श्रीमद्ब्रह्मसूत्राणुभाष्यम्

श्रीमद्वल्लभाचार्यचरणप्रणीतम्

AṆUBHĀṢYA
ON
THE BRAHMASŪTRA

MAHĀPRABHU ŚRĪ VALLABHĀCHĀRYA'S

AṆUBHĀṢYA

ON

THE BRAHMASŪTRA

WITH THE COMMENTARY

BHĀṢYAPRAKĀŚA

OF

GOSVĀMI ŚRĪ PURUṢOTTAMAJI

AND

THE SUPER- COMMENTARY

RAŚMI ON THE BHĀṢYAPRAKĀŚA

OF

GOSVĀMI ŚRĪ GOPEŚVARJI

EDITED WITH INTRODUCTION AND APPENDICES ETC. BY

MULCHANDRA TULSIDAS TELIWALA

WITH A NEW INTRODUCTION BY

GOSWAMI SRI SHYAM MANOHARJI MAHARAJ

ṢAṢṬHAPĪṬHĀDHĪŚVARA,

MANDIRA ŚRĪ MUKUNDARĀYAJĪ ŚRĪ GOPĀLALĀLAJĪ, KĀŚĪ.

VOLUME ONE

ADHYĀYA 1

AKSHAYA PRAKASHAN

DELHI

First published: Bombay, 1935-41

Reprint: Delhi 2005

ISBN 81-88643-07-6 (set)

ISBN 81-88643-08-4 (vol.1)

Published by:
Harish Chandra for Akshaya Prakashan,
208, M.G. House, 2 Community Centre,
Wazirpur Industrial Area, Delhi - 110052
Email: harish@busyinfotech.com
Fax: 011-27374358
Phone: 011-55195949, 27377342

Printed at:
D.K.Fine Arts Press (Pvt.) Ltd.,
A-6,Nimri Community Centre,
Ashok Vihar, Phase IV, Delhi - 110052.

श्रीकृष्णाय नमः

श्रीमद्ब्रह्मसूत्राणुभाष्यम्

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-

श्रीमद्वल्लभाचार्यचरणप्रणीतम्

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-

भाष्यप्रकाशेन

सम्पूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वरजिचरणप्रणीत-

भाष्यप्रकाशरश्मिना

च परिबृंहितम्

मूलचन्द्रतुलसीदासतेलीवाला

इत्यनेन संशोधितम्

काशीस्थ-श्रीमुकुन्दरायजी-श्रीगोपाललालजीमन्दिराधिष्ठित-

षष्ठपीठाधीश्वर-गोस्वामिश्रीश्याममनोहरपाद-

विरचितया नवीनभूमिकया समुल्लसितम्

प्रथमो भागः

प्रथमोऽध्यायः

देहलीस्थ-

अक्षयप्रकाशनेन

प्रकाशितम्

श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसंपूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिचरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

प्रथमाध्यायप्रथमपादस्यादिमसूत्रत्रयात्मकम्
(त्रिसूत्रीभाष्यम्)

'भगवद्धर्मपरायणसद्व्रतश्रेष्ठिगोवर्धनदास सुन्दरदास' इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतः 'प्राप्तभगवत्पद-
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एल्एल्. बी.,
वकील, हाइकोर्ट' इत्येतेषां सुहृद्भिः
संशोध्य 'निर्णयसागर' मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४५७. संवत् १९९२.
मार्गशीर्ष कृष्ण ९.

मूल्यं रूपकत्रयम् ।

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya Sagar' Press,
26-28, Kolbhat Lane, Bombay 2.

Published by Dhirajlal Vrajdas Sanklia, B.A., LL.B., Advocate
at Khakhar Building, C. P. Tank, Bombay 4.

CONTENTS
(विषय सूची)

अधि. — अधिकरण (Section)
सू. — सूत्र (Sūtra)

Śrīman Mukundarāyo Jayati
Śrī Gopālalālo Jayati
O Śyāma illumine the heart of mine with thy grace always

INTRODUCTION

The Sixth Pīṭhādhīśwar Goswāmī Śrī Śyāma Manoharjī Mahārāj (Kāśī), Vārāṇasī

Prākṛtadharmānāśrayamaprākṛta nikhila dharmarūpamiti I
Nigamapratipādyam yattatcchuddham sākṛtistaumi II

(*Sarvottamastotre*)

In this *śloka* of *Sarvottama-stotra*, Śrīmad Viṭṭhalaeśa-prabhucaraṇa, while hailing the transcendental personality of *Śrimadāchārya*, in the work written by him, *Vallabhāṣṭaka*, after establishing the nature of his *Āchāryasvarūpa*, at the end – establishing Śrīmad Vallabhāchārya's complete identity with Puruṣottama, delineates his characteristic in the *Saptaśloki*. In this, Śrīmad Prabhucaraṇa, who has occupied the throne of the undivided empire of *Suddhādvaita-brahmavāda-nirguṇa-puṣṭi-bhakti-mārga*, addressing the whole universe, narrates as:

> "*kvacid pāṇḍityam cen-na nigamagatih sā'pi yadi*
> *na kriyā sā sā'pi syād-yadi na hari-mārge paricayaḥ* I
> *yadi syāt so'pi śri-vrajapatiratir-neti nikhilair-*
> *guṇairanyaḥ ko vā vilasati vinā vallabhavaram* II"

While describing the characteristics, it is told, above all, by the word "*kvacid*" the divine nature, whereby all the other characteristics depend themselves on this one special nature; *Paṇḍā* means knowledge; the possessor of knowledge is *Paṇḍita*; the state of being thus is *pāṇdityam*; that is, one who is

knowledgeable of all that has happened and all that will happen. This kind of *pāṇḍitya*, though perceivable among the *Bauddhas* and *Naiyāyikas*, is devoid of the knowledge of the *Vedas;* bacause they do not admit the validity of the *Vedas*. Whereas the *Naiyāyikas* admit the validity of the *Vedas*, they lack in the observance of the practices propounded in the *Vedas*.

Knowledge and practices as ordained in the *Vedas* are to be seen among the followers of *Advaita* propounded by Śrimat Śankarāchārya, which, according to them, are valid only in the day-to-day mundane activities; they do not get the exposure to the path of *Hari*. Because they do not follow the *Bhagavat Śāstra* (*Pāñcarātra āgama* practices). Even though practised to perfection, if *Dharma* does not result in generating pleasure in hearing the descriptions of *Viṣvaksena* (Lord Viṣṇu), the efforts are in vain; desire-less action, without offering it to *Achyuta*, does not make the knowledge shine. This kind of knowledge is useless because they are not following the *Hari mārga* i.e. *bhakti mārga* as propounded in the *Bhagavat Śāstra.*

One may say that there are people following the method of worship as also practising the rituals ordained in the *Vedas,* even there we find that they lack in taking pleasure in *vrajapati*; they worship the form of his *vibhūti*, which is not his original form but only a reflection of *Brahman* and thus, they do not serve the *Brahman* with *Bhakti*. In fact, as per the Vedic sentence – " *tadeva Brahma tvam viddhi nedam yadidam upāsate*" it is said that what is being worshipped is not the real *Brahman* but only a symbol; therefore, they do not realise that what is being worshipped is the *vibhūti* – an emanation – and *bhakti* shown there is not the *sevā* to *Vrajapati*; the real state of being *Brahman* is only in *vrajapati*. Āchārya has said – "*param Brahma tu kṛṣṇo hi*" –it is only KṚṢṆA THAT IS THE ULTIMATE BRAHMAN. Thus, it is only in Āchārya Vallabha that all the above qualities are seen and not in any one else.

There are many works of the above said Vallabhācārya;

among them, the most venerable one is only the AṆU BHĀṢYA. In this *Bhāṣya*, following the footsteps of Vyāsa, and in agreement with him, the Āchārya established the *Śuddhādvaita-Brahma-vāda-darśana.*

Two systems of *Darśana* i.e. *āstika darśanam* and *nāstika darśanam. Āstika darśanam* again is mainly divided into six varieties – *Sānkhya, Pātañjala, Pūrva-mīmāmsā, Uttara-mīmāmsā, Tarka* and *Nyāya*. Here the *Sānkhya* is as told by Kapila in *Śrī Bhāgavata. Pātañjalam* means the *Yogaśāstra. Pūrva-mīmāmsā* is as composed by Jaimini; *Uttara-mīmāmsā* is as composed by Kṛṣṇa-Dvaipāyana Vyāsa, consisting of four chapters, named the *Jñāna Kānda; Tarka* means that composed by Kaṇāda, is also called *Vaiśesika*; *Nyāya* is as composed by Gautama, the *Nyāya Śāstra.*

Likewise, the *Nāstika Darśana* also is of six varieties - the *Cārvāka-Sautrāntika-Vaibhāṣika-Yogācāra-Mādhyamika – Ārhata.* Now we will deal with the topic of *Uttara-mīmāmsā*, one of those included in the *āstika darśanas. Uttara-mīmāmsā – Vedānta darśanam.* Among the several views on Vedānta, five systems are predominent; they are – *Kevala-advaita; Viśiṣṭādvaita; Dvaita; Dvaitādvaita; Śuddhādvaita.* Among these, the *Kevalādvaita darśana* was propounded by Āchārya Śankara, an incarnation of Śankara. *Viśiṣṭādvaita* was propounded by Āchārya Rāmānuja, an incarnation of Śeṣa. *Dvaita darśana* was propounded by Āchārya Madhva, an incarnation of Vāyu. *Dvaitādvaita darśana* was propounded by Āchārya Nimbārka, an incarnation of Hamsa. *Śuddhādvaita darśana* was revealed by Bhagavān Śrī Vallabhāchārya, the follower of the system of Vedavyāsa, incarnation of Śrī *Bhagavān*'s visage and the incarnation of Vaiśvānara.

Now, what is Śuddhādvaita ?

Śuddhādvaita jñeyaḥ samāsaḥ karmadhārayaḥ I
Advaitam Suddhayoḥ prāhuḥ ṣaṣthī-tatpuruṣam budhāḥ II

Māyāsambandha-rahitam śuddhamityucyate budhaiḥ I
Kāryakāraṇarūpam hi śuddham brahma na māyikam II

(Su.Ma. śloka 27/28)

Śuddham ca tat advaitam ca – karmadhāraya samāsa. Or, Śuddhayoḥ advaitam – *Ṣaṣṭhi tatpuruṣa samāsa* is to be understood. In this system, the combination of *Māyā* with *Brahman* is done away with; therefore, one should not take it as *Brahman* covered with *Māyā* as the cause of this world; but, only the pure *Brahman* as the cause of this world is to be understood. It is told in the *Siddhānta* that *Māyā* also has been described as a form of *Bhagavat Śakti*, viz. "*mama Māyā duratyayā*" (Gītā 7-14); therefore, the relation of *Māyā* here is not like the one in the other *Siddhāntas*. Here, while discussing the *Kārya-Kāraṇa* – effect and cause – the Śānkaras take the world as false and therefore, ephemeral. In their *Siddhānta*, the world is the transformation of *Māyā*, and they say that its cause also has to have similar nature, as cause and effect are of similar nature. By saying that the world is unreal, they establish that the *jīva* itself is *Brahman*; To refute this, Āchārya has said in his *Nibandha* – "*prapañca* is the creation of *Bhagavān*"; *Prakāśa* on this – " this world is not a transformation of *Prakṛti*; not also born by the combination of atoms; nor is it an appearance; neither born due to the unseen power; not a reality born out of unreal; but it is the creation of *Bhagavān*. Created by the efforts of an entity which is the highest one. Therefore the conclusion is that the pure *Brahman* alone is the cause of the world.

"*Niṣkalam, niṣkriyam, Śāntam; Niravadyam, nirañjanam*"; "*indro māyābhiḥ puru-rūpa īyate*"; "*vācārambhaṇam vikāro nāmadheyam; mṛttiketyeva satyam*"; "*athāta ādeśo neti neti*" – these statements express that *Śuddha Brahman* is *nirviśeṣa;* therefore the pure *Brahman* cannot be the cause of the world. Moreover, if pure *Brahman* is accepted as the cause of the world, then it becomes *saguṇa*, i.e. with qualities; in that case, such Vedic sentences which describe the *Brahman* as possessing

qualities have to be established as valid as in the system of *vivarta-vāda;* because, *Vedas* are *upajīvya,* i.e. the *Siddhānta* depends on the *Vedas* and the dependent cannot go against its own supporter. Thus, there will be no real doership in the *Brahman* and the Vedic sentences which attribute characteristics to *Brahman* also stand vindicated. Similarly, in the Upaniṣads, sentences describing *Brahman* as devoid of characteristics become *upajīvya* and those sentences which qualify *Brahman* with some attributes become *upajīvaka.* And they cannot say something against their own nourishers.

Śruti means sounds and words; *Brahman* without attributes cannot be described by such words; there being no trait in *Brahman,* it is described in a negative fashion in the *Śrutis.* First the *Brahman* is described with attributes; thereafter, by sentences like "*asthūlam*" etc., the *śruti* denies those attributes; because, the absence of something can be established only after establishing what is being denied. In this manner, it is first established as "*dve vāva Brahmaṇo rupe mūrttam chaivāmurttam cha*"– *Brahman* has two forms – one with forms and the other, without forms; in this manner qualified *Brahman* was explained, and after that, it was denied as - *"athāta ādeśo neti neti".*

Here, the attributes imagined in *Brahman* by the *Śruti* were actually imposed by the *avidyā* as in the case of silver in the mother-of-pearl; thus, in this system of *Māyāvāda,* the sentences describing *Śṛṣṭi* become incoherent.

On this objection, the *māyāvādi* says – "there is cogency and it is called the *adhyāropa-apavāda* coherence. The pure *Brahman* cannot be grasped; to make one understand that, the creation of the world etc. are described, and through *upāsanā,* once the qualified *Brahman* is grasped by the *Buddhi,* according to *Śākā-arundhati nyāya,* the false experiences of earlier *śruti* sentences get erased due to the *nirviśeṣa-śruti-vākyas;* after this erasure of false understanding, the subtle, the most subtle and the fourth state of *caitanya* are grasped. Thus the earlier understanding of transformations of *Māyā* gets removed, and then the

unqualified *Brahman* is understood – that is the second-less *ātman*; being one, bacause of the effect of *upādhi*, appears as many; in this manner, *Brahman* with the qualifying agent becomes the cause of the world, and none else. *Jagat* is the effect of *Māyā* and it is pure void; the cause also should be of similar nature; cause and effect are always seen to be of a similar nature." To this, it is replied as follows:

Abhedād-anupādhitvāt-jagadapratyayāptitaḥ |
Sarvādhāratvataḥ-tāvat-Śaktitvāt-nāsya bādhanam ||

Abhedād – saviśeṣa-nirviśeṣayoh bhedābhāvāditi; anupādhitvātiti – there is no *upādhi* in *Brahman*; sarvādharatvataḥ – *sarva-viruddha-dharmāśrayatvātiti*; thus, *saviśeṣa-nirviśeṣa śruti-vākyas*, being equally *śruti*, to nullify one set of sentences is not proper; in that case, Veda becomes invalid. How? In this manner: *Brahman* is to be known only through *śruti*, and not by any other means of knowledge. *Siddhānta* accepts the entire *śruti* as infallibly valid. Therefore, in which manner *Brahman* has been understood from these *śruti-vākyas*, that has to be taken as it is; not an iota of it is to be imagined differently, (causing a defect in exegetical science) as explained by Āchārya. "*Yo anyathā santamātmānam anyathā pratipadyate kim tena na kṛtam pāpam caureṇa-ātmāpahāriṇa*"; "*naiṣā tarkeṇa matirāpaneya*"; these Vedic injunctions say so. Therefore, "*sa haitāvānāsa*"; "*tadātmānam svayamakuruta*"; "*ātmaivedam sarvam*"; "*yato vā imāni bhūtāni jāyante*" – these Vedic statements; and, "*janmādyasya yataḥ; śāstra-yonitvāt; tattu samanvayāt*" these *sūtras* affirm the above principle of exegesis.

"*Aham sarvasya jagataḥ prabhava pralayastathā*"; "*janmādyasya yatonvayād-itarataḥ*" – these *smṛti vākyas* confirm that the pure *Brahman* alone is the creator and enjoyer of everything; "*attā carācara-grahaṇāt*" – this doership is inborn and not ephemeral as in the system of Śankara. "he, being lonely, did not find happiness; he desired a second" *śruti* says. "*krīdārtham ātmanah idam trijagat kṛtam te*" – this *smṛti vākya*

also says – *Brahman* itself, for its enjoyment, expanding itself in the form of world, plays there; without undergoing any change in itself, it takes these forms. We may see examples for this kind of creation without undergoing change – *kāmadhenu, chintāmaṇi, kalpavṛkṣa*, etc. *"Prakṛtiśca pratijñā dṛṣṭānta-anuparodhāt"* (1-4-23) – this *sūtra* states that *Brahman* alone is the material and efficient causes of this world. *"yathā ekena mṛtpiṇḍena sarvam mṛnmayam vijñātam bhavati"* – by this sentence, refuting the falsity of creation, it further says – *"mṛttiketyeva satyam"*. Therefore, *prapañca* is the creation of *Bhagavān* and not created by *Māyā*. But, in this matter, some ignorant people, devoid of the knowledge of difference between *samsāra* and *prapañca*; identifying *samsāra* and *prapañca* as one, say that equally *samsāra* and *Jagat-prapañca* as the effect of *Māyā* and consider them as false; that is not right.

> "*Prapañco bhagavat-kāryas-tadrūpo māyayā-abhavat* |
> *Tacchaktyā-avidyayā-tvasya jīva-samsāra ucyate* ||"

Here the *Prakāśa* – *"Avidyayeti – avidyāpi tacchaktiḥ;* having been counted as one among the prominent twelve *śaktis*. *"śriya-puṣṭyā-gireti" vākyāt*. Therefore, *"sa vai naiva reme; tasmād-ekākī na ramate; sa dvitīyamaicchat; sa haitāvānāsa"* – in this *śruti*, it is said that the transformation in the form of the world is for enjoyment; because this is not possible without some wonderful power, it is said that by the *śakti* of *Bhagavān* called *avidyā*, *jīva* suffers *samsāra*, and it is not born. This is called *abhimati*. It is also counted as non-existence. *Ajñānam, Bhramaḥ, Asat* – these words are used in the *samsāra*, within the frame-work of *Aham* and *Mama*, and not in *prapañca*. Because, that is the *Brahman* itself. Therefore, in *Siddhānta*, by the rule of *sūtra* *"Tadananyatvam Ārambhaṇa-śabdādibhyaḥ"* (Br.Su.2-1-14) – the non-difference of *Jagat* and *Brahman* is accepted. *Jagat* that is of *prapañca* is not of *Māyā*, but it is the nature of *Ādhibhautika* of *Brahman*; the *Ādhyātmika* nature of *Brahman* is *Akṣara-Brahman*; likewise, the *Ādhi-daivika* nature is *Para-Brahman*. In this

manner, the non-difference of *Brahman* and *Jagat* is to be understood; effect is non-different from the cause; it is not false. Therefore, it is to be accepted that the pure *Brahman* alone is the substratum, the cause; and the created beings, the effect.

According to *Māyāvādi* – *Bhagavān* Vyāsa has started the enquiry of unqualified *Brahman* which is devoid of any quality and without a form with the first aphorism *"Athā'to brahma-jijñāsā"* and the following *sūtras* "janmādyasya" etc., explain the *Brahman* with the quality of creating the world. Thus, after making a statement of proving a quality-less *Brahman*, a *Brahman* with quality was explained; this amounts to imputing that Vyāsa has faultered in his statement. And the *sūtras* also, (giving up the original position and accepting un-wanted position) are to be interpreted. Therefore, if the intermediary agent called *avidyā* is accepted, both these constructs, i.e. *Brahman* and *avidyā*, being beginningless, the *avidyā*-covered *Brahman* also becomes beginning-less; and that being the doer, the creation will become eternal and there will be no occasion for dissolution. Therefore, one would like to ask the *Māyāvādi* – if this kind of *kārya-kāraṇa* with the help of *Māyā* is accepted as having been stated in the *śrutis* and *Smṛtis* – *"asya mahato bhūtasya niḥśvasitametaddya-dṛgvedo Yajurvedaḥ"*, *"yo brahmāṇam vidadhāti pūrvam"*; *"yo vai vedānśca prahinoti tasmai"*; *"vedo nārāyanaḥ sākṣāt svayambhūriti śuśruma"*; *"vedaiśca sarvairahameva vedyaḥ"* – by these statements, do Vedas intimate that *Brahman* is *ajñāna-kalpita*? i.e. imaginary doer by the effect of *ajñāna* ?

According to your position, one understands first that the *Vedas* are eternally valid; later on, by a correct interpretation of the same Vedas, one has to understand that the Vedas are imaginary due to the effect of *avidyā*; and then one understands by the teachings of the *guru* –*"na mātā pitā vā na devā na lokā na Veda; na śāśtā na śāstram na śiṣyo na śikṣā"* by these un-real means of knowledge, how the eternally true knowledge of *Brahman* results? Knowing this, no one will enter upon the

study of this *śāstra*. Due to the absence of a follower of the path elucidated by the Vedas, they become invalid and the system will die out. Therefore, the entire Vedic lore is to be accepted as valid. The fact is – *Brahman* is not to be known by the worldly means of knowledge; it is beyond our thinking and is endowed with extra-ordinary powers; is to be known only through the Vedas; and the statements of the world are not to be mingled with them; that will be the right method. Thus, it would be proper to accept that only the pure *Brahman* alone is the material and efficient cause of the world.

Siddhānta:

> "*utpatti-sthiti-nāśānām jagataḥ kartṛ vai bṛhat* I
> *Vedena bodhitam tad hi nānyathā bhavitum kṣamam* II"
>
> *(A.Bha. Ka.1/1)*

Jagat and *samsāra* are different in *siddhānta*: the *jagat* of *prapañca* is different; the thought *Aham* and *Mama* belongs to *samsāra*; there is a subtle difference here; no āchārya has stated thus except Śrī Vallabhāchārya, by reconciling the various statements of *śruti, smṛti, sūtra, Bhāgavata* etc., by reasonings acceptable to *śāstra* – this truth has been elucidated. The definitions of *jagat* and *samsāra* are different; It is told in the *śāstras* that, by the desire of *Bhagavān*, the aspects of *cit* and *ānanda* get covered, and the *sad-aṁśa* shines forth. And this is called the *Jagat*; that which is imagined by the *jīva* due to *avidyā*. i.e. the thoughts "*aham* and *mama*" – this is *samsāra*. This *avidyā* has five states –

> *svarūpajñānamekam hi parva dehendriyāsavaḥ* I
> *Antaḥ karaṇameṣām hi caturdhāndhyās a ucyate* I
> *Pañca-parva tvavidyeyam yad-baddho yāti samsṛtim* II
>
> (Śā.Pra.Kā.36)

As per the words of Āchārya – *Svarūpajñānam, dehādhyāsaḥ, indriyādhyāsaḥ, prāṇādhyāsaḥ* and *antaḥ-karaṇādhyāsaḥ*. *Jīva*, bound by this *avidyā*, gets into *samsāra* called *saṃśṛti*. *Saṃśṛti*

is the imagined state due to *avidyā* and is removable by *jñāna*. *Jagat*, being of *Brahman*, is not destroyable. *Avidyā*'s transformations are the multiplicities; being so, if argued that they are false, the answer is no. Multiplicity is not due to *avidyā*, but was created by *Brahman*'s desire, say the *śrutis* - "*sa ekākī na ramate; saḥ dvitīyamaicchat*"; "*tadātmānam svayamakuruta*"; but, the knowledge pertaining to this i.e. *dvaita-jñāna* – is of *avidyā*. By this knowledge of *dvaita*, only the *jīva* gets bound and not the *Brahman*. Here, the *avidyā* does not inhere in *Brahman*.

First of all, in *Māyāvāda*, we ask – *upādhi* and *upādheya* i.e. the limiting factor and the limited, i.e. *avidyā* and *Brahman*, both being eternal, what kind of relation between them is accepted in your *siddhānta*? If it is *samyoga* etc., they also have to be all-pervading, and thus eternal, there will be no chance for *mokṣa*. Neither is it *adhyāsa*, there being no such imposition. Moreover, in pure *Brahman*, it is impossible to posit a relation with the *upādhi avidyā;* in that case, *Brahman* will become *ajña*; therefore, *avidyā* has to inhere in *jīva* and not in *Brahman*.

> *Ekasyaiva mamāmśasya jīvasyaiva mahāmate* I
> *Bandho'asyā, avidyayā, anādir vidyayā ca tathetaraḥ* II

Therefore, in the statement "*ajñānena-āvṛtam jñānam tena muhyanti jantavah*" – *jivotpatti* is not due to *avidyā* but, due to the desire of Bhagavān, for his happiness, the part of *ānanda* gets covered and he gets bound by the *avidyā*. Here too it is only the desire of Bhagavān. In this state, he is called *samsārī*. Thus, *samsāra* is of the nature of *Aham* and *Mama*, born out of *avidyā* and is thus destroyable by *jñāna*. It is thus: The material and efficient cause of the world is *Brahman*; *samsāra* is imaginary; *avidyā* is its efficient cause. *Samsāra* is false and it stands prior to the rise of *jñāna*. Therefore, it is destroyed in *mukti;* but not the *prapañca*; that being the creation of Bhagavān.

Samsārasya layo muktau na prapañcasya karhicit I
(Śā.Pra.kā. 28)

Therefore, if *samsāra* recedes, it is *jīvanmukti*. In that state, the imaginary knowledge of entities like the body and the senses get removed, but not the body and senses, because they are part of this *jagat*. The substratum for pleasures and sufferings is *samsāra*, and not the world. Here, the example is *jīvanmuktas*. This kind of several *jīvanmuktas* have taken birth in this land of Bhārata, whose bodies and senses, though real, do not experience pleasure and pain. Therefore, *jagat* is real and *samsāra* is unreal; this is the difference between *jagat* and *samsāra* as explained by Śrī Vallabhāchārya.

The nature of Jīva according to Siddhānta

"Jivastvārāgramātro hi gandhavat vyatirekavān"
(Sā.Pra.Kā.57)

"sa ikṣāñ cakre"; "eko'ham bahusyām prajāyeya"; "sa ekākī na ramate"; "sa dvitīyamaicchat"; "tadātmānam svayamakuruta" – according to these statements, *Brahman*, by its own volition, for its sport, covering its own blissful nature, takes the form of *jīva*. In this manner of desiring to become many, from *Brahman* – *"yathā'gneḥ kṣudraḥ visphulingāḥ vyuccaranti"* – subtle, limited and of the form of knowledge, *jīva* – parts emanate. This *jīva's* size is atomic – *"ārāgramātraḥ"* – *"ārāgramātro hyavaropi dṛṣṭaḥ"* is the *śruti*. If the *jīva* is atomic in size, then how he spreads himself in the entire body; to this question, the answer is – *"gandhavat vyatirekavān"* –just like the smell of the flowers goes beyond the periphery of the flower, likewise, though small in size like atom, knowledge extends to all parts of the body. Therefore, *"mamaivāṁśo jīvaloke jīvabhūtah sanātanaḥ"; "aṁśo nānāvyapadesāt"* – by these means of knowledge, one is to understand that *jīva* is a part of *Brahman* itself. If *jīva* is accepted as part of *Brahman*, then *Brahman* becomes composed of parts;

therefore, according to the theory of reflection, the existence of *jīva* is to be accepted.

The premise that *Jīva* is the reflection of *Brahman* is not at all rational. If this *pratibimbavāda* is accepted, *Brahman* becomes possessor of perceivable nature; and if *jīva* is the reflection, *bimba* and *prati-bimba* do not appear at the same place; in that case, the theory goes against the *śruti "samānam vṛkṣam pariṣasvajāte"*- here the existence of *jīva* and *Brahman* at one place is stated. Therefore, *jīva* is to be accepted as an *aṁśa* – part – of *Brahman*. For this, the validity is *śruti* itself and not any other means of knowledge as in the world. Hence, it is said by Āchārya –

"alaukiko hi vedārtho na yuktyā pratipadyate I
Tapasā Veda-yuktyā tu prasādāt paramātmanaḥ II

(Aṇu.Bha.Ka.1/1)

Knowledge derived from the Vedas is not through sense-perception; therefore it cannot be grasped by reasonings. Then, how are we to grasp it? By the reasonings shown in the Veda itself, as in Ch.Upa. *"nyagrodha-phalamāhara"* etc. Here the Āchārya says – "by imagining the meanings of Veda by one's own intelligence, one cannot discuss or analyse them; in what manner *Brahman* has been explained in the Vedānta, has to be accepted as it is. Changing even an iota of its purport will incur fallibility." Therefore, as per the logic of *visphulinga*, the insentient and the souls come out of *Brahman* – just like the sparks from the fire. When the insentient forms emanate, the knowledge and blissful aspects of *Brahman* remain covered; when the souls come out, the blissful nature of *Brahman* remains covered.. In this manner, *sat* – reality; and *cit* – knowledge aspects – both are non-different from *Brahman* and they are the forms of *Brahman*. Because of this, the *śruti* states that by the knowledge of one, the knowledge of all is derived.

If this explanation is accepted, then the sufferings being experienced by the individual souls will be of *Brahman* also.

No; the *śruti* says – "the other shines forth without enjoying"; "one who is the indweller of all living beings, does not get affected by the external worldly sufferings"; "not also gets attached to the results as in the case of water on the lotus leaf." These *śruti* and *smṛti* sentences declare in clear notes that *Brahman* is un-affected; as in the case of sun-light, which does not get affected by the defects in objects like the pot and the cloth. The defects in the individual souls do not affect the *Brahman*. Thus, while discussing the relation between the *jīva* and *Brahman*, it is conclusively proved that the *jīva* is merely an *aṁśa* – part – of *Brahman* and not different from it. *"aṁśo nānā-vyapadeśāt-"* This *sūtra* also confirms this.

In this matter, in his work *Vidvan-maṇḍana*, Prabhucaraṇa commands – *"nānā-vyapadeśāt – nānāvidho yo vyapadeśaḥ* – as *Brahman* at places; as born at other places; as of the nature of knowledge; as of the form of *cid* at places; somewhere, as under the control of *Īśwara;* as atomic and also as all-pervading; having been explained in this manner, the one and the same entity having opposing qualities in itself, can be possible only in *Brahman* and nowhere else; hence, the *jīva* is none other than a part of the *Brahman*. Alternatively, "*nānā-vyapadeśāt* – having been explained as quite distinct from each other" – here, the purport is – *jīva* is the inter-mingled form of *Brahman*, and its nature of being part of *Brahman* is merely an eulogy; and it is only a reflection and of false nature; so this is not to be construed, as they are beyond the ken of sense-perception. *Brahman* is to be known only through the means of Vedas'; therefore, it is to be accepted as explained therein; *śruti* says – *"naiṣā tarkeṇa matirāpaneyā"* – this knowledge is not to be obtained through reasonings. Likewise, the *smṛti* says – *"alaukikāstu ye bhāvāḥ na tāṅsa tarkeṇa yojayet"* – what realities are there, they are not to be subjected to arguments."

Brahman's blissful nature shines in full; whereas it is hidden in the case of *jīva*. When the God, by His sympathy and desire,

uncovers the blissful nature in *jīva*, then they both become one; there is no need to apply here the implied meaning called "*jahadajahallakṣaṇā*" because, *śruti* says – "*sarve vedā yat padam-āmananti*"; all the Vedas have one purpose i.e. to teach the unfathomable nature of *Brahman*. When the *jīva's* blissful nature is covered, then he is devoid of the nature of *Brahman*; "*adhikam tu bheda nirdeśāt*" – it is so said in this *sūtra*. Here the *Bhāṣya* is – "by the word '*tu*' the position is reverted; if *Brahman* is only of that much nature, then this defect arises; but, then, that is more than *jīva* and *jagat*; why? *Bheda-nirdeśāt* – because it is explained as distinct from that." From this it becomes clear that there is no equal or superior to that. "*na tat samaśca abhyadhikaśca dṛsyate*" is the *śruti*. Thus, the non-differentiation between *Brahman* and *jīva* described in the *śrutis* is on the basis of *aṁśa-aṁśi* status. Whereas the *Māyāvādins*, depending solely on the sentence "*tat-tvam-asi*" assert that *jīva* himself is *Brahman*.

In this context, we may quote the verse describing the different systems of philosophy –

"*kecit-tatvamasīti vākya-viṣaye tat-tvam pade lakṣaṇām;*
kecid tatra ṅaso lukam vidadhate Bhāṣyam tu kecid jaguḥ |
kecid cid-viṣayāt-abhedam-apare cchindantyatatvam padam;
siddhānte tu suvarṇavaj-jagadidam brahmaiva jīvastathā ||"

Meaning of this *śloka* is: *Kecid* – Śankarācāryaḥ; the word '*tat*' denotes *sarvajñam Brahma*; "*tvam*" denotes *jīva* with limited knowledge; these two cannot be one and the same; therefore, as in the statement 'this Devadatta is that same person' – *jahad-ajahad-lakṣaṇa* is accepted.

Kecid – Rāmānuja-Mādhva-Śaivāḥ – 'tat-sambandhitvamiti manyamānāḥ – they accept the disappearance of the suffix '*ṅg*' meaning '*tasya tvam*' – you are of him – related with it.

Kecid–Nimbārkāḥ accept identity because of the similarity of *jñāna*. *Apare – Mādhvaikadeśinaḥ* – one sect of the Mādhvas – break the word as '*atat-tvamasi*" meaning 'you are *jīva*' – not that.

In *siddhānta*, as in the case of gold particles being gold itself, parts of *Brahman* also are *Brahman* itself; the *sat* part of *Brahman* is the world; the *cit* part of *Brahman* is *jīva*. In fact, as in the other sect, *'tat-tvam-asi'* is not the only *mahā-vākya;* the whole context is to be taken as conveying one meaning. The interpretation of *Vedas* is to be done, taking into consideration the whole context as told in the *sūtra "prakaraṇācca";* the meaning is to be construed as per the purport of the context, and not by skipping the context, giving the interpretation as one would like.

This *jīva* has three stages of being – the pure, the liberated and the bound. After the *jīvas* get separated from the *Brahman* as sparks from fire, their blissful nature gets obliterated, and before they get covered by the *avidyā*, in that state, they are called the pure *jīva*s; i.e. the purity here is the absence of connection with *Māyā*. The *sūtra "Parā-abhidhyānāt-tu-tirohitam; tato hi asya bandha-viparyayau"* (3-2-5) is supporting this view. *Parasya* - Of *Bhagavān; abhito dhyānam* means desire to enjoy in all manners; thus, the part of *ānanda* is obliterated; thus the state of being *jīva*. Thus, the four qualities – *aiśwarya, vīrya, yaśas,* and *śrī* – having been covered, the binding takes place; *jñāna* and *vairāgya* - knowledge and detachment – having been obliterated, the opposite nature. In this state, in the case of some individuals, *Bhagavān* makes available divinity, which makes them eligible for *mukti;* only at this state they become qualified for *mukti*. Whereas, the *jīva* bound by the five-stage *avidyā*, attains *samsāra*. Then he undergoes experiences of the *samsāra*; by the grace of *Bhagavān* and by the association with pure souls, they get the five-stage *vidyā* and attain *mukti*, of the nature of highest bliss.

"Vairāgyam sānkhya-yogau ca tapo bhaktiśca keśave;
Pañca-parveti vidyeyam yayā vidvān harim viśet ||"

(Sā. Pra.Kā. 48)

By this *śloka*, it is said that till one does not get *vidyā*, until then he is called *samsāri*. Thereafter he is called *mukta*. These

muktas also are of two kinds – *Jīvanmuktas* and *Muktas*. *Jīvanmuktas* – Sanaka and others; *muktas* – those who have reached the *Akṣara-Brahman*. Here also, the *jīvas* originally are of two kinds - of godly nature and of un-godly nature. The godly natured are of two kinds – those who follow the path of *Maryādā*, and those who follow the *Puṣṭi-mārga*. There is difference in the *mukti* of these two categories; that will be shown later.

The system of change without undergoing transformation:

Śrīmad Āchārya has established mainly the system of *Brahman* with name and form as his philosophy. Because, there is no second entity other than *Brahman* according to the *prasthāna* i.e. the *Brahma-sūtra*, the *Upaniṣads* and the *Bhagavad-gītā*. The *prameya* – objects of knowledge; *sādhana* – means; *phala* – the end result; and, according to all *śāstras* - all go to prove the *Brahman* only; this is the *siddhānta*. This *Brahman*, without undergoing changes, like the gold, the clay, the *Kāmadhenu*, the *Cintāmaṇi*, the *Kalpa-vṛkṣa* – transforms itself in the form of the world; this is the *siddhānta*. The gold, even in its transformations like the bracelet and ear-rings, does not change but remains as gold; likewise the *Brahman* also, while changing into the world, does not undergo any material change. This is what is called the *Avikṛta-pariṇāma-vāda* in the *śrutis, smṛtis, sūtras, Śrī Bhāgavata* etc. The one cause which does not undergo transformation becomes the effect in various forms. Because of this only, it becomes possible to get the knowledge of everything by the knowledge of one thing. The statement of *Vedānta* that the knowledge of one produces the knowledge of everything, becomes intelligible only then, when we accept that the pure *Brahman* alone is the cause of this world i.e. material and efficient cause. This argument is of the *Vaidika* system. Now, we shall show some sentences elucidating the system of thought of un-changing transformation.

In the *śrutis* – *"Ekam sat viprā bahudā vadanti;" "Asad vā idam-agra-āsīt; tato vai sad-ajāyata;"*

These two satements speak that the invisible *jagat* became visible. *"Brahma viśvamidam jagat;" "tameva bhāntamanubhāti sarvam; tasya bhāsā sarvamidam vibhāti;" "sarvakāmaḥ, sarva-gandhaḥ, sarva-rasaḥ, sarva-kartā, sarva-bhoktā yaḥ sa sarva-vit;" "parā-asya śaktir-vividheva śrūyate; svābhāvikī jñāna-bala-kriyā ca;"* – by these *śrutis* the doership of everything is stated as in-born nature. *"aṇoraṇīyān mahato mahīyān"* – by this *śruti* it is stated that opposing qualities inhere in *Brahman*. *"ekamevādvitīyam Brahma; eko'ham bahu-syām; prajāyeya; sa ekākī na ramate; sa dvitīyam aicchat"; "sa haitāvānāsa"* – by these *śrutis*, the un-changing transformation system of thought is told.

"Aitadātmyam idam sarvam; tat satyam; sa ātma; tat-tvam-asi"; "eṣa hyevānandayāti"; "eko devo sarva-bhuteṣu gūḍhaḥ" – by these *śrutis* the in-dwelling aspect of *Brahman* in all things is described. Likewise, these sentences also – *"sarvam khalu idam Brahma;" "katham asataḥ sat jāyeta;" "tat satyam ityācakṣate".*

In the *Smṛtis* – *"aham sarvasya jagataḥ prabhavah pralayastathā;" "mama yonir-mahad-Brahma; tasmin garbham dadhāmyaham;" "aham bījapradaḥ-pitā;" "vāsudevaḥ sarvamiti"* these sentences;

And in the *sūtras* – *"Janmādyasya yataḥ; śāstra-yonitvāt; tat-tu-samanvayāt; ātma-kṛteḥ; pariṇāmāt; yoniśca hi gīyate; tad-ananyatvam-ārambhaṇa-śabdādibhyaḥ; sarva-dharma-upapatteśca; prakṛtaitāvatvam hi pratiṣedhati; tató bravīti ca bhūyah; Prakāśa-āśrayavad-vā tejastvāt"* these *sūtras*;

In Śrī Bhāgavata – *"Janmadyasya yato'nvayad itaratah;" "tvayyagra āsit;" "Krīḍārthamātmanaḥ idam trijagat kṛtam te;" "viśvasya kartā; bhuvanasya goptā"* sentences like these and others.

This has to be understood here:

Others - like Āchārya Śankara and others, to establish their systems of philosophy, took recourse to *Prasthānatrayī* as the source of knowledge viz. *Upaniṣad, Bhagavad-gītā* and the *Vyāsa Sūtras*. Whereas, our Āchārya took recourse to four *Prasthānas*. They are –

"Vedas; Śrī Krishna's spoken words; and Vyāsa's Sūtras I"
Samādhibhāṣā Vyāsasya pramāṇam tac-catuṣṭayam II
Uttaram pūrva-sandeha-vārakam parikīrtitam."

(Sā.Pra.Kā.7/8)

Here, the *Prakāsa* – "Vedaḥ – all that is contained in the two *Kāṇḍas*, including the *Arthavāda;* the words of Kṛṣṇa are spoken of separately, though Vedic in nature, because it is classified as *Smṛti*; *Vyāsa sūtras* include the *Jaimini sūtras* also. All these have to be taken only in consonance with *Vyāsa sūtras;*

Vyāsasya Samādhi-bhāṣā – Bhāgavatam. ....experiencing himself in *Samādhi*, and explained later. These four sources, reconciled to prove one school of thought, are the generators of knowledge.

Śrī Bhāgavata has been taken as one of the *Prasthānas* by the Āchārya. Here, the posterior statements are to be taken as clarificatory statements of the anterior ones. This results in saying that *Śrīmad Bhāgavata* is the remover of all doubts. *"Nigama-kalpataroḥ galitam phalam"* – Śrī Bhāgavata is the fruit from the tree that is the *Nigama-kalpataruḥ.*

Evolution and Involution *(Āvirbhāva-Tirobhāva)*

Tadetad akṣayam nityam jagan-munivarā-akhilam I
Āvirbhāva-tirobhāva-janma-nāśa-vikalpavat II

(Vi.Pu.Am.Pra.)

Āvirbhāva and *Tirobhāva* (Evolution and Involution) are in fact the two powers (*śaktis*) of the *Brahman* – *"āvirbhāva-tirobhāvau śaktirvai muravairiṇaḥ"*. These two śaktis are non-different from *Brahman* and sub-servient to *Brahman*. *"sarvam*

khalu idam Brahma" is the *śruti* which says that everything is the form of *Brahman;* by its own desire, *Brahman* attains the form of the world without undergoing any material change; and, again, by its own desire, takes all within itself. This Evolution and Involution only are called the *utpatti* and *vināśa* by the world. In reality – *"na-asato vidyate bhāvo; na-abhāvo vidyate sataḥ"* (Gītā); by this sentence it is said – *asataḥ bhāvaḥ nāsti* – there is no existence for that which does not exist; that which exists does not cease to exist. In the school of thought which accepts *Brahman*, it is experienced in everything and hence, there is no question of its absence anywhere. Well, in that case, there should be no experience as a thing of the past and of the future; in that case, all the worldly dealings such as anterior non-existence, posterior non-existence, the absence of one object in the other, and the complete absence of a non-existing thing etc., are being negated; no; in all these cases, the desire of *Bhagavān* is the ultimate controller.

In that case, the statement "at that point of time when it is called dissolution, it is the intention of *Bhagavān* that there should be no experience of any object" – i.e. under which point of time all objects are experienced, that is called the time of created world; i.e. everywhere, the inimitable desire of *Bhagavān* is the controller and thus, there is no occasion for any defect in the system. (*Vidvan-maṇḍana*).

Thus it is that the Unqualified, un-changing, eternally powerful *Brahman*, by its desire, sports in the form of *Akṣara*, *jīva* and *jagat* by this evolution and involution. Therefore, the absenses as anterior etc., are all involuted in this. Everything being of the form of *Brahman*, there is no absolute absence of anything in *siddhānta*. "Being so, at this point of time, and at this place, this creation be so" – in this manner the desire takes the form of evolution; likewise, "there be no such thing – desire of this nature is involution." (*Vidvan-maṇḍana*). That is why it is said – being eligible to be experienced is called evolution; the absence of that is called involution. These two states are defined

by the existence of objects; and it is not possible for false appearances to be such limiting factors; because, they are abstract concepts and need a substratum to appear upon (*Vidvan-maṇḍana*). Therefore, the creation and dissolution of the world are due to this evolution and involution; the word creation means evolution; the word dissolution means involution. "*Ātmataḥ āvirbhāva-tirobhāvau*" is the *Chāndogya śruti;* these evolutions and involutions are not to be construed as ephemeral.

Brahman the substratum of contradicting features:

If it is accepted that *Brahman* is the substratum of all the attributes, thus acceding that contradictory attributes also do inhere there, one and the same object, at a particular point of time and at a particular point of space, cannot appear as two different objects; therefore, the *Brahman* has to be accepted as devoid of attributes, names and forms. That it is appearing as possessing qualities and with forms due to the effect of *māyā*; this is not so. *Brahman* is known only through the *śruti*; mere reasoning is not useful in this; and the *śruti* states – "*yato vāco nivartante aprāpya manasā saha*" – that *Brahman* does not possess qualities; again, in that very context, it states – "*ānandam brahmaṇo vidvān; na bibheti kutahcana*" the existence of bliss in *Brahman*. That is why, in the *Vyāsa sūtra* – "*darśanācca*" – it is stated that all the opposite qualities are seen in *Brahman*; therefore, *Brahman* is the substratum of all dissimilar qualities is stated in *śruti, smṛti* and *pratyakṣa*..

"*Prakṛtaitāvatvam hi pratiṣedhati; bravīti ca tato bhūyaḥ*" (3/2/22) – by this *sūtra*, in reality and also as per *śāstras*, the contradiction is removed; and by reasoning also, the contradiction is removed. What is called "that much" in *Brahman*? It means the qualities born of *prakṛti* that are denied; thereafter, it talks of the existence of *aprākṛta* qualities. Thus, contradictory qualities also inhere in *Brahman*, but they are not of the *prakṛti* and not of this world. These qualities are of its

very nature, and not due to *māyā*; *"ubhaya vyapadeśāt; ahi-kuṇḍalavat"* (3/2/27); *"prakāśa-āśrayavad vā; tejastvāt"* (3/2/28) – by these *sūtras*, it is to be accepted that *Brahman* is the substratum of opposing qualities. Opposing qualities inhere in *Brahman* is declared in *śruti* – *"aṇoraṇīyān mahato mahīyān;" "samo nāgena; samo maśakena;" "na tat samaśca; abhyadhikam tu dṛṣyate;"* by many such *śāstra* sentences, in *Brahman* whose nature is inexplicable, all opposing qualities do appear by its very nature. At one and the same time, *Brahman* can be seen in two different forms. Likewise, *Brahman* can appear at several places simultaneously; as was seen by Nārada - the sixteen thousand *mahiṣīs* in the *antaḥpura*. Therefore, by the validity as experienced by Nārada, *Brahman* is the substratum of all opposing qualities; it is capable of doing, un-doing and doing variously. Even in this world, we see in one person, the opposing qualities like sympathy in the case of one and the killing instinct in the case of another; this we see at one and the same time in one and the same person; this being so, what to talk of the other-worldly things and happenings. Here Śrī Purusottamacaraṇa:

"Therefore, if we analyse on the strength of verbal testimony, then we come to the conclusion that *Brahman* is the substratum of all the opposing qualities and features. If analysed according to the reasonings shown in the *śrutis*, then it is devoid of all worldly qualities and is full with all un-worldly qualities etc. If analysed on the strength of the meanings, it is the conglomerate of all opposing qualities. To teach this, it was analysed in these three methods." Therefore, if *Brahman* is the abode of opposing qualities, it is not a blemish but adds to its merit. In this same manner, the qualities of being partial between individuals and not showing pity in the case of suffering people etc., are not to be construed as defects in *Brahman* because they are created by *Brahman* itself. Hence, says the Āchārya – *"ātma-śṛṣṭeḥ na vaiṣamyam nairghṛṇyam cāpi vidyate."*

Bhagaval-līlā:

In the discussion, "Is the *Bhagaval-līlā* the product of *māyā* or not", this being only in *Bhagavān*, being based in *Brahman* which is of the nature of *Sat-cit-ānanda*, and being not different from its nature, it is not the effect of *māyā*. This *Bhagaval-līlā* does not proceed with a view to achieving any specific purpose; *"na prayojanavatvāt"*– this *sūtra* illustrates this. But, it is like the sporting activities of the world; see *sūtra "lokavat-tu-līlā kaivalyam";* it is merely a sport; self-experience is *mokṣa*. It is told in the *Bhāṣya* that its (*līlā's*) mere mention will give *mokṣa*. *Līlā* is in the nature of *Brahman* itself, has been produced by *Bhagavān* and it is un-worldly; therefore, it cannot be contended, that it is not the product of *māyā*. The answer to this objection is: "The definition of this sport in *Subodhinī* – "instigated by happiness, being performed without tiring efforts, the act is called sport"; alternatively, without tiresomeness, and with pleasure, the act performed is *līlā*."

Now, another objection: This *līlā* is seen here in this world's mountains and forests, and being in the midst of *prapañca*, it is fleeting or ephemeral; no; *prapañca* itself is the creation of *Bhagavān* as told by Āchārya; *līlā* being part of this *prapañca* which is the creation of *Bhagavān* –

> " *jayati jananivāso devakī janmavādo*
> *yaduvaraparișat-svair-dorbhirasyan-adharmam* I
> *sthira-cara-vṛjinaghnaḥ susmita-śrīmukhena*
> *vrajapura-vanitānām vardhayan kāmadevam* II"

(Bhāgavata 10/10/48)

As per this statement of *Śrī Bhāgavata* the fourth *prasthāna;* In this *śloka*, the present tense used in the word *"jayati"* denotes the *līlās* performed in *Vraja* in the past, and the *'śatṛ'* suffix in the word *"vardhayan"* denotes that at that time of the story and at that instant, there existed all the unseen sports. Therefore, as can be seen in the context of naming the child, Garga's statement in the *Bhāgavata* – *"bhagaval-līlānām*

trikālātītatvam, nitya-vartamānatvam-pravartamānatvañca jñāpyate" i.e. the sports of *Bhagavān* are beyond the three tenses, past, present and future – it is ever in the present – and will also be in future – is denoted.

"bahūni santi nāmāni rūpāṇi ca sutasya te I
guṇa-karmānurūpāṇi tānyaham Veda no janāḥ II"

(Bhāga.10/8/15)

Here, the word *"santi"* is used; it is evident from this that the *līlā* is eternally present.

No; we see in the world that a cook or a teacher is so called even when he is not engaged in that specific act; here too, it is to be so interpreted and not otherwise. The answer is – "not so". The un-worldly sport is beyond this world's ken of knowledge, and even though the *līlā* spoken of here is connected with this world, it should not be established by the example of this world. In this world, even a timid person is praised as a lion among men; whereas the above statement is not so. Here, according to the statement of Garga, as the name denotes, the qualities are to be construed; as per the acts, the form is to be seen; i.e. one who rears the cows is cow-herd; one who gives *mukti* is *Mukunda;* etc.

No; at the time of naming the child, the sports were yet to take place; then, how was it possible to name the child according to the non-existing sports? This doubt does not arise; because the sports of *Bhagavān* are eternal and they are going on eternally. In this manner, sports like *Pūtanā-śakaṭa-bhañjana-Kāliya-damana* etc. were already known, but were not performed at that instant by the desire of *Bhagavān*. Therefore, the sports of *Bhagavān* are eternal and are not limited by time and space; they are there at all places, at one place, in all forms and in various forms by the mere desire of *Bhagavān* and therefore, they are not the product of *māyā* at any time.

Let the un-worldly sports of *Bhagavān* be not the product of *māyā*; but, as in the world, on the question "are the sports the products of *māyā* or not", the answer is an emphatic 'no'. As

ṣhown in the *sūtra "Tat-tvabhāve sandhyavad-upapatteh"* (Br.Su.4/4/13), to delude the non-divine people, *Bhagavān* shows Himself as ordinary human beings, but in truth, He is not so. For those whose thoughts are clouded and are non-divine, as described in the *Bhagavadgītā* (16/18-20) – *"mama-ātma-para-deheṣu pradviṣanto-abhyasūyakāḥ"... "tato yānti-adhamām gatim"* – these people are of non-divine nature and are not fit for emancipation.

In this manner, showing the reasons for finding fault in the sports of *Bhagavān*, in the following *sūtra* the reasons are shown for seeing the praise-worthiness of the sports of *Bhagavān* – *"bhāve jāgradvat"* (Br.Su.4/4/14). As per this *sūtra*, the meaning of the word *"līlā"* and in the act of *līlā* itself, which appear as of this world, what the devotees see is non-worldly; as in the case of a person who gets rid of his clouded vision, and gets the correct vision. In this manner, *Bhagavān*, by his own desire, removes the effect of *māyā* from the minds of his devotees, and to make them enjoy the different experiences of his different sports, enacts them as such.

In certain cases, He performs false sports also as in the battle of Saubha. Therefore, to delude the un-godly people, He performs sports as in the world. Here the *Bhāṣya* – *"ata eva līlāyaḥ anekarūpatvāt, brahmaṇaśca śrutau Saindhava dṛṣṭānte, naikarasatva-nirūpaṇāt, suddha-brahma-dharmatvam na sambhavatīti śankā-nirāsāya kaivalyam ityuktam" ("lokavat-tu-līlā-kaivalyam").*

"sākṣī cetā kevalo nirguṇaśca" in these *śrutis*, the pure state, devoid of any other attribute, that is stated is also of the nature of sports. The pure *param-brahman* is of sportive nature only, and not, at any time, devoid of it is intended here. From this it can be concluded that the sports are in the nature of *Brahman*, and thus, they are eternal. (Br.Su.4/4/14 *Bhāṣya*).

The attribute of smell occurs in earth only and not in water i.e. its appearance at one place and non-appearance at another

place. Likewise, the experience of *Bhagaval-līlā* is seen in the devotees and not in the haters of God. Even now, similar experience of *Bhagaval-līlā* of those times by the devotees are being heard, by the desire and condescendence of God. Thus, *Bhagavān* is always combined with his sports at all times and all places. The Lord Govardhanadhara for protecting his devotees, just to fulfil the desires of His devotees, by this desire and sympathy, appears and disappears.

Therefore, this is the conclusion in the system that *Bhagavān*'s sports are not product of *māyā* at any time.

> "*prabhoreva phalatvam nirdoṣatvañ-ca varṇyate* |
> *līlā-nityavataḥ pūrṇa-guṇatvam ca tato-akhilam* ||"

(Āchārya kārikā)

Bhakti Nirūpaṇam

Definition of *Bhakti* has been given by Āchāryacaraṇa in his *Nibandha* as –

> "*Māhātmya-jñānapūrvastu sudṛḍhaḥ sarvato-adhikaḥ* |
> *Sneho bhaktiriti proktah tayā muktir nacānyathā* ||"

(Śā.pra.kā.45)

Bhakti-svarūpa has been explained by Āchārya by this *kārikā*. *Sneho bhaktiḥ*. When one understands that *Bhagavān* is the soul, *sneha* – affection – takes place. "*Gauṇascenna ātmaśabdāt* (Br.Su.1/1/5) – as per this *sūtra* the word '*gauṇa*' should not be interpreted as attached with *guṇa*, *ātma-śabdāt* – Here the *Bhāṣya* says – *ātma śabdaḥ punaḥ sarveṣu vedānteṣu nirguṇa-parabrahma-vācakatvenaiva siddhaḥ. Tasyaiva Jagat-kartṛtvam śrutirāha.*" This sentence means, *nirguṇa-sākāra-parabrahman* only is the Creator of this world; He only is the indwelling soul; He only is *Bhagavān Śrī Kṛṣṇa*. "*Kṛṣiḥ* means '*Bhū*'; '*ṇaḥ*' means riddance. The identity of these two denotes *param-Brahma Kṛṣṇaḥ*"; this is how the *Gopālatāpaniyopaniṣad* describes. Śrī Kṛṣṇa, the one brought up in the laps of Yaśodā, is *Param-Brahma* – this is made clear in all the *śruti*, *smṛti śāstras*; therefore,

the word *'bhakti'* means *sneha* in Śrī Kṛṣṇa; this is the primary meaning; its use in other places is redundant.

Sat-cit-ānandam Brahma sports in the world in three ways; here, the *jagat* is *'ādhibhautikam'; Akṣara-Brahman* is *ādhyātmikam; Ādhi-daivikam param Brahma, "puruṣaśca-adhi-daivatam" smṛti* says. Likewise, there are three ways for the sports of *Bhagavān – ādhi-bhautika mārga,* i.e. *karma; ādhyātmika mārga,* i.e. *jñānam; ādhi-daiviko mārgaḥ,* i.e. *bhaktiḥ*. Here, the first one, *ādhi-bhautikaḥ* – the *karma mārga* is restricted to world; the second, *jñāna mārga* ends in *Akṣara;* third, the *bhakti mārga* ends in *Puruṣottama para-Brahman*. The *jñānis* think that the ultimate end is *Akṣara Brahman*; but, *bhaktas* consider this *Akṣara Brahman* as the *dhāma* – residence – of *Para-Brahma, Pūrṇa Puruṣottama*. The evidence for this is –

"avyakto'Akṣara ityuktaḥ tamāhuḥ paramām gatim I
yam prāpya na nivartante tad-dhāma paramam mama II

(Gītā 8/21)

Likewise –

"yasmāt kṣaram-atīto'ham akṣarādapi cottamaḥ I
ato'smi loke vede ca prathitaḥ puruṣottamaḥ II"

(Gītā 15/18)

by these testimonies, the meaning of the Vedas and the *śāstras* is known as *bhakti*. Well, how do you come to the conclusion that the meaning of the Vedas and other *śāstras* is *bhakti*? The answer is - *"yatra nānyat paśyati; nānyat śruṇoti; nānyat vijānāti; sa bhūmā; sa vā eṣa evam paśyan evam manvānaḥ evam vijānan, ātma-ratiḥ; ātma-krīdaḥ; ātma-mithunaḥ; atmānandaḥ; sa svarāḍ bhavati;" "parambrahmaitad yo dhyāyati, rasati, bhajati, so amṛto bhavati;" "nāham vedair, na tapasā, na dānena, na cejyayā śakya evam vidho draṣṭum dṛṣṭavānasi mām yathā;" "bhaktyā tvananyayā śakyaḥ;" "aham bhakta-parādhīnaḥ;" "bhaktyā tutoṣa Bhagavān gajayūthapāya"* – by these *śruti, smṛti* testimonials, only *bhakti* has been elucidated. By these the *sarvātma-bhāva* nature of *bhakti* only is conveyed.

In *Chāndogya*, the Sanatkumāra-Nārada dialogue of *Bhūmavidyā*, by the words *"yatra nānyat paśyati"* etc. talks of the absence of any other element; this very *vidyā* again talks of that state of separation from *Bhagavān* wherein, by the ultimate longing, forgetting the *prapañca*, at all places, only the *Bhagavat svarūpa* is experienced, by these words – *"sa eva adhastāt, sa eva upariṣṭād, sa paścāt"* etc. Thereafter, the experiences in the state of separation from *Bhagavān* are described as not the necessary concomitants, and to remind this, the *"ahaṅkāra ādeśa"* – *"ahameva adhastāt, ahameva upariṣṭād"* etc. are given; then comes the *ātmādeśa* – *"ātmaiva adhastāt, ātmopariṣṭād"* etc. Likewise, still further, by the words *"ātma-ratiḥ; ātma-krīḍaḥ; ātma-mithunaḥ"* etc. it extols the *Bhagavān* as of the nature of *"rasa"*. Here, the word *"ātma"* is taken to mean *"pūrṇa puruṣottama"* in the *siddhānta* and not the *Akṣara* or *jīva*. This is evident from the *sūtra* *"gauṇaścen-na-ātmaśabdāt"*; by this *sūtra*, that thing which is the ultimate existence, is what is told mainly in all the Vedānta. By this, the *sarvātma-bhāva* nature of *bhakti* only is conveyed and this is the main purport.

This *bhakti* is achieved only through the grace of God; it is so told in the *śruti* – *"na-ayam ātmā pravacanena labhyah; na medhayā; na bahunā śrutena; yamevaiṣa vṛṇute tena labhyaḥ; tasyaiṣa ātmā vivṛṇute tanūm svām"* (Kaṭho.1/2/23). Here, the word *ātma* means *Puruṣottama; "pravacanena* means *'sasvara vedādhyayanena'*. By this it is clear that the *'puṣṭi-bhakti'* can be attained only by the desire of *Bhagavān*. The word *"sva"* means self, and when desired as one's own self, He gives the *'puṣṭi-bhakti"* of the nature of *'sarvātma-bhāva'*. Here the *Bhāṣya* – "for all individual souls, *Bhagavān*, naturally is the master; but, then, whom He desires as His own, him He protects even as a husband would his wife; *bhakta* also protects Him due to the affection generated by the *varaṇa;* He, like the *Bhakta*, protects him in Himself. (Aṇu Bhāṣya 4/4/15).

This statement of the *Bhāṣya* indicates that *'sneha'* affection

is the important and chief element of *bhakti*; that is why Vyāsa has shown the example of *'pradīpa'* – lamp (*Dīpaka*) – instead of *'ayo-golaka'* – heated iron ball – in his *sūtra "pradīpavad-āveśah; tathā hi darśayati"*. This *'sneha'* has *'śṛṅgāra'* as its chief element as shown by the damsels of Vraja whose *'sthāyi-bhāva'* was nothing but *'rati'* and hence, *bhakti-rasa* also means the same *'śṛṅgāra'*. This experience is non-worldly and is of the nature of *'samyoga'* – togetherness – and *'viprayoga'* – separation. This *alaukika śṛṅgāra* – non-worldly love, though similar to the worldly love, is not the same; because, it is known through the non-worldly means of knowledge, and not known through the worldly means of knowledge.

In fact, in this *bhakti*, the mere doubt of its being this worldly is meaningless. *Ṛṣis* like Vātsyāyana and others wrote their treatises just to elucidate this *bhagavat-bhāva* experience. *Ṛṣis* intentions are not to convey the worldly experiences at any time. That is why, it is said – *"tadetat brahmacaryeṇa parameṇa samādhinā vihito lokayātrārtham na rāgārtho'asya samvidhiḥ; rakṣan dharmārthakāmānstrīn saṁpaśyam-lokavartinām; asya śāstrasya tatvajño bhavatyeva jitendriyaḥ"*. If the intention of those writers were to be of this world, then they would not have said the end-result as *' jitendriya-bhavana'* – becoming one who has won over his senses. This meaning has been elaborately shown by the Āchārya in his *Bhāṣya* on *"liṅgabhūyastvādhikaraṇa"* and in *"kratuvaj-jyāyastvādhikaraṇa"*. Likewise by Śrī Puruṣottamacaraṇa in his Prakāśa and by Śrī Gopeśacaraṇa in his *Raśmi*.

The nature of this *bhakti* is *'sṛṅgāra'* and it is of the nature of togetherness and separation; separation generates a suffering of longing; how then can it be of the nature of pleasure and that too, immeasurably? The answer is the *śruti "yo vai bhūma tat sukham"*; therefore, it is of the nature of only pleasure. In Vedānta, at all places, *mukti* has been described as of the nature of enjoyment of pleasure. In the *Puṣṭi mārga* also, the nature of *Bhagavān* being of *ānanda*, His *prāpti* – attainment – is the

attainment of *paramānanda* – inestimable pleasure and not the attainment of suffering. On this point, the author of *Raśmi*, Yogi Gopeśwara enjoins – *"asyaiva ca-upapatteh ūṣmā"* – in the *Bhāṣya* of this *sūtra, 'tathā hi; asya ānandātmaka-rasa-rūpasya bhagavataḥ eva ayam dharmaḥ; ūṣmā – viraha-tāpaḥ;* though the all-pervading *Bhagavān* is present at all places, because he disappears by His *māyā*, separation and longing of His company is common for all; but, then, it is not felt by all, but only by those in whose hearts the experience of blissful nature of *Bhagavān* takes place, and only in his heart the suffering, born out of non-attainment of Him is experienced; this is in tune with the syllogism – "other things being there, it will be there; they being not there, it will not be there." Therefore, only that object which is of the nature of pleasure can be such; the suffering also here will be of the nature of pleasure."

From the above it is clear that the suffering described here is not born out of *karma;* if it were to be born out of *karma*, then its riddance called *mokṣa*, of the nature of pleasure, will also be shattered. That is why it is said in the *śruti* – *"na paśyo mṛtyum paśyati na rogam no'ta duḥkhatām"* – here the nature of this *bhakti* is described as not of the nature of suffering; but is the cause of suffering though; But, being the means to attain the real *Puruṣottama – ānanda-prāpti*, it is of the nature of pleasure. If not so, in the state of separation, the *śruti* would not have said as – *'citte sphurāyamāṇam ānandatvam'; "ko hi-evānyāt kaḥ prāṇyāt"* – this *śruti* means – "in the state of separation, the *Bhagavad-rūpa* shining in the heart is the cause for the continuity of life". Likewise, in the *Bhāgavata* also –

> *"tāḥ manmanaskā mat-prāṇā madarthe tyakta-daihikāḥ*
> *māmeva dayitam preṣṭhamātmānam manasā gatāḥ* |
> *ye tyakta-loka-dharmāśca madarthe tān bibharmyaham* |
>
> (Bhāga.10/46/4)

"Thus, that which is given by *Bhagavān*, who is one's most-dear, that which has some connection with *Bhagavān* and

which is attained by the devotees, all that will be of the nature of pleasure; therefore, for the naive that you are, the un-earthly nature of pleasure of *Bhagavān* will be the cause of suffering even as the nail-marks of the lover on the bulging breasts of his love, comparable to the pricking of thorns! Let us suffice it at this."

Thus, by the *śruti "yo vai bhūma tat sukham; na-alpe sukhamasti"* the pleasure that is described is of *Brahman* only since that is of that nature, and all that is of the nature of pleasure, end by connoting *Brahman*. In fact, *Brahman* only is the desired object of *jīva*. This is what is told in *Śrī Bhāgavta:*

"*ahamātmā ātmanām dhātaḥ preṣṭhaḥ san preyasāmapi* ।
ato mayi ratim kuryād dehādir yat-kṛte priya ॥"

Here, this should be understood: In *Siddhānta, Para-Brahman* is of the nature of pleasure *'rasa';* is the substratum of all opposing qualities; and with form; thus the *śruti "ātmaiva pūrvamāsīt puruṣa-vidhaḥ"*. The end-result to be attained is *Brahmānanda*. In the *śruti "param-brahmaitad yo dhyāyati rasati bhajati so'amṛto* bhavati" the connection of each word with *Brahman* is to be understood.

This *bhakti* is of the nature of end-result; its definition is – "*para-Brahma śri kṛṣṇa-snehatvam*". Here, by the *varaṇa śruti "yameva eṣa vṛṇute tena labhyaḥ"* the *varaṇa* is of two varieties viz. *maryādā* and *Puṣṭi*. In the case of *maryādā bhakti*, the means prescribed in the *śāstras* are many and that also, is of bodily, mental and verbal nature. Whereas, in the *Puṣṭi mārga, varaṇam* is the only means. In this *mārga*, only by the grace of God is the destruction of all the sins. This is so said –

"*svapāda-mūlam bhajataḥ priyasya*
tyaktānya-bhāvasya hariḥ pareśaḥ
vikarma yaccotpatitam kathañcit
dhunoti sarvam hṛdi sanniviṣṭaḥ" ॥

(Bhāga.11/5/42)

*"praviṣṭaḥ karṇa-randhreṇa svānām bhāva-saroruham dhunoti samalam kṛṣṇaḥ padmapatramivāñjasā"*ll

In this manner, only by *varaṇa (paramātma's* desire) – *puṣṭi-bhakti* is attained by the *puṣṭi-bhakta;* whereas *bhaktas* attain through *bhakti-mārga* – go near to *Bhagavān*; there, if *Bhagavān* appears, gets *rasānanda;* i.e. through all the senses, relation is established with *bhagavat-svarūpa.* This is told in *Bhāgavata* – *"akṣanvatām phalamidam na param vidāmaḥ";* all kinds of such mental longings are fulfilled by the grace of *Bhagavān*; *"brahmaiva san Brahma apyeti"; "so'śnute sarvān Kāmān saha brahmaṇā"* these *śrutis* are the evidence. This experience of *rasa* is the highest. By the statement of the Āchārya *"brahmānandāt samuddhṛtya bhajanānandayojane,"* the *akṣara-brahma-ānanda* is counted-pleasure and the *bhajanananda* is uncounted pleasure. Evaluating between these two, *jñāna* and *bhakti, Bhakti* is superior.

1) In *Bhakti*, drinking of the *rasa* of *kṛpānanda* is the result; in *jñāna*, it is merely the absence of suffering.

2) In *Bhakti*, experience of pleasure in full is the result; in *jñāna*, dissolving one's self and that too completely, without differentiation – is the result.

3) In *Bhakti*, the existence of duality made so by *Bhagavān* and experience of its pleasure is the result; in *jñāna*, since there is no differentiation, experience of pleasure does not arise.

4) In *Bhakti*, from the very beginning, there is limitless pleasure; in *Jñāna*, there is suffering in the beginning, and at the end, attainment of limited *ānanda*.

5) In *Bhakti*, it is the attainment of Pūrṇa Puruṣottama; in *jñāna*, it is the attainment of *Akṣara*.

In this manner, while comparing *jñāna* and *bhakti*, *bhakti* excels.

"ātmārāmāśca munayaḥ nirgranthā apyarukrame |
kurvantyahautikīm bhaktimltthambhūtaguṇo hariḥ ||"

(Bhā.1/7/10)

"The great contemplators and renunciates undertake unearthly *bhakti* in respect of That of big-strides, just for the sake of self-pleasure, because *Hari* is of those qualities not experienced anywhere else.

Therefore, even after getting the *brahma-bhāva*, one can practise *parā bhaktiḥ*. This is the unfathomable excellence of *Bhagavān, Pūrṇa-Puruṣottama Śrī Kṛṣṇa* and the superiority of *bhakti*. That is why learned people, capable of understanding the *rasa* and of emotional nature, offering themselves through *bhakti*, unto *Bhagavān Śrī Gopījana-vallabha*, become immersed in the experience of pleasure. Therefore, by the sentence *"sarva-dharmān parityajya"* only *Bhagavān* is to be accepted as the resort. Only by His grace, *Bhagavān* makes happen all that is wanted by the devotees. That is why the definition of *Puṣṭi* is told in *Śrī Bhāgavata* as – *"poṣaṇam tadanugrahaḥ"*. In *Puṣṭi-mārga*, it is only the *Bhagavad-anugraha*, the controller.

Bhakti is of two varieties as *Maryāda* and *Puṣṭi. Maryādā-bhakti* means *bhakti* in *Bhagavat-caraṇāravinda. Puṣṭí-bhakti* means *bhakti* in *Bhagavat-mukhāravinda. Maryādā-bhakti* is not independent. *Puṣṭi-bhakti* is independent. The end-result in *Maryādā-bhakti* is *sāyujyam* i.e. attaining similarity with *Bhagavān* in qualities. In *Puṣṭi*, it is becoming *Bhagavān* Himself. Thus, in whose case the grace of *Bhagavān* descends, he comes into the *Puṣṭi*; and that grace is inferred by the craving (*ruci*) etc., shown by the devotee in that *mārga*.

That craving means *Bhakti* itself. The result of pure *Puṣṭi-bhakti* means entering into the *Nitya-līla* and attainment of *Puruṣottama*. All this has been elaborately explained by the Āchārya in *Śrīmad Aṇu-Bhāṣya;* it has been vividly explained in his *Prakāśa* by Śrī Purusottamacaraṇa and by Śrī Gopeśwaracaraṇa in his *Prakāśa-Raśmi* still more elaborately

delineated.. One has to understand all this from there.

Now, describing the root of *Brahman* and its nature we conclude here –

> "*kṛṣir bhū-vācakaḥ sabdo; ṇaśca nirvṛtti vācakaḥ;*
> *tayoraikyam param Brahma kṛṣṇa ityabhidhīyate* ||
> *Om Tat Sat Param Brahma Kṛṣṇātmako Nityānandaika-svarūpaḥ* || is the *śruti.*

The letter "*kṛ*" denotes earth; the letter "*ṇaḥ*" means "redemption"; when these two letters become one Word, it denotes the *param-Brahma* called *Kṛṣṇa*. This is confirmed by the *śruti* sentence quoted. Therefore,

> *Paripūrṇatamaḥ kṛṣṇo vaikuṇṭho gokulaḥ svayam* |
> *Caturbhujaśca vaikuṇṭhe gokule dvibhujaḥ svayam* |
>
> (Bra.vaivartapu.)

Kṛṣṇa is the most full-potential god; Gokula is *Vaikuṇṭha* itself; He only is with four hands in *Vaikuṇṭha*, and with two hands in Gokula. In this manner, in respect of all the *śāstras*, the opinion of Śrī Vallabhācārya was explained in short.

Therefore, *paramānandapūrṇa-Puruṣottama-Parabrahma* is Śrī Kṛṣṇa only. What is known from all the *Nigamas, Āgamas* and others is the *para-brahma-svarūpa* Śrī Kṛṣṇa and He alone is to be realized and that is the ultimate *puruṣārtha* and this is the *Śuddhādvaita-Brahma-vāda*. This attainment is not possible without *bhakti*, vide the *śruti* – "*nāyamātmā balahīnena labhyah.*" Here, the word "*bala*" means *bhakti*. Therefore, in the pure *puṣṭi-bhakti*, love is the deciding factor. *Bhakti*, i.e. love without any conditioning factor, is the *Sarvātma-bhāva*. Only this is the chief means for the attainment of *Pūrṇa-Puruṣottama*. In whom the grace of god descends, only he becomes fit for this *puṣṭi-mārga*. Therefore, to establish this *puṣṭi-mārga*, the *prameya*, un-opposed to the *pramāṇa*, was shown by the Āchārya and hence, as delineated by the Āchārya, the *Puṣṭi* path is to be followed.

"jānīta paramam tatvam yaśodotsanga-lālitam |
tadanyaditi ye prāhūrāsurāñstān aho budhāḥ ||"

(Śrī Prabhucaranāḥ Bhāṣya)

Śrīmad Āchāryacaraṇānām Veda-śraddhā:

In this *Bhāṣya*, the glory of this *Puṣṭi-bhakti* has been elaborately described and thus, Āchārya has shown his extra-ordinary belief in respect of the Vedas. Śrī Vallabhācārya does not accept variation even in a single letter of the Vedas. *"uttaram pūrva-sandeha-vārakam parikīrtitam"* – as per this rule of interpretation, *"pūrva-pūrva-prasthāna-sandeha-vārakatvam uttarottara-prasthānasya"* – the earlier basic texts forming the basis for a *siddhānta*, if ambiguous, should be got clarified by the statements in the later texts – Āchārya has upheld this principle.

For example, the Veda says – *"apāṇi-pādo javano gṛhītā"*; here a doubt arises as to, whether *Brahman* is devoid of this earthly hands and feet; or, it denies the existence of hands and feet in general? This doubt is cleared by the sentence of the Gītā – *"sarvataḥ pāṇi-pādāṃātam"* i.e. *Brahman* is having hands and feet everywhere. Similarly, the Gītā says – *"nityaḥ sarvagataḥ sthāṇuḥ"*; *"mamaivāṁśo jīvaloke"* etc. Here, the doubts that arise are cleared by the *Brahmasūtras* – *"utkrānti-gatyāgatibhiḥ"*; *"aṁśo nānā-vyapadeśāt"* etc. Similarly, in the *sūtra* – *"janmādyasya yataḥ"* – the doubt arises that the *jagat-kāraṇatvam* told of the *Brahman* is the material cause or the efficient cause. The conclusion is derived by the sentence of *Śrī Bhāgavata* – *"anvaya-vyatirekābhyām yaḥ syāt sarvatra sarvadā"*. It is how the homogeneity of all the four *prasthānas* is to be achieved. Here, the Āchārya has accepted validity of the entire Veda consisting of two *kāṇḍas*, and not the Upaniṣad only as told by others - *'vedanto nāma upaniṣad pramāṇam'*; says Āchārya – *"vedasya Akṣara-mātrasya anyathā-kalpane'pi doṣaḥ syāt"* – imagining even a letter of the Veda differently will amount to

defective reasoning.

Therefore -

"vedoktād-aṇumātre'pi viparītam tu yad bhaved I
Tādṛśam vā svatantrañca ubhayam mūlato mṛṣā II"

(A.Bha.Ka.)

Likewise -

"yajñarūpo hariḥ pūrvakāṇḍe Brahma-tanuḥ pare I
Avatārī hariḥ kṛṣṇaḥ Śrī Bhāgavata īryate II"

(Sa.pra. 11)

"agnihotram tathā darśa-pūrṇamāsaḥ paśus-tathā I
cāturmāsyāni somaśca kramāt pañcavidho hariḥ II"

(Tatva. 2/2)

"asandigdho'pi vedārthaḥ sthūṇā-khananavan-matam I
mīmāmsānirṇayaḥ prājñe durbuddhestu tato dvayam II
Jaiminiḥ karma-tattvajño nirṇayam pūrva uktavān I
Vyāsaḥ svayam hi sarvajñaḥ uttare nirṇayam jagau II"

(Tatva.2/29/30)

In respect of Purāṇa, Āchārya's faith –

"Purāṇam vedavat pūrvasiddham sarvopayogi tat"

(Tatva.2/48).

In respect of Mahābhārata –

"sarvanirdhāraṇārthāya vyāso bhāratamuktavān"

(Tatva.2/57);

On the subject Jyotiṣa –

"darśādikālanirddhāro jyotiḥ śāstraphalam smṛtam"

(Tatva.2/75)

On Vyākaraṇa –

"vyākritiḥ Pāṇinīyam hi Prātiśākhyam tu śabdag

(Tatva.2/77);

On Āyurveda etc. –

"Ārogye dharmasiddhih syād rakṣā ca dhanuṣo bhavet I
Udvegahānir-gāndharve sthāpatyam ca srugādiṣu II

Kāvyādīnām asatyatvāt nopayogaḥ kathañcana ||
Dharme-kartuḥ kvacid kīrttir-naipuṇyam pāṭhataḥ kvacit ||"

(Tatva.2/79-80)

On Rāmāyaṇa –

" *Rāmāyaṇamanantam hi purāṇamiva sanmatam* |
Vyāsaḥ pūrvamanekokto vālmīkiḥ sāmpratam kila |
Samādhi-bhāṣayā prāha pramāṇam sarvathaiva tat ||"

(Sar.pra.81)

In this manner, in respect of all the *śāstras*, the opinion of Śrī Vallabhācārya was clarified in short.

In respect of Saṁnyāsa:

Saṁnyāsa is not to be taken in the paths of *karma* and *jñāna* due to the defects of *Kali*, to avoid regret later. But, in *Bhakti mārga*, it should be taken. The sacrifice, just for the sake of experiencing the separation of *Bhagavān* only, is praise-worthy. All this Āchārya has elaborately explained in his work *Saṁnyāsa-nirṇaya*. From this it is evident that Āchārya's preference is in *bhakti-mārga* over the *karma-jñāna mārgas*.

In his *Bhāṣya*, Āchārya shows his keen interest in repudiating the *māyā-vāda*. Even while repudiating the *Bauddha-mata*, he shows his penchent for the repudiation of *māyā-vādi*.

In *Brahma-sūtra*, the other Āchāryas have accepted the *Catuḥ-sūtrī* consisting of the *sūtras* – (1) *Athā'to Brahma-jijñāsa;* (2) *Janmādyasya yataḥ;* (3) *Śāstra-yonitvāt;* (4) *Tat-tu-samanvayāt;* whereas, as per Śrī Vallabhācārya, '*janmādyasya yataḥ; śāstra-yonitvat*' appear as one *sūtra*. That is why, in *Śuddhādvaita*, it is called as '*tri-sutri*'.

This *Aṇu Bhāṣya* was written by Śrīmad Vallabhācārya upto *sūtra* 33 of second quarter of third chapter. From *sūtra* 34 onwards it was commented by Śrī Viṭṭhalanātha. Even in the earlier part of the *Bhāṣya*, in '*Ānandamayādhikaraṇa*' the second

varṇaka was written by Śrī Viṭṭhaleśa. In this matter, the statement of author of *Prakāśa* on *Bhāṣya* Śrī Puruṣottama is the authority. It is written: *"ita ārabhya prabhūṇāmiti (Śrī Viṭṭhaleśānām) pratibhāti; "sthāna-viśeṣāt prakāśādivat"* – (Br.Su.3/2/34) – in this *sūtra-bhāṣya-prakāsa*. Likewise, in *Ānandamayādhikaraṇa* – *"sāmpratam tu Prabhucaranaiḥ"*. Similarly, in the ending verse of the fourth chapter,

> *"Bhāṣya-puṣpāñjaliḥ śrīmadācārya-caraṇāmbuje* |
> *niveditastena tuṣṭā bhavantu mayi te sadā* ||"

Here, in the Bhāṣya-prāmāṇya-prakāśa, Śrī Puruṣottamāḥ: *"guṇopasaṁharapādamārabhya sārddhādhyāyasya svayam karaṇāt tad āchāryeṣu nivedayantaḥ samāptau maṅgalam kartavyamiti śiṣṭācārañca śikṣayantaḥ āchāryāṇām prasādam āśāsate";* from this, it is clear that after writing the remaining part of the *Bhāṣya*, it was dedicated at the feet of Śrī Vallabhācārya. But, here some learned persons think that the entire *Bhāṣya* was written by Āchārya himself. In that case, the meaning of *'Śrī Āchārya-caraṇāmbujam'* should be taken to mean as *Vyāsācārya-caraṇāmbujam*. See Āchārya's sentence *"vyāso'smākam guruḥ"*. In this manner, at other places also explanations are given.

Moreover, some people say – "there is another elaborate *Bhāṣya* of the Āchārya; from that, some short passage is available today; this *Bhāṣya* is the abridged version of that *Bhāṣya*." However, what Śrī Puruṣottamacaraṇa has said in his *Prakāśa* is to be accepted as the only part available and there should be no doubt about this. Whatever works of Śrī Vallabhācārya are there, in those cases there are commentaries on them by Śrī Puruṣottama. Where there is no commentary of Puruṣottama, that work is of Śrī Vallabhācārya or not is doubtful.

In this *Bhāṣya*, there are four chapters; they are - svarūpa; *matāntara-nirāsa; sādhana;* description of *phala* – respectively. In each chapter, there are four quarters; in the first chapter,

Vedānta vākyas describing the nature of *Brahman* are discussed. Here, in the first quarter, sentences describing the effect (creation); in the second quarter, sentences describing the *antaryāmi;* in the third quarter, sentences describing the form of *upāsya* (that which is to be meditated upon); and in the fourth quarter, other disconnected sentences are discussed – this is the short description of the first chapter.

In the second chapter, the view points of other systems are repudiated; without repudiating the other systems, discussions on the means and the end-result will not serve the purpose. Here also, in the first quarter of the second chapter, the non-opposing nature of *śruti* and *smṛti* is upheld. In the second quarter, the systems of *Nyāya*, *Māyāvāda* atc., are refuted. In the third quarter, the opposing nature of *śruti* sentences are reconciled. In the fourth quarter, discussion on *prāṇa* etc. that reside in the body of the *jīvas* is made. This is the essence of the second chapter.

The third chapter deals with the means; here, in the first quarter, the discussion revolves round the birth of the *jīva* useful for *brahma-jñāna*. In the second quarter, the qualification of *jīva* for *mukti*; here itself, removing the oppositions, *Brahma-svarūpa* also is decided; in the third quarter, *'guṇopasaṁhāra'* – qualities described at different places differently are to be taken together is called *guṇopa-saṁhāra* – is done; in the fourth quarter, the subsidiary nature of rituals is discussed. This is the short description of the third chapter.

The fourth chapter describes the *phala* – the end result – objective. Here, in the first quarter, discussions of *śravaṇa* etc. are carried on. In the second quarter, the dissolution of all the senses is discussed. In the third quarter, the path of *krama-mukti* etc. is discussed. In the fourth quarter, differentiating between *Puṣṭi* and *Maryādā*, the *phala* and the eternal nature of *līlā* etc. are discussed.

The division of *Adhikaraṇas* are –

First chapter –	1st quarter	– ten *adhikaraṇas;*
	2nd quarter	– eight *adhikaraṇas;*
	3rd quarter	– thirteen *adhikaraṇas;*
	4th quarter	– nine *adhikaraṇas;*
Second chapter –	1st quarter	– twelve *adhikaraṇas;*
	2nd quarter	– eight adhikaraṇas'
	3rd quarter	– sixteen *adhikaraṇas;*
	4th quarter	– ten *adhikaraṇas;*
Third chapter –	1st quarter	– eight *adhikaraṇas;*
	2nd quarter	– eleven adhikaraṇas'
	3rd quarter	– twenty four *adhikaraṇas;*
	4th quarter	– nine *adhikaraṇas;*
Fourth chapter –	1st quarter	– seven *adhikaraṇas;*
	2nd quarter	– six *adhikaraṇas'*
	3rd quarter	– five *adhikaraṇas'*
	4th quarter	– five *adhikaraṇas.*

The abstraction of the contents of *Bhāṣya* and the *Adhikaraṇas* was thus described.

Śrī Vallabhācārya's short life history:

In the Telugu speaking region of south India, there is a village called Kāṅkarvāḍ; there was a family with the title Dīkṣita, followers of the *Taittirīya* branch of the Kṛṣṇa - yajurveda. In this family, all the persons born became *Soma Yājis*. The progenitor of this family was Śrī Nārāyaṇa Yajvā. In this family was born Śrī Laksmaṇa Bhaṭṭa. This gentleman, with his wife, once undertook the pilgrimage to Kāśī; during this time, on the way, at the place called Campāraṇya in Madhyapradeśa, from the womb of his wife Illammāgāru, (vikrama saṁvat 1535), on Vaiśākha Kṛṣṇa -ekādaśi, Śrī Vallabhācārya's appearance took place. Thereafter, Śrī Lakṣmaṇa Bhaṭṭa, along with his wife and son, resided in Kāśī for about twelve years. Śrī Vallabhācārya's thread ceremony etc. took place in Kāśī itself. Śrī Vallabha very quickly studied

the Vedas and the *śāstras*. Thereafter, all the three came back to their native place. Then, Śrī Lakṣmaṇa Bhaṭṭa passed away; and again, Śrī Vallabhācārya undertook a pilgrimage. During this pilgrimage, Śrī Vallabhācārya had *śāstraic* discussions with many learned personalities and they were won over. Śrī Ācārya made round trips thrice, of the country, and preached his *Siddhānta*. During this time, in Vijayanagara, at the court of Śrī Kṛṣṇadevarāya, he defeated all the opposing debaters, and established his *siddhānta*, called the *Sūddhādvaita-Brahma-vāda-nirguṇa-puṣṭi-bhakti mārga.*

During his *yātrā*, at the Govardhana mountain, Śrī Kṛṣṇa, called Śrī Nāthjī, *Para-Brahma, Bhagavān*, by His own desire, appeared before Śrī Vallabhācārya and showed His form and commanded him to undertake His *sevā*. This was the *Puṣṭi-mārga* preached by Śrī Vallabhācārya. During one such pilgrimages, as per the directions of *Bhagavān* Śrī Pāṇḍūraṅga Viṭṭhalanātha, and with his mother's permission, at Kāśī, married the befitting daughter of a learned Telugu Brahmin by name Madhumaṅgala. Here, two sons were born to him by name Śrī Gopīnātha and Śrī Viṭṭhalanātha – first on Āśvina Kṛṣṇa 12, vi.sam.1568; the second on Miti Pau.Kr.9th, vi.sam.1572. In this manner, after crossing the three stages of life, took *tridaṇḍa saṁnyāsa* as approved by the *śāstras*; here in Kāśī, at the well-known Hanumānghāṭ, on Āṣāḍha su.2, vi.sam. 1587, on a Sunday, in the afternoon, entered into the waters of Gaṅgā; in this manner, deluding the non-believers, he left his mortal coil and entered the *Bhagavad Dhāma* in reality.

There are many works written by Śrī Vallabhācārya, the *jagadguru*. They are both short treatises and elaborate works; the bigger ones are - (1) Brahma-sūtra Aṇu Bhāṣya; (2) Tatva-dīpa-nibandhaḥ; (3) Nibandha Prakāśa; (4) Śrīmad Bhāgavata Subodhinī; (5) Pūrva-Mīmāmsā Bhāṣyam; (6) Gāyatrī Bhāṣyam etc.

Short treatises – (1) Śrī Yamunāṣṭakam; (2) Bālabodhaḥ; (3) Siddhānta-muktāvalī; (4) Puṣṭi-pravāha Maryādā-bhedhaḥ; (5) Siddhānta Rahasyam; (6) Navaratnam; (7) Antaḥ-karaṇa-prabodhah; (8) Viveka Dhairyāśrayaḥ; (9) Kṛṣṇāśrayaḥ; (10) Catuḥ-ślokī; (11) Bhakti-varddhini; (12) Jalabhedaḥ; (13) Pañcapadyāni; (14) Saṁnyāsa-nirṇayaḥ; (15) Nirodha lakṣaṇam; (16) Sevā-phalam. Similarly, Puruṣottama Sahasranāma; Paribṛḍhāsṭakam; Patrāvalambanam; Trividha Nāmāvalī; Śikṣā śloka etc. Śrīmad Bhagavadgīta Bhāṣya written by Śrīmad Vallabhācārya is not available due to the vagaries of time or due to some other reasons, think the research scholars.

Śrīmad Vallabhācārya's first son was Śrī Gopīnāthaḥ; he had only one son Puruṣottamaḥ. Thereafter, there are no descendents. Āchārya's second son was Śrī Viṭṭhaleśaḥ; His works are – *Aṇu Bhāṣya Uttarārdhaḥ; Vidvan-maṇḍanam; Sṛṅgāra-rasa-maṇḍanam; Subodhinī ṭippaṇī; Bhakti Hamsa; Bhakti Hetu-nirṇayaḥ* etc. He had seven sons – they were respectively Śrī Giridharaḥ; Śrī Govindarāyaḥ; Śrī Bālakṛṣṇaḥ; Śrī Gokulanāthaḥ; Śrī Raghunāthaḥ; Śrī Yadunāthaḥ; and Śrī Ghanaśyāmaḥ.

Śrīmad Viṭṭhaleśwara's third son's (Śrī Bālakṛṣṇa's) fourth-generation was Śrī Pītāmbara Goswāmī; his son Śrī Puruṣottamacaraṇa was a great scholar, establishing his reputation in all directions, took to his uncle Śrī Śyāmala's son, Vrajarāyajī mahārāj. This Puruṣottamacaraṇa was born in Vi.sam.1724 Mi.Bha.Su.11. Among his commentorial works, the most celebrated one *Nibandha* is *Aṇubhāṣya Prakāśa*. This has no parallel. Scholars like Śrī Puruṣottamacaraṇa are very rare indeed. His works total upto nine lac *ślokas;* some people say, though nine lac ślokas are known today, many are the ones lost. Works written by Śrī Puruṣottamacaraṇa - *Subodhinī Prakāśaḥ; Upaniṣad-dīpikā; Āvaraṇabhaṅgaḥ; Prasthāna-ratnākaraḥ; Suvarṇasūtram; Ṣodaṣagrantha vivṛttiḥ;*

Vādāvaliḥ etc. Many works are full of erudition; in respect of him, there are two well-known *ślokas* –

> *"Śrīmad vallabha dīkṣitāhvayaharer vandyānvaye saptamaḥ*
> *tatkāruṇya sudhābhiṣeka vikasad-saubhāgya bhūmodayaḥ*|
> *dṛśyad-durmada-vādi-vidvad-ibha-duṣkūṭokti-kumbhasthalī*
> *sadyo-bhañjana keli-kesarapatiḥ Pitāmbarasyātmajaḥ* || 1 ||
> *nāsīd-yenasamaḥ samasta-nigama-smṛtyādi tatvārthavid;*
> *vaktā ca apratimaḥ sadassu viduṣamadyāpi bhūmau budhaḥ* |
> *yaḥ sarvam navalakṣa-padyaka-mita-prauḍha-prabandha vyadhāt;*
> *sa śrīmān puruṣottamo vijayatām āchāryacuḍāmaṇiḥ* || 2 ||

Thus, his elaborate biography has to be seen from '*Puruṣottama Digvijaya*' if anyone wants more details. His equal scholars in other systems or in the whole world, are very rare indeed!

On the *Prakāśa* of *Aṇu Bhāṣya*, a vivrtti '*Raśmi*' was written by Śrī Yogi Gopeśwaraḥ, the offspring of third son of Śrī Viṭṭhaleśa. This scholar came to the family of the second son of Śrī Viṭṭhaleśa, Śrī Govindarāya, as *Dattaka* son. He was a well-known scholar. By this scholar a commentary on *Bhāṣya Prakāśa* was written called *Raśmi Bhāṣya*, an elaborate work; it is extolled by scholars.

The lineage of Śrī Gopeśwaracaraṇa and the lineage of his *Dattaka-vaṁsa* is given here in short: Śrīmad Viṭṭhaleśwara's third son, Śrī Bālakṛṣṇa's fourth son was Śrī Pitāmbara; in this line, Śrī Śyam Lālji, his son, Śrī Vrajarāyajī, his *Dattaka-putra* Śrī Puruṣottamacaraṇāḥ, the well-known in all directions; his *dattaka-putra* Śrī Puruṣottamaḥ;(Go.A.Tr.Gṛ.1); his son Śrī Govardhaneśji (second); his *dattaka-putra* Śrī Gokulotsavjī; (Go.Aye Dvi.Gṛ.1); his son Śrī Yogi Gopeśwara, the scholar and author of *Raśmi*, (Go.Gaye.dvi.gr.1) of Śrī Viṭṭhaleśarāyajī; his son Śrī Kṛṣṇarāya mahābhāgaḥ; this is the lineage of Yogi Gopeśwara.

Hereafter, his *dattaka-vaṁśa paramparā*: the second son of

Śrīmad Viṭṭhaleśa Śrī Govindarāya; his son Śrī Kalyāṇarāya; his son Śrī Hari Rāya, *Śikṣāpatra's* author. His *dattaka-putra* Śrī Giridharjī mahodayāḥ; (Go.Aye.Pr.Gṛ.1); his son Śrī Raghunāthjī; his son, Śrī Govindarāyajī the second; his son Śrī Viṭṭhalesarāyajī; his dattaka-putra Śrī Yogi Gopeśwarjī the scholar (Go.Aye.Tr.Gṛ.2) this is the *dattaka-vaṁsa paramparā* of Śrī Yogi Gopeswarāḥ. By this scholar *Bhakti-mārtanda* etc. works, full of essence, were written.

Brahmasūtra is the basic text for all *Vedānta*. When these *Vedānta sūtras* were composed cannot be told definitely because of the lapse of a long time; however, since it is known as having been written by Maharṣi Bādarāyaṇa Vyāsa, the period of its writing may be at the end of *Dvāpara Yuga* and the beginning of *Kaliyuga;* thus, it can be inferred that its time should be about 5000 years ago. *Brahmasūtra* was composed in very early times according to our forefathers. But, as per the present-day Westerners' opinion, this should have been composed around 400 B.C. According to our legends, as per the story in the first *Skandha* of *Śrīmad Bhāgavata*, it is learnt that these *sūtras* should have been composed little earlier than *Śrīmad Bhāgavata*. In *Śrīmad Bhāgavata*, Bhagavān Śrī Kṛṣṇa 's sports are described; and Bhagavān Śrī Kṛṣṇa was on this earth some 5000 years before. Therefore, the period of *Brahmasūtras* composed by Veda Vyāsa also should have been the same. Even in *Śrīmad Bhagavadgītā*, in the *śloka 'brahmasūtra-padaiścaiva'* we come across mention of *Brahmasūtra* by name; from this it is clear that these *sūtras*" period of composition should have been earlier than *Śrīmad Bhagavadgītā*.

In the *Brahmasūtra*, the number of *sūtras* are differently stated by the different *Bhāṣyakāras*; chief among them are–

	Bhāṣyakāraḥ	No. of *Sūtras*	No.of Adhikaraṇas
1.	Āchārya Śankara	555	199
2.	Āchārya Rāmānuja	545	160

3.	Āchārya Madhva	364	223
4.	Āchārya Nimbārka	549	161
5.	Āchārya Vallabha	554	171

Thus, as shown by Jagadguru Śrīmad Āchāryacaraṇa, *sākāra-brahma-vāda*, variously called *'Śūddhādvaita-brahma-vāda-nirguṇa-puṣṭi-bhakti-mārga'* is the only true system; there is no difference of opinion on this. As shown by Śrīmad Āchāryacaraṇa and by Śrīmad Prabhucaraṇa, only by His grace, following his line of thought, this Introduction to *Śrīmad Brahmasūtra Aṇubhāṣya*, along with the *Prakāśa* and *Raśmi* on that, was written by me. Let scholars, without inhibitions, correcting the mistakes that might have occurred during its delineation, read this and grace me.

Thanks:

By the supreme grace of *Bhagavān* Śrī Mukunda Prabhu and Śrī Gopāla Prabhu, who was brought up in the laps of Śrī Yaśodā, and who was Śrī Gopījanavallabha, this deep philosophical treatise called the *Aṇu Bhāṣya-Prakāśa-Raśmi* – the *Triveṇi* confluence is being re-printed by Śrī Harish Chandra with his body, soul, and money; by Śrī Saroj Kumar Goel (residents of Delhi) and by Śrī Dev Kumar Agrawal, Śrī Ghanaśyāmajī Shaḥ, the superior Vaiṣṇavas (residents of Kāśī) deserve all the commendations.

(Translated by Śrī Bhāṣyāchārya, Vidvad-Uttama Prof. Sampannārāyaṇāchārya, Nyāya-Mīmāmsā-Vedānta Vidvān, Vedānta Śiromaṇi).

Abbreviations

Aśvi. kṛ.	-	Āśviṇa Kṛṣṇa
A. Bh. ka	-	Aṇu Bhāśya Kārikā
Br. Su.	-	Brahmasūtra
Bha. Śu.	-	Bhādrapada Śukla
Br. Vai. pu.	-	Brahma Vaivarta Purāṇa
Bhāga.	-	Śrīmad Bhāgvata
Ch. Upa.	-	Chāndogya-Upaniṣad
Kaṭho.	-	Kaṭhopaniṣad
Mi. Pau. kṛ	-	Mithuna Pauṣa Kṛṣṇa
Mi. Asa. Śu.	-	Mithuna Āṣāḍha Śukla
Sā. pra. kā.	-	Śāriraka-prakāśa Kārikā
Vi. pu.	-	Viṣṇupurāṇa
Vi. Saṃ	-	Vikrama Samvat

॥ श्रीमन्मुकुन्दरायो जयति ॥

॥ श्रीगोपाललालो जयति ॥

।। श्यामः सदा दीव्यतु मानसे मे ।।

उपोद्घातः

षष्ठपीठाधीश्वर गोस्वामी श्री श्याममनोहरजी महाराज (काशी), वाराणसी

प्राकृतधर्मानाश्रयमप्राकृतनिखिलधर्मरूपमिति ।
निगमप्रतिपाद्यं यत्तच्छुद्धं साकृतिस्तौमि ।।

(सर्वोत्तमस्तोत्रे)

अत्र श्रीमद्विठ्ठलेशप्रभुचरणाः सर्वोत्तमस्तोत्रे श्रीमदाचार्याणामलौकिकनामानि प्रकटयन्तः स्वरचित- वल्लभाष्टकग्रन्थे स्वाचार्यस्वरूपं निरूप्य समापने "निखिलबुधजनाः गोकुलेशं भजन्ते" इत्यादिना जगद्गुरुश्रीमद्वल्लभाचार्याणां पूर्णपुरुषोत्तमत्वं निरूप्य सप्तश्लोक्यां तद्गुणान्निरूपयन्ति । अत्र श्रीमत्प्रभुचरणास्तु श्रीमद्वल्लभाचार्यचरणार्जितशुद्धाद्वैतब्रह्म-वादनिर्गुणपुष्टिभक्तिमार्गाखण्डसाम्राज्यसिंहासनसमधिरूढाः अखिलं ब्रह्माण्डं सम्बोधयन्तः श्रावयन्ति —

क्वचित्पाण्डित्यं चेन्न निगमगतिः साऽपि यदि न
क्रिया सा साऽपि स्याद्यदि न हरिमार्गे परिचयः ।
यदि स्यात्सोऽपि श्रीव्रजपतिरतिर्नेति निखिलै-
र्गुणैरन्यः को वा विलसति विना वल्लभवरम् ।।

अत्र गुणान्निरूपयन्तः सर्वाधिकासाधारणाखिलगुणाश्रयत्वमाहुः क्वचिदिति । पाण्डित्यं नाम पण्डा बुद्धिर्यस्येति । अर्थात् आगन्तुकानागन्तुकबुद्धिमान् हि पण्डितः तस्य भावः पाण्डित्यम् । तात्पर्यंबौद्धनैयायिकादौ पाण्डित्ये सत्यपि न निगमगतिः नाम वेदानुकूला गतिर्नास्तीति भावः । बुद्धेन तद्दूषणात् । कदाचित् साऽपि नाम, निगमगतिरपि पाण्डित्येन सह भवेत्तदापि वेदोदिता चरणरूपा, निगमाभिमता क्रिया नेति । पाण्डित्यनिगमगतिसहिता क्रियाऽपि श्रीमच्छङ्कराचार्यप्रतिपादिताद्वैतसिद्धान्ते व्यावहारिकसत्तया यदि स्यात्तदाऽपि न हरिमार्गे परिचयः । तेषां भगवच्छास्त्रे अप्रवृत्तत्त्वात् । "धर्मः स्वनुष्ठितः पुसां विष्वक्सेनकथासु यः । नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्" तथा च "नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्" इत्यादि वाक्याद्धरिमार्गपरिचयाभावात्तद्वैफल्यमिति। ननु पूजादिमार्गानुवर्त्तिनः बहवः निगमगतिक्रियासहिताः सन्तः विद्वांसः सन्तीति चेत् सत्स्वपि तेषु न व्रजपतिरतिः । ते तु तद्विभूतिरूपस्य परम्परया तद्रूपत्वं प्रतीकत्वेनादाय पूजादिकं विदधति न साक्षाद् ब्रह्मणः स्नेहात्मिकां सेवां कुर्वन्ति । वस्तुतस्तु "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति श्रुतेः प्रतीकमेवतत् अतः पूज्यस्य विभूतित्वेनाज्ञानात् तत्र

स्नेहात्मिकायाः सेवाया अभावान्न व्रजपतिरतिः । साक्षाद्ब्रह्मत्वं तु व्रजपतेरेवेति। "परं ब्रह्म तु कृष्णो हि" इत्याचार्यवाक्यात् । अतः निखिलैरेतैर्गुणैस्समल-ङ्कृतादाचार्यवल्लभादितरः कः न कोऽपीत्यर्थः।

एतादृशानां श्रीवल्लभाचार्यचरणानां ग्रन्थाः बहवः सन्ति । तत्र सर्वोत्तमो ग्रन्थोऽणुभाष्यमेव । अस्मिन् भाष्ये व्याससरणिमाश्रित्य तदनुसारेणैव शुद्धाद्वैतब्रह्मवाददर्शनस्य स्थापनं कृतमाचार्यैरिति ।

दर्शनं हि नाम अपरोक्षं ज्ञानं साक्षात्कारो वा। तच्च द्विविधम्। आस्तिकदर्शनं नास्तिक- दर्शनञ्चेति । तत्र आस्तिकदर्शनं मुख्यत्वेन षड्विधम्- 'सांख्यपातञ्जलपूर्वमीमांसोत्तरमीमांसातर्कन्यायभेदेन। तत्र साख्यं कापिलं श्रीभागवतोक्तम् । पातञ्जलं योगशास्त्रम् । पूर्वमीमांसा जैमिनि कृता । उत्तरमीमांसा कृष्णद्वैपायनव्यासकृता, चतुरध्यायात्मकं ज्ञान-काण्डम् । तर्कः कणादकृतः वैशेषिकम् । न्यायः गौतम प्रणीतम् न्यायशास्त्रम् । तथा च नास्तिक दर्शनमपि षड्विधम्-चार्वाकसौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकार्हतभेदात्' ।

अत्रास्तिकदर्शनान्तर्गतोत्तरमीमांसायाः प्रकृतविषयत्वात्प्रकृतमनुसरामः। उत्तरमीमांसा-वेदान्त दर्शनम् । तत्र वेदान्तोपजीव्येषु नानामतेषु पञ्चैव प्रमुखाः ते च केवलाद्वैतविशिष्टाद्वैत-द्वैतद्वैताद्वैतशुद्धाद्वैताख्याः सिद्धान्ताः। तत्र केवलाद्वैत दर्शनं शङ्करावतारैराचार्यशंकरैः प्रणीतम् । विशिष्टाद्वैतदर्शनं शेषावतारैराचार्यरामानुजैः कृतम् । द्वैतदर्शनं वाय्ववतारैः आचार्यमाध्वैः रचितम्। द्वैताद्वैतदर्शनं हंसावतारैराचार्यनिम्बार्कैः प्रणीतम्। शुद्धाद्वैत-दर्शनं वेदव्यासमतानुवर्त्तिभिः श्रीभगवन्मुखावतारैः वैश्वानरावतारैश्च भगवद्भिः श्रीवल्लभाचार्य-प्रकटितम् ।

अत्र शुद्धाद्वैतं नाम किमिति प्रश्ने —

शुद्धाद्वैतपदे ज्ञेयः समासः कर्मधारयः ।
अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः ।।
मायासम्बन्धरहितं शुद्धमित्युच्यते बुधैः ।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम् ।।

(शु.मा.श्लो. २७।२८)

अत्र शुद्धं च तदद्वैतं चेति कर्मधारयः। शुद्धयोरद्वैतमिति षष्ठीतत्पुरुषो वा बोध्यः। अत्र मायासम्बन्धरहितत्वकथनेन मायाशबलितं ब्रह्म जगत्कारणमिति न, अपि तु शुद्धब्रह्म एव जगत्कारणमिति तात्पर्यम् । सिद्धान्ते मायाया अपि "मम माया दुरत्यया" (गी. ७।१४) इत्यादि वाक्याद्भगवच्छक्तित्वेनोक्तत्वान्नास्त्यत्र परमतवन्मायासम्बन्धः । अत्रैव कार्यकारणविचारे शांकराः घटपटाद्यात्मकं जगन्मायिकमत एव नश्वरमिति मन्यन्ते । एतेषां मते प्रपञ्चस्य मायिकत्वेन तस्य कारणस्यापि तादृशत्वनैव भवितव्यमिति, कारणसजातीयत्त्वात्कार्यस्येति । एवं प्रपञ्चं मायिकमित्युक्त्वा जीवो ब्रह्मैवेति ते साधयन्ति । तन्निराकरणार्थमाचार्यैः निबन्धे उक्तम् - "प्रपञ्चोभगवत्कार्यः" तत्प्रकाशे च "अयं प्रपञ्चो

न प्राकृतः । नापि परमाणुजन्यः। नापि विवर्त्तात्मा । नाप्यदृष्टादिद्वारा जातः । नाप्यसतः सत्तारूपः । किन्तु भगवत्कार्यः । परमकाष्ठापन्न वस्तु कृतिसाध्यः ।'' अतः शुद्धस्यैव ब्रह्मणः जगतः कारणत्वमिति सिद्धान्तः।

ननु शुद्धब्रह्मणः ''निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'' ''इन्द्रोमायाभिः पुरुरूप ईयते'' ''वाचारम्मणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' ''अथात आदेशो नेति नेति'' इत्यादिभिः प्रमाणैः निर्विशेषत्वेन श्रुतिषु प्रतिपादनात् शुद्धब्रह्मणः जगत्कारणत्वं न संगच्छते । शुद्धब्रह्मणः जगत्कर्तृत्वाङ्गीकारे तु तस्य सगुणता स्यादतो विवर्तवादमतमवलब्म्य सविशेषश्रुतीनां निर्वाह उपजीव्यत्वन्यायेन कर्त्तव्यः तेन ब्रह्मणि वास्तवं कर्तृत्वं न स्यात् सविशेष श्रुतीनां वैय्यर्थ्यमपि न स्यादिति । एवम् उपनिषत्सु सविशेषश्रुतीनां निर्विशेषश्रुत्युपजीव्यत्वन्यायेन ग्रहणम्। श्रुतिर्हि शब्दः। निर्धर्मकस्य तस्य ब्रह्मणश्च शब्देन निरूपणमशक्यम् । तत्र च धर्माभावात्तन्निरूपणमभावमुखेन क्रियते श्रुतिषु । पूर्वं धर्मान्निरूप्य ततः अस्थूलादि वाक्यैर्धर्मान्निशेधति श्रुतिः। अभावस्य प्रतियोगिनिरूपणाधीननिरूपणत्वात्। एवं प्रथमं ''द्वे वाव ब्रह्मणो रूपे मूर्त्तं चैवामूर्त्तं च'' इति विशेषं निरूप्य ततः ''अथात आदेशो नेति नेति'' इति निषेधति ।

अत्र ब्रह्मणि श्रुतिभिः कल्पितानां विशेषाणां शुक्तिरजतवदविद्याकल्पितत्वात्तव मते तु (मायावादिमते तु) सृष्टिनिरूपकाणि वाक्यान्यसंगतानि स्युरिति । अत्र मायावादी कथयति —

नन्वस्ति अध्यारोपापदलक्षणा संगतिः। शुद्धब्रह्मणः दुर्ज्ञेयत्वेन तज्ज्ञापनाय जगज्जननादिकं प्रतिपाद्य उपासना द्वारा औपाधिके ब्रह्मणि बुद्धौ सिद्धायां शाखाऽरुन्धतीन्यायेन पूर्वपूर्वश्रुत्यनुभवाभासानामुत्तरोत्तरनिर्विशेषश्रुत्यनुभवबलात्तत्तन्निराकरणपूर्वकसूक्ष्मातिसूक्ष्म-तुरीयचैतन्यस्वरूपावबोधनेन पूर्वोक्तं मायिकमपोह्य निर्विशेषं ब्रह्म पश्चाद्बोध्यते स एवात्माऽद्वितीय एकः उपाधिना बहुधा भासते । एवमौपाधिकस्यैव ब्रह्मणः जगतः कारणत्वं नान्यस्येति । जगतः मायाकार्यत्वात् कार्यस्य तुच्छत्वेन तत्कारणेनाऽपि तुच्छत्वेन भाव्यम् । कारणसजातीयत्वात्कार्यस्येति चेन्मैवम् —

अभेदादनुपाधित्वाज्जगदप्रत्ययाप्तितः ।
सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधनम् ।।

(विद्व. ३. का.)

अत्र अभेदादिति । सविशेषनिर्विशेषयोर्भेदाभावादिति। अनुपाधित्वादिति। ब्रह्मणः उपाधिरेव नास्तीत्यर्थः। सर्वाधारत्वतः। सर्वविरुद्धधर्माश्रयत्वादिति । तथा च सविशेषनिर्विशेषश्रुतिवाक्ययोः श्रुतित्वाविशेषान्नैकतरबाधो युक्तः अप्रामाण्यापत्तेः। तथा हि । ब्रह्म श्रुत्येक समधिगम्यं न तु प्रमाणान्तरगम्यम् । सिद्धान्ते च सर्वासां श्रुतीनामविकलं प्रामाण्यम् । ''ब्रह्म पुनर्यादृशं वेदान्तेष्ववगतं तादृशमेव मन्तव्यं, अणुमात्रमन्यथा कल्पनेऽपि दोषः स्यात्'' इत्याचार्यवचनात् । ''योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते किं तेन न

कृतं पापं चौरेणात्मापहारिणा'' ''नैषा तर्केण मतिरापनेया'' इत्यादि श्रुतेश्च । अतः ''स हैतावानास'' ''तदात्मानं स्वयमकुरूत'' ''आत्मैवेदं सर्वं'' ''यतो वा इमानि भूतानि जायन्ते'' इत्यादि श्रुतीनाम् । ''जन्माद्यस्य यतः शास्त्रयोनित्वात्'' ''तत्तु समन्वयात्'' इत्यादि सूत्राणाम् । ''अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा'' ''जन्माद्यस्य यतोन्वयादितरतः'' इत्यादिस्मृतिप्रमाणैः शुद्धब्रह्मण एव सर्वकर्तृत्वं सर्वभोक्तृत्वम् ''अत्ता चराचर ग्रहणात्''। तत्कर्तृत्वं स्वाभाविकमेव न तु शाङ्करमतवन्मायिकमिति । ''स एकाकी न रमते स द्वितीयमैच्छत्'' इति श्रुतेः ''क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते'' इति स्मृतेश्च ब्रह्मैव रमणार्थं जगद्रूपेणाविर्भूय तत्र लीलां करोति, स्वयं च अविकृतमेव सत् परिणमते । तत्र दृष्टान्तः कामधेनुचिन्तामणिकल्पवृक्षप्रभृतयः स्पष्टाः। ''प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'' (१।४।२३) इति सूत्रात् ब्रह्म एव जगतः निमित्तसमवायिकारणमिति। ''यथा एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं भवति'' अत्र अलीकत्वनिवारणाय ''मृत्तिकेत्येव सत्यमिति'' उक्तम् । अतः प्रपञ्चो भगवत्कार्यः न तु मायाकार्यः। किन्त्वत्र केचिन्मुग्धाः संसारप्रपञ्चयोः भेदज्ञानशून्याः संसारं प्रपञ्चं च एकमेव मन्यमानाः संसारेण सह प्रापञ्चिकं जगदपि मायाकार्यं कथयन्तः मिथ्या मन्यन्ते तन्नयुक्तम् —

प्रपञ्चो भगवत्कार्यस्तद्रूपो मायया ऽभवत् ।
तच्छक्त्या ऽविद्ययात्वस्य जीवसंसार उच्यते ।।

(त.दी.नि. शा.प्र. २७)

इत्यत्र प्रकाशे ''।।अविद्ययेति।। अविद्यापि तच्छक्तिः। मुख्यासु द्वादशशक्तिषु गणनात् । श्रियापुष्ट्या गिरेति वाक्यात् । एवं सति ''स वै नैव रेमे, तस्मादेकाकी न रमते स द्वितीयमैच्छत्, स हैतावानासेति'' श्रुतौ रमणार्थमेव प्रपञ्चरूपेणाविर्भावोक्तेर्वैचित्र्यं विना तदसम्भवो यतः। तस्माद्धेतोरस्य भगवतः शक्त्या अविद्यया जीवस्य संसार उच्यते न तु जायते। अभिमत्यात्मकत्वात् । असत्त्वेनास्य गणनात्। अज्ञानं भ्रमः असदित्यादिशब्दा अहं ममेति रूपे संसार एव प्रवर्त्तन्ते, न तु प्रपञ्च इत्यर्थः। तस्य ब्रह्मात्मकत्वात्।'' अतः सिद्धान्ते ''तदनन्यत्वमारम्भणशब्दादिभ्यः'' (ब्र.सू. २।१।१४) इति सूत्र न्यायेन जगतो ब्रह्मणश्चाभेदः। प्रापञ्चिकजगतः मायिकत्वं नास्ति किन्तु ब्रह्मणः आधिभौतिकस्वरूपं जगत्, ब्रह्मणः आध्यात्मिकं स्वरूपमक्षरब्रह्म, तथैव आधिदैविकं स्वरूपं परब्रह्म। एवमनेन प्रकारेण ब्रह्म जगतोरनन्यत्वमिति । कार्यस्य कारणानन्यत्वं, मिथ्यात्वं न भवति ।

अतः एकस्यैव शुद्धब्रह्मणः आधाराधेयत्वं कारणकार्यत्वादिकं स्वीकर्त्तव्यम्। तथा च मायावादिमते तु भगवान्व्यासः ''अथातो ब्रह्मजिज्ञासा'' इति निर्गुणनिराकारब्रह्मविषयकजिज्ञासां प्रतिज्ञाय ''जन्माद्यस्येत्यादि सूत्रैर्जगत्कर्तृत्वविशिष्टं ब्रह्म प्रतिपादयति । अतः भवद्विवक्षित-निर्विशेषब्रह्मजिज्ञासाप्रतिज्ञानन्तरं सविशेषब्रह्मप्रतिपादनात् व्यासप्रतिज्ञाहानिरूपमहान्दोषापत्तिः, सूत्रेषु च कृतहान्यकृताभ्यागमदोषप्रसङ्गः। तथा चाविद्योपाधिस्वीकारे अविद्याब्रह्मणोरुपाध्युपाधेय-योरुभयोरनादित्वेनोपहितस्याप्यनादितया तादृशमायोपहितस्यैव च त्वन्मते कर्तृत्वेन स्वीकारादनवरतं सर्ग एव स्यान्न प्रलयः कदाचन ।

तथा चात्र मायावादी प्रष्टव्य:। यद्भवताऽत्र एतादृशी मायिकी कार्यकारणादि व्यवस्था कुत्रत: कृता, यदि श्रुतित: तर्हि तु "अस्य महतो भूतस्य नि:श्वसितमेतद्यदृग्वेदो यजुर्वेद:" इत्यादि: "यो ब्रह्माणं विदधाति पूर्वं" "यो वै वेदांश्च प्रहिणोति तस्मै, वेदो नारायण: साक्षात् स्वयम्भूरिति शुश्रुम" "वेदैश्च सर्वैरहमेव वेद्य:" इत्यादि श्रुतिस्मृतिभ्यां वेद: किमु स्वस्यैवाज्ञानकल्पितत्वं वदति ?। तथा च त्वन्मतानुसारेण तु प्रथमं वेदानां पारमार्थिकसत्त्वं ज्ञात्वा तदनन्तरञ्च श्रुत्यादीनामौदासीन्येन सम्यगध्ययनेन च श्रुते: श्रुतित एवाज्ञानकल्पितत्त्वं श्रुत्वा गुरूपदेशादिकै: "न माता पिता वा न देवा न लोका न वेदा" तथा च "न शास्ता न शास्त्रं न शिष्यो न शिक्षा" इत्यादि प्रमाणै: असत्तुल्यै: परमार्थरूपं ब्रह्मज्ञानं कथं फलिष्यतीति विचार्य न कोऽपि प्रवर्त्तेत। अप्रवर्त्तनेन च वेदमार्गोच्छेदापत्ति:। अत: समग्रवेदस्य प्रामाण्यमविशेषेणैव ग्राह्यम्। वस्तुतस्तु ब्रह्मणोऽलौकिकत्वादचिन्त्यैश्वर्यत्वाच्छ्रुत्येकसमधिगम्यत्वाच्च विशेषतो लोकयुक्तीनां तत्राप्रवेश एवेत्युक्तम्। तस्माच्छुद्धं ब्रह्मैव जगन्निमित्तसमवायिकारणमिति सिद्धम्।

सिद्धान्तस्तु - **उत्पत्तिस्थितिनाशानां जगत: कर्त्तृ वै बृहत्।**
वेदेनबोधितं तद्धि नान्यथा भवितुं क्षमम्।। (अ.भा.का. १।१।)

।। सिद्धान्ते जगत्संसारयोर्भेद: ।।

सिद्धान्ते प्रपञ्च: - जगद् भिन्न:, अहंताममतात्मक: संसार: भिन्न:। अयं सूक्ष्मभेद: केनाप्याचार्यै: न कृत:। एतयो: पृथक्त्वं श्रीवल्लभाचार्यचरणैरेव श्रुतिस्मृतिसूत्रभागवतवाक्यानां समन्वयेन शास्त्रीययुक्त्योपपाद्य प्रकटीकृतम्। जगत्संसारयो: लक्षणम् पृथक्। भगवदिच्छया चिदानन्दांशतिरोभावेन सदंशादाविर्भावितं यत्तज्जगदिति कथ्यते शास्त्रेषु। अविद्यया जीवेन कल्पितोऽहंताममातात्मक: य: स: संसार इति उच्यते शास्त्रेषु। अस्या अविद्याया: पञ्चपर्वाणि—

स्वरूपाज्ञानमेकं हि पर्व देहेन्द्रियासव:।
अन्त:करणमेषां हि चतुर्द्धाऽध्यास उच्यते।
पंचपर्वा त्वविद्येयं यद्बद्धो याति संसृतिम्।।

(शा.प्र.का. ३६)

इत्याचार्यवचनात् — स्वरूपाज्ञानं, देहाध्यास:, इन्द्रियाध्यास:, प्राणाध्यास: अन्त:करणाध्यासश्चेति पञ्चपर्वाणि। अनयाऽविद्यया बद्धो जीव: संसृतिं नाम संसारं प्राप्नोति। अत: संसृते: अविद्याकल्पितत्वाज्ज्ञानेन नाश:। ब्रह्मरूपत्वाज्जगतस्तु न नाश:। ननु द्वैतमाविद्यकं मिथ्या इति चेन्न। "स एकाकी न रमते स द्वितीयमैच्छत्" "तदात्मानं स्वयमकुरूत" इत्यादिश्रुते: द्वैतं नाविद्यकं, ब्रह्मेच्छया उद्भूतत्वात्, किन्तु द्वैतज्ञानमाविद्यकम्। अनेन द्वैतज्ञानेन जीव एव बध्यते न तु ब्रह्म। अत्र अविद्याया: ब्रह्मगतत्वं न सम्भवति। तत्र प्रथमन्तु मायावादे उपाध्युपाधेययोरविद्याब्रह्मणोर्द्वयोरनादित्वेन तयोर्मध्ये

सम्बन्धः कः त्वया स्वीक्रियते ? तत्र संयोगादिसम्बन्धे स्वीक्रियमाणे तयोर्विभुत्वसामान्यात् नित्यसम्बन्धाऽऽपत्त्याऽनिर्मोक्षप्रसङ्गः। तथा च नाप्यध्यासः तस्याप्यभावात् । शुद्धब्रह्मणि अविद्योपाधिसम्बन्धः सर्वथाऽशक्यवचनः तस्य अज्ञत्वापादकत्वात् । अतः अविद्यायाः जीवगतत्वमेव न तु ब्रह्मगतत्वमिति—

''एकस्यैव ममांशस्य जीवस्यैव महामते ।
बन्धोऽस्याऽविद्ययाऽनादिर्विद्यया च तथेतरः ।।''

(श्रीमद्भागवत)

तथा च—''अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः'' इत्यत्र जीवोत्पत्तौ अविद्यायाः न कारणत्वं किन्तु भगवदिच्छयारमणार्थमानन्दांशतिरोभावे सोऽविद्यया बध्यते। तत्रापि भगवदिच्छैव । तदा सः संसारीत्यभिधीयते । एवमहम्ममतात्मकः संसारः अविद्याजन्यः अतः ज्ञानेन नश्यति। तथा हि। जगतः निमित्तसमवायिकारणं ब्रह्म । संसारस्य कल्पितत्वात् अविद्या तन्निमित्तकारणम् । संसारस्य मिथ्यात्वेन स ज्ञानोत्पत्तेः प्राक् अवतिष्ठते । अतएव मुक्तौ तल्लयः— नाशः, न तु प्रपञ्चस्येति, भगवत्कार्यत्वात् ।

''संसारस्य लयो मुक्तौ न प्रपञ्चस्य कर्हिचित्''

(शा.प्र.का. २८)

अतः संसार निवृत्तौ जीवन्मुक्तिः। तत्र देहेन्द्रियादीनामध्यासमात्रस्य निवृत्तिः न तु देहेन्द्रियादीनाम् । यतस्ते जगदन्तः पातिनः। सुखदुःखाद्यधिष्ठानं संसारः न तु जगत् । तत्र दृष्टान्तः जीवन्मुक्ताः। एतादृशाः बहवो जीवन्मुक्ताः अस्यां भारतभूमौ संजाता, येषां देहेन्द्रियादीनां सत्यत्वेपि न सुखदुःखानुभवः। अतः जगत्सत्यं संसारो मिथ्या इति जगत्संसारयोर्भेदः श्रीवल्लभाचार्यैरेव प्रकटितः इत्यलं विस्तरेण ।

।। सिद्धान्ते जीवस्वरूपम् ।।

''जीवस्त्वाराग्रमात्रो हि गन्धवद् व्यतिरेकवान्''

(शा.प्र.का. ५७)

''स ईक्षां चक्रे'' ''एकोऽहं बहुस्यां प्रजायेय'' ''स एकाकी न रमते'' ''स द्वितीयमैच्छत्'' ''तदात्मानं स्वयमकुरुत'' इत्यादिश्रुते ब्रह्म स्वेच्छयैव क्रीडनार्थं स्वकीयमानन्दाशं तिरोभावयित्वा जीवस्वरूपं गृह्णाति । एवं बहुभवनेच्छया ब्रह्मणः सकाशाद् ''यथाग्नेः क्षुद्राः विस्फुलिङ्गाः व्युच्चरन्ति'' तथैव सूक्ष्मपरिच्छिन्नाः चित्प्रधानाः जीवांशाः निर्गच्छन्ति । तस्य जीवस्य परिमाणमाराग्रमात्रोऽणुः ''आराग्रमात्रो ह्यपरोऽपि दृष्टः'' इति श्रुतेः। ननु आराग्रमात्रत्वे कथं सर्वदेहव्यापीति प्रश्ने—गन्धवद् व्यतिरेकवानिति । यथा पुष्पगन्धः पुष्पापेक्षयाऽधिकदेशं व्याप्नोति तथैवाणुमात्रमपि चैतन्यं सर्वदेहव्यापीत्यर्थः। अतः ''ममैवांशो जीवलोके जीवभूतः सनातनः'' ''अंशो नानाव्यपदेशात्'' इत्यादि प्रमाणाज्जीवो ब्रह्मणोंश एवेति । ननु जीवस्याशंत्वस्वीकारे ब्रह्म सावयवं भवेज्जीवस्यावयववत्वादतः प्रतिबिम्बवादानुसारेण जीवस्थितिः

स्वीकर्तव्येति चेन्न । ब्रह्म प्रतिबिम्बो जीव इति पक्षस्तु सर्वथा न यौक्तिकः। प्रतिबिम्बवाद-स्वीकारे ब्रह्मणि दृष्टत्वापत्तिः, जीवस्य प्रतिबिम्बत्वे च बिम्बप्रतिबिम्बयोरेकत्र स्थितिर्न भवतीति, श्रुतौ तयोः जीवब्रह्मणोः "समानं वृक्षं परिषस्वजाते" इति वाक्येन एकत्र स्थितिप्रतिपादनाच्छ्रुतिव्याकोपः अतः जीवस्तु ब्रह्मणोंश एव । यतोऽत्र श्रुतीनामेव प्रामाण्यं ग्राह्यम्। न तु लौकिकयुक्तीनाम् । उक्तञ्चाचार्यैः —

अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते ।
तपसा वेद युक्त्या तु प्रसादात् परमात्मनः ।।

(अणु भा०का०१।१)

अत्र हि वेदार्थस्यालौकिकत्वात्तस्य युक्त्या न प्रतिपत्तिः। कथं तर्हि प्रतिपत्तिरिति प्रश्ने—वेदयुक्त्या, न्यग्रोधफलमाहरेत्यादिरूपया वेदोक्तयुक्त्या प्रतिपत्तव्यमिति । अत्र आचार्याः "नहि स्वबुद्ध्या वेदार्थं परिकल्प्य तदर्थं विचारः कर्तुं शक्यः ब्रह्म पुनर्यादृशं वेदान्तेष्ववगतं तादृशमेव मन्तव्यम् । अणुमात्रान्यथाकल्पनेऽपि दोषः स्यात्"। अतः विस्फुलिङ्गन्यायेन जडजीवानां निर्गमनम्। जडनिर्गमने चिदानन्दांशयोस्तिरोभावः। जीवनिर्गमने आनन्दांशतिरोभावः। एवं सच्चिदात्मकं उभयं ब्रह्माभिन्नं ब्रह्मरूपञ्च । अत एक विज्ञानेन सर्वविज्ञानमिति श्रुतिप्रतिज्ञा । नन्वेवमंशभूतस्य जीवस्य दुःखमशिनः ब्रह्मणोऽपि स्यादिति चेन्न । "अनश्नन्नन्यो अभिचाकशीति" "एकस्तथा सर्वभूतान्तरात्मा, न लिप्यते लोकदुःखेन बाह्यः" "न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा" इत्यादि श्रुतिस्मृतिप्रमाणैर्ब्रह्मणो निर्लेपत्वमुद्घोष्यते यतः सूर्यप्रकाशस्थघटपटादिवस्तुनो दोषेण यथा सूर्य प्रकाशो न दुष्यते तथैव जीवस्थ दुःखादि दोषैरंशि ब्रह्मापि न लिप्यते । अतः जीवब्रह्मसम्बन्धविचारे ब्रह्मणोंऽश एव जीव इति निर्णीयते । कुतः "अंशो नानाव्यपदेशात्" इति सूत्रात्—अत्र विद्वन्मण्डने प्रभुचरणाः आज्ञापयन्ति, "नानाव्यपदेशाद्, नानाविधो यो व्यपदेशः। क्वचिद्ब्रह्मत्वेन क्वचिदुत्पन्नत्वेन, क्वचिद्ज्ञत्वेन, क्वचिच्चिद्रूपत्वेन, क्वचिदीशितव्यत्वेन, अणुत्वेन च व्यापकत्वेन च, निरूपणादेकस्यैव विरूद्धधर्माश्रयत्वं ब्रह्मातिरिक्तस्य न सम्भवतीति ब्रह्मांश एव जीव इत्यर्थः। अथवा नाना व्यपदेशाद्भेदेन व्यपदेशात्तथेत्यर्थः" तात्पर्यं जीवस्य ब्रह्मोपाधिकत्वमौपचारिकमंशत्वमङ्गीकृत्य प्रतिम्बिम्बत्वेन अलीकत्वं न कल्पनीयम् । ब्रह्म वेदैकसमधिगम्यम् अतः यथा तत्र निरूपितं तथैव मन्तव्यम् "नैषातर्केण मतिरापनेया" "अलौकिकास्तु ये भावा न तास्तर्केण योजयेत्" इत्यादि श्रुतेः स्मृतेश्च ।

ब्रह्म पूर्णप्रकटानन्दम् जीवस्तु तिरोहितानन्दः। यदा भगवत्कृपया इच्छया च जीवे भगवान् आनन्दाशमाविर्भावयति तदोभयोर्जीवब्रह्मणोरभेदः। अत्र जहदजहल्लक्षणादि-कानामावश्यकता नास्ति "सर्वे वेदायत्पदमामनन्ति" इति श्रुतेः सर्वेवेदा ब्रह्मणोऽनवगाह्य-माहात्म्यमेव बोधयितुं प्रवृत्ताः। यदा जीवः तिरोहितानन्दः तदा तत्र ब्रह्मत्वं नास्ति "अधिकं तु भेद निर्देशादिति" (२।१।२२) सूत्रात् । अत्र भाष्यम् "तु शब्दः पक्षं व्यावर्तयति । यदि ब्रह्म तावन्मात्रं भवेत् तदायं दोषः। तत् पुनर्जीवाज्जगतश्चाधिकम्। कुतः ?। भेदनिर्देशाद्"।

अनेन स्पष्टं भवति यत् तत्साम्यमाधिक्यराहित्यं अस्ति । ''नतत्समश्चाभ्यधिकश्चदृश्यते'' इति श्रुतेः। एवं चाशांशिभावेनैव जीवब्रह्मणोरभेदः श्रुतौ पठ्यते । अत्र मायावादिनः ''तत्त्वमसी'' त्येतन्मात्रं महावाक्यं मन्वानाः जीवमेव ब्रह्मेति कथयन्ति । अत्र प्रसङ्गप्राप्तः सर्वमतसंग्रहश्लोकः —

''केचित्तत्त्वमसीति वाक्यविषये तत्त्वम्पदे लक्षणां,
केचित्तत्रङसो लुकं विदधते भाष्यं तु केचिज्जगुः ।
केचिच्चिद्विषयादभेदमपरे छिन्दन्त्यतत्त्वं पदं,
सिद्धान्ते तु सुवर्णवज्जगदिदं ब्रह्मैव जीवस्तथा ।।''

अस्यार्थस्तु केचित्=शङ्कराचार्याः तत् पदेन सर्वज्ञं ब्रह्म त्वम्पदेन अल्पज्ञं जीवस्तयोरभेदो न सम्भवत्यतः 'सोऽयं देवदत्त' इति वज्जहदजहल्लक्षणां स्वीकुर्वन्ति । केचिद् रामानुजमाध्वशैवाः तत्सम्बन्धीत्वमिति मन्यमानाः ङसो लुकं विदधते । तस्य त्वमसि । तत्सम्बन्ध्यसीति । केचिद् निम्बार्काश्चित्वसाधर्म्यादभेदः। अपरे माध्वैकदेशिनः 'अतत् त्वमसि' अर्थात् जीवोऽसि इति पदं छिन्दन्ति । सिद्धान्ते यथा सुवर्णांशाः सुवर्णरूपाः तथा ब्रह्मणोंऽशा ब्रह्मरूपाः। ब्रह्मणः सदंशः जगत् चिदंशो जीवः इति । वस्तुतः मतान्तरवत् 'तत्त्वमसी' त्येतन्मात्रं महावाक्यमिति न किन्त्वखिलं प्रपाठकम् ग्राह्यम् । वेदानामर्थानुसंधानं प्रकरणेन कार्यम् ''प्रकरणाच्च'' इति सूत्रात् प्रकरणानुरोधेनैव अर्थः ग्राह्यो न तु प्रकरणं हित्वा स्वानुकूलोऽर्थः कार्य इति ।

अस्य जीवस्य त्रिविधाऽवस्था भवति। शुद्धः मुक्तः संसारीति भेदात् । व्युच्चरणोत्तर-मानन्दांशतिरोभावे सति अविद्यासम्बन्धात्पूर्वा याऽवस्था तस्यामवस्थायां शुद्धजीव इति कथ्यते। मायासम्बन्धरहितत्वं शुद्धत्वम् । ''पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्ध विपर्ययौ'' (३।२।५) इति तत्वसूत्रात् । परस्य भगवतोऽभितोध्यानं नाम सर्वतो भोगेच्छा तेनानन्दांशः तिरोहितः येन जीवभावः । ततश्चतुर्णामैश्वर्यवीर्ययशश्रीरूपाणां धर्माणां तिरोभावाद्बन्धः, ज्ञानवैराग्यतिरोभावाद्विपर्ययः। तदा भगवान् केषुचिज्जीवेषु मुक्त्यधिकाररूपं दैवत्वं सम्पादयति तदैव जीवाः मुक्तियोग्याः भवन्ति। पञ्चपर्वात्मिकयाऽविद्यया बद्धः जीवः संसृतिं याति । ततः संसारधर्माननुभवन् भगवत्कृपया सत्संगादिना पञ्चपर्वात्मिकां विद्यां प्राप्य परमानन्दलक्षणभूतां, मुक्तिं प्राप्नोति ।

वैराग्यं सांख्ययोगौ च तपो भक्तिश्च केशवे ।
पञ्चपर्वेति विद्येयं यया विद्वान् हरिं विशेत् ।।

(शा.प्र.का. ४८)

इति वाक्यात् यावत् विद्यां न प्राप्नोति तावत् संसारीति व्यवह्रियते । तदग्रे मुक्त इति । मुक्ता अपि द्विविधाः जीवन्मुक्ताः मुक्ताश्चेति । जीवन्मुक्ताः सनकादयः। मुक्ताः अक्षरब्रह्मप्राप्ताः। अत्रापि मूलतः जीवाः द्विविधाः। दैवाः आसुराश्चः। तत्र दैवाः द्विविधाः, मर्यादामार्गीयाः पुष्टिमार्गीयाश्च । एतयोः मुक्तौ भेदः वर्त्तते तं चाग्रे दर्शयिष्यामः ।

।। अविकृतपरिणामवादः ।।

श्रीमदाचार्यचरणैर्हि साकारब्रह्मवादः प्रामुख्येन स्वसिद्धान्तत्वेन संस्थापितः। प्रस्थानतः प्रमेयतः साधनतः फलतः सर्वशास्त्रतश्च ब्रह्मातिरिक्तपदार्थाभावात् सर्वसमन्वयो ब्रह्मण्येवेति सिद्धान्तः। तच्च कनकमृत्कामधेनुचिन्तामणिकल्पवृक्षादिरिव स्वयमविकृतमेव स्थितं सत् जगद्रूपेण परिणमतेति सिद्धान्तः। यथा कनकं कटककुण्डलादिपरिणामदशायां कनकत्वान्न विक्रियते तथैव ब्रह्मापि जगद्रूपेण परिणामेप्यविकृतम् । अयमेव श्रुतिस्मृतिसूत्र-श्रीभागवतप्रतिपादितः अविकृतपरिणामवादः। एकमेवाविकृतं कारणं नानाकार्यरूपं भवति । तेनैव एकविज्ञानेन सर्व विज्ञानं भवति । एक विज्ञानेन सर्वविज्ञानरूपवेदान्तानां प्रतिज्ञा तदैव सफला भवति यदा शुद्धब्रह्म एव जगत्कारणं (निमित्त समवायिकारणं) भवेत्। अयं वादः वैदिक इति राद्धान्तः। अतः अविकृतपरिणामवादसाधकानि वचांसि अधुना किंचित् प्रदश्र्यन्ते ।

श्रुतिषु ''एकं सद्विप्रा बहुधा वदन्ति'' ''असद्वा इदमग्र आसीत्ततो वै सदजायत'' (आभ्याम् श्रुतिभ्याम् जगदव्यक्तं व्यक्तमभूदित्युक्तम्भवति) ''ब्रह्म विश्वमिदं जगद्'' ''तमेव भान्तमनुभान्ति सर्वं तस्य भासा सर्वमिदं विभाति'' सर्वकामः सर्वगन्धः सर्वरसः सर्वकर्त्ता सर्वभोक्ता य स सर्वविद'' ''परास्य शक्तिर्विविधैवश्रूयते स्वाभाविकी ज्ञानबलक्रिया च'' (आभिः श्रुतिभिः सर्वकर्तृत्वादीनां स्वाभाविकधर्मत्वं उक्तम्) ''अणोरणीयान्महतो महीयान्'' (अनया श्रुत्या ब्रह्मणो विरुद्धधर्माश्रयत्वं बोध्यते) ''एकमेवा द्वितीयं ब्रह्म, एकोऽहं बहुस्यां प्रजायेय, स एकाकी न रमते स द्वितीयमैच्छत्'', ''स हैतावानास'' (आभिः श्रुतिभिः अविकृतपरिणामवादो बोध्यते) ''एतदात्म्यमिदं सर्वम् तत्सत्यं स आत्मा तत्वमसि'' ''एष ह्येवानन्दयति'' ''एकोदेवो सर्वभूतेषु गूढ़ः'' (आभिः श्रुतिभिः सर्वान्तर्यामित्वम्) ''सर्वं खल्विदं ब्रह्म'' ''कथमसतः सज्जायेत'' 'तत्सत्यमित्याचक्षते'' इत्यादीनि ।

स्मृतिषु = ''अहं सर्वस्यजगतः प्रभवः प्रलयस्तथा'' मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्'' ''अहं बीजप्रदः पिता'' ''वासुदेवः सर्वमिति'' इत्यादीनि ।

सूत्राणि = ''जन्माद्यस्य यतः शास्त्रयोनित्वात्'' (१।१।२) तत्तु समन्वयात् (१।१।३) आत्मकृतेः परिणामात् (१।४।२६) योनिश्च हि गीयते (१।४।२३) तदनन्यत्वमारम्भणशब्दादिभ्यः (२।१।१४) सर्वधर्मोपपत्तेश्च (२।१।३७) प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः (३।२।२२) प्रकाशाश्रयवद्वा तेजस्त्वात् (३।२।२८) इत्यादीनि ।

श्रीभागवते = ''जन्माद्यस्य यतोन्वयादितरतः०'' ''त्वय्यग्र आसीत्०'' ''क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते०'' ''विश्वस्य कर्त्ता भुवनस्य गोप्ता०'' इत्यादीनि ।

इदमत्रावधेयम् = अन्यैः आचार्यशङ्करप्रभृतिभिराचार्यैः स्वस्वसिद्धान्तसाधने प्रमाणत्वेन प्रस्थानत्रयी स्वीकृता उपनिषद्, भगवद्गीता व्याससूत्राणि च । किन्तवस्माकमाचार्यैः प्रमाणत्वेन प्रस्थानचतुष्टयम् स्वीकृतम् तच्च —

"वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ।।
उत्तरं पूर्वसन्देहवारकं परिकीर्त्तितम् ।।"

(शा.प्र.का.७।८)

अत्र प्रकाशः ="वेदाः सर्व एव काण्डद्वयस्थिताः। अर्थवादादिरूपा अपि । स्मृतित्वेन कृष्णवाक्यानि वेदत्वेऽपि पृथगुक्तानि। व्याससूत्राणि चकाराज्जैमिनिसूत्राणि च । एवकारेण व्याससूत्राविरोधेनैव तदङ्गीकरणम् । ....व्यासस्य समाधिभाषा भागवतम् । ....यावत् समाधौ स्वयमनुभूय निरूपितं सा समाधिभाषा । एतच्चतुष्टयमेकवाक्यतापन्नं प्रमाजनकमित्यर्थः।"

आचार्यैः श्रीभागवतस्यापि प्रस्थाने ग्रहणं कृतम् । अत्र उत्तरोत्तरं पूर्वपूर्वसन्देह-वारकम् । अर्थात् सर्वसन्देहवारकत्वं श्रीमद्भागवते फलितम् । श्रीभागवतस्य "निगम कल्पतरोर्गलितं फलम्" इत्यनेन फलरूपत्वादिति।

।। आविर्भावतिरोभावः ।।

तदेतदक्षयं नित्यं जगन्मुनिवराऽखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवत् ।।

(विष्णु०पु०अं०प्र०)

वस्तुतः आविर्भावतिरोभावौ ब्रह्मणः शक्ती । "आविर्भावतिरोभावौ शक्तिर्वै मुरवैरिणः" एते शक्ती ब्रह्मतोऽभिन्ने ब्रह्माधीने च । "सर्वं खल्विदं ब्रह्मेति" श्रुतेः सर्वस्य ब्रह्मरूपत्वेन ब्रह्म स्वेच्छया जगद्रूपेणाविकृतपरिणामं प्राप्य पुनः स्वेच्छयैव सर्वमन्तर्भावयति । इमावेवा-विर्भावतिरोभावौ उत्पत्तिविनाशावित्युच्येते लोकैः। वस्तुतस्तुः="नासतो विद्यते भावो नाभावो विद्यते सतः" (गीता) इति वाक्यात् असतः भावः नास्ति सतः अभावः नास्ति । ब्रह्मवादे सर्वत्र ब्रह्मस्फूर्त्त्याऽभावस्य प्रश्न एव नास्ति । ननु तदा भावित्वेन भूतत्वेन वस्तुनोः सत्ता न स्यात् तथा च घटादेः प्रागभावप्रध्वंसाभावान्योन्याभावात्यन्ताभावादि निषेधात् सर्वव्यवहा-रोच्छेदः। इति चेन्मैवम् । सर्वत्र भगवदिच्छाया एव नियामकत्वात् —

"एवं सति यत्कालावच्छेदेन सर्वेषां मिथोऽनुभवाविषयत्वं भगवदभिमतं स प्रलयकाल इति निगद्यते। यदवच्छेदेन सर्वेषां मिथोऽनुभवविषयत्वं तथा स सृष्टिकाल इत्युच्यते। सर्वत्र विशिष्टेच्छैव नियामिकेति सर्वमनवद्यम्"। (विद्वन्मण्डने)

एवं च निर्गुणमविकृतं नित्यशक्तिमद्ब्रह्माविर्भावतिरोभावाभ्यामक्षरजीवजगद्रूपैः स्वेच्छया क्रीडति इति । अतः प्राग्भावादयः सर्वे अत्रैव अन्तर्निहिताः सर्वस्य ब्रह्मात्मकत्वात्सिद्धान्तेऽत्यन्ताभावाभावः । "एवं सत्यस्मिन्कालेऽस्मिन्देशे इदंकार्यमेवं भवत्वितीच्छाविषयत्वमाविर्भावः तदा तत्र तन्मा भवत्वितीच्छा विषयत्वं तिरोभावः"। (विद्वन्मण्डने)

अतः एवोच्यते "अनुभवविषयत्वयोग्यता आविर्भावः। तदविषयत्वयोग्यता तिरोभावः। ते च वस्तुसत्त्वेनैवावच्छिद्येते । न ह्यलीके ते सम्भवतः तयोर्धर्मत्त्वेन निराश्रयत्वासम्भवात्"। (विद्वन्मण्डने)

तस्मात् "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यमि" त्यादिश्रुतेः भगवत्कार्यरूपप्रपञ्चस्यापि ब्रह्मात्म त्वे नावगमात्पुरुषस्य नित्यत्वेन तदात्मकस्यापि नित्यवर्त्तमानत्वेन स्थितत्त्वाज्जगतः उत्पत्तिनाशौ आविर्भावतिरोभावाभ्यामेव संगच्छेते । अतः आविर्भावतिरोभावेनैव जगतो जन्मनाश इति । जन्म आविर्भाव वाचकः नाशः तिरोभाववाचकः। "आत्मत आविर्भावतिरोभावौ" इति छान्दोग्यश्रुतेः एतयोराविर्भावतिरोभावयोरनित्यत्वादिकं न शङ्कनीयमिति ।

।। ब्रह्मणः विरुद्धधर्माश्रयत्वम् ।।

ननु ब्रह्मणि सर्वधर्मयुक्तत्वस्वीकारे तत्र विरूद्धधर्माणामपि समावेशात् एकमेव वस्तु एकस्मिन्नेव समये एककालावच्छेदेन द्विधा भवितुं न शक्नोत्यतः निर्धर्मकं निर्विशेषं निराकारमेव ब्रह्म स्वीकार्यम्, तत्तु केवलं मायावशात्सगुणं साकारं प्रतिभासत इति चेन्न। केवलश्रुतिप्रतिपाद्ये ब्रह्मणि केवलयुक्त्युपयोगस्यानुपयुक्तत्वाच्छ्रुतौ च "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्यादिना ब्रह्मणि धर्मान्निषिध्य पुनस्तत्प्रकरणे एव "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" इत्यादिना आनन्दधर्मस्य कथनम् । अत एव व्याससूत्रे "दर्शनाच्च" इति सूत्रात् भगवति सर्वे विरुद्धधर्माः दृश्यन्ते अतः ब्रह्मणः सर्वविरुद्धधर्माश्रयत्वं श्रुतिस्मृतिप्रत्यक्षसिद्धम् । तथा च "प्रकृतैतावत्त्वं हि प्रतिषेधति ब्रवीति च ततो भूयः" (३।२।२२) इत्यनेन परमार्थतः शास्त्रतः विरोधपरिहारं कृत्वा युक्त्याऽपि विरोधपरिहारः क्रियते । ब्रह्मणि प्रकृतैतावत्त्वं नाम प्राकृतधर्मान्निषिध्य ततः तदनन्तरं भूयः पुनः अप्राकृतधर्मान् ब्रवीति इति । एवं च ब्रह्मणि सर्वे अप्राकृताः अलौकिकाः विरुद्धा अपि धर्माः सन्ति । किन्तु ते स्वाभाविका एव न तु मायिकाः। "उभयव्यपदेशादहि कुण्डलवत्" (३।२।२७) प्रकाशाश्रयवद्वा तेजस्त्वात्" (३।२।२८) इत्यादिना ब्रह्मणि विरुद्धधर्मवत्वस्वीकारः। ब्रह्मणि विरुद्धधर्मवत्वन्तु श्रुति सिद्धमेवास्ति । "अणोरणीयान्महतो महीयान्" "समो नागेन समो मशकेन" "न तत्समश्चाभ्यधिकं तु दृश्यते" इत्याद्यनेकैः शास्त्रवाक्यैः अनवगाह्यमाहात्म्ये ब्रह्मणि सर्वे विरुद्धधर्मा सहजतया विराजन्ते। एकस्मिन्समये एककालावच्छेदेन ब्रह्म द्विधा भवितुमपि शक्नोति तथा च एककालावच्छेदेन एकमेव ब्रह्म अनेकत्रस्थातुमपि शक्तम् । यथा षोडशसहस्रमहिषीनामन्तःपुरे । अयमनुभवः श्रीनारदेन प्रत्यक्षीकृतः। अतः नारदानुभवप्रामाण्यादपि ब्रह्म विरुद्धसर्वधर्माश्रयः, कर्त्तु अकर्त्तुं अन्यथा कर्त्तुं समर्थम् एवञ्च लोकेऽपि विरुद्धदयामारकत्वादीनि विषयभेदेनैकस्मिन् क्षणे एकस्यामेवव्यक्तौ प्रतीयन्ते तदाऽलौकिके किमु । अत्र श्रीपुरुषोत्तमचरणाः "एवञ्च शब्दबलविचारेण विरुद्धसर्वधर्माश्रयो ब्रह्मेति निर्णयः। श्रुत्युक्तयुक्त्या विचारे तु लौकिकधर्मशून्यमलौकिकसर्वधर्मयुक्तमिति निर्णयः। अर्थबलविचारे तु विरुद्धसर्वधर्मरूपमिति निर्णय इति बोधनार्थमत्र त्रेधा विचारितम् ।" अतो ब्रह्मणो विरुद्धधर्मवत्वं न दूषणाय अपितु भूषणाय भवति। एवमेव ब्रह्मणि वैषम्यनैर्घृण्यादयः

न सम्भवति आत्मसृष्टत्वादिति उच्यते च ''आत्मसृष्टेर्न वैषम्यं नैर्घृण्यं चापि विद्यते'' इत्याचार्याः॥

।। भगवल्लीला ।।

किमु भगवल्लीलायाः मायिकत्वमुत न वेति विचारे भगवत्येकनिष्ठत्वात् सच्चिदानन्दात्मके ब्रह्मण्यनन्यत्वेन स्थितत्वात् स्वरूपात्मकत्वान्न मायिकत्वमिति । भगवल्लीला किमपि प्रयोजनमधिकृत्य न प्रचलति ''न प्रयोजनवत्त्वात्'' (ब्र.सू. २।१।३२) इति सूत्रन्यायेन । किन्तु ''लोकवत्तु लीला कैवल्यम्'' (ब्र.सू. २।१।३३) इति सूत्रात् सा लीलैव कैवल्यं मोक्षः। तस्याः कीर्त्तनेऽपि मोक्षः। इति भाष्ये प्रतिपादनाल्लीलायाः स्वरूपात्मकत्वाद्भगवत्कृतत्वादलौकिकत्वाच्च न सर्वथा मायिकत्वमिति वाच्यम् । अस्याः लीलायाः लक्षणं यथा सुबोधिन्याम् = ''कौतुकाधिष्ठितेन अनायासत्वेन क्रियमाणं कर्म लीला'' यद्वा ''अनायासेन हर्षात्क्रियमाणा चेष्टा लीला'' इति । नन्विहैव दृश्यमानगिरिगह्वरकाननादि- सम्बन्धि लीलायाः प्रपञ्चमध्यपातित्वादनित्यत्वमिति चेन्न । ''प्रपञ्चोभगवत्कार्यः'' इत्याचार्यवचनात् प्रपञ्चस्य भगवत्कार्यत्वेन भगवत्कार्यरूपप्रपञ्च-सम्बन्धिनीनां लीलानां —

''जयति जननिवासो देवकी जन्मवादो
यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मम् ।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन
व्रजपुरवनितानां वर्धयन् कामदेवम् ।।

(भागवते १०।९०।४८)

इति चतुर्थप्रस्थानश्रीभागवतप्रमाणात्—श्लोके 'जयतीति' वर्त्तमानप्रयोगेणातीतानां व्रजलीला-नामपि वर्त्तमानत्वं बोधयन् श्लोकसमाप्तौ 'वर्धयन्निति' पदेन शतृप्रत्ययेन तस्मिन्कथाकाले तस्मिन् क्षणे तत्रैव सर्वपरोक्षलीलानां स्थितिः उच्यते । तथा च भगवतः नामकरणप्रसङ्गे भागवते गर्गवाक्येनापि भगवल्लीलानां त्रिकालातीतत्वं नित्यवर्त्तमानत्वं प्रवर्त्तमानत्वञ्च ज्ञाप्यते ।

''बहूनि सन्ति नामानि रूपाणि च सुतस्य ते ।
गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ।।

(भागवते १०।८।१५)

इत्यत्र 'सन्तीति' पदप्रयोगदर्शनाल्लीलानां नित्यवर्त्तमानत्वं स्पष्टमेव। ननु लोके पाचकपाठकवद् भवतु नाम, यथा पाठनकार्ये अप्रवृत्तेऽपि पाठकोऽयमिति प्रयोगदर्शनादत्रापि तथैवास्त्विति चेन्नैतत् । लोकासिद्धत्वादलौकिकीलीलालोकसम्बन्धिन्यपि लोकदृष्टान्तेन न साधनीया । लोके तु भीरुपुरुषेऽपि नरसिंहवीरवरेत्यादिनामनिदर्शनान्न तथा । अत्र तु गर्गवाक्यानुसारेण यथा नाम, तथा गुणाः, यथा च कर्म तथा रूपमिति । तच्च गां

पालयतीति गोपालः, मुक्तिं ददातीति मुकुन्दः इत्यादिः। तथा हि नामकरणसमये लीलानाम्भावित्वाल्लीलानुसारिनामकरणमसम्भवमिति न शङ्क्यम्, भगवल्लीलायाः नित्यत्वान्नित्यप्रवर्त्तमानत्वाच्चेति । एवं पूतनाशकटभञ्जनकालियदमनादिलीलानां पूर्वमेव सिद्धत्वादपि भगवदिच्छयाऽनाविर्भावः। अतः भगवल्लीलानां नित्यसिद्धत्वात्कालाद्यनवच्छिन्नत्वात्सर्वत्रैकत्र च सर्वरूपेण भिन्नभिन्नरूपेण च यथा तथा भगवदिच्छयैव स्थिततत्वान्न कदापि मायिकत्वमिति । ननु भवतु नाम अलौकिकीनां भगवल्लीलानाममायिकत्वं किन्तु लोकवल्लीलानां तु मायिकत्वं भवति न वेति प्रश्ने सर्वथा तदपि नेत्युत्तरम् । "तत्त्वभावे सन्ध्यवदुपपत्तेः" (ब्र.सू. ४।४।१३) इति सूत्रन्यायेन भगवानासुरव्यामोहनार्थं स्वस्य प्राकृतत्वं प्रदर्शयति न तु तथा भवति । तत्र दूषितदृष्टीनामासुराणां कृते, यथा—श्रीमद्भगवद्गीतायाम्—"मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः" (१६।१८) इत्यत आरभ्य "ततो यान्त्यधमां गतिम्" (१६।२०) इत्यन्तमुक्तम् । एतेषामासुरत्वेन मुक्त्यनधिकारादिति । एवं भगवल्लीलायां दोषादर्शने उपपत्तिमुक्त्वा अग्रिम सूत्रेण गुणदर्शने उपपत्तिमाह "भावे जाग्रद्वद्" (ब्र.सू. ४।४।१४) इति सूत्रन्यायेन लौकिकवद्भासमाने भगवल्लीलापदार्थे लीलायाञ्च भक्तानां यद्दर्शनं तत्त्वलौकिकत्वेनैव। यथा मोहनिवृत्तस्य पुरुषस्य सत एवार्थस्य दर्शनम् । एवं भगवान् स्वेच्छयैव भक्तानां मायापसारणेन तत्तद्रसानुभवार्थं तत्तल्लीलां तथा तथा करोति । तथा च कुत्रचित् मोहलीलामपि करोति यथा सौभयुद्धे। तथा चासुराणां व्यामोहनार्थं लोकवल्लीलां करोतीति । अत्र भाष्ये = "अत एव लीलाया अनेकरूपत्त्वाद् ब्रह्मणश्च श्रुतौ सैन्धवदृष्टान्तेनैकरसत्वनिरूपणाच्छुद्धब्रह्मधर्मत्वं न सम्भवतीति शङ्कानिरासाय ("लोकवत्तु लीला कैवल्यम्") कैवल्यमित्युक्तम् । साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिषु याऽन्यधर्मराहित्यलक्षणा केवलतोक्ता सा लीलात्मिकैव लीलाविशिष्टमेव शुद्धं परं ब्रह्म, न कदाचित् तद्रहितमित्यर्थः पर्यवस्यति । तेन स्वरूपात्मकत्वं लीलायाः पर्यवस्यति । तेन च नित्यत्वम् ।" (ब्र.सू. ४।४।१४ भाष्ये) एवं यथा पृथिव्यामेव गन्धरूपेणाविर्भावः न जलादौ । एवमेवाविर्भावतिरोभावाभ्यां भगवल्लीलायाः अनुभवः अननुभवश्च भक्तानामभक्तानाञ्च कृते भवतः। अधुनाऽपि क्वचिद् क्वचिद् भगवदिच्छया कृपया च तादृशे भक्ते परोक्षलीलानामनुभवः श्रूयते । एवं भगवांस्तु नित्यलीलाविशिष्ट एव सर्वदा सर्वत्र विराजते । श्रीगोवर्धनधरः भक्तमनोरथपूरणार्थमिच्छया कृपया चाविर्भवति तिरोभवति च। तस्माल्लीलायाः कदापि मायिकत्वं सर्वथा नेति सिद्धान्तः।

"प्रभोरेव फलत्वं निर्दोषत्वञ्च वर्ण्यते ।
लीलानित्यवतः पूर्णगुणत्वं च ततोऽखिलम् ।।"

(इत्याचार्यकारिका)

।। भक्तिनिरूपणम् ।।

भक्तेर्लक्षणमाचार्यचरणैरुक्तं निबन्धे —

''माहात्म्यज्ञानपूर्वस्तु सुदृढ़ः सर्वतोऽधिकः ।
स्नेहोभक्तिरिति प्रोक्तस्तयामुक्तिर्न चान्यथा ।।

(शा.प्र.का. ४५)

अनया कारिकया आचार्यैः भक्तिस्वरूपमुक्तम् । स्नेहो भक्तिः। स्नेहस्तु भगवत्यात्मत्वेन ज्ञाते भवति । ''गौणश्चेन्नात्मशब्दात्'' (ब्र.सू. १।१।५) इति सूत्र न्यायेन गुण युक्तत्वाद्गौणः इति न वक्तव्यम्, आत्मशब्दात् । अत्र भाष्ये—''आत्मशब्दः पुनः सर्वेषु वेदान्तेषु निर्गुणपरब्रह्मवाचकत्वेनैव सिद्धः। तस्यैव जगत्कर्तृत्वं श्रुतिराह ।'' इति वचनात् निर्गुणसाकारपरब्रह्म एव जगत्कर्त्ता स एवात्मा स एव भगवान् श्रीकृष्णः। ''कृषिर्भूर्वाचकः शब्दो णश्च निर्वृति वाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते'' इति गोपालतापनीयश्रुतेः भगवतः श्रीयशोदोत्संगलालितस्य श्रीकृष्णस्यैव परब्रह्मत्वं श्रुतिस्मृत्यादिशास्त्रेषु सर्वत्र उद्घोष्यतेऽतः भक्तिपदं श्रीकृष्णस्नेहे मुख्यमन्यत्र तु तत्प्रयोगो भाक्त इति। सच्चिदानन्दात्मकं परब्रह्म त्रिविधं जगति क्रीडति । तत्र आधिभौतिकं जगत् । आध्यात्मिकं अक्षरब्रह्म। आधिदैविकं परं ब्रह्म ''पुरुषश्चाधिदैवतम्'' इति स्मृतेः। एवमेव रमणार्थं मार्गत्रयम्—आधिभौतिकमार्गः कर्म, आध्यात्मिकमार्गो ज्ञानम्, आधिदैविको मार्गो भक्तिः। तत्र प्रथमः आधिभौतिकः कर्ममार्गः लोकपर्यवसायी, द्वितीयो ज्ञानमार्गः अक्षर पर्यवसायी, तृतीयो भक्तिमार्गः पुरुषोत्तम (परब्रह्म) पर्यवसायीति। ज्ञानिनस्तु अक्षरब्रह्मैव परमफलत्वेन मन्यन्ते । भक्तास्तु अक्षरब्रह्म परब्रह्मपूर्णपुरुषोत्तमस्य धामेति स्वीकुर्वन्ति । तत्र प्रमाणम् —

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम ।।

(गीता ८।२१)

तथा च – यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।।

(गीता १५/१८)

इत्यादि प्रमाणैर्वेदादिशास्त्राणामर्थो भक्तिरिति ज्ञायते ।

ननु वेदादि शास्त्राणामर्थो भक्तिरिति कथम्प्रतिपाद्यते भवद्भिरिति चेदुच्यते । ''यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति, स भूमा स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीडआत्ममिथुन आत्मानन्दः स स्वराड् भवति'' ''परं ब्रह्मैतद्यो ध्यायति रसति भजति सोऽमृतो भवति'' ''नाहं वेदैर्न तपसा न दानेन न चेज्यया, शक्य एवं विधो दृष्टुं दृष्टवानसि मां यथा''। ''भक्त्या त्वनन्यया शक्यः०'' ''अहं भक्तपराधीनो'' ''भक्त्या तुतोष भगवान् गजयूथपाय०'' इत्यादि श्रुतिस्मृतिप्रमाणैर्भक्तिरेव प्रतिपाद्यते । एतेन सर्वात्मभावरूपा भक्तिरेवोच्यते । छान्दोग्ये सनत्कुमारनारदसंवादे भूमविद्यायां यत्र

नान्यत्पश्यतीत्यादिनाऽन्यदर्शनादिराहित्यस्योक्तत्वाद्भगवद्विरहावस्थायां प्रपञ्चविस्मृतिपूर्विका या परमाऽऽसक्तिस्तया विगाढभावेन सर्वत्र भगवत्स्वरूपमेव स्फुरतीति स एवोच्यते "स एवाधस्तात्स एवोपरिष्टात्सपश्चादित्यादि" तदनन्तरं भगवद्विरहभावगतस्फूर्तिरूपाणां ज्ञानानां व्यभिचारिभावत्वेनानियतत्त्वं ज्ञापयितुमहंकारादेशः "अहमेवाधस्तादहमेवोपरिष्टादित्यादिः" तत आत्मादेशः इति । "आत्मैवाधस्तादात्मोपरिष्टादित्यादिः"। तथा चाग्रे आत्मरत्यादि पदैः "आत्मरतिः आत्मक्रीड आत्ममिथुन" इत्यादिभिः रसरूपं भगवन्तं भक्तो भजति ।

अत्रात्मशब्देन सिद्धान्ते पूर्णपुरुषोत्तम एवोच्यते। नत्वक्षरं जीवो वेति । "गौणश्चेन्नात्मशब्दादिति" सूत्रन्यायेन परमकाष्ठापन्नं यद्वस्तु तदेव सर्वत्र वेदान्तेषु मुख्यतया प्रतिपाद्यम् । अनेन परब्रह्मणि सर्वात्मभावरूपा व्यसनात्मिका भक्तिः सैव मुख्या । सा च भगवदनुग्रहैकसाध्या । तच्चोक्तम् श्रुतौ —

"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन
यमेवैष वृणुते तेन लभ्यः
तस्यैष आत्मा विवृणुते तनुं स्वाम्" ।।

(का. १।२।२३)

अत्र आत्मशब्दः पुरुषोत्तमवाचकः, प्रवचनेन नाम सस्वरवेदाध्ययनेनेति । अनेन पुष्टिभक्तेः केवलं भगवद्वरणलभ्यत्वमेव । अत्र स्वपदस्यात्मीयवाचकत्वेन स्वीयत्वेन वरणे सर्वात्मभावरूपा पुष्टिभक्तिः प्रयच्छति । भाष्ये च "निसर्गतः सर्वेषां जीवानां भगवान् भवत्येव प्रभुर्यद्यपि तथापि यं स्वीयत्वेन वृणुते तस्य विवाहितः पतिरिव भर्त्ता सन् वरणजस्नेहातिशयेन भक्तेनापि भ्रियमाणः सन्, स भक्त इव स्वयमपि तं स्वस्मिन् बिभर्त्ति"। *(अ.भा. ४।४।१५)*

इत्यनेन भक्तौ स्नेहस्यप्राधान्यादयोगोलकादि दृष्टान्तं विहाय प्रदीप दृष्टान्तमुक्तवान् व्यासः "प्रदीपवदावेशस्तथा हि दर्शयति" (४।४।१५) । स स्नेहस्तु व्रजसीमन्तिनीनां रतिस्थायिभावत्वेन मुख्यत्वाच्छृंगार एव भक्तिरसः इति वक्तुं शक्यते । स चालौकिक एव । तस्य च संयोगविप्रयोगात्मकत्वम् । अलौकिक शृंगारस्य लौकिकसदृशत्वेऽपि न लौकिकत्वमलौकिकप्रमाणप्राप्तत्वाल्लौकिकप्रमाणाप्राप्तत्वाच्च । वस्तुतस्तु अत्र लौकिकत्वशङ्का निरर्थका इति । वात्स्यायनादिऋषिभिरपि भगवद्भावभावनार्थमेव शास्त्रप्रणयनम् । न तु ऋषीणां कदापि लौकिके तात्पर्यं भवति। अत एवोक्तम्—"तदेतद् ब्रह्मचर्येण परमेण समाधिना विहितो लोकयात्रार्थं न रागार्थोऽस्य संविधिः, रक्षन् धर्मार्थकामांस्त्रीन् सम्पश्यंल्लोकवर्त्तिनाम्। अस्य शास्त्रास्य तत्त्वज्ञो भवत्येव जितेन्द्रियः"। इति लौकिके तात्पर्ये सति शास्त्रकारः जितेन्द्रियभवनरूपफलं न वदेत् । अर्थोयम् लिङ्गभूयस्त्वाधिकरणे, क्रतुवज्ज्यायस्त्वाधिकरणे च विस्तरेण प्रपञ्चितमाचार्यैर्भाष्ये, श्रीपुरुषोत्तमचरणैः प्रकाशे श्रीगोपेशचरणैश्च रश्मौ । ननु भक्तेः शृंगाररसरूपत्वात् शृंगारस्य च संयोगविप्रयोगात्मकत्वाद्विप्रयोगस्य विरहात्मकत्वेन

दुःखरूपत्वात्कथं सुखरूपत्वमिति चेदुच्यते भूम्नश्च । "यो वै भूमातत्सुखं" इति श्रुतेः सुखरूपत्वमेव । सर्वत्र वेदान्तेष्वपि मुक्तेः सुखरूपत्वमेव । पुष्टावपि भगवत्स्वरूपस्यानन्दमयत्वात्तल्लाभे परमानन्दलाभ एव न तु दुःखलाभ इति । अत्र = रश्मिकाराः योगिगोपेश्वरा आज्ञापन्ति = "अस्यैव चोपपत्तेरूष्मेति सूत्रभाष्ये । तथाहि अस्यानन्दात्मकरसरूपस्य भगवतः एवायं धर्मः। ऊष्मा विरहतापः। व्यापकस्य भगवतः सर्वत्र सत्त्वेऽपि मायया तिरोधानात्तद्विरहः सर्वसाधारणस्तथापि, न सर्वाऽनुभवगोचरोऽपि तु यस्य हृदि रसरूपभगवदाविर्भावो भवति तस्यैव तदप्राप्तिजतापानुभवो गोचरीभवतीत्यन्वयव्यतिरेक रूपोपपत्तेः। तथा च रसरूपस्य वस्तुन एव तथात्वात् स तापोऽपि रसात्मक एवेति"। अनेन सिद्ध्यति यत् अस्य दुःखस्य न कर्मजन्यत्वम्, कर्मजन्यत्वे सति अस्य मोक्षसुखमपि विलुप्येत। अत एवोक्तम्—"न पश्यो मृत्युं पश्यति न रोगं नोत् दुःखतामिति" श्रुत्या तादृशभक्तेः दुःखादिरूपत्वं निषिध्यते अतोस्य दुःखहेतुत्त्वेऽप्यनन्यलभ्यसाक्षात्पुरुषोत्तमानन्दप्राप्तिहेतुत्वेन सुखरूपत्वमेवेति । अन्यथा वियोगावस्थायां चित्तेस्फुरायमाणमानन्दत्वमिति न वदेत् । "को ह्येवान्यात्कः प्राण्यादि'ति, श्रुतेः वियोगावस्थायां हृदिविराजमानस्य भगवद्रूपस्यैव जीवनहेतुत्वमिति । तथैव श्रीभागवतेऽपि —

"ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।
मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ।
ये त्यक्तलोकधर्माश्च मदर्थे तान् विभर्म्यहम् ।।

(भा. १०/४६/४)

अतः स्वपरमप्रियभगवद्दत्तं भगवत्सम्बन्धि यत्किमपि भक्तैः प्राप्यते तत्सर्वं सुखरूपमेव भवत्यतः भगवदलौकिकरसवार्त्ताऽनभिज्ञस्य तव कृते तु कण्टकवेधदृष्टान्तवत्कांमिनीकुचकुम्भे प्रणयप्रसङ्गे रसोत्कर्षे प्रियकृतनखवेधस्यापि दुःखहेतुत्वं भविष्यतीत्यलं प्रलापेन ।

एवं "यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति" श्रुत्या परब्रह्मण एव सूखरूपत्वात्प्रतीयमानं प्रियत्वादि ब्रह्मण्येव पर्यवस्यति । वस्तुतः जीवस्य प्रियं ब्रह्म एव। एतदेव श्रीभागवते उक्तम् —

"अहमात्माऽऽत्मनां धातः प्रेष्ठः सन् प्रेयसामपि ।
अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रिय ।।इति।।

अत्रेदं बोध्यम् । सिद्धान्ते रसात्मकं विरुद्धधर्माश्रयं साकारमेव परब्रह्म । "आत्मैव पूर्वमासीत् पुरुषविध" इति श्रुतेः । फलं च ब्रह्मानन्दः । तथा च "परं ब्रह्मैतद्यो ध्यायति रसति भजति सोऽमृतो भवति" इत्यस्य प्रत्येकं सम्बन्धो ज्ञेयः। इयं च भक्तिः फलरूपा । तल्लक्षणं तु परब्रह्मश्रीकृष्णस्नेहत्वमिति । तत्र "यमेवैष वृणुते तेनलभ्यः" इति वरणश्रुत्या वरणस्य मर्यादा पुष्टिभेदेन द्वैविध्यम् । मर्यादापक्षे विहितानि साधनानि शास्त्रेषु बहूनि सन्ति तेषां कायिकवाचिकमानसिकरूपप्रभेदाः । पुष्टौ तु वरणमेव साधनमिति । पुष्टौ भगवदनुग्रहणैव सर्वपापक्षयः ।

तच्चोक्तम् — "स्वपादमूलं भजतः प्रियस्य
त्यक्तान्यभावस्य हरिः परेशः
विकर्म यच्चोत्पतितं कथञ्चिद्
धुनोति सर्वं हृदि सन्निविष्टः" ।।

(भा. ११/५/४२)

"प्रविष्ट कर्णरंध्रेण स्वानां भावसरोरुहम्
धुनोति शमलं कृष्ण पद्मपत्रमिवाञ्जसा" ।।

एवं वरणेनैव पुष्टिभक्तेः प्राप्तिः। पुष्टिभक्तेः वरणैक लभ्यत्वात् । एवं भक्तिमार्गेण भक्ताः भगवत्समीपं गच्छन्ति । तत्र भगवत्प्राकट्ये रसानन्दप्राप्तिः। सर्वैरिन्द्रियैर्भगवत्स्वरूपेण सह संयोगादिलाभः। अतएवोक्तम् भागवते "अक्षण्वतां फलमिदं न परं विदामः"। स च सर्वो मनोरथः भगवता पूर्यते । "ब्रह्मैव सन् ब्रह्माप्येति" "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा" इत्यादि श्रुतेः। अयं रसानुभवः श्रेष्ठः। "ब्रह्मानन्दात्समुद्धृत्य भजनानन्दयोजने" इत्याचार्यवाक्यात् अक्षरब्रह्मानन्दस्य गणितानन्दत्वात् भजनानन्दस्य चागणितानन्दत्वादिति । अनयोः ज्ञानभक्त्योः तारतम्ये भक्तिः श्रेष्ठा ।

(१) भक्तौ कृपानन्दरसपानं च फलम् । ज्ञाने दुःखाभावमात्रं फलम् ।
(२) भक्तौ पूर्णानन्दानुभवः फलम् । ज्ञाने स्वरूपेण प्रकर्षतो लयः फलम् ।
(३) भक्तौ भगवत्कृतद्वैतस्थित्यानन्दानुभवः फलम् । ज्ञाने भेदाभावस्थितेरानन्दानुभवो न संगच्छते ।
(४) भक्तौ प्रारम्भतः एव निरतिशयानन्दः। ज्ञाने प्रथमतः कष्टमन्ते गणितानन्दप्राप्तिश्च ।
(५) भक्तौ पूर्णपुरुषोत्तमप्राप्तिः। ज्ञाने अक्षरप्राप्तिः ।

एवं ज्ञानभक्त्योः तारतम्ये भक्तेः अतिशयितत्वमिति ।

आत्मारामाश्च मुनयः निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ।।

(भा. १/७/१०)

अतः ब्रह्मभावानन्तरमपि परा भक्तिरनुष्ठातुं शक्यते । इदमेव भगवतः पूर्णपुरुषोत्तमस्य श्रीकृष्णस्य अनवगाह्यमाहात्म्यम् । भक्तेरुत्कृष्टंत्वञ्च । अत एव विद्वांसः रसज्ञाः भावुकाः भक्त्यैवात्मानं भगवते श्रीगोपीजनवल्लभाय समर्प्य रसानन्दनिमग्नाः भवन्ति । अतः "सर्वधर्मान्परित्यज्य" इति वाक्याद्भगवानेव शरणीकरणीयः। भगवान् स्वानुग्रहेणैव भक्तानां सर्वं साधयति । अत एवोक्तं श्रीभागवते—"पोषणं तदनुग्रहः" इति पुष्टेर्लक्षणम् । पुष्टिमार्गे भगवदनुग्रहस्यैव नियामकत्वम् ।

भक्तिः मर्यादापुष्टिभेदेन द्विधा भवति । मर्यादाभक्तिः भगवच्चरणारविन्दभक्तिः। पुष्टिभक्तिः भगवन्मुखारविन्दभक्तिः। मर्यादा भक्तिः अस्वतन्त्रा । पुष्टि भक्तिः स्वतन्त्रा ।

मर्यादाभक्तौ फलं सायुज्यम् । पुष्टौ साक्षाद्भगवान् । एवं यस्मिन् भगवत्कृपा भवति स पुष्टौ आयाति । सा च कृपा तन्मार्गरुच्यादिभिरनुमीयते । सा रुचिः भक्तिरेव । शुद्धपुष्टिभक्तिफलं तु नित्यलीला प्रवेशः पुरुषोत्तमलाभश्च । इत्यादिकं श्रीमदणुभाष्ये आचार्यैः विस्तरेण प्रतिपादितं पुरुषोत्तमचरणैश्च तत्प्रकाशे विस्तरेणालोडितं गोपेश्वरचरणैश्च तत्प्रकाशरश्मौ अतिविस्तरेण विवरितम् । अतः तत्रतोऽवगन्तव्यम् ।

अधुनात्र ब्रह्मणः मूलम् स्वरूपं विविच्य समाप्यते ।

तत्र — "**कृषिर्भूवाचकः शब्दो णश्च निर्वृति वाचकः**
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ।।
ॐ तत्सत्परं ब्रह्म कृष्णात्मको नित्यानन्दैकस्वरूपः ।। इति श्रुतेः

तथा च — **परिपूर्णतमः कृष्णो वैकुण्ठो गोकुलः स्वयम् ।**
चतुर्भुजश्च वैकुण्ठे गोकुले द्विभुजः स्वयम् ।।

(ब्रह्मवैवर्त्त पु०)

अत एव परमानन्दः पूर्णपुरुषोत्तमः परब्रह्म श्रीकृष्ण एव । अतः निखिलनिगमागमाधिगम्यमानस्वरूपः परब्रह्मश्रीकृष्ण एव प्रापणीयोऽयमेव परमपुरुषार्थः शुद्धाद्वैतब्रह्मवाद इति । तत्प्राप्तिः भक्त्या विना नेति । "नायमात्मा बलहीनेन लभ्यः" इति श्रुतेः। अत्र बलं भक्तिः। अतः शुद्धपुष्टिभक्तौ स्नेह एव नियामकः। निरुपधिस्नेहात्मिका भक्तिरेव सर्वात्मभावः। अयमेव पूर्णपुरुषोत्तमप्राप्तौ मुख्यं कारणम् । यस्मिन् भगवत्कृपा भवति स एव पुष्टिमार्गाधिकारी भवति । तस्मात् श्रीमदाचार्यचरणैः पुष्टिमार्गस्थापनाय प्रमाणानुरुद्धः प्रमेयमार्गः प्रकटीकृतः। अतः श्रीमदाचार्यानुग्रहीतेन पुष्टिपथेनानुसर्त्तव्यमिति ।

"जानीत परमं तत्त्वं यशोदोत्सङ्गलालितम् ।
तदन्यदिति ये प्राहुरासुराँस्तानहो बुधाः ।।

(श्रीप्रभुचरणाः भाष्ये)

।। श्रीमदाचार्यचरणानां वेदश्रद्धा ।।

भाष्येऽस्मिन् पुष्टिभक्तिमाहात्म्यमतीव विस्तरेण वर्णितं तथा च वेदविषये भाष्यकृद्भिः निरतिशया श्रद्धाऽपि स्थापिता । श्रीवल्लभाचार्याः वेदस्याक्षरमात्रस्याप्यन्यथाकल्पनम्, वेदेऽर्थवादं च नाङ्गीकुर्वन्ति । "उत्तरं पूर्वसन्देहवारकं परिकीर्त्तितम्" इति न्यायेन पूर्वपूर्वप्रस्थानसन्देहवारकत्वमुत्तरोत्तरप्रस्थानस्येति वर्णयन्त्याचार्याः ।

यथा वेदे - "अपाणिपादोजवनो ग्रहीता" इत्यत्र किं ब्रह्म प्राकृतपाणिपादरहितं यद्वा सामान्यनिषेधः, इति सन्देहे "सर्वतः पाणिपादान्तम्" इत्यादि गीतावाक्यं सन्देहवारकम् । गीतायाञ्च "नित्यः सर्वगतः स्थाणु०" "ममैवांशो जीवलोके" इत्यादौ सन्देहे "उत्क्रान्तिगत्यागतिभिः" "अंशो नानाव्यपदेशात्" इत्यादि सूत्रैर्निर्णयः। तथा च तत्वसूत्रे "जन्माद्यस्य यतः० इत्यत्र ब्रह्मणः जगत्कारणत्वं निमित्तत्त्वेनोपादानत्वेन वा इति सन्देहे "अन्वयव्यतिरेकाभ्यां

य: स्यात्सर्वत्र सर्वदा'' इत्यादि श्रीमद्भागवतवाक्यान्निर्णय:। एवं चतुर्णां प्रस्थानानामेकवाक्यत्वम्। अत्राचार्यैः समग्रस्य वेदस्योभयकाण्डात्मकस्य प्रामाण्यं स्वीकृतम् न तु 'वेदान्तो नाम उपनिषत्प्रमाणम्' इतिवत् केवलस्य उपनिषद् भागस्येति ज्ञेयम्। ''वेदस्याक्षरमात्रान्यथा कल्पनेऽपि दोषः स्यात्'' इत्याचार्याः।

तथा च — **वेदोक्तादणुमात्रेऽपि विपरीतं तु यद्भवेत्।**
तादृशं वा स्वतन्त्रं च उभयं मूलतो मृषा॥

(अ.भा.का.)

तथा च — **यज्ञरूपो हरिः पूर्वकाण्डे ब्रह्मतनुः परे।**
अवतारी हरिः कृष्णः श्रीभागवत ईर्यते॥

(शा.प्र. ११)

अग्निहोत्रं तथा दर्शपूर्णमासः पशुस्तथा।
चातुर्मास्यानि सोमश्च क्रमात् पञ्चविधो हरिः॥

(तत्व. २।२)

असन्दिग्धोऽपि वेदार्थः स्थूणाखननवन्मतम्।
मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो द्वयम्॥
जैमिनिः कर्मतत्त्वज्ञो निर्णयं पूर्व उक्तवान्।
व्यासः स्वयं हि सर्वज्ञ उत्तरे निर्णयं जगौ॥

(तत्व. २।२९-३०)

पुराणविषये आचार्याणां श्रद्धा —

पुराणं वेदवत् पूर्वसिद्धं सर्वोपयोगि तत्'

(तत्व. २।४८)

महाभारतविषये —

''सर्वनिर्द्धारणार्थाय व्यासो भारतमुक्तवान्''

(तत्व. २।५७)

ज्यौतिषविषये —

''दर्शादिकालनिर्द्धारो ज्योतिः शास्त्रफलं स्मृतम्''

(तत्व. २।७५)

व्याकरणविषये —

''व्याकृतिः पाणिनीयं हि प्रातिशाख्यं तु शब्दगम्''

(तत्व. २।७७)

आयुर्वेदादिविषये —

''आरोग्ये धर्मसिद्धिः स्याद्रक्षा च धनुषो भवेत्
उद्वेगहानिर्गान्धर्वे स्थापत्यं च स्रुगादिषु ।
काव्यादीनामसत्यत्वान्नोपयोगः कथञ्चन ।
धर्मे कर्त्तुः क्वचित् कीर्त्तिर्नैपुण्यं पाठतः क्वचित् ।

(तत्व. २।७९-८०)

रामायणविषये —

''रामायणमनन्तं हि पुराणमिव सन्मतम्
व्यासः पूर्वमनेकोक्तो वाल्मीकिः साम्प्रतं किल ।
समाधिभाषया प्राह प्रमाणं सर्वथैव तत् ।

(सर्व.प्र. ८१)

एवं सर्वशास्त्राणां विषये श्रीवल्लभाचार्याणां मतमुपरि संक्षेपेण स्पष्टीकृतम् ।

संन्यासविषये—कलिदोषात्कर्ममार्गे ज्ञानमार्गे च संन्यासो न कर्त्तव्यः, किन्तु पश्चात्तापनिवृत्यर्थं भक्तिमार्गे कर्त्तव्यः। भगवद्विरहानुभवैकार्थः परित्यागः प्रशस्यते । इत्यादिकं सर्वं आचार्यैः स्वकृतसन्यासनिर्णयग्रन्थे विस्तरेण विवृतम् । एवं कर्मज्ञानमार्गापेक्षया भक्तिमार्गे आचार्याणां समादरः विशेषः सिद्ध्यति ।

भाष्येऽस्मिन् आचार्याणां मायावादि खण्डने अतीव निर्बन्धः। बौद्धमतखण्डनप्रसंगेऽपि मायावादिखण्डनं निर्दिश्यते । ब्रह्मसूत्रे अन्ये आचार्याः (१) ''अथातो ब्रह्मजिज्ञासा'' (२) ''जन्माद्यस्य यतः'' (३) ''शास्त्रयोनित्वात्'' (४) ''तत्तु समन्वयात्'' इति सूत्रचतुष्टयात्मिकां चतुःसूत्रीं स्वीकुर्वन्ति । तथाहि श्रीवल्लभाचार्याः (१) अथातो ब्रह्मजिज्ञासा (२) जन्माद्यस्य यतः शास्त्रयोनित्वात् (३) तत्तु समन्वयात् इति सूत्रत्रयात्मिकां त्रिसूत्रीं स्वीकुर्वन्ति । श्रीवल्लभाचार्याणां मते 'जन्माद्यस्य यतः शास्त्रयोनित्वात्' इत्यभिन्नमेव सूत्रं वर्त्तते । इदमणुभाष्यम् तृतीयाध्यायद्वितीयपादस्य चतुःत्रिंशत् (३४) सूत्रतः प्राक् श्रीमद्वल्लभाचार्यरचितम् । तदनन्तरं श्रीविट्ठलनाथानां कृतिः। प्राक्तनभाष्येऽपि 'आनन्दमयाधिकरणे' द्वितीयवर्णकं श्रीविट्ठलेशरचितमेव । इत्यत्र भाष्यप्रकाशरचयितृणां श्रीपुरुषोत्तमानामुक्तिरेव प्रमाणम् । तथा हि—''इत आरभ्य प्रभूणामिति (श्रीविट्ठलेशानाम्) प्रतिभाति'' इति ''स्थानविशेषात्प्रकाशादिवत्'' (ब्र.सू. ३।२।३४) इति सूत्रभाष्यप्रकाशेउल्लिखितम् । तथा च ''साम्प्रतं तु प्रभुचरणैः'' इत्यानन्दमयाधिकरणे । तथाहि—चतुर्थाध्यायसमाप्ति श्लोके —

''भाष्यपुष्पाञ्जलिः श्रीमदाचार्यचरणाम्बुजे ।
निवेदितस्तेन तुष्टा भवन्तु मयि ते सदा ।।

इत्यत्र भाष्यप्रकाशे श्रीपुरुषोत्तमाः—''गुणोपसंहारपादमारभ्य सर्द्धाध्यायस्य स्वयं करणात्तदाचार्येषु निवेदयन्तः समाप्तौ मङ्गलं कर्त्तव्यमिति शिष्टाचारं च शिक्षयन्त आचार्याणां प्रसादमाशासते'' इति लिखन्ति अनेन स्पष्टं प्रतीयते यत् अवशिष्टं भाष्यं निर्माय

श्रीवल्लभाचार्यचरणयोः समर्पितमिति । अत्र केचिद्विद्वांसः सम्पूर्णं भाष्यमाचार्यकृतमेवेति मन्यन्ते । तत्र श्रीमदाचार्यचरणाम्बुजमित्यस्यार्थो व्यासाचार्यचरणाम्बुजमिति ग्राह्यम् । "व्यासोऽस्माकं गुरुः" इत्याचार्यवाक्यात् । एवमेवान्यत्रापि समादधते । अन्यच्च श्रीमदाचार्याणामन्यदेकं बृहद्भाष्यमस्ति तन्मध्यस्थोऽनतिविस्तृतो भागोऽधुना नोपलभ्यते तस्यैव भाष्यस्य संक्षेपभूतमिदं भाष्यमित्यपि केचिद् वदन्ति । वस्तुतस्तु श्रीपुरुषोत्तमचरणैः प्रकाशे यदुक्तं तदेवास्त्यविचिकित्सितमिति । या या कृतिः श्रीवल्लभाचार्याणामस्ति तत्र तत्र श्रीपुरुषोत्तमानां टीकादिकमपि वर्त्तते । यत्र यत्र पुरुषोत्तमानां टीकादिकं किमपि नास्ति सा कृतिः श्रीवल्लभाचार्याणामस्ति नवेति सन्दिग्धोऽर्थः।

भाष्येऽस्मिन् चत्वारः अध्यायाः। ते च क्रमशः स्वरूपमतान्तरनिराससाधन-फलप्रतिपादकाः। तत्रापि प्रत्येकाध्याये पादचतुष्टयम् । अत्र प्रथमाध्याये ब्रह्मस्वरूपबोधक-वेदान्तवाक्यानां विचारः। तत्रापि प्रथमपादे—कार्यप्रतिपादकानि वाक्यानि, द्वितीयपादे—अन्तर्यामिप्रतिपादकानि वाक्यानि, तृतीयपादे—उपास्यरूपप्रतिपादकानि वाक्यानि, तथा चतुर्थपादे—प्रकीर्णानि वाक्यानिति । इत्येवं प्रथमाध्यायपदार्थसंग्रहः।

द्वितीयाध्याये मतान्तरनिराकरणम् । विना मतान्तरनिराकरणेन साधनफलयोरनुपयो-गादिति । तत्रपि द्वितीयाध्यायस्य प्रथमपादे—श्रुतिस्मृत्योः अविरोधः प्रदर्श्यते । द्वितीयपादे—न्यायमायावादादिमतानां निराकरणम् । तृतीयपादे श्रुतिवाक्ययोः परस्परविरोधपरिहारः। चतुर्थपादे—जीवशरीरमध्यवर्त्तिप्राणादीनां विचारः। इति द्वितीयाध्यायपदार्थसंग्रहः ।

तृतीयाध्यायः साधनाध्यायः। तत्र प्रथमपादे—जीवस्य ब्रह्मज्ञानोपयोगिजन्मविचारः। द्वितीयपादे—जीवस्य मुक्तियोग्यता, अत्रैव विरोधपरिहारेण ब्रह्मस्वरूपनिरूपणञ्चेति । तृतीयपादे—गुणोपसंहारः। चतुर्थपादे—कर्माद्यङ्गविचारः। इति तृतीयाध्यायपदार्थसंग्रहः ।

चतुर्थोऽध्यायः फलाध्यायः। तत्र प्रथमपादे—श्रवणादेर्विचारः। द्वितीयपादे—सर्वेन्द्रियलयादि विचारः। तृतीयपादे—क्रममुक्तिमार्गादिनिरूपणम् । चतुर्थपादे—पुष्टिमर्यादाभेदेन फलस्य लीलानित्य-त्वादिकस्य च निरूपणम् ।

अथ प्रतिपादमधिकरणानि वर्ण्यन्ते —

तत्र प्रथमाध्यायस्य प्रथमपादे दशसंख्यात्मकान्यधिकरणानि ।

तत्र प्रथमाध्यायस्य द्वितीयपादे अष्टसंख्यात्मकान्यधिकरणानि ।

तत्र प्रथमाध्यायस्य तृतीयपादे त्रयोदशसंख्यात्मकान्यधिकरणानि ।

तत्र प्रथमाध्यायस्य चतुर्थपादे नवसंख्यात्मकान्यधिकरणानि ।

द्वितीयाध्यायस्य प्रथमपादे द्वादशसंख्यात्मकान्यधिकरणानि ।

द्वितीयाध्यायस्य द्वितीयपादे अष्टसंख्यात्मकान्यधिकरणानि ।

द्वितीयाध्यायस्य तृतीयपादे षोडशसंख्यात्मकान्यधिकरणानि ।

द्वितीयाध्यायस्य चतुर्थपादे दशसंख्यात्मकान्यधिकरणानि ।

तृतीयाध्यायस्य प्रथमपादे अष्टसंख्यात्मकान्यधिकरणानि ।

तृतीयाध्यायस्य द्वितीयपादे एकादशसंख्यात्मकान्यधिकरणानि ।

तृतीयाध्यायस्य तृतीयपादे चतुर्विंशतिसंख्यात्मकान्यधिकरणानि ।
तृतीयाध्यायस्य चतुर्थपादे नवसंख्यात्मकान्यधिकरणानि ।
चतुर्थाध्यायस्य प्रथमपादे सप्तसंख्यात्मकान्यधिकरणानि ।
चतुर्थाध्यायस्य द्वितीयपादे षष्ठसंख्यात्मकान्यधिकरणानि ।
चतुर्थाध्यायस्य तृतीयपादे पञ्चसंख्यात्मकान्यधिकरणानि ।
चतुर्थाध्यायस्य चतुर्थपादे पञ्चसंख्यात्मकान्यधिकरणानि ।
इत्येवमतिसंक्षेपेण भाष्यपदार्थसंग्रहः प्रतिपादमधिकरणानि च वर्णितानि ।

।। श्रीमद्वल्लभाचार्याणां संक्षिप्तचरितम् ।।

दक्षिणप्रदेशे तैलङ्गदेशे 'कांकरवाड' नाम्निग्रामे दीक्षितसंज्ञासंज्ञितकृष्णयजुर्वेदीय-तैत्तिरीयशाखिनां प्रथितं कुलमासीत् । तस्मिन्कुले सर्वे कुलपुरुषाः सोमयाजिनः बभूवुः। अस्य कुलस्य मूलपुरुषाः श्रीनारायणयज्ञाः। अस्मिन्नेव कुले श्रीलक्ष्मणभट्टाः प्रादुर्बभूवुः। ते स्वपत्न्या सह एकवारं काशीयात्रार्थमगच्छन् । तदैव मार्गमध्ये मध्यप्रदेशे चम्पारण्यस्थले तत्पत्न्याः इल्लम्मागारोः कुक्षौ । (वि.सं. १५३५) वैशाखकृष्णैकादश्यां श्रीवल्लभाचार्याणां प्राकट्यमभवत् । तदा भवतां पितृचरणाः श्रीलक्ष्मणभट्टाः भार्यापुत्राभ्यां सह द्वादशवर्षाणि यावत् काश्यामवसन् । तदा काश्यामेव श्रीवल्लभाचार्याणां यज्ञोपवीतादयः संस्काराः अभवन् । श्रीवल्लभः निखिलान् वेदान् सर्वशास्त्राणि च झटिति अधीतवान् । ततः स्वदेशमागतास्ते त्रयः। ततः श्रीलक्ष्मणभट्टाः दिवं याताः। ततः पुनः श्रीवल्लभाचार्याः तीर्थयात्रार्थं प्रस्थिताः। तदा तीर्थयात्रायां श्रीवल्लभाचार्याणां बहुभिर्विद्वद्भिः सह शास्त्रचर्चा जाता यत्र विद्वांसः पराजिताः । आचार्याः त्रिवारं पृथ्वीपरिक्रमां विधाय स्वसिद्धान्तप्रचारं कृतवन्तः तत्रैव विजयनगरे श्रीकृष्णदेवरायनृपतेः राजसभायां सर्वान् वादीन् पराजित्य विधिवत् 'शुद्धाद्वैतब्रह्मवादनिर्गुणपुष्टिभक्तिमार्गाभिधं स्वसिद्धान्तं संस्थापितवन्तः । तत्र यात्रा मध्य एव श्रीगोवर्धनपर्वते श्रीनाथजीत्यपरपर्यायः परब्रह्म भगवान् श्रीकृष्णः श्रीवल्लभाचार्यसन्निधौ स्वेच्छया स्वयं प्रादुर्भूयात्मानं दर्शयामास । स्वसेवाकरणार्थमाज्ञापयच्च । स एव पुष्टिमार्गः श्रीवल्लभाचार्यैः प्रवर्तितः। तत्रैव तीर्थयात्राप्रसङ्गे श्रीवल्लभाचार्यचरणाः भगवतः पाण्डुरंगविठ्ठलनाथस्याज्ञया काश्यां च स्वमातुरनुमत्या च स्वजातीय मधुमंगलनामक-तैलङ्गविद्वान्ब्राह्मणस्य सुयोग्यकन्यया सह विधिपूर्वकं विवाहं चक्रुः । तत्र श्रीगोपीनाथ-विठ्ठलनाथाख्यौ द्वौ सुतौ यथाक्रमं (वि.सं. १५६८ आश्वि. कृ.१२ तथा वि.सं. १५७२ मि.पौ.कृ. ९) जन्म लेभाते । एवमाश्रमत्रयं प्रोत्तीर्य सर्वशास्त्रसम्मतं त्रिदण्डसंन्यासं परिगृह्य काश्यां हनुमानघाटेति प्रसिद्धस्थले वि.सं. १५८७ मि. आषा.शु. २ रविवासरे मध्यान्ह काले सुरसरित्प्रवाहे आत्मानं प्रवेशयामासुः। एवमासुराणां व्यामोहनार्थं स्वशरीरत्यागं कृतवन्तः। वस्तुतस्तु ते साक्षाद्भगवद्धाम प्रापुः ।

जगद्गुरुश्रीवल्लभाचार्यविरचिताः अनेके ग्रन्थाः सन्ति । ते च बृहदग्रन्थलघुग्रन्थभेदेन द्विविधाः। तत्र बृहद् ग्रन्थाः - (१) ब्रह्मसूत्राणुभाष्यम् । (२) तत्त्वदीपनिबन्धः। (३)

निबन्धप्रकाशः। (४) श्रीमद्भागवतसुबोधिनी । (५) पूर्वमीमांसाभाष्यम् । (६) गायत्रीभाष्यम् इत्यादयः ।

लघु ग्रन्थाः - (१) श्रीयमुनाष्टकम् । (२) बालबोधः । (३) सिद्धान्तमुक्तावली । (४) पुष्टिप्रवाहमर्यादाभेदः। (५) सिद्धान्तरहस्यम् । (६) नवरत्नम् । (७) अन्तःकरणप्रबोधः। (८) विवेकधैर्याश्रयः। (९) कृष्णाश्रयः। (१०) चतुःश्लोकी । (११) भक्तिवर्द्धिनी । (१२) जलभेदः। (१३) पञ्चपद्यानि । (१४) संन्यासनिर्णयः। (१५) निरोधलक्षणम् । (१६) सेवाफलम् ।

तथा च = पुरुषोत्तमसहस्रनाम । परिवृढाष्टकम् । पत्रावलम्बनम् । त्रिविधनामावली । शिक्षाश्लोका इत्यादयः ।

श्रीमद्वल्लभाचार्यविरचितं श्रीमद्भगवद्गीताभाष्यमनुपलब्धम् । कालवशाद्वा कस्माच्चित्कारणाल्लुप्तमिति मन्यन्ते ऐतिह्यज्ञाः ।

श्रीमद्वल्लभाचार्याणां प्रथमपुत्राः श्रीगोपीनाथाः। तेषामेक एव सुताः श्रीपुरुषोत्तमाः। तदग्रे वंशविस्तारो नास्ति ।

आचार्याणां द्वितीयसुताः श्रीविट्ठलेशाः। एतेषां ग्रन्था :- अणुभाष्योत्तरार्धः। विद्वन्मण्डनम् । शृंगाररसमण्डनम् । सुबोधिनी टिप्पणी । भक्तिहंसः। भक्तिहेतुनिर्णयः। इत्यादयः। एतेषां सप्तसुताः। ते च क्रमशः श्रीगिरिधराः, श्रीगोविन्दरायाः, श्रीबालकृष्णाः, श्रीगोकुलनाथाः, श्रीरघुनाथाः, श्रीयदुनाथाः श्रीघनश्यामाश्च ।

श्रीमद्विट्ठलेश्वर तृतीय सूनु श्रीबालकृष्णतः पुरुषगणनया चतुर्थवंश्यश्रीपीताम्बरगोस्वामिनामात्मजाः श्रीपुरुषोत्तमचरणाः दशदिगन्तविजयिनः स्वपितृव्याणां श्रीश्यामलसुतव्रजरायजीमहाराजानामुत्सङ्गे गताः। एतेषां श्रीपुरुषोत्तमचरणानां जन्म वि.सं. १७२४ मि.भा.शु. ११ अभूत् । ऐषां टीकाग्रन्थेषु सर्वश्रेष्ठः अणुभाष्यप्रकाशाभिधनिबन्धः। एषः निबन्धः अद्वितीयः । श्रीपुरुषोत्तमचरणसदृशाः विद्वांसः सुदुर्लभाः। एतद्विरचिताः ग्रन्थाः। नवलक्षश्लोकपरिमिताः सन्ति । तत्र केचित्कथयन्ति यन्नवलक्षसंख्यकाः ग्रन्थाः सन्ति । किन्त्वधुना तेषु अधिकग्रन्थाः लुप्ताः । श्रीपुरुषोत्तमचरणरचितेषु ग्रन्थेषुसुबोधिनीप्रकाशः, उपनिषद्दीपिका, आवरणभङ्गः, प्रस्थानरत्नाकरः, सुवर्णसूत्रम्, षोडशग्रन्थविवृतिः, वादावलिः इत्यादयः बहवो ग्रन्थाः पाण्डित्यपूर्णतया निबद्धाः एतेषां विषये साम्प्रदायिकौ श्लोकौ प्रसिद्धौ —

श्रीमद्वल्लभदीक्षिताह्वयहरेर्वन्द्यान्वयेसप्तम-
स्तत्कारुण्यसुधाभिषेकविकसत्सौभाग्यभूमोदयः ।
दृप्यद्दुर्मदवादिविद्वदिभदुष्कूटोक्तिकुम्भस्थली-
सद्योभञ्जनकेलिकेसरपतिः पीताम्बरस्यात्मजः ।।१।।
नासीद्येन समः समस्तनिगमस्मृत्त्यादि तत्त्वार्थविद्
वक्ता चाप्रतिमः सदःसु विदुषामद्यापि भूमौ बुधः ।

यः सर्वं नवलक्षपद्यकमितप्रौढप्रबन्ध्यं व्यधात्
स श्रीमान् पुरुषोत्तमो विजयतामाचार्यचूडामणिः ।।२।।

एवमेतेषां विस्तृतं चरित्रं 'पुरुषोत्तमदिग्विजये' द्रष्टव्यं विशेषजिज्ञासायाम् । एतादृशाः, उत्कृष्टविद्वांसः सम्प्रदायान्तरे भूतलेऽपि च विरला एवेति ।

अणुभाष्यप्रकाशोपरि 'रश्मि' विवृति लेखकाः श्रीयोगिगोपेश्वराः श्रीविट्ठलेशतृतीय-सुनुवंशोद्भवाः परन्तु श्रीविट्ठलेशद्वितीयसुनुश्रीगोविन्दरायवंशे दत्तकत्वेन समागताः विद्वद्वरेण्याः। एते प्रसिद्धा पण्डिताः। एभिः भाष्यप्रकाशोपरि रश्मिनामिका भाष्यात्मिका ग्रन्थाकारा वा टीका निरमायि, सा विद्वन्मान्या । श्रीगोपेश्वरचरणानां स्ववंशपरम्परा दत्तकवंशपरम्परा च संक्षेपेणात्र प्रदर्श्यते—श्रीमद्विट्ठलेश्वरतृतीयसुनु श्रीबालकृष्णानां चतुर्थपुत्राः श्रीपीताम्बराः तस्यान्वये क्रमेण श्रीश्यामलजितः, तत्पुत्राः श्रीव्रजरायजितः तद्दत्तकपुत्राः श्रीपुरुषोत्तमचरणाः दशदिगन्तविजयिनः तद्दत्तकपुत्राः श्रीपुरुषोत्तमाः (गो.आ.तृ.गृ.१ से) तत्पुत्राः श्रीगोवर्धनेशजितः (द्वि०) तद्दत्तकपुत्राः श्रीगोकुलोत्सवजितः (गो. आये द्वि.गृ.१.से) तत्पुत्राः श्रीयोगिगोपेश्वराः पण्डितप्रवराः रश्मिकाराः (गो.गये.द्वि.गृ.१. में विट्ठलेशरायजी के) तत्पुत्राः श्रीकृष्णरायमहाभागाः। इति योगिगोपेश्वराणां स्ववंशावलिः। अतः परं तेषां दत्तकवंशपरम्परा—श्रीमद्विट्ठलेश्वर द्वितीयसूनुश्रीगोविन्दरायाः तत्पुत्राः श्रीकल्याणरायाः तत्पुत्राः श्रीहरिरायाः शिक्षापत्ररचयितारः तद्दत्तकपुत्राः श्रीगिरिधरजीमहोदयाः (गो.आये.प्र.गृ.१. से.) तत्पुत्राः श्रीरघुनाथजितः तत्पुत्राः श्रीगोविन्दरायजितः (द्वि.) तत्पुत्राः श्रीविट्ठलेशरायजितः तद्दत्तकपुत्राः श्रीयोगिगोपेश्वर महाभागाः विद्वत्प्रवराः (गो. आये. तृ.गृ.२.से. प्रा.वि.सं. १८३५ मि.ज्ये.शु. ८) इति श्रीयोगिगोपेश्वराणां दत्तकवंशपरम्परा । किं चैभिः' भक्तिमार्त्तण्डादयः अन्येऽपि ग्रन्थाः सारगर्भिताः लिखिताः।

ब्रह्मसूत्रमिदं समग्रवेदान्तानां आकरग्रन्थः। ब्रह्मसूत्रेदं कदा निर्मितमित्यतिचिरन्तनवृत्त-त्वाद्यद्यपि निश्चयेन वक्तुं न शक्यते तथापि महर्षिबादरायणव्यासरचितत्वादस्य रचनाकालः द्वापरयुगस्यान्तिमो भागः कलिकालस्य च प्रारम्भः अतः सम्भवतः पञ्चसहस्रवर्षाणि यावत् पूर्वमस्य कालः निश्चेतुं शक्यते । ब्रह्मसूत्ररचनाकालः अतिप्राचीनः इति प्राञ्चां मतम् । आधुनिकपाश्चात्यानामतानुसारेणास्य रचनाकालः चतुः शती ई०पू० वर्त्तते । अस्माकमैतिह्यानुसारेण श्रीमद्भागवतप्रथमस्कन्धोपारव्यानेन ज्ञायते यच्छ्रीमद्भागवतनिर्माणतः पूर्वमेव रचितमिति । श्रीमद्भागवते भगवतः श्रीकृष्णस्य लीलावर्णनमस्ति भगवान् श्रीकृष्णस्योद्भवः किञ्चिदधिक पञ्चसहस्राब्देभ्यः पूर्वतने काले आसीदिति । अतः श्रीवेदव्यासरचित- ब्रह्मसूत्रस्यापि कालः स एवेति निश्चीयते । एवमेव श्रीमद्भगवद्गीतायामपि "ब्रह्मसूत्रपदैश्चैव" इत्यादि श्लोके ब्रह्मसूत्रस्य नामोल्लेखात्स्पष्टं निश्चीयते यत्तत्त्वसूत्रस्य रचनाकालः श्रीभगवद्गीतातः अपि पूर्वमस्तीति ।

ब्रह्मसूत्रेऽस्मिन् सूत्रसंख्याऽपि विविधा तत्तद्भाष्यकारैर्निश्चिता । तत्र प्रमुखमतानि —

		सू.सं.	अधि.सं.
(१)	भाष्यकाराः आचार्यशङ्कराः	५५५	१९१

(२)	भाष्यकारा: आचार्यरामानुजा:	५४५	१६०
(३)	भाष्यकारा: आचार्यमाध्वा:	३६४	२२३
(४)	भाष्यकारा: आचार्यनिम्बार्का:	५४९	१६१
(५)	भाष्यकारा: आचार्यवल्लभा:	५५४	१७१

एवं जगद्गुरुश्रीमदाचार्यचरणैकदर्शित: साकारब्रह्मवादापरपर्याय: ''शुद्धाद्वैतब्रह्मवादनिर्गुणपुष्टिभक्तिमर्गो'' नाम सन्मार्ग इत्यविचिकित्सितम्। श्रीमदाचार्यचरणै: श्रीमत्प्रभुचरणैश्च प्रदर्शितरीत्या तत्कृपयैव तत्सिद्धान्तसरणिमनुसृत्य श्रीमद्ब्रह्मसूत्राणुभाष्यस्य प्रकाशरश्मिसहितस्योपोद्घातोऽयं मया विलिखित: । अत्र निर्मत्सरा: विद्वांस: गच्छत: स्खलनन्यायेन प्राप्तामशुद्धिं संशोध्य पठन्तु, मयि चोपकुर्वन्त्विति ।

।। धन्यवाद ज्ञापनम् ।।

भगवत: श्रीयशोदोत्संगलालितस्य श्रीगोपीजनवल्लभस्य श्रीमुकुन्दप्रभो: श्रीगोपालप्रभोश्च परमानुग्रहेण परमगहनस्यास्य तत्वसूत्रस्याणुभाष्यप्रकाशरश्मिरूपत्रीवेणिसङ्गमस्वरूपबृहद्ग्रन्थस्य पुन: प्रकाशने प्रयतमाना: सतनुवित्तदत्तचित्ता: श्रीहरिश्चन्द्रमहोदय:, श्रीसरोजकुमारगोयल: (एतौ दिल्लीवास्तव्यौ) श्रीदेवकुमार अग्रवालमहोदय:, श्रीघनश्यामजीशाहमहोदय: (एतौ काशीवास्तव्यौ) एते सर्वे शतश: धन्यवादार्हा:। इत्यलं विस्तरेणेति ।।

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

अथ प्रथमोऽध्यायः ।

प्रथमः पादः

भाष्यप्रकाशः ।

॥ श्रीकृष्णाय नमः ॥

संगीतं श्रुतिमूर्धभिस्तदविदां वागाद्यतीतं विदां

रश्मिः ।

श्रीकृष्णाय नमः । साकारब्रह्मवादस्थापकेभ्यः श्रीमदाचार्येभ्यो नमः ।

उद्धर्तुं ज्ञानरहितान्, माद्दशानपराधिनः ।
कृतश्रम इवाभासि यतस्त्वं विट्ठलेश्वरः ॥ १ ॥

जयति जगति वाणी वेदवेदान्तयुक्ता विविधमहिमशुद्धाद्वैतविद्याकृतेऽलम् ।
प्रभवति खलु वादे मायिनीतीह यस्य जयति विजितमायः श्रीमदाचार्यवर्यः ॥ २ ॥

पितृचरणोदितसरणौ साकारब्रह्मस्थापिकायां तु ।
आदिमूर्तिभजनेषु[1] प्रतिनिधीन् विठ्ठलान् नमामि ॥ ३ ॥

गुणत्रयातीतगुणाढ्यगेहे कृष्णाश्रयाद्याः सुरवर्यवृक्षाः ।
तदन्तरा मूलसुखार्थसारं शाखाद्विषट्क शब्दसहस्रपर्णम् ॥ ४ ॥

मुक्तालिवृन्दैरभितः स्तुतं च जुष्टं रसाकाङ्क्षिशुकादिभक्तैः ।
दिव्यं पुराणं च सहस्रनामकल्पद्रुमं नौमि रसार्थकामी ॥ ५ ॥

श्रीवल्लभाचार्यपदाब्जयुग्मसंशोधिताशेषविशेषबुद्धिः ।
वेदान्तिहृत्पद्म[2]विकासनेऽलं[3] भाष्यप्रकाशे वितनोमि रश्मिम् ॥ ६ ॥

विविधदुरितपाशं व्याहृतीकृत्य नस्त्वं प्रविश हृदयकञ्जं किंच योगं विधेहि ।
कथमिह खलु रश्मिर्मान्यतां पण्डितानां सदसि जलजपाणे लप्स्यते त्वन्यथायम् ॥ ७ ॥

भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्तथा ।
तथापि यामि तत्पारं कृपानौकासमाश्रितः ॥ ८ ॥

यदि भाष्यप्रकाशीयं रहस्यं वेत्तुमिच्छथ ।
तदा पश्यत विद्वांसो रश्मिं स्पष्टचमत्कृतिम् ॥ ९ ॥

अतिगूढार्थं भाष्यं विवरीतुं शास्त्रार्थत्वेनानिर्वचनीयं वस्तु निर्दिशन्ति **संगीत**मित्यादिना । **संगीत**मिति । शिवादयोपि गीता इति तद्व्युदसितुं समिति । तथा च शेषितया गीतमित्यर्थः । **श्रुतिमूर्धभि**रिति । वेदान्तैरित्यर्थः । 'ऋचां मूर्धानं यजुषामुत्तमाङ्गं साम्नां शिरोऽथर्वणां मुण्ड-

---

१. नामरूपयोर्भजने, यथा नामभजने श्रीमदाचार्यास्तथा स्वरूपभजने श्रीविट्ठलेश्वराः । २. पद्मेति पाठः । ३. 'अलं वयं ते महिमाऽनुवर्णने' इति श्रीभागवतचतुर्थस्कन्धेऽलंयोगे चतुर्थीस्थले सप्तम्यपि दृश्यते ।

भाष्यप्रकाशः।

दूरं साधनसंपदां निरुपधिस्नेहैः सुखापं वृतैः।
रासोल्लासवशंवदव्रजवधूवृन्दे वसन्तं सदा
दासक्लेशहरं मुदा परतरं श्रीकृष्णदेवं श्रये ॥ १ ॥
मन्दान् वीक्ष्य जनान् विभुः श्रुतिगणं व्यस्याऽथ कारुण्यतः
स्त्रीशूद्रादिहिताय भारतमुखेनोक्त्वा तदर्थं पुनः।
बुद्धिं शोधयितुं चकार सुविदां यो ब्रह्मसूत्रात्मकं

रश्मिः।

मुण्डम्'इति कौषीतकिश्रुतेः। एतेन मुख्यं प्रमाणं प्रदर्शितम्। समन्वयरूपः प्रथमाध्यायार्थश्च दर्शितः। **तदविदां वागाद्यतीत**मिति। वेदान्ताविदां वागाद्यतीतं, न तु सर्वथेत्यर्थः। 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्युक्त्वा 'आनन्दं ब्रह्मणो विद्वान्' इति श्रुतेः। 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतेश्च। 'विदूरकाष्ठाय मुहुः कुयोगिनाम्'इति स्मृतेश्च। तेन मतान्तरनिराकरणरूपो द्वितीयाध्यायार्थ उक्तः। **विदा**मित्यादि साधनानां संपद्येषां तेषां विदां **दूर**मित्यर्थः। 'यस्यामतं तस्य मतं मतं यस्य न वेद सः' इति श्रुतेः। 'नायमात्मा प्रवचनेन लभ्यः' इति श्रुतेश्च। तर्हि किमपि साधनं नास्ती-त्याकाङ्क्षायामस्तीत्याहुः **निरुपधिस्नेहै**रिति। निरुपधिः स्नेहो येषां तैरित्यर्थः। 'नायमात्मा बलहीनेन लभ्यः' इति श्रुतेः, बलं भक्तिरिति सिद्धान्तः। 'वशीकुर्वन्ति मां भक्त्या' 'भक्त्याहमेकया ग्राह्यः' इत्यादिस्मृतिशताच्च। किंच 'ब्रह्मविदाप्नोति परम्' 'तमेव विदित्वातिमृत्युमेति' इत्यादावपि स्नेह एवो-च्यते। प्रियत्वप्रकारकबुद्धेरेव स्नेहपदार्थत्वात्। पुत्रे स्निह्यतीत्यादौ पुत्रविषयिणीं प्रियत्वप्रकारां बुद्धिं करोतीति प्रत्ययात्। तेन साधनं दर्शितम्, तृतीयाध्यायार्थश्चोक्तः। कर्मधारयपक्षे तु बहुवचनं परिकर-स्यापि साधनत्वाय। तेन भक्त्यंशानां साधनत्वम्, न तदतिरिक्तानामित्युक्तम्। तत्रापि प्रेम्णि विशेष-माहुः **सुखाप**मिति। अधिकारिण आहुः **वृतै**रिति। 'यमेवैष वृणुते तेन लभ्यः' इति श्रुतेस्तथेत्यर्थः। फलाध्यायार्थमाहुः **रासोल्लासे**त्यादि। रसानां समूहो रासस्तत्र तेन वा य उल्लासः परस्परमाश्लिष्य क्रीडा स रासः, रससमूहत्वात्, भावे घञ् वा, उत्तरोत्तररमणेच्छा वा। तेन **वशंवदे व्रजवधूवृन्दे सदा वसन्त**मित्यर्थः। सप्तम्यत्राभिव्यापकाधारे बोध्या। 'तिलेषु तैलं दधनीव सर्पिः' इति श्रुतेः, सर्वस्मिन्नात्मास्तीति लौकिकः। तादृशोपि भक्तोन्मुख इति भजनीयत्वमाहुः **दासक्लेशहर**मिति। **सदे**त्यत्राप्यन्वेति। **परतर**मिति। 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति श्रुतेः। **श्रीकृष्णदेव**मिति। एतच्च फलाध्यायतृतीयपादे 'समान एवं चाभेदात्' इति सूत्रे उपपादितम्। अतिधृतिरत्र जातिः। शार्दूलविक्रीडितं छन्दः। 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति तल्लक्षणात्। **दासक्लेशहर**मितिपदेनाभिव्यज्यमानस्य भक्तनिष्ठभावस्य ग्रन्थकर्तृभावपोषणात्। भावस्य भावाङ्गत्वेन प्रेयोऽलंकारः। रसो भक्तिः। स च तृतीयाध्यायतृतीयपादे 'व्यतिहारो विशिंषन्ति हीतरवत्' इति सूत्रभाष्य उक्तः। यथास्या अतिरिक्तरसत्वं तथोपपादितं मया भक्तिमार्तण्डस्य प्रमेयप्रकरणे, एतद्रश्मौ चैतद्वक्ष्यते ॥ १ ॥

उपष्टम्भकं स्तुवन्तो व्यासं नमन्ति युगलेन **मन्दान्वीक्ष्ये**त्यादि। **तदर्थ**मिति वेदार्थ-मित्यर्थः। **बुद्धिं शोधयितु**मिति 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः' इति श्रुतेरित्यर्थः। **चकारे**ति भारतकरणसूत्रकरणयोः पूर्वापरीभावस्तु 'कृतवान् भारतं यस्त्वम्' 'जिज्ञासितमधीतं च' इति पाठक्रमात्। सोयं पूर्वतन्त्रे दशमस्य पञ्चमे पादे 'ऐन्द्रवायवस्याग्रवचनादा:

भाष्यप्रकाशः ।

वेदान्तार्थविकासकाद्भुतपदं शास्त्रं गुणैरुज्ज्वलम् ॥ २ ॥
एवं सर्वहितं चरन्नपि यदाखिद्यत्तदा नारदात्
तत्रोपायमवेत्य खेदहतये दृष्ट्वा समाधौ हरिम् ।
श्रीमद्भागवतेन संशयमहन् भक्तिप्रचारोद्यत-
स्तं कृष्णं मुनिमानमामि करुणं ज्ञानावतारं हरेः ॥ ३ ॥
सर्गादौ स्वमतं समस्य विधये यं ब्रह्मवादं जगौ
कौन्तेयोद्धवयोः प्रकाश्य च पुनर्वेदान्तसारं हरिः ।
तं व्यासाशयगोचरं प्रथयितुं यैर्भाष्यमाभाषितं
तानाचार्यवरान्नमामि करुणान् श्रीवल्लभाख्यान् प्रभून् ॥ ४ ॥
श्रीवल्लभप्रतिनिधिं तेजोराशिं दयार्णवम् ।
गुणातीतं गुणनिधिं श्रीगोपीनाथमाश्रये ॥ ५ ॥
श्रीविठ्ठलेशपादाब्जनखचन्द्ररुचः सदा ।
अलंकुर्वन्तु मत्स्वान्तं मायावादतमोहराः ॥ ६ ॥

रश्मिः ।

दितः प्रतिकर्षः स्यात्' इत्यधिकरणे चिन्तितः । ज्योतिष्टोमे 'उपांश्वन्तर्यामौ धाराग्रहौ' धारया गृह्णातीत्युक्तेर्विधाय, ऐन्द्रवायवो ग्रहस्तृतीयः 'ऐन्द्रवायवाग्रा ग्रहा गृह्यन्ते' इति श्रूयते । स न तयोः पूर्वं गृह्यते पाठक्रमान्न ह्ययमग्रताविधिः, किंतु ग्रहविधिरतः स्वस्थानस्यैवैन्द्रवायवस्य ग्रहणमिति । **गुणैरुज्ज्वल**मिति व्यञ्जनाकाङ्क्षाप्रभृतिभिरुज्ज्वलमुत्तममित्यर्थः ॥ २ ॥

यदाखिद्यदिति । यदाखिद्यत्तदा नारदात् तत्रोपायमवेत्य खेदहतये भक्तिप्रचारोद्यतो जात इत्यन्वयः । तेन हेतुहेतुमद्भावाभावान्न लट्लिङौ ॥ ३ ॥

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ, तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' इतिश्रुतिमनुसंदधानाः सर्वाचार्यशिरोमणित्वेन ब्रह्मवादप्रवर्तकानाचार्यान्नमन्ति **सर्गादा**वित्यादि । **यं ब्रह्मवाद**मिति । द्वितीयस्कन्धे नवमे चतुःश्लोक्यां ब्रह्मवित्प्रपाठके च प्रसिद्धम्, नृसिंहोत्तर-तापिनीये चेत्यर्थः । **प्रकाश्ये**ति व्यस्येत्यर्थः । अदृश्यत्वाधिकरणे स्फुटीकृत्येति यावत् । **आचार्य-वरा**निति । 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्' इति सूत्रेण बहुवचनम् । एकस्मिन्नर्थे वर्तमानः शब्दो बहूनामर्थानां वचनं बोधको भवतीत्यतिदेशोऽयम् । परंतु भावप्रत्ययं विना जातेः प्राधान्येनाख्यामपेक्ष्यते । जातौ शक्त्यङ्गीकारे चेदमेव मानम् । तथा च महाभाष्यं 'यावद्ब्रूयादेकोर्थो वा बहुवद्भवतीति तावदेकस्मिन्बहुवचनमिति' इति शेखरे स्पष्टम् । 'एकत्वं न प्रयुञ्जीत गुरावात्मनि चेश्वरे' इति वाक्याच्च । 'अत एव प्राणाः' इति श्रीव्याससूत्रेषु प्राणपदोत्तरबहुवचनदर्शनात्प्रमाण-भूताच्च एवमेव प्रयोक्तव्यमस्तु ॥ ४ ॥

आचार्यज्येष्ठपुत्रानाश्रयन्ति **श्रीवल्लभे**त्यादि । वितानं छन्दः । 'वितानमाभ्यामन्यत्' इति लक्षणात् । आभ्यामित्युपलक्षणम् । विद्युन्मालादिभ्योऽखिलेभ्यो यदतिरिक्तमनुष्टुब्वृत्तं तदेव वितान-मिति ॥ ५ ॥

मायावादतमोहरा इति । 'स्थानविशेषात्प्रकाशादिवत्' इति सूत्राष्टकसहितसार्धाध्यायस्य श्रीमद्विठ्ठलेश्वराचार्यप्रणीतत्वादितिभावः ॥ ६ ॥

भाष्यप्रकाशः ।

तत्पुत्रान् सह सूनुभिर्निजगुरून् श्रीकृष्णचन्द्राह्वयान्
भक्त्या नौमि पितामहं यदुपतिं तातं च पीताम्बरम् ।
वन्दे च व्रजराजमन्वयमणिं यद्रोचिषा मादृशो-
ऽप्यासीन्मूर्ध्नि कृपापरः प्रभुवरः श्रीबालकृष्णः स्वयम् ॥ ७ ॥
श्रीवल्लभाचार्यपदाम्बुजाते भक्त्या मुदाऽन्तर्हृदि संनिवेश्य ।
भाष्यप्रकाशे प्रयतेऽतिदीनो निःसाधनस्तत्करुणाबलेन ॥ ८ ॥
आचार्यवाचः प्रणमामि भाष्यसुबोधिनीस्था इतराश्च यास्ताः ।
मत्स्वान्त आगत्य कृपाप्लुतास्ता मदीयवाचां रचयन्त्वलंकृतिम् ॥ ९ ॥

अथ स्वालौकिकानुभावप्रकटनहृदयस्य भगवत आज्ञया तदर्थमाविर्भूताः श्रीमदाचार्या-

रश्मिः ।

सर्वानेव मान्यान् नमन्ति **तत्पुत्रा**निति ॥ ७ ॥

ग्रन्थकरणे स्वप्रतिभाहेतुं वदन्तस्तत्करणं प्रतिजानते **श्रीवल्लभाचार्ये**त्यादि । त्रिष्टुप्जातिः । इन्द्रवज्राछन्दः । 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति तल्लक्षणात् । **भाष्यप्रकाश** इति । प्रकाश-शब्द आतपं वक्ति । भाष्यसमाप्तौ 'आविष्कृतोऽयं भुवि भाष्यभास्करः' इति भाष्यस्य भास्करत्वोक्तेः । निमित्तत्वं सप्तम्यर्थः ॥ ८ ॥

'भूतैर्महद्भिः' इति न्यायेन प्रार्थयन्ते **आचार्यवाच** इत्यादि । उपजातिः । 'अनन्तरोदीरित-लक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इति लक्षणात् । गाथाछन्दः । वस्तुतस्तु **रचयन्तु भूषा**मिति पाठः प्रतिभाति । तथा चाख्यानकीछन्दः 'आख्यानकी तौ जगुरू गमोजे जतावनोजे जगुरू गुरुश्चेत्' इतिलक्षणात् । ओजे विषमे पादे । अनोजे समे । हस्ताक्षरपुस्तके त्वयमपाङ्कः, अन्याक्षरैर्लिखितश्च । **आगत्य कृपाप्लुता** इत्यनेन वाचामाधिदैविकत्वं ध्वन्यते ॥ ९ ॥

भाष्यमवतारयन्ति **अथे**त्यादिना । भाष्ये परसवर्णाभावस्तु वैकुण्ठस्थतास्फोरकः, न व्याकरण-विरोधाधायकः । सत्यलोक एव परसवर्णश्रवणात् । आकाशवाणीवत् । तथाहीति निदर्शनार्थस्यो-ल्लेखस्तु ब्रह्मभावात् । यतः सत्यलोकमभिव्याप्यैव तथाहीति प्रयोगो मया श्रुतः पूर्ववदेव । सोपि भाष्ये क्वचिदेव दृश्यते । वैकुण्ठस्थता तु श्रीमदाचार्याणां ब्रह्मभावेन सर्वरूपत्वात् स्फुटैव ।

'नमामि हृदये शेषे लीलाक्षीराब्धिशायिनम् ।
लक्ष्मीसहस्रलीलाभिः सेव्यमानं कलानिधिम्' इति-

दशमश्रीसुबोधिनीप्रारम्भश्लोकात्, असंधिस्तु शिवादिभिरपि अकरणात् तस्याः । युक्ता सेति सारोत्र । **अथे**ति, अथशब्दः आरम्भार्थकः, । न त्वानन्तर्यार्थकः, आचार्यैः सूत्रपाठात् पूर्वं मङ्गलाकरणात् । तथा चाहुराचार्याः सुबोधिन्यामथ व्याख्या इति । निबन्धाद्यानन्तर्यं वा तदर्थः । **स्वालौकिकानुभावो** ब्रह्मवादलक्षणो (पत्रावलम्बनोक्तः) मायावादव्यतिरिक्तः । स्वस्य ब्रह्मणोऽ-लौकिको लोकोत्तरोऽनुभावो ब्रह्मज्ञानमनु पश्चाद्भावो भक्तिः प्रेम च यौगिकोर्थः, रूढो भिन्नः । कीदृ-गित्याकाङ्क्षायां ब्रह्मणो वादो यत्र त्वलौकिकानुभावेन 'ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः परः'इति

भाष्यप्रकाशः ।

तस्यानुभावस्य सर्ववेदान्ततात्पर्यगोचरत्वज्ञापनाय वेदार्थतामरसतरणेर्भगवतो बादरायणस्य सूत्राणि व्याकरिष्यमाणाः,

रश्मिः ।

निबन्धाज्ज्ञानमनु ब्रह्मभावो भक्तिः लक्ष्यते तेन लक्षणं, ब्रह्मवादो लक्षणं यस्य स्वालौकिकानुभावस्य लक्ष्यस्य स तथोक्तः । अनुभावस्वरूपं प्रथमे सुबोधिन्यां सप्तदशाध्याये 'इत्थंभूतानुभावः' इत्यत्रास्ति । मृतोपि जीवन् तिष्ठतीत्थंभूतानुभावः इति । [तथा चायं निष्कर्षः । उक्ते प्रतीतस्याप्रतीतस्य चार्थस्य स्वस्य ब्रह्मण आचार्याणां चालौकिको लोकानधिगतो योयमनुभावः । मानुषीं तनुमाश्रितस्य सन्मनुष्याकृतेश्च जगज्जन्मादिकर्तृत्वं सकलमतनिरासपूर्वकं अध्यायद्वयप्रतिपाद्यं साधनफलत्वे च । आचार्याणां तत्प्रतिपादकत्वं चतुर्षु अध्यायेषु स प्रथमस्कन्धारूढो यौगिकश्चेति यौगिको ज्ञानमनुभावो भक्तिस्तद्रूपोपि । तदुक्तं वल्लभाष्टके 'तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया' इति । व्याख्यातं च टीकाकृद्भिः] **सर्ववेदान्तेति सर्ववेदान्तानां तात्पर्यगोचरत्वस्य ज्ञापनाय** । अत्रेदं ज्ञेयम् । शक्तिलक्षणातात्पर्येषु तिसृषु वृत्तिषु तात्पर्यवृत्तिगोचरत्वमित्थम् । ननु तात्पर्यवृत्तिरेव नास्ति । तात्पर्यानुपपत्तेर्लक्षणाबीजत्वस्य 'यष्टीः प्रवेशय' 'काकेभ्यो दधि रक्ष्यताम्' इत्यादिषु स्पष्टतया वृत्तेर्द्वैविध्यादिति चेत्, सत्यम्, वृत्तिद्वयपक्षोप्यस्ति । परेषामालंकारिकाणां वृत्तित्रयपक्षस्तु,

'भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य,
यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत्' इत्यादौ

व्यञ्जनावृत्तिमन्तरेण निर्वाहाभावादिष्टः । न चात्र लक्षणयैव निर्वाह इति वाच्यम् । राजासंबन्धिनि गजे तदयोगात् । दूषणानां यौक्तिकत्वेन 'युक्तं च सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा' इति कृष्णवाक्यान्मुख्यार्थस्य बाधाद्यभावाच्च । स्फुटमन्यत्**प्रस्थानरत्नाकरे** । एवं च वृत्तिद्वयपक्षेपीदं युक्तम् । तथा हि प्रस्थानरत्नाकरे द्वेधावृत्तिप्रपञ्चे व्यञ्जनास्थले तात्पर्यवृत्त्या निर्वाह्याभिधागौणीतात्पर्यरूपास्तिस्रो वृत्तय आलंकारिकरीत्या वृत्तिपदसहिता व्यवस्थापिता इति 'भद्रात्मनः' इत्यादौ अभिधामूलव्यञ्जनास्थलेऽभिधामूलतात्पर्यवृत्तिस्वीकारः । दार्ष्टान्तिके तु तात्पर्यमात्रं न वृत्तिः । एवं च 'स्याद्वाचिको लाक्षणिकः शब्दोत्र व्यञ्जकस्तथा' इत्यत्र 'स्याद्वाचिको लाक्षणिकः शब्दस्तात्पर्यवांस्तथा' इत्येवं राद्धान्तिकपाठेपि 'यतो वाचो निवर्तन्ते' इति श्रुत्याऽस्यापि शब्दस्य निवृत्तेः । अतो मूले तात्पर्यमात्रमुक्तं, न वृत्तिपदम् । नन्वेवमप्यभिधामूलव्यञ्जनास्थले अभिधैव व्यापारो नातिरिक्ता व्यञ्जनेत्यादि उपपाद्य यथासंभवं तात्पर्यवृत्त्यर्थः धर्माभिधास्वन्तभावान्नातिरिक्ता व्यञ्जनेति पठनाद् 'भद्रात्मनः' इत्यादिस्थलेऽभिधादिवृत्तिप्राप्त्या दार्ष्टान्तिकेऽप्यभिधादिवृत्त्यावश्यकत्वात् त्रिविधशब्दस्य यच्छब्दार्थमूलब्रह्मणो निवृत्तिरिति चेत् मैवम् । ['यतो वाचः' इत्यस्या इदमित्थतया तत्स्वरूपे निरूपणनिषेधेन परत्वमत्रैव भाष्य ईक्षत्यधिकरणे चाशब्दत्वनिषेधेन सामान्यतो यच्छब्दार्थे ब्रह्मणि निर्गुणानन्दमात्रयच्छब्दाभिधायाः स्वीकारात् । नन्वेवं सति **तात्पर्यगोचरत्वज्ञापनायेति** मूलाशुद्धिरिति चेत्, न, सर्ववेदान्तपदपरत्वान्मूलस्य । एकापेक्षया बहूनामनुग्रहस्य न्याय्यत्वात् । 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः' इति गीतावाक्यादोमादाय सर्वाभिधादानं रभसात् । 'इदं सर्वं तस्योपव्याख्यानम्'इति श्रुतावुपोपसर्गेण पूर्वोक्ताथोदरणात् । यत उपे-

भाष्यप्रकाशः।

'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः'॥

रश्मिः।

त्यस्य समीपार्थकत्वम्। अन्यथा यत इति श्रुतिभाष्यविरोधापातः। नन्वेवं सति विराजि नारायणादिरूपेषु 'नारायणादिरूपाणि'इत्यादिवक्ष्यमाणा वेदस्य वेदान्तानां चाभिधावृत्तिर्विराजि प्रमेयम्। 'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्। एतावान् सर्ववेदार्थः' इत्येकादशे निरुक्तात् जगद्व्यापारवर्जाधिकरणे यद्रूपमुक्तम्, तत्तु परं भावं जानतां तात्पर्यं, तदगोचरत्वं च। तत्र नूनं परस्मिन्भावेऽभिधावृत्तिर्गौणी वोङ्कारोपव्याख्यानरूपत्वात्, सर्वस्य शब्दजातस्य घटादौ शक्तिसंकोच इत्याद्युपपादयिष्यते त्वया। किंच, तात्पर्यानुपपत्तिरूपबीजस्य सत्त्वाल्लक्षणया भवितव्यमिति चेत् न। परस्मिन्वृत्तिद्वयासंगतेः। 'यतः' इति श्रुत्येदमित्थतया वागप्राप्ये तद्व्यापारद्वयासंभवादिदमित्थतांशे। एवं च भाष्यप्रकाशोक्तवाक्येषु मूर्त्या तस्य परं पदे श्रीमहाविष्णावभिधया वृत्त्या प्रवृत्तानां वैदिकानां शब्दानां परब्रह्मनिर्गुणानन्दमात्राधिपदशक्त्यै तेषां

'संयोगो, विप्रयोगश्च, साहचर्यं, विरोधिता,।
अर्थः, प्रकरणं, लिङ्गं, शब्दस्यान्यस्य संनिधिः॥
सामर्थ्यमौचिती, देशः, कालो, व्यक्तिः, स्वरादयः' इति

काव्यप्रकाशोदितैः प्रकरणादिभिः विशेषस्मारकैः परमस्मिन्तात्पर्येणान्येषां पदानां वैदान्तिकानां पुरुषोत्तमे प्रवृत्तिः। यथा 'भद्रात्मनः' इत्यादौ वारणपदसामर्थ्येन तात्पर्यव्यापकेनाभिधया वृत्त्या राज्ञि प्रवृत्तानामपि तात्पर्यवृत्तिर्वारणे इति। ननु व्यञ्जनावृत्तिर्वारणे न तात्पर्यवृत्तिः, सा तु ह्यभिहितान्वयवादिनां मतम्। आकाङ्क्षायोग्यतासंनिधिवशाद्वक्ष्यमाणानां पदानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोपि वाक्यार्थः समुल्लसति। तत्रेति ये 'घटमानय, गामानय, शुक्लां दण्डेन देवदत्त' इत्यादौ पदानि स्वार्थमभिधायान्वितानि भवन्तीति वदन्ति तेऽभिहितान्वयवादिन इति चेत् न। यत् किंचित् घटमानय दुष्टां गामानयेत्यादौ यत्किंचित्त्वांशे दुष्टत्वांशे च तात्पर्यवृत्त्या पूर्वोक्तयैव निर्वाहात्। नन्वेवं सति जिज्ञासालक्षणसमन्वयेक्षत्यधिकरणेषु सामान्येषु विचाराभावेप्यानन्दमयाधिकरणेपि न विचारकः। परन्त्वन्तस्तद्धर्माधिकरणे सवितृमण्डलमध्यवर्तिनि शक्तिः, वैदिकानां पदानां नारायणादिरूपाणां न तात्पर्यम्। तल्लिङ्गाधिकरण आकाशादिपदानां सा, न तत्। अतिदेशाधिकरणे प्राणादिपदानां सा, न तत्। ज्योतिश्चरणाधिकरणे ज्योतिरादिपदानां शक्तिः, न तत्। अनुगमाधिकरणे प्राणपदस्य सा, न तत्। तात्पर्यं तु फलाध्याये ब्रह्मणि नित्यलीलाविशिष्टेऽतः प्रारम्भेऽभिधालक्षणशक्त्या विचारात् स्वालौकिकानुभावस्य तात्पर्यगोचरत्वं कथमिति चेत्, सत्यम्। उपासनया शुद्धान्तःकरणानां पुंसां भक्त्या पुरुषोत्तमाविर्भाव इति सिद्धान्तादुपासनाविषयाणां विभूतीनां भक्तिविषयस्य पुरुषोत्तमस्य अभिधया प्रतिपाद्यत्वेपि बाधकाभावात्। लौकिकानुभावत्वात्। नित्यलीलायां भक्तमनोरथपूरकस्य रसरूपस्य श्रीपुरुषोत्तमस्य तात्पर्यगोचरत्वमलौकिकानुभावत्वात्। यद्वा। निर्गुणात् सृष्टिरिति राद्धान्तात्तात्पर्यगोचरत्वमेवातिव्याप्तिवारणायेतराण्यधिकरणानीति निर्गुणत्वात् तेषां वाच्यांशे तात्पर्यगोचरत्वमेव। ननु सर्वैरेव भाष्यकृद्भिरेवं व्याख्यानात्

भाष्यप्रकाशः ।

इति भाष्यलक्षणात् सूत्रोपन्यास एवानुसरणसिद्धेः स्वकृतेरादित एव भाष्यत्वाय सूत्री-

रश्मिः ।

कथं स्वालौकिकानुभावप्रकटनमिति चेन्नैवम् । तैः सगुणब्रह्मणः सकाशात् सृष्टिरिति निरूपणान्न तात्पर्यविषयत्वम्, किंतु ह्यभिधेयत्वमिति, लौकिकत्वात् । तत्र ब्रह्मनिर्गुणादिपदानामभिधामूलं तात्पर्यम्, ब्रह्मणि नारायणादिपदानां कथमु तात्पर्यं, लक्षणाया अप्यभावेन लक्षणामूलव्यञ्जनापरपर्यायतात्पर्यस्याप्यभावादिति चेन्न । जन्यजनकभावसंबन्धस्य शक्यसंबन्धस्य सत्त्वेन लक्षणा गौणीरूपा भविष्यति, सति प्रमाणे तात्पर्यं त्वलौकिकपरमोत्कृष्टत्वे, यथा 'गङ्गायां घोष' इत्यत्र शक्यस्य प्रवाहस्य संबन्धः संयोगः, तस्य तीरे सत्त्वात्तीरे लक्षणा, शैत्यपावनादौ तदभावात्, तात्पर्यवृत्तिरालंकारिकाणां तथा तात्पर्यम् । फलं तु बृहद्वामनपुराणे उत्तरखिले च शाब्दं बोधरूपम् ।

'श्रुतय ऊचुः—नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत ।

सगुणं ब्रह्म सर्वेदं वस्तुबुद्धिर्न तेषु नः ॥ १ ॥
ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं निर्गुणं परम् ।
वाङ्मनोगोचरातीतं ततो न ज्ञायते तु तत् ॥ २ ॥
आनन्दमात्रमिति यद्वदन्ति हि पुराविदः' इति ।

अत्रायं नारायण इत्यादौ ह्यभिधावृत्त्याऽखिलभागवतोक्तधर्मवत्त्वेन नारायणज्ञानमीप्सितम् । परं तु नराणां समूहो नारं तदयनं यस्येति सगुणनारायणपदविग्रहाभावे नारा आपः ता अयनं यस्येति विग्रहे, ब्रह्मेदमित्यादौ न तथापि तु ब्रह्मत्वेन ज्ञानमिति ह्यशेषतत्स्थधर्मवत्त्वेनाज्ञानमेव । तात्पर्यवृत्त्या तु ज्ञानमेव । 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र दध्युपघातकज्ञानवत् । प्रस्थानरत्नाकरे तु स्वमतनिरूपणावसरे यदुक्तमभिधामूलव्यञ्जनास्थलेप्यभिधैव व्यापारो नातिरिक्ता व्यञ्जना । वक्त्रा स्वविवक्षितबोधोत्पादनाय संयोगाद्यैस्तस्या एकत्र नियमनेप्यभिधेयान्तराभिधाविषयकसंस्कारस्य सदृशादिभिरुद्बोधे तयैवाभिधेयान्तरस्फूर्तिसिद्धौ वृत्त्यन्तरकल्पनस्य व्यसनमात्रत्वात् । न च संयोगादीनां संस्कारोद्बोधप्रतिबन्धकत्वं शक्यवचनम् । 'अस्याननं योनिरुदारवाचाम्' इत्यत्र पदान्तरसाहचर्येप्यश्लीलानुसंधानजन्यजुगुप्साया अनुभूयमानत्वादिति । तत्तु 'भद्रात्मनः' इत्यादौ विलक्षणबोधस्य गजांशेऽनुभूयमानस्य तथाङ्गीकारमाश्रित्य, पूर्वोक्तं तु तमाश्रित्येति ज्ञेयम् । प्रकृतमुच्यते । द्वेधावृत्तिपक्षेपि बुभुत्सितावाचकत्वे तत्प्रतीतिजनकत्वस्य तात्पर्यवृत्तिलक्षणत्वात् फललक्षणादिव्यञ्जनान्तानां तात्पर्यवृत्तावेवाभिनिवेशेन शक्तिगौणीरूपं वृत्तिद्वयमस्माकं शक्तिलक्षणात्मकं तु परेषाम् । परंतु तात्पर्यस्याभिधायामन्तर्भावे, अनन्तरभावे तु वृत्तित्रयम् ।] **इति भाष्यलक्षणा**दिति । अत्र सूत्रानुसारित्वे सति यद्वाक्यघटकं स्वपदवर्णकं तत्त्वं भाष्यलक्षणं पर्यवसन्नम् । तच्च 'साङ्गोऽध्येयः' इत्यादि स्वोक्तस्य 'अर्थज्ञानार्थम्' इत्यादिना वर्णनादत्र समन्वितम् । महाभाष्येपि 'अथ शब्दानुशासनम्' इत्यादिस्वोक्तस्य 'अथेत्ययं शब्दोऽधिकारार्थः' इत्यादिना वर्णनात् समन्वितम् । गुरुञ्जनोपाख्यानेऽतिव्याप्तिवारणाय सत्यन्तम् । वृत्तावतिव्याप्तिवारणाय विशेष्यम् । सूत्रानुसारित्वं च न सूत्रानुगुणत्वम् । तथा सति 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः' इत्यादिश्रुतौ 'चमसवदविशेषात्' इति सूत्रानुगुणायामतिव्याप्तिः, अतः सूत्रानुसारिव्याख्यानत्वं तदर्थः । प्रसिद्धश्रुतावपि ज्ञेयम् । 'ब्रह्मविदाप्नोति परम्' इत्यादौ । तथा च सूत्राणां

अथातो ब्रह्मजिज्ञासा ॥ १ ॥ (१-१-१)

भाष्यप्रकाशः।

याथशब्देनैव मङ्गलसिद्धेश्च सूत्रमेवादौ पठन्ति अथातो ब्रह्मजिज्ञासेति। नच मङ्गलाचरणान्तरादर्शनाच्छिष्टाचारविरोधः शङ्कनीयः। महाभाष्ययोगभाष्ययोर्ग्रन्थकृत्कृतस्याथशब्दाति-

रश्मिः।

श्रुत्यनुसारित्वान्नातिव्याप्तिः आर्थिकार्थस्पर्श्यध्यासभाष्येपि न सेति। यतु शंकराचार्यैः 'शास्त्रयोनित्वात्' इति सूत्रांशं प्रथमान्तत्वेनानन्दमयाधिकरणं च भङ्क्त्वोत्सूत्रं व्याख्यातम्, 'भावे चोपलब्धेः' इति सूत्रं 'भावाच्चोपलब्धेः' इति पाठं भित्त्वा व्याख्यातम्, माध्वरामानुजभास्कराचार्यैः 'साभाव्यापत्तिरुपपत्तेः' इति सूत्रं 'स्वाभाव्यापत्तिः' इत्येवं पाठं भित्त्वा व्याख्यातम्' तत्राव्याप्तिर्न दोषाय, अन्यत्र तु गौण्या निर्वाहः। सूत्रमेवेति। सर्वतः सारभूतार्थबोधकत्वे सूचकत्वे च सति स्वल्पाक्षरपदत्वमिति सूत्रलक्षणम्। 'खल्वहं ब्रह्म सूत्रं' सूचनात्सूत्रम्' इत्यारुणिश्रुतेः।

'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च,।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः' ॥

इति स्मृतेश्च। वस्तुतस्तु यत्राभियुक्तानां सूत्रत्वव्यवहारस्तानि सूत्राणीति। अतो महति 'अचतुरविचतुर'इत्यस्मिन्पाणिनीये सूत्रे नाव्याप्तिः ॥

अथातो ब्रह्मजिज्ञासेति इति ॥ १ ॥ प्रतीकमिदम्, क्रियाविशेषणं तृतीयान्तव्यतिरिक्तम्। तृतीयान्तं तु करणमिति विवेकः। ननु ब्रह्मपदेन किमुच्यते प्राणो वा ब्रह्मैव वा। तथाहि 'एष उ एव बृहस्पतिः' इति श्रुतेः प्राण एष प्राण इत्यर्थात्। न च प्राणेत्यनया श्रुत्या बृहस्पतित्वं विहितम्, न ब्रह्मत्वमिति वाच्यम्। 'ब्रह्म वै देवानां बृहस्पतिः' इत्यारण्यकसमाप्तिग्रन्थस्थश्रुतेरिति चेत्, मैवम्। द्वितीयाध्याये चतुर्थचरणे 'श्रेष्ठश्च' इत्यधिकरणे 'न वायुक्रिये पृथगुपदेशात्' इति सूत्रे प्राणस्योपपादिततत्त्वान्तरकत्वात्। न च ब्रह्मापेक्षया ब्रह्मणस्पतिजिज्ञासा प्रस्तोतव्येति शङ्क्यम्। बृहदारण्यके 'एष उ एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिः' इतिश्रुत्योर्ब्रह्मपदेन वाग्ग्रहणेनादोषात्, तत्त्वान्तरत्वाच्चेति। अत एव जिज्ञासासूत्रे ब्रह्मपदेन वेदान्ता गृहीताः। 'वाग्वै ब्रह्म' इति श्रुतेः। न च शुकादिप्रभृतीनां जिज्ञासा जैमिनिसूत्रानुसारेणाधिकर्तव्येति वाच्यम्। पौर्वतन्त्रीयत्वात्। 'न च वेदादृते किञ्चिच्छास्त्रं ब्रह्माभिधायकम्' इति महाकौर्म्यात्। 'नन्वेवमपि स दोषस्तदवस्थ एवेति चेत्, न। जैमिनेर्भगवतो व्यासस्य शिष्यत्वाच्छास्त्रभेदाच्च। न च वेदजिज्ञासाधिकर्तव्या नामाख्यातोपसर्गनिपातादिभिर्धर्मजिज्ञासया षडङ्गैरितराङ्गैश्च तस्या निराकाङ्क्षत्वात्। इतरत् सर्वं साधनाध्यायतुर्यपादेऽचीक्लृपन्नाचार्याः अतस्ततोऽवधेयम्। **शङ्कनीय** इति तर्कितव्य इत्यर्थः। आङ्पूर्वस्याप्ययमर्थः। **ग्रन्थकृत्कृतस्ये**ति। तत्र ग्रन्थो नाम संबन्धप्रयोजनज्ञानाधीनशुश्रूषाजन्यश्रुतिविषयः संदर्भः।

'सिद्धार्थं सिद्धसंबन्धं श्रोतुं श्रोता प्रवर्तते।
शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजनः' ॥

---

१. अस्मत्सविधे द्वित्राणि रश्मेः पुस्तकानि सन्ति, तेषां रश्मिकारसंशोधितं पुस्तकं शुद्धं समीचीनं च। तत्र इत आरभ्य एकोनविंशतिः पत्राणि न लभन्ते तदर्थमतीव प्रयतितेपि तत् संपादने न सफलप्रयत्नावयम्। ग्रन्थान्तराणि तु अशुद्धिपुनरुक्तिबहुलानि न विश्वसनीयानि तथापि तदवलम्बनेन ग्रन्थसंशोधने कृते बहूनिस्खलितानि नयनपथातिथीनि भवन्ति तानि विद्वद्भिः संशोध्यानि इत्यभ्यर्थ्यते शुद्धिकृद्भिः।

इदमत्र विचार्यते । वेदान्तानां विचार आरम्भणीयो न वेति ।

भाष्यप्रकाशः ।

रिक्तस्य मङ्गलस्यादर्शनेन, शाबरभाष्ये च 'अथातो धर्मजिज्ञासा' इति सूत्रमेवोपन्यस्य भाष्यारम्भदर्शनेन च विरोधाभावादिति । अस्यारम्भसूत्रत्वादत्राधिकारिविषयसंबन्धप्रयोजननिरूपणद्वारा शास्त्रारम्भः समर्थनीयः । शास्त्रप्रवृत्त्यावश्यकत्वहेतुरूपा संगतिश्च निरूपणीया । अन्यथा प्रेक्षावत्प्रवृत्त्यभावेन शास्त्रवैयर्थ्यं स्यात् । शास्त्रस्य वैधत्वमपि विचारणीयम् । अन्यथा वेदान्तानुपयुक्तत्वं, प्रामाणिकानादरणीयत्वं च स्यात् । तदिदं सर्वं हृदि कृत्वा भगवता श्रीबादरायणाचार्येणेदमधिकरणरूपं सूत्रं प्रणीयते, न तु ब्रह्मविचारप्रतिज्ञामात्रमत्र क्रियत इत्याशयेनाहुः इदमित्यादि ।

> विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
> संगतिश्चेति पञ्चाङ्गं शास्त्रेधिकरणं स्मृतम्' ॥

इति लक्षणाद् विषयादिपञ्चकघटितं वाक्यमधिकरणम् । तेनास्मिन् सूत्रे, इदं वक्ष्यमाणं बुद्धिस्थं विचार्यते । अग्रिमसूत्रेषु वेदान्तानां विचारणीयत्वादुपोद्घातेन चिन्त्यत इत्यर्थः । विषयादिकमाहुः **वेदान्तानामित्यादि** । नन्वत्रायं विषयाद्युपन्यासो न युक्तः, असौत्रत्वात् ।

रश्मिः ।

इत्युक्तेः शुश्रूषायाः संबन्धप्रयोजनज्ञानाधीनत्वम् । तर्ह्यथेति मङ्गलेनापि भाव्यं तत्राहुः **शाबरभाष्ये च**ेति । **अन्यथे**ति वैधत्वाभाव इत्यर्थः । **प्रणीयत** इति । स्मेति शेषः । **उपोद्घातेने**ति । तेनोपोद्घातोत्र संगतिरित्युक्तम् । तत्त्वं च प्रकृतसिद्ध्यनुकूलचिन्ताकालावच्छेदेन प्रकृतानुकूलत्वं प्रकृतोपपादकत्वं वा । एवमपि विशेषलक्षणसमन्वयेपि सामान्यलक्षणस्यानन्तर्याभिधानघटितत्वेनास्य सूत्रस्य च प्राथम्यान्न नैयायिकलक्षणसमन्वयः । किंतु, अधिकरणस्य पञ्चावयवत्वेन 'अथातो ब्रह्मजिज्ञासा' इति सावधानपुरुषप्रयुज्यमानवाक्यप्रयोजनकप्रकृतोपपादकत्वावच्छेदकेन ब्रह्मभक्तिविचारत्वेन रूपेण स्मृतस्य ब्रह्मभक्तिविचारस्योपेक्षानर्हत्वमित्येवं संगतिसिद्धान्तलक्षणसमन्वय इति बोध्यम् । इदं चेक्षत्यधिकरणे संगतिग्रन्थनिरूपणावसरे स्फुटमुपपाद्यम्, इयं चाध्यायानां पादानां च संगतिः । त्रिपदं जिज्ञासासूत्रं **अथातो ब्रह्मजिज्ञासे**ति । तत्र अतःशब्दार्थः स्वयमग्रे वक्तव्यः । तस्याधिकरणरचनानुपयोगात् । ब्रह्मशब्दार्थो वेदान्तानामिति । जिज्ञासाशब्दार्थो विचारः । अथशब्दार्थः आरम्भः । कर्तव्यादिपदाध्याहारापेक्षयारम्भो घञन्तादिरत आरम्भणीयो रभिरनीयर्प्रत्ययान्तः । अत उक्तं वेदान्तानां विचार आरम्भणीयो नवेति । अत्र प्रतीतार्थग्रहिलवादी तु शङ्कते **नन्वत्रे**ति । **असौत्रे**ति । सौत्रः प्रतीतोर्थः तद्भिन्नत्वात् । तद्विषयादिकमाहुः **विषयादिकमाहु**रिति । सूत्रे ब्रह्मपदस्य वेदेपि वृत्तिदर्शनेन तत्संबन्धिवेदान्तानां सूचनेन ब्रह्मपरत्वेपि ब्रह्मजिज्ञासेति शेषषष्ठ्या समासस्य वक्ष्यमाणत्वेन च जिज्ञासापदस्य विचारार्थकत्वस्य च तथात्वेनाथशब्दस्यारम्भापरपर्यायाधिकारार्थत्वस्यापि तथात्वेनायमेव विषयादिरित्याशयेन विषयादिकमाहुरित्यर्थः । **वेदान्तानां विचार आरम्भणीयो न वे**ति भाष्यात् । आरम्भार्थं उद्यम एवोत्तरत्रानुवृत्तिरूपाधिकारनिवेशाच्चेति । तथाहि, उद्यमत्वे सत्युत्तरत्रानुवृत्तिरासमन्तात् तादृशारम्भार्थः । भाष्ये **विचार** इति । सूत्रैर्वस्तुतत्त्वपरीक्षणमित्यर्थः । मीमांसेति यावत् । शेषे षष्ठी । अन्यथा, 'स्मृतेश्च' इत्यादिसूत्रेषु स्मृतीनां विचारकर्मता

भाष्यप्रकाशः ।

किंतु ब्रह्मजिज्ञासा कार्या न वा, ब्रह्म जिज्ञास्यं न वा, इत्येवं सूत्रानुसरणाद् युक्त इति चेन्न। तथोपन्यासे, 'तपसा ब्रह्म विजिज्ञासस्व' इतिश्रुत्या तपस एवोपदेशात् तद्विहाय व्यासपादैः किमिति वेदान्तवाक्यानि विचार्यन्ते, तपः कुतो नोपदिश्यत इत्याशङ्का स्यात्, श्रुतिविरुद्धत्वं च भायात् । एवमुपन्यासे त्वधीतवेदस्य, 'वेदान्तविज्ञानसुनिश्चितार्थाः' इति श्रुतिस्फुरणादस्यां च श्रुतावर्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुताकथनात् तस्य च विचारसाध्यत्वात् तत्स्फूर्त्याशङ्कानुदयाद् युक्त इति ।

किंच । जिज्ञासापदस्य च यौगिकार्थ एव प्रायः प्रसिद्ध इति ब्रह्मज्ञानेच्छा कर्तव्या न वा, ब्रह्म ज्ञानेच्छाविषयं कार्यं न वेति प्रथमतो बोधे, ततस्तावन्मात्रस्यापुरुषार्थत्वात् तत्रानुपपत्तौ भातायां पश्चाद् विचारं लक्षयित्वा ततस्तत्कर्तव्यत्वादिकं विचार्यम् । तदपि वेदान्तैरेव वक्ष्यमाणरीत्या विचार्यम् । अन्यथाकस्मिकता स्यात् । अत आवश्यकत्वादपि युक्तः ।

रश्मिः ।

न स्यात् । स्मृतयो विचार्यन्त इति । कर्मषष्ठ्या स्मृतीनां विचाराकर्मत्वात् । तथाच कर्मषष्ठीपरिग्रहे प्रतिज्ञाहान्याख्यनिग्रहस्थानापत्तिः । प्रकृते **किंतु ब्रह्मे**ति । ब्रह्मपदेन वेदान्ताः । अन्वयांनुपपत्त्या अध्याहारनिवृत्तये वा पक्षान्तरमाहुः **ब्रह्म जिज्ञास्यं न वे**ति । **तपसे**ति । नन्वियं श्रुतिः ब्रह्मप्रत्यक्षात्मकज्ञानसाधनविचारसाधनं तपः संतापात्मकमाह, द्वितीयस्कन्धनवमाध्याये तथोक्तेः । वेदान्तवाक्यानि तूपाङ्गत्वेन विचार्यन्त इति उपाङ्गविषयत्वाभावादिति चेत् तत्राहुः **इत्याशङ्के**ति । तथा च तर्कस्यान्यथाज्ञानत्वादुपाङ्गविषयेपि प्रत्यक्षसाधकविचारसाधनतपःप्रतिपादकश्रुतिस्फुरणमिति भावः । **विचार्यन्त** इति । सूत्रान्तरेषु विचार्यन्त इत्यर्थः । **श्रुतिस्फुरणा**दिति । नन्वितिकरणाभावात् कथं वेदान्तानामिति पदस्य 'वेदान्तविज्ञाने'ति श्रुतौ वेदान्तानामित्यन्तर्वर्तिविभक्तिमाश्रित्य वाक्यप्रतीकत्वमिति चेन्मैवम् । 'यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकम्' इत्युपक्रम्य 'सर्वं विष्णुमयं गिरोङ्गवदजः सर्वस्वरूपो बभौ' इति प्रक्षिप्ताध्यायश्लोके सर्वं विष्णुमयमिति पदद्वयस्येतिकरणाभावेपि सर्वं विष्णुमयं जगदिति वाक्यप्रतीकतायाः श्रीधरैः स्वीकारात् । आचार्यैरप्येवमिति । नन्वेवमपि सूत्रेण 'तपसा ब्रह्म विजिज्ञासस्व' इति श्रुतिस्फुरणस्य दुर्वारत्वेन तस्यां च तपसो ब्रह्मजिज्ञासाकारणतोपन्यासेन वेदान्तश्रुतिस्फुरणात्, तस्यां चार्थविचारस्य वेदान्तज्ञानकारणता, एवं चोभयोरर्थयोः स्फुरणमधिकम्, न तु शङ्कानुदय इत्यरुच्याहुः **किंचे**ति । **ब्रह्म, ज्ञानेच्छाविषयं कार्यं न वे**ति । क्रियाविशेषणत्वाद्द्वितीयान्तम्, आर्दि पचतीतिवत् । सार्थकप्रत्ययान्तधातूपस्थाप्यक्रियाविशेषणानां कर्मत्वमिति व्युत्पत्तेः । उभयलिङ्गता वा विषयपदस्य । **तत्रे**ति यौगिकार्थ इत्यर्थः । **लक्षयित्वे**ति स्वसाध्यत्वाख्यसंबन्धेन लक्षयित्वेत्यर्थः । नन्वेवमपि स्फुरितश्रुतिविरोधो नापैतीति चेत् न । तपो न मुख्यसाधनमित्यानन्दमयाधिकरणे वक्ष्यमाणत्वादिति, करणाभावश्रुतेरस्फुरणमेव वा । न्यायस्य क्वाचि-

१. अन्यथेति पाठः ।

भाष्यप्रकाशः ।

किंच । व्यासप्रवृत्तिबीजबोधनार्थत्वेनापि युक्तः । तथाहि । प्रथमस्कन्धे चतुर्थाध्याये 'द्वापरे समनुप्राप्ते' इत्यारभ्य, 'एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः' इत्यन्तेन सर्वेषां श्रेयोऽर्थं प्रवृत्तिर्व्यासचरणानामुक्ता । पञ्चमे च, 'जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनम्' इति नारदेन ब्रह्मविचारान्तायाः कृतेस्तथात्वं बोधितम् । तथाच ज्ञानविधिनार्थज्ञानार्थं प्रवृत्तानपि यदा जैमिनीयादिदर्शनैरेकदेशीयविरुद्धज्ञानवतो दृष्टवांस्तदा भारतकरणोत्तरमत्र प्रवृत्तः वेदार्थनिश्चयो वेदान्तार्थनिश्चयं विना न भविष्यतीति । अत एवात्राग्रे वेदान्तवाक्यैरेव ब्रह्मविचारदर्शनं ब्रह्मणि सर्ववेदार्थत्वस्याग्रे स्थाप्यत्वाच्च । तदर्थं वेदान्तविचारावश्यकत्वमवश्यं साधनीयम् । तेन तत्र हेत्वाकाङ्क्षोपशमात् । अतस्तदुपोद्घाततयायं विचारोऽपि शेषषष्ठ्यन्तब्रह्मपदादेव बोध्यत इति सौत्रत्वाद् युक्त इति ।

रश्मिः ।

त्कत्वात् । वस्तुतस्तु निबन्धे विद्यापर्वसु विचाररूपतपोग्रहणादाह तपसा ब्रह्म विजिज्ञासस्वेति । अनशनादेर्विचारसाधकत्वात् । तस्मान्न विरोध इति । तत्त्वं तु तपसेति श्रुतिः प्रत्यक्षज्ञानसाधनं तपोरूपसंतापमाह । द्वितीयस्कन्धे नवमाध्याये यद्ब्रह्म कृतं नोपाङ्गरूपवेदान्तविचारोपयुक्तं किंचिदाह । 'अन्नं ब्रह्मेति व्यजनात्' इत्यादौ प्रत्यक्षज्ञानस्वीकारादत्र तु शाब्दमिति न 'तपसा'इत्यस्याः श्रुतेर्विषय इति । तथाप्यसौत्रत्वापरिहारो वेदान्तविचारस्येति पक्षान्तरमाह **किंचेति** । **ज्ञानविधिनेति** । ज्ञेयश्चेत्यनेनेत्यर्थः । **वेदार्थेत्यादि** । तथा च संहितानुक्रमणिकायां ।

'रहस्यमूलं ऋक्पर्णो यजुःपुष्पप्रवालवान् ।
यज्ञकर्मफलः श्रीमान् विप्रभ्रमरसेवितः ॥
छन्दःस्कन्धः शाखाशाखो ब्राह्मो वृक्षः साक्षादेषः ।
यस्तं विद्यान् महर्षिर्विप्रवर्य स स्वर्गं गच्छेदास्वा कीर्तिम् ।' इति । रहस्यं वेदान्ताः ।

तत्रेति । अग्रिमसूत्रेषु वेदान्तविचार इत्यर्थः । **युक्त इतीति** । उपलक्षणमेतत् । ब्रह्म वेदवेदान्तौ, जिज्ञासा विचार इत्येवं सौत्रत्वस्य । एवं च 'जिज्ञासितमधीतं च यत् तत् ब्रह्म सनातनम्' इति वाक्यात् सूत्रेण वेदान्तानां विचार आरम्भणीयो न वेति ब्रह्मपदाद् वेदवाचकादेव लभ्यते संशयः । वेदान्तत्वेन ब्रह्मोपादाने तु द्वितीयकोटौ बीजाभावमापद्येत । यद्यपि ब्रह्मशब्दो वेदे प्रयुक्तः उक्तवाक्ये, तथापि वेदपदमपहाय यद् ब्रह्मपदमुक्तं तेनार्थरूपब्रह्मजिज्ञासापि ध्वन्यते । तद्ध्वनितार्थमादाय भाष्यप्रकाशे संदर्भः कियान्प्रवृत्तो रश्मेरुत्तरोपि । इत्थं च यस्मात् कर्मादिभ्यो ज्ञानं माहात्म्यैक्यज्ञानरूपां भक्तिं व्यापारीकृत्य यद्वा गीतोक्तं ज्ञानं पुरुषार्थस्य दुःखाभावस्य सुखस्य च साधनमतः कारणान्माहात्म्यैक्यरूपज्ञानायाथवा गीतोक्ताय ब्रह्मणां वेदान्तानां विचारः, वेदान्तानामिति शेषे षष्ठी, तथा च वेदान्तप्रतिपाद्यवस्तुतत्त्वपरीक्षणमिति वेदान्तप्रतिपाद्याभिन्नविचार इति बोधः । प्रतिपाद्यप्रतिपादकभावसंबन्धे षष्ठीति सर्वं सुष्ठु । विचारान्तःप्रविष्टवस्तुरूपार्थमादायोत्तरः संदर्भो रश्मेः प्रपत्स्यते इति । पूर्वतन्त्रसिद्धं विषयलक्षणमाहुः

१. आरम्भणीयानारम्भणीयविचारः ।

किं तावत् प्राप्तम्। नारम्भणीय इति। कुतः।

साङ्गोऽध्येयस्तथा ज्ञेयो वेदः

भाष्यप्रकाशः।

तत्र विषयो नामापाततः प्रतिपन्नः संदिग्धोऽर्थः। तादृशश्चात्र वेदान्तविचारो न तु वेदान्ताः। तेषामग्रिमसूत्रेषु विचार्यत्वात्। विशयः संशयः। एकधर्मिकविरुद्धकोटिद्वयावगाहि ज्ञानम्। तदाकारश्चात्र, आरम्भणीयो न वेत्यनेनोक्तः। पूर्वपक्षः प्रतिवादिमतम्। तदाहुः **नारम्भणीय इति**। तत्र पृच्छति कुत इति। 'वेदान्तविज्ञानसुनिश्चितार्थाः' इति श्रुतावर्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुताबोधनाद् विचारं विना च तदसंभवात् स आवश्यक इति कुतो नेत्युच्यत इत्यर्थः। एवं प्रश्ने प्रतिवादी अनारम्भणीयतामुपपादयन् गृह्णाति साङ्ग इत्यादि। अयमर्थः। वेदान्तविचारस्यारम्भणीयत्वं वदता सिद्धान्तिना विधिप्रयुक्त्यारम्भणीयत्वं वक्तव्यम्। तत्र विचारे प्रत्यक्षविधेरदर्शनात् कथंचिद् कुतश्चिद् वैधत्वं साधनीयम्। ततश्च कर्मादिविधिभ्यस्तत्सिद्ध्यसंभवादध्ययनादिविधिभ्यः साधनीयम्। तत्र, 'स्वाध्यायोऽध्येतव्यः' इत्येकः। 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इत्यपरः। 'साङ्गो वेदोऽध्येयो ज्ञेयश्च' इत्यन्यः। एते त्रयः पूर्वकाण्डस्थाः। 'श्रोतव्यः' इत्यादिरुत्तरकाण्डस्थश्चेतरः।

तत्र भाट्टास्तावदेवं मन्यन्ते। अध्ययनविधेरक्षरग्रहणमात्रपर्यवसानेऽदृष्टकल्पनापत्तेरर्थज्ञानरूपदृष्टफलार्थतैव युक्ता। न च विमतं वेदाध्ययनमर्थज्ञानहेतुरध्ययनत्वाद् भारताध्ययनवदित्यनुमानेनाध्ययनस्य स्वाध्यायसंस्कारद्वाराऽर्थज्ञानहेतुत्वप्राप्तेर्न तावत्पर्यन्तं विधिव्यापारो युक्त इति वाच्यम्। विमतं वेदाध्ययनं नार्थज्ञानहेतुर्वेदाध्ययनत्वादाधुनिकाध्ययनवदिति प्रत्यनुमानेन तद्बाधात्। न च लोकेऽवगतसामर्थ्यानां शब्दानां वेदेऽपि बोधकत्वाल्लिखितपाठादिनाऽप्यर्थज्ञानसंभवाच्चार्थबलादेव तत्प्राप्तेरर्थज्ञानांशे तस्यापूर्वविधित्वाभावान्न तत्पर्यन्तं विधिव्यापारो युज्यत

रश्मिः।

तत्र विषय इत्यादि। **वेदान्तविचार** इति। 'जन्माद्यस्य यतः' इत्यारभ्य 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इत्यन्तसूत्रजातं ब्रह्मविचारशास्त्रं तत्तादृशमित्यर्थः। **वेदान्तविज्ञानेति** बुद्धिर्विज्ञानं मन्तव्यमिति प्रसिद्धश्रुतिमपहाय श्रुत्यन्तरोपन्यासोनेकश्रुत्यनुगृहीतत्त्वार्थः । **तदसंभवादिति**। वेदान्तविज्ञानजन्यनिश्चितार्थे सुष्ठु (असंदिग्धोपि वेदार्थ इति भाष्येप्याह) तस्यासंभवादित्यर्थः। **गृह्णातीति** हेतून् संगृह्णातीत्यर्थः। यदि च प्रतीकमत्र कर्मत्वेनान्वेति तदा तु शेषोपि पूरणीयः। प्रथमप्रतीकेपि सूत्रविशेषणं भवितुमर्हति प्रतीकं 'अथातो ब्रह्मजिज्ञासा'इति सूत्रमेवादौ पठन्तीति। तथा च त्रेधान्वयः प्रतीकस्य कर्मत्वेनाऽभेदेन करणत्वेन चेति सिद्धम्। **तत्र स्वाध्याय** इत्यादि। अत्राद्यं वाक्यं तैत्तिरीयब्राह्मणस्थम्, अन्यद्वाक्यद्वयं शाखान्तरीयम्। अध्यापयीतेत्यत्राध्यापयेदिति केचित् पठन्ति, तृतीयं च 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति पठन्ति। **स्वाध्यायसंस्कारद्वारेति**। 'अपहतपाप्मा स्वाध्यायो देवपवित्रमिति' श्रुतेरपहतपाप्मत्वमादिपदोक्तमयातयामत्वं च तद्रूपसंस्कारद्वारेत्यर्थः। अथवा स्वाध्याय एव संस्कारस्तद्द्वारेत्यर्थः। अध्ययनं वेदे स्वाध्यायतासंपादनं यदर्थज्ञानहेतुरिति यावत्। **विधिव्यापार** इति शाब्दी प्रवर्तनेत्यर्थः। दृष्टान्तवैषम्यान्नियमविधिमाक्षिपन् शङ्कां निषेधति

भाष्यप्रकाशः ।

इति वाच्यम् । अर्थज्ञानांशेऽस्य नियमविधित्वाङ्गीकारात् । न च यथाऽवघातनिष्पन्नैरेव तण्डुलैर्दर्शपूर्णमासापूर्वसिद्धिर्न पेषणादिनिष्पन्नैस्तथाऽध्ययनावगतेनैवार्थेन क्रत्वपूर्वसिद्धिर्नतु प्रकारान्तरावगतेनेति फलांशे नियमविधित्वं न युक्तम्, अनारभ्याधीतत्वेन श्रुत्याद्यभावेन च क्रत्वर्थताया अशक्यवचनत्वादिति वाच्यम् । वैदिकशब्दानां विलक्षणत्वेन पूर्वोक्तरीत्या सम्यगर्थज्ञानाभावे गृहस्थादीनां द्रव्यादियज्ञासिद्धेः सर्वधर्मलोपप्रसङ्गात् । अतः पूर्वोक्तदूषणेनापूर्वविधित्वनियमविधित्वयोरशक्यवचनत्वेऽपि, 'वसन्ते ब्राह्मणमुपनयीत' इत्यादिवाक्येषु द्वितीयानिर्देशेन तेषां संस्कार्यत्वावगमात् संस्कारस्य च कार्यान्तरयोग्यतासंपादनरूपत्वादुपनयनसंस्कृतानां त्रैवर्णिकानां कार्यान्तरापेक्षत्वेन तत्संनिधिपठितस्याध्ययनस्य चानिर्दिष्टकर्तृकतया कर्त्रपेक्षत्वेन परस्पराकाङ्क्षासंनिधियोग्यत्वैस्त्रैवर्णिकानां यज्ञरूपकार्यान्तराधिकारनियमार्थत्वस्याध्ययनविधौ सुखेन संभवात् । एवं चाधानाग्निहोत्रादिविधयस्त्रैवर्णिकेषु विद्वत्सु सत्सु तानेवाधिकुर्वन्ति । अन्यथा चतुर्थादेरप्याक्षिपेरन् । सोऽयमधिकारो वक्ष्यमाणेऽपशूद्राधिकरणेऽध्ययनविधिप्रसादलभ्य इत्यध्ययनविधिरर्थज्ञानपर्यवसायीति ।

प्राभाकरास्तु, 'संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' इत्याचार्यकरणे विहितेनोपनयीतेत्यात्मनेपदेनोपनयनरूपस्य माणवकसंस्कारस्याचार्यत्वसिद्धिप्रयोजनताप्रत्ययेऽपि,

रश्मिः ।

न च यथेति । **दर्शपूर्णमासापूर्वसिद्धि**रिति । अवान्तरापूर्वद्वारेण दर्शपूर्णमासपरमापूर्वसिद्धिरित्यर्थः । **श्रुत्याद्यभावेने**ति । निरपेक्षो रवः श्रुतिः । आदिना लिङ्गादयः । **वैदिकेत्यादि ।** स्वरादिकृतं वैलक्षण्यम् । स्फुटं प्रस्थानरत्नाकरे इदम् । **द्रव्यादियज्ञासिद्धे**रिति । 'द्रव्ययज्ञास्तपोयज्ञाः' इति गीतोदितास्त इत्यर्थः । **सर्वधर्मलोपप्रसङ्गा**दिति । अतोऽनारभ्याधीतत्वेपि क्रत्वर्थतावश्यमभ्युपेयेत्यर्थः । **अत** इति । क्रत्वर्थत्वादित्यर्थः । सर्वधर्मलोपप्रसङ्गादित्यर्थो वा । एतच्च यज्ञरूपेत्यादिनान्वेति । **पूर्वोक्तदूषणेने**ति लिखितपाठादिनार्थज्ञानसंभवरूपेण दृष्टान्तवैषम्यरूपेण चेत्यर्थः । **संस्कार्यत्वावगमा**दिति । आप्यत्वोत्पाद्यत्वयोरसंभवेन तथात्वावगमादित्यर्थः । **यज्ञरूपकार्यान्तरे**ति । स्वाध्यायब्राह्मणे 'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तत् ब्रह्मयज्ञः संतिष्ठते' इत्युपक्रम्य 'तस्मात्स्वाध्यायोऽध्येतव्यः' 'यं यं क्रतुमधीते तेन तेनास्येष्टं भवति'इति तदुत्तरश्रुतेरिति भावः । **एवं चाधानाग्निहोत्रादिविधय** इति । 'वसन्ते ब्राह्मणोग्निमादधाति', 'यावज्जीवमग्निहोत्रं जुहोति,' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'इत्येवमाद्या विधय इत्यर्थः । **तानेवाधिकुर्वन्ती**ति । उक्तविधयस्तावद्विद्यार्जनमाक्षिपन्त्यनुपपत्त्या । यदा तु स्वाध्यायविधिविहिताध्ययनोपात्तविद्या द्विजन्मानो लभन्ते तदा तैरेव लब्धात्मानो न चतुर्थस्य विद्यामाक्षिपन्ति, अनुपपत्तिक्षयात् । यद्यपि चैवं विहितोपायसिद्धज्ञानवत एव विधयोऽधिकुर्वन्ति, तर्हि तदेव ज्ञानमकर्मकालोपात्तमप्यग्निवत् क्रत्वङ्गमिति तच्छून्यस्य स्वाच्छन्द्येन विद्यामर्जयतः शूद्रस्याधिकारो न सिद्ध्यतीति त्रैवर्णिकानेवाधिकुर्वन्तीत्यर्थः । **अन्यथे**ति अध्ययनविध्याक्षिप्तत्वाभावे इत्यर्थः । **चतुर्थादे**रिति । अधिकारमिति शेषः । संबन्धसामान्यविवक्षया षष्ठी वा । इदमत्र श्रीजैमिन्यभिप्रायं निश्चित्य संमत्यर्थमाहुः **सोऽयमित्यादि** । **अपशूद्राधिकरण** इति । इद-

भाष्यप्रकाशः ।

'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते' ॥

इति स्मृतौ क्त्वाप्रत्ययेनोपनयनस्याध्यापनाङ्गताप्रतीतेस्तत् कथमध्यापनस्योपकरोतीत्यपेक्षायां, 'शिष्यम्' इति, 'तमध्यापयेत्' इति च द्वितीयोक्तकर्मत्वलिङ्गादुपनेयासत्तिद्वारेति निश्चीयते। उपनीतोऽपि नाकिंचित्करोऽङ्गमिति तद्व्यापारापेक्षायां वाक्यान्तर उपनयनं प्रक्रम्य विहितं वेदाध्ययनमेवाध्यापनोपकारकत्वादुपनीतव्यापारतयाऽध्यवसीयते । तदेवं स्वाङ्गमुपनयनं प्रयुञ्जानोऽध्यापनविधिस्तद्द्वारेणाध्ययनं प्रयुङ्क्ते । ततश्चाध्ययनस्यापि प्रयोजने विचार्यमाणे स्वसमवेतत्वेनान्तरङ्गत्वादर्थज्ञानमेव तथात्वेन निश्चीयते, न त्वाचार्यत्वसिद्धिर्बहिरङ्गत्वात् । न च प्रथमावगतत्वेनाचार्यत्वसिद्धिरेवाध्ययनप्रयोजनं, न तु पश्चादवगतमर्थज्ञानमिति वाच्यम् । तत्सिद्धिं विनाऽप्यध्ययनानुष्ठानसंभवेन प्रथमं तदनवगमात् । न च शब्दादवगतो नियोग एव प्रयोजनमस्त्विति वाच्यम् । अर्थज्ञानस्यापि प्रतीयमानत्वेन त्यागायोगात् । नन्वेवमध्ययनस्यार्थज्ञानार्थत्वेऽध्ययनविधिनैवार्थज्ञानप्राप्तिः किमिति नाद्रियत इति शङ्क्यम् । अध्ययनविधेरधिकारशून्यत्वादाचार्यकरणविधिप्रयुक्त्याप्यात्मलाभानङ्गीकारे विश्वजिदादिवन्नियोज्यकल्पनापत्तेः । अतोऽध्यापनविधिप्रयुक्तमेवाध्ययनमर्थज्ञानं च, नाध्ययनविधिप्रयुक्तमित्याहुः ।

एवं मीमांसकमतद्वयेऽप्यर्थज्ञानस्य वैधत्वात् तदाक्षिप्तविचारस्यापि वैधत्वम् ।

रामानुजाचार्यास्तु, अध्ययनविधिना स्वाध्यायाख्यस्य वेदस्याक्षरराशेर्ग्रहणं विधीयते। तत्रेतिकर्तव्यताकाङ्क्षायामध्यापनविधिना,

'श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्' ॥

रश्मिः ।

मधिकरणं षष्ठस्य षष्ठेस्ति । **द्वितीयोक्तकर्मत्वलिङ्गा**दिति । तत्सामर्थ्यादित्यर्थः । **स्वेत्यादि** । स्वमात्मास्मिन्मते मनस्तत्समवेतत्वेन स्वल्पापेक्षत्वरूपा**न्तरङ्गत्वा**दित्यर्थः । **बहिरङ्गत्वा**दिति प्रयोगोपाधित्वेन तथात्वादित्यर्थः । तथाहि, संमाननेत्याद्युक्तसूत्रे उत्सञ्जनज्ञानव्ययविगणनानि नयतेर्वाच्यानि । इतरे तु प्रयोगोपाधयः । उत्सञ्जने दण्डमुन्नयते उत्क्षिपतीत्यर्थः । 'ब्राह्मणमुपनयीत' विधिनात्मसमीपं प्रापयेदित्यर्थः । उपनयनपूर्वकेणाध्यापनेनोपनेतरि ह्याचार्यत्वं क्रियत इति । **आत्मलाभानङ्गीकार** इति अधिकारिस्वरूपलाभानङ्गीकार इत्यर्थः । **विश्वजिदादिव**दिति । एतच्चतुर्थस्य तृतीयपादे 'चोदनायां फलाश्रुतेः कर्ममात्रं विधीयेत नह्यशब्दं प्रतीयते' इत्यधिकरणे 'विश्वजिता यजेत' इत्यत्र फलाश्रवणेपि अध्याहृतफलान्वयमङ्गीकृत्य तत्किमित्यपेक्षायां 'सः स्वर्गः स्यात् सर्वान् प्रत्यविशेषात्'इत्यधिकरणे स्वर्गः फलमिति चिन्तितं, तेन स्वर्गकामो नियोज्य इति सिद्धं, तद्वदित्यर्थः । **अत** इति । प्रयोगोपाधिनाप्याचार्यत्वकामात्मलाभेन लाघवादित्यर्थः । **तदाक्षिप्ते**ति । अविचारिताश्च शब्दा नार्थं प्रत्याययन्तीति भाष्यात् । 'येन विना यदनुपपन्नं तद् तेनाक्षिप्यते' इति । **प्रौष्ठपद्या**मिति भाद्रपद्याम् । **उपाकृत्ये**ति उपकारं कृत्वेत्यर्थः । उपाकर्म कृत्वेति वार्थः । **अर्धपञ्चमा**निति । अर्धपञ्चमः पौषो माघो वा येषु भाद्रपदाश्विनकार्तिकमार्गशीर्षेषु आश्विन-

भाष्यप्रकाशः ।

इत्यादिभिश्चापेक्षितानि विधीयन्ते । तेनाचार्योच्चारणानूच्चारणरूपमध्ययनमक्षरराशिग्रहणफलकमित्यवगम्यते। तच्च चतुर्वर्गफलस्य विधिवाक्ये कर्मत्वेन बोधितस्य स्वाध्यायस्य कार्यान्तरयोग्यतासंपादनरूपः संस्कारः । तेनाध्ययनविधिरक्षरग्रहणमात्रपर्यवसायी । अध्ययनगृहीतं च स्वभावादेवार्थबोधकमिति स्वाध्यायस्यापि तथात्वात् तत्रापाततोऽवगम्यमानानामर्थानां स्वरूपप्रकारविशेषनिर्णयाय वेदवाक्यविचाररूपमीमांसाद्वयश्रवणेऽधीतवेदः पुरुषः स्वत एव प्रवर्तते । तत्र कर्मस्वरूपनिरूपणे तेषामल्पास्थिरफलत्वं दृष्ट्वाऽध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चाऽमृतत्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलकवेदान्तविचाररूपशारीरकमीमांसायामधिकरोतीत्याहुः ।

शैवस्तु, अध्ययनविधेरक्षरग्रहणमात्रपरत्वमङ्गीकृत्याध्ययनेनाऽऽपाततोऽर्थप्रतीतेस्तदनु ब्रह्मस्थूलोपासनभूतज्योतिष्टोमादिविधायकानां सूक्ष्मोपासनभूतदहरादिविद्याविधायकानां चेतरेतरविरोधाभासं पश्यँस्तद्विचारे पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्ततेऽतो नानिबन्धनो विचार इत्याह ।

भट्टभास्कराचार्यास्तु स्वाध्यायविधेरर्थावबोधपर्यवसितत्वेऽपि ब्रह्मज्ञानं तेनाक्षेप्तुं न शक्यम् । 'यज्ञेन दानेन' इति, 'शान्तो दान्त उपरतस्तितिक्षुः श्रद्धाचितो भूत्वा आत्मन्येवात्मानं पश्येत्' इति श्रुत्या ब्रह्मज्ञानस्योपायान्तरसापेक्षत्वात् । कर्मावबोधनसमर्थेषु पुरुषेष्वध्ययनविधेः कृतार्थत्वेनोपायान्तराक्षेपाक्षमत्वात् । 'श्रवणायापि बहुभिर्यो न लभ्यः' इत्यादिश्रुतेर्ब्रह्मणो दुर्ज्ञेयत्वाच्च । अतो ब्रह्मजिज्ञासा न तत्कारिता किंतु, 'श्रोतव्यो मन्तव्यः', 'सोन्वेष्टव्यः स विजिज्ञासितव्यः', 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इत्यादिवेदान्तविधिकारिता वास्त्वित्याहुः ।

तत्राध्ययनविधेरर्थज्ञानार्थत्वकल्पनमसंगतम् । 'यं यं क्रतुमधीते तेन तेनास्येष्टं भवति' इतिवाक्येनाक्षरग्रहणमात्रेऽपि फलबोधने तदतिहाय फलान्तरकल्पनस्यायुक्तत्वात् ।

रश्मिः ।

कार्तिकमार्गशीर्षपौषेषु वा तादृशान् मासानित्यर्थः। चतुर्वर्गे त्वत्र बहुव्रीहिः। **विधीति**। 'स्वाध्यायोऽध्येतव्यः' इति वाक्ये । **गृहीतं चेति** शास्त्रमित्यर्थः। **इत्याहुरिति**। तेनात्राक्षरग्रहणमधिकमिति पूर्वस्माद्विशेषः । **विरोधेत्यादि** । 'आभासत्वे विरोधस्य विरोधाभास इष्यते' इत्यलंकारं लक्षयित्वा 'विनापि तन्वि हारेण वक्षोजौ तव हारिणौ' मनोहारिणौ इत्युदाहरणम् । 'घटाद्विना घटीयो धनेशः संराजतेऽधुने'ति चोदाहरणम्, तत्र प्रश्लेषादाभासः । एवं चैकशास्त्राद्विरोधः । साधनयोरेकत्र सहानवस्थानलक्षणः आभासो विरोधस्यैवं कर्माणि ज्ञानप्रयोजकतया मोक्षे समुच्चीयन्त इति वक्ष्यन्ति । भगवांश्चैवाचार्य इति गुणकर्मत्वादङ्गत्वं ज्योतिष्टोमादीनामिति । **इत्याहेति** । तेनैतन्मते विचारसार्थक्यमात्रम्, न तु तस्य वैधत्वावैधत्वविवेचनमिति । ग्रामं गच्छतीत्यादौ ग्रामसंयोगोऽवान्तरसंयोगान् गृह्णातीति तदनुसारेणाध्ययनस्याक्षरग्रहणमात्रं फलमित्याशयेनाहुः **तत्रेति** । दूरान्वयदोषोपि मीमांसकमते यः सोपि न । **अक्षरग्रहणमात्र** इति । दृश्यमाने इष्ट इत्यर्थः । इदानीं 'लभ्यमाने फले दृष्टे नादृष्टफलकल्पना । विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यति' इति वाक्यात् । स्वर्गब्रह्मज्ञानादि तु साधनान्तरयागविज्ञानादिभिरिष्टत्वेनोक्तं भवति ।

भाष्यप्रकाशः।

वाक्यबलेनाऽदृष्टद्वारकत्वस्याप्यदुष्टत्वात्। तेन तेन ऋत्वध्ययनेनास्याध्येतुरिष्टं मनोवाञ्छितं भवतीति दृष्टफलार्थत्वस्यापि शक्यवचनत्वाच्च। नच प्रत्यक्षविरोधः। इदानीन्तनाध्ययनस्य व्यङ्गत्वेनादोषात्। नच व्यङ्गत्वे मानाभावः। स्वाध्यायपदस्य वेदे योगरूढ्या सुष्ठासमन्तादध्यायो यस्येति योगस्यापि ग्राह्यत्वे देशकालगुरुशिष्यनिष्ठानां शोभनगुणानां पाठार्थानुष्ठानेषु शङ्काराहित्यरूपस्य समन्तत्वस्य च ग्रहणेन स्वाध्याय इति समाख्याया एव तत्र मानत्वात्। नचैवं सत्यर्थज्ञानस्यापि प्राप्तेः कथं तदर्थत्वकल्पनस्यासंगतिरिति शङ्क्यम्। तैस्तस्य माणवकाधिकार-

रश्मिः।

ननु तत्राधीत इत्यध्ययनस्य स्वर्गब्रह्मज्ञानपर्यन्तमस्थानादिष्टपदोक्तसाध्यसाधनभावव्याहतिरित्याशङ्क्याहुः **वाक्यबलेने**त्यादि वाक्यं यं यं क्रतुमिति। अभ्युपगम्याहुः **तेन तेने**ति दृष्टफलार्थत्वेन। **दृष्टफलार्थत्वस्ये**ष्टार्थत्वस्येति यावत्। **इति योगस्यापी**ति। पूर्वकाण्डविषयत्वेन रूढे शब्दे। **देशकाले**त्यादि। यज्ञाद्यनुष्ठापका देशादयः। पूर्वतन्त्रे एकादशस्य द्वितीये पादे 'एकदेशकालकर्तृत्वं' इत्यधिकरणे समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजतीति समत्वपौर्णमासीत्वे देशकालयोर्गुणौ चिन्तितौ। गुरुशिष्ययोस्त्वत्रैव स्पष्टा इति। **समाख्याया** इति। यौगिकस्य शब्दस्येत्यर्थः। तन्मतमनुस्मृत्य दूषयन्ति **तैस्तस्ये**ति। मीमांसकैरित्यर्थः।

सिद्धान्तस्तु प्राथमिकमध्ययनमध्यापनविधिप्रयुक्तम्, माणवकोपनयनस्याध्यापनाङ्गत्ववदध्ययनाङ्गत्वेपि तस्य बालत्वेन स्वतोध्ययने प्रवर्तनादर्शनात्, किंच 'द्वितीयं प्राप्यानुपूर्व्या जन्मोपनयनं द्विजः' इत्युपनीतमुपक्रम्य 'आचार्यं मां विजानीयात्' इति तस्याचार्ये भगवद्बुद्धिकरणं विहितम्। तथा 'गच्छेदाचार्यसंसदि' इति स्मृत्यन्तरे चाचार्यसंसद्गमनं च विहितम्। तदुभयमपि क्रीडनासक्तस्य बालस्य न संभवति। तस्माच्छ्रुतिचोदितोऽध्ययनज्ञानयोर्विधिर्न माणवकमधिकरोति। अपि च। त्रैवर्णिकाः कर्तव्यमपेक्षमाणा अध्ययनं च कर्तारमपेक्षमाणमुभये सापेक्षा अन्योन्यं भवन्ति। तत्र विद्वत्तायोग्यतदयोग्यौ कर्तारावपेक्षतेऽध्ययनम्। नाद्यः। फलोपधायकयोग्यमपेक्षमाणं न माणवकमपेक्षेत, नेतरः तादृशफलानिष्पत्तेः। न चैवं त्रैवर्णिकाधिकारनियमभङ्ग इति वाच्यम्। अष्टवर्षवाक्ये उपनयनाध्यापनयोः संनिधानादध्ययनं विना चाध्यापनासिद्धेस्तदाक्षिप्तेनैवाध्ययनेनोक्ताधिकारनियमसिद्धेः। न च स्वाध्यायवाक्यवैयर्थ्यमिति शङ्क्यम्, वेदस्य स्वाध्यायत्वबोधनेन तस्य कृतार्थत्वात्। एतेनाध्ययनविध्यभावे माणवकस्याध्ययनार्था प्रवृत्तिर्न स्यादिति प्रत्युक्तम्। स्वस्याचार्यत्वसिषाधयिषुणैव तेऽध्यापनीया इति। न च किमनेन निर्बन्धेन अध्ययनविधिरेव माणवकं प्रवर्तयत्विति शङ्क्यम्, विधिव्यापारकौण्ठ्यप्रसङ्गात्। यत्तूपनीतव्यापारापेक्षायामुपनयनमुपक्रम्य विहितमध्ययनमध्यापनोपकारकत्वेन तदङ्गं नार्थज्ञानाङ्गं साध्यद्वयस्यैकत्रासंभवादित्युक्तं तदपि न। एकस्यापि वाहनकरणकयानस्य सुखोद्देशदेशप्राप्त्योरङ्गत्वात्। तदप्यध्यापनाक्षिप्तमध्ययनं लौकिकमेवोररीकार्यम्, तावताप्यध्यापनसंभवात्; विहितस्यापि तत एवाङ्गीकारे तूद्देशाभावात् ततो नापूर्वं सिध्येदित्युक्तम्, तदपि तथा। लौकिकेन तेनाचार्यत्वासिद्धेः। वेदाध्ययनेनैव तत्स्मरणात्। न चापूर्वासिद्धिरिति वाच्यम्, आचार्यकृतोद्देशेनापि तत्सिद्धेः। पूर्वतन्त्रीयचतुर्थतार्तीयस्थ'फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात्' इत्यधिकरणचिन्तितजातेष्टौ पितृकृतोद्देशवदिति दिक्।

भाष्यप्रकाशः ।

त्वेनाङ्गीकारात् । **वेदस्य** गुरुमुखाद् ग्रहणदशायां तं प्रति स्वाध्यायत्वस्य भावित्वेन तदानीमभावात् । 'वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति, सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमद', इति तैत्तिरीयाणां शिक्षोपनिषच्छ्रुत्या तथानिश्चयात् । आधानाग्निहोत्रादिविधीनामपि तत्र तदाक्षेपकत्वस्याध्ययनविधिप्रसादलभ्यत्वोपगमेन प्रसादस्य च माणवके सामर्थ्याभावादभावेन तेषामप्याक्षेपकतायां कौण्ठ्याच्च । आश्रिते चैकवाक्यत्वे, ज्ञेयश्चेति विध्यन्तरस्यापि संग्राह्यत्वात् तद्बलादेवार्थज्ञानमङ्गीकार्यम् । अन्यथा तद्वैयर्थ्यादिति । अत एव प्राथमिकाध्ययनस्यापि तदर्थत्वमसंगतम् । किंत्वध्यापनप्रयुक्तत्वं यदुक्तं तन्मात्रं युक्तम् । ज्ञातुर्नियोज्यस्याचार्यत्वकामिनस्तत्रैव **विधौ** सत्त्वेन लिङ्प्रयोगेण च तत्र विधित्वस्यासंदिग्धत्वात् । **कृत्यानां** त्वावश्यकार्थेऽप्यनुशासनात् । वयसा जातस्वातन्त्र्याणां त्रैवर्णिकानामध्ययनस्यावश्यकत्वबोधनेन वाक्यसार्थक्यसिद्धेः । एवंच यद्यप्यध्यापनविधावध्यापनमात्रं श्रुतं, तथापि, 'साङ्गो वेदोऽध्येयो ज्ञेयश्च' इतिश्रावणाद् गुरुणाङ्गपाठनेर्थाज्ञापने च तदसिद्ध्या वैयर्थ्ये वाक्यस्य प्रसक्ते तद्वारणाय तथाध्यापनमङ्गीकरणीयम् । आचार्यलक्षणस्मृतौ वेदस्य 'सकल्पं सरहस्यं च' इति विशेषणाच्च ।

रश्मिः ।

प्रकृतमनुसरामः । दूषणमाहुः **वेदस्ये**त्यादि । **अभावा**दिति । तथा च माणवकं प्रति स्वाध्यायसमाख्यासामर्थ्यविरहेणार्थज्ञानस्याप्यनुपलब्धेर्न तदर्थत्वकल्पनमिति भावः । ननु स्वस्यासाधारण्येन पितृपितामहादिपरंपराप्राप्ता शाखा स्वाध्याय इति योगस्य सायणीयेऽङ्गीकारात्, पूर्वोक्तं न साधीय इति शङ्कामपनुदन्तो वेदे स्वाध्यायत्वस्य भावित्वं श्रौतमित्याहुः **वेदमनूच्येत्यादि** । **तथानिश्चया**दिति वेदे स्वाध्यायत्वस्य भावित्वनिश्चयादित्यर्थः । अन्यथा स्वाध्यायमनूच्येत्येव वदेदिति भावः । **तदाक्षेपकत्वस्ये**ति विद्वत्त्रैवर्णिकाक्षेपकत्वस्येत्यर्थः । **आक्षेपकतायामि**ति अर्थज्ञानाक्षेपकतायामित्यर्थः । अतः परमवशिष्टमर्थज्ञानांशे नियमविधित्वम्, तदपि प्राभाकरमतदूषणेन दूषितं भविष्यतीत्याशयेनाहुः **आश्रिते चे**ति । **इती**ति । अयमत्र प्रकर्षं ब्रूते । तथा च विधिवैयर्थ्यं प्रकृष्टो हेतुरित्यर्थः । प्रत्यक्षश्रुतिलभ्यत्वसंभवे चोदकप्राप्तत्वस्वीकारस्यानुचितत्वादित्यपरः । एतच्च पूर्वतन्त्रे द्वादशस्य चतुर्थे पादे 'विप्रतिषेधे परम्' इत्यधिकरणे चिन्तितम् । यत्रार्त्विज्ययाजमानयोः कर्मणोर्युगपदात्मलाभस्तत्र ये यजमानास्ते ऋत्विज इति विहितमार्त्विज्यं चोदकप्राप्तयाजमानाद् बलीय इति । **विधा**विति उपनयीतेति विधावित्यर्थः । पूर्वतन्त्रे अपूर्वत्वोपात्तसाक्षादध्ययनविधिप्रयोजनमाहुः **कृत्याना**मित्यादि । **अनुशासना**दिति । 'आवश्यकाधमर्णयोर्णिनि'इत्येतदनन्तरं 'कृत्याश्च'इत्यनुशासनादित्यर्थः । **वाक्यसार्थक्यसिद्धे**रिति । तेन नात्र नित्यानुवादगन्धोपीत्याशयः विधिपक्षेप्युपादेय इति वक्ष्यन्ति । न चैवमनधीयाना व्रात्या भवन्तीति वाक्यवैयर्थ्यम् । 'तयोरेव कृत्यक्तखलर्थाः' 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च'इत्यादिसूत्रैरनेकार्थेषु प्राप्तस्य तव्यस्यावश्यकार्थत्वावेदकत्वात् । वाक्यत्रयैकवाक्यतया यत्सिद्धं तदाहुः **एवं चे**त्यादि । **विशेषणाच्चे**ति । अनेनाध्यापनविधौ नियोज्याभावादध्यापनसमभिव्याहृतेनोपनयीतेत्यात्मनेपदेनाचार्यकरणलाभे तत्कामिना नियोज्याकाङ्क्षा पूरणीया । तथा सत्यध्यापनस्याचार्यत्वसिद्धिः प्रयोजनं नत्वर्थज्ञापनमपि, ततश्च सिद्धे आचार्यत्वे तस्यार्थज्ञापनस्यानावश्यकत्वान्माणव-

भाष्यप्रकाशः।

एवं साङ्गेऽधीते ज्ञाते च तस्य स्वाध्यायः सिद्ध्यति। तदोक्तं फलमपि संपद्यत इति वाक्यत्रयैकवाक्यतयावसीयते तस्मात् प्राथमिकाध्ययनमध्यापनप्रयुक्तम्, अर्थज्ञानं च प्रत्यक्षश्रुतिलभ्यमिति भाट्टप्राभाकरयोः पूर्वोक्तकल्पना असंगतैव। कृत्यप्रत्यययोर्विध्यर्थकत्वपक्षेप्युक्त एव प्रकारो युक्तः। अन्यथा विधिकौण्ठ्यप्रसङ्गात्। एवंच रामानुजाचार्यैरध्ययनविधेरक्षरग्रहणपर्यवसायित्वं, स्वाध्यायस्य च स्वभावादर्थबोधकत्वं यदुक्तं तदप्युक्तदिशैव युक्तम्। नत्वन्यथापि। एवमेव भास्कराचार्योक्ते स्वाध्यायविधेरर्थावबोधपर्यवसितत्वेपि बोध्यम्। शैवस्तु विचारसार्थक्यमात्रमाह, न तु शास्त्रप्रयोजकं कंचन विधिमपीति तन्मते वैधत्वमेवायाति। तेन तत्तूदासीनप्रायम्। एवं वेदान्तस्थविधावपि श्रवणपदेन शब्दग्रहणं मननपदेनावबोधोऽन्वेषणविजिज्ञासापदाभ्यां चेच्छा विधीयत इति बोद्धव्यम्। नचेच्छाया अविधेयत्वम्। 'तिस्रः खलु एषणा एषितव्याः' इति चरके पतञ्जलिनाऽभिधानात्। अतः शंकराचार्योक्ततस्तद्विजिज्ञासस्व तद् ब्रह्मेति विधिरपि तथा। एवंच भैक्षवे ये विधय उक्ताः, 'आत्मेत्येवोपासीत,' 'स म आत्मेति विद्यात्' 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति। तेऽपि ज्ञान एव, न विचारे। ये चापि मध्वाचार्यैर्जिज्ञासासूत्रे, 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च' इति तेऽपि सर्वे ज्ञान एव पर्यवस्यन्ति।

यत्तु शैवः। किमयं श्रोतव्य इति विधिर्नियमः परिसंख्या वा। नाद्यः। वेदान्तश्रवणं

रश्मिः।

कस्याविद्वत्तायां यज्ञाद्यनधिकार इत्याशङ्कापास्ता। **फल**मिति 'तेन तेनास्येष्टं भवति' 'अग्नेर्वायोरादित्यस्य वा सायुज्यं गच्छति' इति फलमित्यर्थः। **वाक्यत्रयैकवाक्यत**येति। सा चेत्थम्। अष्टवर्षमिति वाक्योक्तमध्यापनप्रयुक्तमध्ययनं स्वात्मलाभाय 'साङ्गः' इति वाक्योक्तसाङ्गत्वज्ञेयत्वासक्तमवगम्यते। तदनु शङ्काद्यपनुत्या स्वाध्याय इति। सिद्धमाहुः **तस्मा**दिति। **उक्त एव प्रकार** इति वाक्यत्रयैकवाक्यताप्रकार एवेत्यर्थः। **विधिकौण्ठ्यप्रसङ्गा**दिति 'स्वाध्यायो' 'ज्ञेयश्च' इति विधिकौण्ठ्यप्रसङ्गादित्यर्थः। **एवं चे**ति। 'ज्ञेयश्च' इति प्रत्यक्षविधेरकौण्ठ्यस्यावश्यकत्वे चेत्यर्थः। **विचारे**ति आपाततः प्रतीतार्थे तत्पोषकविचारः युक्तत्वायुक्तत्वपोषणनिरासाभ्यां युक्तत्वायुक्तत्वार्थाभ्यां सह वर्तमानो विचारः सार्थकः, तस्य भावः सार्थक्यम्, सार्थक्यमेव सार्थक्यमात्रम्। **शास्त्र**मिति शास्त्रं वेदान्तरूपं तदुपाङ्गं मीमांसा सापि शास्त्रमवयवी अनङ्गीकारात्। तस्य प्रयोजको विधिस्तम्। **अवैधत्व**मिति। न च श्रोतव्य इत्यत्र ब्रह्मवाचकपदानां ब्रह्मणि शक्तितात्पर्यनिर्धारः श्रवणमिति कथं अवैधत्वमिति शङ्क्यम्, अस्य विधित्वस्य तैरनङ्गीकारात्। सोऽत्रैवाग्रे स्फुटः संग्राह्यत्वात्। भास्करमतीयमविरुद्धमंशं व्याकुर्वन्ति **एवं वेदान्तस्थे**ति। **तथे**ति इच्छाविधायकत्वेन प्रकारेणेत्यर्थः।

श्रोतव्य इत्यस्य विधित्वं निर्णेतुं तावच्छैवमतं प्रसङ्गादाहुः **यत्तु शैव** इति। **विधिरि**ति अपूर्वविधिरित्यर्थः। प्रमाणान्तरेण यस्य यदर्थत्वमप्राप्तं तदर्थत्वेन तस्य विधिः सः। 'यजेत स्वर्गकामः' इति, यथा प्रमाणान्तरेण यागस्य स्वर्गार्थत्वानवगमाल्लक्षणसंगतिः। **नियम** इति पक्षे, अप्राप्तस्य विधिः सः। व्रीहीनवहन्ति इति। यथा नखविदलनादिना वितुषीकरणपक्षेऽप्राप्तस्यावहननस्य विधानात्। स चाप्राप्तांशपूरणात्मकः **परिसंख्ये**ति। उभयस्य युगपत् प्राप्तौ इतरव्या-

शब्दाश्च बोधकाः ।
निःसंदिग्धं तदर्थाश्च लोकवद् व्याकृतेः स्फुटाः ॥

भाष्यप्रकाशः ।

स्वविषयमात्रावगतिसाधनं शास्त्रश्रवणत्वाद् वैद्यकशास्त्रश्रवणवदित्यनुमानेनापि प्राप्ततयाऽपूर्वत्वाभावात् । न द्वितीयः । अवघातवद् दृष्टफलस्योपायान्तरस्याप्राप्तत्वात् । नेतरः । तथा सति श्रोतव्या एव वेदान्ता नाध्येया इति स्यात् । ततश्च विचारस्याप्ययोगात् पुरुषार्थासंभवः । एवं च वेदाध्ययनादिरपि निवर्तेतेति महानेवानयः स्यादिति विकल्पितवान् । तत्तुच्छम् । हेतोः साधारणत्वेनानुमानतोऽप्राप्तावपूर्वविधित्वस्य स्थिरत्वात् । कथं साधारणतेति चेद् वेदान्तश्रवणं न स्वविषयावगतिसाधनं शास्त्रश्रवणत्वात् सूत्रश्रवणवदित्येवमवधेहि । किंच, श्रवणपदं शब्दग्रहणमात्रपरं वा, वाक्यार्थज्ञानपरं वा । आद्ये विधिवैयर्थ्यापत्तिः । स्वाध्यायविधिनैव चारितार्थ्यात् । नचाध्ययननियमाभावाय पुनर्विधानमिति वाच्यम् । आचारविरोधात् । त्रैवर्णिकाधिकारस्यापि त्यागापत्तेश्च । द्वितीये तु निराबाधं विधित्वम् । अन्यथा वाक्यवैयर्थ्यापत्तेरिति ।

अतः पूर्वकाण्डविधेरर्थज्ञानमात्रार्थत्वेनोत्तरकाण्डीयस्यापि **ब्राह्मणश्रमणन्यायेन** विशेषार्थतया विचारस्यावैधत्वान्नारम्भणीयः । ननु संदेहाभावायाध्ययनादिविधौ विचार आक्षेप्य इत्यत आह **शब्दाश्चेत्यादि** ।

रश्मिः ।

वृत्तिपरो विधिः सा, पञ्च पञ्चनखा भक्ष्या इति । यथा । भक्षणस्य रागप्राप्तत्वात् पक्षेप्राप्तत्वाभावाच्च नापूर्वनियमोऽन्यपञ्चनखभक्षणनिवृत्तिपरत्वात् पञ्चनखापञ्चनखभक्षणस्य युगपत् प्राप्तत्वात् परिसंख्या । अत्र श्रुतस्य पञ्चनखभक्षणस्य हानाच्छ्रुतहानिः । अपञ्चनखभक्षणनिवृत्तिकल्पनादश्रुतकल्पना । अपञ्चनखभक्षणस्य बाधनात् प्राप्तबाध इति दोषत्रयवती । **ततश्चेति** अध्ययनाभावाच्चेत्यर्थः । अनुभयस्य युगपत्प्राप्तावितरव्यावृत्तेरित्यर्थः । **एवं चेति** । पूर्वोक्तपरामर्शेनाध्यापनविधावपि परिसंख्यापत्त्येत्यर्थः । **श्रवणपद**मिति । इदं तव्यान्तप्रकृतिरूपं ज्ञेयम् । **विधिवैयर्थ्यापत्ति**रिति श्रोतव्य इति विधिवैयर्थ्यापत्तिरित्यर्थः । **चारितार्थ्या**दिति शब्दग्रहणस्यैवाध्ययनपदार्थत्वेन तथात्वादित्यर्थः । **न चे**त्यादि । श्रोतव्य इति पुनर्विधानं श्रवणेध्ययनानन्तर्यनियमाभावायेत्यर्थः । तथैवाचारमाशङ्क्य हेत्वन्तरमाहुः **त्रैवर्णिके**त्यादि । अध्ययने त्रैवर्णिकाधिकारात् तस्य चाभावाच्छ्रवणविधिः सर्वानप्यधिकुर्यादित्यर्थः । **निराबाध**मिति । वाक्यार्थज्ञानस्याध्ययनविधिनानुपलब्धेर्निराबाधं श्रोतव्य इत्यस्य विधित्वमित्यर्थः । द्वितीयार्थादरे युक्तिमप्याहुः **अन्यथे**ति । **ब्राह्मणश्रमणन्यायेने**ति । ब्राह्मणाश्चेत् श्रमणास्तेन न्यायेनेत्यर्थः । यथा ब्राह्मणः सन् श्रमणो भवति, पश्चाद्भूतपूर्वगत्या श्रमण इत्युच्यते तथा । **विशेषार्थे**ति । वेदान्तार्थज्ञानपरतयेत्यर्थः । एतावता 'साङ्गोऽध्येयस्तथा ज्ञेयः' इति भाष्यं हेतुद्वयसमर्पकं विवृतम् । **शब्दाश्चे**ति । शब्दाश्च निःसंदिग्धं **बोधकाः लोकवत् व्याकृते**र्व्याकरणा**त्तदर्थाश्च स्फुटा** इत्यर्थः । व्याकरणत्वं च महाभाष्ये लक्ष्यलक्षणसमुदायत्वम् । लक्ष्याः प्रयोगाः सुध्युपास्यादयः । लक्षणानि सूत्राणि अइउणित्यादीनि वृद्धिरादैजित्यादीनि च । एवं लौकिकशब्दविषयं व्याकरणम् । अलौकिकशब्दविषयं तु विकल्पनादिविधिमलक्ष्यलक्षणसमुदायरूपम् । ननु ये एव लौकिकाः शब्दास्ते एव वैदिका इति साबरभाष्ये शब्दाभेदाल्लक्षणभेदः कुत इति चेन्, न । निबन्धटीकायां वैदिकशब्दानां स्वरादिना

अर्थज्ञानार्थं विचार आरम्भणीयः । तस्य च ब्रह्मरूपत्वात् तज्ज्ञाने पुरुषार्थो भवतीति न मन्तव्यम् । विचारं विनापि वेदादेव साङ्गादर्थप्रतीतेः ।

भाष्यप्रकाशः ।

विशेषबोधनाय स्वोक्तं विभजते अर्थज्ञानेत्यादि । सर्वोऽपि प्रयोजनमुद्दिश्य कार्यमारभते । तत्रास्य विचारस्य प्रयोजनं वेदार्थज्ञानं वाऽन्यद् वा । तत्रान्यस्यादर्शनाद्, 'वेदान्तविज्ञानसुनिश्चितार्थाः' इतिवाक्यबोधितमाद्यमेवादर्तव्यम् । तत्रापि तस्य स्वतोऽपुरुषार्थत्वात् प्रयोजनान्तरमेष्टव्यम् । तच्च प्रयोजनमनन्तविधमप्यैहिकामुष्मिकपुरुषार्थेऽन्तर्भूतत्वात् पुरुषार्थरूपम् । तच्च वेदार्थज्ञानेन भवतीति तदर्थं विचार आरम्भणीयो, न तु स्वतःपुरुषार्थत्वात् । वेदार्थश्च, 'सर्वे वेदा यत्पदमामनन्ति' इति, 'वेदैश्च सर्वैरहमेव वेद्यः,'

'वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे, परोक्षवादा ऋषयः परोक्षं च मम प्रियम्'

इत्यादिश्रुतिस्मृतिभिर्ब्रह्मरूपः । नच 'वेदोऽखिलो धर्ममूलम्'इत्यादिस्मृतिभिर्धर्मरूप इति वाच्यम् । 'यज्ञो वै विष्णुः' इति, 'धर्मो यस्यां मदात्मकः' इति श्रुतिस्मृतिभ्यां धर्मस्यापि ब्रह्मरूपत्वबोधनात् तद्रूपेणैवार्थत्वात् । ब्रह्मणस्तु ज्ञानादेव पुरुषार्थसिद्धिः । 'ब्रह्मविदाप्नोति परम्' 'आनन्दं ब्रह्म'इत्युपक्रम्य, 'य एवं वेद प्रतितिष्ठति, अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या' । दहरविद्यायां दहरपुण्डरीकवेश्मस्थितस्याकाशस्यैतदमृतमभयमेतद् ब्रह्मेत्यनेन ब्रह्मत्वमुक्त्वा, एवंवित् स्वर्गं लोकमेतीत्येवंविधेषु वाक्येष्वैहिकामुष्मिकपुरुषार्थस्य ज्ञानमात्रेणैव श्रावणात् तावतापि पुरुषार्थसिद्धेर्ब्रह्म न मन्तव्यं न विचार्यमित्यर्थः ।

रश्मिः ।

भेदकथनात् । महाभाष्येपि 'व्यत्ययो बहुलम्' इति योगविभागेन 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति परिभाषासाधितोक्तवेदेषु विकल्पनादिविधिमल्लक्ष्यलक्षणसमुदायसत्त्वे शब्दाद्भेदे आयान्त्येव । तथा वेदेषु योगरूढिः, वेदान्ते तु योगः । तदुक्तं पत्रावलम्बने

'लौकिको वैदिकश्चैव व्यवहारो द्विधा मतः ।
लोकसिद्धं पुरस्कृत्य वैदिको बोध्यते यथा ॥
लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम् ।
न विवादस्तत्र कार्यो लोकोच्छितिस्तथा भवेत् ॥
ब्रह्मवादे निरुक्तिस्तु न वक्तव्यैव कुत्रचित् ।
वस्तुतो ब्रह्म सर्वं हि व्यवहारस्तु लोकतः ॥
ये धातुशब्दा यत्रार्थ उपदेशे प्रकीर्तिताः ।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित् ॥

इति योगकथनात् । पूर्वमीमांसाकारिकासु तु लौकिकवैदिकव्यवहारकथनावसरे 'जलाग्न्योरिव संरक्षा तयोः कार्या मनीषिभिः' इत्युक्तम् । 'विचारो योगरूढितः' इत्यपि तत्र । **स्वोक्तमिति** स्वेन कारिकयोक्तमित्यर्थः । **प्रयोजनमिति** फलमित्यर्थः । **तस्य** इति वेदार्थज्ञानस्येत्यर्थः । **तस्य चे**त्यादिभाष्यं विवृण्वन्ति **वेदार्थश्चे**त्यादि । मीमांसकाशङ्कामनूद्य निषेधन्ति **न चे**त्यादि । **तज्ज्ञान** इत्यादि भाष्यं विवृण्वन्ति **ब्रह्मणस्त्विति** । वाक्यान्तरेण प्राप्तं ब्रह्मविचारं प्रत्याख्याति

नचार्थज्ञानमविहितम्, अविचारिताश्च शब्दा नार्थं प्रत्याययन्तीति वाच्यम्, ज्ञेयश्चेति विधानात्।

'गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः'

इति बाधोपलब्धिश्च। शब्दश्चक्षुरादिवन्न संदिग्धार्थप्रतिपादकः। तदर्थश्च

भाष्यप्रकाशः।

न च श्रोतव्य इति विधिना श्रवणं विधाय तदर्थमननाय मन्तव्य इति विध्यन्तरदर्शनादवबोधसामान्यस्य तदर्थत्वेनाशक्यवचनत्वाद् युक्तिभिरनुचिन्तनमेव मननपदार्थो वक्तव्य इति विचारोऽपि प्राप्त एवेति वाच्यम्। तस्य शारीरपरत्वात्। प्रियत्वलिङ्गेन तथा निश्चयात्। नच वाक्यार्थः शारीरः परमात्मा वेति संदेहे लिङ्गादिभिस्तन्निश्चितार्थबोधार्थमेव विचार आक्षेप्य इति वाच्यम्। वेदे साङ्ग इति विशेषणादधीतनिगमनिरुक्तव्याकरणस्य विचारं विनापि तैरेव तत्संभवात्। तेषु श्रुतीनामेवोदाहृतत्वात्। न च मास्तु वाक्यार्थज्ञानार्थं विचारापेक्षा। पदार्थज्ञानार्थं त्वावश्यकः। शब्दानां प्रायशोऽनेकार्थत्वेनानेकवृत्तिकत्वेन च कया वृत्त्या कमर्थमत्र बोधयन्तीति निश्चयाभावात्, तदर्थज्ञानस्य चाविहितत्वेन तदविचारादिति शङ्कनीयम्। ध्येयत्ववत् साङ्गस्य ज्ञेयत्वविधानेन गुरुमुखादेव पदार्थज्ञानस्यापि सिद्धेः। नच विध्यभावाद् गुरुणार्थो न वक्तव्य इति शङ्का कार्या। वाक्यान्तरे बाधोपलब्धेः। तदिदमुक्तं, नचार्थेत्यादिना। नापि संदेहाभावाय तदपेक्षा। शब्दस्य निःसंदिग्धार्थबोधकत्वात्। न हि गौरित्युक्ते सत्त्वान्तरबोधो भवति।

रश्मिः।

न चेत्यादि। तस्येति। 'आत्मा वा अरे' इति वाक्यस्येत्यर्थः। अत्रोपक्रमं नियामकं करोति **प्रियत्वेति।** मैत्रेयीब्राह्मणे 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' इत्यात्मानमुपक्रम्यास्य निर्देशेन **शारीरपरत्वनिश्चयादित्यर्थः।** अत्र मैत्रेय्याः स्त्रीत्वेन तदधिकारानुसारेण जीवोपक्रमात्तस्य पूर्वपक्षग्रन्थत्वान्न वाक्यान्वयाधिकरणविरोधः। **तत्संभवादिति** शारीरः परमात्मा वेति संदेहानुपपत्तिसंभवादित्यर्थः। **तेष्विति** निगमनिरुक्तव्याकरणेष्वित्यर्थः। **स्पष्टम्।** यदा तु समाहारद्वन्द्वात्, निगमे व्याकरणं यथा, अत्र च 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति निगमस्तत्र। न च जीवो द्रष्टव्यः श्रोतव्यः, कर्तृत्वात्, आत्मनश्च कर्मत्वादिति व्याकरणम्। एवमन्यत्रापि।

'अहमात्मात्मनां धातः प्रेष्ठः सन् प्रेयसामपि।
अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः' इति।

भगवद्वाक्यमप्युपलक्षणविधया ज्ञेयम्। **न चार्थज्ञाने**त्यादिभाष्यमवतारयन्ति **न च मास्त्विति।** कारिकास्थं तथापदं विवृण्वन्तो 'ज्ञेयश्च' इति विधानादिति भाष्यार्थमाहुः **ध्येयत्ववदिति। 'गीती शीघ्री'**इति भाष्यमवतारयन्ति **न चेति।** वाक्यान्तरं पाणिनीयशिक्षास्थम्। यद्वा 'ज्ञेयश्च' इति वाक्यादन्यद्वाक्यं गीतीति वाक्यान्तरम्। **बाधेति** अधमत्वावहनं बाधः। बाधश्च विपरीतप्रमेति नैयायिकाः। भेदवादमाहुः। अधमत्वनिवृत्त्यर्थं गुरुणार्थो वक्तव्य इति प्रमाया विपरीतप्रमा। **तदिदमिति।** न च मास्त्वित्यारभ्य विवृतमित्यर्थः। **शब्दश्चक्षुरि**त्यादिभाष्यमवतारयन्ति **नापीति। नहीति। यथेति** भाष्यतात्पर्यम्। **तदर्थश्चे**त्यादिभाष्यं

व्याकरणादिना निश्चीयते। यथा लौकिकवाक्ये तथा वेदेऽपि। न च तद्विरुद्धं निर्णेतव्यम्, । अप्रामाणिकत्वप्रसङ्गात् । तस्माद् वेदार्थज्ञानार्थं विचारो नारम्भणीयः।

स्यादेतत्

भाष्यप्रकाशः।

अतोऽनेकार्थत्वादिसंकटेपि व्याकरणोक्तस्वरादिना सुखेन तन्निरासात्। किंच। लोके प्रत्यक्षादिसंक्रमान्न तथा व्याकरणापेक्षेति तद्विरुद्धमपि क्वचिन्निर्णीयते। अत एव लौकिकशब्दार्थनिर्णायकत्वेऽपि न तत्र तेषामङ्गत्वप्रसिद्धिः। वेदे तु तेषामङ्गत्वस्य शास्त्रप्रसिद्धत्वात् प्रमेयस्य चात्यन्तालौकिकत्वेन विचारवादिनोऽपि तेषामाश्रयणीयत्वात् तद्धेतुन्यायेन तैरेवार्थज्ञानसिद्धेः कृतमजागलस्तनप्रायेण विचारेणेति। तदिदमुक्तं नचेत्यादिना।

अत्रैकदेशी स्वमतेन विचारकर्तव्यतामुपपादयति स्यादेतदिति वक्ष्यमाणप्रकारेण विचार-

रश्मिः।

विवृण्वन्ति **अत** इति। **व्याकरणे**त्यादि। तथा च शिक्षायाम्।

'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्'॥ इति।

यथा दत्त इत्युक्ते, प्रत्ययार्थसहितं दानं संज्ञाश्चेति। **संकटे** आद्युदात्तत्वात्संज्ञाशब्दोऽयमिति तथा च सूत्रम् 'निष्ठा च द्व्यजनात्' इति। अथवा 'इन्द्रशत्रो' इत्यत्र स्वरेण समासनिर्णय आद्युदात्तत्वाद् बहुव्रीहिरिति, आदिना पदान्तरसमभिव्याहारादि पदान्तरसमभिव्याहार आदिर्येषां सामर्थ्यादीनां, पदान्तरसमभिव्याहारस्यादयः पदान्तरसमभिव्याहारादयः संयोगादयः, ते च ते तेषां समाहारः पदान्तरसमभिव्याहारादि, तेन 'सशङ्खचक्रो हरिः' इत्यत्र हरिशब्दो विष्णुवचन इति। **न चे**त्यादिभाष्यतात्पर्यमाहुः **किंचे**ति। **क्वचि**दिति घटपटकालीनादिप्रयोगेषु इत्यर्थः। व्याकरणे तु घट चेष्टाभासचलनपरिमाणेषु, पट गतिभासप्रभृतिषु, कालाङ्ञ् इति। **तेषा**मिति। छन्दःकल्पशिक्षानिरुक्तज्योतिषव्याकरणानामित्यर्थः। **तद्धेतुन्याये**नेति। 'हेतुहेतुमतो हेतौ तद्हेतोरेव हेतुता' इत्यर्थः। **तदिद**मिति। किंचेत्यारभ्य विवृतमित्यर्थः। अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति वदन्तो विप्लववादिनो निरसितुमिदमित्याहुः। यद्वा। केवलवैदिककृतपूर्वपक्षे षडङ्गैर्निर्वाहः, परंतु 'स्वाध्यायोऽध्येतव्यः' इति श्रुतिविरोधः, वक्ष्यमाणभाष्यार्थाध्ययनाभावात्। इति केवलवैदिकं प्रति वैदिकश्चेत् मीमांसकः, स एकदेशी तस्याक्षेपस्तमाहुः **अत्रैकदेशी**ति। ब्रह्मपुच्छश्रद्धालुत्वाध्यासी पूर्वमीमांसको वैदिकैकदेशीति वार्थः।

न वेदार्थज्ञानमात्राय विचारः। किंतु ब्रह्मज्ञानाय। तस्य चात्मरूपत्वात्

भाष्यप्रकाशः ।

स्यारम्भणीयत्वमुपपद्यतामित्यर्थः । तदाह **न वेदार्थे**त्यादि । **तस्ये**ति ब्रह्मणः । 'पटोलपत्रं पित्तघ्नं नाडी तस्य कफापहा' इत्यादिषु विशेषणमात्रस्यापि तत्पदेन ग्रहणदर्शनात् । अयमर्थः । अनुपपद्यमानत्वान्मास्तु वेदार्थमात्रत्वेन ब्रह्मज्ञानाय विचारः, परं त्वात्मत्वेन ब्रह्मज्ञानाय

रश्मिः ।

न वेदार्थेत्यादीति । अत्र **न वेदार्थज्ञानमात्राय विचार** इति भाष्ये । अयं षडङ्गमात्रेण वेदार्थकर्ता वैदिकः । अस्य भेदः मीमांसकपूर्वकषडङ्गैरर्थकर्ता वैदिकः । उक्तास्त्रयो विधयो वेदे यद्यपि, तथापि 'स्मृतेश्च' इति सूत्रभाष्ये वेदान्तानामपि वेदत्वोक्तेः वेदान्तेपि समानाः । अत एव वेदान्तमीमांसाया वेदविधिविचारः । अत एव वेदान्ती यस्य मन्तव्य इति विधिस्त्यागः द्रष्टव्य इति प्रथमविधेः दर्शनानन्तरं प्रवर्तते । किंतु ब्रह्मज्ञानायेति भाष्ये वेदान्ते ब्रह्मोक्तं तस्य ज्ञानाय तत्र ब्रह्मणि प्रकारद्वयम् । श्रुत्युदासीनात्मत्वं वेदार्थभूतात्मत्वं चेति भाष्यार्थो भविष्यति । तत्पदस्य पूर्वपरामर्शकत्वेन ब्रह्मज्ञानस्येत्यर्थेन भाव्यमित्याकाङ्क्षायां दृष्टान्तमाहुः **पटोलपत्र**मिति । **वेदार्थमात्रत्वेने**ति । पूर्वमीमांसका अङ्गीकुर्वन्ति वेदार्थमात्रत्वश्रुत्युदासीनात्मत्ववेदार्थभूतात्मत्वानि ब्रह्मणि धर्मान्, परंतु औपाधिकास्ते । तथाहि । पूर्वमीमांसाकारिकासु वैदिका उक्ताः, तैत्तिरीये अलूक्षा विमर्शिनः, पूर्वे उक्तास्ते पूर्वमतार्किकाः श्रद्धाऽभावात्, पद्मपुराण तर्कानादराच्च । तत्रापि व्याकरणपदपदार्थकज्ञानवन्तः । 'अलौकिको हि वेदार्थः' इति सिद्धान्तात् । श्रुत्येकशरणाः पूर्वमीमांसां नकृतवन्तः । मीमांसायाः पूर्वं जैमिनिसूत्रमात्रत्वाच्छबराचार्यप्रभृतिभिः करणात् । ते हि मीमांसारहितषडङ्गाष्टोपाङ्गपरिशिष्टविचारकाः पुरःस्फूर्तिकनिर्गुणं स्वीकुर्वन्तोपि वेदार्थमात्रत्वमङ्गीकुर्वन्ति । अन्यथा ब्रह्मज्ञानप्रसङ्गान्नापि व्यक्तिशक्तिमङ्गीकुर्वन्ति, प्रस्थानरत्नाकरस्याधुनिकत्वात् । अन्ये पुनर्मीमांसां कुर्वन्तस्तर्कं मीमांसायुतं कुर्वन्ति । तदा श्रुत्युदासीनात्मत्वमङ्गीकुर्वन्ति । भाट्टदीपिकायां मन्त्रमय्येव देवता, प्रातिपदिकार्थस्तु यः कश्चिद्भवतु । मम तु वदतोप्येवं वाणीं दूष्यतीत्युक्तत्वात् । शांकरादीनां वेदान्ते तु 'यतो वाचो निवर्तन्ते' इति श्रुत्या तथा, अन्यासामर्थवादत्वाङ्गीकारात् । किंच, वेदार्थे न निष्पन्नात्मत्वं स्वीकुर्वन्ति निर्गुणत्वेपि । पूर्वं तादृशकुचोद्याभावात् । सोपाधिकत्वप्रसिद्धेरेवमुपपाद्यमानत्वादिति । भाट्टनैयायिकाश्च भाष्यं भाष्यप्रकाशे सुबोधिन्यनुसारेण विवृण्वन्ति । सुबोधिनी तु ब्रह्मत्वं ब्रह्मेति निर्विकल्पकज्ञानं ब्रह्मत्वविशिष्टब्रह्मेति ज्ञानं, सविकल्पकमात्मेत्युच्यते । तत्र पूर्वं निर्विकल्पकं, केवलवैदिकत्त्वात् । पश्चात् सविकल्पकं, मीमांसाया सत्त्वात् । तदुक्तं पूर्वम्, तथा च वेदार्थमात्रत्वावच्छिन्नब्रह्मत्वं ब्रह्मेति स्यादेतदित्यस्मात्पूर्वभाष्यस्य विषयः । मीमांसासहितस्य साङ्गोपाङ्गसपरिशिष्टवेदार्थत्वावच्छिन्नब्रह्मत्वविशिष्टब्रह्मेति ज्ञानमात्मा स **स्यादेत**दित्यादिभाष्यविषयः । **अनुपपद्यमानत्वा**दिति । षडङ्गैरेव वेदार्थसंभवात् मीमांसाप्रयोजकत्वेनुपपद्यमानो वेदार्थत्वेन ब्रह्मज्ञानाय विचारः । न च वेदार्थत्वं षडङ्गसाध्यत्वं तज्ज्ञानमात्राय विचारः ।

१. क्षणिकविज्ञानवाद्येकदेशीति वार्थः ।

भाष्यप्रकाशः ।

विचारो न प्रतिक्षेप्तुं शक्यः । नच संदिग्ध एव विषये विचारस्य प्रवृत्तेरात्मनश्चाहंप्रत्ययगोचरत्वेनासंदिग्धत्वादेवमप्यविचार्यत्वमेवेति शङ्क्यम् । अहंप्रत्ययस्य स्थूलोऽहं कृशोऽहं बधिरोऽहं गच्छाम्यहं श्वसिम्यहं जानाम्यहमित्यादौ देहाद्युपाधिगोचरत्वेन विपर्यस्तत्वात् तेन

रश्मिः ।

न प्रतिज्ञातत्वेपि चरममीमांसापाद्यकत्वाभावादिति भाष्यार्थे संभवान्मास्तु वेदार्थमात्रत्वेत्यादिः कुत इति वाच्यम् । वेदा वेदान्तास्तदर्थज्ञानं तदपि ब्रह्म 'वेदैश्च सर्वैरहमेव वेद्यः' इति वाक्यात् । तथा च वेदार्थमात्रत्वेन ज्ञानमात्राय ब्रह्मज्ञानाय विचारः इत्यर्थः संपन्नः । यद्वा, जैमिनिर्व्यासशिष्य इति धर्मजिज्ञासाया भाविनीत्वाद्वेदार्थकार्त्स्न्येन ज्ञानमात्ररूपाय ब्रह्मज्ञानायेत्यर्थः । अयमेव भाष्यार्थः । कर्ममार्गस्यापि भाष्ये दर्शनात् । यथा व्याकरणकार्त्स्न्यं निरुक्ते तथा वेदार्थकार्त्स्न्यं ब्रह्मज्ञाने तस्मै विचार इत्यर्थः । व्याख्यानतो विशेषप्रतिपत्तेर्न हि संदेहादलक्षणमिति महाभाष्यात् । इदमपि मास्तु ह्युद्देशसत्त्वेपि पूर्वमीमांसावत् सर्वविचाराभावात् । न चैतावदेव विचारः विस्तृतविचारस्य पूर्वमीमांसायां दर्शनेनोत्तरमीमांसाविचारमात्रायैतावतोऽसंभवात् । **किंतु ब्रह्मे**त्यादिभाष्यार्थमाहुः **परंत्विति** । नन्वत्रापि प्रतिज्ञातब्रह्मज्ञानायेति भाष्यार्थः संभवतीति चेन् न । ब्रह्मशब्दः सोपि वेदान्तरूपः सोपि ब्रह्म, तद्व्यावृत्त्यर्थत्वादित्याहु**रात्मत्वेने**ति । ब्रह्म आत्मा, तस्य चात्मरूपत्वादिति भाष्यात् । ब्रह्म ब्रह्मत्वमिति निर्विकल्पज्ञानं ब्रह्म, ब्रह्मब्रह्मत्वब्रह्मत्वस्वत्वरूपसंबन्धावगाहि ज्ञानमात्मा । तथा च ब्रह्मणो वेदार्थत्वेपि तत्त्वेन ज्ञानं नासंभावनाविपरीतभावनानिवर्तकं मीमांसासहितमात्मत्वेन, ब्रह्मज्ञानं तु ह्यसंभावनाविपरीतभावनानिवृत्त्युत्तरत्वेन तन्निवर्तकम् । **आत्मत्वेने**ति 'आत्मा देहो मनो ब्रह्म' इति विश्वात् ब्रह्म प्रोक्तम् । तथाध्यात्मदेवजातिषु सूरिभिरिति च । **अहंप्रत्ययेति** । सुखी अहमिति प्रत्ययगोचरत्वेनेत्यर्थः । अहंप्रत्ययस्याहंकारविषयत्वमपि यतः कर्ताहमिति प्रत्ययात् । स चिदचिद्ग्रन्थिरूपः । **देहादीति** । स्थूलोहं कृशोहमिति देहाध्यासः; बधिरोहमिति इन्द्रियवैकल्यम्, गच्छाम्यहमिति कार्याध्यासः, श्वसिम्यहमिति प्राणाध्यासः, त एत आत्माधिष्ठानकाः । जानाम्यहमिति अहंकारे चिदध्यासः आत्मनो ज्ञानाश्रयत्वात् । 'कामः संकल्पः' इति बृहदारण्यकात् । जीवेऽन्तःकरणाध्यासो वा तदायमप्यात्माधिष्ठानकः । अहंकारानतिरिक्तजीववादिमतेनाह । जगदान्ध्यापत्तिभिया नायमहंकारमात्राश्रयः । अहंकारमात्राश्रयत्वे जडत्वेनाहंकारस्य तथा जडाश्रितस्य गोलकाश्रितव्यतिरिक्तस्याप्रकाशकत्वनियमात् । यद्वा, अहंकारस्य 'आत्मा मनसा संयुज्यते' इत्यादिप्रणाड्यभावात्, तेन जानाम्यहमित्यत्र ज्ञानकर्ताहमिति बुद्धिर्नतु ज्ञानाश्रयोऽहमिति । अन्त्यायाः प्रत्यगात्मविषयत्वात् । पूर्वस्याहंकारविषयत्वात् । **विपर्यस्तत्वादिति** । 'शङ्खः पीतः' इतिवत् 'घटो भ्रमति' इतिवच्च करणदोषविषयदोषजन्यसंप्रयुक्तभिन्नार्थमात्रप्रतिपादकबाह्यज्ञानत्वादित्यर्थः संशयः । स्मृत्योर्वारणाय मात्रबाह्यपदे । तत्र विषयदोषजन्यत्वं त्यक्तुं शक्यम् । आवश्यकत्वलाघवाभ्यां तावतैव सिद्धेरिति सिद्धान्ते विशेषः । क्वचिद्विषयदोषोभ्युपेयते, यथा जीवपरमाण्वोरध्यासो दोष इति । एतच्च द्वितीयाध्याये तर्कपादे 'उपपत्याणि न कर्मातस्तदभावः' इति सूत्रभाष्यप्रकाशे 'चरमः सद्विशेषाणाम्' इति श्लोकार्थकथनावसरे

तस्य चाविद्यावच्छिन्नत्वाद् देहात्मभावदृढप्रतीतेस्तदतिरिक्तस्य ब्रह्मणोऽभावान्न

भाष्यप्रकाशः ।

संदेहनिवृत्तेरभावात् । नच देहादिरेवात्मेति युक्तम् । देहस्यावस्थाभेदेषु परिणामान्तरदर्शनेन नश्वरत्वनिश्चयात् । अहंवित्तिवेद्ये त्वात्मनि, यः कृशः पूर्वं स इदानीं स्थूल इति पूर्वापरकाले ऐक्यभानेन तदभावात् । नच सोऽहमिति प्रत्यभिज्ञया देहादेरात्मत्वं वक्तुं शक्यम् । प्रत्यभिज्ञायाः सोयं दीपस्तदिदं जलमितिवत् सजातीयविषयत्वेन पूर्वापरकालकतदैक्यानिश्चायकतया तदविषयत्वात् । एवं तत्तदिन्द्रियनाशेऽपि जीवनदर्शनाच्छ्वासोच्छ्वासयोर्बहिरागच्छतः प्राणस्यापि ज्ञानादर्शनेनाचेतनत्वनिश्चयाद् बुद्धिमनसोरपि करणत्वेन सिद्धतया कर्तृत्वेनासिद्धत्वाद् विषयपार्थक्यस्य सर्वानुभवसाक्षिकत्वात् सर्वेषामिदंकाराऽऽस्पदत्वाच्च । नचेदंकारास्पदानामात्मत्वं युज्यते । पुरोऽवस्थित एव विषये तथाप्रयोगदर्शनात् । आत्मनश्च प्रत्यग्वित्तिवेद्यत्वेन तथात्वाभावात् । नचैवं सिद्धे देहादिभ्यो विवेके संदेहाभावादजिज्ञास्यत्वम् । **तस्याविद्यावच्छिन्नत्वाद्** विदुषां शास्त्रपरिपक्वबुद्धीनामप्यहंप्रत्यये विविक्ततत्स्वरूपस्यागोचरत्वात् सुखदुःखादीनां

रश्मिः ।

वक्तव्यम् । गृह्यमाणारोप इति केचित् । स च परेण गृह्यमाणस्योत स्वयं गृह्यमाणस्य । आद्येऽतिप्रसङ्गो, ज्ञानस्य त्रिक्षणावस्थायित्वस्वीकारात् । द्वितीये तस्यैव बाधादिति । अन्यत्र गृह्यमाणस्यारोप इति चेत्, न । आन्यत्रिकग्रहणस्य तदानीं विरहाद् गृह्यमाणत्वस्याशक्यत्वात् । **न च देहादि**रिति । प्राणेन्द्रियक्रियाबुद्धिमनोविषया **आदि**शब्दवाच्याः । आत्मनोऽभेदे प्रत्यभिज्ञां प्रमाणयन्ति **अहंवित्ती**ति । प्रत्यभिज्ञाया ऐक्यनियामकत्वे साम्यशङ्कामादाय निषेधन्ति **न च सोह**मिति । नेत्याह **प्रत्याभिज्ञाया** इति । **पूर्वापरे**ति । पूर्वापरौ कालौ यस्य देहस्य तस्यैक्यानिश्चायकतया पूर्ववदैक्याविषयत्वान्न साम्यमित्यर्थः । तेन व्यक्त्यवलम्बना प्रत्यभिज्ञा ऐक्यमवगाहते 'सोयं घटः' इतिवत् । या तु जातिमवलम्बते न सैक्यमवगाहते, प्रवाहे तदिदं जलमितिवदित्युक्तम् । तेन च देहो नात्मेत्युक्तम् । तर्हीन्द्रियनिकुरम्बः प्रत्येकमिन्द्रियं वा प्राणादिर्वात्मा भविष्यति तत्राह **एव**मिति । सकलेन्द्रियनाशोऽपेरर्थः । **करणत्वेने**ति । बुद्ध्या पदार्थान् जानातीति प्रत्ययेन, सुखसाक्षात्कारः सकरणकः, जन्यसाक्षात्कारत्वात् । चाक्षुषसाक्षात्कारवदित्यनुमानेन च बुद्धिमनसोः करणत्वेन सिद्धतया ज्ञानाश्रयत्वेनासिद्धत्वादित्यर्थः । **विषये**ति मृत्पाषाणादिपार्थक्यस्येत्यर्थः । साधारणं हेतुमाह **सर्वेषा**मिति । नासावात्मेदंकारास्पदं पुरोवस्थितत्वाभावादित्याह **आत्मनश्चे**ति । **प्रत्यग्वित्ती**ति । प्रातिलोम्येन जडादिसर्ववैलक्षण्येन सच्चित्सुखात्मतयाञ्चति प्रकाशत इति प्रत्यक् जीवः, श्रीधर्यां तथा व्याख्यानं तृतीयस्कन्धे, तद्वित्तिवेद्यत्वेनेत्यर्थः । सा चाहं प्रत्यगिति । **तस्य चाविद्यावच्छिन्नत्वा**दिति भाष्यमवतारयन्ति **न चैवं सिद्ध** इति । विविक्ततत्स्वरूपाज्ञाने हेतुमाहुः **अगोचरत्वा**दिति । **सुखदुःखादीना**मिति ।

निबन्धे 'तत्प्राप्तावपि नो मुक्तिर्जाग्रत्स्वप्नवदुद्भवः ।
अविद्याविद्ययोस्तस्माद्भजनं सर्वथा मतम्' ॥ इति शास्त्रार्थे

वेदमात्रादसंभावनाविपरीतभावनानिवर्तकं ज्ञानमुत्पद्यते। प्रत्युत देहात्मभावदृढप्रतीतेः श्रुतेरुपचरितार्थत्वं स्तुतित्वं वा कल्पयिष्यतीति।

मैवम्।

भाष्यप्रकाशः।

प्रादेशिकत्वस्य चाभिमानेन तथा निश्चयात् तेषामपि **देहात्मभावदृढप्रतीते**रविद्यासंबन्धरहितस्य केवलस्यात्मनः प्रत्ययाभावेन दर्शनान्तरेऽपि व्यापकतया प्रतिपन्नस्य तस्यैव बृहत्त्वेन बृंहणत्वेन च तदतिरिक्तस्य ब्रह्मणोऽभावाद् विविक्ततत्स्वरूपज्ञानाय विचार आवश्यकः। **नच वेदमात्राद् विविक्तात्मस्वरूपविषयासंभावनाविपरीतभावनानिवर्तकं ज्ञानं सिद्ध्यति।** प्रत्यक्षापेक्षया शब्दस्य निर्बलत्वात्। **प्रत्युत** प्रबलप्रमाणेन **देहात्मभावदृढप्रतीत्या** शास्त्रपक्वबुद्धिरपि दर्शनान्तराभिमानेन विविक्तात्मस्वरूपबोधिकायाः **श्रुतेः** कल्पनोपदेशतयोप**चरितार्थत्वं वा**, उपासनाशेषतया **स्तुतित्वं वा कल्पयिष्यति।** अतोसंभावनाद्यपनयनेन श्रुतावुपचारादिनिवृत्त्यर्थं वेदार्थभूतात्मत्वेन ब्रह्मज्ञानाय विचार आवश्यक इति।

एवमुक्तमेकदेशिमतं चोदकः प्रतिक्षिपति **मैवमिति**। यदुक्तं, न वेदार्थज्ञानमात्राय विचारः,

रश्मिः।

तत्प्राप्तौ विद्याप्राप्तौ, तथा चाविद्योद्भवेनागोचरत्वात् आत्मगुणानाम्। **प्रादेशिकत्वस्ये**ति प्रदेशे भवत्वस्येत्यर्थः। अध्यात्मादेराकृतिगणत्वाट्ठञ्। **तथे**ति अविद्योद्भवत्वस्य निश्चयात्। न चाणोर्जीवस्य धर्माणां प्रादेशिकत्वेप्यक्षतिरिति शङ्क्यम्। परमात्मविचारादणुभाष्यत्वेपि। **देहात्मे**त्यादि। न च सुखदुःखजनकपूर्वजन्मीयधर्माधर्माधारतया तस्य शरीरातिरिक्तत्वसिद्धिरिति वाच्यम्। मयूरचित्रादिवत् तयोरपि स्वाभाविकतया तज्जनकधर्माधर्मासिद्धौ तदाधारस्यात्मनोप्यसिद्धेरिति प्रत्यक्षैकप्रमाणवादिनो लोकायतिका आहुः, तेनाविद्यास्वरूपमप्युक्तम्। अभिमानस्याविद्याकार्यत्वेनाज्ञानरूपं तत्स्वरूपमुक्तम्। **दर्शनान्तर** इति शैवमते भास्कराचार्यमते च। **विविक्ते**ति। सच्चिदानन्दं ब्रह्म स्वेच्छया सदानन्दरूपं, तस्य जगज्जन्मादिकर्त्री शक्तिः चिच्छक्तिर्व्यापिका, तस्या व्यामोहिका शक्तिरित्येवमिच्छायाः पूर्वमुत्तरं च विविक्ततत्स्वरूपज्ञानाय। तेन अविद्यास्वरूपमप्युक्तम्। **न वेदमात्रा**दिति भाष्यं विवृण्वन्ति **न च वेदे**ति। असंभावना देहातिरिक्तात्मासंभावना। विरुद्धसर्वधर्मानाधारत्वभावना विपरीतभावना 'अज्ञानमन्यथाज्ञानं ब्रह्मगं विनिवार्यते। कृष्णगमपीति भावः। मीमांसकास्तु प्रातिपदिकार्थः कश्चिदस्तु शब्दमयी देवतेत्याहुः। **निर्बलत्वा**दिति। न हि शब्दशतेनापि दृश्यमानो घटो वारयितुं शक्यते। **प्रत्युते**ति भाष्यं विवृण्वन्ति **प्रत्युते**ति। **श्रुते**रिति तत्त्वमस्यादिश्रुतेरित्यर्थः। **कल्पने**ति कल्पनोपदेशसूत्रे स्पष्टम्। **उपासने**ति मनोव्यापारविशेषो रामानुजाचार्यमतेन्यत्रापि। **स्तुति**रुत्कर्षाधायकगुणवर्णनम्। अत्र पक्षे नोपचारः। **वेदार्थभूतात्मत्वेने**ति स्वबुद्ध्या वेदार्थं परिकल्प्य तादृशवदार्थभूतात्मत्वेन। [अत्रैव श्रुत्युदासीनात्मत्वेन ब्रह्मज्ञानाय विचारोप्यग्रे भाष्यप्रकाशेनूद्य नोदकप्रतिक्षेपे दूषयिष्यन्ति। अधस्तनरश्मौ तु तुर्यपङ्क्तौ। अधस्तनरश्मौ व्यवहारे वयं भाट्टा इति वदतो मते भाट्टीयब्रह्मज्ञानाय]। **चोदक** इति। केवलवैदिकः साङ्गोपाङ्गसपरिशिष्टवेदैः कृतमर्थं प्रतिक्षिपदेकदेशिमतम्। सिद्धान्त्येकदेशीत्यर्थः। तस्य च सच्चिदानन्दात्मकं ब्रह्म निराकारमेव,

अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते ।
तपसा वेदयुक्त्या तु प्रसादात् परमात्मनः ॥

भाष्यप्रकाशः ।

किंतु ब्रह्मज्ञानायेति । तत्र किं दर्शनान्तरवच्छ्रुत्युदासीनात्मत्वेन ब्रह्मज्ञानाय वेदान्तविचारः । ततश्च वेदार्थज्ञानमानुषङ्गिकमिति तव मनीषितम्, उत वेदार्थभूतात्मत्वेन तदर्थं स इति । तत्राद्यस्तु दर्शनान्तरैरेव सिद्धो, न विवक्षितपदवीमधिरोहति । द्वितीयश्चेत् तदापि तन्न संगच्छत इत्यर्थः । उक्तरूपस्यात्मनो वेदार्थत्वाभावे हेतुं कारिकया गृह्णाति **अलौकिक** इति । हिशब्दो हेतौ । अलौकिकत्वादित्यर्थः । किं तेनेत्याह **न युक्त्येति** । कथं तर्हि तत्प्रतिपत्तिरित्यत आह **तपसेत्यादि** । तपोऽनशनादिरूपम् । **वेदोक्ता युक्तिर्वेदयुक्तिः** न्यग्रोधफलमाहरेत्यादिरूपा । **परमात्मप्रसादो** मुख्यं साधनम् । अन्यथा 'तेषां प्रकृतिवैचित्र्याच्चित्रा

रश्मिः ।

सर्वभवनसामर्थ्यसंपृक्तं निमित्तान्तरमन्तरेणैवांशतो धर्मरूपेण, तदनु क्रियारूपेण, ततः प्रपञ्चरूपेण संभवतीति मतम् । तदेतत् 'अरूपवत्' सूत्रे तृतीयाध्याये वक्ष्यते । तेनात्रैवं ज्ञेयम् । भाष्ये आधिदैविकादिभेदेन नारम्भणीयः, स्यादेतत्, मैवमित्यादिग्रन्थैः त्रेधा पूर्वपक्षः । केवलवैदिककृतो नारम्भणीय इत्यादिग्रन्थविषयः । मीमांसकश्चेत् पूर्वोक्तस्तत्कृतः स्यादेतदित्यादिग्रन्थविषयः । सिद्धान्त्येकदेशिकृतो मैवमित्यादिग्रन्थविषयः । प्रथमपूर्वपक्षी वेदार्थमात्रत्वमङ्गीकरोति । द्वितीयः श्रुत्युदासीनात्मत्वमङ्गीकरोति । स्वबुद्ध्या वेदार्थं परिकल्प्य तादृशवेदार्थभूतात्मत्वं च । तृतीयस्तु वेदार्थभूतात्मत्वेन 'नाहं वेदैः' इत्यादिभिः वेदार्थभूतस्य 'वेदैश्च सर्वैरहमेव वेद्यः' इति स्वेच्छया विरुद्धसर्वधर्माधारत्वेन वा वेदार्थभूतात्मत्वमङ्गीकरोति, स एव सिद्धान्तः । प्राज्ञादप्याधिक्यात् । मुख्यमतं कृष्णमतमित्युपनिषदोत्तरत्र [चिमनभातेपि अमतमित्वत्र मते रुचप्रचिवीति भानं ज्ञेयम् ।] **प्रतिक्षिपती**ति षडङ्गवेदविचारितब्रह्मौदासीन्येन स्वबुद्धिपरिकल्पितवेदार्थभूतात्मत्वे ब्रह्मज्ञानमापततीत्यरुच्या भ्रान्तत्वेन प्रतिक्षिपतीत्यर्थः [**प्रतिक्षिपती**ति । मीमांसाया अपि न स्वातन्त्र्यं येन देवताप्रतिपादिकोर्थो यः कश्चिदस्तु हीति युज्यतेऽपि तु 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतेस्तर्कैः अप्रतिपाद्यवेदानुकूलमीमांसायुततर्कैः प्रतिपाद्यरूपवेदार्थभूतत्वेन प्रतिपाद्यमित्येवं प्रतिक्षिपतीत्यर्थः] **दर्शनान्तरव**दिति । कणभक्षाक्षचरणशास्त्रवद्युक्त्या वेदान्तविचार इत्यन्वयाज्जीवः पराभिन्नः सच्चिदानन्दरूपत्वात्परमात्मवदित्यनुमानसाध्यात्मत्वेनेव साध्यार्थातिरिक्तार्थवादश्रुत्युदासीनात्मत्वेनेत्यर्थः । अत्राहमस्मि प्रिये जानामीति प्रतीतेः सच्चिदानन्दलक्षणो जीवः, शांकराणामपि अहं ब्रह्म इत्यनुमितिः अहं पराभिन्न इत्यनुमितिः । **आनुषङ्गिक**मिति । स्वबुद्ध्या वेदार्थान् परिकल्प्य तदर्थविचारे तदनुषङ्गेण दीव्यतीत्यानुषङ्गिकं 'तेन दीव्यति खनति जयति जितम्'इति ठक् । **वेदार्थे**ति । स्वबुद्ध्या वेदार्थं परिकल्प्य तादृशवेदार्थभूतात्मत्वेनेत्यर्थः । श्रुत्युदासीनात्मत्वेन ज्ञानं निरीश्वरहतमिति सांख्ययोगनैयायिकभाट्टादीनाम् । **न विवक्षिते**ति । वेदवेदान्तदर्शनपदवीं नार्हतीत्यर्थः । विचारान्तरतां नार्हतीत्यर्थः । **न संगच्छत** इति यौक्तिकत्वान्न संगच्छते । आचार्यमतत्वेपि तपआदिरहितं न संगच्छते, पक्षगीतं विना न संगच्छत इत्यर्थः । **अनशना**दीति । आदिना वेदार्थत्वेति उक्तवेदार्थत्वाभावे (चिकाय)वेदार्थत्वं त्वस्यैव गीतोक्तम् । **न्यग्रोधे**त्यादि । छान्दोग्ये

१. न्यग्रोधफले न्यग्रोधस्तथा ब्रह्मणि सर्वमितिभावः । २ अर्थान्तरं स्यादिदम् ।

न हि स्वबुद्ध्या वेदार्थं परिकल्प्य तदर्थं विचारः कर्तुं शक्यः ।

भाष्यप्रकाशः ।

वाचः स्रवन्ति हि'इतिन्यायेनान्यदेव बुद्ध्येतेति । एतदेव विभजते **न हीत्यादि** । **अयमर्थः** । भवान् हि श्रुतीनामनुपचरितार्थत्वाय दर्शनान्तरे आत्मगमकत्वेन स्वीकृतस्याहंप्रत्ययस्य प्रादेशिकग्राहकत्वं प्रदर्श्य तस्याविद्याख्योपाध्यवच्छिन्नात्मग्राहकत्वेन भ्रमत्वं च प्रदर्श्य तेन तन्निश्चयाभावात् कर्तृत्वभोक्तृत्वाद्यंशेऽपि तस्य भ्रमत्वं साधयितुं चिदेकरसस्यात्मनो ज्ञानाविषयत्वं च साधयितुमध्यासभाष्यसूचितां विषयत्वेन जडत्वेन व्याप्तिमङ्गीकृत्यैवमाह । अहंवित्तौ प्रकाश-

रश्मिः ।

'भूय एव मा भगवान् विज्ञापयतु'इति पुत्रेण श्वेतकेतुना पृष्ट आरुणिः 'तथा सोम्येति होवाच न्यग्रोधफलमाहरेतीदं भगव इति भिन्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामेकैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन भगव इति तꣳ होवाच यं वै सौम्यैतमणिमानं न निभालयसे एतस्य वै सौम्यैषोणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सौम्येति स एषोणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो' इत्येवंरूप इत्यर्थः । भगव इति संबोधनं, निभालयसे पश्यसि । **मुख्यमिति** वरणद्वारापि । **न्यायेनेति** एकादशस्कन्धोक्तेन तेनेत्यर्थः । प्राज्ञश्च केवलवैदिकैकदेशी त्वचोदकश्च तेषां वाचकानि पक्षाणि, तैरुपात्तान् तान् प्राज्ञकेवलवैदिकैकदेशिपदोपात्तान् । एकदेशीयवस्तुसूचितशांकरं प्रत्याह । तपआदीनि वेदार्थभूतात्मवादी । **भवानिति** शांकरः कश्चित् । **अनुपचरितेति** । अनुपचरितार्थत्वं यथाशास्त्रदृष्टार्थत्वं तेन अर्थवादत्वने पूर्वोक्तपक्षे अनुपचरितार्थत्वाभावेपि अरुचिः । शंकराचार्यमतेऽपि व्यवहारे भाट्टप्रतारणादर्शवादत्वं वक्ष्यमाणपक्षेऽनुपचरितार्थत्वं तस्मा इति वा । **दर्शनान्तर इति** वैदिकशास्त्रादन्यस्मिन् शांकरादिशास्त्रे । **प्रादेशिकेति** । सुख्यहमिति हृद्देशे भगवत्त्वस्याग्राहकत्वम् । अविद्योपाध्यवच्छिन्नविषयग्राहकत्वेन **भ्रमत्वम्** । **तेन तन्निश्चयाभावादिति** भ्रमात्मकेनाहंप्रत्ययेनात्मनिश्चयाभावादित्यर्थः । **कर्तृत्वेत्यादि** । प्राकृतिकं कर्तृत्वादिकमात्मन्यारोपितमिति तथा । **अध्यासभाष्यसूचितामिति** अध्यासभाष्यस्य तत्त्वमस्यादिवाक्यावेदितैक्यविद्याप्रतिपत्तिप्रयोजनाहितजडमिथ्यात्वमवगमयितुमात्मनि अस्मत्प्रत्ययमात्रगोचरे जडतद्धर्माध्यासः कल्पितः, शुक्तौ रजतमिव । स चाविद्यास्वरूपो वस्तुस्वरूपावधारणेन विद्यारूपेण नश्यतीति । अधिष्ठानावधारणे रजतमिव । अस्यानर्थस्य प्रहाणाय वेदान्तारम्भ इति वाच्योऽर्थः । व्याप्तिस्तु संभावनापरेण न चायमस्ति नियमः पुरोवस्थित एव विषये विषयान्तरमध्यसितव्यमित्यादिभाष्येण तात्पर्यरूपया व्यञ्जनयोच्यत इत्यर्थः । सिद्धान्ते च बुभुत्सितार्थावाचकत्वे तत्प्रतीतिजनकत्वम् । तत्प्रतीतीच्छयोपचरितत्वं तात्पर्यमित्यालंकारिकाः, वृत्तेर्द्वैविध्यात् । तेन फललक्षणादिव्यञ्जनान्तानां तात्पर्ये निवेशः । **एवमिति** वक्ष्यमाणप्रकारेणेत्यर्थः । अनर्थप्रहाणफलका वेदान्तास्तादृशारम्भकत्वे अध्यासभाष्यशक्यार्थः । अत्रानर्थप्रहाणे जडो विषयत्वात् मिथ्याजडत्वादित्यनुमानयोः प्रविष्टत्वेनैतत्प्रतीतीच्छयोचरितत्वमनर्थप्रहाणकलङ्कोद्यमरूपारम्भे वर्तते । अन्यथा तत्प्रहाणे जडमिथ्यात्वमवगमयितुमिति जातो धर्माध्यासः कल्पित इति न वदेत् । अयं बुभुत्सितोर्थोपि भवति, तदवाचिकत्वे तत्प्रतीतिजनकत्वमपि तादृशार्थप्रतीतिजनकत्वमपि । ननु रूपारम्भे तत्प्रतीतिजनकत्वं नास्ति, किंत्वनर्थप्रहाणवाचकभाष्ये इति चेन्न, न ह्यारम्भः पृथगेव वाच्यः, किंतु

भाष्यप्रकाशः ।

शमानस्यात्मनो ज्ञानान्तरविषयत्वेन जडत्वापत्तिः । सर्वास्वर्थवित्तिषु प्रकाशाश्रयत्वेन सिद्ध-स्यात्मनो घटमहं जानामीत्यादौ विषयत्वायोगः । चैत्रो ग्रामं गच्छतीत्यादौ क्रियाफलस्य संयोगस्योभयनिष्ठत्वेऽपि ग्रामादौ परसमवेतक्रियाफलशालित्वस्य कर्मत्वेन स्वसमवेतक्रियाफल-शालिन आत्मनः परत्वाभावेन आत्मानमहं जानामीत्यादौ ज्ञानविषयस्यात्मनः कर्मलक्षणा-नाक्रान्ततया कर्मत्वायोगः । तस्य कर्तृभेदाङ्गीकारे कर्मभूतस्य तस्यानात्मत्वप्रसङ्गः । अप्रका-शमानत्वस्यैव जडत्वेन स्वस्मिन्नप्रकाशमानतयापि जडत्वापत्तिः । अनुभवबलेन कर्मकर्तृविरोधे परिहृते सिद्धे चाभेदे प्रकाशाश्रयरूपकर्तृत्वेनैव प्रकाशत इत्यङ्गीकारेऽपि यस्मिन्नर्थात्मानौ प्रका-शेते तस्य ज्ञानरूपप्रकाशस्य स्वयमप्रकाशमानतया जडत्वे विषयाप्रकाशकत्वप्रसङ्गः । तस्या-

रश्मिः ।

तस्यानर्थस्य प्रहाणेन सहैकीकृतस्यार्थजातस्य वाचकभाष्यस्य नयतीति जघन्यत्वात् । अध्यास-भाष्यसूचितामिति भाष्यप्रकाशात् । एवं च काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातकत्वस्य काकेषु सत्त्वाद्भद्रात्मनः इति काव्यप्रकाशस्य वरवारणस्येत्यत्र समासान्तरस्य सत्त्वात्तद्वदत्राप्यध्यासभाष्ये तादृशारम्भत्वसत्त्वेपि अवगमयितुमित्यनेन ज्ञानबोधनेपि जडमिथ्यात्वादिपदसमभिव्याहारेणानुमिति-सूचनादशु(भ)मिति । विशिष्टत्वसत्त्वमयीति तेन रूपेणाध्यासभाष्यस्यानुमितिविशिष्टे लक्षणा तादृशभाष्येऽनुमितिविशिष्टायां व्याप्तौ चानुमितिसत्त्वादिति । **एव**मिति अवधारितमाहेत्यर्थः । तमाह **अहंवित्ता**विति अहं ब्रह्मास्मीत्याकारिकायामित्यर्थः । **जडत्वापत्ति**रिति आत्मा जडो विषयत्वात् घटवदित्यनुमानेन तथात्वापत्तिरित्यर्थः । प्रथमान्तानीमानि पदानीत्यतः फलरूपा संवित् स्वयंप्रकाशाभ्युपेतव्येत्यनेनानुपपत्तिः । स्वप्रकाशकं घटमहं जानामीत्याकारकं च सर्वमेव ज्ञानं घटादिकमिव स्वात्मानं स्वाधिकरणमात्मानं च गोचरीकुर्वत् त्रिपुटीप्रत्यक्षतां **प्रवाद**यति । मितिमातृमेयविषयत्वात् स्वस्येति । प्राभाकरमतमाक्षिपन्ति **सर्वास्वि**ति । अहं घटं जानामि घट-ज्ञानो घटं ज्ञातवान् ज्ञातो घट इत्येवंरूपासु घटविषयकज्ञानाश्रयोऽहमित्यादिबोधात् प्रकाशाश्र-यत्वेन सिद्धस्येत्यर्थः । **विषयत्वायोग** इति । स्वर्गमिच्छतीत्यादौ कर्तुस्तथात्वादर्शनात्तथेत्यर्थः । नैयायिकादीनाक्षिपति **चैत्र** इति । **उभयनिष्ठत्वेपी**ति कर्तृकर्मनिष्ठत्वेपीत्यर्थः । तथाच क्रिया-फलशालित्वस्य कर्मलक्षणस्यातिव्याप्तत्वमिति भावः । तन्निवृत्तये परसमवेतविशेषणविशिष्टलक्षण-मित्याह **ग्रामादा**विति । तच्चाव्याप्तमित्याह **स्वसमवेते**ति । **परत्वाभावे**नेति । कर्मभू-तात्मास्मदर्थाध्यस्तात्मनोरैक्यात्तथेत्यर्थः । ननु 'आत्मानमात्मना वेत्सि' इतिवदुपपद्यतामित्यत आह **तस्ये**ति । **अनात्मत्वप्रसङ्ग** इति जीवद्वयाङ्गीकारस्य निर्यौक्तिकत्वेनानात्मप्रसङ्ग इत्यर्थः । जडत्वापत्तिरूपं तत्फलमाह **अप्रकाशे**ति । **स्वस्मिन्नि**ति । स्वविषयकप्रकाशकर्तृत्वाभावेनापि । **अनुभवबले**नेति प्रमाणीभूतेनेत्यर्थः । **प्रकाशत** इति । कर्मापीति शेषः । **यस्मिन्नि**ति अहं जीव इत्यस्मिन् बुद्ध्याद्युपाधिप्रकारकात्मविशेष्यके ज्ञाने इत्यर्थः । **स्वय**मिति अर्थरूपविषय-

भाष्यप्रकाशः ।

प्रकाशमानत्वेऽपि निलीयचक्षुरादिवत् प्रकाशकत्वे तत्फलस्यैवैतत्फलस्यैव स्वयम्प्रकाशतया आस्थेयतयाऽस्य जडत्वापत्तिः । पूर्वज्ञानफलस्यैतस्य जडत्वे एतज्ज्ञानफलस्याग्रिमस्यापि जडत्वापत्तिः । परंपराङ्गीकारेऽनवस्था जगदान्ध्यापत्तिश्चेत्यतः फलरूपा संवित् स्वयंप्रकाशाऽभ्युपेतव्या, न तु निलीयचक्षुरादिवत् प्रकाशिका । ततश्च स्वयंप्रकाशत्वस्यैव चेतनत्वेन तदाश्रयतया प्रकाशमानस्यात्मनो विषयत्वेन जडत्वापत्तिस्तदवस्था । नचार्थात्मानौ विना केवलायाः संविदः प्रकाशाभावात् संविदर्थात्मनां परस्परप्रकाशकत्वमेवेति परतःप्रकाशत्वमेव चेतनत्वम्, ततश्च संवित्तुल्यत्वान्नात्मनोऽपि जडत्वमिति शङ्क्यम् । तथा सत्यर्थस्यापि चेतनत्वापत्तेः । अथ संविदर्थात्मनां परस्पराविनाभावान्नात्यन्तभेद इति विभाव्यते, तदा तु संविद इव तयोरपि स्वयंप्रकाशत्वं सिद्धमित्यर्थात्मनोः संविदतिरेकेणानिर्वाच्यत्वात् संविदेव केवला सिद्ध्यति, न

रश्मिः ।

जनकत्वेन संसर्गजन्यत्वेन च स्वयमप्रकाशमानतयेत्यर्थः । **निलीयचक्षु**रिति । लीङ् श्लेषणे निपूर्वः । ल्यबन्तस्तु न भवति । 'अचो यत्' 'शकि लिङ्च'इति सूत्रे चकारेण शक्यार्थविधानात् नितरां लातुं शक्यं चक्षुरित्यर्थः । गुणाभावस्तु चिन्त्यः । यद्वा । अव्ययमिति योगविभागाल्ल्यबन्तेन समासः । विषयेण नितरां संबध्य यच्चक्षुस्तद्वदित्यर्थः । अत्रापि यत्तदोरध्याहारो लक्षणा वा । निलीयेति विशेषणं तु अतथाभूतस्य चक्षुषो दृष्टान्तार्थकत्वात् । यद्वा । निलीय विषयतामप्राप्य चक्षुः आदिना श्रोत्रादि तद्वदित्यर्थः । **प्रकाशकत्व** इति । अभिमत इति शेषः । **तत्फलस्ये**ति चक्षुःफलस्य जन्यज्ञानस्यैवैतत्फलस्यार्थात्मविषयकस्याहं जीव इति ज्ञानस्य यत्फलमनुव्यवसायरूपं तस्यैव स्वयंप्रकाशता स्यात् । अस्यार्थात्मविषयकज्ञानस्य जडवत्संवित्प्रकाश इति ततश्च स्वयंप्रकाशत्वस्यैव चेतनत्वेन तदाश्रयतया प्रकाशमानस्यात्मनो विषयत्वेन जडत्वापत्तिस्तदवस्था । नचार्थात्मानौ विना केवलायाः संविदः प्रकाशाभावात् संविदर्थात्मनां परस्परप्रकाशकत्वमेवेति परतः प्रकाशमेव चेत् संवित्प्रकाश इति नैयायिका विरुद्धं मन्यन्ते । ननु जडत्वं नाम प्रकाशकतावच्छेदकं चक्षुरादौ व्यभिचारादित्याशङ्क्याह **जडत्वापत्ति**रिति । **पूर्वज्ञानफलस्ये**ति । इदं हि विशिष्टं ज्ञानम् । विशेषणज्ञानाधीनं दण्डीतिज्ञानवत् । तथा च बुद्ध्यादिज्ञानफलस्याहं जीव इति ज्ञानस्य जडत्व एतज्ज्ञानफलस्य बुद्ध्यादिनाहं ज्ञानाश्रय इत्यादिज्ञानस्याग्रिमस्य जडत्वापत्तिः । पूर्वसजातीयत्वलिङ्गकानुमानादित्यर्थः । जन्यं ज्ञानं विषयात् पूर्वं न भवतीत्यर्थात्मविषयकं ज्ञानं पूर्वज्ञानशब्देन (न) गृहीतम् । **जगदान्ध्ये**ति । ज्ञानस्यापि जडत्वे प्रकाशाभावात् तथेत्यर्थः । **इत्यत** इति । जडत्वापत्तेर्जगदान्ध्यापत्तेश्चेत्यर्थः । **फलरूपे**ति अन्तःकरणपरिणामनिवृत्तावरणरूपा संविदित्यर्थः । तदुक्तं 'अहं ब्रह्मास्मि' 'ब्रह्मैवाहमस्मि' इत्यखण्डाकारवृत्तितया वृत्त्यविज्ञाने निवृत्तेऽब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात् प्रत्यगात्मनोऽखण्डानन्दस्वरूपावस्थितिर्भवतीति । **ननु निलीये**त्यादि । स्वयं स्वाप्रकाशतामावहन्ती प्रकाशिकेत्यर्थः । इदानीं तस्याः स्वप्रकाशत्वाय यतते । **ततश्चे**ति । परतः प्रकाशादित्यर्थः । **तथा सती**ति परतः प्रकाशत्वस्य जडत्वनिवर्तकत्वे सतीत्यर्थः । नैयायिका ज्ञानं निर्विषयकं न मन्यन्ते तद्रीत्याह **अथे**ति । **विभाव्यते** नैयायिकवद्विभाव्यते । **संविदतिरेकेणे**ति संविद्रूपकारणसत्ताव्यतिरेकेण । तयोरर्थात्मनोर**निर्वाच्य-**

भाष्यप्रकाशः ।

त्वर्थात्मभ्यां सहिता । वस्तुतस्तु संविदोऽर्थसहभावोऽपि न नियतः, अतीतानागतस्थले व्यभिचारात् । नच तत्राभाव एव विषय इति वाच्यं, तस्यासत्त्वात् । नच सोऽपि सन्निति वाच्यं, सत्त्वस्य निर्वक्तुमशक्यत्वात् । सत्त्वं हि सत्ताख्यसामान्यं समवायो वा, अर्थक्रियाकारित्वं वा प्रकाशमानत्वं वाऽभ्युपेयम् । तत्र नाद्यौ । सत्तायां सत्तासमवायाभावेन अर्थक्रियाकारित्वेऽर्थक्रियाकारित्वाभावेन च तयोरसत्त्वे तद्योगिनोऽप्यसत्त्वसिद्धेः । सत्तान्तराद्युपगमेऽनवस्थापाताच्च । न तृतीयः । मरुमरीचिकादेरपि तोयाद्यात्मना सत्त्वापातात् । नच मरुमरीचिकादीनां तोयाद्यात्मना असत्त्वेऽपि स्वरूपेण सत्त्वात् प्रकाशमानत्वं नानुपपन्नमिति वाच्यं तथापि सत्त्वस्य प्रकाशमानत्वातिरिक्तधर्मान्तरत्वेन प्रकाशमानत्वस्य तत्त्वाभावात् । अथ भावधर्म एव सत्त्वम् । अभावोऽपि भाव एव 'भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्'इति भावस्यैव भावान्तरात्मनाऽभावरूपत्वादिति विभाव्यते । तदापि स भावधर्मः को वा । व्यवहारयोग्यत्वमिति चेत् । को नाम तत्र व्यवहारः । अभिलाप इति चेत् । तद्योग्यत्वस्य खपुष्पेऽपि तुल्यत्वात् । अतोऽभावस्य खपुष्पतुल्यत्वेनातीतानागतस्थलेऽर्थवियुक्तैव संवित् । एवमर्थसहभावानियमे सिद्धे यत्र सहभावाभिमानस्तत्राप्यर्थसत्ताया निर्वक्तुमशक्यत्वादर्थस्यानिर्वाच्यत्वमेव । तथैवात्मनो व्यापकत्वेनाहंप्रत्यये प्रादेशिकत्वस्थूलत्वकृशत्वादिना भासमानस्य चन्द्रसद्भावे चन्द्रान्तरवद् भानात् तस्याप्यनिर्वाच्यत्वम् । तच्च सतो बाधाभावादसतश्चाभानात् सत्त्वासत्त्वयोरेकत्र विरोधेन सदसद्रूपताया अशक्यवचनत्वात् सदसद्विलक्षणत्वमेव । तथाच सति विषयत्वेन भासमानानां मरुमरीचितोयतुल्यत्वात् संविदेव केवला सती सिद्ध्यतीति सैवात्मा । तस्या अविषयत्वेऽपि तत्रैव कर्तृत्वभोक्तृत्वादयोऽध्यस्यन्ते, अप्रत्यक्ष आकाशे मालिन्यवदिति ।

रश्मिः ।

त्वभावियकत्वेन खपुष्पादिवदनिर्वाच्यत्वं तस्मात् । एवं संविदोऽर्थसहभावं दृष्टं अङ्गीकृत्य तस्याध्यस्तत्वमन्तरेण स्वयंप्रकाशतासंभवात् स्वयमर्थो मिथ्येत्युक्तम् । इदानीमर्थाभावेपि संवित्प्रकाश इति मन्यते **वस्तुतस्त्व**ति । **न च तत्रे**ति । घटो भविष्यति, घटो ध्वस्त इत्यादिप्रत्यये इत्यर्थः । अभावोऽस्तीति प्रतीत्याशङ्क्य पराकरोति **न च सोपी**ति । **सत्ताया**मिति । अनङ्गीकारादसंभवाच्च । तत्र तयोरभावेन तयोः सत्ताख्यसामान्यसमवायार्थक्रियाकारित्वयोरसत्त्वेन तद्योगिनोऽभावस्याप्यसत्त्वसिद्धिरित्यर्थः । तयोः सत्ता स्वीक्रियत इत्यत आह **सत्तान्तरे**ति । **भावान्तर**मिति । अभावो भावान्तरम्, नान्यः कश्चित्, अनिरूपणादित्यर्थः । **तच्चे**ति अनिर्वाच्यमित्यर्थः । **सैवात्मे**ति । श्रुत्युदासीनात्मत्वेन वेदार्थभूतात्मत्वस्वरूपेणात्मेत्यर्थः । **अध्यस्यन्त** इति । परत्र परावभासोऽध्यासः । आरोप्यात्यन्ताभाववत्त्वं परत्वमधिकरणत्वं त्वलोऽर्थः । अवभास्यते इत्यवभासो रजतादिः । एवं चैकावच्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववति अवभास्यत्वमिति बुद्धिनिष्कर्षः । कपिसंयोगीत्यत्र संयोगेऽतिव्याप्तिवारणायैकावच्छेदेन इति । तस्य स्वसंसृज्यमाने स्वात्यन्ताभाववति इतरावभास्यत्वेपि स्वस्याभावयोर्मूलाग्रावच्छेदकभेदेनैकावच्छेदकत्वाभावात् । पूर्वं स्वाभाववति भूतले पश्चादानीतो घटश्चकास्तीति घटेऽतिव्याप्तिवारणाय स्वसंसृज्यमान इति अभावकाले प्रतियोगिसंसर्गस्य वर्तमानत्वं तदर्थः । भूत्वावच्छेदेनावभास्ये गन्धेऽ-

भाष्यप्रकाशः।

तदसंगतम्। विषयत्वेन जडत्वेन व्याप्तेः प्रत्यक्षबाधितत्वात्। आत्मनश्चेतनत्वस्योभयसंमतत्वात्, तस्य च प्रत्यग्वित्तिवेद्यत्वात्, प्रत्यग्वित्तिगोचरत्वेन विषयत्वस्य व्यापकतया जडत्वेन विषयत्वेन व्याप्तेरेव प्रत्यक्षसिद्धत्वाच्च। नच प्रत्यग्वित्तेश्चिदेकरसात्माग्राहकतया तदविषयत्वमेवेति वाच्यम्। तेन रूपेणाविषयत्वेऽपि प्रत्यक्त्वादिना रूपान्तरेण विषयत्वात्। अन्यथा विषयाभावेन तद्वित्तिलोपप्रसङ्गात्। 'सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यग्रसः प्रमाणैरेतैरवगतः' इति तापनीये प्रत्यक्त्वस्यापि तत्प्रमाणत्वेनैव श्रावणाच्च। नच तत्राहंकारस्यैव विषयत्वं, नात्मन इति वाच्यम्। न्यायादिमते आत्मन एव तथा भानात्। सांख्यादिमते च तस्य जडत्वेन तस्यां प्रतीतावहंत्वचैतन्ययोः सामानाधिकरण्याभानप्रसङ्गात्। भासमाने च सामानाधिकरण्ये तस्यामहंकारविषयताया निवृत्तत्वात् प्रत्य-

रश्मिः।

तिव्याप्तिनिरासाय स्वात्यन्ताभाववतीति। शुक्ताविदंत्वावच्छेदेन रजतसंसर्गकालेऽत्यन्ताभावोऽस्तीति नाव्याप्तिरिति व्याख्यानम्। नच बन्धस्य ज्ञाननिवृत्तयेऽध्यासवर्णना व्यर्थैव नित्यस्यापि नाशसंभवादिति वाच्यम्। पापादेः श्रद्धानियमादिसंपृक्तज्ञानानामनाश्यत्वेन ज्ञानमात्रनाश्यबन्धेऽत्र मूलस्यैवामूलत्वादिति। तदेतन्निरस्यति वेदार्थभूतात्मत्वेनात्मनो विचारकः **तदसङ्गतमिति**। **प्रत्यग्वित्तीति**। तथा च यदि विषयत्वं जडत्वं निवृत्तसामानाधिकरणं स्यात् प्रत्यग्वित्तौ विषये जीवे जडत्वं भायात्, यतो न भाति ततो हि प्रत्यक्षबाधिता सेत्यर्थः। विषयत्वमपि साधारणो हेतुरित्याहुः **प्रत्यग्वित्तिगोचरत्वे चेति**। आत्मन इत्यर्थः। **एवेति** 'व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्' इति ह्यभिलापात्। **व्याप्तेरिति** सा च नियतधर्मसाहित्ये उभयोरेकतरस्य वा व्याप्तिरिति सांख्यप्रवचनसूत्राद्धेतोर्नियतसामानाधिकरण्यरूपा तदेव व्यापकसामानाधिकरण्यमिति व्याप्तेः स्वरूपं मुक्तावल्यामित्यलमतिप्रसङ्गेन। विशेषस्तु प्रस्थानरत्नाकरे उपपादितः। हेतोः साधारणतां वारयन् शङ्कते **न चेति**। विषयत्वरूपहेतावपि विषयत्वमेवेति साध्यवदन्यवृत्तित्वाभावान्न साधारणत्वं विषयत्वरूपहेताविति भावः। **अविषयत्वमेवेति** साध्यवदन्यवृत्तित्वाभावात् न साधारणता इति भावः। **तत्प्रमाणत्वेनेति** प्रमापयति विषयत्वेन प्रमां जनयतीति प्रमाणं प्रत्यक्षादि। नन्द्यादित्वाल्ल्युः। आत्मविशेष्यकप्रमाप्रकारत्वेनेत्यर्थः। प्रमीयतेऽनेन प्रत्यक्त्वेनेति करणत्वोपचारो वा। यद्वा, तस्याः प्रत्यग्वित्तेः प्रमाणत्वेन प्रत्यक्त्वस्य शब्दस्य श्रावणादित्यर्थः। प्रत्यग्वित्तिलोपशङ्कां पराकरोति **न च तत्राहमिति**। अध्यासस्योक्तत्वात्तस्य

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते'॥

इतिवाक्योक्तत्वान्निम्बार्काचार्यसंमतत्वादेवकारः। **न्यायादिमत** इति। अध्यक्षो विशेषगुणयोगत इति न्यायमतम्। **आदिपदेन** शांकरमते माध्वमते च। तथा च निम्बार्कमतं न्यायादितर्कहतं मध्वाचार्यानभिमतं चेति निम्बार्कमतं सांप्रतं निर्बलमिति नेति भावः। **तस्येति** अहंकारस्येत्यर्थः। **सामानाधिकरण्येत्यादि**। ननु चैतन्यसामानाधिकरण्ये किं मानमिति चेन्न

भाष्यप्रकाशः ।

कृत्वेनेतराविषयतया पारिशेष्यादात्मविषयत्वस्यैव सिद्धेः । नचैवं सति तत्स्वरूपयाथात्म्यभानप्रसङ्गः । साधनान्तरवैकल्येन तथाऽऽपादयितुमशक्यत्वात् । लोकेऽपि मणिपरीक्षादौ तथा निर्णयात् । अन्यथा सांख्यादिशास्त्रतो नित्याऽनित्यवस्तुविवेकस्याप्यसंभवे त्वदभितविचाराधिकारस्याप्यसंभवापत्तेः । अतोऽनिच्छतापि प्रत्यग्वित्तिवेद्यत्वमात्मनोऽङ्गीकार्यम् । नचैवं परतःप्रकाशत्वेन जडत्वापत्तिः । इदानीं तथात्वेऽपि, अत्रात्मा स्वयंज्योतिर्भवतीति श्रुतेः स्वप्न एव तस्य स्वतःप्रकाशत्वेन जाग्रति तदभावेऽपि भस्मच्छन्नाग्निवददोषात् । जाग्रति तथाऽभ्युपगमस्योक्तश्रुतिविरुद्धत्वाच्छ्रौते मते चित्स्वरूपत्वे सति स्वयंप्रकाशसंविदाश्रयत्वस्यैव चेतनत्वात्, तेनै-

रश्मिः ।

अहमित्यस्याभिमाने योगाद् ब्रह्मणि रूढिरिति माध्वोक्तेः । वस्तुतस्तु असन्निवृत्तिकृतः पुरुषविधस्याहमिति सत्तारूपधर्मेणाविर्भावः । अस्तेभुवोर्थकस्य शतरि कृते रूपमिदमिति । तर्हि अहमिति सत्ताकृत् स्वरूपं सत्तानित्यत्वे तत्कारणेच्छायां व्यापारः । व्यापारः कर्म स्वयमेवेति ब्रह्मणि योगः इति वेदान्तत्वादुपपन्नतरः । मीमांसाकारिकासु वेदान्ते योगमात्रादरात् । **अहंकारे**त्यादि अहंकारो विषयो यस्याः सा अहंकारविषया तस्याः भावो अहंकारविषयता तस्या इत्यर्थः । प्रत्यक्त्वेन रूपेण ज्ञानता कर्तृत्वादयो ये इतरे ते विषया यस्याः सेति पूर्ववत् । **एवं सती**ति आत्मविषयिण्या अभ्रमत्वे सतीत्यर्थः । **साधनान्तरे**ति । मनः करणं 'एषो अणुरात्मा चेतसा वेदितव्यः' इति श्रुतेः, योगेन साधितमेव पश्यति, 'अन्तरेव च पश्यति' इति श्रुत्यन्तरात् 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्' इति स्मृतेश्च योगादिसाधनान्तरवैकल्येनेत्यर्थः । **तथे**ति भाने प्रकारस्य याथात्म्यस्येत्यर्थः । नासौ न भ्रमः । अग्रे बाधादिति । **तथा निर्णया**दिति । वज्रयोगानन्यमनस्त्वादीनि साधनान्तराण्यत्र । **अन्यथे**ति प्रत्यग्वित्त्यविषयत्वे प्रकारे । **नित्यानित्ये**ति नित्यानित्यवस्तुविवेकः शमदमादि वैराग्यं मुमुक्षुत्वं चेति साधनचतुष्टयवानधिकारी तत्र प्रकारो नित्यानित्येति, अविकारिशरीरे विशेषणत्वेन निविष्टस्येत्यर्थः । सिद्धमाह **अत** इति । एतावता व्याप्तेर्वैपरीत्यमङ्गीकारितमधुना दूषयितुमुपक्रमः । उक्तज्ञानान्तरविषयत्वे जडत्वापत्तिरित्यनुवदति **न चे**ति । **भस्मच्छन्ने**ति । भस्मस्थानीयं अविद्यादेहादि । **उक्तश्रु**तीति । अत्र आत्मा स्वयंज्योतिरिति श्रुतिविरुद्धत्वात् । एवं आत्मसंविदोः स्वयंप्रकाशत्वेन प्राप्तं तौल्यं निषिद्धम् । 'सत्यं ज्ञानम्' 'यः सर्वज्ञः' इति श्रुतिद्वयसिद्धं लक्षणमाह **श्रौते मते** इति । जीवजडयोरतिव्याप्तिवारणाय दलद्वयम् । स्वयंप्रकाशश्चासौ संविदाश्रयश्चेति कर्मधारयः ततः षष्ठीतत्पुरुषः । **तेनैवे**ति संविदि विशेष्यशून्यत्वेन संविदात्मनोरर्थयोस्तौल्यस्य परिहारादित्यर्थः । यत्तु प्राभाकरमतमाक्षिप्तं तत्तु इष्टमेव । एकसत्त्वे द्वयं नास्तीति प्रतीत्याध्यापनविधिप्रयुक्ताध्ययनस्य सिद्धान्ते सत्त्वादिति । अर्थज्ञानस्य अध्ययनविधिप्रयुक्तत्वाभावात् स्वाध्यायादिविधिप्रयुक्तत्वस्यार्थज्ञाने सत्त्वात् । प्राभाकरमते ज्ञानविषययोरर्थः कश्चिद्भवतु । किंच ज्ञातता भट्टमते प्रत्यक्षेण, मुरारिमिश्रमते तु व्यवसायज्ञानेन ज्ञातता भवति तत्रानुव्यवसायानुक्तिः । किंच नात्मनश्चाक्षुषाध्यक्षविषयता आकाशे चाक्षुषग्रहवारणायोद्भूतरूपस्य कारणत्वात् । तस्य चात्मन्यभावात् । अपि च ज्ञानेन ज्ञानप्रामाण्यगृहीतिरपि न सांप्रतम् । तथा सति दूराहितज्ञाने प्रामाण्यसंशयानुदयप्रसङ्गात् । ज्ञानस्य ज्ञातत्वेन तन्निष्ठप्रामाण्यस्यापि ग्रहादिति । ज्ञातत्वाभावे च धर्म्यज्ञानात् संशयानुदय इति । अतो

भाष्यप्रकाशः ।

वार्थतौल्यस्य परिहारात्, कर्मकर्तृविरोधस्यानुभवबलेनैव परिहृतत्वाच्च । **एवमाश्रयाश्रयिभावेन** सिद्धे आत्मसंविदोर्भेदे विषयत्वेनार्थोऽपि भिन्न एव । नच सत्त्वस्यानिर्वाच्यत्वात् तद्योगिनोस्तयोरनिर्वाच्यत्वं शङ्क्यं, सत्त्वनिर्वचनस्य तवाप्यावश्यकत्वात् । अन्यथा संविदोऽप्यसत्त्वापातात् । प्रकाशस्वरूपत्वमेव सत्त्वमितिचेत् सिद्धमेव तर्हि तद्योगित्वादात्मनः सत्त्वं, असत आश्रयत्वायोगात् । नच तत्प्रकाशस्वरूप एवात्मा, न तु तद्योगीति वक्तुं युक्तम् । प्रत्यत्तवस्य तत्राभानात् । अहं जानामीति, ज्ञानवानहमित्येवमात्मधर्मत्वेनैव तस्य भानाच्च । एवं सिद्धं प्रकाशभिन्नस्यात्मनः सत्त्वम्, सिद्धं चानारोपितरूपेण विषयत्वादर्थस्यापि सत्त्वम् । असतोऽविषयत्वात् ।

रश्मिः ।

गुरुमतं पर्यवसितं ग्राह्यम् । स्वतो ज्ञानग्राहकसामग्रीग्राह्यं स्वतोग्राह्यमिति । सिद्धान्ते तु 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इति वाक्यमपि । नैयायिकमताक्षेपं वारयन्ति **कर्मकर्त्रि**ति । तथाचानुभवबलेनैवात्मानमहं जानामीत्यत्र कर्मलक्षणसंगतिरिरिति भावः । पुनर्जडत्वापत्तिस्तु दत्तोत्तरा । यस्मिन्नर्थात्मानाविति ग्रन्थमाक्षिपन्नाह **एव**मिति । **भेदे** इति । नैयायिकास्तु संविदो निर्विषयत्वे ज्ञानत्वाभावः, सविषयत्वेपि जगतो विषयतो[1] यस्यकस्यचित् । आद्ये सर्वज्ञतापत्तिः । द्वितीये विनिगमकाभावः, सुषुप्तिरपि निर्विषया न स्यात् । तदानीं निराकारचित्संततिस्वीकारस्तु तस्याः स्वयंप्रकाशत्वे प्रमाणाभावं द्रढयति । निर्विषयिण्या ज्ञानत्वे घटादीनामपि ज्ञानत्वापत्तिरत आत्मा ज्ञानभिन्न इत्याहुः । आत्मद्रव्यज्ज्ञानं बुद्धिर्गुणः । ननु प्रकृतेपि परिहरणीयमेतन्न इत्याह **विषयत्वेने**त्यादि । ब्रह्मत्वेनाभेदादवच्छेदकोक्तिः । सर्वभवनसमर्थत्वादचिन्त्यशक्तेश्च जातोर्थो भिन्न एवेत्यर्थः । तथा च नित्यज्ञानस्य प्रपञ्चविषयत्वे न सार्वज्ञ्यम् । अनित्यस्य यो विषयस्तद्विषयकत्वम् । सुषुप्तौ सामग्रीविरहाददोष इति न पूर्वोक्तं किंचिदिति भावः । अथवा । ननूक्तं विषयादिजन्यत्वे संविदो अहं जीव इत्याद्याकारिकाया जडत्वापत्तिरिति, तत्राह **विषयत्वेने**ति । तथा च चिदचिद्ग्रन्थिरूपाहंकारवैशिष्टयेपि पुरुषविधब्राह्मणोक्तात्मरूपब्रह्मत्वेनाभेदात्तज्जन्यत्वेप्यक्षतेरिति हृदयम् । वस्तुतस्तु आविर्भावः विपरीतव्याप्तेन । एतेन पूर्वज्ञानफलस्येत्यादिनोक्ता जडत्वापत्तिर्जगदान्ध्यापत्तिश्च निरस्ता । संविदोपि कैवल्यं नास्त्येवेति विषयाविनाभावं नन्दयति । तेन वस्तुतस्त्वित्यादिनोक्तमर्थवियुक्तैव संविदिति तदप्युक्तप्रायम् । अहंवित्तौ सत्ताया इवान्यत्र दृश्यमानघटादीनामपलपितुमशक्यत्वादिति । ब्रह्मैव तदाकारतया चकास्तीति चेन्न अपसिद्धान्तापत्तेः । अत्रानिर्वचनीयां ख्यातिमाशङ्क्य निषेधति **न च सत्त्वस्ये**ति । **तयो**रिति आत्मार्थयोरित्यर्थः । सत्त्वस्वरूपमाह **प्रकाशे**ति । ॐइत्याह **सिद्धमेवे**ति । **असत** इति अनिर्वाच्यस्येत्यर्थः । **तत्रे**ति ज्ञाने इत्यर्थः । आत्मनि सत्त्वस्याप्यभातत्वमाशङ्क्याह **अहं जानामी**ति । ज्ञानानुकूलव्यापारवानहमित्यत्रास्मत्प्रत्ययगोचरस्यात्मनो धर्मः सत्तास्मच्छब्दे रूढेः । तत्कर्तृसमभिव्याहारे अहंकारो योगाभावान्नाहंकार इति तस्य सत्त्वस्य भानात् । अहंकारस्य सत्तासमभिव्याहारताकथनस्य सत्त्वमस्त्येव न सर्वान्तरत्वरूपप्रतीतित्वरूपप्रत्यक्त्वभानात् विशेष इति भावः । सिद्धमाह **एवं सिद्ध**मिति । **तदर्थस्यापी**ति । ब्रह्मकार्यत्वादिति भावः । युक्तिमाह **असत** इति । संहितायामित्यधिकारात्तस्याश्चात्राविवक्षितत्वादसंधिः । तदुक्तम्—

१. तदर्थेति रश्मौ ।

भाष्यप्रकाशः ।

खपुष्पं पश्याम्यनुभवामि प्रत्येमीत्याद्यप्रत्ययाद् मरीचितोयादीनां चारोपितरूपेण विषयत्वात् ।

रश्मिः ।

'संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते' इति ।

असतोपि तोयादेर्विषयत्वं दृश्यते इति चेत्तत्राह **मरीचीति** । **आरोपितरूपेणेति** । अयं भावः । भाट्टास्तावद्भ्रमः स्मृतेर्नातिरिच्यत इत्यख्यातिं वदन्ति, संस्कारजन्यत्वाविशेषात् । न च तत्तास्फुरणापत्तिरिति शङ्क्यम् । कर्तृदोषेण तत्प्रमोषात् । दोषाभावे तु रजतस्फूर्तिरधिष्ठानस्फूर्तिर्वा भवेत् । दोषाश्च रागादयः क्वचित्प्रबलालोकादिना विवेकासामर्थ्यं क्वचिदन्यचित्ततेत्येवमादयो अननुगतास्तथातथादर्शनादुन्नेयाः । अतः प्रमुष्टतत्ताका स्मृतिरेव भ्रमस्थले ज्ञेया । प्राभाकरास्तु रजतमनुभवामीत्यनुव्यवसायबाधं स्मरामीत्यनुव्यवसायापत्तिं च पश्यन्तो ग्रहणस्मरणात्मकं ज्ञानद्वयमगृहीतासंसर्गकमत्र ख्यातिरूपमिति वदन्ति । स्मृतिप्रमाणभेदेन ज्ञानस्य द्वैराश्यात् । न चानुव्यवसायद्वयापत्तिरिति वाच्यम्, स्मरणाभिमानस्य दोषेण प्रमोषात् । तस्माद्विविक्तज्ञानद्वयाङ्गीकारे न कोपि दोष इति । अत्राप्येकज्ञानतौल्येन ज्ञानद्वयस्याशक्यवचनत्वात् । न च तौल्यं नास्तीति वाच्यम् । यद्यगृहीतासंसर्गकं ज्ञानद्वयं स्यात्, एकज्ञानतुल्यता न स्यात्, यदि न स्यात् सा व्यवसायानुव्यवसाययोर्नोपलभ्येतेति तर्केण तन्मूलभूतव्यवसायानुव्यवसायाभ्यां चैकज्ञानतुल्यत्वनिश्चयात् । अपि च, ज्ञानद्वैराश्याग्रहेणात्र ज्ञानद्वयाङ्गीकारे सर्वत्र विशिष्टज्ञानोच्छेदः । घटोयमिति प्रमायामप्यगृहीतासंसर्गकवद्गृहीतज्ञानद्वयस्य शक्यवचनत्वात् । द्वैराश्ये मूलस्य चिन्त्यत्वाच्चेति मतद्वयेपि दोषान् पश्यता भवतानिर्वचनीया ख्यातिरादृता । इत्थं हि त्वदीयं व्युत्पादनम् । प्रमा द्वेधा । तत्र तत्त्वमस्यादिवाक्योत्था पारमार्थिकी, संसारप्रमा व्यावहारिकी । साचेत्थं एकैव संविच्चातुर्विध्यं धत्ते । तत्रान्तःकरणवैशिष्ट्येन प्रमातृताम्, अन्तःकरणवृत्तिवैशिष्ट्येन प्रमाणताम्, घटादिवैशिष्ट्येन विषयताम्, अन्तःकरणवृत्त्यभिव्यक्तत्वेन फलतामिति । पूर्वमिन्द्रियार्थसन्निकर्षः, ततश्चान्तःकरणस्य चक्षुरादिद्वारा विषयदेशगमनम्, तेन संयोगस्तदाकारेण परिणामो वृत्त्यात्मकः । यथा तडागोदकं छिद्रान्निर्गत्य कुल्याद्वारा केदारं प्रविश्य चतुःकोणाद्याकारेण परिणमते । तत्र परिणामे विषयसंवित्प्रतिफलनं भवति । तदैकदा वृत्तिविषययोरवस्थितिरेकदेश इति तत्प्रयुक्तभेदस्याकिंचित्करत्वात् तत्संविदोरैक्यम् । तदिदं प्रत्यक्षप्रमा तया च वृत्त्यावरणसहिताज्ञाननिवृत्तिः । ततोऽन्तःकरणविशिष्टसंविदा विषयस्फुरणमिति । यदा तु इन्द्रियविषययोर्दोषः, तदा भ्रमः । स च सदसद्विलक्षणत्वादनिर्वचनीय इति ।

तदिदं स्वबुद्ध्युल्लासमात्रम् । आरोपितरूपेण बुद्धिरूपेण विषयत्वात् । तथा हि । अहंकारभेदरूपा बुद्धिः स्थिरा मूर्ता सच्चिदानन्दब्रह्मभिन्ना ख्यायत इति अन्यख्यातिरेवोचितेति । एतद्वैशिष्ट्यज्ञानप्रनाडीनां द्वितीयाध्यायोपान्ते 'प्राणवता शब्दात्' इत्यधिकरणे विस्तृतिनिरस्ती वक्तव्ये इति ते अत्र नोच्येते । नन्वभावे सत्त्वस्य वक्तुमशक्यत्वादतीतानागतस्थलेऽर्थवियुक्तैव संवित्तद्वद्वर्तमानकालेप्यर्थो मिथ्या दृश्यत्वाच्छुक्तिरजतवदिति अनुमानेनार्थोऽनिर्वचनीय इति नार्थे नियामकतेति शङ्कते **न चेति** । ननु चाभावत्वेन प्रत्ययात्सोतिरिच्यत इति चेत्, न । घटे ध्वस्ते तद्द्रव्यं

भाष्यप्रकाशः।

न चाभावे सत्ताव्यभिचारः। तस्यापि भावत्वात्। भावान्तरात्मना अननुभूयमानप्रतियोगिरूपेणैव तत्राभावव्यवहारात्। अन्यथा निष्प्रतियोगिकत्वेनापि तस्य प्रत्ययापत्तेः। नचैवं संविदोऽर्थाद्यविनाभावेऽर्थं विना संविदप्रकाशात् स्वतःप्रकाशत्वहानिः। दीपादेस्तेजोरूपत्वस्येव संविदः प्रकाशस्वरूपत्वस्यैव स्वतःप्रकाशपदार्थत्वात्। अत एवात्मनोऽपि तथात्वात्। नचात्मनो व्यापकत्वेन सर्वत्र सत्त्वात् तत्रारोप्यमाणस्य शरीरादेर्मरीचिकादावारोप्यमाणतोयादेरिव सत्त्वदेशस्याशक्यवचनत्वादसत्त्वमास्थाय प्रतीयमानत्वमात्रेण सदसद्विलक्षणत्वमनिर्वाच्यत्वं चास्थीयत इत्यपि सांप्रतम्। वस्तुपरिच्छेदास्थातुर्मते तत्समवाय्यादीनां सत्त्वेन तेषामेव देशत्वसिद्धेः। तदनास्थातुर्मते च ब्रह्मकार्यत्वाद् ब्रह्मण एव तथात्वसिद्धेः। एवं सिद्धे देशे शरीरादीनां च सिद्धत्वे तेषामात्मन्यारोपोऽपि सुकरः। अन्यथा खपुष्पादेरिव दुष्करः स्यात्। अप्रत्यक्ष आकाशे मालिन्याध्यासवदप्रत्यक्ष आत्मनि शरीराद्यध्यासोपपादनमप्यसंगतम्। बालानामवकाशरूपेण बुद्धानां वस्तुस्वभावेनैव चाकाशस्यापि प्रत्यक्षत्वात्। अतः कल्पनाया असंगतत्वात् 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति, 'भोक्ता भोग्यं प्रेरितारं च मत्वा' इत्यादिश्रुतिविरोधाच्च, न कर्तृत्वभोक्तृत्वादिरहित आत्मा। नच स वेदार्थः। ब्रह्मणो वेदार्थत्वात्। किंतु स्वबुद्ध्या तथा कल्पित इति, न तदर्थं विचारः शक्यवचनः। तदिदमुक्तं न हीत्यादि।

रश्मिः।

कपालत्वेनावतिष्ठते संज्ञानिवृत्तिमात्रं परम्, एवं कपाले ध्वस्ते तच्छकलात्मता ततोपि चूर्णीभावः ततश्च बहिःप्रक्षेपे पृथिव्यामेकीभावः, पुनः कपालं घटश्चेत्येवं भ्रमणेनानुभूयमानप्रतियोगिरूपेण कपालादिनाप्यभावप्रत्ययनिर्वाह इति। प्रत्यक्षविरोधस्य सहने फलाभावादिति। न चेह घटो ध्वस्त इत्याधाराधेयभावव्याघातः। घटाभावे घटाभाव इतिवदुपपत्तेः। तदाह **भावान्तरात्मने**ति। 'यदस्ति यन्नास्ति तदेव विष्णुः' इति विष्णुरूपभावान्तरात्मत्वमभावस्य, न अनुभूयमानोऽननुभूयमानस्तादृशः प्रतियोगी संबन्धनिरूपको यस्येति। मुख्यधर्मेणैव व्यवहार इत्यत्र युक्तिमाह **अन्यथे**ति। निर्गतः प्रतियोगी यस्मात् तत्त्वं भावान्तरधर्मस्तेन रूपेणेत्यर्थः। 'इदुदुपधस्य चाप्रत्ययस्य' इति षत्वम्। तद्रहितपाठस्तु प्रामादिकः। तेन खपुष्पेऽभिलापयोग्यत्वेपि अस्त्यादिक्रियान्वितत्वरूपसत्त्वाभावेन तदतौल्यमपि सूचितम्। तथैवात्मनेत्यादिनिरुक्तमनुवदन्तीं शङ्कामपाकुरुते **न चात्मन** इति। **सदसद्विलक्षणत्व**मिति। अनिर्वचनीयत्वमेव सदसद्विलक्षणत्वमास्थीयत इति योजना। दूषयति **वस्त्वि**ति। वस्तुतो ब्रह्मणो वैश्वानराधिकरणे प्रादेशत्वाभिमानत्वरूपाङ्गीकारेणैव **परिच्छेदास्थातु**र्भगवतो व्यासस्य **मते** शरीरादि**समवाय्यादीना**मित्यर्थः। **तदनास्थातु**रिति प्रस्तुत एकदेशिनो मते इत्यर्थः। **ब्रह्मण** इति सर्वशक्तिमतो ब्रह्मण एकदेशत्वसिद्धेरित्यर्थः। तवाप्येवमावश्यकमित्याह **एवं सिद्ध** इति। तथा चानिर्वाच्यत्वनिरुक्तिर्निष्प्रयोजनेति भावः। दृष्टान्ताप्रसिद्धिमाह **बालाना**मिति। **आकाशस्यापी**त्यादि। इदं चाग्रे व्युत्पाद्यम्। **तदेषा**मिति श्रुत्यर्थस्तु, विज्ञानमयस्य सुप्तस्य विज्ञानराहित्ये अजातशत्रुणा हेतुरुच्यते **तदेषा**मिति। एषामात्मप्राणादीनां विज्ञानं स्वविषयप्रकाशनसामर्थ्यं विज्ञानेन स्वचैतन्येन जीव आदायोपादाय हृदयाकाशे शेत इति। **न च स वेदार्थ** इति स्वात्मा न वेदार्थ इत्यर्थः। यदप्यध्यासलक्षणं **तदप्यध्यासम्**। न चेदंत्वावच्छेदेन तदत्यन्ताभावोऽस्तीति रजतत्वाभाववति रजतत्वप्रकारकं

ब्रह्म पुनर्यादृशं वेदान्तेष्ववगतं तादृशमेव मन्तव्यम् । अणुमात्रान्यथा-कल्पनेऽपि दोषः स्यात् ।

'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चौरेणात्मापहारिणा' ॥

'नैषा तर्केण मतिरापनेया' इति श्रुतेश्च ।

भाष्यप्रकाशः ।

अथ 'सत्यं ज्ञानमनन्तं ब्रह्म,' 'अस्थूलमनणु'इत्यादिश्रुतिभ्योऽधिगत इति वदति तत्राह **ब्रह्मेत्यादि** । यथा हीदमस्थूलत्वादिकं वेदान्तेषूच्यते, तथा 'सर्वकामः सर्वगन्धः सर्वरसः, विश्वतश्चक्षुरुत विश्वतोमुखः' इत्यादिकमप्युच्यत इति तादृशमपि मन्तव्यं न तु निर्विशेषमात्रम् । न च तत्र स्वस्यान्यथाकल्पनं युज्यते, प्रतिज्ञाहानिदोषात् प्रतारकत्वापत्तेश्च । नच श्रोतुर्मन्दत्वे कश्चिदुपायो विधेय इति तदर्थं किंचित्कल्पनेऽप्यदोष इति वाच्यम् । तथा सति श्रुत्यभिप्रेतात्मस्वरूपाज्ञानेन श्रोतुः 'योऽन्यथा सन्तम्' इतिश्रुत्युक्तदोषापत्तेः । तथा वक्तुरपि, नैषा तर्केणेति श्रौतनिषेधातिक्रमदोषापत्तेः । श्रुतिविरोधदोषापत्तेश्च । तदिदमुक्तम् **अणुमात्रान्यथेत्यादि** । ननु

रश्मिः ।

ज्ञानं तत्रात्यन्ताभावो निविष्टः, भावोऽस्तीति नाव्याप्तिरिति वाच्यम् । इदंत्वस्य पुरोवर्तित्वरूपस्य शुक्तिनिष्ठत्वे सदसत्ख्यात्यापत्तिः, अनुभवविरोधश्च । विशेषणानुभवो रजत इति । रजतनिष्ठत्वे तु प्रतिबन्धकोऽत्यन्ताभावं विघटयिष्यतीति । बन्धस्य नित्यता तु 'बन्धोस्याविद्यया-नादिः' इति वाक्यादविद्याकार्यत्वेन मिथ्यात्वात् । व्यावहारिकी माध्वैर्बन्धमिथ्यात्वखण्डने खण्डितेति । ननु कारणान्तरसमवधानान्न बन्धस्य विद्यामात्रनिवर्त्यत्वमिति चेन्न, एकेनैव दण्डादिना घटनाशदर्शनेन दृष्टान्तसंभवाच्च । 'असंदिग्धोपि वेदार्थः' इत्यत्र अस्य पक्षस्य संग्रहात् । सिद्धान्तपक्षमाहुः **तादृशमपीति** । निर्गुणमेव पश्चादनारोपितगुणसंपृक्तमित्यर्थः । इदमुभयव्यपदेशाधिकरणे तृतीयाध्याये स्पष्टीभविष्यति । **अणुमात्रेत्यादि** भाष्यं विवृण्वन्ति स्म **न च तत्रेत्यादि** । ब्रह्मणि धर्माणामध्यस्तत्वकल्पनमित्यर्थः । कुतः, अणुमात्रान्यथाकल्पनमपि नेष्यत इत्यर्थः । **प्रतिज्ञेति** 'अथातो ब्रह्मजिज्ञासा' इति निर्गुणब्रह्मजिज्ञासां प्रतिज्ञाय 'जन्माद्यस्य यतः' इति वदतो व्यासस्य प्रतिज्ञाहानिदोषादित्यर्थः । अध्यस्तत्वेपि लक्षणतोपपत्तेराह **प्रतारकत्वेति** । केवला संवित्तदित्यसूत्रयतो भगवतो व्यासस्य तत्त्वापत्तेश्चेत्यर्थः । अत एव द्वितीयस्य नवमाध्याये इच्छानन्तरं सदानन्दस्य जगत्कर्त्री शक्तिः, चितस्तु व्यामोहिका शक्तिरिति विभाग उक्तः । **अणुमात्रेत्यादि** भाष्यमवतारयन्ति **न च श्रोतुरिति** । **मन्दत्व** इति तावदवधानशून्यत्व इत्यर्थः । **योऽन्यथा सन्तमिति** । अत्र **प्रतिपद्यत** इत्यस्य जानाति, प्रतिनिधिं पद्यते गच्छति प्रतिपत्तिं शरणागतिं कुरुते इति त्रयोऽर्थाः । प्रतिनिधिः कृष्णः प्रतिकृतिश्च । तदुक्तं सुबोधिन्यां 'नैश्चिन्त्यं वाचि पूर्ववत्' इति **कृष्णविषये**, प्रतिकृतिविषये तु 'हरिमूर्तिं प्रियां कृत्वा' इति । पुरुषोत्तमप्रतिष्ठायां गोस्वामि-

नच विरुद्धवाक्यानां श्रवणात् तन्निर्धारार्थं विचारः। उभयोरपि प्रामाणिकत्वेनैकतरनिर्धारस्याशक्यत्वात् । अचिन्त्याऽनन्तशक्तिमति सर्वभवनसमर्थे ब्रह्मणि विरोधाभावाच्च।

अत एवोपनिषत्सु तत्तदुपाख्याने बोधाभावे औपाधिकबोधे च तपस

भाष्यप्रकाशः।

विरुद्धवाक्यश्रवणे श्रोता संदेग्धि। संदेहे चावश्यमनिष्टम्। 'अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति' इति स्मरणात्। 'यस्य स्यादद्धा न विचिकित्सा'इति इति श्रुतेश्च। अतस्तन्निवारणार्थं निर्धार आवश्यकः। स च विचाराधीन इति तदर्थं स कार्य एवेत्यत आह **नचेत्यादि**। विचारः कथं कार्यः किमेकतरबाधेन, किंवोभयसामञ्जस्येन। यद्याद्यः पक्षस्तदा तद्बाधनायाप्रामाणिकत्वं तस्य वक्तव्यम्। तथा सत्यन्यत्रापि तदापात इत्युपचारनिवृत्त्यर्थं यतमानस्याऽप्रामाणिकत्वापत्त्या वृश्चिकभिया पलायमानस्य विषमाशीविषमुखे निपातः। अथ द्वितीयस्तदा, 'परास्य शक्तिर्विविधैव श्रूयते,' 'स हैतावानास' इत्यादिश्रुतिभिर्ब्रह्मसामर्थ्येनैव विरोधस्य परिहारे विचारस्य वैफल्यमेवेति युक्त्या वेदार्थः सर्वथा न प्रतिपत्तुं शक्यः, इत्यतो वेदार्थज्ञानायोपायान्तरमेष्टव्यम्। तदपि श्रुत्यविरुद्धम्। तत्र प्रमाणमाह **अत एवेत्यादि**। तैत्तिरीये भृगोर्बोधाभावे वरुणेन 'तपसा ब्रह्म विजिज्ञासस्व' इति, छान्दोग्ये इन्द्रप्रजापतिसंवादे इन्द्रस्यौपाधिकबोधे प्रजापतिना, 'वस द्वात्रिंशतं वर्षाणि ब्रह्मचर्यम्'इति साधनान्तरस्य **तपस एवोपदेशः**

रश्मिः।

नोपि 'ततः श्रीपुरुषोत्तमात्मकतायां जातायां स्वरूपे भगवान् श्रीगोकुलेशः श्रीकृष्णोयमिति बुद्धिः कर्तव्या, न स्वरूपादिबुद्धिः' इत्याहुः। **नैषा तर्केणे**ति भाष्यं विवृण्वन्ति **तथा वक्तुरि**ति। **एषे**ति ब्रह्मविषयिणीत्यर्थः। अयमर्थः। द्वितीयाध्यायेऽणुकारणवादे वक्ष्यते। काठके इयं श्रुतिः। सा च 'अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् न ह्यतर्क्यमणुप्रमाणात्,' 'नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ' इत्यादिः। अनन्यः आचार्यः। 'अत एव चानन्याधिपतिः' इति सूत्रात्। अन्येन आगमाभिज्ञाचार्येण। 'नाहं किंचित्करोमि' इति वाक्यात्। न अन्यो भिन्नो विद्यते यस्येत्यागमाभिज्ञेन। **तदिदमि**ति। **न च तत्रे**त्यादिना विवृतमित्यर्थ इति। **न च श्रोतु**रित्यादिना विवृतमित्यर्थः। आरणे 'अन्धो मणिमविन्दत् तमनङ्गुलिरावयत्। अग्रीवः प्रत्यमुञ्चत्। तमजिह्व असश्चत'। 'ऊर्ध्वमूलमवाक् छाखं वृक्षं यो वेद संप्रति। न स जातु जनः श्रद्दध्यात्' इति मृत्युर्मा मारयात्' इति। 'अणोरणीयान्महतो महीयान्' इति वेदान्ते। अविन्दत् ज्ञातवान्। परस्मैपदात्, लब्धवान्वा विरुद्धधर्माश्रय उक्तः। तमनङ्गुलिरिति 'अपाणिपादो जवनो ग्रहीता' इत्युक्तः। **अग्रीव** इति। सर्वतो हि शिरोमुखमित्युक्तः। **तमजिह्व** इति लिह आस्वादने आस्वादकतृरहितः। 'निर्गुणो गुणभोक्ता च' इति गीतोपबृंहिका। **श्रुतिविरोधे**ति। **यस्य स्यादद्धे**ति। यस्य विचिकित्सा संशयो नास्ति तस्याद्धा प्रत्यक्षं स्यादित्यर्थः। **तस्ये**ति उभयोरेकतरस्येत्यर्थः। **विषमाशीविषमुख** इति। विषमाशीविषः सर्पविशेषः। एतावता 'अलौकिको हि वेदार्थः' इत्यर्धकारिका व्याख्याता। उत्तरार्धं विवरीतुं संबन्धार्थमाह **इत्यत** इति। **बोधाभाव** इति। अन्नब्रह्मज्ञानानन्तरं 'तद्विज्ञाय पुनरेव च वरुणं पितरं उपससार अधीहि भगवो ब्रह्मेति, तꣳहोवाच तपसा ब्रह्मविजिज्ञासस्व' इति बोधाभाव इत्यर्थः। **औपाधिकबोध** इति। छान्दोग्ये च दशम-

एवोपदेशः । नच तपःशब्देन विचारः । तस्य पूर्वानाधिक्यात् तप एव । नचोपाख्यानानां मिथ्यात्वम् । तथा सति सर्वत्रैव मिथ्यात्वं भवेद् विशेषाभावात् ।

भाष्यप्रकाशः ।

कृत इत्यर्थः । ननु तप संताप इतिवत्, तप आलोचन इत्यपि धातुरिति तन्निष्पन्नोऽयं शब्दो विचारार्थक एव मन्तव्यः । तथा सति श्रुत्यैव विचारस्य प्राप्तिरित्यत आह **नच तप** इत्यादि । **तप एवेति** तप एव तपःशब्देनोच्यत इत्यर्थः । अयं भावः । विचारो ह्येकतरबाधेन वा, ब्रह्मणः सामर्थ्यादिप्रदर्शनेन वा साधनीयः । न तु श्रोतरि तेन कोऽपि विशेषः संपाद्यः । तथा सति पठितवेदस्य साधनान्तरश्रवणं विनाऽपि विचारे वेदार्थः स्फुरेदेवेति पूर्वानाधिक्यादुपसदनवैयर्थ्यापत्तिः । गुरुवाक्योत्तरं विचार इत्यङ्गीकारे गुरोः खलत्वापत्तिः । उपसदनोत्तरमपि तस्यैवायासोपदेशेन दयाराहित्यप्राकट्यात् । तपसोऽङ्गीकारे तु तेन शिष्ये विशेषाधानादधिकारसंपत्तौ साङ्गवेदवाक्येभ्य एव स्फूर्तिर्नच कोऽपि पूर्वोक्तदोष इति तपःशब्दो रूढ एवादरणीयः । तदेतदुक्तं, **तप एवेति** । अन्यथा छान्दोग्यविरोधस्यापरिहार इत्यपि बोधयितुं सावधारणमुक्तम् । ननु सत्यमुपनिषत्सु तप उपदिश्यते, तथाप्युपाख्यानेषु न तु ज्ञानसाधनत्वेन क्वापि पृथग् विधीयते । उपाख्यानानि तु विद्यास्तुत्यर्थमसदपि बोधयन्तीति, न तदनुरोधे निर्बन्धः कार्य इत्यत आह **नचोपे**त्यादि । तथाच श्वेतकेतूपाख्यानस्थयुक्तीनां त्रिवृत्करणादीनां

रश्मिः ।

प्रपाठके ब्रह्मजिज्ञासुभ्यामिन्द्रविरोचनाभ्यां नोदितः प्रजापतिरुवाच 'साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथाम्' इति । ततश्च तथा कृते 'एष आत्मेति होवाच ततस्तौ शान्तहृदयौ प्रवव्रजतुः' । तयोरिन्द्रस्तु शरीरालंकारनाशादिना तन्नाशाद्यनुसंधाय, 'नाहमत्र भोग्यं पश्यामि' इति पुनः प्रजापतिमुपजगामेत्यौपाधिकबोधे इत्यर्थः । तस्य विचारस्य श्रोतरि पूर्वापेक्षया विशेषरूपाधिक्यासंपादकत्वात् तपःशब्देनानशनादिरूपं विशेषाधायकं तप एवोच्यते इत्याशयमभिसंधाय विवृण्वन्ति **अयं भाव** इति । **तेने**ति विचारेणेत्यर्थः । ननु विचारेणाप्युत्तरोत्तरं प्रतिभारूपो विशेषः संपाद्य एवेति चेत्, तत्राहुः **तथा सती**ति । **इति पूर्वानाधिक्या**दिति इति हेतोः पूर्वोपसदनापेक्षया ब्रह्मोपसदनविषये विशेषरूपाधिक्यासंपादकत्वात् । विशेषश्चान्नादिब्रह्मबोधानुकूल्यमेव । ननु विचारेप्येवं वक्तुं शक्यमित्यत आह **उपसदने**ति । भृगोर्वरुणोपसरणवैयर्थ्यापत्तिः । विचारेणैव विशेषाधानाद्गुरोरप्रयोजकत्वादित्यर्थः । शिष्ये **विशेषाधाना**दिति । 'अन्नं ब्रह्मेति व्यजानात्, प्राणो ब्रह्मेति व्यजानात्, मनो ब्रह्मेति व्यजानात्, विज्ञानं ब्रह्मेति व्यजानात्, आनन्दो ब्रह्मेति व्यजानात्' इत्येवमुत्तरोत्तरं फलवैजात्यात् साधनवैजात्याय शिष्ये विशेषाधानावश्यकत्वादित्यर्थः । तदुक्तं—

'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते ।
तपसा वेदयुक्त्या तु प्रसादात्परमात्मनः' ॥ इति ।

तपःशब्द इति । तपःशब्दः अरूढ इति पदच्छेदः । 'तप संतापे' इति धातुपाठात् । तेन वेदान्ते योगाङ्गीकारस्य न विरोधः । यद्वा तपःशब्दो रूढः शक्तिसंकोचवान् । अत्र तपो भगवानिति द्वितीयस्कन्धनवमाध्याये निरूपणान्न विचारः । ततः 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इति वाक्यात्तप एव । 'तदुक्तं तपसा ब्रह्म विजिज्ञासस्व', 'तपो ब्रह्म,' इति । 'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते । तपसा वेदयुक्त्या तु प्रसादात्परमात्मनः' इत्यत्र तप उक्तम् । न च वेदयुक्तिविचारः । अस्तु तथा, परंतु द्वितीयसुबोधिन्यां तपसंतापस्वीकारात्, 'स्वयमेवात्म-

न ह्यप्रामाणिकोक्ते विधौ वा उपाख्याने वा ब्रह्मस्वरूपे वा कस्यचिदपि विश्वासो यथा लोके। तस्माद् वेदे अक्षरमात्रस्याप्यसत्यार्थ(ज्ञान)स्याभावाद् वैदिकानां न संदेहोऽपि किं पुनर्विरुद्धार्थकल्पना । विद्यासु च तदश्रुतेः । यदि वेदार्थज्ञाने विचारस्योपयोगः स्यात्, अङ्गत्वेन व्याकरणस्येव विद्यासु श्रवणं स्यात्। स्वातन्त्र्ये च पुराणादेरिव मीमांसाया अपि प्रकारभेदेन प्रतिपादकत्वं स्यात्। 'तं त्वौपनिषदं पुरुषं पृच्छामि'इति तु तेषां निषेधः । अन्यथाज्ञानं नोपनिषदुक्तं फलं समर्पयति। तस्मान्नारम्भणीय एव ब्रह्मविचारः।

भाष्यप्रकाशः ।

च मिथ्यात्वं स्यात्। तथाच सर्वो वेद एवोच्छिद्येतेत्यर्थः। तत्र हेतुमाह न हीत्यादि। सिद्धं वदन् स्वोक्ते प्रत्यक्षसंवादमप्याह तस्मादित्यादि। वैदिकानामिति प्राज्ञवैदिकानाम्। प्रकारान्तरेणापि विचारानर्थक्यमाह विद्यास्वित्यादि। स्वोक्तं व्याचष्टे यदीत्यादि। चरणव्यूहे, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गान्युक्त्वा, 'तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते' इत्येवोच्यते। तस्मात् 'साङ्गो वेदोऽध्येयो ज्ञेयश्च' इति विधावपि नाक्षेपो युक्त इत्यर्थः। एवं विधित्रयेऽपि विचाराक्षेपस्याशक्यवचनत्वाद् विधिप्रयुक्त्यारम्भणीयत्वं निवारितम्। ननु मास्त्वङ्गमध्यपातस्तथापि पुराणादिवत् स्वातन्त्र्येणैवारम्भणीयः। नचाऽप्रामाणिकत्वम्। प्रतिपदमनुपदं, छन्दो, भाषा, धर्मो, मीमांसा, न्यायस्तर्क इत्युपाङ्गानीति तत्रैवोपाङ्गेषु पाठात्, स्मृतावपि ।

'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश' ॥ इति ।

विद्यासु गणनाचेति चेत्तत्राह स्वातन्त्र्ये चेत्यादि। तस्मादिति वेदार्थज्ञानार्थं ब्रह्मज्ञानार्थं चाऽनुपयोगात् ।

रश्मिः ।

ना'इति वाक्यात् विचारस्याप्राप्तिः, अभगवत्त्वात्। तथा च तस्य विचारस्य अभगवत्त्वेन पूर्वस्मात्संतापात्मकात्तपसो भगवद्रूपादस्यानाधिक्यात्तपःसन्तापात्मकमेव ग्राह्यमिति भाष्यार्थः । आधिक्यं स्वयं प्रकाशाविघटकत्वम्। एकरसत्वं वा एकरसत्वेन पूर्वस्मादनाधिक्यं वा । मुख्यं हेतुमाह अन्यथेति तपसो विचारार्थकत्व इत्यर्थः । अपरिहार इति अपरिहारो मुख्यो हेतुरित्यपि बोधयितुमित्यर्थः। उपाख्यानानीति। एतच्च पूर्वतन्त्रे द्वितीयस्य द्वितीयपादे चिन्तितम्। त्रिवृत्करणादीनामिति। 'यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति। अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुः तत्पुरीषं भवति, यो मध्यमस्तन्मांसम्, योऽणिष्ठस्तन्मनः, आपः पीतास्त्रेधा विधीयन्ते, तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति, यो मध्यमस्तल्लोहितम्, योऽणिष्ठः स प्राणः, तेजो अशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुस्तदस्थि भवति, यो मध्यमः स मज्जा, योऽणिष्ठः सा वाक्, अन्नमयं हि सौम्य मनः, आपोमयः प्राणः, तेजोमयी वागिति' त्रिवृत्करणश्रुतिः। भाष्ये। असत्येति। न च सर्वरस इति श्रुतिविरोधे रस शब्द इति धातुपाठात् शब्दस्यासत्यर्थादिति शङ्क्यम्। क्षराक्षरपुरुषोत्तमभेदेनासत्यार्थ-

अनेन धर्मविचारोप्याक्षिप्त एव । न ह्येतन्निराकर्तुः सोऽयमतिभार इति पूर्वःपक्षः ।

सिद्धान्तस्तु ।

भाष्यप्रकाशः ।

ननु मास्तु ब्रह्मविचारस्यारम्भणीयत्वं,धर्मविचारे तु दोषाभावात् तदारम्भे को दोष इत्यत आह **अनेने**त्यादि । 'स तृतीयमतप्यत, स एतं दीक्षितवादमपश्यत्'इत्यादौ तपस एव कथनेनेत्यर्थः । नन्विदमपि शास्त्रमृष्युक्तत्वात् प्रामाणिकमतः कथं निराक्रियत इत्यत आह **नही**त्यादि । गुरोर्मते एव निराकृते शिष्यस्य का वा गणनेत्यर्थः । एवं च यथा मीमांसाकरणात् पूर्वमङ्गैरेव संदेहनिवृत्तिस्तथेदानीमपि भविष्यतीति व्यर्थं तत्करणमिति केवलवैदिककृतः पूर्वपक्षो निरूपितः ।

उत्तरं वक्तुं गृह्णन्ति **सिद्धान्त** इत्यादि । ननु शब्दस्य निःसंदिग्धमर्थप्रतिपादकत्वात्

रश्मिः ।

वाचकानां क्षराक्षरसंबन्धित्वेन पुरुषोत्तमनिःश्वासे वेदे असत्यार्थस्याभावात् । तेजो घृतादि । अर्थविधुराणां वैदिकानां धर्म्यज्ञानात्संशयो न घटत इति विंशिषन्ति **प्राज्ञे**ति । प्रज्ञ एव प्राज्ञः ते वेदार्थभूतात्मत्वज्ञाः । पूर्वमीमांसाकारिकाणां भावार्थपादभाष्यस्य च तद्विषयकविचारो लाघवादत्रैव युक्त इत्याशये**नानेन** इत्यादि भाष्यमित्याशयेन विवृण्वन्ति स्म **स तृतीय**मिति । इयं श्रुतिः संहितातृतीयाष्टकेऽस्ति । स प्रजापतिस्तृतीयं तपो अतप्यत तदन्वेतं दीक्षितवादं ज्ञातवानित्यर्थः । पूर्वं प्रकाशे प्राज्ञेति स्वयं विशेषणोक्तेः । ननु मीमांसकान्तरोत्थापकग्रन्थाभावात् पूर्वपक्षोपन्यासोऽयं दुर्बोध इति चेन्न, नात्र ब्रह्मपदेन भ्रमितव्यम् । ब्रह्मपदस्य 'जिज्ञासितमधीतं च यत्तद्ब्रह्म'इत्यत्र वेदे प्रयुक्तत्वात् । वेदत्वेन वेदान्तविचारेपि संहतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति वदतां ब्रह्मसूत्राणां प्राचीनवृत्तिकृतां वेदगतिप्रदर्शनार्थं ब्रह्मपदग्रथनस्य सत्त्वान्न ग्रन्थाभाव इति । सिद्धान्तग्रन्थमवतारयन्ति **उत्तर**मित्यादि । **गृह्णन्ती**ति पूर्ववत् । **भाष्ये संदेहवारक**मिति द्वितीयाधिकरणे—

'संदेहवारकं शास्त्रं वेदप्रामाण्यवादिनाम् ।
क्रियाशक्तिज्ञानशक्ती संदिह्येते परस्थिते' ॥

इति वक्ष्यते। तत्र ज्ञानशक्तिक्रियाशक्ती किंनिष्ठे इति विशेषजिज्ञासाजनकत्वात् विशेषवेदार्थजिज्ञासा भवति । तर्हि कोऽत्र वेदार्थः यत्र संशयोदयः । ज्ञानशक्तिक्रियाशक्ती संदिह्येते परस्थिते इति भाष्यात् ज्ञानशक्तिक्रियाशक्तिविषयकः संशयः तस्योदय इत्यर्थः । अत्र ब्रूमः ।

'श्रुतिवृन्दैः सदा जुष्टं श्रुतिवृन्दैः सदाद्भुतम् ।
श्रुतिवृन्दैः सदा सन्तं श्रौतं श्रीकृष्णमाश्रये' ॥

इत्युक्तम् । ब्रह्म पुनर्यादृशमित्यादिः फलिष्यति । 'शतं शुक्राणि यत्रैकं भवन्ति, सर्वे वेदा यत्रैकं भवन्ति, सर्वे होतारो यत्रैकं भवन्ति, स मानसीन आत्मा जनानाम्, वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन्यदास्ते' इत्यत्र पूर्वस्यां शुक्रवेदज्योतिषामुत्पत्त्यादिमतां यत्रैकीभावः, स आत्मा जनानां, मनसि भव इति निरुक्तेर्मानसीनत्वस्य च रसानतिरिक्तानन्दलिङ्गत्वमित्यानन्दो ब्रह्म । द्वितीयस्यां चानन्दस्यैव पुरु-

संदेहवारकं शास्त्रं बुद्धिदोषात् तदुद्भवः।
विरुद्धशास्त्रसंभेदादङ्गैश्चाशक्यनिश्चयः॥
तस्मात् सूत्रानुसारेण कर्तव्यः सर्वनिर्णयः।
अन्यथा भ्रश्यते स्वार्थान्मध्यमश्च तथादिमः॥

परंपरया पाठवदर्थस्यापि गुरुमुखादेव श्रवणेऽपि मन्दमध्यमयोः संदेहो भवेत् समानधर्मदर्शनात् पदादिपाठवत्। तत्र यथा लक्षणानामुपयोग एवमेव मीमांसाया अपि।

भाष्यप्रकाशः।

संदेह एव कथमित्यत आहुः बुद्धीत्यादि। तन्निवृत्तिर्व्याकरणादिभिरेव भविष्यतीत्यत आहुः **विरुद्धेति**। **सर्वनिर्णय** इति पूर्वोत्तरकाण्डार्थनिर्णयः। कथमिदमित्यपेक्षायां व्याचक्षते **परंपरयेत्यादि**। **समानधर्मदर्शनादिति** अर्थे समानधर्मदर्शनात्। यथा 'अक्ताः शर्करा उपदधाति' इत्यत्राञ्जनकरणत्वं घृततैलवसादिषु समानम्। तथाच यथा संहिताध्ययनदशायां, 'देवाय ते यजमानाय शीकाय ते स्वाहा' इत्यादौ संदेहाभावेऽपि पदादिपाठकाले, देवय ते शीकय त इति ह्रस्वश्रुत्या संदेहे, अथादावुत्तरे विभागे ह्रस्वव्यञ्जनपर इत्यधिकारस्थस्य, देवाशीकेत्यादेः।

रश्मिः।

षत्वनिरवधित्वतेजोनिचयत्वरूपधर्मवत्त्वं तस्य साकारस्य तमसस्तु पार इत्यनेन निरविद्याजराधिकरणकत्वनिर्वचनेनाविद्यास्पर्शगन्धविरहं निरुच्य उत्तरार्धे सर्वरूपविचयननामकरणतदभिवदनानामभिवदतः स्थितेश्च श्रावणाद्रूपविचयादिलीलानां तत्संबन्धिनां तत्कर्तुर्महापुरुषस्य स्थितिं महत्त्वेन रूपादीनां तदभिन्नत्वं, धीरत्वेनाधिकारं, तुना कर्तृकर्मकरणानुसंधानरहितता। अयमर्थो द्वितीयनवमाध्याये चिन्मात्रोहं इति भावना तया च ब्रह्मभावलक्षणो मोक्ष इति मायावादनिरस्तिं च श्रावयति। तथा तैत्तिरीयोपनिषदि ब्रह्मवित्प्रपाठके रसरूपस्यैव आनन्दस्य परब्रह्मत्वं श्रुतम्। 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद् बहून् शब्दान्वाचो विग्लापनं हि तत्' इति सर्वात्मभावं विदधती साधनमाह। तथा छान्दोग्ये नारदसनत्कुमारसंवादेप्येतदेव साधनमाह। तथा च तेजोमयो व्यापक आनन्द एव रसः कमनीयः साकारो अचिन्त्यानेकशक्तिवृतः सर्वाश्रयः पुरुषः परं ब्रह्म सर्वात्मभाववद्भक्ते स्वे महिम्नि प्रतिष्ठितो रूपादिविचयादिलीलां चरीकुर्वन्वरीवर्तीति। यथायमर्थः सर्वेषां वेदान्तानां तथास्यां ब्रह्ममीमांसायां विशदयिष्याम इति। तन्मतेऽवस्थिते **विरुद्धेति** विरुद्धानां योगसांख्यवैष्णवतन्त्राणां नैयायिकशांकररामानुजशास्त्राणां संभेदान्मिश्रणादित्यर्थः। एवं च वेदार्थभूतात्मत्वेन ब्रह्मणि ज्ञानशक्तिक्रियाशक्तिव्यापकत्वादेरिति संदेहः। तद्बीजं तु विरुद्धशास्त्रसंभेदः तेन ज्ञानशक्तिक्रियाशक्ती स्तः न स्तो वा, व्यापकोऽव्यापको वेति। 'समान एवं चाभेदात्'इति सूत्रभाष्येऽव्यापकत्वमुपपादितम्। अयमर्थो द्वितीयनवमाध्यायेविरोधेन स्फुटमन्यत्रप्रतिपादितमिति संक्षेपः। **प्रकृते**। **परंपरया पाठव**दित्यादिभाष्यं विवृण्वन्ति **तथा च यथेति**। **देवाशीके**त्यादि। षष्ठ्यन्तमिदं तस्येत्यध्याहरणीयम्। सूत्रविशेषणत्वादिति प्रतिभाति। यथा सूत्रस्येत्यनेनान्वेति। सूत्रस्य भाष्यम्। आदौ पदादौ उदात्ताकारे पदान्ते च वर्तमानः संहितायां यो दीर्घः असौ पदविभागपदसमे व्यञ्जनपरः सन् ह्रस्वमापद्यते। व्यञ्जनपरत्वं यथा

तदुक्तम् ।

असंदिग्धेऽपि वेदार्थे स्थूणाखननवन्मतः ।
मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो द्वयम् इति ॥

भाष्यप्रकाशः ।

'त्रपुश्च मे मिथुश्चरन्तं सुश्चन्द्रदद्म' इत्यादेः पदपाठे, त्रपु च मिथु चरन्तं, सुचन्द्रेति पाठात् संदेहे, त्रपुमिथुपूर्वः शकारश्च परः, सुपूर्वश्चन्द्रपर इति । उत स्वानासो दिविष·तु, आपो हि ष्ठा मयोभुव इत्यादेः पदपाठे, उत स्वानासः, दिवि सन्तु, आपः हि स्थ इति पाठात् संदेहे, स्वानासो दिव्यापोहीत्यादिसूत्रस्योपयोग इति लक्षणानां प्रातिशाख्यसूत्राणां संदेहनिवृत्त्यानुपयोगः । तथाऽर्थश्रवणेऽपि वाजिभ्यो वाजिनमित्यत्र किमामिक्षाऽन्नवन्तो विश्वेदेवा वा वाजिनामानोन्ये वा वाजिनयागदेवताः । गायत्र्यां सविता, सूर्यो वा परब्रह्म वा । आकाशादेव समुत्पद्यन्त इत्यत्र भूताकाशो वा ब्रह्म वेति संदेहः समानधर्मदर्शनान्मन्दादीनां भवेदिति । तन्निवृत्त्यर्थं मीमांसाद्वयस्याप्युपयोग इति ज्ञानविधावुपाङ्गभूतयोस्तयोरप्याक्षेपो युक्त एवेत्यर्थः ।

अस्मिन्नर्थे प्राचां संमतिमाहुः तदुक्तमित्यादि । द्वयमिति संदेहाभावो दार्ढ्यं चेत्यर्थः ।

रश्मिः ।

संहितास्थं ज्ञेयम् । व्यञ्जनमस्मात्परं इति व्यञ्जनपर इति । देवाशीकासुस्राप्वतायमुनाहृदयोत्याशुद्धेति सूत्रे अत्र भाष्यम् । देवाशीका इत्यादिषु ग्रहणे । अवग्रहेषु अन्त्यस्वरो विभागे ह्रस्व आपद्यते यथा देवाय त इत्यादि । यथा वा शीकाय ते स्वाहा शीकाय त इति शीकय ते स्वाहा इदं सप्तमाष्टके स्तुभ्नयन्तो हवामहे इत्यादिषु लक्षणम् । **त्रपुमिथ्विति** इति सूत्र, उपयुक्तं इति शेषः । यद्वा इति च सूत्रस्योपयोग इत्युत्तरत्रान्वयः । त्रपुमिथू पूर्वौ यस्य, चकारः परो यस्यैतादृशः शकारो भवति, सुः पूर्वो यस्य चन्द्रः परो यस्य तादृशः शकारो भवतीति सूत्रार्थः । त्रपुमिथुभ्यां परस्य चस्य सोः परस्य चन्द्रस्य च सुण् न भवतीति फलितोर्थः । अन्यत्र तु तृतीयेऽध्याये चन्द्रे सुशकारेणेति सूत्र्यते । चन्द्रे प्रत्यये सुशब्दशकारेणाव्यवधीयत इति च । भाष्ये । **उपयोग** इति । संतुस्थयोः सकारस्य शकारे उपयोग इत्यर्थः । **मीमांसाद्वयस्याप्युपयोग** इति । तत्राक्ताः शर्करा इत्यत्र तु तेजो वै घृतमिति वाक्यशेषोपयोगः । अर्थवादत्वेपि विशेषार्थतया विध्यविरुद्धत्वात्प्रामाण्यमिति पूर्वतन्त्रे प्रथमाध्यायोपान्ते 'संदिग्धेषु वाक्यशेषात्' इत्यधिकरणे चिन्तितम् । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्'इत्यपि, द्वितीयस्य द्वितीये पादे 'गुणश्च न पूर्वसंयोगे वाक्ययोः समत्वात्' इत्यधिकरणे चिन्तितम् । घनीभूतपिण्ड आमिक्षापदार्थः, जलं वाजिनपदार्थः । तत्र वाज आमिक्षाद्रव्यमेषामस्तीति वाजिनो विश्वेदेवास्तदनुवादेन वाजिनद्रव्यरूपो गुणो विधीयते । आमिक्षाद्रव्येणास्य समुच्चयो विकल्पो वेति प्राप्तम् । तत्रोत्पत्तिशिष्टामिक्षया निवृत्तान्यकाङ्क्षे वैश्वदेवभागे उत्पन्नशिष्टं वाजिनद्रव्यं प्रवेशमलभमानं वाजिशब्दस्य देवतान्तरार्थतां वक्ति । एवं च द्रव्यदेवताभेदाहितकर्मान्तरतास्येति । यथा 'निष्कलं निष्क्रियं' 'यतो वा इमानि भूतानि जायन्ते' इति संदेहे जन्माद्यधिकरणम् । यथा **गायत्र्यामित्यादिसंदेहे** रूढेः सवितृप्राप्तिः तन्न इत्यत्रैवान्तस्तद्धर्माधिकरणे उक्तं भविष्यति । **आकाशादेवेत्यादेस्तु** तल्लिङ्गाधिकरण इति । **ज्ञानविधाविति** । ज्ञेयश्चेत्यस्मिन् स्वाध्यायविधौ वेद्याय । **उपाङ्गेति** । प्रतिपदमनुपदं छन्दो भाषेति

तथाच निर्णये येन केनचिद्वक्तव्येहरिः स्वयं व्यासो विचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति । ब्रह्मजिज्ञासा कर्तव्येति व्यासोक्तत्वादपि कर्तव्यता । कर्तव्यपदाध्याहारे स्वातन्त्र्यं न भवति । अन्यथा, 'अथ योगानुशासनम्'इतिवत् स्वतन्त्रता स्यात् । तथाच ज्ञानानुपयोगः । तथाहि । 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति केवलोपनिषद्वेद्यं ब्रह्म, न शास्त्रान्तरवेद्यम् । तद् यदि मीमांसा स्वतन्त्रा स्यात् तज्जनितं ज्ञानं न ब्रह्मज्ञानं भवेत् ।

भाष्यप्रकाशः ।

एतेन शास्त्रप्रयोजनमारम्भसमर्थनायोक्तम् । विचारकर्तव्यतासमर्थनेनोपोद्घातरूपा अधिकरणसंगतिरपि बोधिता । अतः परं प्रयोजनवत्त्वेऽपीदं शास्त्रं कया संगत्या आगतम् । श्रुतौ च तपस उपदेशात् तदेव च कुतो नोक्तमित्याकाङ्क्षायां शास्त्रसंगतिं वदन्त एव सूत्राक्षराणि व्याकुर्वन्तः प्रथमतो वाक्यार्थमाहुः तथाचेत्यादि । उक्तरीत्या वेदार्थनिर्णयस्यावश्यकत्वात् तन्निर्णये येनकेन चिद्वक्तव्ये यदा कालवशात् तपआदीनामसंभवं व्यङ्गतया तेषामसाधकत्वं च दृष्टवाँस्तदा जगद्दुःखदूरीकरणार्थं हरिः स्वयं व्यासरूपेणावतीर्य वेदव्यासादिकार्यं कृत्वा सर्ववेदार्थनिर्णयार्थं ब्रह्मविचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति ब्रह्मजिज्ञासा कर्तव्येति । धर्मादिवद् व्यासोक्तत्वादपि कर्तव्यता । अत इदानीं तपो न वेदार्थज्ञानसाधनं किंत्विदमेव साधनम् । किंच तापसानामृषीणामपि स्वभावभेदाल्लोकानां संदेहं यदा दृष्टवाँस्तदा करुणया कृतवानिति तदुक्तरीत्या प्रयतने प्रसादोऽपि भविष्यति, तेन वेदार्थबोधश्चेति नास्य गतार्थत्वम् । कृपैव च संगतिरित्यर्थः । ननु सूत्रे कर्तव्यपदाभावादध्याहारस्य च दोषत्वात् किमित्येवं व्याख्यायत इत्याकाङ्क्षायामाहुः कर्तव्यपदेत्यादि, भवेत् इत्यन्तम् । अत उक्तदोषनिवृत्त्यर्थमध्याहृत्य व्याख्यायत इत्यर्थः । अत्र सर्वसंमतत्वादेवमध्याहारपक्ष उक्तो वाक्यार्थश्च ।

रश्मिः ।

चरणोपाङ्गेष्वष्टसु मीमांसकोक्तेः । तयोरिति मीमांसयोरित्यर्थः । भाष्ये । वेदार्थ इति । ननु वेदार्थे ज्ञानक्रियाशक्तिरूपे वेदार्थभूतात्मरूपे उक्ताः संदेहाः संभवन्ति । तदन्वसंदिग्धो वेदार्थो भवति । सामान्ये अर्थे विशेषार्थे शत४शुक्राणीत्याद्युक्ते तु मीमांसानिर्णयः कथमिति चेन्न । ससंबोधो मोक्षो निःसंबोधो मोक्षो वेति संदेहे संपद्याविर्भावादिसूत्राणि वाक्यशेषरूपाणीति मुख्यः ससंबोधो मोक्ष इति मीमांसानिर्णयसत्त्वात् । स्थूणाखननवदिति । स्थूणा हि शङ्कुः सीम्नि निखन्यते निखातापीति तद्वदित्यर्थः । प्रकृते । शास्त्रप्रयोजनमिति । संदेहाभावरूपं दार्ढ्यरूपं चेत्यर्थः । उपोद्घातरूपेति पूर्वोक्ता तु अध्यायादेः संगतिरिति न पुनरुक्तिः । स्वयमिति । पाक्षिकप्रामाण्यप्रहाणायेदम् । वाक्यानि त्वग्रे वक्तव्यानि । ननु वेदार्थविचारेऽलौकिको हि वेदार्थ इत्यस्योपस्थित्या कालवरणतपआदीनामित्यत्र आदिशब्देन वेदयुक्तिः परमात्मप्रसादश्चेत्युभयं ग्राह्यम् । तदा तपआदीनामित्यत्र बहुवचनं विरुद्धम् । साधनान्तरग्रहणगौरवम् । वेदार्थे उक्तसाधनातिरिक्तसाधनग्रहणापत्तिश्चेत्यरुच्याहुः किं चेति । दृष्टवानिति वक्ष्यमाणपुराणप्रसिद्धम् । असंदिग्धमिति सूत्रविशेषणात् तापसानां ऋषीणामपि स्वभावभेदाल्लोकानां संदेहं विना विशेषणानुपपत्तेः । करुणयेति तपसा चेत्यपि द्रष्टव्यम् । कृतवानिति वेदोपयुक्तं मीमांसाशास्त्रं कृतवान् । कृपैवेति एतत्प्रथमस्कन्धे चतुर्थेऽस्ति । 'व्यासः कृपणवत्सलः' इति । एतच

अथवा, अध्याहारकरणापेक्षयाथशब्द एवाधिकारे व्याख्येयः। वेदाध्ययनानन्तर्यं तु सिद्धमेव। न ह्यनधीत एव विचारमर्हति तत्रैतत् स्यात् स्वतन्त्रतेति। तत्र प्रतिविधास्यामः। वेदार्थब्रह्मणो वेदानुकूलविचार इति। किमत्र युक्तम्।

भाष्यप्रकाशः।

अतः परं पदानामर्थं वदिष्यन्तः पूर्वोक्तः पक्षो वक्ष्यमाणदोषग्रासान्न साधुरित्याशयेन पक्षान्तरमाहुः अथवेत्यादि। अधिकारो नाम नियमविशेषः इति केचित्। यथा, 'आकडारादेका संज्ञा' इति। प्रारम्भ इत्यन्ये। यथा, 'अथ योगानुशासनम्' इति। प्राधान्येन निरूपणमित्यपरे। प्रस्ताव इति कैयटे, 'अथ शब्दानुशासनम्' इत्यत्र व्याख्यातः तत्रेदृशनियमस्य पूर्वप्रकृतसापेक्षत्वात् पूर्वं च कस्याप्यप्रकृतत्वात् सोऽत्र न युज्यते, अतः प्रारम्भादेः प्रस्तावाव्यतिरेकात् प्रस्तावे व्याख्येयः। तथाच ब्रह्मजिज्ञासारूपं शास्त्रमधिक्रियते प्रस्तूयत इति व्याख्याने कल्पनाराहित्यादिदं तदपेक्षया ज्याय इत्यर्थः। नन्वधिकारार्थत्वे आदृते कर्तव्यपदाध्याहाराभावेन ब्रह्मजिज्ञासाया विध्यनाक्षिप्तत्वाद् वैदिकाधिकारिणोऽप्यप्राप्तेः शूद्रादिरनधीतवेदोऽपि ब्रह्मजिज्ञासायामधिकुर्यादिति कथं ज्याय इत्यत आहुः वेदेत्यादि। अग्रे वेदवाक्यानामेव विचारदर्शनादेतद्विचारकस्येदानीन्तनस्यापि वेदाध्ययनानन्तर्यं त्वर्थादेव सिद्धमिति न वैदिकाधिकारिणोऽप्राप्तिरित्यतो ज्याय इत्यर्थः। ननु तथापि विध्यनाक्षिप्ततया पुराणादिवत् स्वातन्त्र्यं तु सिद्धम्। तथा सति पूर्वोक्तो ज्ञानानुपयोगरूपो दोषस्तु स्यादित्याकाङ्क्षायां, तत्रैतत् स्यादित्यादिना तदनूद्य प्रतिविधानप्रकारमाहुः तत्रेत्यादि। अनुपदमेव वक्ष्याम इत्यर्थः। ननु प्रक्षालनपङ्कन्यायेनैतदपेक्षया तदादरणमेव युक्तमित्यत आहुः वेदार्थेत्यादि। वेदार्थभूतं यद्ब्रह्म

रश्मिः।

संगतिलक्षणोपपादनावसरे ईक्षत्यधिकरणे स्पष्टम्। **भाष्ये। न भवतीति** वेदवेदान्तसंदेहवारणाय ब्रह्ममीमांसा कर्तव्येति विध्याक्षिप्तत्वेन पृथगारम्भाभावात् न भवतीत्यर्थः। **अन्यथेति** आरम्भार्थकत्व इत्यर्थः। **स्वतन्त्रतेति** प्रकारभेदेन प्रतिपादकतया वेदाङ्गता स्यादित्यर्थः। तथा च वेदाङ्गत्वमस्वातन्त्र्यं वेदानङ्गत्वं स्वातन्त्र्यमिति हृदयम्। **प्रकृते। वक्ष्यमाणदोषग्रासादिति** अधिकाकाङ्क्षेत्यादिदोषचतुष्टयग्रासादित्यर्थः। आक्षेप्यबोधनायावतरणमाहुः **नन्वधीति। अधिकुर्यादिति** अधिकारं प्राप्नुयादित्यर्थः। अत्र वैदिकानां वेदाध्ययनानन्तर्यमिति संशक्तकानां मीमांसा सदितोच्यते तदग्रे अपाकरिष्यते। **वक्ष्याम** इति वयमित्यध्याहारः। 'अस्मदो द्वयोश्च' इति सूत्रेण एकत्वेपि बहुवचनम्। प्रतिविधानं वक्ष्यामः। **प्रक्षालनपङ्कन्यायेनेति** 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायेनेत्यर्थः। **एतदपक्षयेति** अधिकारेऽध्याहारादरणापेक्षया। **तदादरणमध्याहारादरणं युक्तमङ्गत्वे विधेः।** एव इति न्यायानुरोधादेवकारः। **इत्यत आहुरिति** इत्यतः शङ्कापूर्वाङ्गत्वादाहुरिति। ईश्वरमीमांसा सार्वविभक्तिकस्तसिः। इत्यतः शङ्का। ननु दोषतौल्ये कुतस्तदादरणमिति चेन्न। शङ्काग्रन्थत्वात्। **भाष्ये।** वेदार्थशब्दो न वेदार्थत्वेन ब्रह्मज्ञानाय विचार इत्याद्युक्तः प्रथमवैदिकपूर्वपक्षोक्तार्थवाचकः। गौणमुख्यन्यायविरोधात्। अतो वेदार्थो मुख्यपूर्वपक्षोक्तः। वेदपदस्य 'स्मृतेश्च' इति सूत्रे वेदान्तपरत्वोक्तेरत आहुः **वेदार्थभूत-**

भाष्यप्रकाशः ।

तत्संबन्धी सपरिकरतज्ज्ञापको वेदानुकूलो वेदवाक्यानां विरोधपरिहारादिना तेष्पचारादिदोष-निवर्तको विचारो मीमांसारूप इति हेतोः । अत्र हि सर्ववेदार्थत्वेन ब्रह्म जिज्ञास्यम्, अन्यथा वेदवेदान्तयोरैकशास्त्र्यं न स्यात् । तदभावे च जैमिन्याद्युक्तदिशा मुमुक्षुप्रवृत्तिप्रतिघाते शास्त्रवैय-र्थ्यमापद्येत । विचारस्य च यदि वेदानुकूल्यं न स्यात् तदाप्यास्तिका न प्रवर्तेरन् । अत आवश्य-कत्वात् स्वातन्त्र्येऽपि विरोधाभावादानुकूल्येन तज्जनितज्ञानस्य ब्रह्मज्ञानरूपत्वात् प्रतिविधानमेव युक्तमित्यर्थः । अयं प्रकारो माध्वानामपि संमतः तद्बोधकस्कान्दवचनोपन्यासादवगन्तव्यः । अध्याहारपक्षेऽप्येवं वक्तुं शक्यत्वात् । तज्ज्यायांसं मन्यमानोऽनुयुङ्क्ते **किमत्र युक्तमिति** । स्वतन्त्र-

रश्मिः ।

मिति । **सर्ववेदार्थत्वेने**ति च । मुख्यपूर्वपक्षोक्तं मुख्यपूर्वपक्ष्यर्थत्वेनेति चार्थः । **सपरिकरे**ति विशेषणं निःसंबोधमोक्षनिरासाय आत्मनो मोक्षत्वात् । विरोधनिराकरणादिरपि परिकरः । वेदान्त-रूपपदं व्याचख्युः **वेदवाक्याना**मिति । **आदिशब्देन** साधनं मुख्यत्वादिकं फलं च संबो-धत्वं चेति गृह्यते । तेन विरोधपरिहारोक्तोध्यायद्वयार्थः । **आदिशब्दो**क्तोध्यायद्वयार्थश्चेत्यध्याय-चतुष्टयार्थः । तेष्वित्यध्यायेषु चतुर्षु । **आदिशब्दे**नाकाङ्क्षायोग्यतासंनिधयः । **इति हेतो**रिति । न तदादरणमेव युक्तं, अध्याहृत्याध्याहारशेषनिवर्तनात् । दोषनिवर्तनं ततोपि अध्याहारदर्शना-त्सर्वत्र । **सर्ववे**देति । ननु वेदार्थत्वेनापि विद्यात्मत्वेन पूर्वस्य पुराणेपि सत्त्वात् द्वितीयस्यापि निरीश्वरमीमांसाविषयत्वात् । अत्र सूत्रे ब्रह्मपदेन वेदोक्तवेदार्थत्वेन ब्रह्म जिज्ञास्यम्, वेदार्थो ब्रह्म इति प्रतीतेः । यथा घटः पृथ्वीत्वेन घटप्रतीतेः । तथा च वेदार्थो ब्रह्म तस्य न तु पुराणाद्यर्थः पृथ्व्यर्थब्रह्मणो वेदानुकूलविचार इति भाष्यार्थः । ब्रह्मशब्देन वेदमात्राग्रहणे युक्तिमाहुः **अन्य-थेति** । **ऐकशास्त्र्य**मिति । तच्चाग्रे भाष्ये वक्ष्यते । श्रुत्योरप्युक्तम् । 'यदेव विद्यया करोति' इति । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति च । वृत्तिकृद्बौधायनोप्याह 'संहतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेन' । **जैमिन्याद्युक्तदिशे**ति । यथाहुः 'चोदनालक्षणोर्थो धर्मः' इति सूत्रे कार्यरूप एव वेदार्थः, न तु सिद्धरूपः इति, द्वितीयपादे च 'आम्नायस्य क्रियार्थत्वादानर्थ-क्यमतदर्थानां तस्मादनित्यमुच्यते' इत्यधिकरणेऽर्थवादानां क्रियार्थत्वाभावेन स्वार्थे तात्पर्यविधु-राणां स्तावकत्वमिति धर्मनिर्णयः । चतुर्लक्षण्या चोपासनात्मकधर्मनिर्णय इति । न च ब्रह्मज्ञाने उपयोग इति वाच्यम् । 'आत्मा वा अरे द्रष्टव्यः,' 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्' इति, श्रुतिस्मृतिभ्यां तस्य धर्मत्वात् । न च सृष्ट्यादिवाक्यार्थं निर्णेतुमपेक्षत इति वाच्यम् । 'ब्रह्मिष्ठो ब्रह्मा तं दर्शपूर्णमासयोर्वृणीते' इति कल्पसूत्रात्

'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन' ॥

इत्युक्तेर्विध्येकवाक्यतयार्थवादत्वात् । किंच नवमे तृतीयचतुर्थयोः 'फलदेवतयोश्च' 'देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्' इत्यधिकरणयोर्न देवता विग्रहवती, किंतु शब्दमात्रं देवता । अर्थस्तु प्रातिपदिकानुरोधाच्चेतनो वा कश्चित्स्वीक्रियते, न तु विग्रहादिमान् । उपासनादौ परं ध्यानमात्रमध्याहार्यमिति । अनया दिशेत्यर्थः । **आदिना** क्षणिकवादी ग्राह्यः । **युक्तमित्यर्थ** इति । वैधत्वस्य **'ज्ञेयश्च'**इति विधिना प्राप्तत्वादिति भावः । **तद्बोधके**त्यादि । स्कान्दे वचनानि त्विमानि ।

व्याख्यानमिति । व्याख्यानतो विशेषप्रतिपत्तेः । यथा कर्मणि 'दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामः' । 'अथातो दर्शपूर्णमासौ व्याख्यास्याम' इति ।

अथवैतर्हीमानि सिद्ध्यन्ति प्रयोजनानि । अधिकाकाङ्क्षा न भवेत् । अध्याहारश्च । पुरुषार्थश्च सिद्ध्येत् । उच्छेदश्च न भवेदिति । कथम् । अथशब्दोऽर्थचतुष्टये वर्तते, मङ्गले, अधिकारे, आनन्तर्ये, अर्थान्तरोपक्रमे च । तत्र श्रुतिमात्रेणैव

भाष्यप्रकाशः ।

ताप्रतिविधानस्यात्राप्यपेक्षितत्वेन प्रतिपत्तिगौरवदोषस्यात्रापि सत्त्वादध्याहारकरणाथशब्दव्याख्यानपक्षयोर्मध्ये किं युक्तं, तद्वक्तव्यमित्यर्थः । तत्रोत्तरमाहुः व्याख्यानमिति । अथशब्दव्याख्यानपक्ष एव युक्त इत्यर्थः । तत्र हेतुमाहुः व्याख्यानत इत्यादि । ननु कात्र विशेषप्रतिपत्तिरित्यत आहुः यथेत्यादि । तथाच यथा कल्पसूत्रेण प्रयोगप्रकारादिबोधनात् तत्तत्पदार्थसंदेहनिवृत्तिस्तथानया मीमांसया ब्रह्मणीति, तत्र यथाऽधिकारेऽथशब्दस्तथात्रापीति कल्पसूत्रतौल्यरूपविशेषस्य प्रतिपत्तिरित्यर्थः ।

नन्वध्याहारपक्षेऽपीदं सुवचमतः सर्वसंमतत्वादध्याहारपक्ष एव युक्तो नाऽथशब्दस्याधिकारव्याख्यानपक्ष इत्यत आहुः अथवेत्यादि । एतर्हीति व्याख्यानपक्षे । अत्र चोदयति कथमिति । स्वोक्तं विभजन्ते अथेत्यादि । तत्र मङ्गले,

'ओँकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिष्क्रान्तौ तेन माङ्गलिकावुभौ' ॥ इति ।

अधिकारे, यथा, 'अथैष ज्योतिः' इति वेदे । 'अथ योगानुशासनम्' इत्यादि च

रश्मिः ।

'नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किंचित्तदन्यथा जातं त्रेतायां द्वापरे खिलम् ॥
गौतमस्य ऋषेः शापात् ज्ञाने त्वज्ञानतां गते । संकीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः ॥
शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ॥
अवतीर्णो महायोगी सत्यवत्यां पराशरात् । उत्सन्नान् भगवान् वेदानुज्जहार हरिः स्वयम् ॥
चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः । शतधा चैकधा चैव तथैव च सहस्रधा ॥
कृष्णो द्वादशधा चैवं पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥
अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥
निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः । यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ॥
सविशेषणसूत्राणि ह्यपराणि विदो विदुः । मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः ॥
इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः । सूत्रेषु येषु सर्वेपि निर्णयाः समुदीरिताः ॥
शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः । एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः ॥
ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु । ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तमः' ॥ इति ।

अधिकारे अथैष ज्योतिरिति । एतच्च पूर्वतन्त्रे द्वितीयस्य द्वितीये पादे 'संज्ञा चोत्पत्तिसंयोगात्' इत्यधिकरणे चिन्तितम् । तत्र ज्योतिष्टोमं प्रकृत्येदं श्रूयते । अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति । तत्रैतच्छब्देन प्रकृतं ज्योतिष्टोमं परामृष्यत

मङ्गलसिद्धेरर्थान्तरस्य च पूर्वोक्तस्याभावान्नात्र तत्कल्पनम् । अथाऽवशिष्यते आनन्तर्ये वाऽधिकारे वेति । आनन्तर्ये त्वध्ययनस्य स्वतःसिद्धत्वादधिकाकाङ्क्षा भवति । तथा सति तदभावान्न विचारः सिद्ध्येत् ।

भाष्यप्रकाशः ।

लोके । आनन्तर्ये यथा, भुक्त्वा अथ व्रजतीति । अर्थान्तरोपक्रमे यथा, पूर्वं किंचिदुक्त्वा पुनर्विकल्पान्तरे क्रियमाण उच्यते, अथायमाशय इति । यद्यपि कोशे,

'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इति

'अथाथो संशये स्यातामधिकारे च मङ्गले ।
विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये' ॥

इत्यर्थान्तरमप्युक्तम् । गौडो भवान् अथेति ब्रूम इति प्रतिज्ञायामपि दृश्यते । तथापि प्रच्छकस्य संदेग्धुश्च कस्याप्यनुक्तत्वेन अथ शक्तोऽसि भोक्तुमित्यादिवत् प्रश्नसंशयव्यञ्जकवाक्याभावेन च प्रश्नसंशययोर्वक्तुमशक्यत्वात् स्वसंशयस्य स्वतोनिवृत्त्यभावेन, स्वसंशयस्य, 'अविज्ञातं विजानताम्' इति श्रुतेः कृत्स्नस्य ब्रह्मणो विचारयितुमशक्यत्वेन कार्त्स्न्यस्य च प्रकृतविरुद्धत्वाद् विकल्पस्य पक्षान्तरात्मकत्वेनारम्भस्योपक्रमात्मकत्वेन चार्थान्तरोपक्रमानतिरेकात् समुच्चयनियमरूपाधिकारयोरप्यर्थान्तरसापेक्षत्वेन विकल्पतुल्यकक्षत्वादुपयुक्तविचारकार्त्स्न्यप्रतिज्ञयोरपि प्रस्तावाव्यतिरेकादथशब्दोऽत्रार्थचतुष्टये संभावितो वर्तते । तत्रान्यार्थकृतस्य पटहमृदङ्गादिध्वनेरिवाथशब्दस्यापि श्रवणमात्रेण मङ्गलसिद्धेः स्मृतिव्याकोपपरिहारात् तस्याः स्वरूपश्रवण-

रश्मिः ।

इत्याशङ्कायां अथशब्देन प्रकृतव्यवच्छेदोत्पत्तिसंयोगात्संज्ञया कर्मान्तरमिदमिति । एष इति तु प्रतिज्ञायमानकर्मान्तरवाचक इति । सुषुप्त्युत्क्रान्त्योर्भेदेनेति सूत्रे विशिष्य वक्तव्योयम् 'त्रयाणामेव चैवमुपन्यासः प्रश्नश्च' इति सूत्रे मध्वाचार्याः । 'अविज्ञातप्रार्थनं वा प्रश्न इत्यभिधीयते' इति वाक्यात् अविज्ञातप्रार्थनं प्रश्नः । तुः प्रतिज्ञायमानकर्मान्तरवाचक इति । (तथा च एष याग इत्यर्थः ।) **अथेत्यस्य** अधिक्रियत इत्यर्थः । **लोक** इति छन्दोवत्सूत्राणि भवन्तीति, लोके इत्यसंगतमिति यद्यपि तथापि चतुर्थचरणे सांख्यस्यावैदिकत्वमुक्तं 'एतेन योगः प्रत्युक्तः' इति चोक्तमतो लोक इति संगतम् । **आदिशब्दार्थो** द्रष्टव्यः । **अथ व्रजती**ति भोजनानन्तरं व्रजतीत्यर्थः । **अथायमि**ति अर्थान्तरोपक्रमादयमाशय इत्यर्थः । तथा च एष याग इत्यर्थः । येषां यथायथमसंभवान्तर्भावाभ्यामवक्तव्यत्वमाहुः **तथापी**ति । **अथ शक्तोसी**ति । तृप्तं प्रति तृप्त्यनन्तरं भोक्तुं प्रवर्तमानं प्रति च वचनम् । **प्रश्नसंशये**ति परेच्छाप्रतिपत्तिफलकं वाक्यं प्रश्नः । स्वरसतो अथशब्दस्य प्रश्नसंशयार्थताभानात् तद्व्यञ्जकवाक्येत्युक्तम् । **स्वत** इति प्रतिज्ञातसंशयविषयग्रन्थात् । **स्वसंशयस्ये**ति वक्तुमशक्यत्वादिति पूर्वेणान्वयः । ननु कृत्स्नार्थको अथशब्दो विचारान्वयी न तु ब्रह्ममात्रान्वयीत्यत आहुः **उपयुक्ते**ति । तत्र **श्रुती**त्यादि भाष्यं विवृण्वन्ति स्म **तत्र अन्यार्थ**मिति । वृत्त्यान्यार्थम् । **अथशब्दस्ये**ति अधिकारार्थे कृतस्य । **स्मृती**ति शिष्टाचारप्राप्तस्मृतीत्यर्थः । **स्वरूपे**ति स्वरूपं मङ्गलश्रवणविषयः तदेव मङ्गलम् । मात्रचा प्रतिपाद्यत्वयोगव्यवच्छेदः क्रियते, न तु प्रतिपाद्यत्वेन यन्मङ्गलं तदाचरणेन तन्मात्रं कार्य-

भाष्यप्रकाशः।

मात्रकार्यत्वेन मङ्गलस्यार्थान्तरबोधनाप्रतिरोधकत्वाच्च न तन्मात्रकल्पनं युक्तम्। पूर्वं कस्याप्यर्थस्यानुक्तत्वादर्थान्तरोपक्रमस्यापि कल्पनं न युक्तम्। यत् पुनरानन्तर्यप्रस्तावरूपमर्थद्वयमवशिष्यते, तत्रानन्तर्ये यस्य कस्यचिदानन्तर्यं तु स्वभावादेव प्राप्तमिति, न तस्य वक्तव्यत्वम्। यदि च शाबरभाष्योक्तमध्ययनानन्तर्यमङ्गीक्रियते, नह्यनधीतवेदो विचारेऽधिकरोतीति। तदा तस्य विचारार्थकजिज्ञासापदेनैवार्थात् सिद्धेरथशब्दोक्तानन्तर्यप्रतियोगिनोऽधिकाकाङ्क्षा भवति, अध्ययनातिरिक्तात् कस्मादनन्तरं ब्रह्म विचारयितव्यमिति। तस्यां च सत्यामध्ययनातिरिक्तस्य कस्यापि तन्मतेऽदर्शनान्न प्रकृतविचारसिद्धिरित्यर्थः। ननु 'संहतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेन' इति वदद्भिः प्राचीनवृत्तिकारैर्द्वयोर्मीमांसयोरैकशास्त्र्यमङ्गीकृतम्। ततश्चाग्नेयादिषट्कभेदवदध्यायभेदवच्चावान्तरप्रमेयभेदेन भेदेऽपि प्रयोजनैक्याद्, 'अथाऽतो धर्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिः शब्दात्' इत्यन्तमेकं शास्त्रमतः कर्मविचारानन्तर्यमस्येति रामानुजाचार्याः।

आराधनाराध्यभूतयोर्धर्मब्रह्मणोः प्रतिपादकत्वेनैकशास्त्र्यं। 'अथाऽतो ब्रह्मजिज्ञासा' इति पृथगारम्भस्त्वथातः शेषलक्षणमित्यादिवदवान्तरपरिच्छेदार्थ इति तदेकदेशी नव्यः शैवः।

पूर्वं धर्मजिज्ञासा कार्या, पुरुषमात्रविषयत्वात्, ब्रह्मज्ञानं तु कस्यचिदेव मुमुक्षोरिति धर्मविचारानन्तरं चतुर्णां प्रतिपन्नाश्रमान्तराणां सा। 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति सूत्रयतः सूत्रकारस्यापि ज्ञानकर्मसमुच्चयादेव मोक्षप्राप्तिरभिप्रेतेति ज्ञायते, अपरिज्ञाते, च कर्मणि केन समुच्चयः, केन नेति न ज्ञातुं शक्यम्, ज्ञाते तु तस्मिन् नित्यकाम्यनिषिद्धानां हेयोपादेयविभागविज्ञानात् काम्यनिषिद्धे हेये, नित्येन समुच्चय इति सुखेन ज्ञातुं शक्यते। किंच। तृतीये, कर्मसमृद्ध्यर्थानामुद्गीथाद्युपासनानां चिन्तनात् तेषां च कर्माधिकृतपुरुषमात्रविषयत्वात् कर्माविज्ञानेन तच्चिन्ताया अप्यनुपपत्तिरतोऽपि तदानन्तर्यमिति भट्टभास्कराचार्याः।

रश्मिः।

मवश्यं कार्यं यस्याः तत्त्वेन इत्यर्थः। **अर्थान्तरे**ति। मङ्गलस्य विचारकर्तव्यतारूपे वाक्यार्थे कर्तृत्वादिनान्वयाभावादिति शंकरभाष्योक्तहेतुसंग्राहकश्चकारः। एवं मङ्गलविधिरधिकारपक्षेपीति ज्ञेयम्। मङ्गलस्य शक्यार्थत्वे वाक्यभेदश्च स्यात्। **अर्थात्सिद्धे**रिति आक्षेपात्सिद्धेरित्यर्थः। **अथशब्दोक्ते**ति अथशब्दोक्तानन्तर्यनिरूपकस्येत्यर्थः। आकाङ्क्षास्वरूपमाहुः **अध्ययनातिरिक्ता**दिति। **तथा सती**ति भाष्यं विवृण्वन्ति स्म **तस्यां** चेति। **कस्यापी**ति आनन्तर्यनिरूपकस्येत्यर्थः। **षोडशलक्षणे**नेति द्वादशलक्षणान्यध्यायाः कर्मकाण्डे, चत्वारोध्यायाः उपासनाकाण्ड इत्येवं षोडशलक्षणेनेत्यर्थः। **प्राचीनवृत्तिकारै**रिति। बोधायनप्रभृतिभिरित्यर्थः। **प्रमेये**ति प्रमाणभेदशेषत्वप्रयुक्तिक्रमाधिकारसामान्यातिदेशविशेषातिदेशोहबाधतन्त्रप्रसङ्गरूपप्रमेयं पूर्वतन्त्रे। उत्तरतन्त्रे तु समन्वयविरोधनिराकरणसाधनफलरूपमिति ज्ञेयम्। **प्रयोजने**ति आराधनाराध्यभूतयोर्धर्मब्रह्मणोः प्रतिपादनरूपप्रयोजनैक्यात्। **ऐकशास्त्र्य**मिति तच्च पूर्वोक्तैकशास्त्रनिष्ठम्। **अथातः शेषलक्षण**मिति इदं च पूर्वतन्त्रे तृतीयाध्यायस्यारम्भसूत्रम्। **अवान्तरपरिच्छेदार्थ** इति अवान्तरविचारविशेषार्थ इत्यर्थः। **कर्मसमृद्धि**रिति। तमेतमिति वचनेन ब्राह्मणा विविदिषन्तीति श्रुतिरत्रानुसंधेया। **तदानन्तर्यम्** धर्मविचारानन्तर्यम्। 'यस्त-

तथा हि, न तावद्धर्मविचारानन्तर्यम् । विपर्ययसंभवात् ।

भाष्यप्रकाशः ।

किंच, 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति श्रुतौ तर्कोपकरणेन शब्देन परमात्मानं सम्यग् ज्ञात्वा प्रज्ञाख्यभावनाविधानात्, पतञ्जलिनाऽपि, 'स तु दीर्घकालादरनैरन्तर्यसत्काराऽऽसेवितो दृढभूमिः' इति सूत्रयता दीर्घकालासेवितस्याव्यवधानासेवितस्य ब्रह्मचर्यतपःश्रद्धायज्ञादिरूपसत्कारासेवितस्य योगस्य दृढभूमित्वकथनाच्च क्रियमाणाया भावनाख्योपासनाया दृढत्वाय यज्ञोपयोगः कैश्चिदिष्यते ।

तत्तत्फलार्थं विहितानामपि कर्मणां, 'तमेतं वेदानुवचनेन' इत्यादिश्रुत्या, 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इतिन्यायेन क्रत्वर्थखादिरत्वस्य वीर्यार्थत्ववद्ब्रह्मभावनार्थत्वं कैश्चिदिष्यते ।

तथापरैः श्रेयःपरिपन्थिकल्मषनिबर्हणद्वारा यज्ञोपयोग इष्यते ।

अन्यैः पुनः 'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः,' 'यस्यैतेऽष्टाचत्वारिंशत् संस्कारा' इति स्मृत्या यज्ञादिसंस्कृतस्य पुरुषस्य दीर्घकालादरनैरन्तर्यैर्ब्रह्मभावनामासेवमानस्य समूलकाषमविद्यावासनानिवृत्त्या प्रत्यगात्मवैशद्यात् पुरुषसंस्कारद्वारा यज्ञोपयोग इष्यते ।

तथेतरैः 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेद्' इति स्मृत्या ऋणत्रयापाकरणेन कर्मणां ब्रह्मज्ञानोपयोग इष्यते इति नाना मतानि वाचस्पत्ये लिखितानि । अतः कर्मज्ञानसमुच्चयस्य बहुवादिसंमतत्वात् पूर्वोक्तरीत्या धर्मविचारेणाधिकाकाङ्क्षापूरणसंभवात् तदनन्तरं सुखेन ब्रह्मविचारसिद्धिरित्याकाङ्क्षायामाहुः **तथाहि, नेत्यादि** । तदुक्तरीत्या समुच्चयाङ्गीकारेऽपि धर्मविचारानन्तर्यं नोपपद्यते कुतः **विपर्ययसंभवात्** । 'हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षसः' इतिवद् वेदवेदान्ताध्ययनक्रमनियामकप्रमाणाभावात् । नच कर्त्रैक्यात् क्रमनियमः शङ्क्यः ।

रश्मिः ।

र्केणानुसंधत्ते' इति 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति च श्रुतिद्वयमनुकूलयन्ति **तर्कोपकरणेन शब्देनेति** । इत्यादिश्रुत्येत्यादि तेन उपसर्पति इति शेषः । ब्रह्मपावनमिति वचनेत्यादिश्रुत्या । 'एकस्य तूभयत्वे' इति पूर्वतन्त्रेयं न्यायश्चतुर्थस्य तृतीयपादे चिन्तितः । एकस्योभयशेषतानिमित्तं पृथक् संयोग इति न्यायार्थः । स यथा खादिरेऽग्नीषोमीयपशुबन्धोक्त्यनन्तरं खादिरं वीर्यकामस्य यूपं कुर्वीतेति पृथक् श्रुतिसंयोगाद्वीर्यार्थत्वे तद्वदित्यर्थः । **समूलकाष**मित्यादि । वासना लक्षणं तु—

दृढभावनया त्यक्तं पूर्वापरविचारणम् ।
यदादानपदार्थस्य वासनेति प्रकीर्तिता ॥

प्रत्यगात्मा जीवः । **ऋणत्रये**ति देवपितृमनुष्याणामृणत्रयेत्यर्थः । **हृदयस्ये**त्यादि इदं पूर्वतन्त्रे चतुर्थस्य प्रथमे पादे चिन्तितम् । अग्नीषोमीयं पशुमालभेतेति प्रकृत्य श्रुतम् । **इतिवदिति** इत्यत्र संख्यारूपस्थानं क्रमनियामकं यथा तद्वत् । **नच कर्त्रैक्यादिति** । अत्र वयं 'अथातो धर्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिः शब्दात्' इत्यन्तमनेककर्तृकमपि परंतु वेदनिश्वसितुः कृष्णावतारत्वेन वेदान्तानामपि निश्वसितकर्तृकत्वमित्येककर्तृकं शास्त्रमिति मन्महे । **क्रमनियम** इति क्रमेण स्थानेन नियम इत्यर्थः । स्थानं क्रमपर्यायकम् । तदुक्तम्

'क्रमो हि द्विविधैर्वेष्टो देशसामान्यलक्षणः ।
पाठानुकारसादेश्याद्विनियोगस्य कारणम्' इति ॥

भाष्यप्रकाशः ।

आघारदर्शपूर्णमासवत् कर्मब्रह्मविचारयोरेकाङ्गिप्रयुक्ताङ्गत्वेन वा, पञ्चप्रयाजवदेकाङ्गिप्रयुक्तानेकाङ्गत्वेन वा, गोदोहनादिवदधिकृताधिकारत्वेन वा, षड्यागवत् फलैक्येन वा कर्त्रैक्यं येन

रश्मिः ।

स्थाने पठनीयक्रमपाठः । स्थानं च यथासंख्यपाठः संनिधिपाठः अनुष्ठानसादेश्यं च । प्रकृते तु यथासंख्यपाठरूपं स्थानम् । तथा च प्रथमस्य धर्मविचारस्य प्रथमप्राप्तिः । द्वितीयस्य ब्रह्मविचारस्य पश्चादित्येवं विनियोगः । न च अथशब्दः शास्त्रं विभजन्पूर्वोक्तं कर्त्रैक्यं विघटयिष्यतीति वाच्यम् । अथातः शेषलक्षणमिति तृतीयाध्यायसूत्रवत् अथशब्दस्य अविभाजकत्वात् । संनिधिपाठरूपं स्थानं च वैकृतान्यङ्गानि यत्र प्राकृताङ्गाननुवादेन विहितानि तेषां विकृतौ विनियोजकम् । तेषां कैमर्थ्याकाङ्क्षायाः मूलसिद्धविकृत्यविकृतिप्रीतादेवतासंबन्धेन पूर्वसंबन्धेनैवोपशमात् । अनुष्ठानसादेश्यरूपं स्थानं तु पशुधर्माणामग्नीषोमीयार्थत्वं प्रयोजयति । औपवस्थ्येहनि अग्नीषोमीयः पशुरनुष्ठीयते तस्मिन्नेव दिने ते धर्माः पठ्यन्ते, अतस्तेषां कैमर्थ्याकाङ्क्षायामनुष्ठानसदेशत्वेन उपस्थितं पशुः पशुप्रीतदेवता च पशुदेवताप्रीतिरेव वा अपूर्वमेव भाव्यत्वेन संबध्यते इति । **तत्रापि तथे**ति भाष्यं विवृण्वन्तः कर्त्रैक्ये प्रमाणाभावमाहुः **आघारे**त्यादि । षष्ठ्यन्ताद्वतिः । 'आघारमाघारयति । ऊर्ध्वमाघारयति । ऋजुमाघारयति' । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'इति श्रुतयोरेवाङ्गीप्रयुक्ताङ्गत्ववदित्यर्थः । आघारइदमग्निहोत्राधिकरणे द्वितीयस्य द्वितीयपादे चिन्तितम् । दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति तु सोमद्रव्यस्य दर्शाङ्गतामब्रुवन्दर्शादिकालः सोमे विधीयत इति चतुर्थस्य तृतीये पादे 'उत्पत्तिकालविशये कालः स्याद्वाक्यस्य तत्प्रधानत्वात्'इत्यधिकरणे चिन्तितम् । **पञ्चप्रयाजव**दिति । द्वितीयस्य द्वितीयपादे दर्शपूर्णमासयोः श्रूयन्ते 'समिधो यजति,' 'तनूनपातं यजति,' 'इडो यजति,' 'बर्हिर्यजति,' 'स्वाहाकारं यजति,' इति पञ्चप्रयाजाः तेषां यजत्यभ्यासाद्भेद इति चिन्तितम्, तद्वदित्यर्थः । **गोदोहनादिव**दिति । चमसेनापः प्रणयेदिति दर्शपूर्णमासाङ्गमपां प्रणयनमाश्रित्य गोदोहनेन पशुकामस्येति विहितस्यापां प्रणयनेधिकृताधिकारकस्य गोदोहनस्येवेत्यर्थः । तदिदं चतुर्थे 'यस्मिन्प्रीतिः पुरुषस्य लिप्सार्थलक्षणाविभक्तत्वात्'इत्यधिकरणे चिन्तितमन्यैः । **षड्यागव**दिति । त एवं द्वितीयस्य द्वितीयपादे, 'प्रकरणं तु पौर्णमास्यां रूपावचनात्'इत्यधिकरणे चिन्तिता आग्नेयादयः षड्यागाः । 'य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते' इत्याम्नातम् । तत्र यदाग्नेयोष्टाकपालोमावास्यायां च पौर्णमास्यां चाच्युतो भवतीति । तावब्रूतामग्नीषोमावाज्यस्य एवं तावुपांशू पौर्णमास्यां यजन्निति । ताभ्यामेकमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छदिति । ऐन्द्रं दध्यमावास्यायामिति । ऐन्द्रं पयोमावास्यायामिति प्रकृताः षडनूद्यन्ते । तत्राप्याग्नेयोपांशुयाजाग्नीषोमीयाणां पौर्णमासीकालविहितानां सह प्रयोगः । एवमितरत्रापि। एतौ समुदायौ पौर्णमास्यमावास्यापदाभ्यामुपलक्ष्येते इति नानुवादकतानुपपत्तिः । तेषां सर्वेषां दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्येन फलसंबन्धः । तदिदं वाक्यं चैकादशे 'प्रयोजनाभिसंबन्धात्पृथक्सत्तां ततः स्यादेककर्म्यमेकशब्दाभिसंयोगात्'इत्यधिकरणे । अत्र श्रुतं फलं सत्तां यागानां पृथगुत्पन्नतया पृथगेव फलाभिसंबन्धात्प्रत्येकं संबध्यत इति पूर्वपक्षं संगृह्य दर्शपूर्णमासरूपैकशब्दाभिसंयोगा-

भाष्यप्रकाशः ।

बोध्येत तादृशप्रमाणस्याप्यनुपलम्भात् । न च, विद्यां चाविद्यां च यस्तद् वेदोभयं सह,' 'सत्येन लभ्यस्तपसा ह्येष आत्मा' इत्यादिश्रुतिरेव क्रमे प्रमाणमिति वाच्यम् । समुच्चयमात्रबोधनेन चारितार्थ्यात् । किंच । धर्मो न यथाकथंचिज्ज्ञातो विद्यया समुच्चेयोऽपि तु निर्णीतस्वरूपः । निर्णयस्तु यथा कर्मस्वरूपविषयकः पूर्वतन्त्रात्, तथा कर्मशेषभूतपुरुषस्वरूपविषयकस्तदाराध्यभूतब्रह्मस्वरूपविषयकश्चोत्तरतन्त्रात् । अतोऽभ्यर्हितत्वात् पूर्वं वेदान्तविचारेण तदवगन्तव्यम् । नानावादैरात्मस्वरूपे ब्रह्मस्वरूपे च विप्रतिपन्ने वैदिकानां वेदवाक्यैरेव तन्निरासस्यावश्यकत्वात् । ज्ञाते तयोः स्वरूपे कर्मणि सुखेन प्रवृत्तिसंभवादिति । नचाध्ययनादिविधेः कर्मावबोधनसमर्थेषु पुरुषेषु चरितार्थत्वेन, शान्तो दान्त इत्यादिश्रुत्युक्तसाधनान्तरसापेक्षब्रह्मज्ञानोपायभूतशमाद्याक्षेपासामर्थ्यात् पूर्वं धर्मविचारस्यैव प्राप्तिरिति वाच्यम् । शान्तो दान्त इति श्रुतौ पश्येदितिपदाच्छमादीनां दर्शनसाधनत्वेन विचारे तदपेक्षाभावात् । प्रह्लादकव्यादिवदाबाल्यान्मुमुक्षाशमादिमत्सु तदप्रवृत्तौ तेषां विचारमात्राप्रसक्तेर्यथाकथंचित् प्रवृत्तौ वाऽभ्यर्हितस्यैव प्राप्त्या नियमभङ्गाच्च तदेतदुक्तम् ।

रश्मिः ।

दैककर्म्यं समुदितस्यैव फलमिति चिन्तितं तद्वदित्यर्थः । अत्र क्रियत इति व्युत्पत्त्या कर्मफलं ऐककर्म्यमेकफलत्वम्, क्वचित्तु सूत्रे पृथक्त्वं ततः स्यादिति पठ्यते । सत्तामिति न पठ्यते । **नचेत्यादि** । **अविद्यां** कर्मरूपमित्यर्थः । ज्ञानमेवेच्छां प्रयुञ्जानो यत्नं संपादयतीत्यालोच्याहुः **किंचेति** । **कर्मशेषेत्यादि** । एतच्च तृतीये 'द्रव्यगुणसंस्कारेषु बादरिः' इत्यधिकरणे चिन्तितम् । **पूर्वमिति** 'अभ्यर्हितं च'इति सूत्रेणेत्यर्थः । ननु मीमांसायाः न किमपि प्रयोजनं पश्यामः, आदिज्ञानस्यान्यत एव संभवादित्यत आहुः **नानावादैरिति** । **विप्रतिपन्न** इति विविधप्रकारैर्ज्ञात इत्यर्थः । **वेदवाक्यैरिति** वेदवेदान्तवाक्यैः विचारविषयैः मीमांसासूत्रविषयवाक्यैरित्यर्थः । **तन्निरासस्येति** विप्रतिपत्तिगतसंशयनिरासस्यापि । **प्रवृत्तीति**, इच्छाद्वारा प्रवृत्तिसंभवात्, जानाति इच्छति यतत इति नैयायिकप्रवादात् । दृष्टानुवादिनीं 'शान्तो दान्तउपरतस्तितिक्षुश्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्येत्' इति श्रुतिमनुरुध्य विपर्ययाभावशङ्का तामपाकुर्वते **न चाध्ययनेत्यादि** । **पूर्वं धर्मविचारस्यैवेति** । वैधत्वादिति भावः, अन्यथा श्रुतिविरोध इति भावः । विचारितधर्मेण विशेषचित्तशुद्धिः शमदमादिकारणम् । **तदपेक्षाभावादिति** शमाद्युपेतत्वेपि दर्शनानपेक्षत्वादित्यर्थः । तेन शमदमाद्युपेतसूत्र(श्रुत्यविरोधात्)विरोधः । तथा च श्रुतिविरोधाद्वेदविचारविधिस्तदन्तेपि प्रवर्तते, न तु विध्यन्तरमादरणीयं संभवेपीत्याशयः । **तदप्रवृत्ताविति** । शान्त्यादिकमुत्पाद्य आत्मानं पश्येदिति श्रुतिस्फूर्तेः शान्त्याद्युत्पादनाय विध्यप्रवृत्ताविस्यर्थः । सत्तामात्रभवत्यर्थादेव पूर्वोक्तनिरस्तिं मन्यमाना आहुः **यथाकथंचिदिति** । भक्तिमार्गीयाणां स्वत एव शमादिसत्त्वेन वैधशमादिसत्तामात्रं भवत्यर्थाद्भक्तिमार्गीयाणां शमादिविधिप्रवृत्तौ । **नियमभङ्गाच्चेति** । धर्मब्रह्ममीमांसयोः पूर्वापरीभावनियमभङ्गाच्चेत्यर्थः । **तदेतदुक्तमिति** । **तथा हि न तावद्धर्मविचारानन्तर्यम्, विपर्ययसंभवादिति** भाष्येणेत्यर्थः । **तत्रापि तथा**

नच पाठतो नियमः । तत्रापि तथा । नचाऽऽचाराद् व्यवस्था । तत्राप्यनियमसंभवात् । प्रत्यवायाश्रवणात् । संभवेपि न वक्तव्यत्वमध्ययनवत् । तथाच ततोऽप्याकाङ्क्षा भवेत् । नच वैराग्यशमदमादिः पूर्वसिद्धः ।

भाष्यप्रकाशः ।

ननु पूर्वं धर्मकाण्डं पठ्यते, अनन्तरं ज्ञानकाण्डमिति पाठस्य क्रमनियामकत्वमस्त्विति चेत् तत्राहुः **नचेत्यादि** । पाठक्रमे विद्यमानेऽपि पूर्वकाण्डं न सर्वैरादित आरभ्य पठ्यते । अपि तु यतःकुतश्चित् । अतोऽवान्तरकाण्डक्रमानियमवज्ज्ञानकाण्डक्रमानियमस्यापि शक्यवचनत्वात् तत्रापि तथेत्यर्थः । ननु पाठः शिष्टाचारादनियतोऽस्तु, न तु विचारोऽपीत्यत आहुः **नचाचारेत्यादि** । प्रत्यवायाश्रवणस्योभयत्र तौल्यात् तथेत्यर्थः । ननु धर्मस्य ब्रह्मबोधहेतुत्वात् तद्विचारोपयुक्तानां श्रुतिलिङ्गादीनां वेदचोदनार्थवादस्मृत्यादिप्रामाण्यप्रतिपादनानां ब्रह्मविचारोपयुक्तत्वाच्च धर्मविचारानन्तर्यं ब्रह्मविचारस्य नियमेन संभवतीति चेत् तत्राहुः **संभवेपीत्यादि** । स्फुटार्थमेतत् ।

ननु तर्हि, नित्यानित्यवस्तुविवेकः, ऐहिकामुष्मिकभोगविरागः, शमदमादिसाधनसंपन्मुमुक्षुत्वं चेति शंकराचार्योदितं साधनचतुष्टयानन्तर्यमाद्रियतामित्याशङ्कायां, भास्कराचार्यैर्यद्यपि शमदमादयोऽन्तःकरणधर्माः पूर्वं न प्रकृताः स्वशब्देन चानिर्दिष्टा इति सूत्रकारस्य न विवक्षिता इत्येव दूषणं दत्तम् । रामानुजाचार्यैश्चैषां पूर्वमीमांसोक्तकर्मफलकरणेतिकर्तव्यताधिकारिविशेषानिश्चयानन्तरभावितदनित्यत्वज्ञानाऽऽत्मनित्यत्वज्ञानाधीनतया शास्त्रद्वयविचारोत्तरभावित्वं दूषणमुक्तम् । तथापि तन्न तथा स्फुटमिति प्रकारान्तरेण दूषणमाहुः **नचेत्यादि** । तदानन्तर्यं तदा

रश्मिः ।

इत्यादि भाष्यं विवृण्वन्ति स्म **ननु पूर्वमिति** । **तत्रापि तथेत्यर्थ** इति पाठतो नियमेपि विपर्ययसंभवादित्यर्थः । तेन तत्रापि तथेति भाष्यमपि विवृतम् । **उभयत्रेति** पाठे विचारे चेत्यर्थः । **ब्रह्मविचारेति** । यथानिरपेक्षो रवः श्रुतिः साच 'अथातो ब्रह्मजिज्ञासा' इत्यत्र विग्रहदशायां ब्रह्मण इति शेषषष्ठीश्रुत्या ब्रह्मसंबन्धिनां जिज्ञासार्थत्वमिति विनियोगः । 'आकाशस्तल्लिङ्गात्' इत्यत्र लिङ्गं, 'वाक्यान्वयात्'इत्यत्र वाक्यं, 'प्रकरणाच्च' इत्यत्र प्रकरणं, देशकालौ प्रकरणमिति निबन्धकारिकाविरोधेन, स्थानं द्रष्टव्यं, 'स्वपीति इत्याचक्षते स्वमपीतो भवति'इति अत्र अतिदेशसामान्यरूपात्स्थानात् स्वमित्यस्य स्वमपीतोऽर्थः, न तु स्वापनिमित्तकारणरूपकर्तेत्यर्थः । समाख्या यौगिकश्च शब्दः सापि 'अथातो ब्रह्मजिज्ञासा' इत्यत्र बृहत्त्वात् बृंहणत्वाच्च ब्रह्मेति योगात् यौगिकः शब्दः । स्ववाक्यस्वरूपलक्षणोक्तपदार्थानां ब्रह्मणश्च संनिधिं कल्पयति संनिहितयोः परस्पराकाङ्क्षयोरेकवाक्यत्वं प्रकल्प्य सामर्थ्यं चालोच्य ब्रह्मणा सत्यादिपदानां सामानाधिकरण्यं कुर्यादिति श्रुतिकल्पनेन ब्रह्मयौगिकार्थस्य तत्पदार्थैक्यं बोधयति । **स्फुटेति** अनन्यलभ्यस्य शब्दार्थत्वात् । अत्र अथशब्दार्थत्वेन वक्तव्यधर्मस्याक्षेपलभ्यत्वादित्येवं स्फुटार्थम् । **भाष्ये । तथा च ततोपीत्यादि** आक्षेपलभ्यत्वे च तं श्रुतिलिङ्गादिकमानन्तर्यनिरूपकमुपलभ्याप्यधिकाकाङ्क्षा भवेदित्यर्थः । **प्रकृते । स्वशब्देन चेति** शमादिवाचकशब्देन चेत्यर्थः । **पूर्वमीमांसेत्यादि** पूर्वमीमांसोक्ताः कर्म च फलं च करणं चेतिकर्तव्यता चाधिकारिविशेषश्चैतेषां निश्चयानन्तरभाविनी यद्

तेषामेवाभावात्। न च यदैव संभवस्तदैव तत् कर्तव्यमिति वाच्यम्। तदसंभवापत्तेः। तथाहि। ब्रह्मणः परमपुरुषार्थत्वे ज्ञाते तज्ज्ञानस्यैव साधनत्वेऽवगते तच्छेषत्वे च यागादीनामवगते तदर्थकर्मकरणे चित्तशुद्धौ सत्यां वैराग्यादि। इदं च वेदान्तविचारव्यतिरेकेण न भवतीत्यन्योन्याश्रयः।

भाष्यप्रकाशः।

युज्येत 'यदि तत्सत्ता पूर्वं स्यात्। सा त्वतिदुर्लभा। न हि नित्यानित्यवस्तुविवेकमन्तरेणेहामुत्रार्थभोगात् पुरुषो विरज्यते। न वा सांख्यदर्शनात्यन्ताभ्यासतदुदितसाधनाद्यन्तरेण तादृशविवेक उदेत्युदिते वा सर्वः शाम्यति दाम्यति वा। दुर्वासःप्रभृतिष्वपि तदभावस्य स्मरणात्। कथंचित् किंचित् कस्यचित् कदाचित् संभवेऽपि न सर्वसाधनानि तथा। तदेतदुक्तं, **तेषामेवाभावादि**ति। तथाच समुदितसाधनचतुष्टयसंपदत्यन्तदुर्लभेति तदानन्तर्यमत्र न शक्यवचनमित्यर्थः। सांख्याद्यभ्यासाभावेऽपि लौकिकदुःखादिना विरज्यमाना दृश्यन्ते। किंचित्कामनयापि शाम्यन्ति दाम्यन्ति चेत्युक्तविवेकरहितवैराग्याद्यानन्तर्यमप्यत्र न युक्तम्। तदपायस्य भूयोदर्शनादित्याशयेन वैराग्यादीनामेव ग्रहणम्। ननु केषांचित् पूर्वं वैराग्याद्यभावेऽपि पश्चात् तानि दृश्यन्त इति तदानन्तर्यादरणे को दोष इत्यत आहुः **न च यदैवे**त्यादि। **तदसंभवापत्ते**रिति वैराग्यादेर्विचारस्य चासंभवापत्तेरित्यर्थः। कथमिदमित्याकाङ्क्षायामेतदेव विभजन्ते **तथाही**त्यादि। दर्शनान्तराभिमानिनां ज्ञानकर्मसमुच्चयवादात् तत्तदुक्तज्ञानानां च भिन्नविधत्वात् तत्तदभिमतरीत्या साधनीभूतयागाद्यनुष्ठाने विवक्षितविचारोपयोगिचिशुद्ध्यभावात्

रश्मिः।

आत्मातिरिक्तानित्यत्वज्ञानात्मनित्यत्वज्ञाने तदधीनतयेत्यर्थः। **कथंचि**दिति ज्योतिषपञ्चाङ्गादिप्रकारेण। **कस्यचि**दिति। नित्यानित्यवस्तुविवेकादौ यस्यकस्यचित्। **कदाचि**दिति अस्मदादिर्दृष्टान्तः। **तथे**ति सर्वत्वेन प्रकारेण संभवन्तीत्यर्थः। नन्वाशङ्काभाष्ये न च नित्यानित्यवस्तुविवेकवैराग्यशमदमादिरिति वक्तुं युक्तम्, प्रथमत्यागे मानाभावादित्याकाङ्क्षायामभूतपूर्वोक्तविवेकवैराग्यादिरपि नानन्तर्यनिरूपक इति बोधयितुं तथोपन्यास इत्याहुः **सांख्याद्यभ्यासे**त्यादि। **कामनये**ति शमजन्यफलकामनया, दमजन्यफलकामनया च। **भूयो दर्शना**दिति। अस्मदादिर्दृष्टान्तः। **तानी**ति वैराग्यादीनीत्यर्थः। **असंभवे**ति अन्योन्याश्रयस्य द्विनिष्ठत्वात् द्वयस्यासंभव उक्तविकल्पेन। **इद**मिति पूर्वोक्तम्। **एत**दिति समीपतरवर्तिभाष्यम्। **विभजन्ते** व्याकुर्वते। धर्मविचारस्य ब्रह्मशब्दसूचितस्य भाष्ये विचारात् समुच्चये स्फुरिते तेन सहैवाहुः **दर्शने**ति। **भिन्नविधत्वा**दिति। स्मृत्यात्मकं ज्ञानं भक्तिरूपं साधनमिति रामानुजाचार्यमतम्। मध्वमते ज्ञानं भक्त्यात्मकम्। नैयायिकैस्तु 'द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतुः तच्चेश्वरनोदनाभिव्यक्ताद्धर्मादेवेत्युच्यत' इति भिन्नविधत्वादित्यर्थः। **साधनीभूते**त्यादि। अयमर्थः। चित्तशुद्धिकारणता यागादेर्न सामान्यरूपेण, तथा सति विलक्षणचित्तशुद्ध्यनुत्पत्तिप्रसङ्गोपि तु तृणारणिमणिन्यायेन तत्तच्चित्तशुद्धिजनकत्वरूपेणेति तत्तन्मतीयविचारोपयोगिचित्तशुद्ध्युदयात् सिद्धान्तविचारोपयोगिचित्तशुद्ध्यभावादिति। एवमेव विचारचित्तशुद्ध्योरपि कार्यकारणभावः। **विवक्षिते**ति। 'यदेकमव्यक्तमनन्त-

निर्धारिते तु वेदान्ते विचारो व्यर्थ एव । नच साक्षात्कारस्तत्फलम् । तस्य शब्दशेषत्वेन तत्कल्पनायां प्रमाणाभावात् । 'दशमस्त्वमसि' इत्यादौ प्रत्यक्ष-

भाष्यप्रकाशः ।

ब्रह्मणः परमपुरुषार्थत्वज्ञानार्थं, ज्ञानस्य केवलस्यैव साधनत्वज्ञानं चावश्यकमिति तदर्थं चैकदेशिना वेदान्तविचारः पूर्वं मृग्यः । तथा सत्युक्तरीत्या तत्करणमिति चक्रकान्योन्याश्रय इति तदसंभवापत्तिरित्यर्थः । नन्वध्ययनदशायां गुरुमुखात् साधनान्तराद्वा वेदान्तार्थे निर्धारिते सुखेन तत्संभवान्नान्योन्याश्रय इति शङ्कायां दूषणान्तरमाहुः **निर्धारित** इत्यादि । विचारो ह्यर्थनिर्धारार्थः अर्थनिर्धारश्च वैराग्यादिप्रयोजकतया यदि पूर्वमभ्युपेतस्तदा फले जाते निःप्रयोजनत्वान्निःसंदिग्धविषयत्वाच्च स व्यर्थ इत्यर्थः । एवकारेण तदर्थकप्रवृत्तिविघातोपि संगृह्यते । नन्वर्थे निर्धारितेऽपि न विचारवैफल्यं, तस्यात्मसाक्षात्कारार्थत्वादित्यत आहुः **न चे**त्यादि । विचारस्यार्थज्ञानजनकतया शब्दाङ्गत्वेन तदुपकारकत्वस्यैव प्रत्यक्षसिद्धत्वेन तस्यात्मसाक्षात्कारफलकत्वकल्पनायां प्रमाणाभावादित्यर्थः । ननु दशमस्त्वमसीत्यादेः शब्दादपि दशमोऽहमित्याकारकात्मसाक्षात्काररूपं फलं विचारद्वारा दृश्यत इति तथा कल्पनायां दृष्टमेव प्रमाणमस्तीति कथं प्रमाणाभाव इत्याकाङ्क्षायां दृष्टान्तवैषम्यं स्फुटीकुर्वन्ति **दशम** इत्यादि । अयमर्थः । उक्तवाक्यदृष्टान्तेन विचारद्वारा आत्मसाक्षात्कारः कस्यापाद्यते । किं देहविशिष्टात्मवेदिनो वा देहात्मवेदिनो वा । तादृशस्यापि चक्षुष्मतोऽन्धस्य वा विविक्तात्मवेदिनो वा । तत्र नाद्यः । व्यामुग्धादिषु परेण बोध्यमानस्य दशमत्वस्य बाह्यत्वेन तद्विशिष्टस्य बाह्यस्यैव देहादेस्तथात्वसिद्ध्योक्तरीत्या तस्य ज्ञानस्यात्मविषयकत्वाभावात् । अत एव न द्वितीयः । अन्धस्येतराऽज्ञा-

रश्मिः ।

रूपम्'इति श्रुतेस्तत्तन्मार्गीयज्ञानानामनन्तरूपान्तर्गतत्वे तस्य मार्गाप्रविष्टस्यानन्तरूपान्तररूपान्तराविघटकतया स्वात्मप्रविष्टविवक्षितविचारेत्यादिः । **एकदेशिने**ति । उक्तार्थमेतत् । **चक्रकान्योन्याश्रय** इति । वेदान्तविचारेण साक्षात् वैराग्याद्याश्रीयते, वैराग्यादिभिस्तु साक्षात् परंपरयेति **चक्रकम्** । तौल्ये **त्वन्योन्याश्रय** इति भावः । भाष्ये तु विशेषो नाभ्युपगत इति बोध्यम् । **साधनान्तराद्वे**ति तपआदिरूपात् व्याकरणादिरूपाद्वा तस्मादित्यर्थः । **तस्यात्मसाक्षात्कारार्थत्वा**दिति । 'तत्त्वमसि'आदिवाक्यस्य ब्रह्मविचारस्य वा 'अहं ब्रह्मास्मि'इत्याकारकसाक्षात्कारफलकत्वादित्यर्थः । **इत्यत आहु**रिति इतीदमाशङ्क्य प्रतिविधानमाहुरित्यर्थः । आशङ्काभाष्यस्याभास एव विवृतत्वात् तस्येत्यादिप्रतिविधानभाष्यं विवृण्वन्ति **विचारस्ये**त्यादि । **शब्दाङ्गत्वेने**ति । आकाङ्क्षायोग्यतासंनिधिवत् । 'अविचारिताश्च शब्दा नार्थं प्रत्याययन्ति' इति भाष्यात् । **दशमे**ति । दशम इति वक्तव्ये दशमेति प्रतीकमुभयसाधुतायै । **दृष्ट**मिति साक्षात् कारणत्वेन दृष्टं शब्दरूपम् । **तत्र नाद्य** इति । चक्षुष्मतो देहविशिष्टात्मवेदिनो देहात्मवेदिनो वापाद्यत इति न वक्तुं शक्यमित्यर्थः । **व्यामुग्धादिष्वि**ति । कस्तावदस्मासु दशम इत्येवं तथाभूतेष्वित्यर्थः । **बाह्यत्वेने**ति चाक्षुषत्वात् तथात्वेनेत्यर्थः । **उक्तरीत्ये**ति भाष्योक्तरीत्येत्यर्थः । तर्हि चक्षुष्मतो देहस्य प्रत्यक्षीकरणादस्तु तज्ज्ञानस्यात्माविषयकत्वम्, अन्धेन तु तथा करणात् तज्ज्ञानस्यात्मविषयकत्वं दुर्वारमित्यत आहुः **अत एवे**ति । दशमत्वस्य चाक्षुषत्वेन बाह्यत्वादेवान्धस्य देहविशिष्टात्मवेदिनो देहात्मवेदिनो वापाद्यत इत्यपि न वक्तुं शक्यमित्यर्थः । **अन्धस्ये**त्यादि । नवान्यान् पश्यत एव स्वस्मिन् दशमत्वबुद्धिरिति भावः ।

सामग्र्या बलवत्त्वाद् देहादेः प्रत्यक्षत्वात् स्वदेहमपि पश्यन् दशमोऽहमिति मन्यते। न तथा प्रकृते। मननिदिध्यासनविधीनामानर्थक्यप्रसङ्गात्।

भाष्यप्रकाशः।

नात्। तस्य प्रज्ञाचक्षुष्ट्वेन तया ज्ञायमानस्यापि चाक्षुषकल्पत्वाच्च न तृतीयः। तस्यात्मविस्मृत्यभावेन तत्र शब्दस्याऽकारणत्वात्। न च पूर्वविकल्पोक्तानामात्मनिष्ठमान्तरमेव दशमत्वं शब्दाद् भासत इति वाच्यम्। दशमत्वस्य वक्रपेक्षाबुद्धिजन्यत्वेन तस्यां च बुद्धौ संख्याघटकानां परात्मनां भानाभावेन स्वस्यापि दशमत्वाभानप्रसङ्गात्। अतो नवमत्वादिवद् दशमत्वस्यापि बाह्यत्वमेव। कृशोहमितिवद् दशमोहमितिप्रत्यग्वित्त्यापि देहस्यैव वेद्यत्वाच्च। प्रकृते विचारे तु वेदान्तवाक्यैर्ब्रह्मत्वेनात्मसाक्षात्कारस्य तवाभिप्रेतत्वेन न तथा धर्मधर्मिणोरुभयोरप्यान्तरत्वान्न दृष्टान्तसाम्यम्। न हि समीपवर्तिभिरिन्द्रियैरग्राह्य आत्मा तद्ग्राह्येण बाह्येन शब्दप्रमाणेन ग्राहयितुं

रश्मिः।

ननु स्पर्शेनानुमानेन वा नवान्यान् ज्ञास्यतीति, तत्राहुः **तस्येत्यादि**। प्रज्ञा लिङ्गपरामर्शो व्याप्तिज्ञानं वा। **चाक्षुषकल्पत्वाच्चेति**। त्वाचत्वेनानुमितित्वेन च त्वदिष्टाभावादीषदूनचाक्षुषत्वादित्यर्थः। अन्यथान्धस्य पुरोवस्थितो घटोऽस्तीति शब्दात् घटसाक्षात्कारापत्तिः। शब्दस्य कारणत्वे ततः पूर्वमात्मविस्मृतिः स्यादिति शब्दो न कारणमित्याहुः **तस्यात्मेत्यादि**। अभ्युपगमवादेनाशङ्कां निषेधन्ति **न च पूर्वेत्यादि**। चक्षुष्मतो देहविशिष्टात्मवेदिनोऽन्धस्य तथावेदिनो विविक्तात्मवेदिनश्चेत्यर्थः। **भानाभावेनेति**। परमनोव्यावृत्तमनस एवात्मप्रत्यक्षजनकत्वोपगमात् तथेत्यर्थः। **देहस्यैवेति**। ननु नापेक्षाबुद्धेः सजातीयविषयत्वनियम इति चेत्, तत्राहुः **कृशोऽहमित्यादि**। अन्यथात्मनो दशमत्वकृशत्वाद्यापत्तिरिति भावः। तेन दशमादेरहमो विशेषणत्वादस्मच्छब्दवाच्यात्मन एव दशमत्वमित्यपि निरस्तम्। **न तथा प्रकृत** इति भाष्यं विवृण्वन्ति **प्रकृत** इत्यादि। विषयत्वेन प्रकृते वेदान्तीये 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इति श्रुतावतिप्रविष्टे च विचारे वाक्यैः'आत्मा वा अरे' इति 'दशमस्त्वमसि'इत्यादिभिरित्यर्थः। **न तथेति** भाष्यानुवादं वर्णयन्ति **धर्मधर्मिणोरिति** ब्रह्मत्वात्मनोरित्यर्थः। **तद्ग्राह्येणेति** श्रोत्रग्राह्येणेत्यर्थः। अत्र **भाष्ये। प्रत्यक्षसामग्र्या** इति। अयमर्थः। अत्र दशमोऽहमिति प्रतीतौ शब्दसामग्र्याः प्रत्यक्षसामग्र्याश्च सत्त्वेपि शब्दसामग्र्यैव प्रत्यक्षं किं न स्यात्। शब्दात् प्रत्येमीत्यनुव्यवसायात् न भविष्यति। घटं पश्यन् घटशब्दं शृण्वन् घटं पश्यामीत्यनुव्यवसायं प्राप्नोतीति सार्वजनीनम्। तथा च प्रत्यक्षसामग्रीं शब्दसामग्रीः प्रतिबध्नातीति मन्तव्यम्। यथा समाने विषये एकदा लौकिकप्रत्यक्षसामग्रीसत्त्वेऽनुमितिसामग्रीसत्त्वे लौकिकप्रत्यक्षमेवोत्पद्यते। तदनन्तरं साक्षात्करोमीत्यनुव्यवसायात्। अतः समानविषयेऽनुमितिं प्रति लौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकता। समानविषयत्वं च पर्वतोद्देश्यकसंयोगसंसर्गकवह्निविधेयकानुमितिं प्रति पर्वतोद्देश्यकसंयोगसंसर्गकवह्निप्रकारकलौकिकप्रत्यक्षसामग्रीत्वेन प्रतिबन्धकत्वम्। स्फुटमेतत् सामग्रीवादे। तथा च दशमः क इति संदिहानेषु दशमोऽहमिति पश्यत्सु दशमत्वानवच्छिन्नदेहमात्रं पश्यत्सु दशमस्त्वमसीति शब्दसामग्री प्रतिबध्यते। एवं च शब्दसामग्रीत्वेन समानविषयकप्रत्यक्षसामग्रीत्वेन प्रतिबध्यप्रतिबन्धकभावात् प्रत्यक्षसामग्र्या बलवत्त्वादिति। शब्दात् प्रत्येमीत्यध्यवसायस्तु भ्रमः। व्यामुग्धेषु दशमस्त्वमित्यस्य शब्दस्य दशमत्वसंदेहवारकत्वेन दशमत्वांशेपि चाक्षुषसं-

नचाधिकारिभेदः कल्पनीयः । शब्दज्ञाने तत्कल्पनायां प्रमाणाभावात् ।

भाष्यप्रकाशः ।

शक्यते । अथ दर्शनाव्यवधानेन श्रवणस्य विधानाच्छक्यत इत्युच्यते तदा मनननिदिध्यासनविधिवैयर्थ्यम् । तथाच दृष्टान्तवैषम्यान्मनननिदिध्यासनबिधिविरोधाच्चात्मसाक्षात्कारस्य न श्रवणफलत्वं विचारफलत्वं वा वक्तुं शक्यमित्यर्थः । ननु मुख्याधिकारिणः शब्दादपरोक्षं भवति, न तु मन्दादेरिति तादृशेषु मननाद्युपयोगान्न तद्विध्यानर्थक्यमिति चेत्तत्राहुः न चेत्यादि । शब्दजन्ये ज्ञानेऽधिकारिभेदस्तदा कल्प्यो यदि स विधिवैयर्थ्यं समादध्यात् । न तु तथा । मन्दस्य पदशक्त्यादिज्ञानशून्यतया मननाद्यसामर्थ्येन, मध्यमस्य च विदितपदपदार्थसंसर्गतयाऽऽकाङ्क्षादिबलेन दशमादिवदपरोक्षभवनसौकर्ये मननाद्यनुपयोगेन ताभ्यां तदसमाधानात् । तत्कल्पनायां श्रुतार्थापत्तिरूपप्रमाणाभावादित्यर्थः । ननु विदितपदपदार्थसंसर्गस्यापि वाक्यतात्पर्याज्ञाने दशमादि-

रश्मिः ।

शयात् । ननु 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुत्यनुकूलं शाब्दापरोक्षमित्येवमाशङ्कामुखेन **मननेत्यादि**भाष्यमवतारयन्ति **अथ दर्शनेत्यादि** । **शक्यत** इति शब्दादपरोक्षं शक्यते । आशङ्काप्रतिविधानभाष्यं विवृण्वन्ति **नन्वित्यादि** । **तादृशेष्विति** भिन्नाधिकारिष्वित्यर्थः । **न चेत्यादीति** । **न चाधिकारिभेदः कल्पनीय** इत्यादिर्यस्येत्यतद्गुणसंविज्ञानो बहुव्रीहिः । समाधानभाष्यं व्याकुर्वन्ति **शब्दजन्य** इत्यादि । **नतु तथेति** । अधिकारिभेदो विधिवैयर्थ्यं तु न समादधातीत्यर्थः । **ताभ्यामिति** मन्दमध्यमाभ्याम् । मननादिविध्यानर्थक्यासमाधानादित्यर्थः । **श्रुतार्थापत्तिरूपेति** । प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्यार्थान्तरमन्तरेणानुपपद्यमानस्योपपत्तयेऽर्थान्तरकल्पनमर्थापत्तिः । सा च प्रमाणान्तरमिति मीमांसकाः । लाघवादनुमानमिति नैयायिकाः । अर्थान्तरकल्पनया समाधेयत्वेनोच्यमानस्य प्रमाणसिद्धस्यार्थस्य मिथः प्रतिघातरूपान्यथानुपपत्तिस्तत्र कारणम् । तात्पर्यवृत्तावन्तर्भाव इति मम प्रतिभाति । जीवन्देवदत्तो गृहे नास्तीत्यस्य बहिःसत्त्वप्रतीतीच्छयोच्चारितत्वाद् गृहाधिकरणको जीवनविशिष्टबहिःस्थितदेवदत्तप्रतियोगिको भाव इति सुखेन बोधात् । अथवा । गृहाधिकरणकजीवनविशिष्टबहिःस्थितदेवदत्तनिष्ठा सत्ता तत्प्रतियोगिको भावस्तन्निष्ठा सेति बोधः । एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रादृष्टार्थानुपपत्तावपि पीन इत्यस्य नक्तं भोजनानुषङ्गकपीनत्वे तात्पर्यात् न दोष इति । तस्मादन्यथानुपपत्तावर्थापत्त्यां निवृत्तायां प्रमितयोः संसृष्टबुद्धिः प्रमेयप्रमारूपा भवतीति ज्ञेयम् ।

तथा च 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो[2] मन्तव्यो[3] निदिध्यासितव्यः' इत्यत्र प्रमाणसिद्धस्य आत्मा वा अरे द्रष्टव्यः श्रोतव्यः इति अंशस्यार्थान्तरकल्पनया समाधेयत्वेन उच्यमानस्य मन्तव्यो निदिधासितव्य इत्यस्यांशस्य च मिथः शेषशेषिभावे प्रतिघातः, श्रवणेनैवात्मदर्शनात् । इत्थमन्यथाऽनुपपत्तावर्थापत्तिकारणभूतायां प्राप्तायामत्र मन्तव्यो निदिध्यासितव्य इतिशब्देन प्रमितस्य मनननिदिध्यासनरूपस्यार्थस्य भिन्नाधिकारिरूपार्थान्तरमन्तरेणानुपपद्यमानस्योपपत्तये भिन्नाधिकारि-

१. जीवनसंसृष्टत्वगृहाधिकरणकाभावयोर्मिथः प्रतिघातः । २. दर्शनस्य न श्रवणशेषित्वं शाब्दाऽपरोक्षापत्तेः, किंतु प्रेमशेषित्वं प्रेम्णा दर्शनमिति । ३. मननस्य मीमांसारूपस्य न निदिध्यासनशेषित्वं किंतु अन्यथाभावनाविपरीतभावनानिवर्तकत्वात् तच्छेषित्वम् ।

अत्यन्तासत्यप्यर्थे शब्दस्य ज्ञानजननात् प्रमाणसंकरापत्तिश्च।

भाष्यप्रकाशः ।

वाक्यादप्यपरोक्षादर्शनान्मननादिना तज्ज्ञाने च तद्दर्शनात् तात्पर्यज्ञानशून्येनाधिकारिणा तत्समाधातुं शक्यत एवेति कथं प्रमाणाभाव इत्यत आहुः अत्यन्तेत्यादि। शब्दस्येति षष्ठ्या करणत्वं बोध्यते। तथाच खपुष्पं सुरभीत्युक्तेऽत्यन्तासतोऽपि ज्ञानं जायते। एवं गुर्वादिनोक्तवेदान्तवाक्ये अगोचरस्याप्यात्मनस्त्वदभिमतं ज्ञानं भविष्यतीत्युक्तविधिवैयर्थ्यं दुर्वारमतः प्रमाणाभाव इत्यर्थः। ननु विधिबलादेव ज्ञायते सर्वेषां न भवतीत्यतो न तदभाव इत्यत आहुः प्रमाणेत्यादि। संकरो मर्यादाभङ्गेन जायमानं कार्यम्। यथा वर्णसंकर इति। तथाच तत्र यथा न वर्णत्वमेवमत्रापि दशमस्त्वमसीतिवाक्यस्य युष्मत्पदस्मारितपदार्थोल्लङ्घनेनासत्पदार्थविषयकज्ञानजनने तस्य ज्ञानस्य प्रमाणत्वं न स्यादिति तादृशज्ञानोपपादनप्रयासवैफल्यम्। किंचैवं भग्नायां प्रमाणमर्यादायां तं

रश्मिः ।

कल्पनम्। तेन दर्शनमननादिरूपयोः प्रमितयोः शेषशेषिभावेन संसृष्टबुद्धिरिति समन्वयः। सेयमधिकारिणि मननादिविध्यानर्थक्यस्य परिहर्त्र्येव भवति तादृशस्य तु प्रकृतेऽलाभाच्छ्रुतार्थापत्तिरूपप्रमाणाभावादित्यर्थः। **तज्ज्ञान** इति तात्पर्यज्ञाने चापरोक्षदर्शनादित्यर्थः। **तदिति** विध्यानर्थक्यमित्यर्थः। शब्दस्य ज्ञानजननादिति पाठं मत्वा आहुः **षष्ठ्येत्यादि**। फलानां तृप्त इति दृष्टान्तः। **ज्ञानं जायत** इति। अत्रैवं ज्ञेयम्। वाक्यं च सिद्धार्थं साध्यार्थं च, यद्यपि सर्वमेव वाक्यं सिद्धार्थं भवति। भावित्वभूतत्वयोर्धर्मत्वेन निराश्रयत्वासंभवाद्वर्तमानकाले भाविभूतयोर्वस्तुनोः सत्ता स्वीकार्येति। न च कालस्तदाश्रयो भवतीति शङ्क्यम्। भावी कालो भूतः कालः इति प्रतीत्यापत्तेरित्यादिकं स्थितं **विद्वन्मण्डने**। तथापि कारणकलापनिष्पाद्यव्यवहारनिबन्धनोयं साध्यत्वव्यवहार इति। वाक्ये द्वैविध्यम्। तत्र सिद्धार्थस्य वाक्यस्य संनिकृष्टे विषये प्रत्यक्षसहकारित्वात् प्रत्यक्षहेतुत्वमेव। विप्रकृष्टविषये तु तदानींतनार्थसत्तायाः संदिग्धत्वेन संभावनात्मकस्यैव ज्ञानस्य शब्दत्वेन संदिग्धमेव प्रामाण्यम्। बालादिवाक्येपि तथा। प्रतारकवाक्ये तु श्रोतुर्विश्वासजाड्यं प्रामाण्यबुद्ध्युत्पादकं न तु शब्दः। वक्तुरनाप्तत्वेन तत्र शब्दत्वविरहात्। भ्रान्तः सन् प्रतारको यद्वाक्यं प्रयुङ्क्ते तत्र तथा। प्रवृत्तिसामर्थ्ये तु वक्तृप्रतारकत्वबुद्ध्यभावहेतुका प्रामाण्यधीः प्रमेयबलेन श्रोतुर्जायत इति विश्वासजाड्यकृतत्वं तत्रेति। तस्य प्रतारकत्वज्ञानानन्तरं तु या प्रवृत्तिः सापि न शब्दकालाभ्यां किंतु अननुगतादेव कारणविशेषादिति न सापि प्रामाण्यावेदिका। भ्रान्तवाक्यस्य तु शब्दत्वेऽपि न तज्जन्यं ज्ञानं प्रमाणं, वक्तृदोषात्। अतः सिद्धार्थानि वाक्यानि गौणमेव प्रामाण्यं बिभ्रति। साध्यार्थे तु वाक्यार्थो बुद्धिपरिकल्पितः। संसर्गिण्याः क्रियायास्तदानीमभावेन तत्संसर्गस्याप्यभावात्। तस्माद्वक्तुर्दृष्टार्थवादित्वाभावेन तद्वाक्यस्याप्रामाण्यं यद्यपि तथापि प्रवृत्तिसामर्थ्यात् प्रमेयबलेनैव प्रामाण्यमिति। अत एव 'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि' इति अभियुक्तोक्तिः। **प्रमाणत्वं न स्यादिति**। शाब्दबोधे पदजन्यपदार्थोपस्थितेः तन्त्रत्वादितिभावः। न च तत्र विपरीतलक्षणयैवोपस्थितिरिति वाच्यम्। यथा

'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम्'॥

मनसा तज्जननेऽपि तथा । तस्मात् प्रथमं शाब्दमेव ज्ञानमिति मन्तव्यम्, अनुभवसिद्धत्वात् । इदानीन्तनानामपि शमादिरहितानां निर्विचिकित्सितवेदार्थज्ञानोपलब्धेः । संन्यासानुपपत्तिश्च ।

भाष्यप्रकाशः ।

घटमानयेत्यत्रापि वाक्यार्थज्ञानं प्रत्यक्षं स्यात् । आत्मन इव घटस्यापि पूर्वमनुभूतत्वात् । चीत्कारेण गजानुमितिरपि न स्यात् । यद्वा, प्रमाणे ज्ञानेऽनुव्यवसीयमानयोः प्रत्यक्षत्वपरोक्षत्वयोर्जातित्वबाधकसंकरापत्तिः स्यात् । नचेष्टापत्तिः । व्यवहारे भट्टनयमुपगच्छतस्तथा वक्तुमयुक्तत्वात् । भारत आजगरेऽपि,

'जातिरत्र महासर्प मनुष्यत्वे महामते ।
संकरात् सर्ववर्णानां दुष्परीक्ष्येति मे मतिः' ॥ इति ।

युधिष्ठिरेण ब्राह्मणत्वजातिबाधकतया संकरस्योपगतत्वाच्च । अतोनेकदूषणग्रासादधिकारिभेदशब्दापरोक्षयोः कल्पनमेवायुक्तमित्यर्थः । ननु मास्तु शब्दादपरोक्षं, तथाऽपि दशमस्त्वमितिवाक्यसहकृतचक्षुषा दशमोऽहमितिवन्मनसैवानुद्रष्टव्य इति श्रुतेस्तत्त्वमस्यादिवाक्यसहकृतमनसैव विविक्तात्मसाक्षात्कारो भावीत्यधिकारिभेदो नायुक्त इति चेत्तत्राहुः **मनसे**त्यादि । वाक्यसहकृतमनसा यदि सर्वेषां साक्षात्कारस्तदा मननादिविधिवैयर्थ्यम् । यदि कस्यचिद् तदा यस्य न साक्षात्कारस्तस्य वेदान्तार्थनिर्धार एव विचारफलत्वेन वाच्यस्तथा सत्युक्तरीत्या वैराग्यादिसंपादकत्वेन तस्य प्रागेवापेक्षितत्वात् पूर्वोक्तान्योन्याश्रयादिदोषतादवस्थ्यमित्यर्थः । सिद्धमाहुः **तस्मा**दित्यादि । मन्तव्यमिति सर्वेषां भवतीति मन्तव्यम् । अनुभवसिद्धत्वं विशदयन्ति **इदानी**मित्यादि । तथाच पूर्वोक्तं दूषणं दुरुद्धरमित्यर्थः । उक्तदार्ढ्याय दूषणान्तरमाहुः **संयासे**त्यादि । 'गृहाद्वा प्रव्रजेद् वनाद्वा प्रव्रजेद्' इतिश्रुतौ तत्तदाश्रमानन्तर्यकथनाद् दृढं वैराग्यं

रश्मिः ।

इत्यपकारिणं प्रति विपरीतलक्षणयोक्तिः । अपकारिणि उपकारित्वरूपेण मुख्यार्थे बाधिते सति विरोधरूपसंबन्धेन अपकारित्वलक्षणादिति वाच्यम् । तथा सति पारोक्ष्यापत्त्या प्रतिज्ञाव्याहतेः । **वाक्यार्थज्ञान**मिति वाक्यार्थस्य घटानयनस्य ज्ञानं प्रत्यक्षात्मकं स्यादित्यर्थः । पुरोवर्तिवाक्यार्थस्य ज्ञानं निशामनं भवतीति परोक्षवाचितत्पदेन घटो विशेत इति ज्ञेयम् । **गजानुमिति**रिति । शब्दापरोक्षप्रतिज्ञा गजवान् देश इत्यनुमितिरित्यर्थः । किंतु गजप्रत्यक्षं स्यादिति भावः । परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः संकरः इति नैयाकिकोक्तं लक्षणमनुसृत्याहुर्यद्वा इति । प्रमीयत इति प्रमाणमिति । भावव्युत्पत्तिमत्त्वमाहुः **प्रमाणे ज्ञान** इति अहं ब्रह्मास्मीति ज्ञाने इत्यर्थः । **अनुव्यवसीये**ति ब्रह्म अहं जानामीति अनुव्यवसीयमानयोरित्यर्थः । अत्र ज्ञानानुकूलो व्यापार इत्यत्र ज्ञानस्य शाब्दत्वप्रत्यक्षत्वाभ्यां बोधः, न ज्ञानत्वेन प्रकारेण अन्वेषमाणे ज्ञानत्वस्य तत्रैव पर्यवसानात् । **अयुक्तत्वा**दिति आकृत्यधिकरणविरोधेन तथात्वादित्यर्थः । यद्वा न भावव्युत्पत्तिः । करणव्युत्पत्तिरेव । तथा च व्यवसायज्ञानस्यानुव्यवसायकारणत्वात् प्रमीयतेऽनेन व्यवसायेन तत् प्रमाणं ज्ञानं ब्रह्म इत्याकारकं तस्मिन् सति अनुव्यवसीयमानयोरनुव्यवसायप्रत्यक्षत्वपरोक्षत्वप्रकारकज्ञानं विषयतासंबन्धेन तस्य कर्त्रोः । अत्र धात्वर्थफलमात्रं कृतिमत्त्वं कर्तृत्वं फलानुकूलव्यापारश्चानेकधा । भाष्ये **इदानी**मिति । 'अलौकिको हि वेदार्थः' इति श्रुत्युक्तसाधनवतामिति विशेषणीयम् । **निर्विचिकित्से**त्यादि । विचिकित्सा तु संशयः । प्रकृते । **पूर्वोक्त**मिति अनुभवविरोधरूपमित्यर्थः । **तत्तदाश्रमानन्तर्ये**ति ।

किंच। अध्याहारश्च कर्तव्यः। स च कर्तव्यादिपदानाम्। यदि तत् स्वार्थं, व्यर्थमेव वाक्यं स्यात्। परार्थत्वे त्वशक्यं, न हि तैर्विचारः कर्तुं शक्यते। स्वकृतिवैयर्थ्यं च। असंगतिश्चास्य सूत्रस्य भवेत्।

किंचाधिकारपक्षे पुरुषार्थः सिद्ध्यति, नानन्तर्यपक्षे उक्तन्यायात्।

किंच, तादृशस्याधिकारिणः श्रवणमात्रेण कृतार्थस्य समाधिनिरतस्य प्रवचनासंभवाच्छास्त्रोच्छेदः शास्त्रविरोधश्च। साधनानामग्रे स्वयमेव वक्तव्यत्वात्। अतोऽनेकदोषदुष्टत्वादधिकारार्थ एव श्रेयान्।

भाष्यप्रकाशः।

संन्यासाङ्गमिति ज्ञायते।श्रुत्यन्तरे च 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वाः' इति वेदान्तार्थनिश्चयोत्तरं संन्यासस्योक्तत्वात् तदङ्गभूतवैराग्यस्य वेदान्तार्थनिश्चयोत्तरत्वमेवायाति। ततः पूर्वभावित्वं च विचारस्येति तत्तदभावे दृढवैराग्याभावात् संन्यासानुपपत्तिः। तथाचानन्तर्यपक्षे तन्निरूपकस्य वक्तुमशक्यत्वात् किमनन्तरमित्याकाङ्क्षायाः कथमपि न पूरणमित्यर्थः।

द्वितीयं दूषणं विवृण्वन्ति किंचेत्यादि। तदिति विचारकरणम्। तथाच स्वयमेव मनसि विचार्यमिति स्वार्थत्वे शास्त्रानर्थक्यमित्यर्थः। अशक्यमिति अशक्योपदेशरूपम्। तथाच फलाऽभावाद् वैयर्थ्यमित्यर्थः। असंगतिरिति परैः कर्तव्यमितिप्रतिज्ञाया अग्रिमसूत्रीयस्वयंकृतिविरुद्धत्वादसंगतिरित्यर्थः।

तृतीयं विवृण्वन्ति किंचाधिकारेत्यादि। उक्तन्यायादिति तदसंभवापत्तेरित्यनेनोक्तान्न्यायात्। विचारव्यतिरेकेण ब्रह्मणः परमपुरुषार्थत्वज्ञानाद्यभावात् तदभावे चित्तशुद्ध्याद्यभावेन विचाराभावात् तथेत्यर्थः।

चतुर्थं विवृण्वन्ति किंच, तादृशस्येत्यादि। तादृशस्येति साधनचतुष्टयसंपन्नस्य। साधनानामिति वैराग्यादिसाधनानाम्। अग्रे इति, तृतीयाध्याये। तथाचानन्तर्यनिरूपकतया पूर्वसिद्धानां पुनः कथनानर्हत्वात्, कथनेन च पूर्वं तदभावनिश्चयात् सिद्धत्वाङ्गीकारे व्याख्येयशास्त्रविरोध इत्यर्थः। एतेन यन्माध्वैर्जातिकृतं गुणकृतं च ब्रह्मविद्यायामधिकारत्रैविध्यमङ्गीकृत्य तदानन्तर्यमथशब्दार्थो, न त्वध्ययनमात्रानन्तर्यमिति साधनाध्यायानुसारेणाङ्गीक्रियते, तदपि

रश्मिः।

'ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत्' इति आश्रमक्रमेण संन्यासः। गृहाद्वेति श्रुतौ तु अनियततत्तदाश्रमानन्तर्यकथनेनाश्रमा न संन्यासाङ्गानि अपि तु आश्रमानियमात् 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति श्रुत्यन्तराच्च दृढवैराग्यमित्यर्थः। **तदङ्गभूतेति**। हेतुगर्भं विशेषणमिदं तेन संन्यासाङ्गभूतत्वादित्यर्थः। **एवायातीति**। यथा भुक्त्वा पयः पिबतीत्यत्र पयःपानोपयोगिपात्रमपि भोजनोत्तरमेवायाति तद्वदित्यर्थः। **तत इति** वैराग्यादित्यर्थः। **तत्तदभावे** इति विचारवेदान्तविज्ञानाद्यभाव इत्यर्थः। **द्वितीयमिति**। **अध्याहारश्चेति** भाष्योक्तमित्यर्थः। **अशक्येत्यादि**। वैराग्याद्यनन्तरं साक्षात्काराभिनिष्पत्तये ब्रह्मजिज्ञासा कर्तव्येति तथाविधित्वं न स्यादिति भावः। तथा च सांख्यप्रवचनसूत्रं 'नाशक्योपदेशविधिरुपदिष्टेप्यनुपदेशः' इति। न च मात्र भूद्विधिरिति वाच्यम्। स्वाध्यायोध्येतव्य इत्यत्र भाट्टैरङ्गीकारेण तवाप्यावश्यकत्वात्। **तृतीयमिति**। **पुरुषार्थश्च सिध्येदिति** भाष्योक्तमित्यर्थः। **न्यायादिति** अन्योन्याश्रयादित्यर्थः। तमेवाहुर्विचारेत्यादि। **चित्तशुद्ध्यादीति**। **आदि-**

नच ज्ञातुमिच्छा जिज्ञासा नाधिकर्तुं शक्येति वाच्यम् । जिज्ञासापदस्य विचारार्थत्वात् ।

भाष्यप्रकाशः ।

प्रत्युक्तम्, विचारब्रह्मविद्ययोरैक्याभावात् । अतो न तदुपन्यस्तश्रुतिस्मृतीनामपि विरोधः ।

एवमथशब्दार्थं निर्णीय जिज्ञासाशब्दार्थं निश्चेतुमधिकारार्थविरुद्धं मतान्तरीयं तदर्थमनूद्य परिहरन्ति **न चे**त्यादि । **ज्ञातुमिच्छा जिज्ञासे**ति 'धातोः कर्मणः' इति धातुवाच्यस्यार्थस्येप्सितत्वस्मरणाज्ज्ञानप्रधानेयमिच्छा प्रस्तोतुमशक्येत्यर्थः । **विचारार्थत्वा**दिति जिज्ञासितं सुसंपन्नमपि ते महदद्भुतम्' इति, 'जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनम्' इति, 'अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत्' इति, 'जिज्ञासायां संप्रवृत्तो नाद्रियेत् कर्मचोदनाम्' इत्यादिषु जिज्ञासितजिज्ञासापदयोरिष्टेच्छावाचकत्वे वाक्यार्थेऽनन्वयेन तत्र विचारार्थकत्वनिश्चयेन तथात्वात् । तथाचैवंविधाप्तवाक्य-

रश्मिः ।

पदेन वैराग्यशमदमादिः । **चतुर्थ**मिति । **उच्छेदश्च न भवे**दिति भाष्योक्तमित्यर्थः । **सिद्धत्वे**त्यादि । आनन्तर्यनिरूपकत्वाङ्गीकारे साधनाध्यायविरोध इत्यर्थः । **जातिकृत**मित्यादि । ब्राह्मण्यादिजातित्रयकृतं सेवा(वैराग्या)दिगुणत्रयकृतं चेत्यर्थः । अधिकारश्चोक्तो भागवततन्त्रे ।

'मन्दमध्योत्तमत्वेन त्रिविधास्त्वधिकारिणः ।
तत्र मन्दा मनुष्येषु य उत्तमगुणा मताः ॥
मध्यमा ऋषिगन्धर्वा देवास्तत्रोत्तमा मताः ।
इति जातिकृतो भेदस्तथान्यो गुणपूर्वकः ॥
भक्तिमान्परमे विष्णौ यस्त्वध्ययनवान्नरः ।
अधमः शमादिसंयुक्तो मध्यमः स उदाहृतः ॥
आब्रह्मस्तम्बपर्यन्तमसारं चाप्यनित्यकम् ।
विज्ञाय जातवैराग्यो विष्णुपादैकसंश्रयः ॥
स उत्तमोऽधिकारी स्यात् संन्यस्ताखिलकर्मवान् ॥

इति स्मृतयो माध्वभाष्ये । **ऐक्याभावा**दिति । हेतुहेतुमद्भावेन तथात्वादित्यर्थः । **तदुपन्यस्ते**ति । 'शान्तो दान्त उपरतः' इति 'परीक्ष्य लोकान् कर्मचितान्' इति 'नास्त्यकृतः कृतेन' इति 'यमेव' इति 'यस्य देवे' इति श्रुतयः । स्मृतयस्तूक्ताः । **विरोध** इति । ब्रह्मविद्यापरत्वादिति भावः, भागवततन्त्रे विचाराभावात् । **मतान्तरीय**मिति । शंकराचार्यादिमतीयजिज्ञासापदार्थमनूद्य इत्यर्थः । अथशब्द आनन्तर्यार्थः परिगृह्यते नाधिकारार्थः ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति । **ज्ञातुमिच्छा जिज्ञासा** इति च तद्भाष्यम् । अत्र भाष्याशयवर्णकः । जिज्ञासापदं ज्ञानेच्छां वक्ति विचारं लक्षयति वा । नाद्यः । अथशब्दस्यारम्भार्थत्वे ब्रह्मज्ञानेच्छाया अनारभ्यत्वात्सूत्रार्थासंगतिः । प्रत्यधिकरणविचारकरणेनेच्छाकरणाभावादिति । नापरः । कर्तव्यपदाध्याहारं विना अन्वयानुपपत्त्यभावेन विचारलक्षकत्वायोगात् । तदध्याहारे तु अथशब्दवैयर्थ्यम् । तेनैवारम्भोक्तेरिति भाष्याशय इति एतदुभयमालोच्याहुः **धातोः कर्मण** इति । 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सूत्रम् । 'इषिकर्मणः इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम्' इति वृत्तिः । असंदेहाय पुष्कलवाक्यान्याहुः **जिज्ञासित**मित्यादि । **वाक्यार्थ** इत्यादि । नारदकृतव्यासाभिनन्दनरूपे भारतादिकरणरूपस्वाभाविकधर्मेपि विशेष-

अत एव जिज्ञासितुमिच्छेदिति पुराविदां वचनानि। जिज्ञासापदेन चैतज्ज्ञापयति ब्रह्मज्ञानं पुरुषार्थसाधनत्वादिष्टम्। तदिच्छापूरणाय विचार आरभ्यत इति। यस्मात् कर्मादिभ्यो ज्ञानमेव पुरुषार्थसाधनमित्यतस्तज्ज्ञानाय विचारोऽधिक्रियत इति

भाष्यप्रकाशः।

ग्राहितां रूढिमनादृत्य वृथा यौगिकादरणमप्रयोजकमित्यर्थः। अत्र शाबरभाष्यसंमतिमाहुः **अत एवे**त्यादि। ननु विचारे प्रारम्भणीये, अथातो ब्रह्मविचार इत्येव कुतो नोक्तमित्याशङ्कायामाहुः **जिज्ञासापदे**नेत्यादि। भृगुप्रपाठके, 'अधीहि भगवो ब्रह्म' इतिश्रुतेर्ब्रह्मज्ञानेच्छयोपसन्नाय भृगवे, 'यतो वा इमानि' इति ब्रह्मलक्षणकथनपूर्वकं तद्विजिज्ञासस्वेतिपदेन तदिच्छापूरणाय विचारोपदेशादिहापि तथैव विचार आरभ्यत इति ज्ञापयतीत्यर्थः। नचात्र तपोऽनुपदेशाच्छ्रुतिविरोधः शङ्क्यः। तपस इदानीमसाधनतायाः प्रागुपपादितत्वात्। नच विचारस्याश्रौतत्वं शङ्क्यम्। लक्षणवत्तदुपयोगस्य प्रागुपपादितत्वात्। नच मन्तव्यादिप्रत्यक्षविधिमूलकत्वं परित्यज्य किमिति ज्ञानविध्याक्षिप्तमङ्गीक्रियत इति वाच्यम्। तथा सति तत्रात्मादिपदात् तावन्मात्रत्वेनैव विचार्यत्वापत्त्याऽग्रिमसूत्राणां विरोधाद्यापत्तेः। तस्मादेतावदेवात्रार्थत्वेन ग्राह्यमित्येव युक्तम्। एवं जिज्ञासाशब्दार्थं निश्चित्य सिद्धान्तरीत्या सिद्धं वाक्यार्थं वदन्तोऽतःशब्दार्थमाहुः **यस्मादि**त्यादि। अत्र केचन, क्षेमः सुभिक्षोऽयं देशोऽतोहमस्मिन् वसामीत्यादौ स्वोक्तस्य गम्यमानस्य वा वृत्तस्य हेतुभावे अतःशब्दप्रयोगदर्शनात् प्रकृते च कर्मज्ञानं पूर्वं वृत्तमिति तस्य हेतुत्वमतःशब्दोऽत्रोपदिशतीत्याहुः। अन्ये तु बृहदारण्यकीयसप्तान्नब्राह्मणस्थायाम्, 'अथाऽतो व्रतमीमांसा' इत्यादिश्रुतौ,

'अथाऽतो गोभिलोक्तानामन्येषां चैव कर्मणाम्।
अस्पष्टानां विधिं सम्यग् दर्शयिष्ये प्रदीपवद्' ॥ इति।

कात्यायनादिस्मृतौ चातःशब्दस्य पूर्वावधौ प्रयोगदर्शनादत्राप्यतःशब्देन पूर्वावधिरेवोच्यते।

रश्मिः।

रूपे च इत्येवमादौ वाक्यार्थे इष्टेच्छाया अभिनन्दनाय साधकतयाऽनन्वयेनेत्यर्थः। **यौगिकादरण**मिति। ज्ञातुमिच्छा जिज्ञासा इत्यत्र आकृतेरजहल्लक्षणया फलभूतज्ञानलक्षकत्वम्। प्रत्ययस्य इच्छासाध्यविचारलक्षकत्वं कर्तव्यपदान्वयानुरोधादिति शांकराद्यारटनमित्यर्थः। एवंविध आप्तवादादन्यत्रापि प्रयोगो दृश्यते इत्याहुरत्र **शाबरे**ति। **तदिच्छापूरणाये**ति ब्रह्मज्ञानविषयिण्या इच्छायाः पूरणायेत्यर्थः। शाब्दं चैतज्ज्ञानमिति वेदितव्यम्। **लक्षणव**दिति प्रातिशाख्यसूत्रवदित्यर्थः। **तथासति तत्रे**ति। 'आत्मा वा अरे' इत्युपक्रम्य श्रोतव्यमन्तव्यादिविधावित्यर्थः। **अग्रिमसूत्राणा**मिति ब्रह्मविचारकाणामग्रिमसूत्राणां विरोधादनुपयोगापत्तेरित्यर्थः। **एतावदेव** इति ब्रह्मविचारमात्रमित्यर्थः। **अत्र केचने**ति रामानुजशंकराचार्यादय इत्यर्थः। **अत** इति तादृशदेशत्वादित्यर्थः। **स्वोक्तस्ये**त्यादि। क्षेमदेशसंबन्धिनः सुभिक्षदेशसंबन्धिनश्च सुखिनो वयं जाता भविष्याम इत्यादिवत्सुभिक्षदेशस्येत्यर्थः। **कर्मज्ञान**मिति उपलक्षणं चैतत्। अथशब्दार्थस्तु साधनचतुष्टयसंपदः। **पूर्वावधा**विति। अथोपासनोत्त्यनन्तरं यतो जिज्ञासाया सत्त्वमत एषां व्रतादीनां मध्ये कस्य कर्म व्रतत्वेन धारयितव्यमिति मीमांसा प्रवर्तत इत्यर्थात्तथात्वादित्यर्थः।

अतःशब्दार्थः ।

भाष्यप्रकाशः ।

तथाच, अतः–अस्मात्सूत्रादारभ्येत्यर्थमाहुः । तत्र पूर्वस्मिन् मते देशदृष्टान्ताद्धर्मज्ञानस्य न तेन रूपेण हेतुत्वं, किंतु वृत्तत्वेन वाच्यम्, तच्चानन्तर्यपक्षदूषणादेवापास्तम् । धर्मज्ञानत्वेन हेतुत्वं तु प्रत्यक्षबाधितम् । द्वितीये तु, स्मृतौ कर्मणामस्पष्टत्वेन विशेषितत्वात् तदेवातःशब्देन गोचरीक्रियते, न तु पूर्वावधिरनुक्तसिद्धत्वात् । एवं श्रुतावपि पूर्वं, त एते सर्व एव समाः सर्वेऽनन्ता इत्यनेन ब्राह्मणां वाङ्मनःप्राणानां साम्यबोधनादुपासकेन कस्य कर्म व्रतत्वेन धार्यमित्यपेक्षायां यस्य व्रतमुत्कृष्टं तन्निश्रायनार्थं व्रतमीमांसायाः प्रवर्तितत्वेन तदुत्कर्षज्ञापनमेव हेतुत्वेनाभिप्रेयते, न तु पूर्वावधिरिति बोध्यम् । तेन मतद्वयमप्ययुक्तमितिज्ञापनायोक्तमिति । **अतःशब्दार्थ** इति तथाच

रश्मिः ।

अस्मादिति कर्मज्ञानाधिकारादित्यर्थः । **धर्मज्ञानस्येति** । यद्यपि कर्मज्ञानमुक्तं पूर्वं 'देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' इति यजुःसंहिताश्रुतेः, तथापि 'धर्मं चर' इति शिक्षाश्रुतेः धर्मज्ञानं पूर्वमित्याशयेनोक्तमत एव 'अथातो धर्मजिज्ञासा' इत्युक्तम् । 'कर्मैके तत्र दर्शनात्' इति सूत्रं त्वग्रे । **न तेन रूपेणेति** दृष्टान्ते देशत्वरूपेण हेतुत्वाभावादत्रापि न कर्मज्ञानत्वरूपेण हेतुत्वं किंतु क्षेमत्वेन सुभिक्षत्वेन च तद्वदत्रापि पूर्ववृत्तत्वेन वाच्यमित्यर्थः । **आनन्तर्यपक्षदूषणादेवेति** । अथातः साङ्गशिरसो वेदस्याधिगताल्पास्थिरफलके बलकर्मज्ञानतया संज्ञता मोक्षाभिलाषस्यानल्पस्थिरफलब्रह्मजिज्ञासास्यनन्तरभाविनीति तथात्वादित्यर्थः । तथा यदुक्तं 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति धर्मस्यापि नित्यफलमवगच्छतो विवेकाद्यसंभवादानन्तर्यसंभावनां ब्रूते **अतःशब्द** इति । तथा चोक्तश्रुतिः 'यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते' इति श्रुतिबोधितेति । अतो विवेकादिसंभवादित्यर्थः । तस्यापि तथात्वादिति **प्रत्यक्षबाधितमिति** । धर्मजिज्ञासायाः प्रागपि अधीतवेदस्य ब्रह्मजिज्ञासोपपत्तेस्तथेत्यर्थः । कर्मत्वं तु क्रियासाधारणधर्मत्वं च चोदनालक्षणोर्थ इति विभेदः । सूचीकटाहन्यायेनाहुः **द्वितीये तु । स्मृताविति । तदेवेति** अस्पष्टत्वमेवेत्यर्थः । अन्यथा विशेषणवैयर्थ्यापत्तिरिति भावः । **त एत** इति वाङ्मनःप्राणा इत्यर्थः । **कर्म व्रतत्वेनेति** व्यापारो व्रतत्वेनेति निश्चयविषयत्वेनेत्यर्थः । **इत्यपेक्षायामिति** । एतदग्रे **यस्य व्रतमुत्कृष्टं तन्निश्रायनार्थ**मित्यपि दृश्यते । **तदुत्कर्षेति** यस्य व्रतमुत्कृष्टं तदुत्कर्षज्ञापनमित्यर्थः । **तथा अत** इत्यस्योत्कर्षज्ञापकत्वादित्यर्थः । उत्कृष्टश्च प्राणः 'यतश्चोदेति सूर्यः अस्तं यत्र च गच्छति' इति, 'प्राणाद्वा एष उदेति प्राणेऽस्तमेति' इति श्रुतेः । भाष्ये **ज्ञानमेवेति** । सर्वात्मभावाख्यः सर्वत्र विगाढभावहेतुकब्रह्मानुभवादिकार्यकः प्रियत्वानुभव इत्यर्थः । अयमेव स्नेहः । एतच्च 'अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च तदुक्तम्' इति सूत्रविचारे साधनाध्याये स्पष्टयितव्यम् । **अधिक्रियत** इति । अधिकार उत्तरत्रानुवृत्तिः । अत एव 'उत्क्रमिष्यत' इति सूत्रभाष्यलिङ्गमित्यनुवर्तत इति । ननु तथाप्येवं सति भाष्ये एवं स्फुटमुक्तं स्यात्, मैवम् । जिज्ञासापदज्ञापितस्य भगवद्व्यासाशयगोचरस्य ज्ञानस्यैतादृशस्योल्लेखात् । 'पुरुषार्थोऽतःशब्दात् इति बादरायणः' इति सूत्रात् । **अतः** सर्वात्मभावात् । नच प्राणो वै बलमिति चेदत्र ब्रवीमि । स्मृतित्वानङ्गीकारात्, न च श्रुतिविरोधस्तदङ्गत्वात् । न च प्रमाणाभावः 'भक्त्या

भाष्यप्रकाशः ।

धर्मो यशःप्रदः सुखदश्चातः करोमीत्यादाविष्टेऽप्यतःपदप्रयोगदर्शनादयमेवार्थो न त्वन्यविध इत्यर्थः । नन्वस्य प्रथमसूत्रत्वादत्र प्रेक्षावत्प्रवृत्तिसिद्ध्यर्थमधिकारिविषयसंबन्धप्रयोजनानि

रश्मिः ।

संजातया भक्त्या' इति वाक्यानुभवात् । न च प्रमाणाभावः 'नायमात्मा बलहीनेन लभ्यः' इति श्रुतिलाभात् । **बलं भक्तिरिति** भाष्यम् । न च प्राणो वै बलमिति शङ्क्यम्, अप्रकरणित्वात् । न च ज्ञानं तत्, 'ब्रह्मविदाप्नोति' इति श्रुतेः । मैवम् । 'भक्तिरहस्यभजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन्मनःकल्पनम्' इति उद्देश्यविधेयभावात् । ज्ञानत्वेन सर्वात्मभावमुद्दिश्य ज्ञानं तु गीतायां विहितमिति । किं च 'भक्त्याहमेकया ग्राह्यः' इति स्मृतिर्वेदविरोधाभावात्स्वमूलं श्रुतिं ज्ञापयिष्यति । ननु 'ब्रह्मविदाप्नोति परम्' 'तमेव विदित्वा' इत्यादिप्रत्यक्षश्रुतिविरोधात् न ज्ञापयिष्यति । एतद्भक्तौ निवेशयिष्यामहे, रसत्वात्तु तस्याः । वैपरीत्यमिति चेन्नेति ब्रवीमि, अरसत्वात्तस्य । ऐक्यमिति चेन्नेति ब्रवीमि, 'सत्यं विज्ञानमानन्दं ब्रह्म' इति भेदात् । आनन्दादुच्यते, नैष दोषः । 'रसँ ह्येवायं लब्ध्वानन्दी भवति' इत्यैक्यं श्रूयते । अपि च 'तस्य प्रियमेव शिरः' इति श्रूयते । एवं तर्ह्युपासेत्युच्यते । नेति ब्रवीमि 'सर्वेषां मदुपासनम्' इति प्रक्रम्य 'भक्तिं विन्दते' इति अरसत्वाच्चेति । तदानीं वैपरीत्यं प्रवर्त्स्यामहे । अरसत्वात्तस्या नेति ब्रवीमि । प्रज्ञेति[1] चेन्न, स्मरणात्मकत्वेन तन्निवर्त्यत्वात् । श्रद्धेति चेन्न, साधारण्यात् । शाण्डिल्यसूत्रार्थस्तत्र स्पष्टः । अतो भक्तिरेव साधनमिति प्रतिज्ञायते यत्सुसंसिद्धम् । द्वेषादीनामप्येतर्हि तत्संश्लिष्टानां तदिति च । तत्संश्लिष्टानां मनःकल्पनरूपभक्तिसंश्लिष्टानाम् । प्रमेयबलं चैतत् । आनन्त्याधिपत्यात् 'यस्य देवे परा भक्तिः' इति साक्षाच्छ्रुतिं चोत्पश्यामः । न च 'योगास्त्रयः' इति वाक्यविसंवादः । अहीनन्याये एतदुक्तं बहुकर्तृके सत्रे यजमानेषु यः कोऽपि शुक्रग्रहं स्पृशतु विशेषस्यावधारयितुमशक्यत्वादिति । न चात्र द्वादशचतुर्थपादीयाहीनन्यायेनाचार्यप्रवृत्तिरिति संभावयामः । स्मृतेर्निर्णीयत इति 'प्रेम्णोऽन्यत्साधनं लोके नास्ति' इति **सर्वनिर्णयाच्च**[2] । गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति न्यायेन वाक्ये भक्तिर्मुख्या गृह्यते । ज्ञानं वा मुख्यं चतुःश्लोकीप्रोक्तं गृह्यते, भगवानेवाग्रे मध्ये पश्चाच्चेत्याकारकं, तयोरपि मार्गत्वात् । सर्वात्मभावो मुख्यभक्तिः । भजनानन्दः फलम् । श्रवणादिभक्तिमार्गो ज्ञानमार्गश्च तदपेक्षया गौणः । विशेषस्मृतिहेतुभिः संयोगविप्रयोगसाहचर्यादिभिः काव्यप्रकाशोक्तैर्वाच्योर्थः । तत्त्वज्ञानं तु भक्तिफलं, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इति वाक्योक्तम् । एवं सति दृष्टानुवादः[2] सुष्ठु संगच्छते इत्यलम् । अथवा दृष्ट एव स्नेह इत्युपपत्तेर्ज्ञानमेव भक्तिसाधकम् । अतस्तज्ज्ञानाय इत्यर्थः । तच्च शाब्दं माहात्म्यविषयकमैक्यविषयकं च ज्ञानमिति ज्ञेयम् । व्यापारीभूतभक्तिसाधकमित्यर्थः । यद्वा कर्मादिभ्य इति वेदपञ्चरात्रसांख्ययोगपाशुपतमतरूपपञ्चशास्त्रोक्तेभ्यः कर्मादिभ्यः । ज्ञानं त्रिविधम् । तथाहि । 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इति श्रुत्युक्तं सर्वात्मभावरूपम् । 'भक्त्या जानाति चाव्ययम्' इति श्रुत्युक्तम्, 'ब्रह्मविदाप्नोति परम्' इति श्रुत्युक्तं च । 'ब्रह्मविदाप्नोति परम्' इत्यत्र भक्तेर्व्यापारत्वं ज्ञानस्य व्यापारित्वमत एवकारः । प्रकृते । प्रेक्षा[3]वदिति सूक्ष्मदृष्टिमत्प्रवृत्तिसिद्ध्यर्थमित्यर्थः ।

१. भावना । २. दृष्टस्य सर्वनिर्णयवाक्यस्यानुवादः । ३. इत उपलभ्यते रश्मिकाराणां हस्ताक्षर लिखितो ग्रन्थः ।
४. पण्डित ।

अधिकारी तु त्रैवर्णिक एव। न हि वेदविचारस्य वेदाधिकार्यतिरिक्तः शक्यते कल्पयितुम्। न हि मन्दमतेर्वेदो नायातीति त्रैवर्णिके मतिमत्त्वमधिकारिविशेषणं कल्प्यते। अन्धपङ्ग्वादीनामिव कर्मणि, गृहाद्यासक्तस्य मननाद्यसंभवात् साक्षात्कारो न भविष्यति।

नच धर्मन्यायेन गतार्थत्वमस्य। अप्रतिज्ञानादनुपलब्धेश्च। न च जगत्कारणं परमात्मा वा प्रकृतिर्वा परमाणवो वेति संदेहे किंचिदधिकरणमस्ति।

भाष्यप्रकाशः ।

वाच्यानि। तत्रानन्तर्यपक्षे विचारितधर्मो वा शमादिमान् वाधिकारी प्राप्यते। अधिकारपक्षे तु तदप्राप्त्या शास्त्रस्यानर्थक्यप्रसङ्गः, सर्वाधिकारकत्वं वा स्यादित्याशङ्कायामाहुः **अधिकारी त्वित्यादि**। तथाच ब्रह्मणो वेदार्थत्वात् तद्विचारेऽधिकृते ब्रह्मजिज्ञासापदादेव तत्प्राप्तेर्न पूर्वोक्तो दोष इत्यर्थः। नन्वेवं त्रैवर्णिकाधिकारोपगमे तेषां सर्वेषामधिकारप्राप्त्या, शान्तो दान्त इति श्रुतिविरोधात् तत्संकोच आवश्यक इति शमाद्यानन्तर्यपक्ष एव श्रेयानित्यत आहुः **नहि मन्देत्यादि**। तथाच तत्र यथा मतिमत्त्वस्यार्थात् प्राप्तिस्तथात्राप्युपयुक्तस्य विशेषणस्य प्राप्तिरिति संकोचस्यानावश्यकत्वादधिकारो न दुष्यतीत्यर्थः। ननु यद्येवं स्याच्छ्रुतिः किमिति वदेदित्याकाङ्क्षायामाहुः **अन्धेत्यादि**। तथाच तेषां यथाज्यावेक्षणविष्णुक्रमक्रमणादिकरणाशक्त्या तत्कृतकर्मणो व्यङ्गत्वात् फलाजनकत्वं, तथैतदीयशाब्दज्ञानस्यापि व्यङ्गत्वात् साक्षात्काराजनकत्वमिति बोधयितुं फलोपकाराय वदति, आत्मन्येवात्मानं पश्येदिति। अतो विचारे स्वरूपोपकारार्थं शमाद्यनङ्गीकारेऽपि न श्रुतिविरोध इत्यर्थः। ननु यदि त्रैवर्णिकाधिकारेणार्थादध्ययनानन्तर्यसिद्ध्या तदर्थं वेदार्थभूतब्रह्मविचारः प्रतिज्ञात इत्यायाति तदा शास्त्रवैयर्थ्यापत्तिः। धर्मजिज्ञासेत्यत्र धर्मशब्दस्य वेदार्थमात्रोपलक्षकतया पूर्वतन्त्रन्यायेनैव वेदार्थज्ञानसिद्धेरित्यत आहुः **नचेत्यादि**। **धर्मन्यायेनेति** पूर्वमीमांसया। **अप्रतिज्ञानादिति** जैमिनिना ब्रह्मविचारस्याप्रतिज्ञानात्। **अनुपलब्धेरित्यस्यैव विवरणम्, न च जगदित्यादि**।

रश्मिः ।

प्राप्यत इति यथायथं रामानुजशंकराचार्यमते प्राप्यत इत्यर्थः। **तत्प्राप्तेरिति** त्रैवर्णिकाधिकारप्राप्तेर्गीतोक्तजिज्ञासुप्राप्तेश्चेत्यर्थः। अधिकारो नाम ब्रह्मानन्दज्ञातृत्वम्। 'मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः' इति श्रोतुर्विशेषणान्मतिमत्त्वम्। **'शान्तो दान्तः'** इति श्रुत्युक्तमित्यादिशब्दः तृतीयाध्याये विचारयिष्यते। **तत्संकोच** इति त्रैवर्णिकानामधिकारविशेषसंकोच इत्यर्थः। **तथा च तत्रेति** पूर्वतन्त्र इत्यर्थः। **अर्थादिति** ज्ञानिनो विधेयत्वेन भक्तस्य स्वतःसिद्धत्वेन शमादय इति तत्रैवोक्तम्। एवं चाक्षेपादित्यर्थः। **एवं स्या**दिति अनावश्यकत्वं स्यादित्यर्थः। **तेषां यथाज्येत्यादि**। इदं पूर्वतन्त्रे षष्ठे 'फलार्थत्वात्तु कर्मणः शास्त्रं सर्वाधिकारं स्यात्' इत्यधिकरणे चिन्तितम्। **व्यङ्गत्वादिति** भावनाद्यसंभवाद्व्यङ्गत्वाद् 'अनियमः सर्वासाम्' इत्यधिकरणे महन्माहात्म्यवत्यां भक्तेरन्वङ्गं साधनत्वोक्तेः साक्षात्कारो न भविष्यतीत्यर्थः। **न श्रुतिविरोध इत्यर्थ** इति दर्शनविधिशेषत्वात्तस्या इत्यर्थः। तथा च शमादिसहकृतमननादित्वेनात्मसाक्षात्कारत्वेन कार्यकारणभावः। विचारत्वेन शाब्दत्वेन च कार्यकारणभाव इति भावः। ननु मुख्यफलाभावे व्यर्थो विचार इत्याशङ्का तु अग्रे फलकामनाया अनुपयोगादिति भाष्य-

स्यादेतत्। अथातो धर्मजिज्ञासेति धर्मविचारं प्रतिज्ञाय नोदकवाक्यार्थस्य धर्मत्वमुक्त्वा प्रामाण्यपुरःसरं सर्वे संदेहा निवारिताः। तत्र ब्रह्मज्ञानस्यापि धर्मत्वम् 'आत्मेत्येवोपासीत' 'आत्मानं श्लोकमुपासीत' 'तद् ब्रह्मेत्युपासीत' 'आत्मा वा अरे द्रष्टव्यः' इत्यादिनोदनावाक्यार्थत्वात्। 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्' इति स्मृतेश्च। सृष्ट्यादिवाक्यानां त्वर्थवादत्वम्। आरोपाप-

भाष्यप्रकाशः।

एवमानन्तर्यपक्षे निरस्ते पूर्वमीमांसकोऽस्यास्त्रैवर्णिकाधिकारकत्वं सर्ववेदार्थज्ञानार्थत्वं च श्रुत्वा प्रत्यवतिष्ठते **स्यादेत**दित्यादि। यदि त्रैवर्णिक एवाधीतवेदोऽधिकारी, यदि च सर्ववेदार्थ एव ज्ञातुमिष्टस्तदा वक्ष्यमाणमेवाङ्गीकार्यमित्यर्थः। **प्रामाण्यपुरःसर**मिति औत्पत्तिकसूत्रे शब्दस्यान्यानपेक्षप्रामाण्यव्यवस्थापनपूर्वकम्। **सर्वे** इति शब्दस्वरूपविषयकास्तदर्थविषयकाश्च। ननूक्तं, जगत्कारणविचारो न कृत इति तन्निश्चायनार्थत्वान्न गतार्थत्वमिति तत्राह **सृष्ट्यादी**-त्यादि। तथाच पूर्वमीमांसकानां मते प्रवाहनित्यतोपगमेन जगतः स्वातन्त्र्यात् कर्तुरभावेनोपासना-

रश्मिः।

विवरणे स्वयमेवापाकरिष्यते। गतार्थत्वं निषिध्य बोधायनवृत्त्या परस्परानुपयोगं निषेधतीत्याशयेन भाष्यमवतारयामासुरेवमिति। **निरस्त** इति धर्मन्यायेन गतार्थत्वे निरस्ते इत्यर्थः। मीमांसक आधुनिको ज्ञेयः। **सर्ववेदे**ति जिज्ञासासूत्रे ब्रह्मशब्दादिति भावः। **प्रत्यवतिष्ठत** इति ब्रह्मजिज्ञासेत्यत्र वेदवाचकब्रह्मशब्दप्रयोगात् प्रत्यवतिष्ठते। तदुक्तं बोधायनवृत्तौ 'संहतमेतच्छास्त्रं जैमिनीयेन षोडशलक्षणेन' इति। अत्रार्थविचारेण ब्रह्मशब्दो वेदान्तपरो नतु वेदपर इति फलिष्यति। अतो वेदान्तानां विचार आरम्भणीयो न वा इति भाष्यस्य दुर्बोधत्वं न। वेदान्तशब्दं विहाय ब्रह्मशब्दस्तु सर्ववेदसूचकः। तेन 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इत्यादौ नाप्रतिज्ञातार्थत्वम्। 'समवप्रविभ्यः स्थः' इति सूत्रेणात्मनेपदम्। यदि च असंहतेभ्य एव परस्य स्थ आत्मनेपदं तदा तु 'प्रकाशनस्थेयाख्ययोश्च' इत्यनेनात्मनेपदम्। आशयं प्रकाशयतीत्यर्थः। पूर्वपक्षिणा पूर्वमाक्षिप्तमीमांसाद्वयस्य परस्परमङ्गाङ्गीभावं सिद्धान्ते प्रकाशयितुं 'संशय्य कर्णादिषु तिष्ठते यः' इत्यत्र स्थेयाख्ये, कर्णादीन् निर्णेतृत्वेनाश्रयतीत्यर्थात्। **औपत्तिकसूत्र** इति। 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धेस्तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति सूत्रे शब्दस्यार्थेन समं संबन्धः औत्पत्तिको नित्यः। तस्य प्रत्यक्षादिभिरनवगतस्याग्निहोत्रादिलक्षणस्य धर्मस्य निमित्तम्। कथं उपदेशो हि भवति, विशिष्टस्य शब्दस्योच्चारणमुपदेशः। अव्यतिरेको ज्ञानस्य। नहि तदुत्पन्नं ज्ञानं विपर्येति यच्च नाम ज्ञानं न विपर्येति न तच्छक्यते वक्तुम्। नैतदेवमिति तस्मात्तत्प्रमाणापेक्षत्वात् नह्येवं सति प्रत्ययान्तरमपेक्षितव्यं पुरुषान्तरं वा स्वयं प्रत्ययो ह्यसौ शुक्तिका रजतवत्प्रकाशते यतस्तेन हि प्रत्यक्षं व्यभिचरति तन्मूलत्वाच्चानुमानादीन्यपि। तत्रापरीक्ष्य प्रवर्तमानोऽर्थाद्विहन्येत। अनर्थं च प्राप्नुयात् कदाचिन्नैतदेवं यत्प्रत्यक्षं तन्न व्यभिचरति यद्व्यभिचरति तन्न प्रत्यक्षमिति। बादरायणग्रहणं बादरायणस्येदं मतं कीर्त्यते। बादरायणं पूजयितुं नात्मीयं मतं पर्युदसितुमित्यर्थाच्छब्दस्यान्यानपेक्षेत्यादि। **शब्दस्वरूपविषयका** इति। 'कर्मैके तत्र दर्शनात्' इत्यधिकरणे शब्दस्य नित्यताव्यवस्थापनात्तथेत्यर्थः। तत्र शब्दे प्रयत्नानन्तर्यदर्शनात्कर्म क्रिया तत्साध्यत इत्यर्थः। अनित्यतेति यावत्। इत्येके वदन्तीति सूत्रार्थः। **तदर्थविषयका** इति। आकृत्यधिकरणे आकृतिवाचकत्वव्यव-

वादविषयधर्मप्रतिपादकत्वेन विधेयोपासनाविषयस्तावकत्वात् ।

नच ज्ञानादीनामविधेयत्वं प्रमाणवस्तुपरतन्त्रत्वेनाकृतिसाध्यत्वादिति वाच्यम् । न हि सर्वात्मना असाध्यम् । प्रकारभेदस्त्वप्रयोजकः । सर्वस्यापि कारणेषु पुरुषव्यापृतिः । तदत्र वृत्तिसंपादने प्रमाणासंपादने वा पुरुषकृतिसाध्यत्वम् ।

भाष्यप्रकाशः ।

विषयस्यात्मनः प्रशंसार्थं क्वचित् कर्तृत्वमारोप्यते, अन्यत्र च तदपोद्यते । क्वचित् सर्वकामत्वादिकं प्रतिपाद्यते, अन्यत्रापोद्यते । यदि तद्वास्तवं स्यान्नापोद्येतेति तर्केणारोपापवादविषयो यः कर्तृत्वादिधर्मस्तत्प्रतिपादकत्वेन तेषां विधेयस्तावकत्वनिश्चयात् । सिद्धेऽर्थवादत्वे तेषां स्वार्थे तात्पर्याभावेन ब्रह्मणि विरुद्धधर्माधारत्वादिकल्पनस्याप्रयोजकत्वात् । तदर्थत्वेऽपि गतार्थत्वमित्यर्थः । ननूपासनावाक्यशेषाणामस्त्वर्थवादत्वं, न तु ज्ञानवाक्यशेषाणामपि । ज्ञानस्य प्रमाणवस्तुभ्यां जायमानत्वेन तदर्थं कृत्यपेक्षाभावेन तस्य विध्यर्थत्वाभावात्, कृतिसाध्यत्वस्यैव विध्यर्थत्वात् । नच तव्यविरोधः आवश्यकार्थेऽपि जायमानत्वात् । अतस्तच्छेषाणां स्तावकत्वाभावेन तद्विचारस्यावश्यकत्वान्नास्या गतार्थत्वमिति । शमाद्यानन्तर्यवादिनः शङ्कायामाह नचेत्यादि । आदिपदेनेच्छाप्रयत्नौ । तेन 'तदन्वेष्टव्यम्', 'तद्विजिज्ञासितव्यम्', 'मन्तव्यो निदिध्यासितव्यः' इत्यादीनां संग्रहः । तद् दूषयति नहीत्यादि । सन्निकर्षादिजनककृत्यपेक्षायास्तत्रापि सत्त्वात् तथेत्यर्थः । ननु तथापि कर्मवत् साक्षात्कृतिसाध्यत्वाभावात् कथं ज्ञानादीनां विधेयत्वमित्यत आह प्रकारेत्यादि । ज्ञानादेरविधेयत्वसाधनायैवं प्रकारभेदो यः कल्प्यते सत्वविधेयताप्रयोजको न भवति । यतो धर्मस्यापूर्वात्मकत्वेन तस्य सर्वस्यापि कारणीभूते क्रियाकलाप एव यत्नात्मा पुरुषव्यापारो दृश्यते, न तु साक्षात् । तत्तस्मादत्र ज्ञानादौ वृत्तिसंपादने बुद्धिजन्यायाः पदार्थान्तररूपाया बुद्ध्यवस्थाविशेष-

रश्मिः ।

स्थापनात्तथेत्यर्थः । **अयं ह्रीति** निश्चयेन । परो मीयते ज्ञायते येन तादृशो धर्मः स कः यद्योगः स च कर्मसु कौशलं ब्रह्मसेवारूपं भगवता स्वैश्वर्यस्य निर्विषयत्वपरिजिहीर्षया जीवाय दत्तं तेनात्मदर्शनं ब्रह्मबोधनमिति योजना, इदमवान्तरफलं मुख्यमन्यदिति, सिद्धान्तमुक्तावल्यां स्फुटम् । **क्वचिदिति** 'यतो वा इमानि' इत्यादावित्यर्थः । **आरोप्यत** इति अध्यस्यत इत्यर्थः । **अन्यत्रेति** निष्कलं निष्क्रियमित्यादावित्यर्थः । **क्वचिदिति** सर्वकाम इत्यादावित्यर्थः । **अन्यत्रेति** अकाम इत्यादावित्यर्थः । **विधेयस्तावकत्वेत्यादि** विधेया योपासना तद्विषयीभूतात्मस्तावकत्वनिश्चयादित्यर्थः । ननु न प्रतीतं निषेधामत आह **तदर्थत्वेऽपीति** । विरुद्धधर्माधारत्वार्थत्वेऽपि, अर्थवादत्वेन गतार्थत्वमित्यर्थः । **ज्ञानवाक्यशेषाणा**मिति । 'आत्मा वा अरे द्रष्टव्यः' इत्याद्युक्तानां ज्ञानानां वाक्यशेषा 'मैत्रेय्यात्मनो वा दर्शनेन श्रवणेन मत्या विज्ञानेन इदं सर्वं विदितम्' इत्याद्यास्तेषामित्यर्थः । **प्रमाणवस्तुभ्या**मिति इन्द्रियविषयाभ्यामित्यर्थः । **शङ्कायामाहे**ति शङ्कायां प्राप्तायां न चेत्यादिनिषेधमाहेत्यर्थः । **तथेति** सर्वात्मना असाध्यत्वाभावनिश्चय इत्यर्थः । तदित्यव्ययमित्याशयेनाहुः **तत्तस्मा**दिति । **वृत्तिसंपादने**ति पूर्वोक्तभाष्यं व्याकुर्वन्ति **बुद्धिजन्याया** इति । **पदार्थान्तरे**त्यादि । व्याख्यातमेतत् । सांख्यैराहंकारिके तत्त्वान्तररूपत्वमङ्गीक्रियते इति पदार्थान्तररूपायाः । तृतीयसुबोधिन्यनुसारेणाहुः **बुद्ध्यवस्थेति** ।

अन्यथा सिद्धान्तेऽपि मननादिशास्त्रवैफल्यापत्तेः। साधनप्रतिपादकश्रुतिविरोधश्च। येनापि सर्वक्रियाफलत्वं निराकार्यं तेनापि गुरूपसत्त्यादिना यतितव्यमेव ज्ञानार्थे। तस्माद् यत्रापि विध्यश्रवणं, तत्रापि विधिं परिकल्प्य तत्रत्यानां तच्छेषत्वं कल्प्यमिति, नार्थोऽनया मीमांसया। अन्यथा विरोधोऽपि।

स्यादेतत्। ब्रह्मविचार एवारम्भणीयो, न धर्मविचारः। सर्ववेदव्यासकर्त्रा वेदव्यासेनाकृतत्वात् तुच्छफलत्वाच्च। कल्पोक्तप्रकारेण निःसन्दिग्धं करण-

भाष्यप्रकाशः।

रूपाया वा तस्या उत्पादने प्रमाणसंपादने वा, 'आवृत्तचक्षुरमृतत्वमिच्छन्' इति, 'अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा' इत्यादिश्रुतेस्तादृशचक्षुरादिसंपादने वा तथात्वमिति, न ज्ञानादेरविधेयत्वमिति तव्योऽपि विधावेवेत्यर्थः। अविधेयत्वोपगमे दूषणमप्याह **अन्यथे**त्यादि। साधनप्रतिपादकश्रुतयस्तु, 'तपसा ब्रह्म विजिज्ञासस्व,' 'वसाऽपराणि पञ्च वर्षाणि,' 'शान्तो दान्तः' इत्याद्याः। तत्रत्यानामिति वाक्यानां ब्रह्मादिपदानां चेत्यर्थः। **अन्यथे**त्यादि विध्यकल्पने ऐक्यार्थाभावेन वाक्यभेदापत्तावैकशास्त्र्यविरोधः। अपिशब्दात् कर्मप्रतिपादनतन्निन्दनकृतो विरोधो वेदोऽखिलो धर्ममूलमित्यादिस्मृतिविरोधश्च संगृह्यते। अत्रैकदेशी वितण्डया प्रत्याह **स्यादेतद्ब्रह्मे**त्यादि। **सर्ववेदे**त्यादि। तथाच जैमिनिस्तच्छिष्यः सामगो, न सर्वज्ञ इति तदुक्तं न प्रमाण-

रश्मिः।

तस्या इति वृत्तेर्नयनान्तरभूतायाः। नैयायिकास्तु नयनकिरणानां निर्गतेन न विषयसंनिकर्षाज्ज्ञानं तेन यावता संस्काराख्यं गुणान्तरं चरमस्मृतिनाश्यमात्मन्यङ्गीकुर्वन्तो वृत्तिपदार्थमेव नेच्छन्ति। **प्रमाणसंपादने**ति भाष्यमिदं अग्रे व्याख्यातम्। **तथात्व**मिति परंपरया कृत्यसाध्यत्वम्। भाष्ये **अन्यथे**त्यादि परंपरयापि कृतिसाध्यत्वाभावे। द्रष्टव्य इति उपक्रम्य पठितस्य युक्तिभिरनुचिन्तनरूपमननादिशास्त्रस्य वैफल्यापत्तेरित्यर्थः। श्रवेणेनैव दर्शनाङ्गीकाराद्विरोध इति प्रोक्तम्। स्वयमर्थवादत्वस्य विधिवाक्यातिरिक्तेऽङ्गीकारादपिपदम्। **येनापि सर्वक्रियाफलत्व**मिति। शब्दमात्रेण साक्षात्कारमङ्गीकुर्वतापि वैयाकरणेनापीति वा सर्वविधिव्यापारसाध्यत्वमित्यर्थः। **यतितव्य**मिति तथा चानिच्छतापि अनुभवबलात्परंपरया कृतिसाध्यत्वं स्वीकार्यमिति भावः। अन्यथासिद्धत्वं तु नैयायिकमते न तु मीमांसकमते 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते'। **यत्रापी**ति। 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इत्यत्र विधिश्रवणेपि यत्र मैत्रेयीब्राह्मणे 'आत्मा वा अरे द्रष्टव्यः' इत्यादौ तत्रापि तव्यादिं विधावङ्गीकृत्य 'न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति' इत्यादीनामर्थवादत्वम्। आत्मा यत्र प्रियः किमुत वाच्यमात्मनोऽपि आत्मा प्रिय इति प्रियत्वाच्छीघ्रफलदाता स श्रोतव्य इत्येवं तत्रत्यानां तच्छेषत्वं विधिशेषत्वं कल्प्यमित्यर्थः। प्रकृते, **ऐकार्थ्याभावेने**ति। उभयोर्मीमांसयोरित्यर्थः। तथा चायं मीमांसकत्वोक्तिं न संगच्छतीत्यर्थः। संहतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति बोधायनसूत्रात्। **तन्निन्दने**ति कर्मविच्छेदकस्य निन्दनं दुर्ब्राह्मणत्वादिरूपं तत्कृत इत्यर्थः। अत्र तत्पदं कर्मपरामर्शविच्छेदकं लक्षयति। **अत्र वितण्डये**ति वादभेदेन स्वपक्षदोषमनुद्धृत्य परपक्षदोषदानरूपेण प्रतिकूलमाहेत्यर्थः। **सामग** इति 'सामगो जैमिनिः कविः' इति वाक्यादि-

संभवाच्च । आचारपरंपरयापि करणसम्भवाच्च । एतर्ह्यपि संदेहे सूत्रभाष्ययाज्ञिकानामेवानुवृत्तिः क्रियते, न मीमांसकस्य । तस्मात् साङ्गवेदाध्येतुर्निःसंदेहकरणसंभवान्न पूर्वयाऽपि कृत्यम् ।

किंच परमकृपालुर्वेदः संसारिणः संसारान्मोचयितुं कर्माणि चित्तशुद्ध्यर्थं बोधितवानिति कूपेऽन्धपातनवदप्रामाणिकत्वमिथ्यावसीयते । विपरीतबोधिका तु पूर्वमीमांसा तस्मादपि न कर्तव्येति ।

मैवम् । किं विचारमात्रं न कर्तव्यं, पूर्वकाण्डविचारो वा । नाद्यः । तुल्यत्वात् समर्थितत्वाच्च ।

द्वितीये सामान्यन्यायेन संदेहे निवार्ये लक्षणवत्तदुपयोगः । अनिष्टतया निरूपणं न मीमांसादोषः । किंतु विचारकाणां स्वभावभेदात् ।

भाष्यप्रकाशः ।

मित्यर्थः । उपासनायामप्यनुपयोगमाह **आचारे**त्यादि । **सूत्रभाष्ये**ति कल्पसूत्रभाष्येत्यर्थः । **पूर्वयापी**त्यत्रापिशब्दः पूर्वपक्षिगर्हार्थः । शेषमतिरोहितार्थम् ।

एवं केवलवैदिकरीत्या विचारे आक्षिप्ते पूर्ववादी समाधत्ते **मैवमि**त्यादि । पूर्वयापि न कृत्यमिति न वक्तव्यम् । कुत इत्याकाङ्क्षायामपिशब्दस्य समुच्चायकत्वं मन्वानः पक्षद्वयं विकल्प्य प्रथममुभयनिषेधाभावे हेतू आह **तुल्यत्वा**दिति । 'यत्रोभयोः समो दोषः' इति न्यायेन परिहारसाम्यात् तवापीष्टसिद्धेरभावेन दूषणसाम्याद्वा, अप्रतिज्ञानादित्यादिभिस्त्वया समर्थितत्वाच्चेत्यर्थः । **सामान्यन्यायेन संदेह** इति 'अक्ताः शर्करा उपदधाति,' 'निर्मन्थ्येनेष्टकाः पचन्ति'इत्यादौ घृततैलवसानां चिरनिर्मथिताऽचिरनिर्मथितप्रभृतीनां चाञ्जनपाककरणयोग्यतादेः सामान्येन जाते संदेहे । ननु तुच्छफलत्वान्नोपयोग इत्युक्तं तत्राह **अनिष्टतये**त्यादि । **स्वभावभेदा**दिति

रश्मिः ।

त्यर्थः । **अनुपयोग**मिति चतुर्लक्षण्या अनुपयोगमित्यर्थः । **पूर्वपक्षी**ति उभयोः करणाक्षेपाद्याद्यसंदेहयोरभावानिवृत्तिभ्यां तथेत्यर्थः । भाष्ये **कूपेऽन्धपातन**वदिति । कूपेन्धपातनवद्विषयेषु विषयिपातनादप्रामाणिकत्वं तत्संबन्धिनी भीस्तया परमकृपालुरित्याद्यवसीयते इत्यर्थः । प्रकृते । **केवलवैदिके**ति श्रुत्वा केवलवैदिकरीत्या । केवलवैदिकस्य रीतिः पूर्वमङ्गीकृता इति । अपिशब्दस्य न पूर्वयापि कृत्यमित्युक्तं तत्रत्यापिशब्दस्येत्यर्थः । **यत्रोभयो**रिति ।

'यत्रोभयोः समो दोषः परिहारश्च तत्समः ।
नैकः पर्यनुयोज्यः स्यात्तादृगर्थविचारणे ॥'

इति न्यायेनेत्यर्थः । तथा च तव पूर्ववादिनोपि विचाराकर्तव्यतापत्तिः 'स्वाध्यायोऽध्येतव्यः' इति श्रुतिविरोधादिति तु नोक्तम् । पुनः पूर्वोक्तयोरुभयत्र मण्डनखण्डनयोः प्राप्तेः । **समर्थितत्वाच्चे**ति उभयोः समर्थितत्वाच्चेत्यर्थः । **निर्मन्थ्येने**त्यादि । पूर्वतन्त्रे प्रथमस्य चतुर्थे तथा निर्मन्थ्येत्यधिकरणे चिन्तितम् । निर्मन्थ्यपदं वह्नित्वे रूढं यौगिकं योगरूढं वेति संशये निष्पन्नाग्नौ योगव्यभिचारः तदानीं निर्मन्थनकर्माभावात्, भूतपूर्वयोगस्यापि प्रतिक्षणमन्यान्यत्वाद्वह्नौ प्रवृत्त्यसामर्थ्यं, निर्मन्थननिष्पन्नस्याग्नेस्तदैव नाशात् आकृतेस्त्वव्यभिचाराद्रूढमिति प्राप्ते लौकिकनिर्मथनेन

---

१. द्वादशलक्षण्या ।

किंच । आवश्यकत्वादपि । निवृत्तानामपि यागादिज्ञानस्यावश्यकत्वं चित्तशुद्ध्यर्थत्वात् । परमाश्रमभेदेन प्रकारभेदः कायिकादिभेदात् । तत्राद्यस्य वाचिको द्वितीयतृतीययोः कायिकश्चतुर्थस्य मानसिक इत्याश्रमिणाम् । तस्मादेकेनैव चरितार्थत्वात् किं द्वितीयेनेति प्राप्ते । उच्यते । उपासनाया धर्मत्वेऽपि न ब्रह्मणो धर्मत्वं ज्ञानरूपत्वात् । धर्मस्य च क्रियारूपत्वात् ।

भाष्यप्रकाशः ।

'तेषां प्रकृतिवैचित्र्यात्'इत्येकादशस्कन्धीयवाक्योक्तरीतिकात् तस्मात् । अनुपयोगरूपं दूषणमुत्तरमीमांसायां हृदि कृत्वाह किंचेत्यादि । आवश्यकत्वं विवृणोति निवृत्तेत्यादि । तथाच त्रैवर्णिकाधिकारपक्षे शास्त्रवैयर्थ्यस्यापरिहार्यत्वात् तद्विहाय पूर्वतन्त्रमेवादरणीयमित्यर्थः ।

अत्र समादधते उच्यते । उपासनाया इत्यादि । त्रैवर्णिकाधिकारपक्षे स्यातां ब्रह्ममीमांसाया गतार्थत्वानुपयोगौ, यद्युत्तरकाण्डस्य मुख्यतयोपासनारूपधर्मप्रतिपादकत्वं स्यात् । तदेव तु न । किंतु ब्रह्मप्रतिपादकत्वं, ब्रह्मण एव सर्ववेदार्थत्वात् । 'सर्वे वेदा यत्पदमामनन्ति,' 'वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे', मां विधत्तेऽभिधत्ते माम्' 'इत्यादिवाक्येभ्यः । किं बहुना, धर्मोऽपि ब्रह्मात्मकत्वेनैव प्रतिपाद्यः' । 'धर्मो यस्यां मदात्मकः' इति वाक्यात् । जैमिनिस्तु पुरःस्फूर्तिक-

रश्मिः ।

चिरमथनेन च उत्पन्नमग्निं निषेद्धुं पङ्कजपदवद्योगरूढम् । नावनीतवत् । यथा घृतं प्राचीनं नवं च नवनीतोत्पन्नमपि नवमेव नावनीतत्वेनोच्यते । चिरनिर्मन्थितस्त्वाधानकाले निर्मन्थ्य गार्हपत्ये धृतो वह्निः अलौकिकमथनेन सद्यः संभूतोचिरनिर्मन्थितः । भूतपूर्वमपि योगं निमित्तीकृत्य प्रयोग इति । अत्र प्रभृतीनामित्यारभ्य आदिशब्दान्तस्य किं प्रयोजनमिति चेच्छृणु । अनेककोट्यवगाहिज्ञानस्य संशयत्वेन विवक्षितत्वात्प्रभृतीनामित्युक्तम् । तथा च चिरनिर्मथिताचिरनिर्मथितवह्निवह्नित्वलौकिकालौकिकभेदभिन्नानां च । एतेषां संदेह इत्यनेनान्वये विषयत्वं घृतादीनां स्यात्तदविवक्षितं, किंतु तत्संबन्धि अञ्जनं च पाककरणं च तयोर्योग्यतादिशब्देन भावस्तयोः संदेहविषयत्वं विवक्षितं तदाहुरञ्जनेत्यादि । तेषामञ्जनादियोग्यतादेः संदेहे जात इत्यन्वयः । घृतं वसा तैलं वेत्यादयः संदेहाकाराः । अत्र दूरत्वस्थानापन्नमाहुः **सामान्येने**ति । यथा स्थाणुर्वा पुरुषो वा इत्यत्र दूरत्वं तथात्र समानत्वं संदेहकारणं, भाष्ये तु सामान्यं न करणं ज्ञानिनामखण्डब्रह्मभाने तस्य घटपटादिसाधारण्यादतो विचारे सखण्डब्रह्मभाने सामान्यस्य यो न्यायो रीतिस्तेन न्यायेनेति करणत्वोपपादनम् । भाष्ये **लक्षणव**दिति उक्तार्थमेतत् । प्रकृते । **आहे**ति उपयोगमाहेत्यर्थः । **शास्त्रवैयर्थ्यस्ये**ति उत्तरमीमांसावैयर्थ्यस्येत्यर्थः । भाष्ये । **एकेने**ति पूर्वकाण्डविचारेणेत्यर्थः । प्रकृते । **गतार्थत्वे**ति । गतः पूर्वमीमांसया प्राप्तः अर्थः उपासनारूपः यया । यज्ञाद्युपासनायाः मनोव्यापाररूपाया उप समीपे स्थित्वा यथायोग्यकरणरूपाया वा पूर्वया प्राप्तत्वात् । उपासनायाः पूर्वमीमांसायां स्वमते शेषे वेदरूपसंकर्षणे प्रतिपादके विषयिणीत्वात् । 'स सर्पानसृजत' इति तृतीयाष्टके 'तस्मात् समानाः प्रजाः प्रजायन्ते' इति संहितायाम् । अतो नोपासनायां प्रतिपाद्यवृक्षपक्षिवृषभाणां विषयताप्रतिपादकत्वरूपेण मुख्याब्रह्मत्वेपि कृष्णाजिनं ब्रह्मेति संहिता । कृष्णाजिनस्य शेषत्वं दृष्टम् । अत उपासनायां ब्रह्ममीमांसाया अनुपयोगः । **मुख्यतये**ति । विषयत्वाभावादिति भावः । **किंतु ब्रह्मे**ति । विषयत्वेन मुख्यत्वादिति भावः । **पुरःस्फूर्तिक**मिति यथा 'यत्पत्यपत्यसुहृदा-

भाष्यप्रकाशः ।

मेवोवाचेति न दोषः । ब्रह्म च न शारीरमात्रं, येन सृष्ट्यादिवाक्येषु वाचो धेनुत्ववत् तस्मिन् जगत्कर्तृत्वादीनामसंभवतां धर्माणामारोपापवादादिभिर्विधेयोपासनाविषयस्तावकतयोपासनाशेषता संभवन्ती गतार्थत्वानुपयोगौ दृढीकुर्यात् । किंचोपासनाविषये आत्मनि निरङ्कुशजगत्कर्तृत्वादयो ये धर्माः स्तुत्यर्थमारोप्यन्ते, ते किमत्यन्तासन्तः खपुष्पवद्, उत क्वचित् सन्तो रजतवत् । तत्राद्ये आरोप एव बाधितः । द्वितीये तु सिद्धमतिरिक्तेन ब्रह्मणा । तच्च पूर्वकाण्डे परोक्षवादत्वान्न स्फुटं प्रतिपादितमिति तत्प्रतिपादकमुत्तरकाण्डं न धर्मप्रतिपादकम् । अत उपासनाया धर्मत्वेऽपि नोत्तर-मीमांसाया गतार्थत्वमित्यर्थः । नन्वस्त्वेवं, तथापि सृष्ट्यादिवाक्यानां विधिमन्त्रादिरूपत्वाभावा-दर्थवादत्वमेव वक्तव्यम् । ततश्च ब्रह्मस्तावकत्वात् तेषां न स्वार्थे प्रामाण्यमिति तद्विचारशास्त्रस्य

रश्मिः ।

मनुवृत्तिरङ्ग' इति श्लोकोक्तो धर्मः । अत एव धर्मजिज्ञासां चकार न तु कर्मजिज्ञासाम् । 'देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' इति संहितोक्तत्वेपि निरोधलक्षणग्रन्थोक्ताधिदैविकश्रवणादिरूप-मर्यादासेवात्वेन श्रुत्यधिकारिधर्मत्वात् । यथा 'अस्त्वेवमङ्ग उपदेशपदे त्वयीशे' इत्युक्त्वा 'श्रेष्ठो भवान् तनुभृतां खलु बन्धुरात्मा' इति श्रुत्यधिकारि यद्वाक्यं तदुक्तो धर्म आधिदैविकः । तथा च यथा 'धर्मं चर' इत्याचार्योपदेशेन भक्ता अपि भगवद्वाक्यानि पूर्वपक्षयाञ्चक्रुस्तथाचार्योपदेशेन धर्मजिज्ञासां चकार । कर्मणस्तूक्तस्य सर्वानधिकारान्मुख्यत्वेऽपि कर्मणे न कर्मजिज्ञासा इत्युवाच । अग्रे 'कर्मैके तत्र दर्शनात्' इति सूत्रं चकार । तथा चाध्यात्मिकमेवोवाचेत्यर्थः, आध्यात्मिकस्तु 'धर्मः प्रोज्झितकैतवोऽत्र' इति वाक्यादेकादशैकोनविंशाध्यायोक्तश्रवणादिसरणिरूपो धर्मः । **गते**ति । ब्रह्ममीमांसा यतः । **बाधित** इति । तादृशस्यादर्शनादिति भावः । **अतिरिक्ते**नेति सद्ध-र्माश्रयस्य वक्तव्यत्वात्तथेत्यर्थः । **परोक्षवादत्वा**दिति 'परोक्षवादो वेदोयम्' 'परोक्षं च मम प्रियम्' 'परोक्षप्रिया इव हि देवाः' इति वाक्यनिकुरम्बात् । **न धर्मप्रतिपादक**मिति । अपूर्व-प्रतिपादकं नेत्यन्ये । सिद्धान्ते धर्मस्यैव फलपर्यन्तावस्थानोपगमात् । एतदेवाग्रे पूर्वखण्डने स्फुटि-ष्यति । तथाचोक्तम्—

'किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
एतस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥
मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् ।
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ॥
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' ॥ इति

नच वेदो मां स्वव्यापारावधिं कृत्वा भिदां मायामात्रमित्यनूद्य 'नेह नानास्ति किंचन' इति प्रतिषिध्य भेदं, प्रसीदति निवृत्तव्यापारो भवतीति निरुणद्धि इति वाच्यम् । सर्वसामर्थ्यस्य ब्रह्मणो मायाकृतां विपर्यस्तबुद्धिकृतां नेदं ब्रह्मकार्यमित्याकारिकां भिदामनूद्य प्रतिषेधति कार्यभावात्पूर्वं रूपं वक्तीत्येकदेशिनः । विरुद्धसर्वधर्माश्रयस्य आनन्दस्य प्रतीयमानां भिदां मायामात्रं क्रीडार्था माया या मुख्या शक्तिस्तन्मात्रं, नतु आविद्यकमित्यनूद्य प्रतिषेधति । ब्रह्मैव सर्वं, भेदो बुद्धिदोषाद्भातीति सिद्धान्तः । प्रकाशाश्रयाधिकरणे स्फुटमिदम् । न च मायाविद्ययोरेकीभाव इति सांप्रतम् । 'विद्य-याऽविद्यया शक्त्या मायया च निषेवितम्' इति वाक्येन भेदावगमात् । भाष्ये । **ज्ञानरूपत्वा**दिति

रश्मिः ।

क्रियारूपत्वखण्डने तात्पर्यादेवमुक्तम्, आनन्दस्यैव त्रिषु मुख्यत्वात् । न च द्वैतापत्तिः । द्वैतं हि द्वयोर्भाव उच्यते 'प्रज्ञादिभ्यश्च' इत्यणा, ब्रह्मैव सर्वमिति क्व द्वौ । न ह्येकस्मिन्दीपे द्वाविति प्रतीतिरस्ति । तदुक्तम्—

'कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत् ।
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते' ॥ इति सप्तमस्कन्धे ।

यदपि द्वयोर्भावो द्विता तत्र भवं द्वैतं संशयरूपं ज्ञानं, द्वाभ्यामितं प्रकारद्वयेन विरुद्धत्वाद्भिन्नाधारवर्तिना युक्तं वस्तु द्वीतं तत्र भवं द्वैतं तदेव संशयज्ञानमिति कैयटानुरोधे त्वद्वैतं संशयाभावः । अतश्च ब्रह्मैव सर्वमिति निश्चय इति तदप्यविरुद्धम् । अथवा यथाश्रुतोर्थः एकादशस्कन्धे सांख्यनिरूपणे स्फुटत्वात्, भाष्ये तु स्तुत्यानन्द आनन्दमये विश्रान्त इत्यदोषः । तत्र ज्ञानं दशधा इति तृतीयसुबोधिन्यां 'अथ ते तदनुज्ञाता' इत्यत्र निरूपितम् । एतच्च ज्ञानं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेर्ब्रह्मात्मकम् । तल्लक्षणं तु 'त्रितयं तत्र यो वेद स ह्यात्मा स्वाश्रयाश्रयः' इति वाक्ये आधिदैविकादित्रिकव्यतिरिक्तत्वे सति तत्त्रितयज्ञातृत्वमिति सिध्यति । स्वाश्रयश्चासौ आश्रयः इति कर्मधारय एवोद्देश्यविधेयभावात्स्वरूपकथनपूर्वकं लक्ष्यनिर्देशः, तच्च भावनयाभिव्यज्यते 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः' इति श्रुतेः । जीवानामपि अत्रैवाभिनिवेशः सजातीयत्वात् । तद्गुणोऽपि चैतन्यं तत्रैव निविशते तदविनाभूतत्वात् 'जीवस्यानुस्मृतिः सती' इत्युत्तरार्धे तत्स्वरूपमुक्तम् । पूर्वापरानुसंधानरूपा स्मृतिश्चैतन्यमिति । व्युच्चरणात्पूर्वमभेदेन, व्युच्चरणोत्तरमविद्यासंबन्धात्प्राक्कालवर्तिनो ज्ञानस्य सोहमिति पूर्वापरानुसंधानरूपस्यैव सिद्धत्वात् तत्त्वमस्याद्युपदेशोत्तरमपि तथैव प्रतिसंधानादजपायामपि तथात्वात्तादृशत्वनिश्चयः । अयमेव स्वरूपलाभो विद्यया संपाद्यः विस्मृतकण्ठमणिन्यायात् । तथापि नित्यम् । 'सत्त्वशुद्धौ ध्रुवा स्मृतिः' इति श्रुतेः । पूर्वोक्तमेव ज्ञानं धर्मात्मकप्रकाशरूपेणाविर्भवद् भगवद्गुणतां श्रयति सूर्यप्रकाशवत् । तदनित्यमपि 'तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात्' 'युक्तं भगैः स्वैरितरत्र चाध्रुवैः' इत्यादिवाक्येभ्यः । चैतन्यमप्यत्रैव वा निविशते इति द्वितीयं, तृतीयं तु वेदशरीरं दधद्भवति ।

'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥'

इत्येकादशस्कन्धात् सृष्ट्यै भगवन्मनोमयादिसरण्या दधाति, तथाहि ब्रह्मणो हृदयाकाशे स्वयं ब्रह्म आसन्येन करणतामापन्नेन नादरूपं दधदाविर्भवति, तदुक्तं घोषेण गुहां प्रविष्टः इत्यन्तेन । स पूर्वमव्यक्त एव ततो नानावर्णादिसंकल्पकमनोमयं सूक्ष्मरूपमुपेत्य ब्रह्ममुखतः प्रकटः सन्मात्रास्वरवर्णात्मना स्थूलरूपेण शब्दब्रह्मात्मकवेदरूपश्चकास्ति । स च नादोऽस्मदादिष्वपि प्राणघोषरूपेण वर्तते व्यापकत्वात्, श्रावणस्तदनुभवस्तु श्रोत्रवृत्तिनिरोधसंपाद्यो भगवतैव कृत्वा जीवेन । नान्यः प्रकारः श्रावणे जीवानुभवे । जीवानुभवस्तु भगवतेति निरुद्धद्वारनिष्ठजीवो न कार्यं करोतीति । अयमेव नादः स्फोट इत्युच्यते स्फुटति वागनेनेति व्युत्पत्तेः । तदुक्तम्—

१. अनुभवजन्यत्वेऽपि ।

रश्मिः ।

'समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः । हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥
शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् । येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥
स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः । स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम्' ॥ इति ।

तेन स्फुटत्यर्थोऽनेन इति स्फोट इति वैयाकरणोक्तं प्रत्युक्तम् । नैयायिकास्तु स्फोटं नाद्रियन्ते । तथा हि । घट इत्युक्ते घकाराकारटकाराकारविसर्जनीयैरर्थप्रत्ययाभावाद्वर्णानां क्रमिकत्वेन पदवाक्यरूपवर्णसमुदायाभावेन ततोऽप्यर्थाप्रत्ययात्पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतान्तिमवर्णादप्यनेकादृष्टसंस्कारकल्पनागौरवग्रस्तादर्थप्रत्ययाभावाद्वर्णाभिव्यङ्ग्योऽतिरिक्तः स्फोटाख्यः शब्दार्थं प्रत्याययति । एवं पदस्फोटो वाक्यस्फोटश्च । इति प्राञ्चो वैयाकरणाः । आधुनिकास्तु स एवायं घकार इति प्रत्यभिज्ञाबलाद्वर्णरूपः स्फोटः तथा पदवाक्यस्फोटावपि । न चेयमेकार्थबोधकत्वमवलम्बत इति शङ्क्यम् । जलाहरणादिरूपैकार्थजनकत्वस्य सोऽयं घट इत्यादौ शक्यवचनत्वादिति मन्यन्ते तन्न, तादृशसहकारिसंपन्नोऽन्तिमवर्ण एव वाचक इति स्फोटकल्पनायामपि गौरवतौल्याच्च । अपि च वर्णव्यङ्ग्यो यत्किंचिद्वर्णव्यङ्ग्यो वा तावद्वर्णाभिव्यक्तिव्यङ्ग्यो वा नेमौ । क्रमिकाणामाशुविनाशिनां यौगपद्यासंभवात् घकारमात्रोच्चारणे पदस्फोटप्रत्ययेऽर्थप्रत्ययापत्तिवर्णान्तरवैकल्याभ्यां तदसंभवाच्च । अथ पूर्ववर्णसंस्कारसहितचरमवर्णोपलम्भः तद्व्यञ्जक इति उच्यते तर्हि स एवार्थप्रत्यायकोऽस्तु कृतं स्फोटेन । न च पदप्रतीतिः स्फोटसाधिका तावद्वर्णगोचरप्रत्ययाभावेपि तावद्वर्णगोचरसंस्कारात्समूहालम्बनतावद्वर्णगोचरस्मरणसंभवात्क्रमविशेषवत्तावद्वर्णगोचरत्वेन स्फोटासाधकत्वात् । नहि वर्णमात्रं पदं सरोरसयोः नदीदीनयोः अविशेषापत्तेः । किंतु आनुपूर्वीविशेषाविशिष्टतावद्वर्णरूपम् । नचाप्रत्ययः घोत्तरं शृणोमीति प्रत्ययात् घोत्तरत्वं हि टस्यानुपूर्वीति । ततः सृष्टिश्च 'शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्' इति सूत्रभाष्ये स्फुटिष्यति । तादृशशरीरयुक्तमपि रूपं 'अनन्ता वै वेदाः' इति तैत्तिरीयब्राह्मणश्रुत्या अनन्तं विराडिव । तुरीयं तु इदमेव शरीरविशिष्टं भगवदाश्रितमेव पाश्चात्त्यां विश्लिष्टशक्तिमापद्य व्यष्टय इव विकृतास्तत्रासकरवालेत्यादिरूपाः सर्वे शब्दा भवन्त्यादिसृष्टौ । तथा हि पूर्वोक्तो नादः सुषुम्णामार्गेण आधारहृत्कण्ठमुखेषु संचरन् परापश्यन्तीमध्यमावैखरीरूपेणाविर्भवतीति । एतत्प्रामाण्योपपादनावसरे स्फुटमुपपाद्यम् । एतच्चतुर्विधं नित्यम् । ततः तादृशवेदविकृतशब्दात्मकद्विविधशरीरविशिष्टमेव तल्लोके प्रकटीभवितुं समवायित्वेन प्रमातारं निमित्तत्वेन प्रमेयं चाश्रयते । न च प्रमाणविरहः शङ्कनीयः । पश्यन्त्याख्यशब्दावस्थाबोधकश्रुतिसद्भावात् । 'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति' इति श्रुतिः । आधारनाभिहृदयवदनरूपाणि चत्वारि पदानि स्थानानि । तत्र परापश्यन्तीमध्यमावैखरीरूपाश्चतस्रः शब्दावस्थास्तासु त्रीणि परापश्यन्तीमध्यमाख्यानि गुहायां निहितानि । अतः नेङ्गयन्ति न जानन्ति, तुरीयं वैखर्याख्यं अत एव केषांचित् ।

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते' ॥ इति ।

प्रमेयाश्रयत्व तु ज्ञानस्य शब्दानुविद्धत्वाच्छब्दस्य च नित्यमर्थसंबद्धत्वाच्छब्दविशिष्टस्यैव,

नचार्थवादानां धर्म इव ब्रह्मण्युपयोगः कर्तुं शक्यः। उत्पत्तिप्रकारफल-

भाष्यप्रकाशः।

कोपयोग इत्यत आहुः नचेत्यादि। स्यात् स्वार्थे अप्रामाण्यं, यदि कर्मणीव ब्रह्मण्युपयुज्येरन्। कर्मणि हि त्रेधा तेषामुपयोगः। यथा, असावादित्यो न व्यरोचतेत्यादीनां सौर्याद्युत्पत्तौ।

रश्मिः।

तादृशानुव्यवसायाकारात्। परमत्र शब्दोऽर्थश्च न्यग्भूतो भासते, पूर्वत्र तु ज्ञानं न्यग्भूतमिति विशेषः। न च अनेडमूकीयज्ञानस्य शब्दावैशिष्ट्यमिति शङ्क्यम्। अभिनयस्यैव तत्र शब्दस्थानापन्नत्वेन शब्दविशेषमनुसंधायैव बोधकेनाभिनयदर्शनात्परंपरया तस्यापि शब्दवैशिष्ट्यात्। इदं पञ्चमम्। प्रमातरि तु अन्तःकरणेन्द्रियाश्रयणात्पञ्चधा तत्रेन्द्रियेष्वेकधा, अन्तःकरणे चतुर्धा। मनसा जायमानं संशय इति व्यवह्रियते। संकल्पविकल्पात्मकत्वात्तस्य। अत एव शङ्कापिशाच्या उत्तरोत्तरं भिन्नभिन्नविरुद्धकोटिविधायिन्या अनिवृत्तिः। कथं तर्हि आत्मानं गृह्णाति इति चेद्दौरात्म्यनिवृत्तौ प्रमास्यति। अहंकारेण कृता शरीराभिमतिस्तु बुद्ध्याश्रया। विपर्यासनिश्चयस्मृतीनां बुद्धिवृत्तित्वा-द्बुद्ध्याश्रयत्वम्। यदा तु शरीराभिमतिर्मोक्षशास्त्रीयसाधनैर्नाशमेति तदा तन्मूलास्तेऽपि नश्यन्ति। ज्योतिर्ब्राह्मणे आत्मज्योतिष्ट्वमुपक्रम्य स समानः सन् इति अहंकारसमानत्वेन सधियः स्वप्नात्मक-बुद्ध्यवभासकतया स्वप्नात्मकत्वादहंकारो बुद्ध्या सहितः स्वापं पश्यतीति स्वप्नज्ञानमहंकाराश्रयम्। चित्तं तु सुषुप्तावात्मानं पश्यत्यैक्येन अन्यदा तु लीनमिति निर्विषयं ज्ञानं चित्ताश्रयमेवं दशधा। तदिदं षड्विधं जन्यमन्तःकरणधर्मः 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भी-रित्येतत्सर्वं मन एव' इति श्रुतेः। स्थिरं च घटादिवत् न च त्रिक्षणावस्थायित्वम्। 'प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते,' 'स्थिरबुद्धिरसंमूढः,' 'ज्ञानं यथा न नश्येत' इत्यादिवाक्येभ्यः। न चैकज्ञानं सार्वदिकं स्यादिति शङ्क्यं, विषयान्तरज्ञानसामग्र्या जातेन ज्ञानेन तद्बाधात्। नचैव-मस्थिरत्वं शङ्क्यं, संस्काराख्यसूक्ष्मरूपेणावस्थानोपगमात्। न चैवमनुव्यवसायापत्तिस्तस्येति वाच्यम्। व्याप्तस्यापि गन्धस्य घ्राणेन ग्रह एव स्फुरणवन्मनसा तस्य ग्रहण एव स्फुरणात्। न च गन्ध-स्यागन्तुकत्वेन दृष्टान्तासाम्यमिति वाच्यं, रजसा व्यापारान्तरावेशेनोपपत्तेः। तमसा तदावरणाच्च तथा। न चैवं स्मृत्यजनकस्याप्यनुभवस्य स्थिरत्वापत्तिः। इन्द्रियैर्बुद्धिजननोत्तरं पौनःपुन्याद्यभावेन अदार्ढ्यात्, ज्ञानस्य तु लोकशास्त्राहितात्तित्सिद्धिः। न चाधिष्ठानानिर्वाच्यता प्रयुक्ता तत्स्थित्यशक्य-वचनेति वाच्यम्। अन्तःकरणाधिष्ठानकत्वात्। अनिर्वचनीयत्वस्य निरस्तत्वात्। विरुद्धवृत्ति-तिरोभाव्यत्वाङ्गीकारान्न तन्नाशानुपपत्तिरिति प्रासङ्गिकं ज्ञेयम्। प्रकृते। **विधिमन्त्रादी**ति। **आदिना** ब्राह्मणम्। **यथाऽसावि**त्यादि। न व्यरोच्यत मेघाद्याच्छन्नोसावादित्यो न विगतदीप्तिमान्जात इति 'सौर्यं चरुं ब्रह्मवर्चसकामो निर्वपेत्' इति सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः इत्यस्योत्पत्तौ सौर्य-प्रथमज्ञस्यैव तज्जनकवाक्यस्योपयोग इत्यर्थः। इदं पूर्वतन्त्रे सप्तमस्य चतुर्थे पादे 'इतिकर्तव्यता-विधेर्यजतेः पूर्ववत्त्वम्' इत्यधिकरणे चिन्तितम्। यदि च 'असौ आदित्यो न विशेषेण दीप्तिमान्जातः' इति पक्षोपि विभाव्यते, तदापि स एवार्थः। चरुस्तु दशमे 'चरुर्हविर्विकारः स्यादिज्यासंयोगात्' इत्यधिकरणे ओदनविशेषो न तु स्थाली, 'सौर्यम्' इति देवतासंयोगादिति चिन्तितम्। यच्चोखा स्थाली चरुरिति पर्यायतावाचकं निघण्टुवचनं तदपि 'हव्यपाके चरुः पुमान्' इति निघण्ट्वन्तराद-

भेदानामभावात् । प्रकृते तु माहात्म्यज्ञानार्थं तदुपयोगः । तस्य च ज्ञानोपयोगो

भाष्यप्रकाशः ।

यथावाप वै सोमेनेजानादित्यत्राष्टाक्षरा गायत्रीत्यस्याग्नेयपुरोडाशीयेऽष्टाकपालत्वरूपे प्रकारे । यथाच, वायुर्वै क्षेपिष्ठेत्यादीनां भूत्यादिरूपे फले । न तथा ब्रह्मणि । नित्यत्वात् सदैकरसत्वात् स्वस्यैव फलत्वाच्च । अस्ति तु माहात्म्यज्ञानार्थमुपयोगः । माहात्म्यं च सदेव ज्ञातं फलाय, न त्वसत् । असत्त्वे तदधिष्ठानस्यासमर्थतायां ततः फलाभावप्रसङ्गात् । तदाहुः तस्य चेत्यादि । माहात्म्यज्ञानेन भक्तिद्वारा साक्षात्कारोपयोग इति फलाध्याये प्रथमपादे, 'आदित्यादिमतयः' इतिसूत्रे वक्ष्यत इत्यर्थः । नन्वस्तु ब्रह्मणि माहात्म्यज्ञानार्थं सृष्ट्यादिवाक्योपयोगस्तथापि तेषां विध्युपयोगोवश्यं वक्तव्यः । नोचेदुपासनादिविधीनां प्ररोचनाभावेन व्यापारकौण्ठ्ये वाक्यवैयर्थ्यापत्तेः । एवं सिद्धे तेषां विधिशेषत्वे तेषु निरूप्यमाणं ब्रह्मापि तच्छेषमेवेत्युत्तरकाण्डस्य न तत्प्रतिपादकत्वम् ।

रश्मिः ।

विरुद्धम् । **यथावापे**ति । एवं श्रूयते 'आग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन्यदष्टाकपालो भवति अष्टाक्षरा गायत्री' इति । अन्यत्र च 'आप वै सोमेनेजानाद् देवताश्च यज्ञश्च क्रामन्त्याऽग्नेयं पञ्चकपालमुदवसानीयं निर्वपेत् अग्निः सर्वा देवताः' इति, तथापि अप वा इत्याद्यष्टाक्षरेषु गायत्रीत्वकल्पना । यथा यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति इत्यत्र अष्टत्वादिसंख्यासामान्यात्पुरोडाशानां गायत्रीत्वकल्पना । प्रथमस्य चतुर्थे 'पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नायः' इत्यधिकरणेऽस्ति यतोऽष्टाक्षराण्यतोऽष्टाक्षरा गायत्री अतोऽष्टाकपालमिति संख्यातात्पर्यकथनेनोपयोग इत्यर्थः । **यथा च वायुरि**त्यादि । प्रथमस्य द्वितीयपादे 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' इत्यधिकरणे 'वायुर्वै क्षेपिष्ठा' इत्यस्य 'वायव्यं श्वेतमालभेत भूतिकामः' इत्युपयोग इति चिन्तितम् । अत्र प्रथमोर्थवादो निन्दारूपेण विधिशेषभूतः प्राशस्त्येन वा विधिशेषभूतः । द्वौ प्राशस्त्येनैव विधिशेषभूतौ तथा नार्थवादलक्षणं 'प्राशस्त्यनिन्दान्यतररूपेण विधिशेषभूतं वाक्यमर्थवादः' इति मीमांसार्थप्रदीपे । **न तथा ब्रह्मणी**ति । त्रेधा तेषामुपयोग इत्यन्वयः । अत्र हेतूनाहु**र्नित्यत्वा**दिति । प्रथमज्ञप्तिष्वपि सत्यमित्यादिवाक्येनोत्पत्तिवाक्यत्वम् । प्रथमज्ञप्तेः साध्यविषयिण्या विवक्षितत्वात् उत्पत्तिपदस्वारस्यात् । अत उक्तं **नित्यत्वा**दिति । **सदैकरसत्वा**त्प्रकाराभावः, **स्वस्यैव फलत्वाच्च** फलान्तराभावः । अतो न धर्म इव उपयोग इत्यर्थः । तदानीं कथमुपयोगो ब्रह्मणि इत्यपेक्षायां **प्रकृते त्वि**त्यादि भाष्यं विवृण्वति **अस्ति त्वि**ति । तत्त्वमस्यादिवाक्योक्तमैक्यमपि माहात्म्यमिति न पृथगुक्तम् । **तस्य** चेत्यादि भाष्यमवतारयन्ति **माहात्म्यं चे**ति । **असमर्थताया**मिति निर्गुणत्वेन फलदातृत्वरूपगुणस्याप्यभावेनासमर्थतायामित्यर्थः । **तत** इति फलदातृत्वशून्यादित्यर्थः । **भक्तिद्वारे**ति इदं च तत्रैवोपपादयिष्यते । **प्ररोचनाभावेने**ति अर्थवादाभावेन । यः स्तूयते स विधीयते इति नियमप्रवृत्त्यभावाद्विधिरूपव्यापारस्य छान्दसत्वेनान्यनिष्ठत्वरूपे कौण्ठ्ये इत्यर्थः । **वाक्ये**त्यादि उपासनादिविधिवाक्यस्य निष्फलत्वरूपवैयर्थ्यापत्तेरित्यर्थः । **तच्छेष**मिति उपासनाविधिशेषमित्यर्थः । **नेति ब्रह्मण** उपासनायाः सकाशान्मुख्यत्वेऽनधिगतार्थगन्तृत्वाभावेनाप्रामाण्यापत्त्या नेत्यर्थः ।

यथा तथा वक्ष्यते चतुर्थे। उपासनादर्शनादिपदानां मनोव्यापारत्वमेव। विचारस्यापि यथा ज्ञानोपयोगित्वं, तथाग्रे वक्ष्यते।

किंचौपनिषदज्ञानस्यापि कर्मोपयोगित्वम्। 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवति' इति। अत एव ब्रह्मविदामेव जनकादीनां

भाष्यप्रकाशः।

ततश्च सिद्धावुत्तरमीमांसाया गतार्थत्वानुपयोगावित्याकाङ्क्षायामाहुः **उपासनेत्यादि**। अस्त्वेवम्। तथापि विधेयानामुपासनाज्ञानादीनां मनोव्यापाररूपतया सविषयत्वेन विषयाधीनत्वात् तद्विषयस्य ब्रह्मणो न मुख्यत्वं हीयते। अहीयमाने च तस्मिन्नितरप्रमाणागोचरस्य तस्य ज्ञानायोत्तरकाण्डविचारस्यावश्यकत्वान्न तन्मीमांसाया गतार्थत्वानुपयोगावित्यर्थः। ननु तथापि ब्रह्मण आसंसारं प्रसिद्धानुभावत्वात् तज्ज्ञाने विचारस्यानुपयोगाद् वैयर्थ्यमस्य शास्त्रस्यानिवार्यमित्यत आहुः **विचारस्येत्यादि**। **अग्रे वक्ष्यत** इति तृतीयस्य द्वितीयपादे, उभयव्यपदेशाद्यधिकरणेषु वक्ष्यते।

उपासनाद्यर्थमेव न ब्रह्म जिज्ञास्यं, किंतु पूर्वकाण्डोक्तेपि कर्मणि मुख्यफलाद्यर्थं तदवश्यं जिज्ञास्यमिति, नास्यागतार्थत्वानुपयोगावित्याहुः **किंचौपनिषदेत्यादि**। निगदव्याख्यातमेतत्। तथाच त्रैवर्णिकाधिकारपक्षो दोषरहित इत्यर्थः।

रश्मिः।

गतार्थत्वानुपयोगाविति जैमिनीयचतुर्लक्षण्यास्तथेत्यर्थः। अस्ति सप्तग्रहाणां ब्रह्मत्वोपपादिका जैमिनीयचतुर्लक्षणी वैयासिकी वा। **अस्त्वेव**मित्यादि भाष्ये पदशब्दो व्यवसितौ 'पदं व्यवसितत्राण' इत्यमरात्। तथा च उपासनादर्शनादिनिश्चितानां 'आत्मेत्येवोपासीत,' 'आत्मा वा अरे द्रष्टव्यः,' 'य एवं वेद' इत्यादि श्रुतिनिश्चितोपासनादर्शनज्ञानानामिति यावत्। इत्येवं भाष्यार्थं मत्वाहुः **विधेयाना**मिति। निश्चयेन विधेयानां न तु उप समीपे स्थित्वा यथायोग्यकरणरूपायास्तस्या अविहितत्वमपीति। **मन** इति 'कामः संकल्पः' इत्यारभ्य 'सर्वं मन एव' इति श्रुतेः। न च धियो व्यापारत्वं श्रुत्या सिद्ध्यति न तु उपासनायाः उप समीपे स्थित्वा यथायोग्यकरणरूपाया इति वाच्यं, धीवत् तस्या अपि व्यापारसापेक्षत्वात्। **इतरप्रमाणागोचरस्ये**ति। 'मनसैवानुद्रष्टव्यम्' इति श्रुतेस्तथेत्यर्थः। **अनुमानाद्य**गोचरस्येति वा। **ज्ञानाये**ति। शेषितया शाब्दज्ञानायेत्यर्थः। **वक्ष्यत** इति विरुद्धधर्माश्रयत्वस्य आसंसारमप्रसिद्धस्य स्थापनं वक्ष्यत इति। तदर्थं इदं शास्त्रं इति वैयर्थ्यं निवार्यमित्यर्थः। **मुख्यफलाद्यर्थ**मिति 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति श्रुतमक्षय्यं ब्रह्मलोकाख्यं फलं तदाद्यर्थमित्यर्थः। ज्ञानद्वारेति ज्ञेयम्। एतदक्षरधियामित्यधिकरणे वक्ष्यते। तेन न फलव्यभिचारो भक्तेः। एतेन अन्योन्याश्रयोपि नेति ज्ञापितम्। अनुष्ठाने तु श्रुतिभ्यामन्योन्याश्रयो वर्तत एव प्रमितावुक्तान्योन्याश्रयपरिहारोत्राप्यारोप्यः' ब्रह्मजिज्ञासया धर्मजिज्ञासा नाश्रीयत इति धर्मविचारानन्तर्यस्य प्राक्खण्डनात्। **निगदेत्यादि**। निगदेन व्यक्तरवेण[1] 'यदेव विद्यया' इत्यादिना भाष्ये व्याख्यातम्। किंचौपनिषदज्ञानस्यापि कर्मोपयोगित्वमित्येतदित्यर्थः। **तथा चेति**। उभयोर्मीमांसयोरेवंविधैकशाख्ये चेत्यर्थः। **दोषरहित** इति। कर्माधिकृताधिकारित्वादुत्तरमीमांसाचतुरोपि वर्णानधिकुर्यादिति दोषरहित इत्यर्थः।

१. व्यक्तरवेण पाठमात्रेण।

कर्मणि सर्वदेवसान्निध्यम् । अन्यथा आभासत्वमेव । नच ब्रह्मरूपात्मविज्ञाने देहाद्यध्यासाभावेन कर्तृत्वाभावात् कर्मानधिकार इति वाच्यम् । निरध्यस्तैरेव देहादिभिः कर्मकरणसंभवात् । अत एव जीवन्मुक्तानां सर्वे व्यापाराः । तथाच स्मृतिः ।

'नैव किंचित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्छृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' ॥ इति ।

अतो ब्रह्मविदामेव कृतं कर्म शुभफलं भवति । अतो धर्मविचारकाणामपि ब्रह्म जिज्ञास्यमेव । तस्मान्न गतार्थत्वानुपयोगौ ।

ननु फलप्रेप्सुरधिकारी । फलं च विचारस्य शाब्दं ज्ञानं, तस्य मननादिद्वारानुभवः, तस्य चानर्थनिवृत्तिपूर्वकपरमानन्दावाप्तिः । तथाच विरक्तोऽनर्थजिहासुः परप्रेप्सुश्चाधिकारी कस्मान्न भवति ।

'शब्दब्रह्मणि निष्णातो न निष्णायात् परे यदि ।
श्रमस्तस्य फलं मन्ये ह्यधेनुमिव रक्षतः' ॥

भाष्यप्रकाशः ।

एवं त्रैवर्णिकाधिकारपक्षे स्थिरीकृते आनन्तर्यवादी पुनः शङ्कते नन्वित्यादि । सिद्धान्ते ज्ञानविधिनार्थज्ञानप्राप्तेस्तत्र कैमर्थ्याकाङ्क्षायामुक्तप्रणाड्या, 'ब्रह्मविदाप्नोति परम्' इतिश्रुत्युक्तपरप्राप्तिरूपफलार्थमिति वक्तव्यम् । अन्यथा प्रवृत्तिविघातापत्तेः । तत्कथने च सिद्धमस्मदुक्तेनाधिकारिणा । तदेतदुक्तं कस्मान्न भवतीति । अथ वक्तव्यं, सूत्रे ब्रह्मजिज्ञासापदात् तज्ज्ञानस्यैव फलत्वं लभ्यत इति प्रणाडीसिद्धफलपर्यन्तता किमर्थमङ्गीकार्येति । तथा सति श्रीभागवतोक्तकेवलार्थविनिन्दाशास्त्रविरोधापत्तिः । अतस्तदभावायोक्तफलपर्यन्तताऽवश्यमभ्युपेया । ततश्च सिद्धमुक्तेनाधि-

रश्मिः ।

भाष्ये **सर्वदेवसान्निध्य**मिति एतच्च श्रीभागवते स्फुटम् । **अन्यथे**ति ब्रह्मवित्त्वाभावे इत्यर्थः । तथैवानुभवादेवकारः । **देहाद्यध्यासाभावेने**ति देहेन्द्रियादित आत्मनोऽविवेकाभावेनेत्यर्थः । **तत्त्ववि**दिति जीवप्रत्यक्षज्ञानवानित्यर्थः । **धर्मविचारकाणा**मिति मुख्यफलप्रेप्सूनामित्यर्थः । विशेषणमिदं न त्वर्थः । प्रकृते । **आनन्तर्ये**ति । आनन्तर्यवादी व्यवहारे भाट्टः । ननु फलप्रेप्सुरित्यादि युष्मदुपपादितं तथा चैवंविधे सिद्धान्ते कस्माद्विरक्तोनर्थजिहासुः परप्रेप्सुरधिकारी न भवतीति योजनां मन्वाना आहुः **सिद्धान्त** इत्यादि । **कैमर्थ्याकाङ्क्षाया**मिति । कोर्थः प्रयोजनं यस्येति किमर्थस्तस्य भावः कैमर्थ्यं तस्याकाङ्क्षायामित्यर्थः । **वक्तव्य**मिति सर्वात्मभावेन भजनानन्दोपि वक्तव्यः । **अन्यथे**ति फलाभावे इत्यर्थः । **तत्कथने** इति फलकथने इत्यर्थः । **अस्मदुक्तेने**ति वैराग्यशमदमादिमतेत्यर्थः । **शब्दब्रह्मणी**ति भाष्यमवतारयन्ति **अथ वक्तव्य**मित्यादिना । **श्रीभागवत** इत्यादि । श्रीभागवतोक्तं यत्केवलार्थविषयकशाब्दज्ञानवतो निन्दाशास्त्रं

इति भगवद्वचनात् केवलस्य निन्दाश्रवणादिति चेत् । न । फलकामनाया अनुपयोगात् । अन्येनैव तत्समर्पणात् । नित्यत्वादप्यर्थज्ञानस्य न फलप्रेप्सुरधिकारी । निन्दार्थवादस्तु मननादिविधिशेष इति मन्तव्यम् ।

भाष्यप्रकाशः ।

कारिणेत्यनङ्गीक्रियमाणोऽपि वैराग्याद्यानन्तर्यपक्षोऽधिकारिबलादापतित इत्यर्थः ।

•अत्र समादधते नेत्यादि । विचाराधिकारत्वेन फलकामना तदोपयुज्येत, यदि ब्रह्म जिज्ञासापदात् प्राप्येत। तत्तु न। अनन्यलभ्यस्य शब्दार्थत्वात् । अतस्त्रैवर्णिकोऽर्थजिज्ञासुरेवाधिकारी। फलकामना तु, ब्रह्मविदाप्नोति परमित्यादिवाक्यार्थे ज्ञात उत्पद्यत इति तेन समर्पिता । फलं चार्थज्ञानस्य नैकम् । भार्गव्यां विद्यायामन्यत्र च, य एवं वेद प्रतितिष्ठतीत्यादिफलान्तराणामपि श्रावणात् । ततश्च भवदभिमताधिकार्यङ्गीकारेऽन्येषामनधिकारेण विचारे प्रवृत्तौ विहितायां तच्छास्त्रमेव व्यर्थं स्यात् । अतस्तदभावायार्थजिज्ञासोरेवाधिकारित्वं वक्तव्यम् । अर्थज्ञानं च नित्यम् । 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्' इत्यादिष्वनर्थज्ञनिन्दाश्रवणात् । अतोऽर्थज्ञानस्य नित्यत्वं ज्ञात्वा यो जिज्ञासति स एव मुख्योऽधिकारी । नच निन्दार्थवादविरोधः । तस्य मननविधिशेषत्वात् । शब्दब्रह्मणि निष्णातकथनोत्तरं तत्कथनेन तथार्थस्य लाभात् । विचारं विना

रश्मिः ।

शब्दब्रह्मणीत्यादि तस्य विरोधापत्तिरित्यर्थः । निष्णातोऽर्थविषयकशाब्दज्ञानवान्परं साधनैर्न निशामयेत् । अधेनुमप्रसूतिं गां रक्षतः श्रम इवेति वाक्यविषमपदार्थः । **अत** इति जिज्ञासापदादित्यर्थः । **एवे**ति 'तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्' इति वाक्यादेवकारः । **अन्येनैवे**त्यादि भाष्यं विवृण्वन्ति **फलकामने**त्यादि । **ज्ञात उत्पद्यत** इति फलकामनाया फलेच्छारूपत्वेन जानाति इच्छति यतते इति ज्ञाते उत्पद्यते । एवकारसाफल्याद्ययुक्तिमप्याहुः **फलं** चेत्यादि । **फलान्तराणा**मिति । प्रतिष्ठान्नवत्त्वान्नादत्वादीनामित्यर्थः । **अन्येषा**मिति परप्रेप्सोरतिरिक्तानां प्रतिष्ठादिप्रेप्सूनामित्यर्थः । **तच्छास्त्र**मिति । 'य एवं वेद प्रतितिष्ठति' इत्यादि फलान्तरनिरूपकं शास्त्रमित्यर्थः। युक्तिस्तु यदि अर्थजिज्ञासुरधिकारी स्यात् फलान्तरनिरूपकं शास्त्रं व्यर्थं स्यादिति । **नित्यत्वादि**त्यादि भाष्यं विवृण्वन्ति **अर्थज्ञानं च नित्य**मित्यादि । **निन्दार्थवाद** इति भाष्यं विवृण्वन्ति **न च निन्दार्थवादे**त्यादि । **तस्य मनने**त्यादि तस्य निन्दार्थवादस्य । 'नहि निन्दा निन्द्यं निन्दितुं प्रवर्तते अपि तु विधेयं स्तोतुम्' इति न्यायेन परं मन्वीत इत्याक्षिप्तस्य विधेः शेषत्वात्। तथा च अर्थज्ञानवतः पराद्रष्टुः श्रमः श्रमफल इति परं द्रष्टुं मन्वीतेति । यथा 'प्रातः प्रातरनृतं वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्' इत्यस्यानुदितहोमनिन्दार्थवादस्योदितहोमस्तावकत्वं तद्वत् । ननु शब्दब्रह्मपाठी तदर्थज्ञानवान्न भवेत्तदा दोष इति वदत्कथं परे व्यापृणोतीति चेत्तत्राहुः **शब्दब्रह्मणी**त्यादि । **तथार्थस्ये**ति उक्तार्थस्येत्यर्थः । तथा च निष्णातपदमहिम्ना परे व्यापृणोतीति भावः । नन्वेतर्ह्यपि दर्शनविधिशेषत्वमस्तु तत्राहुः **विचार**मिति । तथा चावश्यकत्वान् मननविधिशेषत्वमित्यर्थः । अथवा 'आत्मा वा अरे' इति श्रुत्युक्तमननविधिशेषत्वादित्यर्थः । विधिशब्देन पूर्वं पूर्वमीमांसायां तव्यो विधौ न त्वावश्यके, आनन्तर्यवादिनो व्यवहारे वयं भाट्टा इति वक्तृत्वात् । भाष्ये तु

१. य एवं वेद प्रतितिष्ठतीत्यादिफलान्तरनिरूपकं शास्त्रम् ।

ननु ब्रह्मणो विचारे प्रतिज्ञाते विरोधनिराकरणादीनामप्रतिज्ञातार्थत्वम् । नचावक्तव्यत्वम् । निर्विचिकित्सज्ञानानुदयप्रसङ्गादिति चेत् । न ।

ब्रह्मण इति न कर्मणि षष्ठी, किंतु शेषषष्ठी । तथाच ब्रह्मसंबन्धि

भाष्यप्रकाशः ।

परनिष्णातासंभवादिति । एवमत्राधिकारी प्रयोजनं चोक्तम् ।

अतः परं विषयसंबन्धौ वक्तुमाशङ्कामुखेन मतान्तरमाहुः **नन्वित्यादि** । ब्रह्मजिज्ञासेत्यत्र, 'कर्तृकर्मणोः कृति' इति विशेषविधानात् कर्मषष्ठ्यङ्गीकार्या यद्यपि, 'प्रतिपदविधाना षष्ठी न समस्यते' इति निषेधाद् ब्रह्मणे जिज्ञासेति चतुर्थीसमासः शङ्क्यते तथापि, 'कृद्योगा च षष्ठी समस्यते' इति प्रतिप्रसवात् समाससिद्धेरत्र कर्मषष्ठ्यां गृहीतायां ब्रह्मविचार एव प्रतिज्ञातो भवति । नच शेषषष्ठी युक्ता । यद्यपि संबन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षतया ब्रह्मणः कर्मतालाभस्तथाप्याक्षेपतः प्राप्त्यपेक्षया आभिधानिकग्रहणस्यैव ज्यायस्त्वात् । तथा सति तद्व्यतिरिक्तानां विरोधनिराकरणादीनां ज्ञानपरिकरतया सिद्धावप्यप्रतिज्ञातार्थत्वम् । प्रतिज्ञा हि साध्यविशिष्टपक्षप्रतिपादकं वाक्यम् । तदत्र प्रथमसूत्रम् । तत्र च ब्रह्मण एव कर्मत्वेन जिज्ञास्यतया प्रतिज्ञानात् तदन्येषां तथात्वाभावात् । नचेष्टापत्तिः कर्तुं शक्या । तथा सति तेषामवचने निर्विचिकित्सब्रह्म-

रश्मिः ।

व्यवहिताव्यवहितसाधारणं शेषत्वं स्वीकृत्य मननादिविधिशेष इत्युक्तमिति भावः । **एवमत्रे**त्यादि पूर्वोक्तसरण्यात्राधिकरणे ब्रह्मजिज्ञासापदेनाधिकारी प्रयोजनं चोक्तमित्यर्थः । **मतान्तर**मिति शंकराचार्यरामानुजादिमतमित्यर्थः । **चतुर्थीसमास** इति धर्माय जिज्ञासा धर्मजिज्ञासा इति वदाशङ्क्येतेत्यर्थः । **प्रतिप्रसवा**दिति कर्तृकर्मणोः कृतीति षष्ठीत्यस्य निषेधस्य कुण्ठितप्रवृत्तेः पुनः प्रवृत्तिजननादित्यर्थः । तथा च शेषे षष्ठी वक्तव्या सापि न संभवतीत्याहुः **न च शेष** इति । सामान्यतो विशेषो बलीयानिति । **तद्व्यतिरिक्ताना**मिति ब्रह्मव्यतिरिक्तांशं द्वितीयाध्यायाद्यर्थम् । **विरोधनिराकरणादीना**मित्यर्थः । अयमर्थः फलाध्याये परनिरूपणमप्रतिज्ञातं स्यात् । 'अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तमम्' इत्यक्षरपर्यवसानात्, तथा सति अन्यमतविशेषोपि, इदमिदमित्थतायाः प्रतिपादनं साकारत्वं च निःसंदिग्धं न स्यादतोन्यमततुल्यत्वपरिजिहीर्षुभिराचार्यैः शेषषष्ठ्यादृता । अन्यथा तन्मतदूषणानि वक्ष्यमाणानि व्यर्थानि स्युः । ततश्चाधाराधेयभावो जीवैरक्षरस्योपपाद्योपपादकरूपो विरोधनिराकरणेन प्राप्यप्रापकभावः साधनेनाधाराधेयभावः परेण संभवति । अदृश्यत्वाधिकरणेऽक्षराभिन्नत्वमक्षरे प्रतिष्ठितत्वं वक्ष्यमाणमिति । न चाक्षराभेदमादायापि परविचारस्य प्रतिज्ञातत्वसिद्ध्या शेषषष्ठी अक्षरत्वेन विरोधनिराकरणादीनां दृष्टानां कर्मत्वेपि बाधकाभावान्न युक्तेति शङ्क्यम् । भेदपक्षेऽप्रतिज्ञातत्वापत्तेः वैलक्षण्याच्चागणितानन्दत्वेन । 'नाणुरतच्छ्रुतेः' इति सूत्रात् । अत एव गीतात्रयोदशे ब्रह्मसूत्रपदैश्चेति क्षेत्रमुक्त्वाऽध्यात्मज्ञाननित्यत्वमुक्तम् । अध्यात्मत्वं तु परस्य जीवभाव एव, ब्रह्माण्डस्थस्यापि जीवत्वं 'अग्नेः शिखाया मध्ये परमात्मा व्यवस्थितः । स हरिः सेन्द्रः सोक्षरः परमः स्वराट्' इति श्रुतेः । अतो गीताऽविरोधेन शारीराणुभाष्यत्वमपि । अप्रतिज्ञातार्थत्वं पुनः स्फुटयन्ति **प्रतिज्ञा हीत्यादि** । न्यायप्रसिद्धमेतत् । यथाह पर्वतो वह्निमानिति **प्रतिज्ञे**ति । **तदत्रे**ति तादृशवाक्यमस्यां मीमांसायां ब्रह्मविचारे पक्षेधिकर्तव्यत्वसाधनादत इत्यन्त इति प्रथम-

भाष्यप्रकाशः ।

ज्ञानानुदयेन प्रतिज्ञावैयर्थ्यप्रसङ्गात् । तथाच कर्मषष्ठ्यङ्गीकारे द्वितीयाध्यायादीनामाकस्मिकत्वम् । शेषषष्ठ्यङ्गीकारे व्याकरणविरोधो, ब्रह्मण इतरतौल्याद् गौणत्वापत्तिश्चेत्युभयतःपाशारज्जुरित्यर्थः ।

अत्र समादधते नेत्यादि । कृद्योगे कर्मणिषष्ठ्यनुशासनेऽपि विभक्तीनां विवक्षाधीनत्वात् समासस्य सामर्थ्यमात्रापेक्षितत्वाच्च ब्रह्मणः कर्मत्वे अविवक्षिते कर्मषष्ठ्यभावेन शेषषष्ठ्यामपि सामर्थ्यात् समाससिद्धेर्व्याकरणविरोधाभावः । सर्वेषां प्रतिज्ञातत्वसिद्ध्या न कस्याप्याकस्मिकत्वम् ।

रश्मिः ।

सूत्रमित्यर्थः । तथा च ब्रह्मजिज्ञासाधिक्रियते इति पदार्थफलकभाष्यम् । **अधिकारार्थ एव श्रेयानिति** । **अवचन** इति । प्राप्त इत्यत्र ज्ञेयम् । **व्याकरणविरोध** इति 'कर्तृकर्मणोः कृति' इति सूत्रविरोध इत्यर्थः । **उभयतःपाशारज्जु**रिति उभयतो बन्धनरज्जुरश्वादिर्यथा उभयदेशे निवृत्तव्यापारो भवति तथा संपन्नमित्यर्थः । अथवा उभयतः पाशौ बन्धनसाधने ग्रन्थी यस्याः सोभयतःपाशा तादृशी रज्जुर्जलाहरणविशेषादौ प्रसिद्धा क्वचित् । **विवक्षाधीनत्वा**दिति षष्ठ्याहुः कर्मादीनामपि संबन्धमात्रविवक्षायां षष्ठ्येवेति । **सामर्थ्यमात्रे**त्यादि 'समर्थः पदविधिः' इति सूत्रादित्यर्थः । समासादिवृत्त्यवृत्तित्वेन सामर्थ्यमिह व्यपेक्षा नास्ति अपित्वेकार्थीभावः । स च विशेषणविशेष्यभावावगाह्युपस्थितिजनकत्वं संसृष्टार्थं समर्थमिति भाष्योक्तेरिति शेखरे । **पदविधि**रिति पदमुद्दिश्य यो विधीयते समासादिः स समर्थ इत्युच्यते तथा च सामर्थ्यमित्यवसेयम् । तद्यद्विग्रहवाक्यार्थाभिधाने शक्तत्वमिदमेव एकार्थीभाव इति व्यवह्रियते, व्यपक्षेति नैयायिकाः, तत्र एतौ अजहत्स्वार्थायां जहत्स्वार्थायां चान्तर्भवतः । पदानि स्वाभिधेयानि न जहति यस्यां साऽजहत्स्वार्था सा चावगतसामर्थ्यानां शब्दानां समासघटकानां शक्तिलक्षणाभ्यां वाक्यार्थबोधाद्भवति । अत्र न समासादौ अन्या शक्तिः क्लृप्तशक्त्यैव निर्वाहात् तत्त्यागापत्तेश्च । इयमेव व्यपेक्षा इति । तच्च मतान्तरमिति महाभाष्यकृत् । 'सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न' इति वार्तिकान् न ऋद्धस्य राजपुरुष इति प्रयोगापत्तिरत्र । एतद्विपरीता तु जहत्स्वार्था । तत्र वृषभयावकादिपदेषु वृषयवादि पदवत् समासघटकपदानां पुनर्बोधकतां विहाय समासे शक्तिः तयैव च राजसंबन्धिपुरुषबोध इति एकार्थीभावः । अन्यथा ऋद्धस्य राजपुरुष इत्यापद्येत । इत्येवंविधसामर्थ्यमात्रापेक्षित्वादित्यर्थः । **अविवक्षित** इति सर्पिषो जानीते इतिवदविवक्षित इत्यर्थः । **कर्मषष्ठ्यभावे**नेति । 'यतो वाचो निवर्तन्ते' इति श्रुतेः कारकत्वाभावादपि कर्मषष्ठ्यभावेनेत्यप्यर्थोऽत्र बोद्धव्यः । **समाससिद्धे**रिति 'कृद्योगा च षष्ठी समस्यते' इत्यत्र शेषे षष्ठ्यपि कृद्योगेति समाससिद्धेः । **सर्वेषा**मिति ननु सर्वेषामित्यत्र निविष्टपुरुषमुख्यत्वेप्यक्षरस्य वेदार्थत्वेन वेदवाचकब्रह्मपदोपादानात्तत्पुरःसरं सर्वेषां प्रतिज्ञानत्वसिद्धेः परस्य पुरुषोत्तमस्य जगद्व्यापारवर्ज्याधिकरणस्यापि विषयस्याप्रतिज्ञानार्थत्वमिति चेन्न । ब्रह्मपदवाच्यवेदाभिधेयत्वस्याक्षर एव तात्पर्यवृत्त्या प्रतिपाद्यत्वस्य परे सत्त्वात् । 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतेः । तथाच ब्रह्मजिज्ञासेत्यस्या ब्राह्मीभिन्ना ब्रह्मसंबन्धिनी जिज्ञासेति बोधः । तथा चोक्तम् ।

'जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ।
भेदः संसर्ग उभयं वेति वाच्यव्यवस्थितेः' । इति भूषणे ।

अर्थस्तु त्रैविध्यं वदत्यत्र भेद इत्यादि । भेदः अन्योन्याभावः । व्यर्थोयं प्रयास इति चेन्न ।

तज्ज्ञानोपयोगि सर्वमेव प्रतिज्ञातं वेदितव्यम् । नच गौणतापत्तिरजिज्ञास्यत्वं च स्यादिति वाच्यम् । ब्रह्ममात्रे संदेहाभावात् । संदिग्धस्यैव जिज्ञास्यता । गौणत्वं तु शब्दत एव, न त्वर्थतः ।

भाष्यप्रकाशः ।

तर्हि गौणत्वाजिज्ञास्यत्वे त्वापद्येतामित्यत आहुः **नचे**त्यादि । **केन** प्रकारेणाजिज्ञास्यत्वमापाद्यते । **किं ब्रह्मत्वेन,** उत रूपान्तरेण । तत्राद्ये त्वोमिति ब्रूमः । अध्ययनादिदशायां, 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिवाक्यार्थावधारणादेव तत्स्वरूपे सत्तायां च संदेहाभावात् । किंतु यद् वेदे लक्षितं ब्रह्म, तत् किम् । येन वेदे नानापदार्थानां लक्षितत्वेऽप्याम्नायव्याख्यानरूपे भारते विवृतत्वेऽप्येत-

रश्मिः ।

राजपुरुषः सुन्दर इतिवद्राजपुरुषो देवदत्तस्य इति वारणायाभ्युपगमात् । भेदस्य वाच्यत्वे तु तद्विरुद्धोयमप्रयोगः । संबन्धस्यैव सार्वजनीनत्वादाह संसर्ग इति । एतदुभयं वाच्यमस्तु विनिगमनाविरहादस्वामिकेपि राजपुरुष इत्यापत्तेश्चेत्याह उभयं वेति । तथाचाराजकीयभिन्नो राजसंबन्धवांश्चायमिति बोधः । व्यपेक्षावादिनस्तु राजपुरुष इत्यत्र राजसंबन्ध्यभिन्नः पुरुष इति बोधः । राजपदस्य राजसंबन्धिनि लक्षणेत्यभ्युपगमात् । सविशेषणराजपदस्य सविशेषणतत्संबन्धिनि लक्षणोपगमात् । न शोभनराजपुरुष इत्यादौ एकदेशे राज्ञि शोभनान्वयानुपपत्तिः । उक्तं त्विष्टमेव । एवं सति पूर्वतन्त्रीयो निषादस्थपतिं याजयेदित्यत्र लक्षणादोषग्रस्तो न षष्ठीसमासः किंतु कर्मधारय इति सिद्धान्तः संगच्छते इति वदन्ति । तथा च ब्रह्मसंबन्धिनी जिज्ञासेत्येव बोधः । **इत्यत आहु**रिति इति इदमाशङ्क्य प्रतिविधानमाहुरित्यर्थः । **ब्रह्ममात्र** इत्यादि भाष्यं विवृण्वन्ति **केने**त्यादि । **रूपान्तरेणे**ति वेदलक्षितत्वेन सर्ववेदार्थनिर्वाहकरूपेण सर्वविरुद्धधर्माश्रयत्वेनेत्यर्थः । **तत्स्वरूपे सत्तायां** चेति सत्यज्ञानानन्दाः स्वरूपभूताः 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति श्रुतेः सत्ता । यथा चन्द्रमसि द्वये चित्स्वरूपे आनन्दस्वरूपता, यद्यज्जनकं तत्तद्गुणकमिति वक्ष्यमाणव्यासेः । दृष्टान्तत्वात्त्वानन्दगुणकता अत एव साकारता । तथाच श्रुत्यन्तरं 'सत्यं ज्ञानमानन्दं ब्रह्म' इति 'आनन्दरूपममृतं यद्विभाति' इति च । इदानीं शेषषष्ठीपक्षं समर्थयन्तः **संदिग्धस्ये**त्यादि भाष्यं विवृण्वन्त अन्यद्रूपमाहुः **किंतु यदि**त्यादि । यद्वेदे जगत्कर्तृत्वादिना रूपान्तरेण **लक्षितं** ज्ञापितं ब्रह्म तदजिज्ञास्यमिति वक्तव्यमिति सशेषा योजना । **किं त्वि**ति वितर्के । तथा च वेदलक्षितत्वेन रूपान्तरेण तत्राजिज्ञास्यत्वमापादनीयमित्यर्थः । अत्र पृच्छन्ति **किमि**ति तत्किमित्यर्थः । देहलीदीपन्यायेन तदित्यस्योभयान्वयित्वात् । एवमापादनं किंहेतुकमिति प्रश्नः न संभवतीति फलितोर्थः । तत्र हेतुमाहुः **येन वेद** इत्यादि । येनेत्येतज्जिज्ञासेत्यनेनान्वेति । तथा च वेदे नानापदार्थानामन्नादीनां जगत्कर्तृत्वेन लक्षितत्वेप्याम्नायव्याख्यानरूपे भारते विवृतत्वेपि येन हेतुनैतस्य लक्षितब्रह्मणो जिज्ञासा प्रस्तूयते अतोस्य संदिग्धत्वेन जिज्ञास्यत्वमित्यर्थः । तथा चान्नादि ब्रह्म आनन्दो वा ब्रह्म इत्येवं संदिग्धस्यैव जिज्ञास्यतेति भाष्यार्थः । अथवा प्रकृत्यादिगतं जगत्कर्तृत्वं ब्रह्मगतं वा तत् । अथवा 'क्रियाशक्तिज्ञानशक्ती संदिह्येते परस्थिते' इति हृदयम् । लक्षितजिज्ञासाप्रस्तावस्तु जन्माद्यस्य यत इति सूत्राद् बोध्यः । **यदी**त्यादि यदि ब्रह्मज्ञानस्य मोक्षसाधनत्वेन हेतुना एतज्जिज्ञासैव प्रस्तूयते इति मन्यते तर्हि कथमन्नादिज्ञानेषु ब्रह्मज्ञानस्यैव मोक्ष-

१. चित्स्वरूपे यस्य । २. त्ववदाम्नाय ।

भाष्यप्रकाशः।

जिज्ञासैव प्रस्तूयते। यदि तज्ज्ञानस्य मोक्षसाधनत्वेन, तर्हि कथं तज्ज्ञानस्यैव तथात्वम्। यदि वेदार्थत्वेन तज्ज्ञानस्य तथात्वं, तदा धर्मविचारेणैव गतार्थता। षोडशलक्षण्या सर्वस्यैव तस्य निर्णीतत्वात्। अत एव न वेदान्तार्थत्वेन। अतः सर्ववेदार्थतानिर्वाहकवक्ष्यमाणरीतिकगुणवत्तया जिज्ञास्यत्वं वक्तव्यम्। ततश्च तादृशगुणवत्त्वेनैतस्य जिज्ञास्यतासिद्धेर्नाजिज्ञास्यत्वम्। नापि गौणत्वापत्तिः। गुणजातस्य ब्रह्मसंबन्धित्वेन जिज्ञास्यतया ब्रह्मणो मुख्यत्वस्यैव सिद्धेः। शब्दतो गौणत्वं

रश्मिः।

साधनत्वमित्यर्थः। ब्रह्मण एव वेदार्थत्वादुपपन्नमित्याह **यदि वेदार्थत्वेनेत्यादि**। अतस्त-जिज्ञासैव प्रस्तूयत इति पूर्वेणान्वयः। अथापि नतरां जिज्ञास्यमित्याहुः **तदा धर्मेत्यादि**। **षोडशलक्षण्येति** उक्तार्थमेतत्। **अत एवेति** धर्मविचाराङ्गतया ब्रह्मविचारस्य प्रविष्टत्वादुक्तहेतोरेवेत्यर्थः। सिद्धमाहुरत इति। लक्षितजिज्ञासायाः वितर्कासंभवादित्यर्थः। **वक्ष्यमाणरीतिकेति** अग्रिमाधिकरणवक्ष्यमाणरीतिकेत्यर्थः। तथा च यदि कर्मणिषष्ठी परिगृह्यते तदा ब्रह्म यदि प्रसिद्धं, तर्हि जिज्ञासाकर्मतानुपपत्तिः। अप्रसिद्धं चेत्सुतरां तदनुपपत्तिः। नह्यप्रसिद्धमुद्देश्यं भवति। यदि च प्रसिद्धत्वेपि चैतन्यविशिष्टं देहमात्रमात्मेति **प्राकृतलोकायतिकयोः** प्रसिद्धिः। चेतनानीन्द्रियाणि आत्मेति **तदेकदेशिनः**। मन इत्यपि। तथा क्षणिकविज्ञानमात्रमित्यपि, एवं शून्यमित्यपि। देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेति **वैशेषिकाः**, भोक्तैव केवलं न कर्तेति **सांख्याः**, अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तीरिति **योगिनः**। एवंविधप्रतिपन्नात्मविलक्षणस्य जीवस्य स्वरूपभूतात्मनः प्रतिपत्तये विचारात्कर्मताऽविरोधान्नानुपपत्तिरिति विभाव्येत तदापि ब्रह्म नात्ममात्रमिति जिज्ञासाकर्मतानुपपत्तिः पदार्थविरोधश्च। न च 'अयमात्मा ब्रह्म' इति श्रुतेर्न स इति वाच्यमंशत्वेनोपपत्तेः, अतः शेषषष्ठी युक्ता, अन्वयोपपत्तेरिति सूक्ष्मदृशावधेयम्। तेन प्रसिद्धकर्मत्यागेपि न पिण्डमुत्सृज्य करं लेढीति न्यायप्रसरः। **गौणत्वं त्वित्यादि** भाष्यं विवृण्वन्ति **नापीत्यादि**। न च अत्र ब्रह्मसंबन्धिनी जिज्ञासेत्यर्थात् ब्रह्मसंबन्धिसंबन्धिजिज्ञासाभावात्कथं गौणत्वापत्तिरिति वाच्यं, गुणजातस्याशेषस्य ब्रह्मत्वात्। न चैवं कर्मषष्ठीपरिग्रह एव श्रेयानित्यायातीति वाच्यं, ब्रह्मण एव ईप्सिततमत्वप्राप्त्या तच्छक्तीनां भेदपक्षेऽविचार्यतापत्तेः असंभवाच्चेत्युक्तम्। ननूक्तं तेषां ब्रह्मत्वमिति चेत्, न, अंशत्वादुपपत्तेः। ननु 'तद्विजिज्ञासस्व तद्ब्रह्म' इति श्रुत्या ब्रह्मणः कर्मत्वात् कर्मषष्ठीपरिग्रहो ज्यायानिति चेन्न विरोधनिराकरणादीनामप्रतिज्ञातार्थत्वापत्त्या तस्याः श्रुतेरविषयत्वात्। किंतु 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतेर्विषयः। मननस्य पदज्ञानपूर्वकत्वात् 'स्वाध्यायोऽध्येतव्यः' इति पूर्वमीमांसाकारिकासु तदुक्तं पूर्वम्। ननु एवमपि आत्मनः कर्मत्वात्कर्मषष्ठ्यापत्तिरिति चेन्न। जिज्ञासापदस्याकर्मकज्ञानेच्छाप्रकृतिकत्वात्। ज्ञा अवबोधने। ज्ञातुमिच्छा जिज्ञासा इतिभावे घञ्। ननु घटं जानातीति सकर्मकत्वमिति चेन्न। अत्र फलव्यधिकरणव्यापारबोधकत्वादस्तु सकर्मकत्वमत्र तु फलसमानाधिकरणव्यापारबोधकत्वेनाकर्मकत्वात्। न चात्रापि फलव्यधिकरणव्यापारोस्तु इति शङ्क्यम्। जिज्ञासापदस्य विचारे शक्तेः। विचारस्य च युक्तिभिरनुचिन्तनरूपस्य ब्रह्माविषयत्वात्। 'ज्ञानशक्तिक्रियाशक्ती संदिह्येते परस्थिते'

१. आदिशब्देनाधोक्षजोपि। २. संबन्धिसंबन्धिनोपि।

वेदप्रामाण्यं तु प्रतितन्त्रसिद्धत्वान्न विचार्यते ।

भाष्यप्रकाशः ।

तु न स्वरूपमुख्यत्वविघातकम् । पुत्रः पित्रा सहागत इत्यादौ तथादर्शनादिति । नन्वस्त्वेवं, तथापि वेदार्थस्य ब्रह्मणो वेदानुकूलो विचारोऽत्र प्रतिज्ञात इति तदर्थं वेदप्रामाण्यमपि विचारणीयम्। तदत्र कुतो न विचारितम् । यतो न विचारितं, ततो न वेदार्थत्वेन विचार इति पक्षो न युक्त इत्यत आहुः वेदेत्यादि । प्रतितन्त्रसिद्धत्वादिति आस्तिकं तन्त्रमात्रं लक्ष्यीकृत्य सिद्धत्वात् । न हि नास्तिकनिग्रहायाचार्यस्य विचारे प्रवृत्तिः, किंत्वास्तिकशिक्षणाय । ते तु सर्वे वेदप्रामाण्ये निर्विचिकित्सा इति प्रयोजनाभावान्न विचार्यते । तावता न वेदानुकूलविचारत्वहानि-

रश्मिः ।

इति भाष्यकारिकायाः 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेर्ब्रह्मणोऽसंदिग्धत्वात् । अत एव 'जन्माद्यस्य यतः' इत्यधिकरणे क्रियाशक्तिर्निरूपिता । ततश्च ब्रह्मण इति शेषषष्ठी न कर्मणि । 'तद्विजिज्ञासस्व' इतिश्रुतौ जिज्ञासाया विचारार्थकत्वे तच्छब्दात्षष्ठ्या लुक् ब्रह्मणः कर्मत्वाभावात् । किंतु ज्ञानशक्तेः क्रियाशक्तेर्वेदस्य कर्तृत्वम् । यद्वा तद्विजिज्ञासस्व इत्यर्थविषया अन्नादिरूपार्थब्रह्मपरत्वात् सूत्रे वेदान्तशब्दविषये न प्रवर्तत इति । **तथादर्शनादिति** पित्रेति सहार्थतृतीयान्तशब्दस्य पितृस्वरूपमुख्यत्वविघातत्वकाभावदर्शनादित्यर्थः । **न वेदार्थत्वेनेति** वेदानुकूलत्वान्न वेदार्थत्वेनेत्यर्थः । **न युक्त** इति प्रमाणवेदार्थत्वरूपप्रतियोगिज्ञानाभावान्न युक्तः । **निर्विचिकित्सा** इति । अत्र वदन्ति वैशेषिकाः शाब्दं हि उपनीतं मन्तव्यम् । श्रोत्रमात्रजन्यत्वात् । पदानां चोपनायकत्वात् । अन्वयधीरप्यनुमितिः एते पदार्थास्तात्पर्यविषये मिथःसंसर्गवन्तः आकाङ्क्षादिमत्पदस्मारिततद्योग्यतासत्तिमत्त्वे सति संसर्गापरपदस्मारितत्वाद्वेत्यनुमानात् । घटोस्तीत्यत्र घटोऽस्तित्ववान् तद्योग्यत्वात् पटवदित्यनुमानाद्वा । न चान्वयव्यतिरेकाभ्यां शब्दस्य कारणतेति वाच्यम् । हेतुशरीरघटकत्वेन हेतुत्वेन वान्वयव्यतिरेकानुविधानोपपत्तेस्तस्यातिरिक्तकारणताग्राहकत्वाभावात् । तस्मान्न शब्दः पृथग्मानं, अतो वेदस्योपनायकतामात्रमिति । अत्र नैयायिकास्तिष्ठन्ते, स्वाशयं प्रकाशयन्तीत्यर्थः । 'प्रकाशनस्थेयाख्ययोश्च' इति सूत्रेणात्मनेपदम् । बाधकप्रमाणाभावो योग्यता साच न लिङ्गविशेषणम् । प्रमामात्रविरहस्य सर्वत्र निश्चेतुमशक्यत्वात् । तत्संशयेपि शब्दादन्वयबोधाच्च । शब्दप्रामाण्ये योग्यतायाः संशयसाधारणं ज्ञानं प्रयोजकमिति शब्दप्रमाणमिति । किंचाकाङ्क्षाया हेतुशरीरनिविष्टायाः अन्वयबोधानुकूलानुपूर्वीपर्यवसायिन्या न भूतपूर्वत्वमतो न तद्घटितो हेतुः । नहि मिथःसंसर्गाज्ञातुर्देवदत्तो ग्रामं गच्छतीति वाक्यस्यान्वयबोधानुकूलायाः ग्रामं गच्छति देवदत्त इत्येवं विधानुपूर्व्या ज्ञानमस्ति, तथायोग्यत्वहेतुकानुमानेपि अज्ञातस्य तस्यानुपयोगात्, स्वरूपसत्ताया अकारणत्वेन हेतुतायास्तज्ज्ञाने पर्यवसानात्तज्ज्ञानं लिङ्गमिति वाच्यं, तत्तु बाधाभावनिश्चयमात्रं जनयित्वा कृतार्थमिति न हेतुतां निर्वोढुमलम् । अपि च अस्तित्वव्याप्ययोग्यतावान् गौरित्यनुमानस्यान्वयबुद्धित्वे घटः कर्मत्वमित्यादिस्थलीयस्य घटः कर्मत्वमानयनं कृतिस्तद्व्याप्ययोग्यत्ववान् युष्मदर्थः इत्यनुमानस्यापि शाब्द-

१. योग्यतालक्षणघटकप्रमाणत्वविशेषणीभूतस्य प्रमामात्रस्य विशेष्यान्वितविरहस्य निश्चेतुमशक्यत्वादित्यर्थः ।

रश्मिः ।

बुद्धित्वापातः । किंच । योग्यतायाः संशयविषयिण्याः अप्यन्वयबुद्धिविघटकत्वाभावदर्शनादनुमितिविघटकत्वदर्शनाच्च वैलक्षण्याहितो भेदः। तेनान्यान्येप्याकाङ्क्षाघटितलिङ्गकानि गौरस्तित्ववान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितत्वात् घटवत्। गौरिति पदं अस्तिमद्बोज्ञानपूर्वकं अस्तिपदसाकाङ्क्षगोपदत्वात् यन्नैवं तन्नैवमाकाशवत्। लौकिकानि पदानि वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वात् घटमानयेति पदकदम्बवत्। इतीमान्यनुमानानि प्रयुक्तानि । किंच व्याप्तिज्ञप्तिविधुरेणापि शाब्दबोधोनुभूयते इत्यविवादं नापि तत्र व्याप्तिज्ञप्तेः कल्पनं शब्दश्रवणानन्तरं प्रागेव बोधात्। सर्वेषु शाब्देषु व्याप्तिज्ञानकल्पनमिव यावदनुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोधस्यापि सुकरकल्पनत्वाच्च । अस्तु तर्हि श्रावणप्रत्यक्षता । मैवम् । हेतुसंस्कारयोरपि साकाङ्क्षपदवत् उपनायकतायाः शक्यवचनत्वेन तदुपस्थापितस्याप्युपनयमर्यादया भानापत्तेः। न चेष्टापत्तिः आकाङ्क्षादिमत्पदस्मारितत्वादिरूपाद्धेतोः पदजन्यसंस्काराद्वा प्रत्येमीत्यापत्तेः। भवति तु शब्दात् प्रत्येमीत्याद्यनुव्यवसायः । ननु तत्तदर्थविषयकशाब्दबुद्ध्यनुव्यवसायं प्रति शाब्दबुद्धेस्तावत् तत्तदर्थकसाकाङ्क्षपदजन्यतत्तदर्थगोचरशाब्दत्वेन विषयविधया हेतुताद्रियतेऽतः शाब्दस्यैवोपनयमर्यादया भानं न हेतुसंस्कारयोरिति चेन्न गौरवात्, घटेन जलमाहरेत्यादौ इतरबाधलब्धछिद्रेतरत्वादेरर्थाक्षिप्तस्यापदार्थस्यापि शाब्दबोधेवगाहात् प्राप्तस्य तद्विषयकानुव्यवसायस्य बाधाप्रसक्तेर्गवादेरिवास्तित्वादौ गत्वादेरपि भानप्रसङ्गात्। अपि च शाब्दज्ञानस्य श्रवणजन्यत्वाभ्युपगमे पदार्थान्वयबोधदशायामपदार्थानामपि स्वसामग्रीबलेन प्रत्यक्षतापत्तिः। ननु श्रावणप्रत्यक्षसामग्री अपदार्थानां श्रावणप्रत्यक्षे प्रतिबन्धिका भविष्यतीति चेन्न प्रत्यक्षसामान्यं प्रति शाब्दसामग्र्याः प्रत्यक्षसामग्रीकोटिनिविष्टतया प्रतिबन्धकताऽसंभवात्। न च शाब्दान्यप्रत्यक्षत्वावच्छिन्नं प्रति तस्यास्तथात्वकल्पनाददोष इति वाच्यं, गौरवात् । तदपेक्षया शाब्दज्ञानस्य प्रत्यक्षभिन्नत्वकल्पनमेव लघीय इति । अतोन्वयबुद्धेः श्रवणेन्द्रियजन्यत्वाभावान्न प्रत्यक्षता । तस्माद्घटोस्ति गामानयेत्यादौ स्वस्वपदजन्यपदार्थोपस्थित्यनन्तरं घटादावस्तित्वाद्यन्वयविषयकस्य विलक्षणबोधस्यान्वयव्यतिरेकाभ्यामाकाङ्क्षादिमच्छब्दकारणकस्य नोपनीतभानता। नचान्वयबोधो नास्त्येवेति व्यर्थः प्रयास इति शङ्क्यम्। अनुभवविरुद्धत्वात् तस्यासाधकत्वेऽनुमितिरपि न स्यात् । न च वक्तव्यं पदजन्यसंस्कारजन्यत्वात् शब्दसिद्धिः स्मृतिरूपास्तु शब्दात्प्रत्येमीत्यनुव्यवसायविरोधात् । किंच घटास्तित्वयोर्गोकर्मत्वानयनानामेवोपस्थित्या तद्विषयकस्यैव संस्कारस्य जननेऽन्वयविषयस्याजननात्स्मृतित्वं न शक्यवचनमतः शब्दोऽतिरिक्तां प्रमाणतां दधाति। परंतु शब्दशतादपि प्रत्यक्षविरुद्धं प्रतिपादयितुमशक्यमिति शब्दः प्रत्यक्षमुपजीवति तेनानाप्तोक्ते न प्रामाण्यमिति। किंच। श्रोत्रसापेक्षः शब्दः। स्वस्वरूपलाभेपीतः प्रत्यक्षं प्रबलमिति । अत्रापि अयं विशेषः। शब्दस्यैव प्राबल्यमिति स्थितमाकरे। तथाहि प्रामाण्यांशे श्रोत्रसापेक्षताभावेन स्वरूपलाभे सापेक्षता न प्राबल्यं विघटयति। श्रुतमात्रशब्दश्चक्षुरादितिरस्कुर्वन्नेव पदार्थमुपस्थापयतीति। एवं च प्रत्यक्षं नोपजीवति शब्दः, वेदे तदभावात्। लोकानधिगतस्याप्यग्निहोत्रादेर्विधानात् । न च सोपि योगिनां प्रत्यक्षः । मानाभावात् । योगादेर्मानान्तरेण धर्मादिप्रत्यक्षजननसामर्थ्यस्याज्ञानात् तदर्थप्रवृत्त्यनुपपत्तिश्च । न चादृष्टं प्रवर्तकं, सत्कर्मैकरणेन तदुत्पत्तेः । परंपराप्यादिसर्गवादादवक्तव्या । अनादिसर्गवादिभिस्तु वेदोऽपौरुषेयो धर्मप्रमितिं

तस्माद् ब्रह्म जिज्ञासितव्यमिति सिद्धम् ॥ १ ॥

॥ इति प्रथमाध्याये प्रथमपादे प्रथमं जिज्ञासाधिकरणम् १ ॥

भाष्यप्रकाशः ।

रित्यर्थः । सिद्धमाहुः **तस्मादित्यादि** । ब्रह्मसंबन्धिनां विचारेऽपि ब्रह्मणो विषयत्वस्यार्थतः सिद्धत्वात् तादृशगुणकत्वेन ब्रह्म जिज्ञास्यमिति सिद्धमित्यर्थः । अपेक्षितगुणवत्तयैवात्र ब्रह्म जिज्ञास्यं, न त्वशेषविशेषशून्यतयेति शेषषष्ठ्येव युक्तेत्यत्र गमकमप्याहुः **किंच इत्यादि**[1], इतीत्यन्तम् । तथा च प्रथमसूत्रे ब्रह्मविचारं प्रतिज्ञाय ब्रह्मणो येन रूपेण वेदार्थता तानि रूपाणि प्रकारांश्च वक्तुमग्रिमे कार्यलक्षणं प्रमाणं च वदतीत्यतस्तथेत्यर्थः । एवं विषये निर्द्धारिते प्रतिपाद्यप्रतिपादकभावः संबन्धोऽप्यनुक्तसिद्ध एवेति प्रेक्षावत्प्रवृत्त्युपयुक्तं सर्वमत्र निरूपितम् । प्रकारभेदेन काण्डद्वयस्यापि ब्रह्म-

रश्मिः ।

जनयतीति स्वीकाराच्च । नापि स्वभावः प्रवर्तकः । तस्यापि मूलविमर्शे वेद एव विश्रान्तेः । ईश्वरेच्छयेत्यपि न युक्तं, शब्दं विना तस्या एवासिद्धेः । तदग्रे स्फुटिष्यति । निःश्वसितश्रुतेरबुद्धिपूर्वकमेवाभिव्यञ्जनान्नेश्वरप्रत्यक्षोपजीवकत्वं, तेन वेदः प्रमाणम् । इदं चौत्पत्तिकसूत्रतात्पर्यार्थकथने उक्तमपि स्पष्टप्रतिपत्तिप्रयोजनकम् । अस्मदादिमुखेनापि ब्रह्मैव क्रीडयितुं वाक्यं वदति इति सर्वाणि वाक्यानि वेदतुल्यानि ब्रह्मवाक्यत्वादिति सिद्धान्तः । 'स एष जीवो विवरप्रसूतिः' इत्यत्र 'एवं गतिः' इति ह्यतिदेशात् । अत्र श्रोत्रं प्रमाणकं शब्दस्त्वतिग्रहः 'श्रोत्रं वै ग्रहः स शब्देनातिग्रहेण गृहीतः श्रोत्रेण शब्दाञ्छृणोति' इति बृहदारण्यकश्रुतेः । 'चक्षुर्वै ग्रहः स रूपेणातिग्रहेण गृहीतः रूपं पश्यति' इतिवदानुपूर्व्या अभावात् । अत एव शब्दगुणकमाकाशमित्याकाशलक्षणे शब्दप्रवेशः । उष्णस्पर्शवत्त्वं तेजस्त्वमिति तेजोलक्षणेन रूपप्रवेशः कृत इति शुभम् । न चैवं सकलवाक्येषु निर्दुष्टत्वं स्यात् । न । योग्यावयवैरेव वाक्यनिर्माणोपगमात्, योग्यावयवैरेव पदार्थनिर्माणवत् । अन्यथा घोटकस्य निर्मातुः शृङ्गनिर्माणमप्यापद्येत । क्रीडैव प्रयोजिकेति तु तत्त्वम् । एवं निःसंदेहा इत्यर्थः । यथादर्शनमाहुः **ब्रह्मसंबन्धिनामित्यादि** । न च ब्रह्मपदस्य वेदान्तवाचकत्वं 'वेदान्तानां विचार आरम्भणीयो न वेति' भाष्येण सिद्ध्यति । ततश्च वेदान्तानां विचार आरम्भणीय इति सिद्धमिति भाष्यमस्तु । न तु ब्रह्मजिज्ञासितव्यमितिभाष्यं सिद्धकथनभाष्यत्वादिति वाच्यं 'षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इतिश्रुतेः । षडङ्गैरेव निर्वाहे मीमांसाया अनङ्गत्वेन वेदान्तविचारानावश्यकत्वेऽस्य शास्त्रस्यानुपयोगेनारम्भणीयतास्य स्यात्तन्निवृत्त्यर्थमारम्भणीयताप्रतिपादनपुरस्कारेण वेदान्तेषु मुख्यतया प्रतिपाद्यस्फोरणाय अथातो वेदान्तविचारः' इत्यसूत्रयित्वा 'अथातो ब्रह्मजिज्ञासा' इति सूत्रणादत्रैव सूत्रान्त इति करणसामर्थ्यात्किंचेत्यस्यान्यच्चेत्यर्थात् च पूर्वशेषतायाः संभवदुक्तिकत्वाद्देहलीदीपन्यायेनाभासमवतारयन्ति **अपेक्षितेत्यादि** । अतस्तथेत्यर्थः । उक्तग्रन्थसंवादाच्छेषषष्ठ्येव युक्तेत्यर्थः । एतेन 'तद्विजिज्ञासस्व तद्ब्रह्म' इति श्रुत्येकवाक्यतायै कर्मणि षष्ठी युक्तेत्यपि प्रत्युक्तम् । स्वरूपलक्षणं परित्यज्य कार्यलक्षणकथनेन शेषषष्ठ्यामेव व्यासचरणानां तात्पर्यात् । **प्रतिपाद्यप्रतिपादकभावसंबन्ध** इति मीमांसाब्रह्मधर्मयोः स संबन्ध इत्यर्थः । **अत्रेति** जिज्ञासाधिकरण इत्यर्थः । **प्रकारभेदेनेति** क्रियाज्ञानत्वभेदेनेत्यर्थः ।

१. द्वितीयसूत्रविवरणे द्रष्टव्यम् ।

भाष्यप्रकाशः।

प्रतिपादकतयैकवाक्यत्वसमर्थनान्मीमांसाद्वयस्यैकशास्त्रत्वसूचनेन वृत्तिकाराविरोधोऽपि बोधितः।

शांकरास्तु ब्रह्म जिज्ञास्यं न वेति संदेहे, अहंवित्तिवेद्यत्वेन प्रत्यक्षस्यात्मन एव ब्रह्मत्वान्न जिज्ञास्यमिति पूर्वपक्षे कर्तृत्वादिशून्यनिर्विशेषचिदेकरसत्वेन जिज्ञास्यत्वमङ्गीकृत्य केवलज्ञानादेव मोक्षं चाङ्गीकृत्य मोक्षं प्रति केवलज्ञानस्यैव हेतुत्वाज्ज्ञानकर्मसमुच्चयं नाङ्गीकुर्वन्ति। तन्मते पूर्वोत्तरकाण्डयोः स्वर्गमोक्षरूपप्रयोजनभेदात् कर्मब्रह्मरूपाभिधेयभेदाच्छेषशेषिभावाद्यभावेन परस्पराकाङ्क्षाभावाच्चैकवाक्यत्वाभावे उत्तरकाण्डस्य वेदान्त इति समाख्याया विरोधः। नापि कर्मशेषभूतकर्तृस्वरूपप्रतिपादकत्वेनापेक्षा। कर्मानुपयुक्तकर्तृभोक्तृभावशून्यात्मप्रतिपादकताभ्युपगमात्। नापि कर्मपौष्कल्यजनकविद्याप्रतिपादकत्वेन सा। 'यदेव विद्यया करोति तदेवास्य वीर्यवत्तरं भवति' इति वाक्यस्योद्गीथविद्यामुपक्रम्य पठितत्वेन तन्मात्रस्य त्वन्मते तथात्वबोधकतया सर्वस्य काण्डस्य तथात्वसंपादनाक्षमत्वात्। मानवी ऋचौ धाय्ये कुर्यादितिवत्। न च वैदिकाभिधाने स्वरादिनियमयोगेनैकवाक्यत्वमिति शङ्क्यं अप्रयोजकत्वात्, सूत्रोक्तैकवाक्यलक्षणविरोधात्। न च

रश्मिः।

वृत्तिकारेति संहतमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति ब्रुवतो वृत्तिकारस्याविरोध इत्यर्थः। **आत्मन एवेति** जीवस्यैवेत्यर्थः। **सेति** पूर्वकाण्डस्योत्तरकाण्डापेक्षेत्यर्थः। **त्वन्मत** इति अस्मन्मते तु यत्तदिति सामान्यनिर्देशस्य विवक्षितत्वान्न तथात्वमिति बोध्यम्। **तन्मात्रस्येत्यादि** उद्गीथविद्यामात्रस्य। कर्मपौष्कल्यजनकत्वबोधनात् न तया सर्वस्योत्तरकाण्डस्य कर्मपौष्कल्यजनकविद्याप्रतिपादकत्वसंपादनाक्षमत्वादित्यर्थः। न च किंचौपनिषदज्ञानस्येत्यादि भाष्येऽप्ययं दोषः इति शङ्क्यं 'विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत्'इति न्यायमनुसृत्य श्रुतौ विद्याशब्दो न संकोचसहिष्णुरिति भाष्याशयात्, अत एवात्र त्वन्मत इत्युक्तम्' एवं च

'यदेव विद्ययेत्याह ब्रह्मा ब्रह्मिष्ठ एव च।
तज्ज्ञानं तेषु हि प्रोक्तं कर्तृशेषा यतस्तु ते'॥

'ज्ञाननिष्ठाय देयानि कव्यानि' इति यथा तथेति पत्रावलम्बने विवरणे चास्या उद्गीथप्रकरणावरुद्धत्वेन विद्यान्तरासंग्राहकत्वं यदुक्तं तदप्युक्तदिशैव 'त्वन्मते' इति कथनादिति ध्येयम्। **मानवीत्यादि** इयं श्रुतिर्द्वितीयाष्टकेस्ति विकृतिरूपे सौमारौद्रे चरावतिदेशतः प्राप्तासु सामिधेनीषु मध्ये द्वौ धाय्यासंज्ञिकौ मन्त्रौ प्रक्षेप्तव्यौ तौ मानवौ कर्तव्यावित्यर्थः। 'प्रवो वाजा अभिद्यव' इत्याद्या अग्निसमिन्धनार्था ऋचः सामिधेन्यस्तासु द्वयोरेव मानवीऋकृत्ववद्विद्यासूद्गीथविद्याया एव कर्माङ्गत्वमिति भावः। मतान्तरमुपक्षिप्य वारयन्ति **न च वैदिकेत्यादि**। वैदिकानामभिध्यानं वेदान्तेषु वेद इति वर्तते यतस्ते स्वरपूर्वकमनध्यायादित्यजन्तः वेदान्तान्पठन्ति पाठयन्ति च। अत एकवाक्यत्वं धर्मातिरिक्तब्रह्माप्रतिपादनादिति शङ्क्यमित्यर्थः। अत्र हेतुमाहुर**प्रयोजकेत्यादि**। ब्रह्मप्रतिपादकताया उक्तत्वाद्वेद इति प्रसिद्धिमात्रेण तयोरेकवाक्यताया असिद्धेस्तथात्वादित्यर्थः। अत्रापि हेतुमाहुः **सूत्रोक्तेत्यादि**। द्वितीयाध्यायस्थ 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति सूत्रोक्तेत्यर्थः। उदाहरणं तु।

१. किंचेति विकल्पे।

भाष्यप्रकाशः ।

यज्ञानां विविदिषोत्पादकत्वेन पूर्वस्योत्तरकाण्डशेषतायामेकवाक्यत्वसंभव इति वाच्यम् । सन्प्रत्ययोक्तेच्छायामिष्यमाणपर्यन्तत्वं वादेन जिगीषतीत्यादौ दृष्टं, केवलाया अपुरुषार्थत्वं चेति तावन्मात्रान्तत्वस्यासंगतत्वात् । इष्यमाणपर्यन्तत्वस्य चानुपगमात् । अत एवं वदता, 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति' इति पृथक्समाप्तिश्रुतेः,'वेदाः साङ्गोपनिषदः' इति पौराणिकपृथङ्निर्देशाच्चात्यन्तभेद एवास्थेयः । नचैवं वैदिकप्रसिद्धेर्वेदान्तशब्दो रूढ एवेति वाच्यम् । तथा सति स्वाध्यायादिविधौ तदनिवेशेन तदध्ययनार्थज्ञानविचाराणामवैधत्वापत्तेः । न च तद् विजिज्ञासस्व, तद् ब्रह्मेत्यादिविधिना विचारप्राप्तौ तेनाध्ययनाद्याक्षेपान्न दोष इति वाच्यम् । तथा सति जिज्ञासुमात्रप्राप्तौ त्रैवर्णिकाप्राप्त्या अधिकारविरोधापत्तेः । अतस्तन्मते उपनिषदां वेदान्तत्वं न कथमपि सिद्ध्यतीत्यवधेयम् ।

रामानुजाचार्यास्तु ब्रह्मपदस्य निर्दोषपूर्णगुणपुरुषोत्तमवाचकत्वं, तस्य च स्थूलसूक्ष्मचिदचिच्छरीरविशिष्टतया वेदान्तार्थत्वेन जिज्ञास्यत्वं चोपगम्य यज्ञादीनां विविदिषोपयोगमात्रश्रावणेऽपि व्यासपादैः'आप्रायणात्तत्रापि हि दृष्टम्'इत्यादिसूत्रेषु यावज्जीवं तत्करणबोधनाद् ध्रुवानुस्मृतिरूपोपासनाभक्त्यादिनामकदर्शनसमानाकारज्ञानजनकत्वेन भावनात्मकोपासनया समुच्चयमङ्गीकुर्वन्ति ।

भास्कराचार्यास्तु ब्रह्म प्रसिद्धं न जिज्ञास्यम् । अथाप्रसिद्धं नतरामिति पूर्वपक्षे, 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यादिषु जगत्कारणताश्रावणेन प्रसिद्धमपि ब्रह्म स्मृतिकारैस्त्रिगुणस्य प्रधानस्य परमाणूनां च तथात्वाङ्गीकाराद् विप्रतिपन्नमिति तन्निवृत्त्यर्थमत्र कारणकार्यजीव-

रश्मिः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इति ।

सर्वाणीमानि पदानि निर्वापप्रकाशार्थानि विभागे च साकाङ्क्षाणीति । **एकवाक्यत्वे**त्यादि यावन्ति पदानि तानि ब्रह्मप्रकाशार्थानि विभागे च साकाङ्क्षाणीति एकवाक्यत्वसंभव इत्यर्थः । **तावन्मात्रे**ति । विविदिषेत्यत्रेच्छामात्रान्तत्वस्येत्यर्थः । तथा च वादेन विजिगीषतीत्यत्र इवेच्छाविषयपर्यन्तत्वं वाच्यं, तत्राहु**रिष्यमाणे**त्यादि । **एवं वदते**ति । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति'इत्यत्र यज्ञानां विविदिषोत्पादकत्वं वदतेत्यर्थः । **आस्थेय** इति, वेदवेदान्तयोरास्थेय इत्यर्थः । **न चैव**मिति । वैदिकाभिध्यानेत्याद्युक्तदिशेत्यर्थः । **तदनिवेशने**ति । वेदस्यान्त इति योगाभावेन तथेत्यर्थः । **न कथमपी**ति । तदुक्तं **पत्रावलम्बने** । ननु वेदान्तत्वं कथमिति सिद्धान्ते तु एवं लोकसिद्धस्य जगतो लोकप्रतीतिं बाधित्वा ब्रह्मत्वेनालौकिकत्वं संपाद्यत इति अर्धजरतीयन्यायात्तदन्तत्वं यथा लोकसिद्धस्य व्रीह्यादेर्लोकप्रतीतिं बाधयित्वा प्रोक्षणादिनाऽलौकिकत्वं क्रियते तद्वत्, प्रोक्षणवत्साधनानुक्त्याऽर्धजरतीयत्वम् । **रामानुजाचार्यास्त्वि**ति एते विशिष्टाद्वैतवादिनः । समानाकारं ज्ञानं विविदिषति विविदिषेत्यत्र सनर्थस्य तद्भाष्ये अविवक्षितत्वाद्वेदनमात्रं समानाकारं ज्ञानम् । **भावने**त्यादि वेदान्तोक्तया तज्जनकयज्ञादिकस्य समुच्चयम् । **ध्रुवानुस्मृती**त्यादि ध्रुवानुस्मृतिरूपं यदुपासनाभक्त्यादिनामकं दर्शनेन समानाकारं ज्ञानं तज्जनकत्वेनेत्यर्थः ।

भास्कराचार्यास्त्विति । एते भेदाभेदवादिनः समन्वयाधिकरणे भेदाभेदनिरूपणेऽस्ति । **विप्रतिपन्न**मिति संदिग्धमित्यर्थः । ननु सांख्ये असङ्गः पुरुषः । परमाणुवादिनां स्वोपादानगोचरापरोक्ष-

भाष्यप्रकाशः ।

रूपैः वेदान्तोक्तेश्वररूपं जिज्ञास्यमित्युपगम्य पूर्ववत् समुच्चयमङ्गीकुर्वन्ति । सूत्राणि च शारीरकपदेनोपवर्षादिमतमनुसृत्य विशिंषन्ति । तन्मते पूर्वोत्तरकाण्डयोरभिधेयभेदेऽपि प्रयोजनैक्यादैकशास्त्र्यात्, 'सर्वे वेदा यत्पदमामनन्ति,' 'वेदैश्च सर्वैरहमेव वेद्यः,'

'वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे ।
परोक्षवादा ऋषयः परोक्षं च मम प्रियम् ॥
मां विधत्तेभिधत्ते मां विकल्प्यापोह्यते ह्यहम् ।
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ।
मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' ॥

इति श्रुतिस्मृतिविरोधो दुर्वारः । गीतायां, ब्रह्मसूत्रपदैरित्युक्तेस्तद्विरोधश्च ।

भिक्षुभाष्ये तु, आत्मेत्येवोपासीतेत्यादिविहितज्ञानविषयं किं ब्रह्म, किं वा तस्य ब्रह्मतानिर्वाहकं गुणजातं, कीदृशं तस्य ज्ञानं, कीदृशं च तस्य ज्ञानस्य फलमित्यादिकं विशिष्य मुमुक्षूणां जिज्ञासितं भवतीत्येवं जिज्ञासामुखेन संशयमधिकारिणं चोपन्यस्य शाखाभेदेन श्रुतिष्वन्योन्यविरुद्धार्थतायाः प्रतिभासनादिति जिज्ञासाजनकसंशयहेतुं चोपन्यस्य तन्निर्णयार्थं ब्रह्ममीमांसाशास्त्रस्यापेक्षितत्वमुक्त्वा ब्रह्मज्ञानस्य चोदनालक्षणतया, 'अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्' इत्यादिस्मृत्या च धर्मत्वेऽपि न पूर्वमीमांसया ब्रह्ममीमांसाया गतार्थत्वं कल्पसूत्रवदशेषतन्निर्धारणार्थत्वादित्यनेन धर्मस्य सर्ववेदार्थत्वं, ब्रह्ममीमांसायाः पूर्वमीमांसाशेषत्वं च प्रकटीकृत्य, 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतिसिद्धत्वाद् ब्रह्मस्वरूपे जिज्ञासा नोपपद्यत इत्याशङ्क्य, ब्रह्मस्वरूपज्ञानं किं सांख्यसिद्धं जीवचैतन्यं, किं वा चैतन्यान्तरमिति जिज्ञासासत्त्वादाकाङ्क्षितं ब्रह्ममीमांसाशास्त्रं वेदव्यासः प्रतिजानीत इत्युक्तम् ।

तन्मतेऽपि पूर्वोक्तवाक्यविरोधो जैमिनेरकुशलत्वापत्तिश्च । किंचेदं शास्त्रं धर्मविशेषविचारार्थं

रश्मिः ।

ज्ञानचिकीर्षाकृतिमानीश्वर इति । प्रधानादेः संशयकोटौ कथं निवेश इति चेत्, न असङ्गपुरुषादेर्युक्त्याऽप्रयोजकत्वात्पूर्ववदिति, स्वभाष्ये पूर्वस्मिन्यथातथाऽयं समुच्चयोत्रैवाग्रे वक्तव्यः । एवं च कार्यकारणजीवजिज्ञासेति सूत्रयितुं युक्तं, अन्यथा धर्मजिज्ञासया गतार्थत्वं स्यात्तत्राहुः **सूत्राणि** चेत्यादि । स्फुटमिदं तद्भाष्ये । अत एव उपवर्षाचार्येणोक्तं प्रथमपादे, आत्मवादं तु शारीरके वक्ष्याम इति रूपे, अतः उपदेशविचारार्थत्वं संबन्धः न तु संहतत्वम् । अतः शारीरकाणि सूत्राणीति विशिंषन्ति **अभिधेयभेदेऽपीति** कर्मोपासनारूपाभिधेयभेदेपीत्यर्थः । **गीतायामित्यादि** त्रयोदशे इत्यर्थः । 'बहुधा गीतम्'इत्यन्वयः ।

भिक्षुभाष्ये त्विति । अयमविभागाद्वैतमङ्गीकुरुते यथा मधु मधुकृतो निस्तिष्ठन्तीति अथास्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते इति छान्दोग्यश्रुतिदर्शनात् । इदं द्वितीयस्य तृतीयपादे 'यावद्विकारं तु विभागो लोकवत्' इति सूत्रे वक्ष्यन्ति । **अधिकरणमिति** एतादृशब्रह्मजिज्ञासुमित्यर्थः । श्रौतं विस्पष्टमेव ब्रह्मेत्याकाङ्क्षायामाह **शाखाभेदेनेत्यादि** । **श्रुतिष्विति** अधिकरणान्तरविषयभूतास्वित्यर्थः । **जिज्ञासाजनकेत्यादि** संशयो जिज्ञासाजन्मेति तथा । **चोदनेत्यादि** आत्मेत्येवोपासीतेति चोदना । **अकुशलत्वापत्तिरिति** । निःशेषधर्मविचारस्याकृतत्वात्तथेत्यर्थः ।

भाष्यप्रकाशः।

प्रवर्तितमुत ब्रह्मविचारार्थम्। आद्ये धर्मविशेषजिज्ञासा ब्रह्मज्ञानजिज्ञासेति वा प्रतिज्ञां कुर्यात्। प्रकरणिन एव ज्ञेयत्वेन तस्यैव प्रतिज्ञातव्यत्वात्। तदकरणेन व्यासस्याप्यकौशलमापद्यते। द्वितीये तु प्रतिपाद्यभेदात् पूर्वशेषत्वाभावेन कल्पसूत्रन्यायविरोधः। सिद्धान्ते तु ब्रह्मणः सर्ववेदार्थत्वाज्जैमिन्युक्तं धर्मस्य तथात्वमपासितुं तथा शङ्कानिरासावावश्यकावित्यदोषः। तस्मादिदमपि पूर्वतुल्यम्।

यत्तु शैवो रामानुजमतैकदेशमादायाराधनाराध्यभूतधर्मब्रह्मप्रतिपादकयोर्मीमांसाशास्त्रयोः फलैक्यादैक्यम्। यथा हि व्रीहिप्रोक्षणं दर्शपूर्णमासोत्पत्त्यपूर्वहेतुतया स्वर्गे समुच्चीयते, तथा कर्माणि ज्ञानप्रयोजकतया मोक्षे समुच्चीयन्तेऽतो गुणकर्मत्वादङ्गत्वं ज्योतिष्टोमादीनाम्। नच नित्यविधिप्राप्तानां तेषामितिकर्तव्यताविरोधात् कथं संस्कारतासिद्धिरिति शङ्क्यम्। करणतया स्वतन्त्रविध्यन्तरविहितसौत्रामणीबृहस्पतिसवादेरग्निचयनवाजपेयाद्यङ्गत्ववदुभयविधिबलादुभयसिद्धेः। अतो ज्ञानोदयावधि कर्माणि कर्तव्यानि। नच विविदिषन्तीति श्रुत्या विविदिषोत्पत्तिपर्यन्तत्वं कर्मणां शङ्क्यम्। इच्छाया अपुरुषार्थत्वात्। अतः पूर्ववदेव शास्त्रैक्यमित्यङ्गीकृत्य ततो रामानुजाचार्यधृतेषु वाक्येषु परीक्ष्य लोकान् कर्मचितानित्यादिवाक्यत्रयं विषयत्वेनोपन्यस्य ब्रह्म विचारार्हं न वेति संदेहे, अयमात्मा ब्रह्मेतिश्रुतिरहंवित्तिप्रत्यक्षसिद्धमात्मानं ब्रह्मेत्युपदिशतीति संदेहाभावात्। किंच, विचारफलं विषयपरिच्छेदः। वेदान्तविचारजन्यं ज्ञानं चेद् ब्रह्म परिच्छिनत्ति तदा परिच्छेदातीतत्वभङ्गप्रसङ्गः। यदि न परिच्छिनत्ति, तदा प्रकाशाभावाद् ब्रह्मविषयज्ञानस्यासंभवः।

रश्मिः।

कल्पसूत्र इत्यादि बौधायनकल्पसूत्रन्यायस्य दृष्टान्ततायां विरोध इत्यर्थः। ननु सिद्धान्ते कथमित्यत आहुः **सिद्धान्ते त्वि**त्यादि। **जैमिन्युक्त**मिति वैशेषिकाद्यन्तर्गतपुराणप्रसिद्धजैमिन्युक्तवैशेषिकादितुल्येश्वररूपस्य धर्मस्य तथात्वं सर्ववेदार्थत्वमित्यर्थः। **शङ्के**त्यादि 'जैमिनीये च वैय्यासे न विरोधोस्ति कश्चन' इतिपुराणोक्तवेदाविरुद्धजैमिनिमतस्थापनाय भगवद्भिक्षूक्तशङ्कानिरासौ आवश्यकाविति। **तस्मा**दिति प्रयोजनैक्यादेकशास्त्र्यात्। **पूर्वतुल्य**मिति 'सर्वे वेदाः' इत्यादिपूर्वोक्तवाक्यविरोधब्रह्मसूत्रपदैरितिगीताविरोधाभ्यां धर्माभ्यां भास्कराचार्यमतसदृशमित्यर्थः। **शैव** इति अयमपि विशिष्टाद्वैतवादी शिवो ब्रह्मेति। तदाह **यथा ही**त्यादिना। एतच्च पूर्वतन्त्रे द्वितीयाध्याय उक्तम्। दर्शपूर्णमासाभ्यामुत्पत्तिर्यस्यापूर्वस्य तद्धेतुतयेत्यर्थः। **गुणकर्मत्वा**दिति व्रीहीनवहन्तीतिवत्संस्कारकत्वादित्यर्थः। **तेषा**मित्यादि प्राशस्त्यज्ञानस्य शाब्दभावनायामितिकर्तव्यत्वात् ज्योतिष्टोमादीनामर्थभावनायां करणत्वेन तद्विरोधात् कथं 'आत्मेत्येवोपासीत' इति भावनायामितिकर्तव्यतारूपसंस्कारकर्मतासिद्धिरित्यर्थः। **उभयविधिबला**दिति ज्योतिष्टोमविधिः 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति उभयविधिबलात् ज्ञानस्वर्गोभयरूपफलसिद्धेः करणतासंस्कारतयोर्वा सिद्धेरित्यर्थः। **पूर्ववदेवे**ति फलैक्यादेवेत्यर्थः। **वाक्येष्वि**ति 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' 'अन्तवदेवास्य तद्भवति' 'न ह्यध्रुवैः प्राप्यते ध्रुवम्' 'प्लवा ह्येते अदृढा यज्ञरूपाः' 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन' 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' 'ब्रह्मविदाप्नोति परम्' 'न पुनर्मृत्यवे तदेकं पश्यति' 'न पश्यो मृत्युं पश्यति' 'अकर्मपश्यो न स्वराड् भवति' 'तमेवं विद्वानमृत इह भवति' 'तमेव विदित्वातिमृत्यु-

भाष्यप्रकाशः ।

तस्मान्न विचार्यमिति पूर्वपक्षमुक्त्वा, विचारयोग्यं ब्रह्म, 'अयमात्मा ब्रह्म' इति श्रुत्याऽहंकारबद्धस्य संसारिण आत्मनो ब्रह्मत्वाभिधानादेव संदेहसंभवात् । निरस्तसमस्तोपप्लवकलङ्कस्य निरतिशयज्ञानानन्दादिशक्तिमहिमातिशयवत्त्वं हि ब्रह्मत्वम्, अनाद्यज्ञानवासनावष्टम्भविजृम्भितविचित्रकर्मफलभोगानुगुणबहुशरीरप्रवेशनिर्गमव्यापारपरवशनिःसीमतापसहिष्णुत्वं जीवत्वमिति तयोर्लक्षणेनेतरेतरभेदनिश्चये तयोरैक्यदौर्घट्यस्फूर्तेः । किंच । अन्नं ब्रह्म, मनो ब्रह्म, विज्ञानं ब्रह्म, आदित्यो ब्रह्म, नारायणं परं ब्रह्म इत्यादयोऽन्यमन्यमर्थं ब्रह्म इत्याहुः । तत्र किं ब्रह्मेत्येवं संदेहादपि विचारार्हं ब्रह्म । नचापरिच्छिन्नत्वाद् ब्रह्मणस्तद्विषयं ज्ञानं न संभवतीति शङ्क्यम् । ईदृगिदमिति ब्रह्मणः परिच्छेदासंभवेऽपि लक्षणमुखेनेतरव्यावृत्ततामात्रेण परिच्छेदसंभवात् लक्षणेन परिच्छेदो हि सर्वत्र लक्ष्यविषयकेतरव्यावृत्तताज्ञानरूप एव दृष्ट इत्यदुष्टः । अत उपदिष्टस्य ब्रह्मणो लक्षणे वेदान्तवाक्यैर्निरूपिते परीक्षिते च सति तल्लक्षणशून्येभ्यः सजातीयविजातीयेभ्यः सर्वेभ्यो व्यावृत्तं ब्रह्म विज्ञायत इति तदर्थं युक्तः शास्त्रारम्भ इत्याह। एतन्मतेऽपि तेषां वाक्यानां विरोधः पूर्ववदेव। जीवलक्षणं तु जीवप्रकरणे दूषयिष्यामः । किंच । 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति,' 'ईशं तं ज्ञात्वा अमृता भवन्ति,' 'तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्,'

'आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनादेव पाशं दहति पण्डितः' ॥

'ज्ञात्वा देवं मुच्यते सर्वपाशैः' इतिश्रुत्युक्तमोक्षप्राप्तिलिङ्गेन शिवस्य परब्रह्मत्वं यत्तेनोपगतं, तदप्यसंगतम् । 'ब्रह्मविदाप्नोति परम्' इति तदुपन्यस्ते फलवाक्ये, नारायणं परं ब्रह्मेति श्रुत्युक्तनारायणरूपग्रहणस्यैव युक्तत्वात् । उभयत्रापि परब्रह्मपदोपबन्धसाम्यात् । लिङ्गापेक्षया

रश्मिः ।

मेति नान्यः पन्था अयनाय विद्यते' 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति' इति वाक्येष्वित्यर्थः । **अहंकारबद्धस्ये**त्यादि अयमित्यस्य तात्पर्यकथनमिदम् । **निरस्तसमस्ते**ति आधाराभिधानमिदम् । **अनादी**ति अनादिरज्ञानवासना सैवावष्टम्भः प्रारम्भः तेन विजृम्भितं उज्जृम्भितं चेष्टितमुत्फुल्लं वा यच्चित्रकर्मफलं तस्य भोगः साक्षात्कारः तस्यानुगुणानि बहूनि शरीराणि तेषु प्रवेशनिर्गमौ तावेव व्यापारौ ताभ्यां परवशस्य निःसीमतापः निरवधितापः तस्य सहिष्णुत्वम् । **लक्ष्यविषयके**त्यादि । यमाकाशमितरव्यावृत्तमित्याकाशलक्षणेन ज्ञायते इति परिच्छेदो हीतरव्यावृत्तताप्रकारकलक्ष्यविषयकज्ञानरूप एवेति । **जीवप्रकरण** इति द्वितीयाध्याये तृतीयपाद इत्यर्थः । **आत्मान**मित्यादि मनसि प्रणवस्य भावनादेवं ज्ञात्वा मुच्यत इति फलितोर्थः । **मोक्षप्राप्ती**त्यादि । यदि शिवः परं ब्रह्म न स्यात्तर्हि तज्ज्ञानेन मोक्षो न स्यादिति मोक्षप्राप्तेर्लिङ्गं सामर्थ्यं तेनेत्यर्थः । **नारायण**मित्यादि नारा आपस्ता एवायनं यस्येति जलशायिनमित्यर्थः । दृष्टं यथावर्षजलशायिसूर्यमण्डलस्थं ब्रह्म यथा वा वर्षजलशायिमेघो गर्जति तथा ब्रह्म । अत उक्तं युक्तत्वादिति । हेत्वन्तरमाहुः **उभयत्रे**त्यादि । ननु लिङ्गस्य का गतिरत्राहुः **लिङ्गापेक्षये**त्यादि ।

१. विद्युत् ।

भाष्यप्रकाशः ।

श्रुतेर्बलिष्ठत्वात् । 'ऋतं सत्यं परं ब्रह्म' इतिवाक्यस्यापि संदिग्धत्वात् । शिवेशादिपदानां च भगवद्वाचकत्वमेवेत्यादिकमस्माभिः प्रहस्ते निपुणतरमुपपादितम् । पुनरग्रेऽपि तत्र तत्रोपपादयिष्यते।

माध्वास्तु शास्त्रे प्रवर्तनीया ब्रह्मजिज्ञासा विषयः, कर्तव्या न वेति संदेहः । तत्र प्रमाणाभावेन जीवव्यतिरिक्तस्य ब्रह्मणोऽभावाज्जीवस्य स्वप्रकाशत्वादहंवित्तौ प्रकाशमानत्वात् तस्यापि ज्ञायमानत्वेनानुभवान्तरान्वेषणेऽनवस्थाप्रसङ्गाद् क्वचिद् विश्रान्त्यङ्गीकारे आत्मन्येव तथात्वौचित्यात् । न च स्वप्रकाशसंविदाश्रयतयाऽऽत्मा भासत इति युक्तम् । औत्तरिकानुस्मृतिसिद्धसौषुप्तिकानुभवाभावप्रसङ्गात् । तत्र संविदाश्रयत्वेनात्मप्रतीतेरभावात् । अतः स्वप्रकाशात्मानतिरिक्तस्य ब्रह्मणः संदिग्धत्वाभावेनाविषयतया तज्जिज्ञासाया अपि तथात्वान्न कर्तव्येति पूर्वः पक्षः । सिद्धान्तस्तु, भवेदेतदेवं, यदि स्वप्रकाशजीवाभिन्नं ब्रह्म स्यात् । न त्वेवम् । जिज्ञास्ये ब्रह्मपदप्रयोगात्, तद्विजिज्ञासस्व, तद् ब्रह्मेति ब्रह्मशब्दस्य गुणपूर्णतां वक्ति । 'अथ कस्मादुच्यते ब्रह्मेति, बृहन्तो ह्यस्मिन् गुणाः' इति श्रुतेः । तथाच कथं तस्य जीवाभेदः । जीवस्याल्पगुणत्वेनानुभवात् । न च ब्रह्मणि गुणाध्यासः । परमार्थतोऽब्रह्मत्वप्रसङ्गात् । न च देशाद्यपरिच्छिन्नत्वं ब्रह्मत्वम्, उक्तश्रुतिविरोधात् । देशाद्यपरिच्छेदेनापि जीवभेदसिद्धेः । जीवाणुत्वस्य वक्ष्यमाणत्वात् । जीवस्य स्वप्रकाशत्वेपि तद्भिन्नब्रह्मणः संदिग्धत्वाद्विषयत्वम् । अतस्तज्जिज्ञासा कर्तव्येत्याहुः । ब्रह्मशब्दश्च विष्णावेव रूढः । 'यमन्तःसमुद्रे कवयोऽवयन्ति, यदक्षरे परमे प्रजाः, यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यचसर्ज भूम्याम्' इत्युक्त्वा, 'तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्' इति श्रुतौ समुद्रान्तःस्थत्वलिङ्गिते जगत्कर्तरि परब्रह्मत्वविधानात् । 'यो देवानां नामधा एक एव' इति श्रुतावेवकारेणैकस्य सर्वनामधारकत्वमुक्त्वाऽग्रे, 'अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः' इति विश्वाधारपद्मस्य नाभ्यर्पितत्वश्रावणात् ।

रश्मिः ।

बलिष्ठत्वादिति । एतच्च तृतीयस्य तृतीयपादे 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इत्यधिकरणे चिन्तितम् । 'ऐन्द्या गार्हपत्यमुपतिष्ठते' इत्युदाहरणम् । ननु परब्रह्मपदोपनिबन्धः शिवपरेपि वाच्ये दृश्यत इत्यत आहुः **ऋतं सत्य**मिति । कथं तर्हि ज्ञात्वा शिवमित्यादि तत्राहुः **शिवेत्यादी**त्यादि । द्वितीये वादे वस्तुतः सर्वेषां शब्दानां सर्वार्थत्वस्य महाभाष्याद्यभिमतत्वेन ब्रह्मवाचकत्वस्यैवाभिप्रेतत्वात् । प्रतिनियततावन्मात्रकार्यकरणेन भगवदनुकारितया व्यवहारार्थमेव शक्तिसंकोचेन शिवादिषु रुद्रवाचकत्वदर्शनेपि ब्रह्मवाचकत्वस्यापर्यवस्येयत्वात् । इत्येवं निपुणतरमुपपादितमित्यर्थः । महाभाष्ये पस्पशाह्निके । आदिपदोक्ते वाक्यपदीये तु

'संबन्धिभेदात्सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते । सा नित्या सा महानात्मा तामाहुस्त्वतलादयः' ॥

इति स्फुटम् । इति तट्टीकायाम् ।

माध्वास्त्विति एते भेदवादिनः । नन्वहंवित्तौ विषयत्वेन प्रकाशमानस्य कथं स्वप्रकाशत्वं तत्राहुः **तस्यापी**त्यादि । **तथात्वौचित्या**दिति स्वप्रकाशत्वौचित्यादित्यर्थः । **औत्तरिके**त्यादि सुषुप्त्यौत्तरिकेत्यर्थः । तादृशानुस्मृतिः न किंचिदवेदिषमित्याकारिका तया कार्यभूतया सिद्धो यः कारणात्मा । 'सुखमहमस्वाप्सम्' इत्याकारकः सौषुप्तिकानुभवः तस्याभावप्रसङ्गात् । **तत्रे**ति सुखमहमस्वाप्सं न किंचिदवेदिषमित्यौत्तरिकानुस्मृतावित्यर्थः । **तथात्वा**दिति अविषयत्वादित्यर्थः ।

भाष्यप्रकाशः।

'वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते'॥

इति हरिवंशवाक्याच्चेत्यप्याहुः। तन्मतेऽपीज्यत्वेनैव वेदार्थत्वाङ्गीकारान्मां विधत्त इतिवाक्यविरोधः। यत्तु कर्मविधात्री श्रुतिर्मां प्रत्येव तद्विधत्ते, इन्द्राद्यभिधात्री च मामभिधत्ते, चत्वारि वागितिश्रुत्या अहं विविधरूपत्वेन कल्प्यो, न सुरां पिबेदित्यादिश्रुत्याहमेवाप्रियादपोह्य इति व्याख्यातम्। तदप्यध्याहारवृत्तिसंकोचलक्षणादोषसंभवाच्चिन्त्यम्। प्रकृतमनुसरामः। एवंचात्र सूत्रे शेषषष्ठ्या ब्रह्मसंबन्धिनां जिज्ञास्यताबोधनेन साधारणाधिकारे ज्ञानकर्मसमुच्चयः उत्कृष्टाधिकारे च भक्तिमार्गीयः सर्वात्मभावः साधनमिति बोधितम्॥ १॥

इति प्रथमं जिज्ञासाधिकरणम्॥ १॥

रश्मिः।

इज्यत्वेनैवेति विष्णुत्वेनैव न तु कर्मत्वेन। 'यज्ञो वै विष्णुः' इति श्रुतेः। अस्वरसमाहुः **तदप्यधी**त्यादि। तद्विधत्त इति कर्माध्याहारः। इन्द्राद्यभिधात्रीणां भगवदभिधाने वृत्तिसंकोचः। चत्वारि वागित्यादौ वागादिलक्षणेत्येवं ज्ञेयम्। पादसेवनन्यायेन भक्तिमीमांसेयमिति बोधयितुं सूत्रनिष्कर्षार्थमाहु**रेवं चे**ति। ब्रह्मणोऽजिज्ञास्यत्वेन शेषषष्ठ्यामेव व्यासचरणतात्पर्ये चेत्यर्थः। विरोधनिराकरणस्यामुख्यसाधनसंबद्धत्वात्साधनाध्यायान्ते साक्षाद्ब्रह्मसंबन्धिन आहुः **साधारणे**त्यादि। **ज्ञानकर्मसमुच्चयः** 'यदेव विद्यया' इति 'तमेतम्' इति श्रुतिभ्यामुक्तः। द्वितीयः सर्वोत्तममार्गे कर्मणा चित्तशुद्ध्या भक्तिरिति। **सर्वात्मभाव** इति तन्निर्धारणाधिकरणे व्युत्पाद्यम्। अयमर्थः। सच्चिदानन्दस्य ब्रह्मणः सदंशस्य धर्मः कर्म, चिदंशस्य ज्ञानं, आनन्दस्य प्रेमा, आनन्दमयमुपक्रम्य 'तस्य प्रियमेव शिरः' इति श्रुतेः। तथा च सर्वात्मभावप्रतिज्ञासूत्रमिदं पूर्वाध्याये भक्तेर्विषयरूपं ब्रह्म प्रतिपाद्यते समन्वयप्रतिपादनद्वारा, द्वितीये तत्परिशोधः क्रियते, तृतीये प्रतिज्ञातः सर्वात्मभावो बोध्यते, चतुर्थे तत्फलमिति भक्तिमीमांसेयमिति सूत्रनिष्कर्षः। अथातो भक्तिजिज्ञासेति सूत्रयितुं युक्तं यद्यपि तथापि विषयस्य कारणत्वात्तत्पुरःसरं प्रतिज्ञातं वेदितव्यमिति। किंच न भक्तिज्ञानकर्मभिरेव मोचयति किंतु अवतारदशायां स्वरूपेणापीति सकलरूपब्रह्मसंबन्धिनां जिज्ञासार्थे ब्रह्मजिज्ञासा इत्येव युक्तमिति शुभम्। अत्र 'नानामतध्वान्तविनाशन' इति भाष्यान्ते वक्ष्यमाणत्वात् नानामतान्युक्त्वा ध्वान्तनाशनं कृतमिति ज्ञेयम्॥ १॥

इति प्रथमं जिज्ञासाधिकरणम्॥ १॥

किंच, तत्र किं लक्षणं किं प्रमाणकमिति जिज्ञासायामाह सूत्रकारः ।

भाष्यप्रकाशः ।

एवं पूर्वाधिकरणे वेदार्थभूतब्रह्मणो जिज्ञास्यत्वे साधिते कथं जिज्ञास्यमिति प्रकारविशेषाकाङ्क्षायां समन्वयाविरोधाभ्यां तस्य वक्तव्यत्वात् तद्बोधकमग्रिमसूत्रमवतारयन्ति तत्रेत्यादि । तेषु वक्तव्येषु तदुपजीव्यतया उक्तजिज्ञासायां लक्षणप्रमाणात्मकं प्रकारद्वयं पूर्वमाहेत्यर्थः ।

रश्मिः ।

पूर्वाधिकरणे ब्रह्मजिज्ञासापदेन त्रैवर्णिकोर्थजिज्ञासुरधिकारी, ब्रह्मसंबन्धी विषयः, प्रतिपाद्यप्रतिपादकभावः संबन्धः, शाब्दं ब्रह्मज्ञानं च फलम्, तस्याप्यानन्दावाप्तिः फलमित्यनुबन्धचतुष्टयमुक्तम् । अन्यच्च षडङ्गैरेव वेदार्थनिश्चयस्य संभवादधिकाकाङ्क्षायाश्च तपःप्रभृतिभिरेव पूरणात् वेदान्ता अजिज्ञास्या इत्याशङ्क्य ऋषिप्रणीतशास्त्रपार्थक्यबाहुल्यात् तच्छ्रवणे बुद्धिदोषान्मन्दानां संदेहे तन्निवृत्तये इदं शास्त्रं कर्तव्यम् । यद्यपि 'सर्वे वेदा यत्पदमामनन्ति' इत्यादिना ब्रह्मण एव वेदार्थता तथापि 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति पुरुषरूपता 'वेदान्तविज्ञानसुनिश्चितार्थाः' इति वेदान्तानामर्थनिश्चायकता चाम्नायते । तस्मात् तपःप्रभृतीनामसंभवाद् वेदान्तविचारेणैव वेदार्थभूतब्रह्मस्वरूपनिश्चय इति ब्रह्मसंबन्धिविचारः श्रीमद्बादरायणाचार्यैः प्रस्तूयत इत्युक्तम् । अतो वक्ष्यमाणानि यावन्त्यधिकरणानि समाप्तिपर्यन्तानि तावन्त्यस्यैव विषय इत्युक्तं भवति । अतो विषयविषयिभावसंगत्याधिकरणमवतारयन्ति **एवं पूर्वे**त्यादिना । **साधित** इति 'वेदार्थब्रह्मणो वेदानुकूलविचार इति' इति भाष्येऽस्माभिः भूतपदं समावेश्य वेदार्थभूतं ब्रह्म वेदार्थब्रह्म इति समस्य साधित इत्यर्थः । साधनं तु वेदार्थावेदार्थभूतत्वेपि वेदार्थभूतत्वेन ब्रह्मग्रहणाद् भक्त्येकलभ्यत्वेवेदार्थत्वम् । अवेदार्थत्वे तु वेदानुकूलविचाराविचाराविषयत्वापत्तेः । नन्वेतस्य **प्रकाशे** सर्वपदं समावेश्य व्याख्यानं सर्ववेदार्थत्वेन ब्रह्म जिज्ञास्यमिति ग्रन्थेनेति चेन्न, सर्ववेदार्थत्वस्य वेदार्थमात्रपर्यायत्वेन वेदार्थभूतेत्याद्यनुपदस्योक्तप्रकाशविरोधापत्तेः । तेन सर्ववेदार्थत्वं न वेदार्थमात्रत्वं किंतु वेदार्थभूतत्वं सर्ववेदार्थत्वप्रयोजकं लक्षणयेति । एतेन 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यपि व्याख्यातं, सर्ववेदार्थत्वं वेदार्थभूतत्वं विना न संभवतीति । **प्रकारविशेषाकाङ्क्षाया**मिति । सामान्यप्रकारकजिज्ञासाया विशेषप्रकारकजिज्ञासाजनकत्वात् तादृशाकाङ्क्षायां सामान्यप्रकारेण बृहत्त्वबृंहणत्वरूपब्रह्मत्वेनाजिज्ञास्यत्वाद् विशेषपदोपादानम् । **तस्ये**ति प्रकारविशेषस्य कर्तृत्वलक्षणस्य । इदमध्यायद्वये स्पष्टम् । **तद्बोधक**मिति लक्षणप्रमाणबोधकम् । सर्वविरुद्धधर्माश्रयत्वरूपप्रकारविशेषस्य वक्तव्यत्वाद् ब्रह्मणो निमित्तत्वादिबोधकमित्यर्थः । **तत्रेत्यादी**ति । अत्र किंच तत्रेत्यादीति वक्तव्येपि अवतरणान्तराभावेनान्यच्चेत्यर्थासंभवादारम्भो वक्तव्यः, स च कर्मानध्याहरन् न समर्थ इति अध्याहाराभावायैतावदेवोपात्तम् । **किंचे**ति त्यक्तं तद्बीजं पूर्वमुक्तम् । **तेषु वक्तव्येष्वि**ति तत्र ब्रह्मणीति पूर्वत्रार्थः । अत्राभासे तु प्रकारविशेषेषु वक्तव्येषु इति तत्रेत्यस्यार्थः । तेच समन्वयसूत्रादारभ्याभिन्ननिमित्तोपादानतादयो विशेषप्रकाराः । संगतिमधिकरणयोराहुः **तदुपजीव्यतये**ति । लक्षणप्रमाणाभ्यां सामान्यप्रकाराभ्यां वस्तुसिद्धर्वस्तूपजीव्याश्च तन्निष्ठाः प्रकाराः सामान्यविशेषरूपा इति तथेत्यर्थः । सधर्मकस्य निर्धर्मकाभिन्नत्वेनोक्तजिज्ञासाविषयत्वमत **उक्तमुक्तजिज्ञासाया**मिति उक्तजिज्ञासाविषये अधोक्षजपादेपि । **लक्षणप्रमाणात्मक**मित्यादिः । अतस्तदुपजीव्यता प्रकारविशेषोपजीव्यता तत्कारणता तया, तेनोपजीव्योपजीवकभावः संगतिरित्यर्थः ।

१. 'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः । शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी' इति विचारोर्थस्य ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ २ ॥ (१-१-२)

भाष्यप्रकाशः ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ २ ॥ अत्र सर्वेऽपि योगविभागेन शास्त्रयोनित्वादिति सूत्रं भिन्नमभ्युपगच्छन्ति । तन्न युक्तम् । अग्रिमसूत्रेषु साध्यहेतुनिर्देशपूर्वकमेवाधिकरणरचनस्य दर्शनेनात्रापि तथैव युक्तत्वात्, सांख्ये ब्रह्मपदस्य प्रकृतौ प्रयुक्तत्वेन तद्वारणाय विवक्षितब्रह्मणि शास्त्रोक्तकर्तृत्वप्रतिपादनस्यावश्यकत्वाच्च । नच सूत्रभेदेऽप्यधिकरणस्य सूत्रत्रयात्मकत्वाङ्गीकारात् प्रथमसूत्रे विशेषतः प्रमाणानुक्तावप्यथशब्देन धर्मविचारानन्तर्ये ब्रह्मविचारस्य बोधिते ब्रह्मणो वेदान्तवेद्यतोपस्थितेः सुखेनोक्तदोषपरिहारात् सूत्रैक्यं न युक्तमिति वाच्यम् । अथशब्दस्यानेकार्थत्वेनानन्तर्यस्याप्यनेकविधत्वेन धर्मविचारानन्तर्यस्योपपादनसापेक्षत्वेन चाहत्य ब्रह्मणो वेदान्तवेद्यत्वानुपस्थित्या जन्माद्यधिकरणरचनायामनाश्वासप्रसङ्गात् । अतः सूत्रैक्यमेव युक्तमिति । ये तु जन्माद्यधिकरणं, शास्त्रयोनित्वाधिकरणं च भिन्नमङ्गीकुर्वन्ति तेषां मते प्रथमस्य हेतुशून्यत्वाद् द्वितीयस्य च साध्यशून्यत्वात् साकाङ्क्षतयाऽतिक्लिष्टत्वेन तद्विवक्षितप्रमेयासाधकत्वं बोध्यम् ।

रश्मिः ।

जन्माद्यस्य यतः शास्त्रयोनित्वादिति ॥ २ ॥ अत्रापीति अस्मिन् सूत्रेपि तथा । साध्यहेतुप्रतिपादकत्वप्रकारस्यैव युक्तत्वादित्यर्थः । **आवश्यकत्वाच्चे**ति । **चकारेण**—

'ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् । ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः' ॥

इति स्मृत्यनुग्रहः संगृहीतः । अत्र ब्रह्मसूत्रपदमुपनिषत्परमिति शांकराः । तत्र सूत्रपदप्रवृत्तिर्मृग्या । रामानुजानां भास्कराणां चाशङ्कामनूद्य निषेधमाहुः **न च सूत्रे**त्यादि । किंचेति त्यक्त्वा तत्रेत्याभासो राद्धान्ते अधिकरणं सूत्रद्वयात्मकं वा । **सूत्रत्रये**ति । **वेदान्तवेद्यने**ति धर्मस्य वेदवेद्यत्वे ब्रह्मणो वेदान्तवेद्यत्वं क्रियाकाण्डं ज्ञानकाण्डमिति समाख्याभ्याम् । **उपपादने**ति शंकराचार्यैः साधनचतुष्टयानन्तर्याङ्गीकारात् क्वचिदधिकारार्थताङ्गीकारादुपपादनेत्यादि । **अनाश्वासे**ति शास्त्रान्तरेभावात् संशयात्तथा । **युक्तमिती**ति । किंच शास्त्रयोनित्वादितिसूत्रानतिप्रयोजननिवर्तकत्वेनापि सूत्रैक्यं युक्तम् । तथाहि एतस्य शंकरभाष्ये यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत् स्वरूपाधिगम इत्याद्युक्त्वा शास्त्रमुदाहृतं पूर्वसूत्रे 'यतो वा इमानि भूतानि जायन्ते' इत्यादीति चोक्त्वा किमर्थं तर्हीदं सूत्रं यावता पूर्वसूत्र एव एवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितमित्याशङ्क्य तत्र सूत्राक्षरेण विस्पष्टं शास्त्रस्यानुपादानात् जन्मादिसूत्रेण केवलमनुमानमुपन्यस्तमित्याशङ्क्येत तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते **शास्त्रयोनित्वादितीति** । समाधानग्रन्थेनानतिप्रयोजनत्वसूचनादिति । माध्वानां मतमाहुः **ये त्वि**त्यादि । आसत्तिविरहादप्रमाणमित्याहुः **तेषां मत** इत्यादि । **साध्ये**ति जगजन्मादिकर्तृत्वं साध्यम् । **अती**ति यथाकथंचित्साधने सूत्रभेदः किमर्थः गीताविरोधश्चेत्....शब्दः । **तद्वी**ति 'कृष्णायाक्लिष्टकारिणे' इति श्रुतेः तस्य व्याख्यानमाह विद्ययाविद्योपमर्ददशायां जातत्वेन आचार्यचरितत्वाभावापत्त्या आचार्यविवक्षितं मोक्षसाधकं यत्प्रमेयं तस्य स्मृतिसहायाज्जन्मरूपहेतुसाध्यकस्या-

ननु कथमत्र संदेहो यावता, सत्यं ज्ञानमनन्तं ब्रह्मेत्याह श्रुतिरेव ।

विरुद्धं चैतत् । स्वरूपलक्षणाकथने कार्यलक्षणस्य वक्तुमशक्यत्वात् । विवादाध्यासितत्वाच्च । न हि ब्रह्मणो जगत्कर्तृत्वं सर्वसंमतम् । न चागमोदितमिति वेदमात्रस्य ब्रह्मप्रमाणकत्वं वक्तुं शक्यते ।

भाष्यप्रकाशः ।

लक्षणे शङ्कते **नन्वित्यादि** । यत् संदिग्धं तत् सम्यक् परिच्छेत्तुं लक्षणीयम् । अत्र ब्रह्मणि कथं संदेहः । यावतेत्यवधारणे हेत्वर्थे वा । तथाच ब्रह्मणः सत्ता स्वरूपलक्षणं च श्रुतित एव सिद्धम् । तदवधारणे ततो हेतोर्वा ब्रह्मणोऽखिलविशेषशून्यत्वेन सिद्ध्या संदेहप्रयोजकप्रकाराभावात् संदेह एव न घटत इत्यर्थः ।

प्रकारान्तरेणापि तदभावमाह **विरुद्धमित्यादि** । यद्धि लोकाप्रसिद्धं तदलौकिकया श्रुत्या निर्णेयम् । श्रुतिस्तु पूर्वं स्वरूपलक्षणमुक्त्वाऽग्रिमे प्रपाठके कार्यलक्षणं वक्ति । अतः प्रथममेव तत्कथनं श्रुतिविरुद्धम् । न च स्वरूपलक्षणे संदेहाभावात् कार्यलक्षणमेवोच्यत इति युक्तम् । अन्नप्राणादिष्वपि तस्यातिप्रसङ्गदर्शनेन स्वरूपलक्षणाकथने केवलतत्कथनस्याप्रयोजकत्वात् । कैश्चिन्मायाशबलस्यान्यैः शुद्धसत्त्वात्मकशरीरविशिष्टस्येतरैः सत्त्वादिगुणत्रयात्मकस्य प्रधानस्यापरैर्नित्यज्ञानेच्छाप्रयत्नधर्मकस्य तथात्वाङ्गीकारेण तस्य विवादाध्यासितत्वाच्च । तदेव विभजति **न हीत्यादि** । ननु ब्रह्मणः कर्तृत्वस्य सर्वसंमतत्वाभावेऽपि वेदस्य प्रमाणमूर्धन्यत्वात् तदुक्तकोटेरौत्कट्यात् संदेहाभावाय लक्षणविचार उचित इति चेत् तत्राह **न चेत्यादि** । चोऽवधारणे । कर्ता आगमेन वेदरूपेण

रश्मिः ।

साधकत्वमित्यर्थः । **यावते**त्युक्तसंबन्धार्थं तच्छब्दघटितफक्किकामाहुः **तदवेति** । **अखिलेति** सत्यत्वाद्यभावानामधिकरणरूपत्वेन परेषां तथा । **संदेह** इति संदेहे दूरत्वं कारणं स्थाणुर्वा पुरुषो वेत्यत्र स्थाणुत्वपुरुषत्वादिकं प्रयोजकं तद्वदत्र तदभावात् । **तदभाव**मिति संदेहाभावमित्यर्थः । **स्वरूपे**त्यादि भाष्यं विवृण्वन्ति स्म **यद्धीति**। **लोकाप्रे**ति अनधिगतार्थगन्तृत्वं श्रुतिप्रामाण्यं यतः । **श्रुतिस्त्वि**त्यादि । तैत्तिरीयाणां ब्रह्मोपनिषदीत्यर्थः । **अन्ने**त्यादि । 'अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिश्रुतिभिः कार्यलक्षणस्यातिव्याप्तिरेवं तु स्वरूपलक्षणलक्षिते कार्यलक्षणं विवक्षितमिति नातिव्याप्तिः । अन्नादीनां सत्यादिप्राधान्यान्न प्रकटसच्चिदानन्दत्वमिति नातिप्रसङ्ग इति भावः । हेतुभाष्यमवतारयितुं शङ्कानिषेधावाहुः **नच स्वरूपे**त्यादि । **केवलतत्कथनस्ये**ति कार्यलक्षणकथनस्येत्यर्थः । **अप्रयोजकत्वा**दिति । इदम**शक्यत्वा**दित्यस्य विवरणम्, तथाहि कार्यलक्षणस्य किमन्यद् ब्रह्मज्ञानजनकमिति जिज्ञासया प्रवृत्तत्वेन जिज्ञासायाः स्वरूपलक्षणलक्षितब्रह्मघटितत्वेन विशेषणज्ञानाभावप्रयुक्तजिज्ञासाभावात् कारणविघटनेनाकारणकत्वरूपाप्रयोजकत्वमशक्यत्वमिति । **विवादे**त्यादिभाष्यं विवृण्वन्ति **कैश्चि**दिति । शांकरैरित्यर्थः । **अन्यै**रिति रामानुजशैवभास्करमाध्वैरित्यर्थः । **इतरै**रिति सांख्यैरित्यर्थः । **अपरै**रिति नैयायिकैरित्यर्थः । **तथात्वाङ्गीकारेणे**ति भूतादिकर्तृत्वाङ्गीकारेणेत्यर्थः । **तस्ये**ति भूतादिकर्तृत्वस्येत्यर्थः । **तदेवे**ति विवादाध्यासितत्वमेवेत्यर्थः । **तदुक्ते**ति वेदोक्तायाः कर्तृत्वकोटेः । **लक्षणे**ति कार्यलक्षण-

---

१. कार्यलक्षणाभावमित्यर्थः ।

किंच व्यर्थश्चैवं विचारः। लक्षणप्रमाणाभ्यां हि वस्तुज्ञानं भवति। तच्च स्वरूपलक्षणेनैव भवतीति किमनेन। तस्मादयुक्तमुत्पश्याम इति।

उच्यते।

संदेहवारकं शास्त्रं वेदप्रामाण्यवादिनाम्।
क्रियाशक्तिज्ञानशक्ती संदिह्येते परस्थिते॥

न हि श्रुतिं व्याख्यातुं प्रवृत्तः सूत्रकारः किंतु संदेहं वारयितुम्। तत्र, 'सत्यं ज्ञानमनन्तम्', 'नित्यशुद्धमुक्तस्वभावम्' इतिश्रुत्या कर्तृत्वादिप्रापञ्चिकधर्मराहित्यं प्रतीयते। 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति' इति कर्तृत्वं च।

भाष्यप्रकाशः।

मूलशास्त्रेणोदित इत्येतावता कृत्स्नस्य वेदस्यैव ब्रह्मणि प्रमाणत्वं न वक्तुं शक्यते। कल्पनोपदेशस्यापि तत्र शक्यवचनत्वादनुमानस्यापि तत्र प्रमाणत्वाच्चेत्यर्थः। अत्र ब्रह्मप्रमाणत्वमिति पाठः प्रतिभाति। अथ वेदोक्त एवाग्रहस्तदा दूषणान्तरमाह किंचेत्यादि। अयुक्तमिति सूत्रोक्तं लक्षणमयुक्तमित्यर्थः। शेषमतिरोहितार्थम्।

अत्र समाधातुं गृह्णते उच्यत इत्यादि। प्रकारान्तरेणात्र संशय उच्यते। वेदप्रामाण्यवादिनाम्। 'सर्वे वेदा यत् पदमामनन्ति' इति श्रुत्यनुसारेण ब्रह्मण्येव सर्वस्य वेदस्य प्रामाण्यमन्यत्र प्रमाणाभासत्वमितिवादिनां वेदे यः संदेहस्तद्वारकमिदं वैयासं शास्त्रम्। तत्र कः संदेह इत्यपेक्षायां, परस्थिते 'ब्रह्मविदाप्नोति परम्' इत्यत्राप्नोतिकर्मभूतो यः पर उक्तस्तत्स्थिते क्रियाशक्तिज्ञानशक्ती स्वरूपलक्षणविरुद्धत्वाद् ब्रह्मणि संदिह्येते, स्तो न स्तो वेत्येष संदेह इत्यर्थः। गृहीतं विभजन्ते न हीत्यादि। यदुक्तं स्वरूपलक्षणाकथन इत्यादि, तदसंगतम्। यदि सूत्रकारः श्रुतिं व्याख्यातुं प्रवृत्तः स्याद् यथाक्रमं प्रतिपदं च व्याकुर्यात्। न तु तथा। किंतु संदेहं वारयितुम्। ततश्च यत् संदिग्धं तद्विवृणोति, व्याख्येयसमानार्थकैरन्यैश्च पदैर्विपक्षसपक्षबाधक-

रश्मिः।

विचारः। कल्पनेति यथा 'वाचो धेनुमुपासीत' इत्यत्र वाचो धेनुत्वकल्पने कल्पनयोपदेशः। तत्रेति कृत्स्ने वेदे। प्रतिभातीति। एतेन ब्रह्मणि, प्रमाणं भावे ल्युट्, प्रमा येनेति व्यधिकरणपदो बहुव्रीहिः कप् साधक इत्यसूचि। 'यतो वाचो निवर्तन्ते' इति श्रुतेरज्ञाते कं साधयित्वा ब्रह्मणीदमित्थतांशे ज्ञानप्रमाणकत्वं वार्थः। यद्वा केनोपनिषदि 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते' इति श्रावणाद्ब्रह्म प्रमाणं यस्येत्येव बहुव्रीहिः। वेदोक्तेति वेदोक्तावेदोक्तयोर्वेदोक्तलक्षण इत्यर्थः। एवकारेण व्याख्यानव्यवच्छेदः। प्रकारान्तरेणेति प्रकारस्तु वेदोक्तस्वरूपलक्षणं व्याख्यानोक्तमसर्वाङ्गीकृतकर्तृत्वलक्षणं वा ब्रह्मेति। तत्स्थित इति अधोक्षजे परे स्थिते। अधोक्षजत्वान्न विचारस्तस्य। अत एव शेषषष्ठी। आर्थिकार्थमाहुः ततश्च यदित्यादि। विवृणोतीति विवृण्वन्ति। व्याख्येयेत्यादि। यद्यप्याचार्याः यत इत्यादौ आचार्य इवाचरणं करोति इति व्याख्येयसमानार्थकैः पदैरेव विवरणं दृश्यते, तथापि प्रकृतोपयोगि विवरणमिदं ज्ञेयम्। यथात्रैव सूत्रे समपदानि अन्यानि च। एवं सर्वत्राध्याये। द्वितीयाध्याये विपक्षो निश्चितसाध्याभाववान् यथा सांख्यानामसंगपुरुषः भूतकर्तृत्वरूपनिश्चितसाध्याभाववान्। तस्य बाधक-

तत्र संदेहः । किं ब्रह्म कर्तृ, आहोस्विदकर्तृ । किं तावत् प्राप्तम् । अकर्तृ ।

भाष्यप्रकाशः ।

साधकतर्कोपन्यासेन संदेहमपाकरोति । तत्र, सत्यमित्यादिके स्वरूपलक्षणे, यतो वेत्यादिकार्यलक्षणे, च ब्रह्मपदादेकस्यैव लक्षणद्वयमुतोभयत्र सामान्यशब्दप्रयोगेऽपि लक्ष्यस्वरूपभेदेन तदवच्छेदकभेदाद् ब्रह्मभेदः । तत्र यदि भेदस्तदा कस्य वेदार्थत्वं कस्य न, उतोभयोर्वेति पुनः संदेहसंभव इति तद्वारणार्थमेकं ब्रह्म वक्तव्यम् । तथा सत्युक्तरीतिकाद् विरोधात् संदेह इति प्रकारप्रश्नोत्तरत्वेन संदेहबीजमुक्तम् । स्वरूपलक्षणस्य हृदिकरणादकथनेऽप्यदोषश्च बोधितः । संदेहाकारमाहुः तत्रेत्यादि । तथा च परस्परविरुद्धार्थबोधकाभ्यां लक्षणाभ्यामेव संदेहाल्लक्षणकरणं युक्तमित्यर्थः । पूर्वपक्षं विवृण्वन्ति ब्रह्मेत्यादि । अयमर्थः । शेषलक्षणे, कर्म फलार्थत्वादित्यने-

रश्मिः ।

स्तर्कस्तदा सांख्यस्मृत्यनवकाशः स्यादिति तस्योपन्यासः । सपक्षो निश्चितसाध्यवान् स च प्रकृतिसमवायिपरमाणुभिन्नेश्वरदृष्टान्तादिरूपस्तद्बाधकस्तर्को यद्येवं स्यात् सिद्धान्तरूपस्तस्योपन्यासस्तेन । संदेहास्तत्रतत्रोक्ताः अत्रत्योऽत्रैव वाच्यस्तत्र सत्यमित्यादिना । यद्यपि उक्तरीतिकतर्कोपन्यासो नास्ति तथापि सामान्यन्यायेन बोध्यः । अत्रत्यसंदेहमाहुः तत्र सत्यमिति । ब्रह्मपदादिति 'तद्विजिज्ञासस्व तद्ब्रह्म' इति कार्यलक्षणे ब्रह्मपदं, तेन कार्यलक्षणलक्षितं स्वरूपलक्षणे परविपश्चित्पदाभ्यां परिधापितं ब्रह्म जिज्ञासासंबन्धीत्युक्तम् । तत्र जिज्ञासा विचाररूपा अधोक्षजत्वात्परे विपश्चिति न प्रवर्तते, यौगिकी तु प्रवर्तते विचारस्याशेषधर्मसापेक्षत्वेन इदमित्थतांशेऽभावेपि आहार्यज्ञानविषयिण्या इच्छाया अधोक्षजत्वेऽपि अबाधात् । धर्मत्वसामान्यप्रत्यासत्त्या सर्वे धर्मा इति ज्ञानसत्त्वात् विचारे त्वस्याप्रयोजकत्वात् । विचारस्य सर्वधर्मस्वरूपज्ञानसापेक्षत्वात् । अतः तद्विजिज्ञासस्व इत्यत्र तदिति लुप्तषष्ठीकं पदं विचारार्थपक्षे, द्वितीये तु यथोक्तम् । एकस्येति ब्रह्मण इत्यर्थः । उभयत्रेत्यादि कार्यलक्षणलक्षिते स्वरूपलक्षणलक्षिते चेत्यर्थः । ब्रह्मशब्दप्रयोगेपि लक्ष्यस्य कार्यलक्षणनिर्णयवाक्येन 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दे प्रयन्त्यभिसंविशन्ति' इत्यनेन आनन्दत्वनिर्वचनाल्लक्ष्य आनन्दः, स्वरूपं सत्यज्ञानानन्तरूपमिति भेदेन आनन्दत्वसंबृहत्त्वरूपशक्यतावच्छेदकभेदात् ब्रह्मभेद इत्यर्थः । बृहत्त्वबृंहणत्वे व्यापकत्वपोषकत्वरूपेऽवच्छेदकत्वेनोक्ते । सत्यज्ञानानन्तत्वमपि स्वरूपतावच्छेदकं ज्ञेयम् । तत्रेति लक्ष्यस्वरूपयोरित्यर्थः । एकं ब्रह्मेति विद्वन्मण्डने स्पष्टम् । तथासतीत्यादि एकस्मिन्ब्रह्मणि कार्यस्वरूपलक्षणलक्षिते सति । एकस्यैव लक्षणद्वयमित्युक्ता रीतिर्यस्मिन् संशयवर्णने तस्माद्विरोधात्कर्तृ आहोस्विदकर्तृ इत्येवंविधसंशयगतविरोधात् । अथवा भाष्योक्तरीतिकात्स्वरूपलक्षणविरोधात्कारिकोक्तः क्रियाशक्तिज्ञानशक्ती स्तः न स्तो वा इत्येवं संदेह इति । उच्यत इत्यस्यार्थकथने प्रकारान्तरेणेत्युक्तं तत्र प्रकारप्रश्नो भेदप्रतियोगिप्रकारः क इति आक्षेपलभ्यस्तदुत्तरत्वेन भाष्ये श्रुत्येति कार्यलक्षणफक्किकायामावृत्य श्रुतिबोधितत्वाविशेषरूपं कर्तृत्वांशे कोटिबीजमिति स्वरूपलक्षणविरोधरूपं च संदेहबीजमुक्तमित्यर्थः । भगवता व्यासेन स्वरूपलक्षणानुक्तौ हेतुमाहुः स्वरूपेत्यादि । अधोक्षजत्वादपि स्वरूपलक्षणं हृदिकृतम् । तत्रेत्यादीति कर्तृ ज्ञानक्रियाशक्तिमत्, अकर्तृ तद्रहितं तेन ज्ञानशक्तिक्रियाशक्ती संदिह्येते इति कारिकाविरोधो न । नहि परमस्ति न वेति संदेह उपपद्यतेऽसत्त्वप्रसङ्गात् । तथा चेति एकस्यैव लक्षणद्वयमित्येवं संशये नाकृतौ । पूर्वपक्षमिति अकर्त्रीति पूर्वपक्षमित्यर्थः । कर्म फलार्थत्वादिति । इदं सूत्रं पूर्वतन्त्रे तृतीयेऽस्ति ।

कथम् । 'ब्रह्मविदाप्नोति परम्' इति प्रधानवाक्यम् । फलसंबन्धात् । ऋचापि विवृतम् । 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति । फलार्थं च ब्रह्मज्ञानम् । फलं च फलवाक्योक्तधर्मज्ञानादेव, नान्यथा । कर्तृत्वं च परविवरणतयोक्तम् । परं किमित्युक्ते यः सर्वान्तर आनन्द इति । कथं सर्वान्तरमित्याकाङ्क्षायां परिचयार्थं

भाष्यप्रकाशः ।

नोपलक्षणविधया ज्ञानस्यापि फलशेषत्वे सिद्धे प्राधान्यं फलस्यैवेति तत्संबन्धादुक्तमेव प्रधानवाक्यं, न तु कार्यलक्षणवाक्यं तथा । न चैवं पूर्वकाण्डेस्तु, उत्तरकाण्डे तत् किमित्युपेयमिति वाच्यम् । **ऋचापि विवृतम्** । यदि तस्य प्राधान्यं न स्यात् किमिति विवृणुयादतोऽत्रापि तदादृतम् । तथा सति ज्ञानं फलार्थं, फलं च फलवाक्योक्तधर्मज्ञानात् परत्वज्ञानादेव । अतः परत्वज्ञानार्थं **कर्तृत्वं परविवरणतयोक्तम्** । स्वरूपलक्षणे प्रापञ्चिकधर्मराहित्यप्रतीतेर्ब्रह्मणि कर्तृत्वस्याशक्यवचनत्वात् । तस्माद्वा एतस्मादित्यादिना यत् कर्तृत्वमुक्तं तज्ज्ञेयात् फलरूपं परं पृथक्कृत्य तं विवरीतुमुक्तम् । ततस्तत्स्वरूपजिज्ञासायां **सर्वान्तर**त्वकथनपूर्वकमानन्द इति स्वरूपमुक्तम् । अन्यथा तन्निरूपणमसंगतं स्यात् । सर्वान्तरत्वं च तस्य परत्वनिर्वाहकतयोक्तम् । तत्रापि कथं-

रश्मिः ।

'कर्माण्यपि जैमिनिः फलार्थत्वात्' इति तदर्थकथनमिदम् । **तथेति** प्रधानत्वेनेत्यर्थः । **ऋचापी**त्यादि भाष्यमवतारयन्ति **न चैवमित्यादि** । **न चैवमिति** पूर्वतन्त्रीयन्यायादरणमित्यर्थः । **यदि तस्येत्यादि** यदि उत्तरकाण्डे फलसंबन्धिवाक्यस्य प्राधान्यं न स्यादित्यर्थः । **अत्रापी**त्यादि उत्तरकाण्डेपि फलसंबन्धात्प्राधान्यमादृतमित्यर्थः । **फलार्थं चेत्यादि** भाष्यं विवृण्वन्ति **तथासतीत्यादि** । कोऽसौ धर्मो यज्ज्ञानात्फलमित्यत आहुः **परत्वज्ञानादिति** । ब्रह्मणो विशेषधर्माणां चाधोक्षजत्वेन यतो वाच इति श्रुत्या चानुक्तिः । **भाष्ये** । एवकारेण ब्रह्मत्वेऽपि सर्वेषां कार्यकारणभावाभावादन्यफलकारणं व्यवच्छिद्यते । **भाष्ये** । **नान्यथेति** नान्यधर्मज्ञानैः कार्यकारणभावाभावादित्यर्थः । **प्रकृते** । **कर्तृत्वं चेत्यादि** भाष्यं विवृण्वन्ति **अतः परत्वेत्यादि** । **उक्तमिति** । 'परमे व्योमन्' इत्यन्तेन 'ब्रह्मवित्' इत्यंशविवरणं कृत्वा 'सोऽश्नुते' इत्यादि परविवरणे ब्रह्मणेति सहार्थेऽप्रधाने तृतीयया कर्तृत्वमुक्तमशनस्याप्रधानं मुख्यं तु कर्तृत्वम् । 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यादिनोक्तं विवरीतुमिति 'यथाग्नेः क्षुद्रा विस्फुलिङ्गाः' इत्यादिश्रुत्युक्तमक्षरकर्तृत्वं तु 'कदाचित्पुनरन्यथा' इति निबन्धाचरणरूपाक्षरद्वारेति फलितम् । तदेव स्पष्टयन्ति **स्वरूपलक्षणेत्यादि** । **ज्ञेयादिति** ब्रह्मविदित्युक्तादित्यर्थः । **परं किमित्यादि** भाष्यं विवृण्वन्ति **ततस्तदित्यादि** । अत्र यद्यपीति शेषः । परं किमिति तत्स्वरूपजिज्ञासा ज्ञातुमिच्छा । प्रच्छ ज्ञीप्सायाम् । किमः प्रश्ने । तथा च भाष्यं जिज्ञासापदेनेत्यादि । **उक्तमिति** ब्रह्मवित्प्रपाठके उक्तम् । **स्वरूपमुक्तमिति** 'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयः' इति स्वरूपमुक्तमित्यर्थः । ननु स्वरूपलक्षण आत्मानन्दस्याभावात् कथमेवमित्याकाङ्क्षायामाह **अन्यथे**त्यादि । प्रकृते तु व्याख्येयव्याख्यानरूपा संगतिरिति ज्ञेयम् । ज्ञेयं तद्भविष्यतीत्याशङ्कामपाकुर्वन्तः **कथं सर्वान्तरमित्यादि**भाष्यं विवृण्वन्ति **सर्वान्तरत्वं चेत्यादि** । तथा चानन्द एव पर

भूतभौतिकसृष्टिमुक्त्वा गौणानन्तर्यं परिहृतम् । गौणोपासनाफलं च प्रधानशेषतयोक्तम् । तत्रान्यगतकर्तृत्वारोपानुवादोऽपि संभवति । ततश्च भृगुर्वै वारुणिरित्युपाख्यानेऽपि परिचायकत्वाद् गौणकर्तृत्वमेवानूद्यते, फलाश्रवणादिति पूर्वः पक्षः ।

सिद्धान्तस्तु ।

उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत् ।
वेदेन बोधितं तद्धि नान्यथा भवितुं क्षमम् ॥
न हि श्रुतिविरोधोऽस्ति कल्पोऽपि न विरुध्यते ।
सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवद् बृहत् ॥

भाष्यप्रकाशः ।

भावाकाङ्क्षायां तन्निष्कर्षार्थमाकाशादीनां भूतानामोषध्यादीनां भौतिकानां च सृष्टिकथनेन कर्तृत्वं प्रतिपाद्य तस्य सर्वान्तरत्वकथनेन चरमत्वाद् गौणमपर्यवसन्नं प्राणादीनामिवानन्तर्यं निवारितम् । 'सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासते' इत्यादिनाऽन्नब्रह्माद्युपासनाफलं प्रधानशेषतया, 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इत्यादिनानुवाकचतुष्टयेन कथितस्य सत्त्वब्रह्मानन्दावाप्तिसर्वभयाभावरूपप्रधानफलस्य शेषतया सर्वोत्कृष्टत्वज्ञापनायोक्तमिति कर्तृत्वं परस्मिन् सिद्ध्यति । तथापि स्वरूपलक्षणविरोधात् पूर्वकाण्डोक्तप्रजापतिगतस्य प्रकृतिगतस्य वा कर्तृत्वस्यारोपेणानुवादोऽपि संभवतीति द्वितीयप्रपाठकेऽपि फलाश्रवणेनामुख्यत्वात् तत्राप्येवं नेतव्यम् । तथाच नास्य लक्षणत्वमिति पूर्वपक्षार्थः ।

सिद्धान्तमाहुः उत्पत्तीत्यादि । तदिति कर्तृत्वम् । अन्यथेति गौणम् । कल्प इति कल्पसूत्रम् । सर्वभावः सर्वभवनम् । तत्र समर्थत्वादकर्त्रपि कर्त्रित्यर्थः । गृहीतं विभजन्ते वेदेनेत्यादि । स्यादन्यगतकर्तृत्वारोपानुवादः कार्यलक्षणे यदि स्वरूपलक्षणं विरुध्येत । तदेव तु न ।

रश्मिः ।

इति भावः । लिङ्गं तु विज्ञानमयरूपजीवादप्यान्तरत्वम् । तत्रापीति अन्नादिसर्वान्तरत्वेपि मुख्यं तद्गौणं वेति कथंभावाकाङ्क्षायामित्यर्थः । गौणोपासनेत्यादि भाष्यं विवृण्वन्ति सर्वं वा इत्यादि । शेषत्वं विवृण्वन्ति अस्ति ब्रह्म इति । उक्तेनानुवाकेन सत्त्वं, असद्वा इदमित्यनुवाकेनापि सत्त्वं, भीषास्माद्वातः पवते इत्यनुवाकेन ब्रह्मानन्दावाप्तिः, 'यतो वाचो निवर्तन्त' इत्यनेन सर्वेषां वातादीनां भयाभावः । सर्वोत्कृष्टत्वेत्यादि सर्वेभ्य उपासनाफलेभ्यः परप्राप्तेरुत्कृष्टत्वेन ज्ञापनार्थम् । तथापि नेत्याहेति वदन्तस्तत्रान्येत्यादि भाष्यं विवृण्वन्ति तथापीत्यादि । आरोपेणेति परस्मिन्नित्यर्थः । ततश्च भृगुर्वा इत्यादिभाष्यं विवृण्वन्ति द्वितीयप्रपाठक इति । यतो वा इत्यादिषु गौणं कर्तृत्वमुच्यते तद्ब्रह्मेति श्रावणेन पररूपफलाश्रवणादित्यर्थः । तथा चेत्यादि एवंविधेन विरोधेन प्रजापत्यादिगते कर्तृत्वेङ्गीकृते न भूतादिकर्तृत्वस्य लक्षणत्वमित्यर्थः । गौणमिति गौणत्वेन प्रकारेण गौणम् । कल्पसूत्रमिति तच्च कर्ता कारयिता हरिरिति वक्ष्यमाणम् । ननु लक्षणं न बृहतः किंतु परस्येत्यत आहुः तत्र समर्थत्वादिति । तथा चाक्षरस्य चरणत्वात् पुरुषविधस्य विरुद्धधर्माश्रयत्वात् न विरुद्धं जन्मादिकर्तृत्वं लक्षणमिति भावः

वेदेनैव तावज्जगत्कर्तृत्वं बोध्यते। वेदश्च परमाप्तोऽक्षरमात्रमप्यन्यथा न वदति। अन्यथा सर्वत्रैवाविश्वासप्रसङ्गात्। नच कर्तृत्वे विरोधोऽस्ति। सत्यत्वादि-

भाष्यप्रकाशः।

विवरणार्थं परस्य तृतीयान्तेन ब्रह्मपदेनैव विवृतत्वात्। नच तत्र वेदहिरण्यगर्भब्राह्मणजातिजीवा अर्थत्वेन ग्रहीतुं शक्याः। परपदविवरणात् सान्तत्वादिना ब्रह्मापेक्षयोत्कर्षस्य तेष्वशक्यवचनत्वात्। परशब्दस्यान्यार्थकत्वोपगमेऽपि विवरणोक्तब्रह्मशब्दानुरोधादेत एव परत्वेन ग्राह्याः। तत्प्राप्तिस्तु कर्मणापीति साधनान्तरेण ज्ञानेन को वा विशेषः स्यात्। अत उत्कृष्टार्थकत्वमादरणीयम्। उत्कृष्टं च किमित्यपेक्षायां विवरणानुरोधाद् ब्रह्मान्तरं कल्प्यम्। तच्चाप्रसिद्धं, स्वरूपलक्षणहीनं च। न च प्रकृतिः। सांख्यमतेऽपि ज्ञानात्मकपुरुषापेक्षया तस्या हीनत्वात् परार्थत्वाच्च। अश्रौतत्वस्य वक्ष्यमाणत्वाच्च। अतो ब्रह्मापेक्षयान्यस्य परत्वेन वक्तुमशक्यत्वादुक्तलक्षणविशिष्टस्यैव ब्रह्मणः कर्तृत्वं वेदेन बोध्यते। नच तदारोपितमिति शक्यवचनम्। निरङ्कुशस्य तस्याऽन्यत्रासिद्धताया अनुपदमेव वक्ष्यमाणत्वात्।

किंच। वेदः परमाप्तत्वादक्षरमात्रमपि मिथ्या न वदति। यदि क्वापि तथा वदेत्, स्वर्गकामो यजेतेत्यादिविध्यंशे स्वरूपलक्षणाद्यंशे चाविश्वसनीयः स्यात्। ततश्च सन्मार्गमात्रमुच्छिद्येत। अतो यद्यद्यथा वदति तत्तथेति मन्तव्यम्। तेन कर्तृत्वं वेदोक्तत्वादपि वास्तवमित्येव सिद्ध्यति। नच कर्तृत्वाङ्गीकारे स्वरूपलक्षणविरोधोऽस्ति, येन तदनुरोधादवास्तवत्वं तस्य कल्प्येत। तदुक्तसत्यत्वादिधर्मवत् कर्तृत्वस्याप्युपपत्तेः। नच ब्रह्म यावद्धर्मरहितमिति वक्तुं शक्यम्। स्वरूपलक्षणविरोधात्। तत्र ब्रह्मणि सत्यत्वादिधर्माङ्गीकारात्। नचासत्यजडसान्तव्या-

रश्मिः।

कारिकायाम्। **तृतीयान्तेने**ति 'ब्रह्मणा विपश्चिता' इति तृतीयान्तेन। विविधभोगकर्तृत्वस्य सृष्टिमन्तरेणानुपपद्यमानस्य सामर्थ्याज्जगत्कर्तृत्वं न स्वरूपलक्षणविरुद्धमित्यर्थः। यत्तूपनिषद्भाष्ये विपश्चिता मेधाविना सर्वज्ञेनैवेत्यर्थः इति शंकराचार्यास्तदपि सर्वमन्तरेण सार्वज्ञ्यानुपपत्त्या सर्वकर्तृत्वं द्रढयति। न च भोगकर्तृत्वापेक्षया अशनकर्तृत्वं ज्याय इति शङ्क्यम्। अश्नुत इत्युक्ताशनस्य भोगत्वात्। अत्राप्रधानकर्तरि तृतीया 'सहयुक्तेऽप्रधाने' इति सूत्रेण। क्वचिदप्रधाने कर्मादौ तथाचाप्रधान इत्यस्य विभक्त्यर्थे अप्रधाने इत्यर्थः। **न च तत्रे**ति तृतीयान्ते ब्रह्मपदे इत्यर्थः। यद्यपि ते परत्वमाश्रयन्ते तथापि ज्ञेयब्रह्मापेक्षया नाश्रयन्त इत्याहुः **सान्तत्वादिने**त्यादि। आदिना सर्वोत्कृष्टत्वम्। **ब्रह्मापेक्षये**ति परविवरणब्रह्मापेक्षयेत्यर्थः। ननु परस्यान्यत्रानात्मवैरिदूरकेवलेष्वपि वृत्तिदर्शनात्तेऽर्थाः सन्तु इत्याशङ्का नेत्याहुः **परशब्दस्ये**त्यादि। **एत एवे**ति वेदादय इत्यर्थः। तथा सति ब्रह्मविदिति विशेषासमर्पकं भवेदित्याहुः **तत्प्राप्तिस्त्वि**त्यादि। **वक्ष्यमाणत्वाच्चे**ति आनुमानिकमप्येकेषामित्यानुमानिकाधिकरणे वक्ष्यमाणत्वादित्यर्थः। अन्यत्र सिद्धस्यैवारोपो दृष्टः प्रकृते तु तदभावादारोपोऽशक्यवचन इत्याहुः **निरङ्कुशस्ये**त्यादि। **अनुपद**मिति अत्रैव सत्यत्वादिधर्मवदित्यादिना विशेषेण तु द्वितीयाध्यायद्वितीयपादे। **वेदश्चे**त्यादि भाष्यं विवृण्वन्ति किं च **वेदे**त्यादि। **अन्यथे**ति भाष्यं विवृण्वन्ति स्म **यदी**ति। **न च कर्तृत्व** इत्यादिभाष्यं विवृण्वन्ति **न च कर्तृत्वे**त्यादि। **सर्वथे**त्यादिभाष्यं विवृण्वन्ति **न च ब्रह्मे**त्यादि। ननु न सत्यत्वादिधर्मो ब्रह्मण्युपेयते अपित्वसत्यत्वादेरभावोऽधिकरणात्मकोऽभ्युपेयते इति निर्धर्मकं ब्रह्मेत्याशङ्क्य निषेधन्ति **न चासत्ये**त्यादि।

धर्मवत् कर्तृत्वस्याप्युपपत्तेः। सर्वथा निर्धर्मकत्वे सामानाधिकरण्यविरोधः। सत्यज्ञानादिपदानां धर्मभेदेनैव तदुपपत्तेः। नच कर्तृत्वं संसारिधर्मो, देहाद्यध्यासकृतत्वादिति वाच्यम्। प्रापश्चिके कर्तृत्वे तथैव। न त्वलौकिककर्तृत्वे। अत एवास्येत्याह। अस्येति पुरोवर्ती प्रपञ्च इदमा निर्दिश्यते। अनेकभूतभौतिकदेवतिर्यङ्मनुष्यानेकलोकाद्भुतरचनायुक्तब्रह्माण्डकोटिरूपस्य मनसाप्याकलयितुमशक्यरचनस्यानायासेनोत्पत्तिस्थितिभङ्गकरणं न लौकिकम्।

भाष्यप्रकाशः ।

वृत्तत्वेनैक एवार्थः सत्यादिपदैरुच्यत इति वक्तुं युक्तम्। व्यर्थपौनरुक्त्यापत्तेः। तत्तद्भेदधर्मकत्वसिद्ध्या घटकुट्यां प्रभाताच्च। अतः सत्यादिपदानां स्वार्थत्यागोऽपार्थ एव। तदेतदुक्तं धर्मभेदेनैव तदुपपत्तेरिति। स्फुटमग्रिमम्।

ननु लक्षणद्वयस्यैकपरत्वे सर्वासु श्रुतिष्वेकमेव ब्रह्म प्रतिपाद्यम्। तदा, अस्थूलादिवाक्येष्वपि तदेव निरूप्यत इति निर्धर्मकत्वं बलादापतितमतः कर्तृत्वनिषेध एव युक्त इत्यत आहुः

रश्मिः ।

व्यर्थेत्यादि असत्यमात्रव्यावृत्त्या जडादिव्यावृत्तिसिद्ध्या तथेत्यर्थः। नैयायिकोक्तदूषणग्रासान्नाभावोधिकरणानतिरिक्तः इत्याशयेनाहुः **तत्तद्भेदेत्यादि**। असत्यमात्रव्यावृत्त्या इत्यत्र व्यावृत्तिर्भेदः स च ब्रह्मणीति तत्रासत्यादिव्यावृत्तयस्तत्तद्भेदास्तद्धर्मकत्वसिद्ध्या। न्यायमाहुः **घटकुट्या**मिति द्वितीयाध्यायोपान्तेस्ति ज्ञानप्रक्रियायाम्। प्रहस्ते चास्ति श्वेताश्वतरस्य शिवपरत्वखण्डने च। यथा कस्यचिद्भ्रमतः संन्यासिनः स्तेयकृतो वा मूलमलभमानस्य घटकुट्याः समाधिभेदकुम्भदास्या इभशिरःकुम्भदास्या निर्गतस्य तत्रैव प्रभातं तथा धर्मनिषेधाय भ्रमतो धर्म एव पर्यवसितिरित्यर्थः। अत्र विश्वकोशः 'घटः समाधिभेदेभशिरःकूटकुटेषु च। कुटः कोटे घटे गेहे शिलाकुट्टकपूरुषे। स्यात्कुटीकुम्भदास्यां च सुरायां चित्रगुच्छके' इति समाधिगेहान्निर्गतस्येत्यर्थः। **अपार्थ एवे**ति एवकारस्तु सर्वत्र ग्रन्थेषूपपादनान्निर्धर्मकत्वव्यवच्छेदकः। **तदेत**दिति। न चासत्येत्यादिना विवृतमित्यर्थः। सत्यत्वादिधर्मभेदेनैव भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वरूपसामानाधिकरण्योपपत्तेरिति भाष्यार्थः। **स्फुट**मित्यादि तथाहि। **भाष्ये। न चे**त्यादि। अहन्ताममतात्मकः संसारः सोस्यास्तीति संसारी तस्य धर्मः यतोऽहं कर्तेत्यादिप्रतीत्याहंकारसमानाधिकरणं कर्तृत्वं, संसाराभावे तु अहं मुक्तो न कर्तेति अस्मत्प्रत्ययगोचरे कर्तृत्वतदभावौ। देहाद्यध्यासः प्रधानकार्यत्रिगुणात्मकदेहाद्यध्यासोहं कर्तेति।

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते॥'

इति वाक्याद् देहादिधर्मस्थौल्यादिकर्तृत्वं स्वस्मिन्नध्यस्यते भोक्तृत्ववत्। भोक्तृत्वमानन्दधर्मः 'आनन्दभुक्' इति श्रुतेरित्यर्थः। शङ्कितमनुमानं सत्प्रतिपक्षमित्याशयेनाहुः **प्रापञ्चिक** इत्यादि। तथा च कर्तृत्वं न संसारिधर्मः ब्राह्मत्वात् सत्यत्वादिवत् इति प्रतिपक्ष इति भावः। हेतुर्व्याप्यत्वासिद्ध इत्यपि लौकिकं कर्तृत्वमुपाधिः। सूत्रकारस्याप्ययमेव आशय इत्याहुः **अत एवे**त्यादि। अलौकिककर्तृत्वादेवेत्यर्थः। ब्रह्मणो भविष्यति नेत्याहुः **अनेके**त्यादि। तथाच हिरण्यगर्भस्यापि स्रष्टृत्वे प्रमाणाभावोनायासेनेत्यर्थः। अतएव निरध्यस्तैरेव देहादिभिः कर्मकरणसंभवादितिभाष्यम्। एवमग्रिमं स्फुटमित्यर्थः। **प्रकृते। निर्धर्मकत्व**मिति श्रौतधर्मनिषेधादस्थूलादि-

प्रतीतं च निषेध्यम्। नाप्रतीतं, न श्रुतिप्रतीतम्। सत्यत्वादयश्च लौकिकाः। ततः सर्वनिषेधे तदज्ञानमेव भवेत्। नच सत्यत्वादिकं लोके नास्त्येव व्यवहारमात्रत्वात्, कारणगतमेव सत्यत्वं प्रपञ्चे भासत इति वाच्यम्। तर्हि कर्तृत्वं तथा कुतो नाङ्गीक्रियते। स्मृतिश्च स्वीकृता भवति 'कर्ता कारयिता हरिः' इति।

नचारोपन्यायेन वक्तुं शक्यम्। तथा सत्यन्यस्य स्यात्। तत्र न प्रकृतेः। अग्रे स्वयमेव निषिध्यमानत्वात्। न जीवानामस्वातन्त्र्यात्। न चान्येषामुभय-

भाष्यप्रकाशः।

प्रतीतमित्यादि। युक्तः प्रतिषेधः। परंत्वस्थूलादिवाक्ये लोकप्रतीता एव प्रतिषिद्ध्यन्त इत्यत्रापि प्रतीतमेव प्रतिषेध्यम्। अत एव नाप्रतीतम्। प्रसञ्जयितुमशक्यत्वेन प्रतिषेधानर्हत्वाच्च। न श्रुतिप्रतीतम्। तुल्यबलत्वात् प्रत्यायनवैयर्थ्यापाताच्च। श्रुत्युक्ताः सत्यत्वादयोऽपि यदि लौकिकत्वेनादृतास्ततो लोकश्रुतिप्रतीतसाधारण्येन सर्वनिषेधे ब्रह्माज्ञानमेव भवेत्। तथाच स्वरूपलक्षणवैयर्थ्यं सर्वनाशश्च स्यात्। नच तदभावाय लोकस्य व्यवहारमात्रत्वात् तत्रापि कारणगतमेव सत्यत्वमतो न तत् प्रतिषेध्यं, किं तु कर्तृत्वमेवेति वाच्यम्। तदा तु धर्मसंकोचस्य तौल्यात् कर्तृत्वमपि तथाङ्गीकार्यम्। तेन कल्पस्मृतिस्वीकाररूपगुणोऽपि भविष्यति। नन्वगत्या सत्यत्वं तथास्तु, न तु कर्तृत्वमपि। आरोपन्यायेन तस्य शक्यवचनत्वादित्यत आहुः न चेत्यादि। अन्येषामिति अभावकालस्वभावभूतग्रहलोकपालादीनाम्। ननु प्रकृते फलवाक्यविचारो भवतापि

रश्मिः।

श्रुतिभिः। अत इति कर्तृत्वाकर्तृत्वयोः प्राप्तौ युक्तत्वादित्यर्थः। इत्यत्रापीति नित्यशुद्धबुद्धमुक्तस्वभावमित्यादिष्वित्यर्थः। प्रसञ्जयितुमिति अभावस्य प्रसक्तिं कर्तुम्। प्रतिषेधानर्हत्वाच्चेति। यथाहुः अभावलौकिकप्रत्यक्षं प्रति प्रतियोगिज्ञानस्य हेतुत्वमन्यथा प्रतियोगिज्ञानशून्यकाले नेत्याकारकप्रतियोग्यमिश्रिताभावलौकिकप्रत्यक्षं स्यादिति प्राञ्चो नैयायिकाः। तुल्यबलत्वादिति।

उपजीव्यत्वतः श्रौतवाक्यतोन्यपरत्वतः।

'अन्तरङ्गत्वतश्चापि तुल्यमत्रोभयोर्बलम्' इत्यर्थः।

यथाहि निर्गुणप्रतिपादिकासु आधारनिरूपकत्वेनोपजीव्यत्वं कारणत्वमत एवान्यपरत्वं निर्गुणप्रतिपादकत्वरूपमत एवान्तरङ्गत्वं धर्मनिरपेक्षत्वेन स्वल्पापेक्षत्वरूपम्। एवं सगुणप्रतिपादिकास्वपि विरहप्रतियोगिनिरूपकत्वेनाधारनिरूपकत्वेन चोपजीव्यत्वमन्यपरत्वं च। कार्यस्वरूपयोरेकब्रह्मलक्षणत्वात् धर्मनिरपेक्षत्वस्य स्वरूपलक्षणेपि प्रकाशाश्रयन्यायेन वक्तव्यत्वात्प्रकृतेपि तत्संभवेनान्तरङ्गत्वं च तुल्यं, एवमप्युपपादनसौष्ठवाच्छ्रौता धर्मा निषेध्या इत्याकाङ्क्षायां हेत्वन्तरमाहुः प्रत्यायनेत्यादि। तथा सति प्रक्षालनपङ्कन्यायेन धर्मान्न प्रत्याययेदित्यर्थः। सत्यत्वादय इत्यादि भाष्यं विवृण्वन्ति श्रुत्युक्ता इत्यादि। सर्वनाश इति ब्रह्माज्ञाने तद्विषयकस्य दृढभक्त्यादेरुच्छेदात्तथा स्यादित्यर्थः। न च सत्यत्वेत्यादि भाष्यं विवृण्वन्ति न च तदित्यादि। तथाङ्गीकार्यमिति कारणगतमेव कर्तृत्वं लोकेऽङ्गीकार्यमित्यर्थः। स्मृतिश्चेत्यादिभाष्यं विवृण्वन्ति तेनेत्यादि। कल्पस्मृतीति भाष्योक्तकल्पस्मृतीत्यर्थः।

भाष्ये तथासतीति आरोपोह्यन्यगतधर्मस्येति कर्तृत्वस्यान्यधर्मत्वे सतीत्यर्थः। अग्र इति यथा बर्हिर्देवसदनं दामीत्यत्र बर्हिर्लवनसामर्थ्यं दामीति शब्दादालोच्यानेन लवनं विदध्यादिति श्रुतिं कल्पयित्वा लवनाङ्गत्वं मन्त्रस्य। प्रकृते। अभावेत्यादि अभावो नास्तिकानां, कालस्वभावौ श्वेताश्वतरे, भूतो-

निषेधादेव । तस्माद् ब्रह्मगतमेव कर्तृत्वम् । एवं भोक्तृत्वमपि । न वा काचिच्छ्रुतिः कर्तृत्वं निषेधति । विरोधभानात् कल्प्या तु लौकिकपरा । फलवाक्येऽप्यश्रुतानां गुणोपसंहारः कर्तव्यः । तथाचायं सूत्रार्थः । जन्म आदिर्येषामित्यवयवसमासादतद्गुणसंविज्ञानो बहुव्रीहिः ।

भाष्यप्रकाशः ।

स्वीकृतस्तथा सति तद्विवरणोक्तं भोक्तृत्वं तत्रास्तु, कर्तृत्वं तु कथमङ्गीकर्तुं शक्यमित्यत आहुः **गुणोपसंहार** इति सूत्रकृताग्रे तथाङ्गीकारात् तथेत्यर्थः । तस्माद् ब्रह्म कर्तृ इति सिद्धम् । एवं सिद्धान्तं व्याख्याय तस्य सूत्राविरोधित्वं बोधयितुं सूत्रं व्याकुर्वते **तथाचे**त्यादि । एवं कर्तृत्वे सिद्धे वक्ष्यमाणरीतिकः सूत्रार्थ इत्यर्थः । अत्र सर्वेऽपि तद्गुणसंविज्ञानं बहुव्रीहिमङ्गीकुर्वन्ति । तत्रोपसर्जनत्वेन पूर्वप्रयोगार्हस्यादिशब्दस्य परत्वाय राजदन्ताद्याकृतिगणीयत्वं कल्पनीयमित्यरुच्या प्रकारान्तरेण व्याकुर्वन्ति **जन्मे**त्यादि । जन्म आदिः प्रथमोऽवयवो येषां ते जन्मादि । **सुपां सुलुगि**ति जसो लुगित्यवयवसमासादिति भावप्रधानो निर्देशः । तथाचादिपदविशेष्यकावयवसमासत्वादतद्गुणसंविज्ञानो बहुव्रीहिरित्यर्थः । न च, 'अङ्गं प्रतीकोऽवयवः' इति कोशादवयवपदस्याङ्गवाचकत्वेनात्र च तदभावेन कथमवयवसमासत्वमिति शङ्क्यम् । एकदेशेऽप्यवयवपदप्रयोगात् । यथा पञ्चावयवमनुमानवाक्यमिति । कैयटेऽपि, 'एकाचो द्वे प्रथमस्य' इत्यत्र, एकोऽज् यस्य स एकाजिति विशिष्टावयवोपलक्षितस्यावयविन इत्यादिना, अज्झल्विशिष्टस्य शब्दस्यैकोऽज-

रश्मिः ।

न्यप्रविष्टः, ग्रहाः सूर्यादयः ज्योतिषे, एवं लोकपाला अपि । **आदिशब्देन** कामः 'असत्यमप्रतिष्ठं ते' इति वाक्यात् । **भोक्तृत्वमि**ति द्वितीयाध्याये द्वितीयपादे 'रचनानुपपत्तेश्च' इत्यधिकरणेऽन्यत्र चेत्यर्थः । **भाष्ये । अस्वातन्त्र्यादि**ति 'स्वतन्त्रः कर्ता' इत्यनुशासनात् कर्तृत्वे स्वातन्त्र्यस्य प्रयोजकत्वमिति भावः । **उभयनिषेधादि**ति चिज्जडनिषेधादित्यर्थः । सिद्धमाहुः **तस्मा**दित्यादि । आन्यत्रिकत्वाभावेनारोपाभावादित्यर्थः । अतिदिशन्ति **एवमि**ति । अश्रुत इत्युक्तं भोक्तृत्वं मुक्तजीवीयमपि सहार्थकतृतीयान्तप्रतिपाद्यब्रह्मगतमेवेत्यर्थः । इच्छया जीवे प्रधानीभूय भासत इत्यर्थः । **कल्प्या त्वि**ति कर्तृत्वनिषेधकत्वेन लिङ्गात्कल्प्या तु लौकिककर्तृत्वनिषेधपरेत्यर्थः । अथवा किमनया कुसृष्ट्येति वक्ष्यमाणत्वाद्यथाकथंचिद्व्याख्यायते । **प्रकृते** । अश्रुत इत्यस्याश्नातीत्यर्थाद्भोक्तृत्वम् । **अग्र** इति तृतीयस्य तृतीयपादे इत्यर्थः । **तथे**ति भोक्तृत्वम् । सिद्धमाहुः **तस्मा**दित्यादि । तृतीयस्य द्वितीयपादे उभयव्यपदेशाधिकरणे स्पष्टम् । **अत्रे**ति । **पूर्वप्रयोगार्हस्ये**ति 'उपसर्जनं पूर्वम्' इति सूत्रात्पूर्वेत्यादिः । जन्मादीतिपदे इत्यर्थः । **कल्पनीयमि**ति पाणिनीयगणपाठे राजदन्तादिषु जन्मादिशब्दपाठाभावेपि तत्त्वं कल्पनीयमित्यर्थः । तर्हि बहुवचनं स्यादित्याकाङ्क्षायामाहुः **सुपामि**त्यादि । 'सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः' इति वैदिकीप्रक्रियायां सप्तमेध्याये सूत्रमुदाहरणानि च तत्रैव । **भाष्ये । इत्यवयवसमासे**ति अवयवानां जायतेऽस्ति विपरिणमत इत्यादीनां समसनात् जन्मादीनां वा समसनात् । एवं चात्रावयवावयविनोरत्र समासाभावादतद्गुणत्वम् । **प्रकृते । पञ्चावयवमि**ति प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । **उक्तसूत्र** इति षष्ठाध्यायप्रथमपादस्य प्रथमाह्निकस्य उक्तसूत्र इत्यर्थः । **विशिष्टावयवे**ति अज्झल्विशिष्टावयवोपल-

भाष्यप्रकाशः ।

वयव इत्यङ्गीकाराच्च । तत्रैकस्याचो विशिष्टावयवत्ववदत्र आद्यादीनां समूहावयवत्वेन तद्वाचकपदानां समासेऽवयवसमासत्वस्य सुखेन संभवात् ।

एतस्यातद्गुणसंविज्ञानत्वं त्वेवम् । तथाहि । उक्तसूत्रे कैयटेन तद्गुणसंविज्ञानपदं द्वेधा व्याख्यातम् । तस्य अन्यपदार्थस्य गुणो विशेषणं तस्य संविज्ञानं येनेति । स वर्तिपदार्थो गुणो यस्यान्यपदार्थस्य तस्य संविज्ञानं येनेति च । तत्रोदाहरणं तु शुक्लवाससमानयेति । तत्र शुक्लवासःसंयुक्तपुरुषानयने पृथगचोदितान्यपि वासांसि संबन्धसामर्थ्यादानयनेन संबद्ध्यन्त इत्युक्तम् । इदं च लम्बकर्णमानयेत्यादावपि तुल्यम् । एवं सत्यन्यपदार्थविशेषणस्य यत्र संबन्धासामर्थ्यात् कार्यसंबन्धस्तत्र तद्गुणसंविज्ञानः । यत्र तस्य संबन्धसामर्थ्यात् कार्ये संबन्धाभावस्तत्रातद्गुणसंविज्ञानः । यथा चित्रगुमानयेत्यत्र। अत्र हि पुरुषानयने समासवर्तिपदार्थभूतानां चित्राणां गवां सन्निधानाभावान्न कार्येण सह संबन्ध इति । एवं सति प्रकृतेऽन्यपदार्थभूतानां प्रधानानां स्थितिप्रलयाभिसंवेशानामेकदेशतया तद्विशेषणीभूतो य आदिस्तस्य प्रथमान्तरव्यावर्तकतया जन्म विशेषणम् । स्वयं तु वर्तिपदार्थे विशेष्यः । तस्य धर्मरूपं यत्प्राथम्यं तदपेक्षाबुद्धिजन्यम् । तस्य निरूप्यत्वमपि स्थित्यादिजन्यमतः सोऽत्र सूत्रेऽर्थादायातायां ब्रह्मकर्तृकभवनक्रियायां न सं-

रश्मिः ।

क्षितस्य । **आद्यादीना**मिति आदेरादि जन्म आद्यादि, आदिरादिर्येषां स्थितिलयाभिसंवेशानां त आद्यादयः, आद्यादि च आद्यादयश्च आद्यादयः तेषामाद्यादीनाम् । **येनेती**ति येनेति तृतीयान्तान्यपदार्थकथनं तु तस्यान्यपदार्थस्य गुणो विशेषणं तस्य संविज्ञानं स वर्तिपदार्थो गुणोवयवो वा यस्यान्यपदार्थस्य तस्य संविज्ञानमित्यस्याग्रे संनिहितविशेषणस्यान्यपदार्थस्य विशिष्टसंबन्धाश्रयेण केनचिद्बहुव्रीहिणाभिधानादित्यर्थः । इत्युत्तरग्रन्थसूचितं ज्ञेयम् । शब्दरत्ने तु तस्यान्यपदार्थस्य गुणा विशेषणानि संज्ञायन्ते कार्यित्वादिना यत्रेति 'सर्वादीनि सर्वनामानि' इत्यत्र व्याख्यातम् । **तद्गुणसंविज्ञान** इति तथाच प्रायः संयोगसमवायान्यतरसंबन्धेन संबन्धी यत्र अन्यपदार्थस्तत्र तद्गुणत्वमिति शब्दरत्नोक्तं लक्षणं पर्यवसितं ज्ञेयम् । **नैयायिकास्तु** लक्ष्यतावच्छेदकस्य विशेष्यान्वय्यन्वयित्वं लक्षणमाहुः **यत्र तस्ये**ति । इदमपि संयोगसमवायातिरिक्तस्वस्वामिभावादिसंबन्धेन संबन्धी यत्रान्यपदार्थः तत्र तद्गुणत्वमिति शब्दरत्नोक्तं लक्षणं नातिवर्तते । **नैयायिकास्तु** लक्ष्यतावच्छेदकस्य विशेष्यान्वय्यनन्वयित्वं लक्षणमाहुः । अत्रैतावान् विशेषः । समासशक्तिवादिनां विशेषणस्य विशेष्यान्वय्यन्वयित्वे तदनन्वयित्वे उक्तसंबन्धो नियामकः । लक्षणावादिनां नैयायिकानां तु शब्दस्वभाव एव तन्त्रमिति । **सन्निधानाभावा**दिति अत एव नागयज्ञोपवीती भोज्यतामित्यादौ यज्ञोपवीतस्य कार्यित्वाभावेपि तत्सन्निधानात्तद्गुणत्वमिति हरिग्रन्थः । नैयायिकानां मते तु अतद्गुणसंविज्ञान एव । **प्रधानाना**मिति विशेष्याणामित्यर्थः । **स्थितीत्यादि** । **अभिसंवेशः** सुषुप्तिस्तत्सुखमित्यर्थः । **प्रथमान्तरे**ति जन्मतः प्रथमान्तरेत्यर्थः । **स्वयं त्वि**ति आदिस्त्वित्यर्थः । **तस्ये**ति आदेरित्यर्थः । **अत** इति प्राथम्यस्य निरूप्यत्वस्य चापेक्षाबुद्धिजन्यत्वेन स्थित्यादिज्ञानजन्यत्वेन च साक्षाद्ब्रह्मजन्यत्वाभावादित्यर्थः । **ब्रह्मकर्तृके**त्यादि यतो

१. कार्यकारणभावसंबन्धाश्रयेण । २. अभिधावृत्तिः पदधर्मः 'पदज्ञानं तु करणम्' इति भाषापरिच्छेदात् ।
३. कार्यकारणभावसंबन्धस्तृतीयान्तान्यपरं सूचयतीति ग्रन्थसूचितम् । ४. विशेष्यान्वयित्वं कार्यम् ।

भाष्यप्रकाशः ।

बध्यते । तदसंबन्धे तद्द्वारा जन्मनोऽपि न संबन्ध इत्यस्य समासस्यातद्गुणसंविज्ञानत्वम् । इदं च तद्गुणसंविज्ञानस्य प्रथमलक्षणादरे बोध्यम् । द्वितीयलक्षणादरे तु तद्गुणकस्य विशेष्यस्यान्यपदार्थस्य संविज्ञानं समायाति । तच्च चित्रगुरित्यत्रापि वर्तत इति तद्वारणाय विशेषणसंबन्धपूर्वक एव तस्य क्रियासंबन्धो वक्तव्यः । तदाप्यत्र विशेष्यभूतानां स्थित्यादीनां विशेषणसंबन्धपूर्वको न क्रियासंबन्ध इति पूर्ववदेवातद्गुणसंविज्ञानत्वम् । यदि च संविज्ञानपदेन वर्तिपदार्थस्य तद्विशेष्यस्य वा प्रव्यक्तीभाव एवाद्रियते तदा तु विशेष्यविशेषणयोर्ज्ञातत्वेनास्माकं तत्प्रव्यक्तीभावाभावाद् भाववृत्तसूक्ते, 'सोअङ्ग वेद यदि वा न वेद' इति श्रावणाच्चातद्गुणसंविज्ञानत्वमिति न कोऽपि शङ्कालेशः । अत्रैतत्समासादरेण भाववृत्तसूक्ते, यदि वा नेतिवाक्यबोधिताऽनाधानपक्षसूचना-

रश्मिः ।

जन्मादयोस्य भवन्तीति सूत्रान्वयाज्जन्मादिकर्तृका भवनक्रिया तथापि सूत्रे यत इति पञ्चमी 'जनिकर्तुः प्रकृतिः' इति सूत्रादित्याशयः । **तदसंबन्ध** इत्यादि आदेः प्राथम्यवाचकस्यापेक्षाबुद्धिजन्यत्वेन ब्रह्मजन्यत्वाभावात् तद्धेतुकभवनक्रिययाऽसंबन्धे तद्विशिष्टजन्मनोपि संबन्धेनो न विशेषणसंबन्धाभावप्रयुक्तो विशिष्टाभाव इत्यस्य समासस्यातद्गुणसंविज्ञानत्वमित्यर्थः । **बोध्यमिति** अन्यपदार्थस्य स्थित्यादेर्गुणो जन्म तस्यासंविज्ञानमत्रेत्येवं बोध्यमित्यर्थः । **तद्गुणकस्येति** समासवर्तिपदार्थगुणकस्यान्यपदार्थस्य स्थित्यादेरित्यर्थः । एवं कैय्यटोक्तलक्षणद्वयसमन्वयमुक्त्वा तद्गुणसंविज्ञान इत्यत्रान्यपदार्थगुणानां कार्यित्वादिना संविज्ञानमिति पक्षे संविज्ञानपदस्यान्वयलक्षकत्वं लक्ष्यतावच्छेदकस्य विशेष्यान्वय्यन्वयित्वमिति पक्षेपि तथेति वक्तव्यं तथा सति तद्गुणान्वय इति वक्तव्ये संविज्ञानपदकथनेन तस्य तद्गुणानां च प्रव्यक्तीभाव एवाभिप्रेत इत्याशयेन प्रकारान्तरमाहुः **यदि चेत्यादि** । **तद्विशेष्यस्य वेति** वर्तिपदार्थविशेष्यस्यान्यपदार्थस्य चेत्यर्थः । **वाकारश्चकारार्थः** । एतत्पक्षे प्रकृतेऽतद्गुणे संविज्ञानत्वं निगमयन्ति **तदा त्वित्यादि** । षड्भावविकाररूपयोर्जन्मप्राथम्यरूपयोर्वा विशेष्यविशेषणयोर्जनितत्वेन जगद्भवत्वेन साक्षाद्ब्रह्मणस्तद्विषयकसंविज्ञानत्वाभावादित्यर्थः । सांख्यानां सर्वस्य मायिकत्वादस्माकमित्युक्तम् । नन्वसार्वज्ञ्यापत्तिरेवं भवेदित्यतः श्रुतिं प्रमाणयन्ति **भाववृत्तेत्यादि** । इयं श्रुतिर्ब्राह्मणस्य द्वितीयाष्टकेस्ति तत्रैतस्याः पूर्वं 'नासदासीन्नो सदासीत्तदानीम्' इत्याद्युक्त्वा 'तम आसीत्तमसा गूढमग्रेऽप्रकेतम् । सलिलꣳसर्वमा इदम्' इत्यादिना सृष्टिं च । ततः 'को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनाय । अथा को वेद यत आबभूव । इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न । यो अस्याध्यक्षः परमेव्योमन्' इति श्रूयते । तथा च सोध्यक्षो विसृष्टिं जन्म वेद यदि वा विसृष्टिं न वेदेति जन्मनो ज्ञानाविषयत्वेनातद्गुणत्वमित्यर्थः । यदीत्यस्या यदा भगवान् सच्चिदानन्दरूपो धर्मरूपेणाविर्भवतीत्यादिक्रमेण ततो जाता तदा तु धर्मरूपेणादधे, यदा तु स्वयमेव तथाविर्भूतस्तदा न दधे । सर्वस्य ब्रह्मानतिरेकादित्यर्थः । तथा च विकारान्तरज्ञानदशायां जन्मनः प्रव्यक्तत्वाभावात्तदसंविज्ञानं नैतावताऽसार्वज्ञ्यमिति भावः । **न कोपीति** । या तु 'यस्मिन्निदꣳसं च विचैति सर्वम्' इति श्रुत्या जन्मनः सिद्धत्वेन श्रौतत्वात् तद्गुणसंविज्ञान एव युक्त इत्याशङ्का सापि नेत्यर्थः । जन्मनो ब्रह्मकर्तृकत्वेपि श्रौतात्संदेहादज्ञानमुक्तम्, विरुद्धधर्माश्रयत्वेन माहात्म्यज्ञानं च द्योतितम् । **अनाधानपक्षेति**

अथवा जन्मप्रभृति सर्वे भावविकारा आदिशब्देन गृह्यन्ते। तथाच जन्म च आदिश्चेत्येकवद्भावः। आदिशब्दश्च धर्मवाची। स च स्वसंबन्धिनं लक्षयति। तस्योभयसापेक्षत्वादुत्पत्तेर्विद्यमानत्वादन्यानेव भावविकारानुपलक्षयतीत्यादिशब्देनान्ये भावविकाराः।

भाष्यप्रकाशः।

जन्मस्थितिभङ्गादीनामाविर्भावादिरूपत्वबोधनेन भगवानेव तत्तद्रूपः क्रीडन्नाविस्तिरश्च भवतीति पुष्टिसृष्टिप्रकारो बोधितः। तथाच जन्म आविर्भाव आदिर्येषां प्रकाराणामित्यर्थो बोध्यः। प्रवाहसृष्टिबोधनाय प्रकारान्तरमाहुः **अथवेत्यादि**। प्रभृतिशब्दः पूर्वावधिवाचकः। **सर्वे** इति जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते नश्यतीतिप्रतीतिसिद्धा यास्कोक्ताः षट्। कथं गृह्यन्त इत्यपेक्षायामाहुः **तथाचेत्यादि**। सर्वोऽपि द्वन्द्वो विभाषैकवद्भवतीत्येकवद्भावः। आदिशब्दश्च प्राथम्यरूपधर्मवाची। पूर्वतन्त्रे शब्दानां धर्मवाचकत्वस्य सिद्धत्वात्। स च स्वसंबन्धिनं लक्षयति। तत्र कं लक्षयतीत्याकाङ्क्षायां तस्य यथोत्पत्तावाधारता तथाग्रिमेषु निरूपकता। प्राथम्यस्योभयसापेक्षत्वात्। अत उत्पत्तेरत्र कण्ठोक्तत्वेन विद्यमानत्वादन्यानेवोपलक्षयतीति तथेत्यर्थः। तेन विषयवाक्योदितौ स्थितिभङ्गौ प्रत्याहारन्यायेनान्येषामपि बोधकौ। कालादिगतमपि कर्तृत्वं भगवदीयमेव, न तु स्वतन्त्रमिति च बोधयितुमत्रादिपदोक्तिरिति तात्पर्यं सूचितम्। एवं व्याख्याने आदिपदस्य लाक्षणिकत्वम्। तथादिपदेन आदित्वधर्मवत्तया जन्मनोऽपि संग्रहीतुं शक्यत्वाज्जन्मपदवैयर्थ्या-

रश्मिः।

स्वस्यैव सर्वरूपत्वेन धारणपक्षेत्यर्थः। **पुष्टिसृष्टिप्रकार** इति ब्रह्मैव कार्यकारणरूप इति प्रकार इत्यर्थः। 'पुष्टिं कायेन निश्चयः' इति **पुष्टिप्रवाहमर्यादा**ग्रन्थवाक्यात्। अत्र पक्षे सर्वस्यानन्दरूपतया विकारविरहादर्थमाहुः **तथा च जन्मे**त्यादि। **प्रकाराणा**मिति। 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेन लौकिकभावविकारसदृशप्रकाराणामित्यर्थः। **प्रवाहे**त्यादि प्रवाहः प्रवहणम्। सर्गपरंपराया अविच्छेद इति यावत्। 'द्वौ भूतसर्गौ लोकेस्मिन् दैव आसुर एव च' 'द्वया ह प्राजापत्या देवाश्चासुराश्च' इति श्रुतिस्मृतिभ्याम्। अत्र समवायी मायामनोरूपः 'द्वे अस्य बीजे' इत्यारभ्य 'मायामयं वेद स वेद वेदम्' इति भगवद्वाक्यात्। मायामात्रस्यैव मिथ्यात्वं न सर्वस्य। प्रवाहस्य सदसद्ग्रन्थिरूपत्वात्। संध्याधिकरणे स्फुटिष्यतीदम्। **प्रभृती**त्यादि तथा च जन्मपूर्वावधिकसर्वे भावविकारा इति भाष्यार्थः। **यास्कोक्ता** इति निरुक्तप्रसिद्धो यास्कर्षिः। **सर्वोपी**त्यादि परिभाषेयम्। **आदिशब्द** इति भाष्यं विवृण्वन्तिस्म **आदिशब्दश्चे**ति। **पूर्वतन्त्र** इति आकृत्यधिकरण इत्यर्थः। **स्वसंबन्धिन**माश्रयं, तं विना स्थातुं धर्मो न शक्नोतीति भावः। लक्षणायां संबन्धं वक्तुमाहुः **तत्र क**मित्यादि। **तस्य यथे**त्यादि प्राथम्यस्य यथा जन्मन्याधारता तथाग्रिमेष्वस्त्यादिषु निरूपकता, प्राथम्यस्यास्त्यादिनिरूप्यत्वात्। **उभयसापेक्षत्वा**दिति आधारनिरूपकसापेक्षत्वादित्यर्थः। **उपलक्षयती**ति निरूपकतासंबन्धेनोपलक्षयतीत्यर्थः। ननु कथं तर्हि आदिशब्दप्रयोग इत्यत आहुः **तेने**त्यादि। **प्रत्याहारन्याये**नेति 'आदिरन्त्येन सहेता' इति सूत्रसिद्धेनेत्यर्थः। **अन्येषा**मिति विपरिणामवर्धनापक्षयाणामित्यर्थः। **कर्तृत्व**मिति कालेन विपरिणमतीत्यादिप्रतीत्या विपरिणामादिकर्तृत्वमित्यर्थः। **भगवदीयं** तृतीयस्कन्धवाक्यात् कालादीनामीश्वराधीनकर्तृत्वात्। तथा **चादि** जन्मादि कर्तृत्वं सूचयितुमादिपदेनास्त्याद्युपलक्षणमिति भावः।

अथवा जन्मनो नादित्वम् । तदाधारस्य पूर्वमविद्यमानत्वात् । अन्ये त्वादिमन्तः । तदाधारस्य पूर्वं विद्यमानत्वात् । अत आदिशब्दः स्वाधारसद्धर्मवाची तद्धर्माणामुपलक्षकः । अथवा गमनप्रवेशयोर्भेदाज्जन्म आदिर्येषामिति

भाष्यप्रकाशः ।

पत्तिरित्यरुच्या प्रकारान्तरेण व्याकुर्वन्ति **अथवा जन्मन** इत्यादि । बहिर्विद्यमाने जन्माधारे पश्चाज्जन्म चेत्तदा जन्म प्रत्याधारस्य तद्गतधर्मस्य चादिता संभवति । प्रकृते तु तन्नास्तीति जन्मनो नादित्वम् । अन्येषां तु भावविकाराणामुक्तयुक्त्यादिमतो हेतोरादिशब्दः स्वाधारसद्धर्मवाची आदित्वाधारभूतोऽस्तिपदवाच्यो धर्मस्तस्यान्यापेक्षया प्राथम्यात् तत्पूर्वकमेव तं वदन्नादित्वस्य सापेक्षतया तद्धर्माणां विपरिणामादीनामुपलक्षक इति न स्वार्थत्यागदोषो, नापि जन्मपदवैयर्थ्यदोष इत्यर्थः । अस्मिन् पक्षे असत्कार्यवाद आपतति । तथापि यदेतस्य कथनं तन्नृसिंहोत्तरतापिन्याद्युक्तमायिकसृष्टिं प्रत्यपि भगवत एव कारणत्वमिति बोधयितुं, न तु पूर्वोक्तं पक्षं निराकर्तुमिति बोध्यम् । अथ मर्यादासृष्टिसंग्रहाय तद्गुणसंविज्ञानपक्षमभिसंधायाहुः **अथवा गमनेत्यादि** । गमनप्र-

रश्मिः ।

बहिरिति तेन 'सत इदमुत्थितं सदिति चेन्न नु तर्कहतम्' इत्यस्य विषय इति ज्ञापितम् । तेन

'सद्बुद्ध्या सर्वथा सद्भिर्न सेव्यमखिलं जगत् ।
भ्रान्त्या सद्बुद्धिरत्रेति सन्तं कृष्णं भजेद्बुधः' ॥

इति तृतीयाध्याये विषयत्वेन सन् कृष्णः सिद्धः स च जगति त्वतलादिवाच्यस्तदा निरावरणसेवा भवति शुक्तिज्ञानवत् । **जन्माधार** इति आद्यक्षणसंबन्धो जन्म तदाधारे घटादावित्यर्थः । तदा सृष्ट्यन्तरपक्षे जन्मसंबन्धरूपजन्मस्वरूपस्योभयसापेक्षत्वात् तत्प्रत्याधारस्य जगतः विशिष्टे शक्त्या तद्गतधर्मो जगत्त्वादिरूपस्तस्य, चकाराज्जन्मनोप्यादिता संभवति । **प्रकृते त्वि**ति प्रवाहसृष्टावित्यर्थः । **तन्नास्ति** भ्रान्त्या सद्बुद्धिस्तद्विषयभूतं जगदाधाररूपं नास्ति ततो जन्मापि **नास्ती**ति अस्त्याद्यपेक्षया **जन्मनो नादित्व**मिति एतादृशसर्गपरंपरयास्त्यादीनामप्यादित्वसंभवात् जन्मनो न तथात्वमित्यर्थः । **उक्तयुक्त्ये**ति हेतुभाष्योक्तयुक्त्येत्यर्थः । **भाष्ये** । **तदाधारस्य** जन्माधारस्य । **प्रकृते** । **धर्म** इति सत्ताख्य इत्यर्थः । अत्र न विशिष्टे शक्तिः, आधारस्य सत्त्वात् । अतोऽस्तिपदवाच्यो धर्मः स आत्मा वाक्यपदीयात् । 'सत इदम्' इति श्लोके पूर्वमुक्तम् । **तत्पूर्वक**मित्यादि प्राथम्यपूर्वकमेव सत्ताख्यं धर्मं शक्त्या वदन् लक्षणया विपरिणामादीनां निरूपकाणामुपलक्षक इत्यादिपदस्य शक्यार्थस्वीकारेण न स्वार्थत्यागदोषो नापि जन्मपदवैयर्थ्यदोषो जन्मनोनादित्वेनादिपदवृत्तिद्वयासंभवादित्यर्थः । अत्राजहत्स्वार्थलक्षणायां कृतायां यथायोग्यं तीरे घोषः प्रवाहे मत्स्य इत्यन्वयो मञ्जूषायाम् । नच युगपद्वृत्तिद्वयविरोध इति वाच्यं, गङ्गायां घोषमत्स्यौ स्तः इतिवदुपपत्तेः । तथा चादित्वेन सत्तारूपात्मत्वेन सता भ्रान्तिविषयसज्जन्माक्षेपोत्र नापि तु ह्याक्षेप्यजन्मोक्तिः । **अस्मिन् पक्ष** इति प्रवाहपक्ष इत्यर्थः । **नृसिंहे**त्यादि 'सैषाविद्या जगत्सर्वम्' इत्यादिः । **अथ मर्यादे**ति कर्मज्ञानादितत्तत्प्रकारनियमो मर्यादा, सा तु विभागसार्थक्यादस्ति सचैवम् । विधिमन्त्रनामधेयनिषेधार्थवादात्मना हि विभक्तो वेद इति । तत्सृष्टिस्तु 'वचसा वेदमार्गं हि'

१. श्रीभागवतदशमे गुणप्रकरणे वेदस्तुतिरूपे तृतीयाध्याये ।

जात्यपेक्षयैकवचनम् । जन्म तु श्रुतत्वात् सिद्धम् ।

अथवा किमनया कुसृष्ट्या । जन्म आद्यस्य आकाशस्य यत इति ।

भाष्यप्रकाशः ।

वेशयोः पूर्वोत्तरावधिभूतसंचरप्रतिसंचरयोर्मध्ये कार्यस्वरूपस्य कारणतो भेदाज्जन्मादयो भवन्तीति जन्म आदिर्येषां तत्तज्जातीयं जन्मादि । जातिरत्र विकारत्वं क्रियात्वं वा । अत्र, 'ब्राह्मणो जन्मतः श्रेयान्', 'न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम्' इत्यादाविव जात्यपेक्षयैकवचनम् । तथाच यद्यपि, सुपां सुलुगिति जसो लोपे जन्मादीति सिध्यति तथापि विकारान्तरसंग्रहस्तेन न भवत्यतस्तदुपेक्षितम् । नपुंसकं तु सामान्ये । एतत्पक्षसंग्रहे बीजमाहुः **जन्म तु श्रुतत्वात् सिद्धमिति** । जन्म तु, 'यस्मिन्निदꣳ सं च विचैति सर्वम्' इति तैत्तिरीये श्रुतत्वाद् व्ययनात्मकबहिर्गमनरूपं सिद्धम् । तच्च सजातीयसंवलनवियोगादि संगृह्णत् समयनरूपं प्रवेशं च स्मारयतीति तद्गुणसंविज्ञानोऽपि युक्त इत्यर्थः ।

एवं पक्षत्रयेण व्याख्यायैतेषामत्र बोधनस्यानतिप्रयोजनत्वात् प्रतिपत्तिगौरवाच्चारुचिं सूचयन्तः प्रकारान्तरेण सूत्रं व्याकुर्वन्ति **अथवा किमित्यादि** । **नन्वेवं सत्याकाशजनकत्वस्यैव**

रश्मिः ।

इति मनःपूर्वकं वचसा वेदमार्गं सृष्टवानित्यर्थः । शब्दादर्थोत्पत्तिश्च शब्द इति चेदित्यादि सूत्रभाष्ये स्फुटिष्यति । अत्र समवाय्यक्षरम् ।

'मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः' ॥

'अव्यक्तोक्षर इत्युक्तः' 'अव्यक्ताद्व्यक्तयः सर्वाः' इति वाक्येभ्यः । गमनं सच्चिदानन्दस्य भगवतो धर्मरूपेण भवनोत्तरं स्वस्मिन् लयः यत्प्रयन्तीत्युक्तः प्रवेशस्त्वभिसंविशन्तीत्युक्त इत्याशयेन गमनप्रवेशौ व्याकुर्वन्ति **गमनेत्यादि** । **प्रतिसंचरः** प्रतिनिधिसंचरः । तथा च पूर्वोत्तरावधिभूतयोः जननजीवनयोर्यौ संचरप्रतिसंचरौ तयोर्मध्ये । **कारणत** ब्रह्मण इति इत्यर्थः । **जन्मादय** इति विकारा इत्यर्थः । **न भवतीति** यतो वा इति श्रुतौ जननगमनप्रवेशयोर्मध्ये स्थितिमात्रोपादानान्न भवतीत्यर्थः । **सामान्य** इति दृढभक्तिरितिवत् । यद्यपीदमनियतलिङ्गविषयकमत एवार्दि पचतीत्येव प्रयोगस्तथापि बहुव्रीहौ त्वनियतलिङ्गत्वादुपपन्नम् । **सिद्धमिति** ब्रह्मणः सिद्धमित्यर्थः तथाच तद्गुणसंविज्ञाने श्रुत्यनुकूलतैव बीजमित्यर्थः । **व्ययनात्मकेति** व्यवहिताश्चेति छन्दसि व्यवधानेपि प्रयोगात् समेति व्येतीत्यर्थात्तथेत्यर्थः । **संगृह्णदिति** तात्पर्योपलक्षणविधयापि गृह्णत् । **स्मारयतीति** संविज्ञानस्य शक्यार्थपक्षमाश्रित्येदम् । **युक्त** इति अस्मिन् पक्षे विग्रहस्त्वयमेव सर्वं आदिर्येषामितिवत् । इह आदिशब्दस्यावयववाचित्वादुद्भूतावयवभेदः समुदायः समासार्थः । उद्भूतावयवभेदत्वं चारोपितावयवगतसंख्यत्वम् । तस्य च समुदायस्य युगपत्क्रियान्वयासंभवात् तदन्तर्भूतानामवयवानामेव पृथगन्वयः । **शंकराचार्यैस्तु** जन्मादिर्यस्येति विगृहीतम् ।

एवं पक्षत्रयेणेति 'स आत्मानꣳ स्वयमकुरुत' इति 'सोऽकामयत बहु स्याम्, प्रजायेय' इति 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति तैत्तिरीयोक्तपुष्टिप्रवाहमर्यादाबोधकपक्षत्रयेणेत्यर्थः । **एतेषामिति** पुष्टिप्रवाहमर्यादानामित्यर्थः । **भाष्ये** । **कुसृष्ट्येति** कुसृष्टित्वं तु अवयवसमासपक्षे जन्मग्रहणप्रयासः अतद्गुणसंविज्ञान एव । अवयविसमासपक्षे तु समुदायस्य युगपत्क्रियान्वयक्लेशः । द्वन्द्वे तु आदिशब्दस्य लाक्षणिकत्वं जगन्मिथ्यात्वं

'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्येव विचार्यते । फलसंबन्धित्वात् । तेनैकत्र सिद्धः शास्त्रार्थः प्रकारान्तरेऽपि । यतो वा इमानि भूतानीत्यत्र विस्फुलिङ्गवत् सर्वोत्पत्तिः । अत्र तु क्रमेणेति विशेषः । एतेन सर्व एव प्रकाराः

भाष्यप्रकाशः ।

लक्षणत्वमायाति, न तु सर्वभूतजनकत्वस्य तत्स्थित्यादिकर्तृत्वस्य च । तथा सति वाक्यान्तरे ब्रह्मभेदापत्तिरितिशङ्कायामाहुः तेनेत्यादि । यदा, यतो वेति वाक्यं विषयत्वेनादरणीयं तदाप्ययं न्यायस्तु सर्वथाङ्गीकार्य एव । अन्यथा आकाशवाक्येऽपि ब्रह्मान्तरापत्तिः स्यात् । अतो जनन-प्रकारस्यैव भेदो न तु ब्रह्मण इति न कोऽपि दोष इत्यर्थः । यतो वेतिश्रुतौ, यत् प्रयन्त्यभिसंवि-शन्तीत्यस्य भागस्य यद् ब्रह्म प्रयन्ति प्रकर्षेण सृष्टिसामयिकदुःखराहित्येन प्रलये गच्छन्ति, अभितः संविशन्ति स्वपन्ति सुषुप्ताविव सत्संपन्ना भवन्तीत्यर्थो बोध्यः । एवं पक्षत्रयेण व्याख्याने बीज-माहुः एतेनेत्यादि । सूत्रे एवं श्लिष्टप्रयोगेण वेदोक्ताः सर्वे प्रकारा व्यासचरणैः संगृहीता ज्ञेयाः । तथाच क्वचित् साक्षात्, क्वचित् तटस्थत्वेन, क्वचित् किंचिद्द्वारा क्रमेणेति बोधनायास्माभिरपि

रश्मिः ।

चापघत इति । न च यथा कतन्तेभ्यः कण्वादिभ्य इत्यत्र कतस्यान्तः कतन्तः शकन्ध्वा-दित्वात् पररूपम् । कतः अन्तो येषां ते कतन्ताः कतन्तश्च कतन्ताश्च कतन्तास्तेभ्य इत्येकशेषः । कण्व स्यादिः कण्वादिः कण्व आदिर्येषां ते कण्वादयः ततः पूर्ववदेव बहुव्रीहि-तत्पुरुषयोरेकशेषः । तद्वज्जन्म चादिर्जन्मादि जन्म आदिर्येषां तज्जन्मादि जन्मादिश्च जन्मादि च जन्मादि । नपुंसकमनपुंसकेनेति स्वरभिन्नानां यस्योत्तरस्वरः स शिष्यत इति वा बहुव्रीहेः शेषः । तथा च जन्मनस्तदादीनां च ग्रहणं भविष्यतीति वाच्यम् । एवं तर्हि जन्मादिरित्यत्र सारूप्यार्थमे-वादिशब्द उपादीयतेऽन्यस्य प्रयोजनस्याभावात्, तथा च गौरवग्रस्तार्थबोधकत्वाद्व्यर्थत्वमिति बोध्यम् । फलसंबन्धित्वादिति 'ब्रह्मविदाप्नोति परम्' इति फलमुपक्रम्य पठितत्वेन तत्पदेन फलरूपपदस्यैव परामर्शेन फलसंबन्धित्वादित्यर्थः । अत्रैवं प्रतिभाति सुगमव्याख्या । अवयवसमासे येषामिति बहुवचनं विकाराभिप्रायेण समर्थनीयं तदनुपपन्नमभिसंविशन्तीत्यनेनोक्ताभिसंवेशस्या-विकारत्वात् सुषुप्तिसुखत्वेन विकाराणां यथायथं जन्मस्थितिभङ्गेष्वन्तर्भावाज्जगतः स्थितिकाले संभा-व्यमानत्वाच्चेत्याशङ्क्या द्वन्द्वपक्ष उक्तः । अस्मिन्नपि पक्षे जगतो नित्यत्वापत्त्या लक्षणत्वव्याघातः । अवयविसमासे च समासार्थस्य समुदायस्य क्रियान्वयक्लेशः इति पूर्वोक्तमेव लक्षणं समर्थयन्त आहुः अथवा गमनेत्यादि । श्रुतौ प्रयन्तीति गमनमभिसंविशन्तीति प्रवेशः तयोर्गमनसुषुप्तिरूप-त्वेन भेदात् जन्म आदिर्येषां स्थितिगमनप्रवेशानामित्यवयवसमास इत्यर्थः । तथा च बहुवचनं स्यादित्याशङ्क्याहुः जात्यपेक्षयेति । एवं तर्हि जन्मासंग्रहस्तु स्यादतद्गुणसंविज्ञानपक्ष इत्याशङ्क्याहुः जन्मेत्यादि । यथा देवदत्तशालायां ब्राह्मणा आनीयतामित्युक्ते देवदत्तो यदि ब्राह्मणश्चेत्तदा सोप्या-नीयत एव, एवं स्थित्यादिकर्तृत्वसिद्धौ जन्मकर्तृत्वमपि श्रुतत्वात् सिद्धमिति । अस्मिन् पक्षे पक्षद्वयं ज्ञेयम् । इतोपि लाघवमाहुः अथवा किमित्यादि । भाष्ये । फलसंबन्धीति ब्रह्मवित्प्रपाठके 'ब्रह्म-विदाप्नोति परम्' इति फलमुपक्रम्य पठितत्वेन तत्पदेन फलरूपपरस्यैव परामर्शेन फलसंबन्धित्वात् । प्रकृते । ब्रह्मभेदापत्तिरिति जगत्कर्तृ ब्रह्म आकाशकर्तुर्भिन्नं स्यादित्यर्थः । न कोपीति एतेन जन्मस्थितिभङ्गनिरूपितं कारणत्वत्रयं मिलितं सदेव लक्षणमिति बोधयितुं सूत्रे समाहारो द्योतित इति परास्तमित्यर्थः । श्लिष्टप्रयोगेणेति जन्माद्यस्येति श्लिष्टप्रयोगेणेत्यर्थः । तटस्थ-त्वेनेति । तल्लक्षणं तु 'ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिरष्टविशिष्टतयोपलक्ष्यमाणः सर्व-

सूचिता वेदितव्याः । ब्रह्मविचारे ब्रह्मणोऽप्यधिकृतत्वाद् ब्रह्मेत्यायाति । न त्वध्याहारः।

शास्त्रे योनिः शास्त्रयोनिः । शास्त्रोक्तकारणत्वादित्यर्थः । शास्तीति शास्त्रं वेदः । सामान्यग्रहणं पूर्वकाण्डे पूर्वसृष्टिवाक्यानां संग्रहार्थम् । यथाऽस्यैव कारणत्वं, नान्यस्य तथोपरिष्टाद् वक्ष्यामः। मतान्तरवज्जन्मादीनां न विकारित्वं किंत्वाविर्भावतिरोभावावेव तथोत्तरत्र वक्ष्यते, तदनन्यत्वाधिकरणे। नामलीलाया अपि न पृथङ् निरूपणं प्रपञ्चमध्यपातात्।

भाष्यप्रकाशः।

तदाशयं स्फुटीकर्तुं पक्षत्रयेण व्याख्यातमित्यर्थः।

नन्वत्र लक्ष्यानिर्देशात् प्रतिज्ञायां च संबन्धिविचारस्यैवाधिकृतत्वेन ब्रह्मणोऽनधिकृतत्वादत्र ब्रह्मानुवृत्तेरशक्यवचनत्वेन ब्रह्मपदं ब्रह्म वाऽध्याहार्यम्। कर्मषष्ठीपक्षे तु प्रकृतत्वादेव तत्प्राप्तेर्नायं दोष इत्यत आहुः **ब्रह्मेत्यादि**। तथाचार्थादेव तत्प्राप्तेर्नोक्तदोष इत्यर्थः।

एवं लक्षणबोधकं सूत्रांशं व्याख्याय प्रमाणबोधकमंशं व्याकुर्वन्ति **शास्त्रे इत्यादि**। शास्त्रे इति सप्तम्या वैषयिकमधिकरणं बोध्यते। शास्त्रविषयो योनिः शास्त्रयोनिः। विषयत्वं प्रतिपाद्यत्वम्। तदेतदभिसंधायाहुः **शास्त्रोक्तेत्यादि**। **शास्तीति** राजवदाज्ञापयति। एतेन तद्विरोधेऽपराधोऽपि बोधितः। नन्वत्रोत्तरकाण्डार्थ एव विचार्यत इति शास्त्रशब्दस्य कुतः प्रयोग इत्यत आहुः **सामान्येत्यादि** । **पूर्वसृष्टिवाक्यानामिति** । भाववृत्तसूक्तादीनाम् । एतेन वेदार्थतयैवात्र सूत्रकृतो ब्रह्म विवक्षितमिति स्वोक्ते बीजं प्रदर्शितम्। ननु योनिशब्दो निमित्तवाची प्रायो दृश्यते इति साधारणेन कारणपदेन कुतो व्याख्यायत इत्यत आहुः **यथेत्यादि**। **उपरिष्टादिति** अग्रिमसूत्रे, तथाचातो व्याख्यात इत्यर्थः। अत्र कश्चिज्जन्मादिसूत्रस्थेन यत इति पदेनैव विषयश्रुतेः स्मारणात् सिद्धे शास्त्रप्रमाणकत्वे, शास्त्रयोनित्वसूत्रं व्यर्थमित्याह। तन्न। यत इत्यस्य हेतुकोटौ प्रवेशे जन्माद्यस्येतिभागस्य प्रपञ्चवृत्तान्तपरतया ब्रह्मलक्षणत्वायोगेनासंगतत्वप्रसङ्गात् । नच लक्षणे प्रविष्टस्यैव यतःशब्दस्योक्तश्रुतिस्मारकत्वमित्यपि युक्तम् । श्रुतौ भूतानीति बहुवचनेन

रश्मिः।

प्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते' इति सर्वोपनिषदि। अष्टविशिष्टता 'भूमिरापोऽनलः' इति गीतायामष्ट तद्विशिष्टता। **संबन्धीति** ब्रह्मशब्देन वेदः तत्संबन्धिविचारस्य। एवकारेण ब्रह्मरूपार्थव्यवच्छेदः क्रियते । मीमांसकमतेनार्थाध्याहारमाहुः **ब्रह्म वेति**। **तत्प्राप्तेरिति** ब्रह्मरूपलक्ष्यप्राप्तेरित्यर्थः। **भाववृत्तेत्यादि** ब्राह्मणस्य द्वितीयाष्टकस्थानामित्यर्थः । **आदिपदेन** संहितोक्तानां 'प्रजापतिरकामयत प्रजाः सृजेय' इत्यादीनाम् ।, **एतेनेति** शास्त्रपदोपादानेनेत्यर्थः । **निमित्तवाचीति** 'तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता' इति मातृरूपत्वबोधनादित्यर्थः । **अत इति** अभिन्ननिमित्तोपादानत्वादित्यर्थः। **हेतुकोटावित्यादि** यत इत्यादिश्रुतेरित्येवं हेतुकोटौ प्रवेशस्य प्रपञ्चस्य जन्मादि भवतीत्येवं प्रपञ्चवृत्तान्तपरतया ब्रह्मलक्षणत्वायोगेन सूत्रस्याभासेनासंगतत्वप्रसङ्गादित्यर्थः।न च यतः शास्त्रयोनित्वात् इति हेतुकोटिप्रवेशोस्त्विति शङ्क्यं परैरप्यनङ्गीकारात् । अन्यपक्षं समर्थयितुमप्याशङ्कामाहुः **न च लक्षण इत्यादि**। जगज्जन्मादिप्रपञ्चवृत्तान्ते आर्थिके लक्षणे प्रत्ययांशस्य प्रविष्टत्वेन यतःशब्दस्यापि प्रविष्टस्यैवेत्यर्थः। आभासोक्तपक्षे तु जन्माद्यस्य यत इति

केचित् पृथग्रूपनामप्रपञ्चकर्तृत्वं योगविभागेन प्रतिज्ञाय समन्वयादिसूत्रेष्वेव हेतून् वर्णयन्ति। अन्वयसिद्ध्यर्थं च अतति व्याप्नोतीत्यत्। शास्त्रे योनित्वं प्राप्तं तदिति नैतत् सूत्रकारसंमतमिति प्रतिभाति।

भाष्यप्रकाशः।

लक्षणस्य तद्विरुद्धत्वापत्तेः। नच जात्यपेक्षयैकवचनान्न विरोध इति वाच्यम्। तथा सति वाक्यान्तरासंग्रहेण ब्रह्मभेदापत्तेः। तस्माच्छास्त्रयोनित्वादित्यवश्यं प्रणेतव्यम्। ननु तथापि साधारणशब्देन व्याख्यानमयुक्तम्। जन्मादीनामादिमत्तया असत्त्वेनाग्रिमसूत्रेऽपि तटस्थकारणताया एव सिद्धेरित्यत आहुः **मतान्तरे**त्यादि। न्यूनत्वरूपं प्रतिज्ञादोषं परिहरन्ति **नामे**त्यादि।

शांकरमतमनुवदन्ति केचिदित्यादि। तन्मते दशसूत्रं जन्माद्यधिकरणम्। तत्र द्वाभ्यां प्रतिज्ञा। तत्र द्वितीयसूत्रे पञ्चम्यनन्वयादन्वयसिद्ध्यर्थं तथा वर्णयन्तीत्यर्थः। तद् दूषयन्ति **नैत**दित्यादि। शास्त्रयोनिरित्येतावतैव प्रतिज्ञासिद्धावपि त्वादित्यधिककथनादग्रिमसूत्रे पुनः साध्यपरामर्शाच्च तथेत्यर्थः। यत्पुनः शास्त्रस्य योनिरिति षष्ठीतत्पुरुषमङ्गीकृत्य, महत ऋग्वेदादिशास्त्रस्य सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य संभवो, न सर्वज्ञादन्यतः संभवतीत्येवं ब्रह्मणः सर्वज्ञत्वं समर्थितम्। 'अस्य महतो भूतस्य निःश्वसितं यद् ऋग्वेद' इत्यादिबृहदारण्यकीयश्रुतिमादाय पुरुष-

रश्मिः।

लक्षणे प्रविष्टस्य। **उक्तश्रुति**र्यत इति श्रुतिस्तत्स्मारकत्वं न तु 'तस्माद्वा एतस्मात्' इति श्रुतिस्मारकत्वम्। **लक्षणस्ये**ति आकाशमात्रभूतकर्तृत्वस्यान्तिमलक्षणस्य श्रुतिविरुद्धत्वापत्तेरित्यर्थः। अथवा एकजगज्जन्मादिकर्तृत्वस्य वसुभूतादिजन्मादिकर्तृत्वरूपश्रौतलक्षणादानुपूर्व्यंशेविरुद्धत्वापत्तेरित्यर्थः। **न च जाती**ति भूतत्वरूपनित्यधर्मापेक्षयेत्यर्थः। यद्वा द्रव्यत्वापेक्षयाद्यस्येत्येकवचनादित्यर्थः। **तथासती**ति लक्षणवाक्ये यत इति श्रुतिसंग्रहे विस्फुलिङ्गवत्सर्वोत्पादकाद्ब्रह्मणो वाक्यान्तरे क्रमसृष्टिबोधके ब्रह्मभेदापत्तेरित्यर्थः। यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादेवं सर्वोत्पादकाद्ब्रह्मणः 'तस्माद्वा एतस्मात्' इति क्रमेणोत्पादक आत्मा भिद्यते यत इति श्रुत्यसंग्रहात्, आद्यस्याकाशस्य जनकत्वात्, इत्येवं ब्रह्मभेदो ज्ञेयः। शंकरभाष्ये तु जन्माद्यस्य यत इत्यत्र प्रदर्शितानुमानस्य स्वातन्त्र्यं मा भूदिति शास्त्रयोनित्वादित्युक्तमित्युक्तम्। **तटस्थकारणताया** इति जिज्ञास्यब्रह्मणो निर्गुणत्वेन जगत्कारणत्वं कथं लक्षणं संभवतीत्याशङ्क्य यज्जगत्कारणं तद्ब्रह्मेति कल्पितं कारणत्वं तटस्थं सदेव ब्रह्मलक्षणं यद्रजतं सा शुक्तिरिति शुक्तेर्लक्षणं रजतं तद्वदित्येवं तथेत्यर्थः। **भाष्ये। उत्तरत्रे**ति द्वितीयाध्याय इत्यर्थः। तथा च 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः' इति वाक्याद् ब्रह्मशक्तित्वेनादिमत्त्वाभावेनासत्त्वाभावान्न तटस्थलक्षणतेति भावः। दृष्टान्तासिद्धेश्च। **प्रकृते। न्यूनत्वरूप**मिति नामप्रपञ्चाकथनरूपं सूत्रे न्यूनत्वं तद्रूपमित्यर्थः। **दशसूत्र**मिति यद्यप्यन्यत्रान्यथा दृश्यते तथापि शंकरभाष्ये सर्वज्ञं ब्रह्मेत्युपक्षिप्तं तदेव द्रढयन्नाहेति शास्त्रयोनित्वसूत्रस्य तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते इति समन्वयसूत्रस्येदं सूत्रमारभ्यते इति ईक्षतिसूत्रस्यावतरणदर्शनाद् दशसूत्रमित्यर्थः। **साध्यपरामर्शा**दिति तदिति साध्यपरामर्शादित्यर्थः। हेतूनां वर्णने स न स्यादिति भावः। एतच्च तद्ब्रह्मैव समवायिकारणमिति

भाष्यप्रकाशः।

निःश्वासवद् वेदसंभवश्च तत उक्तः। तत्तु मध्वभाष्यव्याख्यात्रा जयतीर्थेनैव दूषितम्। इदं शास्त्रस्य निर्मितत्वं किमर्थमुपलभ्य रचितत्वं वा, निःसृतमात्रत्वं वा, नाद्यः। कणादाक्षचरणानुसरणप्रसङ्गात्, श्रुत्यादिविरोधाच्च। न द्वितीयः। शास्त्रयोनित्वस्य सार्वज्ञ्यसाधकत्वाभावप्रसङ्गादिति। इदमपि युक्तम्। पूर्वविकल्पे वेदस्यानित्यत्वप्रसङ्गात्। द्वितीये निःश्वासस्याबुद्धिपूर्वकत्वेन तथात्वादिति। एतेन, विमतं ब्रह्म वेदगतसर्वविषयप्रकाशनशक्त्याधारः। वेदोपादानत्वात्। दीपगतप्रकाशनशक्त्याधारदीपोपादानवह्निवदिति विवरणोक्तमनुमानं, निःश्वासात्मकवेदोपादानत्वेनाबुद्धिपूर्वकनिःश्वासोपादानपुरुषदृष्टान्तसनाथेन प्रतिसाधनेनापास्तम्।

यत्तु भामतीनिबन्धे, वर्णनित्यत्वपक्षेऽपि पदानामानुपूर्वीविशिष्टवर्णात्मकत्वाद् वाक्यानां च तादृशपदात्मकत्वादानुपूर्व्याश्च व्यक्तिधर्मत्वादानुपूर्व्युपगृहीतानां नित्यानामपि वर्णानां पदत्ववाक्यत्वयोरनित्यत्वेन लोके वेदे च न तयोः पौरुषेयत्वे विवादः। किं तु वेदवाक्ये पुरुषस्वातन्त्र्यास्वातन्त्र्ययोः। तत्र स्वातन्त्र्यकोटिः काणादादीनाम्। द्वितीयां तु जैमिनीया वेदाध्ययनं प्रति गुरुशिष्यपरंपरानादित्वेन समर्थयन्ति। वैयासास्तु, अनाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्य परमात्मनो वेदजनकत्वेऽपि पूर्वपूर्वसर्गानुसारितादृक्तादृगानुपूर्वीविरचनेन। अतः पुरुषास्वातन्त्र्यमात्रमेव वेदे अपौरुषेयत्वमित्युक्तम्। तदप्यसंगतम्। वर्णवद् वैदिकपदादीनामपि नित्यत्वात्। वाचा विरूपनित्ययेति, वेदो नारायणः साक्षात् स्वयंभूरिति शुश्रुम, वेदस्य चेश्वरात्मत्वादित्यादिश्रुतिपुराणवाक्येषु वेदपदादानुपूर्वीवैशिष्ट्य एव वेदत्वेन तादृशस्यैवेश्वरात्मकत्वात्। ईश्वरस्याविद्योपधानेन सार्वज्ञ्यलब्धेरप्यभ्युपगमैकशरणत्वात्। तादृशानुपूर्वीरचनया अस्वातन्त्र्ये राजाज्ञानुवादकराजदूतवदानुपूर्वीरचनामात्रेणेश्वरसार्वज्ञ्यासिद्ध्या व्याख्येयग्रन्थविरोधाच्च। अतः स्थितस्य गतिचिन्तनमात्रायायं प्रयासः। जगत्कर्तृत्वेनैवोभयविधतत्कर्तृत्वस्य, तेनैव सार्वज्ञस्यापि सिद्धौ भाष्यकारस्याप्यपार्थ एव प्रयास इति दिक्।

अन्यैस्तु शास्त्रं योनिः कारणं प्रमाणमस्येति व्याचक्षाणैर्बहुव्रीहिरङ्गीकृतः। सोऽप्ययुक्तः। लक्षणाप्रसङ्गात्। स्वारसिकार्थत्यागाच्च।

रश्मिः।

भाष्यस्य पुरःस्फूर्तिकमन्वयमाद्यलोक्तं ज्ञेयम्। तेन तदनुभूतं प्रसिद्धं वा ब्रह्मैव, समवायिकारणं ब्रह्मैवेत्यन्वयः इति पक्षपरामर्शकस्य भाष्यप्रकाशस्य न विरोधः। मृष तितिक्षायां चुरादिः। यत्र तु तालव्यान्तं तत्र मृक्ष आमर्शने तुदादिर्बोध्यः तथाचानित्यः स्यादित्याहुः **कणादे**त्यादि। निःश्वसितरूपस्य निरपेक्षत्वस्य तत्सामर्थ्यस्य च विरोध इत्याहुः **श्रुत्यादी**त्यादि। **आदि**पदेन लिङ्गम्। श्रुतिस्मृतिविरोधाच्चेति वार्थः। **प्रतिसाधनेने**ति ब्रह्म वेदगतसर्वविषयप्रकाशनशक्त्यनाधारः निःश्वासात्मकवेदोपादानत्वात् अबुद्धिपूर्वकनिःश्वासोपादानपुरुषवदित्येवं प्रतिसाधनेनेत्यर्थः। **पुरुषे**त्यादि। **विवाद** इति संबन्धः। स्वातन्त्र्यं च कर्तृत्वं वेदवाक्यनिरूपितं पुरुषगतं कर्तृत्वमित्यर्थः। **विरूपे**ति विविधरूपेत्यर्थः। विरूपेति देवतासंबोधनं वा। **व्याख्येये**ति व्याख्येयग्रन्थः सांख्यादिभाष्यं व्यासकृतं, तस्य प्रथमब्रह्मपदस्य विरोधात्। **अत** इति सर्वत्र शैथिल्यात्। **उभयविधे**त्यादि रूपनामविभिन्नजगत्कर्तृत्वस्येत्यर्थः।

अन्यैस्त्विति रामानुजप्रभृतिभिरित्यर्थः। **लक्षणे**ति योनिपदस्य स्वसंबन्धिनि लक्षणा तस्या आपत्तेः। नायं वैयाकरणमत इत्यत आहुः **स्वारसिके**त्यादि योनेरित्यर्थः।

तस्मात् सर्वज्ञत्वं सर्वशक्तिमत्त्वं च सिद्धं निरङ्कुशजगत्कर्तृत्वेन ।

भाष्यप्रकाशः ।

विज्ञानेन्द्रभिक्षुणा तु शास्त्रं योनिः मूलप्रमाणं यस्मिन्निति सप्तम्यर्थे बहुव्रीहिमङ्गीकृत्योक्तम् । अत्र शास्त्रादिति वक्तव्ये यच्छास्त्रयोनित्वादित्युक्तं, तच्छास्त्राविरुद्धानुमानस्मृतियोगिप्रत्यक्षादिसंग्रहाय । अत एवाग्रे, उपपत्तेश्चेत्यादावनुमानम् । स्मृतेश्चेत्यादौ स्मृतिः । आचारदर्शनाच्चेत्यादावाचारदर्शनमुखेन योगिप्रत्यक्षादिकं च संगृहीतमिति । तदत्रैवाग्रे मया दूष्यम् ।

उक्तार्थं निगमयन्ति तस्मादित्यादि । तथाचात्र निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वमिति लक्षणं सिद्धमित्यर्थः । तत्र धर्मादेर्वारणाय तृतीयान्तम् । प्रकृत्यादिवारणाय शेषम् । तेन लक्षणे विवादाध्यासितत्वदोषपरिहारः । प्रजापत्यादिवारणाय निरङ्कुशेति ज्ञेयम् ।

अत्रानादिसृष्टिवादिनो मीमांसका बीजाङ्कुरदृष्टान्तेन सृष्टिप्रवाहानादित्वं वदन्तस्तपोयज्ञाद्युपचितपुण्यविशेषलब्धशक्तीनां प्रजापतिप्रभृतीनां क्षेत्रज्ञानामेव तत्तत्कल्पेषु कारणत्वमभिमन्यमाना

रश्मिः ।

तथाचात्रेति । लक्षणं निरङ्कुशत्वं चानन्याधीनत्वं निष्क्रान्तमङ्कुशादिति 'निरादयः क्रान्ताद्यर्थे पञ्चम्याः' इति समासः । जगज्जन्मादिकर्तृत्वेनेत्युक्तावसंभव इति जगज्जन्मकर्तृत्वेनेत्युक्तौ स्थितिप्रलयकर्तर्यव्याप्तिर्जन्मादीति सौत्रादिपदासंग्रहश्चेति च दूषणप्रसरोऽतो जगत्कर्तृत्वेनेत्युक्तम् । न च कर्तृत्वं जन्मकर्तृत्वं जन्मादिकर्तृत्वं वा वाच्यमित्युभयथोभयदोषतादवस्थ्यमिति शङ्क्यं निरङ्कुशजगज्जन्मकर्तृत्वेन निरङ्कुशजगत्स्थितिकर्तृत्वेन निरङ्कुशजगल्लयकर्तृत्वेनेत्येवं प्रातिस्विकरूपेण लक्षणघटकतृतीयान्ताङ्गीकारात् । नन्वङ्कुशप्राप्तिरीश्वरीये कर्तृत्वे कुत इति चेन्न, **ईश्वरे** आत्तगजेन्द्रलीलत्वात् । अङ्क्यतेऽनेन, अकि लक्षणे 'सानसिवर्णसि' इति साधुः । **अङ्कुशः । धर्मादेरिति** यागज्ञानयोरित्यर्थः । ननु शास्त्राणि षट् वेदवेदान्तसांख्ययोगपाञ्चरात्रपाशुपतानि । तत्र तृतीयान्तपददानेपि लक्षणगमनादतिव्याप्तिरिति चेन्न, इष्टापत्तेः । 'एकं सद् विप्रा बहुधा वदन्ति' इति 'त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम्' इति । 'यदेकमव्यक्तमनन्तरूपम्' इति च श्रुतिः । परमनेकरूपेष्वाचार्या नियामकाः 'आचार्यवान् पुरुषो वेद' 'आचार्यचैत्यवपुषा स्वगतिं व्यनक्ति' इति च । **प्रकृत्यादीति** प्रकृतिः स्वरूपं 'प्रकृतिमगन् किल यस्य गोपवध्वः' इति वाक्यात् । **आदि**पदेन शिवमायाकामाः । ननु 'अचेतनत्वेपि क्षीरवच्चेष्टितं प्रधानस्य' इति कापिलसांख्यप्रवचनसूत्रवृत्तेः सांख्यशास्त्रमादाय लक्षणस्य प्रकृतावतिव्याप्तिरिति चेन्न, प्रथमाध्याये प्रकृतेः कारणत्वाभावस्योपपादनात् । 'उपरागात् कर्तृत्वं चित्सांनिध्याच्चित्सांनिध्यात्' इति सूत्रमेकार्थीभावसामर्थ्येपीति ज्ञेयम् । ननु निरङ्कुशपदेनैव प्रकृत्यादिवारणे किं शेषेणेत्यत आहुः **तेनेत्यादि** । तथा च ये निरङ्कुशजगत्कर्तृत्वं प्रकृतौ मन्यन्ते तेप्यत्र पिहितमुखा इत्यर्थः । ननु भाष्ये निरङ्कुशपदाभावात् किं दृढमावश्यकत्वमत आहुः **प्रजापत्यादीति** । वेदोक्तत्वेप्युपबृंहिते वेदोक्तेर्थे आदरः सूचितः । 'एकं सद् विप्रा बहुधा वदन्ति' इति वेदान्ते प्रजापतावपि तपोरूपब्रह्मणः स्रष्टृत्वात्, शब्दार्थयोरभेदात् । [प्रजापत्यादीति पुराणे ।

'सृजामि तन्नियुक्तोहं हरो हरति तद्वशः ।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्' इति वाक्यात् ।

१. प्रच्छन्ननास्तिकाः । २. 'एकः सन्' इतिपाठः ।

ननु न सर्वो वेदो ब्रह्मणो जगत्कर्तृत्वे मानम्। तपोयज्ञादियुक्तप्रजापतिप्रभृतीनामेव जगत्कारणत्वस्य पूर्वकाण्डे तत्तदुपाख्यानेष्ववगम्यमानत्वात्। नचावान्तरकारणत्वम्। परस्याश्रवणात्। उत्तरकाण्डे तु द्वयप्रतिपादनाद् विरोधः संदेहश्च। मीमांसायाः संदेहनिवारकत्वेऽप्येकांशस्याप्रामाण्यं स्यात्। उभयसमर्थने शास्त्रवैफल्यं वा। वेदप्रामाण्यादेव तत्सिद्धेः। बाधितार्थवचनं वेदे नास्तीत्यवोचाम।

किंच। वेदान्ताः किं वेदशेषा, वेदा वा। नाद्यः। अनुपयोगात्। अनारभ्याधी-

---

भाष्यप्रकाशः।

ब्रह्मणो निरङ्कुशं जगत्कर्तृत्वमसहमानाः प्रत्यवतिष्ठन्ते **ननु नेत्यादि**। **तत्तदुपाख्यानेष्विति** 'प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत स सर्पानसृजत' इति। 'आपो वा इदमग्रे सलिलमासीत्। तस्मिन् प्रजापतिर्वायुर्भूत्वाऽचरत्' इत्यादिषु। तथैव पौराणेष्वपीत्यर्थः। **परस्येति** प्रजापत्यादिव्यतिरिक्तस्य। तथाच न पूर्वकाण्डस्य तत्र प्रामाण्यम्। ननु यथोपक्रमस्य संदिग्धत्वे निर्णय उपसंहारेण भवति, तथात्रोत्तरकाण्डेन निर्णय इति शङ्कायामाह **उत्तरेत्यादि**। **द्वयप्रतिपादनादिति** यतो वा इमानीत्यादौ ब्रह्मणः कर्तृत्वस्य, नित्यशुद्धबुद्धेत्यादावकर्तृत्वस्य प्रतिपादनाद्विरोध उभयत्रापि श्रौतत्वस्य साधारण्यादेकतरपक्षपातस्याशक्यत्वेन **संदेहश्चेति** तस्याः प्राबल्यान्नोत्तरकाण्डेन तन्निर्णय इत्यर्थः। तर्हि तन्मीमांसया निर्णयोऽस्त्वित्यत आह **मीमांसाया इत्यादि**। तथाच मीमांसायाः कर्तृत्वाकर्तृत्वान्यतरप्रसाधकत्वे अप्रसाधितांशबोधकवेदान्ताप्रामाण्यापत्तिरुभयप्रसाधकत्वे मीमांसाया एव वैयर्थ्यमित्युभयथापि कौण्ठ्यान्न तस्या निर्णायकत्वमिति सर्वस्मिन्नपि वेदे निरङ्कुशं जगत्कर्तृत्वं कुत्रापि कस्यापि न सिद्ध्यतीत्यनादिसृष्टिवाद एवादरणीय इत्यर्थः।

एवं ब्रह्मस्वरूपविचारेण जगत्कर्तृत्व आक्षिप्तेऽपि यदि तद्बोधकप्रमाणप्राबल्यं स्यात् तदानुपलब्धस्य धर्मस्यैव तत्सिद्धिः स्यादिति वेदान्तानां प्रामाण्यमाक्षिपति **किंचेत्यादि**। यदि वेदशेषाः

रश्मिः।

आदिशब्देन हरविष्णू।] **क्षेत्रज्ञानामिति** जीवानाम्। **प्रजापतिरिति**, इयं संहितातृतीयाष्टकेस्ति। **आपो वा** इत्यादि, इयं सप्तमाष्टकेस्ति। **पूर्वकाण्डे तत्तदुपाख्यानेषु चावगम्यमानत्वादिति** भाष्येऽन्वयं मत्वाहुः **पौराणेष्वपीति**। **तत्रेति** ब्रह्मणः कर्तृत्व इत्यर्थः। **उपसंहारेणेति**। यथा छान्दोग्ये 'ओमित्येतदुद्गीथमुपासीत' इत्युद्गीथोपासना ओमितिपदात् ब्रह्मोपासना वेति संदिग्धत्व उपक्रमस्य 'स य एतमेवं विद्वानुपास्ते परोवरीय एव हास्यास्मिँल्लोके जीवनं भवति तथामुष्मिन् लोके' इत्युपसंहारेण परोवरीयस्त्वस्य परमात्मत्वस्य पूर्वोक्तस्वरप्राणादेः सकाशादतिशयेन परः परोवरीयानिति योगेन फलत्वकथकेन ब्रह्मोपासनापरत्वमुपक्रमस्य निर्णीयते। एवं पूर्वकाण्डे संदिग्धं कर्तृत्वं ब्रह्मण्युत्तरकाण्डे निर्णीयते इत्यर्थः। **भाष्ये** शास्त्रवैफल्ये हेतुः **वेदेत्यादि**। **तत्सिद्धेरिति** उभयसमर्थनसिद्धेरित्यर्थः। विचारमन्तरा कथं तत्सिद्धिरित्यत आहुः **बाधितार्थेत्यादि**। **प्रकृते**। **धर्मस्येवेति** अग्निहोत्रादेरिव कर्तृत्वसिद्धिः स्यादिति हेतोरित्यर्थः। कर्तृत्वसिद्धिस्तु वेदान्ताभावे गहना स्यात्।

'कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः। अकर्मणोपि बोद्धव्यं गहना कर्मणो गतिः'॥

इति गीतानुसंधेया। **आक्षिपतीति** अनादिसृष्टिवादी जगत्कर्तृत्वं कुत्रापि कस्यापि न सिद्ध्यतीत्येतदर्थमाक्षिपति वेदानामन्ताभावादित्यर्थः। **अनुपयोगादिति** भाष्यं विवृण्वन्ति **यदि**

तत्वेन तदुपयोगित्वे पूर्वकाण्डविचारेणैव गतार्थत्वम्। विद्याप्रवेशश्च। न द्वितीयः। यज्ञाप्रतिपादनात् । मन्त्रब्राह्मणत्वाभावाच्च । तस्माद् वेदोषरा वेदान्ता इति

भाष्यप्रकाशः ।

स्युस्तदा द्रव्यदेवतादि प्रकाशयन्त इतिकर्तव्यतां वा बोधयन्तो वेदार्थे यागे क्वचिदुपयुक्ताः स्युः। तत्तु न दृश्यते। अथानारभ्याधीता अपि स्मृतयो गृह्यसूत्राणि च यथा, 'मानवी ऋचौ धाय्ये कुर्याद्' 'यद्वै किंच मनुरवदत्तद्भेषजम्' इति, 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इत्यादिवाक्येनाग्निसमिन्धनादावुपनयनादौ चोपयुज्यमानाः शेषभावं भजन्ते। तथैते वेदान्ता अपि, 'यदेव विद्यया करोती'त्यादिवाक्येन वेदोक्तकर्मस्रूपयुज्यमाना वेदशेषा इत्युच्यते तदा पूर्वमीमांसायां तृतीये शेषशेषिभावस्याद्ये स्मृतिपादे तत्प्रामाण्यस्य च विचारितत्वात् तयैव गतार्थत्वाद् व्यर्थैवोत्तरमीमांसा वेदान्तानां च स्मृतिवद् विद्यास्वेव प्रवेशो, न वेद इति । नापि धर्माद्यन्यतमपुरुषार्थप्रकाशकत्वेन तत्र प्रवेशः। स्मृतावपि तौल्यात् । अत एव शिक्षोपनिषदि 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति'इति वेदानुवचनानन्तरमुपनिषदनुशासनं पठितम्। पुराणेऽपि साङ्गोपनिषद इति वेदेभ्यः पृथक् तन्निर्देशश्चेति युज्यत इति विद्याप्रवेशश्चेति चकारेण समुच्चीयते। यदि वेदास्तदा, 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्'इति, 'तद्भूतानां क्रियार्थेन समाम्नायः' इत्यादिपूर्वतन्त्रवाक्याद् 'वेदोऽखिलो धर्ममूलम्'इत्यादिस्मृतिवाक्याच्च यागतच्छेषान्यतरप्रतिपादकाः स्युः। यथा, 'अग्निहोत्रं जुहोति'इत्यादयः। 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा', 'वारणो यज्ञावचरः' इत्यादयश्च। ब्रह्म तु ज्ञानशेष इति नोभयरूपमिति तत्प्रतिपादकानां कथं वेदत्वम्।

किंच। वेदो हि मन्त्रब्राह्मणसमुदायात्मकः। तत्र मन्त्रा नाम प्रयोगकालेऽनुष्ठानौपयिकार्थस्मारकाणि वाक्यानि। तद्भिन्नं च ब्राह्मणमिति, 'तच्चोदकेषु मन्त्राख्या', 'शेषे ब्राह्मणशब्दः' इति सूत्राभ्यां तल्लक्षणं निर्णीतम्। वेदान्तेषु तु विध्यनङ्गीकारेण प्रयोगाद्यभावात् तद्वाक्येषु मन्त्रत्वाद्यभावः। अत आर्यप्रसिद्धिमात्रेण वक्तव्ये वेदत्वे तेषामूषरभूमिवद् वेदोषरत्वेनापार्थत्वात् तेषां

रश्मिः ।

वेदेत्यादि। **इतिकर्तव्यता**मिति इतिशब्दः प्रकारं वदति । कर्तव्यता च क्रियाम्। तथा च क्रियाप्रकारमित्यर्थः। सामान्यस्य च भेदको विशेषः प्रकार इति तद्विदः। **तत्त्वि**ति क्वचिदप्युपयुक्तत्वं त्वित्यर्थः। **अनारभ्ये**त्यादि भाष्यं विवृण्वन्ति **अनारभ्ये**त्यादि । **मानवी ऋचा**विति व्याख्यातैषा। मनोरुक्तेर्भेजत्वेन तत्स्मृतयोग्निसमिन्धनादावुपयुज्यन्ते । **उपयुज्यमाना** इति विद्यापौष्कल्यजनकतयोपयुज्यमाना इत्यर्थः । **स्मृतिवदि**त्यादि इतिहासपुराणमित्यपरविद्यायां श्रावणाद् 'यदेव विद्यया करोति श्रद्धया उपनिषदा वा'इति श्रुत्या तद्विद्यास्वेव प्रवेशो भवेन्न वेद इत्यापत्तिः। **धर्मादी**ति, **आदि**पदेन ब्रह्माक्षरे, यद्वा आदिपदेनार्थकाममोक्षाः। **तत्रे**ति वेदे इत्यर्थः । **न द्वितीय** इत्यादिभाष्यं विवृण्वन्ति **यदि वेदा** इत्यादि । **पूर्वतन्त्रे**त्यादि प्रथमाध्यायस्थसूत्राभ्यामित्यर्थः । 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' 'तद्भूतानां क्रियार्थेन समाम्नायोर्थस्य तन्निमित्तत्वात्' तेष्वेव पदाथषु भूतानां वर्तमानानां पदानामित्यर्थः । उभयोरेकतिङो दर्शनाद्वाक्यादित्युक्तम्। **आमिक्षे**ति घनीभूतः पिण्ड इत्यर्थः। **यज्ञावचर** इति यज्ञप्रचारहेतुः । **इत्यादयश्चे**ति यागतच्छेषप्रतिपादका इत्यर्थः। **नोभयरूप**मिति न यागतच्छेषरूपमित्यर्थः । **सूत्राभ्या**मिति द्वितीयाध्यायस्थाभ्यामित्यर्थः। प्रथमे 'शिष्टाकोपे विरुद्धमिति

तेषां किं स्यादिति चेत् । मैवम्। अस्ति तावद् वेदत्वम् । अध्ययनादिभ्यः स्मरणाच्च। प्रमाणं च सर्वोऽपि वेदः स्वार्थे। स च न यज्ञश्चेद् ब्रह्म भवतु । न चैतावता अवेदत्वम्। अतिप्रसङ्गात्। शक्यते ह्यग्निहोत्रादीनामन्यतरदनन्तर्भाव्य

भाष्यप्रकाशः ।

विचारे किं फलं स्यात्। सर्वोऽपि प्रयोजनोद्देशेनैव प्रवर्तत इति फलाभावात् प्रवृत्तिविघाते तन्मीमांसाऽप्यपार्थेति तत्साधिते ब्रह्मणो जगत्कर्तृत्वेऽत्यन्ताभिनिवेशो न कार्य इत्यर्थः।

अत्र समादधते **मैवमित्यादि**। न वेदान्तेषु वेदोपरत्वं, किंतु वेदत्वमेव । अध्ययनाध्यापनज्ञानविधिभिर्वेदं पठन्तः पाठयन्तोऽर्थं चावगच्छन्त आर्याः स्वरपूर्वकमनध्यायशूद्राऽश्रवणादिनियमान् पालयन्त एव तथा कुर्वन्तीत्याचारपरंपरया,

'स्वयंभूरेष भगवान् वेदो गीतस्त्वया पुरा।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः' ॥ इति

पुराणोक्तस्य स्मरणस्यात्रापि तुल्यत्वेन च तन्निर्धारात् । किंचौत्पत्तिकसूत्रे बादरायणग्रहणं पूजार्थं कृत्वा अलौकिकेऽर्थे परानपेक्षं वेदस्य प्रामाण्यं जैमिनिना प्रतिपादितम्। ततश्च सोऽलौकिकोऽर्थः को वेत्यपेक्षायां यथा तन्मते यज्ञस्तथा व्यासमते ब्रह्म। अनुपलब्धार्थत्वस्योभयत्रापि तौल्यात्।

किंच। यागप्रतिपादकत्वेन वेदत्वं मन्वानो भवान् ब्रूताम् । किं यावद्यज्ञप्रतिपादकत्वं वेदत्वम्, उत यत्किंचित्तत्प्रतिपादकत्वम्, अथवा यथाकथंचित् तत्प्रतिपादकत्वमिति । नाद्यः। अग्निहोत्रादिप्रतिपादकस्य भागस्य तदितरयज्ञाप्रतिपादकत्वेनावेदत्वप्रसङ्गात् । न द्वितीयः । सर्वस्य तथात्वप्रसङ्गात् । मनुः पुत्रेभ्यो दायं व्यभजदित्याद्यर्थवादस्यापि तथात्वप्रसङ्गाच्च । तृतीयश्चेत् सिद्धं ब्रह्मप्रतिपादकत्वेऽपि वेदत्वम्। वक्ष्यमाणरीत्या तेषामपि यज्ञार्थत्वेन तथात्वादिति। तदेतदुक्तं **शक्यते हीत्यादिना**। अत्रान्यतममिति वक्तव्ये अन्यतरदिति प्रयोगस्तु, महाभाष्ये 'प्रत्ययः' 'परश्च' इत्यत्र निमित्तविचारं प्रकृत्य तदुदाहरणे तद्यथा बहुष्वासीनेषु कश्चित् कंचित् पृच्छति, कतरो देवदत्त इत्यत्रोपाध्यनङ्गीकाराद् बोध्यः।

रश्मिः ।

चेत्' 'न, शास्त्रपरिमाणत्वात्'इत्यधिकरणे। आचारस्यापि प्रामाण्यादाहुः **अध्ययनेत्यादि**। **प्रमाणं चेत्यादि** भाष्यं विवृण्वन्ति **किंचौत्पत्तिकेत्यादि**। **अनुपलब्धेति** अनधिगतार्थगन्तृत्वं प्रमाणमिति लक्षणस्मारकपदम् । **अवेदत्वप्रसङ्गादिति** । एतेनातिप्रसङ्गादिति भाष्यं विवृतम् । **शक्यते** हीत्यादिभाष्यस्यातिप्रसङ्गादिति भाष्यविवरकत्वात् । **तथात्वादिति** यथाकथंचिद्यज्ञप्रतिपादकत्वादित्यर्थः । **तदेतदिति** किंच यागेत्यादिना विवृतमित्यर्थः। न **चैतावता** ब्रह्मप्रतिपादकत्वेनावेदत्वमग्निहोत्रादिप्रतिपादकवेदभागेषु। अतिप्रसङ्गादवेदत्वप्रसङ्गात्। यतोग्निहोत्रदर्शपूर्णमासादीनां मन्त्रविधिनिषेधनामधेयार्थवादसंबन्धिनां मध्येन्यतरद् एकतरद् वेदेनन्तर्भाव्य वेदाद्बहिःकृत्य वेदे वेदत्वं वक्तुं शक्यतेऽपि तु न, तस्मादतिप्रसङ्ग इति भाष्यार्थः। अग्निहोत्रादिषु लक्षणापर्याप्तिं मत्वा न प्रति तद्वेदलक्षणं न वक्तव्यमतो यथाकथंचित्तत्प्रतिपादकत्वं वेदत्वं तत्र वेदान्तेष्वपीति फलितोर्थः । **उपाध्यनङ्गीकारादिति** । अत्रायमाशयः । डतरडत-

तथा वक्तुम् । तस्माद् ब्रह्मापि प्रतिपादयन्तो वेदान्ता वेदत्वं न व्यभिचरन्तीति । मन्त्रब्राह्मणरूपत्वं चोत्पश्यामः । ऋगेव मन्त्रः ।

भाष्यप्रकाशः ।

स्वरूपतः संदेहं वारयन्ति **मन्त्रे**त्यादि । तच्चोदकेत्यादिसूत्राणां विचारे ह्याम्नातत्वे सति कर्मसाधनत्वेन विधिबोधितोच्चारणकः शब्दो मन्त्रः । तथात्वे सति मन्त्रभिन्नः शब्दो ब्राह्मणमिति तयोर्लक्षणम् । तदुभयात्मकत्वं च वेदलक्षणं सिद्ध्यति । न तु विधेयार्थसारको मन्त्र इति लक्षणम् । तस्य, वसन्ताय कपिञ्जलानालभेतेत्यत्राऽव्याप्तेः । एवं मननहेतुर्मन्त्र इत्यस्य

रश्मिः ।

मौ हि 'किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच्' 'वा बहूनां जातिपरिप्रश्ने डतमच्' इति सूत्राभ्यां विहितौ तत्रैतादृशमहाभाष्यप्रयोगात् बहूनां निर्धारणेपि डतरचः इष्टत्वात्पूर्वसूत्रे द्वयोर्ग्रहणं प्रायोभिप्रायम् । तथा च वार्तिकम् 'किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाध्यानर्थक्यम्' इति अत्र **कैयटः** द्वयोरिति जातिपरिप्रश्ने इति च न कर्तव्यमिति भावः । इतीति मनोरमायामुक्तम् । अन्यतरान्यतमशब्दौ तु स्वभावादेव द्विबहुविषये निर्धारणे वर्तेते । तत्र हेतुस्तु किंयत्तद्भ्य एव तयोर्विधानादिति शेखरे उक्तः । तथा च सूत्रे द्वयोर्ग्रहणं प्रायोभिप्रायमिति स्वभावाद् द्विबहुविषये निर्धारणे वर्तेते इत्यत्रापि द्विशब्दोपादानं प्रायोभिप्रायमिति बहूनां निर्धारणेप्यन्यतरदिति प्रयोगः साधुरेवेति । द्वयोर्बहूनामिति चोपाधी तयोर्नाङ्गीकारादित्यर्थः । तथाच भागवतैकादशे भगवद्वाक्यं

'आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम्' इत्युपक्रम्य,

'वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ।
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भावः पुरुषः सोभिधीयते' ।

इत्यत्र तयोरन्यतम इति । न च किमोस्मिन् विषये डतरजपीत्यनेन बहूनां निर्धारणे किमः एव डतरजिति नियम्यत इति शङ्क्यम् । न तत्सूत्रं किंतूक्तमहाभाष्यसिद्धं वाक्यमित्यदोषात् । **स्वरूपत** इति मन्त्रब्राह्मणे वेदस्य स्वरूपे 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति । स्वमतं व्याकर्तुं मीमांसकमतेनाहुः **तच्चोदकेत्यादिसूत्राणा**मिति पूर्वतन्त्रे द्वितीये 'तच्चोदकेषु मन्त्राख्या', 'शेषे ब्राह्मणशब्दः', 'अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः स्यात्', इति सूत्राणां विचार इत्यर्थः । यद्यपि शास्त्रदीपिकायां यत्राभियुक्तानां मन्त्र इति प्रसिद्धिः स मन्त्रः अवशिष्टं ब्राह्मणमिति लक्षणं तृतीयसूत्रे चोहप्रवरनामधेयानामभियुक्तप्रसिद्ध्यभावादेवामन्त्रत्वमिति स्थितं तथापि सूत्रत्रयविचारे त्विदमेव लक्षणमिति विचारपदसामर्थ्यम् । तथाचाम्नातेष्विति सूत्रभाष्यं 'आम्नातत्वे सति तच्चोदकेषु मन्त्राख्या तथात्वे सत्येव शेषे ब्राह्मणशब्दः' तदाह आम्नातेषु विभागो द्विविधः इति 'पत्नि कति ते जाराः' इत्यादिप्रश्नोत्तरीभूतलौकिकवाक्यानां संकल्पस्य च मन्त्रत्ववारणाय सत्यन्तम् । अध्ययनविधिना सर्वमेवोच्चारणं प्रेरितमिति ब्राह्मणेतिव्याप्तिवारणाय तृतीयान्तम् । विविधमनुष्ठानं यत्र विधिना बोध्यते तत्र मन्त्रस्य साधनत्वेन बोधनादनेनेदं कुर्यादिति । तत्त्वेन चोदका इति न चास्य लक्षणस्य प्रत्यगाशीर्मन्त्रादिष्वव्याप्तिः, विषयत्वेन तेषामपि जपसाधनत्वात् । मीमांसकानां सिद्धान्तलक्षणं वक्तुं तन्मतमनुवदन्ति **न त्वि**त्यादि

भाष्यप्रकाशः ।

ब्राह्मणेऽतिव्याप्तेः । अस्यन्तस्त्वान्त उत्तमपुरुषान्त इत्यादीनां परस्परं प्रयोगकरणभूतः शब्द इत्यस्य प्रत्यगाशीर्मन्त्रे चाव्याप्तेः । किंत्वभियुक्तानां यत्र मन्त्र इति समाख्यानं स मन्त्र इति लक्षणमङ्गीक्रियते । यदि तु चरणव्यूहानुरोधेन वसन्तायेत्यादीनां ब्राह्मणत्वमङ्गीकृत्य प्रयोगकरणभूतः शब्दो मन्त्र इति सौत्रमेव लक्षणमाद्रियते, तदापि जपोपासनादिप्रयोगं प्रत्यपि प्रत्यगाशीःप्रभृतिमन्त्राणां विषयत्वादिना करणत्वमस्त्येवेत्यदोषः । तच्चर्क्सामयजुःष्वेव प्रसिद्धम् । निगदादीनामपि तत्रैव निवेशः । ब्राह्मणलक्षणमप्यत एव सिद्धम् । वेदान्तेषु च, सत्यं ज्ञानमि-

रश्मिः ।

अङ्गीक्रियते इत्यन्तम् । **अव्याप्ते**रिति अस्य मन्त्रस्य विधिरूपत्वेन विधेयार्थाभिधायकत्वेन तत्त्वाभावात् । **अस्यन्त** इत्यादि 'विप्रुषा१ शान्तिरसी'त्यसिपदान्तः, 'इषे त्वे'ति त्वान्तः, वाचा त्वा होत्रा प्राणेनोद्गात्रा चक्षुषाध्वर्युणा मनसा ब्रह्मणा श्रोत्रेणाग्नीध्रैरेतैस्त्वा पञ्चभिर्दैव्यैर्ऋत्विग्भिरुद्धरामीत्युत्तमपुरुषान्तः, बर्हिर्देवसदनं दामीति च । **परस्पर**मिति अव्याप्तिरिति शेषः । त्रिषु परस्परमेकलक्षणप्रवेशेन लक्षणान्तराप्रवेशात् । **प्रत्यगाशी**रिति 'आयुर्घृतम्', 'अग्ने आयुर्मे देहि' इति मन्त्रे इत्यर्थः । **अङ्गीक्रियत** इति मीमांसकैरिति शेषः । दूषणं तु भावार्थपादेऽनाम्नातेष्विति सूत्रभाष्ये उक्तम् । तथा हि इदं लक्षणं प्रकरणभेदेन स्थितयोः ऋक्सामयोरेव संभवति न तु कृशररूपयजुःशाखान्तरेपि । वाजसनेयके ब्राह्मणे ब्राह्मणं वसन्ताय कपिञ्जलानालभेत ग्रीष्माय कलविङ्कानिति न मन्त्रौ । ननु कथं मन्त्रमध्ये पठितयोरमन्त्रत्वमिति चेन्न त्रिगुणपाठाय यजुष्ट्वार्थममन्त्रयोरपि तत्र प्रक्षेपात् ।

त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह ।
यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः ॥

इति चरणव्यूहवाक्यादिति तद्विवरणे चैतदतिरिक्तस्थले विधायकत्वं न क्वापि मन्त्रे दृष्टम् । अत्र च मन्त्रत्वं संदिग्धम् । ब्राह्मणे तु विधायकत्वं प्रसिद्धमिति लिङ्गभूतं लिङ्गं च स्थानाद्बलिष्ठमिति । अत उक्तमेव लक्षणं ज्याय इति । ननु कथं तर्हि चोदकेषु मन्त्राख्येति सूत्रे अतः कर्मणि यागजपादौ यः साधनभूतः शब्दः स मन्त्रः कर्मकरणः शब्दो मन्त्र इत्युक्तं भवतीति भाष्यमित्याशङ्क्य तत्रेष्टमापादयन्ति **यदि त्वि**त्यादि । चरणव्यूहस्तु 'त्रिगुणं पठ्यते यत्र' इति वाक्यम् । **आद्रियत** इति द्रा कुत्सितगतौ 'घुमास्थे'तीत्वम् । **जपोपासने**ति आदिशब्देन किंचिद्ग्राह्यम् । **विषयत्वादिने**ति आदिशब्देनाशिष्ट्वम् । **अदोष** इति तथा चोभयमपि सिद्धान्तलक्षणमिति हृदयम् । **तच्चे**ति मन्त्रलक्षणं चेत्यर्थः । **निगदादीना**मिति परप्रत्यायनार्था मन्त्रा निगदाः प्रोक्षणीरासादयः इध्माबर्हिरूपसादयः इन्द्र आगच्छ हरिव आगच्छ इत्यादयः । **आदिपदेन** निविन्मन्त्राः अग्ने महानसि ब्राह्मणभारतेत्येवंरूपाः । **तत्रैवे**ति । 'यजू१षि वा तद्रूपत्वात्' इति सूत्रेण यजुष्ष्वेवेत्यर्थः । **ब्राह्मणे**त्यादि अत एव पत्नि कति ते जारा इत्यादिलौकिकवाक्यानां संकल्पस्य च ब्राह्मणत्ववारणस्यावश्यकत्वादेव सिद्धान्तलक्षणं सिद्धमित्यर्थः । सत्यन्ताभावे लौकिकवाक्ये संकल्पे चातिव्याप्तिरिति भावः । **नापी**ति करणबहुलं ब्राह्मणं इत्यददाः इत्ययजथा, इत्यपचथा इति ब्राह्मणो गायेदित्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेतिव्याप्तेः । इत्याहेति वाक्योपनिबद्धं ब्राह्मणमित्यपि न । राजाविधं भगं भक्षीत्याह यो वां रक्षाः शुचिरस्मीत्याहेत्यनयोरतिव्याप्तेः । आख्यायिकारूपं ब्राह्मणमित्यपि न, यमयमीसंवादसूक्तादावतिव्याप्तेः । नापि हेत्वाद्यन्यतमत्वं तत्त्वं, मन्त्रेष्वपि हेत्वादिसत्त्वात् । ब्राह्मणे तेन ह्यन्नं क्रियते इति हेतुः । तद्दध्नो दधित्वमिति निर्वचनं,

ब्रह्मप्रतिपादकं ब्राह्मणम्, तच्छेषाः सृष्ट्यादिप्रतिपादकाः । यद्यपि न विधीयते, तथापि नादृशमेव ज्ञानं फलायेति युक्तमुत्पश्यामः । पूर्ववैलक्षण्यं तु भूषणाय ।

भाष्यप्रकाशः ।

त्यादीनामृचाम्, अच्युतमसीत्यादीनां यजुषां, हावु हावु हावु इत्यादीनां साम्नां च विद्यमानत्वात् तान्येव मन्त्रः । ऋगित्युपलक्षणम् । तद्भिन्नं ब्रह्मप्रतिपादकं ब्राह्मणम् । ब्रह्मप्रतिपादकभागशेषाः सृष्ट्यादिप्रतिपादका भागा ब्राह्मण एव निविशन्ते । ततश्च मन्त्रब्राह्मणसमुदायरूपत्वात् सिद्धं वेदान्तानां वेदत्वमिति । तर्हि वेदोषरत्वं कथं निवर्ततामित्यत आहुः यद्यपीत्यादि । तथाच वेदे बाधितार्थवचनस्याभावादविधीयमानमपि ज्ञानं यथोक्तं फलं जनयिष्यत्येवेति नोषरत्वमित्यर्थः । ननु पूर्वमीमांसायां विहितस्यैव फलवत्त्वं साधितमिति कथं तथेत्यत आहुः पूर्वेत्यादि । तथाच, गुणे त्वन्यायकल्पनेति तत्रैवोक्तत्वाद् वेदगुणभूतस्य जैमिनीयस्यैव निर्णयस्य हीनाधिकारिपरत्वं वेदविरोधे कल्पनीयमित्यर्थः ।

रश्मिः ।

अमेध्या वै माषा इति निन्दा, वायुर्वै क्षेपिष्ठा देवतेति प्रशंसा, तद्विचिकित्सन् जुहवानीति संशयः, यजमानेनेत्यादि विधिः, माषानेव मह्यं पचतेति परकृतिः, पुरा ब्राह्मणा अभैषुरिति पुराकल्पः, यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुःकपालान्निर्वपेदिति विशेषावधारणकल्पना । एवं मन्त्रेपि इन्दवो वामुशन्ति हीति हेतुः, उदानिषुर्महीरिति तस्मादुदकमुच्यते इति निर्वचनं, मोघमन्नं विन्दते अप्रचेता इति निन्दा, अग्निर्मूर्धा दिवः ककुत्पतिरिति प्रशंसा, अधःस्विदासीदुपरिस्विदासीदिति संशयः, कपिञ्जलानालभेत इति विधिः, सहस्रमयुतं ददिति परकृतिः, यज्ञेन यज्ञमयजन्त देवाः इति पुराकल्पः । **ऋगेव मन्त्र** इति भाष्यं व्याकुर्वन्ति **वेदान्तेषु** चेत्यादि । **ऋचामिति** 'तेषामृग्यत्रार्थवशेन पादव्यवस्था'इति सूत्रोक्तमर्थवशेन व्यवस्थितपादत्वरूपं लक्षणमत्रानुस्यूतमिति ऋचामित्यर्थः । **ते**षामित्यस्य मन्त्राणामित्यर्थः । अर्थवशेनेत्यनेन छन्दोनुरोधेन मगणादिकृता 'पादव्यवस्था व्यावर्तिता । **यजुषा**मिति 'शेषे यजुःशब्दः' इति सूत्रोक्तमृक्सामातिरिक्तमन्त्रत्वरूपं लक्षणमत्रानुस्यूतमिति यजुषामित्यर्थः । **साम्ना**मिति 'गीतिषु सामाख्या' इतिसूत्रोक्तं ऋक्षु यद्गानं तद्रूपत्वरूपं लक्षणमत्रानुस्यूतमिति साम्नामित्यर्थः । **तान्येव मन्त्र** इति मन्त्रपदोत्तरं यदेकत्वं तत्प्रकृत्यर्थावच्छेदके मन्त्रत्वेऽन्वेति मन्त्रत्वं च ऋग्यजुःसामनिष्ठमेकमेवेति नायोग्यता । न च पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधः । अनेकव्रीहिव्यक्तितात्पर्यके संपन्नो व्रीहिरितिवाक्येप्येकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्यावश्यकत्वादित्यन्यत्र विस्तरः । ननु भाष्ये ऋगित्युक्तेः कुतो यजुःसाम्नोर्ग्रहणमित्यत आहुः **ऋगि**त्यादि । **ब्रह्मप्रती**त्यादि भाष्यं विवृण्वन्ति **तद्भिन्न**मित्यादि । **साधित**मिति द्वितीयाधिकरणे साधितमित्यर्थः । तथाच शाबरभाष्यम् 'यः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते' इति । **तत्रैवे**त्यादि पूर्वतन्त्रे नवमस्य तृतीयपादे 'विप्रतिपत्तौ विकल्पः स्यात् समत्वाद् गुणे त्वन्यायकल्पनैकदेशत्वात्' इत्यधिकरणे अदितिः पाशां प्रमुमोक्तुं अदितिः पाशान् प्रमुमोक्तेतानिति पाशमन्त्रावेकवचनान्तबहुवचनान्तौ तत्र बहुवचनान्तः किंप्रकृतावेवाग्नीषोमीये निविशते उत बहुपाशकेषु पशुगणेषूत्कृष्यते नोत्कर्षः किंतु गुणे कारकगतसंख्याभिधायित्वेन गुणभूते बहुवचने लक्षणाकल्पना पाशावयवगतेव बहुत्वं लक्ष्यते इति । एवमुपाङ्गेषु गणनाद्वेदगुणभूतायां पूर्वमीमांसायामेव तत्त्वं कल्पनीयमित्यर्थः । उपलक्षणाद्वैलक्षण्यशास्त्रभेदरूपभूषणायेति

काण्डद्वयस्यान्योन्योपकारित्वाय साधारणग्रहणम्। 'यदेव विद्यया करोति' इत्यादिना पूर्वशेषत्वं सर्वस्य । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यादिना सर्वस्योत्तरशेषत्वम् । कर्मब्रह्मणोः क्रियाज्ञानयोर्धर्मिपरत्वेनैक्यात् कर्तृवाक्येषु सर्वत्र न विरोधः। तस्माच्छास्त्रयोनित्वं सिद्धम्।

भाष्यप्रकाशः ।

एवं भाट्टादिकृतं पूर्वपक्षं परिहृत्य काण्डद्वयस्यैकवाक्यत्वबोधनाय शास्त्रपदप्रयोग इति पर्यवसितं तदर्थमाहुः काण्डेत्यादि । एकवाक्यत्वप्रकारमाहुः यदेवेत्यादि इदं चतुर्थाध्याये, 'यदेव विद्ययेति हि' इतिसूत्रे व्युत्पादयिष्यते। ऐक्यादिति अभिधेयप्रयोजनयोरैक्यात्। तथाच, 'यज्ञो वै विष्णुः' इति श्रुतेर्धर्मो यस्यां मदात्मकः,

'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्,
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम्।
मायामात्रमनूद्यान्ते प्रतिषिद्ध्य प्रसीदति' ॥

इत्येकादशस्कन्धे भगवद्वाक्याच्च ब्रह्मवादेन सर्वस्य ब्रह्मात्मत्वावगतिरुपनिषत् 'विद्यात्मनि भिदाबाधः' इति वाक्याद् भेदबुद्धिबाधो विद्या तत्पूर्वकं यज्ञादिकरणे कर्मपौष्कल्यम्। ते च वेदान्ताधीने इति पूर्वकाण्डस्य वेदान्तापेक्षित्वं, वेदानुवचनयागादिसाधनैर्भगवत्प्रसादाच्छुद्धे चेतसि विद्योदेतीति साधनावबोधकवेदभागापेक्षित्वं वेदान्तानाम् । यद्यप्युभयत्र पुरःस्फूर्त्या कर्म ज्ञानं च यथायथं प्रतीयते, तथापि पूर्वोक्तश्रुतिस्मृतीनां वक्ष्यमाणानां च तासां विचारे क्रियाज्ञानयोर्धर्म्यात्मकत्वेनाभिधेयस्यैक्यम् । समुच्चिताभ्यां ताभ्यां यथाधिकारं ब्रह्मभावः, परप्राप्तिश्च फलमिति प्रयोजनस्याप्यैक्यमित्येवं सिद्ध एकवाक्यत्वे

रश्मिः ।

न व्याख्यातम्। भाट्टादीति पूर्वमीमांसायां विहितस्यैवेत्यादिना पूर्वं कृतम्। काण्डद्वयस्येत्यादि भाष्यमारभ्य विवृतम् 'अभिधेयप्रयोजनयोरैक्या'दित्यन्तं स्फुटीकुर्वन्ति स्म तथाचेति । ब्रह्मात्मकत्वेति श्रुत्यन्तरे च 'यो वा एतदक्षरमविदित्वा गार्गि अस्मिन् लोके जुहोति ददाति तपस्यत्यपि बहूनि वर्षसहस्राण्यन्तवानेवास्य स लोको भवति' इति बृहदारण्यके, 'य एवास्मि स सन् यजे' इति ब्रह्मात्मकत्वावगतिर्यज्ञाङ्गम्। उप समीपे सीदतीत्युपनिषत्। ते चेति उपनिषद्विद्ये इत्यर्थः। यदेव विद्ययेति भाष्यं स्फोटयित्वा तमेतमिति भाष्यं स्फुटीकुर्वन्ति वेदानुवचनेति वेदानुवचनानि यागादीनि साधनानि तैः 'तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्' इति श्वेताश्वतरे दर्शनसाधनत्वेन प्रसाद उक्तः। स शुद्धिहेतुरित्याशयेनाहुः भगवदिति। सप्तम्यन्तचेतःपदोपादानेन दर्शनं सर्वात्मभावरूपं विवक्ष्यते तस्य 'स मानसीन आत्मा जनानाम्' इतिश्रुत्या चेतसि विद्यात्मकस्योदय इति मुख्यविद्या। सर्वत्र तु यागादिसाधनैः शुद्धमनसि ज्ञानं भक्तिर्वोदेतीति। कर्मब्रह्मणोरित्यादिभाष्यं विवृण्वन्ति यद्यपीत्यादि। अभिधेयस्येति पूर्वोत्तरकाण्डाभिधेयस्य कर्मज्ञानरूपस्य धर्मिणैक्यम् । ताभ्यामिति कर्मज्ञानाभ्याम् । समुच्चयोऽत्र न रामानुजभाट्टाद्यभिमतः सिद्धान्तग्रन्थत्वात् । तथाचोक्तभाष्योक्तसमुच्चय एवं च यथाधिकारमाधिदैविकाध्यात्मिकचित्तशुद्धी अनतिक्रम्य ब्रह्मभावः । ज्ञानद्वारा ब्रह्मत्वं, भक्तिद्वारा परप्राप्तिः। अप्यैक्यमिति 'ते प्राप्नुवन्ति मामेव' इति गीतायाः । अक्षरप्राप्तानां स्वप्राप्त्युक्तेः। कर्तृवाक्ये-

केचिदत्र जन्मादिसूत्रं लक्षणत्वादनुमानमिति वर्णयन्ति ।

भाष्यप्रकाशः ।

सर्वत्र कर्तृत्वेनोच्यत इति न पूर्वोत्तरकाण्डयोर्विरोधः । शेषशेषिभावस्याविशिष्टत्वेऽपि पुरुषकर्मफलेषु यथा आशंसायाः फले पर्यवसानात् फलमेव पूर्वकाण्डे मुख्यं तथात्राऽपीति फलवाक्यवद् वेदान्तानामेव मुख्यत्वज्ञापनाय कौषीतकिब्राह्मणे 'ऋचां मूर्धानं यजुषामुत्तमाङ्गं साम्नां शिरोऽथर्वणां मुण्डमुण्डम्' इति मूर्धत्वादि श्राव्यते । तस्मादूषरत्वगन्धस्याप्यभावाद् ब्रह्मणः शास्त्रोक्तकारणत्वं निःप्रत्यूहमित्यर्थः ।

एवं सिद्धान्तमुक्त्वा आधुनिकानामन्येषां भाष्यकृतां ब्रह्मणः कर्तृत्वस्य शास्त्रैकप्रमाणकत्वांशे विप्रतिपत्त्यभावात् तन्मतानुवादमकृत्वा केषांचिद् वैशेषिकाद्यनुसारिणां मतमनुवदन्ति केचिदित्यादि । अत्रैवं बोध्यम् । वैशेषिकादिदर्शनाभिमानिनस्तावद् बाह्यानां मीमांसकानां कापिलानां च निरासाय निखिलजगदेककर्तारमीश्वरमनुमानेनैव साधयन्ति । तथाहि । जगत् कार्यं सावयवत्वाद्, महत्त्वे सति क्रियावत्त्वाद्, महत्त्वे सति मूर्तत्वाच्च घटादिवदिति जगतः कार्यत्वे सिद्धे, जगद् बुद्धिमत्कारणपूर्वकं कार्यत्वाद् घटादिवदिति साधनेन जगतस्तथात्वे सिद्धे, स बुद्धिमान् को वेत्यपेक्षायामत्र जगत्त्वेन क्षित्यादिवायुपर्यन्तानां विचित्राणां महाभूतानां संग्रहात् तादृशां तेषां जगत्त्वेन तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञः कश्चिदेकः पुरुष आस्थेयः । कार्यत्वस्य तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञकर्तृकत्वव्याप्तत्वात् । एवं च क्षेत्रज्ञानां तादृशाभिज्ञत्वाभावेन प्रकृतेश्चेतनत्वाभावेन च जगत्कर्तृत्वनिवृत्तौ सुखेन जगत्कर्तुरीश्वरस्य सिद्धिरिति । एवं प्रमाणान्तरेणेश्वरस्य तज्जगत्कर्तृत्वस्य च सिद्धौ जन्मादिसूत्रस्यापि लक्षणत्वात् तदितरभेदसाधने पृथिवीत्ववदीश्वरश्चेतनान्तरव्यतिरिक्तः, जगज्जन्मादिकर्तृत्वाद्

रश्मिः ।

ष्वित्यंशं व्याचक्रुः **सर्वत्रे**ति । ब्रह्मैवेति धर्म्यैव । **विरोध** इति ज्ञानक्रियाशक्तिप्रतिपादनविरोधः । अत्रान्योन्याश्रयाभावायाहुः **शेषशेषी**ति । **पूर्वकाण्ड** इति इदं तृतीयस्य प्रथमपादे 'द्रव्यगुणसंस्कारेषु बादरिः' 'कर्माण्यपि जैमिनिः फलार्थत्वात्'इत्यादिसूत्रेषु चिन्तितम् । **आशंसा**-इच्छा तस्याः । **मूर्धत्वादी**ति आदिशब्देनोत्तमाङ्गत्वादिः । **तस्मा**दिति मन्त्रब्राह्मणरूपत्वे सति अविहितज्ञानस्य फलसाधकत्वात् । तथाच ज्ञप्तावन्योन्याश्रयो नास्तीति भावः । वस्तुतस्तु शास्त्रमेकमेवेति नान्योन्याश्रयशङ्का । **निःप्रत्यूह**मिति निष्प्रत्यूहमिति पाठो भाति 'इदुदुपधस्य चाप्रत्ययस्य' इतिसूत्रात् । निर्भिन्नस्येदुदुपधस्य वा वाच्यम् 'निःप्रत्यूहो महान् भोगः' इति सेवाफले श्रीमदाचार्यप्रयोगात् । पौराणप्रयोगो वा बोध्यः । **भाष्ये** । **तस्मा**दिति कर्तृज्ञानयोर्धर्मिरूपत्वेन ग्रहणात् । **सिद्ध**मिति ब्रह्मणः । **प्रकृते** । **वैशेषिकादी**ति वैशेषिकाः प्रमाणद्वयवादिनः । **आदिशब्दो**क्ता नैयायिकाः प्रमाणचतुष्टयवादिनः । **मूर्तत्वाच्चे**ति तत्त्वं च परिच्छिन्नपरिमाणवत्त्वम् । **तथात्व** इति बुद्धिमत्कारणपूर्वकत्व इत्यर्थः । **तदुपादाने**त्यादि तस्य कार्यस्योपादानं चोपकरणं च संप्रदानं च प्रयोजनं चेति द्वन्द्वोत्तरं षष्ठीतत्पुरुषोपि तेष्वभिज्ञ इति सप्तमीसमासः । **लक्षणे**ति इतरभेदसाधने हेतुः । लक्षणत्वमितरभेदसाधकत्वमिति । **तदितरे**त्यादि तस्येश्वरस्येतरस्माद्भेदसाधने पृथिवीत्ववत् पृथिवी इतरेभ्यो

भाष्यप्रकाशः ।

यन्नैवं तन्नैवमित्यनुमानरूपं सूत्रमित्येकं मतम् । तदसंगतम् । जगत्कर्तृसाधकस्य कार्यत्वस्य हेत्वाभासत्वात् । यथाहुर्भास्कराचार्याः । जगत् न बुद्धिमत्कारणपूर्वकं कार्यत्वाद् बीजोत्पन्नाङ्कुरवदिति साधारणो हेतुः । किं च जगता सहेश्वरसंबन्धस्यात्यन्तापरिदृष्टत्वेन साध्यस्य पक्षधर्मत्वाभावादयं विरुद्धोऽपि । यस्यकस्यापि बुद्धिमतः साधने सिद्धसाधनत्वं च । तथा घटादिदृष्टान्तबलेन कार्यत्वसमानाधिकरणस्यानीश्वरासर्वज्ञशरीरेन्द्रियादिमत्कर्तृकत्वस्य सिद्ध्या विवक्षितेश्वरासिद्धिश्च । तादृशजीवसिद्ध्याऽर्थान्तरत्वेनापि तदसिद्धिश्च । नचैवं घटादिदृष्टान्तेन शब्दे कृतकत्वादनित्यत्वसाधने दृष्टान्तीयानां पाक्यत्वादीनामापत्त्याऽनुमानोच्छेदप्रसङ्गः । लिङ्गिनः शब्दस्य प्रमाणान्तरगोचरत्वेन शब्दे पाक्यत्वादीनां निवृत्त्या तदनुच्छेदात् । अत्यन्तापरिदृष्टे ब्रह्मणि त्वन्वयव्यतिरेकपरिशुद्धानां तेषां निवर्तकस्याभावेन तादृशधर्मापत्तेरनिवार्यत्वात् । अतः शास्त्रैकसमधिगम्यं ब्रह्मेति ।

रामानुजाचार्यास्त्वेतेषु दूषणेषु शैथिल्यं प्रदर्श्य प्रकारान्तरेण शास्त्रैकसमधिगम्यत्वं

रश्मिः ।

भिद्यते गन्धवत्त्वात् इत्यनुमानलिङ्गवदित्यर्थः । यन्नैवं तन्नैवमिति देवदत्तवदित्यर्थः । **अनुमानरूप**मिति अस्येति जगतो जन्मादि यत इति 'जनिकर्तुः प्रकृतिः' इतिसूत्रेण पञ्चम्यन्तम् । तस्य लक्षणत्वाद्धेतुत्वं तत एव इतरभेदसाधकत्वमित्यनुमानरूपत्वं जगज्जन्मादिकर्तृत्वसिद्धौ हि तेन चेतनान्तरव्यतिरिक्तत्वं साधनीयं तत्सिद्धिस्तु जगत् बुद्धिमत्कारणपूर्वकं कार्यत्वात् घटवदित्यनुमानसाध्या । तदेवानुमानं दुष्टं किंतरामेतदित्याशयेनाहुः **जगत्कर्त्रि**त्यादि । **साधारण** इति साध्यवदन्यवृत्तित्वं विपक्षवृत्तित्वं वा साधारणत्वम् । साध्यं बुद्धिमत्कारणपूर्वकत्वतदभावस्तद्वान् बीजोत्पन्नाङ्कुरादिस्तदन्यो घटादिस्तद्वृत्तित्वं कार्यत्व इति । विपक्षो बीजाङ्कुरादिः तद्वृत्तित्वं कार्यत्व इति च लक्षणसंगतिः । तथाचान्वयव्याप्त्या साध्यतदभावयोः साधकः साधारण इति फलितम् । यथा धूमवान् वह्नेरिति । तत्रायोगोलके साध्याभावसाधकत्वं बोध्यम् । **साध्यस्ये**ति बुद्धिमत्कारणपूर्वकत्वस्येत्यर्थः । **विरुद्धोपी**ति विरुद्धत्वं तु साध्यासामानाधिकरण्यं तथाच साध्यानधिकरणे बीजाङ्कुरादौ कार्यत्वस्य सत्त्वात्तदसामानाधिकरण्यम् । दूषकताबीजभेदादुभयोर्भेदः । बाधितोपीति वक्तुं युक्तम् । पक्षे साध्यशून्यत्वस्य तल्लक्षणत्वात् । यथा जलादिपक्षे वह्न्यभावः जलं वह्निमज्जलत्वात् इत्यत्र बाधवत् साधारणोपि हेतुः । साध्यवान् पर्वतादिः तदन्यो जलह्रदादिस्तद्वृत्ति जलत्वं साध्यवदन्यत्वादिगतो हेतुः । ननु दृष्टोन्यबुद्धिमत्संबन्धो जगतीति न विरुद्ध इति चेत्तत्राहुः **यस्यकस्यापी**ति । **तथे**ति यथा घटादिदृष्टान्तबलेन कार्यत्वलिङ्गेन च बुद्धिमत्कारणपूर्वकत्वसिद्धिस्तथेत्यर्थः । **सिद्ध्ये**ति जगद् अनीश्वरासर्वज्ञशरीरेन्द्रियादिमत्कर्तृपूर्वकं कार्यत्वात् घटवदित्येवं सिद्ध्येत्यर्थः । ननु नैवं सिद्धिर्भवित्री क्षित्यादिवायुपर्यन्तानां विचित्राणां महाभूतानां जगत्त्वेन तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञो नानीश्वरासर्वज्ञादिरित्यत आहुः **तादृशजी**वेत्यादि । उपासोपचितसार्वज्ञ्यादिशक्तिमतो जीवस्य सिद्ध्येत्यर्थः । **न चैव**मिति दृष्टान्तबलेन दृष्टान्तीयाशेषधर्माणां पक्षवृत्तित्वाङ्गीकारे इत्यर्थः । **तेषामि**त्यादि अनीश्वरासर्वज्ञत्वादीनां श्रवणवन्निवर्तकस्य चक्षुरादिप्रमाणान्तरस्याभावेनेत्यर्थः । **अत** इति प्रत्यक्षस्य तन्मूलकानुमानस्य चाप्रवृत्तेः शब्दस्य पराक्रमप्रतिपादनद्वारा प्रवृ-

भाष्यप्रकाशः ।

साधयन्ति । तथाहि । सावयवत्वादिलिङ्गकैः पूर्वोक्तानुमानैः कृत्वा सिद्धत्वेन जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते । नच जगदकार्यम्, अशक्यक्रियत्वाद् अशक्योपादानादिविज्ञानत्वाच्च, आकाशवदिति प्रतिपक्षसद्भावात् प्रत्याख्यातुं शक्यमिति वाच्यम् । आकाशे निरवयवत्वस्यानुकूलतर्कस्य सत्त्वेन तस्याकार्यत्वेऽपि जगद्रूपेषु महीमहीधरादिषु वाय्वन्तेषु तदभावेन तयोरप्रयोजकतयाकाशदृष्टान्तेन तेष्वकार्यत्वस्य साधयितुमशक्यत्वात् । एवं निरवयवत्वेनोपाधिनैव क्षित्यादिवायुपर्यन्तानि अकार्याणि महाभूतशब्दवाच्यत्वाद् आकाशवदित्यपि प्रत्यनुमानं निरस्तम् । एवं सिद्धे कार्यत्वे शक्यक्रियत्वशक्योपादानादिविज्ञानत्वयोरपि कार्यत्वेनैव सिद्ध्या तयोरपि प्रतिपन्नत्वमेव । तथाहि । घटमणिकादिषु कृतेषु कार्यदर्शनानुगतकर्तृगततन्निर्माणशक्तिज्ञानः पुरुषोऽदृष्टपूर्वं विचित्रसन्निवेशं नरेन्द्रभवनमालोक्य अवयवसन्निवेशविशेषेण तस्य कार्यत्वं निश्चित्य तदानीमेव कर्तुस्तज्ज्ञानशक्तिवैचित्र्यमनुमिनोति । अतस्तु भुवनादेः कार्यत्वे सिद्धे

रश्मिः ।

चेश्चेत्यर्थः । **प्रतिपक्षे**ति साध्याभावसाधकहेत्वित्यर्थः । सावयवादिहेतूनां सत्प्रतिपक्षत्वमिति भावः । साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः । **अनुकूलतर्कस्ये**ति यद्यकार्यं न स्यान्निरवयवो न स्यात् इति शङ्कानिवर्तकस्य निरवयवत्त्वं यद्यकार्यत्वव्यभिचारि स्यान्निरवयवत्वमकार्यसाधकं न स्यात् इति व्याप्तिग्राहकस्य चानुकूलतर्कस्य सत्त्वेनेत्यर्थः । **तदभावेने**त्यादि निरवयवत्वरूपानुकूलतर्काभावेनाशक्येत्यादिहेत्वोरप्रयोजकतयेत्यर्थः । **तेष्वि**ति जगद्रूपेषु महीमहीधरादिष्वित्यर्थः । **उपाधिने**ति साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वमत्राकाशमादाय साधनव्यापकत्वमिति चेन्न । यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमुपाधिरिति लक्षणस्य विवक्षितत्वात् यद्धर्मः कार्यत्वत्वं तथा चाकार्यत्वत्वावच्छिन्नसाधनं नाकाशमिति नाकाशमादाय साधनव्यापकत्वमिति भावः । यदभावेन यद्वदन्यत्वेन वा साधनवति साध्याभाव उन्नीयते स उपाधिः लाघवादिति नव्याः । स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वमुपाधिः शाकपाकजत्वाभाववति घटादौ श्यामत्वसत्त्वाच्छ्यामत्वव्यापकत्वाभावेपि मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकत्वात् । एवं प्रकृतेपि यद्धर्मावच्छिन्ना[१]कार्यत्वव्यापकं निरवयवत्वमाकाशादौ तद्धर्मावच्छिन्नमहाभूतशब्दवाच्यत्वाव्यापकं निरवयवत्वं पृथिव्यादाविति लक्षणसंगतिः । एवं यथार्द्रेन्धनाभावेनार्द्रेन्धनवत्पर्वताद्यन्यत्वेन साधनवति वह्निमत्ययःपिण्डे धूमाभाव उन्नीयते इत्यार्द्रेन्धनमुपाधिस्तद्वत् निरवयवत्वाभावेन निरवयवत्ववदाकाशाद्यन्यत्वेन वा साधनवत्क्षित्यादिषु साध्यस्याकार्यत्वस्याभाव उन्नीयत इति । **कार्यत्वेने**ति कार्यत्वलिङ्गेन घटादिदृष्टान्तसनाथेनेत्यर्थः । **तयोरपी**ति तयोः शक्यक्रियत्वशक्योपादानादिविज्ञानत्वयोरपि प्रतिपन्नत्वं प्राप्तत्वं प्रागल्भ्यं चैवेत्यर्थः । तथा चाशक्यक्रियत्वाशक्योपादानादिविज्ञानत्वयोर्हेत्वोरप्यसिद्धिरिति भावः । **घटमणिके**ति मणिकः गुर्जरदेशे गृहे मिष्टजलार्थं स्थलं 'टांका' इत्युच्यते । **कार्यदर्शने**त्यादि कार्यदर्शनेनानुमिते कर्तृगते कार्यनिर्माणस्य शक्तिज्ञाने येनेत्यर्थः । **अदृष्टपूर्व**मिति न दृष्टं पूर्वं यत्तददृष्टपूर्वम् । **विचित्रः** स्थलविशेष**सन्निवेशो** यत्र तथाविधं चेत्यर्थः ।

१. अकार्यत्वधर्मावच्छिन्नेत्यर्थः ।

भाष्यप्रकाशः।

तावत्सर्वसाक्षात्कारतन्निर्माणादिनिपुणः कश्चित् सिद्ध्यत्येव । विवादाध्यासितं भूभूधरादिकं स्वनिर्माणसमर्थकर्तृपूर्वकं कार्यत्वात् सार्वभौमसदनवदिति प्रयोगात् । किंच सर्वचेतनानां सुखदुःखभोगस्य धर्माधर्मसाध्यत्वेऽपि धर्माधर्मयोरचेतनत्वाच्चेतनाधिष्ठानमन्तरेण तयोः फलहेतुत्वानुपपत्तेः सर्वकर्मानुगुणसर्वफलदानचतुरः कश्चिदास्थेयः । वर्धकिनानधिष्ठितस्य वाश्यादेरचेतनस्य देशकालाद्यनेकपरिकरसन्निधानेऽपि यूपादिनिर्माणसाधनत्वादर्शनात् । तथाच प्रयोगः । धर्माधर्मौ चेतनाधिष्ठितत्वेनैव फलोपधायकौ अचेतनत्वाद् वाश्यादिवदिति । नच पूर्वानुमाने कार्यत्वस्य हेतोर्बीजोत्पन्नाङ्कुरदृष्टान्तेन साधारणत्वं शङ्क्यम् । अङ्कुरादौ संदेहस्यानन्याहितत्वेन पक्षसमतया पक्ष एवान्तर्भावात् । एतेनैव सुखादिदृष्टान्तोऽपि प्रत्युक्तः । नच लाघवादुभयवादिप्रतिपन्नक्षेत्रज्ञानामेवाधिष्ठातृत्वमत्र कल्पयितुं शक्यम् । तेषां सूक्ष्मव्यवहितविप्रकृष्टदर्शनाशक्तिनिश्चयात् । कल्पनाया दर्शनानुसारित्वस्यैव युक्तत्वात् । नचेश्वरेऽप्येतादृगशक्त्यापत्तिः । तत्र तन्निश्चायकप्रमाणाभावात् । अतः प्रमाणान्तरतो न तत्सिद्ध्यनुपपत्तिः । तथाचोक्तानुमानेन सिद्ध्यन् स्वाभाविकसर्वार्थसाक्षात्कारतन्नियमनसामर्थ्यसंपन्न एव सेत्स्यतीति न तस्मिन्नन्वयव्यतिरेकपरिशुद्धमप्यनैश्वर्याद्यापादयितुं शक्यम् । समर्थकर्तृपूर्वकत्वनियतकार्यत्वरूपहेतुबलादेव तन्निवृत्तेः । तथाहि, केनचित् क्रियमाणं किंचित् स्वोत्पत्तये कर्तुः स्वनिर्माणसामर्थ्यं स्वोपादनोपकरणविज्ञानं च निर्वाहकत्वेनापेक्षते । न त्वन्यासामर्थ्यमन्याज्ञानं वा । हेत्वभावात् । उक्तसामर्थ्योक्तज्ञानाभ्यामेवोत्पत्तावुपपन्नायां संबन्धितया दृष्टानामकिंचित्कराणामन्येषां कल्पनायोगात् । अन्यथानुमानोच्छेदप्रसङ्गात् । अथ तदप्युपयोगीति चेत्, किं क्रियमाणवस्तुव्यतिरिक्ताज्ञानादिकं सर्वविषयं क्रियोपयोगि, उत कतिपयविषयम् । नाद्यः । कुलालादेरपि क्रियमाणवस्तुव्यतिरिक्त-

रश्मिः।

साधारणत्वमिति भूभूधरादिकं स्वनिर्माणसमर्थकर्त्रपूर्वकं कार्यत्वात् बीजोत्पन्नाङ्कुरवदित्येवं साध्यतदभावयोः साधकत्वमित्यर्थः । संदिग्धसाध्यवत्त्वं पक्षत्वमिति लक्षणं मत्वाहुः **अङ्कुरादा**विति । **अनन्याहितत्वे**नेति कर्त्रनुपलम्भमात्रोत्पन्नतया उपाधिसत्प्रतिपक्षादिदोषानाहितत्वेनेत्यर्थः । न अन्यः पक्षभिन्नः अङ्कुरादिः पक्षरूप इत्यर्थस्तदाहितत्वेन । **एतेनैवे**त्यादि पूर्वोक्तरीत्या पक्ष एवान्तर्भावेन वायूपनीतचन्दनादिगन्धजन्यसुखादिदृष्टान्तोपीत्यर्थः । पक्षभिन्नत्वस्य दृष्टान्ते तन्त्रत्वादित्यर्थः । **धर्माधर्मा**विति । द्वितीयानुमानेपि किंचिदाहुः **न च लाघवा**दिति । **क्षेत्रज्ञाना**मिति जीवानामित्यर्थः । **अत्रे**ति धर्माधर्मयोरित्यर्थः । द्वितीयानुमाने इति वा । **अत** इति अनुमाननिर्दुष्टत्वात् शब्दप्रमाणादन्यत्प्रमाणमनुमानरूपम् । **तत्सिद्धी**त्यादि ईश्वरसिद्ध्यनुपपत्तिरित्यर्थः । **समर्थे**त्यादि समर्थकर्तृपूर्वकत्वस्य साध्यस्य यो नियतसहचारी कार्यत्वरूपो हेतुस्तद्बलादेवानैश्वर्यादिनिवृत्तेरित्यर्थः । स्वनिर्माणसमर्थकर्तृपूर्वकं कार्यत्वात् सार्वभौमसदनवत् इति पूर्वोक्तानुमानमनुसंधेयम् । **स्वोत्पत्तय** इति स्वस्य क्रियमाणस्योत्पत्तय इत्यर्थः । **हेत्वभावा**दिति कल्प्यमानहेतूनामन्यथासिद्धत्वेनाभावात् । **अकिंचि**दिति अन्यथासिद्धानाम् । **अन्येषा**मिति अन्याज्ञानान्यासामर्थ्यादीनामित्यर्थः । **अन्यथे**ति अनुपयोगिसाधकत्वे घटः पृथ्वी गन्धवत्त्वादिति सद्धेतुना पृथ्वीत्ववत्तावत्परिमाणलिङ्गतत्कर्तृकत्वानां सिद्ध्यापत्त्यानुमानोच्छेदप्रसङ्गादित्यर्थः । **तदपी**ति अन्यदप्युपयोगि सिद्ध्यतु नाम न तावत्परिमाणादीतिचेदित्यर्थः ।

भाष्यप्रकाशः ।

ज्ञानाद्यदर्शनात् । नापरः । सर्वेषु कर्तृषु तत्तदज्ञानाशक्त्यनियमेन सर्वेषामज्ञानादीनां व्यभिचारात् । नच निर्वाहकापेक्षाङ्गीकारे ईश्वरेऽपि शरीरेन्द्रियाद्यापत्तिरिति शङ्क्यम् । संकल्पमात्रेण परशरीरगतभूतवेतालगराद्यपगमदर्शनात् । नच कथमशरीरस्य प्रवर्तनरूपः संकल्प इति शङ्क्यम् । संकल्पस्य मनोजन्यत्वेन शरीरानपेक्षत्वात् । मनसस्त्वीश्वरेऽप्युपगमात् । पूर्वोक्तहेतुनैव ज्ञानशक्तिवन्मनसोऽपि प्राप्तत्वात् । नच मानसोऽपि संकल्पः सशरीरस्यैव, तस्यैव समनस्कत्वादिति वाच्यम् । मनसो नित्यत्वेन देहाद्यपगमेऽपि तत्सद्भावेनानैकान्तिकत्वात् । अत ईदृशस्य विचित्रस्य जगतो निर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञो न समर्थ इति तद्विलक्षण ईश्वरः संकल्पमात्रेण सर्वकरणसमर्थोऽनुमानेन सिद्ध्यति । प्रयोगान्तरेण च । जगद् एकचेतनाधीनम्, अचेतनारब्धत्वान्नीरोगस्वशरीरवदिति । तस्मान्न पूर्वोक्तप्रकारेण शास्त्रैकसमधिगम्यत्वं ब्रह्मणः सिद्ध्यति ।

कथं तर्हि तत्सिद्धिरितिचेद्, उच्यते । नाचेतनारब्धत्वेन हेतुना ईश्वरसिद्धिः । तथाहि । यदत्र साध्यतया निर्दिष्टं, किं तदेकचेतनाधीनत्वम् । न तावदेकचेतनायत्तोत्पत्तिस्थितिकत्वम् । दृष्टान्ते साध्यवैकल्यात् । अरोगस्यापि शरीरस्य पितृपुत्राद्यनेकचेतनाभोग्यत्वात् तत्तददृष्टजन्यत्वेन तदुत्पत्तिस्थित्योस्तदधीनत्वेनैकचेतनाधीनत्वाभावात् । किं च । शरीरस्य स्थितिरपि, किं स्वावयवसमवेतता, उत प्राणनम् । आद्ये अवयवाधीनत्वान्न चेतनापेक्षा, घटादिवत् । द्वितीये क्षित्यादीनां शरीररूपत्वभावेन पक्षे असंभव इति पक्षसपक्षानुगतस्थित्यनुपलम्भः । नाप्येकाचेतनाधीनप्रवृत्तिकत्वं तत् ।

रश्मिः ।

व्यभिचारादिति कुलालत्वेन घटादित्वेन हि कार्यकारणभावः तत्रान्याशक्त्यान्याज्ञाने सहकारिणी तत्रान्यपदार्थो हि पटादिस्तथा च पटादिज्ञानवता कुलालेन क्रियमाणे घटादौ अन्याज्ञानादिनियतसहचरितत्वव्यभिचारादित्यर्थः । उपयोग्यभावेपि कार्यदर्शनात् । **परशरीरे**त्यादि तथाच संकल्प एव निर्वाहको न तु शरीरादिरतो नेश्वरे तदापत्तिरित्यर्थः । **पूर्वोक्ते**त्यादि स्वनिर्माणसमर्थकर्तृपूर्वकत्वनियतकार्यत्वहेतुनैवेत्यर्थः । **प्राप्तत्वा**दिति समर्थपदेन तथात्वादित्यर्थः । **तस्यैवे**ति सशरीरस्यैवेत्यर्थः । **अनैकान्तिकत्वा**दिति साधारणाद्यन्यतमत्वमनैकान्तिकत्वं सशरीरः समनस्कः संकल्पवत्त्वात् क्षेत्रज्ञवत् । इत्यत्र समनस्कत्वस्य संकल्पाभाववति मुक्तात्मनि सत्त्वात् । इत्यनैकान्तिकत्वादनुपसंहारित्वादित्यर्थः । अनुपसंहारी च तद्वन्निष्ठात्यन्ताभावप्रतियोगिसाध्यकादिः तथाचानुपसंहार्यनैकान्तिकत्वादित्यर्थः । **अनुमाने**नेति । **अचेतने**ति कामबीजाद्यारब्धत्वात् । **तत्सिद्धि**रिति शास्त्रैकसमधिगम्यत्वसिद्धिरित्यर्थः । **उच्यत** इति अस्माभी रामानुजाचार्यैरुच्यते । सूचीकटाहन्यायेन प्रथमतो द्वितीयमनुमानं दूषयन्ति **नाचेतने**त्यादि । **तन्ने**ति । **एकचेतनायत्ते**ति आयत्ते यति प्रयत्ने आसमन्तात् प्रयत्नविषये उत्पत्तिस्थिती यस्य जगतस्तत्कत्वम् । उपलक्ष्यते लयः । साध्यवैकल्यमेव साधयन्ति **अरोगस्ये**त्यादि । साध्यलक्षणघटकीभूता स्थितिः शरीरनिष्ठा वाच्या । तथाच यत्सिद्धं तदाहुः **शरीरस्ये**त्यादि । **असंभव** इति जीवनासंभव इति सपक्षरूपनीरोगस्वशरीरानुगतजीवनरूपस्थित्यनुपलम्भः पक्ष इति बाधित इत्यर्थः । **सपक्षे**ति निश्चितसाध्यवत्त्वं **सपक्षत्वम्** । अनुपलम्भ इति पक्षेऽनुपलम्भः । **तदि**ति एकचेतनाधीनत्वरूपं साध्यमित्यर्थः ।

भाष्यप्रकाशः।

पक्षान्तर्भूतेषु गुरुतररथशिलामहीरुहादिष्वनेकचेतनसाध्यप्रवृत्तिकत्वेन व्यभिचारात्। नापि चेतनमात्राधीनत्वम्। सिद्धसाधनत्वात्। किं च। उभयवादिसिद्धानां जीवानामेव नियामकत्वाभ्युपगमो युक्तः। लाघवात्। नच जीवानां पूर्वोक्तरीतिकोपादानादिविज्ञानतन्निर्माणशक्त्यभावः शङ्कनीयः। तपोयागादिभिस्तेष्वपि तादृशज्ञानसामर्थ्ययोरुपगमे बाधकाभावात्। एतदपेक्षयेश्वराख्यपुरुषकल्पनस्य तत्र सामर्थ्यविशेषकल्पनस्य चात्यन्तापरिदृष्टत्वेनातिगुरुत्वात्। अतोऽचेतनारब्धत्वलिङ्गकानुमानेन नेश्वरसिद्धिः।

नापि कार्यत्वलिङ्गकेन। महीमहार्णवादीनां सावयवत्वेन कार्यत्वेऽप्यनेकत्वात् ते सर्वे एकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावात्। न चैकघटवत् सर्वेषामेककार्यत्वं, येनैकदैवैकः कर्ता स्यात्। पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यस्य नियन्तुमशक्यत्वात्। नच जीवानां तादृशनिर्माणशक्त्यदर्शनेन तन्निवृत्तौ कार्यत्वबलेनैव तत्सिद्धिरिति वाच्यम्। पूर्वमशक्तानामपि पश्चात् पुण्यविशेषोपचयेन शक्तिदर्शनात्, तद्विशेषोपचयेनातिशयितादृष्टसंभावनया च तादृशविलक्षणकार्यकर्तृत्वस्यापि संभवादित्युक्तम्। किं च। युगपत् सर्वोच्छित्तिः सर्वोत्पत्तिश्च न प्रमाणपदवीमधिरोहतः। अदर्शनात्। क्रमेणैवोत्पत्तिविनाशयोः कल्प्यमानयोर्दर्शनानुगुण्येन तथा कल्पनायामपि विरोधाभावाच्च। अतो बुद्धिमदेककर्तृकत्वे साध्ये कार्यत्वस्यानैकान्तिकत्वम्।

रश्मिः।

व्यभिचारादिति साध्याभाववत्सु गुरुतररथादिषु स्वसमवाय्यारब्धेषु साध्यशून्येषु हेतोर्व्यभिचारादित्यर्थः। साधारणो हेतुरित्यर्थः। साध्यं प्रकारान्तरेण लक्षयित्वा दूषयन्ति **नापी**त्यादि। **सिद्धे**त्यादि। शरीरादौ तथात्वादित्यर्थः। अयं दोषः पक्षताविघटकः। सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता। एतच्च हेत्वाभासान्तरं जगति नायमित्यतो दूषणान्तरमाहुः **किंचे**त्यादि। कार्यत्वलिङ्गकं स्वरूपासिद्धत्वमित्याहुः **मही**त्यादि। तथाच पक्षे व्याप्यत्वाभिमतस्येश्वरसाधकस्य कार्यत्वस्य विरहात् स्वरूपासिद्धत्वमित्यर्थः। सावयवत्वं लिङ्गमपि बाधितमिति कार्यं सावयवत्वादित्यनुमानमपि दुष्टमिति भावः। पक्षे साध्याभावो बाधः इति तल्लक्षणात्। प्रतिज्ञान्तररूपं निग्रहस्थानं वा व्याख्येयम्। **सर्वेषा**मित्यादि महीमहार्णवादीनामेकस्य कार्यत्वमित्यर्थः। **तत्सिद्धि**रिति स्वनिर्माणसमर्थकर्तृपूर्वकत्वसिद्धिरित्यर्थः। **संभवा**दिति यथा प्रियव्रतः 'प्रियव्रतकृतं कर्म कोनुकुर्याद्विनेश्वरम्' इतिवाक्यात्। **दर्शने**ति न्यायशास्त्रानुगुण्येन। **तथाकल्पनाया**मिति पुण्यविशेषोपचयेनातिशयितादृष्टसंभावनया च तादृशविलक्षणकार्यकर्तृत्वकल्पनायाम्। **अत** इति विवादाध्यासितं भूभूधरादिकं बुद्धिमदेककर्तृपूर्वकं कार्यत्वात्। घटादिवदित्यनुमाने तथेत्यर्थः। **अनैकान्तिकत्व**मिति **सार्वभौमसदने**ति च विवादाध्यासितं भूभूधरादिकं बुद्धिमदनेककर्तृपूर्वकं कार्यत्वात् सार्वभौमसदनवदित्यनेन बुद्धिमदनेककर्तृकत्वे सिद्धे एतत्साध्याभाववति भूभूधरादिके कार्यत्वरूपहेतोर्वृत्तेः साधारणानैकान्तिकत्वमित्यर्थः। तथाच सार्वभौमसदनदृष्टान्तेन बुद्धिमदनेककर्तृत्वे सिद्धे एतत्साध्याभाववति भूभूधरादिके कार्यत्वरूपहेतोर्वृत्तेस्तथात्वावगमात् साधारण्यानैकान्तिकत्वावगमादिति सार्वभौमेतिफक्किकार्थः। कार्यत्वं बुद्धिमदेककर्तृकत्वसाधकं घटनिष्ठत्वात् पटनिष्ठकार्यत्ववदित्यनुमानमपि। कार्यत्वं न बुद्धिमदेककर्तृकत्वसाधकं मह्यादिभूतसमूहनिष्ठत्वात् घटपटस्तम्भसमूहनिष्ठकार्यत्ववदित्यनुमानेन सत्प्रतिपक्षमित्याहु

भाष्यप्रकाशः ।

सार्वभौमसदनदृष्टान्तेन तथाऽवगमात् । मह्यादिभूतसमूहनिष्ठत्वाच्च घटपटस्तम्भसमूहनिष्ठकार्यत्ववत् । साध्यतावच्छेदकराहित्येन दृष्टान्तस्य साध्यविकलत्वं च । सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः । पक्षस्याप्रसिद्धविशेषणत्वं च । तादृशसाध्याप्रसिद्ध्या विवादाध्यासाभावात् । बुद्धिमत्कर्तृकत्वमात्रे साध्ये सिद्धसाध्यत्वं च । किं च । सार्वज्ञ्यसर्वशक्तियुक्तस्य कस्यचिदेकस्य साधकमिदं कार्यत्वं, युगपदुत्पद्यमानसर्ववस्तुगतं वा, क्रमेणोत्पद्यमानसर्ववस्तुगतं वा । आद्ये, आश्रयासिद्धत्वम् । द्वितीयेऽनेककर्तृकत्वसाधनाद् विरुद्धत्वम् । अपिच । सर्वेषां कार्याणां शरीराणां सुखाद्यन्वयदर्शनेन तन्मूलभूतं सत्त्वादिकमवश्याश्रयणीयम् । पुरुषस्य तद्योगश्च कर्मभिरन्तःकरण-

रश्मिः ।

मह्यादीत्यादि । तथाचाभासोक्तरीत्या सत्प्रतिपक्षत्वमिति भावः । **साध्यतावच्छेदके**त्यादि कार्यत्वलिङ्गकानुमाने क्षित्यादेः पक्षस्य विजातीयद्रव्यसमूहकत्वाद् घटादिवदिति दृष्टान्तेपि विजातीयद्रव्यसमूहस्यैव दृष्टान्तत्वेन प्रवेशात् । तत्र साध्यतावच्छेदकस्य कर्त्रैक्यस्य प्रत्यक्षविरुद्धतया राहित्येनेत्यर्थः । तथाच दृष्टान्ताभाव इति भावः । साध्याप्रसिद्धिरग्रे वाच्या । किंच कार्यत्वलिङ्गकमनुमानमाश्रयासिद्धमित्याहुः **सर्वनिर्माणे**त्यादि । सार्वभौमसदने सर्वनिर्माणचतुराणामनेकेषां दर्शनादेकस्याप्रसिद्धेश्च विवादाध्यासितत्वाभावेन भूभूधरादेः पक्षस्य तथात्वमित्यर्थः । यथा काञ्चनमयः पर्वतो वह्निमानिति तथा च पक्षे पक्षतावच्छेदकाभावात् आश्रयासिद्धत्वमिति भावः । किंच व्याप्यत्वासिद्धमपीति सूचयन्तस्तत्र हेतुमप्याहु**स्तादृशे**त्यादि । **साध्याप्रसिद्ध्ये**ति । साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः यथा काञ्चनमयवह्निमान् धूमात् इति । तथा च बुद्धिमदेकत्वस्य साध्यतावच्छेदकस्य कर्तर्यभावाद्व्याप्यत्वासिद्धत्वमित्यर्थः । ननु साध्ये एकपदं न निवेश्यते एवं च न साध्ये साध्यतावच्छेदकाभाव इत्यत आहुः **बुद्धिम**दित्यादि । **सिद्धसाध्यत्व**मिति बुद्धिमत्कर्तृपूर्वकत्वस्य सर्वत्र सिद्धत्वात् । **आश्रयासिद्धत्व**मिति युगपदुत्पद्यमानस्य सर्वस्य केनापि लौकिकप्रमाणेनासिद्धत्वात्तथात्वमित्यर्थः । किंच संदिग्धसाध्यत्वं पक्षत्वमिति लक्षणेन साध्यासंदेहात्पक्षे संदिग्धत्वरूपपक्षतावच्छेदकाभावात् । पक्षे पक्षतावच्छेदकाभावरूपाश्रयासिद्धिः । तथा सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता । तस्याः पक्षेऽभावादाश्रयासिद्धिः । **अनेके**त्यादि क्रमिकाणामनेककर्तृकत्वस्य प्रत्यक्षादिसिद्धत्वात्तथेत्यर्थः । **विरुद्धत्व**मिति साध्याभावसाधकहेतुर्विरुद्ध इति तल्लक्षणाद्विरुद्धत्वमित्यर्थः । सांख्यमतमनुसृत्य दूषयन्ति **अपि चे**त्यादि । **तन्मूलभूत**मित्यादि । शरीरमूलभूतं सत्त्वादिगुणान्यतमं

'अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ।
प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥
स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ।
यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥
गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ।
विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥
एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ।
कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥
तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतम् ।

भाष्यप्रकाशः।

विकारद्वारेण भवतीति विचित्रकार्यविशेषारम्भायैव ज्ञानशक्तिवत् कर्मसंबन्धोऽप्यवश्याश्रयणीयः। ज्ञानशक्तिवैचित्र्यस्यापि कर्ममूलत्वाच्च। इच्छायाः कर्मारम्भहेतुत्वेऽपि विषयविशेषितायास्तस्याः सत्त्वादिमूलत्वेन कर्मसंबन्धोऽवर्जनीयः। एवं सिद्धे कर्मसंबन्धे क्षेत्रज्ञा एव कर्तारः सिद्ध्यन्ति, न तु तद्विलक्षणः कश्चिदनुमानात् सिद्ध्यति।

भवन्ति चात्र प्रयोगाः। तनुभवनादिकं क्षेत्रज्ञकर्तृकं, कार्यत्वाद् घटवत्। ईश्वरः कर्ता न भवति प्रयोजनशून्यत्वाद् मुक्तात्मवत्। तथा, अशरीरत्वात् तद्वदेव। न च क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः। तत्राप्यनादेः सूक्ष्मशरीरस्य भावात्। विमतिविषयः कालो न लोकशून्यः कालत्वाद् वर्तमानकालवत्। किंच। ईश्वरः किमशरीरः सशरीरो वा कार्यं करोति। नाद्यः। मनसो नित्यत्वेऽपि अशरीरेषु मुक्तेषु मानसकार्यादर्शनादीश्वरेऽप्यकर्तृत्वापत्तेः। नेतरः। विकल्पासहत्वात्। तन्नित्यमनित्यं वा। न तावन्नित्यम्। सावयवस्य नित्यत्वे जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः। नाप्यनित्यम्। तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात्। नच स्वयमेव हेतुरिति युक्तम्। अशरीरस्य तदयोगात्। नाप्यन्यशरीरेण शरीरवान्। अनवस्थानात्। किंच। सव्यापारो निर्व्यापारो वा। नाद्यः। अशरीरस्य तदसंभवात्।

रश्मिः।

भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः॥
कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः।
भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम्'॥
'प्रकृतिस्थोपि पुरुषो नाज्यते प्राकृतैर्गुणैः।
अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत्'॥
'यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम्।
प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्'॥
'एतद्भगवतो रूपं ब्रह्मणः परमात्मनः।
परं प्रधानं पुरुषं दैवं कर्म विचेष्टितम्'॥

इत्यादि पुराणप्रामाण्यादवश्यमाश्रयणीयमित्यर्थः। सत्त्वाद्याश्रयेण यद्भवति तदाहुः **पुरुषस्ये**त्यादि। ईश्वराख्यस्यात्मनः सत्त्वादियोग इत्यर्थः। **अवश्ये**त्यादि लोके तथा दर्शनात्तथेत्यर्थः। विचित्रकार्यारम्भो न ज्ञानवैचित्र्यात् किं तु इच्छावैचित्र्यात् तस्याश्चाकर्ममूलत्वाददोष इत्यत आहुः **इच्छाया** इत्यादि। इच्छाया हेतुत्वेऽपि न सामान्यरूपेण तथा सति सृष्टीच्छया प्रलयः स्यादतः सृष्टिविषयिणीच्छात्वेन सृष्टिहेतुत्वमेवमन्यत्रेत्येवं आत्मप्रसादजसुखं स्यादित्येवं विषयविशेषितायास्तस्या हेतुभूतायाः सत्त्वादिरूपप्रधानाभिपत्तिमूलत्वेनेति सत्त्वादिहेतुकर्मसंबन्धो वर्जनीय इत्यर्थः। ननु सृष्ट्यादौ शरीराणामनुत्पन्नत्वात्क्षेत्रज्ञानां स्वशरीराधिष्ठानासंभवे कर्तृत्वव्यभिचार इत्याशङ्क्य पराकुर्वन्ति **न च क्षेत्रज्ञाना**मित्यादि। प्रवाहानादित्वमभिप्रेत्य स्थूलशरीरसत्तासाधनायाहुः **विमती**त्यादि। प्रवाहानादित्वसादित्वरूपविविधमतिविषयः। **मनस** इति करणभूतस्य मनस इत्यर्थः। **तदि**ति शरीरमित्यर्थः। **तद्व्यतिरिक्तस्ये**त्यादि ईश्वरव्यतिरिक्तस्येश्वरशरीरहेतोः सृष्टिप्राक्कालेऽभावादित्यर्थः। क्षेत्रज्ञव्यतिरिक्तस्य क्षेत्रशरीरहेतोः सृष्टिप्राक्कालेऽभावादित्यर्थो वा। **स्वय**मिति ईश्वर इत्यर्थः। **तदयोगा**दिति हेतुत्वायोगादित्यर्थः। **अनवे**त्यादि अवस्थानं शरीरस्थिति-

भाष्यप्रकाशः ।

न द्वितीयः । मुक्तात्मवदकर्तृत्वापातात् । कार्यं जगद् इच्छामात्रव्यापारिकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वम् । दृष्टान्तस्य साध्यहीनता च । अतो दर्शनानुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति शास्त्रैकप्रमाणकः परमेश्वरः परब्रह्मभूतः पुरुषोत्तमः । शास्त्रं तु सकलेतरप्रमाणापरिदृष्टं समस्तविजातीयं सार्वज्ञ्यसत्यसङ्कल्पत्वादिमिश्रानवधिकातिशयापरिमितगुणोदारं निखिलहेयप्रत्यनीकं स्वरूपं प्रतिपादयतीति, न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषप्रसङ्ग इति ।

अत्रोदयनाचार्यैरीश्वरसाधने नवानुमानानि कुसुमाञ्जलौ दर्शितानि ।

'कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविद्व्ययः' ॥

इति । अत्र कार्यादिपदानि भावप्रधानानि । तानि चैवं व्याख्यातानि । आयोजनं सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म । धृतिर्धारणं गुरुत्ववतो ब्रह्माण्डादेः पतनाभावः । आदिपदाद् ब्रह्माण्डादेर्नाशः । पदं घटादिसंप्रदायव्यवहारः । घटादिपदप्रयोगो वा । प्रत्ययो वेदजन्यं धर्मादिज्ञानम् । श्रुतिर्वेदः । वाक्यं पदसमूहः । संख्याविशेषः सर्गादौ परमाणुनिष्ठद्वित्वादिसंख्याजन्यं परिमाणमित्यादि । प्रयोगास्तु क्षित्यादिकं कर्तृजन्यं कार्यत्वाद् घटवत् । अन्ये तु जन्यत्वादित्यपि प्रयुञ्जते । तथा, क्षितिः, उपादानगोचरापरोक्षज्ञानोपायेच्छा तादृशकृतिजन्या, ज्ञानजन्या, इच्छाजन्या, कृतिजन्या वा, जन्यत्वाद् घटादिवदित्यपि । पूर्वोक्तं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वाद् अस्मदादिशरीरजन्यक्रियावत् । उक्ता धृतिः,

रश्मिः ।

स्तदभावादित्यर्थः । **कार्य**मिति हेतुगर्भं विशेषणमिदं, कार्यत्वादित्यर्थः । **अप्रसिद्धे**त्यादि तादृशस्य कर्तुरप्रसिद्धत्वाज् जगतो विशेषणं कार्यं तदप्यप्रसिद्धमित्यर्थः । **दृष्टान्तस्ये**ति घटादेरित्यर्थः । तथा च दृष्टान्ताभाव इति भावः । नैयायिकानुमानानि सांख्यशास्त्रपराहतानीति वदन्तः सिद्धमाहुः **अतो दर्शने**त्यादि । दर्शनं सांख्यशास्त्रम् । **न प्रमाणान्तरे**ति शब्दादन्यत्प्रमाणं प्रमाणान्तरं ततोवसितं निश्चितं वस्तु ब्रह्माख्यं तत्साधर्म्यं कर्तृत्वादिना तत्प्रयुक्तो दोषः ज्ञानिनामपि श्रवणमात्रेण पातित्यं तस्य प्रसङ्गः ।

इत्यादीति इत्यादि यथा स्यात्तथाव्याख्यातानि इति पूर्वेणान्वयः । तेन पदव्याख्यानत्वात् हेतुसमुदायपतितस्यायोजनस्य पक्षत्वेपि न क्षतिः । अन्ये त्वायोजनं कर्मेत्याहुः तेन न प्रायपाठविरोधः । **गोपीनाथमौनी** तु परमाणुः अपरोक्षज्ञानचिकीर्षाकृतिविषयः कार्यात् कपालवत् इति यथाश्रुतं व्याचक्रे । अत्र हेतुतावच्छेदकसंबन्धः समवायः । उक्तानुमाने साधारण्यं मन्यमानानां विजातीयद्रव्यसमूहस्य पक्षत्वे पूर्वोक्तरीत्या कर्त्रैक्यदौर्घट्यादेकैकं द्रव्यं पक्षत्वेन प्रयुञ्जानानां च मतमाहुः **अन्ये त्वि**त्यादि । जन्यत्वं जननशालित्वं तच्च ध्वंसप्रतियोगित्वशालित्वं स्वीकृतं चिकीर्षासत्त्वात् अंशतः साधारणत्वमतो जन्यत्वादित्यपि प्रयुञ्जते, ध्वंसस्य जन्यत्वात् तथाच ध्वंसे साधारणत्ववारणाय प्रयुञ्जत इत्यर्थः । अस्वरसस्तु पक्षे ध्वंसाप्रवेशः । तथात्वे सति पक्षे पक्षतावच्छेदकध्वंसाप्रवेशादाश्रयासिद्धमनुमानमिति । **उपादाने**त्यादि उपादानविषयकं यदपरोक्षज्ञानं उपायेच्छा उपादानविषयिणी कृतिश्च तज्जन्येत्यर्थः । कार्यमात्रं प्रति ज्ञानत्वेनेच्छात्वेन कृतित्वेनान्वयव्यतिरेकाभ्यां पृथक्कारणत्वं यौगपद्यासंभवादित्याशयेनाहुः **ज्ञानजन्ये**त्यादि । **इत्यपी**ति प्रयुञ्जत इत्यन्वयः । **पूर्वोक्त**मिति सर्गाद्यकालिकद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकमित्यर्थः । **उक्ते**ति गुरुत्ववद्ब्रह्माण्डादिपतनाभावात्मिकेत्यर्थः । **पूर्वोक्त**मिति वेदजन्यधर्मादिज्ञानरूपमित्यर्थः ।

भाष्यप्रकाशः।

चेतनप्रयत्नपूर्विका धृतित्वाद् वियति विहङ्गमधृतिवत्। ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत्। उक्तव्यवहारः स्वतन्त्रप्रयोज्यः, व्यवहारत्वाद् आधुनिकलिप्यादिव्यवहारवत्। पूर्वोक्तं ज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत्। वेदः पौरुषेयो वेदत्वाद् यन्नैवं तन्नैवम्, आकाशवत्। वेदः पौरुषेयो वाक्यत्वाद् भारतादिवत्। द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणकपालद्वयारब्धघटपरिमाणवदिति। अत्र प्रथमे प्रयोगे कर्तृजन्यत्वं तु स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमददृष्टाद्वारकजन्यत्वम्। अत्राददृष्टाद्वारकेतिविशेषणान्न जीवात्मनिरूपितादृष्टद्वारकजन्यत्वेन सिद्धसाधनमर्थान्तरं वा। जीवानां क्षित्याद्युपादानीभूतपरमाण्वादिगोचरापरोक्षज्ञानाभावेन तज्जन्यत्वे बाधान्न तैरपि तथा। नच क्षितिघटादिसाधारणस्यैकस्य साध्यस्याभावेन स्वपदार्थाननुगमात् कथं व्याप्तिग्रह इति वाच्यम्। स्वपदार्थाननुगमस्यादोषत्वात्। अन्यथेच्छादिना ज्ञाना-

रश्मिः।

परिमाणेत्यादि परिमाणं च प्रचयश्च परिमाणप्रचयौ ताभ्यामजन्यत्वे। प्रचयः शिथिलसंयोगः तज्जन्यं परिमाणं तूलकादौ। एवं च स्थलभेदेन परिमाणप्रचयसंख्याभिः परिमाणं जन्यते। कार्यत्वं प्रागभावप्रतियोगित्वम्। एवं सति पक्षे ध्वंसे ध्वंसप्रतियोगित्वशालित्वरूपं जन्यत्वाभावेन साध्याभाववति पक्षे तस्य लिङ्गस्य परिमाणस्य स्वोत्कृष्टपरिमाणजनकत्वनियमादेतादृशं परिमाणं नाणुपरिमाणजन्यं किंतु संख्याजन्यमित्याशयेन दृष्टान्तमाहुः **तुल्यपरिमाणे**त्यादि। तथाच तादृशपरिमाणं कपालपरिमाणादुत्कृष्टत्वाभावात्संख्याजन्यमिति भावः। **इती**ति एतस्याग्रे आश्रये सिद्धे द्व्यणुकपरिमाणजनिका संख्या अपेक्षाबुद्धिजन्या, एकत्वान्यसंख्यात्वात्, अयमेकोऽयमेक इमौ द्वौ इति द्वित्वसंख्यावदित्यनुमानेऽस्मदाद्यपेक्षाबुद्धिजन्यत्वबाधात्तदाश्रयत्वेनेश्वरसिद्धिरित्येतावती त्रुटिरत्रास्ति। तेन परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वादित्यनुमानेनेश्वरासिद्धावपि न क्षतिः। न च द्व्यणुकपरिमाणं परिमाणजन्यमेवास्त्विति वाच्यम्। द्व्यणुकपरिमाणं न परिमाणजन्यं, अणुपरिमाणत्वात् परमाणुपरिमाणवदित्यनुमानेन तस्य परिमाणाजन्यत्वादित्यर्थः। **विशेषणा**दिति जन्यत्वविशेषणादित्यर्थः। **जीवे**ति जीवश्चोपास्यासिद्धात्मा तन्निरूपितेत्यादिः। **अर्थान्तरं वे**ति ईश्वरसाधने यतमानस्य जीवसिद्ध्यार्थान्तरमित्यर्थः। अत्र ज्ञानलक्षणासामान्यलक्षणायोगजधर्मैर्यत्किंचिदुपादानगोचरत्वविवक्षणेन च तादृशज्ञानादिमतां जीवानां कर्तृत्वान्न स्वोपादानेत्यादिविशेषणेन तद्धेतुत्वनिवृत्तिः। स्वोपादानेत्यादिविशेषणप्रयोजनमाह **जीवाना**मित्यादि। **तथे**ति। सिद्धसाधनमर्थान्तरं वेत्यर्थः। मीमांसकस्यानादिसृष्टिवादित्वात् तद्वारणायेदमुक्तम्। **अभावेने**ति घटादीनां कुलालादिकर्तृकत्वस्य प्रत्यक्षात्। स्वपदार्थाननुगमात्। स्वपदेन क्षित्यादिसंग्रहे दृष्टान्ते साध्यस्याभावेन घटादिसंग्रहे तु पक्षे तदभावेन पक्षनिष्ठात्यन्ताभावप्रतियोगिनः स्वोपादानेत्यादिसाध्यस्य हेतुः कार्यत्वमित्यनुपसंहारिकार्यत्वम्। तत्फलं च व्याप्तिज्ञानप्रतिबन्ध इति कथं व्याप्तिग्रह इत्यर्थः। न च तद्वन्निष्ठात्यन्ताभावप्रतियोगिसाध्यकादित्वमनुपसंहारित्वम्। एवं च स्वपदेन घटादिग्रहवेलायां पक्षस्य साध्यत्वाभावेन कथं तद्वन्निष्ठत्वमत्यन्ताभावस्येति शङ्क्यम्। स्वपदेन क्षित्यादिसंग्रहे तद्वत्त्वसत्त्वादिति। **अदोषत्वा**दिति इच्छादिना ज्ञानानुमाने यो यदिच्छावान् स तज्ज्ञानवानित्येवं व्याप्तिग्रहे यत्तत्पदाभ्यां विवक्षितमेव गृह्यते तदेवात्र स्वपदेनोक्तमिति प्रातिस्विकरूपेण व्याप्त्यग्रहेऽपि विवक्षितत्वेन रूपेणानुगमाददोषत्वादित्यर्थः। **अन्यथे**त्यादि तस्य दोषत्वे, अयं

भाष्यप्रकाशः ।

द्यनुमानं न स्यात् । स्वविशेष्यकस्वत्वप्रकारकज्ञानत्वादिनैव तत्र कार्यकारणभावात् । अत्र च सकर्तृकत्वादिसाध्यकानुमाने कर्तृत्वेनैव कारणता, ज्ञानजन्यादिसाधके च ज्ञानत्वादिना । एवं कार्यतापि कार्यत्वेन जन्यत्वेन च । नच शरीरगौरवेणाप्रयोजकत्वं शङ्क्यम् । अवच्छेदककोटौ घटत्वादीनां प्रवेशे आनन्त्यगौरवाद्, ध्वंसस्य जन्यत्वेन तस्य च जन्याभावत्वेनावच्छेदकतया प्रवेशे शरीरगौरवाच्च । एवं तु विवक्षितविवेके जन्याभावत्वैकदेशस्य जन्यत्वस्यैव प्रवेश इति शरीरलाघवात् सामान्यलाघवादेकत्वलाघवात् कल्पनालाघवादुपस्थितिलाघवाच्च जन्यत्वेनैव कार्यता, न घटत्वादिना । कार्यत्वं च स्वसमवायिजन्यताख्येन परंपरासंबन्धेन कृतित्वमेवेति, न तत्रापि गौरवम् । नच विशिष्यान्वयव्यतिरेकाभ्यां घटत्वकुलालत्वादिना विशिष्य-कार्यकारणभावस्यावश्यकत्वात् सर्वमेतद्विरुद्धमिति वाच्यम् । कार्यमात्रवृत्तीनां जातीनां कार्य-तावच्छेदकत्वमिति सिद्धान्तसमुद्घोषात् । नचाङ्कुरादौ हेतोर्विपक्षगामित्वेनानैकान्तिकत्वं शङ्क्यम् ।

रश्मिः ।

स्वज्ञानवान् स्वेच्छावत्त्वात् देवदत्तवदित्यनुमानं न स्यादित्यर्थः । आदिशब्देन स्वेच्छावान् स्वयत्नाद् देवदत्तवत् । **स्वविशेष्यके**त्यादि आदिना स्वविशेष्यकस्वत्वप्रकारकेच्छात्वतादृशयत्नत्वे ग्राह्ये । अन्ये त्वेतद्दोषभिया स्वपदरहितं साध्यमङ्गीकुर्वन्ति तदुक्तं **अत्रे**त्यादि । पूर्वोक्तानुमानद्वयमध्य इत्यर्थः । सकर्तृकत्वं पर्यायत्वेनादिर्यस्य कर्तृजन्यत्वस्य तदादिसाध्यमस्मिन् अनुमाने । द्वितीयानुमान आहुः **ज्ञानजन्यादी**ति । आदिना इच्छाजन्या कृतिजन्येति साध्यद्वयम् । **एवमि**ति कारणतावदित्यर्थः । नन्वेवं सामान्यतः कार्यकारणभावे कार्यत्वं कृतिसाध्यत्वरूपं प्रागभावप्रतियोगित्वरूपं वा । जन्यत्वं जननशालित्वरूपं च कार्यतावच्छेदकद्वयं शरीरगौरवग्रस्तं कृतिसाध्यत्वस्य प्रागभावप्रतियोगित्वरूपत्वात् । जननशालित्वस्य ध्वंसप्रतियोगित्वशालित्वरूपत्वात् । कम्बुग्रीवादिमत्त्वरूपघटत्वेन कार्यतायां लाघव-मित्याशङ्क्य निराकुर्वन्ति **न च शरीरे**त्यादि । **आनन्त्यगौरवा**दिति घटत्वपटत्वादीनामानन्त्यात् कार्यतावच्छेदकानन्त्येनानन्त्यगौरवादित्यर्थः । अन्यदपि साध्य आह **ध्वंसस्ये**त्यादि । **तस्य चे**ति ध्वंसस्य चेत्यर्थः । **अवच्छेदकतये**ति साध्यतावच्छेदकतया । **एवं त्वि**ति जन्यत्वेन रूपेण विव-क्षितस्य हेतोर्विवरण इत्यर्थः । **विवक्षिते**ति कार्यता कार्यत्वेनैव चेत्तर्हि पूर्वोक्तसाधारण्यं, तन्निवृत्त्यर्थं जन्यत्वेनैव कार्यता तर्ह्याश्रयासिद्धिः पूर्वोक्तेति तदुभयनिवृत्तये कार्यता कार्यत्वजन्यत्वान्यतररूपेण विवक्षितेति विवक्षितविवेकस्तस्मिन् । **शरीरलाघवा**दित्यादि कार्यताव्यवच्छेदकशरीरलाघवात् कृतित्वेन जन्यत्वेन कार्यत्वेन च कार्यकारणभावे यत्र जन्यत्वं कार्यत्वं च तत्र कृतित्वमिति सामान्य-व्याप्तिलाघवाद् घटत्वावच्छेदकानन्त्यापेक्षया सामान्यावच्छेदकैकत्वे लाघवादित्यर्थः । कार्यत्वस्य शरीरगौरवं परिहरन्ति **कार्यत्वं चे**त्यादि । स्वं कृतिस्तत्समवायी-आत्मा तज्जन्यत्वं यथा कार्यस्य तथा कृतेरपीति तादृशेन परंपरासंबन्धेनेत्यर्थः । **विरुद्ध**मिति अनावश्यकत्वादसंगतमित्यर्थः । **जातीना**-मिति सामान्यानां धर्माणामित्यर्थः । **सिद्धान्ते**त्यादि तथा च कार्यत्वेन कर्तृत्वेन सामान्यकार्य-कारणभावानङ्गीकारे कार्यमात्रवृत्तिमहापृथिवीत्वस्य कार्यतानवच्छेदकत्वप्रसङ्गेन सैद्धान्तिकनियम-भङ्गापत्तिरिति तदभावाय सोऽप्यावश्यक इत्यर्थः । **विपक्षगामित्वेने**त्यादि हेतोरङ्कुरादौ साध्या-भाववद्गामित्वेन । क्षितिः कर्त्रजन्या कार्यत्वादङ्कुरादिवदिति विरुद्धगर्भितसाधारणानैकान्तिकत्वमित्यर्थः ।

भाष्यप्रकाशः।

तत्र साध्यसंदेहस्यानन्याहितत्वेन तस्य पक्षसमत्वात्। नच शरीरजन्यत्वस्योपाधेर्विद्यमानत्वाच्छरीराजन्यत्वस्य प्रतिसाधनस्य सत्त्वाच्च साध्यसंदेहस्यान्याहितत्वेनानैकान्तिकत्वं सिद्धमिति शङ्क्यम्। कर्त्रादिजन्यतायामपि गुरुभूतस्य शरीरजन्यत्वस्यानवच्छेदकत्वाल्लघुभूतस्य जन्यत्वमात्रस्यैवावच्छेदकत्वेन तस्य च साधनव्यापकत्वेनानुपाधित्वे हेतोरदुष्टत्वात्। एवं च कर्त्रादिजन्यतायामिव शरीरजन्यतायामपि जन्यत्वस्यैवावच्छेदकत्वादीश्वरे नित्यज्ञानादिकमिव नित्यशरीरवत्त्वस्याप्यङ्गीकारेण प्रतिसाधनदोषस्याप्यभावात्। अनुमानं च, क्षित्यादिकं शरीरजन्यं जन्यत्वाद् घटवत्। ईश्वरः शरीरी कर्तृत्वात् कुलालवदिति। अनुकूलतर्कश्चात्र कर्तृत्वजन्यत्वाभ्यामिव शरीरित्वजन्यत्वाभ्यामपि पूर्वोक्तयुक्तितुल्ययुक्तिकः कार्यकारणभाव एव। श्रुतिश्च, 'यतो वा इमानि भूतानि जायन्ते' इत्यादि, 'सहस्रशीर्षा पुरुषः' इत्यादि, 'आकाशशरीरं ब्रह्म' इत्यादि च। श्रुतीनां चानुकूलतर्कविधया स्वतन्त्रतया च ब्रह्मणि प्रामाण्यमिति नवीनमतम्।

सांप्रदायिकमते शरीरस्य कुलालशरीरत्वादिनैव कारणत्वं, नतु शरीरत्वेनेतीश्वरस्यानित्यं शरीरं लोकानुग्रहेण व्यवहारप्रवर्तनार्थम्। अतोऽस्मदाद्यदृष्टजनिते रामकृष्णादिनामके शरीरे भूतावेशन्यायेनावेशः। कार्यकरणानन्तरं च त्याग इति।

अभिनवमते तु महेश्वरस्य विश्वमेव शरीरम्। तच्च नित्यानित्यपुञ्जघटितमित्यनित्यांशविरामेऽपि नित्यांशमादाय नित्यमेव। आकाशात्मकं च नित्यमेव। रामकृष्णादिनामकं त्वाविर्भावतिरोभावशालि भक्तानुग्रहेण कदाचित् क्वचिदाविर्भवति तिरोभवति च। अत एव तत्त्ववादिभिर्मूर्तमपि तन्नित्यं विभु वेत्यङ्गीक्रियते। सर्वत्र सर्वदा तथाभूतभक्तभावनया भक्तैः साक्षात्क्रियमाणत्वात्। तादृशसाक्षात्काराणां प्रमात्वे संभवति भ्रमत्वकल्पनस्यान्याय्यत्वात्। तदुक्तम्, औत्सर्गिकं धियां प्रमात्वमिति। विश्वात्मकं तु योगिप्रत्यक्षगम्यमपि विश्वरूपदर्शनादिषु श्रूयत

रश्मिः।

साधारणानैकान्तिकत्वमात्रं वा। **तत्रे**त्यादि विपक्षे अङ्कुरादौ कर्तृजन्यत्वसंदेहस्य कर्त्रनुपलम्भमात्रोत्पन्नतयोपाधिसत्प्रतिपक्षादिदोषानाहितत्वेनाङ्कुरादेः पक्षसमत्वेन पक्षानतिरेकात्। **उपाधे**रिति घटादौ कर्तृजन्यत्वसाध्यवति शरीरजन्यत्वाभावाभावात्साध्यव्यापकत्वं क्षित्यादौ च साधनवति शरीरजन्यत्वाभाव इति साधनाव्यापकत्वं चात उपाधेरित्यर्थः। **प्रतिसाधनस्ये**ति क्षितिः कर्त्रजन्या शरीराजन्यत्वात् अङ्कुरादिवद् इति प्रतिसाधनस्येत्यर्थः। **अनैकान्तिकत्व**मिति अङ्कुरादेः पक्षसमत्वाभावेन तत्र साधारणानैकान्तिकत्वमित्यर्थः। **गुरुभूतस्ये**ति पदार्थान्तरप्रवेशेन गुरुभूतस्येत्यर्थः। **तस्य चे**त्यादि जन्यत्वस्य च जन्यत्वरूपसाधनव्यापकत्वेनेत्यर्थः। **एवं चे**ति लाघवाज्जन्यत्वस्यैवावच्छेदकत्वे सतीत्यर्थः। **अभावा**दिति तथाचैवं रामानुजोक्तं दूषणमपि निरस्तं भवतीत्यर्थः। रामानुजाचार्यैः सांख्यमवलम्ब्य दत्तं सत्कर्मसंबन्धिरूपं दूषणं परिहरन्ति **श्रुतिश्चे**त्यादि। **लोकानुग्रहे**णेति लोकानुसारेणेत्यर्थः। **रामकृष्णादी**ति आदिपदेन महाक्षितिजनकत्वाय चतुर्मुखादिशरीरस्य संग्रहः।

उक्ते मते उक्तानां शरीराणां जन्यत्वादशरीरस्येश्वरस्य तदकर्तृत्वापत्त्या व्यवहारप्रवर्तकत्वासंभवात् सांप्रदायिकमतं विहायाभिनवमतं वदन्ति **अभिनवे**त्यादि। **तत्त्ववादिभि**रिति कृष्णानुसारिभिः 'तत्त्वान्युक्तानि मे नव' इत्येकादशे। 'भूमिरापोऽनलः' इति गीतायाम्। **औत्सर्गिक**-

भाष्यप्रकाशः ।

एव सहस्रशः । एवं श्रुत्यादिभिः शरीरेऽङ्गीकृते तदनुसारिसकर्तृकत्वानुमानं निर्दुष्टमेव । एवमेके- नेश्वरेण सकलक्षित्यादिकार्यसंभवे सति प्रमाणाभावाद् गौरवाच्च नानेकेश्वरसिद्धिः । किंचानेके- श्वराङ्गीकारे तेषामैकमत्यं वैमत्यं वा स्यात् । तत्राद्ये स्वातन्त्र्याभावादैश्वर्यहानिः । द्वितीये तु कार्यासिद्धिरिति कार्यदर्शनाद्, 'एकमेवाद्वितीयं ब्रह्म' इत्यादिश्रुतिभ्यस्तादृशैः पुराणैश्चैकस्यैव सिद्धि- रिति न पूर्वोक्तं किमपि दूषणम् । एवमेकेश्वरसिद्धौ कर्मत्वादिलिङ्गकान्यप्यनुमानानि तमेकमेव साधयन्तीति न कोऽपि क्वापि दोष इति **मैथिलभवदेवमिश्राः** ।

ज्ञानेन्द्रभिक्षुस्तु, बुद्धिप्रभृतिकार्यम्, उपादानगोचरप्रत्यक्षजन्यं कार्यत्वाद् घटादिवत् । यदि चोपादानगोचरापरोक्षवृत्तेरेव कार्यहेतुत्वं लाघवात् । न तु चैतन्यस्य गौरवादिति । तदा तु

रश्मिः ।

मिति धियां ज्ञानानां प्रमात्वमौत्सर्गिकं स्वाभाविकं भ्रमत्वादि त्वनौत्सर्गिकमित्यर्थः । पुन्नान्मदशक्ति- वददृष्टपुञ्जात्क्षित्यादिकार्याङ्गीकारे बाधकमाह **किं चानेके**त्यादि । **साधयन्ती**ति । न चान्तिमस्ये- श्वरासाधकत्वं शङ्क्यम् । तेन द्व्यणुकपरिमाणस्य संख्याजन्यत्वे सिद्धे द्व्यणुकपरिमाणजनिका संख्याऽपेक्षा- बुद्धिजन्या एकत्वान्यसंख्यात्वात् । अयमेकः अयमेकः इमौ द्वौ इति द्वित्वसंख्यावत् इत्यस्मदाद्यपेक्षा- बुद्धिजन्यत्वबाधात्तदाश्रयत्वेनेश्वरसिद्धेः । न च द्व्यणुकपरिमाणं परिमाणजन्यमेवास्तु इति वाच्यम् । द्व्यणुकपरिमाणं न परिमाणजन्यं अणुपरिमाणत्वात् परमाणुपरिमाणवदित्यनुमानेन तस्य परिमाणाजन्य- त्वात् । **मैथिलभवदेवमिश्रा** इति । एवमेतेषु मतेषु कार्यत्वलिङ्गकानुमाने शरीराजन्यत्वस्य दूषणस्य प्रबलत्वात्तत्परिहारायेश्वरे सशरीरत्वमावश्यकम् । शरीरस्यापि नित्यानित्यविकल्पकृतदोषपरिहाराय श्रुत्यालम्बनमावश्यकम् । अन्यथा नैयायिकादिभिरपि न तेनेश्वरसिद्धिरिति बोध्यम् । **उपादाने**त्यादि प्रकृते उपादानं प्रकृत्यंशरजःसत्त्वं तत्र तद्विषयकं प्रत्यक्षं यस्य तज्जन्यमित्यर्थः । तादृशप्रत्यक्षाश्रयत्वेने- श्वरसिद्धिरिति भावः । **यदि चे**ति उपादानगोचरापरोक्षं च तद्वृत्तिः कर्मधारयः । **चैतन्यस्ये**ति उक्तप्रत्यक्षाश्रयत्वेनाक्षेप्यस्य बहुव्रीहिप्राप्तस्य वा । **गौरवा**दिति उपादानगोचरप्रत्यक्षाश्रयत्वस्य साध्यतावच्छेदकत्वे शरीरगौरवादित्यर्थः । अत्र विभाव्यते इति शेषः । तथा चानेनानुमानेनोपादान- गोचरप्रत्यक्षकृतिसिद्धेर्नेश्वरसिद्धिरिति भावः । **कार्यहेतुत्व**मिति कार्यं कार्यत्वं हेतुर्यस्येति तथोक्तम् । कार्यायोजनेति कारिकया कार्यपदं दत्तम् । यद्यपि तादृशप्रत्यक्षाश्रयत्वेनेश्वरसिद्धिरनुमानान्तरेण भवति तथापि प्रकारान्तरेण साधनायानुमानान्तरमाह **तदा त्वि**त्यादि । न च स्वरूपासिद्धिरत्रेति वाच्यम् । उपादानगोचरप्रत्यक्षं साधिष्ठानं गुणत्वाद् रूपादिवदित्यनुमानेन तदधिष्ठानसिद्धौ तादृशाधिष्ठानं जन्यं कार्यत्वात् घटवदित्यनुमानेन तद्वारणसंभवादेवं चोपादानगोचरप्रत्यक्षपदं तादृशाधिष्ठाने गौणम् । उपादानगोचरप्रत्यक्षाधिष्ठानवृत्तीच्छाकृतिमज्जन्यत्वादिति हेतुः । वृत्तिः पदार्थान्तररूपा नात्र । नन्वेवमपि प्रकृतिसिद्ध्यासङ्गपुरुषे व्याप्यत्वाभिमतस्य पक्षेऽभावः स्वरूपासिद्धिः । यथा ह्रदो द्रव्यं धूमादित्यत्र ह्रदे धूमाभावः । 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतोक्तेः स्वरूपासिद्धिस्त- दवस्थेति चेन्न, उपादानगोचरप्रत्यक्षवृत्तीच्छाकृतिमत्त्वस्य समवायसमवाय्युपरागान्यतरसंबन्धेन विवक्षितत्वात् । न चैवमपीश्वरे हेतोः साध्याभाववद्वृत्तित्वेन साधारण्यमिति वाच्यम् । स्वरूपासिद्धि- निवृत्तिमात्रप्रयोजनकत्वेन वृत्त्यनियामकसंबन्धस्य तत्र साधारण्यसंपादकत्वाभावात् । व्याप्तिग्रहवेलायां

अन्ये पुनः श्रुत्यनुवादकमाहुः। सर्वज्ञत्वाय श्रुत्यनुसार्यनुमानं च ब्रह्मणि प्रमाणमिति।

तत्तु, 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति केवलोपनिषद्वेद्यत्वादुपेक्ष्यम्।

भाष्यप्रकाशः।

बुद्ध्यादीनि सकारणकानि, उपादानगोचरप्रत्यक्षवृत्तीच्छाकृतिमज्जन्यत्वाद् घटादिवदित्येवं कारणीभूतसत्त्वस्य सिद्ध्यनन्तरं, तत्कारणसत्त्वं परस्य भोग्यम्, इच्छादिमत्त्वाज्जीवोपाधिवदिति कारणसत्त्वभोक्तृतयेश्वरोऽनुमेय इत्याह।

एवं चाभिनवोक्तरीत्याऽनुमानस्य श्रुत्यनुसारित्वेन प्रामाण्याद् व्यासचरणानां च श्रुत्यर्थनिर्णयाय प्रवृत्तत्वात् सूत्रमनुमानोपष्टम्भकश्रुत्यनुवादकम्। अनुमानस्य ब्रह्मणि प्रामाण्येऽनङ्गीकृते, यतो वेत्यादिश्रुतौ केवलं कर्तृत्वस्योक्तत्वादुपादानादिगोचरापरोक्षज्ञानवत्त्वस्यासिद्धेः। अङ्गीकृते तु तस्मिन् कर्तृत्वस्योक्तज्ञानव्याप्तत्वात् सुखेन सर्वज्ञत्वस्य सिद्धेरिति।

द्वितीयं मतमनुवदन्ति **अन्य** इत्यादि। तदुभयमेकहेलया दूषयन्ति **तत्त्वि**त्यादि। अयमर्थः। बृहदारण्यके शाकल्यब्राह्मणे उदानप्रतिष्ठोत्तरश्रवणानन्तरं तूष्णींभूते शाकल्ये तं प्रति याज्ञवल्क्येन, 'स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्जते न व्यथत इत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ पुरुषाः स यस्तान् पुरुषान् व्युदुह्य प्रत्युह्यात्यक्रामीत् तं त्वौपनिषदं पुरुषं पृच्छामि' इति वाक्ये मूर्तामूर्तब्राह्मणवदेतावत्तादिनिषेधपूर्वकं

रश्मिः।

गौणमुख्यन्यायेन समवायस्यैव ग्रहणात्। **इत्याहे**ति सांख्यादिमतमवलम्ब्याहेत्यर्थः। नैयायिकस्यान्येषां च मतेन भाष्ये यत्सिद्धं तत्सिद्धान्ते यादृक् तादृशं वक्तुमाहुः **एवं चे**ति। **अयमर्थः**। भाष्ये **केचि**दिति नैयायिकमतमुक्त्वान्येषां मतोक्तौ संगत्यर्थं प्रकाश एवं चेत्युक्तम्। शुष्कानुमानिकपक्षस्य वेदान्तानुपयोगस्य द्वितीयाध्यायद्वितीयपादे वक्ष्यमाणत्वात्। तथा च एवं चेत्यस्य शुष्कानुमानोक्तौ सत्यां चेत्यर्थः। वेदान्तापेक्षायामन्यमतेऽभिनवोक्तरीत्या श्रुतिप्रवेशाय हेतुभाष्यस्य श्रुत्यनुसार्यनुमानमित्यादेरर्थः **प्रामाण्या**दित्यन्तेन प्रकाशेनोक्तः। इतिर्हेतौ व्याकृतः। **श्रुत्यनुवादक**मिति भाष्यं तु व्यासेत्यादिप्रकाशेन व्याकृतम्। **आहु**रित्यत्रान्वेति। **अनुमानस्ये**त्यादिप्रकाशेन **सर्वज्ञे**त्यादि भाष्यं व्याकृतम्। **कर्तृत्वस्ये**ति ईश्वरः उपादानादिगोचरापरोक्षज्ञानवान् कर्तृत्वात् कुलालवदित्येवं कर्तृत्वस्योक्तज्ञानव्याप्तत्वं तस्मात्। **उक्तज्ञाने**ति उपादानादिगोचरापरोक्षज्ञानवान् कर्तृत्वात् इत्येवमुक्तज्ञानव्याप्तत्वात्। **इति द्वितीय**मिति एवंप्रकारकं द्वितीयमित्यर्थः। **एकहेलये**ति एकेनावज्ञानेन विलासेन वेत्यर्थः। तदित्थं पूर्वोक्तेषु मतेषु कार्यत्वलिङ्गकानुमाने शरीराजन्यत्वस्य दूषणस्य प्रबलत्वात् तत्परिहारायेश्वरे सशरीरत्वमावश्यकम्। शरीरस्यापि नित्यानित्यविकल्पकृतदोषपरिहाराय श्रुत्यालम्बनमावश्यकम्, अन्यथा महानैयायिकादिभिरपि न तेनेश्वरसिद्धिरिति। अत उक्तं भाष्ये **उपेक्ष्य**मिति। **उदाने**त्यादि कस्मिन्नूदानः प्रतिष्ठितः इति समान इति उदानप्रतिष्ठोत्तरश्रवणानन्तरमित्यर्थः। अत्रापि समानोन्तर्यामिणि प्रतिष्ठितः सोऽप्यक्षर इत्यर्थस्योन्नेयत्वाद् ब्रह्मणः स्वरूपमाहेत्याशयेन व्याकुर्वन्ति **मूर्तामूर्ते**त्यादि। मूर्तामूर्तब्राह्मणे हि मूर्तामूर्ते ब्रह्मणो रूपे उक्त्वोच्यते 'अथात आदेशो नेति नेति' इति तत्र निषेधो 'द्वे वा व ब्रह्मणो रूपे' इति षष्ठ्या श्रावितस्य भेदस्य रूपद्वयनिराकरणे 'सर्वतः पाणिपादं तत्' इत्यादयो विरुध्येरन्। तथाच रूपद्वयं ब्रह्मैव न तु ब्रह्मण इति सिद्ध्यति। तद्वदत्रापि नेति नेत्यनेन

भाष्यप्रकाशः ।

करणाद्यग्राह्यो नित्योऽसङ्गो निर्दुःखः शारीराद्यानष्टौ पुरुषान् पृथिव्याद्यायतनेषु तत्तल्लोकेषु च विशेषेणोच्चैः स्थापयित्वा पुनस्तत उपसंहृत्य, योऽतिक्रान्तवानेतादृश उपनिषद्वेद्यः पुरुषः पृष्टः । तत्रागृह्यपदे यदि केवलेन्द्रियाग्राह्यत्वं विवक्षितं भवेत् तदानुमानादिनापि वेद्यत्वादौपनिषदपदमनतिप्रयोजनं स्यादतस्तत्र यावत्प्रमाणागोचरत्वमेवास्थेयम् । तथासत्यौपनिषदपदे(न) प्रतिप्रसव एवोपनिषदां सिद्ध्यतीति ब्रह्मणः केवलोपनिषद्वेद्यत्वमेव श्रुतिविवक्षितम् ।

यत्तु भैक्षवे, उपनिषन्मूलप्रमाणकमुपनिषन्महातात्पर्यविषयं वा औपनिषदं, 'सर्वे वेदा यत्पदमामनन्ति', 'वेदैश्च सर्वैरहमेव वेद्यः' इतिश्रुतिस्मृतिभ्यामित्युक्तम् । तस्मिन्नपि पक्षे अगृह्यपदोक्तप्रतिषेधस्य तुल्यत्वान्नेतः कोऽपि विशेषः सिद्ध्यति । किंतूक्तश्रुतिस्मृत्योर्मध्ये वेदपदात् पूर्वकाण्डवेद्यत्वमात्रमधिकमायातीत्यगृह्यपदविरोधः पूर्ववदेव । नचाधिकागमने केवलोपनिषद्वेद्यत्वहानिः शङ्क्या । 'सर्वे वेदाः' इतिवाक्यस्याप्यौपनिषदत्वेन 'मनसैवानुद्रष्टव्य' इत्युक्तमनोवेद्यत्ववत् सर्ववेदवेद्यत्वस्याप्युपनिषन्मात्रसिद्धत्वात् । एवं च मनसोऽपि श्रुत्युक्तसाधनैः शुद्धत्व एव दर्शनकरणत्वं, वेदानामपि वेदान्तविज्ञानसुनिश्चितार्थानामेव वेदनकरणत्वमित्युपनिषद एव मूलप्रमाणत्वमिति, न केवलोपनिषद्वेद्यत्वहानिः । अतः प्रमाणान्तरावेद्यत्वात् सूत्रस्यानुमानत्वकथनमप्रयोजकम् । श्रुतिविचारार्थमेव सूत्रकृतः प्रवृत्तेरिति । एतदेवाभिप्रेत्य भट्टभास्करादिभिरनुमानानि दूषितानीति युक्त्या विचारे ईश्वरपक्षकं पूर्वोक्तमितरव्यतिरिक्तसाध्यकानुमानमप्याश्रयासिद्धमेव ।

अथ नव्याभिनववादिमतमालम्ब्य शरीरिण ईश्वरस्य कर्तृत्वमङ्गीक्रियते तदापि नानुमानस्य श्रुत्यनुसारित्वम् । कर्तृत्वनिर्वाहकतयाज्ञानादिवच्छरीरस्यापि जगत्पूर्ववर्तिताया आवश्य-

रश्मिः ।

पूर्वोक्तैतावद्ब्रह्मनिषेधपूर्वकमित्यर्थः । **शारीराद्या**नित्यादि शारीरादित्यस्थवायुस्थचन्द्रस्थाग्निस्थछायामयाप्प्रतिष्ठपुत्रमयान्पुरुषान् पृथिवीरूपाकाशकामतेजस्तमोब्रेतोरूपेष्वायतनेषु 'पृथिव्येव यस्यायतनं रूपाण्येव यस्यायतनं' इत्यादिश्रुतिभिः तत्तल्लोकेषु चक्षूरूपेषु सर्वत्र चक्षुर्लोक इति श्रावणात् । अग्निर्लोक इत्यादिपाठे तु अग्न्यादिरूपेषु व्युदुह्य विशेषेणोच्चैः स्थापयित्वा प्रत्यूह्य पुनस्तत उपसंहृत्य अत्यक्रामीद्योऽतिक्रान्तवानित्यर्थः । अगृह्यः करणागोचर इति व्याख्यां दूषयितुमाहुः **तत्रागृह्ये**त्यादि । **तत्र याव**दिति अगृह्यपद इत्यर्थः । **तुल्यत्वा**दित्यादि केवलेन्द्रियाग्राह्यत्वपरत्वेन तुल्यत्वान्न शांकरव्याख्यानतः कोपि विशेषः सिद्ध्यतीत्यर्थः । **पूर्ववदे**वेति अनुमानादिवेद्यत्वेनौपनिषदमनतिप्रयोजनं स्यादतोगृह्यपदविरोध औपनिषदपदेनेति तादृशविरोधपराकरणायास्मदुक्त एवार्थ इत्यर्थः । श्रुतिस्मृत्योर्विरोधं सिद्धान्ते पराकुर्वन्ति **न चाधिके**त्यादि । **मनसैवे**त्यादि मनसैव भक्तिभावनादेरनु पश्चाद्धृदयादौ द्रष्टव्योऽयमर्थः । **अप्रयोजक**मिति शुष्कानुमानस्य तर्कत्वेपि वेदयुक्तित्वाभावेन मीमांसातर्कत्वे न तु प्रयोजकम् । **पूर्वोक्त**मिति वैशेषिकमतोपन्यासससमाप्तिस्थल उक्तम् । **आश्रयासिद्ध**मिति पृथ्वीत्ववदीश्वर इति पक्षे पृथिवीत्ववत्त्वरूपपक्षतावच्छेदकाभावात् । काञ्चनमय-

भाष्यप्रकाशः।

कत्वेन तदानींतनस्य तस्य नित्यानित्यपुञ्जात्मकविश्वरूपरूपताया वक्तुमशक्यत्वात्। नच नित्यांशमादाय सिद्धिः। तेषां नानात्वेन तेषु शरीरत्वस्य प्रत्येकपर्याप्त्या तद्धर्मैः सूक्ष्मत्वानवयवत्वादिभिर्जगत्करणप्रतिबन्धापत्तेः। नच नित्यपुञ्जात्मकमेव तदङ्गीकार्यमिति वाच्यम्। यस्य पृथिवी शरीरमित्यादौ पृथिव्यादिगतैकत्वव्याकोपात्। 'सर्वतः पाणिपादं तत्'इत्यादिविरोधापत्तेः। सृष्टिप्रकरणेषु सच्चिदानन्दातिरिक्ततदनुक्त्या तद्विरोधापत्तेश्च। अतो नव्यादिमतीयानुमानस्यापि न श्रुत्यनुसारित्वम्। एतेनैव भैक्षवमपि दत्तोत्तरम्। प्रथमानुमानस्य नैयायिकतुल्यकक्षत्वात्। द्वितीयेऽपि प्रयोगे यदालम्ब्य सत्त्वस्य कारणत्वेन सिद्धिः क्रियते तेषु प्रकरणेषु सत्त्वस्य सर्वकारणताया अनिश्चायितत्वेनानुमानस्याप्रयोजकत्वात्। नच स्मृत्या तत्परिहरणीयमिति वाच्यम्। श्रुतिविरुद्धायास्तस्या एवानादरणीयत्वात्। मैत्रायणीयश्रुतौ, 'तमो वा इदमग्र आसीदेकं तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयात्येतद्रूपं वै रजस्तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपम्' इत्येवं परप्रेरणेन रजसः सत्त्वस्य च भवनकथनात्। तृतीयेऽपि प्रयोगे सत्त्वस्य परभोग्यत्वेनोपाधित्वाङ्गीकारात् तदुत्पत्तेः पूर्वं परस्य निरुपाधिकत्वेनेच्छाद्यभावात् प्रेरणस्याप्यसंभवापत्तेः। नैयायिकादिवन्नित्यज्ञानेच्छादीनामीश्वरसमवेतत्वाङ्गीकारे शरीराभावप्रयुक्तदोषतादवस्थ्यात्, सांख्यादिमतालम्बनाडम्बरवैयर्थ्याच्च। अतः श्रुत्यनुसारित्वाभावान्नानुमानं ब्रह्मप्रमितिजननायालम्। नापि योगिप्रत्यक्षम्। 'विदूरकाष्ठाय मुहुः कुयोगिनाम्' इति द्वितीयस्कन्धवाक्यात्। 'यमेवैष वृणुते' इति, 'धातुः प्रसादात्'इति श्रुतेश्च। नच गीतोक्तविश्वरूपदर्शनादिविरोधः। तस्य मूलरूपत्वाभावात्। कालोऽस्मीति तत्रैव निर्धारणात्। तत्रापि, 'रूपं परं दर्शितमात्मयोगात्' इति वाक्येन तस्यापि भगवद्बलेनैव दर्शनेन योगस्याप्रयोजकत्वाच्च। उपपत्तेश्चेत्यादौ यदुपपत्त्युपन्यसनं, तदपि न ब्रह्मस्वरूपज्ञापकतया, किंतु हेत्वाभासैः परान्तरशङ्कानिरासकतयेति वक्ष्यते।

रश्मिः।

पर्वत इतिपक्षे काञ्चनमयत्ववत्। **अशक्यत्वा**दिति अनुत्पन्नतया तथात्वादित्यर्थः। **सिद्धि**रिति तदानींतनशरीरसिद्धिरित्यर्थः। **सूक्ष्मे**ति आदिशब्देनैक्यभ्रमजनकत्वम्। **नित्यपुञ्जात्मक**मिति। नतु प्रत्येकपर्याप्त्येत्यर्थः। एवं सति श्रुत्यनुसारित्वमुद्घोषयतस्तव शरीरत्वस्य प्रत्येकपर्याप्तिबोधकश्रुतिविरोध इत्याहुः **यस्य पृथिवी**त्यादि। **सच्चि**दित्यादि। एतदतिरिक्तशरीरानुक्त्येत्यर्थः। **नैयायिके**त्यादि बुद्धिप्रभृति कार्यं नोपादानगोचरप्रत्यक्षजन्यं कार्यत्वादङ्कुरवत्, इति साधारणविरुद्धत्वाभ्यां हेतोस्तथेत्यर्थः। **यदालम्ब्ये**ति सांख्यमालम्ब्येत्यर्थः। **अप्रयोजकत्वा**दिति निश्चितसर्वकारणताकसत्त्वातिरिक्तकारणसिद्ध्याप्रयोजकत्वादित्यर्थः। **स्मृत्ये**ति 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः' इति स्मृत्या। **तदुत्पत्ते**रिति सत्त्वोत्पत्तेरित्यर्थः। **इच्छाद्यभावा**दिति आदिना ज्ञानयत्नौ। **प्रेरणस्ये**ति सत्त्वप्रयोजकस्य तमसः प्रेरणस्येत्यर्थः। **द्वितीये**त्यादि तथाच 'अनागतमतीतं च' इत्यत्रापि ब्रह्मभिन्नमिति वाच्यमिति भावः। **कालोऽस्मी**ति श्वेताश्वतरे 'कालः स्वभावो नियतिर्यदृच्छा' इत्यत्राचिन्त्यत्वेनोक्तोऽस्मीति तात्पर्येण कालकर्मस्वभावशक्तिषु श्रीभागवतोक्तासु निवेशात्। ननु 'सदेव सोम्येदमग्र आसीत्' इत्यत्राद्वितीयत्वाय कालस्यापि ब्रह्मत्वसाधनेपि काल उपदेश इति धातुपाठाद्योग आवश्यकः सिद्धान्त इति कथमेवमिति चेत्तत्राहुः **तत्रापी**त्यादि। **अप्रयोजकत्वा**दिति उपदेशस्य शक्तिपरत्वेपि

भाष्यप्रकाशः ।

'आचारदर्शनात्' इति सूत्रं तु कर्मविषये, न तु ब्रह्मविषय इति न किंचिदेतत् । अतस्तदुपेक्ष्यमेव ।

ननु श्रुत्युक्तं सच्चिदानन्दात्मकं शरीरमङ्गीकृत्यानुमानदोषनिरासे दोषाभावात् कथमुपेक्ष्यत्वमित्यत आहुः **अनधीत्यादि** । तथाच सिद्धसाधनत्वाच्छ्रुत्युक्तसकलविशेषविषयकप्रमित्यजनकत्वाच्चाप्रामाण्यमित्यर्थः । ननु 'मन्तव्यः' इति श्रुत्या मननं विहितम् । तच्च युक्तिभिरनुचिन्तनम् । युक्तयश्चानुमानरूपा इति श्रुत्यनुकूलानुमानस्य प्रामाण्यं श्रुत्यैव सूच्यत इति कथं पूर्वोक्तमतस्योपेक्ष्यत्वमुच्यत इत्याशङ्कायामाहुः **मननेत्यादि** । तथाच मननादेरङ्गत्वबोधनादनुमानादेः सहकारित्वं न निवार्यते, किंतु करणत्वमतस्तदंशे उपेक्ष्यत्वम् नच सर्वज्ञत्वासिद्धिः । विपश्चित्त्वश्रुतेः 'यः सर्वज्ञः सर्ववित्' इति श्रुत्यन्तराच्च तत्सिद्धेरिति 'उपपत्तेश्च' इत्यादिसूत्रेष्वप्यत एव

रश्मिः ।

संभवेन मूलरूपत्वसाधनेऽप्रयोजकत्वात् । **अतस्तदिति** नैयायिकतुल्यत्वाद् भैक्षवमपीत्यर्थः । **शरीरमिति** आनन्दस्याकारसमर्पकत्वात्तथा । **सिद्धसाधनत्वादित्यादि** श्रुतिसिद्धानां साधनत्वाद्धेतुष्वनुमानानां च श्रुत्युक्तसकलविषयकप्रमित्यजनकत्वाच्चाप्रामाण्यमत् उपेक्ष्यत्वमित्यर्थः । इदं च लक्षणं वाक्यमात्रप्रामाण्यापेक्षं तेन गगनकुसुममित्यादौ वाक्येऽप्रमाणे नातिव्याप्तिः । तेनेश्वरसिद्ध्यधीनं वेदप्रामाण्यं वेदप्रामाण्याधीनेश्वरसिद्धिरित्यन्योन्याश्रयोपि व्याख्यातः । आप्तोक्तं वाक्यं प्रमाणमितिलक्षण एव तत्प्रसरात् । प्रमाणेन शब्देन श्रोत्रेण वानधिगतस्य स्वर्गादिसाधनत्वस्य यागादावर्थस्य गन्तृत्वमर्थविषयकप्रमाकरणत्वात् प्रापकत्वम् । न चैवं वैयाकरणव्युत्पत्तिविरोधः । प्रमीयते अनेनेति प्रमाणमिति करणे ल्युट् । ननु प्रमाकरणं प्रमाणमिति प्रसिद्धलक्षणं कुतो नादृतम् । अन्योन्याश्रयान्नादृतमिति चेद्धारणया वृत्त्यानुगमिष्यतीति चेन्न । तस्य व्याकरणादिप्रसिद्धत्वेऽपि 'परोक्षवादो वेदोयम्' इति 'परोक्षं च मम प्रियम्' इति च कथनादनधिगतार्थस्य परोक्षत्वात् । न च फलांशे परोक्षवादो यथा 'स्वर्गकामो यजेत' इत्यत्रात्मसुखमादाय स्वर्गपदेऽर्थ इति वाच्यम् । निबन्धटीकाया विष्णुस्वामिमतीयत्वाद् एतस्यैकादशसुबोधिनीमतत्वादोम् । **मननमित्यादीति** श्रुतौ श्रवणं नाम भगवद्वाचकपदवाक्यानां ब्रह्मणि शक्तितात्पर्यनिर्धारः । स च मनननिदिध्यासने विना न संभवतीति श्रवणाङ्गत्वं निदिध्यासनद्वारा मननस्येत्यर्थः । अथवा मनननिदिध्यासननिरूपितं श्रवणस्याङ्गत्वम् । स्मरणं हि मननं श्रुतस्य भवतीति श्रवणमननयोः कार्यकारणभावबोधकस्मर्यमाणसूत्रभाष्यात् । न तु मननमात्राङ्गत्वं श्रवणनिदिध्यासनयोरतो निदिध्यासनाङ्गं मननं न विरुद्धमित्यर्थः । न चैवं मननस्य निदिध्यासनाङ्गत्वमित्येवं भाष्येऽत्र तु मनननिदिध्यासनयोः श्रवणाङ्गत्वमितीति शङ्क्यम् । श्रवणानन्तरं मननं पुनश्च श्रवणं निदिध्यासनं चेत्यर्थद्वारा निदिध्यासनदार्ढ्ये तात्पर्यात् तावन्मात्रोक्ते साधनसरण्या तात्पर्याज्ञानात् । द्वितीयपादेऽप्येवं वक्ष्यन्ति सर्वत्र प्रसिद्धोपदेशाधिकरणे । **तदंश इति** करणत्वाभ्युपगमांशे इत्यर्थः । एतेन—

'अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरम् ।
गृह्यमाणगुणैर्लिङ्गैरग्राह्यमनुमानतः' ॥

इति श्रीभागवतवाक्यमपि व्याख्यातम् । **अत एवेत्यादि** साधनाध्याये द्वितीयपादे सहकारि-

संदेहवारकत्वाच्छास्त्रस्यापि तदङ्गत्वमिति ॥ २ ॥

इति प्रथमाध्याये प्रथमपादे द्वितीयं जन्माद्यधिकरणम् ॥ २ ॥

भाष्यप्रकाशः ।

तन्निर्देशो, न तु करणत्वेनेत्यर्थः । एतदेवोपकारकत्वं स्मृत्यादिष्वपीत्यतिदेष्टुमाहुः संदेहेत्यादि । तदङ्गत्वमिति मननाङ्गत्वम् । अत एव, 'स्मृतेश्च' इत्यादिसूत्राणि ।

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं चालयिष्यति' ॥

॥ इत्यादिवाक्यानि च । एतस्यैव निष्कर्षो निबन्ध उक्तः ।

'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ।
उत्तरं पूर्वसंदेहवारकं परिकीर्तितम्' ॥

इति । तथाच संदेहवारकतया कल्पसूत्रवद् व्याख्यानरूपत्वान्नानुवादकत्वमित्यर्थः । कारिकार्थस्तु तद्विवरणग्रन्थाद् बोध्यः ।

इति द्वितीयं जन्माद्यधिकरणम् ॥ २ ॥

एवं जिज्ञास्यस्य ब्रह्मणो लक्षणं तत्र प्रमाणं च निर्णीय तस्य किं ब्रह्मणः कारणतामात्रे तात्पर्यमुत तत्तद्विशेषविशिष्टायां तस्यामिति संशयमपनेतुमग्रिममधिकरणमित्याशयेन तदवतारयन्ति

रश्मिः ।

त्वादेव युक्तिनिर्देश इत्यर्थः । **स्मृत्यादिष्विति** । आदिशब्देन मीमांसा । **तदङ्गत्वमितीति** शास्त्रस्य मीमांसारूपस्यापि श्रवणाङ्गत्वं भाष्यात् । अपिशब्देनेतिहासपुराणे । तत्पक्षे तदङ्गत्वपदार्थमाहुः **मननाङ्गत्वमिति** । **स्मृतेश्चेति** इमानि सूत्राणि द्वितीयपादे वक्ष्यन्ते, स्मृतिर्मीमांसारूपापि । **चैव हीति** चकारेण जैमिनिस्मृतिः । **संदेहेत्यादि**भाष्यनिष्कर्षमाहुः **तथा चेत्यादि** । **नानुवादकत्वमिति** स्मृतिशास्त्रस्य जन्मादिसूत्रस्य वा नानुमानोपष्टम्भकश्रुत्यर्थानुवादकत्वमित्यर्थः । **तद्विवरणेत्यादि** तत्त्वदीपावरणभङ्गाश्चेत्यर्थः । तत्र ननु चतुर्णां क्वोपयोगः एकेनैव चरितार्थत्वाच्चेत्याशङ्क्याहुः **उत्तरमित्यादि** उत्तरोत्तरं पूर्वपूर्वस्य संदेहवारकं प्रकर्षेण कीर्तितम् । यथा 'अपाणिपादो जवनो ग्रहीता' इत्यत्र किं प्राकृतपाणिरहितं ब्रह्म आहोस्वित् सामान्यनिषेध इति संदेहे सर्वतःपाणिपादान्तमित्यादि गीतावाक्यं निर्णायकं, तथा गीतायां 'नित्यः सर्वगतः स्थाणुः' 'ममैवांशो जीवलोके' इत्यादिषु संदेहे सूत्रैर्निर्णयः । 'उत्क्रान्तिगत्यागतीनाम्' इत्यादिभिः । तथा 'जन्माद्यस्य यतः' इति संदेहे 'अन्वयव्यतिरेकतः' इति भागवतेन, निर्णय इति तत्त्वदीपे । उत्क्रान्त्यादिसूत्रैरंशत्वनिर्णयः अन्वयव्यतिरेकत इति । श्रीभागवतवाक्ययोः 'अन्वयव्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा' 'समन्वयेन व्यतिरेकतश्च' इति द्वितीयैकादशस्थयोरर्थकथनम् । तथाचैतयोर्वाक्ययोर्जन्मादिसूत्रे शबलस्य ब्रह्मणो वा कार्यलक्षणमिति संदेहे निर्णायकत्वमित्यावरणभङ्गे । 'जन्माद्यस्य यतोन्वयादितरतः' इति वाक्यमपि संग्रहीतुं शक्यम् । तदुक्तं कौर्म्ये 'न च वेदादृते किंचिच्छास्त्रं ब्रह्माभिधायकम्' इति ।

॥ इति द्वितीयं जन्माद्यधिकरणम् ॥ २ ॥

प्रसङ्गसंगत्या हेतुतासंगत्या वाधिकरणमवतारयन्ति **एवमित्यादि** । **तस्येति** लक्षणस्येत्यर्थः । **तद्विशेषेत्यादि** तत्तद्विशेषः समवायित्वनिमित्तत्वकर्तृत्वरूपस्तद्विशिष्टायां कारणतायामित्यर्थः ।

तत्रैतत् स्यात् । तत्र किं समवायि निमित्तं कर्तृ वा । किमतो यद्येवम् । एवमेतत् स्यात् । यद्येकमेव स्यात् तदा क्रियाज्ञानशक्त्योर्निरतिशयत्वं भज्येत । मृदादिसाधारण्यं च स्यात् ।

मतान्तरवत् कथमेवं संदेहो यावता, 'यतो वा इमानि' इत्यादिभ्यो निःसंदेहश्रवणात् । एवं हि सः । पञ्चमी श्रूयते यत इति । पञ्चम्यास्तसिलिति[१] । आत्मन इत्यपि पञ्चमी, निमित्तत्वे न संदेहः । पञ्चम्या निमित्तत्वकथनात् । उपादानत्वे

भाष्यप्रकाशः ।

तत्रैतत् स्यादित्यादि संदेहवारकेऽस्मिञ्छास्त्रे वक्ष्यमाणं विचार्यं स्यात् । तदाहुः तत्र किमित्यादि । तत्रेति श्रुतौ । मम तु तदिति प्रथमान्तपाठोऽत्र प्रतिभाति । चोदयति किमतो यद्येवमिति । कारणतामात्रादरेणैव जगत्कारणीभूतब्रह्मप्रमित्या प्रमाणसाफल्ये जाते पुनः संशयपङ्कं निपात्य तन्निरसनार्थकात् प्रयासात् किं फलान्तरं संपाद्यमित्यर्थः । तत्रोत्तरमाहुः एवमेतत् स्यादिति । वक्ष्यमाणेन विचारेण वक्ष्यमाणदोषनिवृत्तिरूपं फलं स्यादित्यर्थः । तदुपपादयन्ति यद्येकमित्यादि । यदि कारणतामात्रादरेण प्रमितेः पूर्तिरङ्गीकार्या तदैकं निमित्तादिषु वक्तव्यम् । तत्र यदि दण्डादिवन्निमित्तं, यदि वा प्रयोज्यवत् कर्तृ, तदा यथायथं क्रियाशक्तेर्ज्ञानशक्तेश्च निरतिशयत्वभङ्गः । दण्डाद्यपेक्षया कर्तरि क्रियाशक्तेः प्रयोज्यापेक्षया प्रयोजके ज्ञानशक्तेराधिक्यदर्शनात् । यदि मृद्वत् समवायित्वं, यदि वा कुलालादिवत् कर्तृत्वं, तदा तत्साधारण्यं, विकृतत्वमनाप्तकामत्वं चेति । तथाचैतद्दोषनिरासः फलमित्यर्थः । अत्र चोदयति मतान्तरवदित्यादि सांख्यन्यायादिरूपस्य मतान्तरस्य स्मृतिरूपत्वात् तज्जनकानुभवे दुष्टत्वस्य संभावितत्वात् तत्रोचितः संदेहः । अत्र तु तदभावान्न तस्य संभावनेत्यर्थः । संदेहोत्पत्तिप्रकारमाहुः एवमित्यादि । निमित्तत्वकथनादिति 'विभाषा गुणेऽस्त्रियाम्' इत्यत्राकारप्रश्लेषे अगुणादपि हेतोः पञ्चम्यङ्गीकृता । यथा धूमाद् वह्निमानित्यादौ । एवं प्रकृतेऽपि

रश्मिः ।

सामानाधिकरण्येऽन्वयसौष्ठवादाहुः **मम त्वित्यादि** । कर्तुरपि निमित्तत्वेन पृथङ्निर्देशानुपपत्तिमाशङ्क्य तयोर्भेदसाधनायाहुः **तत्र यदीत्यादि** । 'स्वतन्त्रः कर्ता' 'साधकतमं करणम्' इति लक्षणभेदात् कर्ता करणं हेतुरिति संज्ञाभेदात् कारकपञ्चकत्वापत्तेश्च कर्ता पृथक् । न च गौरवमिति शङ्क्यम् । 'शिक्षा कल्पो व्याकरणम्' इतिश्रुतेर्नैयायिकलाघवस्यायुक्तत्वादसमवायिकारणस्य निमित्तत्वाच्च । **मृदादीत्यादि** भाष्यमवतारयन्ति **यदि मृदित्यादि** । साधारण्यमेवाहुः **विकृतत्वमित्यादि** । **एतद्दोषेति** मृत्कुलालादिसाधारण्यदोषनिरास इत्यर्थः । **मतान्तरेति** भाष्यं देहलीप्रदीपन्यायेनोत्तरत्रापि मतान्तरे ब्रह्मणि विकृतत्वाद्यनङ्गीकाराद् दृष्टान्तः परत्रेति मतान्तरवत्कथमित्यादि चोदकं भाष्यमित्याशयेनावतारयन्ति **अत्रेत्यादि** । **स्मृतिरूपत्वादिति** लोकप्रमितार्थान् स्मृत्वा युक्त्या यथाबुद्धि संशोध्य शास्त्रप्रणयनेन तथात्वादित्यर्थः । **संभावितत्वादिति** करणदोषेण बुद्धिदोषरूपेण तथात्वादित्यर्थः । **तदभावादिति** श्रुत्यवलम्बनान्मानसीनानुग्रहेण चक्षुरादिकरणे दोषाभावादित्यर्थः । [वस्तुतस्तु सांख्यमते प्रकृतेरिव ब्रह्मणोऽपि विकृतत्वापातः इति मतान्तरवदिति भाष्यं यथाश्रुतमेव साधीयः] **भाष्ये** । **श्रूयत** इति सूत्रविषयवाक्ययोः श्रूयते इत्यर्थः । **प्रकृते** । **अकारेत्यादि** । इदं च बाहुलकं

---

१. तसिरिति ।

कर्तृत्वे च संदेहः। तद्वाचकाश्रवणात् कल्पनायां प्रमाणाभावात्। समवायित्वे पुनः सुतरां संदेहः। एवं प्राप्त आह।

तत्तु समन्वयात्॥ ३॥ (१।१।३)

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। निमित्तत्वस्य श्रुतिसिद्धत्वाद् मतान्तरनिराकरणत्वेनाग्रे वक्ष्यते। तद् ब्रह्मैव समवायि कारणम्। कुतः। समन्वयात्

भाष्यप्रकाशः।

तत्कथनात्। तथाच तावन्मात्राङ्गीकारे उक्तरीत्या क्रियाज्ञानशक्त्योर्निरतिशयत्वभङ्गप्रसङ्गः। तन्निवृत्त्यर्थमुपादानत्वकर्तृत्वयोरप्यङ्गीकारे प्रमाणाभावात् संदेहः। समवायस्याग्रे दूषितत्वात् समवायित्वे विकृतत्वस्यापत्तेश्च तत्र सुतरां तथेत्येवं समवायित्वेऽत्यन्तं संदिग्धे सूत्रमाहेत्यर्थः। एतेनास्याधिकरणस्य पूर्वेण सह सामान्यविशेषभावः संगतिरपि दर्शिता।

तत्तु समन्वयात्॥ ३॥ एवं पक्षत्रयेऽपि दोषा इति तान् विहाय श्रुत्युपपत्त्यर्थं केवलं तटस्थकारणत्वमादरणीयमित्याशयेन पूर्वपक्षयुक्तिमाहुः **निमित्तत्वस्येत्यादि**। ननु तुशब्दो विशेषावधारणपूजाव्यावृत्तिपादपूरणाद्यर्थहेतुषु दृष्टस्तत् कथं व्यावृत्त्यर्थ एवात्र गृह्यत इत्यत आहुः **मतान्तरेत्यादि**। 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्'इत्यादौ तथा दर्शनादत्रापि तथेत्यर्थः। **तद् ब्रह्मैव समवायिकारणमिति** तद् अनुभूतं प्रसिद्धं वा समवायिकारणं ब्रह्मैवेत्यन्वयः।

रश्मिः।

प्रकृतेस्तदनुदृष्टेरिति वार्तिकप्रयोगाद्गुणेऽस्त्रियामिति प्रायिकमित्यन्य इति शेखरे केषांचिन्मतमनूदितं तदनुसारेण बोध्यम्। तथाचाकारप्रश्लेषाद्धूमाद्वह्निमानित्यस्य अस्त्रियामित्यत्राकारप्रश्लेषे नास्ति घटोऽनुपलब्धेरित्यस्य च प्रयोगस्य सिद्धिरित्याशयः। यद्वा उभयत्रापि अकारप्रश्लेषाप्रश्लेषाभ्यां जाड्येन जाड्याद्वा बद्धः धूमाद्वह्निमान् नास्ति घटोनुपलब्धेरिति प्रयोगत्रयसिद्धिरित्याशयः। दीक्षितैस्तु हरदत्तग्रन्थानुसारेण विभाषेति योगं भङ्क्त्वा अगुणे स्त्रियां च पञ्चमी साधितेति ध्येयम्। **यथा धूमादिति** धूमपदं स्वज्ञाने वह्निमत्पदं स्वज्ञानविषये लाक्षणिकमत्र ज्ञेयम्। हेतुहेतुमद्भावोपपत्तये। **उपादानत्व** इत्यादिभाष्यं विवृण्वन्ति **तन्निवृत्तीत्यादि**। **भाष्ये**। ननु मृदः कुलालाच्च घट इति प्रयोगात् कर्तृत्वोपादानत्ववाचकपञ्चमीश्रवणं यत इति आत्मन इति चेति कथं तद्वाचकाश्रवणमत आहुः **कल्पनायामित्यादि**। **प्रकृते**। **समवायित्व** इत्यादि भाष्यं विवृण्वन्ति **समवायस्येत्यादि**। **अग्र** इति द्वितीयाध्यायद्वितीयपादे 'समवायाभ्युपगमाच्च साम्यादनवस्थितेः' इति सूत्र इत्यर्थः। **तथेति** संदेहत्वेन प्रकारेण संदेह इत्यर्थः। **सामान्येत्यादि** प्रसङ्गस्यावान्तरभेदो हेतुताख्य इत्यर्थः।

तत्तु समन्वयात्॥ ३॥ दोषा इति निमित्तत्वे क्रियाज्ञानशक्त्योर्निरतिशयत्वभङ्गः, कर्तृत्वे प्रमाणाभावः, उपादानत्वे विकृतत्वमिति दोषा इत्यर्थः। **निमित्तत्वस्येत्यादीति** ल्यब्लोपे पञ्चम्यत्र निमित्तत्वमात्रस्य श्रुतिसिद्धत्वमङ्गीकृत्य समवायित्वे कर्तृत्वे च ब्रह्मणो न संदेग्धव्यमित्येतत्तुशब्द आहेति वृत्त्यनुसारेणार्थः। **विशेषेत्यादि** समुच्चयोप्युपलक्षणीयः। तथा च विश्वः 'तुः पादपूरणे भेदे समुच्चयेऽवधारणे' इति। अत्र तत्पदेन ब्रह्मपरामर्शभ्रमं वारयन्तोऽधिकारसूत्रलभ्यत्वात्, पर्वतो धूमादिति प्रयोगादर्शनात् वह्निमान्धूमादिति दर्शनात्, रूपादावंशतो बाधसंभवात्। समवायित्वस्य साध्यताभ्रममनुमानत्वाय वारयन्ति **तदित्यादि**। ब्रह्मैव तत्समवायिकारणमिति योजना। समन्वयपदसमभिव्याहारात् सूत्रे सोपयु-

१. पक्षे रूपादौ साध्याभावो बाधः। सौत्रापरिष्कृतमात्रहेतुत्वाङ्गीकारे।

सम्यगनुवृत्तत्वात् । अस्तिभातिप्रियत्वेन सच्चिदानन्दरूपेणान्वयात् ।

भाष्यप्रकाशः ।

ननु सम्यगनुवृत्तत्वमनारोपितानागन्तुकरूपेण सर्वं लक्ष्यीकृत्य वर्तमानत्वम् । तज्जगति ब्रह्मणः कथम् । न हि जगति ब्रह्मणोऽनारोपितानागन्तुकेन ब्रह्मत्वेन रूपेणान्वयोऽवगम्यते, यथा पटे तन्तोर्घटे वा मृद इत्याकाङ्क्षायां तदाहुः अस्तीत्यादि । तेषु तेषु वस्तुषु तत्तत्पुरुषप्रतीतिविषयेणास्तित्वादिधर्मेणावगम्यमानात् सदादिरूपेणान्वयात् । यो हि यदन्वितः स स्वस्मिंस्तद्विषयां प्रतीतिमाधत्ते, यथा घटादिः पृथिवीत्यादिप्रतीतिम् । तथात्र सर्वमस्तीत्यादिप्रतीतिजनकत्वात् सदाद्यन्वितम् ।

रश्मिः ।

ज्यते न ब्रह्मेत्यनुवर्तते, तथा च भाष्येऽनुमानप्रतीतावपि औपनिषदत्वविघटिकेति न सोपयुज्यते । एवं मदुक्तप्रकारेण योजने नानुमानप्रतीतिः । तथाहि । अत्र समवायिकारणमिति न पक्षः । तथा सति समवायिनो द्रव्यमात्रस्य ब्रह्मत्वसिद्ध्या ब्रह्मणस्तदतिरिक्तस्यापि समवायित्वासिद्धेः पर्वतो धूमादिति प्रयोगापत्तेश्च । नाप्यनुभूतं स्वप्ने तदंशस्य मायारूपस्य पक्षत्वं, अथ कार्ये प्रसिद्धं श्रुत्यादौ च प्रसिद्धं ब्रह्मैव पक्षः 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति गीताप्रामाण्यानुरोध्यागामिभाष्यानुरोधेन ततो विशेषितत्वे तु समवायिकारणस्य पूर्वसूत्रवासनया जगतः समवायिनि वक्तव्ये जगत्समवायी पक्षः । ब्रह्मत्वं साध्यम् । एवकारः प्रकृत्यादिकं व्यवच्छिनत्ति । पक्षत्वे त्रिषु व्याख्यानेषु मध्ये भाष्यीयं मध्यमं व्याख्यानम् । अस्तिभातिप्रियात्मकेनानागन्तुकानारोपितरूपेण सर्वत्रानुवृत्तत्वं हेतुः । यत्रानारोपितानागन्तुकरूपेण समन्वितत्वं तत्र तदात्मकत्वमिति सामान्यव्याप्तिः । यथा मृदोऽनारोपितानागन्तुकेन मृत्त्वेन रूपेण समन्वितत्वात् मृदात्मकत्वं घटस्य । रूपादौ च घटादेर्घटत्वेन रूपेणानुवृत्त्यभावान्न रूपादौ घटाद्यात्मकत्वम् । अत्र स्वरूपासिद्धिं शङ्कते **नन्वित्यादि** । **अनारोपित**ेत्यादि । आरोपितमध्यस्तम्, आगन्तुकं रूपित्वादि । यदि चाध्यस्तमप्यागन्तुकं तर्ह्येकमेवोपादत्तं, द्वितीयं त्ववस्तुत्वादुपादत्तमप्यनुपादत्तम् । इदं तादात्म्येन संबन्धेन वर्तते । **तदाहु**रिति अनारोपितानागन्तुकरूपेण वर्तमानत्वमाहुरित्यर्थः । **अस्तित्वे**त्यादि । अत्र भाष्ये द्वन्द्वान्ते श्रूयमाणं त्वप्रत्ययं प्रत्येकं संबद्ध्यास्तित्वादीत्युक्तम् । तत्रास्तित्वाद्याश्रये ब्रह्मणि सति अस्तित्वादिना समन्वयाभावाज्जगति ब्रह्मसत्त्वासिद्धेः । नन्वेकत्वात् साध्यस्याधिकदेशवृत्तित्वं व्यापकत्वान्नानुमानदोषकरमिति चेद् ब्रह्मत्वास्तिभात्यादिसमन्वययोः कार्यकारणभावोऽस्त्येव तस्य ग्राहकावन्वयव्यतिरेकौ तयोरेवाभावात् । ब्रह्मत्वे सत्युक्तसमन्वयेऽब्रह्मत्वाभावे सति समन्वयाभाव इति । ब्रह्मणि तदुभयाभावान्न साध्यहेतुभाव इति दोषो न । अथवा स्वप्नसृष्टिमायाकृतभेदव्यतिरिक्तसृष्टिदृष्टोपादानभेदे वा ब्रह्मत्वरूपसाध्याभाववति हेतोः सत्त्वात्साधारण्यम् । अत्रोच्यते धर्मधर्मिणोरभेदात् सदादिरूपेणावगम्यमानादन्वयादिति योजना । **पृथिवी**त्यादि पृथ्वीत्वान्वितत्वात् पृथिवीत्वविषयामित्यर्थः । **तथात्र सर्व**मित्यादि सर्वमिति पक्षः, सदाद्यन्वितत्वं साध्यं, अस्तीत्यादिहेतुः, यन्नैवं तन्नैवं खपुष्पवदिति दृष्टान्तः । अस्तीत्यादिप्रतीतिजनकत्वं त्वेवं साधितम् । 'अन्वयव्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा' इत्यस्य **सुबोधिन्याम्** । तथाहि । घटः सन् पटः सन् भासते इति प्रिय इति च सर्वत्रैवैकस्य ब्रह्मणोन्वयः, अन्यथा एकशब्दानुवृत्तिः प्रतीत्यनुगतिश्च न स्यात् । विशेषेणातिरिच्यत इति व्यतिरेकः घटादिभ्यः किमतिरिच्यते घटस्तु घटान्नातिरिच्यते तथा पटः

१. हेतौ हेतुतावच्छेदकाभावः स्वरूपासिद्धिः । अन्वयत्वापेक्षया समन्वयत्वस्य गुरुतया हेतुतावच्छेदकत्वाभावात्, नीलधूमत्ववत् ।

नामरूपयोः कार्यरूपत्वात् ।

भाष्यप्रकाशः ।

ततश्च सदाद्यात्मकं सच्चिदानन्दात्मकं च ब्रह्मेति तेन रूपेण ब्रह्मान्वयोऽवगम्यत एवेत्यर्थः । ननु जगत्यस्त्यादिसमन्वयो न ब्रह्मणः समवायित्वगमकः । नामरूपयोरपि समन्वयात् । नच तयोर्नानात्वान्नान्वय इति शङ्क्यम् । तयोः प्रतिनियतरूपेणानन्वयेऽप्यवच्छेदकावच्छेदेनान्वयस्य निराबाधानुभवात् । नच रूपस्य व्यभिचारः शङ्क्यः । तस्य व्यवहार्यत्वपरत्वात् । अवकाशादिरूपेण व्यवहार्यत्वस्याकाशादावपि सत्त्वादिति चेत् तत्राहुः नामरूपयोः कार्यरूपत्वादिति । नामरूपे कर्मणोऽप्युपलक्षके । 'त्रयं वा इदं नाम रूपं कर्म' इति श्रुतेः प्रपञ्चस्यैतत्त्रयात्मकत्वात् । तथाच, 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति श्रुतेर्नाम्नां रूपेषु नियमने कृत एव जगतः

रश्मिः ।

पटात् किं तु सद्घटादप्यतिरिच्यते पटादपि, एवं सर्वत्र, यत्सर्वं सत्सर्वस्मादतिरिच्यते तद्ब्रह्म । नन्वेकमेव ब्रह्मत्वसाधकमस्तु किं द्वाभ्यामिति चेन्न । अन्वयेन ब्रह्मत्वं न सिद्ध्यति जगति जगतोऽप्यन्वयात् । यद्यपि घटादेर्व्यतिरिच्यते जगत्तथापि जगतो न व्यतिरिच्यते, खपुष्पादिकं तु जगतो व्यतिरिच्यते परं नान्वेति, सज्जगतो व्यतिरिच्यते भगवतोपि सत्त्वात्, कारणस्याक्षरस्यापि सत्त्वात्, अतो यस्यान्वयव्यतिरेकौ तदेव सर्वमिति । तत्र यदि सर्वमस्तीति प्रतीतिजनकं घटोस्ति भूतले घटाभावोस्तीत्यादिप्रतीतेर्नेतु भातिप्रियत्वप्रतीतिजनकं घटो ज्ञानं घटो जानाति घटः प्रीणातीत्याद्यप्रतीतेः । घटो भासते इत्यत्र तु नाश्रयत्वं तङर्थः किं तु विषयत्वमित्यागृह्यते, तदा तु अत्रैव युक्तिनिरूपणे भातिप्रियत्वयोरपि घटादिवृत्तित्वस्य मया व्युत्पाद्यत्वाद् घटादीनां तद्धर्मकत्वे सिद्धे तदप्रतीतावप्यक्षतिः । जीवे आनन्दांशस्य जडे चिदानन्दयोरप्राकट्यस्य वक्ष्यमाणत्वात् । अतो न पद्मसरसि भृङ्गे झङ्कृतिपराकृतमशकशुङ्कारः । हेतुघटिका प्रतीतिश्च प्रत्यक्षानुमित्यन्यतरपरा । तेन सदन्वयः प्रतीतिसाक्षिकश्चिदानन्दयोस्त्वानुमानिक इति ज्ञेयम् । **तेने**ति सच्चिदानन्दरूपेणेत्यर्थः । नन्वस्त्यादयो यथा ब्रह्मधर्मास्तथा नामरूपे अपीति नामरूपरूपेणान्वयः कुतो न स्यादित्याशङ्कते **ननु जगती**त्यादि । **समवायित्वे**त्यादि भाष्यप्रकाशीययथाश्रुतव्याख्यानपक्षे समवायित्वस्य साध्यत्वाभावाद्गमक इत्युक्तम् । समवायिनि ब्रह्मत्वे सिद्धे ब्रह्मणः समवायित्वं गमयतीत्यर्थः । **समन्वया**दिति तथा च जगतोऽपि जगत्समवायित्वं स्यादिति प्रश्नः । **नान्वय** इति घटनामरूपयोः पटे नान्वयः । तन्नामरूपयोर्भिन्नत्वादित्यर्थः । **प्रतिनियते**त्यादि देवदत्तविष्णुमित्रत्वादिरूपेण नीलत्वपीतत्वरूपेण चेत्यर्थः । **अवच्छेदके**त्यादि नामत्वरूपत्वरूपेणेत्यर्थः । पदार्थतावच्छेदकं गुणत्वं तस्यावच्छेदो द्वैधीकरणं येन नामत्वरूपत्वरूपेण करणे प्रत्ययः । उपदेश आद्योच्चारणमित्यत्रोपदेशपदात्प्रत्ययवत् करणनिष्ठव्यापारो वा धात्वर्थः । पचादेराकृतिगणत्वादच् । **व्यभिचार** इति आकाशादौ रूपव्यभिचार इत्यर्थः । **व्यवहार्ये**त्यादि रूपवान् विशेषतो व्यवहार्यो भवतीति कार्यताख्यसंबन्धेन व्यवहार्यत्वलक्षकत्वादित्यर्थः । **श्रुते**रिति बृहदारण्यकेऽस्ति नामरूपयोरागन्तुकरूपत्वान्न तयोर्ब्रह्मसमवायित्वबाधकत्वमिति वदन्तो भाष्ये द्वयोपादाने उपपत्तिमपि वदन्ति स्म **तथाचे**त्यादि । नामरूपकर्मणां प्रपञ्चरूपत्वे सति । **व्याकरणे**त्यादि । **अनेने**त्यादिव्याकरणश्रुतेर्जीवरूपेण प्रवेशकरणोत्तरमित्यर्थः ।

भाष्यप्रकाशः ।

कार्यत्वेन प्रतीतेस्ते एव कार्यस्य कार्यताव्यञ्जकस्वरूपभूते । यदा हि पृथुबुध्नोदराकारोऽर्थो भवति तदा तत्र तादृशं रूपं घट इति नाम च भवति । तदपि न स्वतः किंतु व्याकरणश्रुतेस्तत्करणोत्तरम् । यथा हि बालके जाते तदवयवानालोक्य व्यक्तौ निश्चितायां नाम नियमयति, एतन्नामाऽयमिति तद्वत् । अतः कर्मापि मूलवस्तूत्तरकालीनं कार्यस्वरूप एव प्रविशतीत्यागन्तुकत्वान्न तत्समन्वयः, किंत्वन्वयमात्रं तेषामतो न ब्रह्मणः समवायित्वबाधकमित्यर्थः ।

ननु तथाप्यस्त्यादिसमन्वयस्य न ब्रह्मसमवायितागमकत्वम् । कार्यमात्रे प्रकृत्यात्मकानां सत्त्वरजस्तमसामनुवृत्तिदर्शनात् । यथाहुः सांख्याः ।

'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः' ॥

इति गुणानां स्वरूपं वृत्तीश्चोक्त्वा

'सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः' ॥ इति ।

एतदर्थस्तु सत्त्वादयो गुणाः सुखदुःखमोहस्वरूपाः प्रकाशप्रवृत्तिनिग्रहफलका यथाक्रमं बोध्याः । ते पुनरन्योन्याभिभवनान्योन्याधारत्वान्योन्यजननान्योन्यमिथुनक्रियावृत्तयः स्वत एव सन्तो यथा वर्तितैले अग्निविरोधिनी सहाग्निना रूपप्रकाशनं कार्यं कुरुतो यथा वा वातपित्तकफा दोषाः परस्परविरुद्धा अपि शरीरधारणलक्षणं कार्यं कुर्वन्ति, तथैते परस्परविरुद्धा अप्यनुवर्तन्ते, कार्यं च कुर्वन्तीति । तथाच प्रयोगः । महदादिकार्यं सुखदुःखमोहगुणकद्रव्यजन्यं कार्यत्वे सति सुखदुःखमोहगुणकद्रव्यत्वात् । यथैका रूपयौवनशीलवती स्त्री भर्तुः सुखदा, सपत्नीनां दुःखदा, पुरुषान्तरस्य मोहदेति, तद्वदिति । नच सुखादीनामान्तरत्वेनानुभवात् स्त्र्यादीनां सुखादिगुणकत्वे मानाभावः शङ्कनीयः । स्त्रीचन्दनादिजन्यस्य सुखस्य तत्तदवयवेषु

रश्मिः ।

अत इति धर्मत्वादित्यर्थः । **मूलवस्त्वि**त्यादि ऋतुप्रयोगादिमांसपिण्डाद्युत्तरकालिकं प्रसिद्धमित्यर्थः । **समवायित्वे**त्यादि अन्वयमात्रमित्यर्थः । तदित्थं पूर्वोक्तानुमाने न ब्रह्मणि समवायित्वं सिद्ध्यति तदप्यनागन्तुकानारोपितरूपेणानुवर्तनात् । जगति जगत्त्वं खलु जङ्गन्ति परमागन्तुकरूपेणेति जगतो यथान्वयेपि न तत्समवायित्वबाधकत्वमेवं ब्रह्मणोप्यन्वये तु न । समवायित्वमित्येवंविधबाधकत्वं नेत्यर्थः । अत्र प्रयोगः ब्रह्म न भूतादिसमवायि अन्वयात् नामरूपादिवत् इति विरुद्धरूपहेत्वाभासोत्थापनेन । गुणा इत्यस्यार्थमाहुः **सत्त्वे**त्यादि । प्रीतीत्यादेरर्थमाहुः **सुखे**त्यादि । प्रदीपवच्चेत्येतद्विवृण्वन्ति **यथा वर्तितैले अग्नी**त्यादि अत्राकारो लेखककरदोषात्पतितः भ्रमाद्वा पूर्वसवर्णदीर्घः । 'ईदूदेद्विवचनं प्रगृह्यम्' इति सूत्रात्प्रगृह्यसंज्ञायां प्रकृतिभावात् । **अग्निने**ति दीपरूपेणेत्यर्थः । चकारार्थमाहुः **यथा वे**त्यादि । **सुखे**त्यादि । तादृशं द्रव्यं प्रकृत्यात्मकम् । **कार्यत्वे सती**ति प्रकृतेस्तादृशद्रव्यजन्यत्वापत्तिवारणायेदम् । 'प्रकृतिपुरुषयोरन्यत्सर्वमनित्यम्' इति पञ्चमाध्यायस्थसांख्यप्रवचनसूत्रात् । तथाच सत्यन्ताभावे प्रकृतौ साधारणानैकान्तिकत्वम् । **तद्वदिती**ति व्यतिरेके केवलचेतनवदिति दृष्टान्तः । **स्त्र्यादीना**मिति बाह्यानामाधिभौतिकानामित्यर्थः । **मानाभाव** इति आध्यात्मिकादीनामाधिभौतिकस्त्र्यादिधर्मत्वे

भाष्यप्रकाशः ।

बहिरेवानुभवेन तज्जनकेषु रूपादिष्वपि तस्य बहिरेव सत्तानिश्चयात् । नच तस्यानुभवस्य भ्रान्तत्वं शक्यवचनम् । तथा सति देहे मे सुखं, शिरसि मे वेदनेत्याद्यनुभवान्तरस्यापि बाधप्रसङ्गात् । एवं तु स्त्रीसुखं चन्दनसुखमित्याद्यभिलापोऽपि युज्यते । आन्तरत्वेनानुभवस्तु मानसस्यैव । एवं सिद्धे तेषां बाह्यत्वे रूपादिसंसर्गेण बहिरेव तेऽभिव्यज्यन्ते । घृतद्रवत्वादिवत् । तथाच प्रयोगः । विमताः सुखादयो न साक्षादात्मधर्माः । बाह्यत्वे सत्यात्मनि प्रतीयमानत्वात् । गौरत्वादिवदिति । तथा, रूपादयः सुखादिगुणकाः सुखादिजनकत्वात् । यद् यज्जनकं तत् तद्गुणकं, प्रकाशशैत्यादिजनकवन्हिचन्दनादिवदिति च । एवं सिद्धे तेषां तद्गुणकत्वे तेषां द्रव्याणां तद्गुणात्मकत्वमप्यनुमेयम् । तथाच प्रयोगः । विमताः सुखाद्यात्मकाः, सुखाद्यविनाभूतत्वात् । तन्मात्राविनाभूतमहाभूतवत् । तथा, सुखादयो द्रव्यसूक्ष्मावस्थारूपाः । तदविनाभूतत्वे सति तज्जनकत्वात् । महाभूताविनाभूततज्जनकतन्मात्रवदिति । नच प्रथमे क्षणे द्रव्यं यावद्गुणशून्यमेवोत्पद्यत इति वाच्यम् । प्रत्यक्षबाधितत्वात् । अपाकजस्य रूपादेरुत्पत्तिदशायामप्यनुभवात् । एवं सुखादावपि बोद्धव्यम् । पुत्राद्युत्पत्तिकाल एव पुरुषभेदेन सुखदुःखाद्युत्पत्तिदर्शनतस्तस्य बालादेस्तदानीमपि तज्जनकतया तद्गुणकत्वतदविनाभावयोर्निश्चयादिति । एवं मैत्रायणीये, 'तमो वा इदमेकमेवाग्र आसीत् तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयाति' इति । श्वेताश्वतरेऽपि, 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इति तमःशब्दवाच्यायाः प्रकृतेर्गुणानां च सृष्ट्यादौ सत्ताश्रावणात् पुराणेषु मन्वादिषु

रश्मिः ।

मानाभाव इत्यर्थः । **तस्ये**ति । **घृते**त्यादि वह्निसंसर्गेणेत्यादिः । **विमता** इति रूपादयः सुखादिगुणकाः आध्यात्मिकस्य सुखादेरित्यर्थः । **गौरत्वे**त्यादिभास्वरं गौरत्वमात्मनीति दृष्टान्तः । **तन्मात्रे**ति तेन यद् यदविनाभूतं तत् तदात्मकं इति व्याप्तिः सामान्या । **तज्जनकत्वा**दिति द्रव्यजनकत्वात् । न च रूपादिवदन्यथासिद्धत्वमिति वाच्यम्। घटादिकं प्रति दण्डादिकस्य रूपवन्न भवत्यन्यथासिद्धत्वम्। द्रव्यस्य सुखत्वेनाकारणकत्वापत्तेः कार्यस्य। प्रथमक्षणिकद्रव्यमादाय हेत्वोरंशतः स्वरूपासिद्धत्वमाशङ्क्य पराकुर्वन्ति **न च प्रथम** इत्यादि । तथाच पक्षैकांशतः ह्रदे पर्वते चाद्यक्षणावच्छेदेन सुखाद्यविनाभूतत्वरूपहेत्वभावाद् ह्रदो द्रव्यं धूमादितिवत् पक्षे हेत्वभावात्स्वरूपासिद्धिः सिद्धान्तमुक्तावल्युक्ता, पर्वते सुखादिरूपे आद्यक्षणावच्छेदेन हेतुतावच्छेदकस्य तदविनाभूतत्वसमानाधिकरणतज्जनकत्वरूपस्य गौरवेणाभावात् स्वरूपासिद्धिर्मञ्जर्युक्ता । **अपाके**त्यादि पाकोऽग्निसंयोगः । **निश्चया**दिति तथाच प्रथमक्षणावच्छेदेनापि द्रव्यस्य सगुणत्वात् न हेत्वोः स्वरूपासिद्धत्वमिति भावः । **पुराणेष्वि**ति एकादशे—

'तमो रजः सत्त्वमिति प्रकृतेरभवन् गुणाः ।
मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च ॥
तेभ्यः समभवत्सूत्रं महान् सूत्रेण संयुतः ।
ततो विकुर्वतो जातो योऽहंकारो विमोहनः' ॥

इत्यादिष्वित्यर्थः । **मन्वादिष्वि**ति ।

'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।

प्रकृतेरपि स्वमते तदंशत्वात् । अज्ञानात् परिच्छेदाप्रियत्वे । ज्ञानेन बाध-

भाष्यप्रकाशः ।

तथा स्मरणात् सिद्धे प्रकृतेः सत्त्वे सर्वस्य त्रिगुणत्वेन गुणमय्याः प्रकृतेरेव समन्वयस्य सिद्धत्वान्न ब्रह्मणः समवायित्वसिद्धिरित्यत आहुः प्रकृतेरित्यादि ।

'आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम् ।
यदा विवेकनिपुणा आदौ कृतयुगेऽयुगे ॥
तन्मायाफलरूपेण केवलं निर्विकल्पितम् ।
वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ॥
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते' ॥

इत्याद्येकादशस्कन्धीयभगवद्वाक्यैस्तस्या अंशत्वे जन्यत्वे च निश्चिते तद्रूपस्याप्यागन्तुकत्वेन तदन्वयस्यापि समन्वयत्वाभावान्न तेन ब्रह्मणः समवायित्वभङ्ग इत्यर्थः । ननु भवत्वेवं, तथापि तदन्वयस्य सांख्यैः साधितत्वात् तेनैव रूपेण ब्रह्मान्वयोऽस्तु किमस्त्यादिरूपान्वयाग्रहेणेत्याशङ्कायामाहुः अज्ञानादित्यादि । अयमर्थः । प्राकृती या प्रीतिः सा आज्ञानिकी, न तु वास्तवी । तत्र गमको देशतः कालतश्च परिच्छेदः । यथा कस्यचित् किंचित् प्रियं किंचिन्न । तदपि कदाचित् प्रियं, कदाचिन्न । तथा सति तस्या औपाधिकत्वम् । मैत्रेयीब्राह्मणे तथैव सिद्धत्वात् ।

रश्मिः ।

'अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ।
ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः' ॥

इत्यादिष्वित्यर्थः । **प्रकृतेरेवेति** अस्त्यादीनामपि प्राकृतत्वसंभवादेवकारः । **न ब्रह्मण इति** ब्रह्म न समवायि सत्त्वादिना समन्वयादिति । अस्त्यादिसमन्वयरूपहेतोः सत्प्रतिपक्षत्वात्तथा । **ज्ञानमय इति** 'ज्ञानमथो ह्यर्थः इत्यपि पाठः । कार्त्स्न्यमथोशब्दार्थः । **अयुग इति** युगेभ्यः पूर्वं प्रलये चेत्यर्थः । **तन्मायेत्यादि** माया तत्फलं दृश्यं सर्वं तद्रूपेणेत्यर्थः । **उभयात्मिकेति** कार्यकारणरूपिणीत्यर्थः । **तद्रूपस्येति** मायारूपस्य सत्त्वरजस्तमोरूपस्य धर्मस्येत्यर्थः । **समवायित्वभङ्ग इति** । एतच्च चतुर्थपादे 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इत्यधिकरणे स्फुटम् । यद्यप्येवं ब्रह्मणः समवायित्वे सिद्धे परिच्छेदाप्रियत्वे विरुद्धे इत्याशङ्क्याहुः **अज्ञानादिति** । इत्येवं तथापि ब्राह्मणानां संतोषो न भवति सुगमव्याख्यान इति विस्तरेणाहुः **ननु भवत्वित्यादिना** । **तदन्वयस्येति** प्रकृत्यन्वयस्येत्यर्थः । **तेनैवेति** प्राकृतप्रियत्वादिरूपेणेत्यर्थः । देशतः परिच्छेदमाहुः **यथेत्यादि** । कालतः परिच्छेदमाहुस्तदपीत्यादि । **तस्या इत्यादि** प्रीतेर्धनसौन्दर्यादियुक्तशुद्धदेशशुद्धानुद्वेजककालरूपोपाध्याहितत्वमित्यर्थः । **मैत्रेयीत्यादि** । एतच्च चतुर्थपादे वाक्यान्वयाधिकरणे स्पष्टम् । तथा चाज्ञानाद्ब्रह्मात्मकानन्दे परिच्छेदोऽप्रियत्वं च लोके भवतो न तु प्राकृतं प्रियत्वमस्ति, तथाच श्रुतिः 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति । तथा च प्राकृतप्रियत्वस्यैवाभाव इति दूरे तेन रूपेण समन्वय इति भावः । व्यतिरेकमुखेन ज्ञानेन

भाष्यप्रकाशः।

वास्तवस्य नैसर्गिकतायां वस्तुसद्भावे ज्ञानेन तद्बाधायोगाच्च। अतो वास्तवं प्रियत्वमात्मन्येवे-त्यात्मन एव दर्शनादिकमावश्यकमिति बोधयित्वा 'इदं सर्वं यदयमात्मा' इत्यनेन सर्वस्यात्मा-भिन्नत्वं श्रावयति। तथा तैत्तिरीये, 'आनन्दं ब्रह्मणो विद्वान्'इत्युपक्रम्य, 'एतꣳ ह वा व न तपति किमहꣳ साधु नाकरवं किमहं पापमकरवम्'इति 'स य एवं विद्वानेते आत्मानꣳ स्पृणुते' इत्या-त्मत्वानुसंधानेन तत्कृततापाभावं च श्रावयति। अत एवमात्मानन्दज्ञानेन प्राकृतिकप्रियत्वादौ बाधदर्शनान्न तद्रूपेणान्वय आद्रियते किं त्वात्मत्वेन। सर्वस्मिन्निरुपधिप्रियत्वस्य बोधनादबाधि-तेनैव रूपेण श्रुत्यविरोध इति तदन्वय एवाद्रियत इत्यर्थः। ननु यद्येवं तदा नानात्वमपि नादर-

रश्मिः।

बाधदर्शनादिति भाष्यं विवृण्वन्ति **वास्तवस्ये**त्यादि। **भाष्ये**। सुगमव्याख्या त्वेवं बोध्या। तथाहि। प्रतिपादितोऽस्तिभातिप्रियत्वेन ब्रह्मसमन्वयोऽनुपपन्नः परिच्छेदाप्रियत्वयोर्दर्शनादित्याशङ्क्याहुः **अज्ञानादि**त्यादि। तथा च न ते वास्तवे इति तत्प्रतीतावपि न समन्वयानुपपत्तिरित्यर्थः। किंच नायं नियमो यदुपादानधर्माणां उपादेये भानमिति। विभागेनापरिच्छेदतिरोभावस्य सांख्येप्य-ङ्गीकारात्। संयोगेन महत्त्वस्य नैयायिकैरप्यङ्गीकाराच्च। तयोरवास्तवत्वे हेतुमाहुः **ज्ञानेने**त्यादि। वाचारम्भणवाक्योक्तरीतिकज्ञानेन विकल्पबुद्धेर्बाधस्य श्वेतकेत्वादिषु दर्शनादित्यर्थः। **प्रकृते**। सिद्धमाहुः **अत** इत्यादि यतः सर्वत्रौपाधिकी सा, अत इत्यर्थः। **बोधयित्वे**ति सहोवाचे-त्याद्यनुवाकद्वयं 'न वा अरे' इत्यारभ्य 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदꣳ सर्वं विदितम्' इत्यंशेन बोधयित्वा 'ब्रह्म तं परादात्' इत्यारभ्य 'इदं सर्वं यदयमात्मा' इत्यन्तेनांशेन सर्वस्यात्माभिन्नत्वं श्रावयतीत्यर्थः। तथाचा-न्यत्र प्रतीयमानं प्रियत्वं तदंश इति भावः। **एतमि**त्यादि पूर्वोक्तानन्दविदं न तपति नोद्वेजयति समे एते साध्वसाधुनी एवं तापहेतू इति विद्वान् आत्मानं स्पृणुते स्नेहयतीत्यर्थः। स्पृ प्रीतिपालनयोः स्वादिः। **बाधदर्शना**दिति 'किमहꣳ साधु नाकरवम्'इत्यादिश्रुतेस्तथेत्यर्थः। **बोधना**दिति 'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' इत्यादिना बोधनादित्यर्थः। **एवाद्रियत** इति एवकारेण ब्राह्मणां सत्त्वरजस्तमसां व्युदस्तिः। तथाहि। माभूत् प्राकृतसत्त्वरजस्तमो-रूपेण ब्रह्मान्वयः परंतु ब्राह्मतद्रूपेण तु स्यात्।

'सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः।
स्थितिसर्गनिरोधेषु गृहीता मायया विभोः'॥

इति वाक्यात् नैवम्। एतेषामप्यागन्तुकत्वादेतस्य सुबोधिन्यां सद्रूपेण निर्गतं सत्त्वमि-त्युच्यते, केवलचिद्रूपेण निर्गतं क्रियाशक्तिप्रधानत्वात्सदानन्दानन्दाभावाच्च रज इत्युच्यते, आनन्दां-शाच्च तमः, ते भगवद्रूपा एव भगवता सृष्टाः। न च ते पूर्वं भगवति स्थिताः इति प्रतिपादनात्। अबाधितेन नानात्वेन धर्मेण प्रकृतेरन्वयात् तस्या अपि समवायित्वं निर्दुष्टमित्याशङ्कामुखेनाभासमाहुः **नन्वि**त्यादि। अथवा ननु यदि ब्रह्मोपादेयता प्रपञ्चे स्यात् तदा ब्रह्मण एकरसत्वेन तथे-

दर्शनात्। नानात्वं त्वैच्छिकमेव। जडजीवान्तर्यामिष्वेवैकैकांशप्राकट्यात्। कथमेवमिति चेत्। न। सद्रूपे घटरूपक्रियास्विव तारतम्येनाविर्भाववज्जडेऽपि भानत्वादिप्रतीतेस्तारतम्येनाविर्भावोऽङ्गीकर्तव्यः। भगवदिच्छाया नियामकत्वात्।

भाष्यप्रकाशः।

णीयम्। तस्यापि प्राकृतिकत्वादित्यत आहुः **नानात्वमित्यादि**। 'बहु स्याम्' इति श्रावणात् तन्न प्राकृतिकमित्यर्थः। ननु यदीदमप्राकृतं स्यादत्रास्त्याद्यंशत्रयानुवृत्तिरनुभूयेत, सा तु न दृश्यतेऽतो न तथेत्यत आहुः **जडेत्यादि**। जडे सदंशस्य, जीवे 'ज्ञानं त्वन्यतमो भावः' इति वाक्याज्ज्ञानांशस्यान्तर्यामिण्यानन्दांशस्य प्राकट्यात्। तथाच प्राकट्याभावहेतुकमदर्शनं नानुवृत्तिबाधकमित्यर्थः। अत्र चोदयति **कथमित्यादि**। सर्वत्र त्रितयसद्भावेऽपि तत्र तत्रैकैकांशप्राकट्यं कयोपपत्त्याङ्गीक्रियत इत्यर्थः। अत्र समादधते **नेत्यादि**। एवमाक्षेपो न युक्तः। यतोऽस्तीतिप्रत्ययगोचरे सद्रूप एकस्मिन्नेवार्थे घट इति गुणित्वेन, रूपमिति तदुपसर्जनतया गुणत्वेन, क्रियेति त्रिक्षणावस्थायितयाऽऽशुतरविनाशित्वेन यथा सदंशस्य तारतम्येनाविर्भावस्तथा जडेऽपि भानत्वप्रियत्वयोस्तारतम्येनाविर्भावोऽङ्गीकार्यः। नन्वेवमङ्गीकारे का वा युक्तिरितिचेद् उच्यते। श्रीभागवते कंसस्यारिष्टदर्शनस्थले, 'अदर्शनं स्वशिरसः प्रतिरूपेषु सत्स्वपि' इत्यासन्नमृत्योः शिरःप्रतिबिम्बादर्शनमुक्तम्। तथा द्वितीयस्कन्धे, 'घ्राणं च गन्धः' इत्यादिवाक्यैरिन्द्रियाणां सजातीयग्राहकत्वं च बोधितम्। एवं सत्युक्तस्थले यच्छिरसोऽग्रहणं तत्र हेतुत्वेन विषयस्य चक्षुषो वा आवरणं वक्तव्यम्। तत्र न शिरसः। तस्यान्येन दर्शनात्। नापि चक्षुषः। तदानीं तेन विषयान्तरदर्शनात्। अत उभयोपपत्त्यर्थं विषयनिष्ठज्ञानांशस्य तच्चक्षुः प्रत्येवावरणमिति वक्तव्यम्। एवं लोकाञ्जनस्थले वैषयिकज्ञानांशावरणम्। सदंशावरणे तु स्पार्शनमपि तस्य न स्यादिति। एवमेकत्र

रश्मिः।

त्यर्थः। **न प्राकृतिकमिति** तथा च तेन रूपेणापि ब्रह्मण एवान्वयान्न प्रकृतिसमन्वय इति भावः। ऐच्छिकत्वेनागन्तुकत्वान्न समन्वयः। **अत्रेति** ऐच्छिकनानात्वावच्छिन्ने जगतीत्यर्थः। **न दृश्यत इति**। किं तु सदंशमात्रस्य दृश्यत इत्यर्थः। **न तथेति** नानात्वमप्राकृतिकं नेत्यर्थः। **अदर्शनमिति** चिदानन्दयोरित्यर्थः[1]। **क्रियेतीति** कृतिजन्या क्रियेति प्रथमं भगवदिच्छया क्रिया, ततो द्वितीयक्षणे स्थितिः, ततस्तृतीयक्षणेधःसंयोगेनाशुतरविनाशित्वं ज्ञेयम्। **प्रतिरूपेष्विति** दर्पणादिष्वित्यर्थः। विषयस्य न संभवतीत्याहुः **तत्र नेत्यादि**। **चक्षुष इति** करणस्य। **तदानीमिति** स्वप्नकाल इत्यर्थः। **उभयोपपत्त्यर्थमिति** स्वस्य शिरःप्रतिबिम्बादर्शनविषयकरणोभयतः अग्राहकत्वं चक्षुर्दोषस्तस्योपपत्त्यर्थमित्यर्थः। **तच्चक्षुरिति** स्वप्नद्रष्टुश्चक्षुरित्यर्थः। **एवं लोकेत्यादि** यादृशाञ्जनेन तमन्यो न पश्यति तादृशस्थल इत्यर्थः। सर्वोपि तं न पश्यतीति शरीरावरणमेव तत्र वक्तव्यं किं ज्ञानांशावरणकल्पनयेत्यत आहुः **सदंशेत्यादि**। **स्पार्शनमिति** प्रत्यक्षमित्यर्थः। एवं सदंश उपपाद्य ज्ञानप्रियत्वांशयोराहुः **एवमेकत्रेति** सदंशे। अन्यत्र ज्ञानांशे। **तथेति** नित्यज्ञानरूपे भानरूपक्रियास्विव तारतम्याभावेपि विषयताविषयकज्ञानेन ज्ञानमिति गुणित्वेन रूपमिति तदुप-

१. चिति सदानन्दयोरसनन्दे सचितोरदर्शनमित्यर्थः। २. त्वविचिष्टेन।

भाष्यप्रकाशः।

ज्ञानांशसिद्धावन्यत्रापि तथा सिद्ध्यति। एवं प्रियत्वांशेऽपि बोध्यम्। यद्वा पदार्थमात्रस्य ज्ञानेनैव प्रकाशाज्ज्ञानजनकत्वाच्च सांख्योक्तप्रकारेणैव ज्ञानाविनाभावसिद्धौ ज्ञानात्मकत्वस्यापि सिद्धिः। परंतु तन्न जडे सदंशवत् प्रकटम्। सन् घटः, सन् पट इतिवज्ज्ञानं घट इति सामानाधिकरण्याप्रतीतेः। प्रियत्वे तु ततोऽप्यप्रकटम्। तत्तदसाधारणत्वात्। जीवे तु चिदंशस्यापि प्राकट्यम्। चेतनत्वेनैव सदा प्रतीयमानत्वात्। सदंशस्तु न्यग्भूतः। विशेषणतयैव प्रतीयमानत्वात्। प्रियत्वं तु ततो न्यग्भूतम्। उक्तयुक्तेः। अन्तर्यामिणि तु प्रियत्वमेव मुख्यमन्यदुभयं न्यग्भूतम्। तद्द्रष्टृणां प्रियत्वेनैवानुभवगोचरत्वादिति। अत्र नियामिका तु, प्रजायेयेति भगवदिच्छैव। अन्यथा पूर्वोक्ताकारेणैव नानाभावात् सृष्टिसिद्धावेतदाकारान्तर-

रश्मिः।

सर्जनतया गुणत्वेन क्रियेति त्रिक्षणावस्थायित्वेन आशुतरविनाशितया ज्ञानांशस्य तारतम्येनाविर्भावः। ज्ञानस्य विषयताविषयकस्य त्रिक्षणावस्थायित्वात्। तदुक्तं **तथा सिद्ध्यतीति**। प्रियत्वेतिदिशन्तिस्म **एवमिति**। **बोध्यमिति** पुत्रादौ बोध्यमित्यर्थः। आत्मनि प्रियरूपे प्रियरूपक्रियास्विव तारतम्याभावेपि पुत्रादौ प्रिये प्रिय इति गुणित्वेन रूपमिति तदुपसर्जनतया गुणत्वेन क्रियेति त्रिक्षणावस्थायित्वेनाशुतरविनाशितयाऽऽनन्दांशस्य तारतम्येनाविर्भावः। यथा सूर्ये रूपं श्यामं सूर्यत्वं च तदाच्छादिका क्रिया त्रिक्षणावस्थायिनी। दीपादावपि प्रसिद्धम्। अन्वयव्यतिरेकाभ्यामित्यस्य सुबोधिन्यनुसारेण पक्षान्तरमाहुः **यद्वेत्यादि**। **ज्ञानेनैवेत्यादि** घटो भासत इत्यादिप्रतीतेस्तथेत्यर्थः। **ज्ञानजनकत्वादिति** विषयविधयेति बोध्यम्। **सांख्योक्तेत्यादि**। घटादयो ज्ञानगुणकाः ज्ञानजनकत्वात् प्रकाशशैत्यादिजनकवह्निचन्दनादिवदित्यनुमानेनेत्यर्थः। **ज्ञानात्मेत्यादि** विमता घटादयः ज्ञानात्मकाः ज्ञानाविनाभूतत्वात्। तन्मात्राविनाभूतमहाभूतवदित्येवं ज्ञानात्मकत्वस्यापीत्यर्थः। किंच चित्त्वं व्यापकं घटादिवृत्ति वा मुख्यब्रह्मधर्मत्वात्, सत्त्ववत् इति। पटादौ व्यभिचारवारणाय मुख्येति हेतुविशेषणम्। सत्यादित्रयान्यतमत्वं तदर्थः। तथाच मुख्यब्रह्मधर्मत्वेन व्यापकत्वेन घटादिवृत्तित्वेनानुकूलस्तर्क एव युक्तिः। **सामानेत्यादि** भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वं सामानाधिकरण्यं तदप्रतीतेरित्यर्थः। **प्रियत्वमिति** प्रीतिजनकत्वदर्शनेन। घटादयः, प्रियत्वगुणकाः प्रीतिजनकत्वात्, प्रकाशशैत्यादिजनकवह्निचन्दनादिवत्। घटादयः प्रीत्यात्मकाः प्रीत्यविनाभूतत्वात्। तन्मात्राविनाभूतमहाभूतवदित्यनुमानाभ्यां घटाद्यात्मकं प्रियत्वमित्यर्थः। किंच प्रियत्वं व्यापकं घटादिवृत्ति वा मुख्यब्रह्मधर्मत्वात् सत्त्ववदित्यपि ज्ञेयम्। आनन्दो घट इत्यप्रतीतिस्तु तमस्स्वभावत्वाप्रतीतिवत्। सिद्धान्तमुक्तावलीटीकायां स्फुटमेतत्। **तत्तदित्यादि** इन्दुश्याद्यसाधारणधर्मत्वादित्यर्थः। **न्यग्भूत इति** गुणभूत इत्यर्थः। **उक्तयुक्तेरिति** तत्तदसाधारणत्वादित्यर्थः। **तद्द्रष्टृणामिति** 'आनन्दो ब्रह्मेति व्यजानात्' इति श्रुतेर्भृग्वादीनामित्यर्थः। **भगवदित्यादि**भाष्यं विवृण्वन्ति **अत्रेत्यादि**। सा तु यथाकार्यं भगवदिच्छानुमेयेति भावः। **पूर्वोक्तेत्यादि** 'एकोहं बहु स्याम्' इतीच्छाकारेणैव। **नानाभावात्सृष्टिसिद्धावेतदाकारान्तरकथनस्य** 'प्रजायेय' इतीच्छाकारान्तरकथनस्य

भाष्यप्रकाशः ।

कथनस्य वैयर्थ्यापत्तेः । उच्चनीचभावादिनाऽऽविर्भावस्यैव प्रकर्षपदार्थत्वेन विवक्षितत्वादिति । एतेन दुष्टत्वादिप्रतीतावपि भगवदिच्छैव हेतुरिति न तयापि समवायित्वे दोषप्रसक्तिः । क्रीडार्थे तथैव बुद्ध्युत्पादनात् । एतदप्येकादशस्कन्धीयविंशैकविंशाध्यायस्थैर्गुणदोषदर्शनस्य कर्मनियमार्थत्वबोधकवाक्यैरवसीयत इति नात्रापि शङ्कालेशः । अत एव न क्वचिदपि कुत्सितत्वं ब्रह्मविदां भासते । अत एवैकादश एवोक्तम्,

'किं वर्णितेन बहुना लक्षणं गुणदोषयोः ।
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः' इति ॥

नचैवं ब्रह्मणः समवायित्वे, 'सैषाऽविद्या जगत् सर्वम्' इत्यादितापिनीयश्रुतिविरोधः शङ्क्यः। तस्याग्रे, न विलक्षणत्वाधिकरणे समाधेयत्वात् । तत्रापि तस्मादात्मन एव त्रैविध्यं सर्वत्र योनित्वमपीतिवक्ष्यमाणत्वादिति । अत एव श्रीभागवतारम्भश्लोकेऽपि ब्रह्मणः समवायित्वं

रश्मिः ।

वैयर्थ्यापत्तेरित्यर्थः । **विवक्षितत्वादितीति** 'गर्दभीतराभवद्गर्दभ इतरः' इति श्रुत्यन्तरे तथादर्शनादिति भावः । इतरा शतरूपा, इतरो मनुः । भाष्योक्तहेतुसमाप्ताविति शब्दः । **एतेनेति** एतादृशप्रकर्षपदार्थेनेत्यर्थः । **क्रीडार्थमिति** एतच्च द्वितीयेध्याये 'लोकवत्तु लीलाकैवल्यम्' इति सूत्रे स्पष्टम् । **कर्मनियमेत्यादि** ।

'विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते ।
अवेक्षतेरविन्दाक्ष गुणं दोषं च कर्मणाम्' ॥ इत्यादिना
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः' । इत्युक्तमाक्षिप्तम् । ततो भगवता
'स्वे स्वेधिकारे या श्रद्धा स गुणः परिकीर्तितः ।
कर्मणां जात्यशुद्धानामनेन नियमः कृतः ॥
गुणदोषविधानेन सङ्गानां त्याजनेच्छया' । इति विंशे, एकविंशे च
'शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु ।
द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ॥
धर्मार्थं व्यवहारार्थं यात्रार्थमिति चानघ ।
दर्शितोयं मयाचारो धर्ममुद्वहतां धुरम्' ॥

इति कर्मनियमार्थत्वबोधकवाक्यैः क्रीडार्थत्वमवसीयत इत्यर्थः । वाक्यार्थस्तु श्रीधर्यां स्फुटः । **शङ्कालेश** इति एतच्च द्वितीयाध्याये स्फुटतरमिति न शङ्कालेश इत्युक्तम् । **क्वचिदिति** लोके कुत्सितत्वेन प्रतीयमानेपीत्यर्थः । **ब्रह्मविदामिति** निरस्ताविद्यानां भरतादीनामित्यर्थः । साविद्यानां प्रतीतिस्त्वविद्याकृतेति न प्रपञ्चवास्तविककुत्सितत्वसंपादनायालम् । शङ्खादौ वास्तवपीतत्वसंपादने सकामलस्य प्रतीतिरिवेति भावः । **एकादश** इति एकोनविंश इत्यर्थः । **अग्रे** इति द्वितीयाध्याय इत्यर्थः । **तत्रापीति** तापिनीय इत्यर्थः । **त्रैविध्यमिति** ब्रह्मविष्णुशिवरूपत्वमित्यर्थः । **इतिवक्ष्यमाणत्वादिति** इत्यात्मनः समवायित्वस्य वक्ष्यमाणत्वादित्यर्थः । **समवायित्वमिति** अभिन्ननिमित्तोपादानत्वयोर्मध्य इत्यर्थः । अतोऽभिन्ननिमित्तोपादानं जगद् ब्रह्मकारणक-

नच साधारण्येन सर्वजगत् प्रति परमाण्वादीनामन्वयः संभवति ।

भाष्यप्रकाशः ।

ग्राहयितुं, 'जन्माद्यस्य यतोऽन्वयात्' इत्यनेनान्वय एव हेतुत्वेनोक्तः । नच तत्रेतरत इत्यनेन व्यतिरेकस्याप्युक्तत्वात् तस्यात्र कुतो नोक्तिरिति शङ्क्यम् । ब्रह्मणो व्यापकत्वेनाभावरूपस्य व्यतिरेकस्याभावाद्विशेषेणातिरिक्तत्वरूपो व्यतिरेकः कृत्स्नप्रसक्तिवारणायात्र विवक्षितः । स त्वनारोपितानागन्तुकरूपबोधकेन समुपसर्गेणैव बोधित इत्यतः पृथगनुक्तेः । एवं चतुःश्लोक्यामप्यन्वयव्यतिरेकाभ्यामित्यत्रापि वोध्यम् । एतदेवैकादशस्कन्धीये,

'यथा हिरण्यं सुकृतं पुरस्तात् पश्चाच सर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत्' ॥

इति वाक्येऽपि निष्कृष्य दृष्टान्तेन बोधितं ज्ञेयम् । प्रकृतमनुसरामः । नन्वेतादृशोपपादनसापेक्षब्रह्मान्वयोपगमापेक्षया तदनपेक्षः परमाणूनां भूतानां वान्वयो ज्यायान् प्रतिपत्तिसौकर्यात् । तदर्थमेव सर्वेषां प्रयत्नादित्याशङ्कायामाहुः नचेत्यादि । परमाण्वादीनामित्यादिपदेन, 'कालः स्वभावो नियतिर्यदृच्छा'इति श्रुत्युक्तानां कालादीनां संग्रहः । जगदन्तःपातिषु दिगाकाशादिषु परमाणूनामन्वयाभावात् । तेषां नित्यत्वाभ्युपगमेऽपि स्वभावान्वयस्त्ववश्यं वाच्यः । एवं मतान्तरे कालस्य प्रकृतेश्च वाच्यः । तथा सति विप्रतिपन्नानामनेकेषां परमाणूनां चानेकेषाम-

रश्मिः ।

मित्युक्तं भवतीति सुबोधिनीस्वारस्यात् । अत एव तथा चैवं विचारे ब्रह्मणः सर्वविधं कारणत्वं श्रुतिवाक्याभ्यां प्रमाणाभ्यां सिद्धमिति भाष्ये वक्ष्यते । **व्यतिरेकस्येति** निमित्तकारणत्वरूपस्येत्यर्थः । **व्यतिरेक** इति निमित्तकारणमित्यर्थः । इतरन् निमित्तकारणमिति सुबोधिनीस्वारस्यात् । कारणत्वे सति विशेषेणातिरिक्तत्वं निमित्तस्यैवेति । **स त्विति** निमित्तकारणरूपो व्यतिरेक इत्यर्थः । **अनारोपितेति** 'विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' इत्यत्र असांप्रतमित्यस्य न युज्यते इत्यर्थान् निपातानां वाचकत्वमपीष्टमिति भावः । वस्तुतस्तु द्योतकेनेत्यर्थः । अनागन्तुकनारोपितरूपस्य व्यञ्जनया बोधकेनेत्यर्थात् । **बोधित** इति व्यतिरेके सति ब्रह्मणो जगत्यन्वयः स्यात्तदैव समन्वयः, अस्त्यादिनान्वयः । अन्यथा तु कृत्स्नस्य ब्रह्मणो जगत्त्वप्रसक्तिरिति समन्वयो न स्यादिति भावः । **एवं चतुरिति** एतच्चैतस्य सुबोधिन्यां व्याख्यातं प्रागुक्तं च । **तदर्थमिति** समन्वयसंपादनार्थमित्यर्थः । **काल इत्यादि** श्वेताश्वतरेऽस्ति । **तेषामिति** दिगाकाशादीनाम् । **नित्यत्वेत्यादि** तच्चैकं विभु नित्यं चेति तर्कसंग्रहे इत्यभ्युपगमपदम् । स्वभावान्वयो नित्येष्वपि वाच्य इत्यर्थः । अन्यथा शब्दगुणकत्वं न स्यात् । **मतान्तर** इति व्याहृति ब्रह्मवादे सांख्ये चेत्यर्थः । व्याहृति ब्रह्म कालः । द्वितीयाध्याये दशमस्य कालात्मा संकर्षण उक्तः । स वेदः । काल उपदेश इति धातुपाठात् । आत्मशब्दस्तु 'कालोस्मि' इति गीतावाक्यात् । मतं तु

'प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ।
तृतीयं सर्वभूतस्थं यज्ज्ञात्वा मुच्यते बुधः' ॥

इत्यत्र व्याहृति ब्रह्म । अण्डसंस्थितं द्वितीयम् । **वाच्य** इति अन्वयो वाच्यः । **एकस्मिन्नित्यादि** भाष्यं विवृण्वन्ति **तथा सतीत्यादि** । **विप्रतिपन्नानामिति** दीधितिकृ-

१. पदार्थतत्त्वविवेचनाख्ये ग्रन्थे ।

एकस्मिन्ननुस्यूते संभवत्यनेककल्पनाया अन्याय्यत्वात् । लोके कर्तृविशेषवदुपादानविशेषग्रहणेऽपि न ब्रह्मणि व्यभिचारः । अलीकप्रतीतेऽस्तित्वादिप्रतीतावपि सम्यगन्वयाभावान्न कार्यत्वव्यभिचारौ । तस्माद् ब्रह्मण एव समवायित्वम् ।

भाष्यप्रकाशः ।

न्वयकल्पनस्य न्यायविरुद्धत्वं प्रतिपत्त्यसौकर्यात् । किंत्वेकस्मिन् ब्रह्मणोऽन्वये संभवति तस्यैवानुस्यूतस्य समवायित्वं युक्तमित्यर्थः । एकस्मिन् समवायिनीति वार्थः । नन्वनेकसमवायिकल्पनस्यान्याय्यत्वे मृत्तन्त्वादेरपि समवायित्वं न स्यात् । तथाच प्रत्यक्षविरोध इत्यत आहुः **लोक** इत्यादि । तथाच यथा लोके कुलालादीनां चतुर्मुखान्तानां कर्तृत्वेऽपि तत्तन्मते प्रकृतेरीश्वरस्य च सर्वनियामकत्वान्न कर्तृत्वं हीयते एवं लोके तन्त्वादीनां परमाण्वन्तानां प्रकृत्यन्तानां वोपादानत्वेन ग्रहणेऽप्यस्मन्मते ब्रह्मणो मूलकारणत्वान्न समवायित्वहानिरित्यर्थः । ननु शुक्तिरजतादौ स्वाप्निकेषु चास्तित्वं प्रतीयत इति तेषु सदन्वयो वक्तव्यस्तथा सति तस्यापि ब्रह्मकार्यत्वे जगत्तुल्यतया सत्यत्वं स्यात् । तत्तु विशेषदर्शनबाधितत्वादशक्यवचनम् । ततश्च न तस्य ब्रह्मकार्यत्वमपि । अतोऽकार्येऽपि सदन्वयान्न तेन ब्रह्मणः समवायित्वसिद्धिरित्यत आहुः **अलीके**त्यादि । तथाचान्वयस्य न गमकत्वमपि तु समन्वयस्य । समन्वयस्त्वनारोपितानागन्तुकरूपेणान्वयः । अलीकप्रतीतरजतादौ तु सत्ता आरोपितेति सत आरोपितरूपेणान्वयान्न तस्य ब्रह्मकार्यतागमकत्वम् । तस्यैवाभावाच्च न ब्रह्मणोऽपि समवायित्वव्यभिचार इत्यर्थः । सिद्धमाहुः **तस्मा**दित्यादि । नामरूपयोः कर्मणः सुखदुःखमोहानां चागन्तुकत्वेन, परमाण्वादीनां चासाधारणत्वेन, कालादेस्तथात्वे विप्रतिपन्नत्वेन, अलीकप्रतीतेः सत्त्वस्यारोपितत्वेन तेषामन्वयस्यासम्यक्तया प्रकटाप्रकटानां वास्तविकानां सच्चिदानन्दानामेव समन्वयाद् **ब्रह्मण एव समवायित्वं** निश्चेयमि-

रश्मिः ।

तापि परमाणुद्व्यणुकयोश्च प्रमाणाभाव इति वदता त्रसरेणावेव विश्रान्त्यङ्गीकारेण संदिग्धानामित्यर्थः । यद्वा चकारान्न विशेष्यविशेषणभावोऽतो विप्रतिपन्नानां कालादीनाम् । विप्रतिपत्तिर्नैयायिकप्रसिद्धा । **अनेकेषा**मिति परमाणुस्वभावकालादीनामित्यर्थः । **प्रतिपत्ती**त्यादि गौरवात्तथेत्यर्थः । कालादीनां तु किं कारणं ब्रह्म कुतोऽस्य जाता जीवाम इति कारणजिज्ञासायां 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' इति श्रुतावेव चिन्त्यत्वनिर्वचनादेव कारणत्वस्य निरासादिति । **एकस्मिन्नि**ति अत्र संभवतीत्यन्तेन **एकस्मिन्ननुस्यूते संभवती**ति भाष्यं विवृतम् । तस्यैवेत्यादिना**नेककल्पनाया अन्याय्यत्वा**दिति भाष्यस्य फलितार्थकथनमिति बोध्यम् । **तत्तन्मत** इति सांख्यनैयायिकादिमत इत्यर्थः । समन्वयलक्षणस्यानारोपितपदकृत्यं वक्तुं हेतोर्व्यभिचारित्वं शङ्कामुखेनाहुः **नन्वि**त्यादि । **विशेषदर्शने**त्यादि दोषनिवृत्तौ नेदं रजतमिति नेमे स्वाप्निका इति च विशेषदर्शनेत्यर्थः । **ततश्चे**त्यादि सत्यत्वाभावाच्चेत्यर्थः । **तेने**ति व्यभिचरितेन समन्वयेन हेतुनेत्यर्थः । **ब्रह्मण** इत्यादि उभयपक्षेपीति बोध्यम् । **आरोपिते**ति पूर्वमसत्त्वात्तथेत्यर्थः । **तस्ये**ति आरोपितरूपेणान्वयस्येत्यर्थः । **ब्रह्मकार्यते**ति अनुमानपक्षेणेदमुक्तम् । भाष्ये तु व्याख्यानपक्ष इति न गमकशब्दः । तेन ब्रह्मकार्यतासाधकत्वमित्यर्थः । न कार्यत्वव्यभिचाराविति भाष्यीयकार्यत्वशब्दं व्याकृत्य व्यभिचारशब्दं व्याकुर्वन्तिस्म **तस्यैवे**त्यादि । आरोपितरूपेणान्वयस्य शुक्तिरजतादिवदभावाच्चेत्यर्थः । **व्यभिचारो** **हानिः । असाधारणत्वेने**ति आकाशाद्यवृत्तित्वेन तथेत्यर्थः । **तथात्व** इति कारणत्व इत्यर्थः ।

एतत् सर्वं श्रुतिरेवाह। 'स आत्मानᳪस्वयमकुरुत' इति। निमित्तत्वं तु स्पष्टमेव सर्ववादिसंमतम्।

भाष्यप्रकाशः।

त्यर्थः। नन्वेवं वादिविसंमताग्रहे किं बीजमत आहुः एतदित्यादि। पूर्वाधिकरणोक्तं कर्तृत्वं शास्त्रप्रमाणकत्वम्, एतदधिकरणोक्तं समवायित्वं च कर्तृकर्मत्वबोधकविभक्तिभ्यामेकस्यैव श्रुतिर्वदतीत्येतदेव बीजमित्यर्थः। अन्यथा श्रुतावुपचारापत्तेः। एवंच, यत इत्यत्र हेतौ या पञ्चमी सा, 'जनिकर्तुः प्रकृतिः' इत्यत्र प्रकृतिपदेन समवायिरूपं कारणं परामृश्य विहितेति निमित्तवदुपादानमपि सैव वक्तीति वाचकशब्दश्रवणमप्रत्यूहम्। तथाचैवं विचारे ब्रह्मणः सर्वविधं कारणत्वं श्रुतिवाक्याभ्यां प्रमाणाभ्यां सिद्धम्। तत्र स्वस्यैव समवायित्वेन कर्तृदोषभूतमनात्मकामत्वं, क्रियाज्ञानयोः सातिशयत्वं च वारितम्। कर्मणि आत्मपदेनाविकृतत्वबोधनाद् विकृतत्वं च वारितम्। तेन दोषरहिता ब्रह्मणः सर्वविधा कारणतेत्यनेनाधिकरणेन निर्णीतम्। समन्वयपदव्याख्यानेनात्र समवायस्वरूपमपि बोधितम्। अनारोपितानागन्तुकरूपेणानुवृत्तिरेव समवाय इति। इदमेव च तादात्म्यम्। आगन्तुकरूपेण भेदसहिष्णुत्वेऽप्यनागन्तुकरूपेणाभेदादिति। न तु

रश्मिः।

कर्त्रीत्यादि ताभ्यां विभक्तिभ्यामित्यर्थः। **अन्यथेति** पूर्वोक्तत्रयानङ्गीकार इत्यर्थः। **उपचारेति।** तदिति तच्छब्दे। कर्ता वाच्यः समवाय्यभिन्नकर्तरि लक्षणापत्तेरित्यर्थः। **परामृश्येति** प्रकृतिपदमुपादानमात्रपरमिति भाष्यकैय्यटमतमिति मनोरमायामुक्तत्वात् तथेत्यर्थः। **निमित्तवदिति** वृत्तिकृन्मते प्रकृतिपदस्य हेतुमात्रपरत्वादिति भावः। **सैव वक्तीति** 'जायमानस्य हेतुरुपादानं स्यात्' इति वृत्तौ हेतुपदं भाष्यकैय्यटसंमत्या स्वभावेन चाभिन्ननिमित्तोपादानं वक्तीत्यर्थः। **श्रुतीति** यत इति विभक्तिरूपा विनियोक्त्री श्रुतिः 'यतो वा इमानि भूतानि' इति साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणरूपसमभिव्याहारात्मकं वाक्यं ताभ्यामित्यर्थः। **समवाय** इति न चानारोपितानागन्तुकरूपेण घटत्वादिना रूपादौ घटादीनामनुवृत्तेरभावात्समवायित्वं न स्यादिति शङ्क्यं, तादात्म्यस्वीकारात्। एतच्च द्वितीयस्य द्वितीयपादे स्फुटिष्यति समवायेत्यादिसूत्रे। **आगन्तुकेत्यादि** यथागन्तुकरूपेण घटत्वादिना मृदो भेदसहिष्णुत्वेपि अनागन्तुकरूपेण मृत्त्वेनाभेदात्। तथागन्तुकेन रूपेण रूपनामादिना ब्रह्मणो भेदसहिष्णुत्वेपि अनागन्तुकरूपेण सत्यत्वादिनाभेदादित्यर्थः। तथा च प्रत्ययः। मृद् घटो न, घटो मृत्, ब्रह्मजगन्न, अधिकत्वात्, जगद् ब्रह्मेति भेदस्यैच्छिकत्वान्न तयोर्विरोधः। नागेशभट्टोपीदं लक्षणं मञ्जूषायामनुमेने। शब्दार्थयोस्तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्। अभेदस्याध्यस्तत्वाच्च न तयोर्विरोधः। तत्र भेदस्योद्भूतत्वविवक्षयास्यार्थस्यायं वाचकः उञः प्रगृह्यं तस्य वाचकः प्रणव इत्यादौ षष्ठी। अभेदस्य तत्त्वविवक्षया तु प्रथमा 'वृद्धिरादैच्' 'ओमित्येकाक्षरं ब्रह्म' इत्यादिषु। अत एवार्थे शब्दधर्मत्वव्यवहारः। अत्यन्ताभेदेऽश्वपुरुषयोरिव तद्व्यवहाराभावात्। नाप्यत्यन्ताभेदे सः।

भाष्यप्रकाशः ।

वैशेषिकप्रतिपन्न इति न कोऽपि विरोधः । एतस्य संबन्धत्वमैच्छिकभेदोत्तरं द्विनिष्ठत्वे विशिष्ट-बुद्धिनियामकत्वाज्ज्ञेयम् ।

विज्ञानेन्द्रभिक्षुस्तु जन्मादिसूत्रे अधिष्ठानकारणमतिरिक्तमङ्गीकृत्य, यत्राविभक्तं येनोप-ष्टब्धं च सद् उपादानकारणं कार्याकारेण परिणमते तदधिष्ठानकारणम् । यथा सर्गादौ जला-विभक्ताः पार्थिवसूक्ष्मांशास्तन्मात्राख्या जलेनैवोपष्टम्भात् पृथिव्याकारेण परिणमन्त इत्यतो जलं पृथिव्या अधिष्ठानकारणमिति । अत्र प्रमाणं तु,

'आधारमानन्दमखण्डबोधं यस्मिँल्लयं याति पुरत्रयं च' ।

रश्मिः ।

घटे स्वधर्मत्वव्यवहाराभावादिति । न कोऽपीति समवायदूषकस्य 'समवायाभ्युपगमाच्च साम्यादनव-स्थितेः' इति सूत्रस्यापि न विरोध इत्यर्थः । अत्र वदन्ति तादात्म्यं न संबन्धः किं तु नीलं घटमान-येत्यादौ विशेषणीभूतनीलादिपदोत्तरं विभक्त्यर्थकर्मत्वं तस्य नान्वयः क्वापि । विशेषणपदोत्तरं विभक्तेः साधुत्वार्थं प्रयोगात् । अभेद एव वा विशेषणविभक्तेरर्थः । अयमेव तादात्म्यम् । अभेदस्य संसर्गमर्यादया भानं तु समासस्थल एव । लुप्तविभक्त्यनुसंधानाभावेपि शाब्दबुद्धेरानुभाविक-त्वात् । न च विशेषणविभक्तेरभेदार्थकत्वं न संभवति, घटे नील इत्यादावप्यभेदान्वय-बोधापत्तेः । धान्येन धनमस्येत्यादौ तृतीययाऽभेदबोधनात् । नाभेदप्रकारकबोधे विरुद्धविभक्तिराहित्यं प्रयोजकमिति शङ्क्यम् । द्वितीयादिनाभेदबोधने द्वितीयान्तविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजक-ताभ्युपगमादिति तदमञ्जुलम् । अभेदस्य संसर्गता नीलो घट इत्याद्यसमस्तस्थलेप्यविरुद्धा गौर-वाभावात् । एवंचासमस्तस्थले विशेषणविभक्तेरभेदे शक्तिकल्पनमनुचितम् । ननु विशेषणविभक्तेर-भेदे शक्तिभ्रमस्थलेऽभेदस्य संसर्गतावादिमतेऽभेदस्य प्रकारतावादिमते च नीलो घट इति वाक्या-दभेदप्रकारकबोधः संभवति । एवं च द्वितीयादिनाऽभेदबोधने द्वितीयान्तविशेष्यवाचकपदसम-भिव्याहारस्य प्रयोजकत्वं यदभ्युपगतं तदभेदस्य संसर्गतया शक्त्या च बोधनद्वये हेतुरिति हेतु-ताद्वयकल्पने गौरवम्, अभेदस्य संसर्गतावादिनः इत्यादीति चेन्न । अभेदे शक्तिभ्रमस्थलेपि तत्संसर्गबोधस्यैवोपगमादभेदस्य संसर्गतावादिनेति तद्व्यक्तित्वावच्छिन्नभेदाभाव एव नीलत्वादि-प्रकारेण भासमानानां तत्तद्व्यक्तीनां स्वस्मिन्संबन्धतया भासत इति **भट्टगदाधरः** । तदेतदाहुः **एतस्य संबन्धत्वमिति** । **द्विनिष्ठत्व इत्यादि** ब्रह्मजगन्निष्ठत्वे जगद् ब्रह्मेति । **विशिष्टबुद्धि-नियामकत्वाज्ज्ञेयमित्यर्थः** । अत्रेयं लिपिर्बोध्या । तच्छोधितावरणभङ्गे तज्ज्ञानफलमिति दर्शनात्, तेन जकारञकारयोर्योगे ज्ञ इत्युच्चारणमात्रं न त्वस्य वर्णान्तरत्वमिति श्रुत्वं भवत्येवेति कथं नात्र तदिति कुचोद्यं निरस्तम् । अथवा मातृकाविद्यायां पञ्चाशद्वर्णा इति पक्षः । तत्र षोडश स्वराः पञ्च-विंशतिः स्पर्शाः यादयोष्टौ क्षकारोन्तिमः । संध्यक्षरत्वेपि पृथगुपादानं भिन्नश्रुत्या ज्ञकारस्याप्युप-लक्षकमिति शकारचवर्गयोर्योगाभावान्न श्रुत्वम् । शिक्षोक्तचतुःषष्टिपक्षत्रिषष्टिपक्षयोस्तु क्षज्ञयो-र्भिन्नाक्षरत्वे न संदेहः । एवमेकपञ्चाशद्द्विपञ्चाशत्पक्षेपि बोध्यम् । एतच्च 'पञ्चाशद्वर्णरूपश्च' इति निबन्धे स्पष्टम् । अतोस्मिन्नंशे मनोरमोक्तं श्रुत्वं भवत्येवेत्येवामञ्जुलमेवेति ध्येयम् । शुद्धस्यैव कारणत्वं कूटाकूटयोः कूटस्यैव प्राधान्यमिति वक्तुं निश्चेतुं मतान्याहुः **विज्ञान इति** । **तन्मात्रेति** मन्वाख्या । **जलेन** आश्रयभूतेन । **अत्रेति** [illegible] **इत्यर्थः** ।

भाष्यप्रकाशः ।

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' ॥

इति कैवल्योपनिषद्वाक्यम् ।

'यस्य यत् कारणं प्रोक्तं तस्य साक्षान्महेश्वरः ।
अधिष्ठानतया स्थित्वा सदैवोपकरोति च' ॥

इति पुराणान्तरवाक्यं च । एतादृशकारणत्वमेवाधिष्ठानकारणत्वमिति मूलकारणत्वमिति चोच्यते । ब्रह्मणश्च स्वाविभक्तप्रकृत्याद्युपष्टम्भकत्वं साक्षितामात्रेणेति जगत्कारणत्वेऽपि ब्रह्मणो न विकारित्वम् । न वा प्रकृतिपुरुषादिष्वतिप्रसङ्गः । सर्गात् पूर्वमन्येषां साक्षित्वासंभवात् । अत एवाविकारिचिन्मात्रत्वेऽपि ब्रह्मणो जगदुपादानत्वं, जगदभेदश्चोपपद्यते । विकारिकारणवदधिष्ठानकारणस्याप्युपादानत्वव्यवहारात् । कार्याविभागाधारत्वस्यैवोपादानसामान्यलक्षणत्वात् । अविभागश्चाधारतावत् स्वरूपसंबन्धविशेषोऽत्यन्तसंमिश्रणरूपो दुग्धजलाद्येकताप्रत्ययनियामकः । तत्र समवायसंबन्धेन यत्राविभागस्तद्धि विकारिकारणम् । यत्र कार्यस्य कारणाविभागेनाविभागस्तदधिष्ठानकारणम् । यथा जलं पृथिव्या इति । न हि जलस्य पृथिवी साक्षादेव विकारः । तन्मात्राणां भूतप्रकृतित्वश्रुतिस्मृतिविरोधात् । नच द्वयोरेवोपादानत्वम् । विजातीयानामनारम्भकत्वात् । एवमाकाशादीनां वाय्वाद्युपादानत्वमप्यधिष्ठानतयैव द्रष्टव्यम् । संभवत्यविरोधे सृष्टिप्रक्रियायां वैशेषिकसांख्ययोरुभयोरप्यत्र विरोधानौचित्यादिति । वैशेषिकादिभिरपीदृशं ब्रह्मणः कारणत्वमिष्यत एव । परंतु तैरिदमपि निमित्तकारणत्वमिति परिभाष्यते । अस्माभिस्तु समवाय्यसमवायिभ्यामुदासीनं निमित्तकारणेभ्यश्च विलक्षणतया चतुर्थमाधारकारणत्वमिति । ब्रह्मणश्च जगत्कर्तृत्वं स्वोपाधिमायौपाधिकम् । परिणामित्वरूपोपादानत्वं च प्रकृतितत्कार्याद्यौपाधिकमित्याह ।

तदसंगतम् । 'आत्मैवेदमग्र आसीत्' इत्यादिश्रुतिषु दृश्यमानस्य जगतः पूर्वमात्मरूपत्वादिबोधनेनेतराभावसिद्धावविभागाख्यस्य स्वरूपसंबन्धस्य तदानीं वक्तुमशक्यत्वेन लक्षणेऽव्याप्तेः । गार्गीब्राह्मणे भूतभव्यस्याकाशे आकाशस्य चाक्षरे ओतप्रोतत्वकथनेन तादृशत्वस्य च, 'ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः' इत्यादावुपादानतागमकत्वेन, आथर्वणानां गोपथब्राह्मणारम्भे 'ब्रह्म ह वा इदमग्र आसीत् स्वयं त्वेकमेव तदैक्षत महद्वै यक्षं तदेकमेवास्मि

रश्मिः ।

अतिप्रसङ्ग इति अधिष्ठानकारणत्वस्येत्यर्थः । **दुग्धजलादीति** आदिशब्देनोदकसैन्धवखिल्यादिग्रहणम् । कार्येत्यादि सामान्यलक्षणं योजयते **तत्रेत्यादि** । **यत्रेत्यादि** च । **जलं पृथिव्या** इति अद्भ्यः पृथिवीति श्रुतेः । **भूतेति** । **श्रुतिस्मृति**कैवल्योपनिषत्पुराणान्तररूपे पूर्वोक्ते । **द्वयोरिति** जलतन्मात्रयोरित्यर्थः । **विजातीयेत्यादि** । तथाच विजातीयजलस्य पृथिव्यनारम्भकत्वमिति भावः । **वाय्वादीत्यादि** 'आकाशाद्वायुः । वायोरग्निः' इत्यादिश्रुतावित्यर्थः । **विरोधानौचित्यादिति** परस्परं वैशेषिकसांख्ययोर्विरोधो बोध्यः । **स्वोपाधिमायेति** माया शुद्धसत्त्वप्रधाना । **प्रकृतिः** सत्त्वरजस्तमःसाम्यावस्था । **इत्यादीति** आदिशब्दार्थस्तद्भाष्ये द्रष्टव्यः । **दृश्यमानस्येति**

भाष्यप्रकाशः ।

हन्ताहं मदेव मन्मात्रं द्वितीयं तदेव निर्मम' इति द्वितीयस्य ब्रह्ममात्रत्वश्रावणपूर्वकं सृष्टिकथनेन

'विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ।
यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम्' ॥

इति तृतीयस्कन्धे विश्वस्य ब्रह्मतन्मात्रत्वकथनेन च द्वितीयस्य विश्वस्य च साक्षादुपादेयत्वे ब्रह्मण उपादानत्वस्यादण्डवारितत्वाच्च । नचोक्तकैवल्यश्रुतिविरोधः । तस्या अवान्तरसृष्टिविषयकत्वात् । एवकाराग्रपदाद्यभावेन पुरत्रयलयलिङ्गेन च तथा निश्चयात् । नापि स्मार्तसदापदविरोधः । प्राथमिकसृष्ट्यनन्तरं तथात्वेऽप्यविरोधात् । उक्तश्रुताविवेहापि प्राथमिकसृष्ट्यारम्भकालगमकस्याभावात् । उक्तदृष्टान्तोऽप्यसंगतः । पृथिव्यादितन्मात्रस्यैव साक्षाज्जलादिजन्यत्वात् ।

'रसमात्राद् विकुर्वाणादम्भसो दैवनोदितात् ।
गन्धमात्रमभूत् तस्मात् पृथ्वी घ्राणस्तु गन्धगः' ॥

इत्यादितृतीयस्कन्धवाक्यैस्तथानिश्चयात् । विजातीयारम्भस्यात्रापि तादवस्थ्यात् । न च विजातीयानामनारम्भकत्वम् । तन्तुत्वपटत्वयोर्भेदेन तत्रैव विजातीयारम्भदर्शनात् । द्रव्यत्वादिना साजात्यस्य भवदनभिमतेऽपि सत्त्वात् । नच द्रव्यत्वव्याप्यजातिभिरेव साजात्यं विवक्षितमिति वाच्यम् । अप्रयोजकत्वाद् गोमयादिभ्यो वृश्चिकाद्युत्पत्तिदर्शनात् । चलत्यनिले सूक्ष्मानलेनापि यत्र महान् दावानलस्तत्रानलावयवानां स्वल्पत्वेन ततो महानलस्याशक्यवचनतयाऽनिलेनैव तदुत्पत्तेः सार्वजनीनत्वाच्च । 'यत्र क्वचन स्विद्यति शोचते वा पुरुषस्तेजस एव तदध्यापो जायन्ते' इत्यादिश्रुतिभिरपि तथा निश्चयाच्च । सांख्यवैशेषिकादीनां परस्पराविरोध-

रश्मिः ।

णत्वं लेखकप्रमादात् । **द्वितीयस्येति** जगत इत्यर्थः । **अदण्डेत्यादि** दण्डो दुष्टगोरानयनेस्ति दोषात्तद्वदुपादानत्वेपि विकारित्वादिदोषावचनाच्चेति दण्डेन हेयत्वापत्त्या वारितं भवत्येव । 'वाचो धेनुमुपासीत' इति श्रुत्या शब्दात्मनो धेनुत्वेनोपासनमत्र ज्ञेयम् । क्लृप्तकारणभावेनैव निर्वाहेऽतिरिक्तकल्पनायां गौरवमिति चकारार्थः । **अवान्तरेति** 'तम (एवाग्र) आसीत्तमसा गूढमग्रे प्रकेतम्' इति श्रुत्यावान्तरेत्यादिः । 'आपमापामपः सर्वाः' इति श्रुतिवत् । **पुरत्रयेत्यादि** तमोधिष्ठातुस्त्रिपुरारेर्हि लिङ्गमिदमिति, अन्यथा लोकत्रयमित्युक्तं स्यात् । **स्मार्तसदेत्यादि** अधिष्ठानतया स्थित्यधिष्ठानकारणं तत्कृतस्य सर्वकालबोधकस्मार्तसदापदेत्यर्थः । **तथात्व** इति अधिष्ठानतया स्थित्वा सदोपकार इत्यर्थः । **प्राथमिकेत्यादि** अग्रपदादेरिवेत्यर्थः । विजातीयस्यानारम्भकतामुपगम्य जलस्य न साक्षाद्विकारः पृथिवीत्युक्तं तन्नेत्याहुः **उक्तेत्यादि** । यथा जलं पृथिव्या इत्युक्तदृष्टान्तः । **विजातीयेत्यादि** । **अत्रापीति** त्वयाप्यभ्युपगते गन्धरूपतन्मात्रस्य पृथिव्युपादानत्वेपीत्यर्थः । गन्धत्वपृथिवीत्वाभ्यां वैजात्यं बोध्यं पुराणे । नैयायिकः प्रत्यवतिष्ठते **नचेत्यादि** । **तत्रैवेति** प्रसिद्धयोस्तन्तुपटयोरेव । **भवदित्यादि** तन्तुपटयोः कार्यकारणभाव इत्यर्थः । तथाच तन्तुभ्यो घटोप्युत्पद्येतेति भावः । **न च द्रव्यत्वेत्यादि** पृथिवीत्वाप्त्वादिभिरित्यर्थः । **अप्रयोजकेति** द्रव्यत्वव्याप्या जातिः पृथिवीत्वं तस्य तन्तुपटयोः सत्त्वेन विजातीयानारम्भासाधकत्वात् । हेतौ हेतुमाहुः **गोमयेत्यादि** । एतच्च गोमयस्यापृथ्वीत्वे । गोमयस्य पृथ्वीत्वाद्धेत्वन्तरमाहुः **चलतीत्यादि** । तथाच द्रव्यत्वव्याप्या जातिरनिलत्वं तेनानले साजात्याभावादप्रयोजकत्वादिति भावः । **स्विद्यतीत्यादि** स्वेदयुक्तो भवत्यश्रूणि मुञ्चतीत्यर्थः । **तथेत्यादि** द्रव्यत्वव्याप्यतेजस्त्वेनापां

भाष्यप्रकाशः ।

रोधाग्रहस्य प्रकृतानुपयोगित्वेन तथायासस्यापार्थत्वाच्च । एवं ब्रह्मणो मायौपाधिकं कर्तृत्वं प्रकृतितत्कार्यौपाधिकं परिणाम्युपादानत्वमप्यवान्तरसृष्टिविषयकमेव । 'आनन्दरूपममृतं यद् विभाति,' 'सच्चिदानन्दरूपाय' इत्यादिश्रुतिभिः 'आनन्दमात्रकरपादमुखोदरादिः' इत्यादि-स्मृतिभिश्च ब्रह्मण आनन्दाकारत्वे सिद्धे मूलरूपस्यौपाधिकत्वकल्पनाया असंगतत्वात् । नच विकारित्वादि शङ्क्यम् । तस्याग्रे तदनन्यत्वाधिकरणे परिहरणीयत्वात् । एवमन्यदपि यद्यद् विरुद्धमविरुद्धं वा तत्सर्वं प्रसङ्गे व्यवस्थापयिष्यामः ।

भट्टभास्कराचार्यास्तु ब्रह्मण एवोपादानत्वमङ्गीकृत्य कार्यस्य जगतः कारणाद् भेदाभेदौ प्रतीत्या व्यवस्थापयन्ति । तथाह्याहुः—

'एकस्यैकत्वमस्तीति प्रमाणादवगम्यते ।
नानात्वं तस्य तत्पूर्वं कस्माद् भेदोऽपि नेष्यते ॥
यत्प्रमाणैः परिच्छिन्नमविरुद्धं हि तत् तथा ।
वस्तुजातं गवाश्वादि भिन्नाभिन्नं प्रतीयते' ॥

नह्यभिन्नं भिन्नमेव वा क्वचिद् दर्शयितुं शक्यते । सत्ताज्ञेयत्वद्रव्यत्वादिसामान्यात्मना सर्वमभिन्नं, व्यक्त्यात्मना तु परस्परवैलक्षण्याद् भिन्नम् । तथाहि—

'प्रतीयते चेदुभयं विरोधः कोऽयमुच्यते ।
विरोधे चाविरोधे च प्रमाणं कारणं मतम् ॥
एकरूपं प्रतीतत्वाद् द्विरूपं तत् तथेष्यताम् ।
एकरूपं भवेदेकमिति नेश्वरभाषितम्' ॥

रश्मिः ।

साजात्याभावेऽप्युपादानत्वबोधनेनाप्रयोजकत्वनिश्चयादित्यर्थः । **तथेति** अविरोधप्रकारस्येत्यर्थः । **अवान्तरेति** 'माया च तमोरूपा' इति नृसिंहतापनीयात् । सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरि-त्युभयथापि तमसः सृष्टिरवान्तरसृष्टिस्तद्विषयकम् । व्यवस्था सर्वसंमतेत्येवकारः । **अग्र** इति द्वितीया-ध्याय इत्यर्थः । **प्रमाणादिति** चक्षूरूपादित्यर्थः । **तत्पूर्वमिति** एकत्वपुरःसरमतो हेतोस्तथेत्यर्थः । एकैव मृन्नानाघटाद्याकारेण भवतीति निदर्शनमत्र बोध्यम् । **यत्प्रमाणैरिति** प्रमाणैश्चक्षुरादिभिर्य-द्वस्तु परिच्छिन्नं यद्विशिष्टं निश्चितं यथैकस्मिन् घटे द्रव्यत्वपृथ्वीत्वघटत्वादयः रूपरसपरिमाणादयश्च प्रमाणनिश्चिता इति तद्विशिष्टं घटरूपं वस्तु तत्तथैवाविरुद्धम् । निश्चितोयमर्थ इति हिशब्दार्थः । तथैव गवाश्वादिवस्तुजातं वक्ष्यमाणरीत्या भिन्नाभिन्नं प्रतीयतेऽतो भिन्नत्वाऽभिन्नत्वावच्छिन्नमेव वस्तु-जातमविरुद्धमित्यर्थः । उपपादयन्ति **नहीत्यादि** । **एवेति** अयमभिन्नमित्यत्रापि । **सर्वमिति** अन्ये सत्तादिकं सर्वत्र मन्यन्ते । **परस्परेत्यादि** परस्परं घटपटाद्याकारवैलक्षण्यादित्यर्थः । एवं भेदाभेदयोरविरोधमुत्पाद्य प्रकृते योजयन्ति **तथाहीत्यादि** । **तत्तथेष्यतामिति** तद्ब्रह्म यथाप्रतीतत्वात् श्रुत्येकरूपं तथा चक्षुषा प्रतीतत्वाद् द्विरूपमप्यनिच्छतेष्यतामित्यर्थः । नन्वेवं सति 'एकमेवाद्वितीयं ब्रह्म' इतीश्वरभाषणविरोध इति चेत्तत्राहुः **एकरूपमित्यादि** । एकं एक-

भाष्यप्रकाशः ।

ननु शीतोष्णयोर्यथा परस्परं विरोधस्तथा भेदाभेदयोः, किमिदमुच्यते नास्ति विरोध इति । अत्रोच्यते । भवतः प्रज्ञापराधोऽयं, न वस्तुविरोधः । कथम् । सहानवस्थानं, छायातपवद्भिन्नदेशवर्तित्वं वा शीतोष्णवद्विरोधो नाम । एतदुभयमिह कार्यकारणयोर्ब्रह्मप्रपञ्चयोर्नास्ति । तत्र उत्पत्तेस्तत्रैवावस्थितेस्तत्रैव प्रलयात् । विरोधे हि त्रयमेतन्नोपपद्यते । नहि कृशानुनाङ्कुरोत्पत्त्यादिलक्षणः संबन्धो दृश्यते । कारणेन हि मृत्सुवर्णादिना कार्यं सर्वदानुस्यूतं दृश्यते । तत्राक्षिणी निमील्य परस्परासंगतिलक्षणो विरोधो वैयात्याद् वक्तव्यो भवेत्, प्राथमिकश्रोत्रियश्रोत्रप्रतारणार्थं वा । शीतोष्णयोर्भिन्नाधारवर्तिनोर्न कदाचिदुत्पाद्योत्पादकलक्षणः संबन्धो, नाधाराधेयलक्षण इति युक्तस्तयोः परस्परविरोधः । तस्माच्छीतोष्णवदित्ययुक्तं दृष्टान्ताभिधानम् । अत्र प्रागल्भ्यात् कश्चिदाह । यथा संशयज्ञानं स्थाणुर्वा पुरुषो वेत्यप्रमाणं, तथा भेदाभेदज्ञानमिति । तदसत् ।

'परस्परोपमर्देन न कदाचित् सह स्थितिः ।
प्रमेयानिश्चयाच्चैव संशयस्याप्रमाणता' ॥

अत्र पुनः कारणं पूर्वसिद्धं मृत्सुवर्णादिलक्षणम् । ततः कार्यं पश्चाज्जायमानं तदाश्रितमेव जायते । कारणसमानार्थतया हि कार्यबुद्धिः । न कारणस्वरूपोपमर्देन देशतः कालतो वा

रश्मिः ।

रूपमेव भवेदितीश्वरभाषितं न किंतु एकोहं बहु स्यामिति एकं बहुरूपं भवेदितीश्वरभाषितमित्यर्थः । यद्वा । गोपालतापिनीये कथं चतुर्भिरेको देवो भवेदिति प्रश्ने एकमेवाद्वितीयं ब्रह्मेत्युत्तरात्तथा । **कृशानुने**ति निमित्तकारणेन वह्निनेत्यर्थः । **कारणेने**ति समवायिनेत्यर्थः । **दृश्यत** इति तथा च न जगतो ब्रह्मणा सहानवस्थानं नापि भिन्नदेशवर्तित्वमित्यर्थः । **तत्राक्षिणी** इत्यादि उभयविधलक्षणासंभवे सति भवज्ज्ञानशक्तिं तिरोभाव्येत्यर्थः । **वैयात्या**दिति गत्यन्तरविरहात्तद्विरुद्धं तदसंगतमिति दर्शनाच्चेत्यर्थः । एतदपि ब्रह्मजगतोर्गवाश्वादेश्च नास्तीति तत्प्रयोजनमाहुः **प्राथमिके**त्यादि । साङ्गोपाङ्गवेदमात्रेण वेदार्थमवगच्छन्तः पूर्वकालीनशिष्टानुयायिनः छन्दोध्येतारः श्रोत्रियास्तेषां श्रोत्राणि भेदाभेदबोधकशब्दानेव गृहीतवन्तीति तेषामुक्तरीत्याऽसंगतिलक्षणविरोधप्रदर्शनेन दुर्बुद्ध्युत्पादनार्थमित्यर्थः । **वक्तव्य** इत्यादि पूर्वेणान्वेति । **उत्पाद्ये**ति ब्रह्म जगद्वदित्यादिः । **तस्मा**दिति विरोधलक्षणाभावेपि विरुद्धत्वादित्यर्थः । **प्रागल्भ्या**दिति प्रतिभातिशयादित्यर्थः । धार्ष्ट्याद्वा । गल्भ धार्ष्ट्ये इति । **अप्रमाण**मिति भावे ल्युट्, अप्रमेत्यर्थः । अत्र भेदाभेदवादी किंचिदाह **तदस**दिति । अत्रापि विषमो दृष्टान्त इत्याशयेनाहुः **परस्परे**त्यादि । स्थाणुत्वपुरुषत्वादीनां तथात्वेन तथेत्यर्थः । तथा प्रमेयानिश्चायकत्वात्संशयस्याप्रमात्वं चेत्यर्थे भावे ल्युटा विषमत्वमुपपादयन्ति **अत्र पुनरि**त्यादि । **तदाश्रित**मिति कारणसमवेतमित्यर्थः । दृष्टान्ते तु स्थाणुत्वपुरुषत्वयोर्न कदाचित्सहस्थितिरित्यर्थः । एतद्विषयकं ज्ञानमपि प्रमात्मकमित्याहुः **कारणे**त्यादि । कारणं मृत्तत्समानः मृत्त्वेनार्थो विषयत्वेन यस्यां तत्तथाहि घटो मृदिति बुद्धिः **कार्यबुद्धिः** । **देशत** इति एतद्देशे घटो न मृत् अस्मिन्काले घटो न मृदिति च न पृथग्भूतं कार्यं

भाष्यप्रकाशः।

पृथग्भूतं कार्यं दृश्यते। तस्मान्न किंचिदेतत्। तदयं संग्रहश्लोकः—

'कार्यरूपेण नानात्वमभेदः कारणात्मना।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा'॥ इति।

अत्र वाचस्पतिमिश्रा उक्तां कारिकामुपन्यस्याहुः—कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत्। परस्पराभाव इति चेत् किमयं कार्यकारणयोः कटकहाटकयोरस्ति न वा। न चेद् एकत्वमेव वास्तवं न भेदः। अस्ति चेद् भेद एव, नाभेदः। न च भावाभावयोरविरोधः। सहासंभवात्। संभवे वा कटकवर्धमानकयोरपि तत्त्वेनाऽभेदप्रसङ्गः। भेदस्याभेदाविरोधात्। अपि च। कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्ते, एवं कटकात्मना न भिद्येरन्। कटकस्य हाटकादभेदात्। तथाच हाटकत्वमेव वस्तु सन्न कटकादयोऽभेदस्याप्रतिभासनात्। अथ हाटकत्वेनैवाभेदो, न कटकत्वेन। तेन तु भेद एव कुण्डलादेः। यदि हाटकादभिन्नः कटकः, कथमयं कुण्डलादिषु नानुवर्तते। नानुवर्तते चेत् कथं हाटकादभिन्नः। ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव। यथा सूत्रात् कुसुमभेदाः। नानुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः। तस्मात् तेऽपि हाटकाद्भिन्ना एवेति। सहानुवृत्त्या च सर्ववस्त्वनुगमे, इदमिह नेदमस्मान्नेदमिदमिदानीं नेदमिदमेवं नेदमेवमिति विभागो न स्यात्। कस्यचित् क्वचित् कदाचित् कथंचिद् विवेकहेतोरभावात्।

रश्मिः।

दृश्यत इत्यर्थः। **तस्मा**दिति कार्यस्य कारणाश्रितत्वेन तज्ज्ञानस्य यथार्थत्वेन च दृष्टान्तस्य विरुद्धत्वादित्यर्थः। **तदय**मिति तदित्यव्ययं हेत्वर्थकम्। **नानात्व**मिति भेद इत्यर्थः। तस्य नानात्वनिबन्धनत्वात्। **अभेद** इति कुण्डलं सुवर्णमिति सामानाधिकरण्यप्रतीतेरभेद इत्यर्थः। **भिदे**ति सुवर्णं कुण्डलं नेति प्रतीतेर्भिदेत्यर्थः। **नचे**दिति कटकसुवर्णयोरन्योन्याभावो यदि न तर्हि एकस्मिन् घटे स्वभेदाभाववति एकत्वमिवैकत्वमेव। तथा कटकं सुवर्णमिति प्रतीतेः सुवर्णं कटकं नेति प्रतीतिसत्त्वेपि न भेद इत्यर्थः। **नाभेद** इति अन्योन्याभाववतोर्घटपटयोरिव नाभेद इत्यर्थः। **संभव** इति घटतदत्यन्ताभावयोरिव संबन्धाभावदशायां भेदतदभावयोः संभवे वा कटकशरावयोः परस्पराभाववतोरपि कटकत्ववर्धमानकत्वरूपेण तथेत्यर्थः। ननु तथाप्रतीत्यभावान्नाभेद इति चेत्तत्र दूषणान्तरमाहुः **अपि चे**त्यादि। **भेदस्ये**ति हाटको न कटक इति भेदेऽस्यात्यन्ताभावरूपस्य भेदाभावस्याभेदस्याप्रतिभासमानत्वात्। अयं, न कटकादय इत्यत्र हेतुः। यद्वा कटकं हाटकमिति प्रतीत्याभेदस्याप्रतिभासनादित्यर्थः। **कुण्डलादे**रिति। इति विभाव्यते तदा इति शेषः। **अय**मिति कटक इत्यर्थः। ननु कटकत्वं हाटकत्वं न व्यभिचरतीति कथं भिन्ना इति चेत्तत्राहुः **सहानुवृत्त्ये**त्यादि। **अनुगम** इति। सर्वत्रेति शेषः। **इदमि**त्यादि इह क्षीरं इदं दधि नेदं तैलमिति संसर्गतदभावव्यवस्था न स्यात्। तथा कुड्यादिदं पटादिकं भिद्यते इदं कुड्यमस्मात्कुड्यान्न भिद्यते इत्यसंकरो न स्यात्। एवमिदं कोकिलरुतमिदानीं वसन्तसमयेस्ति, इदमम्बुदध्वानं नेति व्यवस्था न स्यात्, तथेदं घटादि एवं कम्बुग्रीवत्वादिप्रकारकं इदं पटादिकं एवं नेति प्रकारासंकरो न स्यादित्यर्थः। उक्तास्वव्यवस्थासु हेतुमाहुः **कस्यचि**दित्यादि। कुतश्चिदपीति ध्येयम्। **अभावा**दिति सर्वस्यैव भिन्नाभिन्नत्वेन

भाष्यप्रकाशः ।

अपि च । दूरात् कनकमित्यवगते, न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन् । कनकादभेदात् तेषाम् । तस्य च ज्ञातत्वात् । अथ भेदोऽप्यस्ति कनकात् कुण्डलादीनामिति कनकावगमेऽपि अज्ञातास्ते । नन्वभेदोऽप्यस्तीति, किं न ज्ञाताः । प्रत्युत ज्ञानमेव तेषां युक्तम् । कारणाभावे हि कार्याभाव औत्सर्गिकः । स च कारणसत्तयाऽपोद्यते । अस्ति चाभेदे कारणसत्तेति । कनके ज्ञाते ज्ञाता एव कुण्डलादय इति तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः । तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत् ततो भिद्यते । यथा करभे गृह्यमाणे अगृह्यमाणो रासभः करभात् । गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः । तस्मात् ते हेम्नो भिद्यन्ते । कथं तर्हि हेम कुण्डलमिति सामानाधिकरण्यमिति चेत् । नह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम् । अथानुवृत्तिव्यावृत्तिव्यवस्था च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम् । न खल्वभेद ऐकान्तिकेऽनैकान्तिके चैतदुभयमुपपद्यते यत इत्युक्तम् । तस्माद् भेदा-

रश्मिः ।

तथेत्यर्थः । **तस्येति** हाटकस्येत्यर्थः । **तस्य चेति** कनकस्य चेत्यर्थः । **तेषामिति** कुण्डलादीनामित्यर्थः । एवं युक्त्या भेदापवादेनाभेदं व्यवस्थाप्य श्रुत्यापि भेदं कारणत्वेन निराकुर्वन्तिस्म अभेदो हि वास्तवो भेदोऽनिर्वचनीय इति । **अथेत्यादि** । **कारणाभाव** इति कारणं हि 'अथात आदेशो नेति नेति' इति श्रुत्या मूर्तामूर्तापोदितं ब्रह्म तदद्वैतमभावः, तस्मिन् हि सति कार्यं भेदो मायामात्रं तद्रूपोऽभावः । **स चेति** कार्याभाव इत्यर्थः । **अपोद्यत** इति उक्तश्रुत्यापोद्यते । **अस्ति चेति** अभेदेऽद्वैते सति । एवं कनकाभेदे कटकादिकारणे सत्तोन्नेया । **ज्ञाता एवेति** एवकारस्तु एकविज्ञानेन सर्वविज्ञानश्रुत्यनुरोधात् । **तज्जिज्ञासेत्यादि** तेषां कुण्डलादीनां जिज्ञासा ज्ञानानि चेत्यर्थः । कार्यकारणयोरभेदाभावं सप्रमाणमुपसंहरन्ति **तेनेत्यादि** । अपोद्यं कार्ये भेदं दर्शयन्ति स्म **यथेति** । कारणेपि भेदं दर्शयितुं दृष्टान्तेपि भेदं दर्शयन्ति स्म **गृह्यमाण** इति । **दूरत** इति समीपतस्तु शास्त्रदृष्टिकैर्गृह्यन्त इत्यभेदवादान्नोक्तं सूचितं परम् । कुण्डलहाटकयोर्भेदाभेदावेव वाच्यौ सामानाधिकरण्यानुरोधात्, न ह्यत्यन्तभेदे तदस्ति, कुण्डलकटकयोरदर्शनात्, अत्यन्ताभेदेपि न हेमहेमेत्यनुपलम्भादिति । भास्कराचार्योक्तमनुवदन्ति **कथं तर्हीत्यारभ्य**–**इत्युक्त**मित्यन्तेन । ननु न हेम कुण्डलमिति प्रतीतिरत आहुः **सामानेत्यादि** । भिन्नप्रवृत्तिनिमित्तत्वे सति एकार्थबोधकत्वं सामानाधिकरण्यं, तथा च नेयं प्रतीतिः किं तु सामानाधिकरण्योक्तिरिति भावः । यद्वा सामानाधिकरण्यमेकदेशवृत्तित्वम् । **नहीति** हेमकुण्डलयोर्नाधाराधेयभावः, ब्रह्मजगतोस्तु वर्तते इति दृष्टान्तवैषम्यम्, घटकपालयोस्तु वर्तते आधाराधेयभावः स न दृष्टान्तः । शीतोष्णयोर्भिन्नाधारवर्तित्वेन समानाश्रयत्वं नास्ति ब्रह्मजगतोस्तु वर्तते 'स आत्मा स्वाश्रयाश्रयः' इति वाक्यादित्याहुः **समानाश्रयत्व इति** । **उक्तं** उक्तप्रायम् । यदि हेम्नः सकाशात् कुण्डलादीनां भेदाभेदौ स्यातां तर्हि तेषामनुवृत्तहेम्नः सकाशादभेदादितरेतरव्यावृत्तिर्न स्यान्न स्याच्च हेम्नि निर्णीते संशय इति प्रतितर्केण मिथोविरोधाख्येन सामानाधिकरण्यानुपपत्तिरूपं तर्कं वितण्डया दूषयन्ति **अथानुवृत्तीत्यादि** । इदमिह नेदमित्यादिनोक्तेत्यर्थः । नन्वत्यन्ताभेदे मा भूदनुवृत्तिव्यावृत्तिव्यवस्था मा भूच्च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा भेदाभेदमते ते किं न स्यातामित्याशङ्क्य पूर्वोक्तमविनिगममुत्सर्गापवादं च स्मारयन्ति **न खल्वित्यादि** । **ऐकान्तिक** इति भेदाभाववद्वृत्तिनि अभेदे तदभाववर्तिनि चानुवृत्तिव्यावृत्तिव्यवस्था कुण्डलादिजिज्ञासा चेत्येतदुभयमित्यर्थः । स्वमतेन सामानाधिकरण्यमुपपादयन्ति **तस्मादित्यादि**

भाष्यप्रकाशः।

भेदयोरन्यतरस्मिन्नहेये। अभेदोपादानैव भेदकल्पना, न भेदोपादाना अभेदकल्पनेति युक्तम्। भिद्यमानतन्त्रत्वाद् भेदस्य, भिद्यमानानां च प्रत्येकमेकत्वात्। एकाभावे नानाश्रयस्य भेदस्यायोगात्। एकस्य च भेदानधीनत्वात्। नायमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वादेकत्वग्रहस्य चान्यानपेक्षत्वादभेदोपादानैवानिर्वचनीयकल्पनेति सांप्रतम्। तथा च श्रुतिः, 'मृत्तिकेत्येव सत्यम्' इति। तस्मात् कूटस्थनित्यतैव पारमार्थिकी, न परिणामिनित्यतेति सिद्धमिति। तदनवधानविजृम्भितमेव। उक्ते मते भेदाभेदयोर्नानात्वैकत्वरूपतया भेदस्यान्योन्याभावरूपत्वानङ्गीकारेण तदादाय तन्मतदूषणस्य गगनकुसुमसौरभ्यकल्पत्वात्। परस्पराभावरूपत्वेऽपि घटतदत्यन्ताभावयोर्घटतद्भेदयोश्च भूतल एव सहावस्थानदर्शनेन भेदस्य तदभावेनाभेदेन सह न विरोधः। अत्यन्ताभावस्य नित्यव्यापकत्वेन सर्वत्र सत्त्वात्। प्रतियोग्यानयनोत्तरं तदभावबुद्धिप्रतिबन्धमात्रपरम्। एवं सति यत्र भेदस्तत्राप्यभेदो वर्तत एवेति तयोः सहासंभवाद्विरोधकथनस्यापि तथात्वम्। एवं, संभवे वेत्यादिना कटकवर्धमानकयोरभेदप्रसञ्जनस्यापि तथात्वम्। अविरोधस्यैक्यापादकतायाः क्वाप्यदृष्टत्वात्। यदपि, कटकस्य हाटकादित्यादिना कटकादीनां हाटकाद् भेदव्युत्पादनं, तदपि तथा। तेषां तदवस्थारूपत्वात्। अवस्थानां चावस्थावतः सकाशतो भिन्नाभिन्नत्वात्। पट्पद्यां समुद्रतरङ्गयोस्तथात्वस्य

रश्मिः।

उभयप्रत्ययादित्यर्थः। **अहेय** इति तेनाभेदस्थापनेऽभिप्रायो न तु भेदखण्डने इति द्योतितम्। विरोधादन्यतरबाधेप्यभेदो बाध्य इति सौगतमतमाशङ्क्याहुः **अभेदे**त्यादि। **नानाश्रयस्ये**ति नानानिमित्तप्रयुक्तत्वेन तथेत्यर्थः। यथा घटः पटो न, कुड्यं पटो न, कुसूलं पटो नेत्यादि। **अयोगा**दिति तथाचैक्यरूपाभेदतन्त्रत्वाद्भेदस्य न भेदोपादानाऽभेदकल्पनेत्यर्थः। **एकस्य चे**ति भिद्यमानस्येत्यर्थः। भिद्यमानतन्त्रत्वं स्पष्टयन्ति **नायमि**त्यादि। अयं घटः नायं पटो नेत्यर्थः। **अनिर्वचनीये**ति अध्यस्तभेदकल्पनेत्यर्थः। **सांप्रत**मिति युज्यत इत्यर्थः। **सत्य**मिति वाचारम्भणं घटादिर्विकार इति भावः। **कूटस्थे**ति ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिरष्टविशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते इति सर्वोपनिषदुक्तकूटस्थनित्यता। **परिणामी**ति प्रकृतिपरिणामिनित्यतेति। सिद्धान्ते अद्वैतेपि व्यासपादसंगृहीतैकदेशिमते अनुकूलमिदमिति। पूर्वतन्त्रे षष्ठस्य तृतीयपादे द्रव्यकर्मणोस्तादात्म्यं भेदाभेदावङ्गीकृत्य वर्णिताविति स्वयमङ्गीकाराच्च। मतान्तरं समर्थयन्ति **तदनवे**त्यादि। तदिति वाचस्पत्युक्तम्। **अन्योन्ये**ति ऐच्छिकमपि नानात्वमन्योन्याभावजन्यमित्युपलक्षणार्थं उक्तम्। **तदादाये**ति भेदस्यान्योन्याभावरूपत्वमादायेत्यर्थः। **भूतल** इति घटवद्भूतलं घटो नेति प्रतीतेस्तथेत्यर्थः। **तस्ये**ति घटस्येत्यर्थः। **अभेदेने**ति पाठे तु भेदात्यन्ताभावेन सह तस्य भेदस्य न विरोध इत्यर्थः। अत्र हेतुं वक्तुमत्यन्ताभावेन सह प्रतियोगिनः स्थितिमाहुः **अत्यन्ते**त्यादि। तथा च सति घटे घटो नास्तीति प्रतीत्यापत्तिः किं न स्यात्तत्राहुः **प्रतियोगी**त्यादि। **तदभावे**त्यादि। तद्वत्ताज्ञानस्य तदभाववत्ताज्ञानं प्रति प्रतिबन्धकत्वात् प्रतियोग्यत्यन्ताभावेत्यर्थः। **एवं सती**ति अत्यन्ताभावस्य नित्यव्यापकत्वे सतीत्यर्थः। **अभेद** इति भेदात्यन्ताभावरूपः। **तथात्व**मिति गगनकुसुमसौरभ्यकल्पत्वमित्यर्थः। **क्वापी**ति तथा सति घटत्वद्रव्यत्वादीनामभेदापत्तिरिति भावः। **तथात्वस्ये**ति भेदाभेदस्येत्यर्थः।

१. भुमिरापोऽनलोवायुरित्यष्ट। २. व्याप्ततया।

भाष्यप्रकाशः ।

शंकराचार्यैरेवोक्तत्वात् । अतः परं सहानुवृत्त्यादिनोक्तो दूषणत्वेन प्रतीतिविरोधो वक्तव्यः । स चेद् विद्यमानेऽपि कुण्डलादिना भेदे कनकत्वेनाभेदः प्रतीयते तदा न प्रतीतिविरोधोऽपि । प्रमाणेनाधिगमात् । प्रमिते च तस्मिन्, दूरात् कनकमित्यादिनोक्तानां विकल्पानामनवसरपराहतत्वादिति प्रतीयते चेदुभयमितिकारिकयैवोक्तं व्युत्पादितं च । अतो मुकुटकटकादीनामवस्थात्वेन हेमसामानाधिकरण्यस्य सामयिकत्वेन च व्यावृत्तिव्यवस्थाजिज्ञासाजनकत्वयोरुपपत्तेर्भेदस्यागन्तुकत्वमेव, न त्वनिर्वचनीयत्वम् । नच श्रुतिविरोधः । उक्तश्रुतौ परिणामिनो मृदादीनेव दृष्टान्तीकृत्य, एवं सोम्य स आदेशो भवतीति दार्ष्टान्तिकेऽतिदेशेन परिणामिनित्यताया एव श्रुत्यभिप्रेतत्वात् । नचात्र कारणे सत्यत्वस्य कार्ये वाचारम्भणत्वस्य चोक्तत्वेन कार्यमिथ्यात्वसिद्धौ कूटस्थनित्यत्वमेव सेत्स्यतीति वाच्यम् । घटः पट इत्यादिवाचारम्भणरूपस्य विकारस्यैव नामधेयत्वाभिधानेन नामधेयस्य विकारत्वविधानेन वा स्वरूपमिथ्यात्वस्य श्रुत्यनभिप्रेतत्वात् । यदि कार्यस्वरूपस्यापि वाङ्मात्रतामभिप्रेयाद्, वाचारम्भणं नामधेयमिति पदद्वयं न ब्रूयात् । एकेनैव चारितार्थ्यात् । इदं यथा तथा तदनन्यत्वाधिकरणे प्रपञ्चयिष्यते । सिद्धान्ते यो विशेषः सोऽपि तत्रैव व्युत्पादयिष्यते । तस्मादस्मिन्नंशे भास्कराचार्यमतमदुष्टमेव ।

रामानुजाचार्यास्तु, 'अस्मान्मायी सृजते विश्वमेतत् । तस्मिँश्चान्यो मायया सन्निरुद्धः' ।

रश्मिः ।

'सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः' ॥

इत्यनेनेत्यर्थः । तेन कार्यसमवायिनोरेव भेदाभेदावङ्गीकृतौ इति यथा करभे गृह्यमाणे इत्यादिदृष्टान्तासंगतिरपि द्रष्टव्या । **प्रतीतिविरोध** इति इदमिहेत्यादि विभागाभावात्तादृशप्रतीतिविरोध इत्यर्थः । **तस्मिन्निति** भिन्नाभिन्नत्व इत्यर्थः । तथा च प्रत्यक्षतस्तर्कस्य नैर्बल्यात् प्रतीत्यनुरोधेन भेदाभेदावेवास्थेयावित्यर्थः । **व्यावृत्तीत्यादि** हेम्नि गृह्यमाणेपि कुण्डलाद्यग्रहणात्कुण्डलादिव्यावृत्तिर्यासां न भेदनिबन्धना, अपि तु मुकुटादीनामवस्थात्वेन हेम्नस्तदवस्थाभावनिबन्धना सामानाधिकरण्यस्य कार्यतासमयजन्यत्वेन तदानीं सामानाधिकरण्याभावाच्च तन्निबन्धना च । एवं कुण्डलादिविशेषजिज्ञासापि न भेदनिबन्धना एवं तयोरुपपत्तेरित्यर्थः । **न त्वनिर्वचनीयत्वमिति** दृष्टान्ताभावान्मानाभावात्खण्डितत्वाच्चेत्यर्थः । यदप्यभेदोपादानेनैवेत्यादिनाऽभेदस्य भेदानधीनत्वं भेदस्य चाभेदाधीनत्वमित्युक्तं तदपि न मञ्जुलम् । अभेदस्य भेदाभावरूपत्वेन भेदरूपप्रतियोगिसापेक्षत्वादित्यपि ध्येयम् । **स्वरूपेत्यादि** घटादिस्वरूपेत्यर्थः । तथा च घटः पट इत्यादिनामधेयमेव मिथ्या न तु कम्बुग्रीवाद्याकारोपीति भावः । एवेति पूर्वतन्त्रे षष्ठस्य तृतीयपादे द्रव्यकर्मणोस्तादात्म्यं भेदाभेदावङ्गीकृत्य वर्णितौ वैयाकरणानामपि तौ संमतावित्येवकारः । प्रकृते तु भेदाभेदौ पूर्वतन्त्र एव विधेः प्रेरकत्ववत् न तूत्तरतन्त्रे 'प्रवर्तकत्वं कृष्णस्य न विध्यर्थस्य कर्हिचित्' इतिवाक्यात्तद्वदभेदः । **अस्मानित्यादि** नक्षत्राणामुदयो यतो भवत्यस्मात्प्रत्यक्षात् । **अस्मानित्यादि** शसन्तं पदं वा, अन्यः सन्निरुद्ध इत्युक्तसन्निरोधार्थम् । **अन्य** इति अस्मत्पदार्थो जीवः । **संनिरुद्धः** 'अपश्यत् पुरुषं पूर्णं मायां च तदपाश्रयाम् । यया संमोहितो जीवः' इतिवाक्यान्मुग्धः । श्वेताश्वतरस्था चतुर्थाध्यायस्था

भाष्यप्रकाशः ।

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'इत्यादिश्रुतिष्वचिद्वस्तुचिद्वस्त्वीश्वराणां यथायथं भोग्यत्वभोक्तृत्वनियन्तृत्वैः स्वरूपविवेकात् त्रयोऽपि भिन्नाः । तथा, 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः' इत्यारभ्याऽऽपोऽग्निरन्तरिक्षं वायुर्द्यौरादित्यो दिशश्चन्द्रतारकमाकाशस्तमस्तेजः सर्वाणि भूतानि प्राणा वाक् चक्षुः श्रोत्रं मनस्त्वग् विज्ञानं रेत इत्येतानि काण्वपाठेन, विज्ञानस्थाने, आत्मा लोकयज्ञवेदाश्चाधिका माध्यन्दिनपाठेन, वाजसनेयके बृहदारण्यकेऽन्तर्यामिब्राह्मणे ब्रह्मशरीरत्वेनोक्ता ब्रह्मण आत्मत्वं चोक्तम् । सुबालोपनिषदि तु वाजसनेयक उक्ताः पृथिव्यादयस्तत्रानुक्ताश्च बुद्धिचित्ताव्यक्ताक्षरमृत्यवश्च शरीरत्वेनोक्ताः । 'यः पृथिवीमन्तरे संचरन् यस्य पृथिवी शरीरं यं पृथिवी न वेद एष सर्वभूतान्तरात्मा दिव्यो देव एको नारायणः' इत्यारभ्य 'यस्य मृत्युः शरीरम्' इत्यन्तेन तथोक्तम् । तेन पृथिव्यादीनां स्थूलानामव्यक्तादीनां सूक्ष्माणां च शरीरत्वश्रावणात् । स्थूलसूक्ष्मभेदेन द्विविधस्याप्यचिद्वस्तुनो ब्रह्मशरीरत्वम् । अव्यक्तादीनि त्वव्यक्ताऽक्षरतमांसि गुणत्रयसाम्यावस्थारूपायाः प्रकृतेरेव सूक्ष्मपरिणामविशिष्टानि रूपान्तराणि तेषु मूलभूतरूपं तमः । सुबालोपनिषद्येव प्रलयप्रकरणे, 'पृथिवी अप्सु लीयते आपस्तेजसि तेजो वायौ वायुराकाशे आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ भूतादिर्महति महान् अव्यक्ते अव्यक्तमक्षरे अक्षरं तमसि लीयते तमः परे देव एकीभवति' इत्यविभागापत्तिदशायां विभागव्यपदेशानर्हरूपेण तस्यैवावस्थानात् । शरीरकथनप्रस्तावे च तमःस्थाने मृत्योः श्रावणान्मृत्युशब्देनात्र तम उच्यत इति निश्चीयत इति तस्यापि शरीरत्वं निर्बाधम् । एवं काण्वोक्तविज्ञानस्थाने आत्मनः श्रावणाचिद्वस्तुनोऽपि ब्रह्मशरीरत्वमसंदिग्धम् । एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एवेति 'सदेव सोम्येदमग्र आसीत्' 'सत्यं चानृतं च सत्यमभवत्' इत्यादौ जगतो ब्रह्मत्ववादः । प्रपञ्चरूपे

रश्मिः ।

श्रुतिरेव । श्रुत्यंशमायिमायापदे व्याकरोति **मायां त्वित्यादि । अचिदित्या**दि विश्वमित्यचित्, मायया संनिरुद्धोऽन्यश्चित्, मायीश्वरस्तेषां यथायथं श्वेताश्वतरपञ्चमाध्याये

'वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते' ॥

इत्युपक्रम्य कर्मानुगान्यनुक्रमेण देही स्थानेषु रूपाण्यभिसंपद्यते 'स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति' इति भोग्यत्वभोक्तृत्वे 'सर्वाधिपत्यं कुरुते महात्मा' इति नियन्तृत्वं चोक्तं तैरित्यर्थः । आदिशब्दार्थभूतां श्रुतिमाहुः **यः पृथिव्यामित्यादि । आपोग्निरित्यादि** 'योऽप्सु तिष्ठन् अपामन्तरः' इत्यादि । एवं 'अग्नौ तिष्ठन्नग्नेरन्तरः' इत्यादिः । एवमग्रेपि । **बुद्धिचित्तेति** यो बुद्धिमन्तरे संचरन् यस्य बुद्धिः शरीरमित्यादिः । एवमग्रेपि । श्रुतिमाहुः **यः पृथिवीमित्यादि । तथोक्तमिति** पृथिव्यादीनि शरीरत्वेनोक्त्वा ब्रह्मण आत्मत्वं चोक्तम् । इति भोग्यभोक्तृनियन्तृत्वान्युक्तानि । **तस्यैवेति** तमस एवेत्यर्थः । अत्यन्तविस्मरणरूपमृत्योः कथं शरीरत्वमित्यतो मृत्योः शरीरत्वं कथयन्ति **शरीरेत्यादि । अत्रेति** शरीरप्रस्ताव इत्यर्थः । **तस्यापीति** मृत्योरपीत्यर्थः । अन्यथा सुबालोपनिषच्छरीरप्रस्तावप्रलयप्रकरणयोरेकवाक्यता न स्यादिति भावः । **सत्यं चानृतं चेति** चिदचिदित्यर्थः ।

भाष्यप्रकाशः ।

शरीरे प्रलयदशायां तमःशब्दवाच्यातिसूक्ष्माचिद्वस्त्वेकशेषे सति तमसि च स्वशरीरतया विनिर्देशानर्हातिसूक्ष्मदशापत्त्या स्वस्मिन्नेकतापन्ने सति तथाभूततमःशरीरं ब्रह्म पूर्ववद्, विभक्तनामरूपचिदचिन्मिश्रप्रपञ्चरूपः स्यामिति संकल्प्याप्ययक्रमेण जगच्छरीरतयाऽऽत्मानं परिणामयतीति सर्वेषु वेदान्तेषु परिणामोपदेशः । अतः स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यं कारणं चेति जगतो ब्रह्मोपादानकत्वेऽपि सूक्ष्मचिदचिदीश्वरसंघातस्यैवोपादानत्वेन चिदचितोर्ब्रह्मणश्च भोक्तृत्वभोग्यत्वनियामकत्वरूपस्वभावासंकरोऽप्युपपन्नतरः । शुक्लकृष्णरक्ततन्तुसंघातोपादानके चित्रपटे तत्तत्तन्तुप्रदेश एव शौक्ल्यादिवत् तत्र तत्र भोक्तृत्वादीनां शक्यवचनत्वात् । एतावान् परं विशेषः । तन्तूनां पृथक्स्थितियोग्यत्वात् पुरुषेच्छया कदाचित् संघातात् कारणत्वं कार्यत्वं च कादाचित्कम् । इह तु चिदचितोः सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात् सर्वदा सर्वैः शब्दैस्तत्प्रकारः परमपुरुष एव वाच्य इति। 'अहमिमास्तिस्रो देवता अनेन जीवेनात्मानुप्रविश्य नामरूपे व्याकरवाणि' इत्यत्र तिस्रो देवता इत्यनेन सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात् सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तमिति विशिष्टाद्वैतवादमङ्गीकृत्य चिदचिद्विशिष्टस्यैवोपादानत्वं रोचयन्ते ।

तदपि चिन्त्यम् । आदिसृष्टिप्राक्काले सूक्ष्मचिदचिच्छरीरवैशिष्ट्यस्य वक्तुमशक्यत्वात् । 'सदेव सोम्येदमग्र आसीद्' 'एकमेवाद्वितीयम्' इत्यत्रैवकारादिभिरितरव्यवच्छेदात् । न च तैः शरीर्यन्तरं मुख्यान्तरं मिषदन्तरं च व्यवच्छेद्यते, न तु शरीरममुख्यममिषद्वेति वाच्यम् । पुरुषविधब्राह्मणे, 'आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्' इत्यनुवीक्षाया अन्यदर्शननिषेधस्य च विरोधापत्तेः । नच तत्राप्यन्यपदेन शरीर्येव

रश्मिः ।

सच्चासच्चेति वार्थः । प्रलयदशायां विशिष्टाद्वैतं साधयन्ति **प्रपञ्चे**त्यादि । **पूर्ववदि**ति पूर्वसृष्टाविवेत्यर्थः । **अप्ययक्रमेणे**ति पृथ्वी अप्सु लीयत इत्याद्युक्तक्रमेणेत्यर्थः । **संघाता**दिति संघातभावं प्राप्येत्यर्थः । **इमा** इति अनुप्रवेशकर्मशब्देन स्थूलसूक्ष्मचिदचित्प्रकारब्रह्मेतिशब्देन । **शब्दस्ये**ति स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यमिति शब्दस्य सामानाधिकरण्यं भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वरूपम् । अयं न ब्रह्माद्वैतवाद इतीमं पक्षं दूषयन्ति **तदपी**त्यादि । **आदिसृष्टी**त्यादि हिरण्यगर्भसृष्टेरादिसृष्टिः वक्ष्यमाणा । **तैरि**ति सदिदमग्रैकाद्वितीयपदैरित्यर्थः । तत्र सदिदंपदाभ्यां शरीर्यन्तरं, सच्चेदं चैवासीदित्यर्थात् । मुख्यवाचिनैकपदेन मुख्यान्तरमद्वितीयमित्यनेन द्वितीयं, सव्यापारं वस्तु यत्र नास्तीति मिषदन्तरमिति। **नन्वित्यादि** इदं जगत् सदात्मनैवासीन्न तु पृथगित्यर्थेन शरीररूपजगद्व्यवच्छेद्यते । एकमेवेत्यनेनामुख्यमद्वितीयमित्यनेन सव्यापारमिति नार्थ इत्यर्थः । **आत्मैवेदमित्यादि** । **अग्रे** सृष्टिप्राक्काले अनुवीक्ष्य स्वस्मिन् लयात्पश्चादात्मानं वीक्ष्येत्यर्थः । **विरोधे**त्यादि तमोविशिष्टात्मानुवीक्षणेनान्यसत्त्वेन च विरोधापत्तेरित्यर्थः । **शरीर्येवे**त्यादि तथाचान्यत् शरीरि चिदचिद्विशिष्टं वा नापश्यदित्यर्थान्न विरोध इत्यर्थः । एवकारेण शरीरं द्वितीयैवकारेण वैशिष्ट्यं चिदचिद्विशिष्टान्तरं वा व्यवच्छिद्यते । यद्यात्मनः शरीरित्वं चिदचिद्विशिष्टत्वं वा सिद्धं स्यात्तदात्मनोऽन्यच्छरीरि चिदचिद्विशिष्टं वा नापश्यदित्यर्थो भवेत्

भाष्यप्रकाशः।

विशिष्ट एव वा परामृश्यतेऽतो न विरोध इति वाच्यम् । तत्र तादृशपरामर्शस्याशक्यवचनत्वात् । तथाहि–तत्रात्मा किं स्वशरीरं विशेषणत्वेन शरीरत्वेन वा अमिषत्त्वेन वा परामृशत्यात्मत्वेन वा। नाद्यः । तस्य पार्थक्ये सत्यात्मानुवीक्षणस्य तदन्यादर्शनस्य च यथायथं भ्रमत्वाज्ञतापादकत्वयोरापत्तेः । तमस एकीभावस्य स्वशरीरतया विनिर्देशानर्हातिसूक्ष्मदशापत्तिरूपताङ्गीकारेण तदानीं पार्थक्यस्य शरीरत्वस्य वानभिमतत्वाच्च । न तुरीयः। आत्मत्वेन परामर्शे तेन प्रमाणज्ञानेनैवाभेदसिद्धौ भेदापादकप्रमाणाभावेन वैशिष्ट्याभावे केवलब्रह्माद्वैतवादस्यैव सिद्धेः। नच सुबालोपनिषद्यन्येषां प्रलयकथनात् तमसस्तदनुक्त्वैकीभावकथनादन्येभ्यः कश्चिद्विशेषो वक्तव्यः । स च स्वरूपातिरोभावपूर्वकाविभागापत्तिरूप एव युक्तः। अन्यथा शब्दान्तरवैयर्थ्यप्रसङ्गात् । सिद्धे चैवं तमःस्वरूपातिरोभावे तदानीं वैशिष्टयस्याविलोपादुत्पत्तौ च, 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' इति प्रतिसृष्टिपूर्वतुल्यताश्रावणेन सर्वदा सृष्टिप्रलयक्रमस्यैकरूप्ये सृष्टावपि शरीरित्वेन वैशिष्ट्याद् विशिष्टाद्वैतवादस्यैव सिद्धिर्न केवलब्रह्माद्वैतवादस्येति तदानीं विशिष्टेतरादर्शनमेव तदर्थ इति वाच्यम् । उक्तश्रुत्योरवान्तरयत्किंचित्प्रलयसृष्टिविषयत्वेनाप्युपपत्तौ सर्वदैकरूप्यस्य नियन्तुमशक्यत्वात्। 'यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' इति विस्फुलिङ्गन्यायेन सहोत्पत्तिप्रलयश्रावणात् । सूर्याचन्द्रमसावितिलिङ्गेनास्या अवान्तरविषयत्वावगमात् अनुवीक्षणादिश्रुत्यनुरोधेन सौबालवाक्येऽपि तथात्वस्य वक्तुं युक्तत्वाच्च ।

रश्मिः।

तदेव पुनर्न संभवतीति वक्तुमात्मनः शरीरित्वं विकल्प्य दूषयन्ति **तत्रात्मेत्यादि**। चिदचिच्छरीरविशिष्ट आत्मेत्यत्र शरीरे विशेषणत्वं शरीरत्वमात्मत्वं व्यापारराहित्यं च सृष्टिप्राक्कालीनत्वादस्ति, आनन्दरूपत्वे त्वात्मत्वम् । अनुवीक्ष्येत्यस्य कर्मत्वेनार्थादात्मैवान्वेतीत्याशयेनाहुः **आत्मानुवीक्षणस्येति** । **भ्रमत्वेत्यादि** तमोविशिष्टे आत्मनि द्रष्टव्ये आत्ममात्रदर्शनस्य भ्रमत्वमात्मान्यस्य सत्त्वात् । तददर्शनेऽज्ञतेति बोध्यम्। स्वमते तु शुद्धात्मनो विषयत्वेन ज्ञानस्य विषयताविषयत्वात् तथात्वापत्तेः । **तेनेति** आत्मत्वप्रकारेणेत्यर्थः। प्रमाणमात्मा 'अत्र प्रमाणं भगवान्' इतिवाक्यात्। तथाच प्रमाणविषयकज्ञानेन प्रमाणेत्यत्र भावे ल्युट् प्रमेत्यर्थः । प्रमात्मकज्ञानेनेत्यर्थः । **वैशिष्ट्येत्यादि** वैशिष्ट्यस्य भेदनिबन्धनत्वाद्वैशिष्ट्याभाव। इत्यर्थः। **तदनुक्त्वेति** प्रलयमनुक्त्वेत्यर्थः। **अन्येभ्य** इति पृथिव्यादिभ्यस्तमसि विशेषः इत्यर्थः। **सचेति** तमोनिष्ठो विशेष इत्यर्थः । **शब्दान्तरेत्यादि** लीयत इति शब्दादन्य एकीभवतीति शब्दस्तस्य वैयर्थ्यप्रसङ्गादित्यर्थः। मयूरव्यंसकादेराकृतिगणत्वात्समासः पूर्वपदार्थप्रधानः । **तदर्थ** इति नान्यदपश्यदित्यस्यार्थ इत्यर्थः । **उक्तेत्यादि** पृथिव्यप्सु लीयते इत्यादिसूर्याचन्द्रमसावित्यादिश्रुत्योरित्यर्थः । अवान्तरसृष्टिप्रलयविषयत्वे हेतूनाहुः **यथेत्यादि** । **सहेत्यादि** तथाचादिसृष्टौ सहोत्पत्तिप्रलयाविति क्रमसृष्टिप्रलयाववान्तरावित्यर्थः। पूर्वाधिकरणान्तिमवर्णके क्रमसृष्टिर्ब्रह्मण उक्तेति कथमेवमित्यरुच्या हेत्वन्तरमाहुः **सूर्येत्यादि**। **लिङ्गेनेति** सामर्थ्येन शक्यार्थेनेति यावत्। **अवान्तरेत्यादि** अन्यथा सर्वेषां कर्मत्वमुक्तं स्यादित्यर्थः । **अनुवीत्यादि** अत्रेदं हृदयम्। इदमात्मैवेत्यत्रैवकारोऽन्ययोगव्यवच्छेदकः विशेष्यसंगतत्वात्। तथाचात्मान्यस्मिन्निदंत्वव्यवच्छेद आत्मनि चेदंत्वं प्रतीयते। एवं चात्मातिरिक्तमिदं जगन्न भवतीति फलति। कथं तर्हि जगदन्तर्गततमःसत्तेति । एवमनुरोधेनेत्यर्थः। **सौबालेत्यादि** तमः परे द्रेव एकीभव-

भाष्यप्रकाशः ।

त्वाच्च । अस्तु वा सौबालवाक्यस्यादिसृष्टिविषयत्वं, तथापि न तदानीं वैशिष्ट्यसिद्धिः । पृथिव्यादीनां नादेयसामुद्रसलिलैक्यवदविभागापत्तिरूपप्रलयस्य तमसश्च करकाणां जलैक्यवत् पूर्वभावापत्तिरूपस्य ब्रह्मैक्यस्य शक्यवचनत्वात् । आत्मपदस्य केवलात्मवाचित्वेन विशेषणान्तरसंग्रहाक्षमत्वात् । अन्यथा देहविशिष्टात्मप्रत्ययस्यापि प्रामाण्यापत्तेः । नच निर्विशेषत्वापत्तिः । सच्चिदानन्दरूपाकारस्य 'कृत्स्नः प्रज्ञानघनः', 'आनन्दरूपममृतं यद् विभाति' इत्यादिश्रुतिभिस्तत्सिद्धेः । तस्मात्, 'सदेव सोम्य' इत्यत्र सच्छब्देन केवलं ब्रह्मैव परामृश्यत इति मन्तव्यम् । आत्मपदवत् सत्पदस्यापि केवलब्रह्माभिधायित्वात् । 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति गीतावाक्येन तथा निर्णयात् । एवं तैत्तिरीयेऽपि सत्यज्ञानादिलक्षणं ब्रह्म प्रकृत्य तत एव सर्वज्ञादाकाशादिक्रमेण सृष्टिमुक्त्वा, उपादानतां च, 'सोऽकामयत बहु स्यां प्रजायेय' इति स्थिरीकृत्य केवलस्यैवोपादानत्वाय 'तदात्मानं स्वयमकुरुत' इत्यात्मन एव कर्मत्वं कर्तृत्वं च श्राव्यते । 'सत्यं चानृतं च सत्यमभवत्' इति केवलब्रह्मवाचकसत्यपदेन प्रपञ्चस्यापि ब्रह्मता विधीयत इति तत्रापि पूर्वोक्त एवार्थ इति प्रथमसृष्टौ शुद्धं ब्रह्मैवोपादानम् ।

किंच । श्रुतौ हि प्रकारद्वयेन निरूपणम् । आत्मत्वेन ब्रह्मत्वेन च । आत्मैवेदं सर्वं, ब्रह्मैवेदं सर्वमिति । इदं च पदद्वयं व्याप्तिं बृंहणत्वं चापेक्ष्य । यद्यप्युभयोः स्वरूपमानन्दस्तथापि सप्रकार आत्मा, निष्प्रकारं ब्रह्मेति भेदः । तत्रायमात्मा ब्रह्म विज्ञानमय इत्यात्मनोऽपि ब्रह्मत्वविधानाद् व्यासेनापि ब्रह्मजिज्ञासाया एव प्रतिज्ञानाच्च निष्प्रकारमेव मुख्यम् । तस्यैव चाग्रे कारणत्वविचारणमित्यतोऽपि तादृशमेवोपादानम् ।

किंच । अन्तर्यामिब्राह्मणे सुबालोपनिषदि च, 'यं पृथिवी न वेद, यं मृत्युर्न वेद,' इत्येवं सर्वावस्थावस्थितस्याचिद्वस्तुनोऽवेत्तृत्वं श्रावितम् । तच्च वेदनयोग्यत्व एव घटते, यमात्मा न

रश्मिः ।

तीति वाक्येपि तथात्वस्यावान्तरविषयत्वस्येत्यर्थः । श्रुतित्वाविशेषाद्विपरीतं किं न स्यादित्याशङ्क्याहुः **अस्तु वे**त्यादि । **तदानी**मिति प्रलयदशायामित्यर्थः । शब्दान्तरप्रयुक्तितात्पर्यमाहुः **पृथिवी**त्यादि । **अन्यथे**ति आत्मनो विशिष्टत्व इत्यर्थः । प्रामाण्यापत्तेरित्यस्य प्रमात्वापत्तेरित्यर्थः । **तत्सिद्धे**रिति प्रसिद्धसिद्धेरित्यर्थः । एतदानन्दमयाधिकरणे स्फुटिष्यति । **तस्मा**दिति सकलश्रुतिस्वारस्यादित्यर्थः । **विधीयत** इति न तु सर्वावस्थावस्थितचिदचिद्वस्तुशरीर ईश्वर इति जगतो ब्रह्मत्वप्रवादोऽनया क्रियत इति भावः । **पूर्वोक्त** इति सदेव सोम्येत्यत्रोक्त इत्यर्थः । **निष्प्रकार**मिति एतच्चारूपवदेव हीति पञ्चसूत्र्युक्तमेकदेशिमतमप्यङ्गीकुर्वता व्यासेन निर्णीतं पूर्ववद्वेति सूत्रे तदनुसारेण ज्ञेयम् । तदेतत्तृतीयाध्याये स्फुटम् । अथवा भौतिकशरीरराहित्येन केवलानन्दरूपमित्यर्थः । इदं रूपद्वयं प्रयोगे । द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्तीति गृह्यसूत्रात् । अचिपूजने । द्वन्द्वं स्रुक्स्रुवादिरूपमेवं ब्रह्मात्मेति द्वन्द्वम् । स्वरूपलक्षणयुक्तं ब्रह्म समष्टिः । 'सदेव सोम्य' इत्यत्र 'तत्तेज ऐक्षत' 'आनन्दाद्ध्येव खल्विमानि' इत्यादौ व्यष्टिः । व्याहृतिर्ब्रह्म, श्रीभागवतद्वितीयस्कन्धे । अन्नादिपञ्चविरहानुभवार्थमित्यानन्दमयाधिकरणे, वायुः प्रत्यक्षं ब्रह्म । मुख्यनिष्प्रकारकमिति निर्जिता प्रकाराः सत्त्वादयो यस्मात् । द्वितीयस्कन्धनवमाध्याय उपष्टम्भमिदं मतमित्येवकारः । अत-

केचिदत्र शास्त्रयोनित्वपूर्वपक्षनिराकरणाय, तत्तु समन्वयादिति योजयन्ति। तत् पूर्वपक्षसिद्धान्तयोर्द्वयोरप्यसंगतत्वादुपेक्ष्यम्।

भाष्यप्रकाशः।

वेदेतिवत् न त्वयोग्यत्वे। घटो न वेदेत्यादिप्रयोगादर्शनात्। अतः सर्वत्र चिदन्वयोऽवश्यमुपेयः। सदन्वयस्तु प्रत्यक्षसिद्ध आनन्दान्वयश्चेत्यतोऽपि ब्रह्मैवोपादानम्। नच मृदब्रवीदित्यादाविवाभिमानिनमादाय तथोक्तिरिति वक्तुं शक्यम्। जीवानुप्रवेशकृततद्वैशिष्ट्यस्य पाश्चात्यत्वेन पूर्वं युष्माभिस्तथा वक्तुमशक्यत्वात्। अनुप्रवेशश्रुतिविरोधेन सर्वदा वैशिष्ट्यस्याशक्यवचनत्वात्। सदैवाविनाभावे चिदचिदविवेकप्रसङ्गात्। आत्मा न वेदेति पृथङ्निर्देशवैयर्थ्यप्रसङ्गाच्च। अत उक्तलिङ्गेनापि ब्रह्मण एव केवलस्य परिणामनिश्चयादुपादानत्वम्। नच स्वभावसांकर्यप्रसङ्गः। प्रजायेयेतीच्छयैवोच्चनीचादिभावसिद्धौ सांकर्याभावात्। सृष्टिप्राक्काले त्वितराभावेनैवाशङ्कानुत्थानात। अतो विशिष्टाद्वैतवादस्यार्वाचीनत्वात्। सर्ववस्तूनां ब्रह्मपरिणामत्वेन ब्रह्माभिन्नतयैव पदार्थत्वात् सर्वैः शब्दैस्तत्तद्रूपं ब्रह्मैवोच्यत इति कारणावस्थब्रह्मवाचिना शब्देन कार्यवाचिनां शब्दानां सामानाधिकरण्यमुपपादनमन्तरेणापि मुख्यवृत्तमिति राद्धान्तपन्थाः।

प्रकृतमनुसरामः। अस्मिन् सूत्रे रामानुजाचार्यादिमतमुपक्षिपन्ति केचिदित्यादि। ते हि पूर्वपक्षसिद्धान्तावेवमाहुः। तथाहि। यद्यपि शास्त्रयोनित्वसूत्रे ब्रह्मणः शास्त्रमात्रप्रमाणकत्वं साधितं तथापि तन्नोपपद्यते। 'चोदनालक्षणोऽर्थो धर्मः,' 'तस्य ज्ञानमुपदेशः', 'तद्भूतानां क्रियार्थेन समाम्नायः', 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इति जैमिनिना तत्र तत्र

रश्मिः।

एव मुख्यमिति। **अत** इति प्रसक्तस्य निषेधायोगादित्यर्थः। **आनन्देत्यादि** स्त्रीपुत्रादयः प्रिया इति प्रतीतेः प्रत्यक्षसिद्ध इति शेषः। **तथोक्तिरिति** यं पृथिवी न वेद इत्याद्युक्तिरित्यर्थः। **तद्वैशिष्ट्यस्येति** अभिमानिवैशिष्ट्यस्येत्यर्थः। **पूर्वमिति** जीवप्रवेशात्पूर्वमित्यर्थः। ननु सर्वावस्थावस्थितं विशिष्टमिति चेत्तत्राहुः **अनुप्रवेशेत्यादि**। अनुप्रवेशो हि भूतपूर्वे अचिद्वस्तुनि चितः पश्चात्प्रवेशः स च सर्वदा वैशिष्ट्ये न घटत इत्यर्थः। ननु तिस्रो देवता इत्यनुप्रवेशश्रुतौ श्रावणाद्देवताविशिष्टे एवाचिद्वस्तुनि जीवप्रवेशे नानोरनर्थकत्वात्सर्वदा वैशिष्ट्यं शक्यवचनमिति चेत्तत्राहुः **सदैवेत्यादि**। ननु पृथिवीशरीरयोरात्मवैशिष्ट्येन मा भूद्विवेकः परं तु शारीरशरीरयोस्तु विवेको भविष्यतीति कथंचिदचिदविवेकप्रसङ्ग इति चेत्तत्राहुः **आत्मेत्यादि**। **पृथगित्यादि** अचितः पृथिव्या इत्यर्थः। तथाच पृथिवी न वेदेत्यत्राचित्त्वमेव विवक्षितमिति भावः। **उक्तलिङ्गेनेति** अचितोऽवेत्तृत्वकथनसामर्थ्येनेत्यर्थः। **ब्रह्मण** इति सच्चिदानन्दानां कार्ये दर्शनाद्ब्रह्मण एव न त्वात्मन इत्यर्थः। **स्वभावेति** चित्त्वादिस्वभावेत्यर्थः। सच्चिदानन्देषु क्रमेण नीचोच्चोच्चतरेषु सांकर्यं नीचत्वादिभ्यामुच्चतरसांकर्यं मेलनम्। परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः संकरोप्ययम्। **सांकर्येति** दुष्टसांकर्याभावात्। **इतरेति** अचिदित्यर्थः। **अत** इति चि(स)दानन्दयोः फलत्वात्। **अर्वाचीनेत्यादि** अचिदधीनत्वेन सृष्टेः पाश्चात्यत्वादित्यर्थः। **सर्वैः शब्दैरिति** 'ॐमित्येतदक्षरमिद९ सर्वं तस्योपव्याख्यानम्' इति माण्डूक्यश्रुतेः। **तत्तद्रूपमिति** 'यदेकमव्यक्तमनन्तरूपम्' इति श्रुतेः **मुख्यवृत्तमिति** आकाशस्तल्लिङ्गाद्यधिकरणेषु स्फुटमेतत्। **भाष्ये। शास्त्रेत्यादि** शास्त्रयोनित्वे पूर्वपक्षः शास्त्रयोनित्वपूर्वपक्षः पात्रे समितादीनामाकृतिगणत्वात् 'पात्रे समितादयश्च' इतिसूत्रेण समासः। सुप् सुपेति वा समासः। **प्रकृते। ते हीति** रामानुजभास्करशंकरशैवाचार्या इत्यर्थः। **तत्र तत्रेत्यादि** द्वादशलक्षण्यां प्रथमा-

भाष्यप्रकाशः ।

वेदस्य प्रवृत्तिनिवृत्तिजनकक्रियापरताया एवानुक्रान्तत्वाद् ब्रह्मरूपसिद्धार्थपरत्वे प्रयोजनशून्यत्वप्रसङ्गात् । नच प्रत्यक्षादीनां वस्तुयाथात्म्यावबोधपर्यवसानदर्शनाच्छास्त्रेऽपि तथात्वमस्त्विति शङ्क्यम् । लोके वेदे च प्रयोजनरहितवाक्यप्रयोगस्यादर्शनात् । प्रयोजनं च प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारात्मकमेवोपलब्धम् । तदनुद्दिश्य न केनापि किंचिद्वाक्यं प्रयुज्यते श्रूयते वा । अतो वेदेऽपि तथात्वं युक्तम् । नच पुत्रस्ते जातो, नायं सर्पो रज्जुरेषेत्यादिषु लौकिकवाक्येषु हर्षभयनिवृत्त्यादिरूपपुरुषार्थान्वयदर्शनात् सिद्धार्थपराणामपि वाक्यानां प्रयोजनवत्त्वं शङ्कनीयम् । तत्रापि वाक्यार्थज्ञानादेव तत्प्राप्तेर्वाक्यस्य प्रतारणया प्रयोगेऽपि तत्संभवाद् वाक्यस्यार्थपरताया निश्चेतुमशक्यत्वात् । किंच । पचति गच्छतीत्यादिप्रयोगस्य प्रमाणान्तरेणावगमोत्तरमेव दर्शनात् । सिद्धार्थवाक्यानां गृहीतग्राहित्वात् प्रामाण्यमपि न । साध्यार्थपराणां तु गामानयेत्यादीनां प्रयोजनवत्त्वमगृहीतग्राहित्वं चाविवादम् । अतो लोकवद् वेदेऽपि वाक्यानां प्रवृत्तिनिवृत्तिपरत्वेन ज्ञानपरत्वेन वा प्रयोजन एव पर्यवसानमिति परिनिष्पन्ने ब्रह्मणि तात्पर्याभावान्न वेदान्तानां ब्रह्मणि तात्पर्यमित्येकः पूर्वपक्षः ।

तथाऽन्योऽपि । तथाहि । वेदान्तवाक्यान्यपि कार्यपरतयैव ब्रह्मणि प्रमाणभावमनुभवन्ति । अद्वितीयं ज्ञानैकरसं परिनिष्पन्नमपि ब्रह्म अनाद्यविद्यया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चं कुर्यादिति ब्रह्मणः प्रपञ्चविलायनद्वारेण विधिविषयत्वात् । स च विधिः, 'न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथा' इत्येवमादिर्बोध्यः । तत्र द्रष्टृदृश्यभेदशून्यं ब्रह्म कुर्या-

रश्मिः ।

ध्याय इत्यर्थः । प्रथमपादे द्वितीयपादे चेति वार्थः । **तथात्व**मिति सिद्धार्थब्रह्मयाथात्म्यावबोधपर्यवसानं प्रयोजनमस्त्वित्यर्थः । **प्रवृत्ती**त्यादि प्रवृत्तिनिवृत्तिभ्यां साध्यौ इष्टानिष्टयोः प्राप्तिपरिहारौ यौ तदात्मकमित्यर्थः । अर्थार्थी राजकुलं गच्छेत्, मन्दाग्निर्नाम्बु पिबेत्, स्वर्गकामो यजेत, न कलञ्जं भक्षयेदित्यादिषु द्रष्टव्यम् । **तत्प्राप्ते**रिति हर्षस्य भयनिवृत्त्यादेश्च प्राप्तेरित्यर्थः । **तत्संभवा**दिति हर्षभयनिवृत्त्यादिसंभवादित्यर्थः । **अर्थे**त्यादि प्रयोजनपरताया इत्यर्थः । **प्रमाणे**त्यादि प्रत्यक्षप्रमाणेनेत्यर्थः । **अवगमे**त्यादि पाककर्तुर्गमनकर्तुश्चेत्यर्थः । **गृहीते**त्यादि चक्षुषा गृहीतं यत्पात्ररज्ज्वादि तद्ग्राहित्वादित्यर्थः । **नेति** अनधिगतार्थगन्तृत्वस्य प्रमाणलक्षणत्वादिति भावः । **अगृहीते**त्यादि अगृहीतं साध्यं गवां नयनादि तद्ग्राहित्वम् । **वाक्यानामि**त्यादि सिद्धार्थपराणां साध्यार्थपराणां च । **प्रवृत्ती**त्यादि व्याख्यातम् । **प्रयोजन एवे**ति ब्रह्मज्ञानमपि फलं साध्यमिति प्रयोजन एव तत्तु सिद्धमित्यर्थः । **ब्रह्मणी**ति सिद्धार्थे । **वेदान्ते**त्यादि ब्रह्मणीत्यत्र सप्तम्या विषयत्वमर्थः । तथा च ब्रह्मविषयकप्रमाजनकत्वं वेदान्तवाक्यान्यनुभवन्त्याश्रयन्ते धातूनामनेकार्थत्वादित्यर्थः । **निष्प्रपञ्चमि**त्यादि द्रष्टृदृश्यरूपप्रपञ्चविलयद्वारेण ज्ञानैकरसं ब्रह्म कुर्यात् भावयेद् ज्ञानविषयीकुर्याद्वेत्यर्थः । **विधी**त्यादि सिद्धस्यापि घटस्य निर्जलं (सजलं) घटं कुर्यादिति विधिविषयत्ववत्तथेत्यर्थः । **द्रष्टृदृश्ये**त्यादि दृशिमात्रं ब्रह्म कुर्यादित्यर्थः, गुणविधिरयं ब्रह्मणः सिद्धत्वात्, दध्ना जुहोतीतिवत् । तत्र धात्वर्थस्य दृशेः भावनायां कर्मत्वेनान्वयः, न तु करणत्वेन । गुणकामाधिकरणे दध्नेन्द्रियकामस्य जुहुयादित्यत्राश्रयत्वेन

भाष्यप्रकाशः ।

दित्येवमर्थसिद्धेः । अतः स्वनिबन्धनाया उपाधिनिबन्धनायाश्च कर्तव्यतायाः प्रामाण्ये विशेषाभावात् सिद्धस्यापि ब्रह्मणोऽनिष्पन्नतारूपेण साध्यत्वाविरोधात् वेदान्तानां ब्रह्मणि कार्यपरतयैव प्रामाण्यं, न स्वातन्त्र्येणेति द्वितीयः पूर्वपक्षः ।

तथाऽपरोऽपि । यद्यपि वेदान्तवाक्यानां स्वातन्त्र्येण सिद्धरूपब्रह्मस्वरूपपरतया न प्रामाण्यं, तथापि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः,' 'य आत्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः,' 'आत्मेत्येवोपासीत,' 'आत्मानमेव लोकमुपासीत' इत्यादिध्यानविषयो नियोगः स्वविषयभूतध्यानस्य ध्येयैकनिरूपणीयतया ध्येयमाक्षिपन्, 'सत्यं ज्ञानमनन्तं ब्रह्म,' 'सदेव सौम्येदमग्र आसीत्,' 'इदं सर्वं यदयमात्मा,' 'अयमात्मा ब्रह्म सर्वानुभूः' इत्यादिस्वरूपतद्विशेषपरवाक्यनिर्दिष्टस्वरूपमेवात्मानमाक्षिपतीत्येषां वाक्यानां ध्यानविधिशेषतयैव प्रामाण्यात्, तद्विधिविषयीभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपेऽपि तात्पर्याद्, ब्रह्मस्वरूपमपि सिद्ध्यत्येवेति चेन्न । प्रवृत्तिनिवृत्तिप्रयोजनविधुराणां वेदान्तवाक्यानां ध्यानविधिशेषत्वेऽपि ध्येयविशेषस्वरूपसमर्पणमात्रपर्यवसानात् तत्र स्वातन्त्र्येऽपि बालातुराद्युपच्छन्दनवाक्य-

रश्मिः ।

धात्वर्थान्वयस्वीकारेण तस्यानियतत्वात् । यद्यप्यत्र कर्मत्वबोधकद्वितीयाभावस्तथापि भावनायां धात्वर्थ(प्रेक्षण)संबन्धस्य प्रतीतेः स साध्यत्वेन स्वीक्रियत इति कर्मत्वेनान्वयो निराबाधः । द्रष्टारमित्यस्य धात्वर्थेन सहाश्रयतासंसर्गेणान्वयः द्रष्टुः प्रेक्षणाश्रयाभेदात् । दृष्टेरित्यत्र पञ्चम्या भेदोर्थः । नञस्त्वभावरूपोर्थः । दृष्टिपदं स्वविषये स्वाविनाभूते दृश्ये लाक्षणिकं सद् दृश्यमात्रोपलक्षकम् । तद्भेदस्य द्रष्टृदृश्यभेदरूपस्य प्रतियोगितासंबन्धेन नञर्थेऽभावेऽन्वयः । तस्य च स्वीयसंबन्धेन धात्वर्थेऽन्वयः । एवं न मतेर्मन्तारमित्यत्रापि द्रष्टव्यम् । तदाहुः **एवमर्थसिद्धे**रिति । एवं च दृष्टेर्न इत्यंशस्य द्रष्टृदृश्यभेदशून्यमित्यर्थः । द्रष्टारमित्यस्य ब्रह्मेत्यर्थः । चक्षुराद्यपेक्षया ब्रह्मणो द्रष्टृत्वात् । पश्येत् द्रष्टृदृश्याधारं पश्येत् । द्रष्टृदृश्यभेदरूपाधेयशून्यं कुर्यादित्यर्थः । **अतः स्वे**त्यादि साध्यस्थले स्वनिबन्धना सिद्धस्थले तूपाधिनिबन्धना निष्प्रपञ्चादिधर्मनिबन्धनेत्यर्थः । **अनिष्पन्ने**त्यादि उक्तरीतिकज्ञानविषयत्वेन रूपेणेत्यर्थः । पूर्वपक्षायाशङ्कते **यद्यपी**त्यादि । **न प्रामाण्य**मिति गृहीतग्राहित्वान्नेत्यर्थः । साध्यस्वरूपपरत्वान्नेति वा । **ध्याने**ति निदिध्यासनं तन्मते ध्यानं तदेकवाक्यतया विजिज्ञासादीनां ध्यानत्वमतो ध्यानविषय इत्यर्थः । **नियोग** इति विधिरित्यर्थः । **ध्येयैके**ति ध्येय आत्मैव एको मुख्यस्तेन निरूपणीयतया, ज्ञानविशेषत्वेन घटादिज्ञानवत् । श्रुतावयमात्मा जीवात्मा । **तद्विशेषे**ति जीव इत्यर्थः । **ध्यानविधी**ति पारार्थ्यं शेषलक्षणम् । विध्यर्थतव्यलिङ्गादीनां प्रामाण्यं तव्यादिविशिष्टवाक्यानां तु विधिशेषतयैव प्रामाण्यमिति प्रामाण्यपदमुक्तमन्वयपदं विहाय । **तद्विधी**ति आत्मविषयकं निदिध्यासनमित्यादिरूपे ध्यानशरीरे अपिशब्दौ विधिशेषेण साकं ब्रह्मस्वरूपसमुच्चायकौ । ध्यानमनु पश्चान्निरूपकतयानुप्रविष्टेत्यर्थः । **प्रवृत्ती**त्यादि द्विपदद्वन्द्वं कृत्वा प्रयोजनशब्देन कर्मधारयस्ततस्ताभ्यां विधुराणामिति तत्पुरुषः । **ध्येयविशेषे**ति मात्रशब्देन ध्यानव्यवच्छेदः । **बाले**त्यादि यथौषधकटुतायामपि

भाष्यप्रकाशः ।

वज्ज्ञानमात्रेणैव पुरुषार्थतासिद्धेः परिनिष्पन्नवस्तुसत्यतागोचरत्वाभावाद् ब्रह्मणः शास्त्रप्रमाणकत्वं न संभवतीति तृतीयः पूर्वपक्षः ।

सिद्धान्तस्तु, समन्वयः सम्यगन्वयः पुरुषार्थतयाऽन्वयः । तथाच, 'यतो वा इमानि भूतानि जायन्ते,' 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्,' 'तदैक्षत बहु स्यां प्रजायेय' इति,' 'तत्तेजोऽसृजत्,' 'ब्रह्म वा इदमेकमेवाग्र आसीत्,' 'आत्मा वा इदमेकमेवाग्र आसीत्,' 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः,' 'एको ह वै नारायण आसीत्' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिषु परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयाऽन्वयाच्छास्त्रप्रमाणकत्वं ब्रह्मणः सिद्ध्यत्येवेत्यर्थः । अन्यथा सर्वप्रमाणानां यत् स्वविषयावबोधपर्यवसायित्वं, तच्छास्त्रानिवर्तमानं शास्त्रस्याबोधकत्वरूपमप्रामाण्यमादध्यात् । नच प्रवृत्तिनिवृत्त्यन्वयविरहिणः प्रयोजनशून्यत्वं, पुरुषार्थान्वयप्रतीतेः । स्वरूपपरस्यापि पुत्रस्ते जातः, नायं सर्पो रज्जुरेषेत्यादेर्वाक्यस्य हर्षभयनिवृत्त्यादिरूपप्रयोजनदर्शनाच्च । अयमर्थः । अनादिकर्मरूपाविद्यावृतपरावरतत्त्वयाथात्म्यस्वस्वरूपज्ञानानां देवादिदूर्वान्तानां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां मुक्तानां स्वस्य चाविशेषेणानुभवसंभवे स्वरूपगुणविभावचेष्टितैर्निरवध्यानन्दजननं ब्रह्मास्तीति बोधयदेव वाक्यंप्रयोजनपर्यवसायि । प्रवृत्त्यादिनिष्ठं तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्यवसायि । एवंभूतं कथं लभ्यत इत्यपेक्षायां तत्प्राप्त्युपायतया, 'ब्रह्मविदाप्नोति परम्', 'आत्मानमेव

रश्मिः ।

बालादियथार्थाशनाय नेदं कटुरिति वाक्यवदित्यर्थः । **पुरुषार्थेत्यादि** पुरुषेणार्थ्यते प्रार्थ्यते इति पुरुषार्थ आनन्दः साध्यत्वं वा तस्यान्वयप्रतीतिसिद्धेरित्यर्थः । **परिनिष्पन्नेत्यादि** विधिविषयभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपं परिनिष्पन्नवस्तु । **सिद्ध्यत्येवेति** अत्यन्तायोगव्यवच्छेदकैवकारप्रयोगः कृतः । **अन्यथेति** पूर्वपक्षरीतिकशास्त्रार्थत्वे । **अबोधकत्वेति** योग्यताविरहप्रयुक्तमबोधकत्वरूपं वह्निना सिञ्चतीतिवाक्याप्रामाण्यवदप्रामाण्यमादध्यादित्यर्थः । **न च प्रवृत्तीति** प्रवृत्तिश्च निवृत्तिश्च स्वर्गान्वयश्च तेषामभाववतो वेदान्तस्य । **पुरुषार्थेति** निरवध्यानन्दान्वयस्य प्रतीतेः । **स्वरूपपरस्येति** सिद्धस्वरूपपरस्य । वेदशास्त्राच्छास्त्रान्तरवेदान्ते प्रवृत्तिनिवृत्त्योः स्वर्गान्वयात्प्रसिद्धाद्भिन्नस्य प्रयोजनीभूतानन्दान्वयस्य दुरुपपादत्वादाहुः **अयमर्थ** इति । **अनादीत्यादि** अनादिकर्मरूपयाऽविद्यया आवृतपरावरतत्त्वयाथात्म्यरूपस्य स्वस्वरूपस्य ज्ञानं येषां तेषामित्यर्थः । **व्यवस्थितेत्यादि** इदं क्षेत्रज्ञानामेव विशेषणं न मुक्तानामसंभवात् ।अत्र **धारको** ब्रह्मा ब्रह्मन् पुंसि चेति सूत्रात् । **पोषको** विष्णुः। शिवो नोक्तः। **अनुभवसंभव** इत्यस्य कर्तरि षष्ठ्या । तमसोनुभवावकरत्वात् शिवस्य तामसत्वात् । भोग्यविशेषा दूर्वास्तेषाम् । **स्वस्येत्यादि** मुक्तानां वा स्वस्य विशेषेणानुभवसंभव इति योजना। कर्मणि षष्ठी अनुभवसंभव इत्यस्य स्वस्येत्यत्रानुभवविषयमाहुः **स्वरूपेति** । स्वरूपमालम्बनविभावः, गुणाः अनुभावा, विभावाः संचारिणो वैराग्यादयः, चेष्टितमुद्दीपनविभावस्तैः निरवध्यानन्दो रसात्मकः तस्य जननं यस्मात् ब्रह्मण इति बहुव्रीहिः । **वाक्यमिति** पुत्रस्ते जातः नायं सर्पो रज्जुरेषेत्यादिरूपम् । **यावदित्यादि** स्वर्गादिरूपपुरुषार्थान्वयबोधमनतिक्रम्येत्यव्ययीभावः । वर्तत इति शेषः । **नेत्यादि** न निरवध्यानन्दपर्यवसायीत्यर्थः । **आनन्द-**

भाष्यप्रकाशः ।

लोकमुपासीत' इति वेदनादिशब्दैरुपासनं विधीयते । यथा वेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा पश्चात् तदुपादाने प्रयतते । यथाच कश्चिद् राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनान्निष्क्रान्तो मार्गभ्रष्टो नष्ट इति राज्ञा विज्ञातः स्वयं चाज्ञातपितृकः केनचिद्विवर्धितोऽधिगतवेदशास्त्रः षोडशवर्षो गुणसंपन्नस्तिष्ठन् केनचिदभियुक्तेन प्रयुक्तं 'पिता ते सर्वलोकाधिपतिः प्रशस्तगुणः पुरवरे त्वामेव नष्टं पुत्रं दिदृक्षुस्तिष्ठति' इति वाक्यं शृणोति चेत्तदानीमेवाहं तावज्जीवतः पुत्रोऽस्मिपिता च सर्वसंपत्समृद्ध इति महाहर्षान्वितो भवति । राजा च स्वपुत्रं जीवन्तं सकलगुणसंपन्नं श्रुत्वाऽवाप्तसर्वार्थो भवति पश्चात्तावुभौ संगच्छेते च । यत्तु परिनिष्पन्नवस्तुगोचरवाक्यार्थज्ञानमात्रेणापि पुरुषार्थपर्यवसानाद् बालातुराद्युपच्छन्दनवाक्यवन्नार्थसद्भावे प्रामाण्यमित्युक्तम् । तदसत् । निश्चितेऽर्थाभावे पूर्वं ज्ञातस्याप्यर्थस्य पुरुषार्थानुपयोगात् । बालातुरादीनामप्यर्थसद्भावभ्रान्त्या पूर्वं हर्षाद्युत्पत्तावपि पश्चात् तदभावनिश्चये हर्षादिनिवृत्तिदर्शनात् । एवमौपनिषदेष्वपि वाक्येषु ब्रह्मसत्तायां तात्पर्याभावे निश्चिते पूर्वमुत्पन्नमपि ब्रह्मज्ञानं न पुरुषार्थपर्यवसायि स्यात् । तस्माद्, 'यतो वा इमानि' इत्यादिवाक्यं स्वोक्तप्रकारकब्रह्मास्तित्वं बोधयदेव प्रमाणं भवतीति सिद्धमिति रामानुजाचार्याः ।

भास्कराचार्यास्तु प्रपञ्चप्रविलायनद्वारेण ब्रह्मणः शास्त्रप्रमाणकत्वं न स्वत इति पूर्वपक्षे एवं प्रत्युत्तरमाहुः । तथाहि । ब्रह्मण आत्मत्वेन नित्यत्वेन चाभ्युपगतस्य कथं कार्यत्वम् । नित्यत्वकार्यत्वयोर्विरोधात् । नचोपाधेर्विद्यमानत्वात् तद्विलायनेनोपधाननिवृत्तेस्तद्द्वारा कार्यत्वमिति वाच्यम् । तथा सति घटे कृते नभसोऽपि कार्यत्वापत्तेः । नचोक्तदूषणभयात् प्रपञ्चप्रविलायनं कुर्यादिति वाक्यं कल्पनीयमिति वाच्यम् । पुरुषमात्रेण मह्यादीनां महाभूतानां विलायनस्य कर्तुमशक्यत्वेन विधेर्वैयर्थ्यात् । समाधौ सुषुप्तौ च सर्वतिरोधानेऽपि व्युत्थानदशायां सर्वस्य पुरो-

रश्मिः ।

मीमांसायां तैत्तिरीये स्पष्टम् । एवंभूत इत्याद्युक्तदृष्टान्तमाहुः **यथेत्यादि** । ब्रह्मविदाप्नोति परमित्याद्यभियुक्तप्रयुक्तवाक्यस्थानीयम् । तृतीयपूर्वपक्षं दूषयितुमनुवदन्ति स्म **यत्तु इत्यादिना** । **बोधयदिति** । वाक्ये शक्तेरिति भावः । **रामानुजेति** । अत्रैव पूर्वपक्षभर इति प्रथमद्वितीयौ पक्षौ नानूदितौ रामानुजाचार्यमते । पूर्वोक्तेषु द्वितीयं पूर्वपक्षमाहुः **प्रपञ्चेत्यादि** । **तद्द्वारेति** उपधानकार्यत्वनिवृत्तिद्वारा यद्वा उपाधिद्वारेत्यर्थः । उपाधिरुपधेय उपधानं च । उपधीयतेऽनेन व्यापारेणेत्युपधानम्, करणे ल्युट्, तादृशोपधाननिवृत्तेः कार्यत्वात्तदाश्रयब्रह्मणोपि कार्यत्वमित्यर्थः । एवं युक्त्या प्रत्युत्तरमनूद्य नियोगविचारेण प्रत्युत्तरमनूदितुमाहुः शङ्कां मीमांसकस्य । **न चोक्तदूषणेत्यादि** इमानि दूषणानि प्रथमपूर्वपक्ष उक्तानि द्वितीये पक्षे वा । **प्रपञ्चेति** वाक्यकल्पने विधिस्तु पूर्वोक्तो न दृष्टेर्द्रष्टारं पश्येदित्यादिः । अत्र द्रष्टृदृश्यभेदशून्यब्रह्मकरणे नञादीनां सामर्थ्यमालोच्य प्रपञ्चप्रविलायनं कुर्यादित्यभिधात्री श्रुतिः कल्प्यते सा वाक्यशब्देनोच्यते । अत्र तया नञर्थस्य भेदेनान्वयात्तदङ्गत्वं बोध्यते । दृष्टिपदस्य लक्षणाङ्गत्वं बोध्यत इत्यर्थगतसामर्थ्यम् । शब्दगतसामर्थ्यं तु पश्येदितिशब्दात् द्रष्टृदृश्यभेदशून्यब्रह्मकरणे सामर्थ्यमालोच्यानेन प्रपञ्चप्रविलायनं कुर्यादिति श्रुतिं कल्पयति । ततश्च दर्शनाङ्गस्य बोधनमिति । नियोज्यासंभवाद्विधिवैयर्थ्यं भवेदित्याहुः **पुरुषेत्यादि** । ननु दृष्टं प्रविलायनकर्तृत्वमिति चेन्नेत्याहुः **समाधावित्यादि** । तथा च एतादृशं प्रविलायनकर्तृत्वम-

भाष्यप्रकाशः ।

ऽवस्थानात् । प्रपञ्चप्रविलायने उपायाभावाच्च । प्रपञ्चेनैव प्रपञ्चप्रविलायनेऽनवस्थाप्रसङ्गाच्च । प्रपञ्चस्य साधारणत्वेन तत्प्रविलायने सर्वमुक्तिप्रसङ्गादिदानीं जगदप्रतीतिप्रसङ्गाच्च । अथात्मीयबन्धकारणस्याविद्याकामकर्मलक्षणस्य नाशनमेव प्रपञ्चप्रविलायनमिति मन्यसे तत्र न विसंवादः । किंच । नियोगस्य नियोज्यसापेक्षत्वेन तदाकाङ्क्षायां यदि तादृशप्रपञ्चकर्ता नियोगकर्ता वा नियोज्यः स्यात् तर्हीदानीं नियोज्याभावान्नियोगो न क्रियेत । किंचात्र प्रतीतिवेलायां प्रपञ्चविलयोभ्युपगम्यते । अग्निहोत्रादौ तु प्रतीतिकालोऽनुष्ठानकालश्च भिन्नस्तदप्यसंगतम् । अत्रेव तत्रापि प्रतीतिमात्रेणैव नियोगसिद्धावनुष्ठानलोपप्रसङ्गात् । किंच प्रविलायनं व्यापारो वा अभावो वा । नाद्यः । तस्य सत्त्वेन प्रपञ्चतादवस्थ्यात् । न द्वितीयः । तस्यावस्तुत्वेन प्रतिज्ञानाच्छशविषाणतुल्यत्वेन तद्विषयकनियोगानुपपत्तेः । अथात्मज्ञानविषयो नियोगः परिकल्प्यते, आत्मज्ञानं कुर्यादिति । तदप्यसंगतम् । ज्ञानस्य प्रमाणप्रमेयाधीनत्वेन क्रियावत् पुरुषेच्छानधीनतया नियोगविषयत्वस्य तत्राशक्यवचनत्वात् । नच द्रष्टव्यादिविधिविरोधः । तस्योपायपरत्वात् । श्रोतव्यादिपदैस्तस्यैव विवरणात् । नचाध्ययनविधिनाऽर्थज्ञानं विधीयत इति

रश्मिः ।

प्रविलायनकर्तृत्वमित्यर्थः । ननु दण्डादिप्रपञ्चेन घटादिप्रपञ्चः प्रविलीयतामिति चेन्नेत्याहुः **प्रपञ्चेनेत्यादि** । **अनवस्थे**ति बहुभिरपि कर्तुमशक्यत्वादनवस्थेत्यर्थः । यद्वाऽविलायकप्रपञ्चविलायकप्रपञ्चकल्पनेन व्यवस्था योगसंपन्नतनुयोगेन करिष्यतीति चेन्नेत्याहुः **प्रपञ्चस्येत्यादि** । **साधारणत्वेने**ति प्रविलायकाप्रविलायकसाधारणत्वेनेत्यर्थः । **न विसंवाद** इति । स्यादिति शेषः । नियोज्यविचारेण दूषयन्ति **किंचे**ति । **न क्रियेते**ति नियोज्यस्यैव विलायनत्ववाक्यकल्पकत्वस्यापि संभावयितुं शक्यत्वान्नियोज्येनैव विलयसिद्धौ विधेर्निरर्थकत्वभियेदानीं न क्रियेतेत्यर्थः । इदानींतनो नियोज्योऽस्त्वित्याकाङ्क्षायां दूषणान्तरमाहुः **किंचात्रेत्यादि** । **प्रतीतीत्यादि** समष्ट्या व्यष्ट्याश्च प्रतीतेः काल इत्यर्थः । **भिन्न** इति उदिते जुहोत्यनुदिते जुहोतीत्याद्युक्तः । न हि प्रतीतिमात्रेण नियोगसिद्धिरिहेष्यते किंतु तत्तत्तिथिवारनक्षत्रादिका स इति भिन्नः । इत्थं चेदानींतननियोज्यं प्रत्यपि नियोगो न क्रियेत प्रतीतिमात्रसिद्ध्या नियोगसिद्धेरभावादिति भावः । **तदपी**त्यादि अथात्मीयेत्यादिनोक्तम् । **अत्रेव तत्रापी**ति प्रतीतिकाल इवानुष्ठानकाले । **प्रतीती**ति ज्ञानकाण्डत्वादिति भावः । गीतायां ज्ञानयज्ञादिस्मृतेरित्येवकारः । तथा च स्वसंबन्धनाशनस्य प्रपञ्चप्रविलायनत्वाङ्गीकारे ब्रह्मणो निष्प्रपञ्चतायाः सिद्धिः । तथाच वेदान्तवाक्यानां कार्यपरतया ब्रह्मणि प्रमाणत्वमिति यत् प्रतिज्ञातं तदसंगतं भवेदिति निग्रहस्थानप्राप्त्यासंगतमित्यर्थः । **नियोगसिद्धावि**ति नियोगोत्र विधिस्तस्य सिद्धावित्यर्थः । अयं प्रलाप इदानींतनब्रह्मविन्नियोज्यमनतिक्रम्य ज्ञेयः । **सत्त्वेने**ति तादृशनाशानुकूलव्यापारस्य मुक्तात्मन्यनङ्गीकारे प्रविलायनाभावापत्त्या सत्त्वमवश्यं वाच्यं, व्यापारश्च प्रपञ्चांश इति प्रपञ्चतादवस्थ्याप्रविलयविरुद्धसत्त्वावस्थत्वादित्यर्थः । प्रलयविषयनियोगविचारस्य वृत्तत्वात् भिन्नप्रक्रमेणाहुः **अथात्मे**ति । **आत्मज्ञान**मिति दृश्यभिन्नद्रष्टृविषयकज्ञानं कुर्यात्, स्वं सर्वस्वात्मविषयकं ज्ञानं कुर्यादित्यर्थः । **क्रियावदित्यादि** क्रियाया इव क्रियावदत्र जानातीच्छति यतते इति परंपरा बोध्या । **तत्रे**ति ज्ञान इत्यर्थः । **न चेत्यादि** । तस्य ज्ञानस्य पुरुषेच्छाधीनत्वादिति भावः । **श्रोतव्यादीत्यादि** तथाच द्रष्टव्य इत्यस्यैवार्थः श्रोतव्यो

भाष्यप्रकाशः।

शङ्क्यम्। तत्रार्थज्ञानरूपफलायाक्षरग्रहणरूपाध्ययनस्य विधानात् फलस्याविधेयत्वात्। किंच। नियोगविषयभूतमात्मज्ञानं यद्यनुत्पन्नं तदा यागवत् साध्यत्वाभावाद् विषयत्वासिद्ध्या तद्विषयकनियोगस्यासिद्धिः। यदि च श्रवणाद्युत्पन्नं तदा श्रवणादिनैवात्मज्ञानसिद्धेः किमन्तर्गडुना नियोगेन। नच फलार्थं तदपेक्षा। 'तमेव विदित्वा' इति श्रुतौ नियोगनिरपेक्षाज्ज्ञानादेव मुक्तेरुक्तत्वात्। किंच। ज्ञाननियोगयोः परस्परमसंबन्धे वाक्यानर्थक्यात् संबन्धोऽवश्यं वक्तव्यः। स च गुणप्रधानभावेनैव दृष्ट इत्येकस्यावश्यं प्राधान्यं वक्तव्यम्। तद्यदि ज्ञानस्येत्युच्यते तदा नियोगस्य वाक्यार्थतया प्राधान्यं सर्वत्र यत्प्रतिज्ञातं तद्धीयेत। यदि नियोगस्यैव तदुच्यते तदा ज्ञानस्य नियोगार्थत्वान्मुक्त्यर्थत्वं न स्यात्। तस्योभयार्थत्वे प्रमाणाभावात्। नच नियोगो मुक्त्यर्थः। अश्रुतत्वात्। तमेव विदित्वेति ज्ञानस्यैव साक्षात्तदुद्देशेन श्रुतत्वादिति। एतदग्रे च, यो रामानुजमतोपन्यासेऽस्माभिः प्रथीयःपूर्वपक्ष उक्तो, यद्यपि 'शास्त्रयोनित्वात्' इत्यादिना, यश्च तृतीय उक्तो यद्यपि वेदान्तवाक्यानामित्यादिना, तदुभयमुपन्यस्य ततः पूर्ववदेव सृष्टिवाक्यप्रभृतीनां सम्यगन्वयः समन्वय इति समन्वयपदार्थमुक्त्वा युक्तीरेवमाहुः। नच तेषां ब्रह्मपराणामर्थान्तरकल्पना युक्ता। श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। नच कार्य एव प्रामाण्यं प्रतिपत्तुं युक्तम्। स्वरूपावबोधेऽपि प्रामाण्यस्याविशिष्टत्वात्। अपौरुषेयत्वस्यैव प्रामाण्ये तन्त्रत्वात्। नचाग्निहोत्रादिवाक्येषु कार्यावगतिः प्रामाण्ये तन्त्रमिति शङ्क्यम्। तस्य चैत्यवन्दनादिवाक्येऽपि तुल्यत्वात्। अथापौरुषेयत्वे सत्यनपेक्षत्वं तन्त्रमिति विभाव्यते। तदा तु वेदान्तेऽपि तस्य तुल्यत्वात् स्वरूपपरत्वेऽपि प्रामाण्यमक्षुण्णमेव। किंच। पदानां स्वार्थप्रत्यायनेऽनपेक्षत्वं लोकवेदसाधारणम्। वाक्यानां तु लोके परापेक्षमेव प्रामाण्यम्। अन्यथा खपुष्पं तिष्ठति पश्येत्यादीनामपि तत् स्यात्।

रश्मिः।

मन्तव्य इत्यादिः। दर्शनस्य प्रत्यक्षेतरत्वादिति भावः। **विधानादिति** न तु ज्ञानस्य विधानात्। **फलस्य** ज्ञानस्य। **अनुत्पन्नमिति** श्रवणादिभिस्तथेत्यर्थः। किंतु सिद्धमिति भावः। **श्रवणादिनेति** विधिविषयेण। आत्मज्ञानसिद्धिरौषधफलवत्। **अन्तरिति** व्यर्थं न द्रष्टव्य इति। **नियोगेन** विधिना। **तदपेक्षेति** नियोगापेक्षेत्यर्थः। **नियोगेत्यादि** विदित्वेत्यत्र लिङ्लोट्तव्यादीनां विरहेण तथेत्यर्थः। **असंबन्ध** इति संबन्धः सहोच्चारणं असंबन्धोऽसहोच्चारितत्वं तस्मिन् सति। **आनर्थक्यम**प्रामाण्यं तस्मात्। **दृष्ट** इति धवखदिरौ छिन्धीत्यत्र धवखदिरादिव्यतिरिक्तस्थले दृष्ट इत्यर्थः। धवखदिरयोर्गुणप्रधानभावाभावात्। माभून्मुक्त्यर्थत्वं ज्ञानस्य नियोगस्य तद्भविष्यतीत्याशङ्क्य निषेधन्ति **न च नीत्यादि**। निषेधे हेतुमाहुः **अश्रुतेत्यादि**। **तदुद्देशेनेति** मुक्त्युद्देशेनेत्यर्थः। **पूर्ववदिति** रामानुजसिद्धान्तवदित्यर्थः। **युक्तीरिति** धर्मे (ब्रह्मणि) एव समन्वये युक्तीरित्यर्थः। **अपौरुषेयत्वस्यैवेति** एवकारेण कार्यावगतिव्यवच्छेदः। **तन्त्रत्वं** प्रयोजकत्वं तस्मात्। **कार्यावगतिरिति** जुहुयादिति होमे कृतिसाध्यत्वावगतिः। **तस्येति** कार्यावगतिरूपतन्त्रस्य चैत्यवन्दनं कुर्यादिति वाक्येपीत्यर्थः। **स्वरूपेति** स्वरूपावबोधकत्वेपीत्यर्थः। **परापेक्षमिति** आकाङ्क्षायोग्यतासंनिध्यपेक्षमित्यर्थः। स्वघटकपदार्थसत्त्वापेक्षं वा। **खपुष्पमिति** पश्य मृगो धावतीतिवदन्वयः। **तत्स्यादिति** प्रामाण्यं

भाष्यप्रकाशः ।

वेदे तु तेषामप्यपौरुषेयत्वात् प्रमाणान्तरानधिगतमूलकारणगमकत्वे तदनपेक्षमेव । मीमांसकमते प्रमाणान्तरानधिगतार्थगन्तृत्वस्यैव प्रामाण्ये तन्त्रत्वाङ्गीकारात् । श्रौतानां तथैवेष्टत्वाच्च । अतः प्रत्यक्षवत् सृष्टिवाक्यस्यापि प्रामाण्यं तुल्यमेवेत्यादिभिर्बहुधा नियोगपरत्वं वाक्यानां दूषयित्वा शरीरेन्द्रियमनसामात्माधिष्ठितानां चेष्टाविशेषः प्रयत्नः सर्वधात्वर्थसाधारणः । स एव च साध्यत्वाद् वाक्यार्थो लोकवेदयोः । नियोगस्तु न वाक्यार्थः। पूर्वमीमांसाभाष्ये पूर्वोत्तरतन्त्रसूत्रयोश्च तत्सूचकाक्षराभावात् । किंतु प्रवृत्तौ निमित्तमात्रं सः । रागादिवत् । भावना तु भवति वाक्यार्थः । ये प्राहुः किमपि भावयेदिति ते स्वर्गकामपदसंबन्धात् स्वर्गं भावयेदिति ब्रूयुरिति भावार्थाधिकरणभाष्ये स्पष्टत्वात् । कृतप्रयत्नापेक्षस्त्विवति व्याससूत्रेऽपि स्पष्टत्वाच्चेति वाक्यार्थविषये भावनामादृतवन्तः । यत् पुनर्वेदान्तानां कर्तृप्रतिपादनपरत्वं वा जपार्थत्वं वेति नियोगवादिभिरुक्तं, तत्तु सर्वजगत्कारणस्य ब्रह्मणो नियोज्यत्वाभावान्नियोज्यस्य जीवस्य सत्ताया अहमिति प्रत्यक्षेणैव सिद्धेरात्मवादे साधितत्वाच्च न वेदान्तस्य तत्परत्वं, प्रकरणाद्यभावाच्च न कर्मशेषजपार्थत्वमित्येवं नियोगवादिनं दूषयित्वा ततो भेदाभेदवादं स्थापयित्वा ततो मायावादिमतं दूषयित्वा ज्ञानकर्मसमुच्चयं स्थापितवन्तः । एवमुक्ते मतद्वये त्रिसूत्र्या जन्माद्यधिकरणसमाप्तिः ।

शंकराचार्यमतेऽप्येत एव पूर्वपक्षाः । सिद्धान्तस्तु मायावादेन निर्विशेषब्रह्मजीवैक्यप्रतिपादनपरः । अधिकरणसमाप्तिस्तु श्रुतत्वाच्चेति दशमे सूत्रे ।

शैवमतेऽप्येत एव पूर्वपक्षाः । सिद्धान्ते तु समन्वयो नामोपक्रमादिभिर्लिङ्गैस्तात्पर्यनिर्णय इत्युक्त्वा तैः शिवपरत्वं वेदान्तवाक्यानामित्युक्तम् ।

रश्मिः ।

स्यादित्यर्थः । **तेषामिति** वाक्यानामित्यर्थः । **मूलकारणेति** एकप्राणरूपमूलकारणवद् ब्रह्मरूपमूलकारणगमकत्वे । **तदित्यादि** आकाङ्क्षाद्यनपेक्षमित्यर्थः । **स एवेत्यादि** आर्थीभावनारूपः प्रयत्न एव शाब्दीभावनासाध्यत्वादित्यर्थः । पूर्वतन्त्रे द्वितीयेऽध्याये यजेतेत्याख्यातान्तेनापूर्वं प्रतिपाद्यते पदान्तरं तु तच्छेषतां भजत इति । अपूर्वं वा अर्थ इति स्थितं तद्दूषयन्ति **नियोग** इति अपूर्वमित्यर्थः । विधिर्वा । **पूर्वोत्तरेत्यादि** व्यासजैमिनिसूत्रयोरित्यर्थः । **नियोगेति** सर्वैः पूर्वमीमांसकैः नियोगरूपभावनायास्त्रिक्षणावस्थायित्वेन नियोगो न विधिविषयः किंत्वपूर्वमिति नियोगवादिनः । **तत्परत्वमिति** नियोज्यपरत्वमित्यर्थः । तत्परत्वे चाप्रामाण्यापत्तिरिति भावः । 'जन्माद्यस्य यतः' इत्यारभ्य श्रुतत्वाच्चेत्येवमन्तैः सूत्रैः यान्युदाहृतानि वेदान्तवाक्यानि तेषां सर्वज्ञः सर्वशक्तिरीश्वरो जगतो जन्मस्थितिलयकारणमित्येतस्यार्थस्य प्रतिपादकत्वमिति भाष्यस्वारस्यादुक्तत्वाच्च दशसूत्रमधिकरणमिदम् । तदीयाधिकरणमालायां या ईक्षत्यधिकरणसमाप्तिरस्मिन् सूत्र उक्ता सा स्वप्रज्ञाविलास इत्याशयेनाहुः **अधीत्यादि** । **यद्वा** ईक्षत्यधिकरणसमाप्त्या सप्तसूत्रमेवाधिकरणम् । भास्कराचार्यमते धीत्यादिः तथाच भास्करभाष्यम् । सांख्यास्तु त्रिगुणमचेतनं प्रधानं जगत्कारणमनुमीय तत्रैव वेदान्तवाक्यानि योजयन्तः प्रत्यवतिष्ठन्ते । चेतनस्य ब्रह्मणो जगत्कारणत्वे यत्प्रतिज्ञातं शास्त्रयोनित्वं 'सदेव सोम्येदमग्र आसीत्' इत्यादिवाक्यसमन्वयात्तदसिद्धं, सच्छब्दो वस्तुमात्रवाची प्रधानेप्यवकल्पतेऽतो न चेतनं जगत्कारणमिति प्राप्ते ब्रवीति 'ईक्षतेर्नाशब्दम्' इति । सूत्रस्य दशमत्वं तु 'जन्माद्यस्य यतः शास्त्रयोनित्वात्' इत्यनेकसूत्रमितिपक्षे । **तैरिति** उपक्र-

तथाहि। जैमिनिर्धर्मजिज्ञासामेव प्रतिज्ञाय तत्प्रतिपादकस्य पूर्वकाण्डस्य समन्वयमाह।

अवान्तरवाक्यानां प्रकारशेषत्वात्। नच सर्वस्मिन् वेदे धर्म एव जिज्ञास्यः। तद्गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात्।

भाष्यप्रकाशः।

तत्र सिद्धान्तानामसंगतिः पश्चाद् व्युत्पाद्या। पूर्वं तु सर्वो वेदः क्रियापर इति पूर्वपक्षस्यासंगतिं व्युत्पादयन्ति **तथाहीत्यादिना**। **समन्वयमिति** धर्मे सर्ववाक्यानां तात्पर्यलिङ्गैः संदेहनिरसनपूर्वकं संबन्धम्। **अवान्तरवाक्यानामिति** अर्थवादमन्त्रादिरूपाणाम्। **साधकत्वमिति** प्रमितिजनकत्वम्। अयमर्थः। पूर्वकाण्डे ह्यग्निहोत्रादीनि कर्माणि प्रतिपाद्यन्ते। तेषां च न तेन रूपेण तदभिधेयत्वम्। शास्त्रभेदप्रसङ्गात्। किं तु धर्मत्वेनेत्येतद् बोधनाय जैमिनिर्धर्मजिज्ञासामेव प्रतिज्ञाय धर्मप्रतिपादकस्य पूर्वकाण्डस्य धर्मे समन्वयम्, आम्नायस्य क्रियार्थत्वादित्यादिभिः सूत्रैराह। तत्र मन्त्रार्थवादादीनां कथं क्रियार्थत्वमित्याकाङ्क्षायां तेषामवान्तरवाक्यानां धर्मप्रकारभूतद्रव्यदेवताकर्मस्तुत्यादिप्रकाशकत्वेन धर्मशेषत्वात् सर्वस्य पूर्वकाण्डस्य तत्रैव समन्वयः। नच तेष्वम्नायादिपदात् सर्वस्मिन् वेदे धर्म एव जिज्ञास्य इति शङ्क्यम्। तद्गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात्। नच व्यासस्य तद्गुरुत्वे संदेहः। मार्कण्डेयपुराणारम्भ एव।

'व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत।
यस्याग्रे भारताख्यानं व्यासेनोक्तं महात्मना'। इति॥

श्रीभागवतेऽपि द्वादशस्कन्धे व्यासशिष्यान् प्रस्तुत्य, 'साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम्' इति कथनात्। नच सोऽन्य एवेति शङ्क्यम्। औत्पत्तिकसूत्रे, बादरायणस्यानपेक्षत्वादिति पूजार्थं बादरायणग्रहणेनापि तथावगतेः। नच ब्रह्मजिज्ञासायाः क्रत्वर्थपुरुषार्थजिज्ञासावदवान्तरशेषविशेषविषयत्वं शङ्क्यम्। तथा सति जैमिनिरेव क्रत्वर्थादिजिज्ञासावत्

रश्मिः।

मादिलिङ्गैरित्यर्थः। माध्वास्तु शास्त्रयोनित्वलक्षणस्य ब्रह्मशिवादिष्वतिव्याप्तिरित्यलक्षणमिदमिति पूर्वपक्षे, तच्छब्दस्य विष्णुवाचकत्वमङ्गीकृत्यान्वयादुपक्रमादिलिङ्गसमुदायाद् विष्णुरेव जगज्जन्मादिकारणत्वेन शास्त्रयोनिर्न तु हिरण्यगर्भादिरिति सिद्धान्तयन्ति। तदेतन्मतं 'अनुकृतेस्तस्य च' इत्यधिकरणे सर्वेषां ब्रह्मण्यनुकरणत्वस्य व्यवस्थाप्यत्वादत्रैतच्चिन्तनस्यानुपयुक्तत्वान्नानूदितमिति ज्ञेयम्। **धर्म** इत्यादि अयं समुपसर्गार्थः। **संबन्धमि**त्यन्वयपदस्यार्थः। **अर्थवादे**ति आदिशब्देन विधिनिषेधनामधेयानि। **प्रमिती**ति मन्त्रब्राह्मणयोर्वेदनामधेयमिति ब्राह्मणे एव धर्मप्रमितिजनकत्वमिति नेति भावः। जैमिनिर्धर्मजिज्ञासामित्यादि अप्रामाण्यं स्यादित्यन्तं भाष्यं व्युत्पादयन्ति **अयमर्थ** इत्यादि। **तेने**ति अग्निहोत्रत्वादिरूपेण पूर्वकाण्डाभिधेयत्वमग्निहोत्रप्रतिपादकाग्निष्टोमप्रतिपादकयोर्वेदयोर्भेदप्रसंगात् प्रतिपाद्यभेदस्य प्रतिपादकभेदकत्वादित्यर्थः। **प्रतिज्ञाये**ति 'अथातो धर्मजिज्ञासा' इति प्रतिज्ञायेत्यर्थः। **अवान्तरे**त्यादि भाष्यं विवृण्वन्ति **तत्रे**त्यादि। **तत्रैवे**ति धर्म एवेत्यर्थः। **न चे**त्यादि भाष्यं विवृण्वन्ति **न च तेष्वि**त्यादि सूत्रेष्वित्यर्थः। **अपी**ति अपिर्मार्कण्डेयश्रीभागवताभ्यामौत्पत्तिकसूत्रस्य समुच्चये। **तथावगते**रिति व्यासशिष्यत्वावगतेः। **क्रत्वर्थे**त्यादि

संदेहमात्रवारकत्वाज्जिज्ञासयोः । न त्वलौकिकार्थसाधकत्वम् । तथा सति वेदानामन्याधीनत्वेनाप्रामाण्यं स्यात् वेदजिज्ञासेत्येवोक्तं स्यात् ।

भाष्यप्रकाशः ।

तामपि प्रतिजानीयात् । तस्या अपि शास्त्रपूर्त्यर्थमवश्यमपेक्षितत्वात् । अतः कर्तृभेदाद् भिन्ने एवोभे अपि जिज्ञासे । ते च पूर्वोत्तरकाण्डाभ्यां प्रमिते धर्मे ब्रह्मणि च मन्दमध्यमयोर्बुद्धिदोषात् संदेहसंभवमालोच्यैव कृते, न त्वन्योऽन्यमतदूषणाय । जैमिन्युक्तानामभ्यासादीनां व्यासपादैरुपन्यासाद् व्यासाभिप्रेतस्यानपेक्षत्वस्य जैमिनिनोपन्यासात् । नापि धर्मब्रह्मप्रमितिजननाय । यदि तथा स्यात् तदा मीमांसाऽधीने वेदस्य प्रमितिजनकत्वे उभावपि वेदस्य प्रामाण्येऽनपेक्षत्वं न ब्रूयाताम् । अत इदमपि सर्वस्य वेदस्याक्रियार्थत्वगमकम् । तदेतदुक्तं **संदेहे**त्यादि, **अप्रामाण्यं स्या**दित्यन्तेन । अथ यदि कर्मार्थतैव वेदस्य जैमिन्यभिप्रेता स्यात् तदा बादरायणमतं जानानेन तदनादराय वेदजिज्ञासेत्येवं प्रतिज्ञावाक्यमुक्तं स्यात् । अत उक्तहेतुत्रयात् सर्वस्य वेदस्य क्रियार्थत्वं न जैमिन्यभिप्रेतम् । किं चाम्नायस्येति तु पूर्वपक्षसूत्रं, तद्भूतसूत्रस्थं क्रियार्थपदं तु तिङन्तवाचकं, न तु साध्यार्थपरम् । तेन तदर्थं जैमिनिसूत्रानुसरणमपार्थमेवेति ।

रश्मिः ।

चतुर्थेऽध्याये 'अथातः क्रत्वर्थपुरुषार्थत्वयोः जिज्ञासा'इति सूत्रेणेत्यर्थः । **अवान्तरे**त्यादि अङ्गविशेषविषयत्वमित्यर्थः । नास्तिक्यनिराकरणाय ब्रह्मत्वार्थं च कर्मणि ब्रह्मज्ञानस्यापेक्षितत्वादिति भावः । **ता**मिति ब्रह्मजिज्ञासामित्यर्थः । **संदेहे**त्यादि 'संदेहवारकं शास्त्रं बुद्धिदोषात्तदुद्भवः' इति पूर्वं कारिकयोक्तम् । **जैमिन्युक्ताना**मिति द्वितीयस्य द्वितीयपादे उक्तानामित्यर्थः । **उपन्यासा**दिति 'आनन्दमयोऽभ्यासात्' इति सूत्र उपन्यासादित्यर्थः । **आदि**शब्देन श्रुत्यादि । **व्यासे**त्यादि अत्रैव तृतीयपादे 'शब्द इति चेन्न' इत्यादिसूत्रेऽभिप्रेतस्येत्यर्थः । **उपन्यासा**दिति 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशो व्यतिरेकश्चार्थेनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति सूत्रे इत्यर्थः । तथा च शाबरभाष्यं बादरायणग्रहणं बादरायणस्येदं मतं कीर्त्यते बादरायणं पूजयितुं नात्मीयं मतं पर्युदसितुमिति । **न त्वि**त्यादि भाष्यं विवृण्वन्ति **नापी**त्यादि । **ब्रह्मे**त्यादिः अलौकिकार्थेत्यस्यार्थः । **प्रमिती**त्यादिः साधकत्वमित्यस्यार्थः । जिज्ञासे इति बोध्यम् । **तथे**त्यादिति भाष्यं विवृण्वन्ति **यदी**त्यादि । **उभा**विति व्यासजैमिनी इत्यर्थः । **इदमपी**ति भिन्नकर्तृकत्वमपीत्यर्थः । **तदेत**दिति न च ब्रह्मजिज्ञासाया इत्यारभ्योपपादितमित्यर्थः । **वेदे**त्यादिभाष्यं विवृण्वन्ति **अथे**त्यादि । **उक्ते**त्यादि जैमिनेर्व्यासशिष्यत्वात्, मीमांसयोर्भिन्नकर्तृकत्वात्, अथातो वेदजिज्ञासेत्यप्रतिज्ञानाच्चेति हेतुत्रयादित्यर्थः । उक्ते धर्मे समन्वयेऽधिकां युक्तिमाहुः **किंचे**त्यादि । तदेतद्भाष्यशास्त्रदीपिकादौ प्रसिद्धम् । सिद्धान्तसूत्रं तु 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इति । **तिङन्ते**त्यादि 'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्' इति सूत्रम् । तेष्वेव पदार्थेषु भूतानां वर्तमानानां पदानां क्रियार्थेन तिङन्तेन समुच्चारणमर्थस्य पदनिमित्तत्वादिति सूत्रार्थः । **साध्यार्थे**त्यादि साध्योर्थो जन्ययागस्तत्परत्वं नेत्यर्थः । **अयमर्थः** लिङादिप्रयोगे ह्याख्यातत्वलिङ्त्वाभ्यां भावनैवोच्यते । सा च भवितुर्भवनानुकूलो भावकव्यापारविशेषः तत्र शाब्दी भावना आर्थी भावना च । पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः शाब्दी भावना लिङ्वाच्या, अयं मां प्रवर्तयति प्रवृत्त्यनुकूलव्यापारवानयमिति लिङ्श्रवणे प्रत्य-

किंच। साधनं च फलं चैव सर्वस्याह श्रुतिः स्फुटम्।
न प्रवर्तयितुं शक्ता तथा चेन्नरको न हि॥
प्रवर्तकस्तु सर्वत्र सर्वात्मा हरिरेव हि।

भाष्यप्रकाशः।

ननु तथापि पूर्वकाण्डस्य क्रियार्थत्वे तु न विवादः। तथा सत्यैकशाख्यानुरोधादुत्तरकाण्डस्यापि पूर्वशेषतैव येन केनापि प्रकारेणादरणीया। नच विपरीतमाशङ्कनीयम्। सिद्धे ब्रह्मणि साध्यार्थानां वाक्यानामन्वयायोगात्। नच प्रापकत्वेनान्वयः। तत्तद्वाक्यगतफलोक्तिबाधप्रसङ्गात्। अतो वेदस्य साध्यार्थपरतां निश्चित्य तच्छेषतैवोत्तरकाण्डार्थस्यादरणीया। यदि चोपासनाशेषत्वं ज्ञानशेषत्वं वाङ्गीक्रियते तदापि तयोर्विधेयत्वेन धर्मत्वादुत्तरार्थस्य ब्रह्मणः प्रवर्तकश्रुतिवाक्यशेषता दुर्वारैवेति सर्वस्य वेदस्य धर्मार्थत्वमर्थादेव सिद्धमित्यत आहुः किंचेत्यादि। चकारद्वयं व्यापारस्य स्वरूपस्य च समुच्चायकम्। सर्वस्येति कर्मणः। सर्वस्यैव स्फुटमाहेत्यन्वयः। सर्वत्रेति विहिते निषिद्धे च। सर्वात्मेति 'स आत्मानꣳ स्वयमकुरुत'

रश्मिः।

यात्। यथा गोशब्दश्रवणे गोत्वं प्रतीयते इति गोत्वं गोशब्दार्थः। स च व्यापारविशेषः। वेदे पुरुषाभावाल्लिङादिशब्दनिष्ठ एव। अतः शाब्दीभावना। तस्याश्च साध्यसाधनेतिकर्तव्यतारूपांशत्रयापेक्षिण्या अंशत्रयोपेतार्थीभावना साध्यत्वेन संबद्ध्यते, न तु संख्यादयोऽयोग्या भावयितुम्। एवं च साध्यार्थ आर्थीभावना तत्परत्वं नेति। क्रियार्थपदस्य प्रकृतिप्रत्ययरूपतिङन्तवाचकत्वं, न तु लिङादिमात्रप्रत्ययार्थपरत्वमिति पर्यवसन्नोर्थः। तेनेत्यादि जैमिनिसूत्रविचार एतत्सूत्रद्वयं क्रियार्थत्वसाधकं वक्तव्यं तस्य तु तथात्वाभावेन सर्वस्य वेदस्य क्रियार्थत्वार्थत्वमित्यर्थः। किंच साधनमित्यादिभाष्यं विवरीतुमाभासमाहुः ननु तथेत्यादि। क्रियार्थत्व इति स्वाध्यायविधिना तु सर्वो वेदः पुरुषार्थाय नीयते। तदर्थमर्थवादानां भूतार्थप्रतिपादनेन प्रयोजनविधुराणामयं प्राशस्त्यरूपो लक्ष्यमाणोर्थः क्षिप्रदेवतासाध्यं कर्म क्षिप्रमेव फलं दास्यतीति। अन्यथा प्रयोजनवदर्थपर्यवसानं न स्यादतो विधिना अर्थवादानां प्राशस्त्ये तात्पर्यं बोध्यते। तात्पर्याच्च लक्षणा। ततश्चैककार्यकरत्वरूपैकवाक्यत्वं विधीनाम्। विधिमन्तरेण पुरुषप्रवर्तनासंभवात्। अतश्चार्थवादाः प्रयोजनपर्यवसायिनः स्युरिति सिद्धान्तसूत्रार्थात् क्रियार्थत्वे श्रुति'र्न प्रवर्तयितुं शक्ता तथा चेन्नरको नहि' र्हितावतो हेतोः साधनं चेत्यादिरित्यन्वयं मन्वाना आहुः वेदस्येति। विधिविषययागार्थत्वे तु न विवाद इत्यर्थः। विपरीतमिति पूर्वकाण्डस्योत्तरशेषतेत्यर्थः। प्रापकत्वेनेति अन्तःकरणशुद्धिद्वारा ब्रह्मप्रापकत्वेन कर्मणां ज्ञानभक्त्योरन्वय इत्यर्थः। तत्तदित्यादि यजेत स्वर्गकामः, तरति तरति ब्रह्महत्यां योश्वमेधेन यजते, इत्यादिवाक्येत्यर्थः। अन्तःकरणशुद्धिद्वारा ज्ञानभक्तिस्वर्गादिकं चेत्युभयं फलत्वं नार्हेदिति भावः। अङ्गीक्रियत इति कर्मणोङ्गीक्रियत इत्यर्थः। तयोरिति ज्ञानोपासनयोः। विधेयत्वेनेति आत्मेत्येवोपासीतेति प्रज्ञां कुर्वीत इत्युभयोर्विधिकर्मत्वेन विध्यर्हत्वेन। धर्मत्वादिति 'चोदनालक्षणोर्थो धर्मः' इति जैमिनिसूत्रोक्तधर्मलक्षणाक्रान्तत्वात्। प्रवर्तकेत्यादि आत्मेत्येवोपासीत 'आत्मा वा अरे द्रष्टव्यः' इत्यादिवाक्यशेषतेत्यर्थः। यद्वा विधिवाक्यशेषता। व्यापारस्येति देवताप्रीतिरूपस्येत्यर्थः। इदं तृतीयाध्याये स्फुटीकरिष्यते। स्वरूपस्येति ब्रह्मप्राप्तिफलवद् ब्रह्मणोपि फलत्वं 'भगवानेव हि फलम्' इति निरोधलक्षणग्रन्थात्। स्फुटमाहेति क्रियाविशेषणत्वात्। कारिका उप-

यज्ञ एव हि पूर्वत्र बोध्यते स्वर्गसिद्धये ॥

भाष्यप्रकाशः ।

इति श्रुतेः सर्ववस्तुस्वरूपोऽन्तर्यामिब्राह्मणात् सौबालश्रुतेश्च सर्वान्तर्यामी । अयमर्थः । वेदस्य या साध्यार्थपरता त्वयाङ्गीकृता सा श्रुतेः प्रवर्तकत्वानुरोधात् । तत्र श्रुतेर्यत् प्रवर्तकत्वं तत् किं यावदधिकारिणः प्रति साधारणं, किं वा असाधारणम् । आद्ये कस्यापि त्रैवर्णिकस्य नरको न स्यात् । तथा राजदण्डादेरपि लोके कोऽपि विषयो न स्यात् । रोगी च नोपलभ्येत । अविहिताभिषिद्धाच्च निवृत्तेरपि तत एव संभवात् । तदभावे नरकादेरप्यसंभवात् । अथ पूर्वकर्मजन्यदुरदृष्टवशादविहितादौ प्रवृत्तिः । तर्हि तादृशेन शुभादृष्टेन विहितेऽपि प्रवृत्तिसंभवान्न श्रुतेः प्रवर्तकत्वसिद्धिः । अथासाधारणम्, तर्हि तदसाधारण्यं स्वभावतो वक्तुमशक्यं, हेत्वन्तरसाहाय्येन साधनीयम् । तत्र कालादेः साधारणत्वात् तत्तज्जीवादृष्टस्य तथात्वं कल्पनीयम् । तथा सति तेनैव प्रवृत्तिसंभवान्न श्रुतौ प्रवर्तकत्वनिर्धारः कर्तुं शक्यः । अथ प्रवृत्तेः शब्दश्रवणान्तरभावित्वदर्शनाददृष्टादेः सहकारित्वेनैव प्रवेशो, न करणत्वेनेति विभाव्यते, तर्ह्यदृष्टसंपादितदृष्टसामग्रीसत्तायां प्रवृत्तिरकुण्ठितैव स्यात् । अवतमसे चाक्षुषदर्शनेन सहकारिदौर्बल्येऽपि कार्योत्पत्तिनिर्धारात् । अतः कौण्ठ्यदर्शनात् फलमुखं प्रवर्तकत्वं न श्रुतेः शक्यवचनम् । तेन

रश्मिः ।

पादयन्ति **अयमर्थ** इत्यादि । **साध्यार्थपरते**ति 'चोदनालक्षणोऽर्थो धर्मः' इति सूत्रे कार्ये धर्मे चोदना प्रमाणमिति कार्यपरत्वं वेदप्रामाण्यव्यापकमिति साध्यार्थपरतेत्यर्थः । **प्रवर्तकत्वे**त्यादि । अयमर्थः । 'यजेत स्वर्गकामः' इत्यादौ यजेतेत्यत्रास्त्यंशद्वयं प्रकृतिप्रत्ययरूपम् । तत्राख्यातत्वलिङ्त्वाभ्यां प्रत्ययो युक्तो भवति । ताभ्यां भावनैवाभिधीयते, विधिनिमन्त्रणेत्यादिशास्त्रात् । विधिः प्रेरणं, भावना च भवितुर्भवनानुकूलो भावकव्यापारविशेषः । सा च शाब्दीभावनार्थीभावना च । तत्र पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः शाब्दीभावना लिङ्वाच्या । अयं मां प्रवर्तयति प्रवृत्त्यनुकूलव्यापारवानयमिति लिङ्श्रवणे प्रत्ययात् । यथा गोशब्दश्रवणे गोत्वं प्रतीयते इति गोत्वं गोशब्दार्थः । ननु स च व्यापारविशेषो न विध्यर्थोऽपि तु इष्टसाधनत्वं तदर्थ इति चेन्न । यागस्तु इष्टसाधनं तस्मात्तं त्वं कुरु इति सहप्रयोगात् । पर्यायतायां तु सहप्रयोगो न स्यात् । स च लोके पुरुषनिष्ठः । वेदे तु पुरुषाभावाच्छब्दनिष्ठ एव सः । अतो वेदः प्रवर्तयति । एतादृशप्रवर्तकत्वं तु वेदस्य साध्यार्थपरत्वे, न तु सिद्धार्थपरत्वे इति प्रवर्तकत्वानुरोधात्तथेत्यर्थः । साध्यार्थे प्रवृत्तिर्न तु सिद्धार्थे इति भावः । **तत एवे**ति विधित एवेत्यर्थः । **तदभाव** इति अविहितनिषिद्धाचरणभाव इत्यर्थः । **श्रुते**रिति विधिश्रुतेरित्यर्थः । **तथात्व**मिति हेतुत्वमित्यर्थः । **संभवा**दिति प्रवृत्तिसंभवादित्यर्थः । **तर्ह्यदृष्टे**ति अदृष्टसंपादितदृष्टसामग्रीसत्तायामित्यत्र सामानाधिकरण्यं सप्तम्यर्थः । तथाच तादृशसत्तासमानाधिकरणा शब्दश्रवणानन्तरं जायमाना प्रवृत्तिरकुण्ठितैव स्यादित्यर्थः । नन्वदृष्टं तथा न प्रबलमिति कुण्ठिता प्रवृत्तिरिति चेत्तत्राहुः **अवे**त्यादि । अवहीनं तमः अवतमसं 'अवसमन्धेभ्यस्तमसः' इति सूत्रेणाच् तस्मिन्नित्यर्थः । **सहकारी**त्यादि आलोकसंयोगदौर्बल्येपीत्यर्थः । **निर्धारा**दिति शब्दश्रवणमन्तरेणापि बालस्यादृष्टवशात् स्तनपाने प्रवृत्तिदर्शनाच्चेत्यपि द्रष्टव्यम् । **फलमुखे**ति फलमिष्टमनिष्टं च तदुपायभूतप्रवर्तकत्वम् । **न श्रुते**रिति अदृष्टस्य वान्यस्य वा वक्तव्यमिति भावः । पूर्वार्धे साधनं करणल्युडन्तमतो व्याधरलाभः । फलपदं फलत्वावच्छिन्ने योगरूढमतो ब्रह्मप्राप्तिवद्ब्रह्मापि फलमित्याहुः **तेने**ति । द्वितीयां

सिद्ध एव हि सर्वत्र वेदार्थो वेदवादिनाम्।

भाष्यप्रकाशः।

साधनव्यापारफलस्वरूपाणि कर्मणां श्रुतिर्बोधयतीत्येतावन्मात्रमङ्गीकार्यम्। नच प्रवृत्तिनिवृत्त्यनुपपत्तिः। ईश्वरस्यैव प्रवर्तकस्य निवर्तकस्य सत्त्वात्। नचात्र कल्पना। 'एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष उ एवासाधु कारयति तं यमधो निनीषति'इत्यादिश्रुतेः। नच वैषम्यनैर्घृण्यापातः। आत्मसृष्टेरेव श्रुत्यभिप्रेतत्वेन भेदाभावादिति वैषम्यनैर्घृण्यसूत्रे व्युत्पादयिष्यामः। अतः श्रुतेः प्रवर्तकत्वाभावेन साध्यार्थपरतैवासंगता। नच तर्हि पूर्वकाण्डे यज्ञबोधनं व्यर्थमिति शङ्क्यम्। तस्य स्वर्गसिद्ध्यर्थत्वात्। विध्यादीनां क्रीडेच्छाव्यापारत्वान्न तद्वैयर्थ्यमिति कृतप्रयत्नापेक्षसूत्रे व्युत्पादयिष्यामः। एवं सिद्धे विध्यादीनां क्रीडेच्छाव्यापारत्वे तदर्थानां तत्फलानां च क्रीडाशेषतैवेति तत्प्रतिपादकत्वेनैवोभयोरैकशास्त्र्यं, न कर्मप्रतिपादकतयेति मन्तव्यम्। पुरःस्फूर्तिकमादाय क्रियापरत्वाङ्गीकारेऽपि तेन पूर्वकाण्डस्यैव धर्मार्थत्वसिद्धिर्न सर्वस्य वेदस्येति तावन्मात्रस्य साध्यार्थतोपगमेन पूर्वमीमांसकमतं द्वाभ्यां दूषितम्। अतः परं पूर्वकाण्डस्यापि साध्यार्थत्वमनुपगम्य दूषयन्ति सार्धेन **सिद्ध एवे**त्यादि। **सर्वत्रे**ति काण्डद्वये। पूर्वत्रेतिपाठे अपेरध्याहारः। **वेदवादिनामि**ति सर्ववेदप्रामाण्यज्ञान-

रश्मिः।

कारिकां विवृण्वन्ति **न च प्रवृत्ती**त्यादि। **अत्रे**ति ईश्वरस्य प्रवर्तकत्वे निवर्तकत्वे चेत्यर्थः। **श्रुते**रिति उपलक्षणमेतत्। लोकदृष्टान्तेनेश्वरे संभवति प्रवर्तकत्वादौ शब्दे दृष्टान्ताभाव इति। यज्ञ एवेत्युत्तरार्धं विवरीतुमाहुः **न च तर्ही**ति। साध्यो यज्ञस्तत्परत्वाभाव(काल)इत्यर्थः। **स्वर्गे**त्यादि न तु प्रवृत्त्यर्थत्वमिति भावः। विधिनिमन्त्रणेति सूत्रे पुरुषनिष्ठमेव प्रेरणं लिङभिधीयते। नन्वीश्वरोऽदृष्टद्वारेण प्रवर्तयिष्यति किं विहितप्रतिषिद्धविधानेनेति चेत्तत्राहुः **विध्यादीनामि**त्यादि। **तद्वैयर्थ्य**मिति विहितप्रतिषिद्धवैयर्थ्यमित्यर्थः। **व्युदि**ति द्वितीयाध्यायतृतीयपादे व्युत्पादयिष्याम इत्यर्थः। **क्रीडेच्छे**त्यादि तज्जन्यत्वे सति तज्जन्यजनको हि व्यापारः। इच्छाजन्यत्वे सति व्यापारत्वमिच्छाजन्यक्रीडाजनकत्वं, क्रीडेच्छाया व्यापारत्वम्। **तदर्थाना**मिति विध्याद्यर्थानामित्यर्थः। **क्रीडाशेषता** दशविधलीलार्थता, पारार्थ्यं शेषलक्षणमिति। तथा च क्रीडा यागादिस्तदर्थः विध्यर्थः प्रेरणादिः। एवकारस्तु, ननु यागादिर्जीवधर्मः इति जीवक्रीडा नात्मक्रीडा तच्छेषता चेन्न, परात्तु तच्छ्रुतेरिति ईश्वरक्रीडा तच्छेषता चेति। क्रीडा। तच्छेषतेतरव्यवच्छेदकः। यद्वा न यागादिः किंतु 'यतो वा इमानि भूतानि जायन्ते' इत्याद्युक्ता सर्गादिर्वेदान्ते तच्छेषता विध्याद्यर्थे प्रेरणादौ इत्यर्थः। **तत्प्रती**ति दशविधलीला तच्छेषप्रेरणादिप्रतिपादकत्वेन। साध्यार्थपरताया दूषितत्वादेवकारः। **उभयो**र्वेदवेदान्तयोः। **ऐकशास्त्र्यं** तु 'यदेव विद्यया करोति' इति 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इतिश्रुतिभ्याम्। **न कर्मे**ति साध्यार्थपरतया नेत्यर्थः। **मन्तव्य**मिति मननार्हम्। 'क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते' इतिवाक्यात्। न चैवमीश्वरः प्रवर्तयतीति मतं दृष्टविरोधीति 'चोदना पुनरारम्भः'इतिसूत्रस्य भाष्यविरोध इति वाच्यम्। लौकिकानुग्रहाय जैमिनेः प्रवृत्तत्वेन दृष्ट एव तेषां विश्वासात् तत्र विधेः प्रवर्तकत्वोक्तेरिति। यद्वा 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा' इति श्रुतिप्राप्तविकल्पोक्तानुष्ठानकरणे तथैव वर्तते। अधुना तु 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इतिश्रुत्युक्तानुष्ठानमिति न किंचिदेतच्छास्त्रभेदात्। ननु न तथा प्रतीयत इतिचेत्तत्राहुः **पुर** इत्यादि। **तावदि**त्यादि पूर्वकाण्डमात्रस्येत्यर्थः। **द्वाभ्या**मिति कारिकाभ्याम्। **अध्याहार** इति। उत्तरकाण्डसंग्रहायेति भावः।

मन्त्राणां कर्मणां चैव दर्शनश्रवणाच्छ्रुतौ ।
कृतिश्च सिद्धतुल्यत्वं वेदः स्वार्थे च सन्मतः ।

'प्रजापतिरकामयत प्रजायेय' इति । 'स एतदग्निहोत्रं मिथुनमपश्यत्'। 'प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं चामावास्यां चातिरात्रं च तानुदमिमीत यावदग्निहोत्रमासीत् तावानग्निष्टोम' इत्यादि । न ह्युपाख्यानानां मिथ्यार्थत्वं बुद्धजन्मनः पुरोक्तं युक्तं वा । तथा सति वेदानामप्रामाण्यमेव स्यात् । मिथ्योपाख्यानप्रतिपादकलोकवत् ।

भाष्यप्रकाशः ।

पूर्वकं तदनुसारिणाम् । **चैवे**ति चकारो 'अपश्यत् पुरोडाशं कूर्मं भूतꣳ सर्पन्तम्' इति द्रव्यादीनां दर्शनस्य समुच्चायकः । मन्त्राणां दर्शनं तु, 'स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत्, स एतं दीक्षितवादमपश्यत्' इत्यादिषु बोध्यम् । **स्वार्थे चे**ति चोऽप्यर्थे । अतः स्तुतिं समुच्चिनोति । उक्तं विभजन्तो दर्शनस्य श्रुती आहुः **प्रजापतिरि**त्यादि । अत्राद्या तैत्तिरीयब्राह्मणस्था । अस्यामपश्यदित्यस्य ज्ञानार्थताया अपि शक्यवचनत्वात् सिद्धार्थत्वं न निःसंदिग्धं स्यादित्यतो द्वितीयस्या उपन्यासः । सा च संहिताप्रथमाष्टकस्था । तत्रोक्तस्योन्मानस्य कर्मणामसिद्धत्वेऽशक्यवचनत्वादिति । **न ही**त्यादिकं विभागभाष्यम् । तेनायमर्थः । व्यासादधीतवेदः श्रुतभारतः स्वयमृषिर्जैमिनिर्यदि धर्मरूपायाः क्रियायाः सिद्धत्वं नाभिप्रेयात् तदा भावार्थाधिकरणे, 'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत' इत्यनेन सिद्धाव-

रश्मिः ।

कर्मदर्शनश्रुतेर्भाष्ये वक्तव्यत्वान् मन्त्रदर्शनश्रुतेश्चानुक्तत्वात्तां दर्शयन्ति **मन्त्राणामित्यादि** । **भाष्ये । कृतेश्चे**ति[1] कृतिर्यत्नस्तस्य नित्यत्वेपि क्रीडार्थमाविर्भावतिरोभावाभ्यां साध्यत्वभानेपि सिद्धतुल्यत्वं, सर्वस्य नित्यत्वादिति । **प्रकृते । दर्शनश्रुती** इति दर्शनश्रुती इति द्विवचनान्तमिदम् । **ज्ञानार्थताया** इति एवं भविष्यतीति ज्ञातवानित्येवं साध्यज्ञानार्थताया उक्तप्रकारेण वा इत्यर्थः । **उक्तस्ये**ति उदमिमीतेत्युक्तस्येत्यर्थः । **इती**ति । नहि साध्यस्य घटस्योन्मानं संभवतीति भावः । **विभागभाष्य**मिति 'वेदः स्वार्थे' इत्यादिकारिकैकदेशव्याख्याश्रुत्योर्व्याख्यानभाष्यम् । विभागशब्दस्तावद्व्याख्यानेषु प्रयुज्यते विशिष्य तु भाष्यविभागे प्रतिविधास्यामः इति सृष्टिभेदवादे कथनात् । अर्थपरोत्र विभागशब्दः । स्वरूपपरो यथाह 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यमवरं स्मृतम्' इत्यत्राव्यङ्ग्यमधममभिप्रेत्यैतावदधमकाव्यलक्षणमितरद्विभागपरमिति । तथात्र **नही**त्यादि वेदस्वरूपपरं न भवति किंतु व्याख्यानभाष्यमित्यर्थः । तथापि स एवार्थः । यद्वा । यथा संहिता एकप्राणस्य योगः । वायुः शब्दतामापद्यते इति प्राञ्चः । तद्वद्भगवद्व्यासस्य सूत्राणि तदीयैकप्राणयोगः एकस्य विभज्य धारणार्थं विभागस्य भाष्यं युक्तमिति । अत एव शैवभाष्ये व्याख्यायते इति वक्तव्ये विभज्यत इत्युक्तम् । **तेने**ति एकदेशभाष्यस्य पूर्वकारिकाव्याख्यानसापेक्षत्वेनेत्यर्थः । वेदस्वरूपेतरद्यद्व्याख्यानं तत्परत्वेनेति वार्थः । **अय**मिति मीमांसकादिनिरासको वक्ष्यमाणोर्थ इत्यर्थः । तदर्थं साधकारिकार्थमाहुः **व्यासादि**त्यादि । **भावार्थे**त्यादि द्वितीयाध्याये इत्यर्थः । **सिद्धे**त्यादि भावार्था इत्यत्र भावशब्दस्तावद् 'भावे घञ्' इति सूत्रनिष्पन्नः

१. 'कृतिश्च' इति भाष्यपाठो रश्मिकारैः कृतेश्चेति स्वीकृत्य व्याख्यातोस्ति ।

भाष्यप्रकाशः ।

स्थापन्नधात्वर्थाभिधायकानां नामपदानां क्रियाप्रत्यायकत्वं न वदेत् । नच तत्र भावार्थपदेन भावनार्था इत्येवोच्यत इति वाच्यम्। तथा सति कर्मशब्दपदवैयर्थ्यापत्तेः । भावार्थैः क्रिया प्रतीयेतैतावतैव चारितार्थ्यात् । तथा 'सर्वेषां भावोऽर्थ इति चेत्'इत्यग्रिमसूत्रं च न वदेत् । क्रियाबोधकाख्यातपदानां भावनार्थत्वस्य सर्वजनीनत्वेन सर्वेषां भावोऽर्थ इति संदेहस्यैवानुदयात् । तथा अग्रिमसूत्रद्वये क्रमेण नाम्नां पुरुषानपेक्षक्रियाप्रतिपादकत्वम्, आख्यातानां तु पुरुषापेक्षक्रियाप्रतिपादकत्वमिति विभागं च न कुर्यात् । साध्यैकस्वभावक्रियावादे पुरुषानपेक्षक्रियाया एवाभावात् ।

किंच । यागादिधर्मरूपा क्रिया यदि सर्वदा साध्यावस्थैव स्यान्न कदापि सिद्धावस्था, तदा तन्निष्पत्तेः कदाप्यभावाच्चोदनापि नोच्येत । 'चोदना पुनरारम्भ' इति लक्षणमपि तस्या न क्रियेत ।

रश्मिः ।

इति तथेत्यर्थः । मीमांसकाभिमानिशङ्कामनूद्य निषेधन्ति **न च तत्रे**त्यादि । **भावनार्था** इति । भावनार्था आख्यातशब्दास्तेभ्योऽपूर्वं प्रतीयत इतिसूत्रार्थात् । यथाहुः—

'द्रव्यादिशब्दतोऽपूर्वधीर्भावार्थपदादुत ।
द्रव्यादीनां फलार्थत्वात् तच्छब्देन ह्यपूर्वधीः' ॥
'क्रियाद्वारमृते द्रव्यं फलेन नहि युज्यते ।
भावनावाचिनोऽपूर्वमाख्यातादवगम्यते' ॥

इति 'सोमेन यजेत' 'हिरण्यमात्रेयाय ददाति' इत्यादौ भावार्थस्य यागदानादेः साध्यत्वेन फलं प्रति असाधनत्वान्नापूर्वप्रत्यायकत्वं किंतु सोमादिद्रव्यादीनामिति पूर्वपक्षः । क्रियामन्तरेणाफलवन्तो भवन्तो द्रव्यादयः काष्ठादिदृष्टान्तमनुरुन्धाना भावनावाचितां समर्पयन्ति । यजति ददातीत्यादीनामपूर्वबोधकतामाख्यातानाम् । धात्वर्थव्यतिरिक्ता सर्वधात्वर्थसंबद्धकरोत्यर्थरूपा भावनेति । चतुःसूत्रमधिकरणमिदं द्वितीये त्वेकसूत्रे 'चोदना पुनरारम्भ' इत्यस्मिन्नधिकरणेऽपूर्वसदसद्भावे संशयः । यागस्य क्रियारूपत्वेन त्रिक्षणावस्थायितया कालान्तरभाविफलजननासामर्थ्यान्मध्ये व्यापाररूपमपूर्वद्वारं कल्प्यतेऽतोऽपूर्वमस्तीति सिद्धान्तयन्ति, तदिदं सूत्रं विरुणद्धि । सूत्रेष्वपूर्ववाचकपदाभावात् न च यागस्य करणत्वानुपपत्तिः । आख्यातानां क्रियासामान्यवाचितया समानपदोपात्तस्य धातोश्चातीन्द्रियक्रियाविशेषवाचितया तन्निष्ठस्य करणत्वस्य देवताप्रीतिरूपव्यापारेण सिद्ध्यानुपपत्त्यभावात् । साधकतमं करणमिति करणलक्षणाङ्गीकारे तु स्वरूपेण निर्वाहान्न व्यापारापेक्षात आख्यातपदैस्तत्कल्पनस्याशक्यत्वात् । पुरुषप्रवृत्तिस्तु न यागः तदभिव्यञ्जकतया तदेकदेशत्वात् । यथाहि उद्यमननिपतनरूपपुरुषव्यापारसहकृतेन परशुनाघातात्मकदृढसंयोगद्वारा छिदा साध्यते तथा चोदनाप्रयुक्तपुरुषव्यापाराभिव्यक्तयागेन देवताप्रीतिद्वारा फलं साध्यते, अतः प्रवर्तकत्वेनाप्यपूर्वकल्पनमशक्यमिति । एतद्दूषणं स्फुटमिति प्रकारान्तरमाहुः **तथासती**त्यादि । **अग्रिमे**त्यादि 'येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि तस्मात्तेभ्यः पराकाङ्क्षा भूतत्वात्स्वे प्रयोगे' । 'येषां तूत्पत्तौ अर्थे स्वप्रयोगो न विद्यते तान्याख्यातानि तस्मात्तेभ्यः प्रतीयेताश्रितत्वात्प्रयोगस्य' इति सूत्रद्वये इत्यर्थः । **चोदनापी**ति 'चोदनालक्षणोर्थो धर्मः' इति सूत्र इत्यर्थः । क्रियायाः प्रवर्तकं वचनं चोदनेत्युच्यते तस्याश्च कृदन्तत्वमिति सिद्धावस्थाबोधिका सा नोच्येत धर्मलक्षणत्वेनेत्यर्थः । **तस्या इ**ति चोदनाया इत्यर्थः । **न क्रियेते**ति

भाष्यप्रकाशः ।

अतो जैमिनेरपि वेदस्य सिद्धार्थपरतैवाभिप्रेता । इदं यथा तथा भावार्थाधिकरणभाष्ये व्युत्पादितमाचार्यचरणैः । मयापि तद्विवरणे निपुणतरं प्रपञ्चितमिति नात्र लिख्यते ।

रश्मिः ।

सिद्धावस्थापन्नधात्वर्थबोधकघञन्तारम्भपदेन न क्रियेतेत्यर्थः । न च स्वर्गादिरारभ्यते येन तदपूर्वमारम्भः इति न घञन्तमिदमिति वाच्यं 'चोदनालक्षणोर्थो धर्मः' इत्यत्रानन्वयात् अपूर्वानङ्गीकारात् स्फुटीभविष्यति चैतदुपरिष्टात् । न च करणत्वोपपत्तये व्यापारावश्यकतेति शङ्क्यम् । देवताप्रीतेर्व्यापारत्वात् । न च वैयधिकरण्यम्, विषयतासंबन्धेन यजमाने सत्त्वात्तस्याः । **अत** इति धर्मलक्षणं चोदना तस्याश्च घञन्तारम्भपदेन विवरणादित्यर्थः । **व्युत्पादित**मिति अत्र स्पष्टप्रतिपत्तये तद्विवरणेन सहार्थं उपादीयते । तथाहि 'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते' इति सूत्रं न सर्वेषु धर्मोपि तु केषुचिदेव पदेषु इत्यत्र हेतुनिर्णयाय प्रववृते । अस्यार्थः क्रियावाचिनां धातुत्वानुशासनात्सर्वधातुष्वनुगतरूपं यत्क्रियासामान्यं स भावः, सोर्थो विधेयो येषां ते भावार्थास्तादृशा ये शब्दाः ते कर्मवाचका इत्यर्थः । इदमेवानुगतरूपं क्रियासामान्यमितिभाष्यम् । तथाच यजत्यादयो धातुत्वेन रूपेण क्रियासामान्यं यजतित्वादिना प्रतिनियतरूपेण क्रियासामान्यव्याप्यं यागसामान्यरूपं विशेषं प्रतिपादयन्तीत्यर्थः पर्यवसन्नः । ननु किं क्रियाया रूपद्वयनिरूपणेन पूर्वोक्त एवार्थोस्तु सूत्रस्येति चेन्न, पुरुषक्रियामात्रस्य धर्मत्वाभावात् वेदैकसमधिगम्यातीन्द्रियस्थिरयागस्यैव धर्मत्वात् । स्थिरत्वस्य च यजतिना यागसामान्यबोधन एव संभवात् सामान्यस्य च नित्यत्वात् । अतो रूपद्वयनिरूपणस्यावश्यकत्वात् । ननु क्रिया प्रत्यक्षा यजतीतिप्रत्ययाभिलापयोः क्रियाविशेषं कुर्वाणं दृष्ट्वैव संभवादतीन्द्रियत्वं कथमिति चेन्न, द्रव्यदेवतासंबन्धो हि यागः । चतुर्थेध्याये 'यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्' इति सूत्रे द्रव्यदेवताक्रियासमुदायस्य तल्लक्षणत्वात् द्रव्यदेवते यागस्य रूपमिति–आमिक्षाधिकरणे सिद्धत्वाच्च, तयोश्च संबन्धः प्रीतिहेतुत्वेन स्वीकारः,

'देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' ॥

इति वाक्यात् । स च देवताया अतीन्द्रियत्वात्परात्मधर्मत्वाच्चातीन्द्रिय इति । न च देवता यजतीति प्रयोगापत्तिः । तादृशस्वीकारस्य देवनिष्ठत्वादिति वाच्यम् । तादृशव्यापारस्य फलत्वेन कर्मनिष्ठत्वात् । तेन देवदत्तो यजतीति प्रयोगानापत्तिरपि दत्तोत्तरा । ऋत्विजो यजन्तीति त्विष्टमेव योधा युद्ध्यन्तीतिवत् । प्रैषे होतर्यजेति प्रयोगात् । अतः फलरूपो यागोऽतीन्द्रियः 'चातुर्होत्रं च सत्तम' इति क्रियायाः पुरुषावयवेषु गणनाच्च । ननु देवतोद्देशेन द्रव्यत्याग एव यागोस्तु अग्नय इदं न ममेति त्यागवाक्यानुरोधाद्दानस्यापि यजत्यर्थत्वाच्चेतिचेन्न, परस्वत्वापादनरूपदानस्याप्यतीन्द्रियत्वात् । लोकप्रयोगस्तु न तात्त्विकः, शास्त्रदृष्ट्यभावात् । न च 'व्रीहीनवहन्ति' 'अग्नीषोमीयं पशुमालभेत' इत्यादिक्रियाणां प्रत्यक्षत्वादेतद्दृष्टान्तेन यागोपि प्रत्यक्षो भवतु इति शङ्क्यम् । मन्त्रेण चावघातो, देवपत्न्यश्च कर्त्र्यः, लौकिके 'हविष्कृदेहि' 'उभौ हि वै देवाना९शमितारौ' इत्यादिभिस्तदावाहनादतीन्द्रियत्वात् । फले संपन्नेऽलौकिकक्रियायाः कर्तुश्च तिरोभावः । न च नार्हति स्वीकारो नित्यो भवितुं द्रव्यस्य व्रीह्यादेरनित्यत्वेन तज्जन्यहोमोत्तरभावित्वादिति शङ्क्यम् । 'अप-

रश्मिः ।

श्यन् पुरोडाशं कूर्मं भूत्सर्पन्तम्' इत्याद्यर्थवादेषु द्रव्यस्यालौकिकत्वकथनात् । किं च पुरुषसूक्तविवरणाध्याये—

'इति संभृतसंभारः पुरुषावयवैरहम् ।
तमेव यज्ञं पुरुषं तेनैवायजमीश्वरम्' ॥

इतिवाक्याद्द्रव्यादीनामलौकिकत्वं निराबाधम् । 'यज्ञेन यज्ञमयजन्त देवाः' इति श्रुतेश्च । ते प्रोक्षणादिसंस्कारैरिदानीं लौकिकेषु द्रव्यादिषु संनिधाप्यन्ते, मूर्तौ देवतावत् । लौकिकैरेव यागनिष्पत्तौ तु संस्कारा व्यर्थतां गच्छेयुः । अतो ये क्षणिकत्वमदृष्टं वा कल्पयन्ति ते न यागपदार्थं विदुः । अतःपरमेष ह्यर्थो विधीयत इति सूत्रशेषार्थः । एष योऽतीन्द्रियत्वादिधर्मवान् सोर्थः । लौकिकस्तु संसारहेतुत्वादनर्थ इत्यर्थः । स्थिरत्वेन विद्यमानत्वादेव विधीयते चोदनया पुरुषः प्रवर्त्यते तत्र.। प्रलये तु 'स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुतेर्नित्यक्रियाया ईश्वरधर्मत्वेन तन्निष्ठता, तेन धर्मानित्यत्वादिना क्रियात्वादिजातौ पदशक्तिरङ्गीकार्या । सा च धर्म इति तत्स्थित्यर्थं धर्मिणः प्रावाहिकी सत्ताभ्युपगन्तव्या । अहोरात्रन्यायेन कल्पस्य कल्पपूर्वकत्वात्तद्रात्रिरूपे प्रलये सर्वनाशात् । ये पुनर्जीवन्ति ते स्वापाच्च क्रियाप्रवाहोपरमे तस्या जातेरनाधारत्वापत्त्या कालादौ तत्स्थितिर्निराधारत्वं वा कल्पनीयम् । शाब्दबोधसमये च क्रियायाः आक्षेपलभ्यत्वं कल्पनीयं, कर्मदर्शनादिश्रुतीनां च स्वार्थे तात्पर्यराहित्यं कल्पनीयमिति वरं धर्मनित्यत्वमित्यलम् । उक्तेर्थे शङ्कते सर्वेषां भावोर्थ इतिचेत् । यदि भावार्थेभ्य एव धर्मः प्रतीयत इति उच्यते तदा सर्वे शब्दाः भावार्थाः क्रियावाचकाश्च सर्वे धातुजाः । कृत्प्रत्ययेन च भावोभिधीयत इतीत्यर्थः । न सर्वे शब्दाः धर्मवाचकाः धर्मस्य पुरुषार्थत्वात् । भावार्थशब्दैर्नामभिस्तु धर्मः प्रत्याय्यते परंतूदासीनतया न तु पुरुषार्थतया अतो धर्मप्रमितिसंपादने भावार्थकर्मशब्दत्वमेव न प्रयोजकं किं तु पुरुषस्यापेक्षापीतः सापेक्षानपेक्षविभागं वदन्परिहरति येषां तूत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि तस्मात्तेभ्यः पराकाङ्क्षा न भूतत्वात्स्वे प्रयोगे, स्व इति षष्ठ्यर्थसप्तम्यन्तं स्वीयत्वेनार्थवाचि। तथाच येषां शब्दानामर्थस्योत्पत्तौ सत्यां प्रयोगकाले रूपोपलब्धिर्जायते तानि नामानि । निरुक्ते नामाख्यात इत्यादिशब्दविभागवचनात् । अतः स्वयं नमन्ति कारकतया क्रियाशेषा वाक्ये भवन्ति नामयन्ति, स्वार्थमाख्यातार्थं प्रति, स्वार्थमाख्यातार्थप्रयोजनाय शेषभूतं कुर्वन्तीति नामसंज्ञा तेषां शब्दानामर्थस्य परार्थत्वज्ञापिका । अतः परार्थत्वेन स्वातन्त्र्याभावाद्वाक्यार्थबोधावसरे नामभ्यो धर्मः पुरुषार्थतया न प्रमीयत इत्ययमर्थो नामशब्दार्थकथनेन बोध्यते । तच्छ्रवणानन्तरं पुरुषाकाङ्क्षा न भवति । यथा पचतीत्युक्ते कः इत्याकाङ्क्षा, न तथा घट इत्युक्ते, नापि पाक इत्युक्ते । अतःपरं भूतत्वात्स्वे प्रयोगे इति सूत्रांशः, स्वप्रयोगकाले भूतत्वात् सिद्धत्वादित्यर्थः । अतस्तन्निष्पादनार्थं न पुरुषापेक्षेति भावः । तथाच नामभ्योऽनपेक्षत्वेन स्थिरत्वेन धर्मप्रमितावपि पुरुषार्थत्वेन न प्रमीयत अतो भावार्थकर्मशब्दत्वं तत्स्वरूपप्रमित्युपयोग्येव न तु पुरुषार्थरूपत्वघटिततत्प्रमित्युपयोगीति सिद्धम् । येषां तूत्पत्तावर्थे स्वप्रयोगो न विद्यते तान्याख्यातानि तस्मात्तेभ्यः क्रिया प्रतीयेताश्रितत्वात्प्रयोगस्य । यथा नामभ्यः पुरुषार्थत्वेनाप्रवृत्तिस्तथाख्यातेभ्योपीति शङ्कां वारयति तुशब्दः । उत्पत्ताविति सतिसप्तमी आनन्तर्यज्ञापिका । अर्थ इति विषयसप्तमी । स्वप्रयोग इति शब्दप्रयोगः । तथा चायं सूत्रार्थः, येषां शब्दानामर्थोत्पत्त्यनन्तरमर्थे

भाष्यप्रकाशः ।

किंच । अर्थवादाधिकरणेऽर्थवादानां विधेयस्तावकत्वेन प्रामाण्यकथनादपि तथा । यदि हि बालातुराद्युपच्छन्दनवदर्थवादानां स्तावकत्वमभिप्रेयात् प्रामाण्यं तेषां न ब्रूयात् । तदुपच्छन्द-

रश्मिः ।

प्रयोगो न विद्यते अर्थं प्रदर्श्य प्रयोगो न विद्यते यथा अयं घट इति उत्पत्तिसमये प्रयोगो नात्र निषिध्यते तेषामाख्यात इति संज्ञा, यैर्धर्म आख्यायत इति ज्ञापनार्थम् । तस्मादविद्यमानार्थ-त्वात्स्वनिष्पत्त्यर्थं पुरुषाकाङ्क्षाया विद्यमानत्वात्तेभ्यः पदेभ्यो धर्मः कर्तव्यत्वेन प्रतीयेत । किंचाश्रि-तत्वाप्रयोगस्येति प्रतीतौ हेत्वन्तरम् । प्रयोगो ह्यनुष्ठानं तत्पुरुषाश्रितं भवति । पुरुषप्रयत्नव्यतिरेकेण धर्मो न निष्पद्यते । आख्यातार्थश्च भावना उत्पादनात्मिका क्रिया पुरुषधर्मः । अतः स्वनिष्प-त्त्यर्थं पुनः पुनः प्रयोगार्थं च पुरुषोऽपेक्ष्यते इति पुरुषार्थो धर्मस्तेभ्यः प्रतीयत इत्यर्थः । नामभ्यस्त्वौदा-सीन्येनेत्युक्तम् । एवमाख्यातस्य धर्मप्रत्यायकत्वे सिद्धे आख्यातविशेषो लिङ् तदर्थे प्रवर्तकत्वं वदन् चोदनालक्षणोऽर्थो धर्म इति पूर्वमुक्तं तत्र चोदनास्वरूपमाह'चोदना पुनरारम्भ'इति न त्विदमधिकरणान्तरं पूर्वशेषत्वात् विषयान्तरादर्शनाच्च । चोदना तु प्रथमतः प्रवृत्तिजनकत्वादारम्भ इत्यर्थः । पुनःशब्दो हि त्वर्थः । चोदना हि प्रवर्तकं वाक्यं तेन चाख्यातपदोक्ता भावना विधीयते, अयं मां प्रवर्त-यतीति प्रेरणया नियोज्ये प्रवृत्तिरूपारम्भजननात् । तथाच विधेयत्वेन चोदनाविषयोर्थो धर्म इति । अतस्तस्य वाक्यस्य धर्मत्वज्ञापकत्वमतो भावार्थैः कर्मशब्दैर्यागो दानं होम इत्यादिभिः यथा-सिद्धत्वेन धर्मः प्रतिपाद्यते, यथा चाख्यातैर्विशेषणत्वेन यागेन भावयेदिति यजेतेत्यस्यार्थात् तथानेन वाक्येन विशेष्यत्वेन धर्मो न प्रतिपाद्यते, पुरुषविशेषणत्वेनैव धर्मप्रमितिः विशेषणं चौदासीनप्रच्युत्या आरम्भः पुरुषविशेषणं पुरुषधर्मस्तन्निष्ठ इति यावत् । आरम्भस्तद्योग्यो धर्म इति पुरुषविशेषणमा-रम्भ इति । स च निष्पादनार्थं प्रवृत्तिरित्येतावान् लिङर्थे विशेषः । न च प्रवर्तकवाक्यस्य धर्म-त्वज्ञापकत्वे धर्माज्ञापकत्वादव्याप्तिर्लक्षणे शङ्क्या । आरभ्यत्वेन धर्मप्रमितेरपि भवनात् । नन्वाख्या-तत्वाविशेषेपि लिङर्थे विशेष इत्यत्र को हेतुरिति चेन्मैवं, यथाख्यातानां भावनालक्षणः क्रियारूपोर्थनिष्ठो व्यापारोऽभिधेयः तथा लिङोभिधानलक्षणः अङ्गैः कर्म भावयेत् कर्मणा फलं भावयेत् इति पूर्वापरी-भावापन्नः शब्दनिष्ठो व्यापारोऽभिधेयः । तादृशेन शब्दनिष्ठव्यापारेण पुरुषः कर्मणि प्रवर्तत इति तस्य पुरुषे प्रेरणासंबन्ध इति । न चात्र विप्रतिपत्तव्यम् । लोके घटमानय इत्यादिशब्दश्रवणान-न्तरभाविन्यां प्रवृत्तौ अयं मां प्रवर्तयतीति प्रतीतेस्तदनुरोधेन वेदेपि तथा कल्पनात् । न चैवं एषउ एव साधुकर्म कारयतीति श्रुत्युक्तमीश्वरस्य प्रवर्तकत्वं कथं घटते इति शङ्क्यम् । ईश्वरः प्रवर्तयतीति मतं शास्त्रानुसारीति लौकिकानां दृष्टे विश्वस्तानामत्र संमुखीकरणार्थत्वात् । अतोऽस्मिन्नधिकरणे सिद्धा-वस्थापन्नधात्वर्थरूपक्रियात्मको धर्म उदासीनो नामपदेभ्यः प्रतीयते, साध्यावस्थापन्नधात्वर्थः क्रियात्मकः पुरुषापेक्षः पुरुषार्थरूप आख्यातेभ्यः । तत्रापि लिङंशेनारभ्यतया । अतः पुरुषार्थतया तदारभ्यतया च प्रतीतिजननादाख्यातपदानि भजन्ते प्रमितिजननेन मुख्यतां, नामपदानि तु सिद्धतद्बो-धकतया तदुपकारकाणीति सिद्धम् । एवं व्युत्पादितं प्रपञ्चितं चेत्यर्थः । एवं सिद्ध एवेत्याद्यर्धकारिका विवृता । मन्त्राणामित्यादि विवरीतुं मन्त्रादीनामर्थवादत्वमपीति तदंशं विचारयन्ति **किंचार्थेत्यादि** । **अर्थवादेत्यादि** इदमधिकरणं पूर्वतन्त्रे प्रथमस्य द्वितीयपादेस्ति । **तथेति** अर्थवादानां सिद्धार्थ-

भाष्यप्रकाशः ।

नस्य प्रतारणरूपत्वात् । ननूपच्छन्दनवाक्यस्य फलांश एव प्रतारणरूपत्वं, न प्रवर्तनांश इति, न तत्रेवात्रापि दोष इति चेन्न । स्वर्गादिरूपस्य फलस्याप्रत्यक्षत्वेन विधिवाक्योक्तफलांशेऽपि तथात्वप्रसङ्गात् । अत उपाख्यानानां मिथ्यार्थप्रतिपादकत्वकथनं ताथागतवासनावलम्बनमेव । नच—

'परोक्षवादो वेदोऽयं बालानामनुशासनम् ।
कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा' ॥ इति,
'फलश्रुतिरियं नृणां न श्रेयो रोचनं परम् ।
श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनम्' ॥

इतिपुराणवाक्यादुपच्छन्दनन्यायेन मिथ्यात्वमाद्रियत इति वाच्यम् । तत्रैवमर्थाभावात् । सर्वथा सन्मार्गविमुखानां नानाकामानां सहसा कामानिवृत्तिमालोच्य ताँस्ततो निवर्तयितुं स्वर्गादिरूपं तदभीष्टं सदेव नश्वरं फलं प्रदर्श्य तेन तेषां सन्मार्गवर्तित्वविधानेन कर्ममोक्षेऽधिकारिणः कर्तुं कुसुमरूपं तदिति तत्र मिथ्यात्वगन्धस्यापि वक्तुमशक्यत्वात् । 'फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि' । 'पुष्पेषु फलबुद्धयः' इत्यादिवाक्यैस्तथानिश्चयात् । अतस्तत्र विश्रान्त्या मायावादेन वा ये भ्रान्तास्तेषामेव वेदार्थे तथा भानं, न वेदवादिनामित्यर्थवादा अपि स्वार्थप्रमितिं जनयन्त एव स्तावका इति निश्चेयम् ।

किंच । अग्निहोत्रमिथुनदर्शनोत्तरं पठ्यते । 'तदुदिते सूर्येऽजुहोत्,' 'यस्यैवं विदुष उदिते सूर्येऽग्निहोत्रं जुह्वति प्रैव जायते' इति । उन्मानानन्तरं च पठ्यते, 'य एवं विद्वानग्निहोत्रं जुहोति यावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोति' इति । एताभ्यां च विद्वद्वाक्याभ्यामर्थवादश्रावितार्थविषयकज्ञानस्य फलाङ्गता बोध्यते । यदि स उपच्छन्दनाय मिथ्या श्रावितः स्यात् ततो विद्वद्वाक्यमपि मुधा स्यात् । एवमन्यत्रापि । ततश्च सर्वस्य वेदस्य प्रामाण्यमपि विलुप्येत । अतस्तदभावाय सत्यार्थकथनेनैवोपच्छन्दनमुपगन्तव्यम् । तेन श्रुतिपुराणयोरुभयोरपि सामञ्जस्यात् । ततः कर्मादि-

रश्मिः ।

बोधकता न तु प्रतारकतेत्यर्थः । **फलांश** इति कटूनि मधुरत्वरूपफलांश इत्यर्थः । **ताथागतेत्यादि** ताथागता बौद्धभेद इति प्रतिभाति । **कर्ममोक्षायेति** कर्ममोचन इत्यर्थः । **तथेत्यादि** पूर्वोक्तार्थाभावनिश्चयादित्यर्थः । **तत्रेति** स्तुतिमात्र इत्यर्थः । **स्वार्थेत्यादि** अत एव ग्रावाणः प्लवन्ते इत्यस्याः सेतुबन्धे संवादोपि संगच्छते । क्वचिद्देशे ग्राव्णां त्रयाणां पूजार्थं तरणेनागमनमितिश्रुतमपि । **प्रैवेति** प्रजायते एवेत्यर्थः । **विद्वदित्यादि** विद्वत्पदघटितवाक्याभ्यामित्यर्थः **यदि स** इति अर्थवाद इत्यर्थः । **श्रावितः स्यादिति** 'वा शरि' इत्यस्य वैकल्पिकत्वात् पक्षे 'विसर्जनीयस्य सः' इति सत्वम् । **विद्वद्वाक्यमिति** परोक्षवादो वेदोयमितिवाक्यम् । **अन्यत्रापीति** गोअश्वा एव पशवो अन्ये त्वपशव, आदित्यो यूप, इत्यादावपि । त्रयः पशूना[२]हस्तादानाः पुरुषो हस्ती मर्कटः पशुपतिः पशूनां चतुष्पदामुत च द्विपदामित्यादिश्रुत्यन्तरेऽन्येषां पुरुषादीनामपि पशुत्वश्रावणात् तद्विरोधेनापशवः इत्यत्र पशुपदगौण्या उचितत्वात् । एवमादित्यो यूप इत्यादिषून्नेयम् । **सच्चिदा**-**नन्दरूपयूपस्य** संस्कारेण चित्प्राधान्यात् । इदानींतनानां सर्ववेदादर्शित्वात् । **ततश्चेति** मिथ्यार्थकथनाच्चेत्यर्थः । **तेन श्रुतीत्यादि** 'परोक्षप्रिया इव हि देवाः' इतिश्रुतिः पुराणं तूक्तं तयोरित्यर्थः । एतावता प्रकृते किमायतमित्यपेक्षायामुपयोगं मन्त्राणां कर्मणामित्यत्र स्फुटयन्तः सिद्धमाहुः **ततः कर्मे**-

१. विद्वत्पदघटित इति. २. अप्रशस्ताः पशवः ।

तस्मात् पूर्वमीमांसानभिज्ञाः क्रियापरत्वं सर्वस्यापि वेदस्य वदन्तो मूर्खा

भाष्यप्रकाशः ।

दर्शनश्रुतीनां स्वार्थे प्रामाण्यमकलङ्कमिति पूर्वकाण्डस्यापि सिद्धार्थपरत्वमेव । नच जुहुयाद् यजेतेत्यादीनां साध्यकृतिबोधकपदानां व्याकोपः । सिद्धस्य कर्मणः प्रकारज्ञानपूर्वकं करणे फलसंबन्धं बोधयता विद्वद्वाक्येनातिदेशसिद्धया कृतेः सिद्धतुल्यत्वेन साध्यकृतिव्यञ्ज्यस्य सिद्धस्यैव धर्मस्य तत्र विवक्षिततया बालोपच्छन्दनायोक्ते साध्यार्थे तात्पर्याभावनिश्चयात् । एकत्र दृष्टः शास्त्रार्थोऽपरत्रापि तथेति न्यायेन विद्वद्वाक्यशून्यस्थलेऽपि तथाऽवसायाच्च । अतः पूर्वकाण्डस्य साध्यार्थपरत्वमयुक्तमेव । उत्तरकाण्डस्य तु ज्ञानादिप्रतिपादकत्वेऽपि ज्ञानोपासनादीनां विषयभूतब्रह्मणैव स्वरूपलाभेन ज्ञानादिभिर्ब्रह्मण एव प्राप्यतया फलत्वेन च तस्यैव शेषित्वम् । पूर्वकाण्डोक्तफलस्याप्येतस्यैवानन्दस्यान्यानीतिश्रुतेस्तदंशत्वाच्च । कर्म फलार्थत्वादितिन्यायात् । इदं फलत्वमप्युपाख्यानगम्यमिति । तदेतदुक्तं नहीत्यादिना । सिद्धमाहुः तस्मादित्यादि । यस्मादुक्तरीत्या विचारे न सर्वस्याम्नायस्य क्रियार्थत्वं, न वा पूर्वकाण्डस्य साध्यार्थपरत्वं तस्मात् ते तथेति तद्वाक्येन शास्त्रयोनित्वव्याकुलीभावाभावात् पूर्वपक्षोऽसंगत

रश्मिः ।

त्यादि । **तत** इति अर्थवादानां स्वार्थप्रमितिजनयतामेव स्तावकत्वादित्यर्थः । **इत्तीति** इति हेतोस्तत्र साध्यस्य दर्शनायोगेन सिद्धस्य कर्मणो दर्शनात्तथेत्यर्थः । **कृतिश्चेत्यादि** भाष्यं विवरीतु माहुः **न चेत्यादि** । **साध्यकृती**ति पुरुषनिष्ठा शाब्दीभावनासाध्यार्थीभावनेत्यर्थः । **अतिदेशेत्यादि** ।

अन्यत्रैव प्रतीतायाः कृत्स्नायाः धर्मसन्ततेः ।
अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयते ॥
प्राकृतात्कर्मणो यस्मात्तत्समानेषु कर्मसु ।
धर्मप्रवेशो येन स्यात् सोऽतिदेश इति स्मृतः ॥

इति द्विधालक्षितातिदेशस्यान्यत्राग्निहोत्रे प्रतीतायाः प्रकारज्ञानपूर्वककरणरूपायाः धर्मसन्ततेरन्यत्र जुहुयात् सोमेन यजेत इत्यादावतीन्द्रिययागादौ कार्यतः फलसंबन्धार्थं प्राप्तेः सिद्धयानश्वरस्य फलासंबन्धादाख्यातबोधितकृतेः सिद्धतुल्यत्वेनेत्यर्थः । 'यज्ञो वै विष्णुः' इतिश्रुतेः सिद्धतुल्यत्वाभावे तया विष्णुद्रव्यसंबन्धरूपातीन्द्रिययागोऽभिव्यक्तो न स्यात् । 'स्वयमेवात्मनात्मानम्' इतिवाक्यविषयत्वात् । अतिदेशे विद्वद्वाक्यं प्रमाणमुक्तं 'परोक्षवादो वेदोयम्' इत्यादि । **सिद्धस्ये**ति अतीन्द्रियस्य । **तत्रे**ति जुहुयात् यजेत इत्यादावित्यर्थः । किमत्रातिदेशकमित्यपेक्षायामाहुः **एकत्रे**त्यादि तथाच पूर्वत्रापि न्यायेनातिदिश्यत इत्यर्थः । **अत** इति फलसंबन्धस्याहेयत्वादित्यर्थः । **तस्यै**वेति ब्रह्मण एवेत्यर्थः । पञ्चप्रकृतियागानामात्मसुखमेव फलं न स्वर्गलोकाख्यं 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति श्रुतेः । इदं यथा तथा प्रतिपादितं सर्वनिर्णये इति तद्धृदिकृत्याहुः **पूर्वकाण्ड इत्यादि** । **कर्मेत्यादि** 'कर्मण्यपि जैमिनिः फलार्थत्वात्' इति सूत्रस्यार्थकथनमिदम् । एतच्च तृतीयाध्याये चिन्तितम् । **इदमित्यादि** । आनन्दस्य फलत्वमिदमुपनिषद्रम्यमिति तन्न्यायेन न मिथ्यार्थत्वमुपाख्यानानामित्यर्थः । **तदेतदि**ति कारिकाव्याख्यानव्याख्येयमित्यर्थः । **ते** इति पूर्वमीमांसाभिज्ञा इत्यर्थः । **भाष्ये** । **मूर्खा** इति बन्धहेतौ प्रवृत्तत्वेन बन्धाज्ञानान्मूर्खा इत्यर्थः । 'पण्डितो

१. कृतेश्चेति पाठः २. धर्मोपदेशो येन इति पाठः ।

एव। उत्तरवादिनोऽपि पूर्वाज्ञानमङ्गीकृत्य पूर्वानुपयोगित्वं ब्रह्मज्ञानस्य वदन्तो वेदानभिज्ञा एव। 'यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवति' इत्युपनिषज्ज्ञानस्य श्रुतिसिद्धैव कारणता।

भाष्यप्रकाशः।

इत्यर्थः। एवं पूर्वपक्षासंगतिमुद्घाट्य सिद्धान्तासंगतिमुद्घाटयन्तः पूर्वं शंकरमतस्यासंगतत्वमाहुः उत्तरेत्यादि। अनभिज्ञा इत्यन्तं ग्रहणकभाष्यम्। तत्रायमर्थः। सर्वस्य वेदस्य क्रियापरत्वमभिसंधाय शुद्धबुद्धोदासीनभूतब्रह्माभिधायके वेदान्ते भागे प्रयोजनशून्यतयाऽऽनर्थक्यं प्रत्यक्षादिसमानविषयतया लौकिकवाक्यवदनुवादकतायामनपेक्षप्रामाण्यभङ्गं च दर्शयतां स्वाध्यायविधिगृहीतत्वेन तत्सार्थक्याय दूरतरयज्ञादिकर्मापेक्षितकर्तृदेवतादिप्रतिपादकत्वेन क्रियार्थत्वं वा, सन्निहितोपासनादिक्रियापेक्षितविषयप्रतिपादकत्वेन तादर्थ्यं वाभिमन्यमानानां पूर्वेषां वादिनां तदनुसारिणां च वेदान्ताज्ञानमङ्गीकृत्य शुद्धबुद्धोदासीनस्य ब्रह्मणः प्रमाणान्तरानधिगतत्वादितरनैरपेक्ष्येण तद्बोधकतया प्रामाण्यं हेयोपादेयशून्यब्रह्मात्मावगमादेवावस्तुभूताविद्यासमारोपितसकलक्लेशनिवर्तकतया सार्थक्यं च वेदान्तेषु प्रदर्श्य तत्सिद्धस्य ब्रह्मज्ञानस्य यज्ञानुपयोगित्वं वदन्तो वेदज्ञानरहिता इत्यर्थः। नन्वेवं युक्तियुक्तमर्थं वदन्तः कथं तथेत्याकाङ्क्षायां छान्दोग्यारम्भदेशस्थश्रुत्युपन्यासेन तदुक्तं दूषयन्तो विभजन्ते यदेवेत्यादि प्रवृत्तिरित्यन्तम्। कारणतेति सहकारिकारणता। अस्यां श्रुतौ विद्यापदेनात्मभिदाबाधकं ज्ञानम्। श्रद्धापदेन वेदोक्ते आस्तिक्यबुद्धिः। उपनिषत्पदेन परमात्मस्वरूपविषयकं रहस्यज्ञानमुच्यते। तेन तत्तद्युक्तो यत् कर्म वेदोक्तं करोति तदेव कर्म वीर्यवत्तरमनश्वरफलं मोक्षपर्यवसायि भवतीत्यर्थः। यत्तु कैश्चिद् विद्या विज्ञानं, श्रद्धा कर्मश्रद्धा, उपनिषद् योग इति व्याख्यातम्। तन्न। विद्यापदस्य विज्ञाने उपनिषत्पदस्य योगे च शक्त्यदर्शनात्। 'विद्याऽऽत्मनि भिदाबाधः' इत्येकादशस्कन्धवाक्येन, उपनिषद् रहस्यविद्येति शंकराचार्यविद्यारण्यादिव्याख्यानेन चोक्तार्थ एव

रश्मिः।

बन्धमोक्षवित्' इतिवाक्यात्। **पूर्वाज्ञान**मिति पूर्वं कर्म, अज्ञानमविद्या, पूर्वायामज्ञानाख्यं कर्म वा तत्पूर्वाज्ञानं पूर्वस्य कर्मणः अनुपयोगोऽस्यास्तीति अनुपयोगि तस्य भावस्तत्त्वम्। **प्रकृते**। **ग्रहणके**त्यादि परमतीयत्वाद् ग्रहणकभाष्यमित्यर्थः। द्वितीयाध्याये 'स्मरन्ति च' इति सूत्रे स्मरन्ति च ऋषय इति भाष्यवत्। दूषणार्थं ग्रहणाद् ग्रहणकम्। स्वार्थे कः। गृह्यते परमते सूत्रापेक्षितं येन तद्ग्रहणकं न तु व्याख्यानं 'करणाधिकरणयोश्च' इतिसूत्रेण ल्युट्। कस्य सूत्रांशस्येदं ग्रहणमिति ग्रहणकम्। 'अज्ञाते' इतिसूत्रेण कप्रत्ययो वा। **प्रत्यक्षादी**त्यादि अग्निर्हिमस्य भेषजमिति वाक्यमुदाहरणम्। **स्वाध्याये**त्यादि वेदान्तानामित्यादिर्बोध्यः। वेदानामर्थे शङ्काराहित्यांशे वेदान्तानां स्वाध्यायविधिगृहीतत्वं बोध्यम्। **तदि**त्यादि वेदान्तसाफल्यायेत्यर्थः। काण्डभेदादाहुः **दूरतरे**ति। **संनिहिते**ति 'आत्मेत्येवोपासीत' इत्यादीनामेकवाक्योदितेत्यर्थः। आत्मानं श्लोकमुपासीतेति। **तादर्थ्य**मिति क्रियार्थत्वमित्यर्थः। **पूर्वेषा**मिति मीमांसकानामित्यर्थः। ननु यागः क्रिया तत्र च कारकं कारणमिति कथमेवमित्यत आहुः **सहकारी**त्यादि। कारणं तु ह्येकप्रक्रमपठितप्रयाजादिकं तदाहुः **अस्या**मिति। **भवतीति**। न च 'यदेव विद्ययेति हि' इतिसूत्रभाष्यविरोधः। एतद्भाष्यास्वरसेनैव तत्र पक्षान्तरोक्ते-

नच बाधितत्वात् त्यज्यत इति वाच्यम् । ब्रह्मात्मज्ञानवत एव वशिष्ठादेर्यज्ञाधिकारात् । नचैवं किमनेनेति वाच्यम् । इत्थंभूतत्वाद्यज्ञस्य ।

भाष्यप्रकाशः ।

शक्तिनिश्चयाच्च । तथाच परमात्मरहस्यज्ञानात्मकब्रह्मज्ञानस्य श्रुतिसिद्धकारणताया अज्ञानाद् वेदानभिज्ञा इत्यर्थः । ननु सिद्धे फले साधनान्तरस्यानुपयोगेन, उत्कृष्टस्य निकृष्टशेषताया-श्चासंगतत्वेन तस्याः श्रुतिसिद्धाया अनादरान्नानभिज्ञत्वमिति समाधिं दूषयन्ति नचेत्यादि । त्यज्यत इति नाद्रियते । अधिकारपदेनात्र मुख्याधिकारो विवक्षितः । तथाच यदि ज्ञानमात्रे-णाविद्यानिवृत्त्यादि स्याद् वशिष्ठादिर्ज्ञानी यागादिकं न कुर्यात् । यदि स ज्ञानित्वेन भवद-भिमतो न स्यात् तद्वचनानि नाद्रियेरन् । अतः पुराणादिप्रसिद्धैर्भवदादृतैरपि यागादिकरणेन तत्रादरसूचनात् तद्विरोधेन ज्ञानस्य सहकारितानादरे सुतरामनभिज्ञतेत्यर्थः । ननूपनिषदात्मक-ज्ञानपूर्वकेण वशिष्ठाद्यधिकारेण वेदान्तविचारे किं सिद्ध्यति, येनैवमाग्रहः क्रियत इत्याकाङ्क्षाया-माहुः न चैवमित्यादि । अयमाशयः । 'यज्ञो वै विष्णुः' इति श्रुतेर्यज्ञोऽप्येकं ब्रह्मण एव क्रियात्मकं रूपम् । नच तत्राधिष्ठातृत्वमेव बोध्यते, न तु क्रियात्मकत्वमपीति शङ्क्यम् । 'धर्मो यस्यां मदात्मकः,' 'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्, एतावान् सर्ववेदार्थः' इत्याद्येकादशस्कन्धीयभगवद्वाक्यैस्तथात्वस्यापि निश्चयात् । स च द्रव्यदेवतायजमानयज्ञावच-रादिभिरभिव्यज्यते । स चेल्लौकिकैरेवाभिव्यज्येत तदा प्रोक्षणादिसंस्कारा अवहननादीनां च नियमा मुधैव स्युः । अतो वेदोक्तफलसिद्ध्यर्थं यथा ते तथा मोक्षफलार्थमुपनिषदप्युपयुज्यते । तदभावे तु साङ्गस्य यज्ञस्य लौकिकेष्वर्थेष्वध्यस्यमानत्वात् तदङ्गानां लौकिकत्वे तैराधि-दैविकयज्ञस्वरूपानाविर्भावात् । उपनिषदा त्ववगते सर्वस्य ब्रह्मत्वे ब्रह्मभूतैरङ्गैराधिदैविकयज्ञा-

रश्मिः ।

खात् । **शक्तीत्यादि** तेन विद्या उद्गीथाद्यंशमात्रविषया, श्रद्धा तात्पर्यं, उपनिषद् देवताविषयोपासनेति विश्वेश्वरव्याख्यानमपि परास्तम् । मात्रशब्दपरित्यागे तु युक्तम् । यदेव विद्ययेत्यादिभाष्यविरोधा-भावात्, तथास्तिक्यबुद्धिः श्रद्धेति बहुस्थलेषु प्रसिद्धेः । तथैवोपनिषच्छब्दरूपा न तूपासनारूपार्थ-रूपेत्यपि प्रसिद्धमिति च । **उत्कृष्टस्येति** आत्मज्ञानस्येत्यर्थः । **तस्या** इति कारणताया इत्यर्थः । **समाधिमित्यादि** बाधितत्वात्त्यज्यत इति समाधिमिति न च वाच्यमित्यनेन दूषयन्तीत्यर्थः । **मुख्याधिकार** इति । गौणमुख्यन्यायादितिभावः । तेन काम्यकर्माधिकाराज्ज्ञानात् पूर्वं न विरुद्ध्यन्त इति बोध्यम् । **नाद्रियेरन्निति** द्वितीयाध्याये 'स्मरन्ति च' इति सूत्रे स्मरन्ति च व्यासादयः इति नाद्रियेरन्नित्यर्थः । **तत्रेति** श्रुतिसिद्धकारणतायामित्यर्थः । **उपनिषदात्मकज्ञानेति** अर्थे ज्ञान उपनिषच्छब्दः आशङ्काग्रन्थत्वात् । **तत्रेति** विष्णावित्यर्थः । **तथात्वस्येति** यज्ञात्मकत्वस्येत्यर्थः । **अपि च** अधिष्ठातृत्वबोधने लक्षणाप्यापाद्येत । **सच द्रव्येति** । **यज्ञावचरो** यज्ञप्रचारहेतुः । **यथा त** इति । यथा प्रोक्षणादिसंस्कारा इत्यर्थः । **तदभाव** इति 'तं त्वौपनिषदं पुरुषं पृच्छामि' इतिश्रुते-रुपनिषच्छब्दरूपकारणाभावे । यज्ञस्यावयविनः लौकिकेष्ववयवेष्वङ्गेषु । **अध्यस्यमानस्येति** कारणा-भावाद्यज्ञाविर्भावाभावे यज्ञ इति प्रतीतिर्भ्रम इत्यध्यस्यमानत्वं तस्मात् । अत्र हेतुमाहुः **तदङ्गाना-**

किंच। कर्मफलवद् ब्रह्मफलस्यापि लौकिकत्वात्। 'य एवं वेद प्रतितिष्ठति, अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या' इति । अत्यन्ताविद्यावतो यज्ञानधिकारात् तन्निषेधार्थं ज्ञानमुपयुज्यते ।

भाष्यप्रकाशः ।

विर्भावः। तथा तादृशां यज्ञे यज्ञाधिष्ठातुर्भगवतोऽप्याविर्भावः। यथा विश्वसृजां सहस्रसमे हिरण्मयशकुनिरूपस्य ब्रह्मणस्तथैव पृथुनाभिप्रभृतीनां यागेषु रूपान्तरेण । तदभावादेव नेतरेषां यागेषु तदाविर्भावः । तथा यागस्य विद्योपयोग आचार्यस्यापि संमत इति तु, सर्वापेक्षा च यज्ञादिश्रुतेरित्यादिसूत्रप्रणयनादेव गम्यते । नच मोक्षस्य जन्यत्वम् । ब्रह्मण आप्यत्वस्य वक्ष्यमाणत्वात् । अतो मुमुक्षूणां यज्ञस्यावश्यकत्वात् तत्रेत्थंभूतमधिकारं बोधयितुमयमाग्रह इति । तदेतदुक्तम् । ननु मुमुक्षूणां यज्ञा नावश्यकाः । कर्मफलस्य लौकिकत्वात् । अधिकारिभेदेऽपि मनुष्यादिब्रह्मान्तानां शरीरवतामेव तद्भोगकथनेन तथानिश्चयात् । नच किं तेनेति वाच्यम् । 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति श्रुत्या दुःखसंभेदकथनेन तस्य संसाररूपत्वबोधनात् । अतो मुमुक्षूणां शरीरसंबन्धस्यानाकाङ्क्षितत्वाद् यज्ञानां कारणता श्रुतिसिद्धापि नाद्रियत इत्याशङ्कायामाहुः **किंच, कर्मेत्यादि** । **ब्रह्मफलस्येति** ब्रह्मज्ञानफलस्य । श्रुतिस्तु तैत्तिरीयाणां भृगूपनिषदि भार्गव्या विद्यायाः समाप्तिस्था। तत्र, 'सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता य एवं वेद प्रतितिष्ठति' इति । अत्र परमे व्योम्नि

रश्मिः ।

मित्यादि । **यज्ञाधिष्ठातुरिति** 'यज्ञेन यज्ञमयजन्त देवाः' इत्यत्र द्वितीयान्तयज्ञपदोक्ताया यज्ञाधिदैविकयज्ञाद्व्यतिरिक्तातीन्द्रिययज्ञाधिष्ठातुः । आदिना आधिदैविकयज्ञेन समुच्चयः । **विश्वसृजामिति** 'विश्वसृजः प्रथमाः सत्रमासत' इतिश्रुतेः। **हिरण्मयेत्यादि** 'ततो ह जज्ञे भुवनस्य गोपाः हिरण्मयः शकुनिर्ब्रह्मनाम' इतिश्रुतेराविर्भाव इत्यर्थः । **पृथुनाभीत्यादि** एतच्च श्रीभागवते स्फुटम् । आधुनिकानामधिष्ठात्राधिदैविकानाविर्भावे हेतुमाहुः **तदभावादेवेति** उपनिषच्छब्दरूपकारणाभावादेव नाधिष्ठात्राधिदैविकाविर्भावः । **आचार्यस्येति** व्यासस्य । **जन्यत्वमिति** जन्यत्वात्साध्यत्वं घटादिवत् सिद्धत्वेन जन्याप्यविकारिसंस्कार्येषु कर्मसु मोक्षरूपब्रह्मणः आप्यकर्मत्वेन जन्यकर्मत्वाभावान्न जन्यत्वमित्याहुः **आप्यत्वस्येति** 'ब्रह्मविदाप्नोति परम्' इत्यादौ परमित्यादेः क्रियाजन्यफलशालित्वरूपाप्यकर्मत्वादित्यर्थः । **वक्ष्यमाणत्वादिति** अधिकरणसमाप्तावित्यर्थः । इत्थंभूतत्वादिति भाष्यं विवृण्वन्तिस्म **तत्रेत्थमिति** । **तदेतदुक्तमिति** अयमाशय इत्यारभ्य व्याख्यातं न चैवं किमनेनेतिवाच्यम् इत्थंभूतत्वाद्यज्ञस्येति भाष्येणोक्तमित्यर्थः । **शरीरवतामिति** 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः' इति 'विदेहं सन्तमात्मानं सुखदुःखे न स्पृशतः' इति वदन्त्याः शरीरवतामेव कर्मफलयोः सुखदुःखयोर्भोगकथनेनेत्यर्थः । **किं तेनेति** शरीरवतामेव तद्भोगकथनेन किं स्यादिति प्रश्नः । **दुःखेत्यादि** दुःखमिश्रीभावकथनेनेत्यर्थः । **ब्रह्मज्ञानेति** ब्रह्म च तज्ज्ञानं चेति कर्मधारयः, ब्रह्मज्ञानं च तत्फलं च ब्रह्मज्ञानफलं, तस्येत्यर्थः । **परमे व्योमन्निति** 'सुपां सुलुक्' इति सप्तम्या लुक् । **परमव्योम्नीति** परो मीयते ज्ञायतेऽनेनेति परमं तस्मिन् । आकाशशरीरं ब्रह्मेति श्रुतेः । श्रुतौ **एकतिङ्वाक्यमिति** प्रतिवाक्यमाश्रयभेद **इत्याशयेनाहुः**

नच देहाध्यासस्य कारणत्वम् । ब्रह्मार्पणं ब्रह्महविरित्यादिस्मृतेः । तस्मादन्योन्योपयोगित्वे न कोऽपि दोषः ।

भाष्यप्रकाशः ।

प्रतिष्ठाकथनेनास्या विद्याया अत्युत्कृष्टत्वं दुर्लभत्वं च बोध्यते । विद्यापदोक्त्या फलेषूपासनाफलत्वभ्रमो निवार्यते । तत्तत्फलकथनमुखेन गृहस्थाद्यधिकारश्च बोध्यते । तेनायमर्थः । कर्मणो विद्यायाश्च फलस्येतरेतरवैलक्षण्यं प्रदर्श्य कर्मफलस्य शरीरिभोग्यतया संसारात्मकत्वात् तादृशफलजनकत्वेन तस्य विद्याजनकत्वमनादृत्य यदि कर्म त्यज्यते, तदा तस्य दोषस्य ब्रह्मविद्यायामपि तौल्यात् तस्या अपि त्याज्यत्वापत्तिः । अथ यद्यधिकारजाघन्यात् त्यज्यते, तदा तूक्तश्रुत्या विद्यासाहित्यबोधनेन जाघन्यस्य निवारितत्वान्न कर्मणस्त्याग उचितः । यदि च विद्यावत्त्वेऽपि देहाध्यासस्यानिवृत्तत्वात् तस्यैव कर्मकारणत्वमिति विभाव्यते, तदा तु ब्रह्मार्पणमित्यादिस्मृत्या, 'य एवास्मि स सन् यजे' इत्यादिश्रुत्या चाध्यासस्य कारणतानिवारणात् तासामेव विरोध इति वेदानभिज्ञत्वमनिवार्यमेवेत्यर्थः । एवं विद्यास्वातन्त्र्यवादिशांकरमतमपास्यान्येषामेकदेशिनां संग्रहायाहुः तस्मादित्यादि । वेदानभिज्ञत्वस्य विद्यास्वातन्त्र्यवादिन्येव पर्यवसानात् कर्मणां विद्याकारणत्वस्योपनिषदश्च कर्मसहकारित्वस्य श्रुत्यैव बोधनान्मूर्खोद्भावित इतरेतराश्रयदोषोऽपि व्यक्तिभेदादेव निवृत्तः । नच छान्दोग्य औषस्त्य अविदुषामपि

रश्मिः ।

दुर्लभत्वमिति भक्त्येकलभ्यत्वात् शुद्धभावप्रसादाच्च । **उपासनाफलत्वभ्रम** इति ।

'उपास्तिं मन्यन्ते मधुमथनभक्तिं निजकृता-
र्थतां तत्रोपास्यं परमपुरुषं चापि सुविदः ।
द्वयोः सारूप्यात्तद्भ्रमहतिकृते मानसगतं
मुदा भक्तेर्हंसं प्रकटमकरोद्विट्ठलकृती ॥' इति भक्तिहंसात् ।

गृहस्थादीत्यादि प्रतिष्ठान्नवत्त्वान्नादत्वप्रजापशुवत्त्वानि गृहस्थाधिकारं बोधयन्ति ब्रह्मवर्चसं ब्रह्मचार्यधिकारं, कीर्तिस्तु 'मोक्षकाम उदारधीः' इतिवाक्यात् वानप्रस्थसंन्यासाधिकारमिति विभागः । **प्रदर्श्येति** तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिस्थावरान्तेषु प्रसिद्धे । अतएवानुष्ठेयफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति भाष्येण प्रदर्श्येत्यर्थः । **तस्येति** शरीरभोग्यस्य प्रतिष्ठादेः फलस्य संसारात्मकस्य यज्ञनकत्वं तस्येत्यर्थः । अत्यन्तेत्यादिभाष्यं विवरीतुमाहुः **अथ यदीत्यादि** । विवृण्वन्ति **तदा त्वित्यादि** । तदा त्वत्यन्ताविद्यावतो यज्ञानधिकारमालोच्य ज्ञानरहितस्याधिकारनिषेधार्थं यज्ञे ज्ञानमुपयुज्यते इति वदन्त्या उक्तश्रुत्या तथेत्यर्थः । **न च** देहेत्यादि भाष्यं विवृण्वन्ति **यदि चेत्यादि** । **य एवेत्यादि** यः प्रकटश्चिदंशोऽस्मि स एव सन् यजे यागं कुर्वे इत्यर्थः । **व्यक्तिभेदादिति** अयमर्थः । न वयं कर्मस्वरूपज्ञाने ब्रह्मज्ञानस्य कारणत्वं ब्रूमः । न वा ज्ञानस्वरूपज्ञाने कर्मस्वरूपज्ञानस्य येन हलन्त्यमिति न्यायेनान्योन्याश्रयो दोषाय भवेत् किंतु ब्रह्मज्ञाने यज्ञानां कारणत्वं यज्ञे चात्मभिदाबाधकं ज्ञानं जीवस्वरूपज्ञानं सहकारिकारणमिति विषयभेदभिन्नज्ञानव्यक्तिभेदादित्यर्थः । न च जिज्ञासाधिकरणस्थकिंचोपनिषदेत्यादिभाष्येणास्यार्थस्योक्तेः पुनरुक्तिः शङ्क्या तस्य ब्रह्मजिज्ञासायाः आवश्यकत्वसाधनपरत्वात् । अत्र तूत्तरवादिदूषणाय तदुपक्षेपस्यावश्यकत्वाच्च । **औषस्त्येति** तृतीयप्रपाठक इत्यर्थः । चक्रस्यापत्यमुष-

१. प्रदर्श्य इति प्रकाशे ।

क्रियाज्ञानयोः स्वातन्त्र्येण पुरुषार्थसिद्ध्यर्थं भिन्नतया शास्त्रप्रवृत्तिः।

किंच। वेदान्तवाक्यानामस्मिञ्छास्त्रे समन्वय एव प्रतिपाद्यते संदेहनिराकरणद्वारा। तत् कथं सिद्धवद्धेतुत्वेन निर्देशः। अग्रिमवैयर्थ्यं च स्यात्।

भाष्यप्रकाशः।

यजमानादीनां श्रावणात् कर्मणामविद्वदधिकारकत्वमेवेति शङ्क्यम्। तत्राप्यविद्वत्तायां मूर्धविपातश्रावणेनात्यन्ताविदुषामनधिकारस्यैव बोधनात्। अतः पूर्वसूत्रभाष्य उक्ते ज्ञानकर्मसमुच्चये न कोऽपि दोषः। तेन मायावादिव्यतिरिक्ता अस्मिन्नंशे सर्वेऽप्येकदेशिनो वेदाविरुद्धवादिन इत्यर्थः। नन्वेवं परस्परसाकाङ्क्षत्वे ऐकशास्त्र्यमेव स्यान्न तु शास्त्रभेदः। ततश्च वेदमनूच्येत्यादिपृथक्समाप्तिश्रावणव्याकोप इति शङ्कायामाहुः क्रियेत्यादि। तथा च त्रिवर्गसाधन उभयोरपि स्वातन्त्र्यात् सिद्धे शास्त्रभेदे पूर्वोक्तदोषस्य न लेश इत्यर्थः।

एवं वेदानभिज्ञत्वं शांकराणां बोधयित्वा सूत्रार्थानभिज्ञत्वं सर्वेषामेव बोधयन्ति किंच वेदान्तेत्यादि। अयमर्थः। शंकराचार्यैर्हि, सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं ब्रह्म वेदान्तशास्त्रादवगम्यत इति प्रतिज्ञाय, समन्वयादिति हेतुः सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानीत्येवं व्याख्यातः। तत्रोक्तधर्मवत्त्वसाध्यकं ब्रह्मपक्षकं वाक्यसमनुगतत्वहेतुकमनुमानमभिसंहितं प्रतीयते।

भास्कराचार्यैस्तु ब्रह्मस्वरूपं शास्त्रमवबोधयति, न केवलं कार्यमेव। कुतः। समन्वयात्। समन्वितानि हि ब्रह्मस्वरूपप्रतिपादनपरत्वेन सृष्टिप्रकरणगतानि वाक्यानीत्येवं हेतुर्व्याख्यातः। तेन तन्मते शास्त्रपक्षकम्। तथैव शैवस्य च मते।

रामानुजाचार्यास्तु समन्वयः सम्यगन्वयः पुरुषार्थतयाऽन्वय इति हेतोरर्थमुक्त्वा परम-

रश्मिः।

स्तिर्नाम तत्संबन्धिनीत्यर्थात्। **यजमानादीना**मिति। **आदि**शब्देन प्रस्तोता। **श्रावणा**दिति 'मा भवानवोचत् कतमा सा देवतेति प्राण इति होवाच' इत्यादिश्रुतिभिस्तथेत्यर्थः। कतमा सेतिशब्देन यजमानस्याविद्वत्त्वम्। **मूर्धे**त्यादि 'स ह प्रस्तोतारमुवाच प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रस्तोष्यति मूर्धा ते विपतिष्यति' इत्यादिना तथेत्यर्थः। इदानीं जिज्ञासाधिकरणे उक्तोप्ययमर्थो नोपपादितोऽत्रोपपादित इति न पुनरुक्तिरिति वदन्ति **अतः पूर्वे**त्यादि। **दोष** इति अन्योन्याश्रयदोषः। अन्योन्याश्रये गते पूर्वोक्तमितरदोषनिवारणं सूपपन्नमिति। न कोपीति दोषविशेषणम्। **एकदेशिन** इति आचार्यमतस्य सर्वोत्तमस्य सर्वोत्तमत्वे ज्ञाते न्यूनाधिकभावेनैकदेशित्वं बोध्यम्। तेन भेदाभेदमते भेदोधिकः। भेदमतयोर्नित्यक्रीडास्थ इवार्थे भेदे प्रापञ्चिकत्वमपीत्याधिक्यम्। विशिष्टाद्वैतयोर्वैशिष्ट्यस्य पदार्थान्तरत्वादाधिक्यम्। एवमविभागाद्वैतेऽपि वैपरीत्यम्। पूर्वं यदेकमव्यक्तमनन्तरूपं पश्चादेकमेवेति नानावृक्षरसानामेकमधुवत्। **त्रिवर्गे**ति। फलयोस्त्वङ्गाङ्गिभाव इतिभावः। **पूर्वोक्तदोषस्ये**ति आभासोक्तैकशास्त्र्यरूपस्य। **उक्तधर्मे**त्यादि सर्वशक्तिमत्त्वसाध्यकमित्यर्थः। ब्रह्म सर्वशक्तिमत् वाक्यसमनुगतत्वात् कम्बुग्रीवादिमान् घट इतिवाक्यसमनुगतघटवदित्यनुमानम्। **कार्यमेवे**ति धर्ममात्रमित्यर्थः। **शास्त्रे**ति शास्त्रं ब्रह्मस्वरूपप्रतिपादकं सृष्टिप्रतिपादकवाक्यानां ब्रह्मस्वरूपप्रतिपादनपरत्वेन समन्वयात्। हेतुः शोभितोऽग्रे वाच्यः। एवं रामानुजाचार्यमतेऽपि ज्ञेयम्। **शैवस्य** चेति

नच प्रतिज्ञागर्भितहेतुत्वम्। अनुपयोगात्। गौणमुख्यभावे परं विवादः।

भाष्यप्रकाशः।

पुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयान्वयाच्छास्त्रप्रमाणकत्वं सिद्ध्यत्येवेति व्याचक्रुः। तत्र शांकरे व्याख्याने यथावस्थिते हेतोः स्वरूपासिद्धत्वम्। अतस्तत्रापि शास्त्रपक्षकमेवानुमानं वक्तव्यम्। ततश्च वेदान्तशास्त्रं ब्रह्मस्वरूपस्य प्रतिपादकं, तद्वाक्यानामेतदर्थप्रतिपादने समनुगतत्वात् यदीयं वाक्यं यदर्थप्रतिपादने तात्पर्येण समनुगतम्, तच्छास्त्रं तस्यार्थस्य प्रतिपादकम्। क्रियार्थप्रतिपादकपूर्वकाण्डवदित्यनुमानं मतत्रयेऽपि कर्मवादिवारणाय प्रयुक्तमिति फलति। तत्रेदं विवेचनीयम्। किमयं हेतुरविप्रतिपन्नः सिद्ध उत साध्यः। तत्राविप्रतिपन्न इति तु न वक्तुं शक्यम्। तथा सति पूर्वपक्षस्यैवानुत्थानप्रसङ्गात्। नापि सिद्धः। अस्मिञ्छास्त्रे संदेहनिराकरणद्वारा तस्यैव प्रतिपाद्यत्वात्। सिद्धत्वेऽग्रिमस्य समन्वयसाधकग्रन्थस्य वैयर्थ्यप्रसङ्गाच्च। अतस्तस्य सिद्धवन्निर्देशो न युक्त इति। अथ बुद्धिस्थं यथा प्रतिज्ञायते, तथा बुद्धिस्थमत्र हेतूक्रियत इति समन्वयसाधनप्रतिज्ञागर्भितस्य हेतोः सिद्धवन्निर्देशेऽपि न दोष इति विभाव्यते तदाप्ययुक्तमित्याहुः **नचे**त्यादि। भवद्भिर्हि भाट्टप्राभाकरयोस्तदनुसारिण एकदेशिनश्च निराकरणायायं हेतुरेवं व्याख्यायते। तत्र प्रतिज्ञाया बुद्धिस्थत्वेन वादिनिग्रहवेलायां साधनस्याभावेन हेतोः साध्यसमतया तदनिग्राहकत्वादनुपयोगः। किं च। तैरपि वेदान्तानां ब्रह्मप्रतिपादकता न स्वीक्रियते इति तु न। किं तु गौणत्वेन। तथा सति गौणमुख्यभाव एव विवादो न तु प्रतिपादकत्व इति विवक्षितासाधकत्वादप्यनुपयोगः। अथ सम्यक्त्वकुक्षौ मुख्यतां निवेश्य ब्रह्मणो मुख्यतया प्रतिपादनेऽनुगतत्वादित्येवं विभाव्यते, तदापि शांकराणां शैवानां च मतमयुक्तमित्याहुः

रश्मिः।

चकारेण माध्वस्य। **स्वरूपासिद्धत्व**मिति समनुगतत्वस्य शास्त्रनिष्ठतया पक्षधर्मत्वाभावात्तथेत्यर्थः। **तत्रापी**ति शांकरमतेपीत्यर्थः। **मतत्रय** इति। प्रसिद्धोपात्ताभिप्रायोऽयं ग्रन्थः, कर्मवादिवारणं त्रयाणामेव वा। **अय**मिति समन्वयादिति हेतुः। **अविप्रतिपन्न** इति निःसंदिग्ध इत्यर्थः। **तथास**तीति ब्रह्मप्रतिपादने निःसंदिग्धत्वे सति साध्यार्थपर एव वेदो न सिद्धार्थपर इति पूर्वपक्षस्य ब्रह्मणि समन्वयनिःसंदिग्धत्वेनानुत्थानप्रसङ्गादित्यर्थः। **वेदान्त**वाक्यानामित्यादिभाष्यं विवृण्वन्ति **अस्मिन्नि**त्यादि। **तस्यैवे**त्यादि समन्वयस्यैव साध्यत्वादित्यर्थः। **अग्रिमे**त्यादिभाष्यं विवृण्वन्ति **सिद्धत्व** इत्यादि। तत्कथमित्यादिभाष्यं विवृण्वन्ति **अतस्तस्ये**ति। साध्यत्वात्समन्वयरूपस्य हेतोरित्यर्थः। **यथे**ति 'वैयाकरणसिद्धान्तकौमुदीयं विरच्यते' इति यथा प्रतिज्ञायते इत्यर्थः। **एकदेशिन** इति ब्रह्मपरित्यागादेकदेशित्वम्। **साध्यसमे**ति हेतोः साध्यत्वेन साध्येन समता। **अनुपे**ति उपलक्षणमेतत्। 'जन्माद्यस्य यतः' इत्यत्र सूत्र एव यच्छब्दार्थे कारणे प्रकृतिर्यच्छब्दार्थः कर्तृ कारणं प्रत्ययस्तसिलर्थः समवायिकारणं प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येनेति नियमादतोनुपयोगादित्यस्य। **गौणमुख्ये**त्यादिभाष्यं व्याचक्षते **किंच तै**रित्यादि। **गौणत्वेने**ति नियोज्यप्रतिपादकत्वात् नास्तिक्यनिराकरणाच्च धर्माङ्गतयेत्यर्थः। **अनुपयोग**ादिति भाष्यमावृत्त्या योजयन्ति **विवक्षिते**त्यादि। गौणत्वेन ब्रह्मप्रतिपादकत्वासाधकत्वेन भाट्टादिनिराकरणासाधकत्वाद्धेतोरनुपयोग इत्यर्थः। नन्वस्त्युपयोगः समन्वयो हि मुख्यतयानुगतत्वं न च तैर्मुख्यतयानुगतत्वमुररीक्रियते इत्याहुः **अथ सम्यगि**त्यादि। **विभाव्यत** इति। हेतुस्तथेत्यर्थः। **अयुक्त**मिति आनन्दमयाधिकरणखण्डना-

नच येन रूपेण समन्वयो मतान्तरस्थैर्विचारितस्तथाग्रे सूत्रेषु निर्णयोऽस्ति।

भाष्यप्रकाशः।

नच येनेत्यादि। शांकरैर्हि जगत्कारणरूपे वाक्यानां समनुगतत्वं व्याख्यायाग्रे उच्यते। नच तेषां कर्तृस्वरूपप्रतिपादनपरतावसीयते, तत् केन कं पश्येदिति क्रियाकारकफलनिराकरणश्रुतेरिति। ततश्च तन्मते यावद्धर्मशून्ये रूपे समन्वयो विचारितो भवति। तेन रूपेण समन्वयविचारस्त्वाध्यायसमाप्त्याशास्त्रसमाप्तिवाचकेष्वपि सूत्रेषु न दृश्यते। सर्वत्र तत्तद्धर्मपुरःसरं कर्त्रादिरूपेणैव तेषां तेषां वाक्यानां ब्रह्मप्रतिपादकताया निर्णीतत्वात्। अतोऽपि व्याख्याताकारस्य हेतोरनुपयोगः। एवं चानुपयोगादिति गृहीतो हेतुरस्तीत्यन्तेन विभक्तो बोध्यः। एवं शैवमतस्याप्यसंगतिर्बोध्या। शिवरूपेणापि निर्णयस्य सूत्राक्षरेष्वनुपलम्भात्। तन्मतमर्वाचीनमित्याचार्यैर्न तदर्थं किमप्युक्तम्। मया तु प्रहस्ताख्ये भिन्दिपालाख्ये च वादे शिवतत्त्वविवेकादिग्रन्थदूषणेन निपुणतरं दूषितमिति न तदर्थमिह संरम्भः क्रियते। तथापि तत्र तत्र प्रसङ्गेन दूषयिष्यामि। तत्र तावत्, सदेव सौम्येदमग्र आसीदित्युपक्रमस्तत्त्वमसीत्युपसंहारः शिवरूपगमक इति यत् तदसंगतम्। 'ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति गीतायां ब्रह्मवाचकत्वस्यैवोक्तत्वेन तयोः शिवाकारगमकत्वाभावात्। नापि, 'धातुः प्रसादान्महिमानमीशम्' इति, 'यः परः स महेश्वरः' इत्यनयोरुपक्रमोपसंहारयोः। उपक्रमे 'अणोरणीयान् महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः। तमक्रतुं पश्यति वीतशोकः' इति पादत्रयोत्तरं, 'धातुः प्रसादात्' इति तुरीयपादः। तत्र तमित्यनेन पूर्वोक्तं महतो महीयांसमात्मानं दर्शनकर्मतया परामृश्य तद्विभूतिरूपमीशं पश्यतीत्याह। अन्यथा पौनरुक्त्यापत्तेः। महिमपदस्य विभूतिवाचकत्वं च, 'गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दास-

रश्मिः।

च्छिवरूपप्रतिपादनाभ्यामयुक्तम्। भास्कररामानुजाचार्यौ तु नानन्दमयखण्डकौ नापि शिवरूपप्रतिपादकौ अतस्तन्मते नोक्ते। **क्रियेति** व्यापारः, कारके कर्मकरणे फलम्। **तेनेति** यावद्धर्मशून्यत्वेनेत्यर्थः। **आध्यायेत्यादि** आशास्त्रसमाप्तीतिच्छेदः। अत्राप्यनुपयोगादिति भाष्यमावर्तयन्ति **अतोपीत्यादि**। अव्यवहितहेतोरपि। **संरम्भ** इति उद्यम इत्यर्थः। मयापि ग्रन्थविस्तृतिभिया न वितन्यते तथापि संक्षिप्तवरयुक्तयस्तु वक्तव्या इत्याहुः **तथापीत्यादि**। एवं प्रासङ्गिके दूषयितव्ये प्रकृतेऽपि तत्पदं शिववाचकमिति यत्तदपि दूष्यमिति तत्पदार्थस्य शिवरूपत्वं यदभ्युपगतं तदनुवदन्ति **तत्रेत्यादि**। **तयोरिति** सत्तत्पदयोरित्यर्थः। **तत्रेति** मन्त्र इत्यर्थः। अत्र विशेषणविशेष्यभावप्रतीतेश्चकारानुक्तेश्च नायमर्थः साधीयानिति शङ्कामपनेतुं महिमपदस्य महत्वावच्छिन्नमर्थं परित्यज्य विभूतिपरत्वोपवर्णने च युक्तिमाहुः **अन्यथेत्यादि**। **अन्यथेति** तथा व्याख्यान इत्यर्थः। अत्रेदं बोध्यम्। महत इति महान्, शतृ, अतिशयेन महान्, महीयान्; ईयसुन्। एवं महतीति महत इति वा महिमेति वक्तव्यं, महिमशब्दस्य ब्रह्मपरत्वं वदता। तत्रेमनिचो 'हृभृधृसृस्तृशृभ्य इमनिच्', 'जनिमृङ्भ्यामिमनिन्', 'वेञः सर्वत्र' इति सूत्रैर्विशेषविहितत्वेन महेः 'उणादयो बहुलम्' इति सूत्रेणेमनिच् साधनीयः। एवमप्यतिशयमात्राधिक्ये पुनरुक्तिरिति। 'पृथ्वादिभ्य इमनिज्वा' इति 'वर्णदृढादिभ्यः ष्यञ्च' इति भावे विहित इमनिच् तु श्रुत्यनुगृहीतोऽपीत्याहुः **महिमेत्यादि**। तथाच महतो भावो महिमेति विभूतिरेवार्थ इति भावः। **ईयसुनोऽतिशयत्वमादाय**

भाष्यप्रकाशः ।

भार्यम्' इति छान्दोग्यश्रुतौ सिद्धम् । किंचेशमहेश्वरशब्दौ रूढौ शिवे । वैयासे तु दर्शने लिङ्गादिभिर्निर्णयस्याभिप्रेतत्वं तल्लिङ्गाद्यधिकरणेषु दृश्यत इति रूढिरप्रयोजिका । किंच,

'नारायणः शिवो विष्णुः शंकरः परमेश्वरः ।
एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' ॥

इति वाराहपुराणवाक्ये रुद्रादिशब्दानां परब्रह्मनामत्वेनैव व्यवस्थापनात् त्रिलोचनादिविशिष्टरूपस्य ततोऽप्यसिद्धेः । नृसिंहतापनीये नृकेसरिशक्तिगणनायां 'श्रियं लक्ष्मीमौपलामम्बिकां गाम्' इति श्रावणात् । वाराहे, ॐमित्येकाक्षरीभूताया उमाया नारायणदारत्वेन कथनाच्च । नाम्बिकापत्युमापतिपदाभ्यामपि तत्सिद्धिः । नापि 'यो वै रुद्रः स भगवान्' इत्यथर्वशिरोवाक्येन । 'अथर्वशिरःशिखाध्यायिशतमेकमेकेन मन्त्रराजजापकेन तत्समम्' इति पूर्वतापनीये नृसिंहमन्त्रराजजापकस्योत्कर्षश्रावणाद् विद्यावदुत्कर्षस्य च विद्योत्कर्षाधीनत्वाद् विद्योत्कर्षस्य च वेद्योत्कर्षाधीनत्वान्मन्त्रराजवेद्ये नृकेसरिण्येवोत्कर्षविश्रान्तेरथर्वशिरःशिखावेद्यस्य ब्रह्मरूपत्वेऽपि तत्र परत्वस्यापर्यवसानात् । एवमन्यत्रापि द्रष्टव्यम् । ब्रह्मरूपत्वं सर्वविद्येशानत्वं सर्वदेहीश्वरत्वं गुरुत्वोपाधिना मोक्षदातृत्वं तु तत्तच्छ्रुतिपुराणानुसारेणानुमन्यामह इति दिक् ।

रश्मिः ।

न पुनरुक्तिरित्यत आहुः । **किंचेशे**त्यादि । **अप्रयोजिके**ति अत एव सायणीये रुर्वैदिकः शब्दस्तं द्रवति प्राप्नोतीति रुद्रः इति योगेन ब्रह्मपरत्वमुक्तम् । योगस्तु ईष्ट इति ईशः महांश्चासावीश्वरश्चेति । तत्रेश् ऐश्वर्ये चेश्वरस्य भावः ईश्वरश्च व्यापकः, 'अश्नोतेराशुकर्मणि वरट् च' इति सूत्रेण चकारेणोपधाया ईत्वं, विदधता निष्पन्नत्वात् । यदि चेष्ट इतीश्वरस्तदा 'स्थेशभासपिसकसो वरच्' इति सूत्रेण वरच् । नन्वयं योगोऽपि शिवे वर्तते 'एको हि रुद्रो न द्वितीयाय तस्थुः य इमान् लोकानीशत ईशनीभिः' इतिश्रुतेरिति चेत्तत्राहुः **किंचे**त्यादि । **ततोऽपी**ति श्रुतितोऽपीत्यर्थः । अपी रूढीं समुच्चिनोति तेन सर्वा श्वेताश्वतरोपनिषद् ब्रह्मपरेत्युक्तम् । यः परः स महेश्वर इत्युपसंहारोऽपि ब्रह्मपर इति च 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासशास्त्रात्पूज्यत्वस्येश्वरशब्देनैवोपस्थापनान्महच्छब्दो निरतिशयं पूज्यत्वमाचष्टे इति । इदानीं महानारायणोपनिषदि 'अम्बिकापतय उमापतये नमो नमः' इतिश्रुत्या प्रत्यवतिष्ठमानं प्रत्याहुः **नृसिंहे**त्यादि । **तत्सिद्धि**रिति त्रिलोचनादिविशिष्टरूपसिद्धिरित्यर्थः । तेन महानारायणीयोपनिषदपि निष्प्रत्यूहं नारायणपरत्वे गर्जति । अथर्वशिरसः शिवप्रतिपादकत्वमपि जलधिशायिनृकेसरितोपकृष्टत्वेनेत्याहुः **नापी**त्यादि । अतिदिशन्ति **एवमि**त्यादि । **अन्यत्रे**ति महोपनिषदि—

'ऋतं सत्यं परं ब्रह्म पुरुषं नृकेसरि-
विग्रहं कृष्णपिङ्गलमूर्ध्वरेतं विरूपाक्षं शंकरम् ।
नीललोहितमुमापतिं पशुपतिं पिनाकिं ह्यमितद्युतिम्' ॥

इत्यादावित्यर्थः । ऋतमनारोपितं, पिङ्गं तडिद्गौरं व्रजभक्तरूपं लाति गृह्णातीति पिङ्गलः, कृष्णश्चासौ पिङ्गलश्च कृष्णपिङ्गलस्तं निष्कामत्वादूर्ध्वरेतसं विशिष्टं सुन्दरं रूपं निरुपमं ययोस्तादृशेऽक्षिणी यस्य तं, शं कल्याणं करोतीति शंकरस्तं, नीललोहितं मेघश्यामं पशुपतिं गोपतिं पिनाकिं पिनाकादयश्चेति 'पातेराक इत्वं नुम्च' इति विषमपदव्याख्या । ननु तर्हि ब्रह्मरूपत्वादिबोधिका अप्यन्यथा नेया इति चेन्नेत्याहुः **ब्रह्मे**त्यादि । **तत्तच्छ्रुती**त्यादि ताश्च 'यो वै रुद्रः स भगवान् अथ कस्मादुच्यते प्रणवो यस्मादुच्चार्य-

शास्त्रारम्भस्तु प्रथमसूत्र एव समर्थितः। तस्मात् समवायिकारणत्वमेवानेन

भाष्यप्रकाशः ।

प्रकृतमनुसरामः । ननु भवन्मते सर्वस्य वेदस्य सिद्धार्थपरत्वेन सिद्धस्वरूपब्रह्मप्रतिपादकत्वे संदेहाभावान्न तदर्थं शास्त्रारम्भो वक्तुं शक्यः । ज्ञानकर्मसमुच्चयस्याप्यङ्गीकारेण कर्मण्यपि गौणतात्पर्यस्य विद्यमानत्वान्न तदर्थमपि । ब्रह्मणः कारणतायास्तेषु तेषु रूपेषु पर्यायेणाङ्गीकरिष्यमाणत्वाच्च न विष्णुशिवादिव्यतिरिक्तस्य ब्रह्मत्वनिरासार्थम् । अभिन्ननिमित्तोपादानवादिनो यावन्तस्तैः सर्वैरपि जन्मादिसूत्रविषयवाक्यविचारेणैव सर्वविधकारणतायाः समर्थनान्न तद्विशेषनिर्धारार्थमपीति भवन्मते शास्त्रारम्भवैयर्थ्यम् । नैवमन्यमते । तत्तदन्यस्मिन् वेदान्ततात्पर्याभावसमर्थकतया सार्थक्यादिति शङ्कायामाहुः **शास्त्रेत्यादि** । **प्रथमसूत्र इति** । तत्र शेषषष्ठीसमर्थनस्थले, नच गौणतापत्तिरजिज्ञास्यत्वं चेत्यादिना । तन्मया विवृतं, केन प्रकारेणेत्यारभ्य दर्शनादितीत्यन्तेनेति ततो बोध्यम् । सिद्धमाहुः **तस्मादित्यादि** । शास्त्रारम्भस्य प्रथमसूत्र एव समर्थितत्वाद् द्वितीयसूत्रविषयवाक्ये, यतो

रश्मिः ।

माण एव ऋग्यजुःसामाथर्वाङ्गिरसो ब्रह्मब्राह्मणेभ्यः प्रणामयति नामयति च तस्मादुच्यते प्रणव' इति । 'अथ कस्मादुच्यते सूक्ष्मं यस्मादुच्चार्यमाण एव स सूक्ष्मो भूत्वा शरीराण्यधितिष्ठति सर्वाणि चाङ्गान्यभिमृशति तस्मादुच्यते सूक्ष्मम् । अथ कस्मादुच्यते तारं यस्मादुच्चार्यमाण एव गर्भजन्मव्याधिजरामरणसंसारमहाभयात्तारयति त्रायते तस्मादुच्यते तारमिति' । तथा महानारायणोपनिषदि 'तन्नो रुद्रः प्रचोदयात्' इत्युक्त्वा 'ईशानः सर्वविद्यानाम्'इति श्रूयते, जाबालेच 'रुद्रस्तारकं ब्रह्म व्याचष्टे'येनासावमृतीभूत्वा मोक्षीभवतीति गुरुत्वोपाधिना मोक्षदातृत्वं विस्पष्टं श्रूयते । **पुराणे श्रीभागवते** चतुर्थस्कन्धे ब्रह्मकृतशिवस्तुतौ 'यत्तद्ब्रह्म निरन्तरम्' इति अष्टमे मोहिनीस्वरूपदर्शनानन्तरं भवानीं प्रति भववाक्यं 'अहं कलानामृषभो विमुह्ये' इति पुनश्चतुर्थस्कन्धे रुद्रगीते 'शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने' इति कर्तृकरणकर्मशक्तित्रयसमेताहंकाररूपेण सर्वदेहीश्वरत्वं अन्यत्रापि द्रष्टव्यम् । तत्रैव प्रचेतसां मोक्षदातृत्वं

'इदं विविक्तं जप्तव्यं पवित्रं मङ्गलं परम् ।
निःश्रेयसकरं चापि श्रूयतां तद्वदामि वः' ॥

इति शिववाक्यमिति । **तदर्थमिति** गौणत्वेन सिद्धधर्मज्ञानार्थमित्यर्थः । **ब्रह्मण इत्यादि** अस्य तत्पदेनाप्यन्वयाद्रूपेभ्यो भेदः । **तेष्विति** सच्चिदानन्देष्वित्यर्थः । तत्तु जन्माद्यधिकरणसमन्वयाधिकरणाभ्यां सद्रूपे लक्षणं योजितम् । ईक्षत्यधिकरणे च चिद्रूपे लक्षणं योजयिष्यन्ति । आनन्दमयाधिकरणे चानन्द इति कथं तेषु तेषु कारणतेति चेन्न 'सत्त्वं रजस्तम' इत्यस्य सुबोधिन्यां 'सद्रूपेण रजः आनन्देन तमः' इति निरुक्तेः । ननु किमतो यद्येवं मैवं

'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ।

स्थित्यादये हरिविरञ्चिहरेति संज्ञां श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः'इति तत्तद्गुणसंबन्धे तत्तद्रूपतोपपत्तेः सामञ्जस्यात् । तथा च सद्रूपनिर्गतसत्त्वतनुर्विष्णुरिति सद्रूपे कारणतायोजनं विष्णावेव योजनमेवमन्यत्रापीति न दोषः । **तद्विशेषेति** कारणताविशेषसमवायित्व इत्यर्थः । **शास्त्रारम्भ** इति शास्त्रं सूत्रं तदारम्भवैयर्थ्यम् । **तत्तदित्यादि** तेभ्यस्तेभ्यो निर्गुणगुणत्रयविशिष्टविष्णुशिवपुरुषोत्तमेभ्योन्यस्मिन्नित्यर्थः । संज्ञोपसर्जनीभूतत्वाभावात्स्सायादि । ननु मृदो घट इतिवत् यत इति पञ्चम्या समवायित्वनिर्णयो भविष्यतीति चेत्तत्राहुः **द्वितीयेत्यादि** । ननु लयस्य

सूत्रेण सिद्धम्। ननु कारणत्वमेवास्तु ब्रह्मणः। किं समवायिकारणत्वेन। विकृतत्वं च स्यात्। अनर्थरूपत्वेन कार्यस्यायुक्तता च। तस्मादनारम्भणीयमेवैतत् सूत्रमिति

भाष्यप्रकाशः।

वेत्यादेः कारणतामात्रबोधनेऽपि चारितार्थ्येन, 'यत् प्रयन्त्यभिसंविशन्ति' इत्यस्याधारतामात्र-बोधनेऽपि चारितार्थ्येन, 'सदेव सौम्येदमग्र आसीत्' इत्यत्रापि, तत्तेजोऽसृजतेत्यादिना कर्तृ-त्वस्यैवासंदिग्धतया उपादानत्वं केवलस्य वा शरीरद्वारा वेति संदेहानपायात् । सौत्रस्य योनिशब्दस्यापि कारणमात्रवाचकत्वेन प्रमाणाबोधकत्वादुपादानत्वनिर्द्धारणासमर्थत्वाच्चेतः पूर्व-सूत्रयोरुपादानत्वस्यासिद्धत्वादनेनैव सूत्रेण युक्तिनिर्देशात् तत्सिद्धमित्यर्थः । नन्वत्रोपादान-पदं परित्यज्य समवायिपदेन कुतो व्यवहार इति चेदुच्यते । लोके उपादानपदेन कर्तृक्रि-यया व्याप्तस्य परिच्छिन्नस्यैवाभिधानदर्शनात् । 'प्रकृतिर्ह्यस्योपादानम्' इति, 'पुरुषस्तदुपादान-मात्मानं लीलयाऽसृजत्' इति श्रीभागवतेऽपि भगवता मैत्रेयेण च तादृश एवोपादानपदस्य प्रयुक्तत्वाच्चेति जानीहि ।

अत्र ब्रह्मस्वरूपस्य समवायित्वममन्वानाः प्रत्यवतिष्ठन्ते **नन्वित्यादि** । अयमर्थः । समन्वयसूत्रे ब्रह्मस्वरूपस्य समवायित्वायाग्रहो यः क्रियते, स न पूर्वसूत्रोक्तकारणतासमर्थ-नार्थः। शास्त्रयोनित्वेनैव समर्थितत्वात् । नापि शास्त्रयोनित्वसमर्थनार्थः । त्वया तथाऽ-नङ्गीकारात्। किं तु कारणत्वे विशेषान्तरस्यापि बोधनार्थः । स न युक्तो विकृतत्वादि-

रश्मिः ।

ध्वंसरूपत्वेन कपाले घटो ध्वस्त इतिवत् ब्रह्मणि जगल्लीनमिति प्रतीत्या ब्रह्मणः समवायित्व-मस्त्विति चेत्तत्राहुः **यत्प्रयन्तीत्यादि**। पूर्वं मृदेव घट इति प्रतीतिवत् सदेवेदमिति श्रुत्या तद्भ-विष्यतीति किमनेनेति चेन्नेत्याहुः **सदेवेत्यादि**। योनिशब्दादपि न निर्णय इत्याहुः **सौत्रस्ये-त्यादि**। **प्रमाणेत्यादि**। **समवायित्व इत्यादि**। समवायस्य द्वितीये दूषणात्तदस्तित्वप्रयुक्तं सम-वायित्वमपि न वक्तुं शक्यमित्युपादानपदमत्र भाष्ये वक्तव्यमिति पृच्छति **नन्वत्रेत्यादि**। **कुतो व्यवहार** इति अस्य मीमांसाशास्त्रस्य पृथक्त्वान्मित्रवत् कुतो व्यवहार इति। ननु प्रश्नश्चेत् यदीत्यर्थः। **उच्यत** इति न घटत इत्युच्यत इत्यर्थः। **लोक** इति स्मृतौ। **परिच्छिन्नस्यै-वेति** सूत्रमृत्पिण्डादिरूपतूलांशमृदंशादेरेवेत्यर्थः । अन्यथा सूत्रमृत्पिण्डादिभावमनापन्नैरपि तूला-दिभिः पटघटाद्युत्पद्येत इति भावः। ननु नैयायिकैः परिच्छिन्नेऽपि समवायित्वव्यवहारः क्रियते व्यासचरणैरपि समन्वयादित्युक्तत्वाच्च क्वैतादृशाक्रोशः प्रसिद्ध इत्यत आहुः **प्रकृतिरित्यादि** । स्वव्यतिरेकेणासृज्यत्वादात्मानमिति। **तादृश** इति परिच्छिन्नप्रधाने परिच्छिन्नपुरुषावतारे चेत्यर्थः। **जानीहीति** तथा च ब्रह्मणोपरिच्छिन्नत्वमपीति नोपादानपदप्रयोग इति भावः। यः परिच्छि-न्नांशः स उक्तः । समवायश्च तादात्म्यमित्युक्तम् । उपलक्षणमेतत् दूषितेपि प्रसिद्धिप्राब-ल्यात्पर्याये प्रयोगानर्हत्वं नेति भाष्येण ज्ञाप्यते इत्यस्य। **अमन्वाना** इति नैयायिकाः। यथाहुः 'संसारमहीरुहस्य बीजाय' निमित्तकारणाय इत्यर्थ इति मुक्तावल्यां विश्वनाथाः। **शास्त्रेत्यादि**। सूत्रांशेनेत्यर्थः । **त्वयेति** सिद्धान्तिनेत्यर्थः। **विकृतत्वमित्यादि अयुक्तता** चेत्यन्तं भाष्यं विवृण्वन्ति **स नेत्यादि**। **अत इति** कार्यस्यानर्थरूपत्वेन तत्समवायित्वस्य ब्रह्मण्युपयुक्ततायाः

चेन्मैवम् । सर्वोपनिषत्समाधानार्थं प्रवृत्तः सूत्रकारः । तद्यदि ब्रह्मणः समवायित्वं न ब्रूयाद् भूयाननुपनिषद्भागो व्यर्थः स्यात् । 'इदं सर्वं यदयमात्मा,' 'आत्मैवेदꣳ सर्वम्' । 'स सर्वं भवति,' 'ब्रह्म तं परादात्' इत्यादि, 'स आत्मानꣳ स्वयमकुरुत,' 'एकमेवाद्वितीयम्,' 'वाचारम्भणं विकारः' इत्यादि । एवमादीनि वाक्यानि स्वार्थे बाधितानि भवेयुः ।

भाष्यप्रकाशः ।

दोषापादकत्वात् । अतः शरीरस्य वोपाधेर्वा भिन्नाया एव प्रकृतेर्वा तथात्वं वक्तव्यम् । तथा सति स्वरूपसमन्वयस्याभावादनारम्भणीयमेवैतत् सूत्रं तव मते स्यादिति । अत्र समादधते **मैवमित्यादि** । व्यर्थः स्यादित्यत्र हेतुः **बाधितानि भवेयुरिति** । अयमर्थः । समवायित्वं यन्निषिद्ध्यते, तत् किं पूर्वसूत्रस्य निराकाङ्क्षत्वादुत दोषोत्पादकत्वात् । नाद्यः । व्यासस्य सर्वोपनिषदां यथावस्थितार्थबोधनार्थं प्रवृत्तत्वेन भूयस उपनिषद्भागस्य वैयर्थ्ये जन्मादिसूत्रस्थविशेषाकाङ्क्षाया अनिवृत्तेः । नेतरः । तदभावस्याप्यनुपदं व्युत्पाद्यत्वात् । स भागस्त्विदं सर्वमित्यादिरूपः । अत्राद्यं वाक्यं मैत्रेयीब्राह्मणस्थम् । तत्र हि 'आत्मनि वा अरे दृष्टे श्रुते मते विज्ञाते सर्वमिदं विदितम्' इत्यनेनात्मज्ञानादिभिः सर्वज्ञानरूपं फलं दर्शयित्वा, तज्ज्ञानं किं प्रकारकमित्याकाङ्क्षायां, 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद' इत्यादिना 'योऽन्यत्रात्मनः सर्वं वेद' इत्यन्तेन ब्रह्मादिसर्वान्तेष्वात्मभिन्नत्ववेत्तुः कैवल्याभावरूपममृतत्वाभावरूपं वा पराभवं प्रदर्श्य 'इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे यज्ञा इमानि भूतानीदं सर्वं यदयमात्मा' इत्युपसंहारे ज्ञानप्रकारदर्शनेन सर्वस्यात्माभेदं दर्शयति । तस्मिंश्चाभेदे सर्वस्यात्मोपादेयत्वमन्तरेणाघटमाने वाक्यमेव बाधितार्थं भवेत् । एवं द्वितीयवाक्यमपि, छान्दोग्ये सनत्कुमारसंवादे । तत्राप्यग्रे, 'आत्मनः प्राण आत्मन आशा' इत्यादि श्राव्यते । तदप्यात्मनः समवायित्वं विना नोपपद्यते । तदतिरिक्तस्योपादानस्याश्रावणात् । तृतीयं तु पुरुषविधब्राह्मणस्थम् । तत्रापि 'आत्मैवेदमग्र आसीत्' इति सृष्टिपूर्वकाले केवलात्मसत्तामुक्त्वा, ततः 'सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्' इत्यनेन सृष्ट्यनन्तरमन्यदर्शनमुपक्रम एव निषेधति । मध्ये च, किमुत ब्रह्मावेद् यस्मात् तत्सर्वमभवदिति प्रश्ने, 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात् तत्सर्वमभवत्' इत्युत्तरमुक्त्वा तदिदमप्येतर्हि 'य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति' इति सर्वा-

रश्मिः ।

इत्यर्थः । **शरीरस्येत्यादि** । नैयायिकशंकराचार्यसांख्यानां मते यथाक्रमम् । **तथात्वमित्यादि** । समवायित्वं तत्तन्मतीयमङ्गीकार्यमित्यर्थः । **तस्मादित्यादि** भाष्यं विवृण्वन्ति **तथा सतीत्यादि** । तथा चास्थूलेत्यादिभाष्यसंग्रहाय कोट्यन्तरं निवेशमाना विकल्पमाहुः **अयमर्थ** इति । भाष्ये यत्फलितं तदाहुः **जन्मादीत्यादि** । शास्त्रयोनित्वांशे जन्मादिसूत्रस्य समवायित्वप्रतिपादकशास्त्रप्रतिपाद्यसमवायित्वरूपविशेषाकाङ्क्षाया अनिवृत्तेरित्यर्थः । **अनुपदमिति** तथात्रास्थूलेत्यादि भाष्येणेत्यर्थः । **इदमित्यादि** भाष्यं विवृण्वन्ति **स भाग इत्यादि** । **तज्ज्ञानमिति** सर्वज्ञानमित्यर्थः । **ज्ञानप्रकारेति** सर्वविशेष्यके ज्ञान आत्माभिन्नत्वरूपप्रकारेत्यर्थः । द्रव्यादीनां विद्यमानसमवायिकत्वनियमादाहुः **तदतीत्यादि** । सृष्टस्येदमा निदर्शनादग्र इतिपदेन सृष्टिपूर्वकालस्य बोधनाच्च वीक्षणं नात्मविषयकमनोश्च न प्रलयानन्तरमर्थस्तदाहुः **सृष्ट्यनन्तरमन्येत्यादि** । **अवेदिति** ।

भाष्यप्रकाशः ।

त्मभावरूपं फलमाह । समवायित्वानङ्गीकारे तदपि सर्वं बाधितं भवेत् । तुरीयं तु तद्भिन्नत्ववेत्तु उक्तरूपं पराभवं वक्तीत्युक्तम् । मध्ये वाक्यद्वयं तु सर्वत्रैकवाक्यतार्थम् । पञ्चमं तु तैत्तिरीये ब्रह्मवित्प्रपाठके । तत्रापि करोतिकर्मत्वेनात्मनः श्रावणात् तस्यैवोपादानोपादेयभावः स्फुटति । सोऽपि तथा भवेत् । एकमेवेत्यादिकं तु छान्दोग्यस्थम् । तत्राप्येकमेवेति विशेष्यान्वितेनैवकारेणान्यसत्त्वे व्यवच्छिन्नेऽपि 'एके मुख्यान्यकेवलाः' इति कोशादेकशब्दस्य नानार्थत्वेनात्र मुख्येतरव्यवच्छेद एवाभिसंहित इति । श्रुत्यन्तरे, 'नान्यत् किंचन मिषत्' इति कथनाद् व्यापारं कुर्वतो वान्यस्य निषेधोऽभिसंहित इति वा शङ्का स्यादिति तन्निवारणायाद्वितीयपदेन द्वित्वसंख्यापूरकस्य निषेधः सृष्ट्यादौ क्रियते । सोऽपि सदितरस्य समवायिनः सत्त्वे बाध्येत । वाचारम्भणवाक्ये तु मृण्मयादिभिर्दृष्टान्तैः स्फुटमेव समवायित्वमवगम्यते । तथा द्वितीये गार्गीब्राह्मणे कस्मिन् वा आकाश ओतश्च प्रोतश्चेति प्रश्ने, एतद्वै तदक्षरं गार्गीत्यादिना अक्षरे ओतप्रोततामाकाशस्य वदति । सा च समवायित्वस्यैव लिङ्गम् ।

'नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे ।
ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग! यथा पटः' ॥

इत्यादिपुराणवाक्यैस्तन्निश्चयात् । नच, 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति गीतावाक्यान्नैवमिति शङ्क्यम् । तत्र केवलप्रोतत्वस्यैवोक्तत्वेऽप्यग्रे, 'रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः' इत्यादिभिः स्वस्य भूतसूक्ष्मत्वादिबोधनेनौतत्वस्यापि सूचिततया तत्राप्यैवमर्थ्येनोक्ततौल्यात् । तथा

'त्वय्यग्र आसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे ।
त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात्' ॥

इत्यष्टमस्कन्धीयब्रह्मवाक्येऽपि समवायित्वस्योपबृंहणात् । आथर्वणानां गोपथब्राह्मणारम्भे च, 'ब्रह्म वा इदमग्र आसीत् स्वयंभ्वेकमेव तदैक्षत महद्वै यक्षं तदेकमेवाऽस्मि हन्ताहं मन्मात्रं द्वितीयम्' इत्यादि श्राव्यते । तृतीयस्कन्धे च 'विश्वं वै ब्रह्म तन्मात्रम्' इति । एवंजातीयकानि

रश्मिः ।

लङ् । **तदपीति** सृष्ट्यनन्तरमात्मान्यादर्शनाद्यपीत्यर्थः । **वेत्तु उक्तेति** वेत्तुरुक्तेति पाठः प्रतिभाति । तादृशस्य कैवल्याभावरूपममृतत्वाभावरूपं वा पराभवमित्यर्थः । ननु प्रथमतुरीयाभ्यामेव समवायित्वसिद्धेः किं मध्यस्थेन वाक्यद्वयेनेत्यत आहुः **मध्य इत्यादि** । मैत्रेयीब्राह्मणेन सार्कं छान्दोग्यपुरुषविधब्राह्मणयोरेकवाक्यताप्रतिपत्तिः प्रयोजनम् । एवमन्यत्रापीति सर्वत्रेत्युक्तम् । **तत्रापीति** तदात्मानमिति श्रुतौ स आत्मानमित्यपि क्वचित्पाठः । **उपादानेत्यादि** यथा कुलालो मृदं घटमकुरुतेति प्रयोगो न तु दण्डं घटमकुरुतेति । मृदो दण्डस्येति वा मृदं घटात्मना करोति न तु दण्डं घटात्मना करोतीति वा, एवं प्रकृतेपि प्रयोगादुपादानोपादेयभाव इत्यर्थः । **व्यवच्छिन्न** इति यथा पार्थ एव धनुर्धर इत्यत्र । **निषेध** इति श्रुत्यन्तरैकवाक्यतयात्र निषेध इत्यर्थः । **सत्त्व** इति दोषापादकत्वेन ब्रह्मणोसमवायित्वे जगतः पूर्वं समवाय्यपक्षेया सत्त्व इत्यर्थः । अन्यान्यपि श्रुतिपुराणवाक्यान्यादिपदार्थत्वेनाहुः **तथेत्यादि** । **नैवमिति** सूत्रमणिगणयोरुपादानोपादेयभावाभावान्नैवमित्यर्थः । **ऐवमर्थ्येनेति** 'सह सुपा' इति समासः । ब्राह्मणादित्वात् ष्यञ् ।

नन्वेवं निःसंदिग्धत्वात् कथं सूत्रप्रवृत्तिः। उच्यते। अस्थूलादि-वाक्यान्यपि सन्ति सर्वत्र प्रपञ्चतद्धर्मवैलक्षण्यप्रतिपादकानि। ततोऽन्योऽन्य-विरोधेनैकस्य मुख्यार्थबाधो वक्तव्यः। तत्र स्वरूपापेक्षया कार्यस्य गौणत्वात् प्रपञ्चरूपप्रतिपादकानामेव कश्चित् कल्पयेत्। तन्माभूदिति जन्मादिसूत्रवत् समन्वयसूत्रमपि सूत्रितवान्। तथाचाऽस्थूलादिगुणयुक्त एवाविक्रियमाण एवात्मानं करोतीति वेदान्तार्थः संगतो भवति। विरुद्धसर्वधर्माश्रयत्वं तु ब्रह्मणो भूषणाय।

भाष्यप्रकाशः।

वाक्यान्यादिपदेन संगृह्यन्ते। अतः पूर्वसूत्राकाङ्क्षापूरणायेदं सूत्रमावश्यकमित्यर्थः।

पुनश्चोदयति नन्वेवमित्यादि। एवमिति पुरःस्फूर्तिकयथाश्रुतार्थग्रहणे। तथाच सूत्रकारो हि वेदान्तार्थं दुर्बोधमाकलयँस्तत्रान्येषामृषीणामपि शुक्रादिकृतं बुद्धिमोहमवधार्य लोकाननुजिघृक्षँस्तदर्थं व्यक्तीकर्तुं प्रवृत्तो यद्येवं समवायित्वमसंदिग्धमेव जानीयात् समन्वयसूत्रं न प्रणयेत्। अतः सूत्रप्रवृत्तिरेव समवायित्वाभावं बोधयतीत्यर्थः। अत्रप्रवृत्तिमुपपादयन्तः समादधते उच्यत इत्यादि। अर्थस्तु निगदेनैव व्याख्यातः। जन्मादिसूत्रवदिति यथा जन्मादिसूत्रं कर्तृत्वादिधर्मनिर्धारणेन निर्विशेषमात्रतानिराकरणार्थं तथेदमपि समवायित्वनिर्धारणेन तदर्थं, न तु सांख्यं निराचष्टुम्। तस्याग्रे वक्ष्यमाणत्वादिति भावः। एतेन पूर्वचोदितस्य द्वितीयदूषणस्यापि निवृत्तिं बोधयन्ति तथाचेत्यादि। संगतो भवतीति। उक्तदूषणस्योद्धृतत्वादसंदिग्धो भवति। तथा चैतत्सूत्राभावे उक्तसंदेहानपायात् तदर्थं सूत्रप्रवृत्त्या समवायित्वमावश्यकमित्यर्थः। नन्वविक्रियमाणस्य समवायित्वं काल्पनिकम्। कल्पना तु लोकाविरुद्धैव प्रामाणिकसमाजे शोभते। तत इदमसंगतमित्याशङ्कायामाहुः विरुद्धेत्यादि। भूषणायेति 'तदेजति तन्नैजति'। 'आसीनो दूरं व्रजति शयानो याति सर्वतः'। 'अपाणिपादो जवनो ग्रहीता' इत्याद्यनेकश्रुतिसिद्धत्वाद् भूषणाय। ब्रह्मणः श्रुत्येकसमधिगम्यत्वस्य सर्वेषामेव संमतत्वादित्यर्थः।

ननु फलार्थं सर्वः प्रवर्तते। तस्यैव पुरुषशेषत्वात्। तदैहिकं मोक्षरूपं वा यद् यस्या-

रश्मिः।

अन्तर्यामिपरत्वे पूर्वतौल्यात्। निगदेनेति अभिधानेनैवेत्यर्थः। तदर्थमिति निर्विशेषमात्रता-निराकरणार्थमित्यर्थः। किंचिन्निराचक्षते न त्वित्यादि। प्रकृतिः समवायिनीति सांख्यमित्यर्थः। तस्याग्र इति सांख्यनिराकरणस्य चतुर्थपाद इत्यर्थः। पूर्वचोदितस्येति समवायित्वं यन्निषिद्ध्यते इत्यादिनोक्तविकल्पोक्तस्येत्यर्थः। धातूनामनेकार्थत्वात्। तज्ज्ञापयत्याचार्य इत्यत्र ज्ञा नियोग इत्यस्य ज्ञानार्थत्वं यथा, न तु ज्ञा अवबोधने इत्यस्य, नापि ज्ञाने ज्ञापने च वर्तमानस्य ज्ञपेः प्रयोगः। पूर्वस्य मारणतोषणनिशामनेषु ज्ञा इत्यनेन मित्त्वाद् ह्रस्वे ज्ञपेस्तु 'ज्ञपमिच्च' इत्यनेन मित्त्वात् 'मितां ह्रस्वः' इत्यनेन ह्रस्वे ज्ञपयतीति प्रयोगात्। निशामनं ज्ञानम्। उद्धृतत्वादिति मैवं सर्वेत्यादिभाष्येणोद्धृतत्वादित्यर्थः। उक्तेत्यादि उपादानत्वे कर्तृत्वे च संदेह इत्यादिभाष्योक्त-संदेहानपायादित्यर्थः। नैयायिकः शङ्कते नन्वित्यादि। तस्यैवेत्यादि 'फलं च पुरुषार्थत्वात्' इति सूत्रादित्यर्थः। इदं तृतीयस्य तृतीयाधिकरणे चिन्तितम् 'द्रव्यगुणसंस्कारेषु बादरिः' इत्यत्र। तत्र

किंच । अन्यपदार्थस्रष्टौ वैषम्यनैर्घृण्ये स्याताम् । कर्माधीनत्वे त्वनीशता । ततः कर्तृत्वमपि भज्येत । ततः सर्वमाहात्म्यनाश एव स्यात् ।

नन्वेवमेवास्तु, अपवादार्थत्वात् । रज्जुसर्पवदयुक्तार्थकथनेऽपि न दोषः ।

भाष्यप्रकाशः ।

भीष्टं तत् सर्वं, ब्रह्मोपासनया वा तज्ज्ञानेन वा सर्वस्य यथाधिकारं ब्रह्मणि सर्वकर्तृत्वं सर्वेश्वरत्वादिकं चानुसंदधानस्य सेत्स्यत्येव । नच समवायित्वानुसंधानस्यावश्यकत्वम् । शरीरद्वारापि तदङ्गीकारे पूर्वोक्तमाहात्म्यानपायेन तथानुसंधानस्यानावश्यकत्वात् । अतोऽपार्थप्रयासात् तव मते एतत्सूत्रवैयर्थ्यमेवापद्येतेत्यत आहुः किंचेत्यादि । तत इति अनीशत्वे । तत इति कर्तृत्वभङ्गे । तथाच वैषम्यादिवारणेन कर्तृत्वादिसमर्थनार्थमप्यावश्यकत्वान्न वैयर्थ्यमतस्तवापि निर्दोषनिखिलगुणगणालंकृतब्रह्माङ्गीकर्तुरावश्यकमित्यर्थः ।

अत्र विरुद्धधर्माश्रयत्वमसहमानो निर्विशेषमात्रवादी पुनः शङ्कते नन्वित्यादि । अयमर्थः । अस्तु कर्तृत्वादिभङ्गः । अस्थूलादिवाक्यैः स्वरूपस्य निर्विशेषत्वे निश्चिते तेषां कर्तृत्वादीनामविद्याकल्पितत्वेनापवादार्थत्वात् । न चैवं मिथ्यार्थकथने वाक्यप्रामाण्यभङ्गः । यथा ह्यतिचपले बाले तस्य भीत्युत्पादनाय रज्जुः सर्प इति प्रदर्श्यते, ततो विनीते तस्मिन् रज्जुरियमिति स्वरूपं कथ्यते । तथा संसारासक्तेषु भीत्यर्थं माहात्म्यं कर्तृत्वफलदातृत्वनियामकत्वादिरूपमुच्यते । ततो वैराग्याद्युत्पत्तौ स्वरूपं बोध्यत इति रज्जुसर्पवदयुक्तार्थकथनेऽपि न दोषः । तत्र तात्पर्याभावात् । अथेदं सर्वं यदयमात्मेत्यादीनां स्वार्थत्यागादस्यासंगतत्वं विभाव्यते । तदबोधात् । गीतायां विश्वरूपं पश्यता पार्थेनैव सर्वव्याप्त्या सर्वत्वकथनेन तदर्थनिश्चयादसंगत्यभावादिति ।

रश्मिः ।

स्फ्यकपालादिद्रव्यं, अरुणिमादिर्गुणः, अवघातप्रोक्षणादिः संस्कारः । एतेषु त्रिष्वेवोपकारित्वरूपं शेषत्वम् । फलपुरुषकर्मसु न शेषत्वमुपकारित्वाभावात्, इति बादरिर्मन्यते, जैमिनिस्तु पारार्थ्यं शेषलक्षणमुररीचकार उपकारित्वस्य प्रधाने स्वामिन्यपि दर्शनेनातिव्याप्तत्वादिति । तथा च 'कर्माण्यपि जैमिनिः फलार्थत्वात्', 'फलं च पुरुषार्थत्वात्'; 'पुरुषश्च कर्मार्थत्वात्', इति सूत्रत्रयादेतेष्वपि पारार्थ्याच्छेषत्वं ज्ञेयम् । एवकारेण प्रमाणप्रमेयसाधनव्यवच्छेदः । **शरीरद्वारापीति** नव्यमते विश्वमेवेश्वरशरीरमित्यनादरेऽपिशब्दः । एवं द्वितीयोऽपिशब्दः । **अनावश्यकत्वादिति** प्राचां नैयायिकानामिव प्राचस्तवाप्यनावश्यकत्वादित्यर्थः । नैयायिकयुक्तिपराहतत्वादनावश्यकत्वादिति वा । **अनीशत्व** इति सार्वविभक्तिकस्तसिरिति भावः । कर्तृत्वं 'स्वतन्त्रः कर्ता' इत्यनुशासनात्तदपि तदभावे भज्येत । **तवापीति** । नैयायिकस्यापीत्यर्थः । तेन रामानुजा अप्याक्षिप्ता ज्ञेयाः । **अत्रेत्यादि** मध्ये नैयायिकाशङ्काया उक्तत्वात् **पुनरिति** । रज्जुः सर्पवदिति भाष्यं विवृण्वन्ति स्म **न चैवमिति** । **तत्रेति** कर्तृत्वादावयुक्तार्थकथन इत्यर्थः । **सर्वमित्यादि** भाष्यं विवरीतुमाहुः **अथेदमित्यादि** । **अस्येति** आरोपापवादस्येत्यर्थः । **सर्वव्याप्त्येति** सर्वं

'सर्वं समाप्नोषि ततोऽसि सर्वः' इति स्मृतेश्चेति चेत् मैवम् । तथा सति पाषण्डित्वं स्यात् । एतादृशशास्त्रार्थाङ्गीकर्तुरासुरेषु भगवता गणितत्वात् ।

'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत् कामहेतुकम्' इति ।

भाष्यप्रकाशः ।

अत्र समादधते **मैवमित्यादि** । **तथा सतीति** सर्वधर्मापवादे कृते सति । **पाषण्डित्वमिति** पापलिङ्गवत्त्वम् । 'तानि पापस्य पण्डानि लिङ्गं षण्डमिहोच्यते' इति श्रीभागवतवाक्यात् । गीतावाक्यार्थस्तु, ते आसुराः, असत्यं नास्ति सत्यं वेदपुराणादिप्रमाणं यस्मिंस्तद्सत्यम् । वेदादिस्वरूपसत्त्वेऽपि तत्प्रामाण्यानभ्युपगमाद् विशिष्टाभावः । अत एव नास्ति धर्माधर्मरूपा प्रतिष्ठा हेतुव्यवस्था यस्येत्यप्रतिष्ठम् । तथा नास्ति शुभाशुभफलदातेश्वरो नियन्ता यस्येत्यनीश्वरं जगदाहुरिति । यद्वा । सत्यं सत्यशब्दनिर्दिष्टं ब्रह्म, तदुपादेयत्वेन तदात्मकत्वे जगदपि सत्यं भवति, तद्विरुद्धमसत्यम् । न विद्यते ब्रह्मणि प्रतिष्ठा यस्येत्यप्रतिष्ठम् । न विद्यते नियामकः सत्यसंकल्प ईश्वरो यस्येत्यनीश्वरमिति । किंच, सर्वं पशुमनुष्यादिकं योषित्पुरुषयोः परस्परसंबन्धेन जातमुपलभ्यते । अनेवंभूतमपरस्परसंभूतं तादृशमन्यत् किं, न किमपि । अत इदं सर्वं कामहेतुकमिति । यद्वा । यतः सर्वमेवमतोऽदृष्टं कारणं किमपि नास्ति । अदृष्टाङ्गीकारेऽपि क्वचिद्गत्वाऽन्ततः स्वभाव एव पर्यवसानात् स्वाभाविकमेव जगद्वैचित्र्यमस्तु । दृष्टे संभवत्यदृष्टकल्पनानवकाशात् । अतः काम एव प्राणिनां कारणं, नान्यददृष्टेश्वरादीत्याहुरिति । इयं च लौकायतिकदृष्टिरिति । ततश्चायमर्थः । धर्माणामपवादमातिष्ठतस्तद्विशिष्टस्येश्वरस्य काल्पनिकत्वेन वस्तुतस्तदभावात् प्रच्छन्नानीश्वरवादितया स्वभाववाद एव विश्रान्त्या लौकायतिककल्पत्वाद् पाषण्डित्वस्य गीतोक्तलक्षणकत्वादासुरत्वस्य चापत्तिर्वेदस्यापि कल्पितत्वापत्त्या तस्यानर्थक्यम् । कथंचित्प्रामाण्याङ्गीकारेऽपि संसारभ्रमस्यौत्पत्तिकत्वात् तद्भ्रमनिवारणाय स्वरूपमात्रस्यैव वक्तव्यत्वेन शेषशास्त्रस्य प्रक्षालनपङ्कन्याया-

रश्मिः ।

समाप्नोषीत्यनेनेत्यर्थः । योऽन्यथेति श्रुत्यनुकूलमर्थमाहुः **पापेत्यादि** । **तत्प्रामाण्यादिति** अविद्यावद्विषयत्वादिति भावः । इदं चाध्यासभाष्ये स्फुटम् । **विशिष्टेत्यादि** जगति वेदसत्त्वेऽपि प्रामाण्यरूपविशेषणाभावात् प्रमाणं वेदादिर्जगति न विद्यते इति विशेषणाभावप्रयुक्तो विशिष्टाभाव इत्यर्थः । **नास्तीति** । औपाधिकत्वादिति भावः । जगति सर्वेषां कामहेतुकत्वाभावात्किमन्यदित्याद्यंशं प्रकारान्तरेण योजयन्ति **यद्वेत्यादि** । **प्राणिनामिति** गोमयोत्पन्नवृश्चिकघटादिनिष्ठजलजन्यजन्त्वादिव्यतिरिक्तानामिति वाच्यम् । शांकरैर्यथाकथंचिदीश्वराङ्गीकारान्नास्तिकैस्तु तदनङ्गीकारादाहुः **इयं चेत्यादि** । कथं तर्ह्यस्य निर्विशेषमात्रवादिशङ्कानिराकरणाय भाष्ये उपक्षेप इत्याकाङ्क्षायां निर्विशेषमात्रवादिनो नास्तिकतौल्यादुपक्षेप इति वक्तुं तत्तौल्यं स्फुटयन्ति **ततश्चेत्यादि** । **आपत्तिरिति** एतदन्तं तथासतीत्यारभ्य कामहेतुकमित्यन्तस्य भाष्यस्य फलितोर्थः । **शास्त्रानर्थक्यं चेति** भाष्यं विवृण्वन्ति **वेदस्यापीत्यादि** । **तद्भ्रमेति** संसारात्मकभ्रमेत्यर्थः । **स्वरूपस्यैवेति** विशेषज्ञानरूपस्य । एवकारेण कार्यलक्षणप्रतिपादकभागव्यवच्छेदः । **शेषशास्त्रं** माहात्म्यप्रतिपादकं तस्येत्यर्थः । आरोपापवादे **प्रक्षालनेत्यादि** । ननु कर्तृत्वादिप्रतिपादकस्य

शास्त्रानर्थक्यं च । सर्वं समाप्नोषीत्यप्यसंगतं स्यात् । वस्तुपरिच्छेदात् । नहि वेदो निष्प्रपञ्चरूपकथनमुक्त्वा स्वोक्तं जगत्कर्तृत्वं निषेधति । तस्मादध्यारोपा-

भाष्यप्रकाशः ।

दानर्थक्यम् । स्वस्वमतकल्पितरूपस्य चेतनविशेषस्येश्वरस्य सर्वैरेवाङ्गीकारेण तत्सत्तासाधनायाप्यनुपयोगात् । अपवादार्थमेवारोपितमेव सर्वमुच्यत इत्यङ्गीकारे, सर्वं समाप्नोषीत्यस्याप्यसंगतिः । पदार्थान्तरस्य व्याप्यस्याभावेनावस्तुनश्चाव्याप्यत्वेनास्य वस्तुपरिच्छेदबोधकस्यार्थबाधापत्तेः । असंगतत्वं विभजन्त एव तदुपपादकमाहुः **न हीत्यादि** । यदि हि निष्प्रपञ्चकथनं मुक्त्वा जगत्कर्तृत्वं ब्रह्मणि निषेधेत्, तदा कर्त्रन्तरादिसत्तया जगदपि सर्वं स्यात् । तदा व्याप्यसिद्धौ सर्वं समाप्नोषीति वाक्यं संगतं स्यात् । यथा तात्त्विकभेदवादिनां मते । तव मते तु निष्प्रपञ्चत्वकथनपूर्वक एव कर्तृत्वादिनिषेध इति त्वन्मत इदं वाक्यमसंगतमेवेत्यर्थः । एवं तन्मतमपास्य तमुपहसन्ति **तस्मादित्यादि** । **तस्मा**दिति युक्तिप्रमाणविरुद्धत्वात् । तथाचैवंविधव्याख्यानरोगेण स्वयंनिवृत्तदैवभावैरासुरत्वरूपमरणप्राप्त्या अस्पृश्यैर्वेदान्ता अपि शवतिलापो यथा अमङ्गला अस्पृश्यास्तथा कृता इत्यर्थः । अत एव प्रबोधचन्द्रोदयनाटकेऽपि बौद्धोक्तिः ।

'प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः । वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते' ॥

इति । 'असद्वा इदमग्र आसीत्, ततो वै सदजायत' इति श्रुतिच्छायायास्तादृशैरप्यालम्बनात् । अत एव पाद्मोत्तरखण्डेऽप्युक्तम्--

'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा' ॥

रश्मिः ।

शेषशास्त्रस्य नानर्थक्यं कर्तृत्वस्यापि नैयायिकादिभिरङ्गीकारेण तत्प्रतिपादनस्यावश्यकत्वादित्याशङ्कां निराचिकीर्षवो हेतुमप्याहुः **स्वस्वमत इत्यादि** । **सर्वं समाप्नोषी**त्यादि भाष्यं व्याकुर्वन्ति **अपवादेत्यादि** । असंगतौ हेतुभूतं भाष्यं विवृण्वन्ति **पदार्थेत्यादि** । तथा च वस्तुपरिच्छेदं समाश्रित्य यच्छास्त्रं सर्वं समाप्नोषीति तदप्यसंगतं स्यादिति भाष्यार्थः । **उपपादकमिति** तर्कमित्यर्थः । **निःप्रपञ्चेत्यादि** निर्गुणरूपप्रतिपादकं वाक्यप्रबन्धं मुक्त्वेत्यर्थः । क्त्वस्तु भावोर्थः अव्ययकृतो भाव इति वार्तिकात् । 'समानकर्तृकयोः पूर्वकाले' इत्यादिसूत्रैः द्योत्यं समानकर्तृकत्वादिकमित्युच्यत इति भूषणे स्थितम् । पूर्वोत्तरभावः सामानाधिकरण्यं च संसर्गः । तथा च तादृशवाक्यप्रबन्धवचनसमानाधिकरणमुत्तरकालिकं कर्तृत्वनिषेधं कुर्यादित्यर्थः । **कर्त्रन्तरादिसत्तयेति** सगुणादिरूपकर्त्रन्तरेत्यर्थः । **यथेत्यादि** नैयायिकानां यथा घटादि कर्त्रन्तरसत्तया प्रत्यक्षसिद्धया जगद्रूपव्याप्यसिद्धौ सर्वं समाप्नोषीति संगतं भवति तथा स्यादित्यर्थः । त्वं तु निष्कलं निष्क्रियं शान्तमित्यादिभिः निःप्रपञ्चत्वं प्रपञ्चविरहवैशिष्ट्यं कथयन्नेव कर्तृत्वं निषेधतीति मन्यसे इति कर्त्रन्तरसत्ताऽसिद्ध्या व्याप्यासिद्धेरिदमसंगतमेव स्यादित्याहुः **तव मत इत्यादि** । **आसुरत्वेत्यादि** 'मृत्युरत्यन्तविस्मृतिः' इति वाक्यात् स्वरूपविस्मारकत्वेनासुरत्वं मृत्युः । **तथाकृता** इति । भगवन्माहात्म्यनाशकत्वादिति भावः । **अत एवेति** अनुभूय युक्तिप्रमाणातिक्रमादेवेत्यर्थः । **किमपराध्यत** इति तादृशवाक्यानां सर्वेषामप्रामाण्यात्कोऽपराध इत्यर्थः । सर्वोऽपि वेदो नाङ्गीक्रियत इत्यपराध इत्यत आहुः **असद्वेत्यादि** । यथा अस्थूलादिश्रुतिर्निर्वि-

पवादपरत्वेन व्याख्यातृभिर्वेदान्तास्तिलापः कृता इति मन्यामहे । सर्ववाक्यार्थबाधात् । यथा निर्दोषपूर्णगुणविग्रहता भवति तथोपरिष्टाद् वक्ष्यामः ।

ननु पुरुषार्थार्थानि शास्त्राणि । इदं च शास्त्रं मोक्षरूपपुरुषार्थसाधकम् । मोक्षश्चाविद्यानिवृत्तिरूप इति युक्तम् । अविद्या चाज्ञानं ज्ञानेनैव नश्यति । ततो ज्ञानोपयोगित्वेन व्याख्यातव्ये वेदान्तेऽध्यारोपापवादव्यतिरेकेण व्याख्यानमयुक्तम् । अतो यथाकथंचिद् व्याख्यानेऽपि पुरुषार्थसिद्धेर्न कोऽपि दोष

भाष्यप्रकाशः ।

इत्यादि । ननु ब्रह्मणः प्रपञ्चसमवायित्वमयुक्तम् । कार्यस्य कारणसाजात्यनियमेन प्रपञ्चगतदोषाणां ब्रह्मण्यापातादित्याकाङ्क्षायामाहुः यथा निर्दोषेत्यादि । उपरिष्टादिति अन्तस्तद्धर्माधिकरणे ।

अपवादार्थत्वे उक्तान् दोषानसहमानो निर्विशेषवादी पुनः प्रत्यवतिष्ठते नन्वित्यादि । युक्तमिति 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्गः' इति गौतमसूत्रे मिथ्याज्ञानापायस्य मोक्षसाधकत्वेन कथनाद्युक्तम् । अविद्या चाज्ञानमिति । 'अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या' इति पतञ्जलिसूत्र उक्तं भावरूपमज्ञानं, न तु ज्ञानाभावः । योगभाष्ये, अमित्रो न मित्रं, न वा मित्राभावः, किंतु मित्रविरुद्धसम्पदिति दृष्टान्तेन व्यासपादैरेव भावरूपताया उक्तत्वादिति । ततश्चायमर्थः । शास्त्रस्य स्वार्थाबाधने य आग्रहः क्रियते स शास्त्रस्वरूपं विचार्य कार्यः । न हि शास्त्रत्वेन शास्त्राणामुपादेयता येन स युक्तः स्यात् । किंतु पुरुषार्थार्थत्वेन । पुरुषाश्च नानास्वभावाः स्वस्वोपयोगिशास्त्रमाद्रियन्ते । तत्रेदं शास्त्रं मोक्षसाधकं मुमुक्षूपयोगि । मोक्षस्त्वभियुक्तैरविद्यानिवृत्तिसाध्यतयोक्तत्वादविद्यानिवृत्तिरूप एवात्र वक्तव्यो न तु स्वरूपात्मकः । तस्याजन्यत्वात् । तत्र च साधनानामनुपयोगेन तदुपदेशवैयर्थ्यप्रसङ्गाच्च । नचाविद्यानिवृत्तेर्जन्यत्वे कदाचित् तन्नाशः शङ्क्यः । ध्वंसरूपत्वात् । अत एव जन्यभावत्वेन नश्वरत्वेन व्याप्तिराद्रियते, न तु केवलं जन्यत्वेन । ततश्च साधनसाध्यो मोक्षोऽविद्यानिवृत्तिरूप एवेत्यविवादम् । तत्र साधनविचारे यद्यपि दर्शनान्तराभिमानिभिः साधनान्तराणि कर्मसमुच्चिततत्तद्विधज्ञानरूपाण्युक्तानि तथापि श्रौतेऽस्मिन् वेदान्तदर्शने केवलं ज्ञानमेव साधनम् । अविद्याया अज्ञानरूपत्वस्य साधितत्वात् । विवक्षितज्ञानमात्रेणैव तन्निवृत्तिसिद्धौ साधनान्तराणां समुच्चयस्य चापार्थत्वात् । ततो ज्ञानोपयोगित्वेनैव वेदान्तव्याख्याने कर्तव्येऽध्यारोपापवादपक्षमपहाय स्वार्थपरत्वेन व्याख्यानं नाभियुक्तजनरुचिरम् । अतो यथाकथंचिद्व्याख्यानेऽपि ज्ञानोत्पत्त्या अज्ञाननिवृत्तौ, 'ब्रह्म वेद ब्रह्मैव भवति' इतिरूपस्वरूपावस्थात्मकपुरुषार्थसिद्धेरप्रत्यूहत्वात् पाषण्डित्वासुरत्वशास्त्रानर्थक्यादिरूपाणां दोषाणां लेशस्याप्यभावादनुचितोऽयमुपहास इति । एवं तेन स्वोपहासे विनिवारिते तस्यापत्रपत्वं बोधयन्तः स्वोक्तं स्थिरीकर्तुं तदुक्तं

रश्मिः ।

शेषवादिनावलम्ब्यते तथेयं तैरवलम्ब्यते इति लोकायतिकतौल्यमिति भावः । दुःखजन्मेत्यादि । इदं सूत्रं शंकराचार्यैरुपन्यस्तं भाष्ये । साधनपादस्थं सूत्रमाहुः अनित्येत्यादि । स्वरूपात्मक इति ब्रह्मस्वरूपात्मक इत्यर्थः । अत एवेति ध्वंसस्य जन्यत्वे सत्यनश्वरत्वादेवेत्यर्थः । जन्यभावत्वेनेति

इति चेत् । न । पुरुषार्थस्य शास्त्रार्थस्य वा स्वरूपं शास्त्रैकसमधिगम्यं, न स्वबुद्धिपरिकल्पितम् । अतः स्वबुद्ध्या शास्त्रार्थं परिकल्प्य तत्र वेदं योजयन्तो महासाहसिकाः सद्भिरुपेक्ष्याः ।

पुरुषार्थः पुनर्यथा वेदान्तेष्ववगतः । 'ब्रह्म वेद ब्रह्मैव भवति', 'ब्रह्म-

भाष्यप्रकाशः ।

निषेधन्तः प्रामाणिकप्राचीनरीतिमाहुः नेत्यादि । अयमर्थः । यदुक्तं, पुरुषार्थार्थानि शास्त्राणीत्यादिना, तदङ्गीकुर्मः । परंतु पुरुषार्थः शास्त्रार्थश्च कीदृशो विवक्षित इति विचारणीयम् । किं स्मार्त उत श्रौतः ? । तत्र नाद्यः । विरुद्धानां शास्त्राणां व्यासेनैव निराकरणात् । वाक्याभासयुक्त्याभासावष्टम्भाः पूर्वपक्षवादिन इहोत्तिष्ठन्ति । तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्त इति भवद्भाष्यकृतापि तन्निराकरणाङ्गीकारात् । अतो द्वितीय एवादरणीयः । तथा सति पुरुषार्थस्य शास्त्रार्थस्य च स्वरूपं श्रुत्येकसमधिगम्यं, न तु दर्शनान्तरवाक्यादरणेन स्वबुद्धिकल्पितमिति सिद्धम् । एवं सति पदवाक्यप्रमाणनिष्णातेनाचार्येण कार्यलक्षणस्यैव पूर्वं विचारितत्वादग्रे तत्तद्धर्मादिविचाराच्च धर्मविशिष्टब्रह्मज्ञानमेव शास्त्रार्थो, न त्वध्यारोपापवादेन यावद्धर्मशून्यब्रह्मावगतिः । अतः स्वबुद्ध्या तथा शास्त्रार्थं कल्पयित्वा तत्र वेदस्यैकवाक्यत्वं बोधयन्तो लोकान्तरीयभयराहित्येन महासाहसकर्तृत्वात् सद्भिर्वेदानुसारिभिरसंभाष्या इति । मोक्षस्याविद्यानिवृत्तिरूपत्वव्युदासायाहुः पुरुषार्थ इत्यादि । तथाचाविद्यानिवृत्तिरूपो मोक्षः कुत्रापि नोक्त इति त्वन्मतीयः पुरुषार्थोऽपि काल्पनिक इत्यर्थः । एतदेव बोधयितुं वाक्यान्युदाहरन्ति ब्रह्म वेदेत्यादि । अत्र प्रथमे ब्रह्मभावो, द्वितीये परब्रह्मप्राप्तिरेव च फलत्वेनोच्यते । तृतीये च संसारावृत्त्यभावः । चतुर्थे गीतावाक्ये आप्तिस्वरूपं निष्कृष्यते । पञ्चमे च वैयासे सूत्रे तृतीयवाक्यार्थनिर्धारणेन जन्यभावत्वनश्वरत्वयोर्व्याप्तिर्निराक्रियते । अत्रायमाशयः । भवद्भाष्ये न्यायसूत्रोपन्यासेनाविद्यानिवृत्तेरूर्ध्वं सरूपत्वादनश्वरत्वं यदसूचि, तद् आश्रमवासिके भारतीये पर्वणि महता प्रबन्धेन, त्यक्तदेहानां कुरुपाण्डवसैन्यानां व्यासेन पुनर्दर्शितानां स्वस्वपत्नीभिः

रश्मिः ।

वे तु जन्यत्वेनेति भावः । ध्वंसस्य जन्यत्वेऽपि नश्वरत्वाभावात् । निराकरणादिति । द्वितीयाध्याये तथेत्यर्थः । 'ईक्षतेर्नाशब्दम्' इति सूत्रस्थं शांकरभाष्यं संमतये आहुः वाक्याभासेत्यादि । एवं पीठिकामुक्त्वा व्याकुर्वन्ति स्म तथा सतीत्यादिना । स्वबुद्ध्येति भाष्यं विवृण्वन्ति स्म न त्विति । अत इत्यादिभाष्यं विवरीतुमाहुः एवं सतीत्यादि । आप्तिस्वरूपमिति परमाप्नोतीत्युक्तमाप्यं कर्म ब्रह्म तन्निष्ठाप्तिस्वरूपमित्यर्थः । भक्त्या हृदि प्रकटे प्रवेश आप्तिरिति निष्कर्षः । निराक्रियत इति यदीयं व्याप्तिः प्रामाणिकी स्याच्छ्रुतिष्वाहता स्यात् इति तर्केण तथेत्यर्थः । एवं सामान्यतः सिद्धान्तग्रन्थं व्याख्याय प्रेक्षावत्प्रवृत्तये शंकरभाष्यं पूर्वपक्षकोटौ निवेशयितुमाशयं वर्णयन्ति अत्रायमित्यादि । असूचीति नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यत इत्युक्त्वा 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिजालमुपन्यस्यैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानफलं दर्शयन्तीति निरुच्यास्योपन्यासेन तत्स्वीकृतं तथात्वमसूचीत्यर्थः । स्मार्तं स्मार्तेनैव दूष्यमित्याशयेनाहुः तदाश्रमेत्यादि । वाक्यानि तु

विदाप्नोति परम्', 'न स पुनरावर्तते', 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्', 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इत्येवमादिभिः श्रुतिस्मृति-

भाष्यप्रकाशः ।

सहैकरात्रिकृतविहारामन्त्रणादिकथनाद् ध्वंसस्याप्यनश्वरत्वं प्रायिकमेव, न तु नियतमतस्तद्वद्विद्या-कृताविद्यानिवृत्तेरपि स्वप्नप्रबोधन्यायेन च निवृत्तिसंभवान्नानश्वरत्वं, गुणानामन्योन्याभिभव-जननमिथुनवृत्तितया सत्त्वेन रजस्तमसोरिव ताभ्यां सत्त्वस्याप्यभिभवे पुनरप्यविद्योत्पत्ति-संभवादसंगतम् । अतस्तद्विहाय श्रौत एव ब्रह्मप्राप्तिरूपः पुरुषार्थ आदर्तव्यः । नच तस्य नश्वरत्वं शङ्क्यम् । 'न स पुनरावर्तते' इति ब्रह्मप्राप्तस्यानावृत्तिबोधनेन तस्यानश्वरत्वनिश्चयात् । जन्यभावत्वेन नश्वरत्वेन व्याप्तेर्लौकिकत्वबोधनायैव सूत्रे शब्दादित्यस्य हेतोरुपन्यासात् । नच ब्रह्मणः सर्वगतत्वेन नित्याप्तस्वरूपत्वादनाप्यत्वं शङ्क्यम् । आप्तस्वरूपत्वेऽप्युक्तगीतावाक्ये आप्तिस्वरूपविवरणेनेदानीं तस्याभावादाप्यत्वस्यापि सत्त्वात् । एतदर्थापत्त्यैवान्तस्त्वबहिष्ट्वयोरपि तत्र मन्तव्यत्वात् । नच श्वेताश्वतरोपनिषदि, 'भूयश्चान्ते विश्वमायानिवृत्तिः' इतिमायानिवृत्ते-र्मोक्षरूपत्वश्रावणादविद्यानिवृत्तेरप्यनश्वरत्वं श्रौतत्वं च शङ्क्यम् । मायाऽविद्ययोर्भेदात् ।

'विद्याऽविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् । मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते' ॥

इति भगवता तयोः कार्यकारणभावबोधनात् । माया चाविद्या च स्वयमेव भवतीति ताप-नीयश्रावितद्वैरूप्यपक्षेऽपि तयोर्भेदेन तन्नाशयोरपि भिन्नत्वान्मायानिवृत्तेरेव मोक्षत्वं, नाविद्यानि-

रश्मिः ।

विद्वन्मण्डने सन्ति । अनुभवमप्याहुः **स्वप्नप्रबोध**ेत्यादि । अविद्यया विद्यानिवृत्तिं व्युत्पादयन्ति स्म **गुणानाम**िति । **असंगत**मिति यदसूचि तदसंगतमित्यर्थः । **अतस्त**दिति स्मृत्यनुभव-सूत्रविरुद्धत्वात्स्मार्तमित्यर्थः । अत्र यस्य तूत्पाद्यो मोक्षस्तस्य मानसं वाचिकं कायिकं वा कार्य-मपेक्षते इति युक्तं, तथा विकार्यत्वे च तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम् । नहि दध्यादिविकार्य-मुत्पाद्यं वा घटादि नित्यं दृष्टं लोके इति शंकरभाष्योक्तमाशङ्क्य निराकुर्वन्ति **न चे**त्यादि । स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं, सर्वगतत्वेन नित्याप्तस्वरूपत्वात्सर्वेण ब्रह्मण आकाशस्ये-वेति शंकरभाष्योक्तमाशङ्क्य निषेधन्ति **न च ब्रह्मण** इत्यादि । **तस्ये**ति प्रवेशस्येत्यर्थः । तथा च लोकन्यायेनोपष्टब्धत्वाच्चायमेवार्थस्तात्त्विक इति भावः । **एतदि**त्यादि अभिहितानुपपत्तिरूपयेत्यर्थः । इदमिह तत्त्वं गीतावाक्यावगतोऽर्थः प्रवेशरूपो ब्रह्मणो व्यापकत्वेन नित्याप्तस्वरूपत्वादनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं सान्तस्त्वबहिष्ट्वरूपं कल्पयतीति, यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र यागस्य क्षणिकत्वेन स्वर्गसाधनतानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते तद्वत् । श्रुतीनामेकवाक्यत्वायाहुः **माया-निवृत्तिरि**त्यादि 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' इति स्मृतिरप्येतेन संगृहीता । तदुक्तम् ।

'ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥
भक्त्याहमेकया ग्राह्यो यावान् यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' । इति ।

मायातरणोत्तरं ब्रह्मभाव इति वस्तुस्थितिः ।

'अपश्यत्पुरुषं पूर्णं मायां च तदुपाश्रयाम् । यया संमोहितो जीव आत्मानं त्रिगुणात्मकम् ॥
परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते । अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे' । इति समाधिभाषायाः ।

ब्रह्मणो व्यतिरिक्तत्वमाश्रित्यानाप्यत्वं यदुक्तं तद्दूषितमिदानीं तु स्वात्मरूपत्वे सत्यनाप्यत्वादिति

न्यायैर्ब्रह्मप्राप्तेरेव पुरुषार्थत्वम् । ब्रह्म च पुनर्न जीवस्यात्ममात्रम् । अज्ञानवद्वा । 'एकस्यैव ममांशस्य जीवस्यैव महामते । बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतरः' इति भगवता जीवस्यैवाविद्यावत्त्वप्रतिपादनात् । तस्मान्न्यायोपबृंहितसर्ववेदान्तप्रतिपादितसर्वधर्मवद् ब्रह्म । तस्य श्रवणमनननिदिध्यासनैरन्तरङ्गैः शमदमादिभिश्च बहिरङ्गैरतिशुद्धे चित्ते स्वयमेवाविर्भूतस्य स्वप्रकाशस्य सायुज्यं परमपुरुषार्थः । तस्मात् सर्वे वेदान्ताः स्वार्थ एव युक्तार्था इति न्यायैर्वक्तव्यत्वाद् ब्रह्मणः समवायित्वाय समन्वयसूत्रं वक्तव्यम् ॥ ३ ॥

इति प्रथमाध्याये प्रथमपादे तृतीयं समन्वयाधिकरणम् ॥ ३ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीब्रह्मसूत्राणुभाष्ये प्रथमाध्याये प्रथमपादस्यादिमत्रिसूत्रीभाष्यं समाप्तम् ॥

भाष्यप्रकाशः ।

वृत्तेः । मायानिवृत्तिश्च मोक्षस्य पूर्वा कक्षेति परममोक्षत्वं ब्रह्मप्राप्तेरेव निश्चयम् । तदेतदुक्तं ब्रह्मप्राप्तेरेव पुरुषार्थत्वमिति । यदपि मोक्षस्य स्वात्मस्वरूपत्वेनानाप्यत्वमुक्तं यच्च ब्रह्मणोऽविद्याशाबल्यादज्ञानवत्त्वं तदप्यसंगतमिति ज्ञापनायाहुः ब्रह्म चेत्यादि । आत्ममात्रमिति 'मात्रं कार्त्स्न्येऽवधारणे' कृत्स्नमात्मस्वरूपम् । तथाचाऽस्मिन् वाक्ये जीवस्यांशत्वकथनेन स्वस्यांशित्वं बोधयता भगवता ब्रह्मणो जीवात्ममात्रत्वे निवारिते मोक्षस्यात्मरूपत्वेनानाप्यत्वं निवारितम् । जीवस्याविद्यया बन्धकथनेन ब्रह्मणोऽविद्यावत्त्वमपि निवारितमतस्तदप्यसंगतमित्यर्थः । सिद्धमाहुः तस्मादित्यादि । तस्मादिति एकदेशिमतस्योपबृंहणविरुद्धत्वात् । तस्येति सर्ववेदान्तप्रतिपादितधर्मविशिष्टस्य ब्रह्मणः । स्वयमाविर्भूतस्येति नायमात्मेतिश्रुत्या साधनाधीनत्वे ब्रह्माविर्भावस्य वारिते आविर्भावः स्वोक्तकरणेन प्रसादादेव भवतीति तेन स्वयमाविर्भूतस्य । तथाच श्रौतानां स्मार्तानां च ब्रह्मविषयाणां साधनानां चित्तकषायशोषण एव पर्यवसानात् तैरतिशुद्धे चित्ते परमव्योमात्मके सति तत्राविर्भूतस्य ब्रह्मणः, 'सोऽश्नुते' इतिश्रुत्युक्तं सायुज्यमेव सर्वोत्कृष्टः पुरुषार्थो ध्वंसाप्रतियोगित्वात् । न तु ब्रह्मात्मावगतिमात्रम् । अतस्तादर्थ्येन यथाकथंचिद् वेदान्तव्याख्यानमयुक्त-

रश्मिः ।

भाष्ये ब्रह्मैक्यादनाप्यत्वं यदुक्तं तदनुवदन्ति यदपीत्यादि । स्वयंपदात्पुष्टिमार्गं व्याचक्षते स नायमात्मेतीति । ननु पुष्टिमार्गबोधकं किं पदं श्रुताविति चेन्न 'वृणुते' इति पदसत्त्वात् । साधननिषेधपूर्वकं, वृङ् संभक्तौ इति धातुपाठात् स्वीयत्वेन स्वीकारस्तु संभक्तिरूपपुष्टिसंबन्धित्वेन तत्त्वात् । तेनेति प्रसादेन दर्शनसाधनेन 'तमक्रतुं पश्यति वीतशोको धातुः प्रसादात्' इति श्रुत्युक्तेनेत्यर्थः । आविर्भूतस्येति लोकरीत्याविर्भूतस्येत्यर्थः । तत्राविरिति व्योमात्मके शरीरे आविर्भूतस्यानन्दस्य । 'आकाशशरीरं ब्रह्म' इतिश्रुतेः । अदृश्यत्वाधिकरणात् । यद्यपि सेवाफलविवृतिविवृतौ सायुज्यं 'भक्त्यामामभिजानाति' इति स्मृत्युक्तः प्रवेश इत्युक्तं, तथाप्यत्र परमपुरुषार्थपदसमभिव्याहारादलौकिकसामर्थ्यरूपं मुख्यं फलं सह युनक्तीति सयुक् सयुजो भावः सायुज्यमिति व्युत्पत्त्या संयोगानुभवरूपं सायुज्यं विवक्षितमित्याशयेनाहुः सोऽश्नुते इतीति । तादर्थ्येनेति स्वसैद्धान्तिकपुरुषार्थार्थत्वेनेत्यर्थः । इदमत्र बोध्यम् । निमित्तत्वस्य श्रुतिसिद्धत्वादित्युक्तम् । अत्र च समवायित्वाय समन्वयसूत्रं वक्तव्यमित्युक्तम् । अतो निमित्तत्वे सति समवायि ब्रह्म इत्युक्तं भवति ।

भाष्यप्रकाशः ।

मित्यर्थः । एवमेकदेशिमतानि व्युदस्य पूर्वोक्तं सूत्रप्रयोजनं निगमयन्ति तस्मादित्यादि ।

इति तृतीयं समन्वयाधिकरणम् ॥ ३ ॥

इति श्रीवल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य श्रीपीताम्बरात्मजस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे प्रथमाध्याये प्रथमपादस्यादिमत्रिसूत्रीप्रकाशः समाप्तिमगमत् ॥

रश्मिः ।

अतएव द्वितीयस्कन्धे 'अन्वयव्यतिरेकाभ्याम्' इत्यस्य सुबोधिन्यां अभिन्ननिमित्तोपादानं जगत् ब्रह्मकारणकं इत्युक्तं भवतीत्युक्तम् । तदिदं लोकाप्रसिद्धमिति चिन्त्यते समवायश्च तादात्म्यं न तु वैशेषिकमतप्रतिपन्नमिति द्वितीयाध्याये समवायदूषणावसरे व्युत्पाद्यं, तच्च कृत्स्नस्यांशस्य वा, अंशस्येति सिद्धान्तः । तथा च 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' इतिश्रुतिव्याकोपः । मैवं 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इत्याशङ्क्य 'श्रुतेस्तु शब्दमूलत्वात्' इति भगवता व्यासेनैव तन्निराकरणात् । अत एव । अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ इति स्मृतिः । तस्य निमित्तत्वं दुष्टूपपादम् । समवाय्यसमवायिभिन्नत्वे सति कारणत्वस्य तल्लक्षणत्वात् । नैतत् निमित्तकारणलक्षणस्यैकांशेन समवायिन्यविरुद्धत्वात् । अवयवभेदस्यावयविनि सत्त्वात् । तथा चैषा प्रक्रिया । ब्रह्माविकृतमेवैकांशेन समवायि, दृष्टान्ताभावो भूषणाय 'न तत्समः' इति श्रुतेः धेनुविशेषवद्वा, तदेव प्रकृतिरूपं, क्वचित्कालरूपं स्वांशमुपादानं करोति । प्रमाणं तु पूर्वमुक्तम् । उपादानं च द्विविधम् । परिणाम्युपादानं विवर्तोपादानं च । तत्राद्यं स्वसमानसत्ताकं कार्याकारेणाविर्भवति । उपादानसमसत्ताकोऽन्यथाभावः परिणामः । स च विकृताविकृतभेदेन । द्विविधः । तत्राद्यो यथा मृदो घटशरावादिः । द्वितीयस्तु यथा सुवर्णस्य कटककुण्डलादिः । विवर्तस्तूपादानविषमसत्ताकोन्यथाभावः । यथा रजतादिरूपेण बुद्धेः स्यानं । यद्यपि समवायिकारणभिन्नं यत्कारणं तन्निमित्तकारणम् । असमवायि कारणस्यातिरिक्तकारणताकल्पने प्रयोजनाभावात् । कारणसामग्र्यामन्तर्भाव इत्युक्तं तत्तथैव एतदुक्तमाचार्यचरणैः 'प्रपञ्चो भगवत्कार्यस्तद्रूपो माययाभवत्' इति शास्त्रार्थप्रकरणे । तथाच शरीरि, प्रसिद्धकर्तृत्वात् कुलालवदिति साकारत्वसिद्धिः । पृथ्वी जलं शोषयति तेजः पिबतीत्यादि कर्तृत्ववारणाय प्रसिद्धेति हेतुविशेषणम् । अन्यद्विद्वन्मण्डने स्फुटम् ।

इति तृतीयं समन्वयाधिकरणम् ॥ ३ ॥

इति श्रीविट्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायजित्पौत्रेण संपूर्णवेत्रा विट्ठलरायजिद्भ्रात्रीयगोकुलोत्सवात्मजगोपेश्वरजिता कृते भाष्यप्रकाशस्य रश्मौ प्रथमाध्याये प्रथमपादस्यादिम त्रिसूत्री रश्मिः संपूर्णतामगमत् ॥

श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसंपूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिच्चरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

प्रथमाध्यायप्रथमपादस्येक्षत्यधिकरणमारभ्य पादसमाप्त्यन्तो
द्वितीयो भागः

'भगवद्धर्मपरायणसद्व्रतश्रेष्ठिगोवर्धनदास सुन्दरदास' इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतः 'प्राप्तभगवत्पद-
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एलएल. बी.,
वकील, हाइकोर्ट' इत्येतेषां सुहृद्भिः
संशोध्य 'निर्णयसागर' मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४५८. संवत् १९९२,

श्रीकृष्णप्रादुर्भावोत्सवः

मूल्यं रूपकत्रयम् ।

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya Sagar' Press,
26-28, Kolbhat Street, Bombay 2.

Published by Dhirajlal Vrajdas Sanklia, B. A., LL. B., Advocate
at Khakhar Building, C. P. Tank, Bombay 4.

श्रीकृष्णाय नमः ।
श्रीगोपीजनवल्लभाय नमः ।
श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

अथ प्रथमोऽध्यायः ।

एवं ब्रह्मजिज्ञासां प्रतिज्ञाय किं लक्षणकं ब्रह्मेत्याकाङ्क्षायां जन्मादिसूत्रद्वयेन वेदप्रमाणकं जगत्कर्तृ समवायि चेत्युक्तम् । एवं त्रिसूत्र्या जिज्ञासालक्षणविचारकर्तव्यता सिद्धा ।

भाष्यप्रकाशः ।

अतः परं प्रस्तोष्यमाणग्रन्थावतरणाय पूर्वोक्तस्य शास्त्रार्थसंग्रहरूपत्वं बोधयन्तः तदर्थमनुवदन्ति **एवं ब्रह्मेत्यादि** । तेन सिद्धमाहुः **एवं त्रिसूत्र्येत्यादि** । कर्तव्यतापदस्य जिज्ञासादिपदैः प्रत्येकं संबन्धः । **सिद्धेति** सूचिता । तथाच पूर्वसूत्रे जिज्ञासापदमहिम्ना ज्ञाने-

रश्मिः ।

अतः परं चिद्रूपेऽव्याप्तिवारकं प्रकृतिपरमाण्वादावतिव्याप्तिवारकं च सप्तसूत्रमीक्षत्यधिकरणभाष्यमाक्षेपसंगत्या पूर्वमवतारयन्ति **अतः परमित्यादि** । संगतिस्तु पूर्वपक्षभाष्ये स्फुटिष्यति 'क्रियाशक्तिज्ञानशक्ती संदिह्येते परस्थिते' इति भाष्यकारिकाया ज्ञानशक्तिसंदेहोत्र । **त्रिसूत्र्येति** । करणत्वबोधकतृतीयानुरोधादत्र द्वन्द्व इति सूचयन्त आहुः **कर्तव्यतेत्यादि** । **प्रत्येकमित्यादि** । द्वन्द्वान्ते श्रूयमाणत्वादिति भावः । जिज्ञासासूत्रे कर्तव्यपदानध्याहाराज्जन्मादिसूत्रे च लक्षणपदानुक्तेः समन्वयसूत्रेपि कारणविशेषविचारानुक्तेराहुः **सूचितेति** । सूचकपदेन सिद्धेत्यर्थः । साचेयं नार्थव्यञ्जना किंतु शब्दव्यञ्जनेत्याहुस्तथाचेत्यादि । **जिज्ञासापदमहिम्नेति** । अयमर्थः । यथा—

'भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत्' । इत्यत्र

भद्रात्मनोऽनाक्रमणीयमूर्तेः, विस्तीर्णे वंशे कुले उन्नतिरभ्युदयो यस्य, कृतः शरसंग्रहो येन, अनुपप्लुता मण्डूकवद्गतिर्यस्य, वैरिनिवारकस्य, एतादृशस्य यस्य राज्ञो हस्तः सततं दानोदकसेकसुन्दरोऽभूदिति मुख्यो वाच्योर्थः । इदानीं व्यङ्ग्योर्थः । अत्युच्चतयाऽनाक्रमणीयस्य, विशाला पृष्ठवंशस्योन्नतिर्यस्मिन्, कृतभ्रमरसंग्रहस्य, अनुपप्लुतगतेः, एवंविधस्य परवारणस्य, पर उत्कृष्टो वारणस्तस्य, हस्तः शुण्डादण्डः, मदोदकसेकसुभगोभूदिति । अत्र व्यञ्जनया गजप्रतीतिः । राज्ञो वाच्यत्वस्य प्रकरणनियतत्वात् उक्तव्यञ्जनाद्वारा व्यञ्जकशब्दं लक्षयति । शब्दस्यार्थविशेषयुक्तस्य व्यञ्जकत्वादर्थोपि सहकारित्वेन व्यञ्जको बोध्यः । तद्वत्प्रकृतेपि । तथाहि ।

तत्र ब्रह्मणि चतुर्धा विचारः। स्वरूपसाधनफलप्रतिपादकानि वेदान्तवाक्यानि त्रिविधानि मतान्तरनिराकरणं च । तत्र स्वरूपे विचारिते मतान्तरनिरासव्यतिरेकेण साधनफलयोरनुपयोगात् । अतः प्रथमं स्वरूपनिर्णयः । तदनु मतान्तरनिरासः । तदनु साधनानि फलं चेति । तत्र प्रथमेऽध्याये स्वरूपवाक्यानि विचार्यन्ते। तानि द्विविधानि। संदिग्धानि, निःसंदिग्धानि च। तत्र निःसंदिग्धानां निर्णयो न वक्तव्यः। संदिग्धानि पुनश्चतुर्विधानि । कार्यप्रतिपादकान्यन्तर्यामिप्रतिपादकान्युपास्यरूपप्रतिपादकानि प्रकीर्णकानि चेति। तत्र प्रथमपादे कार्यवाक्यानां निर्णय उच्यते। सच्चिदानन्द-

---

भाष्यप्रकाशः।

च्छासारणेन, 'अविज्ञातं विजानतां विज्ञातमविजानताम्' इति ब्रह्मस्वरूपमर्यादाबोधनाद् ब्रह्मज्ञानोत्तरमपि तस्याः करणावश्यकता सूचिता । द्वितीये स्वरूपलक्षणमनुक्त्वैव कार्यलक्षणकथनेन तस्य गौणत्वनिवारणात् तत्करणावश्यकता सूचिता। तृतीये समवायित्वनिर्णायकहेतुकथनेन विरुद्धधर्माश्रयत्वबोधनाद् विचारकरणावश्यकता च सूचितेति त्रिसूत्र्युक्त एवार्थोऽग्रे विशेषाकारेण बोधनीय इत्यर्थः। तमेव वैशेषिकं बोधयितुं प्रकारमाहुः तत्र ब्रह्मणीत्यादि । अत्राध्यायार्थक्रमनियमे तत्तदुपजीव्योपजीवकभावं हेतुत्वेनाहुः तत्र स्वरूप इत्यादि । तथाचैवं चतुर्धा विचारः शास्त्रार्थः । तत्तद्विधाविचारस्तत्तदध्यायार्थ इत्यर्थः। प्रथमाध्यायस्य विशेषाकारेणार्थमाहुः तत्र प्रथम इत्यादि । निःसंदिग्धानीति 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्म' इत्यादीनि। न वक्तव्य इति निर्णयस्य संदेहनिरासार्थत्वात् तेषु च तस्याभावान्न वक्तव्यः । तथाच स्वरूपनिरूपकत्वेऽपि संदेहाजनकत्वादेव तद्विचारो व्यासेन न क्रियत इत्यर्थः । पादसंख्यायां हेतुभूतां विधामाहुः संदिग्धानीत्यादि । प्रथमपादार्थमाहुः तत्रेत्यादि । निर्णेतव्यानां वाक्यानां विधां वदन्ति सच्चिदित्यादि । सच्चिदानन्दरूपेण कारणं निर्दिश्य कार्यप्रतिपादकानि, आकाशवायुतेजोवाचक-

रश्मिः।

'संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः' ॥ इति ।

संयोगादयो विशेषस्मृतिहेतव उक्तास्तत्र जिज्ञासासूत्रे ब्रह्मपदसांनिध्येन विचारस्य वाच्यत्वे नियमिते ज्ञानेच्छाकरणावश्यकताव्यञ्जकः शब्दो लाक्षणिकस्तस्य व्यङ्ग्योर्थस्तत्करणावश्यकतारूप इत्यर्थः। 'ज्ञानी चेद्भजते कृष्णम्' इति वाक्यात्। नैयायिकास्तु लक्षणयैव निर्वाहयन्ति । विजानतामिति इदमित्थतयाऽस्माभिर्ब्रह्म ज्ञातमित्यभिमानवतामित्यर्थः । अविजानतामिति तादृशाभिमानशून्यानामित्यर्थः । करणेत्यादि। जन्मादिसूत्रेषु ज्ञानेच्छाधिकारादर्शनात् व्यङ्ग्येर्थे विवक्षिते कर्तव्यपदस्यार्थस्य वाध्याहार इति भावः। कर्तव्यपदप्रत्ययार्थत्वेन तदैवावश्यकत्वाप्रतीतेः। भाष्ये कर्तव्यतापदान्न व्यङ्ग्येर्थेधिकारक्रियानन्वयो दोषाय। तस्येति जन्मादिकर्तृत्वस्य निर्वाहकसंगत्या निरूपणेनेत्यर्थः। वैशेषिकमिति विशेषेण संसृष्टमित्यर्थः। 'संसृष्टे' इति सूत्रेण ठक्। तस्येति

भाष्यप्रकाशः ।

शब्देन कारणं निर्दिश्य कार्यप्रतिपादकानीत्येवं षड्विधान्याद्ये पादे निर्णीयन्त इत्यर्थः । नन्वन्यवाचकैः शब्दैः कुतो निर्देश इति शङ्कानिरासायाहुः अन्यत्रेत्यादि । तथाच तेषां नैसर्गिकशक्तिबोधनेन भूताकाशादिषु ब्रह्मलक्षणस्यातिव्याप्तिपरिहारायैवं निर्देश इति बोधयितुमयं निर्णय इत्यर्थः । एवमुपोद्घातेनार्थकथनादिदं बोधितम् । विचारस्य शास्त्रार्थत्वाज्जिज्ञासासूत्रस्य सर्वत्र विषयिविषयभावः संगतिः । शास्त्रस्याध्यायेषु तेषां स्वपादादिषु पादानां स्वावयवेषु सामान्यविशेषभावः । अधिकरणानां परस्परमन्यान्या एव संगतय उन्नेया इति । संगतिस्त्वनन्तराभिधानप्रयोजकाकाङ्क्षाजनकज्ञानविषयोऽर्थः । इदं वाक्यमेतद्वाक्यानन्तरं कस्मादुक्तमीदृशी या जिज्ञासा सा अनन्तराभिधानप्रयोजकाकाङ्क्षा । तज्जनकं तत्स्वरूपयोगि यज्ज्ञानं तत्र विषयत्वेन योऽर्थः प्रकाशते सोऽर्थः संगतिशब्दवाच्यः । तद्भेदाश्च षट् ।

'सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा ।
निर्वाहकैककार्यत्वे षोढा संगतिरिष्यते' ॥

रश्मिः ।

संदेहस्येत्यर्थः । **तेषामित्यादि** आकाशादिपदानां नैसर्गिकशक्तेर्ब्रह्मणि बोधनेनेत्यर्थः । **स्वावयवेष्विति** अधिकरणेष्वित्यर्थः । **अन्यान्या** इति तत्तदधिकरणे वक्तव्याः । आनन्तर्यपदघटितत्वं दीधितिकृतोपगतं संगतिलक्षणस्य तथापि गदाधर्यां चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञमभिधायोत्तरार्धत्वमात्रं व्याख्यातमिति तदाहुः **अनन्तरेत्यादि** । विश्लिष्यावयवानर्थमाहुः **इदमित्यादि** । यथा प्रत्यक्षनिरूपकवाक्यनिरूपणानन्तरमनुमाननिरूपकवाक्योक्तिस्तत्रानुमाननिरूपकमिदं वाक्यं प्रत्यक्षनिरूपकवाक्यानन्तरं कस्मादुक्तमीदृश्या अनन्तराभिधानहेतुविषयकं यज्ज्ञानं तद्विषयिणी या इच्छा तद्रूपाया जिज्ञासायाः स्वरूपं ज्ञानेच्छारूपं तत्रोपयोगिज्ञानपूर्वकत्वेन कार्यत्वमनुमानमिति तन्निरूपकवाक्ययुक्तमित्येवमुपयोगि यज्ज्ञानं कार्यत्वत्वेनोपस्थितं कार्यत्वं तद्विषयज्ञानं तत्र विषयत्वेन ज्ञाननिरूपितविषयतावच्छेदकविशेषात्मकेन कार्यत्वत्वेन प्रकाशमानस्य धर्मस्योपजीव्योपजीवकत्वस्य संगतित्वमिति । एवं कारणत्वस्यापि न तु कारणत्वस्यैव । अत्र प्रत्यक्षोपजीवकज्ञानमुपजीवकत्वत्वेनोपस्थितोपजीवकत्वसामान्यप्रकारेण ततः कार्यविशेषान्वेषणनिवृत्तिस्त्वनन्तरमनुमानपददर्शनात् । एवं हि स्वरूपोपयोगः स्यात् । अनुमाननिरूपकमिदं वाक्यं प्रत्यक्षनिरूपकवाक्यानन्तरं कस्मादुक्तमिति पूर्वोक्तजिज्ञासायां ततश्चानुमानं प्रत्यक्षस्य कार्यत्वात्तदनन्तरमुक्तम् । इति विशेषावधृतिरिति । इयं च जिज्ञासा व्याख्यातुरेव न तु निरूपयितुः । निरूपयितुरपि वा ग्रन्थकरणानन्तरं मया कस्मादुक्तमिति जिज्ञासासंभवात् न च निरूपितप्रत्यक्षानुमानयोः संभवतीयम् । उक्तमिति क्तान्तपदघटितत्वादिह त्वनुमानस्य निरूपयिष्यमाणत्वादिति वाच्यम् । तत्कालीनप्रत्यक्षानुमानयोर्निरूपयितुरपि वा ग्रन्थकरणानन्तरं मया कस्मादुक्तमिदं स्यादिति जिज्ञासासंभवात् । वस्तुतस्तु 'धातुसंबन्धे प्रत्ययाः' इति सूत्रेण भविष्यत्काले लुङ् स्यादित्यध्याहारः । मनोरमायां विशेषानुलेखात् तथाप्युदाहरणानुरोधेन श्रूयमाणतिङन्तस्थले एव सूत्रप्रवृत्तिस्तदा तु उक्तमित्यत्र वचनीयं स्यादिति वक्तव्यम् ।

१. ज्ञानेच्छा जिज्ञासा, ज्ञानं यद्यपि हेतुरूपविषयेण पूरितं तथापि विशेषहेतुना न पूरितमिति इच्छाविषयज्ञानविषयत्वेनेत्यर्थः । २. हेतुविशेषादयं विषयविधया हेतुः ।

रश्मिः।

बुद्धिस्थं यद्विचारितं तत्पर्यायोक्तमिति । वस्तुतस्तु अस्य वाक्यस्यैतद्वाक्यानन्तरं निरूपणे को हेतुः स्यादित्येव जिज्ञासा । एवं चानुमानस्येत्यस्य स्पष्टप्रतिपत्तिप्रयोजनकतया तत्रोपयोगिज्ञानागोचरत्वम् । तथा ज्ञानविषयेत्यत्र हेतुभिन्नेति वक्तव्यत्वेन नेत्यर्थस्य हेतोर्गोचरत्वमिति कार्यत्वस्य संगतित्वमित्यपि न । कार्यत्वमनुमानस्येत्यत्र कार्यत्वमित्येतावतैव जिज्ञासापूर्तेरिति ध्येयम् । सामान्यहेतोर्विशेषकार्यत्वरूपहेतुत्वादित्यपि ध्येयम् । तथा तज्जनकमित्यस्य कार्यज्ञानमिष्टसाधनमिति ज्ञानमिति विवरणं **गदाधरभट्टकृतम्** । कारणस्य कार्यमावश्यकमिति कार्यत्वरूपेण कार्यसामान्यज्ञानमिति विवरणं **भवानन्दरामनाथकृतम्** । तत्र गदाधरकृतव्याख्यानेभिधातुः पूर्वोक्तं ज्ञानं संभावितं न तु निश्चितं दीधितिकृतानुल्लेखात् । अस्मदुक्तज्ञानजिज्ञासयोरपि संभवाच्च विषयताविशेषस्य विवक्षा चेति दूषणद्वयम् । इतरयोस्तु शिष्यस्य प्रतिभाविरहेण तद्विरहेण च शिष्यज्ञानयोर्वक्तुमशक्यतया ज्ञाने व्याख्यातुरभिधातुर्वा ग्राह्येते संभाविते न अपि तु निश्चिते दीधितिकृतोल्लेखात् । अतस्तज्जनकं तत्रोपयोगीति व्याख्यातम् । तथा तत्रोपयोगिज्ञाननिरूपितविषयतावच्छेदकं कार्यत्वत्वोपस्थितकार्यत्वावच्छिन्नकार्यानुमाननिरूपकवाक्यवद्यद्यपि वक्तुं शक्यते तथापि कार्यत्वं कण्ठरवेणोक्तं झटिति बुद्धावारोहति । एवं च उपयोगिज्ञाननिरूपितविषयतावच्छेदकं कार्यत्वत्वमिति ज्ञेयम् । गदाधरभट्टास्तु प्रत्यक्षानन्तरमस्य किमुपजीवकमित्यादिजिज्ञासां प्रति उपजीवकत्वादिज्ञानं हेतुरित्यनुमानस्य प्रत्यक्षानन्तरमभिधाने प्रयोजिका किमस्योपजीवकमिति जिज्ञासा तज्जनकं कार्यज्ञानमिष्टसाधनमिति उपजीवकत्वविषयकज्ञानं तद्विषयत्वमुपजीवकत्व इति लक्षणसंगतिः । एवमुपजीव्येपि बोध्यम् । तथा च कारणत्वस्य कार्यत्वस्य च संगतित्वं न तु कार्यत्वस्यैव जनकज्ञानविषयेत्यनेन जनकीभूतेष्टसाधनताज्ञानीयज्ञाननिष्ठविशेष्यतायां विषयतासंबन्धेन यदवच्छेदकत्वं तन्निरूपितावच्छेदकतात्मकविषयताविशेषस्य विवक्षितत्वात् । न ज्ञाननिष्ठेष्टसाधनत्वेतिव्याप्तिर्भवति चोपजीवकज्ञानमिष्टसाधनमित्यत्रेष्टसाधनताज्ञानैकदेशज्ञाने या विशेष्यता उपजीवकत्वप्रकारकज्ञाननिष्ठेष्टसाधनताविषयकं ज्ञानमिति बोधात् । तादृश्यां विशेष्यतायां विषयितासंबन्धेन यदवच्छेदकत्वं इष्टसाधनतावच्छेदकत्वं इष्टसाधनतानिष्ठविषयता निरूपिता तद्द्वारा विषयितासंबन्धेन विशेष्यतायाः इष्टसाधने सत्त्वात् तादृशेष्टसाधनतानिरूपितमवच्छेदकत्वमुपजीवकत्वे इष्टसाधनताधिकरणे ज्ञाने विषयतासंबन्धेनोपजीवकत्वस्य सत्त्वात्तदात्मकस्य विषयताविशेषस्योपजीवकत्व एव सत्त्वादतिव्याप्तिवारणम् । **भवानन्दभट्टास्तु** प्रत्यक्षस्य कारणत्वज्ञाने कारणस्य कार्यमावश्यकमिति क्रमेण कार्यस्वरूपेण कार्यसामान्यज्ञानं ततः सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वात् किमस्य कार्यमित्याकारिका शिष्यजिज्ञासा, ततः शिष्यस्य किमस्य कार्यमिति शब्दप्रयोगः, ततः शिष्यजिज्ञासाज्ञानं गुरोः, तत इष्टसाधनताज्ञानेनानन्तराभिधानमिति क्रमेण जिज्ञासायामनन्तराभिधानप्रयोजकत्वमिति वदन्ति । **रामनाथस्तु** आनन्तर्याभिधानप्रयोजकशिष्यज्ञानगोचरतदिच्छाजनकीभूतशिष्यज्ञानविषयत्वमेव संगतिरित्याह । प्रत्यक्षनिरूपणानन्तरं कारणस्य कार्यमावश्यकमिति शिष्यस्य कार्यत्वसामान्यज्ञानं ततश्च किमस्य कार्यमिति शिष्यजिज्ञासायां गुरुणानुमानाभिधानं क्रियते इति शिष्यज्ञानजिज्ञासे अनुमानाभिधानावसरे शिष्यजिज्ञा-

१. क्रान्तपदारुच्याह ।

रूपेणाकाशवायुतेजोवाचकवाक्यानि षड्विधान्यपि निर्णीयन्ते । अन्यत्रान्यवाचकान्यपि वेदान्तेषु भगवद्वाचकानीति।

रश्मिः।

सायाः प्रतिभाविरहेण तद्विरहेण च वक्तुमशक्यतया जिज्ञासा चानन्तराभिधातुरेवेति **गदाधराः**। घटत्वादिप्रत्यक्षेण को घट इति जिज्ञासोदयात् घटत्वादौ प्रत्यक्षसंगतित्ववारणाय प्रयोजकान्तम्। नन्वेवमपि न निस्तारः। प्रत्यक्षादौ निरूपिते स्वसामग्रीवशात्[1] को घट इति कस्यचिज्जिज्ञासया केनचिद् घटो निरूपितः तादृशनिरूपणप्रयोजकतथाविधजिज्ञासामादाय, घटत्वादावपि प्रत्यक्षादिसंगतित्वप्रसक्तेः प्रयोजकान्तमुपादायाप्यशक्यवारणत्वात्। अथ तत्र घटत्वादेः संगतित्वमिष्टमेव प्रसङ्गमध्ये तस्यान्तर्भावनीयत्वाच्च। अन्यथा तादृशनिरूपणं संगत्यभावेनाबद्धप्रलापः स्यात्। आकाङ्क्षिताभिधाने तु स न स्यादिति। एवं च घटत्वादीनां लक्ष्यत्वेन प्रयोजकान्तमनर्थकमित्युच्यते तदा तु यन्निरूपणानन्तरं कदाचिदपि कस्यचिद्धर्मस्यावान्तरधर्मप्रकारकज्ञानेच्छा न जायते अपि तु कालान्तरे जायते, तदा तस्य तत्संगतित्ववारणाय प्रयोजकान्तोपादानात्। न च तादृशधर्म एव दुर्लभः। तादृशधर्मसंभावनयातिव्याप्तिसंदेहेनातिव्याप्तिवारकविशेषणदानौचित्यात्। यद्वा यन्निरूपणानन्तरं यद्धर्मावच्छिन्नस्य यस्य पुंसो विशेषजिज्ञासा न जाता अपि त्वन्याभिधानानन्तरमेव, तद्धर्मस्य तं प्रति तत्संगतित्ववारणाय[2] प्रयोजकान्तमुपादेयम्। अस्तु तर्ह्यनन्तराभिधानप्रयोजकज्ञानविषयत्वं सा प्रयोजकजिज्ञासाजनकेत्यधिकं मैवं पटादिकं निरूप्य प्रतिपाद्यस्य जिज्ञासामन्तरेणैव यत्रासंबद्धघटाद्यभिधानं कृतं केनचित् तत्रास्य घटज्ञानं भवत्वित्याकारकेच्छाजनकीभूतं वक्तृघटादिज्ञानं तद्विषयघटत्वादावतिप्रसङ्गः। घटविषयकज्ञानस्यापि घटादिबुबोधयिषाद्वारा पटाद्यभिधानानन्तरं घटाद्यभिधानप्रयोजकत्वादतो जनकान्तरमप्युपादेयम्।

न चैवमपि पटघटादिनिरूपणोत्तरं घटसंबन्धेन दण्डादिस्मरणे को दण्ड इत्यादिजिज्ञासया दण्डादिनिरूपणं तत्र तादृशजिज्ञासाजनकज्ञानविषयस्य पटनिरूपितसंगतित्वापत्तिरिति वाच्यम्। यदभिधानानन्तराभिधानप्रयोजकजिज्ञासायां तदभिधानप्रयोज्यत्वस्य निवेशनीयत्वादिति पदकृत्यं **गदाधर्याम्**। निवेशप्रकारस्तु यदभिधानानन्तराभिधानप्रयोजनकतदभिधानाप्रयोज्यजिज्ञासाजनकज्ञानविषयोर्थः संगतिरिति बोध्यः। पटाभिधानानन्तरं दण्डादिनिरूपणाभावान्न पटनिरूपितसंगतित्वं दण्डादिनिरूपणे अस्य लाघवाय जिज्ञासा निरूपिता ज्ञानमिष्टविषयतावच्छेदकत्वविशेषः संगतिर्लाघवात्। भवति च जिज्ञासा तत्स्वरूपैकदेशभूतेच्छा तन्निरूपिता या तद्द्वितीयदलज्ञाननिष्ठायोग्यता तदवच्छेदकमनुमानं विषयविधया तत्ता चानुमाने तदवच्छेदकमनुमानत्वमपि परंत्ववच्छेदकत्वविशेषः कार्यत्वमिति लक्षणसमन्वयः। जिज्ञासा चात्र किमनुमानं कार्यभूतमित्येव विचारः। तादृशजिज्ञासयैवानुमाननिरूपणादिति स्थितं गदाधर्याम्। **गदाधरव्याख्यानमनुवदन्ति तत्रेत्यादि**। स्मृतस्य पूर्वाभिहितवस्तुसंबन्धेन स्मृतस्योपेक्षानर्हत्वम्। विरोधो नञर्थः। द्वेष्यज्ञानविषयता चोपेक्षार्हत्वम्। एवं च द्वेष्यज्ञानविषयताविरोधि यद्रूपं तत्, जिज्ञासाविषयतावच्छेदकरूपमिति[3] यावत्। स्मृतस्येत्यभिधानं जिज्ञासाया आनन्तर्याभिधानप्रयोजकत्वलाभाय। उपोद्घातादिपञ्चकभिन्नत्वे सतीति पूरणीयम्। तथाचोपोद्घातादिपञ्चकभिन्नसंगतिः प्रसङ्ग इति पर्यवसितार्थः। तेनाधेयत्वाधिकरणत्वघटत्वादीनामत्रैवान्तर्भावः। उपेक्षान-

१. चक्षुःसन्निकर्षादिसामग्रीवशात्। २. जिज्ञासाया अजनकीभूतो यच्छब्दार्थः तत्संगतित्वेत्यर्थः। ३. वक्ष्यमाणा।

भाष्यप्रकाशः।

इत्यभियुक्तोक्तेः। तत्र स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः। प्रकृतार्थसाधकत्वमुपोद्घातः। उपजीव्योपजीवकभावो हेतुता। सा सापेक्षत्वादुभयसंग्राहिका। प्रतिबन्धकीभूतजिज्ञासा-निवृत्ताववश्यवक्तव्यत्वमवसरः। निर्वाहप्रयोजकता निर्वाहकत्वम्। एकजातीयकार्यजनकत्वमेक-

रश्मिः।

र्हत्वं च विभाजकमात्रमतस्तादृशधर्माणां मुमुक्षानर्हत्वादिरूपाणां निरूपणप्रयोजकजिज्ञासाविषय-तावच्छेदकत्वविरहेपि न क्षतिः। उदाहरणं त्वाधारनिरूपणेन स्मृतस्याधेयस्योपेक्षानर्हत्वज्ञानेन किमाधेयमिति जिज्ञासयाधेयनिरूपणमिति। **प्रकृतार्थेत्यादि**। तदुक्तं 'चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः' इति। प्रकृतसिद्ध्यर्थां प्रकृतोपपादकत्वविषयिणीं किमस्योपपादकमिति चिन्तामुपोद्घातसंगतित्वनिर्वाहिकां विदुरित्यर्थः। तादृशजिज्ञासामादायैवोपोद्घातत्वे लक्षणसमन्वयात्। अर्थसाधकत्वं च उपपादकत्वं तच्च निर्वाहकत्वं तच्च क्वचित् तद्घटकतया क्वचित्तदघटकतयेति। तत्राद्यं विशिष्टपरामर्शत्वस्यानुमितिजनकतावच्छेदकत्वं परामृश्यमानलिङ्गलिङ्गपरामर्शान्यतरव्यापारकज्ञानकरणकं ज्ञानमनुमितिरित्यनुमितिलक्षणघटकतयानुमितिलक्षणोपपादकम्। परामर्शज्ञानेन विना परामर्शघटितलक्षणानिर्वाहादिति परामर्शव्यवस्थापने उपोद्घातः संगतिः। द्वितीयं तु सामान्यप्रत्यासत्तेरनुमितिपूर्वं नियमतो विशिष्टपरामर्शनिर्वाहकतया विशिष्टपरामर्शत्वावच्छिन्ना यानुमितिकारणता तन्निर्वाहकत्वादेव परामर्शघटितानुमितिलक्षणोपपादकत्वं न त्वनुमितिलक्षणघटकतयेति द्विविधमुपपादकत्वम्। **उपजीव्येत्यादि** इयं विवेचिता। ननु कार्यत्वं षोढात्वं व्याहनिष्यतीत्याकाङ्क्षायां हेतुतापदमजहत्स्वार्थवृत्त्या कार्यत्वकारणत्वोभयसाधारणेन केनचिद्रूपेण तदुभयपरमिति नाधिक्यमित्यनुवदन्ति **सा सापेक्षेत्यादि**। **प्रतिबन्धकीत्यादि**। अत्र किमिदानीं वक्तव्यमिति जिज्ञासाजनकज्ञानविषयत्वमादाय लक्षणसमन्वयः। यद्यपि तादृशजिज्ञासाविषयतायां जिज्ञासानिवृत्तिघटितं नावच्छेदकमिति तेन रूपेण संगतित्वं नास्ति अपि तु निवृत्त्युपलक्षिततत्कालवक्तव्यत्वरूपेणैव तथापि न क्षतिः। यादृशस्य संगतित्वं तादृशस्यैव विभाजकत्वमित्यनियमात्। जिज्ञासानिवृत्तेर्विभाजकधर्माघटकत्वे बाधकाभावादिति। इयं च प्रत्यक्षोत्तरोपमाने संगतिः। अत्र प्रतिबन्धकीभूतानुमान जिज्ञासा किमनुमानमिति तस्या अनुमाने उपमानापेक्षया प्राथमिकजिज्ञासाविषयत्वप्रयोजकबहुवादिसंमतत्वकथनेन नानुमाननिरूपणाद्विषयसिद्ध्यानिवृत्तौ सत्यामुपमानमवश्यं वक्तव्यमिति जिज्ञासया किमिदानीं वक्तव्यमिति जिज्ञासया वोपमाननिरूपणात्। **निर्वाहेत्यादि**। उदाहरणं तु व्याप्तिपक्षधर्मतयोर्ज्ञानस्यानुमितिजनकत्वेन तादृशव्याप्तिनिरूपणानन्तरं किमनुमितिनिर्वाहप्रयोजकमिति जिज्ञासया पक्षधर्मतानिरूपणमिति। पक्षधर्मताज्ञानं कारणमिति पक्षधर्मता निर्वाहप्रयोजिका। **एकजातीयेत्यादि**। उदाहरणं तु अनुमानस्येश्वरसिद्ध्यपवर्गयोः संगतिरत्रैकजातीयं येन केनापि धर्मेणेश्वरसिद्ध्यपवर्गाख्यं कार्यं तज्जनकत्वमनुमान इति। सामान्यत एकजातीयानेककार्यजनकत्वज्ञाने ईश्वरसिद्ध्यनन्तरं किमन्यकार्यजनकत्वमिति जिज्ञासयापवर्गरूपकार्यनिरूपणात् सामान्यलक्षणसमन्वयः। **भवानन्दभट्टैस्तु** नैयायिकेनेश्वरसिद्ध्यनन्तरं शक्तिं निरस्य परमप्रयोजनं त्वनुमानस्यापवर्ग इत्यनेनेश्वरसिद्ध्यपवर्गयोरनुमानजन्यत्वलक्षणैककार्यत्वसंगतिः सूचिता। एकस्य कारणकार्यतायाः तदर्थ-

१. विशिष्टे बाधितो विधिर्विशेषणमुपसंक्रामति शिखी न इतिवत्। एवं चोपमाननिष्ठवक्तव्यत्वे संगतित्वम्।

भाष्यप्रकाशः ।

कार्यत्वम् । इदं च संगत्यभिधानमात्रोपयोगित्वात् स्वरूपकथनमात्रम् । लक्षणं तु प्रसङ्गाद्य-न्यतमत्वमेव । तेन पूर्वस्येष्टसाधनत्वाधाराधेयभावादावव्याप्तावपि न दोष इति नैयायिका

रश्मिः ।

त्वादित्युक्तम् । इदानीं भवानन्दोक्तमनुवदन्ति **इदं चेत्यादि** । विभाजकं चेत्यर्थः । सामान्यलक्षणं चेति वार्थः । लक्षणफलमनुवदन्ति **तेन पूर्वस्येत्यादि** । **इष्टसाधनत्वेति** इदं त्विह वक्तव्यं इष्टसाधनत्वस्य कार्यकारणभावात्मकत्वं कैश्चित्स्वीकृतं तन्मतं भवानन्द्यादावनू-दितं तत्राव्याप्तिः । नैयायिकैस्तत्र संगतित्वानङ्गीकारात् । **नैयायिका** इति अस्य 'ऋतू-कथादिसूत्रान्ताद् ठक्' इति ठकि नैयायिका इत्येव । अतः परं पूर्वोक्तं संगतिसामान्यलक्ष-णमुपजीवकत्वे न संभवति किं प्रत्यक्षोपजीवकमिति जिज्ञासयानुमाननिरूपणाभावात् । अपि तु किमनुमानमिति जिज्ञासयैव निरूपणं तस्य । इयं च जिज्ञासानिरूपयितुः अनुमाननिरू-पणात्पूर्वं संभवात् । या तु प्रत्यक्षग्रन्थानन्तरं मया कस्मादुक्तमिदमिति पूर्वोक्ता जिज्ञासा सा-नुमाननिरूपणानन्तरं निरूपयितुर्विचारसामयिकी । नचात्र किं मानमिति वाच्यम् । अनुमान-त्वरूपलक्ष्यतावच्छेदकविशिष्टे लक्षणप्रतिपादकस्य तत्करणमनुमानमित्युत्तरस्य संगतेरेव मानत्वात् । अन्यथा पूर्वोक्तजिज्ञासास्वीकारे तु यद्धर्मप्रकारकयद्विषयिणी जिज्ञासा तद्धर्मावच्छिन्नतदुद्देश्यकं लक्षणादिनिरूपणमिति नियमस्य को घटः कम्बुग्रीवादिमान् घटः इत्यादिषु दर्शनात् उप-जीवकमनुमानमित्युत्तरस्य प्रसङ्गात् । ननु पूर्वोक्तां जिज्ञासां स्वीकृत्योपजीवकपदमध्याहृत्योत्तरस्यो-पजीवकमनुमानं तच्च तत्करणमित्यर्थात् संगतिरिति चेन्न । किं प्रत्यक्षोपजीवकमिति जिज्ञासायाः प्रत्यक्षोपजीवकत्वविशिष्टेऽनुमितिकरणत्वरूपविशेषधर्मबोधकात्तत्करणमित्यादिवाक्यादेव निवृत्तेः । तथा चानन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपसंगतित्वं प्रकृते नोपजीवकत्वे संभवति । किंतु निरूप्यतावच्छेदकेऽनुमानत्वे इत्यनन्तराभिज्ञानप्रयोजकजिज्ञासाजनकनिरूप्यतावच्छेदकधर्मप्रका-रकस्मरणप्रयोजकनिरूप्यनिष्ठसंबन्धः संगतिरित्येव लक्षणं युक्तम् । प्रत्यक्षानुमानपदार्थयोरुपजी-व्योपजीवकभावसंबन्धज्ञानादनुमानपदार्थत्वरूपप्रकृतलक्षणलक्ष्यतावच्छेदकप्रकारेणानुमानस्मरणादनु-मानपदार्थः क इति विशेषजिज्ञासयानुमितिकरणमनुमानपदार्थ इति निरूपणादुपजीवकत्वे संगतित्वनिर्वाहात्[1] । एवं च पूर्वापरनिरूपणविषययोः संबन्ध एव संगतिः । न तु निरूप्यतावच्छे-दक इति । इदं यद्यपि साधीयः संगतमित्यत्र संबद्धमिति व्यवहारात् तथाप्यवश्यवक्तव्य-त्वस्य संबन्धत्वविरहादवसरे व्याप्ततादृशस्थले हेतुतासंबन्धाश्रयणात् । किंच यत्र गां पश्यन् सास्नादिमतीयं गौरिति प्रयुङ्क्ते तत्र संगतेप्यानन्तर्याभिधानाभावादव्याप्तिः । किंच शरीरगौरवं शक्यतावच्छेदकगौरवं च । अपिच[2] जिज्ञासाधिकरणसंगतौ लक्षणस्याप्रवेशः । आनन्तर्याभि-धानघटितत्वात् । अधिकरणस्य प्राथम्येनानन्तराभिहितत्वात् । अन्यच्च प्रतिपत्तिगौरवं चेति मत्वा

१. विशेषणज्ञानस्य कारणत्वादिति भावः । २. पञ्चाङ्गेषु संगतेरपि सत्त्वाजन्मादिसूत्रस्याजातत्वेनानन्तर्याभिधानप्रयो-जकजिज्ञासाभावाल्लक्षणस्याप्रवेशमाहुरपि चेति ।

भाष्यप्रकाशः ।

आहुः । वयं तु, सावधानपुरुषप्रयुज्यमानवाक्यप्रयोजकत्वेन स्मृतस्योपेक्षानर्हत्वमेव संगतिः ।

रश्मिः ।

संगतमित्यत्रोपेक्षानर्हमिति व्यवहारारम्भं वा लक्षणान्तरमाहुः **वयं त्वित्यादि** । इति रोचयामह इति संबन्धः । प्रयुज्यत इति प्रयुज्यमानमुच्चार्यमाणमित्यर्थः । एतादृशवाक्यस्य प्रयोजकं परंपरया कारणं यद्धेतुतादिस्तदवच्छेदकत्वेनानुमानवाक्यत्वादिना स्मृतिविषयोनुमानवाक्यादिः । अवच्छेदकत्वं तृतीयार्थः । उपेक्षानर्हता च क्वचिद्धेतुतया क्वचिदुपोद्घातेनेत्येवं ज्ञेया । तथा च सावधानाभिन्नपुरुषकर्तृकप्रयोगकर्मीभूतवाक्यनिरूपितप्रयोजकतावच्छेदकरूपेण कर्तृनिष्ठस्मृतिनिष्ठविषयितानिरूपितविषयताशालिवाक्यपदान्यतरनिष्ठोपेक्षानर्हत्वं संगतिः । अत्रेदं हृदयम् । सावधानपुरुषप्रयुज्यमानं वाक्यमथातो ब्रह्मजिज्ञासेति तत्प्रयोजकं प्रकृतोपपादकत्वमस्य जातित्वविरहाद्धर्मत्वेन प्रकृतोपपादकरूपत्वात्तत्तावच्छेदकेन ब्रह्मभक्त्यादिविचारप्रतिज्ञावाक्यत्वेन स्मृतस्य ब्रह्मभक्त्यादिविचारप्रतिज्ञावाक्यस्योपेक्षानर्हत्वं संगतिः । बुद्धिंस्थमेव सर्वोपि प्रयुङ्क्त इति दृष्टानुयायिनः । तादृशावच्छेदकस्य संगतित्वविरहात् तत्रातिव्याप्तिवारणाय विशेष्यम् । अनुभवविषयीभूतघटादिसंबन्धेन स्मृतस्य दण्डादेरुपेक्षानर्हत्वं द्वेष्यज्ञानविषयताविरोधिरूपात्मकमिति तत्रातिव्याप्तिः तद्वारणाय विशेषणदलम् । दण्डः संगत इत्यव्यवहाराद्वाक्यधर्म एव संगतिः । प्रयुक्तवाक्यनाशोत्तरं कालान्तरे तदुपपादकत्वेन स्मृतस्योपेक्षानर्हत्वं संगतिः स्यात् तत्रातिव्याप्तिवारणाय प्रयुज्यमाने इति । यदि च तादृशस्थले संगतित्वव्यवहारः प्रामाणिक एव तदा तु स्पष्टप्रतिपत्तिः प्रयोजनं वाक्येत्यादितृतीयानां तूपेक्षानर्हताप्रयोजकस्फूर्त्यै । प्रकृतोपपादकत्वावच्छेदकब्रह्मभक्त्यादिविचारप्रतिज्ञावाक्यत्वादिना वाक्यादिस्फुरणे सत्युपेक्षानर्हता वाक्यादेर्यतः । पुरुष इति तु वक्तव्यमेव योग्यत्वात् । तत्त्वं च जीवेशत्वं तच्च स्त्रीपुरुषसाधारणं तेन स्त्रीप्रयुज्यमानवाक्यप्रयोजकत्वेन स्मृतस्योपेक्षानर्हत्वे नाव्याप्तिः । केनचित्प्रतिष्ठायै पुरुषेण प्रयुज्यमानं वाक्यमानन्तर्यावच्छेदकावच्छेदेन प्रतिपत्स्यमानावच्छेदकमित्याद्यनर्थकं तादृशवाक्यप्रयोजकत्वेनासंबद्धोच्चारणे पदप्रतारणाय यदुपेक्षानर्हत्वं तत्रातिव्याप्तिवारणाय **सावधानेति** । स चानवधानपुरुष इति नासंबद्धेऽतिव्याप्तिः । किं च सावधानेत्यनुक्तौ भ्रान्तपुरुषोपि संगृह्येतेति सावधानेत्यवश्यं वक्तव्यमेव । तर्हि स्मृतस्येत्यवक्तव्यं, वक्तव्यं तत् । सावधानपुरुषप्रयुज्यमानवाक्यप्रयोजकत्वेनाधारत्वेनोपेक्षानर्हत्वस्य कालेपि सत्त्वात् । स्मृतस्येत्युक्ते तु स्मरणविषयत्वविरहात् काले नातिव्याप्तिः तादृशप्रयोजकत्वेन स्मृतत्वमेव संगतिरिति तु न । स्मरणविषयतायां संगतित्वव्यवहाराभावादतिव्याप्तिप्रसङ्गात् । अथवात्र भगवान् व्यासः सर्वमपि ब्रह्मभक्तिविचारं स्मृत्वेदं सूत्रं प्रणिनिनायेति । सावधानपुरुषप्रयुज्यमानवाक्यं 'जन्माद्यस्य यतः' इत्यारभ्य'अनावृत्तिः शब्दात्'इत्यन्तं तत्प्रयोजकत्वेन तदुपपादकत्वेन स्मृतस्य ब्रह्मभक्तिविचारवाक्यस्योपेक्षानर्हत्वं संगतिः । पूर्वत्र तु स्मर्यमाणप्रयुज्यमानयोः वाक्ययोः संगतिरत्र तु प्रयुज्यमानयोरेव । एवं स्मर्यमाणयोरपि ज्ञेया । झटिति बुद्ध्यारोहणेन प्रतिपत्तिगौरवमपि नास्ति ।

१. जन्मादिसूत्रस्याजातत्वेपि बुद्धिस्थत्वात्तदादायानन्तर्याभिधानप्रयोजकजिज्ञासादिसंभवस्य तु 'सिद्धान्तकौमुदीयं विरच्यते' इत्यादौ दृष्टत्वात्तदनुयायिनः ।

भाष्यप्रकाशः ।

हेतुतादयः सर्वे उपेक्षानर्हत्वस्यैव प्रयोजका धर्मास्ते तद्बोधकतया संगतित्वेनोच्यन्ते ।

रश्मिः ।

शक्यतावच्छेदकलाघवं स्फुटम् । शरीरलाघवं च । स्मृतस्योपेक्षानर्हत्वं संगतिरित्यन्यस्य परिष्कारत्वात् । ईश्वरलिखापितं पञ्चम्यन्तम् । यत्र गां पश्यन्नित्याद्युक्तस्थलेपि सावधानपुरुषप्रयुज्यमानं सास्नादिमती गौरियमिति वाक्यं तत्प्रयोजकत्वेन हेतुत्वेन स्मृतस्य वाक्यस्योपेक्षानर्हत्वं संगतिरिति नाव्याप्तिः । अत्र गां पश्यन्नित्यनुभवस्थले गां पश्यामीत्येवं वाक्यं स्मृत्वा स्मर्यमाणोच्चार्यमाणयोर्वाक्ययोः संगतिर्ज्ञेया ! अत्र यद्यप्युच्चार्यमाणवाक्यं संगतमिति प्रतीतेः संगतिरत्रापेक्ष्यते तथापि स्मर्यमाणत्वोच्चार्यमाणत्वमात्राहितभेदावच्छिन्नत्वान्न दोषः । अथवा भारतकरणोत्तरं ब्रह्मसूत्रप्रणयनेन सावधानपुरुषप्रयुज्यमानं वाक्यं भारतरूपं वर्तमानत्वाविवक्षणात् । तत्प्रयोजकत्वेन भारतार्थवेदार्थनिर्वाहकत्वेन स्मृतस्य ब्रह्मभक्तिविचारस्योपेक्षानर्हत्वं संगतिः । एवमन्येन सावधानपुरुषेण प्रयुक्तं यद्वाक्यं घटोयमिति तदुपपादकत्वेनेतरेण स्मृतस्य प्रयुक्तस्य च नीलोयं घटोतः प्रत्यक्ष इति वाक्यस्योपेक्षानर्हत्वं संगतिः । प्रथमवाक्ये तु तद्घटकपदानां वाक्यत्वमाश्रित्य पदधर्मः संगतिवाक्ये चकास्तीति । यद्यपि गदाधरभट्टैः यद्यप्युपोद्घातादिपञ्चकभेदमनिवेश्य सर्वा संगतिः प्रसङ्ग एवान्तर्भावयितुं शक्यते तथापि विभाजकस्य स्वतन्त्रेच्छकृततया न पर्यनुयोगावसर इति सामान्यलक्षणं प्रसङ्गलक्षणमित्युक्तं तथापि तद्विशेषणरहितमिति ततोपि वैलक्षण्यं ज्ञेयम् । न च जिज्ञासानिरूपिताज्ञाननिष्ठविषयतावच्छेदकतावच्छेदकत्वविशेषैः संगतिरस्तु किमनेनेति वाच्यम् । निरूप्यतावच्छेदकस्य संगतित्वविरहात् । अवच्छेदकत्वविशेषपदेन यत्रावच्छेदकत्वे संगतित्वव्यवहारस्तन्मात्रविवक्षणेपि जिज्ञासाविरहेण गोदर्शनानन्तरं सास्नादिमती गौरिति संगतवाक्येऽव्याप्तिः । नापि प्रसङ्गाद्यन्यतमत्वं, निरुक्तलक्षणमनुसरतामुपेक्षानर्हतापदेनोपेक्षानर्हतावच्छेदकोपस्थितेरावश्यकत्वात् । अन्यथा निरुक्तसामान्यलक्षणेनैकवाक्यतानापत्त्यास्साव्याप्तिरापद्येत । तथा सति निरूप्यतावच्छेदकस्य संगतित्वविरहेणासंभव एव दूषणम् । अवच्छेदकत्वविशेषग्रहणेपि पूर्वोक्तस्थलेऽव्याप्तिः । आनन्तर्यघटितनिरुक्तसामान्यलक्षणमनुसरतां तु प्रसङ्गादिलक्षणान्यानन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वघटितान्यावश्यकानि । अन्यथा यत्रानन्तर्याभिधानं जातं न भवति तत्रत्यस्यापि स्मृतनिष्ठोपेक्षानर्हत्वादेः प्रसङ्गादिसंगतित्वापत्तेः । संगतिसामान्यलक्षणानाक्रान्ततया संगतत्वेन प्रतीतेष्वपि संगतत्वशून्यत्वाभ्युपगमात् । नन्वेवमपि सर्वत्र हेतुतादिषु संगतित्वव्यवहाराय विशेषलक्षणान्यपि वक्तव्यानीत्याशङ्कायां तत्र लाक्षणिको व्यवहार इति तानि न वक्तव्यानीत्याहुः **हेतुतादय** इति । एतेन तत्र तत्र तत्तद्व्यवहारे नियामकमप्युक्तम् । एवं हि प्रयोजकास्तथाहि सावधानपुरुषप्रयुज्यमानवाक्यमाधारनिरूपकं तत्प्रयोजकत्वेनाधेयत्वेन स्मृतस्याधेयनिरूपकवाक्यस्योपेक्षानर्हत्वं भवतीति आधेयत्वस्य प्रसङ्गान्तर्गतस्योपेक्षानर्हत्वप्रयोजकत्वम् । तथा सावधानपुरुषप्रयुज्यमानवाक्यमनुमितिनिरूपकं तत्प्रयोजकत्वेनानुमितिलक्षणोपपादकत्वेन स्मृतस्य परामर्शस्योपेक्षानर्हत्वं भवतीति उपोद्घातस्य प्रयोजकता । एवं सावधानपुरुषप्रयुज्यमानवाक्यं प्रत्यक्ष-

१. विशेषणनिष्ठो धर्मः । २. भूतले घटवद्भूतलमित्यत्रच ।

तत्र लक्षणविचार एव सद्रूपाणां वाचकता निर्णीता। चिद्रूपस्य ज्ञानप्रधानस्य निर्णयार्थमीक्षत्यधिकरणमारभ्यते सप्तभिः सूत्रैः। सप्तद्वारत्वाज्ज्ञानस्य।

भाष्यप्रकाशः।

तत्रेयत्तानियामकस्यासद्दर्शनेऽनुक्तत्वादन्येषामपि संग्रहो न दुष्ट इति रोचयामहे। तत्र जन्माद्यधिकरणे जगदुत्पत्त्यादिरूपसदात्मककार्यनिरूपणेन सामान्यतः कारणतया विशेषतः कर्तृतया च स्वरूपं निरूपितम्। समन्वयाधिकरणे च सर्वत्र ब्रह्मणः समनुगतत्वादुपादानतया विशेषतस्तन्निरूपितम्। तत्र यत् सामान्यतः सिद्धं तदनुवदन्ति तत्रेत्यादि। उक्तविधेषु वाक्येषु पूर्वसूत्राभ्यां कृते लक्षणविचार एव। सद् रूप्यते यैस्तेषां 'सदेव सौम्येदमग्र आसीत्' इत्यादिवाक्यगतानां पदानां ब्रह्मवाचकता निर्णीता। कार्यस्य सदात्मकत्वेन तत्कारणभूतं ब्रह्मैव सच्छब्दैर्वाक्येषूच्यत इति निर्णयः कृत इत्यर्थः। अतः परमग्रिमाधिकरणप्रयोजनमाहुः चिद्रूपस्येत्यादि। निर्णयप्रयोजनमग्रिमसूत्रे स्फुटीभविष्यति। सप्तद्वारत्वादिति पञ्च चक्षु-

रश्मिः।

निरूपकं तत्प्रयोजकत्वेन कार्यत्वेन स्मृतस्यानुमानवाक्यस्योपेक्षानर्हत्वं भवतीति हेतुताकार्यतयोः प्रयोजकता। एवं सावधानपुरुषप्रयुज्यमानवाक्यं[1] प्रत्यक्षनिरूपकं तत्प्रयोजकत्वेनावसररूपनिरूपणीयतावच्छेदकेनावश्यवक्तव्यत्वेन स्मृतस्योपमानवाक्यस्योपेक्षानर्हत्वं भवतीति अवसरस्य प्रयोजकता। एवं तादृशवाक्यं व्याप्तिनिरूपकं तत्प्रयोजकत्वेन तत्कार्यनिर्वाहकत्वेन स्मृतस्य पक्षधर्मतानिरूपकवाक्यस्योपेक्षानर्हत्वं भवतीति निर्वाहकस्य प्रयोजकता। एवं तादृशवाक्यमीश्वरनिरूपकं तत्प्रयोजकत्वेन तत्सजातीयत्वेन स्मृतस्यापवर्गनिरूपकस्योपेक्षानर्हत्वं भवतीति एककार्यत्वस्य प्रयोजकता। अथवा तादृशवाक्यमपवर्गनिरूपकं तत्प्रयोजकत्वेनेश्वरसिद्धिसजातीयकार्यजनकत्वेन स्मृतस्यानुमानवाक्यस्योपेक्षानर्हत्वं भवतीति एकजातीयकार्यजनकत्वस्य प्रयोजकता। नन्वेवं घटत्वादावपि उपेक्षानर्हताप्रयोजकत्वदर्शनेन कथमिमे षडेव प्रयोजका इत्याकाङ्क्षायां तत्त्वे इष्टमभ्युपगच्छन्ति **तत्रेत्यादि**। उपेक्षानर्हत्वप्रयोजकेष्वित्यर्थः। **अन्येषामिति** उपेक्षानर्हत्वप्रयोजकानां घटत्वादीनामित्यर्थः। तस्मादव्याप्त्यतिव्याप्त्यसंभवविरहाच्छोभनमिदं लक्षणमिति सुधीभिराकलनीयम्। संगतिव्यवहारस्तु तत्रतत्र स्पष्टत्वाय हेतुतादिभिः[2] प्रयोजकधर्मैरेव वक्तव्य इत्यपि ज्ञेयमित्यलं[3] विस्तरेण। एवं संगतिं निरूप्य भाष्यमवतारयन्ति **जन्मादीत्यादि**। **जगदित्यादि** जगदुत्पत्त्यादिना रूप्यते व्यवह्रियते यत्सदात्मकं कार्यं तस्य निरूपणेनेत्यर्थः। यद्यपि मृदो घट इति समवायित्वेपि पञ्चमी दृष्टा तथापि विकृतत्वापादकत्वेन न तथा वक्तुं शक्येति मत्वाहुः **विशेषतः कर्तृतयेति**। **उपादानतयेति** समन्वयपदसामर्थ्यात्तथेत्यर्थः। **निर्णयप्रयोजनमिति** ब्रह्मणः सच्चिदानन्दरूपत्वेन पूर्वाधिकरणाभ्यां सद्रूपे लक्षणसमन्वय उक्तः। चिद्रूपे लक्षणसमन्वयनिरूपणेनाव्याप्तिपरिहाररूपं तदित्यर्थः। उपलक्षकमेतत्। संगतिरपि निर्वाहकत्वरूपा स्फोटिष्यति। **सप्तद्वारत्वादिति** मनसोधिकरणत्वेन द्वारत्वमिव ब्रह्मणश्चिद्रूपोंशो जीव इति द्वारत्वम्। चक्षुरादिद्वारा मनसा जीवस्य द्रष्टृत्वमिव जीवद्वारा ब्रह्मणो द्रष्टृत्वात्। 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति श्रुतेः। न च द्रव्यत्वम्। स्वप्ने चिद्रूपतानुभवात्।

१. इदं हेतुतया वाक्यम्। २. हेतुता। ३. कृतम्।

तत्रैवं संदेहः। ब्रह्मणः स्वप्रकाशत्वेन सर्वप्रमाणाविषयत्वाद् 'यतो वाचो निवर्तन्ते' इति श्रुतेश्च विचारः कर्तुं न शक्यते । स्वप्रकाशत्वविरोधाच्छ्रुतिविरोधाच्च ।

भाष्यप्रकाशः ।

रादीनि मनो जीवश्चेत्येवं सप्तद्वारत्वात्। तथाचान्यत्र गुणवाचका अपि ज्ञानादिशब्दा वेदान्तवाक्यविशेषेषु ब्रह्मवाचका इति बोधनाय सप्तसूत्राणीत्यर्थः । संशयस्याकारमाहुः **तत्रैवमित्यादि** । **स्वप्रकाशत्वेनेति** । 'तमेव भान्तमनुभाति विश्वम्' इतिश्रुत्या स्वप्रकाशत्वेन । **स्वप्रकाशत्वविरोधादिति** प्रमाणविषयत्वे तज्ज्ञानस्य प्रमाणतन्त्रत्वेन स्वप्रकाशत्वाभावेन तद्विरोधात् । **श्रुतिविरोधादिति** विचारस्य मनोवाग्विषयत्व एव संभवेनोक्तश्रुतिविरोधात् ।

रश्मिः ।

ब्रह्मवाचका इति । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति बृहदारण्यकात्सप्तस्वरूपाणि वक्ष्यमाणानि, प्रज्ञां स्मरणात्मकानि कुर्वीत कार्यकारणवस्त्वैक्यमर्षणेन पटतन्तुवत् । ततो ज्ञानैकब्रह्मवाचका इत्यर्थः । ज्ञानस्येतिभाष्यात् । **सप्तसूत्राणीति** सूत्रसंख्यातात्पर्योक्तिरियं पुत्रेष्टिन्यायेन । तथाहि । पुत्रेष्टौ श्रूयते 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इत्युपक्रम्य 'यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नव कपालं त्रिवृतैवास्मिन् तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इति । अत्रोत्पन्नशिशोर्गायत्र्यादिजनितपूततासिद्ध्यर्थमष्टादिसंख्याककपालसंस्कृतपुरोडाशा न न्यूनाधिकसंख्याककपालसंस्कृतपुरोडाशाः । एवं त्रिवृदादिवाक्येष्वपि तत्तत्संख्याबोधने किं गमकमिति चेत् मैवं गायत्रीपादस्याष्टाक्षरत्वेनाष्टाकपालसंस्कृतपुरोडाशप्रचारे उत्पन्नशिशोर्गायत्र्यैव पावित्र्यं नन्दयितुमर्हति नान्यथापि । तथा च श्रुतिः 'गायत्री चतुर्विंशत्यक्षरा त्रिपदा' इति एतदभिप्रायेणैवाचार्यैः पुरुषोत्तमसहस्रनामस्तोत्रे 'गायत्री च तथा छन्दो देवता पुरुषोत्तमः' इति द्वात्रिंशदक्षरेषु गायत्रीत्वमुक्तं श्लोकस्य चतुष्पात्त्वात् । किंच गायत्र्याश्चतुर्थोपि पादोस्ति बृहदारण्यके गायत्र्युपासने 'अष्टावक्षर१ँह वा एकं गायत्र्यै पदम्' इत्यादिना पादत्रयमुक्त्वा 'अथास्या एतदेव तुरीयं दर्शितं पदम्' इतिश्रुतेः । एतदित्यस्य पादत्रयात्मकमित्यर्थः । तथा च गायत्र्यास्त्रिपादीत्वेनैकैकस्य पादस्याष्टाक्षराणि भवन्तीति गायत्रीजन्यपावित्र्यापेक्षायामष्टाकपालसंस्कृतपुरोडाशप्रचारो युक्त इति । एवमन्यत्रापि । एतच्च स्फुटं 'त्वमेव पूर्वसर्गेऽभूः' इत्यस्य सुबोधिनीटिप्पण्याम् । अन्यत्र यथा 'आत्मना प्रथमा लीला मनसा तु ततः परा' इत्याद्युक्ते सप्तके । आत्मा जीवः यशः मनः चक्षुः लीलाः क्रियाः, ज्ञानं पञ्चरात्रात् ऐश्वर्यं वाक् भागवतरसनं 'स्वादु स्वादु पदे पदे' इति भागवतात् धर्मी, प्राणः त्वक् वैराग्यं, प्राणवैराग्ययोर्भगवत्त्वात्, इन्द्रियं घ्राणः श्रीः । अत्र चक्षुर्मनो वा वक्तव्यमिन्द्रियमुख्यत्वात्तथापीन्द्रियश्रीः शृङ्गारं विना न भवतीति पृथ्वीः श्रीतन्मात्रा, गन्धस्तु ग्राहकघ्राणः शरीरं श्रोत्रं वीर्यं नभस्त्वात्, रूपं समष्टिः । अष्टरूपाणि कृतकृत्यीकुर्वन्तीति । अत्राष्टाकपालत्वादयो गुणाः कर्मान्तरविधायकाः, उत वैश्वानरस्तावका वेति संशये कर्मान्तरविधायका इति पूर्वपक्षे शते पञ्चाशदिति न्यायेन द्वादशकपालेष्वष्टादीनां संभवात्स्तावका एवेति प्रथमस्य तृतीयपादे 'पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये'

आहोस्विद् विरोधपरिहारेण शक्यत इति । किं तावत् प्राप्तम् । न शक्यत इति । कुतः ।

ज्ञापनार्थं प्रमाणानि सन्निकर्षादिमार्गतः ।
सर्वथाऽविषयेऽवाच्येऽव्यवहार्ये कुतः प्रमा ॥

ऐहिकामुष्मिकव्यवहारयोग्ये हि पुरुषप्रवृत्तिः । प्रवृत्त्यर्थं हि प्रमाणानि । ब्रह्म पुनः सर्वव्यवहारातीतमिति । नन्वेतदपि वेदादेवावगम्यत इति चेत् तर्हि

भाष्यप्रकाशः ।

विधिकोटिस्तु स्फुटैव । पूर्वपक्षयुक्तिं गृह्णन्ति **ज्ञापनार्थमित्यादि** । **सन्निकर्षादिमार्गत इति** । आदिपदेन सहकारीणि । **मार्ग** उपायः । **सर्वथाऽविषय** इति स्वप्रकाशत्वेन मनोनिवृत्तिश्रुत्या च सर्वप्रमाणाविषये । **अवाच्य** इति वाङ्निवृत्तिश्रुत्या सत्यज्ञानादिपदैरपि लक्ष्यत्वादवाच्ये । अव्यवहार्यत्वं विभजन्ते **ऐहिकेत्यादि** । व्यवहारो नाम मनोमात्रेन्द्रियप्राणजन्यपुरुषप्रवृत्तिरूपो व्यापारः । **सर्वव्यवहारातीतमिति** लौकिकवैदिकव्यापारानर्हम् । **एतदिति** अविषयत्वादिकम् । **वेदादिति** । 'न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यात्' । 'अन्यदेव तद्विदितादथो अविदितादधि' इत्यादिरूपात् । अयमर्थः । प्रमाणैर्हि द्रव्यगुणक्रियादिरूपाः पदार्था लौकिकालौकिकसन्निकर्षेण यथार्हं प्रमीयन्ते । ब्रह्म त्वस्थूलादिवाक्यैरतद्रूपत्वादसंगत्वेनासन्निकृष्टत्वाच्च सर्व-

रश्मिः ।

इत्यधिकरणे पूर्वतन्त्रसिद्धान्तः । न च संख्यायाः पुरोडाशविशेषणतया श्रावणेन पुरोडाशेष्टाकपालत्वादिरूपतद्धर्मे वा पर्यवसानान्नेदं संगच्छत इति वाच्यम् । अप वै सोमेनेजानाद्देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चकपालमुदवसनीयं निर्वपेत्, अग्निः सर्वा देवताः, पाङ्क्तो यज्ञो देवताश्चैव यज्ञं चावरुन्धे गायत्रो वाग्निर्गायत्रच्छन्दस्तं छन्दसा व्यवर्धयति यत्पञ्चकपालं करोति । अष्टकपालः कार्योऽष्टाक्षरा गायत्री गायत्रो वा अग्निः गायत्रच्छन्दः स्वेनैवैनं छन्दसा समर्धयति पङ्क्तौ याज्यानुवाक्ये भवतः पङ्क्तो यज्ञः तेनैव यज्ञान्नैतीत्युदवसानीयविधायकश्रुतेस्तथानिश्चयात् । तत्र हि अष्टाकपालपुरोडाशविधाने तस्मिन् पञ्चकपालत्वस्य सत्त्वेपि तदनादृत्य याज्यानुवाक्ययोः पञ्चसंख्याकत्वविधानेन पञ्चसंख्याकयज्ञादनपगमविधानतस्तथानिश्चयो ज्ञेयः । अतः संख्यायाः सतात्पर्यकत्वमपेक्षितस्थले निश्चेयम् । अनपेक्षितायाः निस्तात्पर्यकत्वमितिदिक् । **ब्रह्मवाचका** इति उक्तरीत्या व्यष्ट्या समष्ट्या च । **तमेवेति** क्वाचित्कोयं पाठः । पुस्तकान्तरे मुण्डके श्वेताश्वतरे च 'तमेव भान्तमनुभाति सर्वम्' इति पाठात् । **उक्तश्रुतीति** भाष्योक्तश्रुतिविरोधात् । **विधिकोटिरिति** विरोधपरिहारेण शक्यते इति विचारः कर्तव्य इति विधिकोटिः । लोके लेटोऽदर्शनात् । लटो विध्यर्थत्वाभावात् । यद्वा छन्दोवत्सूत्राणि व्याख्यानं चेति शक्यते इति लेट् । **भक्ष्यत्वादिति** सत्यज्ञानानन्तजगज्जन्मादिकर्तृपदानां वाङ्निवृत्तिश्रुत्या शक्यार्थे बाधे सत्यपदं सत्यत्वमनभिदधच्छक्यार्थमभेदेनासत्यत्वाभावरूपलक्ष्यार्थं वक्तीत्यभेदसंबन्धो लक्षणा । एवं लक्षणद्वये ज्ञानादिपदानामभेदसंबन्धो लक्षणेति ज्ञेयम् । **मन इत्यादि** 'व्यवहारः संनिपातो मनोमात्रेन्द्रियासुभिः' इत्येकादशस्कन्धात् । **द्रव्य-**

बाधितार्थप्रतिपादकत्वान्न वेदान्ता विचारयितव्या इति प्राप्ते उच्यते ।

ईक्षतेर्नाशब्दम् ॥ ४ ॥ (१।१।४)

न विद्यते शब्दो यत्रेत्यशब्दं सर्ववेदान्ताद्यप्रतिपाद्यं ब्रह्म न भवति । कुतः । ईक्षतेः । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रम्य 'तदैक्षत बहु स्यां प्रजायेय' इति । 'तत्तेजोऽसृजत' । तथाऽन्यत्र । 'आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किंचन मिषत्' । 'स ऐक्षत लोकानुसृजा' इति ।

भाष्यप्रकाशः ।

प्रमाणाविषयम् । अतद्रूपत्वादेव च नामाख्यातनिपातोपसर्गरूपचतुर्विधपदजाताप्रतिपाद्यतया अवाच्यम् । अवाच्यत्वादेव वैदिकव्यवहारादप्यतीतम् । तदेतत्सर्वमभिप्रेत्य, 'यतो वाचः' इत्यादयस्ततो वागादीनां निवृत्तिं तस्य विदिताविदितान्यत्वं च श्रावयन्तीत्यतस्तदविचार्यम् । तस्याविचार्यत्वादेव तत्प्रमितिफला वेदान्ता अप्यविचार्याः । अथ ब्रह्मण एवंरूपतापि वेदादेवावगम्यत इति तस्याप्रमेयत्वज्ञानायैव विचार्या वेदान्ता इति विभाव्यते, तदा तु स्वव्यापारेण तत्समर्पयन्तस्तस्य तथात्वं बोधयन्तीति, मम माता वन्ध्येतिवाक्यवद् बाधितार्थप्रतिपादकत्वादेवाविचार्या इति । एवं पूर्वपक्षमुक्त्वा सिद्धान्तं वक्तुं सूत्रं पठन्ति ।

ईक्षतेर्नाशब्दम् ॥ ४ ॥ व्याकुर्वन्ति नेत्यादि । ननु ब्रह्मणो वेदान्ताद्यात्मकशब्दप्रतिपाद्यत्वे ईक्षतिधातुनिर्देशस्य कथं हेतुत्वमित्याकाङ्क्षायां विषयवाक्यान्युदाहरन्ति सदेवेत्यादि । अत्र प्रथमं वाक्यं छान्दोग्यस्थम् । द्वितीयमाश्वलायननामैतरेयोपनिषत्स्थम् । तृतीयं प्रश्नोपनिषदः षष्ठप्रश्नस्थम् । मिषदिति व्यापारं कुर्वत् । आदिपदेनादिसृष्टिविषयकेक्षणघटितानां, 'ब्रह्म वा इदमग्र आसीत् स्वयंभ्वेकमेव तदैक्षत महद्वै यक्षं तदेकमेवास्मि हन्ताहं मदेव मन्मात्रं द्वितीयं तदेव निर्मम' इत्यादीनां संग्रहः । तथाच, न केवल ईक्षतिर्ब्रह्मणो वेदान्तशब्दप्रतिपाद्यत्वे हेतुभूतः, किं तु वाक्यगतः । तेन च स्वार्थप्रत्यायने वाक्येषु ब्रह्मकर्तृका ईक्षा प्रतीयते । ईक्षा च पर्यालोचनम्, एवं करिष्यामीत्यध्यवसायः । सोऽत्रैतादृश

रश्मिः ।

गुणेति आदिशब्देन विशेषसमवायाभावाः पूर्वपक्षग्रन्थत्वात् । **अतद्रूपत्वादिति** अद्रव्यादिरूपत्वादित्यर्थः । **तर्हीत्यादि** भाष्यं विवरीतुमाहुः **अथ ब्रह्मण** इति । विवृण्वन्ति स्म **तदा त्विति** । **स्वव्यापारेणेत्यादि** 'यतो वाचो निवर्तन्ते' 'न तत्र चक्षुर्गच्छति' इत्यादिवेदान्तः स्वीयवागप्राप्यचक्षुरप्राप्यमनोऽप्राप्यरूपार्थिकपदानामभिधारूपव्यापारेण प्रमेयत्वं समर्थयन्नेव ब्रह्मणोप्रमेयत्वं बोधयतीति तथेत्यर्थः । अथवा यथा अशेषनिषेधशेषपदाभ्यामभिधावृत्त्या ब्रह्मप्रमापकाभ्यामेवाप्रमेयत्वं बोध्यते । इत्यभ्युपगमवादवदस्थूलादिपदानामभिधारूपव्यापारेण प्रमेयत्वं समर्थयन् वेदान्तो ब्रह्मणस्तैरेव पदैरप्रमेयत्वं तात्पर्येण बोधयतीति तथेत्यर्थः ।

ईक्षतेर्नाशब्दम् ॥ ४ ॥ ब्रह्म वेदः अशब्दं न विद्यते शब्दः बोधकव्यापारवाम् पदसमूहो यत्रेत्यशब्दं सर्ववेदान्ताद्यप्रतिपाद्यं न भवति ब्रह्मकर्तृकेक्षाप्रत्ययादिति सूत्रार्थः । यथा 'तदैक्षत' इत्यादिवाक्यं शब्दार्थयोर्नित्यसंबन्धादर्थोपि ब्रह्मपक्षः । **सोत्रेति** ईक्षाकर्ताधो-

भाष्यप्रकाशः ।

इति कार्यबलादुन्नीयते । अत एतादृशेक्षाबोधकेनेक्षतिना यत्र यत्रैवं पूर्वमव्यवहार्यत्वेऽपि पश्चाद् व्यवहार्यत्वेन प्रतिपाद्यत्वाभावस्तत्र तत्रैवमीक्षणकर्तृत्वेन प्रतिपाद्यत्वाभाव इति

रश्मिः ।

क्षजस्तच्छब्दार्थः । न चाधोक्षजोपि शब्द इति तस्याप्यविषय इति वाच्यं ईक्षतेः । तथा चेदमित्थतयाधोक्षजशब्दविषयो भवत्येव । अथवा विरुद्धधर्माश्रयत्वात् विषयोविषयो वान्यथा 'न कोपि भग' इति छान्दोग्यीयसच्छब्दाविषयत्वे ब्रह्माज्ञानमेव भवेदिति महानेवान्यायः स्यात् । न च 'मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्' इति श्रुत्या शब्देतरमनसा ब्रह्मज्ञानं भवतीति शब्दाविषयत्वेप्यक्षतिरिति वाच्यम् । भक्तिरूपमनोनुद्रष्टव्यत्वेन प्रमाणप्रस्तावे तद्विचाराप्रसक्तेः । भक्तिरस्य भजनमितिश्रुतिः भक्तिरूपमनसा द्रष्टव्यत्वं वक्ति ततश्च प्रकृतेः प्रमाणबलेनाविषयः स्वेच्छया विषयश्च । **एतादृश** इति लोकदृष्टिद्वारा व्यवहार्यो भविष्यामीति भाष्योक्ताकारक इति विचक्षणस्य ब्रह्मणोस्तिभातिप्रियत्वेनात्र व्यवहाररूपकार्यबलादुन्नीयते तर्क्यत इत्यर्थः । तथा च श्रुतौ ऐक्षतेत्यस्य बहुत्वज्ञानेक्षो जात इत्यर्थः । बहु स्यां प्रजायेयेतीच्छाकारावेदकश्रुतिप्रामाण्यात् । ईक्ष दर्शन इति धातुः, अत्र त्वीक्षापर्यालोचनमित्युक्तं तद्दर्शनार्थमादायेत्यविरोधः । **यत्र यत्रैव**मिति ब्रह्मरूपार्थः पक्षस्तत्र । एवमिति । वेदान्तशब्दैः प्रतिपाद्यत्वाभाव इति प्रतिपाद्यत्वसंबन्धेनाशब्दत्वाभावः । **एवमिति** भाष्योक्तरीत्या वाक्यगतेक्षणकर्तृत्वेनेत्यर्थः । **प्रतिपाद्यत्वाभाव** इति प्रतिपाद्यत्वसंबन्धेन ब्रह्मव्याप्यीभावः । **व्याप्तिरिति** यदि च यथा तेजः इति दृष्टान्तेनान्वयव्याप्तिरपीति विभाव्यते तदा तद्वाक्यगतेक्षणकर्तृत्वेन प्रतिपाद्यत्वसंबन्धेन ब्रह्मव्याप्यं हेतुर्बोध्यः । ब्रह्मपक्षः ज्ञानप्रधानः । 'तत्तेज ऐक्षत' इति छान्दोग्यमत्रानुसंधेयम् । प्रकृते पूर्वमव्यवहार्यत्वेपि पश्चात्प्रतिपाद्यत्वसंबन्धेन व्यवहार्यत्वमशब्दत्वरूपं व्यापकं साध्यम् । एवमीक्षणकर्तृत्वेन रूपेण प्रतिपाद्यत्वसंबन्धेन ब्रह्मव्याप्यं हेतुः । अतः साध्यत्वेपि व्याप्यत्वात् पूर्वं वचनं व्यतिरेकव्याप्तित्वाद्वा । सा च 'नियतधर्मसाहित्ये उभयोरेकतरस्य वा व्याप्तिः' इति सांख्यप्रवचनसूत्रादव्यभिचारविशिष्टा हेतुनिष्ठा साध्याधिकरणवृत्तिता । सूत्रार्थस्तूभयोः समव्याप्तिकयोः कृतकत्वानित्यत्वादिरूपयोः एकतरस्य विषयव्याप्तिकस्य धूमादेः नियतधर्मसाहित्येऽव्यभिचरितधर्मरूपे सामानाधिकरण्ये व्याप्तिः व्याप्तिशब्दः शिष्टैः प्रयुज्यत इति । अव्यभिचारस्तु यत्र यत्र हेतुस्तत्र तत्र साध्यं यत्र साध्याभावस्तत्र हेत्वभावः इति नियमः । सिषाधयिषायां सत्यां साधकत्वेनोपादीयमानत्वं हेतुत्वं, सिषाधयिषाविषयत्वं साध्यत्वं, घनगर्जितेन मेघानुमाने सिषाधयिषास्त्येव विनापि तं तथानुमानमानुभाविकमिति चेदस्तु तर्हि सिषाधयिषाविषयत्वयोग्यत्वात्साध्यत्वम् । एवं च वह्निमान् धूमादित्यादौ धूमनिष्ठं तादृशाव्यभिचारविशिष्टं वह्निसामानाधिकरण्यमस्तीति लक्षणसमन्वयः । धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय विशेषणदलम् । अयःपिण्डादौ वह्नेः साध्यव्यभिचारान्नातिव्याप्तिः । हेतुसाध्यपदे तु व्याप्त्यस्वरूपभूते यद्यपि तथापि सामानाधिकरण्यस्य ससंबन्धिकतया संबन्धिबोधनायोपात्ते विशेषाकाङ्क्षानिवृत्त्या

रश्मिः ।

विशेषणस्वरूपपरिनिष्ठायै विशेष्यम् । अव्यभिचरितं हेतोः साध्यमित्यलक्षणम् । व्याप्तेर्हेतुधर्मत्वात् । कथंचिद्गुणभूतत्वेन व्यवह्रियमाण आधेयोऽर्थो हेतुः । न चैवमव्याप्तिः । पर्वतीयधूमे महानसीयवह्निसामानाधिकरण्याभावादिति वाच्यम् । हेतुसाध्ययोर्हेतुतावच्छिन्नसाध्यतावच्छिन्नत्वाभ्यां विशेषणीयत्वात् । न च धूमावयवेषु धूमसत्त्वाद्वह्नेश्चासत्त्वादन्वयव्यभिचारः । समवायसंबन्धेन वह्न्यभाववति महानसादौ धूमसत्त्वाद्व्यतिरेकव्यभिचारश्च शङ्क्यः । हेतुतावच्छेदकसाध्यतावच्छेदकसंबन्धावच्छिन्नत्वाभ्यामपि तयोर्विशेषणीयत्वात् । नाप्येतत्क्षणीये धूमे पूर्वक्षणवृत्तित्वविशिष्टवह्निसामानाधिकरण्याभावादव्याप्तिरिति वाच्यम् । तत्र वैशिष्ट्यानवच्छिन्नत्वस्यापि विशेषणीयत्वात् । वस्तुतस्तु सिषाधयिषोदयानन्तरं हेतुसाध्यभावेन ततः पूर्वं तदभावात्तस्य वह्नेरसाध्यत्वेन तदसामानाधिकरण्येऽप्यदोषात् । सिषाधयिषोत्तरक्षणात्मकक्षणात्पूर्वक्षणत्वविवक्षयाऽव्याप्त्युद्भावनं तु काकदन्तविचारमनुहरति । आप्राकृतमापण्डितं च पूर्वोक्तरीतिकव्याप्तिज्ञानमात्रेणानुमितिदर्शनस्य सार्वजनीनत्वात् । एतादृशदर्शनेनैव वह्निघटोभयावच्छिन्नप्रतियोगिताकवह्न्यभाववति केवलवह्निदेशे धूमदर्शनेन व्यतिरेकव्यभिचारग्रासात्प्रसिद्धानुमाने व्याप्तिशङ्कापि निरस्ता वेदितव्या । व्यासज्यवृत्तिधर्मावच्छिन्नाभावस्थले साध्यदर्शनेन सविशेषणे हीति न्यायादभावस्योभयत्व एव विश्रान्तेश्च । ज्ञेयं वाच्यत्वादित्यादौ केवलान्वयि साध्यके हेतुनिष्ठा साध्यसमानाधिकरणताऽव्यभिचरितेति ध्येयम् । एवं सत्तावान् जातेरित्यत्रापि ज्ञेयम् । एवं च साध्यवदन्यावृत्तित्वं साध्यात्यन्ताभाववदवृत्तित्वं च नातिदुष्टम् । ब्रह्मणि ज्ञेयत्वाद्यभावेन सर्वत्रापि केनचिद्रूपेण ज्ञेयत्वाद्यभावेन प्रमेयत्वे प्रमेयत्वस्य वाच्यत्वे वाच्यत्वस्यानवस्थात्माश्रययोः यथासंभवं भियाऽभावेन च केवलान्वयिसाध्यकानुमानस्यैवाभावात् । मीमांसकानामपीदमिष्टम् । न चाव्याप्यवृत्तिसाध्यके कपिसंयोगी एतद्वृक्षत्वादित्यादौ साध्यात्यन्ताभाववदवृत्तित्वस्याव्याप्तत्वं शङ्क्यम् । दृष्टे कपिसंयोगे सिद्धसाधनत्वेनादृष्टे चाहेतुत्वेन तस्य दुरनुमानत्वात् । न च दृष्टेपि कपिसंयोगे सिषाधयिषयानुमितिसंभवात्तादृशस्थले सिद्धसाधनस्य दोषत्वात् । सदनुमानमेवेदं यथाहुः प्रत्यक्षेण परिकल्पितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका इतीति शङ्क्यम् । एतद्वृक्षत्वस्यैकव्यक्तिमात्रवृत्तित्वेनान्यत्र सहचारग्रहस्य व्याप्त्यनुग्राहकस्याभावेन मूलावच्छेदेन व्यभिचारज्ञानाद्व्याप्तिप्रतिबन्धात् । न चैवं संयोगे द्रव्यत्वादित्यादावपि सहचारग्रहाभावाद्व्याप्तिप्रतिबन्धो भवेदिति शङ्क्यं पक्षैकदेशे सहचारग्रहसत्त्वेनादोषात् । अस्तु व्यतिरेकव्याप्तिग्रहः परं तु सिषाधयिषा तु न भवत्येव । इच्छाया ज्ञानानुरूपकार्यत्वात् । अत एव ज्ञाते इच्छानुदयात् । तथाचानुमितप्रकारकमपि संयोगज्ञानात्पूर्वमभावात्कथमनुमित्सा । न च कपिसंयोगज्ञानमात्रमिच्छोदये प्रयोजकं न तु विचारणावच्छिन्नं तस्य च पूर्वं सत्त्वादनुमित्सोदय इति वाच्यम् । अयं घट इति ज्ञानादनुमित्सोदयप्रसङ्गात् । अतो यत्र पूर्वमनुमितिविषयत्वस्य यद्धेतुकत्वस्य च ज्ञानं तत्र सिद्धौ सत्यां सिषाधयिषा तया चानुमानं नात्र तथेति । महानसादिवह्न्यनुमितौ तथादर्शनादिति ध्येयम् । परं तु सत्तावान् जातेरित्यत्र साध्यवदन्यस्मिन् सामान्यादौ जात्यभावादव्याप्त्यभावेपि हेतुतावच्छेदकसंबन्धेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिरिति नातिदुष्टं लक्षणद्वयम् । एवं च कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिपरिहाराय यच्चिन्तामणौ प्रति-

'स इमाँल्लोकानसृजत' इति । 'स ईक्षाञ्चक्रे' । 'स प्राणमसृजत' इत्येवमादिषु सृष्टिवाक्येषु ब्रह्मण ईक्षा प्रतीयते ।

किमतो यद्येवम् । एवमेतत् स्यात् । सर्वव्यवहारप्रमाणातीतोऽपि ईक्षाञ्चक्रे लोकसृष्टिद्वारा व्यवहार्यो भविष्यामीति । अतो यथा यथा कृतवाँस्तथा तथा

भाष्यप्रकाशः ।

व्याप्तिर्बोध्यत इतीक्षतेर्हेतुत्वमित्यर्थः । एवं सर्वत्र हेतुशोधनप्रकारो बोध्यः । ननु प्रतीयतामीक्षा, तावता पूर्वोक्तविरोधस्य कथं परिहार इति पृच्छति **किमतो यद्येवमिति** । समादधते **एवमित्यादि** । तथाच ब्रह्मणः पूर्वोक्तरूपत्वस्येक्षायाश्च श्रुतिसिद्धत्वाच्छ्रौतत्वेनैकतरबाधस्याप्यनुचितत्वाद् विरुद्धधर्माधारत्वस्य ब्रह्मणि भूषणत्वात् तस्यापि 'अन्यदेव तद्विदितादथो अविदितात्', 'तदेजति तन्नैजति' इत्यादिश्रुतिसिद्धत्वादभिन्ननिमित्तोपादानवादमुपगच्छता तस्याप्यङ्गीकाराच्चैवमीक्षाकारसिद्धौ सुखेन सिद्ध्यति विरोधपरिहारे ब्रह्मणो विचार्यत्वस्यापि सिद्धि-

रश्मिः ।

योगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यं व्याप्तिरिति प्रतियोगिव्यधिकरणो यः साध्यसमानाधिकरणात्यन्ताभाव इति प्रतियोगिव्यधिकरणत्वेनाभावो विशेषितस्तदपि मुधैव । तस्य दुरनुमानत्वात् । यदपि मञ्जरीकारः हेतुसमानाधिकरणा यावन्तस्ते साध्यसमानाधिकरणास्तत्त्वं व्याप्तिरिति । तदपि न रुचिरम् । यावत्त्वस्यानेकपदार्थघटितत्वेनापेक्षाबुद्धिविशेषविषयत्वरूपयावत्त्वाङ्गीकारेपि अपेक्षाबुद्धेरयमयमयमेते सर्वे इत्याकारकत्वेन तत्पदार्थविषयकतयानेकपदार्थघटितत्वानपायेन प्रतिपत्तिगौरवग्रासात् । यावत्त्वस्य व्यापकत्वरूपत्वेपि व्यापकत्वस्य तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वरूपतया भावद्वयनिवेशेनोक्ततुल्यकक्षत्वादित्यलं पल्लवितेन । यद्यप्यत्र न विशेषस्तथापि सिद्धान्तादृतलक्षणबोधायेदम् । आत्मशब्दादित्यादिहेतुष्वतिदिशन्ति **एवं सर्वत्रेत्यादि** । अनुमानं तु ब्रह्म पूर्वं सर्वव्यवहारप्रमाणाद्यतीतमपि पश्चात्तद्विषयः । एवमीक्षितृत्वात् यन्नैवं तन्नैवं जीववदिति व्यतिरेकी हेतुः । न च केवलान्वयित्वमस्य । जीवस्यैवंप्रकारेण श्रुत्याद्यनुक्तत्वेन दृष्टान्ताभावाद् व्यतिरेकी हेतुरित्यत उक्तं शोधनप्रकार इति । **पूर्वोक्तविरोधस्येति** पश्चाद्व्यवहार्यत्वे स्वीकृते पूर्वपक्षोक्ताव्यवहार्यत्वविरोधस्येत्यर्थः । **विरुद्धधर्मेति** सर्वव्यवहारप्रमाणातीतोपि ईक्षांचक्रे लोकसृष्टिद्वारा व्यवहार्यो भविष्यामीति भाष्योक्तस्य तस्य । भाष्यार्थस्तु व्यवहाराश्च प्रमाणानि च व्यवहारप्रमाणानि सर्वाणि च तानि व्यवहारप्रमाणानि सर्वव्यवहारप्रमाणानि तेभ्योतीतः अतिक्रम्य गतः 'यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि' इत्यादि केनोपनिषदा वागादीन्द्रियाविषयः स सर्वप्रमाणातीतः । व्यवहार इन्द्रियादिकार्यं तदतीतः । तत्रैकत्रेक्षतिर्हेतुः । गौणश्चेत्यादिसूत्रैः साधितः । स्वतन्त्रहेतूनां स्वाप्ययादीनां सर्वव्यवहारातीतत्वं साध्यं बोध्यम् । **उपगच्छतेति** सिद्धान्तिनेत्यर्थः । सिद्ध्यतीति सप्तम्यन्तमिदम् । **अतो यथेत्यादिभाष्यं** विवृ-

---

१. पर्वतत्वादयः ।

स्वयमेवोक्तवान् । पूर्वरूपं फलरूपं च सृष्टस्वांशपुरुषार्थत्वाय । ततश्च प्रमाणबलेनाविषयः, स्वेच्छया विषयश्चेत्युक्तम् ।

ननु सर्वप्रमाणविषयत्वे दूषिते केवलवेदविषयत्वं कथं सिद्धान्तीक्रियते । उच्यते । चक्षुरादीनां प्रामाण्यमन्यमुखनिरीक्षकत्वेन, न स्वतः । भ्रमानुत्पत्ति-

भाष्यप्रकाशः ।

स्तादृशब्रह्मकृतिबोधकत्वेन वेदान्तानामप्यबाधितार्थत्वात् तेषामपि विचार्यत्वसिद्धिरित्यर्थः । एवं करणकथनयोः प्रयोजनमाहुः पूर्वमित्यादि । स्वांशा जीवास्तदुपयोगिपुरुषार्थत्वं तेजःप्रभृतीनां भवत्वितीच्छया पूर्वं प्रथमतो रूपं प्रजादिशब्दवाच्यं शरीरं फलरूपं लोकादिकं च सृष्टम् । तथाचैतेषां पुरुषार्थत्वेन जीवाशास्यत्वायैवं कृत्वा तत्कर्तृतया फलदातृतया च स्वस्य व्यवहार्यत्वं च कृतवानिति तत्संपादनं प्रयोजनमित्यर्थः । तेन सिद्धमाहुः तत इत्यादि ।

अत्र प्रत्यवतिष्ठते नन्वित्यादि । केवलवेदविषयत्वं कथमिति सर्वप्रमाणानां तुल्यत्वेनाविशेषात् केवलवेदवेद्यत्वं ब्रह्मणः कयोपपत्त्येत्यर्थः । अत्र समाधातुमुपपत्तिमाहुः उच्यत इत्यादि । न हि प्रमाणानां प्रामाण्यं तुल्यम् । तथा सति शुक्तिरजतादिविषयकश्चाक्षुषादिभ्रमो न स्यात् । हेतुषु चाभासता न स्यात् । शब्देषु च वाक्यप्रामाण्याप्रामाण्यविभागो न स्यात् । अतश्चक्षुरादिमनोऽन्तानां तदुपजीविनां च प्रामाण्यं न स्वतः, किंतु परमुखनिरीक्षकत्वेना-

रश्मिः ।

ण्वन्ति स्म एवं करणेत्यादि । एवं सृष्टिकरणं वेदान्तेषु व्यासाद् भागवताच्तत्कथनं च तयोरित्यर्थः । तेजःप्रभृतीनामिति बृहदारण्यके दृप्तबालाकिब्राह्मणे 'स होवाच गार्ग्यः य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपासे' इत्यादि । यद्वा । छान्दोग्ये 'तत्तेज ऐक्षत' 'तदाप ऐक्षन्त' इति च पुरुषार्थत्वम् । तत्संपादनेति करणकथनसंपादनप्रयोजनमित्यर्थः । वेदान्तेषु ब्रह्मकृत्यबोधने पूर्वोक्तरूपेण व्यवहार्यत्वं कृतं न स्यात् । लोकानां शास्त्रादेव ब्रह्मज्ञानं भवतीति भावः । तत इत्यादीति यथा गोवर्धननाथजित् । आभासता न स्यादिति व्याप्तिज्ञानरूपप्रमाणकजन्यहेत्वाभासता धूमवान् वह्नेरित्यत्र न स्यात् । उपमानस्यामानान्तरत्वादनुक्तिः । सादृश्यातिदेशवाक्यार्थस्मरणसहकारेण चक्षुरादिनैव संज्ञासंज्ञिपरिच्छेदोपपत्तौ सादृश्यज्ञानादेर्मानान्तरत्वकल्पनस्यायुक्तत्वात् । अन्यथा घटाभाववति घटोपलब्धावपि इन्द्रियसंबद्धविशेषणतायाः सत्त्वेन घटाभावप्रतीतिः स्यात्तद्वारणायाभावग्रहे हेतुतया स्वीक्रियमाणाया योग्यसहकारिसंपन्नानुपलब्धेरुपयोग्यानुपलब्धेरपि मानान्तरत्वप्रसक्तेः । न चैवं सति परोक्षत्वं व्याहन्येतोपमितेरिति वाच्यम् । इष्टापत्तेः । न च चक्षुर्व्यापारापगमेपि जायमानत्वान्नैवमिति वाच्यम् । पूर्वं जातस्य ज्ञानस्य करणव्यापारोपरमेप्यनुपरमस्यानुभवसाक्षिकस्य सत्त्वात्पुनर्जननकल्पनस्यायुक्तत्वात् । उपेक्षान्यज्ञानस्य त्रिक्षणावस्थायित्वकल्पनस्याभ्युपगमैकशरणत्वात् । मानसं वा तदस्तु । अतिदेशवाक्यालक्षणत्वेन पूर्वं ज्ञातस्य ततः पदार्थस्फुरणेन स्फुरितस्य सादृश्यस्य संस्कारेण शब्दाभिव्यक्तौ दृष्टसंवादनिश्चितप्रामाण्यस्य च वाक्यस्य सहकारेण मनसाप्ययं गवयपदवाच्य इति संज्ञासंज्ञिपरिच्छेदस्य प्रसिद्धपदसमभिव्याहृतवाक्यस्मरणसहकृतमनसा मधुकरादिशक्तिग्रहस्येवोपपत्तेः । तदुत्तरमेतत्पदवाच्यत्वेनैनं जानामीत्यनुव्यवसायेन मानसत्वनिश्चयाच्चेति । तत्रापि सादृश्यभ्रमो ज्ञेयः । चक्षुरादीनामिति भाष्यं विवृण्वन्ति स्म अतश्चेति । तदुपजीविनामिति अनुमानादीनामित्यर्थः ।

प्रसङ्गात्। सत्त्वसहितानामेव चक्षुरादीनां प्रामाण्यात्। अतो निरपेक्षा एव भगवन्निःश्वासरूपवेदा एव प्रमाणम्। संकेतग्रहस्तु वैदिक एव वेदविद्भिः कृतः।

भाष्यप्रकाशः।

न्याधीनम्। यदधीनं स तु सत्त्वगुण एव प्रकाशकत्वात्। तत्सहितानामेव तेषां प्रामाण्यात्। तस्य यदा गुणान्तरेणोपमर्दस्तदानुग्राहकाभावेन तेषां नैर्बल्यादप्रामाण्यमेव। सत्त्वशुद्धिस्तु वेदोदितयथावस्थितसाधनैरेवेति तेषां सर्वेषां सुदूरवर्तिनोऽपि वेदस्यैव स्वसार्थकत्वार्थमपेक्षा। वेदस्य तु न कथमपि तदपेक्षा। जैमिनीयादिनये तस्यापौरुषेयत्वात्। काणादादिनये चेश्वरजन्यत्वात्। अतोऽन्यनिरपेक्षा वेदान्तनये भगवन्निःश्वासरूपत्वेनैव सिद्धा आस्तिकमात्रमते अविप्रतिपन्ना वेदा एव प्रमाणम्। अतः सर्वप्रमाणाविषयत्वेऽपि सर्वनिरपेक्षत्वाद्भगवन्निःश्वासरूपत्वात् सर्वास्तिकोपजीव्यत्वाच्च वेदैकविषयत्वं सिद्धान्तीक्रियते। तथा चैषा युक्तिरित्यर्थः। नन्वेवंरूपत्वेऽपि वेदस्य न सर्वनिरपेक्षत्वं शब्दत्वात्। शब्दस्य बोधकतायाः पदपदार्थसंबन्धग्रहाधीनत्वात् तद्ग्रहस्य च प्रयोजकप्रयोज्यव्यवहाराधीनत्वाद्, वस्तुतस्तु ब्रह्मणोऽव्यवहार्यत्वेन तत्र संबन्धग्रहस्य दौर्घट्याद् बोधकताया अभावेन वेदविषयत्वसाधनमप्यनर्थकमेवेत्याशङ्कायामाहुः संकेतेत्यादि। नैवमबोधकत्वं सापेक्षत्वं वा शङ्कनीयम्।

रश्मिः।

एवेति अनुभवसाक्षिकत्वादेवकारः। सत्त्वेत्यादिभाष्यं विवृण्वन्ति यदधीनमिति। तेषामिति चक्षुरादीनामित्यर्थः। वेदोदितेत्यादि। 'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः' इत्यभिप्रेतश्रुत्येकदेशप्रामाण्यात्तथेत्यर्थः। अतो निरपेक्षा इति भाष्यं विवृण्वन्ति अतोन्येति। अत्र विशेषणसंगतैवकारद्वयमयोगव्यवच्छेदकं शङ्खः पाण्डुर एवेति। तथा च भगवन्निःश्वासरूपवेदाः निरपेक्षत्वायोगव्यवच्छेदवन्तः प्रमाणं भगवन्निःश्वासरूपवेदत्वायोगव्यवच्छेदवदिति बोधो भाष्ये। पदपदार्थेति वाक्ये तु ह्याकाङ्क्षादिग्रहाधीनापि। प्रयोजकेत्यादि पूर्वतन्त्रे प्रथमे 'चोदनालक्षणोऽर्थो धर्मः' इत्यधिकरणे प्रयोजकस्य तत्प्रयोज्यस्य च पुरुषस्य यो व्यवहारो गामानयेति वाक्ये गवानयनरूपमध्यमप्रवृत्तिरूपस्तमवलोक्य सर्वैर्गोशब्दस्य सास्नादिमति पिण्डे संगतिर्गृह्यते इति तदधीनत्वमिति स्थितम्। तत्रेयं प्रनाडी गामानयेति प्रयोजकवृद्धेनोक्तः प्रयोज्यवृद्धस्तदर्थमवगत्य गामानयति तत्पश्यन् बालस्तया क्रियया तस्य प्रयत्नमनुमिनोति प्रयत्नवान् क्रियायाः यथाहमिति तेनेच्छामिच्छावान् प्रयत्नाद्यथाहमित्यनुमिनोति तदनन्तरं गोविषयकज्ञानवान् तद्विषयकेच्छाया यथाहमितीच्छया तद्विषयकं ज्ञानमनुमिनोति ततस्तत्र हेत्वाकाङ्क्षायामुपस्थितत्वाच्छब्दमेव कारणत्वेन कल्पयति ततो गवादिपदानां प्रत्येकमावापोद्वापाभ्यां गोपदं गोधीजनकमित्यादि कल्पयति कॢप्ते च तस्मिन्नतिप्रसङ्गभङ्गभिया तज्जननानुकूलं शक्तिरूपं संबन्धं कल्पयति तदुत्तरं च क्वचिद्व्यवहारात् क्वचिदुपमानात् क्वचिच्छब्दाद्व्याकरणादिरूपाद्भवतीति। संबन्धग्रहस्येति प्रतिपाद्यप्रतिपादकभावस्य। आशङ्कायामिति शांकराशङ्कायामित्यर्थः। इदानीं ब्रह्मलोको व्यापकः सर्वोपरि वरीवर्ति 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वा विजिज्ञासितव्यम्' इतिश्रुतेः। अग्रे च तस्य पुरत्वसंपादनार्थं किं तत्र वर्तते यदन्वेष्टव्यं यद्वा विजिज्ञासितव्यमिति प्रश्ने 'यावान् वायमाकाशः तावानेषोन्तर्हृदय आकाशः उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' इत्या-

भाष्यप्रकाशः ।

यतः सदेवेत्यादिसंदर्भ एव तेजःप्रभृतिसृष्ट्युत्तरमेव श्राव्यते । 'तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जम्' इति । 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति । नहि तदानीं वैदिक्या इतरा कापि सृष्टिर्न वा वेदविज्ञ इतरे पुरुषाः, न वा भगवतोऽन्यः कश्चिच्छिक्षक इति प्रथमतः संकेतग्रहो वैदिक एव

रश्मिः ।

दिनाग्निर्वायुः सूर्यचन्द्रविद्युन्नक्षत्राण्युक्त्वा 'यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितम्' इति श्राव्यते । अनित्यतानिवृत्त्यै च ब्रह्मपुरे जीर्णे ध्वस्ते वा तदाश्रितं किमवशिष्यते इति प्रश्ने 'नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिताः एष आत्मा अपहतपाप्मा' इत्यादि श्राव्यते । तेन ब्रह्मपुरशब्देन शरीरं परामृशन्तः परास्ताः । ब्रह्म तु विरुद्धसर्वधर्माधिकरणमित्युपपन्नतरमेतत् । उपबृंहितं च द्वितीये—

'तस्मै स्वलोकं भगवान् सभाजितः संदर्शयामास परं न यत्परम् ।
व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ॥
प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः ।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः' ॥ इति ॥

किंच परिदृश्यमान आदित्यलोके नित्यत्वमस्मदाद्यपेक्षया दृष्टम् । शरीराणां तैजसत्वेन उत्कर्षश्चेति नैयायिका अप्यनुमन्यन्ते । ततोऽप्युत्कृष्ट आनन्दात्मा ब्रह्मलोकोनुमास्यतेऽतो ब्रह्मपुरं निःसंदिग्धं गर्जति सा वैदिकी सृष्टिरस्याः प्रपञ्चात्मिकायाः व्यतिरिच्यत एवैतत्सर्वं हृदि कृत्याहुः **यतः सदेवेत्यादि** । **तेजःप्रभृतीत्यादि** 'तत्तेज ऐक्षत बहु स्यां प्रजायेय' इति । 'ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि' इति ईक्षाश्रावणात् तेजोपां व्यस्तानां ब्रह्मार्चनताबोधनेनोपलक्षणस्य सदेवेत्यत्र वारणार्थं तेजःप्रभृतिसृष्ट्युत्तरमेव श्राव्यत इत्यर्थः । एतद्ग्रन्थप्रयोजनं सदेवेत्यत्रोपलक्षणवारणमुक्तं बीजभेदात्सृष्टयोर्भेद उक्तः । **तदानीमिति** ब्रह्मांशसच्चिद्भ्यां जायमानत्वेनोपलभ्यमानेदानींतनसृष्टेः सदात्मकतापत्तिकाले वैदिक्या ब्रह्मलोकरूपायाः इतरा कापि सृष्टिर्न वक्तुं शक्येत्यर्थः । **संकेतग्रह** इति साधुत्वापरपर्याया अनादिवाचकत्वरूपाया अर्थबोधाविर्भावकशक्तेर्ग्रह इत्यर्थः । अन्यत्र ब्रह्मणः संकोचस्य शक्तित्वम् । सा च शक्तिरतिरिक्तेति मीमांसकाः । तदेव सिद्धान्तेप्यविरुद्धत्वात् । न त्वतिरिक्तशक्तिकल्पने गौरवादर्थसापेक्षं शब्दस्वरूपमेव वाचकत्वापरनामकं शक्तिः कारणत्वादिवदिति वैयाकरणोक्तमादरणीयमिति चेन्न । आविर्भावकशक्तिसत्त्वेन तस्या एवार्थबोधार्थं शब्देपि स्वीकारेणातिरेकस्यादोषत्वात् । तदाधारत्वस्य च बोधरूपकार्यादेव सिद्धत्वात् । ननु केयमाविर्भाविका शक्तिरिति चेन्न । उपादानस्य कार्यस्य व्यवहारगोचरत्वसंपादिका शक्तिः सेति । आविर्भावस्य व्यवहारयोग्यतात्मकत्वात् । न च किमनयेति शङ्क्यम् । तदाधारत्वस्य कारणलक्षणत्वात् । यत्तु अनन्यथासिद्धनियतपूर्ववर्तित्वं कारणत्वं तन्न । पूर्ववर्तित्वस्य कार्यसापेक्षत्वात् कार्यस्य च नियतपश्चाद्भावित्वात् अन्योन्याश्रयग्रासात् । अनन्यथासिद्धत्वस्यान्यथासिद्धभिन्नत्वेनान्यथासिद्धेश्चान्यत्र गृहीतकारणताकत्वरूपत्वेन तत्राप्यस्यैव कारणलक्षणस्य वक्तव्यत्वादात्माश्रयापत्तेश्च । गौर-

भाष्यप्रकाशः।

प्रपञ्चो वेदविद्भिर्भगवच्छिक्षया वा भगवद्दत्तस्वमनीषया वा भगवदिच्छामात्रेणैव वा कृत इति तथा गृहीतसंबन्धस्य वेदस्य नाबोधकत्वम्, न वा लौकिकसापेक्षत्वमित्यर्थः। एवमेव पुरुषसूक्तेऽपि सहस्रशीर्ष्णो महापुरुषाद्विराजस्तन्मध्यगानां च सृष्ट्यादिकं श्रावयित्वा,

'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे।
सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते' ॥

इत्यादि मन्त्रत्रयं पठ्यते। तत्रास्मिन् मन्त्रे हेतुः पूर्वपक्षनिरासे। अस्मिन् प्रपञ्चेनादित्वं परमाणुजन्यत्वगुणजन्यत्वादिशङ्का महति पुरुषे च शबलत्वादिशङ्का न कार्या। तत्र हेतुः, 'तमसः पारे' इति। अस्य पदद्वयस्य महापुरुषे सर्वेषु रूपेषु च देहलीदीपन्यायेन संबन्धः। यदास्त इति यत्पदं हेतुबोधकम्। तेनास्मिन् मन्त्रे छान्दोग्यवदेव सर्वं सृष्टिस्वरूपमभिवदितृत्वेन भगवत एव शिक्षकत्वं च बोधितम्। ततो द्वितीये,

'धाता पुरस्ताद् यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः।
तमेवंविद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' ॥

इति मन्त्रे धातुः प्रथमं तद्बोद्धृतया तद्वक्तृत्वं शक्रस्य दिशां देवतानां श्रोतृत्वं चोक्त्वा उत्तरार्धे केवलस्यैव सर्वकर्तृत्वेन सर्वात्मकत्वेन यद्वेदनं तस्य फलमाह। ततस्तृतीये,

रश्मिः।

वाच्च। नापि कारणं कारणमित्यनुगताकारप्रतीतिसंज्ञिकजातिविशेषस्तत्। अभावेपि तस्याङ्गीकारेण जातेरेवाशक्यवचनत्वात्। अखण्डोपाधित्वं त्वगतिकगतिः। नापि कार्यानुकूतान्वयव्यतिरेकित्वं तत्। मूलकारण आकाशादौ च व्यभिचारात्। तत्तन्मते तस्य तस्य नित्यविभुत्वेन कालतो देशतश्चाव्यतिरेकात्। नन्वीश्वरेच्छासंकेतः। मैवम्। शब्दवृत्तित्वाभावात्। संबन्धान्तरस्याप्रयोजकत्वात्। अतस्तद्देशकालविभेदेनास्माभिरुच्चार्यमाणोयं शब्द इममेवार्थं बोधयतु न त्वन्यमितीश्वरेच्छाकृतनियमशक्तिसंकोच एव संकेतः। तत्रत्यानामपि न सर्वदा ब्रह्म प्रत्यक्षमिति ध्वनयन्तः पक्षान्तरमाहुः भगवद्दत्तेत्यादि। पूर्वं भगवद्दीक्षयेत्यत्राप्तवाक्याच्छक्तिग्रह उक्तः। इदानीं विवृतेर्वदन्तीत्युच्यते यत्तदुच्यते भगवद्दत्तमनीषां विना विवृत्यसंभवात्। वक्ष्यमाणभगवदिच्छामात्रेणेत्यत्र व्याकरणाच्छक्तिग्रहः। 'अनागतमतीतं च' इतिवाक्याद्वेदविदां व्याकरणदर्शनेच्छाविषयत्वात्। न च विपरीतं कुतो न स्यादिति वाच्यम्। मात्रप्रत्ययेन भगवद्दत्तमनीषाव्यवच्छेदात्। दत्तमनीषाया इच्छाविषयमनीषातिरिक्तत्वात्। महाराजाधिराजत्वेनोपपत्तेः। ब्रह्मलोकेप्युत्तममध्यमनिकृष्टव्यवहारोस्तीत्यपि सूचितमनेन। अन्यथा लीलानुपपत्तेः। तदुक्तम्— 'तेने ब्रह्म हृदा य आदिकवये' इति। पूर्वपक्षेति 'सहस्रशीर्षा' इति ग्रन्थस्मारितपूर्वपक्षनिरासे। अस्मिन्निति परिदृश्यमानेपीत्यर्थः। न कार्येति विधेरपि सृष्टस्रष्टृत्वादस्य प्रपञ्चस्य तत्सृष्टस्रष्टृस्रष्टृत्वाच्च मीमांसकनैयायिकसांख्यैर्न कार्येत्यर्थः। संबन्ध इति यतस्तमसोऽविद्यायाः पारे धीरः सर्वाणि रूपाणि विचित्य नामानि कृत्वाभिवदन्नास्तेऽतस्तमसः पारे महान्तं पुरुषमादित्यवर्णमेतमहं वेदेत्यर्थात्तथेत्यर्थः। प्रकर्षश्चाधिदैविकतेत्याहुः देवतानामिति। प्रविद्वानित्यस्यार्थमाहुः श्रोतृत्वमिति। एवमित्यस्यार्थमाहुः सर्वकर्तृत्वेनेत्यादि। फलमिति अमृत इह भव-

आकृतिमात्रार्थं लोकापेक्षा । अनधिगतार्थगन्तृ च प्रमाणं, लोकानधिगत इत्यर्थः । यज्ञब्रह्मणोरलौकिकत्वं सिद्धमेव । लौकिको व्यवहारः सन्निपात-

भाष्यप्रकाशः ।

'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः' ।।

इतिमन्त्रे तादृशे यज्ञे सिद्धानामेव धर्माणां प्राथम्यं तत्फलं चाह । तेनापि पूर्वोक्त एवार्थः सिद्धः । एतदेव श्रीभागवतद्वितीयस्कन्ध उपबृंहितम् ।

'यदास्य नाभ्यान्नलिनादहमासं महात्मनः ।
नाविदं यज्ञसंभारान् पुरुषावयवादृते ।।
तेषु यज्ञस्य पशवः सवनस्पतयः कुशा' । इत्यारभ्य,
'तमेव यज्ञपुरुषं तेनैवायजमीश्वरम्' ।।

इत्यन्तेन । अतो वेदैकसमधिगम्यत्वसाधनं नानर्थकमिति । ननु भवत्वेवं तदानीन्तनानां, तावतेदानीन्तनानां कथं संकेतग्रह उपायाभावात् । तथा सतीदानीं तु स दोषस्तदवस्थ इत्यत आहुः आकृतीत्यादि । आकृतिमात्रार्थमिति आकृत्यवधारणार्थम् । सिद्धमेवेति तव मतेऽपि सिद्धमेव । तथाच यथा दारवमार्तिकाद्युपकरणे गृहीतसंकेताः सौवर्णेऽपि तस्मिंस्तया आकृत्या संकेतमवधारयन्ति, तथात्राप्तवाक्याद् यादृशो लौकिकस्तादृशे वैदिकेऽपि प्रपञ्चे संकेतमवधारयिष्यन्तीतिबोधनार्थम्, 'यथा सौम्यैकेन मृत्पिण्डेन' इत्यादीनां लौकिकदृष्टान्तानां श्रुतावप्यादरणादिति लौकिकानां पुरुषाणामेव परापेक्षत्वं, न वेदस्य । यदि चैवमपि सापेक्षत्वमेवेति विभाव्यते तदा तु धर्मब्रह्मणोरपि बोधने लोकप्रसिद्धपदादिसमभिव्याहारसापेक्षत्वादनपेक्षतायै तिलाञ्जलिरेव प्रदीयताम् । तथानधिगतार्थगन्तृत्वस्यापि । प्रसिद्धपदसमभिव्याहारशून्यतायामबोधकताया एवापत्तेर्धर्मोऽपि न बुद्ध्येतैव । तथा निषेधावधिभूतब्रह्मस्वरूपमपि लोकप्रसिद्धमर्थमेव निषिद्ध्य बोध्यत

रश्मिः ।

तीत्यमृतरूपं फलमित्यर्थः । **तानीत्यस्य** यज्ञेन पुरुषावयवेन यजनं यत्तत्परामर्शकत्वात्तदर्थमाहुः **सिद्धानामेवेति** । **तत्फलमिति** महिमानो भगवद्विभूतिरूपाः नाकं स्वर्गं सचन्ते 'षच समवाये' संबध्नन्तीति धर्मफलमित्यर्थः । **पूर्वोक्त** इति वैदिक्येव सृष्टिर्वेदविद एव पुरुषा भगवानेव शिक्षक इति वैदिकसृष्टौ वेदशब्दानां संकेतग्रह इत्युक्त इत्यर्थः । 'यज्ञेन यज्ञमयजन्त' इत्यंशमुपष्टभ्नन्ति **एतदेवेत्यादि** । **स दोष** इति संकेताग्रहरूपदोष इत्यर्थः । **आकृतीति** 'मात्रं कात्स्न्र्येऽवधारणे' इति कोशात् । **तव मत** इति पूर्वोक्तलक्षणाङ्गीकर्तुर्मीमांसकशांकरादेर्मतेपि । **आप्तवाक्यादिति** तेन पूर्वोक्ता प्रनाडी संगृहीतेति बोधितम् । प्रस्थानरत्नाकरे तु प्रगल्भातिबालत्वनुपादाय प्रत्यक्षविरोधो दत्त इत्यदोषः । **आदरणादिति** एतेनैवकारो बहुश्रुत्युपष्टब्धत्वाल्लौकिकसिद्धत्वव्यवच्छेदकः । **परापेक्षत्वमिति** लौकिकपदेष्वाकाङ्क्षादिरूपपरापेक्षत्वमित्यर्थः । **वेदे** पुरुषाभावादाहुः **वेदस्येति** । **एवमपीति** आकृतिमात्रार्थे लोकापेक्षायामपीत्यर्थः । **निषेधावधीति** निषेधश्चासाववधिरिति कर्मधारयः तद्भूतेत्यर्थः । निषेधशेषभूतब्रह्मस्वरूपमि-

१. वैदिक्येव सृष्टिः वेदविदेव पुरुषः भगवानेव शिक्षकः इति वैदिकसृष्टौ वेदशब्दानां संकेतग्रह इति.

रूपत्वात् पुरुषार्थासाधक एव। तर्हि शब्दमात्रस्य कथं ग्रहणम्। वेदव्याख्यातृवाग्विषयत्वादिति ब्रूमः।

भाष्यप्रकाशः।

इत्यस्ति तद्बोधनेऽपि लोकापेक्षेति। तदभावे तदपि न बुद्ध्येत। अथ तत्र प्रसिद्धान्यपि पदादीनि वैदिकान्येवेति न दोष इति चेत् तर्ह्यत्रापि व्यवहारं वैदिकमेवानुसंधत्स्व। इदानीं विधूयमानेऽपि तस्मिन् भगवता,

'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्।
एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम्।
मायामात्रमनूद्यान्ते प्रतिषिद्ध्य प्रसीदति'॥

इति श्रीभागवते कथनात्। अतो धर्मब्रह्मबोधन इव वैदिकप्रपञ्चबोधने आकृतिमात्रार्थं लोकापेक्षायामपि न दोष इत्यर्थः। तदेतदुक्तं, सिद्धमेवेत्यन्तेन। नन्वेवं सति लौकिकव्यवहारस्याप्यादरे को दोष इत्यत आहुः लौकिक इत्यादि। एकादशस्कन्धे,

'सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः।
व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः'॥

इति भगवता प्राकृतगुणान् प्रकृत्य मनआदिव्यवहारस्य सन्निपातत्वकथनाल्लौकिकव्यवहारस्य सन्निपातकार्यत्वेनाऽप्रामाणिकत्वात् पुरुषार्थासाधक इत्यतो नाद्रियत इत्यर्थः। एवं ब्रह्मणो वैदिकव्यवहारविषयत्वमसहमानश्चोदयति तर्हीत्यादि। यदि सूत्रकृत एवं ब्रह्मणो वैदिकव्यवहारविषयत्वमभिप्रेतं स्यात् तर्हि शब्दमात्रस्य नाशब्दमित्यनेन कथं ग्रहणं कुर्यात्। नावेदं, नावेदान्तमित्येव वदेत्। अतो नायं सूत्रार्थ इत्यर्थः। अत्र समादधते वेदेत्यादि। "अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि' इति मैत्रेयीब्राह्मणे श्रावणाद् वेदव्याख्यातृवाचामपि तथात्वेन ब्रह्मणस्तद्विषयत्वमपि सूत्रकृतोऽभिप्रेतमित्यतः शब्दशब्दग्रहणमिति ब्रूमः। तथा चैवमभिप्रेतत्वादयमेव सूत्रार्थो, नान्यः। सांख्यनिरा-

रश्मिः।

त्यर्थः। **तदभाव** इति लोकाभावे। **तदपि** निषेधावधिब्रह्मस्वरूपमपीत्यर्थः। **दोष** इति सापेक्षत्वलक्षणः। **तत्रेति** वेद इत्यर्थः। **सिद्धमेवेत्यन्तेनेति**। **भाष्ये**। **अनधिगतेति** अनधिगतो योर्थो यागब्रह्मात्मकः तस्य गन्तृत्वप्रतिपादकत्वेन प्रापकत्वं प्रमाकरणत्वं तु नोक्तमनधिगतार्थप्रमाकरणत्वेन संशयविपर्यासकरणत्वाभावापत्त्या संशयविपर्यासप्रतिपादकवेदेऽप्रामाण्यप्रसङ्गात्। अधिगतार्थगन्तृत्वं वेदभागेपि पुनर्दर्शने भवति तद्वारणायाहुः **लोकानधिगत** इति। यागब्रह्मणोः पुनः पुनर्ज्ञानेपि वेदाधिगतत्वेपि लोकानधिगतत्वान्नाव्याप्तिरित्यर्थः। इदं लक्षणं दूष्यत्वेन जयराम्यामपि शिरोमणिटीकायामादृतम्। दूषणं तु लोकानधीतिं भाष्याभासोक्तम्। परिहारस्तु भाष्यम्। **प्रकृते**। **अप्रामाणिकत्वादिति** द्वैतापादकत्वेन द्रव्याद्वैतप्रमाऽजनकत्वात्तथा। **तथात्वेनेति** ब्रह्मप्रतिपादकत्वेनेत्यर्थः। **नान्य** इति अशब्दशब्दोत्र प्रकृतिवचन इति शंकराचार्यप्रभृतयः। सोन्यः सूत्रार्थः। स नेत्यर्थः। एवकारव्यवच्छेद्योप्ययमर्थः। अन्यैः सांख्यमत्र निरस्तमित्युक्तम्। तस्यानतिप्रयोजकत्वे हेतुमाहुः **सांख्येत्यादि**।

एतेन 'मनसैवानुद्रष्टव्यम्' इत्यपि समर्थितम् । तस्मात् सृष्ट्यादिप्रतिपादका अपि वेदान्ताः साक्षाद् ब्रह्मप्रतिपादका इति सिद्धम् ॥ ४ ॥

भाष्यप्रकाशः ।

करणस्याग्रे आनुमानिकाधिकरणे करिष्यमाणत्वेनात्र तत्प्रयोजनाभावात् । अतो गृहप्रविष्टचौरतुल्यस्य मिथ्यावादिन एव निराकरणायेदं सूत्रमित्यर्थः । नन्वेवं सति सूत्रत्वव्याख्यानत्वादीनां सूत्रान्तरादिष्वपि सत्त्वाद् तद्व्याख्यानादिकमपि कुतो न संगृह्यत इति चेद्, उच्यते ।

'किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन' ॥

इत्येकादशस्कन्धे 'वेदान्तकृद्वेदविदेव चाहम्' इति गीतायां च भगवद्वाक्याद् यथावस्थितवेदार्थवेत्ता भगवानेव । स तु, मां विधत्त इत्यादि, 'वेदैश्च सर्वैरहमेव वेद्यः' इति च वक्ति । तथा,

'वदन्ति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः ।
तेषां विकल्पप्राधान्यमुताहो एकमुख्यता' ॥ इत्युद्धवप्रश्ने,
'कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ।
मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥
तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ।
ततो भृग्वादयोऽगृह्णन् सप्त ब्रह्ममहर्षयः ॥
तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः ।
मनुष्याः सिद्धगन्धर्वाः सविद्याधरचारणाः ॥
किंदेवाः किन्नरा नागा रक्षःकिंपुरुषादयः ।
बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः ॥
याभिर्भूतानि भिद्यन्ते भूतानां मतयस्तथा ।
यथाप्रकृति सर्वेषां चित्रा वाचः स्रवन्ति हि ॥
एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणाम् ।
पारंपर्येण केषांचित् पाषण्डमतयोऽपरे ॥
मन्मायामोहितधियः पुरुषाः पुरुषर्षभ ।
श्रेयो वदन्त्यनैकान्त्याद् यथाकर्म यथारुचि' ॥ इत्याद्याह,

अत्रागृह्णन्नित्यस्य किंपुरुषादय इत्यन्तं पृथक्संबन्धः । बह्वीनां प्रकृतीनां चित्रवाङ्निर्गमहेतुत्वम् । शेषं तु स्फुटमेव । तेन भगवदुक्तिविरुद्धस्य वेदव्याख्यानत्वप्रतीतावपि तस्य व्याख्यानत्वाभाव एव सिद्ध इति तन्न संगृह्यत इत्यवधेहि । एवं शब्दशब्दोक्तिं साधयित्वा तेन सिद्धमाहुः एतेनेत्यादि । एवं वैदिकशब्दप्रतिपाद्यत्वसमर्थनेन मनसैवानुद्रष्टव्यमिति श्रुतिसिद्धं कामवि-

रश्मिः ।

अग्र इति चतुर्थपाद इत्यर्थः । चित्रवागिति वाचश्च वेदव्याख्यानरूपा ज्ञेयाः । एतेनेति अर्थ उक्तः । कामपदं क्रोधोपलक्षकम् । वेदव्याख्यातृवाग्विषयत्वेन तत्साध्यस्वारस्येन ।

स्यादेतत् । कर्तृत्वमकर्तृत्वं च वेदे प्रतीयते ब्रह्मणः । 'यतो वा इमानि भूतानि जायन्ते', 'स आत्मान॰ स्वयमकुरुत,' 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्,' 'असङ्गो ह्ययं पुरुषः' इत्येवमादिवाक्येषु । तत्र द्वेधा निर्णयः संभवति । सर्वभवनसमर्थत्वाद्विरुद्धसर्वधर्माश्रयत्वेन, अन्यतरबाधाद्वा । अलौकिकापेक्षया लौकिकस्य जघन्यत्वात् कर्तृत्वादेर्लोकसिद्धत्वात् कर्तृत्वबाध एव युक्तः । ईक्षत्यादिकं तु प्रकृतिगुणसंबन्धादपि ब्रह्मणो युज्यते । तस्मादलौकिकसर्वभवनसमर्थत्वादिकल्पनापेक्षया लौकिक एवान्यतरबाधो युक्तः । ततश्च सत्यस्वरूपादन्यदेवैतदिति स्वयमेवाशङ्क्य परिहरति सूत्रकारः ।

भाष्यप्रकाशः ।

वर्जितातिशुद्धमनसानुद्रष्टव्यमिति समर्थितम् । अपिशब्दात्, 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्' इत्यादीनामपि संग्रहः । एवं व्यवस्थया विरोधपरिहारेण ब्रह्मणः सर्वप्रमाणाविषयत्वतद्विषयत्वयोः समर्थनेन यत् सिद्धं तन्निगमयन्ति तस्मादित्यादि । एवं ब्रह्मणोऽलौकिकप्रमाणगम्यत्वाद्वेदान्तानां ब्रह्मप्रतिपादकत्वेन विचारणीयत्वं सिद्धमित्यर्थः ॥ ४ ॥

अतः परं, गौणश्चेन्नात्मशब्दादिति द्वितीयं सूत्रमवतारयन्ति **स्यादेतदित्यादि** । **कर्तृत्वमकर्तृत्वं चे**ति चकारादुपादानत्वमनुपादानत्वं च । अत्र पूर्वश्रुतौ हेतुत्वमात्रं प्रतीयते । तत्प्रकारान्तरेणापि संभवतीत्यतो द्वितीयश्रुत्युपन्यासः । तत्र कर्तृत्वं स्फुटमिति तद्विरुद्धं निष्क्रियत्वं शान्तत्वं च । तृतीयश्रुतौ तथैवोपादनत्वविरुद्धं निष्कलत्वं निरवद्यत्वं च । चतुर्थ्यामसङ्ग इत्यनेनासक्तेः संसर्गस्य च निषेधः क्रियां विकारित्वं च विरुणद्धि । **युक्त** इति उत्पत्तिशिष्टोत्पन्नशिष्टन्यायेनोपजीव्योपजीवकभावेन च बुद्धावारोहाद्युक्तः । एतदिति शबलं स्वरूपम् ।

रश्मिः ।

समर्थितमिति न यत्र मनो निविशत इतिवाक्येन मनोऽविषये मनसैवेति बृहदारण्यकविरुद्धमतो विमतं ब्रह्म वेदो व्याख्यातृमनोविषयं वेदव्याख्यातृवाग्विषयत्वात् । अस्मदादिवाग्विषयवत् । तथा च श्रुतिः 'यन्मनसा ध्यायति तद्वाचा वदति' इति । एवं समर्थितमित्यर्थः । भक्तेर्दुर्लभत्वादप्रकरणत्वाच्च । 'भक्तिरस्य भजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन्मनःकल्पनमेतदेव च नैष्कर्म्यम्' इतिश्रुतेर्विषयः । अत एवाहुः **अपी**ति । अत्र धीरत्वेन प्रत्यगात्मदर्शनत्वे कार्यकारणभावः सोपि भक्तिमार्गविषयः । विवेकधैर्याश्रयग्रन्थस्य भक्तिमार्गीयत्वात् । **आदिशब्देन** 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इतिश्रुतिः मैत्रेयीब्राह्मणस्थत्वाद्भक्तिमार्गीयत्वम् । एवं 'तरति शोकमात्मवित्' इत्यत्र सर्वात्मभावप्रकरणीयत्वात् । तस्मादुक्तश्रुतिरत्रेति ज्ञेयम् । **व्यवस्थे**ति प्रमाणबलेनाविषयः स्वेच्छया विषयः । **ब्रह्मप्रती**ति स्वरूपलक्षणवन्निर्वाहकसंगत्या साक्षाद्ब्रह्मप्रतिपादकत्वेनेत्यर्थः । तेन चिद्रूपे लक्षणाव्याप्तिः परिहृता । तेनैव प्रकृतिपरमाण्वादावतिव्याप्तिरपि निवारिता ॥ ४ ॥

अवतारयन्तीति प्रसङ्गसंगत्यावतारयन्तीत्यर्थः । **प्रकारान्तरेणे**ति निमित्तत्वमात्रेणेत्यर्थः । **उत्पत्तिशिष्टेत्यादि** द्वितीयस्य द्वितीयपादे 'गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात्' इतिसूत्रे वैश्वदेव्यामिक्षेति यागं विधायाम्नायते वाजिभ्यो वाजिनमिति । तत्रोत्पत्तावामिक्षारूपद्रव्ययुक्तं कर्मावधारितमिति न तत्र वाजिनरूपद्रव्यान्तरसंबन्धापेक्षेति वाजिनं तत्र प्रवेशमलभमानं सत् कर्म भिनत्ति इति स्थितम् । तेन न्यायेनेत्यर्थः । **उपजीव्येत्यादि** एतच्च—

'उपजीव्यत्वतः श्रौतवाक्यैश्चान्यपरत्वतः । अन्तरङ्गत्वतश्चापि निर्विशेषं निरूप्यते' ॥

इत्यादिपूर्वपक्षग्रन्थे विद्वन्मण्डने स्फुटम् । **एतदिती**ति स्यादेतदिति भाष्यान्वय इत्यर्थः ।

गौणश्चेन्नात्मशब्दात् ॥ ५ ॥

ईक्षत्यादियुक्तः परमात्मा गौणः प्रकृतिगुणसत्त्वसंबन्धवानिति चेन्न तथा वक्तुं न शक्यते । कुतः । आत्मशब्दात् । 'आत्मा वा इदमेक एवाग्र आसीत्' इत्युपक्रम्य, 'स ऐक्षत' इत्युक्तम् । आत्मशब्दः पुनः सर्वेषु वेदान्तेषु निर्गुणपरब्रह्मवाचकत्वेनैव सिद्धः । तस्यैव जगत्कर्तृत्वं श्रुतिराह । ननु चोक्तमन्यतरबाधो युक्त इति । न युक्तः । स्वातन्त्र्याभावेन सगुणस्य कर्तृत्वायोगात् । वेदाश्च प्रमाणभूताः । ततः सर्वभवनसामर्थ्यमेव श्रुतिबललभ्यमङ्गीकर्तव्यम् ।

भाष्यप्रकाशः ।

गौणश्चेन्नात्मशब्दात् ॥ ५ ॥ अयुक्तत्वे हेतुमाहुः स्वातन्त्र्याभावेनेत्यादि । कारकमात्रस्य स्वव्यापारं प्रति स्वातन्त्र्ये सत्यपि यत् कर्तृलक्षणतया स्वातन्त्र्यस्य कीर्तनं तत् कारकान्तरनियामकतयैवातो गुणानामुपादानत्वे वा करणत्वे वाऽवश्यं कर्तृनियम्यतैव युक्ता, न तु प्रयोजकता । तथा सति तेषामेव सृष्ट्यादिकार्ये स्वातन्त्र्येण ब्रह्मनियामकतया सगुणस्य स्वातन्त्र्याभावेन कर्तृत्वायोगादित्यर्थः । ननु गुणानां जडत्वेन चेतनाधीनत्वान्न सगुणस्य स्वातन्त्र्यहानिरतो गुणसंबन्धिन्येव कर्तृत्वं युक्तमित्यत आहुः वेदाश्चेत्यादि । अनपेक्षत्वाद्भगवन्निःश्वासरूपत्वाच्च वेदाः स्वतः प्रमाणभूताः । ते च, 'सदेव सौम्येदमग्र आसीत्', 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यादिषु विशेष्यान्वितेनैवकारेणेतरयोगं व्यवच्छिन्दन्तस्तदानीं केवलस्य शुद्धस्यैवात्मनः कर्तृत्वमावेदयन्ति । नच कालवाचकाग्रपदेन तत्सत्ताया अपि बोधनादेवकारो नान्ययोगव्यवच्छेदक इति शङ्क्यम् । बोधनार्थमेव तथोक्तेः । कथमेतदितिचेदित्थम् । इयं हि श्रुतिः सर्वापेक्षया प्राथमिकं वृत्तान्तं वक्ति । तत्रैवकारेण सदितरयावद्व्यवच्छेदे भिन्नविधप्रमाणान्तरस्यापि व्यवच्छिन्नत्वात् तस्याप्यभावेनाग्रपदे प्रमाणान्तरसिद्धकालानुवादकतया वक्तुमशक्यत्वेन, एतस्यैव वाक्यस्य कालसत्ताबोधकत्वे चात्मासीत् कालोऽप्यासीदित्येवं वाक्यभेदप्रसङ्गेन कालसत्ताया अशक्यवचनत्वे केवलस्यात्मनोऽपि निरूपणमशक्यमिति वाक्यस्याबोधकत्वे प्रसक्ते सृष्ट्युत्तरव्यवहारानुसारेण सर्वाधारतया प्रतीयमानो यः कालस्तदुपरञ्जनेन पूर्ववृत्तान्तं वक्तीत्येवं बोधनार्थत्वं जानीहि । अत एव सृष्ट्युत्तरमपि केवलं ब्रह्मैवेति बोधनाय सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्येवं श्रुत्यन्तरेऽप्युच्यते । एवं तदानीमितराभावे गुणानां सत्ता तदानीं वक्तुं न शक्यत इति न सगुणः कर्ता । नचोत्पत्तिशिष्टन्यायस्योपजीव्यन्यायस्य वा

रश्मिः ।

गौणश्चेन्नात्मशब्दात् ॥ ५ ॥ **कीर्तन**मिति 'स्वतन्त्रः कर्ता' इति सूत्रे कीर्तनमित्यर्थः । **गुणाना**मिति प्राकृतानामित्यर्थः । **निःश्वासे**त्यादि व्यासादिभिरुच्चार्यमाणा वेदाः परंपरया निःश्वासा इति वक्तव्यम् । **एवकारेणे**त्यादि सदन्ययोगव्यवच्छेदवदिदमिति । एकान्ययोगव्यवच्छेदवानात्मेति च यथायथं बोधात्तथेत्यर्थः । **नान्ययोगे**त्यादि किंत्वयोगव्यवच्छेदक इति भावः । तथा च सत्त्वावच्छिन्न इदंत्वावच्छिन्नायोगव्यवच्छेदवान् तथैकत्वावच्छिन्न आत्मायोगव्यवच्छेदवानिति च बोधात्कालसत्तायामपि न क्षतिरिति भावः । **वाक्यभेदे**त्यादि वाक्यभेदस्य दोषत्वं गौरवप्रसञ्जकतया पौरुषेयत्वं वा दूषकताबीजं पुरुषाणां दोषत्वस्य संभावितत्वात् ।

किंच । अस्तिभातिप्रियत्वादिधर्मवद्ब्रह्मगतकर्तृत्वं लोके प्रतीयते । कार्यत्वात् । तस्मादात्मशब्दप्रयोगाद् गुणातीतमेव कर्तृ ॥ ५ ॥

भाष्यप्रकाशः ।

प्रवृत्तिरत्र शङ्कनीया । विरुद्धधर्माधारत्वेन बाध्यबाधकभावाभावात् । ततः श्रुतिबललभ्यं, श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपेषु षट्सु प्रमाणेषु श्रुतिबलसिद्धं ब्रह्मणः सर्वभवनसामर्थ्यमेवाङ्गीकर्तव्यमित्यर्थः ।

ननु मास्त्वेवं कर्तृत्वादिबाधस्तथापि कर्तृत्वस्य लौकिकत्वं नापैतीति तत एव तद्बोधोऽस्त्वित्यत आहुः **किंचे**त्यादि । प्रियत्वादीत्यादिपदेनापहतपाप्मत्वसंग्रहः । तथाच ब्रह्मधर्मस्य

रश्मिः ।

विरुद्धेत्यादि । साधनाध्यायद्वितीयपादे 'अम्बुवदग्रहणात्' इत्यधिकरणे वक्ष्यमाणेन विरुद्धधर्माधारत्वेन बाध्यबाधकभावाभावेन निर्गुणे धर्मप्रवेशस्य संभवेनोपजीव्यत्वादीनां सगुणप्रतिपादकास्वपि सत्त्वेन न न्यायप्रसर इत्यर्थः । **ततः सर्वे**त्यादि भाष्यं विवृण्वन्ति **ततः श्रुती**त्यादि । तत्र 'निरपेक्षो रवः श्रुतिः' 'सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते' इति पदार्थे लिङ्गं 'समभिव्याहारो वाक्यम्' 'उभयाकाङ्क्षा प्रकरणम्' 'देशसामान्यं स्थानम्' समाख्या यौगिकः शब्दः तत्र यजेत इत्याद्या विधात्री श्रुतिः । व्रीह्यादिरूपा अभिधात्री विनियोक्त्री च । स यस्य शब्दस्य श्रवणमात्रेण संबन्धप्रत्ययः । सा च त्रिधा विभक्तिरूपा, एकाभिधानरूपा, एकपदरूपा चेति । 'व्रीहिभिर्यजेत' इत्यत्र विभक्तिरूपया तृतीयया श्रुत्या व्रीहीणां यागाङ्गत्वम् । पशुना यजेत इत्यत्रैकत्वपुंस्त्वयोः समानाभिधानरूपया श्रुत्याङ्गत्वम् । यजेत इत्याख्याताभिहितसंख्याया भावनाङ्गत्वम् । समानाभिधानश्रुतेरेव पदश्रुत्या च यागाङ्गत्वं 'बर्हिर्देवसदनं दामि' इत्यस्य लवनाङ्गत्वलिङ्गेनायं मन्त्रो लवनं प्रकाशयितुं समर्थः । वाक्येन यस्य पर्णमयी जुहूर्भवतीत्यत्र पर्णताया जुह्वङ्गत्वम् । साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चरणरूपवाक्यसत्त्वात् । प्रकरणेन प्रयाजादिषु समिधो यजतीति । अत्रेष्टविशेषस्यादर्शनात्समिधा योगेन किमित्यस्त्युपकार्याकाङ्क्षा । दर्शपूर्णमासवाक्येपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत् कथमित्यस्त्युपकारकाकाङ्क्षा तया प्रयाजादीनां दर्शपूर्णमासाङ्गत्वम् । स्थानेन यथासंख्यपाठरूपेण 'ऐन्द्राग्नमेकादशकपालं निर्वपेत् वैश्वानरं द्वादशकपालं निर्वपेत्' इत्येवं विहितेष्टिषु इन्द्राग्नी रोचनादिव इत्यादीनां याज्यानुवाक्यामन्त्राणां यथासंख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं विनियोगाः संनिधिपाठरूपेण स्थानेन वैकृतानामङ्गानां प्राकृताङ्गाननुवादेन विहितानां विकृत्यर्थत्वम् । तेषां कैमर्थ्याकाङ्क्षायाः फलवद्विकृत्यपूर्वस्य भाव्यत्वेन संबन्धादेव पूरणात् । अनुष्ठानसादेश्यरूपेण स्थानेन पशुधर्माणामग्नीषोमीयार्थत्वं समाख्यया वैदिक्या होतृचमस इति होतुश्चमसभक्षणाङ्गत्वं लौकिक्याध्वर्यवसमाख्ययाध्वर्योस्तत्तत्पदार्थाङ्गत्वम् । **एवे**ति लिङ्गादिषु प्रत्यक्षस्य विनियोजकस्य शब्दस्याभावात्ते श्रुतितो निर्बला इत्येवकारः । अत एव गार्हपत्यमुपतिष्ठत इत्यत्र लिङ्गादैन्द्या इन्द्रोपस्थानार्थत्वं कल्प्यते । तावत्प्रत्यक्षया श्रुत्या गार्हपत्योपस्थानार्थत्वं प्राप्यत इति दृश्यते मीमांसायाम् । **अपैती**ति अप आ एतीति पदच्छेदः तेन नात्र वृद्धिदोषः न पररूपं, वृद्ध्यनन्तरं तथास्तु । **तथाचे**ति अस्तिभातिप्रियत्वाश्रयत्वेन-

नन्वात्मशब्दोऽपि लोकवद् गौणोऽस्तु । लोके हि केनचित् पृष्टो विष्णुमित्र आह, यज्ञदत्तो ममात्मेति । अत्र गौणत्वमुपचार इत्येवं प्राप्तेऽभिधीयते ।

तन्निष्ठस्य मोक्षोपदेशात् ॥ ६ ॥

एवं हि श्रूयते । 'असद्वा इदमग्र आसीत्, ततो वै सदजायत,' 'तदात्मानꣳ स्वयमकुरुत' इत्युपक्रम्य, 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति' इति । प्रापञ्चिकधर्मरहिते ब्रह्मणि एतस्मिन् पूर्वोक्तजगत्कर्तरि परिनिष्ठितो मुक्तो भवतीत्यर्थः । तत्र यदि जगत्कर्ता गौणः स्यात् तन्निष्ठस्य संसार एव स्यान्न मोक्षः ॥ ६ ॥

भाष्यप्रकाशः ।

कर्तृत्वस्य लोके प्रत्ययेन तस्य कार्यासाधारण्याभावान्न लौकिकत्वमिति न तत्प्रयुक्तोऽपि बाध इत्यर्थः । सिद्धमाहुः **तस्मादित्यादि** । केनापि प्रकारेण बाधस्य वक्तुमशक्यत्वादात्मशब्दश्रुतिरूपमुख्यप्रमाणप्रमितत्वाच्च तथेत्यर्थः ॥ ५ ॥

तन्निष्ठस्य मोक्षोपदेशात् ॥ ६ ॥ एवं द्वितीयसूत्रं व्याख्याय, 'तन्निष्ठस्य मोक्षोपदेशात्' इति तृतीयसूत्रमवतारयन्ति **नन्वात्मेत्यादि** । लोकवत्पदं विभजन्ते **लोके हीत्यादि** । तथाच मास्तु गुणसंबन्धाद् गौणत्वमात्मनस्तथाप्यात्मपदश्रुतेर्मुख्यौपचारिकसाधारण्येन संदिग्धत्वान्नानया निर्णय इति पूर्वपक्षाशयः । अत्र सूत्रं पठित्वा समादधते **एवं हीत्यादि** । असदिति लौकिकविलक्षणमव्याकृतम् । यदा ह्येवेत्यस्यार्थस्तु, यदा यस्मिन् काले, ह्येव निश्चयेनैव, एष साधक, एतस्मिन् पूर्वोक्ते ब्रह्मणि, अदृश्ये नामरूपशून्ये, अनात्म्ये आत्मन इदमात्म्यं शरीरं तद्रहिते, अनिरुक्ते विकारो हि विशेषवशान्निरुच्यते नत्वविकार इति विकारशून्यत्वाद् विदिताविदितात् परत्वेन निर्वक्तुमशक्यत्वाद्वा अनिरुक्ते, एवं भूते ब्रह्मणि अभयं यथा स्यात् तथा प्रतिष्ठां स्थितिं विन्दते 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति' इत्येवंरूपां प्राप्नोति, अथ तदनन्तरमेव स साधकः, अभयं गतो मुक्तिं प्राप्तो भवतीति । तदाहुः **प्रापञ्चिकेत्यादि** । सूत्रसिद्धं निर्णयमाहु-

रश्मिः ।

कुलालादिषु ब्रह्मकार्यत्वेन ब्रह्मत्वे सतीत्यर्थः । अथवा ब्रह्मास्तीत्यादिप्रत्ययात् सत्तादिकर्तृत्वे विवादे ब्रह्मगते लोके प्रतीयमाने सतीत्यर्थः । एतद्बोधनायैव भाष्येऽस्तिभातीत्यादिकं ब्रह्मविशेषणम् । **कार्यासाधारण्येत्यादि** कार्यमात्रवृत्तित्वाभावादित्यर्थः । **आत्मशब्देति** आत्मशब्दरूपा श्रुतिः । निरपेक्षस्वरूपा तद्रूपेत्यादिः । **अवतारयन्तीति** हेतूपपादकत्वेनोपोद्घातसंगत्यावतारयन्तीत्यर्थः । **गुणसंबन्धादिति** प्राकृतगुणसंबन्धादित्यर्थः । **भाष्ये** । लोके यादृशं गौणत्वं तदाहुः **अत्रेत्यादि** ॥५॥

तन्निष्ठस्य मोक्षोपदेशात् ॥ ६ ॥ प्रकृते । पञ्चमस्कन्धे 'योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवे तन्निमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्गः' इतिगद्यात् । स्थितिश्च सर्वात्मभावस्तस्यैव फलजनकत्वादित्याशयेनाहुः **यत्र नान्यदित्यादि** । तदुक्तम् ।

'ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् ।
यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे' ॥ इति ।

किंच।

हेयत्वावचनाच्च ॥ ७ ॥

इतोऽपि निर्गुण एव जगत्कर्ता। वेदान्तेषु सर्वत्र साधनोपदेशे पुत्रादिवज्जगत्कर्ता हेयत्वेन नोपदिश्यते। यदि सगुणः स्यात् प्राकृतगुणपरिहारार्थं मुमुक्षुभिर्जगत्कर्ता नोपास्यः स्यात् पुत्रादिवत्। अत ईक्षत्यादयो न सगुणधर्माः। सूत्रत्रयस्य ईक्षतिहेतुसाधकत्वाच्चकारः। एवं सूत्रचतुष्टयेन ईक्षतिहेतुना जगत्कर्तृत्वोपपत्त्या सृष्टिवाक्यानां ब्रह्मपरत्वमुपपादितम् ॥ ७ ॥

भाष्यप्रकाशः।

स्तत्रेत्यादि। तथाचास्यां श्रुतावुपक्रमगतं कर्तृभूतं ब्रह्मैवेति तस्मिन्नित्यनेन परामृश्य तस्यैव प्रापञ्चिकधर्मराहित्यबोधनेन विरुद्धधर्माधारत्वं निगमयित्वा तादृशे तस्मिन् परिनिष्ठितस्य मुक्तिं वदन्ति। तथान्यत्रापि, सदेव सौम्येदमित्यादिना कर्तृत्वादिविशिष्टं ब्रह्मोक्त्वा, 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति। अतस्तादृशब्रह्मनिष्ठस्य मोक्ष उपदिश्यत इति सृष्टिप्रकरणोक्तं फलमेव तत्रत्यात्मशब्दस्यौपचारिकत्वनिवर्तकं तात्पर्यलिङ्गत्वादिति सूत्राशय इत्यर्थः ॥ ६ ॥

हेयत्वावचनाच्च ॥ ७ ॥ आत्मशब्दस्यात्र गुणातीत एव कर्तरि तात्पर्यमिति बोधयन्तश्चतुर्थसूत्रमाहुः **किंच। हेयत्वावचनाच्चेत्यादि।** अर्थस्तु निगदव्याख्यातः। तथा चात्रोपपत्ति-

रश्मिः।

तथान्यत्रेति छान्दोग्येऽष्टम इत्यर्थः। **पुरुषो वेदेति** पुरुषः स्त्री वेहेत्यर्थः। **संपत्स्य इति** भक्तिफलबोधकपदसमभिव्याहारात्। **चिरमिति** सत्संपत्तौ विलम्ब इत्यर्थः। तदाहुः **अत** इत्यादि। **तत्रत्येति** आत्मा वा इदमिति श्रुतिभवेत्यर्थः। न 'चात्मा वा इदम्' इत्यादिश्रुतिरन्यत्र वर्तते। 'असद्वा इदम्' इत्यादिश्रुतिः तैत्तिरीय आनन्दवल्ल्यामित्यन्यत्रोक्तं फलमुपचारनिवर्तकं कथं कथं चास्य तन्निवर्तने हेतुतेति शङ्के पराकुर्वन्ति **तात्पर्येत्यादि।** तथा च तदात्मानमित्यत्रात्मशब्दस्यानुपचरित एवात्मनि तात्पर्यमिति फलेन स्वसमभिव्याहारद्वारा बोधनात्तादृशतात्पर्ये लिङ्गत्वादुपचारनिवर्तने हेतुत्वं तैत्तिरीयस्थात्मनोनुपचरितत्वसमर्थनेनान्यत्रात्मा वा इदमिति श्रुतावपि तदुपचारनिवर्तनादित्यर्थः। **भाष्ये। किं चेति** हेत्वन्तरनिरूपणमारभ्यत इत्यर्थः॥६॥

हेयत्वावचनाच्च ॥ ७ ॥ भाष्ये। निर्गुण इति प्रकृतिगुणसंबन्धरहित इत्यर्थः।

'आत्ममायामृते राजन् परस्यानुभवात्मनः।
न घटेतार्थसंबन्धः स्वप्नद्रष्टुरिवाञ्जसा' ॥

इति वाक्येवस्थितमतस्थेष्यात्ममाया सा शुद्धसत्त्वरूपास्त्येव 'प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः' इति वाक्यात्। **सर्वत्रेति** बृहदारण्यकादिषु 'किं प्रजया करिष्यामः अमृतत्वस्य तु नाशास्ति' इत्यादिनेत्यर्थः। **सगुण इति** प्राकृतगुणसत्त्वसहित इत्यर्थः। **नोपास्यः स्या**दिति 'तज्जलान् शान्त उपासीत' इत्यादिषु तथा न स्यादित्यर्थः। न च शुद्धसत्त्वप्रधाना माया तत्र प्रतिबिम्बितं चैतन्यमीश्वरपदवाच्यं मलिनसत्त्वप्रधानाऽविद्या तत्र प्रतिबिम्बितं चैतन्यं जीव इत्युपाधिभेदकृतविशेषेण हेयत्वोपादेयत्वोपपत्तिरिति शङ्क्यम्। प्रतिबिम्बपक्षस्य

अतः परं स्वतन्त्रहेतूनाह, 'स्वाप्ययाद्', 'गतिसामान्यात्', 'श्रुतत्वाच्च' इति सूत्रत्रयेण।

ननु किमर्थं हेत्वन्तराणि। साधकत्वे एकेनापि तत्सिद्धेः। असाधकत्वे शतेनाप्यसिद्धेरितिचेत्। मैवम्। रूपभेदार्थं हेत्वन्तराणि। नानाविधान्नभोजनतृप्तिवत्। तद्यथा आत्मशब्दात्, तन्निष्ठस्य मोक्षोपदेशाद्, हेयत्वावचनाच्चेति निर्गुणस्य स्वरूपपरतया कार्यपरतया च। कार्यस्य पुनर्विधिनिषेधभेदाद् द्विरूपतेति। एवमुत्तरत्रापि प्रपञ्चयिष्यते।

तत्र सृष्टिवाक्यानामीक्षतिहेतुना भगवत्परत्वमुक्तम्। इदानीं प्रलयवाक्यानामाह।

भाष्यप्रकाशः।

रूपात् तात्पर्यलिङ्गादप्यात्मशब्दस्य गुणातीतवाचकत्वेन निर्णयादीक्षत्यादयो न सगुणधर्मा इत्यर्थः। शेषं स्फुटम् ॥ ७ ॥

अग्रिमसूत्राण्यवतारयन्ति **अतः परमित्यादि**। **स्वतन्त्रहेतूनिति** वेदान्तवाक्यानां ब्रह्मपरत्वप्रतिपादने प्रत्येकं समर्थान् हेतून्। एतेषां हेतूनां वैयर्थ्यमाशङ्कते **नन्वित्यादि**। समादधते **मैवमित्यादि**। **रूपभेदार्थमिति** ब्रह्मणो व्यवहार्यत्वे केवलं सृष्टिरेव न द्वारं, किंतु द्वारान्तराण्यपि सन्ति तानि तत्तद्रूपनियतानीति तेषां रूपाणां विशेषस्य ज्ञापनार्थम्। एवं तात्पर्योक्तौ गमकमाहुः **तद्यथेत्यादि**। तथाच चतुःसूत्र्यामाद्येनेक्षतिं सामान्यत उक्त्वा द्वितीयो हेतुः स्वरूपपरतया ततोऽग्रिमौ द्वौ कार्यपरतया चेति हेतुत्रयमुक्तम्। तथाग्रे त्रिसूत्र्यामपि कार्यान्तरपरतयेत्यर्थः। कथं कार्यान्तरपरतेत्यत आहुः **कार्यस्येत्यादि**। **द्विरूपतेतीति**। इति असाद्धेतोर्हेत्वन्तराण्युच्यन्त इत्यर्थः। एवमेवात्र तात्पर्यमित्यत्र गमकमाहुः **एवमित्यादि**।

रश्मिः।

द्वितीयाध्याये दूष्यत्वात्। इदं च भाष्यं साक्षाद्भक्तिर्नास्त्येव दृष्ट एव स्नेह इत्युपपत्तेरिति पक्षमनुग्रहीतुम्। अदृष्टेपि मनोव्यापाररूपोपासासंभवात्। सौत्रश्चकारः समुच्चयं द्योतयतीत्याहुः **सूत्रेत्यादि**। एवं सूत्राद्यर्थो निगदेन व्याख्यात इत्यर्थः। **प्रकृते**। सिद्धमाहुस्**तथाचेत्यादि**। **तात्पर्यलिङ्गादिति**। षष्ठीतत्पुरुषः उपपत्त्या तात्पर्यं वक्तुरिच्छा लिङ्ग्यते ज्ञाप्यत इति। **शेषमिति** सूत्रत्रयेत्यादिभाष्यमित्यर्थः। घञजपाः पुंसीत्यस्य प्रायोवादत्वान्नपुंसकत्वमपि। **हेतूनिति**। साध्यं तु नाशब्दमित्येव। एतदेवाहु**र्वेदान्तवाक्यानामित्यादि**। **द्वारान्तराणी**ति लयमोक्षसाम्यसर्वकार्यरूपाणीत्यर्थः। **तेषा**मिति स्वाप्ययत्वगतिसामान्यश्रुतत्वानामित्यर्थः। **द्विरूपतेती**ति विधिनिषेधरूपविषयिभेदान्मोक्षहेयत्वरूपविषयस्य भेदः। **एवमित्यादी**ति। **उत्तरत्रे**ति अत्रैवाग्रे तेनात्र त्रिसूत्र्याम्। यथा गौणश्चेदिति सूत्रे ब्रह्मशब्दं विहाय आत्मशब्दो निर्गुणस्य स्वरूपपरतयोक्तः। द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्तीति गृह्यसूत्रात् प्रयोगेधोक्षजब्रह्मस्थल आत्मशब्दप्रयोगोधोक्षजत्वेपि हिरण्यगर्भप्रयोगे तथादर्शनात्।

---

१. द्वितीयसुबोधिन्याम्।

स्वाप्ययात् ॥ ८ ॥

ब्रह्मणो न सर्वव्यवहारातीतत्वम् । कुतः स्वाप्ययात् । स्वस्मिन्नप्ययात् । तत्र चित्प्रकरणत्वाज्जीवस्योच्यते । एवं हि श्रूयते । 'यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति तस्मादेनं स्वपिति' इत्याचक्षते । स्वं ह्यपीतो भवतीति ।

स्वपितीति न क्रियापदं, किंतु जीवस्य नाम । तदैव स्वपितिनामत्वं यदा सता संपद्यते । सति स्वशब्दवाच्ये अपीतिं लयं प्राप्नोतीत्यर्थः । अहरहर्जीवो ब्रह्म संपद्य ततो बलाद्यधिष्ठानं प्राप्य पुनर्नव इव समायाति । वासनाशेषात् । स्वशब्देन चाभेदः । अर्थतः सच्छब्दसामानाधिकरण्यान्निर्गुणत्वम् ।

भाष्यप्रकाशः ।

स्वाप्ययात् ॥ ८ ॥ एवं सूत्रत्रयप्रयोजनमुक्त्वा पूर्वसंगतिज्ञापनाय तत्रोक्तमनुवदन्तः स्वाप्ययसूत्रमवतारयन्ति तत्रेत्यादि । व्याकुर्वन्ति तत्र चिदित्यादि । उच्यत इति लय उच्यते । श्रूयत इति छान्दोग्ये श्वेतकेतूपाख्याने श्रूयते । श्रुतिं व्याकुर्वन्ति स्वपितीति । नेत्यादि तथाच सत्संपत्तिरहितस्वापदशायां तु स्वपितीति यत्र प्रयोगस्तत्रास्य क्रियापदत्वमेव । सत्संपत्तिदशायां तु स्वशब्दस्यात्मवाचकत्वेन सति स्वशब्दवाच्य आत्मनि अपीतिं लयं प्राप्नोति । तदा तस्मिन् पितिर्लयो यस्यासौ स्वपितिः । पृषोदरादित्वादकारनाश ईकारस्य विकृतौ च सत्यां स्वपितिनाम्नः सिद्धिः । वस्तुतस्तु केवलयौगिकत्वे नामत्वाभावाद् योगरूढोऽयं शब्द इत्यर्थः । एवंप्रकारेण हेतुकथनस्य प्रयोजनमाहुः अहरहरित्यादि । अयमर्थः । सुषुप्तिस्तावद् द्विधेति तदभावो नाडीष्वित्यत्र वक्तव्यम् । तथा छादोग्य एव श्राव्यते 'तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तोऽपि न विन्देयुरेवमेवेमाः सर्वाः प्रजा

रश्मिः ।

'ब्रह्मन् पुंसि च' इति व्याकरणसूत्रात् । कार्यं मोक्षो हेयत्वं च ते सूत्रद्वये तथात्र स्वाप्ययादित्यत्र निर्गुणस्य स्वरूपपरतया सूत्रद्वये मोक्षः सर्वकार्यत्वं चेत्येवं कार्यपरतया तत्राप्यस्य प्रपञ्चः करिष्यत इति । **पूर्वसंगती**ति निर्वाहकत्वसंगतिज्ञापनायेत्यर्थः । ननु भाष्ये प्रसङ्गसंगतेः सूचनान्नायं प्रकाशार्थ इति चेन्न । सामान्यलक्षणस्य गौरवग्रस्तत्वेनास्यार्थस्यानतिरेकात् । भाष्ये तु सूत्रयोः संगतिरुक्ता प्रसङ्गरूपा । सा सामान्यलक्षणम् । किमन्यं नाशब्दत्वनिर्वाहकमिति जिज्ञासया त्रिसूत्र्यवतारात् । एवं च सामान्यसंगतेः सूचितत्वेनाभिहितमुक्तम् । **तत्रे**त्यादीति । प्रलय इति ब्रह्मविद्योपनिषदि 'यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरात्' इत्यत्रोत्पत्त्यनन्तरं लयोक्तेरत्रापि लय उक्तः । स्थितिस्तु चशब्दार्थ इत्यकथनेप्यदोषः ॥ ७ ॥

स्वाप्ययात् ॥ ८ ॥ भाष्ये । **ब्रह्मण** इत्यादि, अग्रे व्युत्पाद्यम् । **तत्र चिदित्यादी**ति चित्प्रकरणं चिद्रूपस्य ज्ञानप्रधानस्येत्यादिभाष्येणोक्तमेव । **प्रकृते** । अपितेः पितिरूपतां संपादयन्ति **पृषोदरे**त्यादि । **विकृता**विति ह्रस्वेकाररूपायामित्यर्थः । **नामत्वाभावा**दिति पाचकपाठकादिवत्तथात्वादित्यर्थः । **योगरूढ** इति पङ्कजादिपदवदित्यर्थः । स्वं ह्यपीतो भवतीत्यस्य यः प्रकृतः सच्छब्दवाच्यस्तमपीतो भवत्यपिगतो भवतीत्यर्थः । **वक्तव्य**मिति तृतीयस्य द्वितीयपादे

ननु प्रलये वक्तव्ये कथं सुषुप्तिः । मोक्षातिरिक्तदशायां तथाकर्मसंबन्धाभावादिति ब्रूमः ॥ ८ ॥

भाष्यप्रकाशः ।

अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दत्यनृतेन हि प्रत्यूढाः' इति । तत्र नाड्यां दुःखाभावमात्रम्, ब्रह्मणि सुषुप्तौ तु तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्माऽभयं रूपमशोकान्तरमिति बृहदारण्यके श्रावणाद् ब्रह्मसंपत्त्या बलादिरूपं यदधिष्ठानं, करणे ल्युट्, देहनियमनसाधनं तत् प्राप्य तथा समायातीति बोधनमेकम् । च पुनः स्वशब्द आत्मवाचकोऽत्र प्रयुक्तस्तेन पूर्वोपक्रान्तस्य सत आत्माऽभेदबोधनमपरम् । किंचात्र विभक्त्यन्तरप्रयोगेण शब्दतः सामानाधिकरण्याभावेऽप्युपक्रमे सत एव निर्दिष्टत्वेनार्थतः सच्छब्दसामानाधिकरण्यात् सतो निर्गुणत्वबोधनं चेति तृतीयं प्रयोजनमिति । तथाचैवंप्रकारेण गुणातीतस्य प्रलयकारणतां बोधयितुमेवं हेतुनिर्देश इति हृदयम् । अत्र सूत्रस्य विषयवाक्यस्य च विरोधमाशङ्कते **नन्वि**त्यादि । समादधते **मोक्षे**त्यादि । मोक्षातिरिक्तदशायां कर्मसंबन्धे सत्यपि यथा जाग्रत्स्वप्नयोः कर्मसंबन्धस्तथा सुषुप्तौ प्रलये च नास्ति, किंतु वासनामात्र इति प्रलयसाम्यात् तत्कथनमिति ब्रूम इत्यर्थः । एवं चात्र ब्रह्म न सर्वव्यवहारातीतं, सुषुप्तिप्रलययो-

रश्मिः ।

वक्तव्यमित्यर्थः । **भाष्ये** । **वासने**ति कर्मवासनावशात् । कर्मजसंस्कारो वासना । **प्रकृते** । **स्वशब्देन चाभेद** इति भाष्यं विवृण्वन्ति **च पुनरि**त्यादि । **अत्रे**ति चतुर्ष्वर्थेषु मध्येत्र सूत्रे प्रयुक्त इत्यर्थः । **पूर्वे**त्यादि श्रुतौ 'सता सोम्य' इत्यनेनेत्यर्थः । **आत्माभेदे**त्यादि । एतादृशबोधनफलं तु सच्छब्दस्य जडपरत्वनिवृत्तिः । **अर्थत** इत्यादि भाष्यं विवृण्वन्ति **किंचात्रे**त्यादि । ननु भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वरूपं सामानाधिकरण्यं सच्छब्दस्यात्मवाचकत्वाच्छब्दतोपीत्यर्थत इति भाष्यांशोऽसंगत इत्याकाङ्क्षायामाहुः **विभक्त्यन्तरे**त्यादि । अयमर्थः । सतेति तृतीया विभक्तिः सहार्था तथा चात्मसाहित्यवानिति तस्यार्थः । स्वमित्यत्र कर्म द्वितीयार्थः । आत्मा संयोगाश्रय इत्यर्थः । सूत्रेपि व्यपेक्षालक्षणसामर्थ्यपक्षे स्वस्मिन्नित्यस्य आश्रय आत्मेत्यर्थः । एवं सति निरुक्तं सामानाधिकरण्यमत्र विशेष्याभावान्नास्तीत्यर्थः । ननु तथापि कथमर्थतः सामानाधिकरण्यं यावता प्रवृत्तिः शब्दत इति चेन्न । एकार्थविशेष्यकप्रतीतिजनकत्वमात्रस्य तल्लक्षणत्वात् । अत एव युगपदधिकरणवचनतापेक्षपट्वीमृद्व्यावित्यत्र पुंवत्त्वमाशङ्क्य वृत्तौ वृत्तेः प्राक् यत्र सामानाधिकरण्यं तत्रैव तत्प्रवृत्तिः । प्रकृते च न ततः प्राक्सामानाधिकरण्यमित्युत्तरितं द्वन्द्वसूत्रभाष्ये 'नामन्त्रिते समानाधिकरणे' इतिसूत्रभाष्ये च सामान्यवचनमित्यस्याग्र्ये देवि सरस्वति इति पर्यायेषु प्रत्युदाहरणं दत्तमिति स्थितं 'स्त्रियाः पुंवद्भाषितपुंस्कात्' इति सूत्रस्य शब्देन्दुशेखरे । एवं चोक्तरूपस्यैकार्थबोधकत्वस्य सामानाधिकरण्यस्य शब्दप्रयुक्ताभावप्रतीतावप्यर्थस्य विषयविधया कारणत्वेन ततः सामानाधिकरण्यादित्यर्थः । **निर्गुणत्वे**त्यादि । **तेनैतत्सिद्धम्** । गुणातीतोयमात्मा यत्र लीयते तत्सत्पदवाच्यं ब्रह्म गुणातीतमेव । नह्येतादृशस्य स्वसंबन्धेन कर्मसंबन्धविनिर्मुक्तपरमसुखानुभवसंपादकं सगुणं भवितुमर्हतीति । अतः स्वाप्ययसंपादकत्वात् न सर्वव्यवहारातीतं नापि सगुणमित्यतस्तथेत्यर्थः । **वासनामात्र** इति । कर्मसंबन्ध इति शेषः । **प्रलयसाम्या**दिति

मुक्तिवाक्यानामाह ।

गतिसामान्यात् ॥ ९ ॥

गतौ सामान्यात् । गतिर्मोक्षः । समानस्य भावः सामान्यम् । मोक्षे सर्वस्यापि भगवतापि तुल्यत्वात् । एवं हि श्रूयते । 'स यथा सर्वासामपां समुद्र एकायनम्' इत्युपक्रम्य वागेकायनमिति दृष्टान्तार्थं निरूप्य, 'स यथा सैन्धवखिल्य

भाष्यप्रकाशः ।

जीवाधारत्वेन श्रुतत्वाद्, यद् यदा यदाधारत्वेन श्रुतं तत् तदा तत्प्रयुक्तव्यवहारविषयमित्येवमनुमानं बोध्यम् । ततश्च यस्मिँल्लयं याति पुरत्रयं चेत्यादौ जडलयाधारत्वेन श्रावणात् तत्प्रयुक्तव्यवहारविषयत्वादपि सर्वव्यवहारातीतत्वाभावः सेत्स्यति । तेनायं हेतुर्लक्षणवाक्यस्थस्य यत्प्रयन्तीति भागस्य समर्थनार्थ इति बोधितम् । प्रलयवाक्यानां ब्रह्मणि समन्वये वक्तव्ये सुषुप्तिवाक्योदाहरणं सूत्रे स्वाप्ययपदसूचितव्यासाशयज्ञापनार्थम् । अग्रिमसूत्रे मुक्तिवाक्यविचारात् पूर्वस्मिन् प्रलयोऽपि सूच्यत इति ज्ञायते । अन्यथा न्यूनता स्यादिति ॥ ८ ॥

गतिसामान्यात् ॥ ९ ॥ गतिसामान्यादिति षष्ठं सूत्रमवतारयन्ति **मुक्तीत्यादि** । तेषां ब्रह्मपरत्वमाहेत्यर्थः । **गतिर्मोक्षः । गतिशब्दः फले रूढः ।** 'अन्ते या मतिः सा गतिः', 'सा काष्ठा सा परा गतिः' इत्यादौ तथा दृष्टत्वात् । अत्र चाप्ययोत्तरमभिसंवेशस्यैव समर्थनीयत्वात् तथेत्यर्थः । **श्रूयत इति** बृहदारण्यके मैत्रेयीब्राह्मणे श्रूयते । **दृष्टान्तार्थमिति** लयाधिकरणदृष्टान्तार्थम् ।

रश्मिः ।

तथा च सूत्रेणैव विषयवाक्यं स्मार्यत इति भावः । एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति न्यायात् । यथा मोक्षे कर्मसंबन्धाभावस्तथा मोक्षातिरिक्तदशायां सुषुप्तावकामभगवद्रूपायां तथा कर्मसंबन्धाभावः प्राप्तः स नेति प्रलयसाम्यम् । **एवं चेति** स्वाप्ययहेतुसमर्थनेन सर्वव्यवहारातीतसाध्यस्य न्यूनतारूपदोषनिवारणाय ग्रहणे च । **तत्प्रयुक्तेत्यादि** तत्प्रयुक्तव्यवहारविषयं यथा भवति तथा ज्ञेयमिति क्रियाविशेषणत्वेन द्वितीयान्तमिदम्, आर्दि पचतीतिवत् । तेन 'घाजन्तश्च' इति सूत्रेण विषयशब्दस्य नियतपुंस्त्वेपि न दोषः । यथा वियति विहंगम इत्यत्र विहंगमाधारत्वेन वियति विहंगमप्रयुक्तो यस्तदाधारत्वव्यवहारः तद्विषयत्वमिति दृष्टान्तः । **अनुमान**मिति पूर्वं तु ब्रह्म नाशब्दं वाक्यगतेक्षतेः । यन्नैवं तन्नैवं, जीववत् । वेदान्तशब्दप्रतिपाद्यं नाशब्दम् । अन्वयव्याप्तिरपि तेजोदृष्टान्तेन । स्वाप्ययपदसूचितव्यासाशयमाहुः **अग्रिमेत्यादि** । **सूच्यत इत्यादि** स्वाप्ययपदेन सूच्यत इति । 'यत्प्रयन्त्यभिसंविशन्ति' इतिश्रुतेः कर्मसंबन्धार्हदशायामपि तदभिभूय तादृशसुखसंपादकत्वसामर्थ्यरूपव्यासाशयो ज्ञायत इत्यर्थः । 'बुद्धिप्रेरककृष्णस्य पादपद्मं प्रसीदतु' इति 'अतः सेवापरं चित्तं विधाय स्थीयतां सुखम्' इति च । अत्र युक्तिमाहुर**न्यथेत्यादि** । प्रलयवाक्यानां ब्रह्मणि समन्वयाप्रतिपादनेऽस्य समन्वयाध्यायत्वं न्यूनं स्यादित्यर्थः ॥ ८ ॥

गतिसामान्यात् ॥ ९ ॥ उक्तभाष्यं समर्थयन्ति स्म **गतिशब्द इति । अभिसंवेशस्य इति** लक्षणवाक्यस्थस्याभिसंविशन्तीतिभागाभिहितस्येत्यर्थः । **बृहदिति** स्पष्टा सूत्र-

उदके प्रास्त' इत्यादिना लयदृष्टान्तं निरूप्य, 'न प्रेत्य संज्ञास्ति' इति प्रतिपाद्य तन्निरूपणार्थं 'यत्र हि द्वैतमिव भवति तदितर इतरम्' इत्यादिना सर्वस्य शुद्धब्रह्मत्वं प्रदर्शितम् ।

भाष्यप्रकाशः ।

इत्यादिनेति प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीतेति ग्रन्थेन, न प्रेत्य संज्ञास्तीति प्रतिपाद्येति, विमुक्त्यनन्तरं भोक्तृभावादिनिवृत्त्या जीवादिसंज्ञाराहित्यं प्रतिपाद्य । तन्निरूपणार्थमिति संज्ञाभावनिरूपणार्थम् । सर्वस्येति जडस्य जीवस्य च । अत्रायमर्थः । यथाऽबादीनामंशानां कार्याणामबाद्यात्मकाः समुद्रादयो लयाधिकरणभूतास्तथा सदात्मकस्य सर्वस्य सदात्मकं कारणभूतं ब्रह्मैव लयाधिकरणभूतम् । नच स्पर्शादीनां त्वगाद्यंशत्वस्य प्रत्यक्षबाधितत्वात् केवलं लयस्थानत्वमेव विवक्षितं न तु तस्य कारणत्ववैशिष्ट्यमपीति शङ्क्यम् । त्वगस्य स्पर्शवायोश्चेति ।

'मुखतस्तालुनिर्भिन्नं जिह्वा तत्रोपजायत ।
ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते' ॥

इत्यादिश्रीभागवतद्वितीयस्कन्धवाक्येषु तथादर्शनेनात्र वैराजानामेव तेषां दृष्टान्तत्वेन विवक्षितत्वात् । यथा सदंशानां कार्याणां लयस्थानं ब्रह्म तथा चिदंशानां जीवानामपि लयस्थानं ब्रह्मैवेति वक्तुं स यथा सैन्धवेत्यादिना यथा सामुद्रलवणशकल उदके प्रक्षिप्त उदकमेव लक्षीकृत्य विलीयते, न तु खिल्यत्वेन ग्रहणाय कोऽपि समर्थः संभाव्यते, किंतु यस्माद्यस्माद्देशाददीयते तत्र तत्र लवणरस एवास्वाद्यत इति तत्र तत्सत्ता निश्चीयत इत्येवं लयदृष्टान्तं निरूप्य, एवं वा अरे इदं महद्भूतमनन्तपारम्, अरे मैत्रेयि, इदं जीवात्मत्वेनानुभूयमानं महत् पूर्वोक्तेभ्योऽबादिभ्य उत्कृष्टम्, अनन्तम्—अविनाशि, अपारम्—अनादितत्त्वं विज्ञानघने चिदेकस्वरूपे ब्रह्मण्येवैतेभ्यः स्थूलसूक्ष्मशरीरात्मकेभ्योऽबुपलक्षितेभ्यो भूतेभ्यः समुत्थाय पृथग्भूय तान्येव भूतान्यनु तल्लयोत्तरं विनश्यति विशेषेणादर्शनं प्राप्नोति ब्रह्मणः पृथङ्न ज्ञायते । तत्र हेतुः । न प्रेत्य संज्ञाऽस्तीति । लयोत्तरं जीवसंज्ञैव निवर्तते, ब्रह्मैव भवतीति । ततो लवणरसस्य सर्वत्रो-

रश्मि ।

संगतिरत्र । प्रास्त उदकमिति तेन नवसु पदेषु मोक्षे लवणमुदके निधायेत्याद्युपदेश इति ज्ञापितम् । तेन जीवेऽणुत्वं वास्तविकमित्युपदेशः । तेन मोक्षे नान्यविधत्वमत्र प्रयोजनम् । तेन मैत्रेयीब्राह्मणे भक्तिप्रतिपादनात्तत्रत्या मुक्तिरप्युपदेशः । अबादीनामिति अप्स्पर्शगन्धादीनाम् । तत्रत्यश्रुत्युक्तानामंशानां सदंशानां कार्याणां न तु चिदानन्दांशानामबादीनां तिरोहितत्वेन प्रकटसदंशत्वेन तथेति । अत्र कार्यार्थकानामंशानामिति त्याज्यमिति वक्तुमबादीनामित्यादिपदार्थे किंचिदाशङ्क्य निषेधन्ति न च स्पर्शेत्यादि । 'स यथा सर्वासामपा॰समुद्र एकायनमेव॰सर्वेषा॰स्पर्शानां त्वगेकायनमेव॰सर्वेषां गन्धानां नासिके एकायनम्' इत्यादिश्रुतिष्वेतद्बोध्यम् । तस्येति लयस्थानस्य । तथेति 'तस्माद्वा एतस्मादात्मनः' इति श्रुतिकारणत्ववैशिष्ट्यदर्शनं तेन । अत्रेति छान्दोग्ये मैत्रेयीब्राह्मणे च । उपष्टम्भकत्वात्पुराणानामेवकारः । तथाच 'तस्माद्वा एतस्मादात्मनः' इत्यत्रोपष्टम्भकमिदं पुराणमिति विकल्पः । इति वक्तुमिति सैन्धवखिल्यस्य जलीयसदंशत्वमिव जीवस्यानुप्रभावसंबन्धेन वृक्षः पुनः पुनः पेपीय-

आदिमध्यावसानेषु शुद्धब्रह्मण एवोपपादानात्। सर्वेषां वेदान्तानां ब्रह्मसमन्वय उचित इति ॥ ९ ॥

किंच।

श्रुतत्वाच्च ॥ १० ॥

'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशि-

---

भाष्यप्रकाशः।

दके ऽनुभवाल्लवणत्वेन वर्तत एवोद्ग्रहणमिति कुतो निषिद्ध्यते संज्ञेत्येवं मैत्रेय्या मोहे पुनः संज्ञाभावनिरूपणार्थं, यत्र हि द्वैतमित्यादिना भेदकधर्मसत्तायां द्वैतदर्शनकथनपूर्वकं, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येज्जिघ्रेदभिवदेच्छृणुयान्मन्वीत विजानीयाद् येनेदं सर्वं विजानाति तं केन विजानीयाद् विज्ञातारमरे केन विजानीयात्' इत्यन्तेन, यत्र तु यस्मिन्नधिकरणे अस्य संबन्धि सर्वं स्थूलं सूक्ष्मं चात्मैवाभूद् आत्मरूपमेवाभूत् तत् तदा करणस्य विषयस्य च लयादैकरूप्ये करणविषयभावापगमात् केन कं पश्येदित्यादि। ननु यद्यप्यन्यल्लीनं, तथापि विज्ञाता तु तिष्ठति स यथा स्वप्ने स्वयंज्योतिः पश्यत्येवं स्वयं कुतो न विजानातीत्याकाङ्क्षायां विज्ञातुः स्वरूपस्यापि समुद्रे लवणस्येवात्मत्वं स्मारयति, विज्ञातारमित्यादिना। तथाच तदा विज्ञातापि न विज्ञातृरूपेणास्ति, किंतु गुणातीतेनात्मरूपेणातो न विजानातीत्युत्तरमुखेन सर्वस्य ब्रह्मतौल्यं च निरूपितम्। एवं च ब्रह्म न सर्वदा सर्वव्यवहारातीतं मोक्षे तथात्वेन श्रावितत्वाद् यदेवं तदेवं मैत्रेयीब्राह्मणश्रावितसर्ववदित्येवमत्रानुमानसिद्धेरस्य हेतुत्वं बोधितम्। तेनात्र यतो वेतिश्रुतिस्थोऽभिसंविशन्तीति भागः समर्थितः। किं चैतेनैव सर्वस्य शुद्धब्रह्मत्वमपि दर्शितमिति। तेन फलितमाहुः आदीत्यादि। आदावमृतत्वलिङ्गेन, मध्ये आत्मदर्शनादिना सर्ववेदनप्रतिज्ञामारभ्य, वागेकायनमित्यन्तेनावसाने सर्वस्यात्मभावकथनेन च तेषु शुद्धब्रह्मण एव सर्वरूपत्वेन सर्वकर्तृत्वेन चोपपादनाद् ये केऽपि वेदान्तास्ते सर्वे येनकेनचिद्रूपेण ब्रह्मैव वदन्तीति सर्वेषां वेदान्तानां ब्रह्मणि तात्पर्येणान्वय उचित इत्यर्थः ॥ ९ ॥

श्रुतत्वाच्च ॥ १० ॥ सप्तमं सूत्रं पठित्वा तद्विषयवाक्योपन्यासेनैव व्याकुर्वन्ति पूर्णमि-

रश्मिः।

मान इति परंपरितजीवसंबद्धत्वमपीति छान्दोग्यीयेन 'अस्य सोम्य महतो वृक्षस्य' इत्याद्युपदेशेन सिद्ध्यति। तत्केन कमिति जिघ्रेदित्यादिष्वेतत्पठनीयम्। अधोक्षजे सर्वव्यवहारातीतत्वेनेति वक्तुं सर्वदेति। तथात्वेनेति सामान्येनेत्यर्थः। मैत्रेयीति 'यत्र त्वस्य सर्वमात्मैवाभूत्' इति पूर्वोक्तमैत्रेयीत्यादिः। अस्येति गतिसामान्यस्येत्यर्थः। आदाविति 'येनाहं नामृता स्यां किमहं तेन कुर्याम्' इति श्रुतावित्यर्थः। ननु तर्हि घटादिभ्योपि ब्रह्मबोधो भवेदिति चेत्तत्राहुः येनकेनेति। तेन घटत्वादिभिर्बोधे न ब्रह्मबोधः। ब्रह्मत्वेन बोधे तु ब्रह्मबोधो भवत्येव। तात्पर्येणेति पत्यादिकेषु अभिधयान्वयः इति भावः ॥ ९ ॥

श्रुतत्वाच्च ॥ १० ॥ अभिसंवेशविचारमनुपूर्तौ सप्तसूत्रमिति भाष्यविरोधोतः सप्तममिति। पठित्वेति सर्वभाष्यरीत्या। तद्विषयेति तत्प्रसिद्धमुपबृंहितं विषयवाक्यं तस्योपन्यासेन। उपबृंहणं समाधिभाषा तेनाभिसंवेशनकथनेपि यत इत्यस्यार्थाकथनात् नाभिसंवेशान्ताधिकरणपूर्तिः। व्याकुर्व-

भाष्यप्रकाशः ।

त्यादि । अयं बृहदारण्यके द्वितीयवंशब्राह्मणानन्तरं परिशिष्टलक्षणखिलकाण्डारम्भे वर्तते । अस्मिन् मन्त्रे तु सर्वस्य ब्रह्मात्मैकत्वनिर्णयार्थम् 'आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्' इत्यादिश्रुत्यर्थ एवोपसंह्रियते । व्याख्या तु, पूर्णमदः, अदः परोक्षं ब्रह्म पूर्णम्, आकाशवद् व्यापि निरन्तरं निरुपाधिकम् । पूर्णमिदम्, इदं नामरूपाभ्यां व्यवह्रियमाणमवतारादिरूपमपि पूर्णं पूर्वोक्तरूपमेव । एवं व्यवहार्याव्यवहार्यस्वरूपयोर्निरुपाधिकत्वमुक्त्वा कार्यरूपेऽपि तथात्वमाह पूर्णात् पूर्णमुदच्यते । पूर्णात् कारणात्मनः सकाशात् पूर्णमुत् पूर्णानन्दं सद् अच्यते, पूर्णं सद् उदच्यते वा । अञ्चु गतिपूजनयोः, अच इत्येक इति पाणिनिः । पूज्यते उद्गच्छति वा । एवं स्थितिदशायां कार्यस्य ब्रह्मरूपतामुक्त्वा प्रलयदशायां तथात्वमाह । पूर्णस्य ब्रह्मणः पूर्णं निरुपाधिकमेकरसत्वलक्षणं स्वभावं प्रलयदशायामादाय पूर्णं ब्रह्मैव सदवशिष्यते अव्यवहार्यत्वेन रूपेण तिष्ठतीति । तथाचानया श्रुत्याऽसंदिग्धं यथा स्यात् तथा सर्वकार्यरूपत्वं ब्रह्मणः प्रतिपादितम् । तेन पूर्णज्ञानिनां व्यवहारदशायामपि कार्यं गुणातीतं ब्रह्माभिन्नमेव । व्यवहारस्तु भगवतः सत्यसङ्कल्पत्वाद् 'बहु स्यां प्रजायेय' इत्यादिरूपया इच्छयैव । नचात्र सर्वत्र पूर्णपदादुद्गतस्य कार्यस्यांशस्य च पूर्णैश्वर्यादिमत्त्वं शङ्क्यम् । ऐश्वर्यप्रकरणाभावात् । पूर्णैश्वर्यादिबोधकस्य भगवच्छब्दस्य भगवत्येवानुपचारिकत्वमिति विष्णुपुराणे सिद्धत्वात् । नच परममोक्षदशायां ब्रह्मैक्ये तत्र तथात्वं शङ्क्यम् । दशमस्कन्धे श्रीवसुदेवं प्रत्यखण्डाद्वैतोपदेशे, खं वायुरितिश्लोके भगवता सच्चिदानन्दधर्मतारतम्यादिकृतनानात्वाविरुद्धैकत्वस्यैव प्रतिपादनेन पूर्णैश्वर्यादीनां स्वस्मिन्नेव निय-

रश्मिः ।

न्तीत्यस्य विवृण्वन्ति स्मेत्यर्थः । **अय**मिति मन्त्रः । एवेति उत्तराधिकरणादेवेति । **यत** इत्यस्य पूर्णार्थकत्वानुक्तेः विषयवाक्यमिव विषयवाक्यमित्युपचारस्तत्प्रयोजनं तु 'सदेव सोम्य' इत्यत्र सच्छब्दार्थनिर्णयद्वारा 'यतो वा' इत्यत्र यच्छब्दार्थनिर्णयः । विषयवाक्यं तु समाधिभाषा उपष्टम्भिका न वेति संदेहेनेति प्राप्तं सापेक्षत्वापत्तेर्वेदस्येति । उपष्टम्भिकेति सिद्धान्तः । 'इतिहासपुराणैस्तु वेदं समुपबृंहयेत्' इतिवाक्यात् । प्रामाणिकी सापेक्षतापि न दोषायेति । तथा चैवकारेण मुख्यविषयवाक्योपन्यासव्यवच्छेदः । अत्र सूत्रं विवृण्वन्तीति वक्तव्ये सप्तममित्यादेरयमर्थः । 'विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यग्व्यवस्थितम् । सत्यं पूर्णम्' इति द्वितीयस्कन्धादाहुः **सप्तम**मिति । अन्यथास्या एव श्रुतेर्ग्रहणे मानाभावापत्तिः । एवं तु सच्छब्दार्थपूर्णग्रहणार्थं सूत्रम् । तमेवोपसंहारं दर्शयन्ति **व्याख्या त्वि**त्यादि । **परोक्ष**मिति ।

> 'इदमः प्रत्यक्षगं रूपं समीपतरवर्तिनि चैतदो रूपम् ।
> अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात्' ॥ इति

विष्णुपुराण इति ।

> 'ऐश्वर्यस्य समस्तस्य धर्मस्य यशसः श्रियः ।
> ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' ॥

इतिवाक्य इत्यर्थः । **पूर्णैश्वर्यादी**ति पूर्णत्वं बृहदारण्यकोक्तं ज्ञेयम् । स्वजायाधनपुत्रकर्मात्मकमलौकिकं प्राणाग्निहोत्रोपनिषदि । प्रमाणबलेनाविषयः स्वेच्छया विषयश्चेति भाष्यादाहुः

ष्यते' इति श्रुत्यैवासंदिग्धं सर्वकार्यत्वं प्रतिपादितम् । 'सर्वे वेदा यत्पदमामनन्ति' इति च । चकारोऽधिकरणसंपूर्णत्वद्योतनाय ।

भाष्यप्रकाशः ।

मितत्वाच्च । अतः सर्वव्यवहारातीतत्वमनपहायैव सर्वव्यवहारविषयं ब्रह्मेत्यर्थः संपद्यते । एतेन फलितमाहुः सर्वे वेदा इत्यादि । तथाचाभिधया वृत्त्यापि सर्वे शब्दा ब्रह्मवाचका इति सर्वेषां वेदान्तानामभिधया तात्पर्येण च ब्रह्मण्येव समन्वय इत्यर्थः । अत्रेदं बोध्यम् । इयं श्रुतिः काठके द्वितीयवल्लीस्था, 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत् पश्यसि तद्वद' इति प्रश्ने मृत्युनोक्ता । 'सर्वे वेदा यत् पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्' इति पदं पदनीयं प्राप्तव्यमिति यावत् । आमनन्ति प्रतिपादयन्ति । यद्वदन्ति यत्प्राप्त्यर्थानि । संग्रहेण संक्षेपतः । तदेव संक्षेपत आह, ओमित्येतदिति । तथाचोङ्कारेण यत् संक्षेपत उच्यते तदेव सर्वैर्वेदैर्विस्तरेणोच्यत इत्यर्थः । एतदेव द्वादशस्कन्ध उपबृंहितं, 'समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः' इत्यारभ्य,

'ततोऽभूत् त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् ।
स्वधाम्नो ब्रह्मणः साक्षाद् वाचकः परमात्मनः ।
स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम्' ॥

इत्यादिभिः । तथाच बीजशक्तिरेव सर्ववृक्षे प्रसरतीत्योङ्कारस्य या परमात्मवाचकता सैव सर्वस्मिन् वेदतरौ प्रसृतेति सर्वे वेदा अभिधया प्रतिपादयन्तीति युक्तम् । किं च । जैमिनीये नये सर्वे शब्दाः प्रायेण धर्मवाचका एव । धर्मश्च घटत्वादिरूपः । त्वप्रत्ययश्च भावे । भाव इति भूधातोर्घञि रूपम् । भूधातुश्च सत्तायां व्याप्तौ वा । उभयथापि सतो व्यापकस्य वा धर्मो घटत्वादिरिति सिद्ध्यति । तादृशश्च धर्मी भगवानेवेति धर्मद्वारा भगवद्वाचका एव सर्वे शब्दाः । वैयाकरणमतेऽप्येवम् ।

'संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः' ॥ इति वाक्यपदीयात् ।

रश्मिः ।

अत इति । अधोक्षजत्वेन निषेधेन च प्राप्तं सर्वव्यवहारातीतत्वम् । भाष्योक्तस्वेच्छया विषयदशायामाहुः अभिधयेत्यादि । प्रमाणबलपर्यालोचने त्वाहुस्तात्पर्येणेति । तपांसि पुराणानि । वदव्रज गताविति गत्यर्थकाद्वदतेः शतरि रूपमिदं न तु क्रियापदमित्याशयेनाहुः यत्प्राप्त्यर्थानीति । नय इति मते । यद्यपि 'प्रयोगचोदनाभावादर्थैकत्वमविभागात्स्यात्' इत्यादिसूत्रेषु प्रथमाध्यायस्थेषु आकृतावेव शक्तिरिति स्थितं शास्त्रदीपिकायाम् । तथापि सर्वेषां न संभवति यथा 'यः सिक्तरेताः स्यात् स प्रथमामुपदध्यात्' इत्यादिश्रुतौ । सिक्तरेतस्त्वादेराकृतित्वाभावेन व्यक्तौ [illegible] तैरभ्युपगन्तव्यः । वैदिकपदार्थानां नित्यत्वेन न व्यक्त्यनित्यत्वप्रयुक्तं

भाष्यप्रकाशः।

नैयायिकादिमतेन विशिष्टवाचकत्वपक्षेऽप्येषैव व्यवस्था। घञ् चात्र स्वार्थे। अन्यथाऽनवस्था स्यादिति। एवं पदवद्वर्णा अपि स्वभावतो भगवद्वाचका एव।

'वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः।
तावन्ति हरिनामानि कीर्तितानि न संशयः'॥

इति शिष्टवैदिकप्रसिद्धवाक्यात्। वाक्यानि तात्पर्येण बोधयन्तीति सर्वस्य वेदस्य भगवद्वाचकत्वमप्रत्यूहमिति। सौत्रस्य चस्य प्रयोजनमाहुः चकार इत्यादि। एवमत्र त्रिसूत्र्यां सुषुप्तिविचारेण दैनन्दिनप्रलयकर्तृत्वं, द्वितीये मोक्षविचारेणात्यन्तिकतत्कर्तृत्वं, तृतीये सर्वकार्यकर्तृत्वप्रतिपादनेन नैमित्तिकादितत्कर्तृत्वं बोधितमिति प्रतिभाति।

रश्मिः।

संबन्धानित्यत्वम्। अत एव व्यक्तावेव संबन्ध इति सिद्धान्त इति **प्रस्थानरत्नाकरे**। एतदभिप्रेत्याहुः **प्रायेणेति**। **व्याप्तौ वेति** भू प्राप्ताविति धातुपाठात्। **एषैवेति** जातिधर्मान्यतरविशिष्टवाचकत्वरूपेत्यर्थः। **अत्रेति**। 'तस्य भावस्त्वतलौ' इति सूत्रे सिद्धावस्थापन्ने धात्वर्थे घञ् न तु प्रकृतिजन्यबोधे प्रकारतयाभिमत इत्यर्थः। यद्यपि वृत्तौ सिद्धावस्थापन्ने धात्वर्थे वाच्य इति विस्पष्टमुपलभ्यते तथापि प्रकृतिजन्यबोधे प्रकारो भाव इत्यस्यापि संभाव्यतयोक्तिरियम्। **अनवस्थेति** त्वस्यार्थो भावः भावश्च घञा निष्पन्नो भावान्तर इत्यनवस्थेत्यर्थः। **भगवद्वाचका** इति न च न तथाप्रतीतिरिति वाच्यम्। संकेताग्रहेणाबाधकत्वात्। तदाहुः **वेदाक्षराणीत्यादि**। ननु 'यतो वा इमानि' इत्यादि वाक्यानां यद्धेतुका प्रत्यक्षभूतनिष्ठोत्पत्तिरित्याद्यर्थात् कथं ब्रह्मबोधकत्वमित्यत आहुः **वाक्यानीत्यादि**। तात्पर्यनिर्णयलिङ्गभूतैरुपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तिभिः 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादिस्मृतेश्च भगवदिच्छया ब्रह्म बोधयन्तीत्यर्थः। ननु पूर्वं सृष्टेरुक्तत्वात् ब्रह्मणो व्यवहार्यत्वमपि लयाधारत्वेनैव वाच्यम्। इति सुषुप्तिमोक्षसर्वकार्यत्वविचारोऽप्रासङ्गिक इति चेत् तत्राहुः **एवमत्रेत्यादि**। **दैनंदिनेत्यादि** तत्स्वरूपं द्वादशस्कन्धे चतुर्थेऽस्ति।

'नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप। उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते॥
कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा। परिणामिनामवस्थास्ता जन्मप्रलयहेतवः॥
अनाद्यन्तवतानेन कालेनेश्वरमूर्तिना। अवस्था नैव दृश्यन्ते वियति ज्योतिषामिव'॥ इति।

तथा च देहादेर्दिने दिने ध्वंसो दैनंदिनप्रलयः। सुषुप्तिरपि दैनंदिनेति तादृशप्रलयकर्तृत्वं बोधितमित्यर्थः। तथा च सुषुप्तौ दिने दिने च ब्रह्मण्यप्यय इति सूत्रार्थः। **आत्यन्तिकेत्यादि**। अयं च मोक्षात्मा तदुक्तम्—

'यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबन्धनम्।
छित्त्वाच्युतात्मानुभवोवतिष्ठते तमाहुरात्यन्तिकमङ्ग संप्लवम्'॥ इति।

गतेः प्रलयरूपताकथनेनाप्रासङ्गिको मोक्षविचार इति परास्तम्। **नैमित्तिकादिति**। ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलय इत्यर्थः। तदुक्तम्—

'चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते। स कल्पो यत्र मनवश्चतुर्दश विशांपते॥
तदन्ते प्रलयस्तावान् ब्राह्मी रात्रिरुदाहृता। त्रयो लोका इमे यत्र कल्पन्ते प्रलयाय हि॥
एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्। शेतेऽनन्तासनो विश्वमात्मसात्कृत्य चात्मभूः'॥

भाष्यप्रकाशः।

अत्रैकदेशिन इमानि सूत्राणि सांख्यनिरासकतया व्याकुर्वते। तथाहि। सांख्यपरिकल्पितं प्रधानं जगत्कारणत्वेन नाश्रयितुं शक्यम्। अशब्दं हि तत्। कथमशब्दम्। ईक्षतेः। 'सदेव सोम्येदमग्र आसीत्'इत्युपक्रम्य 'तदैक्षत बहु स्यां प्रजायेय'इति 'तत्तेजोऽसृजत'इति जगत्कारणस्येक्षणकर्तृत्वश्रावणात्। तथाऽन्यत्रापि। 'आत्मा वा इदमेक एवाग्र आसीदित्युपक्रम्य, स ईक्षत लोकान्नुसृजा' इति। क्वचिच्च षोडशकलं प्रस्तुत्य, स ईक्षाञ्चक्रे स प्राणमसृजतेति। ईक्षतेरिति धात्वर्थनिर्देशो लक्षणया। विषयिणा विषयलक्षणात्। यथा यजतेः। तेन 'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः, तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते' इत्यादीनां सर्वज्ञेश्वरकारणपराणामपि वाक्यानां संग्रहः। नच सत्त्वधर्मेण ज्ञानेन प्रधानस्यापि सर्वज्ञताया ईक्षितृत्वस्य च शक्यवचनत्वान्नानेन प्रधानवारणमिति वाच्यम्। तस्य प्रधानावस्थायां गुणसाम्यात् सत्त्वधर्मस्य ज्ञानस्य तदानीमशक्यवचनत्वात्। तदा तदादरे रजस्तमोधर्मस्याप्यवर्जनीयत्वेन ज्ञानप्रतिबन्धस्यापि संभवेन किंचिज्ज्ञत्वस्याप्यापत्तेश्च। किंचासाक्षिकाऽसत्त्ववृत्तिर्न क्वापि जानाति, नाभिधीयत इत्यचेतनस्य प्रधानस्य सार्वज्ञ्यमनुपपन्नम्। नच योगिवदिति वाच्यम्।

रश्मिः।

इति। आदिना प्राकृतिकः प्रलयः। महदहंकारपञ्चतन्मात्राणां सप्तप्रकृतीनां तत्कार्यस्य ब्रह्माण्डस्य लयात्प्राकृतिकः। तदुक्तम्।

'द्विपरार्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः। तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय वै॥
एष प्राकृतिको राजन् प्रलयो यत्र लीयते। आण्डकोशस्तु संघातो विघात उपसादिते'॥

इति द्विपरार्धं ब्रह्मायुस्तेनास्मिन् सूत्रेप्यप्रासङ्गिको विचार इति परिहृतम्। **एकदेशिन** इति। तथाहि ब्रह्मैकदेशस्य पुच्छरूपस्य ब्रह्मताङ्गीकारात् प्रमाणैकदेशस्य 'यतो वाचो निवर्तन्ते' इत्यस्य प्रमाणत्वेन स्वीकारात्। 'एवं कदाचिद्भगवान् साक्षात्सर्वं करोत्यजः' इत्यादिना षड्भेदभिन्ना सृष्टिरुक्ता निबन्धे। तत्रैकदेशस्यान्तरालिकसृष्टिरूपस्य स्वीकारादेकदेशित्वम्। **स ईक्षत** इति स ऐक्षितेति पाठः। (बृहदारण्यके तु स ऐक्षत इत्येव)। **षोडशकल**मिति। पुरुषमिति शेषः। स प्राणमसृजत प्राणात्खं वायुर्ज्योतिरापःपृथिवीन्द्रियं मनोन्नमन्नाद्वीर्यं तपोमन्त्राः कर्मलोकनाम चेति रत्नप्रभाकारेणोक्ताः षोडशकलाः। नन्वीक्षतेरिति धातुनिर्देशो भवति इक्श्तिपौ धातुनिर्देश इति कात्यायनस्मरणान्न तु धात्वर्थनिर्देश इत्यत आहुः **ईक्षतेरिती**ति विषयी धातुः विषयो धात्वर्थः प्रतिपाद्यतासंबन्धेनेति यावत्। **यथा यजते**रिति। यजतेरर्थपरत्वम्। 'इतिकर्तव्यताविधेर्यजतेः पूर्ववत्त्वम्' इति जैमिनिसूत्रे यजतिपदेन लक्षणया धात्वर्थस्य यागस्य कथनाद् बोध्यम्। **ज्ञानमय**मिति ज्ञानमीक्षणं तद्विकार इव विकार एव तप इत्यर्थः। **सत्त्वधर्मेणे**ति प्रधानस्य त्रिगुणात्मकत्वेन ज्ञानस्य च 'सत्त्वात्संजायते ज्ञानम्' इतिस्मृतेः। सत्त्वधर्मत्वेन तथेत्यर्थः। **सत्त्वधर्मस्ये**ति सत्त्ववृत्तेरित्यर्थः। केवलसत्त्ववृत्तेर्ज्ञानत्वं स्वीकृत्य प्रधानस्य सर्वज्ञत्वं निरस्तम्। इदानीं जडवृत्तिर्ज्ञानशब्दार्थो न भवति किं तु साक्षिबोधविशिष्टा वृत्तिः वृत्तिव्यक्तबोधो वा ज्ञानं तज्जडस्य प्रधानस्य न संभवतीत्याहुः **किं चासाक्षिके**ति। **क्वापी**ति देवदत्तो जानातीत्येव न तु घटो जानातीति। **योगिवदि**ति सत्त्वोत्कर्षनिमित्तं सर्वज्ञत्वमिति शेषः। सेश्वरसांख्यमतमाहुः

भाष्यप्रकाशः ।

तेषां चेतनत्वेनादृष्टान्तत्वात् । यदि च तप्तायःपिण्डस्य दग्धृत्ववत् साक्ष्यधिष्ठितस्य प्रधानस्येक्षितृत्वं कल्प्यते, तदा तु यन्निमित्तं प्रधानस्येक्षितृत्वं तस्यैव सर्वज्ञत्वाज्जगत्कारणत्वं वक्तव्यम् । तद्धेतोरेवेति न्यायात् । नच ब्रह्मणो नित्यज्ञानत्वेन विवक्षितत्वादीक्षणात्मकज्ञानक्रियां प्रति स्वातन्त्र्यासंभवात् कथं सर्वज्ञत्वमिति वाच्यम् । प्रततौष्ण्यप्रकाशेऽपि सूर्ये सविता दहति प्रकाशत इति प्रयोगदर्शनादिहापि तद्वत् सत्यसति च ज्ञानकर्मभूते विषये नित्यज्ञानतया तादृशप्रयोगोपपत्तेः । नच प्राक् सृष्टेः पदार्थान्तराभावादीक्षणात्मकस्येश्वरज्ञानस्य निर्विषयत्वं शङ्क्यम् । तत्त्वान्यत्वाभ्यामनिर्वाच्ययोर्नामरूपयोर्व्याचिकीर्षितत्वेन तयोरेव विषयत्वात् । नच तयोरनागतत्वेनाविषयत्वं शङ्क्यम् । अतीतानागतविषयकज्ञानस्य योगिषु दर्शनात् तद्ध्येये ईश्वरे तादृशाशङ्काया एवासंगतत्वात् । नच प्राक् सृष्टेर्ब्रह्मणोऽशरीरित्वादीक्षितृत्वमनुपपन्नमिति शङ्क्यम् । सवितृप्रकाशवद् ब्रह्मणो नित्यज्ञानस्वरूपत्वेन ज्ञानसाधनानपेक्षत्वात् । 'न तस्य कार्यं करणं च विद्यते' इति, 'अपाणिपादो जवनो ग्रहीता' इतिमन्त्राभ्यामपि तथा निश्चयात् । नच चैतन्यैक्यवादिनो जीवेश्वरभेदाभावात् संसारिणो जीवस्यापि तथाज्ञानापत्तिरिति शङ्क्यम् । घटगिरिगुहाद्युपाधिभेदेन व्योम्न इव ब्रह्मचैतन्यस्याप्युपाधिभेदेन भेदस्याप्यङ्गीकारेणोक्तदूषणाभावादित्यादि । तज्जयतीर्थेन माध्वेनैवं दूष्यते । सांख्यप्रतिपन्नं प्रधानं न श्रौतं जगत्कारणं, तदैक्षतेतीक्षतिश्रवणादशब्दं तदिति यद् व्याख्यातं तदयुक्तम् । तथाहि । अत्राशब्दमित्यनेनोक्तमश्रौतत्वं न सांख्यस्य प्रतिवादिनः सिद्धम् । तेन वैदिकत्वाभ्युप-

रश्मिः ।

यदि चेत्यादि । **तद्धेतोरेवेति** हेतुहेतुमतोर्हेतुत्वे तद्धेतोरेव हेतुता इति न्यायादित्यर्थः । सर्वज्ञत्वं नाम ज्ञानकर्तृत्वमिति मत्वाशङ्क्य निषेधन्ति **न च ब्रह्मण इत्यादि** । **ज्ञानक्रियामिति** ईक्ष दर्शनाङ्कनयोरिति धातुपाठाज् ज्ञानस्य धात्वर्थत्वेन क्रियात्वम् । भूवादयो धातवः क्रियावाचिन इति । नित्यस्यापि ज्ञानस्य तत्पदार्थोपहितत्वेन ब्रह्मस्वरूपाद् भेदं कल्पयित्वा कार्यत्वोपचाराद् ब्रह्मणस्तत्कर्तृत्वव्यपदेशः साधुरिति सदृष्टान्तमाहुः **प्रततेत्यादि** । **तद्वदिति** दाहप्रकाशयोः कर्मभूते विषये सत्यसति च प्रयोगवत् । **ज्ञानकर्मेति** । **सर्वं जानातीत्यत्र नित्येति** । नित्यत्वं ज्ञाने विषयाविनाभूतत्ववत् विषयविनाभूतत्वमपीति । **तादृशेति** सर्वं जानातीति प्रयोगोपपत्तेरित्यर्थः । **तत्त्वान्यत्वाभ्यामिति** सतोऽबाधात् सत्त्वेनानिर्वाच्ययोरसतोप्रत्ययादसत्त्वेनानिर्वाच्ययोरित्यर्थः । ईश्वरत्वेश्वरान्यत्वाभ्यामिति वार्थः । सत्तामात्रत्वान्नामरूपयोः प्राक् सृष्टेरिति भावः । गङ्गानिष्ठशुक्लत्वनीलत्वाभ्यां गङ्गात्वगङ्गातीरत्वाभ्यां सर्वात्मत्वदशायामनिर्वाच्ययोर्वा नामरूपयोः । **घटगिरीति** मलिनसत्त्वप्रधानाऽविद्या जीवोपाधिः शुद्धसत्त्वप्रधाना मायेश्वरोपाधिः । यत्र मते त्वणुत्वं वास्तविकं यत्तदेव भेदकम् । **इत्यादीति** आदिना यदप्युक्तं प्रधानस्यानेकात्मकत्वात् मृदादिवत्कारणत्वोपपत्तिर्नासंहतस्य ब्रह्मण इति तत्प्रधानस्याशब्दत्वेनैव प्रत्युक्तम् । यथा तु तर्केणापि ब्रह्मण एव कारणत्वं निर्वोढुं शक्यते न प्रधानादीनां तथा प्रपञ्चयिष्यति 'न विलक्षणत्वादस्य' इत्येवमादिनेति भाष्यसंग्रहः । अशब्दपदेन प्रधानं न ग्रहीतुं शक्यमित्याह **अत्राशब्दमित्यादि** । **इतीति** तथाच सगुणस्य कारणता न स्यात् किं तु

भाष्यप्रकाशः।

गतेः। नापि स्वन्यायेन तदुक्तिः। अजामेकामित्यादौ प्रधानस्य श्रुतत्वात्। नच तत्रान्यत् कल्प्यम्। नाममात्रे विवादादर्थान्तरस्य चाभावात्। किं च ब्रह्मणोऽपि श्रौतत्वं न युक्तम्। अवाच्यत्वात्। अवाच्ये वृत्त्यन्तरायोगात्। नापि तस्येक्षितृत्वम्। तस्येक्षतिस्वरूपत्वात्। नच मायावच्छिन्नस्य जगत्कारणस्येक्षितृत्वं संभवतीति वाच्यम्। जिज्ञास्यस्यैव जगत्कारणताया उक्तत्वात्। नहि जिज्ञास्यं मायावच्छिन्नम्। तज्जिज्ञासाया अप्रयोजकत्वात्। किंच माययेक्षितृत्वं भवत्युपचर्यते वा। आद्ये दृश्यत्वाद्यपि किं न स्यात्। द्वितीये प्रधानेऽपि तत्संभवादिति।

मम त्वन्यदपि स्फुरति। सूत्रव्याख्याने यदुक्तम्, ईक्षतेरिति धात्वर्थनिर्देशो लक्षणया विषयिणा विषयलक्षणाद् यथा यजतेरिति तदपि फल्गिवति। सूत्राणां वेदान्तवाक्यकुसुमग्रथनार्थत्वस्य पूर्वं स्वयमेव कथनादत्रापि पूर्वं विषयवाक्योपन्यासाद्वाक्यविशेषगतत्वेन स्वार्थप्रत्यायकस्यैव धातोर्निर्देशस्य सूत्रकाराशयगोचरतया लक्षणाया अत्राविवक्षितत्वात्। किंच पञ्चशिखवृत्तौ ब्रह्मपदस्य प्रधानवाचकताङ्गीकारात् तेन चेत् तत् स्मरेत् तदा प्रसङ्गे जात आनुमानिकादिसूत्राण्यप्यत्रैव वदेत्। जन्मादिसूत्रविषयश्रुत्या तु न वक्तुं शक्यम्। तत्र तत्प्रसङ्गाभावात्। श्रुत्यन्तराणां त्वानुमानिकपाद एव विचारादिति। सूत्रान्तरव्याख्यानं तु नातिविरुद्धमित्युपरम्यते। हेयत्वावचनसूत्रे चकारं प्रतिज्ञाविरोधाभ्युच्चयार्थमाहुः श्रुतत्वाच्चेति। चकारप्रयोजनं न किमप्याहुः।

रश्मिः।

शुद्धसत्त्वप्रधानमायामात्रस्य। **पूर्वमिति** जन्मादिसूत्र इत्यर्थः। **अविवक्षितत्वादिति** तेन 'यः सर्वज्ञः सर्ववित्' इत्यादीनां संग्रहो य उक्तः सोप्यसंगत इति भावः। अधुनास्मिन् प्रधाननिरूपणरूपपूर्वपक्षोत्थानमसंगतमित्याहुः **किंचेत्यादि**। अत्र प्रधानस्मारकपदाद्यभावेन प्रसङ्गसंगतेर्वक्तुमशक्यत्वात्। उपोद्घातादीनां चासंभवादसंगतमिदं स्यात्। यदि च ब्रह्मपदस्य प्रकृतिवाचकत्वं सांख्यसंमतमिति जिज्ञासासूत्रेण प्रधानं स्मरेदिति नासंगतं प्रधाननिरूपणरूपपूर्वपक्षोत्थानमिति विभाव्यते तदा दूषणान्तरमाहुः **पञ्चशिखेत्यादि**। **सूत्राणीति** चतुर्थपादे वक्ष्यमाणानि। **जन्मादीत्यादि** 'यतो वा इमानि भूतानि' इतिश्रुत्या जन्मादिसूत्रेण चेत्यर्थः। तथा च जगत्कर्तृत्वेनार्थेन प्रधानस्मरणं वक्तुं शक्यं प्रधाने जगत्कर्तृत्वस्य सांख्याभिमतत्वादित्यपि नेत्यर्थः। **तत्प्रसङ्गेति** किं तु 'अधीहि भगवो ब्रह्म' इति ब्रह्मण एवोपक्रान्तत्वात्तत्संगतिरिति भावः। जन्मादिसूत्रविषयश्रुतिपदस्योपलक्षकत्वात्। **श्रुत्यन्तराणामिति** 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः' इत्यादीनामित्यर्थः। **विचारादिति** जीवप्रकरणेन जीवपरत्वोपपादनरूपाद्विचारात्। तथा चात्र सूत्रे प्रधानस्मरणाभावात्पूर्वपक्षोऽसंगत एवेति भावः। ईक्षतिसूत्रे प्रधानस्मरणस्यासंगतत्वेनाग्रेपि तत्स्मरणस्यासंगतत्वमित्याशयेनाहुः **नातिविरुद्धमिति**। **प्रतिज्ञेत्यादि** यथारुन्धतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां तारामसुख्यां प्रथममरुन्धतीं ग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति तद्वन्मुख्यमात्मानमुपदिदिक्षुः प्रधानस्य हेयत्वं वदेत् स आत्मा तत्त्वमसीत्यत्र न चैवमवोचदिति सूत्रं व्याख्याय 'उत तमादेशमप्राक्षो येनाश्रुतम्' इत्याद्युपक्रमे श्रावणात् कारणविज्ञानेन

भाष्यप्रकाशः ।

भास्कराचार्या अप्येतदधिकरणं प्रधानकारणतानिरासायैवेति व्याचक्रुः ।

रामानुजाचार्यास्तु, मुख्यतया प्रधानकारणवादनिरासं व्याख्याय निर्विशेषचिन्मात्रब्रह्मवादोऽप्येताभिर्युक्तिभिः सूत्रकारेण निरस्यते । पारमार्थिकमुख्येक्षणादिगुणयोगिजिज्ञास्यं ब्रह्मेति स्थापनात् । निर्विशेषवादे हि साक्षित्वमप्यपारमार्थिकम् । वेदान्तवेद्यं ब्रह्म च जिज्ञास्यतया प्रतिज्ञाय तच्चेक्षतेर्नाऽशब्दमित्यादिसूत्रैश्चेतनमिति प्रतिपाद्यते । चेतनत्वं नाम चैतन्यगुणयोगः । अत ईक्षणगुणविरहिणः प्रधानतौल्यमेव । किंच निर्विशेषप्रकाशमात्रब्रह्मवादे तस्य प्रकाशत्वमपि दुरुपपादम् । प्रकाशोऽपि नाम स्वस्य परस्य च व्यवहारयोग्यतामापादयन् वस्तुविशेषः । निर्विशेषवस्तुनस्तदुभयरूपत्वाभावाद् घटादिवदचित्त्वमेवेति । अथ तदुभयरूपत्वाभावेऽपि तत्क्षमत्वमस्तीति चेन्न । तत्क्षमत्वं हि तत्सामर्थ्यवत्त्वम् । तत्सत्त्वे निर्विशेषत्वहानेः । अथ श्रुतिप्रामाण्यादयमेको विशेषोऽभ्युपगम्यते, हन्त तर्हि सर्वशक्तित्वादयोऽन्येऽपि तथेति निर्विशेषवाद एव त्यक्तः स्यादित्याद्याहुः ।

शैवस्तु रामानुजमतस्यैव चौरो मध्वमतस्य च क्वचित् क्वचित् तद्विरुद्धां शैवश्रुतिमुदाहरन् भिन्नं प्रस्थानमभिमन्यते । तन्मते ईक्षत्यधिकरणं जन्माद्यधिकरणोक्तलक्षणस्य प्रधानेऽतिव्याप्तिवारणाय । आनन्दमयाधिकरणं च जीवेऽतिव्याप्तिवारणायेति ।

मध्वाचार्यास्तु, 'यतो वाचः', 'अशब्दमस्पर्शमरूपमव्ययम्', 'अवचनेनैव प्रोवाच' 'यद्वाचानभ्युदितम्' इत्यादिषु श्रुतिषु वाच्यत्वनिषेधाद् ब्रह्मणः शास्त्रयोनित्वसूत्रोक्तं शास्त्रप्रमाणकत्वं न युज्यत इति पूर्वपक्षनिवृत्त्यर्थमीक्षत्यधिकरणम् । तत्र विषयवाक्यं तु, 'स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते', 'आत्मन्येवात्मानं पश्येत्', 'विज्ञाय प्रज्ञां कुर्वीत'इत्यादि । एतेष्वीक्षणीयत्वश्रावणाद् वाच्यमेव ब्रह्म । न चेक्षणस्य दर्शनात्मकत्वात् कथं तेन वाच्यत्वसिद्धिरिति शङ्क्यम् । 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति वाक्यान्तरे उपनिषदेकगम्यत्वश्रावणेन प्रत्यक्षाद्यवेद्यत्वे सिद्धे वचनेनैवेक्षणस्य विवक्षितत्वात् । नचाऽवचनेनोवाचेत्यादिश्रुतिविरोधः । तत्र साकल्येनावचनस्य विवक्षितत्वात् ।

'अप्रसिद्धेरवाच्यं तद् वाच्यं सर्वागमोक्तितः ।
अतर्क्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृतम्' ॥

इति गारुडेन तथानिश्चयादिति व्याख्यायाग्रे प्रधानस्याश्रौतत्वं न सांख्यमतसिद्धमतस्तस्याशब्दत्वव्यवस्थापनमसंगतमिति सूचयन्ति । ततो गौणश्चेत्यादिसूत्रेषु जीवात्मनीक्षणीयत्ववाच्यत्वादिश्रौतगुणयोगं नानाश्रुतिस्मृत्युपन्यासेन निराकुर्वन्ति । समाप्तौ च पुनरपि

रश्मिः ।

सर्वविज्ञानमिति प्रतिज्ञानस्य विरोधः । नहि सच्छब्दवाच्ये प्रधाने भोग्यवर्गकारणे हेयत्वेनाहेयत्वेन वा ज्ञाते भोक्तृवर्गो विज्ञातो भवतीति । चकारं प्रतिज्ञाविरोधसमुच्चयार्थमाहुरित्यर्थः । **चौर** इति भगवाञ्चौर इत्यर्थः । **अतिव्याप्तीति** तेनैतन्मते मध्वरामानुजमतोक्तं ज्ञेयम् । **तथेतीति** प्रमाणभूतश्रुतिबोधिता इति निश्चयादित्यर्थः । **नानाश्रुतिस्मृतीति** ।

'यो गुणैः सर्वतो हीनो यश्च दोषविवर्जितः ।
हेयोपादेयरहितः स आत्मेत्यभिधीयते' ॥

भाष्यप्रकाशः।

सिंहावलोकनन्यायेन ब्रह्मणोऽवाच्यत्वमेव युक्त्यन्तरैर्दूषयन्ति।

तत्रेदमवधेयम्। तथाहि। द्विविधं कपिलसूत्रप्रसिद्धं सांख्यम्। समासरूपमष्टाविंशतिसूत्रम्। तदुपरि पञ्चशिखर्षेर्वृत्तिः। प्रवचनसूत्रात्मकं च षडध्याययुक्तम्। तत्राद्ये तु शास्त्रप्रतिपाद्यानामर्थानामुद्देशमात्रं नान्यत्। द्वितीये तु, 'सत्त्वरजस्तमःसाम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहंकारोऽहंकारात् पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति। पञ्चविंशतिर्गणः' इत्येकस्मिन् सूत्रे सर्वानुद्दिश्य ततोऽग्रे 'स्थूलात् पञ्चतन्मात्रस्य', 'बाह्याभ्यान्तराभ्यां तैरहंकारस्य', 'तेनान्तःकरणस्य', 'ततः प्रकृतेः', 'संघातपरार्थत्वात् पुरुषस्य' इति पञ्चसूत्र्या स्थूलभूतानि प्रत्यक्षसिद्धान्यादाय तेभ्यः कार्येभ्य उपरितनानामानुमानिकत्वमेव कपिलाचार्यैरादृतम्। ततोऽग्रे यद्यपि 'प्रधानाज्जगज्जायते' इति श्रुतिं सूत्राकारेण पठन्ति त्रिविधं प्रमाणं चाङ्गीकुर्वन्ति, तदप्युक्तोपष्टम्भायैव, न तु शब्दस्य प्राधान्याय। अत एव व्यासचरणैरप्यानुमानिकसूत्रे तथैव तन्मतं सूचयित्वा दूष्यते। तेन सांख्यमते प्रकृतेर्मुख्यतया शब्दगम्यत्वाभावेनाशब्दत्वमेव सिद्ध्यति। शब्दगम्यत्वस्यानुमानिकपादे निराकरणेन तस्याभिमानिकत्व एव पर्यवसानादिति। अत एतद्व्यतिरिक्तं सर्वं

रश्मिः।

'एतदन्यस्वभावो यः स नात्मेति सतां मतम्।
अनात्मन्यात्मशब्दस्तु सोपचारः प्रयुज्यते'॥

इति वामन इति स्मृतिः 'द्वे वा व ब्रह्मणो रूपे आत्मा चैवानात्मा च तत्र यः स आत्मा स नित्यः शुद्धः केवलो निर्गुणश्च अथ ह योऽनीदृशः सोऽनात्मा' इति तलवकारश्रुतिः। **युक्त्यन्तरै**रिति न ह्यशब्दः श्रूयते न चाप्रसिद्धं कल्प्यं सर्वशब्दावाच्यस्य लक्षणायुक्तेरित्येवं युक्त्यन्तरैरित्यर्थः। प्रधानस्याश्रौतत्वं न सांख्यमतसिद्धमिति भागोऽसंगतः। तन्मते प्रधानादीनामानुमानिकत्वेनाश्रौतत्वात्। अन्यत्सर्वं संगतमित्याहुः **तत्रेदमित्यादि**। **नान्यद्**िति। तथा च तस्य प्राथम्येपि विस्पष्टप्रतीत्यजनकत्वान्नोच्यत इति भावः। **द्वितीये त्वित्यादि** प्रवचनसूत्रात्मके। सत्त्वरजस्तमसामिति व्यस्तोपि पाठः। **आनुमानिकत्वमिति** 'कार्यात्कारणानुमानं तत्साहित्यात्'। 'अव्यक्तं त्रिगुणाल्लिङ्गात्'। 'तत्कार्यतस्तत्सिद्धेर्नापलापः'। 'सामान्येन विवादाभावात्' 'धर्मवदनुमानम्' इति सांख्यप्रवचनसूत्रेषु सत्त्वादिधर्मवदव्यक्तस्यानुमानेन तथेत्यर्थः। अथवा 'अचाक्षुषाणामनुमानेन बोधो धूमादिभिरिव वह्नेः' इति सूत्रे तथेत्यर्थः। तथा च स्थूलभूतातिरिक्तानां प्रकृत्यादीनामानुमानिकत्वमेवेति भावः। ननु 'प्रधानाज्जगज्जायत इति' इतिसूत्रे प्रधानं श्रौतमित्यप्यादृतं तत्राहुस्**ततोग्र इति**। स्थूलादित्याद्यारभ्य त्रयोदशसूत्रीपठनानन्तरमित्यर्थः। **श्रुतिमिति** इतिशब्दान्तां श्रुतिम्। **त्रिविधमिति** 'त्रिविधं प्रमाणं तत्सिद्धौ सर्वसिद्धेर्नाधिक्यसिद्धिः' इति सूत्रेणेत्यर्थः। तच्च प्रत्यक्षानुमानशब्दात्मकम्। **उक्तोपष्टम्भायेति** प्रकृत्यादीनां यदुक्तमानुमानिकत्वं तदुपष्टम्भायेत्यर्थः। 'प्रधानाज्जगज्जायते' इति जगता प्रधानमनुमातव्यमिति श्रुतिमात्रप्रामाण्ये पूर्वोक्तं न सिद्ध्येदिति प्रमाणत्रयमङ्गीकृतमिति हृदयम्। **प्राधान्यायेति** तथा च प्रधानादित्यादिसूत्रं प्रधानस्य जगत्कर्तृत्वबोधने परिसमाप्तं न तस्य श्रौतत्वबोधनायालमिति भावः। **तथैवेत्यादि**। **आनुमानिकमिति** प्रकृत्यादि-

भाष्यप्रकाशः ।

सम्यगेव । अत एव भाष्यान्तरेऽपि प्रकृतेस्तथात्वस्यैवादरणमिति दिक् ।

विज्ञानेन्द्रभिक्षुस्तु, ननु यदि प्रलये प्रधानादिसमन्वयो ब्रह्मण्युपगतस्तर्हि तस्यैव श्रुत्युक्तं जगत्कारणत्वमस्तु । भवदभिमतब्रह्मकल्पने तस्य जगदधिष्ठानकारणत्वकल्पने च गौरवात् । सांख्यसूत्रेष्वीश्वरस्य निराकृतत्वात् । ब्रह्मशब्दश्च व्यापकत्वात् प्रधानजीवयोरुपपद्यत एव । अधिष्ठानकारणत्वं च जीवानामेवास्तु । समस्तकार्याणामदृष्टद्वारा जीवकार्यत्वस्य अदृष्टवदात्मसंयोगजन्यतया जीवाधेयत्वस्य च सर्वास्तिकसंमतत्वात् । 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' इति, 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि,' 'येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि' इति जीवप्रकरणस्थश्रुतिस्मृतिभ्यामपि तथावसायाच्च । अतः शास्त्रस्य नित्येश्वरपरत्वे शास्त्रयोनित्वादितिहेतुराश्रयासिद्धः । कार्येश्वरपरत्वे च पृथक् शास्त्रारम्भवैफल्यम् । सांख्यादिभिरेव तथाविधब्रह्मनिरूपणादिति शङ्कायामिदं सूत्रं प्रववृते । ईक्षतेर्नाशब्दमिति । विवादास्पदप्रधानादिभ्योऽतिरिक्तं ब्रह्म न अशब्दं, न अशास्त्रयोनि, न जगत्कारणश्रुत्यप्रतिपाद्यमिति यावत् । कुतः । ईक्षतेः । इतरावृत्तिश्रुत्युक्तेक्षतिधर्मकत्वात् । तथाच कारणश्रुतिः पराभिमतप्रधानाद्यन्यविषया, तदवृत्तिधर्मप्रकारेण बोधकत्वात् । आकाशाद् वायुरित्यादिश्रुतिवदिति । अथवा तज्जगज्जन्मादिकारणं ब्रह्म चेतनमचेतनं वा । चेतनत्वेऽपि स्वयंभूस्तदतिरिक्तो वेति विशेषाकाङ्क्षायां प्रववृते ईक्षतेर्नाशब्दमिति । जगत्कारणं ब्रह्म ना पुरुष एव । कुतः ईक्षतेः । ईक्षणश्रुतिगोचरत्वाद् । अत एवेक्षणात् तद् ब्रह्म अशब्दं शब्दब्रह्मणो हिरण्यगर्भादतिरिक्तं च भवति, सुतरां पुरुषान्तरेभ्य इत्यर्थः । हिरण्यगर्भस्य वेदमयत्वेन वेदगर्भत्ववच्छब्दब्रह्मत्वमपि स्मर्यते

'पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत् ।
कल्पो यत्राऽभवद् ब्रह्मा शब्दब्रह्मेति यं विदुः' ॥

इति भागवतादिष्विति । एवं द्विधा सूत्रं व्याख्याय, तदैक्षत बहु स्यामितिविषयवाक्यं दर्शयित्वा ।

रश्मिः ।

विशेषणदानेनानुमानिकं प्रकृत्यादीति तन्मतं सूचयित्वेत्यर्थः । **भाष्यान्तर** इति अनुव्याख्यानसंज्ञके मध्वभाष्य इत्यर्थः । **तथात्वस्यैवे**ति मुख्यतयात्राऽशब्दत्वस्यैवेत्यर्थः । यथाहुः ।

'न च सांख्यनिराकृत्यै सूत्राण्येतान्यचिक्लृपत् '
भगवान् न ह्यशब्दत्वं प्रधानेङ्गीकरोत्यसौ' ॥

इति । **तस्यैवे**ति अविभक्ततया स्थितस्य ब्रह्मणः 'अविभक्तं च भूतेषु' इति वाक्यात् । **भवदभी**ति प्रायोपाधिक इत्यर्थः । पदार्थद्वयकल्पने गौरवात् । प्रकृत्यविभक्तं तु क्लृप्तमेवेति गौरवम् । **जगदधिष्ठाने**ति एतदुपपादितम् । **सांख्यसूत्रेष्वि**ति 'ईश्वरासिद्धेः' इत्यादिष्वित्यर्थः । 'मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः' । 'उभयथाप्यसत्कारत्वम्' । 'मुक्तात्मनः प्रशंसा उपासासिद्धस्य वा' इति सूत्रेष्वित्यर्थः । **अधिष्ठानेत्यादि** उक्तसूत्राग्रे 'तत्संनिधानादधिष्ठातृत्वं मणिवत्' इतिसूत्रात्तथेत्यर्थः । 'विशेषकार्येपि जीवानाम्' 'सिद्धरूपबोद्धृत्वात् वाक्यार्थोपदेशः' 'अन्तःकरणस्य तदुज्ज्वलितत्वाँल्लोहवदधिष्ठातृत्वम्' इतिसूत्राण्यालोच्याह **समस्तेत्यादि** । शास्त्रयोनित्वहेतोरीश्वरेऽभावाज्जीवेनादावाहुः **आश्रये**ति । **शास्त्रारम्भे**ति । शास्त्रं वेदान्तः । नेति चेतन

१. अनुव्याख्यानि । २. तसायःपिण्डवत् ।

भाष्यप्रकाशः।

'सर्गकाले तु संप्राप्ते ज्ञात्वा तं कालरूपकम्।
अन्तर्लीनविकारं च तत् स्रष्टुमुपचक्रमे।
तस्माद्व्यक्तमुत्पन्नं ततश्चापि महानभूत्' ॥

इति स्मृतिं च दर्शयित्वाह। नहीदमीक्षणं प्रधानादीनामचेतनानां संभवति। ईक्षणध्यानचिन्तनादिशब्देषु चैतन्यस्य विशेष्यत्वात्। ईक्षणादिशब्दस्योपाधिवृत्तिवाचकत्वेऽपि प्रकृतिस्वातन्त्र्यवादिभिरपि प्रधाने तत्पूर्विकाया वृत्तेरनङ्गीकाराच्च। नापि जीवानां, महदादिसृष्टेः पूर्वं करणाभावेन तेषां चैतन्यफलोपधानाभावात्। नचेयमीक्षणपूर्विका सृष्टिर्महत्तत्त्वसृष्टेः पश्चादिति वक्तुं शक्यम्, तथा सतीक्षणात् पूर्वमपि द्वैतापत्त्या, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इतीक्षणाव्यवहितपूर्वश्रुत्यनुपपत्तेः। ततश्चापि महानभूदिति स्मृतिविरोधाच्च। नच तत् पूर्वसर्गीयमिति वक्तुं शक्यम्। सर्गकाले तु संप्राप्ते ज्ञात्वेति सर्गसमकालीनज्ञानावगमादित्यादि। ततः शांकरमतीयं सूत्रव्याख्यानं, मायां तु प्रकृतिं विद्यादिति श्रुतिव्याख्यानं च दूषयित्वा ततः सांख्ययोगयोर्वेदाविरुद्धत्वं च साधयित्वा रजस्तमःसंभिन्नतया मलिनं कार्यसत्त्वं परमेश्वरस्य नोपाधिः, किंतु केवलं नित्यज्ञानेच्छानन्दादिमत् सदैकरूपं कारणसत्त्वमेव तस्योपाधिः। 'न स्थानतोऽपि परस्योभयलिङ्गम्' इत्यागामिसूत्रात्। ब्रह्मविष्णुमहेश्वरास्तु सृष्टिस्थितिसंहाराधिकारिणः कार्यसत्त्वाद्युपाधिका महदाख्या अवान्तरेश्वरा एव। तेषां च कार्योपाधित्वम्।

'गुणेभ्यः क्षोभ्यमाणेभ्यस्त्रयो देवा विजज्ञिरे।
एका मूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः।
सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्' ॥

इति मात्स्यादिभ्यः। बुद्ध्याख्यसमष्टिमहत्तत्त्वं हि त्रिगुणात्मकरज्जुवत् त्रिगुणात्मकमेकमेव। सत्त्वाद्यंशभेदेन त्रयाणां देवानां च शरीरं भवतीत्येका मूर्तिरित्युच्यते हरिहरात्मकदेहवत्। अत एव चैतत्सूक्ष्मशरीराधारभूतं विराडाख्यं स्थूलशरीरमेकमेवेति त्रयाणामेव विश्वरूपत्वमुपपद्यते। त्रयश्च देवाश्चेतनरूपा भिन्ना एव। अत एव त्रयाणामेकपिण्डतया वातपित्तकफवत् परस्परसापेक्षत्वाद्।

रश्मिः।

इत्यर्थः। **विशेष्यत्वादिति** आश्रयतयाऽपेक्षणीयत्वेन तथात्वादित्यर्थः। ईक्षणादिमच्चैतन्यमिति प्रयोगोऽत्र। नन्वीक्षणादेर्द्वित्वादिवद्व्यासज्यवृत्तित्वेन शबलवृत्तित्वात् प्रधानज्ञानवाचकत्वमपि निर्दुष्टमिति शङ्कायामाहुः **ईक्षणेत्यादि**। **तत्पूर्विकाया** इति चैतन्यवृत्तिपूर्विकायाः प्रधानवृत्तेरित्यर्थः। उपाधिपूर्विकाया वा, वृत्तिर्ज्ञानविशेषः। **नापीत्यादि** ईक्षणं संभवतीति योजना। **करणेत्यादि** शरीरेन्द्रियादिरूपस्य करणस्याभावेनेत्यर्थः। **चैतन्येत्यादि** जीवानां चैतन्यस्य फलं कार्यं तस्य यदुपधानं जननयोग्यत्वं तदभावादित्यर्थः। 'मनोमात्रमिदं ज्ञात्वा' इत्यादिवाक्यान्महत्तत्त्वाख्यं मनो ब्रह्मण्यन्तर्भाव्याशङ्कते **न चेयमिति**। **द्वैतापत्त्येति** महदादिसर्जनार्थं शरीराद्यपेक्षणादिति भावः। महत्तत्त्वेन द्वैतापत्तिर्वा। **इतिस्मृतीत्यादि** महत्सृष्टेः पूर्वमीक्षणबोधकस्मृतिविरोधाच्चेत्यर्थः। **ततश्चेत्यादि** तत इत्यनेनाव्यक्तपरामर्शादिति भावः। **तत्पूर्वेति**। **तदिति** स्मृत्युक्तं महत्सर्जनम्। **सर्गसमेति** 'समानकर्तृकयोः पूर्वकाले' इति क्त्वो विधायकसूत्रात्तथेत्यर्थः। **संभिन्नतयेति**

भाष्यप्रकाशः ।

'अन्योन्यमनुरक्तास्ते ह्यन्योन्यमनुजीविनः ।
अन्योन्यं प्रणताश्चैव लीलया परमेश्वराः' ॥

इति मत्स्यादिवाक्यमप्युपपन्नम् । एतेन त्रयाणां भेदाभेदावपि व्याख्यातौ वेदितव्यौ । ननु तेषां कार्योपाधिकत्वेऽपि, 'त्रिधा कृत्वाऽऽत्मनो देहं सोऽन्तर्यामीश्वरः स्थितः' इति स्मृतेर्योगिकायव्यूहवल्लीलावतारत्वमेवाऽस्तु, किमर्थं विष्ण्वादीनां चेतनान्तरत्वं कल्प्यत इति चेन्न । कौर्मे—

'प्रधानं पुरुषं चैव प्रविश्याशु महेश्वरः ।
क्षोभयामास योगेन परेण परमेश्वरः ॥
प्रधानात् क्षोभ्यमाणाच्च तथा पुंसः पुरातनात् ।
प्रादुरासीन्महद्बीजं प्रधानपुरुषात्मकम्' ॥

इत्यनेन, तथा विष्णुपुराणादिषु च पुरुषान्तरेण सह प्रकृतिं संयोज्यैव परमेश्वरस्तदुभयात्मकं देवतात्रयरूपं महान्तं सृजतीत्यवगमात् ।

'ब्रह्मादीनां त्रयाणां तु स्वहेतौ प्रकृतौ लयः ।
प्रोच्यते कालयोगेन पुनरेव समुद्भवः' ॥

इति मात्स्यादिभ्यस्तेषामुत्पत्तिलयसिद्धेश्च । अस्मिन् कूर्मवाक्ये ईश्वरप्रवेशो जीवस्य ज्ञानेच्छाप्रयत्नव्यापनरूपः । क्षोभश्च गुणद्वारा । योगश्चैकाग्र्यम् । अयं च क्षोभः संयोगविशेषद्वारा महतो हेतुः । एवं पुराणान्तरेभ्योऽपि न तेषां साक्षादवतारत्वम् । किंच । मनुना

'यत् तत्कारणमव्यक्तं नित्यं सदसदात्मकम् ।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति गीयते' ॥

इत्यनेनाव्यक्तब्रह्मकार्यस्यापि लौकिकब्रह्मत्वमुक्त्वा, 'आपो नारा इति प्रोक्ताः' इत्यादिना योगेन तस्यैव नारायणत्वमुक्तमतो नारायणादप्यतिरिक्त एव परमेश्वर इति । नच नारायणादिशब्दानामुपाधिमात्रपरत्वमिति वाच्यम् । तथा सति लक्षणापत्तेरिति । अत एव विष्ण्वादिदेवतायाः कृष्णाद्यवतारेषु न पुरुषान्तरप्रवेशः श्रूयते, फलवान् वा भवतीत्यतोंऽशावतारत्वमेव । अत एव भागवते ऋष्यादीन् प्रकृत्य स्मर्यते,

रश्मिः ।

मिश्रतया । ननु 'प्रधानं पुरुषं चैव प्रविश्य' इत्युक्तौ जीवद्वयमेकत्र देहे स्यादित्यत आहुः **अस्मिन् कूर्मवाक्य** इति । प्रधानपुरुषयोः संचालनसंभवेन कर्मत्वानुपपत्तिमाशङ्क्याह **क्षोभश्चे**ति । तथा च गुणान् संचालयामासेत्यर्थः । धात्वर्थमाह **अयं चे**ति तथा च गुणानां मुख्यगौणभावेन संयोगं कृतवानित्यर्थः । **उपाधिमात्रे**ति मात्रचा शुद्धस्वरूपव्यवच्छेदः । तथा चाविभागाद्वैतहानिरिति भावः । **लक्षणापत्ते**रिति जहदजहल्लक्षणापत्तेरित्यर्थः । **नारायण इत्यत्र** नारा आपस्तासां त्यागोऽस्वमात्रमात्मा नारायणान्तर्गतीयोऽस्वसंबन्धस्य त्यागः । अस्वात्मनोरैक्यम् । एवं तत्त्वमसीत्यत्र मायाविद्ययोस्त्यागः ब्रह्मविष्ण्वोरप्येवम्, एतन्मते त्वविभक्तत्वेनैवाद्वैतम् । गीतोक्तसात्त्विकविषयम् । अत आपत्तिशब्दः । अत एवाविभागाद्वैतं सिद्धम् । **पुरुषे**ति विष्णुपुरुषादन्यः पुरुषः पुरुषान्तरं तस्मिन् प्रवेशः । किंतु स्वस्मिन् विष्ण्वंश एव कृष्णे । फलं कार्यं तद्वान् पुरुषान्तरप्रवेशः । **अंशे**ति विष्ण्वंशावतारत्वमित्यर्थः । 'सर्वं तं परादात्' इत्युक्तश्रुत्यैवकारः । अत्र प्रमाणमाहुः **अत** इति ।

भाष्यप्रकाशः।

'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे'॥ इति।

अत्र कृष्णो विष्णुः स्वयं परमेश्वरः, तस्य पुत्रवत् साक्षादंश इत्यर्थः। ऋष्यादीनामंशांशिवचनादिति। न चैवं सति, 'मत्तः परतरं नान्यत् किंचिदस्ति धनञ्जय' इति गीतावाक्यविरोध इति वाच्यम्। तथाविधवाक्यानां व्यक्तपरत्वात्। ईश्वरस्य चाव्यक्ततया व्यवहार्यत्वाभावात्। एतेनापि विष्ण्वादीनां परमेश्वरत्वादिकं व्यक्तापेक्षया बोध्यम्। नित्यत्वं च 'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते' इति स्मृतेर्बोध्यम्। अथवा, 'यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्' इतिश्रुतेर्विष्णुदेवताया औत्पत्तिकब्रह्मात्मभावान्मत्तः परतरं नास्तीत्यादिवचनोपपत्तिः। वक्ष्यति चाऽऽचार्यः, 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' इति। अत एवानुगीतायां, 'परं हि ब्रह्म कथितं योगयुक्तेन तन्मया' इति श्रीकृष्णवचनाद् भगवद्गीतायां परब्रह्मैव कार्यब्रह्मणा श्रीकृष्णेनाहमित्युपदिष्टमिति निर्णीतम्। किंच। अन्येषामपि ज्ञानिनां ब्रह्मभावेऽपि विष्णावेव मुख्यतो ब्रह्मभावान्मत्तः परतरं नास्तीति वचनमुक्तं, नान्यस्य। तस्य सर्वज्ञानिमुख्यत्वमुक्तं मोक्षधर्मे,

'अनाद्यन्तं परं ब्रह्म न देवा नर्षयो विदुः।
एकस्तद्वेद भगवान् धाता नारायणो विभुः॥
नारायणादृषिगणः' इत्यादिना।

तथा शिवस्यापि मत्तः परतरं नास्तीति वचनं बोद्धव्यम्। किंच। योगयुक्ता ये जीवाः पूर्वपूर्वेषु सर्गेषु करणवर्गेण सह च सायुज्यमुक्त्या परमेश्वरतां गतास्ते वासुदेवव्यूहेऽन्तर्भवन्ति। तत्र च व्यूह एक एव वासुदेवो नित्येश्वर इतरे तदंशा वासुदेवाः। तथा संकर्षणप्रद्युम्नोऽनिरुद्धाख्यव्यूहरूपिणो विभूतिगणाः पूर्वसिद्धाः। त एते यथायोग्यं महदादिविराडन्तरूपेण ब्रह्मविष्णुरुद्ररूपेण चांशावताराः परमेश्वरस्य भवन्ति। 'आगच्छन्ति यथाकालं गुरोः संदेशकारिणः' इति मोक्षधर्मात्। तथाच ये हरिहरादयः परमेश्वरकोटयस्तेषां, मत्तः परतरं नास्तीति वचनमुपपद्यत एव। यद्यपि तेषां जगद्व्यापारवर्जमेवैश्वर्यं तथापि परमेश्वरात्मकतया सर्वस्रष्टृत्वसर्वाधारत्वा-

रश्मिः।

मृडयन्तीति सुखयन्तीत्यर्थः। अत्रार्थे प्रमाणमाहुः **ऋष्यादीनामिति**। वाक्येंशस्य कला इति समासं मत्वाहुः **अंशांशीति**। तथा चांशस्यापेक्षणात्कृष्णोंश इत्यर्थः साधुः। ऋष्यादीनामंशाः पुत्रादयस्ते सन्त्येषां तेंशिन इत्यर्थः। **व्यक्तपरत्वादिति** तथा च व्यक्तं 'मत्तः परतरं नान्यत्' इत्यर्थः। परमेश्वरत्वबोधकानां संगतिमाह **एतेनेति**। विष्ण्वादिनित्यत्वबोधकानां संगतिमाह **नित्यत्वं चेत्यादि**। एकस्यांशांशिभावः उक्तः स विरुद्ध इति पक्षान्तरमाहुः **अथवेति**। 'प्रत्यबुद्ध्यत' यथावदात्मानं प्रतिबोधितवान्। **औत्पत्तिकेति** नित्यब्रह्मात्मभावस्तत्कृतः स कृष्णस्तदभिन्नान्मत्तः इत्यर्थः। तर्ह्यन्येषामपि ब्रह्मभाव एतादृशः स्याद्वन्नये आत्मनोप्यविभाग इति। ब्रह्मात्मभावादित्यत्रात्मशब्दोऽधिक इत्यत आह **किं चेत्यादि**। **ब्रह्मभावादिति** कृष्णरूपात्। **वचनमिति** तस्य वचनमुक्तं नान्यस्येति। **योगयुक्ता इति**। स्वमार्गेपि मानसीसेवाया योगत्वेन व्याख्यानात्। अन्ये तु 'पतन्त्यधो नादृतयुष्मदङ्घ्रयः' इतिवाक्यविषयाः। **करणेति** सूक्ष्मदेहेन। द्वितीयस्कन्धेस्ति। **इतर इति** कृष्णाद्याः। **परमेति** परमेश्वर आत्मा येषां **क्यापो**

भाष्यप्रकाशः ।

ह्युपदेशोऽपि तेषु युज्यत एव । ननु यद्येवं तदा गीतादिषु विष्णवादिदेवतैश्वर्यमेव कुत उक्तं, न परमेश्वरस्तदैश्वर्यं वेति चेन्न ।

'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः' ॥

इति प्रश्नप्रतिवचनाभ्यां विष्णुदेवाद् भेदेन परमेश्वरकथनात् । 'अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते' इत्यादिना च परमेश्वरस्यैश्वर्यादिकथनादिति । ये त्वीश्वरस्यान्तर्याम्यतिरिक्तविधयापि योगिनामिव लीलाशरीरमिच्छन्ति, तेषां मते, 'न तस्य कार्यं करणं च विद्यते', 'अप्राणो ह्यमनाः शुभ्रः', 'अक्षरात् परतः परः' इत्यादिश्रुतीनां, 'अरूपवदेव हि तत्प्रधानत्वात्' इत्यागामिसूत्रस्य च विरोधः । कार्यं शरीरम् । करणं बुद्ध्यादि । बुद्ध्यादिना हि शरीरं प्रेर्यत इति । 'सर्वदेहविवर्जितः' 'अशरीरः शरीरेषु सर्वेषु निवसत्यसौ' इति, 'देहद्वयस्थितो नित्यः सर्व देहविवर्जितः' । इति भारतादिष्वीश्वरस्य देहद्वयप्रतिषेधात् । अतो विष्णवादिदेवानामेव स्थित्यादिलक्षणस्वाधिकारपालनाय मत्स्यादयो लीलावताराः । ते च परब्रह्मणः प्रकृष्टशक्तितया आवेशावतारतया वा परमेश्वरत्वेनोपास्या इति । तथाच श्रुतिः—

'यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' ॥
'यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम्' ॥

इति । नन्वेवं परब्रह्मणः सकाशाद् विष्णवादिदेवानां भिन्नत्वे विष्णुशिवप्रकरणस्थानि सृष्ट्यादिवाक्यानि ब्रह्मनिरूपणे साध(क)नतया विचारकैः किमित्युपन्यस्यन्त इति चेत्तयोरीश्वरकोटितया परमेश्वरेण सह व्यवहारसाम्यादिति गृहाण । अत एव, 'त्रयाणामेकभावानां यो न पश्यति वै भिदाम्' इत्यादिभिस्त्रयाणामेव देवानां स्वाभाविकब्रह्मात्मभावसाम्यात् सर्वोपनिषत्सु त एवोपासनार्थं ब्रह्मतयोपदिश्यन्त इति । परब्रह्मणश्च स्वतो नामरूपाद्यभावः ।

'न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः ।
सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे ॥
नामरूपे न यस्यैको योऽस्तित्वेनोपलभ्यते' ।

इत्यादिरूपविष्णुपुराणादिवाक्यात् । आत्मनः पर इति जीवादतिरिक्ते । अतः परब्रह्मणो नामरूपाद्यभावान्मुख्यविकारयोर्हरिहरयोर्नामरूपाभ्यामेव शास्त्रेषु प्रायशो व्यपदेशः । अत एव वैष्णवाः शैवाश्च विष्णवाद्यतिरिक्तं परमेश्वरमविद्वांसो ब्रह्ममीमांसाशास्त्रं विष्णवादिपरतया व्याचक्षाणा अविवेकिन एवेति मन्तव्यम् । एवं पञ्चसूत्र्यां संक्षेपतः प्रदर्शितः शास्त्रार्थ इतः परं प्रपञ्च्यत इत्याह ।

रश्मिः ।

तत्फलं वा । अविभागाद्वैतादेवेति । ऐश्वर्यादीति अहं परं यस्येति बहुव्रीहिणेत्यर्थः । **अन्तर्यामीति** अन्तर्यामिब्राह्मणे स्फुटमिदम् । **देहद्वयेति** स्थूलसूक्ष्मदेहद्वय इत्यर्थः । व्यष्टिसमष्ट्यात्मकदेहद्वयेति वा । **व्यवहारेति** अविभागाद्वैतेन तथा । **पञ्चसूत्र्यामिति** एतत्सूत्रपर्यन्तायां जन्माद्यस्येति

भाष्यप्रकाशः ।

तदप्यविचाररमणीयमेव । सदेव सोम्येदमग्र आसीदित्यनेन निरूपिताया आदिसृष्टेः पूर्वं केवलं ब्रह्मैव, नान्यदित्यस्यार्थस्य साधने तदभिमताविभागलक्षणाद्वैतस्याऽवान्तरसृष्टिप्राक्कालविषयत्वव्युत्पादनेन तदानीं तदभिमतप्रकारेण प्रधानादिसमन्वयस्याशक्यवचनतया जीवादृष्टस्याप्यभावेन प्रथमव्याख्यानगतपूर्वपक्षस्यैवासंगतत्वेन तदपाकरणाय सूत्रप्रवृत्तेर्वक्तुमशक्यत्वात् । द्वितीयव्याख्यानं तु न दुष्टम् । सांख्ययोगयोः सर्वांशेन श्रुत्यविरुद्धत्वोपपादनं त्वसंगतमेव ।

'अक्षपादप्रणीते च काणादे सांख्ययोगयोः ।
त्याज्यः श्रुतिविरुद्धोंऽशः श्रुत्येकशरणैर्नृभिः ॥
जैमिनीये च वैयासे न विरोधोऽस्ति कश्चन' ।

इति पराशरोपपुराणीयवाक्यविरोधात् । नच योऽभ्युपगमवादत्वेनोक्तो नित्येश्वरदूषणादिः स एव त्याज्योऽस्त्विति वाच्यम् । तदुक्तषडध्याय्यां तस्याभ्युपगमवादत्वगमकानुपलम्भात् । नित्यानित्यवस्तुविवेकव्यतिरिक्तांशान्तरेऽपि तथात्वात् । 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' इति श्रुत्या तथा निश्चयात् । एवं योगेऽपि द्रष्टव्यम् । जीवात्मज्ञानमात्रेण मोक्षाङ्गीकारस्यापि तथात्वात् ।

'येऽन्येऽरविन्दाक्ष ! विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः' ॥

इति श्रीभागवते विविक्तजीवात्मज्ञानाद्विमुक्तमानिनां पातकथनेन तथा निश्चयादिति । तथा परमेश्वरस्य ब्रह्मविष्णुमहेश्वरातिरिक्तस्य कारणसत्त्वोपाधिकत्वस्थापनमप्यसंगततमम् । शिवतत्त्वविवेकस्थापितस्योङ्कारवाच्यस्य गुणसाम्योपाधिकस्य सर्वेश्वरस्येव कारणसत्त्वोपाधिकस्यापि

रश्मिः ।

सूत्रद्वयमिति । एतदपि विशिष्टाद्वैततुल्यमिति दूषयन्ति **तदपीत्यादि** । **तदभिमतेत्यादि** त्रिगुणात्मकरज्जुवत्रिगुणात्मकब्रह्मविष्णुशिवात्मकमेकमेव नित्यज्ञानेच्छानन्दादिमत्सदैकरूपकारणसत्त्वोपाधिकं ब्रह्मकार्यं तत्कारणं ब्रह्म इत्येवं तदभिमतेत्यादि । **तदानीमिति** प्रथमसृष्टिकाल इत्यर्थः । अतीतार्थमात्रपरत्वकल्पनेपि साकारप्रतिपादकत्वेनादोषादाहुः **द्वितीयेति** । **अभ्युपगमवादत्वेनेति** आग्रहवादो युक्तिरहितोऽभ्युपगमवादः । ननु किं तेनेत्यत आहुः **नित्यानित्येत्यादि** । **तथात्वादिति** श्रुतियुक्तिविरुद्धत्वेनाभ्युपगमवादत्वादित्यर्थः । तदर्थं श्रुतिविरोधमाहुः **काल इत्यादि** । अत्र योनिवादनिरासात्प्रधानवादोप्यभ्युपगमवाद इति निश्चयादित्यर्थः । 'एतेन योगः प्रत्युक्तः' इतिसूत्रादष्टाङ्गयोगे किंचिदाहुः **एवं योग इति** । षडङ्गयोगस्यौपनिषदत्वात् । **शिवतत्त्वेत्यादि** 'अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति नाभिर्हृदयं कण्ठं मूर्धा तत्र चतुष्पादं ब्रह्म विभाति जागरिते ब्रह्मा सुप्ते विष्णुः सुषुप्तौ रुद्रस्तुरीयमक्षरं स आदित्यो विष्णुश्च' इति ब्रह्मादिभ्यः परमक्षरशब्दं सर्वदेवतात्मकं तत्त्वान्तरं दर्शितम् । स एव 'न तत्र देवा ऋषयः पितर ईशते' इति श्रुत्यानन्येश्वरः । 'एको देवः सर्वभूतेषु गूढः' इति श्रुत्यान्तर्यामी चेति ब्रह्मोपनिषदि । अपि च जगत्कारणं ब्रह्म मायोपाधिकचैतन्यमित्यविवादं ब्रह्मविष्णुरुद्रास्तु तदीयगुणविशेषोपाधिचैतन्यरूपाः 'सैषा चित्रा सुदृढा बह्वङ्कुरा स्वयं गुणभिन्नाङ्कुरेष्वपि गुणभिन्ना सर्वत्र ब्रह्मविष्णुशिवरूपिणी' इति श्रुतेः । ततश्चोपा-

भाष्यप्रकाशः ।

निरुपाधिकपरमेश्वरप्रतिनिधित्वेनैव ब्रह्मोपनिषन्नृसिंहतापनीयमैत्रायणीयाथर्वशिखासु सिद्धत्वात् । इदं यथा तथा प्रहस्ताख्ये वादे निपुणतरमुपपादितमिति नेह प्रपञ्च्यते । नच निरुपाधिकस्य निराकारत्वं शङ्क्यम् । 'आनन्दरूपममृतं यद्विभाति' इति मुण्डके, 'अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये ॐकारं सर्वेश्वरं द्वादशान्ते आनन्दाऽमृतरूपं प्रणवं षोडशान्ते' इति तापनीये, 'आनन्दमात्रकरपादमुखोदरादिः' इति पञ्चरात्रस्मृतौ, 'अथवा परमात्मानं परमानन्द-

रश्मिः ।

धिभेदे उपहितभेदस्यौचित्यात्, गुणमूर्तिभ्यः परं मायोपाधिकं जगत्कारणं ब्रह्मेति सिद्धम् । तच्चोमासहायं परमेश्वरं प्रभुम्, 'ऋतं सत्यं परं ब्रह्म'इति कैवल्योपनिषच्छ्रुतेरेतद्वपुरित्यप्पयदीक्षितास्तत्र वदन्ति तादृशेश्वरस्यैवेत्यर्थः । **प्रतिनिधित्वेने**ति अत्रैवं ज्ञेयम् । यन्मूर्तित्रयातीतं तुरीयं तत्त्वं परं ब्रह्मेति प्रत्यपादि तन्मन्दम् । ब्रह्मोपनिषद्येव पूर्वोक्तानन्तरं पठ्यते तेषां मध्ये यत्परं ब्रह्म विभाति स्वयममनस्कमश्रोत्रमपाणिपादं ज्योतिर्वर्जितं नेत्यक्षरस्वरूपं निरुच्य तस्य ब्रह्मलोकत्वप्रसिद्ध्यै 'तत्र लोका न लोका देवा न देवा वेदा न वेदा यज्ञा न यज्ञा माता न माता पिता न पिता स्नुषा न स्नुषा चाण्डालो न चाण्डालः पौल्कसो न पौल्कसः श्रमणो न श्रमणः पशवो न पशवस्तापसो न तापसः इत्येकमेव परं ब्रह्म विभाति' इत्यनेन तत्र लोकादीनां ब्रह्मत्वमुच्यते न तु लोकादयो निषिध्यन्ते । एकेनैव लोकादिपदेन चारितार्थ्यात् । ततो हृद्याकाशे तद्विज्ञानमाकाशं तत्सुषिरमाकाशमित्यनेन तस्य भक्तहृदयाकाशत्वलोकादीनां ब्रह्मत्वोक्तेर्निरुच्य प्रायपाठानुरोधप्राप्तप्रथमार्थसप्तम्या ततस्तादृशहृदि वेद्यं पूर्णं ब्रह्म ज्ञपयितुं तद्वेद्यं हृद्याकाशे 'यस्मिन्निदं सं च विचरति' 'यस्मिन्निदं सर्वमोतप्रोतमिति तल्लक्षणमुक्तम् । तथा च ब्रह्म प्रतिनिधीयतेऽस्मिन् इति प्रतिनिधिरक्षरं तत्त्वेनेत्यर्थः । **नृसिंहतापनीये**त्यादि यदप्यप्पयदीक्षितेन 'अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये' इति नाभिहृदयभ्रूमध्येष्वकारादिमात्रात्रयवाच्यानां ब्रह्मादीनामुपासाविधानानन्तरं ॐकारं सर्वेश्वरं द्वादशान्त इति द्वादशान्तोपास्यं तेभ्यः परं तत्त्वान्तरं तापिनीये दर्शितमित्युक्तम् । तत्रापि तदनन्तरं सप्तात्मानं चतुरात्मानं चतुःसप्तात्मानं चतुरात्मानमानन्दामृतरूपं प्रणवषोडशान्तर इति भक्तसाहित्यलिङ्गेन प्रतिनिधेरेवोक्तेर्युक्तत्वात् । यदपि तेन मैत्रेयोपनिषदि 'तमो वा इदमेकमास' इत्यारभ्य 'तत्परेणेरितं विषमत्वं प्रयात्येतद्वै रजसो रूपम्' इत्यादिना तपोधिष्ठातुः परस्य संकल्पेनाविद्याख्यस्य तमसो गुणविभागं निरूप्य तस्य प्रागुक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरिति 'अथ यो ह खलु वा वास्य राजसोंऽशो योयं ब्रह्माथ यो ह खलु वा वास्य तामसोंऽशोऽसौ योयं रुद्रोथ यो ह खलु वा वास्य सात्त्विकोंऽशोऽसौ योयं विष्णुः' इति तेभ्यः परं तत्त्वान्तरं दर्शितमित्युक्तम् । तत्रापि ततः पूर्वं ब्रह्मणो वा एता अग्र्यास्तनवः परस्यामृतस्याशरीरस्येत्युक्तत्वात् तस्यैव तमोभवनादिरुच्यते इति प्रतिनिधिरेव तत्त्वान्तरम् । यत्त्वथर्वशिखायां शिव उच्यत इति तदप्योंकारप्रणवनाम्नो निर्वचनाद् ब्रह्मविष्णुरुद्रेन्द्राः संप्रसूयन्ते इति वचनात् प्रतिनिधित्वेन सिद्धम् । नात्र प्रसवविरोधः संपद्याविर्भावात् । तदुक्तं मैत्रायणीये 'ब्रह्मणो वा एता अग्र्यास्तनवः परस्यामृतस्याशरीरस्य तस्यैव लोके प्रतिमोदन्ति' इति । एतदेवाहुः **निपुणतरमुपपादित**मिति । यत्तत्पदाध्याहारे गौरवं मत्वाहुः **किंचे**ति । अग्रिमाधिकरणे

१. आदित्या मासा वा । २. ॐकारो भक्तः, साहित्यं प्रतिपाद्यप्रतिपादकभावसंबन्धेन ।

भाष्यप्रकाशः ।

विग्रहम्' इति योगियाज्ञवल्क्यस्मृतौ चानन्दाकारस्यैव सिद्धत्वात् । नच, 'न तस्य कार्यं करणं च विद्यते' इत्यस्य विरोधः । तस्य तत्संबन्धि यत् तत् कार्यं जन्यं न, किं त्वजन्यमेव । किंच, तस्येति षष्ठ्या भेदो निरूप्यते । तथाच जीववत् स्वरूपातिरिक्तं ज्ञानक्रियादिषु करणमिन्द्रियादिकं च तस्य नास्ति । अथवा नित्यत्वादाकारस्य तद्धेतुभूतं करणं क्रिया, सापि नास्ति । अत एव, न तत्सम इत्यादीति तदर्थात् । एतेनैव 'अप्राणो ह्यमनाः शुभ्रः' इत्यस्याप्यविरोधः सिद्धः । नाप्यरूपवत्सूत्रस्य विरोधः । तत्रापि रूप्यते निरूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वं तद्युक्तं रूपवद्विश्वम् । ब्रह्म तु तद्विलक्षणम् । यद्वा रूप्यते व्यवह्रियतेऽनेनेति रूपं करचरणादि तद्वत् तद्युक्तं ब्रह्म न, किंतु तद्विलक्षणम् । करादेरपि ब्रह्माभेदाद्रूपरूपं ब्रह्मैव, नतु रूपवदिति । ननु कुत एतदवगम्यत इत्याकाङ्क्षायां तद्विनिगमकं सूत्रशेषेणाह 'तत्प्रधानत्वात्' इति । सर्वेषां वेदान्तानां प्राधान्येन ब्रह्मप्रतिपादकत्वात् । तथाच ब्रह्मप्रकरणे निरूपित आकारो ब्रह्माभिन्न एवेति । नचाऽऽकारनिरूपकाणां ब्रह्मपरिचायनार्थत्वात् तेषां ब्रह्मभिन्नकराद्याकारनिरूपकत्वेऽपि न प्राधान्येन ब्रह्मप्रतिपादकत्वप्रतिरोध इति शङ्क्यम् । 'स यथा सैंधवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञान(घन) एव' इतिश्रुतौ बाह्याभ्यन्तर-भेदराहित्यबोधने ज्ञानाकारत्वस्यैव सिद्धत्वात् । आकारभूतकरादिराहित्येन केवलज्ञानात्मकतायां बाह्याभ्यन्तरत्वप्रतीतिराहित्येन तन्निषेधानुपपत्तेः । अकृत्स्नादिप्रतीतिराहित्येन कृत्स्नघनपदयो-र्वैयर्थ्यापत्तेश्च । अतः केवलसच्चिदानन्दात्मकब्रह्माभिन्नकरचरणाद्याकाराङ्गीकारे न कस्यापि विरोधः । यत् पुनस्तलवकारादिश्रुत्या परमेश्वरस्य साक्षादुपास्यत्वाभाव उक्तः स तु तामेव श्रुतिं विरुणद्धि । पूर्वार्धे मनःप्रवृत्तिरहितं तत्प्रेरकं यदुक्तं, तदेव ब्रह्म त्वं विद्धि, नेदं प्रेर्यत्वेनानुभू-यमानं जीवात्मरूपं न विद्धि । यत् प्रेरकं तत् किमित्यत आह । यदिदं सच्चिदानन्दाकारमुपासते वैदिकोपासका इति तत्रार्थात् । अनुपास्यत्वेऽभिप्रेते तु द्वितीयेदंकारं न वदेदेव । नेदं यदुपासत इत्येतावतैव चारितार्थ्यात् । 'यस्यामतं तस्य मतम्' इत्यत्रापि, 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्' इति वरणहेतुकतनुविवरणस्य श्रुत्यन्तरे श्रावणाद् वरणाभावे यस्यामत-मविदितं तस्य मतं, यस्य पुनस्तदभावेऽपि मतं स न वेदेति । यद्वा, अनिरुक्तश्रुतौ ब्रह्मणो वाक्यपरिच्छेद्यत्ववारणाद् यस्यामतमनिरुक्तत्वात् सम्यक्तया अज्ञातं तस्य मतम् । यस्य पुनस्त-द्विपरीतं स न वेदेति । अविज्ञातं करचरणादिविशिष्टतया जानतां, विज्ञातं तदभिन्नतया

रश्मिः ।

वक्ष्यन्ति च ब्रह्मणि त्विन्द्रियाद्यभावादानन्देनैव कार्यं क्रियते इति । **अविरोध** इति आकारहेतुभूतः प्राणादिर्नास्तीत्यविरोध इत्यर्थः । **एवेती**ति करादीनां प्रत्येकं सच्चिदानन्दात्मकत्वादेवकारः । **सर्वेषा**मिति समासस्तु तस्य प्रधानत्वं तत्प्रधानत्वं तस्य ब्रह्मणः प्रधानत्वात् मुख्यत्वादिति भाष्यात् । अविभागाद्वैतवादी शङ्कते **न चाकारेति** । **बाह्याभ्यन्तरे**त्यादि । कृत्स्नेति शेषः । यद्वा सप्तम्यन्तं पदं तृतीयान्तं वा । उक्त इति तथा च श्रुतिरित्यादिनोक्तः । अस्मिन् व्याख्याने वरणाभावेपि ब्रह्मावबोध आयाति स सिद्धान्तविरुद्ध इति भिन्नां व्याख्यामाहुः **यद्वे**त्यादि । **अनिरुक्ते**त्यादि तन्निष्ठस्येत्यादिसूत्रविषयभूतायामित्यर्थः । **सम्यक्तये**ति इदमित्थतयेत्यर्थः ।

भाष्यप्रकाशः ।

जानतामित्यर्थादिति । अतो न परब्रह्मणोऽनुपास्यत्वाज्ञेयत्वादिकं युक्तम् । यदपि परब्रह्मणः स्वतो नामाद्यभावसाधनाय विष्णुपुराणादिवाक्यमुपन्यस्तं तत्रापि कल्पनापदात् काल्पनिकनामादिनिवृत्तिरेवाभिप्रेता, न यावन्नामादिनिवृत्तिः । 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' । ॐकारं प्रकृत्य 'स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः' । 'तस्य वाचकः प्रणवः' इति गीताश्रीभागवतपातञ्जलसूत्राणां विरोधात् । वाचकस्यैव नामत्वात् । एवं सिद्धे सदादिनामकत्वे,

'नारायणः शिवो विष्णुः शंकरः परमेश्वरः ।
एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' ॥ इतिवाराहपुराणवाक्यात्,
'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' ॥

इत्यादिश्रुतिभ्यश्च नामान्तरस्वीकारेऽप्यदोषात् । 'अनादिमत्परं ब्रह्म' इति स्वलिखितगीतावाक्याग्रिमगीतावाक्य एव सर्वतःपाणिपादान्तमित्यादिना परमेश्वररूपस्याप्युक्तत्वेन तस्याप्यङ्गीकार्यत्वात् । ज्ञेयं प्रस्तुत्यैव तस्य कथनेनोपासनागन्धस्याप्यभावात् । अतो नामरूपे न यस्येति द्वितीयवाक्येऽपि काल्पनिकनामाद्यभाव एवास्थेय इति परमेश्वरस्य लीलाविग्रहाङ्गीकारे दोषाभावान्मत्स्यादीनां परमेश्वरलीलावतारत्वेऽपि न दोषः । द्वितीयस्कन्धे, 'लीलावतारान् पुरुषस्य भूम्नः' इति प्रतिज्ञाय ब्रह्मणा मत्स्यादीनां कथनात् । न च 'एते चांशकलाः पुंसः' इति प्रथमस्कन्धविरोधः । तेषामेतद्भिन्नत्वात् । त्वदुपगतनित्यकार्यवासुदेववन्नामरूपादिसाम्येऽपि भेदस्योपक्रमोपसंहाराभ्यां यथायथमवगन्तुं शक्यत्वात् । गीतायां श्रीभागवते च विभूतिमध्ये

रश्मिः ।

तद्विपरीतमिति इदमित्थतया ज्ञातम् । **युक्त**मिति न च मन्त्रोपासनेति भक्तिहंसविरोध इति वाच्यं मन्त्रोपासनेत्येकपदात् । वस्तुतस्तु भक्त्येकसमधिगम्यं 'नेदं यदिदमुपासते' किं तु यदिदं भजन्त इति भावः । **तस्य वाचक इत्यादि** । अस्य सूत्रस्य समाधिपादे 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' इतिसूत्रमुपक्रम्य पाठात्तत्पदेनेश्वरपरामर्शादिति भावः । **तस्यापी**ति तथा चैतत्स्वारस्येनाहं परो यस्येति बहुव्रीहिर्ज्ञेयः । ननूपासनास्पृश्यत्वलिङ्गेन नायं समासः साधीयानित्यत आहुः **ज्ञेयमित्यादि** । **उपासनागन्धस्ये**ति । त्रयोदशे 'ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते' इति पूर्वार्धात् 'एवं सतत' इत्यादेर्द्वादशस्थत्वात्तथेत्यर्थः । **लीलावतारत्वेपी**ति लीलावतारपदं योगरूढं साक्षात्सच्चिदानन्दरूपाणामैश्वर्यादिगुणसहितानां मुख्यानां भगवदवताररूपाणां वाराहयज्ञकपिलदत्तसनकादिनरनारायणध्रुवादीनां नाम । अवतारशब्दार्थस्तु ।

'सत्त्वरूपशरीरेषु ब्रह्मणः संक्रमः स्मृतः ।
अशुद्धशुद्धभावेन शरीराणामतो द्विधा ।
कार्यकाले संक्रमणमावेशः सर्वदा परम्' ॥ इति ।

एतच्च 'स एव प्रथमं देवः'इत्यस्य सुबोधिन्यां प्रथमस्कन्धे स्फुटम् । **न दोष** इति यथाविभवादिकार्यकर्तृत्वेन विष्ण्वाद्यवतारत्वं भगवतो भिक्षोर्मते तथा भक्तैः सह निगूढभावकरणाऽभावेपि लीलाक्षरं तत्कार्यकर्तृत्वेन लीलावतारत्वेपि निगूढभावाकरणं दोषो नेत्यर्थः । नन्वक्षराद् विविधा भावाः प्रजायन्ते तत्रैव चापियन्ति नैवमन्यत्रेति चेन्न । तत्पुराणादिषु तेभ्योपि जननप्रलयाद्युक्तेः । **अंशकला** इति धर्मावेशिन इत्यर्थः । **तेषा**मिति मत्स्यादीनामित्यर्थः । भेदकमाहुः **त्वदुपगते**त्यादि । **उपक्रमे**त्यादि द्वितीयस्कन्धे

भाष्यप्रकाशः।

वासुदेवस्य गणनाच्च। यत्पुनः, 'कृष्णस्तु भगवान् स्वयम्' इत्येतत्स्वयंपदस्य पुत्रवत् साक्षात् परमेश्वरांशः। ऋष्यादीनामंशांशित्ववचनादित्युक्तम्। तदप्यसंगतम्। भूभारहारकं कृष्णमंशेषूक्त्वा तदंशित्वेन पुमांसं चोक्त्वा ब्रह्माण्डात्मकपुंरूपताभ्रमवारणाय तुशब्दोक्तिपूर्वकं स्वयं भगवत्त्व-विधानस्याबोधात्। 'कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्' इति, 'वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः' इत्यादिवाक्यानामप्यविचाराच्च। गीतायां तु

'परं ब्रह्म परं धाम पवित्रं परमं भवान्।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे'॥

इति वाक्यमपि प्रायो नावलोकितं, येन 'मत्तः परतरम्' इतिवाक्यस्य वामदेवव-च्छास्त्रदृष्ट्या ज्ञानिमुख्यवाक्यत्वेन गतिश्चिन्तिता। नहि परब्रह्मत्ववक्तार ऋषयः सर्वे भ्रान्ता येनैवं भगवदुक्ते गौणीं वृत्तिं ब्रह्मदृष्टिं च नावगच्छन्ति। तथा व्यक्तपरत्वेन गतिरप्यसंगतैव। अव्यक्त-स्याक्षरत्वेन भगवद्धामतयैव सिद्ध्या भगवतस्ततोऽपि परत्वात्। नच व्यवहार्यत्वान्नेश्वरत्वमिति युक्तम्। तस्य सूत्रव्याख्यान एवोपपादितत्वात्। यदपि मोक्षधर्मवाक्येन नारायणाद्भिन्नत्वं

रश्मिः।

'प्राधान्यतो यानृष आमनन्ति लीलावतारान् पुरुषस्य भूम्नः।
आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान् सुपेशान्'॥ इत्युपक्रमः।

'सोयं तेभिहितस्तात भगवान् विश्वभावनः।
समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत्॥
इदं भागवतं नाम यन्मे भगवतोदितम्।
संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु'॥ इत्युपसंहारः।

अत्र पुरुषस्य भूम्न इत्यनेन भगवदवतारत्वमुपक्रमे। उपसंहारेपि भगवान् विश्वभावनः इत्यनेनै-तेषां भगवत्त्वं सिद्ध्यति। प्रथमस्कन्धे तु 'एतन्नानावताराणां निधानं बीजमव्ययम्' इत्यनेन वक्ष्यमाणानामवताराणां मत्स्यादिरूपाणां पुरुषावतारे स्थानत्वमुद्गमहेतुत्वं चोक्तमिति पुरुषावतारत्व-मुपक्रमे उपसंहारे च 'एते चांशकलाः पुंसः' इत्यनेन पुंसो विराजोवतारत्वं सिद्ध्यतीत्युभयेषां भेदः। तथा च लीलावतारा भूमपुरुषस्यान्ये पुरुषस्य। **गणनाच्चे**ति तथा चैक एव वासुदेवो नित्येश्वर इतरे तदंशा वासुदेवा इति भागः संमत इति भावः। **अंशेष्विति**।

'एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी।
रामकृष्णाविति भुवो भगवानहरद्भरम्'॥

इत्यनेन तेषूक्त्वा इत्यर्थः। **पुमांस**मिति 'एते चांशकला पुंसः कृष्णस्तु भगवान् स्वयम्' इत्यनेनेत्यर्थः। **गौणी**मिति आत्मीयवाचकत्वे स्वयमित्यत्र गौणीं, पुत्रपितृगुणयोगाद्गौणी। **सिद्ध्ये**ति

'अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिम्।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम'॥

भाष्यप्रकाशः ।

परमेश्वरस्योक्तं, तत्र तु नारायणपदं यौगिकमेव । धातृपदविशेषितत्वात् । न तु रूढम् । अतो यत्र नारायणपदेन परमेश्वर उच्यते तत्र रूढ्यैवोच्यते यथा महोपनिषदि । तत्र हि 'एको ह वै नारायण आसीन्न ब्रह्मा न ईशानो नापो नाग्नीषोमौ' इत्यादिना ब्रह्मादिसर्वनिषेधेऽपामपि निषेधात् । स एकाकी नर एवेत्यनेन पुरुषाकारस्योक्ततया निराकारत्वस्यापि वारणात् । तस्य ध्यानान्तस्थस्य यन्नस्तोममुच्यते, तस्मिन् पुरुषाश्चतुर्दशाऽजायन्तैका कन्येति प्रस्तुत्य, दशेन्द्रियाणि मन एकादशं तेजो द्वादशमहंकारस्त्रयोदशः प्राणाश्चतुर्दश आत्मा पञ्चदशी बुद्धिरिति तेषां स्वरूपकथने तेजःपदेन महत्तत्त्वस्य गणितत्वात् ।

'विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः ।
स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तमः' ॥

इति पुराणे तस्य तेजोरूपत्वावगमात् । अतो यत्किंचिदेकदेशमालम्ब्य सकलशास्त्रविप्लावनं

रश्मिः ।

इत्यत्र सिद्ध्येत्यर्थः । **तस्येति** ब्रह्मणो व्यवहार्यत्वस्येत्यर्थः । **यौगिकमेवेति** पूर्वमीमांसा-कारिकास्वाचार्यैर्वेदान्ते योगमात्राङ्गीकारादेवेति । **धातृपदेत्यादि** 'धाता नारायणो विभुः' इति । **नतु रूढमिति** । ननु रूढेः स्वमतेऽभावादप्राप्ताया निषेधः कुत इति चेन्न । स्वमते शक्तिसंकोचलक्षणायाः रूढेः प्रस्थानरत्नाकरेऽङ्गीकारात् । तथा च न परमेश्वरभिन्ने नारायणपदं शक्तिसंकोचयुक्तमिति । **रूढ्यैवेति** अपां सत्यज्ञानानन्तेक्षरे संकोचः । अक्षरं नारं जीवसमूहः अयनं यस्येति न तत्राधोक्षजेऽघटितयोगः संभवतीत्येवकारः । नारमयनं यस्येति योगाबाधं वदन्तो हेतुमाहुः **यथेति** । तेनाऽघटितविग्रहे रूढिरित्युक्तम् । ननु सर्वेषां शब्दानां परमेश्वरे योगोऽङ्गीकृतः प्रस्थानरत्नाकरे इति चेन्न भैक्षवबोधनपरत्वाद् ग्रन्थस्य । **अपामपीति** तथा च नारा अयनं यस्येति योगस्य तदानीम-भावान्नारायणपदं रूढमेवेत्यर्थः । तेन सर्वशक्तिमत्यधोक्षजे रूढिरपि युक्ता कदाचिदिति ध्वनितम् । **एकाकीति** 'एकाकी त्वेक एककः' 'एकादाकिनित्' । इदानीं तेन यन्महतो देवतात्रयात्मकत्वमुक्तं तन्निराकुर्वन्तः साकारत्वे प्रमाणान्तरमाहुः **तस्य ध्यानेत्यादि** । **तेषामिति** ते पुरुषाश्च सा कन्या चात्र विवक्षितास्तथा च ते च सा च ते तेषामित्यर्थः । **नस्तोममिति** नासिकासमूहः वायुस्थानम् । अग्रे वायवीसृष्टिमिति भावः । **तेजोरूपत्वेति** येन तमसा पूर्वं महत्तत्त्वं प्रस्वापितं लयं प्रापितमासी-त्तन्मूलभूतं तमो महत्तत्त्वेन पीयते इति तृतीयस्कन्धसुबोधिन्या इति शेषः । इमं न्यायं यदप्यप्पय-दीक्षितेन 'उमासहायं परमेश्वरं प्रभुं ऋतं सत्यं परं ब्रह्म' इति श्रुत्या ।

य एकः शाश्वतो देवो ब्रह्मवन्द्यः सदाशिवः ।
त्रिलोचनो गुणाधारो गुणातीतोक्षरोव्ययः ॥
जाता सिसृक्षा तस्यापि वीक्ष्यात्मस्थं गुणत्रयम् ।
वेदत्रयमिदं ज्ञेयं गुणत्रयमिदं हि यत् ॥
पृथक्कृत्यात्मनस्तद्धि तत्र सारं विभज्य च ।
दक्षिणेनासृजत्पुत्रं ब्रह्माणं वामतो हरिम् ॥
पृष्ठदेशे महेशानं त्रीन् पुत्रानसृजत्प्रभुः ।

एवं चिद्रूपस्य कारणतानिरूपणेन वेदान्तानां ब्रह्मपरत्वं निरूपितम् ॥ १० ॥

इति प्रथमाध्याये प्रथमपादे चतुर्थमीक्षत्यधिकरणम् ॥ ४ ॥

अतः परमानन्दरूपस्य कारणत्वोपपादनेन तद्वाक्यानां ब्रह्मपरत्वमुपपाद्यते, आनन्दमयाद्यष्टभिः सूत्रैः। तत्र तैत्तिरीयशाखायां ब्रह्मभृगुप्रपाठकद्वयेन ।

भाष्यप्रकाशः ।

न सतां मार्ग इति बोध्यम् । एवं शिवरूपेऽपि ज्ञेयम् ।

'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ।
तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्' ॥

इति श्रुतेरनन्तरूपः परमेश्वरः कदाचिच्छिवाकारेणैव सर्वं जगत् करोतीति । अतो विचारकाणां विष्णुशिवप्रकरणीयवाक्यलिखनमस्मदुक्ताभिप्रायेण, न तु त्वदुक्तेनेति गृहाण । एतावान् परं विशेषो यन्नृसिंहतापनीये, 'अनुपनीतशतमेकमेकेनोपनीतेन तत्समम्' इत्यादिना गृहस्थवानप्रस्थयतिरुद्रजापकाथर्वशिरःशिखाध्यायिपर्यन्तमुक्त्वा अथर्वशिरःशिखाध्यायिशतमेकमेकेन मन्त्रराजजापकेन तत्सममिति नृसिंहमन्त्रराजजापके उत्कर्षविश्रान्तिबोधनात् तद्विद्यावेद्यरूप एवोत्कर्षविश्रान्तिः । एतदपि प्रहस्ताख्यवादादेवावगन्तव्यमिति दिक् । अतः परं प्रकृतमनुसरामः ।

ईक्षत्यधिकरणप्रयोजनमाहुः **एवमित्यादि** । वेदान्तवाक्येष्वव्यवहार्यत्वादिना बोधितस्य **चिद्रूपस्य कारणता**समर्थनेन **सर्वेषां वेदान्तानां** कार्यद्वारा ब्रह्मस्वरूपनिरूपकत्वाद् **ब्रह्मपरत्वं** ब्रह्मणि तात्पर्येण समन्वितत्वं **निरूपितम्** । तथा चेदमधिकरणप्रयोजनमित्यर्थः ॥ १० ॥

इति चतुर्थमीक्षत्यधिकरणम् ॥ ४ ॥

नन्वीक्षत्यधिकरणे सर्वेषां वेदान्तानां ब्रह्मपरत्वं सिद्धमेवेत्यग्रिमाधिकरणस्य किं प्रयोजनमित्याकाङ्क्षायां तद्वदन्तस्तदवतारयन्ति **अतः परमित्यादि** । **तद्वाक्यानामिति** आनन्दप्रतिपादकवाक्यानाम् । तथाच लक्षणगताव्याप्त्यादिदोषपरिहारायेदमधिकरणम् । अत्रापि सामान्यविशेषभावगर्भोऽवसर एवाधिकरणसंगतिरित्यर्थः । तानि कानीत्याकाङ्क्षायां विषयवाक्यानां बाहुल्यादाकरमेव प्रदर्शयन्ति **तत्रेत्यादि** । आनन्दकार्यं प्रतिपाद्यत इति शेषः । तानि विषय-

रश्मिः ।

इति शिवराघवसंवादस्थस्मृतिभिश्च यस्तु क्वचित्क्वचिच्छ्रुतिपुराणादौ विष्णोरुत्कर्षः प्रतिपादितः स तु प्रतर्दनाख्यायिकायामिन्द्रस्येव तदन्तर्यामिण्येव परशिवे पर्यवस्यतीति शिव एव परं ब्रह्मेत्युक्तं तत्रापि प्रसङ्गादतिदिशन्ति **एवं शिवेत्यादि** । **अस्मदुक्ते**ति अव्यवहितपूर्वोक्ताभिप्रायेण । **अवगन्तव्य**मिति एतच्च 'समान एवं चाभेदात्' इति सूत्रे वक्तव्यं साधनाध्याये । **तथा चेद**मिति चेतनेऽव्याप्तिवारणम् ॥ १० ॥ **इति चतुर्थमीक्षत्यधिकरणम्** ॥ ४ ॥

तद्वदन्त इति प्रयोजनं वदन्तोधिकरणमवतारयन्तीत्यर्थः । **लक्षणे**ति आदिशब्देनानन्दप्रतिपादकवेदान्तासमन्वयादध्यायार्थे न्यूनताख्यनिग्रहस्थानं गृह्यते । **सामान्येत्यादि** सामान्यतश्चिन्निरूपकाणां पूर्वाधिकरणे निरूपणादानन्दप्रसङ्गेन विशेषतश्चिन्निरूपणस्य वक्ष्यमाणत्वात्सामान्यविशेषभावगर्भोवसरः । आनन्दनिरूपणे प्रतिबन्धकीभूता जिज्ञासा किमत्र चिन्निरूप्येति जिज्ञासा तस्याश्च लक्षणवाक्ये प्रथमनिर्देशेनानन्दापेक्षया प्राथमिकजिज्ञासाविषयत्वात् चिद्रूपतानिरूपणाद्विषयसिद्ध्या निवृत्तौ सत्यामानन्दतावश्यं वक्तव्येति जिज्ञासया किमिदानीं वक्तव्यमिति जिज्ञासया वानन्दरूपतानिरूपणादित्यर्थः । तानि कानीति स्वोक्तं व्याकुर्वन्ति स्म **तानीति** ।

तत्रानन्दमय इति मयट्प्रत्ययान्तस्याब्रह्मत्वेनाजगत्कर्तृत्वे ब्रह्मप्रपाठकस्याब्रह्मपरत्वं स्यादिति तन्निराकरणार्थमानन्दमयाधिकरणम् । षडिन्द्रियस्वरूपद्वयानन्दभेदेनानन्दस्याष्टविधत्वादष्टसूत्राणि ।

ननु कथं संदेहः, कथं वास्याब्रह्मत्वे प्रपाठकासंगतिरिति । उच्यते । ब्रह्मविदः परप्राप्तिं प्रतिज्ञाय ज्ञेयांशे कारणत्वायानन्दांशमप्रवेश्य जडत्वपरिहाराय सर्वज्ञानन्दरूपं फलमुपपाद्य तन्निरूपणार्थं सर्वोऽपि प्रपाठक आरब्धः। तत्र साधनशेषब्रह्मणो वाक्यादेव निःसंदिग्धप्रतीतेः फलस्य ब्रह्मत्वं प्रतिपादनीयम् ।

भाष्यप्रकाशः ।

वाक्यानीत्यर्थः । नन्वेतद्वये ब्रह्मणः कार्यमुच्यते । सत्यज्ञानानन्तलक्षणकं ब्रह्म प्रस्तुत्य 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यादिना कार्यकथनात् । तथाग्रिमेऽपि, 'यतो वा इमानि' इति ब्रह्म लक्षयित्वा, 'आनन्दाद्ध्येव खल्विमानि भूतानि'इत्यादिना ब्रह्मण एव निष्कर्षाच्चानन्दकार्ये संदेह एव न भविष्यतीति व्यर्थोऽधिकरणारम्भ इत्यत आहुः तत्रानन्दमय इत्यादि । तत्रेति ब्रह्मप्रपाठके । मयट्प्रत्ययान्तस्येति मयट्प्रत्ययान्तप्रतिपाद्यस्य । तथाचानन्दरूपेणात्र जगत्कर्तृत्वस्य प्रतिपिपादयिषितत्वान्मध्ये च संदिग्धशब्दनिवेशात् तन्निवृत्त्यर्थमयमारम्भ इत्यर्थः । नन्वानन्दरूपेणैवात्र कारणताप्रतिपिपादयिषितेत्यत्र किं गमकमित्याकाङ्क्षायामधिकरणसूत्रसंख्यैव गमिकेत्याशयेनाहुः षडित्यादि । षडिन्द्रियात्मपरमात्मभिर्हि लोके कार्यं क्रियते । ब्रह्मणि त्विन्द्रियाद्यभावादानन्देनैव कार्यं क्रियत इति तत्तदात्मक आनन्द एवेत्यानन्दस्यैवाष्टविधत्वात् तावन्ति सूत्राणीति सैव तथेत्यर्थः । एवमधिकरणारम्भे साधिते आनन्दमयस्याब्रह्मत्वेनापि प्रपाठकस्य ब्रह्मपरत्वं मन्वान एकदेशी चोदयति ननु कथमित्यादि । एवं प्रश्ने संदेहादिकं व्युत्पादयति । उच्यते । ब्रह्मविद इत्यादि । 'ब्रह्मविदाप्नोति परम्' इति वाक्ये ब्रह्मविदः परप्राप्तिं प्रतिज्ञायैतद्वाक्यविवरणभूतायामृचि आनन्दांशस्य कारणत्वबोधनाय 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद' इति लक्षणवाक्योक्तज्ञेयांशस्य साधनशेषत्वेन तदपेक्षया फलस्योत्कृष्टत्वात् फलभूतमानन्दांशं तत्राप्रवेश्य कारणस्य प्रकृत्यादेर्लोके जडत्वदर्शनात् तद्विलक्षणत्वमानन्दांशे

रश्मिः ।

आकरमिति वाक्यनिकुरम्बोत्पत्तिस्थानमित्यर्थः । **अग्रिम** इति भृगुप्रपाठक इत्यर्थः । मयट्प्रत्ययान्तत्वं शब्दस्य संभवति । तत्राब्रह्मत्वेनेत्यादिरापत्तिर्न संभवतीति लक्षणयार्थपरत्वेन व्याकुर्वन्ति **मयडित्यादि** । भाष्ये तु शब्दार्थात्यन्ताप्रविवेकपक्षः । तथाप्रतिज्ञानादिति भावः । तदपि जैमिनिसूत्रप्रामाण्यात् । **संदिग्धशब्देति** मयडादिशब्दानां निवेशात् । आत्मोपनिषदाहुः **षडिन्द्रियेति** । षडिन्द्रियाण्यन्तरात्मा, आत्मा बाह्यात्मा, परमात्मा चेति त्रयं तैरित्यर्थः । **इन्द्रियाद्यभावादिति** 'न तस्य कार्यं करणं च विद्यते' इति श्रुतेरित्यर्थः । **सैवेति** अष्टसंख्यैव । **ननु कथमित्यादीति** मयडादौ संदेहः । **ऋचीति** 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति ऋचीत्यर्थः । अनन्तपदप्रवेशस्य तात्पर्यमाहुः **आनन्दांशस्येत्यादि** । कारणत्वं जगतः । **भाष्ये** । अकारणत्वायेति छेदे तु अकारणत्वायेत्यस्य फलसाधनत्वाभावाय किं तु फलत्वायेत्यर्थः । **साधनेत्यादि** वेदेत्युक्तस्नेह-

तत्राब्रह्मान्नमयादितुल्यवचनात् सुखवाचकशब्दानामेव वचनाच्च संदेहः। आनन्दांशस्यैव कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात् तदभावे प्रपाठकवैयर्थ्यं च।

फलस्य नैकव्यप्रतिपादनायात्मपदप्रयोगेण फलरूपेण जगत्कारणतामुक्त्वा

भाष्यप्रकाशः।

बोधयितुं तस्य जडत्वपरिहाराय विपश्चिद्ब्रह्मपदाभ्यां सर्वज्ञानन्दरूपं फलमृगुत्तरार्धे, सोऽश्नुते सर्वान् कामान् सहेत्यनेनोपपाद्य तस्य सर्वज्ञानन्दरूपस्य फलस्य निरूपणार्थं सर्वोऽपि प्रपाठक आरब्धः। तत्रर्चि साधनशेषस्य ज्ञेयब्रह्मणो लक्षणवाक्यादेव निःसंदिग्धं स्वरूपावगमात् फलस्य ब्रह्मत्वं प्रतिपादनीयम्। प्रतिज्ञावाक्ये परपदात् तस्य च ऋगुत्तरार्धेन विवरणे भिन्नविभक्तेर्भिन्नपद-वचनयोश्च कथनेन परपदार्थानिश्चयाद् ऋग्व्याख्यानरूपे प्रपाठकेऽवश्यं कारणत्वादिना ब्रह्मत्व-मुपपादनीयमित्यर्थः। एवं प्रपाठकार्थमुक्त्वा संदेहबीजमाहुः तत्राऽब्रह्मेत्यादि। **अब्रह्मान्नम-यादीति** अब्रह्मरूपं यदन्नमयादीत्यर्थः। एवं संदेहमुपपाद्य प्रपाठकासंगतिमुपपादयन्ति **आनन्दांशस्यैवेत्यादि**। सदेव सोम्येति, 'स ऐक्षत लोकान्नु सृजै' इत्यादिश्रुत्यन्तरे सच्चिदंशयोः कारणत्वस्य प्रतिपादितत्वेन तत्सहचरितस्यानन्दांशस्यापि तथात्वेन तस्यान्यत्र कारणत्वाकथनात् तदभावे कार्यानुसारिलक्षणस्याव्यापकत्वप्रसक्तेरत्र तस्यैव कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात् तदभावे तद्वैयर्थ्यमित्येवमसंगतिरित्यर्थः।

ननु कारणतावाक्ये 'तस्माद्वा एतस्मादात्मनः' इत्यात्मपदादात्मा वा इदमेक एवेत्यादावि-वात्रापि चिदंशकारणताप्रतिपादनस्य संभवदुक्तिकत्वात् कथमत्रानन्दांशकारणताप्रतिपादनविनि-गमनेत्याकाङ्क्षायामात्मपदोक्तितात्पर्यं वदन्तस्तद्विनिगमकयुक्तिमाहुः **फलस्येत्यादि**। यथा मलय-

रश्मिः।

व्यापारकज्ञानरूपसाधनविषयत्वेनेत्यर्थः। **फलस्येति** परस्येत्यर्थः। **भिन्नेत्यादि** 'सत्यं ज्ञान-मनन्तं ब्रह्म यो वेद निहितं गुहायाम्' स इत्यनेन प्रतिज्ञावाक्यगतं ब्रह्मविदितिपदं विवृतम्। आप्नोति परमित्यस्य अश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति व्याख्यानं, तत्र परमित्यत्र द्वितीया विभक्तिः। परपदमेकवचनं च। विवरणे तु सर्वान् कामान् इति सर्वपदं कामपदं च बहुवचनं च। ब्रह्मणा विपश्चितेत्यत्र तृतीयाविभक्तिर्ब्रह्मपदं विपश्चित्पदं चेति विभक्तेः पदवचनयोश्च भिन्नत्वम्। **भाष्ये**। **तुल्यवचना**दिति अवयवित्वेन तथात्वादित्यर्थः। तर्ह्यब्रह्मत्वम-संदिग्धं स्यात् तन्निवृत्तय आहुः **सुखेत्यादि**। 'तस्य प्रियमेव शिरः' इत्यादिना तथात्वादित्यर्थः। **प्रकृते**। **संदेहबीज**मिति अन्नमयादितुल्यवचनं विभूतित्वगमकं सुखवाचकशब्दवचनं ब्रह्म-त्वगमकमत्रत्यबीजत्वेन बीजग्रहणाद् बीजद्वयमित्यर्थः। **अन्यत्रेति** भृगुप्रपाठकादन्यत्र। **तदभाव** इति कारणत्वाभाव इत्यर्थः। **कार्यानुसारीति** निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वरूपलक्षण-स्येत्यर्थः। कार्यं जगत् तदनुसारि यत्स्वरूपं तस्य लक्षणमिति। सगुणनिर्गुणाभेदं वक्तुं कार्य-लक्षणमित्यनुक्त्वा कार्यानुसारिलक्षणस्येत्युक्तम्। यथान्येषां सास्नादिमत्त्वं गोलक्षणमस्मन्मते सास्नावत्त्वम्। **अव्यापकत्वेत्यादि** हेतौ पञ्चमी तथा चास्माद्धेतोः अत्राधिकरणे तस्यैवानन्दस्ये-त्यर्थः। **ब्रह्मत्वेत्यादि** प्रपाठकस्येति शेषः। **तद्वैयर्थ्यमिति** प्रपाठकवैयर्थ्यमित्यर्थः। **असंगति-**

तस्यैव मध्ये सर्वान्तरत्वं प्रतिपादितं 'तस्माद् वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमयः' इति। अन्ते च, 'एतमानन्दमयमात्मानमुपसंक्रामति' इति आदिमध्यरूपे अनूद्य फलत्वेनोपपादितम् । तन्निरूपकस्यापि तत्तुल्यफलत्वं वक्तुमन्नमयादीनामपि ब्रह्मत्वेनोपासनमुक्तम् ।

तत्र पूर्वपक्षेऽन्नमयादेरिवानन्दमयस्यापि न ब्रह्मत्वम् । अन्नमयादितुल्यवचनात् तथैव फलसिद्धेरिति । एवं प्राप्तेऽभिधीयते ।

आनन्दमयोभ्यासात् ॥ ११ ॥ (१।१।५)

आनन्दमयः परमात्मा, नान्नमयादिवत् पदार्थान्तरम् । कुतः । अभ्यासात् ।

भाष्यप्रकाशः ।

जस्याभीष्टत्वेऽपि दूरत्वात् तदर्थं न पुरुषप्रवृत्तिस्तथात्र मा भूदिति तदर्थं फलस्य नैकट्यप्रतिपादनायात्मपदप्रयोगेण तदेतत्पदाभ्यां सन्निहितपरामर्शात् फलरूपेण जगत्कारणतामुक्त्वा तस्यैवानन्दस्य मध्ये सर्वान्तरत्वमन्ते फलत्वं चानन्दमयपदाभ्यामुक्तम् । तेनादिमध्यावसानेषु कारणत्वसर्वान्तरत्वफलत्वानि तत्रैव साधितानि । तथान्नमयादीनां ब्रह्मत्वेनोपासनकथनात् तदान्तरत्वनिरूपकाणां यदा तत्तुल्यं फलत्वं, तदाऽऽनन्दमयस्य सर्वान्तरस्य फलत्वं किं वाच्यमित्याशयेन फलत्वमेव दृढीकृतम् । तथाच यदि केवलमात्मपदमेव कारणताप्रतिपादकवाक्ये स्यात् तदा त्वदुक्तं स्यादपि । न त्विह तथा किंतु तदेतत्पदसमभिव्याहृतम् । तथा सत्यात्मपदं नैकट्यमेव बोधयति, नतु तेन रूपेण कारणताम् । सा च प्रतिपिपादयिषिते पर्यवस्यतीति संपूर्णवाक्यविचारादवसीयते । अतः पूर्वोक्ताः फलत्वादय एतद्विनिगमकयुक्तिरूपा इत्यर्थः । एवं विनिगमकबोधनेन परोक्तं प्रतिक्षिप्य प्रकृते पूर्वपक्षमाहुस्तत्रेत्यादि । तथैवेति ब्रह्मत्वेनोपासनेनैव । सूत्रं व्याकुर्वते अभिधीयत इत्यादि ।

आनन्दमयोभ्यासात् ॥ ११ ॥ ननु हेतुना साध्यसिद्धिर्व्याप्तिनिश्चये सति भवति । प्रकृते

रश्मिः ।

रिति स्वरूपलक्षणप्रतिपादकानन्दकर्तृत्वप्रतिपादकप्रपाठकयोरसंगतिरित्यर्थः । तदर्थमिति प्रवृत्त्यर्थमित्यर्थः । तदेतदिति 'तस्माद्वा एतस्मादात्मनः' इतिश्रुतौ । फलरूपेणेति ब्रह्मविदाप्नोति परमिति सन्निहितश्रुत्युक्तेनेत्यर्थः । तस्येति विपश्चिद्ब्रह्मणः । इदं फलमत आहुरानन्दस्येति । आनन्दमयपदाभ्यामिति 'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमयः' 'एतमानन्दमयमात्मानमुपसंक्रामति' इति श्रुतिद्वयघटकाभ्यामित्यर्थः । तन्निरूपकस्यापीत्यादिभाष्यं कैमुतिकन्यायेन व्याकुर्वन्ति तथान्नमयेत्यादि । एतद्विनिगमकेत्यादि । 'तस्माद्वा एतस्मादात्मनः' इति श्रुतावात्मपदेनानन्दांशकारणताप्रतिपादनविनिगमकेत्यर्थः । नन्वानन्दस्य कारणत्वेप्यक्षरानन्दस्य वक्तव्यम् । धर्मिणो भक्तैः सह निगूढभावकरणस्य दशमसुबोधिन्यामुक्तेस्तद्रूपानन्दस्य जगत्कारणताभावादिति चेन्न । अदृश्यत्वाधिकरणोक्ताक्षराभेदमादायोपपत्तिसंभवात् । पुरुषविधब्राह्मणस्यात्र वक्तव्यत्वात्तत्र पत्न्यंशसत्ताया अभावात् । अत एषापि सदानन्दस्य जगज्जन्मादिकर्त्री शक्तिरित्युक्तं द्वितीयस्कन्धनवमाध्याये । उपासनेति प्रायपाठादेवकारः ।

आनन्दमयोभ्यासात् ॥ ११ ॥ भाष्ये । अभ्यस्यत इत्यादि । एतेन विधेरविशेषेण पुनः श्रवणमभ्यासः इति शास्त्रदीपिकोक्तलक्षणं विधिपदरहितं युक्तं 'एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं

अभ्यस्यते पुनः पुनः कीर्त्यत इत्यभ्यासस्तस्मात्। अभ्यासस्य भेदकत्वं पूर्वतन्त्रसिद्धम्।

यथा पूर्वतन्त्रे शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयानां षण्णां

भाष्यप्रकाशः।

चाभ्यासत्वेन परमात्मबोधकत्वेन व्याप्त्यभावादसिद्धोऽयं हेतुरित्यत आहुः **अभ्यासस्येत्यादि।** पूर्वतन्त्रे हि,'समिधो यजति,' 'तनूनपातं यजति,' 'इडो यजति,' 'बर्हिर्यजति,' 'स्वाहाकारं यजति' इति पञ्चकृत्वो यजत्यावृत्तौ मीमांसितं, किमत्र तनूनपादादिषु चतुर्षु पूर्वयागानुवाद उत यागान्तरविधानमिति। तत्र पूर्वपक्षिणा धात्वर्थप्रत्यभिज्ञानादिडादिगुणविधानार्थं समिद्यागानुवादेऽङ्गीकृते सिद्धान्तितम्। भेदाभेदसाधारण्या यजिश्रुत्या यागमात्रप्रत्यभिज्ञानेन श्रुतेर्यागान्तरपक्षे तुल्यत्वाद् गुणविधानपक्षेऽपि चतुर्थीतद्धितयोरभावेन देवतायास्तृतीयाया अभावेन द्रव्यस्य च वक्तुमशक्यत्वाद् द्वितीयया चाग्निहोत्रं जुहोतीत्यादिवत् तेषां कर्मनामत्वनिश्चयात् पदान्तरसमभिव्याहृतेन यजतिना यागान्तरमेव बोध्यत इति। तथाच यत्र यत्र वाक्ये पदान्तरसमभिव्याहृतस्य यस्य पदस्याभ्यासस्तत्र तत्र तस्य पदस्य पूर्वस्मादर्थान्तरगमकत्वमिति व्याप्तेः पूर्वस्मादर्थान्तरत्वेन परमात्मसाधनान्नासिद्धो हेतुरित्यर्थः। नन्वभ्यासस्य भेदकत्वमात्रं सिद्धम्। तस्य फलमितरभेदः सोऽत्र शब्दान्तरादेव सिद्धो वाक्यान्तरसिद्धमसन्निहितमभ्यासं स्वलाभाय नापेक्षते। तथा सति कथं तेन परमात्मावगतिरित्यत आहुः **यथेत्यादि।** तथाच शब्दान्तरेण सिद्धेऽपि भेदे वैलक्षण्यमभ्यासः साधयति। सिद्धाच्च वैलक्षण्यादन्नमयादिभ्य आनन्दमयस्यातुल्यत्वं सिद्ध्यति। तेन ब्रह्मात्मावरश्मिः।

हि स्यात्' इति सूत्रे विधिपदाश्रवणात्। अत एव विधिभिन्नस्याप्यविशेषेण पुनः श्रवणेऽभ्यासत्वव्यवहार इति बोधितम्। **प्रकृते। परमात्मेत्यादि।** इदं चाधिकारसूत्राद् ब्रह्मेत्यनुवृत्तौ लभ्यते। तेन पक्षहेतुनिर्देशोपि सूत्रे न दोषाय। **पूर्वतन्त्र** इति द्वितीयस्य द्वितीयपादे 'एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात्' इत्यधिकरण इत्यर्थः। **पूर्वयागे**ति समिद्यागानुवाद इत्यर्थः। **धात्वर्थेत्यादि।** करणीभूतधात्वर्थभेदेपि शब्दैकत्वेनार्थैकत्वस्य दृढतरप्रत्यभिज्ञानादित्यर्थः। प्रत्यभिज्ञानं च तत्तेदन्ताप्रकारकं ज्ञानं स एवायं यजतिरित्याकारकम्। **इडादीत्यादि।** अत्र तनूनपादादीत्यनूदितव्ये इडादीत्यनुवादः शास्त्रदीपिकादौ तनूनपादादीति पदमसंगतमिति ध्वनयति। **तथाहि।** तनूनपादादीत्यत्रातद्गुणसंविज्ञानो बहुव्रीहिः संभवति। अन्यपदार्थस्य संयोगसमवायातिरिक्तसंबन्धेन संबन्धित्वात्। पञ्चानामपि यागानां भिन्नत्वात्। लक्ष्यतावच्छेदकस्य विशेष्यान्वय्यन्वयित्वाभावात्। नैयायिकलक्षणस्याप्यसमन्वयात्। तथा च चतुर्णां यागानां संग्रहायेडादीत्येव वक्तव्यम्। आदि चेड् चेडादी 'अल्पाच्तरं पूर्वम्' इतीडः पूर्वनिपातः। इड् आदिर्ययोरित्यतद्गुणसंविज्ञानो बहुव्रीहिः। इडादी च इडादी चेडादय इत्येकशेषः। तथा चेडादीनां तनूनपादिड्बर्हिःस्वाहाकाराणां देवतारूपाणां द्रव्यरूपाणां वा गुणानां विधानार्थमित्यर्थः। **चतुर्थीत्यादि** अग्नये जुष्टं निर्वपामि, आग्नेयोष्टाकपालः, इतिवत्। **तृतीयाया** इति दध्ना जुहोतीतिवत्। **इतरभेद** इति यथा पृथिव्या भेदकस्य गन्धवत्त्वस्य जलादिभेदसाधकत्वाजलादिभेदः फलं तद्वदित्यर्थः। **शब्दान्तरादिति** द्वितीयस्य द्वितीयपादे 'शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्' इत्यधिकरणे सोमेन यजेत हिरण्यमात्रेयाय ददाति दाक्षिणानि जुहोति इत्यत्र यजत्यादीनां शब्दान्तरत्वात् कर्मभेदकत्वमिति चिन्तितम्। तद्वदत्राप्यन्नमयादिशब्दान्तरादेवेतरभेदः सिद्धः किमभ्यासेनेत्यर्थः। तथा चानन्दमयः शब्दान्तरादिति

कर्मभेदकत्वमेवमेवानन्दमयस्याप्यभ्यासात् पूर्ववैलक्षण्यम् । अतोऽतुल्यत्वाद् ब्रह्मत्वम् । एवमभ्यासः श्रूयते 'को ह्येवान्यात् कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्' । 'एष ह्येवानन्दयाति' इत्यर्थतोऽभ्यासः ।

भाष्यप्रकाशः ।

गतिरित्यर्थः । नन्वभ्यासस्यान्नमयादिवाक्येष्वपि दर्शनादत्रैव कथं वैलक्षण्यसाधकत्वमित्यत आहुः **एवमभ्यास** इत्यादि । अयमर्थः । पूर्वानुवाकेष्वन्नादीनां प्रशंसामुक्त्वापि, को ह्येवान्यादिति वाक्ये किंशब्दद्वयेन पूर्वोक्तं सर्वं परामृश्यते । तेन तदननादिकं प्रति व्यतिरेकमुखेनानन्दस्यैव हेतुता श्राव्यते । तेनान्नादीनामपि यत्स्वकार्ये सामर्थ्यं तस्यानन्दसापेक्षता बोध्यत इति सर्वोपजीव्यत्वेन स्तुत्या सर्वत्राऽऽनन्दोऽर्थतोऽभ्यस्यत इति स्तावकत्वेन वैलक्षण्यसाधकत्वमित्यर्थः । ननु स्तावकाभ्यासस्य पूर्वेष्वपि सत्त्वाद् वैलक्षण्यस्य तेष्वपि सिद्धेर्वैलक्षण्यं नानन्दमयस्य परमात्मत्वनिर्णायकम् । लिङ्गेन सिद्ध्यतस्तस्य मयट्श्रुत्यपेक्षया दुर्बलत्वात् । अर्थान्तरत्वेऽपि प्रायपाठेन तुल्यत्वनिश्चयात् । किं चायं विकारे मयट् । 'द्व्यचश्छन्दसि' इति नियमस्य, मृण्मयं गृहं राजन्नहं गममित्यादिमन्त्रेषु व्यभिचारात् । तेन विकारार्थे द्व्यचो भवत्येव । अन्यस्मात्तु विकारार्थे भवति, न भवति चेति व्यवस्थितविकल्पाश्रयणेन त्र्यचोऽप्यानन्दशब्दात् तस्य विकारार्थे

रश्मिः ।

सुवचमिति शङ्कितुराशयः । **इत्यर्थ** इति तथा च प्रकृतोपयोगिहेतुत्वस्याभ्यास एव सत्त्वान्न तत्सुवचमिति भावः । तथा चेदं प्रथमस्य शब्दान्तरस्य त्यागे मानमिति भावः । नन्वेवमप्यभ्यासस्य पूर्वतन्त्रे भेदकत्वमात्रं सिद्धमिति कथमत्र वैलक्षण्यसाधकत्वमस्येत्याशङ्कते **नन्वभ्यासस्येति** । **एवमभ्यास इत्यादीति** । **एवं** पूर्वोक्तेभ्यो विलक्षण इत्यर्थः । नन्वभ्यासस्वरूपं पूर्वतन्त्रसिद्धमेवेत्येवमभ्यासः श्रूयते इति भाष्यस्य किं प्रयोजनमित्याशङ्कायां प्रयोजनं वदन्तः पूर्वतन्त्राद्विलक्षणोयमभ्यास इत्याहुः **अयमर्थ** इति । अस्य भाष्यस्येदं प्रयोजनमित्यर्थः । **परामृश्यत** इति सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शकत्वादिति भावः । प्रसिद्धवाचका इति सुबोधिन्यां तत्र तत्र तच्छब्दस्य यच्छब्दस्य व्याख्यानात् । अभ्यासे चाप्राधान्यबोधकतृतीयाभावात् सर्वमित्युक्तम् । **श्राव्यत** इति आनन्दत्वाभावात्कः पूर्वोक्तोन्नमयादिरन्यात्प्राण्याच्च यत एष आकाश आनन्दोतोयमेव अनिति प्राणिति चेत्येवं श्राव्यत इत्यर्थः । **बोध्यत** इति सूच्यते व्यङ्ग्यतया बोध्यत इत्यर्थात् । अत्र सुबन्तस्यानन्दपदस्यैकवारं कीर्तनादानन्दमयपदाभावाच्चाहुः **अर्थतोभ्यस्यत** इति । **स्तावकत्वेनेति** पूर्वतन्त्रोक्तस्य तस्यास्तावकत्वेनास्य स्तावकत्वेनेत्यर्थः । एतेन पूर्वतन्त्रेभ्यासस्य भेदकत्वमात्रं सिद्धं कथमत्र वैलक्षण्यसाधकत्वमस्येति शङ्कापि परास्ता । **पूर्वेष्विति** अन्नमयादिष्वित्यर्थः । अन्नं न निन्द्यात्तद्व्रतं प्राणो वा अन्नमित्यादिभिरिति शेषः । **लिङ्गेनेत्यादि** स्तावकाभ्याससामर्थ्येन । **सिद्ध्यतः** परमात्मत्वनिर्णायकवैलक्षण्यस्य अपरमात्मत्वनिर्णायकविकारमयट्श्रुत्यपेक्षयेत्यर्थः । यथैन्द्र्या गार्हपत्यमुपतिष्ठते इति श्रुतौ यावल्लिङ्गादैन्द्र्या इन्द्रोपस्थानार्थत्वं कल्प्यते तावत्प्रत्यक्षया गार्हपत्यमिति श्रुत्या गार्हपत्योपस्थानार्थत्वं क्रियते इत्यैन्द्री गार्हपत्योपस्थानाङ्गं तद्वत् । नन्वानन्दशब्दकृतं वैलक्षण्यं परमात्मत्वं साधयिष्यतीत्याकाङ्क्षायामाहुः **अर्थान्तरत्व** इति । प्राचुर्यविकारान्यतरत्वे विकारप्रायपाठेनान्नमयादितुल्यत्वनिश्चयात् । अभ्यासात्पूर्वहेतोर्भेदसाधकस्य शब्दान्तरस्यार्थान्तरत्वोक्तिरत्र । **तेनेति** व्यभिचारदर्शनेनेत्यर्थः । **व्यवस्थितेत्यादि** । सर्वे विधयश्छन्दसि विकल्पन्त इति न्यायादिति भावः ।

स्तुत्या मयडर्थत्वप्रकृतिस्तु तुल्या। पुनर्वचनेनाभ्यासेन प्रवाहाद् भेदे साधिते

भाष्यप्रकाशः।

सुवचत्वात्। तथा सति न तेन वैलक्षण्यसिद्धिर्वैलक्षण्यसिद्धावपि न तेन परमात्मत्वसिद्धिरित्यत आहुः **मयडर्थेत्यादि**। मयट् प्रत्ययः। अर्थत्वमर्थान्तरत्वम्। ताभ्यां सहिता प्रकृतिर्मयडर्थत्व-प्रकृतिः शब्दान्तररूपा। सा तुल्या व्यवस्थितविकल्पाश्रयणेऽपि पदार्थान्तरपक्षे परमात्मपक्षे च साधारणा। यद्वा स्तुत्या तुल्या यादृशी स्तुतिस्तादृशमर्थान्तरं बोधयति। अतो न तयाऽवान्तरप्रायपाठेन वा विकारार्थाग्रहो युज्यते। तदपेक्षयाऽसाधारणस्य लैङ्गिकाभ्यासस्यैव ज्यायस्त्वादित्यर्थः। तेन सिद्धमाहुः **पुनरित्यादि**। किमः पुनर्वचनेन बोधितो य आर्थिकोऽभ्या-सस्तेन मयडर्थान्तरयोः प्रवाहाद् भेदे आनन्दमयस्य साधिते तस्य ब्रह्मत्वं सिद्धमित्यर्थः।

रश्मिः।

ननूक्तं पूर्वस्माद्विलक्षणोत्राभ्यास इति तत्राहुः **वैलक्षण्यसिद्धावपीति**। **तेनेति** सिद्धेन वैलक्ष-ण्येन दुर्बलेन लिङ्गेन वेत्यर्थः। **अर्थान्तरत्वमिति** प्राचुर्यविकारान्यतरत्वम्। **शब्दान्तररूपेति** उभयोरेकतरानन्दमयशब्दान्तररूपा। **साधारणेति** स्तुत्येत्यत्रान्वेति। तथा च प्रायपाठेपि स्तुत्या तेन साधारणेत्यर्थः। तथा चानन्दमयशब्दमहिम्नैव परमात्मत्वसिद्धिरित्याशयः। मुख्ये प्राचुर्यार्थे संभवति गौणविकारार्थानौचित्यात्। इदानीं प्रायपाठविरोधं परिहरन्तः **स्तुत्येति** पदमत्र योजयन्तो-र्ह्यर्थिकप्रत्ययान्त तुल् उन्मान इति धातुनिष्पन्नस्य तुल्येत्यस्योन्मातुं योग्येति यौगिकार्थं हृदिकृत्य पक्षान्तरमाहुः **यद्वेति**। **अत** इत्यादि सर्वोत्कृष्टस्तुत्यानन्दमयस्यान्नमयादिभ्य उत्कर्षात् न तया स्तुत्येत्यर्थः। **लैङ्गिकेति** आर्थिकाभ्यासस्येत्यर्थः। केचित्तु मयटोर्थो वाच्यं प्राचुर्यं पूर्वापेक्ष-याप्याधिक्यं यत्र प्राचुर्यविशिष्टानन्दे स मयडर्थः तस्य भावो मयडर्थत्वं, प्राचुर्यं विशेषणीभूतं तस्य या प्रकृतिरानन्दशब्दात्मिका सा त्वानन्दमयशब्दनिष्ठा स्तुत्या कृत्वा प्रदर्श्यमानवाक्यनिष्ठानन्द-शब्देनैकार्थवाचकत्वेन तुल्या। प्रदर्श्यमानवाक्ये स्तुतिर्वाक्यार्थः। आनन्दमयशब्दे तु प्रत्ययार्थ इति तुल्यत्वमिति व्याचक्षते। (अस्मिन् पक्षे स्तुत्या इति षष्ठ्यन्तम्। निरूपितत्वं षष्ठ्यर्थः।) अन्ये तु को ह्येवान्यादिति श्रुतौ आनन्दस्याभ्यासः न त्वानन्दमयस्येत्यभ्यासाभावादानन्दमयो न ब्रह्मेत्याशङ्कायामाहुः **अर्थतोभ्यास** इति। शब्दत आनन्दस्याभ्यासेप्यर्थतः आनन्दमयस्यैवाभ्यास इत्यर्थः। अर्थतः कथमभ्यास इत्याशङ्कायामाहुः **स्तुत्या मयडर्थत्वमिति**। एवं सानुस्वारपाठोङ्गीकृतः। स्तुत्या 'को ह्येवान्यात्' इत्यादिरूपया। मयडर्थत्वं मयटोर्थः प्राचुर्यं यस्मिन् स मयडर्थ इति व्यधिकरणपदबहुव्रीहिणा मयडर्थ इत्यस्यानन्दमय इत्यर्थः। तथा च को ह्येवान्यात् इत्यादि-स्तुत्यानन्दस्य मयडर्थत्वमानन्दमयत्वमित्यर्थः। स्तुतौ प्राचुर्यस्य प्रयोजकत्वात्। प्रभवो धनादिमन्त एव स्तूयमाना दृश्यन्ते इति। अतोत्र स्तुत्या प्राचुर्यं ज्ञाप्यते। एवं सति 'को ह्येवान्यात्' इत्यत्र स्तूयमान आनन्द एवेत्यानन्दप्रचुरस्यानन्दमयस्यैवाभ्यास इति भावः। **प्रकृतिस्तु तुल्येति** आनन्दशब्दरूपेत्यर्थः। आनन्दमयपदे मयटा प्राचुर्यं बोध्यते को ह्येवान्यादित्यादौ आनन्दस्तुत्या प्राचुर्यं बोध्यते। आनन्दशब्दस्त्वानन्दशब्दे आनन्दमयशब्दे च तुल्य इति भाव इत्याहुः तदेतद्भाष्ये प्राचुर्येण प्रस्तुतेर्थेनुशासिते मयट्येकदेशं प्राचुर्यमादाय वक्ष्यमाणसूत्रानुसारेण व्याख्यातव्यम्। मयड-र्थत्वेत्यादेर्भाष्यस्यानुमानपक्षेर्थः। नन्वानन्दमयः परमात्मा अभ्यासात् इडादियागान्तरवत्। एवं सूत्रे पक्षहेतुनिर्देशापत्त्या वह्निमान् धूमादितिवत् साध्यहेतुनिर्देशस्य प्रसिद्धस्य त्यागोतः परमात्मानन्द-

ब्रह्मत्वम्। न तु द्वयापत्तिः। उत्तरस्य साधकत्वात्। तस्माद् आनन्दमयं ब्रह्मैव।

भाष्यप्रकाशः।

नन्वानन्दमयस्य ब्रह्मत्वे द्वैतापत्तिः। 'तस्य प्रियमेव शिरः' इत्यादिसंबन्धषष्ठ्या तस्य भेदबोधनात्। तथा सति ब्रह्मत्वस्याप्यसिद्धिः। नेह नानास्तीत्यादौ ब्रह्मणि भेदनिषेधादित्याशङ्कायामाहुः **न त्वित्यादि**। **उत्तरस्यै**तदभ्यासवाक्यादग्रिमस्य 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति' इत्यन्तरशब्दवाच्यभेदकृतिनिन्दावाक्यस्य राहोः शिर इत्यादिवदभेदषष्ठीसाधकत्वान्न द्वयापत्तिरित्यर्थः। सिद्धमाहुः **तस्मादित्यादि**। चोद्याभावात् तथेत्यर्थः। उपचयापचयशङ्किताब्रह्मत्वपरिहारस्तु गुणोपसंहारपादे प्रियशिरस्त्वादिसूत्रे आचार्येण विधेय एवेति न चोद्यावसर इति बोधयितुमेवकारः। एवमस्मिन् वर्णकेऽन्नमयादीनां ब्रह्मकार्यत्वेन पदार्थान्तरत्वमङ्गीकृत्य आनन्दे फलत्वस्य वक्तव्यत्वात् साधनशेषभूते ज्ञेये ब्रह्मण्यानन्दं चानिवेश्यार्थिकाभ्यासादानन्दमयस्य तेभ्यो भेदः साधितः।

रश्मिः।

मयः अभ्यासादित्युक्तेपि हेतुः स्वरूपासिद्धः पक्षे व्याप्यत्वाभिमतस्य हेतोरभावादित्याशङ्क्य स्वरूपासिद्धत्वं वारयन्ति स्म **स्तुत्या मयडिति**। स्तुत्या मयडर्थः प्राचुर्येण प्रस्तुतः प्रकृष्टप्रकृत्यर्थः। प्राचुर्यं यत्राभ्यासवाक्ये तन्मयडर्थं प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येनेति। तस्य भावस्तत्त्वं प्रकृतिरानन्दरूपा तु तुल्या अन्नादिभिस्तुल्या ब्रह्मत्वेनेत्यर्थः। तेन पक्षे हेत्वभावाभावात् न स्वरूपासिद्धत्वं हेतोरिति भावः। **प्रवाहादिति** विकारप्रवाहात्। **न त्विति** भाष्यं विवृण्वन्ति **न त्विति**। **उत्तरस्येति** भाष्यं विवृण्वन्ति स्म **उत्तरस्येति**। **उदर**मिति स्वल्पमित्यर्थः। **गुणोपेति**। साधनाध्यायतृतीयपाद इत्यर्थः। गुणानामुपसंहारो यत्रेति समासात्। तेनानन्दाधिष्ठातरि विधातर्यव्याप्तिः परिहृता। यत ईक्षतिसूत्रे सद्रूपं सत्यं 'सत्यं परं धीमहि' इति मङ्गलाचरणात्। मूर्त्या तस्य परं पदं विष्णुर्ज्ञानं तत्त्वेन सत्यं अनन्तत्वेन च तत्प्रतिपादकवेदात्यन्तामिलनात्। अत एवानन्दत्वेनापि सत्यं तत्राव्याप्तिरत्र परिहृता। ब्रह्मादिषु लक्षणसमन्वयस्यावश्यकत्वात्। यतो मुण्डके कर्मादित्रयं मुण्डकत्रयेणोक्त्वा प्रश्ने परब्रह्मान्वेषणे प्राणविद्योक्ता तदनु विद्योपनिषदि।

'ब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमाम्।
यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरात्'॥

इत्युक्तं ततः। **अत्रैवं बोध्यम्**। 'मायेत्यसुराः' इति श्रुतेः 'असत्यमप्रतिष्ठं ते' इति स्मृतेश्चासुरसिद्धान्तस्य जाघन्यात् साकारं व्यापकं ब्रह्म तदेव विरुद्धानामणुत्वादिधर्माणामाश्रयः पुरुषोत्तमश्चाद्यमूर्तिः। श्रौतं स्मार्तं च प्रमेयं भिन्नं 'योगिनः प्रति स्मर्यते स्मार्ते चैते' इति चतुर्थाध्यायस्थसूत्रे तथैव सूचनात्। श्रौतं ज्ञानं भक्तिर्वा साधनं, स्मार्तं तु भक्तिरेवेति श्रीमदाचार्याणां सिद्धान्तः। एष चात्र निबन्धे च स्फुटः। श्रीमद्विठ्ठलेश्वरदीक्षितानां तु पुरुषोत्तमो यशोदोत्सङ्गलालित एव ब्रह्म, विरुद्धानां व्यापकत्वादिधर्माणामाश्रयः। 'समान एवं चाभेदात्' इति तृतीयाध्यायस्थसूत्रे तथैव व्यासपादानामभिप्रायव्यवस्थापनेन सूत्रसमासौ—

'एवं विचारचातुर्यवद्भिः सद्भिर्व्रजाधिपे।
आनन्दमयतानन्दसंदोहायावधार्यते'॥

अथवा 'स नैव रेमे, तस्मादेकाकी न रमते स द्वितीयमैच्छत्, स हैतावानास' इत्यादिश्रुतिभिरेष उ एवेतिश्रुतेश्च तानि तानि साधनानि कारयित्वा तानि तानि फलानि ददद् भगवान् स्वक्रीडार्थमेव जगद्रूपेणाविर्भूय क्रीडतीति वैदिकैर्निर्णीयते। एतदेव काण्डद्वयेऽपि प्रतिपाद्यते।

भाष्यप्रकाशः।

सांप्रतं तु **प्रभुचरणै**रखण्डब्रह्मवादेन पूर्वं सिद्धं कार्यस्यापि ब्रह्मत्वमनूद्यानन्दस्य साधनशेषत्वेऽपि रूपभेदेन फलत्वानपायाज्ज्ञेयकोटावानन्दं निवेश्यापि तेभ्य आनन्दमयभेदः 'तस्यैष एव शारीर आत्मा' इत्यादिवाक्याभ्यासाद् वर्णकान्तरेणाधिदैविकवादमाश्रित्य साध्यते **अथवे**त्यादि। तदर्थं पूर्वं सर्वश्रुतीनां ब्रह्मपरत्वेनैकवाक्यत्वाय प्रतीयमानस्य द्वैतस्य बाध्यताप्रकारबोधनाय च सृष्टिप्रक्रियास्मारणपूर्वकमखण्डब्रह्मवादस्वरूपं सप्रमाणं निरूप्यते **स वै नैवे**त्यादि। **वैदिकै**रिति प्राचीनौपनिषदैः। एतेन संमतिरपि शिष्टानामुक्ता। एतेन सृष्टीच्छायां प्रयोजिका क्रीडेच्छेति बोधितम्। **एतदेव काण्डद्वयेऽपि प्रतिपाद्यत** इति 'शाब्दस्य हि ब्रह्मण एष पन्थाः' इत्यनेन

रश्मिः।

इति श्लोकेन भाष्यसमाप्तौ च—

'जानीत परमं तत्त्वं यशोदोत्सङ्गलालितम्।
तदन्यदिति ये प्राहुरासुरांस्तानहो बुधाः'॥

इति श्लोकेन च तथैवोक्तत्वात्। भक्तिरेव साधनं श्रौतस्मार्तं च प्रमेयमेकमेव 'स्मृतेश्च' इति सूत्रेण श्रौतस्याप्यर्थस्य व्यासपादैः स्मृत्योपबृंहणादित्येतावान् मतभेदः। अन्यत्समानमित्याशयेन भाष्यं भिन्दन्ति **सांप्रतमित्यादि**। **प्रभुचरणै**रिति श्रीमद्विट्ठलेश्वरदीक्षितैरित्यर्थः। तेन पूर्ववर्णकस्यापि मुख्यत्वं न तु तत्र किमप्यस्वारस्यमिति ध्वनितम्। एवं तत्र तत्र मतभेदो द्रष्टव्यः। प्राकरणिकग्रन्थनिबन्धाद्येकवाक्यतायां विचार्यमाणायां तु एकमेव मतमिति वस्तुस्थितिस्तत्त्वं चेति विभावनीयं महद्भिः। 'पितृप्रवर्तितपथप्रचारसुविचारकः' इति नामरत्नग्रन्थनाम्नः प्रभूणाम्। अत एव मिलितयोरेवाचार्यत्वम्। **अखण्डब्रह्मवादेने**ति नात्राखण्डब्रह्मवादो 'अखण्डं कृष्णवत्सर्वं' इति निबन्धोक्तः, तस्य ज्ञानमार्गीयत्वात् 'भजनं सर्वरूपेषु' इत्यस्य तत्त्वदीपे तथाकथनात्। किं तु लीलासामग्रीसहितमेवाखण्डं ब्रह्मेति परमभागवतेन वादेनेत्यर्थः। एतत्स्वरूपं द्युभ्वाद्यायतनाधिकरणे 'प्रकरणात्' इति सूत्रे वक्ष्यति। **रूपभेदेने**ति गणितत्वागणितत्वकृतेनेत्यर्थः। **द्वैतस्ये**ति संशयरूपस्य संख्यारूपस्य वा बाध्यताप्रकारसूचनाय सर्वस्य ब्रह्मत्वबोधनेनेत्यर्थः। **निरूप्यत** इति। यत्तु शंकरपादा अतः परस्य ग्रन्थस्य किमुत्थानमुच्यते द्विरूपं हि ब्रह्मावगम्यते इत्यादिना सोपधिकनिरुपाधिकभेदेन श्रुतिव्यवस्थामाहुः तत्तात्त्विकत्वातात्त्विकत्वाभ्यां द्वेधा भेदस्य विद्वन्मण्डने निपुणतरं खण्डनात्। ग्रन्थोत्थाने प्रकारान्तरमुपदिशद्भिरिति शेषः। **स वै नैवेत्यादी**ति इदं प्रजापतिपरमिति शांकरा व्याचक्षते तदशोभनं 'सर्वान् पाप्मन औषत् तस्मात्पुरुषः' इति पुरुषनिर्वचनश्रुतेः अपहतपाप्मत्वस्य ब्रह्मलिङ्गस्य तत्र सत्त्वेन विराडात्मकप्रजापतेर्ग्रहीतुमशक्यत्वात्। किं च सोऽबिभेदित्यपि भयं न बाधकं बाललीलायां तत्स्वीकारात् भक्तानुरोधेन। माहात्म्यं चैतद्ब्रह्मणो यद्भक्तवश्यत्वम्। अत एकोप्यसाधारणो धर्मो विद्यमानः शिष्टान् संदिग्धानपि ब्रह्मधर्मानेव गमयति इति 'अन्तस्तद्धर्मोपदेशात्' इत्यधिकरणभाष्याच्च। न च 'ततः पतिः पत्नी चाभवताम्' इत्यनन्तरं ततो मनुष्या-

अन्यथा जीवस्य साधनफले निरूपयन्त्याः श्रुतेर्जीवपरत्वमेव स्यान्न ब्रह्मपरत्वम् । कर्मब्रह्मणोरपि जीवशेषत्वं नापेयात् ।

एवं सति पूर्वकाण्डेऽवान्तरफलान्युक्त्वा 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इतिश्रुतेर्निरवध्यानन्दात्मकमेव परमं फलमिति तद्विवक्षमाणा पूर्वं सामान्यत आह, ससाधनं तैत्तिरीये 'ब्रह्मविदाप्नोति परम्' इति । अक्षरब्रह्मवित् परं ब्रह्माप्नोतीत्यर्थः । अत्र परशब्दस्य पूर्वपरत्वे तदित्येव वदेत् ।

भाष्यप्रकाशः ।

द्वितीयस्कन्धे उक्तार्थस्यैवोपबृंहणात् क्रीडनमेव प्रतिपाद्यत इत्यर्थः । तेन सृष्टीच्छा क्रीडेच्छारूपैवेति निर्णीयोक्तोपबृंहणेऽन्यस्याप्यर्थस्य संभवदुक्तिकत्वात् तदनुक्त्वा विपक्षे बाधकं तर्कमेवाहुः अन्यथेत्यादि । अन्यथेति भगवतः सर्वरूपत्वाभावे । नापेयादिति पारार्थ्यस्य शेषलक्षणस्य फलद्वारा तत्र सत्त्वान्नापेयादित्यर्थः । नच जीवशेषत्वमेव काण्डद्वयस्यास्तु बाधकाभावादिति वाच्यम् । 'सर्वे वेदा यत् पदम्', 'ओमित्येतदक्षरम्', 'इदं सर्वम्', 'यस्यात्मा शरीरम्' इत्यादिषु वेदादेर्भगवत्परत्वस्य भगवतो जीवशेषित्वस्य च श्रावणेन तद्विरोधस्यैव बाधकत्वात् । तस्मान्नात्र शङ्कालेशः । एवमखण्डब्रह्मवादस्यैव श्रौतत्वादुक्तरीतिक एवार्थ इति हृदिकृत्याधिदैविकवादेन भेदं साधयितुं विषयवाक्यं व्याकरिष्यन्तः सिद्धमनूद्य तदवतारयन्ति एवं सतीत्यादि । एवं सतीति उक्तदोषपरिहारायोक्तरीत्या श्रुतीनां ब्रह्मपरत्वे सति । इति श्रुतेरिति । आनन्दान्तरस्यैतदंशत्वादिति शेषः । सामान्यत इति संक्षेपेण । विषयवाक्यप्रतीकं धृत्वा व्याकुर्वन्ति ब्रह्मेत्यादि । साधनशेषाद् ब्रह्मणः परस्यातिरिक्तत्वे गमकमाहुः अत्रेत्यादि । तथाच शब्दान्तरेण निर्देश एव भेदगमक इत्यर्थः । एतेन निरवधिसत्यज्ञानात्मकत्वे

रश्मिः ।

अजायन्त' इति श्रुत्या पतिर्मनुः पत्नी शतरूपेति व्याख्यायत इति वाच्यम् । मनुशब्दस्य मुख्यवृत्तिर्ब्रह्मण्येवेति मनुष्यपदोपपत्तेः । किं चोपसंहारेत्र ह्येते सर्वमेकं भवन्ति तदेतत्पदनीयमस्य सर्वस्य यदयमात्मा अनन्त इत्येतत्सर्वं वेद इति सर्वपरायणत्वं सर्वपदनीयत्वं तज्ज्ञानेन सर्वज्ञत्वं तैर्ब्रह्मलिङ्गैरुपक्रमस्य निःसंदिग्धं ब्रह्मपरत्वं, अतोऽन्तस्तद्धर्माधिकरणन्यायेनाकाशस्तल्लिङ्गाधिकरणन्यायेनातिदेशाधिकरणन्यायेनास्य ब्रह्मपरत्वात् । चतुर्थचरणे समाकर्षाधिकरणेऽप्युपपादयिष्यते । क्रीडनमिति एतच्चैतस्य सुबोधिन्यामस्ति । इच्छान्तरादर्शनादाहुः तेन सृष्टीच्छेति । अन्यस्येति अज्ञबुद्ध्याच्छादनाय कल्पितप्रकारस्य शांकरमतसिद्धस्येत्यर्थः । परमार्थ एव पूर्वोक्तः । आहुरिति उपबृंहणस्यापामरप्रसिद्धत्वाद्वैदिकमन्यस्य वैदिकेनैव प्रकारेण बोध्यत्वाद्वा श्रौतेनैव विचारेण तमर्थं समर्थयन्तो गतेरर्थवत्त्वसूत्रे तर्ककथनात् तन्न्यायेनाहुरित्यर्थः । पारार्थ्यस्येति पूर्वतन्त्रोक्तस्येत्यर्थः । फलद्वारेति तत्र कर्मब्रह्मणोः फलाभ्युपायः द्वारं स्त्रीत्वविवक्षायां द्वारा 'द्वारं पुनर्निगमनेऽभ्युपायः' इति विश्वात् । फले शेषत्वमन्येषां नास्ति । अतः फले शेषत्वं मतस्थस्य मतावलम्बनमभ्युपायः तयेति शेषः । इदानीं पूर्वमीमांसकाशङ्कां पराकुर्वन्ति न च जीवेत्यादि । भेदमिति प्रकाशाश्रयन्यायसिद्धमित्यर्थः । भाष्ये । ससाधनमिति तेनास्य प्रकारस्य मर्यादामार्गीयत्वं सूचितम् । वस्तुतस्त्वित्यादि मुख्यपक्षे तूभयमार्गपरत्वं ज्ञेयम् । प्रकृते । विषयेत्यादि । सिद्धमिति काण्डद्वयसिद्धम् । संक्षेपेणेति संक्षेपेणोत्तरकाण्डार्थमाहेति भाष्येणान्वयः । विषयवाक्यप्रतीकमिति 'तस्माद्वा एतस्माद्विज्ञानमयादन्योन्तर

पूर्वं ब्रह्मोक्त्वाग्रे यत् परमित्याह तेन सान्निध्यात् तत एव परं पुरुषोत्तमरूपमेवाऽत्राभिप्रेतमिति ज्ञायते ।

किंच प्रतिवादिना तदाप्तिर्ज्ञानात्मिकैव वाच्या । तथा सति ब्रह्मप्राप्तो ब्रह्म प्राप्नोतीत्यर्थः स्यात् । स चासंगतः । साधनसाध्यभावव्याहतिश्च ।

भाष्यप्रकाशः ।

सत्यक्षरादुत्कृष्टत्वमिति परस्य लक्षणमप्युक्तप्रायम् । तच्चोत्कृष्टत्वमानन्दमीमांसोत्तरं, 'यतो वाचः' इति श्लोके गणनापरिच्छेदरहितावाङ्मनसगोचरानन्दरूपत्वेन सिद्धं भविष्यति । ननु 'सर्वं ब्रह्म' इतिवित् परं ब्रह्माप्नोतीत्यर्थोक्तौ न कोऽपि दोष इत्यत आहुः किंचेत्यादि । असंगत इति पुनरुक्तिदोषादसंगतः । नन्वत्र व्याख्यानव्याख्येयभाव एव संगतिरिति चेत् तत्राहुः साधनेत्यादि । नच शाब्दज्ञानवान् परं साक्षात्काररूपं ज्ञानमाप्नोतीत्युक्तौ न दोष इति वाच्यं प्रत्यक्षविरोधात् । नच साधनान्तरासमवधानाददोष इति वाच्यम् । तस्यात्रानभिप्रेतत्वात् । अनुपदेशेन तथाव-

रश्मिः ।

आत्मानन्दमयः' इति विषयवाक्यस्य पूर्वाङ्गमित्यर्थः । प्रतीकमित्यस्यावयवमित्यर्थः । भविष्यतीति अनन्तपदार्थनिरूपणे भविष्यतीत्यर्थः । यद्वा एकप्रक्रमपठितत्वेन भविष्यतीत्यर्थः । वस्तुतस्तु निरवध्यानन्दत्वमेव लक्षणम् । सत्यज्ञानानन्तविपश्चित्त्वं वा लक्षणमेकश्रुत्युपपादितत्वात् । प्रकटचिदंशत्वेन न सूर्येऽतिव्याप्तिः सत्यानन्तयोराच्छन्नत्वात् । परे तु त्रयं प्रकटमिति । प्रकटमिति लक्षणे विशेषणम् । निरवधिसत्यज्ञानत्वे सतीति विशेषणाभावे श्रृङ्गाररसेतिव्याप्तिः स्वमतहानिश्च 'सत्यं परं धीमहि' इति 'सत्यव्रतं सत्यपरम्' इति च ।

'आत्ममायामृते राजन् परस्यानुभवात्मनः ।
न घटेतार्थसंबन्धः स्वप्नद्रष्टुरिवाञ्जसा' ॥ इति च ।

अर्थसंबन्धो देहसंबन्धः । विशेष्याभावे ब्रह्माज्ञानमेव भवेत् । अधोक्षजत्वेन निरवध्यानन्दद्वारा तज्ज्ञानात् । 'आनन्दं ब्रह्मणो विद्वान्' इति श्रुतेः । अक्षरेतिव्याप्तिवारणाय निरवधीति । शंकरोपनिषद्भाष्योक्तार्थं वदन्त आशङ्कामाहुः नन्वित्यादि । सर्वं ब्रह्मेत्युपासकः परं ब्रह्माप्नोति इत्यर्थोक्तावित्यर्थः । न कोपीति यद्यपि प्राप्यस्य ब्रह्मणः उपासकाद्भिन्नत्वेन भवनमुक्तं तथापि मान्त्रवर्णिकं ब्रह्म जीवाद्व्यतिरिक्तं नापि तु तस्यैवोपासकस्याविद्यालेशशून्यं निर्विशेषचिन्मात्रैकरसस्वरूपं तदेव 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रेणोच्यते । अग्रे 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह' इत्यनेन वाङ्मनसयोरगोचरत्वस्योक्तेरिति दोषोपि नेति न कोपि दोष इत्यर्थः । व्याख्यानव्याख्येयेति । तथा चोपनिषद्भाष्यं ब्रह्मविदिति ब्रह्म वेद ब्रह्मैवेति वक्ष्यमाणलक्षणं बृहत्तमत्वात् ब्रह्म तद्वेत्तीति ब्रह्मविदाप्नोति परं निरतिशयं तदेव ब्रह्म परं नह्यन्यस्य विज्ञानादन्यस्य प्राप्तिरिति । साधनेत्यादीति 'धर्मादिष्वनियमः' इत्यनेन 'अल्पाच्तरं पूर्वम्' इत्यस्य बाधादेवं प्रयोगः । धर्मादिश्चाकृतिगणः । ब्रह्मज्ञानं साधनं परप्राप्तिः साध्या सापि ज्ञानात्मिकेत्येकस्य साधनसाध्यभावव्याहतिश्चेत्यर्थः । व्याख्यानव्याख्येयभावेपि तन्मतेन साधनसाध्यभावमाशङ्क्य निषेधन्ति न च शाब्देत्यादि । प्रत्यक्षेति शाब्दपरोक्षापत्त्या तथा । साधनान्तरेति संन्यासयोगरूपसाधनान्तरासमवधानात् । अत्रेति श्रुतावित्यर्थः । अनभीत्यादि छान्दोग्ये आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्येति गार्हस्थ्यलिङ्गाद्वेदान्तविज्ञानसुनिश्चितार्थानां पुंसां तदनिवेशे गृहस्थानां ब्रह्मलोके

अतः परं विशेषतस्तद्विवक्षमाणानुभवैकगम्यं तत्स्वरूपं नान्यमानगम्यमिति ज्ञापयितुमन्यमुखेनाह 'तदेषाभ्युक्ता' इति। अन्यथा सर्वार्थतत्त्वप्रतिपादिका श्रुतिरेवं कथं वदेत्। तदित्यव्ययम्। तथाच तत् पूर्वोक्तं ब्रह्मविदः परप्राप्तिलक्षणमर्थं विशदतया प्रतिपाद्यत्वेनाभिमुखीकृत्योपगृह्य ऋगेषा विदितपरब्रह्मकैरुक्ता । पूर्ववाक्योक्तार्थस्य वैशद्यमनया क्रियत इत्यर्थः संपद्यते।

भाष्यप्रकाशः ।

सायात्। 'यमेवैषः' इति श्रुत्या साक्षात्कारस्य वरणेतरसाधनानधीनत्वाच्च। साधनान्तरकल्पनायामपि पूर्वोक्तरीत्या परशब्दवैयर्थ्याच्च। अत उक्तविधस्यैवार्थस्यात्र संक्षेपत उक्तिरेवेति निश्चयः। एवं सामान्यत उक्तिं तथैव व्याख्याय विशेषतो व्याख्यातुं सामान्यविशेषभावे गमकाकाङ्क्षायां व्याख्यानव्याख्येयभाव एव गमक इत्याशयेनाहुः अतः परमित्यादि। अन्यथेति व्याख्यानत्वाभावे, परस्य तत्प्राप्तेश्चानुभवैकवेद्यत्वाभावे च। एवमिति अन्यमुखेन। अव्ययमिति हेतुपञ्चम्यन्तमव्ययम्। श्रुतिव्याख्यानगतं तत्पदं त्वर्थाध्याहृतमर्थविशेषणत्वाय वाऽव्ययमित्यु-

रश्मिः ।

परामृताद्धिरण्यगर्भमोक्षात् मोक्षानापत्तेः। तथा सति 'न स पुनरावर्तते' इति छान्दोग्यविरोध इति तथा। भाष्ये। काण्डद्वयेपीत्यादिना गृहस्थाधिकारस्य पूर्वकाण्डसिद्धस्यापि संग्रहात्। परमहंसयतीनां तु गार्हस्थ्यमपि प्राप्तं चेत् पारिभाषिकसंन्यासो गृहस्थानां यथा। 'काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः' इत्यादि गीतायाः। अत्र हेतुमाहुः अनुपदेशेनेति 'वेदान्तविज्ञानसुनिश्चितार्थाः' इत्यत्रोक्तगार्हस्थ्यस्य तैत्तिरीयेनुपदेशेन तथा साधनान्तरत्वाभावनिश्चयात्। अनुपदेशेप्यपेक्षितोपसंहार एकवाक्यतयोचित एवेत्यत आहुः यमेवेति। वरणेतरेत्यादि प्रमेयबलमेवैतत्। वरणं वैदिकमनुग्रहो वेदान्तः। नन्वस्तु तत्र तथापरमत्र तु ब्रह्मविदिति साधनोपदेशेन भक्तिरूपसाधनत्वव्यापारत्वेन निवेशस्यावश्यकत्वाद्भक्तेर्वेदान्तविज्ञानसुनिश्चितार्थानां संन्यासयोगाच्छुद्धसत्त्वानां प्राकट्यात् तद्वत्काण्डद्वयेपीत्यादिभाष्यादस्माभिरपि साधनान्तरं कल्प्यत इत्यत आहुः साधनान्तरेत्यादि। पूर्वेति अत्रैव पूर्वोक्तरीत्या चेति। अत्र व्यवहारे भाक्तत्वाभावेन निहितं गुहायामित्यस्याग्रे ब्रह्मणाश्रुते एकीभवतीत्युक्तं स्यात् न तु परमे व्योमन्नित्यादिरुपनिबद्धः स्यात्। अतः स्वमते पुष्टिमर्यादाभक्तफलं वक्तीति युक्तम्। 'ब्रह्मविद्ब्रह्मैव भवति' इत्यत्र ज्ञानफलमिति चकारार्थः। अत उक्तेति भाक्तवदर्थवादत्वाभावादक्षरब्रह्मविदः पूर्णानन्दप्राप्त्युपदेशरूपस्यैवेत्यर्थः। ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेर्ज्ञानमार्गस्य सावकाशत्वाद्भक्तिमार्गस्य निरवकाशत्वादेवकारः। अत्रेति ब्रह्मविदाप्नोति परमितिमात्रे। उक्तिरेवेत्येवकारेण व्याख्यानत्वव्यवच्छेदः। निश्चय इति। शब्दादपरोक्षस्य सर्वनिर्णये मर्यादाभङ्ग एव स्यादित्यादिना दूषितत्वादितोधिकाकाङ्क्षिणा स द्रष्टव्यः। सामान्यविशेषेत्यादि तदेषाभ्युक्तेति श्रुतेरित्यर्थः। एवेति एवकारोप्यर्थकस्तेन तदेषाभ्युक्तेति श्रुतेरपि सामान्यविशेषभावे गमकत्वं द्रष्टव्यम्। अन्येत्यादि विदितपरब्रह्ममुखेनेत्यर्थः। यद्यपि श्रुतं नारदमुखादित्यन्यमतत्वं संभाव्यते तथापि पुरुषविधब्राह्मणवत्तद्वा एतद्विदितं मीमांसितमिति श्रुत्यायमर्थः साधुः। श्रुत्यर्थस्तु एतदित्यस्य यथोक्तकर्मणामवश्यकर्तव्यत्वं, विदितमित्यस्य भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञ ऋषियज्ञश्चेति पञ्चमहायज्ञप्रकरणे विदितं विज्ञातमित्यर्थः। भाष्ये। तत्पदं द्वितीयान्तत्वेन व्याख्यातं तत्तात्पर्यमाहुः श्रुतिव्याख्यानेत्यादि। अध्याहारदोषादाहुः अर्थेत्यादि। अर्थशब्दस्य नियतपुंलिङ्गत्वादिति

तामेवाह। 'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता'। सोपपत्तिकमानन्दात्मकत्वमग्रे निरूपणीयमित्यधुना तदनिरूप्य सच्चिदंशौ देशकालापरिच्छिन्नत्वं चोक्तवती।

अथवा, अक्षरब्रह्मण्यानन्दात्मकत्वे सत्यपि तस्य परिच्छिन्नत्वान्न परमफलत्वमत आनन्देऽपरिच्छिन्नत्वमेव परमफलतावच्छेदकमिति तद्धर्मपुरःसरं

भाष्यप्रकाशः।

क्तम्। तथाच संपूर्णा ऋक् फलांशविवरणार्थैवेति संपद्यत इत्यर्थः। तामित्यादिना ऋचं पठित्वा व्याकुर्वन्ति **सोपपत्तिकमित्यादि**। एवमग्रे फलनिरूपणावसरे निरूपणीयमित्यधुना साधननिरूपणावसरे सोपपत्तिकमनिरूप्य सत्यज्ञानपदाभ्यां सच्चिदंशावनन्तपदेन देशकालापरिच्छिन्नत्वं च ज्ञेयस्य ब्रह्मणः साधनशेषत्वायोक्तवतीत्यर्थः। एवं पूर्ववर्णकस्थस्य ज्ञेयांशे कारणत्वायानन्दांशमप्रवेश्येत्यस्य संग्रहाय तदाशयो विशदीकृतः। तेन ब्रह्मत्वे तुल्येऽपि क्षरस्य देशकालापरिच्छिन्नत्वाभावान्न विवक्षितफलसाधनशेषत्वम्। अक्षरस्य तु तदपरिच्छिन्नत्वात् तादृशसाधनशेषत्वमिति बीजं प्रकाशितम्।

अतः परं प्रस्तूयमानवर्णकरीत्या विवक्षितफलविवरणार्थमत्रानन्दांशप्रवेशं वक्तुमनन्तशब्दस्यार्थान्तरमाहुः **अथवेत्यादि**। **परिच्छिन्नत्वादिति** गणनया परिच्छिन्नत्वात्। एवमत्र

रश्मिः।

भावः। तथा च तदिति तं द्वितीयान्तं न पञ्चम्यन्तमस्मिन् पक्षे। **भाष्ये। विदितपरब्रह्मकैरिति** 'तासां मे पौरुषी प्रिया' इति पुराणद्वारा पुरुषविधब्राह्मणाङ्गीकर्तृभिः स्वस्या अक्षरं ब्रह्म परमं स्थानमिति स्वोत्कृष्टैरित्यर्थः। तेन यदध्येतृभिरिति परैरुक्तं तदसंभवि। अध्येतृणामसामर्थ्यादिति बोधितम्। **प्रकृते। फलांशेत्यादि** फलं चांशश्च फलांशौ तयोर्विवरणार्थेत्यर्थः। यद्यप्याह ससाधनमित्यस्य पूर्ववाक्योक्तार्थस्य वैशद्यमनया क्रियते इत्यस्य च भाष्यस्य विरोधः स्यात् तथाप्यनुभवैकगम्यं तत्स्वरूपमित्याद्याभासभाष्यानुसारेणाह **ससाधनमिति**। पूर्वोक्तस्य भाष्यस्य अथवेत्यादिवक्ष्यमाणद्वितीयपक्षानुमानाभासत्वं पूर्ववाक्योक्तार्थस्येति भाष्यस्य फलांशप्रतिपादकत्वस्येत्यर्थः। इत्यविरोधः। साधिष्ठानमेव तत्स्वरूपमिति 'आदित्यादिमतयश्चाङ्ग उपपत्तेः' इति सूत्रभाष्ये तु द्वितीयपक्षानुसारी नेति। **तामित्यादि** अत्र कर्ता भगवान् 'वेदान्तकृत् वेदविदेव चाहम्' इति स्मृतेः। **साधनेत्यादि** फलांशे निरूपणीये साधनत्वेनाधिष्ठानरूपसाधनत्वेन स्वरूपे प्रतीतं साधनं तस्य निरूपणावसर इत्यर्थः। फलांशनिरूपणे साधननिरूपणमन्यथासंगतं स्यात्। एवमेव ज्ञेयस्येत्यादिकं स्वरूपे प्रतीतं ग्राह्यम्। एवं पूर्वेत्यादि फक्किकातात्पर्यं तु ज्ञेयम्। पूर्ववर्णके ब्रह्मविदाप्नोतीत्यस्य विषयवाक्यत्वाभावात्। तथाहि। ननु फलांशे वर्णनीयानन्दाप्रवेशो नैव युज्यते यतः आनन्दत्वेन फलत्वमिति चेत्तत्राहुः **एवं पूर्वेति**। पूर्वोक्तप्रकारेण पूर्वं वर्णकं यस्य भाष्ये वक्ष्यमाणवर्णकस्य द्वितीयस्य तत्स्थस्येत्यादिरतः फलांशेप्यदुष्टो निरानन्दपक्ष इति। **तदाशय** इति शंकरमतमपाकर्तुं निरानन्दपक्षो ज्ञानमार्गे इति तथेत्यर्थः। **तुल्येपीति** क्षरस्य सत्त्वेन ब्रह्मत्वमक्षरस्य तु चित्त्वेनेति तयोरंशत्वात्तुल्येपीत्यर्थः। **तदपरिच्छिन्नत्वा**दिति अक्षरात्मकेऽपरिच्छिन्ने सत्येव हृदि परस्यापरिच्छिन्नस्य प्रादुर्भावात्तथेत्यर्थः। **फलविवरणार्थ**मिति आप्नोति परमित्येतावत्फलस्य सत्यमित्यादिनैव विवरणार्थमित्यर्थः। **गणनयेति** 'ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः' इति श्रुतेः। **परिच्छिन्नत्वादिति**।

परमानन्द एवानन्तशब्देनोच्यतेऽत्र। 'सत्यं विज्ञानमानन्दं ब्रह्म', 'सच्चिदानन्दविग्रहम्' इत्यादिश्रुतिषु त्रयाणामप्येकप्रक्रमपठितत्वाद् द्वितयोक्तौ तन्नियतसहचरितत्वेनाऽनुक्तोऽप्यानन्दः प्राप्स्यत एवेत्याशयेन वानन्दः स्फुटतया नोक्तः। अथ वेदनपदार्थमाह । यो वेदेत्यादिना। अत्रेदमाकूतम्। 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्' इति श्रुत्या वरणेतरसाधनाप्राप्यत्वमुच्यते ।

एवं सति श्रुतिद्वयविरोधपरिहारायाक्षरब्रह्मज्ञानेनाविद्यानिवृत्त्या प्राकृतधर्मराहित्येन शुद्धत्वसंपादनेन पुरुषोत्तमप्राप्तौ स्वरूपयोग्यता संपाद्यते । तादृशे जीवे स्वीयत्वेन वरणे भक्तिभावात् सहकारियोग्यतासंपत्त्या पुरुषोत्तमप्राप्ति-

---

भाष्यप्रकाशः ।

वेद्यपदार्थो गणितागणितानन्दभेदेन द्वेधा विवृतः । अनन्तरूपमिति श्रुत्यन्तरादत्राप्यनन्तपदं रूपानन्त्यवाचकमेवास्तु । तथा सति नानन्तपदेन परमानन्दलाभ इत्याशङ्क्य पक्षान्तरमाहुः **सत्यं विज्ञानमित्यादि**। **अथेति** वेद्यनिरूपणोत्तरम् । नन्वेवं द्वेधा वेद्यव्याख्याने **किं** बीजमित्याकाङ्क्षायामाहुः **अत्रेत्यादि** । **इदमाकूतमिति**। **वरणेतरसाधनाप्राप्यत्वमिति** अत्र प्रवचनपदं वेदे रूढम् । तदत्र वाच्यतासंबन्धेन तदुक्तसाधनान्युपलक्षयति । मेधा धारणावती बुद्धिः सा च पुरुषनिष्ठस्वाभाविकसाधनानि श्रुतं चागन्तुकानि साधनानीति । तथा ऋचि वेदनव्याख्यानांश इदं वक्ष्यमाणं तात्पर्यम्। **एवं सतीति** व्याख्येये यजुषि वेदनप्राप्यत्व उक्ते सति । **सहकारियोग्यतासंपत्त्येति** सहकारियोग्यतयोः संपत्त्या। तथाच वरणाभावे ज्ञानमार्गरीत्या

रश्मि ।

अतोत्राक्षरं नोच्यत इति भावः । **द्वेधेत्यादि** प्रकाशाश्रयन्यायेनाभेदमाश्रित्य द्वेधा विवृत इत्यर्थः । यद्यप्यक्षरनिरूपणमप्रयोजनं तथापि श्रुत्यन्तर आनन्दमात्रपदान्निरूपितम् । **एवेति** अयमानन्दव्यवच्छेदकः । **सत्यं विज्ञानमित्यादीति** यद्यपि सर्वोपनिषदि 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्म' इति श्रुतिरस्ति तथापि स्पष्टेति नानावादानुरोधिरूपोपयोगिनी न भवतीति पद्मपुराणीयवाक्येन यमुनाजित्परामप्यर्धाङ्गित्वेन तस्यास्तामङ्गीचक्रुरिति बोध्यम् । **किं बीजमिति** पूर्वं प्रकाशाश्रयन्यायसूचनेन बीजस्योक्तत्वेपि विशेषजिज्ञासायां प्रश्नः । **रूढमिति** 'प्रवचनं स्मृतं वेदे' इति विश्वात् । योगरूढमिति वक्तव्ये नामैकदेशग्रहणम् । अत्र वाच्यतासंबन्धो लक्षणा । अग्रे तु स्थलद्वये सामानाधिकरण्यसंबन्धो लक्षणेति ज्ञेयम् । **श्रुतं चेत्यादि** 'श्रुतं शास्त्रावधृतयोः' इति विश्वात् । शास्त्रान्तरवाच्यान्यागन्तुकानि साधनानि इति तथा वरणेतरसाधनाप्राप्यत्वम् । उच्यत इति शेषः । **वेदनेत्यादि** अत्रेति पदस्यार्थः । **तात्पर्यमिति** आकूतपदस्यार्थः । **व्याख्येय** इति साधनांशव्याख्यानेत्र व्याख्येये । **वेदनप्राप्यत्व** इति अक्षरब्रह्मवेदनस्य सत्यं ज्ञानमित्यारभ्य यो वेद निहितं गुहायामित्यन्तस्य न परमे व्योमन्नित्युक्तसाधनशून्यस्य परप्राप्तिसाधकत्वमदृष्टत्वादिति साधनान्तरोपलक्षकता श्रुत्यन्तरस्वारस्याच्च । वरणजभक्तिस्तु न साधनान्तरमपेक्षतेऽश्रुतत्वादित्येवं पूर्वोक्तसाधनांशव्याख्येयवेदनप्राप्यत्वप्रकारे सतीत्यर्थः । **सहकारीति** सहकारिणी भक्तिः । **योग्यताऽ**विद्यानिवृत्त्या शुद्धत्वम् । भावाः कारणानि परप्राप्तौ । सिद्धमाहुः **तथाचेति** निर्णीयत इत्यन्तभाष्येण 'यो वेद निहितं गुहायाम्' इत्यन्तर्गतोर्थः उक्तः । तत्रोपासनया शुद्धत्वं निरूप्यते न कर्मणा । एवं चाक्षरब्रह्मज्ञानेनेत्यस्य भाष्यस्य न शाब्दापरो-

भवतीति निर्णीयते। तदैव गुहायां परमव्योमाविर्भावः। परो मीयते दृश्यतेऽनेनेति तथा। ज्ञानमार्गीयजीवज्ञेयप्रकारकाद्वैशिष्ट्येनापि तथा। परमव्योम्नोऽत्यलौकिकत्वज्ञापनायालौकिकः प्रयोगः कृतः।

भाष्यप्रकाशः।

ज्ञानप्रधानतया ब्रह्मज्ञानं, वरणे तु भक्तिमार्गरीत्याऽऽनन्दप्रधानतया ब्रह्मज्ञानं, येन परप्राप्तिरिति वेद्यस्य द्विधाविर्भाव एव द्विधा व्याख्याने बीजमित्यर्थः। अस्या ऋच एवं निर्णायकत्वे गमकमाहुः **तदैवेत्यादि। कृत** इत्यन्तम्। तथाच श्रुत्यन्तरे वेद्यनिरूपणे हार्दाकाशविशेषण-

रश्मिः।

क्षेणेत्यर्थः पूर्वदूषणान्नापि सर्वं खल्विदं ब्रह्मेति श्रुत्युक्तेनेत्यर्थः भक्तिकारणत्वात्। किं तु यथा यथा परिमृज्यत इति श्लोकोक्तेनेत्यर्थः। न च तत्र न ज्ञाननिरूपणं किं तु ज्ञानाङ्गभक्तिनिरूपणमिति वाच्यम्।'अच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्' इति वाक्ये केवलज्ञाननिषेधात्। ज्ञानं फलं न तु साधनमिति च। ततः कार्यकारणभावादविद्यानिवृत्त्या तज्जन्यधर्मराहित्येन। **शुद्धत्वेनेत्यादि** आध्यात्मिकशुद्धान्तःकरणे सत्यलौकिकत्वेन 'दिव्यमन्त्रेण बहुशः कुर्यादात्ममलच्युतिम्' इत्यमृतबिन्दूपनिषच्छ्रुतेः। **स्वरूपेति** मुक्तोपसृप्यव्यपदेशादिति सूत्रात्। एवं ज्ञानमार्गरीत्येत्यर्थः। **ब्रह्मज्ञान**मिति अक्षरज्ञानम्। तदा तु

'ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्'॥

इति गीतायाः भक्तिद्वारा परप्राप्तिः। साधनांशविवरणे श्रुतिविरोधपरिहारायाहुः **वरणे त्वित्यादि। भक्तिमार्गेत्यादि** भक्तिमार्गः श्रवणादिसरणिरूपस्तत्र तत्र ग्रन्थेषु प्रसिद्ध एव। प्रकारभेदेन 'भक्तिमार्गो बहुविधः' इति वाक्यात्। स भाष्ये पुष्टिमर्यादाभेदेन वरणे भक्तिभावः पुष्टिः। साधनैः सहकारिणो भक्तिरूपस्य योग्यताया आधिदैविकशुद्धत्वरूपायाः संपत्त्या, 'यथा यथात्मा परिमृज्यतेसौ' इति वाक्याद्भक्तिशुद्धत्वयोः पूर्वापरीभावः, तदनु शुद्धत्वे पूर्वोक्तो भक्तिभावपदैकदेशभावस्याभिव्यक्त्या पुरुषोत्तमेत्यादिः। 'तथा तथा पश्यति वस्तु सूक्ष्मम्' इति वाक्यात्। भावः सर्वात्मभावान्तर्गतो दानसाध्य इति पुनर्भाष्ये नोक्तः। **अनया** भक्तिमार्गरीत्येत्यर्थः। नन्वेकादशस्कन्धीयान्याध्यायोक्तभक्तिमनादृत्य कुत आज्ञाशेषभक्तिमार्गादर इति चेन्न। निबन्धे त्रयोदशे हंसकृतनिर्णयः सर्वसंमतः 'एवं विमृश्य' इत्युक्तः। तद्भक्तिस्वरूपं स्वरूपलाभः। सोपि चतुर्दशे ज्ञानशेषभक्तिनिरूपणनिरूपितो भविष्यत्यतस्त्रयोदशाध्यायनिर्णयार्थं प्रवृत्तत्वात्।

'अन्यच्चेच्छ्रेय एतादृक् उपायो वा भवेत्तदा।
न कृष्णत्वं फलं पूर्णं नापि त्यागस्तथोभयोः'॥

उभयोरिति गुणचेतसोः। **ब्रह्मज्ञान**मिति साधनशेषाक्षरब्रह्मज्ञानमित्यर्थः। (सर्वात्मभावचरमवृत्तिरूपम्, तृतीयाध्याये लिङ्गभूयस्त्वाधिकरणे स्पष्टम्)

'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्'॥

इति गीतोक्ता परप्राप्तिः। **वेद्यस्येति** ब्रह्मविदित्युक्तस्य सत्यज्ञानमित्यादिना विवृतस्य वेद्यस्य ज्ञानप्राधान्येन आनन्दप्राधान्येन च द्विधाविर्भाव इत्यर्थः। **एवमिति** साधनान्तरीयपररूपाक्षरचिदानन्दः परमाप्नोति न तु अक्षरविदित्येवमित्यर्थः। **तदैवेत्यादीति** ब्रह्मभावकाल इत्यर्थः। ब्रह्मभूतस्य भक्तिकथनात्। **श्रुत्यन्तर** इति। 'अथ यदिदमस्मिन्' इत्यस्यां दहराधिकरणीयायां वेद्यनिरूपणे

भाष्यप्रकाशः ।

त्वेन परमादिपदाभावोऽत्र तु तत्सद्भाव इत्येव गमकमित्यर्थः । यत आकारायुधादिलिङ्गानां व्यूहेष्ववतारेषु च सत्त्वात् पुरुषोत्तमत्वं तैर्निश्चेतुमशक्यम् । अक्षरस्थितत्वज्ञाने तु निश्चेतुं शक्यमतोऽक्षरात्मकस्य व्योम्नः परमत्वम्,

'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम' ॥

इति गीतावाक्यस्वारस्यात् । तस्य परमव्योमत्वं तु, 'ऋचो अक्षरे परमे व्योमन्', 'यदक्षरे परमे व्योमन्' इत्यादिश्रुतिभ्योऽवगन्तव्यम् । नचाव्यक्तपदादक्षरपदं प्रकृतिवाचकमिति शङ्क्यम् । 'यं प्राप्य न निवर्तन्ते' इति मुक्तिस्थानत्वरूपलिङ्गविरोधात् । प्रकृतिं प्राप्तानां तु पुराणे प्रकृतिचिन्तकानधिकृत्य, 'पूर्णं शतसहस्रं तु तिष्ठन्ति विगतज्वराः' इति वाक्येन तदुत्तरं पुनरावृत्तिबोधनात् । 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च' इति पुरुषत्वोक्तिविरोधाच्च । अव्यक्तत्वं त्वक्षरीयमेव प्राथमिककार्यत्वात् प्रकृतिगामि भवति । आकाशजन्ये वायौ नीरूपत्ववत् । न तु तत्प्रकृत्यसाधारणम् । अतोऽक्षराधिष्ठातृत्वं पुरुषोत्तमाऽसाधारणमित्यक्षरस्यैव

रश्मिः ।

पुरुषोत्तमनिरूपणे दहरः परमात्मा न जीव इति भाष्यादित्यर्थः । **अत्र त्विति** श्रुतौ तु तत्र हार्दाकाशे परमादिपदसद्भाव इत्यर्थः । **व्यूहेष्वित्यादि** प्रद्युम्नानिरुद्धसंकर्षणवासुदेवेष्वित्यर्थः । सोवतारो भवति यः सत्त्वरूपे स्वधाम्नि प्रविष्टः कार्यं करोति तेष्वित्यर्थः । **अक्षरात्मेति** तेनाक्षरं व्योम प्रकृतिः पुराणोक्ता इन्द्रः स्वराडिति पर्यायाः । इदं व्योम भूतानां छिद्रदातृ 'आकाशवत्सर्वगतश्च नित्यः' इति गीतोक्तम् । 'छिद्रा व्योम्नीव चेतनाः' । जीवा भिन्नाः । ततः परमत्वं भक्तिसाधनजन्यं परमत्वस्य भक्त्यन्तःपातित्वात् । **अवगन्तव्यमिति** । तथा चैतत्परमत्वस्यात्र संनिवेश इति भावः । **प्रकृतीति** सशङ्खचक्रो हरिरित्यत्र हरिशब्दस्य विष्णुवाचकत्ववत् । **चेति** तेन प्रधानमित्यपि नपुंसकं न पुरुषः । मुख्यकारणगता धर्माः कार्ये समायान्तीत्याशयेनाहुः **अक्षरीयमेवेति** । एवकारेण पुरुषोत्तमव्यावृत्तिः । न च 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यत्राकाशोक्षर एव इति कथमात्मशब्दार्थपुरुषोत्तमव्यावृत्तिरिति शङ्क्यम् । आत्मन इत्यत्रोक्तरीत्यांशद्वयात् तत्र पुरुषोत्तमव्यावृत्तिः । 'अक्षरात्सोम्य विविधा भावाः प्रजायन्ते' इत्युक्तेनाक्षरव्यावृत्तिः । भक्तैः सह निगूढभावकरणातिरिक्तकार्याभावात् । **नीरूपत्ववदिति** आकाशे नीरूपत्वं तु आधेयतया रूपाभावात् । अन्यथा **प्रस्थानरत्नाकरे** वायौ नीरूपत्वं स्फुटं परं त्वाकाशे नीलो नास्ति नीलमाकाशं तु वरीवर्ति इति भणितं विरुद्धं स्यात् । एवं चारूपित्वे सति चालनव्यूहनद्रव्यशब्दगन्धनयनसर्वेन्द्रियबलदानाख्यकार्यत्वं लक्षणं सिद्धम् । अत्राकाशजन्यो नीलरूपो वायुर्न भाति चालनादिकार्याभावात् ।

'चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ।
सर्वेन्द्रियाणामात्मत्वं वायोः कर्मादिलक्षणम्' ॥

इति स्पर्शस्तन्मात्रा । नीरूपे सति स्पर्शवत्त्वं स्वरूपलक्षणम् । **न तु तदिति** तदक्षरपदम् । **प्रकृतीति** त्वन्मते प्रकृतिसाधारणं परं तु प्रकृतिर्मायेन्द्रियरूपा पुराणमते त्रिगुणात्मिकेत्यक्षरपदं स्वयंप्रकाशासाधारणं न प्रकृतिसाधारणम् । **अत** इति प्रकाशासाधारणात् । **अक्षरेत्यादि** अक्षर-

रश्मिः।

तदधिष्ठातृपुरुषोत्तमसाधारणमित्यर्थः। तृतीयाध्यायद्वितीयपादे तदव्यक्ताधिकरणे तथोक्तेः। पुरुषोत्तमेत्यत्र समासस्तु पञ्चमीतत्पुरुष इति केचित्। तन्न। तद्विधायकसूत्राभावात् योगविभागस्यागतिकगतित्वाच्च। पुरुषेषूत्तम इति सप्तमीसमास इत्यन्ये। तन्न। तथा सति सप्तमीसमासेन नरक्षत्रियशूरतम इति प्रयोगापत्तेः। न चेष्टापत्तिः 'न निर्धारणे' इति निषेधवैयर्थ्यापत्तेः। निर्धारणे तादृशप्रयोगस्यासाधुत्वज्ञापनेनैव तत्सार्थक्यात्। एके तु सप्तमीसमास एवायम्। निषेधस्य स्वरभेदनियामकषष्ठीसमासनिषेधफलकत्वात्। कैयटस्तु यतश्च निर्धार्यते यश्च निर्धार्यते यश्च निर्धारणे हेतुः तत्त्रितयसन्निधान एव निर्धारणषष्ठी, तत्रैव चायं निषेधः। पुरुषोत्तम इत्यत्र तु त्रितयसन्निधानाभावात् न निर्धारणविभक्तिः किं तु संबन्धसामान्ये षष्ठीति तया समासः। अत एव हलादिःशेष इतिसूत्रे किमयं हलामादिरिति षष्ठीसमास इति भाष्ये उक्तेः। गुणवचनेन निषेधस्त्वनित्य इति तरप् सूत्रे आह। अत्र जयरामः। उक्तत्रितयसंनिधौ तदङ्गीकारे नरशूरक्षत्रिय इति प्रयोगस्याप्युपपत्तेः। तत्त्रितयसंनिधानात्। अत एतादृशप्रयोगात् नराणां क्षत्रियः शूरतमः इत्यर्थे नरक्षत्रियशूरतम इत्यप्रयोगाच्च समासवाक्यादन्यतो निर्धारणनिर्धारणप्रयोजकरूपोपस्थितावेव समासनिषेधः। अतोत्र निर्धारणाभावात् न षष्ठीसमासनिषेधः। यत्र तु पुरुषाणामुत्तमः कृष्णस्तत्र तु कृष्णस्य विधेयत्वेन निर्धारणोपगमान्न समासः। विधेयस्यैव तन्निर्धारणप्रयोजकत्वस्वीकारात्।

'नाथः सृजत्यवति यो जगदेकपुत्र-
प्रीत्या ततः परमनिर्वृतिमादधाति।
तस्मै नमः सहजदीर्घकृपानुबन्धं
लब्धत्रितत्त्वतनवे पुरुषोत्तमाय'॥

इति लीलावत्यां यः सृजति तस्मै पुरुषोत्तमाय नम इति तत्प्रयोजकरूपोपस्थितावपि न क्षतिरित्याह। नागोजिभट्टास्तु 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' इति स्मृतिस्वारस्यात् कर्मधारय एव राजदन्तादित्वादुत्तमशब्दस्य परनिपात इत्याहुः। एतदेव च युक्तम्। 'एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' इतिश्रुतिस्वारस्याच्च। अत्र वदन्ति। कर्मधारयसमासे उत्तमपुरुष इति प्रयोगापत्तिः। जातिविशिष्टवाचकस्य गुणक्रियाविशिष्टवाचकयोगे जातिविशिष्टप्राधान्यनियमात् नीलोत्पलमित्यादौ तथादर्शनात्। अन्यत्र त्वनियमः। यथा खञ्जकुब्जः कुब्जखञ्जः इत्यादौ तदपि पूर्वोक्तस्मृतिस्वारस्यात् तादृशनियमस्यैतदतिरिक्तस्थले एव स्वीकारात् परास्तम्। उत्तमपुरुष इति प्रयोगानापत्तिस्तु राजदन्तादित्वादुत्तमशब्दस्येत्युक्तम्। यद्यपि कैयटजयरामोक्तषष्ठीसमासपक्षे पुरुषतादात्म्यवानुत्तम इति बोधः। षष्ठ्यास्तादात्म्यार्थकत्वात्तथापि तादात्म्यस्य भेदसहिष्णुरभेदोर्थ इत्यभेदबोधकस्मृत्युपपत्त्यर्थं कर्मधारय एव युक्त इति बोध्यम्। 'स आत्मानं स्वयमकुरुत' इत्यत्र तादात्म्यं भेदघटितं चेद्विभक्तसदृशो भेदपदार्थः। 'विभक्तमिव च स्थितम्' इति गीतावाक्यात्। **भाष्ये।** **तथेति** परमत्वे नास्ति। **ज्ञानमार्गीय** इत्यादि। अत्रायं परमार्थः। 'आनन्दांशप्रकाशाद्धि ब्रह्मभावो भविष्यति' इत्यस्य तत्त्वदीपे तिरोहितस्याविर्भावे ब्रह्मभाव इति प्रतिपादनाज्ज्ञानमार्गे पराभिध्यानसूत्रोक्तरीत्या जीवे तिरोहितो य आनन्दस्तस्याविर्भावेऽक्षरात्मकतया जीव एव ज्ञेयः। अत्र तु तत्र पुरुषोत्तमाविर्भावकथनेन न ततो वैशिष्ट्यमिति। एतच्चैवं सतीत्यारभ्य निर्णीयत इत्यन्तेनोक्तम्। तत्र तिरोहितानन्दाविर्भावो

'भक्त्याऽहमेकया ग्राह्यः' 'नाहं वेदैः' इत्युपक्रम्य, 'भक्त्या त्वनन्यया शक्यः' इत्यादिस्मृतिरप्येवमेव संगच्छते । अन्यथा ज्ञानमार्गिणामपि ब्रह्मविदां परप्राप्तिः स्यान्न त्वेवम् ।

'मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥
तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह' ॥

भाष्यप्रकाशः ।

तद्धर्मकत्वमिति हृदयम् । ननु वरणपदार्थो लक्षणया ज्ञापनात्मको ग्राह्यो न तु रूढोऽङ्गीकारात्मक इति नात्र भक्तिनिवेशे किंचिद् बीजं पश्याम इत्याशङ्कायां स्मृत्या स्वोक्तमुपष्टभ्नन्ति भक्त्येत्यादि । एवमेवेति वरणपदस्याङ्गीकारपरत्व एव । विपक्षे बाधकं तर्कमाहुः अन्यथेत्यादि । न त्वेवमिति न ज्ञानमार्गिणां विवक्षितलक्षणा परप्राप्तिः । एवमृचो निर्णायकत्वमुपपाद्यैवंप्रकारकज्ञानस्य

रश्मिः ।

निवेशनीयः । अलौकिक इति परमे व्योमन्निति रूप इत्यर्थः । प्रकृते । लक्षणयेति ज्ञानाङ्गीकारयोर्जन्यजनकभावसंबन्धो लक्षणा । रूढ इति तेन न वृङ् संभक्तौ इत्यस्य भक्तिनिवेशबीजस्य प्राप्तिरिति नात्र भक्तिरित्यादिः । उपष्टभ्नन्तीति व्यासचरणैः स्मृतेश्चेति सूत्रेण स्वोक्तोपष्टम्भनात् ।

'कृष्णवाक्यानुसारेण शास्त्रार्थं ये वदन्ति हि ।
ते हि भागवताः प्रोक्ताः शुद्धास्ते ब्रह्मवादिनः' ॥

इति शास्त्रार्थाच्चोपष्टभ्नन्तीत्यर्थः । भक्त्येत्यादीति । 'न ज्ञानं न च वैराग्य'मिति । न च 'ज्ञानी त्वात्मैव मे मतः' । 'जनयत्याशु वैराग्यम्' इति वाक्ये भगवदाविर्भावकारणं वैराग्यकारणं भक्तिरिति भक्तिग्राह्यवैराग्यं च कुतो न प्रायः श्रेयः इति वाच्यम् । काठकोक्तब्रह्मविषयिण्यां मत्यां तर्कपरित्यागापत्तेः 'नैषा तर्केण मतिरापनेया' इति काठकश्रुतिः । न हि तर्केणाश्चर्यरहितेन तिरोहितसदानन्दसद्रूपेण घटादिज्ञानं पारमार्थिकं भवति। आश्चर्यवतो भक्तस्य तु भवति । एवं वैराग्येऽक्षरात्मकप्रतिकृतिवितृष्ण्ये तदाविर्भूतपुरुषोत्तमावज्ञापत्तेः । अङ्गीकारेति अङ्गीकारपरत्वे सति भक्तिमार्गीयत्व एवेत्यर्थः । परप्राप्तिरिति तेन 'नायमात्मा' इति श्रुतौ भक्तिनिवेशे उपपत्तिरुक्ता भवति । अत एव वाराहे सप्तविंशे ।

'ज्ञानादेव तु कैवल्यं प्राप्यते नान्यथा तु यत् ।
इति वेदवचः स्फीतं गीयते विदुषां गणैः ॥
श्रवणानन्तरं कार्यं मननं भक्तिपूर्वकम् ।
ततो ध्यानं प्रकुर्वीत ततः साक्षाद्भवेद्धरिः' ॥

इति ज्ञानात्केवलभक्त्या कैवल्यमिति 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतौ च भक्तिनिवेशः स्फुटमुक्तः । श्रुतिरप्येवमाह 'स्वप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम्' इति वासुदेवोपनिषदि । एवमृच इति वरणद्वारा ऋचः । एवंप्रकारेत्यादि अक्षरत्वप्रकारकज्ञानस्य । फलयोगौर्णत्वादित्यर्थः । भाष्ये । गुहायामित्यारभ्य यो वेदेत्यन्तःसंदर्भो

१. अन्तरा प्रतिबन्धः नशब्दो निषेधार्थकः छप्रत्ययोभवार्थः । अप्रतिबन्धे भवत्वं तस्मात् स्वार्थे कः (इति नान्तरीयकव्याकृतिः) ।

इत्यादिवाक्यैः। एतदेवाह। गुहायां हृदयाकाशे यदाविर्भूतं परमं व्योमाक्षरात्मकं व्यापिवैकुण्ठं, तस्य पुरुषोत्तमगृहरूपत्वात् तत्र निहितं स्थापितमिव वर्तमानं यो वेद स भक्तो ब्रह्मणा नित्याविकृतरूपेण विपश्चिता, विविधं पश्यचित्त्वं हि विपश्चित्त्वम्। पृषोदरादित्वात् पश्यच्छब्दावयवस्य यच्छब्दस्य लोपं कृत्वा व्युत्पादितो विपश्चिच्छब्दः। तेन विविधभोगचतुरेण सह सर्वान् कामानश्नुत इत्यर्थः। एतेन परप्राप्तिपदार्थ उक्तो भवति। शुद्धपुष्टिमार्गीयत्वादस्य भक्तस्य स्वातन्त्र्यं भोग उच्यते। सहभावोक्त्या ब्रह्मणो गौणत्वम्। अत एव भक्ताधीनत्वं भगवतः स्मृतिष्वप्युच्यते। 'अहं भक्तपराधीनः', 'वशे कुर्वन्ति मां भक्त्या' इत्यादिवाक्यैः।

यद्यप्यश भोजन इति धातोरश्नातीत्येव रूपं भवति, अशूङ् व्याप्ताविति धातोर्भवत्यश्नुत इति रूपं, विकरणभेदात् पदभेदाच्च। तथाप्यत्राश भोजन इति धातोरेव प्रयोग इति ज्ञायते। तथाहि। अत्राशनक्रियायां ब्रह्मणा सहभाव उच्यते। तथाच व्याप्त्यर्थकत्वे ब्रह्मणा सहभूतान् कामान् व्याप्नोतीत्यर्थो भवत्यथवा ब्रह्मणा सह भूतः स जीवः कामान् व्याप्नोतीति। एतौ त्वनुपपन्नौ। न हि कामवज्जीवकर्तृकव्यापनक्रियाकर्मत्वं ब्रह्मणि संभवत्यतिमहत्त्वात्।

भाष्यप्रकाशः।

फलनान्तरीयकत्वादुत्तरार्धं सर्वमेव व्याकुर्वन्ति एतदेवाहेत्यादिना। एतेनेति ऋगुत्तरार्धेन। एतमर्थं स्मृत्योपष्टभ्नन्ति अत एवेत्यादि। नचास्य नवमस्कन्धीयवचनस्य सात्त्विकांशभूतविष्णुवाक्यत्वेन पुरुषोत्तमवाक्यत्वाभावान्नोक्तार्थोपष्टम्भकत्वमिति शङ्क्यम्। तस्य भिन्नत्वेऽपि मूलपुरुषरूपनामलीलासाम्येनादोषात्। पराशरपुराणे—

'वैष्णवानि पुराणानि समस्तानि महामुने।
त्रिमूर्तीनां हरेर्नाम्ना मूर्त्या तस्य परं पदं प्रवदन्ति'॥

इति साम्यस्मरणादिति। उक्तेऽर्थेऽनुपपत्तिमुद्भाव्य परिहरन्ति यद्यपीत्यादि। व्युत्पादयन्ति तथाहीत्यादि। विपक्षोद्भावितयोरर्थयोराद्यं दूषयन्ति न हीत्यादि। कामवदिति सप्तम्यर्थे वतिः। अतिमहत्त्वादिति,

रश्मिः।

दहराधिकरणे स्फुटमुपपादितः। स्थापितमिवेति इवपदेनाक्षराधिकरणभाष्यविरोधः परिहृतः। दर्शनमात्रे परं विशेषात्। परप्राप्तिपदार्थ इति। अयं फलाध्याये स्फुटतर इति ततोवधेयः। शुद्धपुष्टीति एतन्मार्गद्वयं सहकार्यन्तराधिकरणे स्पष्टम्। शुद्धत्वं निवेदितात्मत्वं 'निवेदितात्मा विचिकीर्षितो मे' इतिवाक्यात्। ब्रह्मणो गौणत्वमिति 'सहयुक्तेऽप्रधाने' इति पाणिनिसूत्रात्। प्रकृते। त्रिमूर्तीनामित्यादि त्रिमूर्तीनां मध्ये हरेर्नाम्ना मूर्त्या च तस्य गुणावतारस्य परं पदं मुख्यं रूपं प्रवदन्तीत्यर्थः। अनुपपत्तिमिति श्नुरूपविकरणस्यात्मनेपदस्य च नानुपपत्तिमित्यर्थः। भाष्ये। कामानिति काम्यन्त इति कामा आनन्दादयस्तानित्यर्थः। भाष्ये। ब्रह्मणि संभवतीति ब्रह्मसाहित्यवदभिन्नान्कामानिति शाब्दबोधेन व्यापनरूपफलाश्रयत्वस्य विशेषणभूते ब्रह्मण्यपि

व्यापनं चात्र स्वाधीनीकरणमेव वाच्यम् । न हि कामानां तथात्वं स्वतः पुरुषार्थरूपम् । भोगशेषत्वात्तेषाम् । पूर्वोक्तपरप्राप्तिव्याकृतिरूपत्वाच्चास्य तथार्थोऽनुपपन्नः ।

तेन अश भोजन इति धातोरेवायं प्रयोगोऽर्थस्यालौकिकत्वज्ञापनायालौकिकः प्रयोगः कृतः । 'व्यत्ययो बहुलम्' इति सूत्रेण छन्दसि तद्विधानात्, श्नाप्रत्ययपरस्मैपदयोर्व्यत्ययेन श्नुप्रत्ययात्मनेपदे जाते इति भोगार्थक एवायं धातुः एवमेव, 'न तदश्नोति कंचन, न तदश्नोति कश्चन' इत्यत्र प्रत्ययमात्रव्यत्ययेन प्रयोगोऽशधातोरेवेति ज्ञेयम् । अन्यथा सर्वव्यापकस्य ब्रह्मणस्तन्निषेधोऽनुपपन्नः स्यात् ।

भाष्यप्रकाशः ।

'एकः शुद्धोऽक्षरो नित्यः सर्वव्यापी तथा पुमान् ।
सोऽप्यंशः सर्वभूतस्य मैत्रेय परमात्मनः' ॥

इतिवाक्यादित्यर्थः । द्वितीयं दूषयन्ति व्यापनं चेत्यादि । संयोगरूपव्यापनस्यापुरुषार्थत्वाद् व्यापकात्मवादिमते तस्य स्वतःसिद्धत्वाच्च तद्विधानासंगत्यापत्तेरत्र कामस्वाधीनीकरणरूपं तद् वाच्यम् । तेन कामप्राप्तिरेव व्याकृता भवति, न परप्राप्तिरिति सोऽर्थोऽनुपपन्न इत्यर्थः । एतेनैव, ब्रह्मणा करणभूतेन सर्वान् कामान् सहाश्नुते युगपद् भुङ्क्त इति योजनासिद्धोऽर्थोपि निरस्तो बोध्यः । भोगस्य सुखसाक्षात्कारातिरिक्तोदासीनज्ञानात्मकोऽर्थस्तु पूर्वमेव निरस्तः स चासंगत इत्यादिना । तेनोक्तैव योजना । अयमेव चार्थ इति निश्चयः । सिद्धमाहुः तेनेत्यादि । जाते इति प्रथमाद्विवचनम् । श्रुत्यन्तरेप्ययमेवार्थ इत्याहुः एवमित्यादि । तथाच तत्राप्यस्थूलादिलक्षणं ब्रह्म कमपि न भुङ्क्ते, कोपि ब्रह्म न भुङ्क्ते इत्येवार्थो वक्तव्यः । सकलप्रापश्चिकधर्मनिषेधे प्रापश्चिकभोगनिषेधकथनस्यापि युक्तत्वादित्यर्थः । एवं परप्राप्तिपदार्थे भोगरूपे व्याख्याते भोगलिङ्गात् परस्य सोपाधिकत्वं ब्रह्मवित्पदस्य सकामोपासकपरत्वं चापाद्य

रश्मिः ।

सत्त्वेन कर्मत्वं ज्ञेयम् । प्रकृते । इत्यर्थ इति श्रुतिरपि 'यतो वाचो निवर्तन्ते' इति बृहत्त्वाद्बृंहणत्वाच्च ब्रह्मेति च । तथा च कामप्रदेशानां कर्मत्वप्राप्त्या कामानां कर्मत्वानुपपत्त्या लक्षणापत्तिरिति भावः । संयोगरूपेत्यादि । सिद्धान्त इति शेषः । सर्वदा सत्त्वेनापुरुषार्थत्वादित्यर्थः । अन्यसंमतिमाहुः व्यापकेति । भास्कराचार्यमते । स्वत इति द्रव्ययोः संयोगः प्रसिद्धः । अत्रेत्यादि द्वितीयव्याख्याने ब्रह्मणः कामविशेषणत्वाभावेन केवलकामस्वाधीनीकरणरूपमित्यर्थः । 'वशे कुर्वन्ति मां भक्त्या' इति वाक्यात् । अत एव भाष्य एवकारः । अनुपपन्न इति 'अकाम आत्मकाम आप्तकामः' इति श्रुतेः अनुपपन्नः । अकामत्वेन कामकामाभावात् कामप्राप्तेरभावात् । एतेनैवेति ब्रह्मावृत्तिकामस्वाधीनीकरणस्य परप्राप्तित्वाभावेनैवेत्यर्थः । तेनोक्तेति एवकारद्वयं वचनानामुक्तानामनुसंधानात् । प्रथमेत्यादि तेन धर्मधर्मिभेदेनोभयविधमप्यानन्दं भक्तोनुभवतीति निष्कर्षः । भाष्य एवकारस्तु 'परोक्षवादो वेदोयम्' 'परोक्षं च मम प्रियम्' 'परोक्षप्रिया इव हि देवाः' इतिवाक्यैः फलांशे परोक्षवादौचित्यात् । इत्येवेति एवकारेण व्यापनरूपार्थव्यवच्छेदः क्रियते । व्यापननिषेधेऽपसिद्धान्तात् । भोगस्य साधितस्य निषेधायोगादन्यभोगं निषेधन्ति सकलेत्यादि । आपाद्येति उपनिषद्व्याख्या ता आपाद्येत्यर्थः

१. ब्रह्मरहित ।
३६ ब्र० सू० १०

ननु सकामोऽग्रोऽपासकस्तदुपास्यं च सगुणं ब्रह्म। द्वयोरपि कामोपभोगश्रवणात्। 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्युपक्रम्य, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्यादिनाऽन्यदर्शनादिनिषेधाद् ब्रह्मविदः कामोपभोगासंभवश्चेति चेन्मैवम्। तदेषाभ्युक्तेति वाक्येन पूर्ववाक्योक्तार्थनिरूपिकेयमृगित्युक्तत्वेन प्राकृतगुणसंबन्धस्य तत्र वक्तुमशक्यत्वात्। तथा सति ब्रह्मवित्प्राप्यत्वपरत्वयोरसंभवापत्तेः। नच वेद्यस्यागुणत्वमुत्तरस्य सगुणत्वमिति वाच्यम्। परत्वानुपपत्तेः। साधनशेषभूतस्यागुणत्वं तत्फलस्य सगुणत्वमित्यसंगततरं च। 'यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः' इति श्रीभागवतवाक्येन गुणातीतपुंसां वैकुण्ठदर्शनाधिकार उच्यते यत्र तत्र किमु वाच्यं तत्परदर्शने।

यच्चोक्तं ब्रह्मविदो द्वैतदर्शनानुपपत्त्या कामभोगासंभव इति। तत्राप्युच्यते। यत्र त्वस्य सर्वमात्मैवाभूदिति श्रुतिरखण्डब्रह्माद्वैतभाने ब्रह्मविदः प्रापञ्चिकभेदादर्शनं वदति, न तु प्रपञ्चातीतार्थदर्शनं बोधयति निषेधति वा। पुरुषोत्तमस्वरूपं तु यावत्स्वधर्मविशिष्टं प्रपञ्चातीतमेवेति तद्दर्शनादौ किमायातम्। 'पुरुष एवेद९ सर्वं यद् भूतं यच्च भाव्यम्' इत्यनेन ब्रह्मात्मकत्वं प्रपञ्चस्योक्त्वैतदपि तस्य विभूतिरूपं पुरुषस्त्वितो महानित्याह, 'एतावानस्य महिमा

भाष्यप्रकाशः।

चोदयति ननु सकाम इत्यादि। तथाच वृथा पूर्वोक्ता चिन्तेति चोद्याशयः। तत्र समादधते मैवमित्यादि। तत्र हेतुमाहुः तदेषेत्यादि दर्शन इत्यन्तम्। एवं पूर्वदूषणं परिहृत्य द्वितीयं परिहर्तुमनुवदन्ति यच्चेत्यादि। समादधते तत्रापीत्यादि। किमायातमिति श्रुत्यविरोधात् किं दूषणमायातं, न किमपीत्यर्थः। ननु धर्मविशिष्टस्य पुरुषोत्तमस्य प्रपञ्चातीतत्वे किं मानमित्याकाङ्क्षायां तदुपपादयन्ति पुरुष एवेत्यादि। तथाचोक्तश्रुत्या प्रपञ्चाज्ज्यायस्त्वकथनेन तदतीतत्वमेव बोध्यतेतस्तथेत्यर्थः। एवं चोद्यनिराकरणेन पूर्वोक्तचिन्तायाः सार्थकत्वाय

रश्मिः।

दर्शन इत्यन्तमिति। आत्मबोधोपनिषद्यप्ययमर्थोऽनुभूयते 'ॐ नमो नारायणाय' इति मन्त्रोपासको 'वैकुण्ठं भगवल्लोकं गमिष्यति' इत्युक्त्वा 'अथ यदिदम्' इत्यादिनोपासनमुक्त्वा 'अस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानास्थायामृतः समभवत्समभवत् यत्र ज्योतिरजस्रं यस्मिँल्लोके स्वर्हितं तस्मिन्मां धेहि पवमानासृजे लोकेऽक्षिते अमृते लोकेऽक्षिते अमृतत्वं गच्छत्यमृतत्वं गच्छत्यमृतत्वं गच्छत्यों नमः' इति। अत इति प्रपञ्चातीतत्वान्निर्गुणस्य वस्तुनोऽभावाच्च 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुतेरनन्ताः पराः सर्वोत्कृष्टाः आनन्दरूपास्ताश्च स्वाभाविक्यो

अतो ज्यायांश्च पूरुषः' इति श्रुतिरतो न किंचिदनुपपन्नम् । एवं सति ब्रह्मविदः परप्राप्तेः पूर्वदशा तत् केनेत्यादिनोच्यते, उत्तरदशा तु सोऽश्नुत इत्यनेनोच्यत इति सर्वं सुस्थम् । छान्दोग्येऽपि, 'यत्र नान्यत् पश्यति' इत्यादिना भूमस्वरूपमुक्त्वा, 'आत्मैवेद९ सर्वम्' इत्यन्तेन तद्विभावमुक्त्वोच्यते । 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति' इति । एतच्च, 'लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि' इत्यधिकरणे प्रपञ्चयिष्यते ।

भाष्यप्रकाशः ।

सिद्धमाहुः एवं सतीत्यादि । ननु शाखाभेदेन पूर्वोत्तरदशावैपरीत्यस्यापि शक्यवचनत्वान्नेदं सुस्थमिति शङ्कायामाहुः छान्दोग्येपीत्यादि । तद्विभावमिति उत्तरदशारूपसर्वात्मभावस्योद्दीपकमखण्डब्रह्मभानरूपं विभावम् । तथाचात्राऽखण्डब्रह्मभानात्मरतिक्रीडादीनां पूर्वोत्तरभावस्य स्पष्टत्वान्न पूर्वोक्तस्य सुस्थत्वाभावः शङ्कितुं शक्य इत्यर्थः । नन्वेवं चेच्छान्दोग्यवाक्यमपि सम्यग् व्युत्पाद्यमित्यत आहुः एतच्चेत्यादि । एतदिति छान्दोग्यवाक्यम् ।

एवमनेन ग्रन्थेन श्रुतौ मुख्यतया फलमेव निरूप्यत इत्युपगम्य श्रुतिर्व्याख्याता । व्याख्येयवाक्ये ज्ञानस्य ज्ञातृविशेषणतया प्रवेशेनाऽमुख्यत्वात् । तथापि तद्व्याख्यानभूतायामृचि साधनस्य पृथङ्निरूपणाद् व्याख्यानस्य विशेषप्रतिपत्तिहेतुत्वात् तामनुसृत्य पूर्वोक्तमर्थं द्रढ

रश्मिः ।

न त्वागन्तुक्यः ज्ञानं बलं भक्तिर्ब्रह्मवशीकारत्वात् क्रियाश्च विविधा इत्यत इत्यर्थः । शाखाभेदेनेति उत्सन्नप्रच्छन्नशाखाभेदेनेत्यर्थः । आहुरिति सकलश्रुतिसंमतोयमर्थ इत्याहुरित्यर्थः । तद्विभावमिति तद्विभावमिति द्वितीयः पाठः । भक्तेः रसत्वादाहुः उत्तरेत्यादि । उत्तरदशया रूप्यते सम्यगभिव्यक्तो निरूप्यते इत्युत्तरदशारूपः उत्तरदशारूपश्चासौ सर्वात्मभावः तस्येत्यर्थः । यद्यपि पूर्वदशायामपि सर्वात्मभावस्तथापि न सम्यज् ज्ञात इति विशेषणमुत्तरदशारूपेति । अयं भूमेति भूमालम्बनविभावः उद्दीपकं भूमचेष्टा सा चाखण्डब्रह्मज्ञानरूपं 'सा सा सा सा जगति सकले कोयमद्वैतवादः' इति कामुकवद्ब्रह्माद्वैतवादः इति द्वितीयं विभावं कामुकदृष्टान्तः सदानन्दस्य जगज्जन्मादिकर्त्री शक्तिस्तत्संबन्धि जगत् स्त्रीप्रायमिति । ब्राह्मणस्यापि तथात्वात् भूम्नोरभेदेन निरूपणम् । 'स्वयमेवात्मनात्मानम्' इतिवाक्यात् । परप्राप्तिविवरणात् तादृशसाधनफले एकीकृत्याहुः तथाचेति 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति' इति श्रुतौ एवंशब्देन 'स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणत स उत्तरतः स एवेद९ सर्वम्' इत्यादिश्रुत्युक्तं परामृष्टत्वादखण्डब्रह्मभानमात्मरत्यादिकं स्पष्टम् । पूर्वोत्तरेति अखण्डब्रह्मभानस्यात्मरत्यादीनां च पूर्वोत्तरभावस्येत्यर्थः । फलमेवेति गुहायां निहितं वेदेति पुरुषोत्तमविषयकज्ञानवदुक्त्या वेदनस्य फलान्तरगतत्वात्साधनफले एकीकृत्य फलमेव निरूप्यत इत्यर्थः । एतेन परप्राप्तिपदार्थ उक्तो भवति इति भाष्यादेवकारः । व्याख्येयेति 'ब्रह्मविदाप्नोति परम्' इत्यस्मिन् । ज्ञात्रित्यादि विदित्यस्य ज्ञानकर्ताश्रय इत्यर्थात्तथेत्यर्थः । पृथगिति एकतिङ् वाक्यमिति तथा । ल्यब्लोपे पञ्चमी । पृथङ्निरूपणमुपलभ्येत्यर्थः । तामित्यादि व्याख्यानर्चं प्रतिज्ञाहानिभागत्यागलक्षणे परिहर्तुमनुसृत्य । पूर्वोक्तमव्यवहितपूर्वोक्तमर्थम् । द्रढयितुमिति अव्यवहितपूर्वव्याख्याने पर-

अथवा तदेषाऽभ्युक्तेति वाक्येन पूर्ववाक्योक्तब्रह्मनिरूपिकेयमृगित्युच्यते। तत्र साधनफले निरूपिते इति ऋच्यपि ते एव निरूप्येते। तथाहि। आनन्दस्य फलात्मकत्वेन साधनशेषभूते ब्रह्मणि तमनुक्त्वा, यो वेदेत्यन्तयर्चा, 'ब्रह्मवित्' इत्येतावतो वाक्यस्य विवरणं क्रियते। एतेन फलासौ स्वरूपयोग्यतासंपत्तिरुक्ता। तत उक्तरीत्या भगवद्वरणेन भक्तिलाभे गुहायामाविर्भूतं यत् परमं व्योम, तस्मिन्निहितः पुरुषोत्तम एवेति। तं निहितमिति तृतीयार्थे द्वितीया। तथाच तत्र निहितेन ब्रह्मणेत्यग्रे पूर्ववत्।

अथ परमफलत्वान्निरवध्यानन्दात्मकत्वमन्तरङ्गेभ्योऽप्यन्तरङ्गत्वं स्वस्मिन् ज्ञापयितुं सर्वस्य सर्वरूपत्वेन सर्वाधिदैविकरूपत्वमपि ज्ञापयितुमाधिभौतिका-

---

भाष्यप्रकाशः।

पूर्ववर्णकोक्तव्याख्यानमेवानुसरन्तः पक्षान्तरमाहुः अथवेत्यादि। पूर्ववदित्यन्तम्। एवं चोक्त-रीत्येत्यस्य ब्रह्मणेत्यादिनाऽन्वयः। तथाच ब्रह्मणा सह तदात्मकानेव कामानश्नुत इत्यर्थः। यत्तु, न ह्यन्यज्ञानेनान्यप्राप्तिर्भवतीति परैर्दूषणमुक्तम्। तदसंगतम्। 'य एवं वेद प्रतितिष्ठति' इत्यादि-श्रुतिविरोधात्। यच्च परिच्छिन्नत्वेऽन्यत्वे च प्राप्तिर्नापरिच्छिन्नत्वेऽनन्यत्व इति। तदपि तथा। इच्छयाविर्भावतिरोभावाभ्यामेवोपपत्तेः। अनन्यत्वं तु सुवर्णशकलन्यायेन ब्रह्मणः सकाशाज्जीवस्य, न तु जीवस्य सकाशाद् ब्रह्मण इति तस्यापि प्राप्तिप्रतिबन्धकत्वाभावादिति। तेन ज्ञानमपी-च्छयैवेति न कोऽपि दोषः। एवमृक्तात्पर्यमुक्त्वाधिदैविकवादमाश्रित्य सृष्ट्यादिनिरूपक-ग्रन्थस्य तात्पर्यमुपयोगं चाहुः अथेत्यादिना। सर्वस्य सर्वरूपत्वेनेत्यादि 'प्राणस्य प्राण-

रश्मिः।

मन्योन्याविर्भावे भक्तिरूपं साधनं नोक्तम्। पुरुषोत्तमस्य साधनकोटिनिवेशश्चेत्यदढं पूर्वोक्तं प्रसि-द्ध्या पुराणस्य द्रढयितुमित्यर्थः। एवेति गुणविधिवद्वर्तमानत्वाद्व्याख्यान्तरव्यवच्छेदक एवकारः। एवं चेति अस्यार्थस्य पुराणोपष्टम्भस्य पक्षान्तरत्वे पूर्वार्थसदृशत्वे चेत्यर्थः। इत्यादिनेति इत्या-दिनान्वय इत्यर्थः। यथाश्रुतान्वये बाधकाभावात्। तथा चेति ब्रह्मणा पुरुषोत्तमाभेदे सति। तदात्मकान् पुरुषोत्तमात्मकान्। एवकारेणाक्षरमात्रकामव्यवच्छेदः। अत्राक्षरस्याविपश्चित्त्वमङ्गी-कृतम्। अस्थूलादिवाक्येषु पर्युदासार्थकनञाश्रयणात्। परैरिति व्याख्यातृभिः। य एव-मिति 'सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता' इति पूर्वमुक्तत्वात् विद्याज्ञानेन प्रतिष्ठा-प्राप्तिश्रावणेन तद्विरोधादित्यर्थः। किंचाक्षरस्य पुरुषोत्तमाभेदपक्षेन्यत्वाभावादेव नेयमाशङ्केति ज्ञेयम्। अपरिच्छिन्नप्राप्तिप्रकारमाहुः इच्छयेति। भक्तेच्छयेत्यर्थः। कदाचित्स्वेच्छयापीति सामा-न्योक्तिः। 'यद्यद्धिया' इति वाक्याद् 'यमेवैष वृणुते तेन लभ्यः' इति श्रुतेश्च। अनन्यस्य प्राप्तिप्रकारमाहुः अनन्यत्वमित्यादि। तस्यापीति भेदाभेदस्यापि किं त्वनन्यत्वमात्रस्य प्रतिबन्धकत्वात्। अपिशब्देनानन्यत्वस्यापि। 'अन्तरा भूतग्रामवत्स्वात्मनः' इति सूत्रात्। इच्छयैवेति 'दिव्यं ददामि ते चक्षुः पश्य मे रूपमैश्वरम्' इति वाक्यात् दानशक्तेरपीच्छाशक्त्यधीनत्वात्। आधिदैविकेति आनन्दमययोर्वादम्। पक्षान्तरभाष्ये निरूप्येते इति पुराणोपबृंहिते अपि भक्तिमार्गीयत्वा-याक्षरव्यावृत्त्या निरूप्येते। स्वरूपेति अक्षरब्रह्मणेऽक्षरज्ञानाभावे मुख्यफलाभावोक्ते मुख्यफले

---

१. प्रणितानन्दस्य।

दिरूपेणाविर्भवितुं भगवानाकाशादिरूपेणाविर्भूतोऽत एव भवन आकाशस्यैव कर्तृत्वमुच्यते । अग्रेऽन्नमयादीनि चत्वारि रूपाणि पूर्वं निरूपितान्युत्तरोत्तरमन्तरङ्गभूतानि । अन्नरसमयशरीरभूतात् प्राणमयस्तस्मान्मनोमयस्तस्माद् विज्ञानमयः । कश्चित्त्वेतानि रूपाणि विकारात्मकत्वात् प्राकृतान्येवैतेभ्योऽप्यन्तरङ्गो विमुक्ताविद्यो जीव एवानन्दमय उच्यत इत्याह । स प्रतिवक्तव्यः ।

भाष्यप्रकाशः ।

मुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रम्' इति श्रुत्यनुसारेणात्राप्यन्नमयस्यान्नमयः प्राणमयस्य प्राणमय इत्येवमानन्दमयमात्मा मे शुद्ध्यन्तामिति तैत्तिरीयश्रुत्यन्तरे शोध्यत्वज्ञापनेन, 'आनन्दमानन्दमयोऽवसाने' इति स्मृतौ च क्रममुक्तिप्रकरणेन कारणशरीरनिविष्टविमुक्ताविद्यजीवयोरानन्दमयत्वकथनात् तयोरपि य आधिदैविकस्तमानन्दामयमत्र ज्ञापयितुमित्यर्थः । **कर्तृत्वमुच्यत** इति तेनात्र नाकाशादीनां प्राकृतत्वं, किंतु विभूतिरूपत्वमेवेत्यर्थः ।

अत्यन्तरङ्गत्वं विशदयन्ति **अग्रे** इत्यादि । अन्योऽन्तर आत्मेति सर्वत्र कथनात् तथेत्यर्थः । अत्र मायावादी मयटो विकारार्थकत्वमङ्गीकृत्य सूत्राण्यन्यथा नीत्वा आनन्दमयमपि जीवं मन्यते । तन्मतमनूद्य परिहरन्ति **कश्चिदित्यादि । स प्रतिवक्तव्य** इत्यादि । तत्र मयटः संदिग्धार्थ-

रश्मिः ।

स्वरूपयोग्यताऽक्षरज्ञानरूपा तस्याः संपत्तिरुक्तेत्यर्थः । ततोऽविद्यानिवृत्त्या प्राकृतधर्मराहित्येन शुद्धसत्त्वसंपादनेन पुरुषोत्तमप्राप्तौ स्वरूपयोग्यता संपाद्यते । यत आधिदैविकशुद्धसत्त्वे चित्ते भक्तिर्भवति पुरुषोत्तमप्राप्तिसाधनम् । अत्र भक्तिः पुष्टिरूपेत्याहुः **भगवद्रूपेणेत्यादि । आविर्भूत**मिति काय आकाशशरीरस्य ब्रह्मणो यत्प्रसिद्धं परमं शरीरं व्योम तस्मिन्निहित इत्यर्थः । सूच्यार्थोपि नितरां हितः स्निग्धः स्नेहभक्तिविषय इति । **पुरुषोत्तम एवे**ति 'आकाशशरीरं ब्रह्म' इति श्रुतेर्ब्रह्म पुरुषोत्तमस्तल्लिङ्गात् । न त्वक्षरमतोक्षरयोगव्यवच्छेदक एवकारः । **द्वितीये**ति उक्तलिङ्गाद्ब्रह्मणेत्यनेनान्वयाय 'छन्दसि बहुलम्' इति सूत्रेण बाहुलकाद्द्वितीया । **ब्रह्मणे**ति पुरुषोत्तमेन न तु सूर्येणाधिकारिणा विपश्चिन्मात्रेण 'सूर्यो विपश्चिन्मनसा पुनातु' इति श्रुतेः विपश्चित्पदं न सूर्यव्यावर्तकं विशेषणमिति पक्षान्तरं वा । तथाच विपश्चित्पदं प्रस्थानरत्नोक्तरीत्या पुरुषोत्तमे यौगिकं सूर्ये रूढमिति ज्ञेयम् । **प्रकृते । सृष्ट्यादी**ति प्रपाठकद्वय इत्यर्थः । **चे**ति आनन्दमयाधिकरणाभासोक्तसर्वोपि प्रपाठक आरब्ध इति भाष्यीयं स्फुटमित्यनुक्तसमुच्चये चकारः । **भाष्ये । स्वस्मिन्नि**ति । आत्मनि आनन्दमये । **प्रकृते । स्मृतावि**ति इयं द्वितीयस्कन्धे द्वितीयाध्यायेस्ति । **कारणेत्यादि** धर्मादिरयं शब्दः 'लघ्वक्षरं पूर्वम्' इति सूत्रेण शरीरस्य लघ्वक्षरस्य पूर्वप्रयोगप्राप्तेः । तेन कारणं च शरीरं च कारणशरीरे इति द्वन्द्वः । तत्र निविष्टयोर्मुक्ताऽविद्ययोः जीवयोः मुक्तेः पूर्वमाविद्यत्वं जीवस्यानन्दप्रवेशे विमुक्तत्वमिति द्विवचनम् । आनन्दमयकोशात्मकं कारणशरीरं प्राणमयाद्यात्मकं लिङ्गम् । अन्नमयं स्थूलमिति । एवं चानन्दमयमात्मेत्यादिश्रुतौ कारणशरीरनिविष्टः आनन्दमानन्दमय इत्यत्र विमुक्ताविद्य इत्यर्थः । **ज्ञापयितु**मिति अपिशब्देनानन्दं ज्ञापयितुं प्रस्तुतम् । **तेने**त्यादि 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यत्र क्तस्य कर्त्रर्थकत्वाद्विभूतिरूपत्वात् भगवद्भवन आकाशस्यैव **कर्तृत्वेने**त्यर्थः । आत्मन इति पञ्चम्युक्तं समवायित्वं त्वात्मनोऽक्षुण्णमेव अभिन्ननिमित्तोपादानत्वमक्षररूपाकाशाभिन्नत्वपक्षेणादृश्यत्वाधिकरणात् । **जीवं मन्यत** इति मुख्यमेवात्मानमुप-

अग्रिमप्रपाठके भृगुणा अधीहि भगवो ब्रह्मेति पृष्टो वरुणस्तदोक्तमाधिकाराभावात् स्वयं ब्रह्मस्वरूपमनुक्त्वा, तपसाऽधिकारातिशयक्रमेण स्वयमेव ज्ञास्यतीति तदेव साधनं सर्वत्रोपदिष्टवान् । 'तपसा ब्रह्म विजिज्ञासस्व' इति । ब्रह्मातिरिक्तेन साधनेन न तज्ज्ञातुं शक्यमिति ज्ञापनाय, तपो ब्रह्मेति सर्वत्रोक्तवान् । तथाच तपसा साधनेन ब्रह्मत्वेन ज्ञातानि रूपाणि प्राकृतानीति विचारकेण न वक्तुं शक्यमिति । तर्हि पुनर्ब्रह्मविषयकप्रश्नसाधनोपदेशतत्करणपूर्वातिरिक्तब्रह्मज्ञानानां परंपरा नोपपद्यते इति चेत् । मैवम् । भगवतो हि विभूतिरूपाण्यनन्तानि । तत्र येन रूपेण यत्कार्यं करोति तेन रूपेण समर्थोऽपि तदतिरिक्तं न करोति । तथैव तल्लीला यतः ।

तथाचान्नमयादिरूपैः क्षुद्राण्येव फलानि ददाति । हीनाधिकारिणां तावतैवाकाङ्क्षानिवृत्तिर्भवति । एवं सति यादृशेनाधिकारेणान्नमयस्वरूपज्ञानं भवति तादृशे तस्मिन् संपन्ने तज्ज्ञानमपि तथा । एवमेवोत्तरत्रापि । तथाचाकाशादिरूपमाधिभौतिकस्वरूपमुक्त्वाऽऽध्यात्मिकं तत् पुरुषरूपं वदन्ती पक्षि-

---

भाष्यप्रकाशः ।

कत्वादनिर्णायकत्वेन श्रुत्यन्तरादेव निर्णय उचित इत्याशयेनाहुः अग्रिमेत्यादि । तर्हीति तेषां ब्रह्मरूपत्वे । यत इति 'सोऽकामयत, बहु स्यां प्रजायेय', 'तस्मादेकाकी न रमते', 'स हैतावानास' इत्यादिष्वेकस्यैव बहुत्वोच्चनीचभावलीलानामुक्तत्वादित्यर्थः ।

तज्ज्ञानमपि तथेति तज्ज्ञानमपि तदुक्तफलदमित्यर्थः । एवं विभूतिरूपज्ञानफलमुक्त्वानन्दमयस्याधिदैविकत्वं बोधयितुं पूर्वोक्तं स्मारयन्ति तथाचेत्यादि । आकाशादिरूपमाधिभौतिकं स्वरूपं तस्माद्वेत्यारभ्यान्नात् पुरुष इत्यन्तेनोक्त्वा आध्यात्मिकमन्नमयादिपुरुषरूपं वदन्ती श्रुतिस्तस्येदमेव शिर इत्यादिना पक्षिरूपमाहेत्यर्थः । ननु तस्येदमेवेतीदमा प्रत्यक्षविषयस्यैव शिरआदेः परामर्शात् प्रत्यक्षविषयस्यैव पक्षित्वं कल्पनयोपदिश्यत

रश्मिः ।

दिदिक्षु शास्त्रं लोकबुद्धिमनुसरदन्नमयशरीरमनात्मानमत्यन्तमूढानामात्मत्वेन प्रसिद्धमनूद्य मूषानिषक्तद्रुतताम्रादिप्रतिमावत्ततोन्तरं ततोन्तरमित्येवं पूर्वेण समानमुत्तरमनात्मानमात्मेति ग्राहयत् प्रतिपत्तिसौकर्यापेक्षया सर्वान्तरमुख्यमानन्दमयमात्मानमुपदिदेशेति क्लिष्टतरमिति भाष्येण मन्यत इत्यर्थः । ब्रह्मरूपत्व इति ब्रह्मरूपत्वाधिकरणे काले । भाष्ये । पुनर्ब्रह्मविषयकेत्यादि पुनर्ब्रह्मविषयकः प्रश्नस्तद्वाक्यं पूर्वोक्तमेव । साधनोपदेशस्तद्वाक्यमपि । अत एव भाष्ये सर्वत्रोक्तवानित्युक्तम् । तत्करणं तपःकरणम् । तद्वाक्यं 'स तपोतप्यत' इति । इदमपि सर्वत्रैकमेव । पूर्वातिरिक्तब्रह्मज्ञानं च तत्प्रतिपादकानि 'अन्नं ब्रह्मेति व्यजानात्, प्राणो ब्रह्मेति व्यजानात्, मनो ब्रह्मेति व्यजानाद्विज्ञानं ब्रह्मेति व्यजानात्' इत्येवमनेकानि वाक्यानि तेषां परंपरेत्यर्थः । प्रकृते । पूर्वोक्तमिति जन्माद्यधिकरणादावुक्तमित्यर्थः । वदन्तीति 'स वा एष पुरुषोऽन्नरस-

रूपमाह । यतस्तेनैव रूपेणाधिभौतिके रूपे आध्यात्मिकस्य पुरुषस्य प्रवेशः । तदुक्तं वाजसनेयिशाखायाम् । 'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः, पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्' इति । वस्तुतस्तु पुरुष एव । परं तु पुरःसंबन्धी सन् पक्षी भूत्वा पुरः शरीराण्याविशदित्यर्थः । प्राकृतीषु विविधासु पूर्वप्राकृतस्यैकविधस्य प्रवेशोऽनुचितो यद्यपि तथापि स्वप्रवेशं विना न किंचिद् भावीति गतिप्रतिबन्धकमुल्लङ्घ्यालौकिकया गत्या प्रविशामीति ज्ञापनाय पक्षिभवनम् । स हि तादृशः । अत एव द्विपदश्चतुष्पद इत्युक्तम् ।

आधिदैविक एक एवेति यः पूर्वस्येति सर्वत्रोक्तम् ।

भाष्यप्रकाशः ।

इति नात्राध्यात्मिकपुरुषोपदेश इत्याशङ्कायां तद्बोधनाय स्वोक्ते हेतुमाहुः यत इत्यादि । तथा च पक्षिरूपस्यातिरिक्तत्वाङ्गीकारे पक्षादिपदेषु लक्षणाभावादयमेव पक्षो ज्यायानित्यतस्तथेत्यर्थः । ननु तथापीदंपदे लक्षणागौरवं चाधिकमतो नेदं साधीय इत्यतः स्वोक्तमुपष्टम्भन्ति तदुक्तमित्यादि । तथाचातिरेकस्य श्रुत्युक्तत्वात् तेनेदंपदलक्षणाया अप्यदुष्टत्वादयमेव पक्षो ज्यायानित्यर्थः । एकविधस्येति अन्नमयेऽन्नमयरूपस्येत्येवमित्यर्थः । स हि तादृश इति पक्षी यतो गतिप्रतिबन्धकोल्लङ्घनेनेष्टदेशप्रवेशसमर्थ इत्यर्थः । प्रतिबन्धकज्ञापकमाहुः अत एवेत्यादि । तथाच पुरां विशेषणबलात् तथावसीयत इति नात्र कल्पनालेशोऽपीत्यर्थः । नन्वेवं पक्षिरूपस्यान्नमयादिषु पञ्चस्वपि सत्त्वादानन्दमये को विशेष इत्याकाङ्क्षायामाहुः आधिदैविक इत्यादि । एवमत्र श्रुत्यर्थे निर्णीते यः पूर्वपक्षोऽधि-

रश्मिः ।

मयः' इत्यनेन रसमये 'स वा एष पुरुषविध एव' इत्यनेनावशिष्टेष्वित्यर्थः । नात्राध्यात्मिकेति इदमा निर्दिष्टशिरस्कादिकपक्ष्यभेदान्नेत्यर्थः । आध्यात्मिकत्वं त्वाधिभौतिकसंबन्धात् पुरुषस्याधिदैविकस्य । पुरा आस पुरमुषति पुरि शेते इति त्रेधा व्युत्पन्नः पुरुषशब्दः । लक्षणाभावादिति लक्षणायाः पुरुषावयवेष्वभावादित्यर्थः । अतस्तथेति पक्षस्य ज्यायस्त्वात्पक्षिरूपस्याधिभौतिकस्याध्यात्मिकपुरुषातिरिक्तत्वम् । लक्षणागौरवं चेति परिदृश्यमानस्य पक्षिशिरआदेरपरिदृश्यमानेन पुरुषशिरआदिनाध्यात्मिकेन प्रतियोगितासंबन्धो लक्षणा । पुरुषमतिरिक्तं मत्वा ऐलेंवत्[1] पक्षिभवनकल्पने गौरवं चेत्यर्थः । आधिदैविकेत्यादि 'तस्यैष एव शारीर आत्मा यः पूर्वस्य' इत्यन्नमयादि प्रकृत्य प्रत्येकं कथनात् पूर्वं फलत्वेनोक्तमाधिदैविकानन्दमयत्वमेव विशेष इत्यर्थः । भाष्ये । एवमुक्तेरिति 'तस्यैष एव शारीर आत्मा यः पूर्वस्य' इत्युक्तेरित्यर्थः । न त्वेवमिति न तु वदतीत्यर्थः । आध्यात्मिकरूपाणामिति आध्यात्मिकाः 'देहप्राणमनोबुद्धिजीवा अन्नमयादयः पञ्च कोशाः' इति श्रुतिरत्रानुसंधेया । प्रकृते । पक्षिरूपस्येति आधिदैविकस्य । यद्वादमाश्रित्य ग्रन्थप्रवृत्तिः । तेनान्नमयादीनां पक्षित्वेपि न क्षतिः । आधिदैविक इत्यादीति । तथा चैकरूपत्वमेव विशेष इत्यर्थः । तथा चेति । यत्तु शंकराचार्याः न चात्रानन्दमयाभ्यासः श्रूयते 'यदेष आकाश आनन्दो न स्यात्' 'सैषानन्दस्य मीमांसा भवति' 'आनन्दं ब्रह्मणो विद्वान्' इत्यादिषु प्रातिपदिकार्थमात्रमेवाभ्यस्यते इति वदन्ति तन्न । 'तस्यैष एव शारीर आत्मा यः पूर्वस्य'

---

१. परिदृश्यमानवत् ।

नन्वानन्दमयेऽप्येवमुक्तेर्नायमपि परमकाष्ठापन्नरूपः, किं तु पूर्वोक्तेभ्योऽतिशयितधर्मवान् विभूतिरूप एव। नच शिरआदीनामानन्दरूपत्वेनैवोक्तेरयं परमात्मैवेति वाच्यम्। अन्नमये यथावयवानां तद्रूपत्वं तथाऽऽनन्दमयेऽपि तेषां तद्रूपत्वादन्यथा तस्यैष एव शारीर आत्मेति न वदेत्। शरीरं हि पूर्वोक्तं तत्संबन्धी हि शारीरस्तद्भिन्नः प्रतीयते। तथाच परब्रह्मत्वं स्वान्यात्मवत्त्वं च सर्वश्रुतिविरुद्धम्। नन्वेतदतिरिक्तं चेद् ब्रह्म स्यात् तदानन्दमयादन्योऽन्तर आत्मा ब्रह्मेत्यपि वदेत्। नत्वेवमतोऽयं पर एवेति चेन्न। आध्यात्मिकरूपाणामेवात्र निरूपणात् तेषां च पञ्चरूपत्वात् तावतामेव निरूपणमतोऽस्मादन्य एव पर इति प्राप्ते प्रतिवदति। **आनन्दमयोभ्यासात्।** आनन्दमयशब्दवाच्यः पर एव। कुतः। अभ्यासात्। तस्यैष एव शारीर आत्मा यः पूर्वस्येत्यन्नमयादिषु सर्वत्रैवात्मत्वेनानन्दमयस्यैव कथनात्। ननु न किंचिन्मानमत्र पश्यामः। किं च। आनन्दमयस्यैव सर्वत्रात्मत्वेन कथने आनन्दमयेऽपि, तस्यैष एवेत्यादि न वदेदयमेव पूर्वस्यात्मेति वदेदतो नानन्दमयः पर इति चेत्। उच्यते। न हीश्वरादन्यः सर्वेषामेक आत्मा भवितुमर्हति। तस्यानन्दरूपत्वं तु 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति। रसो वै सः रसꣳह्येवायं लब्ध्वाऽऽनन्दी भवति। को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्।

भाष्यप्रकाशः ।

करणावतारणायोत्तिष्ठति तमाहुः नन्वित्यादि। तथाच योग्यत्वात् प्रायपाठाच्चानन्दरूपत्वमवयवानामुच्यते, न तु परमात्मत्वादित्यर्थः। परमात्मत्वाभावे गमकमाह अन्यथेत्यादि। पूर्वोक्तमिति आनन्दमयम्। शेषं निगदव्याख्यातम्। एवं च मयटो विकारार्थत्वानङ्गीकारेऽप्यन्नमयादीनामिवानन्दमयस्याऽप्याध्यात्मिकविभूतिरूपेणापरब्रह्मत्वं प्रायपाठबलादङ्गीकर्तव्यं, न तु परब्रह्मत्वमिति पूर्वपक्षाशयः। अत्र सूत्रमुपन्यस्य समादधते **आनन्दमयोऽभ्यासादिति।** तस्येत्यादि तथाच वाक्याभ्यासात् तथेत्यर्थः। अयं प्रकारो गुणोपसंहारपादे, आत्मगृहीतिकार्याख्यानाधिकरणाभ्यां पुनः स्फुटीकर्तव्यः। अत्र चोदयति। नन्वित्यादि। अत्रेति उक्तवाक्येष्वानन्दमयग्रहणे। साधकतर्काभावमुक्त्वा बाधकतर्कमाह किंचेत्यादि। अनयोर्दूषणयोः पूर्वं निरस्यन्ति न हीत्यादि, मन्तव्यमित्यन्तम्। तथाच सर्वेभ्योऽन्तरात्मत्वमानन्दमयस्य निरूपयिष्यन्त्या यत् तस्यैष एव शारीर आत्मा यः पूर्वस्येति प्राणमयाद्यानन्दमयान्तस्य, एष एव शारीर आत्मा यः पूर्वस्यान्नमयस्येत्यन्नमयसंबन्धिन आत्मनः सर्वसंबन्ध्यात्मत्वमभ्यस्तम्। अन्नमयाभिमानी तु पूर्वं नोपक्रान्तः

रश्मिः ।

इत्यनेन वाक्येनान्नमयादिषु सर्वत्रानन्दमयस्यैवात्मत्वेनाभ्यासादित्यर्थः। **भाष्ये। आनन्दमयस्यैवेत्येवकारेण** 'असन्नेव सः' इत्यादिशंकरपादोक्तपुच्छाभ्यासो निराकृतः। व्याख्येयविरोधस्य तत्रातिस्फुटत्वात्। **प्रकृते। तथेति** आनन्दमयत्वमित्यर्थः। **स्फुटीति** तेन साष्टसूत्रसार्धाध्याय एतस्य शेष इति शेषशेषिभावः संगतिः सूचिता। **चोदयतीति** वाक्याभ्यासं स्फुटजिज्ञासुस्तथेत्यर्थः।

भाष्यप्रकाशः ।

किंतु जगत्कर्त्रैवोपक्रान्तस्तत्रापि सृष्टिकथनेन तदेतच्छब्दाभ्यां सन्निहितं विपश्चिद् ब्रह्मैव परामृश्यत इति तदेव पञ्चानामात्मेति बोध्यते । अत आत्मपदघटितवाक्याभ्यासस्तस्य सर्वात्मत्वं सर्वान्तराऽऽत्मत्वं वा बोधयंस्तत्र निरङ्कुशमीश्वरत्वं निगमयति । एतस्यैवानन्दस्येति श्रुत्यन्तरं चानन्दप्राचुर्यम् । तच्च निरवधिसच्चिदंशापेक्षयेति प्रकृतत्वात् सिद्ध्यति । तथा रसो वै स इत्यादिश्रुत्यन्तरं चानन्दरूपताम् । एवं सर्वश्रुत्येकवाक्यत्वेऽभ्यस्यमानवाक्यगतस्तस्यैष इत्ययमेतच्छब्दः पूर्वोक्तमात्मानं परामृशन्नेतादृशं तं सर्वत्र ग्राहयतीति पूर्वोक्तश्रुत्यैकवाक्यतापन्नस्यास्यैव मानत्वान्न मानाभाव इत्यर्थः । एतेनैव बाधकतर्कोऽपि निरस्त एव । शारीरपदं तु शरीरसंबन्धित्वमात्रबोधकं, न त्वभिमानित्वबोधकम् । किंचाभिमानित्वपक्षेपि नाभिमानित्वं दोषः । सर्वात्मकत्वात् । अन्यस्यान्यस्मिन्नभिमानस्यैवाध्यासरूपत्वेन दोषत्वात् । अत एव पुरुषविधब्राह्मणे, ब्रह्म वा इदमग्र आसीदित्युपक्रान्तस्यात्मनो ब्रह्मत्वं निगमयित्वा तदात्मानमेवावेदहं ब्रह्मास्मीत्युच्यते । नच तस्यैष इति षष्ठ्या भेदनिर्देशान्नात्र तथेति वाच्यम् । राहोः शिर इतिवदभेदेऽपि

रश्मिः ।

जगत्कर्त्रेति 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति श्रुत्या स एवोपक्रान्त इत्यर्थः । ननु नेयमुपक्रमश्रुतिः किंतु 'ब्रह्मविदाप्नोति परम्' इत्यतः कथं जगत्कर्त्रैवोपक्रान्तः इति चेत्तत्राहुः **तत्रापीत्यादि** । जगत्कर्तृबोधकश्रुतावपीत्यर्थः । **बोध्यत** इति । तथा च तदेतच्छब्दाभ्यां परामर्शार्होऽस्योपक्रमस्तत्रेति नोक्तदोष इत्यर्थः । नन्वस्तु विपश्चिद् ब्रह्म पञ्चानामात्मा तथाप्यानन्दमात्राभ्यास इति कथमानन्दमयाभ्यास इत्याकाङ्क्षायां प्रत्ययार्थविशिष्टप्रातिपदिकार्थरूपत्वं तस्य मन्तव्यमित्यन्तभाष्यं विवृण्वन्तो व्युत्पादयन्ति **एतस्यैवे**त्यादि । निगमयतीति पूर्वेणान्वयः । **सिद्ध्यती**ति तेनानन्दमयस्य ब्रह्मत्वेंशतो दुःखसत्तां प्रापयतीति शांकरोक्तं प्रत्युक्तम् । भाष्ये तु विशिष्टं शुद्धान्नातिरिच्यत इति न्यायादानन्दानन्दमयावेकौ इति न दुःखसत्तावारणायान्यापेक्षा तथापि प्रकृतत्वादस्तु । **आनन्दरूपता**मिति निगमयतीति पूर्वेणान्वयः । **एतादृशं** तमिति प्रत्ययार्थविशिष्टप्रातिपदिकार्थं तमानन्दमयमित्यर्थः । **अस्यैवे**ति आनन्दमयपरामर्शकतदेतच्छब्दघटितश्रुतिवाक्यस्यैवेत्यर्थः । **न मानाभाव** इति । ननु न किंचिन्मानमत्र पश्यामः इत्युक्तो मानाभावो नेत्यर्थः । तेन 'यदेष आकाश आनन्दो न स्यात्' 'सैषानन्दस्य मीमांसा भवति' 'आनन्दं ब्रह्मणो विद्वान्' इत्यादिषु प्रातिपदिकार्थमात्राभ्यासान्नानन्दमयाभ्यासः श्रूयत इति शंकरभाष्योक्तं प्रत्युक्तम् । **एतेनैवे**ति 'तस्यैष एव शारीर आत्मा यः पूर्वस्य' इत्यत्र पूर्वोक्तात्मपरामर्शोपपादनेनैव पूर्वपक्षग्रन्थोक्तोन्यथा तस्यैष एवेत्यादिरूपो बाधकस्तर्क इत्यर्थः । नन्वस्त्वेवं तथापि शारीरपदं कथं संगच्छते इति चेत्तत्राहुः **शारीरपद**मिति । **न त्वभिमानित्वे**ति व्याकरणे तदर्थकतद्धिताभावादिति भावः । ननु संबन्धस्त्वभिमानरूप एवेति कथमेवमिति चेत्तत्राहुः **किंचाभीत्यादि** । **सर्वात्मकत्वा**दिति आनन्दमात्रकरपादमुखोदरादित्वेन देहेन्द्रियाद्यात्मकत्वादित्यर्थः । ब्रह्मण्यध्यासं वारयन्ति **अन्यस्येत्यादि** । अन्यस्य चैतन्यस्यान्यस्मिन् जडे देहादावित्यर्थः । **उच्यत इति** अभिमान उच्यत इत्यर्थः । पूर्वतन्त्ररीत्या तु **द्वन्द्वप्रयोगः** । 'आत्मैवेदमग्र आसीत्' 'ब्रह्मैवेदमग्र आसीत्' इति । **तथे**ति सर्वावयवरूपत्व-

एष ह्येवानन्दयाति' इत्यादिश्रुतिभिर्निर्णीयते। एवं सति तदेकवाक्यतायै प्रकृतोऽप्यानन्दमयशब्दस्तद्वाच्येवेति मन्तव्यम् । अन्यथानन्दमयादन्योऽन्तर आत्मेत्यपि वदेत् ।

ननूक्तमाध्यात्मिकानामेवात्र निरूपणादित्यादीति चेन्न । उक्तरीत्याधिदैविकस्यैवान्ते निरूपणात् । अत एव भार्गव्यां विद्यायामपि भृगोरन्नमयादिज्ञानानन्तरमपि पुनर्ब्रह्मजिज्ञासोक्ता, न त्वानन्दमयज्ञाने। न हि भृगोराध्यात्मिकज्ञानार्थं प्रवृत्तिः, किं तु ब्रह्मज्ञानार्थमेव। अधीहि भगवो ब्रह्मेति प्रश्नवचनात् ।

किंच, ब्रह्मविदाप्नोति परमित्युपक्रमादन्ते ज्ञेयानन्दगणनामुक्त्वा, 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इति वाक्यैर्ब्रह्मविदि पुरुष आदित्ये च तदेवाक्षरं ब्रह्म प्रतिष्ठितमिति तदानन्दोऽपि तथैवेति तयोरानन्दयोरैक्यम्। एवंरूपं ब्रह्मेति यो वेद तस्य क्रमेणान्नमयादिप्राप्तिमुक्त्वा अन्ते वदत्येतमानन्दमयमात्मानमुपसंक्रामतीति । एवं सत्युपक्रमे परप्राप्तेः फलत्वेनोक्तेरुपसंहारेऽपि तथैव भवितव्यत्वादानन्दमयप्राप्तेरेवान्ते फलत्वेनोक्तेस्तदुत्तरमन्यस्यानुक्तेरानन्दमय एव परः ।

भाष्यप्रकाशः ।

षष्ठीदर्शनात् । नन्वस्त्वेवं, तथाप्यानन्दमय एतत्कथनस्य किं प्रयोजनमित्याशङ्का तु, शरीरप्रवेशप्रयोजनेत्यादिनाऽनुपदमेव निवारणीया । तस्मान्न कोऽपि दोषः । उक्तसाधनाय विपक्षबाधनाय च तर्कमाहुः अन्यथेत्यादि । अत्र चोदयति नन्वित्यादि । तत्र समादधते नेत्यादि । उक्तरीत्येति सर्वात्मत्वादेरन्यत्रासंभवेन । एतमेवार्थं श्रुत्यन्तरेणोपष्टम्भन्ति अत एवेत्यादि । ननु भृगोर्ब्रह्मज्ञानार्थं प्रवृत्तिरिति सत्यं, परंतु तत्रानन्दत्वेन ब्रह्मज्ञानाज्जिज्ञासोपरतिर्न त्वानन्दमयत्वेन ज्ञानात् । अतो नानया श्रुत्या तदुपष्टम्भ इत्याकाङ्क्षायां प्रस्तुतप्रपाठकोपक्रमादिविचारेणापि तमर्थं साधयन्ति किंचेत्यादि पर इत्यन्तम् । तथाचास्य प्रपाठकस्य, ब्रह्मविदाप्नोति परमिति सूत्रितार्थविवरणरूपत्वात् फलविवरणमेवानन्दमये प्रपाठकस्य तात्पर्यं नियमयत् तस्य ब्रह्मत्वं गमयति । एवं भृगुप्रपाठके

रश्मिः ।

मित्यर्थः । तथा चाध्यासापत्तिरिति भावः । **षष्ठीदर्शना**दिति तथा शरीरस्यायं शारीर इत्यत्रापि षष्ठ्याऽभेदार्थकत्वेन 'आनन्दरूपममृतं यद्विभाति' इति श्रुतेः आनन्दात्मकशरीरभिन्न आत्मेत्यर्थादभेद एव संसर्गो न त्वध्यास इति बाधकस्तर्को निरस्त इत्यर्थः । **एतत्कथनस्ये**ति शारीर आत्मत्वकथनस्येत्यर्थः । **उक्ते**ति आनन्दानन्दमयाभेदसाधनाय । **विपक्षे**ति भाष्ये आध्यात्मिकरूपाणामेवेत्यादिनोक्तो विपक्षस्तस्य बाधनायेत्यर्थः । **अन्यत्रे**ति आध्यात्मिकाधिभौतिकयोरित्यर्थः । अत्र **भाष्य आधिदैविकस्यैवे**ति सर्वेषां पदार्थानां तत्तदाधिदैविकं तत्तदाकारमव्यापकतया भातीति विश्रुतम् । **आनन्दत्वेने**ति 'आनन्दो ब्रह्मेति व्यजानात्' इति श्रुतेरित्यर्थः । **सूचितार्थे**त्यादि । **अयमर्थः** । उपसंहारे 'आनन्दमयमात्मानमुपसंक्रामति' इति वचनादुपक्रमेप्याप्नोति परमित्यत्र परपदेनानन्दप्राचुर्यं सूच्यते । उत्कृष्टार्थत्वात् । अन्यथा तु नैकवाक्यतेति । **सूत्रितार्थे**ति पाठः । अयमपि क्वाचित्क इति विवृतः । सूत्रलक्षणाक्रान्तत्वाद्वा सूत्रितार्थेति पाठः ।

ननूपसंक्रमणं ह्यतिक्रमणमतो न तथेति चेत्। हन्तैवमतिक्रान्तशब्दार्थो त्वन्मतिर्भाति । यतः संक्रमणशब्दः प्राप्त्यर्थकः सर्वत्र श्रूयते । अत एव रवेर्मकरादिराशिप्राप्तौ तत्तत्संक्रमणमित्युच्यते । नचेयं न परममुक्तिः । अस्माल्लोकात् प्रेत्येति पूर्वमुक्तेः । अत एव पुरुषोत्तमानन्दानुभवे सत्यनुभवैकगम्योऽय-

भाष्यप्रकाशः ।

यद्यपि जिज्ञासोपरतिस्थले आनन्दमयपदाभावस्तथापि समाप्तौ 'एतमानन्दमयमात्मानमुपसंक्रम्य एतत् साम गायन्नास्ते' इति फलकथनेन द्वयोरपि प्रपाठकयोरैकार्थ्यावगमात् तस्याप्युपष्टम्भकत्वमव्याहतमित्यर्थः । अत्र वादी परमफलत्वाभावमाशङ्कते नन्वित्यादि । संक्रमः प्रतिसंक्रम इति पुराणप्रयोगात् तथेत्यर्थः । समादधते हन्तेत्यादि । उच्यत इति 'कार्मुकं तु परित्यज्य झषं संक्रमते रविः' इत्यादिवाक्येषूच्यते । ननु संक्रम एव प्राप्तिर्नतूपसंक्रमोऽपीति चेत् तथाप्युपोपसर्गेणातिक्रमोऽर्थः कथं लब्धव्यः । तर्हि किमर्थोऽयमुपसंक्रम इति चेत् भेदेन स्थित्वा भोगार्थ इत्यवधेहि । ऋचि तथैव सिद्धत्वेन तदुपपादकग्रन्थेऽपि तथैव सिद्धेरावश्यकत्वादिति । नन्वेवं भेदे सति नेयं परममुक्तिः, किं तु जीवन्मुक्तिरेवेयमिति चेत्तत्राहुः नचेत्यादि । तथाचैतच्छरीरत्यागकथनेनात्र जीवन्मुक्तेरशक्यवचनत्वात् परममुक्तिरेवात्रोच्यत इत्यर्थः । तर्हि देहान्तरे सिद्धिरेवास्तु । परममुक्तौ बाधकस्य भेदस्योक्तत्वादिति चेन्न । तथा सति करणग्रामसद्भावात् प्राणमयादिसत्त्वेन पुनस्तत्संक्रमोक्तिविरोधापत्तेः । तस्मादत्र परममुक्तिरेव विव्रियत इति हृदिकृत्यैतस्याः परममुक्तित्वसाधकं हेत्वन्तरमाहुः अत एवेत्यादि । अस्य परममुक्तित्वादेव पुरुषोत्तमानन्दानुभवे सति

रश्मिः ।

तस्यापीति भृगुप्रपाठकस्यापि । **वादीति** व्याख्याता । **आशङ्कत** इति पुच्छत्वेनोक्तं ब्रह्म प्रधानमित्यङ्गीकृत्य न त्वानन्दमयस्योपसंक्रमयितव्यस्यान्नमयादिवदब्रह्मत्वे सति नैवं विदुषो ब्रह्मप्राप्तिः फलं निर्दिष्टं भवेन्नैष दोषः । आनन्दमयोपसंक्रमणनिर्देशेनैव पुच्छप्रतिष्ठाभूतब्रह्मप्राप्तिफलस्य निर्दिष्टत्वादितिभाष्येणाशङ्कत इत्यर्थः । **कार्मुकं** धनुः । **झषं** मीनम् । **उच्यत** इति । तथा च पुराणेपि प्रतिसंक्रम उक्तो न त्वतिसंक्रम इति न तस्य विरोधः । प्रतिसंक्रमस्तु लयः । समीपार्थकोत्रोपेत्याशयेनाहुः **भेदेनेत्यादि** । अत्रार्थ एकवाक्यतां प्रमाणयन्ति **ऋचीत्यादि** । 'ब्रह्मविदाप्नोति परम्' इत्याद्यृचि । **जीवन्मुक्तिरिति** 'असक्तबुद्धिः सर्वत्र' इत्यादिवाक्योक्तोऽध्यासाभावो जीवन्मुक्तिः ।

'विद्ययाऽविद्यानाशे तु जीवो मुक्तो भविष्यति ।
देहेन्द्रियासवः सर्वे निरध्यस्ता भवन्ति हि ॥
तथापि न प्रलीयन्ते जीवन्मुक्तगताः स्फुटम् ।
आसन्यस्य हरेर्वापि सेवया देवभावतः ॥
इन्द्रियाणां तथा स्वस्य ब्रह्मभावाल्लयो भवेत् ।
आनन्दांशप्रकाशाद्धि ब्रह्मभावो भविष्यति' ॥

इति शास्त्रार्थात् । **तर्हीति** जीवन्मुक्त्यसंभवकाल इत्यर्थः । **तत्संक्रमोक्तीति** प्राणमयमुपसंक्रामतीति प्राणमयादिसंक्रमोक्तिविरोधापत्तिः । भेदस्तु सर्वात्मना लीनो भावनालीनो वर्तत एव । **तस्मादिति** ज्ञानाग्निना सर्वकर्मनाशात्तदनुजभक्त्या वेति कर्मजन्यशरीरस्य शङ्कितुमप्यशक्यत्वादेवेत्यर्थः । **पुरुषोत्तमेति** पुरा आस पुरि शेते इति व्युत्पत्तिद्वयं पुरमुपतीत्यधिष्ठान-

भाष्यप्रकाशः।

वरणैकहेतुकानुभवमात्रगम्योऽयमानन्दो, न मनोवाग्विषय इति ब्रह्मण आनन्दं ज्ञात्वा विद्वान् सन् कुतश्चन लोकवेदादिभ्योऽपि न बिभेतीति सर्वतो भयाभावमनेन श्लोकेनोक्तवतीति

रश्मिः।

व्युत्पत्तिः। पुरुषोत्तमो धर्मी स 'यद्यत्रिय' इति वाक्यानुगुणो भजनविषयः। तस्यानन्दो भजनानन्दः तस्यानुभवो हि सर्वात्मभावरूपसाधनेन 'पुरुषार्थोतः शब्दादिति बादरायणः' इति सूत्रात्। पुरुषोत्तमस्तु अग्निशिखेव त्रिष्वग्निषु हृदि वर्तते।

'विष्णुर्नाम महायोगी महामायो महत्तपाः।
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः'॥

इति योगतत्त्वोपनिषच्छ्रुतेः। स पुरुषोत्तमो 'यद्यद्धिया' इति वाक्यानुगुण इत्युक्तः। स्वात्मकसाधनलभ्यः।

'शुद्धस्फटिकसंकाशं किंचित् सूर्यमरीचिवत्।
लभते योगयुक्तात्मा पुरुषोत्तमतत्परः'॥

इति श्रुत्युक्तं तत्साधनम्। व्यानवायुः पूर्वार्धार्थः। अमृतबिन्दूपनिषदि तथोक्तः। तदन्वमृतबिन्दूक्तं साधनम्। तदा शून्याभावे सिद्धे ब्रह्मोपनिषदोऽशून्यभावनिश्चयः। तेन धर्मी पुरुषोत्तमः। तत्र भक्ता लक्ष्मीर्वर्तते पुरुषविधब्राह्मणात्। तया भक्त्या 'अचलत्वं चापेक्ष्य' इति सूत्रभाष्योक्तरीत्यात्मबोधोपनिषदुक्तस्वरूपलाभे शाब्देऽन्यस्मिन् वा। लभत इति। अमृतबिन्दूपनिषदुक्तप्रत्याहारप्रभृतिकयोगयुक्तात्मा निरोधानन्तरं मानसीसेवावान्। पुरुषोत्तमतत्पर इति। अत्र साधने पुरुषोत्तमयोगाध्यायोक्ते ऊर्ध्वमूलमधःशाखोश्वत्थः कालात्माश्वो बृहदारण्यकोक्तोप्सुयोनिर्नारायण इव वर्तमानः। शाखास्तु देवलोकभूलोकभुवर्लोकरूपाः। कर्मानुबन्धीनि मूलानि मनुष्यलोके तच्छेदनेन भगवद्धामाक्षरप्राप्तिः। ज्ञानकर्माभेदपक्षे पञ्चरात्रोक्ते। जीवांशोधिकारी। तेजोरूपं तेजोबिन्दूपनिषदि प्रोक्तम्। पश्चाच्चत्वारोर्थाः सर्वत्र प्रतिपाद्यन्ते इति ओजः। सोमो रसात्मकः। वैश्वानरोन्नपाचकः। सर्वहृत्स्थश्चतुर्थः। वेदान्तकृच्च क्षराक्षरपुरुषोत्तमाः सर्वभावश्च समष्टिः। सर्वात्मभावश्च। कृतकृत्यता फलम्। गुह्यतमत्वात्पुरुषोत्तमात्मकं साधनं गीतात्रयोदशाध्याये सर्वम्। अत्र तत्पर इत्यर्थः। तथा च गोपीचन्दनोपनिषदि श्रुतिः। ब्रह्म चिद्घनानन्दैकरूपपुरुषोत्तमरूपेण वसुदेवसद्मन्याविर्भविष्यतीति। अयं मध्यमः पक्षः। उत्तमस्तु स्वरुच्या निश्चित्य तत्परः। यथात्रैव भाष्ये अग्निशिखा पुरुषविधः 'यद्यद्धिया' इति वाक्यात् 'नाहं वेदैः' इति वाक्याच्च। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्' इति काठकाच्च 'त्रिषत्या ह वै देवाः' इति श्रुतेः ब्रह्मामृतात्मबोधोपनिषदः उदाहृतास्तदङ्गमन्याः। रामोत्तरतापिनीयेपि 'सोमृतत्वं च गच्छति सोमृतत्वं च गच्छति सोमृतत्वं च गच्छति' इति वारत्रयमुक्तं त्रिषत्यम्। भिन्नाभिन्नयोरानन्दयोरभिन्नमानन्दमुक्त्वा भिन्नानन्दमाहुः **वरणैकेत्यादि**। वरणैकहेतुको भक्त्याख्यः प्रियत्वानुभव इत्यर्थः। **अयमानन्द इति** उक्तपुरुषोत्तमानन्दभिन्नो भेदघटितत्वेन भक्तिमार्गीयानन्दः। **लोक** इति आदिना कालः। न कुतश्चनेत्युक्त्या लोकाद्भयाभावो यथा चोराद् बिभेतीत्यादिभयहेतवः। तेभ्यो विद्वानित्युक्त्या द्वितीयाभावान्न भयम्। इष्टनिवृत्त्यनिष्टप्राप्तिज्ञानजतापहेतुकं भयं भवति तदपि विद्वानित्युक्त्या 'एतꣳह वा व न तपति' इति तापाभावान्न

मानन्दो, न मनोवाग्विषय इति ज्ञात्वा लोकवेदकालादिभ्योऽपि न बिभेतीति, 'यतो वाचः' इति श्लोकेनोक्तवती । अन्यथा आनन्दे मनसोऽप्यगम्यत्वमुक्त्वा, विद्वानिति कथं वदेत् ।

एवं सति सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्यृचि यत् फलमुक्तं तदेवान्ते विवृतमिति ज्ञायते । अन्यथा अस्माल्लोकात् प्रेत्येत्युक्तत्वाद्देहाभावेन भयानुपस्थित्या तन्निषेधासंभवः कामभोगासंभवश्च । अत एव

भाष्यप्रकाशः ।

सर्वभयाभावः परममुक्तेर्लिङ्गमिति स एव तथात्वसाधक इत्यर्थः । विपक्षबाधकतर्कोक्तिमुखेन पुनर्हेत्वन्तरमाहुः अन्यथेत्यादि । अन्यथेति परममुक्तित्वाभावे । तथाच मनोवागविषयानन्दवेदनमपि परममुक्तेरेव लिङ्गमित्यर्थः । एवं हेतुत्रयेणास्याः परप्राप्तेः परममुक्तित्वसाधनेनेदं सिद्धम् । या ज्ञानमार्गिणां ब्रह्माभेदरूपा परममुक्तिः सा भक्तानां फलानुभवे स्वरूपयोग्यतासंपादकतयोपयुज्यते । तस्यां सत्यां भक्त्या तादात्म्येन फलानुभवात् । अतः सा पूर्वकक्षारूपेति । तदेतद् हृदिकृत्य सिद्धमाहुः एवं सतीत्यादि । एवं सतीति आनन्दमयप्राप्तेरेवं परममुक्तित्वे सति । विवृतमिति यतो वाच इति श्लोकेन विवृतम् । अस्य श्लोकस्यर्गुक्तफलांशविवरकत्वमृगंशस्य च यजुर्विवक्षितफलबोधकत्वमिति द्वयं निगमयितुं तद्विपरीतवादबाधकं तर्कमाहुः अन्यथा अस्मादित्यादि । तथाच यद्यस्यर्गंशविवरकत्वं न स्यात् तदोक्तरीत्या भयाभावेन भयनिषेधनमसंगतं स्यात् । यदि ऋगंशस्य विवक्षितफलबोधकत्वं न स्यात् तदा कामभोगोक्तिरप्यसंगता स्यादित्युभयमन्त्रवर्णादेवोभयं निगम्यत इत्यर्थः । अथैतत्साधकं हेत्वन्तरमाहुः अत एवेत्यादि । तथाच विवक्षितफलविवरकत्वादेव तथोक्तमित्यर्थः । एवमेतस्याः श्रुतेः फलांश-

रश्मिः ।

तद्धेतुकं भयम् । 'न यत्र कालः' इतिवाक्यात् कालाभावान्न तद्धेतुकमपि भयम् । स एवेत्यादि सर्वभयाभावोपि परममुक्तित्वसाधकः । विपक्ष इत्यादि परममुक्तित्वाभावेन तावद्रूपव्यापनाभावपक्ष इत्यर्थः । न वदेदित्यन्यथाज्ञानरूपबाधकतर्कोक्त्युपायेनेत्यर्थः । हेत्वन्तरं परममुक्तित्वे । हेतुत्रयेणेति एतच्छरीरत्यागसर्वभयाभावमनोवागविषयानन्दवेदनरूपेणेत्यर्थः । ब्रह्माभेदेति कर्मादिजन्यचित्तशुद्ध्यनन्तरमक्षराभेदरूपेत्यर्थः 'आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकोटयः' इति शास्त्रार्थात् । न तु शाब्दापरोक्षरूपं ब्रह्म । तस्यामित्यादि योग्यतायां सत्याम् । सिद्धान्तमुक्तावलीटीकोक्तज्ञानिभक्तौ चेद्विशेषतोनुगृह्णाति तदा पुष्टिभक्तिं प्राप्नुतः । आदाविति ग्रन्थोक्तपुष्टिमर्यादाभक्तयेत्यर्थः । तादात्म्येति भेदसहिष्णुनाभेदेनेत्यर्थः । भक्तानां पुरुषोत्तमाभेदस्त्वन्तरायरूपस्तदानन्दानुभवे इति तं तत्र न संपादयति इति 'अन्तरा भूतग्रामवत्स्वात्मनः' इति सूत्रे वक्ष्यते । अक्षरेण तद्रूपजीवेन च पुरुषोत्तमाभेदरूपादाधेयभेदः स इवार्थ इति न परमतप्रवेशः अदृश्यत्वाधिकरणे स्पष्टः । चरणरूपाक्षरेण पुरुषोत्तमाभेदः पूर्वोक्तेनाक्षरेण 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतोक्तः पुरुषोत्तमेनाभेदः । जीवस्य तु भक्तत्वाद् दत्तो भेदोऽभेदस्तिरोहितः । पूर्वकक्षेति 'ब्रह्मभूतः प्रसन्नात्मा' इति गीतावाक्यात् । यजुर्विवक्षितेत्यादि ब्रह्मविदित्यादियजुषा विवक्षितधर्मधर्मिभेदेन द्विविधानन्दरूपफलेत्यर्थः । तथोक्तमिति आनन्द-

सामानाधिकरण्यमनुक्त्वा 'आनन्दं ब्रह्मणः' इत्युक्तम्। एतेन लौकिकं पूर्वदेहं त्यक्त्वा साक्षाद्भगवद्भजनोपयोगिनं भगवद्विभूत्यात्मकं संघातं प्राप्नोत्यादौ। तथाहि। देहेन्द्रियप्राणान्तःकरणजीवात्मको हि संघातः। तत्र स्थूलं शरीरमाद्यविभूतिरूपम्। द्वितीयं स्पष्टम्। तृतीयं सर्वेन्द्रियसंबन्धित्वेनेन्द्रियरूपत्वेन चान्तःकरणात्मकत्वेन चेन्द्रियान्तःकरणरूपम्। तुरीयं जीवतत्त्वात्मकम्। यत्र गुहायां

भाष्यप्रकाशः।

विवरकत्वमुपपाद्य तेन सिद्धं निगमयितुमाहुः एतेनेत्यारभ्य, अवगम्यत इत्यन्तम्। आद्यविभूतिरूपमिति अन्नमयविभूतिरूपम्। मनोमयविभूतिरूपस्येन्द्रियान्तःकरणरूपत्वे हेतूनाहुः तृतीयमित्यादि। अत्र मनसः सर्वेन्द्रियनियामकत्वान्मनोमयस्य सर्वेन्द्रियसंबन्धित्वम्। शेषं स्फुटम्। तथाच कार्यद्वारा मनसैव सर्वेन्द्रियाण्याक्षिप्यन्त इति तथेत्यर्थः। जीवस्य विद्यमानत्वाद्विज्ञानमयविभूतिर्बुद्धिरूपा मनसः पृथग् भविष्यतीत्याशङ्कावारणाय तत्स्वरूपमाहुः तुरीयमित्यादि। जीवतत्त्वात्मकमिति जीवस्य यत् तत्त्वं स्वरूपसहकारियोग्यतासंपत्तिस्तदात्मकमित्यर्थः। अत्र गमकं यत्रेत्यादिना प्रोक्तं ज्ञेयम्। एवं

रश्मिः।

ब्रह्मणोः सामानाधिकरण्येनोक्तमित्यर्थः। एतेनेत्यारभ्येत्यादि। अत्र भाष्ये। संघातमिति यद्बृहदारण्यके शारीरब्राह्मणे ब्राह्ममित्युक्तं तत्। साक्षाद्भगवद्भजनेति विशेषणेन तस्य फलत्वात्। विवृण्वन्ति स्म अत्रेत्यादि। अत्र प्रकृते संघाते मनस उत ये मनो विदुरिति श्रुतेराधिदैविकरूपमनस इत्यर्थः। 'मनसो वशे सर्वमिदं बभूव' इति वाक्यात् सर्वेन्द्रियाणि प्राणाः इन्द्रियाणि प्राणाः अन्तःकरणं स्थानं तेर्थाः सर्वेन्द्रियपदवाच्याः। तेषां नियामकत्वादित्यर्थः। मनोमयस्येति मनःप्राचुर्यस्य विभूतित्वात्। सर्वेन्द्रियाणि पूर्वोक्तानि तत्संबन्धित्वम्। आधिदैविकत्वेन प्रेर्यप्रेरकभावः संयोगरूपः सोस्यास्तीति सर्वेन्द्रियसंबन्धि तस्य भावः सर्वेन्द्रियसंबन्धित्वम्। शेषमिति। इन्द्रियेत्यादि भाष्यं स्पष्टम्। तथा हि आधिदैविकादिरूपेण त्रैविध्यम्। सर्वेन्द्रियसंबन्धो नेयनायकभावः। इन्द्रियरूपत्वम्। 'मनोमात्रमिदं ज्ञात्वा' इतिवाक्यात्। अन्तःकरणात्मकत्वं मनःप्राचुर्येप्येकदेशविकृतन्यायेन, एवं स्पष्टम्। कार्यद्वारेति ज्ञानरूपकार्यद्वारा। आक्षिप्यन्त इति आक्षेपोर्थापत्तिः। 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति श्रुतेः। तथेति सर्वेन्द्रियसंबन्धित्वादिः। मनसेति अपृथगिति पदच्छेदः। मनोबुद्धिचित्ताहंकारा इति मनोभेदा इति। बुद्धिरूपेति इन्द्रियानुग्राहिकेत्यर्थः। बुद्धितारतम्येनेन्द्रियज्ञानक्रिययोस्तारतम्यदर्शनाद्बुद्ध्यैवानुगृहीतानीन्द्रियाणि पश्यन्ति कुर्वन्ति च। इदं च कार्यलक्षणम्। स्वरूपलक्षणं तु द्रव्यस्य घटादेः स्फुरणे शब्देनालोकेन संस्कारेण वा यद्विशिष्टं ज्ञानमिति। तृतीयस्कन्धे षड्विंशे 'तैजसात्तु विकुर्वाणाद्बुद्धितत्त्वमभूत्' इत्यस्य सुबोधिन्याम्। तल्लेखे प्रस्थानरत्नाकरे च स्फुटम्। तत्त्वपदस्याभिप्रायमाहुः मनसेति। तस्येन्द्रियप्रेरकत्वं कार्यलक्षणम्। संकल्पविकल्पात्मकत्वं स्वरूपलक्षणमिति तेन पृथक्। बुद्धेर्मनोभेदत्वात्। स्वरूपेत्यादि ज्ञानेन्द्रियेषु विज्ञानमयप्रवेशात्तथेति वक्ष्यमाणभाष्योक्ता। यत्रेत्यादिनेति अग्रिमग्रन्थेन भाष्ये यत्र स्वरूपयोग्यतायां सत्यां बुद्धिरूपायां यतो जीवरूपं ज्ञानं बुद्धिरूपस्वतत्त्वं विना न ब्रह्मवित्। बुद्धिमानयं पदार्थान् जानाति इति प्रत्ययात्। 'मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलब्धनिजसुखानुभवो भवान्' इदमेव ब्रह्मज्ञानमिति द्वितीयपादे वक्ष्यन्ति। गुहायामित्यादेरर्थ-

भगवद्वरणेन परमव्योमाविर्भावस्ततः पूर्णानन्दात्मकं पुरुषोत्तमस्वरूपं फलरूपं प्राप्य उक्तऋगर्थरीत्या तेन सह सर्वकामाशनमेव मनोवागविषयानन्दवेदनं तद्वान् भवतीति वाक्यैकवाक्यतयावगम्यते ।

भाष्यप्रकाशः ।

विभूतिरूपाणि व्याख्याय तच्छेषिणं व्याकुर्वन्ति तत इत्यादि । अत्र कामाशनस्य वेदनरूपत्वम् । भोगस्य सुखसाक्षात्काररूपत्वात् । वाक्यैकवाक्यतयेति उपसंक्रमेण वेदनभयाभावाभ्यां तापाभावादिभिश्चास्य फलांशविवरकत्वेन वाक्यानामैकवाक्यतया ।

एवमानन्दमयप्राप्तेर्यथा परममुक्तित्वं, तथा प्रकारो विषयवाक्यभूतप्रपाठकविवरणेन प्रकाशितः । तत्र पूर्वोक्तानां विभूतीनां पक्षिरूपत्वं यदत्रोक्तं तल्लीलोपयोगिषु तेषु

रश्मिः ।

माहुः **गुहायामित्यादि** । हृदि मनसि अयं हृदयं सप्तम्या लुक् तत्संबन्ध्याकाशे छिद्ररूपे 'छिद्रा व्योम्नीव चेतनाः' इति वाक्यात् । सुपर्णद्वययुक्तं वस्तु 'द्वौ सुपर्णौ भवतः' इति गोपालतापिनीयात् । मर्यादाभक्तस्यान्यत्र चरणयोर्लयात् पुष्टिभक्तस्य फलम् । सिद्धान्तमुक्तावलीटीकायां ज्ञानिभक्तौ चेद्विशेषतोनुगृह्णाति तदा पुष्टिभक्तिं प्राप्नुतः आदाविति ग्रन्थात् । पुष्टिमार्गत्वान्न भगवद्वरणातिरिक्तं साधनमुक्तम् । भक्तिहेतौ त्वनुग्रह उक्तः स पुराणोक्तः ।

'यदा यस्यानुगृह्णाति भगवानात्मभावितः ।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम्' ॥

इतिवाक्यात् । न बिभेति कुतश्चनेति परिनिष्ठितमतित्यागः । गुहायां हृदये 'स मानसीन आत्मा जनानाम्' इति श्रुतेः । परमव्योमाविर्भावोऽयोगोलके वह्निरिव वरणातिरिक्तं साधनं नेत्युक्तम् । हृदि अयमात्मा सामानाधिकरण्येन तत्संबन्धिन्याकाशे जीवदेहे मनसि परमव्योमाविर्भावः स्पर्शमणिसंबन्धेनायसि चामीकरत्वाविर्भाववत् । परो मीयते ज्ञायते येन व्यापकेन व्योम्नेति परमं व्योम । ननु जीवस्य देह आकाशात्मकोपि मांसरूपः । संहितायामाकाशस्य मांसत्वोक्तेः भगवदंशत्वात् 'तस्माद्वा एतस्मादात्मनः' इत्यादिकं भवति । आत्मनो जीवादाकाशो देहः । आकाशाद्वायुः प्राणादिः त्वक् च । वायोरग्निः दर्शनाग्निः जाठराग्निर्ज्ञानाग्निश्च । अग्नेरापः प्रस्वेदादिरूपाः । अद्भ्यः पृथिवी कठिनांशा अस्थ्यादि । पृथिव्या ओषधयः लोमानि केशाः । ओषधीभ्योन्नं लिक्षा अन्नाद्यूकाः । पुरि शेरते इति पुरुषाः यथाकथंचिन्नेयाः । तत्र पुरुषोत्तमस्य दीपशिखावद्वर्तमाने पूर्णानन्दे अदृश्यत्वाधिकरणोक्ते संपन्ने 'तस्यैष आत्मा विवृणुते तनुं स्वाम्' इति श्रुत्युक्तं भवति, स्वां स्वीयां तनुं विवृणुते प्रकाशयति । **प्रकृते** । **तच्छेषिणमिति** । आनन्दमयमित्यर्थः । **तापाभावेत्यादि** 'एतꣳह वा व न तपति' इति श्रुतेः । **अस्येति** प्रपाठकस्य । तथा च व्याख्येयव्याख्यानभावेनैकवाक्यता तया । अधुना प्रथमस्कन्धस्य 'अथो विहायेममसुं च लोकम्' इत्यादिश्लोकद्वयसुबोधिन्युक्तदिशान्नमयादिविभूतीनां साधनसंपत्तये लौकिकान्नमयादिकोशेषु तत्तदर्थं तत्प्रवेशं बोधयन्तीत्याशयेन भाष्यमवतारयन्ति **एवमानन्दमयेत्यादि** । **प्रकाशित** इति सर्वरीत्या व्याख्याय पूर्वं पश्चात्प्रथमत्यागे मानाभावमाश्रित्याथवेत्यादिना प्रकाशितः । **तल्लीलेत्यादि** लीलापूर्वकालिकेषु

अथेदं विचार्यते। 'पुरश्चक्रे द्विपदः' इति श्रुतौ वस्तुतस्तु पुरुष एव। परंतु पुरःसंबन्धी सन् पक्षी भूत्वा पुर आविशदिति निरूपितम्। प्रकृते चान्नमयादयस्तथैवोक्ताः। एवं सत्येकस्यां पुरि बहूनां तेषां प्रवेशो न वक्तुमुचितः। प्रयोजनाभावादित एकैकस्यां पुरि तथा वाच्यः। तत्र कीदृश्यां तस्यां कस्य प्रवेश इति विचार्यमाणे प्राकृतत्वब्रह्मत्वयोरविशेषाद् विनिगमकाभावात् सर्वेषां सर्वत्र प्रवेशोऽप्रवेशो वा भवेदिति चेत्।

अत्रेदं प्रतिभाति। अस्माल्लोकात् प्रेत्येति वाक्ये इदंशब्दप्रयोगात् प्राकृत-

---

भाष्यप्रकाशः।

कोशेषु पक्षिरूपेण यः प्रवेशस्तद्धेतुकमिति तद्बोधिकायाः श्रुतेरविचारे तन्न दृढं भवतीति तद्दृढीकरणाय पक्षिरूपप्रवेशबोधकश्रुतिविचारं प्रतिज्ञाय तद्विचारबीजं वक्तुं प्रथमतो विषयमाहुः अथेत्यारभ्य, उक्ता इत्यन्तम्। तथैवेति पक्षिरूपेण। अत्र विचारबीजं वदन्तः पूर्वपक्षमाहुः एवं सतीत्यादि, चेदित्यन्तम्। अविशेषादिति सर्वेषु पक्षित्वविशेषात्। अप्रवेश इति उक्तश्रुतावेकस्य प्रवेशोक्तावप्यन्नमयादिषु पक्षिलिङ्गेन पुरि प्रवेशे प्राप्तेऽपि प्राणमयादिष्वन्तर आत्मेति श्रावणात् तेषां चतुर्णां तत्तदन्तःप्रवेशोऽस्तु। अन्नमये तु तदश्रावणात् तत्प्रवेशो न शक्यवचनः। किंच, द्विपत्त्वादिलिङ्गस्य स्थूलास्वेव सत्त्वात् तास्वेव प्रवेशोऽत्र भासत इति प्राणमयादिषु लिङ्गाभावेन विवक्षितपूष्ट्वाभावात् तेष्वपि तदन्तराणां सोऽशक्यवचन इत्यप्रवेश इत्यर्थः। सिद्धान्तमाहुः अत्रेत्यादि। अयमर्थः। अस्माल्लोकात् प्रेत्येत्यत्र स्थूलशरीरत्यागाङ्गीकारे सूक्ष्मशरीरकारणशरीरयोः सत्त्वेन प्राणमयादिकोशानां सत्त्वेन, एतं प्राणमयमात्मानमुपसंक्रामतीत्याद्यग्रिम-

रश्मिः।

लौकिककोशेष्वित्यर्थः। भाष्ये। निरूपितमिति आधिभौतिकेष्वाध्यात्मिकानां प्रवेश इति निरूपितमित्यर्थः। प्रकृते। तन्नेति प्रवेशहेतुकं नेत्यर्थः। तद्विचारबीजमिति पक्षिणामप्राकृतत्वब्रह्मत्वाविशेषो विनिगमकाभावश्च हेतू। तद्धेतुकः सर्वेषां सर्वत्र प्रवेशोऽप्रवेशो वा बीजम्। तस्य पक्षिरूपप्रवेशबोधकश्रुतिविचारस्य भवति। विषयमाहुरिति परोक्षवादरूपसिद्धान्तोपयोगिनं तमाहुरित्यर्थः। अथेत्यारभ्येति। ननु उपष्टम्भकश्रुतेर्विचारे किं मूलमिति चेन्न। अत्राधिकरणे पूर्वाधिकरणवन्नपुंसकलिङ्गानुक्तेरानन्दमय इति पुलिङ्गोक्तेः 'ब्रह्मन् पुंसि च' इति सूत्राद् ब्रह्मेति पुलिङ्गानुवर्तनाद्वेदगर्भकारणतानिरूपणेन। भाष्यत्वात् तादृशस्वपदवर्णने येन केनापि यागेन पूर्वकाण्डोक्तब्रह्मणोपि विचारमालोच्यास्याविचारात्पूर्वकाण्डानुगुण्यं पाषण्डनिवर्तकमेव मूलमिति। नपुंसके 'ततो ह जानातो भुवनस्य गोपा हिरण्मयः शकुनिर्ब्रह्मनामेति श्रुतिः। पूर्वपक्षमिति संशय उन्नेयः। सर्वेषामेकैकस्मिन् प्रवेशोऽप्रवेशो वा सर्वत्र प्रवेशोऽप्रवेशो वेति। श्रुतिः पूर्वपक्षयुक्तिश्च संशयबीजम्। उक्तश्रुताविति 'पुरश्चक्रे द्विपदः' इति श्रुतावित्यर्थः। एकस्य प्रवेशोक्ताविति 'स पक्षी भूत्वा' इत्यत्रैकत्वविवक्षणादिति भावः। अस्त्विति अत आत्मनश्चेतनत्वादिति भावः। न शक्येति। चेतनाभावादिति भावः। लिङ्गाभावेनेति द्विपत्त्वादिलिङ्गाभावेन। तदन्तराणामिति पक्षिणामित्यर्थः। सूक्ष्मेति। कारणशरीरं तु—

'अविप्रणाशः सर्वेषां कर्मणामिति निश्चयः।
कर्मजानि शरीराणि तथैवाकृतयो नृप'॥

गुणमयं प्रपञ्चमतिक्रम्य गुणातीतं प्रपञ्चं साक्षाल्लीलोपयोगिनं प्राप्नोतीत्यवगम्यते । तत्प्राप्त्यैव भगवद्भावे संपन्ने पूर्वं भगवद्विरहभावेनातितीव्रत्वेन सर्वोपमर्दिना शरीरेन्द्रियप्राणान्तःकरणानि नष्टान्येव स्युर्यदि तत्तद्रूपं ब्रह्म तेषु तेषु न प्रविष्टं स्यात् । जीवस्य च ब्रह्मण्येव लयेन लीलारसाननुभवेन नाश एव सः । तथाच तत्तद्रूपं ब्रह्म तेषु तेषु स्थितमिति न तेषां नाशः । जीवे त्वानन्दमयः पुरुषोत्तमः प्रविशतीति रसात्मकत्वादानन्दात्मकमेव विरहभावरसाब्धिमनुभूय

भाष्यप्रकाशः ।

वाक्यविरोधादस्माल्लोकादित्यस्येदम इदं सर्वं यदयमात्मा, अस्मिंल्लोकेऽर्धुक[१] स्यादित्यादाविदमः परिदृश्यमानयावत्संग्राहकत्वदर्शनादत्रापि ब्रह्मविदः फलप्रकरणे प्रापञ्चिकसर्वसंग्राहकताया एवाभिप्रेतत्वौचित्यात् तथावगम्यते । ततो गुणातीतप्रपञ्चप्राप्त्यैव भगवत्युत्कटरत्यां जातायां पूर्वं विरहभाव एवोद्रिच्यत इति तेन शरीरादीनि मूले सति लीनानि स्युरतस्तदभावाय प्रवेशः सर्वत्रावश्यकः । किंच, लये ज्ञानिसाधारण्येन वरणवैयर्थ्याल्लीलाननुभवे स जीवस्याप्यनिष्टरूप एवेत्यतोऽप्यावश्यक इत्यर्थः । ननु भवत्वन्यत्रान्येषां प्रवेशस्तथापि जीवस्य नित्यत्वात् तत्रानन्दमयप्रवेशो निष्प्रयोजनत्वादयुक्त इत्यत आहुः जीवे त्वित्यादि उच्यत इत्यन्तम् । **प्रविशतीति** रसानुभावनाय प्रविशति । इतिर्हेतौ तथाच सोपि सप्रयोजनः । तस्य पुरुषोत्तमत्वं श्लोकाद्युक्तभयाभावरूपाल्लिङ्गादेव ज्ञायते । एतदग्रिमा-

रश्मिः ।

इतिभारतोक्तम् । **तथावगम्यत** इति प्राकृतगुणमयं प्रपञ्चमित्याद्यवगम्यत इत्यर्थः । अत्र प्राकृतगुणातीतयोः प्रपञ्चयोर्मध्ये प्राप्तिसाधनं नोक्तं तथापि वरणमत्यन्तानुग्रहश्च ज्ञेयम् । पुष्टिमार्गीयत्वान्न साधनान्तरमपेक्षते । साधारणप्रवाहव्यवस्था तु शारीरब्राह्मणेस्ति । **तत्प्राप्त्येत्यादि** भाष्यं विवृण्वन्ति **तत** इत्यादि । **गुणातीते**त्यादि एवकारेण वरणस्य विद्यमानत्वात्तदन्तर्गतात्यन्तानुग्रहस्यापि सत्त्वाद् गीतोक्तगुणातीतलक्षणोक्तधीरतुल्यप्रियाप्रियत्वातिरिक्तधर्मः व्यवच्छिद्यते । अव्यभिचारी भक्तिमांश्च 'स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते' स गुणातीतः तथा चैतादृशप्रपञ्चान्तर्गतानां धीरतुल्यप्रियाप्रियत्वाव्यभिचारिभक्तिपदार्थानां प्राप्तिर्विशेषतः करणं भगवदुत्कटरत्याम् । सर्वात्मभावस्य दानसाध्यस्यानुक्तिः । रतिस्तु सर्वात्मभावकस्य निरोधलक्षणग्रन्थोक्तस्याधिभौतिकप्रेमसंबन्धादाध्यात्मिक्यत उक्ता । **पूर्वविरहे**ति । ननु संयोगौ भवतः पूर्वविरहः कुत इति चेन्न भगवदास्यार्तेरधिकारत्वात् । अक्षरब्रह्मत्वं तु गुणातीतप्रपञ्चप्राप्त्यैव प्राप्तमतः प्रथमाधिकारो नायुक्तः । **एवकारस्तु** भक्तरुक्मिण्याहरणे पूर्वं तस्या विरहभावोक्तेः । 'जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात्' इति प्रसादः स्यात् । तेन विरहभावेन सर्वोपमर्दिना शरीरादीनि तथा । **मूले सतीति** हृदि प्रकटे ब्रह्मणीत्यर्थः । पृथिव्यादाविति वा । ननु स एवास्तु फलत्वादित्यतो **जीवस्य** चेत्यादि भाष्यं विवृण्वन्ति **किं च लये**त्यादि । **भाष्ये । ब्रह्मण्येव लयेने**त्यत्र एवकारेणाक्षरात्मकचरणव्यवच्छेदः । तदानीं भक्त्यभावाल्लयप्रतिबन्धकाभावात् । **प्रकृते । अनिष्टे**त्यादि 'तदापीतेः संसारव्यपदेशात्' इति सूत्रे स्फुटिष्यति एवकारार्थोऽपि । **रसानुभावनाये**ति प्रदीपाधिकरणे स्पष्टमिदम् । **सोपी**ति आनन्दमयप्रवेशोपि । **प्रयोजनं** रसानुभावनम् । **भाष्ये । रसात्मकत्वा**दिति 'रसो वै सः' इति श्रुतेः । रस शब्दे, रस आस्वादने चर्वणैकस्वभाव आनन्दमये रसशास्त्रप्रसिद्धे । शब्दा-

१ ३८ म० सू० १०

पश्चात् प्रादुर्भूतं प्रभुस्वरूपं प्राप्य, 'न बिभेति कुतश्चन' इति वाक्येन लोकात् तदभावमुक्त्वा, 'एतꣳह वा व न तपति किमहं साधु नाकरवं किमहं पापमकरवम्' इतिवाक्यैर्वेदाद्भयाभाव उच्यते।

शरीरप्राणमनोऽन्तःकरणजीवात्मनां शरीरत्वं वाजसनेयिशाखायामन्तर्यामिब्राह्मणे पठ्यते। 'यस्य सर्वाणि भूतानि शरीरं यस्य प्राणः शरीरं यस्य वाक् शरीरं यस्य चक्षुः शरीरं यस्य श्रोत्रं शरीरं यस्य मनः शरीरं यस्य त्वक्शरीरम्।

भाष्यप्रकाशः।

र्थस्तु य एवमतापकरत्वेन एते साध्वसाधुनी विद्वान् स आत्मानं स्पृणुते ब्रह्म प्रीणाति। तत्र हेतुरुभे ह्येवैष इत्यादि। अत्र स्पृणोतिर्ज्ञानार्थक इति न पुनरुक्तिः। तेन सोऽपि युक्त इत्यर्थः। अत्र या स्वरूपप्राप्तिरुक्ता सा फलाध्यायतुरीयपादे निपुणतरं भाष्य उक्तेति मया तत्रैव व्युत्पादनीयेति बोध्यम्। किं च। द्विपत्त्वादीत्यादिनोक्तद्वितीयबाधकनिरासाय पूर्ष्ट्वं स्फुटीकुर्वन्ति शरीरेत्यादि। प्राणमनोऽन्तःकरणेतिपाठे मनोऽन्तरिति भिन्नं पदम्। एतद्गणनामध्ये इत्यर्थः। प्राणेन्द्रियान्तःकरणेति वा पाठः। अत्रायमर्थः। पूर्ष्ट्वं हि शरीरत्वम्। तच्च भूताद्यात्मान्तेषु तुल्यम्। तथा ब्रह्मण आन्तरत्वं च सर्वत्रात्रोक्तमिति प्रवेशोऽपि तस्य सिद्धः। एवं सत्येतदनुरोधाद् बहुपदां पुरां दर्श-

रश्मिः।

र्थरसरूपधृक्त्वात्। एवेति विरहभावरसाब्धेर्हृदयात्मकत्वव्यवच्छेदकः। आनन्दसृष्टौ सुखात्मकत्वेपि सर्वस्य सुखे ईर्ष्यासूयादिमिश्रीभावे सुखमेव दुःखाय इति वाराहपुराणे चातुर्मास्यमाहात्म्येस्ति। विरहमनुभूयेत्युक्तौ तस्य प्रियमेव शिर इति श्रुत्युक्तभावात्मकत्वविरोधः भावात्मकस्य प्राज्ञत्वात्। तर्हि विरहभावमनुभूय इति वक्तव्यम्। न विरहभावस्तूष्णीकं नानुभूय इत्यस्य कर्म अतितीव्रत्वात् किं तु शब्दजास्वादरूपोऽतो रस इति। सोपि शाब्दविषयो लौकिकानामतोत्र शास्त्रदृष्ट्याब्धिशब्दः। लवणमेतदुदकमिति श्रुतिविषयः। जातानां लीलास्थानामभेदानुभवेन विलक्षणरसानुभवार्थम्। मानसीसेवा वा तत्रत्या। जातानां रसान्तस्थानां शरीराणां रेणुजत्वेन पार्थिवत्वात् तत्कारणायां दृष्टिरुचिता। नन्वात्मनः कारणत्वं 'आत्मन आविर्भावतिरोभावौ' इति श्रुतेरिति चेन्न तत्रत्यानां सर्वेषामात्मत्वेन यथादृष्टं कारणमिति। **प्रादुर्भूत**मिति राजवत्प्रादुर्भूतम्। **न बिभेतीत्यादि** पूर्वं व्याख्यातम्। **एतदि**ति। **पापमकरव**मिति श्रुत्यग्रिमार्थस्तु अग्रिमा श्रुतिस्तु 'स एवं विद्वानेते आत्मानꣳस्पृणुते। 'उभे ह्येवैष एते आत्मानꣳ स्पृणुते य एवं वेद' इति। **उभे ह्येवैष** इत्यादि उभे ह्येवैष एते आत्मानꣳ स्पृणुते इति श्रुतिः। 'भक्त्या मामभिजानाति' इति न्यायेनाहुः **अत्र स्पृणोति**रिति। **ज्ञानार्थक** इत्यादि। पृण प्रीणन इति धातोर्ज्ञाने लक्षणेति 'किमहं साधु नाकरवम् किमहं पापमकरवम्' इति 'स एवं विद्वानेते आत्मानꣳ स्पृणुते। उभे ह्येवैष एते आत्मानꣳ स्पृणुते' इत्यत्र स्पृणोतेर्न पुनरुक्तिरित्यर्थः। **सोपी**ति जीवे आनन्दमयप्रवेश इत्यर्थः। **द्विपत्त्वा**दिति अप्रवेश इति भाष्यव्याख्याने किं च द्विपत्त्वादित्यादिनोक्तपूष्ट्वाभावरूपबाधकनिरासायेत्यर्थः। **पद**मिति करणं वागादि जीवो रेतःस्थः 'यो रेतसि तिष्ठन्' इति श्रुतेः। एतस्य क्लिष्टत्वादाहुः **प्राणेन्द्रियेत्यादि**। तथा च भाष्यत्वाद्बाहुलकमिति भावः। **सर्वत्रात्रे**ति अन्तर्यामिब्राह्मण इत्यर्थः। **तस्ये**ति ब्रह्मण इत्यर्थः। **एवं सती**ति प्राणमयादिषु शरीरत्वे

इत्यादेरन्ते यस्यात्मा शरीरमिति । अत्र पूर्वोक्तनिर्गुणदेहानां भगवच्चरणरेणुजत्वेन भूतरूपत्वाद् ब्रह्मशरीरत्वम् । तत्रान्नमयतत्प्रवेशेन तत्स्थितिः प्राणेष्वपि तथा । ज्ञानेन्द्रियेषु विज्ञानमयप्रवेशात् तथा । मनसि मनोमयप्रवेशात् तथात्वम् । जीवे त्वानन्दमयः प्रविशतीति तथात्वम् । अतो युक्तं पक्षित्वकथनम् ।

आनन्दमयस्य स्वरूपं विशेषतो वक्तुमशक्यमिति यः पूर्वस्येति सर्वत्रोक्तम् । शरीरप्रवेशप्रयोजनकपक्षिरूपत्वं पञ्चस्वपि साधारणमिति तेषु तथा वद-

---

भाष्यप्रकाशः ।

नादत्र प्रतिष्ठापदेन पादयोर्बोधनाच्च पुरश्चक्र इति श्रुतौ द्विपदादिपदं कृतपूर्मात्रोपलक्षकमिति तत्र तासां करणं, तासु प्रवेश इति चाभिप्रेतं, न तु तासां द्वैविध्यं स्थूलत्वं वेति निर्णये सर्वास्वेव कार्यार्थं पक्षिरूपेण प्रवेशः सिद्ध्यतीति पक्षिलिङ्गादन्नमयादीनामपि प्रवेशः शक्यवचन इत्यर्थः । एवं सर्वेषां प्रवेशं समर्थयित्वा लीलौपयिकप्रवेशार्थमप्राकृतविभूतिरूपाणां स्वरूपमाहुः अत्रेत्यादि । इदं च प्रथमस्कन्धसुबोधिन्यां, 'या वै लसच्छ्रीतुलसीविमिश्रपादाब्जरेण्वभ्यधिकाम्बुनेत्री'इत्यत्र सिद्ध्यति । प्रवेशं विभजन्ते तत्रेत्यादि । जीवस्य वरणेनैव शुद्धत्वाद् विज्ञानमयस्य प्रवेशोऽनर्थक इति शङ्कावारणाय तदधिकरणमाहुः ज्ञानेन्द्रियेत्यादि । जीवे तथात्वं लीलारसानुभवयोग्यत्वरूपं बोध्यम् । एवं सर्वत्र पक्षित्वोक्तिं समर्थयित्वानन्दमये शरीरत्वोक्तेस्तात्पर्यं वक्तुं यः पूर्वस्येति गूढोक्तेराशयमाहुः **आनन्दमयस्येत्यादि** । **शरीरेत्यादि** च । विशेषतो वक्तुमशक्यत्वं मनोवागगम्यत्वाद् बोध्यम् । तथाच तस्यैष इत्यत्र शब्द एव पूर्वसमो न त्वर्थोऽपि ।

रश्मिः ।

सिद्धे सतीत्यर्थः । **अत्रेति** तैत्तिरीये प्राणमयादिषु पृथ्वी पुच्छं प्रतिष्ठा, अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा, महत्पुच्छं प्रतिष्ठा, ब्रह्म पुच्छं प्रतिष्ठा, इति यथायथं प्रतिष्ठापदेनेत्यर्थः । **तासामिति** पुरामित्यर्थः । **द्वैविध्यमिति** द्विपत्त्वं चतुष्पत्त्वमिति द्वैविध्यम् । **सर्वेषां प्रवेशमिति** एतेन पूर्वपक्षे अप्रवेशो दूषितः सिद्धान्ते । **सिद्ध्यतीति** । युक्तिस्तु अणुभाष्ये टीपिता सारोऽयमर्थः । सा च पार्थिवं शरीरमिति योगादिशास्त्रादत्रापि पार्थिवशरीराभावे सूत्रं निर्विषयं स्यात् । नन्वस्ति सर्वेषां पार्थिवशरीरमिति चेन्न आकाशत्वाच्छरीराणाम् । 'आकाशशरीरं ब्रह्म'इति श्रुतेः । तदंशानां व्योम्नीव छिद्राणां जीवानामाकाशशरीरत्वौचित्यात् । आकाशान्मांसरूपाद्दश वायवः । वायोस्त्रयोग्नयः दर्शनाग्निजाठराग्निज्ञानाग्निरूपाः । अग्ने रुधिरादिरूपा आपः । अद्भ्यः पृथिवी 'यत्कठिनं सा पृथिवी' इति श्रुतेः कठिनांशोस्थ्यादिः पृथ्वीति । पार्थिवत्वाभावात् । भगवदिच्छाधीनं सर्वं तथापि युक्त्यर्थं भाष्येऽन्नमयप्रवेश उक्तः । ब्रह्मशरीरत्वमिति भाष्ये ब्राह्मं वेति शारीरब्राह्मणं द्रष्टव्यम् । भाष्ये प्राणिष्वपि तथेत्यन्नमयप्रवेश इत्यर्थः । प्राणानामम्मयत्वेनान्नमयस्याप्प्रचुरस्य प्रवेश उचितः। 'आपो वा अन्नम्'इति श्रुतेः । **तथात्वमिति** भाष्यं विवृण्वन्ति **जीवे तथात्वमिति** । **गूढोक्तेरिति** 'तस्माद्वा एतस्मादात्मनः' इत्यत्र तदेतच्छब्दाभ्यां विपश्चिद्ब्रह्मपरामर्शाद् यः पूर्वस्येत्यत्र यच्छब्देन गूढानन्दमयोक्तेरित्यर्थः । **तस्यैष** इति 'तस्यैष एव शारीर आत्मा यः पूर्वस्य' इति श्रुतावित्यर्थः । अत्रेदं सारम् । 'रसो वै सः' 'आनन्दो ब्रह्मेति व्यजानात्' 'सत्यं विज्ञानमानन्दं ब्रह्म' इति श्रुतिसहस्रैरानन्दो ब्रह्मरस इत्यविवादम् । रसश्च मुख्यो भक्तिरूपः शृङ्गारश्च । इमौ द्विविधौ, संयोगविप्रयोगभेदात् । एवं चोभावेकः वस्तुस्वभावात् ।

न्त्यानन्दमयेऽपि तथैवोक्तवती श्रुतिरिति ज्ञेयम्। एवं सति स्पर्शमणिसंबन्धित्वेन रजतादेर्हेमत्वमिवोक्तप्रकारकप्रवेशादाश्रयाणामपि तत्तदात्मकत्वमित्युच्यते।

भाष्यप्रकाशः।

तेनात्रायमर्थः। तस्येत्यभेदे षष्ठी। तथाच पूर्वस्य यः शारीर आत्मा उपक्रमे जगत्कर्तृत्वेनोक्तस्तदभिन्न एष इति। एवमर्थोक्तौ गमकं तु, अग्रेऽन्यस्यान्तरात्मन उत्तयभाव एवेति प्रागेवोक्तम्। प्रवेशस्य योग्यतासंपादकत्वप्रकारं दृष्टान्तेनाहुः **एवं सती**त्यादि। एवमत्र श्रुत्यन्तरानुसारेण वास्तवं पक्षिरूपमादृत्य प्रकृतश्रुत्यर्थो निर्णीतः। **अतः परं** 'परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः' इति श्रुतेः।

रश्मिः।

पूर्वोक्तो यद्यपि वाक्यान्वयाधिकरणे प्रियत्वस्य ब्रह्मधर्मत्वमुक्तमिति धर्मस्तथापि पूर्वोक्तश्रुत्या धर्म्यपि। आनन्दवत्। भक्तिश्च भावो 'रतिर्देवादिविषया भाव इत्यभिधीयते' 'केवलेन हि भावेन गोप्यः' इत्यादिवाक्यात्। एवं च पूर्णब्रह्म भावात्मकमिति निष्कर्षः। तच्च न निराकारं 'आनन्दरूपममृतं यद्विभाति' 'आनन्दमात्रकरपादमुखोदरादिः' इति श्रुतिस्मृतिभ्याम्। प्रकृतश्रुतेश्च तत्राकारविचारे कृष्णाकारो मुख्यः। एतच्च 'समान एवं चाभेदात्' इति सूत्रे उपपादनीयम्। श्रीभागवते च स्फुटम्। न चैवं परिच्छिन्नस्याब्रह्मत्वं शङ्कनीयम्। वैश्वानराधिकरणे प्रादेशमात्रस्यैवाभिविमानत्वमिति सिद्धान्तात्। ज्योतिश्चरणाधिकरणे ज्योतीरूपत्वोक्तेर्यथा परिच्छिन्नोपि वह्निस्तूलादियोगान्महान् भवति तद्वदिति दृष्टान्तः। तदेव स्वधर्मेण सच्चिदानन्दरूपेण व्याप्तमिति समन्वयाधिकरण उपपादितम्। तदर्थं 'तदव्यक्तमाह हि' इत्यधिकरणे विरुद्धधर्माश्रयत्वं तस्य व्यवस्थापितम्। एवं च कल्पतर्वादिवत्तद्वस्त्वेव तादृशमिति वस्तुस्थितिः। अन्यथास्मदादितुल्यता स्यात्। सा चासंगततरा। 'हेयत्वावचनाच्च'इत्यादिसूत्रविरोधात्। तथा च तेजोमयो व्यापकः आनन्दमयो भावात्मकः कमनीयः साकारोऽनेकशक्तिवृतः पुरुषः परं ब्रह्मेति शास्त्रार्थः। तत्राक्षरं तस्य धाम भवतीति ततो भिन्नाभिन्नम्। एतच्च 'सूक्ष्मं तु तदर्हत्वात्' 'तदधीनत्वादर्थवत्' इतिसूत्रयोर्भाष्ये स्फुटम्। तत्प्राप्तिश्च सर्वात्मभावरूपभक्तेः। एतच्च पुरुषार्थाधिकरणे तृतीयस्य चतुर्थचरण उपपादितम्। तत्प्राप्तिश्च साकारानन्दनिचयानुभव इत्यत्रैवोक्तम्। स च भक्तहृदये बहिश्च। तच्च।

'गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं
यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्ति।
दृग्भिर्हृदिकृतमलं परिरभ्य सर्वा-
स्तद्भावमापुरपि नित्ययुजां दुरापम्'॥

इत्युत्तरार्धे त्रयस्त्रिंशाध्यायवाक्ये स्फुटं सुबोधिन्याम्। तदंशांशानन्दस्य हृदीदानीमप्यनुभवान्नासंभावना। एतादृशोपि स्वयं गौणः सन् भक्तमनोरथं पूरयतीति तस्य निसर्गः। 'सह ब्रह्मणा विपश्चिता' इति श्रुतेः। 'अहं भक्तपराधीनः' इति स्मृतेश्चात एव स्वस्तावकान् भक्तान् स्वात्मलीलायां प्रवेशयति 'ध्रुवासो अस्य कीरयो जनासः' इति ऋग्वेदात्। कीरयः स्तोतारः। अन्यथा जीवानां स्वरूपतो नित्यत्वाद् ध्रुवास इति न वदेत्। एवं स्वधामनि ब्रह्मणि रंस्यमानो यदा जगद्रूपेण क्रीडितुमिच्छति तदा नामरूपविभेदेन जगन्निर्माय तत्र क्रीडतीति वैदिकपरमभागवतसिद्धान्तः। तमिमं हृदिकृत्याहुः **अतः परमि**त्यादि। परोक्षत्वं च फलांशत्वाज्ज्ञेयमिति

वस्तुतस्तु परोक्षवादोयमिति ज्ञायते । तथाहि । 'ब्रह्मविदाप्नोति परम्' इति वाक्येन ब्रह्मविदः परप्राप्तिं सामान्यत उक्त्वा तत्तात्पर्यं सत्यं ज्ञानमित्यृचोक्तम् । तत्र सर्वात्मभाववान् भक्तो भगवता सह तत्स्वरूपात्मकान् कामान् भुङ्क्त इत्युक्तव्याख्यानेन तदर्थोऽवधार्यते । उक्तभक्तस्य सदैव, विरहभावे तु विशेषतः प्रियस्वरूपातिरिक्तास्फूर्त्या अन्नप्राणादिरूपः स एवेति ज्ञापनाय तत्तद्रूपत्वमुच्यते ।

तेन परमप्रेमवत्त्वं सिद्ध्यति । ततो भगवदाविर्भावे सत्यपि पूर्वभावस्यातितीव्रत्वेन ज्ञानादिसर्वतिरोधानेनाग्रिमरसानुभवो न भविष्यतीति स्वयमेव तदनुभवात्मको भवतीति ज्ञापनाय विज्ञानरूपत्वमुच्यते । तदानुभवविषयः प्रकट आनन्दमय इति तत्स्वरूपमुच्यते । तत्र निरुपधिप्रीतिरेव मुख्या, नान्यदिति ज्ञापनाय प्रियस्य प्रधानाङ्गत्वमुच्यते । तदा प्रियेक्षणादिभिरान-

---

भाष्यप्रकाशः ।

'वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे ।
परोक्षवादा ऋषयः परोक्षं च मम प्रियम्' ॥

इत्येकादशस्कन्धीयभगवद्वाक्याच्च परोक्षवादस्यैव ज्यायस्त्वेनात्र परोक्षवाद एवास्तीत्याहुः **वस्तुत** इत्यादि । उपपादयन्ति **तथाही**त्यादि **प्र**तिष्ठारूपत्वमित्यन्तम् । **तत्रे**ति तात्पर्यकथने । **तदर्थ** इति ऋगर्थः । **तत्तद्रूपत्व**मिति अन्नप्राणमनोरूपम् । **स्वयमेवे**ति भगवानेव ।

रश्मिः ।

फलांशे पारोक्ष्यमिति । अत्र पारोक्ष्यं च यत्रान्यथास्थितोर्थः संगोपयितुमन्यथाकृत्वोच्यते स परोक्षवादः । तथा च श्रुतिः 'तं वा एतं चतुर्हूतं सन्तं चतुर्होतेत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः' इति । वैयाकरणानां श्रोत्रात्परो वादः, वद व्यक्तायां वाचि भावे घञ्, अक्ष्णः श्रोत्रात् परमिति परोक्षम् । 'परोक्षवादो वेदोयम्' इत्यत्रैकादशस्कन्धे स्पष्टम् । तथा च पुरुषविधब्राह्मणे भक्तिधर्मानुपदिशतीति परोक्षाय पक्षिरूपत्वमाहेति ज्ञेयम् । **अन्नप्राणे**ति । एतच्च तृतीयस्य तृतीयपादे 'व्यतिहारो विशिंषन्ति हीतरवत्' इति सूत्रे सिद्ध्यति स्फुटीकरिष्यते च तत्रैव । उदाहरणं तु 'लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः' इति । **भाष्ये । उक्ते**ति सर्वात्मभाववद्भक्तस्य । **सदैवे**ति व्रजभक्तवत् संयोगे विप्रयोगभावनम् । प्रेम वर्तते यद्यपि तथापि तन्न प्रधानमिति सदैवेत्युक्तम् । 'आन्तरं तु परं फलम्' इति वाक्यात् । संयोगरसोपि वर्तते 'भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्' इतिवाक्यात् । **प्रियस्वे**ति लिङ्गभूयस्त्वाधिकरणे स्फुटम् । अत्र भाष्ये स एवेत्येवकारेण पूर्वोक्तस्य भक्तप्रविष्टानामयसश्चामीकरणपक्षस्य व्यवच्छेदः क्रियते । फलाध्याये वाङ्मनसीति सूत्रे तस्य पक्षस्य पूर्वपक्षीयत्वात् । **तेने**ति पूर्वोक्तभावस्य सर्वात्मकभावरूपमुख्यभक्तिरूपत्वेनेत्यर्थः । परो मीयते ज्ञायते येन सर्वात्मभावेन स परमः परमश्चासौ प्रेमा च परमप्रेमा तद्वत्त्वम् । तदुक्तं 'सच्चिदानन्दता स्वतः' इति निरोधलक्षणग्रन्थे । **तत** इति सर्वात्मभावादित्यर्थः । **विज्ञानरूपत्व**मिति तथा चाङ्गुलिषु यथा सूर्यरश्मिप्रवेशस्तथा प्रविष्ट इत्यर्थः । **तदे**ति विरहस्वरूपानुभवोत्तरकाल इत्यर्थः । **प्रकट** इति हृदि बहिश्च तथेत्यर्थः । ततश्च रसः पूर्णोस्तीति **वक्तुं स्थायिनो** विभावादिसंयोगं वदन्ति विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति भरतोक्तिः ।

न्दात्मक एव विविधरसभावसंदोह उत्पद्यते यः स दक्षिणः पक्ष उच्यते। ततः स्पर्शादिभिः पूर्वविलक्षणः प्रकृष्टानन्दसंदोहो यः स उत्तरः पक्ष उच्यते। नानाविधपक्षसमूहात्मकत्वात्तयोः पक्षयोर्युक्तं तथात्वम्। स्थायिभावस्यैकरूपत्वादात्मत्वमुच्यते। यतस्तत एव विभावादिभिर्विविधभावोत्पत्तिः।

भाष्यप्रकाशः।

तत्रेति आनन्दमयस्वरूपकथने। **प्रियस्येति** प्रियस्वरूपस्य। तेन श्रुतौ प्रियमिति नपुंसकलिङ्गस्य नानुपपत्तिः। **प्रधानाङ्गत्वमुच्यत** इति कल्पनयोपदिश्यते इत आरभ्य कल्पनोपदेशो बोध्यः। तत्रायं प्रकारः। आनन्दमयानुभवे निरुपधिप्रीतिरेव मुख्या। 'भक्त्याऽहमेकया ग्राह्यः' इति वाक्ये तस्या एवानुभवजनकत्वकथनात्। नान्यत् साधनान्तरमिति ज्ञापनाय प्रियस्य प्रीतिविषयस्यानन्दस्वरूपस्य प्रधानाङ्गत्वं शिरस्त्वमुच्यते। शिरसा हि पुमानभिज्ञायते, सोऽयमिति। तथा निरुपधिप्रीत्या भगवानिति शिरःशब्दे तत्सिद्धिनिबन्धना गौणी। **एवमग्रे,** तदेत्यादिना वक्ष्यमाणयोर्भावयोर्दक्षिणोत्तरपक्षत्वेऽपि तथा। ताभ्यामुड्डीयाऽभीष्टदेशं प्राप्नोति। एवं दर्शनस्पर्शजनिताभ्यां भावाभ्यां शीघ्रं

रश्मिः।

तत्रेत्यादि विविधभावोत्पत्तिरित्यन्तम्। **प्रियेक्षणादिभिरि**ति आदिशब्देन पुलकबाष्पादयः। **स्पर्शादिभिरि**ति। आदिनालिङ्गनादयः। एवंविधानन्दे पक्षशब्दप्रयोगपारोक्ष्यतात्पर्यमाहुः **नानाविधे**ति। तयोर्दक्षिणोत्तरपक्षयोर्नानाविधा नीलरक्तपीतहरितादिभेदेनानेकविधाः पक्षास्तेषां समूहात्मकत्वात्। प्रकृते चेक्षणादिभिर्मोदप्रमोदादयः। तथात्वं नानाविधत्वमित्यर्थः। ननु स्थायिभाव एव पूर्णः सत्रसत्वमापद्यते इति सिद्धान्तात्भक्तिरस आनन्दस्य स्थायित्वं न संभवति किं तु प्रेम्णस्तथा च विभावस्थायिभावयोर्वैपरीत्यं युक्तमित्याकाङ्क्षायामथवा तस्य प्रियमेव शिरः इत्यत्र स्थायिनि वक्तव्ये आलम्बनवैशिष्ट्यस्य किं प्रयोजनमित्याकाङ्क्षायां स्थायिन आनन्दवैशिष्ट्येस्ति प्रयोजनमित्याशयेनाहु**र्यत इत्यादि**। एतच्च मान्त्रवर्णिकसूत्रभाष्ये स्फुटिष्यति। तेन शंकराचार्यैर्यदुक्तं यद्यपि अन्नमयादिभ्य इवानन्दमयादन्यो अन्तर आत्मेति श्रूयते तथापि नानन्दमयस्य ब्रह्मत्वं यत आनन्दमयं प्रकृत्य श्रूयते 'तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा'इति तत्र यद्ब्रह्म मन्त्रवर्णे प्रकृतं सत्यं ज्ञानमनन्तं ब्रह्मेति तदिह ब्रह्म पुच्छं प्रतिष्ठेति पठ्यते। तद्विजिज्ञापयिषयैवान्नमयादय आनन्दमयान्ताः पञ्च कोशाः कल्प्यन्ते इति तन्निरस्तम्। मन्त्रवर्णेपि तस्य ब्रह्मणः साधनशेषत्वात्। **प्रकृते**। अत्र तस्य प्रिय एव शिर इति वक्तुमुचितं प्रियपदेन प्रीतिविषयानन्दस्याभिधानात् तस्य च पुंस्त्वात्। यथा न गन्धवत्सुवर्णमिति प्रयोगोपि तु गन्धवती सुवर्णं पृथ्वीविशेषणत्वात् तद्वदिति शङ्कां वारयितुमाहुः **प्रियस्वरूपस्ये**ति। तथा च स्वरूपस्य नपुंसकत्वान्नानुपपत्तिरित्याहुः **तेने**ति। **प्रीतिविषयस्ये**ति तेनात्र तस्य प्रियत्वमेव शिरः आनन्द एव शिर इत्यनुक्त्वा प्रीत्याश्रयस्य यच्छिरस्त्वमुक्तं तेन सर्वोत्तमभावरूपा प्रीतिः स्वाश्रयसंमिश्रितैव स्थायितां व्रजतीति सूचितम्। **तत्सिद्धीत्या**दि। अभिज्ञापकत्वगुणसिद्धिनिबन्धनेत्यर्थः। एतेन भक्तेः स्थायिभावः प्रदर्शितः। सालम्बनविभावः। इदानीमनुभावान्निरूपयन्ति तदा प्रियेत्यारभ्य तथात्वमित्यन्तेन भाष्येणेत्याहुः **एवमग्र इत्यादि**। **तथे**ति प्रापकत्वनिबन्धना गौणीत्यर्थः। उपपादयन्ति **ताभ्यामित्यादि**। यथेति शेषः। **प्राप्नोतीति** हृदि तथेत्यर्थः। यत्तु शंकरभाष्ये

परप्राप्तिसाधनीभूतब्रह्मज्ञानदशायां तदानन्दोऽपि यः पूर्वमनुभूतः स गणितानन्द इत्येतदानन्दानुभवानन्तरं तुच्छत्वेन भातीष्टगतावसाधनत्वेन स्वरूपतोऽपि तस्माद्धीनत्वं चेति पृष्ठभागादपि दूरस्थितपुच्छरूपत्वं ब्रह्मण उच्यते । पुरुषोत्तमाधिष्ठानत्वात् प्रतिष्ठारूपत्वं च । एवं सत्यक्षरादप्युत्तमत्वेऽप्यप्रधानीभूय

भाष्यप्रकाशः ।

भगवन्तं प्राप्नोतीति । स्थायिभावस्येत्यादिनाऽऽत्मशब्देऽपि तत्सिद्धिनिबन्धना सा । परप्राप्तीत्यादिना च पुच्छशब्दे पूर्वेषामानन्दानां प्रशंसानिबन्धना सा बोध्यते । **प्रतिष्ठाशब्देऽपि** तथा । एवमवयवेषु परोक्षवादो बोध्यः । तथाच स्वर्णघर्मानुवाके आनन्दरूपं परप्रकाशकं कमनीयं परमेश्वरस्य यत्स्वरूपं ब्रह्मा ज्ञातवान् । स सर्वान्तर्यामी सर्वनियामको बहुधा विचरति यत्र सर्वमेकं भवति स आत्मा जनानां मानसीनश्च मानससंबन्धी । मानसाश्चैते भावा आनन्दरूपा इति तज्जनकस्य यत् स्वरूपं भावरूपं कल्प-

रश्मिः ।

ब्रह्मणः प्रकृतत्वेन प्रधानत्वेङ्गीकृते आनन्दमयावयवत्वेनापि ब्रह्मणि विज्ञायमाने प्रकृतत्वं न हीयते आनन्दमयस्य ब्रह्मत्वात् इति प्राप्ते समाहितं तथासति तदेव ब्रह्म आनन्दमय आत्मावयवी, तदेव ब्रह्म पुच्छं प्रतिष्ठावयवः, इत्यसामञ्जस्यं स्यादन्यतरपरिग्रहे तु युक्तं ब्रह्म पुच्छं प्रतिष्ठेत्यत्रैव ब्रह्मनिर्देशः आश्रयितुं ब्रह्मशब्दसंयोगान्नानन्दमयवाक्ये ब्रह्मशब्दसंयोगाभावादिति तदिदं दूषयितुमक्षरपुरुषोत्तमयोर्गौणप्रधानभावं दर्शयन्तः आनन्दस्य मुख्यतामुपपादयन्ति **स्थायिभावस्येत्यादि** । आनन्दरूपस्येत्यर्थः । 'आनन्द आत्मा' इति श्रुतेः । **तत्सिद्धीति** एकत्वनिबन्धना गौणीत्यर्थः । **पूर्वेषामित्यादि** मानुषानन्दमारभ्य प्रजापतिपर्यन्तानां पूर्वेषामानन्दानां 'ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः' इति आनन्दसंबन्धिनी ब्रह्मप्रशंसा तन्निबन्धनेत्यर्थः । पुच्छमपि मयूरादेः सर्वाङ्ग आनन्दोऽस्यैकपुच्छानन्द इति प्रशंसन्ति पुच्छे ब्रह्मानन्द इति किमु वक्तव्यं मोदादिरूपा आनन्दाः कीदृशा आनन्दाः मनोवागविषया इति प्रशंसा च तदा पूर्वेषामवयवानन्दानामित्यर्थः । **प्रतिष्ठाशब्द** इति पादयोस्तिष्ठतीत्यधिष्ठानत्वनिबन्धना सेत्यर्थः । तथा चानन्दमयवाक्ये ब्रह्मशब्दसंयोगाभावेपि मुख्यस्यानन्दशब्दस्य संयोगाद्यत्तैः समाहितं तत्समाहितमिति भावः । यदपि शंकरभाष्ये मुख्यत्वेन स्वीकृते ब्रह्मणि पुच्छत्वप्रतिष्ठात्वोक्तिसमर्थनाय पुच्छवत्पुच्छं प्रतिष्ठापरायणमेकनीडं लौकिकस्यानन्दजातस्य ब्रह्मानन्द इत्येतदनेन विवक्ष्यते नावयवत्वमित्युक्तं तदपि परास्तमनेन । **स्वर्णघर्मेत्यादि** 'सुवर्णं घर्मं परिवेदवेनं इन्द्रस्यात्मानं दशधा चरन्तम् । अन्तः समुद्रे मनसा चरन्तं ब्रह्मान्वविन्दद्दशहोतारमर्णे । अन्तःप्रविष्टः शास्ता जनानां एकः सन् बहुधा विचारः शतं शुक्राणि यत्रैकं भवन्ति सर्वे वेदा यत्रैकं भवन्ति सर्वे होतारो यत्रैकं भवन्ति स मानसीन आत्मा जनानाम्' इत्यनुवाक इत्यर्थः । आत्मपदार्थमाहुः **आनन्दरूपमिति** । चरन्तमित्यस्यार्थमाहुः **पदमिति** । घर्मपदार्थमाहुः **प्रकाशकमिति** । सुवर्णपदार्थमाहुः **कमनीयमिति** । इन्द्रस्येत्यस्यार्थमाहुः **परमेति** । अन्वविन्ददित्यस्यार्थमाहुः **ज्ञातवानिति** । अन्तःप्रविष्ट इत्यस्यार्थमाहुः **स सर्वेति** । शास्तेत्यस्यार्थमाहुः **सर्वेत्यादि** । बहुधा विचार इत्यस्यार्थमाहुः **बहुधा विचरतीति** । शतमित्यादेरर्थमाहुः **यत्र सर्वमित्यादि** । **आनन्दरूपा** इति मनसा देवदत्त आनन्दं यातीति प्रयोगात् 'मन आनन्दम्' इति श्रुतेः । **भावरूपमिति** एतच्च प्रथमस्कन्धे नारदोपाख्याने व्यासस्समाधिप्रसङ्गे

भक्तकामपूरणकर्तृत्वेऽसंभावना विपरीतभावना च संभवति । तदभावाया- सन्नेव स भवतीत्याद्युक्तम् । स्वानुभवाभावेऽपि गुरूपदेशादिनापि तदस्तित्व- मात्रमपि यो जानाति तं ब्रह्मविदः सन्तं सत्त्वधर्मविशिष्टं वर्तमानं च विदुरित्यग्रेऽवददस्ति ब्रह्मेति चेदित्यादिना । ब्रह्मासत्त्वज्ञानेऽसन् भवतीत्युक्त्वा तदस्तित्वज्ञाने सन् भवतीत्यनुक्त्वा, सन्तमेनं विदुरिति तत्त्वेनान्यज्ज्ञानं यदुक्तं, तेनोक्तपुरुषोत्तमानन्दानुभववन्तं ज्ञानक्रियाविशिष्टं जीवं वर्तमानं विदुः । अननुभवे केवलं गुरूपदेशादिना तादृग्ब्रह्मास्तित्वज्ञाने स्वरूपतः सन्तं तं विदुर्न तु ज्ञानादिमन्तम् । तदसत्त्वज्ञाने त्वलीकतुल्यमिति श्रुतितात्पर्यमिति ज्ञायते ।

एवं विचारचातुर्यवद्भिः सद्भिर्व्रजाधिपे ।
आनन्दमयतानन्दसंदोहायावधार्यते ॥ ११ ॥

भाष्यप्रकाशः ।

नया परोक्षवादार्थमुच्यत इति बोध्यः । एतमर्थं दृढीकर्तुम्, 'असन्नेव स भवति' इति श्लोकं व्याकुर्वन्ति **एवं सतीत्यादि ज्ञायत इत्यन्तम्** । शेषाणां श्रुतीनामर्थस्तु पूर्वोक्तपक्षे- ष्वपि तुल्य इत्यतोऽग्रे न व्याख्यातम् । एवं परोक्षवादव्याख्यानस्य फलं कारिक- याऽऽहुः **एवं विचारेत्यादि** । एवमस्मिन् वर्णके आनन्दस्य ज्ञेयकोटिनिवेशे तदनिवेशे चानन्दमयस्य परब्रह्मत्वं निर्बाधमिति प्रभुचरणैर्व्यवस्थापितम् ॥ ११ ॥

रश्मिः ।

'गोप्यश्च कृष्णमुपलभ्य' इत्यत्रान्यत्र स्फुटतरं भूमाधिकरणे च । **व्याकुर्वन्ती**ति अपि चेत्यादिना शंकरभाष्ये असन्नेवेति श्लोक आनन्दमयमननुकृष्य ब्रह्मण एव भावाभाववेदनयोर्गुणदोषाभिधानाद् ब्रह्म पुच्छं प्रतिष्ठेत्यत्र ब्रह्मण एव स्वप्रधानत्वमिति गम्यते । न ह्यानन्दमयस्यात्मनो भावाभावशङ्का युक्ता प्रियमोदादिविशेषस्यानन्दमयस्य सर्वलोकप्रसिद्धत्वादिति यदुक्तं तद् दूषयितुमानन्दमयेऽसंभावना- विपरीतभावने संभावयन्त एव व्याकुर्वन्तीत्यर्थः **एवं सती**ति । एवंविधाक्षरपुरुषोत्तमपरे व्याख्याने सतीत्यर्थः । **भाष्ये**। सन्तमेनमित्यत्रैतच्छब्दस्यान्वादेश एनादेशात्तदर्थमाहुः **ब्रह्मासत्त्वेत्यादिना**। **सन्तमेनमित्यादि** अन्वादेशबोधकैनादेशयुक्तसन्निहिततरपूर्ववाचकैतच्छब्दार्थविषयत्वेनान्यज्ज्ञानं यदुक्तमित्यर्थः । अन्वादेशं वक्तुमाहुः **तेनेत्यादि**। एतच्छब्दार्थमाहुः **पुरुषोत्तमेत्यादि** । तथा चैतस्य सन्निहितत्वादेतदेनमित्यस्यार्थ इत्यर्थः । **ज्ञानक्रियेत्यादि** । अयमर्थः । जीवस्य स्वतो नित्यत्वेन सत्त्वकथनमनुपपन्नं सन्नित्यलीलाप्रविष्टत्वरूपं सत्त्वं वक्तीति । एवं कार्यार्थमुपादानमुक्त्वान्यत्कार्य- विधानमाहुः **अननुभवे**ति । तथा च पुरुषोत्तमानुभवार्थमुपात्तस्य तदभावे केवलसत्त्वविधानार्थ- मुपादानेनान्वादेशादेनमिति प्रयोग इति भावः । असन्नेवेत्यत्र तत्पदादेकमेवार्थमाहुः **तदसत्त्वे**ति । **अलीकतुल्य**मिति 'आभास एव च' इति सूत्रभाष्योक्तमेतत् । **सद्भि**रिति प्रच्छन्नबौद्धनिरासार्थम् । **व्रजाधिप** इति तेन भजनीयत्वं सूचितम् । यतः

'यो बीजावापमारभ्य फलपाकावधि स्वयम् ।
पोषितस्तं व्रजतरुं नाथो नापि जिहासति' ॥

इति अत एव चानन्याधिपतिरिति फलाध्याये वक्ष्यन्ति । अग्र आचार्याणां ग्रन्थ इति सूचयन्ति **प्रभुचरणै**रिति ॥ ११ ॥

नन्वानन्दमयस्य न ब्रह्मता वक्तुं शक्या। मयटो लोके विकाराधिकार-विहितत्वादित्याशङ्क्य स्वयमेव परिहरति।

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १२ ॥

अनेनैव पूर्वसूत्रार्थः सिद्धो भविष्यति। विकारवाची शब्दो मयट्प्रत्ययो यस्मिंस्तद्विकारशब्दं तस्मात्तच्छब्दवाच्यं ब्रह्म न भवति। ब्रह्मणोऽविकारित्वादिति चेत्। नात्र विकारे मयट्, किं तु प्राचुर्यात्। प्राचुर्यमतति प्राप्नोतीति प्राचुर्यात्। तथाच पाणिनिः। 'तत्प्रकृतवचने मयट्'। प्राचुर्येण प्रस्तुतं वचनं

भाष्यप्रकाशः।

अतः परमग्रिमसूत्रमवतारयन्ति **नन्वित्यादि**। मयड्वैतयोर्भाषायामित्यनेन लोके मयटो विकाराधिकारे विहितत्वाद्वैदिकनिर्णयस्यापि वादिबोधनाय लोकन्यायेनैव कर्तव्यत्वादित्याशङ्क्य परिहरतीत्यर्थः। सूत्रं पठित्वा व्याकुर्वते।

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १२ ॥ अनेनेत्यादि। विकारार्थनिराकरणेनैव पूर्वसूत्रगत आनन्दमयशब्दो यौगिक इति बोधनान्निरवध्यानन्दरूपः परमात्मेति सिद्धो भविष्यतीत्यर्थः। **विकारशब्दमिति** पदमिति शेषः। अनेन सूत्रांशेन मायावादिवद् भ्रान्ताः प्रागपि ऋषयः सन्तीति, तथा प्राचुर्यादित्यनेन व्याकरणान्तरे प्राचुर्येऽपि मयडस्तीत्यपि बोधितम्। तथापीदानीं पाणिनीयस्यैवात्यादृतत्वात् प्रसिद्धत्वाच्च प्राचुर्यार्थे तत्संमतिमाहुः **तथा चेत्यादि**। ननु पाणिनीये सूत्रे तत्प्रकृतवचने मयडुक्तो, न प्राचुर्ये इति कथं तस्य संमतित्वेनोपन्यास इत्याकाङ्क्षायां व्याकुर्वन्ति **प्राचुर्येणेत्यादि**। सूत्रं तु काशिकायामेवं व्याख्यातम्। तदिति प्रथमा समर्थविभक्तिः। प्राचुर्येण प्रस्तुतं प्रकृतम्। तथाच, प्रथमान्तात् समर्थात् प्रकृतोपाधिकेऽर्थे वर्तमानात् स्वार्थे मयड् भवतीति। उदाहरणं तु प्रकृतमन्नमन्नमयमिति। अपरे तु प्रकृतमुच्यतेऽस्मिन्निति प्रकृतवचनम्। उदाहरणं तु प्रकृतमन्नमुच्यतेऽस्मिन्नित्यन्नमयो यज्ञ इति। उभयथा च सूत्रप्रणयनाद् द्वयमपि प्रमाणमिति। अयमेवार्थः प्रसादेऽनूदितः। सिद्धान्तकौमुद्यां तु तथानूद्य प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनमिति व्याख्यानेन सूत्रे षष्ठीतत्पुरुषो बोधितः। मनोरमादिषु तट्टीकासु तु यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढस्तथापि वचनग्रहणसामर्थ्याद् यादृशस्य प्रकृतस्य लोके प्रत्यायनमभिप्रेतं तत्रायं मयट् स्यादिति विशेषो लभ्यत

रश्मिः।

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १२ ॥ **सन्तीतीति बोधितमित्यनेनान्वयः।** एवं प्रकारान्तरेण सूत्रव्याख्याने बीजं वक्तुमन्येषु व्याख्यानेषु अस्वरसं प्रदर्शयन्तोनुवदन्ति **सूत्रं त्वित्यादि**। **उभयथेत्यादि** ल्युटो भावार्थत्वेधिकरणार्थत्वे च सूत्रप्रणयनं संभाव्येत्यर्थः। **तथानूद्येति** भावेधिकरणे च ल्युटं तथोदाहरणं चानूद्येत्यर्थः। अत्र क्त्वाप्रत्ययः पूर्वकाल इत्यस्याविवक्षायां कौमुद्यां व्याख्यानोत्तरकाले तदननुवादात् मनोरमाशब्दरत्नौ योजयित्वाहुः **यद्यपीति**। **प्रत्यायनमभिप्रेतं तत्रेत्यादि** मयटाभिप्रेतम्। प्रकृतमुच्यतेस्मिन्निति ल्युडधिकरण

तत्प्रकृतवचनं, तस्मिन् मयट्प्रत्ययो भवतीत्यर्थः।

भाष्यप्रकाशः।

इत्युक्त्वा स्वार्थिकप्रकरणवशात् प्रचुरार्थबोधविषयवृत्तिमतः प्रातिपदिकात् स्वार्थे मयड्विधाने प्रातिपदिकार्थोपस्थापिका प्रथमा विभक्तिः प्रकृतावर्थादेव सिद्ध्यतीति वचनपदस्य भावव्युत्पत्तौ तच्छब्दग्रहणं व्यर्थम्। अधिकरणव्युत्पत्तौ तु प्रथमाप्रापकत्वात् सार्थकम्। उच्यमानता प्रकृतता च प्रकृत्यर्थविशेषणम्। ल्युटोक्तमधिकरणत्वं तु मयडर्थ इत्युक्तम्। शब्देन्दुशेखरे तु स्वार्थिकप्रकरणविरोधादधिकरणत्वं मयडर्थ इत्यसंगतम्। न चान्नमयो यज्ञ इत्याद्युदाहरणासिद्धिः। प्राचुर्यवदधिकरणलक्षकाच्छब्दात् स्वार्थे मयट्करणेऽपि तत्सिद्धेः। वृत्तेरप्यत एव संगतेश्च। सूत्रे तु तद्ग्रहणं चिन्त्यप्रयोजनमित्युक्तम्। तदेतत् सर्वं

रश्मिः।

उक्तः। **प्रचुरेति** प्रचुरार्थविधविषया वृत्तिः तद्वतः **वृत्तिः** कृद्रूपा। **प्रकृताविति** सामीप्ये सप्तमी। **अर्थात्** स्वार्थिकप्रकरणवशादेव। **तच्छब्देति** प्रथमासमर्पकस्य ग्रहणम्। **उच्यमानतेत्यादि**। इदं च प्रथमपक्ष एव। उच्यते इति वचनं उच्यमानं भावप्रधानो निर्देशः उच्यमानता। अत्रेदं ध्येयम्। प्रकृत इति लुप्तसप्तम्यन्तं भिन्नं वचन इति च प्रकृत्यर्थः। कस्य वचनाधिकरणत्वमित्यपेक्षायां सन्निधानात् भवन्मयोवनिपतिः तन्निष्ठोच्यमानता न गौणनिष्ठोच्यमानता प्रकृत्यर्थस्यैव लाभात् तस्यैवोच्यमानतेति। अन्यथा वचनशब्दीयप्रकृतिप्रत्ययार्थयोः प्रकृत्यर्थस्य मयट्प्रकृत्यर्थविशेषणता ल्युडर्थस्य प्रकृतमन्नमन्नमयमन्नमयो यज्ञ इत्यादावन्नादिरूपः। द्वितीयपक्षे विधेयप्रत्ययविशेषणतेत्यसंगतं स्यात्। उच्यमानता प्रकृत्यर्थस्य प्रायिकी। अत एव भवतीप्रचुर इत्यर्थे भवन्मय इति दृश्यते। **ल्युटोक्तमिति** ल्युडुक्तं वचनाधिकरणत्वं त्वित्यर्थः। **मयडर्थ** इति न चैवं स्वार्थिकप्रकरणविरोधः। आद्ये तत्प्रकरणपाठस्य चरितार्थत्वादिति शब्दरत्नकारः। **शब्देन्दुशेखरे त्विति** एतदग्रे एतावती त्रुटिरत्र भाति। वचनपदस्य भावार्थकल्युडन्तत्वपक्षे प्रचुरस्य वचने बोधने सति प्रातिपदिकात्प्रत्यय इत्यर्थः। प्रचुरार्थबोधकात्तदिति प्रथमासमर्थात् स्वार्थे मयडिति यावत्। अधिकरणार्थकल्युडन्तत्वपक्षे तु प्राचुर्येण प्रस्तुतान्तादिति वचनात् प्रथमासमर्थादधिकरणेर्थे द्योत्ये मयट्प्रत्यय इत्यर्थः। प्रकृतेति लुप्तसप्तम्यन्तं तत्र वर्तमानादिति तस्यार्थः। अस्मिन् पक्षे वचन इत्यत्र प्रकृत्यर्थोऽविवक्षितः। तेन 'निजामयोध्यामपि पावनीमयं भवन्मयो ध्यायति नावनीपतिः' इति प्रकृत्यर्थाधिकरणमात्रे मयडुपपन्नतरः। तन्त्रेणार्थद्वये सूत्रतात्पर्यं व्याख्यानात्। स्वार्थिकप्रकरणपाठस्तु आद्यपक्षे चरितार्थ इत्युक्त्वा वस्तुतस्त्वथ स्वार्थिका इत्यस्य प्रायेणेत्यादिर्बोध्यः। 'जात्यन्ताच्छ बन्धुनि' 'देवतान्तात्तादर्थ्ये यत्' इत्यादौ वाचकताया एव प्रतीतेः। बन्धुनीत्यस्य शोभनजातिव्यञ्जकद्रव्य इत्यर्थः। तत्पदग्रहणं वाक्यभेदेन प्राचुर्याभावेप्यत्यन्तस्वार्थिकमयडर्थं तेन चिन्मयं ब्रह्मेत्यादि सिद्धमिति स्थितम्। **ग्रन्थान्तरे त्विति**। ननु कथं तर्हि विकारशब्दसूत्रे तन्मयट्परतयेति वृत्तिरतआह **वृत्तेरिति**। **अतएवेति** प्राचुर्यवत अन्नादादेरधिकरणयज्ञलक्षकाच्छब्दात् स्वार्थे मयडङ्गीकारादेवेत्यर्थः। अन्नमाधेयं यज्ञोधिकरणमित्याधाराधेयभावसंबन्धो लक्षणा अन्नादिशब्दा लक्षकाः। एवमनूद्य तत्रास्वरसप्रदर्शनपुरःसरं प्राचुर्येणेत्यादि भाष्यं विवृण्वन्ति **तदेतदित्यादि**।

---

१. भवती इत्यस्याधिकरणे।

प्राचुर्येण पूर्वापेक्षयाऽन्याधिक्येन, 'को ह्येवान्यात् कः प्राण्यात्' इति वाक्ये प्रकर्षेण स्तुतम् । अतो मयट् पूर्वापेक्षया प्राचुर्यमयते । एकदेशनिर्देशेन तदर्थलक्षणया प्राचुर्यः । प्राचुर्येण प्रस्तुतार्थवाचकत्वादित्यर्थ इति वा ।

भाष्यप्रकाशः ।

वृत्तिविचारादेवानुसंधाय तद्ग्रहणं वैयर्थ्यनिवृत्त्यर्थम् । तेन प्रकृतं तत्प्रकृतम्, उच्यत इति वचनमवश्यप्रतिपादनम् । प्राचुर्येण प्रस्तुतस्य वचनं तत्प्रकृतवचनम् । तत्र तथेति सूत्रार्थः । तथाच तच्छब्दस्य विवक्षितप्रकारबोधनार्थत्वाद्वचनपदस्यावश्यकार्थत्वादेवं सूत्रार्थोक्तौ संमतित्वं निर्बाधमिति तथेत्यर्थः । स्वोक्तं विभजन्ते प्राचुर्येणेत्यादि । पूर्वापेक्षयेति अन्नमयादिचतुष्टयापेक्षया । ननु प्राचुर्येण प्रस्तुतेऽर्थेऽनुशिष्टो मयट् कथं प्राचुर्यबोधक इत्यत आहुः एकदेशेत्यादि । यथा हि भीमसत्यादिपदानि, विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्य इति वार्तिकेनैकदेशभूतान्यपि विशिष्टार्थनामानि, तथात्र नामत्वाभावेन वक्तुमशक्यत्वाल्लक्षणया प्राचुर्येण प्रस्तुतं बोधयतीत्यर्थः । पूर्वस्मिन् पक्षे कल्पनाक्लेशात् प्रकारान्तरेण व्याख्यातम् । तथाच पञ्चम्यन्तमिदं पदम् । तेन न कल्पनाक्लेश इत्यर्थः । ननु, मयड्वैतयोर्भाषायामिति सूत्रे विकल्पस्य भाषायां सिद्धेर्वेदे नित्यं विकारे मयट् । किं च, 'नित्यं वृद्धशरादिभ्यः' इत्यग्रिमसूत्रे भाषायामित्यस्यानुवृत्त्या भाषायां नित्यो, वेदे वृद्धादिभ्यो वैकल्पिक इति सिद्ध्यति । एवं सत्यानन्दशब्दस्य वृद्धत्वात्

रश्मिः ।

वृत्तिविचारादेवेति वृत्तिविचारस्तु तत्प्रकृतवचने मयट् प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं भावेधिकरणे वा ल्युडिति वृत्त्यर्थमाहुः तेन प्रकृतमित्यारभ्य तथेत्यन्तम् । **सूत्रार्थ** इति । अत्रेदं बोध्यम् । प्राचुर्यं तत्पदार्थः । प्रस्तुतः प्रकृतपदार्थः । प्रतिपादनं च वचनपदार्थः । प्रत्ययार्थविशेषणमिदं स्वार्थिकत्वस्य प्रायिकत्वात् । एवं च न तत्पदवैयर्थ्यं न वा प्रकृतपदस्य लक्षणया प्राचुर्येण प्रस्तुतस्य बोधकत्वं न वा प्रकृतपदे लुप्तविभक्त्यन्तत्वकल्पनं न वा वचनपदप्रकृत्यर्थत्यागः । अन्नमयो यज्ञ इति तु प्रतिपादनमित्यत्राधिकरणल्युटमाश्रित्य चिदेव चिन्मयमिति च प्रकृतवचने मयडिति योगविभागेन सिद्ध्यतीति । **विवक्षितेति** प्राचुर्यरूपप्रकारबोधनार्थत्वादित्यर्थः । **आवश्यकेति** भावव्युत्पत्त्यावश्यकत्वं द्योत्यते, प्रतिपादनविषयत्वात् । **प्राचुर्येणेत्यादीति । भाष्ये । तत्प्रकृतेति** तेन प्रकृतं तत्प्रकृतं तस्य वचन इत्यर्थः । ननु स्वार्थिकाधिकारात् तदित्यस्य प्रथमान्तात्समर्थादित्यर्थो न तु तेन प्राचुर्येणेत्यर्थः इति चेन्न । तस्यार्थस्य 'समर्थानां प्रथमाद्वा' इत्यधिकारसूत्रलभ्यत्वात् वचनशब्दो भावल्युडन्तः । लक्षणयेति पदस्वारस्यमाहुः **यथेत्यादि** । **वार्तिकेनेति** तद्धिते स्वार्थिकाधिकारस्थेनेत्यर्थः । **लक्षणयेति** अवयवावयविभावसंबन्धो लक्षणा । प्राचुर्येण प्रस्तुतमवयवि, प्रस्तुतमवयव इति तेन भाष्ये तदर्थलक्षणयेत्यस्य प्राचुर्येण प्रस्तुतेर्थे लक्षणयेत्यर्थः । तथा च प्राचुर्यान्मयडित्यत्र हेतुगर्भं विशेषणमिति प्रथमान्तस्य हेतुत्वलाभः । प्राचुर्येणेति भाष्याभिप्रायमाहुः **अस्मिन्नित्यादि** । **कल्पनेति** हेतुत्वकल्पनाक्लेशात् । प्रतीतिविरोधोपि द्रष्टव्यः । इदं दूषणं 'तुष्यतु दुर्जनः' न्यायेनेति बोध्यम् । **व्याख्यातमिति** प्राचुर्येणेत्यादिना व्याख्यातमित्यर्थः । **इदमिति** प्राचुर्यादिति पदमित्यर्थः । आनन्दशब्दाद्विकारार्थे मयट् चतुर्भिः प्रकारैर्मनोरमायां प्रसह्य साधितस्तत्र तृतीयं प्रकारमाशङ्कामुखेनाहुः **किंचेत्यादि** । **वृद्धत्वादिति** 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इतिसूत्रेण

छन्दसि द्व्यज्व्यतिरिक्तस्थले मयटो विकारे विधानाभावाद् व्याकरणमप्यर्थनिर्णायकम्। विज्ञानमयानन्दमयशब्दौ पश्यन्नपि पाणिनिः 'मयड्वैतयोर्भाषायाम्', 'द्व्यचश्छन्दसि' इति कथमवोचत्।

भाष्यप्रकाशः।

ततो वैकल्पिको, विज्ञानशब्दाच्च नित्यो विकारे मयडदण्डवारितः। अन्नादिपदेभ्यश्च स्वारसिक एवेति प्रायपाठानुग्रहाद् विकारार्थ एव युक्त इति तं विहाय प्राचुर्ये तदङ्गीकारो न युक्त इत्यत आहुः छन्दसीत्यादि। द्व्यज्व्यतिरिक्तस्थल इति बह्वच्स्थले। तथाच यदि सूत्रकारः पाणिनिस्तथाभिप्रेयात् तदा छन्दसि बह्वज्व्युदासाय द्व्यच एवेति न नियमयेत्। अतो नित्यो वैकल्पिको वा मयट् छन्दसि बह्वचो विकारे न भवत्येवेति पाणिनीयविचारेणापि प्राचुर्यार्थग्रहणं युक्तमेवेत्यर्थः।

अत्र शङ्कराचार्याः। अन्नमयादिविज्ञानमयान्तं विकारप्रायपाठमनादृत्यानन्दमयपदस्य प्राचुर्यार्थत्वब्रह्मविषयत्वयोरङ्गीकारे प्रायपाठविरोध आकस्मिकत्वं च। मान्त्रवर्णिकब्रह्माधिकाराद् ब्रह्मविषयत्वादरणेऽन्नमयादीनामपि ब्रह्मत्वप्रसङ्गः। अन्नमयाद्यान्तरस्यान्यस्य कथनात्तेषां न ब्रह्मत्वम्। आनन्दमयादन्तरस्यान्यस्याकथनात् तस्य ब्रह्मत्वमित्यङ्गीकारेऽप्येकस्यैवानन्दमयस्य ब्रह्मण आत्मत्वेनावयवित्वं, तस्यैव पुच्छत्वेनावयवत्वमित्यसामञ्जस्यम्। किं च। प्रियमोदादिविशेषयुतस्यानन्दमयस्य सर्वलोकप्रसिद्धत्वेन भावाभावशङ्कास्पदत्वाभावात् 'असन्नेव स भवति' इतिश्लोकस्यापि विरोधः। अपि चानन्दमयस्य ब्रह्मत्वेऽपि प्रियाद्यवयवयोगेन सविशेषब्रह्मत्वमङ्गीकर्तव्यम्। तथा सति वाङ्मनसाऽगोचरत्वबोधकस्य, 'यतो वाचो निवर्तन्ते' इति वाक्यशेषस्य विरोधः। किं चानन्दप्रचुर इत्युक्ते तत्र दुःखास्तित्वस्यापि प्रत्ययापत्तिः। लोके प्राचुर्यस्य प्रतियोग्यल्पतासापेक्षत्वात्। तथाच सति यत्र नान्यत् पश्यति शृणोति विजानातीति सुखैकरसे भूम्नि ब्रह्मणि तद्व्यतिरिक्ताभावबोधकश्रुत्यन्तरस्यापि विरोधः। किं च। प्रियादेः प्रतिशरीरं भिन्नत्वेनानन्दमयस्यापि तथात्वात् तस्य न ब्रह्मत्वं शक्यवचनम्। 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतौ, 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा' इति श्रुत्यन्तरे च ब्रह्मण आनन्त्यैकत्वयोः श्रवणात्। किं च। आनन्दपदस्यैवाभ्यासो, न त्वानन्दमयपदस्येत्यतोऽपि न ब्रह्मत्वम्। एतमानन्दमयमात्मानमुपसंक्रामतीत्यभ्यासस्त्वन्नमयादिप्रवाहपतितत्वान्न ब्रह्मत्वसाधनसमर्थः। अत आनन्दमयशब्दस्य ब्रह्मविषयताया अनिश्चितत्वेन तत उत्तरेष्वानन्दमात्रप्रयोगेष्वा-

रश्मिः।

तथात्वादित्यर्थः। 'द्व्यचश्छन्दसि' इतिसूत्रादाहुः एवेति। एतेन विज्ञानमयानन्दमयशब्दावित्यादि भाष्यमपि व्याख्यातप्रायम्। व्याकरणमित्यादि भाष्यं तु ननु पाणिनिनानुक्तेपि शंकरभगवत्पादभाष्योक्त्या विकारे त्र्यचोपि मयड् भविष्यतीति चेत्तत्राहुः **व्याकरणमिति** व्याकरणमप्यर्थनिर्णायकं न तु तदुक्तेरेवेत्यर्थः। तदुक्तिस्तु क्रीडान्तरे चरितार्था नात्र निविशत इति च योज्यम्। यद्वा श्रुत्या निर्णीतं व्याकरणं नापेक्षत इत्यत आहुः **व्याकरणमिति** अङ्गत्वादर्थनिर्णायकमित्यर्थः। सूत्रेण ज्ञाप्यते अन्यानि पञ्चाङ्गानि वेदे एवेति। **प्रतियोगीति** आनन्दप्रचुर इत्युक्ते प्रतियोगिनो दुःखस्याल्पता तत्सापेक्षत्वात्। आनन्दो दुःखं च द्वन्द्वत्वात् संबन्धि?। **तथा चेति** अल्पप्रतियोगि-

अत्र केचित् सर्वविप्लववादिनो विकारार्थत्वं वदन्ति । श्रुतिसूत्रादीनामर्थाज्ञानात् । तद् वेदाद्यर्थविद्भिर्भगवतो नवमावतारकार्यं ज्ञात्वोपेक्ष्यम् ।

भाष्यप्रकाशः ।

नन्दमयाभ्यासस्य कल्पयितुमशक्यत्वान्नानन्दमयो ब्रह्मेत्याहुः ।

तन्मतस्याधिकरणसमाप्तौ दूषणीयत्वादत्रैतत्सूत्रे पूर्वपक्षतयोदितमानन्दमयपदस्य विकारार्थत्वं यत् सिद्धान्तितं, तस्यासंगतत्वायाहुः अत्र केचिदित्यादि । अत्रानन्दमयशब्देऽन्नमयादिषु पञ्चस्वपि वा केचिन्निर्विशेषवादग्रहिला विवर्तवादाद्यङ्गीकारेण भगवन्माहात्म्यादिनाशकत्वात् सर्वविप्लववादिनो विषयवाक्याकरश्रुतेस्तद्विचारकाणां व्याससूत्राणां व्याकरणसूत्राणां च तात्पर्याज्ञानाद् विकारार्थत्वं वदन्ति । तत उक्तश्रुत्याद्यर्थविद्भिर्भगवतो नवमावतारस्य बुद्धस्य कार्यं वेददूषणरूपं ज्ञात्वोपेक्ष्यम् । पाद्मोत्तरखण्डे उमामहेश्वरसंवादे तामसशास्त्रकथनं प्रतिज्ञाय कानिचिदसच्छास्त्राण्युक्त्वा,

'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते ।
मयैव कथितं देवि कलौ ब्राह्मणरूपिणा ॥
अपार्थं श्रुतिवाक्यानां दर्शयँल्लोकगर्हितम् ।
कर्मस्वरूपत्याज्यत्वमत्रैव प्रतिपाद्यते ॥
सर्वकर्मपरिभ्रष्टं वैकर्मत्वं तदुच्यते ।
परेशजीवयोरैक्यं मयात्र प्रतिपाद्यते ॥
ब्रह्मणश्च परं रूपं निर्गुणं वक्ष्यते मया ।
सर्वस्य जगतोऽप्यत्र मोहनार्थं कलौ युगे ॥
वेदार्थवन्महाशास्त्रं मायावादमवैदिकम् ।
मयैव वक्ष्यते देवि जगतां नाशकारणात्' ॥ इति ।

शिववाक्याद् वेदाद्यर्थविद्भिर्नादरणीयमित्यर्थः । नच प्रायपाठविरोधः । विकारार्थस्य प्राणमयपद एवाभावात् । प्राणादीनां त्रयाणां वृत्तित्वेनाकाशपृथिव्योश्च भूतान्तरत्वेन तदवयवकल्पनाग्रन्थतस्तत्र मयटः स्वार्थिकत्वस्यैव भट्टभास्करोक्तरीत्या निश्चयात् ।

रश्मिः ।

स्वीकार इत्यर्थः । **भगव**दिति आदिशब्देनैक्यज्ञानं नहि खपुष्पशब्दार्थो नापि विवर्ते ऐक्यमुत्पाद्यं प्रतियोग्यभावात् । अतो भक्तिकारणनाशकत्वात्सर्वेषां भक्तिमुख्यत्वेन तदभावे नाशः । भगवद्भावाच्युतिः साधनाभावान्न च्युतिमात्रं किं तु विप्लवः संसारसागरे मज्जनम् ।

'नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्' ॥

इतिवाक्यात् । अच्युतभावेपि निर्गुणा भक्तिरेव । सगुणा तु निन्द्यते तृतीयस्कन्धकपिलवाक्येष्विति । अतः सर्वेभ्यो विगतः प्लवो भक्तिर्यस्माद्वादात्तादृशवादो येषां ते सर्वे विप्लववादिनः । **तात्पर्ये**ति अत्रैव स्पष्टमिदं प्रमेयम् । कुतोऽभाव इत्यतोऽसंभवादित्याहुः **प्राणादीना**मिति तस्य 'प्राण एव शिरः व्यानो दक्षिणः पक्षः अपान उत्तरः पक्षः' इत्येषां त्रयाणां वायुवृत्तिविशेषत्वेनेत्यर्थः । **आकाशे**त्यादि 'आकाश आत्मा पृथ्वी पुच्छं प्रतिष्ठा'इति श्रुत्युक्तयोरित्यर्थः । **स्वार्थिक इत्यस्यैवे**ति स्वार्थः प्रातिपदिकार्थः स इमे प्राणादयः पञ्चेत्येवकारः । **निश्चयादि**ति

भाष्यप्रकाशः ।

नच घटाकाशस्य घटविकारत्ववत् प्राणाद्युपाध्यवच्छिन्नस्य प्राणविकारत्वं भामत्युक्तरीत्या सिद्ध्यतीति प्रायपाठसिद्धिरिति वाच्यम् । एतस्या रीतेर्मज्जत्फेनालम्बनकल्पत्वात् । अवच्छिन्ने तद्विकारत्वस्याप्रत्ययात् । शास्त्रेषु क्वापि तथाप्रयोगादर्शनाच्च । तुष्यतु दुर्जनन्यायेन तदङ्गीकारेऽपि तस्य सत्यामुभयत्र प्राप्तावेकतरनिर्णायकत्वं, न तु तत्प्रापकत्वमिति द्व्यचश्छन्दसीति व्याकरणसूत्रेण, न बह्वच इति नियमिते विज्ञानानन्दशब्दाभ्यां वैकारिकमयट्प्राप्तेरेवाभावेनाऽकिंचित्करत्वाच्च । नच मनोरमादिषु, 'मयड् वा'इति सूत्रेण, हेतुमनुष्येभ्य इत्यनुवर्तमाने हेतुवाचकानन्दशब्दादागतार्थे मयटं साधयित्वा विकारस्यार्थिकत्वमुक्तमित्यस्त्येव प्राप्तिरिति वाच्यम् । पञ्चस्वप्यन्नमयादिषु स्वार्थे मयट्प्राप्तौ बाधकाभावेन वृथा तदतिहायैवं क्लिष्टकल्पनस्यायुक्तत्वात् । हेतुत्वस्य निमित्तोपादानसाधारणत्वेन विकारस्यार्थिकताया निर्णेतुमशक्यत्वाच्च । नचानन्दप्राचुर्यस्योक्तरीत्या दुःखशाबल्यस्फोरकत्वेनानन्दमये ब्रह्मत्वसिद्ध्यभावादागतार्थमादाय विकारादरणेऽपि को दोष इति वाच्यम् । लोकेऽपि प्रचुरप्रकाशः सविता, प्रभूतसन्तापो निदाघदिवसोऽन्धकारमयी वर्षाविभावरी, बहुधनो वैश्रवण इत्यादिवाक्यश्रवणे प्रतियोगिनां तमःशैत्यप्रकाशदारिद्र्याणां प्रत्यक्षतो बाधेन तत्र तदल्पत्वशङ्काया अनुदयात् । वेदे तु सर्वभूतोपजीव्यांशानन्दप्राचुर्यबोधके दूरापेतैव प्रतियोग्यल्पत्वशङ्का । यदि हि तत्र वेदो दुःखसंभेदमभिप्रेयादवयवकल्पनायां तदपि क्वचिन्निवेशयेत् । सजातीयैरेवार्थैरवयवकल्पनाया अनुपक्रान्तत्वात् । आकाश आत्मा पृथिवी पुच्छं महः पुच्छमित्यादिना तथा निश्चयात् । यच्च शारीर आत्मेति शरीरसंबन्धबोधनं दुःखसंभेदसमर्थकमित्युक्तं, तदप्यन्तर्यामिब्राह्मणाननुसंधानहेतुकम् । अत एवं सत्यपि यत् तदविचारेणानन्दमये दुःखास्तित्वकथनं, तद् ग्रन्थकृतो महादुःखसंस्कारस्य प्राबल्यमेव गमयतीति दिक् ।

भास्कराचार्यास्तु स्वरूपैक्ये प्राचुर्यवचनं प्रचुरप्रकाशो रविरितिवन्नेतरालपत्वमपेक्षत इत्याहुः ।

रामानुजाचार्यास्तु, तत्प्रचुरत्वमितरसत्तां नावगमयति । अपि तु तस्याल्पत्वं निव-

रश्मिः ।

तथा च प्राणाकाशपृथिवीप्रचुरे प्राणमये प्राणविकारत्वासंभवान्न 'द्व्यचश्छन्दसि' इति विकारे मयडित्यर्थः । **मज्जदित्यादि** मज्जतो यत्फेनावलम्बनं तत्तुल्यत्वादित्यर्थः । **तथाप्रयोगे**ति घटाकाशो घटविकार इति प्रयोगाभावादित्यर्थः । **तस्ये**ति प्रायपाठस्येत्यर्थः । **तत्प्रापकत्वमि**ति विकारे मयट्प्रापकत्वमित्यर्थः । मनोरमोक्तं चतुर्थं प्रकारमाशङ्क्य पराकुर्वन्ति **न च मनोरमेत्यादि** । **आर्थिकत्वमि**ति यो यतो निर्गतः स तस्य विकार इति लोक प्रसिद्धेः । **अशक्यत्वादि**ति उपादानस्यैव विकारदर्शनादिति भावः । मनोरमायां प्राचुर्ये मयट्यपि प्रकृत्यर्थविरोधिनो लेशतोनुवृत्तिलाभात् प्रकृते विकारार्थः पर्यवस्यतीत्युक्तम् । तत्र तत्पर्यवसानं कथमिति चिन्त्यमिति शब्दरत्नकारः । तत्र चिन्तितप्रकारमुखेन हेतुग्रन्थेन शब्दरत्नमुत्क्षिपन्तो द्वितीयप्रकारमाशङ्क्य निषेधन्ति **न चानन्देत्यादि** । एवं शब्दरत्नमाक्षिप्य मनोरमोक्तमाशङ्क्य तन्निषिद्ध्य तत्र हेतुमाहुः **लोकेपी**ति । **तदपी**ति दुःखमपीत्यर्थः । **आकाशेत्यादि** आकाशपृथिव्योः प्राणमयावयवयोर्विजातीयत्वं विज्ञानमयावयवस्य महसो विजातीयत्वमिति तथेत्यर्थः । आदिना योग आत्मेति ज्ञानमयावयवस्य योगस्य विजातीयत्वम् । **अन्तर्यामीत्यादि** । तत्र सर्वेषां ब्रह्मशरीरत्वकथनादिति भावः । **इतराल्पमि**ति दुःखस्य लेशमित्यर्थः । **इतरसत्तामि**ति दुःखसत्तामित्यर्थः । **तस्ये**ति आनन्दस्येत्यर्थः ।

योऽर्थऽस्तमवोचाम ॥ १२ ॥

भाष्यप्रकाशः ।

र्तयति । इतरसद्भावासद्भावौ तु प्रमाणान्तरावसेयौ । इह त्वपहतपाप्मेत्यादिना प्रमाणान्तरेण तदभाव एवावसीयते । तथा आनन्दमीमांसायां ब्रह्मणि निरतिशयदशाशिरस्कानन्दबोधिकया श्रुत्या पूर्वोक्तजीवानन्दापेक्षया प्राचुर्यबोधनेन सापेक्षत्वमप्येवं पूर्यत इति दुःखसद्भावावगमकथनमसदित्याहुः । तदपि युक्तमेव । उपपन्नत्वात् ।

यत्तु, 'श्रीग्रामण्योश्छन्दसि'इत्यत्र श्रियश्छन्दसीत्यंशो भाष्यकृतां छन्दसि विभाषाया व्यवस्थितत्वमुपेत्य प्रत्याख्यातस्तद्रीत्या प्रकृतेऽपि भाषाग्रहणं, 'द्व्यचश्छन्दसि,' 'नोत्वद्वर्ध्रबिल्वात्' इति सूत्रद्वयं च त्याज्यम् । तथाचानन्दमय इत्यादावपि विकारे मयट् सुकर एवेति शंकराचार्योक्तं सम्यगेवेति मनोरमायां समर्थितम् । तत्तु विकारत्वप्रकारकबोधविवक्षायां बह्वचः परस्य मयट्प्रत्ययस्यासाधुत्वज्ञापनाय, 'द्व्यचश्छन्दसि' इत्यादेरावश्यकत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादिति दूषणं प्रदर्श्य रामकृष्णशास्त्रिभिरेव सिद्धान्तरत्नाकरे दूषितमिति न कथमपि विकारे मयट्सिद्धिः । यदपि प्राचीनवृत्तिकारैर्विज्ञानमयस्थले विकारार्थकत्वं यदाश्रितं तत्रैषैव गतिरिति मनोरमायामुक्तम् । तदपि कल्पितमिवाभाति । रामानुजाचार्यैर्वृत्तिकारानुसरणस्य कृतत्वेन तैरननूदितत्वात् । अथास्ति तत्र तर्हि तत्रैव दोषो नान्यत्रेति, न किंचिदेतत् । किं च पूर्वसूत्रे, अभ्यासादित्युक्त्वाऽस्मिन् सूत्रे प्राचुर्यादिति यदुक्तं तेनान्नमयादिषु पञ्चस्वपि प्राचुर्यमेव बाधकाभावात् सिद्ध्यतीति प्रायपाठोऽप्येतस्यैवानुग्राहको, न तु विकारार्थस्येति बोधनायाहुः योऽर्थस्तमवोचामेति । यः सर्वत्रानुस्यूतः पञ्चानामर्थस्तं व्याकरणसूत्रोपन्यासेनावोचामेत्यर्थः ॥ १२ ॥

रश्मिः ।

अपाप्मेति पापमपि दुःखं पापजनकत्वादिति भावः । **तदभावे** इति दुःखाभावः । प्रथमं प्रकारमाहुः **यत्त्वित्यादि** । श्रीति आमो नुडिति वृत्तिः । श्रीणामुदारो धरुणो रयीणां सूतग्रामणीनामित्युदाहरणम् । त्याज्यमिति सति हि भाषाग्रहणे शरमयं बर्हिरित्यादिसिद्ध्यर्थं द्व्यचश्छन्दसीति वक्तव्यम् । मौञ्जं शिक्यम् । वार्ध्रं चर्म बैल्वो यूप इत्यादौ द्व्यच इति प्राप्तं प्रतिषेद्धुं नोत्वदिति सूत्रमारब्धव्यं भाषाग्रहणे त्यक्ते तु सूत्रद्वयं व्यर्थमिति त्याज्यमित्यर्थः। उत्वान् उकारवान् तथात्रोकारवद् वर्ध्रबिल्वेभ्यो विकारे मयण् न भवतीति सूत्रार्थः । **तत्रैवेति** वृत्तावेवेत्यर्थः । **अभ्यासादिति** भाष्य एवमभ्यासः[1] श्रूयते इत्यनेन ग्रन्थेनान्नमयादिव्यावृत्तोभ्यास इत्युक्त्यान्नमयादिव्यावृत्तो हेतुरेवमत्रापि तद्व्यावृत्तो हेतुरित्यर्थो भाति क्त्वाप्रत्ययात् तथापि यदुक्तमित्यस्यान्नमयादिव्यावर्तकभाष्याभावात् तेनान्नेनेत्यादिः । बाधकेति पूर्वसूत्रे एवमितिवत् । अत्र सूत्रे अन्नमयादिपरत्वे सूत्रस्य बाधकभाष्याभावात् । **एतस्यैवेति** प्राचुर्यार्थस्यैवेत्यर्थः ॥ १२ ॥

१. दृष्टान्ते पापाभावः.

शब्दबलविचारेण मयटो विकारार्थत्वं निवारितम्। अर्थबलविचारेणापि निराकरोति।

तद्धेतुव्यपदेशाच्च ॥ १३ ॥

हेतुत्वेन व्यपदेशो हेतुव्यपदेशः। तस्य हेतुव्यपदेशस्तद्धेतुव्यपदेशस्तस्मात्। 'एष ह्येवानन्दयाति' इति। आनन्दयतीत्यर्थः। सर्वस्यापि विकारभूतस्यानन्दस्यायमेवानन्दमयः कारणम्। यथा विकृतस्य जगतः कारणं ब्रह्म अविकृतं सच्चिद्रूपमेवमेवानन्दमयोऽपि कारणत्वादविकृतोऽन्यथा तद्वाक्यं व्यर्थमेव स्यात्। तस्मान्नानन्दमयो विकारार्थः। चकारः समुच्चयं वदन् सूत्रद्वयेनैकोर्थो मध्ये प्रतिपादित इत्याह ॥ १३ ॥

भाष्यप्रकाशः।

उक्तसूत्रेण विकारार्थे निरस्तेऽग्रिमसूत्रस्य किं प्रयोजनमित्यत आहुः शब्देत्यादि। 'तामिन्द्रो मध्यतोऽपरोच्य व्याकरोत्' इति श्रुतेः 'मुखं व्याकरणं स्मृतम्' इति परिशिष्टाच्च व्याकरणरूपः शब्दोऽर्थनिर्णायक इति तद्बलविचारेण तथाकृतम्। तदपेक्षया अर्थस्तु बलिष्ठः। प्रतिपाद्यत्वेन शेषित्वात्। उक्तरीत्या निराकरणे स चेद् विरुद्ध्येत तदा प्रयासो व्यर्थः स्यादतस्तद्वारणाय सूत्रान्तरमित्यर्थः।

तद्धेतुव्यपदेशाच्च ॥ १३ ॥ उक्तरीतिकं विकारार्थनिराकरणं व्युत्पादयन्ति **सर्वस्ये**त्यादि। **व्यर्थमेव स्या**दिति 'रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति' इति पूर्ववाक्ये पूर्वप्रकृतस्यानन्दमयस्यैव रसत्वेन सिद्धत्वात् तल्लाभेनानन्दवत्ताश्रावणेनैव रसरूपस्यानन्दमयस्यानन्दकारणताया अर्थतः सिद्धौ पुनस्तत्कथनमप्रयोजनकं सत् तथास्यादतः कारणत्वेनाविकृतत्वबोधनायैवेदं वाक्यम्। तेनाविकारत्वमेव सिद्ध्यतीत्यर्थविचारेणापि न तथेत्यर्थः ॥ १३ ॥

रश्मिः।

तद्धेतुव्यपदेशाच्च ॥ १३ ॥ **भाष्ये**। **हेतुत्वेने**ति भावप्रधानो हेतुरुक्तः। सहकारिकारणतारूपहेतुवारणाय। **तस्ये**ति प्रचुरानन्दस्य जीवादिनिष्ठस्य। आनन्दयातीति लडन्तं पदम्। प्रकृते **तामि**ति **तां** वाचम्। **मध्यतो** मुखमध्यतः। **अपरोच्य** ल्यबन्तं पदम्। वैखरीकृत्येत्यर्थः। **व्याकरो**दिति तामेव व्याकरणमकरोदित्यर्थः। परिशिष्टं वेदोपाङ्गम्। **तल्लाभेने**ति। आनन्दमयलाभेनानन्दीभवतीत्यानन्दवत्ताश्रावणेनेत्यर्थः। **तत्कथन**मिति 'एष ह्येवानन्दयाति' इत्यनेन तथेत्यर्थः। **अविकृतत्वे**ति व्यर्थं सत्किंचिज्ज्ञापयतीति वैयाकरणानां प्रसिद्धेः। फलमन्यत्र यतो वा इमानि इति श्रुतौ यच्छब्दार्थकारणाविकृतत्वम्। **भाष्ये**। एकोर्थ इति विकारार्थनिरासरूप इत्यर्थः ॥ १३ ॥

ननु किमिति निर्बन्धेन सूत्रत्रयेणैवं वर्ण्यते। अन्नमयादिवदुपासनापरत्वेनापि श्रुत्युपपत्तेः। पक्षपुच्छादित्वेन मोदप्रमोदादीनामुक्तत्वाच्च। तस्माद् ब्रह्मत्वेन साधितमप्यावश्यकोपपत्त्यभावान्न ब्रह्मपरत्वमिति प्राप्तेऽभिधीयते।

मान्त्रवर्णिकमेव च गम्यते ॥ १४ ॥

'सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति मन्त्रः। मन्त्रेणाभिधया वृत्त्या प्रतिपाद्यं मान्त्रवर्णिकम्। तदुपपादनग्रन्थे तदेव मुख्यतया ज्ञायते। यत्र यदुद्दिष्टं तदेव मुख्यतया ज्ञातव्यम्। उपपादनीयं च संदिग्धम्। तत्र, ब्रह्मणा विपश्चितेति संदिग्धं सर्वज्ञं ब्रह्म।

भाष्यप्रकाशः।

मान्त्रवर्णिकमेव च गम्यते ॥ १४ ॥ मान्त्रवर्णिकसूत्रमवतारयन्ति नन्वित्यादि। एवमिति परमात्मपरत्वेन। नचोपास्तेरश्रवणादप्रामाणिकं कथं कल्पनीयमिति शङ्क्यम्। तदभावेऽपि विद्युद् ब्रह्मेत्यादिषु विद्युदाद्युपासनासु प्रकरणबलेन तत्स्वीकारात्। प्रकृते तु पक्षपुच्छादित्वेन मोदप्रमोदादीनां कल्पनयोक्तत्वाच्च लिङ्गस्यापि सद्भावात्। तस्मादुक्तहेतुद्वयाद् ब्रह्मत्वेन साधितमप्यानन्दमयपदमावश्यकोपपत्त्यभावान्न ब्रह्मपरमिति प्राप्ते इत्यर्थः। ब्रह्मपरत्वमिति पाठे त्वर्हतीति शेषस्त्रुटितो बोध्यः। को मन्त्रः, किं मान्त्रवर्णिकमित्याकाङ्क्षायामाहुः सत्यमित्यादि। तथाच यं कंचिदर्थमभिसंधाय शक्यसंबन्धानां नानात्वात् तेषु यं कंचिदादाय लक्षणया यत्किंचिदुच्यते, तन्न मान्त्रवर्णिकम्। किंतु मन्त्रेणाभिधया पदशक्त्या मुख्यवृत्त्या यत् प्रतिपाद्यं तत् तथेत्यर्थः। एतस्य मान्त्रवर्णिकस्य कथमुपपत्तित्वमित्यत आहुः तदित्यादि। तदुपपादनग्रन्थ इति सर्वस्मिन् प्रपाठके। तथा च तस्य मुख्यत्वादावश्यकोपपत्तित्वमित्यर्थः। मुख्यत्वमेवास्य कथमित्यत आहुः यत्रेत्यादि। ननु तदेषाऽभ्युक्तेति प्रतिज्ञानान्मन्त्रस्य ब्राह्मणव्याख्यानत्वं स्फुटम्। शिष्टस्य प्रपाठकस्य मन्त्रव्याख्यानत्वे किं गमकमित्यत आहुः उपपादनीयमित्यादि। संदिग्धमिति विभक्तिभेदात् पदभेदाच्च संदिग्धम्। तथाच संदिग्धोपपादकत्वमेव व्याख्यानत्वगमकमित्यर्थः। ननु

रश्मिः।

मान्त्रवर्णिकमेव च गम्यते ॥ १४ ॥ प्रकरणेति। ननु प्रकरणं कुत इति चेन्न ब्रह्मविदित्यत्र विदित्युपासनास्वीकारात्। अक्षरविषयत्वेन तथावसायात्। विभूतिविषयकं ज्ञानमुपासनेति। प्रीतिविषयः शिर इत्यानन्दमयो भक्तिविषयः। तत्स्वीकारादिति प्रामाणिकत्वस्वीकारात्। पूर्वपक्षत्वात्तूष्णीकमुपासापरत्वं वा। पक्षेति भाष्यं विवृण्वन्ति स्म प्रकृते इति। लिङ्गस्येति उपास्तिलिङ्गस्य। तस्मादिति भाष्यं विवृण्वन्ति स्म तस्मादिति। बोध्य इति अवोध्य इति न हेतुः किं तु साधितमित्यस्य विशेष्यं ब्रह्मपरत्वं बोध्यमिति भावः। तथा चेति मान्त्रवर्णिकमित्यत्र शैषिकठगङ्गीकारेणेत्यर्थः। यं कंचिदिति यथा काकेभ्यो दधि रक्ष्यतामित्यत्र यं कंचित्काकरूपं यं कंचिद् दध्युपघातकत्वरूपं संबन्धमादाय यत्किंचित्काकपदेन दध्युपघातक उच्यते। यत्रेत्यादीति ब्रह्मविदाप्नोति परमिति यदुद्दिष्टं भाष्ये। प्रकृते परपदं च। व्याख्याने तु तृतीयाविभक्तिः ब्रह्मपदं चेति तयोर्भेदः। विभ-

४० ब्र० सू० र०

तस्य हि फलत्वं वाक्ये नोपपाद्यते। फलं तु सर्वैः स्तुत आनन्दः। अभ्यासात् स्तुतत्वमित्यवोचाम। शिरःपाण्यादिकं तु स्तुत्यर्थमेव पुरुषविधत्वाय। लोके ह्यन्तर्भूतं बहिर्वेष्टितं च तदाकारं भवति।

भाष्यप्रकाशः ।

सर्वज्ञे ब्रह्मणि कस्मिन्नंशे कुतश्च संदेह इत्यत आहुः **तस्य हीत्यादि** । **वाक्य** इति मन्त्रे । तथाच ब्राह्मणवाक्ये द्वितीयया परस्य फलत्वबोधनात्, तद्व्याख्यानमन्त्रे तु द्वितीयया कामानां फलत्वबोधनाद् ब्रह्मणश्च गौणत्वबोधनात् तस्य फलत्वांशे संदेह इत्यर्थः। तर्हि कथं तस्य फलत्वमुपपाद्यत इत्याकाङ्क्षायां सर्वतः प्रचुरानन्दरूपत्वेनोपपाद्यत इत्याहुः **फलं त्वित्यादि**। **सर्वैरिति** प्रकारैः । प्रकारास्त्वभ्याससर्वान्तरत्वसर्वाधिकत्वादयो बोध्याः। ननु यदि प्रचुरानन्दरूपेणैव फलत्वमभिप्रेतं स्यादमूर्तस्य तथोक्तं स्यान्न तु शिरःपाण्यादिकं कल्प्येत । प्रयोजनाभावात् । कल्पनया चोपासनार्थता प्रतीयते, न तु परमफलतेत्यत आहुः **शिर इत्यादि** । **शिरःपाण्यादिकमिति** इदमा बोधितं शिरःपाण्यादिकम् । **पुरुषविधत्वायेति** सर्वेषां पुरुषविधत्वाय । यदि हि स्वयं पुरुषविधो न स्यात्तदा तदुपरितनोऽन्नमयान्तः कोऽपि पुरुषाकारो न स्यादिति तदर्थं तथोक्तिरिति तस्य पुरुषविधतामन्वयं पुरुषविध इति वाक्यादेव प्रतीयते । अतः सा कल्पना नोपासनार्थाऽपि तु स्तुत्यर्थेति कल्पनाया लिङ्गत्वाभावात् प्रकरणापेक्षया वाक्यस्य बलिष्ठत्वाच्चानन्दमयपदस्य ब्रह्मपरत्वं न पारिप्लवमित्यर्थः । नन्वानन्दमयस्य पुरुषविधत्वेन कथं सर्वेषां तथात्वमित्यत आहुः **लोके हीत्यादि** । अयमर्थः । लोके ह्यन्तर्भूतस्य तदाकारता मूषानिषिक्तप्रतिमादौ दृष्टा।

रश्मिः ।

ह्मीति व्याख्येये द्वितीया विभक्तिः। **वाक्य इतीति**। वाक्येनेति पाठे करणत्वे नान्वयः किं तु सप्तम्यन्तम्। निषेधार्थं नञ् चेति। **ब्राह्मणेति** अस्यतत्क्रान्तमध्यमपुरुषान्तत्वाभावात्तथा। धृष्टिरसि ब्रह्म यच्छ इषेत्वोर्जेत्वा वायवस्थेत्युदाहरणानि । 'शेषे ब्राह्मणशब्दः' इति ब्राह्मणवाक्ये इत्यर्थः। **फलत्वांश इति** फलत्वांशेपि संदेह इत्यर्थः। **अभ्यासादित्यादिभाष्यमुपलक्षकतया** विवृण्वन्ति **अभ्यासेत्यादि**। आदिशब्देनोपसंक्रमः । **सर्वेषामिति** अन्नमयादीनाम्। द्वा सुपर्णेति श्रुतेः पुरुषविधत्वाय । **तदुपरीति** आनन्दमयोपरितन इत्यर्थः। **वाक्यस्येति** तस्य पुरुषेत्यादिवाक्यस्येत्यर्थः। **बलिष्ठत्वादिति** यथा 'इन्द्राग्नी इदं हविरजुषेताम् अवीवृधेतामहोज्यायोक्राताम्' इत्यत्रेन्द्राग्नीपदस्य लिङ्गाद् दर्शाङ्गत्वे सिद्धे इदं हविरित्यादेरपि दर्शाङ्गत्वं तदेकवाक्यत्वान्न तु प्रकरणाद्दर्शपूर्णमासाङ्गत्वम्। प्रकरणाद्वाक्यस्य बलिष्ठत्वात्। आकाङ्क्षारूपं प्रकरणं वाक्यस्य वाक्यान्तरैकवाक्यत्वे प्रमाणम्। एवं च यावत्प्रकरणं वाक्यं कल्पयित्वा विनियोजकं भवति तावद्वाक्यं लिङ्गश्रुती कल्पयित्वा विनियोजकमिति बलीय इत्युक्तम् । तद्वद्बलिष्ठत्वादित्यर्थः । **न पारिप्लवमिति** पारिप्लवाख्यं कर्मेति पारिप्लवार्था इतिसूत्रे तृतीयस्य चतुर्थपादे वक्ष्यन्ति । तत्कर्म न पारिप्लवमाचक्षीत इत्येकवचनस्य विवक्षितत्वात् । एतस्य फलमुपाख्यानस्य न पारिप्लवशेषत्वम् । उपाख्यानं प्रपाठकद्वयस्थं किं तु यदुद्दिष्टं तन्मुख्यत्वज्ञानशेषत्वम् । अतो न कर्मशेषेयं विद्येति तृतीयस्य चतुर्थपादे भृगुप्रपाठकमुक्त्वा पारिप्लवशेषतानिराकरणात् । ब्रह्मपरत्वस्योपाख्यानं शंसनसाहित्यात्पारिप्लवत्वं प्राप्तं सर्वाण्याख्यानानि पारिप्लवे शंसतीति वाक्यात् ।

जीवोऽत्र मुख्यः । कर्तृत्वेन व्यपदेशात् । स च वस्तुतो हंसरूपः । पुरुषाधिकारकं हि शास्त्रम् । तेन पुरुषशरीरे तदाकारः सर्वं फलं प्राप्नोति । अतः पुरुषं हंसरूपेणानुवर्णयति ।

भाष्यप्रकाशः ।

बहिर्वेष्टितस्य तदाकारता तूपदेहे सीवितवसनादौ च। तथाच यथा भाण्डकर्तारः प्रथमत आकृतिं मधूत्थादेः कृत्वा तदुपरि मृदं वेष्टयित्वा तन्मूषायां धातून् पूरयन्ति । अन्यथा पूरितभाण्डनिर्माणं न भवति । तथात्र तादृशोऽयं देहः । अतोऽत्र देहे कश्चिदान्तर एवंविधो वर्तते यदुपरि समागता अन्नरसादयः पुरुषाकारा भवन्ति । नो चेद् घटादिवत् कृतिसाध्यत्वाभावाद् भस्मोत्करवद् राशीभूता एव भवेयुः । अत्र तु श्रुतौ, 'तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधः' इत्यादौ पूर्वं प्राणमयादिकमुक्त्वा तेन प्राणमयादिना आन्तरेण एषोऽन्नमयादिरुपरितनः पूर्ण इति पूर्वोक्तन्यायेन पूर्णतां प्रतिज्ञाय ततस्तां निगमयितुं, 'स वा एष प्राणमयादिः पुरुषविध एव' इत्यनेन तदाकारमुक्त्वा तस्य प्राणमयादेः पुरुषविधतामनुलक्ष्यीकृत्य, अयमन्नमयादिः पुरुषविध इति वदति । तेन सर्वान्तरस्यानन्दमयस्यैव सर्वत्र पुरुषाकारसमर्पकता पर्यवस्यति । तेन तथा सिद्ध्यतीति । नन्वस्त्वेवं, तावता स्तुतिः का वा सिद्ध्यतीत्यत आहुः **जीव** इत्यादि । **वर्णयती**त्यन्तम् । **तेने**ति हेतुना । **तदाकार** इति हंसाकारः । अयमर्थः । उक्तमन्त्रे सोऽश्नुत इत्यनेन जीवः फलाशने कर्तृतया व्यपदिष्टः फलभोगे मुख्यः । तस्य च, द्वा सुपर्णाविति श्रुत्या, 'एवं स मानसो हंसो हंसेनैव प्रबोधितः' इति स्मृत्या च हंसरूपेणैव सिद्धत्वात् पुरुषाधिकारेण प्रवृत्तस्य शास्त्रस्य तं प्रत्यप्रवृत्तौ तस्य ब्रह्मवित्त्वाद्यभावेन वेदनादिफलस्याप्यभावाच्छास्त्रादेर्वैयर्थ्यं स्यादिति फलार्थं शास्त्रसार्थक्यार्थं च जीवस्य पुरुषरूपमावश्यकम् । तथा समतां विना फलानुभवदौर्घट्याद् ब्रह्मसमतायाश्च, 'न तत्समः' इत्यादिश्रुत्या निषेधात् फलानुभावनार्थं समतायै ब्रह्मणोऽपि हंसरूपमावश्यकम् । अतः पुरुष एव यदा हंसरूपेण जीवान्तराविश्य तं पुरुषरूपेणान्तरितवाँस्तदा तद्वेष्टनेन पुरुषरूपो जीवः

रश्मिः ।

मूषेति सांचा इति लोक उच्यते । **उपदेह** इति नागकञ्चुक्यामित्यर्थः । **मधूत्था**देरिति । मेन इति लोके ।

फलानुभवेति फलं कर्मफलभोगस्तदर्थमत्रापि समता नायात्यतो गौणमुख्यन्यायेन सार्ष्टि प्रलम्ब(फलं) सख्यरूपं फलं च तदनुभावनार्थं समता वक्तव्या अन्यथा तद्वाक्यवैयर्थ्यप्रसङ्गात् । तस्यै समताया इत्यर्थः । विरुद्धधर्माश्रयत्वात् समतासमते उपपन्ने । **अत** इति हंसद्वयस्य पुरुषस्य चावश्यकत्वात् । **पुरुष** इति पुरा आस इति व्युत्पन्नः । न तु पुरि शेते इति न वा पुरमुषतीति व्युत्पन्नः । एवकार इममर्थं व्यवच्छिनत्ति । पुरा सृष्टिपूर्वं व्युत्पत्तिद्वयासंभवात् । तस्य रूपद्वयं हंसः पूर्वशास्त्रे 'ततो ह जातः' इति श्रुतेः । पुरुषो वेदान्तशास्त्रे 'आत्मैवेदमग्र आसीत्' इति श्रुतेः । तयो रूपयोः समावेशः द्वा सुपर्णेति श्रुतेराहुः **यदे**ति । **हंसे**ति गतिप्रतिबन्धकमुल्लङ्घ्य प्रवेशार्थम् । **जीवान्तरे**ति जीवो जीवमजीवयदिति वाक्यात् । 'यस्यात्मा शरीर'मिति श्रुतेश्च । **त**मिति जीवम् । 'आकाशशरीरं ब्रह्मे'ति श्रुतेः । 'आकाशो ह वै नामरूपयोर्निर्वहिता' इति श्रुतेश्च पुरुषरूपेण 'तासां मे पौरुषी

पञ्चस्वपि शारीर आत्मा जीव एक एव। तत्रान्नमये निःसंदिग्धत्वात्, तस्यैष एव आत्मेति नोच्यते। द्वितीयादिषु प्रथमोक्तमेवातिदिश्यते। तत्रान्नमये हस्तेन प्रदर्शयन्निव निःसंदिग्धं व्याख्यातम्। तदन्तरो हि प्राण आन्तरव्यवहार-

भाष्यप्रकाशः।

सर्वं लौकिकालौकिकफलमनुभवति। परमात्मा च हंसेऽन्तर्भृतो हंसाकारश्च सँस्तत्फलमनुभावयतीति श्रुतिरपि परमात्मानं हंसरूपेण पुर्याविशेोत्तरं वर्णयति। तथाच स्वयमतिमहानपि जीवस्य फलभोजनार्थमेवं करोतीत्येषा स्तुतिरित्यर्थः। एवं पक्षिरूपकल्पनस्य शिरःपाण्यादिकथनस्य च स्तुत्यर्थतासमर्थनेन निरालम्बना प्रत्यगात्मविषया बुद्धिः कर्तुमशक्येति दृष्टशारीरात्मसामान्येन प्रत्यगात्मनि बुद्धिसिद्ध्यर्थं शाखाचन्द्रन्यायेनेदं कल्पनमित्यपास्तम्। तथा सति पुरुषरूपकल्पनयापि कार्यसिद्धेः पक्षिरूपकल्पनावैयर्थ्यप्रसङ्गादिति। ननु यद्येवमभिप्रेतं स्यात् तर्ह्यानन्दमयस्यैव पक्षिरूपत्वं वर्णितं स्यान्नान्नमयादीनामतो नैवमित्याशङ्कायां स्वोक्तं विभजन्ते पञ्चस्वित्यादि। तथाच प्राणमयादीनां चतुर्णां व्याख्याने, तस्यैष एव शारीर आत्मेति कथनात् पञ्चस्वपि फलेष्वेकस्यैव जीवस्य भोक्तुः पञ्चानां शरीरतया भोग्यत्वस्य च ज्ञाप्यत्वेन हंसरूपजीवानुरोधादन्नमयादिष्वपि तथाकल्पनं युक्तमित्यर्थः। ननु यद्येवं तदान्नमय इदं वाक्यं कुतो नोच्यत इत्यत आहुः तत्रेत्यादि। कोशेऽन्नमये शरीरत्वस्यैकात्मभोग्यत्वस्य च प्रत्यक्षसिद्धत्वेन तत्तुल्येऽन्नमयेऽपि तथात्वस्यासंदिग्धत्वान्नोच्यत इत्यर्थः। नन्वेवं सत्यन्येष्वपि तत्तत्कोशतौल्यात् तत्रापि नोच्येतेत्यत आहुः द्वितीयेत्यादि। प्रथमोक्तमिति अन्नमय उक्तं पञ्चावयवकत्वम्। तथाचातिदेशदार्ढ्यार्थं तदुक्तिरित्यर्थः। एतदेव प्रपञ्चयन्ति तत्रेत्यादि। प्रदर्शयन्निवेति। वदतीत्यत इति शेषः। तथाच यत एवं वदत्यतः प्राप्यरूपेऽन्नमयेऽप्यत्र व्याख्यातं तदवयवसाम्यं निःसंदिग्धमित्यर्थः। प्रदर्शयतीवेति वा पाठः। प्राणमये आहुः

रश्मिः।

प्रिया' इतिवाक्यात्। एवमिति आनन्दमयस्यैव साकारफलत्वमिति पूर्वोक्तप्रकारेण। नैवमिति न साकारब्रह्मत्वमित्यर्थः। फलेष्विति एतमन्नमयमात्मानमुपसंक्रम्येत्यादिश्रुतिभ्यः। फलत्वमानन्दमयान्नमयादिविभूतिसाधारणम्। हंसरूपेति मुक्तहंसरूपजीवस्य ब्रह्मसामर्थ्यानुरोधात्। तथेति पक्षिरूपत्वकल्पनमित्यर्थः। एवमिति हंसरूपजीवानुपजीवानुरोधेन पक्षित्वे। इदमिति तस्यैष एव शारीर आत्मा यः पूर्वस्येति वाक्यम्। तथात्वस्येति एकात्मभोग्यत्वस्य। उक्तमिति एकात्मभोग्यत्वम्। तत्तत्कोशतौल्यादुक्तप्रायम्। शारीर आत्मेत्युक्त्या शरीरमप्यतिदिष्टमिवेत्याहुः पञ्चावयवेति। चकारः पूरणीयः। तथा चेति अन्येष्वपि तत्तत्कोशतौल्याद्वचनाभावे प्राप्तत्वेपि यत्र शारीरपदान्तर्गतशरीरस्याप्यतिदेशस्तत्रैकात्मभोग्यत्वातिदेशे किमु वक्तव्यमित्येकात्मभोग्यत्वातिदेशदार्ढ्यार्थं तस्य 'तस्यैष एव शारीर आत्मा' इत्यतिदेशवाक्यपञ्चावयवरूपस्य शरीरस्योक्तिरित्यर्थः। एवकारस्तु दार्ढ्योक्तपञ्चावयवस्यापि व्यवच्छेदकः। प्रदर्शयन्निवेति वेदस्य कर्तृत्वमुक्तं तदा वेदरूपशिवभक्तसंवलितत्वे सिद्धे क्रीडार्थं भक्तत्वाच्च। श्रुतेः कर्तृत्वायाहुः प्रदर्शयन्निवेति। तदन्तर इत्यादीति बहिर्व्यवहारकारणमुक्तमन्नमयशब्देन तस्यान्तरत्वाद्धीत्यनुभवान्निश्चयेनान्तरो यो व्यवहारः 'व्यवहारः संनिपातो मनोमात्रेन्द्रियासुभिः' इति वाक्येन भगवतोक्तस्तस्य कारणम्। 'संनिपातस्त्वहमिति ममेत्युद्धव या मतिः' इति भगवद्वाक्यात्। अहंममेतिमत्याः कारणम्।

कारणम् । बलभोजनविसर्गादिषूपयोगात् । तस्य संचार आकाशे परिनिष्ठितः पृथिव्याम् । एवं लौकिकव्यवहारार्थं बाह्याभ्यन्तरभेदेन द्वयम् ।

तदनु वैदिकव्यवहारः । स च मनोमयः पुरुषः । आदेशः कर्मचोदना । ब्राह्मणानि सशेषाणि । अथर्वाङ्गिरसे ब्रह्मकर्मत्वात् प्रतिष्ठा ।

भाष्यप्रकाशः ।

तदन्तर इत्यादि । अत्र, बलेत्यादिना प्राणादित्रयस्य कार्यमुक्तम् । कोशाद्भेदश्च दर्शितः । स पञ्चवृत्तिको दशवृत्तिको वा । अयं तु त्रिवृत्तिकः । तस्य संचारो नियते देशे हृदादौ । अस्य तु सर्वत्राकाश इति स तस्य स्वरूपलाभहेतुत्वादात्मा । स तु देहे स्थितोऽयं तु सर्वस्यां पृथिव्यामिति । अतो द्विविधभोगसाधनत्वेन स्वाभिमानाय द्वयोः कथनमित्यर्थः । अग्रिमप्रयोजनादिकमाहुः **तदन्वित्यादि** । लौकिके व्यवहारे वयःप्रभृतिभिः स्वातन्त्र्यसंपत्तौ सत्यां वैदिके प्रवर्तत इति वेदप्रयुक्तो मनोमात्रेन्द्रियप्राणव्यापारस्तस्यानन्तरभावी । तस्य च लौकिकाद् भेदः, 'शब्द इति चेन्नातः प्रभवात्' इत्यत्र सोपपत्तिकं वक्तव्यः । तद्भोगसाधनाय च स वेदात्मको मनोमयः पुरुषः । वेदस्य च मनोमयत्वमेकादशस्कन्धे, 'स एष जीवो विवरप्रसूतिः' इति श्लोकेन भगवतोक्तम् । **सशेषाणीति** सार्थवादानि । **ब्रह्मकर्मत्वादिति** । चातुर्होत्रविधाने ब्रह्मणः कृताऽकृतावेक्षकत्वेन तत्कर्मणोऽथर्वसिद्धस्य कर्म-

रश्मिः ।

प्रकृते । कार्यमुक्तमिति अत्र प्रथमे प्रश्नोपनिषदि 'अहमेतत्पञ्चधात्मानं प्रविभज्य एतद्बाणमवष्टभ्य विधारयामि' इति श्रुतिः । द्वितीये व्यानस्य श्रुत्यन्तरात् आनन्दभुगित्यनेन विकल्प्यते श्रुत्यन्तरम् । विसर्गेऽपानस्य प्रसिद्धोपयोगः । भेदकमाहुः **स पञ्चेत्यादि** । 'प्राणोऽपानः समानश्चोदानव्यानौ च वायवः' इत्यमरादित्यर्थः । **दशेति** 'दशेमे पुरुषे प्राणाः' इति शाकल्यब्राह्मणश्रुतेः । पञ्च प्राणादयः पञ्च नागादयश्च । **तस्येत्यादिभाष्ये** तच्छब्देन प्राणः परामृष्ट इत्यत्रापि तस्येत्यस्य 'तुना' सह संबन्धः । अत्र आकाश आत्मेत्यत्रात्मपदं स्वरूपलाभहेतुत्वेन रूपेण प्राणदेहं वक्तीत्याशयः । प्राणेन्द्रियात्मधिष्ण्यत्वमित्याकाशलक्षणवाक्यादित्याशयेनोक्तं **स तस्येत्यादि** । **पृथिव्यामिति** अधोलम्बनसाम्यात्पृथिव्याः पुच्छत्वमपि । **द्वयोरिति** पुच्छप्रतिष्ठयोरित्यर्थः । अत्र तस्य यजुरेव शिर इत्यत्र मनुष्यकर्मप्रतिपादकस्य यजुषः शिरस्त्वं व्यवहारे मनुष्यकर्मैव मुख्यं 'पुरुषत्वे च मां धीराः' इतिवाक्येनैतत्सजातीयश्रीधर्युक्तश्रुत्या च पुरुषकर्माग्निहोत्रादिभिः 'आविस्तरां प्रपश्यन्ति' 'पुरुषत्वे च मां भगवन्तं धीरा' इति । ततः ऋग्वेदो देवदैवत्यो देवताप्रतिपादकः । कर्मविषयप्रतिपादको दक्षिणः पक्षः । ततः सामवेदः पित्र्यः पितृप्रतिपादकः उत्तरः पक्षः । देवानां पितॄणां चानेकप्रकारत्वात् । आदेशः कर्मनोदना कर्मनोदनाप्रतिपादकानि ब्राह्मणानि सशेषाणि ह्यात्मा । प्रतिपाद्यप्रतिपादकयोर्नित्यसंबन्धात्सामानाधिकरणम् । धर्मप्रमितिकाले ब्राह्मणानि धर्मप्रमितिं जनयन्तीत्यनुष्ठानकालेऽनुष्ठीयमानान्धर्मान् विषयीकुर्वन्त्या ब्रह्मणः कर्मनोदनाया आत्मत्वम् । अग्रे नोदनाविषयस्य धर्मस्य पक्षत्वमिति नार्थान्तरम् । **आदेश इत्यादि** । **वय** इति प्रभृतिशब्देन 'लोकसिद्धं पुरस्कृत्य वैदिकं बोध्यते यथा' इत्युक्तलोकसिद्धपुरस्कारः । **शब्द इतीति** तृतीयपाद इत्यर्थः । **भाष्ये । आदेश आत्मेति** श्रुतिं विवृण्वन्ति । ऋग्दक्षिणः पक्षः सामोत्तरः पक्षः इत्येतां विवृण्वन्ति **ब्राह्मणानीति** । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठेति श्रुतिं व्याकुर्वन्ति **अथर्वेति** । अथर्वाङ्गिरसां द्रष्टा मन्त्रो ब्राह्मणश्च अथर्वाङ्गिरसस्तस्मिन् । **प्रकृते । चातुर्होत्रेत्यादि** चत्वारो होतारो यत्र कर्मणीति योगः । योगरूढः शब्दः । **कृतावेक्षकं** तेन च साङ्गं कर्म भवति तदभावे तु व्यङ्गं कर्मेति । साङ्गं कर्म फलाय

तदनु नानाविधयागादिसाधनवतः फलं विज्ञानमयः । तत्र श्रद्धा आपः । तृतीयाध्याये त्वयमर्थो विस्तरेण वक्ष्यते । यथोक्तकर्तृत्वात् क्रममुक्तिः ।

ऋतसत्यौ प्रमीयमाणानुष्ठीयमानौ धर्मौ योगश्च मुख्यत्वादात्मा । अधो-

भाष्यप्रकाशः ।

स्थैर्यसंपादकत्वादथर्वाङ्गिरसः प्रतिष्ठारूप इत्यर्थः । शान्त्यादिकर्मबोधकत्वात् पुच्छत्वमपि तस्य बोध्यम् । एतेन नानावृत्तिकान्मनोमयकोशाद् भेदोऽपि दर्शितः । एवं द्विविधैहिकभोगौपयिकं द्वयं वैदिकव्यवहारौपयिकं तृतीयं चोक्त्वा पारलौकिकभोगौपयिकं चतुर्थमाहुः **तदनु नानेत्यादि** । विज्ञानमय इति विज्ञानप्रचुरः । तस्यावयवानां स्वरूपमाहुः **तत्र श्रद्धेत्यादि** । पञ्चाग्निविद्यायां, यतिथ्यामाहुत्याऽ हुतायामापः पुरुषवचसो भूत्वा समुत्थाय वदन्तीति प्रश्नान्निरूपणभागे प्रथमाहुतौ, देवाः श्रद्धां जुह्वतीति कथनाच्च श्रद्धारूपा आपो मुख्या इति सा शिर इत्यर्थः । अस्यार्थस्य काल्पनिकत्वपरिहाराय विचारितत्वं बोधयन्ति **तृतीयेत्यादि** । रंहत्यधिकरण इत्यर्थः । ननु प्रथमाहुतौ श्रद्धाहोमस्ततः सोमवृष्ट्यन्नरेतःक्रमेण पञ्चम्यामाहुतौ हुतायां रेतसः पुरुषभाव इत्यवयवपूर्त्यभावात् कथमस्य जीवभोग्यत्वं भोगसाधनत्वं चेत्याकाङ्क्षायामाहुः **यथोक्तेत्यादि** । अन्नमयाद्युक्तोपासनाकर्तृत्वात् क्रममुक्तिः । एतेनोपासनाकथनप्रयोजनमपि बोधितम् । तथाच श्रद्धादीनामर्थानां पूर्वसिद्धत्वेन सत्त्वादेतदवयवास्तु पूर्णा एव । तेन जीवस्य तत्र क्रमिको भोग इति न दौर्घट्यमित्यर्थः । एतेन संशयविपर्यासादिनानावृत्तिकाद् विज्ञानमयकोशाद् भेदो दर्शितः । अत्रैतत् सिद्धम् । अन्नब्रह्मोपासनायां सर्वान्नप्राप्त्या लौकिको बाह्यो भोगस्ततोऽग्रिमोपासने सर्वायुःप्राप्तिरूप आन्तरः । तदग्रे ब्रह्मानन्दज्ञानात् सर्वदा भयाभावाद् वैदिकः । तदग्रे प्रमादाभावे सति पापनाशपूर्वकसर्वकामाप्तिरूप इति । अवयवान्तरस्वरूपमाहुः **ऋतेत्यादि** ।

रश्मिः ।

स्थिरम् । व्यङ्गं तु नेति । **प्रतिष्ठेति** स्वरूपलाभहेतुत्वात् । **शान्त्यादीति** शान्तिकर्मणः सर्वकर्मान्तिमत्वेन पुच्छत्वमित्यर्थः । आदिना पौष्टिकादिप्रतिष्ठाहेतोः शांकरभाष्योक्तस्य संग्रहः । तथा च शान्तिपौष्टिकादिप्रतिष्ठाहेतुकर्मबोधकत्वादित्यर्थः । **तदन्वित्यादि** । तदनु वैदिकव्यवहारलक्षितः । **नानाविधयागादिसाधनवत** इत्यादि इत्थंभूताख्यानेऽनुः । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यत्र चित्तशुद्धिद्वारा यागादीनां विज्ञानमयफलकत्वात् । फलं स्वकारणानि विस्तारयति प्रवृत्तिद्वारा । तदुक्तं 'विज्ञानं यज्ञं तनुते' इत्यादिनात्रैव । **यतिथ्या**मिति यत्संख्यायामित्यर्थः । ननु कस्मादन्नवाक्ये श्रद्धालाभः इत्यत आहुः **निरूपणे**ति । तथा चैकवाक्यतया श्रद्धालाभः इति भावः । **मुख्या** इति पुरुषरूपफलरूपत्वेन मुख्यत्वम् । **सेति** तस्य श्रद्धैव शिरः इति श्रुतौ श्रद्धेत्यर्थः । **इत्यवयवे**ति श्रद्धामात्रकथनेन सोमवृष्ट्यन्नरेतसामकथनाद्धेतोरवयवपूर्त्यभावादित्यर्थः । **सर्वान्ने**ति 'सर्वं वै तेनान्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासते' इतिश्रुतेरित्यर्थः । **सर्वायु**रिति सर्वमेव त आयुर्यन्ति ये प्राणं ब्रह्मोपासते इति श्रुतेरित्यर्थः । **भयाभावा**दिति 'यतो वाचो निवर्तन्ते' इतिश्रुतेस्तथेत्यर्थः । **प्रमादाभाव** इति ।

'विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति ।
शरीरे पाप्मनो हित्वा सर्वान्कामान् समश्नुते' ॥

इति श्रुतेरित्यर्थः । **ऋतेत्यादि** ऋतं प्रमीयमाणो धर्मो ब्राह्मणैः सत्यमनुष्ठीयमानो धर्मो

भागो महर्लोकः । तादृशस्य ततोऽर्वाक् संसृत्यभावात् । ततोऽपि ब्रह्मविद

भाष्यप्रकाशः ।

तादृशस्येति श्रद्धाहोमात् पूर्वजन्मनि निष्कामयज्ञकर्तुर्ज्ञानरहितस्य ततः श्रद्धादिक्रमेण

रश्मिः ।

मन्त्रैरित्यर्थः । भावार्थपादभाष्य इदं स्फुटमस्तु ।

ननु विपरीतं किं न स्यात् इति चेन्न संहितायां 'ब्रह्मवादिनो वदन्ति' इतिश्रुत्या ब्रह्मसत्यमतोनुष्ठीयमानधर्मः सत्यं 'ऋतं सत्यं परं ब्रह्म' इति महानारायणात् । परब्रह्मकार्ये ऋतं प्रमीयमाणो धर्मः ब्राह्मणस्य वेदान्तत्वात् । प्रमीयमाणानुष्ठीयमानधर्मः परं ब्रह्म 'धर्मो यस्यां मदात्मकः' इतिवाक्यात् । **योगश्चेति** विज्ञानमयस्योपक्रान्तत्वाद् योग उक्तः । विज्ञानप्रचुरज्ञानयोग इत्यर्थः । ज्ञानमय इत्युक्ते ज्ञानधर्मत्वेन ज्ञानरूपत्वमपि स्यादतो मार्गत्वावयवीति 'विजातीयसंमेलने मार्गत्वं केवलस्य धर्मत्वम्' इत्येकादशसुबोधिन्यां अतो नामैकदेशग्रहणं योग आत्मा इति 'परो हि योगो मनसः समाधिः' इति चित्तवृत्तिनिरोधो योग इति स च समाधिः सायुज्यविशेषः । आश्रयव्यापकतयात्मायतनादित्यर्थः । **अधोभाग** इति 'षड्भिः संपद्यते धर्मः' इति तदन्तर्गतदेशो महर्लोकः । अधस्त्वाच्च प्रतिष्ठा ऋतसत्यरूपपरब्रह्मात्मकधर्मसाधनत्वाद्युक्ता । मह पूजायां कर्तर्यसुन् । विज्ञानमयस्यापि शिरस्त्वादिकं कथमिति चेच्छृणु । आपः पुरुषवचसो भवन्तीति निर्विवादम् । तत्र श्रद्धा आपः धर्मावपि शास्त्रदृष्ट्या स्वोपादानरूपावित्यब्रूपौ । ननु पक्षपदादब्रूपशिरःकथनं पृथक् कुतः इति चेन्न । शिरोधोदेश एव पक्षपदप्रवृत्तेः । अतो विभूतेः पुरुषशरीरस्य द्वौ भागौ धर्माब्रूपौ ताभिरर्चनं ज्ञानाङ्गमित्यप्शिरस्त्वादिकमुपपन्नम् । नाप्यर्चनलाभो दुर्लभः साधने महःपदात् । न चार्चनं द्रव्यमन्यदिति वाच्यम् । सोर्चन्नचरत्तस्यार्चत आपोऽजायन्तेति बृहदारण्यकात् । विज्ञानमयेनाप्यम्मयो यज्ञस्तन्यते तद्विभूतित्वात् । ततोपि ब्रह्मविद इत्यग्रे भाष्यं तज्ज्ञाप्यमर्थमाहुः **श्रद्धेति** तच्छब्दात्पूर्वोक्तश्रद्धापदस्मारितश्रद्धाहोमपदमन्वयार्थं पञ्चम्यन्तं श्रद्धाहोमावधिके पूर्वजन्मनीति पूर्वजन्मलाभः । अग्रेन्वयार्थं सप्तम्यन्तं पदं ब्रह्मविद इतिवक्ष्यमाणत्वात् तत्साधननिष्कामयज्ञकर्तृलाभः । ननु यज्ञकर्तृपदेन यज्ञलाभे निष्कामशब्दस्य किं प्रयोजनमिति चेन्न श्रीमदाचार्यमार्गीययज्ञबोधनार्थत्वात् ।

'काम्यानां कर्मणां त्यागं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः' ॥

इति गीता । श्रद्धाहोमानन्तरं तादृशशरीरज्ञानस्य भावित्वात् ज्ञानरहितस्येत्यस्य लाभः । अग्रे । **भाष्ये । ततोर्वागि**ति महर्लोकादर्वाक् भूर्भुवःसुवर्लोकेषु संसृतिः संसरणं तदभावात् । तथा च संसरणमपेक्ष्य महर्लोक एवाध इति भावः । महार्लोकवासिनो भृग्वादयो ज्ञानिनः 'नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते' इति द्वितीयस्कन्धात् । अत्रेदं बोध्यम् । श्रद्धायाः पुरुषवचस्त्वानन्तरं यथोक्तोपासनया क्रममुक्तिः शरीरे पाप्मन इत्यग्रेतनश्लोकात् । उपासा तु धर्मप्रमित्यनन्तरं तदनुष्ठाने शुद्धे चित्ते वृत्तिनिरोधः इत्यतः ऋतसत्यावित्यादिभाष्यमवयवत्रयनिरूपकम् । **भाष्ये महःपुच्छमित्या**देस्तात्पर्यमाहुर**ध इत्यादि** । अधोभाग इति पुच्छपदार्थः । लोक इति प्रतिष्ठापदार्थः । कुत इत्यत आहुः **तादृशस्ये**ति (ततोर्वागिति महर्लोकादर्वाक् भूर्भुवःसुवर्लोकेषु संसृतिः संसरणं तदभावात् । तथा च संसरणमपेक्ष्य महर्लोक एवाध इति भावः । महर्लोकवासिनो भृग्वादयो ज्ञानिनः 'नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमन्ते' इति द्वितीयस्कन्धात्) अत्र सुबोधिन्यां कल्पायुष इति विबुध-

आनन्दमयः फलम् । तस्य स्वरूपस्यैकत्वाद् धर्मभेदेन शिरःपाण्यादि निरूप्यते । तस्य मुख्यतया प्रीतिविषयत्वं धर्मस्तच्छिरः । मोदप्रमोदावपरिनिष्ठितपरिनिष्ठितावानन्दातिशयौ । आनन्दस्तु स्वरूपम् । साधनरूपत्वाद् ब्रह्म पुच्छमिति । श्लोकौ तु सच्चिदंशबोधकौ केवलानन्दत्वपरिहाराय ।

भाष्यप्रकाशः ।

प्राप्तयोग्यदेहस्य । एतादृशस्य ज्ञानप्राप्त्या मुख्यं फलं भवतीति विवेक्तुमाहुः ततोऽपीत्यादि । साधनरूपत्वादिति ज्ञेयत्वेन साधनशेषतया तथात्वात् । एवं, लोके हीत्यादिना वर्णयतीत्यन्तेनोक्तमर्थं विभज्य पुरुषविधत्वं पक्षिरूपत्वं च समर्थितम् । तेन च मन्त्रे द्वितीयान्तकामपदेनोक्ता एत एव धर्माः । आनन्दमयस्तु विपश्चिद् ब्रह्म । धर्मधर्मिणोः प्रकाशाश्रयवद्भेदेऽप्यभेदादेतादृशमेव व्याख्येयवाक्योक्तं परमिति बोधितम् । तावतापि तस्य विविधज्ञानवत्त्वं लक्षणोक्तसच्चिद्वैशिष्ट्यं च सम्यङ्नावगम्यत इति तदर्थमग्रिमो ग्रन्थो, न तु साधनशेषब्रह्मज्ञानायेत्याहुः श्लोकौ त्वित्यादि । श्लोकात् पूर्वं, तदपीत्यनेनानन्दमयं लक्ष्यीकृत्य, असन्नेवेति श्लोक उक्तः । तेनानन्दमयमेवास्ति ब्रह्मेति वेत्तव्यमित्यायाति । एवमसद्वेतिश्लोके कर्तृत्वसमवायित्वयोर्बोधनाच्चिदंशलाभः । तेन द्वावेतौ विपश्चित्त्वसमर्थनायेति फलति । तथा सति तत्तच्छ्लोकोत्तरं यो ग्रन्थः सोऽपि श्लोकोक्तार्थपोषणायेति

रश्मिः ।

विशेषणात् सत्त्वात्मकशरीरेण क्रममुक्तो जीवोपि तत्र कल्पपर्यन्तं तिष्ठतीति महर्लोके एतादृशी संसृतिः तस्य रमन्त इतिपदाच्च संसृतिः । महर्लोकादर्वाक् लोकेषु तु न संसृतिः एतावत्कालमवस्थानाभावात् ।

'यदा प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारम् ।
अष्टाधिपत्यं गुणसंनिवाये सहैव गच्छेन्मनसेन्द्रियैश्च ॥
योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम् ।
न कर्मभिस्तां गतिमाप्नुवन्ति विद्यातपोयोगसमाधिभाजाम् ॥
वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा ।
विधूतकल्कोथ हरेरुदस्तात् प्रयाति चक्रं नृप शैशुमारम्' ॥

इत्येतेषु तथोपलम्भात् । 'तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः' इति पूर्वार्धे नमस्कृतमित्यस्यार्थस्तु स्फुट आकरे । **अद्धेत्यादि** एतच्च तृतीयाध्यायेत्रैव स्फुटिष्यति । **ततोपीत्यादीति।** एकत्वादेकरसत्वेन तथा मोदप्रमोदरूपधर्मभेदेन तस्य प्रियमित्यत्र भावप्रधानो निर्देशस्तदाहुः **प्रीतिविषयत्वमिति** । प्रीतिविषयस्यात्मत्वम् । **शिर** इति शिरसा सर्वात्मभावेन ज्ञायते पुरुषोत्तम इति । **अपरीति** अल्पाक्षरत्वाभावेपि अभ्यर्हितत्वात्पूर्वनिपातः । चराचरेति सूत्रेप्यल्पाच्तरोभ्यर्हित इति पूर्वनिपातः । अतो न विरोधः । **आनन्देति** अनन्तानन्द इति स्वरूपलक्षणप्रविष्टत्वादिति भावः । अतिशयो भक्तमनोरथोत्तरो ज्ञेयः । वृद्धिह्रासभाक्त्वात् आत्मानन्दस्तु सदैकरसः । **ज्ञेयत्वेनेति** 'ब्रह्मविदाप्नोति परम्' इत्यत्र तथा । **पुरुषेति** विज्ञानब्रह्मरूपे । **भेदेपीति** ब्रह्मस्वरूपान्तर्गतेवशब्दार्थः । गीतायामिव प्रसिद्धं विविधेति पक्षयोरिव धर्माणां विविधत्वात् । तदप्येष श्लोको भवतीति श्रुतौ तदित्यव्ययम्, अपि अन्वर्थ इत्याशयेनाहुः **श्लोकात्पूर्वमिति** । **असद्वेति** 'असद्वा इदमग्र

अपरौ तु श्लोकौ माहात्म्यज्ञापनाय वाग्गोचरागोचरभेदेन। अवान्तरानन्दास्तु सर्वे तस्मा[1]न्न्यूनतया तदुत्कर्षत्वबोधनाय । तस्मात् सर्वत्र प्रपाठके मान्त्रवर्णिकमेव प्रतीयते। अतो मुख्योपपत्तेर्विद्यमानत्वेनानन्दमयः परमात्मैव। चकारो मध्ये प्रयुक्तो विधिमुखविचारेणाधिकरणसंपूर्णत्वबोधकः ॥ १४ ॥

भाष्यप्रकाशः ।

बोधितम् । तेनाथातोऽनुप्रश्ना इत्यादिना ग्रन्थेन साधनस्य विद्वत्त्वस्य फलोपधायकस्वरूपप्रश्नः । सोऽकामयतेत्यारभ्य तत्त्वेव भयं विदुषोऽमन्वानस्येत्यन्तेनोक्तरूपतया सर्वदा विचारयत एव पूर्णं विद्वत्त्वं तदेव फलं नान्यथेति सिद्ध्यति । भीषास्मादित्यादिग्रन्थस्य तात्पर्यमाहुः **अपरावित्यादि** । भीषास्मादिति श्लोको वाग्गोचरमाहात्म्यबोधनाय । 'यतो वाचः' इति तु वागाद्यगोचरतद्बोधनाय। तथाच सव्याख्यानावेतौ परत्वस्य निगमनायेति सिद्ध्यति । गणितागणितानन्दत्वरूपविशेषावगमं विना ज्ञेयब्रह्मणः सकाशात् परस्य निष्कष्टुमशक्यत्वादिति । **शेषं स्फुटम्** । श्रीभागवते दशमस्कन्धे वेदस्तुतौ, 'पुरुषविधोन्वयोऽत्र चरमोऽन्नमयादिषु यः' इत्यनेनायमर्थ उपबृंहितः । अन्नमयादिषु चरम आनन्दमयो भगवानिति । तथा सति तेन पुरुषाकारे समर्पिते सर्वस्य पुरुषाकारता सिद्ध्यति ।

रश्मिः ।

आसीत्ततो वै सदजायत' 'तदात्मान१ स्वयमकुरुत' 'तस्मात्तत्सुकृतमुच्यत' इति श्लोकपूर्वार्धेन कर्तृत्वस्योत्तरार्धेन समवायित्वस्येत्यर्थः । श्लोकद्वयोत्तरग्रन्थतात्पर्यमाहुः **तेनाथेत्यादि** । **भीषेति**

भीषास्माद्वातः पवते भीषोदेति सूर्यः ।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥

इतिश्लोक इत्यर्थः । अत्रापि तदुत्तरग्रन्थस्तत्पोषायेत्याहुः **तथा चेति** । **सव्याख्यानाविति** 'सैषानन्दस्य मीमांसा भवति' 'एतं ह वा व न तपति' इतिव्याख्या तत्सहिताविलर्थः। आनन्दमीमांसायाः कथं व्याख्यानत्वं तत्राहुः **गणितेति** । **इतीति** । तथा च मृत्युनियामकत्वेन लिङ्गेन व्याख्येये परं निष्कृष्टं तदत्रापि तथेति तथेत्यर्थः। द्वितीयश्लोकस्य विद्वानित्यन्तोंशः स य एवं विद्वानित्यन्तेन व्याख्यातः। अपरांशस्तु 'एते आत्मान१ स्पृणुते उभे ह्येवैष एते आत्मान१ स्पृणुते य एवं वेद' इत्यनेनेत्यपि बोध्यम्। यद्वा 'एत१ह वा व न तपति' इत्यादिकं ब्रह्मविन्माहात्म्यबोधनद्वारा विद्यादिमाहात्म्यबोधकमिति तथा। **शेषमित्यादि** मान्त्रवर्णिकमेवेत्येवकारेण मन्त्रवर्णातिरिक्तोपनिषद्व्यवच्छेदेनुक्तत्वेनातिरिक्तोपनिषत् संग्रहान्नेतर इत्यादिवक्ष्यमाणसूत्रैर्विधिरूपोपायविचारेणाधिकरणसंपूर्णत्वस्यानुक्तत्वेन संग्रहादनुक्तसमुच्चायकश्चो विधिमुखविचारेणाधिकरणसंपूर्णत्वबोधक इत्यर्थः। यतो मध्ये सूत्रमध्ये प्रयुक्तो यद्यन्ते प्रयुक्तः स्यादानन्दमयो मान्त्रवर्णिकमेव गम्यते चेति क्रियान्तरसमुच्चायकः स्यादित्येवं स्फुटमित्यर्थः। परं च अनुक्तस्याधिकरणसंपूर्णत्वस्य चकारो बोधकः एतादृशस्थलेनुक्तोर्थोध्याहर्तव्यः। इत्येवंबोधकश्चकारप्रयोगः। समुच्चयस्य तु वाचकः समासस्थले समासः समुच्चयस्य वाचकः वर्तिपदानि वा स्वार्थैः साकं समुच्चयस्य वाचकानि समासो नेति वा काकेभ्यो दधि रक्ष्यतामितिवत्। नन्वन्नादिरसा राशिभूता भवेयुः भस्मराशिवत्। पक्षिणो हंसस्यावरकास्तदा तु पुरुषाकारता न स्यात्। तथालिङ्गावृतजीवावरकास्तदाप्यङ्गुष्ठाधिकपुरुषाकारता न स्यादित्यत आहुः **श्रीभागवत इत्यादि**। **तदन्तरेत्यादि**

1. नूतनतया ।

भाष्यप्रकाशः।

ये तु प्रसिद्धमन्नमयस्य पुरुषविधत्वं स्वीकृत्य तस्य पुरुषविधत्वमनु प्राणमयाद्यानन्दमयान्तानां पुरुषविधत्वं मूषानिषिक्तप्रतिमान्यायेनाहुस्तैः स्वोक्तदृष्टान्तप्रकार एव न बुध्यते। मूषानिषिक्तप्रतिमायास्तदन्तराकारानुविधायित्वात्। तस्य च मधूत्थनिर्मितप्रतिमया समर्पणादत्रापि तेन न्यायेन बाह्याकारानुरोधस्याशक्यवचनत्वात्। तेनैष पूर्ण इत्यत्र तच्छब्देन प्रकृतम्, एतच्छब्देन पूर्वोक्तं च परामृश्य मध्ये, स वा एष इति तदेतच्छब्दाभ्यां च प्रकृतं परामृश्य तस्य पुरुषविधतामित्यत्र पूर्वपरामर्शनम्। ततस्तस्य प्राण एव शिर इत्याद्यवयवकल्पनावाक्ये पुनः प्रकृतपरामर्श इत्येवं व्याख्याने प्रक्रान्तत्यागप्रसङ्गाच्च। तस्मान्नैते कोशाः, किंतु पञ्चापि फलरूपा व्यापका भिन्ना एव। एतल्लोकत्यागोक्तिपूर्वकं तत्तत्प्राप्तिश्रावणात्। तथा श्रुत्यन्तरे 'अन्नात् प्राणा भवन्ति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्मयोनिः स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशश्च स वै सर्वमिदं जगत् स स भूत९ स भव्यम्' इत्यादिना अनादिपञ्चविधस्योक्तरीत्या पञ्चात्मकस्य पुरुषस्य सर्वव्याप्तिसर्वात्मकत्वबोधनपूर्वकं, 'ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाति विद्वान्' इत्यनेन तद्विदो मुक्तिश्रावणाच्च। कोशास्तु 'अन्नमयप्राणमयमनोमयविज्ञानमयमानन्दमयमात्मा मे शुध्यन्ताम्' इति श्रुत्यन्तरे शोध्यत्वलिङ्गाः प्रतिशरीरं भिन्ना एव। म इति स्वस्वजीवीयत्वरूपभेदलिङ्गात्। अतस्तद्भ्रमेणात्र तदङ्गीकरणमपि प्रकृतविरुद्धमेवेति। ननु शोध्यत्वलिङ्गिकायां श्रुतौ सिद्धवन्निर्देशादत्र चाकारसमर्पणलिङ्गात् कोशत्वं चतुर्णां सिद्ध्यति। मतान्तरे तु तत् सृष्ट्वा तदेवानुप्राविशदित्यनुप्रवेशस्याग्रे श्रावणादनुप्रवेशस्य च श्रुत्यन्तरे, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति जीवकरणकत्वबोधनादत्र शारीरपदाच्च पञ्चानां कोशत्वम्। द्वितीयवर्णकरीत्या विचारे त्वग्रे अस्माल्लोकात् प्रेत्येत्यादिना इत उत्क्रमणपूर्वकमन्नमयाद्युपसंक्रमणश्रावणादेतेषामेव प्राप्यतया फलरूपत्वं सिद्ध्यति। तत्र सिद्धान्ते चतुर्णां विभूतित्वं, पञ्चमस्य परपुरुषरूपत्वात् परमफलत्वम्। पूर्वपक्षे तु पञ्चानामपि विभूतिरूपत्वमिति विशेषः।

तथापि श्रुतिसमर्थनं तु सर्वत्र तुल्यमतः कुत उत्क्रमणं कस्य प्राप्तिरित्येतत् सर्वमतेऽपि विचारणीयमेवेति चेत्। अत्रेदं प्रतिभाति। तथाहि। ब्रह्मविदाप्नोति परमिति

रश्मिः।

मूषान्तराकारानुविधायित्वादित्यर्थः। **मधूत्थेत्यादि** मूषान्तर्गतयेत्यर्थः। **तेनैषेत्यादि** तेन प्राणमयेनैषोन्नमयः पूर्ण इत्यर्थः। मधूत्थत्वेन मूषा पूर्णा यथा। **प्रकृतमिति** प्राणमयम्। **पूर्वोक्तमिति** अन्नमयम्। **पूर्वपरेत्यादि** अन्नमयेत्यर्थः। **प्रकृतपरेति** प्राणमयपरामर्शः। **प्रक्रान्तेत्यादि** अन्नमयः प्रक्रान्तस्तत्त्यागप्रसङ्गादित्यर्थः। **हृदेति** सर्वव्यातीत्यादिविषयकबोधनस्योक्तत्वात् मनो बुद्धिः हृन्मनः अज्विकृतिः। यद्वा हृदेडेराच्। **तद्भ्रमेणेति** कोशत्वभ्रमेण। अत्र विभूतिष्वन्नमयादिषु। **तदङ्गीकरणं** कोशत्वाङ्गीकरणमपि प्रकृते नैतल्लोकत्यागेन विरुद्धम्। **मतान्तर** इति उक्तमतान्यमते। **पूर्वपक्ष** इति द्वितीयपूर्वपक्षे शब्दो योगरूढस्तथायं सिद्धान्तस्य पूर्वस्मिन् पक्ष इत्यर्थः।

भाष्यप्रकाशः ।

प्रतिज्ञानात् तत आन्तं तद्विवरणे फलत्वस्यैवोपपादनादिदं फलप्रकरणमेवेति निश्चीयते । एवं सत्यनुप्रवेशश्रुतिः प्रकरणेन संदष्टा परस्य फलरूपस्यैव सर्वत्रानुप्रवेशं समर्पयति । न त्वप्रकरणिनो जीवस्य । नच लिङ्गाद् बाधः । तदनुप्रविश्य सच्च त्यच्चाभवदित्यादिना सत्यमित्याचक्षते इत्यन्तेन वाक्येनानुप्रविष्टसर्वात्मकतायाः सर्वस्य सत्यतायाश्च श्रावणादनुप्रवेशस्य नामरूपव्याकरणार्थताया अश्रावणाच्चास्यानुप्रवेशस्य तस्मादनुप्रवेशाद् भिन्नत्वेनास्य जीवलिङ्गत्वाभावात् । अन्यथा वाक्यपीडापत्तेः । अग्रे च, यदेष आकाश आनन्दो न स्यादित्यनेनानन्दस्यैवान्तराकाशवर्तित्वश्रावणेन प्रकरणस्यैव पोषाच्च । अत आकारसमर्पणस्याप्युक्तरीत्या ब्रह्मकोशत्वसाधकतया मैत्रायणीयश्रुतौ, विश्वभृद्वै नामैषा तनूर्भगवतो विष्णोर्यदिदमन्नं प्राणो वा अन्नस्य रसो मनः प्राणस्य विज्ञानं मनस आनन्दं विज्ञानस्येति भगवत्तनुत्वश्रावणेन, अन्नात् प्राणा भवन्ति भूतानामिति पूर्वोक्ततैत्तिरीयश्रुतौ व्यापकत्वादिब्रह्मलिङ्गश्रावणेन चैतेषां जीवकोशरूपत्वे दूरनिरस्ते, एते विभूतिरूपाः प्राप्या एवेति सिद्धम् । जीवकोशास्त्वेतद्व्यष्टिरूपा इति तावत् प्रेत्यपदोक्तोत्क्रमणलिङ्गादत्र बोधिताः कल्प्यन्ते । तेन श्रुत्यन्तरीयः सिद्धवन्निर्देशोऽप्युपपन्न एव । एवमेतेषां विभूतित्वे जीवकोशाद् भेदे च निश्चिते पूर्वोक्ताभ्यासादिभिरानन्दमयस्य ततोऽपि निष्कर्षात् परमफलत्वं सुसिद्धमिति ब्रह्मवज्जीवः पूर्वोक्तविभूतिव्यष्टिरूपेभ्यः स्वकोशेभ्य उत्क्रम्य मान्त्रवर्णिकसूत्रभाष्योक्तरीत्या क्रमेण समष्टिभूतान्नमयाद्यानन्दमयान्तानि विभूतिरूपाणि प्राप्यानन्दमयो भूत्वा, एतमानन्दमयं परं ब्रह्म प्राप्नोति । 'आनन्दमानन्दमयोऽवसाने' इति द्वितीयस्कन्धवाक्यात् । यद्यप्यत्रानन्दमयो मध्ये नोक्तस्तथापि, 'तडितोऽधिवरुणः संबन्धात्' इतिन्यायेन श्रुत्यन्तरसिद्धत्वान्निवेशनीय इति नात्र विवादलेशः । एवमत्र त्याज्येभ्योऽन्नमयादिकोशेभ्य उत्क्रमणं तत उक्तरीत्या विभूतिरूपाणां तेषामानन्दमयस्य परस्य च क्रमेण प्राप्तिरिति वर्णकद्वयोक्तमुपपन्नतरमित्यवधेहि ।

ननु भवत्वेवं ज्ञानमार्गीयाणां प्राप्तिः, परंतु भक्तिमार्गीयाणां प्राप्तिः कथं व्युत्पाद्या । प्राप्तिर्हि पूर्वमसंबद्धस्य पाश्चात्यसंबन्धरूपा । अत्र चाकारसमर्पकत्वेनानन्दमयस्य लौकिकेऽपि

रश्मिः ।

बाध इति प्रकरणस्य बाधः । **अन्यथे**ति एतद्भाष्यानुरोधेनोपाधित्यागेन च वाक्ये जीवेनात्मनेत्यत्र पीडा भागत्यागलक्षणापत्तेः । **अन्त**रिति आनन्दोस्यास्तीत्यानन्दः **आकाश** इति व्युत्पत्तेस्तथा । **व्यापकत्वा**दिति विष्णोर्व्यापकस्य तनुरपि तथा । **आदिना** प्राणादिकर्तृत्वम् । **प्राप्या एवे**ति एवकारः पूर्वोक्तमतान्तरपूर्वपक्षयोगव्यवच्छेदकः । **तेने**ति व्यष्टिसमष्टिभेदात् कोशत्वं तेन विभूतीनामप्यविरुद्धत्वम् । **श्रुत्यन्तरीय** इति शोध्यत्वलिङ्गेन जीवीयकोशबोधकश्रुत्यन्तरमन्नमयं प्राणमयं मनोमयं विज्ञानमयमानन्दमयमात्मा मे शुद्ध्यन्तामिति तत्संबन्धी श्रुत्यन्तरीयः । **उपपन्न** इति कारणसत्त्वादुपपन्नः । अनुपपन्नत्वं त्वीश्वरे जीवतुल्यतापत्त्या कोशाकल्पनात् । अन्यथा कोशा न स्युरित्येवकारः । **ततोपी**ति विभूतिभ्योपि फलत्वेन निष्कर्षादित्यर्थः । **प्राप्ये**ति तेन सेवाफलीयमलौकिकसामर्थ्यफलं स्फुटीकृतम् । आनन्दमयो भूत्वेत्यर्थे प्रमाणमाहुः **यद्यपीत्यादि** । **तडित** इत्यादि अयं न्यायः फलाध्यायस्य तृतीयेस्ति पादे । **ज्ञानमार्गीयाणा**मिति ब्रह्मविदिति व्याख्येयश्रुतेरित्यर्थः । **व्युत्पा-**

निषेधमुखेन चतुःसूत्र्येदमेवाधिकरणं पुनर्विचार्यते सुदृढत्वाय । इदमत्राकूतम् । जीव एवानन्दमयो भवतु । फलस्य पुरुषार्थत्वात् । स ब्रह्मविदानन्दमयो भवतीति स्वर्गादिसुखवदलौकिकमेव रूपमानन्दमयं जीवस्य फलभूतमिति[1] प्राप्तेऽभिधीयते ।

भाष्यप्रकाशः ।

शरीरे· स्थितेः पूर्वं सिद्धत्वेन विभूतिरूपाणां चाकाशवद् व्यापकतया स्थितेरर्थात् सिद्धत्वेन भक्तशरीरेष्वपि सत्तया पक्षिरूपेण तेषु भक्तशरीरेषु प्रवेशनिर्वचनाशक्तौ फलप्राप्तेर्व्युत्पादयितुमशक्यत्वादिति चेत् । अत्रोच्यते । अनुप्रवेशश्रुत्या, आविशदिति श्रुत्या च पुरेषु भगवत्प्रवेशो निर्विवादः । पक्षिलिङ्गेनान्येषामपि गतिप्रतिबन्धकीभूतव्यापकत्वोल्लङ्घनात् स निर्विवादः । या पुनः सार्वदिकी स्थितिः सा तु तावन्मात्रकार्यार्थत्वादेतत्फलानुभावने प्रयोजिका न भवत्येव । यथा काष्ठादिषु वह्निस्थितिर्दाहादौ । एवं सति बहिष्ठो भक्त्या यदान्तः प्रविशति, हृद्येव वा मायामपसार्य प्रादुर्भवति तदा अक्षरात्मकानि विभूतिरूपाण्यपि भगवता सह विशन्त्याविर्भवन्ति वा । अक्षरस्य चरणाद्यात्मकत्वेन तेषामपि तत्त्वात् । इयं तु लौकिकशरीरव्यवस्था । यदा त्वेतत्त्यागेनालौकिकशरीरे प्राप्तिस्तदा तु तत्र वर्तमानत्वात् तेषां कार्यकारित्वमेवेति विशेषः । एवं चाधिभौतिकरूपेण व्याप्तानि तिष्ठन्त्याध्यात्मिकेन प्रविशन्त्याधिदैविकेन कार्यं कुर्वन्ति । आधिभौतिकत्वं च लौकिके नियतम् । आधिदैविकत्वं भगवति नियतं पर्यवसन्नम् । अवान्तरेषु सर्वेषु त्वाधिदैविकादित्रयमपि यथासंभवं सव्यपेक्षमिति, न क्वापि प्राप्तिव्युत्पत्तिप्रतिबन्ध इति जानीहीति दिक् ॥ १४ ॥

प्रकृतमनुसरामः । अग्रिमसूत्रमवतारयितुं तत्र प्रयोजनमाहुः निषेधेत्यादि । ननु को वा संदेहो येन निषेधमुखविचारावश्यकतेत्यत आहुः इदमित्यादि । यद्यप्यानन्दमयस्य फलत्वं, सर्वापेक्षयोत्कर्षश्च प्रतिपादितस्तथापि फलस्य पुरुषार्थत्वेन पुरुषशेषत्वात्, तस्यैष एव शारीर आत्मेत्यानन्दमयेऽपि श्रावणाज्जीव एवानन्दमयो भवतु । नच मन्त्रवर्णविरोधः । स ब्रह्मवित् सर्वान् कामान् अश्नुते, विपश्चिता ब्रह्मणा सह भूत आनन्दमयो भवतीत्यर्थोक्तौ तदभावात् । तेन यथा स्वर्गसुखमस्य फलभूतं तथा अखण्डैकरसं मुक्तावस्थालौकिकरूपमपीत्यर्थः । सूत्रं पठित्वा व्याचक्षते ।

रश्मिः ।

द्येति अत्र विशेषः फलाध्यायद्वितीयचरणे द्रष्टव्यः । फलप्राप्तेरिति विरहानुभवरूपफलप्राप्तेरित्यर्थः । आधिभौतिकादिभेदेन समादधते अत्रोच्यत इत्यादि । गतीति गतिप्रतिबन्धकीभूतं व्यापकत्वं तस्योल्लङ्घनादित्यर्थः । तावन्मात्रेति द्वा सुपर्णेति श्रुत्युक्तमात्रकार्यार्थत्वादित्यर्थः । एतत्फलेत्यादि विरहफलानुभावने । तदनुप्रविश्य सच्च त्यच्चाभवत् इति फलानुभावनेन । वह्निस्थितिरिति अन्तर्वह्निस्थितिरित्यर्थः । दाहादाविति प्रयोजिका न भवतीति पूर्वेणान्वयः । आधीति नन्वाध्यात्मिकत्वं कुतो नोक्तमिति चेन्न प्रवेशे आधिदैविकजन्ये आधिभौतिकाधिदैविकसंबन्धादाध्यात्मिकत्वमुभयनिष्ठमिति ॥ १४ ॥

१. रूपमिति ।

नेतरोऽनुपपत्तेः ॥ १५ ॥

इतरो जीवो न। आनन्दमयो न भवति। कुतः। अनुपपत्तेः। जीवस्य फलरूपत्वमात्रेणानन्दमयत्वं नोपपद्यते। तथा सति तस्य स्वातन्त्र्येण जगत्कर्तृत्वेऽप्यलौकिकमाहात्म्यवत्त्वेन निरूपणं नोपपद्यते। अतो न जीव आनन्दमयः॥ १५॥

भेदव्यपदेशाच्च ॥ १६ ॥

इतोऽपि न जीव आनन्दमयः। यतो भेदेन व्यपदिश्यते। 'रसꣳ ह्येवायं लब्ध्वानन्दी भवति' इति। आनन्दोऽस्यास्तीत्यानन्दी। एष ह्येवानन्दयातीति।

भाष्यप्रकाशः।

नेतरोऽनुपपत्तेः ॥ १५ ॥ इत्यादि। **तथा सतीति** जीवस्यानन्दमयत्वे सति। **निरूपणमिति** ब्रह्मणो निरूपणम्। तथाच, 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इत्यादिनोक्तं माहात्म्यं जीवेऽपि गच्छदेतां श्रुतिं विरुन्ध्यादिति माहात्म्यश्रुत्यनुपपत्तेस्तथेत्यर्थः। नचात्रैव जीवस्य निरङ्कुशजगत्कर्तृत्ववारणे कृते फलाध्यायस्थस्य वक्ष्यमाणस्य जगद्व्यापारवर्जसूत्रस्य वैयर्थ्यापत्तिरिति शङ्क्यम्। तत्रैतादृशजगद्व्यापारराहित्यस्याविवक्षितत्वेनावैयर्थ्यात् ॥१५॥

भेदव्यपदेशाच्च ॥ १६ ॥ 'रसꣳ ह्येवायं लब्ध्वानन्दी भवति' इत्यत्रानन्दीति लब्धृलब्धव्यभेदव्यपदेशो न जीवभेदगमकः। 'आत्मलाभान्न परं विद्यते' इत्यत्र स्वरूपैक्येऽपि लब्धृलब्धव्यभेदव्यपदेशदर्शनेन तस्यानियामकत्वादिति परे मन्यन्ते। तन्निवारणायाहुः **एष ह्येवेत्यादि**। तथाचानया श्रुत्याऽऽनन्दनीयानन्दकत्वेन भेदनिर्देशाज्जीवब्रह्मभेदे सिद्धे

रश्मिः।

नेतरोऽनुपपत्तेः ॥ १५ ॥ प्रयोजनमिति सुदृढत्वं भाष्योक्तं प्रयोजनम्। **निषेधेत्यादि** जीवजडनिषेधोपायविचारावश्यकतेत्यर्थः। **तस्येत्यादि**। सिद्धान्ते तु तस्येत्यभेदे षष्ठी भवति। **भवत्विति** आनन्दमयत्वरूपफलस्योक्तश्रुत्या पुरुषार्थत्वावसायात्। अधीष्टे लोट्। **स ब्रह्मेत्यादि** भाष्यमवतारयन्ति **न चेति**। **अत्रैवं जीवस्येति** अत्र भक्तदेहे एव जीवस्य ॥ १५ ॥

भेदव्यपदेशाच्च ॥ १६ ॥ तस्येति जीवस्यानन्दप्रचुरत्वनियामकत्वादित्यर्थः। **पर इति** शंकराचार्याः औपाधिकभेदं जीवानन्दमययोर्मन्यन्ते अतो जीवो नानन्दमय इति। **जीवब्रह्मभेद इत्यादि** ब्रह्मचिक्रीडिषया भेदे सिद्धे 'आसीज्ज्ञानमथो ह्यर्थः' इतिवाक्यात् भिदां 'मायामात्रमनूद्यान्ते प्रतिषिद्ध्य प्रसीदति' इति भगवद्वाक्याच्च। चिक्रीडिषया भेदे सिद्धे इन्द्रियैर्मायापदवाच्याभिः स गृह्यत इत्येकवाक्यता भेदोक्त्यद्वैतयोः। यद्वा।

'आत्ममायामृते राजन् परस्यानुभवात्मनः।
न घटेतार्थसंबन्धः स्वप्नद्रष्टुरिवाञ्जसा' ॥

इति वाक्यान्मायासत्त्वकृतो भेदो वर्तते इत्यदोषः। विकल्प एव वा 'एकोऽहं बहु स्याम् प्रजायेय' इतिश्रुत्या साकं भगवद्वाक्यस्य। श्रुत्योर्विरोधे विकल्प इत्येवं मनुस्मरणात्। इदानीं कथं तर्हि 'आत्मान्वेष्टव्यः' 'आत्मलाभान्न परं विद्यते' 'आत्मन्येवात्मना तुष्टः' इति श्रुतिस्मृतयो भवन्ति। यावता न लब्धैव लब्धव्यो भवतीत्युक्तमित्याशङ्क्य तथाप्यात्मनोऽप्रच्युतात्मभावस्यैव सततस्तत्त्वानवबोधनिमित्तो देहादिष्वनात्मस्वात्मत्वनिश्चयो लौकिको दृष्टः तेन देहादिभूतस्यात्मनोप्यात्मानन्विष्टो अन्वेष्टव्योऽलब्धो लब्धव्योऽश्रुतः श्रोतव्योऽमतो मन्तव्यो विज्ञातव्यः इत्यादिभेदव्यपदेश उपपद्यत

आनन्दयतीत्यर्थः । चकारात् सूत्रद्वयेन जीवो नानन्दमय इति निरूपितम् ॥ १६ ॥

तर्हि जडो भवत्वानन्दमयः । न । आन्तरत्वान्न कार्यरूपो भवति । किं तु कारणरूपः । स स्वमते नास्त्येव । मतान्तरे तु प्रकृतिर्भवेत् । तन्निवारयति ।

कामाच्च नानुमानापेक्षा ॥ १७ ॥

जडा प्रकृतिर्नास्तीति कारणत्वेन निराकृतैव । अथैतद्वाक्यान्यथानुपपत्त्या सत्त्वपरिणामरूपा कल्प्यते । सा कल्पना नोपपद्यते । कुतः । कामात् । आनन्दमयनिरूपणानन्तरं, 'सोऽकामयत' इति श्रूयते । स कामश्चेतनधर्मः । अतश्चेतन एवानन्दमय इति । चकारात्, 'स तपोऽतप्यत' इत्यादि । अतोऽनुमानपर्यन्तमर्थमबोधयद् वाक्यं न तिष्ठतीत्यर्थः ॥ १७ ॥

भाष्यप्रकाशः ।

आनन्दीति निर्देशस्यापि भेदोपोद्बलकत्वे बाधकाभावात् । आत्मलाभश्रुतावपि न जीवलाभस्तात्पर्यविषयः, किंतु परमात्मलाभ एव । तत्र भूम्न एवात्मतया सनत्कुमारेण नारदं प्रति छान्दोग्ये व्याख्याततत्वात् । अतो जीवब्रह्मैक्यस्य तद्रीत्या अभ्युपगमैकशरणत्वमिति दृष्टान्तोऽप्यसंगत एवेत्यर्थः । नानन्दमय इति कस्यामप्यवस्थायां तथा ॥ १६ ॥

कामाच्च नानुमानापेक्षा ॥ १७ ॥ कामाच्चेति सूत्रद्वयमवतारयन्ति तर्हि जड इत्यादि । नेति । एतदेव विभजन्ते आन्तरत्वादित्यादि । मतान्तर इति सांख्यमते । जडेत्यादि 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इत्यादौ प्रधानादिशब्दैः श्रुतावुक्तापि यादृशी सांख्यैर्जडा मूलकारणभूताङ्गीक्रियते तादृशी श्रुतौ नास्तीतीक्षतिसूत्रे कारणत्वेन निराकृतैव । अथ तस्य प्रियमेवेत्यवयवकल्पना वाक्यान्यथानुपपत्त्या आत्मपदार्थे गौणमङ्गीकृत्य आनन्दस्य सुखात्मकत्वेन सत्त्वधर्मत्वाद् सत्त्वपरिणामरूपा कार्यभूता कल्प्येत, सा तथेत्यर्थः । अनुमानपर्य-

रश्मिः ।

इत्यादि भाष्यं निरसन्ति आत्मलाभेत्यादिना । दृष्टान्तासंगतिमाहुः अत इत्यादि । दृष्टान्त इति यथा मायाविनश्चर्मखड्गधरा उत्सूत्रेणाकाशमधिरोहन्तः स एव मायावी परमार्थरूपो भूमिष्ठोन्यः । यथा वा घटाकाशादुपाधिपरिच्छिन्नादनुपाधिपरिच्छिन्न आकाशोन्यः इतिभाष्योक्तदृष्टान्त इत्यर्थः । तथेति चकाराद्धेतुसमुच्चयार्थादनुपपत्तेर्भेदव्यपदेशाच्च नेतर आनन्दमयः इत्यन्वयात्सूत्रद्वयेन जीवो नानन्दमय इत्यर्थः ॥ १६ ॥

कामाच्च नानुमानापेक्षा ॥ १७ ॥ प्रधानेत्यादिश्रुतिस्तु श्वेताश्वतरेस्ति । अत्र प्रधानादिशब्दैरिति बहुवचनेन ज्ञायते प्रधानपदेभ्यः सुपां सुलुक् इत्यनेन सूत्रेण लुगिति । ईक्षतिसूत्र इति ईक्षत्यधिकरणस्य 'गौणश्चेन्नात्मशब्दात्' इति सूत्र इत्यर्थः । ईक्षत्यधिकरणस्य नामैकदेशग्रहणमीक्षत्यधिकरणस्य सूत्रे । अथवा स्यादेतदित्यारभ्य युक्त इत्यन्तः संदर्भः ईक्षतिसूत्रस्यैव । ततश्चेत्यारभ्य गौणश्चेत्यादिसूत्राभास इतीक्षतिसूत्र एव निराकृता । उपलक्षणमेतत् । व्यासचरणैर्द्वितीयाध्याये रचनाधिकरणे निराकृतैवेति

अस्मिन्नस्य च तद्योगं शास्ति ॥ १८ ॥

इतश्च न जड आनन्दमयः। अस्मिन्नानन्दमये अस्य जीवस्य च 'आनन्दमयमात्मानमुपसंक्रामति' इति तेन रूपेण योगं शास्ति। फलत्वेन कथयतीति। न हि जीवस्य जडापत्तिर्युक्ता। 'ब्रह्मैव सन् ब्रह्माप्येति' इतिवदस्याप्यर्थः। तस्मान्नायं जीवो, नापि जडः। पारिशेष्याद् ब्रह्मैवेति सिद्धम्।

भाष्यप्रकाशः।

न्तमित्यादि । वाक्यश्रवणोत्तरम्, आनन्दमयपदोक्तोऽर्थः सत्त्वपरिणाम आनन्दविकारत्वाल्लौकिकसुखवदित्येवं यावदनुमीयते तावत् ततः पूर्वमेव कामवाक्यश्रवणात् तत्प्रतिहन्यतेऽतस्तथेत्यर्थः ॥ १७ ॥

अस्मिन्नस्य च तद्योगं शास्ति ॥ १८ ॥ इतिवदस्याप्यर्थ इति 'आनन्दमानन्दमयोऽवसाने' इति श्रीभागवतीयवाक्यादानन्दमय एव सन्नानन्दमयमात्मानमुपसंक्रामतीत्यर्थो ज्ञेय इत्यर्थः ।

एवमधिकरणव्याख्यानं समाप्य विकारशब्दसूत्रे विशेषेणाऽदूषणादधुना परमतं दूष-

रश्मिः।

व्याख्यानस्य । **वाक्येति** एतद्वाक्यं 'को ह्येवान्यात्कः' इत्यादि तच्छ्रवणोत्तरमित्यर्थः । **प्रतिहन्यत इति** प्रतिपक्षेण हन्यते नाश्यते । प्रतिपक्षस्तु आनन्दमयपदोक्तार्थः न सत्त्वपरिणामः कामात् यन्नैवं तन्नैवं यथा प्रकृतिः । **अतस्तथेत्यर्थ इति** अतः कारणादनुमानमनुमिती रचनानुपपत्त्यधिकरणे तथा व्याख्यानात्तत्पर्यन्तमपेक्षेति मध्यमपदलोपी समासः । अपेत्यनर्थकम् । ईक्षा दर्शनम् । ईक्ष दर्शन इति धातुपाठात् । एतादृशीमीक्षामवबोधं कारयत्तिष्ठतीत्यर्थे शैषिकोण् । शेष इति सूत्रेण प्रत्ययः । नेति सूत्रे वर्तत एव । वाक्यं प्रयोजककर्तृ ह्यर्थाध्याहारात् । अत उक्तमतः कामात्तथेत्यर्थ इति । तथाचायं सूत्रार्थः । अनुमानापेक्षा न कामात् कामवाक्यादिति अत्रापेक्षाशब्दाधिक्यमनुमानं न कामादित्येतावता चारितार्थ्यात् । एवं सत्यानन्दमयपक्षे हेतोः साध्यासामानाधिकरण्यादसाधारणत्वम् । दत्तेत्यपेक्षाशब्दे आनन्दमयपक्षे जडत्वापेक्षारूपप्रतियोग्यभावात् तत्प्रतियोगिकाभावरूपसाधनाभावात् न पक्षे हेतोः साध्यासामानाधिकरण्यं पक्षे हेतोः साध्यासामानाधिकरण्यं त्वेवं ज्ञेयम् । स्याद्यद्यनुमानपर्यन्तमर्थमवबोधयद्वाक्यं तिष्ठेत्तदा हेतोः साध्यसामानाधिकरण्यम् । वाक्यावस्थानं तु तद्घटकपदानां त्रिक्षणावस्थायित्वेन प्रथमक्षणे सकारोत्पत्तिः द्वितीयक्षणे स्थितिस्तृतीयक्षणे नाशः ओकारप्रागभावश्च चतुर्थक्षणे ओकारोत्पत्तिः पञ्चमक्षणे स्थितिः षष्ठक्षणे ओकारनाशः । ककारप्रागभावश्च इत्येवम् । ततः कामवाक्यनष्टत्वेनानवस्थानात्पक्षेनुमानपर्यन्तमवबोधनमेवं सोकामयदित्यत्र 'ॐ तत्सदिति निर्देशो ब्रह्मणः' इति गीतायास्तच्छन्दस्य शुद्धब्रह्मवाचकत्वेपि कामयतेतिपदसमभिव्याहारात् सृष्टिविषयिणीच्छारजउपाधिविशिष्ट इति विशिष्टे लक्षणेति रजोनुमानमत्र । साध्यतावच्छेदकसंबन्धो विशेष्यविशेषणभावः हेतुतावच्छेदकसंबन्धः स्वनिष्ठप्रतिपादकतानिरूपितप्रतिपाद्यताख्यः शब्दार्थसंबन्धस्य नित्यत्वेन संबन्धस्य द्विनिष्ठत्वम् । **भाष्ये । तिष्ठतीति** 'पदद्वयं सुप्तिङन्तं ताभ्यां चलति वाक्पतिः' इति वाक्यात्तिष्ठतीत्यर्थः ॥ १७ ॥

अस्मिन्नस्य च तद्योगं शास्ति ॥ १८ ॥ भाष्ये । जीवस्य चेति इदमा प्रत्यक्षी-

ये पुनरधिकरणभङ्गं कुर्वन्ति, तेषामज्ञानमेव। यतस्तैरप्यानन्दमयः कः पदार्थ इति वक्तव्यम्।

भाष्यप्रकाशः।

यन्ति स्वोक्तसमर्थनाय **ये पुनरित्यादि** । ये शांकरा एकवारं सर्वसंमतप्राचीनरीत्या व्याख्याय, पुनरिदं त्विह वक्तव्यमित्यादिना प्रायपाठविरोधमाकस्मिकत्वमेकस्यैवावयवित्वावयवत्वाभ्यामसामञ्जस्यम्, असन्नेवेत्यादिश्लोकद्वयविरोधमानन्दप्राचुर्येऽपि दुःखसाहचर्यमब्रह्मत्वापत्तिमानन्त्यैकत्वविरोधमानन्दमयपदानभ्यासं च प्रदर्श्यानन्दमयपदस्य ब्रह्मपरत्वानादरणेन व्यासोक्तस्याधिकरणस्य भङ्गं कुर्वन्ति तेषां श्रुत्यर्थाज्ञानमेव। यतस्तैरप्यानन्दमयपदार्थः क इति प्रश्ने तस्योत्तरं वक्तव्यम् । तस्यानुक्तत्वाद् तथेत्यर्थः । न चानन्दमयपदस्य ब्रह्मपरतायां दूषितायां जीवो वा जडो वा पारिशेष्यादानन्दमयः सेत्स्यतीति कथमनुक्तत्वमिति वाच्यम् । दूषणानामसंगतत्वात्। तथाहि । अस्यामुपनिषद्यारम्भे एव 'ब्रह्मविदाप्नोति परम्' इति ब्राह्मणोक्तोऽर्थः सत्यं ज्ञानेत्यस्यामृचि संक्षेपेणोक्तः। स एव संपूर्णे प्रपाठके विस्ता-

रश्मिः।

कृतस्यानन्दमयस्य चकारेण जीवस्य चेत्यर्थः। **प्रकृते**। **व्याख्यायेति** आनन्दमयः परमात्मेति स्थितमिति व्याख्यायेत्यर्थः। **प्रायपाठेत्यादि** 'स वा एष पुरुषोन्नरसमयः तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयस्तस्मादन्योन्तर आत्मा मनोमयस्तस्मादन्योन्तर आत्मा विज्ञानमयः' इति च विकारार्थे प्रवाहे सत्यानन्दमय एवाकस्मादर्धजरतीयन्यायेन कथमिव मयटः प्राचुर्यार्थत्वं ब्रह्मविषयत्वं वाश्रीयते इति भाष्येण प्रायपाठविरोधमाकस्मिकत्वं च आनन्दमयस्य ब्रह्मत्वे दूषणम्। **एकस्येत्यादि** । तथा सति तदेव ब्रह्मानन्दमय आत्मावयवी तदेव च ब्रह्म पुच्छं प्रतिष्ठावयव इत्यसामञ्जस्यं स्यादिति भाष्योक्तं तत्। **असन्नेवेत्यादीति**। अस्मिंश्च श्लोकेऽननुकृष्यानन्दमयं ब्रह्मण एवाभावाभाववेदनयोर्गुणदोषाभिधानात् गम्यते ब्रह्म पुच्छं प्रतिष्ठेत्यत्र ब्रह्मण एव स्वप्रधानत्वमिति । न चानन्दमयस्यात्मनो भावाभावशङ्का युक्ता । प्रियमोदादिविशेषस्यानन्दमयस्य सर्वलोकप्रसिद्धत्वात् इत्यनेन भाष्येण श्लोकविरोधमित्यर्थः । द्वयपदमसदेवेति श्लोकस्याप्येतत्समानयोगक्षेमत्वादुपात्तम् । **आनन्देत्यादि** आनन्दप्रचुर इत्युक्ते दुःखास्तित्वमपि गम्यते इत्यनेन दुःखास्तित्वम्। **अब्रह्मत्वेत्यादि**। तर्हि[1] च सति 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इति भूम्नि ब्रह्मणि प्रतिशरीरं तद्व्यतिरिक्ताभावश्रुतिरुपरुध्यत इत्यनेनाब्रह्मत्वापत्तिं प्रियादिभेदादानन्दमयस्य भिन्नत्वं ब्रह्म तु न प्रतिशरीरं भिद्यते 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यानन्त्यश्रुतेरित्यनेनानन्त्यविरोधम् 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा' इति श्रुत्यन्तरादेकत्वविरोधम्। न चानन्दमयाभ्यासः श्रूयते प्रातिपदिकार्थमात्रमेव हि सर्वत्राभ्यस्यते यदेष आकाश आनन्दो न स्यादित्यादिषु। यस्त्वानन्दशब्दस्य मयडन्तस्यैवाभ्यासोयं एतमानन्दमयमुपसंक्रामतीति । न तस्य ब्रह्मविषयत्वमस्तीति विकारात्मनामन्नमयादीनामुपसंक्रमितव्यानां प्रवाहे पठितत्वादित्यनेन भाष्येण आनन्दमयपदानभ्यासम्। **तथेति** अज्ञानमित्यर्थः। इदं त्विह वक्तव्यमित्यादिनाधिकरणं भञ्जन्ति आनन्दमयस्य प्रकृतत्वात्। ब्रह्मत्वं यत्तदभाङ्क्षुर्येन भाष्येण तद्बभञ्जुः **तथाहीत्यादिना**। भाष्यं तु तत्र यत्तद्ब्रह्म मन्त्रवर्णे प्रकृतं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति तदिह ब्रह्म पुच्छं प्रतिष्ठेत्युच्यते तद्विजिज्ञापयिषया एवान्नमयानन्द-

1. दुःखास्तित्वे सति।

भाष्यप्रकाशः ।

रेण व्याख्यायते । तत्र ज्ञानशेषस्य ब्रह्मण ऋचि स्वरूपलक्षणवाक्यादेवासंदिग्धं प्रतीतेस्तत्र संदेहानुदयेन तदर्थमुपपादनविस्तारस्याप्रयोजनकत्वात् फलवाक्ये विभक्तिवचनयोर्भेदेन संदेहात् तदर्थ एव संपूर्णप्रपाठक उपपादनीयः । अत उपपादनबीजत्वेन ज्ञानशेषस्य ब्रह्मणो मन्त्रवर्णे प्रकृतत्वकथनमेवासंगतम् । तत एव तद्विजिज्ञापयिषया पञ्चानां कोशत्वकथनमपि तथा । ज्ञेयपरयोरैक्याङ्गीकारोऽपि शब्दान्तरप्रयोजनाननुसंधानात् तथा । विकारप्रत्ययासंभवस्य प्रागुपपादितत्वाच्च प्रायपाठविरोधोक्तिराकस्मिकत्वोक्तिश्चापि तथा । प्रियाद्यवयवयोगस्य बाधकत्वकथनमपि तथा । द्वितीयवर्णकसमाप्तिस्थपरोक्षवादव्याख्यातरीतिकभक्तहृदयाधिकरणप्रादुर्भावाज्ञानात् । केवलनिर्विशेषब्रह्मवादस्येक्षत्यधिकरण एव निरस्तत्वाच्च । एकस्यावयवावयविभावविरोधकथनमपि, प्राणस्य प्राणमिति श्रुतिस्थस्य, नेह नानास्तीति भागस्यार्थाज्ञानादेव । आकारदर्शनं विना नानात्वस्फुरणायोगेन तस्य निषेधानर्हतया तेनैवाकारप्राप्तौ सत्यां नानात्वनिषेधस्यावयवावयविभावविरोधाभाव एव पर्यवसानादिति । एवं, 'कृत्स्नः प्रज्ञानघन एव' इति कृत्स्नपदादपि ज्ञातव्यम् । अकृत्स्नत्वापादकभेदबुद्ध्युदयं विना भेदनिवारणफलककृत्स्नपदवैयर्थ्यस्य दुष्परिहरत्वादिति । एवमसन्नेवेति श्लोकस्य ब्रह्म पुच्छेत्युक्तब्रह्मपरत्वोत्प्रेक्षणमपि निर्हेतुकम् । अन्नमयादिश्लोकानामिवास्याप्यवयविपरतायाः प्राञ्जलायास्त्यागे बीजाभावात् । नच प्रियमोदादिरूपस्यानन्दमयस्य सर्वप्रतीतिगोचरत्वात् तद्विषयकभावाभावशङ्काभावादेतस्य श्लोकस्यासंगतिरेव बीजमिति युक्तम् । उक्तप्रियादिपञ्चावयवविशिष्टावयविरूपेणानन्दमयपुरुषज्ञानस्य स्वतः क्वाप्यदर्शनेनोक्तश्रुतित एव ज्ञानसंभवे तत्र

रश्मिः ।

मयान्ताः पञ्चकोशाः कल्प्यन्ते तत्र कुतः प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्ग इति । **ज्ञानशेषस्येति** ब्रह्मविदिति श्रुत्यंशे ज्ञानविषयस्येत्यर्थः । **तदर्थं** ज्ञानशेषब्रह्मार्थम् । **विभक्तीत्यादि** परमिति ब्रह्मणा विपश्चितेति च विभक्तिभेदः । परमिति सर्वान् कामानिति च वचनभेदः । **तदर्थ** इति ज्ञानशेषब्रह्मार्थे । **तत एवेति** ज्ञानशेषस्य ब्रह्मणोऽप्रकृतत्वादेवेत्यर्थः । एतेन नन्वानन्दमयावयवत्वेन ब्रह्म पुच्छं प्रतिष्ठेत्युच्यते । अन्नमयादीनामिवेदं पुच्छं प्रतिष्ठेत्यादि तत्र कथं ब्रह्मणः स्वप्रधानत्वं शक्यं विज्ञातुम् । प्रकृतत्वादिति ब्रूम इति भाष्यमपि निरस्तम् । **तथेति** असंगतम् । संनियोगशिष्टन्यायात् । विभूतित्वस्यान्नमयादीनामुपपादितत्वाद्वा । **ऐक्येति** ब्रह्मविदाप्नोति परमित्यत्रेत्यर्थः । **शब्दान्तरेत्यादि** उत्क्रमणादिशब्दान्तराणामित्यर्थः । एतच्च द्वितीयाध्यायतृतीयपादे स्फुटम् । ब्रह्मशब्दात्परशब्दः शब्दान्तरं वा । इतः परं क्रमेणोक्तानि दूषणान्युद्धरन्ति स्म **विकारेत्यादि** । **बाधकत्वेत्यादि** असामञ्जस्यरूपबाधकत्वेत्यर्थः । **द्वितीयवर्णक इत्यादि** द्वितीयस्मिन् वर्णके आनन्दमयोऽभ्यासात् इत्येवं पुनः सूत्रप्रक्षेपेण वर्णके समाप्तिस्थो यो वस्तुतस्त्वित्यादिना भणितः परोक्षवादस्तेनेत्यादि । 'ततो ह जातो भुवनस्य गोपा हिरण्मयः शकुनिर्ब्रह्मनाम' इति श्रुतेः । कदाचित्प्रादुर्भावस्थले शकुनिद्वयदानमपि यथा मह्यमन्तरिक्षदेवेनादेहेन शकुनिद्वयं दत्तं माखापरिमाणकम्[1] । **बीजाभावादिति**

१. लोके बहुत बडी माखी माखा कहियत है ।

भाष्यप्रकाशः।

विश्वासरहितस्य निन्दाया विश्वस्तस्य प्रशंसायाश्च बोधनेनास्यासंगत्यभावात्। एवं, 'यतो वाचः' इति वाक्यशेषस्य निर्विशेषसमर्पकत्वकथनमपि तथा। नायमात्मेति मन्त्रे स्वकृततनुविवरणश्रावणेनैतदुत्तरार्धे श्रावितस्यानन्दवित्त्वस्यापि तत एव सिद्ध्या तदननुगृहीतवाङ्मनसयोरगोचरत्वस्यापि तत एव सिद्धेस्तस्य निर्विशेषसमर्पकतायाः कल्पयितुमशक्यत्वात्। किंचोक्तप्रणाड्या वेदनविषयाणामलौकिकानामेव प्रियादीनामत्र पूर्वोक्तरीत्या परामर्शात् तेषां प्रतिशरीरं भेदाभावादेवानन्दमयस्यानेकत्वमपि न शक्यकल्पनम्। अत आनन्दमयेऽनेकत्वप्रसञ्जनाय लौकिकानां प्रियादीनामादरोऽप्यसंगत एव। यत्पुनर्न चानन्दमयपदाभ्यासः श्रूयत इत्यादिना आनन्दमयपदाभ्यासे आनन्दमयपदाभ्यासस्याशक्यकल्पनत्वमुक्तं तदपि तथैव। यतोऽभ्यासोऽभ्यस्यमानं भिन्दन्नाभ्यस्तपदवाच्येन सामान्यरूपेण तं भिनत्ति, किंतु पदान्तरोक्तेन विवक्षितरूपेण। समिधो यजतीत्यादिरूपे तदुदाहरणे पञ्चसु यागत्वे समानेऽपि पदान्तरोक्तसमिदादिरूपेणैव भेददर्शनात्। एवं सति तत्र यथाभ्यस्तो यजतिः समिदादि-

रश्मिः।

नहि देवदत्तावयवे संपूर्णदेवदत्तत्वमुपपादयितुं शक्यम्। **विश्वासेत्यादि** श्रुत्या प्रतिपादनादेतादृशमेव ब्रह्मेति ज्ञानेरहितस्य। शुद्धमनोवशस्येति यावत्। **विश्वस्तस्येति** श्रुत्या प्रतिपादनादेतादृशमेव ब्रह्मेति सत्यं दधतः। **असंगतीत्यादि** तथा च युक्तिनिषेधे पर्यवस्यत्ययं श्लोकः इति भावः। तथा च नेदमपि ब्रह्म पुच्छं प्रतिष्ठेत्यत्र ब्रह्मण एव स्वप्रधानत्वमित्यस्य गमकमित्यानन्दमयावयवत्वेनापि ब्रह्मणि विज्ञायमाने न प्रकृतत्वं हीयते। आनन्दमयस्य ब्रह्मत्वादित्येवेति भावश्च। **नायमात्मेत्यादि** मुण्डकेस्त्ययं मन्त्रः। यत्र ब्राह्मणानां मन्त्र इति समाख्या स मन्त्र इति मन्त्रलक्षणात्। **स्वकृतेति** स्वां तनुं विवृणुते संभजते प्रकाशनार्थम्। रामोत्तरतापनीयात्। तस्य तनुं स्वां स्वकीयां कृत्वेति वा गुरुतन्वामयोगोलके वह्निरिव ब्रह्मावेशात्। **एतदुत्तरार्ध** इति। यत इत्यस्याः श्रुतेरुत्तरार्धे। **तत एवेति** वृततन्वा एवेत्यर्थः। यतस्तन्वा मनआदिभिरानन्दज्ञानं मनसि जायते इति। **तदित्यादि** तनुविवरणकर्तुरात्मनोननुग्रहीतेत्यर्थः। **तत एवेति** अवृततन्वा एवेत्यर्थः। **तस्येति** वाक्यशेषस्येत्यर्थः। **निर्विशेषेत्यादि** आनन्दं ब्रह्मण इत्यत्रानन्दो मायिको विवर्त इति मायावादः 'इन्द्रो मायाभिः पुरुरूप ईयते' इति श्रुतौ मायिकत्वमैन्द्रियकत्वं भिदां 'मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' इति भगवद्वाक्यादिति। सिद्धान्तान्तरे ब्रह्मवादः। उभयव्यपदेशाधिकरणरीत्या विद्वन्मण्डनोक्तरीत्या च सकलविरुद्धधर्माश्रयो ब्रह्मेति राद्धान्तीयो ब्रह्मवादः। **अत** इति साकारस्यैव ब्रह्मणो व्यापकत्वमिति सिद्धान्तात्। **अभ्यस्यमान**मिति यथात्र प्रस्तुतानन्दम्। **सामान्येति** यथात्र प्रस्तुतानन्देऽभ्यस्तत्वं प्रस्तुतत्वं च तयोरभ्यस्तत्वसामान्यं रूपं प्रस्तुतं विशेषरूपं तथा यागत्वं सामान्यरूपं समिद्यागः तनूनपाद्याग इत्यादौ समिदादिविशेषरूपं विशेषणत्वात्तदुक्तमत्र किं तु पदान्तरोक्तेनेत्यादिना। **पदान्तरोक्तेत्यादि** यद्यपि शास्त्रदीपिकादौ अभ्यस्तविधिश्रुत्या कर्मभेद इत्येवोक्तं तथापि केन रूपेणेति विचार्यमाणे सामान्यरूपेण संभवादेतेनैव रूपेणेति भावः। नैयायिकरीत्या शक्तं पदं स्वीकृत्य स्तुत्या प्राचुर्यार्थकानन्दाभ्यासादन्नमयादिभेदसाधकस्तादृशानन्दाभ्यास इत्याशयेनाहुः

१. सत्याधान। २. ब्राह्मणं वेदान्तेषु ब्राह्मणत्वात्।

न तावज्जीवः । तस्य ब्रह्मज्ञानफलत्वेन, ब्रह्मणा विपश्चितेत्यानन्दमयस्योक्तत्वात् ।

भाष्यप्रकाशः ।

पदाभ्यासकल्पनानपेक्ष एव समिदादिरूपयागभेदसाधकस्तथात्रानन्दपदमप्यानन्दमयपदाभ्यासकल्पनानपेक्षमेवानन्दमयरूपानन्दभेदसाधकमिति स्फूर्त्या तादृशशङ्काया एवानुदयादिति बोध्यम्। अथानन्दवल्लीभाष्ये यदुक्तमानन्द इति विद्याकर्मणोः फलं, तद्विकार आनन्दमय इति । प्रियादिवासनानिर्वृत्तो ह्यात्मानन्दमयो विज्ञानमयाश्रितः स्वप्न उपलभ्यत इति च । तदप्यसंगतमिति । तत्रान्त्यं दूषयन्ति नेत्यादि । अयमर्थः । ब्राह्मणे परशब्देनोदितं फलं तद्व्याख्यारूपायामृचि न केवलेन कामपदेन शक्यवचनम् । तेषां ज्ञेयब्रह्मापेक्षया अपरत्वेन ऋगुपजीव्यब्राह्मणस्थपरशब्दविरोधापातात् । किंतु विपश्चिद्ब्रह्मपदाभ्यां सहितेन । अतः, सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्येतावन्तं ग्रन्थं व्याख्यातुं सर्वप्रपाठक इत्युपपादितम् । तथा सत्यन्नमयादीन्निरूप्य सर्वान्तरः प्रियाद्यवयववानानन्दमयो यो व्याख्यायते स जीवस्य ब्रह्मज्ञानफलत्वेनैव व्याख्यायते । तत्रावयवा एव कामपदार्थोऽवयव्येव विपश्चिद्ब्रह्मेति सिद्ध्यति । उत्तरत्रैतमानन्दमयमात्मानमुपसंक्रामतीत्यनेन तादृशस्य तस्यैव पर्यवसि-

रश्मिः ।

अत्रानन्दपदमित्यादि । **अत्रे**ति ब्रह्मवित्प्रपाठके । **आनन्दमयरूपे**ति अत्रानन्दशब्दप्राचुर्येण प्रस्तुतानन्दविवक्षा ज्ञेया। **तादृशे**ति आनन्दमयपदाभ्यासश्रवणरूपशङ्कायाः । आनन्दमयपदाभ्यासश्रावणकल्पनानपेक्षत्वेनानुदयात् । अत्राभावस्य प्रतियोगिज्ञानसापेक्षत्वाङ्गीकारादेवकारः । न चैवमपि वर्णके दृष्टान्तविरोध इति वाच्यम् । वर्णक आनन्दपदेनोपसंक्रामतेर्विवक्षितत्वात् स्थानसाम्यात् । तथा चैतमन्नमयमात्मानमुपसंक्रामति, एतं प्राणमयमात्मानमुपसंक्रामति, एतं मनोमयमात्मानमुपसंक्रामति, एतं विज्ञानमयमात्मानमुपसंक्रामति, एतमानन्दमयमात्मानमुपसंक्रामतीति पञ्चकृत्वोभ्यस्त उपसंक्रामतिरन्नमयादिभेदसाधक इति दृष्टान्तसाम्यं बोध्यम् । अभ्यासादित्यत्र सामान्यरूपेणाभ्यासत्वेनाभ्यासकथनात् । एतेन यस्त्वयं मयडन्तस्यैवानन्दशब्दस्याभ्यासः एतमानन्दमयमात्मानमुपसंक्रामतीति न तस्य ब्रह्मविषयत्वमस्ति विकारात्मनामेवान्नमयादीनामनात्मनामुपसंक्रमितव्यानां प्रवाहे पठितत्वादिति भाष्यमपि प्रत्युक्तम् । विकारे मयटः प्राप्त्यभावात् । किं चैतेनानन्दमयस्य ब्रह्मत्वे निर्णीते ह्यानन्दपदस्य लक्षणयानन्दमयपरत्वज्ञानादभ्याससिद्धिः । तत्सिद्धौ तन्निर्णय इत्यन्योन्याश्रयफलकं यत्, यदि चानन्दशब्दस्य ब्रह्मविषयत्वं निश्चितं भवेत् तत उत्तरेष्वप्यानन्दमात्रप्रयोगेषु आनन्दमयाभ्यासः कल्प्यते न त्वानन्दमयस्य ब्रह्मत्वमस्ति प्रियशिरस्त्वादिभिर्हेतुभिरित्यवोचामेति भाष्यं प्रत्युक्तम् [**आनन्दमये**त्यादि अत्रानन्दपदं प्राचुर्येण प्रस्तुतानन्दवाचकमेवमेव सामानाधिकरण्यात्] **विद्याकर्मणो**रिति पुण्यकर्मार्थकं कर्मपदं समासघटकं बोध्यम् । आनन्दसाधनत्वात् । विकारार्थमयडन्तत्वे स्वानुभवं प्रमाणयति स्म **प्रियादी**त्यादि । प्रियादिकर्मजन्यसंस्कारविशेषरूपवासनया निर्वृत्त आनन्दित इत्यर्थः । **आनन्दमय** इति विषयानन्दमयः फलत्वाद्विज्ञानमयाश्रित इत्यर्थः । **इतीति** इतिर्हेतुवाचकः । तत्र तयोः पक्षयोः । **शक्यवचन**मित्यत्र व्याख्यातुमिति शेषः । **सहितेने**ति कामपदेनेति विशेष्यम् । **उपपादित**मिति उपपादनीयं च संदिग्धमिति भाष्य उपपादितम् । **जीवस्ये**ति भाष्यीयस्य तस्येत्यस्य व्याख्यानम् । तेनैतद्भाष्यपूर्वभाष्यस्य न तावज्जीव इत्यस्य जीवः प्रियादिवासनानिवृत्तो ह्यानन्दमयो विज्ञानमयाश्रित इत्यर्थः । **कामपदार्थ** इति काम्यन्त इति कामाः प्रियादयः । **तादृशस्य तस्ये**ति अवयवविशिष्टस्यावयविन इत्यर्थः । तर्कमप्याहुः

भाष्यप्रकाशः।

तत्फलत्वेनोपसंहारात् स यदि जीवत्वेन विवक्षितः स्यात् प्रथमान्तत्वेनात्र निर्दिष्टः स्यात्। सोऽश्नुत इति श्रुतौ फलशेषिणो जीवस्य प्रथमान्तत्वेनैव निर्दिष्टत्वात्। भोक्तृफलयोरैक्यापत्तिश्च स्यात्। किंचान्नमयादीनां व्यवहारे सतामत्र प्रायपाठेनाकस्मात् तद्विहाय स्वप्नोपलभ्यमानग्रहणे तद्विरोधोऽपि। किंच ब्रह्मांशस्याविद्ययात्यन्तभिन्नत्वमानिनो जीवस्य 'ब्रह्म वेद ब्रह्मैव भवति' इत्युक्तो ब्रह्मभावः सर्वात्मभावरूपं ज्ञानं तदधिकाररूपा अविद्यानिवृत्तिश्च न ब्रह्मज्ञानफलत्वेन वक्तुं शक्यानि। ब्रह्मभावस्यावरणभङ्गमात्रेण स्वतो भवनस्य भवतिना बोधनात्। प्रकृते तदङ्गीकारे द्वितीयाविभक्तिपीडा लक्षणादोषश्च स्याताम्। ज्ञानस्य तथा-

रश्मिः।

स यदीत्यादिना स आनन्दमयः। **अथ जड** इत्यादिभाष्यं विवृण्वन्ति स्म **किं चान्नेत्यादि**। अन्नमयादीनां पुरुषविधानां जडत्वेपि फलत्वम्। अन्वयस्यानन्दमयत्वात्। आत्मसुखरूपस्वर्गः लोकरूपे स्वर्गेन्वित इति जडोपि लोकः फलं तद्वत्। **तदिति** स्वर्ग आत्मसुखं तर्हि आत्माश्रितः स्वर्गो लोकस्तर्हि जडः स्वर्गोद्भवदेहादिस्तदाश्रित आसमन्तात् सेवितः इत्युभयोः **किमाश्रित** इति प्रश्ने-आद्ये आनन्दमयस्य ज्ञानफलत्वे जितं ब्रह्मवादिभिः। द्वितीये दूषणमाहुः **जडाश्रितत्व** इति। एवकारो विद्यायोगं व्यवच्छिनत्ति। **व्यवहारे सता**मिति स्वप्नवैलक्षण्यार्थमुक्तम्। **तद्विहाय** इति जडं धर्मफलं विहाय। **तद्विरोध** इति स्वाप्निकस्यासत आनन्दमयस्य ग्रहणे उक्तप्रायपाठविरोध इत्यर्थः। अपिना स्वर्गफलविरोधः। ज्ञानस्यापीत्यादिभाष्यं विवृण्वन्ति स्म **किं च ब्रह्मांशस्येत्यादि**। **ब्रह्म वेदे**ति वेदनरूपज्ञानेनाविद्यानिवृत्त्या ब्रह्मैव भवति आवरणभङ्गात् ब्रह्मभावः अयमितः प्रेत्य। सर्वात्मभावस्तृतीयाध्याये स नात्र ब्रह्मज्ञानफलत्वेनेति वक्ष्यमाणप्रकारानुपपत्तेस्तस्य प्रदानसाध्यत्वात्। अतोऽहं मनुरभवं सूर्यश्चेत्युक्तः। अयं सशरीरस्य। **ब्रह्मज्ञाने**ति ब्रह्मविदाप्नोति इत्यनेनोक्तं ब्रह्मज्ञानं तत्फलत्वेनेत्यर्थः। अतो ज्ञानस्याप्यवान्तरफलं ब्रह्मभावादि। **शक्यानी**ति 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इतिसूत्रेण शक्यो ब्रह्मभावः शक्या विद्यानिवृत्तिः शक्यं ज्ञानं तानीमानि शक्यानीत्येवमेकशेषः। कथमत्र तल्लक्षण एव विशेष इति चेन्न अविद्यानिवृत्तिसाध्यः सर्वात्मभावो विद्या विद्याविरुद्धसम्यङ्निवृत्तिश्च ज्ञानात्मिकेति त्रयाणां ज्ञानरूपत्वेन लिङ्गलक्षण एव विशेषादिति। निवृत्तिरभावोधिकरणात्मेति ज्ञानरूपत्वं सिद्धान्तेप्यभावो ज्ञानात्मेति सर्वं सुस्थम्। **भवतिने**ति 'इक्श्तिपौ धातुनिर्देशे' इतिसूत्रेण तिप् ततः सुबुत्पत्त्या टा तेन तृतीयान्तमिदं पदं बोध्यम्। **प्रकृत** इति एतमानन्दमयमात्मानमुपसंक्रामतीत्यर्थः। **द्वितीयाविभक्तीत्यादि**। कर्मणि द्वितीया इतीति वक्तव्यम्। तच्च कर्म **उत्पाद्यं विकार्यं संस्कार्यमाप्यं** चेति चतुर्विधम्। तच्च नित्यत्वान्नोत्पाद्यं कर्म आनन्दमयो घटवत्। अपरिणामत्वान्न विकार्यं दधिवत्। नित्यैकरसत्वान्न संस्कार्यं व्रीहिवत्। स्वात्ममात्रत्वान्नाप्यं ग्रामवदिति विभक्तिपीडा विज्ञानमय आपादरूपविभक्तेः शक्तिरूपव्यापारेन्यथाकृते पीडा भवत्येव न च विकारे मयडिति कर्मत्वोपपत्तिरिति वाच्यम्। विकारशब्दसूत्रविरोधात्। ब्रह्मवित्फलत्वाच्च न विकारे मयडिति। आनन्दमय इत्यत्र विज्ञानपदस्याभेदान्वयानुपपत्त्या स्वाश्रिते लक्षणादोषश्चेत्यर्थः। **तथात्वे**ति ब्रह्मज्ञानफलत्वाङ्गीकार इत्यर्थः। अयमर्थः। यथा ब्रह्मणा विपश्चितेति पदाभ्यां यथानन्दमयो गृहीतस्तथा सूर्यो विपश्चिन्मनसा पुनातु इति श्रुत्या विपश्चित्सूर्योपि इति सदानन्दग्रहणवच्चिद्भक्तिरपि तस्यैष एव शारीर आत्मा यः पूर्वस्येत्यत्र यः पूर्वस्यात्मोक्तः सच्चिद्विपश्चि-

अथ जडः स्वर्गवत् तदा किमाश्रित इति वक्तव्यम् । जडाश्रितत्वे कर्मफलमेव स्यात् । ज्ञानस्याप्यवान्तरफलमिति चेन्न तर्हि किमानन्दात् तस्यातिरिक्तं फलं भविष्यति । जडचिद्रूपतायाः पूर्वमेव विद्यमानत्वात् ।

भाष्यप्रकाशः ।

त्वाङ्गीकारे तु तस्य, स यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवंवित् इति साधनशेषभूतपुरुषविशेषणत्वेन तत्कोटिनिविष्टत्वात् । साधनरूपस्य फलरूपस्य च ज्ञानस्यावैजात्यात् साधनफलभावव्याहतिश्च । तेन, एतᳶ ह वा व न तपतीत्यादिकं ब्रह्मविन्माहात्म्यबोधनद्वारा विद्यादिमाहात्म्यायैव सिद्ध्यति । अतः श्रुतिव्याख्यानस्यासंगतत्वादानन्दमयो जीव इत्यसंगतम् । एवं द्वितीयं दूषयित्वा आद्यं दूषयन्ति अथ जड इत्यादि । जीवाश्रितत्वे भोक्तृशरीरान्तःपातात् तद्व्यतिरिक्तं जडं वा ब्रह्म वा आश्रित इत्यनयोर्मध्ये

रश्मिः ।

ज्ज्ञानरूपः किं न स्यादत उक्तं ज्ञानस्य तथात्वाङ्गीकारे त्विति पूर्वं श्लोकचतुष्टयान्तः प्रपाठकः समर्थितः । अग्रिमपदमीमांसाभिप्रायश्चोक्तः अग्रिमार्थमस्मिन् पक्षे आहुः **तस्य स य** इति तस्येत्यस्य साधनरूपस्येत्यनेनान्वयः । श्रुत्यर्थस्तु आनन्दमीमांसोक्तः आनन्दस्तच्छब्दार्थः **अय**मिति परिदृश्यमानः । **असा**विति विप्रकृष्टः स एकः सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः । कथनप्रयोजनं तु सूर्यस्य देवपत्नीनामसु निरुक्ते पाठात् पुरुषस्य पत्नीत्वद्योतनाय तदुक्तं टिपण्यां 'स्त्रीप्रायमितरत्सर्वम्' इति टिप्पन्याम् । कश्चिदेव हि भक्तो हि इतिवाक्यादेकवचनम् । **साधने**ति अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रामतीत्याद्युक्तफलसाधनं स य एवंविदित्युक्तं ज्ञानं तस्य शेषमतस्तदर्थः पुरुषः । तस्य विशेषणत्वेन । विशेषणत्वं तु एवंविदित्यस्य पूर्वोक्तप्रकारेण वित्पुरुष इति । **फलरूपस्ये**ति विपश्चित्सूर्यरूपस्य । **साधनफले**ति धर्मादिः । ब्रह्मविदिति साधनं ब्रह्मणा विपश्चितेति फलम् । **तेने**ति अग्रिमग्रन्थस्यानुक्तस्याभिप्रायाद्यतो वाच इत्यस्यानुक्त्वा तदग्रिमस्याभिप्रायमाहुः **एत**मिति । श्रुत्यन्तर्गतं ब्रह्मविदमित्यर्थः । अग्रे स एवंविद्वानिति श्रुतयस्तिस्रः । एवंविद्वान् पुण्यपापे अतापकरत्वेन विद्वान्, आत्मानं स्पृणुते प्रीणातीत्यर्थः । समत्वेन द्विकर्मकत्वं छान्दसम् । आत्मानुग इति पाठे कर्ता, एते इति कर्म, नगो गिरिराजः । पुण्यपापे प्रीणातीति । तद्यथाऽऽरणे 'नात्र भुवनं न पुरुषा न पशवोः नादित्यः संवत्सर एव प्रत्यक्षेण प्रियतमं विद्यात् । एतद्वै संवत्सरस्य प्रियतमᳶरूपं योस्य महानर्थ उत्पत्स्यमानो भवति इदं पुण्यं कुरुष्व' इति श्रूयते । तत्र निरोधलक्षणग्रन्थोक्तदिशा पुण्यकरणम् । पुण शुभे, पुणे साधु पुण्यं 'तत्र साधुः' इति यत् । पुण्यकरणं 'देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे' इतिश्रुतेः संहितास्थायाः । 'यज्ञो वै श्रेष्ठतमं कर्म' इतिश्रुतिः । श्रेष्ठतमं मर्यादाभक्तिरूपं कर्म, तन्निरोधलक्षणग्रन्थ इति । ननु पापस्योपयोगाभावादेते इति द्विवचनमन्यथा बाहुलकादेर्भयमिति चेत्तत्राह **उभे इत्यादि** । अत्राप्यात्मानमात्मानग इतिपाठद्वयम् । **य एव**मिति एवं पूर्वोक्तं माहात्म्यं वेदस्यैक्यमाहात्म्ययोः प्रतिपादकत्वादित्यर्थाच्च । **श्रुतीत्या**दि आनन्दवल्लीभाष्यस्येत्यर्थः । आनन्दमयस्य जीवत्वं व्युदस्तम् । जीवाद्याश्रितत्वं तु स्यात्तच्च भाष्यविवरणाय पीठिकामाहुः **जीवाश्रितत्व** इत्यादि । भोक्तृशरीरं जीवशरीरम् । **तदे**तिभाष्यं विवृण्वन्ति स्म **तद्व्यतिरिक्त**मिति । कर्तृत्वात्फलत्वासंभवेन तद्व्यतिरिक्तं स्वर्गयोग्यं जडं शरीरमित्यादि बोध्यम् । **ब्रह्मे**ति ब्रह्म गणितानन्दं आत्मा वाश्रितः । आत्मत्वस्वरूपानन्दविषयः । तथा च **स्वर्गव**दितिभाष्ये स्वर्गः आत्मसुखं लोको

‘अस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति’ इतिश्रुतिविरोधश्च। पुच्छत्वेन ब्रह्मवचनात् प्रद्वेष इति चेत्, तर्हि ‘स एको ब्रह्मण आनन्दः’ इत्यत्रापि षष्ठ्या भेदनिर्देशाद् ब्रह्मणः परमपुरुषार्थत्वं नाङ्गीकुर्यात्।

भाष्यप्रकाशः।

एकं किंचिद् वक्तव्यम्। तत्राद्ये ज्ञानफलत्वाभावादुक्तश्रुतिविरोध एव दूषणम्। यदि तदविरोधाय ज्ञानावान्तरफलत्वमङ्गीक्रियते, तदा मुख्यं फलमानन्दादतिरिक्तं किं भविष्यतीति वक्तव्यम्। ब्रह्मभावादीनां फलत्वाङ्गीकारे दूषणानामुक्तत्वात् संसारदशायां जडरूपताया ब्रह्मवित्त्वदशायां चिद्रूपतायाश्च सत्त्वात्। अत आनन्दमयस्य विकारत्वाङ्गीकारे फलबोधकश्रुतिविरोधः सर्वथा दुर्वार इत्यर्थः। दूषणान्तरमाहुः अस्येत्यादि। स एको ब्रह्मण आनन्द इत्यस्य व्याख्याने ब्रह्मानन्दस्य परमत्वायैतस्यैवानन्दस्येति श्रुतिस्तैरुपन्यस्ता। आनन्दमयस्य विकारत्वे ब्रह्मानन्दैकदेशत्वाभावात् स्फुट एव तद्विरोध इत्यानन्दमयस्य विकारत्वाङ्गीकारः सर्वथा श्रुतिविरुद्ध इत्यधिकरणभङ्गो न युक्त इत्यर्थः। अधिकरणभङ्गस्याशयान्तरमुद्भावयन्ति पुच्छत्वेनेत्यादि। जिज्ञास्यत्वेन मुख्यतया शास्त्रारम्भे बोधितस्य ब्रह्मणोऽनयाधिकरणरचनया न्यूनता समायातीत्यतः प्रद्वेषादधिकरणभङ्ग इत्यर्थः। तद् दूषयन्ति तर्हीत्यादि। स्वप्रधानस्याप्रधानत्वापत्त्या यदि प्रद्वेषस्तदा ब्रह्मण आनन्द इत्यत्राभिन्नस्य षष्ठ्या भेदनिर्देशाद्भयाभावरूपस्य फलस्यानन्दकर्मकज्ञानेनैवोक्तत्वात् तस्य परमपुरुषार्थत्वमपि नाङ्गीकुर्यात्। पुच्छत्ववचनवद्

रश्मिः।

वा ग्राह्य इतिभावः। भाष्यं विवृण्वन्ति स्म **तत्राद्य** इति। तत्रोभयोः पक्षयोस्तद्व्यतिरिक्तं जडं स्वर्गलोकयोग्यं शरीरं तत्सेवित आनन्दमयः स्वर्गसुखरूपः इतिपक्षे इत्यर्थः। **उक्तश्रुतिविरोधः** ‘ब्रह्मविदाप्नोति परम्’ इतिश्रुतिविरोधः। तर्हि आत्मसुखं स्वर्गः आत्माश्रितो जडस्तर्हि तस्य ब्रह्मज्ञानफलत्वे जितं ब्रह्मवादिभिरित्यर्थः। **ज्ञानस्येति**भाष्यं विवृण्वन्ति स्म **यदीत्यादि**। **तर्हीत्यादि**भाष्यं विवृण्वन्ति स्म **तदेत्यादिना**। भाष्यार्थस्तु जडाश्रितत्व इति यथाधिभौतिकसर्गोऽन्तरिक्षजडाश्रित एवमानन्दमय आत्मसुखं जडाश्रितं प्रजातिरमृतमानन्द इत्युपस्थ इतिश्रुतेस्तत्त्वे कर्मफलं स्पष्टम् यन्न दुःखेन संभिन्नमिति वाक्येन स्वर्गान्तर्गतत्वात्। एवकारेण ज्ञानफलयोगव्यवच्छेदः क्रियते। अवान्तरेति मुख्यमानन्दमयः फलम्। **भाष्ये**। **तस्येति** ब्रह्मज्ञानस्य। **प्रकृते**। जडचिद्रूपताया इत्यादिभाष्यं विवृण्वन्ति **संसारदशेत्यादि**। **फलबोधकेति**। नहि ब्रह्मज्ञानफलमानन्दविकारः संभवतीति विरोध इत्यर्थः। **सर्वथेति** विकारशब्दसूत्रविचारे ब्रह्मकर्मविचारे मोक्षस्य निर्विकारत्वविचारे च हिरण्यगर्भः कर्मणा मुक्तः इति। **दूषणान्तर**मित्यादि पूर्वं विद्यमानो जडो नानन्दमय इति जड आनन्दमयफलमित्याशङ्किनं प्रति ह्यानन्दविकारत्वापत्तिः पूर्वं विद्यमानस्य स्तुतस्येति दूषणान्तरमाहुरित्यर्थः। **परमत्वायेति** अस्यैवानन्दस्येत्यत्र सावधारणत्वदर्शनादितिभावः। अत्र ‘अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तमम्’ इतिवाक्याद्भवदभिमतानन्दस्य विकृतत्वापत्तिरुक्ता। **ब्रह्मानन्देत्यादि** अस्य निर्विकारत्वादितिभावः। **शास्त्रारम्भ** इति जिज्ञासाधिकरण इत्यर्थः। **अभिन्नस्येति**। ब्रह्माभिन्नस्यानन्दस्येत्यर्थः। **भयाभावेत्यादि** ‘आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन’ इत्युत्तरश्रुत्येत्यर्थः। **आनन्देत्यादि** ब्रह्मसंबन्ध्यानन्द-

उपक्रमादिसर्वविरोधश्च पूर्वमेव प्रतिपादितः । यदप्यधिकरणमन्यथा रचितं ब्रह्म पुच्छमिति । तत्र न पुच्छस्य ब्रह्मत्वं प्रतिपाद्यते, येनान्यथा समाधानं भवेत् । किं तु ब्रह्मणः पुच्छत्वमिति पूर्वन्यायेनेदं पुच्छं प्रतिष्ठेतिवत् । तत्र श्रुतिबाधो ब्रह्मणाप्यशक्यः ।

भाष्यप्रकाशः ।

भेदवचनस्यापि प्रद्वेषबीजस्य सत्त्वात् । अथ यदि राहोः शिर इतिवद् ब्रह्मण इत्यभेदषष्ठी तर्हि तस्य प्रियमेवेत्यादावप्यभेदषष्ठीमादृत्य पुच्छत्वं भाक्तमङ्गीकार्यं न त्वधिकरणं भङ्क्तव्यमित्यर्थः । भङ्गे पूर्वोक्तानि दूषणानि स्मारयन्ति **उपक्रमे**त्यादि । ननु न वयमधिकरणं भङ्कुमः किंतु प्रकारान्तरेण तत् समर्थयाम इत्याकाङ्क्षायां तद् दूषयितुमनुवदन्ति **यदपी**त्यादि । **ब्रह्म पुच्छमिति** । ब्रह्म पुच्छं प्रतिष्ठेत्यत्र किमानन्दमयस्यावयवत्वेन ब्रह्म विवक्ष्यते, उत स्वप्रधानत्वेनेति संदेहे पुच्छशब्दादवयवत्वेनेति प्राप्तम् । तत्रोच्यते 'आनन्दमयोऽभ्यासात्' आनन्दमयात्मेत्यत्र ब्रह्म पुच्छं प्रतिष्ठेति स्वप्रधानमेव ब्रह्मोपदिश्यते । असन्नेव स भवतीति निगमनश्लोके केवलस्य ब्रह्मण एवाभ्यस्यमानत्वादित्येवं रचितमित्यर्थः । तद् दूषयन्ति **तत्र ने**त्यादि । ब्रह्म पुच्छं प्रतिष्ठेति वाक्ये पुच्छस्य यदि ब्रह्मत्वं प्रतिपाद्येत तदा शङ्का स्यात् । पूर्वं वेदनविषयतया लक्षितं स्वप्रधानब्रह्मरूपत्वं पुच्छस्य कथमिति । तदा समाधानमपि संभवेदभ्यासात् स्वप्रधानत्वमिति । दृश्यते तु विपरीतम् । तत्र ब्रह्मपदाभ्यासेन कथं समाधानं भवेत् । अभ्यासो हीतरशब्दश्रुतमर्थं स्थापयन्नभ्यस्यमानं परिच्छिनत्ति, न तु तदर्थं बाधते । समिधो यजतीत्यादौ तदुदाहरणे तथादर्शनात् । एवमत्रापि ब्रह्मपदाभ्यासस्तत्समभिव्याहृतपदश्रुतं पुच्छमितरेभ्यः परिच्छेत्स्यति, न तु बाधिष्यते । अतो ब्रह्मणोऽवयवश्रुतिबाधोऽनया रीत्या ब्रह्मणा सर्ववेदपाठिनापि कर्तुमशक्यः, किं पुनरितरेणेति व्यर्थमिदमन्यथारचनमित्यर्थः । दूषणान्तरमाहुः

रश्मिः ।

कर्मकज्ञानेनेत्यर्थः । एवकारेण संबन्धिब्रह्मणो योगव्यवच्छेदः । **तस्येति** ब्रह्मणः । **भाक्तमिति** प्रियमोदप्रमोदानन्दानामगणितानन्दानामभेदे षष्ठी उपपन्ना गणितानन्दे ब्रह्मणि तु पुच्छत्वं भाक्तत्वमित्यर्थः । **आनन्दमय** इत्यादि 'आनन्दमय आत्मा मे शुद्ध्यन्ताम् ज्योतिरहं विरजा विपाप्मा भूयास९ स्वाहा' इत्यत्र विरजाहोमेस्ति । किंत्विति भाष्यं विवृण्वन्ति स्म **दृश्यते त्विति** । **कथं समाधान**मित्यादि यत्र ब्रह्मपदाभ्यासस्तत्र परमात्मत्वं न तु यत्र स तत्र पुच्छत्वमिति व्याप्तिकमिति तथा । तदुपपादयन्ति **अभ्यासो ही**त्यादिना अग्रे स्पष्टम् । **तथा दर्शनादि**ति यजतेरभ्यासो हि समिदादिशब्दश्रुतमर्थं समिदादिरूपं परिच्छेदकत्वेन स्थापयन्नभ्यस्यमानं यजत्यर्थरूपं यागं समिदादिरूपेण परिच्छिनत्ति न तु समिदादिरूपमितरपदार्थं बाधत इति दर्शनादित्यर्थः । **परिच्छेत्स्यती**ति ब्रह्मपुच्छत्वेन रूपेण परिच्छेत्स्यति । तत्रेतिभाष्यं विवृण्वन्ति स्म **अतो ब्रह्मण** इति । इतःपूर्वभाष्यार्थस्तु पूर्वन्यायेनेत्यस्य व्याख्यानं इदं पुच्छं प्रतिष्ठेतिवत् इतिपूर्वन्यायोन्नमयन्यायः तेन । तेन तृतीयान्ताद्वतिः । इदं पुच्छं प्रतिष्ठा इत्यनेनेव इदं पुच्छं प्रतिष्ठा इतिवदिति न तु ब्रह्मार्थं[1] बाधिष्यत इत्यर्थः । ब्रह्मार्थमिति[2] शेषः । **सर्ववेदे**त्यादि ब्रह्मणेत्युक्तेस्तात्पर्यमिदम् ।

---

१. पुच्छार्थम् । २. पुच्छार्थम् ।

मौर्ख्यं चैतत्। आनन्दमयस्यैव ब्रह्मत्वे न कोपि दोषः स्यात्। आनन्दमयस्याब्रह्मत्वं परिकल्प्य तत्पुच्छत्वेन ब्रह्म वेदबोधितमिति ज्ञात्वा तत्समाधानार्थं यतमानो महामूढ इति विषयफलयोः किं मुख्यमित्यप्यनुसंधेयम्। पुच्छत्वोक्तिस्तु पूर्वभावित्वाय। अत एव ज्ञानविषयत्वं प्रतिष्ठा च। आनन्दमयो ब्रह्मण्येव प्रतिष्ठित इति। अत्रावयवावयविभावो भाक्त इति तु युक्तम्।

भाष्यप्रकाशः।

मौर्ख्यमित्यादि। एतत् अन्यथारचनम्। चकारादधिकरणभङ्ग उभयमपि मौर्ख्यम्। तत्र हेतुरानन्दमयस्येत्यादि। त्वदुद्भावितानां दोषाणां प्रागेव परिहृतत्वादन्येषां चाभावात् तथेत्यर्थः। ननु प्रकारान्तरेण योजनं कौशलाय भवतीति कथं मौर्ख्यमित्यत आहुः आनन्दमयस्याब्रह्मत्वमित्यादि। तथाच भवेत् कौशलाय यद्यानन्दमयस्याब्रह्मत्वं न कल्पयेत्, पुच्छश्रुतिं च न बाधेत्। तत्तु करोतीत्यतस्तथेत्यर्थः। ननु शास्त्रे प्रकृतं ब्रह्मैव मुख्यमतस्तस्य तथात्वं साधयितुमयं यत्नः कथं मौढ्यायेत्यत आहुः विषयेत्यादि। प्रकृतत्वस्योभयत्र तौल्यान्न तेन रूपेण मुख्यत्वं निर्णेयं किंतु रूपान्तरेण। तथा सति तु त्वदभिमतस्य न मुख्यत्वं किंतु फलस्येति विषयमुख्यत्वार्थमपार्थो यत्न इत्यर्थः। ननु भवत्वेवं तथापि विषयत्वेनावश्यकस्य पुच्छत्वोक्तिकृतोऽपकर्षः कथं सोढव्य इत्यत आहुः पुच्छेत्यादि। सा तु पूर्वं तत्प्राप्तिबोधनाय। न हि द्वारं गृहं वा अप्राप्य तत्र स्थितं पुरुषं कश्चित् प्राप्नोति। तेन तथेत्यर्थः। अत्र गमकमाहुः अत इत्यादि। आनन्दमयस्य तत्र स्थितौ गमकमाहुः प्रतिष्ठेत्यादि। नन्वेवं सति द्वैतमापद्यते, तच्च नेह नानाऽस्तीत्यादिभिर्निषिद्धमतो नोक्तं साधीय इत्यत आहुः अत्रेत्यादि। भाक्तत्वस्य प्रामाणिकत्वान्न द्वैतापत्तिदोष इत्यर्थः। ननु भाक्तत्वे भवता हंसाकारः कथं समर्थनीय इति

रश्मिः।

मौर्ख्यमिति आनन्दमयस्यैव ब्रह्मत्वे कल्पनालाघवं तदकरणात् पाण्डित्यविरुद्धं मौर्ख्यम्। पण्डा-लाघवबुद्धिः सा न जातेति। तत्तु करोतीति पुच्छवत्पुच्छं प्रतिष्ठापरायणमेकनीडं लौकिकस्यानन्दजातस्य ब्रह्मानन्द इत्येतदनेन विवक्ष्यते नावयवत्वम्। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुत्यन्तरादिति भाष्येण पुच्छश्रुतिबाधकरणं बोध्यम्। अतस्तथेत्यर्थः अतः कारणान्महामूढ इत्यर्थः। गुरुव्यासोक्तानन्दमयस्य ब्रह्मत्वकल्पनं मोहादिति मूढः तमःकार्ययुक्तः शंकरत्वात् तत्पुच्छत्वेन ब्रह्मवेदबोधितमिति ज्ञात्वा तत्समाधानार्थं यत्नो महामोहादिति महामूढो महेश्वर इत्यर्थः। ब्रह्मविदित्यत्र ब्रह्मज्ञानविषयत्वेन प्रकृतं सर्वान् कामान् सह ब्रह्मणा विपश्चिता इत्यनेन सावयवब्रह्मरूपानन्दमयं फलत्वेन प्रकृतम्। एवं च प्रकृततावच्छेदकफलत्वावच्छिन्नं आनन्दमयमेव मुख्यं न तु प्रकृततावच्छेदकविषयत्वावच्छिन्नं ब्रह्मेत्युपक्रमोपि फलरूपस्यानन्दमयस्यैवेत्याहुः प्रकृतत्वस्येत्यादिना 'योपध' इत्यस्य लिङ्गानुशासनसूत्रस्यैतदतिरिक्तो विषयः। नन्वेवमिति पुच्छरूपाक्षराभिन्नत्वे सति तत्प्रतिष्ठितत्वे सति। भाक्तत्वस्येत्यादि 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स

१. मौर्ख्यातिरिक्तः।

प्राणमयादीनामपि तथात्वात् । अन्तःस्थितस्य बाह्यानुरोधेन तथात्वमिति सर्वं सुस्थम् ॥ १८ ॥

इति प्रथमाध्याये प्रथमपादे पञ्चममानन्दमयाधिकरणम् ॥ ५ ॥

भाष्यप्रकाशः ।

शङ्कायामाहुः अन्तरित्यादि । बाह्यो जीवस्तदनुरोधेन तथाकार इति न कोऽपि शङ्कावकाशः । तत्प्रकारस्य पूर्वमेवोपपादितत्वात् सर्वं प्राचां वचनं समीचीनमेवेत्यर्थः । एवं च यज्ञामतीनिबन्धे पक्षद्वयं व्याख्यायोक्तम् ।

'प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम् ।
पूर्वस्मिन्नुत्तरे पक्षे प्रायपाठस्य बाधनम्' इति ।

अर्थस्तु, आनन्दमयपदस्य ब्रह्मार्थकत्वपक्षे मयडर्थस्य विकारस्य त्यागेन प्राचुर्यार्थाङ्गीकारेण प्रायपाठपरित्यागः । आनन्दमयपदस्य ब्रह्मण्यप्रसिद्धस्य लक्षणया योगेन वा ब्रह्मणि व्याख्याने मुख्यार्थोल्लङ्घनम् । आनन्दपदाभ्यासेन च ज्योतिरधिकरणपूर्वपक्षे ज्योतिःपदेन ज्योतिष्टोमवदानन्दमयो लक्ष्यत इत्यानन्दपदस्यापि मुख्यार्थोल्लङ्घनम् । पुच्छपदं च बालधौ शक्तमानन्दमयावयवे गौणमिति तत्समानाधिकरणब्रह्मपदमपि स्वार्थत्यागेन तत्परमतस्तस्यापि मुख्यार्थोल्लङ्घनमिति चत्वारो दोषाः । विकारार्थकत्वपक्षे तु ब्रह्मपदस्य न स्वार्थत्यागो, नाप्यानन्दमयपदस्य, न चानन्दपदस्य । पुच्छपदमुख्यार्थबाधस्त्ववयवपरतायामधिकरणपरतायां च तुल्यः । अवयवप्रायपाठबाधश्च विकारप्रायपाठबाधेन तुल्य इति विकारार्थग्रहणपक्ष एव साधीयानिति । तदपि व्याख्येयपूजनमात्रमेव, न तु तात्त्विकम् । विकारार्थस्य प्राणमये बाधितस्य घटाकाशदृष्टान्तेनोज्जीवयितुमशक्यत्वात् । आप्राकृत-

रश्मिः ।

शृणोत्यकर्णः' इत्यादिश्रुतिषु पर्युदासार्थकनञ्श्रावणादिति भावः । **तदनुरोधेन तथेति** जीवे प्रवेशानुरोधेन तथा हंसाकार इत्यर्थः । नन्वानन्दमयस्यैव साकारत्वमिति सिद्धान्तात् कथं विज्ञानमयानुरोधेन हंसाकार इत्याकाङ्क्षायां समाधानमाहुः **तत्प्रकारस्येत्यादि** । पूर्वमेव मान्त्रवर्णिकसूत्र एव जीवोत्र मुख्य इत्यादिना वर्णयतीत्यन्तेन । तथा च स सिद्धान्तः पौरुषाकारपरो न तु हंसाकारमात्रपर इति भावः । **एवं चेति** प्राचां सर्ववचनस्य समीचीनत्वे प्रकारे चेत्यर्थः । **पक्षद्वयमित्यादि** । प्राचुर्यविकाररूपपक्षद्वयं व्याख्याय वाचस्पतिकेनोक्तं **पूर्वस्मिन्नित्यादि** । पूर्वस्मिन् प्राचुर्ये उत्तरे विकारे अप्रायपाठस्येत्यादिरित्यर्थः । मुख्यत्रितयलङ्घनं व्याचष्टे **आनन्दमयपदस्येत्यादिना** । **अप्रसिद्धस्येति** । ननु क्व प्रसिद्धिरिति चेत्कोशे इति गृहाण । **लक्षणयेति** ब्रह्मकोशयोर्जन्यजनकभावो लक्षणा तया । **लक्ष्यत** इति विकारविकार्यभावसंबन्धेन लक्ष्यते । विकारविकार्यभावसंबन्धो लक्षणा । **तत्समेति** तदेकार्थकेत्यर्थः । भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकेत्यर्थः । भिन्नप्रवृत्तिनिमित्तैकार्थबोधकत्वसंबन्धो लक्षणात्र । **दोषा** इति पूर्वस्मिन् पक्ष इत्यर्थः । **उत्तरे पक्षे इत्यादि** । व्याकृतेत्यत्राप्रायपाठस्य बाधनमित्युपलक्षणमित्याशयेन **विकारेत्यादि** । **अवयवेत्यादि** विकारपक्षेऽवयवपरतायां प्राचुर्यपक्षे पुच्छस्य ब्रह्मत्वमिति तन्मते पुच्छस्य ब्रह्मत्वाधिकरणपरतायां तुल्य इत्यर्थः । विकारपक्षे अवयवप्रायपाठबाधश्च आनन्दविकारेति ब्रह्मपुच्छावयवेनौचित्यादिति । प्राचुर्यपक्षे विकारप्रायपाठबाधेन तुल्यम् । **व्याख्येयपूजनमात्रमिति** भाष्यस्य यथा कथंचन समर्थनमेव पूजनं तदेव पूजनमात्रम् । **विकारार्थस्येत्यादि** । उपपादितं चैतद्विकारशब्दसूत्रे । **आप्राकृतमित्यादि**

भाष्यप्रकाशः ।

माच पण्डितं कस्यापि घटाकाशे घटविकारत्वप्रत्ययस्याभावात् । घटभृते दुग्धादावपि तथा-प्रत्ययाभावेन दृष्टान्ताभावादनुमातुमप्यशक्यत्वात् । लोके शास्त्रे तथाप्रयोगस्य क्काप्यनुपलम्भादिति । एवं बाधिते विकारपाठे तस्य प्रायताया अपि वन्ध्यासुतसौन्दर्यदेशीयत्वात् । किंच । शब्दमात्रमोङ्कारस्य विकृतिः । ॐकारस्तु ब्रह्मवाचक एवेति तद्विकृतयः सर्वेऽपि शब्दा उत्सर्गतो ब्रह्मवाचका एव । 'ॐमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानम्' इति,

'स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः, ।
स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम्' ॥

इति, 'तस्य वाचकः प्रणवः' इति श्रुतिपुराणपातञ्जलस्मृतिभिस्तथानिश्चयात् । अतः शक्तिसंकोचेनैव व्यवहारसिद्ध्यर्थं तत्तद्वदन्तीति तन्निवर्तनायैवाचार्यः श्रौतान् हेतून् ब्रूत इति प्रागेव निर्णीतमिति नानन्दमयानन्दब्रह्मपदानामपि मुख्यार्थोल्लङ्घनम् । अतः पूर्वस्मिन् दोषाभावाद् द्वितीयस्मिन्नेव व्याकरणविरोधादिरूपदोषबाहुल्यादुत्तर एवासाधुरिति । यदपि वेदसूत्रयोर्विरोधे, गुणे त्वन्यायकल्पनेति सूत्राण्यन्यथा नेतव्यानीत्युक्तम् । तदप्यसंगतम् । तथाहि । इदं हि, 'विप्रतिपत्तौ विकल्पः स्यात् समत्वाद् गुणे त्वन्यायकल्पनैकदेशत्वात्' इति नावमिकतृतीयपादस्थसूत्रस्यैकदेशभूतम् । सूत्रस्य त्वेवं विषयः । ज्योतिष्टोमेऽग्नीषोमीयपशावेकवचनान्तबहुवचनान्तौ पाशोन्मोकमन्त्रौ भिन्नयोः शाखयोराम्नातौ । अदितिः पाशं प्रमुमोक्त्वेतमिति तैत्तिरीये ।

रश्मिः ।

'आङ् मर्यादाभिविध्योः' इति सूत्रेण समासे आप्राकृतं चापण्डितमित्येव चकारो मध्ये रभसात् अङिदाकारो वा । **अनुमातु**मिति प्राणाद्यवच्छिन्नाकाशः प्राणादिविकारः विकारत्वात् यो यदवच्छिन्नः स तस्य विकारः घटाकाशवत् प्राणादिविकार आकाशः प्राणाद्यवच्छिन्नः विकारत्वात् यो यस्य विकारः स तदवच्छिन्नः घटाकाशवदिति । घटभृतदुग्धादिवद्वेत्येवमनुमातुमित्यर्थः । **अशक्यत्वा**दिति स्वरूपासिद्ध्यवतारणात्तथा । **वन्ध्येत्यादि** । इदं पदं सदृशे लाक्षणिकम् । तथा चेषद्वन्ध्यासुतसौन्दर्यसदृशत्वादित्यर्थः । ईषदर्थे देशीयर्प्रत्ययः । पूर्वस्मिन्पक्षे मुख्यत्रितयोल्लङ्घनं नास्तीत्याहुः **किं चे**त्यादिना । एवकारः कुत इत्यत आहुः **ॐमित्येत**दिति । तथा च श्रुतेरेवकार इति भावः । **अत** इति उपव्याख्यानमित्यत्रोपशब्दात् । **शक्तीत्यादि** शक्तिस्तु ब्रह्मणि उक्तवाक्यात् । घट इत्युक्तेपि वेदान्ते भासचेष्टयोरपि कर्तृत्वसंबन्धेन ब्रह्मण्यन्वयात् । परमात्मन इत्युक्त्या स्वोपपदार्थेषु तु उक्तसंबन्धेनान्वयाभावाच्छक्तिसंकोचलक्षणया योगकाविरोधकरूढ्येत्यर्थः । घटपटादौ योगासंभवादेवकारः । ननु व्यवहारे ब्रह्मवद्घटादिष्वपि व्यवह्रियतामित्यत आहुः **व्यवहारे**ति । अस्ति ब्रह्मत्वेन घटादिविषयके महात्मनां नास्त्याधुनिकानां तेषां व्यवहारसिद्ध्यर्थमित्यर्थः । यथादृष्टं व्यवहारः ज्ञानवताम् । **तत्त**दिति तदित्यव्ययं घटादिपदानीत्यर्थः । तद्घटादिकर्मीभूतम् । **आचार्य** इति महात्मा व्यासः ब्रह्मत्वेन घटादिज्ञानवत्त्वाद् ब्रूत इति । **श्रौतानित्यादि** । श्रुतिनिष्ठान् हेतून् तद्धर्मोपदेशादीनित्यर्थः । **प्रागेवे**ति ईक्षतिसूत्र एव । **यद्यपीत्यादि** । **उक्तं** वाचस्पतिकेनोक्तम् । **गुणत्वा**दिति विभक्तिप्रातिपदिकयोः प्रातिपदिकानां प्राधान्यं संख्याया गुणत्वं विभक्तिप्रातिपदिकयोः

१. पक्षे हेत्वभावः स्वरूपासिद्धिः ।

अन्तस्तद्धर्मोपदेशात् ॥ १९ ॥ (१।१।६)

'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः । उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यधिदैवतमथाध्यात्ममथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते' इत्यादि । तत्र

भाष्यप्रकाशः ।

अदितिः पाशान् प्रमुमोक्त्वेतानिति शाखान्तरे । तत्र संदेहः । बहुवचनान्तो मन्त्रः प्रकृतौ निविशते न वेति । तत्र प्रकरणवशेन प्राप्तावपि विकल्पापादकत्वाद् बहुवचनस्यैकस्मिन् पशुपाशे असमर्थत्वाच्च न निवेशो युक्त इति बहुपाशकपशुगणयुक्तासु विकृतीषूत्कृष्टव्य इति पूर्वः पक्षः । सिद्धान्तस्तु पाशरूपप्रातिपदिकार्थान्वितं विभक्त्यभिहितं कर्मकारकं प्रकृतावप्यस्तीति पाशकर्मकोन्मोचनाभिधानेन संभवन्मन्त्रो नोत्कर्षं सहते । संख्यामात्रं त्वसंभवदपि गुणत्वान्न प्रातिपदिककारकयोः प्रधानभूतयोरुत्कर्षणसमर्थम् । इह संख्याप्यविवक्षिता । पाशकर्मणोरभिधानमात्रेण व्यवहारस्य सिद्धेः । किं चैकस्मिन्नप्यवयवबहुत्वाभिप्रायेण छान्दसो बहुवचनप्रयोगोऽवकल्पते । अतो गुणेऽन्यायकल्पनाया अदुष्टत्वात् प्रकरणानुरुद्धो विकल्प एव युक्त इति । एवं चात्र सूत्राणां वेदार्थनिश्चायनाय प्रवृत्तत्वेन संख्यावदेकदेशत्वाभावात् तदन्यथानयने मीमांसाद्वयस्य वेदस्य च विप्लवापत्तेरिति । वस्तुतस्तु ।

'युक्तिभिरतिशिथिलाभिः समादधानो दृढान् दोषान् ।
वाचस्पतिरपि भाष्ये व्याख्याव्याजेन दूषणं ब्रूते' ॥

इति बोध्यम् ॥ १८ ॥

इति पञ्चममानन्दमयाधिकरणम् ॥ ५ ॥

अन्तस्तद्धर्मोपदेशात् ॥ १९ ॥ अथ य एष इत्यादि । इदं छान्दोग्ये प्रथमप्रपाठके श्रूयते । विषयवाक्यमुपन्यस्य संशयाकारमाहुः किमित्यादि । तथाचात्र त्रिकोटिकः

रश्मिः ।

प्रातिपदिकं मुख्यम् । धर्मिवाचकत्वात् । विभक्तिस्तु गुणभूता कर्मकरणादिसंबन्धरूपधर्मवाचकत्वात् । संख्यायास्तु विभक्त्यपेक्षयापि गुणत्वं विभक्तिवाच्यकर्मकारकगतसंख्याभिधायित्वादिति बोध्यम् । यद्वा, प्रातिपदिकार्थान्वितविभक्त्यभिहितकर्मकारकातिरिक्तमसंभवद्वस्तुत्वं गुणत्वं तस्माद्गुणत्वात् । संख्याविवक्षितापीत्याहुः किं चैकस्मिन्नित्यादि । गुण इत्यादि संख्यायां पाशावयवगतबहुत्वसंख्यालक्षकत्वकल्पनाया इत्यर्थः । एवं संख्यामुक्त्वा तस्य दृष्टान्तस्य वैषम्यमाहुः एवं चेत्यादिना । व्याख्याव्याजेनेति यथावयवप्रायपाठबाधश्च विकारप्रायपाठबाधेन तुल्यः इति । स्वपक्षे दोषमनुद्धार्य परपक्षे दोषदानरूपवितण्डासत्त्वात् ॥ १८ ॥

इति पञ्चमाधिकरणम् ॥ ५ ॥

अन्तस्तद्धर्मोपदेशात् ॥ १९ ॥ श्रूयत इति । श्रुत्यर्थस्तु हिरण्मयो ज्योतिर्मयः । पुरुषः पुरि शयनात् । दृश्यते समाहितचेतोभिः । आपणखादानखाग्रम् । तेन सर्वोपि सुवर्णप्रचुरः । अक्ष्णोर्विशेषमाह कपेरासनमिव तेजस्वि पुण्डरीकमेवंभूते तस्याक्षिणी तस्योदितिरिति नाम ।

संशयः। किमधिष्ठातृदेवताशरीरमाहोस्वित् परब्रह्मेति, ब्रह्मणो वा शरीरमिति। तदर्थमिदं विचार्यते। हिरण्मयशब्दः सुवर्णविकारवाची, आहोस्वित् प्रकाशसाम्येनानन्दवाचीति। ब्रह्मविदाप्नोति परमित्युपक्रम्य आनन्दमयस्य फलत्व-

भाष्यप्रकाशः।

संशय इत्यर्थः। **तदर्थमिदं विचार्यत** इति तादृशसंशयोत्पत्त्यर्थं तस्य बीजं विचार्यत इत्यर्थः। तदाहुः **हिरण्मयेत्यादि**। ननु जन्माद्यधिकरणसमन्वयाधिकरणाभ्यां लक्षणकथनादिना सप्रकारां कारणतां विचार्येक्षत्यानन्दमयाधिकरणाभ्यामसंभवादिदोषनिरासेन सा

रश्मिः।

एतज्ज्ञानफलमाह **उदेतीति**। एतदग्रे तस्यर्क् साम च गष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्परात्पराञ्चो लोकास्तेषां चैव देवकामानां चेति पठितं तदग्रे इत्य**धिदैवत**मिति। तदग्रेऽ**थाध्यात्म**मिति। तदग्रे वागेवर्क् प्राण इत्यादि। तदग्रे अथ यदेतदक्षणः शुक्लं भा इत्यादि। तदग्रे य एषोन्तरक्षिणि पुरुषो दृश्यत इति एतासामर्थोग्रे वक्तव्यः। **किमित्यादीति**। अत्र **भाष्ये। अधिष्ठात्रित्यादि**। हिरण्मयवपुरिति वक्ष्यमाणवाक्यादित्यर्थः। इदमेव वाक्यं ब्रह्मण इत्यादावपि ज्ञेयम्। **विचार्यत** इति यथा दृश्यमानशास्त्रान्नातिवर्तेत द्विकोटिकश्च भवेदित्यर्थः। **हिरण्मयेत्यादीति**। अत्र **भाष्ये। आनन्दवाचीति** 'आनन्दरूपममृतं यद्विभाति' इति श्रुतेः प्रकाशस्यानन्देन्यत्र च साम्येनानन्दवाचीत्यर्थः। गौणी लोके हिरण्मयस्यानन्दजनकत्वात् जन्यजनकभावसंबन्धो लक्षणा। ज्ञानं जातिस्तस्यात्र भातीत्यनेनामृतनिष्ठभावानुकूलव्यापारकथनेन कथनात्। व्यापारस्यानात्मत्वात्। जातौ शक्तिराकृत्यधिकरणानुरोधात्। विशिष्टे शक्तिरिति द्वितीयसुबोधिन्याम्। व्यक्तौ शक्तिरिति प्रस्थानरत्नाकरे उभयशास्त्रफलितमुक्तम्। 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्म' इति भाष्यश्रुतेः आनन्दविशिष्टे ज्ञाने ब्रह्मपदशक्तिर्वा। अन्यस्माद्वाङ्निवृत्तिश्रुतेः। तत एव तद्धर्मशक्तेरपि। न च ज्ञानत्वविशिष्टे ज्ञानस्यानन्दत्वविशिष्टे आनन्दस्य शक्तिः जातौ विशिष्टे व्यक्तौ वा। सत्ताया विद्यमानत्वेप्यात्मानतिरेकात्। ज्ञानानन्दवद्वर्तमानत्वेपि सत्तामात्रमित्यत्र देवकीस्तुतौ धर्मताप्रतिषेधात्। नन्वेवं सति ज्ञानवत्त्वेनात्मानं व्यभाङ्क्षीस्त्वं तथा सति वेदस्यात्मपदादेर्ज्ञानादिमति लक्षणान्नाजूगुपदिति चेन्न। सत्यं ज्ञानमनन्तमानन्दं ब्रह्मेत्यत्र ज्ञानवत्त्वेनात्मानं व्यभाङ्क्षुः। पूर्वे इति। वेदमीमांसायां सास्ति न तु वेदान्तमीमांसायां, आनन्दत्वानन्दतत्संबन्धानामेकत्वात्। एकमेवाद्वितीयं ब्रह्मेति श्रुतेः। अतो लघुभूषणे।

'सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः'॥ ७२॥

प्रकृतेऽसत्यांशाभावाज्जातिरात्मा वाक्यपदीयात् आत्मा ब्रह्म कोशात् ब्रह्मज्ञानमिति स्पष्टम्। अत आनन्दे ज्ञानं जातिस्तद्वदन्यत्रापि। दूरत्वादुपाध्यधीनश्चाक्षुषः संशयोऽयं तु शाब्दो विरुद्धशब्दोपजन्यः। विरोधश्च सहानवस्थानलक्षणो हिरण्मये आनन्दत्वाभाव आनन्दे हिरण्मयत्वाभावो ह्यविदुषाम्। यद्यज्जनकं तत्तद्गुणकं यद्यद्गुणकं तत्तदात्मकमिति व्याप्तिभ्यां हिरण्मयस्यानन्दजनकत्वादानन्दत्वमिति चेद्विभाव्येत तदा तु हिरण्मयत्वरूपदृढोपाधिर्बलीयान्। सहावस्थानलक्षणविरोधं प्रापयिष्यति। तथा च शरीरत्वेनैकविधो दृष्टः परब्रह्मत्वेन चापर उद्भावितोतितेजस्विपदार्थदर्शनात्। न च संदेहो नोपपद्यते श्रुत्या 'ध्येयः सदा सवितृमण्डलमध्यवर्ती' इत्यग्निपुराणबाधादिति वाच्यम्। पुराणस्यापि पञ्चमवेदत्वादुपबृंहणत्वाच्चेति। **लक्षणेत्यादि** आदिना प्रकारः स च निमित्तत्वादिः। **असंभवेत्यादि**। अव्याप्त्यति-

१. आनन्दम्।

मुक्त्वा द्वितीयोपाख्याने, स यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवंविदिति साधनस्यानन्दमयमात्मानमुपसंक्रम्येति फलं श्रुतम् ।

भाष्यप्रकाशः ।

परीक्षिता । तथा सति लक्षणप्रमाणाभ्यां ब्रह्मज्ञानस्य सौकर्यात् तावतैव च ततः फलसिद्धेः किमनेनाधिकरणेनेत्याकाङ्क्षायां पूर्वाधिकरणेनास्य संगतिं वक्तुमाहुः **ब्रह्मविदित्यारभ्य, विचारारम्भ** इत्यन्तम् । **द्वितीयोपाख्यान** इति यद्यपि प्रथमप्रपाठक एतादृशं वाक्यमस्ति । तथापि तत्र, स एको ब्रह्मण आनन्द इति गणितानन्दं प्रस्तुत्य तत्पठितं, न तु वाङ्मनसागोचरं प्रस्तुत्येति पूर्णब्रह्मविदस्तदनुपयुक्तमिति शङ्का स्यादतस्तदभावायैतदुक्तम् । **अत्र हि** सर्वान्ते एतदुक्त्वाग्रे, हावु हावु इत्यहोअर्थकेन शब्देन वीप्सया आश्चर्यमुक्त्वा, **अहमन्नमित्यादिना सर्वात्मभावं ब्रह्मभावं चाह** । **तेनै**तज्ज्ञानमक्षरसायुज्ये परब्रह्मसायुज्ये च फलोपधानायावश्यकमित्येतस्य कथनम् । नच भवत्वेवं, तथाप्यस्य विचारे किं बीजमिति वाच्यम् ।

रश्मिः ।

व्याप्त्यसंभवरहितोऽसाधारणधर्मो हि लक्षणमिति तथा । अशब्दत्वे लक्षणशब्दस्याप्रवृत्तेरसंभवः । आनन्दे ब्रह्मत्ववासनावतां जगज्जन्मादिकर्तृत्वस्याव्याप्तिर्लक्ष्यत्वात् । येषां त्वक्षरधियां तादृशवासनाभावस्तेषामतिव्याप्तिरानन्दे लक्षणस्येति ज्ञेयम् । **परीक्षिते**ति यथा पूर्वतन्त्रे 'तस्य निमित्तपरीष्टिः' इतिसूत्रयता श्रीजैमिनिना परीक्षिता, तथोत्तरतन्त्रेपीति भावः । **फलसिद्धे**रिति ब्रह्मात्मविषयकशाब्दज्ञानरूपं फलमत्र । **एतादृश**मिति स यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवंविदिति । [**सर्वात्मभाव**मित्यादि पृथिवी वान्नमित्यत्रात्मभावः सर्वात्मभावः व्याहृतिर्ब्रह्मभावात् पृथिव्यामाकाशः प्रतिष्ठित इत्यग्रेतनश्रुतेरन्तरिक्षमपि ज्ञेयम् । सर्वेषामात्मत्वं सर्वात्मभावः । अस्मत्पदार्थस्यात्मत्वमन्नस्य देहत्वमादिशब्देनाहमन्नाद इत्यादिनाकाशरूपान्नादरूपस्य ब्रह्मणो भावो ब्रह्मत्वं ब्रह्मभावः । आकाशोन्नाद इति श्रुतावाकाशशरीरं ब्रह्मेति श्रुतेर्ब्रह्मशरीरमाकाशः अहं श्लोककृदित्यादिना संघातकृत् ब्रह्मवदाकाशद्वारा । श्लोकृ संघाते ।] **एत**दिति आनन्दवल्ल्यां हि यतो वाचो निवर्तन्त इतिश्रुतिवाक्यानन्तरं 'एतं ह वा व न तपति किमहं साधु नाकरवम्, किमहं पापमकरवमिति' इति निरुच्य स एवं विद्वानित्यनेन वाङ्मनसागोचरं प्रस्तुत्यात्मप्रीणनमुक्तम् । एतमित्यस्यैवंविदमिति भाष्यम् । ज्ञानं च शाब्दमत्र सर्वेषु । अग्रे भृगुप्रपाठकेपि पूर्णब्रह्मवित्त्वं न हीयत इति एतत् द्वितीयप्रपाठकस्थं 'स यश्चायं पुरुषे' इति वाक्यमुक्तमिति भावः । यद्वा वारुण्यां विद्यायामानन्दमात्रपर्यवसितिदर्शनेनानन्दः पूर्णं ब्रह्म तत्प्रस्तावनाग्रे इत्येतदुक्तम् । ननु तर्हि अक्षरब्रह्मविदः एतदनुपयुक्तमत आहुः **अत्र हीत्यादि**। **अहमन्नमित्यादिने**ति 'अहमन्नमहमन्नमहमन्नम् । अहमन्नादोहमन्नादोहमन्नादः । अहं श्लोककृदहं श्लोककृदहं श्लोककृत् । अहमस्मि प्रथमजा ऋतास्य पूर्वं देवेभ्योऽमृतस्य नाभायि यो मा ददाति स इदेव मावा अहमन्नमन्नमदन्तमाद्मि । अहं विश्वं भुवनमभ्यभवां सुवर्णज्योतिः य एवं वेद इत्युपनिषत्' इत्यनेनेत्यर्थः । अत्रान्नान्तिकतया सर्वात्मभावं सर्वस्मिन्नात्मभावः सर्वात्मभावः । अन्नादान्तिकया ब्रह्मभावं ब्रह्मणोन्नादस्य भावोन्नादत्वं, अत्र हि अन्नपदेन भोग्यमन्नादपदेन भोक्ता अग्रे कार्यकारणसंघातकर्तुरभेदं गदति 'श्लोकृ संघाते' इतिधातुपाठात् संघातकृद्ब्रह्म तद्भावम् । **तेनेत्यादि** । ज्ञानं शाब्दम् ।

तत्र सवितरि विद्यमानस्याब्रह्मत्वे फलं नोपपद्यत इति विचारारम्भः। तत्र हिरण्मयशब्दो विकारवाची। केशनखादयश्चोच्यन्ते शरीरधर्माः। 'मृता वा एषा त्वगमेध्या यत् केशश्मश्रू' इति शरीरमन्तरा नोपपद्यते। परिच्छेदश्चाधिदैविकादिवचनं च बाधकम्।

भाष्यप्रकाशः।

तत्त्वेवं भयं विदुषोऽमन्वानस्येत्यनेन मननाभावे भयस्योक्ततया तदापत्तेरेव बीजत्वादित्याशयेनाहुः **तत्र सवितरीत्यादि**। तथाचास्य हेतुतागर्भः प्रसङ्गोऽत्र संगतिरित्यर्थः। किं चायं जन्मादिसूत्रस्थविचारः सर्वस्याग्रिमविचारस्य मूलम्। तत्राग्रे, फलमत उपपत्तेरित्यनेन सर्वफलदाता भगवानेवेति वक्तव्यम्। ततोऽग्रे चतुर्थेऽध्याये निषेधमुखेन प्रतीकोपासना, विधिमुखेनाङ्गोपासनाश्चादित्यादिमतिसूत्रे वक्तव्यास्तत्र मतान्तरोक्तरीत्या प्रतीकोपासनानामब्रह्मपरत्वेऽपि तद्वाक्योक्तफलसिद्धिस्तदन्तःस्थाद् ब्रह्मण एवेति ज्ञापनायाङ्गोपासनानां ब्रह्मपरत्वे तदुक्तमवान्तरफलं तत्क्रतुत्वरूपं मुख्यं फलं च भगवत एवेति ज्ञापनाय चाप्येतद् बोध्यम्। तेनान्तःपदघटितेषु वाक्यान्तरेषु सत्स्वप्येतस्यैव विषयवाक्यत्वेनोदाहरणेऽप्येतदेव बीजमिति बोध्यम्। पूर्वपक्षमाहुः **तत्रेत्यादि**। **विकारवाचीति** म्यच्त्वाद् विकारार्थकप्रत्ययवान्। **नोपपद्यते इति** मृतत्वक्संबन्धो नोपपद्यते। **परिच्छेदश्चेत्यादि** अन्तराऽऽदित्य इत्यनेनोक्तस्तदन्तर्वर्तित्वकृतः परिच्छेदः। इत्यधिदैवतमित्यनेनोक्तमाधिदैविकवचनम्। 'आध्या-

रश्मिः।

अक्षरेति वैद्योऽविद्यानाशो नाक्षरसायुज्यं पृथिव्यास्तद्विकाराणामभावेहमन्नमित्यादौ ह्यन्नाभानापत्तेः किं तु अक्षरकार्याविष्टाक्षरसायुज्यमतस्तेन सर्वात्मभावब्रह्मभावयोः सातत्येन फलोपधानापेक्षणेन स यश्चायं पुरुष इतिश्रुत्युक्तादित्यैक्यशाब्दज्ञानं फलोपधानायावश्यकमेवं परब्रह्मसायुज्यं न संयोगजन्यं कारणे व्यङ्गत्वात् किं तु संयोगविप्रयोगसंचारिभावजन्यं वैराग्यरूपसंचारिणो मुख्यत्वमतो ब्रह्मभावः साधनं ब्रह्मविदिति श्रुतेः। उक्तश्रुत्युक्तं शाब्दं ज्ञानं फलोपधानायावश्यकं सहकारिकारणम्। **एतस्येति** श्रुत्युक्तशाब्दज्ञानस्य फले सायुज्ये सहकारिकारणोपधानाय सहकारिकारणभावाय। **तदापत्तेरिति** एवकारोऽप्यर्थे। फलोपधानायावश्यकत्वरूपबीजसमुच्चयाय। **तथा चेत्यादि**। **भाष्ये**। **स यश्चायमिति** श्रुतौ। **सवितरीत्यादि** फलमेतमानन्दमयमुपसंक्रम्येति श्रुत्युक्तमानन्दमानन्दमयोवसान इति श्रीभागवतोक्तं च श्रुतावेक इत्यानन्दमयैक्यम्। **विचारेति** अस्पष्टत्वेन विचारारम्भ इत्यर्थः। **प्रकृते**। **अस्य हेतुतेति** अस्याधिकरणस्यात्राधिकरणे। हिरण्मय आनन्दमय इत्यत्रानन्दमयत्वविशिष्टहिरण्मयज्ञानरूपविशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वाद्धेतुता। एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति नियमादधीतवेदान्तानां आनन्दमयरूपसंबन्धिज्ञानं संबन्धिन एकार्थप्रतिपादकत्वरूपसंबन्धेन हिरण्मयप्रतिपादकस्य वाक्यस्य स्मारकमिति स्मृतस्य हिरण्मयप्रतिपादनस्योपेक्षानर्हत्वमिति प्रसङ्गसंगतिः। **वाक्यान्तरेष्विति**। एतान्यन्यत्रैवान्यमतानुवादे लिखितानि। **एतदेवेति** उक्तमननमपि। एवकारोऽप्यर्थ इति फलोपधानावश्यकत्वमपि बीजम्। छान्दसं हिरण्शब्दं मत्वाहुः **म्यजित्यादि** तथा च हिरण्यविकारवाचीति भाष्यार्थः। **इत्यधीत्यादि**। श्रुतिस्तु प्रथमविषयवाक्येऽन-

अतः सर्वथा तच्छरीरमिति मन्तव्यम् । चाक्षुषत्वाच्च । इन्द्रियवत्त्वं च श्रूयते । यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्येति । कपेरास आसनम् । आरक्तं तस्यासनं भवतीति । असभ्यतुल्यता च । अतो देहेन्द्रिययोर्विद्यमानत्वाज्जीवः

भाष्यप्रकाशः ।

त्मिकस्तु यः प्रोक्तः सोऽसावेवाधिदैविकः' इति स्मृतौ तस्याध्यात्मिकाभेदकथनादाध्यात्मिकस्य च जीवत्वात् तद्वचनमपि ब्रह्मत्वबाधकमित्यर्थः । आदिपदं, य एषोऽन्तरक्षिणीति, अथाध्यात्ममित्यादिनोक्तानामक्षिपुरुषधर्माणां संग्रहाय । अक्षिपुरुषविचारोऽपि, स यश्चायं पुरुष इति श्रुत्यर्थनिर्णयायेति बोध्यम् । **मन्तव्यमि**ति उक्तहेतुभिर्निश्चेयम् । एवं देहत्वसाधनेन देहित्वं साधयित्वेन्द्रियवत्त्वं साधयति **इन्द्रिये**त्यादि । **कप्यास**मिति उपवेश-

रश्मिः ।

न्तरं तस्यर्क् च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गीतैतस्य हि गाता स एष ये चामुष्मात् पराञ्चो लोकाः तेषां चेष्टे देवकामानां चेत्यग्रे इत्यधिदैवतमिति पूर्वमुक्तम् । श्रुत्यर्थस्तु तस्योदितिनाम्नो गेष्णौ पृथ्व्याद्युक्तलक्षणे पर्वणी तस्मात्परमात्मोद्गीथः । यत एतस्योदिन्नाम्नो गाता तस्मादेवोद्गायति इत्युद्गातेत्युद्गातृनामप्रसिद्धिः स एष उन्नामामुष्मादादित्यात् । किं च लोकाधिष्ठातारो देवास्तेषां कामानां फलानां चेष्टे ईशिता । इत्यधिदैवतमुद्गीथस्वरूपं देवस्येत्यर्थः । **य एष इत्यादि** । श्रुत्यर्थस्तु अथ भिन्नप्रक्रमे । अस्यां परिदृश्यमानायां । श्रुतिस्तु अथाध्यात्मं वागेवर्क् प्राणः साम तदेतदस्यामृच्यध्यूढं॰साम तस्मादृच्यध्यूढ॰साम गीयते इति । अग्रे वागेव सा प्राणोऽमस्तत्सामेति श्रुत्या सामनिर्वचनम् । इतराणि निर्वचनानि प्रोच्यन्ते चक्षुरेवर्गात्मा साम तदेतदस्यामृच्यध्यूढ॰साम तस्मादृच्यध्यूढ॰साम गीयते। चक्षुरेव सा आत्मामस्तत्साम श्रोत्रमेवर्ङ्मनः साम तदेतदस्यामृच्यध्यूढ॰साम तस्मादृच्यध्यूढ॰साम गीयते श्रोत्रमेव सा, मनोमः, तत्सामाथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः[2] कृष्णं तत्साम तदेतदस्यामृच्यध्यूढ॰साम तस्मादृच्यध्यूढ॰ साम गीयते अथ यदेवैतदक्ष्णः शुक्लं भाः सैव साथ यं नीलं परः कृष्णं तदमः[4] तत्सामेति अग्रेऽथ य एषोन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत्साम तदुक्तथं तद्यजुः तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्यरूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति अस्या अर्थः । दृश्यते योगिभिरपि सार्वात्म्यमुद्दिष्टैरतिदिष्टैर्धर्मैः पूर्णात्मत्वं चक्षुष्टपुरुषस्य । **अत्री**ति 'अन्यत्रैव प्रतीतायाः' इति कारिकोक्तातिदेशः । अतिदेशवाक्यगतं कार्यं स यश्चायमितिश्रुतावेक्यम् । **नामे**ति नामनिर्वचनस्य तस्योदिति नाम 'स एष सर्वेभ्यः पाप्मभ्य उदितः' इतिश्रुतौ । सैव पुरुष ऋक् उक्तथ्यादन्यच्छस्त्रजातं लिङ्गव्यत्ययस्तु विधेयलिङ्गापेक्षया बोध्यः । तस्यैतस्य चक्षुष्टपुरुषस्य तदेव रूपं परममुष्यादित्यरूपस्य हिरणमय इति यौ ऋक्सामरूपौ अमुष्यादित्यपुरुषस्य गेष्णौ[1] पर्वणी तावस्यापि गेष्णौ यदमुष्यादित्यरूपस्य पुरुषस्य नामोदिति उद्गीथ इति च तदेवास्य नामेति । **अक्षिपुरुषे**ति मिथुनत्वशुक्लत्वादीनामित्यर्थः । नन्वेकयैव निर्वाहे द्वितीयस्याः किं प्रयोजनमित्याकाङ्क्षायां तदाहुः **अक्षी**त्यादि । तथा च स यश्चायं पुरुष इत्यत्र यच्छब्दार्थपुरःसरं श्रुत्यर्थनिर्णयायेत्यर्थः । तदग्रे स्पष्टीकरिष्यतेऽस्माभिः । फलं स्वस्याधिकारीत्यस्य व्याख्याने देहित्वमिति आदित्यान्तःस्थदेहित्वम् । **भाष्ये । अत** इत्यादि उक्तवाक्येभ्यः । **कश्चि**दिति विज्ञानमय इति सर्वोपनिषदि सूर्यविशेषणात् । **अधिकारी**ति आनन्दमय इत्यर्थः ।

१. मिथुनम् । २. यन्नीलमिति छेदः । ३. सुरमः । ४. तत्–अः–मः ।

कश्चिदधिकारी सूर्यमण्डलस्थ इति गम्यते। फलं तत्सायुज्यद्वारेति। अथोच्येत, एष सर्वेभ्यः पाप्मभ्य उदित इति। अपहतपाप्मत्वादिधर्मश्रवणात्। पूर्वदोषस्यापि विद्यमानत्वाद् ब्रह्मण एव केनचिन्निमित्तेन शरीरपरिग्रह इति। तस्य च शरीरस्य कर्मजन्यत्वाभावादपहतपाप्मत्वादि संगच्छते। सुवर्णशरीरत्वमप्यलौकिकत्वाद् ब्रह्मण एव संगच्छते। शरीरवदिन्द्रियस्यापि परिग्रहः। वर्णमात्रपरिग्रहान्नासभ्यता। स्थावरापेक्षया जङ्गमस्योत्कृष्टत्वात् स्थावरावयवोपमानवज्जङ्गमावयवोपमानं स्थावरस्यापीति सर्वब्रह्मभावाय श्रुत्युक्तत्वाच्च। तस्माद्

भाष्यप्रकाशः।

नार्थकस्यासतेः करणे घञ्। कपेर्मर्कटस्यासनमधोभाग इव कप्यासम्। उपमावाचकपदलोपाल्लुप्तोपमा। तेन रूपकातिशयोक्तिः। ननु यदि स जीवः स्यात् तदा तैत्तिरीये परिकरान्तानामुपासनानामनन्तरं, स यश्चायमिति वाक्यं नोच्येत। तथा बृहन्नारायणीये, आदित्यो वा एष एतन्मण्डलं तपतीत्यनुवाके त्रयीविद्यात्मकत्वमुक्त्वा, आदित्यो वै तेज ओजो बलमिति तदग्रिमानुवाके ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोतीति फलं नोच्येतेति शङ्कायामाह फलमित्यादि आनन्दमयोपसंक्रमणरूपं फलं स्वस्याधिकारिसायुज्यद्वारा भवतीत्येतदर्थं तदनन्तरमुच्यते। 'आदित्यो वै तेज' इत्यत्रापि ब्रह्मणः सायुज्यमित्याद्युक्त्वा, 'एतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेद' इत्युच्यते। एवमधिष्ठातृदेवताशरीरकोटिः साधिता। ब्रह्मशरीरकोटिं साधयति अथोच्येतेत्यादि। अनया श्रुत्या असाधारणब्रह्मधर्मश्रावणादयं ब्रह्मैवेत्युच्येतेत्यर्थः। तद् दूषयति अपहतेत्यादि। स्थावरस्येति पुण्डरीकस्य। एवमुपमाप्रयोजनं तु ब्रह्मप्रवेशेन सर्वस्य ब्रह्मभावबोधनम्। ब्रह्मदाशा इतिवत्।

रश्मिः।

आनन्दमयो विज्ञानमयो 'विज्ञान आदित्यः' इति श्रुतेरानन्दमयफलाधिकारीत्यर्थः। **प्रकृते। अनन्तरमिति** उपासनायाश्चित्तशुद्धिः। **नोच्येतेति। स्वस्याधिकारीति**। अत्रायं, स यश्चायं पुरुष इतिश्रुत्यर्थनिर्णयः। यश्चायं पुरुषः अन्तरक्षिणि पुरुषः कुतोयं निर्णयः प्रसिद्धपुरुषार्थत्यागेन। एवं तु स्यात्, अत्रैकपदेनाभेद उच्यते, स नाविद्यावच्छिन्नमायावच्छिन्नयोः संभवतीति प्रसिद्धं परित्यज्याक्षिस्थितो मायावच्छिन्नपुरुषो गृह्यते। तस्य ब्रह्मत्वमग्रेधिकरणे वक्ष्यते इति एवमभेद उपपन्नः। **सार्ष्टितामिति** समाना ऋष्टिः ऋद्धिः। जीवस्योपासाफलत्वायोगात्। **इति फलमिति**। आदित्यो वै तेज ओजो बलमिति ज्ञानस्य फलम्। ब्रह्मण इति षष्ठ्या विभाजितं जीवात् ब्रह्मेति। सैषा त्रय्येव विद्या तपति य एषोन्तरादित्ये हिरण्मयः पुरुष इत्युक्तहिरण्मयः। अयं ब्रह्मैवेति पदत्रयमध्याहृत्य भाष्यं योजयन्ति **अनयेत्यादिना। उच्येत** इति विधावधीष्टे वा लोट्। **अपहतेत्यादीति। भाष्ये। पूर्वदोषस्येति** विकारमयडन्तपदप्रतिपाद्यत्वस्य। **प्रकृते। सर्वब्रह्मेति** भाष्यं विवृण्वन्ति स्म **एवमुपमेति। ब्रह्मप्रेत्यादि** तत्सृष्ट्वा तदेवानुप्राविशदितिश्रुत्युक्तेन। **सर्वस्येत्यादि** जङ्गमस्थावररूपस्य, ब्रह्मभावो ब्रह्मत्वं समत्वं 'निर्गुणं हि समं ब्रह्म' इतिश्रुतेस्तस्य बोधनम्। **ब्रह्मदाशेति** 'सर्वं खल्विदं ब्रह्म' इति श्रुत्या सर्वस्य ब्रह्मत्वेपि सेव्यं ब्रह्मपदवत् सेवकेन्तःकरणारूढं न भवतीति ब्रह्मत्वविधानं तद्वदसभ्येप्युपमानत्वं न भविष्यति तत्परिहारायैवमसभ्योपमेत्यर्थः। **इतिवदिति** यत्तु वृत्तावत्तु क्षेपण **इत्यस्यास इतिरूप-**

ब्रह्मण एवेदं शरीरमित्येवं प्राप्ते, उच्यते ।

अन्तस्तद्धर्मोपदेशात् ॥

अन्तर्दृश्यमानः परमात्मैव । कुतः । तद्धर्मोपदेशात् । तस्य ब्रह्मणो धर्मा उदित्यादिधर्मा उपदिश्यन्ते । 'स एष सर्वेभ्यः पाप्मभ्य उदितः' इति । अयमाशयः । ब्रह्म कारणं, जगत्कार्यमिति स्थितम् । तत्र कार्यधर्मा यथा कारणे न गच्छन्ति । तथा कारणासाधारणधर्मा अपि कार्ये । तत्रापहतपाप्मत्वादयः कारणधर्मास्ते यत्र भवन्ति तद् ब्रह्मेत्येवावगन्तव्यम् । बलिष्ठत्वात् कारणधर्मस्य । नामतुल्यतामात्रमुभयेषामपि धर्माणाम् । ते श्रुत्येकसमधिगम्या ब्रह्मणि । लोके प्रमाणा-

---

भाष्यप्रकाशः ।

स्फुटमन्यत् ।

सूत्रं पठित्वा समादधते अन्तरित्यादि । ननु बाधकानां बहूनामुक्तत्वाद्धर्मोपदेशमात्रेण कथं ब्रह्मत्वनिश्चय इत्यतस्तद् व्युत्पादयन्ति अयमाशय इत्यादि । स्थितमिति पूर्वाधिकरणैर्निर्णीतम् । कार्यधर्मा इति कार्यासाधारधणर्माः । दृष्टं चैतत् । न हि घटीया जलाहरणयोग्यत्वादयो मृत्पिण्डकपालादौ गच्छन्ति । न वा मृत्पिण्डादिसंस्थानविशेषा घटादौ । अथ यदि गच्छेयुस्तदा कार्यकारणयोर्वैलक्षण्यं न भवेत् । कार्यकारणव्यवहारश्च भज्येत । अतो ये असाधारणा धर्मास्तेऽन्यत्र न गच्छन्तीति नियतम् । तत्र प्रकृतवाक्ये, 'तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः' इत्यनेनोक्तमपहतपाप्मत्वम् । तथा आदिपदेनाक्षिपुरुषवाक्ये 'सर्क् तत्साम तदुक्थं तद्यजुस्तद् ब्रह्म तस्यैतस्यैतदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम'इत्यनेनोक्तमृक्सामादिसार्वात्म्यं यन्नाम तन्नामेत्यतिदिष्टं नामनिर्वचनहेतुभूतमपहतपाप्मत्वं च, 'य आत्मा अपहतपाप्मा' इतिश्रुत्यन्तरे ब्रह्मासाधारणधर्मत्वेन सिद्धम् । तथा, इदं सर्वं यदयमात्मेति श्रुत्यन्तरसिद्धं सार्वात्म्यं च कारणभूतब्रह्मासाधारणधर्मरूपं नान्यगामि तदत्रोपदिश्यते । एवमन्येऽपि श्रुत्यन्तरोक्ता असाधारणा ब्रह्मधर्मा यत्र भवन्ति तद् ब्रह्मेत्येवावगन्तव्यम् । तेन सूत्रे अन्तःपदं स्थानान्तरस्याप्युपलक्षकं, न तु तावन्मात्रपर्यवसन्नमिति बोधितम् । नच केशनखादीनां कार्यधर्माणामपि बोधनात् कथं विनिगमनेति शङ्क्यम् । उपजीव्यत्वेन नित्यत्वेन च कारणधर्मस्य बलिष्ठत्वात् । न चापहतपाप्मत्वं स्वाध्याये मुख्यप्राणे चोच्यते, सार्वात्म्यं च चतुर्मुखादावतः कथमसाधारणत्वमिति शङ्क्यम् । यतो नामतुल्यतामात्रमुभयेषां धर्माणाम् । स्वाध्यायादौ ह्यपहतपाप्मत्वं पापराहि-

रश्मिः ।

मस्यत ग्रासोस्मिन्नित्यधिकरणार्थकघञा सिद्ध्यतीत्युक्तं तद्भाष्यासंमतम् । स्फुटमिति । अत्र भाष्ये वर्णमात्रेत्यादिमात्रपदेन कर्पासनरूपस्य द्रव्यस्य व्यवच्छेदः । प्रकृते । उक्तत्वादिति पूर्वपक्षे तथा । सर्क् तत्सामेति व्याख्यातैषा । अव्याख्यातमाहुः सार्वात्म्यमित्यारभ्य य इत्यन्तम् । ऋक् सामेति हेतुभूतम् । इदं सर्वमिति इदं परिदृश्यमानं सर्वं यत् तदयमात्मेत्यर्थः । सार्वात्म्यमिति अयमात्मेत्यतिदिष्टं जगन्निष्ठमिदम् । अन्य इति अस्तिभात्यादयः । तेनेति । अथवा 'य एषोन्तरक्षिणि पुरुषो दृश्यते' इत्यादावक्षिपुरुषेपि तद्धर्मोपदेशेन । तावन्मात्र इति । आदित्यमण्डलान्तस्थमात्रेत्यर्थः । बलिष्ठत्वादित्यादिभाष्यं विवृण्वन्ति न च केशेत्यादि । नामतुल्यतामात्रमित्यादिभाष्यं विवृण्वन्ति न चापेत्यादिना । कथमित्यत उपपादयन्ति स्वाध्यायेत्यादि ।

न्तरमपि प्रवर्तते । अतः सर्वरसादयो ब्रह्मनिष्ठा एव धर्माः । स्थूलत्वादयस्तु ये ब्रह्मणि निषिध्यन्ते, अस्थूलादिवाक्येषु ते कार्यधर्माः । अणोरणीयानित्यादिषु कारणधर्मा एव । अत एकोऽप्यसाधारणो धर्मो विद्यमानः शिष्टान् संदिग्धानपि ब्रह्मधर्मानेव गमयति । इममेव श्रुत्यभिप्रायमङ्गीकृत्य सर्वत्र ब्रह्मवाक्यनिर्णयमाह

भाष्यप्रकाशः ।

त्यरूपं, स्वाध्यायो देवपवित्रमिति य एवंविदि पापं कामयत इति तत्र तत्र लिङ्गात् । अत्र तु सर्वकर्माञ्जनराहित्यरूपम् । 'अनन्वितं ते भगवन् विचेष्टितं यदात्मना चरसि च कर्म नाज्यसे' इति श्रीभागवतवाक्यात् । एवं चतुर्मुखादिसार्वात्म्यमपि साङ्कुशम् । 'अविज्ञाय परं मत्तः एतावत्त्वं यतो हि मे' इति द्वितीयस्कन्धे नारदं प्रति ब्रह्मवाक्यात् । अत उदित्यादीनामेवं कारणभूतब्रह्मासाधारणधर्मत्वे सिद्धे तत्सहपठितानां दृश्यत्वहिरण्यश्मश्रुत्वादीनामपि ब्रह्मधर्मत्वमेव बोध्यम् । यतस्ते श्रुत्येकसमधिगम्या ब्रह्मणि । लोके तु तेषां गमकं प्रमाणान्तरमपि वर्तते । अत एतद्वत् 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' इत्यादिश्रुत्यन्तरोक्ताः सर्वरसादयोऽपि ब्रह्मनिष्ठा एव धर्मा बोध्याः । श्रुत्येकसमधिगम्यत्वस्य तेष्वपि तौल्यात् । नचैवं सति स्थूलत्वादिप्राप्तिः शङ्क्या । तेषां श्रुत्या निषिध्यमानत्वेन कार्यधर्मत्वात् । नच ब्रह्मणि विरुद्धधर्माश्रयत्वस्याग्रे व्युत्पादनीयत्वात्, 'आसीनो दूरं व्रजति', 'अणोरणीयान् महतो महीयान्' इत्यादिषु सहावस्थानविरुद्धक्रियाधर्मयोरिव भावाभावविरुद्धस्थूलत्वतदभावयोरपि शक्यवचनत्वादेतेषां कारणधर्मत्वमेवास्त्विति शङ्क्यम् । इतः पूर्वं गार्ग्या उपादानकारणबोधार्थं कार्याणां प्रकृततया याज्ञवल्क्येन कार्यविलक्षणकारणबोधनार्थं कार्यधर्माणामेव निषेधात् । अन्यथा प्रकृतिविरोधापत्तेः । न चैवमनण्वित्यनेन निषिद्धस्याणुत्वस्य, स य एषोऽणिमेत्यादिषु श्रूयमाणस्य का गतिरिति शङ्क्यम् । तत्राणोरणीयानित्यादिषु तु, सप्त प्राणाः प्रभवन्तीत्यादिभिः कार्यस्याग्रे वक्ष्यमाणतया ततः पूर्वं श्रूयमाणानां कारणधर्मत्वेन तद्भिन्नत्वात् । 'ऐतदात्म्यमिदं सर्वम्', महतो महीयानित्यादि तद्विरुद्धधर्मसामानाधिकरण्यश्रावणेन तथानिश्चयात् । एवमन्यत्रापि बोध्यम् । **अत एकोऽप्यसाधारणधर्मो विद्यमानः शिष्टान् संदिग्धानपि धर्मान्** ब्रह्मधर्मत्वेनैव **गमयति** । अन्यथाऽन्यगामित्वेन तस्यासाधारण्यभङ्ग-

रश्मिः ।

पवित्रमिति । पावित्र्यं पापाभाव इति भावः । श्रुती तु एकतरा सह वै पन्नायामारणे 'अपहतपाप्मा स्वाध्यायो देवपवित्रम्' इति । द्वितीया छान्दोग्ये मुख्यप्राणकृतपापविध्वंसनानन्तरं 'य एवंविदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणो नैवैतेन सुरभिर्न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष इति' । पापं कर्तुं इ कामयते । अभिदासति हिनस्ति, स प्राणवित्, अश्मा आखणः तद्वदप्रधर्षणीय इत्यर्थः । एतेन मुख्यप्राणेन न विजानाति स्थानदोषाद् घ्राणदेवता पाप्मना विद्धा मुख्यस्थानबलीयस्त्वात् मुख्यप्राणदेवता न विद्धेत्यपहतपाप्मत्वम् । **लिङ्गा**दिति पाप्मभावलिङ्गात् । **ते श्रुत्येकसमधिगम्या** इत्यादि भाष्यं विवृण्वन्ति स्म **अत उदित्यादि** । **प्रमाणान्तर**मिति प्रत्यक्षमित्यर्थः । **स्थूलत्वे**त्यादिभाष्यं विवृण्वन्ति स्म **न चैवमित्यादिना** । अग्रे इति उभयव्यपदेशाधिकरणादौ । **उपादा**नेत्यादि 'सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदर्वाक् पृथिव्याः यदन्तरा द्यावापृथिवी इमे यद्भूतं यच्च भवच्च भविष्यच्चेत्याचक्षते । कस्मिन्नेव तदोतं च प्रोतं च'इति गार्गिब्राह्मणे प्रश्नश्रुत्येत्यर्थः । याज्ञवल्क्यो यज्ञवक्ता वल्क परिभाषणे इति धातुपाठात् । **अणोरणीयानि**त्यादिभाष्यं विवृण्वन् **न चैव**-

सूत्रकारः । तथाच श्रुतिव्यतिरिक्तस्थले तथैवावगन्तव्यम् । अनन्तमित्यनन्तमूर्तिता च ब्रह्मणः प्रतिज्ञाता । अन्यथा गुहायां निहितमिति विरुद्ध्येत । तस्मात् साकारं तादृशमेव ब्रह्म ।

भाष्यप्रकाशः ।

प्रसङ्गात् । तथाच यत्र निषिद्ध्यन्ते तत्र तदनुरोधात् ते लौकिकाः कार्यधर्मा एव । यत्र च न निषेधस्तत्रालौकिका ब्रह्मात्मकास्ते धर्माः, नेह नानास्तीतिश्रुत्यनुसारेणावगन्तव्याः । इममेव श्रुत्यभिप्रायमङ्गीकृत्य सर्वेष्वधिकरणसूत्रेषु ब्रह्मवाक्यनिर्णयमाह सूत्रकारः । अन्यथा, आदित्यान्तरक्ष्यन्तइत्येवमधिकरणं विशिंष्यात् । तथाचेदं सिद्धम् । यत्र निश्चिते कार्यत्वे तस्य कारणाभेदेन स्तुतिः क्रियते, यथेन्द्रप्रतर्दनसंवादादौ तत्र नेयं रीतिः । तद्व्यतिरिक्तस्थले त्वेवमेवावगन्वव्यमिति । न चैवं परिच्छिन्नेषु नानास्थानेषु नानापरिमाणेन स्थितौ ब्रह्मणोऽनेकत्वापत्त्या, एकमेवाद्वितीयमित्यादिश्रुतिविरोध इति शङ्क्यम् । यतः सत्यं ज्ञानमनन्तं ब्रह्मेति लक्षणवाक्य एवानन्तमित्यनेन **ब्रह्मण आनन्त्यकथनेऽनन्तमूर्तिता च प्रतिज्ञाता । नचात्र मानाभावः** । निहितं गुहायामिति हृदयाकाशनिधानकथनस्यैव मानत्वात् । **अन्यथा गुहायां निहितमिति** विरुद्ध्येत । अनन्तमूर्तित्वाभावे व्यापकतया सर्वस्य तदन्तःस्थत्वात् । इदं च श्रुत्यन्तरेऽप्युक्तम् । 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इति । तस्माद् ब्रह्मण एकत्वेन व्यापकत्वेऽप्यनन्तमूर्तित्वात् । साकारं वेदैकवेद्यत्वात् । यादृशं

रश्मिः ।

मित्यादि । तथा च यत्रेति अस्थूलादिश्रुतिषु न निषेध इति । **तदनुरोधादिति** नित्यस्य निषेधायोगेन निषेधानुरोधादित्यर्थः । **न निषेध** इति यथात्र । नेह नानेति श्रुतिर्बृहदारण्यके । **इममेवेत्यादिभाष्यं** व्याकार्षुः **इममित्यादिना** । एकोप्यसाधारणो धर्मो मयि विद्यमान संदिग्धानपि ब्रह्मधर्मानेव गमयत्विति संकेतान्तस्याभितो गमनं प्रायोभूम्यन्तगमनमित्यर्थादित्यर्थः । **अधिकरणेत्यादि** सूत्रपदं यत्र सूत्रमवतारणमाभास्यते तत्संग्रहाय । यथा शब्दाधिकरणे सूत्रप्रयोजनं बोधयितुं संशयादिकमाहुरिति । **अन्यथेत्यादि** अधोक्षजत्वेन यत्र च न निषेध इत्याद्यङ्गीकारे इत्यर्थः । **विशिंष्यादिति** न तु तद्धर्माधिकरणमिति तद्धर्मेण विशिंष्यादिति भावः । अन्तस्त्वस्य सर्वप्रसिद्धस्याधोक्षजत्वेपि नटवत्त्यागायोगात् तथा । **तथाचेत्यादिभाष्यं** विवृण्वन् **तथाचेत्यादि** । **इन्द्रेत्यादि** इयमाख्यायिकानुगमगाधिकरणे व्याचरीकरिष्यते मामेव जानीहीतीन्द्रेण लोकपालादिकं मामेव जानीहीति स्वात्मा स्तुतः । आदिपदेन पुरुषविधब्राह्मणे 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेहं मनुरभवमहं सूर्यश्चेति तदिदं मप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति' इति । अत्र स इदमित्यादिस्तुतिः । अविद्यमानस्य सर्वभवनरूपस्योत्कर्षाधायकगुणस्य जीवीयस्य वर्णनाच्छुत्या । **नेयं रीतिरिति** इन्द्रिया अपि धर्मा अधोक्षजत्वेनादृष्टा ब्रह्मधर्मा इति गमयतीति रीतिर्नास्थूलत्वादिनिषेधादित्यर्थः । **तद्व्यतीति** श्रुतावपि तावन्निषेधव्यतिरिक्तस्थले इत्यर्थः । यथात्रादित्यादिपुरुषयोः । भाष्यादाहुः **एवेत्येवकारम्** । तद्व्यतिरिक्तस्थलानि तु ह्युदाहृतान्युदाहरिष्यन्ति च । **अनन्तमित्यादिभाष्यं** विवृण्वन्त आहुः **न चैवमित्यादि । मानाभाव** इति ।

---

१. प्राणवतेत्यधिकरणे ।

ब्रह्मणः शरीरमिति तु सर्वथा असंगतम्। सर्वकर्तुर्ब्रह्मणः का वा अनुपपत्तिः स्याद् येन स्वस्यापि शरीरं कल्पयेत्। किं तु लीलया व्यामोहनार्थमन्यथा भासयेन्नटवत्।

भाष्यप्रकाशः।

यत्र स्थाने यद्वाक्य उच्यते तादृशं तत्र ब्रह्मेति मन्तव्यमिति सिद्धमित्यर्थः। एवमधिष्ठातृदेवतापक्षं निराकृत्यात्र ब्रह्मैवोच्यत इति स्थापितम्। अतः परं साधकानुग्रहार्थं ब्रह्मण एव शरीरमिति पक्षं निराचक्षते ब्रह्मणः शरीरमित्यादि। असंगतत्वे हेतुमाहुः सर्वकर्तुरित्यादि। अयमर्थः। यदत्र शरीरमङ्गीकृतं तत् किं नित्यमुतानित्यम्। नाद्यः। अद्वितीयश्रुतिव्याकोपात्। सच्चिदानन्दादतिरिक्तवस्त्वभावस्य प्रागेवोपपादितत्वेन ब्रह्मात्मकताया एवापाते शरीरत्वस्याशक्यवचनत्वाच्च। अन्यथा पुरुषविधब्राह्मणोदितायाः, सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यनुवीक्षाया विरोधापत्तेश्च। द्वितीयपक्षेऽपि तच्छुद्धसत्त्वात्मकं वा प्राकृतं वा मायिकं वाङ्गीकार्यम्। तत्र कर्त्रपेक्षायां ब्रह्मण एव कर्तृत्वं च वाच्यम्। तत्रान्यानपेक्षतया सर्वकर्तुर्ब्रह्मणः का वा अनुपपत्तिः स्याद् येन स्वस्यापि शरीरं कल्पयेत्। अतो मूलरूपे नास्त्येव शरीरम्। किंतु स्वरूपमेव तदाकारम्। 'प्राणन्नेव प्राणो भवति वदन् वाक्' इतिवच्छरीरकार्यं कुर्वन् लीलया व्यामोहनार्थं शरीरवद्भासयेन्नटवत्।

रश्मिः।

भाष्येऽनन्तमित्यनन्तानन्द इत्यानन्दविशेषणादिति भावः। **यत्र स्थान** इति परिमाणनिरूपणस्थले वैश्वानराधिकरणे। **यद्वाक्ये** 'प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते' इतिवाक्ये। **तादृश**मिति। न च सुषुप्तौ ब्रह्मज्ञानेऽभावतया विषयत्वात् नेदमिति वाच्यम्। अभावापेक्षयाऽसतोतिरेकात्। न चेदानींतनानां ब्रह्मविदामप्रतीतिविषयत्वात् नेदमिति वाच्यम्। नित्यलीलाधिकृतकानां कृतपुण्यपुञ्जानां प्रतीतिविषयत्वात्। एतेन शंकरभाष्यीयं यत्तूक्तं हिरण्यश्मश्रुत्वादिरूपश्रवणं परमेश्वरे नोपपद्यते इत्यत्र ब्रूमः। स्यात्परमेश्वरस्यापीच्छावशात् मायामयरूपं साधकानुग्रहार्थं 'माया ह्येषा' इति स्मरणात्। इति तत्र विशेषोऽदर्शि। तत् 'ज्ञानमात्रं परं ब्रह्म' इति पक्षे

'आत्ममायामृते राजन् परस्यानुभवात्मनः।
न घटेतार्थसंबन्धः स्वप्नद्रष्टुरिवाञ्जसा'॥

इति नवमाध्यायसिद्धान्तात् द्वितीयस्कन्धे। स्वरूपं तु सत्यं ज्ञानमनन्तानन्दमिति भेदः। **प्रागेवे**ति ईक्षत्यधिकरणाभासे। तथा च भाष्यम् 'सच्चिदानन्दरूपेणाकाशवायुतेजोवाचकवाक्यानि षड्विधान्यपि निर्णीयन्ते' इत्यादि। **शुद्धे**त्यादि 'विशुद्धसत्त्वं तव धाम शान्तम्' इति श्रीभागवते 'सैषा विद्या जगत्सर्वम्' इति नृसिंहतापिनीये 'मायाभिः पुरुरूप ईयते' इति च शंकराचार्यमते। सिद्धान्ते प्रकृतेर्मायावज्ज्ञानमात्रदेहसाधकत्वात् मायाप्रकृत्योर्भेदः। **ब्रह्मणः शरीरमिति**भाष्यं व्याचक्रुः **द्वितीये**ति। तदसंगतमिति भाष्यविवरणम्। **तत्रे**ति शरीरे। तथा चानवस्थादोषादिति तु सर्वथाऽसंगतमित्यर्थः। **सर्वकर्तु**रिति भाष्यविवरणम्। **तत्रे**त्यादि शरीरे, कर्तव्ये शरीरानपेक्षतया। **सर्वकर्तु**रिति एवं च सर्वकरणेपि तदनपेक्षमेवाविशेषादिति भावः। **किं त्विति** भाष्यं विवृण्वन्ति स्म **अत** इति। **स्वरूप**मिति स्वरूपमगमत् 'किल यस्य गोपवध्वः' इति वाक्यात् प्राकृतं स्वरूपम्। प्राणन्नित्यादिश्रुतिर्बृहदारण्यके 'समान एवं चाभेदात्' इत्यत्र तार्तीये कृष्णावताराभेदस्य वेदस्तुतौ च प्रतिपादना-

तस्माद् वेदातिरिक्तेऽप्युपपत्तिपूर्वकं यत्र ब्रह्मधर्मस्तद् ब्रह्मेति मन्तव्यम्। ब्रह्म तु वेदैकसमधिगम्यं यादृशं वेदे प्रतिपाद्यते तादृशमेवेत्यसकृदवोचाम। प्रकृतेऽपि हिरण्मय इत्यत्र यकारलोपश्छान्दसः। अतो न द्व्यच् । हिरण्यशब्द

भाष्यप्रकाशः ।

'यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः ।
भूभारः क्षपितो येन जहौ तच्च कलेवरम्' ॥

इति प्रथमस्कन्धवाक्यात् । अतो यादृशं प्रतीयते तादृशं तद् ब्रह्मैव । येषां पुनर्न मोक्षाधिकारस्तेषां तच्छरीरवद्भासत इति निश्चयः । एतमेव निर्णयमन्यत्रातिदिशन्ति तस्मादित्यादि । ननु किमित्येवं निर्बन्धेन सर्वाकारं निरूप्यते । निर्विशेषमेवोपासकानुग्रहाय मायया शरीरं कल्पयतीत्येव कुतो न कल्प्यते इत्याकाङ्क्षायामाहुः ब्रह्म त्वित्यादि । ननु भवत्वेवं, तथापि प्रकृते हिरण्मय इत्यत्र विकारवाचिनो मयटः प्रयोगः। हिरण्मयशब्दस्य, दाण्डिनायनसूत्रे निपातनाद्विकारत्वसिद्धौ कथं ब्रह्मत्वनिर्णय इत्यत आहुः प्रकृतेऽपीत्यादि । तथाच त्र्यच्त्वेन विकारप्रत्ययाभावान्नायं निपातः किंत्वत्र छान्दस एव यकारलोप इत्यर्थः । ननु पूर्वं स्वरूपलक्षणविचारे ब्रह्मणः सत्यज्ञानानन्दरूपत्वमेव सिद्धं न हिरण्यरूपत्वमिति हिरण्मयस्याविकारत्वेऽपि ब्रह्मत्वं वक्तुमशक्यमतः शरीरत्वमेवाङ्गीकार्यमित्यत आहुः **हिरण्यशब्द** इत्यादि । यद् यज्जनकं तत् तद्गुणकं, यद् यद्गुणकं तत् तदात्मकमिति व्याप्त्योः पूर्वं साधितत्वादत्रानन्दसाधकत्वेनानन्दात्मकत्वे विकारभूतस्य लौकिकस्यापि हिरण्यस्य सिद्धे कारणभूतस्याविकारस्यानन्दात्मकत्वे बाधकाभावाद्धिरण्यशब्द आनन्दवाची । अतः केशश्मश्रुनखाग्राक्षीणि, तत्सहभूता अनुक्ता अन्येऽपि पुरुषावयवाः कप्यासशब्देन वर्णान्तरस्यापि सूचितत्वात् तत्तद्वर्णविशिष्टा अपि सर्वे आनन्दमया एवेति पुरुषाकारं ब्रह्मस्वरूपमेवेति मननीयम् । अन्यथा, तत्त्वेव भयं विदुषोऽमन्वानस्येत्युक्तस्य भयस्यापत्तेरित्यर्थः । ननु सूर्यान्तर्वर्ति न ब्रह्मशरीरमित्यसंगतम् । उपबृंहणविरोधात् । अग्निपुराणे, ध्येयः सदेति श्लोके, हिरण्मयवपुरिति शरीरवा-

रश्मिः ।

तद्वाक्यमाहुः **यथे**त्यादि । **निश्चय** इति भाष्यविद्वन्मण्डनप्रहस्तादौ निपुणतरं प्रतिपादनादिति भावः । **ब्रह्म त्वित्यादी**ति । न च रामतापिनीये 'उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना' इति कथमिति वाच्यम् । पूर्वार्धे 'चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः' इत्यत्र चिन्मयपदेनौडुलोमिमते तदिति न बादरायणमते इति 'चिति तन्मात्रेण तदात्मत्वादित्यौडुलोमिः' इतिसूत्रात् । यादृशं वेदे प्रतिपाद्यते तादृशमेव श्रुतौ ब्रह्मणो रूपं कल्पनाशब्देनोक्तमिति वा । **दाण्डिनायने**ति 'दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि' इतिसूत्रे । **नाय**मिति दाण्डिनायनसूत्रस्य लौकिकप्रक्रियाविषयत्वात् । अत एवैवकारो वक्ष्यते । **यकारलोप** इति तथा च भाष्ये इयकार इत्यादिपदच्छेदः । इत्पदार्थः सुबोधिन्यां 'स त्वं न चेत्' इत्यत्र । न च इत् इति पदच्छेदपक्षेपि यद्यर्थे इदिति । अत्र तु हीत्यर्थको य इ तद्विदुरित्यत्र तथादर्शनात् । **पूर्व**मिति समन्वयाधिकरणे । हेतुभाष्यविवरणपूर्वकं विवृण्वन्ति **यद्यज्जनक**मित्यादि । **पूर्व**मिति समन्वयाधिकरणे । **अतः केशे**त्यादिभाष्यं विवृण्वन्ति स्म **अतः केशे**ति । कमनीयमिति स्वर्णघर्मानुवाकपदादाहुः **वर्णान्तरस्ये**ति । **ब्रह्म स्वरूपमेवे**ति पुरुषविधब्राह्मणादेवकारो विधान्तरयोग-

आनन्दवाची। लोकेऽपि तस्यानन्दसाधकत्वात्। अतः केशादयोऽपि सर्वे आनन्दमया एव। तादृशमेव ब्रह्मस्वरूपमिति मन्तव्यम्। अत एव,।

'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः' ॥

इत्यत्रापि वपुः स्वरूपम्।

'माया ह्येषा मया सृष्टा' इत्यादि भगवद्वाक्यं, भगवन्मायया भगवन्तमन्यथा पश्यन्तीत्याह। न तु भगवानेव मायिक इति। शरीरे सति जीवत्वमेवेति निश्चयः। अतो ब्रह्मधर्मोपदेशात् सूर्यमण्डलस्थः परमात्मैव॥ १९॥

भाष्यप्रकाशः।

चक्रपदस्योक्तत्वादित्याशङ्कायामाहुः अत एवेत्यादि। तथाचात्रापि वं सुखं पुष्णातीति योगेन ब्रह्मैवोच्यते। अत एव स्मृत्यन्तरे।

'आदित्यमण्डलासीनं रुक्माभं पुरुषं परम्।
ध्यात्वा जपेत्तदित्येतन्निष्कामो मुच्यते द्विजः॥
आदित्यमण्डलान्तःस्थं परं ब्रह्माधिदैवतम्।
छन्दोनिवृत्स्याद्गायत्री मया दृष्टा सनातनी' ॥

इति गायत्र्या ध्येये सूर्यमण्डलान्तःस्थे वपुःपदं नोच्यत इति न तेन शरीराङ्गीकारः कर्तुं शक्य इत्यर्थः। नन्वत्र केवलस्वरूपाङ्गीकारेऽन्यत्रापि स्वरूपमेव न्यायबलेन साधितुं शक्यम्। तथा सति।

'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।
सर्वभूतगुणैर्युक्तं न मां पश्यन्ति सूरयः' ॥

इति विश्वरूपाकृतेर्नारायणस्य यद्भारते वाक्यं तस्य विरोधो दुर्वार इत्यत आहुः मायेत्यादि। तथाचास्मिन् वाक्येऽपि, यन्मां सर्वभूतगुणैर्युक्तं पश्यसि एषा माया मया सृष्टेति पदसंबन्धान्न विरोध इत्यर्थः। ननु किमित्येवं निर्बन्धे शरीरवत्ता निराक्रियते। कर्माजन्यस्यैच्छिकशरीरस्याङ्गीकारेऽपि ब्रह्मत्वाक्षतेरित्याशङ्कायामाहुः शरीर इत्यादि। मास्तु कर्मजन्यत्वं शरीरस्य,

रश्मिः।

व्यवच्छेदकः। मन्तव्यमित्यस्यार्थः मननीयमिति। अत एवेत्यादीति सति संभवे तन्त्रत्वाभावादेव। अन्यथाश्रुतिविरुद्धपुराणं तन्त्रं स्यात्। श्रुतिविरुद्धोंशः तन्त्रं पुराणे उपष्टभ्नन्ति स्म अत इत्यादि। छन्द इत्यादि। छन्दोभिर्ध्यायतीत्यर्थः। निवृत्स्यती ध्यायती चासौ गायत्री च एतेन पुराणमुपबृंहणमतिक्रम्यार्थान्तरोपन्यासो न सांप्रतमिति निरस्तम्। माया ह्येषेति इदं वाक्यं शंकरभाष्य उपन्यस्तम्। पदसंबन्धादिति माया त्रिगुणा तन्मते ततो वावच्छेतुं माया ह्येषेत्यत्र मायेन्द्रियाणि ततश्च 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यत्र मायायाः करणतयोल्लेखाद्यन्मां पश्यतीत्यत्र मायिकं मां पश्यतीत्यर्थाभावात् किं तु इन्द्रियविशिष्टं मां पश्यति इत्यर्थात्। 'दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्' इत्यत्र विशिष्टकरणदानस्य मायिकं मां पश्यतीत्यर्थे विरोधात् भिदां 'मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' इति भिदाया एव मायामात्रत्वात्। 'भगवानपि ता रात्रीः' इत्यत्र 'योगमायामुपाश्रितः' इत्यत्र योगमायाश्रयणादिन्द्रियरूपमायायाः करणत्वम्। विषयविषयात इन्द्र इन्द्रियरूप-

भेदव्यपदेशाच्चान्यः ॥ २० ॥

इतोऽपि सूर्यमण्डलस्थः परमात्मा । भेदव्यपदेशात् । 'य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः' इति श्रुत्यन्तरे आधिदैविकं सूर्यमण्डलाभिमानिभ्यां भेदेन निर्दिष्टम् । यद्यपि तत्राकारो न श्रूयते, तथापि हिरण्मयवाक्येनैकवाक्यत्वात् सर्वत्र साकारमेव ब्रह्मेति मन्तव्यम् ।

भाष्यप्रकाशः ।

तथापि शुद्धसत्त्वात्मकत्वं त्रिगुणात्मकत्वं वा तु सर्वथाङ्गीकार्यम् । तेन सह संबन्धश्चाभिमान एव वाच्यः । तथा सत्यभिमन्ता जीव इति तापनीये श्रावितस्य जीवलक्षणस्य तत्र सत्त्वाज्जीवत्वमेव । यदि च नियन्तृत्वं तदाऽन्यस्याभिमानिनस्तत्र सत्त्वाद् ब्रह्मशरीरत्वाभावः । यदि च संबन्धान्तरं, तदापि ।

'स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः ।
प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद् वैभवादपि' ॥

इति नारसिंहवाक्यविरोध इति शरीराङ्गीकारे जीवत्वापत्तिरनिवार्येति तदभावाय निर्बन्ध इत्यर्थः ॥ १९ ॥

भेदव्यपदेशाच्चान्यः ॥ २० ॥ ननु पूर्वसूत्रोक्तेनैव हेतुना सिद्धे ब्रह्मत्वे किमिति

रश्मिः ।

मायाभिः पुरुरूपः चाक्षुषः शाब्दोनुमित उपमित इत्येव मीयते प्राप्यते इति पदसंबन्धः । भगवतो मायेति संबन्धविशेषनिवेशश्चायं पदसंबन्धस्तस्मादित्यर्थः । एतेन शंकरभाष्याद्विशेषे दर्शिते स्मरणं सभाजितम् । **त्रिगुणे**त्यादि त्रिगुणमुपक्रम्य 'अभ्यपद्यत लीलया' इतिवाक्यात् । अत्र सूत्रे उत्तरसूत्रादन्य इति साध्यानुकर्षादधिकारसूत्राद्ब्रह्म इत्यनुवर्तनाद्वा न पक्षहेतुनिर्देशो दोषायेति ज्ञेयम् । अत एव रामानुजभाष्यं 'अन्तरादित्ये अन्तरक्षिणि च यः पुरुषः प्रतीयते स जीवादन्यः परमात्मैव कुतः तद्धर्मोपदेशादिति' । अस्मन्मतेपि परमात्मान्यपदार्थ इति विशेषो न । **नियन्तृत्व**मिति जीवशरीरयोः संबन्धः अथान्तर्यामिब्राह्मणे । **ब्रह्मे**ति किं तु नियन्तुर्ब्रह्मणोन्यस्याभिमानिनः शरीरत्वं स्यादिति भावः । तस्मिन् सत्यन्तर्यामिब्राह्मणविरोधः । एवं चाभिमाननियन्तृत्वान्यतरसंबन्धे विवक्षिते त्वाहुः **यदि चे**ति । संबन्धान्तरत्वमभिमाननियन्तृत्वान्यतरत्वं तदापि संयोगसंबन्धासंग्रहाद्वाक्यविरोध इत्याहुः **तदापी**ति । वसुदेवे संक्रान्तः संयोगसंबन्धेन वर्तमानो वासुदेवः अयं पुरुषो जीवः । तथा च पुरो जीवस्य च संयोगसंबन्धः । विद्याविद्यावच्छिन्नजीवस्य वासुदेवाभेदसंभवमालोच्याह **प्रकृती**ति । अभिमानो मिथ्येति प्रकृतिः । स्पर्शोभिमानाख्यस्तस्य राहित्यात् । नियन्तुरंशत्वात् स्वातन्त्र्यं तस्मात् । वैभवं वैभव्यं तत्त्वमस्तीतिवद्वासुदेवोयं पुरुष इति तस्मादपि ॥ १९ ॥

भेदव्यपदेशाच्चान्यः ॥ २० ॥ **भाष्ये** । **आधिदैविक**मिति आदित्ये तिष्ठन् इत्याद्युक्तादित्ये स्थित्यादिमन्तं निर्दिष्टं जानीयादिति शेषः । **सूर्ये**त्यादि सूर्यमण्डलं जडम् । तदभिमानी चेतनः वेदेत्यनेन ज्ञानानुकूलव्यापारवत्त्वबोधनपुरस्कारेण नेति नञा निषेधात् । ज्ञानवत्त्वस्याधारे जडे बाधात्ताभ्यामित्यर्थः । **प्रकृते** । **समाने**ति समानप्रकरणं ब्रह्मप्रकरणेनोद्गीथप्रकरणं समानं तदुक्तधर्मान्तरं परमात्मत्वं तस्य । परमात्मत्वमत्रोद्गीथत्वं तद्विद्योक्तधर्मवत्त्वम् **भाष्ये** । एक-

अन्तर्यामिब्राह्मणे चत्वारोऽर्था उच्यन्ते। सर्वत्र तिष्ठँस्तद्धर्मैर्न संबध्यते। सर्वमुक्तिपरिहाराय स्वधर्मैस्तत्र बद्ध्यते। स्वलीलासिद्ध्यर्थं तच्छरीरमिति। तस्य नियमनं तदर्थमिति। चकाराद्धर्मा उच्यन्ते।

भाष्यप्रकाशः।

हेत्वन्तरोपन्यास इत्याकाङ्क्षायामाहुः यद्यपीत्यादि। तथाच समानप्रकरणोक्तधर्मान्तरस्यापि प्राप्त्यर्थं हेत्वन्तरमित्यर्थः। नन्वत्र भेदव्यपदेशमात्रेण कथं परमात्मलाभ इत्यत आहुः अन्तर्यामीत्यादि। तदिति सामान्ये नपुंसकम्। अभिमानीत्यर्थः। अत्र हि जडाज्जीवाच्च भिन्नत्वेनान्तर्यामी प्रतिपाद्यते। तत्र, य आदित्ये तिष्ठन्नादित्यादन्तर इति जडं मण्डलमाधारत्वेन निर्दिश्य ततोऽन्तरत्वकथनात् ततो भेदो बोधितः। तेन तद्धर्मैर्न संबध्यत इति बोधितम्। तत आदित्यादन्तरत्वं तदभिमानिनो जीवस्याप्यस्तीति ततोऽपि भेदबोधनाय, यमादित्यो न वेदेति तदभिमान्यज्ञेयत्वकथनेनाभिमानिधर्मैर्न संबध्यत इत्याह। तथा यद्यभिमानी तं जानीयान्मुक्तः स्यात्। अतस्तदभावाय स्वासाधारणैर्ज्ञानापहतपाप्मत्वादिभिर्धर्मैः कर्तृभिस्तद् आधारभूतम् अभिमानि वस्तु न बध्यते, न व्याप्यते। 'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्'। 'सैषा त्रय्येव विद्या तपति' इति स्मृतिश्रुत्युक्तधर्मैर्मण्डल एव

रश्मिः।

वाक्यत्वादिति स्वार्थबोधे समाप्तयोर्हिरण्मयपदघटितान्तर्यामिपदघटितवाक्ययोर्द्वन्द्वप्रयोगात्परस्परसाकाङ्क्षयोरेकवाक्यतया द्वन्द्वप्रयोगिमीमांसको ज्ञानाङ्गमित्येवमेकवाक्यत्वात्। द्वन्द्वं ब्रह्मात्मरूपम्। 'स्वरूपं द्विविधं चैव सगुणं निर्गुणं तथा' इतिश्रुतेः। ननु साकारं ब्रह्मेति वक्तव्ये सर्वत्रेत्येवमिति च कुतः। इति चेच्छृणु सर्वत्रेत्यवश्यं वक्तव्यम्। एकत्र सिद्धः शास्त्रार्थोपरत्रापि तथेति न्यायात् अन्यथैकत्रान्यथापरत्रान्यथेति शास्त्रार्थो भिद्येत। एवेत्यपि वक्तव्यमुक्तश्रुतेः। पुरुषविधब्राह्मणाच्च। 'अहं सर्वस्य प्रभवः' 'अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्। परं भावमजानन्तः' इति गीता। 'समान एवं चाभेदात्' इति वैयाससूत्रम्। 'अपश्यत् पुरुषं पूर्णम्' इति समाधिभाषा तदेकवाक्यतया। द्वितीयस्कन्धे नवमाध्याये ज्ञानस्य कथनात् ब्रह्मणे चतुर्भुजरूपप्रदर्शनाच्च। तच्च निर्गुणपूर्वकमिति सुष्ठूक्तं सर्वत्रेति एवेति च ध्येयम्। प्रकृते। भेदव्येति हेतुना। परमात्मलाभः भावप्रधानपरमात्मशब्दः तेनान्यद् ब्रह्मसूत्रान्तरादनुवृत्तं परमात्मेत्युच्यतेन्यपक्षग्रन्थत्वात् तस्य लाभ इत्यर्थः। तेनात्र वक्ष्यमाणसाध्यपक्षयोर्न विरोधोत्र। अभिमानिधर्मैरिति तद्धर्मैरधोक्षजत्वादिभिः। सर्वमुक्तीत्यादिभाष्यं विवरिष्यन्त आहुः तथा यदीत्यादि। मुक्त इति। ज्ञानत्वेन मुक्तित्वेन कार्यकारणभावादिति भावः। बध्यत इति बध बन्धने इति धातोः कर्मणि प्रत्यये रूपम्। बन्धनं चाप्रीत्यनुकूलो व्यापारः सा च प्रकृते व्यापनरूपस्वरूपलक्षिका। धातूनामनेकार्थत्वमित्याशयेनाहुः व्याप्यत इति। यदेत्यादि उत्तरार्धं तु 'यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्' इति। सैषेति तैत्तिरीये 'आदित्यो वा एष एतन्मण्डलं तपति तत्र ताः ऋचस्तदृचां मण्डलं स ऋचां लोको अथ य एष एतस्मिन् मण्डलेर्चिर्दीप्यते तानि सामानि स साम्नां लोको अथ य एष एतस्मिन् मण्डलेर्चिषि पुरुषस्तानि यजूंषि स यजुषां मण्डलं स यजुषां लोकः। सैषा त्रय्येव विद्या तपति य एषोन्तरादित्ये हिरण्मयः पुरुषः' इति श्रूयते। स्मृतिश्रुतीत्यादि धर्मादिष्वनियमात् साधुः प्रयोगः। अन्यथा 'अभ्यर्हितं

भाष्यप्रकाशः ।

व्याप्यते, नाभिमानीति स न मुच्यते । यद्वा दिवादिर्भ्वादिवदाकृतिगणः । तेन क्षीयते मृग्यतीत्यादिवद् बध्यत इत्यपि कर्तरि प्रयोगः । तथा सति स्वधर्मैस्तमभिमानिनं न व्याप्नोतीत्यर्थः । तात्पर्यं तूभयथापि समानम् । तेन ततोऽपि भेदः । एवमुभयाद्भेदे सिद्धेऽपि तत्र स्थितेः किं प्रयोजनमित्याकाङ्क्षायां, यस्यादित्यः शरीरं य आदित्यमन्तरो यमयतीत्याह । तत्र जगद्भासनं दिग्विभागो धर्मप्रवृत्तिरित्यादिरूपा स्वस्यैव लीला तत्सिद्ध्यर्थं तन्मण्डलं शरीरं, न त्वधिष्ठानार्थम् । तेन जीवतुल्यता वारिता । एवं, 'गामाविश्य च भूतानि धारयाम्यहमोजसा' इत्यादिष्वपि भगवल्लीलात्वं बोध्यम् । तेन पृथिव्यादिकार्यस्यापि लीलात्वं तेषां लीलाशरीरत्वं च ज्ञातं भवति । शरीरस्य तादृशत्वे गमकमाह **य आदित्यमन्तरो यमयतिती** । अत्रादित्यपदं मण्डलाभिमानिनोः संग्राहकम् । तथाच **तस्यादित्यादेर्नियमनं तदर्थं** तादृश-

रश्मिः ।

पूर्वम्' इति सूत्रप्रवृत्तिर्न स्यादेव । तदुक्ता धर्मा जगद्भासनादयः । **आकृतिगण** इति आकृत्या गण्यते इति व्युत्पत्तिः । **क्षीयत इत्यादि** । यद्यपि क्षि क्षये भ्वादिः । क्षि निवासगत्योस्तुदादिः । क्षि हिंसायां क्र्यादिस्तथाप्याकृतिगणः संभवति । **मृग्यती**ति मार्ग अन्वेषणे चुरादिः, मृग गतौ भ्वादिः, परस्मैपदी उभयस्य मृग्यतीति रूपं मृग्यमिति तथा । **दिग्विभाग** इति सूर्योदयानन्तरं प्राच्यादिव्यवहारात् । **लीले**ति स्थानलक्षणलीला । **एवं गा**मिति आदिपदार्थोऽग्रे वक्ष्यते । **भगवदि**त्यादि पृथ्वीधारणमपि स्थानम् । सृष्टायाः पृथ्व्याः मर्यादया पालनरूपत्वात् । ओषधीनां सोमरसमर्यादया पालनम् । जाठराग्नेश्चतुर्विधान्नपाचनस्य मर्यादारूपत्वेन स्थानत्वम् । अग्निर्ज्ञानं क्रियात्मा । सर्वस्य स्मृतिर्ज्ञानमपोहनं च मर्यादया पालनम् । अत्र ब्रह्माग्निविचारः 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति दशविधलीलासंपृक्त इति 'लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः' इत्यपि बोध्यम् । इति 'गतिस्मित' इति श्लोकोक्तभगवत्परिग्रह उक्तः । तथा च सुबोधिनी एकैकस्मिन् पदार्थे दशविधलीलाविशिष्टो भगवान् तिष्ठतीति । आदिपदार्थवाक्यानि तु यदादित्यगतमिति वाक्यानन्तरम् ।

'गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चोषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥
अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥
सर्वस्य चाहं हृदि संनिविष्टोः मत्तः स्मृतिर्ज्ञानमपोहनं च' । इति

लीलात्वमिति विसर्गलीलात्वम् । 'विसर्गः पौरुषः स्मृतः' इति तल्लक्षणात् । 'द्यावाभूमी जनयन् देव एकः' इति श्रुतिः सर्गे । **शरीरत्व**मिति यौगिकं शरीरपदं वेदान्ते योगमात्रादरान्न तु रूढमित्यन्तर्यामिणः शरीरं योगरूढं वा । **संग्राहक**मिति अभिधयैव संग्राहकं विशिष्टे शक्तेः । अन्तर्यामी तु साकारव्यापकेन्तर्भवति तद्रूपस्थितसाकारव्यापकेषु त्रिषु रूपेषु व्यक्तौ शक्तिरिति पक्षे चिन्त्यम् । नन्वस्त्वेवं तथाप्यभिमानिस्मरणस्य किं प्रयोजनमत आहुः **तथे**ति । तथा चाभिमानिस्मारणस्य प्रसिद्धशरीरत्वज्ञानं प्रयोजनमन्तर्यामिणो लीलाज्ञानं प्रयोजनं द्वा सुपर्णेतिश्रुतेरित्यर्थः ।

तस्मात् सर्वविलक्षणत्वादन्य एव, नाभिमानी। उपचारव्यावृत्त्यर्थमन्यपदेनोपसंहारः।

भाष्यप्रकाशः ।

लीलार्थम् । तं यदि, भीषास्मादित्याद्युक्तरीत्या न नियमयेत्तदा सा सा लीला न सिद्ध्येदिति । अत्र पुनरप्यन्तर इति पदम्, अन्तरं करोतीत्यन्तरयति, अन्तरयतीत्यन्तर इति सर्वान्तःस्थापकत्वबोधनार्थम् । एवमेते चत्वारोऽर्था उच्यन्ते । सूत्रे तु चकारात् पूर्वसूत्रोक्ता धर्माः समुच्चीयन्ते । तेन हेतुभेदेऽपि साध्यैक्यान्नाधिकरणभेदः । एवं श्रुतिं सूत्रं च व्याख्याय सिद्धमाहुः **तस्मादित्यादि** । तथाच भेदव्यपदेशात् सर्वविलक्षणत्वेन व्यपदेशादादित्यान्तर्वर्ती परमात्मा अन्य एव, नाभिमानीत्यर्थः । नन्वत्रान्य इत्यस्य साध्यत्वेन निर्देशादिदमधिकरणान्तरमेवास्त्विति चेत्तत्राहुः **उपचारेत्यादि** । तथाच, नेतरोऽनुपपत्तेरित्यादिना पूर्वाधिकरणं निषेधमुखेन विचारितं यथोपचारनिवृत्त्यर्थं तथेदमन्यपदेनोपसंहृतमिति तत्रेवात्रापि नाधिकरणभेद इत्यर्थः । ननु, उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यनेनोपासनाकथनात् तस्याश्च वाचो धेनुत्ववदारोपिताकारेणापि सिद्धेः किमर्थमयमाग्रह इत्यत

रश्मिः ।

तस्येत्यादिभाष्यं विवृण्वन्ति स्म **तस्येत्यादिना** । **भीषेत्यादि** ।

'भीषास्माद् वातः पवते भीषोदेति सूर्यः ।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः' ॥

इति तैत्तिरीये । **उक्तरीत्येति** उक्तरीत्या नामस्थानलीलार्थं न नियमयेदित्यर्थः । **सा सेति** प्रजायेयेति न्यायेनोच्चनीचभावेन सा सा लीला न सिद्ध्येत् सर्वस्य भगवत्त्वेन समत्वात् 'स्थितिर्वैकुण्ठविजयः' इति स्थानलक्षणोक्तविजये तु सा सा लीला स्यादेव । **अनेति** य आदित्यमन्तर इत्यत्र पुनरनन्तरपदस्यार्थः । **सर्वान्तरिति** सर्वानन्तरं करोतीत्यर्थेनानुवादकत्वमिति भावः । **चकारादित्यादि** भाष्यार्थमाहुः **सूत्रे त्वित्यादि**। **तेनेत्यादि** चकारकृतपूर्वोक्तहेतुसमुच्चयेन। अन्यत्वरूपसाध्यैक्यात् । साध्यभेदस्त्वधिकरणं भिन्द्यात् । यथोत्तरत्र । **तस्मादित्यादीति** । पूर्वं साध्यं परमात्मत्वं न त्वादित्यान्तःस्थत्वं तस्य संदिग्धसाध्यत्वेन पक्षत्वात् । अत्र तु परमात्मनः पक्षत्वं संदिग्धसाध्यवत्त्वात् । अन्यत्वं साध्यं भेदव्यपदेशो हेतुः । अत्र साध्यतावच्छेदकहेतुतावच्छेदकयोरैक्यात्साध्यसाधनत्वव्याहतिर्दोषः । अन्यथा प्रसिद्धानुमाने वह्नेर्हेतोरपि वह्निसिद्धिः स्यात् । अतो हेतुपरिष्कारपूर्वकं सिद्धं सूत्रार्थमाहुः **तस्मात् सर्वविलक्षणत्वादिति** । तथा च सर्वविलक्षणत्वत्वं हेतुतावच्छेदकमिति तयोर्भेदान्नोक्तदोष इति भावः । परमात्मनि तल्लक्षणेन सर्वविलक्षणत्वं सिद्धं, पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् इत्यत्र यथा, सर्वविलक्षणत्वेन हेतुनान्यत्वसिद्धिः । यथा लक्षेणन सर्वविलक्षणत्वसिद्धिस्तथा भेदव्यपदेशोपीति समानव्याप्तिज्ञानविषयत्वेन हेत्वोरैक्यं सारम् । **उपेत्यादि** 'आनन्दमानन्दमयोवसाने' इति द्वितीयस्कन्धात् जीवस्याप्यानन्दमयत्वेनानन्दमयस्य तद्वाचकत्वे उपचरितत्वं स्यात्तन्निवृत्तये इत्यर्थः । **उपसंहृत**मिति तथा चादित्यान्तःस्थाभिमानिव्यावर्तकत्वेनोपचारनिवृत्त्यर्थमेवमुपसंहृतमित्यर्थः । **अनेनेति** इतिश्रुत्यन्तर्गतवेदेतिपदेन । **उपासनेति** वेदेत्यनेनोक्तोपासनेत्यर्थः । **वाच**

ब्रह्मत्वे सिद्धे ज्ञानं वा, उपासना वेति, नास्मत्सिद्धान्ते कश्चन विशेषः। कारणे कार्यधर्मारोपस्त्वयुक्त एव। कार्ये पुनः कारणधर्माधिकरणत्वेनोपासना अभेदात् फलायेति सर्वत्र व्यवस्थितिः ॥ २० ॥

इति प्रथमाध्याये प्रथमपादे षष्ठमन्तस्तद्धर्माधिकरणम् ॥ ६ ॥

भाष्यप्रकाशः ।

आहुः **ब्रह्मत्व** इत्यादि। तथाच भवतूपासना, तथापि पूर्वसूत्रोक्तधर्मैस्तस्य ब्रह्मत्वे सिद्धे तदाकारस्याकल्पितत्वमप्यनुपपत्त्यभावात् सिद्धमेवेति वेदनस्य ज्ञानत्वमुपासनात्वं वास्तु, मनोव्यापारत्वस्योभयत्र तौल्यादतस्तत्र नास्मत्सिद्धान्ते कश्चिदाग्रह इत्यर्थः । नन्वतस्मिंस्तद्धर्मानारोप्य तत्त्वेन चिन्तनमुपासना, तस्य तत्त्वेन निश्चयो ज्ञानमिति स्वरूपभेदात् कुतो न विशेष इत्यत आहुः **कारण** इत्यादि। अस्त्वयं विशेषस्तथापि हीने उत्कृष्टधर्मारोपस्य लोके कार्यसाधकत्वस्य विपरीते वैपरीत्यस्य च दर्शनात् कारणे यः कार्यधर्मारोपः स तु हीनत्वापादकत्वेन कार्यासाधकत्वादयुक्त एव । वेदे हि सर्वत्रान्नं ब्रह्मेत्यादौ कार्ये कारणधर्माणामुत्पत्तिस्थितिप्रलयकर्तृत्वादीनामारोपेणोपासनात् फलप्राप्तिः श्रूयते। तत्र हेतुः कार्यस्य कारणाभेद एव । सर्वत्र तथा दर्शनात् । कारणस्य कार्याभेदस्तु प्रत्यक्षाच्छास्त्राच्च विरुद्धः। यत्र पुनः सर्वथा भेदो यथा वाग्धेन्वोस्तत्रापि शब्दापेक्षयार्थस्योत्कृष्टत्वम् । शब्दशेषित्वादर्थस्य । अतो ज्ञानोपासनयोर्विशेषसत्त्वेऽपि यथैकदेशिभिः स्वीक्रियते तथा नास्तीति फलजनकत्वांशे विशेषाभावकथनं तच्चोपपन्नमेवेत्यर्थः ।

माध्वास्तु, पूर्वाधिकरणविषयवाक्येषु, अदृश्येऽनात्म्येऽनिरुक्त इत्युक्तम् । तच्चादृश्यत्वम्, अन्तःप्रविष्टं कर्तारमेतमन्तश्चन्द्रमसि मनसा चरन्तं सहैव सन्तं न विजानन्ति देवा इत्यत्रान्तःस्थस्य कस्यचिदुच्यते । तदग्रे च, इन्द्रो राजा जगतो य ईशे इति । सप्त युञ्जन्ति रथमेकचक्रं त्वष्टारं रूपाणि विकुर्वन्तमित्यादिभिरन्ये प्रतीयन्ते । अतः को वाऽनन्दमय इति संदेहे, इन्द्रो राजेत्यादितत्तद्देवतावाचकश्रुत्या, सप्त युञ्जन्तीत्यादित्यलिङ्गाच्च

रश्मिः ।

इति 'वाचो धेनुमुपासीत' इति श्रुतिः। **उपासने**ति यथा वाचो धेनुमित्यत्र । **तस्ये**ति। **तत्त्व**तस्तत्त्वेन। **कार्ये पुन**रित्यादिभाष्यं विवृण्वन्ति स्म **वेदे ही**त्यादिना। सर्वत्र जगति घटपटादौ। इदं **सर्वत्रे**त्यादिभाष्यविवरणम् । **प्रत्यक्षा**दिति सुवर्णं न कटकादि ब्रह्माहमस्मि न त्वहं ब्रह्मेत्यादिप्रतीतेरित्यर्थः ।अत्राब्रह्माहं नास्मि अहं ब्रह्मास्मीति योजना । अत्राभेद उपपादनीये कारणतावच्छेदकं नोद्देश्यतावच्छेदकं कार्यतावच्छेदकं नो विधेयतावच्छेदकं कारणतावच्छेदकं विधेयतावच्छेदकं कार्यतावच्छेदकमुद्देश्यतावच्छेदकं तु भवति । कुतः मायावच्छिन्नमविद्यावच्छिन्नमस्मत्पदार्थः इत्यभेदो भवति विशिष्टं शुद्धान्नातिरिच्यते इति यत्र पुनः साधनेन भेदे विगलिते ब्रह्म शुद्धं न तत्रास्मत्पदार्थभेदः तस्यैवाभावादिति हेतोः। 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' 'कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत्' इति सर्वत्र प्रसिद्धोपदेशादित्यधिकरणे शास्त्रमुक्तमेव । भाष्यसूचितार्थमाहुः **यत्र पुनरि**ति। **तथा ने**ति एकादशसुबोधिन्यामुप समीपे स्थित्वा यथायोग्यकरणमुपासनमुक्तं तदत्रापीति भावः। अत्र शांकरमते भास्करमते रामानुजमते चाधिकविशेषाभावान्माध्वमतमादावाहुः **माध्वा** इति। **आदित्ये**त्यादि सप्तमुखाश्वरथत्वात् तस्य विपश्चितमिति सूर्यनामेति शब्दसामर्थ्या-

---

१. ब्रह्माहमस्मीत्यादौ ।

भाष्यप्रकाशः।

कश्चिद्देवताजीवविशेष एव तत्र युक्तः । श्रुतेः सर्वापेक्षया प्रबलत्वाज्जगतो य ईश इत्यादियोगस्यापि तदुपोद्बलकस्य तत्र दर्शनाच्चेति प्राप्त इदं सूत्रद्वयं प्रववृते । 'अन्तस्तद्धर्मोपदेशात्' 'भेदव्यपदेशाच्चान्यः' इति । अन्तः श्रूयमाणो विष्णुरेव । कुतः । 'अन्तःसमुद्रे मनसा चरन्तं ब्रह्मान्वविन्दद्दशहोतारमर्णे । समुद्रे अन्तः कवयो विचक्षते । मरीचीनां पदमिच्छन्ति वेधसः । यस्याण्डकोश१ँशुष्ममाहुः प्राणमुल्वम्' इत्यादि तद्धर्मोपदेशात् । श्रुत्यर्थस्तु समुद्रे अन्तरर्णे अन्तर्जले मनसा चरन्तं यथेष्टं विहरन्तं दशहोतारं, हु दानादनयोः, दशेन्द्रियविषयदातारं ब्रह्मा अन्वविन्दद् व्यजानादिति तथा । मरीचीनां जीवानां पदमाश्रयभूतं वेधसः भूतभाविनो ब्रह्माण इच्छन्तीति । अण्डकोशं ब्रह्माण्डं यस्य शुष्मं वीर्यमाहुरिति । अत्र समुद्रशायित्वब्रह्माण्डवीर्यत्वादीनामन्तःप्रविष्टनिष्ठतयोपदिष्टानां लिङ्गानां विष्ण्वेकनिष्ठत्वादन्तःप्रविष्टः कर्ता विष्णुरेवेति । प्रलयार्णवशायित्वब्रह्माण्डवीर्यत्वयोः कथं विष्णुलिङ्गत्वमित्याकाङ्क्षायाम्, आपो नारा इति व्यासस्मृतिवाक्यं, चतुर्वेदशिखाश्रुतिश्चोपन्यस्ता । ननु तस्येन्द्राद्यभिन्नत्वं तर्ह्यस्त्विति शङ्कायां द्वितीयसूत्रे, 'इन्द्रस्यात्मा निहितः पञ्चहोता । वायोरात्मानं कवयो निचिक्युः । अन्तरादित्ये मनसा चरन्तम् । देवाना१ँ हृदयं ब्रह्मान्वविन्दत्' इत्यादिष्वेकस्यैव सर्वदेवान्तर्वर्तित्वकथनेन यथेष्टचारितयान्तर्यामित्वबोधनेनेन्द्रादिभ्यस्तस्य भेदव्यपदेशात् सोऽन्य एव तेभ्य इति वदन्ति ।

शैवास्तु छान्दोग्यश्रुतिमेव विषयवाक्यत्वेनोपन्यस्य साधकानुग्रहार्थं तत्र हिरण्मयं किमपि रूपं समास्थाय सवितृमण्डलेऽधिवसति । तच्च त्रिलोचननीलकण्ठादिविशिष्टम् । न चाक्षिणी इति द्विवचनविरोधः । तस्य पुण्डरीकोपमाबोधनार्थत्वात् । तृतीयस्य नेत्रस्य मुकुलितत्वेन तत्र पुण्डरीकोपमाया अभावात् नचैतावता तृतीयाभावः शङ्क्यः । यथाहि कंचित् त्रिपुत्रं ब्राह्मणमुद्दिश्योच्यते, द्वावस्य पुत्रावग्निकल्पौ । न तावता तृतीयाभाव, आयाति । किन्तूपमाभाव एव । तथात्रापि शक्यवचनत्वाद् । ध्येयः सदेति वाक्यं तु लौकिकानां भाक्तमेव । नापि पुण्डरीकाक्षत्वलिङ्गेन विष्णुः शङ्क्यः । कमलनेत्रत्वस्य लौकिकसाधारणत्वेन लिङ्गत्वाभावात् । नचास्मिन् हिरण्मयपुरुषवाक्ये शिवासाधारणलिङ्गादर्शनात् कथं शिवाकारत्वनिश्चय इति शङ्क्यम् । अस्य वाक्यस्य संदिग्धत्वेनासंदिग्धेन वाक्यान्तरेणैतदर्थस्य निर्णेयत्वात् । तैत्तिरीयाणां महोपनिषदि, आदित्यो वा एष एतन्मण्डलं तपतीत्यनुवाके, य एषोन्तरादित्ये हिरण्मयः पुरुष इत्यादित्यान्तर्यामिणमभिधाय तदग्रिमानुवाके, आदित्यो वै तेज इत्यादि-

रश्मिः।

दित्यर्थः । **श्रुतेरि**त्यादि निरपेक्षस्वरूपायाः श्रुतेः सर्वेषां लिङ्गादीनामपेक्षयेत्यर्थः । **चतुर्वेदे**त्यादि अहं न तेजोरश्मीन् नारायणं पुरुषं जातमग्रतः पुरुषात् प्रकृतिर्जगदण्डमिति श्रुतिः । अहं तेजआदिकं न किं तु पुरुषान्महत्स्रष्टुर्विष्णोर्द्वितीयरूपाद्विष्णोः प्रकृतिः प्रकृतिअमः सुरछान्दसः जगत् जीवानूद्यमपीति नारायणत्वमुभयथा विष्णुलिङ्गम् । **अण्डमिति** ब्रह्माण्डवीर्यत्वं लिङ्गम् । **पञ्चहोते**ति पञ्चज्ञानेन्द्रियादिदाता पञ्चहोता पञ्चहोता वायुरिति चितिश्रुतेः । **उपमाभाव** इति अग्निकल्पपदोक्तोपमाभावः । तृतीयोग्निकल्पो नेति । **भाक्तमि**ति स्वाधिष्ठाने लाक्षणिकम् । आश्रयतासंबन्धो लक्षणा । **लिङ्गत्वे**ति असाधारणधर्मत्वाभावेन लौकिकेतिव्याप्तेस्तथा । अमृतपदशक्तिं शिवे साधयति भगवान्

भाष्यप्रकाशः ।

नाऽऽदित्यरूपस्य विभूतिमभिधाय एष पुरुष एष भूतानामधिपतिरिति भूतपतित्वेन तं निर्दिश्य तदग्निमानुवाकेषु, सर्वो वै रुद्र इत्यादिषु, हिरण्यबाहवे अम्बिकापतय उमापतय इत्युपसंहारेण तत्र शिवाकारनिर्णयात् । अन्तर्यामिब्राह्मणे, एष त आत्माऽन्तर्याम्यमृत इति कथनाच्च । जाबालोपनिषदि, एतानि ह वा अमृतस्य नामधेयानीति शतरुद्रियप्रशंसावाक्येन अमृतपदस्य शिवपरतानिर्णयादत आदित्यान्तर्वर्ती त्रिलोचननीलकण्ठादिशरीरवानित्याहुः । तन्मन्दम् । शरीरपक्षस्य प्रागेव दूषितत्वात् । आकारेऽप्यक्षिद्वित्वस्य पुण्डरीकोपमाबोधनार्थत्वं तदा स्याद्यदि नीलग्रीवादिकं त्रिलोचनत्वसाधकमस्मिन् वाक्ये एतन्निर्णायकवाक्यान्तरे वा स्यात् । भूतानामधिपतिरित्यस्य तु न निर्णायकत्वम् । भूतपदस्य, क्षरः सर्वाणि भूतानि, पादोऽस्य विश्वा भूतानीतिवत् प्राणिमात्रवाचकत्वेन प्रेतवाचकत्वाभावान्न नीलग्रीवादिरूपवल्लिङ्गत्वम् । तस्य प्रेतमात्रवाचकत्वे च परिच्छिन्नैश्वर्यबोधकत्वेन परमैश्वर्यविघटकतया तस्यालिङ्गत्वमेवेत्युभयथापि तदगमकत्वात् । सर्वो वै रुद्र इत्यादीनां तु नैतद्वाक्यशेषत्वम् । आदित्यो वै तेज इत्यनुवाकान्ते, इत्युपनिषदित्यनेन विद्यासमाप्तिबोधनात् । एवममृतपदस्यापि न निर्णायकत्वम् । शतरुद्रियस्याऽमृतनामत्वेऽप्यमृतपदस्य शिवनामत्वाभावात् । इदं यथा तथा प्रहस्ताख्ये वादे निपुणतरमुपपादितमिति नेह प्रपञ्च्यते । यत्पुनर्ध्येयः सदेत्यस्य लौकिकवाक्यत्वमुक्तं, तत्त्वग्निपुराणा-

रश्मिः ।

शैवः । **जाबालेत्यादि** । तत्र माध्वाचार्यमते विष्णुगुणावतारपरत्वं यच्छ्रुतीनामुक्तं तन्नारायणशिवो-विष्णुरितिवाक्यान्नारायणादीनां ब्रह्मनामत्वात् तत्परमेवेत्येतावान् विशेष इति तन्मतमपहाय शैवं निराकुर्वन्ति स्म **तन्मन्दमित्यादिना** । निर्णायकत्वं कोशादिभ्यां तदा स्याद्यदान्येषां पदानां शिववाचकत्वं स्यादस्य च प्रायपाठेन यथाकथंचिदप्यन्यपरत्वं तस्यां [१] त्वेवमित्याहुः **भूतपदस्ये**-त्यादि । **अलिङ्गत्वमिति** तव मते लिङ्गत्वमिति बोध्यम् । **उभयथापीति** उभे प्राणिमात्रवाचकत्व-प्रेतमात्रवाचकत्वे अवयवौ यस्य प्राणिमात्रवाचकत्वप्रेतमात्रवाचकत्वसमुदायस्य स उभयस्तस्मिन् प्रकार इत्यर्थः । एतदुपपादितं प्रहस्ते द्वितीयवादे शिवेशानादिपदानां शिवे रूढिखण्डनप्रस्तावे । वस्तुतः सर्वेषां शब्दानां सर्वार्थत्वस्य महाभाष्याद्यभिमतत्वेन ब्रह्मवाचकत्वस्यैवाभिप्रेतत्वात् । प्रतिनियततावन्मात्रकार्यकरणेन ब्रह्मानुकारितया व्यवहारार्थमेव च शक्तिसंकोचे कोशेषु शिववाचकत्व-दर्शनेपि ब्रह्मवाचकत्वस्यापि पर्यवस्येयत्वादित्यादिना ग्रन्थेन । **एतद्वाक्येति** 'य एषोन्तरादित्ये हिरण्मयः पुरुषः' इति महोपनिषद्वाक्यशेषत्वम् । **विद्यासमाप्तीति** तदुत्तरविद्यास्थानां सर्वो वै रुद्र इत्यादीनामुत्तरविद्याशेषत्वमिति भावः । समाप्तपुनरात्तत्वदोषात् । न चानेकार्थसंकटे वाक्यशेषप्रवृत्तौ प्रतिबन्धे समाप्तेरप्रयोजकत्वमिति वाच्यम् । स्यादेवं यद्यनेकार्थत्वं स्यात् । तदेव तु न प्रायपाठात् । एवं च समाप्तेरस्यानन्तरप्रायपाठविघटकत्वाभावेन रुद्रादिपदानां समाप्तिवैयर्थ्यपरिजिहीर्षयानेकार्थ-संकटाभावे किंचिज्ज्ञापकत्वेन समाप्तेरप्रयोजकत्वाभावात् । इदमिति शरीरपक्षस्येत्यारभ्य निरुक्तम् । **उपपादित**मिति शरीर इत्यारभ्य हेत्वर्थकविभक्त्यन्तं प्रहस्ते प्रथमवादे उपपादितम् । आकारप्रतीति-र्ब्रह्मण एव सर्वाकारत्वादेवोपपन्नेत्यादिग्रन्थेन । आकार इत्यारभ्य स्यादित्यन्तमन्तर्यामिविचारे पुण्डरीकाक्षत्वाक्षिद्वित्वाभ्यामादित्योभूयदा हरिरिति वैष्णवाः । ध्येयः सदा सवितृमण्डलेत्याद्यग्निपुराण-श्रीमद्भागवतवाक्ययोर्मकरकुण्डलत्वादिलिङ्गकथनाच्चेत्यादिना संदर्भेणोपपादितम् । **लौकिके**त्यादि

१. शिवतात्पर्यकपदप्रायपाठात् ।

भाष्यप्रकाशः।

दर्शनादेवेति। गायत्र्यां तु भर्ग इति पदं सान्तम्। द्वितीयपादे चास्यान्वयो मैत्रायणीयो-

रश्मिः।

लौकिकानां वाक्यत्वं यदि च लौकिकानामित्यस्य स्मार्तानामित्युच्यतेर्थः एतर्ह्यपि वाक्यसामानाधिकरण्यं सुष्ठु लौकिकं वाक्यं तत्त्वमिति न तु वाक्यसंबन्धिकत्वम्। ननु दृढतरमेतदुपोद्बलकं यद्गायत्र्यां सवितुर्वरेण्यं भर्ग इति तत्राहुः **गायत्र्यां तु** इत्यादि। त्रिपदा गायत्री। त्रिपदेति संध्याश्रुतेः। **द्वितीय** इत्यादि तिस्रो व्याहृतयः अस्य प्रथमपादस्थस्य वरेण्यपदस्य द्वितीयपादे अच्युतप्रवाचकभर्गःपदेनान्वये मैत्रायणीये उपनिषदि।

'रविमध्ये स्थितः सोमः सोममध्ये हुताशनः।
तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोच्युतः'॥

इति श्रुतौ सिद्धः। अयमर्थः। सवितुर्देवस्य वरेण्यं तद्भर्गो धीमहि यः सविता नो धियः प्रचोदयात्। शश्वत्सूयमानात्सूर्यः सवनात्सवितेति श्रुतेः। सविता ब्रह्मेति यत्तदोः सामानाधिकरण्यम्। तस्य सवितुर्देवस्य वरेण्यं भर्गो धीमहीति तत्पदं लुप्तषष्ठीकम्। तत्सवितुरिति समस्तं पदं धामत्वाश्रौतान्वयः। इमं च भर्गःशब्दस्य सान्तत्वेऽचकथम्। केचित्तु सवितुर्देवस्य वरेण्यं तं भर्गं चिन्तयामि यः पूर्वोक्तोऽस्माकं बुद्ध्युपलक्षितानि सर्वेन्द्रियाणि प्रेरयतीति योऽस्माकं भर्गो धियः प्रेरयति सवितुर्देवस्य तद्वरेण्यं धीमहीति चान्वयमाहुः तन्न। अदन्तत्वपक्षे तदित्यत्र लिङ्गव्यत्ययः सुप्लोपकल्पनाऽव्ययत्वकल्पना वा भर्गपदे व्यवहितान्वयो वा विभक्तिव्यत्ययो वा। न च तदित्यस्याव्ययत्वस्य व्यवहितान्वयस्य च सार्वत्रिकत्वेनादोषादन्वयोऽदुष्ट एवेति शङ्क्यं अव्ययत्वकल्पनाया अन्वयासंभवफलकत्वाद्व्यवहितान्वयस्य पूर्वतन्त्रे तृतीयस्याष्टमे पादे मासं तु सवनीयानां नोदनाविशेषात् इति मांसाधिकरणे शाक्यानामयनं नाम षट्त्रिंशदाब्दिकं सत्रम्। तत्र संस्थितेहनि गृहपतिर्मृगयां याति स प्रतिपद्यते स यान् मृगान् हन्ति तेषां सरसाः सवनीयाः पुरोडाशा भवन्तीति श्रूयते तत्रेदं तरसं सर्वेषां पुरोडाशानामुत सवनीयानामिति विचिकित्सा। उद्देश्यः पुरोडाशः सवनीयेत्र विशेष्टुं न शक्यते इति सर्वपुरोडाशार्थं तरसं नवनीतवत्। सवनीयपदं तु सर्वपुरोडाशेषु लाक्षणिकमिति पूर्वपक्षे प्राप्ते तरसं संनिहितं सवनीयपदमतिहाय पुरोडाशेनान्वेति व्यवहितान्वयदोषप्रसङ्गात्। अतः सवनीयपुरोडाशेष्वेव तरसत्वमिति सिद्धान्तयता दोषत्वकथनादिति। स्यादेतत्। भर्गमिमं तं चिन्तयामि इति मैत्रश्रुतेः तद्भर्गाख्यं किमपीति स्मृतेश्च भर्गाःशब्दस्यादन्तत्वज्ञापनेन भ्रस्ज पाके इत्यस्माण्णिचि 'भ्रस्जो रोपधयोः' इति रमागमे तदीयाकारमकारयोरित्त्वालोपे भ्रज्जत्यतो 'अकर्तरि च कारके संज्ञायाम्' इत्यनेनाकर्तर्यजि प्राप्ते 'बहुलं छन्दसि' इत्यनेन कर्तरि घञि 'ञ्नित्यादिर्नित्यम्' इत्यनेनाद्युदात्तत्वे च भर्ग इति व्युत्पत्तिमचकथत्। अत एव तलवकाराणां कः सविता का सावित्री इत्युपक्रम्य द्वितीयः पादो भर्गमयः इति ब्राह्मणं संगच्छते इति। अत्र वदन्ति स्म भर्गाख्य इत्यस्य 'शकन्ध्वादिषु पररूपं वाच्यम्' इत्यनेन पररूपे भर्गमय इत्यस्य 'पृषोदरादीनि यथोपदिष्टम्' इति सलोपे च कृते सिद्धिरिति तरसन्यायेन संनिहितान्वयबोधनादसुनन्तमेतदिति। अत एव विष्णुसंज्ञमिति श्रुतिः। काचित् वरेण्यं सवितुर्भर्गो विष्ण्वभिधं जगौ।

याज्ञवल्क्योपि पुरुषं व्योम्नि तद्विष्णुसंज्ञितं।
भ इति भासते लोकान् र इति रक्षते प्रजाः॥
ग इत्यागच्छते तेजस्तं भरगाद्भर्ग उच्यते।
इत्याह गायत्र्यर्थस्य व्याकृतौ योगशास्त्रके॥

भाष्यप्रकाशः ।

पनिषदि सिद्धः । तथा,

'रविमध्ये स्थितः सोमः सोममध्ये हुताशनः ।
वह्निमध्ये स्थितं सत्यं सत्यस्यान्तः स्थितोऽच्युतः' ॥

इति तत्रैव मन्त्रः । योगियाज्ञवल्क्येऽप्येतादृशमेव वाक्यम् । ताभ्यामपि सर्वान्तरच्युत एवोक्तो ध्येयत्वेन च भगवानेवादृत इत्यतोऽपि शैवमतमसंगतमेवेति दिक् ।

विज्ञानेन्द्रभिक्षुस्तु काण्वषष्ठाध्यायस्थं, 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु । य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते । सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति । स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्' इति वाक्यं विषयत्वेनोपन्यस्य, तत्र किं जीवविशेष उच्यते, उत परमेश्वर इति संदेहे विज्ञानमयशब्दस्य योगरूढिभ्यामात्मसामान्यवाचित्वाज्जाग्रदाद्यवस्थाभिर्जीवस्यैव प्रक्रान्तत्वाज्जीव एवेति प्राप्ते । अन्तः परब्रह्मैव भवितुमर्हति । कुतः । तद्धर्मोपदेशात् । सर्ववशित्वशुभाशुभकर्मफलाभागित्वसर्वाधिपतित्वादीनां परमेश्वरधर्माणामुपदेशात् । न चैते धर्माः सिद्धेः पूर्वं जीवेषु संभवन्ति । सत्कर्मणैव पदप्राप्तेश्चेत्यादियुक्तिभिर्हेतुं साधयित्वा, न केवलं धर्मव्यपदेशादेवान्तःस्थो विज्ञानमयो जीवादन्यः परमेश्वरः । किं तु, भेदव्यपदेशाच्चान्यः । भेदव्यपदेशश्च यथात्रैव वाक्यशेषे । येषां नोऽयमात्मा, आत्मन्येवात्मानं पश्यतीति । आधाराधेयभावस्य भेदतन्त्रत्वादित्याद्युक्त्वाह । 'आधुनिकास्तु, य एषोऽन्तरादित्ये हिरण्मय इति छान्दोग्यवाक्यं विषयतया वर्णयन्ति । तन्न । पाप्मभ्य उदित इत्यनेनोक्तस्य पाप्मभ्य उदयस्य पापनाशरूपतया ब्रह्मधर्मत्वाभावात् । धर्मान्तरस्य चात्रानुक्तत्वात् । प्रत्युत तेनैव लिङ्गेन चन्द्रनक्षत्रादिदेवताप्रकरणपठिततया च देवताविशेषावधारणाच्च । न चादित्यस्यान्तरिति भेदनिर्देशानुपपत्तिरिति वाच्यम् । आदित्यस्यान्तरपि आदित्यभिन्नस्य हिरण्यगर्भादेः स्मरणात् ।

'ब्रह्मादीनां परं धाम त्रयाणामपि संस्मृतम् ।
वेदमूर्तिधरः पूषा पूजनीयः प्रयत्नतः' ॥

रश्मिः ।

इति च संगच्छते । यत्तु अथ भर्ग इति यो ह वा अस्मिन्नादित्येभिहितस्तारकोक्षिणीवेष भर्गाख्यो भाभिर्गतिरस्य हीति भर्गो भर्जयतीति वैष भर्ग इति रुद्रो ब्रह्मवादिनो 'अथ भ इति भासयतीमांल्लोकान् र इति रञ्जयन्तीमानि भूतानि ग इति गच्छन्त्यभिन्ना गच्छन्तीमाः प्रजास्तस्मात् भरगत्वाद्भर्गः । 'शश्वत्सूयमानात्सूर्यः । सवनात् सविता' इत्यादिश्रुत्या रुद्रपदादकारान्तस्य भर्गशब्दस्यैव तद्वाचकत्वात् तत्त्वमेव युक्तमिति तन्मन्दम् । रुद्रपदस्य प्राणवाचकत्वात् । कतमो रुद्र इति 'दशेमे पुरुषे प्राणाः आत्मैकादश' इतिश्रुतेः प्राणस्य च ब्रह्मवाचकत्वमतिदेशाधिकरणे लेङ्खयिष्यामः । विशेषस्तु प्रहस्ते लज्जित एवेत्युपरमामः । भिक्षुमतनिरूपणे ब्रह्मधर्मेत्यादि पापं विना तन्नाशस्याशक्यवचनत्वेन तथात्वादित्यर्थः । पूषेति सूर्यः तथासति पूष्णि त्रयाणामुपासनाः सन्तु तत्राहुः

१. लखि प्रकाशने ।

भाष्यप्रकाशः ।

इति मात्स्यादिषु हिरण्मयशब्दाद्धिरण्यगर्भ एवात्रोपास्यत्वेन गम्यते । किंच, ध्येयः सदेति-रूपयोः श्रुतिस्मृत्योर्नारायणाख्यहिरण्मयस्य सूर्यमण्डल उपासनासिद्धेस्तदेकवाक्यतया हिरण्य-श्मश्रुत्वादिश्रुतेरपि नारायणपरत्वमेव, न परमेश्वरपरत्वम् । अपिच । यस्मिन् वाक्ये रूपसंस्थाना-दिकं श्रूयते, तत्र तत्तद्देवतापरिग्रह एवौत्सर्गिकः । असाधारण्यात् । ब्रह्मणश्च स्वतो नीरूपताया, 'अरूपवदेव हि तत्प्रधानत्वात्' इत्यत्र वक्ष्यमाणत्वात् । क्वचित्तु प्रकरणादिबलाद्देवादीन् विहाय देवादिरूपैरेवारूप ईश्वर उपास्य इष्यते । न चेह तथा बलवत् प्रकरणादिकमस्ति । अन्यथा देव-तोपासनमात्रोच्छेदापत्तेः । सर्वत्रैव ब्रह्मोपासनसंभवात् । लीलाविग्रहोऽपि विष्ण्वादिदेवतानामेव स्वस्वाधिकारसंपादनार्थः । न त्वीश्वरस्य । 'अप्राणो ह्यमनाः शुभ्रः, अक्षरात् परतः परः', 'न तस्य कार्यं करणं च विद्यते' इत्यादिश्रुतीनां संकोचे प्रमाणाभावात् । तदुक्तं विष्णुपुराणे ।

'स देवोऽन्यशरीराणि समाविश्य जगत्स्थितिम् ।
करोति सर्वभूतानां नाशं चान्ते जगत्पतिः' ॥ इति ।

तत्र विषयवाक्यव्याख्यानादिकं तु न दुष्टम् । तथाप्येतस्य विषयवाक्यत्वेऽधिकरणस्य पूर्वाधिकरणेन सह न स्फुटा संगतिरिति बोध्यम् । यत्पुनश्छान्दोग्यवाक्यस्थस्यालिङ्गत्वा-दिकमुक्तं, तत्त्वबुद्ध्यैव । अत्र पाप्मभ्य उदयस्य सर्वकर्माञ्जनराहित्यरूपस्य विवक्षितत्वादिति प्रागेवोक्तम् । नच पाप्मशब्दस्य पापे शक्तत्वात् तत उदयस्य पापनाशरूपत्वमेव युक्तं, न यावत्कर्माञ्जनराहित्यरूपत्वमिति वाच्यम् ।

'स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ।
कर्मणां जात्यशुद्धानामनेन नियमः कृतः' ॥

रश्मिः ।

हिरण्मयेत्यादि । **क्वचिदिति** रामतापिनीयादौ ।

'रमन्ते योगिनोनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परब्रह्माभिधीयते' ॥
'चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः ।
उपासकानां कार्यार्थे ब्रह्मणो रूपकल्पना' ॥ इति ।

बलवदित्यादि छान्दोग्ये ॐ इत्येतदक्षरमुद्गीथमुपासीत इत्युद्गीथप्रकरणं तत्र रूपोपासने बलवत् । मायादिप्रकाराणां संभवात् । हिरण्मयपदकृतं बलवत्त्वं वारयन्ति स्म **अन्यथेत्यादिना** । **नन्विति** यथा श्रीभागवते 'सत्त्वं रजस्तम इति प्रकृतेर्गुणा' इत्यादि तथा न । **नाशं चेति** चकारेणोत्पत्तिर्ग्राह्या । एतद् दूषयन्ति स्म **तत्र विषयेत्यादिना** । **यावदित्यादि** कर्मत्वावच्छिन्न-विहितनिषिद्धकर्मजन्यपुण्यपापाञ्जनराहित्यरूपमित्यर्थः । अशुद्धिशाबल्यस्योभयत्र तौल्यादुभयोः पाप्मत्वमेवेत्याहुः **स्वे स्व इत्यादि** । स एव गुणो नेतरः तदुपपादयति स्म भगवान् **कर्मणामिति** । यस्माद्विधिप्रतिषेधाभ्यां अनेन गुणदोषविधानेन कर्मणां नियमः संकोचः कृतः । कुत इत्यत आह जात्योत्पत्त्यैवाशुद्धानां तत्त्वप्राप्तानां संगानां त्याजनेच्छया । अयं भावः । पुरुषस्याशुद्धिर्नाम न प्रवृत्तेरन्यास्ति स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात् । नापि सहसा सर्वतो निवृत्तिः संभवति अत इदं कर्तव्यमिदं नेत्येवं स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते 'उत्पत्त्यैव हि कामेषु प्राणेषु

भाष्यप्रकाशः ।

इति विधिप्रतिषेधयोर्व्यवहारनियमार्थत्वबोधके वाक्ये कर्ममात्रस्य जात्यशुद्धत्वबोधनेन तदङ्गने पुण्यरूपेऽप्यशुद्धिशाबल्यस्य दुरपोहत्वेन सर्वस्यैव पाप्मरूपत्वात् । अन्यथा पुण्यफलस्यापि मुमुक्षूपादेयतायापत्तेः । अतो धर्मान्तरानुक्तावपि न वाक्यस्य जीवपरत्वं शक्यशङ्कम् । आदित्यान्तस्तु न हिरण्यगर्भादिः । मात्स्ये परं धामोद्दिश्य तस्य पूषत्वकथनेन तत्र परब्रह्मण एवाभिप्रेतत्वनिश्चयात् । ध्येयः सदेति वाक्येऽपि परमेश्वर एवोच्यते ।

'नारायणः शिवो विष्णुः शंकरः परमेश्वरः ।
एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' ॥

इति वाराहपुराणवाक्येन तस्य ब्रह्मनामत्वात् । नीरूपेश्वरवादस्येक्षत्यधिकरणव्याख्यान एव निरस्तत्वात् । नचैवं, 'यो देवानां नामधा एक एव', 'एकं सद्विप्रा बहुधा वदन्ति' इत्यादिश्रुत्या, 'हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्' इत्यादिस्मृत्या च सर्वत्र ब्रह्मोपासनायाः शक्यवचनत्वेन देवतामात्रोपासनोच्छेद इति शङ्क्यम् । ज्ञानपूर्वकोपासकान् प्रति तस्येष्टत्वात् । अज्ञान् प्रति तु तदभावात् । 'येऽप्यन्यदेवताभक्ता' इत्यादिभगवद्गीतावाक्यसंदर्भेण तथा निश्चयात् । स्वरूपे विग्रहस्तु नास्त्येव । आकारस्तु स्वरूपात्मक एवेत्यसकृदुक्तमुपपादितं च । तेन 'अप्राणो ह्यमनाः शुभ्रः' इत्यादिश्रुतीनां न विरोधः । अरूपवदेवेति सूत्रे तु रूपवद्भिन्नमेवोच्यते, न तु रूपरहितम् । नञः पर्युदासार्थत्वात् । अन्यथा त्वरूपमित्येतावतापि रूपाभावबोधनसिद्धेर्मतुब्वैयर्थ्यस्य दुर्वारत्वात् । अतो, 'न तस्य कार्यं करणं च' इत्यत्र संकोच एतदेव सूत्रं प्रमाणमित्यसंकोच एव प्रमाणाभावः । श्रुतयस्तूक्ता वक्ष्यन्ते च । उक्तं विष्णुपुराणवाक्यं

रश्मिः ।

स्वजनेषु च' इत्यादिना एकविंशे वेदस्य प्रवृत्तिपरत्वनिषेधात् इति श्रीधर्यनुसारेण 'गुणदोषविधानेन सङ्गानां त्याजनेच्छया' इत्यर्धेन सह श्लोकान्वयः । **मुमुक्ष्विति** आदिशब्देन पुण्यफलार्थं प्रवृत्तिः । धर्मान्तरस्येत्युक्तं दूषयन्ति **अतो धर्म** इति । धाम्नः परमिति विशेषणान्तरलब्धमर्थमाहुः **परं धामे**त्यादि । **तत्रे**ति परधामपूषणि । एवकारो हिरण्यगर्भादिव्यवच्छेदकः । पूषस्थत्वस्य ब्रह्मलिङ्गत्वात् । **देवतामात्रे**ति देवतैव देवतामात्रं तस्योपासनाया उच्छेद इत्यर्थः । **तस्ये**ति उच्छेदस्य । **अज्ञानि**ति पूर्ववाक्याज्ज्ञानित्यर्थः । **तथे**त्यादि 'तेपि मामेव कौन्तय यजन्त्यविधिपूर्वकम्' इति तत्र कथनादिति भावः । **पर्युदासे**ति 'पर्युदासः सदृग्ग्राही' इति रूपवद्भिन्नत्वे सति रूपवद्ब्रह्मेत्यर्थः । **अन्यथे**ति नञः प्रसज्यप्रतिषेधकत्वप्रकारकत्वे तु । रूपवदभावापेक्षया रूपात्यन्ताभावस्य लघुत्वात् । **अत** इति पर्युदासाश्रयणादेव संकोचे लौकिककार्यादौ । **एतदि**ति पर्युदासार्थकनञ्घटितमरूपवत्सूत्र**स्यासंकोचः** पर्युदासं विना यथाश्रुतव्याख्यानं संकोचे । तथा च कार्यत्वावच्छिन्नप्रतियोगिताकाभावः करणत्वावच्छिन्नप्रतियोगिताकाभावश्च विद्यते इति न श्रुत्यर्थः । किं तु लौकिककार्यत्वेत्यादिस्तथा लौकिककरणत्वेत्यादिरर्थः । सूत्रानुसारेण निरुच्य श्रुत्याकाङ्क्षामौनैवत् । **श्रुतय इत्यादि** 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्' इत्याद्याः ।

१. स्वरूपाभिन्नः । २. जनपरिहाणे चुरादिः ।

आकाशस्तल्लिङ्गात् ॥ २१ ॥

अस्य लोकस्य का गतिरित्याकाश इति होवाच। सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते । आकाशं प्रत्यस्तं यन्ति । आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति। तत्र संशयः। भूताकाशो ब्रह्म वेति। ननु कथमत्र संदेहः। आकाशव्योमशब्दा ब्रह्मण्येव प्रयुज्यन्ते ब्रह्मप्रकरणे। कार्यनिरूपणे तु महाभूतवचनः। यथा, आकाश आनन्दो न स्यात्, परमे व्योमन् प्रतिष्ठिते-

भाष्यप्रकाशः ।

त्ववान्तरस्थितिनाशविषयकं, न तु महाकार्यविषयकम्। शरीराणीति बहुवचनेन तथानिश्चयात्। अत इदं भिक्षावैयग्र्यदशायामेवावादीति दिक् । अतो यत्रासाधारणधर्मोपदेशोऽभिमान्यादिभेदव्यपदेशो वा तत्र रूपोक्तावनुक्तौ वा परं ब्रह्मैवाभिधीयत इति निश्चयः ॥ २० ॥

इति षष्ठमन्तस्तद्धर्माधिकरणम् ॥ ६ ॥

आकाशस्तल्लिङ्गात् ॥ २१ ॥ छान्दोग्यप्रथमप्रपाठकस्थं विषयवाक्यमुपन्यस्याधिकरणप्रयोजनं विचारयन्ति नन्वित्यादि, विचार इत्यन्तम्। तत्र कथंपदे गृहीतं प्रकारं विभजन्ते आकाशेत्यादि । यद्यपि लोकप्रसिद्धेः प्रयोगप्राचुर्याच्च संदेहः संभवति, तथाप्यस्य वाक्यस्य प्रकरणावरुद्धत्वेन प्रकरणे चाकाशपदेन कारणमुक्त्वा कार्यनिरूपणस्योपक्रान्ततया

रश्मिः ।

'कांस्यघण्टानिनादस्तु यथा लीयति शान्तये ।
ॐकारस्तु तथा योज्यः शान्तये सर्वमिच्छता ॥
यस्मिन् संलीयते शब्दः तत्परं ब्रह्म गीयते ।

इति ब्रह्मविद्योपनिषदि लयस्य महेश्वरात्प्रवचने स्वाप्ययादिति सूत्रे च ब्रह्मणो न सर्वव्यवहारातीतत्वम्। कुतः स्वस्मिन्नप्ययालयात्। स्वस्वरूपं तु द्वादशे 'एष नैमित्तिकः' इत्यत्र विश्वसृक्पदेन ज्ञानं तल्लक्षणं सर्वोपनिषदि अवस्थात्रयभावाद्भावसाक्षि स्वयं भावरहितं नैरन्तर्यं चैतन्यमित्युच्यत इति । 'अनन्तासनपदेन पूर्वव्यापकं चैतन्यं तत्रैवानन्तं नाम मृद्विकारेषु मृदि सुवर्णतन्तुकार्येषु अव्यक्तादिसृष्टिप्रपञ्चेषु पूर्वं व्यापकं चैतन्यमनन्तमित्युच्यते इति आत्मभूयदेवानन्दोनाम सुखचैतन्यस्वरूपमपरिमितानन्दसमुद्रः अविशिष्टसुखस्वरूपश्च आनन्द इत्युच्यते' इति । **निश्चया**दिति महाप्रलयेऽशरीरिणः कर्तृत्वम्। **भिक्षेत्यादि** विज्ञानभिक्षुत्वादिन्द्रभिक्षुत्वं विज्ञानक्षरणादियं भिक्षावैयग्र्यदशेत्याशयः। **असाधारणे**ति पूर्वसूत्रोक्ता अपहतपाप्मत्वादयः । **अभीत्यादि** अयं द्वितीयसूत्रे य आदित्ये तिष्ठन् इत्यत्र ॥ २० ॥

इति षष्ठमधिकरणम् ॥ ६ ॥

आकाशस्तल्लिङ्गात् ॥ २१ ॥ **गृहीतमित्यादि** 'किमश्च' इत्यनेन प्रकारे थमुप्रत्ययात् प्रत्ययांशेन गृहीतं प्रकारमित्यर्थः। **विभजन्त** इति प्रकरणाभ्यां विभजन्ते। तथा च प्रकरणभेदात् न द्वितीयकोटिरतः संशये द्वितीयकोटिः किंप्रकारेति प्रश्नः। कोशप्रसिद्धिं श्रीभागवतादौ भूताकाशे प्रयोगप्राचुर्यं च समाकलय्य लौकिकस्फूर्तिं पुरस्कृत्याभ्यस्तवेदान्तानां पूर्वपक्षविगानं समादधानाः किंचिदाहुः **यद्यपीत्यादिना**। **प्रकरण इत्यादि** उभयोरुपकार्योपकारकयोः कार्यकारणयोरा-

त्यादि । आत्मन आकाशः संभूत इति कार्यनिरूपणम् । अतः प्रकरणादेव संदिग्धनिर्णये किमिति सूत्रारम्भः । जन्मादिलक्षणसूत्रेण चायमर्थो निर्णीतः । अन्यथा ब्रह्मशब्देऽपि संदेहः स्यात् । महाभूतवेदादिवाचकत्वात् । तस्मात् प्रकरणादेव परिज्ञानं भविष्यतीति चेत् । उच्यते । असंदिग्धे प्रकरणे तथैव निर्णयः । इह पुनः प्रकरणमपि संदिग्धम् । अतो विचारः ।

अवान्तरविद्यायां पर्यवसितप्रकरणवदस्यापि प्रकरणस्य भूताकाश एव पर्यवसानमिति लोकभाष्यन्यायेनाकाशो भौतिक एवेति पूर्वपक्षस्तत्राह ।

भाष्यप्रकाशः ।

प्रकरणादेवाकाशशब्दार्थस्य निर्णयसिद्धेराकाशः प्रकरणादिति सूत्रयितव्यम् । अथ प्रकरणापेक्षया लिङ्गस्य बलिष्ठत्वात् तेन निर्णिनीषा तदा तु जन्मादिसूत्रे लिङ्गस्य निर्धारितत्वात् तेनैवैतद्वाक्यनिर्णयसिद्धेः सूत्रमेव न प्रणेतव्यम् । अथ जन्मादिसूत्रे लक्षणस्यापरीक्षितत्वान्न लिङ्गता, तदा त्विदानीं तस्याः सिद्धत्वादाकाशो ब्रह्मलिङ्गादित्येवं प्रणेतव्यम् । न तु तल्लिङ्गादिति पूर्वपक्षाशयः । प्रतिवचनाशयस्तु स्फुट एव । प्रकरणस्य संदिग्धत्वं तु उपक्रमे उद्गीथोपासनस्योक्तत्वादत्र परोवरीयोरूपस्योत्कृष्टस्य फलस्य कथनाच्च ज्ञेयम् । तेन विचारस्यावश्यकत्वमिति । अधिकरणसंगतिस्तु प्रसङ्गरूपा । पूर्वाधिकरणयोः प्रत्ययकृते संदेहे वारितेऽत्र प्रकृतिकृतसंदेहस्य वारणीयत्वादिति । प्रयोजनमुक्त्वा पूर्वपक्षमाहुः अवान्तरेत्यादि । तथा च यथा जानश्रुत्युपाख्यानं संवर्गविद्यायां पर्यवसितं तथास्यापि प्रकरणस्य भूताकाश एव पर्य-

रश्मिः ।

काङ्क्षारूपे ब्रह्मप्रकरणेऽत्र तूद्गीथब्रह्मप्रकरणे चकारेण विषयवाक्ये । अत्र लोकस्य भूतस्य गतिः कारणम् । निर्णयेत्यादि । आकाशपदस्य ब्रह्मवाचकत्वनिश्चयो ज्ञानं तस्य सिद्धेरित्यर्थः । भाष्ये । कार्यनिरूपणं किमित्याकाङ्क्षायामाहुः आत्मन इति । प्रकृते । जन्मादिलक्षणेत्यादिभाष्यं विवृण्वन्ति स्म अथेत्यादि । लिङ्गस्येति जगजन्मादिकर्तृत्वरूपस्य श्रुतिसामर्थ्यस्य । ब्रह्मलिङ्गादिति । नन्वसिद्धस्य लिङ्गस्य कुत उपन्यासः व्यासोक्तत्वात् सेत्स्यतीति । न तु तदिति तस्माल्लिङ्गात्तल्लिङ्गादित्यर्थेऽसिद्धत्वात् । प्रतीत्यादि उच्यत इत्यादिनोक्तस्य प्रतिवचनस्येत्यर्थः । प्रतिवचने किंचिद्विवृण्वन्ति स्म प्रकरणस्येति । उक्तत्वादिति 'ॐमित्येदक्षरमुद्गीथमुपासीत' इतिश्रुत्येत्यर्थः । परोवरीय इति आकाशः परायणमित्यस्याग्रे पठ्यते 'स एष परोवरीयानुद्गीथः' इति । एवं च महाप्रकरणवदवान्तरप्रकरणमपि ह्यात्मपरमाकाशपरं वेति संदिग्धं वरीयसः का साम्नो गतिरिति स्वर इति होवाचेत्यादिश्रुत्युक्तस्वरप्राणान्नादेः सकाशादतिशयेन वरः वरीयान् इति व्युत्पत्तिः । परोवरीयान् परमात्मेति तदर्थः । विरुद्धा द्वितीया कोटिः पूर्वपक्षभाष्यात्म । अतो विचार इत्यत्र भाष्येऽत इत्यत्र सार्वविभक्तिकस्तसिलित्याशयेन तस्य भाष्यस्य विवरणम् । तेन विचारस्येति । स्मृतस्योपेक्षानर्हत्वरूपं प्रसङ्गं स्मारयन्ति स्म पूर्वेत्यादि । प्रत्ययेत्यादि यद्यपि मयट्प्रत्ययमात्रकृतसंदेहो वारितस्तथापि ह्यधिकरणानां न्यायरूपत्वेनैवमुक्तम् । किं च पूर्वाधिकरणे यद्यपि हिरण्यशब्द आनन्दवाचीति भाष्येण प्रकृतिकृतसंदेहोपि वारितस्तथापि प्रकृतिमात्रकृतसंदेहो न वारितः इति प्रत्ययकृत इत्युक्तम् । अत्र तु विविक्तप्रकृतिकृतसंदेहो वारितः । इतिद्व्यधिकरणारम्भप्रयोजनसमाप्तौ । जान इत्यादि छान्दोग्ये षष्ठे प्रपाठके इदमस्ति । जनश्रुतस्यापत्यं जानश्रुति-

आकाशस्तल्लिङ्गात्॥ आकाशः परमात्मैव । कुतः। तल्लिङ्गात्। श्रुतिलिङ्गादयो नियामकत्वेन पूर्वतन्त्रवदिहापि गृह्यन्ते। लिङ्गं श्रुतिसामर्थ्यम्; एकवाक्यता च सर्वासां ब्रह्मश्रुतीनाम्। तत्र ब्रह्मैव जगत्कारणमिति निःसंदिग्धेषु

भाष्यप्रकाशः ।

वसानम् । लोकेऽवगतसामर्थ्यः शब्दो वेदेऽपि बोधक इति लोकभाष्यन्यायेनात्र भूताकाशग्रहणस्यैव युक्तत्वात् । लिङ्गापेक्षया श्रुतेः प्राबल्यस्य पूर्वतन्त्रे सिद्धत्वात्। 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति जैमिनिसूत्रात् । ब्रह्मग्रहणे तु लक्षणापत्तेः। बाधकं विना तदादरस्यानुचितत्वात्। नचाकाशते, आकाशयतीति वा योगेन प्रकाशकं ब्रह्मोच्यतेऽतो न दोष इति वाच्यम्। रूढ्यपेक्षया योगस्यापि दुर्बलत्वात्। नच लिङ्गबोधकवाक्यासंगतिः। सर्वाणि ह वा इमानि भूतानीति सर्वपदस्य भूतपदस्य च वाय्वादिषु संकोचात् सुखेन संगतेः । किंचेह, इमानीति कथनादवान्तरभूतसंबन्ध्यवकाशरूप एव स ग्राह्यः। फलं तु तादृशोपासनाबलादेव भविष्यतीति पूर्वः पक्ष इत्यर्थः। सूत्रं पठित्वा समादधाना व्याचक्षते **आकाश इत्यादि** । **नियामकत्वेनेति** अर्थविशेषनिर्णायकत्वेन । **श्रुतिसामर्थ्यमिति** अन्यानपेक्षस्य शब्दस्य स्वरसेनार्थबोधकत्वम् । **एकवाक्यतेति** ।

रश्मिः ।

स्तदुपाख्यानं 'वायुर्वा व संवर्गः' इत्याद्युक्तायां संवर्गविद्यायाम्। संवर्गपदस्य योगस्तु संवृङ्क्ते स्थितिकाले सर्वमात्मनि स्थापयतीति संवर्ग इति यदा वाऽग्निरुद्वायति वायुमेवाप्येति इति श्रुतेः उद्वायतीत्यस्य शाम्यतीत्यर्थः। लोके येष्वर्थेषु प्रसिद्धानि पदानि सति संभवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम्। नाध्याहारादिभिरेषां कल्पयितव्योर्थः परिभाषितव्यो वेति जिज्ञासाधिकरणस्थं शाबरभाष्यं तदेव लोकभाष्यपदेनोच्यते तेन न्यायेनेत्याहुः **लोक इत्यादि** । **लक्षणेति**। आकाशपदस्येत्यर्थः। शरीरशरीरिणोरध्यासकः संबन्धो लक्षणा। बीजस्य तात्पर्यानुपपत्त्यन्वयानुपपत्त्यन्यतरस्याभावाल्लक्षणापि न संभवतीत्याहुः **बाधकमित्यादिना** । **वाय्वादिष्विति** 'आकाशाद्वायुर्वायोरग्निरग्नेरापः' इति श्रुत्युक्ताकाशकार्येषु । **इति कथन** इति इदमो रूपस्य प्रत्यक्षगत्वेनावान्तरभूताकाशस्यैव प्रत्यक्षत्वात्तथेत्यर्थः। **तादृशेति** तादृशाकाशोपासनाबलात्। **अर्थेत्यादि** एतेन तल्लिङ्गादित्यस्य श्रुतेर्लिङ्गादित्यर्थोऽबोधि। इदानीं तस्य तात्पर्यनिर्णयस्य लिङ्गं तल्लिङ्गं तस्मादित्यर्थं हृदिकृत्याहुः **विभाग इत्यादि** । अयमाशयोत्र बोध्यः। ब्रह्मवाक्यानामेकवाक्यतोक्ता सा च दुर्लभा बहुत्वविशिष्टेषु ब्रह्मवाक्येषु एकत्वावच्छिन्नाया वाक्यताया अशक्यवचनत्वात्, एकत्वस्य बहुत्वविरुद्धत्वात्। तस्मादत्रैकवाक्यता पूर्वतन्त्रकृता गृह्यते लाघवात् सेयमेकवाक्यता भावार्थपादभाष्येऽतन्वन् श्रीमदाचार्याः। एकस्मिन् वाक्ये न तु बहुषु वाक्येषु तामेव गृह्णीमः । अस्य लोकस्येत्यस्याकाशपरत्वमपास्य ब्रह्मवाक्यत्वमत्र सूत्रे व्यासपादैर्निरणायि। एवं चास्य यतो वा इमानि इत्यस्य चाधिकरणसंगत्या विभागेपि साकाङ्क्षत्वेन ब्रह्मणो जगज्जन्मादिकर्तृत्वरूपेर्थैकत्वादेकं वाक्यमपरनये वेदलोकशब्दयोरेकत्ववत् । अथैकत्वमाकाशपदस्य भौतिकाकाशपरत्वापवदनेन भवति तदपोहितमाकाश इत्यनेनाधिकरणांशेन तत्र रूढ्या योगस्यापहरणात् कथमाकाशपदवाच्यत्वं ब्रह्मणः इत्यत उत्तरमपाठीत् तल्लिङ्गादिति तस्य तात्पर्यस्य योनिर्निर्णयः तस्य लिङ्गादिति। अयमर्थः। आकाशपदस्यास्तु रूढिः परं त्विह नास्ति । तात्पर्यवृत्तिनिर्णायकानां पदानामासीत्सत्त्वानन्दानामिह सत्त्वात् इति। नहि

सिद्धम् । सर्वशब्दवाच्यत्वं ब्रह्मण्येव । तत्र वाक्यार्थापेक्षया पदार्थस्य दुर्बलत्वाद्

भाष्यप्रकाशः ।

विभागे साकाङ्क्षत्वे सत्येकार्थप्रतिपादकता । सा च समन्वयरूपा । उपपत्त्यात्मकं तात्पर्यनिर्णयलिङ्गम् । तेन तल्लिङ्गादित्यस्य श्रुतिसामर्थ्यात्तात्पर्यनिर्णयलिङ्गाच्चेत्यर्थः सिद्ध्यति । मुख्यत्वादिति मुख्यार्थत्वात् । तथाच, 'यतो वा इमानि भूतानि जायन्ते' इत्यादिषु निखिलजडजीवकारणत्वं ब्रह्मणि सिद्धम् । अत्रापि तदेव सर्वपदेन निखिलान्युद्दिश्य, भूतपदेन च देहविशिष्टजीवतया महाभूततया च तानि जीवजडरूपेण निष्कृष्य तत्कारणत्वमाकाशे बोध्यते । तथा, एभ्य इत्यनेन पूर्वोक्तान्येव भूतानि परामृश्य ततो ज्यायस्त्वं च बोध्यते । तथा परमस्थानत्वरूपं परायणत्वं च । तद्यदि भूताकाशो गृह्येत, तदा सर्वपदार्थसंकोचेन सर्वपदसामर्थ्यस्वार्थबाधाद् भूतादीनां पदानामपि तद् बाध्येत । तच्चासंगतम् । एकपदानुरोधेनानेकपदार्थसंकोचात्मकस्य सामर्थ्यबाधस्यानुचितत्वादिति । किंच । 'सर्वे वेदा यत्पदमामनन्ति' इति 'तं त्वौपनिषदम्' इति च श्रुत्या सर्वस्य वेदस्य ब्रह्मण्येव तात्पर्यमिति सिद्धम् । तद्यदि निरङ्कुशसर्वकारणत्वमस्मिन् वाक्ये भूताकाशस्योच्येत, तदार्थभेदाद् विभागे साकाङ्क्षत्वाभावाच्च सर्वासां श्रुतीनामेकवाक्यता व्याहन्येत । यद्यपि सर्वे वेदा इत्यत्रासंकुचितवृत्तिना सर्वशब्देन ब्रह्मणि सर्वशब्दवाच्यत्वं तत्तत्पदार्थरूपतया सिद्धं, तथापि तत्र वेदे वाक्यार्थापेक्षया तदेकदेशभूतस्य पदार्थस्य दुर्बलत्वाद् वाक्यार्थ एवादरणीयः । वाक्यार्थस्तु सर्वगतित्वादिः । गतिराश्रयः । प्रश्ने, शालावत्येनैतल्लोकगतेः पृष्टत्वेऽपि जैबलिना तदुपपादनार्थं सर्वभूतोत्पत्तिप्रलयाधारत्वं

रश्मिः ।

जगज्जन्मादिकर्तृवाचकपदानि प्रयुञ्जतो भगवतो व्यासस्य भौतिकाकाशे तात्पर्यास्तित्वं वक्तुं शक्यम् । नवार्थासंगतौ रूढिमाद्रणीमो वयं लिङ्गाभावात् । अत उक्तमेकार्थस्य ब्रह्मरूपस्य प्रतिपादकता । **साच समन्वयरूपेति** । ननु तर्हि तात्पर्यलिङ्गादित्येव सिद्धे निर्णयपदमधिकं निग्रहस्थानमिति चेन्न तात्पर्यलिङ्गेन चेत्येव तल्लिङ्गादित्यनेन तदपल्युलत्[1] । तथाप्यत्र यदुददानं तत्फलं तु ह्योमित्येकाक्षरं ब्रह्म सर्वं तस्योपव्याख्यानं इति निर्णयस्तत्संग्रहणार्थम् । अन्यथाकाशशरीरं ब्रह्मेति श्रुतिरूपाप्रतिहताज्ञेन वेदेन ब्रह्मशरीरे समन्वयः स्यात् एतदग्र उपपादयिष्यामो वयम् । निष्कृष्टमर्थमाहुः **रूपेत्यादि** । अत्रेदं विशेषणमुत्पत्त्यात्मकस्यास्य लोकस्य का गतिरित्यादिश्रुतिस्थत्वेन सूत्रे व्यावृत्त्यर्थं किं त्वेकवाक्यतया श्रौतं यदेष आकाश आनन्दो न स्यादित्युक्ता उपपत्तिरेव लिङ्गं प्रथमज्ञसेः पूर्वतन्त्रे उत्पत्तिपदार्थत्वात् । **तात्पर्येत्यादि** । आकाशशब्देनात्र ब्रह्मबोधो भवतु इत्याकारिकेच्छा वक्तुस्तात्पर्यम् । **सिद्ध्यतीति** । न च ब्रह्मलिङ्गादित्यर्थः साधुः तस्याधिकारसूत्रलभ्यत्वेपि साध्यत्वात् । अर्थस्य ब्रह्मणो मुख्यत्वेन रूपेणोपस्थितिरित्याहुः **मुख्यार्थेत्यादि** । पूर्वभाष्यार्थस्तु **सिद्धमिति** शास्त्रयोनित्वादिति सूत्रांशेन सिद्धम् । **सर्वशब्देति** कार्यकारणैक्यमर्षणात् । ओमित्येकाक्षरं ब्रह्म सर्वं तस्योपव्याख्यानमिति श्रुतेरेवकारः । एवं पदवाच्यत्वमुक्त्वा वाक्यवाच्यत्वमपि ब्रह्मणीत्याहुः **तत्र वाक्यार्थेति** । **दुर्बलत्वादिति** यथा घटः भवत्येतयोरेकतरानुक्तौ सत्यां न शक्यार्थो दुर्बलो भवति परस्परं सापेक्षत्वात् सापेक्षमसमर्थं भवति इत्युक्तेः एकतिङ् वाक्यमिति सापेक्षत्वाभावो वाक्यार्थः प्रबलः । सापेक्षत्वाभावात् अन्यत्सर्वमग्रे स्फुटम् । तत्र ब्रह्मैवेत्यारभ्य यावत्समाप्ति सर्वोपि ग्रन्थस्तावदुपपत्तिरूप-

१. पल्युल लवनपवनयोक्षुरादिः ।

रश्मिः ।

तात्पर्यलिङ्गरूपद्वितीयार्थोपपादनायेत्याहुः **तथा चेत्यादिना** । **अत्रेति** ब्रह्मवाक्ये । **सर्वपदेति** सर्वाणीति विषयवाक्यस्थसर्वपदार्थस्य संकोचेन आकाशमात्रकार्येषु संकोचस्तेन । **अर्थबाधादिति** । केवलोत्पन्नकार्यरूपत्वस्य ब्रह्मत्वात् बाधेन तथेत्यर्थः । भूतादीनां वाय्वादीनां पदानां वाय्वादि-वाचकानां सर्वपदसामर्थ्यं तत्तद्वाचकत्वेन बाध्येत ततश्च सर्वाणि ह वा इमानि भूतानीत्यत्र भूतानीत्यस्य सर्वाणीति विशेषणासंगतिरिति भावः । **एकपदेत्यादि** आकाशपदेत्यर्थः । **सर्वशब्देत्यादि** भाष्यं विवृण्वन्ति स्म **किं चेत्यादिना** । योगजधर्मेण प्रत्यासत्त्यात्मकेन अयं महान् पुरुष इत्यत्र ब्रह्मणः सर्वशब्द आब्रह्मतृणशब्दस्तच्छब्दपर्यायो महापुरुषशब्दः तद्वाच्यत्वम् । यद्वा सर्वाणीतिशब्दस्तद्वाच्यत्वम् । अकारो वै सर्वा वागिति श्रुतेरशब्दवाच्यत्वं ब्रह्मणः एवं च सर्ववाचकः शब्दः सर्वशब्दोकारशब्दश्च तद्वाच्यत्वम् । अत्र कठवल्लीबृहदारण्यकश्रुती प्रमाणयन्ति **सर्वे वेदा इत्यादि** । पदमक्षरमामनन्ति अभ्यस्यन्ति व्यष्टिसमष्टिभेदेन समष्टेरुक्तत्वाद्व्यष्टेर्वक्ष्यमाणत्वात् उपरमामः । ब्रह्मपदं वेदार्थे वेदात्परात्परे च वर्तते तत्र वेदार्थे 'मां विधत्तेभिधत्ते मां' इति भगवद्वाक्या-द्वेदार्थे ब्रह्मण्यभिधा वेदात्परात्परे तात्पर्यं वक्तुरिच्छात्मकम् । यद्यपि अस्मत्पदेन मामित्यत्र परात्परमुच्यते तथाप्यदृश्यत्वाधिकरणेऽक्षराभिन्नमक्षरे स्थितमित्युक्त्योपपन्नम् ।

'नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत ।
सगुणं ब्रह्म सैर्वेदं वस्तुबुद्धिर्न तेषु नः ॥
ब्रह्मेति पठ्यतेस्माभिर्यद्रूपं निर्गुणं परम् ।
वाङ्मनोगोचरातीतं ततो न ज्ञायते तु तत्' ॥ इति

ज्ञानं तु ह्यभिधया प्रतिपादनानन्तरमतो ज्ञानानीत्यत्राभिधावृत्तिः श्रीनारायणादौ लभ्यते । न ज्ञायते इत्यत्र वाङ्मनोगोचरातीते त्वपोद्यतेतस्तत्र तात्पर्यम् । यदा पदं पदनीयमिति कठवल्ल्यनुसार्यर्थः तदा तु तात्पर्यवृत्त्या प्रतिपादयन्ति । न चानेकार्थसंकटे तात्पर्यज्ञानं कारणं न तु वृत्त्यन्तरम् । वृत्तिस्तु शक्तिलक्षणान्यतरसंबन्ध इति शङ्क्यम् । शास्त्रान्तरत्वात् । व्यञ्जनाया आलंकारिकसंमतत्वाच्च । प्रस्थानरत्नाकरे तु व्यञ्जना तात्पर्येणैव गतार्थेत्युपपादितम् ।

'गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्' ॥

इत्यत्र मा त्वं गम इत्यभावे न व्यञ्जनापि तु तात्पर्यवृत्त्यैव निर्वाहः । लक्षणावृत्त्येति नैयायिकाः । तत्र पुष्पवच्छब्दव्यतिरिक्तस्थले युगपद्वृत्तिद्वयविरोधः । **तत्र वाक्यार्थेत्यादिभाष्यं** विवृण्वन्ति स्म **यद्यपीत्यादिना** । तत्तत्पदानि घटपटादिपदानि तदर्थतया व्युत्पत्त्येति यावत् । तदुक्तम् 'सर्वाणि रूपाणि विचित्यं धीरः नामानि कृत्वाभिवदन् यदास्ते' इति । एवं चास्मिन् पक्षे ह्याकाशपदं न शक्त्यात्मपरमपि तु गौण्येति । **तथापि तत्रेति** व्याख्येयम् । **वेद इति** व्याख्या एतद्व्यवच्छेदकं पदं लोकाद्वैदिकपदपदार्थानां भिन्नत्वाद्वैदिकेषु वाक्येषु लौकिकपदार्थस्य शेषत्वख्यापनाय भाष्योक्त-त्वाच्च । **सर्वगतित्वादिरित्यत्रादिपदेन** उपसंहारं घटयांबभूवुरुपक्रमोपसंहारयोरर्थनिर्णायकत्वात् । अस्य लोकस्य का गतिरित्यत्र गतिराश्रयः कारणमिति यावत् । मध्ये सर्वभूतोत्पत्तिः सर्वभूतास्तगमनं ज्यायस्त्वे विषयवाक्यनिरुक्तानि ज्ञेयानि वाक्यार्थसमुदायस्य महावाक्यार्थत्वात् । यथादिपदेन

१. (पिपीलिका) शाकल्यब्राह्मणे । २. सर्वमित्यतः प्रत्ययस्डा । ३. विचिन्त्येत्यर्थः ।

वाक्यार्थः सर्वगतित्वादिः । तद् वाक्यार्थान्यथाऽनुपपत्त्या आकाशपदार्थो ब्रह्मेति सर्वशब्दवाच्यत्वाच्च न लक्षणा । मुख्यत्वाच्च । यावन्मुख्यपरत्वं संभवति तावन्न कस्यापि वेदान्तस्यापरब्रह्मपरत्वमिति मर्यादा । तस्माद्, यदेष आकाश आनन्दो न स्यादितिवदत्राप्याकाशो ब्रह्मैवेति सिद्धम् ॥ २१ ॥

इति प्रथमाध्याये प्रथमपादे सप्तमं तल्लिङ्गाधिकरणम् ॥ ७ ॥

भाष्यप्रकाशः ।

वदता परायणपदेन सर्वगतित्वं प्रतिपाद्यत इति । तथा आदिपदेन सर्वज्यायस्त्वं परोवरीयस्त्वमनन्तत्वं च । तत् तस्मात् कारणाद् वाक्यार्थान्यथानुपपत्तिरूपयोपपत्त्यापि, आकाशपदस्य ब्रह्मण्येव तात्पर्यमित्यर्थः । सर्वशब्दवाच्यत्वादित्यादिर्ग्रन्थस्तूत्तानार्थः । एवमत्र श्रुतिसामर्थ्यरूपेण लिङ्गेन उपपत्तिरूपेण तात्पर्यलिङ्गेन चेति द्विधा व्याख्यातम् ।

रश्मिः ।

भाष्ये आकाशः परायणमित्यग्रहीषुराचार्यास्तथादिपदेन विषयवाक्याग्रेतनानां स एष परोवरीयानुद्गीथः स एषोनन्त इति श्रुत्युक्ताः प्रतिपाद्यन्ते इति । एकतिङ् वाक्यं तेन परायणमित्यस्य क्रियापदमन्तरा विभक्त्यनुत्पत्तेर्वाक्यत्वमेवमग्रेपि । **तद्वाक्यार्थे**त्यादिभाष्यं विवृण्वन्ति स्म **तत्तस्मादि**त्यादि । **वाक्यार्थे**ति वाक्यार्थस्य सर्वगतित्वादेः अन्यथाभाँतिभाकाशपरत्वेनुपपत्तिस्तद्रूपयेत्यर्थः **तात्पर्य**मिति आकाशपदस्य तात्पर्यवृत्तिर्न तु गौणीत्यर्थः । **उत्तानार्थ** इति मुख्यार्थत्वात्तद्बाधाभावान्न लक्षणेति प्रयोजनमेकमपरमाहुः **याव**दिति । **इतिव**दिति य एष आकाशः परमात्मा न स्यात् जगज्जन्मादिकर्ता कः स्यात् अतः परिशेषात् आकाशपदवाच्यं ब्रह्मैवेति सिद्धमित्यर्थः । अतोस्माभिः प्रासङ्गिकविवरणमात्रं कृतं न तूपपादनादीति भावः । **उपपत्ती**त्यादि । ननु तात्पर्येण श्रुतिसामर्थ्यलिङ्गमित्येवास्तु किंचाकाशपदार्थो ब्रह्मेति तदिति भाष्ये आकाशपदवाच्यं तत् लिङ्गादित्येव सूत्रान्वयध्वननं विना तल्लिङ्गादित्यत्र समासं ब्रह्मपदानुवर्तनात् । तत्कथं द्विधा तल्लिङ्गादिति लिङ्गव्याख्यानं बाढम् । एतदपेक्षया कुतः तल्लिङ्गादिति भाष्यस्यैव विस्पष्टत्वात् । सामर्थ्यपदेनैव चारितार्थ्यात्तत्पदवैयर्थ्यापत्तेः । श्रुतिपदवैयर्थ्याद् द्वितीयो हेतुरावश्यकः श्रुतिपदात्तात्पर्योपलब्धेः इति कुतो द्विधा व्याख्याने दोषः । एवं चाकाशपदवाच्यं तल्लिङ्गादित्येव सूत्रान्वयः । व्यङ्ग्यार्थापेक्षया शक्यार्थस्य बलीयस्त्वादिति । द्वितीयं लिङ्गम् । तथा च पूर्वपक्षाशयवर्णने तल्लिङ्गादिहेतुः आकाशः प्रकरणादिति प्राप्ते आकाशस्तलिङ्गात् प्रकरणापेक्षया लिङ्गस्य बलिष्ठत्वादुक्तं एवमपि जन्मादिसूत्रेण सिद्धसाधनत्वात् पुनरुक्तिः जन्मादिसूत्रीयलिङ्गस्यापरीक्षितत्वात् काञ्चनमयधूमहेतुवदलिङ्गता अलिङ्गतायां तस्माल्लिङ्गादिति कर्मधारयसमासगर्भिततल्लिङ्गादित्यस्याप्यलिङ्गता । तन्निवृत्त्यर्थं तस्य लिङ्गं तल्लिङ्गमिति षष्ठीतत्पुरुषे तच्छब्दवैयर्थ्यं तदा ब्रह्मेति जिज्ञासासूत्रादनुवर्त्य ब्रह्मलिङ्गादिति हेतुः । आकाशः तत् जगत्कर्ता ब्रह्मलिङ्गादिति हेतुः सिद्धः । तत्र ब्रह्म वेद इतिश्रुतिसामर्थ्यरूपेण लिङ्गेन लिङ्गं श्रुतिसामर्थ्यमभिधालक्षणं तेनाकाशते आकाशयतीति वाकाशः इत्याकाशे योगरूढ्यभिधारूपेण लिङ्गेनाकाशस्य जगत्कर्तृत्वेनानुमितिविषयत्वं यदा तु यदेष आकाश आनन्दो न स्यादित्युपपत्तिरूपेण तात्पर्यलिङ्गेनानन्दत्वे नानुमितिविषयत्वम् । जगत्कर्ता आकाशत्ववानित्यनुमितिः । इदमनुमानं ब्रह्मविदि साधारणं ब्रह्मविदि ब्रह्मलिङ्गरूपहेतुसत्त्वेपि जगत्कर्तृत्वरूपसाध्याभावेन साध्याभाववद्वृत्तित्वाद्धेतोः । श्रुतिसामर्थ्य-

१. इदं व्याख्येयम् । २. इयं व्याख्या ।

भाष्यप्रकाशः ।

अन्ये तु, तल्लिङ्गादित्यस्य, ब्रह्मासाधारणधर्मादित्यर्थं वदन्ति । केचिच्चैवं सूचयन्ति। तन्मतेऽधिकरणवैयर्थ्यम्। तद्धर्मोपदेशाधिकरणेनैव गतार्थत्वादिति।

विज्ञानभिक्षुस्तु, काण्वचतुर्थाध्याये सुषुप्तं जीवमुपक्रम्य पठ्यते, 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इत्यादि। तत्र किं भूताकाशस्तद्देवता वा ब्रह्म वोच्यत इति संशयः। तद्बीजं तु उपक्रमोपसंहारयोर्ब्रह्मवाचकब्रह्मात्मादिपदवन्मुख्यवाक्ये भूताकाशादिवाचकस्याकाशपदस्य श्रवणम्। अन्यतरस्य गौणत्वे नियामकाभावस्त्रयाणामपि स्वापाधारत्वादविशेषश्च। निर्णयस्तु, आकाशो ब्रह्मैवेति। हेतुस्तु तल्लिङ्गात्। लिङ्गानि तु, स यथोर्णनाभिस्तन्तुनोच्चरेत्' इति 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति' तस्योपनिषत् सत्यस्य सत्यमित्यादीनि। सर्वश्रुतिषु ब्रह्मणि तथा दृष्टान्तदर्शनात्। अचेतनस्य भूताकाशस्याग्निविस्फुलिङ्गदृष्टान्तानर्हत्वात्। तद्देवतायाश्च सर्वदेवान्तर्गतत्वेनाकारणत्वात्। य एवायमाकाशे पुरुष इति पूर्ववाक्येनाकाशदेवताया ब्रह्मत्वप्रतिषेधाच्च। सत्यस्य सत्यमिति च नामपूर्ववाक्येन ब्रह्मण्येव व्याख्यातम्। तत्र सत्यशब्देन पञ्चभूतानि व्याख्याय तदपेक्षयापि निषेधशेषं ब्रह्म सत्यमिति श्रुत्यैव स्पष्टमुक्तत्वात्। स्कान्देऽपि,

रश्मिः ।

मुपपत्तिरूपं लिङ्गद्वयं साध्याभाववद्वृत्तिगृहीतमतो व्याख्यातमित्यर्थः। **अन्य** इति भास्कराचार्याः। **वदन्तीति** तथा च तद्भाष्यम्। तल्लिङ्गमव्यभिचारी धर्म इति। **केचिदिति** शंकराचार्यादयः। तथा च तद्भाष्यं परस्य हि ब्रह्मण इदं लिङ्गम्। 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इतिरामानुजभाष्यम्। निखिलजगदेककारणत्वं सर्वस्माज्ज्यायस्त्वं परायणमित्यादीनि परमात्मलिङ्गान्युपलभ्यन्ते इतिमाध्वभाष्यम्। स एष परोवरीयानुद्गीथः स एषोनन्त इत्यादि तल्लिङ्गादिति। एवमसाधारणधर्मे स्वतात्पर्यवृत्तिं कुर्वन्तीत्यर्थः । शैवभाष्येप्येवं ज्ञातव्यम्। **इतीति** बोध्यमिति शेषः । **तदेषामिति**। स जीवः प्राणानामिन्द्रियाणां स्वविज्ञानेन चैतन्येन विज्ञानं प्रकाशनसामर्थ्यमादाय गृहीत्वा उत्तानार्थेयमग्रे। **स्वापेत्यादि** इदं तद्भाष्यप्रामाण्यात् सुष्ठु श्रुत्यन्तराच्च मनसोप्याधारत्वं सुष्ठु 'कामः संकल्पः' इत्यादिश्रुतेः । यथोर्णनाभिरिति श्रुतिर्बृहदारण्यके तस्य ब्रह्मणः उपनिषदिति नाम। **अकारणेति** द्रक्ष्याम्यहमिति चक्षुर्दध्रे इत्येवं नियतकार्यकारणत्वेनान्यत्राकारणत्वादित्यर्थकः व्यापकत्वेन वा तथात्वात्। **पूर्वेत्यादि** 'य एवायमाकाशे पुरुष एतमहं वा ब्रह्मोपासे' इतिगार्ग्यवाक्यं ब्रह्मत्वप्रतिषेधकं तु सहोवाचाजातशत्रुर्मामेतस्मिन् संवदिष्ठा इत्यजातशत्रोर्ब्राह्मणस्य वाक्यं तेनेत्यर्थः। श्रुत्यन्तरेणाप्याकाशदेवतातिरिक्तत्वमाह भगवान् भिक्षुः **सत्यस्येत्यादिना**। **निषेधशेषमिति**।

स वै न देवासुरमर्त्यतिर्यङ्
न स्त्री न षण्ढो न पुमान् न जन्तुः।
नायं गुणः कर्म न सन्न चासन्
निषेधशेषो जयतादशेषः ॥

भाष्यप्रकाशः ।

'चैतन्यापेक्षया प्रोक्तं व्योमादि सकलं जगत् ।
असत्यरूपं सत्यं तु कुम्भकुण्डाद्यपेक्षया' ॥

इत्युक्तत्वाच्च । अतः शब्दसाम्येऽपि ब्रह्मलिङ्गाद् ब्रह्मैवाकाशशब्दार्थः । आकाशशब्दश्च ब्रह्मणि रूपकविधया विभुत्वनिर्लेपत्वादिगुणलाभाय, मुखे चन्द्रवच्छ्रुत्या प्रयुक्तः । अत एव, 'परमे व्योमन् प्रतिष्ठिता' इत्यादिषु श्रुतिष्वाकाशरूपेण ब्रह्म निर्दिश्यते । नानार्थतायां, गङ्गायां घोष इतिवल्लक्षणायाश्चायुक्तत्वादिति । एवं प्राणज्योतिरादयः शब्दा अपि जीवनत्वप्रकाशनत्वादिप्रतिपादनाय रूपकत्वेनैव व्याख्येयाः । वस्तुतस्त्वाकाशप्राणज्योतिरादयः शब्दा आकाशादिभावापन्नब्रह्मपरा एवैतेषु ब्रह्मवाक्येषु भवन्ति । केवलब्रह्मपरत्वे सत्याकाशादिलिङ्गानुपपत्तेः । यत्तु छान्दोग्यवाक्यमाधुनिका इहोदाहरन्ति, 'अस्य लोकस्य का गतिः' इत्यादि । तन्न । प्रकरणादिशून्यात् केवललिङ्गाच्छ्रुतेर्बलवत्त्वस्य पूर्वमीमांसासूत्रादेवावधारणात् । तत्र च श्रुतिप्रकरणयोरभावात् । किञ्च । प्रश्ने, अस्य लोकस्येत्यनेन भूर्लोकजना एवोक्ता इति प्रत्युत्तरे भूतानीत्युक्तत्वात् सर्वाणि भूतानीति ब्रह्मलिङ्गं न भवति । आकाशसाधारण्यात् । आकाशाद् वृष्टिद्वारैषां भूर्लोकस्थानां सृष्टिस्थितिसंहारादित्याह । तदसंगततमम् । सूत्रविरोधात् । सूत्रे केवलस्य लिङ्गस्यैव हेतुत्वेनोक्तत्वात् । त्वद्रीत्या

रश्मिः ।

इति गजेन्द्रस्तुतौ तु स्पष्टम् । उक्तत्वाच्चेति । तथा च कुम्भकुण्डादि सत्यस्य सत्यमिति श्रुत्यर्थः फलितः । श्रुतावाकाशपदोक्तेस्तात्पर्यमाहाचार्यो विद्वानः आकाशशब्देत्यादि । **रूपकेति** अनुभयोक्तिरूपताद्रूप्यरूपकं यथा 'अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना' इत्यत्रानुभयोक्तिताद्रूप्यन्यूनताद्रूप्याधिकताद्रूप्यभेदेन ताद्रूप्यरूपकस्य त्रैविध्यम् ।

'विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् ।
रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः' ॥

इति तल्लक्षणात् । विषयिणः उपमानस्य पद्मादेरभेदेन ताद्रूप्येण च विषयस्योपमेयस्य रञ्जनं रूपकमित्यर्थः । यद्वा । अभेदरूपकं वा तत् । 'अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्' इत्यत्र यथा । **विभुत्वेत्यादि** तथा च गौणीवृत्तिरिति भावः । **प्रतिष्ठितेति** 'सैषा भार्गवी वारुणी विद्या परमे व्योम्नि प्रतिष्ठिता' इत्यर्थः । ननु वृत्तेर्द्वैविध्याल्लक्षणयैव निर्वाहे किं गौण्येति चेत् तर्कपादीयगौण्युपपादकयुक्तिहृदय आह **लक्षणाया इत्यादि** । **एवं प्राणेति** 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्' इत्यादिबृहदारण्यकादग्रेतनाधिकरणेषु प्राणादयो व्याख्येया इत्यर्थः । एवं विभागाद्वैतप्रात्याऽविभागाद्वैताय पक्षान्तरमाह भगवान् **वस्तुतस्त्वित्यादि** । आकाशादीत्यादिपदेन प्राणज्योतिरादयः तेनायं भगवानाचार्यः तावच्छ्रुचरणमाकाशभावापन्नब्रह्मकर्तृकं तादृशब्रह्मणः सकाशाद्वेति मन्यते । तेन तल्लिङ्गादित्यस्याकाशभावापन्नब्रह्मलिङ्गादित्यर्थः पर्यवसितः । **प्रकरणेत्यादि** 'उभयाकाङ्क्षा प्रकरणम्' 'निरपेक्षो रवः श्रुतिः' इति पूर्वमीमांसासूत्रं पूर्वं निरुक्तम् । **तत्रेत्यस्य** छान्दोग्यीयवाक्ये इत्यर्थः । **वृष्टिद्वारेति** अयमाचार्यो मन्यते । ननु सत्यं व्याससूत्रेण जैमिनिसूत्रदौर्बल्यं तथापि श्रुतिलिङ्गादय इत्यादिभाष्यप्रामाण्यात् त इह तथैवोपादेया इतिलिङ्गा-

भाष्यप्रकाशः ।

तु, श्रुतिलिङ्गप्रकरणैरिति पाठापाताच्छ्रुतिविरोधाच्च । श्रुतौ सामाद्यदोलोकान्तगतिज्ञानवतः शालावत्यस्यैतल्लोकगतिप्रश्नेन सामाद्येतल्लोकान्तस्य परमाश्रये परमोपजीव्ये वा प्रश्नपर्यवसानात्, तादृशत्वस्य चाकाशेऽसंभवात् । अतश्छान्दोग्यवाक्यस्याविषयत्वकथनम-संगतम् । अन्येषामाधुनिकत्वकथनमपि तथा । स्वस्य सर्वार्वाचीनत्वात् । प्राचीनवृत्त्यादीनामनाश्रयणाच्च । आकाशशब्दस्य भूताकाशतद्देवताब्रह्मसु साधारण्यकथनमपि तथा । ब्रह्मणि रूपकविधया प्रयोगाङ्गीकारेण गौण्या वा निरूढलक्षणाया वाऽऽदराद् ब्रह्मवाचकत्वस्याभावेन

रश्मिः ।

पेक्षया सिद्धान्तेपि ह्याकाशश्रुतिर्बलवत्तरेति चेत्तत्राहुः **श्रुतीत्यादि** । **सामादीति** का साम्नो गतिरिति स्वर इति होवाचेत्यारभ्य अमुष्य लोकस्य का गतिरित्ययं लोक इति होवाचेत्यन्तया श्रुत्येत्यर्थः । **असंभवादिति** आश्रयमात्रे उपजीव्यमात्रे तथा संभवः । आकाशे तु 'आकाशाद्वायुः' इति श्रुतेः वायूपजीव्यत्वं तथाचाकाशादिभावापन्नब्रह्मणः परमाश्रयत्वपरमोपजीव्यत्वाभ्यामस्पर्शात्प्रश्नविषयत्वमसंभवीति भावः । ब्रह्माधिकारात् । एवं चैतत्सिद्धं भाष्यविरोधस्तदा स्याद्यदीदं लिङ्गतात्पर्यवृत्तिवेलामतिक्रामच्छ्रुतिमतिक्रामेन्नत्वेवमतो लिङ्गं बलीयः श्रुत्यपेक्षयात्रेति श्रुतिलिङ्गेति सूत्रं तु तात्पर्यवृत्त्यवेलायां प्रतिबन्धकाभावात् परैरभिधादिवृत्त्या प्रवर्तितमिति ज्ञेयम् । तथा च लिङ्गस्य बलीयस्त्वे सूत्रं प्रतिबन्धकं तात्पर्ये तु सूत्रप्रतिबन्धकमुत्तेजकं व्याससूत्रम् । संबन्धात् । अतोऽसंगततममित्यत्र तमबपि योज्यः । **अत** इति व्याससूत्रविरोधादिदूषणेभ्य इत्यर्थः । ननु प्राचीनवृत्तिकल्पगीतास्कन्धाद्यनुसरतामस्माकं सर्वेभ्यः पूर्वत्वं व्याख्यानप्रयुक्तमपि चाधुनिकत्वं लोकरञ्जकत्वं लाक्षणिकमत्रेति नायं हेतुरिति शङ्कायामाहुः **प्राचीनेत्यादि** । किं च लोकरञ्जकत्वं तदा स्यात् यदि तदुत्तरमस्मद्भाष्ये विषयत्वं तस्य वाक्यस्य नादृतं भवेदिति । न चास्याप्रसिद्धत्वात्तदज्ञानादादृतत्वमिति शङ्क्यम् 'अनागतमतीतं च' इत्यादिवाक्यात् । **गौण्येत्यादि** द्वितीयाध्याये गौण्यसंभवादिति सूत्रे आचार्येण भगवता गौणीत्वेन गौण्या पदार्थ उक्तः तत्काव्यप्रकाशे लक्षणात्वेन वर्णितस्य भेदास्त्रयोदशोपवर्णिताः । उपादानलक्षणा कुन्ताः प्रविशन्तीत्यत्र । लक्षणलक्षणा गङ्गायां घोष इत्यादौ । शुद्धा सारोपालक्षणा आयुर्घृतमित्यादौ । गौणी सारोपालक्षणा गौर्वाहीक इत्यादौ । शुद्धसाध्यवसानीलक्षणा आयुरेवेदम् । गौणी साध्यवसानालक्षणा गौरयमित्यादौ । एवं षड्विधा प्रयोजनवती । आसां व्यङ्ग्योत्थापनफलकतया नियमेन तासां सव्यङ्ग्यत्वमेव । तच्च व्यङ्ग्यं द्विविधम् । गूढमगूढं चेति । काव्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यं गूढम् । अनत्यन्तसहृदयैरपि झटिति ग्राह्यमगूढम् । यथा 'मुखं विकसितस्मितम्' इति 'श्रीपरिचयात्' इति चोदाहरणे । एवं द्वादशधा प्रयोजनवतीलक्षणा । निरूढलक्षणा कर्मणि कुशला इत्यादौ । सैकविधैव । एवं च गौर्वाहीक इतिवत् आकाशो ब्रह्मेति गौण्या सारोपयेत्यर्थः । ननु सारोपत्वं केन प्रकारेणेति चेद्ग्रन्थगौरवभीतिकानुज्ञया तत एव विदांकुर्वन्तु विद्वांसः । तथा च गोसदृशो वाहीकः गोनिष्ठाज्ञत्वादिगुणविशिष्ट इतिवदाकाशसदृशं ब्रह्माकाशनिष्ठस्वापाधारत्वादिगुणविशिष्टमिति तन्मतेऽर्थः । अत्र सादृश्यातिरिक्तकार्यकारणभावादिसंबन्धानामविवक्षातो नो शुद्धा सारोपा संबन्धान्तरेण सारोपा शुद्धा भवतीति । तथा च भास्कराचार्यभाष्यम् । सर्वमभिव्याप्य प्रकाशते इत्याकाशः तत्सादृश्याद्वेति द्वितीयवेत्यस्य प्रयोजनं पूर्वतन्त्रे क्वचित्प्रसिद्धम् । यथा 'सेवायां वा कथायां वा' इत्यत्र श्रीमदाचार्योक्तौ । पूर्वोक्तेर्थे तज्जन्मादिसूत्रभाष्यविरोधमाकलय्याहुः । किं च । यथा गौरित्यादावज्ञत्वाद्यतिशय एव प्रयोजनमेवं प्रकृते स्वापाधारत्वातिशय एव प्रयोजनं वाच्यं तस्याभावादाहुः **निरूढेत्यादि** । **कर्मणि**

अत एव प्राणः ॥ २२ ॥ (१।१।८)

प्रस्तोतर्या देवता प्रस्तावमन्वायत्तेत्युपक्रम्य श्रूयते । कतमा सा देवतेति प्राण इति होवाच । सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते । सैषा देवता प्रस्तावमन्वायत्तेति । तत्र संशयः । आसन्यः प्राणो ब्रह्म वेति । पूर्वपक्षसिद्धान्तौ पूर्ववदेवेत्यतिदिशति ।

भाष्यप्रकाशः ।

साधारण्यस्याभावादिति ॥ २१ ॥

इति सप्तमं तल्लिङ्गाधिकरणम् ॥ ७ ॥

अत एव प्राणः ॥ २२ ॥ अत्रापि छान्दोग्यप्रथमप्रपाठकस्थं वाक्यं विषयवाक्यत्वेनोदाहरन्ति प्रस्तोतरित्यादि । अत्रापि देवतापदेनोपक्रमादन्नादित्यसहपाठाच्च प्रकरणं न ब्रह्मणः । प्राणस्य प्राणमित्यादिर्ब्रह्मप्रकरणस्था श्रुतिः पुराणप्रसिद्धिश्च संदेहबीजम् । श्रुतौ तु प्रस्तावः सामोपासनाविशेषः । अन्वायत्ता अनुगता प्रस्तावाख्योपासनाविषया । प्राणश्च वायुवत् प्रतीयमानोऽपि न वायुविकारः । 'बुद्धिः प्राणस्तु तैजसः' इति पुराणेषु भिन्नकारणकत्वेन सिद्धत्वात् । श्रुतौ च प्राणाद्वायुरजायतेति वायुजनकत्वेन, 'यो वायुः स प्राणः' इति श्रुतौ वायुत्वेन च कथनात् । यद्यपि लोके वायुविकारत्वेनोक्तस्तथापि तदपेक्षया वेदहृदयरूपस्यैतदुपबृंहणस्य बलिष्ठत्वात् । अतः स आसन्यो ब्रह्म वेति संशयः । पूर्वपक्षस्तु पुराणप्रसिद्धेरासन्यो ग्राह्य इति । सिद्धान्तस्तु असंकुचितवृत्तेः सर्वशब्दस्य सामर्थ्यादेवात्र प्राणशब्देन ब्रह्म ग्राह्यम् ।

रश्मिः ।

कुशल इत्यादौ यथा कुशान् लात्यादत्ते इति विग्रहे 'आतोनुपसर्गे कः' इति कप्रत्यये च निष्पन्नः कुशलशब्दः । तस्य कुशग्राहिरूपमुख्यार्थस्य क्रियासामान्यवाचके कर्मणीति पदे सति सबाधत्वात् मुख्येन शक्यार्थेन विवेचकत्वसाधर्म्यरूपस्य संबन्धेन निरूपणरूपोऽमुख्योर्थो लक्ष्यते इति कुशग्राहिणि पुरुषेऽसतां कुशानां परित्यागः सतां च ग्रहणं विवेचकत्वम् । एवं निपुणेपि सतोर्थस्य ग्रहणमसतः परित्याग इति विवेचनीयम् । तद्वत्प्रकृतेप्याकाशते दीप्यते सूर्योदयोत्रेत्याकाशः 'हलश्च' इति घञ् तस्य दीपनरूपमुख्यार्थस्य य एषोन्तर्हृदय इति पदेषु सत्सु सबाधत्वान्मुख्येन दीपनब्रह्मणा शक्यार्थेनाधारत्वसाधर्म्यरूपस्यसंबन्धेनाकाशभावापन्नब्रह्मरूपोऽमुख्योर्थो लक्ष्यते इति निरूढलक्षणा तयेत्यर्थः । साधारणेत्यादि ब्रह्मणि लक्षणा आकाशे रूढिरिति तथा । इतिः समाप्तौ । यदपि तत्तद्भावापन्नस्य ब्रह्मणः तत्तच्छब्दवाच्यत्वमित्युक्तं तदपि न । ॐकारस्य ब्रह्मवाचकत्वात् सर्वेषां शब्दानां चौंकारविकृतित्वादिति ॥ २१ ॥

इति सप्तमाधिकरणम् ॥ ७ ॥

अत एव प्राणः ॥ २२ ॥ पुराणेत्यादि बुद्धिः प्राण इत्यादिवक्ष्यमाणा । अस्या अपि पर्यायमाहुः प्रस्तावेत्यादि । तैजस इति राजसाहंकारकार्यमित्यर्थः । श्रुतौ चेति 'प्राणाद्वायुरजायत' इति श्रुतौ चेत्यन्वयः । तेनाग्रे पुनः श्रुतावित्युक्तेपि न पुनरुक्तिः 'पुराणं हृदयं स्मृतम्' इति वेदहृदयत्वम् । संशय इति त्रिकोटिक इत्यर्थः । श्रुतौ त्विति अत्र प्रस्तोतरि संबोधनम् । अभ्युज्जिहते उत्पद्यन्त इत्यर्थः । भास्कराचार्यभाष्येऽयमर्थः । ननूक्तं प्रकरणं न ब्रह्मण इत्यत

नन्वधिकरणानां न्यायरूपत्वात् सर्वत्र गमिष्यति, किमित्यतिदिश्यत इति। उच्यते। प्राणस्य मुख्यस्यापि सर्वभूतसंवेशनं स्वापादौ श्रुतावेवोपपाद्यते यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येतीत्यादिना। तत्र यथा प्राणविद्याया न ब्रह्मपरत्वमेवमेवास्यापि न ब्रह्मपरत्वमिति, न न्यायेन प्राप्नोति। अतोऽति-

---

भाष्यप्रकाशः।

प्रकरणापेक्षया लिङ्गस्य बलिष्ठत्वात्। पुराणस्य चान्यत्र सावकाशत्वेनात्रानुपबृंहणतायामपि विपरीतबलाबलभावस्याशक्यकल्पनत्वादिति। अत्राधिकरणवैयर्थ्यमाशङ्कते नन्वित्यादि। समादधते उच्यत इत्यादि। उपपाद्यत इति धर्मत्वेनोपपाद्यते। तत्रेत्यादि तत्र प्राणविद्यावाक्ये पुरुषस्वापप्रयुक्तं भूतसंवेशनं, तत्प्रबोधप्रयुक्तं च भूताधिजननमुच्यते, न तु स्वतन्त्रमतो यथा न प्राणविद्याया ब्रह्मपरत्वमेवमस्यापि वाक्यस्य न ब्रह्मपरत्वं स्याद्यदि श्रुतिसामर्थ्यरूपे हेतौ स्वातन्त्र्यपारतन्त्र्यविवेको न क्रियेत। इतिर्हेतौ। प्राणविद्यासाधारण्यस्य बाधकस्य सत्त्वात् तेन न्यायेनास्य ब्रह्मपरत्वं न प्राप्नोति। अतोऽप्राप्तत्वादतिदिशति। एवकारेण बाधकयोगं व्यवच्छिन्दन्नत्र तं हेतुं प्रापयतीत्यर्थः। एतस्यातिदेशस्य फलमाहुः

रश्मिः।

आहुः प्रकरणेत्यादि। लिङ्गं सर्वशब्दसामर्थ्यम्। अन्यत्रेति प्राणविद्याविशेषे। विपरीतेत्यादि 'आनर्थक्ये प्रमाणानां विपरीतं बलाबलम्' इत्यप्यत्र न प्रवर्तते इत्यर्थः। तथा च छन्दोवत्सूत्राणि भवन्तीति सूत्रोक्तमेव ज्यायः। पुराणापेक्षयेति अतिदेशोग्रे सिद्धान्तनिरूपणे निरूप्यः। भाष्ये। गमिष्यतीति न्यायो गमिष्यति। प्रकृते। धर्मत्वेनेति प्राणधर्मत्वेन।

'अन्यत्रैव प्रतीतायाः कृत्स्नाया धर्मसन्ततेः।
अन्यत्र कार्यतः प्राप्तिरतिदेशोभिधीयते'॥

इति पूर्वतन्त्रसिद्धमतिदेशपदार्थमाहुः एवकारेणेत्यादि। सूत्र एवकारेण बाधकयोगमत्यन्तायोगमत्रपक्षे प्राणशब्दवाच्ये ब्रह्मत्वे साध्ये तं हेतुं तल्लिङ्गादिति हेतुं प्रापयतीत्यर्थः। भगवान् सूत्रकारः। तथा चेयं सूत्रयोजना। प्राणशब्दवाच्यं ब्रह्म तल्लिङ्गाद्भवत्येवेति। ब्रह्म तल्लिङ्गहेतुकप्राणशब्दवाच्यत्वात्यन्तायोगव्यवच्छेदवदिति बोधः। न चैवं भवतेरध्याहाराद्दोषः इत्ययोगव्यवच्छेदकोन्ययोगव्यवच्छेदको भवत्येवकार इति शङ्क्यम्। तथा सति ब्रह्म प्राणशब्दवाच्यत्वायोगव्यवच्छेदवत् ब्रह्मान्यः प्राणशब्दवाच्यत्वयोगव्यवच्छेदवान् इति ब्रह्मापेतप्राणपदवाच्यत्वं स्यात्तदसंगतम्। आनन्दमयादिपदवाच्यत्वं निरुच्य ज्योतिरादिपदवाच्यत्वस्य निरुच्यमानत्वात्। तद्वदत्रेति। यद्वा अत इत्यस्य तल्लिङ्गं हेतुरर्थः एवकारस्यायोगव्यवच्छेदोर्थः। तथा च तल्लिङ्गहेत्वयोगव्यवच्छेदवत् प्राणपदवाच्यं ब्रह्मेति सूत्रार्थः। बाधकशून्यात्पूर्वोक्तालिङ्गात् इति तु फलितोर्थः। भाष्ये। न्याय आपादित इति यद्ययं न्यायो न स्यात् तदा प्राणविद्यासाधारण्यं स्यात् तस्माद्विषयवाक्यमतिरिक्तन्यायवदित्येवमापादित इत्यर्थः। विषयवाक्यं अतिरिक्तन्यायवत् प्राणविद्याऽसाधारण्यात् यदेवं तदेवं ब्रह्मविदाप्नोतीत्यादिविद्यावत् यन्नैवं तन्नैवं भार्गवीवारुणीविद्यान्तर्गतान्नादिविद्यावदित्यनुमाने।

दिशति। अनेन चायमतिरिक्तो न्याय आपादितः । यत्रैव प्रकरणे ब्रह्मपरत्वे कल्प्यमाने न किंचिद् बाधकं तत्रैव ब्रह्मपरत्वं कल्पनीयमिति, न त्वन्यस्मिन् संभवे तत्परत्वमिति। अत एव तल्लिङ्गात् प्राणशब्दवाच्यं ब्रह्मेति ॥ २२ ॥

इति प्रथमाध्याये प्रथमपादेऽष्टममतिदेशाधिकरणम् ॥ ८ ॥

भाष्यप्रकाशः ।

अनेनेत्यादि । न त्वन्यस्मिन् संभव इति संभवान्तरे सति तु नेत्यर्थः । सिद्धमाहुः अत एवेत्यादि । बाधकशून्यात् पूर्वोक्ताल्लिङ्गात्तथेत्यर्थः । नच, 'प्राणं तर्हि वागप्येति प्राणश्चक्षुः प्राणं श्रोत्रं प्राणं मनो यदा प्रबुद्ध्यते प्राणादेवाधि पुनर्जायन्ते' इत्यत्रेन्द्रियसंवेशनमुच्यते, न भूतसंवेशनमिति विषयभेदात् कथमस्य साधारणत्वशङ्केति वाच्यम् । 'दीपश्चक्षुस्तथा रूपं ज्योतिषो न पृथग्भवेत्' इत्यादिषु पुराणवाक्येष्विन्द्रियाणां भूतापृथग्भावस्योक्तत्वेन भूतविशेषत्वस्य सिद्धतयेमानीत्यस्य श्रुत्यन्तरे वागादिरूपत्वेनोक्तानीत्यर्थस्य शक्यवचनत्वेन शङ्कोदयस्य संभवात् । अतः सर्वथेदं समाधेयमिति । एतेन माहात्म्यज्ञानोपयोगिनीनां देवान्तरोपासनानामनुच्छेदायेदमधिकरणम् । अन्यथा तु लोके पित्रपेक्षया क्वचित् पुत्रमाहात्म्यदर्शनात्, केचिद् ब्रह्मकार्यत्वेऽपि ब्रह्मापेक्षयाऽधिका भविष्यन्तीति शङ्का स्यादिति तेनोपोद्घातः संगतिरिति बोधितम् । एवं चात्रातिदेशाङ्गीकारे, 'आपो वा इद९ सर्वम्' इत्यादिवाक्येष्वपि सर्वात्मकत्वादिब्रह्मलिङ्गदर्शनादबादिशब्दानामपि ब्रह्मप्रकरणे ब्रह्मवाचकत्वमित्यपि साधितं ज्ञेयम् । अधिकरणानां न्यायरूपत्वादिति ।

रश्मिः ।

प्रकृते । बाधकेति बाधकं प्राणविद्यासाधारण्यं तच्छून्यादित्यर्थः । तथेति प्राणशब्दवाच्यं ब्रह्मेत्यर्थः । अनुमानावर्णनाद्विपरीतसूत्रपाठक्रमः । यद्वा जिज्ञासासूत्राद् ब्रह्मेत्यनुवृत्तेर्न सूत्रे ब्रह्मपदमुक्तम् । विषयेति इन्द्रियपञ्चमहाभूतरूपविषयभेदात् । साधारणेत्यादि ब्रह्मपरत्वबाधकसाधारणत्वशङ्केत्यर्थः । पुराणेत्यादि एकादशस्कन्धादिषु इन्द्रियाणां चक्षुरादीनां भूतेभ्यो दीपादिभ्योऽपृथग्भावस्येत्यर्थः । श्रुत्यन्तरे 'अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यत्र 'प्राणादेव खल्विमानि भूतानि जायन्ते' इत्यत्र वा शक्यवचनत्वेन भूतानां चेन्द्रियसारत्वात् । इति भास्कराचार्यभाष्यात्तथेत्यर्थः । अत इत्यादि शङ्कोदयसंभवात् । इदं शङ्काविषयभूतम् । एतेनेति ब्रह्मविद्यातिरिक्तप्राणविद्याच्छेदेनेत्यर्थः । क्वचिदिति वेनात्पृथुनाममाहात्म्यं वसुदेवाच्च श्रीकृष्णस्य । स्यादितीति तथा चैवं विधनिरङ्कुशजगत्कारणत्ववादिनीनां ब्रह्ममात्रपरत्वादेव न शङ्केति भावः । भिक्षुमते त्वियं शङ्का स्यादेव। पञ्चाङ्गेऽधिकरणे न्यूनं पूरयन्ति स्म तेनेत्यादिना । अत्र सावधानपुरुषप्रयुज्यमानवाक्यं ब्रह्मजिज्ञासाधिकारवाक्यं तत्प्रयोजकत्वेन ब्रह्मजिज्ञासोपपादकत्वेन स्मृतस्य साकारब्रह्मणो रूपजातस्योपेक्षानर्हत्वं भवतीत्युपोद्घातः । ननु विशेषलक्षणं गौणं कुतः आद्दतोत्रेति चेन्न । संगतिव्यवहारस्तु तत्र तत्र स्पष्टत्वाय हेतुतादिभिः प्रयोजकधर्मैरेव वक्तव्य इति तत्रैवेक्षत्यधिकरणे निरुक्तत्वात् । एवं चात्रातिदेशाङ्गीकारेण 'आपो वा इदं सर्वम्' इत्यादिवाक्येष्वपि सर्वात्मकत्वादिब्रह्मलिङ्गदर्शनादबादिशब्दानामपि ब्रह्मवाचकत्वमित्यपि साधितं ज्ञेयम् । अधिकरणानां न्यायरूपत्वादिति

---

१. ज्योतिरादिभ्यः ।

भाष्यप्रकाशः।

अत्र सर्वेऽपि ब्रह्मासाधारणधर्ममेव हेतूकृत्याधिकरणं योजयन्तीति तद्दूषणमपि पूर्ववदेव बोध्यम्।

माध्वास्तु, 'तद्वै त्वं प्राणो अभवः महान् भोगः प्रजापतेः। भुजः करिष्यमाणः यद्देवान् प्राणयो न वा' इति तैत्तिरीयोपनिषच्छ्रुतिं विषयवाक्यत्वेनोपन्यस्याधिकरणं रचयन्ति तत्र लोकप्रसिद्धिः, ईशानः प्राणदः प्राण इति विद्वद्रूढिः संदेहबीजम्। श्रीश्च ते लक्ष्मीश्च पत्न्यावित्यादि तल्लिङ्गं हेतुत्वेनाहुः। अतिदेशप्रयोजनं तु किमपि नाहुः। अत्रापि पूर्ववदेव दूषणम्। किंचात्र हेतुः पुरुषसूक्तस्थो, विषयवाक्यं भर्तृसूक्तस्थमतो हेतुसाध्यवैयधिकरण्यपरिहारप्रयासश्चाधिक इत्यवधेयम्।

विज्ञानभिक्षुस्तु कौषीतकिब्राह्मणादिस्थां ब्रह्मप्रकरणीयां श्रुतिं विषयत्वेन वक्तीति तद्दूषणमपि पूर्ववदेव ॥ २२ ॥

इत्यष्टममतिदेशाधिकरणम् ॥ ८ ॥

रश्मिः।

क्वचित्पुस्तके ह्येवं चेत्यारभ्य इतीत्यन्तः रश्मावुक्तः मूले प्रकाश एव पठ्यते। सर्वे इति शंकररामानुजशैवभास्कराचार्याः। तद् दूषणमिति अधिकरणवैयर्थ्यरूपम्। महान् भोगः परमानन्दः श्रुतौ। 'तद्वै त्वं यो यदा भारं तन्द्रयते स भर्तुं परास्य भारं पुनरस्तमेति'। श्रुत्यर्थस्तु यदा भारं भर्तुं तन्द्रां कुरुते तदा संकर्षणव्यूहेन भारं परा अस्य असु क्षेपणे क्षिप्त्वेति तथा च यस्त्वमस्तमेता तद्वै त्वं प्राणोऽभवः। किं च प्रजापतेर्महान् भोगः। अपरं च भुजः भोगात् करिष्यमाणः यद्यस्माद् देवान् प्राणय उ न प्राणय वा किं तु सर्वानित्यर्थः। विद्वद्रूढिरिति क्वचित्प्रसिद्धा विष्णौ। दूषणमधिकरणवैयर्थ्यरूपम्। महाभोगरूपस्य परमानन्दस्यापि कृष्णलिङ्गत्वादिति। श्रुतिमिति। भाष्ये। श्रुतिं दृष्ट्वा दूषणं पूर्ववदुन्नेयम्। भाष्ये। अत एवेत्यादि अत्रापि प्राणत्वेन ब्रह्मोपस्थितिरशक्योपपादना। नहि पटत्वेन तन्तूपस्थापनं शक्नोति कर्तुं कश्चित् प्राणपदवाच्यत्वेन तूपस्थापयितुं शक्नोति यः कश्चिद् ब्रह्म। यथा सशङ्खचक्रो हरिरित्यत्र हरित्वेन विष्णुनुपस्थापयितुं शक्नोति न तु हरिर्वर्षायां इत्यत्रापि किं तु वर्षापदसमभिव्याहारान्मण्डूकवाचकं हरिपदमित्यवधारितेत्र हरिपदवाच्यो मण्डूक इत्येवं हरिपदवाच्यत्वेन मण्डूकोपस्थितिर्न तु हरित्वेन स्ववाचकपदोपस्थितस्यैव विशिष्टबोधे विशेषणमर्यादया भानस्य घटः पृथ्वीत्यादिस्थले दर्शनात् ॥ २२ ॥

इत्यष्टममधिकरणम् ॥ ८ ॥

ज्योतिश्चरणाभिधानात् ॥ २३ ॥

इदमामनन्ति । अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु इदं तावद्यदिदमस्मिन्नन्तःपुरुषे ज्योतिरिति ।

तत्र ज्योतिःशब्देन प्राकृतं ज्योतिराहोस्विद् ब्रह्मैवेति संशयः ।

भाष्यप्रकाशः ।

ज्योतिश्चरणाभिधानात् ॥ २३ ॥ आमनन्तीति छान्दोग्ये पञ्चमप्रपाठके वदन्ति । श्रुतौ तु, विश्वतः पृष्ठेष्विति सर्वेषामुपरि अयं च विश्वशब्दो न संकोचसह इति ज्ञापनाय तदर्थकं शब्दान्तरं सर्वतः पृष्ठेष्विति । शेषं स्फुटम् । संशयमाहुः तत्र ज्योतिरित्यादि । अत्र लोकप्रसिद्ध्या, 'अनादिमत् परं ब्रह्म' इति प्रकृत्य पठितेन, 'ज्योतिषामपि तज्ज्योतिः' इति गीतावाक्येन च कोटिद्वयोपस्थितिः संशयबीजम् । पूर्वपक्षमाहुः अत्रेत्यादि । अयमर्थः । लोके तमोविरोधी पदार्थ आदित्यादिर्ज्योतिःपदेनाभिधीयते । अत्र च दीप्यत इत्युक्तं, प्रकाशकत्वमपि तस्यैव लिङ्गम् । तथाग्रे, तस्यैषा दृष्टिर्यत्रैतदस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानाति, तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेर्ज्वलत उपशृणोतीति जाठरस्याग्नेर्लिङ्गम् । नच सूर्यादिप्रकाशस्य दिवोऽर्वागपि दर्शनाज्जाठरप्रकाशस्य च क्वाप्यदर्शनादुभयोर्बाधे गीतावाक्यादिभिर्ब्रह्मैव ज्योतिःपदवाच्यतयादरणीयमिति वाच्यम् । ब्रह्मासाधारणधर्मस्य तत्प्रकरणस्य चात्रानुपलम्भात् । अतस्तेजोधर्मस्यात्र दर्शनाद्, बर्हिराज्याधि-

रश्मिः ।

ज्योतिश्चरणाभिधानात् ॥ २३ ॥ वदन्तीति यद्यपि म्ना अभ्यासे तथाप्युपसर्गबलेनायमर्थः । 'उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते' इतिवाक्यात् । मनिन च ज्ञाने दिवादिः । मणिनण् स्तम्भे चुरादिः । मनू विबोधने तनादिरेषामात्मनेपदित्वात् 'ये धातुशब्दा यत्रार्थे' इति पत्रावलम्बनवाक्यस्य वेदराशिपरत्वात् । ननु वेदपदेनैव चरितार्थत्वे राशिग्रहणं ज्ञापयति भाष्यादीनामपि तथैव भाष्योऽर्थः इति चेन्न । षडङ्गपरत्वेनैव चरितार्थत्वादिति । स्फुटमिति । अत इत्यस्य स्वर्गाल्लोकादित्यर्थः । अनुत्तमेष्वित्यत्र न विद्यते उत्तमं येभ्य इति बहुव्रीहिः । न च तत्पुरुषः शङ्क्यः । तमपाकर्तुमेवाग्रे उत्तमेष्विति बहुव्रीहिफलितार्थकथनात् । इदं पूर्ववदनुत्तमेषूत्तमेष्वित्येतयोर्व्याख्याने । लोकेष्वित्यस्य जनलोकादिष्वित्यर्थः । अत्रासाधारणब्रह्मधर्माभावात्पूर्वपक्ष इति भाष्ये हेत्वपेक्षितं पूरयन्तः पूर्वपक्षस्वरूपमाहुः अयमर्थ इत्यादिना । तस्यैषेति तस्य ज्योतिषो दृष्टिर्दर्शनमेवा का यत्र यस्मिन्काले श्रुतिः श्रवणं श्रवणोपायः को यत्र यस्मिन् काले कर्णावपिगृह्याङ्गुलीभ्यां पिधाय निनदमिव रथघोषमिव नदथुरिवर्षभकूजितमिवाग्नेरिव ज्वलत उप स्वान्तर्गतमेव शब्दमेतच्छ्रवणं यथा स्यात्तथा शृणोतीति श्रुत्यर्थः । दिवोर्वागपीति तादृशश्रुत्युक्तज्योतिषस्तु 'यदतः परो दिवो ज्योतिर्दीप्यते' इति दिवः परं दीपनमुच्यते इति भावः । गीतेत्यादि आदिपदेन ज्योतिर्ब्राह्मणं 'ज्योतिर्दर्शनात्' इति सूत्रं च संगृह्यते । एवमपेक्षितं पूरयित्वाऽसाधारणब्रह्मपदं ब्रह्मप्रकरणस्याप्युपलक्षकमिति सूचयन्तो हेतुभाष्यार्थमाहुः ब्रह्मेत्यादि । बर्हिराज्येत्यादि । अयं न्यायः पूर्वतन्त्रे प्रथमस्य चतुर्थपादेऽस्ति तत्र 'बर्हिर्लुनाति' 'आज्यं विलापयति' 'पुरोडाशं पर्यग्नि-

अत्रासाधारणब्रह्मधर्माभावात् पूर्वपक्षः। सिद्धान्ते तु चरणस्य ब्रह्मधर्मत्वमिति 'एतावानस्य महिमा, अतो ज्यायांश्च पूरुषः, पादोऽस्य सर्वा भूतानि

भाष्यप्रकाशः।

करणन्यायेनात्र शास्त्रप्रसिद्ध्यपेक्षया लोकप्रसिद्धेरेवात्र फलवत्त्वाच्च त्रिवृत्कृतं वा प्राकृतमेव तेज इह ग्राह्यम्। अघटमानो धर्मो द्युमर्यादत्वादिर्यः स तूपासनार्थः। किंच। यदि ब्रह्मैवात्रोपास्यत्वेनाभिसंहितं स्यात्तदाऽस्या उपासनायाश्चक्षुष्यः श्रुतो भवतीत्यल्पं फलं नोच्येत। अतः फलमपि वाक्यस्य तेजस्तात्पर्यकत्वगमकमतः प्राकृतं तेज एवात्रादरणीयमिति पूर्वपक्षः। सिद्धान्ते युक्तिमाहुः सिद्धान्ते त्वित्यादि। नन्विह कुत्र चरण उक्तो यस्य ब्रह्मधर्मत्वमुच्यत इत्यत आहुः एतावानित्यादि। तथाच यद्यप्यत्र नोक्तस्तथापि वाक्यान्तर उक्तस्तस्य चैतस्य चैकवाक्यत्वमतश्चरणलाभ इत्यर्थः। कथमेकवाक्यतेत्याकाङ्क्षायां तामुपपादयन्ति

रश्मिः।

करोति' इत्यत्र द्रव्यनामानो बर्हिराज्यपुरोडाशशब्दाः श्रुताः ते शास्त्रज्ञैः संस्कृतेषु प्रयुज्यन्ते। असंस्कृतेपि जातिमात्रे कैश्चिदशास्त्रज्ञैस्तत्र तेषां किं संस्कारनिमित्ततोत जातिवाचकतेति संशयः पील्वादिवदश्वबालवच्च शास्त्रस्य याज्ञिकप्रसिद्धिः सार्वत्रिकी। अशास्त्रस्य म्लेच्छकतिपयसिद्धेर्बलीयसीति संस्कारनिमित्ततेति पूर्वः पक्षः। तेषां जातिवाचितेति सिद्धान्तः। नहि शास्त्रस्थाः सर्वलोकस्थाश्च जातिमपहाय प्रयुञ्जते। संस्कारं विहाय जातिमात्रे तु केचन प्रयुञ्जते। यथा बर्हिषा यूपावटमवस्तृणातीत्यत्र संस्कारमन्तराप्यास्तरणमिति तेन जातिमेते न व्यभिचरन्ति। व्यभिचरन्ति तु संस्कारमतोन्वयव्यतिरेकाभ्यामिति। अत्र दृष्टान्तप्रपञ्चः कस्यचित्। पीलुशब्दं म्लेच्छा हस्तिनि ह्यार्या वृक्षविशेषे प्रयुञ्जते। आदिशब्देन यवशब्दस्तं च दीर्घशूकेष्वार्याः प्रियङ्ग्वादिषु म्लेच्छाः। आश्ववालः प्रस्तर इत्यश्ववालाः वाक्यविशेषात्तु तृणविशेषः। आदिपदेन त्रिवृद्बहिष्पवमानमित्यत्र त्रिवृच्छब्दस्य त्रैगुण्यं लोकसिद्धोर्थः। वाक्यशेषादृक्त्रयात्मकेषु त्रिषु सूक्तेष्ववस्थितानां बहिष्पवमानात्मकस्तोत्रनिष्पादनक्षमाणां 'उपास्मै गायतां नरः' इत्यादीनामृचां नवकमर्थस्तद्वदिति। ननु न न्यायोक्तिर्नूनं साधीयसी जैमिनीयन्यायमालाविस्तरेऽयं न्यायोन्यत्रापीत्युक्तेस्तस्यैवान्यत्र संचार इत्यस्यान्यत्रासंचारादितिचेन्न तस्यास्वमतत्वात्। फलेत्यादि फलपदं प्रयोजनवचनं तेनोपासनारूपप्रयोजनवत्त्वादित्यर्थः। त्रिवृदित्यादि तासां तेजोबन्नानां देवतानामेकैकान् द्विधा विभज्य पुनश्चैकैकं भागं द्विधा कृत्वा तत्स्वभागादितरभागयोर्निक्षिप्य तन्त्रिगुणरज्जुवत्त्रिवृतं करवाणीति त्रिवृत्करणश्रुत्यनुसार्यर्थः परत्र। सिद्धान्ते तु रोहितशुक्लकृष्णरूपैस्त्रिधा भवनं पुरुषं प्राप्य त्रेधाभवनं च त्रिवृत्करणश्रुत्यर्थः। त्रिवृत्करणश्रुतिस्तु 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति वाय्वाकाशयो रूपाभावात्पुरुषं प्राप्य त्रेधाभावाभावालोचनाच्च तेजोबन्नानि तावदिच्छापुरस्सरं परस्मादात्मनो जातानीति चोत्पत्तिमद्व्यवहर्तृप्राणिनिकायव्यवहारनिर्वाहकतदीयधर्माधर्मात्मककर्मापेक्षया तानि त्रिवृत्कृतानि न तु पञ्चीकृतानि। अत्रिवृत्कृतानि तु त्रिवृत्करणात्पूर्वाणि छान्दोग्ये श्वेतकेतूपाख्याने 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रम्य 'तत्तेजोसृजत' 'तदपोसृजत' 'ता अन्नमसृजन्त' इति श्रुतिप्रोक्तानि। ननु यदतः परो ज्योतिर्दीप्यते इत्यवधिवाचकपञ्चम्या श्रुतस्य द्युमर्यादत्वस्य का गतिस्तत्राह अघटेत्यादि। एवं भाष्यं व्याख्याय शांकरभाष्यीयामपि युक्तिमाहुः किं चेत्यादिना। चक्षुष्य इत्यादि। चक्षुषे हित इत्यर्थः। तस्मै हितमित्यधिकारे शरीरावयवाद्यत् इति यत्। न तु चक्षुषा दर्शनीयः। सूत्राभावात्। श्रुतः विख्यातः। ब्रह्मधर्मत्वमिति हृदयब्राह्मणाद्धृदयं ब्रह्म तस्य विधा धर्मः ज्योतीरूपस्तत्त्वम्।

त्रिपादस्याऽमृतं दिवि' इति पूर्ववाक्यम् 'गायत्री वा इदं सर्वं भूतं यदिदं किंच' इति गायत्र्याख्यब्रह्मविद्यां वक्तुं तस्याः पादचतुष्टयं प्रतिपाद्य ब्रह्मणश्चतुष्पात्त्वमुक्तम्। पुरुषसूक्तेऽप्याश्रमचतुष्टयस्था जीवाः पादत्वेनोक्ताः। तथा प्रणवब्रह्मविद्यायामप्यकारोकारमकारनादवाच्याश्चत्वारः पादा विश्वतैजसप्राज्ञतुरीया उक्ताः। तद्विष्णोः परमं पदमिति च। ब्रह्म पुच्छमिति च। सत्यकामब्राह्मणे तु स्पष्टा एव

भाष्यप्रकाशः।

गायत्रीत्यादि, सिद्धमित्यन्तम्। उक्तरीत्या तां ब्रह्मप्रतिपादकविद्यां वक्तुं यस्मात् तस्या भूतादिपादचतुष्टयं प्रतिपाद्य तदेतदृचाऽभ्यनूक्तमिति तत्पदेन तदेव चतुष्पात्त्वं परामृश्य ब्रह्मणश्चतुष्पात्त्वमृचोक्तम्। यदि हि सा ब्रह्मविद्यात्वेन न विवक्षिता स्यादृचैवं कथनं निष्प्रयोजनकं स्यात्। अत एवं गायत्र्या ब्रह्मविद्यात्वेन प्रकरणस्य ब्राह्मत्वे सिद्धे, एकप्रकरणगतत्वेनैकवाक्यतेत्यर्थः। नन्वग्रिमसूत्रैकदेशे प्रकरणस्य ब्राह्मताया आक्षेप्स्यमाणत्वेन संदिग्धत्वान्न तावन्मात्रेणात्र ब्रह्मणश्चतुष्पात्त्वसिद्धिरिति हेतोः साध्यसमत्वमत आहुः पुरुषसूक्त इत्यादि। तत्र पुरुषं प्रकृत्य पठिते एतावानितिमन्त्रे श्राविताना पादानां द्वितीयस्कन्धीये पुरुषसूक्तविवरणाध्याये,

'पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः।
अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः'॥

इत्येनेन विवरणादाश्रमवद्देहविशिष्टा जीवाः पादत्वेन सिद्धा इति तत्प्रत्यभिज्ञानादत्र ब्रह्मपादसिद्धिः। किंच। यद्येकत्रैव क्वचिद् ब्रह्मणः पादनिरूपणं स्यात् तदा कथंचित् संदि-

रश्मिः।

भूतादीति भूतपृथिवीशरीरहृदयरूपं पादचतुष्टयमित्यर्थः। गायत्री वा इदं सर्वं भूतमिति या वै सा गायत्रीयं वा व सा येयं पृथ्वीति या वै सा पृथ्वीयं वा व सा यदिदमस्मिन् पुरुषे शरीरमिति। यद्वैतत्पुरुषे शरीरमिदं वा व तद्यदिदमस्मिन्नन्तःपुरुषे हृदयमिति श्रुतिभिः। **ऋचोक्त**मिति 'तावानस्य महिमा ततो ज्यायाꣳश्च पूरुषः। पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' इति ऋचोक्तमित्यर्थः। **एव**मिति पूर्वपरामृष्टार्थकथनाय इयं वक्ष्यमाणा ऋक् इत्यभेदकथनमित्यर्थः। **एकवाक्यते**ति एकार्थप्रतिपादकता। **अग्रिमेत्यादि** 'छन्दोभिधानान्नेति चेत्' इत्येकदेश इत्यर्थः। **हेतोरित्यादि** ब्रह्म चतुष्पाद् ब्रह्मप्रकरणादित्यत्र हेतोः साध्यतुल्यत्वं न सिद्धत्वमतो यत्र प्रकरणे ब्राह्मत्वमसंदिग्धं तत्स्थलमाहुरित्यर्थः। **प्रकृत्ये**ति 'सहस्रशीर्षा पुरुषः' इत्यनेन। **एतेने**ति श्लोकार्थस्तूपदेशभेदान्नेति चेदिति सूत्रे स्वयमेव वक्तव्यः। **आश्रमे**ति आश्रमवन्तो देहविशिष्टा जीवा इत्यर्थः। **तत्प्रती**ति तावानित्यृचि सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वेन यावत्सर्वनामशब्दैः पुरुषसूक्तोक्तार्थस्य प्रत्यभिज्ञानात्त इमे पादाः इत्येवं तत ईक्षाप्रकारकज्ञानविषयत्वाद्ब्रह्मपादसिद्धिः। न तु गायत्रीपादसिद्धिः। तस्याः शब्दात्मकत्वेनार्थपादत्वासंभवात्। एवं तावानित्यस्याः सिद्धे ब्रह्मपादनिरूपकत्वे 'अथ यदतः परो दिवो ज्योतिर्दीप्यते' इत्यत्रापि पूर्ववाक्ये द्युसंबन्धित्वेन प्रसिद्धं ब्रह्मैव प्रत्यभिज्ञायते प्रत्यभिज्ञाविषयीक्रियते इति चतुर्थपादसिद्धिरित्यर्थः। ग्रन्थोत्थाधिक्यरूपं निग्रहस्थानं निराकुर्वन्ति स्म **किं चेत्यादिना**। **कथंचिदि**ति ब्रह्मणो निरंशत्वात् कथमंशरूपाः पादाः इति प्रकारेणेत्यर्थः।

ब्रह्मणश्चत्वारः पादा निरूपिताः। अतः सच्चिदानन्दरूपस्य प्रत्येकसमुदायाभ्यां षड्रूपत्वम्। तत्र केवलानां कार्यत्वमेव। चतुर्थपादस्य तु ब्रह्मत्वम्।

भाष्यप्रकाशः।

ह्येतापि। अस्ति तु तद् बहुषु स्थलेष्विति बोधयितुमाहुः तथेत्यादि। तथाच माण्डूक्यादौ काठके तैत्तिरीये छान्दोग्यस्थसत्यकामब्राह्मणे च नानाप्रकारेण पादश्रावणान्न ब्रह्मणश्चतुष्पात्त्वे संदेह इति न हेतोः साध्यसमत्वमित्यर्थः। ननु भवतु ब्रह्मणश्चतुष्पात्त्वं, तथापि ते चत्वारो न पशोरिवावयवाः किंत्वंशा एव वाच्याः। तच्च न युज्यते, ब्रह्मणोऽनंशत्वादित्यत आहुः अत इत्यादि। यतो जन्माद्यधिकरणेषु ब्रह्मणस्त्रिरूपता, कार्यकारणभावो, विरुद्धधर्माधारत्वं

रश्मिः।

बहुषु स्थलेष्विति। एतेन विरुद्धधर्माश्रयत्वं फलिष्यति ब्रह्मणः। **माण्डूक्यादावित्यादि** आदिपदेन ब्रह्मोपनिषच्च। तत्र मण्डूके 'ॐमित्येतदक्षरं सोयमात्मा चतुष्पात्' इति चोपक्रम्य।

'बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्थितः'॥

इति पादत्रयं संगृह्य तुरीयं परममृतमजं ब्रह्म यत्तन्नतोस्मीति तुरीय उक्तः। अथर्वशिखायां चतुष्पादे 'तदक्षरं परं ब्रह्म पूर्वास्य मात्रा पृथिव्यकारः द्वितीयान्तरिक्षमुकारः तृतीया द्यौर्मकारः चतुर्थ्यर्धमात्रा सा लुप्तमकार इत्यकारोकारमकारनादवाच्याश्चत्वारः पादा उक्ताः। नादसंज्ञो लुप्तमकार इति नारायणकृतटीकोक्तोर्थः। एतेन चतुर्थ्यर्धमात्रा सा सोमलोक इति शैवाचार्यकल्पितोऽपपाठः परास्तः। अप्रसिद्धेः काव्यप्रकाशदूषणोल्लासोक्तदोषात्। काठके चतुर्थवल्ल्याम्।

'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति'॥

इत्यत्र यथाकथंचित्साधनीयाः उभौ स्वप्नान्तजागरितान्तौ येनेति च्छेदः। अत्र स्वप्नान्तमित्यस्य स्वप्नमध्ये स्वप्नज्ञेयमित्यर्थात् स्वप्नसाक्षी तैजसो लभ्यते। एतद्भेदरूपसुषुप्तिसाक्षी प्राज्ञश्च लभ्यते जागरितमध्ये जागरितज्ञेयमिति विश्व उपलभ्यते। आत्मानमिति तुरीयक उपलभ्यते 'इन्द्रियैरर्थोपलब्धिर्जागरितम्'। 'करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्नः'। 'सर्वप्रकारकज्ञानोपसंहारो बुद्धेः कारणात्मनावस्थानं सुषुप्तिः'। 'ब्रह्मप्रकरणानूद्यो निरङ्कुशजगज्जन्मादिकर्तृत्वावच्छिन्नो वा तुरीयः' इति तैत्तिरीये शिक्षायां 'यश्छन्दसामृषभः' इति चतुष्पाद्धौः तात्पर्यवृत्त्या तु कामवर्षक इत्यन्यदेतत्। **भाष्ये। तद्विष्णोरिति** संहिताप्रथमाष्टके तृतीयप्रश्ने 'गमध्यै गावो यत्र भूरिशृङ्गा अयासः। अत्रा ह तदुरुगायस्य विष्णोः परमं पदमवभाति भूरेः' इति। 'विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे इन्द्रस्य युज्यः सखा' 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम्' इति। श्रुत्यर्थस्तु नित्यलीलावादे स्फुटः। **प्रकृते। सत्येत्यादि**। षष्ठप्रपाठक इदम्। तत्र नानाप्रकारेण 'ब्रह्मणश्च ते पादं ब्रवाणीत्युपक्रम्य प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः' इति। एवमेवाग्रे अग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मण इति एवमग्रे प्राणः कला चक्षुः कला श्रोत्रं कला मनः कला इत्येवं नानाप्रकारेणेत्यर्थः। **नेत्यादि** तथा च चतुष्पाद् ब्रह्म प्रकरणात् ज्योतिर्ब्रह्म चरणाभिधानादिति ब्रह्मसिद्धमिति हृदयम्। **अनंशेत्यादि** निष्कलमिति श्रुतेस्तथा। **त्रिरूपतेत्यादि इदं**

तत्रापि षड्विधत्वप्रतिज्ञानाद् भूतथिपृवीशरीराणां परिचायकत्वेन षड्विधत्वमनिरूप्य हृदयस्य षड्विधत्वं निरूपयँस्तस्य ह वा एतस्येत्यादिना पञ्च देवपुरुषान्निरूप्य तेषां द्वारपालत्वज्ञानानन्तरम्, 'अथ यदतः परो ज्योतिर्दीप्यते'

भाष्यप्रकाशः ।

च साधितमत एवं चतूरूपत्वादेवमंशाः सुखेन युज्यन्त इत्यर्थः । ननु भवतु ब्रह्मणश्चतुष्पात्त्वं तथाप्यत्र प्रकरणे सत्यकामब्राह्मणवत् कार्यरूपा एव भूतादयः पादा निरूप्यन्ते । तेषां च न ज्योतिर्वाक्याकाङ्क्षा । गायत्रीं प्रकृत्योक्तत्वात् । नापि ज्योतिर्वाक्यस्य तदाकाङ्क्षा । अथेति प्रकृतच्छेदात् । उभयत्राप्याकाङ्क्षोत्थापकपदाभावाच्च । यदि च तेषामृचा विवरणादृचि च पुरुषपदाद्गायत्राणामपि तेषां ब्राह्मत्वं विभाव्यते, तदापि ऋचि ज्योतिर्वाक्ये च परस्पराकाङ्क्षोत्थापकपदाभावान्न तयोरेकवाक्यता । तदभावे च प्रकरणैक्येन साधितमप्येकवाक्यत्वमप्रयोजकमित्याकाङ्क्षायां तयोः परस्पराकाङ्क्षां साधयितुमाहुः **तत्रापीत्यादि** । यत्र गायत्र्याश्चतुष्पदात्वमुक्तं तत्रापि तस्याः षड्विधत्वप्रतिज्ञानादस्ति षण्णां विधानामाकाङ्क्षा । तत्र भूतपृथिवीशरीराणां पादत्वेन प्रतीयमानानामपि पार्ष्णिप्रपदाङ्गुल्यादिवत् पादपरिचायकत्वमेव

रश्मिः ।

भिन्नं पदम् । अयमाशयः । जन्माद्यधिकरणे प्रपञ्चत्वेन ब्रह्मत्वेन कार्यकारणभावः सिद्धः । समन्वयाधिकरणेऽभिन्ननिमित्तोपादानत्वेन परीक्षितः । तेन विरुद्धधर्माधारता बोधिता । ईक्षत्यधिकरणे चिद्रूपेऽव्याप्तिः परिहृता प्रकृतिपरमाण्वादौ चातिव्याप्तिश्च । तेन चिदंशो ब्रह्मणि बोधितः सदंशस्य च कारणता बोधिता सदेव सोम्येत्युपक्रमात् । आनन्दमयाधिकरणे आनन्दे लक्षणयोजनेन तत्राव्याप्तिः परिहृता तेनानन्दांशो ब्रह्मणि बोधितः तेन त्रिरूपता बोधिता । एवं त्रिरूपताकार्यकारणभावः समवायित्वनिर्णायकधर्मकथनेन तृतीयेधिकरणे विरुद्धधर्माधारत्वं च साधितमिति । अतो विरुद्धधर्माधारत्वात् प्रकरणैक्यप्रयुक्त एकवाक्यत्वेऽप्रयोजकत्वं शङ्कते **नन्वित्यादि** । **तेषामिति** कार्याणाम् । न ब्रह्मप्रतिपादकज्योतिर्ब्राह्मणाकाङ्क्षा ब्रह्मणो कार्यत्वादित्यर्थः । हेत्वन्तरमाह **गायत्रीमित्यादि** । तथा च कस्यैते पादा इति संबन्धित्वेनापि न ब्रह्माकाङ्क्षेति भावः । **अथेति** भिन्नप्रक्रमवाचकेनाथेत्येवं पदेनेत्यर्थः । नन्वस्त्वनाकाङ्क्षा तथापि ।

'स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते' ॥

इत्यङ्गाङ्गित्वापेक्षयैकवाक्यतास्तु इत्यपेक्षायामाहुः **उभयत्रेत्यादि** । नन्वस्ति तावदाकाङ्क्षोत्थापकपदसत्त्वं तदेतदृचाभ्यनूक्तमिति श्रुत्या तदेतत्पदाभ्यामुक्तस्य पूर्वं निरूपितस्वर्गाकाङ्क्षोच्यते । ऋचि च पुरुषपदं पादसापेक्षमिति चेत्तर्हि अस्तु तत्रैकवाक्यत्वं विवक्षितस्थले तु नास्त्यैक्यमित्याहुः **यदि चेत्यादिना** । **ऋचेत्यादि** । सैषा चतुष्पदा षड्विधा गायत्रीति पूर्वमुक्तं तत्कथं षड्विधत्वमित्याकाङ्क्षायां वाच्यवाचकयोरभेदमाश्रित्याकाङ्क्षा पूरणीयेत्याशयेन तेषां पादानामृचा तावानित्यादिकया विवरणादित्यर्थः । तर्ह्यस्तु तत्रैकवाक्यता विवक्षितस्थले तु नास्त्येवेत्यत्राहुस्**तदापीति** । **तदभाव** इति परस्पराकाङ्क्षोत्थापकपदाभाव इत्यर्थः । **पादपरीति** वक्ष्यमाणप्रकारेण गायत्र्याः सर्वभूतात्मकत्वपरिचायनाय भूतानां पृथिवीत्वेन संकोचः पृथिव्याः शरीरत्वेन शरीरस्य हृदयत्वेनैवं हृदयात्मक-

भाष्यप्रकाशः।

न तु पादत्वं, न वा तद्विधापूरकत्वमित्याशयेन तेषां षड्विधत्वमनिरूप्य हृदयस्यास्ति तथात्वमित्याशयेन हृदयस्य षड्विधत्वं निरूपयन् वक्ता तस्य ह वेत्याद्युक्तरीत्या पञ्चविधाज्ञानानन्तरमथेति प्रकृतविच्छेदेन पूर्वोक्तविधाभ्यो ज्योतिषो वैलक्षण्यं बोधयंश्चतुर्थपादस्य षड्विधत्वप्रतिपादनाल्ल्यब्लोपे पञ्चमीप्रतिपादनं कृत्वा, अतस्तृतीयातस्तसिः, अनेन प्रकारेण चतुर्थपादेत्युक्तरीत्या तदेव ज्योतिरन्तःपुरुष उपसंहरति। तस्मात् पूर्वं मन्त्रेति पादस्येति कथनात् पादत्रयमुपरि यतोऽतोऽत्र, तस्य ह वेत्यारभ्यान्तं विधानिरूपके वाक्ये चतुर्थः पादो निरूप्यत इति सिद्धम्। तथाच षड्विधत्वप्रतिज्ञाया विधानिरूपणसाकाङ्क्षत्वाद्विधोपपादनस्य चाकस्मिकत्वाभावाय प्रतिज्ञासाकाङ्क्षत्वादुभयोरेकवाक्यत्वम्। अतः परं ऋगवशिष्यते। सापि चतुष्पदात्वषड्विधत्वप्रतिज्ञयोरनन्तरं तद्विवरणतयोक्तेति तच्छेषस्तस्मादुपपादनवाक्यात् पूर्वं च पठिता। तस्यां च त्रिपादस्याऽमृतमिति रीत्या पादत्रयं कण्ठत उपरितनलोकेष्वित्युक्तत्वादस्ति चतुर्थपादाकाङ्क्षा। चतुर्थश्च पादः सर्वभूतात्मको हृदयाधिष्ठानक इति तदधिष्ठानस्य हृदयस्य ज्योतिर्वाक्यपर्यन्तेन विवरणादाकाङ्क्षा पूर्यते। विव्रियमाणपादविधानां च स्वाधारभूतपादस्वरूपविवरणाकाङ्क्षा। सा च पादोऽस्य सर्वा भूतानीति भूतविवरणेन ऋचा पूर्यते। तथा

रश्मिः।

पादपरिचायकत्वम्। **निरूपयन्निति** वेदान्तकृदिति भावः। **ल्यब्लोप** इति। अनुनासिकात्परोनुस्वारः इत्यत्र यथा तथेत्यर्थः। **कृत्वेति** अत्र प्रतिपादनं विधायेति पाठः। अस्मिन् पाठे यद्यपि क्त्वः प्रयोगेऽथैक्यं तथापि ल्यब्लोपो नाम ल्यबन्तशब्दाज्ञाने प्रत्यासत्त्या ल्यबन्तधात्वर्थकर्मण्यधिकरणे च पञ्चमीति शब्देन्दुशेखरे व्याख्यानात्। **अत** इति व्याख्येयमिदम्। **अन्तःपुरुष** इति अस्मिन्नन्तःपुरुषे ज्योतिरिति श्रुतेः। **तस्मादित्यादि**भाष्यं विवृण्वन्ति स्म **तस्मादित्यादि**। विषयवाक्यात्पूर्वमन्त्रे। **पादत्रय**मिति अनुकरणशब्दोयं त्रिपादिति श्रौतस्य तेन सुपां सुलुक् इत्यनेन त्रिपादित्यत्र ङसो लुग्व्याख्यातः। त्रिभिः पद्यत इति च तथा च त्रिपादोस्येत्यन्वयः। अभेदषष्ठ्या त्रिपादभिन्नममृतं क्षेममभयमित्युक्तं पादत्रयमित्यर्थः। गूढार्थोऽग्रे वाच्यः। **अत** इति चतुर्थपादाकाङ्क्षायाः सत्त्वादित्यर्थः। **आन्त**मिति अन्तमन्तःपुरुषे ज्योतिरिति वाक्यं तदभिव्याप्येत्यर्थः। हृदयषष्ठविधायां ज्योतिषि चतुर्थः पादः इति भाष्यीयचतुर्थत्वं समर्थयितुं किंचिदाहुः **तथा चेत्यादि**। **प्रतिज्ञेति** षड्विधात्वप्रतिज्ञेत्यर्थः। **भाष्ये। उपरितनेति**।

'पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः।
अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु'॥

इत्यनेनैकवाक्यतायै बहुवचनम्। पादत्रयमुपरितनलोकेषु, चतुर्थः सर्वत्रेति। **प्रकृते। तच्छेष** इति व्याख्यानस्य व्याख्येयार्थत्वेन पारार्थ्यादिति भावः। पारार्थ्यं शेषलक्षणम्। **उपेत्यादि** तस्य ह वा एतस्य हृदयस्येत्यादिषड्विधोपपादनवाक्यं तस्मादित्यर्थः। **त्रिपादस्यामितीति** भाष्ये त्रिपाद्, अस्य, अम्, ऋतमिति पदच्छेदं मत्वोक्तम्। अत्र पक्षे संबन्धोऽभेदो बोध्यः। **आकाङ्क्षेति** चतुर्थपादाकाङ्क्षा पूर्यत इत्यर्थः। **सर्वभूतात्मक** इति सर्वाणि भूतानीति पादस्य भूतरूपस्य विवरणात् स च पृथ्वीरूपः पृथ्वी च शरीररूपा शरीरं च हृदयरूपमिति संकोच इति हृदयविधारूपचतुर्थपादो ज्योतीरूपः सर्वभूतात्मकः। हृदयं व्यवच्छेत्तुं विशिंषन्ति स्म **वीत्यादि**। **स्वाधारभूतेति** एतादृशः पादो हृदयात्मा। **भूतेत्यादि** करणे तृतीया। **ऋचेति** कर्तरि तृतीया।

भाष्यप्रकाशः ।

ऋचि, दिवीति पदादत्र च परो दिव इति कथनादृचि पुरुषपदेनोक्तः पादत्रयाधारो ज्योतिर्वाक्ये प्रत्यभिज्ञायते । अतश्चतुर्थः पादोऽस्मिन् वाक्ये निरूप्यत इत्यृचा सहाप्यस्यैकवाक्यत्वं सिद्धमित्यर्थः ।

अत्रेदं बोध्यम् । अत्र गायत्रीमुपक्रम्य तस्याः सर्वभूतात्मकत्वं प्रतिज्ञाय तत्स्वरूपजिज्ञासायां, वाग्वै गायत्रीति तत्स्वरूपमुक्त्वा वाचः कथं गायत्रीत्वमित्यपेक्षायां सर्वभूतगातृत्वात्तत्त्रातृत्वाच्च गायत्रीत्वमुक्तम् । तर्हि तस्याः कथं सर्वभूतात्मकत्वमित्यपेक्षायां या वै गायत्रीयं वा व सेत्यादिना तस्याः पृथिवीत्वं प्रतिपाद्य तेन रूपेण सर्वभूतधारकत्वात् सर्वभूतत्वे समर्थिते, किं तत् सर्वं भूतं का च तद्धारिका पृथिवीत्यपेक्षायां तां शरीरत्वेन संकोच्य शरीरं हृदयत्वेन संकोचयति । तत्र प्राणाँश्च प्रतिष्ठापयति । तेन प्राणरूपाणि भूतानि शरीरैकदेशहृदयात्मकपृथिवीरूपेण वाग्रूपा गायत्री धारयतीति प्रतिपाद्य तस्याः स्वरूपमाह । सैषा चतुष्पदा षड्विधा गायत्रीति । तत्र वाग्रूपायाः कथं पृथिव्यादिरूपत्वं भूतधारकत्वं च । तथा पदशब्दोऽपि किं स्थानवाची, उत चत्वारि वाक्परिमिता पदानीति श्रुत्युक्तपरा पश्यन्ती-मध्यमावैखरीति वागवस्थाचतुष्टयवाची वा पादवाची वेति संदेहवारणाय तदेतदृचाभ्य-

रश्मिः ।

पादत्रयेत्यादि पुरुषस्यावयवित्वेनावयवभूतपादत्रयाधारत्वमिति ज्ञेयम् । ज्योतिःपदेन प्रत्यभिज्ञायते षष्ठविधात्वेनान्तिमत्वात्तुरीयपादेप्यत्र पर्यवसित्या प्रधानं हृदयं तदिदं ज्योतिरिति तथा । ननु 'यदतः परः' इतिविशेषणेन प्रथमपादभूतभूतादिनिविष्टपुरुषव्यतिरेकात् तत्कथं पुरुषो ज्योतिरिति प्रत्यभिज्ञा तदिदं जलं सेयं दीपमालिका यथा । किं च । परस्य पुरुषरूपज्योतिषः प्राज्ञतैजसतुरीयरूपत्वेपि शरीरपृथिवीहृदयरूपत्वं च कथमित्यतो गायत्री वा इदं सर्वमित्यारभ्य य एवं वेद इत्यन्तस्य योर्थः सिद्धस्तं सिद्धान्ते आहुः **अत्रेदमित्यादिना** । **अत्रेत्यादि** 'गायत्री वा इद४सर्वं भूतं यदिदं किं च' इति ह्यन्तपदद्वयमग्रे संबध्यते । **सर्वभूतेत्यादि** सर्वं भूतं गायति च त्रायते च या सा गायत्रीति श्रुतेरित्यर्थः । **तर्हीति** वाग्रूपत्ववेलायाम् । **इत्यादिनात्रादिना** 'येयं पृथिव्यस्या४हीद४सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते' इति नातिशीयते नातिवर्तते यद्वा शिग् तनुकरणे शिनोति शिनुते इत्यर्थे वा शीयते इति छान्दसः । **तामित्यादि** 'यद्वै तत्पुरुषे शरीरमिदं वा व तद्यदिदमस्मिन् तत्पुरुषे हृदयम्' इति संकोचयतीत्यर्थः । तस्मिन् हीमे प्राणाः प्रतिष्ठिता इति श्रुतेराहुः **तत्रेत्यादि** । एतेनातिदेशाधिकरणसंगतिरपि सूचिता, प्रसङ्गरूपा । प्राणनिरूपणेन तदाधारहृदयं तन्निष्ठपुरुषो ज्योतिस्ताभ्यामाधाराधेयभावसंबन्धः सामानाधिकरण्यसंबन्धश्चेति संबन्धित्वात् । एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति स्मृतस्योपेक्षानर्हत्वं प्रसङ्गसंगतिः । **चत्वारीत्यादि** 'चत्वारि वाक्परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहायां त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति' इतिश्रुतिः । एतदर्थस्तु वाचः परिमितानि वाक्परिमितानीति षष्ठीतत्पुरुषः । वागित्यत्र ङसः स्वादेशो वा । परिमितानीत्यस्य शास्त्रनिर्णीतानीत्यर्थः । पदान्यवस्थाविशेषरूपाणि । ताश्चावस्थाः परापश्यन्तीमध्यमावैखरीरूपाः । मनीषिणोध्यात्मकुशलाः । तेषां मध्ये त्रीणि गुहायां शरीरे आधारनाभिहृदयेषु निहितानि । नेङ्गयन्ति न जानन्ति । तुरीयं वैखर्याख्यं मनुष्या वदन्ति मनुष्याणां वदने वर्तमानोर्थबोधकः

इति चतुर्थपादस्य षष्ठविधत्वप्रतिपादनात् । अतश्चतुर्थपादे पञ्चपुरुषास्ततः परो दिवोज्योतिः षष्ठस्तस्यैव सर्वत्र दीप्यमानत्वं निरूप्य तदेवान्तःपुरुषे उपसंहरति । तस्मात् पूर्वं 'त्रिपादस्याऽमृतं दिवि' इत्युक्तत्वादस्य त्रिपात्संबन्धि अमृतमुपरितनलोकेष्विति । अतोऽत्र चतुर्थः पादो निरूप्यत इति सिद्धम् ।

अतः पादानां ब्रह्मधर्मत्वाज्ज्योतिषो ब्रह्मत्वमिति ।

भाष्यप्रकाशः ।

नूक्तमिति प्रतिज्ञाय ऋचा विवृतम् । यावान् सर्वभूतात्मकत्वादिरूपोऽर्थः पूर्वमुक्तस्तावान् अस्य गायत्रीनाम्नः पुरुषस्य महिमा माहात्म्यं विभूतिः । तत उक्तरूपान्महिम्नः पुरुषो ज्यायान् अधिकः । पूर्वोक्तं कथमस्य महिमेत्यत आह पादस्येत्यादि । तथा चोक्तरूपस्य सर्वस्यैतत्पादरूपत्वान्महिमत्वम् । तत एव च पुरुषस्य ज्यायस्त्वम् । एतेन पदशब्दार्थोऽपि निर्णीतः । पादा एव पदशब्दवाच्या इति । एवं चार्थरूपपादबोधनेन गायत्र्या वाग्रूपत्वं निवारितम् । तेन पुरुषस्य गायत्रीवाच्यत्वाद् गायत्रीत्वम् । तेन वाग्रूपाया गायत्र्यास्तद्विद्यात्वमित्यपि साधितम् । ततः पुरुषः को वेत्यपेक्षायां तं पूर्वोक्तपार्थिवशरीरवतः पुरुषाद् व्यावर्तयितुं यद्वैतद् ब्रह्मेत्यारभ्य, योऽयमन्तर्हृदय आकाश इत्यन्तेन तत्स्वरूपमाह । तेन मन्त्रे पुरुषत्वेन यदुक्तं तद् ब्रह्म आकाशो, न तु शरीरी पुरुष इत्युक्तम् । तत आधेयस्य कथं महिमाधारत्वमित्यतस्तथात्वं साधयितुं तस्य व्यापकत्वं तदुपासनं तत्फलं चाह । तदेतत्पूर्ण-

रश्मिः ।

शब्दो भवतीत्यर्थः । **ऋचेति** तावानित्यादिकया । **निवारित**मिति अन्यथा परापश्यन्तीमध्यमावैखर्याख्यपादचतुष्टयं वदेदिति भावः । किंरूपत्वं तस्या इत्यपेक्षायां पुरुषो ज्योतिरिति प्रत्यभिज्ञानुसारेण वाच्यवाचकयोरभेदोक्त्याराद्ब्रह्मरूपत्वमित्याहुः **तेनेत्यादिना** ग्रन्थेन । **यद्वेत्यादि** ऋक् समनन्तरमेव यद्वैतद्ब्रह्मेतीदं वा व तद्योयं बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाशोयं वा व स योयं अन्तःपुरुष आकाशो यो वै सोन्तःपुरुष आकाशो यं वा व स योयमन्तर्हृदय आकाश इत्यन्तेन वाक्येन । बहिर्धेत्यस्य बहिरित्यर्थः । आकाशस्याधिभौतिकादिभेदेन त्रिधा निरूपणं ज्ञेयम् । तेनाकाशस्तल्लिङ्गादित्यधिकरणेनावसररूपा संगतिरुक्ता । **तदेतदित्यादि** तदेतत्पूर्णमप्रवृत्तिपूर्णामप्रवर्तिनीं श्रियं लभते य एवं वेद इत्यनेनेत्यर्थः । अप्रवर्तीत्यस्य न कुतश्चित्प्रवर्तितुमुत्पत्तिं प्राप्तुं शीलमस्येत्यर्थः । अप्रवर्तिनीमित्यस्याविनाशिनीं कल्पस्थायिनीमित्यर्थः । **इत्यादिनेत्यत्र** आदिना पञ्च देवसुषयः स योस्य प्राङ् सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोन्नाद्यमित्युपासीत तत्तेजस्व्यन्नादो भवति य एवं वेदाथ योस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रं स चन्द्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान् यशस्वी भवति य एवं वेदाथ योस्य प्रत्यक् सुषिः सोऽपानः सा वाक् सोग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत तद्ब्रह्मवर्चस्व्यन्नादो भवति य एवं वेद । अथ योस्योदक् सुषिः स समानस्तन्मनः स पर्जन्यस्तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान् व्युष्टिमान् भवति य एवं वेदाथ योस्योर्ध्वसुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीतौजस्वी महस्वान् भवति य एवं वेद ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य द्वारपान् वेदास्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेदेति श्रुत्या निवेशयतीत्यर्थः । अत्र प्राक् सुषिश्च ।

भाष्यप्रकाशः ।

मित्यादिना । ततः कास्तद्विधा इत्यपेक्षायां तस्य ह वा एतस्य हृदयस्येत्यादिना पञ्चप्राणानिन्द्रियाणि तद्देवाँश्च द्वारपालकोटौ निवेशयति । षष्ठेन ज्योतिषा च षट्संख्यां पूरयति । तेनैते षडपि विधाः । एतद्व्यतिरिक्तः प्राणविद्यायां, प्राणो हि पिता प्राणो मातेति प्रसिद्धो जीवात्मकः प्राणः पाद इति सिद्ध्यति । सोऽपि न विविक्तः किंतु शरीरविशिष्ट इति तद्विशिष्टानां जीवानां पादत्वं, तस्य च मुख्यं स्थानं हृदयं, विधाश्च तत्रैव भूयस्य इति हृदयमपि पाद एव निविशते । ज्योतिश्चात्र हार्दमेव यदाकाशशब्देनोक्तं, हृद्यन्तर्ज्योतिरिति श्रुत्यन्तराच्च । अतः पूर्वोक्तरीत्या एकवाक्यत्वं निष्प्रत्यूहमित्यर्थः ।

यत्तु केचित् पुरःस्फूर्तिकमालम्ब्य गायत्र्या भूतपृथिवीशरीरहृदयभेदेन चतुष्पात्त्वं, तस्या वाग्रूपत्वकथनाद् हृदये प्राणानां चोक्तत्वात् तदुभयसहितानि तानि भूतानि संख्यायां निवेश्य तैः षड्भिर्गायत्र्याः षड्विधत्वं व्याख्याय, इदं यावदुक्तं तावानस्य महिमा विकारस्ततो ज्यायान् पुरुषो महान् विकारोऽस्य पुरुषस्य सर्वाणि भूतानि पूर्वं गायत्र्यात्मनोक्तान्येकः पादोऽस्य गायत्रीब्रह्मणस्त्रिपाद् अमृतं दिवि द्योतनवति स्वात्मन्यवस्थितमित्येवं मन्त्रं व्याख्याय तस्य गायत्र्यवच्छिन्नस्य ब्रह्मणो हृदयाकाश उपास्यत्वं च व्याख्याय तत उपास्त्यङ्गभूतं पञ्चद्वारपालोपसानं च व्याख्याय गायत्र्युपाधिकस्य हृद्युपास्यत्वेनोक्तस्यैव कौक्षेयज्योतिःप्रतीकत्वेनोपासनम् 'अथ यदतः परो दिवः' इत्यादिना विधीयते । अत्र चाथशब्दो विद्यान्तरोपक्रमार्थ इत्याहुः ।

रश्मिः ।

सुषिश्छिद्रम् । अस्येति हृदयस्य । कीर्तिः परोक्षख्यातिः । व्युष्टिरपरोक्षख्यातिः । **एते** इति पञ्च द्वारपाला ज्योतिश्चेत्येत इत्यर्थः । तेन प्राणरूपाणि भूतानि इत्यादिस्वोक्तसंदिग्धत्वात् प्रपञ्चयन्ति **एतद्व्यतीत्यादिना** । **प्रसिद्ध** इति पितृत्वमातृत्वे जीवानां प्रसिद्धे ईश्वरस्य तु पिताहमस्य जगतो मातेति न प्रसिद्धे । **किंत्वित्यादि** । पितृत्वमातृत्वयोः शरीरिधर्मत्वादिति भावः । धातृपितामह समभिव्याहारात् । **भूयस्य** इति षड्धर्मा इतिसंख्यातात्पर्यात् । **हृदयमिति** 'गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्' इतिसूत्रादौ । **निविशत** इति तथा चाश्रमवद्देहविशिष्टा जीवाः पाद इति तथेति भावः । **ज्योतिरित्यादि** 'योयमन्तर्हृदय आकाशः' इत्यत्राकाशशब्देनोक्तं यद्धार्दमाकाशं ज्योतिर्ब्रह्मैवेति योजना । ज्योतिश्च चकारेण पंचसुषयो जीवाः हृदयं हृदि अयमिति च्छान्दोग्यव्युत्पत्तेस्ततो ज्योतिः षष्ठीविधा । अत्र योयमितिश्रुतौ जीववद्धार्दं 'द्वौ सुपर्णौ भवतः' इति श्रुतेः परं तु ज्योतिर्न सुषिः हृदये आकाश इति हृदि अयं जीवस्तत्समीपे आकाश इति आत्मासन् काशः । वर्णलोपः । काशृ दीप्तौ आसमन्तात् काशत इति वा । सुषयस्तु न काशन्ते । आकाशशब्दस्य ज्योतिःसामानाधिकरण्ये श्रुतिं प्रमाणयन्ति स्म **हृद्यन्तरिति** । **अत इत्यादि** उपपादनात् । भाष्योक्त 'तावानस्य महिमा' इत्यादिरीत्या ऋग्विषयवाक्ययोरेकवाक्यत्वं निष्प्रत्यूहमिति । 'निःप्रत्यूहो महान् भोगः' इत्याचार्यप्रयोगात् । इत्यर्थ इति इदमेव वाक्यत्वं निःप्रत्यूहं निरुपसर्ग इति निष्कृष्टोर्थो बोध्यः । इति लिङ्गव्यत्ययेनान्वयः । अर्थपदाभावे तु सुष्ठ्वन्वय इति ज्ञेयम् । स्वोक्तं व्याख्यानं दृढीकर्तुं शांकरव्याख्यानमुपक्षिपन्ति **यत्त्वित्यादि** 'अङ्गं प्रती कोऽवयवः' इति कोशात् प्रतीकोवयवः ।

भाष्यप्रकाशः।

तन्मन्दम् । पुराणोपबृंहितश्रुत्युपष्टब्धेन व्याख्यातप्रकारेण पादानां विधानां च विवेकसिद्धावेवं सांकर्येण पादविधयोर्व्याख्यानस्यासंगतत्वात् । उक्तपुराणश्रुत्योरेवंविरोधेनैव मन्त्रव्याख्यानस्याप्यसंगतत्वात् । अथ योऽस्य दक्षिणः शुषिरित्यादावप्यथशब्दस्य सत्त्वेऽपि तत्र न विद्याभेदकत्वम्, 'अथ यदतः परः' इत्यत्र विद्याभेदकत्वमित्यत्र बीजानुपलम्भाद् अङ्गोपास्तिभेदप्रायपाठविरोधाच्चेति । एवमेकवाक्यतामुपपाद्य सिद्धमाहुः **अत** इत्यादि । अत एव ।

रश्मिः ।

दूषयन्ति स्म **तन्मन्दमित्यादिना** पुराणेन 'पादेषु सर्वा भूतानि पुंसः' इति श्लोकद्वयात्मकेनोपबृंहिता या श्रुतिः ।

'तावानस्य महिमा अतो ज्यायांश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' ॥

त्रिपादूर्ध्वउदैत्पुरुषः पादोस्येहाभवत्पुनः' इतिपुरुषसूक्तस्था तदुपष्टब्धेन प्रकृतश्रुतिव्याख्यानप्रकारेणेत्यर्थः। प्रकारपदं ज्ञापयति ह्यपरस्यापि मायावादप्रकारस्य पुराणान्तरः उपष्टम्भोस्तीति कृष्णवाक्यानुसारित्वं सिद्धान्ते उत्कर्षः। **अयमर्थः**। पुराणेन वेद उपष्टब्धव्यो न युक्त्या। केवलयुक्तीनां तर्काप्रतिष्ठानसूत्रे प्रत्याख्यानात् तदपेक्षया पुराणस्य महत्त्वात्। तत्र च पादेषु च भूर्भुवः सुवो महर्लोकस्था व्यष्टिजीवाः प्रथमः पादः । जनलोकस्था ब्रह्मचारिणो व्यष्टिजीवा द्वितीयः पादः। तपोलोकस्था वानप्रस्थाः व्यष्टिजीवास्तृतीयः पादः सत्यलोकस्थाः संन्यासिनो व्यष्टिजीवाश्चतुर्थः पादः। एतदनुरोधेन पुरुषसूक्ते पाद इत्यत्र सुपां सुः पादा इत्यर्थः। तथा च पुराणे साधिष्ठानानां जीवानां पादत्वं पुरुषसूक्तेपि विश्वा भूतानीति साधिष्ठानानामेव तेषां तत्त्वमित्यत्रापि भूतपृथिवीशरीरपरिचायितहृदयस्थानं तस्य ह वेत्यादिनोक्तानां जीवानां पादत्वं तेषामेव च पञ्चपुरुषाणां ज्योतिषश्च षड्विधात्वमिति सिद्ध्यति । इति पादानां विधानां च विवेकसिद्धावित्यर्थः। **पादयोरि**ति वाक्प्राणौ निवेश्य पादयोश्चतुष्पदाषड्विधयोर्व्याख्यानस्येत्यर्थः। तथा च सैषा चतुष्पदा षड्विधा गायत्रीति वाक्यं न पादानुवादकं तत् षड्विधात्वानुवादकं च किं तु प्रतिज्ञावाक्यम्। पादतद्विधानां प्रतिपादकं तु तस्य ह वा इति वाक्यमिति हृदयम्। एवं तदुक्तपादान् दूषयित्वा तावानिति मन्त्रव्याख्यानं दूषयन्ति स्म **उक्तपुराणेत्यादिना**। न च पुरुषपदं पुरुषावतारवाचकं तथा वाक्येपि पुंसः इति पदं पुरुषावतारपरमिति शङ्क्यम्। 'तस्माद् विराडजायत विराजो अधिपुरुषः' इति तस्य तत्कार्यश्रावणात्। अतः 'पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः' इतिश्रुतेरत्र परमकाष्ठापन्नवस्तु पुरुषपदाभिधेयम् । न तु विकृतः पुरुषः। एवं पुराणवाक्ययोरपि पुरुषसूक्तविवरणात् स एवार्थः। किं च पुराणे व्यष्टिजीवाः पादेषु व्याख्याताः। अत्र तु सर्वाणि भूतानि तेजोबन्नादीनि सस्थावराणि जङ्गमानि गायत्र्यात्मनोक्तान्येकः पादोतो विरोधेनेत्यर्थः। गायत्र्युपाधिकस्येत्यादिनोक्तं दूषयन्ति स्म **अथ य इत्यादि**। नन्वङ्गोपासनातः कौक्षेयज्योतिरुपासनस्य भेदसाधनाय तथाव्याख्यायत इति चेत्तत्राहुः **अङ्गोपास्तीत्यादि**। अङ्गोपास्तिभेदे प्रायपाठविरोधोङ्गोपास्तिभेदप्रायपाठविरोधः सुप् सुपेतिसमासः। तथा सतीति सामानाधिकरण्ये सप्तमी । असमस्तपाठोत्र भाति । द्वारपालोपासनेङ्गोपास्तित्वं त्वविरुद्धम्।

भाष्यप्रकाशः ।

मृग्वाक्ययोरपि परस्पराकाङ्क्षासत्त्वेन पादानां ब्रह्मधर्मत्वाज्ज्योतिषो ब्रह्मत्वं सिद्धमित्यर्थः । अत्रैतद्बोध्यम् । मन्त्रे, 'पादोऽस्य सर्वा भूतानि' इत्यत्र, 'क्षरः सर्वाणि भूतानि' इति गीतोक्तः क्षरः पुरुषो जीवसमष्ट्यात्मको यद्यपि वक्तुं शक्यते । किंच 'हृद्यन्तर्ज्योतिःपुरुषः' इति श्रुत्या जीवस्य हृदयं स्थानं, तद्विराड्जीवस्य स्वर्लोकः 'हृदा स्वर्लोकः' इति द्वितीयस्कन्धात् । अत्र च स्वर्लोकस्य द्वारपान् वेदेति तत्प्रत्यभिज्ञानात् । तथापि मन्त्रे, त्रिपादस्याऽमृतं दिवीति विशेषकथनात् पुरुषसूक्तविवरणाध्याये च तेषामाश्रमत्रयस्थत्वेन व्यष्टितया निगमनात्, पादोऽस्येत्यत्रापि व्यष्टिजीवा एव ग्राह्याः । अन्यथा त्रिपादित्यादेर्विरोधापत्तेः । एवं सिद्धेऽत्रत्यानां सर्वभूतानामुपरितनानां च व्यष्टिजीवत्वे तेषां सर्वेषां हृद्यन्तरिति श्रुत्या हृदयमेव स्थानमिति तस्यैकत्र षड्विधत्वेऽन्यत्रापि तथात्वमिति ब्रह्मपादानां गायत्रीपादतुल्यत्वं तद्विधानां च गायत्रीविधातुल्यत्वं भवति । एवं सति यथा प्रणवविद्यायां ब्रह्मणः पादसंख्यापूरकत्वं तथास्यां गायत्रीविद्यायां विधासंख्यापूरकत्वम् । एवमत्र चरणानां ब्रह्मधर्मत्वात् प्रकरणस्य ब्राह्मत्वे सिद्धे शब्दमात्रस्य ब्रह्मण्येव मुख्यवृत्तत्वात् । 'तमेव भान्तम्', 'यदादित्यगतं तेजः' इत्यादिश्रुतिस्मृतिभिर्दीपनात्मकस्य तेजोलिङ्गस्यापि ब्रह्मण्येव समन्वयात् 'अहं वैश्वानरो भूत्वा' इतिगीतावाक्येन जाठरधर्मस्योष्णिमादेरपि तत्र समन्वयात् । द्युमर्यादत्वस्यापि ब्राह्मणश्रमणन्यायेनाधिक्यबोधनार्थत्वात् । चक्षुष्यः श्रुतो भवतीति फलस्यापि भगवदीयत्वेन दृश्यो विख्यातश्च

रश्मिः ।

इति न दूषितम् । ऋग्वाक्ययोरिति तावानित्यस्य विषयवाक्यस्य च । न हि खल्ववयववाचकपदस्यावयविवाचकत्वं प्रसिद्धम् । अतश्चरण इत्युक्ते पुरुषस्याग्रहणात्कथमत्र ब्रह्मज्योतिरित्याशङ्कां प्रकरणस्य ब्राह्मत्वं साधयन्तोऽपनयन्ति स्म अत्रैतदित्यादिना । वक्तुमिति पादत्वेन वक्तुम् । श्रुत्यापि जीवसमष्ट्यात्मकत्वं पादस्य संभवतीत्याहुः किं चेत्यादिना । तत् स्थानमित्यर्थः । हृदेत्यादि ।

'भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोस्य नाभितः ।
हृदा स्वर्लोक उरसा महर्लोको महात्मनः' ॥

इत्युक्तकल्पितपदेनान्वयः । ननु प्रकृतश्रुतौ स्वर्लोकः कुत्र प्रत्यभिज्ञातः इत्यत आहुः अत्र चेत्यादि । तथा च श्रुतावपि पुरुषो जीवसमष्ट्यात्मको वक्तुं शक्यत इति भावः । अन्यथेति ग्रहणे जीवसमष्ट्यात्मकपुरुषप्रकारे सति । एवमिति त्रिपादित्यादेरविरोधचिन्तनप्रकारेण । ननु सैषा चतुष्पदा षड्विधा गायत्रीति गायत्र्याः पादानां षड्विधत्वं न तु ब्रह्मणः पादानां तथात्वमित्याशङ्कायां तत्र तस्यातिदेश इत्याहुः तस्यैकत्रेत्यादिना । अन्यत्रेति प्रणवादिविद्यायामपि पादस्य षड्विधत्वमित्यर्थः । पादसंख्येत्यादि । 'तुरीयं परममृतमजं ब्रह्म' इति श्रुतेः । विधेत्यादि ज्योतीरूपस्य ब्रह्मण इत्यर्थः । एतावता प्रकरणस्य ब्राह्मत्वं साधितमतः परं ज्योतिषो ब्रह्मवाचकत्वं साधयितुं पूर्वपक्षोदितदोषान् दूरीकुर्वन्तो हेतूनाहुः शब्दमात्रस्येत्यादिना । अन्तिमपादत्वात्तु ह्यभिधावृत्तिर्ज्योतिःपदस्य ब्रह्मणीति सिद्धम् । ब्राह्मणश्रमणेत्यादि ब्राह्मणश्चेच्छ्रमणः श्रमशीलश्चेदत्युत्कृष्टः इति न्यायेन । एवं ब्रह्मणोपि व्यापकरूपस्य तेजसो द्युमर्याददीपनाश्रयत्वाद्विरुद्धधर्माश्रयत्वादत्युत्कृष्टमित्यर्थः । भगवदीयत्वेनेति उपक्रमे 'ॐमित्येतदक्षरमुद्गीथमुपासीत' इति ह्युपसंहारे च 'आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्य' इति निरोधलक्षणग्रन्थोक्तरीतिदर्शनादुपक्रमोप-

ब्रह्मधर्मनिर्णयार्थमिदमधिकरणं चरणानामौपचारिकत्वव्यावृत्त्यर्थम् । एतन्निर्णयेन प्रणवादिविद्या निर्णीता वेदितव्याः ॥ २३ ॥

भाष्यप्रकाशः ।

भवतीत्याकारकत्वात् । 'अपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः' इति पञ्चमस्कन्धोक्तरीत्या तस्य महाफलत्वात् । 'वसन्ते ज्योतिषा यजेत', वाचैव ज्योतिषेत्यादिश्रावणेन ज्योतिःपदस्य तेजोमात्रवाचकत्वाभावाच्च ज्योतिषो ब्रह्मत्वमिति हृदयम् । एवं सिद्धान्तमुक्त्वा, तद्धर्मोपदेशाधिकरणेनास्य गतार्थताशङ्कां परिहरन्ति ब्रह्मेत्यादि । तथाच तत्र हेतोः सिद्धत्वेनात्र तु साध्यत्वेन फलभेदान्न गतार्थतेत्यर्थः । ननु ब्रह्मप्रतिपत्तिरूपस्य फलस्याऽन्यथापि सिद्धेः का हेतुसाधनावश्यकतेत्यत आहुः एतदित्यादि । पादनिर्णयेन पादवत्योऽन्या अपि विद्या निर्णीताः स्युरित्येतदर्थं तदावश्यकतेत्यर्थः ॥ २३ ॥

रश्मिः ।

संहाराभ्यामर्थनिर्णयादुक्तमेतत् । **तस्य महेत्यादि** संपद्याविर्भावाधिकरणन्यायेन प्राप्तं शरीरं यस्य तस्य दर्शनीयत्वं व्याख्यातत्वं च भगवदीयत्वेनेति महाफलत्वमित्यर्थः । **इत्यादीति** ह्यत्रादिपदेन मनोज्योतिर्जुषतामित्यस्य संग्रहः । **हेतोरिति** धर्मरूपस्य । **साध्यत्वेनेति** हेतुत्वेनोक्तश्चरणाभिधां गायत्रं ब्राह्मं वेति संदेहात्साध्यत्वेनेत्यर्थः । **ननु ब्रह्मेति** औपचारिकत्वव्यावृत्त्या चरणानां ब्रह्मप्रतिपत्तिरूपस्य फलस्य । **अन्यथेति** तुरीयचरणचरमत्वादिति हेतुप्रकारेणापि सिद्धेः । **हेतुसाधनेति** हेतौ ब्राह्मत्वसाधनावश्यकतेत्यर्थः । नन्वन्तस्तद्धर्माधिकरणेनैकान्तरितश्रुतिविचारोपि कृतः ।

'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् ।
एतैरादित्यमण्डलं सर्वैरेव विधास्यते' ॥

इत्यारणात् । अत्र तु चरणानां ब्रह्मधर्मत्वोक्त्या प्रकाशाश्रयवद्वेति सूत्रोक्तब्रह्मब्रह्मधर्मभेदाय प्रतिबन्धकं चरणौपचारिकत्वं तद्व्यावृत्त्यर्थं विचारः कृतः इति फलभेदः कुतो नादृत इति चेन्न । अस्यार्थस्यैव ननु ब्रह्म इत्यादिभाष्यविभागेनोक्तत्वात् । **विद्या इति** । ताश्च 'सर्वासामविरोधः सामान्यतदभावाभ्यामौपसदवत्तदुक्तम्' इति तार्तीये सूत्रे शंकरभाष्ये प्रसिद्धा भाष्यविभागे प्रपञ्चिताश्च । **इत्यर्थ** इति तथा चैष सूत्रार्थः । ब्रह्म ज्योतिःशब्दवाच्यं चरणाभिधानात् । चरणप्रत्यभिज्ञानादिति । चरणप्रत्यभिज्ञानं त्वेवम् । अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यत्र सर्वनामत्वेन प्रसिद्धार्थवाचकेन यच्छब्देन तावानिति पूर्ववाक्ये द्युसंबन्धित्वेन प्रसिद्धं ब्रह्मात्रापि द्युसंबन्धात्प्रत्यभिज्ञायत इति । अत्रेदं विज्ञेयम् । ज्योतिषो ब्रह्मत्वमित्यनेन ब्रह्मधर्मनिर्णयार्थमिदमधिकरणमिति भाष्यं विरुध्यते । ज्योतिःपदस्याभिधावृत्तौ ब्रह्मणि सत्त्वात्, ज्योतिःपदस्य चरणे वृत्त्यभावात् । तत्कथं ब्रह्मधर्मनिर्णय इति । उच्यते । चरमस्य धर्मिवाचकत्वेपि धर्मवाचकत्वस्य तुरीयं परममृतमजं ब्रह्मेत्यादौ दृष्टत्वात् चरमचरणवाचकत्वमपि ज्योतिःपदस्येति । न च युगपद्वृत्तिद्वयविरोध इति वाच्यं, अमुष्य वस्तुन एव तथात्वादिति ॥ २३ ॥

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम् ॥ २४ ॥

ननु नात्र ब्रह्म चतुष्पान्निरूपितं किंतु गायत्रीछन्दः । 'गायत्री वा इदं सर्वं यदिदं किंच' इत्युपक्रम्य तामेव भूतपृथिवीशरीरहृदयभेदैर्व्याख्याय, 'सैषा चतुष्पदा षड्विधा गायत्री। तदेतदृचाभ्युक्तं, एतावानस्य महिमा'इति। तस्यामेव व्याख्यानरूपायां गायत्र्यामुदाहृतो मन्त्रः कथमकस्माद् ब्रह्म चतुष्पादभिदध्यात् । यद्वै तद् ब्रह्मेति ब्रह्मपदमपि छन्दसः प्रकृतत्वात् तत्परमेवावगन्तव्यम् । शब्दस्यापि ब्रह्मवाचकत्वसिद्धेर्ब्रह्मोपनिषदितिवच्छन्दब्रह्मेति च । तस्माच्छन्दस एव पादाभिधानान्न ब्रह्मधर्माः पादा इति चेन्नैष दोषः । तथा चेतोऽर्पणनिगदात् । तथा तेन द्वारेण चेतसोऽर्पणं निगद्यते । 'गायत्री वा इदं सर्वं यदिदं किंच' इति । न हि वर्णसमाम्नायरूपस्य सर्वत्वमनुपचारेण संभवति । यथा सूचीद्वारा सूत्रप्रवेशस्तथा गायत्रीद्वारा बुद्धिस्तत्प्रतिपाद्ये ब्रह्मणि प्रविशेदिति । कुत एतदेवं प्रतिपाद्यत इति, तत्राह । तथा हि दर्शनम् । तथा तेनैव प्रकारेण दर्शनं ज्ञानं भवति । स्थूला बुद्धिर्नाहत्यैव ब्रह्मणि प्रविशेदिति । एतेन

भाष्यप्रकाशः ।

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् ॥ २४ ॥ आक्षेपांशं व्याकुर्वन्ति नन्वित्यादि । अकस्मादिति तात्पर्यलिङ्गोपष्टम्भं विना । तथाचोपक्रमस्य तात्पर्यलिङ्गत्वादसंजातविरोधत्वेन प्रबलत्वाच्च तदनुरोधेनैव मन्त्रव्याख्यानमुचितमिति मन्त्रेण ब्रह्मपादासिद्धेर्हेतुः स्वरूपासिद्ध इत्यर्थः । परिहारांशं व्याकुर्वन्ति तथा तेनेत्यादि । अत्र हि तथा चेतोऽर्पणनिगदे सर्वरूपत्वोक्तिर्लिङ्गम् । वाग्रूपायां गायत्र्यां तस्यासंभावितत्वात् । तदेव च विरुद्ध्यमानमुपक्रमस्य प्राबल्यमपहन्ति । निवृत्ते च तस्मिन् प्रकरणस्य ब्राह्मत्वं मन्त्रवर्णादेव निश्चीयते अतस्तथेति । अग्रिमं व्याकुर्वन्ति कुत इत्यादि । वेदेनेति शेषः । एवं निरूपणप्रयोजनमाहुः एतेनेत्यादि । तथाच सर्वासां मन्त्रोपासनानां निर्णयार्थ-

रश्मिः ।

छन्दोभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम् ॥ २४ ॥ भाष्ये । अभ्युक्तमिति क्वचिदभ्यनूक्तमित्यपि पाठः । प्रकृते । तात्पर्येत्यादि तात्पर्यस्य लिङ्गं तस्योपष्टम्भस्तं वित् । तात्पर्येत्यादि तात्पर्यस्य तत्प्रतीतीच्छयोच्चरितत्वस्य लिङ्गं ज्ञापकं तत्त्वादित्यर्थः । किं च । असंजातेति न संजातो गायत्रीप्रतिपादनविरोधो यस्य तत्त्वेन । स्वरूपासिद्ध इति पक्षेऽभावात्तथा । तस्येति सर्वरूपत्वस्य । तदेवेत्यादि सर्वरूपत्वमेवेत्यर्थः । तस्मिन्निति उपक्रमप्राबल्ये । मन्त्रवर्णादिति तावानिति मन्त्रवर्णादेव निश्चीयत इत्यर्थः । भाष्ये । प्रतिपाद्ये ब्रह्मणीति न च भर्गःपदाच्छिवः, तमउपाधिकं ब्रह्म तत्प्रतिपाद्यं न शुद्धमिति शङ्क्यम् । सर्वेषां पदानां शुद्धब्रह्मणि शक्तेः । अन्यत्प्रहस्ते स्फुटम् । प्रकृते । मन्त्रेत्यादि

सर्वा मन्त्रोपासना व्याख्याताः। हि युक्तश्चायमर्थो लोके स्वतो यन्न प्रविशति तदुपायेन विशतीति। न त्वदृष्टद्वारा। दृष्टे संभवत्यदृष्टकल्पनाया अन्याय्यत्वात्। तस्मात् पादा ब्रह्मधर्माः॥ २४॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम्॥ २५॥

किंच। भूतादयोऽत्र पादा व्यपदिश्यन्ते। भूतपृथिवीशरीरहृदयानि चत्वारि। न ह्येतानि गायत्र्याः पादा भवितुमर्हन्ति। ब्रह्मपरिग्रहे तूपपद्यन्ते। यावन्मुख्यमुपपद्यते तावन्न गौणं कल्पनीयम्। अयमर्थः। पूर्वहेतौ छन्दसोऽपि पादा व्यपदेशाद् भवन्ति। तथापि ब्रह्मण एव युक्ता इति। पुरुषसूक्ते एतावानस्येत्यस्य ब्रह्मपरत्वात्। अस्मिन् वाक्ये तु गायत्र्याः पादा एव नोपदिष्टाः किंतु ते ब्रह्मण एव पादा इति।

भाष्यप्रकाशः।

मेतदित्यर्थः॥ २४॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम्॥ २५॥ युक्त्यन्तरं वदतीत्याहुः **किंचेत्यादि**। **अयमर्थः**। त्वया हि गायत्र्याः प्रकरणित्वमुपगम्य सन्निहितत्वाद् भूतादय एव पादत्वेन वाच्याः। ते च स्वरसेनासंभवन्तो गौण्या योज्याः। गौणीत्वेकत्र वास्तवत्वेऽन्यत्र भवत्यत-स्तथेति स एव मुख्यो विवक्षित इति श्रुतौ वक्ष्यमाणपरामर्शं बोधयितुं सैषेत्येतत्पदमुक्तम्। अन्यथा तु पूर्ववदियं वा व सेत्येवं वदेदित्यर्थः। नन्वयमर्थस्तु पूर्वसूत्रेणैव सिद्ध इत्यस्य सूत्रस्य किं प्रयोजनमत आहुः **अयमर्थ** इत्यादि। **पूर्वहेतौ** चेतोऽर्पणनिगदरूपे **छन्दसोऽपि पादा** गौण्या कथनाद् **भवन्ति**। **तथापि ब्रह्मणः पादा युक्ता इति** ज्ञायते। नच तर्हि भूतादय एव मुख्यतया ब्रह्मणः पादा भवन्त्विति शङ्क्यम्। **पुरुषसूक्ते, एतावानस्येत्यस्य ब्रह्मपरत्वात्**। तदर्थस्य चात्र विवरणर्चि प्रत्यभिज्ञानात्। नच तत्रापि सर्वभूतपदेनैतान्येवोच्यन्त

रश्मिः।

'प्रयोगकरणभूतः शब्दो मन्त्रः' तदुक्तोपासनानाम्॥ २४॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम्॥॥ २५॥ पूर्वसूत्रे भूतपृथ्वीशरीराणां परिचाय्यकत्वेनेति भाष्येण तेषां पादत्वं नोक्तम्। अत्र तु भूतादीनां पादत्वमुक्तं तत्कथमित्यपेक्षायां तत्प्रकारमाहुः **अयमित्यादि**। **वास्तवत्व** इति यथा गौर्वाहीक इत्यादिस्थले जाड्यादेर्गवि वास्तवत्वे। **अतस्तथेति** यतो ब्रह्मपरिग्रहाभावे गौण्यापि पादा न योजयितुं शक्याः। अतो ब्रह्मपरिग्रह इतीति। **स** एवेति भूतादिपादव्यपदेशो मुख्य एवेति 'सैषा चतुष्पदा षड्विधा' इत्यत्र श्रुतौ वक्ष्यमाणानां 'तस्य ह वा एतस्य' इत्यादिना पादानां विधानां च समीपतरवाचिनैतत्पदेन परामर्शं बोधयितुं सैषेत्येतत्पदमुक्तमित्यर्थः। यद्वा। श्रुतौ सैषा चतुष्पदेत्यत्र गायत्रीपदेन लक्षणया वक्ष्यमाणस्य तद्वैतद्ब्रह्मेति ब्रह्मणः परामर्शं बोधयितुं सैषेत्यत्र समीपतरवाच्ये तत्पदमुक्तमित्यर्थः। अत्र युक्तिमाहुः **अन्यथेति**। ब्रह्मपरामर्शाभावे प्रकारे सति तु समीपतरवर्तिवाचकस्यैतत्पदस्य निष्प्रयोजनत्वे सति पूर्ववद्या वै सा पृथिवीयं वा व सा इति श्रुताविव प्रत्यक्षवाचकस्येदम एव प्रयोगः कृतः स्यादित्यर्थः। **सर्वभूतेत्यादि** सर्वा(विश्वा)भूतानीत्यस्यार्थकथनमिदम्। तस्य च सर्वभूतवाचकत्वेन विश्वभूतपदेनेत्यर्थः। विश्वभूतपदेनेति वार्थः। **एतानीति** भूतपृथिवीशरीरहृदयानीत्यर्थः।

तद्वाचकत्वेन गायत्र्यामुपचारेणोपसंहारः । चकारादर्थो न शब्दस्य पादा भवन्ति, किंत्वर्थस्यैवेति । तस्माद्ब्रह्मवाक्यत्वे भूतादीनां पादत्वमुपपद्यते नान्यथेति । तस्मात् पादानां ब्रह्मधर्मत्वम् ॥ २५ ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २६ ॥

'पादोऽस्य विश्वा भूतानि' सर्वाणि भूतान्येकः पादः । पादत्रयममृतं दिवीत्येकोऽर्थः ।

'पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ।
अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्द्धसु' ॥ इत्यपरः ।

भाष्यप्रकाशः ।

इति शङ्कयम् । पुरुषसूक्तविवरणाध्याये चैतद्व्याख्यान आश्रमचतुष्टयस्थानां भौतिकशरीरविशिष्टजीवानामेव व्याख्यातत्वाच्छरीरवैशिष्ट्ये च भूतपृथिव्यादेरपि परिचायकत्वेनैव संग्रहान्मुख्यतया ग्रहणे तद्विरोधापत्तेस्तन्मुख्यतया वक्तुमशक्यत्वात् । नच गायत्री वेति वाक्यविरोधः । अस्मिन् वाक्य इत्याद्युक्तरीत्या तेषां गायत्र्यामुपचारेणोपसंहार इति तद्विरोधाभावादित्यर्थः । तद्वाचकत्वेनेति ब्रह्मवाचकत्वेन । उपसंहार इति सैषा चतुष्पदेत्यादिनोक्तः सः । तथाच पादानां ब्रह्मधर्मत्वाभावे गायत्र्यां तद्व्यपदेशस्यापि वक्तुमशक्यत्वात् त्वया स्वमतोपपादनायाप्यसदुक्तमवश्यमङ्गीकरणीयमिति, गले पादुकान्यायेन तदङ्गीकारणं प्रयोजनमित्यर्थः । एतेन सूत्रस्थमेवंपदं व्याख्यातम् । स्फुटमन्यत् ॥ २५ ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २६ ॥ सूत्रं व्याख्यातुं तदर्थं

रश्मिः ।

तन्मुख्येत्यादि तेषां भूतपृथिवीशरीरहृदयानां मुख्यपादताया इत्यर्थः । स इति चतुष्पाद् ब्रह्मत्वेन दृष्टा गायत्र्येतदुपासनोक्तफलाय भवतीत्येतदर्थं पादानां विधानं चोपसंहार इत्यर्थः । वृत्त्यनुसारेणेदं प्रतिज्ञावाक्यमुक्तम् । गले पादुकान्यायेनेति अयं क्वचित्प्रसिद्धः कैकेय्या रामराज्यार्थं यतन्त्या रामपादुकां गले स्वे कृते इति न्यायो वा । भरतेन रामपादुके सेविते इति तयापि तथा । एवमनिच्छतोपि ग्राहिते पादुके यथा तथेदमपि वृत्तमित्यर्थः । ब्रह्मण एव पादा युक्ता इति सूत्रस्थस्यैवंपदस्यार्थ इत्याहुः एतेनेत्यादिना । वृत्तौ त्वेवमित्यस्य तव मतोपपत्तिरित्यर्थ उक्तः । अन्यदिति तस्मादित्यादिना सिद्धकथनं स्फुटार्थमित्यर्थः ॥ २५ ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २६ ॥ अत्रैवं भाति । बहुधा हि पादनिरूपणं भवति तत्र 'पादेषु सर्वभूतानि' इत्यत्र भूरादयः पादाः 'पादास्त्रयो बहिश्च' इत्यत्राश्रमस्था जीवाः पादाः । पादोस्येत्यत्र सर्वभूतान्येकः पादोऽमृतादयस्त्रयस्त्रयः पादा इति सिद्ध्यति । किंचाकारउकारमकारार्धमात्राकाराः पादाः ब्रह्मविष्णुकपर्दितुरीयपादाः भूतपृथिवीशरीरहृदयानि पदानि । प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलाः पादाः । पृथ्वी कलाऽन्तरिक्षं कला द्यौः कला समुद्रं कलाः पादाः । अग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलाः पादाः । प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलाः पादाः । एकशब्दश्च संख्यावाची । मुख्यत्वं च पुरःस्फूर्तिकत्वे

पुरुषसूक्तानुरोधे द्वितीय एवार्थः। प्रथमे तावत्। ननु दिवीति मन्त्रे सप्तम्या आधारत्वं प्रतिपाद्यते। अतः परमित्यत्र पञ्चम्या अनाधारत्वमत उपदेशभेदात् पूर्वोक्तपरामर्शाभावान्न ज्योतिषो ब्रह्मत्वमिति चेन्नैष दोषः। उभयस्मिन्नप्यविरोधात्। मन्त्रे दिव्येवोक्तम्। अस्मिन् वाक्ये सर्वत्रोच्यते। सर्वत्र

भाष्यप्रकाशः।

प्रथमतो मन्त्रं व्याकुर्वन्ति **पादोऽस्येत्यादि**। **एकोऽर्थ इति** पुरःस्फूर्तिकः सर्वादृतस्तृतीयोऽर्थः। अस्मिन् पक्षे श्रौतं दिवीति पदं द्योतनात्मस्वरूपपरम्। अतः पादसंख्यापूर्तिस्त्वमृतात्मकेन स्वरूपेणैव। न तु जीवैर्न वा लोकैरिति। द्वितीयस्कन्धानुसारेणेतरमाहुः **पादेष्वित्यादि**। श्लोकार्थस्तु तिष्ठन्ति येष्विति स्था भूरादिलोकाः स्थितिपदवाच्यास्ते पादा यस्येति स्थितिपात्। तस्य स्थितिपदो भगवतो भूरादिषु पादेषु सर्वाणि भूतानि विदुः। त्रिमूर्ध्नो भूरादित्रयोपरिवर्तमानस्य महर्लोकस्य मूर्धसूपरितनेषु जनस्तपःसत्येषु, 'अमृतं क्षेममभयम्' इति सुखत्रयमधायि। अतो भूरादिचतुष्के अनित्यं सुखमित्यर्थादायाति। अस्मिन् पक्षे श्रौते पादशब्दे, सुपां सुलुगिति सुपः स्वादेशः। अस्येत्यस्य स्थितिपदः पुंस इत्यर्थः। दिवीति अनित्यं सुखमित्यर्थादायाति। अस्मिन् पक्षे श्रौते पादशब्दे, सुपां सुलुगिति सुपः स्वादेशः। अस्येत्यस्य स्थितिपदः पुंस इत्यर्थः। दिवीति जनआदित्रयोपलक्षकम्। अमृतपदममृतत्वस्यानुव्यवसीयमानत्वात् सुखत्रयोपलक्षकम्। एवं सति द्वितीयस्योपपादनसापेक्षत्वात् प्राञ्जलः पूर्व

रश्मिः।

सति सर्वादृतत्वं तदेतदभिसंधायाहुः **पुरःस्फूर्तिक इत्यादि**। अस्यार्थस्य तृतीयत्वमुपपादयन्ति स्म **अस्मिन्नित्यादिना**। **इतीति** तथा चास्यार्थस्योपबृंहितत्वे[न] श्रौतमात्रत्वात्तृतीयत्वमित्यर्थः। यदि चास्याप्यर्थस्य 'पादास्त्रयः' इत्यनेनोपबृंहितत्वं तदा द्विधा पादनिरूपणम्। एतच्चैवकारोप्यर्थः इत्यादिनाग्रे सूचयिष्यन्ति। तथा चोभयस्मिन्निति सौत्रं पदं सिद्धम्। **तिष्ठन्तीत्यादि**। अत्र चत्वारो लोकात्मका ब्रह्मपादाः सेत्स्यन्ति। **स्थितिपदे**त्यादि स्था इत्यत्राधिकरणे घञ्। स्थितिशब्दश्च लोकेषु रूढ इति भावः। **जनस्तप इत्यादि** अत्र सान्तः। **अमृतमित्यादि अमृतं** तु जनलोके सुखम्। तस्य स्वरूपतः स्थानतश्च नाशाभावात्। तथा च न विद्यते मृतं नाशो यस्येत्यमृतम्। तपोलोके तु क्षेममक्षेमदर्शनाभावात्। जनलोके तु महर्लोकात् पलाय्यागतानां दुःखितानां दर्शनरूपमक्षेमदर्शनमस्ति तपोलोके तु नैवमिति तत्सुखस्य क्षेमत्वम्। सत्यलोके तु सुखमभयरूपं मोक्षप्रत्यासन्नत्वादित्येवममृतादिभेदो ज्ञेयः। **आयातीति** 'यान्त्युष्मणा महर्लोकाज्जनं भृग्वादयोर्दिताः' इतिवाक्यात् महर्लोकेपि स्थानत्यागलक्षणस्य दुःखस्य विद्यमानत्वेनानित्यप्रायमेव सुखमिति भावः। श्रुत्येकवाक्यत्वायाहुः **अस्मिन्नित्यादि**। **सुप** इति सप्तमीबहुवचनस्येत्यर्थः। तथा च पादोस्य विश्वा भूतानीत्यस्य पादेषु स्थितिपदः पुंसो विश्वा भूतानि इत्यर्थः। **जन आदीति** जनपदं सकारान्तमत्र क्वचिच्च ग्रीवायां जनलोकोस्य इत्यादावकारान्तं पदमिति बोध्यम्। अमृतपदेन तात्पर्यानुपपत्त्यनुसंधानात्तदीयोपरितनत्वादिधर्मैः सादृश्याद्गौणी सारोपा। अत्र द्योतनाद्यतिशय एव प्रयोजनम्। गौर्वाहीक इतिवत्। द्यौर्जनःतपःसत्यानि हीति। **सुखत्रयेत्यादि** त्रिपादित्यस्य त्रिभिः पद्यते प्राप्यते इति त्रिपादिति विग्रहः। अत्रापि गौणी सारोपा। मृतममृताभयक्षेममिति।

विद्यमानस्य दिवि विद्यमानत्वं न विरुद्ध्यते । अतःशब्देन न तत्राविद्यमानत्वं किं तु ततोऽप्यन्यत्र सत्त्वं बोध्यते । तस्मात् सप्तमीपञ्चमीनिर्देशो न विरुद्धः । द्वितीये तु । ननु मन्त्रे अमृतपदमत्र ज्योतिःपदमत उपदेशभेदाच्चतुर्थश्च पादो

भाष्यप्रकाशः ।

एव ग्राह्य इति शङ्कायामाहुः **पुरुषेत्यादि** । एवकारोऽप्यर्थे । पूर्वस्यापि पादास्त्रय इत्युक्तरीत्या पुरुषसूक्तानुसारित्वात् । एवमभिप्रेत्य सूत्रं द्वेधा व्याकरिष्यन्त आहुः **प्रथमे तावदित्यादि** । प्रथम इति पुरःस्फूर्तिके तृतीये । **पूर्वोक्तपरामर्शाभावादिति** विभक्तिभेदेन मन्त्रोक्तस्य दिव्शब्दस्यास्मिन् प्रत्यभिज्ञाभावात् । सिद्धान्तग्रन्थे पञ्चम्याः कथं सर्वत्र विद्यमानताबोधकत्वमत आहुः **अत इत्यादि** । अतो दिव इत्युक्त्वा, सर्वतः पृष्ठेष्वित्यादिश्रावणेन पञ्चम्या ल्यब्लोपीयत्वे, इमं द्युलोकमारभ्येत्यर्थात् तथेत्यर्थः । अत्र सर्वे, वृक्षाग्रे श्येनो वृक्षाग्रात् परतः श्येन इति विभक्तिभेदेऽपि यथैकार्थ्यप्रत्यभिज्ञा तथात्रेति दृष्टान्तमात्रमाहुः । अत्र तु विभक्तिभेदस्य प्रयोजनमप्युक्तमिति विशेषः । द्वितीयपक्षेण व्याकर्तुं पूर्वपक्षमाहुः **ननु मन्त्र इत्यादि** । अन्यमप्युपदेशभेदमाहुः **चतुर्थश्च पादो हृदयमिति** । मन्त्रे लोकात्मकः पादः । ब्राह्मणस्य तु हृदयमुपक्रम्य पठितत्वाद् हृदयं पादत्वेन तत्र सिद्ध्यतीत्युपदेशभेद इत्यर्थः ।

रश्मिः ।

पादास्त्रय इत्यादि । श्लोकस्तु ।

'पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ।
अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः' ॥ इति ।

श्लोकार्थस्तु चत्वारश्चाश्रमाः भगवतश्चत्वारः पादाः यतो भगवान् तानधितिष्ठति तत्र त्रयः पादाः ब्रह्मचारी वानप्रस्थः संन्यासी च ते त्रयोपि त्रिलोक्या बहिश्चासन् चकारेण स्वेच्छयान्तरेपि । न जायन्ते प्रजादिरूपेणेत्यप्रजाः गृहस्थव्यतिरिक्ताः । अपरो हीनः गृह एव मेधा बुद्धिर्यस्येति गृहमेधः । बृहत् स्थूलमूर्ध्वरेतोरूपं व्रतं यस्य नास्ति सोऽबृहद्व्रत इति । अस्मिन् पक्षे त्रिपादाश्रमत्रयात्मकः पुरुषः ऊर्ध्वे उपरितनामृतसुखार्थमुदैत् । उपरितनेषु जनस्तपःसत्येषु लोकेषु गतवान् । अस्य पादो गृहस्थाश्रमीह त्रिलोकीसुखार्थं पुनरभवात् पुनः पुनरुत्पन्न इति त्रिपादूर्ध्व उदैत् पुरुषः इति श्रुत्यर्थः । **एवमिति** उपबृंहणेनैवं द्वेधा मन्त्रार्थमभिप्रेत्येत्यर्थः । **प्रत्यभिज्ञेत्यादि** अयं चोपदेशभेदादित्यस्यार्थः । उभयस्मिन् विभक्तिभेदादिना भिन्नविधेप्युपदेशे ब्रह्मवाक्यत्वस्याविरोधादिति सूत्रशेषार्थः । **ल्यबित्यादि** । ज्ञापित इति शेषः । **सर्वे** इति शंकराचार्यादयः । **प्रयोजनमिति** सप्तम्या तत्रैव विद्यमानत्वमुच्यते पञ्चम्या तु सर्वत्र तदिति ह्यन्यत्र सत्त्वं प्रयोजनमित्यर्थः । **लोकात्मक** इति तावानिति मन्त्र उपष्टम्भकेन पुराणेन लोकात्मको लोकस्थिताश्रमस्थजीवात्मको वा पाद इत्यर्थः । लोकात्मकपदस्योपलक्षकत्वात् । **ब्राह्मणस्येति** तस्य ह वा एतस्य हृदयस्येति । **हृदयमुपक्रम्याथ** यदतः पर इति ब्राह्मणस्य पादस्य पठितत्वादित्यर्थः ।

हृदयम्। अतःशब्दाच्च सर्वस्माद्भेदः प्रतिपाद्यते। अत उपदेशभेदान्नैकवाक्यता अस्मिंश्च वाक्ये चरणाभावात्। स्वरूपासिद्धो हेतुरिति चेन्नैष दोषः उभयस्मिन् ज्योतिःपदे अमृतपदे च प्रयुज्यमाने एकार्थत्वान्न विरोधः। पाद-

भाष्यप्रकाशः।

अन्यमपि भेदकमाहुः **अतःशब्दादित्यादि**। अत इत्यस्य पूर्वपरामर्शित्वात् पूर्वस्माद् भेदे प्रत्यायिते पूर्वोक्ताद् ब्रह्मणोऽपि सकाशाज्ज्योतिषो भिन्नत्वसिद्धिरित्यर्थः। **अत इत्यादि** एवं प्रकारत्रयेणैकदेशभेदान्मन्त्रब्राह्मणयोर्भिन्नार्थत्वेनोपदेशभेदादित्यर्थः। तेन सिद्धमाहुः **अस्मिन्नि-त्यादि**। ब्राह्मणवाक्ये तदभावादेकवाक्यत्वाभावेन मन्त्रतः प्राप्त्यभावात्तथेत्यर्थः। सिद्धान्तं व्याचक्षते **नैष इत्यादि**। **एकार्थत्वादिति** उभयोर्ब्रह्मवाचकत्वेनैकार्थत्वान्नैकवाक्यताविरोधः। ननु तथापि पादभेदेन विभागे साकाङ्क्षत्वाभावात् कथमेकवाक्यतेत्यत आहुः **पादेत्यादि**। आश्रमचतुष्टयस्थजीवानां पादत्वपक्षे लोकानां च पादत्वपक्षे यथायथं हृदयरूपं चरणस्थानं, पादान्तर्वर्ति ब्रह्म च ज्योतीरूपं सर्वत्रेति पादभेदेऽपि तदुपलक्षकस्य तदन्तःस्थितस्य च सार्वत्रिकत्वेनोभयत्रापेक्षणाद्विभागे साकाङ्क्षतायाः सत्त्वान्नैकवाक्यत्वभङ्ग इत्यर्थः। ननु

रश्मिः।

पूर्वोक्तादिति गायत्री वा इदं सर्वमिति गायत्रीरूपादित्यर्थः। **तेनेति** एकवाक्यताभावसाधनेन। **तथेति** स्वरूपासिद्धत्वप्रकारेण हेतुरित्यर्थः। **पादभेदेनेति** मन्त्रब्राह्मणयोरिति शेषः। **पादेत्यादीति** अत्र मन्त्रब्राह्मणयोः पादत्रयमुपरितनलोकेषु जनस्तपःसत्येषु समानमेकवाक्यत्वादुभयोः पादान्त-र्ज्योतिः सर्वत्र ब्रह्मत्वात् न तु हृदयं न वा पञ्च स्वर्लोकपा न वा जीवाः नापि लोकाः अतश्चतुर्थत्वेन ज्योतिषो ह्युपादानं व्यर्थं सञ्ज्ञापयति चतुर्थं सर्वत्रेति तत्कथमुपपद्यते। उच्यते। उभयस्मिन्नपि पक्षे चरणयोः बहुत्वविशिष्टजीवलोकयोः स्थानं हृदयं वाच्यं पदं यथायोग्यम्। जीवानां स्थानं हृदयं स्पष्टम्। लोकानां लोकृ दर्शने इति धातुपाठात् ज्ञानात्मकत्वे हृदयं योग्यं स्थानं च हृदयं स्वाभिन्नपञ्चसुष्यात्मकं ते च तेजोमनआकाशात्मानः इति चतुर्थं सर्वत्रेति सुष्ठूपपन्नम्। तेजआदीनां व्यापकत्वात्। पादानां विश्वामृतक्षेमाभयानां ब्राह्मणोदितानां मन्त्रोदितानां सर्वभूतपृथिवीशरीरहृदयानां च भेदेपि तदुपलक्षकस्य सुखत्रयोपलक्षकस्यामृतस्यामृतान्तःस्थित-स्यामृतत्वस्य सार्वत्रिकत्वात्त्रिपादस्यामृतं दिवीत्युभयत्र श्रवणात्। सार्वत्रिकपदं ज्ञापयति ह्यन्यत्र पादेष्वप्येवम्। तथाहि पूर्वोक्तानि चतुश्चतुरंशकानि चत्वारि पादानि छान्दोग्यषाष्ठानि। तत्र प्राचीदिक्कलादिष्वमृतत्वं परेण मृत्यतिक्रान्ता इति बृहदारण्यकश्रुतेः। पृथिवीकलादिषु अबृहद्व्रतः[1] 'भारतभूजयो वरम्' इति वाक्यात्। अग्निकलादिषु क्षेमं तुरीयचन्द्रप्रवेशात्। निरुक्ते वाय्वग्नि-सूर्येन्दूनां चन्द्रस्य तुरीयत्वात्। प्राणकलादिष्वभयम्। मनःप्रवेशात्। मनोमयो वेदः 'मनोमयं रूपमुपेत्य' इति वाक्यात्। वेदार्थस्तु 'यश्छन्दसामृषभो विश्वरूप' इति विश्वरूपपदसाहचर्या-च्छ्रेष्ठार्य ऋषभः पूर्वं गौरुक्तो धर्मात्मा स्मृतस्तत्रापि छन्दोभ्योऽध्यमृतात्संबभूव समेन्द्रो मेधया स्पृणोतु अमृतस्य देवधारणो भूयासं इत्यमृतपदमुपलक्षकमिति तथा। वाक्सुषिर्नोक्तः पञ्चमः। तस्य व्यापकत्वं प्रसिद्धमिति तुरीयप्रतिपादिका वाक्सर्वत्र। तथा च मुण्डके चतुर्थं पादं ब्रह्मेति सर्वत्र। अथर्वशिखायां नादश्चतुर्थः पादः। सर्वत्रैवमिति। नूनमुभयस्मिन्मन्त्रब्राह्मणयोरविरोधश्चिन्त्या

१. अबृहद्व्रता।

अयमुपरितनलोकेषु चतुर्थं सर्वत्रेति। अन्यथा वैजात्यं पादानामापद्येत। परिच्छेद-विरोधश्च। अतोऽमृतज्योतिःशब्दयोरेकार्थत्वेन विरोधाभावादेकवाक्यत्वम्। अतोऽत्र चरणसद्भावात्तस्य च ब्रह्मधर्मत्वाज्ज्योतिर्ब्रह्मैव॥ २८॥

इति प्रथमाध्याये प्रथमपादे नवमं ज्योतिश्चरणाधिकरणम्॥ ९॥

भाष्यप्रकाशः।

स्पष्टस्य ब्रह्मधर्मस्यात्राभावेऽपि निर्बन्धेनैवं व्याख्याने का वोपपत्तिरित्यत आहुः **अन्यथे-त्यादि**। गायत्रीपरतया व्याख्याने गायत्र्याः शब्दत्वेन पादानां चार्थत्वेनांशांशिभावाङ्गीकारे वैजात्यं पादानामापद्येत। किंच। गायत्री परिच्छिन्ना। अत्र तु, सर्वतःपृष्ठेष्वित्यादिना परिच्छेदराहित्यं प्रतिपाद्यतेऽतः परिच्छेदविरोधश्च। तथाच गायत्रीपक्षे दोषद्वयसत्त्वं ब्रह्मपक्षे तदभावश्च व्याख्यानिर्बन्ध उपपत्तिरित्यर्थः। एवं सर्वमुपपाद्य सिद्धमाहुः **अत इत्यादि**। **अत** इति पक्षान्तरस्याघटमानत्वात्। **अत** इति एकवाक्यत्वस्य सिद्धत्वात्। तथाच प्रकरणस्य ब्राह्मत्वे सिद्धे ब्रह्मधर्मस्य तत्र सिद्धत्वादुपसंहारगतमपि ज्योतिःपदं ब्रह्मवाचकत्वेनैव सिद्धमतस्तथेत्यर्थः। अत्र पादवतीनां विद्यानां ब्रह्मस्वरूपपरत्वप्रतिपादनादध्यायसंगतिः। आश्रमचतुष्टयस्य जीवस्थितितद्भोग्यसुखरूपकार्यद्वारा तत्प्रतिपादनात् पादसंगतिः। ज्योतिषः स्थितिकार्यकत्वेन ब्रह्मलक्षणेऽतिव्याप्तौ प्राप्तायां तन्निवृत्त्यर्थं ज्योतिःपदे संदेहवारणादवसरोऽधि-

रश्मिः।

अत्र तु न्यायप्राप्ता विपुलीकृता तेन सार्वत्रिकत्वेनोभयत्र मन्त्रब्राह्मणयोश्चतुर्थपादस्य ब्रह्मत्वेनैकरस-त्वादपेक्षणादित्यर्थः। **वा** इति वै निश्चयेनेत्यर्थे। शब्दात्मकं जगदिति पक्षे दोषाभावादाहुः **किं चेति**। **गायत्रीत्यादि**। परिच्छिन्नत्वमस्याः पर्यवसिद्धदशायाम्। सर्वत इत्यादिस्थले यद्यपि प्रथमत्यागे मानाभावाद्विश्वतःपृष्ठेष्वित्यादिनेति पाठ्यं तथापि विश्वशब्दस्य संकोचसहिष्णुत्वमत्र नास्तीति सर्वतःपृष्ठेष्विति व्याख्यातमतोऽसंदिग्धत्वादिदमेवोक्तम्। **भाष्ये। एकवचनत्वमिति** एकवाक्यत्वमित्यत्र पाठः एकब्रह्मवाचकत्वम्। **प्रकृते**। अत्राध्यायपादाधिकरणानां संगतयो न स्फुटा इति ता उपपादयन्ति स्म **अत्र पादे**त्यादिना अध्यायसंगतिः। पादवतीनां प्रणवादिविद्यानां मध्ये चतुर्थस्य पादस्य ब्रह्मत्वेन तत्प्रतिपादकवाक्यस्य ब्रह्मणि समन्वयात् समन्वयाध्यायस्याधिकरणेन संगतिर्निर्वाहकलक्षणा संगतिः समन्वयायास्याधिकरणस्य वचनं संगतमित्यर्थः। **तत्प्रति-पादनात्** कार्यप्रतिपादनात्। **पादस**मिति तथा चात्रापि कार्यप्रतिपादकस्य ब्रह्मणि समन्वयात् न कार्यसमन्वयरूपपादार्था संगतिरित्यर्थः। **ज्योतिष इत्यादि**। अयमाशयः। जन्माद्यधिकरणे यद्यप्याकाशजन्मकर्तृत्वं ब्रह्मलक्षणत्वेन निष्कृष्टम्। तस्यापि ब्रह्मासाधारणधर्मत्वात्। तथाप्युप-लक्षणविधया तत्स्थितिकर्तृत्वं तल्लयकर्तृत्वं च सिद्ध्यति तथा चैतन्मिलितं सदेव लक्षणमिति न। किं तु पृथक् पृथक्। किं चाधिकरणानां न्यायरूपत्वेन यतो वा इमानि भूतानीत्यत्राप्ययं न्यायः प्रवर्तत इति स्थितिकर्तृत्वस्य ब्रह्मलक्षणस्य ज्योतिष्यतिव्याप्तौ प्राप्तायामिति। **संदेहेत्यादि** ब्रह्मपरत्वव्यवस्थामनेनान्यपरत्वसंदेहवारणात्। **अधीत्यादि** धर्मिनिरूपकाधिकरणैः प्रतिबन्धकी-भूतजिज्ञासानिवृत्तौ धर्मेतिव्याप्तिवारणावसरः। वृत्तौ त्वत्र ज्योतिषोन्तःपुरुष उपसंहृतत्वेन स यश्चायं पुरुष इत्यानन्दमयाधिकरणे विषयवाक्ये श्रावितस्य पुरुषान्तःस्थस्यात्र निर्णयादुपोद्घात

५० ब्र० सू० १०

प्राणस्तथाऽनुगमात् ॥ २७ ॥ (१-१-१०)

अस्ति कौषीतकिब्राह्मणोपनिषदि इन्द्रप्रतर्दनसंवादः । प्रतर्दनो ह वै दैवोदासिरित्यादिना, एष लोकपाल एष लोकाधिपतिरेष लोकेशः स म आत्मेति विद्यात् स म आत्मेति विद्यादित्येतदन्तम् । तत्र वरदाने मामेव विजानीह्येत-देवाहं मनुष्याय हिततमं मन्य इत्युपक्रम्य त्वाष्ट्रवधादिनात्मानं प्रशस्य स्वोपासनायाः पापाभावं फलत्वेन प्रतिपाद्य कस्त्वमिति विवक्षायां, प्राणो वा अहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्स्वेत्युक्त्वा आयुषः प्राणत्वमुपपाद्या-मृतत्वं च प्राणस्योपपाद्य, प्राणेन ह्येवामुष्मिँल्लोके अमृतत्वमाप्नोतीति, अमृतत्वं योगेन प्रतिपादयति । तत्र संदेहः । प्राणः किमासन्यो ब्रह्म वेति ।

भाष्यप्रकाशः ।

करणसंगतिः । तेनापो वा इदꣳ सर्वमित्यादावप्ययं न्यायो बोध्यत इति न न्यूनता ।

माध्वास्त्वत्राधिकरणद्वयमङ्गीकुर्वन्ति । तत्र प्रथमसूत्रस्याग्निसूक्तं विषयवाक्यम् । 'वि मे कर्णा पतयतो विचक्षुर्वीदं ज्योतिर्हृदय आहितं यत् । वि मे मनश्चरति आ धीः किंस्विद् वक्ष्यामि किमनूमनिष्ये' इति । अत्र विशब्दो विरुद्धार्थकः । पतयत इति पततो विरुद्धं चरत इत्यर्थः । इदं चरणं हेतुः । शेषं समानम् । वस्तुतस्त्वत्र विचरणमुक्तं न तु चरणमतश्चिन्त्यम् । छन्दोऽभिधानादिति त्रिसूत्रमधिकरणान्तरम् । तत्र छान्दोग्यस्थमुक्तमेव विषयवाक्यम् । समानमितरत् । अत्रापि सूत्रे साध्यानुल्लेखात् सूत्रकृदाशयगोचरत्वं संदिग्धम् ॥ २६ ॥ ९ ॥

इति नवमं ज्योतिश्चरणाधिकरणम् ॥ ९ ॥

प्राणस्तथाऽनुगमात् ॥ २७ ॥ विषयवाक्यमुदाहरन्ति अस्तीत्यादि । तथाच संपूर्णः पञ्चमाध्यायोऽत्र विषयवाक्यमित्यर्थः । कथमस्य विषयत्वमित्याकाङ्क्षायामेतदर्थं वदन्तो मतान्तरीयाः सर्वेऽपि, मुख्यः प्राणो वा देवतात्मा वा, जीवो वा, ब्रह्म वेति चतुष्कोटिकं संशयं वदन्तीति ततो वैलक्षण्यबोधनाय व्युत्पाद्याहुः तत्र वरेत्यादि । योगेनेति प्राण-

रश्मिः ।

एव संगतिरित्युक्तम् । न न्यूनतेति न्यूनतारूपनिग्रहस्थानं नेत्यर्थः । अतिदेशाधिकरणोपान्ते इदं रश्मौ प्रोक्तम् । अत्र त्वत्रेति । श्रुताविदं परिदृश्यमानं जगत् । अत एव सुबोधिन्यां अत्रात्मा नारायण इति निरुक्तम् । वि म इत्यादि मे मम कर्णा । आवोडा कर्णावित्यर्थः । चक्षुर्विचरति इदं ज्योतिर्विचरति मे मम मनश्च विचरति । आ तन्मर्यादीकृत्य धीश्चरति तदप्राप्य किं स्विद्वक्ष्यामि ब्रह्म 'नु' इति वितर्के किमनुमनिष्ये अवबोधं करिष्ये इति श्रुत्यर्थः । माध्वाचार्यमते इदं ज्योतिर्हृदये व्याहितं यत्तल्लक्ष्मीकृत्येति विशेषः । विष्णुरेव ज्योतिः कर्णादीनां विचरणाभिधानादिति भाष्यात् । उक्तमिति सर्वाद्दतम् । साध्यानुल्लेखादिति छन्दोभिधानादित्यस्य हेतुत्वादिति भावः । संदिग्ध-मिति । सर्वत्राधिकरणारम्भे साध्यशून्यस्य सूत्रस्यादर्शनादधिकरणत्वांशे संदिग्धमित्यर्थः ॥ २६ ॥

इति नवमं ज्योतिश्चरणाधिकरणम् ॥ ९ ॥

प्राणस्तथानुगमात् ॥ २७ ॥ प्राणपदस्य बहुवचनान्तता प्रायशः । प्राणा इति भाष्यपुस्तकान्तरे बहुवचनान्तप्राणपदप्रयोगात् । पञ्चमेत्यादि पञ्चमाध्यायो द्रष्टव्यः । तत्र वरे-त्यादीति श्रुत्यर्थशेषेण समम् । श्रुत्यर्थस्तु दिवोदासस्यापत्यं दैवोदासिः स इन्द्रस्य प्रियं धामोपजगाम

---

१. अत्र प्रकाशे, अत्राधिकरणोपान्ते ।

'अत एव प्राण' इत्यत्र प्राणशब्दमात्रे संदेहः । अत्रार्थेऽपि संदेहः । बाधकं च वर्तत इति पृथगधिकरणारम्भः । तत्र साधकासाधारणधर्मस्याभावाद् बाधकानां विद्यमानत्वान्न ब्रह्मत्वमिति पूर्वः पक्षः । सिद्धान्तस्तु चतुर्भिः सूत्रैः प्रतिपाद्यते । तत्र प्रथमं साधकधर्ममाहैकेन । त्रिभिर्बाधकनिराकरणम् । प्राणः परमात्मा भवितुमर्हति । कुतः । तथाऽनुगमात् । तथाहि । पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदार्थानां समन्वयो ब्रह्मप्रतिपादनपर उपलभ्यते ।

भाष्यप्रकाशः ।

संयोगेन । तथाचेन्द्रेण स्वस्मिन् प्राणत्वस्यैवोपपादितत्वेन प्रज्ञापदस्य बुद्धिवाचकतया चेतनधर्माणां तत्रोपचरितत्वाद् द्विकोटिक एव युक्त इत्यर्थः । ननु चतुष्कोटिक एव युक्तोऽन्यथा पूर्वाधिकरणेनास्य गतार्थत्वं स्यादित्यत आहुः अत एवेत्यादि । उक्ताधिकरणे विषयवाक्ये ब्रह्मलिङ्गस्य विद्यमानत्वात् प्राणशब्दः कथं प्रयुक्त इति प्राणशब्दमात्रे संदेहः । अत्र तु प्राणे प्रज्ञात्मत्वकथनादायुष्ट्वोपपादनाच्चासन्यो वा, जीवो वेति प्राणशब्दार्थे संदेहः । किंच जीवमुख्यप्राणलिङ्गादिकं बाधकं वर्तत इत्यतस्तथेत्यर्थः । युक्तिपूर्वकं पूर्वपक्षमाहुः तत्र साधकेत्यादि । कथमेवमित्यत आहुः तत्र प्रथममित्यादि । सूत्रं व्याकुर्वन्ति प्राण इत्यादि ।

रश्मिः ।

युद्धेन च पौरुषेण युद्धकारणपुरुषार्थप्रदर्शनेनेत्यर्थः । तमवलोक्येन्द्रो वक्ति प्रतर्दन ते वरं दास्यामीति तदा सहोवाच प्रतर्दनः हे इन्द्र त्वमेव वरं वृणीष्व यत्त्वं मनुष्याय हिततमं मन्यसे इति । एवमुक्त इन्द्रो वरदाने 'मामेव विजानीहि एतदेवाहं मनुष्याय हिततमं मन्ये' इति स्वोपासनमुक्तवान् । ततश्च त्वाष्ट्रवधादिनात्मानं प्रशस्य स्वोपासनाफलं पापाभावं भणितवान् । एवमैन्द्रगुणविशिष्टोपासनोक्ता । ततः कस्त्वमित्यपेक्षायां प्राणो वेत्यादिना प्राणगुणकां द्वितीयोपासनामुक्तवान् । प्राणस्यायुष्ट्वं तु प्राणो हि भूतानामायुरिति तैत्तिरीयश्रुतेः । स्फुटमग्रिमम् । संयोगेनेति यद्यपि प्राणितीति प्राणः न मृतं येन तदमृतमिति योगेनेत्यर्थः । तथापि सम्यग् योगेन ब्रह्मत्वादित्यर्थः । त्रयाणामेककोटिपातित्वेन द्विकोटिकत्वमित्याहुः तथा चेति । एवकारेण प्राणव्यवच्छेदः । उपपादितत्वेनेति अयं प्रज्ञेत्यादौ हेतुः तथा च धर्मोपपादनं प्रसङ्गः सिद्ध इति भावः । प्रज्ञा ब्रह्मरूपा धर्मिरूपापि कोशात्तस्याः प्रसङ्गो वारितः । प्रज्ञा देवतात्मन्यस्येत्येवं सति संभवति न प्रज्ञात्मेति भावः । किंत्वात्मधर्मः प्रज्ञा वेदार्थ इन्द्रे वेदान्तार्थः । तत्रेति इन्द्रजीवे प्राणरूपे । उपचरितत्वादिति तथा च मनोधर्मरूपायाः प्रज्ञाया एकार्थप्रत्यासत्त्या जीवेन्द्रधर्मरूपत्वम् । प्रज्ञापदेन जीवो गृहीत इति भावः । जीवो वेति अत्र त्रिकोटिकः संशयः फलति । एवं च भाष्ये प्राणपदं जीवस्याप्युपलक्षकमिति भावः । यद्वा । प्राणे प्रज्ञात्मत्वोक्तेर्जीवप्राणयोरैक्याद् द्विकोटिकः संशयः इति भावः । एवं च भाष्य इन्द्रः प्राण इति लक्षणया प्रतीत्या प्रज्ञापदं च जीवधर्मवाचकमित्युक्तरीत्या द्विकोटिक एवेति भाष्याशयः । प्राणपदस्य जीवे देवतायां च शक्त्यभावादाहुः एवेति । तत्र साधकेत्यादि । अत्र भाष्ये अमृतत्वपापाभावरूपसाधारणधर्मदर्शनादसाधारणेति धर्मविशेषणम् । बाधकानि प्राणप्रशंसारूपाणि

उपक्रमे तावद् वरं वृष्णीष्वेति इन्द्रः प्रतर्दनोक्तः परमपुरुषार्थं वरमुपचिक्षेप । त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति । तस्मै हिततमत्वेनोपदिश्यमानः प्राणः कथं परमात्मा न स्यात् । न हि परमात्मनोऽन्यद्धिततममस्ति । परमानन्दस्वरूपत्वात् । पापाभावश्च ब्रह्मविज्ञान एव । 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति श्रुतेः । प्रज्ञात्मत्वं च तस्यैव संभवति । उपसंहारेऽप्यानन्दोऽजरोऽमृत इति, एष लोकाधिपतिरित्यादि च । तस्मात् सर्वत्रानुगमात् प्राणो ब्रह्म ॥ २७ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ॥ २८ ॥

बाधकमाह । यदुच्यते प्राणो ब्रह्मेति, तन्न । कुतः । वक्तुरात्मोपदेशात् । वक्ता हीन्द्र आत्मानमुपदिशति । मामेव विजानीहीत्युपक्रम्य प्राणो वा अहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्वेति । स एष प्राणो वक्तुरात्मत्वेनोपदिश्यमानः कथं ब्रह्म स्यात् । तथाच वाचो धेनुत्वोपासनवद्देवतायाः प्राणत्वोपासना बोध्यते ।

अन्ये च ब्रह्मधर्माः प्राणस्तावका इति कथमस्य ब्रह्मोपाख्यानत्वमिति

भाष्यप्रकाशः ।

तथा ब्रह्मपरत्वेऽनुगमात् पदार्थानां समन्वयादिति सूत्रार्थ इति तमुपपादयन्ति उपक्रम इत्यादि । संभवतीति चिद्रूपत्वात् संभवति । सर्वत्रानुगमादिति आद्यन्तं पदार्थानां ब्रह्मधर्मत्वेनैव समन्वयात् । एवं साधकधर्मो व्याख्यातः ॥ २७ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ॥ २८ ॥ बाधकमाहेति सूत्रांशेनाहेत्यर्थः । उपदिशतीति मामित्यहंकारवादेनोपदिशति । ब्रह्मधर्मा इति

रश्मिः ।

ज्ञेयानि । उपक्रम इत्यादि । अत्र भाष्ये नहीत्यादि वाक्यान्वयाधिकरणे स्फुटमिदम् । कर्मक्षयः पापक्षयः कारणनाशे कार्यनाशात् ॥ २७ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ॥ २८ ॥ अयमाभासो न सूत्रस्येत्याहुः सूत्रांशेनेति वस्तुतस्तु बाधस्य पूर्वपक्षान्तर्गतार्थमात्रवृत्तित्वेन सूत्रे च बाधांशश्च तयोः समाहारः सूत्रांशं तेनेत्यर्थः । अहमित्यादि । [अस्मत्प्रत्ययगोचरोऽथवा सुवर्णघनवत् विज्ञानचिन्मात्रस्वभाव आत्मा यदावभासते तदा त्वंपदार्थप्रत्यगात्मा] अयं वादो न भवति अनात्मनो देहादीनभिमन्यते सोभिमानः । आत्मनो बन्ध इति बन्धे पर्यवसानात् वादस्य मोक्षे पर्यवसानात् इति चेन्नैवम् । अहंनामाभवदिति पुरुषविधब्राह्मणात् । अहमिति ब्रह्मणि सति यौगिकं सत्तार्थस्यास्तेर्मदिक् । रूढमिति माध्वाः तथा च स्मृतिः 'अहं सर्वस्य प्रभवः' 'अहमेवासमेवाग्रे' इति च । तं करोतीत्यहंकारः । पुरुषविधः तस्य वादो मोक्षपर्यवसायीति अहंकारवादः । स यत्पूर्वोऽस्मात्सर्वस्मात् सर्वान् पाप्मनः औषत् तस्मात् पुरुष इति श्रुतिः । आत्मवादः । ब्रह्मवादः पूर्वमुक्तः । द्वन्द्वप्रयोगादुभयं युक्तम् । शीतोष्णसुखदुःखादिवत् । तथा च श्रुती 'ब्रह्म वा इदमग्र आसीत्' 'आत्मैवेदमग्र आसीत्' इति च । पुरुषविधब्राह्मणे ।

चेन्न । अध्यात्मसंबन्धभूमा ह्यस्मिन् । अस्मिन् प्रकरणे अध्यात्मसंबन्धः । आत्मानमधिकृत्य यः संबन्धः । आत्मशब्दो ब्रह्मवाची । वस्तुतो जीवस्य ब्रह्मत्वाय तथा वचः । तस्य संबन्धः । तद्धर्माः । तेषां बाहुल्यं प्रतीयते । एष लोकपाल इत्यादि । यावद् यथाकथंचिदपि ब्रह्मप्रकरणत्वं सिद्ध्यति, तावदन्यप्रकरणत्वमयुक्तमिति हिशब्दार्थः । प्राणस्य प्रज्ञानात्मत्वम् । स्वातन्त्र्येणायु-

---

भाष्यप्रकाशः ।

पूर्वसूत्रव्याख्यान उक्ताः । निराकरणांशं व्याकुर्वन्ति अस्मिन्नित्यादि । अधिकृत्येति अधिराधिक्ये । अधिकं कृत्वा । आत्मपदार्थस्य संदिग्धत्वादाहुः आत्मेत्यादि । ननु तर्हि ब्रह्मपदमेवास्मिन् सूत्रे कुतो नोक्तमत आहुः वस्तुत इत्यादि । ऐकात्म्यवादेन जीवस्य ब्रह्मत्वं बोधयितुमात्मपदम् । अत एव सूत्रे परिहारांशप्रयोगो नकारस्य न कृतः । संबन्ध इति सम्यग् बन्धोऽस्याऽसौ संबन्धः । तथाच जीवात्मनः सकाशात् परमात्मानमधिकं कृत्वा तद्धर्मबाहुल्यमस्मिन् प्रकरणे प्रतीयते । अतोऽत्र बहूनामनुग्रहस्य न्याय्यत्वात् प्राणः परमात्मेत्यर्थः । ननु किमित्येवं निर्बन्ध इत्यत आहुः यावदित्यादि । तथाच पूर्वसूत्रे साधकहेतुमुक्त्वाऽत्र हिशब्दकथनात्, सर्वे वेदा यत् पदमिति श्रुत्यनुरोधेन निर्बन्ध इत्यर्थः । तदुपपादयन्ति प्राणस्ये-

रश्मिः ।

'निर्धर्मको वा भिन्नो वा निरोधं कुरुते यदि ।
तदा निरोधो व्यर्थः स्यादित्येवं षड्गुणाभिधा' ॥

इति गुणप्रकरणकारिका । अहंकारस्तु

'ततो विकुर्वतो जातो योऽहंकारो विमोहनः ।
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् ॥
तन्मात्रेन्द्रियमनसां कारणं चिदचिन्मयः' । इति ।

ततो महतो विकुर्वतः कालेन क्षुब्धगुणात्त्रिवृत् त्रिव्यूहः चिदचिन्मयः चिदाभासत्वाच्चिदचिद्ग्रन्थिरूप इति भेदः । ऐकात्म्येत्यादि वस्तुत इत्यस्यार्थः । यतो वस्त्वैकात्म्यं श्रुत्युक्तत्वात् विभक्तिस्तु तृतीया प्रत्ययस्य सार्वविभक्तिकत्वात् । यागाय याति इत्यस्य यष्टुं यातीति विवरणवत् । अत्राहुः ब्रह्मत्वमित्यादि । वादशब्देन भक्त्यर्थमैकात्म्यं यत्तन्निवर्त्यते द्वितीयाध्याये भोक्त्रापत्तिसूत्रे ब्रह्मणो निर्विशेषस्य कारणत्वादिति भाष्येण सिद्धं गृह्यते । स च शारीरब्राह्मणे अणुः पन्थाः विततः पुराणो यांस्पृष्टो वित्तो मयैव तेन धीरा अपियन्ति ब्रह्मविदः उत्क्रम्य स्वर्गं लोकमितो विमुक्ताः । अग्रे यस्यानुवित्तः प्रतिबुद्ध आत्मा अस्मिन् संदेहे गहने प्रविष्टः स विश्वकृत् स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एवेति प्रोक्तः । दहराधिकरणे जीवब्रह्मवादः स तु तत्रैव दूषितः । अत एवेति ब्रह्मजीवयोरंशांशिभावेनैक्यात् तद्धर्माणां ब्रह्मधर्मत्वादेव वक्तुरात्मोपदेशादिति चेन्नाध्यात्मसंबन्धभूमा ह्यस्मिन्निति न सूत्रितमित्यर्थः । तथा सति ह्यात्मजीवैक्यं सर्वथा व्यासचरणैर्निषिद्धं स्यादिति भावः । संबन्धशब्दस्यासाधारणधर्मवाचकत्वं वक्तुं योगमाहुः सम्यगित्यादि । बन्ध इति बन्ध संयमन इति धातोर्घञि निष्पन्नः । तथा च सम्यक् बन्धो नियम आधेयत्वेन यस्य स धर्मः संबन्धपदवाच्य इत्यर्थः । एतेन सिद्धमाहुः तथाचेत्यादि । प्रतीयत इति ते च धर्माः परमहितत्व-भ्रूणहत्यादिरूपमहापापनिवर्तकत्वलोकपालत्वादिरूपा बोध्याः । हिशब्देत्यादि

दातृत्वम् । न वाचं विजिज्ञासीत वक्तारं विद्यादिति चोपक्रम्य, तद्यथा रथस्यारेषु नेमिरर्पिता, नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्राः प्राणे अर्पिताः । स एष (प्राण एव) प्रज्ञात्माऽऽनन्दोऽजरोऽमृतो न साधुना कर्मणेत्यादिविषयेन्द्रियव्यवहारे अरनाभिभूतं प्रत्यगात्मानमेवोपसंहरति । स म आत्मेति विद्यादिति चोपसंहारः । तस्मादध्यात्मसंबन्धबाहुल्याद् ब्रह्मोपदेश एवायम् ॥ २८ ॥

तर्हि बाधकस्य का गतिरित्यत आह ।

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ २९ ॥

पूर्वसूत्रेणापरिहृतमत्र परिहरति तुशब्दः । अयं दोषो व्यवहारदृष्ट्योपदेशे । अहं ब्रह्मेत्यार्षेण दर्शनेन तूपदेशः । ननु, तत्त्वमसि, अयमात्मा ब्रह्मेति वाक्येषु जीवस्य ब्रह्मत्वं बोध्यते । तत्र प्रत्यधिकारं शास्त्रप्रवृत्तिरिति न्यायेन स्वात्मन एव ब्रह्मत्वावगतिर्मुख्या । न प्रतर्दनस्येन्द्रजीवब्रह्मत्वावगतिरुपासनं वा पुरुषार्थाय । अतः शास्त्रदृष्टिरपि नैवंविधा । केवलस्य चैतन्यमात्रस्य

भाष्यप्रकाशः ।

त्यादि । भूतमात्राः शब्दादयः । प्रज्ञामात्रा ज्ञानेन्द्रियांशाः । तस्मादिति प्रज्ञात्मत्वाद्युपदेशात् ॥ २८ ॥

तर्हीत्यादि प्रकरणस्य ब्रह्मपरत्वाङ्गीकारे । वक्त्रा इन्द्रेण यः स्वात्मोपदेशः कृतस्तस्य बाधकस्य क उद्धरणप्रकार इत्यर्थः ।

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ २९ ॥ व्याकुर्वन्ति पूर्वेत्यादि । अयं दोष इति स्वात्मोपदेशरूपो दोषः । तथाचार्षज्ञानेन स्वात्मानं ब्रह्मात्मकमवगत्येन्द्रेणैवमुपदिष्टमतोऽत्रैवं प्रकारभेदे भासमानेऽपि ब्रह्मण एवोपदेशान्नानेनान्यथा संभावयितुं शक्यमित्यर्थः । कथमेवमवगम्यत इत्यपेक्षायां दृष्टान्तमवतारयन्ति नन्वित्यादि । प्रत्यधिकारमिति अधिकारं लक्षीकृत्य । नैवंविधेति । नेन्द्रजीवस्य ब्रह्मत्वबोधनपरा । तर्हि, न वाचं विजिज्ञासीत वक्तारं विद्यादित्यग्रे श्रावणाज्जीवसामान्य एव शास्त्रदृष्टिरस्त्वित्याशङ्क्याह केवलस्येत्यादि । सर्वज्ञत्वाज्ञत्वादीनां धर्माणां परस्परविरोधाद्भागत्यागलक्षणया निर्विशेषस्य

रश्मिः ।

अस्यार्थस्य युक्तत्वं हिशब्दस्य वाच्योर्थः । आसन्यपक्षे सर्वत्र गौणाद्यापत्तिरिति सूचितोर्थः भाष्ये ज्ञेयः । विशिष्यार्थस्याधिकरणसमासौ वक्तव्यत्वात् । अर्थसंक्षेपमाहुः भूतमात्रेति । यथा रथस्यारेष्विति 'आरं शीघ्रे च चक्राङ्गे शीघ्रगे पुनरन्यवत्' इति विश्वाच्चक्राङ्गेषु । नेमिरिति 'नेमिस्त्रिकायां कूपस्य चक्रान्ते तिनिशद्रुमे' इति विश्वाच्चक्रान्तम् । नाभाविति 'नाभिः प्रभावे कस्तूरीमदे च क्वचिदीरितः' इति विश्वाच्चक्रप्रधानेङ्गे । विषयेन्द्रियेति विषया भूतमात्राः । इन्द्रियाणि प्रज्ञामात्राः ॥ २८ ॥

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ २९ ॥ पूर्वेत्यादीति पूर्वसूत्रेणापरिहृतमिति द्वितीयः पाठः प्रथमे भाष्ये न परिहृतमित्यत्र नैकधेत्यादिवत् नशब्देन सह सुप्सुपेतिसमासात् 'न लोपो नञः' इत्यनेन न नलोपः । एवमिति मामेव जानीहीत्येवम् । अन्यथेत्यादि यदत्र ब्रह्मण्येवाभिप्रायः स्यात् नाहंकारवादेनोपदिशेदतोत्र ब्रह्मातिरिक्तं किंचिदुपदिष्टमित्येवमन्यथा संभावयितुमित्यर्थः । लक्षीकृत्येति यथाधिकारमिति यावत् । वक्तारमिति जीवम् । विरोधादिति

तादृशे ब्रह्मण्यैक्यावगतिर्विरोधात्तत्त्वमस्यादिवाक्यार्थोऽध्यवसीयते । न तु ब्रह्मधर्मा जीवे वक्तुं शक्यन्त इत्याशङ्क्य परिहरति। वामदेववत् । तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति । य एव प्रत्यबुद्ध्यत स सर्वं भवति । तत्र सर्वेषां सर्वभावे सर्वानन्त्यप्रसङ्गात् सर्वमेकमेवेति वक्तव्यम् ।

ततः कारणलय एव सर्वभाव इति मनुरभवं सूर्यश्चेत्यवयुत्यानुवादोऽ-

---

भाष्यप्रकाशः ।

चैतन्यमात्रस्य जीवस्य निर्विशेषे चैतन्यमात्रे ब्रह्मण्यैक्यावगतिस्तत्त्वमस्यादिवाक्यार्थ इति[1] निश्चीयते । न त्वानन्दाऽजराऽमरत्वादयो ब्रह्मधर्मा ऐक्यावगतिविरोधिनस्तत्र जीवे वक्तुं शक्यन्ते । अतोऽत्र वक्तृत्वादिवैशिष्ट्यस्योक्त्या केवलस्यात्राविवक्षितत्वाद् ब्रह्मणोऽपि तादृशत्वेनात्राविवक्षितत्वाज्जीवसामान्ये शास्त्रदृष्टिरपि न वक्तुं शक्येति नायं समाधिरुपपन्न इत्यर्थः । परिहारं व्याकर्तुं दृष्टान्तं व्याकुर्वन्ति तद्धैतदित्यादि । इदं बृहदारण्यके पुरुषविधब्राह्मणस्थं वाक्यम् । तत्रेति अस्मिन् वाक्ये । एकमेवेति ब्रह्मात्मकतयैकमेव । कारणलय इति कारणे ब्रह्मणि लये । अवयुत्यानुवादोऽनुपपन्न इति । स्वसर्वत्वविध्यंशं पृथक्कृत्य मन्वाद्यनुवादः स्वस्य

रश्मिः ।

भाष्यानुवादः । भागत्याग इत्यारभ्य निश्चीयत इत्यन्तम् । सर्वोपनिषदि 'सर्वोपाधिविनिर्मुक्तः सुवर्णघनवद्विज्ञानचिन्मात्रस्वभाव आत्मा यदावभासते तदा त्वंपदार्थः प्रत्यगात्मेत्युच्यते' । 'त्वंपदार्थादौपाधिकाद्विलक्षण आकाशवत्सूक्ष्मः केवलः सत्तामात्रस्तत्पदार्थश्चात्मेत्युच्यते' इति श्रुत्योर्निर्विशेषस्येत्यादिरर्थः । 'कर्मानुसारी भूत्वा प्राप्तशरीरसंबन्धवियोगमप्राप्तशरीरसंबन्धमिव कुर्वाणो यदा दृश्यते तदोपहितत्वाज्जीव इत्युच्यते' । अत्र भागत्यागस्तथा 'ब्रह्मादिपिपीलिकापर्यन्तसर्वप्राणिबुद्धिष्वविशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते' । 'कूटस्थाद्युपरहिताभेदानां स्वरूपलाभहेतुर्भूत्वा मणिगणं सूत्रमिव सर्वक्षेत्रेष्वनुस्यूतत्वेन यदा प्रकाशते आत्मा तदान्तर्यामीत्युच्यते' अत्र भागत्यागश्च यथा गङ्गायां घोष इत्यत्र यथावद्भागत्यागेन लक्षणा भागत्यागलक्षणा भागस्य त्यागो यस्यां सा चासौ लक्षणा चेत्यत्र गौरवम् । वरानेकपदलक्षणातो ह्येकपदलक्षणेति । आत्मा द्वितीयैकवचनान्तयुष्मत्पदार्थोणुः 'एषोणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश' इति श्रुतेः । भाष्यं व्याख्याय फलितमाहुः **अतोत्रेत्यादिना** । **तादृशत्वेनेति** केवलत्वेन । **न वक्तुमित्यादि** तथा च यद्यत्र भागत्यागलक्षणया केवलस्य चैतन्यमात्रस्य ज्ञापनादिकं विवक्षितं स्याद् ब्रह्मधर्मा अत्र नोक्ताः स्युरिति भावः । **भाष्ये वामदेववदिति** इतिकरणमन्तरापि सूत्रप्रतीकत्वं 'सर्वं विष्णुमयम्' इत्यस्य प्रक्षिप्ताध्यायसुबोधिन्या विष्णुपुराणवाक्यप्रतीकत्ववत् । **प्रकृते । कारण इत्यादि** साकारब्रह्मत्वात् कृतकानुरोधेन तादृशतादृशब्रह्मणि लयो बोध्यः । **स्वसर्वत्वेत्यादि** स्वसर्वत्वप्रयोजकविध्यंशं कथं नु मात्मन एव जनयित्वा संभवाति हन्त तिरोसानीतीति पूर्वोक्तप्रकारस्यात्राप्यनुकर्षात्तत्र संभवातीति लेटोक्तं विध्यंशं यद्वा स सर्वं भवतीत्यत्र लेडाश्रयणात् भवातीति पाठाद् वा विध्यंशं पृथक्कृत्य यद्यपि सारस्वतीयधातुपाठे यु मिश्रण इत्येव तथापि धातुतरङ्गिण्यां तट्टीकायाममिश्रणे च सिद्धान्तकौमुद्याममिश्रण इत्यन्य इति निरुक्तेः साधुः । संभवातीत्यस्य

---

१. प्रकृतयोर्थे यद्वा रेषृ अव्यक्तवाची भ्वादिरात्मनेपदी सेट् । यद्वा रिषृ हिंसायां भ्वादिः परस्मैपदी सेट् । यद्वा रुषृ रोषे दिवादिश्चुरादिश्च परस्मैपदिनी सेटौ । वर्णविकारः सर्वत्र बोध्यः ।

नुपपन्नः। तत्र यथा ज्ञानावेशात् सर्वधर्मस्फूर्तिरेवमत्रापि ब्रह्मावेशादुपदेश इति।

भाष्यप्रकाशः।

ब्रह्मणि लीनत्वादनुपपन्नः। न प्रेत्य संज्ञास्तीति श्रुत्यन्तरे ब्रह्मभूतानां भिन्नतया स्वानुसंधानाभावबोधनात्। तर्हि कथमेवमुक्तं तत्राहुः तत्र यथेत्यादि। ब्रह्मावेशादिति शास्त्राभ्यास-

रश्मिः।

संभोगं कुरुतादिति पूर्वत्रार्थः। प्रकृते तु मा मामात्मन एव जनयित्वा कथं नु संभवाति सम्यक् प्रकारेणैक्यप्रकारेणाभक्तिमार्गीयेण भवाति भवतात् सत्तां कुरुतादित्यर्थः। हन्तेति खेदे। तिरोसानि रूपान्तरेण तिरोभूतो भविष्यामीति अथवा स्वसर्वेत्यत्रेयं प्रक्रिया। भू सत्तायां लेट् 'लिङर्थे लेट्' इति सूत्रात् लेटस्तिप् भूति इति स्थिते 'सिब्बहुलं लेटी'त्यतः सिप इत्लोपे कृते भूसूति इति स्थिते 'इतश्च लोपः परस्मैपदेषु' इत्यनेनेतो लोपे भूसूत् इति स्थिते 'लेटोडाटौ' इति सूत्रेणाट् टित्वादाद्यः भूसू अत् 'आर्धधातुकस्येड्वलादेः' इत्यनेन सिप्बहुलं णिद्वक्तव्यः इति वार्तिकेन सिपि णिति वृद्धौ चेट्। भाव इस् अत्। अज्झीनं परेण संयोज्यमिति भाविसत्। षत्वे भाविषत्। प्रण आयूंषि तारिषत् इतिवत्। सिप् इलोपस्य चाभावे पताति विद्युत् प्रियः सूर्ये प्रियो अग्ना भवातीतिवत्। सिप इल्लोपस्याटश्चाभावे सर्वं भवतीति। ननु यत्र सिबिलोपौ तत्रैव ह्यट्। तारिषत् ज्योषिषदासाविषत् इत्यत्र यथा यत्र तु सिविलोपौ न स्तस्तत्र ह्याट् यथा पताति भवातीति ह्यत्र तु सिबिलोपाभावेन कथमट् किंत्वाटा भाव्यमिति चेत्सत्यम् उदाहरणापेक्षया सूत्रमतस्य प्राबल्यं चुरादिगणे मनोरमायां माननदित्यत्रोक्तत्वात्। 'लेटोडाटौ' इति सूत्रे वृत्तौ वास्य विशेषस्यानुपलम्भात्। वृत्तिस्तु लेटः अट् आट् एतावागमौ स्तस्तौ च पिताविति। भक्तिमार्गीयांशस्य पृथक्कृतत्वात्, ज्ञानिवेलायां द्वितीयपक्षे ज्ञानमार्गीयांशस्य पृथक्कृतत्वात्, मुक्तोपसृप्यव्यपदेशादिति सूत्रेणाधिकारवेलायां सत्तामाहुः **स्वस्थेत्यादिना**। तत्र हेतुमाहुः **न प्रेत्येत्यादिना**। **शास्त्रेत्यादि** शास्त्राणामभ्यासः पौनःपुन्यं कीर्तनं स्मरणं वा स्वनिर्वाहकस्मरणोपलक्षकं तेषां यद् दार्ढ्यं शतधापि व्यसनसंपातेनुच्छेदो बाहुल्यं च तयोः समाहारो दार्ढ्यबाहुल्यं तेन। तथा चास्य योहंकारवादः स ब्रह्मात्मभावेनैव न स्वात्मभावेनेत्यतस्तत्र यथा स न मायिकत्वेपि ब्रह्मवाक्यबाधकः तथात्रायमपीति भावः। नन्वत्र ज्ञानावेशादिति भाष्यं पूर्वत्र तु स्वसर्वत्वेत्यादिना भक्तिरपि कैश्चिद्व्याख्यातेति चेत् सत्यम् तदाहुः यद्ब्रह्मविद्यया सर्वं भविष्यन्त इत्यादिना ब्रह्मविद्यया सिद्धदेवर्षिमनुष्याणामुक्त्वा वामदेवर्षिप्रतिपत्तावहं मनुरभवं सूर्यश्चेति साकारब्रह्मवादो निष्कृष्टः तद्वक्ष्यमाणं नित्यनिरतिशयं श्रेयःप्रतिवित्सव आहुरिति तदाहुरित्यस्यार्थः। अथ योन्यां देवतामुपास्तेन्योसावन्योहमस्मीति न स वेद यथा पशुरेवं स देवानामिति ह्यभेदोपासनाया ज्ञानमार्गीयायाः समर्थनार्थं भेददृक् पशुरिति निन्दितः। 'अन्तरा भूतग्रामवत्स्वात्मनः' इत्यत्रान्तरायभूताभेदज्ञानं भक्ताय न ददाति इति तृतीये साधनाध्याये निर्णीतम्। तत्राभेदवान् निन्दितस्ततोत्र ज्ञानमार्गे भेदज्ञानवतो निन्दायां पशुशब्दस्य रूढिः पश बन्धे चुरादिपरस्मैपदी सेट् योगो वा योगरूढिर्वा निरुक्ता तस्य भेददृशि पुरुषे गौणी उपासकत्वादिगुणयोगात्। तस्य तात्पर्यवृत्त्या देवादिप्रियोर्थो हि काक्वां कृतायां विरुध्यतेतो भक्तिमार्गानुसारेणाहुः श्रुतयस्तात्पर्यवृत्तिं पशोः। यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युरेवमेकैकः पुरुषो देवान् भुनक्त्येकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किं तु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युरिति। भुञ्ज्युर्दोहनादिना पालयेयुः भुनक्ति पालयति

१. ऊन परिहाणे। २. अवयुत्येत्यत्र अवोपसर्गार्थे।

त्वाष्ट्रवधादयो ब्रह्मधर्मा एव । तदावेशेन क्रियमाणत्वात् । 'नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचेस्तपसा च तेजितः । तेनैव शत्रुं जहि विष्णुयन्त्रितः' इति-वृत्रवचनं श्रीभागवते । तस्माद्युक्तं ब्रह्मधर्मवचनम् । ननु 'स्वाप्ययसंपत्त्योरन्य-तरापेक्षमाविष्कृतं हि' इति सूत्रे सुषुप्तौ ब्रह्मसंपत्तौ च ब्रह्मधर्माविर्भावो न त्वन्यदेति कथमेवमिति चेन्मैवम् । उपदेशभावनादिष्वपि कदाचिदुत्तमाधिका-रिविषये ब्रह्मप्राकट्यमित्यङ्गीकर्तव्यम् । 'मय्येव सकलं जातम्' इत्यादि-वाक्यानुरोधात् ।

भाष्यप्रकाशः ।

दार्ढ्यबाहुल्येन तदावेशात् । ननु यदि शास्त्रदृष्ट्योपदेशः स्यात् तदा जगल्लयादय उक्ताः स्युर्न तु त्वाष्ट्रवधादय इन्द्रकर्तृका इत्यत आहुः त्वाष्ट्रेत्यादि धर्मवचनमित्यन्तम् । अत्रा-गामिसूत्रविरोधमाशङ्कते नन्वित्यादि । परिहरन्ति मैवमित्यादि । नान्यदेति नियमरूपः सूत्रार्थो नाङ्गीकर्तव्यः । किन्तूभयत्र नियतोऽन्यत्र त्वनियत इत्यङ्गीकर्तव्यः । तत्र हेतुः उपदेशेत्यादि । तथा चैवंविधवाक्यानि पश्यन् व्यासः कथमेवं नियमयेदतो नैवं सूत्रार्थः । आदिपदेन 'एतत्साम गायन्नास्ते' इत्यादिश्रुतीनां, 'कस्याश्चित् पूतनायन्त्याः' इत्यादिवाक्यानां

रश्मिः ।

अप्रियमिति छेदः । किंत्वित्यस्य किंपुनरित्यर्थः । पशुभावाद् व्युत्थानसाधनं तत्त्वज्ञानं कुर्युरिति विद्यु-रित्यस्यार्थः । अत्रैतट्टीकाकृत् पशुभावाद्व्युत्थानं देवा विद्विषन्तीत्याहेत्येकस्मिन् एव पशावादीयमाने इत्याद्या आभासयांचकार पशुभावाद् व्युत्थानसाधनं तत्त्वज्ञानमपि देवा द्विषन्ति इत्याहेति तस्मादेषा-मित्याद्या आभासयांबभूव देवाश्च नाभूत्या ईशते इत्यत्रोक्तान् देवान्देवपदार्थत्वेन ग्राहयामास तदन्यथा यथाकथंचिन्नेयम् । अथाह वै बहव इत्यत्र सोपपत्तिकविद्याकथनानन्तरमित्यथशब्दार्थात् ते देवा नात्र ग्रहीतुं शक्याः किं तु त्यदादीनामुत्सर्गतः प्रधानपरामर्शित्वाच्चैवं स देवानामित्यत्रोक्तान् देवान् ग्राहयाम इति को भेद उभयेषाम् । तेषामभेदद्विषामेषामित्यस्यार्थः । अस्माकं तु भेदद्विषा-मेषामित्यस्यार्थः । यमर्थमिच्छामः । काका तु संभवति । अन्यथा प्रकृतापरामर्शे तु पूर्वविद्याकथन-विच्छेदकाथश्रौतपदविरोधापत्तेः । काकस्तु ह्यप्रियं भवति किमपि तु न किं तु बहुषु ह्यपि तु न, न प्रियमपि तु प्रियमिति । एवमपि वेदोक्षरमात्रमपि नान्यथा वदतीति भाष्यविरोधः । तदा काक्वा विनापि भेदद्विषां भेददृश उपादाने सिंहादिकर्तृकेऽप्रियत्वं विरोधाभासेनालंकृतमिति भेदकदृशो भक्तत्वं गमयति । भक्तास्तु ह्यभेदद्विषोपि वेदान्तकृदादेः सकाशात्प्राप्तेष्टाभेदकवन्त इव चकासतीति तदुपादा-नान्य प्रियाण्येव 'अहं भक्तपराधीन' इति स्मृतेः । 'अन्तरा भूतग्रामवत्स्वात्मनः' इत्यत्र स्फुटम् । जगल्लयेत्यादि स्थितेर्विद्यमानत्वाल्लय उक्तः । तथा च ब्रह्मावेशोत्रेति न लयादय उक्तास्ते तु ब्रह्मत्वे सतीति भावः । इत्यादीत्यादि हावु हावु हावु अहमन्नमहमन्नमहमन्नं अहं विश्वं भुवनम-भ्यभवां सुवर्णज्योतिरित्यादयो ब्रह्मावेशबोधकाः आदिपदार्थाः । हावित्यादीनि त्रीणि पदानि आश्चर्ये अन्यत्र त्रिरुक्तिराश्चर्ये यथा आत्मबोधोपनिषदि अमृते लोकेऽक्षितेऽमृते लोके अक्षिते अमृते लोके अक्षिते अमृतत्वं गच्छत्यमृतत्वं च गच्छत्यमृतत्वं च गच्छत्यों नम इति अमृतबिन्दूपनिषदि । न स भूयोभिजायते

१. वेदान्तकृत्तदनुयायिनाम् ।

इहैव समवनीयन्ते प्राणाः। ब्रह्मैव सन् ब्रह्माप्येतीत्यप्याविर्भावापेक्षम्। तस्य

भाष्यप्रकाशः।

च संग्रहः । तथाच वाक्यानां सूत्रोपजीव्यत्वेनोक्तसूत्रस्थे संपत्तिपदे उपलक्षणविधयोत्तमाधिकारोऽपि संग्रहीतुं शक्यत इति न तद्विरोध इत्यर्थः । ननु तद्वैतदिति, मय्येवेति श्रौतं वाक्यद्वयं पूर्णज्ञानिन इति तस्याहंकारवादेन तथा कथनं युज्यते, न त्वावेशिनः । इन्द्रस्त्वावेशीति दृष्टान्तदार्ष्टान्तिकवैषम्यम् । न चेन्द्रस्यापि पूर्णज्ञानित्वं शक्यवचनम् । तथा सति वामदेवादेरिवेन्द्रस्यापि मुक्तत्वात् तद्वदेवमुपदेशस्यापि फलत्वमुक्तं स्यादित्यत आहुः **इहैवे**त्यादि । अस्तु तस्य पूर्णज्ञानिवाक्यत्वं तेषां मुक्तत्वं च । तथापि ज्ञानमुक्त्योराविर्भावापेक्षत्वं तु निर्विवादम् । इहैवेति श्रुतौ ब्रह्मैव सन्निति ब्रह्मभावे सत्येव मोक्षकथनाद्, 'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुत्यन्तरे ज्ञानेन ब्रह्मभावश्रावणाच्च । ब्रह्मभावश्च स्वस्मिन् ब्रह्मधर्माविर्भावपूर्वकब्रह्मस्फूर्तिरूप एव । न तु तद्व्याप्तिरूपो, न वा तादात्म्यरूपः । तस्य सार्वदिकत्वेन सर्वावस्थासाधारणतया ज्ञानित्वाद्यप्रयोजकत्वात् । नापि निष्प्रपञ्चतत्स्फूर्तिरूपः । सर्वभावस्फूर्त्यादि-

रश्मिः ।

न स भूयोभिजायते न स भूयोभिजायत इति । **वाक्याना**मिति ब्रह्मावेशबोधकानाम् । **उपजीव्यत्वं** कारणत्वं तेन । **उत्तमे**त्यादि उत्तमाधिकारो ज्ञानम् ।

'चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ' ॥
'ज्ञानी त्वात्मैव मे मतः' इति गीतायाः ।

अत एव ज्ञानी चेद्भजते कृष्णमिति निबन्धे प्रोक्तं श्रीमदाचार्यैः । उत्तमाधिकारो ब्रह्मवरणसहितप्रेमापि 'नायमात्मा प्रवचनेन लभ्यः', 'नायमात्मा बलहीनेन लभ्यः' इति श्रुतिभ्याम् । भावनादीनां साधनत्वं तृतीयाध्यायचतुर्थपादे सहकार्यन्तराधिकरणे वक्ष्यते । श्रीभागवते त्रिभिरध्यायैर्हीनाधिकारस्त्रिभिर्मध्यमस्त्रयोदशभिरुत्तम इति प्रथमस्कन्धोधिकारस्कन्धः । एतादृशाधिकारस्योपलक्षणविधया सूत्र उपादाने हेतुमाहुः **तस्येत्यादिना** । **अहंकारवादेने**ति प्रारब्धशेषरूपाविद्यारूपेणेत्यर्थः । सिद्धान्ते तु चिक्रीडिषया रुद्ररूपाहंकारेण नित्यक्रीडाप्रविष्टांशेन । गुणिरुद्रभिन्नगुणिरुद्रसदृशेन । **आवेशी**ति प्रथमस्य तृतीयाध्यायसुबोधिन्यामस्ति । कार्यकाले संक्रमणमावेशः । **तद्वदेव**मिति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति सर्वभावरूपफलत्ववदित्यर्थः । **एवमुपदेशस्ये**त्यस्य स्वात्मनः परमात्मत्वेनोपदेशस्येत्यर्थः । इदानीं ब्रह्मभावस्वरूपं निश्चिन्वन्ति **ब्रह्मभाव** इत्यादिना । एवेति पञ्चाध्याय्यां तथोपपादनात् । **साकारब्रह्मवादायैवे**ति **व्याप्तिरूप** इति स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्याप्तिरत्र तिलेषु तैलस्य दधनि सर्पिष इव तादात्म्यं तदात्मनोभावस्तद्रूपत्वमिति यावद् आत्मसृष्टौ । **तस्ये**ति ब्रह्मव्यापनरूपस्य तदितरस्य च । **ज्ञानित्वादी**त्यत्रादिनाधिकारः । नन्वस्तु ब्रह्मधर्मः सत्यत्वाद्यभावाभावलक्षणस्तत्पूर्वकनिष्प्र-

च प्रायिकत्वान्न सूत्रे फलत्वमाह । जीवन्मुक्तानामपि परममुक्तेर्वक्तव्यत्वाच्च ।
असंप्रज्ञातसमाधाविवाविर्भावदशायामेव शरीरवियोगे वियोजकाभावाद्

भाष्यप्रकाशः ।

विरुद्धत्वात् । अतः प्रकृते उपदेशरूपकार्यदर्शनेन तत्कारणरूपे ज्ञाने ब्रह्मधर्माविर्भावपूर्वकब्रह्मभावे चेन्द्रस्य सिद्धे तथा वाक्यकथनस्य युक्तत्वान्न दृष्टान्तदार्ष्टान्तिकवैषम्यम् । एतावान् परं विशेषो यन्मुक्तस्योक्तविधब्रह्मभावः सार्वदिक आवेशिनस्तु कादाचित्कः । अतस्तस्य प्रायिकत्वाद् वामदेवादिसर्वत्ववन्न सूत्रे तस्य फलत्वमाह । किंच । सर्वभावस्यापि साधनत्वेनावान्तरफलत्वमेव, न परमफलत्वम् । परममुक्तिश्च जीवन्मुक्तानामप्यग्रे वक्तव्या, सुतरामावेशिन इत्यतोऽपि नाहातो न तदनुक्तिर्दोष इत्यर्थः । ननूक्तस्थले ब्रह्माविर्भावाङ्गीकारो न युक्तः । तस्मिन् सति वागादिविलयस्येहैवेति श्रुतौ कथनाद् वक्तुस्तदापत्त्योपदेशनासंभवापत्तेः । तस्य मुक्तिपूर्वावस्थारूपत्वेनार्चिरादिगतिकथनापत्तेश्चेत्यत आहुः असंप्रज्ञातेत्यादि । सत्यमस्ति तत्र तथात्वं पुराणे दधीच्यादिषु प्रसिद्धं च । तथाप्युक्तश्रुतौ, अथाकामयमान इति प्रतिज्ञाय लयकथनात् कामाभावे सत्येव प्राणानां लयो न तु तदभावे । प्रकृते तु दधीचिवदसंप्रज्ञातसमाधेरभावादधिकारित्वेन तदानीमिन्द्रियवियोजकस्य कामाभावस्य चाभावान्न वागादिलय इति नोपदेशानुपपत्तिः । ब्रह्मभावस्य प्राप्तत्वान्नार्चिरादिगत्युक्तिश्चेत्यर्थः ।

यद्वा । ननूपदेशभावनादिषु ब्रह्माविर्भावो न युक्तः । यदि तत्र स स्यात्तदोपदेष्टुः सद्यो मुक्तिः स्यात् 'इहैव समवनीयन्ते प्राणाः' इत्यादिश्रुतौ तथैव सिद्धेः । तथा सति तस्याविर्भावस्य फलत्वमपि व्यासैरुच्येतेत्यत आहुः इहैवेत्यादि । सत्यं सद्योमुक्तिराविर्भावापेक्षा । परंतु ब्रह्मैव सन्निति श्रुताववधारणकथनाद् यत्र सर्वथा ब्रह्मभावस्तत्रैव सद्योमुक्तिः । उपदेशभावनादौ तु न तथा । बहिःस्फूर्तेरपि सत्त्वेन केषुचिदेव तद्भवनेन तस्याविर्भावस्य प्रायिकत्वा-

रश्मिः ।

पञ्चस्य दृशिमात्रस्य ब्रह्मणः स्फूर्तिरूपः । अत इति कार्येण कारणानुमानात् । प्रायिकत्वादिति उत्तमाधिकारजन्यत्वेन प्रायिकत्वात् 'कस्याश्चित्पूतनायन्त्याः' इत्यादौ तादृशभक्तिसाध्यत्वेन दुर्लभत्वप्रयुक्तात्तथात्वादित्यर्थः । सूत्र इति स्वाप्ययसूत्रे । दधीच्यादिष्विति ।

'एवं व्यवसितो दध्यङ्ङाथर्वणमुनिस्तनुम् ।
परे भगवति ब्रह्मण्यात्मानं संनयन् जहौ' ॥

इतिवाक्यात्प्रसिद्धम् । असंप्रज्ञातसमाधिः निर्बीजसमाधिः यन्नेति नेतीति वाक्यसंवादी । यत्र भगवतो रूपस्य न भानम् । 'एतेन योगः प्रत्युक्तः' इत्यत्र प्रपञ्चोस्य । असंप्रज्ञातसमाधिः शमीकस्याग्रे वक्ष्यते । अधिकारित्वेनेति स्वर्लोकपालत्वात् । ब्रह्मेत्यादि ब्रह्म चासौ भावश्चेत्यपि समासः । ब्रह्मावेशानन्तरं ब्रह्मभाव इति पक्षे षष्ठीतत्पुरुष एव । भाष्ये तु वागादिमात्रं लीयते इति तल्लयकथनात् भाष्यविरोध इत्याशङ्क्य पक्षान्तरमाहुः यद्वेत्यादि । उपदेशेत्यादि उपदेशोत्रत्यः । भावनास्मदादिकर्तृका तस्याम् । आदिपदेन संयोगे वियोगवृत्तिरूपे प्रेम्णि । न तथेति न सर्वथा ब्रह्मभाव इत्यर्थः । तत्र हेतुर्बहिःस्फूर्तेरित्यादि । तथा चोत्कटविरहे ब्रह्मभावस्तत्र बहिःस्फूर्तेरभावादिति भावः । यथान्तर्गृहगतानाम् । ननु तदतिरिक्तानां सर्वथा ब्रह्मभावस्मरणात् सद्योमुक्तिप्रसङ्ग इति चेन्न ।

वागादिमात्रं लीयते । तस्य च प्राप्तत्वादेव नार्चिरादिगतिः । तथापि प्रायिकत्वान्न सूत्रगीतादिषु तद्वचनम् । सगुणनिर्गुणभेदेन नियमवचनं त्वप्रामाणिकमेव ।

भाष्यप्रकाशः ।

द्भगवान् व्यासस्तस्य फलत्वं नाह । न तु तावता सर्वत्र नाविर्भाव इति वक्तुं शक्यमित्यर्थः । यदि तादृशाविर्भावस्य न फलत्वं तदा तस्य वैयर्थ्यमेव स्यादित्यत आहुः **जीवन्नित्यादि** । तथाच पारम्याभावात् फलत्वानुक्तावपि नाफलत्वमित्यदोष इत्यर्थः । ननु यदि तादृशस्याविर्भावस्य जीवन्मुक्तिसंपादकत्वं तदा तस्यार्चिरादिगतिरुच्येत । सा च नोच्यतेऽतो नैवमित्यत आहुः **असंप्रज्ञातेत्यादि** । **शरीरवियोग इति** । अर्चिरादिगतिरिति शेषः । **वियोजकाभावादिति** तादृशादृष्टाभावात् । भावनादौ वागादिमात्रं लीयते । तस्य ब्रह्मणश्च प्राप्तत्वात् तत्प्राप्त्यर्थार्चिरादिगतिरत्र नोक्ताऽतो न दोष इत्यर्थः । ननु मुख्याधिकारस्यैवंविधत्वे सूत्रादिषु कुतस्तदनुक्तिरित्यत आहुः **तथापीत्यादि** । प्रायिकत्वं संभावितत्वमनियतत्वमिति यावत् । तथाचातोऽनुक्तिरित्यर्थः । ननु सगुणोपासकस्यार्चिरादिगतिर्निर्गुणपरस्य तु 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति श्रुत्या केचिदेकदेशिनः सगुणनिर्गुणोपासनाभेदेनाधिकारिभेदमङ्गीकुर्वन्ति तत् कुतो नाद्रियत इत्यत आहुः **सगुणेत्यादि** ।

रश्मिः ।

'मुक्तोपसृप्यव्यपदेशात्' 'न स्त्रियो व्रजसुन्दर्यः पुत्र ताः श्रुतयः किल' इति सूत्रस्मृतिभ्यां मुक्तत्वेपि मध्ये वरप्राप्तानन्दभुजो भूत्वोक्तकालं समासाद्य गोप्यो हरिं गता इति । न चेहैवेति श्रुत्यानन्दभोगप्रतिपादकस्मृतिबाधः इति वाच्यम् । अत्र स्मृतीनामुपबृंहणत्वस्वीकारात् । 'इतिहासपुराणैस्तु वेदं समुपबृंहयेत्' इति वाक्यात् । यथा 'भस्मान्तो देहः' इति श्रुतेः । 'कृमिविड्भस्मसंज्ञितः' इति पुराणमुपबृंहणम् । न तु बाध्यं प्रत्यक्षविरोधात् । **अर्चिरादीत्यादि** दृष्टान्तानुरोधोत्र द्रष्टव्यः ।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' ॥

इति परब्रह्माविर्भावे तद्दर्शनेन हृदयग्रन्थ्यादिभेदादौ वागादिमात्रं लीयते इत्यसंगतं मुक्तौ प्रतिबन्धकाभावादित्याशङ्कायामिच्छाविषयादृष्टाभावान्न मुक्तिः किं तु वागादिमात्रस्य लय इति नासंगतमित्याशयेन व्याकुर्वन्ति **तादृशादृष्टेत्यादिना** । अस्य देहवियोगो अनेन भवत्वित्याकारिकेच्छाविषयधर्माधर्माभावादित्यर्थः । इच्छायाः फलबलकल्प्यत्वादिति भावः । वागादिमात्रं लीयते परमाविर्भावदशायामेव पश्चात्तु ह्युपदेशनसंभवोस्त्येवेति । एवं चात्र वियोगान्तं संपूर्णमनुवर्तते । असंप्रज्ञातसमाधिः शमीकस्य भगवतः । **प्रकृते** । प्रथमस्कन्धे परीक्षित्प्रसङ्गे 'उन्मील्य शनकैर्नेत्रे दृष्ट्वा स्वांसे मृतोरगम् । विसृज्य पुत्रं पप्रच्छ' इति वाक्यात् । **तस्येति** भाष्यानुवादः । **प्राप्त्यर्था** ब्रह्मप्राप्त्यर्था । **नोक्ता,** निष्प्रयोजनत्वादिति भावः । दोषः अर्चिरादिगत्यनुक्तिरूपः । **निर्गुणेत्यादि** निर्गुणोपासकस्य । श्रुत्यर्थस्तु तस्याचार्यवतः पण्डितस्य मेधाविनो मुक्ताविद्याबन्धस्य आचार्यवान् पुरुषो वेदेति पण्डितो मेधावीति च पूर्वं श्रुतत्वात् तावदेव तावान् काल एव चिरं विलम्बः सत्संपत्ताविति शेषः । यावत्कालपर्यन्तं न विमोक्ष्ये न विमोक्ष्यते । प्रारब्धकर्मणां भोगाद्विनाशेन यावद्देहपातो न भवतीत्यर्थः । अथ तदा प्रारब्धक्षयाद्देहपातसमकालमेव संपत्स्ये संपत्स्यते मुक्तो भवतीति । **एकदेशिनः** शांकराः । **सगुणेत्यादि** विद्वन्मण्डने स्फुटमुपपादितमेतत् ।

ब्रह्मवादे गुणानङ्गीकाराच्च । तस्माद्युक्तमुक्तं शास्त्रदृष्ट्यातूपदेश इति ॥ २९ ॥

भाष्यप्रकाशः ।

ब्रह्मवादे ब्रह्मणः सगुणनिर्गुणभावाभावेनाधिकारिभेदाभावात् तथागत्यादिनियमकथनमप्रामाणिकमेव । सांख्यप्रतिपन्नानां गुणानां व्यासेनानङ्गीकारादपि तथेत्यसंगतत्वान्नाद्रियत इत्यर्थः । सिद्धमाहुः तस्मादित्यादि । तस्मादिति अभ्यासबाहुल्येन ब्रह्मावेशात् ॥ २९ ॥

रश्मिः ।

'अभेदादनुपाधित्वाज्जगदप्रत्ययाप्तितः ।
सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधनम्' ॥ इति ।

न चाथ मायाशबलितं ब्रह्मासीदिति श्रुतिविरोध इति शङ्क्यं मायाशब्दस्येन्द्रियपरत्वस्य निबन्धे व्यवस्थापनात् । **अनङ्गीकारा**दिति ब्रह्मजिज्ञासां प्रतिज्ञाय केवलादेव जन्माद्यस्य यतः इति वदता रचनानुपपत्तेश्च नानुमानमिति गुणसाम्यावस्थां खण्डयता व्यासेन भगवता गौणश्चेन्नात्मशब्दादिति सूत्रे तथेत्यर्थः । **अभ्यासे**त्यादि व्याकृतम् । इदानीं पूर्वोक्तोर्थः पुनरुच्यते । यत्र वामदेवस्याहंकारवाद उक्तस्तत्रैव तदाहुर्यद् ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवत्', 'ब्रह्म वा इदमग्र आसीत्', 'तदात्मानमेवावेदहं ब्रह्मास्मीति', 'तस्मात्तत्सर्वमभवत्', 'तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' इति सर्वभावो युक्तः । मध्यमपदलोपी समासः तेन सर्वात्मभावोप्यर्थः । य एव प्रत्यबुद्ध्यतेति सामान्यनिर्देशात् । तदतिशयं श्रेयोजिज्ञासवः आहुरिति तदाहुरित्यस्यार्थः । भविष्यन्त इत्यस्य भविष्याम इत्यर्थः । मन्यन्त इत्यस्य संभावयन्तीत्यर्थः । इति पुनरुक्तं संबन्धार्थं पृच्छति **किमु**तेति । यस्माद्विज्ञानात्तद्ब्रह्म सर्वमभवत् तद् ब्रह्म किमु किमात्मस्वरूपमतिरिक्तं वाऽवेत् स्वरूपं तदतिरिक्तं वा यस्मात् तत्सर्वमभवत् तदपि किमिति ब्रह्मविद्याधिकारिप्रमेयप्रमाणप्रश्न इत्यर्थः । क्रमेणोत्तराणि । ब्रह्मेति । अग्रेवबोधात्प्राक् । इदं जीवरूपं चैतन्यं शरीरस्थमंशत्वेन ब्रह्मैवासीत् । तज्जीवरूपं चैतन्यमात्मानमेवमहं ब्रह्माक्षरात्मकं पुरुषोत्तमाधिष्ठानमस्मीत्यवेत् । सेवनादिरूपसाधनसंपत्त्या इति शेषः । तस्मादेव विज्ञानात्तज्जीवरूपं चैतन्यं परब्रह्माविर्भावे इहैव समवनीयन्ते इति श्रुत्यन्तरेण तत्र प्राणादिलयेन तद्रूपत्वे जाते सर्वं सर्वरूपमभवदिति । तदाहुराचार्याः 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधनम्' इति । तत इति सेवातः इति तदर्थः । अधिकारिणमाह यो यो देवानामिति । देवानामिति निर्धारणे षष्ठी तेषां यो यो देवः प्रत्यबुध्यतात्मानमक्षरब्रह्मत्वेन यथावद्बोधितवान् स एव देवस्तत्परब्रह्माभवत् व्यापकत्वादिप्रादुर्भावेन विरुद्धधर्माधारोऽभवदित्यर्थः । 'आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा' इति श्रुत्योः परब्रह्माक्षरब्रह्मणोराश्रयाश्रयिभावः सिद्धः । ब्रह्मैव सन् ब्रह्माप्येतीत्यत्र कर्तृकर्मभावोप्युपपन्नतरः । अक्षरस्यापि परब्रह्मत्वेनाथ योऽन्यां देवतामुपास्तेन्योसौ अन्योहमस्मीति न स वेदेत्यग्रेतनश्रुतेरपि न विरोधः । भक्तस्याक्षरात्मकत्वेन स्वज्ञानं भवतीति तृतीयाध्याये तृतीयपादे व्युत्पाद्यम् । इदानीं प्रकृतमुच्यते ॥ २९ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३० ॥

अन्यद् बाधकद्वयमाशङ्कते। ननु यद्यपि ब्रह्मधर्मा भूयांसः प्रकरणे श्रूयन्ते। तद्वज्जीवधर्मा मुख्यप्राणधर्माश्च बाधकाः सन्ति। न वाचं विजिज्ञासीत वक्तारं विद्यादित्यादि। अत्र हि वागादिकरणाध्यक्षस्य जीवस्य विज्ञेयत्वमभिधीयते। अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति शरीरधारणं मुख्यप्राणधर्मः। मा मोहमापद्यथा, अहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति श्रवणात्।

यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राण इति जीवमुख्यप्राणवाच्यत्वे प्रज्ञाप्राणयोः सहवृत्तित्वादुपचारो युज्यते। उत्क्रान्तिश्च। ननु सर्वथा विलक्षणस्य ब्रह्मणः। तस्माज्जीवमुख्यप्राणलिङ्गयोर्विद्यमानत्वान्न ब्रह्मप्रकरणमिति चेन्न।

भाष्यप्रकाशः।

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३० ॥ व्याचक्षते अन्यदित्यादि। एतद्बाणमिति एतच्छरीरम्। तथाच वागादिकरणाध्यक्षत्वस्य जीवलिङ्गस्य शरीरधारणस्य मुख्यप्राणलिङ्गस्य च ब्रह्मवाक्यत्वबाधकस्य विद्यमानत्वान्नेदं ब्रह्मवाक्यमित्यर्थः। ननु यथैते लिङ्गे ब्रह्मवाक्यत्वबाधके तथा अमृतत्वादिकं ब्रह्मलिङ्गमेतद्बाधकमिति नात्र कस्यापि निर्णय इत्यतः स्वपक्षे गुणमाह यो वा इत्यादि। इति जीवमुख्यप्राणवाच्यत्व इति अस्मिन् प्रकरणेऽङ्गीकार्यत्वे। उत्क्रान्तिरिति। सहैवैतैः सर्वैरुत्क्रामतीत्यनेनोक्तोत्क्रान्तिः। सर्वथा विलक्षणस्येति। उत्क्रान्तिविरोधिन्या व्यापकतया जीवात्, तथा चेतनतया च मुख्यप्राणाद् विरुद्धधर्मणः। तस्मादिति। उक्तरूपस्य महाबाधकस्य सत्त्वात्। तथाचैतेन बाधकेन ब्रह्मलिङ्गानामुपासनार्थत्वस्य शक्यवचनत्वान्नेदं

रश्मिः।

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३० ॥ भाष्ये। 'मा मोहमापद्यथाः' इत्यादि वागादीन् प्रति प्राणवाक्यम्। पञ्चधेति प्राणापानादिभेदेन। प्रकृते। अङ्गीत्यादि अत्र त्वप्रत्ययरहितः पाठः प्रतिभाति। इदं प्रकरणाधिकरणकाङ्गीकार्यत्व इत्यर्थो वा। भाष्ये। उपचारो अमृतत्वादिब्रह्मलिङ्गानाम्। प्रकृते। एतैरित्यादि समीपतरवर्तिभिः प्राणैः। उत्क्रान्तिरित्यस्य युज्येत इति पूर्वेण समं संबन्धः। तथेति उत्क्रान्तिविरोधिन्या व्यापकतयेत्यर्थः। महेति पूर्वपक्षांशे विपरीतलक्षणया स्वरेण वापाततो बाधकं तन्न तु परमार्थत इत्यर्थो बोध्यः। वीत्यादि 'मामेव विजानीहि' इति श्रुतावित्यर्थः। अर्थत्रयं ब्रह्मजीवमुख्यप्राणरूपं घटादीनां प्रसक्त्यभावात्। प्रसक्तानां त्रयाणां च व्यवच्छेदायोगात् व्यवच्छेद्याभावेन तथेत्यर्थः। ननु शिवस्य व्यवच्छेद्यत्वं ब्रह्मणो ब्राह्मणत्वात् विष्णोर्ब्रह्मगुणगणगणै[1]र्गुणितां गणितानन्दगुणकस्यातिरेकादिति चेन्न। भेदकस्य तमसो मायिकत्वेनतैर्थं प्रतीतेः। पूर्वत्राप्येवम्। 'एकतिङ् वाक्यम्' 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति प्रोक्तलक्षणकं वाक्यं तस्य भेदः। आश्रितत्वादिति भाष्याग्रे अत एव 'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी। त्वं जीर्णो दण्डेन वञ्चसि त्वं

---

१. गण संख्याने।

उपसात्रैविध्यात् । अयमर्थः । किमत्र चोद्यते । जीवमुख्यप्राणलिङ्गाद् ब्रह्म-धर्माणां जीवपरत्वं, त्रयाणामपि स्वतन्त्रत्वं वा, लिङ्गद्वयस्यापि ब्रह्मधर्मत्वमुच्यता-मिति वा । आद्यः पूर्वमेव परिहृतः । न हि ब्रह्मधर्मा अन्यपरत्वेन परिणेतुं शक्या इति । द्वितीये दूषणमाह । उपासात्रैविध्यात् । तथा सत्युपासनं त्रिविधं स्यात् । तद्वाक्यभेदप्रसङ्गान्न युक्तम् । तृतीये तूपपत्तिरुच्यते । जीवधर्मा ब्रह्मणि न विरुद्ध्यन्ते । आश्रितत्वात् । जीवस्यापि ब्रह्माधारत्वात् तद्धर्मा अपि भगवदाश्रिता एव । इहेत्युभयत्र संबन्धो ब्रह्मवादे । मुख्यप्राणे तु तद्योगात् ।

भाष्यप्रकाशः ।

ब्रह्मप्रकरणमिति पूर्वपक्षाशय इत्यर्थः । समाधानांशं व्याकुर्वन्ति अयमर्थ इत्यादि । उच्यतामिति । उपपाद्यताम् । **पूर्वमेव परिहृत इति** । न वक्तुरिति सूत्रे ब्रह्मधर्मबाहुल्यप्रतिपादनेन बहूनामनुग्रहस्य न्याय्यत्वालम्बनात् परिहृतः । परिहारस्याकारमाहुः न हीत्यादि । अत्राशक्यत्वं बहुषु लक्षणाया आपत्त्या ज्ञेयम् । **द्वितीय इति** लक्षणादोषराहित्यात् त्रयाणां स्वातन्त्र्येण प्रतिपाद्यत्वाङ्गीकार इत्यर्थः । **वाक्यभेदप्रसङ्गादिति** । विजानीहीत्यस्यावर्तनेन, मामिति पदस्यार्थत्रयकल्पनेनैवकारार्थविरोधेन च वाक्यभेदप्रसङ्गात् । **तृतीय इति** ब्रह्मधर्मत्वोपपादनचोदनापक्षे । **ब्रह्माधारत्वादिति** । 'अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्' इति श्रुत्या जीवस्यावयवत्वबोधनेन तस्य ब्रह्माधारत्वात् । नच वैपरीत्यं शङ्क्यम् । संयोगादुत्पत्तिरिति पक्षे तथात्वे, विभागादुत्पत्तिरिति पक्षे तदभावादिति । **इहेत्युभयत्र संबन्ध इति** । इहाऽऽश्रितत्वादिह तद्योगादित्येवं संबन्धः । ब्रह्मवादपदं माया-

रश्मिः ।

जातो भवसि विश्वतोमुखः' इत्यादिश्रुतिरित्याकाशवाणीपाठः । वञ्चसि गच्छसि । **तस्येत्यादि** शरीरे करादय इति प्रतीत्या करादीनां शरीराधारत्ववत् तस्य जीवस्य ब्रह्माधारत्वात् । वैपरीत्यं तन्त्वधिकरणकपटनिरूपितेत्यादिविद्वन्मण्डने कपालेषु घट इति प्रतीत्यावयविभूतब्रह्मणोवयवभूतजीवस्याधारत्वं शङ्क्यमित्यर्थः । **संयोगादुत्पत्तिरित्यादि** ईश्वरचिकीर्षावशात्परमाणुषु जायमानया क्रियया परमाणुद्वयसंयोगादुत्पत्तिः । **तथात्वे** अवयविनोवयवस्याधारत्वे । **विभागेत्यादि** अयमर्थः । सिद्धान्ते प्रथमस्यान्तिमस्य च कार्यस्य विभागादुत्पत्तिः अवान्तरस्य तु यथासंभवं संयोगविभागाभ्यां सा 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः' इति पञ्चमीश्रवणात् । परमाणुकारणवादस्य तर्कपादे दूषणीयत्वात् । इदं यथा तथा सृष्टिभेदवादे व्युत्पादितम् । **तदभावात्** अवयवानामवयव्याधारत्वाभावात् । **संबन्ध** इति देहलीदीपकन्यायेनेति भावः । **इहेत्यस्य** सर्वात्मभाववति जीवे इह ब्रह्मणि आश्रितत्वात् तद्योगादित्येवमर्थसमर्थनार्थम् । न चैवं स्वे महिम्नि ह्याश्रितत्वव्याख्याने ।

'मन्त्रोपासनवैदिकतान्त्रिकदीक्षार्चनादिविधिभिर्यः ।
अस्पृष्टो रमते निजभक्तेषु स मेस्तु सर्वस्वम्' ॥

इति ह्युपासाऽविषयत्वं विरुद्धमिति वाच्यं मन्त्राणामुपासनेति व्याख्यानात् । अत एव मुक्तिस्कन्धे उपासना उप समीपे स्थित्वा यथायोग्यकरणमिति सुबोधिनी । भाष्यप्रकाशसमासौ चोपासनाघटितसाधनपरंपरा । मायावादव्यवच्छेदसूचकब्रह्मवादपदकथनतात्पर्यमाहुः **ब्रह्मवादेत्यादिना** ।

तेन योगस्तद्योगस्तस्मात्। प्राणधर्मा भगवति न विरुध्यन्ते। प्राणस्य भगवत्संबन्धात् तद्धर्माणामपि भगवत्संबन्धात् । अथवा वक्तृत्वादयो न जीवधर्माः किं तु ब्रह्मधर्मा एव। जीवे आश्रितत्वाद्भासन्ते। परात्तु तच्छ्रुतेरिति न्यायात्। प्राणेऽपि तथा । स्वाप्ययसंपत्त्योर्जीवस्य ब्रह्माश्रितत्वम् । आध्यात्मिकाधिदैविकरूपत्वान्न संयोगः । प्राणस्य तु संयोग एव । तस्मात् सर्वे धर्मा ब्रह्मणि युज्यन्ते।

भाष्यप्रकाशः।

वादिमते जीवब्रह्मणोरभेदादाश्रयाश्रयिभावानङ्गीकारेण तस्य विरुद्धत्वबोधनार्थम् । भगवत्संबन्धादिति । भगवतो नियामकतया तन्नियम्यत्वरूपात् संबन्धात् । तथाच,

'न प्राणेन, नापानेन मर्त्यो जीवति कश्चन।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ' ॥ इति।

तत्सामर्थ्यस्य भगवदधीनत्वात् तद्धर्माणामपि परंपरया भगवद्धर्मत्वमित्यर्थः । अस्मिन् पक्षे जीवप्राणधर्माणां न साक्षाद् भगवद्धर्मत्वमिति लक्षणेवाऽऽपद्येतेत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि। ब्रह्मधर्मा इति साक्षाद्ब्रह्मधर्माः। ननु यद्येवं प्राणे स्यात् तदाऽऽश्रितत्वमेव हेतुत्वेनोक्तं स्यान्न तु तद्योगोऽपीत्यत उपपादयन्ति स्वाप्ययेत्यादि। तथाच स्वाप्ययादौ जीवस्य ब्रह्माश्रितत्वम् । अवस्थाभेदकृतात् तादात्म्यान्न संयोगः । उभयप्रवेशपक्षे तु स्वाप्यये संपरिष्वङ्गश्रुतेः संयोगः कादाचित्कः। प्राणे तु संयोग एव सार्वदिक इति हेतुद्वयकथनं युक्तमित्यर्थः । सिद्धमाहुः तस्मादित्यादि । तस्मादिति अनया रीत्या ब्रह्मणः प्रयोजकत्वेन लक्षणादोषासंसर्गात् । नन्वस्त्वेवमन्येषां भगवद्धर्मत्वं तथापि सहोत्क्रमस्यैकत्वव्यापकत्व-

रश्मिः।

तस्येति प्रत्यक्षाधिकरणवाचकस्येहेतिपदस्येत्यर्थः । न प्राणेनेत्यादिश्रुतिः पञ्चमवलीस्था । तत्सामर्थ्यस्य प्राणसामर्थ्यस्य । परंपरयेति हस्तपुस्तकसंयोगस्य कायधर्मत्ववदित्यर्थः । लक्षणेवेति शक्यसंबन्धो लक्षणा । संबद्धसंबन्धः परंपरेति सादृश्यार्थकस्येवेत्यस्य प्रयोगः । जीवप्राणधर्मवाचकपदवाक्यानां जीवप्राणयोर्धर्मत्वावच्छिन्नेषु शक्तिस्तदाधारयोर्लक्षणा ब्रह्मणो योगात्संबद्धसंबन्धः जीव आश्रयाश्रयिभावः। प्राणे योगमात्रमित्युभयमुपात्तम् । भाष्ये । परादित्यादि द्वितीयस्य तृतीयचरणे पराद्ब्रह्मणः सकाशात् जीवानां कर्तृत्वं तच्छ्रुतेः 'यमधो निनीषति तमसाधु कारयति' इत्यादिश्रुतेरित्यर्थको न्यायोस्ति तस्मादित्यर्थः । प्रकृते । अत्र पक्षे तद्योगादित्यंशवैयर्थ्यमाशङ्क्य समादधति स्म ननु यदीत्यादिना। स्वाप्ययः सुषुप्तिः संपत्तिर्ब्रह्मैव सन् ब्रह्माप्येतीति श्रुत्युक्तो लयः। कुतः संबन्धादित्यत आहुः अवस्थेत्यादि । तादात्म्यं च भेदसहिष्णुरभेदो न संयोग इति तयोरिति शेषः । उभयेत्यादि सह ह्येवास्मिन् शरीरे वसतः इति धर्मधर्मिणोः पृथक्त्वपक्षे देहे प्राणप्रज्ञयोरुभयोः प्रवेशस्तस्मिन् पक्ष इत्यर्थः । एतच्चात्रैवाग्रे स्फुटम्। कादाचित्क इति परिष्वङ्गस्य संयोगवाचकत्वादित्यर्थः । हेत्वित्यादि संबन्धद्वयबोधकहेतुद्वयकथनमित्यर्थः। भाष्ये। न संयोग इति किं त्वभेदः 'यस्तु आध्यात्मिकः प्रोक्तः सोऽसावेवाधिदैविकः' इति वचनात्। प्रकृते। प्रयोजकत्वेनेति परात्तु तच्छ्रुतेरिति न्याये कारयतीत्यत्र 'तत्प्रयोजको हेतुश्च' कर्तृप्रयोजको हेतुसंज्ञः स्यात् कर्तृसंज्ञश्चेति सूत्रवृत्तिभ्यां णिजर्थः प्रयोजकस्तस्य भावेनेत्यर्थः।

सहोत्क्रमस्तु क्रियाज्ञानशक्त्योर्भगवदीययोर्देहे सहैव स्थानं सहोत्क्रमणमिति भगवदधीनत्वं सर्वस्यापि बोध्यते। ननु प्राणस्तथानुगमादिति प्राणशब्देन ब्रह्मैव प्रतिपादितं तत्कथं धर्मयोरुत्क्रमणमिति चेत्। अत्र धर्मधर्मिणोरेकत्वपृथक्त्वनिर्देशयोर्विद्यमानत्वात्। प्राणो वा अहमस्मिन् प्रज्ञात्मेति। अत्र

भाष्यप्रकाशः ।

विरुद्धतया तस्य तु तथात्वं न युज्यत इति तस्य का गतिरित्यत आहुः सहोत्क्रमस्त्विति । तथाच व्यापकत्वादसंभवन्नपि शक्तिशक्तिमतोरभेदाद्धस्तोत्क्षेपणवत् सोऽपि भगवद्धर्म एवेत्यर्थः । एवं बोधनस्य फलमाहुः देह इत्यादि । अत्र पूर्वविरोधमाशङ्कते नन्वित्यादि । तत् कथमिति पूर्वोक्तविरोधेन धर्मधर्मिभावस्य वक्तुमशक्यत्वात् कथम् । एतत्समाधानाय हेतुं गृह्णन्ति अत्र धर्मेत्यादि । तथाच यदि पृथक्त्वनिर्देशो न स्यादुत्क्रमणं विरुध्येत । अत्र तूभयोः सत्त्वान्न पूर्वापरविरोध इत्यर्थः । उक्तं व्याख्यातुमुपपादयन्ति प्राण इत्यादि । अत्र विषयवाक्ये पाठभेदो देशभेदाद् बोध्यः । यथा बृहन्नारायणोपनिषदि तैलङ्गद्रविडपाठभेदात् । यथा चैतद्बाणमवष्टभ्येति प्रश्नोपनिषद्वाक्ये ये त्विमं शरीरं परिगृह्येति पठन्तीति पाठान्तरं शंकराचार्यैरुपन्यस्तम् । तथाऽत्रैवोदूहमित्यत्रादुदुहदिति पठितम् । तद्वत् शंकरानन्दकृतटीकायामप्येवमेव पाठ इति । अत्र क्रियाशक्त्यनुग्राहकः प्राण इति ज्ञानशक्त्यनुग्राहकश्च चेतन इति तदुभयवाचकयोः प्राणप्रज्ञात्मशब्दयोरिदमा सामानाधिकरण्यात् तदुभयवानेको निर्दिष्टः । ततस्तं मामायुरमृतमित्युपास्स्वेत्यनेन तस्योपासनं विधाय तस्य फलं चोक्त्वा तदनु तद्धैक आहुरित्यारभ्यास्तित्वेव प्राणानां निःश्रेयसमित्यन्तेन क्रियाशक्तिप्रशंसा । जीवति वागपेत इत्यारभ्य प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीत्यन्तेन ज्ञानशक्तिप्रशंसा । ततस्तस्योत्थोपासनां विधाय प्राणे सर्वाप्तिमुक्त्वा यो वै प्राणः

रश्मिः ।

तथात्वमिति ब्रह्मधर्मत्वम् । हस्तेत्यादि हस्तोत्क्षेपणस्य पुरुषधर्मत्ववदित्यर्थः । तथा च 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतायां भगवदीययोरित्यर्थः । ननु प्राण इत्यादिसूत्रे प्रज्ञात्मेति पठ्यतेत्र तु प्रज्ञानात्मेति पाठभेदेऽपि किंचिदाहुः **अत्र विषयेत्यादिना** पाठभेदस्तु स्वयमग्रे वक्तव्यः । **तैलङ्गेत्यादि** अयं द्रष्टव्यः क्वचित्स्थले । **इति पठितमिति** शंकराचार्यैरित्यर्थः । तथा च तद्भाष्यम् । ये त्विमं शरीरं परिगृह्येति पठन्ति तेषामिमं जीवमिन्द्रियग्रामं वा परिगृह्य शरीरमुत्थापयन्तीति व्याख्येयमिति । तथा अथ यथास्यै प्रज्ञायै सर्वाणि भूतान्येकं भवन्ति तद्व्याख्यास्याम इत्युपक्रम्य वागेवास्या एकमङ्गमदूदुहत् तस्यै नाम परस्तात् प्रतिविहिता भूतमात्रा प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति इत्यादि प्रज्ञाधर्म इति । इत आरभ्य प्राणगुणविशिष्टोपासना प्राणोहमस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेति श्रुत्यर्थमाहुः **अत्र क्रियेत्यादिना** । उपासनाद्वयप्रतिपादकश्रुत्यर्थस्तु ब्रधिकरणारम्भ उक्तः । **तदन्वित्यादिभाष्यं** विवृण्वन्ति स्म **तदन्वित्यादिना** । **प्राण एवेति** अथ खलु प्राण एवेत्यादितृतीयोपासनाप्रज्ञागुणविशिष्टस्य । **तस्योपेति** तस्मादेतदेवोत्थमुपासीतेति श्रुत्योत्थमित्यस्य देहाद्युत्थापकमित्यर्थः । पुनर्ज्ञानशक्तेरुत्कर्षं वक्तुमिति

क्रियाज्ञानशक्तिमान् निर्दिष्टः । तदन्वेकैकस्य धर्मस्य प्रशंसा, यो वै प्राणः सा प्रज्ञा, या प्रज्ञा स प्राण इत्युपसंहारान्तम् । पुनस्तयोरेवोत्क्रमणप्रवेशाभ्यां सह ह्येवास्मिन् शरीरे वसतः सहोत्क्रामत इत्युपक्रम्य सुषुप्तिमूर्च्छामरणेषु प्राणाधीनत्वं सर्वेषामिन्द्रियाणामुक्त्वा आसन्यव्यावृत्त्यर्थं प्रज्ञयैक्यं प्रतिपाद्योपसंहरति। पुनर्ज्ञानशक्तेरुत्कर्षं वक्तुम्, अथ खलु यथा प्रज्ञायामित्यारभ्य, न हि प्रज्ञापेतोऽर्थः कश्चन सिद्ध्येतेत्यन्तेन ज्ञानशक्त्युत्कर्षं प्रतिपाद्य धर्ममात्रत्वनिराकरणाय ज्ञानशक्तिमन्तं भगवन्तं निर्दिशति, न हि प्रज्ञातव्यमित्यारभ्य, मन्तारं विद्यादित्यन्तेन। तदनु ज्ञानक्रियाशक्त्योर्विषयभूतभूतमात्रारूपजगतो भगव-

---

भाष्यप्रकाशः ।

सा प्रज्ञा, या वा प्रज्ञा स प्राण इत्युपसंहृतेत्येतदन्ता उभयप्रशंसा । तदग्रिमसंदर्भे तूत्क्रमणप्रवेशाभ्यां पुनस्तयोरेव प्रशंसा । सा च तस्मिन् पाठे, सह ह्येवास्मिन्नित्युपक्रम्य सुषुप्त्यादिषु सर्वेन्द्रियाणां प्राणाधीनत्वमुक्त्वा ततः प्राणस्य प्रज्ञयैक्यं प्रतिपाद्योपसंहृता । प्रसिद्धपाठे तु, तस्यैषैव दृष्टिरेतद्विज्ञानमित्युपक्रमः । सह ह्येवास्मिन्नित्युपसंहारः । वाक्यार्थस्तूभयत्राप्येक एव । तस्य प्रयोजनं तु क्रियाशक्त्यपेक्षया ज्ञानशक्तेरुत्कर्षप्रतिपादनमतस्तमुत्कर्षं वक्तुमेतावान् संदर्भः । ततोऽथ खलु प्रज्ञायामित्यादिनोत्कर्षप्रतिपादनम् । तत्रापि पाठभेदः । प्रसिद्धपाठे, अथ यथास्यै प्रज्ञायै, इत्युपक्रमान्न हि प्रज्ञापेता धीः काचन सिद्ध्येदित्युपसंहारात् । अर्थस्त्वेक एव । तदग्रे तु पाठोऽपि समानः । तदर्थस्तु, धर्ममात्रत्वनिराकरणायेत्यादिना प्रतिपाद्यते । तत्र ज्ञानशक्तिमन्निर्देशो जीवसाधारण इति जीवं वारयितुं, ता वा एता दशैव भूतमात्रा इत्यारभ्य, न ह्यन्यतरतो रूपं किंचन सिद्ध्येदित्यन्तेन क्रियाज्ञानशक्त्योः परस्परसापेक्षतया स्वविषयभूतरूपात्मकजगत्साधकत्वं प्रतिपाद्य, ततो, नो एत-

रश्मिः ।

भाष्यं विवृण्वन्ति स्म **तस्य प्रयोजनमित्यादि**। **एक एवेत्यादि**। अथ बुद्धिप्राणयोः सहस्थित्युत्क्रान्तिकथनानन्तरं प्रज्ञायै प्रज्ञायाः संबन्धीनि सर्वाणि भूतानि एकीभवन्ति भगवता तथा व्याख्यास्यामः । तदेकीभावमेवाह **वागेवास्या इति**। अस्या भगवद्रूपायाः प्रज्ञायाः एकमङ्गमंशं वाक् पूरयामास । तस्यै नाम तस्याः भगवद्रूपायाः प्रज्ञाया नाम इत्यव्ययं प्रकारश्यार्थकं परस्तात् द्वितीयमंशं चक्षुरादिना प्रतिविहिता विषयीकृता रूपादिरूपा भूतमात्राः पूरयांबभूवुरित्यर्थः । नामरूपात्मकजगदुक्तम् । तत्र क्रीडामाह **प्रज्ञयेत्यादि**। तया वाचं समारुह्यानुप्रविश्य तया करणभूतया सर्वाणि नामानि वक्तव्यत्वेनाप्नोति चक्षुषा सर्वाणि रूपाणि पश्यतीत्येवंरूपोर्थ इत्यर्थः । श्रुतयस्तु शंकरानन्दभाष्योपन्यास उक्ताः । प्रकृतमनुसरामः । **ता वा एता इति** ता वा एता दशैव भूतमात्राः अधिप्रज्ञं दश प्रज्ञामात्राः अधिभूतं यदि भूतमात्रा न स्युः न प्रज्ञामात्राः स्युः । यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युर्न ह्यन्यतरतो रूपं किंचन सिद्ध्येदिति । **प्रतिपाद्येति**। एतावता त्रेधोपासनमुक्तमबीमांसायाम् । श्रुत्यर्थस्तु अधिप्रज्ञं प्रज्ञामात्रास्विव्यर्थः । एवं भूतमात्रासु दश प्रज्ञामात्रा इत्यर्थः । एवमुक्तमुभयोः

दभेदं प्रतिपादयन्, 'स एष प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः' इत्युपसंहरति ब्रह्मधर्मैः। अतः क्रियाज्ञानविषयरूपो भगवानेवेति प्रतिपाद्य, न तावन्मात्रं ततोऽप्यधिक इत्येकोपासनैव विहिता। तस्माज्जडजीवरूपत्वात् सर्वात्मकं ब्रह्मैवेति महावाक्यार्थः सिद्धः ॥ ३० ॥ १० ॥

इति प्रथमाध्याये प्रथमपादे दशममनुगमाधिकरणम् ॥ १० ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः ॥ १ ॥ १ ॥

भाष्यप्रकाशः ।

ज्ञानेति तासां प्रज्ञायाः सकाशादभेदं प्रतिज्ञायोपपादयति । 'तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष इति । तथाच, यद् यज्जनकं तत् तद्धर्मकं, यद् यद्धर्मकं तत् तदविनाभूतमिति व्याप्त्या भूतमात्राप्रज्ञामात्रात्मकस्य सर्वस्य जगतः प्रज्ञाऽविनाभावेन तदात्मकत्वे सिद्धे तस्या अपि स्वरूपं निर्णेतुम्, आनन्दोऽजरोऽमृत इति ब्रह्मधर्मैरुपसंहरति । अतोऽत्र प्रज्ञात्मकजीवस्वरूपादधिकस्य ब्रह्मणः सर्वात्मकत्वसर्वाधिकत्वज्ञानार्थमेकैवोपासना विहिता । तस्मात् साध्वसाधुकारकतया प्राप्तस्य वैषम्यादिदोषस्यापि परिहाराद् ब्रह्म जडजीवात्मकतया सर्वोपादानत्वेन सर्वात्मकमित्येष महावाक्यार्थः सिद्ध इत्यर्थः । तेनेदमधिकरणं पूर्वोक्तस्य सर्वस्य निगमनार्थमिति बोधितम् । तथाहि । पूर्वं शास्त्रारम्भे जिज्ञासोक्ता । सा सर्वदा कर्तव्या । अन्यथा अरुन्मुखयत्यादिवद्विनाशः स्यादिति विषयवाक्यारम्भे बोधितम् । ततो जन्मादिसूत्रसिद्धं सर्वकर्तृत्वं समन्वयसूत्रसिद्धं सर्वोपादानत्वं चोपपादितम् । तत उपसंहारे, ईक्षत्यानन्दमयाधिकरणसिद्धोऽर्थः प्रज्ञात्मानन्दपदाभ्यां संगृह्य बोधितः । ब्रह्मधर्मोपदेशेन, लोकपालत्वादिबोधनेन, प्राणशब्दोक्त्या, स म आत्मेत्युपसंहारेण च यथायथं तद्धर्मोपदेशाद्यधिकरणार्थः

रश्मिः ।

सापेक्षत्वं प्रपञ्चयन्ति **यदीत्यादि** । ग्राह्यव्यतिरेकेण ग्राहकं न सिद्ध्यति ग्राहकव्यतिरेकेण ग्राह्यं न सिद्ध्यतीत्यर्थः । ग्राह्यग्राहकयोरभेदमाह **नो** इति । प्रज्ञामात्राभूतमात्रारूपमित्यर्थः । **तासां** भूतमात्राणाम् । **तद्यथेत्यादि** रथस्य स्यन्दनस्यारेषु मध्यवर्तिशलाकासु चक्रोपान्ते नेमिरर्पिता नाभौ चक्रपिण्डिकायामरा अर्पिताः यथा तथा भूतमात्राः शब्दादयः प्रज्ञामात्रास्विन्द्रियेष्वर्पिताः प्रज्ञामात्राश्च प्राणे ब्रह्मण्यर्पिताः । प्राणस्य ब्रह्मत्वमाह **स एष** इति । तथा चानेन दृष्टान्तेन नानात्वं नेत्यर्थः । **अतः क्रियेत्यादिभाष्यं** व्याकुर्वन्ति स **अतोत्रेत्यादिना** । **महावाक्येत्यादि** अवान्तरवाक्यार्थसमूहो महावाक्यार्थः । तथा च जडविशिष्टजीवेतिव्याप्तिवारणायेदमनुगमाधिकरणमिति भावः । जीव प्राणधारणे इति धातुपाठात् । प्राणरूपजडाधारो जीवः । औपाधिकब्रह्मणोऽभिन्नः इति । अन्यदपि प्रयोजनमाहुः **तेनेत्यादि** । **विषयेत्यादि** अरुन्मुखान् यतीन् शालावृकेभ्यः प्रायच्छमित्यनेन । श्रुत्यर्थस्तु न रुत् रुक् मुखे येषां तान् । शालावृका अरण्यश्वानः । तथा चावेदान्तमुखानां निन्दाश्रावणेन सर्वदा वेदान्तमुखत्वे प्राप्ते ब्रह्मजिज्ञासापि सर्वदा प्राप्तेति भावः । **उपपादितमिति** ता वा एता दशेत्यादिना निरूपितम् । **तद्धर्मेत्यादि** तद्धर्मोपदेशाद्यधि-

भाष्यप्रकाशः।

संगृहीतः। तेन तथेति। अत्रोपासात्रैविध्यादिति पदं शंकरभास्कराचार्यभिक्षुभिः स्वस्वमतेनैवमेवापत्तिमादाय व्याख्यातम्।

रामानुजाचार्यैस्तु प्राचीनवृत्तिकारानुसारेणोपासात्रैविध्यपदमेकवाक्यत्वे हेतुत्वेन व्याख्यातम्।

रश्मिः।

करणचतुष्टयार्थः। ब्रह्मधर्मोपदेशस्तद्धर्मोपदेशः तस्मादन्तः परमात्मा लोकपालत्वादिरूपहृदयरूपचरणाभिधानाज्ज्योतिर्ब्रह्म प्राणशब्दोक्त्या ब्रह्म ग्राह्यं लिङ्गात्। तल्लिङ्गाधिकरणे योर्थस्त आत्मेति लिङ्गात् ब्रह्मैव भवितुमर्हति प्रकृते इति तल्लिङ्गाधिकरणे अतिदेशाधिकरणे च तल्लिङ्गानां हेतुत्वात्। तथेति अनुगमत्वमुपलक्षणं चैतत्। प्रतिज्ञा प्रथमाधिकरणे अप्रतिज्ञातार्थस्य निग्रहस्थानत्वात्। प्रतिज्ञातार्थस्य लक्षणप्रमाणाभ्यां वस्तुज्ञानमिति द्वितीयाधिकरणे प्रतिज्ञातार्थविशेषलक्षणं विशिष्टज्ञानस्य विशेषणरूपब्रह्मज्ञानाधीनत्वाद् दण्डीति ज्ञानवत्। ततस्तृतीयाधिकरणे सामान्यप्रकारकजिज्ञासाया ब्रह्म कारणमित्यस्याविशेषप्रकारकजिज्ञासाजनकत्वात् ब्रह्माभिन्ननिमित्तोपादानकारणमिति जिज्ञासितम्। ततश्चतुर्थाधिकरणे ब्रह्मलक्षणस्य चित्यतिव्याप्तिः परिहृता। ईक्षत्याश्रयस्य चित्त्वात्। शब्दप्रवृत्तिसाधनेन लक्षणस्याभिधादिव्यापारश्च विचारितः। ततः पञ्चमाधिकरणे आनन्देतिव्याप्तिः परिहृता। आनन्दस्य ब्रह्मत्वप्रसाधनेन। तेन स्वरूपलक्षणस्य असंभवः परिहृतः। कार्यलक्षणलक्षिते। षष्ठे तद्धर्मोपदेशाधिकरणे बृहदारण्यके चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयाताहमद्राक्षमहमश्रौषमिति य एव ब्रूयादहमद्राक्षमिति तस्मा एव श्रद्दध्यामेत्यत्र प्रत्यक्षस्य शब्दापेक्षया श्रद्धेयत्वोक्त्या स्मृत्यादिसिद्धप्रमेयस्य ब्रह्मत्वमुक्तम्। भाष्ये परमात्मपदात् स्मृतौ परमवस्तुनि परमात्मपदात् तदुक्तमारणे।

'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम्।
एतैरादित्यमण्डलं सर्वैरेव विधास्यते'॥ इति।

ततः सप्तमे तल्लिङ्गाधिकरणे आकाशेतिव्याप्तिः परिहृता। आकाशपदस्य ब्रह्मार्थत्वात्। अष्टमेतिदेशाधिकरणे न्यायो नियमार्थम्। यथान्यत्र ब्रह्मनिरूपणं न स्यात् भ्रमेण। नवमे ज्योतिश्चरणाधिकरणे ब्रह्मधर्माणां मुख्यत्वसाधनेन प्रकाशाश्रयसूत्रादौ न द्वैतवारणं कृतमिति धर्मविषयत्वम्। दशमेनुगमाधिकरणे जडजीवरूपत्वाद् ब्रह्मणो जडे कार्येतिव्याप्तिः परिहृता। जीवे तु द्वितीयाध्यायभोक्त्रापत्तिसूत्रीयाणुवादेन कार्येतिव्याप्तिः परिहृता। मय्येव सकलं जातमित्यादि निरूपितं कार्यमिति तेनाणुभाष्यमिति समाख्या 'ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः' इति गीताया इति। **आपत्तिमित्यादि** उपासात्रैविध्यमापाद्य यदि जीवमुख्यप्राणलिङ्गानि स्युः तर्ह्युपासात्रैविध्यं स्यात् इत्येवमिहाश्रितत्वात् इह तद्योगादेकैव ब्रह्मोपासनेति समाधानसूत्रं व्याख्यातम्। मायावादिभिर्मायापुरस्कारेण बुद्धिप्राणौ ह्युपाधी स्वीकृत्य प्रत्यगात्मनः स्वरूपेणाभेद इत्यतः प्राण एव प्रज्ञात्मेत्येकीकरणमविरुद्धम्। तत्त्वमस्यादिवाक्येभ्यो जीवस्यात्यन्तभिन्नत्वाभावाद् ब्रह्मणः। इहेति विषयवाक्ये। अतो न ब्रह्मवादे प्राणप्रज्ञात्मनो भेददर्शनविरोधः। एवं स्वमतेन। भास्कराचार्यैः भेदाभेदेन। विज्ञानेन्द्रभिक्षुभिः अविभागाद्वैतेनेति। विशिष्टाद्वैते चिदचिद्विशिष्टं ब्रह्मेत्यापत्तिर्न संभवतीति पृथक् रामानुजमतोपन्यासः।

भाष्यप्रकाशः ।

न ह्यत्र जीवमुख्यप्राणब्रह्मणां त्रयाणामुपासनमुच्यते, येन वाक्यं भिद्येत । किंतु भोक्तुर्जीवस्य धर्मैर्भोग्यस्य मुख्यप्राणस्य धर्मैः स्वधर्मैश्चेत्येवं त्रैविध्यादेकोपासनैव विधीयत इति, संभवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते इत्यभियुक्तोक्तेः पूर्वपक्षो न युक्त इति । तेषां चौरः शैवोऽप्येवमाह ।

तच्च वाचस्पतिमिश्रैरेवं दूषितम् । एतदालोचनीयम् । कथं न वाक्यभेद इति । युक्तं सोमेन यजेतेत्यादौ सोमादिगुणविशिष्टयागविधानम् । तत्तद्गुणविशिष्टस्यापूर्वस्य कर्मणोऽप्राप्तस्य विधिविषयत्वात् । इह तु सिद्धरूपं ब्रह्म न विधिविषयो भवितुमर्हति । अभावार्थत्वात् । भावार्थस्य विधिविषयत्वनियमात् । वाक्यान्तरेभ्यश्च ब्रह्मावगतेः प्राप्तत्वात्तदनूद्याप्राप्तोपासाभावार्थो विधेयस्तस्य च भेदाद्विध्यावृत्तिलक्षणो वाक्यभेदोऽतिस्फुट इति भाष्यकृता नोद्घाटित इति ।

अत्रेदं बोध्यम् । तथाहि । अत्र हि मामेव विजानीहीत्यारभ्य, नीलं वेतीत्यन्ता ऐन्द्रगुणविशिष्टैकोपासना । तदनु सहोवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेत्यारभ्यैवं हि पश्याम इत्यन्ता द्वितीया प्राणगुणविशिष्टस्य । तदन्वथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति तस्मादेतदेवोत्थमुपासीतेत्यारभ्य सिध्येदित्यन्ता प्रज्ञागुणविशिष्टस्य । तत्र पृथगुपासनाङ्गीकारे, मामेव विजानीहि स म आत्मेति विद्यादित्युपक्रमोपसंहारगतस्य वक्त्रात्मोपदेशस्य विरोध इति तदभावायैकवाक्यत्वस्यावश्यकत्वादुपासनात्रयपक्षस्त्वसंगतः । अथोपक्रमाद्यनुरोधेनावान्तरोपासनावाक्यानां तदनुवादेन प्रकारविधायकत्वमङ्गीकृत्यैन्द्रवाक्यत्वं चेदङ्गीक्रियते, तदा तत्रोक्तानां प्राणधर्माणां ब्रह्मधर्माणां च काल्पनिकत्वापत्तिः पूर्वोक्तरीत्या प्रतर्दनस्य पुरुषार्थासिद्धिश्चेति तदुभयं विहायात्र ब्रह्मवाक्यत्वं

रश्मिः ।

कथमेकवाक्यत्वे हेतुत्वमित्यपेक्षायामाहुः **न ह्यत्रेत्यादिना**। विशिष्टाद्वैतार्थमाहुः **किं तु भोक्तुरित्यादि** । **चौर** इति उपासात्रैविध्यापत्त्यादिना भावस्य यद्यप्ययुक्तं तथापि दूष्यत्वेनेच्छाविषयत्वाद्युक्तमपि विशेषणमिदं भगवतः शैवाचार्यस्य लाघवात् । **सोमादीत्यादि** सोमपदस्य मतुबन्ते लक्षणेत्यर्थम् । **अप्राप्तस्येति**पदेनापूर्वविधित्वं सूच्यते उपासनाया विधिविषयत्वेन तद्विशेषणस्यापि विधिविषयत्वं मत्वा निषेधम् । यद्वा 'प्रज्ञां कुर्वीत ब्राह्मणः' इति बृहदारण्यके प्रज्ञारूपब्रह्मणस्तथात्वं मत्वा निषेधमाह **इहेत्यादिना** । निषेधशेषत्वेनाभावार्थत्वात् । विधिश्रवणस्य गतिं नियमविधिरूपामाह **वाक्यान्तरेत्यादि** । **तस्येत्यादि** प्राणादिधर्मैरुपासारूपस्य भावार्थस्य भेदाज्जानीहीति विध्यावृत्तिलक्षणनियमविधिरित्यर्थः । **अत्रेदमित्यादि** । दूषणे वाक्यभेदरूपे वक्ष्यमाणव्याख्यानातिसामञ्जस्यरूपं इदं दूषणं बोध्यम् । **विरोध** इति प्राणस्य जडत्वादिति भावः । **तदनुवादेनेति** प्राणप्रज्ञागुणानुवादेन । प्राणप्रज्ञागुणैः प्रकारौ तद्विधायकत्वं प्राणप्रज्ञागुणरूपप्रकारवदैन्द्रगुणविशिष्टोपासनाविधायकत्वमङ्गीकृत्येत्यर्थः । **पूर्वोक्तेत्यादि** प्राण इति सूत्रभाष्ये न हि परमात्मनोऽन्यद्धिततममस्ति परमानन्दरूपत्वात् । पापाभावश्च ब्रह्मविज्ञान एवेत्यादिना प्रोक्तरीत्या प्रतर्दनस्येन्द्रात्मैक्ये ब्रह्मैक्यरूपपुरुषार्थासिद्धेस्तथा । **तदुभयमिति** इन्द्रवाक्यत्वं प्रतर्दनवाक्यत्वं चेत्युभयम् । यद्वा

१. इन्द्र आत्मा ।

भाष्यप्रकाशः ।

सिद्धान्तितम् । तथा सति त्रितयपक्षस्य प्रागेव निरस्तत्वाद् विध्यावृत्त्यङ्गीकारे विधोल्लेखवैयर्थ्यप्रसंगाच्च प्रकारत्रयविशिष्टैकोपासाविधिरेव सिद्ध्यतीति वाक्यभेदस्फुटत्वं कथमित्येवालोचनीयं, न तु तदभावसमर्थनमालोचनीयम् । किंच । भाष्यकृतापि ब्रह्मण एवैतदुपाधिद्वयधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितमिति तन्मतसिद्धमुक्तमतो व्याख्येयविरोधोऽपीति।

नन्वेवमस्य प्राचीनपक्षस्य निर्दुष्टत्वे सिद्धान्तिना कुतोऽयं नादृत आपत्त्या च कुतो व्याख्यातमिति चेन्न । त्रैविध्यादित्यस्या ल्यब्लोपपञ्चमीत्वेनापत्तेरार्थिकतयाऽध्याहार्यत्वाभावेन व्याख्याने दोषाभावात् । सिद्धान्ते तेषां धर्माणां जीवीयत्वादिना भानस्यैव भ्रान्तित्वबोधनेन ब्रह्मधर्मत्वस्यैव निर्णीततया प्राचीनप्रतिपन्नत्रैविध्यस्याप्यभावादिति बुध्यस्व ।

माध्वास्तु, ऐतरयोक्तं विश्वामित्रेन्द्रसंवादं विषयवाक्यत्वेनोदाहरन्ति ॥ ३० ॥ १० ॥

इति दशममनुगमाधिकरणम् ॥ १० ॥

इति श्रीवल्लभाचार्यचरणनखचन्द्रकिरणनिवारितहृदयध्वान्तेन पुरुषोत्तमेन कृते भाष्यप्रकाशे प्रथमाध्यायस्य प्रथमः पादः ॥ १ ॥ १ ॥

रश्मिः ।

जीवं प्राणं चेत्युभयम् । यदुक्तम् ।

'युक्तिभिरतिशिथिलाभिः समादधानो दृढान् दोषान् ।
वाचस्पतिरपि भाष्ये व्याख्याव्याजेन दूषणं ब्रूते' ॥ इति ।

तत्स्फुटं दर्शयन्ति **किं चे**त्यादि । **तन्मते**त्यादि अणुभाष्ये द्वितीयव्याख्यानेऽथ चेत्यादिना वृत्तिकृन्मतानुसारेण व्याख्यातमिति रामानुजमतसिद्धमुक्तम् । अर्थात्तैर्वृत्तिकृन्मतानुसारेण व्याख्यानादिदमपि तदेवेति भावः । **विरोध** इति । यद्यपि वृत्तिकृन्मतानुसारेणाथवा नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादित्यस्यायमन्योर्थ इत्यादिना वृत्तिकृन्मतेन व्याख्यानान्तरमचीक्लृपन् शंकराचार्यास्तट्टीकाकारा इदमेकदेशिमतमप्रामाणिकमित्युक्त्वा नात्रोपासात्रयविशिष्टब्रह्मविधिः । आरुण्याद्यनेकगुणविशिष्टाप्राप्तक्रयणवत् सिद्धस्य ब्रह्मणो विध्ययोगात् वाक्यभेदप्रसङ्गाच्च । न च नानाधर्मविशिष्टमेकमुपासनं विधीयते । एवंविधवाक्यस्यात्राश्रवणात् । नापि मामायुरमृतमित्युपास्वेत्यत्र मामिति जीवः, आयुरिति प्राणः, अमृतमिति ब्रह्म, इति स्वस्वधर्मविशिष्टमुपासनं विधीयते इति शङ्क्यम् । ब्रह्माश्रुतेः । प्राणो वामृतमिति प्राणस्यैवामृतत्वकथनाच्चेति प्रथमव्याख्यानमेवमश्रुतमिति दूषितम् । तथापि द्वितीयस्य पूर्वापेक्षयाऽस्वरसराहित्याद्भाष्ये चास्य पक्षस्य नैर्बल्यासूचनाच्च टीकाकारोक्तमेवासंगतमित्याशयः । **ल्यब्लोपे**त्यादि तथा चोपासात्रैविध्यादित्यस्योपासात्रैविध्यमापद्येत्यर्थः । यथा प्रासादात्प्रेक्षते इत्यत्र प्रासादमारुह्येत्यर्थः । एवं च यदि ब्रह्मजीवमुख्यप्राणानां त्रयाणामपि स्वतन्त्रत्वं त्वयोच्येत तदोपासात्रैविध्यमापाद्य वाक्यभेदो दूषणत्वेनोच्येत इत्यर्थः । ननु तथापि वाक्यभेदप्रसङ्गस्य त्वध्याहार्यत्वमेवेति दोषतादवस्थ्यं तत्राहुः **सिद्धान्त** इत्यादिना । **प्राचीनप्रतिपन्ने**ति तथाव्याख्याने समन्वयस्य अध्यायार्थस्य जीवप्राणयोः सत्त्वेनातिव्याप्तिरतोयमर्थ इति भावः । **उदाहरन्ती**ति ते देवाः प्राणयन्तः स एषोसुः स एष प्राणः प्राणकृत्व इत्येव विद्यात्तदयं

१. पञ्च प्राणकृत्वः 'यस्मिन् प्राणः पञ्चधा संविवेश' इति श्रुत्यन्तरात् ।

रश्मिः ।

प्राणोधितिष्ठतीत्याद्यनुगमादत्रापि प्राणो[1] विष्णुरेव ।

'विष्णुमेवानयन् देवा[2] विष्णुर्भूतिमुपासते ।
स एव सर्वं वेदोक्तसारघो देह उच्यते' ॥ इति स्कान्दे ।

इतिश्रीति । अणुभाष्येति अणुभ्यो द्वा सुपर्णेति श्रुत्युक्तेभ्यो भाष्यमिति चतुर्थीसमासः तस्य प्रकाश इत्यर्थः ।

'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥
तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥
ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितम्' ॥

इतिगीतात्रयोदशाध्यायवाक्येभ्यः ॥ ३० ॥ १० ॥

इति दशमाधिकरणम् ॥ १० ॥

इति श्रीविठ्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायपौत्रेण संपूर्णवेत्रा विठ्ठलरायभ्रात्रीयगोकुलोत्सवात्मजगोपेश्वरेण कृते भाष्यप्रकाशरश्मौ प्रथमाध्यायस्य प्रथमः पादः संपूर्णतामगमत् ।

१. स एष प्राण इत्युक्तः । २. प्राणम् ।

श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसंपूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिच्चरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

प्रथमाध्यायस्य द्वितीयपादः

'भगवद्धर्मपरायणसद्व्रतश्रेष्ठिगोवर्धनदास सुन्दरदास' इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतः 'प्राप्तभगवत्पद-
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एलूएलू. बी.,
वकील, हाइकोर्ट' इत्येतेषां सुहृद्भिः
संशोध्य 'निर्णयसागर' मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४६०. संवत् १९९५.

श्रीमदाचार्यचरणप्रादुर्भावोत्सवः

मूल्यं रूपकत्रयम् ।

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya Sagar' Press,
26-28, Kolbhat Street, Bombay 2.

Published by Dhirajlal Vrajdas Sanklia, B. A., LL. B., Advocate
at Khakhar Building, C. P. Tank, Bombay 4.

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

अथ प्रथमोऽध्यायः ।

द्वितीयः पादः ।

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥ (१।२।१)

समन्वये प्रथमेऽध्याये सर्वेषां वेदान्तानां ब्रह्मणि समन्वयो वक्तव्यः । तत्रो-

---

भाष्यप्रकाशः ।

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥ अथ द्वितीयपादं व्याचिख्यासवः पादानामेककार्यत्वरूपां परस्परसंगतिं क्रमनियामिकामवसररूपां च संगतिं प्रतिपादयितुं व्याख्येयाध्यायार्थकथनपूर्वकं पूर्वपादसिद्धः सर्व एवार्थः संक्षेपेण वक्तव्योऽन्यथा मन्दमतीनां पूर्वोक्तानवधारणेन वक्ष्यमाणार्थे संदेहः स्यादित्यतस्तमाहुः **समन्वयेत्यारभ्य, संदेहो निवारित इत्यन्तेन** । **समन्वये** सर्ववेदान्तसमन्वयप्रतिपादकत्वेन समन्वयाख्यया प्रसिद्धे **प्रथमेऽध्याये** उक्तविधः

रश्मिः ।

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥ इदानीं द्वितीयपादभाष्यं व्याचिख्यासवः सूत्रं मङ्गलत्वेन स्फुटं व्याख्यातुमाहुः **सर्वत्रेत्यादि** । **अथ** इति अयमानन्तर्यार्थे । **एककार्येत्यादि** अत्रैकस्य कारणस्य प्रथमचरणरूपस्य कार्यत्वमन्तर्यामिप्रतिपादकेऽस्मिन् पादेऽन्यत्र चेति प्रथमस्य द्वितीयादिभिरेककार्यत्वमेवं चतुर्णामपि पादानां परस्परमेककार्यत्वमुन्नेयम् । तथा हि । शब्दसंदेहनिवारणस्य प्रथमपादकृतस्य द्वितीयपादादिकरिष्यमाणार्थसंदेहनिवारणानां कार्यत्वमिति । **अवसरेत्यादि** प्रतिबन्धकीभूतजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वमवसरः । स च कार्यप्रतिपादकानां 'यतो वा इमानि' इत्यादीनां लक्षणाद्यर्थं भगवतो व्यासादेरन्तर्यामिप्रतिपादकापेक्षया प्राथमिकजिज्ञासाविषयत्वकथनेन तेषां ब्रह्मसमन्वयप्रतिपादनानन्तरं प्रतिबन्धकीभूतजिज्ञासानिवृत्तौ सत्यां जीवपुरस्कारेण कः समन्वय आधेयप्रतिपादकानामवश्यं वक्तव्य इति जिज्ञासया जीवपुरस्कारेण प्रतिपादकानां निरूपणादवसररूपामित्यर्थः । संक्षेपेण पूर्वपादार्थकथने प्रयोजनमाहुः**अन्यथेत्यादिना** । **वक्ष्यमाणार्थ** इति । अयमर्थः । पूर्वपादे इदमित्थतया प्रतिपाद्यत्वाभाव ईक्षत्यधिकरण उक्तः । अग्रे इदमित्थतया प्रतिपाद्यत्वाभाववदन्वये बुद्धिनिवेशसौकर्याभावात् सर्वत्र प्रसिद्धस्योपदेश उक्तः, वेदान्तानां शब्दत्वात् । प्रकर्षपदार्थ इदमित्थतया प्रतिपाद्यत्वं तेन सिद्धस्य न तु केनाप्यंशेन साध्यस्य । उपदेशो मननं उपदिश्यतेनेन मननेनेत्युपदेशः । करणे घञ् । 'उपदेश आद्योच्चारणम्'

---

१. आधेय, कार्य, । २. आधेय ।

भाष्यप्रकाशः।

समन्वय एकार्थप्रतिपादकत्वरूपो वक्तव्यः। परप्राप्तिरूपफलसाधनाय तत्साधनीभूतब्रह्मज्ञानोपकाराय चावश्यं वाच्यः। न चानन्तेष्वनन्तशाखेषु वेदेषूपनिषद्भागरूपाणां वेदान्तानामप्यनन्तत्वादुक्तरीतिकसमन्वयोक्तेरशक्यत्वमसंगतत्वं वा शङ्क्यम्। प्रकारविशेषेण सर्वोपपत्तेरित्याशयेनाहुः तत्रेत्यादि। वक्तव्ये सर्वसमन्वये, अन्तस्तद्धर्माधिकरणादिविषयवाक्यभूतानामुद्गीथाद्युपासना-

रश्मिः।

इत्यत्र मनोरमायाम्। एवं च धर्मित्वेन ज्ञानविचारः पूर्वपादे वृत्तः। अधुना तु धर्मत्वेन। 'वेदस्य विद्यमानत्वान् मर्यादापि व्यवस्थिता' इतिवाक्यात्, अथातो धर्मजिज्ञासेत्युक्तत्वात्। तत्र धर्मः महतः स्रष्टृव्यतिरिक्ते विराजादिः।

'प्रथमो महतः स्रष्टा द्वितीयस्त्वण्डसंस्थितः।
तृतीयः सर्वभूतस्थः यज्ज्ञात्वा मुच्यते बुधः'॥

इति वाक्यम्। किंच मुण्डकत्रये अक्षराद्युक्तं तदनु प्रश्ने परब्रह्मान्वेषकरणं द्वितीयस्याम्। तृतीयस्यां ब्रह्मविद्योपनिषदि।

'ब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमाम्।
यत्रोत्पत्तिं लयं चैव ब्रह्मविष्णुमहेश्वरात्'॥ इति श्रुत्याम्
'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै-
र्युक्तः परः पुरुष एक इहास्य धत्ते।
स्थित्यादये हरिविरञ्चिहरेतिसंज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः'॥

इति वाक्योपबृंहितायां व्याहृति ब्रह्म प्रसिद्धं तस्य मननाद्धर्मज्ञानविचार इति वक्ष्यमाणेर्थे संदेहो धर्मिनिरूपणं धर्मनिरूपणं वेति। धर्मिनिरूपणोपक्रमात्। तर्हि अस्तु धर्मिनिरूपणम्। मैवं। ब्रह्मविद्यात्वेनाक्षरस्य गुणत्रयविशिष्टस्यापि निरूपणे बाधकाभावात् पदशक्तेः प्राधान्यात्। वेदोपाङ्गत्वेन मीमांसायाः। वेदद्वारा मर्यादायां धर्मनिरूपणरूपायां पर्यवसानाच्च। न चैवं पूर्वपादमीमांसातिरिक्तमीमांसाया हेयत्वापत्तिः, प्रकाशाश्रमन्यायाद्धर्माणां धर्म्यभेदात्। अधिकारिणां मर्यादायां स्थितेरावश्यकत्वाच्च। विद्वन्मण्डने तथैवोक्तेः। अतो ज्ञानधर्मविचारः। एवं च प्रथमपादाग्रेतनपादेषु धर्मविचारो वा धर्मिविचारो वा सर्वत्र प्रसिद्धपदादुपक्रमाच्च। **परप्राप्तीति** पर एकार्थः अत एव जीवप्राणमुख्यसूत्रमापत्त्या व्याख्यातमन्यथा त्रयोर्थाः स्युरिति। **तत्साधनी**-त्यादि परप्राप्तिरूपफलसाधनीभूतं यद्ब्रह्मज्ञानं तदुपकारः फलजननयोग्यता स च व्यापारेण स्यात्। तादृशभक्त्यर्थं तदङ्गद्वयं माहात्म्यज्ञानं ब्रह्मात्म्यैक्यज्ञानं च तत्र समन्वये पूर्वाङ्गं सर्वत्र वाक्यान्वयाधिकरणादौ ब्रह्मात्म्यैक्यं च प्रतिपाद्यते तस्मा इत्यर्थः। 'ब्रह्मविदाप्नोति परम्' 'भक्त्या जानाति चाव्ययम्' इति श्रुतिभ्याम्। 'नाहं वेदैः' 'भक्त्यात्वनन्यया शक्य' इति।

'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया।
तदध्यवसत् कूटस्थो रतिरात्मन्यथो भवेत्'॥

इति 'अनन्ता वै वेदाः' इति श्रुतेराह **अनन्तेष्विति**। **प्रकारेत्यादि** यत्रैषां न्यायानां

१. ब्रह्म। २. ज्ञानव्यापारीभूतभक्त्यर्थम्।

ज्ञीथाद्युपासनावाक्यानां मुख्यवाक्येषु फलोपकार्यङ्गत्वम् । ब्रह्मवाक्यानां पुनर्निःसंदिग्धानां समन्वयः स्वतः सिद्धः । संदिग्धानि द्विविधानि शब्दतोऽर्थतश्च ।

भाष्यप्रकाशः ।

वाक्यानां मुख्यवाक्येषु फलसंबन्धबोधकेषु सर्वविधकारणताप्रतिपादकवाक्येषु फलोपकार्यङ्गत्वम् । तत्तदुपासनया तेन तेन रूपेण तत्तत्फलप्राप्तौ महामाहात्म्यज्ञानस्यात्मत्वस्फूर्त्या निरुपधिप्रेम्णश्च सिद्ध्या तस्य साधनस्य भक्तिरूपत्वसिद्धौ विवक्षितपरप्राप्तिरूपं फलं भवतीति तेषां तदङ्गत्वम् । तथा चानया रीत्याऽन्येषामनुक्तानामप्युपासनावाक्यानां प्रयोजनैक्यात् समन्वयः सिद्ध्यतीति न पूर्वोक्तो दोष इत्यर्थः । एवमन्येष्वपि बोध्य इत्याशयेनाहुः **ब्रह्मवाक्याना**मित्यादि । पूर्वं प्रतिपाद्यविषयभेदेन संदिग्धानि चतुर्विधान्युक्तान्यत्र तु तेष्वेव शब्दार्थभेदेन

रश्मिः ।

एकषष्टितमाधिकशतनामप्रसक्तिस्तत्र स्थले प्रकारविशेष (एवमारोपापवादसंगतिस्थले लक्ष्यलक्षणभावएककार्यत्वं वा संगतिप्रकारविशेषः) इत्यर्थः । स चाग्रे वाच्यः । मुख्यवाक्येषु लक्ष्यत्वं यत्तन्निरूपितलक्षणत्वावच्छिन्नं विशेषणमाहुः **फले**त्यादि । मुख्यत्वं फलसंबन्धित्वं पूर्वतन्त्रे । 'ब्रह्मविदाप्नोति परम्' इत्यादिषु वेदान्तत्वेन वेदेभ्यः पश्चादुपयुक्तेष्वर्थतः संदेहभ्रमं वारयन्ति स्म **सर्वे**त्यादिना । सर्वा विधाः समवायित्वादयः । तेन कारणैः फलसंबंधो न त्वधिकारिभिः 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादाविति बोधितम् । ब्रह्मविदित्यत्र विशब्दे संदेहो ज्ञानप्रतिपादको वा भक्तिद्वारकज्ञानप्रतिपादको वेति । आकाशस्तल्लिङ्गादित्यधिकरणे आकाशशब्दो ब्रह्मणि प्रयुक्तो भौतिकाकाशे वेति । अत्र फलं माहात्म्यप्रतिपादनस्याधिदैविकचित्तशुद्धिद्वारा प्रेमा तस्य संबन्धान्मुख्यवाक्यत्वमवान्तरं फलं ब्रह्मविदेत्युक्तम् । एतत्स्फुटीकुर्वन्ति स्म **तत्तदि**त्यादि । **तेनतेने**त्यादि तं परमात्मानं यथा यथोपासते तद्धैतान् भूत्वावतीतिश्रुतेः । 'भगवानेव हि फलं स यथाविर्भवेद् भुवि' इति तत्तत्फलप्राप्तौ ।

'देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' ॥

इति महामाहात्म्यज्ञानस्य निरुपध्यंशे कारणत्वसिद्ध्यात्मत्वस्फूर्तिस्तत्त्वमस्यादिवाक्येन तत्करणको निरुपधिश्चित्तशुद्ध्यानन्यार्थं एकात्मविषयः प्रेमा तस्य सिद्ध्या च तस्य परायणस्य फलस्य भक्तिरूपस्य साधनस्य तात्पर्यवृत्त्या ज्ञानविषयस्य सिद्धौ व्यापारस्योल्लेखोयम् । **न पूर्वोक्त** इति समन्वयोक्तेरशक्यत्वरूपोऽसंगतत्वरूपश्च दोषो न । प्रेमरूपस्य फलोपकार्यङ्गत्वं महामाहात्म्यज्ञानस्येत्यनया रीत्येत्यर्थः । फलोपकार्यङ्गत्वात् अनुक्तानामप्युपासनावाक्यानां प्रयोजनैक्याच्च । तेषामुपासनावाक्योक्तानां क्रमप्राप्तसाधनानां ब्रह्मविदेत्युक्तफलोपकार्यङ्गत्वमित्यर्थः । आत्मनैक्यज्ञानस्य भक्तिसाधनत्वाविशेषेपि हि 'आवृत्तिरसकृदुपदेशात्', इति न्यायेनावृत्त्यर्थं माहात्म्यज्ञानं स्मरणात्मकं तस्य सिद्धिमात्रमुक्तम् । **पूर्वोक्त** इत्यादि आभासोक्तदोषः । **भाष्ये । निःसंदिग्धानां** 'सत्यं ज्ञानमनन्तं ब्रह्म' 'सत्यं विज्ञानमानन्दं ब्रह्म' इत्यादीनाम् । **प्रकृते । पूर्वमित्यादि** ईक्षत्य-

१. तथैव भवतीति ।

तदर्थं चैतद्विचारितम्। ब्रह्मणि व्यवहारोऽस्ति कश्चिन्न वेति। तत्र प्रथमसूत्र एव व्यवहारः स्थापितः। 'यतो वाचो निवर्तन्ते' इत्यादीनां विशेषेणेदमित्थतया निरूपणनिषेधनपरत्वम्। एवमेव कार्यसिद्धेः। अधीतानां ब्रह्मवाक्यानां चतुर्लक्षण्या ब्रह्मपरत्वे सिद्धे श्रवणं सिद्ध्यति। श्रुतस्य कालान्तरेऽप्यसंभावनाविपरीतभावनानिवृत्त्यर्थं पूर्वस्थितानामङ्गानामनपेक्षितानामुद्वापेनान्येषामपेक्षितानामावापेन तस्यैवार्थस्य निर्द्धारणे मननं भवति।

भाष्यप्रकाशः।

संदिग्धत्वमाहुः संदिग्धानीत्यादि। तथाचैवं वाक्यविचारेणानुक्तानामपि समन्वयसिद्धिरित्यर्थः। एवमध्यायार्थस्य सर्वोपयोगित्वमुक्त्वा पादार्थस्य वक्तुं तत्रत्याधिकरणानां प्रयोजनमर्थं च वदन्तः पूर्वं प्रथमस्याहुः तदर्थमित्यादि, तृप्तिवदित्यन्तेन। तदर्थमिति समन्वयार्थम्। विचारितमिति ईक्षत्यधिकरणे विचारितम्। ईक्षत्यधिकरणं चतुर्थं तत्र विचारितस्य कथं प्रथमार्थत्वमित्यत आहुः तत्र प्रथमेत्यादि। स्थापित इति प्रमाणलक्षणप्रभृतिभिः स्वरूपादिचिन्तनस्यैव विचारपदार्थत्वात् तत्प्रतिज्ञयैव स्थापितः। तथाच विचारस्य चतुर्थे सत्त्वेऽपि स्थापनस्य प्रथमे कृतत्वात् प्रथमार्थत्वमित्यर्थः। ननु सत्यं स्थापितस्तथापि श्रुत्यन्तरविरोधान्नादरणीय इति शङ्कायां तत्परिहारप्रकारमाहुः यतो वाच इत्यादि। अस्याः श्रुतेरेवंतात्पर्यकत्वे गमकमाहुः एवमेव कार्यसिद्धेरिति। कार्यं श्रवणादिकं तत्सिद्धेरित्यर्थः। नन्वेवं वाङ्निवृत्तिश्रुतिसंकोचने किं मानमित्याकाङ्क्षायामेतदेव विभजन्ते अधीतानामित्यादि। 'आत्मा वा अरे द्रष्टव्यः' इत्यादिश्रुतावात्मदर्शनसाधनत्वेन श्रवणादित्रयमुक्तम्। तत्रात्मा परब्रह्मैवेति तस्य वागाद्यविषयत्वे प्रमाणलक्षणादिसंसर्गाभावेन श्रौतानां पदवाक्यादीनां ब्रह्मावाचकतया तद्वाचकपदादिशक्तितात्पर्यावधारणरूपस्य श्रवणस्यासंभवात्। तदभावे च, तदुपजीवकस्य, 'तत्त्वेव भयं विदुषोऽमन्वानस्य' इत्यनेनावश्यकतया श्रावितस्य मननस्य, तदुपजीवकस्य निदिध्यासनस्य चासंभवान्न ज्ञानस्यापि सिद्धिर्मोक्षसिद्धिश्चातो मोक्षसाधनबोधकश्रुतिवैयर्थ्यपरिहारा-

रश्मिः।

धिकरणे कार्यान्तर्याम्युपास्यरूपप्रतिपादकत्वेन विप्रकीर्णकत्वेन च चतुर्विधानीत्यर्थः। सर्वेत्यादि सर्ववेदान्तीयाविरोधसाधनफलोपयोगित्वम्। प्रमाणेति शास्त्रं प्रमाणं जगज्जन्मादिकर्तृत्वं लक्षणं द्वितीयसूत्रे प्रभृतिशब्देन तुरीयसूत्रेऽशब्दत्वनिषेधस्तदादिभिः। स्वरूपेति स्वरूपं सत्यज्ञानानन्तानन्दादि तत्समस्तं कार्यलक्षणकथनमुखेन द्वितीयसूत्रे समर्थितम्। असंदिग्धं न विचारार्हमिति। व्यस्तं तु सत्यं जन्माद्यधिकरणे द्वितीयस्कन्धनवमाध्यायानुरोधेनानन्दस्यापि वक्तव्यत्वेप्यानन्दमयाधिकरणे वक्तव्यत्वादत्र न गृहीतम्। ज्ञानमीक्षत्यधिकरणे। शब्दरूपानन्तं च प्रतिपादकमिति। आनन्दः आनन्दमयाधिकरणे इत्येवं ज्ञेयम्। स्थापित इति स्थापनं च परपक्षनिराकरणपूर्वकस्वपक्षस्थापनम्। परपक्षनिराकरणं 'अत' इति पदेन। स्वपक्षः ब्रह्मजिज्ञासाधिक्रियत इति, तस्य स्थापनम्। अव्यवहार्ये कुतः प्रमा। यदभावे यत्राभाव इति व्यवहारस्तथा। भाष्ये व्यवहारः शब्दव्यापारोभिधा गौणी तात्पर्यनामा 'यतो वाचः' इति श्रुतेः 'व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः' इतिवाक्ये वाचा इन्द्रियेण व्यवहारः सन्निपातः। प्रकृतेऽमन्वानसे-

भाष्यप्रकाशः ।

यानिरुक्तश्रुतिविरोधपरिहाराय च ब्रह्मणः श्रुत्यात्मकवागादिविषयत्वाङ्गीकार आवश्यकः । न चैवमुपगमे उक्तश्रुतौ संकोचापत्तिः । विशेषेणेदमित्थतया निरूपयितुमशक्यस्यानुभवैकवेद्यतया वागादिनिवृत्तिभवनेन संकोचाभावात् । न चैवमनुभवैकवेद्यत्वे मनोविषयत्वस्य संभवान्मनसा सहेत्यस्य विरोधः । लोके मनसा ज्ञायमानानामपि फलतण्डुलादिपाकनानाविधान्नभोजनतज्जन्यतृप्तीनामिदमित्थताया अविषयत्वस्य सर्वजनीनत्वेनात्रापि तथात्वस्य युक्ततया मनसो निवृत्तेर्विरोधलेशस्याप्यभावादित्यतस्तथोच्यत इत्यर्थः । भाष्ये तु वास्तवेन यत्किंचिद्रूपेण येनकेनचित् प्रकारेण निरूपणेऽपीदमित्थतया निरूपणस्य संभवात् तद्वारणाय विशेषेणेति पदं बोध्यम् । तथा पूर्वस्थितान्यङ्गानि ब्रह्मवाक्यस्थानि बोध्यानि । उद्वापस्तु

रश्मिः ।

त्यस्यामननकर्तुरित्यर्थः । **अनिरुक्तेत्यादि** 'यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेऽनिलयने अभयं प्रतिष्ठां विन्दते अथ सोऽभयंगतो भवति' इति श्रुतावदृश्यत्वादिगुणके स्थितिं प्राप्तस्य मुक्तिरुक्तेति विरोधपरिहारायेत्यर्थः । **इदमित्थताया** इति 'आश्चर्यवत् पश्यति कश्चिदेनमाश्चर्यवद् वदति तथैव चान्यः' इति स्मृतेर्जीवविषयत्वम् । एतेन पाकभोजनतृप्तीनां मनोमात्रवेद्यानां सर्वथा वागवेद्यत्वमित्युक्तं तत्प्रसङ्गेन स्मृतस्य यतो वाच इतिश्रुतिघटितस्य भाष्यस्य विशेषेणेतिपदस्य कृत्यं कुर्वन्तः स्वोक्तं समर्थयन्ते **भाष्ये त्वित्यादिना** । यत् किंचिद्रूपं सत्यविज्ञानानन्दरूपं सत्यज्ञानानन्तरूपम् केनचित्प्रकारेण सत्यत्वादिना विशेषेणेति । 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति केनेषितोपनिषदि 'यस्यामतं तस्य मतं मतं यस्य न वेद सः' इति च श्रुतिभ्यामिदमित्थतया विशेषेण प्रकारेणेत्यर्थः । **पूर्वस्थितानामित्यादि**भाष्यार्थमाहुः **तथेत्यादिना** । प्रतिपिपादयिषितानन्दमयहिरण्मयादिरूपाणि द्वादशाङ्गानि कमनीयानि तथा बृहद्वामनपुराणे निर्गुणं पठितम् । तत्र जिज्ञासाधिकरणाद् ब्रह्मेत्यनुवर्तते न ब्रह्मत्वं तत्र जन्माद्यधिकरणे शास्त्रयोनिसमानाधिकरणं तदपि समन्वयाधिकरणेऽभिन्ननिमित्तोपादानरूपमीक्षत्यधिकरणे वाग्व्यापारविषयत्वं यद्यपि तथापि ब्रह्मोभयव्यपदेशाद्यधिकरणेषु विरुद्धसर्वधर्माश्रयत्वेन प्रतिपिपादयिषितमिति सर्वतः पाणिपादान्तत्वादयः प्राप्नुवन्ति । ते तृतीयाध्यायतृतीयपादे सर्ववेदान्तप्रत्ययाधिकरणेषु व्यवस्थितानि विरुद्धोपसंहारनिषेधादावापोद्वापाभ्यामङ्गानि तदेतदाहुः **उद्वाप** इत्यादिना । यथानन्दमात्रकरपादमुखोदरादिरूपं 'ध्येयः सदा सवितृमण्डलमध्यवर्ती' इत्यत्र रूपं तत्तदुपासकोपास्यं तत्र प्रकृतपरत्वेन प्रतीयमानस्य व्यापकत्वादेस्तदन्योक्षरस्तत्परत्वेन कल्पनम् । यद्वा यद्येवं यथाश्रुतमभिमतं स्यात् तदैवं परिच्छिन्नत्वेन दृश्यमानं न श्रुतं स्याद् यतः श्रुतमत एवमित्यापत्तिः । अन्यो व्यापकद्रष्टृसत्यत्वादिविशेषस्फुटस्तत्परत्वेन प्रतीयमानस्य पूर्वोक्ताङ्गस्य प्रकृतानन्दमयादिपरत्वापादनम् । यद्येवं यथाश्रुतमभिमतं स्यात् तदैवं 'ब्रह्मविदाप्नोति परम्' इत्याद्युक्तपरप्राप्तिरूपं फलं न श्रुतं स्यात् न वा'आनन्दमानन्दमयोवसाने' इति फलं स्मृतं स्याद्, यतः श्रुतमत एवास्फुटव्यापकद्रष्टृसत्यत्वादिविशिष्टमित्यापत्तिः । 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इति श्रुतेः । न चैवं सर्वतः पाणिपादान्तत्वविशिष्टब्रह्म किमिति वाच्यम् । साकारब्रह्मवादे मुनिरूपाणि यथा तथा तदप्यक्षराधिकरणादौ ब्रह्मत्वेन प्रत्यपादि । विद्वन्मण्डने निर्गुणसगुणयो-

ततोऽप्येवं ध्यानादिसमाध्यन्तरूपनिदिध्यासनरूपं मनसि सर्वतो निवृत्त-

भाष्यप्रकाशः ।

प्रकृतपरत्वेन प्रतीयमानस्यान्यपरत्वापादनम् । आवापस्त्वन्यपरत्वेन प्रतीयमानस्य प्रकृतपरत्वापादनम् । **ततोऽप्येवमिति** । मननानन्तरमभ्यासेन निर्धारणे तद्दार्ढ्ये वा । **निदिध्यासनरूपमिति** । अत्र ज्ञानमिति शेषः । रूपपदरहितः पाठो वा । **मनसीत्यादिना तु**

रश्मिः ।

रभेदः सिद्धान्तित एव । तथा च भाष्यार्थ इत्थम् । श्रवणं मैत्रेयीब्राह्मणे 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुत्याऽरे मैत्रेयीति संबोध्य विहितं श्रवणमन्येषां सिध्यति तच्च स्वनिर्वाहके कीर्तनस्मरणे आदायैव तदुक्तं द्वितीयस्कन्धसुबोधिन्याम् ।

'तस्माद् भारत सर्वात्मा भगवान् हरिरीश्वरः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम्' ॥

इत्यस्य । श्रुतस्य तद्विस्मरणकालेपि गृहव्यापाराद्यासक्तौ व्यापकत्वनिष्कलनिष्क्रियत्वादेरसंभावना तद्विपरीता नानन्दमयसाकारत्वकमनीयत्वादिमात्रभावना तन्निवृत्त्यर्थं पूर्वस्थितानामित्यादिः । ततस्तस्यैवाचार्यग्रन्थादिद्वारा श्रुतस्य मननं शाब्दज्ञानम् । न शाब्दापरोक्षम् । अभावालम्बनं हि तत् । न च छान्दोग्ये श्वेतकेतूपाख्याने 'न्यग्रोधफलमत आहर' इत्युपक्रम्य 'किमत्र पश्यसीति न किंचन भगव इति' इत्यभावस्यैव मूलत्वमिति शङ्क्यम् । 'तꣳहोवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्यैव सोम्यैषोणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति' 'स य एषोणिमैतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्यत्राभावस्याणिमत्वेनादृश्यभावत्वात् । अणोर्भावोणिमा । न केनापि भावयितुं शक्यमतोऽभावं वदन्त्येनमिति व्युत्पत्तिर्विद्वन्मण्डनान्ते वाक्येस्ति । निभालयसे पश्यसि । श्वेतकेतुं पुत्रं प्रति उद्दालकवचांसि । साधनवैयर्थ्यं च स्यात् । न च प्रकृतेप्यणिम्नैवाभावस्यालम्बनत्वमिति वाच्यम् । अभावत्वेनैव योगसूत्रे उपादानात् । 'एतेन योगः प्रत्युक्तः' इत्यत्र 'योगोप्येकः सदादृतः' इति निबन्धात् निरीश्वरयोगः प्रत्युक्तः । अन्यथा 'स्मृतेश्च' इत्यादिसूत्रे योगशास्त्रीयगीतास्मृतेरुल्लेखो न स्यात् । न च सूत्राणामेषामविशेषितत्वम् । स्कन्दपुराणीयनिर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यत इति वाक्यार्धसिद्धस्य तस्य पुराणमतत्वात् । मननं युक्तिभिरनुचिन्तनं स्मरणम् । अवबोधो वा । मनु अवबोधे । सति सप्तमी वा । **प्रकृते** । **मननेत्यादि** । अविहितभक्त्यां श्रवणादित्रयम् । श्रवणादित्रयमन्वन्यासां भक्तीनां स्वयमेव भवनात् । विहितभक्तौ तु अवोपसर्गार्था धातुपाठे, अव रक्षणप्रवेशतृप्तिकान्तिगतिक्रियादीप्तिप्रीत्यवगमस्वाम्यर्थयाचनश्रवणहिंसेच्छावृद्ध्यालिङ्गनावाप्तिदहनभावेषु । भ्वा. प. से. अत्र क्रमेणार्थ एवं भाति । रक्षणप्रवेशतृप्तीनां बोधे ज्ञानमार्गबोधः । विषयरक्षणमक्षरे प्रवेशः तृप्तिस्तु सायुज्ये जले निमग्नस्य जलपानवदिति दृष्टान्तेन । भक्तिमार्गबोधस्तु कान्त्यादिज्ञाने । 'ज्ञानी चेद् भजते कृष्णम्' इति निबन्धे भजनकारणेच्छा कान्तिः । जानातीच्छति यतत इति नैयायिकप्रवादात् । कान्त्या गतिः फलं मर्यादामार्गे 'सायुज्यं कृष्णदेवेन शीघ्रमेव ध्रुवं फलम्'इतिवाक्योक्तम् । पुष्टिमार्गे गतिरलौकिकसामर्थ्यम् । भगवता सह गानादि व्रजभक्तानामिव । सर्वात्मभावे भजनानन्दो गतिः । तत्र त्रिषु मार्गेषु क्रिया भगवल्लीला अपि । दीप्तिर्ज्ञानम् । प्रीतिः स्नेहः । अवगमः स्वरूपाधिगमः । अवोप-

रश्मिः ।

सर्गोपादानेनावगमेपि पुनः पूर्वोक्ताः साधनवैजात्येन फलरूपा ज्ञेयाः । स्वाम्यर्थो भक्तिमार्गे । याचनं निर्गुणे गुणमिश्रणम् । ततः श्रवणम् । अन्यथा 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्यादि स्यात् । अन्यमार्गे मार्गत्वहिंसा । इच्छा स्वोत्कृष्टत्वेच्छा । वृद्धिराकारस्येव दत्तानामलौकिकदेहानाम् । 'अलौकिकस्य दाने हि चाद्यः सिद्ध्येन् मनोरथः' इति सेवाफलोक्त-वाक्यात् । आलिङ्गनं सर्वमार्गेषु । अवाप्तिः संयोगे ब्रह्माप्राधान्येनापि प्राप्तिः । विरहे दहभावः । 'अस्यैव चोपपत्तेरूष्मा' इतिसूत्रात् । तथा च श्रुतिः । 'तं भजेत्' इति गोपालतापनीये । 'भजनं श्रवणादिसरणिः' इति भक्तिहंस इति वैधत्वम् । तेन **निर्धारण** इति निमित्ते सप्तमी व्याख्याता । निमित्तमिह फलम् । निर्धारणं दार्ढ्यस्याप्युपलक्षकं 'दुर्बुद्धेस्तु ततो द्वयम्' इति भाष्यात् । प्राज्ञस्य दार्ढ्यमात्रं तदाहुः **तद्दार्ढ्ये वेति** । एवमावापोद्वापाभ्यां ध्यानादीत्यर्थः । 'गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्' इति न्यायात् । यदेकमव्यक्तमितिश्रुतेश्च ततोप्येवं ध्यानादीत्यन्वयः । 'आवृत्तिरस-कृदुपदेशात्' इति सूत्रात् । समाध्यन्तरूपेत्यत्र समाध्यन्तरूपमिति पारस्करः पाठ इति ज्ञापितम् । अत्रादिपदेन भाष्ये धारणा । संप्रज्ञातासंप्रज्ञातसमाध्योस्त्वत्र संप्रज्ञातः सिद्धिहेतुत्वान् न मोक्षफलक इति न स संगृह्यते । अतोत्र द्वितीयो ग्राह्यः । अभ्यासवैराग्ये अपि ग्राह्ये । हेतुत्वात् । ननु यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधिरूपाष्टाङ्गो हि योगः स कथं पञ्चाङ्गरहितो भवेदिति चेन्न । अत्र भक्तियोगस्य विवक्षितत्वाद् भाष्यस्य भक्तिमार्गीयत्वाद् स च गीतायां भक्तियोगाख्ये द्वादशेध्याये ।

'ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते' ॥

इत्यनन्ययोग उक्तस्तत्र ।

'मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः' ॥

इति 'परो हि योगो मनसः समाधिः' इतिवाक्योक्त उक्तः, ध्यानं एकैकाङ्गे मनआधानं, धारणायां सर्वाङ्गे मनआधानं बुद्धिनिवेशानन्तरं ध्यानादिविषयज्ञाने सति । ततो ब्रह्मणि निवासस्तत्र मनएकीभावे सायुज्य इव समाधिरिति । न च पञ्चाङ्गानन्तरमेतद् भावि । 'एतेन योगः प्रत्युक्तः' इत्यत्र योगस्य प्रत्याख्यानात् । गीतामूर्धन्यविश्वरूपदर्शनाध्याये ।

'नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप' ॥

इति भक्तिमात्रग्राह्यत्वात् तस्य । 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजयेत्' इति निबन्धाद् भक्त्यनन्तरं योगः, स मनसः समाधिः । ननु श्रीभागवत एकादशे चतुर्दशे भक्तिससाधन-ध्यानयोगनिरूपणाध्याये 'मुमुक्षुरेतन् मे ध्यानं त्वं वक्तुमर्हसि' इत्युद्धवप्रश्ने श्रीभगवानुवाच 'स म आसन आसीनः' इत्यादि । तत्रासनप्राणायामध्यानादिप्रत्याहाराणां निरुक्तत्वेन योगशिखायाम् ।

'आसनं पद्मकं बध्वा यच्चान्यद्वापि रोचते ।

रश्मिः।

कुर्यान् नासाग्रदृष्टिश्च हस्तौ पादौ च संयुतौ।
मनः सर्वत्र संयम्य ॐकारं तत्र चिन्तयेत्।
ध्यायेत सततं प्राज्ञो हृत्कृत्वा परमेष्ठिनम्' ॥

इति चासनप्राणायामचिन्तनादिपदार्थानामुक्तत्वेन च कथं ध्यानादित्रिकोपादानमिति चेन् न। त्रयोदशाध्यायोक्तज्ञानाङ्गभक्तेश्चतुर्दशेध्याये उक्तत्वात्। योगशिखायामपि ज्ञानोक्तेर्ज्ञानयोगपरत्वात्। श्रुतीनां यमनियमप्रत्याहारशून्यत्वेन योगमार्गीयत्वाभावेपि योगतत्त्वोपनिषदि।

'शुद्धस्फटिकसंकाशं किंचित् सूर्यमरीचिवत्।
लभते योगयुक्तात्मा पुरुषोत्तमतत्परः' ॥

इति पुरुषोत्तमपराणामस्माकं तत्रोक्तं प्राणायामरूपं साधनं ग्रहीष्यते श्रुत्योर्विरोधे व्यवस्थितविकल्पात्। नन्वेवं ध्यानाङ्गबोधकतत्सिद्धौ तनुवित्तजे इत्यस्य विरोध इति चेन् न। अत्रेदं प्रतिभाति। स्कन्दपुराणोक्तगीतामाहात्म्ये विश्वरूपदर्शनाध्यायमचर्चिका नास्ति। तत्राध्याये तत्राप्युपसंहारेर्थनिर्णायके।

'मत्कर्मकृन् मत्परमो मद्भक्तः सङ्गवर्जितः।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव' ॥

इत्यत्र भगवत्कर्मकृत्त्वकक्षायां प्रथमाधिकारकाद् धर्मरूपत्वेन 'धर्मेण पापमपनुदति' इतिश्रुतेः पापाभावः फलम्। तत्र श्रौतमङ्गम्। आवृत्तिरसकृत्साधनानामिति ह्यावृत्तौ मत्परमत्वकक्षायां भागवतधर्माचरणेन मध्यमाधिकारात् पापापनोदनद्वारा पञ्चपर्वविद्यायोगयोगे प्रेमा फलम्। तपोवैराग्ययोगे तु ज्ञानं फलम्। ततः प्रेम्णा मद्भक्तत्वरूपोत्तमाधिकारात् पापापनोदनद्वारा सायुज्यभगवत्सेवोपयोगिदेहालौकिकसामर्थ्यानि फलानि। तत्र तनुवित्तजे सेवे अङ्गे इति मानसीसेवाद्वारा त्वेते विशिष्टफले। नन्वश्रौते ते हीनाधिकारे प्रविशेतामिति चेन्न। रामोपनिषदि सेवाविधानात् संप्रदायप्रदीपेपि तथा सर्वज्ञाचार्यवचोभिश्च तथेत्यलम्। ननु तथापि योगयोग उक्त इति चेन् न। योगस्य सूत्रे प्रतिवचनेप्यात्मसंयमयोगादिमादायादोषात्। तत्रापि 'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' इत्यादिश्रवणात्। सर्वत्र योग ईदृशो ग्राह्यः। अत्र युज योगे रु. उ. अनि., पूर्वत्र तु युज समाधौ दिवा. आत्म. अनि., सायुज्येत्यत्र युज संपर्के चु. प. से., अतो यथासंभवं ग्राह्यः। भक्तियोग इत्यत्र भक्त्या योगः भक्तियोगः तृतीयासमासः। 'भक्तियोगः पुरैवोक्त' इत्यत्र भक्तियोगौ भक्तियोगः। आवासुर्वा। भक्तिरेव भक्तियोगः। बाहुलकाद् योगशब्दः प्रयुक्तो निरर्थकः। योगः कर्मसु कौशलमिति वाक्यात् भक्त्या कर्मकौशलं वा भक्तियोगः। तदुक्तं शास्त्रार्थे।

'एवं सर्वं ततः सर्वं स इति ज्ञानयोगतः।
यः सेवते हरिं प्रेम्णा श्रवणादिभिरुत्तमः ॥
प्रेमाभावे मध्यमः स्याज् ज्ञानाभावे तथादिमः।
उभयोरप्यभावे तु पापनाशस्ततो भवेत् ॥
तपोवैराग्ययोगे तु ज्ञानं तस्य फलिष्यति।
योगयोगे तथा प्रेम स्तुतिमात्रं ततोन्यथा' ॥

व्यापारे स्वयमुपलब्धनिजसुखानुभवरूपं ब्रह्म। इदमेव ब्रह्मज्ञानमिति। अतस्ता-दृशस्यानुभवैकवेद्यत्वाद्युक्तमविषयत्वम्। पाकभोजनतृप्तिवत्।

भाष्यप्रकाशः।

द्रष्टव्यपदोक्तस्य ज्ञानस्य स्वरूपकथनम्। इदमिति ब्रह्मस्वभावजन्यम्। युक्तमिति अनुभवस्य प्रादुर्भावापेक्षत्वात् प्रादुर्भावस्य च वरणाधीनत्वात् प्रमाणबलस्य कौण्ठ्येन तस्याकिंचित्करत्वा-द्युक्तम्। तथा चैतत्सर्वमनुसंधाय जिज्ञासासूत्रप्रणयनाद् व्यवहारस्थापनं प्रथमाधिकरणार्थ इत्यर्थः।

रश्मिः।

इति ध्यानादिसमाध्यन्तरूपनिदिध्यासनरूपं ब्रह्मेत्यग्रेतनब्रह्मपदेनान्वयः। **तदुक्तं अत्र ज्ञानमिति शेष** इति। अग्रे पाठो वेत्यत्र वाकारोऽनादर इति। यद्वा, निदिध्यासितव्य इत्यत्र निदिध्यासनार्ह इत्यर्थाद् रूपपदेन निदिध्यासनेन रूप्यते व्यवह्रियते यज् ज्ञानं ब्रह्मेति भाष्यप्रकाशे प्रकाशितम्। नितरां दिध्यासत इति निदिध्यासनं सनन्ताद् ध्यै चिन्तायामित्यस्माद् भावे ल्युट्। युवोरनाकौ सनर्थोऽविवक्षितः रामानुजाचार्याणां विविदिषन्तीत्यत्र यथाऽविवक्षितः। ननु वेदोक्षर-मात्रमपि नान्यथा वदतीति भाष्यात् सनर्थो वाच्य इति चेच्छृणु तात्पर्यं, ध्यानादीच्छापि पुरुषार्थसाधिकेति। यथा जिज्ञासा विचारः सन् प्रत्यये न तु ब्रह्मज्ञानेच्छा पुरुषार्थसाधिका तद्वत्। तथा च गोरक्षसंहिता।

'यत् समाधौ परं ज्योतिरन्तरं विश्वतोमुखम्।
तस्मिन् दृष्टे महायोगिगतायातं न विद्यते' ॥

इति। 'ता नाविदन् मय्यनुषङ्ग' इत्यादि श्रीभागवते। अथवा तपो वैराग्ययोगे ज्ञानमित्यु-क्तेर्ज्ञानयोगतः यः सेवते हरिमित्यत्र तथात्वे मध्यमाधिकारकथेयमित्याहुः **अत्र ज्ञानमिति**। तथा च तपोवैराग्यफलं ज्ञानं निदिध्यासनेपीति भावः। लाघवायाहुः **रूपेत्यादि**। तथापि निदिध्यासितव्य इत्यस्य प्रत्ययार्थानुक्तिप्रसङ्गः। **ज्ञानस्येति** सपरिकरस्य। **स्वरूपेत्यादि** गीतायामात्मसंयमयोगा-ध्याये 'शुचौ देशे' इत्यादिनासनप्राणायामकाभ्यां मनसि सर्वतो निवृत्तव्यापारे 'यदा विनियतं चित्तमात्मन्येवावतिष्ठते' इत्युक्तेः विनियते स्वयम्।

'प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्' ॥

इति स्वयमुपलब्धं निजसुखं तस्यानुभवरूपम्।

'युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते' ॥

इति प्रोक्तं ब्रह्मेत्येवं स्वरूपकथनमित्यर्थः। **ब्रह्मस्वभावेत्यादि** एष ब्रह्मणः स्वभावः पूर्वोक्तमनसि स्वयमुपलब्धं यन् निजमनन्तं सुखमानन्दस्तस्य स्वेन विषयीकरणं तद्धेतुः। तेन स्वभावेन जन्यं ज्ञानं तदेव विषयात्मकं स्वेनेतिपदोक्तम्। न च नित्यज्ञाने जन्यपदप्रयोगानुपपत्तिरिति वाच्यम्। जनी प्रादुर्भाव इति प्रादुर्भावार्थकधातुप्रयोगात्। विषयजन्यज्ञानप्रादुर्भाववत् प्रतीय-मानप्रादुर्भाव इत्युपचारात्। ननु चेदं बुद्धिस्थमिति व्याख्यानं त्यक्त्वा कुतो ब्रह्मस्वभावजन्यमिति व्याख्यानं गौरवग्रस्तमिति चेन्न, 'अथातो ब्रह्मजिज्ञासा' इति प्रतिज्ञाय 'जन्माद्यस्य यतः' इतिसूत्रे

१. दर्शनार्थं।
५४ ब्र० सू० र०

रश्मिः।

कार्यलक्षणप्रतिपादनेन सांकर्यात् कार्यलक्षणोक्तपरिणतजगज्ज्ञानं ब्रह्मस्वभावजन्यं जगच्चेति प्रत्यक्षम्। न च श्वेताश्वतरे 'कालः स्वभावो नियतिर्यदृच्छा'। इत्यस्याग्रे इति चिन्त्यमिति दूषितत्वान् नैवमिति वाच्यम्। स्वभावबोधकश्रुतिविरोधेन श्वेताश्वतरस्य विकल्पात्। तामसत्वाच्च। षष्ठस्कन्धनवमेध्यायेपि। ॐ नमस्तेस्तु भगवन् नारायण वासुदेवादिपुरुष महापुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक केवलजगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्धाटिततमःकपाटद्वारे चित्तेऽपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान्' इति। निजसुखं जीवीयमपि। आनन्दांशस्तु पूर्वमेव तिरोहितो येन जीवभाव इति पराभिध्यानसूत्रभाष्यात्। ननु भक्तियोगाध्याये कुत्रोक्तमिदं ध्यानादि। शृणु। 'अनन्येनैव योगेन मां ध्यायन्त उपासते' इत्यत्रानन्यो योगो व्याकृत इति। अत्र योगो युज समाधाविति धातुनिष्पन्नः। इदमेव ब्रह्मणो भूमाधिकरणोक्तसुखरूपस्य सर्वात्मभावस्यापि मुख्याधिकारे ज्ञानम्। ऐच्छिकसृष्टौ ब्रह्मज्ञानमुक्तम्। मायिकसृष्टिपक्षेऽविरोधाध्यायोपान्ते ज्ञानप्रक्रियानिरूपणावसरे स्फुटीकार्यम्। एवकारस्तु भाष्ये क्षेत्रक्षेत्रज्ञनिर्देशयोगाध्याये त्रयोदशे।

'ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः'॥

इतिवाक्ये ब्रह्मसूत्रपदैर्बहुधा गीतमित्यत्रार्थे विचिकित्साभावात्। एतदनुरोधेनैतदध्यायोक्तं 'ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना' इतिवाक्योक्तध्यानादि। मनसीत्यादिभाष्योक्तं सर्वं च ग्राह्यम्। स्वभावजन्यैतादृशानुभवे वरणत्वेनाविर्भावत्वेन कार्यकारणभावात्तद्बोधिकां श्रुतिं प्रमाणयन्त इव व्याचक्षते स्म **अनुभवेत्या**दिना। अत्रायं समुदितो भाष्यस्यार्थः **अत** इत्यारभ्य **अविषयत्व**मित्यन्तस्य। ब्रह्मज्ञानपदार्थज्ञाने सर्वं सुगममिति ब्रह्मज्ञानपदार्थः प्रोच्यते। तत्र ब्रह्म 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्म' इत्युपनिषच्छ्रुतेः सत्यादिचतुष्टयं ब्रह्म तत्र सत्यत्वमविनाशित्वे सत्यमविनाशीति श्रुतेः। सत्यमित्यत्र 'तत्र साधुः' इति यत् सति साधु सत्यम्। 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इतिश्रुत्या ब्रह्मनिष्ठा सत्ता इति यदि वेद तमेनं सत्यं विदुरित्यर्थाद् ब्रह्मसत्तावेत्तरि साधु सत्यं तत्र ब्रह्मणि साधोः सत्यत्वमित्यत्र किमु वक्तव्यम्। साध्नोति परकार्यमिति साधुः 'अस्यैव चोपपत्तेरूष्मा' इति सूत्रात् विरहतापोपशमं साध्नोतीति साधुर्भक्तः आध्यात्मिकादित्रितयवित् 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इति गीतायाः 'ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः परः' इतिनिबन्धाच्च। नन्वविनाशित्वं सत्यत्वं सति साधुत्वं वा सत्यत्वं आद्ये रूढ्यापत्त्या वेदान्तेषु योगेन विचार इत्यस्या उक्तेस्त्यागापत्तिरन्त्ये श्रुत्या व्याकरणस्मृतिबाध इति चेन्न सति साधुत्वे सत्यविनाशित्वस्य सत्यलक्षणत्वात्। अत्राचार्योक्तेर्वेदतौल्याद्विकल्पो वेति। तस्य सत्यपदस्य 'सत्यं ज्ञानं' इति श्रुत्या ज्ञानपदसामानाधिकरण्यं भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वरूपमुपपादनसापेक्षम्। तत्र ज्ञानत्वं नाशरहितत्वे सति चैतन्यत्वम्। नाशरहितं चैतन्यं ज्ञानमित्यभिधीयते इति श्रुतेः। सत्येऽतिव्याप्तिवारणाय विशेष्यं चैतन्यमिति। जन्यज्ञानेऽतिव्याप्तिवारणाय नाशरहितमिति विशेषणम्। ज्ञा अवबोधने भावे ल्युट्। तथा च भक्तावबोध इत्यभेदान्वयानुपपत्तिस्तत्परिहारो ब्रह्मणो निर्विकल्पकज्ञानस्य लक्षणे संबन्धस्यानवगाहरूपः विशेष्यविशेषणसंबन्धानवगाहिज्ञानस्य निर्विकल्पकत्वात् भक्तस्य सेव्यसेवकभावसंबन्धो भक्तसंवलित एव भगवाँस्तद्द्वारा फलतीति पुष्टिमार्गीयमोक्ष-

रश्मिः ।

निरूपणग्रन्थोक्तदिशा तस्यापि अनवगाहः संपद्याविर्भावाद्यधिकरणोक्तौडुलोमिमतेन चिन्मात्रभक्तस्याव-बोधाभेदः । सैद्धान्तिकपक्षे तु ज्ञानादिरूपब्रह्मणा सत्यस्य भक्तस्य भेदः । भक्तो रमारूपः श्रीभागो वाक्षरं वा अदृश्यत्वाधिकरणे वक्ष्यमाणम् । 'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्' इतिवाक्यात् । माध्वास्तु त्वन्मते पदद्वयलक्षणातो वरं मद्रीत्या तत्पदे लक्षणा । तथाहि धान्यमसि धिनुहीत्यत्र तण्डुले धान्यशब्दवत्तदधीनत्वात्तदिति व्यपदेशः । प्राणबन्धनं हि सौम्य मनः इतिवाक्यशेषे जीवस्येशा-धीनत्वोक्तेः ।

'यदधीना यस्य सत्ता तत्तदित्येव भण्यते ।
विद्यमाने विभेदेऽपि मिथो नित्यं स्वरूपतः' ॥

इति भारतोक्तेरित्याहुः । तथा च 'तस्मान् न भिन्ना एतास्ता आभिर्भिन्नो न वै विभुः' इति कृष्णोपनिषच्छ्रुतेर्भक्तस्याप्यभेदान्वयः । युक्तिरपि । आत्मनो भक्तकृतमानोरथिकपदार्थानां भागरूपाणां त्यागेन भक्तेष्वत्यन्तानुग्रहाविर्भावितानां त्यागेन कृष्णोपनिषच्छ्रुत्युक्तोऽभेदः । यदि भागत्यागलक्षणा न स्याच्छ्रुतिरभेदं न वदेत् । इत्यभेदान्वयोपपत्तिः । नन्वभेदान्वयः पूर्वोक्तोनुपपन्नो भक्तस्याभेदा-दानात् 'अन्तरा भूतग्रामवत्'इति सूत्रे तथा प्रतिपादनादिति चेत् न भक्तस्य चतुर्विधपुरुषार्थेषु प्रद्युम्नरूप-कामत्वेपि[1] ज्ञानेन वासुदेवरूपमोक्षरूपेण संचारिभावे व्यतिहारसूत्रोक्तोऽभेद उपपन्न इति । अधुना ब्रह्मसत्तावेतरि सति साधु सत्यं तस्य ज्ञानपदसामानाधिकरण्यं सर्वसंमतम् । नीलमुत्पलमितिवत् । न च सार्वदिकसेव्यसेवकभावसंबन्धं त्यक्त्वा कादाचित्काभेदमादाय सार्वदिकाभेदप्रतीतिसमर्थनं दुर्घटमिवेति वाच्यम् । ज्ञानकाण्डमिति समाख्यया व्यतिहारसूत्रोक्ताभेदज्ञानस्य मुख्यत्वात् । सेव्यसेवकभावस्तु कोटिष्वपि सुदुर्लभस्य नारायणपदस्य प्रशान्तात्मनः ।

'मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' ॥

इतिवाक्याद् भवत्यत एव भक्तेः क्वाचित्कं निरूपणं भक्तैकसमधिगम्यं च । अत एव साक्षाद्भक्तिर्नास्त्येवेति द्वितीयस्कन्धषष्ठाध्यायसुबोधिनी परंतु नवमाध्यायस्य न भवतीत्य-सिद्धान्तरूपा भक्तिपोषिका । ननु नित्यलीलाप्रवेशकामनया कृतं भगवद्भजनं येन तस्य पुंस-स्तिष्ठतु वार्ताऽभेदसंसर्गोपोद्बलिका प्रवर्ततां तावद्रमारमणवार्ता । तादृशां सत्यपदवाच्यानां रमादीनां रमणस्य ज्ञानादिपदवाच्यस्य च सार्वदिकः सेव्यसेवकभावः संसर्गो न त्वभेद इति चेन्न, श्रुतावप्रतीतत्वेनास्य संसर्गस्यानाविष्करणस्य विवक्षितत्वात् । 'अनाविष्कुर्वन्नन्वयात्' इतिसूत्रात् । अत्राश्रमधर्मैरेव लोके स्वं भगवद्भावमनाविष्कुर्वन् भजेतेतिभाष्यात् । न चायमभेदः परमहंसधर्मः परमहंसोपनिषदि तथोक्तेर्न गृहस्थधर्मस्तथा चाश्रमधर्मोपि भाष्ये गृहस्थस्य विवक्षितः 'ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्' इतिसूत्रे 'आचार्यकुलात्'इत्युपक्रम्याग्रे पठ्यते 'धार्मिकान् विद-धत्' इति, अतो धार्मिकपुत्रविधानमैहिकं कर्म श्रुतौ दृश्यत इति भाष्यादिति वाच्यम् । तत्र गृहस्थधर्मैरनाविष्कारेप्यन्यत्र परमहंसादिधर्मैरनाविष्कारे बाधकाभावात् । **आश्रमधर्मैरिति** भाष्ये आश्रमधर्मस्य गृहस्थमात्रधर्मत्वविवक्षितत्वे आश्रमसंकोचापत्तेराचार्येत्याद्युक्तभाष्यस्य तत्स्थल-विषयत्वात् । यद्वा, गोपालतापिनीये 'स होवाचाब्जयोनिश्चतुर्भिर्देवैः कथमेको देवः स्यात् ।

१. काम इच्छा इच्छा भक्तिः ।

रश्मिः ।

एकमक्षरं यद्धि श्रुतं अनेकाक्षरं कथं भूतम् । स होवाच तं हि पूर्वं ह्येकमेवाद्वितीयं ब्रह्मासीत्' इति श्रुतेः । एकं सजातीयभेदशून्यमेव स्वगतभेदशून्यं अद्वितीयं विजातीयभेदशून्यं ब्रह्मासीदिति क्रमेण विशेषणत्रयार्थः । न चात्र सत्यज्ञानपदयोर्न सामानाधिकरण्यापेक्षापि तु सत्यं ब्रह्म ज्ञानं ब्रह्मानन्तं ब्रह्मानन्दं ब्रह्मेत्येवं सत्यादिपदब्रह्मपदयोः सामानाधिकरण्यमिति योजनादरणमिति वाच्यं वाक्यभेदापादकत्वात् । ननु सत्यत्वं ज्ञानत्वं सत्यादिस्थितं रूपं तत्र सत्यादिपदानां शक्तिराकृत्यधिकरणादिति चेन्न । शब्द इति चेन्नातः प्रभवादिति सूत्रभाष्ये विशिष्टे शक्त्यङ्गीकारात् स्थितरूपविशिष्टे शक्तेः । सत्यज्ञानयोः सत्यत्वं ज्ञानत्वं च महानात्मा 'सा महानात्मा तामाहुस्त्वतलादयः' इति वाक्यपदीयात् तयोः सविकल्पकज्ञानात्मकात्मत्वात् । सति सत्तारूपश्चात्मा । त्वंपदार्थादौपाधिकाद् विलक्षण आकाशवत् सूक्ष्मः केवलः सत्तामात्रतत्पदार्थश्चात्मेत्युच्यत इतिश्रुतेः । विलक्षणत्वमाह श्रुतिः । आकाशेति । त्वंपदार्थस्तु स्थूलः, आत्मा तु सूक्ष्म इति विलक्षणः । एवं सत्यादेः सत्यत्वादेश्च संबन्धावगाहिज्ञानमप्यात्मा । सत्यज्ञानशब्दौ जातिशब्दौ सत्यत्वत्वं ज्ञानत्वत्वं च न शङ्क्यम् । 'परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः' इति सूत्रेण सत्यत्वविशिष्टसत्यात् परमाशङ्क्य सामान्यात्त्विति सूत्रेण निषेधकरणात् । अन्यत्र तु घटत्वत्वादिकं धर्ममात्रं भूषणोक्तत्वादस्त्वेवं सत्यत्वं ज्ञानत्वं चात्मानौ सत्यत्वत्वं ज्ञानत्वत्वं च सत्यसत्यत्वयोः ज्ञानज्ञानत्वयोश्च संबन्धरूपे ह्यात्मत्वे वास्ताम् । सत्यज्ञाने साधनप्रमेयरूपेपि । सति साधुत्वस्य साधनत्वात् । ज्ञानस्य मोक्षस्य प्रमेयत्वात् धर्मार्थकामानां प्रमेयत्वेपि मुख्ये कार्यसंप्रत्ययात् तत्रानन्तत्वं पूर्वत्वे व्यापकत्वे च सति चैतन्यमनन्तं नाम मृद्विकारेषु मृदिव सुवर्णविकारेषु सुवर्णमिव तन्तुकार्येषु तन्तुरिव अव्यक्तादिसृष्टिप्रपञ्चेषु पूर्वं व्यापकं चैतन्यं अनन्तमित्युच्यत इतिश्रुतेः । न अन्तोस्य वेदरूपचैतन्यस्य निरवधिचैतन्यमित्यर्थः । निरवधिचैतन्यत्वमेव पूर्वत्वे व्यापकत्वे च सति चैतन्यत्वम् । चैतन्यत्वं ज्ञानेतिव्याप्तमतो व्यापकमिति विशेषणम् । नन्वानन्दादयः प्रधानस्य इति सूत्रे पूर्णानन्दैश्वर्यादयः प्रधानस्य ब्रह्मणो धर्माः इति ब्रह्मैकदेशे ज्ञाने कुतो विशेषणं व्यापकमितीति चेन्न । अव्यक्तादिसृष्टिप्रपञ्चमात्रव्यापकत्वविवक्षणात् । अव्यक्तादिसृष्टिप्रपञ्चेषु पूर्वं व्यापकमितिश्रुतेः । अव्यक्तं भगवत्कृपा तदादिसृष्टेः प्रपञ्चः पुरुषादिसृष्टेः प्रपञ्चः मायादिसृष्टेः प्रपञ्चः । अन्ये सृष्टिप्रपञ्चा निबन्धे प्रपञ्चिताः अव्यक्तादिसृष्टिप्रपञ्चस्तु आनुमानिकाधिकरणे ।

'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' ॥

इतिकाठकश्रुतिभिः कृतः । अव्यक्तादिसृष्टिप्रपञ्चोपादानचैतन्ये मुक्तजीवेऽतिव्याप्तिमाशङ्क्य पूर्वमिति विशेषणम् । पूर्वत्वं च सृष्टिपूर्वत्वं तेन नाव्यक्तादिसृष्टिप्रपञ्चपूर्वत्वमादाय पूर्वोक्तप्रपञ्चोपादानेतिव्याप्तिः । ज्ञानानन्तपदयोः सामानाधिकरण्यं वेदान्तप्रामाण्यात् । न तु व्यापकत्वरूपभागत्यागलक्षणयाऽविनाशिचैतन्यपूर्वचैतन्ययोरभेदान्वयः । पूर्वत्र तु भागत्यागलक्षणां विना सति ब्रह्मणि ब्रह्मधिव्यर्थस्य भेदसंबन्धं विनाऽघटमानस्य त्यागापत्तेर्वेदान्तप्रामाण्याद्देवागत्या भागत्याग-

१. तद्रूपं तत्र न स्थितं साकारव्यापकत्वाच्चेति निबन्धोक्तं स्थितम् ।

रश्मिः ।

लक्षणोररीकृता । वासुदेवरूपमोक्षरूपज्ञानेन संकर्षणरूपार्थरूपस्यानन्तस्याभेदान्वयो हि श्रीगोपालतापिनीयश्रुतेः । वेदान्तानां वेदत्वेन वेदस्य धनत्वेनार्थत्वम् । धन धान्य इति धातुः वेदो धनमिति निरुक्ते ग्रन्थे । तस्य संकर्षणरूपत्वं संकर्षणो हि सहस्रवदनो वेदात्मेति 'वासुदेवकलाऽनन्तः' इत्यस्य सुबोधिन्यां वेदसंकर्षणयोः सामानाधिकरण्यात् । इत्थं च 'अनन्ता वै वेदाः' इतिश्रुतेर्न अन्तो नाशोऽस्य चैतन्यस्य वेदस्येति बहुव्रीहिणानन्तं वेदरूपं प्रामाण्यं संकर्षणरूपमर्थरूपं च । अनन्तं जातिशब्दः अनन्तत्वविशिष्टे शक्तः । अनन्तत्वमात्मा उक्तवाक्यपदीयात् । अनन्तानन्तत्वयोः संबन्धावगाहिज्ञानमप्यात्मा । अनन्तत्वत्वं न शङ्क्यं सामान्यात्त्विति सूत्रात् । अनन्तत्वमात्मा अनन्तत्वत्वं अनन्तानन्तत्वयोस्तावत्संबन्धरूपमात्मत्वं वा । 'सत्यं ज्ञानमनन्त'मिति श्रीभागवते वैकुण्ठवर्णनाद्वैकुण्ठवाचकमपीति विशेष्यमाह श्रुतिः । आनन्दमिति आनन्दत्वं च सुखचैतन्यस्वरूपत्वे सत्य परिमितानन्दसमुद्रत्वं अविशिष्टसुखसमुद्रत्वं च । आनन्दो नाम सुखचैतन्यस्वरूपमपरिमितानन्दसमुद्रः । अविशिष्टसुखस्वरूपश्चानन्द इत्युच्यत इतिश्रुतेः । आसमन्तान्नन्द्यते समृद्ध्यते इत्यानन्दः घञन्तः । न परिमितः 'ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः' इति श्रुत्युक्तोऽक्षरानन्दः परिमितः तद्वत् परिच्छिन्नो न किंतु 'यतो वाचो निवर्तन्ते' इतिश्रुत्युक्तोऽपरिमितः । स आनन्दोऽपरिमितानन्दः स समुद्रोऽपरिमितानन्दः समुद्रः समुनत्ति उन्दी क्लेदने स्फायीति रक् ।

'निजमुरलिकानादाह्वानागतव्रजसुन्दरी-
निरुपमनवस्नेहाम्भोधेर्विचित्रतरोर्मिभिः ।
किमपि परितश्चार्द्रार्द्रोऽस्तु प्रभुः प्रकटीभवन्
प्रतियुवतिसंभेदेनास्मद्दशां विषयः सदा' ॥

अपरिमितानन्दः समुद्रः स्वयं व्रजसुन्दरीः समुनत्ति इत्यर्थः 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इतिवाक्यात् । अत्र क्लिद आर्द्रभावे दि-प-वेट्ट वेदान्तेषु योगमात्रादरणात् ब्रह्मलक्षणत्वात् न लीलाविशेषपरिज्ञानं न चानन्दस्य समुद्रः आनन्दसमुद्रः षष्ठीतत्पुरुषः अपरिमितश्चासौ आनन्दसमुद्र इति कर्मधारय इति वाच्यम् । समुद्रपदे लक्षणापत्तेस्तस्याश्च प्रथमलक्षणे संभवात् । न हि गङ्गातीरघोषस्य गङ्गाघोषावयवविशेषवत्त्वं लक्षणं संभवति किंतु गङ्गातीरघोषस्यावयवविशेषत्वं लक्षणमिति । समुद्रेऽतिव्याप्तिवारणायानन्देति विशेषणम् । आनन्दस्य समुद्र इत्युक्तौ षष्ठ्याभेदप्रत्ययनात् स्वगतभेदापत्तिरत आनन्दः समुद्रः । न च षष्ठ्या भेदप्रतिपादकत्वेप्येकमेवाद्वितीयं ब्रह्मेति श्रुत्या सत्यज्ञानयोः सेव्यसेवकभावसंबन्धेप्यभेदप्रतीतिस्तथानन्दस्य समुद्र इत्यत्र षष्ठ्या भेदप्रतिपादकत्वेप्यभेदप्रतीतिस्तयैव श्रुत्येति न स्वगतद्वैतमिति शङ्क्यम् । श्रीगोपालतापिनीये चतुर्व्यूहैक्यप्रतिपादकश्रुतेरस्याविषयत्वेन स्वगतद्वैतापत्तेः । एवं च समुद्रेतिव्याप्तिवारणायानन्देति विशेषणम् । न च यौगिकसमुद्रशब्दस्य लक्षणघटकस्य योगरूढसमुद्रशब्दप्रतिपाद्ये समुद्रे नातिव्याप्तिप्रापकत्वमिति वाच्यम् । शते पञ्चाशदिति न्यायाद्योगरूढे शब्दे योगस्यापि सत्त्वात्तमादाय समुद्रे सुखेन यौगिकसमुद्रशब्दस्यातिव्याप्तिप्रापकत्वात् । आनन्दसमुद्रत्वरूपलक्षणस्य गणितानन्देऽक्षरेऽतिव्याप्तिवारणायापरिमितेति विशेषणम् । 'यतो वाचो निवर्तन्ते' इति श्रुत्युक्तापरिमितानन्दसमुद्रः । इदमप्यपरिमितानन्दसमुद्रत्वम् ।

१. भक्तप्रेमरस ।

रश्मिः ।

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दमेतज्जीवस्य यज्ज्ञात्वा मुच्यते बुधः' ॥

इतिब्रह्मोपनिषच्छ्रुत्युक्ते जीवापरिमितानन्दसमुद्रेतिव्याप्तं आ अप्राप्येति छेदादतो विशेषणम्। सुखेत्यादि सुखं भूमा भूमाधिकरणात् । भगवान्न जीवः शोभनानि खानि अनेन सुखदुःखेत्यादिना करणे प्रत्ययः भावे वा । यतो अवाचो निवर्तन्ते आ समन्तात् प्राप्येति श्रुतिपदार्थयोः सतोर्नातिव्याप्तं पूर्वं लक्षणमिति चेत्तर्हि सत्यपदवाच्ये भक्तेऽपरिमितानन्दसमुद्रत्वमतिव्याप्तम् । न च भक्तस्यापरिमितानन्दसमुद्रवत्त्वं न तु अपरिमितानन्दसमुद्रत्वमिति वाच्यम् । 'तस्मान्न भिन्ना एतास्ता आभिर्भिन्नो न वै विभुः' इति कृष्णोपनिषदोऽभेदाद्भक्तब्रह्मणोः अतः सुखेत्यादिविशेषणम् । सुखस्य भूमत्वाद्भूम्नः सर्वात्मभावरूपत्वस्य लिङ्गभूयस्त्वाधिकरणे वक्ष्यमाणत्वात्तदाधारो भक्तो न तु सुखरूपभूमरूपः। भगवत्त्वात्सर्वात्मभावस्येतिभाष्यात् । भक्तत्वात् सर्वात्मभावस्येत्यनुक्तत्वात् । न चोक्तश्रुतेर्भक्तस्य ब्रह्माभेदात् सर्वात्मभावरूपत्वमिति शङ्क्यम् । स भूमा कस्मिन् प्रतिष्ठित इति प्रश्ने कृते भक्ते यो महिमरूपः सर्वात्मभावस्तस्मिन्नित्यनुबन्धादिसूत्रभाष्यात् । सुखत्वे सत्यपरिमितानन्दसमुद्रत्वं सर्वात्मभावेतिव्याप्तमतः सुखचैतन्येति । सर्वात्मभावस्यानन्दविशेषत्वान् न चैतन्यत्वम् । सुखचैतन्यत्वे सत्यपरिमितानन्दसमुद्रत्वं कदाचित्प्रकटचैतन्ये सर्वात्मभावेतिव्याप्तमतः स्वरूपमिति । एवं च सर्वात्मभावस्य सुखचैतन्यत्वं वर्तते न तु तत्स्वरूपं कादाचित्कत्वात् । स्वपदानुपादानेपि सर्वात्मभावेतिव्याप्तिः । अत एकं लक्षणं सुखचैतन्यत्वे सति अपरिमितानन्दसमुद्रत्वं सुनिष्पन्नम् ।

'सर्वानेव गुणान् विष्णोर्वर्णयन्ति विचक्षणाः ।
तेऽमृतोदाः समाख्यातास्तद्वाक्पानं सुदुर्लभम्' ॥

इतिजलभेदग्रन्थोक्ताब्धिषु नाव्याप्तिः । 'सत्यं ज्ञानमनन्तमानन्दं ब्रह्म' इति श्रुतौ आनन्दमिति छान्दसं नपुंसकत्वं न त्वानन्दोस्यास्तीत्यानन्दमर्श आद्यजित्यच् । आनन्दो नामेतिश्रुतौ धर्म्यानन्दोक्तेः। अर्शस् उरस् तुन्द चतुर पतिता जटा धारा अभ्र अम्ल लवण स्वाङ्गाद्धीनात् वर्णात् अत्रार्श आदिष्वानन्दपाठाच्च । **इदानीम्** 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्यत्र चित्सतोर्ब्रह्मैक्यमुक्तमानन्दस्य प्रतिपादितं अविशिष्टानन्दस्य प्रतिपादनीयं तदर्थमविशिष्टसुखस्वरूपत्वमानन्दत्वमविशिष्टसुखं विषयसुखं 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इतिश्रुतेः । योगमात्रादरणाद्वेदान्ते विशिष्टम् । शिष्लृ विशेषणे रुधादि न तु शिष हिंसायां भ्वादिः परस्मैपदी तस्य सेट्त्वात् । तथा च विशेषणं व्यावर्तकं व्यावर्तयति यत्तद्व्यावर्तकं विशेषणव्यावर्तकं यत्तस्य विशिष्टमित्यत्र क्तप्रत्ययार्थः कर्मविशेष्यं यत्सुखं तद्भिन्नं तत्सदृशं सुखमविशिष्टं सुखं नञः पर्युदासार्थकत्वात् । तत्र ब्रह्मानन्दपर्यन्तानन्दस्य विशेषव्यावर्तको विषय इति । अविशिष्टं सुखं स्वरूपं तत्त्वं लक्षणं द्वितीयम् । सुखपदं सर्वात्मभावरूपसुखरूपस्यापि वाचकम् । भूमैव सुखमिति श्रुत्या भूम्नः सर्वात्मभावरूपस्य सुखपदवाच्यत्वात् । अन्यथा भगवत्त्वात् सर्वात्मभावस्येतिभाष्यविरोधापत्तेः । तथा च जीववदानन्दस्यापि मुक्तौ ब्रह्मैक्यं न तु वागादीनामिव स्वरूपनाशनम् । 'वाङ्मनसि दर्शनाच्छब्दाच्च' इति फलाध्याये वक्ष्यन्ति स्माचार्याः । तथा च भाष्यम् । ब्रह्मांशत्वेन जीवस्यानन्दात्मकत्वादिति । अस्य भाष्यस्य भाष्यप्रकाशे आभासः सिद्धान्तमाहुरिति मर्यादामार्गे इति शेषः । भाष्यप्रकाशे तु वागादीनां स्वरूपनाशनमुत मणिस्पर्शादयसश्चामीकरत्वमिव तेषामेवा-

रश्मिः ।

लौकिकत्वसंपादनं भगवदनुग्रहादिति संशये भक्तसूक्ष्मदेहस्य चामीकरत्ववदयसोऽलौकिकत्वसंपादनं सिद्धान्तितम् । तत्पुष्टिमार्गे इत्यपि तत्रैव । ननु 'सत्यं ज्ञानमनन्तं ब्रह्म' इति तैत्तिरीयश्रुत्येदं ब्रह्मलक्षणमप्रसिद्धं विरुद्धमनुपादेयमितिचेन्न । अत्र विशिष्टे शक्तेः । परब्रह्मत्वमित्यत्र परमात्मनः प्रत्ययेन परब्रह्मणः प्रकृत्याभिधानादेतच्चतुष्टयस्य तल्लक्षणत्वात् । प्रसिद्धस्य लक्षणस्य ब्रह्मलक्षणत्वात् । तथा च श्रुतिरेतद्वस्तुचतुष्टयं यस्य लक्षणं देशकालनिमित्तेष्वव्यभिचारि स तत्पदार्थः परमात्मा परं ब्रह्मेत्युच्यते इति लक्षणमव्याप्त्यतिव्याप्त्यसंभवरहितं वस्तुतः पुनर्देशकालनिमित्तेष्वव्यभिचारिदेशकालयोर्द्रव्यत्वेन प्रकटसदंशत्वात्तत्रास्य लक्षणस्य व्यभिचारो नास्ति प्रकटसत्यज्ञानानन्तानन्दे संगतत्वात् । अस्य लक्षणस्यातिव्याप्तिर्नास्तीत्यर्थः । निमित्तानां कारणानां प्रकटचित्सदंशत्वात् न तत्र व्यभिचारोतिव्याप्तिरस्यास्ति । यद्वा देशकालनिमित्तेषु यस्यैतद्वस्तुचतुष्टयं लक्षणमव्यभिचारि अव्याप्त्यादिरहितं स [देशः कालो निमित्तं स्वर्गसुखदुःखाभावात्मसुखरूप] तत्पदार्थ इति श्रुतिकठिनपदव्याख्या । अत्र श्वेताश्वतरोपनिषच्छ्रुतिः ॐ ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च प्रतिष्ठिताः अधिष्ठिताः केन सुखेन्तरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष' इति चिन्त्यम् । संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः । ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम् । यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक' इति । श्रुत्यर्थश्चमसवदित्यधिकरणे प्रहस्ते चास्ति । अत्र कालस्य भूतपदवाच्यदेशस्य च चिन्त्यत्वं चिन्त्यप्रयोजनत्वं तथा च 'आत्मनि चैवं विचित्राश्च हि' इति सूत्रस्य देशकालसृष्टावप्यात्मन्येव साधिकरणस्य सृष्टत्वाच्चेतिभाष्यम् । अत्र निमित्तमतिरिच्यते निमित्तमिह फलमिति 'निमित्तात्कर्मयोगे' इतिसूत्रे सिद्धान्तकौमुदीकारोक्तेः तथापि यः कारणानीत्युक्तं कारणं निमित्तम् । यदि च प्रहस्ते श्वेताश्वतरश्रुतयः कौर्मवाक्यैरुपबृंहिता इति तामस इत्युच्येत तदोक्तार्थाधिकारे संपन्ने राजसश्रुतिभिः राजसत्वनिवृत्तौ सत्यां राजसत्वाधिकारे संपन्नेथ ज्ञाते सात्त्विकीभिस्तथासंपन्नेऽथ ज्ञाते निर्गुणाभिः निर्गुणत्वाधिकारसंपत्तिर्ज्ञातव्या । मध्वाचार्यादिभिः तामसत्वादिविभागस्याकृतत्वात् पुराणेष्वात्मगुणसत्त्वादिभिः सगुणत्वे श्रुतिष्वप्यात्मगुणसत्त्वादिभिः सगुणत्वम् । 'गौणश्चेन्नात्मशब्दात्' इतिसूत्रात् न प्राकृतगुणसंबन्धात्सगुणत्वं वा । अनन्तानन्दपदयोः सामानाधिकरण्यं भाष्ये कृतम् । संकर्षणरूपार्थरूपप्रमाणरूपानन्तेन सममनिरुद्धरूपधर्मरूपफलरूपानन्दस्य अभेदान्वयो हि श्रीगोपालतापिनीयश्रुतेः । धर्मस्य भूमत्वं 'प्रणम्य देवं भूमानं' इतिश्रीभागवतसुबोधिन्यामस्ति । भूमैव सुखमितिश्रुतौ मोक्षापेक्षया भूम्नोऽनिरुद्धस्य सुखमवधारितं मोक्षस्तु मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिरितिवाक्यात् स्वरूपावस्थानम् । तन्निवृत्तिर्मोक्ष इतिश्रुतेः । तस्यानात्मनो देहादीनात्मत्वेन योभिमन्यते सोभिमान आत्मनो बन्ध इति श्रुत्युक्तस्य बन्धरूपाभिमानस्य निवृत्तिरित्यर्थः । अतो मोक्षस्य प्रमेयत्वं तत्पूर्वमुक्तम् । आनन्दस्तु फलं आनन्दो गुणशब्दः सुखपर्यायत्वात् । सुखस्य नैयायिकमते गुणत्वात् । स आनन्दत्वविशिष्टे शक्तः आनन्दत्वमात्मा उक्तवाक्यपदीयात् । आनन्दानन्दत्वयोः संबन्धावगाहिज्ञानमप्यात्मा । आनन्दत्वत्वं न शक्यम् आनन्दत्वमात्मा । आनन्दत्वत्वं आनन्दानन्दत्वयोः संबन्धरूपमात्मत्वं वा । अत्र सत्यं ज्ञानमनन्तं ब्रह्म सत्यत्वं ज्ञानत्वं अनन्तत्वं ब्रह्मत्वं संबद्धं तु आत्मस्वरूपम् । सत्यं ज्ञानमनन्तमानन्दं परब्रह्म । सत्यत्वं ज्ञानत्वमनन्तत्वमानन्दत्वं परमात्मेत्युच्यते । परब्रह्मपरमात्मनोः संबन्धः सत्यत्वत्वं

रश्मिः ।

ज्ञानत्वत्वमनन्तत्वत्वमानन्दत्वत्वमित्येवं रूपचतुष्टयात्मकः । न च समवायः संबन्ध इति शङ्क्यम् । समवायाभ्युपगमसूत्रे तर्कपादे तादात्म्यस्य भाष्यप्रकाशे एभिरङ्गीकारात् । एवं चोक्तब्रह्मणो ज्ञानं जीवस्य सत्यपदवाच्यभक्तस्यानन्तानन्दस्य ब्रह्मणो ज्ञानमनुभवः । न च ब्रह्मण इति भेदषष्ठ्या विषयत्वमात्मायुक्तमविषयत्वमितिभाष्यविरोध इति शङ्क्यम् । तादृशज्ञानस्याविषयत्वेनांशतो विषयत्वाभावेन सर्वस्य युक्तमविषयत्वमिति । न च स्वगतद्वैतापत्त्या ब्रह्मज्ञानं, ब्रह्मज्ञानमिति कर्मधारयः इतिवाच्यम् । श्रीगोपालतापिनीयश्रुत्या षष्ठीतत्पुरुषेपि स्वगतभेदाभावात् । कर्मधारयस्तु संभवत्यपि न चतुष्टयरूपब्रह्मण एकज्ञानत्वायोगात् अभेदान्वयाभावात् । ब्रह्म न ज्ञानमात्रमिति भेदावगाहिप्रत्ययात् । घटपटकुड्यकुसूलानि न घट इति प्रत्ययवत् । सत्यं ज्ञानमनन्तं ब्रह्मेत्यभेदोपि 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इतिवाक्यात् । ब्रह्मज्ञानैकवाक्यतायै ततोप्येवमिति आरभ्य ब्रह्मेत्यन्तफक्किकार्थः क्रियते । इदमेव ब्रह्मज्ञानमिति फक्किकैकवाक्यताबोधकभाष्यात् । पदचतुष्टयस्य सत्यमनन्तमानन्दं ज्ञानमिति क्रमेण । तत्र सत्यपदार्थमाहुर्भाष्ये तत इति । तत इति क्रमवाचकं पदं मननानन्तरमित्यर्थः । एवमभ्यासेनावृत्त्येति यावत् । आवृत्तिरसकृदुपदेशादिति सूत्रात् । पूर्वोक्तार्थस्य निर्धारणे श्रवणमनने स्याम् । ननु निर्धारणार्थं मननमनावृतं भाष्ये प्रोक्तम् । निर्धारणे मननं भवतीतिभाष्यात् इतिचेत्तर्हि तद्दार्ढ्ये पूर्वोक्तार्थस्य निर्धारणदार्ढ्ये वा श्रवणमनने स्याम् । 'निमित्तात् कर्मयोगे' इत्यस्य प्राप्तिरपि न यया निर्धारणार्थमित्यर्थो भवेत् । तथा च ततोप्येवं भवतीति भाष्ययोजना । एवं वाक्यभेदो विभाव्येत, तर्हि ततोप्येवं पूर्वोक्तश्रवणमननयोरावृत्त्या ध्यानादिसमाध्यन्तरूपनिदिध्यासनरूपं ब्रह्मेति योजना । निदिध्यासनत्वं ध्यानादिसमाध्यन्तत्वं प्रेम्णो ध्यानादितः पूर्वस्य सत्त्वं ज्ञेयम् । 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजयेत्' इति निबन्धात् । द्वितीयस्कन्धे ध्यानादितोन्यस्याभावात् । तत्र ध्यानं ध्यै चिन्तायामित्यस्य रूपम् । अत्र ध्यानविषयः सत्पदार्थस्तत्र साधुस्तत्त्वमपि ध्यानरूपं यत्प्रत्ययार्थः । एवं धारणायां सत्पदार्थे ध्यानविषयत्ववज्ज्ञानानन्तपदार्थयोरपि ज्ञेयम् । अत्र ध्यानं ध्यानबिन्दूपनिषदुक्तं तथाहि ।

'स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासादेवं पश्येन्निगूढवत्' ॥

इत्यत्र निर्मथनदण्डत्वेन ध्यानमुक्तम् । ध्यानं निर्मथनं तस्याभ्यासः पुनः पुनः कीर्तनमावर्तनं वा तस्मादित्यर्थः । एवं पूर्वोक्तपरामर्शेन । पूर्वोक्तं तु ।

'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्' ॥ इति श्रुत्युक्तम् ।

व्यध ताडने तड आघाते आघातः गत्यर्थस्य हन्तेः । निगूढवदिति गुह संवरणे संवरणाग्निवत् । द्वितीयान्ताद्वतिः प्रथमान्ताद्वा वतिः स्वीयत्वेन सम्यग्वृतवत् स्वीयत्वेन सम्यग्वृतं वा स्वीयत्वेन सम्यग् वृतो वा गायत्र्यर्थकारिकासु प्रणवार्थोक्तेः । सर्वात्मभावकारणं वरणं साधनाध्याये लिङ्गभूयस्त्वाधिकरणीयवरणजसर्वात्मभावेति भाष्यात् । प्रणवचतुरात्मा आत्मा सत्त्वं ब्रह्म त्रितयात्मेति न लक्षणश्रुतौ ह्यधिकपदार्थनिवेशः शङ्कनीयः । नवीनभावजनक इत्यादिगायत्र्यर्थनिरूपणकारिकासु प्रणवार्थः साधुत्वप्रयोजकः । यद्यपि ध्यानबिन्दुःसमाख्यातस्तेजोबिन्दुः परं ध्यानमिति परपदसामर्थ्यं बलीयस्तथापि तद् ध्यानम् ।

१. सम्यक् कथितः शब्दितः ।

रश्मिः ।

'दुःसाध्यं च दुराराध्यं दुःप्रेक्ष्यं च दुराश्रयम् ।
दुर्लभं दुस्तरं ध्यानं मुनीनां च मनीषिणाम्' ॥

इतिश्रुतेः दुःसाध्यत्वादिविशिष्टमिति तत उपरम्यते । उदाकाङ्क्षायामुपनिषद् द्रष्टव्या । अथ धारणा ।

'मनः संकल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान् ।
धारयित्वा तथात्मानं धारणा परिकीर्तिता' ॥ इत्यमृतबिन्दूपनिषदि ।

प्रथममात्मपदं ब्रह्मपरं द्वितीयं जीवपरं यद्यपि तथापि धारणाया द्वादशाङ्गेषु युगपन्मनोधारणरूपात्वेन जीवस्य धारणाकर्तृत्वेन तत्कर्मत्वायोगात् द्वितीयमपि ब्रह्मपरम् । तिष्ठेदित्यस्य क्रियापदस्याध्याहार्यमाणस्य श्रुतावप्रयोगो धारणानन्तःपातित्वात् । अथ सत्यार्थे मन आदिपदार्थानां क्व संनिवेश इति चेदुच्यते यत्प्रत्ययार्थे साधौ कुतः साध्नोतीत्युक्ते किमित्याकाङ्क्षायां मनसि आत्मनि संक्षेप्स्यामीति संकल्पात्मकस्य ध्यानं द्वादशाङ्गेषु एकैकाङ्गस्य चिन्तनं कृत्वात्मनि बुद्ध्या संक्षेपं प्रेरणं युगपद् द्वादशाङ्गेषु कृत्वा ब्रह्मधारणा ध्यानं च पूर्वोक्तं समाधिं च साध्नोतीत्यर्थात् । द्वितीयात्मपदार्थस्य प्रकृतिप्रत्ययार्थे सति । सत्पदार्थस्तु ह्यत्र सुप्तशक्तिरसुप्तदृक् 'मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक्' इतिवाक्यात् । 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इतिश्रुतेर्ब्रह्मसत्तावेत्ता सज्जीवः । अस्ति शक्तिर्वेत्तृ सद्ब्रह्म । यद्यप्यात्मपदार्थः सत्यत्वं सति साधु सत्यमित्यत्र विशेष्यविशेषणसंबन्धावगाहिज्ञानत्वात् तथापि सदप्यात्मा ब्रह्मत्वात् विशेष्यविशेषणसंबन्धावगाहित्वेन स प्रकारकत्वमात्रकृतभेदात् ब्रह्मात्मैवैकदेशविकृतमनन्यवदिति वैयाकरणोद्घोषात् । अथ समाधिः 'यं लब्ध्वाप्यवमन्येत समाधिः परिकीर्तितः' इत्यमृतबिन्दुश्रुतिः । अत्र सर्वात्मभावं लब्ध्वान्यदवमन्येत हीनावबोधविषयं कुर्यात् इत्याज्ञा सर्वात्मभावस्यान्यहीनावबोधविषयकरणं लिङ्गभूयस्त्वाधिकरणे साधितम् । भूमैव सुखं नाल्पे सुखमस्तीति भूमलक्षणमेव सर्वात्मभावलक्षणम् । यद्वा यमात्मानं लब्ध्वावबोधं कुर्यात् तदवबोधकरणं समाधिः । अन्वमन्येत इतिपाठे वर्णविकारः अवमन्येत इति । यद्वा ओ विष्णुः सुपां सुलुगिति सोर्लुक् मन्येत इत्यत्र कर्मप्रत्ययात् अमो लुग्वा ई यं अं लब्ध्वेत्यर्थः । एवं सति साधुः सत्यो भक्तादिर्व्याकृतः । इदानीं सति अस्ति ब्रह्मेति वेतरि साधुं व्याचक्रुः **मनसी**ति सर्वत इत्यादिविशेषणम् । मनसो योग्यत्वाय 'सर्वत्र निवृत्तव्यापारो भगवत्परो भवति' इति सुबोधिन्याः 'अतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते' इति बिन्दुस्तोकोपनिषच्छ्रुतेः । चित्त इत्यनुक्त्वा मन इत्युक्तं तत् स मानसीन आत्मा जनाना[१]सर्वात्मेतिश्रुतेः । चित्ते भगवन्मते उद्घाटिततमःकपाटद्वारे चित्ते इति षष्ठस्कन्धवाक्यात् । भक्तादेस्तादृशे मनसि स्वयमात्मना साधननिरपेक्षेण उपलब्धं निजमनन्तं सुखं आनन्दस्तस्यानुभवो ज्ञानं स्वयं प्रकाशरूपमपि तद्रूपम् । तथा च 'अस्ति ब्रह्मेति वेतरि स्वयमुपलब्धं निजं सुखं तस्यानुभवं साध्नोतीत्यर्थः । तथा च षष्ठस्कन्धवाक्यं सिद्धस्य । 'ॐ नमस्तेस्तु भगवन्नारायण वासुदेव आदिपुरुष महापुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक केवलजगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारे चित्तेऽपावृत आत्म-

१. मत ।
५५ ब्र० सू० ८०

रश्मिः ।

लोके स्वयमुपलब्धनिजसुखानुभवो भवानिति'। निजसुखं जीवीयमपि आनन्दांशस्तु पूर्वमेव तिरोहितो येन जीवभाव इत्युक्तम् । नन्वेतस्यैव मुख्यश्रुत्युपष्टम्भकत्वे किं मानमिति चेन्न सिद्धवाक्यत्वात्। तथा च निबन्धः षष्ठस्कन्धस्य ।

'भक्तिर्मूर्तिमती तत्र देवरूपा सुसंस्थिता ।
तद्बधव्यतिरेकेण न सा निर्गन्तुमर्हति ॥
अतो हरिः सर्वदेवैः स्तूयते सिद्धभावितैः' । इति ।

ध्यानादिसमाध्यन्तरूपमनसीत्यादिविसर्गरहितभाष्यपाठे तु ध्यानादीनां मनसो वृत्तीनां मनस्त्वात्तद्रूपमनसीत्यादिः। तथा च श्रुतिः 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव इति बृहदारण्यके । तस्य प्रमाणबलस्य। 'यमेवैष वृणुते तेन लभ्यः' इतिश्रुतावेवकारेण कौण्ठ्येन नाहं वेदैरिति पक्षे वरणेपि प्रमाणबलानुपयोगः । एतत्सर्वं गीतात्रयोदशाध्यायोक्तं व्यवहारस्थापनं ज्ञेयामृतमुपक्रम्य 'अनादिमत्परं ब्रह्म' इत्यादिशब्दव्यवहारोभिधादिलक्षणो 'भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च' इति चेत्यनुमानं 'ऋषिभिर्बहुधा गीतं' इत्यैतिह्यं 'सूक्ष्मत्वात् तदविज्ञेयम्' इत्यप्रत्यक्षत्वेपि दिव्यचक्षुषा दृश्यत्वात्प्रत्यक्षं ब्रह्म जगज्जन्मादिकर्तृ शास्त्रयोनित्वात् इत्यत्र जगज्जन्मादिकर्तृत्वव्याप्यशास्त्रयोनित्ववद् ब्रह्मेति परामर्शो व्यापारः समवहारः ऐतिह्यं शब्दात्मकं तत्र पूर्वोक्त एव व्यवहारः । प्रत्यक्षे योगजधर्मो व्यापारो व्यवहारः । प्रथमाधिकरणार्थः प्रथमेऽधिकरणे सर्वमधिकृतं तत् किं इति प्रश्ने ।

'तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥
ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः' ॥

इति त्रयोदशाध्याय उत्तरम् । अत्र ज्ञेयं प्रथमाध्याये 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति भक्तिप्राकरणिकश्रुतेः । क्षेत्रमविरोधाध्याये चतुर्थपादे शरीरान्तःस्थानां प्राणादीनां विचारात् । ज्ञानं साधनाध्याये 'इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः' इतिवाक्यात्। तदनु 'ब्रह्म संपद्यते तदा' इत्यन्तेन आवृत्तिरसकृदुपदेशाधिकरणादिवाङ्मनसीत्यधिकरणाद्यर्चिराद्यधिकरणाद्यर्थसंग्रहः । क्षेत्रक्षेत्रज्ञान्तर्ज्ञानभूतप्रकृतिमोक्षज्ञानवतः फलं 'ये विदुर्यान्ति ते परम्' इति माहात्म्यादिज्ञानेन भक्तिद्वारा परस्य पुरुषोत्तमस्य प्राप्तिः । कुतोयमर्थः ब्रह्मपदं विहाय परपदोपसंदानात्। व्याख्यातं चैवमेवानन्दमयाधिकरणे 'ब्रह्मविदाप्नोति परम्' इतिश्रुतिस्थं परपदम् । नन्वस्त्वेवं बाधकाभावात् परं संपद्याविर्भावाद्यधिकरणाद्यर्थः कथं प्राप्तः । उच्यते । परपदपरमार्थः । आत्मैवेदमग्र आसीत्पुरुषविध इति पुरुषविधब्राह्मणे पुराणमतेपि । श्रुतितात्पर्यविषयः कोटिकन्दर्पलावण्यो निर्गुण आनन्दमात्रः पुरुषविधः तत्प्राप्तिरपि विद्वन्मण्डने नित्यलीलावादे उदिता तथापि संपद्य प्रादुर्भावो न प्राप्त इति चेत् स उपपादित एव संपद्याऽविर्भावाधिकरणादौ तत्रैवेत्यलमनधिकारवार्तया । यदि तु ब्रह्मसूत्रपदैरित्यस्योपनिषद्भिरित्यर्थस्तथापि वेदान्तानां वेदत्वस्य भाष्यसंमततया छन्दःपदेनैव ग्रहणाच्छ्रुतिसूत्रयोरेककोटित्वादुक्तमपि युक्तम् । तदुक्तं फलाध्याये तुरीये पुष्टिमर्यादाभेदेन फलमुच्यते

१. सूत्रे ।

रश्मिः ।

प्रभोरेव फलत्वं तन्निर्दोषत्वं च वर्ण्यते लीलानित्यत्वतः पूर्णगुणत्वं च ततोखिलमिति । ननु तथापि धर्मार्थमोक्षकामा इत्यन्तं सत्यं कामार्थधर्ममोक्षा इति क्रमस्य प्रथमसुबोधिन्यां धर्मस्य ह्यापवर्गस्येत्यत्रोक्तत्वात् । अतो जगद्व्यापारवर्जान्यदेतत् । अतो ब्रह्मणि स्वरूपतः कार्यतश्च व्यवहारस्थापनं प्रथमाधिकरणार्थः । ननु कर्मादिभ्यो ज्ञानमेव पुरुषार्थसाधनमतः कारणात् ब्रह्मजिज्ञासाकर्मकोधिकारः प्रथमाधिकरणार्थः कुतो नेति चेन्न ब्रह्मसंबन्धिनां जिज्ञासेति शेषषष्ठ्या त्रयोदशोक्तयावदर्थसंग्रहात्कर्मशरीरप्रविष्टतदर्थे विशेषणीभूतानुवृत्तिरिति विचारो मुख्यो न तु ह्यधिकारार्थोऽनुवृत्तिविशेषणतयाभिप्रेतत्वात् । यद्वा भाष्ये 'यतो वाचो निवर्तन्ते' इति वाङ्मात्रनिवृत्तिकस्य ब्रह्मण अथातो ब्रह्मजिज्ञासेति पदैर्व्यवहारः स्थापित इति निरुक्तम् । अत्र तु तन्न्यूनतादोषं निग्रहस्थानमभ्युपगच्छद्भिर्ग्रन्थकारैः संपूर्णाधिकरणार्थ उक्तः स समर्थनीयो व्यवहारस्थापनमधिकारहेतुरूपपदार्थयोरुपलक्षकमिति । तथा च अधिकारहेतुब्रह्मजिज्ञासापदार्थसमूहो वाक्यार्थः । भाष्यार्थस्तु स्थापितपदव्याख्याने समर्थित एव । न च जिज्ञासामुखेन कार्यलक्षणं प्रथमतो वक्तुं शक्यम् । सगुणब्रह्मजिज्ञासेत्यापत्तेः । न च लक्षणबलात् सगुणस्यैव जिज्ञासेति वक्तुं शक्यम् । निर्गुणे तात्पर्यवृत्तिमात्रप्रतिपाद्ये प्रतिज्ञाया अनुपयोगादिति वाच्यम् । तुरीये चतुर्थचरणे नित्यलीलानिरूपणावसरे निर्गुणस्योपपादनादस्त्युपयोगः । किं च ।

'निर्गुणो वा भिन्नो वा श्रवणे क्रियते यदा ।
तच्छ्रवणं तु व्यर्थं स्यादित्येवं लक्षणं परे' ॥

इति । ब्रह्मणीत्यादि एतेन श्रवणाङ्गत्वं मीमांसायां समर्थितम् । तेन पूर्वं वेदान्तान् श्रुत्वा पश्चान्मननरूपमीमांसेति श्रवणमङ्गमस्याः सा श्रवणाङ्गमीमांसेति प्रोक्तम् । शब्दव्यापाररूपव्यवहारास्थापने सत्यस्य श्रवणं न स्यात् 'यतो वाच' इत्यादिश्रुतेर्ब्रह्मणोऽव्यवहार्यत्वात् । अत्र षष्ठीतत्पुरुषपक्षे 'श्रोतव्यो मन्तव्यः' इत्यस्या इदमित्थतयाऽविषयो ब्रह्मविचारः । भाष्ये । माहात्म्येत्यादि ।

'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ।
तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत्' ॥

इतिवाक्यात् यत इत्यस्य माहात्म्यज्ञानादैक्यज्ञानाच्चेत्यर्थात् ।

'यस्यां वै श्रूयमाणायां कृष्णे परमपुरुषे ।
भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा' ॥

इति वेदत्रय्या मीमांसासहितायाः पुष्टिफलं श्रद्धारतिर्भक्तिरनुक्रमिष्यति इतिभक्तिर्माहात्म्यज्ञानफलम् । ननु श्रवणं च फलमित्युभयं च फलं कथमपरं च तृतीयाध्यायोक्तवर्णाश्रमाचारसेवोभयसर्वात्मभावा न कुतः फलमिति चेन्न । पूर्वमीमांसानिर्णयफलमुक्तं संदेहवारणं दार्ढ्यं च । अत्र तु श्रवणाङ्गमीमांसोच्यते न तु मीमांसानिर्णयः तस्यां तु तत्संबन्धिज्ञानं फलं मीमांसा जन्माद्यधिकरणे निरङ्कुशजगज्जन्मादिकर्तृत्वेन शास्त्रप्रतिपाद्यत्वेन कृता ब्रह्मणस्तत्संबन्धित्वं ब्रह्मणोऽसंदिग्धत्वात् तन्माहात्म्ये निरङ्कुश इत्यादि उक्तदेवत्वरूपे संदिग्धेस्ति तज्ज्ञानं माहात्म्यज्ञानमिति तस्य फलस्य युक्तत्वात् यथा धर्ममीमांसायां मीमांसासंबन्धी धर्मस्तस्य ज्ञानं फलम् । तथा युक्तत्वात् ।

रश्मिः ।

['त्वमात्मनात्मानमवेह्यमोघदृक्
परस्य पुंसः परमात्मनः कलाम् ।
अजं प्रजातं जगतः शिवाय तन्-
महानुभावाभ्युदयोधिगण्यताम्' ॥ इति
'इदं हि पुंसस्तपसः श्रुतस्य वा
स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ।
अविच्युतोर्थः कविभिर्निरूपितो
यदुत्तमश्लोकगुणानुवर्णनम्' ॥ इति
'त्वमप्यदभ्रश्रुतविश्रुतं विभो
समाप्यते येन विदां बुभुत्सितम् ।
प्रख्याहि दुःखैर्मुहुरर्दितात्मनां
संक्लेशनिर्वाणमुषन्ति नान्यथा' ॥
इति भगवतो नारदस्य गुरुचरण श्रीदेव्यासान् प्रति वचनात् ।]
'महात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोधिकः ।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा' ॥

इतिपञ्चरात्रे माहात्म्यज्ञानस्य भक्तेः पूर्वत्वात् दैवीसंपत्संपन्नानुशास्त्रानुभवाच्च माहात्म्यज्ञानं फलं श्रुतायाः । नित्यलीलाप्रतिपादनाद्देवो भगवानिति प्रतीतिः । तत्त्वमस्याद्युक्ताभेदो नात्र भक्तिफलक उपात्तः माहात्म्यज्ञानं तत्त्वमस्यादिमहावाक्योक्ताभेदस्योपलक्षकं तेन तस्य किंचिन्न्यूनसाधनत्वं व्यज्यते श्रद्धादीनां तस्य साध्यत्वात् माहात्म्यज्ञानानन्तरं स्वयं भवनादनुक्तिः ग्रन्थगौरवभयात् । मीमांसाविचारे श्रीभागवतफलविचारस्तूभयोः श्रवणघटितत्वेन तत्र श्रवणे दशविधलीलानां श्रवण-विषयत्वावच्छेदकत्वात् । उभयफलकत्वं मीमांसायां संयोगपृथक्त्वन्यायेन । अपरं च वर्णाश्रमाचार-जन्या भक्तिर्निबन्धटीकायामेतादृशभक्तादर्शनान्नास्तीत्युक्तेर्नात्र निरुल्लिखिता । सेवोभयं तु यदा फलदित्सा भगवतस्तदा श्रीमदाचार्यमार्गश्रद्धया शरणागतौ भवति इति न सकलाधिकारकम् । सर्वात्मभावस्तु 'प्रदानवदेव तदुक्तम्' इत्यधिकरणे दानसाध्यः इत्यन्यदेतत् । एवं च मीमांसयार-म्भोक्तासंभावनाविपरीतभावनानिवृत्त्या श्रवणं तेन माहात्म्यं देवत्वज्ञानं फलमिति निष्पन्नम् । एवं च ब्रह्मत्वं ब्रह्मेति निर्विकल्पकं ज्ञानम् । अत्राध्यारोपापवादलक्षणसंगत्या जगज्जन्मादिकर्तृत्वादि तत्रारोप्याग्रे ब्रह्मनिरूपणे 'अरूपवदेव हि तत्प्रधानत्वात्' इत्येनेनापवादादिति कश्चित् ब्रूयात् तं प्रतिब्रूयात् परमतभाषैषा समाधिभाषापोषिका न प्रमाणम् । प्रमाणं तु समाधिभाषा तत्र 'अनर्थोपशमं साक्षाद् भक्तियोगमधोक्षजे' इति भक्तियोगे दृष्टे भक्तिमार्गविरुद्धः कथमारोपापवादः । भगवन्माहा-त्म्यनाशकत्वात् । अत एवोक्तम् अरूपवत्सूत्रे एकदेशिमतेन समाधानमाहेतिभाष्ये । अतो भक्तिमार्गे विद्वन्मण्डनोक्तदिशा सगुणनिर्गुणयोरभेदः । अतो निर्वाहकलक्षणसंगत्या ब्रह्मनिरूपणम् । एकस्य ब्रह्मज्ञानस्य निर्गुणस्य गुणश्रुतिनिरूपणयोराविर्भावकत्वेन श्रुतितात्पर्यविषयस्य च सगुणनिर्गुणश्रुति-निरूपणयोराविर्भावकत्वेन च निर्गुणब्रह्मनिरूपणानन्तरं किं ब्रह्मज्ञाननिर्वाहप्रयोजकमिति जिज्ञासया सगुणब्रह्मनिरूपणमिति । तथा 'आत्मैवेदमग्र आसीत्' 'ब्रह्मविदाप्नोति परम्' 'संपद्याविर्भाव-

अतः श्रवणाङ्गमीमांसायां माहात्म्यज्ञानफलायां भगवद्वाक्यानामन्यपरत्वेऽन्यवाक्यानां च भगवत्परत्वे दिव्यधर्मादिव्यधर्मव्यत्यासेन वैपरीत्यं फलमापद्येत । तदर्थं दिव्यधर्मनिर्धारो द्वितीयाधिकरणे विचारितः । वेदा एव वाचकाः, अलौकिकमेव कर्मेति । ततः पूर्णालौकिकत्वाय विधिनिषेधमुखेनाधिकरणद्वयम् ।

भाष्यप्रकाशः ।

अतः परं द्वितीयाधिकरणार्थमाहुः **अत इत्यादि, कर्मेतीत्यन्तम्** । **अत इति** । ब्रह्मणि व्यवहारस्थापनेन श्रवणविषयत्वसिद्धौ तत्स्वरूपादिविचारस्यावश्यकत्वात् । **वैपरीत्यमिति** । विपरीतभावरूपम् । अपरप्राप्तिरूपमिति यावत् । **विचारित इति** हेतोः साध्यस्य च कथनमुखेन निर्णीतः । तस्यैवाकारो **वेदा एवे**त्यादिर्नोच्यते । अग्रिमार्थमाहुः **तत इत्यादि, पूर्णालौकिकत्वायेति** अभिन्ननिमित्तोपादानरूपताबोधनेन तथात्वाय । **विधिनिषेधमुखेनेति** । समन्वयेन हेतुना पूर्णालौकिकत्वस्य विधिमुखेन स्थापनम् । अव्यवहार्यत्वस्य प्रधानस्य

र.श्मः ।

स्वेन शब्दात्' इत्यादिभिः सधर्मकब्रह्मनिरूपणानन्तरं किं ब्रह्मज्ञाननिर्वाहप्रयोजकमिति जिज्ञासयास्मन्मते बृहद्वामनपुराणे उत्तरस्थाने खिले च ।

'नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत ।
सगुणं ब्रह्म सर्वेदं वस्तुबुद्धिर्न तेषु नः ॥
ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं निर्गुणं परम् ।

इत्याद्युक्त्वा ।

'तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः ॥ इत्युक्तेः
श्रुत्वैतद्दर्शयामास स्वं लोकं तमसः परम्' ।

इत्यादिभगवद्दर्शितनिर्गुणब्रह्मनिरूपणं कृतमिति । 'नहि विरोधो भगवति' इति 'यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति' इतिवाक्याभ्यां तादृशमेव ब्रह्मस्वरूपं यादृशं श्रुतयो वदन्ति न तु कुतर्ककल्कनकल्पनवशान्निर्णीतम् । भगवद्वाक्यानां 'को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्' इत्यादीनामानन्दमयाधिकरणविषयवाक्यानां भगवत्पदं ज्ञापयति श्रीभागवतीयसमाधिभाषानुसारिकृष्णवाक्यानुसारिभाष्यमिति 'ब्रह्मेति परमात्मेति भगवानिति शब्द्यते' इति शास्त्रार्थात्[1] । **अन्यपरत्वे** 'आनन्दमानन्दमयोवसाने' इतिद्वितीयस्कन्धवाक्याज्जीवपरत्वेन्यवाक्यानां जीवमुख्यप्राणवाक्यानां गतपादान्तउक्तानां सर्वधर्मोपपत्तेर्भगवत्परत्वे दिव्यधर्मा 'दिव्यं ददामि ते चक्षुः' इतिवाक्यात् दिव्यचक्षुर्ग्राह्या अदिव्यधर्माः साधारणचक्षुरादिग्राह्यास्तेषां व्यत्यासेन वैपरीत्यविपरीतस्यैव भावस्तद्रूपं स्वार्थे ष्यञ् वा अपरप्राप्तिरूपम् ।

'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तत्तदेवैति कौन्तेय सदा तद्भावभावितः' ॥ इति स्मृतेरित्यर्थः ।

वैपरीत्यमित्यत्र भावप्रत्ययपक्षे भावपदेनाभावव्यावृत्त्या ज्ञायतेऽभावत्वेन प्रतीता अपि नाभावरूपाः किंत्वभावा इवेति । **प्रकृते** । **साध्यस्येति** जगज्जन्मादिकर्तृत्वस्य । **भाष्ये** । **अलौकिकमित्यादि** लोके भवं लौकिकं तद्भिन्नमलौकिकं निष्क्रियमितिश्रुत्युक्तनिष्क्रियत्वसमानाधिकरणं कर्म जगज्जन्मादिकर्तृत्वं कृतिरेव तद्रूपम् । **प्रकृते** । **अग्रिमार्थमिति** अग्रिमाधिकरणद्वयार्थमित्यर्थः । **प्रधानस्येत्यादि**

१. श्रीभागवताद् ।

समन्वयेक्षतिरूपम्। तदनु प्रथमे पादे शाब्दसंदेहो निवारितो निश्चितार्थे। तत्रापि प्रथमं प्रत्ययसंदेहो निवारितो द्वयेन। प्रकृतिसंबन्धोऽप्यधिकरणत्रयेण पुनरन्तिममधिकरणं संश्लेषनिराकरणाय। एवं प्रथमे पादे शब्दसंदेहो निवारितः॥

भाष्यप्रकाशः।

सगुणस्य च निरासेन तत्स्थापनान्निषेधमुखत्वं बोध्यम्। न च पूर्वं जिज्ञासालक्षणविचाराणां कर्तव्यतायास्त्रिसूत्र्या उक्तत्वादत्रेक्षत्यधिकरणस्य कुतो निवेश इति शङ्क्यम्। त्रिसूत्र्युक्तप्रमेयप्रपञ्चनार्थमेव सर्वस्य शास्त्रस्योपदेशेन तत्तत्प्रयोजनाय तस्य तस्याधिकरणस्य संग्रहेऽप्यदोषादिति। आनन्दमयाधिकरणप्रयोजनमाहुः तदन्वित्यादि। प्रकृतिसंबन्ध इत्यत्र प्रकृतौ संबन्धो यस्य संदेहस्य स तथेति व्यधिकरणपदो बहुव्रीहिः। संदेह इति पाठो वा। एवं नवाधिकरणीप्रयोजनमुक्त्वा दशमस्याहुः पुनरित्यादि। संश्लेषवारणायेति परब्रह्मणश्चिदचि-

रश्मिः।

गौणश्चेत्यादिसूत्रत्रये निरासद्वयम्। पूर्वमिति समन्वयाधिकरणसमाप्तिं लक्षीकृत्य 'लक्षणेत्थंभूताख्याने' इत्यनेन द्वितीया। समाप्तिश्चरमवर्णतिरोभावः। क्रियाविशेषणं वा सामान्ये नपुंसकं वा। अदोषादिति आधिक्यलक्षणनिग्रहस्थानरूपदोषाभावादित्यर्थः। यथाऽशब्दत्वे त्रिसूत्र्युक्तप्रमेयं शाब्दप्रमेयमप्रयोजनमविषयं स्यात्। अक्षरविषयं स्यात्। अतोक्षरपुरुषोत्तमोभयपरत्वप्रयोजनायेक्षत्यधिकरणस्य संग्रहः त्रिसूत्र्युक्तप्रमेयप्रपञ्चः तदर्थम्। तदन्वित्यादीति तदनु अधिकरणचतुष्टयनिरूपणानन्तरं निश्चितोर्थः शास्त्रार्थो यत्र तादृशे प्रथमपादे ब्रह्मणि वा जाते पञ्चमाद्यधिकरणैः शब्दसंदेहो निवारित इतिभाष्यार्थः। तथा तत्रापि शाब्दसंदेहनिवारणेपि। द्वयेनानन्दमयान्तस्तद्धर्माधिकरणद्वयेनेत्यग्रिमभाष्यार्थः। प्रत्ययो मयट्प्रत्ययस्तस्य संशयः प्राचुर्ये वा विकारे वेति। अपिपदद्योतितार्थसंग्रहाय षष्ठीसमासादन्यं समासमाहुः प्रकृतीत्यादिना प्रकृतिसंबन्धः प्रतिपाद्यताख्यः संदेहे उपक्रमोपसंहाराभ्यामेवमुदितोर्थः। पाठो वेति संदेहवाचकपदस्थले संदेहवाचकपदपाठो वेत्यर्थः। प्रकृतिसंबन्धसंदेहवारणं त्वेवम्। तल्लिङ्गाधिकरणे आकाशरूपप्रकृतौ आकाशपदवाच्यत्वादध्याससंबन्धो वारितः 'आकाशशरीरं ब्रह्म' इतिश्रुत्याऽऽकाशस्य शरीरत्वात्। तेन 'यदेष आकाश आनन्दो न स्यात्' इतिश्रुतेरानन्दरूपप्रकृतौ अध्यासाख्यसंबन्धो वारितः। हिरण्मयवपुष्यपि वं सुखं पुष्णातीति वपुरिति वपुःपदव्युत्पत्त्याध्यासाख्यसंबन्धो वारितः आश्चर्यरसत्वात्। बृहदारण्यके आसन्यस्य महाप्राणस्य पापवेधध्वंसकत्वमुक्तम्। भगवति तत्पदप्रयोगाज्जनार्दनत्वमुक्तमतिदेशाधिकरणे। मायया जगत्कर्तेति पौराणमतम्। तेन प्राणस्यान्तर्यामिब्राह्मणोक्तशरीरस्याध्यासाख्यसंबन्धो वारितः। ज्योतिराद्यधिकरणे ज्योतिःपदसंबन्धो ज्योतीरूपे स्पष्ट एव शरीरस्य ज्योतिषोध्यासाख्यः संबन्धो वारितः। अनुगमाधिकरणे प्राणपदवाच्यत्वे सति सिद्धेऽन्ते क्रियाज्ञानविषयरूपो भगवानेवेतिप्रतिपत्त्यर्थं न तावन्मात्रं ततोप्यधिक इत्येकोपासनैव विहितेतिभाष्येण अधिका 'अत्यतिष्ठद्दशाङ्गुलम्' इतिश्रुतेः प्रकृतिसंबन्धो हि स्पष्ट एवेति संदेह इतिपाठे निवारित इत्यनेनान्वयः। यथाश्रुतपाठे तु उक्त इत्यनेनेति बोध्यम्। अपिशब्देन प्रत्ययसंबन्धः। संबन्धस्त्वभेदः संबन्धस्य संदेहार्थत्वे प्रकृतावाकाशे आकाशः भूताकाशः परमात्मा वेति संदेहो वारितः। आकाशः परमात्मेति। एवं प्राणः भौतिकः परमात्मा वेति संदेहः प्राणः परमात्मेति वारितः। एवं ज्योतिश्चरणं भौतिकं वेति संदेहो वारितः ज्योतिश्चरणमिति। आहुरिति मुख्यप्रयोजनमाहुरित्यर्थः। सच्चिदानन्दरूपमेव ब्रह्म न चिदचितोरानन्दे संबन्ध इत्याशयेन व्याकुर्वन्ति परेत्यादिना चिज्जीवोऽचिन्मुख्यप्राणः। ननु तयोरन्तर्यामिब्राह्मणे शरीरत्व-

ये पुनः कश्चित् सगुणनिर्गुणभेदं प्रतिपादयन्ति, ते स्वयमेव स्वस्य ब्रह्म-

भाष्यप्रकाशः ।

तत्संश्लेषवारणाय । ब्रह्मवादे केवलस्यैव तादृशत्वेन चिदचिच्छरीरापेक्षाराहित्यादिति । सिद्धमाहुः परब्रह्मित्यादि षडधिकरण्या निवारितः । तथाचैतावतैव शाब्दसंदेहनिवृत्तेः कार्यसिद्धेश्च संभवा-न्न्यूनाधिकाधिकरणाङ्गीकारो न युक्त इत्यर्थः । ननु केचिदेकदेशिनो, यतो वाच इत्यस्य याव-च्छब्दमनसागोचरत्वनिषेधनपरत्वमास्थाय श्रोतव्यादिवाक्यवैयर्थ्यपरिहाराय ब्रह्मणि सगुण-निर्गुणभेदं प्रतिपादयन्ति । ततश्च निर्गुणं ब्रह्मोक्तश्रुतिरर्थाद् बोधयति । श्रोतव्यादिश्रुतयस्तु शब्दात् सगुणं बोधयन्तीत्येवमपि ब्रह्मणि व्यवहारसिद्धेः पूर्वोक्तरीत्या जिज्ञासासूत्रस्योक्तश्रुते-रर्थकथनं न युक्तमित्याशङ्कायां तन्मतमनूद्य दूषयन्ति ये पुनरित्यादि । कथं बोधयन्तीत्यत

रश्मिः ।

श्रावणादस्तु तत्संश्लेष इत्यत आहुः **ब्रह्मवाद** इत्यादि । आत्मैवेदमग्र आसीद्ब्रह्मैव सदेवा-सदेवेत्यादिषु ह्यन्ययोगव्यवच्छेदकादेवकारादाहुः **केवलस्यैवेति** अन्तर्यामिब्राह्मणं तु साधारणात्मपरं मुख्यप्राणे तु तत्त्वाश्रावणाद्वाऽदोषः । इतीति रूपं भाष्योक्तमिदमाधिदैविकम् । तेनेदमधिकरणं पूर्वोक्तस्य सर्वस्य निगमनार्थमिति बोधितमित्यस्य पूर्वपादान्तरस्थस्य भाष्यप्रकाशस्याध्यात्मिकरूप-परत्वम् । सर्वपदस्य संकुचितवृत्तित्वेनाक्षिप्तबाह्यान्तरभेदपरत्वात् । रश्म्युक्तस्याचिद्विशिष्टे प्राणविशिष्टेऽन्तर्यामिब्राह्मणोक्ते जगज्जन्मादिकर्तृत्वलक्षणस्यातिव्याप्तिवारणरूपप्रयोजनस्याधिभौतिकत्व-मचिद्विशिष्टमाधिभौतिकं रूपमित्यदोषः, सर्वनिर्णये त्रैविध्यदर्शनान्न भाष्यविरोधः ।

'सूर्यो मण्डलमानी च चक्षुःप्रेरक एव नः' ।

एवं सर्वत्र तद्भेदाः स्वयमूह्या 'अन्येप्यवान्तरा भेदाः शतशः सन्ति सर्वशः' ॥

वागिन्द्रियस्य त्रयो भेदाः प्रसिद्धा यदा ग्रहीष्यन्ते तदोपलक्षणीयावितरौ पक्षौ रश्मिभाष्य-प्रकाशोक्तौ । **कार्यसिद्धेरिति** आत्मा वा अरे द्रष्टव्य इतिश्रुत्युक्तश्रवणादिरूपकार्यसिद्धेः । **न्यूनेत्यादि** एकादशाधिकरणानि शंकराचार्या रामानुजाचार्याश्च स्वीकुर्वन्ति मध्वाचार्या अपि न्यूनाधिकानि वा ततश्च नाधिक्यरूपनिग्रहस्थानमिति ब्रूमः । तत्र तत्राधिकरणे दूषणभूषणानामुक्तत्वात् । **केचिदित्यादि** शांकरा विवक्षितगुणोपपत्तेश्चेति सूत्रे अथवा जन्माधिकरणे यद्वा ईक्षत्यधिकरणे गौण इत्याशङ्किनो विष्णुशर्माणः । ननु तर्हि श्रोतव्य इत्यादिवाक्यनिवृत्त्या तद्वैयर्थ्यमित्याशङ्क्याहुः **श्रोतव्यादीति** । **सगुणेति** तथा च गुणाः श्रोतव्यादिविधिविषयाः इति न श्रोतव्यादिवाक्यवैयर्थ्यमिति भावः । **उक्तश्रुतिः** यतो वा इतिश्रुतिः भाष्योक्तार्थ स्फुटोपपादनार्थमियमुपात्ता सूत्रे तु 'ह्यप्राणो ह्यमनाः शुभ्रः' इतिश्रुतिः शुद्धब्रह्मविषया । इयं तु मनोमयप्राणशरीर इति सगुणविषयेति विशेष इति । उक्तश्रुतिर्यतो वाच इतिश्रुतिर्वा । **अर्थादिति** अभिहितार्थात् । भावप्रधानो निर्देशः अभिहितार्थत्वादित्यर्थः । **शब्दा-दिति** गुणविशिष्टवाचकाच्छब्दात् । **पूर्वोक्तेति**जीवोक्तरीत्या अर्थकथनमिति । **जिज्ञासासूत्रस्य** ब्रह्मसंबन्धिनां जिज्ञासेति शेषषष्ठीकथनम् । ईक्षत्यधिकरणे 'यतो वाच' इतिश्रुतेरिदमित्थतया वागप्राप्यत्वकथनं च । **ये पुनरित्यादीति** प्रतिज्ञाविषयस्य ब्रह्मणः शुद्धत्वेन तद्विचाराकरणाद् बोधयन्तीत्यर्थः । गौणश्चेन्नात्मशब्दादित्यत्र ये प्रकृतिसंबन्धात्कर्तृत्वं मन्यन्ते तान् प्रत्यप्याहुः

१. कार्यात्मना भवनान्तरं साधारणात्मा तत्परं न तु कारणात्ममात्रपरमित्यर्थः ।

जिज्ञासानधिकारं बोधयन्ति। ब्रह्मवादे सांख्यानामिव गुणानामनङ्गीकारात्।

भाष्यप्रकाशः।

आहुः **ब्रह्मवाद** इत्यादि। **गुणानामिति** नित्यभिन्नानाम्। ननु, 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इत्यादिश्रुतिषु गुणाङ्गीकारात् कथमनङ्गीकारावगम इत्यत आहुः **भौतिके**त्यादि। भौतिका भूतोत्पादकत्वेन तत्संबन्धिनः। तथाच, प्रधानेत्यादिश्वेताश्वतरश्रुतौ गुणानां सिद्धवन्निर्देशेऽप्युपनिषदारम्भे, भूतानि योनिः पुरुष इति चिन्त्यमित्यत्र योनिपदोक्तनित्यभिन्नगुणानङ्गीकारबोधनादुक्तश्रुतौ ब्रह्मवादसिद्धा भगवदुत्पन्ना एव ते बोध्याः। अतस्तदभिप्रेतानां मायावादसिद्धानां गुणानामसंबन्धार्थमेवाध्यायारम्भात् सा श्रुतिव्यवस्था असंगतेत्यतस्तथेत्यर्थः। ननु कथमेवमवगम्यत एतदर्थमेवाध्यायारम्भ इति, तत्राहुः **अन्यथे**त्यादि। **तत्कारणत्वेनेति**

रश्मिः।

ब्रह्मवाद इत्यादि सांख्यस्य रचनानुपपत्त्यधिकरणे कारणत्वांशे निरासाच्च। अतो विष्णुशर्माणं गौणः कर्तेति ब्रुवाणं प्रति शांकरांश्च प्रत्युक्तं सांख्यानामिवेति। ननु मायावादिनः प्रति निरुक्तिरेषा कथमन्यान्प्रति व्याख्यायते। सत्यम्। यद्येवं त्वमङ्गीकुर्यास्तदापि त्वयानङ्गीकार्येत्याशयात् गुणेश इति श्वेताश्वतरे गुणाङ्गीकारमाशङ्क्य विशिंषन्ति स्म **नित्ये**त्यादिना। अयमर्थः—विद्वन्मण्डने नित्यभिन्ना गुणा हि उपाधिभूताया मायाया ब्रह्मणश्चानादित्वेनोपहितस्याप्यनादितयाऽविरतः सर्गः प्राप्तस्तद्वारणाय स्वीकृताः तत्क्रमनियामकत्वं चेच्छायास्तदेतत्कपोलकल्पितम्। यतः शुद्धब्रह्मजिज्ञासां प्रतिज्ञाय जन्मादिकर्तृत्वमुक्तवन्तो व्यासचरणाः। अन्यथा जन्माद्यस्य यतः शास्त्रयोनित्वात् तत्सगुणं ब्रह्मेति सूत्रितं स्यात्। अतो गुणानामनङ्गीकारादित्यर्थः। **प्रधान इत्यादि** प्रधानं गुणसाम्यावस्था क्षेत्रज्ञो देहज्ञो हि गीताक्षेत्रक्षेत्रज्ञनिर्देशयोगाध्याये हंसोपनिषदि तत्र यत्प्रकाशते चैतन्यं स क्षेत्रज्ञ इत्युच्यते। तत्र इत्यस्य लिङ्गशरीर इत्यर्थः। तयोःपतिरित्यर्थः। न च क्षेत्रज्ञं चापि मां विद्धि इत्यस्य गीतास्मरणस्य विरोधः। 'सर्वं खल्विदं ब्रह्मे'त्यदोषात्। **तत्संबन्धिन** इति ब्रह्मसंबन्धिनः (भूतसंबन्धिनः)। तथा च गुणानामीशो नतु गुणाधीनकर्ता अस्वातन्त्र्यापत्त्या कर्तृत्वभङ्गप्रसङ्गात् कर्ता स्वतन्त्र एव स्यात् इति निबन्धे। ननु तर्हि गुणेश इति प्रतिपादितगुणानां कः संबन्ध इत्यपेक्षायां कार्यकारणभावरूपं तं बोधयितुमाहुः **तथा च** इत्यादि **उपनिषदारम्भ** इति श्वेताश्वतरोपनिषदारम्भे। **योनिपद**स्य समवायिकारणवाचकत्वात् मतान्तरे गुणवाचकत्वमित्याशयेनाहुः **योनिपदे**त्यादि। **अनङ्गीकार**बोधनं तु **चिन्त्य**मितिपदेन लोके सम्यक् प्रकारेण ज्ञातव्यं स्मर्तव्यं वा। चिती संज्ञाने चिती स्मृत्यामितिधातुपाठात्। अत्र पक्षे द्वारं गुणाः **बोध्या** इति।

'सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः।
स्थितिसर्गनिरोधेषु गृहीता मायया विभोः' ॥

इतिद्वितीयस्कन्धवाक्यात्। मायावादपदं विष्णुशर्मपक्षस्योपलक्षकम्। **अध्यायारम्भादिति** आनुमानिकाधिकरणेन तथावसायात्। गौणश्चेन्नात्मशब्दादित्युक्तत्वात्। श्रवणाय तु अध्यायचतुष्टयम्। अधीतानामित्याद्युक्तभाष्यात्। प्रथमपादे शब्दसंदेहनिवारणात् द्वितीयादिष्वर्थसंदेहवारणात् भाष्ये एव **हि** इति शब्दद्वयम्। **सा** इति सगुणनिर्गुणपरा। **तथे**ति भाष्योक्ता व्यवस्था अत्र न तत्पुरुषः किं तु बहुव्रीहिरित्याहुः **तत्कारणकत्व** इत्यादिना।

१. गुणानामनङ्गीकारादित्यनेनान्वेति।

भौतिकगुणानामसंबन्धार्थमेव स्वध्यायारम्भः । अन्यथा सर्वस्यापि तत्कारणत्वेन तत्संबन्धस्य विद्यमानत्वादन्यनिराकरणेन तत्प्रतिपादकत्वनिर्धारकाधिकरणानां वैयर्थ्यमेव ।

अर्थसंदेहनिराकरणार्थं द्वितीयाद्यारम्भः । तत्रार्थो द्विविधो जीवजडात्मकः प्रत्येकसमुदायाभ्यां त्रिविधः । तत्र प्रथमं जीवपुरःसरेण संदेहा निवार्यन्ते ।

भाष्यप्रकाशः ।

तत्कारणकत्वेन । तथाचातोऽवगम्यत इत्यर्थः । एवं प्रासङ्गिकं निराकृत्य प्रस्तुतमाहुः अर्थेत्यादि । कोऽर्थः संदेहजनकः, कथं च तन्निराकरणमित्यपेक्षायामाहुः तत्रार्थ इत्यादि । द्वितीयपादार्थमाहुः । तत्र प्रथममित्यादि । जीवपुरःसरेणेति प्रथमाधिकरणे, अनुपपत्तेस्तु न शारीर इति पूर्वं जीवस्यैव निराकरणाज्जीवपुरःसरेण विचारेणेत्यर्थः । एवमग्रिमपादेऽपि, नानुमानमतच्छब्दादिति सूत्रप्रणयनाज्जडपुरःसरत्वम् । एवं चतुर्थेऽप्युभयपुरःसरत्वमानुमानिकसूत्रविवरणादवगन्तव्यम् । तथाच त्रिभिः पादैस्त्रिविधार्थसंदेहो निवार्यत इत्यर्थः । एवं च पादानामेककार्यकत्वेऽपि क्रमनियामिकाऽत्रावसररूपा संगतिरिति बोधितम् ।

अन्ये तु प्रथमपादे स्पष्टब्रह्मलिङ्गान्याकाशादिवाक्यानि निर्णीतानि । द्वितीयतृतीययोस्त्वस्पष्टब्रह्मलिङ्गानि निर्णीयन्त इत्याहुः । तन्मते क्रमनियामकं न स्पष्टम् ।

रश्मिः ।

अतोवगम्यते इति कार्यस्य जगतः सगुणनिर्गुणत्वाद् गुणास्तु 'आत्ममायामृते' इति स्वमते अवस्थानादप्यवगम्यते । **भाष्ये** । तस्य प्रतिज्ञातस्य निर्गुणस्य कारणत्वेन तत्संबन्धः कार्यकारणभावः । सृष्टिः षोढेति न भाष्ये विशिष्य संबन्धग्रहणम् । 'कार्यकारणवस्त्वैक्यमर्षणं पटतन्तुवत्' इत्यन्याभावेनान्यस्य आनन्दमयविभूत्यादेरभावेन तन्निराकरणेन ब्रह्मत्वप्रतिपादकत्वनिर्धारकाणामानन्दमयाद्यधिकरणानां विशेषणाभावप्रयुक्तनिर्धारकत्वाभावेन **वैयर्थ्यम्** । एवकारस्तु गुणानां तज्जन्यत्वेन तदात्मकत्वेऽवस्थितमते सदानन्दस्य जगत्कर्त्री शक्तिः चितो व्यामोहिकेति ग्रन्थासंगतिः । सांख्यवत्प्रतिज्ञा निर्गुणस्य जगत्कर्त्री शक्तिरन्या चेत्युपपत्तेः । अतः सार्थकत्वे यथा कथंचिन्मतासंगतिं व्यवच्छिनत्ति । तेनावस्थितमते सांख्याद् भेदः मायावादिमतं सगुणं विद्वन्मण्डने विचारितम् । **प्रकृते । इति पूर्वमिति** जीवनिराकरणाल्लिङ्गाद्धेतोः पूर्वकालं पूर्वपादार्थनिरूपणकालम् 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । प्रसङ्गादन्ययोः पादयोरप्याहुः **एवमग्रिमेति** । **जड** इति प्रकृतिरित्यर्थः । **एके**त्यादि एकस्य कारणस्य कार्यप्रतिपादकानां ब्रह्मसमन्वयस्य प्रथमपादार्थस्य हि जीवजडतदुभयसमन्वयनिराकरणानि कार्याणि तत्कत्वेपीत्यर्थः । स्वार्थे कः । चेतनत्वेन प्रतिबन्धकीभूतजीवनिराकरणजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वं जडनिराकरणस्येत्यवसररूपा । तन्निरूपणानन्तरं तदुभयनिरूपणमित्यवसरः । **अन्य इत्यादि शंकराचार्यादयः । तन्मत इत्यादि** द्वितीयार्थस्यैव प्रथमनिरूपणं तृतीयस्य पश्चादित्यत्र क्रमनियामकाभावः । प्रतिबन्धकीभूतजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वस्योभयत्र तौल्यात् । प्रकृते तु जडापेक्षया जीवस्य चेतनत्वेन वैशिष्टयात् प्रथमं तत्पुरःसरेण संदेहवारणं पश्चात् जडपुरःसरेणेत्यर्थः । यद्यप्युपास्यज्ञेयब्रह्मणोर्भेदमाश्रित्य पादयोरवान्तरभेद इति तद्व्याख्यान उक्तं तथाप्युपासनायाश्चित्तशुद्ध्यर्थत्वेन उपास्यापेक्षया ज्ञेयस्योत्कृष्टत्वात् पूर्वनिरूपणं प्राप्तं तदभावात्तथेति ज्ञेयम् । **अन्ये त्विति । रामानुजाचार्यास्तु** अस्पष्टजीवलिङ्गकानि वाक्यानि द्वितीये विचार्यन्ते । **स्पष्टलिङ्ग-**

इदमाम्नायते। 'सर्वं खल्विदं ब्रह्म तज्जलानिति, शान्त उपासीत' 'अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति। स क्रतुं कुर्वीत मनोमयः प्राणशरीर' इत्यादि। तत्र वाक्योपक्रमे सर्वं खल्विदं ब्रह्मेति सर्वस्य ब्रह्मत्वं प्रतिज्ञाय, तज्जलानिति सर्वविशेषणं हेतुत्वेनोक्त्वा तत्त्वेनोपासनमुक्तम्।

नचायं शमविधिः। वाक्यार्थे लक्षणाप्रसङ्गात्। कारणत्वेन सामान्यत एव

भाष्यप्रकाशः।

एवं पादसंगतिं निरूप्य प्रथमाधिकरणं व्याख्यातुं विषयवाक्योपन्यासमुखेनावतारयन्ति इदमाम्नायत इत्यादि। छान्दोग्ये पञ्चमप्रपाठके उच्यते। अत्रादिपदेन, भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वेत्यादिनाऽणीयस्त्वगुणविशिष्टस्य, तत एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या इत्यादिना स एव ज्यायस्त्वगुणविशिष्ट इत्युक्त्वा पुनः सर्वकर्मत्वादिविशिष्टस्य, तत एतद् ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति, यस्य स्यादद्धा न विचिकित्सास्तीत्येतावतश्च बोधकः शाण्डिल्यविद्याख्यो ग्रन्थः परामृश्यते। अत्र संशयादिकं बोधयितुमेतद् व्याकरिष्यन्तोऽत्र वाक्यद्वयस्य प्रतीयमानत्वादादौ पूर्वं व्याकुर्वन्ति तत्र वाक्येत्यादि। तज्जलानिति तस्माद् ब्रह्मणो जायत इति जं लीयत इति लम्, अनितीत्यन्। ब्रह्मसंबन्धेनोत्पत्तिलयस्थितिकमित्यर्थकं तज्जलानिति सर्वविशेषणमुपासनाहेतुत्वेनोक्त्वा सर्वस्य ब्रह्मत्वेनोपासनमुक्तमित्यर्थः। ननु यथाऽत्र तज्जलानिति सर्वविशेषणं तथा शान्त इत्युपासकविशेषणम्, इतिश्च हेतौ। तथा सत्यत्र जगत उक्तरूपत्वात् सर्वत्र रागद्वेषरहितो भूत्वा वक्ष्यमाणोपासनं कुर्यादिति शमविधिमङ्गीकृत्याग्रे मनोमयत्वादिधर्मवैशिष्ट्यकथनात् तत्र जीवोपासनमेव विधीयत इति पूर्वपक्षमुत्थापयन्ति। तत् कुतो नाद्रियत इत्याशङ्क्याहुः नचायमित्यादि। शमविधिमुपगच्छता, शान्त उपासीतेत्यस्य शमपूर्वकोपासनाविधानरूपे वाक्यार्थेऽ-

रश्मिः।

कानि तृतीये तत्प्रतिपादनछायानुसारीणि चतुर्थ इत्याहुः। माध्वास्तु पादद्वयेनान्यत्र शक्तत्वेन प्रतीतानां शक्तितात्पर्याभ्यां भगवत्परत्वमुच्यते तृतीये तु पादे उभयत्र तथात्वेन प्रतीतानां तथेत्याहुः। अत्रापि क्रमनियामकं न स्पष्टम्। भास्कराचार्यास्तु श्रुतिलिङ्गवाक्यप्रकरणसंदिह्यमानवचनव्यक्तिषु वाक्येषु निर्णयार्थं द्वितीयतृतीयपादावारभ्येते इत्याहुः। एतावत इति एतावतः फलपर्यन्तार्थस्येत्यर्थः। वाक्यद्वयस्येति उपासीतेत्यन्तमेकं वाक्यमर्थैकत्वे सति विभागे साकाङ्क्षत्वात्। अथ खल्वित्यादि ब्रह्मवाक्यमेवेति भाष्यात्। तथापि पौरुषलक्षणापेक्षया प्रामाणिकसौत्रलक्षणस्यैव ज्यायस्त्वात् पूर्वोक्तरूपवाक्यत्वस्यैव भाष्येऽत्रादरात्। वाक्यद्वयस्येति साधु। 'एकतिङ् वाक्यम्' इति पौरुषलक्षणाङ्गीकारे वाक्यचतुष्टयात्। भाष्योक्तेति द्वितीयम्। पूर्वमिति उपासीतेत्यन्तम्। छान्दोग्यीयाग्रेतनसंदर्भस्याग्रे व्याकरणात्। जमिति जायत इति जम्। पञ्चम्या जनेर्डः। लमिति लीयत इति लम्। अनिति कर्तरि क्विप्। विश्वेश्वरस्तु अनितीत्यनम्। अकारमकारलोपौ च्छान्दसौ इत्याह। एवं सर्वस्मिन् ब्रह्मत्वं तज्जलान्त्वं च केन धर्मेणोपासनमित्यत आह सर्वस्येत्यादि। उक्तमिति।

१. एतन्मिताक्षरायां तु तृतीय इति कथ्यते। २. व्याख्यानात्।

सिद्धत्वाच्च । अतः सर्वजगतो ब्रह्मत्वेनोपासनमुक्तम् । इदमेव पुराणादिषु विराड्त्वेनोपासनम् । अतः परमग्रिमवाक्यार्थे संदेहः । क्रतुं कुर्वीतेति । क्रतुर्धर्मो

भाष्यप्रकाशः ।

ङ्गीकृते, उक्तोपासनार्थं शमं संपादयेदिति वचनव्यक्तेः पदद्वयेऽपि लक्षणापत्त्या वाक्यार्थे लक्षणाप्रसङ्गात् । वक्ष्यमाणोपासनाया जीवात्मविषयत्वाङ्गीकारे च, शान्तो दान्त इत्यात्मदर्शनवाक्यादस्यामप्यात्मदर्शनसामान्येन शमस्यावापसिद्धत्वाच्च विधिवैयर्थ्यापातः । क्रतुकरणस्याग्रे वक्ष्यमाणत्वेन तदनुवादाङ्गीकारोऽप्यसंगत इति चकारार्थः । तथाच नैवं पूर्वपक्ष उचित इत्यर्थः । तस्मादयमुपासनान्तरविधिरेवेत्याहुः **अत इत्यादि** । एतदुपष्टम्भायोपबृंहणमाहुः **इदमित्यादि** । तच्चोपासनं प्रकारभेदेन, 'पातालमेतस्य हि पादमूलम्' इत्यादिनोक्तमत उपासनान्तरोपगम एव युक्त इत्यर्थः । एतद्विचारप्रयोजनमग्रे स्फुटिष्यति । प्रस्तुतमाहुः **अतः परमित्यादि** । कथं संदेह इत्याकाङ्क्षायां तं बोधयितुं व्याकुर्वन्ति **क्रतुरित्यादि** । ननु

रश्मिः ।

अन्यस्य हेतुगर्भविशेषणत्वादिति भावः । **शमविधिमिति** शमरूपगुणविधिमित्यर्थः । **मनोमयत्वेत्यादि** कोशधर्मवैशिष्ट्यकथनात्तथा । **उत्थापयन्तीति** शंकराचार्यादयः । **पदद्वयमिति** शान्त इत्यस्य शमोपलक्षकत्वमाधेयतासंबन्धेनोपासनायाः संपादनलक्षकत्वं कार्यतासंबन्धेनेत्येवं पदद्वयेनेत्येवं पदद्वयेपि लक्षणापत्त्येत्यर्थः । वाक्यार्थे पदार्थसमुदायात्मके कारणत्वेनेत्यादिहेतुभाष्यं विवृण्वन्ति स **वक्ष्यमाणेत्यादि** । **वक्ष्यमाणेति** अत्रैव वक्ष्यमाणेत्यर्थः । **अस्यामिति** जीवविषयोपासनायाम् । **आत्मदर्शनसामान्येनेति** शान्तो दान्त इत्यत्र आत्मन्येवात्मानं पश्येत् । अथ यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीत्यात्मदर्शनं सामान्यं तेन । **आवापेति** शमस्यावापसिद्धत्वं च कारणत्वेन बोध्यम् । आवाप आक्षेपात् । यत्तु स क्रतुं कुर्वीतेति विहितमुपासनं सर्वं खल्वित्यत्रानूद्य शमगुणो विधीयते इति रामकिंकरो वृत्तिकृदाह तदसंगतमिति बोधयितुं चकार इत्याहुः **क्रतुकरणस्येति** । **असंगत** इति अनु पश्चाद्वादोनुवादः । अस्य तु पूर्वत्वादनुपदार्थाभावादसंगतः । न च लक्षणेत्थंभूतसूत्रोक्तोन्वर्थः । स क्रतुमिति वाक्यं लक्षीकृत्य वादः सिद्धस्य कथनमनुवाद इत्युद्घोषादिति शङ्क्यम् । सिद्धत्वाभावेन तल्लक्षीकरणासंभवात् स क्रतुमित्यस्य पाश्चात्यत्वात् । **नैवमिति** । एतेन छान्दोग्यभाष्ये यच्छंकराचार्यैरत्र शमविधिरङ्गीकृतः सोपि व्याख्यातः । **उपासनेति** स क्रतुमित्युपासना 'शान्त उपासीत' इत्युपासनान्तरम् । तस्य विधिरित्यर्थः । **उक्तमिति** द्वितीयस्कन्धे । **भाष्ये तु** सर्वं खल्विदं ब्रह्मत्वेनोपासनं विधीयते सर्वात्मकं ब्रह्म शान्तः सन्नुपासीत । स क्रतुं कुर्वीत.........सर्वात्मकं ब्रह्म मनोमयेत्यादिगुणकमुपासीतेत्यर्थ इत्युक्तप्रायम् । तत्रेत्यनुवादपदार्थो नासंगतो यद्यपि तथापि क्रतुपदस्य शक्यो यज्ञो मुने विद्वान् विश्वकोशात् । तत्रान्ये त्वैवकारोपासनान्तरविधिरेवेति । अत इति एवं विधेरसंभवात् । अग्र इत्यत्रैवाग्रे स्फुटिष्यति । गुणाभावस्तु दोषादित्वात् । प्रथमाध्याये वस्तुनिर्धारवाचकम् । तथाहि भाष्ये तज्जलान् सर्वमिदं योगिप्रत्यक्षं साकारं ब्रह्मेत्युपासीतेत्युक्तम् । एतदेव मुण्डके रूपं प्रतिपाद्यते, अक्षरात्परतः पर इत्यनया श्रुत्याऽत्र खल्विदमनुभवसिद्धमित्युक्तम्[1] । परे तु इदि परमैश्वर्य इत्यस्येति परमैश्वर्यवचनादि ब्रह्मेति श्रुत्यर्थान्न

१. अनुभवसिद्धम् ।

यज्ञ इति यावत्। तस्य स्वरूपं मनोमयः प्राणशरीर इति।

उपासनाप्रकरणत्वादुपासनैवैषा। तत्र मनोमय इति प्रमाणभूतो वेद

भाष्यप्रकाशः।

द्रव्यदेवते यज्ञस्य स्वरूपभूते। ते चात्रानुक्ते इति कथं यज्ञत्वावगतिरित्यत आहुः **तस्येत्यादि**। तथाच द्रव्यादिरहितोऽयं ज्ञानयज्ञ इत्यर्थः। ननु यस्य भूयांसो यज्ञक्रतव इत्याहुरित्यादावङ्गोपाङ्गसहितहविस्त्यागरूपक्रियायाः क्रतुत्वेन प्रसिद्धत्वान्मानसस्यास्य कथं क्रतुत्वमित्यत आहुः **उपासनेत्यादि**। तथाच प्रकरणबलाद्रूढिमनादृत्य क्रियतेऽसौ क्रतुरिति योगं चादायोपासनाद्रियत इत्यस्यास्तथात्वमित्यर्थः। तर्हि कोऽत्र विषय इत्यतस्तं प्रकटयन्ति **तत्र मनोमय इत्यादि** वेदस्य मनोमयत्वं तु

रश्मिः।

सर्वं ब्रह्मस्वरूपमिति भावार्थपादे भाष्यादावस्ति। **ज्ञानयज्ञ** इति 'द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञाश्च, मुनयः संशितव्रताः' इत्यत्र शंकरभाष्ये ज्ञानं शास्त्रार्थपरिज्ञानमिति व्याख्यानेन न्यायसंभूतो वेदान्तार्थनिश्चयो ज्ञानं तद्रूपो यज्ञः। भारूप इति श्रुतिविशेषितत्वादित्यर्थः। भाष्यार्थस्तु तस्य क्रतोः स्वरूपं मनोमय अमः सुः। मनोमय इति द्वितीयान्तम् एवं प्राणशरीर इत्यपि द्वितीयान्तं प्रथमान्ते वा पदे आत्मा मनोमय इत्यादिमननम्। एतेन क्रतुर्ध्यानं तस्य विषयमाह मनोमय इत्यादीति प्रत्युक्तम्। अन्वित विभक्त्यपेक्षया तस्य विषय इति शेषपूरणस्य गुरुत्वादिति।

एषा··········गीताधिकरणेऽस्ति। गीतायामप्येतद्विशेषणद्वयमिति संशयेपि··············
भारूपः सत्यसंकल्प इत्यादिकविशेषणानां त्यागः।

यस्य भूयांसो इति श्रुतिः प्रथमाध्याये तृतीयाष्टके संहितायां श्रूयते। अस्या अर्थो भाष्ये द्रष्टव्यः। **मानसस्येति** कामः संकल्प इति श्रुतौ धीर्मन इत्युक्तेर्मानसत्वं ज्ञानस्य क्रियात्वं केन प्रकारेणेति **प्रश्नः**। प्रकरणस्य श्रुतिलिङ्गवाक्यानां प्रबलानामभावात्। निर्णायकत्वं भाष्ये आहुः **उपासनेत्यादि**। प्रथमोक्तोपासीत इत्युपासना स्मरणात्मिका मनोव्यापारविशेषरूपा वा········ऽवर्जनीयप्राबल्यात्क्रताः क्रियारूपत्वस्य श्रुतिलिङ्गवाक्यप्राप्तत्वेपि उपक्रमविरोधादर्थानिर्णायकत्वात्। अतोऽत्र क्रियायां क्रतुपदस्य रूढिमनादृत्य क्रियते उपास्यते इत्यसौ विप्रकृष्टः क्रतुः। क्रतुशब्दार्थस्तु मननमित्यग्रे वक्ष्यते। मनोमययज्ञेनेति मननं करणाधिकरणयोश्चेति करणे ल्युट्। मनुते इत्युक्तम्। मन अवबोधे। ज्ञानं विषयमिति प्रकृत्यंशेन दिशववि····विप्रकृष्टं ज्ञानमुच्यते। यद्यपि तज्जलान् इत्युक्त्या तज्जत्वेन तल्लत्वेन तदन्त्वेन सर्वज्ञानविषयत्वात्तज्जत्वादिप्रकारकसर्वविशेष्यकज्ञानत्वात् तज्जत्वेन सर्वं खल्विदं ब्रह्मेत्यभेद उपपन्नः। यथा काकाज्जातः काकः तथापि लक्षणासंभवेदतो भेदे प्रकारान्तरम्। ब्रह्म तावच्चतुष्पात्। चतुष्पात् ब्रह्म विभातीति श्रुतेः। अतः तज्जत्वेपि चतुर्व्यूहैकत्ववच् चतुर्णां पादानामेकत्वमेकमेवाद्वितीयं ब्रह्मेति श्रुतिसिद्धम्। अपेक्षाबुद्धिजन्यत्वेपि द्वैतस्य द्वैतभिन्नद्वैतसदृशरूपस्य सत्त्वात्। ब्रह्मप्रकरणे 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतावाक्यात्। तत्र तैजसस्य स्वप्नसाक्षिकस्य प्राज्ञस्य सुषुप्तिसाक्षिकस्य च नानात्मकत्वेन ब्रह्मत्वं युक्तम्। 'विश्वो वैश्वानरः प्रथमः पादः' इति विश्वस्य दुःखित्वेन नाशोत्पत्तिमत्त्वेन सशरीरत्वेनाब्रह्मत्वमज्ञानेन प्रतीयते। तत्र प्रतिविधास्यामः। आविर्भावतिरोभाववादे विद्वन्मण्डने नाशोत्पत्तिप्रतीती भ्रान्ते इति स्फुटमुपपादिते। दुःखित्वं त्वज्ञानकृतमात्सर्यादिभिः सुखपरिणाम एव मनःसुखं मात्सर्यादिभिरुपहतं तद्दुःखमित्युच्यते तद्वाराहे चातुर्मास्यमाहात्म्ये स्पष्टम्। शरीरं तु आकाशशरीरं ब्रह्मेत्याकाशपदवाच्यम्। मांसशरीरत्वं तस्मात् वा एतस्मादात्मन आकाश संभूतः

उक्तः।प्राणशरीर इति कार्यकारणयोरभेदोपचारः। अग्रे सत्यसंकल्पादिधर्मवचनात् किमयं विज्ञानमयो जीवो ब्रह्मत्वेनोपास्य उत ब्रह्मैवान्तर्यामी, यः पुराणेषु सूक्ष्म उक्तः।

भाष्यप्रकाशः ।

'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः' ॥

इत्येकादशस्कन्धीयभगवद्वाक्यसंदर्भे स्पष्टम् । कार्यकारणयोरिति वेदप्राणयोः । नन्वेवमत्र वेदरूपस्य विषयस्य स्फुटत्वेन कथं वाक्यार्थे संदेह उच्यत इत्यत आहुः **अग्र इत्यादि**। आदिपदेन, एष म आत्मेत्यादेर्वेदव्यावर्तकस्य जीवसंग्राहकस्य धर्मस्य संग्रहः । **अयं विज्ञानमयो जीव** इति वेदबोधितत्वान्मनोमयः प्राणशरीरो, भारूपत्वेन विज्ञानमयो जीवः प्राणधारणप्रयत्नवान् ब्रह्मत्वेनोपास्यः, स म आत्मेति कथनाच्च । उत सत्यसंकल्पादिपदो-

रश्मिः।

इति तैत्तिरीयोक्ताकाशस्य सुबोधिन्युक्ते भगवानेवैवमवस्थो जात इति प्रकारे मांसस्य तज्जातत्वस्वीकारात् । अंशद्वारेति ज्ञेयम् । तथापि संहितासमाप्तौ नभो मांसानीति । न च छान्दोग्येऽन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांऽसं योणिष्ठस्तन्मनः इति मध्यमांसोऽन्नमन्तरा नेति कथं नभो मांसानीति वाच्यं अशितान्नस्य मात्रादेर्मांसत्वेन पुत्रादेः शरीरत्वाभावात् अतः संहितोक्तं शरीरम् । एवं चतुर्णां ब्रह्मत्वादेकरूपत्वसंभवात् । वेदान्तेषु तिसृषु वृत्तिषु योगादरणात् । ये धातुशब्दा इति पत्रावलम्बनात् । अस्या उपासनायाः तथात्वं ऋतुत्वम् । न चैवं त्यागरूपक्रियात्यागे संहिताया यस्य भूयांऽस इत्यादिश्रुतेर्विरोध इति शङ्क्यम् । वेदे योगरूढ्या ऋतुपदस्योक्तत्यागवाचकत्वेपि वेदान्ते योगमात्रादरणात्त्यागरूपार्थस्य लक्षणान्तरस्य वैदिकत्वेन वेदान्तेऽप्राप्तेः ।

स एष इति अर्थस्तु स एष अपरोक्षः जीवयति इति जीवः ईश्वरो विवरेष्वाधारचक्रेषु प्रसूतिरभिव्यक्तिर्यस्य सः । अभिव्यक्तिः केत्याकाङ्क्षायामाह **प्राणेन** इति । घोषेण पराख्येन नादवता प्राणेन सह गुहामाधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धिचक्रे चोपेत्य प्राप्य वक्रे मात्रा ह्रस्वादिः स्वर उदात्तादिर्वर्णः अकारादिः इत्येवं वैखर्याख्यः स्थविष्ठः अतिस्थूलो नानावेदशाखात्मको भवतीति श्रीधरीय उक्तः । **तथा श्रुतिरपि**। 'चत्वारि वाक्परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहायां त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति' इति श्रुत्यर्थस्तु प्रागुक्तः। प्रमाणभूतो वैखर्याख्यः परा पश्यन्ती मध्यमेत्यनेन विशेषणेन व्यावर्तितः। **वेदे इति** निश्वसितमस्य वेदा इतिश्रुतेर्निश्वासात्मकवायोः कारणत्वं वायुः शब्दतामापद्यते इति प्राचां प्रवादात् वेदः कार्यम् । मनोविकारः मनसः प्राचुर्यं वा प्राणशरीरं यस्य··········शरीरं···············। **अग्रे इति**। भारूपः सत्यसंकल्प इत्यादौ । **धर्मस्येति** आत्मत्वादिरूपस्य । **वेदेति** वेदस्य मनोमयत्वं प्राणशरीरत्वं चोक्तम्। तद्बोधितत्वेन लक्षणातो मनोमयः प्राणशरीरश्च इत्युक्तम्। सिद्धान्ते योर्थः स त्वग्रे वक्तव्यः। जीव प्राणधारण इति धातुपाठात् जीवपदार्थमाह पूर्वपक्षी **प्राणधारणे इति**। एष मे आत्मान्तर्हृदय इति पठ्यते, **स त** इत्यन्तर्यामिब्राह्मणे । **य इति ननु ब्रह्मणो व्यापकत्वाज्जीवस्य परिच्छिन्नत्वात् कथमनयोः सामानाधिकरण्यं येन एवं संशय**

तत्र पूर्ववाक्ये जडस्य जगतो ब्रह्मत्वेनोपासनस्योक्तत्वाज्जीवस्यापि ब्रह्मत्वेनोपासनमेव युक्तं, न त्वाहत्यैव ब्रह्मवाक्यं भवितुमर्हति। विज्ञानं ब्रह्म चेद्वेदेति शाखान्तरे स्पष्टत्वाच्च। तस्मात् कार्यकारणयोरभेदाज्जीव एव ब्रह्मत्वेनोपास्य इत्येवं प्राप्ते, उच्यते।

भाष्यप्रकाशः।

क्तधर्मवैशिष्ट्याद् ब्रह्म वा, यः पुराणेषु 'केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्' इत्यादौ सूक्ष्मो हृदयान्तर्वर्तित्वेनोक्त इति संदेह इत्यर्थः। इह, तत्र मनोमय इत्यादिनोपासनविषयबोधनेनाधिकरणसंगतिरपि बोध्यते। पूर्वपादे जन्मादिसूत्रे ब्रह्मणः कर्तृत्वमुक्त्वा तल्लिङ्गाद्यधिकरणचतुष्टयेनातिव्याप्तिपरिहारे क्रियमाणेऽन्तिमेनानुगमाधिकरणेन जडविशिष्टे जीवेऽतिव्याप्तिनिवारणं कृतम्। तदस्मिन्नधिकरणे कर्तृत्वनिर्वाहकाणां मनोमयत्वादिसर्वकर्मान्तानां धर्माणां जीवे बोधनेन ब्रह्मणि तदभावात् कर्तृत्वासंभवं बोधयित्वा पूर्वपक्षे आक्षिप्यते। तेनाक्षेपः संगतिः। पूर्वपक्षमाहुः तत्र पूर्वेत्यादि। आहत्येति। अकस्मात् प्रबलहेतुं विनेति यावत्। तथाच द्वयोर्लिङ्गस्य सत्त्वेन तस्यानिर्णायकत्वादुपक्रमस्यासंजातविरोधत्वेन बलिष्ठत्वात् तत्र च जीवस्यैवोक्तत्वात् पूर्ववाक्यविचारणेऽपि प्रकरणस्यैव नियामकतया औचित्याच्च नास्य ब्रह्मवाक्यत्वम्। किंतु शाखान्तरोक्तविज्ञानमयस्यात्र भारूपत्वेन प्रत्यभिज्ञानात् कार्ये सशरीरे जीवे कारणभूतस्य ब्रह्मण उपचारं विधाय सत्यसंकल्पादिधर्मवत्तया वेदाभिमानिदेवता जीवो वा, स्वजीव एव वोपास्य इत्यर्थः। सिद्धान्तं वक्तुं सूत्रं पठन्ति।

रश्मिः।

इत्याकाङ्क्षायां य इति भाष्यं विवरामासुः यः पुराणेषु इति। तथा च शाब्दसंदेहो न तु चाक्षुष इति पूर्वोक्तत्वात्। पूर्वोक्तसादृश्यस्य दूरत्वोपाधिगृहीतस्य शाब्दसंदेहे प्रयोजकत्वात्। य अन्तर्यामी पूर्वपादत्रिसूत्र्याः संगृहीतस्य शास्त्रार्थस्यैवाग्रे प्रपञ्च इत्युक्तम्। तदस्य पादस्य कथमित्याकाङ्क्षायां संगतिमप्याहुः इहेति। उपासनेति इह तत्रेत्यादेः पूर्वपक्षग्रन्थत्वात्तदनुसारी ग्रन्थः सिद्धान्ते तु मननात्मक–क्रतुविशेषणानि मनोमय इत्यादीनि तेन पूर्वपक्ष एवाक्षेपसंगतिः। सिद्धान्ते तु तन्निवारणमिति। कर्तृत्वेति जगज्जन्मादिकर्तृत्वं पूर्वपादोक्तं निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वं तस्यासंभवमित्यर्थः। आक्षिप्यत इति जीवे मनोमयत्वादिसंनिवेशे निरङ्कुशजगज्जन्मादिकर्तृत्वेन शास्त्रप्रतिपाद्यत्वस्य कुलालवत् संभवात् न ब्रह्म पूर्वपादोक्तकर्तृत्वेन शास्त्रं प्रतिपाद्यमित्याक्षिप्यत इत्यर्थः। आक्षेपो भर्त्सनम्। पूर्वाधिकरणे सर्वात्मकब्रह्मण उपासनानिरूपणेन स्मृतस्यैतदधिकदशापूर्वपक्षभर्त्सनोपेक्षानर्हत्वात् पूर्वपक्षेणाक्षेपः संगतिरित्यर्थः। नन्वधिकरणस्य संगतिघटितत्वेनांशतः संगतौ कुतः संगतिनिरूपणमितिचेन्न घटितसंगतेरेवाक्षेपरूपाया निरूपणात्। द्वयोरिति ब्रह्मजीवयोः। तस्य लिङ्गस्य। उपक्रमस्य सर्वं खल्विदमित्यस्य। जीवस्येति तज्जलानिति हेतौ सर्वे जीवा इति मुण्डके जीवव्युच्चरणश्रावणात् जीवस्य ब्रह्माव्युच्चारणादेवकारः। पूर्वेति सर्वं खल्विदमिति पूर्ववाक्यविचारणे। प्रकरणस्येति ब्रह्मत्वेन जीवोपासनाप्रकरणस्य। विज्ञानमिति भाष्यं विवृण्वन्त एव तस्मादित्यादि भाष्यं विवृण्वन्ति किं त्विति शाखान्तरं तैत्तिरीयम्। तदुक्तविज्ञानमयस्य अन्यो अन्तरआत्मा विज्ञानमय इतिश्रुत्युक्तस्यात्र छान्दोग्ये भारूपत्वेनेत्यर्थः। ननु प्रत्यभिज्ञानस्य किं प्रयोजनमिति चेन्न भारूपपदेन जीवप्राप्तावपि शरीराप्राप्त्या सत्यसंकल्पादिसमावेशाभावेन

सर्वत्र प्रसिद्धोपदेशात् ॥ अथ खल्वित्यादि ब्रह्मवाक्यमेव । कुतः । **सर्वत्र प्रसिद्धोपदेशात्** । कुर्वीतेत्युपदेशो, न तूपासना । तत्र परमशान्तस्य सर्वस्य जगतो ब्रह्मत्वेनोपासनया शुद्धान्तःकरणस्य सर्ववेदान्तप्रसिद्धब्रह्मोपदेश एव युक्तो मननरूपो न तु क्वचित् सिद्धस्य जीवस्योपासना ।

भाष्यप्रकाशः ।

सर्वत्र प्रसिद्धोपदेशात् ॥ कथमयमुपदेश इत्याकाङ्क्षायामाहुः तत्रेत्यादि । तथाच सर्वं खल्विति पूर्ववाक्ये यज्जगतो ब्रह्मत्वेनोपासनं तद्भगवत एव विराट्त्वेनोपासनम् । तस्य काल्पनिकत्वाभावबोधनायैवात्र तज्जलानिति हेतूक्तिः । तत्फलं चान्तःकरणशुद्धिः ।

'स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः ।
तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः' ॥

इति तद्विधायकवाक्ये तथा सिद्धत्वात् । एवं सति पूर्वोक्तोपासनाफलभाजा पुनः किं कार्यमित्यपेक्षायां, अथ खल्वित्यादिना पुरुषस्योपासनानुरूपफलभाक्त्वकथनेन विराट्त्वेनोपासनायामन्यत्र सङ्गाभावेऽप्यन्ते या मतिः सा गतिरिति न्यायेन, यं यं वापीति गीतावा-

रश्मिः ।

भापदार्थमन्यथयेत्तन्मा भूदिति पदार्थान्यथाभावाभावरूपप्रयोजनत्वात् । न च सत्यसंकल्पपदेनैव शरीरपरामर्शाच्छाखान्तरीयप्रत्यभिज्ञानस्य किं प्रयोजनमिति वाच्यम् । भारूपस्य शाखान्तरीयविज्ञानमयप्रत्यभिज्ञाभावे सत्यसंकल्पादिकं निराश्रयं न श्रुतिर्वदेत् । एतेन विज्ञानमयो जीव इत्युक्ते भाष्ये ननु भारूपो जीव इति कुतो नोक्तमिति कुचोद्यं निरस्तम् । **वेदाभीति** मनोमय इति श्रुतेः । भारूप इति श्रुतेर्जीवः स्वजीवौ वा । **तस्येत्यादि** उपासनस्य वाचो धेनुमुपासीतेत्यत्र वाचो धेनुत्वस्य काल्पनिकत्वं यथा तथात्र काल्पनिकत्वं नास्तीति बोधनायैवात्र जगत् ब्रह्मसमवायिकारणकत्वाद् ब्रह्मेति तज्जलानिति सर्वं तज्जलानतस्तज्जलान्त्वादिति हेतोरुक्तिरित्यर्थः । एतावता शुद्धान्तःकरणस्येत्यन्तं भाष्यं विवृतम् । इदानीं सर्ववेदान्तेति भाष्यमुपबृंहणेन योजयन्तो विवरामासुः **स सर्वधीत्यादिना** । **तद्विधायकेति** अयं हेतुरुपायान्तरमित्यनेनान्वेति तथा चैतस्मिन् वाक्ये तथासिद्धत्वात् विराडुपासनानन्तरं चित्तशुद्धौ सत्यां फलान्तरस्य सद्भावेपि चित्तस्य भगवद्भजन एव कर्तव्यत्वेन सिद्धत्वान्मननात्मकमुपायान्तरं कर्तव्यमित्याशयेन मननात्मकं क्रतुमाहेत्यर्थः । मनुतेऽनेनोपदेशेनेति मननात्मकम् । वाक्यं तु द्वितीयस्कन्धे प्रथमाध्यायसमाप्तौ विराडुपासनमुक्त्वोक्तम् । एतदर्थस्तु ननु फलान्तरविषये चित्तसद्भावे किं विधेयम् । 'उद्यतस्य हि कामस्य प्रतिवादो न शक्यते' इति न्यायात्तत्राह **स सर्वधीवृत्तिभिः** सर्वेषां ज्ञानजनकेन्द्रियवृत्तिभिरनुभूतं सर्वं येन यत्किंचित्फलं येन केनचिदुपभोग्यं तत्तदिन्द्रियद्वारानेनैकेनोपभोग्यम् । ननु कथमस्य प्रेरितुर्भोक्तृत्वं तत्तदधिष्ठातॄणां विद्यमानत्वात्तत्राह **आत्मेति** तत्तदिन्द्रियाधिष्ठातॄणां दिगादीनां विद्यमानत्वेपि यथात्मा सर्वेन्द्रियानुभूतसर्व एवं भगवानपि तमप्येकदेशाभिमानिनमवगणय्य तेनाधिष्ठितैरेवेन्द्रियैः सर्वमनुभवतीत्यर्थः । नन्वात्मनः इन्द्रियाधिष्ठातॄणामप्रीतत्वात् आत्मीयत्वेनैवेन्द्रियाणां ग्रहणात् तस्य स्वगृहीतमात्रानुभवो भवतु नाम भगवतस्तु समष्टिरूपस्य व्यष्टिषु देहस्थितकीटेष्विव प्रतीत्यभावात् आत्मीयत्वाभावाच्च तदिन्द्रियाणां कथं सर्वधीवृत्तिभिः भगवाननुभवति तत्राह **स्वप्नजनेति** । स्वप्नजनानामीक्षिता द्रष्टा

शाखान्तरे त्वग्रे आनन्दमयस्य वक्तव्यत्वात्तथा युक्तम्। न त्विह तथा। तस्मादानन्दरूपप्राणशरीररूपो वाक्यार्थः ॥ १ ॥

भाष्यप्रकाशः।

क्येन चान्ते सर्वात्मकत्वमेव, न तु परप्राप्तिरिति तादृशा तदर्थमुपायान्तरं कर्तव्यमित्याशयेन तमाह स क्रतुं कुर्वीतेति। स उक्तोपासनया शुद्धान्तःकरणोऽपि, यथा क्रतुरित्युक्तरीत्योपासनानुरूपमेव फलं प्राप्नोतीत्यतो मनोमयेत्युक्तप्रकारेण मननात्मकं क्रतुं कुर्वीतेति सर्वत्र वेदान्ते सर्वान्तरत्वेन प्रसिद्धस्य ब्रह्मण एव मननोपदेशस्तत्त्वेव भयमिति श्रुत्यन्तरे तस्यावश्यकत्वश्रावणाद्युक्त इति शाखान्तरसिद्धा जीवोपासना नाङ्गीकर्तुं शक्येत्यर्थः। ननु यदि मयटो विकारार्थमनादृत्यात्र ब्रह्मवाक्यत्वमङ्गीक्रियते तर्हि शाखान्तरेऽपि तथा वक्तुं शक्यत्वाज्जीवोपासनाया उच्छेद एव स्यादित्यत आहुः **शाखान्तर** इत्यादि। तथा चैवं वैलक्षण्यस्य स्फुटत्वान्न तदुच्छेद इत्यर्थः। एवं वाक्यं व्याख्याय सिद्धमाहुः **तस्मादि**त्यादि। यस्मादेतादृशस्य मननमेव युक्तम्। तच्चानपेक्षिताङ्गोद्वापेनापेक्षिताङ्गावापेन वाक्यार्थनिर्धारणे भवतीत्ये-

रश्मिः।

यथैकः स्वप्नस्य मायिकत्वेपि ज्ञानं न मायिकं तस्यात्मरूपत्वात्। तत्र स्वप्नदृष्टाः पुरुषाः सर्वे पश्यन्तीति प्रतीतिरस्ति तत्र पुरुषदेहानां मायिकत्वं 'मायामात्रं तु कार्त्स्न्येनाभिव्यक्तस्वरूपत्वात्' इत्यत्र सिद्धं तथापि तन्निष्ठा या प्रतीतिः सा न मायिकी तत्र चैतन्यान्तराभावात् भगवतो जीवस्य चैतन्यं भवतीति विशेषस्तु सुबोधिन्यां द्रष्टव्यः। यद्वाक्षेपादन्तःकरणशुद्धिहेतुरयम्। **एवमिति** अन्तःकरणे शुद्धे सति। **तदर्थ**मिति परप्राप्त्यर्थम्। **मनोमये**त्यादि मनोमयादिपदवाच्य आत्मा सप्रकारकज्ञानत्वात् ब्रह्म तु निष्प्रकारकज्ञानत्वात्। मनोमयो न भवतीति पुंलिङ्गनिर्देशादवगम्यते। इति प्रकारेण। मननात्मकत्वं क्रतोः मननरूप इतिभाष्यात्। तत्त्वेन भयं विदुषोऽमन्वानस्येतिश्रुतेश्च मनुते इति मन्वानो न मन्वानोऽमन्वानः तस्य विदुषः। उचितत्वमपि सर्वस्य ब्रह्मत्वज्ञानानन्तरं मननस्य। अन्यथा पापमन्यथाप्रतिपादने स्यात् योन्यथा सन्तमिति श्रुतेः। विश्वकोशे क्रतुर्यज्ञे मुनेर्भिदीति मुनिविशेषे क्रतुपदं बाधितं सत् यद्यज्ञं वक्ति मनुतेऽनेनेति मननं ल्युट् अवबोधानुकूलं यज्ञं मननं वक्ति मननशीला मुनय इति क्रतुपदं संकल्पे ध्याने च शंकरभाष्ये यागे तु प्रसिद्धमेवैवं बह्वर्थेषु भगवदिच्छया सत्सु मननरूपोप्यर्थः क्रियते ब्रह्मप्राप्तीच्छुभिरिति योगेन क्रतुर्मननं 'ये धातुशब्दा यत्रार्थे' इत्यस्याः पत्रावलम्बनकारिकाया वेदराशिमात्रविषयत्वेन मनने समुदायशक्तिरपि। अमन्वानस्येत्यत्रामननं कुर्वाणस्येत्यत्र वेदराशित्वाद्योगमात्रम्। अत्रावबोधाविशेषेपि बोधनस्मरणात्मकं युक्तिभिरनुचिन्तनस्यापि मननत्वात्। आत्मा वा अरे इत्यत्र श्रुतौ वेदराशित्वेपि अवबोधाविशेषेर्थेपि मननस्यानुचिन्तनात्मकबोधाङ्गीकारात्। ननु मननपदं विहाय क्रतुपदोपसंदाने को हेतुरिति चेच्छृणु जगतो नित्यत्वप्रतिपादनमात्मसेवार्थम्। अनित्यत्वे प्रतिमानामनित्यत्वेन सेवा न स्यात्तदर्थं क्रतुपदं साग्निको निरग्निकोपि पञ्चरात्रोक्तो मननेन प्राप्यते इति ध्वन्यते इति ज्ञायते सा सेवा सिद्धान्तमुक्तावल्यामुक्ता। **तस्येति** मननस्य। **शाखेति** तैत्तिरीयशाखासिद्धेत्यर्थः। मयट इति मनोमय इत्यत्र। **शाखेति** तस्माद्वा एतस्माद्विज्ञानमयादन्यो अन्तर आत्मा आनन्दमय इति श्रुत्या वक्तव्यत्वादितिभाष्यार्थः। **तदुच्छेद** इति विज्ञानमयजीवोपासनोच्छेद इत्यर्थः। **अङ्गेति उद्वापो** नाम प्रकृतपरत्वेन प्रतीयमानस्यान्यपरत्वापादनम्। **आवापो** नाम न प्रतीयमानस्य प्रकृतपरत्वा-

भाष्यप्रकाशः ।

तत्पूर्ववाक्यविचारे, एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानित्यादिश्रुतिभिर्जगज्जनकत्वस्य वेदे सत्त्वेऽप्यस्य महतो भूतस्य निःश्वसितं यदृग्वेदो यजुर्वेद इत्यादिश्रुत्या वेदस्य ब्रह्मजन्यत्वावधारणे निरङ्कुशस्य जगज्जनकत्वस्य वेदे अभावाद्, 'यो ब्रह्माणं विदधाति पूर्वं, हिरण्यगर्भं पश्यति जायमानम्' इत्यादिभिर्हिरण्यगर्भेऽप्यभावादतादृशजनकत्वस्योद्घापेन, निरङ्कुशस्य, यतो वेत्यादिश्रुत्युक्तस्य तस्यावापेन च ब्रह्मपदस्य परवाचकत्वे निर्धारिते तस्य वाक्यस्य परब्रह्मरूपो वाक्यार्थो मतो भवति । तथैतद्वाक्यमननेऽपि सत्यसंकल्पेत्यारभ्य यावन्ति विशेषणानि तेषां मनोविकारभूते वेदे हिरण्यगर्भे जीवान्तरे चासंभवात् तद्विशिष्टे मनोमये मन्तव्ये, मनसैवानुद्रष्टव्यः, स मानसीन आत्मा जनानां, मनसा तु विशुद्धेनेत्यादिश्रुतिभिस्तादृश-

रश्मिः ।

पादनम् । लक्षणान्वयोग्रे वाच्यः । **एत**दिति एतस्य 'स क्रतुं कुर्वीत मनोमयः प्राणशरीरः' इत्यादेः पूर्ववाक्यं सर्वं खल्वित्यादिवाक्यं तस्य मीमांसात्र जगत्सामानाधिकरण्यात् 'सर्वं खल्विदं ब्रह्म'इत्यत्र ब्रह्मपदं वेदवाचकं हिरण्यगर्भवाचकं वा सुपां सुलुगिति सूत्रेण सोर्लुकि ब्रह्मन्नित्यत्र वर्णलोपात् ब्रह्मन् पुंसि चेति लिङ्गानुशासनसूत्राद्वा यथा ब्रह्मा इति ब्रह्मवाचकं तथा ब्रह्मेति हिरण्यगर्भवाचकमित्युत प्रसिद्ध्या ब्रह्मवाचकमिति तस्यां सत्याम् । **वेद** इति । एत इति **असृग्र**मिति वेदे । **अस्ये**ति श्रुतिर्मैत्रेयीब्राह्मणेस्ति । **निरङ्कुशस्ये**ति निरङ्कुशजगज्जन्मादिकर्तृत्वेन शास्त्रप्रतिपाद्यत्वं ब्रह्मत्वं तस्य जिज्ञासाप्रस्तावात् तल्लक्षणांशस्येत्यर्थः । तर्हि हिरण्यगर्भे इदं लक्षणं भविष्यति नेत्याहुः **यो ब्रह्माण**मिति । विदधाति विशेषेण धारयति आश्रयत्वात् । जायत इति जायमानस्तम् । जनी प्रादुर्भावे शानच् । **तद्वि**ति सत्यसंकल्पादिविशिष्ट इत्यर्थः । आनन्दरूप इत्यादिभाष्यं उपपादयामासुः **मनसे**त्यादिना । **मनसा त्वि**ति । **तादृशे**ति विशुद्धमनोग्राह्यत्वं 'दुःखाभावः सुखं चैव पुरुषार्थद्वयं मतम्' 'तमेकमानन्दनिधिं भजेत' इतिवाक्याभ्यां सर्वं खल्वित्यत्र जगति प्रतिमानन्दादौ विषयानन्दस्य 'तस्यैवान्यानि भूतानि' इतिश्रुतेर्ब्राह्मीयत्वेपि बन्धकत्वात् एनमुद्धरिष्यामीति मृदादावाविर्भूते विशेषो जगतो यतोऽत आनन्दनिधिं भजेतैव । गताधिकरणे तेनेदमधिकरणं पूर्वोक्तस्य सर्वस्य निगमनायेत्युक्तम् । तेनास्याधिकरणस्य प्रसङ्गसंगत्या जिज्ञासितं जन्माद्यधिकरणोक्तकर्तृ । समन्वयाधिकरणोक्तसमवायि । ईक्षत्यधिकरणोक्तप्रज्ञात्मा । आनन्दमयाधिकरणोक्तानन्दः । अन्तस्तद्धर्माधिकरणोक्तलोकपालः । तल्लिङ्गाधिकरणोक्ताकाशः । अतिदेशाधिकरणोक्तप्राणः । ज्योतिश्चरणाधिकरणोक्तं ज्योतिः । अनुगमाधिकरणोक्तप्राणः । अत्र मननोपक्रमस्यासंजातविरोधित्वेन मनोमय आनन्दः मयटो लक्षणया प्राचुर्याधारबोधकत्वात् । प्राचुर्यस्य प्रचुरधर्मत्वेन प्रचुरसमानाधिकरणानन्दधर्मत्वात् । प्राणशरीरः प्राणः शरीरं यस्य शरीरस्य साकारत्वमानन्दावरणत्वात् । आनन्दस्य साकारत्वं 'अन्नमयादिषु यश्चरमः' इतिवेदस्तुतौ सिद्धम् । भारूपः ज्योतिः सत्यसंकल्पः द्वितीयः प्राणः जिज्ञासितश्च जिज्ञासाधिकरणोक्तः । आकाशात्माकाशः । सर्वकर्मा लोकपालः । सर्वकामः प्रज्ञात्मा काम इच्छा । सर्वगन्धः पृथ्वीसमवायि । सर्वरसः पृथ्वीजलसमवायि । सर्वमिदमभ्यात्तं समवायि । इह कपाले घटो भविष्यतीति प्रागभावविषयिण्यां प्रतीतौ समवायिनोऽधिकरणत्वात् । अवाकी कर्ता । वक्ता । उपलक्षणमेतत् । करणशून्यः कार्यकर्ता जगत्कर्ता । अनादरः लीलेतरानपेक्षः । तत्रोक्तवाक्याभ्यां आनन्दरूपप्राणशरीरस्य प्रासव्यत्वाद्वाक्यार्थत्वमन्येषां विशेषणत्वम् । अत आनन्दमयस्य तेन मनोग्राह्यत्वेन विकारो-

भाष्यप्रकाशः।

मनोग्राह्यत्वेन मनःप्राचुर्याद्विकारोद्धापेन प्राचुर्यावापेन चानन्दमयरूपो मनोमयः, को ह्येवान्यात् कः प्राण्यादिति प्राणितृत्वश्रावणात् प्राणस्वरूपविग्रह इति मननादानन्दमयरूपो यः प्राणशरीररूपोऽन्तर्यामी सोऽत्र वाक्यार्थ इत्यर्थः। अत्र विषयवाक्ये, भारूप इति प्रकाशरूपो ज्ञानात्मा। सत्यसंकल्प इति, सत्या अवितथा विषयाऽव्यभिचारिणः संकल्पा विचारा यस्य तादृशः। आकाशात्मेति, व्यापको दुर्ज्ञेयो नीरूपो नीलः सर्वाधारो नामरूपनिर्वाहकः। सर्वे

रश्मिः।

द्धापेनेत्यर्थः। अत्र हेतुः मनःप्राचुर्यादिति। तथा च प्रकृतमनःपरत्वेन प्रतीयमानस्य विकारे मयटो मनः संकल्पविकल्पात्मकमनोविकारत्वापादनेनान्योन्यपरत्वेन आनन्दमयवाचकमनोमयप्रतीयमानस्य प्राचुर्ये मयटः प्रकृतं मनः तत्परत्वापादनेनेत्यर्थः। संयोगदलमुक्त्वा वियोगदलं वदन्तः प्राणशरीरपदार्थमाहुः **को ह्येवेति**। **प्राणे**ति साकारानन्दावरणत्वाद्विग्रह इत्यर्थः। **आनन्दे**ति मनोमयपदवाच्यानन्दमयरूपः। ननु तत्र मनोमय इति प्रमाणभूतो वेद उक्त इति भाष्यविरुद्धोर्थ इति चेन्न। अनुपपत्तिसूत्रे प्राणस्यानन्दरूपता त्वित्यादिग्रन्थेनालौकिकानन्दरूपप्राणग्रहणात् तादृशप्राणप्रतिपादकमनोमयोपस्थित्या मनोमयपदवाच्यानन्दमयरूप इति व्याख्यानस्यादुष्टत्वात्। क इत्याकाङ्क्षायामन्तर्यामीति षष्ठाधिकरणेऽमृतत्वात्सर्वहृदयदेशवर्ती भोगविशेषवान् भक्तिमार्गोपयोगी। अत्र पादेर्थबलविचारेण निःसंदिग्धोर्थो भोगविशेषवान् विशेष्यं मतम्। **वाक्यार्थ** इति सत्यसंकल्पत्वादिधर्मविशिष्टमनोमयरूपप्राणशरीररूपोन्तर्यामी वाक्यार्थः। ननु भाष्येऽन्तर्यामिपदं नास्ति मनोमयप्राणशरीरपदयोरर्थौ प्रतीयेते वाक्यं च मननस्य मनोमय इत्यारभ्यानादर इत्यन्तमिति पूर्वोक्तं कथमिति चेन्न। भाष्यप्रकाशोक्तदिशा मनोमयप्राणशरीरेण रूप्यत व्यवह्रियते यथा घटपदेन रूप्यते शब्दरूपरसगन्धस्पर्शादिः पदार्थः। यस्मिन्नुच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स प्रातिपदिकार्थ इति सिद्धान्तकौमुद्यां तथोक्तेस्तथाभारूपादिरमृतोन्तर्यामिरूपोर्थश्चतुर्थपुरुषार्थरूपत्वाद्वाक्यार्थ इति। मयोमयः प्राणशरीर इति विशेषणोक्तस्य सर्वत्र प्रसिद्धस्य मननोपदेशाज्ज्ञायते शब्दवान् रूपवान् रसवान् गन्धवान् स्पर्शवान् घट इत्यनुक्तावयं घटोस्तीत्यादिस्थले घटनिष्ठा सत्ता वाक्यार्थोन्यथा तु शब्दादिमद्घटनिष्ठा सत्ता वाक्यार्थ इति चेदानन्दरूपप्राणशरीरो भारूपसत्यसंकल्पादिरूपो वाक्यार्थो नापि तु उभयरूपवाक्यार्थान्तर्गतो भारूपादिरिति न तु पृथगिति अन्तर्यामिभारूपादिरूपो वा अन्यत्र तु मनोमयः प्राणशरीर इति पदद्वयं जीवसाधारणं भाष्येष्वुपात्तम्। ननु भारूपत्वं जीवस्य ज्ञानतिरोभावान्नास्तीतिभाष्ये भारूप इति तृतीयं पदं न लिखितम्। अत्र तु सत्यसंकल्पेत्यारभ्य यावन्ति विशेषणानीत्युक्तम्। तद्भाष्ये तृतीयं पदं न्यूनमिति सूचयतीतिचेन्न। भाष्ये हिरण्यगर्भजीवस्याविवक्षणेनात्र च विवक्षणेन पदत्रयं मनोमयप्राणशरीरभारूपमित्यदोषात्। प्रकाशे हिरण्यगर्भस्य जीवत्वं तेन अविवक्षितत्वं च जीवपुरःसरेण संदेहविषयत्वाय। भाष्ये तु हिरण्यगर्भस्येश्वरत्वरूपपुरःसरेण संदेहे अविवक्षितत्वमिति बोध्यम्। अन्तर्यामिणोऽप्रकृतत्वात्समन्वयाध्याये वाक्यार्थत्वम्। **नीरूपो नील** इति। नन्विदं विरुद्धं नीरूपस्य नीलत्वासंभवात् द्रव्यस्याकाशस्य च द्रव्यत्वादिति चेदत्रैवं ज्ञेयम्। बहवस्तु आकाशस्य रूपवत्त्वे किं मानं न तावत्प्रत्यक्षं आकाशं तद्रूपं वा पश्यामीत्यप्रत्ययात्। नीलं नभ इतिप्रतीतेर्भ्रान्तत्वात्। न च रूपवतः प्रत्यक्षविषयता न नियता परमाणौ व्यभिचारादिति वाच्यम्। परमाणौ महत्त्वरूपसहकारि-

भाष्यप्रकाशः ।

कामा निर्दोषा यस्येति सर्वकामः । एवमग्रेऽपि सर्वमिदं जगद् अभ्यात्तः, अभि अन्तर्बहिरुभयत्र गृहीतो ज्ञातः । अवाकी । उच्यतेऽनयेति वाक् । वागेव वाकः । करणे घञ् । स यस्य वर्ततेऽसौ वाकी । तद्भिन्नोऽवाकी । उपलक्षणमिदम् । कार्यं कुर्वन्नपि करणशून्यः । अपाणिपादो जवनो ग्रहीतेति श्रुत्यन्तरात् । अनादरः । न विद्यत आदरः संभ्रमो यस्य । आप्तकामत्वात् । सर्वानपेक्षः । अभिसंभवितास्मीति प्राप्तास्मि । अद्धेति निश्चयः । एतादृशस्तं प्राप्नोतीति शेषः । स्फुटमन्यत् । ननु भवत्वयं विषयवाक्यार्थस्तथापि सूत्रे पक्षानुल्लेखात् कथं व्याख्या-

रश्मिः ।

भावात् । न चाकाशो रूपवान् वायुभिन्नत्वे सति महत्त्वात् पृथ्वीवत् इत्यनुमानं मानमितीति शङ्क्यम् । द्रव्यत्वस्य तत्रोपाधित्वात् । नापि क्रियारहितत्वे सति भूतत्वात् यन्नैवं तन्नैवं कालवदिति द्रव्यारम्भकत्वस्योपाधित्वात् आद्यक्षणीयघटादौ व्यभिचाराच्च । बहिरिन्द्रियग्राह्यविशेषगुणवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यधर्मवत्त्वस्य कालादीतरद्रव्यत्वस्य वा भूतत्वस्य वा तत्रापि सत्त्वात् । किं च यदि आकाशो रूपवान् स्यात् परममहान्न स्यात् बहिरिन्द्रियग्राह्यो वा स्यात् स्पर्शवान् वा स्यात् पृथिव्यादित्रयं वा स्यादिति बाधकतर्कपराहतं रूपवत्त्वमाकाशस्येत्याहुः तदिदं साहित्यसर्वस्वकारो नानुमन्यते तथाहि नेदमुचितं नीलं नभः पश्यामीति निःशङ्कं सार्वजनीनप्रत्ययात् न चासौ भ्रमः किमसौ विषयदोषः सादृश्यनिबन्धनस्तत्कारणीभूत इदं रजतमितिवदुत करणदोषः पित्तादिनिबन्धनः शङ्खः पीत इतिवत् नाद्यः असंभवात् । विषयगतदोषजन्यभ्रमत्वावच्छिन्नं प्रति धर्मप्रमोषसहकृतारोपस्य तन्त्रत्वात् प्रकृते तदभावात् । नभस्त्वस्यावच्छेदकताया व्यवस्थापयिष्यमाणत्वात् । न द्वितीयः अस्य प्रत्यक्षस्य सार्वजनीनत्वात् युगपत्सर्वजनकरणदोषस्य वक्तुमशक्यत्वात् । न चेन्द्रजालिकमायायां यथा वस्तुग्रहणप्रतिबन्धरूपः करणगतो विषयगतो वा दोषः सार्वजनीनः । अत्र शोधपत्रं मत्कृतटिप्पणभाष्यप्रकाशेस्ति । **नामरूपेति** 'आकाशो ह वै नामरूपयोर्निर्वहिता' इतिश्रुतेरित्यर्थः । आकाश इवाकाशोऽव्याकृताख्यः नामरूपयोर्जगद्बीजभूतयोर्निर्वहिता निर्वोढा व्याकर्तेति यावदिति श्रुत्यर्थः । **अग्र** इति सर्वकर्मा सर्वगन्धः सर्वरस इत्यत्र सर्वे गन्धाः सर्वे रसाः सर्वकर्मा पूर्वं पठितः **सर्वकामात्** सर्वाणि कर्माणि यस्य । **ज्ञात** इति ग्रह उपादाने चक्षुषा रूपं गृह्णाति बुद्ध्या पदार्थो गृहीत इत्यादौ रूपादिर्गृहीतो ज्ञातो वेति पर्यायात् । **वागिति** वाक् वागेवेत्येतत् संपातायातम् । एवं चोच्यतेऽनयेति वाकः करणाधिकरणयोश्चेति घञ् । एतेनोच्यतेऽनया सा वाक् वागेव वाक इति प्रत्युक्तम् । **प्राप्तास्मि** तत 'एष मे आत्मान्तर्हृदयमेतद् ब्रह्मैतमितः प्रेत्याभिसंभवितास्मि यस्य स्यादद्धा न विचिकित्सास्तीत्याह शाण्डिल्यः शाण्डिल्यः' इत्यत्र श्रुतौ । प्रेत्य मृत्वा प्राप्तास्तीत्यर्थः । अभिगुप्त इति केचित् । **स्फुटमिति** विचिकित्सापदस्य संशयार्थकत्वम् । इत्याह शाण्डिल्यः शाण्डिल्य इत्यस्योपासनायाः सदाचाररूपत्वं च । आगतेर्थे रूप्यम्, स्फुटमित्यर्थः । आदरे वीप्सा । अस्या एवात्र विषयवाक्यत्वावधृतौ बीजं वक्तुमाशङ्कते कश्चित् **ननु भवत्विति** । **पक्षेति** । ननु सूत्रेषु साध्योल्लेखोपि संभवति उक्तं च भाष्ये केचिदत्र जन्मादिसूत्रं लक्षणत्वादनुमानमिति वर्णयन्तीतिचेन्न तदुक्तज्ञानं नोपनिषत्फलं समर्पयेत् प्रकृते 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतेरुपनिषज्ज्ञानस्य विवक्षितत्वात् । ननु तथापि पक्षपदोपादानात्समन्वयेक्षत्यधिकरणयोरपि पक्षोपादानसूचनात् पर्वतो धूमादितिवदप्रयोग इतिचेन्न । अनुमानस्यावाक्यरचनत्वस्य 'रचनानुपपत्तेश्च नानुमानम्' इतिसूत्रे सूचनेन पक्ष इव

भाष्यप्रकाशः ।

तोऽर्थः सौत्रत्वेन निश्चेतुं शक्यः । तदनिश्चये वाक्यार्थोऽपि संदिग्धप्राय एवेति चेन्मैवम् । द्वितीयादिपादानां पूर्वपादोक्तार्थविमर्शरूपत्वात् कारणत्वस्य तत्र विमृष्टत्वेऽप्यन्येषामविमृष्टत्वादत्रान्तस्तद्धर्मोपदेशाधिकरणसाधितस्यानन्दमयान्तरत्वस्य विमर्श इत्यविवादम् । आन्तं पादेऽन्तर्वर्तिन एव विचारदर्शनात् । सूत्रेऽप्युपदेशपदेन तदर्थविचारस्य प्रत्यभिज्ञानात् । विषयवाक्येऽप्येष म आत्माऽन्तर्हृदय इति पदात् । अतः सूत्रे पक्षानुक्तावपि प्रकरणबलेन तन्निर्णयस्य सुसाध्यत्वादिति । यः पुनरत्ता चराचरग्रहणादित्यादौ पक्षोल्लेखः, स तु तस्यैवात्तृत्वादिधर्मविचारार्थ इत्यदोषः ।

रामानुजाचार्यास्तु सूत्रारम्भगतेन सर्वत्रेतिपदेनारम्भगतसर्वपदघटिते वाक्ये विषयवाक्यत्वेन बोधिते तस्य शमविध्यपर्यवसितस्य फलाकाङ्क्षापूरणायाग्रिमसंदर्भस्योपस्थित्या सूत्रगतपक्षाकाङ्क्षापूरणेनोक्तार्थस्य सौत्रत्वे सिद्धे वाक्यार्थनिश्चयस्य सुखेन संभवादिति वदन्ति ।

एवं च सूत्रगतन्यायचर्चात्रैवं बोध्या । अथ खल्वित्यादिवाक्यमुपदेशः । परमशान्ताधिकारत्वात् । यदेवं तदेवम् । कं ब्रह्मेत्यादिवाक्यवत् । यन्नैवं तन्नैवम् । प्राणं तर्हि वागप्ये-

रश्मिः ।

पक्ष इत्युपचारात् । स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयमित्यारण्यकश्रुतौ अनुमानोक्तेरनुकूलतर्ककर्कशविचारस्तु रश्मावस्त्येव समन्वयाधिकरणेषु । ननु तर्हि पक्षानुलेख इत्यसिद्धम्, साध्यानुलेख इति प्राप्नोति मैवं तत्तु समान्वयादित्यत्र पक्षोल्लेखात् । तद् ब्रह्मैव समवायीतिभाष्यात् । साध्योल्लेखस्तु रश्मौ तच्च कर्कशविचाराय । न चैतद्भाष्यविरुद्धमिति वाच्यम् । ईक्षत्यधिकरणे हेतूल्लेखात् तदैक्षत बह्विति विषयवाक्योक्तेक्षार्थकेक्षतिहेतूल्लेखात् भाष्यस्य पक्षमात्रग्रहणे तात्पर्याभावात् । 'तदैक्षत बहु स्याम् प्रजायेय' इति भाष्योक्तश्रुतेः । **संदिग्धप्राय** इति मीमांसानिर्णयस्य दुर्बुद्धेः संदेहवारकत्वात् । **पूर्वपादोक्तेति** । विमर्शो विचारः । **तत्रेति** पूर्वपादेतिव्याप्तिवारणेन विमृष्टत्वेपि अन्येषां कारणत्वनिर्वाहकाणामन्तरत्वादीनामन्तरत्वाद्यन्तरा समवायित्वासंभवात् । अन्तस्तद्धर्मेति ब्रह्मजिज्ञासां प्रतिज्ञाय जन्मादिसूत्रेण ब्रह्म लक्षयित्वानन्दमयान्तैरधिकरणैस्तस्य परमतनिराकरणपूर्वकस्वमतस्थापनात् प्राप्तं बाह्यत्वं निरसितुमप्यन्तस्तद्धर्माधिकरणे साधितं यदानन्दमयस्यान्तरत्वं तस्य परीक्षेत्यविवादम् । **आन्तमित्येत**त्पादीयान्तमभिव्याप्येत्यर्थः । नन्वस्त्वेवं तथाप्यसौत्रत्वशङ्का तु नापगतेत्याकाङ्क्षायामाहुः **सूत्र** इति । **तदर्थेति** हिततमानुशासनस्यैवोपदेशत्वेन सर्वान्तरस्य हिततमत्वेनान्तरपदार्थस्योपदेशपदेन सोयमिति प्रत्यभिज्ञानात् स सर्वान्तरः । **प्रकरणेति** उपासीत इत्युपासनाप्रकरणम् । सामान्यप्रकारकज्ञानस्य विशेषप्रकारकज्ञानजनकत्वेनाथ खल्वित्यादिवाक्यमुपासनं न विदधाति तेन प्रकरणबलरूपपक्षस्य निर्णयस्येत्यर्थः । **पक्षोल्लेख** इति पक्षपदं पूर्ववत् । **तस्यैवेति** तस्यात्तुरेव एतच्च तत्रैव स्फुटीभविष्यति । **फलाकाङ्क्षेति** शमफलाभावेन फलान्तराकाङ्क्षेत्यर्थः । **एवं चेति** पूर्वोक्तरीत्या विषयवाक्यत्वे युक्ते सति सूत्रेण गता प्राप्ता या न्यायचर्चानुमानचिन्ता सात्र प्रकृते एवं वक्ष्यमाणेन हेतुशोधनप्रकारेण बोध्येत्यर्थः । **कं ब्रह्मेति** 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' इत्यत्र प्राणस्यास्य कारणरूपाकाशात्मत्वाद्यदेव कं तदेव खमिति कं ब्रह्मेत्येवोपात्तम् । कं सुखं ब्रह्मेति श्रुत्यर्थः । इयं छान्दोग्ये षष्ठे प्रपाठकेस्ति आदिपदेन तत्त्वमसीत्युपदेशः । भवतीनां वियोगो मे नश्रीत्याद्युपदेशश्च तदिदं परमशान्तायोपकोसलनाम्ने ब्रह्मचारिणेऽग्नयस्तुष्टा उपदिदिशुः । परम-

भाष्यप्रकाशः ।

तीत्यादिवाक्यवत् । उपदेशश्च परमहितानुशासनम् । तत इदं वाक्यं ब्रह्मवाक्यम् । सर्ववाक्य-समर्थितसर्ववेदान्तप्रसिद्धोपदेशात् । यदेवं तदेवं, यन्नैवं तन्नैवमिति सिद्धान्तरीत्या तु प्रकरण-समर्थितत्वेन हेतुर्विशेषणीय इति भेदः ।

रश्मिः ।

शान्तत्वं तु अन्यानेवान्तेवासिनः समावर्तयन् त९ ह स्मैव न समावर्तयति । तं जायोवाच तप्तो ब्रह्मचारीतिश्रुतेः । अन्यशिष्यसमावर्तनेप्याचार्यस्तं न समावर्तितवान् आचार्यभार्याप्याचार्यमुवाच तप्तो ब्रह्मचारीति । तप्त इत्यस्य कायक्लेशं प्राप्त इत्यर्थः । एतच्चोपकोसलस्य परमशान्तत्व एव घटते इति । **प्राण**मिति । इयमपि तत्रैवास्ति । इमां चर एषा सौम्य ते अस्मद्विद्येतिश्रुतेश्च । ब्राह्मणो जानश्रुतिः राज्ञे संवर्गविद्यां बहुधनमादाय दत्तवान् तद्विद्यान्तर्गता (तथा च बहुधनदानेन विद्याग्रहणान्न राजा परमशान्तः) अयं नोपदेशः किंतु प्राणे संवर्गशब्दस्य योगं दर्शयितुं 'स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः प्राणो ह्येवैतान् सर्वान् संवृङ्क्ते' । स इति पुरुषः । संवृङ्क्ते ग्रसतीत्यर्थः । अपरमशान्तत्वं तु हारे शूद्रेति राजसंबोधनाद्बोध्यम् । शुचा द्रवतीति शूद्रः श्रुत्यर्थास्तु स्पष्टाः । **तत** इति उक्तवाक्य उपदेशत्वसिद्ध्यनन्तरम् । **सर्वे**ति अस्य विवरणमग्रे वदिष्यामः । **यदेव**मिति पूर्णमदः पूर्णमिदमिति शुद्धब्रह्मस्वरूपनिगमकमन्त्रपाठानन्तरं ॐ खं ब्रह्मेति पठितं बृहदारण्यके तद्वदिति शेषः । **यन्नैव**मिति अयं घट इतिवाक्यवत् । पूर्वोक्ते वा श्रुती ग्राह्ये । नन्वनुमानत्वेन वर्णनेन नैतज्ज्ञानमौपनिषदं भवेत् अत आहुः **सिद्धान्ते**ति । रामानुजाचार्योक्तरीत्या सर्वत्रेतिपदेन सर्वपदघटितविषयवाक्योपस्थितावपि पूर्वपक्षे सर्वपदघटितवाक्यानुपस्थितौ हेत्वभावात् । भारूप इति जीवप्रत्यभिज्ञानात् सर्वपदघटितवाक्योपस्थितौ हेतुसत्त्वात् प्रकरणसमर्थितत्वेन विशेषणीय इति भावः । हेतोः साधारणत्वनिवृत्तिः फलम् । पूर्वपक्षे हेतोः साधारणत्वम् । **भेद** इति सूत्रार्थस्तु अथ खल्वित्यादि ब्रह्मवाक्यमेव सर्वत्र प्रसिद्धोपदेशात् प्रकरणसमर्थितसर्ववाक्यसमर्थितसर्ववेदान्त-प्रसिद्धस्य ब्रह्मणो मननात्मकपरमहितानुशासनादिति । इदं चैकपदं सूत्रम् । तेनैकदेशेन प्रसिद्ध-पदेनान्वयः । सुप्सुपेति समासः । 'हलदन्तात् सप्तम्याः' इतिसूत्रेण सप्तम्या अलुक् पूर्वपक्षे साधारण्यवारणाय समर्थितान्तम् । सर्ववाक्यानि जीववाक्यानि ब्रह्मवाक्यान्यपि ब्रह्मजीवयोः परेषामैक्यात् । इन्द्रप्रतर्दनसंवादे वा गताधिकरणोक्तानि जीववाक्यानि । प्रकरणसमर्थितत्वं दर्शपूर्णमासयागाङ्गत्वे समिद्यागनिष्ठेस्ति तत्र ब्रह्मवाक्यरूपसाध्याभावात् साधारण्यं तद्वारणाय सर्ववाक्येत्यादि । प्रकरणसमर्थितत्वे सति सर्ववाक्यसमर्थितत्वमपि लिङ्गं तत्रैव साधारणमतः सर्ववेदान्तेत्यादि तत्र सर्ववेदान्तेत्यभावात् न साधारण्यम् । तर्हि प्रकरणसमर्थितत्वे सति सर्ववेदान्तेत्यादिर्हेतुरस्तु अस्य हेतोर्न जीवेनापि समिद्यागनिष्ठे दर्शपूर्णमासयागाङ्गत्वे साधारण्यमितिचेत् महावाक्ये साधारण्यमस्तु । ननु न साधारण्यं प्रकरणस्योपासनसंबन्धित्वात् जीवे सर्ववेदान्त-प्रसिद्धोपदेशत्वेपि हेत्वभावादिति चेन्न । सर्ववेदान्तप्रसिद्धब्रह्मोपदेशस्य यागे सहदेववाक्येषु साधारण्यात् सर्ववाक्यान्यनुगतानीति ओमितिचेन्न औपनिषदत्वाभावात् । तं त्वौपनिषदं पुरुषं पृच्छामीति तु वैदिकपुरुषनिषेधात् । सूत्रभाष्ये वेदान्तेषु वेदत्वविधानान्न वेदानां वेदान्तत्वम् । अतस्त्र्यंबकं यजामह इत्यादिसर्ववाक्यसमर्थितत्वेन वैदिकत्वं न त्वौपनिषदत्वं पुरुषस्य । सर्ववाक्यानि

१. साध्याभाववद्वृत्तित्वं साधारण्यम् ।

ननु क्रतुमयः पुरुष इति यथासंकल्पमग्रिमदेहकथनाल्लोकान्तरभाविफलार्थ-मन्योपासनैव युक्ता, न तु ब्रह्मज्ञानस्य तादृशं फलं युक्तमित्याशङ्क्य परिहरति।

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

विवक्षिता लोकान्तरे तादृशरूपप्राप्तिः, सा प्रकृतेऽप्युपपद्यते। भगवत्स्व-

---

भाष्यप्रकाशः।

किं च, सूत्रे प्रसिद्धपदेन, तदेजति तन्नैजतीत्यादिवाक्यप्रसिद्धत्वस्यापि स्मारणादेतद्वाक्यगताणीयस्त्वज्यायस्त्वाधारत्वेन प्रसिद्धत्वमपि संगृह्यते। अतो वाक्यस्य स्पष्टलिङ्गत्वमपि बोध्यते। तेनात्र पादे अस्पष्टलिङ्गवाक्यचिन्ताङ्गीकारं प्रतिज्ञायैतस्यात्र विषयत्वेनोपन्यासोऽप्ययुक्त इत्यपि सूचितम् ॥ १ ॥

विवक्षितगुणोपपत्तेश्च ॥ २ ॥ इतिसूत्रमवतारयन्ति नन्वित्यादि। अयमर्थः—अत्र हि पूर्ववाक्ये ब्रह्मोपासनकथनेऽप्यथेतिप्रकृतच्छेदेनाग्रे उपासनान्तरमुच्यते। तथा क्रतुमय इत्यारभ्य,

रश्मिः।

तु सन्मूलाः सोम्येमाः सर्वाः प्रजाः ब्राह्मणो मुखमित्येव मुखाज्जातत्वहेतुतः यथा वेदश्रुतिस्तद्वज्जीवो ब्रह्मेति वा भवेत् इत्यादीनि। रामानुजाचार्यास्तु मनोमयत्वादिगुणकं ब्रह्मैव कुतः सर्ववेदान्तवाक्येषु परस्मिन्नेव ब्रह्मणि प्रसिद्धस्य मनोमयत्वादेरुपदेशादिति व्याख्याय सर्वं खल्विदं ब्रह्मेति निर्दिष्टे सर्वस्मिन् जातिब्रह्मशब्देन तदात्मतयाभिधीयमानं परं ब्रह्मैव न प्रत्यगात्मा कुतः प्रसिद्धोपदेशात् तज्जलानिति हेतुतः। सर्वं खल्विदं ब्रह्मेति प्रसिद्धवन्निर्देशात्। ब्रह्मणो जातत्वात् ब्रह्मणि लीनत्वात् ब्रह्माधीनजीवनत्वाच्च ब्रह्मात्मकं सर्वं खल्विदं जगदित्युक्ते यस्माज्जन्मस्थितिलया वेदान्तेषु प्रसिद्धाः तदेवात्र ब्रह्मेति प्रतीयते तच्च परमेव ब्रह्म इममेव सूत्रार्थमभियुक्ता मन्यन्ते यदाह वृत्तिकारः सर्वं खल्विति सर्वात्मा ब्रह्मेश इति व्याचक्रुरतो भेद इत्यर्थः। भाष्ये नानुमानत्वेन वर्णनीयं तत्तु तं त्वौपनिषदं पुरुषं पृच्छामीति केवलोपनिषद्वेद्यत्वादुपेक्ष्यमिति भाष्यविरोधादिति तु न। वादिबुद्धि-प्रवेशार्थत्वेन तर्ककर्कशविचारस्य भगवदिच्छयान्यमतेष्विवात्राप्येकत्वात्।

दूषणान्तरमाहुः **किं चेति** तज्जलानिति हेतुतः सर्वं खल्विदं ब्रह्मेति प्रसिद्धवन्निर्देशादित्यत्र जगज्जन्मादिकर्तृत्वेन प्रसिद्धस्य ब्रह्मणः स्मारणमिव सूत्रे प्रसिद्धपदेनेत्यादिः। **एतद्वाक्येति** सर्वं खल्विदमित्येतस्य वाक्ययोरणीयान् व्रीहेर्वा यवाद्वेति वाक्ये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाद्वेत्यनयोर्गतयोरणीयस्त्वज्यायस्त्वयोराधारत्वेन। **तेन** स्पष्टलिङ्गबोधनेन। **तस्य** स्पष्टलिङ्गबोधकस्य वाक्यस्य। **सूचितमिति**। किं च पूर्ववाक्यस्य पूर्वोक्तरीत्या विषयवाक्यत्वस्फोरणं प्रयोजनम्। तत्त्वन्यथापि संभवति द्वितीयवाक्यरूपोपदेशात्। अत्ताचराचराधिकरणे सूत्रीयशब्दघटितत्वेपि विषयवाक्यत्वदर्शनात्। पूर्वं क्रतुपदस्य मननपदं विहायोक्तेस्तात्पर्यमुक्तम्। सेवा कार्येति सिद्धान्त-मुक्तावल्यां प्रसिद्धा सा। प्रयोजनं जगन्नित्यत्वमपरमपि प्रयोजनं सगुणभक्तिमार्गनिरासरूपं ततश्च सर्वपदघटितत्वेन विषयवाक्यत्वबोधनमपि तत्। यदि च क्वाचित्की विषयवाक्यरीतिरियं न सार्वत्रिकीति विभाव्येत तदुक्तप्रयोजन इदमपि प्रयोजनमस्तु मुख्यं तु भाष्योक्तमन्तःकरणशुद्धिरूपमस्त्येव ॥ १ ॥

विवक्षितगुणोपपत्तेश्च ॥ २ ॥ क्रतुमय इति अथ इति हेत्वर्थे यस्मात्पुरुषो मननमयो यथा क्रतुरस्मिंल्लोके पुरुषः स देहजीवो भवति तथा तादृगेव क्रतुफलात्मक एव इतोस्माद्देहात्प्रेत्य मृत्वा भवति तस्मात् क्रतुं मननं कुर्वीत इतिश्रुतिः तथेतः प्रेत्येत्यत्र तेन पुरुषत्वेन प्रकारेण भवतीत्यर्थादाहुः

रूपलाभात् सारूप्यलाभाद्वा । नच व्याप्तिरुक्तेत्यधमप्राप्त्युपायो युक्तः । सत्यसंकल्पादिवचनं च ब्रह्मवाक्यत्वपोषकमिति चकारार्थः ॥ २ ॥

भाष्यप्रकाशः ।

तथेतः प्रेत्य भवतीत्यन्तेन लोकान्तरे संकल्पानुरूपदेहप्राप्तिरूपं फलमुच्यते । फलं च तात्पर्यनिर्णये लिङ्गम् । अतस्तद्विचारेऽत्रोक्तोपासनाया ब्रह्मविषयत्वं न घटते । फलस्य प्राकृततया जाघन्यात् । अतोऽत्र यथासंकल्पमग्रिमदेहकथनाल्लोकान्तरभाविताद्दशदेहप्राप्त्यर्थं वेदाभिमानिदेवताया वा, क्रतुमय इत्यादिना साधकस्योपक्रान्तत्वात् स्वजीवस्यैव वोपासना युक्ता । इहापि भावनया पेशस्कृतो रूपान्तरस्य प्रत्यक्षसिद्धत्वेन श्रुत्युक्तपारलौकिकरूपान्तरस्य भावनाप्रचयजन्यतायां बाधानवतारात् । न चैवं सति ब्रह्मोपासनायामपि तथा वक्तुं शक्यत्वात् कुतस्तत्त्याग इति शङ्क्यम् । देहत्वस्य प्राकृतत्वव्याप्तत्वेन ब्रह्मज्ञानस्य च, 'तमेव विदित्वा अतिमृत्युमेति', 'ब्रह्मविदाप्नोति परम्' इत्यादिषु ब्रह्माप्तिरूपस्यैव फलस्य श्रावणेन ब्रह्मज्ञाने तादृशफलकथनस्यायुक्तत्वादिति । तस्मादत्र मननोपदेशाङ्गीकारो न युक्त इत्याशङ्क्य परिहरतीति । सूत्रं पठित्वा तत् समाधातुं व्याकुर्वन्ति ।

विवक्षितेत्यादि । विवक्षिता वक्तुमिष्टा उपादेयत्वेनाभिप्रेता वा या गुणरूपा लोकान्तरे तादृशी संकल्पानुरूपदेहप्राप्तिः सा ब्रह्मज्ञानपक्षेऽप्युपपद्यते । ज्ञानफलबोधिकासु श्रुतिषु मृत्युमतिक्रान्तस्य भगवत्स्वरूपस्य ब्राह्मदेहस्य परप्राप्तिरूपस्य वा, ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्या ब्रह्मस्वरूपस्य वा लाभोऽभिप्रेत इति तस्य संकल्पानुरूपताया युक्तत्वादिति । नच यथा क्रतुरित्यादिना लोकान्तरप्राप्यत्वेन संकल्पानुरूपत्वेन व्याप्तिरुक्तेत्यतः, कुर्वीतेत्युपदेशबोधितः क्रतुरधमस्य प्राकृतदेहस्य प्राप्त्युपायो युक्तः । परमशान्तस्य पूर्वोपासनया शुद्धान्तःकरणस्याशुद्धसंकल्पायोगात् तदभावे प्राकृतदेहस्याप्ययोगादित्यर्थः । हेत्वन्तरमाहुः **सत्त्वेत्यादि** । तथाचैवं हेतुद्वयबाधितत्वादस्य जीववाक्यत्वं न शङ्कितुं शक्यमित्यर्थः ।

रश्मिः ।

संकल्पेत्यादि । **फलमिति** तथेतः प्रेत्येत्युक्तदेहफलम् । उपासनाविषयकतात्पर्येणोपासानिर्णये लिङ्गं हेतुः । कार्येण कारणानुमानादित्यतःशब्दार्थः । **तद्विचारे** फलविचारे । ननु स्वोपासनायां कथं तादृशं फलमित्याकाङ्क्षायामाह **इहापीति** । **भावनाप्रचयेति** तेन पूर्वदृष्टान्तेपि भावनाप्रचय इति बोधितम् । अप्रचितभावनाया लोके रूपान्तरासंपादकत्वात् । न त्वित्याद्याभासभाष्यमत्रावतारयामासुः **न चैवं सतीति** । **तथावक्तुमिति** सारूप्यादि तेन प्रकारेण वक्तुम् । **गुणरूपेति** यथा प्राकृतदेहो गुणमयो 'जहुर्गुणमयं देहम्' इत्यादौ तथायमपि ब्राह्मदेहो ह्यात्मगुणमय इति देहप्राप्तिर्गुणपदेनोपचर्यते । सेत्यादिभाष्यं विवरामासुः **सा ब्रह्मेत्यादि** । भगवदित्यादिभाष्यं विवृण्वन्ति स्म **ज्ञानफलेति** । **श्रुतिष्विति** 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेयनाय' 'ब्रह्मविदाप्नोति परम्' 'ऋते ज्ञानान्न मुक्तिः' 'तरति शोकमात्मवित्' इत्येवंरूपासु । **मृत्युमिति** मृत्युमतिक्रान्तोतिमृत्युरित्यतिमृत्युपदविग्रहात् । नन्वतिमृत्यव इत वायुदिगग्नयो बृहदारण्यके सन्ति ते कुतो न व्याकृता इति चेत्तत्राहुः **ब्राह्मेति** । जगद्व्यापारवर्जे ब्राह्मदेहस्यौचित्यात् । अन्या वा श्रुतिर्भगवत्स्वरूपस्य ब्राह्मदेहस्य बोधिका तामर्थद्वारेणाहुः **परप्राप्तीति** । ब्रह्मविदाप्नोतीत्यत्र कर्तृकर्मव्यपदेशादितिभावः । **नचेति**भाष्यं विवरांबभूवुः **न च यथेत्यादि** । **उक्तेति** यथा क्रतुरस्मिन् लोक इतिश्रुतौ तात्पर्यवृत्त्योक्ता सत्यसंकल्पानुरूपलोकान्तरप्राप्यत्वादित्यत्र । **तथा चेति** पराभिध्यानात्सत्यसंकल्पादीनां जीवेषु तिरोहितत्वेन **ब्रह्मवाक्य-**

भाष्यप्रकाशः ।

यत्तु केचिदपौरुषेयवेदे वक्तुरभावान्नेच्छार्थः संभवतीत्यत उपादेयत्वेन फलेन तत्र विवक्षितत्वमुपचर्यते। लोके तथादर्शनात् । वेदेऽपि वाक्यतात्पर्यातात्पर्याभ्यामुपादेयत्वानुपादेयत्वयोरवगन्तुं शक्यत्वात् सूत्रे विवक्षितपदमौपचारिकमङ्गीकुर्वन्ति तन्न रोचिष्णु । निःश्वसितश्रुत्यनुरोधेन वेदे जीवाजन्यत्वरूपस्यापौरुषेयत्वस्यास्थेयत्वेन सर्वथा वक्त्रभावस्यासंगतत्वात् । शास्त्रयोनित्वसूत्रे स्वयमेव वेदकर्तृत्वाङ्गीकारेण वदतो व्याघाताच्च । नच निःश्वसितस्य सार्वदिकत्वादबुद्धिपूर्वकत्वेन वक्तुरुपगमेऽपीच्छार्थासंभवाददोष इति वाच्यम् । 'आनीदवात९ स्वधया तदेकं तस्माद्धान्यन्न परः किंचनास' इति श्रुतिविरोधेन तत्सार्वदिकत्वाङ्गी-

रश्मिः ।

त्वपोषकत्वे प्रकारे च । वक्तुमिष्टा विवक्षितेत्युक्तमाक्षिपन्ति **यत्त्वित्यादि** । **केचिदिति** शंकराचार्याः रामानुजाचार्याश्च । **इच्छार्थ** इति । विवक्षितपदे सन्प्रत्ययस्येत्यर्थः। **उपादेयत्वेनेति**। नन्वुपादानेन फलेनोपचर्यते इतिभाष्यं न तूपादेयत्वेनेति चेन्न । उपादेयत्वमुपादानं पुरुषनिष्ठत्वेपि संबन्धान्तरेणोपादेयनिष्ठत्वात् न त्वतिरिक्तं गौरवात् । उपादेयत्वत्वेनोपादानग्रहणमुपादेयगुणेषु फलतायै उपादेयत्वं फलं तत्कार्यमुपादानमुरुनिष्ठमिति फलं कार्यम् । **तत्रेति** उपादेयेषु गुणेष्वित्यर्थः । तथा च विवक्षितपदं कार्यताख्यसंबन्धेनोपादेयेषु गौणं सत् गुणेषु विशेषणमित्यर्थः । **तथेति** उपादेये घटे विवक्षितो घट इति प्रयोगदर्शनात् । य एव लौकिकाः शब्दास्त एव वैदिकाः इतिविवक्षाधीनां ग्राह्यत्याज्यबुद्धिं वेदेपि साधयितुमाहुः **वेदेपीति** । वाक्यानां 'ज्योतिष्टोमेन स्वर्गकामो यजेत' ब्राह्मणो न हन्तव्य इत्यादीनामारोपितानारोपिताभ्यां तात्पर्यातात्पर्याभ्याम् । तात्पर्यं च फलवदर्थप्रतीत्यनुकूलत्वं शब्दधर्मः तत्प्रतीतीच्छयोच्चरितत्वस्य तात्पर्यलक्षणस्य वक्तुरिच्छा तु तात्पर्यमित्यस्य चेच्छाघटितत्वात् । **औपेति** गुणेषु गौणमित्यर्थः । **निःश्वसितेति** 'अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोथर्वांगिरसः' इति श्रुत्यनुरोधेनेत्यर्थः। महतो परिच्छिन्नस्य भूतस्य परमार्थवस्तुनः निःश्वसितमिव निःश्वसितं प्रयत्नोत्पादितमिति तट्टीकोक्तोर्थः । **वेदकर्तृत्वेति** यद्यपि महतः ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म न हीदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोस्तीत्यादिना वेदकर्तृत्वमङ्गीकृतं सगुणगतमारोपितं तदित्यवास्तवमिति न वदद्व्याघातस्तथाप्यस्मन्मते सगुणनिर्गुणभेदाद्वदतो व्याघातः । चकारेण वेदान्तकृद्वेदविदेव चाहम् । इतीतिहाससमुच्चयः । वक्तुरुपगमेप्यौपचारिकत्वमाशङ्कते वादी **न च निःश्वसितस्येति** । अबुद्धेर्बुद्धिसमानाधिकरणत्वेन जानातीच्छति यतत इतिक्रमे इच्छाया ज्ञानविषयिण्या विषयाभावेनेच्छार्थासंभवादित्यर्थः । अधिकरणं जीवः । जीवेश्वरवत्तस्योपाधिर्बुद्धिरिति । **अदोष** इति न गौणीरूपो दोषः । आनीदिति इयं नासदासीन्नो सदासीत्तदानीमित्युपक्रम्य ब्राह्मणे पठिता । **आनीदिति** अन प्राणने लुङ् । स्वधया पित्रन्नेन । स्वधयानितीति । **धान्यमिति** । व्युत्पत्तिः । स्ववर्णलोपः पचाद्यच् । अनितीत्यनम् स्वधयानम् धानं धानस्य भावो धान्यम् ष्यञ् । एवं च निःश्वसितश्रुतौ श्वस प्राणने श्वसितीति श्वसितं गत्यर्थाऽकर्मकेभ्यः इत्यकर्मकात् क्तः अवातमित्यत्र वातीति वातं हसिमृगिणिति तम् तदानीं कालेनासदासीत् नो सदासी-

भाष्यप्रकाशः ।

कारस्यैवासंगतत्वात् । एवं सिद्धे निःश्वसितस्यासार्वदिकत्वे तदुद्गमे इच्छापूर्वकत्वस्याप्यपर्यवस्थेयत्वात् । प्रपञ्चमात्रं प्रति, बहु स्यामितीच्छाया एव कारणत्वेन वेदात्मकनामप्रपञ्चं प्रत्यपि तस्या अदण्डवारितत्वात् । नच शब्दस्वरूपमात्रोद्गम एवेच्छासंबन्धो, न तु तस्यार्थसाहित्येऽपीत्यदोष इति वाच्यम् । ईदृशविभागे मानाभावात् । नचैवं पौरुषेयत्वाङ्गीकारे काणादादितौल्यापातः । ईश्वरवाक्यत्वेनैव तन्निरासात् । नचैवं शब्दार्थसंबन्धानित्यत्वप्रसङ्गः । शब्द इति चेदित्यस्मिन् सूत्रे तन्निरासप्रकारस्यापि वक्ष्यमाणत्वात् । अतो वेदे वक्तुरिच्छासंबन्धस्य सत्त्वेन विवक्षितत्वादेः सत्त्वादुपचाराङ्गीकारो न युक्त इति दिक् ।

यत् पुनर्मनोमयः प्राणशरीर इत्यस्य सगुणविषयत्वम्, 'अप्राणो ह्यमनाः शुभ्र' इत्यस्य निर्गुणब्रह्मविषयत्वमित्युक्तं तत्तु पूर्वपादार्थानुवादभाष्य एव दूषितमित्युपरम्यते ॥ २ ॥

रश्मिः ।

तदेकं कर्तृ अवातमनिःश्वसितम् जगत् स्वधया आनीत् प्राणयुक्तमकार्षीत् । यतोकार्षीत्तस्माद्धान्यं धनं वेदः धाकारस्य छान्दसो ह्रस्वः निरुक्तौ तथा पाठात्तस्य धान्यं वेदत्वं विरुद्धाऽवातपदविरोधाच्छ्रुतिविरोधस्तेनेत्यर्थः । **असंगते**ति तथा च निःश्वसितस्यासार्वदिकत्वेन वेदोद्गमस्य बुद्धिपूर्वकत्वात्तयेच्छाजननादिच्छार्थसंभव इतिभावः । तदेवाहुर**ेव**मिति । **अपरी**ति पर्यवस्था इच्छां परिलक्षीकृत्य अवहीना स्थितिरिच्छाप्रत्याख्याने स्थितिः । न पर्यवस्थातुं शक्यमपर्यवस्थेयम् 'अचो यत्' तत्त्वात् । निःश्वसितस्येच्छापूर्वकत्वे हेत्वन्तरमाहुः **प्रपञ्चे**ति । **बहु स्या**मिति 'एकोहं बहु स्याम् प्रजायेय' इतिश्रुतौ बहु स्याम् । **अदोष** इति मनोमयप्राणशरीरत्वादिगुणानामर्थत्वेन तत्रेच्छासंबन्धाभावात् विवक्षितपदमौपचारिकमिति नोपचारो दोष इति वाच्यमित्यर्थः । **मानाभावा**दिति मम तु 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इत्यादिजैमिनिसूत्रमेव मानम् । **काणादादी**ति शब्दार्थयोरनित्यत्वापातः । **ईश्वरे**ति येनेश्वरे वाक्यत्वेन हेतुना शब्दार्थयोरनित्यत्वापत्त्या तौल्यं तेनैवेश्वरवाक्यत्वेन हेतुना तत्तौल्यनिरासादित्यर्थः 'वाचा विरूप नित्यया' इतिश्रुतेरिति वाचः कथमित्याकाङ्क्षायामाशङ्कामुखेन तन्निरासं व्युत्पादयांबभूवुः **न चैव**मिति वेदस्येश्वरवाक्यत्वेन जन्यत्वात् जन्यत्वेन नश्वरत्वेन व्याप्त्या बबरशाण्डिल्यादीनां शब्दार्थरूपाणामनित्यत्वे तेषां शब्दानामर्थानां च प्रतिपाद्यप्रतिपादकभावसंबन्धानित्यत्वेत्यर्थः । **सूत्र** इति तृतीयपादस्थे । निरासप्रकारस्तु वैदिकपदार्थानां शब्दप्रभवत्वेन वैदिकप्रपञ्चो भिन्न एव नित्यश्चेति अत एव 'वाचा विरूप नित्यया' इतिश्रुतिः 'वेदो नारायणः साक्षात् स्वयंभुरिति शुश्रुमः' 'शब्द ब्रह्म सुदुर्बोधम्'

'स्वयंभुरेष भगवान् वेदो गीतस्त्वया पुरा ।
शिवाद्या ऋषिपर्यन्ता स्मर्तारोस्य न कारकाः' ॥ इत्यादिस्मृतयश्च ।

सिद्धमाहुः **अत** इति । **दिगि**ति तृतीयपादे तदुपर्यपीत्यधिकरणे वेदे वक्तुरिच्छासंबन्धः स्फुट इति तथेति भावः । **यत्पुन**रिति शंकराचार्यैरिति शेषः । **दूषित**मिति । ये पुनः क्वचित् सगुणनिर्गुणभेदं प्रतिपादयन्ति ते स्वयमेव स्वस्य ब्रह्मजिज्ञासानधिकारं बोधयन्तीत्यादिना दूषितम् । **भाष्ये । नैकान्तत** इति एका संभावना एकान्ततः पञ्चम्या लुक् 'संभावनावयवयोरन्ततः पदमिष्यते' इतिविश्वात् । **प्रकृते** । जीवहिरण्यगर्भयोः सूत्रार्थावुपपत्तितौल्याय योजयामासुः

नन्वेतावतापि नैकान्ततो ब्रह्मवाक्यत्वमुपपत्तेरुभयत्रापि तुल्यत्वादित्याशङ्क्य परिहरति।

अनुपपत्तेस्तु न शारीरः॥ ३॥

नच प्राणशरीररूपो जीवो भवति। तिरोहितानन्दत्वेन निराकारत्वात्।

भाष्यप्रकाशः।

अग्रिमसूत्रमवतारयन्ति। नन्वेतावतेत्यादि। एतावतेति सूत्रद्वयोक्तयोपपत्त्या। तुल्यत्वादित्यादि।

'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।
किमिच्छन् कस्य वा हेतोः शरीरमनुसंज्वरेत्'॥

इत्यादौ ज्ञेयतया प्रसिद्धत्वेन जीवस्य मन्तव्यत्वोपदेशो, लोकान्तरे विवक्षितदेहप्राप्तिः। 'न वै क्वचिन्मे मनसो मृषा गतिः' इतिवाक्यात् सत्यसंकल्पत्वं, व्यापकत्वादाकाशात्मत्वं, पर्यायेण सर्वाहंमानितया वा सर्वकर्मत्वादिकं हिरण्यगर्भे जीवे च संगच्छत इति तस्य बाधाभावेन तुल्यत्वादित्याशङ्क्य परिहरतीत्यर्थः।

अनुपपत्तेस्तु न शारीरः॥ ३॥ सूत्रं व्याकुर्वन्ति नचेत्यादि। सत्यमस्त्वेवमुपपत्तितौल्यं, तथापि शरीरसंबन्धी जीवो वाक्यार्थो न संभवति। कुतः। अनुपपत्तेः। प्राणशरीरत्वस्यानुपपद्यमानत्वात्। तत्र हेतुः तिरोहितेत्यादि। प्राणशरीर इत्यत्र शरीरपदमाकारपरम्। तथाचात्र हि, मनोमय इत्यत्र यथा विकारार्थोद्वापेन प्राचुर्यान्मनोमयत्वमुपदेशगोचरस्तथा प्राणशरीर इत्यत्रानन्दरूपप्राणशरीररूपत्वम्। लौकिकप्राणस्योद्वापात्। प्राणस्यानन्दरूपता त्वनुगमाधिकरण एव सिद्धा। प्राणमुपक्रम्य, 'एष प्रज्ञात्मानन्दोऽजरोऽमृतः' इति तद्विषयवाक्ये श्रावणात्। नच लौकिकप्राणस्योद्वापे किं मानमिति शङ्क्यम्। लौकिकस्य

रश्मिः।

आत्मानमिति। आत्मानं जीवम्। अयमहं ब्रह्मास्मि पूर्णकामः आप्तकाम इदंपदार्थः। आप्तकामत्वात् किमिच्छन् पूर्णकामत्वात् कस्य हेतोः। षष्ठ्यन्तं पदम्। अन्विति आत्मज्ञानानन्तरम्। ज्ञेयतयेति ज्ञानकर्मतया सर्वत्र प्रसिद्धत्वेन मननोपदेशः। एतेन सर्वत्र प्रसिद्धोपदेशादिति सूत्रार्थो जीवपरो व्याकृतस्तौल्याय। द्वितीयसूत्रार्थमाहुः लोकेति। विवक्षितगुणरूपदेहस्योपपत्तिः प्राप्तिः। सूत्रं व्याख्याय 'मनोमयः प्राणशरीरो भारूप' इत्येषां स्पष्टतया सत्यसंकल्प इत्यादीनामर्थानाहुः न वा इति। इदं वाक्यं द्वितीयस्कन्धे षष्ठाध्याये ब्रह्मणः। पर्यायेणेति क्रमेण 'पर्यायस्तु प्रकारे स्यान्निर्माणेवसरे क्रमे' इतिविश्वात्। 'कस्त्वमित्यहमिति होवाचैवमेवेदं सर्वं तस्मादहमिति सर्वाभिधानम्' इति नृसिंहोत्तरतापिनीयश्रुतेः सर्वाहंमानिता। अत्र कस्त्वमिति देवकर्तृकः प्रश्नः। अहमित्यारभ्याहमित्यन्तं प्रजापतिवाक्यम्। शेषं विधायकमिति ज्ञेयम्। एवं पूर्वोक्तपरामर्शे तथा चैवमेवाहमेवेत्यर्थः। अभिधानं नाम। सर्वकर्मत्वेति आदिपदेन सर्वगन्धत्वम्। जीवन्मुक्तजीवस्य सर्वगन्धत्वात्। न च पूर्वपक्षकर्तुर्मते जीवश्रुतिर्नास्तीति वाच्यम्। तन्मते जीवस्यैव ब्रह्मत्वात्। तस्य जीवस्य पदार्थान्वये बाधाभावेन॥ २॥

अनुपपत्तेस्तु न शारीरः॥ ३॥ शरीरं कस्मात्साक्षादग्नयो ह्यत्र श्रियन्त इतिगर्भोपनिषच्छ्रुतौ निर्वचनाच्छरीरपदमाकारपरम्। आनन्दरूपः प्राणशरीर इतिभाष्यं पूर्वं व्याकृतं सूत्रसमासिस्थम्। अधुना आनन्दरूपः प्राणः शरीरं यस्येतिभाष्यं विगृह्य प्राणस्य साकारत्वाय तस्यानन्दरूपतामाहुः प्राणस्येति। अध्यासेनेत्यारभ्यानर्थक्यप्रसङ्गात् इत्यन्तं भाष्यं विवरामासुः नचेति। आध्या-

अध्यासेन तथात्वे त्वनुपास्यत्वमेव । इदानीमेवोपासकस्यापि तथात्वात् । नच प्राणादेर्लौकिकत्वम् । उपदेशानर्थक्यप्रसङ्गात् । अत आनन्दरूपप्राणशरीररूपत्वाभावान्न वाक्यार्थो जीवः । पूर्वपक्षस्यात्रैव निवृत्तत्वात् तुशब्दः । विज्ञानमये तु प्राप्ताप्राप्तविवेकेन धर्मस्यैवोपासना ॥ ३ ॥

भाष्यप्रकाशः ।

तस्य शरीरताया आध्यासिकत्वेनेदानीमुपासकस्यापि प्राणशरीरत्वात् तथोपासनोपदेश आनर्थक्यप्रसङ्गस्यैव मानत्वादिति । अतस्तदभावान्न वाक्यार्थो जीव इत्यर्थः । तुशब्दं व्याकुर्वन्ति **पूर्वेत्यादि** । ननु कथं पूर्वपक्षस्यात्र निवृत्तिः । 'विज्ञानमानन्दं ब्रह्म' इति श्रुत्युक्तस्य विज्ञानस्य, 'विज्ञानं यज्ञं तनुत' इति विज्ञानमयनिगमनश्लोकेऽपि प्रत्यभिज्ञायमानत्वेनात्र पूर्ववाक्ये विराट्त्वेन ब्रह्मोपासनवद्विज्ञानमयेऽपि विज्ञानत्वेन ब्रह्मोपासनस्य शक्यवचनतया आनन्दपूर्वभावमात्रस्य जीवोपासनागमकताया अप्रयोजकत्वेन तत्रापि तदुपासनानवकाशात् तत्र तदङ्गीकारस्यासंगततया पूर्वपक्षस्यानुपशमादित्यत आहुः **विज्ञानमय इत्यादि** । तत्र गौणान्तर्येण

रश्मिः ।

सिकत्वेनेति शरीरगतवायुरूपप्राणस्य स्पर्शरूपस्य सूक्ष्मदेहस्थस्य च । **तथोपदेश** इति आध्यासिकोपासनोपदेशे । **तदभावात्** लौकिकप्राणोपदेशाभावात् । प्राणशब्दस्यौपचारिकत्वापत्त्या नायमर्थः साधीयानिति चेत्तर्हि ब्रह्माहमस्मीतिवत् मनोमयत्वादिविशिष्टोहमित्यध्यासेन गृह्यत इत्याध्यासिकत्वेन । **तथात्वे** मनोमयत्वादिवैशिष्ट्ये । **अपी**ति अनिदानींतनोपासकस्य वामदेवादेरपिपदेन ग्रहः इत्यध्यासेनेत्यादिभाष्यार्थः । **व्याकुर्वन्ती**ति शंकराचार्यैरवधारणार्थकत्वेन व्याकृतं रामानुजाचार्यैरव्याकृतं तुशब्दमतीतार्थत्वेन व्याकुर्वन्तीत्यर्थः । अतः पूर्वपक्षोतीतोतिक्रमं प्राप्त इत्यर्थः । तुः प्रश्न इत्युपक्रम्यातीतपुनरर्थयोरिति विश्वात् । ननु किमनेन प्राणोद्वापेन प्राणशरीरत्वस्य जीवे स्फुटत्वेन तस्यैवोपासनास्तु शाखान्तर इत्यादिभाष्यात् न जीवोपासनमात्राभाव इत्याशङ्क्य शाखान्तर इत्यादिभाष्ये किंचिद्वदन्तो विज्ञानमय इत्यादिभाष्यं विवरीतुमाशङ्कामाहुः **नन्वित्यादि** । श्रुतौ विज्ञानं कर्तृ तनु विस्तारे धातुः । **अत्रे**ति विषयवाक्ये । पूर्वं सर्वं खल्विदमिति वाक्यं तस्मिन् । **विराट्त्वेने**ति । नन्वयं ब्रह्मत्वेनोपासनमुक्तमिति भाष्यं विरुणद्धीतिचेन्न इदमेवेत्यादिभाष्यानुगुणत्वात् । ननु सर्वं खल्विदमिति विराट् तस्य ब्रह्मेतिपदात् ब्रह्मत्वेनोपासनवत् स्वराट्त्वेनेत्युपन्यासः कुतो न इति चेन्न । पुराणादौ 'पुरुषो धारणाश्रयः' इतिवाक्यात् विराट्त्वेनेति युक्तत्वात् । ब्रह्मोपासनवदिति षष्ठ्यन्ताद्वतिः । ब्रह्मणा ब्रह्मत्वेन जगदुपासनस्येवेत्यर्थः । **शक्ये**ति प्रत्यभिज्ञानेन शक्यवचनतया श्रुत्यपेक्षया भाष्यस्य निर्बलत्वेनानन्दपूर्वभावावधारणस्य । **अप्रयोजकत्वेने**ति आनन्दात्फलादुपासनस्य पूर्वत्वावधारणस्य ब्रह्मोपासनसाधारण्यात् । किं च यद्यप्रयोजकत्वं न भवेत् तदा पूर्ववाक्ये अंशतोपि जीवत्वेन जीवोपासना नश्येत् यदि नश्येत् सर्वं खल्विदं ब्रह्मेति श्रुतिं विरुन्ध्यात् । तत्रापि विज्ञानमयेपि जीवोपासनानन्दपूर्वभावित्वेनानवकाशात् । तत्र छान्दोग्ये जीवोपासोच्छेदभिया तदङ्गीकारस्य ब्रह्ममननाङ्गीकारस्य सिद्धान्तेऽसंगततया विज्ञानत्वेनोपासनं विज्ञानजीवस्योक्तम् । तन्न । प्रत्यभिज्ञानप्राप्तविज्ञानत्वे बाधकसद्भावात् । किं तद् बाधकं तत्राहुः **तत्रे**ति विज्ञानमये । तस्माद्वा एतस्माद्विज्ञानमयादन्यो अन्तर आत्मानन्दमय इतिश्रुतेर्गौणान्तर्यम् । तस्माद्वा एतस्मान्मनोमयादन्योन्तर आत्मा विज्ञानमयः

ननु प्राप्तव्यताहशरूपफलाभिप्रायं भविष्यतीति परिहरति।

भाष्यप्रकाशः।

श्रद्धादिधर्मत्वेन च जीवत्वस्य प्राप्तत्वेन मुख्यान्तर्यस्यानन्दरूपत्वस्य चाप्राप्तत्वेन किं ग्राह्यमिति विचारे प्राप्ताप्राप्तविवेकेनाप्राप्तापेक्षया प्राप्तस्यैव बलिष्ठत्वाद्धर्मस्य भगवति वृत्तिमतो जीवस्यैवोपासना युक्तेति सुखेन पूर्वपक्षोपशमात् तन्निवृत्तिरित्यर्थः॥ ३॥

अग्रिमसूत्रमवतारयन्ति **नन्वित्यादि**। यदि तत्र प्राप्ताप्राप्तविवेकेन जीवोपासना, तर्ह्यत्राप्यथ खलु क्रतुमयः पुरुष इत्यादिना जीवत्वस्यैव प्राप्तत्वाद् ब्रह्मत्वस्य चाप्राप्तत्वात्तद्विवेकेन जीवोपासनैव युक्ता। युक्तेस्तुल्यत्वात्। नचानन्दरूपप्राणशरीरतोक्तिविरोधः। तद्वचनं जीवप्राप्तव्यतादृशरूपफलाभिप्रायं भविष्यतीत्यविरोधादित्याशङ्क्य परिहरतीत्यर्थः।

रश्मिः।

इतिश्रुत्युक्तम्। तेन प्रत्यभिज्ञाप्राप्तानन्दपूर्वभावमात्रस्य ब्रह्मोपासनस्य बाधकेन। किं च तस्य श्रद्धैव शिरः इत्यादिश्रुत्युक्तं श्रद्धादिधर्मवत्त्वं प्रत्यभिज्ञाप्राप्तानन्दपूर्वभावमात्रस्य ब्रह्मोपासनस्य बाधकं तेन च। **मुख्यान्तर्यं** अन्योऽन्तरात्मानन्दमय इति श्रुत्युक्तं प्रत्यभिज्ञाने सति प्राप्तव्यं तस्य। तस्य प्रियमेव शिर इत्यादिश्रुत्युक्तमानन्दरूपत्वं च प्रत्यभिज्ञाने प्राप्तव्यं तस्य च प्रत्यभिज्ञानमन्तराऽप्राप्तत्वेनेत्यर्थः। **वृत्तीति** पूर्वाधिकरण आश्रितत्वेनोक्तेर्विशेषणम्। **उपेति** श्रद्धादिधर्मवत्त्वेन विभूतित्वेनानन्दमयाधिकरणोक्तेनोपासना युक्ता न तु प्रत्यभिज्ञातविज्ञानमयत्वेन बाधकसद्भावात्। ननु सुबोधिन्यां जीवोपासनानिषेधात् कथमुच्यत उपबृंहितजीवोपासनमिति चेन्न निषेधस्य जीवपरत्वेन विभूतिपरत्वाभावात्। एतेनैव प्राणशरीरत्वस्य प्रत्याख्यानम्। तथाहि प्राणशरीरत्वस्य जीवे स्फुटत्वेप्युपासनानिषेधात् अग्रे निरासाच्चायुक्तत्वं विज्ञानमयविभूतेस्तु श्रद्धादिधर्मवत्त्वेनोपासना न प्राणशरीरत्वेनेति। ननु शाखान्तर इत्यादिभाष्यादुपासनाया जीवे निषेधो मास्त्विति चेन्न विज्ञानमयविभूतेरुपासनाविधानात् अत एव न सिद्धान्तविरोधः। तथा चोपासनादिसहकृतान्येषां गौणानन्तर्यश्रद्धादिधर्मवत्त्वप्रत्यभिज्ञानानामपि गमकत्वमानन्दपूर्वभाववदितिशाखान्तर इत्यादिभाष्ये ज्ञातव्यम्। 'ब्रह्म ज्येष्ठमुपासत' इतितैत्तिरीयेप्युपासनादिसहकृतानन्दपूर्वभावोस्त्येव 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासत' इतिश्रुतिः। **पूर्वपक्षेति** तथा च प्रकृतउपासनादिसहकृतानन्दपूर्वभाववद्गौणानन्तर्यस्यापि जीवोपासनागमकत्वेनात्राथ खल्वित्यादौ गौणानन्तर्यादिष्वेकस्याप्यभावान्न जीववाक्यत्वमिति पूर्वपक्षोपशमात्। मनोमयत्वादीनां श्रद्धादिधर्मवत्त्ववज्जीवोपासनागमकत्वं यद्यपि तथापि निरूपितव्याख्यानसूत्रैः सर्वत्र प्रसिद्धोपदेशादित्यादिभिस्तदपहतमिति न पूर्वपक्षानुपशमः। प्राणशरीरत्वस्यानन्दरूपप्राणशरीरत्वरूपत्वं पूर्वमुपपादितं तदपि प्राप्तव्यं तादृशं रूपं फलं तदभिप्रायं प्राणशरीरपदं भविष्यतीति नन्वित्यादिभाष्यार्थः। **तत्रेति** विज्ञानमये। **अत्रेति** विषयवाक्ये। पुरुषः पुरि शेत इति पुरुषः। पुरा आस पुरुष इति वा। जीवासाधारणलिङ्गं तु इतः प्रेत्येति मरणकथनं ज्ञेयम्। **तद्विवेकेन** प्राप्ताप्राप्तविवेकेन। **युक्तेरिति** एष म आत्मा अन्तर्हृदय इत्यस्या ब्रह्मपरत्ववद् द्वा सुपर्णेति श्रुत्या जीवपरत्वस्यापि संभवात्। न च पूर्वपक्षस्योपशान्तत्वात् जीवविचारः कुत इति शङ्क्यम्। पूर्वपक्षे निराकरणीयजीवरूपार्थस्य विवक्षणेनानिराकरणीयजीवरूपार्थस्य विचारे बाधाभावात्॥ ३॥

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

'एतमितः प्रेत्याभिसंभवितास्मि'इति, 'यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यः' इत्यग्रे फलवाक्यम् । एतं प्राणशरीररूपं कर्मत्वेन ध्येयत्वेन

भाष्यप्रकाशः ।

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥ इदं सूत्रं व्याकुर्वन्ति एतमित्यादि । सत्यं प्राप्तं जीवत्वम् । परंतु ध्यानकर्तृत्वेन, न तु तत्कर्मत्वेन । विषयस्तु ध्येयत्वेनैवाभिप्रेतः । अत्र चास्य क्रतोः को विषय इत्यस्मिन्नंश एव संदेहात् तद्विचारे त्वेतमित्युपसंहारे गते फलवाक्ये एतमितिपदेन पूर्वं प्राणशरीररूपतयोक्तं ध्येयमेव परामृश्य, अभिसंभवितास्मीति वचनेन तमेव प्राप्यत्वेन व्यपदिशति, ध्यानादिकर्तृत्वेन च शारीरम् । अतः प्राप्ताप्राप्तविवेकन्यायस्यात्राप्रवृत्तिः । किंच, फलविचारेऽपि चेतनस्य फलस्य न पुरुषशेषत्वम् । चेतनस्य महत आशास्यस्य शेषिताया वरणीयस्थले दर्शनात्, 'फलं पुरुषार्थत्वा'दिति पौर्वतन्त्रन्यायस्य स्वर्गादौ चरितार्थत्वादत्र च

रश्मिः ।

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥ **विषय** इति मननविषयो मनोमयः प्राणशरीर इत्यादिनिरूप्यः । **ध्येयत्वेने**ति स क्रतुं संकल्पं ध्यानमिति यावत् । इति शंकरभाष्याद्यथाध्यानकर्तृत्वेनेत्युक्तं वादिबोधाय तन्मतेन तथा तादृशध्यानविषयत्वेनेति वादिबोधाय मननविषयत्वेनेति फलितम् । **अत्रे**ति प्रकृते । **तद्विचार** इति मनोमय इत्यारभ्य मननविषयविचारे । **फले**ति फलप्रतिपादके वाक्ये । **ध्येय**मिति वादिबोधाय मन्तव्यमित्यर्थः । अभीति प्राप्तास्मीत्यर्थः । भूङ् प्राप्तावात्मनेपदी भ्वादिस्तृजन्तः सेट् अभि आभिमुख्ये । सर्वत इति ज्ञानमार्गे । सम्यक् सेवादिपूर्वकं प्राप्तास्मीति । **प्राप्यत्वेने**ति ब्रह्म न विकार्यं कटकादिवन्न संस्कार्यं व्रीह्यादिवत् । नाप्युत्पाद्यं घटादिवत् किं तु स्वर्गादिवत्प्राप्यं कर्मतत्त्वेनेत्यर्थः । एतमिति द्वितीययोक्तं कर्मत्वं तच्चाप्यधर्मेण प्राप्यत्वेनेत्यर्थः । कर्मण आप्यविकार्यसंस्कार्योत्पाद्यभेदेन चातुर्विध्यात् । एवं व्यपदिशतीत्यन्तं भाष्यं व्याकृत्य कर्तृत्वेनेति भाष्यं व्याचक्रुः **ध्यानादी**ति मननादिकर्तृत्वेन । शारीरमुपासकम् । **अत** इति व्यपदेशभेदात् । अप्रवृत्तिरिति जीवत्वस्य प्राप्तत्वं कर्तृत्वे व्यपदेशे ब्रह्मत्वस्याप्राप्तत्वं कर्मव्यपदेशे ब्रह्मत्वस्येतिएकविषयत्वाभावादप्रवृत्तिः । ननु मा प्रवर्तिष्ट प्राप्ताप्राप्तविवेकन्यायः एकविषयत्वाभावात् फलं च पुरुषार्थत्वादिति पौर्वतन्त्रन्यायस्तु प्रवर्तिष्यते तथा च ब्रह्मणो जीवशेषत्वं फलत्वादित्याकाङ्क्षायामाहुः **किं चे**ति । पश्वादिफलस्य चेतनस्य पुरुषार्थत्वमस्त्येवात उक्तं **महत** इति । 'यतो वाच' इतिश्रुतेरुक्तमाशास्यस्येति । **वरणीये**ति मुण्डकोपनिषदि 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्' इतिस्थले पारार्थ्यं शेषलक्षणं तस्य जीवे ब्रह्मवरणार्थत्वाज्जीवस्य सत्त्वात् । आत्मनश्च जीवसाधनालभ्यत्वेन पारार्थ्याभावाज्जीवस्य शेषत्वं वरणीयस्य फलस्य शेषित्वमितिदर्शनात् । फले पारार्थ्यं जैमिनिमतमनपनोद्यमितिचेत्तत्राहुः **फल**मिति । चकारोपि फलमित्यस्याग्रे पठ्यते **पौर्वे**ति । तृतीयाध्यायप्रथमपादस्थोयं न्यायः । सर्गादौ जडपरिच्छिन्नचेतनादौ तथा च 'सा च प्रशासनात्' इति व्यासचरणसूत्रविरुद्धमपनोद्यमेतज्जैमिनिमतमितिभावः । तथा च भाष्यम् । अप्रतिहताज्ञाशक्तेर्भगवद्धर्मत्वादिति । अत्राज्ञापूर्णशक्तिर्मुण्डकम् ।

'श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्तते ।
आज्ञाच्छेदी मम द्वेषी न मद्भक्तो न मे प्रियः ॥'

प्राप्यत्वेन च व्यपदिशति। कर्तृत्वेन च शारीरं व्यपदिशति। नच भजनीय-

भाष्यप्रकाशः।

तद्वैषम्येनाप्रवृत्तेः। अत इदं ब्रह्मवाक्यमेवेत्यर्थः। सौत्रस्य चकारस्यार्थमाहुः नचेत्यादि। यथा क्रतुरित्यादिना भजनीयप्राप्तव्ययोरैकरूप्यस्योक्तत्वात् तादृशरूपस्याप्राप्तत्वे फलवाक्यस्याबोध-

रश्मिः।

इतिवाक्यात् तद्वैषम्यं न्यायवैषम्यमुक्तमेव। अत इति ध्यात्रपेक्षया प्राधान्येन ब्रह्मण एव प्रकरणित्वादित्यर्थः। अर्थमिति समुच्चयम्। भजनीयेति क्रतुर्यज्ञो मननात्मेत्युक्तम्, यज्ञश्च यजेर्नङि रूपं यजिश्च द्वितीयस्कन्धे 'ब्रह्मवर्चस' इत्यत्र भजत्यर्थः भजसेवायां भज्यत इज्यते यज्ञः क्रतुरिति फलितम्। 'यज्ञो वै विष्णुः' इतिश्रुतौ कर्मणि नङ् रूढो वा सेवावाची यज्ञशब्दः यथा क्रतुरितिपदद्वयम् सेवात्वमनुवृत्तित्वम्। यद्वा येन प्रकारेण क्रतुरस्य स यथा क्रतुर्भक्तविशेषणम्। क्रतुमय इत्यत्र 'द्व्यचश्छन्दसि' इतिविकारे मयटोऽबाधादप्यत्र प्रकरणे प्राचुर्ये मयट् पुरुषस्य क्रतुविकारत्वाभावात् यज्ञप्रचुरः पुरुषः पुरि शेते इति व्युत्पत्तेः। तत्र प्रचुरेषु क्रतुषु प्रकारभेदेन यत्प्रकारकः क्रतुस्तद्वांस्तेन प्रकारेण तं प्रेत्य भवतीति योजना। ननु........न ज्ञानत्वेन क्रतुस्तद्वान् प्रेत्य ज्ञानत्वेन प्रकारेण ज्ञानं तदात्मको भवतु नामसेवा द्वितीयप्रकारेण क्रतुस्तद्वान् कथं सेवात्वेन प्रकारेण भवत्विति चेन्न भगवत्सेवोपयोगिदेहो वैकुण्ठादिष्विति सेवाफलग्रन्थोक्तेः भृशं सेवावानपि सेवारूप इति तत्प्रकारोपपत्तेः। कर्ममार्गे त्वावृत्तिः। ननु द्वितीयपुरुषो भक्त इत्येवं व्याकृतमन्यैः उपासक इत्येवमुभयोः किं प्रमाणपदवीमधिरोढुमर्हतीति चेन्न।

'मार्गास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया।
ज्ञानं कर्म च भक्तिश्च नान्योपायोस्ति कर्हिचित्'॥

इति त्रिषु मार्गेषूक्तेषु पूर्ववाक्येनोपासनाप्राप्त्या चित्तशोधकत्वेनोपयोगो भाष्ये कृतः कर्ममार्गस्य कथमथपदव्यवच्छिन्नद्वितीयवाक्ये उपासनानुवृत्तिः। ननु 'ब्रह्मविदाप्नोति परम्' 'आत्मेत्येवोपासीत' इत्येवंविधेषु वाक्येषु वेदनोपासनपदानां सामानाधिकरण्यं शंकराचार्यमते, रामानुजाचार्यमते च वेदनं स्मृत्यात्मकभक्तिरूपं भवन्नये माहात्म्यज्ञानमात्मजीवैक्यज्ञानं च भक्तिव्यापारकम्। हीति कथमत्रोपासनाव्यवच्छेदः। इत्थम् षडङ्गेषु व्याकरणस्याप्यभिनिवेशादुपासनोपसमीपे स्थित्वा यथायोग्यकरणं करणे ल्युट्। मनोव्यापारविशेषो वा मनसो ब्रह्मसमीपे स्थाप्यत्वात्। तत्रोपासना मनस उपदेशो यदा तदा मानसी माहात्म्यज्ञानाद्यनु तनुवित्तजसेवे अनुभवति च। भाष्यप्रकाशे तु यथायोग्यकरणार्थं उप समीपे स्थितिरुपासनेति भावे ल्युटमङ्गीकृत्य प्रपञ्चिता भक्तिः फलाध्यायसमाप्तौ। भाष्ये त्वत्रान्तःकरणशोधकत्वेनोररीकृतोपासना ते इमे उपासने भिन्ने श्रौतवाक्येषु ह्युन्नेये। तासु प्रथमलक्षणलक्ष्या भाष्येन्तःकरणशोधकत्वोक्त्याद्दता। 'भक्तियोगं स लभते एवं यः पूजयेत माम्' इत्येकादशस्कन्धात्। अत्र कर्मकाण्डसंक्षेपादन्तःकरणशोधकत्वं पूजायाः। पूजनोपासाकर्मपदानां पर्यायत्वात्। सुबोधिन्यामुपासनाकाण्डं मन्त्रशास्त्रं पञ्चरात्रं चेतिकथनात् कर्मकाण्डज्ञाने पञ्चरात्रोपयोगस्य शास्त्रप्रसिद्धत्वात्। एवं चोपासनाया एतादृश्या व्यवच्छेदोथशब्देन सुकरः। अत एव

'मन्त्रोपासनवैदिकतान्त्रिकदीक्षार्चनादिविधिभिर्यः।
अस्पृष्टो रमते निजभक्तेषु स मेस्तु सर्वस्वम्'॥

रश्मिः ।

इत्यत्र मन्त्रोपासनमेकपदव्याकृतम् । ननु गीताभक्तियोगाध्याये द्वादशे उपासनोक्तैवेति चेदित्थम् । श्रीभगवानुवाच ।

'मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः' ॥

इत्यत्र मनःपूर्विका उपासना उपसमीपे स्थित्वा यथायोग्यकरणरूपा मानसी तृतीयस्कन्ध-सुबोधिन्युक्तराद्धान्तरोक्ता सिद्ध्यति । उपासत इत्यस्य मनो व्यापारं कुरुते इत्यर्थे पुनरुक्तिः । यद्वा मन्मन आवेशं कृत्वा साधनानामसिद्धवदावृत्तिः कर्तव्येति सुबोधिन्या मन्मन आवेशसाधनतनु-वित्तजसेवे उपासनपदेनोच्येते । चित्तशोधकोपासना तु पूजापदेनोच्यते अत एव मन्त्रोपासनेत्यत्र उपासनं पुरश्चरणपूर्वकसाधनरूपं गृह्यते । यद्वा उपासनया शुद्धचित्ता नित्ययुक्ता भगवदर्थं यतयो तनुवित्तजसेवाकर्तार इतियावत् ब्रह्माविष्टमनसः सिद्धा बुद्धावनूदिताः पूर्वार्धेन सिद्धसाधने फलावश्यंभावनियमात् । अतो युक्तपदेन ब्रह्मार्थं यतयो व्याख्याताः । यदि च चित्तशुद्ध्यनन्तरं ज्ञानिनो व्याक्रियेरन् तदापि 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इति भक्ता व्याकरणीया एव ।

ननु 'पूजया श्रवणादिभिः' इतिभक्तिवर्द्धिन्यां पूजा स्वीकृतैव कथमस्वीकृता भवेत् । सत्यम् । पूजा हि भक्त्यङ्गमिति प्रतिपदं स्फुटमेव । उत्तमपुरुषे तु नास्ति भक्त्यतिरिक्तं साधनम् । ननु यत्किंचिद्भक्त्यनन्तरं पुरुषोत्तमप्रतिष्ठायां श्रीमद्गोस्वामिन एव श्रीभागवतभक्तिवर्द्धिनीनवरत्नाद्युक्तदिशा भगवत्सेवनं भाषयांबभूवुः, तत्र कथं पूजापदप्रवृत्तिः उच्यते । तत्र श्रीमद्गोकुलनाथैः पूजायां हरिण्यकृत सोररीकृता । ननु

'सेवे पूजे यजेश्चैव तत्रतत्रार्थके कथम् ।
प्रवृत्तिस्तत्रतत्रार्थे नियतस्य भवेत् खलु' ॥

धातूनामनेकार्थत्वात्तु भवेत् यथा 'पूजां दधुर्विरचितां प्रणयावलोकैः' इत्यत्र प्रणयावलोकाभिन्नां पूजामिति वचनव्यक्तेः प्रणयावलोके पूजापदम् । पञ्चभिरुपचारैः पूजयेदित्यत्र पञ्चोपचारेषु मीमांसकमते पञ्चोपचाराभिन्नेन पूजनेनेष्टं भावयेदिति बोधात् । एवं द्वादशषोडशचतुःषष्ट्यष्टोत्तरशतोपचारेषु द्रष्टव्यम् । 'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया अभेदार्थिका । एवं यजेरपि द्रव्यादियज्ञेषु प्रवृत्तिः । सेवेस्तु स्त्रीसेवा औषधसेवा राजसेवा इत्यादौ भोगतत्तत्काले भक्षणापेक्षितसमर्पणादौ ह्यर्थे प्रवृत्तिः प्रयोगदर्शनादनुभवाच्च । तदुक्तं सुबोधिन्यां प्रथमद्वितीयाध्याये यजतिस्तुत्यर्थः द्वितीयस्कन्धे यजतिर्भजत्यर्थः । नन्वेवमपि न निस्तारो यतो भज्यादीनां सेवार्थकानां गत्यर्थकत्वम् । षिवू गताविलस्य दैवादिकस्य स्त्रियं सीव्यतीत्यत्र सीव्यतीति सेवा कर्मण्यण् स्त्रियां सेवा स्त्रीसेवेति स्त्रीगमनमित्यर्थः । एवं सर्वत्र यदपि पारिभाषिकं सेवनं तदपि वेदाङ्गव्याकरणेन व्याहतमिति चेदत्रोच्यते । भ्वादौ षिवृ सेवन इत्यत्र षिवृ गताविल्यापत्तिर्विलक्षणार्थं विना विलम्बोपस्थितार्थानामग्रहणात् । अतो रूढ्या देववत्संभावनं सेवापदार्थः प्रथमकक्षायाम् । तिसृष्वपि वा । ननु रूढ्येति भवन्नये कथं संगच्छताम् । वेदान्ते योगमात्रादरणादिति चेत्सत्यम् । भ्वादेराकृतिगणत्वात् । संभावनार्थकं धातुं प्रकल्प्य भज सेवायां षिवृ सेवने सेवृ सेवने इत्यादौ तदङ्गीकारौचित्यात् । प्रथमस्कन्धे द्वितीयाध्याये 'नष्टप्रायेष्वभद्रेषु' इत्यत्र पूर्वं कथायाः श्रवणमेव इदानीं देववत्संभावनमिति सेवार्थः इति । किं च भजतीत्यादौ गत्यनुकूलो व्यापारोऽर्थः ब्रह्मसंबन्धानुकूलो व्यापारस्तु भक्तिरेव । ज्ञानमक्षरसंबन्धानुकूलो

रश्मिः।

व्यापारः कर्म तु चित्तशुद्ध्यनुकूलो व्यापार इति भक्तित्वेन ब्रह्मसंबन्धत्वेन कार्यकारणभावात् 'भक्त्याहमेकया ग्राह्यः' इतिवाक्यात् । ननु ज्ञानमपि पूर्वोक्तलक्षणद्वयकमेवातो न ज्ञानोपासनयोर्भेद इति चेत्सत्यम् । क्षेत्रक्षेत्रज्ञनिर्देशयोगे त्रयोदशेध्याये ।

'अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥
इन्द्रियार्थेषु वैराग्यमनहंकार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा' ॥

इत्यत्राचार्योपासनत्वात् । कामः संकल्प इत्यत्र धियो मनोवृत्तित्वात् लक्षणद्वयकत्वम् । एवं च मार्गास्त्रय इत्यत्र त्रित्वसंख्याविरोधः । अतो ज्ञानत्वरूपसामान्येनैक्येपि ह्युपासात्वेन माहात्म्यज्ञानत्वेनात्मजीवैक्यज्ञानत्वेनानैक्यमेव । ननु गीतोक्तार्थो हि तज्ज्ञो साधनाध्याये वक्तव्यः 'ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः' इत्यनेन ब्रह्मसूत्रपदैः गीतं प्रकाण्डं भवतीति तत्रोक्तं ज्ञानं न प्राप्नोतीति चेन्न 'तत् समासेन मे शृणु' इति समासाङ्गीकारात् । यद्वा अध्यात्मज्ञानं माहात्म्यज्ञानं तत्त्वज्ञानमात्मजीवैक्यज्ञानम् । तत्त्वमनारोपितरूपमिति माहात्म्यज्ञानमपि तज्ज्ञाने भवत्येव । अध्यात्मज्ञानं प्राणो व्यानोऽपान उदानः समानः चक्षुः श्रोत्रं मनो वाक् त्वक् चर्म मांसं स्नावास्थि मज्जा एतदधिविधाय ऋषिरवोचदिति शिक्षाश्रुतेरेतज्ज्ञानम् । अतो भक्तः पुरुषो नोपासक इति सिद्धम् । 'द्वयोः सारूप्यात्तद् भ्रमहतिकृते' भक्तिहंसे स्फुटमन्यत् । एवं च भक्तो यत्प्रकारकक्रतुमान् तेन प्रकारेण सायुज्यालौकिकसामर्थ्यभगवत्सेवोपयोगिदेहपशुपुत्रसालोक्यादिमानितः प्रेत्य भवति । ननु क्रतुरग्रे ब्रह्ममननात्मा वक्ष्यते कथं सेवायां मननमिति चेदत्रोच्यते सिद्धान्तमुक्तावल्यां ब्रह्मबोधनमिति निष्प्रकारकज्ञानरूपब्रह्मबोधात् बोधनपदं विहाय मननपदं सिद्धान्तमुक्तावल्याम् ।

'तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः ।
आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तयेत्' ॥

इतिभावनाविधानात् भावितं च भावनायां भावुकैः श्रीहरिधनचरणैः । ननु स्मरणं भवतु मीमांसया परब्रह्मणो विषयत्वादानन्दरूपप्राणशरीरभजनस्य किं प्रयोजनम् । मैवम् ।

'यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ।
मदर्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः' ॥

इत्येकादशस्कन्धे विंशेध्याये मीमांसयाप्येवमेव स्मरणमन्यनिषेधात् । यद्यपि 'अथातो ब्रह्मजिज्ञासा' इत्यधिकरणे 'यदेव विद्यया करोति श्रद्धयोपनिषदा' इति छान्दोग्येन कर्मरूपोपासनाशेषत्वमुपनिषज्ज्ञानस्य तदपि सुबोधिन्यां व्यवस्थापितम् । भगवत्सेवां कुर्वाणस्य कामनायां जातायां

रश्मिः ।

कर्मकरणे फलं भवत्येवेत्येवम् । स फलोपकारी शेषशेषिभावः । मदर्चोपासनापि मनस उपासनं मानसी-सेवारूपम । व्याख्यानात् । तथा च श्रुतिरीशावास्योपनिषदि ।

'अन्धंतमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्याया॰रताः' ॥

इति ह्युपासाभक्तिभेदमाह 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यति' इति द्वितीया कक्षा रतिः । सेवाप्रकारस्तु संप्रदायप्रदीपे पञ्चमे प्रकरणे पूर्णस्याराधने श्रीकृष्णोक्त एव भक्तिमार्ग इत्यादिना भक्तिमार्गमुक्त्वा भजनप्रकार उक्तः । भजनप्रकारमाह ।

'मच्चित्ता मद्गतप्राणा बोधयन्त परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च' ॥

मच्चित्ता इति पञ्चज्ञानेन्द्रियव्यापारो भगवत्युक्तः । मद्गतप्राणा इति कर्मेन्द्रियव्यापारो भगवत्येव युक्तः । मद्गतत्वेन निर्दोषत्वम् । पायोर्मलांशत्यागेनेति प्राणस्य हि क्रियाशक्तिरिति वाक्यात् । एवं च निरोधलक्षणोक्तो निरोधो मर्यादामार्गीयसर्वात्मभावरूपः प्रकारः । 'बोधयन्तः परस्परम्' इति समानशीलैरेव सङ्गोप्युक्तः 'कथयन्तश्च मां नित्यम्' इति श्रीभागवतश्रवणं कीर्तनमप्युक्तम् । एवं सेवाकथालक्षणा भक्तिः सिद्धा । सैव फलरूपा जातेति 'तुष्यन्ति च रमन्ति च' इत्युक्तमिति । सेवाप्रकरणे तु 'यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः तत्तन्निवेदयेन्मह्यम्' इति दास्यकमुक्तम् । टिप्पण्यां दास्यमुक्तम् । पुरुषोत्तमप्रतिष्ठायां तु श्रीभागवतभक्तिवर्द्धिनीनवरत्नाद्युक्तप्रकारेणेत्युक्तम् । पुरुषोत्तमसहस्रनामस्तोत्रे तु 'लघुस्वमार्गवक्ता च' इत्येकादशस्कन्धनामसु पठितम् । भक्तिरत्ने तदेवोक्तं टीकायाम् । सिद्धान्तमुक्तावल्याम् ।

'तस्माच्छ्रीकृष्णमार्गस्थो विमुक्तः सर्वलोकतः ।
आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तयेत्' ॥

इति भावनोक्ता श्रीहरिधनैः सैव प्रपञ्चिता । शृङ्खला तु संप्रदायप्रदीपे श्रीकृष्णोक्त एवेत्यादिनोक्ता । प्रथमस्कन्धे द्वितीयेध्याये शृङ्खलोक्ता । सेवाप्रकरणे उक्ता एकादशे योगेश्वर-वाक्यैरुक्ता अप्रतीकालम्बनसूत्रे वक्ष्यामः सप्रपञ्चप्रकारम् । एवं प्रकारेण ब्रह्म सेवमानस्य यथाक्रतोर्ब्रह्म भजनीयं यदा तदा श्रीमदाचार्योक्तपूर्वोक्तरीत्या सद्गुरुवाक्यात् आत्मसमर्पणं कृत्वा सेवाकथाभ्यामेव भजनं कुर्वतः । एतमितिपदेनोक्तोयं प्राणशरीरो हि प्राप्तव्यः तस्य भजनीयस्य चैक्यरूप्यमस्त्येव । अत्र मनोमय इति वेद आत्मोक्तस्तस्याभिसन्निवेशः स च सत्यं ज्ञानमनन्तं ब्रह्म इत्यत्रानन्तपदार्थः अनन्ता वै वेदा इति श्रुतेः । अतो वेदं शब्दात्मकं विहाय प्राणशरीररूपार्थस्य प्राप्तव्यत्वम् । न च शब्दार्थयोरौत्पत्तिकसंबन्धान्मनोमयस्यापि प्राप्तव्यत्वमस्त्विति शङ्क्यम् । प्राण-शरीररूपवेदस्यास्तु प्राप्तव्यत्वं सर्वस्य वेदस्य नेति मनोमयस्य प्राप्तव्यत्वाभावात् । अक्षरे त्वेवम् । गणितानन्दापेक्षयाधिकानन्दाविर्भावन उत्तमः पुरुषः । विशिष्यादृश्यत्वाधिकरणे वाच्यम् ॥ ३ ॥ फलवाक्यस्येति एतमितः प्रेत्याभिसंभवितास्मि इतिवाक्यस्येत्यर्थः । खपुष्पमितिवद् बोधकता ।

१. उपाः ।

रूपाकथने तादृशं फलं सिद्ध्यतीति चकारार्थः अधिकरणसंपूर्णत्वद्योतकश्च ॥ ४ ॥

इति प्रथमाध्याये द्वितीयपादे प्रथमं सर्वत्र प्रसिद्धोपदेशाधिकरणम् ॥ १ ॥

शब्दविशेषात् ॥ ५ ॥ (१।२।२)

इदमाम्नायते । 'यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैव-

---

भाष्यप्रकाशः ।

कतैव प्रसज्येतातस्तदपि प्राप्तत्वेनैवावगन्तव्यमित्येष चकारार्थ इत्यर्थः । एवं चात्र जगदुत्पत्तिकर्तृत्वनिर्वाहकाणां सत्यसंकल्पत्वादिधर्माणां ब्रह्मणि साधनेन तदसंभवः परिहृतः । प्रयोजनान्तरमाहुः अधिकरणेत्यादि । एतेनैव पूर्वपक्षस्योपशान्तत्वात् तथेत्यर्थः । अन्ये त्वेतदधिकरणमष्टसूत्रमाहुः । तदप्येतेनैव दूषितम् ॥ ४ ॥

इति प्रथमं सर्वत्र प्रसिद्धोपदेशाधिकरणम् ॥ १ ॥

शब्दविशेषात् ॥ ५ ॥ विषयवाक्योपन्यासमुखेनाधिकरणमवतारयन्ति इदमाम्नायत इत्यादि । इदं वाक्यम् । केचन समानप्रकरणे वाजिनामित्याहुः । अन्ये तु समानप्रकरणे इत्येवाहुः ।

रश्मिः ।

चकारेति अभिधयार्थोनुक्तोपि । शास्त्रार्थस्याधिकरणत्र्युक्तस्यैवाग्रे प्रपञ्चः इत्युक्तत्वात्तया सह संगतिं सूत्रयन्तोधिकरणप्रयोजनमाहुः एवं चेति । तदसंभव इति कर्तृत्वासंभवः । तेन प्रसङ्गः संगतिरिति सूचितम् । प्रयोजनेति । चकारस्येति शेषः । अधीति व्यञ्जनयाधिकरणपूर्णत्वद्योतक इत्यर्थः । वृत्तिद्वयविरोधरूपं दूषणं व्यञ्जनातिरिक्तस्थले बोध्यम् । एतेनेति अधिकरणपूर्वपक्षस्य पूर्वसूत्र एवोपशान्तत्वेपि निराकरणीयजीवपूर्वपक्षस्योपशान्तत्वं नानिराकरणीयजीवपूर्वपक्षस्येत्यत्रानिराकरणीयजीवशङ्कारूपपूर्वपक्षस्योपशान्त्या जीवसाधारणपूर्वपक्षस्यैतेनैवोपशान्तत्वादित्यर्थः । तथेति द्योतकत्वेन प्रकारेण चकारः । अन्य इति शंकराचार्यप्रभृतयः । तदपीत्यादि । एतेनेति अत्रैव पूर्वपक्षोपशान्तिव्युत्पादनेन । दूषितमिति वक्ष्यमाणसूत्राणामनपेक्षाबोधनात् दूषितप्रायमित्यर्थः । उभयोः सूत्रयोः शारीरपरमात्मनोर्भेदः स कर्मकर्तृसूत्रादेव सिद्धः । तृतीयसूत्रेऽर्भकौकःस्थितिरुपपादिता सा वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवमित्यत्र सिद्धा । एवं तत्तदनुप्रवेशाद् ब्रह्माप्येवमितिभाष्यात् । चतुर्थे विशेषोऽसाधि सोपि कर्मकर्तृसूत्रोक्तभेदपर्यवसायीति । भगवांश्चैवस्तु सर्वत्र प्रसिद्धोपदेशादित्यधिकरणं द्विसूत्रमाह एतदग्रेधिकरणसमाप्तौ प्रपञ्चयिष्यते ॥ ४ ॥ १ ॥

इति प्रथमं सर्वत्र प्रसिद्धोपदेशाधिकरणम् ॥ १ ॥

शब्दविशेषात् ॥ ५ ॥ अवतारयन्ति प्रसङ्गसंगत्यावतारयन्ति अस्याधिकरणस्यैकान्तर्यामिरूपनिश्चायनार्थत्वात् । अतोधिकरणाशेषत्वान्नावतरणापेक्षा । विषयवाक्यार्थस्तु स्पष्टः । श्यामाकश्यामाकतण्डुलशब्दार्थावुक्तौ । अन्तरात्मन्निति सप्तम्याश्छान्दसो लुक् । केचन इति रामानुजाचार्यभास्कराचार्याः । अन्य इति शंकराचार्याः । भगवन्तो माध्वशैवाचार्यास्तु श्रुत्यन्तरमुदाजह्रुः तत्र शैवोदाहृतश्रुत्यन्तरस्य वक्ष्यमाणत्वात् माध्वोदाहृतश्रुतिरुच्यते एतमेव ब्रह्मेत्याचक्षत इति न हि जीवमेव ब्रह्माचक्षत इतिभाष्यम् । एवं भिक्षुभाष्येपि द्रष्टव्यम् । प्रकरणेति श्रीमन्थब्राह्मणे ब्रह्मजीवप्रकरणसामान्ये इत्यर्थः । एवं पाठेति बृहदारण्यके व्रीहियवास्तिलमाषा अणुप्रियङ्गवो गोधूमाश्च मसूराश्च

भाष्यप्रकाशः ।

इदं च वाक्यं न बृहदारण्यकस्थम् । तत्र प्रकरणसामान्येऽप्येवं पाठादर्शनादिति । किंतु वाजिशाखायामेवान्यत्रिकं बोध्यम् । भास्कराचार्यादिभिस्तथा कथनात् । तेनात्र प्रसङ्गोऽधिकरणसंगतिः । नन्वत्र पक्षानुपन्यासात् कथमधिकरणान्तरत्वावगतिः । नच समानप्रकरण-

रश्मिः ।

खल्वाश्च खलकुलाश्चेतिपाठः छान्दोग्येपि पञ्चमप्रपाठके अणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वैष म आत्मान्तर्हृदयेति पाठः । अणवो विन्ध्याचलप्रदेशे प्रसिद्धाः प्रियङ्गवः कङ्गुशब्दवाच्याः गुर्जरदेशे प्रसिद्धाः खल्वाश्च वलशब्दवाच्याः । खलकुलाः कुलत्थाः । श्याममकति कुटिलगतिं करोतीति श्यामकः कर्मण्यण् । अक कुटिलायां गतौ भ्वादिः सेट् श्यामस्य कुटिलं संयोगं संबन्धं करोतीत्यर्थः । मकई इतिप्रसिद्धम् । माषा वा । कथनादिति । एवं समानप्रकरणे वाजिनां च श्रुतौ शब्दविशेषः श्रूयते इतिरामानुजभाष्यम् । भास्करभाष्यं समानप्रकरणे वाजिनां श्रुतिरिति । नन्वधिकरणरचनस्य को हेतुः अन्तर्गतत्वे तु पूर्वाधिकरणस्य विविधान्नतृप्तिवत् ब्रह्मजीवयोर्भेदो विविधरूपेण भविष्यतीतिचेन्न । अस्याधिकरणस्य हिरण्मयपदवाच्यं ब्रह्मेति सर्वत्र निश्चयार्थत्वात् । विविधरूपेण भेदसत्ताया निरुपयोगत्वात् । एककर्मकर्तृसूत्रप्रामाण्येन भेदसिद्धेः । तेनेति आनन्दरूपप्राणशरीररूपान्तर्यामिरूपवाक्यार्थे पूर्वाधिकरणोक्तमनुहिरण्मयरूपकथनेन । प्रसङ्ग इति अर्थतो हिरण्मयपदविचारात् संदेहवारणेन प्रसङ्गः । किं च । पूर्वाधिकरणे 'स क्रतुं कुर्वीत' इत्युक्त्वा 'मनोमयः प्राणशरीर' इत्युक्तस्य भारूप इत्यनेन प्रतिमाक्रतुत्वेन क्रतुमतः प्रतिमागतभारूपादेरेष म आत्मान्तर्हृदय इत्यत्रैतत्पदेन परामर्शाल्लौकिकत्वशङ्का स्यात्तद्वारणाय पुनरन्तर्हृदये हिरण्मयरूपनिरूपणात्प्रसङ्गः । उपोद्घातस्य भानेपि सर्वासां संगतीनां प्रसङ्ग एवान्तर्भावोपपादनेन स्वमतसिद्धसंगतिलक्षणाक्रान्तत्वात् प्रसङ्ग एव । तथा च सुबोधिन्यां 'स्वहृदये भगवन्तं यावन्न वेद तावन्न कोपि प्रतिमादौ भगवन्तं प्रपूजयेत्' इति । अत्र 'तत्तु समन्वयात्' इत्यादिन्यायमविस्पष्टत्वायाङ्गीचक्रुः नन्विति । अन्यथा..

पक्षेति अत्र पक्षो हिरण्मयः, ब्रह्मत्वं साध्यम् । शब्दविशेषो हेतुः । परं तु हिरण्मयघटादौ साधारण्यमतोनुमानत्वेन भाष्ये वर्णनीयेऽथातो ब्रह्मजिज्ञासेत्यधिकरणतोनुवृत्तं ब्रह्म पक्षो हिरण्मयत्वं साध्यमिति न साधारण्यमिति निपुणबुद्धयः । समाधिकुशलास्तु अनुमानस्य श्रीमदाचार्यानभिप्रेतत्वेन तत्प्रकाशे कुतोनुमानवर्णनां निपुणबुद्धयः प्रवदन्ति इति च कुतूहलयांबभूवुः । पक्ष इव पक्षस्तस्योपन्यासादित्यर्थः । तदुक्तम् ।

यदि स्फुरति दूषणं निपुणबुद्धयः सर्वथा
मदीयवचसि ध्रुवं तदपि युक्तिभिर्दीयताम् ।
विचारभरचातुरीफलमिदं हि लाके यतः
समाधिकुशलस्य तद्भवतु चापि कौतूहलम् ॥ इति ।

ननु ब्रह्म पक्षस्तस्योपन्यासः प्रश्नविषयः कुतः अतो ब्रह्मजिज्ञासेत्यधिकरणाद्ब्रह्मेत्यनुवृत्तावुपन्यासबोधात् । हिरण्मयस्य पक्षत्वे साधारण्यादितिचेन्न । सूत्रेष्वदृष्टस्य पदस्य सूत्रान्तरादनुवर्तनीयत्वात् । तत्तु समन्वयादित्यादिसूत्रे प्रश्नहेतूल्लेखादत्रापि प्रश्नः । ननु ब्रह्मेत्यनुवर्तनीये वेदान्तानुवृत्तिः स्यात्प्रथमसूत्रे ब्रह्मपदस्य वेदान्तवाचकत्वात् न तु सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्युक्तार्थब्रह्मण इति चेन्न शब्दार्थयोरत्यन्ताप्रविवेकाद्ब्रह्मवाचकवेदान्तानुवृत्तौ बाधकाभावात् । समानेति समानं प्रकरणमिति

मयमन्तरात्मन् पुरुषो हिरण्मयः' इति। तत्र संशयः। हिरण्मयः पुरुषः किं जीव उत ब्रह्मेति। उपक्रमबलीयस्त्वे जीव, उपसंहारबलीयस्त्वे ब्रह्मेति।

यत्रैकस्यान्यपरत्वेनैकार्थता संभवति तद्बलीयस्त्वमिति सिद्धं पूर्वतन्त्रे।

भाष्यप्रकाशः।

त्वेनैतदुक्तपक्षस्य स्मारणादिति वाच्यम्। तथा सति पूर्वशेषत्वावगत्याऽधिकरणभेदस्यासंगतत्वमित्याशङ्कायां संशयाकारमाहुः तत्र संशय इत्यादि। तथाच तत्र मनोमयत्वादिविशिष्टः पक्षोऽत्र तु हिरण्मयत्वविशिष्ट इति पक्षभेदाद् भेद इत्यर्थः। नन्वेवं सति पूर्वपादोक्तान्तस्तद्धर्माधिकरणेनैव गतार्थत्वेनैतत्प्रणयनवैयर्थ्यापात इत्यत आहुः उपक्रमेत्यादि। तथाच तत्रोपक्रमस्य बलिष्ठत्वसाधनात् संशयनिरासः। प्रकृते तु तदभावादेतत्प्रणयनमतो न वैयर्थ्यमित्यर्थः। ननु प्रथमावगततयोपक्रमस्यासंजातविरोधत्वेन बलीयस्त्वस्यात्रापि तौल्याद् वैयर्थ्यं कथं नेत्यत आहुः यत्रेत्यादि। न हि प्रथमावगततामात्रं बलीयस्त्वे तन्त्रम्। किंतु यत्रोपक्रमादावेकस्यान्यपरत्वेन वाक्यस्यैकार्थता संभवति, विप्रतिपत्तिनिरासेन वाक्यभेदो न भवति तस्य बलीयस्त्वमिति पूर्वतन्त्रे सिद्धम्। तदेकशाख्यादत्राप्युपादेयमतोऽत्र यस्य बलीयस्त्वं

रश्मिः।

विग्रहे कर्मधारयः समानप्रकरणत्वमेकार्थत्वम्। उभयाकाङ्क्षा प्रकरणम्। समानप्रकरणं यथाक्रतुरिति पूर्वाधिकरणोक्तत्वेन एतदुक्तो विषयवाक्योक्तः पक्षो हिरण्मयत्वविशिष्टः तस्याप्यवान्तरात्मन्पुरुषः इतिपक्षः अर्थयोर्भेदौ तद्वान् शब्दयोर्विशेषो विभक्तिभेदस्तस्मादिति हेतुः। तथासतीति। समानप्रकरणोक्तपक्षस्यात्रापि सत्त्वाङ्गीकारे सति शंकराचार्योक्तव्याख्यानरीत्या पूर्वाधिकरणशेषत्वावगत्या। तथा चेति तथा चात्रत्यं तद्भाष्यम्। इतश्च शारीरादन्यो मनोमयत्वादिगुणः यस्माच्छब्दविशेषो भवतीति। हिरण्मयत्वेति तन्मतसिद्धसूत्रार्थकथनात् पक्ष उक्तः। तथा च भाष्यम् हिरण्मयः पुरुष इति। परेषां भाष्ये रत्नप्रभा शब्दयोर्विशेषो विभक्तिभेदः तस्मात्तदर्थयोर्भेद इतिसूत्रार्थ इति। अत्र विचार्यमाणे पक्षो हिरण्मयत्वविशिष्टोन्तरात्मन् पुरुषो वा। भेद इति अधिकरणभेदः। एवं सतीति हिरण्मयस्य पक्षत्वे सति। गतेति। अथ य एषोन्तरादित्ये हिरण्मयः पुरुष इति छान्दोग्यश्रुतिर्विषयवाक्यम्। तत्र च हिरण्मयस्यैव पक्षत्वात् इति भावः। उपक्रमस्येति ओमित्येतदक्षरमुद्गीथमुपासीत इत्युपक्रमश्छान्दोग्ये। ब्रह्मविदाप्नोति परमित्युपक्रम्यानन्दमयस्य फलत्वमुक्त्वा स यश्चायं पुरुषे यश्चासावादित्ये स एक स य एवं विदिति साधनस्यानन्दमयमात्मानमुपसंक्रम्येति फलं श्रुतम्। तच्च सवितरि विद्यमानस्याब्रह्मत्वे फलं नोपपद्यते इत्यन्तस्तद्धर्मोपदेशादित्यधिकरणारम्भः। एवं चोपक्रमो ब्रह्मणि इत्येवमुपक्रमस्य बलिष्ठत्वसाधनादित्यर्थः। पूर्वतन्त्र इति षष्ठस्य प्रथमपादेत्रार्षेयस्य हानं स्यादित्यधिकरणे दर्शपूर्णमासयोरार्षेयं वृणीत इति विधाय एकं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरो वृणीते न पञ्चातिवृणीत इतिपठ्यते श्रुत्यर्थस्तु ऋषिर्गोत्रप्रवर्तकः कश्यपभरद्वाजादिः तस्य संबन्ध आर्षेयः तं वृणीते कश्यपगोत्रोहं भरद्वाजगोत्रोहमिति तिष्ठन्नुच्चारयन्ति तदुक्तं द्वौ वृणीते द्वावार्षेयावुच्चारयति उपमन्युवशिष्टगोत्रोहमिति एवमाङ्गीरसबार्हस्पत्यभारद्वाजसगोत्रोहमिति त्रीनार्षेयान् वृणीते उच्चारयतीत्यर्थः। न चतुरो वृणीत चतुर आर्षेयान्नोच्चारयति न पञ्चातिवृणीते पञ्चार्षेयानतिक्रम्य षडादीनार्षेयान् नैवोच्चारयेदिति तत्रैकं वृणीत इत्यादि त्रयोपि विधयः एतेषामेक एवेति संशयः। त्रयोपि विधयोऽविशेषादिति पूर्वपक्षः। सिद्धान्तस्तु विधित्रयाङ्गीकारे वाक्यभेदापत्तिरिति त्रीन् वृणीत

तत्र चतुर्विधभूतनिरूपणार्थं जीवस्यैवाराग्रमात्रस्यान्तर्हृदये प्रतिपादकमिदं वचनं, फलतो हिरण्मयत्वमिति, न त्वेतादृशाभाससमानत्वं ब्रह्मणो युक्तमतो जीव-

भाष्यप्रकाशः ।

तदुपपादनाय प्रणयनमतो न वैयर्थ्यम् । तथाच तत्समानप्रकरणाभावेन तत्रास्मरणान्न तत्रास्य प्रणयनम् । प्रकृते तु स्मरणेऽपि पक्षभेदोपस्थित्या पूर्वत्र निवेशासंभवेनाधिकरणान्तरत्वाङ्गीकार इत्यर्थः । एवमधिकरणान्तरत्वं प्रसाध्य पूर्वपक्षमाहुः तत्रेत्यादि । जरायुजस्वेदजाण्डजोद्भिज्जभेदेन चतुर्विधानि यानि भूतानि जीवदेहाः । न हिंस्यात् सर्वा भूतानीत्यादौ तथा सिद्धत्वात् । तेषां निरूपणार्थम् । छान्दोग्ये, त्रीण्येव तेषां बीजानीति श्रावणादत्र चतुर्थस्याधिकस्य कथनार्थमाराग्रमात्रस्य जीवस्यान्तर्हृदये व्रीह्यादिभिश्चतुर्भिर्दृष्टान्तैरौपाधिकस्य परिमाणस्य प्रतिपादकमिदं वचनमिति दृष्टान्तबलादवसीयते । आराग्रश्रुतावङ्गुष्ठमात्रपरिमाणस्य बुद्धिगुणेनोक्तत्वात् । नच हिरण्मयत्वविरोधः । पूर्वाधिकरणसिद्धेन तत्क्रतुन्यायेनोपासनायां फलतो हिरण्मयत्वमिति वक्तुं शक्यत्वात् । नच तथा ब्रह्मोपासनाङ्गीकारेऽपि बाधकाभावेनोपपत्तितौल्यात् संशय एव पर्यवसानं शङ्क्यम् । तुः शङ्कानिरासे । तादृशो व्रीहियवादिरूपो य आभासो जीवेन स्वात्मतयाऽध्यस्यमानं शरीरं तत्समानत्वं ब्रह्मणो न युक्तम् । निरवद्यत्वात् । अतः साधकबाधकयुक्तिसत्तया संशयनिरासाज्जीवप्रतिपादकमेवेदं वाक्यमिति पूर्वः पक्ष इत्यर्थः । अत्र समादधते हिरण्मय इत्यादि । हिरण्मयस्यानन्दमयत्वं तद्धर्माधिकरणे सिद्धम् । आनन्द-

रश्मिः ।

इत्येक एवविधिः । एकं वृणीत इत्यादिवाक्यद्वयमवयुत्यानुवादेन स्तावकं एकवरणद्विवरणे अप्रशस्ते अपि यदा कर्तव्ये तदा त्रिवरणस्य प्रशस्तस्य कर्तव्यत्वं किमु वक्तव्यमिति चतुर्निषेधपञ्चातिक्रमनिषेधावपि त्रित्वस्तावकावेव । न तु चतुःपञ्चातिक्रमयोर्निषेधो विधेयः । प्रसक्त्यभावादेव तदप्रवृत्तेः । चतुरादयोऽत्यन्तविलम्बकारितयाप्रशस्ता त्रित्वं तु न तथेति प्रशस्तम् । तस्मात्कर्मण्यधिकुर्वन् यजमानस्त्रीनेवार्षेयानुच्चारयेदिति तत्र यथा एकं वृणीत इति प्रथमावगतमपि वाक्यभेदापादकत्वेन न विधिवाक्यम् । किं तु वाक्यभेदनिरासकं त्रीन् वृणीत इत्येव तथा प्रकृतेप्युपपादन इत्यर्थः । ऐकेति । ननु शास्त्रद्वयं वेदवेदान्तरूपं कथमैकशास्त्र्यमितिचेन्न अङ्गाङ्गिभावमाश्रित्यैकशास्त्र्यात् । नन्वन्तस्तद्धर्मोपदेशादित्यधिकरणे यस्य बलीयस्त्वं तत्कुतो नोपपादितं तत्राहुः तथा चेति । तस्योपसंहारस्य समानमुपक्रमेणैकार्थं प्रकरणमुभयाकाङ्क्षारूपं तदभावेन तत्रान्तस्तद्धर्मोपदेशादित्यधिकरणे यस्य बलीयस्त्वं तस्योपादानस्य । पूर्वत्रेत्यधिकरणे । अधिकरणेति तेन यच्चैतत्सूत्रीयमितश्च शारीरादन्यो मनोमयत्वादिगुणः यस्माच्छब्दविशेषो भवतीत्यादि शंकरभाष्यं रामानुजभाष्यं च प्रत्युक्तमित्युक्तमेव पूर्वाधिकरणसमाप्तौ । अस्यार्थस्यानुपपत्तेरित्यादिसूत्रद्वयेनैव प्राप्तत्वात् । भूतपदस्य देहवाचकत्वे संमतिमाहुः नेति । औपाधिकस्येति बुद्ध्याद्यौपाधिकस्य । दृष्टान्तेति व्रीह्यादिदृष्टान्तबलात् । आराग्रेति इयं श्रुतिः श्वेताश्वतरे पञ्चमाध्यायेस्ति ।

'अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः ।
बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यपरोपि दृष्टः' ॥ इति ।

फलत इत्यादिभाष्यं निषेधमुखेन विवरांबभूवुः । न चेति । नत्वेतादृशेति भाष्यं निषेधमुखेन विवरांबभूवुः न चेति । शरीरमिति । नः चाभासो, हिरण्मय इतिभाष्यं

प्रतिपादकमेवेदं वाक्यमिति प्राप्ते, उच्यते ।

शब्दविशेषात् । स हिरण्मयः पुरुषो न जीवस्य फलमपि, तत्प्राप्तेरेव फलत्वात् । नाप्ययं नियमस्तस्यामेव मूर्तौ लय इति । अतः शब्देनैव विशेषस्योक्तत्वान्न हिरण्मयः पुरुषो जीवः ॥ ५ ॥

भाष्यप्रकाशः ।

मयाधिकरणे च तत्प्राप्तेरेव फलत्वमतो जीवस्य फलमपि हिरण्मयो न भवतीति तद्विरोधाज्जीववाक्यत्वं न शङ्कितुं शक्यमित्यर्थः । ननु पूर्वाधिकरणे तत्क्रतुन्यायस्य सिद्धत्वात् तथोपासने स्वरूपसारूप्यान्यतरलाभेन भाष्येऽप्यङ्गीकाराच्च कथं न तस्य फलत्वमित्यत आहुः नापीत्यादि । तैत्तिरीये, आदित्यो वा एष एतन्मण्डलं तपतीत्याद्यनुवाकद्वयमध्ये पूर्वस्मिन् हिरण्मयं पुरुषं प्रस्तुत्य, द्वितीये चादित्यो वै तेज ओजो बलमित्यादिना तद्विभूतिभूता देवताश्चोक्त्वाऽन्ते वदति । 'ब्रह्मणः सायुज्य॑ सलोकतामाप्नोत्येतासामेव देवताना॑ सायुज्य॑ सार्ष्टिता॑ समानलोकतामाप्नोति य एवं वेदेत्युपनिषत्' इति । तथाच यदि तत्क्रतुन्यायो नियतः स्याद्धिरण्मयस्य फलत्वं युज्येतापि । न तु तथा । नचैतद्विरोधः शङ्क्यः । यथा क्रतुरित्यत्र पुरुषविशेषणस्याधिकारस्यापि प्रकारांशे निवेशे तदभावात् ।

रश्मिः ।

व्याकर्तव्यं समानपदव्याकोपात् । **साधकेति** जीवसाधकब्रह्मबाधकयुक्तिसत्तया । **तत्प्राप्तेरिति** आनन्दमयमात्मानमुपसंक्रामतीति श्रुतेः । फलत्वस्य श्रौतत्वादेवकारः । **तद्विरोधात्** हिरण्मयपदविरोधात् । **चेति** चकारेण 'भगवानेव हि फलं स यथाविर्भवेद्भुवि' इति निरोधलक्षणग्रन्थोक्तस्य वाक्यस्य संग्रहः । **तैत्तिरीय** इति महानारायणोपनिषदि 'आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तदृचां मण्डलं स ऋचां लोकः, अथ य एष एतस्मिन् मण्डले-र्चिर्दीप्यते तानि सामानि स साम्नां लोकः, अथ य एष एतस्मिन् मण्डलेर्चिषि पुरुषस्तानि यजू॑षि स यजुषां मण्डल॑ स यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषोन्तरादित्ये हिरण्मयः पुरुषः आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो मनुर्मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोकपालकः[3] किं कं तत्सत्यमन्नममृतो जीवो विश्वः कतमः स्वयंभूः प्रजापतिः संवत्सरः इति संवत्सरोऽसावादित्यो य एष पुरुष एष भूतानामधिपतिर्ब्रह्मैतदमृतमेष पुरुष एष भूतानामधिपतिर्ब्रह्मणः सायुज्यं सलोकतामाप्नोत्येतासामेव देवतानां सायुज्यं सार्ष्टिता॑समानलोकतामाप्नोति य एवं वेदेत्युपनिषत्' । इत्यनुवाकद्वये । **तद्विभूतीति** आदित्यविभूतिरूपाः । नन्वादित्यो वै तेज ओजो इत्यादिनाऽभेदसंसर्गस्य भासनात् कथं विभूतिरूपत्वमिति चेन्न आदित्य इत्यत्र ङसः सुः सुपां सुलुगिति सूत्रात् आदित्यस्येत्यर्थात् । **अन्त** इति द्वितीयानुवाकान्ते । युनक्तीति युक् सह युक् सयुक् सयुजो भावः सायुज्यं युजिर् योगे ऋष गतौ इति हैमधातुपाठः । ऋष्टिः समाना ऋष्टिर्यस्य स सार्ष्टिः तत्ताम् । समानस्य सादेशः । समानलोकतामित्यत्र समानपदात् समानैश्वर्यादिगतिस्तामित्यर्थः । **नत्विति** सार्ष्टितासमानलोकतयोरपि प्राप्तिकथनान्न तु तत्क्रतुन्यायो नियतत्वेन प्रकारेणेत्यर्थः । **एतदिति** तत्क्रतुन्यायविरोधोत्रेत्यर्थः । **प्रकारांश** इति थाल् प्रत्ययार्थीभूतो यः प्रकारस्तदंशे । तथाहि यथाक्रतुरिति पुरुषविशेषणम् । यथा येन प्रकारेण क्रतुरस्येत्यत्राधिकारप्राप्तत्वात् प्रकारस्य

१. पुष्टिप्रवाहमर्यादा । २. ऋषयः । ३. लोकपालः कः ।

ननु हृदये विद्यमानत्वादभिमान्येव जीवो युक्त इति चेत्, तत्राह ।

स्मृतेश्च ॥ ६ ॥

भाष्यप्रकाशः ।

अन्यथोक्तश्रुतिविरोधस्य दुःपरिहरत्वात् । एवं सिद्धे तन्मूर्तौ लयानियमे हिरण्मयस्य फलताया अपि प्रायिकत्वेन तद्विरोधो दुर्वार इत्युपक्रमस्य पदवैयर्थ्यापादकतयैकार्थताविघटकत्वेन निर्बलत्वान्न तदनुरोधादस्य जीववाक्यत्वमित्यर्थः । एवं सिद्धान्तमभिधाय तस्य सौत्रत्वं प्रकटयन्ति अत इत्यादि । शब्दोक्तो विशेषः शब्दविशेषस्तस्मात् । उक्तरीत्या हिरण्मयशब्देनैवाधिकारविशेषमादाय तत्र लयानियमस्य सूचितत्वात् तथेत्यर्थः । एवं चात्राणुत्वबोधकैर्व्रीह्यादिदृष्टान्तैरन्तरात्मनि वर्तमानस्य जीवत्वं प्रतीयत इति युक्त्या पूर्वाधिकरणसंगतिमाक्षिप्योपसंहारबलीयस्त्वेन तन्निवार्य पूर्वोक्तं दृढीक्रियत इतीदं पूर्वाधिकरणस्यैव शेषः ॥ ५ ॥

स्मृतेश्च ॥ ६ ॥ इदं सूत्रमवतारयन्ति **ननु हृदय** इत्यादि । तथाच श्रुतेः संदिग्धत्वेऽपि लिङ्गाज्जीववाक्यत्वं युक्तमित्यर्थः । **अभिमान्येव जीव** इति अभिमानी जीव एवेति योजना ।

रश्मिः ।

याद्दशाधिकारप्राप्तप्रकारेणेत्यर्थात् परंपरया पुरुषविशेषणस्याधिकारस्येत्यर्थः । शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वादिति तृतीयाध्याये सूत्राच्छमादिमतः पुरुषस्य क्रतुरपि शमादिकृतप्रकारेण भवति यथा मनोमयः प्राणशरीर इति मननप्रकारो मनोमयत्वं प्राणशरीरत्वं च गार्ग्यस्य स होवाच गार्ग्यः य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपासे इति तच्छमादिकृतादित्यत्वेन प्रकारेण ब्रह्ममननमित्यादित्यत्वं प्रकारो दृप्तबालाकिब्राह्मणे । यथाधिकारं सायुज्यादिप्राप्तेस्तथेतः प्रेत्य भवतीति श्रुत्योक्तेस्तत्क्रतुश्रुतिविरोधाभावात् । **श्रुतिविरोधस्य** ब्रह्मणः सायुज्यमित्यादिश्रुतिविरोधस्य । **तद्विरोध** इति हिरण्मयस्य कथमपि जीवपरत्वासंभवेन हिरण्मयपदविरोध इत्यर्थः । **पदे**ति हिरण्मयपदवैयर्थ्यापादकतयेत्यर्थः । **तदनुरोधात्** उपक्रमानुरोधात् । यद्यपि पक्षे संभवति जीवस्य फलतो हिरण्मयत्वं तथापि यावद्यथाकथंचिदपि ब्रह्मप्रकरणं सिद्ध्यति तावदन्यप्रकरणत्वमयुक्तमिति हिशब्दार्थ इत्यनुगमाधिकरणभाष्याद्ब्रह्मप्रकरणत्वमेव युक्तम् । **अत** इति मूर्तौ लयानियमात् । **शब्दोक्त** इति मध्यमपदलोपी समासः । **उक्त**मिति भाष्ये हिरण्मय इत्याद्युक्तरीत्या हिरण्मयशब्देन हिरण्मयत्वरूपो जीवाद्विशेषोभिधीयते । हिरण्मयत्वविशिष्टहिरण्मये हिरण्मयपदशक्तेः । **तेनैव** शब्देनैव तात्पर्यवृत्त्याधिकारे विशेषो हिरण्मयप्राप्त्यनुकूलयज्ञवत्त्वं तमादाय तत्र मूर्तौ । **तथे**ति । न हिरण्मयपुरुषो जीवत्वेन प्रकारेण विशिष्टो जीवः । न च तात्पर्यवृत्तौ किं गमकमिति वाच्यम् । यथा क्रतुरितिश्रुतौ यत्प्रकारकः क्रतुरिति क्रतौ प्रकारसामान्यस्यैव गमकत्वात् । हिरण्मयत्वप्रकारकमननस्य हिरण्मयप्राप्तीच्छोरधिकारकृतत्वात् । अधिकरणयोः शेषशेषिभावमाहुः **एवं चे**ति । **पूर्वे**ति पूर्वाधिकरणसंगतिराक्षेपरूपा तामाक्षिप्य पूर्वाधिकरणे जीवाक्षेपस्य पूर्वपक्षीकृतस्य वारणेप्यत्रोपक्रमबलीयस्त्वमादाय जीववाक्यत्ववदुपक्रमगतसर्वपदेन जडस्योक्तावपि मनोमयत्वादीनां जीवेष्वसंभवादुपक्रमबलीयस्त्वमादाय जीववाक्यत्वमित्याक्षिप्येत्यर्थः । **तं निवार्य** आक्षेपं निवार्य । पूर्वोक्तं ब्रह्मवाक्यत्वं दृढीक्रियते । एवं पूर्वाधिकरणेप्युपसंहारोक्तावववाक्यनादरयोर्जीवेष्वसंभवात् ब्रह्मवाक्यत्वं दृढीकृतम् । **शेष** इति तेन प्रसङ्गसंगतिरत्रेति भावः ॥ ५ ॥

स्मृतेश्च ॥ ६ ॥ **श्रुते**रिति शब्दविशेषेणासंदिग्धेपि निरपेक्षस्वरूपश्रुतेर्दृष्टान्तपुरुषपदै-

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति। ननु सर्ववेदानां यन्निः-श्वासत्वं तस्य भगवतो वाक्यं कथं स्मृतिरिति। उच्यते। 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतेः केवलोपनिषद्वेद्यं ब्रह्म, न प्रमाणान्तरवेद्यम्। ततश्चार्जुनस्य शिष्यरूपेण प्रपन्नस्य पुष्टिभक्तत्वाभावाद् भगवद्वाक्ये निर्विचिकित्सविश्वासाभावाद् रथित्वेनैव स्थाप्यत्वान्न तादृशाय तादृशदेशकालयोरुपनिषदामवक्तव्यत्वाद् गुरुरूपतादृशरूपं निःश्वसितवेदोद्गमजनकं स्मृत्वा तदर्थमपि स्मृत्वा भगवान् पुरुषोत्तमो वाक्यान्युक्तवान् स्मृतिरूपाणि।

भाष्यप्रकाशः।

रामानुजादयो भगवन्तं श्रीकृष्णं पुरुषोत्तमत्वेन परब्रह्मत्वेन वदन्तो गीतावाक्यान्येवात्र स्मृतित्वेनोदाहरन्तोऽप्येतत्स्वरूपं न विचारितवन्त इति तत्स्वरूपं तदुपन्यासादिप्रयोजनं च निर्णेतुं विषयवाक्यस्य स्मृतित्वं व्युत्पादयन्ति ननु सर्वेत्यादि। शिष्यरूपेणेति शिक्षणीयरूपेण। 'शिष्यस्तेऽहं शाधि मां त्वं प्रपन्नम्' इति वाक्यात्। निर्विचिकित्सविश्वासाभावादिति अपरं भवतो जन्मेत्यादिरूपात् संशयबोधकवाक्यात् तथेत्यर्थः। रथित्वेनेत्यादि। अग्रिमकार्यकारणार्थं साहंकारताया आवश्यकत्वाद्रथित्वेनैव स्थाप्यत्वान्न तादृशाय साहंकाराय। तादृशदेशकालयोरिति दारुणे देशे काले चेत्यर्थः। गुरुरूपतादृशरूपमिति यो वै वेदाँश्च

रश्मिः।

बहुभिरेकस्य हिरणमयश्रुतेरकिंचित्करत्वात् संदिग्धत्वेपि लिङ्गादयमात्मन् पुरुष इति पुरुषपदसामर्थ्यात्। अभीति अभिमानोऽविद्या सोस्यास्तीत्यभिमानी। पुरुष इति श्रुतौ पुरि देहे शेत इति व्युत्पत्तेर्जीवप्रत्यायनादेवकारः। नन्वयोगव्यवच्छेदमनादृत्यान्ययोगव्यवच्छेदेनैवकारव्याकरणे किं बीजमिति चेन्न अयोगव्यवच्छेदाङ्गीकारे जीवन्मुक्तो व्यावर्तेतातो योजना भाष्यसूचितैव। जीवान्यसामान्ये अभिमानित्वयोगव्यवच्छेदो जीवे चाभिमानित्वं प्रतीयते इति। रामानुजेति। आदिपदेन माध्वाचार्यो भगवान्निम्बार्कश्च। एतदिति गीतारूपम्। तदुपेति आदिपदेन चिन्तनम्। व्युदिति सौत्रत्वाय व्युत्पादयन्ति। स्मेति शेषः। व्युत्पादनस्य भूतानद्यतनपरोक्षार्थवृत्तित्वात्। लटो वर्तमानकाले विधानात्। भाष्ये। ननु स्मृतिपदेन मन्वादिस्मृत्युपस्थितेः सूत्रे गीतास्मृतीनां कुत उपादानमिति प्रश्न उत्तरमाहुः तं त्विति। तथा च मन्वादिस्मृत्यवेद्यत्वात् तद्वाचकस्मृतिपदप्रयोगस्य श्रीव्यासानभिप्रेतत्वेनोपनिषत्तुल्ये स्मृतिपदं प्रयुक्तमिति भावः। स्मरणात्स्मृतिरुच्यते इति स्मृतिपदप्रयोगप्रयोजकस्मरणं व्युत्पादयन्ति स्म ततश्चेति। प्रपन्नस्येति प्रपत्तिमार्गं प्राप्तस्य। स च

'जगन्नाथे विठ्ठलेशे श्रीरङ्गे वैङ्कटे तथा।
यत्र पूजाप्रवाहः स्यात्तत्र तिष्ठेत तत्परः'॥ इति निबन्धोक्तः

तिष्ठेदिति प्राप्ते 'प्रकाशनस्थेयाख्ययोश्च' इति सूत्रेणात्मनेपदम्। अर्जुनाशयप्रकाशस्य स्फुटत्वादीदृशपूजाप्रवाहे स्थितत्वाच्च प्रपत्तिमार्गनिष्ठत्वमत एव गुरूपसत्त्यादिसाधनपरत्वात् मर्यादाभक्तिनिष्ठत्वाच्च पुष्टिभक्तत्वाभावः। प्रकृते। अपरमिति इदं वाक्यं प्रपत्त्या प्रवृत्तस्यार्जुनस्य। अग्रिमेति युद्धरूपाग्रिमकार्यकारणार्थम्। रथित्वेनेति 'ये यथा मां प्रपद्यन्त' इति वाक्यात्। तादृशायेति प्रपत्त्या प्रपन्नायापीत्यर्थः। श्रुतौ प्रहिणोति हि गतिवृद्ध्योः स्वादिः परस्मैपदी प्रकर्षेण

भाष्यप्रकाशः ।

प्रहिणोति तस्मा इत्यादिश्रुत्युक्तं गुरुरूपं यन्मर्यादाप्रतिपादकं रूपम् । अत्राऽयमर्थः । ब्रह्मण औपनिषदस्यैवात्र विचारप्रस्तावादुपनिषदामेव चिन्तनीयत्वेनास्मिन् विचारे निश्चायनाय स्मृतेर्हेतुत्वेनोपन्यासस्यायुक्तत्वेऽपि वेदस्य परोक्षवादत्वेन सूरिमोहजनकत्वात्तादृशस्यापि योऽर्थबोधः सोऽधिकारविशेषदेशकालविशेषसापेक्ष एवेति तदभावान्मन्दमध्यमाद्यर्थं तदुपबृंहणभूतेतिहासपुराणोपन्यास आवश्यकः । तत्रापि, 'वेदान्तकृद् वेदविदेव चाहम्', 'इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन' इति वाक्याद्ध्यन्तरवाक्यापेक्षया भगवद्वाक्योपन्यास एवावश्यकः । तेषु चोक्तरीत्याऽधिकारिदेशकालानां जाघन्यदर्शनेन भवति वैयधिकरण्यशङ्केति तत्परिहारेणोभयसामञ्जस्याय वाक्यानां स्वरूपमवश्यं विचारणीयम् । तत्र वक्तुरभेदे स्मृतित्वस्यासंगतत्वाद् वक्तर्येव कश्चिदवस्थाभेदो वा रूपभेदो वा तदर्थं वक्तव्यः । तत्रानन्तरूपमिति श्रुत्या

रश्मिः ।

प्रापयति । **तस्मै** ब्रह्मणे । **अयुक्तत्व इति** औपनिषदपुरुषज्ञानविघटकत्वेनायुक्तत्वे । **परोक्षेति** 'दशहूतं सन्तं दशहोतेत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः' इति श्रुतेः । 'परोक्षवादो वेदोयं परोक्षं च मम प्रियम्' इति श्रीभागवताच्च । **सूरीति**

'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते ।
तपसा वेदयुक्त्या तु प्रसादात्परमात्मनः' ॥ इति वाक्यात् ।

'मुह्यन्ति यत्सूरय' इति वाक्याच्च । **अधिकारेति** 'ब्राह्मणेन निष्कारणः षडङ्गो वेदो ध्येयो ज्ञेयश्च'इति श्रुतौ ब्राह्मणोधिकारी स्वाध्यायोध्येतव्य इति देशकालादिविशेषो हि त्रिषु वर्णेषु ब्राह्मणवृत्तित्वमधिकारे । देशकालयोर्विशेषः सोरर्थस्तयोर्नियतत्वम् । **मन्देति** आदिपदेनोत्तमः । तस्य वेदार्थे संदेहाभावात् दार्ढ्यम् । तथा चोत्तमं प्रति वेदार्थदार्ढ्यार्थं मन्दमध्यमयोर्दार्ढ्यसंदेहाभावार्थम् । **इतिहासेति** । इतिह इत्यव्ययं पारंपर्योपदेशे तदास्तेऽस्मिन् । आस उपवेशने हलश्चेति घञ् । **एवेति** उपनिषत्तुल्यत्वादेवकारः तथाचोक्तं इति श्रीमद्गीतासूपनिषत्स्विति । **तेष्विति** वेदेषु वैयधिकरण्यं व्यधिकरणत्वं तादृशदेशकालातिरिक्तदेशकालाधिकरणत्वं तस्य शङ्का तर्कः तत्परिहारेण उभयमुपनिषत्त्वं उपनिषद्देशाद्यतिरिक्तदेशाद्यधिकरणत्वं तस्य सामञ्जस्याय । **वक्तुरिति** वेदस्मृत्योर्वक्तुः । **तदर्थमिति** वेदत्वस्मृतित्वोपपत्त्यर्थम् । **अनन्तेति** न चानन्तानि व्यापकानि रूपाणि यस्येति विग्रहीतव्यमिति वाच्यम् । प्रत्यक्षविरोधात् । आकाशवृत्तित्वाच्च व्यापकानां रूपाणाम् । न च नीलो नीरूप आकाश इति नीलस्य व्यापकत्वेप्यन्येषामव्यापकत्वमिति शङ्क्यम् । अत एवानन्तान्यनेकानि रूपाणि यस्येति विग्रहात् । न चानन्तं नीलं रूपमस्येति विग्रह इति वाच्यम् । आकाशनिरूपणाभावात् । निःश्वसितमिति भाष्यं विवृण्वन्ति स्म **वेदेति** । अक्षरात्मकं रूपप्रपञ्चजनकमपीति वेदवक्त्रिति नामरूपप्रपञ्चजनकं रूपमुक्तम् । अस्य स्मृत्वेत्यनेनान्वये स्मरणेनैव रूपप्राप्तिः इच्छाशक्त्यधीनत्वे तादृशरूपकारणशक्तेः कृत्वेत्यध्याहृत्य वेदवक्त्रक्षरात्मकं रूपं कृत्वेत्यन्वयः । परंतु रूपान्तरकरणस्यास्मृतत्वात् स्मृत्वेति भाष्याच्च स्मरणमात्रं रूपस्य । **तदर्थमभिधेयार्थं** तात्पर्यार्थं चेति तत्तात्पर्यं तात्पर्यार्थार्थं च स्मृत्वेत्येवं भाष्यं व्याचक्रुः ।

ततो ब्रह्मविचारे तान्यप्युदाहृत्य चिन्त्यन्ते। पुनश्च भगवाँस्तदधिकारेण ब्रह्मविद्यां निरूप्य स्वकृपालुतया, सर्वगुह्यतममित्यादिना भक्तिप्रपत्ती एवोक्तवान्। अतोऽङ्गत्वेन पूर्वं सर्वनिर्णया उक्ता इत्यध्यवसेयम्। तथैवार्जुनविज्ञानात्,

भाष्यप्रकाशः।

रूपभेदस्य शीघ्रं बुद्धावारोहान्मर्यादाप्रतिपादकं वेदवक्रक्षरात्मकं रूपं वेदार्थं तत्तात्पर्यं च स्मृत्वा तत उत्तमोऽपि भगवाँस्तादृशवाक्यान्युक्तवानतः स्मृतिरूपत्वं तेषामुपपन्नमिति। एवं स्वरूपं विचार्योपन्यासप्रयोजनमाहुः तत इत्यादि। वेदान्तार्थनिश्चायकत्वात् तद्विचारोऽपि युक्त एवेति तान्यपि चिन्त्यन्त इत्यर्थः। नन्वेकार्थत्वं सामानाधिकरण्यप्रयोजकम्। तत्त्विह न दृश्यते। वेदे मुख्यतया ज्ञानविज्ञानयोरत्र च तथा भक्तिप्रपत्त्योः प्रतिपादनेनार्थभेदादित्यत आहुः पुनरित्यादि। तदधिकारेणेति भक्तिघटितेनाधिकारेण। तथाचाधिकारभेदस्य वेदेऽपि

रश्मिः।

वेदार्थमिति सरस्वतीमाविवासेमधीतिभिरिति श्रुत्युक्ताधीतिभिर्विविधोपचारैः सरस्वतीं परिचरेमेति दुर्गाचार्या निरुक्तटीकायां वेदार्थमाहुः वेदार्थः सुपर्णारूढः। सुपर्णः काल इति तृतीयसुबोधिन्यामस्ति तर्हि वेदे गूढे भक्तिप्रपत्ती अत्र स्मृतिषु स्फुटे कुत उच्येते अत आहुस्तात्पर्यं चेति। ततः ऋषिभ्य उत्तमः। तादृशानि स्मृतिरूपाणि 'स्मरणात्स्मृतिरुच्यते' इति वाक्यात् स्मृतिरूपत्वम्। वेदान्तेति। ननु किं प्रकारकः क्रतुरत्र निश्चितेषु क्रतुषु हिरण्मयविषयको हृदि कार्य इत्यत आहुः वेदान्तेति। तदुक्तं वेदेषु संदेहे गीता निर्णायिका इति। वेदाः श्रीकृष्णवाक्यानीत्यस्य निबन्धस्य टीकायाम्। तानीति प्रसङ्गात्सर्वापि गीता चिन्त्यते इति बहुवचनान्तानीति। सर्वे क्रतवो निश्चिताः परं स्वमते यः स वक्ष्यतेऽत्रैवाग्रे। एकार्थत्वं वेदान्तगीतयोः। सामानाधिकरण्यं भिन्नप्रवृत्तिनिमित्तत्वे सति एकार्थबोधकत्वं तस्य प्रयोजकं पर्यायत्वं कारणम्। इहेति वेदान्तगीतयोः। वेद इति क्रियाप्रतिपादनेपि वेदे 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इति श्रुत्या ज्ञानेच्छोत्पादनान्न मुख्यतया प्रतिपादनं किं तु ज्ञानस्य सत्यं ज्ञानमिति श्रुतेस्तदपि तद्विषयकं तरति शोकमात्मविदिति सर्वात्मभावप्रकरणे छान्दोग्यश्रुतेः अभेदज्ञानं च 'तत्त्वमसि' इति श्रुतेः माहात्म्यज्ञानं च 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतेर्भक्तनिष्ठं च। विज्ञानस्य 'सत्यं विज्ञानमानन्दं ब्रह्म' इति श्रुतेर्मुख्यतया प्रतिपादनं विज्ञानं जीवोपि 'विज्ञानं यज्ञं तनुते' इति श्रुतेः। अत्र गीतायां सप्तमेऽध्याये ज्ञानविज्ञानाख्ये

'भूमिरापोनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्'॥

इत्यत्र प्रकृतिद्वयज्ञानं विज्ञानपदवाच्यम्। ज्ञानं तु 'अहं कृत्स्नस्य जगतः' इत्याद्युक्तं ज्ञानिभक्तनिष्ठम्। 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इति वाक्यात् भगवद्विषयकम्। अत्रैवाग्रे 'चतुर्विधा भजन्ते माम्' इत्यादिना भक्तिः।

'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः'॥

भाष्यप्रकाशः ।

सिद्धत्वाद् वेदोऽपीदमेव द्वयं तादृशाधिकार्यर्थं निरूपयति । अत एव ब्रह्मवाक्येषु सृष्ट्यादि-

रश्मिः ।

इत्यत्र 'वासुदेवः सर्वमिति' 'ज्ञानवान् मां प्रपद्यते' इति प्रपत्तिः । एतेन प्रपत्तावप्यभेदज्ञानं सगुणप्रपत्तिनिवृत्तये व्याख्यातम् । तेन वासुदेवः सर्वमिति प्रपद्यते इति नान्वयः । ननु तथेत्यनेन मुख्यतयेत्यर्थकेन भक्तिप्रपत्त्योर्मुख्यतया प्रतिपादनोक्तेर्ज्ञानविज्ञानयोगाध्याये ज्ञानविज्ञानयोर्मुख्यतया प्रतिपादनं न भक्तिज्ञानयोरिति चेत्सत्यम् । मुख्यतया शेषितया प्रतिपादनसत्त्वात् । एकभक्तिर्विशिष्यते इति वाक्याज्ज्ञानवान् मां प्रपद्यत इति वाक्याच्च । अन्यच्च । उपक्रमोपसंहाराभ्यामर्थो निर्णीतो भाष्ये पूर्वतन्त्रोक्तोपक्रमोपसंहारयोः पूर्वसूत्र उक्तत्वात् । अत्रोपक्रमे त्वां प्रपन्नमिति प्रपत्तियुक्तत्व-कथनेनाधिकारिणं प्रति उपसंहारे

'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे ।
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः' ॥

इति श्लोकद्वयेन भक्तिप्रपत्ती उक्ते । अत्र मन्मना भवेति मानसी सेवा मद्भक्त इत्यनेन तनुज-वित्तजसेवे 'यथा भक्तयेश्वरे मनः' इति वाक्यात् । एतच्च भक्तियोगाख्याध्यायस्थ 'मय्यावेश्य मनः'इत्यत्रापि मद्याजी कामनायां सत्यां ज्ञेयः । मुख्याभ्यार्हणकर्ता वा वेदोपयोग उक्तः । वेदे ह्येव सुमतीत्यादिषु सेवाप्रकारसत्त्वात् महीधर्यां स्पष्टमिदम् । मां नमस्कुर्विति वन्दनं न पूजायामन्तर्भवति । एकाद-शसुबोधिन्याः । अतोत्र पृथगुक्तम् । सेवायाः प्रकाराय सिद्धान्तमुक्तावल्याम् 'तस्माच्छ्रीकृष्ण' इत्य-नेन स्मरणमुक्तम् । प्रकाराणां बाहुल्यादधिकारिणां च । तथापि फलाव्यभिचारिसाधनं कर्तव्यमिति सुबोधिन्यामुक्तत्वादाचारसंप्राप्तं कर्तव्यम् । इत्येवं मुख्यतया प्रतिपादनमेव हि भक्तिप्रपत्त्योः । **पुनरित्यादीति** पन स्तुतौ बाहुलकादरः । अस्य उकारः 'पुनरप्रथमे' इत्यमरः । तृतीयाया लुक् अप्रथमेन भक्तिघटितेनाधिकारेणेत्यर्थः । प्रथमाधिकारेण तु शोकापनोदनवान् स चकारेण समु-च्चितः अतोपि तृतीयाया लुक् प्रथमाधिकारेणेत्यर्थः । तथाहि । भाष्ये प्रपत्तिरधिकारिशरीरेऽस्ति प्रपन्नस्येत्यत्राधिकारो योग्यता स प्रपत्तिघटितो जातोऽतो मुमुक्षुर्वै शरणमनुव्रजेदिति श्रुत्या प्रपन्नस्य मुमुक्षुत्वसत्त्वात् अर्जुनाधिकारो मोक्षयोग्यता तेन ब्रह्मविद्या गीताशास्त्रं इति श्रीमद्भगवद्गीतासूप-निषत्सु ब्रह्मविद्यायामिति कथनात् । निरूप्येत्यन्वयः । ननु प्रथममर्जुनाधिकारेण ब्रह्मविद्या निरूपिता भक्तिप्रपत्त्योर्निरूपणे को हेतुरित्याकाङ्क्षायामाहुः स्वेति । अप्रथमेन भक्तिघटितेनाधिकारेण स्वेत्यादिः । ब्रह्मविद्यायां साधनचतुष्टयं वैराग्यादिमतोऽधिकाराद्भक्तिघटितोधिकारो नान्वेति । स्वस्य कृपालुतयेति हेतौ तृतीया भक्तिरूपव्यापारमन्तरेण स्वकृपालुतयाप्यजामिलवन्मोचनसंभवात् न करणे तृतीया व्यापारनियतत्वात्तस्याः । कृपालुत्वं तु 'कृष्णायाऽक्लिष्टकारिणे' इति गोपालतापनीयश्रुतेः । 'सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति' इति पञ्चमाध्याये । **सिद्धत्वादिति** पूर्वतन्त्रे षष्ठाध्याये वेदोक्तकर्माधिकारिणां 'शान्तो दान्त उपरतस्तितिक्षुः' इति श्रुतौ वेदान्तोक्ताधिकारिणां च सिद्धत्वात् । **द्वयमिति** भक्तिप्रपत्तिरूपार्थद्वयम् । **तादृशेति** भक्तिघटिताधिकार्यर्थम् । **अत एवेति** द्वयनिरू-

'करिष्ये वचनं तव' इति। चकारात् तन्मूलभूतनिःश्वासोऽप्युच्यते। व्यासस्यापि भगवज्ज्ञानांशत्वाददोषः ॥ ६ ॥

भाष्यप्रकाशः।

कर्तृत्वमात्मत्वं चैकस्मिन्नेव प्रकरणे वदति। शरणमहं प्रपद्य इत्यादौ प्रपत्तिं च श्रावयतीति तस्याप्यत्रैव तात्पर्यात्सामानाधिकरण्यमिति पूर्वोक्तदोषाभावात् तच्चिन्तनमप्यावश्यकमेवेत्यर्थः। एतस्यार्थस्य सौत्रत्वायाहुः **चकारादित्यादि**। ननु भवत्वत्रैवं, तथापि क्वचित् क्वचिद् व्यासचरणैः पुराणवाक्यान्यप्युदाहृत्य चिन्त्यन्ते, तत्र को हेतुरित्याकाङ्क्षायामाहुः **व्यासस्यापी**त्यादि। बुद्धादिवारणाय, ज्ञानांशत्वादिति। तथाचोक्तस्मृत्या हृदयस्य भगवदाधारत्वेन निर्णीतत्वान्न तद्बलेन ब्रह्मवाक्यत्वपर्यवस्थानं युज्यत इत्यर्थः ॥ ६ ॥

रश्मिः।

पणादेव। ब्रह्म वेदः। **एकस्मिन्** छान्दोग्ये श्वेतकेतूपाख्याने ज्ञानप्रकरणे 'लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि'इत्यधिकरणे तथोक्तेः। 'तदैक्षत बहु स्यां प्रजायेयेति', 'तत्तेजोसृजत' इति सृष्टिकर्तृत्वम्। आदिपदेन 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य' इति श्रुत्युक्तं त्रिवृत्कर्तृत्वं सा अव्याकृताख्या देवता इमास्तेजोबन्नरूपाः। हन्तेति हर्षे विषादे तु न क्रीडार्थं कर्तुरात्मनो विषादाभावात्। आत्मत्वं तत्त्वमसीति श्रुतेर्जीवात्मत्वं शरणमिति बृहन्नारायणोपनिषदि[1] वर्तते। **तस्ये**ति वेदस्येत्यर्थः। **तात्पर्या**दिति अभिधा तु कर्मकाण्डत्वात् कर्मणि। ज्ञानकाण्डत्वाज्ज्ञाने। तात्पर्यं त्वत्र भक्तिप्रपत्त्योरेव। माहात्म्यज्ञानस्यात्मत्वज्ञानस्य च भक्तिप्रपत्ती प्रति कारणत्वात् तथैवानुभवात्।

'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया।
तदध्यवस्यत्कूटस्थो रतिरात्मन्यथो भवेत्' ॥ इति वाक्याच्च।

सामानेति तात्पर्यार्थस्य मुख्यतया वेदेपि भक्तिप्रपत्ती एव मुख्यतया प्रतिपाद्येते इति गीतासामानाधिकरण्यम्। वेदे ज्ञानविज्ञाने तु जीवात्मविषयकज्ञानरूपे भक्तिप्रपत्त्यङ्गभूते न तयोर्मुख्यताविघटके। अभिधया प्रतिपाद्यत्वेन मुख्यत्वव्यवहारो ज्ञानकाण्डमिति समाख्या च। **पूर्वे**ति अर्थभेदरूपदोषाभावाद्गीताचिन्तनम्। **भाष्ये। अतोऽङ्गत्वेने**ति भक्तिमार्तण्डे प्रमाणप्रकरणे इदमुक्तं भवति। **तथैवे**ति भक्तिप्रपत्तिमुख्यत्वप्रकारेणैव विज्ञानात्। **प्रकृते। एतस्ये**ति गीतोपनिषदुभयोक्तस्याहुः समुच्चयं चकारार्थमाहुः **चकारादित्यादी**ति निःश्वसितमस्य वेदा इत्यत्र भावे क्तोऽतो मूलभूतनिःश्वासो वेद इत्यर्थः। प्रसङ्गसंगत्याहुः **नन्विति। क्वचिदि**ति द्वितीयाध्यायस्य तृतीयपादे स्मरन्ति चेति सूत्रे।

'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः।
न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा' ॥ इति।

तथा तृतीयाध्याये तृतीयपादे 'अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्' इति सूत्रे च 'त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु' इत्यादि श्रीभागवतवाक्यानि। तथा तत्रैव चतुर्थपादे 'अपि स्मर्यते', 'विशेषानुग्रहश्च' इत्येतयोः सूत्रयोः 'तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः' इति, 'अहं भक्तपराधीनः' इति च वाक्यद्वयमुदाहृतम्। **बुद्धादी**ति तस्य वेददूषकत्वात्। आदिपदेन मत्स्यादयः। तेषां तामसत्वात् तथा च तत्सूत्राण्यपि भगवद्वाक्यान्येव। **तद्बलेने**ति हृदयविद्यमानत्वकथनबलेन। **ब्रह्मवाक्यत्वे**ति परित्र वर्जने ब्रह्मवाक्यत्ववर्जनानुकूलावस्थानं न युज्यत इत्यर्थः ॥ ६ ॥

१. महानारायणोपनिषदि.

उपक्रमबलीयस्त्वमाशङ्क्य परिहरति ।

अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

ननु व्यापकस्येश्वरस्य हृदयदेशस्थितिरयुक्ता, व्रीह्यादिरूपत्वं च । अतोऽर्भकमल्पकमोको हृदयस्थानं यस्य तत्त्वाद् व्रीह्यादितुल्यत्वाच्च न परमात्मा वाक्यार्थ इति चेन्न । निचाय्यत्वात् । पूर्वं प्रथमदूषणं परिहरति । हृदये ज्ञातुं शक्यत इति तदायतनत्वेन प्रतिपाद्यते ।

निदिध्यासनानन्तरं हि साक्षात्कारस्तदन्तःकरण एवेति निचाय्यत्वम् ।

भाष्यप्रकाशः ।

अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥ इदं सूत्रमवतारयन्ति उपक्रमेत्यादि । असंजातविरोधत्वेन तथाऽऽशङ्क्येत्यर्थः । सूत्रं व्याकुर्वन्त आशङ्कांशं व्युत्पादयन्ति नन्वित्यादि । तथाचेश्वरधर्मविरुद्धस्य जीवधर्मस्य बोधनात् स्मृतिरयोग्यतादोषदुष्टेति न सा निर्णायिकेत्यर्थः । समाधानांशं व्याकुर्वन्ति पूर्वमित्यादि । तदिति हृदयम् । तथाच वृत्तिलाभस्थानत्वादायतनत्वव्यपदेशः । अत्रान्ये दृष्टान्तमपि वदन्ति । यथा, सर्वलोकपतिरप्ययोध्यापतिरिति । कथं वृत्तिलाभस्थानत्वमित्यत आहुः निदिध्यासनेत्यादि । हिर्हेतौ । तदन्तःकरण इति जीवान्तःकरणे । तथाच 'मनसैवानुद्रष्टव्यः' इति-

रश्मिः ।

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥ तथेति प्रथमाया 'अव्ययादाप्सुपः' इति सूत्रेण लुक्, उपक्रमबलीयस्त्वम् । स्मृतिरिति 'ईश्वरः सर्वभूतानाम्' इत्यादिः । योग्यतेति अर्थावबोधो योग्यता सा दोषस्तेन दुष्टा । भाष्ये । व्रीह्यादीति व्रीह्यादिभिर्विशेषेणापहीनं तौल्यमीश्वराय दिश्यते दीयते इति तद्व्यपदेशस्तत्तौल्यं तस्मात् व्रीह्यादिजडतौल्यं चेतनतौल्याद्धीनम् । दिश अतिसर्जनेऽतिसर्जनं दानं छन्दोवत्सूत्राणि भवन्तीत्यतिदेशादेवं व्याख्यानम् । अन्यत्र व्यपदेशः कथनं 'उपसर्गेण धात्वर्थः' इति सिद्धान्तकौमुद्या तिङन्तस्य । प्रकृते । तदिति तदित्यस्य हृदयमित्यर्थ इत्यर्थः । तथा चेति ईश्वरस्य वृत्तिर्वर्तनम् तस्या लाभस्य स्थानं तत्त्वात् । अन्य इति शंकराचार्या एव । निदिध्यासनेति 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यत्र श्रुतौ पाठक्रममनादृत्य निदिध्यासनानन्तरमित्यादिः । हिरिति शब्दानुकरणत्वान्न विभक्तेर्लुक् । प्रतिपाद्यत इति पूर्वोक्तप्रतिपादने हेतुः । जीवेति । निदिध्यासनं तैलधारावदनवच्छिन्नं ध्यानं परेषामस्माकं तु ह्यसंप्रज्ञातसमाधिरिति पादोपारम्भे उक्तम् । अतस्तन्निदिध्यासनं जीवान्तःकरण इत्यर्थः । न तच्छब्दार्थो जीवः । तत्रैव मनसैवेत्यर्थः । निचाय्यत्वम् । अत्र 'पाय्यसानाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु' इति पाणिनीयसूत्रात् ण्यत् छन्दोवत्सूत्राणि भवन्तीति महाभाष्यात् आयादेशः धात्वादेः कुत्वाभावो वैयासकसूत्रेण क्रियते विचाय्यो जगन्निवासो भगवान् निचीयतेऽस्मिन्जगदिति व्युत्पत्तेस्तस्य भावः तत्त्वमावश्यके ण्यः इति ण्ये त्वायादेशो दुर्लभः सौत्रो वा इति पाणिनीयम् । अतो द्रष्टव्यत्वम् । व्यापकरूपं नितरां चाय्यमवयवैः संयोज्यं मनसैव 'स मानसीन आत्मा जनानाम्' इति श्रुतेः । वृक्षेभ्यो विचिनोति फलानीत्यत्र

भक्तौ तु बहिरपीति विशेषः । द्वितीयं परिहरति । एवं व्योमवत् । एवं व्रीह्यादितुल्यतया यत्प्रतिपादनं चतुर्विधभूतान्तरत्वख्यापनाय । यथा चत्वार उपरवाः प्रादेशमात्रा इति तथा तद्धृदयाकाशे प्रकटस्य सच्चिदानन्दस्वरूपसर्वतःपाणिपादान्तस्य तत्स्वरूपमिति ।

भाष्यप्रकाशः ।

श्रुतेस्तत्रैव निचाय्यत्वमिति तस्य प्रशंसया स्थानत्वव्यपदेशोऽतो न स्मृतेरयोग्यतादोषघटितत्वमित्यर्थः । ननु यदि हृदयमेव वृत्तिलाभस्थानं, नेतरत् तदा तस्य व्यापकतापि दुर्घटा । प्रत्यक्षापेक्षया शब्दस्य दुर्बलत्वादित्यत आहुः **भक्तौ त्वित्यादि** । तथाच साधनविशेषेण बहिरपि निचायनान्न शब्दस्य नैर्बल्यमित्यर्थः । द्वितीयं परिहरतीति । ननु मास्तु स्थानविरोधस्तथापि परिमाणविरोधस्तु स्यादेवेत्यतो द्वितीयं परिमाणविरोधरूपं दूषणं परिहरतीत्यर्थः । व्योमवदिति दृष्टान्तं विवृण्वन्ति यथेत्यादि । उपरवा नाम हविर्धाने खाता बिलविशेषाश्चत्वारः । 'दक्षिणस्य हविर्धानस्याधस्तात् पुरोऽक्षं चतुर उपरवानवान्तरदेशेषु प्रादेशान्तरालान् करोति' इति कल्पे विहिताः । तैर्बिलैर्यथाकाशस्य प्रादेशमात्रं स्वरूपमभिव्यक्तीक्रियते, किमत्र भद्रमित्यादिमन्त्रैरध्वर्युयजमानयोः परस्परहस्तग्रहणाय । तथात्र व्रीह्यादितुल्यतया प्रतिपादनं चतुर्विधभूतहृदयाकाशे प्रकटस्योक्तविधस्य ब्रह्मण एव तत्स्वरूपमिति बोधनाय । तैत्तिरीये, 'अतः परं नान्यदणीयस५ हि परात् परं यन्महतो महान्तम्' इत्येकस्यैव नानापरिमाणश्रावणात् । तथाच

रश्मिः ।

विभागानुकूलो व्यापारश्चिनोतेरर्थः । अस्मिन् पक्षे व्यापकं रूपं हृदा विभज्य द्रष्टव्यम् । घटेनाकाशं विभज्येव । **तस्य प्रशंसयेति** तस्य हृदयस्य प्रशंसया ईदृग् हृदयं यत्रात्मा भातीति किं चात्मलाभस्थानमिति प्रशंसा तस्य ब्रह्मण इति नार्थः । हृदयस्य स्थानत्वव्यपदेश इत्यत्रान्वये हृदयाध्याहारापत्तेः । **शब्दस्येति** 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्र ब्रह्मशब्दस्य । **भक्तौ त्विति** तदुक्तम् 'अपि संराधन' सूत्रे तृतीयस्य द्वितीयपादे । **निचायना**दिति निचायनं विभजनं तस्मात् अर्थाद्विभजनं कृत्वा दर्शनात् निचायनाद्धृद्देशस्थस्य बहिरपि संयोजनात् निचीयतेऽस्मिन् धान्यादिरिति निकाय्यपदव्युत्पत्तेः । **नैर्बल्यमिति** प्रत्यक्षेणापि संराधनसूत्रोक्तेनाप्युपष्टम्भादिति भावः । **व्योमवदिति** एवं व्योमवदिति भाष्यम् । तत्रैवं पूर्वपरामर्शे व्योमवदिति षष्ठ्यन्ताद्वतिः । पूर्वं तु व्रीहिर्वा यवो वेति व्रीह्यादितुल्यतया परिमाणप्रतिपादनं तच्चतुर्विधभूतान्तरत्वस्य वृद्धिह्राससूत्रोक्तस्य ख्यापनाय चतुर्विधभूतानि जरायुजस्वेदजाण्डजोद्भिज्जानि । एवमेवं पदं भाष्ये व्याकृतं तत्र दृष्टान्तं व्योमवदिति दृष्टान्तमित्यर्थः स्मेति शेषः । विवरणस्य भूतत्वात् । **हविरिति** हविर्धानमण्डपे । हविरिति हविर्धीयतेस्मिन्निति हविर्धानं शकटं तच्च हविर्धानमण्डपे दक्षिणमुत्तरं चेति तत्र दक्षिणस्य शकटस्याधस्तादित्यर्थः । तदुक्तं पूर्वतन्त्रे द्वादशेध्याये सप्तमाधिकरणे 'हविर्धाने मण्डपे हविर्धानाख्ये शकटे स्थापित इति । अक्षं शकटं लक्षीकृत्य पुरोग्रे अवान्तर्देशेष्ववकाशदेशेषु प्रादेशान्तरालान् प्रादेशो वितस्तिभेदः । **कल्पे** कल्पसूत्रे । **उक्तेति** भाष्योक्तविधस्य न्यायकस्य । **नानेति** 'समो मशकेन समो नागेन' इत्यादिश्रुत्यैकार्थतया नानापरिमाणश्रावणात्

पूर्वपक्षसिद्धान्तयोश्चकारद्वयमेतादृशवाक्यान्तरे पूर्वपक्षसिद्धान्तयोराधिक्योपपत्तिसमुच्चयार्थम् । तेन, अत एव प्राण इतिवदधिकरणान्तरमपि सूचितमिति ॥ ७ ॥

भाष्यप्रकाशः ।

न परिमाणविरोधोऽपीत्यर्थः । एवं समाधानांशं व्याकृत्य चकारप्रयोजनमाहुः **पूर्वपक्षे**त्यादि । तथाचाधिक्यं पूर्वाधिकरणापेक्षया वैलक्षण्यं तत्र या उपपत्तिस्तयोरनुक्तयोः स्फोरणार्थमित्यर्थः । तत्सूचितमर्थमाहुः **तेने**त्यादि । तत्रेदमुदाह्रियते । तैत्तिरीये महानारायणोपनिषद्याम्नायते । 'आदित्यो वा एष एतन्मण्डलं तपति । तत्र ता ऋचस्तदृचां मण्डलꣳ स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन् मण्डलेऽर्चिषि पुरुषस्तानि यजूꣳषि स यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' इति । अत्र संशयः—हिरण्मयः पुरुषः किं जीवो ब्रह्म वेति । तद्बीजं तु विधेयत्वानिर्देशः । तत्रादित्यो वेत्युपक्रम आदित्यस्य मण्डलतापकत्वमुक्त्वोपसंहारे तत्तापकत्वं त्रय्यामुपसंहृतम् । तेनादित्यस्त्रयीशरीरः सिद्धः । शरीरस्य चान्तस्तदभिमान्येव युक्तः । मण्डलस्य हृदयाद्यपेक्षया महत्त्वेऽपि परममहत्परिमाणापेक्षयाल्पत्वेन तत्र जीव-

रश्मिः ।

चकारेति चकारयोः प्रयोजनम् । **पूर्वपक्षे**त्यादीति चकारद्वयं पुनरर्थे प्राथम्यार्थकं तत् स्वल्पाक्षरमिति सूत्रलक्षणविरुद्धमतश्चकारद्वयं व्यर्थं सत्किंचिज्ज्ञापयति एतादृशवाक्यान्तरे पूर्वपक्षसिद्धान्तयोराधिक्ये वैलक्षण्ये या उपपत्तिस्तस्याः समुच्चयं ज्ञापकसिद्धं फलम् ।·······भाष्यार्थः । **पूर्वाधिकरणे**ति अन्तस्तद्धर्मोपदेशाधिकरणापेक्षया न तु प्रकृताधिकरणापेक्षया एतदधिकरणापेक्षयेति संस्कृतापत्तेः । **तत्रे**ति वैलक्षण्य इत्यर्थः । न तु पूर्वाधिकरण इत्यर्थः । त्यदादीनामव्यवहितपूर्वपरामर्शित्वात् । **तयो**रुपपत्तिवैलक्षण्ययोः । अत्र भाष्ये पूर्वपक्षसिद्धान्तयोरिति प्रयोगस्तत्र यद्यपि पूर्वं सिद्धान्तपदमपेक्षितं 'अल्पाच्तरं पूर्वम्' इति पाणिनिसूत्रात् तथापि राजदन्तादेराकृतिगणत्वात् 'राजदन्तादिषु परम्' इति सूत्रेण पूर्वप्रयोगार्हस्य परनिपातः । **तत्सूचित**मिति पूर्वाधिकरणापेक्षया उपपत्तिवैलक्षण्ययोः स्फोरणात् सूचितम् । **तेने**त्यादीति उपपत्तिवैलक्षण्ययोः स्फोरणेन । यथा 'अत एव प्राणः' इत्यधिकरणे सत्यपि 'प्राणस्तथानुगमात्' इत्यधिकरणान्तरम् । पूर्वोक्तस्य सर्वस्याप्यर्थस्य निगमनायात्र व्याख्यातम् । तद्वत् सप्तम्यन्ताद्वतिः । 'अन्तस्तद्धर्मोपदेशात्' इत्यधिकरणे सत्यपि शब्दविशेषात् इत्यधिकरणान्तरमपीति सूचितमित्यर्थः । **तत्रेद**मिति तत्र किमेतादृशवाक्यान्तरं कौ पूर्वपक्षसिद्धान्तौ किमाधिक्यं कोपपत्तिरित्याकाङ्क्षायामिदं वक्ष्यमाणमुदाह्रियते इत्यर्थः । **विधेयत्वे**ति ब्रह्मजीवयोर्विधेयत्वानिर्देशः । 'हिरण्मयः पुरुष' इत्यत्र पदद्वयमपि ब्रह्मजीवसाधारणमिति भावः । **त्रय्या**मिति 'त्रय्येव विद्या तपति' इत्येवकारेणादित्यव्यवच्छेदात् । **तेने**ति उपक्रमोपसंहाराभ्यामेकार्थप्रतिपादननियमेन त्रय्यादित्ययोश्च सामानाधिकरण्यनियमेन च सिद्ध इति । यद्यपि त्रयी वेदः स आत्मा प्रातिशाख्ये उक्तस्तथाप्यत्र विद्वतां प्रतिपाद्यप्रतिपादकभावसत्त्वात्सामानाधिकरण्यासंभवः तथाचैवमुपक्रमोपसंहारयोरेकार्थपरत्वमिति भावः । **स्मृतेश्चे**ति सूत्रम् । ननु ह्यादित्ये विद्यमानत्वादादित्याभिमानी युक्त इत्यत्राहुः **स्मृतेश्चे**त्यवतार्य 'ज्योतिषां रविरंशुमान्' इति स्मृतेरित्यर्थयित्वा रवावादित्ये ज्ञातस्य विभूत्यन्तर्गतत्वेनेश्वरस्यादित्ये स्थितिरित्यादित्ये विद्यमानत्वं नाभिमानिप्रयोजकमित्येवं स्पष्टार्थंकत्वादन्याख्यायार्थकौकस्त्वसूत्रार्थमाहुः **शरीरस्ये**ति । **हृदये**ति आदिपदेन मनः । **अणुमानादि**ति ननु

भाष्यप्रकाशः।

स्यैव मानात्। पुरुषपदेन पूर्वोक्तार्चिर्गतयजुःपुरुषस्यैव व्यपदेशाच्च। नच हिरण्मयत्वविरोधः। तस्योपासनाफलत्वायानुवादात्। नचात्रोपासनाबोधकपदाभावान्नैवमिति शङ्क्यम्। अत्रापेक्षितगुणान्तरबोधके, 'आदित्यो वै तेज ओजः' इत्यव्यवहितोत्तरानुवाके, य एवं वेदेत्युपसंहारेण तस्या उक्तत्वात्। अतो नेदं ब्रह्मवाक्यमिति सूत्रांशेनाशङ्क्यांशान्तरेण सिद्धान्तमाह न, निचाय्येत्यादि। यथा हृदये निचाय्य एवमादित्येऽपि। स यश्चायं पुरुषे यश्चासावादित्ये स एक इति श्रुत्यन्तरात्। नच तत्र जीवो वक्तुं युक्तः। तदग्रे, स य एवंविदित्यादिना विदो जीवस्य वेद्याद् भेदेन निर्देशात्।

'अनाद्यन्तं परं ब्रह्म न देवा नर्षयो विदुः।
एकस्तद्वेद भगवानादित्यो ज्योतिषां पतिः'॥

इति स्मृतेश्च। एवं त्रय्यामपि, 'सर्वे वेदा यत् पदमामनन्ति'इति श्रुत्या तदर्थत्वादिति। ननु पुरुषत्वेन व्यपदेशाज्जीवत्वं तस्येति चेत्तत्राह व्योमवदिति। यथोपरवबिलेषु प्रादेशमात्रत्वं व्योम्नोऽभिव्यज्यते, तथात्र पुरुषरूपं तस्येति न दोषः। ततश्चान्तरादित्ये यः पुरुषो यजुःपुरुषेणाभिव्यज्यते स हिरण्मय इत्येवं विधेयनिर्देशस्याप्युपपन्नत्वात् स ब्रह्मैवेत्यर्थ इति॥ ७॥

रश्मिः।

परममहत्परिमाणवतो ब्रह्मणः। जीवस्यैवेत्येवकारव्यावर्त्योर्थोप्ययम्। नन्वेष म आत्मान्तर्हृदय इति श्रुत्या हृदयस्यान्तस्तद्धर्माधिकरणेन चादित्यस्य ब्रह्मायतनत्वात्कथं तत्र ब्रह्मणोऽमानमित्याकाङ्क्षायामाहुः **पुरुषपदेनेति**। **पुरुषस्यैवेति**। योग्यत्वादिति भावः। एवकारेण पुरा आसेति व्युत्पत्तिसिद्धब्रह्मवाचकपुरुषपदवाच्यव्यवच्छेदः 'वेदा यथा मूर्तिधरास्त्रिपृष्ठे' इति वाक्योक्तपुरुषाकारवाचकपुरुषपदम्। पुरि शेते इति व्युत्पत्तिः। पूरत्र साम्नां लोकोर्चीरूपः। **हिरण्मय** इति जीवे। **अन्विति**। फलतो हिरण्मयत्वस्यान्यत्रिकस्य नानुवादः। **तस्या** इति वेदनरूपायाः उपासनायाः। **सूत्रेति** अर्भकौकस्त्वादिति चेदिति सूत्रांशेनाशङ्क्य तर्कयित्वा पूर्वपक्षयित्वेति यावत्। निचाय्यो हृदा विभाज्यः द्रष्टव्य इति फलितमिति यावत्। **आदित्येपीति** निचाय्य इत्यर्थः। आदित्येन विभाज्यः शाब्देन श्रोत्रेण द्रष्टव्य इत्याहुः **स यश्चायमिति**। स परोक्षः अयं श्रुतिप्रत्यक्षगः। असौ विप्रकृष्टः शाब्देन श्रौत्रेणैकत्वेन द्रष्टव्यो यतः स परोक्ष एक इति श्रुतिविषमपदव्याख्या। न च तत्रेत्यादित्ये सौत्रमेवं पदं व्याचख्युः **एवमिति**। एवं पूर्वोक्तप्रकारेण त्रय्यामपीति सौत्रैवमिति पदस्यार्थः। **तदर्थत्वादिति** वेदानामभ्यस्यमानवेद्यकर्मार्थत्वात्। एवं पदार्थसमाप्ताविति-शब्दः। **पुरुषत्वेनेति** पुरि शयनस्य बोधकपुरुषपदप्रवृत्तिनिमित्तेन पुरुषत्वेन। **तथेति** आदित्यादिषु परिच्छिन्नत्वं तद्वदिति शेषोस्त्यभिव्यज्यत इति योजना। सिद्धमाहुः **ततश्चेति**। **इतीति**। अत्रोपपत्तिर्वैलक्षण्येस्ति, तथाहि अन्तस्तद्धर्मोपदेशादित्यधिकरणादत्राधिकरण उपपत्तिरुपसंहारबलीयस्त्वेनान्तःस्थस्य ब्रह्मत्वव्यवस्थापने करणकारकरूपम्। एतादृशवाक्यान्तरे महानारायणोपनिषत्स्थे तूपक्रमोपसंहारैकवाक्यतया ब्रह्मत्वव्यवस्थापनमित्युपपत्तिः। तथा चान्तस्तद्धर्मोपदेशादित्यधिकरणभाष्यं तस्माद्देहातिरिक्तेप्युपपत्तिपूर्वकं यत्र ब्रह्मधर्मस्तद्ब्रह्मेति मन्तव्यमिति। अत्र हिरण्मयत्वं ब्रह्मधर्मः स उपपत्तिपूर्वकः। वैलक्षण्यं च सिद्धान्ते आदित्यतदभिमानिभ्यां पूर्वाधिकरणेऽत्रापि भाष्यं तस्मात् सर्वविलक्षणत्वादन्य एव नाभिमानीति। अत्राधिकरणे वैलक्षण्यमुप-

संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

बाधकमाशङ्क्य परिहरति । यदि सर्वेषां हृदये भगवाञ्जीववत् तिष्ठेत् तदा जीवस्येव तस्यापि सुखदुःखसाक्षात्कारस्तत्साधनादिपरिग्रहश्च प्राप्नोतीति चेन्न । वैशेष्यात् । विशेषस्य भावो वैशेष्यं तस्मात् । सर्वरूपत्वमानन्दरूपत्वं स्वकर्तृत्वं विशेषः । तद्भावो ब्रह्मणि वर्तते, न जीवे इति जीवस्यैव भोगो, न ब्रह्मण इति । वैशेष्यपदादयमर्थः सूचितः । अपेक्षित एव भोगो, नानपेक्षित इति । न तु तस्य

भाष्यप्रकाशः ।

संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥ बाधकमिति जीवतुल्यतापत्तिरूपं बाधकम् । सम्यग् अभिनिवेशेन भोगः संभोगः, सम्यग्भोगो यस्मादिति वा संभोगः । तयोः प्राप्तिर्जीवतौल्यमापादयतीति तदाशङ्क्य परिहरतीत्यर्थः । **अग्रिमाधिकरणविरोधादिति ।** अग्रिमाधिकरणत्रयविषयवाक्येषु भोगप्रतिपादनात् तदनङ्गीकारे तद्विरोधादित्यर्थः । बहुव्रीहिविग्रह मङ्गीकृत्याहुः **तत्साधनादिपरिग्रहश्चेति ।** अपेक्षित एवेत्यादिनियमे दृष्टान्तमुखेन मानमाहुः

रश्मिः ।

पत्तिप्रयुक्तत्वेन ब्रह्मधर्मस्य वैलक्षण्यं सिद्धान्ते । एतादृशवाक्यान्तरे तूपपत्तावुपक्रमस्यापि सत्त्वाद्ब्रह्मधर्मस्य वैलक्षण्यम् । पूर्वपक्षे 'अथ य एषोन्तरादित्ये हिरण्मयः पुरुषः' ब्रह्मशरीरं पूर्वाधिकरणे । अत्राधिकरण उपक्रमेण जीवस्यैवाराग्रमात्रस्यान्तर्हृदये प्रतिपादकमिदं वचनमित्युपपत्तिः । अतो जीवप्रतिपादकमेवेदं वाक्यमिति वैलक्षण्यम् । एतादृशवाक्यान्तरे तु पूर्वपक्षे त्रयीशरीरादित्यस्थोभिमानी जीवो हिरण्मयः पुरुष इत्युपपत्तिः । अभिमानिप्रतिपादकमिति वैलक्षण्यम् । न च शरीरस्य चान्तस्तदभिमान्येव युक्त इति अर्भकौकस्त्वसूत्राशङ्काग्रन्थो न शब्दविशेषादिति सूत्रे पूर्वपक्षग्रन्थ इति चेन्न शब्दविशेषसूत्रपूर्वपक्षग्रन्थस्यार्भकौकस्त्वसूत्राशङ्काग्रन्थेनुवादाङ्गीकारातिरिक्तपूर्वपक्षाङ्गीकारे गौरवात् । तथाच भाष्यं पूर्वपक्षसिद्धान्तयोरित्यर्भकौकस्त्वसूत्रस्य । न चाधिकरणयोर्विषयवाक्यावधारणे विनिगमनाविरह इति वाच्यम् । पूर्वाधिकरणेन्तःपदात् तद्घटितश्रुतेर्द्रागुपस्थितेरथ य एषोन्तरादित्य इत्यस्याः श्रुतेर्विषयवाक्यत्वावधारणं शब्दविशेषादित्यधिकरणे तु अन्तःपदाभावादपहतपाप्मपदघटितश्रुतेः पूर्वाधिकरण एव गतत्वात् हिरण्मयशब्दविशेषघटितश्रुतेरवधारणम् ॥ ७ ॥

संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥ तत्साधनेत्यादि । वक्ष्यमाणभाष्यादाहुः **सम्यग्भोग** इति । **वेति** विकल्पे । सुखदुःखसाक्षात्कारस्तत्साधनादिपरिग्रहश्चेति भाष्यात् । भाष्ये चकारः पुनरर्थे न तु समुच्चये । **तत्साधनेति** सुखदुःखसाधनानि चक्षुरादीनि आदिपदेन तद्विषयाश्च तेषां तत्साधनत्वेन परिग्रहः । व्यापकस्येन्द्रियसंबन्धसत्त्वात् । तथा चानश्नन्नित्यर्थवादः । **भाष्ये । विशेष** इति सर्वरूपत्वं सर्वानुकारित्वेन सर्वेषु रूपाण्यस्येति स्वमात्मा तस्य कर्तृत्वं 'स आत्मानं स्वयमकुरुत' इति श्रुतेः तस्य भावः सत्ता स ब्रह्मणि वर्तते अन्यथा सर्वेषु रूपाणि न स्युः आनन्दाश्च सर्वेषु न भवेयुः सर्वाणि रूपाणि न स्युः 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते' इति श्रुतेः । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः जीवाशक्यक्रियत्वात् । न च विशेषादित्येव सूत्रे हेतुरस्तु सत्ताभावे 'नासतो विद्यते भावः' इति स्मृतेः । कार्यरूपाणि कार्यानन्दाः कार्यं च न स्यात् । अत एव स्वार्थे ष्यञ् न व्याख्यातः न च

रश्मिः।

प्रकृतिजन्यबोधे प्रकारो भावः इति वृत्तिस्थानापन्नग्रन्थातिक्रमः शङ्क्यः। सत्ताया एव प्रकृतिजन्यबोधे प्रकारत्वात्। न च विशेषत्वघटत्वादीनां प्रकृतिजन्यबोधे प्रकारत्वं न सत्ताया इति वाच्यम्। भावे त्वतलोर्विधानाद्विशेषत्वघटत्वादीनां विशेषघटादिसत्तानतिरेकात्। अनवच्छिन्नत्वं विशेष इति न व्याकृतम्। मायिनं तु महेश्वरमिति श्रुतेः, 'विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्' इति वाक्याच्च मायानवच्छिन्नत्वाभावात्। 'इन्द्रो मायाभिः पुरुरूप ईयते' इति श्रुतौ मायेन्द्रियाणि इति निबन्धेस्ति। न चेन्द्रियानवच्छिन्नत्वं विशेषः प्रकृतेस्त्विवति शङ्क्यम्। चक्षुषश्चक्षुरित्यादिश्रुतेः। अत्र चक्षुराद्यभिन्नं ब्रह्मेति प्रथमया प्रतिपादनादनवच्छिन्नत्वं सुस्थिरमिति शङ्क्यम्। कर्णशष्कुल्यवच्छिन्ननभोदेशावच्छिन्नत्वेनांशतस्तदभावेप्यंशितस्तत्सत्त्वात्। न चापहतपाप्मत्वहिरण्मयत्वसत्यज्ञानान्तत्वस्वातन्त्र्यसार्वज्ञ्यधर्मादिरहितत्वानि विशेष इति शङ्क्यम्। विस्फुलिङ्गौष्ण्यवज्जीवेष्वपि ब्रह्मत्वे सत्युक्तधर्मसत्त्वात्। न चोक्तत्रिकमपि जीवेष्वस्त्विवति शङ्क्यम्। तस्य जीवेष्वनुपयोगात्। स आत्मानं करोति यदा तदात्मान्तर्गतमुक्तजीवानां वास्तविकानामुद्गमेन संसारित्वप्रसङ्गात्। तथाच न स पुनरावर्तत इति श्रुतिविरोधः। मुक्तानां मनोवागगोचरानन्दत्वेपराधप्रसक्तिः। सर्वरूपत्वे मुक्तानां संसारप्रसङ्गः। सर्वेषामन्तःस्थितिप्रयोजकानां संसारित्वात्। अतस्त्रिकं ब्रह्मत्वे सत्यपि जीवानां तेषु नाङ्गीकरिष्यामः। नापि निष्कर्मत्वमध्यासशून्यत्वं च विशेषः, मुक्तानां सत्त्वात्। एवमथातो ब्रह्मजिज्ञासेत्यधिकरणाद्ब्रह्मपदमनुवर्त्य सप्तम्यन्तं विभक्तिविपरिणामेन कृत्वा सूत्रं व्याख्याय संभोगप्राप्तिरिति चेन्न तदभावादित्यसूत्रयित्वा वैशेष्यादिति यदुक्तं तेन ब्रह्मणि भोगे वैशेष्यं सूचितं तत्सहेतुकं विवरामासुः **वैशेष्येति**। **अपेक्षित** इति अनुकूलसंवेद्यं सुखमपेक्षितं तथा च भोगः सुखसाक्षात्कारमात्रम्। अनपेक्षितो दुःखरूपो भोगः। **प्रकृतेति**। **अग्रिमेति** तेन भाष्यस्याग्रिमाण्यधिकरणानि तेषां विरोधादित्यर्थः। अत एव 'नाहं भक्षितवान्' इत्यस्य सुबोधिन्यामनश्नन्न्योभिचाकशीतीति श्रुत्या भोगाभावप्रतिपादनं भागवतमतपरं 'असमर्पितवस्तूनां तस्माद्वर्जनमाचरेत्'। इति भोगः सिद्धान्तरहस्ये प्रसाधितः। ननु ब्रह्मणः पूर्णानन्दस्य आत्मन्येव रुद्धसमस्तभगस्य का स्पृहा तथा च श्रुतिर्माण्डूकोपनिषत्स्था।

'भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे।
देवस्यैष स्वभावोयमाप्तकामस्य का स्पृहा'॥ इति।

अत्र प्रतिप्रसव उच्यते 'भक्तिरस्य भजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन् मनःकल्पनम्'। 'भक्त्या जानाति चाव्ययम्' इत्यादिश्रुतिभिर्भक्तिमार्गः स प्रपञ्चवत्स्वप्राप्तये निर्मितः स उपबृंह्यते।

'अहं भक्तपराधीनः ह्यस्वतन्त्र इव द्विज'।
'वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा'।

इत्यनेन दुर्वाससं प्रति भगवद्वाक्येनातो भक्त्या निवेदितमश्ना (त्याशा च) त्येव तदुक्तं 'तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः' इति। परमपेक्षितसमर्पणं विवक्षितं 'अपेक्षित एव भोग' इति भाष्यात्। अपेक्षितसमर्पणस्य दास्यलक्षणत्वेन भाष्ये दास्यभक्तिरादृताऽत एवान्यत्रापि तद्ग्रहणं ज्ञेयम्। न चाधुनिकानां प्रयतात्मत्वाभावात् नाश्नाति किं त्वाशैवेति शङ्क्यम्।

'अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः'॥

भोगाभाव एव । अग्निमाधिकरणविरोधात् । यथेन्द्रियाधिष्ठातृदेवानाम् । तत्त्वमस्यादिवाक्येन जीवस्यापि तथात्वे तस्यापि तद्वदेव भविष्यति ॥ ८ ॥

इति प्रथमाध्याये द्वितीयपादे द्वितीयं शब्दविशेषाधिकरणम् ॥ २ ॥

भाष्यप्रकाशः ।

यथेत्यादि । तथाचानुमानमेव मानमिति भोगप्राप्तावपि न जीवतौल्यापत्तिरित्यर्थः । नन्वेवं सति जीवस्य कुत उभयभोग इत्यत आहुः **तत्त्वमसीत्यादि** । तथाच ब्रह्मभावाभावेन कामकर्मादिवशगत्वाद् बन्धदशायां तथेत्यर्थः । तथाच तदभावायैव साधनानां विधानमिति भावः । तदेतत्प्रासङ्गिकमुक्तम् ।

अन्यच्च पूर्वाधिकरणेऽन्तर्हृदयवर्तमानस्यान्तर्यामित्वे निश्चायितेऽपि पुनरस्मिन्नधिकरणे यत्तथात्वप्रतिपादनं तत्तदाकारनिश्चायनार्थम् । यथा कौण्डपायिनां सत्रे, मासमग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्देन नित्याग्निहोत्रधर्मा अतिदिश्यन्ते । तथा, हिरण्मयः पुरुष इति शब्दाभ्यामन्तस्त-

रश्मिः ।

इति वाक्यात्तथा च नृसिंहोत्तरतापिनीयश्रुतिः आनन्दभुग् इति । बृहदारण्यकेपि 'यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीतीति नैवेह किंचनाग्र आसीत् मृत्युनैवेदमावृतमासीत्' इत्युपक्रमेऽग्रपदेन 'कालोस्मि लोकक्षयकृत्प्रवृद्धः' इति गीतोक्तकालेऽभावसत्तां नासीदित्यनेनोक्त्वेहपदवाच्याश्रयश्चोक्तः । तन्मनोकुरुतेति श्रुतौ त्यदादीनामुत्सर्गतः प्रधानपरामर्षकत्वात् 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति श्रीगीतातोग्रपदवाच्यकालात्मकं ब्रह्म तत्पदेनोच्यते इह पदवाच्याश्रयो वोच्यते न मृत्युरुपष्टम्भार्थग्रहणाच्च । **अपेक्षित एवेत्यादीति** । इदं न प्रतीकम् । **नियम** इति । अपेक्षित एवेत्यवधारणे । **यथेत्यादीति** 'अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्' इति वक्ष्यमाणाधिकरणे इन्द्रियाधिष्ठातृदेवानां भोगो वक्ष्यते । **तथा चेति** वैशेष्यादिति हेतुप्रकारेण यथेत्यादिभाष्योक्तदृष्टान्तप्रकारेण चेत्यर्थः । प्रकारवचने थाल् तच्छब्दात् । अनुमानं तु ब्रह्म अपेक्षितभोगवत् सर्वरूपादिमत्त्वात् इन्द्रियाधिष्ठातृदेववदित्यत्र पक्षे साक्षाद्धेतुसाध्ये दृष्टान्ते तु इन्द्रियाधिष्ठातृदेवेषु परंपरयेति विवेकः । **एवं सतीति** हृदयदेशे वर्तमानत्वे ब्रह्मांशत्वे च सति उभयस्यापेक्षितानपेक्षितस्य । व्यतिरेकमुखेन भाष्यं व्याचख्युः **तथा चेति** । तथेति उभयभोगवत्त्वप्रकारेण । जीवस्यापि तथात्वे ब्रह्मभावे ब्रह्मवदेव भोगो भविष्यतीति भाष्यार्थः । **तदभावायेति** बन्धदशाभावाय । अधिकरणार्थमुपसंहरन्ति स्म **तदेतदिति** । अधिकरणम् । वाक्यान्तरेपीदं सूत्रं योज्यम् । यत्पूर्वसूत्रसमाप्तावेवं चाणुत्वबोधकैरित्यादिना सूत्रस्य पूर्वशेषत्वमुक्तं तदन्येषां सूत्राणामुभयाधिकरणशेषत्वमाह नाधिकरणप्रयोजनमाहातस्तदाहुः **अन्यच्चेति** । पूर्वाधिकरण इत्यन्तस्तद्धर्मोपदेशादित्यधिकरणे । **तत्तदेति** तस्यान्तर्यामिण आकारनिश्चायनार्थम् । **कौण्डपायिनामिति** अन्तस्तद्धर्माधिकरणविषयवाक्योक्तस्य हिरण्मयपुरुषस्य य आकारस्तस्यातिदेशार्थम् । एतच्च सप्तमस्य तृतीयपादे पूर्वतन्त्र उक्तम् । 'क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात्' इत्यधिकरणे चिन्तितम् । अग्निहोत्रशब्दो न नामधेयं किं तु प्राथमिकाग्निहोत्रधर्माणामतिदेशक इति अग्नये होत्रं यस्मिन् कर्मणि तत्कर्माग्निहोत्रम् । अत्राकारसमर्पकं तु पूर्वाधिकरणभाष्यमेव तस्मादानन्दरूपप्राणशरीररूपो वाक्यार्थ इति । अन्तस्तद्धर्मोपदेशादित्यधिकरणभाष्यं च । अनन्त-

भाष्यप्रकाशः ।

द्धर्माधिकरणविषयवाक्योक्तहिरण्मयपुरुषाकारातिदेशार्थमिदमधिकरणमिति मम प्रतिभाति ।

यदत्र शैवः, प्रसिद्धोपदेशाधिकरणं द्विसूत्रमङ्गीकृत्य अविनाभावरूपाद्वैतोपगमेन विशिष्टाद्वैतवादं चानुसृत्य, सर्वं खल्विदं ब्रह्मेति वाक्योक्तोपासनायां ब्रह्मणः सर्वात्मकत्वोपपादनायाऽथर्वशिरोवाक्यानि 'अहमेकः प्रथममासं वर्तामि च भविष्यामि च, नान्यः कश्चिन्मत्तो व्यतिरिक्तः' इत्यादीन्युदाहृत्य ब्रह्माहमित्यादिना विश्वरूपत्वमात्मन प्रपञ्चयित्वा विश्वरूपत्वे सोऽन्तरादन्तरंः प्राविशदित्यनुप्रवेशमेव हेतुत्वेनाह। तदसंगतम्। एको ह वै नारायण आसीन्न ब्रह्मा न ईशान इति

रश्मिः ।

मित्यनन्तमूर्तिता च प्रतिज्ञातेति। शैव इति भगवानिति शेषः। अविनेति 'अहमेकः प्रथममासे' इत्यादिश्रुतिविचारेण सिद्धमविनाभावरूपाद्वैतं तस्योपगमेन। 'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः' 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' । इत्यादिश्रुतिषु अचिद्वस्तुचिद्वस्त्वीश्वराणां यथायथं भोग्यत्वभोक्तृत्वनियन्तृत्वैः स्वरूपविवेकात्त्रयोपि भिन्नाः, माया च तमोरूपा । तमः परे देव एकीभवतीत्यविभागापत्तिदशायां विभागव्यपदेशानर्हरूपेण ब्रह्मण एवावस्थानाद् विशिष्टाद्वैतवादं चानुसृत्येत्यर्थः। तृतीयाधिकरणे प्रथमपादे रामानुजमतनिरूपण उक्तम्। तथापि शैवस्तु रामानुजमतस्यैव चौरो माध्वमतस्य कचित्तद्विरुद्धांशमेव श्रुतिमुदाहरन् भिन्नं प्रस्थानमभिमन्यते इति चतुर्थाधिकरणप्रकाशादेतन्मतेप्यविरुद्धम् । विरुद्धा वा श्रुतिस्तद्भाष्ये द्रष्टव्या आसमासीदिति कचित्पाठः वर्तामीति पदव्यत्ययश्छान्दसः अत्र धातुत्रयमुत्पत्त्यर्थकमिति प्रहस्ते मध्यमवादे इत्यादीनीति । आदिपदेन इति सोन्तरादन्तरं प्राविशत् दिशोन्तरं प्राविशदिति श्रुतिसंग्रहः। ब्रह्माहमित्यादिनेति। नन्वयं प्रकाशोशोभनः । अथर्वशिरसि सोहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्मेतिश्रुतौ अब्रह्मेतिपदच्छेदादिति चेन्मैवम्। अत्राब्रह्माहमित्यकाराभावो लेखकप्रमादात् अब्रह्माहमित्यस्यादि सोहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्मेति तदब्रह्माहमित्यादि । अब्रह्माहमित्यादि यस्य तदब्रह्माहमित्यादि तदब्रह्माहमित्यादि च तदब्रह्माहमित्यादि च तयोः समाहारः तदब्रह्माहमित्यादि तेन तदब्रह्माहमित्यादिना सरूपैक्यशेषः तस्मात्। यद्वा सोहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्मा अत्र ब्रह्म आ इति च्छेदः अब्रह्मपदार्थस्याभावात्। न च प्रायपाठविरोधः । सावित्र्यहमित्यादौ मिथुनाभावात् न च आ ब्रह्मेति पदच्छेदः 'आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन' इतिवाक्ये तादृशपददर्शनादिति वाच्यम्। तथा सति ब्रह्मव्याप्याहमित्यर्थो भवति तदर्थस्याङ्गेऽभावेपि प्रत्ययाद्गौरवात् । ब्रह्माहमित्यादिनेति भाष्यप्रकाशाच्च । तथा च सोहं यः प्रवेशकर्ता सोहं नित्या सोर्डा अनित्यश्च त्तवा सोर्डा व्यक्तः ब्रह्म आ। नित्यः स्वरूपतः अनित्य आविर्भावतिरोभाववान् 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः' इति वाक्यात् व्यक्तो भक्तेच्छया प्रकटागणितानन्दः 'अव्यक्तोक्षर इत्युक्तः' इतिगीतावाक्यात् अक्षरवाचकाव्यक्तपदसमभिव्याहारात् 'अक्षरादपि चोत्तम' इतिवाक्याच्च अव्यक्तोक्षर उक्तवाक्यात् ब्रह्म आ इति श्रुतिस्मरणे आ तदुक्तं श्रीभागवते 'सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनम्' 'इति रसो वै सः' इति श्रुतिश्च । एतद्विश्वरूपात्पृथक् ।

'यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति ।
यथा सतः पुरुषात्केशलोमानि तथाक्षरात् संभवतीह विश्वम्' ॥ इति ।

मुण्डकेऽक्षरस्योर्णनाभिदृष्टान्तैरुक्तरूपत्वात् वक्ष्यते चादृश्यत्वादिगुणको धर्मोक्तेरित्यधिकरणे । ननु सोहमित्यभेदस्यान्तरा भूतग्रामवदिति सूत्रविरुद्धस्योपादानात् ज्ञानमार्गीयाक्षरपरतया नित्यानित्य-

भाष्यप्रकाशः ।

महोपनिषदि सृष्टिप्राकाले ईशानसत्तानिषेधेनाऽत्रत्यास्तिवर्ततिभवतीनां सत्तार्थकत्वस्य वक्तुमशक्यतया, 'यस्याहं हृदयादासं स ईशो विदधातु मे', 'ततो युद्धमवर्तत', 'नन्दपत्न्यां भविष्यसि' इत्यादिवज्जननार्थस्यैव ग्राह्यत्वेन प्रतिकल्पं प्रथमोत्पत्तिबोधकतया, नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यस्यापि, नासीद्वर्तते भविष्यति चेति पुरुषविपरिणामेन तास्वेव क्रियास्वन्वयस्य युक्तत्वेन रुद्राविनाभावरूपाद्वैतबोधकताया वक्तुमशक्यत्वात् । नच, सोऽहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्मेत्यग्रिमसंदर्भे विश्वरूपत्वस्य स्वस्मिन् प्रपञ्चनात् तत्सिद्धिरिति वाच्यम् । महोपनिषदुक्तनिषेधेन सिद्धे तस्याब्रह्मत्वे वामदेववच्छास्त्रदृष्ट्या ब्रह्मदृष्ट्या वाहंपदप्रयोगाद्रुद्ररूपेणाविनाभावस्यासिद्धेः । नापि, सोऽन्तरादन्तरं प्राविशदिति प्रवेशोक्त्या तत्सिद्धिः शङ्क्या । स प्रसिद्धः

रश्मिः ।

इतिश्रुतिव्याख्यानमस्तु इति चेन्न ज्ञानेन भक्त्येति श्रुत्योक्तसूत्रभेदेप्यभेदस्य सत्त्वात् । 'व्यतिहारो विशिंषन्ति हि' इतिसूत्रात् । ननु तथापि भक्त्याविरहेण कुतः संयोगं विहायेति चेन्न । विरहे आन्तरस्य परमफलत्वात् तथा चेश्वरो भक्त्येति भक्तिर्मुख्या युक्ता सर्वात्मभावरूपा तस्यां योहंकारादेशो 'लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि' इत्यधिकरणे सोपि युक्तः । एवं च ब्रह्माहमित्यादिना विश्वरूपत्वमात्मनः प्रपञ्चयित्वेति भाष्यप्रकाशः शोभनोस्त्येवेति । भावाद्वैतविरुद्धमिव मन्यमानाः 'सदेव सोम्येदमग्र आसीत्' इति श्रुतिविरोधं भक्त्या ज्ञानेन भजत्यनुगृह्णाति चेति श्रुतिविरुद्धं च ज्ञानन्ते ईक्षत्यधिकरण इदमित्थतया निरूपणाविषयत्वेनोक्तादन्यं रुद्राधिकधर्मवन्तं श्रीविष्णुं नारायणं निरूपयामासुः एको हेत्यादिना । **अत्रत्येति** अत्रत्यानां अस्तिवर्तति भवतीनामत्रोत्तरपदे इक्श्तिपौ धातुनिर्देशे इति सूत्राद्धातुनिर्देशे इक्श्तिपौ कृत्तद्धितसमासाश्चेति सूत्रेण प्रातिपदिकसंज्ञायां द्वन्द्वः । **नन्देति** जन्मप्रकरणेस्ति । **इत्यस्या** इतिश्रुत्याः । **युक्तत्वेनेति** अध्याहारदोषाभावायेति भावः । **अशक्यत्वादिति** अविभक्तं च भूतेषु विभक्तमिव च स्थितमिति त्रयोदशाध्यायगीतातः ।

'कार्यकारणवस्त्वैक्यमर्षणं पटतन्तुवत् ।
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते' ॥

इति सप्तमस्कन्धाच्च तथा । **विश्वरूपत्वमिति** । 'भूस्त आदिर्मध्यं भुवस्ते स्वस्ते शीर्षं विश्वरूपोसि ब्रह्म' इतिश्रुत्या स्वस्मिन् प्रपञ्चनात् तस्याविनाभावस्य सिद्धिः । **तस्येति** श्रीरुद्रस्याब्रह्मत्वं सर्वप्रथमसत्ताकत्वं ब्रह्मत्वं तदभावोऽब्रह्मत्वं तस्मिन् । **वामदेवेति** शास्त्रदृष्ट्या तूपदेशो वामदेववत् इतिसूत्रे प्राणस्तथानुगमादित्यधिकरणे स्पष्टम् । शास्त्रदृष्टिर्ज्ञानावेशात् सर्वधर्मस्फूर्तिः वामदेवस्य । ब्रह्मदृष्टिस्तु अहं ब्रह्मेत्यार्षेयं ज्ञानम् । तदत्र सोहमिति । **असिद्धेरिति** ननु तदेतद्रुद्रचरितमिति श्रुतेः रुद्ररूपेणाविनाभावोस्त्वन्यथा श्रुतिविरोध इति चेन्न । श्रुतावेतत्पदात्समीपतरवर्तिनोर्थस्य रुद्रचरितत्वात् । तथा च श्रुतिः अथ कस्मादुच्यते भगवान् महेश्वरो यस्माद्भक्त्या ज्ञानेन भजन्त्यनुगृह्णाति च वाचं संसृजति विसृजति च यः सर्वान् भावान् परित्यज्यात्मज्ञानेन योगैश्वर्येण महति महीयते तस्मादुच्यते भगवान् महेश्वरः तदेतद्रुद्रचरितमिति । अत्राथशब्दो भिन्नप्रक्रमे इत्येतच्छब्दो रुद्रचरितत्वं भक्तचरिते नियमयति । ननु 'समीपतरवर्तिनि चैतदो रूपम्' इति कोशे तरप्प्रत्ययान्तं समीपपदं न तमप्प्रत्ययान्तमिति रुद्रचरितत्वं भक्तचरिते ततोन्यत्रापि भवतु इति चेन्न एवमप्यहमेकमासमित्यादिश्रुत्युक्तस्य रुद्रचरितत्वाभावात् दूरत्वेन चरितस्य ग्राह्यत्वात् । **स** इति यद्यपि देवैः पृष्टो रुद्रस्तत्पदेन पराम्रष्टुं योग्य-

भाष्यप्रकाशः ।

परमात्मा अन्तरादन्तरं दहरपुण्डरीकं प्राविशदतस्तदभेददृष्टित्वात् तथेत्यर्थात् । अन्यथा प्रथमपुरुषादिप्रयोगविरोधापत्तेरिति । किंचाविनाभावरूपाद्वैतोपगमस्य चिदचिदीश्वरभेदसिद्धिसापेक्षत्वेन, 'सदेव सौम्येदमग्र आसीत्' इत्यादि श्रुतिविरुद्धत्वस्य प्रागेवोपपादितत्वेन तदादरस्याप्यसंगतत्वमेवेति दिक् ।

यदप्यनुपपत्तेस्तु न शारीर इत्यादिकं पट्सूत्रमधिकरणान्तरमङ्गीकृत्य बृहन्नारायणोपनिषदो महोपनिषदिति नामान्तरं चाभिधाय, तत्रत्ये 'पतिं विश्वस्यात्मेश्वर ँ शाश्वत ँ शिवमच्युतं नारायणं महाज्ञेयम्' इत्यादिवाक्ये, किं परमेश्वरमूर्त्यात्मा तद्विभूतिर्नारायणो विश्वपतित्वादिलक्षणकतया प्रतिपाद्यते ? किं वा परमेश्वरः शिवः ? इति संदिह्य सहस्रशीर्षं देवमित्यारभ्य सहस्रशीर्षादिविशिष्टत्वेन नारायणस्यैवोद्दिष्टतया अभ्यासात्, समुद्रेऽन्तमिति समुद्रशायित्वरूपतल्लिङ्गात् तद्वाचकाच्युतहर्यादिशब्दप्रयोगाच्च नारायण एव विश्वपतित्वादिलक्षणकत्वेन प्रतिपाद्यत इति पूर्वपक्षमभिधाय सिद्धान्तमाह । अत्र नारायणान्तर्यामी परमेश्वर एव प्रतिपाद्यते । कुतः । विश्वपतित्वादीनां परमेश्वरधर्माणां पदार्थान्तरे नारायणेऽनुपपत्तेः । पशूनां पतये वृक्षाणां पतये जगतां पतये नम इत्यादिना शिव एव परमेश्वरे निखिलभुवनाधिपत्यमभ्यस्यते । एको रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशत ईशिनीभिरिति रुद्रव्यतिरिक्तस्य जगदीश्वरत्वं निषिद्ध्यते । विश्वाधिको रुद्रो महर्षिरिति विश्वाधिकत्वं तस्यैव श्रूयते । अतो विश्वपतित्वादिलक्षणो नारायणात्मा परमेश्वर एवेत्याह । अग्रिमसूत्रे च पद्मकोशप्रतीकाशमित्यादिना नारायणहृदय-

रश्मिः ।

स्तथापि भागत्यागलक्षणापत्त्या ब्रह्माभेददृष्टिरेव परामृष्टः । अन्तरा ब्रह्मपुरात् गुह्याद्गुह्यतरं प्राविशत् प्रविष्ट इति प्रहस्ते । **तदभेददृष्टित्वात्** ब्रह्माभेददृष्टित्वात् । **प्रथमेत्यादि** प्रथमपुरुषः प्राविशदिति तस्य प्रयोगस्य विरोधापत्तिः । न च स शिवः प्राविशदिति श्रुतिवाक्यमस्त्विति शङ्क्यम् । सोहं नित्यानित्य इत्यस्य शिववाक्यत्वात् तन्मध्यपातिन एतस्य शिववाक्यत्वार्थं सोहं प्राविशदित्यर्थात् । अत्र च प्रथमपुरुषश्रुतिविरोधापत्तेः स शिवरूपः प्रसिद्धः परमात्मेत्यर्थस्य शोभनत्वात् । आदिपदेन ब्रह्माहमित्यत्र सुवर्णे कुण्डलतावद्ब्रह्मण्यहंताविरोध इत्यस्मत्पदप्रयोगविरोधः संगृह्यते । **चिदिति** चिच्चाचिच्च ईश्वरश्चैषां समाहारः चिदचिदीश्वरं तस्मिन् । समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यादिति नपुंसकता । **प्रागिति** । तृतीयाधिकरणे एवं शैवमतस्याप्यसंगतिर्बोध्येत्यादिना । **नामान्तरमिति** तथा च श्रुतिः एतद्वै महोपनिषदं देवानां गुह्यमिति । **समुद्र इति** महानारायणोपनिषदीयम् । अन्तं स्वरूपं 'अन्तः स्वरूपे मनोहरे' इति विश्वात् । समुद्रे तमिति पाठे तु तं श्रीनारायणं प्रसिद्धम् । **अत्रेति** नारायणस्य अन्तर्यामी परमेश्वर इत्यर्थः । पूर्वं षष्ठीतत्पुरुषं विधाय पश्चात्कर्मधारयः । नारायणान्तर्यामिणः परमेश्वरत्वस्य विधेयत्वात् । एवं च सूत्रस्य शारीरो नारायणो विश्वपतित्वादिगुणको न अनुपपत्तेरित्यर्थः । **एक इति** । द्वितीया इति सोर्डा द्वितीयः । येति वर्णागमः । इ अ इत्यव्यये । इको यणचि । य इत्यस्मात् सोर्लोपो न य इमानीत्यत्र य इत्यस्य श्रवणात् । तस्थुरिति स्थाणुः । सूर्य आत्मा जगतस्तस्थुषश्च इति श्रुतेः । तस्थौ ईशनीभ्य इति च पाठे स्पष्टोर्थः । **इतीति** इत्यथर्वशिरःश्रुत्या । नारायणेति षष्ठीतत्पुरुषः । कर्मकर्तृव्यपदेशाच्चेति सूत्रार्थमाहुः **अग्रिम इति** । **पद्मेति** पद्मकोशप्रतिकाशं हृदयं चाप्यधोमुखमित्यादिना ध्येयं कर्म ध्याता नारायणः कर्ता तयोर्व्यपदेशाच्च पद्मकोशेत्यादिश्रुताविति सूत्रार्थः ।

भाष्यप्रकाशः ।

मेवोच्यत इत्यङ्गीकृत्य शिवनारायणयोर्ध्येयध्यातृभावमाह। शब्दविशेषसूत्रे च, नारायणपरं ब्रह्मेति मन्त्रे नारायणात् परमिति समासमङ्गीचकार। स्मृतेश्चेति सूत्रे,

'एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम्' ॥

इति गीतावाक्यम्,

'अहं यथावदाराध्यः कृष्णेनाक्लिष्टकर्मणा ।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते' ॥

इति भारतीयमश्वत्थामानं प्रति शिववचनं च स्मृतित्वेनोदाजहार । तत्सर्वमसंगतमेव । द्वापरादिस्थलोकव्यामोहनाय पाद्मवाराहादिप्रसिद्धस्य, त्वामाराध्य तथा शंभो ग्रहीष्यामि वरं सदेत्यादिवरदानस्य यथावत्पदेनात्र बोधनात् कृष्णाराध्यत्वेऽपि शिवस्य परब्रह्मत्वासिद्धया, गीतोक्तरूपस्याप्यनुगीतोत्तरमुत्तङ्कोपाख्याने ।

'ततः स तस्मै प्रीतात्मा दर्शयामास तद्वपुः ।
शाश्वतं वैष्णवं धीमान् ददृशे यद्धनञ्जय' ॥

इत्यारभ्य,

'तद् दृष्ट्वा परमं रूपं विष्णोर्वैष्णवमद्भुतम् ।
विस्मयं च ययौ विप्रस्तद् दृष्ट्वा रूपमैश्वरम्' ॥

इति पूर्वं अर्जुनेनेदानीमुत्तङ्केन च दृष्टस्य रूपस्य वैशम्पायनेन कण्ठत एव वैष्णवत्वप्रतिपादनादुत्तङ्केनापि, विश्वकर्मन्नमस्तेऽस्तु यस्य ते रूपमीदृशमिति निगमनाच्चोपपादनमन्तरेणैव वैष्णवत्वसिद्धयाऽनुगीतायामपि विष्णोरेवेश्वरत्वसिद्धया शैवमतानुपष्टम्भकत्वात् ।

रश्मिः ।

अङ्गीचकारेति तथा च शब्दविशेषो नारायणपरं तस्मादिति सूत्रार्थः । **अह**मिति शिवः । अक्लिष्टेत्यत्र क्लिष विलेखनेनिद्व । प्रातिलोम्येन दूषणान्याहुः **द्वापरे**ति । 'द्वापरादौ युगे भूत्वा कलया मानुषादिषु' इति शिवं प्रति केशववाक्यात् । अतथ्यानि वितथ्यानि मोहशास्त्राणि कारय इतिवाक्यात् तत्स्थलोकानां व्यामोहाय । एवं पाद्मप्रसिद्धिरुक्ता । वाराहादिप्रसिद्धिरपि द्रष्टव्या । **यथाव**दिति यथेत्यव्ययाद् द्वितीयाया लुक् यं प्रकारमर्हामि यथावत् तदर्हमिति सूत्रेण वतिः प्रकारश्च पूर्वोक्तवरदानं वरदातृत्वरूपं लघूपात्तं तसिलादयः प्राक्पाशपः इत्यव्ययत्वे सोर्लुक् अव्ययादाप् सुप इति सूत्रात् । तत्पदेनेत्यर्थः । अतिदेशकं पदमुक्तम् । मासमग्निहोत्रं जुहोतीत्यत्राग्निहोत्रपदवत् । **अत्रे**ति भारतीये । ननु त्वामाराध्य तथेति पदैः अहं यथावदाराध्य इत्याराधनस्य कुतो न बोधनं पुराणे इति चेन्न 'अष्टादशपुराणानां कर्ता सत्यवतीसुतः' 'चक्रे भारतमाख्यानं वेदार्थैरुपबृंहितम्' इतिवाक्यात्पुराणोत्तरं भारताख्यानेन पुराणे भारतीयाराधनस्याप्राप्तेः । **तत** इति वैशंपायनवाक्यम् । स भगवान् तस्मा उत्तङ्काय । विष्णोरिदं वैष्णवं विराड्रूपम् । ऐश्वरं ईश्वर उपसंहारकः प्रधानत्वेन गृह्यते यत्र तदैश्वरम् । शैषिकप्रत्ययः । विश्वकर्मन्निति निरुक्तौ देवपत्नीनामसु पठितम् । **वैष्णवत्वे**ति ईश्वरप्रधानविराड्रूपत्वसिद्ध्या । **विष्णोरेवे**ति यद्यपि मूलरूपे सर्वे शब्दा वाचकतां भजन्ते तथापि ग्रहस्ते व्यवहारमनुरुध्य प्रापितमत्रानूदितम् । तथा चामरः 'ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः' इति । न चेश्वरस्य विष्णुत्वम-

भाष्यप्रकाशः ।

नारायणपरं ब्रह्मेत्यस्यापि प्रथमाप्रायपाठपतितत्वेन तत्र पञ्चमीसमासनिवेशस्याशक्यवचनतया पदभेदपक्षेऽपि, सुपां सुलुगिति सूत्रेण सोर्लोपे सुखेन तथा पाठसिद्ध्या पुरुषसूक्त एव सहस्रशीर्षत्वादिविशिष्टरूपेण जगदुपादानतायाः श्रूयमाणतया च, नारायणपरं ब्रह्मेत्यनेनापि शब्दविशेषेण तदनुपष्टम्भात् । सहस्रशीर्षं देवमित्यनुवाके कर्मत्वबोधकद्वितीयाया नारायण एवाभ्यासान्नारायणपरं ब्रह्मेत्यादिप्रथमान्तप्रायपाठपतितस्य, नारायणपरो ध्यातेत्यस्य, ध्यानं नारायणः पर इत्येतत्समभिव्याहृतस्य वस्तुपरिच्छेदनिवर्तकतायाः स्फुटत्वाच्च तस्य कर्तृत्वे पर्यवसानं वक्तुमशक्यमिति तेनापि तन्मतानुपष्टम्भात् । इतः पूर्वस्मिन्ननुवाके, अणोरणीयानिति मन्त्रे ईशाख्यस्य शिवस्य प्रस्तुतात्ममहिमरूपत्वेनैव सिद्धत्वान्मध्येऽपि, यो देवानां प्रथममिति मन्त्रे महर्षित्वादिभिर्मुख्यविभूतितया सिद्धत्वाच्च, दहरं विपापमित्युपान्त्यमन्त्रेऽपि तद्धृदयाकाशस्यैव ग्राह्यत्वात् ।

रश्मिः ।

न्वये क्लिष्टत्वादित्येवकारः । अर्श आद्यजन्तं वेश्वरपदम् । स्मृतेश्चेति सूत्रार्थासंगतिं व्युत्पाद्य शब्दविशेषसूत्रार्थासंगतिमाहुः **नारायणे**ति । **प्रथमे**ति अस्य चतुर्थचरणं 'तत्त्वं नारायणः परः' अग्रे च नारायणः परो ज्योतिरात्मा नारायणः परः' इति । न च द्वितीयाप्रायपाठः शङ्क्यो नारायणं महाज्ञेयं विश्वात्मानं परायणम् । इतिपूर्वार्धात् नारायणं परं ब्रह्मेति पाठानङ्गीकारात् । उत्तरार्धे तत्त्वं नारायणः परः इति प्रथमाप्रायपाठात् प्रथमाप्रायपाठः । **अशक्ये**ति । ननु तत्त्वं नारायणः परः नारायणपरो ज्योतिरिति समासप्रायपाठविरोध इतिचेन्न । कर्मधारयैरप्युभयसामञ्जस्यात्क्वचित्पुस्तकादौ नारायणः परं ब्रह्मेत्यादिभेदनिर्देशाच्च । **अपदभेदे**ति नारायणपरं ब्रह्म तत्त्वं नारायणः परः, नारायणपरो ज्योतिरित्यत्रापदभेदप्रकृते इत्यर्थः । **सोर्लोप** इति तत्त्वनारायणपदोत्तरीभूतस्य सोर्लोपे । **तथे**ति अपदभेदत्वेन पाठसिद्ध्या । **श्रूयमाणे**ति 'ततो विराडजायत' इतिश्रुत्या इत्यर्थः । कर्मकर्तृसूत्रार्थासंगतिमाहुः **सहस्रे**ति । **एवे**ति एतेनान्यस्य शिवस्य व्यवच्छेदात् कर्मत्वनिबन्धनं यद्ध्येयत्वं तन्निरस्तम् । ननु नारायणपरो ध्यातेति श्रुतिप्रामाण्यात् कर्मधारयमाश्रित्य कर्तृत्वमप्यस्तु ततश्च पञ्चमीसमासोस्तु नारायणपरमित्यत्र ध्यातृत्वमप्यस्तु ततश्च शंभुवमिति सहस्रशीर्षानुवाकस्थपदेन शिवे ध्येयत्वमप्यस्तु इति चेत्तत्राहुः **नारायणे**ति । **प्रथमान्ते**ति तथा च नारायणपरमित्यत्र सोर्लुगिति भावः । **इत्येतदि**ति इत्येतत् संनिहितस्य एतस्य सांनिध्यतः उक्तस्य एतद्विशेषणप्रयोजनमाहुः **वस्त्वि**ति । वस्तूनां ध्येयध्यातृध्यानादीनां परिच्छेदः एतेषामेकतमत्वं तन्निवर्तकतायाः सर्वरूपत्वसमर्पकताया इति फलितम् । **तस्ये**ति नारायणपरो ध्यातेत्यस्य श्रुतिवाक्यस्य कर्तृत्वे ध्यानकर्तृत्वमात्रेऽशक्यं किं तु सर्वरूपत्वे । अग्रे

'यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' ॥

इतिश्रुतेः । 'अनुपपत्तेस्तु न शारीरः' इतिसूत्रासंगतिमाहुः **इत** इति । **प्रस्तुते**ति प्रस्तुतस्य अम्भस्यपारे इतिश्रुत्या नारायणस्यात्मनो महिमा मुख्यविभूतिस्तद्रूपत्वेन । प्रहस्ते उपपादनादेवकारः । **महर्षित्वे**ति । आदिपदेन

'यो देवानां प्रथमं पुरस्तात् विश्वाधिको रुद्रो महर्षिः ।
हिरण्यगर्भं पश्यत जायमानं स नो देवो शुभया स्मृत्या संयुनक्ति' ॥

भाष्यप्रकाशः ।

'सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ।
सत्त्वे च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे मनसा विधीयते' ।

इति चतुर्थस्कन्धे सतीं प्रति शिववाक्येन, अहं ध्यायामि तं विष्णुं परमात्मानमीश्वरमित्यादिना, विष्णोराराधनार्थं मे व्रतचर्या पितामहेत्यन्तेन गारुडद्वितीयाध्याये ब्रह्माणं प्रति शिववाक्येन च तदुपबृंहणादपि रुद्रस्य ध्यातृत्वेनैव सिद्धत्वाच्च । इदं यथा तथा मया प्रहस्ते निपुणतयोपपादितमित्युपरम्यते प्रकृतमनुसरामः ॥ ८ ॥

इति द्वितीयं शब्दविशेषाधिकरणम् ॥ २ ॥

रश्मिः ।

इत्यत्रोक्तानि हिरण्यगर्भत्वजायमानत्वदेवत्वानि । विश्वाधिक इत्यत्र विश्वाधिप इतिपाठान्तरम् । तदपेक्षयार्थः । शास्त्रदृष्ट्या ब्रह्मदृष्ट्या वार्थः पूर्वत्र अधिकं तु भेदनिर्देशादिति सूत्रे आधिक्यस्य ब्रह्मधर्मत्वात् । उपक्रमस्यासंजातविरोधित्वेन दह्रमित्यादौ शिवादियतिहृदयाकाशस्यैव ग्राह्यत्वात् । उपक्रमादर्थकरणादेवकारः । ननु यतीनां भक्तानां हृदयाकाशः तत्र न शिवस्य

'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' ।
'परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति' ।

इत्यादिश्रुतिभ्यामिति चेत्तत्राहुः तत्त्वमिति । मनसेति नमसेति पाठान्तरम् । मे मम शिवस्य । अहं शिव इत्यर्थः । इदमिति इदं पूर्वोक्तमुपपादितम् । ननु भवत्वेवं तथापि शिवस्य भगवन्महिमरूपत्वं यदत्रोद्घोष्यते तत्कुत्रोक्तमिति चेदुच्यते तैत्तिरीयाणां नारायणोपनिषदीत्यादिनोपपादितम् । ननु यमन्तःसमुद्रे इति तत्तरणेशपदस्याणोरणीयान् इतिश्रुतिस्थस्याक्रतुपदवाच्यनारायणमहिमवाच्यसामानाधिकरण्यं पूर्वानुवाके तथास्तूत्तरस्मिन् समुद्रे तमित्यनुवाके विश्वशंभुवमितिपदात्

'अणोरणीयान् महतो महीयानात्मा गुहायां निहितोस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्' ॥

इति शिवस्य भगवन्महिमरूपत्वोद्घोषकश्रुतेः । तथा विश्वपतित्वादीनां परमेश्वरधर्माणां पदार्थान्तरे नारायणेनुपपत्तिरूपं दूषणमिति चेदुच्यते । यदन्तः समुद्रे कवयो वदन्ति यदक्षरे परमे प्रजा इत्यादिश्रुतिषु शंभुवाचकपदाभावात् पूर्वानुवाके नारायणोस्ति उत्तरानुवाके च समुद्रे तं विश्वशंभुवमिति समुद्रशायित्वलिङ्गेनोक्तं वस्तु विष्णुरूपं ब्रह्मरूपं

'रुद्रोऽरुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च ।
गरुडो ब्रह्म विष्णुश्च नारसिंहस्तथैव च
आदित्योग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसि' ॥

इतिश्रुत्या द्वादशानां समुद्रशायित्वात् ततश्च विश्वं च शं च भुव च विश्वशंभुवम् । अमोर्लुक् । पदत्रयसुवङ्नुरोधात् । प्रहस्ते पदत्रयस्य व्याप्य नारायणः स्थित इत्यनेनान्वयमनादृत्य अनन्तमव्ययं कविंसमुद्रे तं विश्वशंभुवं विश्वपुरुषमुपजीवतीति योजना प्रहस्तटीकायां स्वीकृता । अन्यथा 'व्याप्य नारायणः स्थित' इतिवाक्यादनन्तमव्ययमित्यादिवाक्यस्य भेदापत्तिः । न च नारा आपस्ता अयनं यस्येति नारायणयोगोयं रुद्रपरोपीति शङ्क्यम् । विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः

अत्ता चराचरग्रहणात् ॥ ९ ॥ (१-२-३)

कठवल्लीषु पठ्यते। 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्यो-

---

भाष्यप्रकाशः।

अत्ता चराचरग्रहणात् ॥ ९ ॥ पूर्वाधिकरणे परमात्मनः पुरुषहृदयदेशस्थित्यवधारणे जीववत् सुखदुःखभोगप्राप्तिमाशङ्क्य समाप्तौ परिहृता। स परिहारस्तदा युज्येत, यदि तस्य भोगः सिद्धः स्यात्। अतस्तत्साधनायोपोद्धातेनेदमधिकरणमारभ्यत इत्याशयेन विषयवाक्यमाहुः **कठवल्लीषु पठ्यते इति** द्वितीयवल्लीसमाप्तौ पठ्यते। अत्र शंकराचार्यादयोऽस्यामुपनिषद्यग्नि-जीवपरमात्मनां प्रकृतत्वात् त्रिकोटिकं संशयमुपगच्छन्ति। तदयुक्तम्। अग्नेः कोटिपातस्या-

रश्मिः।

इति कोशेन पातरि योगनिश्चयात्। पतिं विश्वस्यात्मेश्वरं शिवमच्युतमिति श्रुत्युक्तेषु शिवेश्वरत्वयोर्ना-रायणेनुपपत्तिः तां चैवं परिजह्रुः अथर्वशिरसि यत्सर्वान् परित्यज्यात्मज्ञानेन योगैश्वर्येण महति महीयते तस्मादुच्यते भगवान् महेश्वर इति श्रुतिः सर्वान् विषयान् त्याजयित्वा देवमुपदिश्य तदर्थबोधनद्वारा विषयवैरस्यमुत्पाद्याधिकारिणं कृत्वा दत्तेनात्मज्ञानेन मनःस्थिरतायै चाष्टाङ्गयोगजन्यैश्वर्येण च भक्तान् महति ब्रूयादिति न्यायो नेदं निर्वचनमिति व्याख्यानं च। अत्राष्टाङ्गयोगजन्यैश्वर्यवानीश्वरो भक्तान् महति ब्रूयाच्चेन्महेश्वरः। ईश ऐश्वर्ये, ईशितुं शीलमस्य स्थेशभासेति वरच्। एवं (निषान्न) निष्ठान्तस्ये-श्वरशब्दस्येश्वरे प्रवृत्तिनिमित्तमैश्वर्यं परं तु योगजन्यमिति तेन व्यवच्छिद्यते तस्य नारायणे प्रवृत्ति-निमित्तं तु स्वाभाविकैश्वर्यम्। श्रुतेरमरस्य निर्बलत्वात्। एवं नारायणविश्वपत्यादिपदानां बहूनामनुग्रहे न्याय्ये शिवपदमपि 'वेदः शिवः शिवो वेदः' इतिवाक्याद्वाचकानां वेदानां नारायणे वाच्यवाचका-भेदोपचाराद्युक्तमिति। एवं 'अनुपपत्तेस्तु न शारीरः' इतिसूत्रार्थस्पृक् प्रहस्ते किंचिदुक्तम्। कर्मकर्तृसूत्रार्थस्पृक् प्रहस्ते किंचिदुच्यते। निरुपाध्यधिष्ठेयां गुहां पद्मकोशेत्यादिभिर्महानारायणोपनिषदि विवृत्त्याधिष्ठातारमाह तस्या शिखाया मध्ये इत्यनेनेति न शिवनारायणयोर्ध्येयध्यातृभावरूपं दूषणमिति। यद्वा। किंचायं मन्त्रः पूर्वतापिनीयप्रथमोपनिषदीत्यादिना परब्रह्मणि शिवशंभुरुद्रादिशब्दानां शक्ति-रुक्ता। तथा च प्रहस्तः। एवं च शिवशंभुरुद्रेशानमहेश्वरादिशब्दा अपि मुख्यवृत्त्या तत्रैव प्रवर्तन्ते।

'नारायणः शिवो विष्णुः शंकरः परमेश्वरः।
एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' ॥

इतिवाराहेणोपबृंहणाच्चेति। न च नारायणे शिवादिशब्दानां शक्तिर्नोक्ता किं तु परब्रह्मणीति शङ्क्यम्। परब्रह्मण इदमित्थतया ज्ञानागोचरत्वेन नारायणे इदमित्थतया पर्यवसानात्। ईश्वरशब्दस्य शक्तेः पृथगपि विचारः कृतः यत्तु ज्ञानघनापरनामा सुदर्शनाचार्य इत्यादिना ॥ ८॥

इति द्वितीयाधिकरणम् ॥ २ ॥

अत्ता चराचरग्रहणात् ॥ ९ ॥ संगतिं वक्तुं वृत्तमनुवदन्ति स **पूर्वाधीति**। **परि-हृतेति** संभोगप्राप्तिसूत्रे परिहृता। **सिद्ध इति** पूर्वतन्त्रे निषेधस्य प्राप्तिपूर्वकत्वादिति भावः। **उपोद्धातेनेति** 'चिन्तां प्रकृतसिद्ध्यर्थामुपोद्धातं विदुर्बुधाः' इति लक्षणकेन। चिन्तां भोग-

पसेचनम् । क इत्था वेद यत्र सः' इति । अत्र वाक्ये ब्रह्मक्षत्रयोरोदनत्वं वदन् यच्छब्दार्थस्य भोक्तृत्वमाह । तत्र संशयः । किं जीवो, ब्रह्म वेति । सच्चिदानन्दरूपत्वं सर्वोपास्यत्वं पूर्वाधिकरणद्वयेन सिद्धम् । सर्वभोक्तृत्वं साधयति ।

भाष्यप्रकाशः ।

संगतत्वादित्याशयेनाहुः **अत्रे**त्यादि । ओदनस्य चेतनभोग्यत्वेन तत्समभिव्याहृतयच्छब्दार्थभूतस्य भोक्तुरचेतनतायास्तत्समभिव्याहारेणैव निवृत्तेरग्नेस्तथात्वाज्जीवब्रह्मकोटिक एव संशयो युक्त इत्यर्थः । नन्वेतस्मिन् विचारे का वा संगतिरित्याकाङ्क्षायां तामाहुः **सच्चि**दित्यादि । तथाच ब्रह्मजिज्ञासाप्रतिज्ञावाक्ये ब्रह्मण इति संबन्धषष्ठ्या ब्रह्मधर्माणामावश्यकानां संगृहीतत्वादुपासने ज्ञाने चापेक्षितेषु धर्मेषु द्वयोः सिद्धौ तृतीयस्यात्तृत्वस्यापि स्मरणात् प्रसङ्ग एव संगतिरित्यर्थः । नच जन्माद्यधिकरणचतुष्टयेन सच्चिदानन्दरूपत्वस्य, तद्धर्माधिकरणे सर्वोपास्यत्वस्य च प्रथमपाद एव सिद्धत्वात् पुनर्विचारस्य किं प्रयोजनमिति शङ्क्यम् । तद्विषयवाक्येषु, ब्रह्मविदिति, हिरण्मयः पुरुषो दृश्यत इति पदात् तत्र तेषां ज्ञानशेषतया विचारादुपासनायां तेषामनुपयोग इति शङ्कानिरासायावश्यकत्वात् । नच पूर्वाधिकरणे कथं सच्चिदानन्दरूपविनिगमनेति शङ्क्यम् ।

रश्मिः ।

चिन्ताम् । प्रकृतो भोगपरिहारः । **तथात्वा**दिति अचेतनत्वात् । न च ब्रह्म तर्हि अग्निरिति श्रुतिविरोधः शङ्क्यः । परमात्मपदेनैव तद्ग्रहणात् । अत एवकारः । **का वे**ति । उपोद्घातस्योक्तत्वेपि भोगचिन्तापि संभोगसूत्रे कृतैवेति तयैव चिन्तयोपोद्घातसंगतिसिद्ध्यानया भोगचिन्तया नोपोद्घातसंगतिरिति हृदयवतः प्रश्नः । तथैवोत्तरयांबभूवुः **तथा चे**ति । **आवश्यकाना**मिति 'परास्य शक्तिर्विविधैव' इति श्रुतेरनावश्यकब्रह्मधर्मप्राप्तौ विशेषणमिदम् । आवश्यकत्वं च संदिग्धत्वम् । **उपासन** इति आत्मेत्येवोपासीतेत्यादिषूपासनम् । 'य एवंविद्' इत्यादि श्रुतिषु ज्ञानं माहात्म्यज्ञानं तैत्तिरीयोपनिषदि प्रकृतश्रुतिपूर्वा श्रुतिः 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः' इति । अस्यां श्रुतावादित्यपुरुषयोः स्थितयोर्वस्तुनोरेकत्वं ब्रह्ममाहात्म्यम् । तद्य एवमिति श्रुतौ वैवंपदेन परामृश्य विदित्यनेन तद्विषयकज्ञाननिर्वचनात् तत्त्वमसीत्यादौ जीवाभेदज्ञानम् । तयोरपेक्षिता धर्मा जगज्जन्मादिकर्तृत्वादयस्तेषु द्वयोर्जनकत्वपालकत्वयोः पूर्वाधिकरणद्वयेन सिद्धिः । सर्वत्र प्रसिद्धोपदेशादित्यधिकरणे सच्चिदानन्दरूपत्वस्य प्रतिपादनात् । आनन्दरूपप्राणशरीररूपो वाक्यार्थ इति भाष्यात् । शब्दविशेषादित्यधिकरणे सर्वोपास्यत्वस्य प्रतिपादनात् यथा चत्वार उपरवा इत्यादिभाष्यात् । तस्यां सत्याम् । **प्रसङ्ग एवे**ति एवकारेणोपाद्घातव्युदासः । **विषयवाक्येष्वि**ति सत्यं ज्ञानमनन्तं नित्यशुद्धबुद्धमुक्तस्वभावमिति यतो वा इमानि भूतानि जायन्त इति तेषु ब्रह्मविदाप्नोति परमित्यस्यापि समन्वयकाले पदजन्यपदार्थोपस्थितेरावश्यकत्वेन व्याख्यानस्य व्याख्येयब्रह्मवित्पदसापेक्षत्वेन चापेक्षितत्वाद्धेतोः पदादित्यर्थः । अपरत्र श्रुतौ दृश्यत इति पदात् । तेषां सच्चिदानन्दरूपत्वसर्वोपास्यत्वात्तृत्वानां वित्पश्यत्यर्थतया पारार्थ्यं शेषलक्षणम् । उपासनायामुप समीपे स्थित्वा यथायोग्यकरणरूपायाम् । 'सर्वं खल्विदं ब्रह्म तज्जलान् इति शान्त उपासीत' इति श्रुत्युक्तायां प्रथमाधिकरणोक्तायां च प्रथमपादे सच्चिदानन्दरूपत्वादेः सिद्धावपि शब्दसंदेहवारणाच्छन्दस्य मुख्यवृत्तिर्लक्षणा वा तात्पर्यं चेति संदेहावारणादर्थसंदेहवारकेऽ-

ब्रह्मक्षत्रयोरशक्यवधयोः सर्वमारकस्य च मृत्योर्भक्षयिता जीवो न भवत्येवेति कथं संदेह इति चेदुच्यते। ओदनोपसेचनरूपकत्वाज्जीवधर्मत्वम्। स्थानाज्ञानाच्च न हि सर्वगतस्य स्वहृदयेऽपि प्रतिभासमानस्य, क इत्था वेद यत्र स इत्यज्ञान-

भाष्यप्रकाशः।

सर्वं खल्वित्यत्र सद्रूपतायाः,सत्यसङ्कल्पादिपदैश्चिद्रूपताया, अनादरत्वेनानन्दरूपतायाश्च बोधनेन तत्सिद्धेरिति । एवं द्वितीयाधिकरणे विषयवाक्येऽप्यन्तरात्मन्नित्यधिकरणनिर्देशात् तस्य च स्थानस्य सर्वसाधारण्यात् सर्वोपास्यत्वसिद्धिः स्फुटैवेति न कोऽपि शङ्कालेशः। तस्यैवान्तिमे सूत्रे भोगस्य स्मारणात् तस्यालौकिकत्वनिश्चायनायैतदधिकरणमित्युपोद्घातोऽपि संगतिरित्यपि बोधितम् । अधिकरणवैयर्थ्यमाशङ्क्य समादधते ब्रह्मक्षत्रेत्यादि । स्थानाज्ञानादिति विवृण्वन्ति नहीत्यादि। तथाच पूर्वाधिकरणद्वये सर्वगतत्वादिरूपेण सिद्धौ स्थानाज्ञानस्य वक्तुमशक्यत्वादज्ञातस्थानकत्वं जीवधर्म एवेत्यर्थः। नन्वेवं ब्रह्मवाक्यत्वसाधकपदार्थानां रूपकाज्ञानाभ्यामन्य-

रश्मिः।

स्मिन् पादे मुख्यवृत्तिस्फोरणेनार्थसंदेहवारणस्यावश्यकत्वादित्यपि लिङ्गं बोध्यम् । **सद्रूपेति**। नन्विदं परिदृश्यमाणं सद्ब्रह्मेति वचनव्यक्तेः कथं ब्रह्मणः सद्रूपताया बोधनेन तत्सिद्धिरिति चेन्न। ब्रह्म संदित्यपप्रयोगः मृद्घट इत्यपप्रयोगवत् । तस्मात्सदिदं ब्रह्मेत्युक्तावपि ब्रह्मणः सद्रूपता मन्तव्येत्याशयात्। **सत्येति** आदिपदेन भारूपादि । स्पष्टम् । **अनादरेति** न विद्यते आदरः संभ्रमो यस्येत्यनादरस्तत्त्वेनेत्यर्थः । आप्तकामत्वात् सर्वानपेक्षत्वेनेति यावत्। सर्वस्यानन्दापेक्षित्वेनानन्दस्य सर्वानपेक्षित्वम्। अन्यापेक्षानन्देपि अन्यस्यानन्दानतिरेकात् सर्वानपेक्षित्वम्। सच्चिदपेक्षितत्वेपि जीवानामन्यापेक्षित्वं नानन्दस्य द्वैताभावात्। **तत्सिद्धेरिति** सच्चिदानन्दरूपत्वसिद्धेः। **एवं द्वितीयेति** शब्दविशेषादित्यधिकरणे । **सर्वेति** हृदये ब्रह्मोपासकानां सर्वेषामुपास्यत्वसिद्धिः। स्वोक्ताया उपोद्घातसंगतेः भाष्यसूचितत्वमाहुः **तस्यैवेति** । द्वितीयाधिकरणस्यैव । एवकारेण प्रथमाधिकरणव्युदासः । भोगस्य भोगेऽपेक्षितत्वस्य भाष्ये स्मरणात् । अपेक्षितभोगस्यालौकिकत्व इत्यर्थः। न चापेक्षितपादार्थो रश्मौ तत्रैव विवृत इति स एतद्विरोधीति शङ्क्यम्। प्रपञ्चवद्भक्तिमार्गस्यापि स्वप्राप्तये सृष्टत्वेन भक्तिमार्गापेक्षितालौकिकभोगस्य रश्मौ विवृतत्वात् प्रपञ्चरूपापेक्षितालौकिकत्वाविवरणात्। उपोद्घातस्तु उक्तलक्षणकः। **अधीति** विषये संशयस्याधिकरणसार्थक्ये प्रयोजकत्वात्तदभावेनाधिकरणवैयर्थ्यमाशङ्क्य। **भाष्ये। ओदनेति**। रूपकमभेदरूपकम्। ब्रह्मक्षत्रं च ओदन इति ब्रह्मक्षत्रयोरोदनाभेदोक्तेः अयं हि धूर्जटिः साक्षादित्यत्राभेदरूपकम्। अयमपरः शंभुरित्यादौ ताद्रूप्यरूपकम् । रूपकस्याभेदरूपकताद्रूप्यरूपकभेदेन द्वैविध्यात् । **जीवधर्मत्वम्** निषिद्धकर्तृजीवधर्मत्वम्। 'काव्यादीनामसत्यत्वान्नोपयोगः कथंचन' इति निबन्धे एषामनुपयोगकथनात्। तथा चौदनं चोपसेचनं चौदनोपसेचने तयो रूपकमभेदः स एषां ब्रह्मक्षत्रमृत्यूनां ते ओदनोपचनरूपकास्तेषां भावः ओदनोपसेचनरूपकत्वं तत्त्वात्। **तेषाम्** ब्रह्मक्षत्रमृत्यूनामत्तृत्वस्य निषिधादत्तृत्वस्य ब्रह्मण्यभावात् जीवधर्मत्वं जीवधर्मवृत्तान्तं श्रुतिर्वक्तीति भाष्यार्थः। **स्थानाज्ञानादितीति** स्वोक्तमित्यर्थः। **सर्वगतत्वेति**। सर्वं खल्विदं ब्रह्मेति सर्वगतत्वमाकाशस्येव घटादौ। आदिपदेनान्तरात्मन्निति श्रुत्युक्तं स्वहृदयेन्यहृदये च प्रतिभासमानत्वम् । **ब्रह्मवाक्येति** अचरब्रह्मक्षत्ररूपं

१. इदमिति ।

मुपपद्येत । अलौकिकसामर्थ्याच्च संदेहः ।

तत्र निषिद्धत्वाल्लौकिकभोजनवन्निरूप्यमाणत्वात् स्थानाज्ञानाच्च कश्चिदुपासनोपचितालौकिकसामर्थ्यो महादेवादिरत्ता भविष्यति । न तु तद्विरुद्धधर्मा भगवान् भवितुमर्हति, अक्लिष्टकर्मत्वादिधर्मवान् । तस्माज्जीव एवोपासनोपचितमहाप्रभावो वाक्यार्थ इत्येवं प्राप्तेऽभिधीयते ।

भाष्यप्रकाशः ।

थात्वस्य वक्तुमशक्यत्वात् कथं संदेह इत्यत आहुः अलौकिकेत्यादि । ननु जीवे कथमलौकिकसामर्थ्यसंभव इत्याकाङ्क्षायां तत्साधयन्त एव पूर्वपक्षमाहुः तत्रेत्यादि । 'न हिंस्यात् सर्वा भूतानि' इतिश्रुत्या स्वपरप्राणवियोजनरूपाया हिंसाया निषिद्धत्वादत्र च ओदनरूपकेण तस्याः लौकिकतौल्यस्य च सूचनात् तथा । महादेवादिरित्यादिपदेन रुद्रवतोऽग्नेः संग्रहः । महादेवस्य निषिद्धभोक्तृत्वं त्वगस्त्यसंहितायां प्रथमाध्याये महादेवेनैव पार्वतीं प्रत्युक्तम् ।

'भक्त्यार्पयन्ति ये मह्यं तवापि पिशितादिकम् ।
उत्पादयन्ति चानन्दं गणेभ्यो वा सुरेश्वरि ॥
तवापि मे मदीयानामस्माकं पिशितादिकम् ।
तृप्तिमुत्पादयत्येव विधिनाऽविधिनार्पितम्' ॥

इति । तद्विरुद्धधर्मेति अनिषिद्धालौकिकभोजनकृत् । विरुद्धधर्मवत्त्व उपपत्तिः अक्लिष्टेत्यादि । सिद्धान्तं व्याकुर्वन्तो विषयवाक्ये हेतुपक्षबोधकपदादर्शनात् कथमस्य सूत्रस्य तद्विषयत्व-

रश्मिः ।

सर्वमारकमृत्युरूपं साधकम् । रूपकमभेदोऽज्ञानं स्थानाज्ञानं ताभ्यामन्यथात्वं जीवपरत्वं तस्य । ओदनेति ओदनाभेदेन तस्या हिंसायाश्चकाराच्छ्रुतौ निषिद्धकर्तृजीववृत्तान्तस्य । महादेवेति पूर्वपक्षे महादेवस्य जीवकोटौ निवेशेन भाष्ये सिद्धान्ते मुख्यविभूतित्वं ध्वन्यते । प्रहस्ते तथोपपादनात् । रुद्रवत इति यो रुद्रो अग्नाविति अथर्वशिरःश्रुतेः । उपसंहारस्य रुद्रे प्रसिद्धिमनुरुध्याग्निविशेषणम् । रुद्रवतोग्निमतो ह्योंकारस्य ब्रह्मविद्योपनिषदि ।

'सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च ।
ईश्वरः परमो देवो मकारः परिकीर्तितः' ॥

इति श्रुतेः सामवेदद्योलोकदेवेश्वरपरमाहवनीयरूपमकाररूपस्येति तु न समगृहीषुर्भोगशरीरस्यैवाधिकृतत्वं न शरीरिणः इति । अग्नेः तत्त्वस्य सार्वजनीनत्वात् महादेवस्याहुः महादेवस्येति पूर्वपक्षत्वाद्यत्रकुत्रत्यं वाक्यमाहुः अगस्त्येति । तथापीति तथा मे मह्यं मदीयानामपि अस्माकमपि पिशितादिकमामिषादिकं विधिनाऽविधिना वा । अक्लिष्टेत्यादीति ।

'ॐ सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे' ॥

इति गोपालतापिनीयादादिपदेन वेदान्तवेद्यत्वम् । तदविरुद्धेति भाष्यव्याख्यानभाष्यं वैतत् । स्वपदानि च वर्ण्यन्ते इति भाष्यलक्षणसंगमनाय । अस्येति प्रत्यक्षस्य हेतुपक्षबोधकस्य

अत्ता चराचरग्रहणात्॥ अत्ता भगवानेव। कुतः। चराचरग्रहणात्। चरं सर्वप्राणिवधार्थं परिभ्रमन्मृत्युः। अचरं ब्रह्मक्षत्ररूपं कस्याप्यचाल्यम्। तयोरत्ता न जीवो भवितुमर्हति।

'यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्' इति न्यायात्। अस्मदादिप्रतिपत्त्यर्थं तु लौकिकवद्वचनं भोक्तृत्वाय। प्रलयकर्तृत्वान्नायुक्तत्वम्। सर्वत्र

भाष्यप्रकाशः।

मितिशङ्कापरिहाराय ब्रह्मक्षत्रपदं चराचरोपलक्षकमिति लाक्षणिकव्याख्यानस्यासंगतत्वबोधनाय चाहुः चरमित्यादि। अचाल्यमिति प्रवाहनित्यत्वादचाल्यम्। श्रुतौ चकारद्वयेन वर्णान्तरस्यापि संग्रहः। तेषामपि भक्तावधिकारेण मुक्तियोग्यत्वात्। देवोऽसुरो मनुष्यो वेति वाक्यात् एवं सति पूर्वोक्तस्यात्ता जीवो भवितुं नार्हति। अत्तुर्जीवभावे तदात्तानां मोक्षासंभवात्। ननु मृत्युञ्जयत्वेन संहारकत्वेन ज्ञानदातृत्वेन च तस्य प्रसिद्धत्वान्मुख्यविभूतिरूप एव सोऽस्तु, न जीवो, न वा परः। बाधकानामुक्तत्वादित्याकाङ्क्षायामाहुः यत्रेत्यादि। यथा ह्यमात्यो युवराजो वा राजकार्यं कुर्वन्नप्यन्येभ्योऽतिशयवानपि, न राजभोग्यं भुङ्क्ते तदसाधारणं कार्यं वा करोति। अत उपासनोपचयादिना जातेऽपि सामर्थ्ये न तस्य तादृशमत्तृत्वं शक्यवचनमित्यर्थः। ननु तादृश भोक्तुर्ब्रह्मत्वे बाधकानामुक्तानां का गतिरित्यत आहुः अस्मदादीत्यादि। तुः शङ्कानिरासे। तथाच यथा सदेव सोम्येदमग्र आसीदित्यत्र ब्रह्मणः केवलत्वेऽभिसंहितेऽप्यग्रपदेन कालोपरञ्जनमस्मदादिप्रतिपत्त्यर्थं, तथात्र भोजने लौकिकवद्वचनमपि। नचात्र निषिद्धत्वं बाधकम्। निषेधस्य जीवेऽपि देहसंबन्धानन्तरमेव प्रवृत्तेरनुज्ञापरिहारसूत्रे वक्ष्यमाणत्वादशरीरे ब्रह्मणि तदप्रवृत्तेस्तं प्रति निषिद्धत्वाभावात्। अन्यथा प्रलयेऽपि हिंसायास्तौल्यात् तत्कर्तृत्वमप्ययुक्तं स्यात्। तथा सति प्रलय एव न भवेदतस्तत्रेव भोक्तृत्वेऽपि नायुक्तत्वम्। नापि स्थानाज्ञानं बाधकमित्याहुः। सर्वत्रेत्यादि सर्वत्र विद्यमानत्वेऽपि, हन्त तिरोसानीति श्रुतेः सृष्ट्यनन्तरं तिरोधानेनाऽज्ञायमानत्वात्

रश्मिः।

तत उक्तं वाक्यं विषयं यस्य तत्त्वं तद्विषयत्वम्। इति लाक्षणिकेति शंकराचार्यरामानुजाचार्याभ्यां कृतस्य। अचाल्यमविकम्प्यम्। वर्णान्तरेति च पुनः क्षत्रं च वर्णद्वयं वैश्यशूद्ररूपं ओदन इत्यर्थः। एवं सतीति शंकराचार्यभाष्यानुरोधेन वर्णद्वये संगृहीते सति। तदेति तदा प्रलयकालेत्तानां भक्षितानामभिसंविशन्तीत्युक्तमोक्षासंभवात्। प्रसिद्धेति अमरे श्रीभागवतेऽथर्वशिरसि चेत्यर्थः। स महादेवः। राजभोग्यमिति स्त्र्यादीत्यर्थः। तदसाधारणमिति पत्रेषु निश्चयाक्षरादिरूपम्। यत्र महादेवादावतिशयो दृष्टः एतादृशात्तृत्वरूपः सः स्वं शिवादिपदं तदर्थः शिवादिरूपस्तस्यानतिलङ्घनात्। अतिलङ्घनमत्रातिशये दृष्टे भवति शिवाद्यर्थाभावापरब्रह्मार्थोऽस्त्यतिशयादिति भाष्यार्थः। उक्तानामिति पूर्वपक्षग्रन्थ उक्तानाम्। पूर्वपक्षोक्तनिषिद्धत्वरूपं दूषणं परिहरयन्तः प्रलयेत्यादिभाष्यमवतारयन्ति स्म न चात्रेति। अनुज्ञेति। इदं सूत्रं द्वितीयाध्यायतृतीयपादे 'अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्' इति। न भवेदिति न च मा भूत्प्रलय इति शङ्क्यम्। स्यात्प्यादिति पूर्वोक्तसूत्रविरोधात्। नापि रूपकं बाधकं 'आनुमानिकमप्येकेषां शरीररूपकविन्यस्तगृहीतेर्दर्शयति च' इति सूत्रे रूपकस्यानिषिद्धकर्तृजीवविषये स्वीकारात्। सर्वत्रेति भाष्यं विवरीतुमाहुः नापीति। भवतीति क्रियापदम्। सर्वत्रेति यतः सर्वत्रेति यदध्याहारः कर्तव्यः अग्रेऽत इति

विद्यमानस्याप्यज्ञायमानत्वात् फलतः स्थानाज्ञानमुक्तम् । ब्रह्मक्षत्रयोरपि मोक्षापेक्षित्वान्मृत्युसंबन्धमात्रेण भगवति भोक्तरि प्रवेशार्थं योग्यरूपत्वमेवौदनत्वम् । प्राणानां तत्रैव समवलयान्मृत्युरपि तत्रैव लीनोऽग्रे जन्ममरणाद्यभावाय भगवत्येव प्रविशति । तस्मादस्मिन् वाक्ये ब्रह्मक्षत्रमृत्यूनां भोग्यत्वेन ग्रहणादत्ता भगवानेवेति सिद्धम् ॥ ९ ॥

भाष्यप्रकाशः ।

प्रत्यक्षरूपस्य फलस्याभावेन तदभिसंधाय स्थानाज्ञानमत्रोक्तं, न तु स्थानविषयकं परोक्षज्ञानमप्यभिसंधायातो न दोषः । ननु भवत्वेवं, तथापि क्लिष्टकर्मत्वं कथं निवर्ततामित्यत आहुः **ब्रह्मक्षत्रेत्यादि** । मोक्षापेक्षिणो ह्यत्रादनीयत्वेनाभिप्रेयन्ते । ते च देहसंबन्धे निवृत्ते मुच्यन्ते, न तु सदेहाः । अतो यथा तण्डुलानां वह्न्यादिसंबन्धेनावयवशैथिल्येन विकृता वोदनत्वं, तथात्र मोक्षापेक्षिणां भोक्तरि भगवति प्रवेशार्थं कथंचिन्मृत्युसंबन्धमात्रेण योग्यरूपत्वमेवौदनत्वम् । यथा कंसादीनां, कुरुपाण्डवसैन्यानां च । अत एव, तदेव रूपं दुरवापमाप, 'यास्यन्त्यदर्शनमलं बलभीमपार्थव्याजाह्वयेन हरिणा निलयं तदीय'मित्यादीनि वाक्यानि । न चैवं मृत्योरुपसेचनत्वासंभवः । अत्रात्र वै मृत्युर्जायत इत्यनेकमृत्युपक्षे, अशनया मृत्युरेवेत्येकमृत्युपक्षेऽपि मुच्यमानब्रह्मक्षत्रप्राणानामत्रैव समवनीयन्ते प्राणा इति श्रुतेस्तस्मिन्नेव लयेन तद्धर्मात्मकोशनाया-

रश्मिः ।

दर्शनात् । **फलस्येति** चक्षुरादिफलस्य प्रत्यक्षरूपफलस्याभावमभिसंधाय । **परोक्षेति** शाब्दज्ञानमित्यर्थः । न च शाब्दापरोक्षमस्त्येवेति शांकराशङ्का प्रभवत्यत्रेति शङ्क्यम् । सिद्धान्तानुसारेण शाब्दप्रत्यक्षानङ्गीकारात् । दोषो ब्रह्मपरत्वे स्थानाज्ञानरूपः । **क्लिष्टेति** कृष्णायाक्लिष्टकारिणे इति श्रुतिप्रसिद्धमिदं प्रतियोगिक्लिष्टकारिरूपक्लिष्टकर्म रूपं तस्य भावः क्लिष्टकर्मत्वम् । अधीतवेदान्तानां ब्रह्मजिज्ञासार्हत्वात् ब्रह्मपदेनैव तद्धर्मस्फूर्तिः । **कथंचिन्मृत्यिवति** मृत्युरत्यन्तविस्मृतिरिति वाक्यात् कथंचित्प्रलयकालाद्यनुसंधानप्रकारेण देहविस्मरणमात्रेण । **कंसेति** अत्रादिपदेन प्रलम्बजरासंधौ तयोः कालानुसंधानं बलभीमरूपैः प्रकारैः मृत्युसंबन्धमात्रेण योग्यरूपत्वं कुरुसैन्यानां युयुधानो विराटश्चेत्यादिगीतोक्तानां पाण्डवसैन्यानां भवान् भीष्मश्च द्रोणश्चेत्याद्युक्तानां पार्थान्योन्यप्रकारैस्तथा । **अत एवेति** मोक्षार्थं मृत्युसंबन्धादेवेत्यर्थः । **हरिणेति** आविष्टेन प्रथमस्कन्धे तृतीयाध्याये द्वयोरावेशित्वं भीमस्य तु नरः फाल्गुनः इत्याद्या विशेषावेशिनो हरेरिति वैष्णवतन्त्राद्बोध्यम् । अन्येषां

'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम्' ॥

इति वाक्यात्तेजोंशसंक्रमो बोध्यः । **इत्यादीनीति** । 'पश्यतां सर्वलोकानामलोकं समपद्यत' इत्यादीनि । मृत्योर्विस्मरणात्मकस्य ब्रह्मणि सर्वज्ञतया प्रवेशासंभवात् उपसेचनत्वासंभवमाशङ्क्यमानस्य शङ्कामपनुदन्तः **न चैवमिति** । स्वयमत्स्यमानं सदन्यस्यादनहेतुरुपसेचनं सिच्यतेऽनेन करणाधिकरणयोश्चेति ल्युट् । **अत्रात्रेति** स्थाने स्थाने । **अनेकेति** शतमृत्युपक्षे अनिलो मृत्युरत्र पक्षे जायत इति श्रुतेः । **अशनयेति** वर्णविकारः अशनाया अशनावानित्यर्थः । छान्दसः प्रत्ययः । **एकमृत्यिवति** नित्यमृत्युपक्षेपि 'प्रत्यर्प्य मृत्यवे पुत्रान्' इत्यस्य सुबोधिन्यां दशमे प्रथमाध्याये स्पष्टमिदम् । मुच्यमानयोर्ब्रह्मक्षत्रयोः प्राणानामित्यर्थः । मृत्युरपीति भाष्यं विवृण्वन्ति स्म **तद्धर्मेति** । **अशनायेति** वैदिकं पदं पूर्वमुपपादितम् । अशनाया इति वर्णविकारपरित्यागः अशनाया हि

ननु किमित्येवं प्रतिपाद्यते। पूर्वपक्षन्यायेन यमोऽन्यो वा मृत्युं साधनीकृत्य स्ववशे सर्वं करोतीति जीववाक्यमेव किं न स्यादित्यत आह।

भाष्यप्रकाशः।

दिरूपो मृत्युरपि तेषां जन्ममरणाद्यभावाय भगवत्येव प्रविशतीति तस्योपसेचनत्वमपि युक्तमेव। एवं सिद्धे तेषामोदनोपसेचनभावे तदत्तृत्वेनाक्लिष्टकर्मत्वमपि भगवतोऽनायासेनैव सिद्धम्। दुश्चिकित्स्यव्रणादिव्यापन्निवारकागदङ्कारकृतिवत्तस्योत्तमफलत्वात्। एवं प्रलयेऽपि सुषुप्तिवत्सुखजनकत्वमेव। नानासंसृतिक्लेशनिवृत्तिफलकत्वात्। तस्मादत्र बाधकानामभावात् साधकयुक्तीनां सत्त्वादस्मिन् वाक्येऽत्ता भगवानेवेति सिद्धमित्यर्थः। किंच। मोक्षापेक्षिब्रह्मक्षत्रप्राणानामुत्क्रमणाभावेनान्तःप्रकटे भगवत्त्येव लयादन्तर्यामित्वमपि सिद्धं ज्ञेयम्॥ ९॥

सूत्रान्तरमवतारयितुं चोदयति नन्वित्यादि। अयमर्थः। विषयवाक्ये पक्षादिबोधक-

रश्मिः।

मृत्युरिति बृहदारण्यकश्रुतिस्थप्रसिद्धं पदं वा। आदिपदेनात्यन्तविस्मृतिरूपो मृत्युः। **प्रविशतीति** विस्मरणरूपो मृत्युः स्वविस्मरणरूपः सन् सार्वज्ञ्याविघटकतया स्मरणात्मकज्ञानरूपत्वेन प्रविशति न तु विस्मरणत्वेन रूपेणेत्यर्थः। अत्यन्तविस्मरणस्यात्यन्तविस्मरणत्वात्। अशनया मृत्युः स्वाभावरूपतृप्तिरूपेण प्रविशति। **इतीति**। युक्तत्वे हेतुः। **अनायासेनेति**। सुप्रसिद्धत्वादिति भावः। न ह्यदन् क्लिष्टकर्मा भवति। ननु दृष्टान्तमात्रेण कथं क्लिष्टकर्मत्वं निवर्ततामिति चेत्तत्राहुः **दुश्चिकित्स्येति**। अगदं करोतीत्यगदङ्कारः। कर्मण्यण् भिषगित्यर्थः। तथाच फलतोऽक्लिष्टकर्मत्वं विवक्षितमिति भावः। कृतप्रयत्नापेक्षत्वाच्चाक्लिष्टकर्मत्वं कृतप्रयत्नापेक्षसूत्रभाष्ये स्फुटम्। **तस्येति** क्लिष्टकर्मणः उत्तमं फलं व्रणादिनिवृत्तिर्दृष्टान्ते मोक्षो दार्ष्टान्तिके यथाकथंचिद् दुःखोत्तरं सुखदृष्टान्तमुक्त्वा नानाक्लेशानन्तरं दुःखाभावोत्तरं सुखदृष्टान्तमाहुः **एवमिति**। सुषुप्तिवदिति सप्तम्यन्ताद्वतिः सुखं दुःखाभावरूपं एवकारेण दुःखव्यवच्छेदः। **नानेति** प्रलयसुषुप्त्योर्नानेत्यादिः। **भाष्ये। तत्रैवेति** जीवेष्वेव। एवकारेण मनो व्यावर्त्यते स्मरणाभावरूपमृत्योर्मनोधर्मत्वं कामः संकल्प इति श्रुतौ धीनां मनोधर्मत्वेनोक्तेः। प्रतियोग्यभावयोः सामानाधिकरण्यनियमात्। अतस्तत्रैव लीनः लीङ् श्लेषणे श्लेषं प्राप्तोग्रे मोक्षप्रलयोत्तरकाले जन्ममरणे आदिपदेन तज्जन्यभयं तेषामभावाय स्वस्य जीवानां च मृत्युरपि भगवत्येव प्रविशति मृत्युर्यस्योपसेचनमिति श्रुतेरुपसेचनस्य भगवति प्रवेशस्यौचित्यात्। **प्रकृते। इत्यर्थ** इति तथा च श्रुतिः ब्रह्म तर्हि अग्निरिति न चैवं रुद्रोऽत्ता इति सिद्धम्। यो रुद्रोऽग्नाविति श्रुतेरिति वाच्यम्। ब्रह्म तर्हि अग्निरिति श्रुतेरग्नेर्ब्रह्मत्वे सिद्धे अग्निनिष्ठस्य रुद्रस्य द्रुतमनुपलभ्य शिवरूपत्वात्। तथा च श्रुतिः 'अथ कस्मादुच्यते रुद्रो यस्मादृषिभिर्नान्यैर्भक्तैर्द्रुतमस्य रूपमुपलभ्यते तस्मादुच्यते रुद्र' इति। भाष्ये एवकारेण महादेवादिव्यावृत्तिः सूत्रार्थस्तु अत्ता भगवान् चराचरग्रहणात्। चराचराणामन्तःप्रवेशनादिति। भाष्ये न्यायचर्चा नोरीकृतापि कस्मैचित्प्रयोजनाय भाष्यप्रकाशे स्वीकृतात्राप्युच्यते। तथा च अत्तृत्वस्य साध्यत्वे हेतुसाध्यतावच्छेदकैक्यप्रसङ्गेन हेतोः साध्यसमत्वापत्तिः। अतोऽनुवृत्तं ब्रह्म भगवत्पदेन गृहीत्वा भगवत्त्वं प्रसाध्यते। न चैवं सूत्रे पर्वतो धूमादितिवदप्रयोगापत्तिरिति वाच्यम्। ईदृशस्थले स्वल्पाक्षरमिति सूत्राददोषात्। **चोदयतीति** स्मेति शेषः। चोदनस्य भूतकालिकत्वात्। **पक्षादीति** ग्रस्येत्यत्र संदिग्धसाध्यवत्पदार्थाभावात् पक्ष-

प्रकरणाच्च ॥ १० ॥

प्रकरणं हीदं ब्रह्मणः । न जायत इत्यारभ्याऽऽसीनो दूरं व्रजतीत्यादिना माहात्म्यं वदन्नन्ते, यस्य ब्रह्म च क्षत्रं चेत्याह । अतः प्रकरणानुरोधात् पूर्वोक्तप्रकारेण ब्रह्मवाक्यत्वमिति । अन्यथा प्रकृतहानाप्रकृतकल्पने स्यातामिति चकारार्थः ॥ १० ॥

इति प्रथमाध्याये द्वितीयपादे तृतीयं अत्ता चराचरेत्यधिकरणम् ॥ ३ ॥

भाष्यप्रकाशः ।

पदाभावेऽपि चराचरदिपदैर्मृत्य्वरादिगतं धर्ममादृत्य योगवृत्त्या तानि बोधयित्वा तेषां ग्रहणस्य लिङ्गत्वं च कल्पयित्वा निर्बन्धेन ब्रह्मवाक्यत्वकल्पनापेक्षया पूर्वपक्षोक्तानां निषिद्धत्वादीनां शीघ्रं बुद्ध्यावारोहात् तेन न्यायेन जीव एवात्र ग्रहीतुमुचितः । स चेत् साधारणो न समर्थस्तदा संहारेऽधिकृतो यमो देवतारूपं मृत्युं, देवतारूपो मृत्युर्वा रोगादिरूपं मृत्युं साधनीकृत्य ब्रह्मक्षत्रोपलक्षितं सर्वं प्राणिजातं स्ववशे करोतीति युक्तम् । अतोऽस्य जीववाक्यत्वमेवादरणीयमिति । अत्र सूत्रं पठित्वा व्याचक्षते ।

प्रकरणाच्चेति ॥ १० ॥ जीवप्रश्नोत्तरश्रवणानन्तरम्, अन्यत्र धर्मादन्यत्राधर्मादिति प्रश्नान्तरे कृते सर्वे वेदा यत् पदमामनन्तीत्यादिना प्रकरणान्तरं प्रवृत्तमत इदं ततोऽतिरिक्तस्य ब्रह्मणः प्रकरणम् । तत्र सर्वे वेदा इति मन्त्रे संक्षेपेण कथनं प्रतिज्ञाय, ॐकारस्य संक्षेपरूप-

रश्मिः ।

बोधकपदाभावः । आदिपदेन साध्यहेतुबोधकपदाभावौ । मृत्य्वादीति ब्रह्मक्षत्रे आदिपदेन ग्राह्ये । धर्मं चरत्वरूपमचरत्वरूपं च । वेदान्ते वृत्त्यन्तराभावादाहुः योगवृत्त्येति तदुक्तम्—

'ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः ।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित्' ॥

इति पत्रावलम्बने । तानि ब्रह्मक्षत्रमृत्युरूपाणि । लिङ्गत्वं ब्रह्मवाक्यत्वे लिङ्गत्वम् । तेनेति पूर्वपक्षन्यायेन । अत्रेति हेतुभूताशङ्कायाम् । भाष्ये । इत्यत इति शङ्कारूपहेतोः सूत्रमाहेत्यर्थः ॥ ९ ॥

प्रकरणाच्च ॥१०॥ प्रकरणं प्रकृष्टं साधकतमम् । 'साधकतमं करणम्' इति सूत्रात् । प्रकरणस्य दूषणराहित्यं यथा अन्नमयादिषु विकारमयडंशेषु प्रायपाठे च पतितानन्दमये साधकतमं विकारे मयटः प्रायपाठः तत्प्रकरणपरं द्व्यचश्छन्दसीति सूत्रेण दूषणरहितं नास्तीति प्रकरणाभावान्न मयट् । उपक्रमो वा प्रकरणं देशकालौ प्रकरणमिति निबन्धटीका तदपेक्षया प्रकरणाधिकार एव ग्राह्य इति ग्रन्थश्च ताभ्यां देशकालाधिकारः प्रकरणम् । प्रकृतमिति परे इत्याशयेनाहुः जीवेति । येयं प्रेते विचिकित्सा मनुष्येऽस्तीति जीवप्रश्नः हन्त तदिदं प्रवक्ष्यामीत्युत्तरं तयोः श्रवणानन्तरमित्यर्थः । कृत इति प्रचेतसा कृते । प्रकरणेति प्रकरणं प्रकृष्टं साधकतमं देशकालौ जीवप्रसाधनादेशकालादन्यब्रह्मसाधनं देशकालरूपं प्रकरणान्तरं ब्रह्मप्रसाधनं देशकालात्मकं प्रकृतमित्यर्थः । ब्रह्मण इति ब्रह्मणः प्रसाधनं देशकालरूपम् । ब्रह्मणः प्रकृतमिति त्वनन्वितम् । तथा च शंकराचार्यादिभाष्यं यत्कारणं प्रकरणं परमात्मनो 'न जायते म्रियते वा विपश्चित्' इत्यादिप्रकृतग्रहणं च न्याय्यमिति न च प्रकरणाच्चेति चकारार्थो यो न जायत इत्याद्युक्त इति वाच्यम् । लिङ्गस्य

भाष्यप्रकाशः।

तामुक्त्वा एतद्ध्येवाक्षरं ब्रह्मेति मन्त्रद्वये सर्वफलदायकत्वादिना तत्प्रशंसामुक्त्वा तत्प्रतिपाद्यस्य ब्रह्मणो माहात्म्यं, न जायत इत्यादिभिरष्टभिर्मन्त्रैर्वदन्नन्ते तस्यैवात्तृत्वं मृत्युरेवाह। तद्यदि यमो देवतारूपो मृत्युर्वात्तृत्वेनाभिप्रेतः स्यात् तदा, न जायत इति मन्त्रे तस्य जननमरणाभावं न वदेत्। पुराणादिषूभयोरपि जन्यत्वस्मरणात्। यमो यमी श्राद्धदेव इति, तत्राऽपानस्ततो मृत्युरिति। वेदेऽपि न मृत्युरासीदमृतं न तर्हीति। जन्यत्वं च नश्वरत्वव्याप्तम्। तथा आसीनमन्त्रे,

रश्मिः।

चकारार्थत्वात्। तथा च भाष्यम्। 'क इत्था वेद यत्र सः' इति च दुर्विज्ञानत्वं परमात्मलिङ्गमिति। रामानुजभाष्यं प्रकरणं चेदं परस्यैव ब्रह्मणः 'महान्तं विभुमात्मानं मत्वा धीरो न शोचति' इत्यादि प्रकृतं 'क इत्था वेद यत्र सः' इत्यपि हि तत्प्रसादादृते तस्य दुरवबोधत्वमेव पूर्वप्रस्तुतं प्रत्यभिज्ञायत इति प्रकरणलिङ्गाभ्यां पर एव स्थितमिति भास्कराचार्यभाष्यम्। **सर्व** इति।

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्'॥

इति मन्त्रे तपांसि तपःप्रतिपादकपुराणानि। **उक्त्वेति** तस्मिन्नेव मन्त्रे ॐमित्येतत् इति पदत्रयेण। ए इति भिन्नं वा पदम्। इति **मन्त्रेति**।

'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छसि तस्य तत्।
एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते'॥

इति मन्त्रद्वये। आङ्पूर्वो लबि शब्दावस्रंसयोर्धातुः भ्वादिरात्मनेपदी। मह पूजायां पूज्यते। **सर्वफलेति** यो यदिच्छसि इति श्रुत्युक्तसर्वफलदायकत्वम्। आदिपदेन ब्रह्मलोके पूज्यत्वम्। **जननेति** जननमरणयोरभावम्। **जन्यत्वेति**। क्व जन्यत्वस्मरणमित्यत्राहुः **यम इति**। अष्टमस्कन्धत्रयोदशाध्यायेऽस्ति द्वितीयं द्वितीयस्कन्धदशमाध्याये मरणं क्व स्मर्यत इति चेच्छृणु मृत्युर्वा न म्रियेत चेदिति श्रीभागवते 'मृत्युर्जन्मवतां वीर देहेन सह जायते' एवं यमस्यापि शापाज्जननमरणाभ्यां शूद्रत्वम्। ननु न मृत्युरासीदिति नश्वरत्वं मृत्योः श्रूयते न जन्यत्वमिति चेत्तत्राहुः **जन्यत्वं चेति**। नश्वरत्वस्य या व्याप्तिस्तद्व्याप्तिविशिष्टं लिङ्गमित्यर्थः। नश्वरं जन्यत्वादित्यत्र ध्वंसे साध्याभाववति हेतोर्वृत्तेरसाधारण्यमतो **जन्यत्वं चेत्यादौ** जन्यत्वं च जन्यभावत्वमिति शङ्क्यम्। ध्वंसप्रागभावयोः सिद्धान्ते कारणावस्थाविशेषत्वात्। कार्यस्थितिप्रतिकूलां कारणावस्थां पश्यत इह घटो ध्वस्त इत्यादिप्रत्ययात्। न चाभावमुखप्रतीतिर्बाधिकेति वाच्यम्। तमसि भावमुखप्रतीतेरिवात्राप्यभावमुखप्रतीतेरबाधकत्वात्। न च ध्वंसानङ्गीकारे नष्टस्य पुनरुन्मज्जनापत्तिरिति वाच्यम्। तादृगवस्थातिरोभावेन निमित्तविघटनेन च तथापादयितुमशक्यत्वात्। यत्र चावस्थातिरोभावो निमित्तान्तरसमवधानं वा तत्रोन्मज्जनेपि बाधकाभावात्। ताम्रादिघटेषु भङ्गोत्तरमपि निमित्तान्तरेण पुनः संधानदर्शनात्। न च तद्घटान्तरमेवेति वाच्यम्। प्रत्यभिज्ञाबाधापत्तेः। आश्रमवासिकपर्वस्थकुरुपाण्डवसैन्यस्य अपकृततक्षकदग्धवटतरूज्जीवनस्य भारतादौ दर्शनात्। तादृशस्थले पदार्थान्तरत्वाङ्गीकारे।

रश्मिः ।

'एकां रात्रिं विहृत्यैवं ते वीरास्ताश्च योषितः ।
आमन्त्र्यान्योन्यमाश्लिष्य ततो जग्मुर्यथागतम्' ॥

इत्यादिवाक्योक्तविहारादीनां विरोधापत्तेः । तक्षककृतकश्यपनिवर्तनस्यापि वैयर्थ्याद्यापत्तेश्च । न च ध्वंसादिशब्दाभिलापबाधः । कार्यकारणादिशब्दवदेतेषामपि सापेक्षवृत्तिकत्वेनावस्थामपेक्ष्याभिलापोपपत्तेः । तस्माद् ध्वंसो नावस्थातिरिक्तः । एवं कार्योत्पत्त्यनुकूलां कारणावस्थां पश्यत एवेह कपाले घटो नास्तीति प्रत्ययात् न प्रागभावोप्यतिरिक्तः । अत्र प्राञ्चः । उत्पन्नस्य घटादेः पुनरुत्पत्त्यापत्त्या प्रागभावोतिरिक्तः । तन्न । कालोपाधीनां क्रमिकत्वेन निमित्तसामग्रीप्रविष्टस्य कालोपाधेस्तदानीमभावात् । जन्यद्रव्यत्वावच्छिन्नं प्रति जनकतया क्लृप्तस्य समवायसंबन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्याभावान्न तदापत्तिः । यदि जन्यद्रव्याभावस्य जन्यद्रव्योत्पत्तिकालिकौत्पत्तिकध्वंसाभावस्य वा हेतुत्वमित्यत्र विनिगमनाविरहात्तादृशद्रव्याभावस्य तादृशाभावानां च कारणताकल्पनापेक्षया लाघवादेक एव प्रागभावो हेतुः कल्प्यते इति विभाव्यते तदापि तत्कालोत्पत्तिकानन्तपदार्थप्रतियोगिकानामनन्तानां प्रागभावानां विनिगमनाविरहेण हेतुत्वकल्पनस्यावश्यकत्वात् प्रागभावरूपधर्मिकल्पनाधिकेति न प्रागभावो युक्तिसह इत्यपि वदन्ति । केचित्तु स्वानधिकरणतन्तुषु पटोत्पत्तिवारणाय सर्वेषां तन्तूनां तत्संयोगादीनां च तत्तद्व्यक्तित्वेन हेतुत्वकल्पनं सहस्रतन्तुकपटस्थले आवश्यकमिति तदपेक्षया प्रागभावस्यैव लघुत्वेन हेतुत्वौचित्यात् । न चैवं द्वित्रिचतुर्षु तन्तुषु सहस्रतन्तुकपटोत्पत्तिः स्यादिति वाच्यम् । चरमसंयोगयुक्तेस्तद्व्यक्तित्वेन हेतुत्वोपगमात् । न चैवं स्वानधिकरणतन्तुष्वपि पटोत्पत्तिर्न भविष्यति चरमसंयोगाभावात् तथाच प्रागभावकल्पनमनुचितमिति शङ्क्यम् । चरमसंयोगस्य यद्धेतुत्वं तन्न समवायघटितसामानाधिकरण्यप्रत्यासत्त्या तथा सति इतरेष्वपि तन्तुषु समवायेन पटोत्पत्तिदर्शनात् तत्र च समवायेन चरमसंयोगाभावेन व्यभिचारादतः कालिकसंबन्धेन तत्पटत्वावच्छिन्नं प्रति कालिकसंबन्धेन चरमोत्पन्नसंयोगव्यक्तेर्हेतुत्वमावश्यकम् । एवं च कालिकसंबन्धेन स्वानधिकरणतन्तुष्वपि चरमसंयोगस्य सत्त्वेन पटोत्पत्तिनिवृत्त्यर्थं प्रागभावस्य हेतुतोचितेत्याहुः । कश्चित्तु पूर्वोक्तयुक्त्या भवतु प्रागभावोतिरिक्तस्तथापि न तस्य सप्रतियोगित्वं मानाभावादित्याह तदपि न । पूर्वोक्तरीत्या निमित्तसामग्रीप्रविष्टकालोपाधेः स्वानधिकरणतन्तुषु चरमसंयोगस्य कालिकसंबन्धेन सत्त्वेप्यभावात् । ननु पक्वे घटे स्पर्शरूपरसगन्धानां पाकजानामुत्पत्तिः तत्रोपादानस्य निमित्तसामग्र्याश्च सत्त्वेन विलक्षणस्पर्शरूपादिप्रागभावं विना न निर्वाह इति चेत्तादृशपरिणामिस्पर्शादिस्वभावादेव सिद्धेः । ननु[1] यत्र पक्के स्वभावस्य धर्मत्वेन तत्कल्पनेपि प्रागभावापेक्षया लाघवात् । एवमव्याप्यवृत्तिसंयोगात्तत्तदवच्छेदेनोत्पत्तौ स्वभावस्यैव नियामकत्वं ज्ञेयम् । न चेह कपाले घटो नास्तीति प्रतीतेर्निर्विषयत्वापात इति वाच्यम् । तस्या घटत्वावच्छिन्नप्रतियोगिताकाभावविषयतयात्यन्ताभावविषयत्वात् । नापीह कपाले घटप्रागभाव इति प्रतीतिस्तत्र मानं तस्या एवाभावात् । तथाग्रहेपि प्रतिवाद्यनादरणीया असार्वजनीनत्वात् । किंचोक्तप्रतीत्या आपाद्यमानः प्रागभावः किं घटत्वावच्छिन्नप्रतियोगिताक एक उत तत्तद्घटप्रतियोगिकोनैकः । नाद्यः, सर्वेषु घटोपादानेषु तत्सत्त्वात् सर्वेभ्यः कपालेभ्यः सर्वघटोत्पत्त्यापत्त्या नियमभङ्गापत्तेः । न द्वितीयः ।

१. अवधारणे ननु ।

भाष्यप्रकाशः ।

कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हतीति स्वस्य तस्य च भेदेन ज्ञातृज्ञेयभावं च न वदेत् । अत इदं मृत्य्वादिदेवताव्यतिरिक्तस्य ब्रह्मण एव प्रकरणम् । तथा सत्यासीनादिमन्त्रेषु यथा विरुद्धधर्माधारत्वादिरूपं तन्माहात्म्यमवदत्तथात्रोक्तविधातृत्वस्वरूपमपीति तथेत्यर्थः । शेषं स्पष्टम् ।

रश्मिः ।

अभावज्ञानस्य धर्मिप्रतियोगिज्ञानाधीनतया तदानीं प्रतियोगिज्ञानाभावेन तत्प्रतीत्यनुदयापत्तेः । न च प्रतियोगिज्ञानस्य घटत्वेन रूपेण सत्त्वात् प्रत्ययो निर्बाध इति वाच्यम् । तथा सतीह घटत्वावच्छिन्नप्रागभावः इति तस्या आकारात् प्रागभावस्यापि सामान्यापत्त्या पूर्वकल्पीयदोषापत्तेः । ननु प्रागभावानङ्गीकारे कारणशरीरप्रविष्टस्य पूर्ववर्तित्वस्य कथं ग्रहणम् । तस्य प्रागभावावच्छिन्नसमवर्तित्वरूपतया प्रागभावग्रहाधीनत्वादिति चेन्न । कार्यविषयकाग्रिमजननज्ञानेनैव तद्ग्रहणसंभवात् । तादृशज्ञानस्य लोकप्रवाहादेव संभवात् । प्रागभावग्रहाधीनत्वाङ्गीकारे तु प्रागभावस्यापि कारणत्वेन तन्निष्ठपूर्ववर्तित्वस्यापि प्रागभावघटिततया प्रागभावज्ञानाधीनज्ञानकत्वेनात्माश्रयापत्तेः । तस्मान्न कारणावस्थातिरिक्तः प्रागभावः । ननु कारणावस्थयापि न नियमसिद्धिः । तथाहि । कारणावस्थायाः कारणफलोपधानदशारूपत्वेन येभ्यः कारणेभ्यो यत्कार्यमुत्पद्यते तत् कार्यं प्रति तेषां यदि कारणत्वेन फलोपधानं तदा वटबीजादपीक्षूत्पत्तिप्रसङ्गः । यदि च कारणविशेषरूपेण कपालत्वादिना तथात्वं तदाप्येतेभ्यः कपालेभ्यः एतद्घटोत्पत्तिनियमासंभवः । तज्जातीयं प्रति तस्यापि सामान्यत्वात् । अथैतत्कपालत्वादीनां तथात्वं तदा विनिगमनाविरहो बहुकपालजन्यं घटं प्रति तावत्सु तथात्वं कल्पनीयमिति गौरवग्रासश्चेति न तयापि नियमसिद्धिरिति चेन्मैवम् । सत्कार्यवादे कार्यस्य कारणे सत एव ततोभिव्यक्तेः । यत्र यत्कार्यसत्ता तत एव तदुत्पत्तिरिति सुखेन नियमसंभवात् । न च बहुकपालजन्ये घटादौ गौरवग्रासः समुदायस्यैव तत्र कारणत्वात्, एकस्यैकमेव कारणमिति सिद्धान्तात् इति दिक् । अतः सुष्ठूक्तं जन्यत्वं च नश्वरत्वव्याप्तमिति ।

तथासीनेति 'आसीनो दूरं व्रजति शयानो याति सर्वतः, कस्तं मदा'इत्यादिमन्त्रे । **स्वस्येति** स्वस्य मृत्योः, तस्याचृत्वेनाभिप्रेतस्य भेदेन । **उक्तेति** उक्तविधं विरुद्धं यदत्तृत्वं तस्य स्वरूपम् । **तथेति** ब्रह्मप्रकरणत्वेन प्रकारेण यद्यप्ययं भाष्यार्थः । वाक्यैकवाक्यता प्रकरणं उभयं किमित्याकाङ्क्षायामाहुः **न जायत** इति । न जायत इत्यादिभिरात्मनो माहात्म्यवतो वचनं यस्य ब्रह्म च क्षत्रं चेत्यत्र यच्छब्दार्थबाहुल्येप्येकार्थनियमनार्थं त्यदादीनामुत्सर्गतः प्रधानपरामर्शित्वात् । एवं च न जायत इत्यादीनां ब्रह्म च क्षत्रं चेत्यस्यैकवाक्यता माहात्म्यवतो यस्य ब्रह्म च क्षत्रं चौदन इत्येवम् । अतः प्रकरणानुरोधात् पूर्वोक्तसिद्धान्तोक्तप्रकारेण ब्रह्मवाक्यत्वमिति जैमिनीयन्यायमालाविस्तरोक्तप्रकरणलक्षणानुरोधी तथापि भाट्टभास्करैः क्रियाया एव चेदं विनियोजकं न सिद्धवस्तुन इत्युक्तेर्ब्रह्मणः सिद्धवस्तुनो न विनियोजकम् । रामानुजाचार्यभाष्येप्येवं व्याख्यान इदं दूषणं ज्ञेयम् । अतः प्रकरणं साधकतमं करणमिति सूत्रोक्त प्रकृष्टं करणं प्रसाधकतमं रूपं विवक्षितम् । **शेष**मिति सिद्धार्थकथनपरं चकारार्थपरं च भाष्यं स्पष्टम् । अधिकरणत्रय्याः संगतिमुक्त्वा प्रलयकर्तृत्वान्नायुक्तत्वमिति भाष्याज्जन्माद्यधिकरणेन संगतिं वदन्तस्तत्र प्रलयकर्तृत्वमर्थो यस्य ब्रह्म च क्षत्रं चेत्यनया वा स्फुरितः प्रलयकर्तृत्वमर्थः कृष्णायाक्लिष्टकारिण इति श्रुतिविरुद्ध इव भातः स विचारितः

भाष्यप्रकाशः ।

अत्र चात्तृत्वस्य ब्रह्मणि निश्चायनात् प्रलयकर्तृत्वनिर्वाहकसामर्थ्यमवसरसंगत्योक्त्वा तदसंभवो निवारितः । सर्वे वेदा, एतद्ध्येवाक्षरमित्युपक्रमात् सर्वरूपत्वात्मकं वैशेष्यमपि जीवतुल्यभोगाभावार्थं सूचितं ज्ञेयम् ।

माध्वास्तु, स यद्यदेवाऽसृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति सर्वमदितेरदितित्वमिति बृहदारण्यकीयाग्निब्राह्मणस्थश्रुतिं विषयवाक्यत्वेनोदाहरन्ति ।

विज्ञानभिक्षुस्तु,

'य इमं मध्वदं वेद आत्मानं जीवमन्तिकात् ।
ईशानं भूतभव्यस्य ततो न विजुगुप्सते' ॥

इति कठवल्लीस्थाम् ।

अत्तृत्वरूपस्य विषयस्य तत्र स्फुटत्वात् । अत्तृत्वं च प्रलयकर्तृत्वमेव सर्वे व्याकुर्वन्ति ।

रश्मिः ।

इत्याहुः **अत्र चेति । अवसरे**ति जन्मादिसूत्रे जगज्जन्मादिकर्तृत्ववचनसमये स्फुरितोपि प्रलयकर्तृत्वरूपोऽसंभावितोर्थोऽविचारित एव स्थितः । जगज्जन्मादिकर्तृत्वं निमित्तमुत समवायित्वं ब्रह्मणि शब्दरूपप्रमाणसंचारः कथं सदसतः परस्मिन्निति जिज्ञासायाः प्रतिबन्धकीभूतायाः सत्त्वात् । तन्निवृत्तौ प्रथमपादेन सत्यां द्वितीयपादेन 'जन्माद्यस्य यतः शास्त्रयोनित्वात्' इत्यधिकरणविषयवाक्ये यच्छब्दार्थो मुख्यवृत्त्यानन्दप्राणशरीररूपो वाक्यार्थ इति भाष्यान्मनोमयप्राणशरीरभारूपादिविशेषणप्रतिपाद्यं ब्रह्मेति भवत्यवधृतिः । शब्दविशेषादित्यधिकरणेन पञ्चाधिकरणानन्तरमन्तस्तद्धर्मोपदेशादित्यधिकरणोक्तस्य 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् । एतैः सर्वैरादित्यमण्डलं विधास्यते' इत्यारणश्रुतेः प्रसङ्गाद्धिरण्यपदस्य स्मृत्यादिसिद्धान्तसिद्धे हिरण्मयेर्थे यथा व्रीहिर्वा यवो वेतिश्रुत्युक्ते मुख्यवृत्तिरित्युच्यते । एवमन्याधिकरणेषु आकाशादिमुख्यवृत्तिः सिद्धैवेति प्रलयकर्तृपदस्य मुख्यवृत्तिः कथमित्याकाङ्क्षायामवश्यवक्तव्यप्रलयकर्तृत्वनिर्वाहकसामर्थ्यमवसरसंगत्योक्त्वा तदसंभवः प्रलयकर्तृत्वासंभवो निवारित इत्यर्थः । अत्तृत्वं मोक्षदातृत्वम् । इदमेव गलाधःसंयोगानुकूलव्यापारवत्त्वं तदन्यमतानुक्तमुपपादयितुं माध्वादिमतान्याहुः **माध्वास्त्वि**ति । **सर्वमदिते**रिति तददितेरदितित्वमिति पाठः । कठेति चतुर्थवल्लीस्थाम् । श्रुत्यर्थस्तु मध्वदं कर्मफलभुञ्जानं यद्यपि तथापि प्रलयानुपयोगान्मधुब्राह्मणस्थाः पृथ्व्यादयः पदार्थाः मधूनि तान्यत्तीति मध्वदः कर्मण्यण् । तं वेद, जीवम् । 'जीवो जीवमजीवयत्' इतिवाक्यात् । **विजुगुप्सत** इति रक्षितुमिच्छति अभयस्य प्राप्तत्वादात्मानं देहं न रक्षितुमिच्छतीति । **सर्व** इति शंकराचार्यप्रभृतयः । स्वसिद्धान्तोपयोगित्वेन पूर्वं ब्रह्मक्षत्रमोक्षदातृत्वरूपमत्तृत्वं संयन्ति स्म **अत्र तदि**ति । कठवल्ल्यां प्रलयकर्तृत्वप्रसङ्गादर्शनात् । **तदित्थम्** । प्रथमवल्ल्यां तावत् त्रयाणामग्निजीवब्रह्मणां प्रश्ना उत्तराणि च तत्र द्वयोः प्रश्नोत्तराणि ब्रह्मप्रश्नोत्तरे तु द्वितीयवल्ल्यां तत्र समाप्तौ यस्य ब्रह्म च क्षत्रं चेति श्रुतिः । अत्र मोक्षोद्देश उचितो न प्रलयस्य । तृतीयवल्ल्याम् ऋतं पिबन्ताविति प्रक्रम्यात्मानं रथिनं विद्धीति मोक्षोपायनिरूपणात् । यत्तु रामानुजाचार्याः न चेदं कर्मनिमित्तं भोक्तृत्वमपि तु जगज्जन्मस्थितिलयहेतुभूतस्य ब्रह्मणो विष्णोः संहर्तृत्वं 'सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इत्यत्रैव दर्शनादिति तन्न तृतीयवल्ल्यां हीदं तत्र पूर्वसंबद्धार्थं

भाष्यप्रकाशः।

तत्तु व्याख्यानं न युक्तम्। अत्र तत्प्रसङ्गादर्शनात्। पूर्वाधिकरणविषयवाक्ये तज्जलानिति विशेषणेन जन्मादित्रयस्य ब्रह्मकर्तृकताया उक्तत्वात् प्रथमपादे चोपपादितत्वात् तेषु केवलस्य संहर्तृत्वस्यैवेह पुनर्विचारे कारणस्यानुपलम्भाच्च। अतोऽत्र तद्भिन्नस्य प्रलयातिरिक्तकालिकमोक्षफलकस्य धर्मान्तरस्यैव विचार इत्येव युक्तम्। जिज्ञासासूत्रे संबन्धषष्ठ्या उपपादितत्वेन ज्ञानोपासनयोस्तद्धर्मविचारस्योपयोगितया आवश्यकत्वादिति। भिक्षूदाहृतस्य तु भूतभव्येशानत्वरूपे स्पष्टे ब्रह्मलिङ्गे विद्यमाने उपपादनसापेक्षलिङ्गग्रहणस्यानवसरपराहतत्वमेव। माध्वोदाहृते तु, नैवेह किञ्चनाग्र आसीन्मृत्युनैवेदमावृतमासीदशना ययाऽशनाया हि मृत्युरित्युपक्रमे जिघत्सा-

रश्मिः।

एवोचितः। पूर्वं त्वात्मानं रथिनं विद्धीति जीवप्रकरणम्। जीवस्यात्र विष्णुपदप्राप्तिरुच्यते न विष्णोः संहर्तृत्वमिति।

'जीवप्रकरणं ह्येतन् मुक्त्युपायोऽस्य रूप्यते।
योग्यं शरीरमारुह्य गच्छेदिति हरेः पदम्'॥

इत्यानुमानिकसूत्रभाष्यकारिका। एतच्चतुर्थपादे आनुमानिकाधिकरणे स्फुटीभविष्यति। अधिकरणेषु तत्प्रसङ्गादर्शनमाहुः **पूर्वाधिकरणे**ति। **प्रथमे**ति 'जन्माद्यस्य यतः शास्त्रयोनित्वात्' इत्यधिकरणे स्वाप्ययादिति सूत्रे च। **कालिके**ति 'कालाठञ्' इति शेषाधिकारस्थसूत्राठ्ठञ्। **धर्मे**ति अत्तृत्वरूपस्य धर्मान्तरस्य। **तद्धर्मे**ति मोक्षफलकात्तृत्वरूपधर्मविचारस्य ज्ञानोपासनयोः 'एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते' इत्यत्र ज्ञात्वा महीयत इति पदोक्तयोः। ज्ञा अवबोधने मह पूजायाम् पूजोपासनेति पर्यायः। ननु क इत्था वेद यत्र सः इत्यत्र तच्छब्दार्थो न जायत इति आरभ्य अस्या श्रुतेरुक्तत्वात् न जायत इत्यादिश्रुत्युक्तः स कथमेतदालम्बनमिति तत्पूर्वश्रुतिप्रोक्तज्ञानोपासनयोः सेत्स्यतीति चेन्न। द्वितीयवल्लीस्थत्वेन न जायते इति श्रुतिपूर्वश्रुतिग्रहणेप्यक्षतेः। वल्ल्यन्तरस्थयोर्विश्वेदेवा उपासते अस्तीत्येवोपलब्धव्य इति ज्ञानोपासनयोर्वा ग्रहणम्। **अन्य**ेति तथा चान्तस्तद्धर्मोपदेशात् इत्यधिकरणे भाष्यम्। एकोप्यसाधारणो धर्मो विद्यमानः शिष्टान् संदिग्धानपि ब्रह्मधर्मानेव गमयतीति तथा च मध्वदरूपतत्सूत्रविषयवाक्यत्वलिङ्गस्य सत्त्वादिदं विषयवाक्यमिति न भ्रमितव्यमिति भावः। **नैवेहे**ति। श्रुत्यर्थस्तु इह परिदृश्यमान आश्रये इहेत्यस्याधिकरणार्थकप्रत्ययान्तत्वात्। आश्रयस्य प्रत्यक्षत्वं 'अथ वा शून्यवद्गाढम्' इत्यस्य निबन्धस्य टीकायामुक्तम्। अत इह संसारमण्डलं इति व्याख्याने प्रत्ययार्थः क्लिष्टान्वयी संसारस्यानाश्रयत्वात्। अग्र इतिपदं पूर्ववृत्तान्तं वक्ति न कालसत्ताम्। इह अग्रे इति वा। मृत्युनेति मृत्युरसत् तम इति यावत्। मृत्युर्वै तम इति बृहदारण्यकश्रुतेः। मृत्युर्मरणदेवयोरिति विश्वात्। दैवेनेत्येके। शबलेनेत्यपरे। अत्यन्तविस्मरणेनेति भागवतमते। मृत्युना तमसेदं जगत् आवृतं वृङ् संभक्तौ क्र्यादिरात्मनेपदी। आसमन्तात् वृतं सम्यग् भक्तं सेवितमासीत्। भक्तिमार्गप्रवेशानन्तरं भगवान् मृत्युसकाशात्प्राणिनो बहिः कृतवान् सोऽकामयत भूयसा यज्ञेन भूयो यजेय इति श्रुतेः। अनुभूयते च तमसावरणम्। भगवत्सेवया तमआवरणभङ्गः पुनर्बहिष्कृतं मृत्युस्तेषां प्राणिनामन्तःपातितवान्। स मृत्युरशनयारूपः। अशनया मृत्युरेवेति श्रुत्यन्तरात्। अशनयेति वर्णविकारः। अशनाया अशनावानित्यर्थः। अयं मृत्युरनुमेय इत्याह अशनेति अशनायेति केचित्। अशितुमिच्छा अशनाया प्रसिद्धा

रश्मिः ।

यया मृत्युः कीदृशो मृत्युः अशनायेति अशनावान् छान्दसः प्रत्ययः । अशनयानुमेय इत्यर्थ इति । न त्वशना इच्छारूपा मनोधर्मः 'कामः संकल्पः' इति श्रुतेः । कुतस्तरां तमोरूपमृत्युधर्मोऽशनायेतिपदेनोच्यते इति चेत्सत्यम् । प्राणिनामन्तःपातितस्य मृत्योः सामानाधिकरण्यसंबन्धेनाशनावत्त्वात् । अशनायया प्राणिषु अशनावान् मृत्युः सामानाधिकरण्यसंबन्धेनानुमीयत इति । अशना इच्छारूपा इहपदोक्ताश्रयधर्मः । 'स ईक्षांचक्रे' इति श्रुत्यन्तरात् । नन्वाश्रयस्याशितुमिच्छा न संभवति । अनश्नन् इति श्रुतेरिति चेन्न कर्मफलस्याशितुमिच्छाया निषेधात् । प्रलये सर्वमशितुमिच्छाया आश्रये सत्त्वात् । तदुक्तं प्रश्नोपनिषदि । संवत्सरो वै प्रजापतिः प्रजाकामो वै प्रजापतिः तस्याशितुमिच्छा स्त्रीप्रलयेन ब्रह्मानन्दकं तादृशानन्देन जग्धमन्नं स्वदोषेण मृत्युजनकं भवति तदुक्तं यया मृत्युः ययाशितुमिच्छया प्राणिनामन्तरशनाया हि मृत्युः पातितः । एतदुक्तं प्रश्ने अकथबन्धी कात्यायन उपेत्य पप्रच्छ भगवन् कुतो ह वा इमा प्रजाः प्रजायन्ते इति तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोतप्यत स मिथुनमुत्पादयते रयिं च प्राणं चेत्येतौ मे बहुधा प्रजा करिष्यत इत्यादित्यो ह वै प्राणो रयिरेव चन्द्रमाः रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च तस्मान्मूर्तिरेव रयिरिति । अत्र प्रजापतिः संवत्सर इति श्रुतेः प्रजापतिः संवत्सरः प्रजापतिपदं योगेनाश्रयरूपसंवत्सरपरम् । ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द इत्यत्र योगो यद्यपि तथापि समुदायशक्तिरपि शक्तिसंकोचलक्षणा रूढिरूपा । प्रजापतिपदस्य लक्षणा वा । ननु नैवेह किंचनाग्र आसीत् इति किंचनपदेन नकारेण च यावद् वस्तुनिषेधात् अग्रपदेन पूर्ववृत्तान्तकथनाच्छून्यवादः प्रतीयत इति चेन्न मेनेऽसन्तमिवात्मानमिति वाक्ये आत्मनोऽसत्त्वेन मननस्मरणात् । अथवा शून्यवद्गाढमितिं निबन्धाच्च न च यदि चेदंपदेनेहपदोक्त आश्रयो गृह्येत तदा तस्य मृत्युसंबन्धापत्तिरिति शङ्क्यम् । तमस्त्वज्ञानजं विद्धीति वाक्यात् अज्ञानाभावेन तमःसंबन्धाभावात् । तस्य प्राकृतत्वात् । यत्र तमःसंबन्धः प्रतिपाद्यते यथा संहितायां जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् । इमौ देवौ जायमानौ जुषन्तेमौ तमाꣳसि गूहतामजुष्टे इत्यत्र तत्र तमो न प्राकृतमपि तु तामसी दैत्यपक्षेषु मायेति कृष्णोपनिषच्छ्रुतेः वैकुण्ठस्थं तमो बोध्यम् । सत्त्वरजस्तमसामात्मगुणत्वस्य श्रीभागवते स्मरणात् । गोपाविन्द्राग्नी इति चेन्न वेदार्थो रामकृष्णयोरिति श्रुतेः । ऐन्द्राग्नमेकादशकपालमित्यस्य तृतीयानुवाकश्रुतिवाक्यस्यानुपक्रमत्वेनोक्तार्थानिर्णायकत्वात् । अकृण्वन् । कृ हिंसायां स्वादिः । अमृतस्य मोक्षस्य नाभिं नभतुभ हिंसायां दिवादी क्र्यादी च । णभू भ्वादिरपि जुषन्त इति जुषप्रीतिसेवनयोस्तुदादिरात्मनेपदी जुष परितर्कण इति नास्ति चुरादित्वेन णिच्प्रसङ्गात् परस्मैपदित्वेन परस्मैपदप्रसङ्गात् ततः परो लेड् अडभावश्छान्दसः । गूहतां गूहन्ताम् गूह संवरणे भ्वादिरुभयपदी जुषेः कर्मत्वेन गुहेः कर्मत्वात् गूहेतामिति द्विवचने तु इमावित्युक्तस्य कर्तृत्वं स्यात् । अजुष्टेत्याव आ । अजुष्टौ पूर्वापरविरोधे तु यस्य कस्यार्थस्य तमःसंबन्धोऽवार्य एव । न त्वयमर्थो नास्त्येव यावानिति वाक्यात् । उक्तश्रुतेश्च । महाभाष्यादौ ह्यग्निपरा श्रुतिर्व्याकरणपरत्वेन व्याख्यातेति च । विद्वन्मण्डनेपि श्रुतयो व्याकृता एव कृष्णलीलापरतया । यदि चेदंपदेन विवर्तात्मकं जगदुच्यते तदा मृत्युरासीदित्येतावतैव चारितार्थ्यं स्यात् । न चेदंपदेन विवर्तत्वेप्यर्थवृत्तान्तावेदने तात्पर्यं पञ्चाक्षर्या इदमावृतमित्यस्या इति वाच्यम् । नैवासीदिदमासीदिति विरोधापत्तेः । न च नैवासीदिदमासीदित्यनेनैव विवर्तत्वमिति शङ्क्यम् । विवर्तत्वे जगतस्तद्दर्शित्वेनेदमिति प्रयोगानापत्तेः । अत इदमिहपदोक्तमधिकरण-

रश्मिः ।

मित्यर्थः । मृत्युना तमसा ज्ञानावरकेण विस्मरणजनकत्वेन मृत्युरत्यन्तविस्मृतिरिति वाक्योक्तेनावृतमिति श्रीभागवतं मतं पूर्वोक्तान्नातिरिच्यते । कोशोक्तपक्षयोर्दैवपक्षे इदं दैवेन सेवितम् । वृङ् संभक्तावित्यस्याङ्पूर्वस्य रूपमावृतमिति भज सेवायां संपूर्वः संभक्ताविति । इदं मायाशबलितेनावृतमित्यपरे । केचित्तु मृत्युनैवेदमिति श्रुतिप्रामाण्यादेव प्रागुत्पत्तेः कार्यकारणसत्तामाहुः तत्तथैव परं जगदाश्रये कार्यकारणांश इति युक्तम् । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति गीतातः । नैवेहेति सावधारणश्रुतौ कृष्णाश्रयोक्तेः । किं च मृत्युस्तमः तमश्च तमु काङ्क्षायां दिवादिस्तस्य रूपमिति स्वरवर्णानुक्रमहैमधातुपाठे तमु काङ्क्षायां दिवादिरिति धातुपाठे ताम्यति काङ्क्षतीति तमः । असुन् पचाद्यचि तमशब्दोकारान्तोपि अमरटीकायां भट्टोजीदीक्षितपुत्रकृतायां तमस्तु राहुः स्वर्भानुरित्यस्य व्याख्यासुधायाम् । तमु ग्लानौ इत्यस्य रूपे तमस्तमौ राहुगुणतिमिरेषु वाच्येषु सत्सु । तमांसि गुणतिमिरसिंहिकेया इति त्रिकाण्डशेषादित्युक्तं मृत्यौ वाच्ये तमु काङ्क्षायामित्यस्य रूपम् । यद्यपि मृत्युरत्यन्तं हर्षक्षयं जनयति तमु ग्लानावित्यस्य रूपे कृते मृत्युर्वाच्यो भवति तथापि त्रिषु तमु ग्लानावित्यस्य रूपेषु चरितार्थेषु मृत्यौ तमु काङ्क्षायामित्यस्य रूपमप्यङ्गीकृत्योच्यते । एवं च मृत्युनाकाङ्क्ष्यत इति काङ्क्षा कर्मणि प्रत्ययः । काम्यन्त इति कामा इत्यानन्दमयाधिकरणभाष्यवत् । इच्छाविषयेणेदमधिकरणमासमन्ताच्छब्दार्थशङ्काराहित्येन सम्यग्भक्तिमार्गनियमैर्युतं वृतं सेवितमित्यर्थः संपन्नः । अत्रेच्छा कस्य ग्राह्या ब्रह्मणो भक्तस्य वा तत्र सर्वाभावनिरूपणाद्भक्तस्याप्यभावे ब्रह्मणः सा । सापि आप्तकामत्वेन विषयविशिष्टा ग्राह्या । विषयास्तु स्थित्युत्पत्त्यन्तरूपाः तेषु संहारविषयिणी या सात्राप्तकामरूपा तस्य संहारस्य कामरूपस्याप्राप्तत्वात् परं तु ब्रह्मेच्छा यथास्थित्युत्पत्त्यन्तविषयिणी तथा भक्तिमार्गविषयिण्यपीच्छा यथा जगन्निरमासीत्तथा भक्तिमार्गमपीति । भक्तिमार्गविषयिणी तु ह्यचलत्वं चापेक्ष्येति सूत्रेण भक्तेच्छा सा भक्ताभावात् इहपदोक्ताश्रयपञ्चके आध्यात्मादित्रितयविदाश्रयस्यापि सत्त्वात्तन्निष्ठा । सोश्नुते सर्वान् कामानित्यत्र तच्छब्दार्थभक्तस्य स्वातन्त्र्यात् । स्वतन्त्रः कर्तेति सूत्रात् । ब्रह्मणस्तु स्वातन्त्र्यं नास्ति सोश्नुते सर्वान् कामान् सह ब्रह्मणेति तृतीययाऽप्राधान्यं ब्रह्मणो यतः 'सहयुक्ते अप्रधाने' इति सूत्रात् । आश्रयलक्षणेपि 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुत्युक्ते सति ब्रह्मण्यमृते साधुरिति व्युत्पत्तिपक्षे भक्तसत्त्वात्तस्येच्छा । ईश्वरस्याप्तकामत्वेन भक्तिमार्गविषयिण्या इच्छाया अभावात् । 'रसो वै स' इतिश्रुतौ दशरसरूपत्वेन ब्रह्मणो न लक्षणश्रुतौ ब्रह्मातिरिक्तनिवेशः । रसस्याविर्भावस्तु भक्तेच्छयात्मतः 'आत्मत आविर्भावतिरोभावौ' इति छान्दोग्यश्रुतेः । स भक्तस्तु रमादिरूपः । वाराहे चातुर्मास्यमाहात्म्ये चतुर्दशाध्याये ।

श्रीवराह उवाच—'पूर्वब्रह्मलये जाते न किंचिदवशिष्यते ।
तत्त्वानि प्रकृतिं यान्ति जीवाः सुप्ता भवन्ति हि ॥
न जानन्ति सुखं दुःखं तदाहं रमया सह ।
अप्राकृते जले देवि क्रीडन् तिष्ठामि मीलया' ॥

इति मील निमेषे भ्वादिः परस्मैपदी सेट् । श्रीभागवतेपि ।

'गोपानां दर्शयामास स्वं लोकं तमसः परम् ।
सत्यं ज्ञानमनन्तं यद्ब्रह्म ज्योतिः सनातनम्' ॥

भाष्यप्रकाशः ।

श्रावणात् तस्याश्च श्रुत्यन्तरे विजिघत्सोऽपिपास इति ब्रह्मणि निषेधेनोपपादनसापेक्षत्वात् प्रकरणस्यापि संदिग्धत्वमेव । तस्मादुक्तमेव विषयवाक्यं युक्तमिति दिक् ।

रश्मिः ।

इति श्रुतिश्च रसो वै स इति । रसे रमाऽऽलम्बनविभावः । निरुक्ते मूले तु सत्यमुदकनामसु पठितं मृत्यू रोदसीः उदकं ज्ञानं शेषश्च सत्यं ज्ञानमिति श्रुतेरर्थाः । मृत्युनेदमित्यस्या रोदसीरूपलोकमात्रा आसमन्ताद्वृत्तं संसेवितमित्यर्थः । मूले निरुक्ते श्येनः सोमः चन्द्रमाः मृत्युः इत्यादिना प्रसिद्धान्यनामानुरोधेनान्यार्थो भवति तथापि पृथ्वी गौः धेनुः इला रोदसीरिति पञ्च प्रसिद्धनामानि ततो बहूनामनुग्रहस्य न्याय्यत्वाद्रोदसीर्गृहीता चन्द्रमसा वा तुरीयतत्त्वत्वात् चन्द्रमसोऽस्या पञ्चाध्याय्याष्टीकायां निरुक्ते । नित्यलीलावादेनापि स्फुटमुपपादनीयम् । मायाशबलितं ब्रह्म कारणमिति पौराणिकमतम् । प्रकृतमनुसर्यते । **जिघत्सेति** अत्तुमिच्छाया अशनापदेन श्रावणात् । **श्रुत्यन्तर इति । छान्दोग्यस्थे** सिद्धान्ते तु ह्यविजिघत्सत्वेपि संभोगप्राप्तिसूत्रे विशेषभोगोपपादनाद्युक्तम् । **प्रकरणेति** अपिपदेन वाक्ये विषयवाक्यत्वस्य संग्रहः । **दिगिति** विस्पष्टत्वेन विषयवाक्यत्वस्य संदिग्धत्वम् । ननु विषयवाक्यस्य न विस्पष्टत्वं सर्वात्तृत्वेन ब्रह्म अदितिपदसामर्थ्येन देवमाता वेति संदेहात् तत एव विषयवाक्यत्वमपीति चेन्न स इति परामर्शकोग्न्याख्यप्राणस्य तस्य च सर्वात्तृत्वसंभवात् । तस्यादितिपदवाच्यत्वस्यापि संभवात् । न च 'स ऐक्षत' इत्यत्राग्न्याख्यप्राणस्य स इत्यनेन परामर्श उक्तः सोग्निर्ब्रह्म भवतु ब्रह्म तर्हि अग्निरिति श्रुतेः । श्रान्तस्य तप्तस्य तेजोरसो निरवर्तताग्निरिति श्रुत्या नैवेह किंचनाग्र आसीदिति श्रुतिमुपक्रम्य पाठाद्ब्रह्म तर्हि अग्निरिति श्रुतेरग्निर्ब्रह्म तस्य प्राणाख्यस्यात्तृत्वसंभवोक्त्या अत्ताऽचराचरसूत्रे अत्ताग्निः स भवतु न च निर्वर्तनं बाधकं आविर्भावतिरोभावयोर्मुरवैरिधर्मत्वेन बाधकाभावादिति वाच्यम् । 'सत्यं ज्ञानमनन्तं ब्रह्म' 'ॐमित्येकाक्षरं ब्रह्म' 'ब्रह्म तर्हि अग्निः' 'ततो ह जातो भुवनस्य गोपा हिरण्मयः शकुनिर्ब्रह्म नाम' 'अन्नं ब्रह्मेति व्यजानात्' 'प्राणो ब्रह्मेति व्यजानात्' 'मनो ब्रह्मेति व्यजानात्' 'विज्ञानं ब्रह्मेति व्यजानात्' 'आनन्दो ब्रह्मेति व्यजानात्' इत्यादिश्रुतिषु ब्रह्माणि प्रोक्तानि तेषां वाराहेऽत्र च व्यवस्था कृता । तथाहि जन्माद्यस्य यतः शास्त्रयोनित्वात् इत्यधिकरणे सत्यं ज्ञानमिति श्रुत्युक्तं ब्रह्म निर्णीतम् । ॐमित्यस्याः श्रुतेः वाराहे लक्ष्म्यादिरूपपरत्वमक्षरब्रह्मपरत्वमस्यामेव श्रुतौ । ब्रह्म तर्हीत्यस्याः श्याचार्यपरत्वं पुराणे आचार्येषु ब्रह्मभेदबुद्धेरपराधेषु गणनात् । शकुनिब्रह्मणः आनन्दमयोभ्यासादित्यधिकरणे स्वरूपनिरूपणात् । अन्नमयादीनामपि तत्रैवाधिकरणे स्वरूपनिरूपणात् । आचार्यपरत्वेप्यस्याधिकरणस्य ब्रह्मजिज्ञासानतिक्रम इति चेदोम् । ननूक्तमेव विषयवाक्यं युक्तमिति प्रकाशस्य विरोध एवकारादिति चेन्न अस्य प्रकाशस्याप्रतीताग्निब्रह्मपरत्वाभावात् । सत्यं ज्ञानमनन्तमिति श्रुत्युक्तब्रह्मणो द्वितीयाधिकरण उपक्रमात् । उपक्रान्तब्रह्माभेदेनाचार्याणां प्रसङ्गात् स्मरणं कृत्वाधिकरणरचना प्रतिज्ञातब्रह्मजिज्ञासाऽविरुद्धैव परम् । ननूक्तविषयवाक्ये सूत्रीयशब्दासंसर्गादिदमेव विषयवाक्यं युक्तमिति चेन्न अस्मादेव भाष्यात् सूत्रीयशब्दघटितमेव विषयवाक्यमिति नियमाभावसूचनात् । अत एव संपद्याविर्भावः स्वेन शब्दादित्यधिकरणे सोश्नुते सर्वानिति विषयवाक्यं सूत्रपदैरघटितमेव फलाध्याये वक्ष्यते । अत उक्तं दिगिति । नन्वत्ता भगवानित्यत्राधिकरणे सिद्धं स भगवान् परमशिवः । मैत्रायणीयोपनिषदि तमो वा इदमेकमास तत्परेणेरितं विषमत्वं प्रयात्येतद्वै रजसो रूपमित्यादिना तमोधिष्ठातुः परस्य

भाष्यप्रकाशः।

शैवस्तु प्रहस्तादेव पराहत इति न तदर्थं पुनः प्रयतनम्। अतः पूर्वोक्तमक्षुण्णम्॥ १०॥

इति तृतीयं अत्ता चराचरेत्यधिकरणम्॥ ३॥

रश्मिः।

संकल्पेनाविद्याख्यस्य तमसो गुणविभागं निरूप्य तस्य तनवो ब्रह्मा रुद्रो विष्णुरिति गुणिभ्य एभ्यस्तत्त्वान्तरं दर्शितमिति। सोत्ता भवतु न त्वदृश्यत्वादिगुणको धर्मोक्तेरित्यधिकरणोदित इति भगवच्छैवमतशङ्कायामाहुः **शैवस्त्विति**। भगवानिति शेषः। अत्र **प्रहस्तः**। तन्न परं ब्रह्म किंतु ब्रह्मणो नान्तरीयकः पाद इति न तत्र निर्व्याजमहिम्नः सिद्धिः। तथाहि ब्रह्मोपनिषत्तापिनीययोर्नान्तरीयकपादत्वनिरूपणमुक्त्वैवमेव मैत्रायणीयोपनिषद्यपि मैत्रिशिष्यः शाकायन्यो वालखिल्यप्रजापतिसंवादमुपक्षिप्य तन्मुखेन ध्येयस्य प्राणाख्यस्यात्मनः स्वरूपं यो ह वोपरिस्थः श्रूयते गुणेषु स वा एष शुद्धः पूतः शून्यः शान्तो प्राणो निरात्मानन्तोऽक्षयः स्थिरः शाश्वतोऽजः स्वे महिम्नि तिष्ठति तेनेदं शरीरं चेतनवत्प्रतिष्ठापितं प्रणोदयिता चैषोस्येत्युक्त्वा स पुरुषसंज्ञोंशेन शरीरे प्रविश्यावर्तत इति चोक्त्वा अथ यो ह वै खलु तस्य सोंशोयं यश्चेतामात्रः प्रतिपुरुषः क्षेत्रज्ञः संकल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्विश्वाख्यस्तेनेदं शरीरं तथेत्युक्त्वा प्रजापतिर्वा एकोग्रेऽतिष्ठत् स नारमतेत्यादिना बह्वीनां प्रजानां तत्कृतानां सृष्टिं चोक्त्वा ततः पूर्वोक्तरूपस्यात्मनोऽज्ञानात् क्षेत्रज्ञस्यास्मदादिशरीरस्य बन्ध इत्युक्त्वा तन्निवृत्तिप्रकारं चोक्त्वा चतुर्थप्रपाठके पुनर्वालखिल्यानां अग्निर्वायुरादित्यः कालोऽपः प्राणोन्नं ब्रह्म रुद्रो विष्णुरेकेन्यमभिध्यायन्त्येकेन्यं कतमः श्रेयः सोऽस्माकं ब्रूहीति प्रश्ने ब्रह्मणो वा एता अग्र्यास्तनवः परस्यामृतस्याशरीरस्येत्युक्त्वा तस्यैव लोके प्रतिमोदतीह यो यस्यानुषक्तः इत्येवं ह्याह 'ब्रह्म खल्विदं वा व सर्वं' इत्यादि तत्तनूपासकस्य तत्तत्सालोक्यं कृत्स्नक्षये पूर्वोक्तपरमपुरुषैक्यं च फलमुक्त्वा ततः पञ्चमे परब्रह्मणः सर्वात्मत्वादिरूपमहामाहात्म्यप्रतिपादने कौत्सायनीस्तुतिमुखेन कृत्वा ततस्तमो वा इदमग्र आसीदित्यादिना तमोभवनं ततः परप्रेरणेन वैषम्याद्रजस्ततस्तथैव सत्त्वं तस्यापि रसश्रवणं तस्य योंशः स प्रतिपुरुषः क्षेत्रज्ञः संकल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्विश्वाख्यः अस्य प्रागुक्ता एतास्तनव इत्युक्त्वा ततो भिन्नप्रक्रमेण अथ यो ह खलु वा वास्य तामसोंशोऽसौ स ब्रह्मचारिणो योयं रुद्र एवमेवास्य राजसोंशो ब्रह्मा तथैव सात्त्विकोंशो विष्णुरित्युक्त्वा स एष एकस्त्रिधाभूतोष्टधैकादशधा द्वादशधाऽपरिमितधा चोद्भूत इत्यादिमाहात्म्यमस्योवाच एवं सति याश्चतुर्थे प्रपाठके दश तनव उक्तास्ता गुणातीता एषेच्छामात्रेणैव प्रकटा इति ज्ञायते। तत्रैव तेषां ब्रह्मत्वविधानात्। याः पुनः पञ्चमे उक्तास्तास्तु सगुणस्य। प्रजापतिं तादृशमुपक्रम्य राजसादिपदोक्तिपूर्वकं पाठात्। न चास्य प्रागुक्ता एतास्तनवः इति कथनात् तासामेतदभिन्नत्वं शङ्क्यम्। प्रागुक्तास्तनवोस्यैता इत्यन्वयात्। प्रतिपुरुषस्य मूलपुरुषभिन्नत्वेन तन्मूर्तीनामपि तथात्वस्यैवौचित्यात्। प्रकृतच्छेदे एतच्छन्दस्य वक्ष्यमाणपरामर्शिताया ज्योतिरधिकरणे सिद्धत्वेन चोद्यानवकाशाच्च। एवं सत्येते तामसरुद्रादयो यस्यांशास्तत्तत्त्वान्तरं संकल्पाध्यवसायाभिमानलिङ्गं प्रजापतिविश्वक्षेत्रज्ञादिनामकं प्रतिपुरुषरूपमेव सिद्ध्यति। यस्याग्र्यास्तनवोऽग्न्याद्या दशोक्ताः कृत्स्नप्रलये तत्तनूपासकानां यदैक्यं कौत्सायनस्तुतौ यन्माहात्म्यं यो गुणेषूपरिष्ठोस्ति यस्यायं प्रजापतिः प्रतिपुरुषः स तु महापुरुषः अशरीरोऽमृतः सर्वात्मको ब्रह्मेति सिद्ध्यति। अत एव षष्ठे प्रपाठके दशमकण्डिकायां भोक्तृभोज्यविचारे यथाग्निर्वै देवानामन्नादः

रश्मिः ।

सोमोन्नमग्निनैवान्नमिति दृष्टान्तमुक्त्वा एवंवित्सोमसंज्ञोयं भूतात्माग्निसंज्ञो ह्यव्यक्तमुखा इतिवचनात्पुरुषो ह्यव्यक्तमुखेन त्रिगुणं भुङ्क्ते इत्यनेन चिदाभासत्वेनाग्निसंज्ञस्यापि संकल्पाभिमानलिङ्गत्वात् त्रिगुणस्य सोमसंज्ञत्वेन भूतात्मनो भोज्यकोटौ निवेश उक्तः तेन तदंशिनः प्रजापतेरपि तथात्वं स्फोरितम् । ततस्त्रयोविंश्यां ॐमित्येतदक्षरस्य यदग्रं तच्छान्तमशब्दमभयमशोकमानन्दं तप्तं स्थिरमचलममृतमच्युतं ध्रुवं विष्णुसंज्ञितं सर्वापरत्वाय तदेतदुपासीतेत्युक्त्वास्यैव मूर्ध्नि स्थाने अभ्यास उक्तो न शिवस्य एवमेवान्त्यकण्डिकायां निष्कामाग्निहोत्रफलकथनेपि परमाकाशे सौरसौम्याग्नेयसात्त्विकमण्डलानि भित्त्वा शुद्धः सत्त्वान्तरस्थमचलममृतमच्युतं ध्रुवं विष्णुसंज्ञितं सर्वापरं धाम सत्यकामसर्वज्ञत्वसंयुक्तं स्वतन्त्रं चैतन्यं स्वे महिम्नि तिष्ठमानं पश्यत्यत्रोदाहरन्ति ।

'रविमध्ये स्थितः सोमः सोममध्ये हुताशनः ।
तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोच्युतः' ॥

इत्याद्युक्तम् । अत एव सप्तमप्रपाठकप्रान्तस्थे ।

'चाक्षुषः स्वप्नचारी च सुप्तः सुप्तात्परश्च यः ।
भेदाश्चैतेस्य चत्वारः तेभ्यस्तुर्यं महत्तरम्' ॥

त्रिभ्यस्तुरीयस्य महत्तरत्वमेवोक्तं न तु महत्तमत्वम् । द्वितीयेन च त्रिपाद्ब्रह्मभोज्यत्वमेवोक्तम् । अतो द्वैतिभावेपि शिवतत्त्वविवेकाभिमतस्य भोग्यकोटित्वात् तत्परस्य तद्भोक्तुर्ब्रह्मण एव पुरुषस्य तुरीयः परममहिमेत्येव सिद्ध्यतीत्युपनिषदर्थनिश्चयः इति । अस्माद् द्वितीयवादस्थप्रहस्तादपि पराभवं प्राप्त इत्यर्थः । प्रहस्तार्थस्तु **नान्तरीयक** इति अन्तरशब्दोत्रात्मवाचकः अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि च' इत्यमरात् । अन्तरीयकः गहादिभ्यश्चेति छः शेषेर्थे स्वार्थे कः आत्मीयः न अन्तरीयको नान्तरीयकः न शब्देन सुप्सुपेति समासः । नात्मीयश्चतुर्षु पादेष्वनुस्यूतो नेत्यर्थः । ननु चतुर्णां पादानां प्रसिद्धत्वेन पञ्चमः पादः कुत इति चेन्न । तेषां मध्ये यत्परं ब्रह्म विभातीति श्रुतेस्तुरीयस्य रूपं स आदित्यः स विष्णुरिति श्रुत्या स्वयममनस्कमश्रोत्रमिति श्रुत्या च द्वेधा निरूपणात् । सगुणनिर्गुणयोर्विद्वन्मण्डनेऽभेदात् व्यष्टिसमष्टिभेदे च ग्राह्यपञ्चमपादरूपं रत्नं परिग्राह्यमिति भावः । गुणेषूपरिस्थो निर्गुण इत्यर्थः । **ब्रह्मचारिण** इति वालखिल्यसंबोधनम् । **ब्रह्मत्वेति** तनूरुक्त्वा ब्रह्म खल्विदं वा व सर्वमित्यनेन तासां ब्रह्मत्वविधानात् । अस्यैता इति सगुणा इत्यर्थः । **ज्योतिरिति** । इदमधिकरणं पूर्वतन्त्रे द्वितीयपादे 'संज्ञा चोत्पत्तिसंयोगात्' इत्यत्र चिन्तितम् । ज्योतिष्टोमं प्रकृत्याथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेत इति श्रुतं तत्र किं प्रकृते ज्योतिष्टोमे सहस्रदक्षिणालक्षणो गुणो विधीयत उत कर्मान्तरं विधीयते इति संशयः । तत्र प्रकरणप्रमाणाज्ज्योतिष्टोमानुवादेन गुणविधिरयमिति प्राप्ते उच्यते । नायं गुणविधिः । अथेत्यनेन प्रकरणविच्छेदात् । न चैष इत्येतच्छब्दानुपपत्तिः । तस्य संनिहितज्योतिःशब्देनान्वयात् । ज्योतिःशब्दोपि प्रकृतविच्छेदादुक्तमपरामृशन् अपूर्वसंज्ञारूपत्वान्नूतनं कर्माभिधत्ते । अतो नूतनसंज्ञया कर्मभेदः । तथैव विश्वज्योतिःसर्वज्योतिःशब्दयोरपि ज्ञेये इति सिद्धान्तितम् । तथात्रापीत्यर्थः । **यथाग्निर्वा** इति यथाग्निर्वै देवानामन्नादः सोमोन्नमग्निनैवान्नमित्येवंवित्सोमसंज्ञोयं भूतात्माग्निसंज्ञोप्यव्यक्तमुखा इति वचनात् पुरुषो ह्यव्यक्तमुखेन

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥ (१-२-४)

तस्यैवाग्रे पठ्यते । 'ऋतं पिबन्तौ सुकृतस्य लोके
गुहां प्रविष्टौ परमे परार्धे ।
छायातपौ ब्रह्मविदो वदन्ति
पञ्चाग्नयो ये च त्रिणाचिकेता' ॥ इति ।

भाष्यप्रकाशः ।

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥११॥ अयं भोगो व्यापिवैकुण्ठे अन्यत्र वास्तु,

रश्मिः ।

त्रिगुणं भुङ्क्ते इति यो हैवं वेद संन्यासी च योगी चात्मयाजी चेति । अर्थस्तु यथा देवानां मध्येऽग्निरन्नादोन्नस्य प्रसिद्धः सोमोन्नमदनीयमग्निनैवान्नमन्नादेन सहभूतमदनीयमिति सिद्धं श्रुत्यन्तरे । अथ यत्किंचेदमार्द्रं तद्रेतसोसृजत तद्रसः सोमः एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इति एवं वेदेषु प्रतिपाद्य मनुष्येष्वतिदिशति एवंवित् वित् ज्ञानी । एवं देववदन्नसहभूतस्तथा च भोक्ताग्नीषोमात्मकस्य जगतः इत्यर्थः । तदुपपादयति सोमसंज्ञोयं भूतात्मा अग्निसंज्ञोप्यव्यक्तमुखा इति । अयं भूतात्मा केवलः प्राकृतः सोमसंज्ञः अन्नभूतः ईदृशोपि अव्यक्तं प्रधानं मुखं भोक्तृत्वादिप्रवृत्तिद्वारं यस्य सोर्डादेशः । इति तादृशत्वादग्निसंज्ञोपि भवति । तथा चात्राप्यन्नान्नादयोः सहचारेणैकस्यैव भोग्यभोक्तृभाव इत्यर्थः । अत्र ज्ञापकमाह वचनात् पुरुषो हि इत्यादि हि निश्चयेन पुरुष इति अव्यक्तमुखेन त्रिगुणं भुङ्क्ते इति वचनात् । भोग्यत्वेन भोक्तृत्वेन च व्यपदेशादित्यर्थः । एवं ज्ञाने फलमाह **यो हैवं वेदे**त्यादि । तदेतदुक्तं भोज्यकोटौ निवेश उक्त इत्यन्तेन । एतेन सिद्धमाह **तेने**त्यादि । **सर्वापरत्वाये**ति सर्वमपरं यस्मादिति सर्वापरं तस्य भावः सर्वापरत्वं तस्मै मोक्षायेत्यर्थः । **चाक्षुष इत्यादि** चाक्षुषः जाग्रद्भोक्ता दक्षिणाक्षिस्थितो विश्वः । स्वप्नचारी स्वप्नभोक्ता तैजसः । सुप्तं सुषुप्तिसाक्षी प्राज्ञः । सुप्तात्परोऽवस्थात्रयरहितस्तुरीयः । एते च चत्वारो अस्य परब्रह्मणो भेदास्तेभ्यः पूर्वोक्तेभ्यस्त्रिभ्यस्तुर्यं महत्तरमुत्कृष्टतरं तत्र हेतुमाह त्रिषु जाग्रदादिषु एकपादेकांशं ब्रह्म चरेत् । चरति अनुगतं तिष्ठति । उत्तरे त्रिपादंशत्रयवच्चरत्यनुवर्तते तस्माद् ब्रह्मांशाधिक्यात्तुरीयमुत्कृष्टमित्यर्थः । नन्वेवं विभागः कुत इत्याकाङ्क्षायां तत्प्रयोजकमाह **सत्ये**ति । सत्यं प्राणादिरूपं चिदात्मा च । अनृतं पराग्रूपं पृथिव्यादि तयोः अन्तर्यामिब्राह्मणे यस्य पृथिवी शरीरमित्यारभ्य यस्यात्मा शरीरमित्यन्तेनोक्तयोश्चिदचिच्छरीरयोरुपभोगार्थं महात्मनः परब्रह्मणः द्वैतिभावः । द्वैतं नानात्वमस्यास्तीति द्वैती तद्भावः तथा च तदर्थमयं विभागः इतिसर्वोपनिषदर्थ इत्यर्थः । एवं तदुपन्यस्तश्रुतीनामाभासत्वमुपपत्तिपूर्वकं प्रदर्शितमिति तट्टीकायाम् । **अत इति** पूर्वोक्तं भाष्यमक्षुण्णम् । टुक्षु शब्दे अदादि परस्मैपदी सेट् दूषितं भाष्यमित्यशब्दितमित्यर्थः ॥ १० ॥

इति तृतीयाधिकरणम् ॥ ३ ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥ ननु

'मुक्ता एव तु तिष्ठन्ति सत्यज्ञानमनन्तके ।
अमुक्तानां च प्रलयोऽयोग्ये जायते कथम्' ॥

सत्यज्ञानमित्यत्रामव्ययमित्याकाङ्क्षायामाहुः **अन्यत्रेति** । फलतः स्थानाज्ञानाद्यत्रकुत्रचिद्रमा-

किमिदं ब्रह्मवाक्यमाहोस्विदन्यवाक्यमिति । अस्य वाक्यस्योत्तरशेषत्वे जीवप्रकरणपठितत्वार्थं ब्रह्मवाक्यत्वं पूर्वशेषत्वे तु ब्रह्मवाक्यमिति प्रकरण-निर्णयः । मध्ये पाठादेवं संदेहः अर्थविचारे तु द्विवचननिर्देशात् पूर्वशेषत्वे

भाष्यप्रकाशः ।

न त्वन्तर्हृदयेऽपीत्याशङ्कावारणाय । किंच, ये पूर्वाधिकरणेषु धर्मा उक्तास्तेऽन्तर्वर्तिन उक्ताः । अन्त-र्वर्ती च हृद्यन्तर्ज्योतिः पुरुष इत्यादिश्रुत्या, अहमित्यादिप्रत्यग्वित्त्या चान्तर्वर्ती जीव एव सिद्धः । ब्रह्म तु व्यापकत्वात् सार्वत्रिकमुदासीनं, न त्वन्तरेव विशेषतः सिद्धम् । तथा सति पूर्वाधिकरणेषु यन्माहात्म्यमुक्तं तज्जीव एव भविष्यति, न ब्रह्मणीति जीवनिवारणेन तत्र तत्साधनाय चेदम-धिकरणमुपोद्घातसंगत्या आरभ्यत इत्याशयेन विषयवाक्यस्थलकथनपूर्वकं तद्वाक्यमुदाहरन्ति **तस्यैवाग्र इत्यादि** । पुरःस्फूर्तिको वाक्यार्थस्तु, ऋतं सत्यं सुकृतस्य सम्यक्त्वमवगत्य कृतस्य कर्मणः फलं पिबन्तौ भुञ्जानौ । यद्यप्येको भुङ्क्ते, नेतरस्तथापि, छत्रिणो यान्तीतिवत् समुदाये गौण्या पिबन्ताविति प्रयोगः । लोके अस्मिञ्छरीरे, गुहां हृदयाकाशं प्रविष्टौ । गुहा-मिति सप्तम्यर्थे द्वितीया । गुहाया विशेषणं, परमे परार्द्धे इति । बाह्यपुरुषस्थानापेक्षया परम उत्कृष्टे । तत्र हेतुः परार्द्धत्वम् । परार्द्धं ब्रह्मणः स्थानम् । तत्र हि भक्तैर्ज्ञानिभिरुपासकैश्च ब्रह्मो-पलभ्यत इति । तौ छायातपौ संसारित्वासंसारित्वाभ्यां धर्माभ्यां परस्परविलक्षणौ ब्रह्मविदो वदन्ति कथयन्ति । न केवलं त एव कथयन्ति, किंतु पञ्चाग्नयस्त्रिणाचिकेताः श्रौतस्मार्ताग्नि-मन्तस्त्रिकृत्वो नाचिकेतोऽग्निर्यैश्चितस्तादृशा गृहस्था अपि वदन्तीति । मुख्योऽर्थस्त्वग्रे भाष्य एव वक्तव्यः । तत्रोक्तेऽर्थे संशयं तद्बीजं चाहुः **किमिदमित्यादि** । **प्रकरणनिर्णय इति** प्रकरणेन कृतो निर्णयः । ननु वल्लीसमाप्त्या पूर्वप्रकरणसमाप्तेस्तदुत्तरप्रकरणगतत्वस्य स्फुटत्वात् कथं संदेह इत्यत आहुः **मध्य इत्यादि** । तथाच,

रश्मिः ।

वैकुण्ठश्वेतद्वीपव्यापिवैकुण्ठ..

तत्र वा । **उपोद्घातेति** प्रकृतः प्रलयस्तत्सिद्ध्यर्था चिन्तां तद्धृदयेपि भोगसाधनरूपां तामुपोद्घातं विदुर्बुधाः । **तया** संगत्या । **तद्वाक्यम्** विषयवाक्यम् । **एक इति** एको जीव इतरोन्तर्यामी 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' इति श्रुतेः । **समुदायेति** एकसार्थवाहि-त्वविशिष्टे गौणी यथा छत्रिणो यान्तीत्यत्र राज्ञश्छत्रित्वात् तथा पानापानकर्तृसमुदाये । पा पाने इति धातोः कर्तृप्रत्ययान्तस्य गौण्येत्यर्थः । **परार्धमिति** परार्ध्यमिति पाठे परार्धं ब्रह्मणः स्थानम-र्हतीति परार्ध्यं हृदयम् । **त्रिरिति** नचिकेतवाक्यानामध्ययनं तदर्थज्ञानमनुष्ठानं चेति त्रित्वं बोध्यम् । इत्यर्थः शंकरभाष्यटीकायाम् । **श्रौतस्मार्तेति** पञ्चाग्नयः स्मार्ताः सभ्यावसथ्ययोः स्मार्तत्वात् । त्रयोग्नयः श्रौताः गार्हपत्याहवनीयान्वाहार्यपचनरूपाः त्रयोऽग्नय इति योगतत्त्वोप-निषदः श्रुतेः । **मुख्य इति** अस्यार्थस्य शांकरकृतत्वेन मायावादिमतसंमतत्वादस्मादन्यो मुख्य इत्यर्थः । **उक्त इति** पुरःस्फूर्तिकेर्थे । **बीजमिति** पूर्वशेषत्वमुत्तरशेषत्वं च । **प्रकरणेति** 'क इत्था वेद यत्र सः' इत्यत्र प्रकरणशब्दार्थ उक्तः । **नन्विति** यस्य ब्रह्म चेति श्रुतिर्द्वितीयवल्लीसमाप्तावे-तदग्रे तृतीयवल्लीप्रारम्भे ऋतं पिबन्ताविति श्रुतिः द्वितीयवल्लीसमाप्त्या न जायते इत्याद्युक्तब्रह्म-

बद्धमुक्तजीवौ भविष्यतः। उत्तरशेषत्वे त्विन्द्रियमनसी। उभयथापि न ब्रह्मवाक्यम्। द्वयोर्मुख्यत्वेन प्रतिपादनात्। ब्रह्मवाक्येऽपि न प्रयोजनसिद्धिः।

भाष्यप्रकाशः।

'स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते'॥

इति पूर्वतन्त्रे सिद्धत्वात् कयाचित् संगत्या पूर्वशेषत्वस्यापि शक्यवचनत्वाद्, आत्मानं रथिनं विद्धीत्यादेः प्रागेव पाठाच्च संदेह इत्यर्थः। ननु तर्ह्यर्थेन निर्णयोऽस्त्वित्यत आहुः अर्थेत्यादि। बद्धमुक्तजीवाविति हन्ता चेन्मन्यते हन्तुमित्यनेन बद्धस्य, मत्वा धीरो न शोचतीत्यनेन मुक्तस्य च पूर्वत्रोक्तत्वात् तदनन्तरपठितस्य द्वित्वस्य तद्विषयत्वप्रत्यभिज्ञानात्तावेव युक्तौ, न तु जीवपरमात्मानौ। अनश्नन्निति श्रुत्या परमात्मनो भोगाभावादिति। इन्द्रियमनसी इति यस्त्वविज्ञानवान् भवतीत्यादौ तयोरेवाग्रे निरूपणात्। पिबन्ताविति पानकर्तृत्वव्यपदेशस्त्वेधांसि पचन्तीतिवत् करणे कर्तृत्वोपचाराद् बुद्धिजीवपक्षे बुद्धौ केवलायामिवोभयत्राप्युपपत्स्यते।

रश्मिः।

प्रकरणस्य समाप्तेः। तदुत्तरं प्रकरणं ऋतं पिबन्ताविति श्रुत्यन्तरम्। आत्मानं रथिनं विद्धीति जीवप्रकरणं तद्गतत्वस्येत्यर्थः। **आत्मान**मिति जीवप्रकरणबोधकादित्यर्थः। ब्रह्मप्रकरणबोधकान्न जायते म्रियते वा विपश्चित् इत्यारभ्य यस्य ब्रह्म चेत्यन्तात् पश्चादिति मध्ये पाठः। ततश्च संदेह इत्यर्थः। **पूर्वत्रे**ति ऋतमित्यस्य पूर्वत्र द्वितीयवल्ल्यामित्यर्थः। **तद्विषये**ति मुक्तबद्धजीवविषयत्वस्याधीतेन मीमांसकेन छायातपयोर्द्वित्वमिदं तन्मुक्तबद्धजीवनिष्ठमिति मनसि संनिधानात् प्रत्यभिज्ञानं तत्तेदंताप्रकारकं ज्ञानं प्रत्यभिज्ञानं तस्मात्। न च ताविमौ छायातपाविति प्रत्यभिज्ञानमस्त्विति शङ्क्यम्। गौरवात्। **यस्त्वि**ति।

'यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः'॥ इति।
'यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः'॥

इति अयुक्तमनइन्द्रियाणि। छाया विषयसुखानुकूल्येन सुखस्य श्यामत्वेन मन आदीनामप्यस्वच्छत्वात् युक्तमनइन्द्रियाणि। आतपः भजनानन्दानुकूल्येन ज्ञानानुकूल्येन वानन्दस्य श्यामत्वेपि स्वेषां मन आदीनां स्वच्छत्वात् कर्तृत्वोपचारादिति। इदं नैयायिकमते। आख्यातस्य पाकं करोतीति पचति इत्यत्र करोतिना विवरणात्। यत्नार्थकत्वेनेधःसु तदभावात्। वैयाकरणास्तु पच्यर्थो व्यापारो नैकविधः फूत्कारत्वाधःसंतापनत्वयत्नत्वादिभिस्तत्तद्रूपेण वाच्यः। देवदत्तोग्निरेधांसि पचति पचन्तीत्यत्र तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात्। न च नानार्थत्वापत्तिरिति वाच्यम्। तदादिन्यायेन बुद्धिविशेषादेव शक्यतावच्छेदकानामनुगमकस्य सत्त्वात्। आख्याते क्रियैकत्वव्यवस्थाप्यावच्छेदकबुद्धिविशेषमादायैव। उक्तं च वाक्यपदीये।

'गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिता भेदाः क्रियेति व्यपदिश्यते'॥ इति

'फलव्यापारयोर्धातुराश्रये तु तिङः स्मृतः' इत्याख्यातार्थ आश्रय इत्याहुः। तथाच देवदत्तः

अथ मन्यते, उपनिषत्पाठादन्यत्रानिर्द्धाराज्जीव ब्रह्म परत्वेऽपि तयोरभेदाद् ब्रह्मपरतैव वाक्यस्य युक्तेति। तथापि कस्य निर्णायकत्वं, प्रकरणस्यार्थस्य वेति। उभयोरपि संदिग्धत्वादयुक्तो विचार इति चेदुच्यते।

भाष्यप्रकाशः ।

उभयथेति उत्तरशेषत्वे च। ननु, येयं प्रेते विचिकित्सेत्यनेन जीवस्य, अन्यत्र धर्मादन्यत्राधर्मादित्यनेन परमात्मनश्च पूर्वं पृष्टत्वात् पूर्वशेषत्वाङ्गीकारे जीवपरमात्मानौ सुखेन संभविष्यत इति तावेवात्र ग्राह्याावित्येकदेशिकृतं समाधानं दूषयन्ति **द्वयोरित्यादि**। ब्रह्मवाक्यत्वाय हि परमात्मनिरूपणमत्राङ्गीकार्यम्। तत्प्रयोजनं च मुख्यतया परमात्मनो भोक्तृत्वप्रतिपत्तिः। सा तु द्वयोस्तुल्यतया मुख्यत्वेन प्रतिपादनाद् दुर्घटेत्यपार्थं तस्य ब्रह्मवाक्यत्वमित्यर्थः। ननूपनिषदो रहस्यविद्यास्तासु यदुच्यते, तन्निर्द्धारितमेवोच्यते । अत उभयोर्ऋतपातृत्वमन्यत्रानिर्णीतमत्र निर्धारयितुं प्रवृत्तं वाक्यमिन्द्रियमनसोर्ग्रहण उपचारदोषेण दुष्यतीति तदभावायास्य जीवब्रह्मपरत्वाङ्गीकारेऽपि तयोरवस्थाभेदेनैव भिन्नतया वस्तुत ऐक्याद् वाक्यस्योभयपरत्वेऽपि ब्रह्मवाक्यत्वमक्षतमित्येकदेशिकृतं समर्थनं दूषणार्थमनुवदन्ति **अथेत्यादि**। तद् दूषयन्ति **तथापीत्यादि**। **संदिग्धत्वादिति**। अर्थस्य संदिग्धत्वं जीवद्वयनिरूपणकोट्यनिरासाद् बोध्यम्। तथाच तदङ्गीकारे विचारवैयर्थ्यमित्यर्थः। एवमेकदेशिमतदूषणेन विचारमाक्षिप्य तत् समर्थयन्ति **उच्यत इत्यादि**। शास्त्रं व्यासप्रणीतं श्रौतवाक्यस्थसंदेहवारकम्। अतस्तत्र पूर्वं संदेहाकारस्य निर्णयः

रश्मिः ।

एधोभिः पचतीत्यत्र फूत्काररूपव्यापारवदेधांसि पचतीत्यत्राधःसंतापनरूपव्यापारमाश्रित्यैधःसु मुख्यमेव कर्तृत्वमिति ध्येयम्। तदादिन्यायस्तु तदादिपदस्य क्वचिद्घटादित्वं शक्यतावच्छेदकं क्वचित्पदादित्वं क्वचित्कुड्यत्वं क्वचित्कुसूलत्वमिति । **बुद्धीति** बुद्ध्या पदार्थान् जानातीत्यत्र करणत्वेन बुद्धेस्तस्यां केवलायां कर्तृत्वोपचारः। **एकदेशीति** शंकराचार्यकृतम् । एकदेशित्वं तु ब्रह्मवादैकदेशालम्बनात् तथाहि पुच्छस्याक्षरब्रह्मणो हि पराकाष्ठापन्नवस्तुत्वं भूयसां श्रुतिभागानां सगुणपरत्वोपगमेनालम्बन्ते तथा निबन्धोक्तषड्विधवैदिकसृष्टिषु मायिकसृष्टेर्ग्रहणमिति अन्यदेवमुन्नेयम्। यद्वा जैमिनिबादरिकाशकृत्स्नौडुलोमिप्रभृतय एकदेशिनः सूत्रोक्तत्वात् । **ब्रह्मवाक्यत्वमिति** एतेन ब्रह्मवाक्य इति भाष्ये ब्रह्मवाक्यपदं भावप्रधानं ब्रह्मवाक्यत्व इति भाष्यार्थः। **तदङ्गीकार इति** एकदेश्युक्ताङ्गीकारे। **आक्षिप्य** निर्भर्त्स्य। **तदि**त्यव्ययम् विचारमित्यर्थः। **श्रौतेति** **श्रुतिसूत्रे एका कोटिरिति** निबन्धटीका।

'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ॥
उत्तरोत्तरसंदेहवारकं परिकीर्तितम्' ।

यद्यपि तथापि सूत्रेषु अप्यविरुद्धम्। शिक्षाछन्दसोर्वेदस्वरूपे उपकुर्वतोरप्यनुष्ठान उपकाराङ्गीकारात् । ननु कारिकायां शास्त्रं वा श्रीकृष्णवाक्यमस्त्विवति चेन्न। अधिकरणघटकसंशयस्य उत्तरोत्तरसंदेहवारकं परिकीर्तितमिति निबन्धेऽविवक्षणात् । **तत्रेति** श्रौतवाक्ये। **समेति** कारिकोक्तनिर्णयपदवाच्यसिद्धान्तनिर्णयविषयीभूतसिद्धान्तः। **अनर्थकम्** न अर्थो निवृत्तिर्यस्मात् तादृक्

संदेहवारकं शास्त्रं पदशक्त्या तु निर्णयः।
जीवादुत्कर्षशब्देन द्वयोर्वाक्येऽपि न क्षतिः॥

गुहातपशब्दाभ्यामित्यर्थः। ऋतं पिबन्तावित्यत्रैवं संशयः। किं जीवद्वयं निरूपयति, आहोस्विज्जीवब्रह्मणी वेति। तत्र ब्रह्मप्रकरणस्य सामान्यत्वाद्,

भाष्यप्रकाशः।

कार्यः। अन्यथा तु समाधानमनर्थकमेव स्यात्। नचोक्तयोरुभयोरपि संदिग्धत्वात् केन स निर्णय इति शङ्क्यम्। पदशक्त्या तु निर्णयः। संदेहाकारस्य। कस्य पदस्य शक्त्येति चेत्। जीवादुत्कर्षशब्देन। जीवं प्राप्य उत्कर्षबोधको यः शब्दस्तेन। वाक्ये द्वयोः पक्षयोर्न क्षतिः। तथाच तादृशपदस्य शक्त्या जीवद्वयपक्षो जीवपरमात्मपक्षश्चेति द्वावपि संग्रहीतुं शक्येते इत्यर्थः। जीवादुत्कर्षशब्दः को वेत्यपेक्षायां व्याकुर्वन्ति गुहेत्यादि। इदं पूर्वोत्तरपक्षयोर्विवरण एव स्फुटीभविष्यति। ननु, यः सेतुरीजानानामिति मन्त्रस्यापि प्रकरणद्वयमध्ये पाठोऽस्तीति स कुतो न विचार्यत इत्यत आहुः ऋतमित्यादि। तथाच तत्राक्षरं ब्रह्म स्फुटमेव श्रूयते इति संदेहाभावात् स न विचार्यते, किंत्वत्रैवैवं संशयादयमेव विचार्यत इत्यर्थः। एवं संशयं साधयित्वा पूर्वपक्षमाहुः तत्रेत्यादि। अयमर्थः। यद्यस्मिन् मन्त्रे ब्रह्मैव प्रतिपाद्यं भवेत् तदा पूर्ववह्ल्यामि-

रश्मिः।

स्यात्। पूर्वपक्षोत्थानद्वारा संदेहान्तरस्य समाधानान्तरप्रवृत्तिजनकत्वात्। उक्तयोरिति अर्थप्रकरणयोः। स इति निर्णयविषयीभूतसिद्धान्तः। पदेति पदानां गुहात्मपदानाम्। शक्त्या अभिधावृत्त्या तात्पर्यवृत्त्या च सिद्धान्तस्य निर्णय इति। कारिकार्थोपि कस्य निर्णय इत्याकाङ्क्षायामाहुः संदेहाकारस्येति। संदेहस्याकारो यस्मै सिद्धान्ताय स तथोक्तः सिद्धान्तस्तस्येत्यर्थः। कस्येति जीवनिरूपणं सूत्रे कुतः ब्रह्मविचारस्य प्रतिज्ञानात् यदि स्वस्माद्ब्रह्मोत्कर्षार्थं तर्हि कस्य पदस्य शक्त्या जीवनिरूपणमिति प्रश्नः। जीवं प्राप्येति जीवादित्यत्र ल्यब्लोपे पञ्चमी व्याकृता। तथाच जीवाद् ब्रह्मोत्कर्षशब्देनातपशब्देन कृत्वा छायापदशक्त्या वाक्ये श्रुतिवाक्ये जीवनिरूपणं सूत्रे त्वात्मा चात्मा चात्मानावित्येकस्यात्मपदस्य शक्त्या जीवनिरूपणम्। अतः पक्षयोः जीवद्वयजीवपरमात्मद्वयरूपयोरेकतरयोर्द्वयोर्जीवपरमात्मनोर्न क्षतिः ब्रह्मनिरूपणीयेपि जीवनिरूपणस्य नासंगतिरित्यर्थः। तथाचेति। तादृशपदमात्मच्छायापदम्। तस्य शक्त्या जीवद्वयपक्षपरमात्मपक्षश्चेत्येतयोः एकतरौ द्वौ जीवपरमात्मानौ अप्येवकारार्थः। तावेव संग्रहीतुं शक्येते इत्यर्थः। जीवादिति छायात्मपदे जीवशब्दो जीवादुत्कर्षशब्दः को वेत्यपेक्षायामित्यर्थः। गुहेत्यादीति गुहाशब्द उत्कर्षबोधक एव। जीवाश्छिद्राणि च ब्रह्म तु गुहां प्रविष्ट इत्युत्कर्षः। स्पष्टमातपशब्दस्योत्कर्षबोधकत्वम्। गुहाशब्देनातपशब्देन चेति भाष्यार्थः। कारिकायामुत्कर्षशब्देनेत्येकवचनात्। संशयनिरूपणं तु ह्यधुना भविष्यति। अतः संदेहपरत्वेन न प्रकाशो व्याख्यातः सिद्धान्तपरत्वेन तु व्याख्यातः। संदेहाकारस्येत्यत्र संदेहस्येत्येव वदेयुः। सिद्धान्तपक्षे तु ह्यत्राकारपदं सार्थकम्। न च सिद्धान्तस्येति संदेहाकारस्येत्यत्र वदेयुर्यदि सिद्धान्तपक्षोभिप्रेयादिति शङ्क्यम्। कारिकायां संदेहवारकमित्यनेन संदेहपुरस्कारेण सिद्धान्तोक्तेः। एतेन सिद्धान्तपदाश्रवणात्कारिकायां संदेहपदश्रवणात् संदेहपरत्वेन व्याख्यानं युक्तमिति प्रत्युक्तम्। एव स्फुटीति। अस्योपपादनसापेक्षत्वात् एवकारः। अन्यत्र नेत्यन्ययोगव्यवच्छेदकः। तथा चैष कारिकार्थः। ननु जीवपरमात्मनिरूपणेऽर्थप्रकरणयोः संदिग्धत्वेन विचारकरणाभाव इति चेत्तत्राहुः संदेहवारकं शास्त्रमिति। सूत्रजातं संदेहस्य श्रुतिष्वधिकरणान्तर्गतस्य वारकं पूर्वपक्षोप-

यस्तु विज्ञानवान् भवतीत्यग्रे विद्वदविद्वतोर्वक्तव्यत्वात् तदर्थमुभयोः प्रथमं निर्देश उचितः । मन्त्रेऽपि, ऋतं स्वर्गापवर्गलक्षणं सुखम् । मार्गद्वयस्यापि विहितत्वात् सुकृतलोकत्वम् । गुहा तत्त्वविचारो हृदयं वा । जात्यपेक्षया त्वेकवचनम् । परमपरार्ध्यं सत्यलोकः । तत्रोभयोर्भोगात् । अविद्यया पिहितप्रकाशत्वादविदुषः छायात्वम् । ब्रह्मज्ञानेनातिप्रकाशत्वादातपत्वं विदुषः । अत एव विदुषः स्वरूपं ब्रह्मविदो वदन्ति । पञ्चाग्नयस्त्रिणाचिकेताश्चेतरम् । इन्द्रियमनसोस्त्वचेतनत्वान्न वाक्यार्थसंगतिः । वाक्यार्थयोगे हि विशेषनिर्णयः । तस्माद् बद्धमुक्तजीवपरतयोपपन्नत्वात् तत्प्रकरणपाठान्न ब्रह्मवाक्यमिति । एवं प्राप्ते, उच्यते ।

भाष्यप्रकाशः ।

वात्राप्युपास्यत्वेन प्राप्यत्वेन च ब्रह्मोच्यत इति प्रकरणस्य तौल्यादेकवचनमेवात्र वदेत् । वदति द्विवचनमतोऽत्र, न ब्रह्माभिप्रेतं, किंतु बद्धमुक्तजीवावेवाभिप्रेतौ । अतः प्रथममुभयोर्निर्देशः । नचैवं मन्त्रवर्णासंगतिः । मन्त्रेपि ऋतपदेनोक्तरीतिकं द्विविधं सुखमुच्यते । प्रवृत्तिनिवृत्तिरूपस्य मार्गद्वयस्यापि विहितत्वात् सुकृतत्वेन तज्जन्यस्य शरीरस्य लोकत्वम् । तत्र गुहा तत्तदुपयोगी तत्त्वविचारो गुहेव गुहा । यदि गौणी नाद्रियते, तदा हृदयाकाशः । नच विचारादेर्भिन्नत्वाद् द्विवचनं

रश्मिः ।

शमद्वारा निरासकम् । न सूत्रजाते सिद्धान्तोपपादके शास्त्रे संदेहवारके पदानां गुहाप्रविष्टात्मपदानां शक्त्याभिधया वृत्त्या तात्पर्यवृत्त्या च तु सिद्धान्तस्य निर्णयो भवतीत्यर्थः । ननु भवतु निर्णयः परंतु ब्रह्मजिज्ञासा प्रतिज्ञातेति जीवनिरूपणार्थमात्मानाविति द्विवचनस्य किं प्रयोजनमिति चेत्तत्राहुः जीवादिति । जीवाद्ब्रह्मण उत्कर्षस्य बोधकः शब्दस्तेन प्रयोजनेन हेतुना वाक्ये सूत्रात्मके विषयवाक्ये वा द्वयोर्जीवब्रह्मणोरपि न क्षतिर्नासंगतिरूपो दोष इत्यर्थः । जीवनिरूपणमपि संगतमिति भावः । यः सेतुरिति अयं मन्त्रः ऋतं पिबन्तावित्यस्याग्रे पठितः । मन्त्रस्तु 'यः सेतुरीजानानामक्षरं ब्रह्म यत्परम् । अभयं तितीर्षतां पारं नाचिकेतं शकेमहि' इति । श्रुत्यर्थस्तु सेतुः सेतुरिव सेतुः ईजानानां नाचिकेतं वयं शकेमहि यजमानानां कर्मिणां नाचिकेतोग्निस्तं वयं शकेमहि शक्नुवन्तः ज्ञातुं चेतुं च । तौल्यादिति तेन भाष्ये समासत्वादित्यत्र सामान्यात्तौल्याद्वेति पाठः । एकवचनमिति पूर्वपक्षत्वान्मायाप्रतिबिम्बितं चैतन्यमीश्वरोऽविद्यायां प्रतिबिम्बितं चैतन्यं जीव इत्यादिप्रकारेण जीवब्रह्मवादादेकवचनम् । मन्त्रेपीति भाष्यमवतारयन्ति स्म न चैवमिति । विद्वदविद्वतोर्भिन्नफलकत्वादेककर्तृपानकर्तृत्वासंगतिः । सुखमिति शक्यतावच्छेदकं सुखत्वमत्र गृह्यते न तु विषयसुखत्वं नापि मोक्षसुखत्वमिति नर्तमित्येकवचनविरोधः इत्यर्थः । मार्गेतिभाष्यं विवरामासुः प्रवृत्तीति । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'ऋते ज्ञानान्न मुक्तिः' इति तमेवैकं जानीथात्मानमिति वा । सुकृतेति भाष्यं विवृण्वन्ति स्म सुकृतेति । सुष्ठु कृतस्य कर्मणो देहजनकत्वात् सुकृतत्वेन रूपेण वर्तमानकर्मणा जन्यस्य शरीरस्य लोकत्वं प्रकाशकत्वं लोकृ दर्शने भ्वादिरात्मनेपदी सेट् । ननु ज्ञानमार्गफलं नोक्तमिति चेन्न ज्ञानानन्तरमावरणभङ्गाद्दतपाने शरीराभावाद्दतं पिबन्तौ इत्यनेनैव शाब्दापरोक्षकथनात् । गुहेति भाष्यं विवरामासुः तत्र गुहेति । तत्र जीवन्मुक्तेपि ।

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् । गुहा हृदयाकाशस्तत्र सकृदेकस्मिन् प्रविष्टौ जीवपरमात्मानावेव । अनेन जीवेनात्मनानुप्रविश्येत्युभयोः

भाष्यप्रकाशः ।

शङ्क्यम् । जात्यपेक्षयैकवचनस्यापि युक्तत्वात् । परमः परश्चतुर्मुखो यत्र मीयते तादृशं परार्धमुत्तमं सत्यलोक एव । तत्रोभयोः । शतजन्मीनस्वकर्मशुद्धस्य कर्मिणो वेदान्तविज्ञानसुनिश्चितार्थस्य सन्न्यासिनश्च भोगादिति । विद्वदविद्वतोरिति विच्छब्दान्मतुप् । योग इति संबन्धे । शेषं स्फुटम् । एवं पूर्वपक्षमुक्त्वा समाधानं व्याकुर्वते गुहामित्यादि । एकस्मिन्निति एकदेत्यर्थः । अत्र हेतुर्हिशब्देन सूच्यते । तं विवृण्वन्ति अनेनेत्यादि । अनेन जीवेन सहात्मनेत्यर्थः । नच सहार्थे

रश्मिः ।

'आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः' ॥

इत्यत्र भक्तिपदेन स्मरणस्याप्युक्तेः । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यत्र मननोक्तेश्च युक्तिभिरनुचिन्तनस्य मननपदार्थत्वात् । हृदयाकाशौ वेति पाठः । जीवन्मुक्तस्य लोकस्य च । जातीति भाष्यं विवरांचक्रुः न चेति । गुहे इति द्विवचनम् । एकेति गुहामित्येकवचनम् । परममिति भाष्यं विवृण्वन्ति स्म परम इति । तत्रोभयोरिति भाष्यं विवरांबभूवुः तत्रोभयोरिति 'शतजन्मभिः पुमान्' इत्यादिवाक्यानि ।

'वेदान्तविज्ञानसुनिश्चितार्थाः
सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोके तु परान्तकाले
परामृतात्परिमुच्यन्ति सर्वे' ॥

इति श्रुतिश्च । एवं पूर्वार्धं व्याख्याय तत्र किंचिदाहुः विद्वदिति मतुबिति । वसुप्रत्यये तु विद्वदविदुषोर्विद्वोऽविदुषोरिति प्रयोगौ स्याताम् । विच्छब्दान्मतुपि तु विद्वांश्च विद्वांश्च विद्वांसौ तयोर्विद्वतोः झय इति सूत्रेण मतुपो मस्य वः संप्रसारणं तु वसोर्न मतुपो वस्य । 'वसोः संप्रसारणम्' इति सूत्रात् । भाष्ये । न वाक्यार्थेति । अन्तःप्रवेशनानुकूलो व्यापारो वाक्यार्थो न मुख्यक्रियात्वाभावात् । वदन्तीति वद व्यक्तायां वाचि व्यक्तवागनुकूलो व्यापारो वाक्यार्थः । कर्तृकर्मान्वयविशिष्टः । तथाचेन्द्रियमनसोर्गौणक्रियाऽयोगे तद्द्वारा मुख्यक्रियाऽयोगः सेयमसंगतिः । यथा सैन्धवमानयेत्यत्र भोजनकाले आननक्रियायामश्वायोग इति विशेषेण लवणस्य निर्णयः । प्रकरणेति द्वितीयवल्ल्याः समाख्या ब्रह्मप्रकरणेतरजीवप्रकरणपाठादित्यर्थः । प्रकृते । एकस्मिन्निति न गुहाविशेषणम् । गुहायाः स्त्रीत्वात् । किं तु कालविशेषणमित्याशयेन व्याचक्रुः एकदेति । हृदयाकाशविशेषणत्वे तु न दोषः । तथाच भाष्यं न ह्येकस्मिन् हृदयाकाशे इति । आत्मनेति 'प्रकृत्यादिभ्य उपसंख्यानम्' इति वार्तिकेन तृतीया । आत्माभिन्नास्मत्पदार्थोनुप्रविश्येमास्तिस्रो देवता इत्यर्थः । सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति छान्दोग्ये सैवात्र संदिग्धेति यथाह तट्टीकायां देवता अप्रत्यक्षभूताः सूर्यबिम्बवदनुप्रविश्यात्मना संसृज्य तद्देहाभिमानीभूत्वा

प्रवेशश्रवणात्। न ह्येकस्मिन् हृदयाकाशे जीवद्वयं प्रवेष्टुमर्हति। अर्थस्त्वेवं संभवति पूर्वाधिकरणे यथाभिलषितभोगो भगवति साधितः। प्रकारान्तरेणापि,

भाष्यप्रकाशः।

तृतीया चेत् स्यात् तदोक्तं संभवेत्। सैवात्र संदिग्धेति वाच्यम्। 'गुहाहितं गह्वरेष्ठं पुराणम्' 'यो वेद निहितं गुहायां परमे व्योमन्' इत्यादौ श्रावितस्य निहितत्वादेः स्वरूपेण प्रवेशं विनानुपपत्त्यात्र तथा निश्चयात्। यद्यपि तत्र परमात्मनः सिद्धवन्निर्देशस्तथापि, तत् सृष्ट्वा तदेवानुप्राविशत्, तदनु प्रविश्य सच्च त्यच्चाभवदिति श्रुत्यन्तरात् प्रवेशहेतुक एवेत्यर्थः। नन्वत्र जीवपदात् तयोरेव सोऽस्त्वित्यत आहुः न हीत्यादि। हृदयाकाशे हि जीवस्य प्रवेशो नामादिव्याकरणार्थः। व्याकरणं चैकेनैव संभवति। अत एवैकवचनम्। अन्यथा जीवाभ्यामित्यादि वदेत्। पुराणेष्वपि,

'चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा।
विराट् तदैव पुरुषः सलिलादुदतिष्ठत'॥

इत्यादौ देहोत्थापनायाप्येक एवोक्तः। अतो व्यष्टिदेहेऽप्येक एव मन्तव्यः। अन्यथा करणाधिपौ द्वौ स्याताम्। ततश्च सुकृतदुष्कृतभोगोऽपि श्रुत्यादौ द्वयोरुच्येत। व्यवस्था च भज्येत। अतो जीवद्वयमेकत्र प्रवेष्टुं नार्हतीति कार्यबलात् सहार्थेऽपि सती तृतीया जीवस्य ब्रह्मसाह्यमेव गमयतीत्यर्थः। ननु भवत्वेवं तत्र तथापि प्रकृतमन्त्रार्थः कथं संगच्छत इत्यत आहुः अर्थ इत्यादि। यथेति भिन्नं पदं नित्यसंबन्धात् तथापदमध्याहरति। तेनास्मिन्नधिकरणे जीवेन

रश्मिः।

नामरूपे नाम्ना रूपेण च सूक्ष्मं पिण्डं व्याकरवाणीति। अत्रास्मत्पदार्थः सूर्यो बिम्बं यथातपरूपेणानुप्रविश्य तापयति एवं जीवेनात्मना देवताः प्रविश्य नामरूपे व्याकरोत्यतः स्वयं सूर्यबिम्बवदप्रविष्ट इति प्रविश्येत्यत्रानन्वितो जीवेनेत्यत्र स्वस्य जीवसाहित्यं प्रवेशे विघटयन् सहार्थे तृतीयां विघटयति। ननु तर्हि न संदिग्धेति चेन्न गुहां प्रविष्टाविति श्रुतावेव सहप्रवेशज्ञापनादिति। श्रुत्योर्विरोधे विकल्पः प्राप्तस्तमसहमाना विकल्पापादकश्रुत्यां सहार्थे तृतीयां साधयामासुः गुहाहितमिति।

'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति'॥

इति मन्त्रः। अस्यार्थः गुहायां हृदयाकाशे आहितं स्थितम्। गह्वरे अनेकानर्थसंकुले देहे स्थितं पुराणमनादिपुरुषम्। अध्यात्मयोगः ब्रह्मणि चित्तसमाधानं तेन प्राप्तं यदधिगमो ज्ञानं ज्ञानाभिन्नभक्तिर्वा तेन तया वा विदित्वेत्यर्थः। व्योमन्निति सप्तम्या लुक्। निहितेति आदिना मत्वेत्युक्तम्। मननं हर्षशोकत्यागश्च। अत्रेति। अनेन जीवेनात्मनानुप्रविश्येत्यत्र। तथेति सहार्थे तृतीयात्वेन तृतीयानिश्चयात्। तत्रेति गुहां प्रविष्टावित्यत्र गत्यर्थाकर्मकेभ्यः कर्तरि क्तो भूते लुङा विगृह्य प्राविविक्षतामिति प्रविष्टाविति सिद्धवन्निर्देशः कर्तव्यः। तत्सृष्ट्वेति इदं सर्वं सृष्ट्वा सच्च त्यच्चेति सद्ब्रह्मास्माकं त्यत्तत्सृष्टं नास्ति तत्सृष्ट्वेत्यादिश्रुतेरर्थः शंकरभाष्ये। तयोरिति प्रतिबिम्बभूतजीवयोः। नामादीति आदिपदेन रूपमनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतेरित्यर्थः। पुराणेष्विति एकपुराणोदाहरणेन गतार्थत्वान्न पुराणान्तराण्युच्यन्ते। इत्यादावित्यादिपदेन पुराणान्तरवाक्यानि। करणेति करणानि इन्द्रियाणि यथोक्तं श्रीभागवते तृतीयस्कन्धे।

ऋतं सत्यं परं ब्रह्मेति ऋतसत्ययोर्ब्रह्मत्वप्रतिपादनात् स्वरूपाऽमृतपातारौ। सुकृतमपि ब्रह्मैव। 'तस्मात् तत्सुकृतमुच्यते' इति श्रुतेः। स एव लोकः। उपचारात् षष्ठी।

अक्षरं वा परमपराध्योंपरि तत्रत्यानां परिदृश्यमानत्वाच्छाया प्रतिसारूप्यं सायुज्यं गतस्य जीवस्यापि तथात्वात् ततोऽपि विशिष्टं ब्रह्म प्रकटा-

---

भाष्यप्रकाशः।

सहापि विवक्षितरीतिकं भोगं साधयतीत्यर्थः। तमेव प्रकारं स्फुटीकुर्वन्ति **ऋतमित्यादि**। **उपचारादिति** राहोः शिर इतिवदभेदेऽपि भेदोपचारात्। उपचारमरोचयन्तो लोकपदस्यार्थान्तरमाहुः **अक्षरमित्यादि**। तथाच, परमे परार्धे इति या सप्तमी सा वृक्षाग्रे श्येन इतिवदौपरिष्टिकसामीप्ये। तेनोपचाराभावादक्षरमेव लोक इत्यर्थः। छायातपौ विवृण्वन्ति **तत्रत्येत्यादि**। तत्रत्यानामक्षरात्मकभगवल्लोकस्थानां जीवब्रह्मणोः परिदृश्यमानत्वादन्येषां चापरिदृश्यमानत्वात्

रश्मिः।

'निर्भिन्ने त्वक्षिणी त्वष्टा लोकपालोऽविशद्विभोः।
चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत्' ॥

अत्र त्वष्टा सूर्यः। चक्षुषोरधिप एकः। न च 'निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदम्' इत्यत्र अश्विनाविति द्विवचनेन करणभूतनासाधिपौ द्वावुक्तौ इति चेन्न साहित्यात् यथा पुनर्वसू 'स्वर्वैद्यावश्विनीसुतौ नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ' इति स्वर्गवर्गे तावुभाविति द्वित्वविशिष्टत्वादेकवचनाभाव इति स्वामी। अयं प्रायोवादः 'देव्यां तस्यामजायेतां नासत्यो दस्र एव च' इति मार्कण्डेयात् नासत्याविति दस्राविति चैकवाचकयोरुभयोः प्रयोगो गौण इति व्याख्यासुधायाम्। **श्रुत्यादाविति** 'अन्यः पिप्पलं स्वाद्वत्ति' इतिश्रुतौ। आदिना

'यया संमोहितो जीव आत्मानं त्रिगुणात्मकम्।
परोपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते' ॥

इति समाधिभाषायाम्। **द्वयोरिति** प्रतिबिम्बितजीवयोः। **व्यवस्थेति** द्वा सुपर्णा सयुजा सखायेति श्रुत्या द्वयोः प्रवेशे द्वयोर्भोगापत्त्या तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीतीति भोगाभोगव्यवस्था च भज्येतेत्यर्थः। **कार्येति** सुकृतदुष्कृतभोगबलात् **जीवस्येति** निरूपितं षष्ठ्यर्थः। **ब्रह्मेति** ब्रह्मणि साह्यम्। सुप्सुपेति समासः। उपचारमसहमानानां युष्माकं न कर्मणा वर्धते नो कनीयात् इति श्रुतेर्ब्रह्मणि कथं सुकृतजन्यो भोगः इत्याशङ्कते **ननु भवत्विति**। **नित्येति** यत्तदोर्नित्यसंबन्धात्। **ऋतमित्यादीति** श्रुत्यर्थस्तु स्पष्टः। श्रुतिकथनेन ऋतं जलनामसु पठितमपि अत्र न विवक्षितमिति सूचितम्। **राहोरिति**। राहुभिन्नं शिरः इति बोधः। **अरोचयन्त इति** वैकुण्ठश्रीगोकुलेतरत्र जीवभोगो जीवरूपेण अवताररूपेण चेन्द्ररूपेण वा सुकृतलोके न तु मुक्तैर्जीवैरतोऽरोचयन्त इत्यर्थः। **तत्रत्यानामिति** 'कर्तृकर्मणोः कृति'इति सूत्रेण कर्तरि षष्ठी। **जीवेति** कर्मणि षष्ठी। **परीति** मुक्तोपसृप्यव्यपदेशादिति वैयाससूत्रात्। एवमिति भाष्ये छाया तेजोऽभावः कोशे परं तु छायापुरुषस्य ज्योतिःशास्त्रप्रसिद्धत्वात् प्रतिनिधिसारूप्यं यस्य छाया तस्य प्रतिनिधिसारूप्यम्। युनक्तीति युक् सहयुक् सयुक् सयुजो भावः सायुज्यं तत्प्राप्तस्य गोप्यादेः

'केवलेन हि भावेन गोप्यो गावो नगा मृगाः।
येऽन्ये मूढधियो नागाः सिद्धामामीयुरञ्जसा' ॥

नन्दत्वादातपः परोक्षवादः। काण्डत्रयेऽपि तद्वाद इति त्रयाणां ग्रहणम्। अतो युक्त एवायमिति हिशब्दार्थः।

भाष्यप्रकाशः।

तान् प्रत्येवं कथनं परोक्षवादः। प्रतिसारूप्यमिति प्रतिकूलं सारूप्यम्। विरुद्धं प्रतिबिंबवत् सारूप्यमित्यर्थः। त्रयाणामिति ज्ञान्युपासककर्मिणाम्। तथाचायं मन्त्रार्थः। परो मीयते यत्र, परस्य वा मा लक्ष्मीर्यत्र तादृशे परार्धाऽभिधलोकोपरितने अक्षरात्मके लोके, गुहां सत्यब्रह्मपुरस्थं दहरपुण्डरीकं वेश्म प्रविष्टौ सुकृतस्य ब्रह्मणः ऋतं स्वरूपाऽमृतं पिबन्तावनुभवन्तौ जीवपरमात्मानौ ब्रह्मविदो ज्ञानिनः पञ्चाग्नय उपासकास्त्रिणाचिकेताः कर्मिणश्च छायातपौ पूर्वोक्तरीत्यातिसरूपत्वेऽपि विलक्षणौ। भगवतः परोक्षप्रियत्वात् तत्तोषार्थं परोक्षवादेन वदन्तीति। तेन जीवब्रह्मपक्षाङ्गीकारेऽपि, न मन्त्रार्थासंगतिरित्यर्थः। तेन सिद्धमाहुः अत इत्यादि। यत एवं मन्त्राऽर्थोऽतोयं गुहाप्रविष्टात्मत्वरूपो हेतुर्ऋतपात्रोर्जीवपरमात्मत्वसाधने युक्त इति हिशब्दार्थः।

रश्मिः।

इत्येकादशद्वादशाध्यायोक्तस्य जीवस्य मुक्तस्य जीवन्मुक्तस्येतरस्य चापि पुष्टभक्तस्य सायुज्यं गतस्यापि तथात्वात् छायारूपत्वात्। ननु सायुज्ये कस्य छायेति चेन्न जीवत्वस्यौपाधिकत्वाभावात् सायुज्येपि जीवत्वात् महत्वप्राकट्येनाणोरणीयसो महतो महीयस ऐक्यात्। ननु सायुज्ये तिरोहितानामप्यानन्दैश्वर्यादीनामाविर्भावात् तेजोरूपत्वं न तु छायारूपत्वमिति चेन्न जीवत्वस्यौपाधिकत्वाभावात् किं च 'छिद्रा व्योम्नीव चेतनाः' इति सिद्धान्तमुक्तावल्याश्छिद्रभूतेष्वानन्दस्य श्यामस्याविर्भूतत्वेन तेजोभावरूपेषु छायात्वमपि। आतपत्वं समर्थयामासुः **ततोपीति**। विशिष्टं शिष्लृ विशेषणे रुधादिः परस्मैपदी अनिट् विशेषणं सोश्नुते सर्वान् कामान् सह ब्रह्मणेति सहार्थेऽप्रधाने तृतीयाऽतः उत्कृष्टं वा। शिष हिंसायां भ्वादिः परस्मैपदी धातुस्तु सेट्त्वान्न गृहीतः। ननु प्रकटानन्दत्वाच्छयाममस्तु तद् भास्वरशुक्लातपरूपमिति चेन्न श्यामभास्वरशुक्लयोर्भास्वरशुक्लस्य मुख्यत्वाच्छयामस्यातपत्वमपीति। सूर्यनारायणे प्रसिद्धम्। अत एवं कथनं परोक्षवाद इत्यर्थः। अन्येषामक्ष्णः परत्वात्परोक्षं तस्य वादः परोक्षवादः इत्यर्थः। **ज्ञानी**ति ब्रह्मविदो वदन्ति इति ज्ञानिनो ज्ञानकाण्डे पञ्चाग्नय इति स्मार्ता उपासका उपासनाकाण्डे पञ्चरात्रे त्रिणाचिकेता इति कर्मिणः कर्मकाण्डे। भक्तास्तु 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' इति सूत्रात् परिपश्यन्ति इति तेषामपरोक्षवाद इति ते न संगृहीताः। ज्ञानिनो वा माहात्म्यजीवब्रह्मैक्यज्ञानिनो अपेक्ष्यन्ते येषां भक्तिकारणवन्तः। **सत्येति** ब्रह्मपुराणमन्यत्रासत्यत्वाद्विशेषणम्। **सत्येति**। **दहरेति** अत्यन्तानुग्रहभाजामिदं 'आन्तरं तु परं फलम्' इति सुबोधिन्याः। **पूर्वोक्तरीत्या** भाष्योक्तरीत्या। **अतिसरूपत्व**मत्यन्तसरूपत्वम्। **परोक्षेति** 'परोक्षप्रिया इव हि देवा' इति श्रुतेः। **अतोय**मिति अयं सिद्धान्त इत्यर्थस्य स्पष्टत्वेनाविवरणार्हत्वं ज्ञात्वानुमानपक्षं 'जन्माद्यस्य यतः शास्त्रयोनित्वात्' इत्यधिकरणभाष्यासंमतमप्यन्येषां रोचनार्थमाहुः **गुहां प्रविष्टेति**। तथा च त्रयोदशाध्याये गीता ब्रह्मसूत्रपदैश्चैव हेतुमद्भिरिति अयं परोक्षवाद इति नार्थोऽसौत्रत्वात्। हेतुः **ऋते**ति हेतुरित्यत्र विरतिरतः संहिताभावान्न हेतुर्ऋतपात्रोरिति प्रयोगो नापि हेतू ऋतपात्रोरिति। ऋतशब्दस्याजादित्वहशादित्वयोरन्यत्र दर्शनात्। ऋतपातारौ जीवपरमात्मानौ गुहाप्रविष्टात्मत्वात्। यन्नैवं तन्नैवं घटवत्। हि शब्दोवधारणे भाष्य उक्तस्तं सिद्धान्तरूपं गुहा-

नन्वप्रकृतत्वात् कथमेवमिति तत्राह **तद्दर्शनात्**। तयोर्दर्शनं तद्दर्शनं तस्मात् जीवब्रह्मणोः प्रतिपादनीयत्वात्। येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके, नायमस्तीति चैके, एतद्विद्यामनुशिष्टस्त्वयाहमिति जीवः पृष्टः। 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यति तद्वद' इति ब्रह्मापि पृष्टम्। तत्र ब्रह्म निरूप्य जीवं निरूपयन्नुभयोस्तुल्यत्वेन महाभोगं निरूपयन् फलार्थं मध्ये स्वरूपं कीर्तयति। अतो ब्रह्मवाक्यमेवैतदिति सिद्धम्॥ ११॥

भाष्यप्रकाशः।

तथाच गुहाप्रविष्टात्मरूपस्य हेतोरस्पष्टत्वेऽपि ब्रह्मलिङ्गत्वं युक्तमित्यर्थः। प्रकरणस्य हेतुलिङ्गतासाधकत्वात् तन्निश्चायनाय सूत्रशेषमवतारयन्ति **नन्वित्यादि**। व्याकुर्वते **तयोरित्यादि**। पूर्वप्रकरणे ब्रह्म निरूप्यात्र प्रकरणे जीवं निरूपयन्नुभयोस्तौल्यं विना महाभोगासंभवात् तेन तं निरूपयन् महाभोगरूपफलार्थं मध्येऽनेन मन्त्रेण तुल्यत्वबोधकं स्वरूपं कीर्तयतीत्यतो ब्रह्मणः प्रकृतत्वान्नाप्रकृतत्वदोष इत्यर्थः॥ ११॥

रश्मिः।

प्रविष्टात्मत्वरूपं हेतुमवधारयतीत्याहुः **तथा चेति**। **अस्पष्टत्व** इति श्रुतिसूत्रयोस्त्रितयस्येति तृतीयापञ्चमीरूपस्याभावादस्पष्टत्वेपि ऋतपात्रोर्ब्रह्मत्वसाधकत्वमप्युक्तम्। **प्रकरणस्येति** हेतोर्लिङ्गता हेतुलिङ्गता तस्याः साधकत्वात्। हेतुर्गुहाप्रविष्टात्मत्वरूपो ब्रह्मलिङ्गं ब्रह्मप्रकरणात्। यत्र यत्प्रकरणं तत्र तल्लिङ्गमिति व्याप्तिः। अनुमाननिरूपणे वह्निप्रकरणे धूमवदिति दृष्टान्तः। **तन्निश्चायेति** प्रकरणनिश्चायनाय। **नन्वित्यादीति** जीवब्रह्मणोरप्रकृतत्वादिति भाष्येर्थः। **व्याकुर्वत** इति आत्मनेपदं स्वेषामाचार्याणां तत्सारभूतरासस्त्रीभावपूरितविग्रहत्वेन जीवब्रह्मणोरप्रकृतत्वे तयोर्महाभोगसाधनमप्रकृतं शिथिलं स्यादिति तयोः प्रकृतत्वोपपादनफलमात्मगामीति प्रकृतत्वं तयोर्व्याकुर्वत इत्यर्थः। **तयोरित्यादीति**। **प्रतिपादनीयत्वादिति**। ननु दर्शनप्रतिपादनीयत्वयोः कथं पर्यायतेति चेन्न प्रतिपादनीयत्वं ब्रह्मजीवनिष्ठं जातित्वाभावात्कुत्रान्तर्भवतु ब्रह्मजीवयोरिति चेन्न धर्मान्तर आविर्भाव्य ब्रह्मजीवयोरन्तर्भवतु न तं विना धर्मत्वेन प्रतीतिबाधात्। न च धर्मान्तरमेव तयोरन्तर्भवत्विति शङ्क्यम्। गौरवात्। अतः प्रतिपादनमभिधा। घटोस्तीत्यत्र घटपदे घटार्थाभिधावत्। तादृशाभिधार्हं प्रतिपादनीयम्। 'अर्हे कृत्यतृचश्च' इति तयाभिधया दृष्टं प्रतिपादनीयम्। मीमांसकानां शक्तिग्रहणप्रनाड्यां प्रयोजकवृद्धेनोक्तः प्रयोज्यवृद्धो घटमानयेति तदा मध्यस्थोवधारयति। घटपदाभिधया दृष्टो घटो घटपदप्रतिपादनीय इति तद्वत्। अभिधया दृष्टत्वं जातित्वाभावात् दर्शनमेवं प्रतिपादनीयत्वं दर्शनमित्येवं पर्यायत्वेन दर्शनात्। प्रतिपादनीयत्वादिति पर्याय इति निष्पन्नम्। श्रुत्यर्थस्तु या इयं प्रेते मृते मनुष्ये विचिकित्सा संशयः का सा इत्यत आहुः **अस्तीति**। अस्ति शरीरेन्द्रियबुद्धिमनोव्यतिरिक्तो देहान्तरसंबन्ध्यात्मेत्येके नायमेवंविधोस्तीत्येक इति। एतज्जीवसंबन्धिनीं विद्यां एतज्जीवसंबन्धिविद्यां जानीयां वाहं कीदृशस्त्वया मृत्युनाऽनुशिष्टः शिक्षितो विशेषणकृतो वा शिक्षृ विशेषणे हिंसितस्तु न सेट्त्वात्। वराणामेष वरस्तृतीयः। अत एवं संदेहे कोसौ जीव इति प्रश्न इति **जीवः पृष्टः** इति। **अन्यत्र धर्मादिति** कृतं जगदकृतं खपुष्पादिकं अकृतं नित्यं वा तयोः समाहारः कृताकृतं तस्मात्। भव्यात् भाविन इति प्रतीकसंगृहीतभाष्यार्थः। पश्यतीत्यत्र क्वचित्पुस्तके उपनिषदि पश्यसीति पाठः। **तत्र ब्रह्मेति** भाष्यं विवरांबभूवुः **पूर्वप्रकरण** इति। **महेति** 'एकोहं बहु स्यां प्रजायेय' इत्यत्र

विशेषणाच्च ॥ १२ ॥

विशेषणानि पूर्वोक्तानि जीवब्रह्मणोरेव संगतानि। अग्रिमं वा,आत्मानं रथिनं विद्धि, सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति जीवप्राप्यं ब्रह्माह । अत उभयोरेव सर्वव्यावृत्त्या कथनादग्रिमग्रन्थपर्यालोचनयापीदं ब्रह्मवाक्यमेव । द्वा

भाष्यप्रकाशः ।

विशेषणाच्च ॥ १२ ॥ अनेनापि हेतुना ब्रह्मणः प्रकृतत्वमेव दृढीक्रियते । विशेषणं किमित्यपेक्षायामाहुः विशेषणानीत्यादि । पूर्वोक्तानीति पूर्वस्यां वल्ल्याम्, अणोरणीयानित्यादिषु द्रष्टृद्रष्टव्यत्वप्रसन्नप्रसादार्हत्ववरणैकलभ्यत्ववरणीयत्वादीनि । ननूक्तमेतस्योत्तरशेषत्वमतः पूर्वप्रकरणस्थान्यनुपयुक्तानीत्यत आहुः अग्रिमं वेत्यादि । उभयोरिति जीवब्रह्मणोः । सर्वव्यावृत्त्येति शरीराद्यात्मकसर्वजडव्यावृत्त्या । अन्ये तु मुण्डके, श्वेताश्वतराणां मन्त्रोपनिषदि च,

रश्मिः ।

प्रोपसर्गोक्तः प्रकर्षो ह्युच्चनीचभावेन तं तत्र भोगः । अत्र तु महाभोगो मोक्षापेक्षिहृदयस्थस्येति तौल्यं विनासंभवः । तथा च ।

'अणोरणीयान् महतो महीयान् आत्मास्य जन्तोर्निहितो गुहायाम् ।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः' ॥

इति श्रुत्युक्ताणुत्वमहत्वाभ्यामन्यैराविर्भूतैश्वर्यादिभिश्च तौल्यमिति भावः ॥ ११ ॥

विशेषणाच्च ॥१२॥ पूर्वस्यामिति ऋतं पिबन्तावित्यस्याः पूर्वस्यां द्वितीयवल्ल्याम् । इत्यादिषु विशेषणेषु । द्रष्टा उक्तायां श्रुतौ तमक्रतुः पश्यति द्रष्टा जीव उक्तः द्रष्टव्यत्वं तमणोरणीयांसं महतो महीयांसं गुहायां निहितमुक्तवतीत्यतो द्रष्टव्यं भवतीति ब्रह्मणो द्रष्टव्यत्वमुक्तम् । वीतशोक इति प्रसन्नो जीव उक्तः । धातुः प्रसादादिति प्रसादपदसामर्थ्येन धाता प्रसादेन पोषकः प्रसादायार्हस्तत्त्वं प्रसादार्हत्वम् । अग्रेतनश्रुत्योर्विशेषणानि एतैर्विशेषणैश्चरितार्थानि । तथाहि । आसीनो दूरं व्रजतीति मन्त्रे मदामदं हर्षाहर्षं विरुद्धधर्माधारं मदन्यो ज्ञातुमर्हतीति मृत्य्वन्यो ज्ञातुं नार्हतीति जीवनिरूपणाभावान्नोभयविशेषणनिरूपणे तस्य प्रयोजनम् । मृत्युर्यद्यपि जीवस्थानापन्नीयो वक्तुं शक्यते तथापि बृहदारण्यके मृत्युस्तम इति जीवत्वाभावात् । ज्ञातृज्ञेयत्वं वा मृत्योर्जीवत्वे तु । अशरीरं शरीरेष्विति मन्त्रे धीरो न शोचति इति प्रसन्नो जीव उक्तः । महान्तं विभुमात्मानमिति महद् ब्रह्मोक्तम् । ते विशेषणे पूर्वमुक्त इति नायमात्मेत्यस्यां श्रुतौ विशेषणे ये ते आहुः वरणैकेति । 'यमेवैष वृणुते तेन लभ्यः' इति श्रुत्यंशोक्तं वरणैकलभ्यत्वं 'तस्यैष आत्मा वृणुते तनुं स्वाम्' इति वरणीयत्वमेतादृशो वरणीयो भवत्यात्मप्रदः । आदिना ।

'नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयात्' ॥

इत्यत्र विरतो जीव उक्तः शान्तः समाहितश्च शान्तमनसश्च प्रज्ञानेनैवमाप्नुयादिति प्रज्ञानाप्यत्वं ब्रह्मण इति ब्रह्मोक्तम् । अग्रे यस्य ब्रह्म च क्षत्रं चेति श्रुतिस्तस्यामवेतृत्वेन जीव उक्तः अवेद्यत्वेन ब्रह्मोक्तम् । अवेत्ता जीवोऽवेद्यं ब्रह्म इति तयोर्विशेषणे स्तः । ननूक्तमिति मध्ये पाठादित्यादिभाष्यविभाग उक्तम् । एतस्येति ऋतमिति श्रुतिवाक्यस्य । पूर्वेति विशेषणानि । अग्रिमं वेतीति ग्रन्थमात्रं

सुपर्णेति निःसंदिग्धम् । चकारः प्रकरणोक्तसर्वोपपत्तिसमुच्चयार्थः ॥ १२ ॥

इति प्रथमाध्याये द्वितीयपादे चतुर्थं गुहां प्रविष्टावित्यधिकरणम् ॥ ४ ॥

भाष्यप्रकाशः ।

द्वा सुपर्णेति मन्त्रे चाऽयमेव न्याय इति वदन्ति । तद् दूषयितुमाहुः द्वेत्यादि । अत्तृत्वानश्नत्वाभ्यां

रश्मिः ।

जीवब्रह्मप्रतिपादकं तत्तु 'आत्मानं रथिनम्' इत्यादि । अस्यार्थः । आत्मानं ब्रह्मपं जीवं रथस्वामिनं जानीहि इत्याहुः श्रुतयः । आत्मानमिति रथोस्यास्तीति रथी तं रथिनं रथिरूपकं जीवात्मनः । 'शरीरं रथमेव तु' शरीरे रथरूपकम् । 'बुद्धिं तु सारथिं विद्धि' बुद्धौ सारथिरूपकम् । 'मनः प्रग्रहमेव च' मनसि रश्मिरूपकम् । 'इन्द्रियाणि हयानाहुः' एकादशेन्द्रियेषु अश्वरूपकम् । 'विषयांस्तेषु गोचरान्' शब्दरूपरसगन्धस्पर्शेषु मार्गरूपकम् । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' आत्मानो मनोभिः संयुज्यन्ते मनांसि इन्द्रियैरिन्द्रियाणि भोग्यैः शब्दरूपरसगन्धस्पर्शैस्तदा भोक्तेत्याहुः । बुद्धिसारथेर्विनियोगमाह यस्त्वविज्ञानेति विज्ञानं बुद्धिरत्र 'बुद्धिं तु सारथिं विद्धि' इति विज्ञानसारथिर्यस्तु' इति बुद्धिविज्ञानयोः पर्यायताश्रावणात् ।

'यस्त्वविज्ञानवान् भवति अयुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥
यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥
यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः ।
न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥
यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥
विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः' । सोध्वन इत्यादि ।

अर्थस्तु स्पष्टः । बुद्ध्या पदार्थान् जानातीति ज्ञाने करणत्वेन बुद्धिसारथेर्विनियोग उक्तः । 'दृश्यते त्वग्रया बुद्ध्या' इति श्रुतेः । जीवप्राप्यमिति तथा च प्राप्यप्राप्त्यर्हौ जीवब्रह्मविशेषणे । नन्वत्र ऋतपातृत्वमुभयोः कथमिति चेन्न सायुज्यमत्र वाच्यम् । 'सायुज्यं कृष्णदेवेन शीघ्रमेव ध्रुवं फलम्' इति निबन्धात् सायुज्ये तु मुण्डकोपनिषदि ।

'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः ।
तथाक्षराद्विविधाः सौम्य भावाः प्रजायन्ते तत्रैवापियन्ति' ॥
'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' ॥ इति ।
'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्' । इति गीता ।

जीवानामक्षरब्रह्मात्मकत्वेनाक्षरात्परस्य प्राप्यत्वेनोभयोः ऋतपातृत्वम् । एवं जीवप्राप्य ब्रह्माहेत्यर्थः । अन्य इति शंकरानन्दा भास्कराचार्याश्च वदन्तीति तथा च शंकरभाष्यम् । एष एव न्यायो द्वा सुपर्णा सयुजा सखायेत्येवमादिष्वपीति । भास्करभाष्यं च द्वा सुपर्णेत्यत्राप्ययमेव न्याय इति । भास्कराचार्यमतेऽन्ये त्विति भाष्यविभागे द्वा सुपर्णेति मन्त्रे चेत्यत्र चोप्यर्थे । द्वा सुपर्णेतिमन्त्रेऽपीत्यर्थः ।

भाष्यप्रकाशः ।

द्वयोर्विशेष्यमाणत्वेन, 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' इति समनन्तरमन्त्रे च जीवपरमात्मनोरुक्तत्वेनासंदिग्धतया जीवान्तरस्य जडस्य च तत्र द्वितीयकोट्यप्रवेशाज्जीवपरमात्मानौ स्फुटौ प्रतीयेते । अतो न्यायप्रयोजनाभावादयुक्तमित्यर्थः । नच तत्र परमात्मनोऽनशनस्योक्तत्वाद्, ऋतं पिबन्तावित्यत्र जीवद्वयमेव युक्तमिति शङ्क्यम् । पूर्वोक्तयुक्तिभिर्द्वितीयस्य ब्रह्मत्वसिद्धौ जीवान्तरस्य तत्राशक्यवचनत्वेन ब्रह्मणो भोगसिद्धेर्द्वा सुपर्णेति मन्त्रे जीववदशनाभावस्यैवानश्नन्नित्यत्र व्याख्येयतया जीवद्वयस्यात्राशक्यवचनत्वादिति । एवमत्र हृदयस्थस्य भोगसाधनेन पूर्वाधिकरणसिद्धोऽपि भोगः प्रकरणैक्यान्मोक्षापेक्षिहृदयस्थस्यैवेति साधितम् । तथा मन्त्रव्याख्यानेनानन्दमयत्वरूपं वैशेष्यं च बोधितम् ।

शंकराचार्यास्तु, द्वा सुपर्णेति मन्त्रमुपन्यस्य पैङ्गिरहस्यब्राह्मणे, तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम् । अनश्नन्नन्यो अभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञः तावेतौ सत्त्वक्षेत्रज्ञाविति व्याख्याय, तदेतत् सत्त्वं येन स्वप्नं पश्यत्यथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्र-

रश्मिः ।

गुहां प्रविष्टावात्मानौ हि तद्दर्शनादिति सूत्रार्थं शंकरभाष्योक्तमाहुः **अत्तृत्वेति** । दर्शनादित्यंशस्य विवृतप्रायत्वाद्विशेषणाच्चेति सूत्रार्थमनुवदन्ति स्म **समाने वृक्षे** इति । निमग्नः मगि गतौ भ्वादिः परस्मैपदी सेट् क्तः । अविद्याकामकर्मरागादिभाराक्रान्तो निश्चयेन देहात्मभावं प्राप्तोऽयमेवाहमस्य पुत्रो नप्ता इत्यादिना । न कस्यचित्समर्थोऽहं किं मे जीवितेनेत्यादिदीनभावोनीशा तया शोचति संतप्यते मुह्यमानः । यदा कदाचिच्छुद्धकर्मसु संचितनिमित्तः अनेकैर्योगमार्गैः कर्मभिश्च जुष्टं सेवितं विभूतिं महिमानं च जगद्रूपमस्यैव परमेश्वरस्येति पश्यति तदा वीतशोको भवतीत्यर्थः । **जीवान्तरेति** अपर आहेत्यादिशंकरभाष्योक्तस्य तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वस्य जीवस्य अनश्नन् इति ज्ञः परमात्मेत्युक्तस्य परमात्मनो क्षेत्रज्ञत्वेन रूपेण जीवान्तरस्य । **जडस्येति** अन्तःकरणस्य सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणशारीरपरतया प्रसिद्धत्वादिति शंकरभाष्यात् । तथा च जीवपरमात्मानावित्येव न तु जीवक्षेत्रज्ञौ नाप्यन्तःकरणशारीरौ श्रुत्यनर्थत्वात् । **तत्रेति** द्वा सुपर्णेत्यत्र । **एवेति** वेदः परमाप्तोक्षरमात्रमपि अन्यथा न वदतीति जन्माद्यस्य यत इत्यधिकरणभाष्यात् । पिबन्ताविति श्रुतेर्निरपेक्षस्वरूपायाः प्रामाण्यादेवकारः । **भोगसिद्धेरिति** अतो न पिबन्ताविति निरपेक्षस्य नापि भाष्यस्य प्रामाण्यहानिरिति भावः । **प्रकरणेति** ननु द्वितीयवल्लीसमाप्त्या पूर्वाधिकरणविषयवाक्यस्य ब्रह्मप्रकरणस्थत्वं तृतीयवल्ल्यारम्भेऽस्याधिकरणस्य विषयवाक्यं जीवप्रकरणे इति कथं प्रकरणैक्यमिति चेन्न । जीवब्रह्मणोर्भोगसाधनप्रकरणैक्यस्य प्रसङ्गसंगत्यात्र विवक्षितत्वात् । ननु ब्रह्मणो भोगसिद्धिरुक्ता सा पैङ्गिरहस्यसंमत्यास्य न्यायस्य शंकराचार्यैः द्वा सुपर्णा इत्यत्र संचारणात् । पिबन्तावित्यत्र छत्रिणो यान्तीतिवल्लक्षणा न तु जीवब्रह्मणोर्महाभोग इत्याकाङ्क्षायामाहुः **शंकरेति** । ऋतं पिबन्तौ इति पूर्वोपन्यासेनाधिकरणरचनायां भोगं दृष्ट्वा भ्रान्ता एष एव न्यायो द्वा सुपर्णा सयुजा सखायेत्येवमादिषु अतिदेशभाष्ये द्वा सुपर्णेत्यादिः । **ताविति** सत्त्वपदवाच्यः ज्ञपदवाच्यश्चेत्येतौ । **व्याख्यायेति** द्वा सुपर्णेति मन्त्रमन्तःकरणपरमात्मपरत्वेन व्याख्याय कुत इत्याकाङ्क्षायां श्रुतिं पेठुः **तदेतदिति** । **येनेति** अन्तःकरणेन । उपद्रष्टा उप समीपस्थशरीरस्य द्रष्टा । **तावेताविति** अन्तःकरणशारीरौ । ननु नेदमतिदेशभाष्यमपि तु

भाष्यप्रकाशः ।

ज्ञाविति तत्र निष्कर्षादत्रत्यः सिद्धान्तस्तत्र न युज्यत तर्ह्येतदधिकरणपूर्वपक्ष एव तदर्थोऽस्त्विति चेत् सोऽपि न। न ह वा एवंविदि किंचन रज आध्वंसत इत्यादिफलकथनात्। सर्वसंसारधर्मातीतो ब्रह्मस्वभावश्चैतन्यमात्ररूपोऽभिप्रेयते। अनश्नन्नन्योऽभिपश्यति ज्ञ इति व्याख्यानात्। यत् पुनः सत्त्वस्य भोक्तृत्वकथनं तत्तु सुखादिविक्रियावति सत्त्वेऽध्यारोपेण। अस्याः श्रुतेः क्षेत्रज्ञभोक्तृत्वबोधन एव तात्पर्यात्। न ह वेत्युक्ते फलवाक्ये अविद्यासंश्लेषाभावरूपफलकथनेन तथा निश्चयात्। इदं हि कर्तृत्वभोक्तृत्वं सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते। वस्तुतस्तु सत्त्वस्याचेतनत्वात् क्षेत्रज्ञस्य चाविक्रियत्वान्नान्यतरस्यापि। किंच। सत्त्वस्याविद्याप्रत्युपस्थापितसद्भावत्वेन तत्त्वतोऽसत्त्वात् सुतरां न संभवतीत्याहुः ।

रश्मिः ।

द्वासुपर्णेति निःसंदिग्धमिति भाष्यस्य प्रकाशेऽनृत्वेत्याद्युक्तमत आहुः **तत्र निष्कर्षा**दिति। पैङ्गिरहस्ये निष्कर्षात् भाष्ये निष्कर्षादित्यर्थः । निष्कृष्टोयमर्थ इति भावः। **अत्रत्य** इति अधिकरणस्य सिद्धान्तो विज्ञातपरमात्मरूपः । **तत्रे**ति द्वा सुपर्णेत्यत्र । **पूर्वे**ति पूर्वपक्षे बुद्धिक्षेत्रज्ञरूपोर्थ एव द्वा सुपर्णेति ऋगर्थोस्त्वित्यर्थः । **न ह वा** इति । स्यादेवं यदि बुद्धिभिन्नः संसार्यस्यां प्रतिपाद्येत न त्वत्र संसार्यभिप्रेयते किं तु शोधितस्त्वमर्थो ब्रह्मेत्याशयेनाहुः न ह वा इति रज इत्युपलक्षणः रजःसत्त्वतमोरूपा अविद्या माया वा ।

'विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् ।
बन्धमोक्षकरी त्वाद्ये मायया मे विनिर्मिते' ॥

इति वाक्ये मायाऽविद्ययोर्भेदात् । रजो रागो वा एवंविदि विदुषि किमपि स्वकार्यं न आध्वंसते न संपादयति ज्ञानेन स्वस्य एव दग्धत्वादित्यर्थः । उपसर्गेण ध्वंसेर्बलादन्यार्थप्रतीतेः ।

'ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः ।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित्' ॥

इति पत्रावलम्बनान्नाध्वंसत इत्यस्य न आगच्छति इत्यर्थो वा नेषद्ध्वंसतेऽपि तु सर्वा ध्वंसतेऽधःपततीत्यर्थो वा न प्रमाद्यतीति वा न हर्षक्षयं करोतीति वा । ध्वसूङ् अवस्रंसनगत्योः स्रंसूच् प्रमादे इत्यस्यावस्रंसनं तस्मिन्। प्रमादो मदेच हर्षे दिवादिः मदे ग्लपनहर्षयोर्वेति स्रंसूध्वंस्वधःपतने स्वरवर्णानुक्रमहैमधातुपाठे आद्याः । स्रस्विति धातुपाठे। इयं श्रुतिर्मुण्डकश्वेताश्वतरयोर्नास्ति । श्वेताश्वतराणां मन्त्रोपनिषदि भविष्यति। अत इत्यादीत्यत्रादिपदार्थो मन्त्रोपनिषदि द्रष्टव्यः। **अभिप्रेयत** इति अर्थोभिप्रेयते। **व्याख्याना**दिति द्वा सुपर्णेत्यत्रान्यपदमनूद्य ज्ञ इति व्याख्यानात्। इममर्थं श्रुतिस्मृती अप्याहतुः 'तत्त्वमसि' 'क्षेत्रज्ञं चापि मां विद्धि' इति । **यत्पुनरि**ति। **सत्त्वस्ये**ति अन्तःकरणस्य। द्वा सुपर्णेत्यत्र भोक्तृत्वकथनम्। सुखादिविक्रियाभाववति सुखदुःखसाक्षात्काररूपो भोगो न संभवत्यतः सत्त्व इत्यस्य विशेषणं सुखादीति संसारिभोक्तृत्वस्याध्यारोपेण । **निश्चया**दिति तथा च भोग आविद्यक एवेति भावः। **इतरे**ति सत्त्वस्य स्वभावोधिष्ठाय मनश्चेन्द्रियाणि विषयानुपसेवते इति । क्षेत्रज्ञस्य स्वभावस्तावदनश्नन्नभिपश्यति ज्ञ इति पैङ्गिरहस्योक्तः। **कल्प्यत** इति तथा चात्रास्याः पूर्वपक्षसिद्धान्तयोरेकतरस्याप्यबोधकत्वाद्दतं पिबन्ताविति 'गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्' इत्यधिकरणविषयवाक्यं न पक्षान्तरमाद्दतमिति भावः। **अन्यतरे**ति कर्तृत्वभोक्तृत्वादयः। **इत्याहु**रिति यत्र वा अन्यदिव स्यात्

भाष्यप्रकाशः ।

तन्न । प्रपञ्चस्य ब्रह्मात्मकतायाः समन्वयसूत्र एव व्युत्पादितत्वेन, आविद्यकत्वस्य च, तदनन्यत्वादिसूत्रेषु दूष्यत्वेन सत्त्वात् सद्भावस्याभ्युपगमैकशरणत्वात् सिद्धे तत्सद्भावे तस्य जडत्वेनाभोक्तृत्वेऽपि तेन जीवीयश्रुत्युक्तभोगानादरस्यायुक्तत्वात् । नचानश्नदादिपदव्याख्यानव्याकोपः शङ्क्यः । येन स्वप्नं पश्यतीत्यस्य येन हेतुना स्वप्नं पश्यति तत् तस्माद्धेतोरेतत् स्वप्नद्रष्टृ

रश्मिः ।

तत्रान्योन्यत्पश्येतेत्यादिना स्वप्नदृष्टहस्त्यादिव्यवहारवदविद्याविषय एव कर्तृत्वादिव्यवहारं दर्शयन्ती श्रुतिर्यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यादिना विवेकिनः कर्तृत्वादिव्यवहाराभावं दर्शयन्तीममेवार्थमाहेति भावः । श्रुतौ न्यायसंचारणमश्रौतमित्याहुः **तन्नेति** । **तदनन्यत्वेति** । द्वितीयाध्याय इत्यर्थः । तथा च 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं' इति कारणानन्यत्वं कार्यस्येति क्व पारमार्थिकदशायामपि कर्तृत्वाद्यभावो येन छत्रिणो यान्तीतिवत्पिबन्तावित्यत्र लक्षणेति न्यायावतारणमश्रौतमित्यर्थः । स्वरूपलक्षणोपपादने पूर्वमुपपादितः पारमार्थिकदशायां महाभोगः वाराहे च ।

श्रीवाराह उवाच—'पूर्वं ब्रह्मलये जाते न किंचिदपि शिष्यते ।
तत्त्वानि प्रकृतिं यान्ति जीवाः सुप्ता भवन्ति हि ॥
न जानन्ति सुखं दुःखं तदाहं रमया सह ।
अप्राकृतजले देवि क्रीडंस्तिष्ठामि मीलया'[१] ॥ इति

श्रुतिश्च 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति । **अपीति** अपिपदेन न्यायसंचारणमयुक्तम् । तदीयपदाघटिते सूत्रे तस्याः श्रुतेर्विषयत्वं प्रायिकमिति समुच्चीयते । ननु शंकरभाष्ये विज्ञानपरमात्मानौ हि ऋतं पिबन्ताविति विषयवाक्यमुपन्यस्य सिद्धान्तितम् । द्वा सुपर्णेति श्रुतिमुपन्यस्यान्तःकरणक्षेत्रज्ञाविति सिद्धान्तितम् । तावतैव मन्त्रवर्णैकवाक्यताविघटनात् विघटितायां च तस्यां मन्त्रान्तरे तन्न्यायसंचारणमसंगतमग्रिमग्रन्थस्य किं प्रयोजनमिति चेन्न 'अधिकं तत्रानुप्रविष्टं न तु तद्धानिः' इत्याशयेनाहुः **न चानश्नदिति** । पैङ्गिरहस्ये क्षेत्रज्ञोऽनश्नन्नन्यश्चाभिचाकशीति पश्यति । यङ्लुग्वा पुनःपुनरतिशयेन काशति शब्दं करोति काश शब्दे काशते दीप्यते वा काश दीप्तौ ह्यभिपूर्वः । आकाशोपि शब्दं करोति दीप्तेरननुभवाच्च नेमावर्थौ । एतान्यनश्नदादिपदानि तेषां व्याख्यानं 'अनश्नन् अभिपश्यति ज्ञः' इति 'अनश्नन्न्योभिचाकशीति' 'अनश्नन्नभिपश्यति ज्ञः' इति पैङ्गिरहस्यश्रुतेः तस्य व्याकोपः । अयमर्थः । जीवब्रह्मभोग ऋतं पिबन्तावित्यत्राङ्गीकृते द्वा सुपर्णेत्यस्या व्याख्याने ज्ञस्य क्षेत्रज्ञस्यानश्नन्नित्यादिना भोगाभावे सिद्धे तदेकवाक्यतया जीवब्रह्मभोगे वाच्ये पिबन्तावित्यत्र पिबदपिबदर्थयोर्लक्षणा ततश्च जीवभोगासंभवोपि च यत्र वा अन्यदिवेति श्रुत्या विवेकिनः कर्तृत्वादिव्यवहाराभावोक्तेः भोमकर्तृत्वं सांसारिकदशायां पारमार्थतस्तु भोगाभाव एव इति ऋतमित्यत्र भोगाङ्गीकारे व्याख्यानस्य व्याकोप इति । स्यादेवं यदि ज्ञपदेन क्षेत्रज्ञः संसार्यपेक्ष्येत किं तु मुक्तो ज्ञस्तस्य तु ज्ञानमार्गे भोगाभाव एव तावता किं दूषणमित्याशयेनाहुः **येन स्वप्नमिति** । येन कफवातपित्तरूपेण हेतुना स्वप्नमिति वैद्यकाः दृष्टानुध्यानेनापीति ज्योतिर्विदः पुरुषोत्तमेनेति कठवल्ल्यां वेदान्तिनः बुद्ध्येति प्रस्थानरत्नाकरे पुरुषोत्तमाः । 'मायामात्रं तु कार्त्स्न्येनाभिव्यक्तस्वरूपत्वात्' इत्यत्र मायोपादानकं

१. मील निमेषे ।

भाष्यप्रकाशः।

सत्त्वं सत्त्वोपाधिकं चैतन्यमित्येवममुक्तं व्याख्यायाथ योऽयमित्यादिना मुक्तं व्याकरोतीत्यमुक्तजीवीयभोगस्य मुक्ताभोगस्य च सिद्धेस्तदभावादिति। न चैकस्मिञ्छरीरे जीवद्वयनिवेशस्यासंगतत्वान्नायं श्रुत्यर्थ इति शङ्क्यम्। अत्र, समानं वृक्षमिति समानपदस्य तुल्यवाचकतया शरीरभेदस्यैवाभिप्रेतत्वेनोक्तदोषाभावात्। नचैवं जीवानां बहुत्वेन, द्वा इत्यादिद्वित्वसंख्याविरोधः। प्रकारपरत्वेनाविरोधात्। सयुक्तस्य त्वेककालावच्छिन्नप्रवेशत्वेनाप्युपपत्तेः। सखित्वस्य चाक्षण्वन्तः कर्णवन्तः सखाय इतिवत् सारूप्येणेति। अतो, नैव किंचित् करोमीतिन्यायेन स्वातन्त्र्यमित्युपदेशायेदं पैङ्गिरहस्यव्याख्यानम्। न ह वा एवंविदीति फलवाक्येन तथा निर्णयात्। नचैवं श्रौतव्याख्यानुरोधेन मुण्डकाद्युक्तैतन्मन्त्रेऽप्ययमेवार्थोऽस्तु, न तु जीवब्रह्मपर इति शङ्क्यम्। तत्र प्रकरणस्य ब्राह्मत्वेन ब्रह्मणः प्रतिक्षेपानर्हत्वात्। 'अतो ह्याम्नान्तेपूभौ ह्याम्नानस्यार्थवत्त्वात्' इति

रश्मिः।

स्वप्नम्। मायया मायोपादानं **सत्त्वं** मायिकमिति मायोपाधिकं चैतन्यं सत्त्वमित्येवमुपाधिविशिष्टत्वेन देहाद्यध्यासेन **चामुक्तं व्याख्यायेत्यर्थः। मुक्त**मिति न च शारीरपदादमुक्तत्वं शङ्क्यम्। उपद्रष्टेत्युपपदात् क्षेत्रज्ञपदाच्चाध्यासातिरिक्तशरीरसंबन्धस्य स्फोरणात्। उपपदेन शरीरस्य उप समीपे द्रष्टा ज्ञाता अध्यासरहित इत्यर्थात् 'क्षेत्रज्ञं चापि मां विद्धि' इति गीतातोऽप्यध्यासाभावो ज्ञेयः। शरीरपदं जीवन्मुक्ताया ज्ञापकम्। अयमिति मुक्तामुक्तरूपः। **शरीरे**ति दात्रेण तुल्यं छिनत्तीति दात्रवत्क्षुरश्छिनत्तीत्यत्र दात्रक्षुरयोर्भेदो यथा तथा शरीरान्तरेण समानं तुल्यं वृक्षं शरीरम्। **प्रकारे**ति द्वा इत्यत्र द्वित्वसंख्या तस्याः प्रकारौ मुक्तामुक्तत्वे तत्परत्वं द्वित्वावच्छिन्ने ये मुक्तामुक्तत्वे तदवच्छिन्नौ सुपर्णासुपर्णावित्यर्थः। सयुजेत्यत्रोपपत्तिमाहुः **सयुक्तस्ये**ति। युनक्तीति युक् सहयुक् सयुक् तस्य भावस्तत्त्वं तस्य त्वेकेन कालेनावच्छिन्नः प्रवेशो ययोः तावेककालावच्छिन्नप्रवेशौ मुक्तामुक्तजीवौ तयोर्भावस्तत्त्वं तेनाप्युपपत्तेः। मुक्तस्य ब्रह्माण्डकोट्याश्रयत्वेनामुक्तस्याणोः संपर्कस्योपपत्तेः। सखाया इत्यत्र तामाहुः **सखित्वस्ये**ति समानशीलव्यसनवत्त्वं सखित्वं अक्षण्वन्त इत्यत्राक्षिकर्णवत्त्वेन सारूप्यं सखित्वं तदत्र संभवति तयोः शरीरवत्त्वेन सारूप्यात् समानशीलव्यसनवत्त्वं तु नास्ति मुक्तामुक्तत्वाभ्यां महावैलक्षण्यात्। **अतो नैवे**ति गीतावाक्यमिदं मुक्तवदमुक्तेन स्वातन्त्र्यमित्युपदेशाय मुक्तामुक्तयोरेकत्र निरूपणम्। कर्ता कारयिता हरिरिति। **न ह वा** इति मुक्तमात्रविषयोयं हेतुः व्याख्यातैषा। 'ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिना स्वोक्तव्याख्यातं तद्वत्पैङ्गिरहस्यं व्याख्यायाशशङ्किरे **न चे**त्यादि। **मुण्डके**ति आदिपदेन श्वेताश्वतरोपनिषत्। **अयमेवे**ति। बद्धमुक्तरूपः। अत्ता चराचराधिकरणे प्रकरणादप्यत्तृत्वं परमात्मनः साधितं तत्प्रकरणमत्राधिकरणे चकारेण समुच्चितं तद्भाष्य उक्तमतो द्वा सुपर्णेत्यस्यामपि प्रकरणं ध्वन्यते। द्वा सुपर्णेति चकारः प्रकरणोक्तेतिभाष्यवाक्ययोः सान्निध्यादित्याहुः **तत्र प्रकरणस्ये**ति। 'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः' 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' अग्रे 'ब्रह्मैवेदममृतम्' इति तदग्रे द्वितीयमुण्डकसमाप्तिस्तृतीयमुण्डके द्वा सुपर्णेति समाने वृक्षे पुरुष इति तदग्रे यदा पश्यः पश्यते रुक्मवर्णमिति अत्र तृतीयमुण्डके सर्वत्र जीवब्रह्मनिरूपणं कर्मकर्तृभावेनेति जीवब्रह्मणोः साधकतमं प्रकृष्टं तद्रूपं प्रकरणं देशकालरूपं वा प्रकरणं तस्य **ब्राह्मत्वेन** श्वेताश्वतरे च चतुर्थाध्याये तद्ब्रह्मेत्युपक्रम्य 'अजामेकां लोहितशुक्लकृष्णाम्'

भाष्यप्रकाशः ।

पूर्वतन्त्रीयन्यायाद् द्वावप्यर्थौ प्रकरणानुरोधात् तत्र तत्र व्यवस्थितावङ्गीकार्यौ तत्र पाठविशिष्टमन्त्रस्यैवात्रार्थविशिष्टस्यैव तस्य प्रकरणिना ग्रहणात् । अर्थभेदं विना व्याख्यानवैयर्थ्यादिप्रसङ्गादिति । अतो मन्त्रवर्णैक्येऽप्यर्थभेदान्नैकवाक्यत्वम् । ऋतमित्यस्य तूभयभेद इति सुतरां तथेत्यस्मिन् मन्त्रे तन्न्यायसंचारणमसंगतमेवेति दिक् ।

एवं चात्र परमात्मनोऽलौकिकभोगयोगे दोषराहित्यस्य प्रसङ्गेन विचारात् प्रलयकर्तृत्वे दोषरहितत्वं समर्थितमितीदं पूर्वस्यैव शेषः ॥ १२ ॥

इति चतुर्थं गुहां प्रविष्टावित्यधिकरणम् ॥ ४ ॥

रश्मिः ।

इत्यस्याग्रे द्वा सुपर्णेति । समाने वृक्ष इति अत्र प्रकरणं प्रायपाठसहितम् । उपलक्षणमेतत् । मुक्तजीवनिरूपणेपि ब्रह्मनिरूपणस्याक्षतेरिति हेतोः । 'एकदेशविकृतमनन्यवत्' । अतो भाष्ये द्वा सुपर्णेति निःसंदिग्धमिति कथनात् निःसंदिग्धस्याविषयवाक्यत्वेन तत्र चकारः । प्रकरणोक्तेति भाष्यवाक्यसांनिध्येन द्वा सुपर्णेत्यस्यामपि प्रकरणं ध्वन्यत इत्यप्रयोजकमिति निरस्तम् । पूर्वं हेतुमङ्गीकृत्य व्यवस्थामाहुः **अतो द्व्याम्नातेष्विति** । तृतीयस्याष्टमे पादेयं न्यायोस्ति तत्र दर्शपूर्णमासयोरध्वर्युकाण्डे याजमानकाण्डे च वाजस्य मा प्रसवेनेत्ययं मन्त्रः आम्नातः तत्र यजमानेनैव प्रयोक्तव्यः अध्वर्युणा वा उभाभ्यामपीति वेति संशयोर्थस्य स्रुक्व्यूहनादेराध्वर्यवत्वात् मन्त्रोपि तेनैव प्रयोक्तव्यः इति पूर्वः पक्षः । प्रकरणद्वयपाठवैयर्थ्यपरिहारायोभाभ्यां प्रयोक्तव्य इति सिद्धान्तः । मन्त्रप्रकाशितार्थमनुष्ठास्यामीति अत्र न प्रमदितव्यमिति च तयोराशयः । उभौ मन्त्रप्रयोक्तारौ द्व्याम्नातेषु मन्त्रेषु । **द्वाविति** मुक्तबद्धजीवरूपौ जीवब्रह्मरूपौ वा । **तत्र तत्रेति** पैङ्गिरहस्ये मुण्डकश्वेताश्वतरयोश्च । व्यवस्थित्यङ्गीकारे सदृष्टान्तं हेतुमाहुः **तत्र पाठेति** । न च मन्त्रस्वरूपमेव प्रकरणिना गृह्यते न तु पाठोपीति वाच्यम् । पाठविशिष्टमन्त्रस्यैव प्रकरणे विपरिवृत्तेः पाठातिक्रमे कारणाभावात् । अत एव प्रयोगकाले मन्त्राणां पाठसिद्धिः । अन्यथा स्मृतिस्थेनापि मन्त्रेणार्थप्रकाशनसंभवात् नैकान्तेनोच्चारणं सिद्ध्येत् । अतः पाठविशिष्टमन्त्रस्यैव प्रकरणिना ग्रहणम् । तस्यैवात्र मुण्डकादौ पैङ्गिरहस्ये चोक्तार्थविशिष्टस्यैव तस्य मन्त्रस्य प्रकरणिना ब्रह्मणा क्षेत्रज्ञेन च ग्रहणादित्यर्थः । **व्याख्यानेति** पैङ्गिरहस्योक्तव्याख्यान इत्यर्थः । आदिपदेन प्रकरणम् । **मन्त्रवर्णेति** पैङ्गिरहस्यमुण्डकश्वेताश्वतरमन्त्राणामैक्येपि । **उभयेति** द्वा सुपर्णेति मन्त्रशब्दार्थोभयभेद इत्यर्थः । **तथेति** नैकवाक्यता । पञ्चमाङ्गमधिकरणस्याहुः **एवं चेति** । **शेष** इति तथा चोपोद्घातः संगतिरित्यर्थः । **माध्वास्तु** ऋतं शुभं हरिः पिबेत् शुभाशुभे जीवः पिबेत् ।

'शुभं पिबत्यसौ नित्यं नाशुभं तु हरिः पिबेत् ।
पूर्णानन्दमयस्यास्य चेष्टा न ज्ञायते क्वचित्' ॥

इति पाद्मात् । यो वेद निहितं गुहायामित्यादिना प्रसिद्धं हिशब्देन दर्शयतीत्याहुः । तत्पौराणमिश्रश्रौतं मतम् । अस्माकं तु शुद्धो ब्रह्मवादः ।

'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम्' ॥ इति निबन्धात् ।
'कृष्णवाक्यानुसारेण शास्त्रार्थं ये वदन्ति हि ।
ते हि भागवता प्रोक्ताः शुद्धास्ते ब्रह्मवादिनः' ॥ इति निबन्धाच्च

अन्तर उपपत्तेः ॥ १३ ॥ (१-२-५)

य एषोऽक्षिणि पुरुषो दृश्यते। एष आत्मेति होवाचैतदमृतमभयमेतद्

भाष्यप्रकाशः ।

अन्तर उपपत्तेः ॥ १३ ॥ अतीतेषु त्रिष्वधिकरणेषु प्रथमे वैशेष्येण लौकिकभोगबाधकं रूपं परिहृत्याग्रिमाभ्यां चराचरग्रहणाद्युगपदुभयप्रवेशाच्च संपद्यमानदशास्थो मोक्षदशास्थश्चेत्युभयविधोऽपेक्षितो भोगः साधितः। इदानीं संसारदशायां किं वैशेष्यमित्याकाङ्क्षायां तन्निर्णेतुमिदमारभ्यत इत्युपोद्घातरूपां संगतिं बोधयितुं विषयवाक्यमुदाहरन्ति य एष इत्यादि। श्रूयते इति छान्दोग्ये षष्ठे प्रपाठके उपकोसलविद्यायां श्रूयते। वाक्यार्थस्तु, ब्रह्मेतीत्यन्तं पुरःस्फूर्तिकः। अग्रे तु पूर्ववाक्ये यदाचार्येणोक्तम्, अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्त

रश्मिः ।

न चोक्तपाद्मात्सिद्धान्तेऽपि जीवब्रह्मरूपार्थौ विहाय शुभशुभाशुभपातारौ स्तामिति चेन्न पुराणमतस्य सिद्धान्ते पृथक्त्वात्। न च भेदं विना ऋतं ब्रह्मात्मकं परस्परं पातुं शक्यं नेति शङ्क्यम्। सत्य आत्मा सत्यो जीवः सत्यं भिदा इमैवारुण्यो इति पैङ्गिश्रुतेः अस्या अभिप्रायो 'अन्तरा भूतग्रामवत् स्वात्मनः' इति सूत्रे वक्ष्यते। विशेषणाच्चेति सूत्रे 'यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्' इति।

'पृथग्वक्तुं गुणास्तेन न शक्यन्तेऽमितत्वतः।
यतोतो ब्रह्मशब्देन सर्वेषां ग्रहणं भवेत् ॥
एतस्माद्ब्रह्मशब्दोयं विष्णोरेव विशेषणम्।
अमिता हि गुणा यस्मात् नान्येषां तमृते विभुम्' ॥ इति ब्राह्मे।

विष्णुस्तु ब्रह्मविद्योपनिषदि।

'यजुर्वेदान्तरिक्षं च दक्षिणाग्निस्तथैव च।
विष्णुश्च भगवान् देवः उकारः परिकीर्तितः' ॥ इति।

ॐमित्येकाक्षरं ब्रह्म यदुक्तं तदन्तर्गतोंकारान्तर्गतः। ब्राह्मस्य हिरण्यगर्भमाहात्म्यप्रतिपादकत्वेन राजसत्वेन ब्राह्मणोपेक्षितत्वाच्च ॥ १२ ॥

इति चतुर्थाधिकरणम् ॥ ४ ॥

अन्तर उपपत्तेः ॥ १३ ॥ **वैशेष्येणेति** 'संभोगप्राप्तिरिति चेन्न वैशेष्यात्' इति सूत्रे वैशेष्येण सर्वरूपत्वमानन्दरूपत्वं स्वकर्तृत्वं विशेषस्तद्भावो ब्रह्मणि वर्तते इति भाष्योक्तेन वैशेष्यपदसूचितापेक्षितभोगभोक्तृत्वेन च भोगेऽङ्गीकृते यद्बाधकं दुःखसाक्षात्कारतत्साधनादिपरिग्रहरूपं तत्परिहृत्येत्यर्थः। **अपेक्षित** इति यत्प्रयन्तीति श्रुत्या 'पुरश्चक्रे द्विपदः पुरः पुरुष आविशत्' इति श्रुत्या चानेन जीवेनात्मनानुप्रविश्येति श्रुत्या वापेक्षितः। इच्छां विना चराचरग्रहणयुगपदुभयप्रवेशयोरनाविर्भावात्। अत उभाविष्टावपेक्षितौ। **किं वैशेष्यमिति** भाष्ये विवृतमपि संभोगप्राप्तिसूत्रे कर्मफलप्राप्तिरूपदूषणदूषितमित्याकाङ्क्षायां निर्लेपत्वमपहतपाप्मत्वं च वैशेष्यं निर्णेतुमित्यर्थः। **उपोद्घातेति** प्रकृतं वैशेष्यं तद्भोगसाधकं तदा सिद्ध्येद्यद्यपहतपाप्मत्वं निर्लेपत्वं च वैशेष्यं स्यात्। तत्प्रकृतसिद्ध्यर्था चिन्ता निर्लेपत्वापहतपाप्मत्वचिन्ता तामुपोद्घातं विदुर्बुधास्तद्रूपामित्यर्थः। **स इति** जाबाल आचार्यः। **बोध्य इति** वाक्यार्थो बोध्यः। **अन्यैरिति**

ब्रह्मेति । तद् यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छतीत्यादि श्रूयते । तत्र संशयः । प्रतिबिम्बपुरुषस्य ब्रह्मत्वेनोपासनापरमिदं वाक्यं ब्रह्मवाक्यमेवेति वा । विरुद्धार्थवाचकत्वात् संदेहः ।

तत्र दृश्यत इति वचनात् प्रतिबिम्ब एवायम् । ब्रह्मप्रकरणस्य च समाप्तत्वादेषा सौम्य तेऽस्मद्विद्या आत्मविद्या चेत्युपसंहारदर्शनात् तत्सिद्ध्यर्थमुपासनापरतैव वाक्यस्य युक्ता ।

भाष्यप्रकाशः ।

एवमेवंविदि पापं कर्म न श्लिष्यते इति फलम् । तत्र निदर्शनं स आह तद् यद्यपीत्यादि । तत् तत्र इदं निदर्शनम् । यद्यप्यस्मिन् अक्षिपुरुषस्थानभूते अक्षिणि, सर्पिर्वा उदकं वा सिञ्चति धारया भूयः पातयति, वर्त्मनी अक्ष्यावरणादिभूते पक्ष्मणी एव गच्छति प्राप्नोति । ते एवार्द्रे स्निग्धे च भवतो, न त्वक्षि । तथाच यत्स्थानस्येदृशं माहात्म्यं तस्य ज्ञाने सति पापसंश्लेषो न भवतीत्यत्र किं वक्तव्यमिति बोध्यः ।

अत्रान्यैश्चतुष्कोटिकः संशय उपन्यस्तः । किमत्र प्रतिबिम्बात्मा निर्दिश्यते, विज्ञानात्मा वा, इन्द्रियाधिष्ठातृदेवता वा, परमेश्वरो वेति । स न युक्तो, दृश्यत इति पदेन विज्ञानात्मदेवतयोरदृश्यमानयोर्निरासादिति बोधयितुं संशयाकारमाहुः तत्रेत्यादि । ननु दर्शनविषयत्वं ब्रह्मणोऽपि नास्तीति संशय एवात्र न घटत इति शङ्कायां तद्बीजमाहुः विरुद्धेत्यादि । दृश्यते इत्युक्तं दर्शनम्, अमृतत्वादिकं च परस्परविरुद्धावर्थौ, तद्वाचकत्वात् तथेत्यर्थः । पूर्वपक्षमाहुः तत्र दृश्यते इत्यादि । प्रकरणसमाप्तौ हेतुरुपसंहारदर्शनादिति । तत्सिद्ध्यर्थमित्युपसंहारसिद्ध्यर्थम् । ननु मास्तु तत्रोपसंहारस्तथा सति प्रकरणैक्याद् ब्रह्मवाक्यत्वमेवास्येत्यत आह

रश्मिः ।

शंकराचार्यप्रभृतिभिः । **चतुष्कोटिक** इति भास्कराचार्याणां किं छायात्माक्षिस्थाने निर्दिश्यते किं वाधिष्ठात्री देवतादित्योथ वेश्वर इति त्रिकोटिकः । **विज्ञानात्मदेवतयो**रिति छायात्माप्युपलक्षणविधया द्रष्टव्यः । **तथे**ति अमृतत्वादिना ब्रह्म दृश्यते इति दृश्यत्वेन च प्रतिबिम्बमित्यर्थः । ननु विरुद्धार्थवाचकत्वं वाक्ययोः प्रतीयते तत्कुत्रास्तीति चेन्न । प्रस्थानरत्नाकरे नन्वस्त्वेवं पदवाक्ययोरतिरेकस्तथापि न त्रयाणां वर्णपदवाक्यानां वाचकत्वम् । पदैः पदार्थोपस्थापने वाक्यार्थत्वेनाभिमतस्यान्वयस्य संसर्गमर्यादया पदैरेव भानसंभवेन वाक्यानां वाचकत्वकल्पने वाक्य एव शक्तेः पर्यवसानस्य वैयाकरणैरेवोपपादितत्वात् । नापि पदोपस्थापितपदार्थानामेव करणत्वं साधीयः । संपूर्णवाक्यश्रवणोत्तरं जायमानस्य बोधस्य पूर्वपदानां नष्टत्वेन नित्यपक्षे व्यञ्जकनाशात्तिरोहितत्वेन चोपस्थापकाभावात्पदार्थानुपस्थितावनुत्पत्तिप्रसङ्गात् । अविद्यमानानां प्रकारान्तरेण बोधकत्वस्याशक्यवचनत्वात् । न च पूर्वपदानां निवृत्तत्वेपि संस्कारेण तेषामुपस्थितौ तदुपस्थापितानां करणत्वमिति युक्तम्, गौरवात् । वाक्यार्थबोधस्याशाब्दत्वापत्तेश्चाक्षुषादिपदवच्छाब्दपदस्यापि करणार्थकपदप्रकृतिकत्वेन तत्समाख्याविरोधापत्तेश्च । नापि वृत्तिमत्पदज्ञानमेव करणमिति युक्तम् । एवमप्यशाब्दत्वस्यापत्तेः । न च वाक्यज्ञानकरणत्वपक्षेप्ययं दोष इति वाच्यम् । ज्ञायमानवाक्यस्यैव करणत्वाङ्गीकारादित्यादिग्रन्थात् । **उपसंहारसिद्ध्यर्थ**मिति उपसंहारः कदा सिध्येद्यदा ब्रह्मधर्माणाममृताभयादीनां प्रतिबिम्बोपासनार्थत्वं स्यात् । अत उपासनापरतैव ब्रह्मधर्मप्रतिपादकवाक्यस्य युक्तेति भाष्यार्थः । 'एषा सौम्य तेऽस्मद्विद्यात्मविद्या च' इति श्रुतावेषा अव्यवहितपूर्वोक्तेत्यर्थादेवकारः । **ननु मास्त्वि**ति ।

अविरोधे हि ब्रह्मपरता। उपास्यत्वेन ब्रह्मधर्माणामन्वयो भविष्यतीत्येवं प्राप्त उच्यते। अन्तरः, अक्षिमध्ये दृश्यत इत्युक्तः परमात्मैव। कुतः। उपपत्तेः। उपपद्यते हि तस्य दर्शनमार्षम्। सर्वत्र ब्रह्म पश्यन् बहिः सन्निधाने तस्य स्थानस्योत्कृष्टत्वात् तत्र भगवन्तमुपदिशति। लोकं वा व तेऽवोचन्

भाष्यप्रकाशः।

अविरोधे हीत्यादि। यदि हि दृश्यत इत्युक्तं दर्शनं न विरुद्ध्यते तदा तथात्वं शक्यवचनं, न तु तदभावेऽपीत्यर्थः। ननु त्वन्मतेऽप्यभयादिपदविरोध इत्यत आह उपास्यत्वेनेत्यादि। सिद्धान्तं व्याचक्षते उपपद्यत इत्यादि। आर्षमिति साधनविशेषजन्यम्। तद्व्युत्पादयन्ति सर्वत्रेत्यादि। उत्कृष्टत्वादिति जलाद्यसंश्लेषेण तन्माहात्म्यबोधकत्वात्। तेन स्वल्पस्थानोपदेशोऽपि न तस्य ब्रह्मत्वबाधक इत्यर्थः। नन्वात्मविद्योपसंहारस्य पूर्वं दर्शितत्वात् प्रकरणाननुग्रहे हेतोः साध्यसमत्वे कथं ब्रह्मतासाधकत्वमित्यत आहुः लोकमित्यादि। उपकोसलेन ब्रह्मोप-

रश्मिः।

अयमर्थः। एषा त इत्यग्निवाक्यम्। एषाऽव्यवहितपूर्वोक्तास्मद्विद्याऽस्माकमग्नीनां विद्या प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेत्युक्त्वात्मविद्येत्युक्त्वाहुरग्नयः आचार्यस्तु ते गतिं वक्तेति। गतिमात्मनः स्थानं तथाग्निना स्वोक्तात्मविद्याचार्योपदेशं विना न फलतीत्यनेन सूचितम्। एवं चाप्युक्तविद्याया एवाचार्येण य एषोक्षिणि पुरुष इत्यादिनोक्तत्वात् तत्रोपसंहारः प्रतीयमानोपि निष्प्रयोजनकः। यद्वा। एषा वक्ष्यमाणा यथा तदेषाभ्युक्तेत्यत्रानन्दमयाधिकरण एषेत्यस्यार्थः। तथा चोपक्रमवाक्यं तत् न तूपसंहारवाक्यमिति प्रतीतिरप्युपक्रमविषयिणी न तूपसंहारविषयिणीत्यात्मनिरूपणस्यासमाप्तत्वान्मास्त्वित्यर्थः। तदभाव इति अविरोधाभावे विरोध इति यावत्। ननु विरोध इति वक्तव्ये नञ्द्वयं किमर्थमिति चेन्न पूर्वत्राविरोध इत्यत्र नञि वक्तव्ये तदभावनिरूपणे द्वितीयनञावश्यकत्वात्। त्वन्मते पूर्वपक्षिमते। उपास्यत्वेनेति ब्रह्मधर्माणाममृताभयादीनां प्रतिबिम्बस्योपास्यत्वेन तत्रान्वयो भविष्यतीत्यर्थः। साधनेति। 'भक्त्या जानाति चाव्ययम्' इति श्रुतेः 'भक्त्याहमेकया ग्राह्यः' इति स्मृतेश्च भगवद्दर्शने साधनं इदं विशेषोपि भवति। कर्मकाण्डज्ञानकाण्डयोर्ज्ञानकर्मप्रतिपादकत्वेन तयोः सामान्यात्। साधनविशेषो ब्रह्मविद्या वा बृहदारण्यके तदाहुः यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद् ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति 'ब्रह्म वा इदमग्र आसीत्' सर्वत्र ब्रह्मदर्शने साधनविशेषः 'प्रदानवदेव तदुक्तम्' इति सूत्रोक्तस्तज्जन्यं सर्वत्र ब्रह्मदर्शनं सर्वात्मभावरूपम्। तन्माहात्म्यमिति स्थानमाहात्म्यम्। तेनेति स्थानमाहात्म्येन। तत्र व्योमवन्निचाय्यत्वेन ब्रह्मणः। हेतौ स्वरूपासिद्धिमुपपत्तिरूप आह नैयायिकस्तामनूद्य पराचक्रुराचार्या इत्याहुः नन्वात्मेति वस्तुतस्तु स्थानस्योत्कृष्टत्वादिति हेतुमुक्त्वा हेत्वन्तरमाहुः लोकमित्यादीत्येव ग्रन्थो युक्तः। अनुमानस्य वेदान्ते सर्वत्रानुपयोगात्। 'जन्माद्यस्य यतः' इत्यधिकरणे केचिदत्र जन्मादिसूत्रमित्यादिभाष्यात्। अत्रान्तरः परमात्मा अमृतादिधर्मोपपत्तेः। यदेवं तदेवं आदित्यान्तरवत्। यन्नैवं तन्नैवं संसारवदित्यत्र ब्रह्मप्रकरणाननुग्रहेण हेतोः साध्यत्वेन साध्यसमत्वम्। एतत्फलं तु पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबन्धः ह्रदो द्रव्यं धूमादित्यत्रेव। परामर्शस्तु व्याप्तिविशिष्टपक्षधर्मताज्ञानं तथा च स्वरूपासिद्धो हेतुरिति भावः। उपकोसलेनेति। उपकोसल-

'अहं तु ते तद्वक्ष्यामि' इति महदुपक्रमाच्च । प्रतिबिम्बमात्रस्य च न पुरुषत्व-नियमः । तस्माद् विरोधाभावाद् ब्रह्मवाक्यमेव ॥ १३ ॥

भाष्यप्रकाशः ।

देशेऽपह्नुतेऽपीमे नूनमीदृशा अन्यादृशा इति वदता आचार्येणाग्निकृते उपदेशे ज्ञाते, उपकोसलेनाचार्याज्ञयाऽभ्युक्तेऽनूदिते, आचार्यो लोकं वा व किल तेऽवोचन्नित्यनेन कं ब्रह्म खं ब्रह्मेति यदवोचन्नग्नयस्तल्लोकं प्राप्यमवोचन् । श्रुतौ लोकानिति पाठे त्वग्निविद्याप्राप्याः पृथिव्यादयः आत्मविद्याप्राप्यं ब्रह्म चैकशेषवृत्त्या संगृह्यते । तत्राग्निविद्योक्तलोकप्राप्त्युपायस्यादित्यपुरुषोपासनादिरूपस्य तैरुक्तत्वादात्मविद्योक्तलोकप्राप्त्युपायभूताम्, 'आचार्यस्तु ते गतिं वक्ता' इति तैराचार्यवक्तव्या गतिर्या बोधिता साऽवशिष्यते । सा तु ज्ञातापि तदा भवति यदा प्रतिबन्धकापगम इत्यभिसंधायाचार्य आह । अहं तु ते तद्वक्ष्यामीत्यादि । तत एवं फले श्रुते, उपकोसलः श्रद्धापूर्वकं, ब्रवीतु भगवानिति विज्ञापितवाँस्तदा, य एषोऽक्षिणीत्याद्युक्तम् । तेन तद्वक्ष्यामीति या प्रतिज्ञा सा महत आत्मविद्यागतिकथनस्यैवोपक्रमस्तस्मात् । तथा चाग्निभिस्तदुपसंहारे कृतेऽपि पुनस्तस्या एवोपक्रान्तत्वेन प्रकरणस्य सत्त्वान्न हेतोः साध्यसमत्वमित्यर्थः । ननु तथापि प्रकरणे श्रुत्यपेक्षया दुर्बलत्वाद्दर्शनश्रुतिसंकोचोऽनुचित इति प्रतिबिम्बपुरुष एवात्राङ्गीकार्य इत्यत आहुः प्रतिबिम्बेत्यादि । सत्यं संकोचोऽनुचितः स्याद् यदि दर्शनविषयस्य प्रतिबिम्बस्य पुरुषत्वं

रश्मिः ।

नामा कश्चित् ब्रह्मचारी स जाबालाचार्येण प्रवासं चिकीर्षताग्निनोदितेनाज्ञप्तोऽग्नीन् द्वादशवर्षाणि परिचचार तस्मै परिचर्यया तुष्टा गार्हपत्याद्यग्नयः प्राणो ब्रह्मेत्यात्मविद्यामुपदिदिशुः तस्मिन्नुपदेशे ब्रह्मविद इव ते सोम्य मुखं भातीति को नु त्वानुशशासेति प्रवासादागतेनाचार्येण जाबालेन पृष्टेनोपकोसलेन को नु मानुशिष्याद्भो इत्यपह्नुतेपीत्यर्थः । इम इति इमेऽग्नयः पूर्वमन्यादृशमीदृशा उपदेशोन्मुखा इति नूनं निश्चयं वदताचार्येण । ज्ञात इति अपूर्वभक्त्या । आचार्येति किं नु सोम्य किल तेऽवोचन् इत्याचार्यप्रश्नेनेत्यर्थः । हे सोम्य तेऽग्नयः इतीदमिति ह प्रतिजज्ञ इत्यनेनानूदिते । अग्निविद्येति अग्नीनां गार्हपत्याद्यग्नीनां विद्याभिः प्राप्यः 'अथ हैनं गार्हपत्योनुशशास पृथिव्यग्निरन्नमादित्यः' इति पृथिव्यादयः आत्मनः प्राणादेर्विद्या तया प्राप्यम् । लोकृ दर्शने इति भ्वादे रूपमिदं लोकमिति । तथा च यज्ज्ञानं तत्प्राप्यमेवेत्याशयेन पर्यायो ब्रह्म चेति । एकशेषवृत्त्या लोकश्च लोकश्च लोकश्च लोकाः 'सरूपाणामेकशेष एकविभक्तौ' इत्येकशेषः अनया वृत्त्येत्यर्थः । तैरिति अग्निभिः । य एष आदित्ये पुरुषो दृश्यते सोहमस्मि स एवाहमस्मीति स य एतमेवं विद्वान् उपास्ते इत्यादिनोक्तत्वात् । प्रतीति प्रतिबन्धकमाचार्यसंबन्धाभावः तदपगम इत्यर्थः । अहमिति कर्तृताख्यसंबन्धेन तद्ब्रह्मविद्यां वक्ष्यामीति । आदिपदेन 'यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते' इति श्रुतिसंग्रहः । श्रद्धेति भगवन्निति महापूज्यसंबोधनादिति भावः । ब्रवीतु मे भगवन्निति तस्मै होवाचेति श्रुतिः । हेतोरिति हेतोः प्रकरणेनोपक्रमरूपेण देशकालरूपेण वा सिद्धत्वं न तु साध्यत्वेन साध्यसमत्वमित्यर्थः । हेतुरमृताद्युपपत्तिरूपः स्वरूपासिद्धो नेत्यर्थः । दर्शन इति । दृश्यत इति श्रुतिर्निरपेक्षो रवः तस्य संकोचः साधनवतां दर्शनरूपः । पुरुषत्वमिति द्वादशाङ्गत्वम् । 'द्वादशाङ्गो हि पुरुषः' इति । द्वादशाङ्गत्वमादाय

स्थानादिव्यपदेशाच्च ॥ १४ ॥

एतं संयद्वाम इत्याचक्षते। एतं हि सर्वाणि वामान्यभिसंयन्ति। एष उ एव वामनीरेष हि सर्वाणि वामानि नयति। एष उ एव भामनीरेष हि सर्वेषु लोकेषु भातीति। वामानि कर्मफलानि। तेषामेव मनोहरत्वेन तदर्थं कर्मकरणात्। कर्मफललयः कर्मफलदानं च यत इति स्वर्गापवर्गफलदातृत्वमुक्तम्। सर्वलोकेषु

भाष्यप्रकाशः।

नियतं स्यात्। तदेव तु न। अन्येषामपि प्रतिबिम्बात्। अतो विषयवशेन दर्शनश्रुतिसंकोचस्तव मतेऽपि तुल्यः। प्रकरणविरोधश्चाधिक इति न प्रतिपुरुषस्योपासनाविधायकमिदं, किंतु ब्रह्मवाक्यमेवेत्यर्थः॥ १३ ॥

स्थानादिव्यपदेशाच्च ॥ १४ ॥ पूर्वसूत्रोक्तस्य हेतोर्वादकवलितत्वात् सूत्रान्तरं पठतीत्याशयेन सूत्रं पठित्वा व्याचक्षते एतमित्यादि। तथाचान्तरपदेन पूर्वसूत्रादेव स्थानप्राप्तेरस्मिन् सूत्रे स्थानादीत्यत्रातद्गुणसंविज्ञान इत्यर्थः। एतेषां संयद्वामत्वादीनां कथं ब्रह्मत्वगमकतेत्याकाङ्क्षायामेतद् व्याकुर्वन्ति वामानीत्यादि। कर्मफललय इति एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः, सर्वं पदं हस्तिपदे निमग्नमितिवत् सर्वेषां सुखानां तत्रैव श्लिष्टत्वेन

रश्मिः।

प्रतिबिम्बे पुरुषपदप्रयोगः। **अन्येषामिति** पुरुषभिन्नानाम्। **अतो विषयेति** विषयवाक्यवशेन प्रतिबिम्बवशेन दृश्यत इति दर्शनश्रुतिः। पुरुषप्रतिबिम्बमात्रे संकोचः॥ १३ ॥

स्थानादिव्यपदेशाच ॥ १४ ॥ **वादेति** व्याप्तिशोधकतर्कैर्वादकवलितत्वम्। सर्वं सर्वमयमिति तापिनीयश्रुतेरुपास्ये प्रतिबिम्बेऽपि ह्यमृतत्वादिधर्मोपपत्तिरूपस्य हेतोरभावाद्वादकवलितत्वं तु न। अखण्डब्रह्मवादत्वेन सखण्डब्रह्मवादेनुपयोगात्। अनुमानपक्षस्य भाष्यासंमतत्वे तु स्थाननिर्देशानन्तरं तद्वृत्तित्वस्मरणेन प्रसङ्गासंगत्या धर्माणां वक्तव्यत्वात् सूत्रान्तरं पठित्वेत्याशयेन सूत्रं पठित्वा व्याचक्षत इति ग्रन्थः। **एतमिति** एतं यथोक्तम्। **आचक्षते** ब्रह्मविदः। अत्र हेतुमाह **एतं हीति** हि यस्मादेतं पुरुषमाश्रित्य वा। **सर्वाणि वामानि** टुवम उद्गीर्णे भ्वादिः परस्मैपदी उद्गीर्णानि, वननीयानीत्यन्ये शोभनकर्मणः फलानि। सर्वे**ऽभिसंयन्ति** सम्यगभिमुखं यन्ति इण् गतौ प्राप्नुवन्ति, उत्पद्यन्त इत्यन्ये तथाच संयन्ति शतृप्रत्ययान्तं वामानि यस्मिन् स संयद्वाम इति व्युत्पत्तिः। वामनीपदव्युत्पत्तिः एष हीति। वामान्युद्गीर्णानि कर्मफलानि प्राणिभ्यः प्रापयति। भाम क्रोधे इत्यस्य रूपं नास्तीत्याह **एष हीति**। तथाच **भातीति** भा कर्तरि क्विप् अमतीत्यमः अम गतिशब्दभक्तिषु भ्वादिः पचाद्यच् भा च अमश्च भामौ भावप्रधानः तौ नयति प्राप्नोतीति भामनी भात्वं भानमेव अत एव भाष्यं सर्वलोकेषु भानं चेति। **अन्तरपदेनेति** अक्षिसापेक्षेणाक्ष्यन्तरवाचकेन। **अतद्गुणेति** न तस्य वर्तिपदार्थस्य गुणा विशेषणानि तेषां संविज्ञानं यत्र क्रियान्वयित्वेन सोऽतद्गुणसंविज्ञानो बहुव्रीहिः। तथा च स्थानादिव्यपदेशादित्यत्र स्थानमादिर्येषां ते स्थानादयः संयद्वामादयः तेषां व्यपदेशादिति सूत्रार्थः। संयद्वामपदेन स्वस्मिन् कर्मफललय उक्तः। कर्मफलानि सुखात्मकानि तेषां लयः श्लेषः लीङ् श्लेषणे। आनन्दरूप इत्याहुः **एतस्यैवेति**। **तत्रेति** अक्षिपुरुषे। ननु पृथिव्यादीनामग्निविद्याप्राप्यानामात्मविद्याप्राप्यब्रह्मणश्च का व्यवस्थेत्यत आहुः

भानं च। एष इति तमेवाऽक्षिपुरुषं निर्दिश्य स्थानादि व्यपदिश्यते। न हि प्रतिबिम्बात्मनः स्थानादिव्यपदेशः संभवति। चकारादेतत्तुल्यवाक्यस्याप्ययमे-

---

भाष्यप्रकाशः ।

लोकादीनां तदवयवत्वेन च तत्रैव लय इत्यर्थः। एतेन स्थानपदस्योक्तरीत्या लयार्थकत्वमित्यपि व्याख्यातम्। तदा तु तद्गुणसंविज्ञान एव। तथा चैतैः संयद्वामत्वादिभिरसाधारणधर्मैरत्र ब्रह्मैव निश्चीयते। अतः पूर्वसूत्रोक्तो हेतुरपि तस्यैव साधक इत्यर्थः। एतं न्यायं वाक्यान्तरेऽप्यतिदेष्टुं सूत्रे चकार इत्याहुः चकारादित्यादि। तत्स्मारयन्ति इन्द्रेत्यादि। तत्रापि प्रथमे पर्याये, य एषोऽक्षिणीत्यारभ्यैतद् ब्रह्मेत्यन्त एवमेवोपदिष्टत्वात् तदित्यर्थः। ननु तत्र, अथ योऽयमित्यादिना प्रश्ने प्रजापतिना, एष एवैषु सर्वेष्वन्तेषु परिख्यायत इति प्रतिबिम्बस्यैव निगमनात् कथं तस्यैतदेकवाक्यत्वमिति शङ्कायामाहुः अथेत्यादि। एतदग्रे, उदशराव इत्यादिना इन्द्रविरोचन-

रश्मिः ।

लोकादीनामिति ब्रह्मपृथिव्यादीनामित्यर्थः। **तदवयवत्वेने**ति अक्षिपुरुषतदवयत्वेनाक्षिपुरुष एव संश्लेष इत्यर्थः। **एतेने**ति कर्मफललय इति भाष्येण उक्तरीत्या ब्रह्मत्वगमकताप्रश्ने कृते उक्ताया ब्रह्मतागमकतारीतिरक्षिपुरुषे लयप्रणाडी तया कृत्वा। ब्रह्मणि स्थीयतेऽनेनेति स्थानं लयः करणे प्रत्ययस्तस्माल्लयार्थकत्वमपी**त्यपि व्याख्यातप्रायमित्यर्थः। **तद्गुणे**ति तस्य वर्तिपदार्थस्य गुणा विशेषणानि तेषां संविज्ञानं क्रियान्वयित्वेन यत्र स तद्गुणसंविज्ञानः। एवकारस्तु स्थानस्य क्रियान्वयित्वेन संविज्ञानादतद्गुणसंविज्ञानव्यवच्छेदकः। **संयद्वामे**ति आदिपदेन वामनीभामन्योर्भावौ। ब्रह्मैवेत्यनेकेषां धर्माणामुपासनागमकत्वे 'जन्माद्यस्य यतः' इत्यधिकरणोक्तधर्माणामप्यारोपसंभवेन स्वारसिकब्रह्मासिद्धेर्महानेवानयः स्यादित्यनेकेषामुपासनागमकत्वाभाव इत्येवकारः। **असाधारणे**ति संयद्वामत्वं कर्मफललय इति भाष्येण व्याकृतं वामनीत्वं कर्मफलदानं चेति भाष्येण विवृतं स्थितिरूपं कर्मफलं स्वर्गापवर्गलक्षणं ब्रह्माणं प्रति परान् प्रति च यतो भवति कर्मणा ब्रह्मणो विमोकस्योक्तेः कर्महिरण्यगर्भयोर्मुख्यत्वात् तदुभयमुक्तम्। भामत्वं सर्वलोकेष्विति भाष्येणोक्तमुत्पत्तिरूपम्। लोकसृष्टिद्वारा व्यवहार्यो भविष्यामीति ईक्षतेरित्यधिकरणभाष्योक्तेः। **अत** इति अनेकेषामुपासनागमकत्वाभावात्। **साधक** इति अस्तु वादकवलितत्वं परं तु ह्यविद्वद्दशायां एकस्या अपि श्रुत्यन्तराननुगृहीतायाः अनुरोधोऽपार्थ इति भावः। विषयवाक्यान्तरसमुच्चये चकार इत्याहुः **एत**मिति। **तदि**ति वाक्यम्। **तत्रे**ति इन्द्रविरोचनयोः प्रजापतेश्च संवादे। अयमेव भाष्यार्थश्छान्दोग्ये दशमप्रपाठकेस्ति। **पर्याय** इति तौ प्रति प्रथमे वाक्यनिर्माणे प्रकारे वा। **तदित्यर्थ** इति वाक्यमित्यर्थः। **अथ योय**मिति। अथ योयं य एषोप्सु परिख्यायते यश्चायमादर्शे कतम इत्येष उ एवैषु एतेषु परिख्यायत इति होवाच' इति श्रुत्या एष उ एवैषु सर्वेषु अन्तेषु परिख्यायते इति पाठान्तरम्। अस्या अर्थः। एष हृदयस्थः उ एव आत्मा सर्वेषु यथोक्तेषु एष्विति पाठेप्ययमर्थः। अबादिषु वर्तमानेषु। अन्तेषु मध्येषु। एतेष्विति पाठेप्ययमर्थः। परिख्यायते इति ह प्रजापतिरुवाचेति। **तस्यैत**दिति। य एषोक्षिणि पुरुषो दृश्यत इत्यस्य संदिग्धस्य एतस्य अप्सु परिख्यायते यश्चायमादर्शे इत्यसंदिग्धस्यैकवाक्यत्वमित्यर्थः।

वार्थः। इन्द्रविरोचनप्रजापतिसंवादे। अथ योऽयं भगवोऽप्सु परिख्यायत इत्यासुरम्। न तु य एषोऽक्षिणि पुरुषो दृश्यत इत्यादि। तस्मादक्षिपुरुषो ब्रह्मैव ॥ १४॥

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

ननु किमिति निर्बन्धेन ब्रह्मवाक्यत्वं संपाद्यते। उपासनापरत्वे को दोष इत्याशङ्क्याह सुखविशिष्टाभिधानात्। एतदमृतमभयमेतद् ब्रह्मेति। यद्यत्रोपा-

---

भाष्यप्रकाशः।

योर्बोधं परीक्ष्य ताभ्यां शरीर एवात्मत्वेन ज्ञाते प्रजापतिना, अनुपलभ्यात्मानमित्यादिना तद्दोषकथनात् तस्यैवासुरत्वं बोधितम्। श्रुत्या चोपपादितम्। अतस्तदेवासुरं, न तु ततः पूर्वतनमपीत्यर्थः। नच प्रजापतिनैवं श्लिष्टं किमित्युक्तमिति शङ्क्यम्। अधिकारपरीक्षार्थत्वात्। नच मिथ्याभाषित्वं प्रतारकत्वं वा। अन्तर्यामिब्राह्मणे तस्य सर्वान्तरत्वश्रावणात् प्रतिबिम्ब अबादौ चात्मनः सत्वेन, यतर एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्तीति कथनेन तदुभयाभावादिति ॥ १४ ॥

सुखविशिष्टाभिधानादेव च ॥ १५ ॥ अभिधानं विवृण्वन्ति एतदमृतमित्यादि।

रश्मिः।

परीक्ष्येति उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथ तन्मे प्रब्रूतमित्यादिना परीक्ष्य एतदमृतमभयमेतद्ब्रह्मेति तौ ह शान्तहृदयौ प्रवव्रजतुरिति श्रुत्या। **ताभ्यां शरीरे** बिम्बभूते द्विवचनान्तं पदम्। ज्ञाते सतीत्यादिनेत्यनुपलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वासुरा ते पराभविष्यन्तीति स ह शान्तहृदय एव विरोचनोऽसुरान् जगाम तेभ्यो हैतामुपनिषदं प्रोवाचेत्यनया तस्या उपनिषदोऽविचार्य देहपरिचरणकथनात् आसुरत्वरूपदोषकथनात् तस्यैवाथ योयं भगवोप्सु परिख्यायते इति वाक्यस्यैवासुरत्वं बोधितं श्रुत्या चासुराणा९ह्येषोपनिषदिति श्रुत्या चोपपादितमतः पूर्वोक्तं वाक्यमेवासुरम्। षष्ठप्रपाठकश्रुतिभ्रमं भाष्ये वारयामासुः **न त्विति**। **पूर्वतनं** दशमप्रपाठकस्थं न तु षष्ठप्रपाठकस्थम्। श्रुत्यर्थस्तु उदशरावे उदकपूर्णे शरावे आत्मन इति कर्म युवामिन्द्रविरोचनौ न विजानीथः शेषं स्पष्टम्। अनुपलभ्य यथोक्तमात्मानं शास्त्राचार्याभ्यामज्ञात्वाऽननुविद्य स्वप्रत्यक्षतां चाकृत्वा विपरीतनिश्चयौ भूत्वा एताविन्द्रविरोचनौ व्रजतः गच्छेयाताम्। अतः यतरे ये केचन देवा वा असुरा वा एतदुपनिषदः एताभ्यां मिथ्या गृहीता प्रतिबिम्बात्मविद्या सैवोपनिषद्येषां त एत**दुपनिषदः** एवंविज्ञाना एतन्निश्चया भविष्यन्ति ते पराभूता भविष्यन्तीत्युक्तं प्रजापतिवाक्यं श्रुत्वा स्वगृहं गच्छन् योसुरराजो विरोचनः स ह शान्तहृदयः एवं सन् असुरान् जगाम तेभ्योसुरेभ्यः एतां शारीरात्मबुद्धिरूपामुपनिषदं प्रोवाचेति। **श्लिष्टमिति** देहात्मवाचकं पदमुपदेशान्तरादिद्वारान्तरात्मव्यञ्जकम्। श्लेषाभिव्यञ्जकपदाभिन्नमित्यर्थः। **अधीति** निवृत्तिप्रवृत्तिमार्गाधिकारपरीक्षार्थम्। देहस्याप्यात्मत्वात्। उभयोः कुत्रात्मन्यधिकार इति **न चेति**। अक्षिपुरुष ब्रह्मदिदर्शयिषोः प्रजापतेर्मिथ्याभाषितं प्रतारकत्वं चेत्यर्थः। न च भाषितमित्यनेनानन्वयः शङ्क्यः। कर्मादीनामपि संबन्धसामान्ये षष्ठ्यभिधानात्। प्रजापतेरिति कर्तरि षष्ठ्यङ्गीकारात्। **अबादाविति** आदिपदेन देहः। **कथनेनेति** पराभवरूपफलकथनेन तदुभयस्य मिथ्याभाषितप्रतारकत्वरूपस्याभावादिति। इति सूत्रार्थसमाप्तौ। तथा चात्मोपनिषदुक्तेषु त्रिष्वात्मसु विरोचनस्य बाह्यात्माधिकारात् न तदुभयमित्यर्थः॥ १४॥

सुखविशिष्टाभिधानादेव च ॥ १५ ॥ अभिधानमिति अक्षिपुरुषं निर्दिश्य

सना विधीयेत, एष आत्मेति । तदा अमृतादिवचनं व्यर्थं स्यात् । तद्धर्माणां पूर्वमेव प्राप्तत्वात् । तस्मादमृतमानन्दः, अभयं चिद्, ब्रह्म सत्, सच्चिदानन्दरूप आत्मेत्युक्तं भवति । अत, एष इत्यक्षिपुरुषं निर्दिश्य सुखविशिष्टमभिधीयते । सच्चितोर्न ब्रह्मख्यापकत्वमिति सुखमेव निर्दिष्टम् । अतः सुख-

भाष्यप्रकाशः ।

अयमर्थः । अत्र ह्येतद्विशेषणत्रयं पूर्वमभिधायाग्रे संयद्वामत्वादय उच्यन्ते । तेनैतत्त्रयस्य स्वरूपबोधकत्वमिति ज्ञायते । तच्च सच्चिदानन्दात्मकमतोऽत्राऽमृतपदमानन्दवाचकमिति सनत्कुमारेण सुखरूपं भूमानं प्रस्तुत्य, यो वै भूमा तदमृतमिति छान्दोग्ये श्रावणाज्ज्ञेयम् । अभयपदं चिद्वाचकमिति त्वभयं ह वै जनक प्राप्तोऽसीति ज्ञानोपदेशोत्तरमभयपदेनोपसंहारात् । ब्रह्मपदं सद्वाचकमिति च सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्र प्रथमनिर्देशादिति । एवं सति पूर्वं यदग्निभिः कंपदेन सुखविशिष्टमुक्तं तदत्राऽमृतपदेनाभिधीयते । नच सच्चितोरपि स्वरूपभूतत्वाद् ब्रह्मविख्यापकत्वं शङ्क्यम् । तयोर्यथायथं जडे जीवे च प्रव्यक्तत्वेनैकान्तिकतथात्वाभावात् । अतः

रश्मिः ।

सुखविशिष्टमभिधीयते एष आत्मेति होवाचेत्यनेन एतदमृतमित्यनेन वा तदभिधानं शब्दविशेषम् । **एतदि**ति अमृताभयब्रह्मात्मकमक्षिपुरुषस्य विशेषणत्रयम् । **श्रावणा**दिति नवमप्रपाठके श्रावणात् । **अभयं हे**ति बृहदारण्यके श्रुतिरियम् । **ज्ञानोपे**ति ज्ञानं चित्पदार्थः । **प्रथमे**ति तथा च पाठक्रमे सत्यत्वेन ब्रह्मोपस्थितेः सद्ब्रह्मेति भावः । न च सति साधुः सत्यमिति सत्यपदं पूर्वाधिकरणे व्युत्पादितमत्र प्रत्ययरहितं कुतो व्याकृतमिति शङ्क्यम् । व्युत्पत्तिर्व्याकरणरूपाङ्गसिद्धा प्रत्ययरहितं सत्पदं ब्रह्मवाचकं 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति श्रुत्या सत्पदमत्र व्युत्पत्तिसिद्धार्थवाचकम् । 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत' इति गीतातः । प्रसङ्गादुच्यते । सत्तामात्रमित्यत्र वर्णागमः सन्मात्रमित्यर्थ इति । **पूर्वमि**ति आत्मविद्यानिरूपणे छान्दोग्ये । एतावत्पर्यन्तमेतदमृतमित्यारभ्याभिधीयते इत्यन्तभाष्यतात्पर्यमुक्तम् । तस्य भाष्यस्यार्थः सुखविशिष्टस्याभिधानमेतदमृतमिति श्रुत्युक्तसुखविशिष्टाक्षिपुरुषमभिधीयते अनेन एतदमृतमिति वाक्येनेत्यत एतदमृतमितीत्यन्तं वाक्यं सुखविशिष्टाभिधानादिति सूत्रांशस्य पर्यायः । उपासनार्थे धर्मापेक्षणात् कुतोमृतादिवचनं व्यर्थमित्यत आहुः **तद्धर्माणा**मिति । उपासनाधर्माणाम् । **पूर्वं** संयद्वामत्वादीनाम् । **तस्मा**दिति उपासनार्थत्वाभावात् संयद्वामत्वादिविशेषणैर्लैयादिरूपब्रह्मासाधारणधर्माणामुक्तत्वाच्च । अमृतादिपदानामानन्दादौ शक्तिः भाष्यप्रकाश उक्तैव । ननु पदत्रयप्रतिपाद्यब्रह्मण्येकसत्पदशक्तिः कथमित्याकाङ्क्षायामस्त्येवमेव यदि तल्लक्षणलक्षितं ब्रह्ममात्रं प्रतिपाद्यं स्यात्त्वेवं सर्वोपनिषदुक्तलक्षकस्यात्मनो निरूपणीयत्वादित्याहुः **सच्चि**दिति । तथा च सर्वोपनिषद्यात्मलक्षणं त्वंपदार्थादौपाधिकाद्विलक्षण आकाशवत्सूक्ष्मः केवलः सत्तामात्रतत्पदार्थश्चात्मेत्युच्यत इति । त्वंपदार्थादौपाधिकाद्विलक्षणः अमृतमभयं चैतत् समीपतरवर्ति आकाशवत्सूक्ष्मः केवलश्च सत्तामात्रतत्पदार्थः ब्रह्म सदिति भाष्येणोक्तं तदेतदाहुः **आत्मेत्युक्तं भवती**ति । सुखविशिष्टाभिधानादित्यत्र सूत्रांशे करणव्युत्पत्तिमाहुः **अत** इति । एष आत्मेति होवाचेत्यनेन निर्दिश्य सुखविशिष्टमाचार्येणाभिधीयते एतदमृतमित्यनेनेति करणे ल्युट् । सच्चितोरिति भाष्यं विवरांबभुवुः **न च सच्चितो**रिति । **ऐकान्तिके**ति एकोऽद्वितीयो अन्तः स्वरूपं स्वार्थे ठक् ।

विशिष्टाभिधानादेव ब्रह्मवाक्यमिति। एषा मुख्योपपत्तिरित्येवकारः। चकारात् सदादिभिरपि। तस्माद् ब्रह्मैवाक्षिपुरुषः॥ १५॥

श्रुतोपनिषत्कगत्यभिधानाच्च॥ १६॥

स्वरूपतो निर्णीय फलतो निर्णयमाह। श्रुतोपनिषत्कस्य, श्रुता उपनिषद् विद्या येन तस्य ब्रह्मविदो या गतिर्देवयानाख्या साऽक्षिपुरुषविदोऽप्युच्यते। अथ यदु चैवास्मिन् शव्यं कर्म कुर्वन्ति, यदि च नार्चिषमेवाभियन्तीत्युपक्रम्य

भाष्यप्रकाशः।

सुखमेव विशेषणत्वेन निर्दिष्टम्। सदादिभिरिति आनन्दसहभूतैः सचित्संयद्वामत्वादिभिः।

रामानुजाचार्यास्त्वेतदग्रे, अत एव च स ब्रह्मेति सूत्रान्तरं पठन्ति। अर्थस्तु, अत एव सुखविशिष्टाभिधानादेव, स खंपदोपदिष्ट आकाशो ब्रह्मेति। तत् पूर्वसूत्रेण गतार्थत्वादन्यैर्नाद्रियते॥ १५॥

श्रुतोपनिषत्कगत्यभिधानाच॥ १६॥ एतत्सूत्रप्रयोजनमाहुः स्वरूपत इत्यादि। फलत इति। फलस्य तात्पर्यलिङ्गत्वात् तथेत्यर्थः। ब्रह्मविदो या गतिरिति एतस्या ब्रह्मविदो गतित्वं छान्दोग्य एव पञ्चाग्निविद्यायां तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्तीत्यादिना श्रावितम्। सैवात्र प्रत्यभिज्ञायते। गीतायामपि।

'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः'॥

इत्यनेन च। अथेत्यादि वाक्यार्थस्तु, अथेति प्रतिज्ञायाम्। यदु चैव यदि, अस्मिन् अक्षिपुरुषवेत्तरि मृते, शव्यं शवसंस्काररूपमौर्ध्वदैहिकं कुर्वन्ति ज्ञातयो, यदि च न कुर्वन्ति, उभय-

रश्मिः।

तस्य तथात्वं ख्यापकत्वं तस्याभावात्। आनन्देति इदं विशेषणं सूत्रीयसुखसंबन्धिपदार्थसमुच्चयसूचनायान्यथा घटादीनामपि समुच्चायकश्चकारः स्यादिति। विशिष्टं निर्दिष्टं वेदितव्यमिति शेषः। पूर्वसूत्रेणेति अन्तरसूत्रे पूर्वपक्षे आत्मविद्या चेत्युपसंहारदर्शनात् इति भाष्येण यदेव कं तदेव खं यदेव खं तदेव कं प्राणं चाहास्मै तदाकाशं चोचुरिति श्रुतिस्मरणात्तस्याश्च निःसंदिग्धत्वाद्गतार्थत्वादित्यर्थः। नाद्रियत इति अनादरान्न लिख्यते रामानुजाचार्यान् प्रत्येव सूत्रप्राकट्यादिति भावः॥ १५॥

श्रुतोपनिषत्कगत्यभिधानाच॥ १६॥ स्वरूपत इति अक्षिपुरुषं स्वरूपतो निर्णीयेति भाष्यार्थः। ननु फलस्य निर्णयः केन प्रकारेण अक्षिपुरुषं ब्रह्मेत्यक्षिपुरुषस्य ब्रह्मत्वनिर्णयः इत्याकाङ्क्षायामाहुः फलस्येति। अक्षिपुरुषब्रह्मत्वे तात्पर्यस्य वक्तुरिच्छात्मकस्य तत्प्रतीतीच्छयोच्चरितत्वात्मकस्य प्रस्थानरत्नाकरोक्तस्य वा लिङ्गत्वं हेतुत्वं तस्मात् तात्पर्यविषयत्वेन प्रकारेणाक्षिपुरुषस्य तथाब्रह्मत्वमित्यर्थः। प्रतीके ब्रह्मविद इति प्रविदो या गतिरित्यपि भाष्यपाठः। अर्थस्त्वयमेव ब्रह्मण एव प्रकृष्टत्वेन तद्विद एव प्रवित्त्वादिति। छान्दोग्यार्थस्तु साधनाध्यायेस्ति प्रयोजनाभावान्नोच्यते। प्रत्यभीति तेर्चिषमेवाभिसंभवन्तीति वाक्येन सेयं प्रविदो गतिरिति तत्तेदन्ताप्रकारकं ज्ञानं क्रियत इत्यर्थः।

'चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति। एष देवपथो ब्रह्मपथ इत्येतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' इति ब्रह्मविदोऽप्येष एव मार्गः पुनरावृत्तिरहितः। चकारस्तूक्तसमुच्चयेनाधिकरणपूर्णत्वबोधकः ॥१६॥

भाष्यप्रकाशः ।

थापि तेषामक्षिपुरुषविदां न परलोके फलवैषम्यमित्युक्त्वा विद्यावतां गमनप्रकारं वदति अर्चिष-मित्यादिना अमानव इति। मनुकृतसृष्टावनुत्पन्नः। मनवश्च शिवपर्यन्ता बोध्याः। 'सलोकपाला मुनयो मनूनामाद्यं मनुं प्राञ्जलयः प्रणेमुः' इति चतुर्थस्कन्धे मैत्रेयेण महादेवेऽपि मनुपदप्रयो-गात्। तेन भगवतो दूत इत्यर्थः। देवपथ इति देवैर्गमयितृभिरुपलक्षितो मार्गः। ब्रह्मपथ इति। ब्रह्मणः प्राप्यस्य परस्य संबन्धी मार्गः। आवर्तमिति। आवृत्तिसाधनभूतमार्गम्।

मायावादिनस्तु, ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः सद्योमुक्तिमेवाङ्गीकुर्वाणा इमां गतिं नाद्रियन्ते। तत्तु व्याख्येयश्रुतिविरोधादेवोपेक्ष्यम्। अतिकृपातदभावसहकारेण सद्योमुक्तिक्रम-मुक्त्योरुपपत्त्योक्तश्रुतिविरोधाभावेनैतद्वक्तुर्भ्रान्तत्वापत्त्या चैतत्त्यागायोगादिति ॥ १६ ॥

रश्मिः ।

अग्निरिति अग्न्यभिमानिनी देवता। एवमग्रेपीति टीकायाम्। अर्चिषमिति अर्चिरभिमानिनीं देवता-मेवाभिसंभवन्ति प्रतिपद्यन्त इत्यादिनेत्यादिपदेन 'अर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तन्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषः' इत्यादि। अर्थस्तु अर्चिषः सकाशादहर्देवतां अह्न आपूर्यमाणपक्षं शुक्लपक्षं देवतां आपूर्यमाणपक्षाद्यान् षण्मासान् सविता उदङ् उत्तरं देशमेति तान् षण्मासान् देवताः मासेभ्यः संवत्सरदेवतां संवत्सरा-दादित्यं सूर्यं आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतमभिसंभवन्तीति प्रत्येकमभिसंबद्ध्यते। तत्पुरुष इति तत्र स्थाने स्थितानेतान् उपासकान् स अमानवं व्याचख्युः अमानव इतीति। दूत इति दूतो ब्रह्म गमयतीत्यर्थः। देवैरिति मध्यमपदलोपी समास इति भावः। अङ्गीकुर्वाणा इति स्वेभ्यो-मुक्तिरित्यात्मनेपदविग्रहकं पदमुक्तम्। कुर्वत इति कुर्वाणा इति। नाद्रियन्त इति श्रुता अनुष्ठिता उपनिषद्रहस्यं सगुणब्रह्मोपासनं येन स श्रुतोपनिषत्कः तस्य या गतिस्तस्या अभिधाना-दिति सूत्रार्थं वदन्तो नाद्रियन्ते। शंकरभाष्ये तु श्रुतरहस्यविज्ञानस्य या गतिर्देवयानाख्यासाऽक्षि-पुरुषविदोभिधीयमाना दृश्यत इति सूत्रार्थः। व्याख्येयेति क्रममुक्तिबोधकव्याख्येया अर्चि-षमेवाभिसंभवतीत्यादिश्रुतिस्तद्विरोधादित्यर्थः। ननु कारणवैजात्याभावेन फलवैजात्यस्य वक्तु-मशक्यत्वात्सद्योमुक्तिरेवैका मुख्या क्रममुक्तिस्तु सगुणब्रह्मपरेत्याकाङ्क्षायां कारणवैजात्यमाहुः अतिकृपेति। एतच्चतुर्थचरणे आनुमानिकमप्येकेषामित्यधिकरणे स्फोटयिष्यति। उक्तेति सद्यो-मुक्तिबोधकश्रुतीत्यर्थः। एतद्वक्तुः क्रममुक्तिवक्तुः प्रजापतेः। एतदिति। क्रममुक्तिप्रतिपादकश्रुति-जातस्य निर्गुणमुक्तिप्रतिपादकत्वत्यागायोगात्। न च सगुणपरत्वेनास्या उपपत्तिरिति शङ्क्यम्। सगुणनिर्गुणकल्पनाया असंगतत्वस्य जन्माद्यस्य यत इत्यधिकरणे उक्तत्वात् साधनाध्याये वक्ष्य-माणत्वाच्च। भाष्ये। पुनरावृत्तीत्यादि तथा च श्रुतिः 'अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयन्ते' इति श्रुतेः। श्रुत्यर्थस्तु उत्तरेण उत्तरायणेन तपसा पुरा-णोक्तसाधनालोचनेन तपसा सर्वात्मभावेन वा श्रत् सत्यं दधातीति श्रद्धा तया विद्यया 'विद्यैव तु निर्धारणात्' इति सूत्रात्सर्वात्मभावेनान्यया च विद्यया कर्मरूपया ज्ञानमन्विष्य इष्ट्वा इच्छा-

अनवस्थितेरसंभवाच्च नेतरः ॥ १७ ॥

इदमेवाधिकरणं पुनर्निषेधमुखेन विचारयति। ननूपासनापरत्वेऽपि सर्वमुपपद्यते। तद्धर्मव्यपदेशेनैवोपासनोपपत्तेः। अतः सर्वा उपपत्तयो व्यपदेशिवद्भावेन संगच्छन्त इत्येवं प्राप्त उच्यते। इतरो नात्र वाक्यार्थः। अनवस्थिते-

---

भाष्यप्रकाशः ।

अनवस्थितेरसंभवाच्च नेतरः ॥ १७॥ सूत्रप्रयोजनमाहुः इदमित्यादि । तथाचोक्ताधिकरणद्वयविषयवाक्ये उपासनाप्रसङ्गाभावेन संदेहानुदयादत्र तु तदुदयात् पुनर्विचार इत्यर्थः । पूर्वपक्षं ग्राहयन्ति नन्वित्यादि । विभजन्ते तद्धर्मेत्यादि । प्रतिबिम्बपुरुषस्य ह्युपासना ब्रह्मत्वेन कर्तव्यात्रोच्यते । ब्रह्मत्वं तु तदैव बुद्धावारोहति, यदा ब्रह्मधर्मास्तत्र व्यपदिश्यन्ते । अतो व्यपदेशिवद्भावेन व्यपदेशवता ब्रह्मणा तुल्यं वर्तमानतया प्रतिबिम्बपुरुषेऽवगते उपासना सिध्यतीति तत्परत्वे सर्वा उपपत्तयो गत्यभिधानान्ताः संगता भवन्तीति दर्शनश्रुतिसंकोचो न युक्तस्तस्याः प्रथमावगतत्वेनासंजातविरोधतया मुख्यत्वादित्यर्थः । सिद्धान्तं व्याचक्षते इतरो नेत्यादि । भवेदिति दृश्यत इति पदेन दृश्यतया प्रतिपाद्यं भवेत् । अयमर्थः । त्वया ह्यक्षिस्थाने दृश्यत्वकथनात् प्रतिबिम्बपुरुषो वाक्यार्थत्वेनापाद्यते । तत् तदा स्याद् यदि दृश्यत्वं तस्य नियतं स्यात् । तदेव तु न । कुतः । अस्थिरत्वात् । तथाहि । किमत्राचार्येण स्वचक्षुर्गत

रश्मिः ।

विषयं कृत्वा अभिजयः स्वाधीनीकरणं यत्नः सर्वात्मभावे न त्वादित्यमण्डलमध्यवर्तिनः स्वाधीनीकरणं योग्यत्वात् । अन्ये तु ब्रह्मामृतवर्षिण्यां अथ देहपातानन्तरं ब्रह्मचर्यादितपसा हेतुनात्मानमनुसंधाय तद्विद्यया ध्यानाख्ययोत्तरमार्गमर्चिराद्युपलक्षितं प्राप्य तेनादित्यादिद्वारा कार्यं ब्रह्म प्राप्नुवन्तीत्यर्थमाहुः । **चकारस्त्वित्यादि** उक्तसूत्रार्थसमुच्चयरूपार्थेन साकमधिकरणचरमवर्णतिरोभावस्य व्यञ्जनया बोधक इत्यर्थः । एतेन निपातस्य समुच्चयाभिधायकत्वमधिकरणचरमवर्णध्वंसस्य द्योतकत्वमित्युक्तम् ॥ १६ ॥

अनवस्थितेरसंभवाच्च नेतरः ॥ १७॥ पूर्वत्रानन्दमयाधिकरणे नेतरोनुपपत्तेः इति सूत्रोपन्यासः सर्वत्र प्रसिद्धोपदेशात् इत्यधिकरणे अनुपपत्तेस्तु न शारीरः इति सूत्रोपन्यासोऽत्र तु अधिकरणोपन्यासस्तद्बीजं संदेहोदयमाहुः **तथाचेति** । उक्ताधिकरणद्वयं आनन्दमयसर्वत्र प्रसिद्धोपदेशादित्यधिकरणद्वयम् । तद्विषयवाक्ये को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यादित्यत्र स क्रतुं कुर्वीतेत्यत्र च पूर्वाधिकरणयोर्निषेधनिरूपणं नाधिकरणेन कृतं तत्र हेतुमाहुः **उपासनेति** । **विचार** इति अधिकरणात्मकविचारः अधिकरणेन विचारो वा । विषयसंदेहोपव्यक्तेः पूर्वपक्षमाहुरित्याहुः **पूर्वेति** । **अत** इति भाष्यमवतारयामासुः **अत** इति । **व्यपेति** विशिष्टो ह्यपदेशो व्यपदेशः सोस्यास्तीति व्यपदेशी मुख्यस्तत्तुल्यत्वेनेत्यर्थः । तदेवाहुर्**व्यपेति**। **तुल्यमिति** 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिः । इतिवदित्यास्यार्थ उक्तो अग्रे भावः सत्ता तदर्थमाहुः **वर्तेति** । सदत्र वर्तमानं तस्य भावो वर्तमानता सत्ता तया । **दर्शनेति** य एषोऽक्षिणि पुरुषो दृश्यते इति श्रुत्युक्ता दर्शनश्रुतिर्दर्शननिरूपको निरपेक्षो रवस्तस्याः संकोच इत्यर्थः । **इतरो** नेत्यारभ्य **सुतरामनवस्थिति**रित्यन्तं भाष्यं विवरामासुः **अयमर्थ**

रस्थिरत्वात् । उपदेशकवाक्यत्वादुपदेष्टुरेव चक्षुर्गतं भवेत् । तथाच वक्तुर्दर्शनाभावादनाप्तत्वम् । द्रष्टुरपगमे चापगच्छति सद्वितीये तु सद्वितीयः । उपासनाकाले च सुतरामनवस्थितिः । सद्वितीयोपासनायामपि श्रवणमननयो-

---

भाष्यप्रकाशः ।

उपदिश्यते, परचक्षुर्गतो वा । आद्ये वक्तुरनाप्तत्वादस्थिरत्वम् । द्वितीये तु द्रष्टरि पश्यत्येव प्रतिबिम्बात् तदपगमे प्रतिबिम्बस्याप्यपगमादस्थिरत्वम् । द्रष्टरि सद्वितीये तस्य सद्वितीयत्वादेकत्वोपदेशस्य विरोधादस्थिरत्वम् । उपासनाकाले च चित्तस्य स्थैर्याय नेत्रनिमीलने प्रतिबिम्बमात्राभावादुपास्याभावादुपासनायाः सुतरामस्थिरत्वम् । यदि च द्वितीयं विना तदसंभवात् पत्नीद्वितीयस्य यागादिवत् सद्वितीयस्यैवोपासनाऽत्रोपगम्यते, तदा तु वाक्यश्रवणकाले श्रोतुरेकत्वादुपासनाकाले चान्यसापेक्षत्वाच्छ्रवणमननयोः प्रकारभेदेन भिन्नविषयत्वात् प्रमीयमाणा-

रश्मिः ।

इति । **वाक्येति** विषयवाक्यार्थत्वेन । **वक्तुरिति** स्वचक्षुर्गतस्य स्वेनादर्शनात् यथादृष्टार्थवादित्वाभावेनानाप्तत्वादित्यर्थः । यदि च दर्पणादिना स्वचक्षुर्गतं पश्यन्नुपदिशतीति कल्प्यते तदा तु दर्पणाद्यप्रयोज्यदर्शने मनोभावे मन्तुर्दर्शनाभावादनाप्तत्वादस्थिरत्वमित्यपि द्रष्टव्यम् । अन्यत्रमना अभूवं नापश्यमन्यत्रमना अभूवं नाश्रौषमिति । भाष्यार्थस्तु अवस्थितिः स्थिरस्य धर्मोऽनवस्थितिरस्थिरधर्मस्तदाहुः **अस्थिरत्वादिति** । **अनाप्तत्वमिति** ततो व्यवहितहेतोरस्थिरत्वमिति शेषः । अस्थिरत्वादितरो नात्र वाक्यार्थः इति । तथा च वस्तुनो य एषोक्षिणि पुरुष इति वाक्येन प्रतिपन्नस्य प्रतिबिम्बत्वेनोपादानेऽनाप्तोक्तत्वात् य एष इति वाक्यस्याप्रामाण्यापत्तिरिति भावः । अप्रमाणवाक्यप्रतिपन्नस्य सदा विचारकोपासकहृद्यस्थिरत्वम् । विचारकहृदि अप्रामाणिकोक्तं न तिष्ठत्यनधिकारादिति । **द्रष्टुरिति** भाष्यं विवरामासुः **द्वितीये त्विति** । **अस्थिरत्वमिति** सदोपासनाऽविषयत्वमित्यर्थः । अस्थिरस्योपासना सदा न भवतीति भावः । **तस्येति** प्रतिबिम्बस्य । **एकत्वेति** पुरुषो दृश्यत इत्यत्रैकत्वस्य विवक्षितत्वादिति भावः । एतद्विरोधादस्थिरत्वं पूर्ववत् । **उपासने**तिभाष्यं विवरांबभूवुः **उपासनेति** । **अस्थिरत्वमिति** सदोपास्याविषयत्वम् । **सद्वितीये**ति भाष्यं विवरांचक्रुः **यदि चेति** । **अन्येति** श्रोतुर्गुर्वादिसापेक्षत्वात् प्रकारावेकत्वं द्वित्वं च तयोर्भेदेन **भिन्नविषयत्वा**द्येकविषयत्वात् । यथा प्रमीयमाणानुष्ठीयमानौ धर्मौ भावार्थपादभाष्ये निरूपितौ तद्वदुपासनायामाहुः **प्रमीयमाणेति** । वेदान्तेष्वपि मन्त्रब्राह्मणयोः सत्त्वम् । 'आनन्दमयमात्मा मे शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयास९ स्वाहा' इति महानारायणोपनिषच्छ्रुत्यां विरजाहोमरूपप्रयोगकरणत्वेन 'प्रयोगकरणभूतः शब्दो मन्त्रः' इति लक्षणकत्वात् मन्त्रत्वम् । एतदतिरिक्तस्य ब्रह्मविदाप्नोति परमित्यस्य प्रयोगकरणशब्दत्वाभावेन 'शेषे ब्राह्मणशब्दः' इति लक्षणकत्वाद् ब्राह्मणत्वम् । अतः प्रमीयमाणानुष्ठीयमाना चोपासना तयोरवस्थयोः सप्तमीद्विवचनान्तम् । एकविषये द्विविषया नास्ति द्विविषये एकविषयोपासना नास्ति इति वैरूप्यं ततोनवस्थितिश्चलत्वम् । न च 'य एषोक्षिणि पुरुषो दृश्यते' इति श्रुतिवाक्यस्य मन्त्रत्वं ब्राह्मणत्वं चेति संकर इति शङ्क्यम् । 'यत्र ब्राह्मणानां मन्त्र इति समाख्या स मन्त्रः' इति लक्षणादरेण मन्त्र इति व्यवहाराधीनाखण्डोपाधिरूपमन्त्रत्वाश्रयणेन संकराभावात् । ब्राह्मणानां व्यवहारमनतिक्रम्य श्रुतिवाक्ये

र्भिन्नविषयत्वादनवस्थितिः। वक्तुरेव नियमे गुरोर्निर्बन्धेन सुतरामनवस्थितिः।

किंच। मनसा ह्युपासनं कर्तव्यम्। तत्र चासंभव एव। तादृशधर्मवत्त्वं च न संभवति। आसुरत्वं च भवेदिति चकारार्थः। तस्मादक्षिस्थाने सहज एव यो भगवानस्ति तत्परमेवैतद्वाक्यमिति सिद्धम्। व्यापकसर्वगतस्य सर्वतः पाणि-

भाष्यप्रकाशः।

नुष्ठीयमानावस्थयोरुपासनायाः प्रकारैक्याभावेन वैरूप्यादनवस्थितिः। यदि च श्रवणदशायां वक्तुः सत्त्वाद् वैरूप्यं परिह्रियते, तदा तु वक्तुरेव सद्वितीयत्वनियमे गुरोर्निर्बन्धापत्त्या निर्बन्धस्य कर्तुमशक्यत्वेन च सुतरां दुष्टत्वादनवस्थितिरिति। एवमनवस्थितिं व्युत्पाद्यासंभवं व्युत्पादयन्ति किंचेत्यादि। तत्रेति मनसि। तथाच प्रतिबिम्बस्य संनिधापयितुमशक्यत्वा-दुपासनाया असंभव इत्यर्थः। उपासनार्थं धर्माणां कल्पितत्वाङ्गीकारे सर्वैर्व्याख्यातस्य वक्ष्यमाणप्रकारकस्यासंभवस्येष्टत्वापादने पूर्वपक्षनिरासस्य कर्तुमशक्यत्वादेवं व्याख्यातम्। अथे-तरव्याख्यातमपि संग्रहीतुं चकारसूचितं दूषणद्वयमन्यदाहुः तादृशेत्यादि। आत्मत्वाऽमृतत्वा-दिधर्मवत्त्वं प्रतिबिम्बस्य न संभवति। तस्या उपासनायाः प्रतिबिम्बपरत्वे तस्या आसुरत्वं विरोचनप्रतिपन्नत्वेन श्रावितं भवेत्। ततश्च गतिविरोधो भवेदिति चकारार्थ इत्यर्थः। सिद्धमाहुः तस्मादित्यादि। सहज इति स्वाभाविकः। ननु तथापि व्यापकस्य ब्रह्मणः स्वल्पे स्थाने स्थितिः कथमुपपद्यत इत्याकाङ्क्षायां तामुपपादयन्ति व्यापकेत्यादि। तथाच सर्वतः

रश्मिः।

मन्त्रत्वब्राह्मणत्वयोरेकतरदङ्गीकुर्मः। वक्तुरेवेति भाष्यं विवृण्वन्ति स्म **यदि चेति**। **वैरूप्यमिति** श्रवणकालेपि श्रोतुः सद्वितीयत्वेनोपासनाया प्रकारैक्याद्वैरूप्यं परिह्रियत इत्यर्थः। **सद्वीति**। श्रोतृ-सद्वितीयत्वे नियमः 'सप्तमी शौण्डैः' इत्यत्र सप्तमीति योगविभागात् सुप्सुपेति सूत्राद् वा समासः। गुरोर्निर्बन्धो निराधित्वम्। संबन्ध इति यावत्। स गुरुमेवाभिगच्छेदिति श्रुत्याभिगम्यस्याज्ञसव्यत्वाभावात् द्रव्यादिसंकोचादिनापि गुरुसंबन्धाभावाच्च। कर्तुमशक्यत्वेनेत्यर्थः। अहरह उपास्यस्य गुरुनिर्बन्धकर-णाशक्यत्वप्रयुक्तो न कदापि उपास्यत्वापत्तिदोषस्तत्कर्मत्वं दुष्टत्वादित्यत्र कर्मणि क्तप्रत्ययात्। इती-त्येकहेतुसमासौ। **असंभवमिति** द्वितीयं सौत्रं हेतुम्। **संनिधेति**। ननु चक्षुष्ठस्य सर्वस्थब्रह्मवन्मनसि संनिधापनसंभवात् कुतोऽसन्निधापनमिति चेन्न उपासायाश्चित्तशोधकत्वात्तदनुष्ठानात्पूर्वं चित्तस्याशुद्ध्या तथात्वात्। शुद्धे एव दर्पणादौ प्रतिबिम्बनियमात् तथा चान्योन्याश्रयादसंभव इत्यर्थः। अमृतत्वादीनां निरुपाधिकानां प्रतिबिम्बेष्वसंभवादिति शंकराचार्यादयो व्याचख्युस्तदनादरे बीजमाहुः **उपासनेति**। **वक्ष्यमाणेति** तादृशेत्यादिभाष्यविभागे वक्ष्यमाणेत्यर्थः। **आपादने** सति। **पूर्वपक्षेति** उपास-नापरत्वेपि सर्वा उपपत्तयो व्यपदेशिवद्भावेन संगच्छन्त इति पूर्वपक्षनिरासस्य। **इतरेति** शंकरा-चार्यादिभिर्व्याख्यातमसंभवमपि। **चकारेति** नच वाचकत्वमुपसर्गस्य स्वमतेप्यस्ति तत्कुतो न व्याकृ-तमिति वाच्यम्। एतेषां प्रस्थानरत्नाकरे वैयाकरणमतादरात्। अनुक्तसमुच्चयेभिधा नैयायिकानां मम त्वमनुक्तसमुच्चये व्यञ्जनेति भावः। चकारेति व्यञ्जनया चकारार्थ इत्यर्थः। तामिति स्थितिम्। पूर्वा-धिकरणेऽस्य प्रश्नस्योत्तरं व्यञ्जनया कृतमत्र त्वभिधया स्थितिमुपपादयन्ति स्मेत्यर्थः। **सर्वत** इति सर्वतः सार्वविभक्तिकस्तसिः पाणयः पादा अन्ताश्च यस्य सः सर्वतः पाणिपादान्तः तस्य भावः सर्वतः पाणि-

पादान्तत्वादानन्दमूर्त्तिर्भगवानेव । ब्रह्मवादे त्वेषैव मर्यादा । सगुणवादो ब्रह्मवादाज्ञानादिति ॥ १७ ॥

इति प्रथमाध्याये द्वितीपादे पञ्चममन्तर उपपत्तेरित्यधिकरणम् ॥ ५ ॥

भाष्यप्रकाशः ।

पाणिपादान्तत्वेन पुरुषत्वस्य प्राकट्यात् स्वल्पमपि स्थानं पर्याप्तं भवतीत्यत उपपद्यत इत्यर्थः । ननु सगुणस्योपाधिविशेषपरिच्छिन्नतया तावति स्वल्पे स्थाने स्थितिरुपपद्यत एवेति तद्विहाय सर्वतः पाणिपादान्तत्वं किमर्थमाद्रियत इत्यत आहुः ब्रह्मवाद इत्यादि । ब्रह्मैव सर्वमिति वादो ब्रह्मवादः । स च 'बहु स्याम्' इत्यादिश्रुतिसिद्धः । तत्र च सर्वतः पाणिपादान्तत्वं श्रुतौ गीतायां च सिद्धमतस्तथाङ्गीक्रियते । यः पुनः सगुणवादः स तु ब्रह्मवादाज्ञानादेकदेशमादाय जघन्याधिकारिणः प्रति प्रवृत्तोतो नाद्रियत इत्यर्थः । भोगस्त्वक्षिपुरुषस्य मण्डलब्राह्मणे, स एष एवेन्द्रो योऽयं दक्षिणेऽक्षन् पुरुषोऽथेयमिन्द्राणीत्यादिना हृदयदेशे जीवसंसारदशायां श्रावितः । इन्द्राणीं च भगवान् स्वात्मानमेव कृतवान् । 'स आत्मानमेव द्वेधाऽपातयत् ततः पतिश्च पत्नी चाभवताम्' इति पुरुषविधब्राह्मणश्रुतेः । एवं चैतेनाधिकरणत्रयेण संभोगप्राप्तिसूत्रभाष्ये सूचितं

रश्मिः ।

पादान्तत्वं तेन । **प्राकट्या**दिति तावत्या मायाया अपसरणेन प्राकट्यात् । **उपाधी**ति उपाधिर्माया अक्षिपुरुषोपाधिस्तूपाधिविशेष इत्यर्थः । **ब्रह्मैवे**ति मध्यमपदलोपी समासः । **बहु स्या**मिति एकोहं बहु स्यामित्यर्थः । श्रुताविति ।

'सर्वतः पाणिपादान्तं सर्वतोक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति' ॥ इति ।

श्रुतौ श्वेताश्वतरे तु 'सर्वतः पाणिपादं तत्' इति पाठभेदेन गीतायां त्रयोदशे च । **सगुणवाद** इति आरोपापवादसंगत्या 'स्वरूपं द्विविधं चैव सगुणं निर्गुणं तथा' इति गोपालतापिनीयश्रौतगुणगणवानेकः गुणानपोह्य शुद्धोऽपर इति । **एकदेश**मिति अरूपवत्सूत्रोक्तम् । **जघन्ये**ति अरूपवत्सूत्रे एकदेशिमतेन समाधानमाहेति भाष्यात् । उत्तमाधिकारिणः प्रति तूभयव्यपदेशाधिकरणोक्तसिद्धान्तसिद्धः वृद्धिह्रासभाक्त्वसूत्रसिद्धान्तसिद्धो अथ वा आत्मकृतेः परिणामादिति सूत्रसिद्धो वा ब्रह्मवादः प्रवृत्तः । यस्त्वत्रैवादृश्यत्वादिगुणकसूत्रे ब्रह्मवादो वक्ष्यते यश्च 'अतः प्रबोधोस्मात्' इत्यधिकरणे मुग्धेर्धसंपत्तिसूत्रे वक्ष्यते स ब्रह्मवादो ब्रह्मस्वरूपविषयो द्वितीयो जीवविषय इति ब्रह्मैव सर्वमिति वाद इति विग्रहं न भजतः । ननु गोपापालतापिनीयश्रुत्या सगुणनिर्गुणविभागः कृत एवारोपापवादसंगत्या इति चेन्न तापिनीयानां ब्रह्मत्वात् । ननु ब्रह्म न भिद्यते इति चेन्न साकारं ब्रह्म न भिद्यते सकलयुक्त्या सिद्धत्वात् इतरस्त्वन्योन्यं भिद्यत एव सकलप्रमाणासिद्धत्वात् । श्रुत्यर्थस्तु नारायणकृतटीकायां कथितं सगुणं निर्गुणं च सकाम्या मेरोः शृङ्ग इत्यादिना । सगुणं पूर्वं ह्येकमेवाद्वितीयं ब्रह्मासीदित्यादिना निर्गुणमुपासने, न वस्तुतत्त्वमपेक्षितमिति न्यायेनान्तर्ब्रह्मादिबुद्धिरेतस्मिंस्तत्त्वदृष्टिः क्रियत इत्याशङ्कानिवृत्त्यर्थं स्वरूपपदोपादानं तेन श्रीवत्सादिकं वस्तुतश्चित्स्वरूपादिकमेव न त्वारोप इति भाव इति । नन्वथ मायाशबलितं ब्रह्मासीदिति श्रुत्या सिद्ध्यतु सगुणनिर्गुणविभाग इति चेन्न सा श्रुतिरिन्द्रियशाबल्यमाह न तमःशाबल्यं तापिनीयोक्तं नापि सर्वोपनिषदि सदसती मायोक्ता तच्छाबल्यमाहेति । **असूचित**मिति । तथाच भाष्यं सर्वरूपत्वमानन्दरूपत्वं स्वकर्तृत्वं विशेषः तद्भावो ब्रह्मणि वर्तत इति ।

भाष्यप्रकाशः।

सर्वरूपत्वानन्दरूपत्वस्वकर्तृत्वभेदेन त्रिविधमपि वैशेष्यं साधितं ज्ञेयम्। एवं चात्र निर्दोषत्वरूपे वैशेष्य एव प्रकटसच्चिदानन्दरूपत्वात्मकं तज्ज्ञातुरपि दोषनिवारकत्वरूपं च हेतुद्वयमुपोद्घातत्वेनोक्तमितीदमपि तस्यैव शेषः।

अत्र विज्ञानेन्द्रेण काण्वपञ्चमाध्यायस्थं, यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति प्रश्ने प्रवृत्तम्, एष त आत्मा सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां

रश्मिः।

कथं साधितमित्यपेक्षायामाहुः **एवं चेति**। **निर्दोषत्वेति** सर्वरूपत्वे स्वस्वरूपलयकर्तृत्वं 'कूर्मोऽङ्गानीव सर्वतः' इतिवाक्यात् कूर्मवत्। अतो भगवान्निर्दोषस्तत्त्व इत्यर्थः। नन्वन्यद्वारापि प्रलयकर्तृत्वं संभवति स्वस्यैव प्रलयकर्तृत्वे वैषम्यनैर्घृण्यं च स्यादिति चेन्न आनन्दरूपत्वे आनन्दभुक् इति श्रुतेः स्वाप्ययाच्चेति सूत्राच्च नान्यापेक्षत्वात्। ननु सगुणस्य लयकर्तृत्वमिति चेन्न स्वकर्तृत्वे स्वस्य निर्गुणात्मनः कर्तृत्वमिति त्रिभिः शब्दैर्निर्दोषत्वम्। तद्रूपे वैशेष्य इत्यर्थः। स्वारसिकार्थाहितनिर्दोषत्वमित्येवकारः। त्रिविधं वैशेष्यं निर्दोषत्वरूपं तस्यातिरिक्तत्वे गौरवमित्येवकारः। निमित्तं सप्तम्यर्थः। तादृशवैशेष्यार्थं विषयवाक्ये अमृताभयैतद्ब्रह्मपदैः प्रकटा ये सच्चिदानन्दास्तद्रूपत्वात्मकं हेतुं द्वितीयं 'यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते' इति स्वरूपतो निर्णय उक्तः। प्रथमो विषयवाक्यात् पूर्वं द्वितीयो हेतुरुक्तः। अक्षिपुरुषज्ञातुर्दोषः पापं तन्निवारकत्वम्। एतद्धेतुद्वयमुपोद्घातत्वेन प्रकृतं यद्वैशेष्यं तत्सिद्ध्यर्थां चिन्तां हेतुद्वयविषयिणीमुपोद्घातं विदुर्बुधाः। तत्त्वेनोपोद्घातविषयत्वेन। उपोद्घातपदं स्वविषये लाक्षणिकम्। इदमप्यधिकरणं तस्यैव शब्दविशेषादित्यधिकरणस्यैव शेषः। संभोगप्राप्तिसूत्रस्यैव वा शेषः। शब्दविशेषादित्यधिकरणस्य संभोगसूत्रात्पूर्वं समाप्तत्वात् वैशेष्ये हेतुद्वयमनुमानसंग्रहे त्वेवं ब्रह्म वैशेष्यं सर्वरूपत्वादिसत्ता उक्तभाष्यात् तद्वत् प्रकटसच्चिदानन्दत्वात् आत्मवत्। अत्र प्रत्येकं साध्यं अन्यथा हेतुसाध्ययोः सत्तासत्त्वयोरैक्ये साधारण्यप्रसङ्गात्। सत्त्वं हेतुः कथमिति चेन्न प्रकटसच्चिदानन्दत्वादित्यत्र प्रकटाश्च ते सच्च चिच्चानन्दश्च सच्चिदानन्दाः प्रकटसच्चिदानन्दास्तेषां भावः प्रकटसच्चिदानन्दत्वम्। अत्र त्वप्रत्ययस्य द्वन्द्वान्ते श्रूयमाणत्वात् 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते' इत्युद्घोषो वैयाकरणानामिति। जीवे साध्याभाववति हेतुवृत्तित्वाद्धेतोः साधारण्यं तद्वारणाय प्रकटेति हेतुविशेषणम् यथा वह्निमान् वह्निमत्त्वादित्यत्र। अत्र साध्यवत्पर्वतादि तदन्यो ह्रसन्त्यादिस्तद्वृत्तित्वात् साधारणो हेतुः हेतौ साधारण्योत्थापकत्वं फलम्। अतो ब्रह्म सर्वरूपत्वसत्तावत् प्रकटसच्चिदानन्दत्वात् पूर्ववत् आनन्दरूपत्वसत्तावत् प्रकटसच्चिदानन्दत्वात् तद्वदेव। स्वकर्तृत्वसत्तावत् प्रकटसच्चिदानन्दत्वात्तद्वदेवेति। न च दृष्टान्तासंभवः पक्षभिन्नत्वे सति निश्चितसाध्यवत्त्वस्य दृष्टान्तलक्षणत्वादिति वाच्यम्। एकदेशविकृतस्य ब्रह्मब्रह्मत्वसंबन्धावगाहिज्ञानस्यात्मत्वेन तस्य पक्षभिन्नत्वात्। नच शतशः सहचारादर्शनाद्व्याप्तिग्रहासंभव इति शङ्क्यम्। स्वमतप्रतिपन्नपक्षैकदेशे सहचारग्रहेपि क्षतेरभावात्। ब्रह्मवैशेष्यवत्। तज्ज्ञातृदोषनिवारकत्वात् यदेवं तदेवमात्मवत्। एवं वैशेष्ये सिद्धे तेनाक्षिपुरुषो ब्रह्म विलक्षणभोगं वैशेष्यात् यदेवं तदेवमात्मवत् यन्नैवं तन्नैवं जीववदित्यनुमानं फलितम्। **विज्ञानेन्द्रेणेति** भगवता इति शेषम्। **काण्वेति** काण्वानां बृहदारण्यकपञ्चमाध्यायस्थं अपरोक्षात् अपरोक्षं ब्रह्म सोदात् न ताद्वाह्मणमित्यत्र न तमिति प्राप्ते आत् यथा। **अशनायेति** अशनेति प्राप्ते सोर्या उरुणा धृष्णुनेति प्राप्ते उरुया धृष्णुयेति या यथा। तथा

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥ (१-२-६)

'य इमं च लोकं परं च लोकं सर्वाणि च भूतान्यन्तरो यमयति'इत्युपक्रम्य श्रूयते। 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी

भाष्यप्रकाशः ।

मृत्युमत्येतीति वाक्यमुपन्यस्य तदर्थस्य ब्रह्मत्वं चिन्तितम् । तदविरुद्धमित्युपरम्यते ।

शैवस्तु, अनवस्थितिसूत्रे भिन्नमधिकरणं स्वीकृत्य,

'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्' ॥

इति तैत्तिरीयमहोपनिषद्वाक्यं विषयत्वेनोदाहृतवान् । तत्र प्राणो वा ब्रह्म वेति संशय्य, ब्रह्मैवेति निर्णीय, तं शिवत्वेन निगमितवान् । तत्र शिवत्वांशे दूषणं प्रहस्ते प्रपञ्चितमित्युपरम्यते ॥ १७ ॥

इति पञ्चममन्तर उपपत्तेरित्यधिकरणम् ॥ ५ ॥

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥ पूर्वाधिकरणे भोगवैलक्षण्यसाधकं वैशेष्यमन्तर्गुहास्थितेऽक्षिपुरुषे चोपपादितम् । वाजसनेयिनां मण्डलब्राह्मणे, स एष एवेन्द्रो योऽयं दक्षिणेऽक्षन् पुरुषोऽथेयमिन्द्राणीत्यादिना हृदयदेशे तयोर्भोगस्य श्रावणात् । अतः परं तदेव वैशेष्यं सृष्टिदशायाममृतत्वादन्तर्यामिणि सर्वहृदयदेशवर्तिन्यस्तीति बोधनायेदमधिकरणमारभ्यत इत्याशयेन विषयवाक्यमुदाहरन्ति य इमं चेत्यादि । **श्रूयत** इति

रश्मिः ।

चाशनाया च पिपासा चाशनायापिपासे अशितुमिच्छा अशनायेति तट्टीकायाम् । **अत्येत्यतिक्रामति** । **तदवीति** । ननु तद्वाक्यस्यैव विषयवाक्यत्वापत्त्या कथमविरुद्धमिति चेन्न अधिकरणानां न्यायरूपत्वेनास्यामपि तत्संचारादविरुद्धमित्याशयात् । अथ नन्विदं विषयवाक्यमस्तूक्तविषयवाक्ये न्यायसंचारोस्तु इति चेन्न । विनिगमनाविरहेणाचार्यसंगृहीतविषयवाक्यग्रहणात् । अतो नान्तस्तद्धर्माधिकरणेन विरुद्धमिति न दूषयामो न प्रकृतव्याख्याने दोषमुद्भावयामोऽनेनेति वा । **तत्र शिवत्वे**ति तत्राधिकरणत्वांशे विषयवाक्यस्य विस्पष्टत्वेन विषयवाक्यराहित्याद्यङ्गत्वमेव दूषणम् । **प्रहस्ते** इति अत्रेशविश्वभुक्पदाभ्यां शिवत्वनिगमने कृते प्रहस्तः पुरुषपदविचारे 'स्वरूपाख्यानमात्रातः' इत्यस्याः कारिकायाः अन्ते यत्तु पुरुषो ह वा इत्यादिना बहूक्त्वोक्तं अङ्गुष्ठमात्रपुरुष इति तु ब्रह्मवाचकमेव अङ्गुष्ठं च········ नमस्तकेप्याश्रितत्वसंग्रहात् । ब्रह्माण्डपुरुषापादतलमस्तकं व्यापित्वबोधनेनैकदेशपातालवासिकालाग्निरुद्रव्युदासात् विरुद्धधर्माधारत्वस्फोरणादितीति । ईशविश्वभुगादिपदानां प्रवृत्तिस्तु एवंसतीशईशानईश्वरसर्वेश्वरपरमेश्वरमहेश्वरशंभुशिवशंकरादयः पत्यपत्यादयश्च शब्दाः मुख्यवृत्त्या योगेन च परब्रह्मण्येव प्रवर्तमानास्तत्रैव योगरूढाः इत्यनेन प्रहस्तेनोक्तेति ॥ १७ ॥

इति पञ्चमाधिकरणम् ॥ ५ ॥

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥ **भोगेति** अक्षिपुरुषो ब्रह्म, विलक्षणभोगं वैशेष्यात् । आत्मवत् । यन्नैवं जीववदित्येवं भोगवैलक्षण्यसाधकम् । **वाजेति** । श्रुत्यर्थस्तु स्पष्टः । **अमृतत्वादिति** । अन्तर्यामी वैशेष्यवान् अमृतत्वादात्मवदित्यनुमानम् । **अस्तीति** तथा च पूर्वाधिकरणेन सहास्य प्रसङ्गसंगतिरिति बोधितम् । **श्रूयत** इति अन्तर्यामि-

भाष्यप्रकाशः ।

वाजिशाखिनां बृहदारण्यके श्रूयते इत्यादीत्यादिपदेनाबग्न्याकाशवाय्वादित्यचन्द्रतारकदिग्विद्युत्स्तनयित्नुसर्वलोकसर्ववेदसर्वयज्ञसर्वभूतप्राणवाक्चक्षुःश्रोत्रमनस्त्वक्तेजस्तमोरेतआत्मान्तान्येवंविधानि वाक्यानि संगृह्यन्ते । एतेषु स्तनयित्न्वन्तानि दशाधिदैववाक्यानि । ततो यथायथमेकैकमधिलोकाधिवेदाधियज्ञाधिभूतवाक्यम् । ततः प्राणादीनि दशाध्यात्मवाक्यानीत्येवं चतुर्विंशतिः । स त आत्मेति माध्यन्दिनपाठे । काण्वपाठे त्वन्तरिक्षमधिकम् । आत्मस्थाने विज्ञानमुच्यत इति भेदः । ततः, 'अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्तम्' इत्युपसंहारः । वाक्यार्थस्तु य इमं च लोकमेतज्जन्मीनं देहं, परं च लोकं जन्मान्तरीयं देहं सर्वाणि भूतानि ब्रह्मादितृणस्तम्बान्तानि, अन्तरोऽभ्यन्तरवर्ती सन् यमयति दारुयन्त्रवद् भ्रामयति स्वसमुचितव्यापारं कारयतीत्येवं कार्यद्वारा तं ज्ञापयित्वा, तत्स्वरूपप्रश्न उद्दालकेन कृत इत्युपक्रमे उक्त्वा याज्ञवल्क्योक्तमुत्तरं, यः पृथिव्यामित्यादिना कथयति । तत्र तादृशान्तर्यामिसत्तायां, 'भीषाऽस्माद् वातः पवते', 'एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठतः' इत्यादिश्रुतीः प्रमाणत्वेनाभिप्रेत्याह यः पृथिव्यामित्यादि । तत्र यः पृथिव्यां तिष्ठन् सोऽन्तर्यामीत्युक्ते जडाद् भेदसिद्धावपि पृथिव्यवस्थितेषु सर्वप्राणिष्वतिप्रसङ्ग इति तद्वारणाय विशिनष्टि यः पृथिव्या अन्तर इति । अभ्यन्तर इत्यर्थः । एवं बहिष्ठप्राणिवारणेऽपि तदन्तःस्थस्याभिमानिनो वारणं न संभवतीति तद्वारणार्थं विशिनष्टि यं पृथिवी न वेदेति । पृथिव्यभिमानिनी देवतात्मा यं न वेद न जानातीति । तेन तद्भिन्न इत्यर्थः । एवं जडाज्जीवाच्च भेदे सिद्धेऽपि तस्य तत्र स्थितेः किं प्रयोजनमित्याकाङ्क्षायामाह यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीति । 'गामाविश्य च भूतानि धारयाम्यहमोजसा' इति भूतधारणकार्यसिद्ध्यर्थं, सा शरीरम् । तन्नियमनं च तत्कार्यसिद्ध्यर्थम् । अन्यथा तद्विसंमतौ कार्यं न सिद्ध्येदिति । अत्र द्वितीयमन्तरपदं नामधातुनिष्पन्नम्,

रश्मिः ।

ब्राह्मणे श्रूयते । काण्वमाध्यंदिनपाठभेदेन **अबग्नी**ति आपश्चाग्निश्चाकाशश्च वायुश्चादित्यश्च चन्द्रश्चेत्येवं समाहारद्वन्द्वः अधिदैवप्रतिपादकत्वात् ततः प्राणश्च स्तनयित्नुश्चेत्येवं द्वन्द्वः अध्यात्मप्रतिपादकत्वात् आत्मा अन्त आत्मान्ता तान्युक्तानि किं चैवंविधानि एतत्प्रतिपाद्यप्रतिपादकानि वाक्यानि । **अधी**ति श्रुतिषु सर्वलोकादिपदानि अथाधिलोकमित्युपक्रम्य पठितान्यतोधिलोकपराणि आध्यात्म्यस्याग्रे वक्ष्यमाणत्वादित्याशयेन सर्वलोकादिस्थलेऽधिलोकादिपदप्रयोगः । **तदन्तःस्थस्ये**ति पृथिव्यन्तःस्थस्य । ज्ञानाश्रयत्वं वेद इत्यनेनोक्तं पृथिव्यां न संभवतीति मन्यमाना आहुः **पृथिव्यभिमानिनी**ति । **तन्नियमे**ति पृथ्वीकार्ये पृथिव्याः ओषधयः इति श्रुत्युक्तमोषधिरूपं तत्सिद्ध्यर्थं नियम्य सूत्रात्माभिमानिदेवतानियमनं पूर्वोक्तगीतावाक्याद्भूतधारणरूपकार्यसिद्ध्यर्थं 'भूर्न मज्जति यद्भयात्' इति तृतीयस्कन्धात् निमज्जनाभावरूपकार्यसिद्ध्यर्थं च । **तद्विसमि**ति अभिमानिविसंमतौ । **अत्रे**ति । 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति' इत्येवंविधासु श्रुतिषु प्रथमस्याभ्यन्तरवाचकत्वं

शरीरं य पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः' इत्यादि ।

तत्राधिदैवमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च कश्चिदन्तरवस्थितो यमयिताऽन्तर्यामीति श्रूयते । तत्र संशयः । किमन्तर्याम्यधिदैवादिषु

भाष्यप्रकाशः ।

अन्तरं करोत्यन्तरयति, अन्तरयतीत्यन्तर इति सर्वान्तःस्थापकत्वबोधनार्थम् । अन्यथा पौनरुक्त्यापत्तेरिति । एवं सर्वत्र बोध्यम् । अत्र प्रश्नवाक्यानुक्तधर्माणां बोधनं तज्ज्ञानज्ञापकं ज्ञेयम् ।

अस्मिन् वाक्यसमूहे कुत्र संशय इत्यपेक्षायामाहुः तत्राधीत्यादि । संशयाकारं तद्बीजं चाहुः किमित्यादि । तथाच सर्वत्रान्तर्यामिणोपसंहारात् सर्वत्रैकः । अधिदैवादिपदानामव्ययीभावेन तत्र तत्राधिकरणे यौगिकत्वेऽपि, 'पुरुषश्चाधिदैवतम्' 'स्वभावोऽध्यात्ममुच्यते', 'अधिभूतं क्षरो भावः', 'अधियज्ञोऽहमेवात्र' इति गीतायां, तं योगमनादृत्य रूढेर्वा, तत्तदधिकृत्य यो वर्तत इति योगान्तरपुरस्कारेण योगरूढेर्वा बोधनादेतेषां नामत्वमवधार्यते । समानन्यायादधिवेदाधिलोकयोरपि तथात्वम् । नपुंसकलिङ्गं तु लोकाश्रयत्वादशिष्यम् । एवं सिद्धे तेषां नामत्वे तैरप्युपसंहाराद्

रश्मिः ।

द्वितीयनिष्पत्तिमाहुः **अन्तरमिति** । **पौनरिति** अन्तर्पदे पौनरुक्त्यम् । तथा च पूर्वेणान्तरपदेन सर्वेषामन्तः स्वयं तिष्ठतीत्युच्यते । अनेन तु स्वयं सर्वानन्तःस्थापयतीति न पौनरुक्त्यमित्यर्थः । **सर्वत्रेति** योप्सु तिष्ठन्नित्यादिश्रुतिष्वन्तरपदेष्वित्यर्थः । **अत्र प्रश्नेति** प्रश्नो भाष्ये य इमं चेत्युक्तः तत्रायं लोकः परलोकः सर्वभूतानि च विषयः तदुत्तरत्वेन यः सर्वेषु लोकेषु तिष्ठन् सर्वेभ्यो लोकेभ्योन्तरः यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योन्तर इति वाक्यद्वयमेव वक्तव्यं पृथिव्यादिनियन्तृत्वाद्यनुक्तधर्माणां यः पृथिव्यामित्यादिभिर्बोधनं वक्तुर्याज्ञवल्क्यस्य प्रच्छकोद्दालकापेक्षया यदधिकं ज्ञानं तस्य ज्ञापकं ज्ञेयमित्यर्थः । ननु हीदं लोकपरलोकसर्वभूतविषयकमुत्तरमिति कथं प्रश्नानुक्तधर्माणां बोधकमिति चेन्न वाक्यद्वयस्योत्तरत्वेनाङ्गीकारे लाघवात् । **अथेति** भाष्यं विवरामासुः **अधिदैवादीनामिति** । **अव्ययीति** अव्ययं विभक्तीति सूत्रेण दैवेष्वित्यधिदैवमिति विभक्त्यर्थेऽधीत्यव्ययेन दैवपदस्याव्ययीभावः । **तत्तदधीति** एतदधिविधाय ऋषिरवोचदिति शिक्षोपनिषच्छ्रुतेः । **बोधनादिति** अध्यात्माधिभूतमात्रे बोधनात् । **नामत्वमिति** योगस्य पाचकादौ रूढेर्घटादौ योगरूढेः पङ्कजादौ नामत्वप्रयोजकत्वदर्शनादवधार्यते । **तथात्वमिति** नामत्वम् । नन्वधिदैवादिपदानां कथं न विशेष्यनिघ्नत्वमित्याशङ्कां परिजह्रुः **नपुंसकेति** । नपुंसकलिङ्गमशिष्यं शास्त्रव्यापाररहितं अत्र हेतुः लोकाश्रयत्वादिति लोकत एव तथासिद्धेरिति तदर्थः । एतच्च 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य'इति महाभाष्यमर्थत उपनिबद्धं ज्ञेयम् । अत एव भारविः 'समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिभिः'इति । अन्यथा स्त्र्यधिकारपठितेन 'नाभिरक्षत्रिये' इति सूत्रेण नाभेः स्त्रीत्वे समुल्लसदित्यादिविशेषणानुपपत्तिः । **तैरपीति** अधिदैवादिपदैरपिपदेनामृतपदं एष त आत्मा अन्तर्याम्यमृत इति श्रवणात् । **भिद्यत इति** द्वितीयाध्यायद्वितीयपादस्थसंज्ञा चोत्पत्तिसंयोगादित्यधिकरणे 'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यत्र संज्ञाया भेदकत्वं सिद्धं तन्न्यायेन भिद्यते

सर्वत्रैक एव, अथाधिदैवादिनामभेदाद् भिद्यत इति। सामान्यतस्त्वन्तस्तद्धर्मोपदेशादिति न्यायेनाऽत्रापि ब्रह्मत्वं सिद्धमेव। तथा शब्दभेदात् संदिह्यते। अधिदैवादिषड्भेदा आधारधर्मा भगवत्युपचर्यन्ते, अथवा संज्ञाविशिष्टा अन्य एवेति। तत्र तत्तदधिकृत्य यो वर्ततेऽभिमानेन तस्य तादृशशब्दप्रयोगः।

भाष्यप्रकाशः।

भिद्यते वेति तद्बीजमित्यर्थः। नन्वन्तर्यामिणः पृथिव्याद्यन्तर्वर्तित्वस्यात्र कथनादन्तर्वर्तिनश्च ब्रह्मत्वस्यान्तस्तद्धर्मोपदेशादित्यत्र साधितत्वादत्र संदेह एव न घटत इति किमर्थमधिकरणारम्भ इत्याकाङ्क्षायां तदुपगम्य संदेहं समर्थयन्ति **सामान्यत** इत्यादि। **तथा शब्दभेदादिति** अधिदैवादिशब्दभेदात्। कथं ततः संदेह इत्यत आहुः **अधिदैवेत्यादि** देवानां समूहो दैवम्। दैवे इत्यधिदैवमित्येवमधिकरणार्थकाव्ययीभावनिष्पन्ना एते शब्दा योगेन ताँस्तानाधारानभिदधाना अत्र पृथिव्यादिवाक्यसमुदायान्ते सर्वलोकाद्येकैकवाक्यचतुष्टयान्ते प्राणादिवाक्यसमुदायान्ते च यथायथमुपनिबद्धा अधिलोकादिषु पुनरुक्ततामापद्यमाना व्यर्थाः सन्तः स्वप्रयोगसामर्थ्येनाधिदैवत्वादिरूपान् धर्मांस्तत्तदाधारेषु बोधयन्तीति ते **षड्भेदा आधारधर्माः**

रश्मिः।

वेति। **तद्बीजमिति** संशयबीजं नाम भेदभिन्नाधिकरणानामधिदैवानां भेदैरन्तर्यामिभेदः। **दैवमिति** 'तस्य समूहः' इति सूत्रेण तद्धितप्रत्ययः। **यथायथमिति** पृथिव्यादिवाक्यसमुदायान्ते इत्यधिदैवतमिति कथनात् अधिदैवमुपनिबद्धम्। सर्वलोकवाक्यान्तेऽधिलोकमिति कथनादधिलोकम्। सर्ववेदवाक्यानन्तरमधिवेदमित्येवमधिवेदकथनादधिवेदम्। सर्वयज्ञवाक्यानन्तरमधियज्ञमित्येवं कथनादधियज्ञमुपनिबद्धम्। यः सर्वेषु भूतेषु तिष्ठन्निति वाक्यानन्तरमधिभूतमित्येवमधिभूतकथनादधिभूतमुपन्यस्तम्। यः प्राणेषु तिष्ठन्नित्यादिवाक्यसमुदायान्ते तु न किमप्युपनिबद्धं यद्यपि तथापि यथाध्यात्ममित्युपक्रम्य प्राणादिवाक्यकथनात् उपनिबद्धप्रायम्। काण्वमाध्यंदिनपाठभेदात् पाठान्तरमुपनिबद्धं वेत्याशयः। अत उक्तमुपनिबद्धा इति। **अधिलोकादिष्विति**। अथाधिलोकमित्येवं सर्वलोकादिवाक्यानामादौ पठितेष्वधिलोकाधिवेदाधियज्ञाधिभूताध्यात्मेषु। **पुनरुक्ततामिति**। **व्यर्थाः सन्तः** किंचिज्ज्ञापयन्ति व्याकरणव्युत्पत्तिं विनापि अधिदैवत्वादिरूपान् धर्मान् तत्तदाधारेषु बोधयन्ति ज्ञापयन्ति ज्ञापकसिद्धं फलमन्यत्र। यथा इत्यधिभूतमथाध्यात्ममिति शिक्षोपनिषदि। एतदधिविधाय ऋषिरवोचदिति श्रुत्या तत्तदधिकृत्य येभिमानेन तत्र तत्र वर्तन्ते तेभिमानिनस्तत्राध्यात्माधिभूतपदप्रयोगः। **अधिदैवत्वादीति** अतद्गुणसंविज्ञानो बहुव्रीहिः अधिदैवत्वमादिर्येषामधिलोकत्वादीनां तेधिदैवत्वादयस्तद्रूपानिति। अथाधिदैवतमित्युपक्रमाभावेन पुनरुक्तताभावात्। तत्तदाधारेषु अन्तर्यामिणोधिलोकाद्याधारेषु व्याकरणव्युत्पत्त्या बोधयन्तीति हेतोरेते षड् भेदाः आधारधर्माः सन्तीत्यर्थः। नन्वधिदैवत्वस्य सन्तीत्यत्रानन्वयोऽतद्गुणसंविज्ञानबहुव्रीह्यङ्गीकारात् अतः पञ्चभेदाः आधारधर्माः न तु षड्भेदा इति चेन्न षण्णां भेदानामाधारधर्मत्वात् अतद्गुणसंविज्ञानबहुव्रीहेः पुनरुक्ततानिबन्धनत्वेन पुनरुक्तताया व्याकरणस्थया 'अव्ययं विभक्तिसमीप' इति स्मृत्या बाधात्। ननु पुनरुक्ततामित्यादिभाष्यविभागः सामर्थ्येनेत्यन्तः किमर्थो व्याकरणस्मृत्या अव्ययं विभक्तिसमीपेत्यादिकयाधिदैवत्वादिरूपानित्यादिग्रन्थनिर्वाहा-

अधिलोकादयश्च शाखान्तरेऽन्यत्रैव प्रसिद्धा योगख्यापकाः पञ्चस्वधिकरणेषु। अधिलोकमधिज्यौतिषमित्यादि। अतोऽधिदैविकादिशब्दा यौगिकाः सन्तो न भगवति वर्तितुमुत्सहन्ते। नाप्यन्ये कल्पनीया यद्धर्मा उपचाराद् भगवति

भाष्यप्रकाशः ।

शब्दतः सन्निहितेऽन्तर्यामिणि भगवत्युपचर्यन्ते । अथवा तत्तदधिकृत्य येऽभिमानेन तत्र तत्र वर्तन्ते तेऽभिमानिनोऽधिदैवादिसंज्ञाविशिष्टाः षडन्ये कल्पनीयाः यद्धर्मा भगवत्युपचाराद् भवेयुरित्येवं संदेहो घटत एवेत्यर्थः । एवं संदेहं समर्थयित्वा पूर्वपक्षमाहुः **तत्रे**त्यादि । **तत्तदधिकृत्ये**ति तत्तत् पृथिव्यादिकमधिकरणीकृत्य अभिमत्याऽहमिति स्वीकुर्वन् यो वर्तते तत्र तिष्ठति तत्संबन्धी अधिदैवादिप्रयोगः । सांख्यपञ्चशिखवृत्तौ तत्तदभिमानिषु प्रसिद्धत्वादिति । ननु योगद्वयस्य तौल्येऽप्यत्राभिमानिग्रहणे को हेतुरित्याकाङ्क्षायां तमुपपादयन्नधिकरणपक्षं दूषयति **अधिलोके**त्यादि । **शाखान्तरे** इति तैत्तिरीयाणां शिक्षोपनिषदि । **अन्यत्रैवे**ति लोकादिष्वधिकरणेषु । **अत** इत्यादि वैदिकप्रसिद्धेर्बलिष्ठत्वात् ते तत्र यौगिकाः सन्तो यौगिकानामौपचारिकप्रयोगादर्शनात् ते तत्र तथा भवितुं न शक्ता इत्येष हेतुरित्यर्थः । तर्हि मास्तु भगवति वृत्तिरन्येष्वभिमानिष्वेव साऽस्त्वित्यतस्तामपि दूषयति **नापी**त्यादि । **कल्पनीया** इति

रश्मिः ।

दिति चेत्सत्यम् । चतुर्ष्वधिलोकादिषु पुनरुक्तिवारणस्यावश्यकत्वेन पुनरुक्ततामित्यादिग्रन्थस्यावश्यकत्वात् । व्याकरणस्मृत्या तदवारणात् । ननु तत्तदाधारधर्मबोधने व्याकरणस्मृतेर्हेतुता न तु पुनरुक्ततामित्यादिग्रन्थार्थस्येति चेन्न । शिक्षोपनिषदि एतदधिविधाय ऋषिरवोचदिति श्रुतेरित्यधिभूतमथाध्यात्ममित्यस्याः अग्रे पाठादेतदधिकृत्य येभिमानेन तत्र तत्र वर्तन्ते तेऽभिमानिनोधिदैवादिपदवाच्या इति श्रौतीव्युत्पत्त्या व्याकरणव्युत्पत्तिबाधात् । नच व्याकरणस्मृतेरप्रामाण्यापत्तिरिति शङ्क्यम् । अध्यात्माधिभूतपदातिरिक्तपदव्युत्पत्तौ प्रामाण्यात् । न चाङ्गत्वहानिरिति वाच्यं अध्यात्माधिभूतपदाङ्गत्वाभावेप्येतदधिविधायेत्यत्र श्रुतावङ्गत्वात् अध्यादिपदाङ्गत्वाच्च । तथाच श्रुत्या व्याकरणस्मृतेर्बाधात् न तत्तदाधारधर्मबोधने व्याकरणस्मृतेर्हेतुता किंतु पुनरुक्ततामित्यादिग्रन्थार्थस्येति फलितम् । **शब्दत** इति एष त आत्मान्तर्याम्यमृत इति श्रुत्यात्मकशब्दतः । **संनिहित** एकश्रुतिपठितत्वेन संनिहिते । **अन्तर्यामिणि भगवत्युपचर्यन्ते** सामानाधिकरण्यसंबन्धेनोपचर्यन्त इत्यर्थः । संशये द्वितीयां कोटिं वदन्तः एवोपचरितैर्वदन्तीत्याशयेनाथवेति भाष्यं विवरामासुः **अथवे**ति । सांख्यसिद्धान्तव्युत्पत्तिमाहुः **तत्तदधी**ति । पूर्वं श्रौती व्युत्पत्तिरुक्ता सैवेयं तु सांख्यमतसिद्धेति । **तत्संबन्धी**ति अभिमानिनां प्रतिपाद्यप्रतिपादकभावसंबन्धेन संबन्धी । **तौल्य** इति अभिमान्यधिदैवत्वयोराधेयत्वेन तौल्ये । **दूषयति** पूर्वपक्षी दूषयति । **लोकादिष्विति** । अव्ययं विभक्तिसमीपेत्यादिसूत्रेणाव्ययीभावात् लोकादिषु पञ्चसु । **अधिलोकादयः** इति भाष्येधिपदार्थमाहुः **अधिकरणेष्विति** । तथाच श्रुतिः पञ्चस्वधिकरणेष्विति । पञ्चाधिकरणविषय उच्यत इत्यर्थः । प्रसङ्गाद्भाष्यार्थः कथ्यते । शाखान्तरे चान्यत्रैव पञ्चस्वधिकरणेषु योगख्यापक अधिलोकमधिज्योतिषमित्यादिश्रुत्युक्तार्थे यथा भवति तथाधिलोकादयः प्रसिद्धाः । योगोवयवशक्तिस्तस्याः ख्यापकाः । इत्यादिपदेनाधिविद्यमधिप्रजमध्यात्मम् । **वैदिके**ति वैदिकप्रसिद्धिस्तु पञ्चस्वधिकरणेषु 'पञ्चस्वधिकरणेषु' इति श्रुतेः । तस्याः रूढेर्बलिष्ठत्वात् । **यौगिकानामि**ति पाचकपाठकादीनाम् । **औपचारिके**ति । शक्यार्थ-

भवेयुः। कल्प्यमानस्य सर्वानुस्यूतस्य तादृशस्य भगवद्व्यतिरिक्तस्यासंभवात्। तस्मादन्तर्यामिब्राह्मणं कुत्राप्ययुक्तं सत् तत्तदभिमानिदेवतास्तुतिपरमेव तत्तदुपासनार्थं भविष्यति।

भाष्यप्रकाशः।

संज्ञित्वेन कल्पनीयाः। कुतो नेत्यत आह **कल्प्यमानस्येत्यादि**। एते हि शब्दाः क्वचिद्वाक्यसंघाते, क्वचिच्च बहुवचनान्तसर्वलोकादिशब्दघटितवाक्यान्ते प्रयुक्ता इति तेषु तत्तत्संघानुस्यूतस्याभिप्रेतत्वेन तादृशस्यापि क्वचित् प्रतिनियतत्वदर्शनेनात्र च तदनुक्त्या भगवदतिरिक्तस्याभिमन्तुः संज्ञितयाऽत्र कल्पयितुमशक्यत्वेनासंभवादित्यर्थः। सिद्धमाह **तस्मादित्यादि**। तस्मादिति एतेषां शब्दानामधिकरणे वर्तने वैयर्थ्यस्य बाधकतया, भगवति वर्तनेऽभिमानस्य बाधकतया, संघाभिमानिनि जीवे वर्तने च तदनुक्तेर्बाधकतयाऽधिकरणस्य भगवतोऽतिरिक्तस्याभिमन्तुश्च तत्संज्ञित्वेन वक्तुमशक्यत्वे संज्ञोपजीविन उपचारस्यापि वक्तुमशक्यत्वादन्तर्यामिब्राह्मणं पूर्वोक्तेष्वन्वेतुमयुक्तं सत् तथेत्यर्थः। नन्वेवमपि वक्तुमशक्यम्। तेषु वाक्येषु यं पृथिवी न वेदेत्यादिभिरुक्तस्यान्तर्याम्यज्ञानस्य श्रावणात् तस्य चाभिमानिधर्मत्वादित्यत आह

रश्मिः।

एव प्रवृत्तेरिति भावः। **एते** इति अधिलोकादयः। **क्वचिदिति** शिक्षोपनिषदि। अथाधिलोकमित्युपक्रम्य पृथ्वी पूर्वरूपं, द्यौरुत्तररूपं, आकाशः संधिः, वायुः संधानं इत्यधिलोकम्। इत्येवं वाक्यसंघाते। एवमधिज्योतिषादयो वाक्यानां संघातेषु प्रयुक्ता ज्ञेयाः। **क्वचिदिति** अन्तर्यामिब्राह्मणे। **क्वचित्प्रतीति**। शिक्षायां पृथिव्यादिषु प्रतिनियतत्वमधिलोकस्य। अग्निः पूर्वरूपमित्याद्युक्ताग्न्यादिषु ह्यधिलोकत्वाभावात्। अधिज्योतिषत्वस्य सत्त्वात्। इत्यधिज्योतिषमिति श्रुतेः। **अत्रेति** अन्तर्यामिब्राह्मणे। **कुत्रापीत्यादि** भाष्यीयं पदं व्याचख्युः **अधिकरण** इति। वर्तमान इति भावप्रधानो निर्देशः। श्रौतीव्युत्पत्तिव्याकरणव्युत्पत्ती हृदिकृत्याहुः **अधिकरणस्येति**। **भगवत** इति षष्ठ्यन्तम्। अव्ययं विभक्तीति सूत्रेण समासेऽधिकरणत्वम्। दैवाधिपदवाच्यत्वे भगवत्त्वम्। **अतिरिक्तस्य** सांनिध्याद्भगवत अतिरिक्तस्य एकादशाध्याये।

'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप'॥ इत्यत्र।

गीताप्रयोगस्य भगवद्वाक्यत्वेन छान्दसत्वात्। 'अतो रोरप्लुतादप्लुते' 'अति'इत्यस्य विकल्पाद् 'भोभगोअघो अपूर्वस्य योऽशि' इत्यनेन रोर्यादेशः 'लोपः शाकल्यस्य' इति सूत्रेण यलोपः। **तत्संज्ञित्वेनेति** अधिदैवादिसंज्ञाः सन्ति ययोस्तौ तत्संज्ञिनौ तद्भावेन संज्ञोपजीविनः संज्ञाशब्दकारणिनः उपचारविशेषणम्। **तथेत्यर्थ** इति तथेति प्रकारवचने थाल्। तत्तदभिमानिदेवतास्तुतिपरमेव तत्तदुपासनापरत्वेन प्रकारेण भविष्यतीत्यर्थः। **नन्वेवमिति** पूर्वोक्तरीत्या भगवदादिषु सर्वेषु बाधकं विमर्षेणापि। **अभिमानीति**। अज्ञानस्य ज्ञानाभावरूपत्वेनाभावस्य प्रतियोग्यधिकरणवृत्तित्वनियमेन ज्ञानस्य धर्मत्वस्फोरणद्वाराऽसतोप्यभिमानिधर्मत्वं यद्वा विष्णुपुराणे यदस्ति यन्नास्ति तत्सर्वं विष्णुरिति स्मरणात् यथाश्रुत एवार्थः। तथाच तदनुक्तेरिति हेतुरसिद्ध इति संघाभिमानिजीवे

अज्ञानं चासंदेहे संदेहवदुपपद्यते । 'देहोऽसवोऽक्षाः' इति न्यायाद्वा । न तु निषिद्धसंज्ञा भगवति कल्पयितुं शक्येति । एवं प्राप्ते, उच्यते ।

अन्तर्याम्यधिदैवादिषु । अन्तर्याम्यधिदैवादिषु भगवानेव । नान्यस्तादृशो भवितुमर्हति । ननु चोक्तं भगवति कथं निषिद्धकल्पनमिति । तत्राह । तद्धर्मव्यपदेशात् । तेषां धर्मास्तद्धर्माः । तत्प्रयुक्तिबोधकाः । ते विशेषेण भग-

भाष्यप्रकाशः ।

अज्ञानं चेत्यादि । उक्तविधमज्ञानमपि, 'सो अङ्ग वेद यदि वा न वेद' इत्यत्र यथा संदेहः कल्पनयोच्यते तथाऽत्राऽज्ञानमप्युच्यत इत्युपपद्यत इत्यर्थः । ननु तथापि ज्ञाने अज्ञानं क्वाप्यदृष्टं कथं कल्पनीयमित्यतो हेत्वन्तरमाह देह इत्यादि । इदं षष्ठस्कन्धे दक्षस्तुतावस्ति ।

'देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ।
सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे' ॥

इति । अत्र मनवोऽन्तःकरणानि । अर्थस्तु देहादयो मात्रान्ता आत्मानं दृश्यं स्वस्वरूपम्, अन्यमिन्द्रियवर्गदेवतारूपं न विदुः । यदुक्तं सर्वं तत्तन्मूलभूतान् गुणान् सत्त्वादींश्च पुमाञ्जीवो वेद । तज्ज्ञः पूर्वोक्तसर्वज्ञोऽपि सन् यमितोऽप्यधिकं सर्वज्ञं न वेद, तमनन्तं भगवन्तमहमीडे स्तौमीति । तथाच यथात्र देहादीनां जडतया योग्यताभावेनासंभवन्निषेधो नित्यानुवादस्तथा, यं पृथिवी न वेदेत्यादावपि पृथिव्यादिपदैर्जडपरामर्शाज्ज्ञाननिषेधो नित्यानुवाद इति तन्न्यायादुपपद्यत इत्यर्थः । ननु कुतोऽयमाग्रहः क्रियते, भगवत्संज्ञात्वमेव कुतो नाद्रियत इत्यत आह न त्वित्यादि । निषिद्धसंज्ञेति निषिद्धेनाभिमानेन कृता संज्ञा सा निकृष्टा । अनुत्कृष्टस्य उत्कृष्टत्वेनोपासनं दृश्यते, मनो ब्रह्मेत्यादौ, न तूत्कृष्टस्य निकृष्टत्वेन । अतः कल्पयितुमशक्येत्यर्थः । एवं पूर्वपक्षमुक्त्वा सिद्धान्तं व्याचक्षते उच्यत इत्यादि । अत्र तेष्वधिदैवादिपदेष्वन्तर्यामी भगवानेवोच्यते । न ह्यन्य एकः सर्वानुस्यूतो भवितुमर्हति । नन्वभिमानिष्वेताः संज्ञाः प्रसिद्धाः । भगवति तु नाभिमान इति निषिद्धस्याभिमानस्य कल्पनं कथं कर्तव्यमित्याशङ्कायां तद्वारणायैतत्प्रवृत्तिनिमित्तं सूत्रे आचार्य आह तद्धर्मव्यपदेशादिति । तेषां

रश्मिः ।

वर्तनमिति भावः । सोऽङ्गेति सोऽध्यक्षः प्रकृतिभावः सोऽङ्ग इति । कल्पनयेति यथा तद्विदि 'भवान्न वेत्ति' इति प्रयोगः । काकुर्विपरीतलक्षणा वा द्वितीयनञभावात् । तथाच कल्प्यते द्वितीयनञर्थो तया काका विपरीतलक्षणया वा सा काकुर्विपरीतलक्षणा वा कल्पना तया । योग्यतेति ज्ञानयोग्यताभावेन ज्ञानकर्तृत्वासंभवात् । नित्येति पूर्वतन्त्रे निषेधस्य प्राप्तिपूर्वकत्वं प्रसिद्धमयं तु अप्राप्तिपूर्वकोतो न निषेधोऽपि तु नित्यानुवादः स च नित्यप्रत्यक्षसिद्धस्यार्थस्यानुवादः । आग्रह इति अज्ञानोपपादनेनाभिमान्याग्रहः । मनो ब्रह्मेति 'मनो ब्रह्मेति व्यजानात्' इति तैत्तिरीयोपनिषदि । न त्विति । उदाहरणाभावादिति भावः । ननु अथाध्यात्मं अधरा हनुः पूर्वरूपमित्यत्र पूर्वरूप उत्कृष्टे अधराहनुदृष्टिः कर्तव्येत्युदाहरणमस्ति । न । अथाधिज्यौतिषमग्निः पूर्वरूपमित्यत्र स्पष्टम् । विधेयोद्देश्ययोः साम्यात् । हीनत्वेऽभेदानुपपत्तेः । ननु चेति भाष्यं विवरामासुः नन्वभीति । एतदिति पृथिव्यादितदभिमानिवाचकपदप्रवृत्तिनिमित्तं तद्धर्मान् । आचार्यो भगवान् व्यासः । तेषामिति भाष्यं विवरामासुः तेषामिति पृथिव्यादितत्तदभिमानिवाचकपदप्रवृत्तिनिमित्तं तद्धर्मस्त ।

वत्युपदिश्यन्ते । सर्वेषां तत्तत्कार्यं सामर्थ्यं च भगवतो न तु स्वतस्तेषामिति । एवं च सत्यन्यत् सर्वं संगतं भवति । तस्माद् ब्रह्मवाक्यमेव ।

भाष्यप्रकाशः ।

पृथिव्यादीनां तदभिमानिनां च ये धर्मास्ते तद्धर्मास्तत्प्रयुक्तेस्तत्कार्यव्यापारावेशबोधका भूतधारकत्वादयस्तदधिष्ठातृत्वादयश्च ते नियमयितृत्वरूपेण विशेषेण भगवत्यपदिश्यन्ते। पृथिव्यादिवाक्येष्वभिमान्यज्ञेयत्वस्य पृथिव्यादेः शरीरत्वस्य पृथिव्यादिपदैस्तदुभयं गृहीत्वा तद्यमनस्य च बोधनेन कथ्यन्ते तस्मात्। एतस्यैव व्याख्यानं **सर्वेषामित्यादि**। चोऽप्यर्थे। एवं चेत्यत्र चोऽवधारणे

रश्मिः ।

त्प्रयुक्तेः अभिमानिरूपशेषप्रयुक्तेरन्तर्याम्यभेदान्वयार्थं प्रयोगात्तत्कार्येषु अधिदैवादिकार्येषु ये व्यापारास्तेषु भगवदावेशबोधकाः । **सर्वेषामिति** भाष्यार्थसंग्रहेणार्थः । एष त आत्माऽन्तर्याम्यमृत इति भ्यन्तरस्यान्तर्याम्यभेदार्थं सामानाधिकरण्यश्रुतेः । शेषप्रयुक्तिस्त्वित्थम् । तत्प्रयुक्तिपदं जैमिनीयन्यायमालास्थं प्रयुक्तिपदं शास्त्रदीपिकायां चतुर्थाध्यायारम्भे ।

'प्रसिद्धे शेषशेषित्वे प्रयुक्तिरधुनोच्यते ।
शेषिणैव च शेषस्य प्रयुक्तिरिति हेतुता' ॥

इति स्मृतम् । अतः पूर्वतन्त्रचतुर्थाध्याये गोदोहनस्य पुरुषार्थत्वप्रयुक्त्याऽनुष्ठानं न तु क्रत्वर्थप्रयुक्त्या इत्येवमादयो निरूपिताः । एवं प्रकृते पृथिव्यादिपृथक्पृथगधिकरणरूपपरिच्छेदकत्वेन निरूपितमतोऽभिमानिगमकम् । पृथिवीमन्तर इत्यत्राभ्यन्तर इत्यर्थाच्चान्तरपदेनाभिमानिवाक्यम् । अन्तरो यमयतीत्यत्रान्तरपदं ब्रह्मवाचकं पुनरुक्तेः आत्मादिपदाच्च । एवं च दर्शपूर्णमासयोः श्रूयते । चमसेनापः प्रणयेत् गोदोहनेन पशुकामस्येति तत्र गोदोहनस्य क्रत्वर्थत्वं पुरुषार्थत्वं चेत्युभयार्थत्वं प्रतीयते पशुफलजननेन पुरुषप्रीतिभानात् । अपां प्रणयनेन क्रतुपौष्कल्यभानाच्च । मैवं । गोदोहनमन्तरेण फलासिद्धेः गोदोहनार्थत्वात् । क्रतुस्तु तदभावेपि चमसेन सिद्ध्यतीति क्रत्वर्थत्वाभावात् तद्वत् । अभिमान्यर्थत्वब्रह्मार्थत्वयोः अन्तर्यामिब्राह्मणस्य सत्त्वेपि ब्रह्मार्थत्वं अभिमान्यर्थत्वं तु यावत्पर्यन्तं ब्रह्मपरत्वं(संभवति)सिद्ध्यति तावत्पर्यन्तमन्यपरत्वमन्याय्यमिति भाष्यविरोधात् न सिद्ध्यतीति नाभिमान्यर्थत्वमिति । ननु भूतधारकत्वादितत्कार्यं सामर्थ्यं च 'पृथ्वी विश्वस्य धारिणी' इति श्रुतेः पृथ्व्यादावस्ति कुतो ब्रह्मवाक्यत्वं प्रतिपाद्यते आत्मामृतत्वे अभिमानिधर्मौ श्रुतत्वाद्भाष्यमपि न बाधकमिति चेन्न ब्रह्मजिज्ञासाप्रक्रमादन्तर्यामिब्राह्मणे ब्रह्मणः शेषित्वेन वेदान्ते पृथ्वीतिश्रुत्युक्तपृथिव्याधारकत्वस्यैतादृशत्वात् । उपक्रमस्य ब्रह्मजिज्ञासोपक्रमादभिमानिपरत्वेऽसंजातविरोधित्वेनानिर्णायकत्वेनोपसंहार आत्मामृतत्वे नाभिमानिधर्मौ श्रुतत्वेप्युपसंहारस्यार्थनिर्णायकत्वात् । एवं श्रुत्यविरोधे भाष्यं बाधकमस्त्येवेत्यलं क्लिष्टविचाराय । **भूतधारकत्वेति** भूतधारकत्वादय उक्तश्रुत्या पृथिव्यादिधर्मा अन्तर्यामिब्राह्मणे ब्रह्मधर्मा अपि । न इति ते अभेदेन विशेषेण **भगवत्यपदिश्यन्ते**ऽन्तर्यामिब्राह्मण इति वक्तव्ये ते नियमयितृत्वरूपेण विशेषेणेत्याद्युक्तिरन्तर्याम्यधिदैवादीनां भेदेपि कस्मैचित्प्रयोजनायाभेदेनान्तर्यामिब्राह्मणे व्यपदेश इति ज्ञापनाय, भेदे तु नियमयितृत्वरूपो विशेषोन्तर्यामिण्यस्त्येव । नन्वेतादृशक्लिष्टार्थकं ब्राह्मणं कुत इति चेच्छृणु । संदिग्धस्य

भाष्यप्रकाशः ।

तथाचायमर्थः। सांख्ये हि तत्तदभिमान्येव नियामकतयाऽधिदैवपदेनोच्यते। करणमेत्र शरीरे वर्तमानतयाऽध्यात्मपदेन । विषयश्च भूतेषु वर्तमानतयाऽधिभूतपदेन । गीतादौ तु पुरुषादय उच्यन्ते। अत्र तु ततोऽप्यधिकाः शब्दा इति सांख्योक्ता गीतोक्ताश्चार्था नात्राभिप्रेताः । अथ प्रश्नानुरोधान्न्यूनतादोषं परिहृत्य गीतोक्ताः स्वभावादयो ग्राह्यास्तदापि तेषां ये धर्मास्तत्तदधिष्ठातृत्वादयस्तेऽपि भगवन्नियमितास्त्ववश्यं वाच्याः । एकस्य सर्वानुस्यूतस्य नियन्तुर्बोधनार्थमेवान्तर्यामिब्राह्मणस्य प्रवृत्तत्वात्। एवं सति यदि तेऽतिरिक्ता अत्राभिप्रेताः स्युस्तदा पृथिव्यादिवत् तानपि नियम्यतया वदेत्। अतस्तेऽत्राधिदैवादिपदेषु नाभिप्रेताः। किंतु, इत्यधिदैवतमित्यादावितिशब्दः प्रकारे हेतौ वा भवंस्तथा वा तेन हेतुना वाऽधिदैवतादिशब्दानां भगवद्वाचकत्वमेव बोधयतीति। तेनेदं सिद्ध्यति। विषयवाक्य उद्दालकेनैतल्लोकपरलोकयोः सर्वभूतानां चान्तर्वर्तित्वे सति तन्नियामकोऽन्तर्यामिशब्दवाच्यः पृष्टः । तत्र चेद् याज्ञवल्क्यस्तावदेव वदेत् तदाऽन्तर्यामिज्ञातृत्वं न स्फुटीभवेदत उद्दालकश्रुताँस्तद्धर्मान् विशेषतः पृथिव्यादिवाक्यैः प्रकाशयति । तत्र पृथिव्यबग्निकार्यं भगवत्प्रयुक्तमिति गीताद्वादशाध्याये, 'गामाविश्य च भूतानि' इति सार्धेनोक्तम्। ततः 'सर्वस्य चाहं हृदि संनिविष्टः' इत्यादिनाऽन्तर्यामित्वं पुरुषोत्तमत्वं च निगमितम्। आकाशकार्यस्य तथात्वं तृतीय-

रश्मिः ।

विषयवाक्यत्वेन तदर्थत्वात् । **पृथिव्यादी**ति अभिमान्यज्ञेयत्वस्य पृथिव्यादेः शरीरत्वस्य चोक्तिरस्तीत्यर्थः। **पृथिव्यादिपदै**रिति पृथिवीमन्तरो यमयतीत्येवंविधेषु वाक्येषु द्वितीयान्तपृथिव्यादिपदैः। **व्याख्यान**मिति भाष्यत्वात् स्वपदानि वर्ण्यन्ते इति भावः। **एवं चे**ति भाष्यं विवरामासुरेवं चेतीति। **चोवधारण** इति विश्वकोशे। चोवधारणे कथं सर्वं संगतं भवतीत्यतो विवरणमाहुः **तथा चे**ति। **सांख्ये ही**ति सेश्वरसांख्ये। निरीश्वरसांख्यस्यानुमानिकमप्येकेषामित्यधिकरणे निराकरिष्यमाणत्वात् । **गीतादा**विति आदिपदेन श्रीभागवतम् । **पुरुषादयः** पुरुषोधियज्ञः अन्येन्यत्रेति बहुवचनम् । अन्यथा तु पुरुषादिनी उच्येते इति पठेयुरिति । **परिहृत्ये**ति श्रुतिवाक्यकल्पनेन परिहृत्य । तदुपष्टम्भाय गीतोक्ता गीताष्टमाध्यायोक्ता 'स्वभावोध्यात्ममुच्यते' ।

'अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञोहमेवात्र देहे देहभृतां वर' ॥ इत्येवं स्वभावादयः ।

एवेति अस्मिन् सूत्रे अन्तर्यामिब्राह्मणस्य विषयतया व्यासाभिप्रेतत्वेनार्थस्य प्रामाणिकत्वादेवकारः। एवेत्येवकारोप्यर्थको द्वितीयः। **बोधयती**ति एवमन्यत्सर्वं संगतं भवतीत्यर्थः। इदमुपलक्षणम्। अन्तरपदद्वयमात्मामृतपदद्वयं च संगतं भवतीत्यस्य । **अन्तर्यामिज्ञातृत्व**मिति अभिनिवेशेन तथेत्यर्थः । **प्रकाशयती**त्यत्रातीतेर्थे स्म बोध्यम् । प्रकाशयति स्म । उक्तार्थमभिमानिपरमाशङ्क्योपष्टम्भन्ति स्म **तत्र पृथिवी**ति। 'भीषास्माद्वातः पवते' इति श्रुतौ वाय्वादीनां कार्यं भगवत्प्रयुक्तमस्त्येवेति सर्वेषां तत्प्रामाण्यात् गीतादिभिरप्युपष्टम्भन्ति स्म । **गीताद्वादशे**ति । बभ्रमुः। गीतापञ्चदशाध्याय इति पठनीयमत्र। द्वादशाग्रेतनोध्यायो द्वादशाध्यायस्तस्मिन्निति वा मध्यमपदलोपी समासः। चतुर्थाध्यायाद्द्वादशाध्याये वा। **अन्तर्यामित्व**मिति सर्वभूतानामन्तर्वर्तित्वप्रश्नेन्तर्यामिकथनाद्धृदि संनिविष्टस्यान्तर्यामित्वम् । पुरुषोत्तमयोगाध्यायस्थत्वाद्वाक्यस्य **पुरुषोत्तमत्वम्** ।

भाष्यप्रकाशः।

स्कन्धे, 'अदो ददाति श्वसतां पदं यन्नियमान्नभः' इति स्फुटम्। वाय्वादित्यकार्यस्य तथात्वं भीषाऽस्मादिति श्रुतौ। तत्राग्नीन्द्रयोः कार्यं न स्फुटं, तदपि तृतीयस्कन्धे, वर्षतीन्द्रो दहत्यग्निरित्यनेन बोधितम्। अत्र त्विन्द्रस्थाने विद्युत्स्तनयित्नू। एवमन्येषां कार्यस्यापि भगवत्प्रयुक्तत्वं ततस्ततो बोध्यम्। विषयश्रुतावधिदैवतपदं, सूत्रे त्वधिदैवपदं, तथापि न तयोरर्थभेदः। गीतायाम्, अधिदैवं किमुच्यत इति प्रश्ने, पुरुषश्चाधिदैवतमित्युत्तरात्। एवं देवधर्माणां भगवत्प्रयुक्तत्वबोधनात् परलोकात्मकजन्मान्तरीयदेहयमयितृत्वज्ञानं स्वस्य याज्ञवल्क्येन प्रकाशितम्। ततो लोकपदस्य भूरादिष्वाधारेष्वपि प्रयोगाद्, अथाधिलोकमिति प्रतिज्ञाय तत्संबन्धि सर्वं पूर्ववद् बोधितम्। ततो लोकान् कथं यमयतीत्यपेक्षायां, वेदयज्ञाभ्यां यमयतीति बोधनाया-

रश्मिः।

'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः'॥ इति वाक्याच्च।

तथात्वमिति प्रकारवचने थाल्। तथा भगवत्प्रयुक्तत्वम्। **त्व**मिति तु भेदेन अम् अल्पेन यत्किंचिद्भेदेनेत्यर्थः। एवमग्रेपि। **अद** इति अदो नभः स्वसतां पदं ददाति परं यस्य भगवतो नियमनादित्यर्थः। **तत्रे**ति।

'भीषास्माद्वातः पवते भीषोदेति सूर्यः।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः'॥

इति श्रुतौ पञ्चमो मृत्युरित्यधिकपदार्थाभावाय श्रुतौ। **अत्र** इति अन्तर्यामिब्राह्मणे। **अन्येषा**मिति चन्द्रतारकदिक्सर्वलोकसर्ववेदसर्वयज्ञसर्वभूतप्राणवाक्चक्षुःश्रोत्रमनस्त्वक्तेजस्तमोरेतआत्मनाम्। चन्द्रतारककार्यं भगवतत्प्रयुक्तं 'यश्चन्द्रमसि' इत्यनेनोक्तम्। दिक्कार्यस्य तथा आकाशशरीरं ब्रह्मेत्यावरण उक्तं दिशामाकाशेन्तर्भावात्। दिशो व्यन्तरं प्राविशदित्यथर्वशिर उपनिषत्। भगवत्प्रयुक्तत्वमुन्नेयं कार्यस्य। सर्वलोकादिकार्याणां विभूतियोगाध्याये।

'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम्'॥

इति वाक्ये विभूतिमत्पदाद्भगवत्प्रयुक्तत्वं बोध्यम्। तदेतदुक्तं **ततस्ततो बोध्य**मिति। **देवे**ति क्रीडाधर्माणां परलोकात्मको जन्मान्तरीयो देहस्तस्य यमयितृत्वं तस्य ज्ञानम्। **प्रयोगा**दिति 'भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोस्य नाभितः'। इत्यादौ प्रयोगाद्भूरादिलोके इत्यर्थकमधिलोकमिति **प्रतिज्ञाय। तत्संबन्धि** भूरादिलोकसंबन्धि **सर्वं** तिष्ठन्नित्याद्युक्तं स्थित्यादिकं **पूर्ववत्** अधिदैवतवत्। **वेदयज्ञाभ्या**मिति लोका हि भूरादयः तत्र पृथिव्या यमयितृत्वमुक्तम्। भुवर्लोकस्य यमयितृत्वं विष्टम्भे। एवं स्वर्लोकस्याप्युपष्टम्भो वक्तव्यः स च 'वेदः शिवः शिवो वेदः' 'एषा त्रयी विद्या तपति' इति 'यज्ञो वै विष्णुः' इत्यादिवाक्यैरात्मभ्यां नियमनम्।

'उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः'॥ इति वाक्यात्।

ननु कर्मभोगानन्तरं स्वर्गाच्युतिस्तत्रानेकेषां जीवानामनेकानि कर्माणि तज्जन्यः स्वर्गोपि तैरेव नियमित इति वेदयज्ञयोः शब्दार्थयोर्नियमनार्थं व्याख्यानं कुतः पूर्ववद्व्याख्यानस्य परि-

भाष्यप्रकाशः ।

धिवेदाधियज्ञवाक्यद्वयमुक्तम् । ततः सर्वभूतनियमनं पूर्ववदेवेति बोधनायाधिभूतवाक्यम् । तत एतल्लोकनियमनबोधनाय दशाध्यात्मवाक्यानीत्येवं कार्यज्ञानमुक्त्वा, तत्स्वरूपमिदमित्थतया वक्तुमशक्यमिति बोधनायादृष्टो द्रष्टेत्याद्याह । तत उपसंहारे, अतोऽन्यदार्तमित्यनेन तस्य सुखरूपत्वं यदाह तदन्तर्यामिज्ञातृत्वं वक्तुरवगत्योद्दालकस्तूष्णींभूत इत्युक्तम् । तेन सर्वेषां स्वल्पेषु महत्स्वन्यसापेक्षेषु तन्निरपेक्षेष्वपि कार्येषु यत् सामर्थ्यं तदन्तर्यामिणः सकाशादेव, न तु स्वत इति साधितम् । तदेव, 'यत्किंचित् पौरुषं पुंसां मेने कृष्णानुकम्पितम्' इति श्रीभागवते ।

रश्मिः ।

त्यागश्च कुतः इति चेन्न । सुवर्गाय वा एतानि लोकाय हूयन्ते इति श्रुतेः स्वर्गस्य कर्मजन्यत्वेपि न कर्ममात्रजन्यत्वम् । देवेभ्यः स्वर्गस्य तिरोधानश्रुतेः देवेभ्यो वै स्वर्गो लोकस्तिरोभवदिति श्रुतिः । एतादृशस्वर्गतिरोभावनाशाय वेदयज्ञयोर्नियमयितृत्वेन व्याख्यानं न तु पूर्ववत्कर्मत्वेन व्याख्यानम् । लोकानां तु कर्मत्वेन व्याख्यानमिति । ननु वेदानन्तरो यमयति यज्ञानन्तरो यमयतीति श्रुतिभ्यां वेदयज्ञयोः कर्मत्वेनान्वयो न तु वेदयज्ञाभ्यां लोकान् यमयतीति कारणत्वेनान्वय इति चेन्न । 'एतस्यैव प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठतः' इति श्रुतेः । प्रशास्त्यनेनेति प्रशासनं वेदस्तस्मिन् विधृते विष्टब्धे । अत्र वेदयज्ञयोरौत्पत्तिकसंबन्धात् करणत्वमुभयोः प्रतीयते प्रशासनपदेन । द्यावापृथिवीत्यत्रावो लुक् औस्तु विधृते इति कर्मणि क्तप्रत्ययेन कर्मण उक्तत्वात् औटः स्थाने तिष्ठत इति कर्तरि प्रत्ययेन च कर्तुरुक्तत्वेन प्रथमाद्विवचनमिति वा । इति श्रुतिपर्यालोचनया वेदयज्ञकरणाभ्यां विधृते तयोः स्थितस्यान्तरस्यैतस्यैव संबन्धिन्यौ द्यावापृथिव्यौ तिष्ठतः । एष एव वेदयज्ञाभ्यां द्यावापृथिव्यौ विष्टभ्नाति यमयति पतनप्रतिबन्धकव्यापारयुक्ते करोति यदा तदा द्यावापृथिव्यौ विधृते उच्येते । ते तिष्ठत इति युक्त्या श्रुत्यन्तरैकवाक्यतया वेदयज्ञयोः व्याख्यानात् । एवं च सर्वेषु वेदेष्वित्यत्र सर्वेषु यज्ञेष्वित्यत्र च सर्वपदाभ्यां करणत्वविशिष्टौ वेदयज्ञावपि प्राप्तावेव । तथा च प्रशासनं नियमनम् तत्करणत्वविशिष्टयोः यज्ञवेदयोरपि तिष्ठन् नियमनकरणत्वविशिष्टवेदयज्ञाभ्यामन्तरो यं नियमनकरणवेदयज्ञौ न वेदतुः यस्य करणभूतवेदयज्ञौ शरीरं यं नियमनकरणे वेदयज्ञावन्तरो यमयति स ते आत्मान्तर्याम्यमृतो भवतीति श्रुत्यर्थः । पूर्ववदेवेति श्रुत्यन्तरेण करणत्वाद्यबोधनात् सर्वपदघटितत्वेप्यधिलोकवदेव, युक्त्यापि सर्वान्तर्गततादृशलोकयमनकरणत्वासंभवात् एवकारः । एतल्लोकेति प्राणाद्यात्मान्त एतल्लोकः समीपतरवर्ती लोकः । कार्येति पृथिव्यबग्न्यादिकार्यज्ञानं याज्ञवल्क्य उक्त्वा । अदृष्ट इति इदमित्थतयाऽदृष्टोऽन्यैः स्वयं द्रष्टा आदिपदेनाश्रुतोन्यैरिदमित्थतया स्वयं श्रोतान्यैरिदमित्थतयाऽमत स्वयं मन्ता । एवमविज्ञातो ज्ञाता नान्योतोस्ति द्रष्टा नान्योस्ति श्रोता नान्योस्ति विज्ञाता एष त आत्मान्तर्याम्यमृत इति श्रुतिः संगृह्यते । ननु महाभागाः पृथिव्यादिदेवताः मनुष्यादिवदात्मनो नियन्तारमन्तर्यामिणं कुतो न विदुरित्यत आहादृष्ट इत्यन्य आहुः तस्येति । अन्तर्यामिणोतोन्तर्यामिणः सकाशादन्यदार्तमित्येवं व्यतिरेकमुखेन सुखरूपत्वं वक्तुर्याज्ञवल्क्यस्य । उद्दालक इति ततो होद्दालक आरुणिरुपररामेति श्रुत्योक्तम् । सर्वेषामिति पृथ्व्यादीनां सर्वेषाम् । यथा पृथ्व्याः स्वल्पं कार्यमोषधिरूपं महद्भूतधारकत्वरूपं धृतिश्च स्वल्पसापेक्षं वृष्टिमात्रसापेक्षं तृणादि स्वल्पवृष्टिनिरपेक्षं तृणादिच्छेदे सति छिन्नतृणादि मध्यस्थतृणादि । तदेवेति तत्सामर्थ्यमेव ब्रह्मोपक्रम्य ततोहंनामाभवदिति बृहदारण्यके पुरुषविधब्राह्मणे

अन्यथा त्वधिकरणरचना, अन्तस्तद्धर्माधिकरणेन गतार्थत्वादयुक्तैव ॥ १८॥

भाष्यप्रकाशः ।

तेनाधिदैवादिपदप्रवृत्तिनिमित्तभूतो योऽभिमानः सोऽपि भगवत्प्रयुक्त इति तेषां पदानामभिमानिष्वौपचारिकत्वबोधनायैव तत्कथनं, नो चेत् तद्वैयर्थ्यमेव । तदनुक्तावपि विवक्षितज्ञापनस्याप्रत्यूहत्वादिति सिद्ध्यति। तेन सूत्रस्थमधिदैवादिष्विति पदं देहलीदीपवदुभयत्रापि संबद्ध्यते। तथाचानेनास्पष्टलिङ्गेनान्तर्यामिण एकत्वसाधनान्नाधिकरणवैयर्थ्यमिति । मतान्तरं दूषयन्ति अन्यथेत्यादि। सा रचना त्वेवम् । अस्मिन् वाक्येऽन्तर्यामीत्यपूर्वसंज्ञादर्शनात् किमधिदैवाद्यभिमानी देवतात्मा, किं वा परमात्मेत्यादिः संशयः। तत्र पृथिव्येवास्यायतनमग्निर्लोको मनो ज्योतिरिति श्रुतौ कार्यकरणवत्त्वात् पृथिव्यादीनन्तस्तिष्ठन् यमयतीति देवतात्मनः स्थितेरुक्तत्वात् तस्य यमयितृत्वसंभवादित्येवं प्राप्ते, तद्धर्माणां परमात्मधर्माणामात्मत्वाऽमृतत्वपृथिव्याद्यज्ञातत्वादीनां निर्देशात् परमात्मैवोच्यत इत्यादिरूपा। सा त्वन्तस्तद्धर्माधिकरणे स्पष्टलिङ्गैरेव सिद्धा। अत्राऽप्यमृतत्वादिभिः स्पष्टैरेव लिङ्गैरुपपाद्यत इति तथेत्यर्थः ॥ १८ ॥

रश्मिः ।

साक्षात्कार्यत्वेनोक्तेराहुः **सोपीति** । **औपचारिकत्वेति** यथैतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः मात्रासंबन्धेनानन्दी पुरुष इति प्रयोगस्तथाधिदेवादिपदानामुक्ताभिमानमात्रासंबन्धेनाधिदैवतमित्यादिप्रयोगा गौणाः मात्रागुणसंबन्धात् भगवत्येव मुख्या आनन्दिपदवत् । **तत्कथनमिति** अन्तर्यामिब्राह्मणे ब्रह्मप्रतिपादनीये अधिदेवतादिकथनमित्यर्थः। **विवक्षितेति** अन्तर्यामिपदेन विवक्षितस्य ब्रह्मणो ज्ञापनस्येत्यर्थः। अधिदेवादय आत्मानो अमृताश्चेति प्रयोगोन्तर्यामिब्राह्मणे । ते तद्धर्मा विशेषेण भगवत्यपदिश्यन्तेऽभेदान्वयात् । दण्डी पुरुष इत्यादौ यथा दण्डो धर्मः पुरुषेऽपदिश्यते तद्वदिति भाष्येस्ति। अत्र भाष्यप्रकाशे सूत्रयोजनायात्रत्येष्वधिदैवादिपदेषु वाच्यतयान्तर्यामिभगवानेकः अन्तर्यामीति सौत्रे पदे एकत्वविवक्षणादित्युक्तम् । एवं चेति भाष्यस्य प्रकाशे तु तेषां पदानामभिमानिष्वौपचारिकत्वबोधनायैव तत्कथनमित्युक्तम् । अत्र तु भगवद्धर्मोहंकारस्तेष्वधिदैवादिषु व्यपदिश्यते। अत्रार्थे प्रामाण्याय सूत्रं योजयामासुः **तेनेत्यादि** । **उभयत्रेति** अन्तर्यामिपदे तद्धर्मव्यपदेशपदे च तथा चाधिदैवादिपदेष्वन्तर्यामी भगवान् इति सूत्रं योजितमधुना तु अधिदैवादिपदेषु अन्तर्यामी भगवानेकः अधिदैवादिष्वर्थेषु तस्य भगवतो धर्मस्याहंकाररूपस्य व्यपदेशादिति योजना। तथा च भाष्यं किमन्तर्याम्यधिदैवादिषु सर्वत्रैक एवेति अस्याः संशयकोटेः सिद्धान्तेऽविरोधात् । योजनान्तरसिद्धमाहुः **तथा चेति**। अनेनोक्तेन स्पष्टेन सूत्रेऽस्पष्टेनेत्यर्थः। अन्तर्यामिणो भगवत्त्वं तु पूर्वं भाष्ये प्रसाधितमेव। अत्रान्तर्यामी पक्षः, एकत्वं साध्यम्। अधिदैवादिषु तद्धर्मव्यपदेशादिति हेतुः यन्नैवं तन्नैवं यथा घट इति प्रयोगः। **मतान्तरमिति** शंकररामानुजाचार्यादिमतम्। **अपूर्वेति**। ननु ब्रह्मवादेन्तर्यामी न प्रसिद्धः इति वक्ष्यमाणभाष्यात् शरीरस्य नियन्तृत्वसंभवासंभवाभ्यां संशयमाह **किमधिदैवेति**। पूर्वपक्षमाह **तत्रेति**। अस्य देवस्य पृथिव्येवायतनं शरीरं लोक्यतेऽनेनेति लोकश्चक्षुरग्निर्ज्योतिः सर्वार्थप्रकाशकं मन इत्यर्थः। श्रुतावस्येत्यत्र यस्येति पठति रत्नप्रभाकारो ब्रह्मामृतवर्षिणीकारश्च। इयं श्रुतिर्बृहदारण्यकेस्ति तत्र यस्येति पाठः। अतः पुस्तकान्तरस्थः पाठोऽस्येति। **इत्यादीति** न चाशरीरस्य कथं नियन्तृतेति वाच्यम्। नियम्यशरीरेणैव तस्य नियन्तृत्वोपपत्तेरिति ब्रह्मामृतवर्षिण्याम्। **तथेत्यर्थ** इति अयुक्तत्वेन प्रकारेणाधिकरणरचनेत्यर्थः ॥ १८ ॥

न च स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥

ननु ब्रह्मवादे अन्तर्यामी न प्रसिद्धः । जीवब्रह्मजडानामेव प्रसिद्धत्वात् । अतोऽन्तर्यामिणः सांख्यपरिकल्पितस्य गुणयोगात् तादृशस्य ब्रह्मत्वे वा कः पुरुषार्थो भवेत् ।

न हीश्वरं प्रकृतिधर्मारूढमन्तर्यामिणं मन्यन्ते । तादृशस्योपनिषत्स्वभावात् । पूर्वपक्षन्यायेन स्तुतिपरता तन्मतस्य वा श्रौतत्वमित्याशङ्क्य परिहरति ।

भाष्यप्रकाशः ।

न च स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥ सूत्रमवतारयितुं किंचिदाशङ्क्याहुः **नन्वि**-त्यादि । अयमर्थः । सर्वं खल्विदं ब्रह्म, सन्मूलाः सोम्येमाः प्रजा इत्यादिश्रुतिसिद्धो वादो ब्रह्म-वादः । तत्र तु कार्यत्वेन जडजीवौ, कारणत्वेन ब्रह्मेति त्रय एव पदार्थाः प्रसिद्धाः । अन्तर्यामी तूभयथापि न प्रसिद्धः । अतो नियमनरूपेण चेतनधर्मेणाऽऽत्मत्वेन च प्रधानं जडं व्युदस्य, ब्रह्म वा जीवो वा कश्चित् कल्प्यः । तत्र ब्रह्मणोऽशरीरत्वात् साधारणजीवस्य च सर्वनियामक-त्वादर्शनात् कार्येश्वरभूत एव कल्पनीयः । तादृशश्च महत्तत्त्वं प्रकृतिं वा योऽभिमन्यते, स भवति । तत्रापि महत्तत्त्वावस्थान्तररूपसूत्रान्तर्गतत्वं नास्य विवक्षितमिति प्रकृत्यभिमान्येव भवतीति तादृशस्यान्तर्यामिणः सांख्यपरिकल्पितस्य तद्गुणानां सत्त्वादीनां तमस एव वा योगात् सर्वनियामकस्य ब्रह्मत्वे साधिते कः पुरुषार्थः सिद्ध्येत् । असिद्धौ हेतुः **नहीत्यादि** ।

रश्मिः ।

न च स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥ **इत्यादीति** सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः इत्यादिपदार्थः । मध्यमपदलोपी समास इत्युक्तम् । **ब्रह्मवाद** इति ब्रह्मणः सत्यं ज्ञानमिति श्रुतिसिद्धस्य । ननु वाद इति षष्ठीतत्पुरुषः कुतो न इति चेन्न एकादशस्कन्धैको-नत्रिंशाध्याये श्रीभगवानुवाच कुर्यात् सर्वाणि कर्माणीत्युक्त्वा 'ब्रह्मवादस्य संग्रहः' इतिकथनात् कर्मादिसेवादिरहितब्रह्ममात्रवादस्यानुपष्टब्धत्वात् । ननु सत्पदेन सति साधुरित्यर्थे तत्र साधुरिति सूत्रेण कृतेन यतो रमादिभक्तानां स्वरूपान्तर्गतानां सत्त्वादेकादशस्कन्धवाक्योपपत्तिरस्तीति चेन्न कार्यप्रपञ्चासंग्रहात् । आत्मकृतेः परिणामादित्यत्रात्मकृतेरुक्तेः । किं च सत्यब्राह्मणे सत्पदार्थो यः सोग्रेतनाधिकरणे प्रपञ्च्यः । **उभयथेति** कार्यविचारविषयत्वेन कारणविचारविषयत्वेन च । **अत** इति भाष्यं विवृण्वन्ति स्म **अत** इति । **प्रधानमिति** जगतो जडस्य ब्रह्मत्वेन व्युदासानर्हत्वात् प्रधानमिति विशेषणम् । प्रकृतिरित्यर्थः । **महत्तत्त्वेति** ज्ञानक्रियावस्थान्तरम् । **नास्येति** वायुना हि गौतमसूत्रेण संदृब्धानि भवन्त्येवमेवैतद्याज्ञवल्क्येति सूत्रनिरूपणं समाप्यान्तर्यामिणं ब्रूहीति श्रुते-र्नास्याभिमानिनो विवक्षितमपि तु वायुरूपसूत्रान्तर्गतत्वं सूत्रविदुन्नेयत्वं विवक्षितम् । तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वान् तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीत्यरिष्टश्रावणात् । ब्रह्मगवीर्ब्रह्मविदां स्वभूता गाः । उदजसे अन्यायेनोन्नयसि । **सांख्येति** भाष्यं विवरामासुः **सांख्येति** । **तद्गुणानां** प्रकृतिगुणानां 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः' इति कापिलसांख्य-प्रवचनसूत्रवृतौ 'सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः' इति गीतायाः । योगशास्त्रीयं प्रकृतिरूपमाहुः **तमस** इति तमसोऽविद्याया एव वा योगादध्यासाख्यसंबन्धात् तथाच पातञ्जलसां-

न च स्मार्तं, स्मृतिप्रसिद्धं स्मार्तं सांख्यमतसिद्धमिति यावत्। तादृशमन्तर्यामिरूपमत्र भवितुं नार्हति। कुतः। अतद्धर्माभिलापात्। तद्धर्माणामनभिलापात्। तद्विरुद्धधर्माणां चाभिलापात्। न ह्यत्र सत्त्वरजस्तमोगुणास्तत्कार्यं वा अभिलप्यते। तद्विरुद्धाश्चैते धर्मा, यस्य पृथिवी शरीरमित्यादि। तस्मात् सांख्यपरिकल्पितं नान्तर्यामिरूपमत्र भवितुमर्हतीति सिद्धम्। एवं सति ब्रह्मधर्मा एवैते भवन्तीति ब्रह्मवादः फलिष्यति॥ १९॥

भाष्यप्रकाशः।

तथाचोपनिषत्सु तादृशेश्वरस्याभावेन श्रुतिविरोधभवनान्न कोऽपि पुरुषार्थः सिद्ध्येत्। अतः पूर्वपक्षन्यायेनान्तर्यामिब्राह्मणस्य प्रकृत्यभिमानिस्तावकत्वं वा, सांख्यमतस्य श्रौतत्वं वाङ्गीकार्यमित्याशङ्कां परिहरतीति। एवं सूत्रमवतार्य तदर्थं वदिष्यन्तो, देवतास्तुतिपरत्वस्याग्रिमसूत्रे निरसनीयत्वाद् द्वितीयमेव परिहरतीत्याहुः न चेत्यादि। नपुंसकप्रयोगं समर्थयन्ति अन्तर्यामिरूपमिति। हेत्वंशं द्विधा व्याकुर्वन्ति तद्धर्मेत्यादि। के विरुद्धा धर्मा इत्यत आहुः तद्विरुद्धा इत्यादि। नहि महदादौ विद्यमाने तदभिमन्तुर्व्यष्टिभूताः पृथिव्यादयः शरीराणि युगपद् भवितुमर्हन्ति। नच योगिवदिति वाच्यम्। गुणप्रधानभावगमकानुपलम्भात्। नापि गमकं कल्पयितुं शक्यम्। तद्धर्मानभिलापस्य बाधकस्योक्तत्वादिति स्फुटमग्रिमम्।

रश्मिः।

ख्यप्रवचने योगसूत्रं 'अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या' इति द्वितीयपादे। ख्यातिर्भ्रमः पृथिव्यादिसर्वनियामकस्येत्यर्थयितव्यम्। सर्वनियामकस्य ब्रह्मत्वे साधिते पुरुषार्थसिद्धेः सकलवादिप्रतिवादिमतसिद्धत्वात्। **द्वितीय**मिति सांख्यमतस्य श्रौतस्य श्रौतत्वं, स्मार्तमन्तर्यामीति विरुद्धलिङ्गत्वमाशङ्क्य स्मार्तमन्तर्यामिरूपमित्याहुः। **नपुंसके**ति। **द्विधे**ति।

'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः'॥

इति षडर्थेषु भावविरोधाभ्यां द्विधा व्याकुर्वन्ति स्मेत्यर्थः। नव्यास्तु संसर्गाभावोन्योन्याभावश्चेति द्वयं नञर्थः इत्याहुः तद्बहूनामसंमतं नव्यानां संमतमित्युपेक्ष्यम्। तर्काप्रतिष्ठत्वात्।

'तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः नैको मुनिर्यस्य वचः प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः'॥ इति भारतात्।

भाष्ये। सत्त्वं च रजश्च तमश्चेत्येतेषां समाहार इति समाहारद्वन्द्वः। तत्कार्यं सत्त्वरजस्तमसः कार्यं 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोहंकारातपञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिगुणाः' इत्यादिसूत्रोक्तम्। **प्रकृते**। **अभी**ति स्वराजः। समष्टिवर्तिनः अभिमानिन्युपचारार्थं तत्राहंकाराङ्गीकारात्। पृथिव्यादयः पृथिव्यबग्न्यादयोन्तर्यामिब्राह्मणोक्ताः। **युगपत्** एककालावच्छेदेन। **न च योगिव**दिति स्वशरीरस्थस्यान्यशरीरस्थत्वं योगशास्त्रीयम्। **गुणप्रधाने**ति पृथिव्यादिषु स्वीयपरकीयभावेत्यर्थः स्वकीयदेहः प्रधानः। **कल्पयितु**मिति सांख्यधर्मैः कल्पयितुं शक्यम्। **स्फुटमग्रिम**मिति। **भाष्ये**। एत इति आत्मामृतत्वान्तर्यामित्वरूपाः। मात्रासंसर्गादानन्दिनोन्ये एवमहंकारसंसर्गादन्येहंकारिणोधिदैवतादय इत्यहंकारोपि **ब्रह्मधर्म**

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥

ननूक्तन्यायेन शारीर एव भवतु । को दोषः, किमिति ब्रह्मपरत्वं कल्प्यमिति । तत्राह । शारीरश्च । नेत्यनुवर्तते । शारीरश्च जीवो नान्तर्यामिब्राह्मणे तत्तदभिमानिरूपो, यस्य पृथिवी शरीरमिति वाक्यानुरोधेन भवितुमर्हति । ततोऽपि भिन्नतयाऽन्तर्यामिणो वचनात् । उभयेऽपि काण्वमाध्यन्दिनब्राह्मणद्वयेऽपि एनं जीवं भेदेनैवाधीयते ब्राह्मणाः । निःसंदेहार्थमुभयग्रहणम् । यो विज्ञाने तिष्ठन्निति काण्वाः । य आत्मनि तिष्ठन्निति माध्यन्दिनाः । नचाऽऽत्मशब्देनान्यः संभवति । अन्येषां पूर्वमेव पठितत्वात् । अन्ते हि जीवमाह । तस्मादन्तर्यामिब्राह्मणे ब्रह्मैव वाक्यार्थ इति सिद्धम् ॥ २० ॥

इति प्रथमाध्याये द्वितीयपादे षष्ठमन्तर्याम्यधिकरणम् ॥ ६ ॥

भाष्यप्रकाशः ।

रामानुजाचार्यास्तु, शारीरश्चेत्यन्तमिदं सूत्रमङ्गीकुर्वन्ति ॥ १९ ॥

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥ सूत्रमवतारयन्ति **नन्वित्यादि ।** तथा च यथा संवर्गादिविद्या अङ्गविद्यास्तथाऽन्तर्यामिब्राह्मणमपीति देवतात्मस्तावकत्वेऽपि ब्रह्मवादाविरोधात् को दोष इत्यर्थः । परिहारं व्याकुर्वते **नेत्यादि ।** ततोऽपीति अभिमानिदेवतातोऽपि । उभय इति ब्राह्मणा इत्यस्य विशेषणम् । निःसंदेहार्थमिति । विज्ञानपदेन बुद्धिरुच्यत इति संदेहनिरासार्थम् । नन्वतति व्याप्नोतीत्यात्मेति योगमादाय दिगाकाशप्राणेष्वन्यतमः कश्चिद् ग्रहीतुं शक्य एवेति कुतो न संभवतीत्यत आहुः **अन्येषामित्यादि ।** हिर्हेतौ । स्फुटमन्यत् । एवं चात्र स्थितिकर्तृत्वनिर्वाहकतयोपोद्घातेन सर्वनियमनं विचारितमिति तदसंभवः परिहृतः ॥ २० ॥

इति षष्ठमन्तर्याम्यधिकरणम् ॥

रश्मिः ।

इति पृथ्वीत्वसंबन्धादन्येपि घटादयः पृथ्वीरूपाः एवं ब्रह्मधर्मसंबन्धादधिदैवतादयो ब्रह्मरूपा इत्युपक्रमोक्तब्रह्मवादः फलिष्यति इत्येवमग्रिमं स्फुटमित्यर्थः । **शारीरश्चेति** 'न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च' इत्यन्तं सूत्रम् ॥ १९ ॥

शारीरश्चोभयेपि हि भेदेनैनमधीयते ॥ २० ॥ नन्वित्यादीति । भाष्ये । उक्तन्यायेन पूर्वपक्षोक्तन्यायेन । **प्रकृते ।** उक्तब्रह्मवादासिद्धिरूपदोषात् को दोष इति भाष्यास्वरसमालोच्यैतत्समर्थयांबभूवुः **तथा चेति । संवर्गेति** संवर्गः प्राणो वायुश्च छान्दोग्यषष्ठप्रपाठके स आदिर्यासामग्निविद्याऽप्रकृतविद्याश्चयुक्तमेव स्थानवैशिष्ट्येनोक्तं य एषोक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचेति श्रुत्युक्ता प्राणविद्यानां ताः संवर्गादयः ता आदयो यासामङ्गविद्यानां ज्ञानाङ्गपञ्चाग्निविद्यादीनां ताः संवर्गादिविद्याद्यङ्गविद्याः । **विज्ञानेति ।** बुद्धिर्विज्ञानरूपिणीति वाक्यात् । न च विज्ञानं जीवः आत्मा तु परमात्मनोऽनियम्यत्वान्मनः आकाशादि भवन्त्विति चेन्न अन्येषां पूर्वमेव पठितत्वादन्ते हि जीवमाहेति भाष्यात् । **तदसंभव इति** स्थितिकर्तृत्वं विष्णुना चरितार्थं न पर उपसंक्रामतीति निष्क्रियत्वादित्यसंभवः ॥ २० ॥

इति षष्ठाधिकरणम् ॥ ६ ॥

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥ (१-२-७)

मुण्डके हि श्रूयते। कस्मिन्नु भगवो विज्ञात इति पृष्टे, द्वे विद्ये वेदितव्ये इत्युत्तरमाह। तत्र नामरूपात्मकजगतो विज्ञानार्थं नामांशे वेदादिः। रूपांशे

भाष्यप्रकाशः।

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥ पूर्वाधिकरणविषयवाक्ये, अमृत इति, अतोऽन्यदार्तमिति च कथनादन्तर्यामिणि सर्वहृदयदेशवर्तिनि भोगवैलक्षण्यसाधकं वैशेष्यं दर्शितम्। सृष्टिदशायां नियामकत्वं चोक्तम्। तत्र पुनरदृष्टो द्रष्टेत्याद्युक्तम्। तत् कुत इत्याकाङ्क्षायां तत्र हेतुबोधनाय सृष्टिपूर्वदशायां सर्वाभावान्नियामकत्वं न भविष्यतीत्याशङ्कायां च तदाप्यक्षरं नियमयतीति बोधनाय चोपोद्घातेनेदमधिकरणमारभ्यत इति प्रसङ्गरूपां संगतिं बोधयितुं विषयवाक्यमुदाहरन्ति मुण्डके हीत्यादि। अत्र सर्वा उपनिषद् विषयवाक्यतया ज्ञेया। इति पृष्ट इति अनेन वाक्येनैकविज्ञानेन सर्वविज्ञाने पृष्टे। इत्युत्तरमाहेति इत्यादिनोत्तरमाह। किमुत्तरमाहेत्यपेक्षायामाहुः तत्रेत्यादि। तत्रेति उत्तरमध्ये तथाचैतद्विद्याद्वयं सर्वविज्ञानार्थ-

रश्मिः।

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥ भोगेति सुखसाक्षात्कारो भोगः। **वैशेष्यमिति** सर्वरूपत्वमानन्दरूपत्वस्वकर्तृत्वरूपं वैशेष्यम्। अन्तर्यामी विलक्षणभोगवान् वैशेष्यादात्मवत्। इतीदं भोगवैलक्षण्यसाधकम्। **तत्रेति** विषयवाक्योपसंहारे। **तत्कुत** इति अन्तर्यामिणो भगवत्त्वेन सृष्टिपूर्वदशायां सत्त्वात् कैरदृष्ट इत्याकाङ्क्षायां तत्राऽदृष्टत्वे हेतुरक्षरे स्थितत्वेनाक्षरेण दृष्टः जीवभूताक्षरैरहरहर्गमनेप्यदृष्टो मायासंबन्धानन्तरं चादृष्ट इत्यदर्शनं दर्शनसमानाधिकरणमुपपन्नमभावस्य प्रतियोगिसामानाधिकरण्यनियमादिति ह्यक्षरकर्तृकं दर्शनं सृष्टिपूर्वकालेऽदर्शने हेतुः प्रतियोगित्वात्तदुक्तं गीतायां 'स्वयमेवात्मनाऽत्मानं वेत्थ त्वं पुरुषोत्तम' इति। पुरुषोत्तमाभेदस्याक्षरे वक्ष्यमाणत्वात्। तस्य बोधनायेत्यर्थः। **उपोद्घातेनेति** चिन्ता तावत्प्रकृतं भोगवैलक्षण्यसाधकं वैशेष्यं दर्शितं तत्र पुनरदृष्टो द्रष्टेत्याद्युक्तम्। तत्सिद्ध्यर्थां तद्धेतुविषयिणी तामुपोद्घातं विदुर्बुधास्तेन। **इति प्रसङ्गेति** उपोद्घातत्वेन प्रसङ्गरूपां संगतिसामान्यलक्षणं स्वमते प्रसङ्गरूपं तल्लक्षणलक्षिते विशेषलक्षणकोपोद्घातत्वमस्त्येव। सावधानपुरुषः श्रुतिवक्ता तेन प्रयुज्यमानं वाक्यमदृष्टो द्रष्टेति तत्प्रयोजकतादर्शनरूपे हेतौ तदवच्छेदकत्वं दर्शनत्वं तेन दर्शनत्वेन स्मृतस्याक्षरकर्तृकदर्शनस्योपेक्षानर्हत्वमिति प्रसङ्गसंगतिरूपसामान्यलक्षणसंगमनम्। **अत्र सर्वेति** अत्र भाष्ये ब्रह्मविद्यायाः संशयकोटित्वेन ब्रह्मविद्याया सर्वोपनिषत्प्रतिपाद्यत्वमुपक्रमे स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेति श्रुतेरुपसंहारे च तेषामेवैतां ब्रह्मविद्यां वदेत इति श्रुतेश्च। **अनेनेति** कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति वाक्येन इदं वाक्यं शौनकस्य। अत्र नु वितर्के कस्मिन्नित्यस्य किमः प्रश्ने प्रयोगात् प्रश्नविषय आश्रय इत्यर्थः। प्रश्नः किमर्थः। आश्रयो ङेरर्थः विषयविषयिभावः संसर्गः। पृच्छ ज्ञीप्सायां ज्ञानेच्छायाः सविषयत्वात्। भगवो भगवन्। **उत्तरमिति** द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमितीतिहासपुराणं न्यायो मीमांसा धर्मशास्त्राणीति। अथ परा यया तदक्षरमधिगम्यते इत्यादिनाङ्गिरा उत्तरमाहेत्यर्थः। अत्र वेदेत्यादीति परायां संदिह्यते न तु भूतयोनिः प्रधानं स्यादुत शारीरः आहोस्वित्परमेश्वरः इत्यथ परेत्यारभ्य धीरा इत्यन्ते संदिह्यते इत्यादि-

परा च । तत्र वेदादिविद्यायां न संदेहः । परायां संदिह्यते किमेषा सांख्यमत-विद्या ब्रह्मविद्या वेति । सांख्यधर्माभिलापात् संदेहः । 'अथ परा यया तदक्षर-मधिगम्यते, यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुरश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं, यद्भूतयोनिं परिपश्यन्ति धीराः' इत्यादि । अग्रे च, 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याऽभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः' इत्युक्त्वा, 'एतस्माज्जायते' इति निरूप्य, अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यावित्यादिना रूपमुक्त्वा पुनः पुरुषात् सृष्टिमाह ।

तत्रैकप्रकरणत्वादेकवाक्यता वक्तव्या पुनः तत्राक्षरपुरुषयोर्भेदः प्रतीयते । तयोरुभयोरपि सृष्टिः । तद् ब्रह्मवादे न संगच्छते । तस्मात् सांख्यमतमेवैतत् । प्रकृतिपुरुषयोः श्लिष्टत्वादन्यतरप्राधान्येनोभयोः स्रष्टृत्वम् । उभयात्मकत्वाज्ज-गतः । रूपमपि समष्टिव्यष्टीनामग्रे ह्युत्पत्तिरिति । तिरोहितरूपत्वान्न ब्रह्मविद्या ।

भाष्यप्रकाशः ।

माहेत्यर्थः । अत्र कस्मिन्नंशे संदेह इत्यपेक्षायामाहुः तत्र वेदेत्यादि । कुतः संदेह इत्यपेक्षायां तद्बीजमाहुः सांख्यधर्मेत्यादि । तथाचोपक्रमे, स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेति प्रतिज्ञानादग्रे सांख्यधर्माभिलापाच्च संदेह इत्यर्थः । तदभिलापमुपपादयन्ति अथेत्यारभ्य । सृष्टिमाहेत्यन्तम् । अग्र इति द्वितीयमुण्डके । तथाच पूर्वमुण्डके, अद्रेश्यत्वादिगुणकस्य भूतयोनित्वकथनात् तादृशत्वस्य प्रधाने सांख्यैरङ्गीकारात् । द्वितीयमुण्डके च पुरुषं तद्रूपं ततोऽग्रे 'पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात् संप्रसूता' इति कथनात् प्रकृति-संयोगेन पुरुषरूपस्य सृष्टेश्च तैरङ्गीकारात् तदभिलाप इत्यर्थः । एवं संदेहबीजमुक्त्वा पूर्वपक्षमाहुः तत्रेत्यादि । मुण्डकत्रये एकस्यैव मतस्य प्रतिपादितत्वेन वाक्यानामितरेतरसाकाङ्क्षतयैकप्रकरणत्वा-देकवाक्यता सर्वस्य वक्तव्येत्यर्थः । तर्ह्युपक्रमस्याऽसंजातविरोधत्वेनावान्तरवाक्यापेक्षया प्रबलत्वाद् ब्रह्मवाक्यत्वेनैव सा भवत्वित्यत आह तत्राक्षरेत्यादि । प्रतीयत इति 'अक्षरात् परतः परः' इत्यत्र प्रतीयते । सृष्टिरिति 'एतस्माज्जायते प्राणः' इत्यादिनोक्ता सृष्टिः । न संगच्छत इति बाधकोपपत्तेरुपक्रमापेक्षया प्राबल्यान्न संगच्छते । ननु सांख्ये प्रकृतेरेव सृष्टिरङ्गीक्रियते, न पुरुषादतः कथं तन्मतसिद्धिरित्यत आह प्रकृतिपुरुषयोरित्यादि । उभयात्मकत्वादिति जीवजडात्मकत्वात् । रूपमपि समष्टेरिति अग्निर्मूर्धेत्याद्युक्तं रूपमपि श्लिष्टस्यैवेत्यर्थः । अत्र युक्तिमाहुः व्यष्टीनामित्यादि । नन्वेतत्सर्वं ब्रह्मवादेऽपि तुल्यमित्यत आह तिरोहितेत्यादि । सच्चिदानन्दरूपस्य विषयवाक्येऽनुक्तत्वेन तिरोहितरूपत्वात् तथेत्यर्थः । ननु तथापि ब्रह्मविद्या-पदविरोधो दुर्वार इत्यत आह ब्रह्मविद्येत्यादि । ब्रह्मपदस्य वेदेऽपि शक्तेस्तथा । नन्वग्रे विद्ययोः

रश्मिः ।

ईषदानन्दतिर इति भाष्यप्रकाशे वक्ष्यामः । सर्वविद्येति सर्वविद्यास्थानमित्यर्थः । व्यस्तपाठे तु सर्वविद्या यस्यामिति सर्वविद्या तां सर्वविद्यां प्रतिष्ठाजनकत्वात् प्रतिष्ठामिति । प्राहेति ब्रह्मा प्राह । भाष्ये । तयोरिति 'कर्तृकर्मणोः कृति' इति सूत्रेण सृष्टिरिति कृद्योगे षष्ठी । प्रकृते । इत्यादिनेति अत्रादिना पुरुष एवेदं विश्वमिति यदर्चिमद्यदणुभ्योणु चेत्युपक्रम्य तदेतदक्षरं ब्रह्मेति सृष्टिप्रकरणोक्तश्रुतिसंग्रहः । उपक्रमेति स ब्रह्मविद्यामित्युपक्रमापेक्षया । श्लिष्टस्येति

किंतु स्मृतिरेवेति। ब्रह्मविद्या वेदविद्या, उपचाराद्वेति । एवं प्राप्त उच्यते। अदृश्यत्वादिगुणकः परमात्मैव। ब्रह्मविज्ञानेनैव सर्वविज्ञानात्। तत एव विद्याया

भाष्यप्रकाशः।

परापरविभागमुक्त्वा तत उपनिषत्समाप्तावक्षरविद्यासमापने, तेषामेवैतां ब्रह्मविद्यां वदेतेति प्रकृतपरामर्शपूर्वकं ब्रह्मविद्यापदकथनाद् वेदविद्यापक्षो न साधीयानित्यत आह **उपचाराद्वेति**। एवं पूर्वपक्षमुक्त्वा सिद्धान्तं वक्तुं सूत्रं व्याचक्षते उच्यत इत्यादि। **ब्रह्मविज्ञानेत्यादि** एकविज्ञानेन सर्वज्ञानस्य ब्रह्मविद्यालिङ्गत्वम्, 'अपि वा तमादेशमप्राक्ष्' इत्यादिश्रुत्यन्तरे सिद्धम्। प्रकृतेऽपि, कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति प्रश्नस्योत्तरत्वेनादृश्यत्वादिगुणकस्य ततः सृष्टेश्च कथनेन तद्विज्ञानादेव सर्वविज्ञानबोधनादक्षराधिगमकत्वादेव विद्यायाः परत्वबोधनाच्च तल्लिङ्गमत्रापि दृश्यत इति स परमात्मैव, न तु प्रकृतिः। तद्विज्ञानेन पुरुषाविज्ञानात्

रश्मिः।

प्रकृतिसंश्लिष्टपुरुषस्य। **व्यष्टीनामित्यादीति** तस्मादग्निः समिधो यस्य सूर्यः इत्याद्युक्त्याग्न्यादिव्यष्टीनाम्। **तथेति** सांख्यस्मृतित्वेन प्रकारेण सांख्योक्तपदार्थानां स्मृतिस्तत्पूर्वकं वेदान्तकरणात् स्मृतिरिव स्मृतिः। **उपचाराद्वेतीति** । **उच्यत इत्यादीति** ब्रह्मविद्यायामाधेयनिरूपकश्रुतिमीमांसयोच्यते इत्यर्थः । यस्मिन् द्यौः पृथिवीत्याद्याधारनिरूपकश्रुतिमीमांसाया अग्रिमे पादे कर्तव्यत्वात् एतावत्या मीमांसया द्वितीयं मुण्डकं समाप्तं तृतीये मुण्डके यदा पश्य इति श्रुतिमीमांसा साधनाध्यायतृतीयपादपञ्चमाधिकरणद्वितीयसूत्रेऽस्ति। नायमात्मा प्रवचनेन लभ्य इति श्रुतिमीमांसा साधनाध्याये लिङ्गभूयस्त्वाधिकरणेपि विद्यैवेति सूत्रेऽस्ति । ब्रह्मपदशक्यस्य प्रतिपादकतासंबन्धेन वेदे उपचारो लक्षणा तस्माद्वेति भाष्यार्थः । भाष्ये ब्रह्मविज्ञानेनैवेत्येवकारेणेतरस्याः प्रकृतेर्व्यवच्छेदाद्विशेष्यसंगतैवकारोक्तेर्भवति जिज्ञासा । अदृश्यत्वादिगुणकः परमात्मेत्यनुमितिः यथा पर्वतो वह्निमानित्यनुमितिः सा ब्रह्मविद्या तस्या एव लिङ्गं एकविज्ञानेन सर्वविज्ञानम् न तु प्रकृतिविद्याया इत्यत्र किं प्रमाणमिति तत्पूर्त्यै श्रुत्यन्तरसिद्धब्रह्मविद्यालिङ्गिनी एकविज्ञानेन सर्वविज्ञानं लिङ्गमित्याहुः **एकविज्ञानेति**। अपि वेति विद्वन्मण्डनानुवादः तत्स्मरणार्थः किं प्रयोजनमिति चेत्तन्नित्यम् । उत तमादेशमित्यत्र 'अपि वा तमादेशम्' इति पुस्तकान्तरपाठो वा । श्रुतिः श्वेतकेतूपाख्यानस्था श्रुतिस्तु उत तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यत्रैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमित्यादिविद्वन्मण्डने स्फुटम्। हे श्वेतकेतो अप्राक्षः गुरुं प्रति पृष्टवानसीति श्रुतिस्थाप्राक्षः इत्यस्यार्थः। नचात्रापि प्रकृतिविद्यास्त्विति शङ्क्यम्। तद्विज्ञानेन पुरुषविज्ञानादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञासंन्यासरूपनिग्रहस्थानापत्तेः । अतः प्रकृतेपि श्रुत्यन्तरैकवाक्यतयैतद्ब्रह्मविद्याया एव लिङ्गमिति समर्थयांबभूवुः **प्रकृतेपीति** । भगव इति भगवान् । तत एवेति भाष्यं विवरामासुः **अक्षराधिगमकत्वादिति**। अथ परा यया तदक्षरमधिगम्यते इति श्रुतावक्षराधिगमकत्वस्य परविद्यालक्षणत्वात् । **तल्लिङ्गमिति** विद्यालिङ्गम् । **अत्रादृश्यत्वादिगुणकः** परमात्मा वेत्यत्र **सोऽदृश्यत्वादिगुणकः**। **पुरुषाविज्ञानादिति** 'असङ्गोऽयं पुरुषः' इति कापिलसांख्यप्रवचनसूत्रेण 'न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते' इत्यनेन च। योगसूत्रेष्वपि 'क्लेशकर्मविपाकाशयैरपरामृष्टपुरुषविशेष ईश्वरः' 'तत्र निरतिशयं सार्वज्ञ्यबीजम्' 'पूर्वेषामपि गुरुः कालेनानवच्छेदात्' 'तस्य वाचकः प्रणवः' 'तज्जपस्तदर्थ-

अपि परत्वम् । अक्षरस्यापि ब्रह्मत्वं पुरुषस्यापि । तयोः परापरभावः । अभेदश्च । एतादृश एव हि ब्रह्मवादः। तत्र प्रथममक्षरस्य ब्रह्मत्वमाह ।

भाष्यप्रकाशः ।

तद्विद्यया मोक्षाभावेन परत्वानङ्गीकाराच्च तथेत्यर्थः । अत्रापि धर्मोक्तेरेव हेतुत्वम् । नन्वत्राक्षर-पुरुषावुक्तावत उभयोर्विज्ञानेन तथात्वमुच्यते, न त्वेकविज्ञानेनेति नायं हेतुरित्यत आहुः **अक्षरस्येत्यादि**। एतादृश एव हीति अन्यथा पुरुषस्वरूपकथनस्य पादत्रयेणैव सिद्धेरक्षरात्

रश्मिः ।

भावनम्' द्वितीयपादे 'अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः' 'अनित्याशुचिदुःखानात्मसु नित्यशुचि-सुखात्मख्यातिरविद्या' 'दृग्दर्शनशक्त्योरेकात्मतेवास्मिता' 'सुखानुशयी रागः' 'दुःखानुशयी द्वेषः' 'स्वरसवाही विदुषोपि तथारूढोभिनिवेशः' एवं चाविद्यायाः ख्यातित्वेन तद्विज्ञाने आत्मख्यातिवि-ज्ञानात् तन्निवृत्तौ विशेषदर्शनसाध्यायां सत्यां पुरुषज्ञानेपि प्रकृतिविद्ययाऽज्ञानादित्यर्थः । **परत्वेति** प्रकृतिविद्यायां परत्वेत्यादिः । **तथेति** ब्रह्मविद्यायाः परत्वम् । विषयवाक्यप्रसङ्गा-त्स्मृते विद्यापरत्वेप्येष एव हेतुरित्याहुः **अत्रापीति** । अत्र ब्रह्मविद्यायाम् । धर्मोपदेशस्तावददृश्यादि-गुणकः परमात्मेत्यनुमितौ ब्रह्मविद्यात्वात् तद्विषयगतः सामानाधिकरण्यसंबन्धेनारोपितः यया तद-क्षरमधिगम्यत इति श्रुत्युक्तोऽक्षरविद्यात्वरूपो धर्मस्तदुक्तेरित्यर्थो वा । **तथात्वमिति** सर्वज्ञानमित्यत्र सर्वनिष्ठज्ञानरूपः प्रकार उच्यते । **अयमिति** सर्वविज्ञाने एकविज्ञानरूपो हेतुः। **अक्षरस्येत्यादीति** भक्तिमार्गत्वाद्गीताद्वादशाध्याये योगाख्ये ।

'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः' ॥

इत्यर्जुनप्रश्ने । श्रीभगवानुवाच—

'मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेता ते मे युक्ततमा मताः ॥
ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते' ।

इत्याद्युक्त्वा 'ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः' इति वाक्येभ्यः। **तयोः परापरभावः** ब्रह्मविदाप्नोति परमिति श्रुतिः अक्षरादपि चोत्तम इति गीतातः **अभेदश्च** ते प्राप्नुवन्ति मामेव इति गीतातः । येनाक्षरं पुरुषं वेद सत्यमिति श्रुतिः येन तत्त्वेन प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति उत्तरपादे तत्त्वमनतिक्रम्य ब्रह्मविद्यां प्रोवाचेत्यर्थाद्ब्रह्मविद्यायास्तत्त्वरूपत्वमिति न यत्तदोर्नित्य-संबन्धविरोधः । **पादत्रयेणेति** द्वितीयमुण्डके दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः अप्राणो ह्यमनाः शुभ्रः इति पादत्रयेण । क्षरात्परतोक्षरात्परः इति श्रुत्यर्थः । अत्रामूर्ताप्राणात्मनः पदैरन्नमयादिविभूतिभेदः प्रतीयते स बाह्याभ्यन्तर इति पदात् विज्ञानमयभेदः तादृशो दिव्योजः पुरुषः शुभ्रः आनन्दरूपममृतं यद्विभातीति श्रुतेरत्रत्याया दिव्य आनन्दः । अत्र किंचिदुच्यते ब्रह्मनिरूपकत्वाच्छ्रुतेः हि विशेषे विशेषणैकदेशिमतेनामूर्तः मूर्तत्वं परिच्छिन्नपरिमाणवत्त्वं ततो नञोर्थो भेदो नात्यन्ताभावः तदङ्गीकारे तु मूर्तत्वावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः । स च छान्दोग्ये अण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न

भाष्यप्रकाशः।

परतः पर इति तुरीयं पादं न वदेत्। प्रयोजनाभावात् तथाच ब्रह्मवादस्य परापरभावपूर्वकाभेदघटितत्वेनात्राप्येकविज्ञानादेव सर्वविज्ञानस्याभिप्रेतत्वेन हेतुरस्त्येवेत्यर्थः। ननूभयोः कथमभेद इत्याकाङ्क्षायामाहुः तत्रेत्यादि। तत्रेति अभेद उभयोर्वक्तव्ये। विश्वोत्पत्तेः कथं ब्रह्मधर्मत्वमत

रश्मिः।

किंचन भगव इति तँ होवाच यं वै सौम्यैतमणिमानं न निभालयसे एतस्य वै सोम्यैषोणिम्नः एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति स य एषोणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति श्रुतौ दर्शनाविषयोणिमा तद्रूपः। वक्ष्यते चारूप एव हि तत्प्रधानत्वादिति सूत्रे। ध्वंसप्रागभावौ कारणावस्थाविशेषौ नाभावौ। ननु भेदस्तु तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकोऽभावः। मूर्तस्य तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकोऽभावः दिव्योमूर्तो नेति तन्न आनन्दस्य साकारत्वेन परिच्छिन्नपरिमाणात्। अतो मूर्तभिन्नमूर्तसदृश इत्यर्थः। पर्युदासः सदृग्ग्राहीति पर्युदासो नञर्थः। तथाच श्वेताश्वतरोपनिषत् 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्' इति सर्वेन्द्रियात्यन्ताभावतद्गुणैराभास्यत इति सर्वेन्द्रियगुणाभासं नपुंसकत्वं छान्दसम्। सर्वेन्द्रियभिन्नत्वे सति तद्गुणैः सादृश्यात् पर्युदासः। एवमेतत्पूर्वश्रुतिषु अदृश्यमग्राह्यमगोत्रमवर्णमित्यादिपदेषु पर्युदासो ज्ञेयः। प्रहस्ते विशेषोस्ति प्रसज्यप्रतिषेधो नञर्थो विद्वन्मण्डनेस्ति सर्वेन्द्रियविवर्जितमिति श्रुतेः स पर्युदासोपयोगी पूर्वोक्तरीत्येत्यविरोधः। यद्वा सर्वेन्द्रियविवर्जितमिति सर्वेन्द्रियगुणाभासमिति एवमिन्द्रियपर्युदासो नास्थूलमित्यादौ स्थूलादेरतः प्रकारान्तरम्। कारणगुणाः कार्ये समायान्तीति स्थूलादिभिन्नस्थूलादिसदृश इत्यर्थः। अनुकृत्यधिकरणे सर्वस्य भगवदनुकारित्वादस्थूलमित्यादिषु पर्युदाससिद्धिः। **पुरुष** इति आदिजिज्ञासाया पुरा आसेति व्युत्पत्तिः न तु पुरि शेते इति न वा पुरमुषतीति उष दाहे इमा व्युत्पत्तयः सुबोधिन्यां सन्ति। बाह्याभ्यन्तराभ्यां समानः हि निश्चयेनाजः अप्राणो हि पादपूरणे 'हिः पादपूरणे' इत्यादिविश्वात्। अमनाश्च पूर्ववत्। शुभ्र इति शुभि दीप्तौ भ्वादिरात्मनेपदी सेट्। शुभ शोभायाम्। अदादिः परस्मैपदी सेट् रक् दीप्तियुक्तः। ब्रह्म तर्हि अग्निरिति श्रुतेः। गोपरूपोऽभ्राभस्तरुणः शुभ्रः शोभायुक्तः गोपवेष इत्यादिगोपालतापिनीयश्रुतेः। अक्षरात् ब्रह्मणः परतः क्षरात्परतः परस्मात् परः पुरुषोत्तमः। नन्वक्षराच्चन्द्रशेखरादित्यर्थोऽस्तु क्षरं प्रधानममृताक्षरो हर इति श्वेताश्वतरादिति चेत्सत्यम्। भक्तादक्षरात्पर इत्यर्थात् ज्ञानेन भजतीत्यथर्वशिरःश्रुतेः। व्यक्तादक्षराद्वा परतोऽव्यक्ताद्भगवत्कृपारूपात् परः व्यक्तमेवाक्षरमिति गोपालतापिनीयश्रुतेः। एतद्व्यक्तमक्षरं महतः कारणम्। यत्त्वक्षरात् प्रकृतेः परतः परः अक्षरो भूतयोनिरिति व्याख्यानं तन्न अक्षरपदस्याविद्यायां शक्त्यभावात्। अक्षरं ब्रह्मवर्णयोरिति विश्वात्। **प्रयोजनेति**। न च कथं न प्रयोजनं पादत्रयेण पुरुषमक्षरमित्यनिरूपणादिति वाच्यम्। अत्र येनाक्षरं पुरुषं वेदेति श्रुतेरेव पुरुषमक्षरमिति निरूपणसंभवात्। **ब्रह्मवाद** इति ब्रह्मणः सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्युक्तस्य वादो भवत्वित्याकाङ्क्षायामाहुः **परापरेति**। परः पुरुषो भक्तमनोरथपूरककालकृतपरत्वविशिष्टत्वात् परस्मादपरत्ववैशिष्ट्यादपरमक्षरं तत्पूर्वकोऽभेदः 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतेः 'परास्य शक्तिर्विविधैव श्रूयते' इति श्रुतेर्भक्तमनोरथपूरककालावच्छेदेन परापरभावः सत्यं ज्ञानमिति श्रुतौ साधकः सत्यमित्यपि व्याख्यातं व्याख्यातं च सप्तब्राह्मणटीकायामिति तादृशो ब्रह्मणो वादो विवादो हि क्षरनिवेशेन

अदृश्यत्वादिगुणकः परमात्मैव । कुतः । धर्मोक्तेः । तथाऽक्षरात् संभवतीह विश्वमिति । इयं चोपनिषत् । न ह्यत्र ब्रह्मव्यतिरिक्ताज्जगदुत्पत्तिरस्ति । पुरुषस्य ब्रह्मत्वं निःसंदिग्धमेव । ईषदानन्दतिरोभावेन ब्रह्माऽक्षरमुच्यते ।

भाष्यप्रकाशः ।

आहुः इयमित्यादि । नन्वेवं ब्रह्मत्वेनोभयोरभेदे, 'अक्षरात् परतः परः' इति कथं परापरभावव्यपदेश इत्यत आहुः **ईषदित्यादि** । तथाच नैसर्गिकावस्थाभेदमादायायं परापरभावव्यपदेशो न तु वस्तुभेदादतो न ब्रह्मवादव्याघात इत्यर्थः । नच सृष्टिकथनोत्तरमस्य कथनात् सृष्ट्यारम्भ एव तथाभावो न तु नैसर्गिक इति शङ्क्यम् । तथासति तदानीं पूर्वभावस्य वीतत्वेन तदव्यय-

रश्मिः ।

सर्वं खल्विदं ब्रह्मेति श्रुत्युक्तः सर्वं ब्रह्मेति वादः तद्घटितो भवतीति ब्रह्मवादः परापरभावपूर्वकाभेदघटितोक्तिः । हेतुरिति एकविज्ञानेनेति हेतुः । **आहुरिति** ब्रह्मत्वेनाभेदमाहुः । **इयमित्यादीति** । **भाष्ये** । **पुरुषस्येति** पुरुषान्न परं किंचिदिति श्वेताश्वतरे 'असङ्गोयं पुरुषः' इति सांख्यप्रवचने 'उत्तमः पुरुषस्त्वन्यः' इति गीतायां च पुरुषस्य ब्रह्मत्वं निःसंदिग्धमित्यर्थः । **नैसर्गिकेति** स्वाभाविका या अवस्था भावे क्विप् । अवस्थितिरेकस्यैव घटस्यामस्य श्यामावस्था पक्वस्य रक्तावस्थेव सैषानन्दस्य मीमांसा भवतीत्युपक्रम्य ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द इति 'गणितानन्दकं बृहत्' ।

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' ॥

इति श्रुत्यन्तरे पूर्णानन्दो हरिरिति गणितागणितरूपा नैसर्गिकावस्था भक्तमनोरथपूरणाय तज्ज्ञापितं भेदमादाय । तदुक्तं ज्ञेयनिरूपणे गीतायां त्रयोदशाध्याये 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति । पुरुषोत्तमयोगाध्याये च 'अक्षरादपि चोत्तमः' इत्युक्त्वा ।

'यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत' ॥

ब्रह्मवादेति सर्वः क्षरः ब्रह्म पुरुषोक्षररूप इति वाद इत्यर्थः । ननु नैवं वक्तुं युक्तम् । अद्वैतश्रुतिविरोधात् । तथाच निर्गुणस्योपाधिवशात् इच्छास्वीकारः ब्रह्मणो रजउपाधिकात् सृष्टिरिति तथायमपीच्छादिसत्त्वाद्येकतरोपाधिकः परापरभावो न तु नैसर्गिक इति शङ्कते स्म **न च सृष्टीति** । यथा 'सुदीप्तात्पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' इति सृष्टिकथनोत्तरं 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः' इतिकथनात् । **तथाभावः** परापरभावः । **पूर्वभावस्येति** निर्गुणभावस्य विगतत्वेन 'अथ परा यया तदक्षरमधिगम्यते' इत्येवं विद्याविषयत्वेन धर्मेण गुणेन निरूपणाद्वीतत्वेन सगुणस्याव्ययत्वाभावाङ्गीकारेण 'यत्तदद्रश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मम् । तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः' इति । अत्र भूतयोनिपदादपि तस्याव्ययत्वाभावात् । यद्वा तदानीमदृश्यत्वादिधर्मनिरूपणात् तस्य वीतत्वेन । ननु न विद्याविषयत्वादिधर्माः सगुणत्वापादकाः स्वाभावाभावरूपत्वेन धर्माणामधिकरणात्मकत्वादिति चेन्न सत्यं ज्ञानमिति निश्वस्य सर्वज्ञ इति श्रुतिं न निश्वसेत् ज्ञानरूपधर्माभावेपि सार्वज्ञ्यसिद्धेः अतो नैयायिकोक्तयुक्तिप्रस्ताऽभावस्याधिकरणात्मकता । किंच क्वचिदधः क्षरात्परतः पर

भाष्यप्रकाशः।

मित्यक्षरविशेषणविरोधापत्तेः। न चाक्षरभावानन्तरं तद्विशेषणमिति वाच्यम्। तथासति पूर्वमक्षरस्य तथाभावे जन्यत्वापत्तेः। न चेष्टापत्तिः। अश्रौतत्वात्। अतस्तथात्वस्य नैसर्गिकत्वं मन्तव्यम्।

रश्मिः।

इति पाठः तत्राधः क्षरः सर्वभूतात्मको भवति ततः परतरः पर इत्यक्षर उक्तः परतमः पुरुषोत्तमो भक्तमनोरथपूरकोस्त्येव तमब्रूविधायकव्याकरणप्रामाण्यात्। तथा चाक्षरसृष्टिनिरूपणानन्तरं पुरुषनिरूपणेपि चतुर्थपादे पुरुषस्याक्षरपरत्वोक्तेः सृष्टिकथनोत्तरमित्यादि न शङ्क्यम्। पूर्वमिति सर्वकारणेभ्यः पूर्वम्। **अश्रौतेति** सत्यं ज्ञानमनन्तमिति श्रुतौ सत्यत्वप्रतिपादनात् सत्यमबाधितमिति गोपालतापिनीये त्रैकालिकाबाधितम्। 'तदाहुरक्षरं ब्रह्म सर्वकारणकारणम्' इति कार्यलक्षणवाक्यं तु पौराणं मतमिति ध्वनितम्। किंचैवं पुरुषनिरूपकश्रुत्यनन्तरं एतस्माज्जायते प्राण इत्यादिभिः सृष्टिः पुनरुक्ततां भजतेऽक्षरात्सृष्टेः प्रथममुण्डके श्रावणात् तस्माश्च 'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते' इत्यादिना द्वितीयमुण्डकेनुवादाद्दिव्य इत्यादिश्रुत्यनन्तरमेतस्माज्जायते प्राण इति श्रुतावेतच्छब्देन समीपतरवर्तिनः पुरुषस्य परामर्शात्। न च पुरुषावतारः स इति न पुनरुक्तिरिति शङ्क्यम्। 'अक्षरात्परतः परः' इत्यनयाक्षरात्परस्य पुरुषत्वोक्तेरक्षरजन्यपुरुषावतारस्य ग्रहीतुमशक्यत्वात्। मम मते तु पुरुषाक्षराभ्यां सृष्टिश्छिन्नैव 'ता वां वास्तून्युष्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि' इति श्रुतेः। अत्र वेदलोकातीतरसात्मकब्रह्मस्वरूपभूता सृष्टिः सा अक्षरात्परतः परस्मात्पुरुषात्संभवतीति न पुनरुक्तिः। तथाहि सांख्यधर्माभिलापार्थं ब्रह्मविद्यान्तर्गतं यावद्विषयवाक्यं तावद्भाष्येऽथ परा यया तदक्षरमित्यादिसृष्टिमाहेत्यन्तमुक्तम्। आ यस्मिन् द्यौः पृथिवी चान्तरिक्षमित्यादिश्रुतिम्। तत्राद्रश्यमित्यादौ प्रसज्यप्रतिषेधः। पर्युदासश्चैकदेशिमते न सिद्धान्ते। नच व्याख्यातः भूतयोनिपदं च पुरुषाक्षरयोर्व्याकरणीयमुभयोरग्रे भूतयोनित्वेन निरूपणात् तत्रत्यभाष्यीयेणादिपदेन यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति। यथा सतः पुरुषात्केशलोमानि तथाक्षरात् संभवतीह विश्वमित्यादिश्रुतिसंग्रहः। एतासामर्था एतद्भाष्ये स्फुटाः। **अग्र** इति द्वितीयमुण्डकारम्भे 'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' इति पूर्वोक्ताक्षरसृष्टिमनूद्य अथवा कर्ममार्गस्य प्रथममुण्डके उद्देशतः कथनात् कर्मोपयोगि ब्रह्म ब्रह्मिष्ठो ब्रह्मेत्यादौ विवक्षितं तदेवानूद्य 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः' इत्याद्युक्त्वा 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी' इत्यनया भक्तेच्छया सृष्टिं निरूप्य तस्माद्विराडजायत' इतिश्रुतेर्विराडुत्पत्तिवारणाय तद्रूपविलक्षणरूपपूर्विकां स्वेच्छया सृष्टिं प्रसिद्धां वक्तुम्।

'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः।
वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथ्वी ह्येष सर्वभूतान्तरात्मा'॥

इत्यनया पुरुषरूपमुक्त्वा पुनः 'तस्मादग्निः समिधो यस्य सूर्यः सोमात्पर्जन्यौषधयः पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात् संप्रसूताः' इत्यादिभिः सृष्टिमाहेति भाष्यार्थः। श्रुत्यर्थस्तु पञ्चाग्निविद्यासाधनाध्याये वक्ष्यते तत्र पञ्चाग्निद्वारेण संसरन्ति याः प्रजास्ता अपि तस्मादेव प्रजायन्ते इत्युच्यते तस्मादग्निरिति तस्मात् पुरुषात् प्रजावस्थानविशेषरूपोग्निः स विशिष्यते। समिधो यस्य सूर्यः समिध इव समिधः सूर्येण हि विद्युल्लोकः समिध्यते। ततो विद्युल्लोका-

भाष्यप्रकाशः ।

न चैवं रूपभेदस्य नैसर्गिकत्वेनाद्वितीयश्रुतिविरोधापत्तिरिति वाच्यम् । एवं भेदभावेऽपि द्वितीयत्वानङ्गीकारात् ब्रह्मत्वेनाभेदात् । ब्रह्मणश्च विरुद्धधर्माश्रयत्वेनैवंभावेप्यभेदानपायात् । इदं च अहिकुण्डलसूत्रे सेत्स्यति । नच पूर्ववद्वेति सूत्रोक्तन्यायेन सृष्टीच्छोत्पत्तिसमकालमेवेपदानन्दतिरोभावात्तदानीमक्षरत्वं परापरभावश्चेति वाच्यम् । तथासतीच्छाया इवाक्षरस्यापि भवनं श्राव्येत, प्राणन्नेव प्राणो भवतीतिवत् ससृक्षन्नक्षरं भवतीति चोच्येत । किंच पूर्ववद्वेत्येकदेशिमतेप्यरूपवदादिपञ्चसूत्रीसिद्धमेव प्राथमिकं रूपम् । तच्चादृश्यत्वादिगुणकमेवेति न तदानीं तस्य तादृशभावापत्तिसिद्धिरित्यक्षरभावस्य नैसर्गिकत्वं विना न श्रुतीनां सामञ्जस्यम् । अत एव निबन्धेपि ।

रश्मिः ।

न्निष्पन्नात्सोमात् पर्जन्यो भगवानिन्द्रो द्वितीयोग्निः ओषधयः पृथिव्यां प्रसूताः तत्रौषधिभ्यः संभूते पुरुषाग्नौ तृतीये रेतःसहिते पुमान् रेतो योषितायामित्यादि स्पष्टम् । इति शंकरभाष्ये । नन्वेतावत्याधेयधर्मनिरूपिकाविषयवाक्यमत्र इयं ब्रह्मविद्या सांख्यविद्या वेति संदेह उक्तः न त्वथ परा यया तदक्षरमधिगम्यते यत्तदद्दश्यमग्राह्यमित्यादि धीरा इत्यन्ते विषयवाक्ये शंकराचार्यवत् किमयं अदृश्यत्वादिगुणको भूतयोनिः प्रधानं स्यादुत शारीर आहोस्वित् परमेश्वर इति संदेह उक्तस्तत्कुत इति चेन्न शंकराचार्यमते संशयो न घटते उपक्रमोपसंहाराभ्यां ब्रह्मविद्यात्वनिश्चयेन तद्विषयस्य परमेश्वरत्वं न प्रधानत्वं नापि शारीरत्वम् । अस्माकं तूपक्रमोपसंहाराभ्यां ब्रह्मविद्यात्वनिश्चयेपि मन्दमध्यमयोः संदेहो भवेत् ब्रह्मविद्यैषा सांख्यविद्या वेति सांख्यधर्माभिलापात् । अतः संदेहोपपत्त्यर्थमारूपोपन्यासं सूत्रमथ परेत्यारभ्य स्वेच्छासृष्टिनिरूपकश्रुतिपर्यन्तं विषयवाक्यं यस्मिन् द्यौरिति श्रुतेराधारधर्मनिरूपिकायाः पूर्वं युक्तमाधेयधर्मनिरूपकत्वात् । ननु नायं संदेहो घटते सांख्यधर्मापलापप्रसङ्गापत्तेः । इष्ट इति चेन्न सर्वविद्याप्रतिष्ठामिति ब्रह्मविद्याविशेषणात् सांख्यविद्यायाश्च सर्वविद्यान्तर्गतत्वात् । मैवं, सांख्यविद्याया सर्वविद्यान्तर्गतत्वाभावात् । 'मार्गास्त्रयो मया प्रोक्ताः' इति भगवद्वाक्यात् । तासु कर्मविद्या प्रथममुण्डके उक्ता 'मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके' इतिश्रुतेरत्र कर्मविद्या बहुधा सन्तताः तपःश्रद्धे ये ह्युपवसन्त्यरण्ये इत्यनया यतिवानप्रस्थविद्याश्चोक्ताः । द्वितीयमुण्डके कर्मविद्यां हित्वा ताः प्रथयांचक्रिरे यथा सुदीप्तात्पावकादित्यादिभिः । अत्र सांख्यविद्याभ्रमविषयसांख्यं सिद्धान्तेनोत्तरकालीनबाधदर्शनात् । **अत** इति । तथा षष्ठ्या लुक् ईषदानन्दतिरोभावप्रकटानन्दत्वं प्रकारस्तस्य तु अवधारणेनास्यादृश्यत्वादिगुणकस्य भूतयोनेर्नैसर्गिकत्वं मन्तव्यम् । तथा तु अस्येति पदच्छेदः । अस्य भूतयोनेस्तथाप्रकारस्य तु निश्चयेन नैसर्गिकत्वं मन्तव्यमिति योजना । **एवं भेदेति** । पूर्वोक्तप्रकारकाभेदेपि नन्वक्षरत्वेन पुरुषत्वेन च भेदात् कथमभेद इत्यत आहुः **ब्रह्मत्वेनेति** । नन्वेतादृशमद्वैतं न युक्तम् । घटपटादीनामपि द्रव्यत्वेनाभेदात् तत्राहुः **ब्रह्मण** इति । **इदं चेति** तृतीयाध्याये सेत्स्यति द्वितीयपादे । व्यासपादोक्तमतान्तरेप्याहुः **नच पूर्वेति** । **सृष्टीच्छोत्पत्तीति** पूर्ववद्वेति सूत्रे धर्मसृष्टीच्छास्थाने । **श्राव्येत** इति स ईक्षां चक्रे इतिवत्सोक्षरं चक्रे इति श्राव्येत । **तस्येति** सिसृक्षोः । **न श्रुतीनामिति** वरेण्यं परं विज्ञानादित्युक्तात्तदेतदक्षरमिति श्रुतिः येनाक्षरं पुरुषं वेदेति श्रुतिः । सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मलक्षणलक्षितस्य यो वेद निहितं गुहायामिति ज्ञानं

भाष्यप्रकाशः ।

इच्छामात्रात्तिरोभावस्तस्यायमुपचर्यते ।
ब्रह्मकूटस्थाव्यक्तादिशब्दैर्वाच्यो निरन्तरः ॥
सर्वावरणयुक्तानि तस्मिन्नण्डानि कोटिशः ।
मूलाविच्छेदरूपेण तदाधारतया स्थितः ॥
प्रभुत्वेन हरेः स्फूर्तौ लोकत्वेन तदुद्भवः ।
अन्तर्याम्यवतारादिरूपे पादत्वमस्य हि ।
हंसाकृतित्वकथने पुच्छत्वं परमात्मनः ॥
तदुपासनया ज्ञानात्परमात्मत्वमस्य हि ।
ज्ञानमार्गे त्वेतदेव सेव्यं कृष्णस्ततोधिकः ॥

रश्मिः ।

विधाय सोश्नुते इत्यनया विपश्चिद्रूपकिंचिद्धर्मेण विशेषणेन प्रकटानन्दत्वं द्योतितमिति ब्रह्मविदाप्नोति परमिति श्रुतिरेतासां श्रुतीनां न सामञ्जस्यम् । एवमत्रार्थः । पूर्वकारिकायाम् ।

'आनन्दांशतिरोभावः सत्त्वमात्रेण तत्र हि ।
मुख्यजीवस्ततः प्रोक्तः सृष्टीच्छावशगो हरिः' ॥

इत्येतस्याम् । अग्रे अहमेवं भविष्यामीतीच्छामात्रेणान्तःसमुत्थितसत्त्वेनानन्दांशस्तिरोहित इव भवत्यतो मुख्यजीवशब्दवाच्यो भवतीत्युक्तम् । तथा सति जीवत्वमेव स्यादानन्दांशस्य तिरोहितत्वाद्यथा महदादीनामित्याशङ्क्याहुः **इच्छामात्रात्तिरोभाव** इति । इच्छायां प्रविष्टायां कार्यव्यापृत्या तिरोभाव इवोच्यते वस्तुतस्त्वानन्दमय एव । वाचकैरपि तस्य न जीवत्वमित्याहुः **ब्रह्मे**ति । आदिशब्देनासत्सत्तमशब्दादयो गृह्यन्ते तथा सति पुरुषोत्तमाद्भिन्नो भविष्यतीत्याशङ्क्याहुः **निरन्तर** इति । अन्तररहित इत्यर्थः । तस्यैव कारणत्वमाहुः **सर्वावरणे**त्यादि । तदाहुरक्षरं ब्रह्म सर्वकारणकारणमिति वाक्यात् । अक्षरस्य पुरुषोत्तमे भेदेन प्रवेशे प्रकारमाहुः **मूलाविच्छेदे**ति । मूलेन श्रीपुरुषोत्तमेन सहाविच्छिन्नतया तिष्ठति न तु कार्यत्वेनेत्याहु**स्तदाधारत**येति एषा स्थितिः सर्वदा । कदाचित्पुरुषोत्तमश्चेदाविर्भवति तदाक्षरमपि बहुधा भवतीत्याहुः **प्रभुत्वे**नेति । प्रभुवैंकुण्ठवासी लोको वैकुण्ठः जीवजडाकारेण प्रादुर्भवतीत्यर्थः । अत एव वैकुण्ठवासिनो मुक्ताः । एतच्च द्वितीयस्कन्धनवमाध्याये स्फुटम् । अक्षरमम्बरान्तधृतेरित्यधिकरणेऽक्षरस्य ब्रह्मवाचकत्वनिर्धारात् न द्वैतम् । अन्तरुपासनायामन्तर्यामिरूपेण प्रकटो भवति तदा सद्योमुक्तौ ज्ञानिनस्तच्चरणारविन्दं विशन्ति इत्यक्षरस्य पादत्वम् । तथावतारेपि 'चैद्ये च सात्वतपतेश्चरणं प्रविष्टे' इति वाक्यात् । आदिपदेनाधिरूपेष्वपि आनन्दमयनिरूपणे हंसाकृतित्वकथनं तत्र ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्माक्षरमानन्दमयस्य पुच्छमिति निःसंदेहाय परमात्मपदम् । एवमनेकभावापन्नमपि ज्ञानमार्गेऽक्षरत्वेनैव सेव्यमित्याहुः **तदुपासन**येति । प्रथमतस्तस्यैव निदिध्यासनेन यज्ज्ञानमुत्पद्यते तेनास्याधिकारिणः परमात्मत्वमेव न त्वक्षरमात्रतेति भगवद्वचनादवगम्यते ते प्राप्नुवन्ति मामेवेति हिशब्दार्थः । भक्तिमार्गे त्वारम्भत एव परमानन्दः ज्ञानमार्गे त्वन्तत इति विशेषः । तथापि ज्ञानमार्गेऽक्षरमेव सेव्यम् । एवमभेदेपि वैलक्षण्यं निरूप्य यदर्थमेतन्निरूपितं तदाह **कृष्णस्ततोधिक** इति । अक्षरादपि चोत्तम इतिवाक्यं समर्थितं भवतीति निबन्धटीकायां विहितः । ज्ञातमित्यत्र ज्ञानादित्यपि पाठः ।

प्रकटानन्दः पुरुष इति । ब्रह्मविदाप्नोति परमित्यत्रैव तथा निर्णयात् । तस्मादहृश्यत्वादिगुणकः परमात्मैव ॥ २१ ॥

भाष्यप्रकाशः ।

इत्युक्तमतोस्मदुक्तमेवादरणीयमिति दिक् । एवं भेदप्रत्ययस्य श्लिष्टस्रष्टृत्वस्य तिरोहितरूपत्वस्य च सांख्यधर्मत्वं निराकृतम् । अतः परं पूर्वमवस्थाभेदस्यानुक्तत्वादत्र तदङ्गीकारे प्रतिज्ञान्तरस्य निग्रहस्थानस्यापत्तिरित्येतन्निराकुर्वन्ति **ब्रह्मविदित्यादि** । **परमिति** शब्दान्तरेणाग्रे गणितागणितानन्दत्वकथनेन च तथा निर्णयादित्यर्थः । तच्चानन्दमयसूत्रस्य द्वितीयवर्णक उपपादितम् । अतो न दोषापत्तिरित्यर्थः । सिद्धमाहुः **तस्मादित्यादि** ॥ २१ ॥

रश्मिः ।

नन्वीषदित्यादिभाष्यप्रामाण्यसिद्धमप्यक्षरधियामिति सूत्रेऽक्षरपुरुषोत्तमयोः लोकतदधिष्ठातृत्वेनोक्तेः 'सत्यं ज्ञानमनन्तं ब्रह्म' 'सह ब्रह्मणा विपश्चिता' इति श्रुतिभ्यां विपश्चित्त्वं वैशिष्ट्येन पुरुषत्वं तदपि विशिष्टं शुद्धान्नातिरिच्यते इति नैयायिकोद्घोषात् अक्षरमेवेति दूरनिरस्तेषदानन्दतिरोभावेनेत्यादिभाष्यवार्तेति चेन्न । सत्यं ज्ञानमनन्तमानन्दं ब्रह्मेति सर्वोपनिषच्छ्रुतेरानन्दविशेषणमनन्तमितीति भाष्य उक्तत्त्वाच्चाक्षरधियामिति सूत्रे निरानन्दार्थस्याग्रहणात् । नैयायिकोद्घोषस्य पुरुषाक्षरयोरभेद आनुगुण्यात् । मुण्डकेप्यक्षरपुरुषयोर्निरूपके आधारं यस्मिन् द्यौरित्यादिना निरूपयन्ती आनन्दरूपममृतं यद्विभाति इति न्यरूपयत् । ननु सत्यपदार्थस्तु सत्यब्राह्मणे बृहदारण्यकेस्ति । तद्वै तदेतदेव तदास सत्यमेव स इति, तत् हृदयं ब्रह्म हृदयब्राह्मणस्योक्तत्वात् । तदुक्तविधं एतदेवं वक्ष्यमाणं प्रकारं तदेव हृदयं ब्रह्माऽस सत्यमेव ससाधक इति अत्र सच्च त्यच्च सत्यं पञ्चभूतात्मकमाधिदैविकं तत्त्वं हिरण्यगर्भात्मकमिति साध्वर्थे यद्विधायकव्याकरणस्मृतिबाधः पूर्वतन्त्रे सिद्ध इति चेन्न तद्धृदयं वै निश्चयेन ब्रह्मैतदेव जगदेव तदा सृष्टिकाल आस सप्रपञ्च इत्यर्थे तत्र साधुरिति व्याकरणस्मृतेर्विरोधाभावात् । एवमग्रे ता आपः सत्यमसृजन्तेत्यत्रापि सत्यपदार्थः । एवं चेषदानन्दतिरोभावेनानन्दमीमांसोक्तगणितानन्दसद्ब्रह्माक्षरमुच्यते मुण्डकश्रुतेः प्रकटानन्दः पुरुष इतीति भाष्यार्थः । **एवं भेदेति** 'अक्षरात् परतः परः' इत्यक्षरपुरुषयोर्भेदः । सच सांख्ये 'प्रकृतिपुरुषयोरन्यत्सर्वमनित्यम्' इति कापिलसांख्यप्रवचनसूत्रेण सांख्यमते प्रकृतिपुरुषधर्मत्वं तदक्षरपदस्य प्रकृतौ शक्त्यभावान्निराकृतं अक्षरं पुरुषं वेदेति श्रुतेः अक्षरसृष्टिविषये पुरुषः श्लिष्यते पुरुषसृष्टिविषयेऽक्षरं श्लिष्यते तत्र प्रकृते पुरुषधर्मसंसर्गः । 'नैरपेक्ष्येपि प्रकृत्युपकारेऽविवेको निमित्तम्' इति सूत्रेण सांख्यमतेऽतः प्रकृतिसृष्टिविषये स चाप्यक्षरपदस्य प्रकृतौ शक्त्यभावान्निराकृतम् । **अग्निर्मूर्धेति** रूपं तत्तिरोहितं तद्रूपं ययोस्तत्त्वं प्रकृतिपुरुषयोरन्यतरस्येति सांख्यमते तद्यथाश्रुतसंभवेन निराकृतम् । विश्वकायस्यैतद्रूपमिति वक्ष्यमाणभाष्यात् । **पूर्वमिति** येनाक्षरं पुरुषं वेदेति प्रथममुण्डके । **दोषेति** दोषस्य प्रतिज्ञान्तरस्यापत्तिः । **तस्मादित्यादीति** इदं शाब्दज्ञानं न त्वनुमितिः तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः । अनुमितिस्तु सौत्रहेतुस्वारस्याय पूर्वमुक्ता । एतच्च ज्ञानं यदा विश्वकायविषयमपि विषयवाक्ये सृष्टिवाक्यानामभिनिवेशात् । प्रस्थानरत्नाकरे सात्त्विकमित्युक्तम् । ननु पुरुषाक्षरयोरभेदज्ञानं भेदकघटितमिदं न विश्वविषयकमिति चेन्न एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात् पुरुषाक्षरयोरेकत्वात् येनाक्षरं पुरुषं वेदेति श्रुतेः । तदेकमेव चेत्सर्वं भवेत्तदोपपद्यते यथा सुवर्णकार्यं सुवर्णं च सुवर्णं सुवर्णज्ञानेन तत्कार्यं ज्ञातं भवत्येवं अक्षरपुरुषौ तत्कार्यं च सर्वमक्षरपुरुषाविति तच्छाब्दज्ञानेन तत्कार्यं ज्ञातं

रश्मिः।

भवत्येव। पटे ज्ञाते तन्तव इव 'तन्तुष्वङ्ग यथा पटः' इति श्रुतेः। न च विरुद्धो दृष्टान्तः कार्यज्ञानेन कारणज्ञानात्। कारणज्ञानेनैकविज्ञानरूपेण कार्यज्ञानस्य विवक्षितत्वादिति वाच्यम्। कार्यकारणवस्त्वैक्यमर्शनोत्तरकालिककार्यज्ञाने कारणज्ञानत्वेप्यक्षतेः। न च कार्यं ब्रह्मेति ज्ञानवत् पटस्तन्तव इति प्रत्ययापत्तिरिति वाच्यम्। इष्टापत्तेः। आतानवितानत्वातिरिक्तस्य तन्तुभ्यः पटे विशेषस्याभावात्। अत एव श्रुतय एकविज्ञानेन सर्वविज्ञाने प्रकारप्रबोधिकाः। पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्। एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य। आविः संनिहितं गुहाचरं नाम महत्पदम्। अत्रैतत्सर्वमर्पितमेजत्प्राणन्निमिषच्च यत्। एतज्जानीथ सदसद्वरेण्यं परं विज्ञानाद्यद्वरिष्ठं प्रजानां यदर्चिमद्यदणुभ्योणु च यस्मिँल्लोका निहिता लोकिनश्च तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धीति। अर्थस्तु एकविज्ञानेन सर्वविज्ञाने प्रकारमाह पुरुष एवेति पुरुषोक्षरात् परः गुहायां हृदयाकाशे अविद्याग्रन्थिं ग्रन्थिवद्दृढीभातामविद्यावासनां विकिरति विनाशयति इह जीवन्नेव न मृतः अरूपमक्षरं केन प्रकारेण विज्ञेयमित्याह आविरिति बहिराविःसत् हृदयाद्बहिराविर्भूतं सत् पुनर्गुहायां निहितम्।

'यथा दारुस्थितो वह्निः प्रकटो वा विशेन्न हि।
तावदन्तः स्थितो वह्निर्न दारुदहनक्षमः'॥

इति सुबोधिनीकारिकात्रानुसंधेया। तदा गुहाचरं नाम प्रह्वं शब्दितं वा भवति। महत्पदत्वमाह अत्रेति। अत्र महति पदे एजल्लोकत्रयात्मकं विराट्पुरुषात्मकं सर्वमेजत् एजृ कम्पने भूलोकिभयात्सर्वं कम्पते प्राणन्नक्ष आदिभिः भुवर्लोकि सर्वं सर्वान् प्राणिति निमिषत् स्वर्गलोकि सर्वं सर्वान् मिषति स्पर्धते मेषति सिञ्चति पृथ्व्यादिभिः मिष स्पर्धे तुदादिः, मिष सेचने भ्वादिः सेटौ। एतदिति महत्पदे पुरुषे विश्वकार्यं सर्वमर्पितं यूयं जानीथ हे शौनक। भेदप्रत्ययानुपपत्तिमाशङ्क्याह सदसदिति सर्वोपनिषदि सदसती मायेति तत्संवलितं सदसत्। अत एव वरेण्यं स्वीयत्वेनाङ्गीकर्तुं योग्यं मायान्तःपातिभिः एतत्कार्यकारणवस्त्वैक्यमर्शनानन्तरं जातं ज्ञानं विज्ञानं क्षरविषयकं तस्मात्परं यत्पुरुषोत्तमविषयकं भक्तिद्वारा ज्ञानं तत्प्रजानां वरिष्ठं कृतकृत्यतासंपादकम्।

'यो मामेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत॥
इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ।
एतद्बुध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत'॥

इति पञ्चदशाध्याये पुरुषोत्तमयोगाख्ये गीता।

'सर्वदा सर्वभावेन भजनीयो व्रजाधिपः।
स्वस्यायमेव धर्मो हि नान्यः क्वापि कदाचन'॥

इति चतुःश्लोकी। क्षरपुरुषोत्तमावुक्त्वाऽक्षरमाह यदर्चीति। वेद्धव्यमिति आघाताख्यसंयोगं कर्तुं योग्यं व्यध ताडने ताडनमाघाताख्यसंयोगः अग्रे वेधनमुक्तम्। धनुर्गृहीत्वेत्यारभ्य नित्यश इत्यन्तम्। अग्रे यस्मिन् द्यौरिति द्युभ्वाद्यायतनं स्वशब्दादित्यधिकरणे चिन्तितम्। प्रकृतमधुनानुसर्यते तच्छाब्दज्ञानं चेतसापि जन्यते एषोणुरात्मा चेतसा वेदितव्य इति मुण्डकश्रुतेः। सुषुप्तेर्ग्राहकस्य चेतसः करणत्वमक्षरस्यापि तत्तुल्यत्वात् बुद्ध्यापि। कठवल्ल्याम्।

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥

ननु पूर्वपक्षन्यायेन ब्रह्मविद्याख्यायामपि स्मृतिर्ब्रह्मविद्यैवाऽस्तु । द्वे

भाष्यप्रकाशः ।

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥ सूत्रमवतारयन्ति **नन्वित्यादि** । **स्मृतिर्ब्रह्मविद्यैवेति** । स्मृतिरेव ब्रह्मविद्येति योजना । अयमर्थः । पञ्चशिखवृत्तावव्यक्तपर्यायेषु

रश्मिः ।

'एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते । दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' ॥

इति श्रुतौ बुद्धेः करणत्वोल्लेखात् । हेतौ तृतीयापक्षेपि हेतोः सव्यापारत्वे करणत्वमस्त्येव करणत्वस्य सव्यापारनियतत्वात् । आत्मा मनसा संयुज्यते मन इन्द्रियेऽधितिष्ठति इन्द्रियमर्थेन संयुज्यते ततः शब्दातिग्रहेण श्रावणं प्रत्यक्षं शृण्वन् श्रोत्रं भवतीति तथा च श्रुत्यन्तरं कठवल्ल्याम् । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति मनसइन्द्रिये अधिष्ठानं 'अधिष्ठाय मनश्चायं विषयानुपसेवते' इति गीतायाः । किंच प्रजापत्यात्मककालेनापि तच्छ्रावणं ज्ञानं जन्यते । शाकल्यब्राह्मणे आदित्यः कस्मिन् प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितं भवतीति रूपेष्विति चक्षुषा हि रूपाणि पश्यति कस्मिन् रूपाणि प्रतिष्ठितानि भवन्तीति हृदय इति हृदयेन हि रूपाणि जानातीति श्रुतेः । एष प्रजापतिर्यद्धृदयमिति हृदयब्राह्मणश्रुतेः । 'संवत्सरो वै प्रजापतिः' 'द्वादशमासाः संवत्सरः' इति श्रुतिभ्याम् । श्रावणं ज्ञानमपि रूपविषयकं नीलमुत्पलं भवत्येवेत्यादौ । ज्ञानाकारस्तु पुरुष एवेदं विश्वमिति द्वितीयमुण्डकश्रुत्युक्तः । अक्षरं नास्तीति चेन्न येनाक्षरं पुरुषं वेदेति श्रुतेः विशिष्टं शुद्धान्नातिरिच्यत इति नैयायिकोद्घोषात् । पुरुषाक्षरयोरभेदाश्रयणात् । एकविधमेव च तज्ज्ञानं अव्ययैकभावावगाहित्वात् तदुक्तं गीतायामेकादशस्कन्धे च ।

'सर्वभूतेषु येनैकं भावमव्ययमीक्ष्यते । अविभक्तं विभक्तेषु तज्ज्ञानं सात्त्विकं स्मृतम्' ॥

कैवल्यं सात्त्विकं ज्ञानमिति भगवद्वाक्येषु । गीतायां सर्वभूतेष्विति सति सप्तमी तस्याः समानाधिकरणमर्थः । सर्वभूताधिकरणं कालः तद्वृत्तिरेकभावाव्ययस्तत्कर्मकमीक्षणम् । तेन सूत्रे मणिगणा इव सर्वभूतान्येकभावाव्ययेति ज्ञानं निवारितम् । यद्वा । सूत्रे मणिगणा इव एकभावाव्यये सर्वभूतानां ज्ञानम् । गीतायामन्तर्यामिज्ञानत्वेप्यन्तर्यामी भगवानेवेत्यन्तर्याम्यधिदैवादिष्वधिकरणे स्थितत्वात् । इदमेव च भावाद्वैतम् ।

'कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत् । अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते' ॥

इति सप्तमस्कन्धात् । कार्यकारणवस्त्वैक्यमीमांसायां कृतायां पुरुष एवेदं विश्वमिति अनुमितिशाब्दादिरूपविकल्पान्व्यक्कृत्य सिद्ध्यति मनसैवानुद्रष्टव्यो नेह नानास्ति किंचन इति बृहदारण्यकात् । ततश्चानुमितिश्रावणज्ञानादि भवतु भावाद्वैतं श्रुतावपि । तत्त्वमसीत्यादौ सदेव सौम्येत्युपक्रमेणैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्युपसंहारेण च सर्वस्यात्मत्वस्य श्रावणात् । भाष्ये ब्रह्मविद्यात्वमीमांसनादेवकारेण स्मार्तमतविद्या व्युदस्यते । सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतिः पूर्वं सर्वत्र प्रसिद्धोपदेशादित्यधिकरणे विचारितैवेति न पुनर्वितताक्रियते ॥ २१ ॥

विशेषणभेदव्यपदेशाभ्यां च नेतरः ॥ २२ ॥ स्मृतिविशेषणं ब्रह्मविद्येतिं तत्संगतैवकारोत्र स्मार्तविद्यात्वं व्यवच्छिनत्ति सोसंभवीत्यत एवकारं विशेष्ये स्मृतौ योजयामासुः **स्मृतिरेवेति** । वस्तुतस्तु यथाश्रुतमेव भाष्यम् । न च ब्रह्मविद्यायां स्मृतिमतविद्यात्वविरोध इति

ब्रह्मणी वेदितव्ये मूर्तं चाऽमूर्तं चेत्यत्र विकारस्यैव ब्रह्मपदवाच्यत्वम्। अतः प्रकृतिपुरुषावेव वाक्यार्थ इति परिहरति। इतरौ न भवतो वाक्यार्थरूपौ। कुतः। विशेषणभेदव्यपदेशाभ्याम्। विशेषणभेदो व्यपदेशश्च ताभ्याम्। अदृश्यत्वादयो गुणा न प्रकृतेर्भवन्ति। सर्वस्यापि तद्विकारत्वात्। न हि घटदर्शनेन मृन्न दृश्यत इति वदितुं युक्तम्। ब्रह्मवादे पुनः सर्वभवनसमर्थत्वाद् ब्रह्मणि

भाष्यप्रकाशः।

नपुंसकलिङ्गस्याऽक्षरपदस्य पाठाद् योनिपदस्योपादानवाचकत्वाद् भूतयोनित्वमव्यक्तलिङ्गम्। अक्षरात् परत्वं च पुरुषलिङ्गम्। अतस्तत्सर्वं यन्कृत्य ब्रह्मविद्यात्वं न स्थापयितुं शक्यम्। कस्मिन् विज्ञात इति प्रश्नवाक्ये कस्मिन् मते विज्ञाते इत्यर्थस्य शक्यवचनत्वादेतस्य सर्वविज्ञानस्य ब्रह्मविद्यालिङ्गत्वाभावात्। नापि ब्रह्मविद्येति समाख्यया। द्वे ब्रह्मणी इति श्रुत्या ब्रह्मपदस्य विकारेऽपि शक्तौ ग्राहितायां तस्या अप्यन्यथासिद्धत्वात्। लिङ्गापेक्षया पञ्चमत्वेनातिदौर्बल्याच्च। अतो लिङ्गबलात् प्रकृतिपुरुषावेव वाक्यार्थ इति परिहरतीत्यर्थः। सूत्रं व्याकुर्वन्ति इतरावित्यादि। व्यपदेश इति व्यपदेशभेदः। आद्यं व्युत्पादयन्ति अदृश्येत्यादि। ननु ब्रह्मवादेऽप्ययं दोषस्तुल्य इति सोऽपि न वदितुं युक्त इत्यत आहुः ब्रह्मवाद इत्यादि। ननु प्रकृतावपि तथा सामर्थ्यमङ्गीक्रियते। अतः परिहारतौल्यान्नैतदपि

रश्मिः।

शक्यम्। तेषां स्मृतीनां ब्रह्मविद्यास्मरणपूर्वकत्वाद्ब्रह्मविद्यात्वात् न चैवं षट्सु शास्त्रेषु वेदान्तसांख्ययोरेकत्वापत्तिरिति वाच्यम्। स्मार्तमतविद्यायाः श्रौतत्वे तात्पर्येण तयोरेकत्वानापादकत्वात्। लिङ्गेन निर्णिनीषन्त आहुः अयमर्थ इति। पाठादिति वेदान्ते कूटस्थोक्षर इति उक्त इति पुंलिङ्गाक्षरशब्द इति भावः। भूतेति 'यद्भूतयोनिं परिपश्यन्ति धीराः' इत्यत्र भूतयोनिपदम्। अव्यक्तेति 'प्रधानाज्जगज्जायते' इति कापिलसांख्यप्रवचनसूत्रात्। अक्षरादिति। अव्यक्तात्परत्वम्। 'असङ्गोयं पुरुषः' इति सूत्रात्। ब्रह्मविद्यात्वमिति स्मार्तमतनिरपेक्षब्रह्मविद्यात्वम्। तेन श्रुतिर्यद्यपि ब्रह्मविद्येति तथापि श्रुतिर्लिङ्गरूपेति नेयं लिङ्गबाधिका। द्वे ब्रह्मणी इति भाष्यं विवरामासुः नापीति। द्वे ब्रह्मणी इति श्रुत्या ब्रह्मविद्येति स्मार्तमतविद्यायां समाख्या यौगिकः शब्दः ब्रह्मण इति विद्येति च विद्यापदं प्रकृतिपदसमभिव्याहारात् स्मार्तमतविद्यावाचकं तया हेतौ तृतीया हेतुभूतया विकारे मूर्तामूर्तरूपे तस्याः समाख्यायाः अन्यथालिङ्गत्वेन प्रकारेण बृहदारण्यके मूर्तामूर्तब्राह्मणे मूर्तं परिच्छिन्नपरिमाणकम्। अमूर्तं वायुश्चान्तरिक्षं च। ननु लिङ्गत्वं समाख्यात्वं च व्यधिकरणं कुतः समानाधिकरणकमत आहुः लिङ्गेति। पञ्चेति। श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां प्रमाणानां पञ्चत्वेन। लिङ्गापेक्षया वाक्यप्रमाणयोर्दौर्बल्यम्। स्थानसमाख्ययोरतिदौर्बल्यं संनिहितत्वासंनिहितत्वाभ्यां तदुक्तमेतेषां समवाये पारदौर्बल्यमिति। सोपीति ब्रह्मवादोपि ब्रह्मणोऽभिन्ननिमित्तोपादानत्वेन सर्वस्यापि तद्विकारत्वमिव सर्वस्य ब्रह्मपरिमाणत्वाद्घटदर्शनेन मृद्दर्शनवत्सर्वपरिमाणदर्शनेन ब्रह्मदर्शनापत्त्या न वदितुं युक्तः परिणामिनित्यतयेति 'प्रधानाज्जगज्जायते' 'प्रकृतिपुरुषयोरन्यत्सर्वमनित्यम्' इति कापिलसांख्यप्रवचनसूत्राभ्याम्। 'प्रकृते-

विरोधाभावः । न हि नित्यं सदैकरूपमविक्रियमाणं च भवितुमर्हति । सर्वब्रह्म-धर्मतुल्यत्वे तदेव ब्रह्मेति जितं ब्रह्मवादिभिः ।

यः सर्वज्ञः सर्वविदित्यादयस्तु सुतरामेव न प्रकृतिधर्माः । व्यवधानाच्च न पुरुषसंबन्धः । अक्षरनिरूपण एव पुरुषविशेषणाच्च । येनाक्षरं पुरुषं वेद सत्यमिति । तस्मादक्षरविशेषणानि, न प्रकृतिविशेषणानि नापि पुरुषविशेषणानि सांख्य-

भाष्यप्रकाशः ।

ब्रह्मवादलिङ्गमित्यत आहुः न हीत्यादि । भवितुमर्हतीति । प्रधानस्य परिणामिनित्यतयैवाङ्गीकारात् तदेतादृशं भवितुं नार्हति । तथा चोक्तरीत्यैकदेशदर्शने तदृश्यत्वस्याशक्यवचनत्वादेतेनैव प्रकृतिवादव्युदास इत्यर्थः । नन्वेतादृशत्वमेव तस्याः कल्प्यमित्यत आहुः सर्वेत्यादि । जितमिति । सांख्यवादिनः प्रतिज्ञासंन्यासप्रतिज्ञान्तरयोरापाताज्जितमित्यर्थः । अन्यमपि विशेषणभेदमाहुः य इत्यादि । नन्वेतानि पुरुषविशेषणानीति न दोष इत्यत आहुः व्यवधानादित्यादि । अदृश्यत्वसर्वज्ञत्वादयः प्रथममुण्डके, पुरुषनिरूपणं च द्वितीयमुण्डक इति व्यवधानात् तथेत्यर्थः । पुनर्विशेषणान्तरमाहुः अक्षरेत्यादि । तथा चाक्षरनिरूपणे आद्यन्तयोः पुरुषविशेषणदर्शनात् पुरुषात्मकमक्षरमत्राभिप्रेतं, न प्रकृत्यात्मकमतस्तथेत्यर्थः । येनेति वाक्यं

रश्मिः ।

राद्योपादानतामन्येषां कार्यत्वश्रुतेः' इति सूत्राच्च तत्प्रधानम् । जितमितीति । न च ब्रह्मलक्षणस्य प्रकृतावतिव्याप्तिरिति वाच्यम् । वेदान्तशास्त्रस्य शब्दत्वात् लोकेनधिगतार्थगन्तृत्वाच्च व्यासस्य शब्दबलविचारकत्वात् । न चैवं बृहदारण्यके चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमद्राक्षमहमश्रौषमिति य एव ब्रूयादहमद्राक्षमिति तस्मा एव श्रद्दध्यामेति गायत्रीब्राह्मणश्रुतौ चक्षुषः सत्यत्वोक्तेः न शब्दबलविचारः प्रामाणिक इति वाच्यम् । शाकल्यब्राह्मणे अगृह्यो नहि गृह्यते इति सकलेन्द्रियाग्राह्यत्वमुक्त्वा तं त्वोपनिषदं पुरुषं पृच्छामीति श्रुतेः शब्देतिग्रहे प्रामाण्यात् चक्षुषोपि प्रामाण्यम् । श्रुत्योर्विरोधे विकल्पो मनुस्मृतिषु प्रसिद्धः । विवदमानौ विरुद्धं भाषमाणौ एको ब्रूते अहं गजादिवस्त्वदर्शं दृष्टवान् । अथ परो ब्रूते तद्वस्तु तथा न भवतीत्यहमश्रौषमित्येवं एयातामागच्छेताम् । तं त्वौपनिषदं पुरुषमित्यस्याः श्रुतेरर्थस्तु जन्माद्यस्य यतः इत्यधिकरणे कृत एव । **प्रतिज्ञेति** प्रकृतिपुरुषौ न स्तस्तर्हि पुरुषाक्षरौ स्तामिति प्रतिज्ञासंन्यासः स्वोक्तसाध्यादेरपरेण दूषणे कृते तत्साध्यादेरपलापरूपस्य प्रतिज्ञासंन्यासस्य स्वरूपस्य सत्त्वात् । प्रकृतिपुरुषौ यद्यपि सांख्यसिद्धौ तथापि सांख्यस्य श्रौतत्वाय वेदान्त्युक्तदोषोद्दिधीर्षया पूर्वानुक्तानि यान्यदृश्यत्वादिविशेषणानि तद्विशिष्टतया प्रतिज्ञातार्थस्य प्रकृतिपुरुषरूपस्य कथनात्प्रतिज्ञान्तरं परोक्तदोषोद्दिधीर्षया पूर्वानुक्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनरूपस्य प्रतिज्ञान्तरस्य स्वरूपस्य सत्त्वात् । **पुरुषेति** सांख्यमतीयपुरुषविशेषणानीति न विशेषणभेदरूपो दोषः । संनिध्यभावेन वाक्यस्याप्रामाण्यापत्तेर्दूरान्वयदोषाच्च व्यवधानाच्चेति हेतोः पुष्टत्वात्तत्रास्वरसमनुद्भाव्य भाष्यमवतारयामासुः **पुनरिति** । अक्षरस्य विशेषणान्तरम् । तेन भाष्ये पुरुषो विशेषणं पुरुषविशेषणं तस्मात् इति कर्मधारयः । **तथा** चेति अक्षरनिरूपणे प्रथममुण्डके आदौ ब्रह्मविद्यां सर्वविद्यामित्यत्र ब्रह्मपदं पुरुषोत्तमाक्षरोभयवाचकं येनाक्षरं पुरुषं वेदेत्युपसंहारात् । अन्ते तु येनाक्षरं पुरुषं वेदेति स्पष्टमेव । एवमाद्यन्तयोः पुरुषो विशेषणं तस्य दर्शनात् । **अत** इति

पुरुषस्य। न हि दिव्यत्वादयो गुणाः पुरुषस्य भवन्ति। न हि तन्मते पुरुषभेदो ह्यङ्गीक्रियते जीवब्रह्मवत्। नच तस्य बाह्याभ्यन्तरत्वम्। सर्वत्वाभावात्। न हि तस्माज्जायते प्राणादिः। तस्मात् पुरुषविशेषणान्यपि न सांख्यपुरुषविशेषणानि। अतो विशेषणभेदः।

व्यपदेशभेदश्च। ब्रह्मविद्यैवैषेति। स ब्रह्मविद्यां सर्वविद्यामित्युपक्रमे,

भाष्यप्रकाशः।

तु प्रथममुण्डकसमाप्तिस्थम्। ननु पञ्चशिखवृत्तौ पुंलिङ्गस्याक्षरपदस्य पुरुषपर्यायेषु पाठान्नपुंसकत्वमनादृत्य पूर्वत्रापि पुरुष एव ग्राह्यः। तथा सति पुरुषविशेषणानि कुतो न सांख्यपुरुषविशेषणानीत्यत आहुः न हि दिव्येत्यादि। साक्षित्वकैवल्यमाध्यस्थ्यद्रष्टृत्वाकर्तृत्वातिरिक्तधर्मानङ्गीकारात् तथेत्यर्थः। ननु बहुषु कश्चित् तादृशोऽप्यस्तु, को दोष इत्यत आहुः न हि तन्मत इत्यादि। तथा च नानापुरुषाङ्गीकारेऽपि सर्वेषां तुल्यत्वमेव तन्मते, न तु नियम्यनियामकभावादिनोत्कर्षापकर्षावतस्तथाङ्गीकारस्तन्मतभञ्जक इत्यर्थः। ननु दिव्यत्वं दिवि भवत्वमलौकिकत्वं वा। तदुभयमपि व्यापकत्वप्राकृतगुणवैलक्षण्याभ्यामुपपद्यते। एकत्वं च जात्यपेक्षया। शेषास्त्वमूर्तत्वादयः सिद्धान्ते न तुल्या इति कथं ते तत्र नेत्यत आहुः नचेत्यादि। किंचैकत्वस्य जातिप्रयुक्तत्वे सर्वेषां तौल्याद्, दिव्यो ह्यमूर्त इति मन्त्रानन्तरमन्त्रोक्ता सृष्टिरपि सर्वेभ्यः स्यादिति सापि सांख्ये तथानङ्गीकाराद् विभिद्यते। तथा महदादिक्रमेण तत्र सृष्टिर्न तु प्राणादि-

रश्मिः।

तस्मादक्षरस्य पुरुषात्मकत्वात् अक्षरविशेषणानि न गुणत्रयसाम्यावस्थारूपायाः प्रकृतेः विशेषणत्वेन प्रकारेण विशेषणानीत्यर्थः। **पूर्वत्रेति** अक्षरमधिगम्यत इत्यत्राक्षरपदेन पुंलिङ्गेनापीत्यर्थः। **तथा सति** पुरुषत्वेनाक्षरे गृहीते सति। प्रथममुण्डके पुरुषविशेषणानीत्यादिः। **साक्षित्वेति** तथाच सूत्राणि कापिलसांख्यप्रवचनसूत्रेषु तु 'असङ्गोयं पुरुषः' इति 'न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते' 'निर्गुणादिश्रुतिविरोधश्चेतीति' इति। **तथेति** नहि दिव्यत्वादयो धर्माः पुरुषस्य भवन्तीति भाष्योक्तः प्रकारः। **तथेति** एकत्वेन पुरुषाङ्गीकारः सांख्यमतभञ्जकः। **एकत्वमिति** पुरुष इत्यत्रैकत्वम्। **ते तत्रेति** पुरुषधर्माः सांख्यपुरुषेषु। **आहुरिति** तेषु सत्स्वपि बाह्यमध्याभ्यन्तररूपपुरुषधर्मस्य विरहमाहुः। **भाष्ये। तस्य** सांख्यपुरुषस्य स बाह्याभ्यन्तरो ह्यजः इत्यस्यां 'पुरुष एवेदं विश्वम्' इति श्रुत्युक्तं मध्यस्थत्वं ग्राह्यमपि सर्वत्वेति हेत्वनुरोधात्। मध्यस्थत्वमन्तरा सर्वत्वानुपपत्तेः। प्रकृतेः सर्वत्वं न पुरुषस्य 'प्रकृतेराद्योपादानतामन्येषां कार्यत्वश्रुतेः' इति सांख्यसूत्रात्। **सृष्टिरिति**। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति श्रुत्युक्तप्राणादिसृष्टिः। **तथानङ्गीति** 'अनुपभोगेपि पुमर्थं सृष्टिः प्रधानस्योष्ट्रकुंकुमवहनवत्' इति सांख्यसूत्रे पुंसामर्थमित्यपि वक्तुं शक्यत्वेपि सर्वेभ्यः पुरुषेभ्यः सृष्टिर्न 'प्रधानाज्जगज्जायत' इति सूत्रात्। अतस्तथासर्वपुरुषत्वप्रकारेणानङ्गीकारात् सांख्यमताद्विभिद्यते पुरुषादक्षराच्च सृष्टिर्ब्रह्मवादे भिद्यते विशेषेण तु ह्यत्र प्राणादिसृष्टिरिति विभिद्यते कारणभेदे भेदः, कार्यकारणयोर्भेदे विभेदः। **नहीति** भाष्यं विवरामासुः **तथा महदिति**। **तत्रेति** सांख्ये। **सृष्टिरिति** 'प्रकृतेर्महान् महतोहंकारात् पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिगुणाः' इति सूत्रोक्ता सा। **नचेति** प्राण-

प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति मध्ये, तेषामेवैतां ब्रह्मविद्यां वदेतेत्यन्ते । तस्मान्न सांख्यपरिकल्पितौ प्रकृतिपुरुषौ वाक्यार्थः । न हि ब्रह्मा ज्येष्ठपुत्राय स्मृतिरूपां विद्यां वदतीति चकारार्थः ॥ २२ ॥

रूपोपन्यासाच्च ॥ २३ ॥

अग्निर्मूर्धा चक्षुषी इत्यादिरूपं न हि प्रकृतिपुरुषयोरन्यतरस्य संभवति ।

भाष्यप्रकाशः ।

क्रमेण, न वा सह, न वा ततः साक्षात् अतोऽपि तथेत्यर्थः । एवं विशेषणभेदरूपं दूषणं व्युत्पादितम् । द्वितीयं व्युत्पादयन्ति व्यपदेशेत्यादि । तथा च यदि सांख्यमतविद्याऽत्राभिप्रेता स्यात् तदा त्रिषु क्वचित् सांख्यविद्यामिति तत्त्वविद्यामिति वा वदेत् । अतो विद्याव्यपदेशभेदादपि तथेत्यर्थः । ब्रह्मेति हिरण्यगर्भो वेदाचार्यः ॥ २२ ॥

रूपमपि समष्टिव्यष्टिजनकस्य यदुक्तं तदपि सांख्यमताद् भेदज्ञापकमित्याशयेन सूत्रं पठित्वा व्याकुर्वन्ति ।

रूपोपन्यासाच्च ॥ २३ ॥ न चेदं रूपं श्लिष्टस्येति शक्यवचनम् । यथा सुदीप्तात् पावकादिति मन्त्रेण केवलादक्षरात् सृष्टिमुक्त्वा, ततो दिव्यो ह्यमूर्त इति मन्त्रेण केवलस्य पुरुषस्याक्षरात् परत्वमुक्त्वा, तत, एतस्माज्जायत इति मन्त्रे एतत्पदेन केवलं पुरुषं परामृश्य ततः

रश्मिः ।

दिभिः सह वा न सृष्टिः प्राणादयस्तु प्राणो मनस्तस्मादग्निरित्युक्ताग्न्यादयः । **तत** इति पुरुषात् । **तथेति** तस्मात्पुरुषविशेषणान्यपि न सांख्यपुरुषविशेषणत्वेन प्रकारेण सांख्यपुरुषविशेषणानि यतः तच्छब्दात्प्रकारे थाल् । **त्रिष्विति** मुण्डकेषु । **तथेति** प्रकृतित्वेन पुरुषत्वेन प्रकारेणाक्षरपुरुषौ न वाक्यार्थ इत्यर्थः । **भाष्ये** । ननु तत्त्वतो ब्रह्मविद्यामित्यस्यास्तत्त्वरूपां प्रकृतिविद्यामित्यर्थोऽपि स्याद्यतः सार्वविभक्तिकस्तसिल् । अतस्तत्त्वविद्यामित्युक्तप्रायमित्याशङ्क्यानुक्तसमुच्चयं चकारार्थमाशङ्कावारणायाहुः **नहीति** । **प्रकृते** । **वेदेति** वेदमार्गेण ब्रह्मणो मुक्तत्वात् नूतनमार्गप्रवर्तकलक्षणमाचार्यत्वं भवत्येव । तथाच सर्वोत्कृष्टत्वात् सर्वोत्कृष्टविद्यावक्तृत्वमेव युक्तमिति भावः । **समष्टीति** समष्टिरेतस्माज्जायते प्राणः इति श्रुत्युक्ता । व्यष्टिस्तु तस्मादग्निः समिधो यस्य सूर्यः इति श्रुत्युक्ता सृष्टिः ॥ २२ ॥

रूपोपन्यासाच्च ॥ २३ ॥ ननु संश्लिष्टस्यैतद्रूपं न संभवतीति भाष्यं युक्तम् । नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगो न प्रकृतियोगादृते इति श्लिष्टस्य रूपं प्राप्तं तन्निषेधस्य युक्तत्वात् । यतः प्राप्तिपूर्वको निषेध इति चेन्न । प्रकृतिपुरुषौ न वाक्यार्थः रूपोपन्यासादिति हेतुर्विरुद्धः यथा शब्दो नित्यः कृतकत्वात् । साध्यव्यापकीभूताभावप्रतियोगित्वं विरुद्धत्वं 'यः साध्यवति नैवास्ति स विरुद्धः उदाहृतः' इति भाषापरिच्छेदकारः पुरुषप्रकृती वाक्यार्थः प्रकृतिसंश्लिष्टपुरुषरूपोपन्यासादिति विरुद्धो हेतुः साध्याभावसाधकत्वात् । साध्याभावसाधको हेतुर्विरुद्धः इति सौत्रहेतोर्विरुद्धत्वापत्तेः । एवमुपन्यासे तु रूपस्य परमतप्रतिपन्नस्यास्मरणान्न विरुद्धो हेतुरिति व्याचक्रुः । **न चेदमिति** । नन्वस्मरणेपि कदाचिद्युक्त्या स्मरणाङ्गीकारे सौत्रहेतोः विरुद्धत्वापत्तिस्तदवस्थैवेति चेन्न मुण्डकीयकेवलपुरुषप्रकृतितत्संश्लिष्टातिरिक्तरूपोपन्यासस्य हेतुत्वेन विरुद्धत्वाभावात् सांख्यमतीयरूपोपन्यासाभावात् । न चात्र मानाभाव इति वाच्यम् । ब्रह्मसूत्रत्वेन सांख्यमतीयरूपोपन्यासस्याभावादनुपलब्धेरेव मानत्वात् । तदेतदभिसंधाय भाष्यार्थमाहुः **न चेदमिति** । **श्लिष्टस्येति** प्रकृतिश्लिष्ट-

ब्रह्मवादे पुनर्विश्वकायस्यैतद्रूपम्। सूत्रविभागात् पुनर्मुख्योपपत्तिरेवेति सूचितम्। चकारेण श्रुत्यन्तरविरोध एकवाक्यता च सर्वेषां वेदान्तानामिति। तस्मादक्षर-शब्देन पुरुषशब्देन च ब्रह्मैव प्रोक्तमिति ब्रह्मविद्यैवैषेति सिद्धम्॥ २३॥

इति प्रथमाध्याये द्वितीयपादे सप्तममदृश्यत्वाधिकरणम्॥ ७॥

भाष्यप्रकाशः।

प्राणादिसमष्टिसृष्टिमुक्त्वा तस्यैव रूपमग्निर्मूर्धेति मन्त्रे वदन्ती श्रुतिर्मन्त्रान्ते, एष सर्वभूतान्तरात्मेति केवलं परामृशति। ततोऽग्रे, तस्मादग्निः समिध इत्यादिभिर्व्यष्टिसृष्टिं वदतीति। इदं च न केवलस्य तन्मतीयस्य। तथा तैरनङ्गीकारात्। नापि केवलायाः। अन्तरात्मत्वोक्तिविरोधात्। अतः प्रकृतिपुरुषयोरन्यतरस्य न संभवतीति ब्रह्मवादे तु विश्वरूपत्वेन विश्वकायत्वस्यैवोक्तत्वा-दुपपन्नतरम्। अतो नात्र सांख्यगन्धोऽपीत्यर्थः। विशेषणभेदव्यपदेशरूपोपन्यासेभ्य इत्यनुक्त्वा यदत्र भिन्नं सूत्रमुक्तं तत्तात्पर्यमाहुः सूत्रेत्यादि। चकारेणेत्यादि। तथा चैतद्द्वयमपि तन्मतबाधकतया चकारेण संगृहीतमित्यर्थः। तेन सांख्यमतसिद्धे कार्येश्वरेऽतिव्याप्तिर्निवारिता।

रामानुजाचार्यास्तु, यया तदक्षरमधिगम्यत इत्युपक्रान्तस्य भूतयोनेरक्षरस्यैव, यः सर्वज्ञः सर्वविदित्यग्रिमवाक्ये परामर्शादक्षरपदेन परमात्मैवोच्यते। 'अक्षरात् परतः परः' इत्यत्र तु पञ्चम्यन्तेनाऽक्षरपदेन भूतसूक्ष्ममचेतनमुच्यते। तथा चाक्षराद्व्याकृतात् परः पुरुषस्तस्मादपि परः परमात्मैव अत्र गमकं तु भूतयोनित्वं परात्परत्वं रूपं च लिङ्गत्वात्। भूतसूक्ष्मस्याक्षरत्वं तु, अश्नुत इति वा, न क्षरतीति वा स्वविकारव्याप्त्या महदादिवन्नामान्तराभिलापयोग्यक्षरणाभावाद्वा

रश्मिः।

स्यासङ्गस्य पुरुषस्य। मुण्डके केवलस्य पुरुषस्य केवलायाः प्रकृते रूपस्य निरूपयितुमशक्यत्वमाहुः **यथेति**। **मन्त्रान्त** इति अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्वमस्येति पादत्रयकथनानन्तरं ह्येष सर्वभूतान्तरात्मेति तुरीयपादरूपे मन्त्रस्यान्ते। व्यष्टिमिति द्विकर्मकोऽयं वदतिः। **अनङ्गीति** 'असङ्गोयं पुरुषः' इति सांख्यसूत्रात्। **न संभव-तीति**। न च 'सत्त्वरजस्तमःसाम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोहंकारः अहंकारात् पञ्चतन्मा-त्राणि उभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशति गुणाः' इति सूत्रेण, 'संघातपरार्थत्वात् पुरुषस्य' इति सूत्रेण 'भावे तद्योगे तत्सिद्धिः' इति सूत्रेण च प्रकृतियोगे पुरुषस्य केवलस्य संभवतीति शङ्क्यम्। क्रमेण सृष्टौ महतो रूपसिद्धेः। प्रकृतिसंबन्धद्वारा महतो रूपसंबन्धस्य परंपरासंबन्धत्वेनान-ङ्गीकारात्। साक्षात्संबन्धेन रूपसंबन्धस्य विवक्षणात्। एतदिति श्रुत्यन्तरं तावत् 'येनाक्षरं पुरुषं वेद' 'तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः' इति। न हि तन्मते पुरुषः प्रकृतिर्न वा तन्मतेऽक्षरपदवाच्या प्रकृतिर्मनः किंतु महत्तत्त्वम्। 'आद्यं महदाख्यं तन्मनः' इति सांख्यसूत्रात् स्वमते सर्वेषां वेदान्तानां पुरुषप्रकृतिव्युदासेन शास्त्रान्तरापरतया ब्रह्मणि एकवाक्यता। ब्रह्मणि वक्तव्ये वाक्यानां एकं वाक्यं तस्य भाव एकवाक्यता महावाक्यमेकं भवतीति। **कार्येश्वर** इति विश्वकायत्वं पुरुष-लक्षणं दिव्यो ह्यमूर्त इति श्रुतेः। तत्कार्येश्वरेऽतिव्याप्तं सातिव्याप्तिस्तेन तन्मतबाधकेन श्रुत्यंतर-विरोधेन मुण्डके कार्येश्वरप्रतिपादनाभावान्निवारिता। इदं रूपमेकज्ञानेन सर्वविज्ञानार्थं पुरुषस्य मध्ये उक्तम्। अन्यथा पुरुषविद्या न स्यादेकविज्ञानेनेति। **महदिति**। महतो नामान्तराभिलाप्ययोग्य-क्षरणं मन इति नामान्तरेण तच्छास्त्रान्तरीयम्। अतो न नामान्तराभिलाप्ययोग्यक्षरणेन्वयः।

भाष्यप्रकाशः ।

योगेन कथंचिदुपपद्यत इत्याहुः । तत्रेदमवधेयम् । गीतायां द्वादशे ।

'एवं सततयुक्ता ये भक्तस्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः' ॥

इति प्रश्नेन तदुत्तरेण चाक्षरपुरुषोत्तमयोरैक्यमवस्थाभेदेन भिन्नत्वं च बोधितम् । ततः पञ्चदशे, 'द्वाविमौ पुरुषौ लोके' इति संदर्भे अक्षरपुरुषादुत्तमत्वं स्वस्योक्तम् । श्वेताश्वतरश्रुतावपि, क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एक इत्यक्षरस्यात्मत्वं देवस्य क्षराक्षरेशितृत्वं चोक्तम् । अत्राप्यक्षरस्य पुरुषत्वं पूर्वमुक्त्वा अक्षरात् परत्वं पुरुषस्य यदुच्यते तेन गीताद्युक्तरीतिकमेवाक्षरपुरुषयोः स्वरूपं ज्ञाप्यते । न तु तदक्षरमतिहाय भूतसूक्ष्मरूपम् । प्रकृतहानाप्रकृतकल्पनयोः प्रसङ्गात् । नच परत इति पञ्चम्यन्तवैयर्थ्यम् । एतस्याक्षरविशेषणत्वेनोपपत्तेः । सांख्ये प्रधानस्याप्यक्षरपदवाच्यत्वेन तद्वारणस्यात्रावश्यकत्वादिति ।

भास्कराचार्यास्तु, परत इति पदमक्षरविशेषणत्वेनाङ्गीकुर्वन्ति । अक्षरपदं चात्र प्रधानबोधकमङ्गीकुर्वन्ति । रूपं च कारणात्मनः कार्यात्मनावस्थितस्येति चाहुः ।

शङ्कराचार्यास्त्वग्निर्मूर्धेत्यादिनोक्तं रूपं परमेश्वरस्येति व्याख्याय, नेदं रूपं परमेश्वरस्य । जायमानमध्ये एतदुपन्यासात् । 'एतस्माज्जायते प्राणः' इति पूर्वं प्राणादीनां, 'तस्मादग्निः समिधो यस्य सूर्यः' इत्यनन्तरं च दर्शनात् । न च सर्वात्मत्वबोधनाय मध्ये पाठ इति युक्तम् । पुरुष एवेदं विश्वं कर्मेत्यस्य सृष्टिकथनोत्तरं वक्ष्यमाणत्वात् । अतो 'हिरण्यगर्भः समवर्तताग्रे' इति, 'स वै शरीरी प्रथमः' इति श्रुतिस्मृतिभ्यां तस्यैव जायमानत्वशरीरित्वयोर्निश्चायनात् तस्यैवेदं रूपम् । न च सूत्रवैयर्थ्यम् । परमेश्वरप्रतिपत्तिहेतुतया तस्योक्तत्वादित्यन्ये मन्यन्त इत्याहुः ।

वाचस्पतिस्तु प्रकरणापेक्षया सन्निधेर्निर्बलत्वात् प्रकरणिन एवेदं रूपमिति यद्यपि सिद्ध्यति, तथापि प्रकरणिनः शरीरेन्द्रियादिरहितस्य विग्रहवत्ताविरोधात् सिद्धे प्रकरणिनोऽसंबन्धे मूर्धादिश्रुतीनामत्यन्तविप्रकृष्टप्रकरणापेक्षयाऽतिबलिष्ठत्वाज्जायमानमध्यपातित्वं जायमानग्रहणे

रश्मिः ।

तत्रेदमिति क्षरात् परतोऽक्षरात्परः पुरुष इत्यर्थमनादृत्य अक्षरादव्याकृतात्परतः पुरुषात् परः परमात्मेति व्याख्याने इदं दूषणम् । **उत्तरेणे**ति श्रीभगवानुवाच–मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते' इत्यादिना उत्तरेण ते प्राप्नुवन्ति मामेव इत्यक्षरोपासका मां प्राप्नुवन्तीत्यक्षराभेदः स्वस्मिन्नुक्तः प्रश्ने च ये चाप्यक्षरमव्यक्तमिति भक्तेच्छयापि अव्यक्तत्वावस्थाधामत्वात् भक्तेच्छया भक्तमनोरथपूरणरूपेण धामस्था रसरूपावस्था पुरुषोत्तमत्वात् इत्यवस्थाभेदेन भिन्नत्वम् । **पुरुषौ** इति क्षराक्षरौ । **अत्रापी**ति मुण्डकेपि । **पूर्व**मिति प्रथममुण्डकसमाप्तौ येनाक्षरं पुरुषं वेदेति श्रुतौ प्रथममुण्डके द्वितीयमुण्डकात्पूर्वं यथा भवति तथोक्त्वा । व्यावर्तकं हि विशेषणं तद्व्यावर्त्यमाहुः **सांख्य** इति । इति रामानुजमततत्समाधानसमाप्तौ । **अङ्गी**ति । **परत** इति प्रधानविशेषणं कार्यात्परतः । रूपोपन्याससूत्रार्थमाहुः **रूपं चे**ति । मध्ये उपन्यासमनुवादयामासुर**एतस्मा**दिति । **दर्शना**दिति अग्निर्मूर्धा चक्षुषी इत्यस्य रूपप्रतिपादकस्य दर्शनात् । हिरण्यगर्भवाचकमत्र सर्वभूतान्तरात्मपदमित्याशयेनानुवादमाहुः **अत** इति । **समवर्तत** अजायत । प्रतिज्ञाविरोधमाहुः **न चे**ति । प्रतिज्ञातब्रह्मजिज्ञासासंन्यासात् **सूत्रवैयर्थ्यम्** । **परमे**ति परमेश्वरस्य ब्रह्मणः प्रतिपत्तिः कार्यद्वारा ज्ञानं तद्धेतुतया ।

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥ (१-२-८)

अधिकरणत्रयेण भोगमुपपाद्य पूर्वाधिकरणे अदृश्यत्वादिगुणानुक्त्वा

भाष्यप्रकाशः ।

कारणमुपन्यस्तं भाष्यकृतेत्याह । तन्मन्दम् । भाष्यकृता एतस्यान्यमतत्वेनैवोपन्यासात् । तदुपन्यासारम्भे, अन्ये पुनर्मन्यन्त इति पुनः शब्देनास्य पक्षस्येष्टत्वस्य स्वयमेवापादनात् । भाष्यकारस्यैवमभिप्राये तेन मूर्धादिश्रुतिरेव प्रमाणतयोपन्यस्येत । अतः सूत्रं भाष्यं च स्वाग्रहमात्रेण विरुन्धन्नतिपाण्डित्यं द्योतयतीति बोध्यम् । एतेनैव भैक्षवमपि दत्तोत्तरम् ।

शैवस्तु पूर्वानुसार्येव ।

माध्वास्तु, 'अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका ।
श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया ।
तामक्षरं परं प्राहुः परतः परमक्षरम् ।
हरिमेवाखिलगुणमक्षरत्रयमीरितम् ।'

इति स्कान्दादक्षरपदं त्रिष्वपि रूढमङ्गीकृत्य, अक्षरात् परतः पर इत्यत्र प्रकृतितः परं यल्लक्ष्मीरूपमक्षरं तस्मादपि परोऽदृश्यत्वादिगुणकोऽक्षरशब्दवाच्यः । पुरुषस्तदुभयभिन्न उक्तविशेषणादेव । यः सर्वज्ञ इत्यादिविशेषणात् प्रकृतितोऽपि भिन्नः । तस्मादेतद् ब्रह्म नामरूपमन्नं च जायत इति नामरूपाद् ब्रह्मणः शब्दब्रह्मरूपाच्चतुर्मुखाद्भेदेन व्यपदेशान्न विरिञ्चः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इतीशान्यत्वव्यपदेशान्न रुद्रः । यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिमिति रूपोपन्यासाच्च न ब्रह्मरुद्रावित्याहुः ॥ २३ ॥

इति सप्तममदृश्यत्वाधिकरणम् ॥ ७ ॥

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥ एवमदृश्यत्वाद्यधिकरणेनाऽन्तर्यामिणोऽदृष्टत्वेऽदृश्यत्वरूपो हेतुः प्रसङ्गाद्दर्शितः । अतः परं प्रस्तूयमानाधिकरणस्य पूर्वोक्तसर्वोपपादकत्वबोधनाय तत्प्रयोजनमाहुः अधिकरणत्रयेणेत्यादि । 'अत्ता चराचरग्रहणाद्' 'गुहां प्रविष्टावा-

रश्मिः ।

विरुन्धन्निति अध्याहृतेन वाचस्पतिना सामानाधिकरण्याच्छतृप्रत्ययः । अतिक्रान्तं पाण्डित्यमतिपाण्डित्यं 'प्रादयो गताद्यर्थे प्रथमया' इति सूत्रेण समासः । यद्वाऽतिक्रान्तं पाण्डित्यं यस्मात्तादृशं स्वं वाचस्पतिम् । पूर्वेति रामानुजमतानुसार्येव । तदुत्तरेणेव दत्तोत्तरः । भगवाञ्छैवः । **वीतशोक** इति विगतः शोको यस्मादिति वीतशोको जीवः । **न ब्रह्मेति** ब्रह्मरुद्रयो रक्तकृष्णरूपत्वात् । **इत्याहुरिति** आहुरित्यनेन स्वरसस्तु पुराणमतमेतत् । स्कान्दं तामसमिति सूत्रस्य पौराणार्थतामसार्थप्रतिपादकतापत्तिः । रूपोपन्याससूत्रे चेशस्य पुरुषं ब्रह्मणो द्रुहिणस्य योनिमिति षष्ठीसमासे ईशं पुरुषमिति पाठस्य विरोधः ॥ २३ ॥

इति सप्तममधिकरणम् ॥ ७ ॥

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥ पूर्वोक्तेति इदं समासौ स्फुटम् । पूर्वोक्तस्य जगज्जन्मादिकर्तृत्वस्य निष्कलं निष्क्रियं शान्तमित्युक्तेऽसंभवात् समवायित्वस्य स्वांसंतिप्रत्ययसंभवात् विरुद्धानां सकलत्वादीनां स्वस्मिन् सत्तां साकाराणामर्थानां च विरुद्धधर्माश्रयत्वसाकारब्रह्मत्वाभ्यामत्रोपपादनात्पूर्वोक्तं सर्वमभिन्ननिमित्तोपादानत्वं तस्य साकारब्रह्मत्व-

प्रसङ्गाद् रूपमुपन्यस्तम् । अधुना साकारब्रह्मतामुपपादयितुमिदमधिकरणमारभते । को न आत्मा किं ब्रह्मेति, आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति चोपक्रम्य द्युसूर्यवाय्वाकाशकवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिन्दया च मूर्धादिभावमुपदिश्याऽऽम्नायते ।

भाष्यप्रकाशः ।

त्मानौ हि तद्दर्शनाद्' 'अन्तर उपपत्तेः'इत्यधिकरणत्रयेण वैशेष्यबोधनात् त्रिविधं भोगमुपपाद्यान्तर्याम्यधिकरणे तद्वैशेष्यमन्तर्यामिणि निगमयित्वा, अदृश्यत्वाद्यधिकरणे तस्याद्दष्टत्वोपपादकान् अदृश्यत्वादिगुणानुक्त्वा रूपाभावादेवादृश्यत्वादीति शङ्कानिरासायान्तरात्मनस्तत्प्रसङ्गाद्रूपमुपन्यस्तम् । परमात्माक्षरयोरभेदः परापरभावश्चोक्तः । तत् तदा संगच्छते, यदि ब्रह्मणः साकारता वास्तवी स्यात् । परमात्मनो विरुद्धधर्माश्रयत्वं च स्यात् । अतस्तदुपोद्घातत्वेनाऽधुनेदमधिकरणमारभत इत्यर्थः । एवं संगतिमुक्त्वा विषयवाक्यमुदाहरन्ति को न आत्मेत्यादि । इदं च छान्दोग्ये सप्तमप्रपाठके वर्तते । तत्रोपक्रमे, प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलनामानः पञ्चापि श्रुताध्ययनवृत्तसंपन्नाः क्वचन समेत्य मीमांसां चक्रुः । को न आत्मा, किं ब्रह्मेति । अत्र स्वात्मब्रह्मणी

रश्मिः ।

विरुद्धधर्माश्रयत्वाभ्यामुपपादकत्वबोधनायेत्यर्थः । यद्वात्रैवाग्रे अत्ता चराचरेत्यादिग्रन्थे पूर्वोक्तसर्वोपपादकत्वं वक्ष्यमाणं तस्य बोधनाय । **वैशेष्येति** शब्दविशेषादित्यधिकरणे संभोगप्राप्तिसूत्रे ब्रह्मणो जीवविलक्षणं भोगवैशेष्यं तस्य बोधनाद्धेतोरधिकरणत्रयेण त्रिविधं भोगमुपपाद्येति योजना । त्रैविध्यं तु अत्ता चराचराधिकरणे आनन्दरूपाद्वैशेष्यात् संपन्नजीवसाहित्येन भोग उपपादितः । गुहां प्रविष्टावित्यधिकरणे ऋतं पिबन्ताविति श्रुत्युक्तः स्वरूपात्मकः सः । अन्तराधिकरणेऽक्षिपुरुषस्य सः इति । **तद्वैशेष्यमिति** भोगवैशेष्यम् । **अदृष्टत्वेति** अन्तर्यामिब्राह्मणे अदृष्टो द्रष्टा अश्रुतः श्रोतेति श्रुत्युक्ताद्रष्टृत्वं तदोपपद्येत यद्यात्मनोऽदृश्यत्वादिगुणा भवेयुरतो हेतुतासंगतिरदृश्यत्वादिगुणकाधिकरणघटिकेति ध्वन्यते । **रूपमिति** तथा च रूपिद्रव्यत्वेन चाक्षुषत्वेन कार्यकारणभावेपि दिव्यचक्षुषा स्वेच्छया वा चाक्षुषत्वेन रूपिद्रव्यत्वेन चाक्षुषत्वेन कार्यकारणभावस्यानङ्गीकारात् । उक्तकार्यकारणभावस्य दिवा कौशिकानां दृष्टी रूपं न प्रतिपद्यते इति व्यभिचारात् । अतोग्निर्मूर्धेतिश्रुत्युक्तसर्वभूतान्तरात्मनो रूपमुपन्यस्तम् । न च हिरण्यगर्भः समवर्तताग्रे इति श्रुतेर्द्रुहिणस्य स्वराजो वा रूपमिति प्रसङ्गाद्रूपमुपन्यस्तमिति भाष्यं कुत इति चेन्न । सर्वभूतान्तरात्मेति श्रुतौ सर्वपदस्यासंकुचितवृत्तित्वेन पञ्चसंख्याविशिष्टवाचकत्वात् । **प्राचीनेति** प्राचीनशालश्च सत्ययज्ञश्चेन्द्रद्युम्नश्च जनश्च बुडिलश्च प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलाः एतानि नामानि येषां ते तथोक्ताः 'श्रुतं शास्त्रावधृतयोः' इति विश्वः । अध्ययनं गुरुमुखादक्षरग्रहणम् । वृत्तो वर्तनं ख्यातो वा दृढो वा भावप्रधानो निर्देशः 'वृत्तोतीते दृढे ख्याते' इति 'वाच्यवद्वर्तने' इति च विश्वः । तैः **सपन्नाः । मीमांसा**मिति विचारणाम् । **को न** इति इमां व्याचक्रुः को नोऽस्माकमात्मा किं ब्रह्म ब्रह्माभिन्नप्रत्यगात्मा क इति विचारयन्तस्ते स्वयं निश्चयमनाप्नुवन्तः ह आत्मन उपदेष्टारं संपादयांचक्रुरिति । तत्र किमो विचारे प्रयोगाभावादिति प्रश्ने विचारयन्त इत्यर्थः । अयं प्रश्न इतीच्छाविषयाकारः स तु संशयाकारः । प्रच्छ ज्ञीप्सायामिति धातुपाठात् विषयस्य प्रत्ययार्थत्वात् ज्ञीप्साविषयस्य ज्ञप्ज्ञानस्य संशयत्वेन प्रकारेण ग्रहणात् । प्रश्नरूप-

भाष्यप्रकाशः ।

अभिन्ने भिन्ने वेति संशयो न तेषां विचारबीजं, किंत्वस्मदुपास्य आत्मा कः, किं ब्रह्म, तदेकदेशो वेति संशयो विचारबीजमित्यनुपदमेव व्युत्पादयिष्यामः ।

यदत्र कैश्चिद् व्याख्यातम् । आत्मब्रह्मशब्दयोरितरेतरविशेषणविशेष्यत्वाद् ब्रह्मेत्यध्यात्मपरिच्छिन्नमात्मानं निवर्तयत्यात्मेति चात्मव्यतिरिक्तस्यादित्यादिब्रह्मण उपास्यत्वं निवर्तयति । अतो, ब्रह्म आत्मैव, आत्मा ब्रह्मैवेत्यभेदेन सर्वात्मा वैश्वानरो ब्रह्म स्वआत्मेति फलिष्यतीति । तन्न । किमः आवृत्त्या वाक्यभेदस्य स्फुटत्वेन विशेषणविशेष्यभावप्रतीत्यनुदयादेतदुपपादनभूताग्रिमग्रन्थानुरोधेन तथाङ्गीकारेऽपि तत्रात्मन उपास्यत्वेनैव सिद्धतया तत्र प्रत्यगात्माभेदापादनस्यासंगतत्वादिति । अतः पूर्वोक्तसंशय एव विचारबीजम् । मीमांसाफलं त्वग्रे वक्तव्यम् । ततः स्वविचारणया तन्निश्चयमलभमाना उद्दालकनामानमन्यं वैश्वानरोपासकं संशयवारकत्वेन संभावितवन्तः । सर्वेऽपि तन्निकटे यदा गतास्तदा तेन विचारितम् । एते प्रश्नार्थमागता

रश्मिः ।

संशयस्योपक्रमे मीमांसाया उक्तायास्तदघटकत्वेनावक्तव्यत्वात् मीमांसायाः 'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरं संगतिश्चेति' पञ्चाङ्ग्याः संशयघटितत्वेन को न आत्मेति विषयवाक्यानन्तरं किं ब्रह्मेति संशयस्यैका कोटिरतो न वेति द्वितीयकोटिं प्रक्षिप्य संशयमाहुः **अत्र स्वेति** । न वेति कोटिमाहुः **भिन्ने वेति** । न च विचारणं विहाय संशयग्रहणे किं मानमिति वाच्यम् । मीमांसां चक्रुरिति मीमांसापदस्य मानत्वात् । उपक्रमस्यार्थनिर्णायकत्वात् । **अत्र स्वेत्यत्र** अत्र को न आत्मा इति श्रुतौ नोऽस्माकं प्राचीनशालादीनां आत्मा क इति प्रश्ने विषयवाक्येन कृते किं ब्रह्मेति श्रुत्या विशयस्यौचित्यान्न वेति द्वितीया कोटिः । तथाच किं स्वात्मा ब्रह्मेति वचनव्यक्तेरभेदसंसर्गघटितत्वेन ब्रह्माभिन्न आत्मा ब्रह्मभिन्न आत्मा वा किमिति संशयविषयकेच्छात्मकः प्रश्नः । **तेषामिति** प्राचीनशालादीनां विचारौ सिद्धान्तिपूर्वपक्षिकृतौ तयोर्बीजं कारणं न किंतु भेदषष्ठ्यास्माकमत्रास्मदुपास्य इत्यविषयसंशयार्थ इत्याहुः **किं त्विति** । कुतो नेत्याकाङ्क्षायामाहुः **इत्यनुपदमिति** । ननु ह्यधिकरणे विषयवाक्यादीनां पृथक्त्वेनात्र मीमांसायां सिद्धान्तपूर्वपक्षौ काविति चेच्छृणु संपादनकरणेतरग्रन्थार्थस्य सिद्धान्तत्वात् तदनुरोधेन पूर्वपक्षस्योन्नेयत्वात् संगतिस्तु सामान्यत्वेनास्याधिकरणस्यात्र प्रतिपिपादयिषितस्याधिकरणस्य विशेषत्वेन पूर्वाधिकरणेन विशेषस्य या सैव सामान्याधिकरणस्य । **कैश्चिदिति** शांकरैः । **इतरेतरेति** यथाहुरात्मैव ब्रह्मेति ब्रह्मज्ञानार्थं पदद्वयमिति रत्नप्रभाकाराः । **अध्यात्मेति** आत्मनीत्यध्यात्मम् । अव्ययं विभक्तीत्यादिसूत्रेण समासः । आत्मानमधिकरणीकृत्य वर्तमानं यच्छरीरं तत्परिच्छिन्नमात्मानं निवर्तयति । ब्रह्मपदस्य व्यापके शक्तत्वादित्यर्थः । आदित्य आदिर्येषां तदादित्यादि तद्ब्रह्म तस्योपास्यत्वं निवर्तयति तदुक्तं ब्रह्मामृतवर्षिण्याम् । आत्मनोऽसंसारित्वार्थं ब्रह्मपदम् । ब्रह्मणोऽपरोक्षत्वार्थमात्मपदमिति । **आवृत्त्येति** किम आवृत्त्या वारद्वयं कथनेन । एकतिङ् वाक्यमिति वाक्यभेदः । **एतदुपपादनेति** विशेषणविशेष्यभावोपपादनभूतो योग्रिम आत्मानमेवैमं वैश्वानर९ संप्रत्यध्येषि तमेव नो ब्रूहीति ग्रन्थस्तस्यानुरोधेन तथेति विशेष्यविशेषणभावस्याङ्गीकारेपि तत्र विशेष्यविशेषणभावे आत्मनः स्वात्मनो वैश्वानरत्वेनोपास्यत्वेनाध्येषि स्मरसि उपास्स इत्यर्थात् सिद्धतया श्रुतिदर्शनादेवकारः । **असंगतेति** अनावश्यकत्वादसंगतत्वं उपास्योपासकयोरभेदापत्तेर्वा सुबोधिन्यां जीवउपासनानिषेधाच्च । **अत्र इति** ।

यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति । तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुदर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचनमास्यमाहवनीय इत्यादि ।

भाष्यप्रकाशः ।

महाश्रोत्रिया अहमिव वैश्वानरोपासका नाहमेभ्योऽधिकोऽतोऽन्यमभ्यनुशासानीति । तत एवं निश्चित्य तद्वेत्तारं कैकेयमुपदिष्टवान् । ततस्ते षडपि कैकेयराजनिकटे गताः । तदा स राजा तेषां पृथक् पृथक् पूजां पुरोहितादिद्वारा कारयित्वा धनं दातुमारब्धवान् । यदा न जगृहुस्तदा, 'न मे स्तेनो जनपदे' इत्यादिना स्वस्य सद्वृत्ततामुक्तवान् । तथापि ते धनं न जगृहुस्तदा तेषामधिकलिप्सां संभाव्याहं यक्ष्यमाणोऽस्मि, ऋत्विक्समानं धनं प्रत्येकं दास्यामि, तावत् स्थातव्यमित्युक्ते, ते स्वाभिप्रायमुक्तवन्तः । आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति । तदा राजा तदधिकारपरीक्षार्थं, प्रातर्वः प्रतिवक्तास्मीत्युक्त्वा अन्तःपुरं प्रविष्टः । ततो द्वितीयेऽह्नि ते समिद्धारपाणयो राजसमीपं गताः । ततो राज्ञा, एते धनविद्याप्रतिष्ठावन्तोऽपि स्वाभिमानं परित्यज्यैतज्जिज्ञासयैवं समागता अतोऽधिकारिण इत्यवगत्य तत्प्रतिभापरीक्षणाय प्रत्येकं पप्रच्छ, कं त्वमात्मानमुपास्स इति । तदा तैः क्रमेण द्युसूर्यादिषु स्वस्वोपास्यात्मत्वेनोक्तेषु, एष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्स इत्यादिना द्युसूर्यवाय्वाकाशवारिपृथिवीनां क्रमेण सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयित्वप्रतिष्ठात्वगुणयोगं मूर्धविपातान्धत्वप्राणोत्क्रमणदेहविशरणबस्तिभेदपादविम्लानिकथनरूपया एकैकोपासननिन्दया च मूर्धचक्षुःप्राणदेहमध्यभागबस्तिपादभावमुपदिश्याग्रे आम्नायत इत्यर्थः ।

यस्त्वेतमित्यादि एतदर्थस्तु, यस्त्वेतं भवत्पृष्टम्, एवं मदुक्तप्रकारेण तत्तदवयवविशिष्टमेकं, प्रादेशमात्रं, 'मात्रं कार्त्स्न्येऽवधारणे' इति कोशाच्छ्रुत्यन्तरे मूर्धचिबुकान्तराले प्रतिष्ठितत्वकथनात् प्रादेशपरिमाणकत्वेनावधारितम्, अभिविमानं तादृशपरिमाणकत्वेऽप्यभितः सर्वतो विगतं मानं परिमाणं यस्मात् तादृशम्, आत्मानं नियामकं, वैश्वानरं विश्वान् नरान्नयतीति यास्केन पृषोदरादितया निरुक्तं स्वप्रापकमुपास्ते चिन्तयति । स सर्वेषु लोकेषु द्युप्रभृतिषु, सर्वेषु भूतेषु चराचरेषु शरीरेषु सर्वेष्वात्मसु जीवेष्वन्नमत्ति सर्वात्मभूतः संस्तांस्तानेकदेशाभिमानिनो न्यक्कृत्य तत्तद्बुद्धिवृत्तिभिस्तत्तदिन्द्रियैश्च तद्भोग्यं स्वयं भुङ्क्ते ।

रश्मिः ।

नाहमिति नाहमेभ्य अधिक इति पदच्छेदः । **कैकेयमिति** केकेयस्यापत्यमश्वपतिनामानं राजानमुपदिष्टवान् सोऽस्मानुपदेक्ष्यतीत्युक्तवान् । **न मे** इति मे मम जनपदे देशे स्तेनः परस्वहर्ता नेत्यर्थः । **संप्रतीति** संप्रति राजन् स्मरसि । नैरुक्तीं व्युत्पत्तिमाहुः **वैश्वानिति** । **मूर्धचक्षुरिति** अत्र देहस्य मध्यभागो देहमध्यभाग इति षष्ठीतत्पुरुषः मूर्धा च चक्षुश्च प्राणश्च देहश्च मध्यभागबस्तिश्च पादौ च मूर्धचक्षुःप्राणदेहमध्यभागबस्तिपादास्तेषां भावं प्रकृतिजन्यबोधे प्रकाररूपम् । **यास्केनेति** ऋषिणा । **पृषोदरादितयेति** पृषदुदरं पृषोदरं पृषू सेचने भ्वादिः वैश्वशब्दस्य दीर्घः निञो लोपः वैश्वानरः । **न्यक्कृत्येति** तिरस्कृत्य, उक्तेषु प्राचीनशालाद्युपास्यैकैकाङ्गेषु गुणेषु

७३ अ० सू० र०

भाष्यप्रकाशः ।

तस्य ह वा एतस्य सर्वावयवविशिष्टस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः, त्वदुपास्यद्युरूपः सुतेजस्त्वगुणविशिष्टः । एवमग्रेऽपि । विश्वरूपो नानारूपवानादित्यः । पृथग्वर्त्मात्मा आवहोद्वहादिभेदेन वान् वायुः । संदेहो देहमध्यभागः बहुलः सर्वगतत्वादाकाशः । बस्तिर्नाभ्यधोभागः । रयिः, अन्नोत्पादनद्वारा धनजनकत्वाद्धनरूपा आपः । प्रतिष्ठा पादौ पृथिवी । वेदिराकारसाम्यात् । बर्हिरास्तीर्णत्वसाम्यात् । हृदयं गार्हपत्यः, हृदयाद्धि मनः प्रणीतमिवानन्तरं भवतीति साम्यात् । अन्वाहार्यपचनो दक्षिणाग्निः । आहवनीयो हवनस्थानत्वसाम्यात् । एवं

रश्मिः ।

एकैकोपासननिन्दासु अवयविनि संनिवेशेषु च निन्दा अपहाय त्रीनर्थानाहुः **मूर्धैवेति** मूर्धा त्वेष आत्मन इति होवाचेति श्रुतेरवयविनि प्राचीनशालेन द्युरूपस्योपासितस्य राज्ञा मूर्ध्नि निवेशः कृतः । गुणमाहुः **सुतेजा** इति एष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्स इति श्रुतेः सुतेजस्त्वेन गुणेन विशिष्टः अनेन गुणेनोपास्य इति गुणयुक्तः दध्ना जुहोतीतिवत् अग्निहोत्रे दधिरूपगुणो विधीयते अतो गुणविधिरयम् । प्राचीनशालोपासितैकाङ्गमाहुः त्वदिति । तव प्राचीनशालस्योपास्यो द्युरूपः । औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाचेति श्रुतेः । त्वदुपास्यद्युरूपो मूर्धैव सुतेजाः सुतेजस्त्वगुणविशिष्ट इति योजना । श्रुतिस्तु औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव सुतं प्रसुतमासुतं कुलं दृश्यते अत्स्यन्नं पश्यसि प्रियं अत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवात्मानं वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इतीति । औपमन्यव हे प्राचीनशाल मा मां प्रति नागमिष्यः प्रष्टुं चक्षुर्विश्वरूप इति भाष्ये विवरणमतिदिदिशुः **एवमग्र** इति । तस्य ह वा एतस्य सर्वावयवविशिष्टात्मनो वैश्वानरस्य चक्षुरेव विश्वरूपः त्वदुपास्यआदित्यरूपं विश्वरूपत्वगुणविशिष्टं तस्य ह वा एतस्य सर्वावयवविशिष्टात्मनो वैश्वानरस्य प्राण एव पृथग्वर्त्मात्मा त्वदुपास्यवायुरूपः पृथग्वर्त्मात्मत्वगुणविशिष्टः तस्य ह वा एतस्य सर्वावयवविशिष्टात्मनो वैश्वानरस्य देहमध्यभाग एव बहुलः त्वदुपास्याकाशरूपः बहुलत्वगुणविशिष्टः तस्य ह वा एतस्य सर्वावयवविशिष्टस्यात्मनो वैश्वानरस्य बस्तिरेव रयिः त्वदुपास्यवारिरूपः रयित्वगुणविशिष्टः तस्य ह वा एतस्य सर्वावयवविशिष्टात्मनो वैश्वानरस्य पादावेव प्रतिष्ठा त्वदुपास्यपृथ्वीरूपः प्रतिष्ठात्वगुणविशिष्टः श्रुत्यर्थो पूर्ववत्सर्वत्र गुणेषु सुतेजस्त्वस्य स्पष्टत्वात् । विश्वरूपत्वादीन् स्पष्टयामासुः **विश्वरूप** इति । उदित आदित्ये रुक्मारुणश्यामश्वेतधूम्रवर्णाः प्रतीयन्ते इति नाकाशरूपाणि किं तु ह्यादित्यस्य । **वानिति** वातीति वान् । गच्छन् । वा गतिगन्धनयो शतृप्रत्ययः प्राण इत्यर्थः । प्राणस्त्वेष आत्मनः इति होवाचेति श्रुतेः । एष वायुः प्राण आत्मनो वैश्वानरस्येतीन्द्रद्युम्नं प्रति कैकयराज्ञ उक्तिः । **प्रतिष्ठेति** तथाच प्रतिष्ठात्वसाम्यात् पृथ्वी पादावित्यर्थः । **वेदिरिति** चतुष्कोणः स्थण्डिलः इति । **साम्यादिति** मनोऽग्निप्रणयनहेतुत्वसाम्यात् । **दक्षिणाग्निरिति** पचनहेतुत्वसाम्यान्मनो भवति । **हवनेति** प्राणाय स्वाहेत्यादिनास्येप्यन्नं हूयत इति भावः । यद्वा । वेदोक्षरमात्रमपि नान्यथा वदतीति भाष्य उक्तत्वाद्यथाश्रुतमेव साधु । न तु साम्याद्धनजनकत्वादिना तन्निबन्धना गौणी । भाष्येत्यादिपदेन यद्भक्तं प्रथममागच्छेत्तद्धोमीयमित्यादिसंग्रहः । तत्तत्रोक्तन्यायेनाग्निहोत्रे संपादिते सति भोजनकाले यद्भक्तमोदनादिभोज्यमागच्छेत् तद्धो-

तत्र संशयः । किं वैश्वानरशब्देन ब्रह्म प्रतिपादयितुं शक्यते, न वेति । अर्थस्यातिसंदिग्धत्वात् संदेहः । तत्रोपक्रमे ब्रह्मात्मपदप्रयोगोऽस्ति नान्यत् किंचित् । उपपादने त्वतद्धर्मा एव । साकारस्य तु लोकन्यायेनाब्रह्मत्वम् ।

भाष्यप्रकाशः ।

विषयमुक्त्वा संशयाकारं तद्बीजं चाहुः किमित्यादि । अर्थस्येत्यादि च । कथमतिसंदिग्धत्वमित्यत आहुः तत्रेत्यादि । तद्बीजे विचार्ये । उपक्रमे विचाराकारकथने ब्रह्मात्मपदयोः प्रयोगोऽस्ति, को न आत्मा, किं ब्रह्मेति । तत्र किम आवृत्त्या वाक्यभेदावगमाद्विशेषणविशेष्यभावाप्रतीत्या द्वयोः प्रकरणित्वमापाततः प्रतीयते । नान्यत् किंचिदन्यतरस्य प्रकरणित्वोपपादकम् । अत उपक्रमस्य संदिग्धत्वादर्थस्यातिसंदिग्धत्वम् । अथाग्रिमग्रन्थे, कं त्वमात्मानमुपास्स इति प्रश्नस्य दिवमेव भगवो राजन्नित्यादिप्रत्युत्तरादुपास्यस्यैवात्मनो विचारविषयत्वं, न प्रतीचोऽस्य । ततश्च समेत्येत्यस्य स्वस्वोपास्यरूपप्रकाशनेन संविदं कृत्वेत्यर्थात्, को न आत्मेत्यत्रोपास्यतया परामृष्टस्यैव विशेषजिज्ञासाबोधकं किं ब्रह्मेति वाक्यम् । तथा सत्युपपादनग्रन्थाद् ब्रह्मण एव प्रकरणित्वं निश्चीयत इत्युच्यते, तदापि तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा इत्यादिरूपस्य तन्निष्कर्षग्रन्थस्य विचारे त्वब्रह्मधर्मा एव सिद्ध्यन्ति । सुतेजःप्रभृतीनां जन्यानामेवार्थानां मूर्धादिरूपत्वनिष्कर्षात् । नच ।

'यच्छब्दयोगः प्राथम्यं सिद्धत्वं चाप्यनूद्यता ।
तच्छब्दयोग औत्तर्यं साध्यत्वं च विधेयता' ॥

इत्यनूद्य विधेयलक्षणयोर्विचारे मूर्धादीनां सिद्धानामर्थानामनूद्यत्वस्य सुतेजआदीनां जन्यानां विधेयत्वस्य चावगमात् साकारस्य ब्रह्मणोऽवयवानां नित्यानामेव तद्रूपत्वं कल्पनयोपदिश्यत इति न ब्रह्मत्वहानिरिति शङ्क्यम् । यतः साकारस्य तु लोकन्यायेनाब्रह्मत्वम् । विमतो वैश्वानरो न ब्रह्म । साकारत्वात् । द्युप्रभृतिलोकवदिति प्रयोगात् । अत एवमप्यर्थस्यातिसंदिग्धत्व-

रश्मिः ।

मीयं होमद्रव्यमिति चिन्तयेत् इति श्रुत्यर्थः । तद्बीजमिति संशयबीजमुपक्रम आत्मब्रह्मपदं दिवमेव भगवो राजन् इत्याद्युपपादनग्रन्थश्च । विचाराकारेति मीमांसारूपे विचारे विषयसंशयाकारकथने । नान्यदिति भाष्यं विवरामासुः नान्यदिति । उपपादन इति भाष्यमवतारयामासुः अथेति । प्रतीच इति प्रत्यगात्मनः । उपपादनेति स ग्रन्थस्तु दिवमेव भगवो राजन्नित्यादिः । साकारेति भाष्यमवतारयांबभूवुः न चेति । कारिकामाहुः यच्छब्दयोग इति । मूर्धादीनामिति ये मूर्धादयस्ते सुतेज आदय इत्यत्र मूर्धादीनां आत्मैवेदमग्र आसीत् पुरुषविधः इत्यादौ नित्यत्वेन सिद्धानां विधेयसुतेजआदिभ्यः प्रथमानां यच्छब्दयुक्तानां कारिकापूर्वार्धोक्तलक्षणविशिष्टानामनूद्यत्वस्य जन्यानां साध्यानामनूद्यमपेक्ष्योत्तराणां तच्छब्दयुक्तानां विधेयत्वस्य । कल्पनयेति गौण्या । लोकन्यायमाहुः विमत इति गौरश्वत्वादितिवद्बाधवारणाय विमत इति विशेषणम् । वैश्वानरो वेदान्तिमताद्विरुद्धमतो यदा भवति तदा पक्षः । पक्षे साध्याभावो बाधः । साध्यवदन्यत्वादि साध्यवन्तो गावस्तदन्यत्वमश्वेषु । वह्निरनुष्णो द्रव्यत्वादित्यत्र साध्यवन्तोबादयः तदन्यत्वमग्न्यादौ प्रकृते साध्यवन्तो द्युलोकादयः तदन्यत्वं वैश्वानरे इति बाधः । वैश्वानरस्य विमत इति विशेषणे

वैश्वानरो यद्यप्यग्नावेव प्रसिद्धस्तथापि पूर्वकाण्डसिद्धत्वाद्देवतात्मपरिग्रहो युक्तः। ततश्च, 'संवत्सरो वा अग्निर्वैश्वानरः' इति श्रुतेः संवत्सरस्य प्रजापतित्वाच्च हिरण्यगर्भोपासनापरमिदमिति गम्यते। ब्रह्मात्मशब्दावपि हि तत्रैव युक्ततरौ। तदुपासकस्यैवान्नभोजनत्वमपि सर्वत्र युक्तम्। प्रादेशमात्रत्वमपि मुख्यजीवत्वादस्मदाद्यपेक्षया स्थूलत्वाभिप्रायम्। विराडभिमानित्वाच्च लोकावयवत्वम्। वेदगर्भत्वादग्नित्रयात्मकत्वमिति। तस्माद्धिरण्यगर्भोपासनापरमेवैतद्वाक्यं न भगवदुपासनापरमित्येवं प्राप्ते उच्यते।

भाष्यप्रकाशः।

मित्यर्थः। एवं संदेहबीजमुपपाद्य पूर्वपक्षमाहुः वैश्वानर इत्यादि। अग्निर्वैश्वानरो वह्निरिति कोशस्मृतेर्वैश्वानरशब्दो भूताग्नावेव प्रसिद्धः। तथापि पूर्वकाण्डे, विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादावहः केतुत्वकथनेनोत्कर्षवत्तया सिद्धत्वाद् देवतात्मपरिग्रहो युक्तः। पूर्वकाण्ड एव, वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरिति देवतात्मन्यपि सिद्धत्वात्। तत एवं देवतात्मपरिग्रहप्राप्तावप्युत्तरकाण्डे वाजिनां बृहदारण्यके सप्तान्नब्राह्मणे, 'संवत्सरो वा अग्निर्वैश्वानरः' इति श्रावणात् तैत्तिरीयाणां बृहन्नारायणोपनिषदि 'प्रजापतिः संवत्सरः' इति श्रुतेः संवत्सरस्य प्रजापतित्वाच्च हिरण्यगर्भोपासनापरमिदं वाक्यमिति गम्यते। यद्यपि माण्डूक्यादौ, 'विश्वो वैश्वानरः प्रथमः पादः' इति श्राव्यते, तथापि तैजसो हिरण्यगर्भो द्वितीयः पाद इति श्रावणात् तत्परत्वमेव युक्तम्। तस्य च ब्रह्मनामकत्वाज्जीवसमष्टिरूपत्वाद् ब्रह्मात्मशब्दावपि तत्रैव युक्ततरौ। तं योऽहंग्रहेणोपास्ते तस्य यथा क्रतुरितिन्यायेन तद्भावात् तदुपासकस्यैव सर्वत्रान्नभोजनं युक्तम्। भोजनत्वमिति पाठे, भोजनत्वं भोक्तृत्वम्। नन्द्यादित्वाल्ल्युः। शेषमुत्तानार्थम्। एवं पूर्वपक्षमुक्त्वा सिद्धान्तं विशदीकुर्वन्ति उच्यत इत्यादि। हेतुं व्याकुर्वन्ति

रश्मिः।

तु वह्निरूपवैश्वानरस्य द्युलोकसमत्वेन साध्यवत्त्वान्न बाधः। एवमिति उपपादनग्रन्थस्थले तन्निष्कर्षग्रन्थोक्तावपि। एवमिति उपक्रमगतात्मब्रह्मपदाभ्यां दिवमेव भगवो राजन्नित्याद्युपपादनग्रन्थमूर्धैव सुतेजा इत्याद्युपपादननिष्कर्षग्रन्थाभ्याम्। कोशेति बहुग्रन्थानुभवजन्यसंस्कारजन्यत्वादमरकोशः स्मृतिः। पूर्वेति आदित्यादिदेवाः विश्वस्मै भुवनाय वैश्वानरमग्निमादित्यं दिनव्यवहारार्थमह्नां केतुं चिह्नमकृण्वन् कृतवन्त इत्यर्थः। देवतेति वैश्वानरान्नयतीति यास्कोक्तयोगसिद्धदेवतास्वरूपपरिग्रहः। वैश्वानरेति हि यतो वैश्वानरो भुवनानां राजा कं सुखात्माभिश्रीरीश्वरः अभिमुखा श्रीर्यस्मातो वैश्वानरस्य वयं सुमतौ स्याम तत्सुमतिविषयाः स्याम अस्मद्विषया शुभमतिस्तस्य भवत्वित्यर्थः। सिद्धत्वादिति वैश्वानरपदयोगस्य सिद्धत्वात्। युक्तमिति बह्वीनां श्रुतीनामनुग्रहस्य न्याय्यत्वात्। माण्डूक्ये तैजसपदस्यापि व्युत्पत्त्यन्तरसिद्धवैश्वानरे यथा कथंचित्प्राप्यत्वात्। आदिपदोक्तनृसिंहोत्तरतापिनीयेप्येवं श्रुतिद्वयं तत्रापि पूर्ववत्। ब्रह्मात्मेतिभाष्यं विवरामासुः तस्य चेति। अत्र पक्षे विषयवाक्यसंगतिमाह तं योहमिति। अहं ब्रह्मास्मीत्यहंग्रहेण। तद्भावात् हिरण्यगर्भभावात्। ल्युरिति कर्तरि ल्युः। भुनक्तीति भोजनस्तस्य भावो भोजनत्वं भोक्तृत्वमित्यर्थः। शेषमिति तथाहि अस्मदादीति बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोपि दृष्टः। अङ्गुष्ठमात्रो रवितुल्यरूपः कामाहंकारसमन्वितो यः इत्यत्रोक्तं स्थूलत्वम्। मूर्धैव सुतेजा इति श्रुतिसंगतिमाह विराडिति। हृदयमित्यादिश्रुते-

वैश्वानरःपरमात्मैव। कुतः। साधारणशब्दविशेषात् । साधारणशब्दाद्विशेषः। ये पूर्वपक्षे साधारणशब्दा हिरण्यगर्भपरतया ततोऽपि विशेषोऽस्ति। येन भगवानेव वैश्वानरो भवति । प्रादेशमात्रस्यैव द्युमूर्धत्वादिधर्मः। न हि द्विरुद्धधर्माश्रयत्वं भगवद्व्यतिरिक्ते संभवति । सर्वभवनसामर्थ्याभावात् । साधारणाद्धर्माच्छब्द एव विशेष इति वा। विशेषादित्येव वक्तव्ये साधारणशब्दशब्दौ प्रादेशमात्रस्यैव वैश्वानरशब्दवाच्यत्वं द्युमूर्धत्वादिकं तस्यैवेति समासेन द्योतयतः। अन्यथा विरोधाभावात्।

भाष्यप्रकाशः।

साधारणेत्यादि। अत्र साधारणशब्दशब्दस्य, ये इत्यादिना विभजनात् साधारणशब्देभ्यो विशेष इत्येवं बहुवचनविग्रहस्य विवक्षितत्वेऽपि ग्रहणके य एकवचननिर्देशः स ब्रह्मादिपदान्नभोजनवाक्यगतैकजात्यभिप्रायात्। विशेष आधिक्यं, तत्किमित्यपेक्षायां स्फुटीकुर्वन्ति **प्रादेशेत्यादि**। अस्मिन् पक्षे शब्दशब्दस्य पदवाक्यसाधारण्यात् संदेहः स्यादिति समासान्तरेण तमर्थमाहुः **साधारणादित्यादि**। तथा च शब्दे विशेषः शब्दविशेषः। वाक्योक्तात् साधारणाद् द्युमूर्धत्वादेर्धर्माद् वाक्यरूपे शब्द एव यो विशेषो विरुद्धधर्माधारत्वलक्षणस्तस्मादित्यर्थः। ननु विशेषस्यैव हेतुत्वे साधारणशब्दशब्दयोः कथनस्य किं प्रयोजनमत आहुः **विशेषादित्यादि**। **समासेन द्योतयत** इति समासघटकायाः पञ्चम्या ल्यब्लोपप्रयुक्तत्वेन श्रौतयोस्तत्प्रकृतिभूतयोः प्रादेशमात्रवाक्यद्युमूर्धादिवाक्यरूपयोः शब्दयोः समभिव्याहारेण परस्परसामाना-

रश्मिः।

स्तात्पर्यमाह **वेदेति** वेदस्यार्थौत्पत्तिकसंबन्धाहेदप्रतिपाद्यमग्नित्रयं गर्भे यस्य तत्त्वात्। एवमुत्तानार्थम्। भाष्यविरोधं परिजहुः **अत्रेति**। **ग्रहणक** इति साधारणशब्दाद्विशेष इति। **भाष्ये। ब्रह्मादीति** एकजातिः शब्दत्वम्। एकत्वावच्छिन्नं शब्दत्वं तदवच्छिन्नानि बहुत्वावच्छिन्नानि ब्रह्मादिपदानीत्यर्थः। **संदेह** इति वैश्वानरः पदार्थो वा वाक्यार्थो वेति संदेहः। वैश्वानरं संप्रत्यध्यैषीत्यत्र वैश्वानरः पदार्थः। वैश्वानरस्य मूर्धैव सुतेजा इत्यत्र वाक्यार्थोपि वैश्वानरः। ततश्च पदार्थाद्विशेषः। प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमिति वाक्यरूपे शब्दे विशेषो विरुद्धधर्माधारत्वलक्षणो वाक्यार्थाद्वा विशेषो विरुद्धधर्माधारत्वलक्षण इति संदेहः। **तमिति** पूर्वोक्तम्। **साधारणाद्धिरण्यगर्भसाधारणात्। वाक्यरूप** इति प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमिति वाक्यरूपे। **विरुद्धेति** प्रादेशो मूर्धचिबुकान्तरालदेशः तन्मात्रस्याभितो विगतमानत्वं विरुद्धम्। केचित्तु द्वैतदोषभिया प्रादेशमात्रमित्यस्य द्युमूर्धादिविशिष्टं प्रदेशमात्रं प्रदेशे द्युमूर्धादिभिः कृत्वा प्रत्यगात्मतया मीयते ज्ञायते इति प्रदेशमात्रः। शाखान्तरे तु मूर्धादिचिबुकप्रतिष्ठ इति प्रादेशमात्रत्वं कल्पयन्ति। इह तु न तथाभिप्रेतमस्य ह वा एतस्येत्याद्युपसंहारविरोधात्। अभिविमानमिति प्रत्यगात्मतया अभि सर्वैः प्राणिभिर्विमीयते इत्यभिविमानमित्याहुः तन्न विरुद्धधर्माश्रयत्वेनोपसंहाराविरोधात्। अभि इत्यस्य सर्वैः प्राणिभिरित्यर्थस्य क्लिष्टत्वात्। **समासेति** समासः साधारणाच्छब्दः साधारणशब्दस्तस्मिन् विशेष इति पञ्चमीतत्पुरुषघटितसप्तमीतत्पुरुषः। हिरण्यगर्भसाधारणं द्युमूर्धत्वादिकमालोच्य शब्दः प्रादेशमात्रमभिविमानं वैश्वानरमिति विरुद्धधर्मबोधकस्तस्मिन् विशेषो विरुद्धधर्माधारत्वलक्षणस्तस्मात्। **तत्प्रकृतीति** पञ्चमी प्रकृतीत्यर्थः। तदित्थम् साधारणात् प्रादेशमात्रवाक्यात् द्युमूर्धादिवाक्याच्चेति। **समभिवीति** एकार्थीभावलक्षणसामर्थ्याच्च **परस्परस्य सामानाधि-**

यदपि लोकात्मकं स्थूलं रूपं तदपि भगवत एव, न हिरण्यगर्भस्येति। पुरुषत्वात्तस्य।

भाष्यप्रकाशः।

धिकरण्यसूचनाद् द्योतयतः। अन्यथेति वैयधिकरण्ये। एतेन ल्यब्लोपार्थग्रहणे युक्तिरुक्ता। ननु सूत्रसिद्धं विरुद्धधर्माश्रयत्वं तु प्रादेशमात्राभिविमानपदयोः पौर्वापर्यसमभिव्याहाराभ्यां लभ्यते। तावता द्युमूर्धत्वादेर्हिरण्यगर्भसाधारण्यं कथं निवर्ततामित्यत आहुः यदपीत्यादि। तत्र हेतुः पुरुषत्वात् तस्येति। अयमर्थः। श्रुतौ पुरुषशब्दश्चतुर्धा प्रयुज्यते। पुरा आसेति, पुरमुषतीति, पुरि शेत इति त्रिधा योगेन। एकधा आकारविशेषे रूढ्या। प्रकृते च मूर्धाद्यङ्ग-श्रावणाद् रूढ एवाभिप्रेयते। सा च कुत्र मुख्येति विचारे सामान्यतः शब्दमात्रस्योङ्कारवि-कृतित्वेन तद्वाच्ये ब्रह्मण्येव मुख्या। आनन्दमयाधिकरणेऽन्तःस्थस्यानन्दमयस्य परस्यैव विज्ञान-मयादिषु पुरुषाकारसमर्पकत्वेन विमृष्टत्वाच्च। 'सहस्रशीर्षा पुरुषः', 'वेदाहमेतं पुरुषं महान्तम्'

रश्मिः।

करण्यं भिन्नप्रवृत्तिनिमित्तत्वे सति एकार्थबोधकत्वलक्षणं विषयवाक्येनावगतं सूच्यते व्यञ्जनयोच्यते इत्येवं परस्परसामानाधिकरण्यसूचनात् द्योतयतः। वैयधीति प्रकारे थालिति प्रकारभूतेस्मिन्। प्रादेशमात्रत्वद्युमूर्धत्वादिकयोर्विरोधत्वाभावादित्यर्थः। एतेनेति वैयधिकरण्यसामानाधिकरण्ययोरा-लोचनेन। युक्तिरिति। तर्कोन्यथाज्ञानमिति यावत्। यदि हिरण्यगर्भसाधारणद्युमूर्धत्वाद्या-लोचनं न स्यात्तदा हिरण्यगर्भवारणाय शब्दे विरुद्धधर्माधारत्वलक्षणो विशेषो न स्यादिति। कार्य-कारणभावग्राहकस्तर्कः। न तु व्याप्तिशोधकः। सूत्रसिद्धमिति सौत्रहेतुसिद्धम्। साधारणद्युमूर्ध-त्वादेर्धर्माच्छब्दे प्रादेशमात्रमभिविमानमिति वाक्ये मूर्धैव सुतेजा इति वाक्ये च विशेषो विरुद्ध-धर्माधारत्वमिति सौत्रहेतोरर्थात्। पुरेति पुरुषविधब्राह्मणे आत्मैवेदमग्र आसीत्पुरुषविध इत्युपक्रम्य स यत्पूर्वोस्मात् सर्वस्मात् सर्वान् पाप्मन औषत्तस्मादुच्यते पुरुष इति। तृतीयापि मधुब्राह्मणे पुरः पुरुष आविरासीदिति स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति औषददहत्। उषू दाहे भ्वादिः परस्मैपदी सेट् ऊदित्। पुरः शरीराणि उष दाह इति सुबोधिनीप्रथमस्कन्धतृतीयाध्याये जगृहे पौरुषं रूपमित्यस्य सा धातुपाठान्तरे उच्छृङ्खलापि विवृत्तिर्मम चिन्तनीयेति स्कन्धसमाप्तौ कथनात्। उष् दाह इति तु स्वरवर्णानुक्रमहैमधातुपाठेस्ति। रूढ्येति समुदायशक्त्या। रूढ इति। ननु कुतो न योगेन यौगिकोवयवशक्तेः पुरा आस इत्यस्याः सत्त्वादिति चेन्न। आत्मनः सविकल्पज्ञानत्वपक्षेऽरूपवत्सूत्रोक्तसिद्धान्ते योगाभावात्। ननु श्रौतेन योगेन ब्रह्माद्येषु सकल-देवेषु ब्रह्मा इत्यादिपुरुषलिङ्गेन पुरुषाभेदः प्रतीयते रूढ्या स बाधिष्यते अश्रौतत्वादिति चेन्न। वैश्वानरस्य ब्रह्मत्वे सूत्रेणोद्दिष्टे इदमित्थतया वेदेनाप्यनिरूप्ये रूढेर्बाधाभावात्। न चेदमित्थतयाऽ-निरूप्येपि योग उचितः श्रौतत्वात् न रूढिर्लौकिकत्वादिति शङ्क्यम्। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति श्वेताश्वतरे रूढ्यङ्गीकारात् सा श्रौती तस्या अङ्गीकारात्। न च श्वेताश्वतरेपि रूढ्यां प्रमाणाभाव इति वाच्यम्। इदमित्थतया ज्ञानाविषये रूढ्यभावस्य निश्चेतुमशक्यत्वात्। सा चेति रूढिः। एतदेव ध्वनयन्ति स्म आनन्देति। परस्येति 'यतो वाचो निवर्तन्ते' इति श्रुतिविषयस्य। पुरुषत्वात्तस्येत्यत्रान्यमपि हेतुमाहुः सहस्रेति। ननु सहस्रशीर्षा पुरुष इत्यत्र सहस्रशीर्ष्णि पुरुषपदस्य पुरा आस पुरमुषतीति योगद्वयं तृतीयस्तु न अत्यतिष्ठद्दशाङ्गुलमिति श्रुतेः

भाष्यप्रकाशः ।

इत्यादावपि तथैव सिद्धत्वाच्च । एवं सति, पुरुषौ चात्ममानवावित्यभिधानकोशेनान्यत्र शक्तिग्राहणेऽपि ।

'तथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते ।
विना तं पुण्डरीकाक्षं कोऽन्यः पुरुषशब्दभाक् ॥
भगवानिति शब्दोऽयं तथा पुरुष इत्यपि ।
निरुपाधी च वर्तेते वासुदेवे सनातने ॥
ब्रह्माद्याः सकला देवा यक्षगन्धर्वकिन्नराः ।
ते सर्वे पुरुषांशत्वादुच्यन्ते पुरुषा इति' ॥

इति शिवतत्त्वविवेकलिखितात्पुराणात् ।

'स एव वासुदेवोऽयं साक्षात् पुरुष उच्यते ।
स्त्रीप्रायमितरत् सर्वं जगद् ब्रह्मपुरःसरम् ॥
स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः ।
प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद् वैभवादपि' ॥

इति नृसिंहपुराणाच्च परस्मिन् ब्रह्मणि वासुदेवे एव मुख्यः । अतस्तस्यैव पुरुषत्वादितरवारणाच्च । न चेतरवारणेऽपि न शिवस्य वारणमिति शङ्क्यम् । प्रकृतिस्पर्शराहित्यस्वातन्त्र्याभ्यां तस्यापि वारणात् । 'शिवः शक्तियुतः शश्वत्' इति श्रीभागवतवाक्येन ।

रश्मिः ।

पुरोतिक्रमबोधने । न पुरि शयनाभावात् । अत एव न पुरि वसतीति सुबोधिन्युक्तयोगः । संकर्षणः पुरुष इत्युक्तम् । 'सहस्रवदनः स्वराट्' इति दशमस्कन्धात् 'एतावानस्य महिमा अतो ज्यायाꣳश्च पुरुषः' इति श्रुत्युक्ते विराजः कारणेऽत्रापि योगद्वयं नास्ति पुरा आसेति योगस्तु स्यात् ज्यायान् गुणैः वासुदेवः पुरुष इत्युक्तम् । मोक्षदातृत्वेन गुणैर्ज्यायस्त्वात् । तस्माद्विराडजायतेति प्रद्युम्नः पुरुष इत्युक्तम् । गर्भसंबन्धात्तस्य । 'विराजो अधिपूरुषः स जातोत्यरिच्यत' इत्यत्र पुरि शेते पुरि वसतीति योगद्वयं विराजमधिकं कृत्य पुरिशयनाद्वसनाच्च । अनिरुद्धः पुरुष इत्युक्तम् । अधिपुरुषो ब्रह्मा यज्ञश्रद्धत्वात् धर्मात्मानिरुद्धरूपश्च । 'ब्रह्मन् पुंसि च' इति पाणिनिसूत्रात् । अग्रे यत्पुरुषेण हविषेत्यत्र पुरुषं जातमग्रतः इत्यत्र यत्पुरुषं व्युदधुरित्यत्र प्रद्युम्नसंकर्षणानिरुद्धव्यूहेषु पुरुषपदानि वासुदेवव्यूहेपि न पुरुषपदमतः पुरुषत्वात्तस्येति भाष्यार्थे कथमयं हेतुरिति चेन्न गोपालतापिनीये वासुदेवादिव्यूहेषूक्तेषु कथं चतुर्भिर्देवैरेको देवो भवेत् इति प्रश्ने एकमेवाद्वितीयं ब्रह्मेति कथनात् । अतो वेदाहमेतमित्यत्रैतच्छब्दस्य सन्निहितयत्पुरुषं व्यदधुरिति श्रुतिविहित्य यज्ञपुरुषपरत्वेपि सहस्रशीर्षा पुरुष इत्यस्य संकर्षणपरत्वेपि यथा विश्वं पादौ ब्रह्महस्तौ देह इति प्रत्ययौ तथानिरुद्धसंकर्षणौ वैश्वानर इति प्रत्ययान्न क्षतिः । एतमित्येतच्छब्दस्य वेदे संनिहितपरामर्शकत्वानियमे तु गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः इति न्यायादेतं वैश्वानरं व्यूहचतुष्टयं कृष्णं वेदेत्यर्थान्न दोषः । आत्मैवेदमग्र आसीत्पुरुषविधः इति पुरुषविधब्राह्मणश्रुतेः । आदिपदेन 'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्' इत्यस्याः आत्मैवेदमित्यस्याश्च संग्रहः । अन्यत्रेति । मानवे मनुसक्ष्युत्पन्ने जीवे तथाच विराड्जीवो द्युमूर्धत्वादिविशिष्टो भवत्विति भावः । गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इत्यभिप्रेत्याहुः तथा पुरुषेति । शिवतत्त्वविवेकोप्पयदीक्षितग्रन्थः । वैभवादिति

भाष्यप्रकाशः ।

'जगतत्कारणतापन्नः शिवया मुनिपुङ्गवाः ।
सा तस्यापि भवेच्छक्तिस्तया हीनो निरर्थकः' ॥

इत्यादिपञ्चत्रिंशद्भिः सूतसंहितावाक्यैश्च सर्वदा सर्वावस्थासु शिवस्य प्रकृतियुक्तत्वतदधीनत्वयोरुक्तत्वात् । 'शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि' इति सौन्दर्यलहर्यां शंकराचार्यैरपि तथाङ्गीकारादिति । नच कारणस्य सर्वाभिः कार्यावस्थाभिरवस्थावत्त्वात् तादृशं रूपं ध्यानार्थमेवोच्यते, न तु तद्वास्तवं कारणरूपमिति वाच्यम् । अत्र मूर्धैव सुतेजा इत्यादिना सिद्धान्येवाङ्गानि निर्दिश्य तेषां द्युप्रभृतिरूपताविधानादङ्गानामवास्तवत्वस्याशक्यवचनत्वात् । न च पृथिव्येव पादावित्यत्र विपरीतोद्देश्यविधेयभावान्नैवमिति शङ्क्यम् । पूर्ववाक्य उद्दालकं प्रति, पादौ त्वेतावात्मन इत्युक्तत्वात् । न च वैद्यके, मूत्राशयपुटो बस्तिरिति कथनादत्र तदुल्लेखेन कार्यरूपत्वमाकारस्य शङ्क्यम् । बस्तिर्नाभेरधो द्वयोरिति कोशोक्ताया नाभ्यधोभागमात्रताया अत्र विवक्षितत्वात् । अन्यथा जलस्य मूत्रीभावेनाऽप्रयोजकत्वे तस्मिन् रयित्वकथनस्य विरुद्धत्वप्रसङ्गात् । तस्य जलनामत्वाभावात् । एतद्वा अपां नामधेयं गुह्यं यदाधावा इतिवद् गुह्यनामत्वेनाप्यश्रावणाच्च । न च साकारस्य पूर्वपक्षोक्तेन लोकन्यायेनाऽब्रह्मत्वं शङ्क्यम् । विरुद्धधर्माश्रयत्वेन सिद्धे वैश्वानरस्य ब्रह्मत्वे तस्याप्रयोजकत्वात् । अलौकिकाऽऽकारत्वेन सत्प्रतिपक्षत्वाच्च । न चात्र मानाभावः शङ्क्यः । 'सहस्रशीर्षा पुरुषः', 'सर्वतः पाणिपादं तत्' इत्यादिश्रुतीनामेव मानत्वात् । सर्वत्रैकस्यैव ब्रह्मणः प्रतिपाद्यत्वात् । अतः साकारस्यैव ब्रह्मताप्रतिपादनार्थमेवं कथनमिति, नात्र हिरण्यगर्भादिरूपता प्रतिपादयितुं शक्येति ।

रश्मिः ।

वैभवः विभुरेव प्रज्ञाद्यण् । सर्वभवनसमर्थः । भावप्रधानः वैभवत्वात् । **इतरेति** विराड्जीववारणात् । **शक्त** इति तदा शक्तः । **न चेदेवं** एवं शक्त्या युक्तो न यदि । **कार्येति** दिवसूर्यादिव्यवस्थाभिः । **विपरीतेति** न च पादावेव पृथ्वीत्यन्वये न विपरीतेत्यादिरिति वाच्यम् । पाठक्रमापेक्षायामुक्तान्वयाभावात् । नच प्रधानक्रमेण योगानां क्रमः आश्रियते स मुख्यः क्रमः प्रधानमुत्तमाङ्गं मूर्धेति मुख्यक्रमेणान्वयोस्तु इति शङ्क्यम् । तस्य पादौ त्वेताविति श्रुतेर्विवक्षाधीनत्वादित्यत एकवाक्यतामाहुः **पूर्ववाक्य** इति । कं त्वमात्मानमुपास्स इति पृथिवीमेव भगवो राजन्निति होवाचेति वाक्ये त्वमुद्दालकः पादाविति एतौ पृथिवीरूपौ तथा चोद्देश्यत्वं पादयोः तत्रेत्यत्रापि तदेकवाक्यतया तयोरेवोद्देश्यत्वमित्यर्थः । तथा चोद्देश्यविधेयभावविकल्पापेक्षयैकवाक्यतयैकार्थो ज्यायानिति भावः । लाघवात् । **बस्तिरिति** । **अधः** अधोभागः । **द्वयोः** स्त्रीपुंसयोः । **तस्येति** सूत्रस्य । **पूर्वपक्षेति** साकारस्य तु लोकन्यायेनाब्रह्मत्वमिति भाष्योक्तलोकन्यायेन । **सत्प्रतिपक्षेति** । विमतो वैश्वानरो ब्रह्म अलौकिकाकारत्वादानन्दवदिति साध्याभावसाधकोऽस्य साकारत्वस्य हेतोरिति सत्प्रतिपक्षलक्षणसत्त्वात् । **अत्रेति** वैश्वानरस्य ब्रह्मत्वे । तथाच गौरश्वत्वाच्छब्दो नित्यः कृतकत्वादित्यत्रेव हेतोर्बाधितत्वान्न सत्प्रतिपक्षत्वमिति भावः । न बाध इत्याहुः **सहस्रेति** संकर्षणाभेदविवक्षया संकर्षणरूपमुपन्यस्तम् । ब्रह्मरूपमुपन्यस्तम् । **सवत** इति । तथाच वैश्वानरे ब्रह्मत्वसत्त्वात् नालौकिकाकारस्य हेतोर्बाधितत्वमिति भावः । ननु सर्वतः पाणिपादान्तत्वं ब्रह्मरूपं द्युमूर्धादिरूपं कुत इत्यत आहुः **सर्वत्रेति** । ब्रह्मभेदाभावादिति भावः । **एवं कथनमिति** न चैवं निबन्धे कटकाद्युपचाराः साक्षात्कृता भवन्तीति कथं सुखोपचाराणां दिवि साक्षात्कृतत्वात् इति चेन्न ब्रह्मणो भक्तमनोरथपूरकत्वस्य अचलत्वं चापेक्ष्येति

विश्वस्य जडस्य नरस्य जीवस्य च भगवदंशत्वेन देवतात्वाद् 'देवताद्वन्द्वे च' इति विश्वानरौ । तौ निवासो यस्येति, 'तस्य निवासः' इत्यण्, तेन परमेश्वर

भाष्यप्रकाशः ।

तेन शंकरभास्कराचार्याभ्यां यद् व्याख्यातं, साधारणयोर्वैश्वानरात्मशब्दयोर्यो विशेषो द्युमूर्धत्वादिस्तस्मादिति । तद्धिरण्यगर्भसाधारण्यादसंगतमिति बोधितम् ।

ननु भवत्वेवं, तथापि वैश्वानरशब्दस्य कथं ब्रह्मणि समन्वय इत्याकाङ्क्षायां योगरूढ्येति बोधयितुं योगं बोधयन्ति **विश्वस्येत्यादि**। 'विश्वो वैश्वानरः प्रथमः पादः' इतिश्रावणाद् ब्रह्माण्डदेहस्य विश्वस्य जडस्य तैजसो हिरण्यगर्भो द्वितीयः पाद इति श्रावणान्नरस्य तदन्तर्गतस्य मुख्यजीवस्य च पादत्वे **भगवदंशत्वेन** देवतात्वाद्देवताद्वन्द्वे कृते 'देवताद्वन्द्वे च' इति सूत्रेणानङि जाते, विश्वानरौ । ततो निवासार्थेऽणि कृते तथेति तथेत्यर्थः । 'तस्य निवासः' इत्यण् इति पाठे तु, विश्वानरयोर्निवास इति विग्रहान्तरमपि बोध्यते । तथा सत्येकोऽर्थो विग्रहोपन्यासेनेतरश्च सूत्रोपन्यासेने-

रश्मिः ।

तुरीयाध्यायसूत्रे वक्ष्यमाणत्वाद्भक्तमनोरथेन स्वसेव्यस्वरूपत्वे सामर्थ्याभावाभावात् । तदुक्तं तद्रूपं गोपालतापिनीये तरुणं गोपवेशमभ्राममिति । अत्र तु प्रादेशमात्रमभिविमानमिति 'उत्क्षिप्तहस्तः पुरुषो भक्तमाकारयत्युत' इति निबन्धे तरुणोपि व्रजे बालको भूत्वा क्रीडते पुरुषोत्तम इति कृष्णोपनिषदि प्रादेशमात्रोपि । **साधारणयो**रिति वह्निजीवसाधारणयोः । **बोधित**मिति तथाच द्युमूर्धत्वादिधर्मेषु सौत्रस्य साधारणधर्मेषु विशेषादिति विशेषपदस्य शक्तिर्वक्तुमशक्येति भावः । वेदान्तशब्दानां ब्रह्मपरत्वं प्रथमपादे उक्तम् । तेन वैश्वानरपदस्य विरुद्धधर्माश्रयत्वलिङ्गेन ब्रह्मत्वसिद्धावपि वृत्तिनिर्धारायाहुः **ननु भवत्विति** । **योगरूढ्ये**ति पङ्कजपदवत् । **श्रावणा**दिति माण्डूक्ये नृसिंहतापिनीये च । **देवते**ति उपलक्षणमेतत् 'वैश्वानरं द्वादशकपालं निर्वपेत्' इत्येकहविर्भागित्वेन श्रुतत्वात् देवतात्वस्य । **कृत** इति विश्वं च नरश्च विश्वनराविति कृते । **अनङी**ति । ननु विश्वनरयोः द्वन्द्वो दुर्लभ इतरेतरयोगाभावादिति चेन्न । जीवजडयोर्लोके प्रसिद्धसाहचर्याद् योगोस्तीति साहचर्यं च भिन्नयोरेवेति भेदो द्वन्द्वकारणं सोस्त्येवेति भेदस्य द्वन्द्वकारणत्वं नैयायिकसिद्धान्तमुक्तावल्याम् । तौ निवास इति भाष्यं व्याचक्रुः **तत** इति । विरुद्धधर्माश्रयप्रसङ्गाद्यस्य तौ निवासस्तयोर्निवास इति विग्रहे तस्य षष्ठ्यन्तात् समर्थात् निवास इत्यर्थेऽण् इत्यण् इति भाष्यार्थः । अन्यथा चेष्टात्मककाले विमते काले वा वैश्वानरपदप्रयोगः स्यात् । न च पङ्कजादिपदवत् ब्रह्मणि रूढिरप्यस्तीति शङ्क्यम् ।

'ये धातुशब्दा यत्रार्थ उपदेशे प्रकीर्तिताः ।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित्' ॥

इति रूढिनिषेधात् । अतस्तौ निवासो यस्य तादृशयोर्निवासयोर्निवास इत्यर्थेन काले प्रयोगः । जन्यमात्रं कालोपाधिरिति विश्वनरयोः कालनिवासत्वाभावात् पुरः पुरुष आविशदिति श्रुत्युक्तप्रविष्टनिवासत्वस्य विवक्षितत्वात् । **तेने**ति एवमर्थेन । **नान्य** इति कालादिर्नेत्यर्थः । **अन्यत्रे**ति वह्न्यादौ । एवं भाष्यं व्याकृतम्। **प्रकृते** । सोस्य निवास इत्यणिति भाष्यपाठं मत्वाहुः **निवासार्थ** इति निवासः अर्थः संबन्धिवस्तु यस्य सौत्रषष्ठ्यन्तस्येति निवासार्थस्तस्मिन्नर्थेऽणि कृत इत्यर्थः । **तथेती**ति विश्वानरो वैश्वानरत्वेन प्रकारेणेति तथेति वैश्वानर ईश्वरत्वेन प्रकारेणेत्यर्थः । **तथा सती**ति पाठद्वये

एव वैश्वानरो भवति, नान्यः। भगवदंशत्वादन्यत्रोपचारात् प्रयोगः। तस्माद् वैश्वानरः परमात्मा ॥ २४ ॥

भाष्यप्रकाशः।

त्येवमपि विरुद्धधर्माश्रयत्वाय संगृहीतं भवतीति बोधितं ज्ञेयम्। यद्यपि निरुक्ते, वैश्वानरस्य सुमतौ स्यामेत्यत्र, विश्वान्नरान्नयति, विश्व एनं नरा नयन्तीति वा, अथवा विश्वानर एवेति निरुक्तीनामुक्तिः। सायणीये च विश्वेषां नराणां हित इति। अन्यत्रापि 'नरे च संज्ञायाम्' इति विश्वपदस्य दीर्घं विधाय ऋष्यणा व्युत्पादनम्। तथाप्यत्र जीवजडव्यावृत्त्यर्थमेवाचार्यस्य प्रवृत्तत्वादेवं व्युत्पादितम्। ननु भवत्वेवं, योगरूढ्योः सर्वसाधारणत्वाद् व्युत्पादनमनतिप्रयोजनमिति शङ्कायामाहुः भगवंदशेत्यादि। तथा च पुरुषपदवदत्रापि रूढ्यादिश्छायामात्रम्। वस्तुतस्तु

रश्मिः।

सति। सूत्रोपेति 'तस्य निवासः इति पाणिनिसूत्रोपन्यासेनेति। एवमपीति अयं पक्षो भाष्ये व्याकृते व्याकृतः। नैरुक्त इति द्वादशस्य षष्ठे पादे। विश्वानिति तट्टीकायां दुर्गाचार्यैरेवं व्याकृतम्। विश्वान्नरानितो लोकादमुं लोकं नयति सर्वासु प्रवृत्तिषु तान् प्रवर्तयतीति वैश्वानरः तस्मिन् सत्येव सर्वाः प्रवृत्तयो नराणां सफला भवन्तीति हेतुकर्तृत्वं द्वितीयव्युत्पत्तौ तु स नीयमानस्तासु क्रियासु अङ्गभावं नरैस्तच्छब्दवाच्यं कर्म संपद्यत इति तृतीयव्युत्पत्तौ तु सर्वभूतप्रवेशाद्विश्वानरः स एव वैश्वानर इति तस्मिन्नग्निकर्तृकनयने सति हेतुकर्तृत्वं प्रयोजककर्तृत्वं नरा सर्वे यागादिकर्मभिः फलं नयन्ति तान् वैश्वानरोग्निः नाययति हेतुमणिचो लुक् छान्दसः। अङ्गभावं कर्तृभावम्। प्रवेशान्नृ नये भ्वादिः परस्मैपदी प्रापणात्। अन्यत्रेति व्याकरणे विश्वे नरा अस्येति विश्वेनरस्तस्यापत्यं वैश्वानरः। आचार्यस्येति भगवतो व्यासस्य। एवमिति वेदत्वेपि वेदान्तसमाख्यया शास्त्रान्तरत्वेन च निरुक्तव्युत्पत्तीनामनावश्यकत्वेन निरुक्तोक्तपक्षद्वये प्रत्ययस्यानतिप्रसिद्धत्वेन च तृतीयपक्षे जीवजडव्यावृत्त्यभावेन सायणीयव्याकरणपक्षयोरसंभवेनैवं व्युत्पादनम्। ब्रह्म तर्हि अग्निरिति श्रुतेर्निरुक्ताद्युक्तव्युत्पत्तीनां संभवेपि शास्त्रान्तरे फलान्तरप्रयुक्तधर्मान्तरैः सत्यज्ञानादिभिः प्रतिपित्सून्प्रति तदसंभव एव अतो वेदशास्त्रे एव ता व्युत्पत्तयः। भवत्वेवमिति। अत्र तथापीति शेषः। सर्वसाधारणेति यथाह।

'काचं मणिं काञ्चनमेकसूत्रे ग्रथ्नन्ति मूढाः किमु तत्र चित्रम्।
विवेकवित्पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह' ॥ इति।

'श्वयुवमघोनामतद्धिते' इति पाणिनिसूत्रम्। अनतीति न अति अत्यन्तं प्रयोजनं प्रशस्ततमं प्रशंसालक्षणं फलं यस्य व्युत्पादनस्येति। आहुरिति 'ये धातुशब्दाः' इति पत्रानलम्बनकारिकाया रूढिमनादृत्य योगमाहुः तथा चेति। पुरुषपदे व्युत्पत्तिचतुष्टयस्योक्तत्वेनादित्ये पुरमुषतीति व्युत्पत्तिः उत्तमे पुरुषे पुरा आस इति, मानवे पुरि वसति इति, अन्यत्र पुरि शेत इति, एषां समुदायशक्तिमन्तरापि।

'अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रितम्।
संयोगाद्यैरवाच्यत्वधीकृद्व्याप्तृतिरञ्जनम्' ॥ इति।

भाष्यप्रकाशः ।

जातिनिबन्धना प्रशंसानिबन्धना वा गौणीत्यर्थः । सिद्धमाहुः तस्मादित्यादि । तस्मादिति । उक्तरीतिकाद् विशेषात् सर्वेषां पदवाक्यानां तदनुगुणत्वाच्चेत्यर्थः ।

रामानुजाचार्यास्तु, विशेष्यत इति विशेषो विशेष्यमाणत्वम् । जाठरभूतदेवतात्मपरमात्मसाधारणस्य वैश्वानरशब्दस्य परमात्माऽसाधारणधर्मैर्विशेष्यमाणत्वादित्येवं सौत्रं हेतुं व्याख्याय

रश्मिः ।

व्यञ्जनावृत्तिरञ्जनम् ।

'संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः' ॥

इति काव्यप्रकाशोक्तदिशा प्रकरणादिनार्थविशेषस्मरणाद्रूढिमन्तराप्यादित्यादीनां तत्र तत्र प्रतिपाद्यता । यथा सशङ्खचक्रो हरिरित्यत्र हरतीति योगमात्रेपि शङ्खचक्रसंयोगाद्धरिपदवाच्यः कृष्णः न सिंहो नापीन्द्रो नापि कपिः । सैन्धवमानयेत्यादौ सैन्धवपदस्य योगरूढत्वे भोजनप्रकरणे लवणबोधो गमनप्रकरणेऽश्वबोधश्च न स्यात् । अतो योगमात्रं प्रकरणादिनाऽश्वलवणबोधवत् पुरुषपदेन यौगिकेन प्रकरणादिनादित्यादिबोधवदत्रापि वैश्वानरेपि वेदवेदान्तशास्त्रभेदेनाग्निपरमात्मनोर्योगमात्रेण बोध इति रूढिः आदिपदेनाव्युत्पत्तिपक्षे योगस्य च छायामात्रमाभासमात्रम् । वेदान्ते घटपटपदादौ घट भाषणे घट चेष्टायां पट गतौ इत्यादिधातुभ्यो यौगिकार्था ये प्रतीयन्ते तेऽर्था घटपटादीनां सच्चिदानन्दात्मकत्वात् । लोके तु ।

'लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम् ।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत्' ॥

इति पत्रावलम्बनात् घटपटपदादौ रूढिः सच्चिदानन्दात्मकत्वस्यानधीतिनामप्रत्ययाद्घटादिषु । घटादिषु चिदानन्दावाच्छन्नौ सदंशः प्रकट इति । ननु यत्र पुरुषपदप्रयोगः पुरा आसेति व्युत्पन्ने चक्षुः सूर्ये पुरुषपदं कथं पुरमुषतीति व्युत्पत्तेः पुरा आसेति व्युत्पन्ने सत्त्वात् सूर्यस्तपति मद्भयात् इत्यादिवाक्यादिति चेत्तत्राहुः वस्तुतस्त्विति । पुरुषत्वं वैश्वानरत्वं च जातिः प्रशंसा तु अवयवितुल्योवयव इति सूर्यः पुरुषपदेन प्रशस्यते इति वेदान्तिब्रह्मतुल्यो वेदिब्रह्माग्निरित्यग्निः प्रशस्यते इति प्रशंसागुणस्यावयविवाचकपदार्थेनाधेयतासंबन्धात् लक्ष्यमाणस्यावयवे सूर्ये योगात् । प्रशंसागुणस्य वेदान्तिब्रह्मवाचकपदार्थेनाधेयतासंबन्धाल्लक्ष्यमाणस्य वेदिब्रह्माग्नौ योगादुभयत्र प्रशंसानिबन्धना गौणीत्यर्थः । तदुक्तं काव्यप्रकाशे । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेति । उक्तेति सौत्रहेतूक्ताद्विशेषात् विरुद्धधर्माधारत्वलक्षणात् । तदन्विति । विरुद्धधर्माधारत्वानुगुणत्वात् । अधुना साधारणशब्दाद्विशेषः साधारणधर्माच्छब्द एव विशेषो नो वा । तस्मादित्यत्र द्वितीयपक्षेऽप्रतीतार्थापेक्षयान्याचार्यव्याख्यानं श्रेष्ठं मन्यमानं प्रत्याहुः रामानुजेति । साधारणशब्दयोर्विशेषः साधारणशब्दविशेषः तस्मादिति शंकराचार्यव्याख्यानमप्रतीतार्थमिति रामानुजाचार्यमतोपन्यासः कृतः । जाठरेति अयमग्निर्वैश्वानरो योयमन्तःपुरुषे येनेदमन्नं पच्यते इति श्रुतेर्जाठरसाधारणस्य तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोतीति श्रुतेः । घोषरूपे शब्दे

भाष्यप्रकाशः ।

औपमन्यवादीनां षण्णां, को न आत्मा, किं ब्रह्मेति विचार्य भेदस्य निर्देशाज्जीवात्मत्वे निवारिते, तेषां जीवात्मनामात्मभूतं ब्रह्म जिज्ञास्यमिति निश्चये तज्जिज्ञासुभिर्वैश्वानरात्मज्ञं कैकेयं राजानमागम्य पृच्छ्यमानो वैश्वानर आत्मा परमात्मैवेति विज्ञायते । किंचात्मब्रह्मशब्दाभ्यामुपक्रम्य पश्चात् सर्वेषु वाक्येष्वात्मब्रह्मशब्दाभ्यां व्यवहारे कर्तव्ये ब्रह्मशब्दस्थाने निर्दिश्यमानो वैश्वानरशब्दो दृश्यतेऽतः स शब्दो ब्रह्मैवाभिधत्त इति विज्ञायते । किंच । सर्वलोकसर्वभूतसर्वात्मस्वन्नादनमग्निप्रोतेषीकातूलदाहवत् सर्वपाप्मदाहश्चाग्रे वैश्वानरात्मविज्ञानफलत्वेन श्राव्यमाणौ ज्ञानविषयं वैश्वानरं परब्रह्मत्वेन विज्ञापयत इत्याहुः । अत्र ब्रह्मधर्मैर्विशेष्यमाणत्वं त्वायाति, परं त्वतिक्लेशेनेति बोध्यम् ।

भिक्षुशैवौ तु, सर्ववेदान्तसाधारणो यः शब्दविशेष आत्मब्रह्मरूप इति व्याचख्यतुः । तत्त्वात्मब्रह्मशब्दयोर्ब्रह्मपरताया उपपादनसापेक्षतया तयोः साध्यसमत्वेन सिद्धवद्धेतुतानर्हत्वादुपेक्ष्यमेव ।

माध्वास्तु, 'आत्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यते' इति स्मरणाद् विष्णवसाधारणेनात्मशब्देन विशेषणादिति व्याकुर्वन्ति । तदप्यात्मशब्दस्योपक्रमस्थे संशयवाक्याग्रिमप्रश्नादिवाक्यतदग्रिमनिष्कर्षवाक्येषु प्रयोगेण जीवसाधारण्यदर्शनेन चोपपादनसापेक्षतया शिथिलमिव ।

रश्मिः ।

आकाशसूक्ष्ममहाभूते भूतसाधारणस्य विश्वस्मादग्निरित्यादिश्रुतेः देवतात्मसाधारणस्य वैश्वानरस्य सुमतौ स्यामेति श्रुतेः परमात्मसाधारणस्य । **परमे**ति प्रादेशमात्रत्वाभिविमानत्वात्मत्वरूपैः । विशेष्यते वैश्वानरः इति विशेष्यमाणः विशेषविशिष्टः विशेष्यमाणत्वं विशेषः विशेषादिति विशेष्यमाणत्वादित्यस्यार्थः । **निवारित** इति ब्रह्मजिज्ञासा प्रस्तावो न जीवजिज्ञासा प्रस्तावः इति निवारिते । **पृच्छ्यमान** इति औपमन्यवादिभिः पृच्छ्यमानः । **परमे**ति एवकारेण जीवव्युदासः । **अती**ति तेषु ब्रह्मधर्मत्वस्योपपादनसापेक्षत्वादिति क्लेशेनायाति **उपपादने**ति । यथाहुः ।

'आत्मदेहमनोब्रह्मस्वभावधृतिबुद्धिषु ।
प्रयत्ने चाप्यग्नावा प्रस्तरे जलदे गिरौ ॥
ब्रह्म प्रोक्तं तपोध्यात्मदेवजातिषु सूरिभिः' ॥ इति विश्वकोशे ।

विष्णिवत्यसाधारणशब्दविशेषादिति हेतुः अकारलोपश्छान्दसः । **उपक्रमे**ति को न आत्मा किं ब्रह्मेति उपक्रमस्थवाक्यस्य संशयवाक्यत्वं किं ब्रह्म न वेति शेषपूरणेन पूर्वं तत्रैव प्रसाधितम् । **अग्रिमे**ति औपमन्यव कं त्वमात्मानमुपास्से इत्यग्रिमप्रश्नवाक्यानि तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा इत्यादिप्रश्नवाक्याग्रिमप्रश्नवाक्यनिष्कर्षवाक्यानि । **जीवे**ति विराड्जीवसाधारण्यदर्शनेन । **प्रबल** इति तथा च विरुद्धधर्माधारत्वस्य तदेजति तन्नैजतीत्यादिश्रुतिभिर्गीतात्रयोदशाध्याये ब्रह्मनिरूपणे सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । असक्तं सर्वभृच्चैवेत्यादिस्मृतिभिश्चोक्तेर्ब्रह्मनिरूपणे विरुद्धधर्माधारत्वस्य सौत्रविशेषपदार्थत्वेन भगवद्व्यासाशयगोचरत्वस्य तदीयान् प्रति प्रतीतत्वात् । अत एव पूर्वं व्याख्यातो हेतुरपि प्रतीत एव । **भास्कराचार्यास्तु** शंकराचार्यवत् साधारणशब्दयोर्विशेषो द्युमूर्धत्वादिरित्याहुः तत्रायं समासो दुर्लभः 'अल्पाक्षरं पूर्वम्' इति पाणिनिसूत्रात् ।

१. विग्रहः ।

भाष्यप्रकाशः ।

तस्मात् सिद्धान्तोक्तहेतुरेव प्रबलः । यत्तु छान्दोग्यभाष्ये प्रादेशमात्राभिविमानपदयोर्व्याख्यानम् । प्रादेशा द्युमूर्धादिपृथिवीपादान्तास्तैरध्यात्मं मीयते ज्ञायत इति प्रादेशमात्रो, मुखादिषु करणेष्वक्तृत्वेन मीयत इति वा, द्युलोकादिपृथिव्यन्तप्रदेशपरिमाणो वा, प्रकर्षेण शास्त्रेणादिश्यन्त इति प्रादेशा द्युलोकादय एव, तावत्परिमाणो वा । शाखान्तरे तु मूर्धादिचिबुकप्रतिष्ठ इति प्रादेशमात्रं कल्पयन्ति । इह न तथाभिप्रेतः । तस्य ह वा एतस्यात्मन इत्युपसंहारात् । प्रत्यगात्मतया अभिविमीयते ज्ञायत इत्यभिविमान इति । तत्तु न युज्यते । मूर्धचिबुकप्रतिष्ठतया प्रादेशमात्रत्वस्य काल्पनिकत्वे मानाभावात् । नच, तस्य ह वा एतस्यात्मन इत्यादिना द्युमूर्धत्वादिकथनमेव मानमिति वाच्यम् । तदेजति, तन्नैजति, अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः, अणीयान् व्रीहेर्ज्यायानाकाशादित्यादिश्रुतिभिः सिद्धे विरुद्धधर्माधारत्वे, अभिन्ननिमित्तोपादानतोपगमेन स्वयमप्युपगते, मायायां युक्तिविरोधस्य भूषणत्वे च स्वीकृते द्युमूर्धत्वमात्रत्वयोः स्वमतपरमताभ्यामविरोधसिद्धेस्तथाकथनस्य काल्पनिकत्वानुपष्टम्भकत्वात् ।

रश्मिः ।

अधुनोच्यते सिद्धान्ते हेतुस्तदा संभवेद्यदा प्रादेशमात्रादिपदार्थौ परोक्त्यप्रतिहतौ स्यातां न त्वेवम् । छान्दोग्यभाष्ये परोक्तिप्रतिहतत्वादित्याहुः । **यत्तु छान्दोग्येति** । **मीयते** इति प्रादेशमात्रेऽग्रे प्रत्ययः । त्रायते इति त्रा त्रेङ् पालने प्रादेशमात्र इत्यत्र पुंस्त्वं छान्दसम् । माङ् माने शब्दे च इत्यत्र धातुः । इदानीमध्यात्ममुक्तं तत्र प्रकारं वक्तुमाह **मुखादी**ति आदिना चक्षुःप्राणादि । परिमाणे मात्रजित्याशयेनाह **द्युलोकादी**ति । एवं स्वार्थिकाणा प्रादेशशब्दसाधने प्रयोजनाभावात्प्रकारान्तरेणाह **प्रकर्षेणे**ति । **शाखान्तर** इति समानप्रकरणे वाजसनेयिब्राह्मणे इति ब्रह्मामृतवर्षिण्याम् । **उपस**मिति उपसंहारस्यार्थनिर्णायकत्वेन तत्रात्मपदेन व्यापकस्यैव कथनात् तदनुरोधादिह न तथाभिप्रेतः इत्यर्थः । **मूर्धे**ति य एकोनन्तो अव्यक्त आत्मा सोविमुक्ते प्रतिष्ठितः सोविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायां नास्यां मध्ये प्रतिष्ठित इति का वै वरणा का वै नासेति सर्वाणीन्द्रियकृतानि पापानि वारयति नाशयतीति वरणा । नासीति कतमच्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः संधिः स एष द्यौर्लोकस्य च परस्य संधिर्भवतीति । अस्या अर्थः । य एष प्रसिद्धः परमात्मानन्तः अव्यक्तः स्वरूपेण अनभिव्यक्तः दुर्ज्ञेय इति यावत् । तं कथंचिज्जानीयादिति अत्रिप्रश्ने याज्ञवल्क्योत्तरं स इति याज्ञवल्क्योब्रवीत् । **वरणाया**मिति वरणार्थे पदार्थं वदेत् पदे निर्वक्ति । **सर्वाणी**ति सर्वान् इन्द्रियवृत्तिकृतान् दोषान् वारयति तेन वरणा भ्रुवावित्यर्थः । तान् दोषान् नाशयतीति नासीति तथाच नियम्यजीवद्वारा नियन्तुरीश्वरस्याधिष्ठानत्वात् नासाभ्रुवोः पाप्मनाशकत्वं तत्रापि स्थानविशेषजिज्ञासया पृच्छति **कतमच्चे**ति । पूर्वोक्तमध्वशब्दार्थं स्पष्टयामासुर्भ्रुवोरिति तदेव स्थानमित्यर्थः । संधिर्द्युलोकस्य स्वर्गस्य परस्य च ब्रह्मलोकस्य संधित्वेन ध्येय इत्याह **स** इति । **कथन**मिति आत्मनो व्यापकस्य निष्कलस्यामूर्तस्य द्युमूर्धत्वादिमूर्तत्वापादकं तत्कथनम् । न च कालभेदेन तदुपपत्तिरिति शङ्क्यम् । तन्निवारणायैव पुनस्तन्नैजतीत्यत्र तच्छब्दोपादानादन्यथा पूर्वेण तच्छब्देन गतार्थत्वात् तद्वैयर्थ्यापत्तेः । **अणो**रिति यदपेक्षया सूक्ष्मं नास्ति तादृशः । महत इति परममहत इत्यर्थः । तथा चाणुत्वमहत्त्वयोरौपाधिकत्वमपि न वक्तुं शक्यमिति भावः । आदिपदेन 'आसीनो दूरं व्रजति शयानो याति सर्वतः' इति श्रुतिसंग्रहः । **अभिन्ने**ति 'तत्तु समन्वयात्' इत्यधिकरण

स्मर्यमाणमनुमानं स्यादिति ॥ २५ ॥

व्याख्यानेन भगवत्परत्वाद् वाक्यस्य प्रमाणान्तरमाह ।

'केचित् स्वदेहे हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति' ॥ इति ।

स्मर्यमाणं रूपमनुमानं स्यात् । प्रादेशमात्रवैश्वानरस्य ब्रह्मत्वे स्मरणं हि मननं श्रुतस्य भवति । श्रुतिवाक्येभ्य एव हि श्रवणम् । यदि प्रादेशमात्रवैश्वानरप्रतिपादकजातीयानां न ब्रह्मवाक्यत्वं स्यात् तदा स्मरणं नोपपद्येत । अत इति हेतोः प्रादशमात्रवैश्वानरो भगवानेवेति सिद्धम् ॥ २५ ॥

भाष्यप्रकाशः ।

प्रत्यगात्मत्वेन विमीयमानस्य विषयत्वेनाब्रह्मत्वस्य भामत्यां स्वीकारात् । व्याख्येयग्रन्थेऽपि को न आत्मा, किं ब्रह्मेत्येतयोर्भिन्नवाक्यत्वपक्ष एकवाक्यत्वपक्षे च प्रत्यगात्मब्रह्माभेदभानाभावस्योपपादितत्वाच्च । तस्माद् विरुद्धधर्माधारत्वादिकमत्राविवादम् ॥ २४ ॥

स्मर्यमाणमनुमानं स्यादिति ॥ २५ ॥ ननु पूर्वसूत्रोक्तहेतुना सिद्धे वैश्वानरस्य परमात्मत्वे किमिति सूत्रान्तरारम्भ इत्याकाङ्क्षायामाहुः व्याख्यानेनेत्यादि । तथाच स्वारस्येन तथाप्रतीत्यभावादाग्रहवादित्वमाशङ्क्येतेति तन्निवारणायारम्भ इत्यर्थः । स्मर्यमाणं स्फुटीकुर्वन्ति केचिदित्यादि । स्मर्यमाणस्य कथमनुमानत्वमित्यत आहुः स्मरणं हीत्यादि । स्मरणं नोपपद्येतेति ये हि ब्रह्म स्मरन्ति ते श्रुतितः श्रुत्वैव स्मरन्त्यतस्तत्राभावे तन्नोपपद्येत । तथाच प्रादेशमात्रत्वस्मरणं प्रादेशमात्रत्वस्य श्रुत्यर्थत्वानुमापकमित्यर्थः । तेन ।

'अनन्तशाखासापेक्षे वैदिकार्थस्य निर्णये ।
स्वबुद्धिकल्पितादर्थाद् बलीयानुपबृंहितः' ॥ इति बोधितम् ।

अन्ये तु,

रश्मिः ।

एतदुपगमः । स्वयमिति शांकरैः । अभिन्ननिमित्तोपादानतोपगमे । प्रत्यगिति प्रत्यगात्मब्रह्मणोर्भेदभानस्याभावस्तस्य । अविवादमिति । विशेषतस्तु विद्वन्मण्डने भक्तिमार्तण्डे च प्रत्यपादीति ततोवधेयम् ॥ २४ ॥

स्मर्यमाणमनुमानं स्यात् ॥ २५ ॥ स्वारस्येनेति इदमुक्तं सिद्धान्तहेतोः प्राबल्यविचारे तथा वैश्वानरस्य परमात्मत्वेन । प्रतीत्यभावस्तु वैश्वानरः परमात्मा साधारणशब्दविशेषात् विरुद्धधर्माधारत्वात् । अभिन्ननिमित्तोपादानभूतजगदाश्रयब्रह्मवत् स एव न परमात्मा तत एव हेतोः पृथ्वीवदिति हेतोः विरुद्धत्वात् । यथा शब्दो नित्यः कृतकत्वात् । साध्याभावव्याप्तो हेतुर्विरुद्ध इति । **श्रुत्यर्थेति** श्रुत्यर्थत्वस्यानुमापयतीति कर्तरि ण्वुल् । **अनुमापकं** अनुमितिविषयत्वकर्तृ प्रादेशमात्रत्वं श्रुत्यर्थः । प्रादेशमात्रत्वस्मरणात् केचित्स्वदेहे हृदयावकाशे इति स्मृताविव । **अनन्तेति** तेन शाखान्तरीयजाबालसमाम्नायेन प्रादेशमात्रत्वं विवक्षितमिति सूचितम् । **वैदिकार्थस्येति** विषयवाक्यार्थस्य । **उपबृंहित** इति उक्तस्मृत्युपबृंहितः । **अन्य** इति शंकराचार्य-

शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न, तथादृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते ॥ २६ ॥

किंचिदाशङ्क्य परिहरति। ननु यदि स्मर्यमाणमनुमानं स्यादिति वाक्यार्थो निर्णीयते, तदा स्मृत्यन्तरेणान्यथापि व्याख्येयम्।

'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्' ॥

इति जाठर एवाग्निर्वैश्वानरो भवति। तस्यैव भगवद्विभूतित्वात्। वाक्यार्थो यथाकथंचिद् योजयिष्यते। न तु विरुद्धधर्माणां विद्यमानत्वाद् भगवत्परत्वं वाक्यस्य। विरुद्धधर्माः शब्दादयः अन्तःप्रतिष्ठानं च। अग्निर्वैश्वानर इति शब्दः

भाष्यप्रकाशः।

'द्यां मूर्धानं यस्य विप्रा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे।
दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेता' इति।
'यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः।
सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः' ॥

इत्युदाहृत्य स्मर्यमाणं श्रुत्यनुमापकं स्यादिति व्याकुर्वन्ति ॥ २५ ॥

शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथादृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते ॥ २६ ॥ शङ्कांशं व्याकुर्वन्ति नन्वित्यादि। इति वाक्यार्थो निर्णीयत इति एवंप्रकारकेण स्मरणेन निर्णीयते। ननु भगवद्विभूतौ चेद् योज्यते, तदा भगवति योजनं कुतो निषिध्यत इत्यत आह न त्वित्यादि। कः शब्द इत्यतस्तं दर्शयति अग्निरित्यादि। अयमर्थः। वाजिनां वैश्वानरविद्याप्रकरणे, य एषोऽग्निर्वैश्वानर इति वैश्वानरसमानाधिकरणतया अग्निरिति श्रूयते। तथाच यदि समानप्रकरणे केवलो वैश्वानरशब्दः स्यात् तदा तस्मिन् पूर्वोक्तेन योगेन भवेद् भगवत्परत्वम्। प्रयुक्ते तु शब्दान्तरे तत् तस्मादग्निसाहचर्यादग्निरेव वैश्वानरो भवेत्। यास्कोक्तस्य योगान्तरस्य तत्रापि शक्यवचनत्वात्। नच योगतौल्येऽग्नौ कुतः पक्षपात इति

रश्मिः।

प्रभृतयः। श्रुत्यन्विति अस्याः स्मृतेः शरीरात्मकरूपप्रतिपादनपरतायाः उदाहृतश्रुतिरेव मूलं मूलान्तरकल्पने मानाभावात्। तथाच स्मृतौ परमेश्वरस्यैवोक्तत्वात्तन्मूलश्रुतावभिविमानवैश्वानरशब्दौ परमात्मपरावेवेति श्रुत्यनुमापकं स्यादिति। ननु दूषणं कुतो नोक्तमिति चेन्न प्रादेशमात्रमभिविमानमित्यत्राभिविमानपदस्योपसर्गबलात् अन्यपरत्वाभावे स्मृतिर्नोदाहृतेत्यस्य भाष्यस्य स्वभाष्यकात्स्र्यमिति भाष्य इति हेतोरिति। अत्रेतिशब्दः प्रकारवचन इति रामानुजाचार्यभाष्ये तन्न तदेजति तन्नैजति इति श्रुतिभिरपि प्रादेशमात्रवैश्वानरस्य भगवत्त्वाच्छ्रौतोपि प्रकारो न तु स्मार्त एवेति तस्याप्रयोजकत्वेनेति पदवाच्यहेतोरावश्यकत्वात् ॥ २५ ॥

शब्दादिभ्योन्तःप्रतिष्ठानान्नेति चेन्न तथादृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते ॥ २६ ॥ एवमिति उपलक्षणमेतत् इति हेतोरित्यस्य अत इति हेतोरिति भाष्यस्य न विरोधः। **अन्यथेति** जाठरत्वेन प्रकारेण। **विरुद्धधर्मा** इत्यादिभाष्यं स्वयमेव विवरामासुरित्याहुः **क** इति। **वाजिनामिति** बृहदारण्यके। **तदित्यादि**भाष्यं विवरणम्। **तदिति**। **भवेदिति** रामो दाशरथिः रामो जामदग्निरितिवत्। निरुक्तविरोधं परिजहार **यास्केति**। तत्रेत्यग्नौ।

केवलवैश्वानरपदे भवेत् । भगवत्परत्वं योगेन । तदग्निसाहचर्यादग्निरेव भवेत् । तस्यैव च त्रेताग्निकल्पनमुपासनार्थम् । प्राणो हि देवता तद् यद्भक्तं प्रथममागच्छेत् तद्धोमीयमित्यादिना । तदेतेभ्यो हेतुभ्योऽन्तःप्रतिष्ठितत्वमपि न भगवद्धर्मः । पुरुषेऽन्तःप्रतिष्ठितं वेदेति भिन्नहेतुर्हेतुहेतुश्च भवतीति न चकारः । तस्माद् विरुद्धधर्माणां विद्यमानत्वान्न भगवान् वैश्वानर इति चेत् । न । तथादृष्ट्युपदेशात् । सर्वभोक्तृत्वं भगवतो वक्तुं तथादृष्टिरुपदिश्यते । विरुद्धधर्माणां तत्तद्भावापत्तिरित्यैश्वर्यमेव भगवतो वर्णितम् ।

भाष्यप्रकाशः ।

शङ्क्यम् । अत्राप्यग्रे हृदयं गार्हपत्य इत्यादिना तस्यैव वैश्वानरस्य त्रेताग्निकल्पनमुपासनार्थं दृश्यते । न चेदमप्युभयत्र तुल्यमिति शङ्क्यम् । प्राणो हि देवतात्राग्रे पठ्यते । तद्यद्भक्तं प्रथममागच्छेत् तद्धोमीयम् । स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेत्यादिना स्वाहायोगाच्चतुर्थ्या चावगतेः । तस्य मुखं च जाठर एव । आहुतिप्रापकत्वात् । अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे येनेदमन्नं पच्यते यदिदमद्यत इति वाजसनेयिब्राह्मणोक्ताल्लिङ्गात् । यदिदं सूत्रस्थेनादिपदेन सूचितम् । तदेतेभ्यो हेतुभ्यो जाठर एव ग्राह्यो न परमात्मा । न वाऽन्तःप्रतिष्ठानात् परमात्मा ग्रहीतुं शक्यः । यतोऽन्तःप्रतिष्ठितत्वमपि न भगवद्धर्मः । वाजसनेयिभिः, स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति समामननात् । यद्यप्यन्तःप्रतिष्ठानं वाक्यस्य जाठरपरतासाधने भिन्नो हेतुरिति सूत्रे चकारोऽपेक्षितः । तथापि भक्तस्य

रश्मिः ।

अत्रैवाग्रे स्पष्टम् । **तस्ये**तिभाष्यं विवरीतुमाहुः **न चे**ति । **कुत** इति । पदस्यान्यस्य संनिधिरूपस्य हेतोः । प्रादेशमात्रमभिविमानमिति प्रादेशमात्रपदसंनिधितौल्याद्विशेषात् कुतो हेतोरिति प्रश्नः । **त्रेते**ति गार्हपत्यदक्षिणाग्न्याहवनीयरूपत्रेताग्निकल्पनम् । **प्राण** इति भाष्यं विवरीतुमाहुः **न चेद**मिति । **तद्य**दिति । श्रुत्यर्थस्तु तत्तेन न्यायेनैवमग्निहोत्रे संपन्ने यद्भक्तं भोज्यमोदनादिरूपं भोजनकाले प्रथममागच्छेत्तद्धोमीयं होमद्रव्यमिति चिन्तयेत् । होमियमिति क्वचिच्छान्दोग्ये पाठः । आहुतिसाधनत्वसाम्यात् । स भोक्ता प्राणाय स्वाहेति मन्त्रेण जुहुयादिति । विश्वेश्वरव्याख्या । अतो देवतोद्देशेन हविःप्रक्षेपस्य स्वाहापदार्थत्वेन प्राणो देवता न तु ब्रह्मेति । तस्य भक्तिहंसे उद्देश्यतासंबन्धनिषेधादित्याहुः **स्वाहे**ति । **चतुर्थ्ये**ति तथाच देवता चतुर्थ्यर्थः । **प्राणाये**त्यत्र । **अवगतेः** देवतात्वावगतेः । पूर्वतन्त्रे एवं व्युत्पत्तिवादे तु भिन्नोर्थः । **मुख**मिति मुखं निःसरणोपाये वक्त्रे चेति विश्वादुपायः । **आहुतिप्रे**ति सर्वात्मस्वाहुतिप्रापकत्वात् । य एवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवतीति श्रुतेः । **वाजसनेयी**ति उपायत्वे हेतुमाहुः **अयमग्नि**रिति । **पच्यत** इति प्राणाद्युद्दिश्य हुतमन्नं पच्यते प्राणादिप्रापणाय । **अन्त**रिति भाष्यं विवरीतुमाहुः **न वे**ति । **पुरुष** इति भाष्यं विवरामासुः **वाजे**ति । **भिन्ने**ति भाष्यं विवरामासुः **यद्यपी**ति । **एत**दिति अन्तःप्रतिष्ठानम् । **ते त्वि**ति हेतुरादिपदसंगृहीतस्तस्य हेतुरपि । **तथा त्वे**ति तथा द्विवचनान्तं तु अ इति च्छेदः । हेतुत्वहेतुहेतुत्वयोस्तु बोधनाय । **स्फुट**मिति संप्रदायप्रदीपे भगवन्मतस्य पूर्वपक्षीकरणमन्येषामुक्तं तदप्यत्र स्फुटम् । पूर्वोक्तहेतुनेत्येकत्वमविवक्षितं **पूर्वोक्ते**भ्यः । **शक्यस्ये**ति वाक्यार्थस्य । वाक्ये शक्त्यार्थस्य शक्यत्वात् । तथापदस्यार्थमाहुः **जाठरे**ति ।

---

१. अन्वाहार्यपचन ।

तर्हि कार्यवाक्यमेवास्तु स्मृत्यनुरोधादिति चेत् तत्राह। असंभवात्। न हि तस्य द्युमूर्धत्वादयो धर्माः संभवन्ति । उपचारादुपासनार्थं परिकल्पनं भविष्यतीति चेन्न । पुरुषमपि चैनमधीयते, वाजसनेयिनः । स एषोऽग्नि-वैश्वानरो यत्पुरुषः । स यो हैतमेवाग्निं वैश्वानरं पुरुषविधं पुरुषेन्तःप्रतिष्ठितं वेदेति । तस्मात् पुरुषत्वं, पाठान्तरे पुरुषविधत्वं वा जाठरस्य न संभवतीति भगवानेव वैश्वानरः। भगवत्परत्वे संभवत्यन्यकल्पना न युक्तेति ॥ २६ ॥

अत एव न देवता भूतं च ॥ २७ ॥

वैश्वानरो न ऊत्येत्यादिमन्त्रैर्देवताया महाभूताग्नेर्वा वाक्यार्थतेति कस्यचिद् बुद्धिः स्यात्। तदप्यतिदेशेनैव परिहरति। मुख्योपपत्तिर्भगवत्परत्वे संभवति नान्यकल्पना युक्तेति ॥ २७ ॥

भाष्यप्रकाशः ।

होमीयत्वमाहुतेर्देवताप्राप्तिश्च या आदिपदेन संगृहीता, तत्राप्येतदेव प्रयोजकमिति हेतुरपि भवतीति तथात्वबोधनाय न चकारः स्फुटमन्यत्। परिहारांशं व्याकुर्वते न तथेत्यादि। पूर्वोक्तहेतुना वाक्यस्य जाठरविभूतिपरत्वं न वक्तुं शक्यते । कुतः । तथादृष्ट्युपदेशात् । भगवतः सर्वभोक्तृत्वं वक्तुं जाठरदृष्टिरत्रोपदिश्यते तस्मात्। नचोत्कृष्टे हीनदृष्टेर्दोषावहत्वस्य पूर्वं साधित-त्वादत्र तादृशदृष्ट्युपदेशस्यायुक्तत्वं शङ्क्यम् । भगवतः सर्वकारणत्वेन भगवन्निष्ठानां तेषां तेषां विरुद्धधर्माणां तत्तद्भावापत्तिः। यथा कारणत्वस्याष्टाविंशतितत्त्वादिरूपता, तथा पाचकत्वस्य जाठराग्निरूपतेति स्वयं त्वविक्रिय एकरस एवेति भगवत ऐश्वर्यमेव वर्णितमतो न दोष इत्यर्थः । तर्हीत्यादि। ननु धर्माणां तत्तद्भावापत्तिः कार्यार्थेति कार्यं मुख्यम्। तर्हीदं कार्यवाक्यमेवास्तु । गीतास्मृत्यनुरोधात्। न तु ब्रह्मवाक्यमिति चेत् तत्राहेत्यर्थः । शेषमुत्तानम्। पाठान्तर इति सौत्रे पुरुषविधमिति पाठान्तरे। ननु पुरुषत्वादिकमपि काल्पनिकं पूर्ववदस्त्विति चेत् तत्राहुः भगवदित्यादि । सर्वे वेदा इत्यादिश्रुतिभिर्मुख्यसंभवे गौणस्यान्याय्यत्वाच्च तथेत्यर्थः॥ २६ ॥

रश्मिः ।

जाठरत्वेन जाठरज्ञानं जाठरत्वेन वैश्वानरस्य ज्ञानं वोक्तवाक्य उपदिश्यते। वह्नेः सर्वभुजो यथेति वाक्यात् उक्तवाक्याच्च जक्षन्नग्निर्भवतीति । तेजःपातृ अष्टौ मासाः । आनन्दभुगिति श्रुतेरानन्दभुग् यद्यपि तथापि क्षुच तृषा च वह्निस्तनू ह्यानन्देन भोजनकारणेऽन्वयव्यतिरेकाभ्यां तस्मादग्निः सर्वभोक्ता । एतज्ज्ञानफलं भगवतः सर्वभोक्तृत्वस्य ज्ञानम् । पूर्वमिति । कारणत्वस्येति भगवन्निष्ठस्य । पाचकत्वस्येति तन्निष्ठस्यैव । एतेन ब्रह्मवादे कृष्णायाक्लिष्टकारिण इति गोपालता-पिनीयं समर्थितम्। कार्यार्थेति यथा दुग्धस्य दधिभावापत्तिर्दधिरूपकार्यनिमित्तम्। इति हेतोः कार्यं दधि मुख्यं मुख्यतया प्रतीतिविषयं तर्हि । शेषमिति। तस्येति भाष्ये जाठरस्येत्यर्थः। सर्वे इति 'सर्वे वेदा यत्पदमामनन्ति' 'वेदार्थो रामकृष्णयोः' 'एतावान् सर्ववेदार्थः' इति भगवद्वाक्यं चादिपदेन। तथेति भगवान् वैश्वानरत्वेन प्रकारेण । वेदेति अत्रासंभवादित्यन्वेति अत इत्युत्तर-सूत्रादनुकृष्यते तस्य पुरुषत्वस्यातोऽसंभवादित्यर्थः ॥ २६ ॥

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

अधुना परिमाणविशेषो विचार्यते । प्रादेशमात्रत्वं भगवतः स्वाभाविकं

भाष्यप्रकाशः ।

अत एव न देवता भूतं च ॥ २७ ॥ इत्यादीति आदिपदेन, वैश्वानरं केतुमह्नामित्यादीनां संग्रहः ॥ २७ ॥

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥ एतदादिषु पञ्चसूत्रेषु, मन्यत इत्यस्याध्याहारो

रश्मिः ।

अत एव न देवता भूतं च ॥ २७ ॥ भाष्ये । वैश्वानर इति इयं श्रुतिः संहिताप्रथमाष्टकपञ्चमप्रश्नस्था । 'वैश्वानरो न ऊत्या प्रयातु परावतः अग्निरुक्थेन वाहसा वैश्वानरममृतस्य ज्योतिषस्पतिम् । अजस्रं धर्ममीमहे' इति मन्त्रैरत्र देवताव्यतिरिक्ताग्नेर्न ऊत्या दुर्वासनया 'ऊतयः कर्मवासनाः' इति वाक्यात्। ऊत्या सेवनेन वा स्यूतिः सेवनसंपत्त्योः। 'ऊतिः स्यूतौ च रक्षणे' इति विश्वात् । प्रयातु प्रापयतु नोस्मान् परावतः पराभववतः धर्षणवत दुर्वासनया । परा प्रातिलोम्यं मोक्ष ऐक्यं वा तद्वतो नोस्मान् सेवनेन प्रापयतु एवं प्रकारः संभवति किंच महाभूताग्निव्यतिरिक्तस्य घर्ममातपमीमहे इमः इण् गतौ । एवं प्रकारः संभवति । अतस्तयोर्वाक्यार्थतेति । **अतीति** ।

'अन्यत्रैव प्रतीतायाः कृत्स्नाया धर्मसन्ततेः ।
अन्यत्र कार्यतः प्राप्तावतिदेशः स कथ्यते' ॥

इति पूर्वमीमांसाकारिकयातिदेशउक्तस्तेन तथा चोक्तशब्दः । आदिपदेन प्रापयत्वित्युक्तम् । प्रापणं घर्ममीमहे इत्युक्ता घर्मप्राप्तिः । अन्तः प्रतिष्ठानं, पृथिव्यां पृष्टो विश्वा ओषधीराविवेश वैश्वानरः सहसा इत्योषध्यन्तः प्रतिष्ठानं च । 'शब्दादिभ्योन्तः प्रतिष्ठानान्नेति चेन्न' देवताभूतम् । कुतः । अत एव तथा दृष्ट्युपदेशात् देवतात्वेन वैश्वानरस्य दृष्ट्युपदेशात् । अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशादिति । असंभवात् भेदं दत्त्वा सेवनेनैक्यात्स्वभजनानन्दप्रापणस्यासंभवात् । पुरुषमपि चैनमधीयते । वैश्वानरब्रह्मणे इति श्रुत्युक्तं ब्रह्मत्वमप्यधीयत इत्यर्थो यद्यपि न वक्तुं शक्यः परं त्वतः पूर्वसूत्रोक्तहेतुभ्यः एव न तु संहितोक्तेभ्यः इत्येवमेवकारव्यावर्त्य इति सूत्रार्थः । एवं जाठरे प्रतीतायाः धर्मस्य ब्रह्मज्ञानविशेषस्य 'अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्' योगेनैव 'एकं सांख्यं च योगं च यः पश्यति स पश्यति' इति गीतातः। अन्यत्र देवताभूते कार्यतो वैश्वानरस्य ब्रह्मत्वप्रतिपादनरूपकार्यतः प्राप्तिरस्तीत्यतिदेशलक्षणसमन्वयः । ननु शास्त्रान्तरीया देवता भूतं चेत्यापत्तिः शास्त्रान्तरे कुतः इत्याकाङ्क्षायामाहुः **मुख्येति** । यथाहुः

'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयप्रबोधः प्रयाति वेदान्तनिषेवणेन' ॥

इति । तथा च शास्त्रान्तरेपि ब्रह्मविषये वेदान्तभूतप्रकृतसूत्रनिषेवणं युक्तम् । तदुक्तं बौधायनेन । संहतमेतत् षोडशलक्षणमिति लक्षणान्यध्यायाः द्वादशपूर्वतन्त्रीयाश्चत्वार उत्तरतन्त्रस्थाः इत्येवं षोडश । संहतं मिलितम् । अत उक्तं नान्यकल्पना युक्तेति तथा च श्रुतिः संहिताप्रथमाष्टके वैश्वानरब्रह्मण इति । प्रकृतेऽन्यानपि मन्त्रानाहुः इत्यादीति । श्रुत्यर्थः पूर्वमुक्तः । **आदिपदेन** तत्रोक्तश्रुतिसंग्रहः । तस्या अप्यर्थ उक्त एव ॥ २७ ॥

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥ शब्दस्येति उच्चारणेन शब्दबलेन व्यास-

कृत्रिमं वेति । अस्मिन् सिद्ध एव पूर्वोक्तं सिद्धं भवेदिति विचार्यते तत्रास्मि-न्नर्थे चत्वार ऋषयो वेदार्थचिन्तकाः प्रकारभेदेन । तत्र केवलं शब्दबलविचारका आचार्याः । शब्दार्थयोर्जैमिनिः । आश्मरथ्यस्तु शब्दोपसर्जनेनार्थविचारकः । केवलार्थविचारको बादरिरिति । आचार्यः पुनर्विचाराविचारयोर्दोषं पश्यन् विचारमपि वदँस्तेषामल्पबुद्धिख्यापनाय नामान्याह ।

तत्र जैमिनिरुभयबलविचारकः प्रथमं निर्दिश्यते । व्यापकस्य प्रादेशमात्रत्वे साक्षादपि कल्पनाव्यतिरेकेणापि स्वरूपविचारेणैवाविरोधं मन्यते जैमिनिः । आकाशवद् व्यापकं सर्वतःपाणिपादान्तं ब्रह्म । अत एव साकारत्वमनन्त-

भाष्यप्रकाशः ।

ज्ञेयः । ननु चतुर्भिः सूत्रैः सर्वस्मिन्नधिकरणार्थे सिद्धे एतेषां सूत्राणां किं प्रयोजनमित्या-काङ्क्षायामाहुः अधुनेत्यादि । पूर्वोक्तमिति असाधारणभगवद्धर्मरूपं विरुद्धधर्माश्रयत्वम् । शब्दबलेत्यादि शब्दस्य बलमुच्चारणक्रमादितात्पर्यम् । तद्विचारेणार्थविचारका व्यासपादा इत्यर्थः । ननु तथापि ऋषिनामकथनस्य किं प्रयोजनमत आहुः आचार्यः पुनरित्यादि । बृहदारण्यके प्रथमे गार्गीब्राह्मणे, मा ते मूर्धा व्यपतदनतिप्रश्न्या वै देवता अतिपृच्छसि गार्गि मातिप्राक्षीरित्यतिप्रश्ने दोषश्रावणेन, कठवल्ल्यां, नैषा तर्केण मतिरापनेयेति निषेधेन च काल्पनिकातिविचारे दोषः पर्यवसितः । तैत्तिरीये च, तत्त्वेव भयं विदुषोऽमन्वानस्येत्यविचारेऽपि दोषः श्रावितः । अत आचार्यस्तमिमं विचाराविचारयोर्दोषं पश्यन्, तदन्वेष्टव्यं, तद्विजिज्ञा-सितव्यं, सोऽन्वेष्टव्यः, स विजिज्ञासितव्य इत्यादिश्रुत्युक्तत्वाच्छब्दबलेनैव कर्तव्यं विचारमपि स्वशास्त्रे वदँस्तथा आह । तथाच शब्दबलविचारस्य मुख्यत्वज्ञापनमेव प्रयोजनमित्यर्थः । जैमिनेः प्राथम्ये हेतुः उभयबलविचारक इति । सूत्रं व्याकुर्वन्ति व्यापकस्येत्यादि । कल्पनाव्यतिरेकेण व्यापकत्वप्रादेशमात्रत्वयोः कथमविरोध इत्याकाङ्क्षायां तं प्रकारमुपपादयन्ति आकाशेत्यादि । यद्यपि श्रुतौ प्रादेशमात्रमभिविमानमिति क्रमेणोक्तं, तथापि शाब्दक्रमादार्थक्रमो बलीयानिति पञ्चमस्य, 'श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्' 'अर्थाच्च' इति प्रथमसूत्रे विचारित-मग्निहोत्रं जुहोति यवागूं पचतीत्यत्र सिद्धम् । अर्थक्रमस्य बलिष्ठत्वानादरे अदृष्टकल्पनाप्रसङ्गात् ।

रश्मिः ।

पादमते अग्निहोत्रं जुहोति यवागूं पचतीत्यत्र अग्निहोत्रानन्तरं यवागूपाक इति प्राप्ते आहुः क्रमादीति । आर्थक्रमादीत्यर्थः । उच्चारणक्रमादीनां तात्पर्यं तत्प्रतीतीच्छया उच्चरितत्वं 'तं त्वौपनिषदं पुरुषं पृच्छामि' इतिश्रुतेः । भाष्ये । शब्दार्थयोरिति औत्पत्तिकस्तु शब्देनार्थस्य संबन्ध इति सूत्रयन् जैमिनिः वेदतदर्थयोर्बलं समानं मन्वानः । आश्मेति अत्र शब्दस्य वेदत्वेनोपसर्जनमात्रं 'अर्थं वागनुधा-वति' अर्थमनुसंधाय वाक्प्रवृत्तेः यन्मनसा ध्यायति तद्वाचा वदतीति श्रुतेः । केवलेति तथाच बृह-दारण्यके भूमिरन्तरिक्षमिति ब्राह्मणे तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमद्राक्षमहमश्रौषमिति य एव ब्रूयादहमद्राक्षमिति तस्मा एव श्रद्दध्याम इति श्रुतेः । प्रकृते । तथेति नामपूर्वकप्रकारेण । जैमिनिः ऋषिः आश्मरथ्यः ऋषिर्बादरिः ऋषिरिति । सिद्धमिति वेदलक्षणमानुपूर्व्यं द्वादशाहीये अध्व-र्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो होतारमित्यत्र गृहपत्यादिदीक्षाणामनुक्रमः

मूर्तित्वं ब्रह्मणः स्वेच्छया परेच्छया स्वभावतश्च विभक्तमिव। त्रयोऽपि नियतपरिमाणाः। अनियतपरिमाणास्तु आकाशवत् परिच्छेदनिरूप्याः। तद्वृद्धिह्रासाभ्यां तथा भवन्ति। स्मृतावप्युक्तम्।

भाष्यप्रकाशः।

तदत्राप्यादरणीयम्। अन्यथाऽत्र विरुद्धधर्माधारत्वकल्पना प्रसज्येत। संभवति चार्थक्रमादरेण परिमाणाविरोधे तं प्रकारमतिहाय विरुद्धधर्माश्रयत्वकल्पनमयुक्तम्। तस्मिन् प्रकारे कथं संभव इति चेदित्थम्। 'आकाशवत् सर्वगतश्च नित्यः' इति, 'सर्वतःपाणिपादं तत्' इति श्रुतिभ्यामेवंविधं ब्रह्मस्वरूपं सिद्धमतः स्वरूपबलादेव ब्रह्मणः साकारत्वमनन्तमूर्तित्वं च। 'यदेकमव्यक्तमनन्तरूपम्' इति, 'पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः' इति श्रुतिस्मृतिभ्यां सिद्धम्। तच्च क्वचिद्, बहु स्यामिति श्रुतेः स्वेच्छया, क्वचिच्च, 'यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय' इति वाक्यात् परेच्छया, क्वचिच्च पूर्वोक्तरीत्या स्वभावतश्च तं तं प्रति तत्तत्प्रकारकोपासनेन प्रकटीभवति। प्रणयस इत्यस्य तत्तद्गोचरत्वं प्रापयस इत्यर्थात्। नच रूपभेदे ब्रह्मभेदः शङ्क्यः। यदेकमिति श्रुतेः 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति च गीतावाक्यात्। अतः पुरुषं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितमिति त्रयोऽपि प्रकारा नियतपरिमाणाः। यदि चाकाशवदिति श्रुत्या विचार्यास्तदा ते अनियतपरिमाणा आकाशवत् परिच्छेदनिरूप्याः परिच्छेदकवृद्धिह्रासाभ्यां नानापरिमाणा भवन्ति। ननु श्रुतौ पुरुषं पुरुषविधमित्यादिकं वैश्वानरविशेषणं, न तु प्रकाराणाम्। परिमाणं च द्रव्यधर्मो, न तु धर्मधर्मोऽतो नेदं युक्तमत आहुः स्मृतावित्यादि। उक्तमिति पुरुषत्वमुक्तम्। तथाच वैश्वानरस्यैव त्रिधा वर्तमानत्वान्नोक्तानुपपत्तिरिति सर्वमुपपन्नमित्यर्थः। तृतीयस्यानन्तरूपत्वं नियतपरिमाणत्वं च व्याकुर्वन्ति भूतेष्वित्यादि। पञ्चधेति ध्यानार्थं प्रादेशमात्र आश्रयार्थमङ्गुष्ठमात्रः स्वामित्वार्थमक्षिस्थितः फलार्थं सर्वदेहस्थित आनन्दमयो वैश्वानरः शिरसि प्रतिष्ठितः सर्वार्थ इति निबन्धोक्तपञ्चकार्यार्थे

रश्मिः।

पाठादवगम्यते कुतस्तत्प्रमाणत्वात् श्रुतेर्वेदस्य प्रमाणत्वादित्येवं प्रथमाधिकरणतृतीयवर्णक उक्त्वा द्वितीयाधिकरणे 'अर्थाच्च' इति सूत्रांशेनार्थक्रमात् सिद्धम्। अदृष्टेति यवागूपाक इत्यर्थः। तदिति पूर्वतन्त्रसिद्धम्। पूर्वोक्तेति बहु स्यामिति श्रुत्युक्तप्रकारेण स्वभावः परिणामहेतुस्तत एव। प्रकटीति यथा 'अनिच्छतोपि गतिमण्वीं प्रयुङ्क्ते' इति वाक्यान्मोक्षरूपेण प्रकटीभवति। त्रयोपीत्यग्रे वक्ष्यमाणाः। महतः स्रष्टृ अण्डसंस्थितं सर्वव्यापि। अनियतेति भाष्यं विवरीतुमाहुः यदि चेति। परिच्छेदो हि परिच्छेदकधर्मः तेन निरूप्याः। परिच्छेदको हि घटादिः तद्वृद्धिह्रासाभ्यां प्रकाराः। प्रकाराणामिति वैश्वानरप्रकाराणाम्। द्रव्यं वैश्वानरः धर्मः प्रकाशः। नोक्तेति। प्रकाराणां द्रव्यत्वादिति भावः। पुरुषस्य परममहत्परिमाणं नियतं पुरुषविधस्याण्डसंस्थितत्वेन जीवत्वादणुपरिमाणं नियतम्। जीवचैतन्यस्य विसर्पिगुणत्वात् पुरुषविधम्। एकरूपत्वं चोभयोस्तृतीयस्य तदुभयमाहुरित्याहुः तृतीयस्येति। व्येति। स्मेति शेषः भूतेर्थे। निबन्धेति। पञ्चात्मकः स भगवान् द्विषडात्मकोभूदित्यस्य टीकोक्तपञ्चकार्यार्थमित्यर्थः। अक्षिस्थितादीनां स्थानमक्ष्यादिरूपं स्वयमुक्तम्।

'विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ।
प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ॥
तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते' ।

इति । भूतेषु पञ्चधा । उदरेऽङ्गुष्ठमात्रः । हृदये प्रादेशो मूर्धनि च मनसीन्द्रियेषु चाणुः । चित्ते व्यापकः । एकस्याप्युपक्रमे सर्वेषु तथात्ववादो विभूतिरभेदाय । तस्माद् वैश्वानरस्य पुरुषत्वात् सच्चिदानन्दरूपेणैव प्रादेशमात्रत्वं न विरुध्यते । अतः साकारब्रह्मवाद एव जैमिनेः सिद्धान्तः ॥ २८ ॥

भाष्यप्रकाशः ।

पञ्चभिः प्रकारैः । उदरेऽङ्गुष्ठमात्र इति 'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति' इति श्रुतेस्तथा । स च, 'अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति' इति तैत्तिरीयश्रुतेरुदरे शरीरस्थित्यर्थम् । प्रादेश इति प्रादेशमात्रः । स हृदये व्याख्यातः । मूर्धन्यग्रे वक्ष्यते । तत्र हृदि ध्यानार्थम् । शिरसि सर्वार्थम् । चक्षुषश्चक्षुरित्यादिश्रुतेस्तत्तन्नियमनार्थं तेषु तिष्ठन् मनःप्रभृतीनामणुत्वस्य वक्ष्यमाणत्वात् तदनुरोधेनाणुः । 'तत् सर्वव्यापकं चित्तमाकृष्य व्योम्नि धारयेत्' इति वाक्ये चित्तस्य व्यापकत्वोक्तेस्तत्र तिष्ठँस्तद्वृद्ध्यर्थं व्यापकः । ननु प्रादेशमात्रस्यात्र प्रकृतत्वात् तद्विचार एव कार्योऽन्यविचारस्य किं प्रयोजनमित्यत आहुः एकस्येत्यादि । एकस्य प्रादेशमात्रस्याप्युपक्रमे सर्वभूतस्थेषु नानारूपेषु भगवत्त्ववादो विभूतिरूपस्य भगवदभेदं बोधयितुम् । तथाच वैश्वानरस्वरूपे विचारितया दिशा सर्वेषु विरुद्धधर्माधारत्वं बोध्यमिति व्यासाशयप्रकटनायायं विचार इत्यर्थः । तेन सिद्धमाहुः तस्मादित्यादि । पुरुषत्वादिति आत्मत्वात् । 'पुरुषौ चात्ममानवौ' इति कोशात् । तथाचाकाशवदित्यादिश्रुतिद्वयोक्तरीत्या स्वरूपविचारेणैव परिमाणद्वयाविरोधो जैमिनिमत इत्यर्थः । ननु जैमिनिमते साकारवाद इत्यत्र किं मानमित्या-

रश्मिः ।

द्वयोः स्थाने विशेषांश्चाहुः उदरेति । निष्ट्या इति निष्टिर्ग्रीवाबन्ध इति सायणीये । तस्मा अधोवितस्तिपरिमाणान्ते नाभिसमीपे तदुपरि तिष्ठतीति । नाभ्यामिति सामीप्ये सप्तमी । उदर इति इदं पदं हृदङ्गुष्ठयोरुपलक्षकम् 'अङ्गुष्ठमात्रः पुरुषः सदा जनानां हृदये संनिविष्टः' इति काठकश्रुतेः 'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्' इति तैत्तिरीयश्रुतेश्च । आश्रयार्थमङ्गुष्ठमात्रो व्याख्यातः । शरीरेति अयं फलार्थमित्यस्यार्थः । शरीरस्थित्यर्थं सर्वदेहस्थितः आनन्दमय इत्यर्थः । व्याख्यात इति स्मर्यमाणमिति सूत्रे व्याख्यातः । अग्र इति 'आमनन्ति चैनमस्मिन्' इति सूत्रे भाष्यव्याख्यायाम् । तत्रेति हृन्मूर्ध्नोः । हृदीति केचित्स्वदेहान्तरिति स्मृतेः । सर्वार्थमिति 'स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु अन्नमत्ति' इति विषयवाक्यश्रुतेः सर्वार्थम् । मनसीत्यादि भाष्यं विवरामासुः चक्षुष इत्यादि । वक्ष्यमाणेति द्वितीयाध्यायेऽणवश्चेति सूत्रे । इति वाक्य इति एकादशस्कन्धचतुर्दशाध्यायस्थे किं च छान्दोग्य उपकोसलविद्यायां 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्युपक्रम्य वामनी भामनीत्युक्तं तत्र कर्मफलनियामकत्वात् स्वामित्वम् । सर्वेष्विति विभूतिरूपेषु । श्रुतिद्वयेति आदिना 'अणोरणीयान् महतो महीयान्' 'प्रादेशमात्रमभिविमानम्' इति श्रुतिद्वयम् । पदवाक्यानां शक्यार्था निर्णीतास्तत्र जैमिनिमते

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

निराकारमेव ब्रह्म मायाजवनिकाच्छन्नं तदपगमेन पुरुषाकारेणाधिदैविकदेवताधिष्ठितेनाभिव्यक्तः पुरुषोऽन्तर्यामी । अत एव पुरुषविध इति । अभिव्यक्तेर्हेतोः साकारत्वमपि मायापगमनकृतत्वान्न स्वाभाविकत्वम् । तथापि निर्दिश्यमानं सच्चिदानन्दरूपमेवाश्मरथ्यो मन्यते ॥ २९ ॥

भाष्यप्रकाशः ।

काङ्क्षायां, जैमिनीयचतुर्लक्षणीसमाप्तौ, 'स विष्णुराह हि', 'तद् ब्रह्मेत्याचक्षते तद् ब्रह्मेत्याचक्षते' इति सूत्रद्वयात् तदनुसारेणाहुः अत इत्यादि । अत इति एवमुभयबलविचारकत्वात् । इदं च सूत्रद्वयं शतदूषणीकृता व्यंकटाचार्याभिधेन स्वग्रन्थ उपन्यस्तम् ॥ २८ ॥

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥ एतदादिषु त्रिषु सूत्रेष्वविरोधमित्यस्यानुषङ्गोऽधिको ज्ञेयः । आधिदैविकदेवताधिष्ठितेनेति आधिदैविकी देवेषु प्रणवमात्रावाच्येषु वर्तमाना या देवता ब्रह्मविष्ण्वादिरूपा तत्तद्गुणगुणसमष्ट्यभिमानिनी तयाधिष्ठितेनेति शरीरतयाङ्गीकृतेन । अत एवेति अधिष्ठानादेव । सूत्रोक्तस्य हेतोः साकारपक्षेऽप्युपपत्तेस्तमपि पक्षमाहुः अभिव्यक्तेरित्यादि । न स्वाभाविकत्वमिति किंत्वर्भकौकःसूत्रोक्तव्योमदृष्टान्तेनोपरववदागन्तुकत्वम् ॥ २९ ॥

रश्मिः ।

साकारब्रह्मवादः सिद्धः तमुपष्टभ्नन्ति स्म **जैमिनीये**ति । जैमिनिप्रणीतमध्यायचतुष्टयं चतुर्लक्षणी सैव संकर्षणकाण्डत्वेन प्रसिद्धा देवताकाण्डत्वेन च तत्रोपासनाप्रतिपादनात् कर्ममीमांसान्तर्गतमेव । उपासनाया अपि मानसकर्मत्वात् । **स** इति प्रसिद्धः तत्पूर्वप्रतिपादितं साकारमिति प्रतिभाति ॥ २८ ॥

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥ **अधिक** इति । मन्यत इत्यध्याहारादधिकः । अभिव्यक्तेः प्रादेशमात्रत्वस्याविरोधं मन्यते आश्मरथ्यः इति मतेऽभिव्यक्तिनिर्वाहकनिराकारत्वं मायाङ्गीकारेण यदेकमव्यक्तमिति श्रुत्युक्तानन्तरूपाणां निर्वाहात्तदपगमेन यः पुरुषाकारस्तत्रेच्छारूपकारणानङ्गीकारात्तत्र कारणत्वार्थं विशेषणमित्याशयेन व्याचख्युः **आधी**ति । ब्रह्मविद्योपनिषदि देवेषु अकारशरीरभूतेषु ऋग्वेदगार्हपत्यपृथिवीब्रह्मसु ब्रह्म आधिदैविकी देवता तदुक्तम् ।

'ऋग्वेदो गार्हपत्यं च पृथिवी ब्रह्म एव च ।
अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः' ॥ इति ।

उकारशरीरभूतेषु यजुर्वेदान्तरिक्षदक्षिणाग्निविष्णुष्वाधिदैविकी देवता विष्णुः तदुक्तं तत्रैव ।

'यजुर्वेदोन्तरिक्षं च दक्षिणाग्निस्तथैव च ।
विष्णुश्च भगवान् देव उकारः परिकीर्तितः' ॥

सामवेददिवाआहवनीयेश्वरेषु मकारशरीरेषु ईश्वर आधिदैविकी देवता ।

'सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च ।
ईश्वरः परमो देवो मकारः परिकीर्तितः' ॥ इति तत्रैव ।

अर्धमात्रा सूर्यसंकाशा वरदः । अत्र वरद आधिदैविकी देवता । एता देवता प्रणवमात्रा

अनुस्मृतेर्बादरिः ॥ ३० ॥

बादरिः केवलयौक्तिकश्चिन्तनवशात् प्रादुर्भूतरूपानुवादिका श्रुतिरिति । 'यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाय' इति वाक्यानुरोधात् । अन्यथा बहुकल्पनायां बुद्धिसौकर्याभावात् तार्किकादिमतेष्वपि तथात्वाद् युक्त्यनुरोधेन ब्रह्मवादोऽप्यन्यथा नेय इति हि मन्यते । अस्मिन् पक्षे त्वतात्त्विकत्वम् । अथवा मायास्थाने अनुस्मृतिः अभिव्यक्तिस्तु तुल्या । एवं सति बादरिमतेऽपि तात्त्विकमेव रूपम् ॥ ३० ॥

भाष्यप्रकाशः ।

अनुस्मृतेर्बादरिः ॥ ३० ॥ अत्रापि भाष्यमुत्तानार्थम् ॥ ३० ॥

रश्मिः ।

अकारोकारमकारवरदरूपास्तद्वाच्याः । **ब्रह्मविष्णिवति** ईश्वरवरदावादिपदार्थौ तत्तद्गुणाः सत्त्वरजस्तमोरूपास्तेषां समष्टयस्तदभिमानिन्यः तासु तया प्रसिद्धया एकया । न चैवमाश्मरथ्यस्य शैवत्वं तिस्रो मात्रार्धमात्रा च अक्षरस्य शिवस्य चेति श्रुतेरिति वाच्यम् । शेतेऽनेन तैजसेनेति शिवः शीङ् स्वप्ने सर्वनिघृष्वेतिवत् ह्रस्वश्च निपातितः । ये धातुशब्दा इति पत्रावलम्बनात् । वैयाकरणास्तु पूर्ववच्छिवमिति साधयित्वा शिवं भद्रमस्यास्तीति शिवः अर्शआद्यच् शिवयतीति वा तत्करोतीति ण्यन्तात्पचाद्यच् । तल्लोके न तु वेदान्ते इति ।

'लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम् ।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत्' ॥

इति पत्रावलम्बनात् । लोके वेदे च गोरवङ् वा स्यादित्यत्र वेदलोकयोः साधनिकानां वाक्यध्वननाद्गौरवाच्च । **भाष्ये** । **अन्तर्यामी**ति 'य आत्मनि तिष्ठन् आत्मानमन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति' इति श्रुतेरन्तर्यामी । **अपी**ति प्रादेशमात्रसमुच्चायकोपि प्रादेशमात्रत्वाविरोधमपि मन्यत इत्यर्थः **प्रकृते** । **उपरववदि**ति चत्वार उपरवा हविर्धानमण्डपे खाता बिलविशेषाः ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ ३० ॥ **उत्ताने**ति । बादरिस्तु मायापगमेन न प्रादेशमात्रत्वाविरोधं मन्यते किं तु प्रादेशमात्रत्वाविरोधमनुचिन्तनेन मन्यते इत्याहुः **बादरि**रिति । यौक्तिकत्वेपि केवलत्वं स्मरणे क्रियात्वस्य वैयाकरणैः क्रियावाचिनो भ्वादयो धातुसंज्ञा स्युरिति वदद्भिरङ्गीकृतस्यानङ्गीकारात् । यौक्तिकत्वं तावत् । संस्कारजन्यं ज्ञानं स्मृतिः । संस्कारस्तु ।

'भावनाख्यश्च संस्कारो जीववृत्तिरतीन्द्रियः ।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ।
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते' ॥

इति भाषापरिच्छेदः । अत्र तस्य संस्कारस्योपेक्षाज्ञानादनुत्पत्तेरुपेक्षाज्ञानात्मक इत्युक्तं लक्षणया । उपेक्षा न विद्यत आत्मनि यस्येति वा तस्याः स्मृतेरुरीकारात् भाष्यप्रामाण्याद्वा । **चिन्तने**ति ध्यानवशात् । **इति वाक्ये**ति एवंविधवाक्यानुरोधात् । तथा च साकारस्य व्यापकत्वं स्यादित्याकाङ्क्षायामाहुः **अन्यथे**ति । **बह्वि**ति साकारस्य व्यापकत्वे बहूनां रूपाणां वास्तविकत्वकल्पने किं

संपत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥

जैमिनिमते साकारवादे नियतसाकारं मन्यमानस्तदेकदेशी नियतमेव प्रादेशमात्रं भगवद्रूपं मन्यते । तन्निराकरणाय सर्वत्र प्रादेशत्वं संपत्तिकृतमित्याह ।

भाष्यप्रकाशः।

संपत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥ ननु पूर्वं जैमिनेर्मतं प्रदर्शितमधुना प्रकारान्तरेण किमिति प्रदर्श्यत इत्याकाङ्क्षायामाहुः **जैमिनिमत** इत्यादि। परममहत्परिमाणप्रादेशमात्रयोः साक्षादविरोधबोधके जैमिनिमते यः साकारवादस्तस्मिन् य एकदेशी ईदृशं भगवत्स्वरूपं मन्यते। प्रादेशमात्रत्वस्य प्रदेशविशेषकृतत्वे तावन्मात्रस्य पुरुषाकारत्वाभावेन

रश्मिः।

ब्रह्मेति संशयापत्त्या बुद्धिसौकर्याभावादित्यर्थः । ननु तादृशं बहुरूपमेकरूपमेव ब्रह्मेति कथं बुद्धिसौकर्याभाव इति चेत्तत्राहुः **तार्किकेति** । **तथात्वादिति** यथाहुः रामकृष्णादिनामकं स्वाविर्भावतिरोभावशालीति। ज्ञानेच्छाप्रयत्नाश्रयत्वेन यथाकथंचिदभिनवमते विश्वकायत्वेन साकारत्वेपि सकलसंमतत्वाभावात्। द्युमूर्धत्वादिविशिष्टस्य ब्रह्मत्वाङ्गीकारेऽभिनवमतप्रवेश इति भावः। **युक्तीति** 'युक्तिर्न्याये च योजने' इति विश्वान्न्यायशास्त्रानुरोधेन योजनमारोपापवादेन श्रुतीनामिति तदनुरोधेन वा ब्रह्मवाद इति। साकारं व्यापकं ब्रह्मेति वादो ब्रह्मवादः सोपि निराकारस्य चिन्तनवशाद्रूपमाविर्भूतं नतु तात्त्विकं रूपमित्येवमन्यथानेय इति हि युक्तार्थं मन्यत इत्यर्थः। तथा च श्रुतिवाक्ये स्तः 'यस्तर्केणानुसंधत्ते सधर्मं वेद नेतरः' इति श्वेतकेतूपाख्याने च न्यग्रोधफलमाहरेत्यारभ्य एतमणिमानं न निभालयसे एतस्यैव सोम्य एषोणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सौम्येति स य एषोणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्यादि। **अतात्त्विकत्वमिति**। प्रादेशमात्ररूपस्य। ननु बुद्धिसौकर्यप्रकारस्योक्तत्वात् तार्किकैरभिनवातिरिक्तैः वास्तवनित्यानन्दात्मकशरीरानङ्गीकारेणान्यमतप्रवेशाभावात् सूत्रे च ब्रह्मवादान्यथोपनायकपदाभावाच्च कथं ब्रह्मवादान्यथाकरणे बादरेराशय इति चेत्तत्राहुः **अथ वेति**। अथ वा ननु तात्त्विकरूपवाद्यपि प्रायपाठपठितो बादरिः कथमतात्त्विकरूपवादीत्यत आहुर**थ वेति**। **मायेति** निराकारं ब्रह्मानुस्मृतिजवनिकाच्छन्नम्। तथाहि ज्ञानकाशयेत्येवं वाक्यादनेकरूपाणां चिन्तनवशादाविर्भूतानामाधिदैविकदेवताधिष्ठितत्वेन तात्त्विकानां संबन्धिनी सदृशी चान्तरालिकसृष्टिपदवाच्यानुस्मृतिः प्रादेशमात्रमनु लक्षीकृत्य ततः पश्चाद्वाऽत एव प्रादेशमात्ररूपा तद्विषयिणी वा स्मृतिर्मायेति निराकारं रूपाणि च तयाच्छादितानि। तत्तद्रूपाणामभिव्यक्तिस्तु मायातत्कार्यापगमेनेति पूर्वमततुल्या। सिद्धमाहुः एवमिति पूर्वोक्तेन द्वितीयवर्णकेन बादरिमतपदसामानाधिकरण्यं यदा तदेत्यर्थः । भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वं सामानाधिकरण्यम् ॥ ३० ॥

संपत्तेरिति जैमिनिस्तथाहि दर्शयति ॥ ३१ ॥ ब्रह्म तु ग्रहा जैमिनिमते। न चानेकेश्वरापत्तिरिति शङ्क्यम् । आत्माधिकः कालादिभिर्नभोग इति ज्योतिषजैमिनिसूत्रात्। आत्मा भवति क इत्याह अधिक इति कलादिभिः सकलगुणैरधिक आढ्यो नभोगो ग्रहो यः सः इत्यर्थो नीलकण्ठसुबोधिन्यामस्ति। **पुरुषाकारेति** न च प्रदेशविशेषः पुरुषाकार प्रदेश इति तावन्मात्रस्य पुरुषाकारत्वमिति शङ्क्यम्। सर्वतःपाणिपादान्तत्वेन सर्वेषु प्रदेशेषु पाणयः पादा अन्ताश्च यस्येति

तत्र का संपत्तिः कथमिति स्वयमेव श्रुत्या प्रदर्शयति । वाजसनेयिब्राह्मणे द्युप्रभृतीन् पृथिवीपर्यन्तान् वैश्वानरस्यावयवान्, अध्यात्म्ये च मूर्धप्रभृतिषु चिबुकपर्यन्तेषु संपादयन् प्रादेशमात्रमिह वै देवाः सुविदिता अभिसंपन्नास्तथा तु व एतान् वक्ष्यामि यथा प्रादेशमात्रमेवाभिसंपादयिष्यामीति । स होवाच मूर्धानमुपदिशन्नेष वा अतिष्ठा वैश्वानर इत्यादिना संपत्तिनिमित्तमेव प्रादेशमात्रत्वं वैश्वानरस्याह । न तु प्रादेशमात्र एव वैश्वानर इति । तदेकदेशिपरिहारं जैमिनिर्मन्यते ॥ ३१ ॥

भाष्यप्रकाशः ।

पुरुषश्रुतिविरोधादिति तदाशयः । अभिविमानत्वं जगन्निर्मातृत्वाद्, द्युमूर्धत्वादिकं तूपासनार्थमित्यविरुद्धम् । तन्निराकरणाय सर्वत्र सर्वेषु वैश्वानरस्य प्रदेशेषु प्रादेशमात्रत्वं तथाह । तत्र संपत्तिकृतत्वे वाच्ये सा केत्याद्याकाङ्क्षायां संपत्तिं तत्कृतं प्रादेशमात्रत्वं च स्वयं जैमिनिः श्रुत्या प्रदर्शयतीत्यर्थः । संपादयन्निति कैकेय इति शेषः । श्रुतिं पठन्ति प्रादेशमात्रमित्यादि । इत्यादिनेति चक्षुषी उपदिशन्नुवाच, एष वै सुतेजा वैश्वानर इति । नासिके उपदिशन्नुवाच, एष वै पृथग्वर्त्मात्मा वैश्वानर इति । मुख्यमाकाशमुपदिशन्नुवाच, एष वै बहुलो वैश्वानर इति । मुख्या अप उपदिशन्नुवाच, एष वै रयिर्वैश्वानर इति । चिबुकमुपदिशन्नुवाच, एष वै प्रतिष्ठा वैश्वानर इतीत्येतावता संदर्भेण । अर्थस्तु, देवा द्युप्रभृतयः, सुविदिताः वैश्वानरमूर्धादिरूपेण भवद्भिर्मत्तः सुज्ञाताः । प्रादेशमात्रमिव ह वै अभिसंपन्नाः प्रादेशपरिमाणकमिव वैश्वानरं, ह वै प्रसिद्ध्या प्राप्तवन्तः । कथं प्राप्तवन्त इत्याकाङ्क्षायां प्रकारं प्रतिजानीते, तथा तु व इत्यारभ्य संपादयिष्यामीत्यन्तम् । प्रतिज्ञातं विवृणोति स होवाच मूर्धानमित्यादिना । एष द्युलोकात्मा देवः, अतिष्ठा वैश्वानरः । अतिष्ठागुणको वैश्वानरावयवः । वैश्वानरशब्दात् तस्येदमिति शैषिकोऽण् । एवमग्रेऽपि । तथाच मूर्धानमित्यादिनाऽध्यात्मं जीवावयवेषु तान् देवान् संपादयन् संपत्ति-

रश्मिः ।

प्रदेशविशेषस्य पुरुषाकारप्रदेशत्वाभावात् । माङ् माने इत्यत्र मान निर्माणमित्याशयेनाहुः अभिवीति यद्वाकाशस्य सर्वगतत्वेन तन्निर्मातुरप्यभितो विगतमानत्वं तथा शंकरभाष्यं अभिविमिमीते वा सर्वं जगत् कारणत्वादित्यभिविमान इति । तन्निरेति एतादृशैकदेशिमतनिराकरणाय प्रादेशत्वमित्यस्य विवरणं प्रादेशमात्रत्वमिति । तथाहेति संपत्तिकृत्त्वेनाह । तत्रेति भाष्यं विवृण्वन्ति स्म तत्रेति । आदिपदेन प्रकारप्रश्नः कथमिति भाष्योक्तः । भाष्ये । अध्यात्म्य इति आत्मानमधिकृत्य वर्तते-ऽवयवसमूहस्तस्मिन् छान्दसः प्रयोगः उपासकावयवेषु । केकय इति राजा । प्रकृते । मत्त इति केकयराज्ञः । व इति प्राचीनशालादीन् । एतान् देवान् वक्ष्यामीति वचेर्द्विकर्मकत्वम् । यूयं प्राचीनशालादयः एतान् देवान् वक्ष्यथ मां प्रति तान् प्राचीनशालादीन् अहं राजा वक्ष्याम्येतान् देवान् इति । स होवाचेति राजा प्राचीनशालादीनुवाच मूर्धानमिति राजा स्वमूर्धानम् । अतिष्ठेति भूरादिलोकानतीत्य तदुपरि तिष्ठतीत्यतिष्ठा । भावप्रधानस्तद्गुणकः । वैश्वानरपदस्यावयववाचकत्वमाहुः वैश्वानरेति वैश्वानरस्यायमवयवो वैश्वानरः । एवमग्र इति एवमेव स्वस्य चक्षुषी दर्शयन् सुतेजाः सूर्यो वैश्वानरस्य चक्षुरिति प्रसिद्धचक्षुषोर्वैश्वानरस्याधिदैवं यदादित्याख्यं चक्षुस्तद्दृष्टिः कर्तव्येति प्रोवाच । एवमग्रेपि स्वावयवेषु वैश्वानरावयवदृष्टिरिति द्रष्टव्या । पृथग्वर्त्मात्मा वायुः वैश्वानरस्य प्राणः ।

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

मुख्यं स्वसिद्धान्तमाह । व्यापक एव प्रादेश इति । न हि विरुद्धमुभयं भगवत्यनवगाह्यमाहात्म्ये । तस्मात् प्रमाणमेवानुसर्तव्यं, न युक्तिः । शब्दबलविचार एव मुख्यः । न तु प्रातीतिकविरोधादन्यथात्वकल्पनम् । वैश्वानरस्य पुरुषत्वं, पुरुषविधत्वं पुरुषेऽन्तःप्रतिष्ठितत्वं च वाजसनेयिनः समामनन्ति । न हि तस्य तद्विधत्वं, तस्मिन् प्रतिष्ठितत्वं च संभवति युक्त्या । अतोऽन्ये ऋषयो भ्रान्ता एव येऽन्यथा कल्पयन्तीत्यभिप्रेत्य स्वमतमाह ।

भाष्यप्रकाशः ।

निमित्तं तदाह । अतः स्थानानुरोधेन तदनुगुणा स्थितिः संपत्तिस्तदनुरोधनिमित्तं प्रादेशमात्रत्वं, न तु स्वाभाविकमित्यर्थः । एवं द्युप्रभृतीनामाध्यात्मिकं रूपमादायानियतपरिमाणपक्षव्याख्यानस्य श्रौतत्वसमर्थनेन नियतपरिमाणमङ्गीकुर्वाण एकदेशी निराकृतः ॥ ३१ ॥

आमनन्ति चैनमस्मिन् ॥ ३२ ॥ अतः परमेतस्यापि पक्षत्वसमर्थनाय सूत्रार्थं व्याकर्तुमवतारयन्ति **मुख्यमित्यादि** । **मुख्यमिति** शब्दबलविचारेण सिद्धम् । तत्स्वरूपं तु **व्यापक एव प्रादेश इति** । व्यापकरूपेणैव प्रादेशमात्रो न तु प्रदेशभेदरूपभेदाभिव्यक्त्यनुस्मृतिसंपत्तिवशात् । तत्र प्रमाणं **न हीत्यादि** । अयं श्रीभागवतषष्ठस्कन्धीयगद्यस्यार्थोपन्यासः । तेन सिद्धमाहुः **तस्मादित्यादि** । 'नैषा तर्केण मतिरापनेया'इति श्रुतेस्तर्कस्य निषेधेन श्रौतानुपपत्तिं विना युक्तेरनादरणीयत्वादुपबृंहणेन विरोधे निरस्ते श्रौतक्रमानादरस्याप्रयोजकत्वात् तथेत्यर्थः । एवं सूत्रतात्पर्यमुद्धाट्य तत्र श्रुत्यन्तरसंमतिं प्रदर्शयन्तो व्याकुर्वन्ति **वैश्वानरस्येत्यादि** ।

रश्मिः ।

मुख्यं स्वमुखावच्छिन्नं यन्नभस्तस्मिन् अध्यात्मनभसि योधिदैवं बहुल आकाशो वैश्वानरस्य देहमध्यात्मावयव इति दृष्टिरित्युवाच । एवं स्वचिबुके अधरमुखफलके प्रतिष्ठापदवाच्या वैश्वानरपादभूतपृथ्वी द्रष्टव्येति तथा च शंकरभाष्यं चिबुकमित्यधरं मुखफलकमुच्यत इति । **तदाहेति** जैमिनिः प्रादेशमात्रत्वमाह । उत्तानमन्यत् ॥ ३१ ॥

आमनन्ति चैनमस्मिन् ॥ ३२ ॥ **सिद्धमिति** मुखं निःसरणोपायवक्त्रेष्विति कोशान्मुखेषूपायेषु भवं सिद्धत्वेन सिद्धम् । **मुख्यमित्यत्र** तत्र भव इति यत् । **प्रदेशेति** जैमिन्येकदेशी प्राह प्रदेशभेदं जैमिनी रूपभेदमाश्मरथ्योभिव्यक्तिं बादरिरनुस्मृतिं स्वैकदेशिदूषको जैमिनिः संपत्तिमिति ज्ञेयम् । **श्रीति** गद्यं तु 'नहि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाश्रयदुरवग्रहवादिनां विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममायामन्तर्धाय कोन्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात्' इति नवमेऽध्याये । **उपेति** नहि विरोध इत्यादिरूपेणेत्यर्थः । **श्रौतेति** साक्षादपीति सूत्रे भाष्योक्तरीत्या श्रौतक्रमानादरस्य । **तथेति** प्रमाणमनुसर्तव्यत्वेन प्रकारेण न युक्तिरनुसर्तव्यत्वेन प्रकारेण । **सूत्रेति** सूत्रार्थविषयिणीं व्यासेच्छां वक्तुरिच्छा तु तात्पर्यमिति । यद्वा शब्दबलप्रतीतीच्छयोच्चरितत्वं सूत्रसंबन्धितात्पर्यम् । **भाष्ये** । **अन्यथात्वेति** कुत्वं कस्मान्न भवतीतिवदन्यथात्वं तस्य कल्पनम् । अन्यथा तु अ इति वा पदच्छेदः । **भ्रान्ता इति** रूपभेदप्रदेशभेदसंपत्तीनां

एवं वैश्वानरमस्मिन् मूर्धचिबुकान्तराले जाबालाः समामनन्ति । एषोऽनन्तोऽव्यक्त आत्मा योऽविमुक्ते प्रतिष्ठित इति । सोऽविमुक्तः कस्मिन् प्रतिष्ठित इत्यादिना भ्रुवोः प्राणस्य च यः संधिः स एष द्यौर्लोकस्य परस्य च संधिर्भवतीति । न ह्यनन्तः संकुचितस्थाने भवति । विशेषणवैयर्थ्यापत्तेः । युक्तिगम्या

भाष्यप्रकाशः ।

समामनन्तीति स एषोऽग्निर्वैश्वानरो यत् पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेत्यग्निरहस्ये वदन्ति । संभवति युक्त्येति भेदादिरूपया युक्त्या । तथाच ब्रह्मणः श्रुत्येकसमधिगम्यत्वात् तद्बलेन विचारे तत्र भेदानुक्त्या तदभावेऽपि तत्रितयं मन्तव्यमित्यर्थः । एवमेकमामननं प्रदर्शितम् । यद्यपि संपत्तिरूपा युक्तिः श्रौती, तथापि कैकेयस्तथा तु व एतान् वक्ष्यामीत्यादिना मध्वादिवत् कल्पनयोपदिष्टवान् । न तु वास्तवरूपम् । स्वकृततथासंपादनवचनात् । तथा सति द्युमूर्धत्वादीनामध्यात्मं कल्पनोपदेशो, न तु स्वारसिकं तत्र मानम् । तच्च शब्दबलविचारे अप्रयोजकम् । दहरविद्यायां, यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इत्यादिना कल्पनां विनैव तन्मानकथनवदत्रापि श्रुत्यन्तरे कथनात् । तथा सति संपत्तिकृतं प्रादेशमात्रपरत्वं जघन्याधिकारिणामुपासनार्थत्वेन पर्यवस्यति । तच्चोत्तमाधिकारिणामनादरणीयमित्याशयेनाहुः अत इत्यादि । सूत्रे चकारादपरमामननं प्रदर्शयन्तो व्याकुर्वन्ति एनमित्यादि । इत्यादिनेति कस्मिन् प्रतिष्ठित इति प्रश्ने, वरणायां नास्यां च मध्ये प्रतिष्ठित इति । का वै वरणा का च नासीति । सर्वानिन्द्रियकृतान् दोषान् वारयति तेन वरणा भवतीति । सर्वानिन्द्रियकृतान् पापान्नाशयति तेन नासी भवतीति । कतमच्चास्य स्थानं भवतीति । भ्रुवोः प्राणस्य च यः संधिः स एष द्यौर्लोकस्य परस्य च संधिर्भवतीत्यन्तम् । नन्वत्रापि प्रदेशादिभेदपक्षा एव भवन्तु, को दोष इत्यत आहुः न हीत्यादि । नचानन्त इत्यत्र कालापरिच्छेद एवोच्यते, न देशापरिच्छेद इति शङ्क्यम् । आत्मत्वेनैव सिद्धे कालापरिच्छेदेऽनन्त इति विशेषणवैयर्थ्यापत्तेः । अतस्तद्बलाद्विरुद्धधर्माश्रयत्वमेवाभिप्रेतमित्यर्थः । ननु युक्त्या साधने को दोष इत्यत आहुः युक्तीत्यादि । नैषा तर्केणेति श्रुतेस्तथेत्यर्थः । ननु सूत्रकृता स्फुटतयाऽनुक्त-

रश्मिः ।

नैषा तर्केणेत्याद्युक्तिनिरसनीयत्वेन श्रुत्यर्थे युक्तिप्रदर्शनमर्थान्तरारोप इवेति भ्रमसाधनसंपादनानुकूलव्यापारवन्तः । आश्मरथ्यस्तु यन्मनसा ध्यायतीति श्रुतिविषयत्वं वेदेषु वदन् भ्रान्तः 'निःश्वसितमस्य वेदाः' इति श्रुतेः वेदानां निश्वसितत्वेन बुद्धिपूर्वकत्वाभावात् । बुद्ध्या पदार्थान् जानातीति । बादरिस्तु तस्मै श्रद्दध्यामेत्यत्र तत्फलकश्रद्धामज्ञात्वा तस्य वचः श्रत् सत्यं दध्याम इति श्रुत्यर्थे भ्रान्तः । प्रकृते । इत्यन्तमिति । श्रुत्यर्थोऽग्रे स्वयं वाच्यः । नहीत्यादीति उपाधिस्तु परमात्मन्यसंगत इति भावः । विशेषेणेति भाष्यं विवरीतुं शङ्कामाहुः न चानन्त इति । अस्मदादिः कालपरिच्छिन्नः शतायुर्वै पुरुष इति तत्र तु न अन्तो नाशो यस्येति कालापरिच्छेदः । एवकारव्यावर्त्यमाह नेति । न देशकृतोन्तो यस्येत्यन्तपदस्यान्तवाचकत्वमित्यर्थः । 'अन्तः प्रान्तेऽन्तिके नाशे' इति विश्वः । नैषेति । तथेति अब्रह्मविद्यात्वस्य संबन्धिनी तथेत्यस्माद् 'अव्ययादाप् सुप इति सूत्रेण षष्ठ्या लुक् यद्यपीयं श्रुतिः काठकेस्ति तत्रैषेत्येतच्छब्देन समीपतरवर्तिवाचकेन श्रेय आददानस्य प्रशंसाविषयिणीमतिरेतच्छब्दवाच्या । किंचान्यत्र धर्मादिति प्रश्ने सर्वे वेदा यत्पदमामनन्तीत्याद्युक्तमक्षरं ब्रह्म वा

त्वब्रह्मविद्यैव । अविरोधेऽपि वक्ष्यति । श्रुतेस्तु शब्दमूलत्वादिति । ननु तथापि काचिद् वेदानुसारिणी युक्तिर्वक्तव्या, शास्त्रसाफल्यायेति चेत् । उच्यते । विरोध एव नाशङ्कनीयो वस्तुस्वभावात् । अयस्कान्तसन्निधौ लोहपरिभ्रमणे या युक्तिर्गर्भस्यौदर्यादाहे, रेतसो मयूरत्वादिभावे । न हि सर्वत्र स्वभावदर्शनाभ्यामन्योपपत्तिः कैश्चिदपि शक्यते वक्तुम् । तस्यान्ते सुषिरमित्यादिना श्रुतिरेवमेवाह ।

यशोदास्तनन्धयस्य च भगवतो मुखारविन्दे विश्वमेव दृष्ट्वा स्वप्नमायाऽविद्यानिराकरणाय सिद्धान्तमाह । 'अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः' इति । उलूखलबन्धने चायमर्थो निर्णीतः । तस्मादानन्दांशस्यैवायं

भाष्यप्रकाशः ।

त्वेऽयमेव सूत्राशय इत्यत्र किं गमकमत आहुः अविरोधेऽपीत्यादि । यद्यपि जाबालश्रुतौ वैश्वानरः स्फुटतया नोक्तस्तथापि मूर्धचिबुकान्तरेऽनन्तस्य प्रतिष्ठितत्वकथनात् प्रादेशमात्रस्याभिविमानत्वं प्रत्यभिज्ञायते । अतस्तत्परत्वं तद्वाक्यस्य बोध्यम् । नन्वित्यादिनोक्ता युक्तिस्तु स्फुटतरैव तस्याः कथं श्रुत्यनुसारित्वमित्यत आहुः तस्यान्ते इत्यादि । तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितमिति तैत्तिरीये बृहन्नारायणोपनिषदि सहस्रशीर्षानुवाके सुषिरस्य सूक्ष्मता तत्र सर्वप्रतिष्ठा च श्राव्यते । सा वस्तुस्वभावादेवोपपद्यतेऽतस्तथात्वमित्यर्थः । दर्शनमुपन्यस्यन्ति यशोदेत्यादि । अत्र स्तनन्धयपदेन अदन्तस्य षड्दिनस्य पूतनाऽसुपयःपानकर्तृतयाऽवस्थासाधनविरोधोऽपि स्मार्यते । निर्णीत इति बन्धनानां द्व्यङ्गुलन्यूनतायाः । पुनः स्वेच्छया बन्धनस्य च कथनान्निर्णीतः । शेषमतिरोहितार्थम् । एवं चात्र निराकारत्वादिना

रश्मिः ।

वाच्यम् । न जाबालसमामननेन सिद्धं ब्रह्म तथापि प्रादेशाभिविमानश्रुतिः श्रेयोऽविषयिणी न वाक्षरब्रह्मविषयिणीत्यदोषः । 'समीपतरवर्तिनि चैतदो रूपम्' इति वाक्यात् । यदि चेदमत्र न गृह्यते तदा तु 'श्रवणायापि बहुभिर्यो न लभ्यः' इत्यादिश्रुत्युक्तं समीपतमवृत्तिर्बहुधाचिन्त्यमान एषोपि परमात्मेत्यदोषः । अग्रे च ततो मया नाचिकेतश्चितोग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यमिति चयनं समीपतमं तदत्रैषेत्यत्रैतच्छब्देनाविवक्षितम् । अविरोधेपीति निमित्तं सप्तम्यर्थः युक्त्यविरोधरूपं फलमविरोधाध्याये वक्ष्यति । श्रुतेः शब्दैकप्रमाणत्वात् वस्तुन एव तथात्वात् । स्फुटतरेति शास्त्रं वेदान्तविचाररूपम् । तद्युक्तिरूपं योजनं शास्ति निर्युक्तिरूपं शास्तीति वेति फले तयोः केन फलेन सहेत्याकाङ्क्षायां शास्त्रस्य सफलत्वायेत्येवं स्फुटतरेत्यर्थः । तत्र प्राज्ञे निर्युक्तिरूपमपि योजनं दार्ढ्याय वेदान्तविचारः शास्ति मन्दमध्यमयोस्तु वक्ष्यमाणयुक्तिरूपमपि दार्ढ्यसंदेहाभावाभ्यां स शास्तीति फलम् । स्वभावेति परिणामहेतुत्वं स्वभावत्वम् । तथात्वमिति स्वभावदर्शनाभ्यां वक्तुं शक्यत्वम् । तथा तु अम् । तु पुनः अम् शैघ्र्यं अम् शैघ्र्येल्पे चेति मनोरमा । तादृशं रूपं किं भविष्यतीत्याकाङ्क्षायां दर्शनमित्यादिः । बन्धनस्येति भक्तवश्यत्वज्ञापनाय बन्धनस्य । शेषमिति । इति चेति इत्येवमनुक्तसमुच्चयश्चकारार्थ इत्यर्थः । सिद्धमाहुः एवमिति । अभिनवनैयायिकमतेप्येवम् । स्वमते प्रादेशमात्रत्वं विशेषः । पूर्वश्रुत्यर्थमाहुः श्रुताविति प्रसङ्गाद्भाष्यश्रुत्यर्थोप्युच्यते । एष इति य एष प्रसिद्धः परमात्मानन्तोऽव्यक्तोक्षरः 'अव्यक्तोक्षर इत्युक्तः' इति गीतातः । तं यः कोपि

धर्मो यत्र स्वाभिव्यक्तिस्तत्र विरुद्धसर्वधर्माश्रयत्वमिति चकारार्थः। तस्मात् प्रादेशमात्रो व्यापक इति वैश्वानरो भगवानेवेति सिद्धम् ॥ ३२ ॥

इति प्रथमाध्याये द्वितीयपादे अष्टमं वैश्वानराधिकरणम् ॥ ८ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये प्रथमस्याध्यायस्य द्वितीयः पादः ॥ १ ॥ २ ॥

भाष्यप्रकाशः ।

कर्तृत्वासंभवमाशङ्क्य तन्निरासाय साकारब्रह्मता विचारिता। श्रुतौ तु वरणा भ्रूः। अस्य स्थानमित्यस्येति पदेनानन्तः परामृश्यते। प्राणपदेन च नासिका। नासिके उपदिशन्नित्यत्र पृथग्वर्त्मात्मनः कथनात्। द्यौरित्याकाशः। तत्र हेतुः । लोकस्य परस्य च संधिरिति। जीवलोकस्य परब्रह्मणश्च संधानजनकत्वादिति ।

अथात्र मतान्तराणि विचार्यन्ते । तत्र जाठराग्निप्रतीकस्य जाठराग्न्युपाधिकस्य वा परमेश्वरस्योपास्यत्वं व्यासमते। जैमिनिमते तु तदुभयकल्पनं विनैव साक्षात् परमेश्वरोपासनं विधीयत इति साक्षादपीति सूत्रे व्याख्यायाभिव्यक्त्यादिसूत्रेषु प्रादेशमात्रत्वस्याविरोधो विचार्यत इति शंकराचार्याः प्राहुः ।

तत्रेदमवधेयम् । आचार्यस्तद्गुरुः सर्ववेदव्यासकर्ता स्वयं समन्वयं प्रतिज्ञाय सरलां सुन्दरीं जैमिनिविचारितां युक्तिं श्रुत्यादिसंमतां जानानः किमिति नोपगतवान्। अथ दुष्टां तर्हि कुतो न दूषितवानिति ।

रश्मिः ।

कथंचिज्जानीयादित्यत्रिप्रश्ने याज्ञवल्क्योत्तरं स इति याज्ञवल्क्यो ब्रूते स्म। **वरणायामिति**। वरणार्थमाहुः **वरणा भ्रू**रिति पदे निर्वक्ति **सर्वाणी**ति। तथा च नियम्यजीवद्वारा नियन्तुरीश्वरस्याधिष्ठानत्वात् नासाभ्रुवोः पाप्मनाशकत्वमित्युक्तम्। तत्रापि स्थानविशेषजिज्ञासया पृच्छति **कतमदि**ति। अत्र प्रमाणमाहुः **नासिके** इति। **पृथगि**ति प्राणः पृथग्वर्त्मात्मेति श्रुतेः प्राणः पृथग्वर्त्मात्मा शंकरभाष्ये तु प्राणस्थाने घ्राणः। पूर्वोक्तमध्यशब्दार्थं स्पष्टयति स्म **भ्रुवो**रिति तदेव स्थानमित्यर्थः। संधिर्द्युलोकस्य यद्वा द्यौराकाशः **संधाने**ति। ब्रह्मामृतवर्षिण्यां तु द्यौर्लोकस्य स्वर्गस्य परस्य ब्रह्मलोकस्य च संधित्वेन ध्येय इत्युक्तम्। अथ ननु कोशे अग्निर्वैश्वानरो वह्निरिति तट्टीकायां च विश्वे नरा अस्य 'नरे संज्ञायाम्' इति विश्वशब्दस्य दीर्घः। विश्वानरस्यापत्यं ऋष्यण्। गीतायां च अहं वैश्वानरो भूत्वेति श्रुतिश्चाग्निः वैश्वानर इति एतत्पर्यालोचनाविरोधेन शंकराचार्यादिमतानि प्रवृत्तानि। अतस्तत्तन्मतसिद्धार्थकानि सूत्राणीत्याशङ्क्याहुः **अथात्रे**ति। **जाठराग्नी**ति। जाठराग्निरीश्वरप्रतीकोवयव इवावयवस्तस्य। परमेश्वरदृष्टिर्हि जाठरे वैश्वानरे इहोपदिश्यते इति भाष्यात्। **अवी**ति ईश्वरोपलब्धिस्थानेषु हृदयादिषु विशेषेणाभिव्यज्यत इत्येवमविरोधः । बादरिमते प्रादेशमात्रत्वेन योयं प्रादेशमात्रोप्यनुस्मरणीयः प्रादेशमात्रश्रुत्यर्थवत्ताया इत्येवमविरोधः संपत्तिकृतां जैमिनिर्मन्यत इत्यविरोधः। **तद्गुरु**रिति शंकराचार्यगुरुः। **दुष्टा**मिति जानानो नोपगतवानिति पूर्वेणान्वयः। **दूषितवा**निति यतो न दूषितवानतः साक्षात्सूत्रार्थो व्यासाभिमत एव। अन्यसूत्रोक्तोपाधिस्तु सर्वथा न संभवति। विद्वन्मण्डने निपुणतरदूषणात्। तथा चेश्वरस्य जाठरस्य वा वक्तव्यः सः। सर्वे वेदा-

भाष्यप्रकाशः।

भास्कराचार्यास्तु, नायं वैश्वानरशब्दो जाठराग्न्यभिप्रायेण प्रयुक्तो येनात्र तद्गुणकोपासनं कल्प्येत। किंतु यौगिकोऽयं शब्दो, विश्वान्नरान् नयतीति। तद्धितस्तु राक्षसवायसादिवत् स्वार्थे। अभिविमानशब्दश्चाभिमुख्येन विचित्रं जगन्निर्मिमीत इति वा, अभिगतश्चासौ विगतमानश्चेति वा योगेन। वैश्वानरशब्दस्य यौगिकार्थग्रहणे जाठरानलविशिष्टोपासनमनभिप्रेतं बादरायणस्येति साक्षात्सूत्रे व्याचक्रुः। तत्र बीजं तु सौत्रोऽपिशब्दः साक्षादविरोधं जैमिनिरपीत्यन्वयादिति तदाशयः।

रामानुजाचार्यास्तु मतद्वयेऽपि जाठरविशिष्टपरमात्मोपासनमङ्गीकृत्य, वैश्वानरशब्दोऽग्निसाधारणोऽपि परमात्मधर्मविशेषितो यथा विश्वेषां नराणां नेतृत्वादिना गुणेन परमात्मानमेवाचष्ट इति निश्चीयते। तथा स एषोऽग्निर्वैश्वानरो यत्पुरुष इति वाजसनेयिपठितोऽग्निशब्दोऽपि येनैवाग्रनयनादिना गुणेन योगाज्ज्वलने वर्तते तस्यैव गुणस्य निरुपधिकस्य काष्ठां गतस्य परमात्मनि संभवादस्मिन् प्रकरणे परमात्मासाधारणधर्मविशेषितः साक्षादव्यवधानेन परमात्मानमेवाभिधत्त इति साक्षात्सूत्रार्थमाहुः।

संपत्तिसूत्रे चोपासकैः क्रियमाणायाः प्राणाहुतेरग्निहोत्रत्वसंपादनार्थमुरःप्रभृतीनां वेदित्वाद्युपदेश इति। आमननसूत्रे च, एनं द्युमूर्धत्वादिविशिष्टं वैश्वानरमस्मिन्नुपासकशरीरे प्राणाहुत्याधारत्वायामनन्ति च। तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा इत्याहुः।

तत्रापीदमवधेयम्। अत्र द्यौपमन्यवादिसंवादवाक्येषु, मूर्धा त्वेष आत्मनश्चक्षुष्टे तदात्मन इत्यादिना यदुक्तं तस्य निगमनमत्र प्रतीयते। तस्य ह वा एतस्यात्मनो वैश्वानरस्येति सर्वैः

रश्मिः।

यत्पदमामनन्ति समन्वयप्रतिज्ञानाच्च प्रतीकस्य जाठरस्य स नोचित इति ज्ञेयम्। **तद्गुणक** इति जाठरगुणकः। **स्वार्थ** इति रक्ष एव राक्षसः वय एव वायसः प्रज्ञादिभ्योण् इत्यण्। **अपिशब्द** इति व्याससमुच्चयबोधकोऽपिशब्दः। **तदाशय** इति भास्कराचार्याशयः। निर्दुष्टोयं सिद्धान्तो न विरुद्धः। **मतद्वय** इति व्यासजैमिन्योर्मतद्वये अतस्तद्विशिष्टस्योपासनमत्रातिदिश्यते इति शब्दादिभ्योन्तःप्रतिष्ठानादिति चेदिति सूत्रे भाष्यात्। तथापि जैमिनिमते कथं तद्विशिष्टोपासनोक्तेत्याकाङ्क्षायां साक्षादप्यविरोधं जैमिनिरिति सूत्रार्थमूचुः **वैश्वानरे**ति। **अग्रनयने**ति। अङ्गति अगि गतौ अङ्गेर्नलोपश्चेति निर्नलोपश्च। आदिपदेन वैश्वानरपदव्युत्पत्तिः पुरमुषतीति च उष दाहे। **आहु**रिति तथा च मतभेदगमकाभावात् पूर्वोक्तोर्थ एव परिशेषात्सिद्ध्यति। **प्राणे**ति स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेति श्रुत्युक्ताया द्युप्रभृतिपृथिव्यन्तशरीरस्य वैश्वानरस्य समाराधनरूपायाः। **वैश्वानरस्ये**ति इयं छान्दोग्यस्था उपासकस्य मूर्धेव परमात्ममूर्धभूतद्यौरित्यर्थः। एवमेतद्भाष्योक्तरीतिकैवंविधप्राणाग्निहोत्रेण वैश्वानरमाराधयेदिति तत्रैव स्फुटम्। **इद**मिति वक्ष्यमाणं सर्वेषां तस्येत्यादिपदानां वैश्वानरपरत्वं न तूपासकपरत्वम्। **यदुक्त**मिति कैकेयेनोपमन्यवाद्युक्तद्युप्रभृतीनां वैश्वानरस्य मूर्धत्वादिकथनेन तत्प्रतीकत्वं यदुक्तं तस्य। **अत्रे**ति वाजसनेयि-

भाष्यप्रकाशः ।

पदैस्तमेव परामृश्य मूर्धप्रभृतीनां समभिव्याहरणात् । तत्कथं सन्निहितपरित्यागेन व्यवहितस्योपासकस्य परामर्शः कर्तुं शक्यते । नचाग्रे सुतेजःप्रभृतिभ्योऽतिरिक्तानामुरःप्रभृतीनां वेद्यादित्वकथनात् तथेति वाच्यम् । भगवतो विश्वकायत्वाय तन्मूर्धादीनां सुतेजस्त्वादिदृष्ट्युपदेशवत्तस्य यज्ञत्वाय तदुरआदीनां वेदित्वादिदृष्ट्युपदेशस्य शक्यवचनतया तस्योपासकावयवगमकताया निश्चेतुमशक्यत्वात् । नचैवं सति तद् यद्भक्तं प्रथममागच्छेदित्यादौ यः प्राणाग्निहोत्राधारत्वेनोपासकास्यादिपरिग्रहः स कथं संगच्छेतेति शङ्क्यम् । संपत्तिसूत्रविषयवाक्ये वैश्वानरावयवानामुपासकमूर्धादिषु संपत्तिकथनेन तेषां तत्र मानवदनुक्तानां तदुरःप्रभृतीनामप्युपासकोरःप्रभृतिषु संपत्त्या मानस्याभिप्रेततया सुखेनैव तदास्यादिपरिग्रहसंगतेः अत एव सर्वत्र वैश्वानरस्थितिबोधनायोपसंहारे, तस्मादु हैवंविद् यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य वैश्वानरे हुतᳬस्यादिति श्रावितम् । तस्मादत्र न जाठरप्रतीकोपासना, न वा तदुपाधिकोपासना, नापि तद्विशिष्टोपासना । किंतु केवलपरमात्मोपासनेति निश्चयः ।

शैवभिक्षू अप्येतेनैव दत्तोत्तरौ, माध्वाश्च ।

प्रकृतमनुसरामः । एवमस्मिन् पादे जीवपुरःसरेणार्थसंदेहो निवारितः । मनोमयत्वादि-

रश्मिः ।

ब्राह्मणे विषयवाक्ये वा । तमेवेति विषयवाक्ये प्रादेशमात्रमभिविमानमित्यादिषु य आत्मपदार्थो वैश्वानररूपस्तमेव । यद्वा । मूर्धा त्वेष आत्मनः इत्यादिषु य आत्मपदार्थ इत्यादिः । व्यवहितस्येति वाजसनेयिब्राह्मणोक्तस्योपासकस्य । कर्तुमिति सर्वैः पदैः कर्तुं शक्यते । ननु प्राप्तिपूर्वको हि निषेधः। स कथमुच्यते सर्वैः पदैः कथं कर्तुं शक्यत इति । मैवम् । उरःप्रभृतीनामुपासकोचितानामुक्तेर्व्यवहितस्याप्येकवाक्यतार्थमेतस्येतिपदेन प्राप्तत्वात् । न च तस्येतिपदेन कुतो व्यवहितस्य प्राप्तिरिति शङ्क्यम् । विषयवाक्येन त्रैलोक्यशरीरस्य परमात्मनो वैश्वानरस्योपासनं विधाय सर्वेषु लोकेष्वित्यादिना ब्रह्मप्राप्तिं च फलमुपदिश्यास्यैवोपासनस्याङ्गभूतप्राणाग्निहोत्रं तस्य ह वा एतस्येत्यादिनोपदिशति यः पूर्वमुपास्यतयोपदिष्टो वैश्वानरस्तस्यैवावयवभूतान् द्युआदित्यादीन् सुतेजोविश्वरूपादिनामधेयानुपासकशरीरे मूर्धादिपादान्तेषु संपादयतीति मूर्धैव सुतेजा उपासकस्य मूर्धैव परमात्ममूर्धभूतद्यौरित्यर्थ इति तद्भाष्यात् । तथेति तादृशवेद्यादिनिरूपणीये तादृशोपासकस्योचिततरत्वात् अध्यात्ममूर्धादिबोधयितुमेतस्येतिपदेनोपासकत्वम् । यज्ञेति यज्ञो वै विष्णुरिति श्रुतेस्तथा । इत्यादाविति । तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेति । भक्तं भक्तद्रव्यम् । एवं व्यानाय स्वाहेति अपानाय स्वाहेति समानाय स्वाहेति उदानाय स्वाहेति अथ य एतदेवं विद्वान् अग्निहोत्रं जुहोतीति श्रुतौ । एतेनेति पूर्वोक्तेन संनिहिततरेण । माध्वास्तु एनं विष्णुमस्मिन् अग्न्यादावामनन्ति योऽग्नौ तिष्ठन् य एष एतस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुष इत्यादिनेति प्रोचुः । तत्स्पष्टम् । विचारमन्तरेणैव यद्वै तेनैव दत्तोत्तरा इत्यन्वयात् प्रत्युक्तप्रायाम् । यदप्यथ ननु को वेत्यादिनोक्तं तदपि स्पष्टम् । आचार्यं मां विजानीयात् आचार्यवान् पुरुषो वेद इति श्रुतिस्मृतिभ्यां ब्रह्म तर्हि अग्निरिति श्रुतेश्चेति न विचारमर्हति तदुक्तम् 'अग्निश्चकार तत्त्वार्थदीपं भागवते महत्' इति निबन्धे । कथं जीवपुरःसरेणेत्यत आहुः मनोमयत्वादीति प्रथमस्याधिकरणस्यार्थरूपता

भाष्यप्रकाशः ।

धर्मवान् हिरण्यश्मश्रुत्वादिधर्मवानत्ताऽलौकिकभोगयोगेऽपि दोषरहितः प्रकटसच्चिदानन्दस्वरूपोऽधिदेवादित्रयनियामकोऽक्षरादुत्कृष्टः स्वत एव साकारो विरुद्धधर्माश्रयो भगवानेव, न जीव इति । तेन सर्वान्तर्याम्येको भगवानिति सिद्धम् । आधेयरूपो विचारित इति च ॥ ३२ ॥ ८ ॥

इत्यष्टमं वैश्वानराधिकरणम् ॥ ८ ॥

इति श्रीवल्लभाचार्यचरणनखचन्द्रनिवारितहृदयान्धकारेण पीताम्बरतनुजपुरुषोत्तमेन कृते भाष्यप्रकाशे प्रथमाध्यायस्य द्वितीयः पादः ॥ १ ॥ २ ॥

समाप्तो द्वितीयः पादः ॥ २ ॥

रश्मिः ।

प्रोक्ता । द्वितीयाधिकरणार्थरूपतामाहुः **हिरण्येति** । तृतीयाधिकरणार्थतामाहुः **अत्तेति** । चतुर्थाधिकरणार्थतामाहुः **अलौकिकेति** । पञ्चमाधिकरणार्थतामाहुः **प्रकटेति** षष्ठाधिकरणार्थतामाहुः अधीति । सप्तमाधिकरणार्थरूपतामाहुः **अक्षरादिति** । अष्टमाधिकरणार्थतामाहुः **स्वत इति** । **आधेय इति** आधेयानि मनोमयत्वादीनि तैः रूप्यते व्यवह्रियते इत्याधेयरूपः तदुक्तं तेन सर्वान्तर्यामी एको भगवानिति सिद्धमिति अग्रिमपादे स्फोटिष्यतितमाम् ॥ ३२ ॥ ८ ॥

इति अष्टमाधिकरणम् ॥ ८ ॥

इति श्रीविद्वन्मण्डनश्रीगिरिधार्यात्मज श्रीदामोदरभ्रात्रीयेण पूर्णवेत्रा श्रीगोविन्दरायपौत्रेण श्रीविट्ठलरायभ्रात्रीयश्रीगोकुलोत्सवात्मजगोपेश्वरेण कृते भाष्यप्रकाशरश्मौ प्रथमाध्यायस्य द्वितीयः पादः संपूर्णतामगमत् ॥ १ ॥ २ ॥

समाप्तो द्वितीयः पादः ॥ २ ॥



श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसंपूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिच्चरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

प्रथमाध्यायस्य तृतीयः पादः

'भगवद्धर्मपरायणसद्व्रतश्रेष्ठिगोवर्धनदास सुन्दरदास' इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतः 'प्राप्तभगवत्पद-
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एलूएल्. बी.,
वकील, हाइकोर्ट' इत्येतेषां सुहृद्भिः
संशोध्य 'निर्णयसागर' मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४६२. संवत् १९९७. आरम्भः

मूल्यं रूपकत्रयम् ।

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya Sagar' Press,
26-28, Kolbhat Street, Bombay 2.

Published by Dhirajlal Vrajdas Sanklia, B. A., LL. B., Advocate
at Khakhar Building, C. P. Tank, Bombay 4.

श्रीकृष्णाय नमः।

श्रीगोपीजनवल्लभाय नमः।

श्रीमदाचार्यचरणकमलेभ्यो नमः।

श्रीमद्ब्रह्मसूत्राणुभाष्यम्।

भाष्यप्रकाश-रश्मि-परिबृंहितम्।

अथ प्रथमोऽध्यायः।

तृतीयः पादः।

द्युभ्वाद्यायतनं स्वशब्दात्॥ १॥ (१।३।१)

द्वितीयपादे आधेयरूपो भगवान् प्रतिपादितः।

भाष्यप्रकाशः।

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥ अथ तृतीयपादं विवरिषवोऽध्यायसंगतिस्फोरणाय पूर्वपादार्थं वदन्तः प्रस्तुतस्यार्थमाहुः द्वितीयेत्यादि। अयमर्थः। पूर्वपादस्यान्तस्तद्धर्माधिकरणप्रपञ्चरूपतयाऽष्टाधिकरण्याम्,

'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः'॥

इति लक्षणं विचारितम्। तत्र प्रथमेऽन्तःस्थस्य मनोमयत्वादीनां धर्माणां, द्वितीये हिरण्यश्मश्रुत्वादीनां च बोधनेन तादृशधर्मविशिष्टं स्वरूपमन्तर्बोधितम्। ततस्त्रिभिः कार्यबोधनेन बिभर्तिपदार्थस्य धारणपोषणात्मकं स्वरूपं बोधितम्। ततोऽन्तर्याम्यधिकरणेऽन्यत्वं परमात्म-

रश्मिः।

द्युभ्वाद्यायतनं स्वशब्दात्॥ १॥ संगतीति एकस्य समन्वयत्वेनैकस्य पादद्वयस्य कार्यत्वं समन्वय इत्येककार्यत्वसंगतिस्फोरणाय। समन्वयः कारणं समन्वयः फलम्। अत्र समासभेदः। कारणेध्याये ब्रह्मणि वेदान्तानां सम्यगनु अयः एरच् यत्रेति बहुव्रीहिः। कार्ये तु समन्वयः सम्यगन्वयः। अन्तस्तद्धर्मेति इयं तत्रैव विचारिता। ननु 'जन्माद्यस्य यतः' इति सूत्रोक्तं लक्षणं पुरुषोत्तमेऽदृश्यत्वाधिकरणोक्ते न स्फुटमित्यसंभव आपततीति चेत् कुतोऽसंभवसंभावना यतः पादेनैव श्रीपुरुषोत्तमे लक्षणं प्रत्यपादीत्याशयेनाहुः अष्टाधीति। तत्रेत्यष्टस्वधिकरणेषु। अन्तःस्थस्येति। साकारस्यादित्यान्तःस्थस्य। आनन्दमयस्य साकारब्रह्मत्वेन तत्प्रपञ्चता कुतो न विचारितेति चेद्भाष्यादावनुक्तेरुपजीव्यत्वाच्चास्याधिकरणस्यानन्दमयाधिकरणे साकारब्रह्मप्रतिपादनं प्रति। ततो भक्तेच्छया 'रसो वै सः' इत्युक्तानन्दमयाविर्भावोपि सूपपादनः। धारणेति[1]। श्नुविकरणेन सह धातूपादानात् डुभृञ् धारणपोषणयोरित्यस्य ग्रहणम्। न भृञ् भरणे इत्यस्य भ्वादित्वात्। उभयपदी धातुः। अन्तःस्थबालकानां पूतनापयःपानव्याजेन स्थापितानां धारणं पोषणं च। अत्र ल्युट् भावे करणेऽधिकरणे च यथासंभवं व्याख्येयः सुखेन। अन्यत्वमिति भेदेनैनमधीयत इति सूत्रभागोक्तमभिमानिभिन्नत्वं तस्मादन्तर्यामिब्राह्मणे ब्रह्मैव वाक्यार्थ इति भाष्यात् परमात्मत्वं आवेशः

---

१. धारणस्येति पाठः।

आधाररूपोऽत्र प्रतिपाद्यते। तेन सर्वं ब्रह्मेति फलिष्यति।

भाष्यप्रकाशः।

त्वमावेशः सपरिकरं लोकत्रयं च बोधितम्। ततोऽदृश्यत्वाद्यधिकरणद्वये अव्यक्तत्वमीश्वरत्वं चाक्षरादुत्तमत्वेन विरुद्धधर्माधारत्वेन च विचारितम्। तदेतदुक्तम्। आधेयरूपो भगवान् प्रतिपादितः इति। तथा अदृश्यत्वाद्यधिकरणे 'यस्मात् क्षरमतीतोऽहम्' इत्यपि विचारितमेव। अतः परं तल्लिङ्गाद्यधिकरणेषु य आधाररूपो निरूपितः सोऽत्र विचार्यते। तेन

'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्'॥

इति वाक्योत्तरार्धोक्तं विमृष्टं भविष्यति। तदेतदुक्तम्। आधाररूपोऽत्र प्रतिपाद्यत इति। द्वितीयपादोक्तमनन्यभक्तिलभ्यत्वं तु गुणोपसंहारपादे फलिष्यतीत्यतो नोक्तम्। एवं पादद्वयोक्तस्य फलं समन्वयस्तत्स्वरूपं वदन्ति तेनेत्यादि। ननु पूर्वपाद आधेयनिरूपणेऽप्याकाशात्मत्वाकाशज्यायस्त्वब्रह्मक्षत्रौदनकत्वलोकशरीरकत्वादिभिर्व्यापकत्वावधारण आधाररूपताऽप्यव-

रश्मिः।

'यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति' इति 'गामाविश्य च भूतानि धारयाम्यहमोजसा' इति चावेशः। **सपरी**ति अन्तर्यामिणः सपरीत्यादि। एवं सर्वत्र बोध्येति भाष्यप्रकाशेन यस्य सर्वे लोकाः शरीरं यः सर्वांल्लोकानन्तरो यमयतीति लोकत्रयम्। पृथिव्यबाकाशवाय्वादित्यचन्द्रतारकदिग्विद्युत्स्तनयित्नवः परिकरः अग्रे यः सर्वेषु लोकेषु तिष्ठन्निति लोकत्रयम्। पुनः परिकरः वेदयज्ञसर्वभूतप्राणवाक्चक्षुःश्रोत्रमनस्त्वक्तेजस्तमोरेतआत्मरूपः तेन परिकरेण सह सपरिकरम्। श्रुतयो विस्तरभिया न लिखिताः। **अव्यक्तत्वम्** अक्षरत्वम्[1]। **ईश्वरत्वं** वैश्वानरत्वम्। **अक्षरादि**ति अक्षरे पुरुषोत्तमं निवेश्य। **उत्तमत्वेन** अक्षरापेक्षया उत्तमत्वेन। वैश्वानर इत्यधिकरणे विरुद्धधर्माधारत्वेन। **इत्यपी**ति अक्षरादपि चोत्तम इत्यनेन द्वितीयपादेनाक्षरोत्तमत्वमपि। **तल्लिङ्गे**ति तल्लिङ्गादित्यधिकरणे 'अत एव प्राणः' इत्यधिकरणे ज्योतिश्चरणाभिधानादित्यधिकरणागमाधिकरणेषु चतुर्षु यः सर्वपरायणत्वेनाकाशः अभिसंवेशस्थानत्वेन प्राणः ब्रह्मत्वेन ज्योतिः सर्वात्मकब्रह्मत्वेन प्राण आधाररूप आकाशादिशब्दाभिधेयः शब्दसंदेहवारणेन निरूपितः। **तेने**ति आधाररूपप्रतिपादनेन। **इतिवाक्ये**ति आधाररूपम्। **प्रतिपाद्यत इती**ति। तेन प्रथमपादेनास्य पादस्य सामान्यविशेषभावः संगतिर्द्वितीयेन तु पादेन प्रसङ्गोऽवसरो वा संगतिरिति फलितम्। केचित्तु त्रैलोक्यात्मा वैश्वानरः पूर्वत्र निरूपितस्तेन त्रैलोक्यायतनं तत्पृथगिति प्राप्ते तदायतनमपि तदेवेति वक्तुमस्यारम्भ इत्याहुस्तर्ह्युपोद्घातसंगतिरधिकरणसंगतिः। अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेतीति सूत्रे भाष्ये 'भक्तौ तु बहिरपि' इति विशेष इत्युक्तम्। अनन्यभक्तिलभ्यत्वं प्रसङ्गात्कुतो न निरूपितमित्याशङ्क्याहुः **द्वितीये**ति। **गुणे**ति साधनाध्यायतृतीयपादे। **तेने**ति सर्वस्याधाराधेयनिरूपकत्वेन। **आकाशात्मे**ति अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति सूत्रे महतो महीयानिति श्रुतौ आकाशात्मत्वादिः महत आकाशात् स्वशरीरान्महान्तं यद्वा आकाश इत्यधिकरणे आकाशो ह्येवैभ्यो ज्यायान् आकाशः परायणमिति श्रुत्युक्तमाकाशात्मत्वमाकाशस्य ज्यायस्त्वं चोक्तं तदत्रापि। तल्लिङ्गाधिकरणे आधाररूपो निरूपितः सोत्र विचार्यते इतिभाष्यप्रकाशात्। **ब्रह्मक्षत्रे**ति अत्ता चराचराधिकरणे ब्रह्मक्षत्रेत्यादिः।

१. अव्ययत्वमिति पाठः।

बाधकानां बलिष्ठत्वात् साधकानामभावतः ।
आधारधर्मा बाध्येरन्निति पादोऽभिधीयते ॥

इदं श्रूयते । 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथाऽमृतस्यैष सेतुः' इति ।

यस्मिन्नित्यादिवाक्ये च वाक्यार्थः सर्वबाधितः ।
अर्थात् प्रकरणाल्लिङ्गादिति पूर्वं विचार्यते ॥

भाष्यप्रकाशः ।

धारिता भवतीति व्यर्थः पादारम्भ इत्यत आहुः **बाधकानामित्यादि** । तेषु प्रेत्याभिसंभवाध्वपाराद्यन्तरात्मत्वादीनां साधितत्वेन **बाधकानां बलिष्ठत्वात् साधकानामसाधितत्वेन** नैर्बल्यात्तदभावत **आधारधर्मा** ज्यायस्त्वादयो **बाध्येरन्न**तस्तथेत्यतो न व्यर्थ इत्यर्थः । क्रमनियामिका त्ववसरसंगतिः । सा च जडार्थवारणरूपा द्वितीयपादारम्भ एवोक्तेति न पुनरुच्यते । एवं संगतिं प्रयोजनं चोक्त्वाऽधिकरणं विवरीतुं विषयवाक्यमुपक्षिपन्ति **इदं श्रूयत** इत्यादि । **श्रूयत** इति आथर्वणोपनिषद्द्वितीयमुण्डके श्रूयते । एतस्यैव वाक्यस्य प्रथमतः कुतो विचार इत्याकाङ्क्षायामाहुः **यस्मिन्नित्यादि** । **वाक्येत्यादि** । **सर्वबाधित** इति सर्वैः प्रकारैर्बाधितः । इतिर्हेतौ । अत्र बुद्धिस्थानात्मिकाधिकरणसंगतिरपि बोध्यते । तल्लक्षणं तु, 'बुद्धिस्थं चिन्त्यते यत्र बुद्धिस्थानात्मिका तु सा' इति । तथा च तल्लिङ्गाद्यधिकरणे आकाशपदस्य ब्रह्मवाचकत्व-

रश्मिः ।

वैश्वानराधिकरणे लोकशरीरकत्वमादिपदेन विरुद्धसर्वधर्माधारत्वम् । **पादेति** आधारनिरूपकपादारम्भः । **प्रेत्येत्यादि** 'आकाशस्तल्लिङ्गात्' इत्यधिकरणे विषयवाक्यमुपन्यस्तम् । तदग्रे च्छान्दोग्ये प्रथमप्रपाठके पठ्यते परोवरीयो हैभ्यस्तावदस्मिंल्लोके जीवनं भविष्यति तथामुष्मिन् लोक इति । प्रेत्याभिसंभवः श्रुत्यर्थस्तु एभ्यः प्रसिद्धेभ्यो लौकिकजीवनेभ्यः परोवरीय उत्तरोत्तरं विशिष्टतरं जीवनं ह भविष्यति तथामुष्मिन् दृष्टे लोके । प्रेत्य मृत्वा । आदिपदेनाग्रिमश्रुतौ प्राणविद्यायाः कर्माङ्गत्वं श्रुतिस्तु मठचीहतेष्विति । श्रुत्यर्थौ तत्रैव द्रष्टव्यौ । मठमद निवासस्थौल्ये भ्वादिः परस्मैपदी सेट् । अञ्चु गतिपूजनयोः अच इत्येके मठ्यत इति मठ्‌ मदः भावे क्विप् अच्यत इत्यच् मदगतिभ्यां हतेषु कुरुषु । अध्वपाराप्तिस्तु काठके तृतीयवल्ल्याम् 'सोध्वनः पारमाप्नोति' इति श्रुतौ । आदिपदेन ब्रह्मक्षत्रौदनकत्वं द्वितीयवल्लीसमाप्तौ । अध्वपाराप्तिस्तु तृतीयवल्ल्यां जीवप्रकरणे ऋतं पिबन्ताविति श्रुत्युक्तब्रह्मसंबन्धिनी । अथवा 'इन्द्रियेभ्यः परा ह्यर्थाः' इत्युपक्रम्य 'अव्यक्तात् पुरुषः परः' इति । व्यापकत्वबाधकमन्तरेति 'यस्त्वेनमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरम्' इति छान्दोग्ये सप्तमप्रपाठके वैश्वानरोस्म्यहमिति टीकायामन्तरात्मत्वं भाष्ये तु जाठरोपाधिकमन्तरात्मत्वम् । आदिपदेन सर्वात्मस्वन्नादनं संसारिलिङ्गम् । **साधितेति** द्वयं श्रुत्या साधितमन्तरात्मत्वं शांकरैः साधितम् । साधकानां नैर्बल्ये पादाभिधानं न स्यात् साधकार्थत्वादित्याकाङ्क्षायामाहुः **असाधितेति** । **तथेति** पादोऽभिधीयते इत्यभिधेयत्वेन प्रकारेण । **अथेति** प्रथमपादे शब्दसंदेहे वारिते आधारनिरूपणे प्रतिबन्धकीभूताधेयनिरूपणं मनोमयत्वादिधर्मैराधेयैराधारनिरूपणस्य विवक्षितत्वात् । अत आधेयनिरूपणेन प्रतिबन्धकीभूतजिज्ञासानिवृत्ताववश्यवक्तव्यत्वमाधारनिरूपण इत्यवसरसगंतिः पादत्रयस्य क्रमनियामिका । **द्वितीयेति** भाष्य उक्ता तत्रार्थो द्विविधो जीवजडात्मकः तत्र प्रथमं

अत्र संशयः। द्युभ्वाद्यायतनं ब्रह्म, आहोस्वित् पदार्थान्तरमिति । अर्थान्तरमेव च भवितुमर्हति। द्युभ्वादीनां सूत्रे 'मणिगणा इव' प्रोतानां भारवाहकत्वान्न तद्वाहकः परमात्मा। अन्यवाग्विमोकश्चासंगतः। एकविज्ञानेन सर्वविज्ञानस्य पृष्टत्वात् कथमन्यविमोकः। सेतुश्च गतिसाधनः। तस्मादफलत्वमपि। आत्मलाभान्न परं विद्यत इति विरोधश्च । अतो न ब्रह्मविद्यापरमेतद्वाक्यम्। किंतु स्मृतिमूलं भविष्यतीत्येवं प्राप्ते। उच्यते।

भाष्यप्रकाशः ।

मङ्गीकृत्य ब्रह्मलक्षणस्य भूताकाशेऽतिव्याप्तिवारणेऽपि सांख्यमतसिद्धे प्रधानेऽतिव्याप्तिमाशङ्क्य वारणात्। बाधादिकं विवरीतुं संशयपूर्वपक्षावाहुः अत्र संशय इत्यादि। अर्थान्तरमेवेत्यादि च। ब्रह्मवाक्यत्वबाधकान् हेतून् विवृण्वन्तः पूर्वमर्थाद् बाधं विवृण्वन्ति द्युभ्वित्यादि। एवं पूर्वार्धोक्तादर्थाद् ब्रह्मवाक्यत्वबाधो व्याख्यातः। प्रकरणकृतं तं व्याकुर्वन्ति अन्येत्यादि। लिङ्गकृतं तं व्याकुर्वन्ति सेतुरित्यादि। स्मृतिमूलमिति सांख्यस्मृतेर्मूलभूतम्। तथा चात्र प्रधानमेव प्रतिपाद्यम्। न चात्मपदविरोधः। योगेन तस्यापि व्याप्तिमात्रबोधकतया संगतेः। अथ रूढ्यपेक्षया योगस्य नैर्बल्यं विभाव्यते तदा पुरुषपरमस्तु। अन्या इत्यत्रामो डादेशः। अन्यमित्यर्थः। वाच इति। षष्ठी पञ्चमी वा। वादान्तररूपायाः। एष इति सांख्यवादः। एवं सर्ववाक्यसंगतेरित्यर्थः। सिद्धान्तं व्याकुर्वन्ति उच्यत इत्यादि। कुत इत्याकाङ्क्षायां

रश्मिः ।

जीवपुरःसरेण संदेहा निवार्यन्त इति भाष्येण तथा चोक्तप्रायेत्यर्थः। यस्मिन्नित्यादीति प्रतीके शरीरगौरवं कारिकाकाठिन्येनाम्नातम्। नैयायिकमते दूषणं नान्यत्र। बाधादिकमिति आदिपदेनार्थादित्यादि। तमिति ब्रह्मवाक्यत्वबाधम्। भाष्ये। एकेति 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति श्रुत्यैकविज्ञानेन सर्वविज्ञानस्य शौनकेनाङ्गिरसः पृष्टत्वाच्छाब्दबोधे पदजन्यपदार्थोपस्थितेः कारणत्वादन्यवाग्विमोके तदर्थस्य ब्रह्मान्यस्य पदजन्योपस्थितिविषयत्वमन्यवाचां विमोकादतः कथमन्यवाग्विमोक इत्यर्थः। सेतुरित्यादीति। भाष्ये। साधन इत्यत्र 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रेण ल्युः। आङ् अभिविधौ अभिव्याप्यार्थमासमन्तात्। भाष्ये स्मृतिपदं शास्त्रत्वात् सांख्यस्मृतिपरमित्याहुः सांख्येति। का सा स्मृतिरित्यत आहुः तथा चेति। समवायिन्योतं कार्यं भवतीति 'प्रधानाज्जगज्जायते' इति स्मृतिप्रोक्तम्। योगेनेति आप्नोतीत्यात्मेति रामानुजाचार्यभाष्योक्तेः। अतति व्याप्नोतीत्यात्मेति योगेन वा। व्याप्तिमात्रमित्यत्र मात्रपदे पुंलिङ्गव्युदासः। पुरुषेति प्रधानसंसृष्टपुरुषपरम्। विषयवाक्यविषमपदार्थानाह अन्या इति। सुपां सुलुगिति सूत्रेण डादेशः। अन्यमिति आत्मविशेषणम्। द्युभ्वाद्यायतनं प्रधानं स्वशब्दादिति सूत्रार्थः। द्यौश्च भूश्च द्युभुवौ द्युभुवावादी यस्य तदिदं द्युभ्वादि यदेतस्मिन् वाक्ये द्यौः पृथिव्यन्तरिक्षं मनःप्राणा इत्येवमात्मकं जगदोतत्वेन निर्दिष्टं तस्यायतनमिति शंकराचार्यभाष्येऽवयविसमास उक्तस्तमपाकर्तुमवयवसमासं बोधयामासुः द्यौः भूश्चेति द्युभुवावादी यस्येत्यवयविसमासे यस्येत्यस्यान्तरिक्षादिसमाहारस्येत्यर्थो भवति तस्य विषयश्रुतावप्रत्ययादवयवसमासो विषयश्रुतिप्रतीत उररीकृतस्तदाहुः। भाष्ये। द्यौरिति। प्रकृते। एवमिति आत्मात्मीयज्ञातिधनवाचकं स्वपदमुक्तम्।

द्युभ्वाद्यायतनं ब्रह्मैव । द्यौर्भूश्चादिर्येषां ते द्युभ्वादयः । तेषामायतनम् । **यस्मिन् द्यौरिति** वाक्योक्तानां साधकं वदन् प्रथमपरिहारमाह **स्वशब्दात्** । आत्मशब्दो व्याख्यातः स्वशब्देन । अत्र न जीवस्यात्मत्वेनोपासनार्थमात्मपदं किंतु पूर्वोक्तानामात्मभूतम् । तेन न भारकृतो दोषः । कारणे हि कार्यमोतं भवति सेतुत्वं च युज्यते । तज्ज्ञानेनाऽमृतत्वप्राप्तेः । अभेदेऽपि ब्रह्मविदाप्नोति परमितिवदर्थः । तस्मादबाधितार्थत्वाल्लक्ष्यस्य सर्वगतत्वव्युत्पादकत्वाद् द्युभ्वाद्यायतनं ब्रह्मैव ॥ १ ॥

भाष्यप्रकाशः ।

हेतुं विवृण्वन्तस्तस्योभयार्थत्वमाहुः **साधकमित्यादि** । साधकमिति ब्रह्मत्वसाधकं हेतुम् । व्याख्यानेनाऽऽत्मशब्दस्फोरणस्य प्रयोजनमाहुः **अत्र नेत्यादि** । आत्मपदस्य जीवे रूढत्वादात्मत्वेन तन्निर्दिश्य जीवस्य सर्वाधारभूतब्रह्मरूपतयोपासनार्थं नात्मपदम् । किंतु, पूर्वोक्तानां द्युभ्वादीनामात्मभूतमनारोपितानागन्तुकं यत्स्वरूपं तद्वाचकम् । एतद्बोधनार्थमेवैवं कथनम् । नो चेदात्मशब्दादित्येव वदेत् । अत इदं साधकं बाधकस्यापि परिहारकमित्यर्थः । ननु सर्वस्यात्मभूतत्वे कथं भारवाहकत्वपरिहार इत्यत आहुः **कारणे हीत्यादि** । लिङ्गदोषपरिहारमाहुः **सेतुत्वमित्यादि** । ननु सेतुत्वेनाऽमृतसाधनत्वमस्योच्यते, न त्वेतज्ज्ञानस्येति कथमेवमित्यत आहुः **अभेदेऽपीत्यादि** तथा च भेदेऽप्यवस्थाभेदेन भेदादुभयसामञ्जस्यमिति नानुपपत्तिरित्यर्थः । सिद्धमाहुः **तस्मादित्यादि** । तस्मादिति भारादिदोषद्वयस्य वारणात् । लक्ष्यस्येति 'लक्ष्यं सर्वगतं चैव शिरो मे सर्वतोमुखः' इति पूर्वमन्त्रोक्तस्य ब्रह्मणो लक्ष्यस्य ॥१॥

रश्मिः ।

न चात्मीयादिवाचकं स्वपदमुक्तं शङ्क्यम् । 'अमृतस्यैष सेतुः' इत्यमृतफलोपदेशात् । **कारणे हीति** ओतम् उङ् शब्दे भ्वादिरात्मनेपद्यनिट् आङ् अभिविधावभिव्याप्यार्थं आसमन्तात् शब्दितं यथा तन्तुषु पट इत्यत्र कारणे तन्तुषु पटः शब्दितो भवति । प्रोतं तु तन्तवः पट इति कारणाभेदावगमे । **लिङ्गेति** लिङ्गं शब्दस्य सामर्थ्यम् । **ज्ञेयत्वमिति** ब्रह्मविदिति ज्ञेयत्वमाप्नोति परमिति प्राप्यत्वं तस्य ब्रह्मणः । **अवस्थेति** गणितानन्दः साधनं पूर्णानन्दः फलमिति पूर्णगणितत्वकृतोवस्थाभेदः । यत्तु शंकराचार्यैरत्र विधरणत्वं मामेव सेतुश्रुत्या विवक्ष्यत इत्युक्तं तदप्यमृतस्येत्यनेनानन्वितमिति त्याज्यमिति ज्ञेयम् । पूर्वपक्षोक्तश्रुतिव्याख्याने प्राञ्जलार्थत्यागं मन्वाना आहुः **अस्मिन्निति** । **लक्ष्यमिति** । श्रुत्यर्थस्तु पूर्वं पुरुषाक्षरं निरूप्य तद्वेद्धव्यमित्युक्तम् । तदर्थं मन्त्रद्वयं धनुरिति लक्ष्यमिति च 'पतिः पत्नी चाभवताम्' 'आत्मनो यदर्धं पत्नीति' प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिन इति गोपालतापिनीयश्रुतेर्लक्ष्म्या मन्त्रस्तृतीयः प्रणव इति । अपरविद्याविषयं चतुर्थमृगिति तत्र तृतीयो लक्ष्यमिति मन्त्रलक्ष्यमक्षरं न पुरुषस्तस्य 'धनुर्गृहीत्वौपनिषदं महान्तं शरं ह्युपासानिशितं संधयीत' (संदधीत) आयाम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि' इति भावपदेन भक्तिपदनीयपुरुषविषयत्वात् । औपनिषदमुपनिषदा गृह्यते ब्रह्मज्ञानमुपासैव निशितं शरं 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते' इतिवाक्यादुपासा दास्यभक्तिर्वा । उप समीपे स्थित्वा यथायोग्यकरणस्य दास्यपदार्थत्वात् तद्भावे तद्भक्तौ गतेन चेतसाऽक्षरं पुरुषाभिन्नं विवक्षितं भावपदात् । आयाम्येति

मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

ननु चोक्तं सर्वविज्ञानस्योपक्रान्तत्वादन्यवाग्विमोको विरुद्ध इति । नैष दोषः । मुक्तोपसृप्यव्यपदेशात् । मुक्तानां जीवन्मुक्तानां शरीराद्यध्यासरहितानामवान्तरप्रकरणशरधनुर्न्यायेन ब्रह्मत्वेन ज्ञातं पृथक्त्वेन वा जीवं लक्ष्ये योजयितुं तदुपसृप्यता व्यपदिश्यते । तेन शरीराद्यध्यासविशिष्टं न ब्रह्मणि

भाष्यप्रकाशः ।

मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥ एवं दोषद्वये परिहृतेऽपि तृतीयस्यापरिहृतत्वादाक्षिपति ननु चेत्यादि । मुक्तोपसृप्यव्यपदेशादिति मुक्तोपसृप्य इति भावप्रधानः । मुक्ते निष्ठा या उपसृप्यता भगवन्निकटगमनयोग्यता तया कृत्वा भगवतस्तस्या उपदेशो मुक्तोपसृप्यव्यपदेशस्तस्मात् । एतद्व्यपदेशेन कथं दोषपरिहार इत्यतस्तदेव व्याकुर्वते मुक्तानामित्यादि । मुक्तपदेनात्र जीवन्मुक्ता एवोच्यन्ते । तदुपसृप्यतेति मुक्तनिष्ठा उपसर्तुं योग्यता । तत्र प्रमाणमवान्तरप्रकरणम् । तत्र प्रोक्तो यः शरधनुर्न्यायस्तेन तथा ज्ञातं तथेति । अयमर्थः । अवान्तरप्रकरणे हि, तद्वेद्धव्यं सोम्य विद्धीत्यैकाम्येण तदेकतानतां प्रतिज्ञाय

रश्मिः ।

यम उपरमे भ्वादिः परस्मैपदी सेट् आसमन्तादुपरम्य उपरमं कारयित्वा वा । अग्रे प्रणवो धनुरिति मन्त्रः प्रणवो मूलप्रकृतिः रुक्मिणी सा गुरुतः शिरो ह्यात्मा गुरूपसत्या योजनीयः । ब्रह्म तल्लक्ष्यमुच्यते पुरुषाख्यं ब्रह्म लक्ष्यम् । अत्रानधिकारमाशङ्क्याह अप्रमत्तेन वेद्धव्यमिति । अप्रमादेनाधिकारः संपादनीयः प्रमादोऽनवधानता । शरवत्तन्मयो भवेत् । अधुनाऽक्षरवेधमाह लक्ष्यमिति लक्ष्यमक्षरम् । सर्वगतं द्युभ्वादिगतम् । सदायतनं शरो मे सर्वतोमुखः सर्वैः प्रकारैर्यन्मुखमुपायः स शरो वेद्धा आत्मा जीवः । सर्वगतो मुक्तो जीवन्मुक्तो विद्धं लक्ष्यं न संशयः । व्यध ताडने । अन्ने ऋग् धनुर्यजुर्बाणेन साम ज्याघोषणादिना ब्रह्म वेदमयं नित्यं परिविध्यन्ति नित्यश इत्यपरविद्याविषयम् । तथा च लक्ष्यस्याक्षरब्रह्मणो हि सर्वगतत्वं विषयवाक्येन प्रतिपादनात् लक्ष्यस्य सर्वगतत्वव्युत्पादकत्वादिति भाष्यार्थः । न च पुरुषोत्तमस्य सर्वगतत्वव्युत्पादकत्वमुचितं प्रतिज्ञातत्वादिति शङ्क्यम् । भक्तमनोरथपूरकत्वेन पुरुषोत्तमस्य भक्ताभावेन तस्य सामान्यरूपं यदक्षरं तन्निर्देशौचित्यात् । अचलत्वं चापेक्ष्येत्यधिकरण उक्तम् । भक्तमनोरथपूरकत्वं चतुर्थाध्याये प्रामाणिकं श्रुत्वाभिमतं लिखितमित्यग्रे प्रकारभेदो न दोषाय ॥ १ ॥

मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥ भाष्ये । विरुद्ध इति । शाब्दबोधे पदजन्यपदार्थोपस्थितेः कारणत्वादिति । प्रकृते । एवेति एवकारेण शंकराचार्यगृहीता मुक्ता व्यवच्छिन्नाः । मुक्तैरुपसृप्यं गम्यमेतदिति शंकराचार्योक्तमपि न साधीय इति बोधयितुं द्वितीयं विरुद्धमंशं व्याचक्रुः तदुपेति । भावप्रधानः मुक्तोपसृप्यपदे जीवन्मुक्तभावप्रधाननिर्देशयोः प्रमाणं बोधयितुं ग्रन्थभाष्यं अन्यद्भाष्यं विवरामासुः तत्रेति । तत्र जीवन्मुक्तोपादानभावप्रधाननिर्देशाङ्गीकारयोः । तथेति ब्रह्मत्वेन ज्ञानं जीवं तथा लक्ष्ये योजयितुं व्यपदिश्यत इति व्यपदिष्टत्वेन प्रकारेण । अवान्तरेति

भाष्यप्रकाशः ।

सा कथं स्यादित्याकाङ्क्षायाम्

‘धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं संधीयीत ।
आयाम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि’ ॥ इति ।

शरधनुर्न्यायेन तां बोधयित्वा, किमस्त्रं कः शर इत्याद्याकाङ्क्षायाम्—

‘प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्’ ॥

इत्यनेन शरस्य यथा प्रवेशेन लक्ष्यनिखाततया लक्ष्यप्रचुरता तथा आत्मनोऽपि तन्निखाततया तत्प्रचुरतेति तया पृथक्त्वेन ज्ञातम् । अथवा,

‘लक्ष्यं सर्वगतं चैव शरो मे सर्वतोमुखः ।
वेद्धा सर्वगतश्चैतद्विद्धं लक्ष्यं न संशयः’ ॥

इति ब्रह्मणः सकाशात् पृथक्त्वेन ज्ञातं जीवं लक्ष्ये ब्रह्मणि योजयितुमुपासानिशितत्वाधायकतद्भावगतचेतःसिद्ध्यर्थमन्यवाग्विमोकोऽत्रोच्यते । स च शरीराध्यासराहित्य एव सिद्ध्यतीति तन्मुखेन भगवतो मुक्तोपसृप्यता व्यपदिश्यते । उक्तरीत्या जीवयोग्यताकथनद्वारोच्यते । तेन शरीराद्यध्यासविशिष्टं लिङ्गशरीरं न ब्रह्मणि योजनीयमिति बोधनाय वाग्विमोकोऽत्रोच्यते । न तु सर्वविज्ञानविघाताय । लक्ष्यादीनां त्रयाणां सर्वगतत्वश्रावणादतो नैतत्कथन-

रश्मिः ।

यथा समिधो यजतीत्यारभ्याम्नातमवान्तरप्रयाजप्रकरणमिति तृतीयस्थदशमेधिकरणे तादृशप्रकरणमाहुः **तद्वेद्धव्यमिति** । **तामिति** तदेकतानताम् । **लक्ष्येति** खनु अवदारणे भ्वादिः उभयपदी सेट् । **तद्भावेति** ब्रह्मात्मभावगतं चेतःसिद्ध्यर्थम् । **उच्यत** इति तथा च पृथक्त्वेन ज्ञातसंबन्धिन्यपि वाक् ब्रह्मवागेव नान्यवागिति भावः । **उक्तरीत्येति** अवान्तरप्रकरणश्रुत्युक्तरीत्या ‘अन्या वाचो विमुञ्चथ’ इत्यनेन जीवयोग्यतेत्यर्थः । **शरीरादीति** स्थूलोहमिति शरीराध्यासोऽन्यस्य बुद्धेर्मनोधर्मस्यास्मदर्थे ख्यातिः स्थूलत्वं नास्मन्मतेन्यख्यातेः अतस्मिंस्तत्त्वारोपोऽध्यासोऽन्यख्यातिरूपः । जानाम्यहमित्यन्तःकरणाध्यासः ज्ञानस्यान्तःकरणवृत्तित्वात् । श्वसिम्यहमिति प्राणाध्यासः श्वासस्य प्राणवृत्तित्वात् । पश्यामि शृणोम्यहमितीन्द्रियाध्यासः दर्शनादेरिन्द्रियधर्मत्वात् । स्वरूपविस्मरणं बद्धोहमिति । पञ्चपर्वाऽविद्या । **लिङ्गेति** सर्वोपनिषदि मन आदिश्च सत्त्वादिश्च इच्छादिश्च पुण्यविशेषैर्नैते पञ्चवर्गाणां धर्माः भूतात्मजानादृतेन विनश्यति आत्मसन्निधौ नित्यत्वेन प्रतीयमान आत्मोपाधिर्यस्तल्लिङ्गशरीरं हृदयग्रन्थिरित्युच्यत इत्युक्तम् । **नेति** तथा चोक्तं भाष्ये ।

‘नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा’ ॥ इति ।

तेन सर्वात्मभावेन ख्यातव्यमिति भावः । **लक्ष्यादीनामिति** लक्ष्यशरवेद्धॄणाम् । **एतत्कथनं**

योजनीयमिति। किंच। वाग्विमोक एव, न वस्तुविमोकः। वस्तुनो ब्रह्मत्वात्। वाचारम्भणमात्रत्वाद्विकारस्य। अतो न सर्वविज्ञानबाधः। अतो बाधकाभावादिदं ब्रह्मवाक्यमेव। ये तु श्रुतेरन्यथार्थत्वं कल्पितमतानुसारेण नयन्ति, ते पूर्वोत्तरस्पष्टश्रुतिविरुद्धार्थवादिन उपेक्ष्याः॥ २॥

भाष्यप्रकाशः।

मुपक्रमविरोधायेत्यर्थः। एवमन्यवाग्विमोकस्य दोषत्वं प्रकरणेन निवारितम्। अतः परमर्थेनाऽपि निवारयन्ति किंचेत्यादि। अर्थस्तु स्फुट एव। एवं सूत्रार्थं व्याख्यायैकदेशिमतमनूद्य दूषयन्ति ये त्वित्यादि। ये मायावादिनः परब्रह्मणः साकारताममन्वानाः श्रुतेर्व्याख्येयाया यस्मिन् द्यौरित्यस्या अन्यथार्थत्वं, सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यायतनानायतनवद्भावस्य, सर्वं ब्रह्मेति सामानाधिकरण्यस्य च श्रावणाद् यथा शाखा स्कन्धो मूलं चेत्यनेकात्मको वृक्ष एवं नानारसो विचित्र आत्मेति शङ्कासंभवे तद्वारणायात्र, तमेवैकं जानथात्मानमिति सावधारणमाह यथा, यस्मिन्नास्ते देवदत्तस्तदानयेत्युक्ते आसनमेवानयति, न देवदत्तम्। तद्वदायतनभूतस्यैकरसस्यैवात्मनो विज्ञेयत्वमुपदिश्यते। अन्या वाच इत्यनेन विकारानृताभिसंधस्य चापवादः। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति दोषश्रावणात्। सर्वं ब्रह्मेति सामानाधिकरण्यं तु प्रपञ्चप्रविलापनार्थं नानेकरसताप्रतिपादनार्थम्। 'स यथा

रश्मिः।

सर्ववाग्विमोककथनम्। इममर्थमुपष्टम्भन्त इव कंचन संदेहं पराचक्रिरे **अत्रेति**। इयं 'हानौ तूपायनशब्दशेषत्वात्' इति सूत्रे विषयवाक्यं साम्यं तूपचारात् परमं ब्रह्मोपैतीत्यन्वयः तदनन्तरं साम्यमुपैतीति। परादक्षरात्। उप आ एतीति 'एङि पररूपम्' नास्ति आङा व्यवधानात्। अतो वारद्वयवृद्धिः। मुक्तिफलेति इदं सूत्रं तृतीयाध्यायसमाप्तौ। **तथेति** परममुक्तस्योपसृप्यताप्रकारः। **सन्निहितेति** एकमात्रद्वितीयमुण्डकपठितत्वेन सन्निहितत्वात्। **प्रकरणेनेति** प्रकरणादिति सूत्रे वक्ष्यते वक्ष्यते च 'आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च' इत्यधिकरणे।

जीवप्रकरणं ह्येतन्मुक्त्युपायोऽस्य रूप्यते।
योग्यं शरीरमारुह्य गच्छेदिति हरेः पदम्'॥ इति।

तद्वज्जीवन्मुक्तप्रकरणमवान्तरप्रकरणम्। जीवकर्तृकब्रह्मकर्मको वेधः तद्वद्वेद्धव्यं सोम्य विद्धीत्यत्र त्वं त्वया वेद्धव्यं तद् ब्रह्म विद्धीति। **अर्थेनेति** लक्ष्यादीनां त्रयाणां सर्वगतत्वेन तत्तत्संबन्धिन्यो वाचो नान्या वाच इति न दोषत्वमित्युक्तेर्थे नान्यवाक्त्वमेकविज्ञानेन सर्वविज्ञानबाधकमतो द्युभ्वाद्यायतनं पदार्थान्तरमित्यन्यवाग्विमोकस्य दोषत्वं प्रकरणेन निवारयन्ति सेत्यर्थः। **स्फुट** इति तथा हि 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति श्रुतौ नामधेयं विकारः जीवन्मुक्तः सर्वोपाया इति नामैव विकारो विकृतिः कुण्डलादिवत् सुवर्णस्य। वस्त्वाकारस्य तु न विकृतित्वं साकारब्रह्मवादे 'यदेकमव्यक्तमनन्तरूपम्' इतिश्रुतेर्ब्रह्मत्वात्। आविर्भावतिरोभावावेव न तु नाशोत्पत्ती। एवं च विकारो वाचारम्भणं मृत्तिकेत्येव घटशरावादौ सत्येत्येवं ब्रह्मेत्येव सत्यं साकारत्वादित्यर्थः। तदेतदुक्तं भाष्ये वाग्विमोक इत्यारभ्य विकारस्येत्यन्तेन ग्रन्थेन। **दोषेति** बृहदारण्यके। **प्रपञ्चेति** स्वस्वकारणरूपतया भावनं प्रपञ्चविलापनमिति तत्त्वानुसंधानं ग्रन्थः एतादृश एव तेषामपवादपदार्थः। विरुद्धार्थवादित्वं स्फोरयामासुः **यथेति**। मुण्डकश्रुतयः अग्रे

नानुमानमतच्छब्दात् ॥ ३ ॥

ननु जडधर्मा जडदृष्टान्ताः प्रकरणे बहवः सन्ति । 'अरा इव ब्रह्मपुरे मनो-

भाष्यप्रकाशः ।

सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' इति श्रावणादित्येवमर्थत्वं प्रपञ्चो मायिक इति कल्पितमतानुसारेण प्रापयन्ति । ते पूर्वोत्तरस्पष्टश्रुतिविरुद्धार्थवादिनो 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' इति । 'एतस्माज्जायते प्राणः' इति । 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' इत्यादि । 'आविःसन्निहितं गुहाचरं नाम महत्पदम् । अत्रैतत्सर्वमर्पितमेजत्प्राणन्निमिषच्च यत्' इत्यादयः पूर्वाः । 'अरा इव रथनाभौ' इत्याद्या आसमाप्ति वर्तमाना उत्तराः, स्पष्टास्तत्तद्दृष्टान्तपूर्वकब्रह्मकार्यब्रह्मरूपविरुद्धधर्माधारत्वादिब्रह्मधर्मप्रतिपादकतया स्फुटार्था या श्रुतयस्तद्विरुद्धो यः प्रपञ्चमायिकत्वादिरूपोऽर्थस्तद्वादिनो वैयात्यादैकदेशिकमादाय तं निर्णीतत्वेन वदन्त उपेक्ष्या आग्रहवादित्वाद् भूताविष्टा इवानादरणीया इत्यर्थः ॥ २ ॥

नानुमानमतच्छब्दात् ॥ ३ ॥ इदमेवाधिकरणं पुनर्निषेधमुखेन विचारयन् पूर्वं जडं निरस्यतीत्याशयेनात्र पूर्वपक्षं दर्शयन्ति **नन्वित्यादि** । कुत्र सन्तीत्यपेक्षायां तन्मन्त्रप्रतीकं दर्शयन्ति **'अरा इव रथनाभौ** संहता यत्र नाड्यः' 'स एषोऽन्तश्चरते बहुधा जायमानः' इत्यत्र नाडीसंघाताधिकरणत्वं शरीरधर्मत्वाज्जडधर्मः । रथनाभिदृष्टान्तो जडदृष्टान्तः । तथा,

रश्मिः ।

इत्यादि साकारत्वं ब्रह्मणः प्रतिपादयति । अरूपमक्षरं केन प्रकारेण ज्ञेयमित्याह **आविरिति** बहिःप्रकटं **सद्गुहाचरं** यथा भवति तथा निहितं **महत्** बृहन्नाम **पदं** धाम **एजत्** एजृ कम्पने भयाद्भूलोके सर्वमेजत् । **प्राणत्** रक्षआदिभिः प्राणत्सर्वं भुवर्लोके । निमेषादिक्रियारहितं मिषत्स्पर्धमानं सिचद्वा स्वर्गलोके । **इत्यादय** इति एतज्जानीथ सदसद्वरेण्यमित्यादिरादिपदार्थः । जीवन्मुक्तप्रकरणीयाश्च श्रुतयश्च । **आस**मिति समाप्तिमभिव्याप्याऽऽसमाप्ति । **ब्रह्मकार्य**मिति यथा सुदीप्तात्पावकादित्यत्र दृष्टान्तपूर्वकं ब्रह्मकार्यम् । अग्निर्मूर्धेत्यत्र साकारब्रह्मरूपता । आविःसन्नित्यत्र विरुद्धधर्माधारता आदिनाऽरा इवेत्यत्र सदंशता दृष्टान्तस्य जडत्वात् । आद्यपदेन आनन्दरूपममृतं यद्विभाति साकारता निरूपिका । आनन्दस्य साकारत्वं वेदस्तुतौ 'अन्नमयादिषु यश्चरमः' इत्यस्य सुबोधिन्याम् । 'तस्य पुरुषविधतामन्वयं पुरुषविधः' इत्यानन्दवल्लीश्रुत्या । **वैयात्या**दिति अगत्या छान्दोग्योक्तमैकदेशिकं एकदेशो भक्तेरुभयकारणयोर्माहात्म्याभेदज्ञानयोर्मध्येऽभेदः । श्वेतकेतूपाख्यानोक्तस्तत्संबन्धिसन्मूलेत्यादिवाक्यमादाय । **भूते**ति समानाधिकरणस्य सर्वथाऽसंभवाद्भूताविष्टाः मूलवस्त्वज्ञानेन वेदार्थविप्लावकत्वादनादरणीया इत्यर्थः ॥ २ ॥

नानुमानमतच्छब्दात् ॥ ३ ॥ **निषेधे** द्युभ्वाद्यायतनं प्रधानमिति पूर्वपक्षयित्वा स्वशब्दादिति हेतुना निषेधः कृतः अधुना अनुमानं प्रधानं तच्छब्दाभावादित्येव नञो निषेधार्थकत्वेन निषेधोपायेन । **अरा** इति रथस्य नाभौ चक्रान्तेऽर्पिता अरा यथा संहता नाड्यः 'नाडी स्थाने कुलाये च' इति विश्वात् । स्थानानि । **शरीरे**ति चक्षुःश्रोत्रादीनां सूर्यदिगादिदेवतास्थानत्वसत्त्वात् ।

मये' इत्यादि। तस्मात् प्रकृतिपुरुषनिरूपकसांख्यानुमापकमेवैतत्प्रकरणमस्तु। निर्णीतमप्यक्षराधिकरणे जडधर्मात् पुनरुज्जीवनम्। तस्माद् द्युभ्वाद्यायतनं प्रकृतिरेव भवितुमर्हतीति चेन्न। अनुमानं तन्मतानुमापकं न भवति। कोऽपि शब्दो निःसंदिग्धस्तन्मतख्यापको नास्ति। ब्रह्मवादख्यापकास्तु बहवः सन्त्यात्मसर्व-

---

भाष्यप्रकाशः।

'यः सर्वज्ञः सर्वविद् यस्यैष महिमा भुवि।
दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा संप्रतिष्ठितः'॥

इत्यत्र पुरमिव पुरमिति पुरपदबोधितो दृष्टान्तो भूमिष्ठमहिमवत्त्वं शरीरधर्मः। तथा, 'मनोमयः प्राणशरीरनेता' इत्यत्र मनोमयत्वं विकारधर्मः। इत्यादीत्यादिपदेन, 'हिरण्मये परे कोशे' इत्यादिमन्त्रोक्तानां शुभ्रत्वप्रकाशाभावादीनां संग्रहः। आत्मसर्वज्ञादिशब्दाश्चेतनधर्मबोधकाः पुरुषनिरूपकाः। तस्मादिति प्रकृतिपुरुषबोधकपदसत्त्वात्। नन्वस्य प्रकरणस्यादृश्यत्वाधिकरणे ब्रह्मपरताया व्युत्पादितत्वात् सिद्धे तथात्वे पुनः किमर्थोऽयं प्रयास इत्यत आहुः निर्णीतमित्यादि। यद्यपि तत्र तथा निर्णीतं तथापि तत्रान्तरात्मत्वेनाधेयतया ब्रह्म सिद्धं न त्वाधारतयेति। रथनाभ्यादिदृष्टान्तसहकृतान्नाडीसंघाताधारत्वादिरूपाज्जडधर्मादाधारभूतेऽक्षरे प्रकृतिरूपतायाः पुनरुज्जीवनं संभवतीति विशिष्टाद्वैतमेव भवेन्न तु शुद्धब्रह्मवाद इति तदभावाय प्रयास इत्यर्थः। सिद्धान्तं व्याचक्षते अनुमानमित्यादि। इदं प्रकरणं सांख्यमतमूलभूतं, तदसाधारणधर्मबोधकशब्दवत्त्वादित्यनुमानं तन्मतानुमापकं न भवति। तत्र हेतुः कोऽपीत्यादि। अयमर्थः। एतेषु मन्त्रेषु यत्तच्छब्दात् तयोश्च नित्यसंबन्धान्नाडीसंघाताधिकरणत्वमन्तःप्रविष्टस्य

रश्मिः।

दृष्टान्त इति ब्रह्मणः पुरमिव पुरं हृदयाकाशः इति हृदयाकाशदृष्टान्तः। शंकरभाष्ये शरीरं तत्र व्योम्नि हृदयाकाश इति स्वमतेर्थः। 'ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' इति श्रुतेः महिमा विभूतिस्तद्वत्त्वं शरीरधर्मः। व्याख्याने तात्पर्यान्न पूर्वोत्तरभावत्यागेन व्याख्यानं दोषाय। **विकारेति** विकारे मयटः। **शुभ्रत्वेति** 'तच्छुभ्रं ज्योतिषां ज्योतिः' 'नक्षत्रचन्द्रार्कवपुः प्रकाशते' इतिश्रुतिभ्यां शुभ्रत्वान्यप्रकाशाभावादीनां आदिपदेन 'न वान्ति वाताः' इति श्रुतौ वायवः, वा गतिगन्धनयोः गत्यनुकूलव्यापाराश्रया नेति बोधात् तत्र वाताभावस्य संग्रहः। पुरुषांशनिरूपकसांख्यानिरूपणमाशङ्क्य एकवित्तिवेद्यत्वेन भाष्येनुक्तमित्याशयेनाहुः **आत्मेति**। एते शब्दाः पूर्वमुदाहृतश्रुतिषु वर्तन्ते। **तथात्व** इति ब्रह्मपरतारूपः प्रकारस्तस्य भावे। **विशिष्टेति** 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इतिश्रुत्युक्तम्। **व्याचक्षत** इति यत्तु शंकराचार्यैरनुमानशब्द आनुमानिकसांख्यस्मृतिपरिकल्पितप्रधानपरत्वेन व्याख्यातस्तदपाकर्तुं तथेत्यर्थः। अनुमानपदे लक्षणां वारयितुं अनुमानस्वरूपमाहुः **इदमिति**। दृष्टान्तस्तु सांख्यसूत्रवत्। एवं हेतुप्रतिज्ञे दृष्टान्तरूपोदाहरणं चोक्तम्। परार्थानुमाने चतुर्थोवयवः तथायमित्युपनयः पञ्चमोऽवयवस्तस्मात्तथेति निगमनमिदं पञ्चावयववाक्यमनुमानम्। अयं हेतुः सत्प्रतिपक्षः साध्याभावसाधकहेत्वन्तरसत्त्वात् तन्मतानुमापकं न भवतीत्याहुः **तत्र हेतुरिति**। **मन्त्रेष्विति** 'अरा इव रथनाभौ संहता यत्र नाड्यः, स एषोन्तश्चरते बहुधा जायमानः' 'ॐमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात्, यः सर्वज्ञः सर्वविद्यस्यैव महिमा भुवि, दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा संप्रतिष्ठितः, मनोमयः प्राणशरीरनेता प्रतिष्ठितोन्ने हृदयं संनिधाय,

ज्ञानन्दरूपादिशब्दाः । अतः संदिग्धा जडधर्मत्वेन प्रतीयमाना अपि ब्रह्मधर्मा एवेति युक्तम् । न हि ब्रह्मवादः श्रुतिव्यतिरिक्ते सिद्धोऽस्ति । येन ब्रह्मधर्माभावो निश्चेतुं शक्येत । तस्मात् सर्वाधारत्वेन निरूप्यमाणः परमात्मैव, न प्रधानमिति ॥ ३ ॥

प्राणभृच्च ॥ ४ ॥

नन्वस्ति निर्णायकं प्राणानामोतत्ववचनम् । 'मनोमयः प्राणशरीरनेता' इति च । अतो जीवधर्माः केचन, जडधर्माश्चापरे सर्वज्ञत्वादयोऽपि योगप्रभावाज्जीवधर्मा इति । तस्माज्जडजीवविशिष्टः सांख्यवाद एव युक्त इति चेन्न । प्राणभृज्जीवो न संभवति । अतच्छब्दादेव । न ह्यानन्दाऽमृतरूपः स भवितुमर्हति तन्मते । पृथग्योगकरणमुत्तरार्थम् ॥ ४ ॥

भाष्यप्रकाशः ।

संचरतो भोक्तुः प्रतीयते । दृष्टान्तस्तु विष्टम्भकत्वमात्रे । अन्यथा दृष्टान्तीयाशेषधर्मापत्तिः पक्षे संभवन्ती अनुमानमेवोच्छेदयेत् । एवं सर्वज्ञ इत्यत्राप्यात्मन एव महिमा । एवं सर्वेषां शब्दानां संदिग्धत्वे न तैः सांख्यमतसिद्धिरित्यर्थः । ननु मास्तु सांख्यमतसिद्धिस्तैर्मतान्तरमेव सिद्ध्यत्विति त्यत आहुः न हीत्यादि । किं तन्मतान्तरम् । ब्रह्मबोधकमन्यद्वा । यद्याद्यः पक्षस्तदा तु श्रुत्येकसिद्धत्वाद् ब्रह्मवादस्यैव सिद्धिः । यद्यन्यस्तदा त्वात्मत्वसर्वज्ञत्वानन्दरूपत्वादीनां ब्रह्मधर्मत्वाभावसाधकं हेत्वन्तरं मृग्यम् । तच्चात्र न दृश्यत इति न तस्यापि सिद्धिरित्यर्थः । सिद्धमाहुः तस्मादित्यादि ॥ ३ ॥

प्राणभृच्च ॥ ४ ॥ निषेधमुखविचारे जीवनिरसनायात्र पूर्वपक्षं दर्शयन्ति नन्वित्यादि । निर्णायकमिति सांख्यमतनिर्णायकम् । सिद्धान्तमाहुः नेत्यादि । पृथग्योगकरणमिति ।

रश्मिः ।

तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति' इत्यादिमन्त्रेषु । भोक्तुरिति ब्रह्मणः । विष्टम्भेति मात्रपदेन जडव्युदासः विष्टम्भः पतनप्रतिबन्धकव्यापारः ष्टभि स्तम्भे भ्वादिरात्मनेपदी सेट् । विष्टम्भते इति विष्टम्भकः । उच्छेदयेदिति यथात्रैव सांख्यसूत्रं दृष्टान्तः तदीयाः सांख्यसूत्रत्वस्वल्पत्वर्षिप्रणीतत्वरूपा धर्माः पक्षेऽस्मिन् प्रकरणरूपे स्युरित्यनुमानं पञ्चावयववाक्यमुच्छेदयेद्विवक्षितानुमित्यभावात् । महिमेति ज्ञानम् । एवकारः सांख्यपुरुषं व्यवच्छिनत्ति । संदिग्धत्वेनेति । सांख्यमतप्रतिपादने इति शेषः । एवं चेदं प्रकरणं न सांख्यमतमूलभूतं तदसाधारणधर्मबोधकशब्दवत्त्वाभावात् व्याससूत्रवदिति प्रतिपक्षरूपानुमानम् । अत्राप्युपनयनिगमने बोध्ये । मतं शब्देपि । भाष्यं दर्शयन्नाचार्यमतमित्याहात आहुः ब्रह्मबोधकमिति । मृग्यमिति सांख्यैर्मृग्यम् ॥ ३ ॥

प्राणभृच्च ॥ ४ ॥ प्राणान् बिभर्तीति प्राणभृत् डुभृञ् धारणपोषणयोः ह्वादिः परस्मैपदी कर्तरि क्विप् तुक् जीव इत्यर्थः । जीव प्राणधारण इति धातुपाठात् श्लौ द्वित्वाभावश्छान्दसः स्वरवर्णानुक्रमहैमधातुपाठे तु टुडु भृगूक् पोषणे धारणे अदादिः ह्वादिरुभयपदी अनिट् इत्यादिरपि तस्य द्वित्वं न पूर्वसूत्रान्नातच्छब्दादिति पदद्वयानुवृत्त्या लब्धनिषेधमादायाहुः निषेधेति । सांख्येति 'यस्मिन् द्यौः पृथिवी' इति श्रुतौ प्राणानामोतत्ववचनं पुरुषस्तु पुष्करपलाशवन्निर्लेप इति न प्राणसंबन्धः । प्रकृतिस्तु सत्त्वरजस्तमोरूपा अत्रैकजीवपक्षः स तृतीयस्कन्धसुबोधिनीश्रीकापिल-

भेदव्यपदेशात् ॥ ५ ॥

विशेषहेतुमाह 'तमेवैकं जानथ' इति कर्मकर्तृभावः प्रतीयते । अतो भेदव्यपदेशान्न प्राणभृज्जीवः ॥ ५ ॥

भाष्यप्रकाशः ।

सूत्रपृथक्करणं, न शद्बयोगकरणं चोत्तरसूत्रेष्वन्वयार्थमित्यर्थः । नचानन्दाऽमृतरूपत्वमुपासनार्थमुच्यत इति वाच्यम् । विभातीत्यस्य विरोधात् । उपासनायां विभानाभावात् । नच तत् फलबोधकमिति वाच्यम् । तन्मत आनन्दस्य प्रकृतिधर्मत्वेन फलताया वक्तुमशक्यत्वात् । 'मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति' इति मन्त्रे आनन्दरूपस्याऽमृतस्य विभातो विज्ञानेन दर्शनविषयत्वश्रावणेनानन्दरूपत्वस्यात्मधर्मतायाः स्फुटत्वाच्चेति ॥ ४ ॥

भेदव्यपदेशात् ॥ ५ ॥ विशेषहेतुमाहेति उक्तस्य हेतोर्मन्त्रान्तरगतत्वेन प्राकरणिकत्वात् प्रकरणस्य ब्रह्मपरतासाधकत्वं, न तु विषयवाक्यस्य तथात्वसाधकत्वमित्यतस्तन्मन्त्रगतं हेतुमाहेत्यर्थः ॥ ५ ॥

रश्मिः ।

मतीयसिद्धान्तान्तरेस्ति अतः प्राणौतो जीवः । **भाष्ये । अत**दिति । ननु तच्छब्दार्थेऽननुगमो दोषः पूर्वं तच्छब्देन प्रकृतिरुच्यत इति चेन्न, प्रकृतिवाचकशब्दाभावादित्येवार्थो न त्वत्र जीववाचकशब्दाभावादित्यर्थः । परं तु हेतूपन्यासे यावानर्थः प्रसङ्गप्राप्तः ब्रह्मवादस्थापकास्तु बहवः सन्तीत्यादिभाष्यसिद्धः स गृह्यते अतोऽननुगमाभावात् । **नही**ति तथा च 'ज्ञानान्मुक्तिः' इति सांख्यप्रवचनसूत्रं आनन्दामृतरूपत्वे तस्य साधनं न निर्दिशेत् । **प्रकृते** । पृथक् च योगश्च पृथग्योगौ तयोः करणमित्याशयेन व्याचख्युः । **सूत्रे**ति । न ह्यानन्देत्यादिभाष्ये जीवस्यानन्दामृतत्वं नास्तीत्युक्ते शङ्कते किंचित् **न चानन्दे**ति । **विरोधा**दिति 'आनन्दरूपममृतं यद्विभाति' इति श्रुतौ भा दीप्तावदादिः परस्मैपदी अनिट्र आनन्दामृतत्वस्य नोपासनाकाले दीप्तिः पराभिध्यानेन परस्य भगवतो अभितो रमणेच्छारूपेण पौराणेन सदानन्दयोस्तिरोभावात् । तन्मतेपि 'मुक्तिरन्तरायध्वस्तेर्न परः' इति सूत्रादन्तरायेण न दीप्तिः । **तत्फले**ति उपासनाफलबोधकम् । **प्रकृती**ति 'प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यवैधर्म्यम्' इति सूत्रात् सत्त्वरजस्तमःसाम्यावस्था प्रकृतिरतो गुणानां सत्त्वरजस्तमसाम् । तर्हि स्वमत आनन्दः कस्य धर्म इत्याकाङ्क्षायामाहुः **मन** इति । मनोमयो वेदः प्राणा इन्द्रियाण्यपि ते शरीरं सूक्ष्मं तस्य नेता नायकः गोविन्द इत्यर्थः । 'भुङ्क्ते गुणान् षोडश षोडशात्मकः' । जीवपरमात्मपक्षे शंकरभाष्योक्तः प्राणं च तच्छरीरं च तस्यायं नेता स्थूलशरीराच्छरीरान्तरं प्रति । **अन्ने**ऽन्नपरिणामेति दिनमुपचीयमानेऽपचीयमाने च पिण्डरूपेन्ने हृदयं संनिधाय प्रतिष्ठितः 'ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति' इति गीतावाक्यात् । **मन्त्र** इति 'प्रयोगकरणीभूतशब्दत्वाभावेपि यत्राभियुक्तानां मन्त्र इति समाख्या स मन्त्रः' इतिलक्षणपुरस्कारेण मन्त्रपदप्रयोगः । **विभात** इति भातीति भान् शता षष्ठ्या ङस् विपूर्वः ॥ ४ ॥

भेदव्यपदेशात् ॥ ५ ॥ मन्त्रान्तरेति यस्मिन् द्यौरिति मन्त्रादन्ये मन्त्रा नानुमानसूत्रे उदाहृता मन्त्रान्तराणि तद्गतत्वेन । **तन्मन्त्रे**ति विषयवाक्यगतं मन्त्रपदं पूर्ववत् । तथा च प्रकरणं ब्राह्ममतच्छब्दात् प्रकृतिवाचकशब्दाभावात् । आत्मसर्वज्ञानन्दरूपादिशब्दानां ब्रह्मवादख्यापकानां

प्रकरणात् ॥ ६ ॥

जीवजडसाधारणनिराकरणाय विशेषहेतुमाह । प्रकरणं हीदं ब्रह्मणः । ब्रह्मा देवानामित्यारम्भे, स ब्रह्मविद्यामिति, तेषामेवैतां ब्रह्मविद्यामित्यन्ते च ब्रह्मविद्याया एव प्रकरणित्वमवगम्यते । 'ब्रह्मैवेदममृतं पुरस्तात्'इत्यादिभिर्विस्पष्टं ब्रह्मवादः प्रतीयते ॥ ६ ॥

भाष्यप्रकाशः ।

प्रकरणात् ॥ ६ ॥ जीवेत्यादि । ननु यद्यपि मन्त्रगतो हेतुर्जीवव्यावर्तकस्तथाप्येकशब्दस्य मुख्यार्थत्वाङ्गीकारे द्वितीयसिद्धावेवकारस्यासंकुचितान्ययोगव्यवच्छेदकताया उपगन्तुमशक्यत्वात्, तमपि जानथ, ततोऽपि मुख्यमात्मानं जानथेत्येवं वचनव्यक्तावस्य मंत्रस्य जडजीवसाधारणता स्यादतस्तदभावाय तथाहेत्यर्थः । शेषं स्फुटम् ॥ ६ ॥

रश्मिः ।

सत्त्वात् श्रीभागवतवत् । तथा चायमित्युपनयः तस्मात्तथेति निगमनम् । एवं यस्मिन्निति वाक्यं आत्मसर्वज्ञादिपदनिरपेक्षमन्वयानुभावकमत आकाङ्क्षाविरहादतच्छब्दादिति हेतुर्यस्मिन् द्यौरिति विषयवाक्ये ब्रह्मत्वसाधनेऽप्रमाणं त्वंपदस्य पदान्तरप्रयुक्तान्वयाननुभावकत्वरूपाकाङ्क्षाभावात् । अतो विषयवाक्ये ब्रह्मत्वसाधने तन्मन्त्रगतभेदव्यपदेशरूपं हेतुमाहेत्यर्थः । **भाष्ये ।** तमिति कर्म, यूयं जानीथेति कर्तारः, न प्राणभृज्जीवः संभवति भेदव्यपदेशात् ॥ ५ ॥

प्रकरणात् ॥ ६ ॥ **जीवेति** तमेवेत्येवकारेण कर्तृभूतजीवव्यावर्तकः कर्मकर्तृव्यपदेशरूपो हेतुः । **एकेति** श्रुतिघटकैकशब्दस्य 'एके मुख्यान्यकेवलाः' इति कोशात् । **द्वितीयेति** तन्मते मुख्यं तमित्यन्वयो नास्ति द्युभ्वाद्यायतनस्य भारवाहकत्वात् यस्मिन् द्यौरिति पूर्वार्धात् । पुरुषस्यासङ्गत्वात् । अतस्तं प्रकृतितत्त्वपदार्थं ततो मुख्यं जीवं चेतनत्वात् अतो जीवस्यापि जानीथेत्यनेनान्वयाज्जीवयोगव्यवच्छेदकताया वक्तुमशक्यत्वात् तत्रापि संकुचिता अज्ञेया जीवाः तद्रूपान्येषां योगस्य व्यवच्छेदो जानीथेत्यनेनान्वयाभावात् वक्तुं शक्योऽतोऽसंकुचितेत्यन्यविशेषणम् । **जडेति** जडा प्रकृतिः । एतेन भाष्ये जडजीवसाधारणेति भावप्रधानः । **तथेति** विशेषहेतुत्वेन हेतुम् । **शेषमिति ।** **भाष्ये ।** तेषामेवैतामित्यादि अत्र 'प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' इति प्रथममुण्डकपरिसमाप्तिपठितापि श्रुतिरस्ति सापि मध्ये ब्रह्मविद्याबोधकत्वेन योज्या । विद्या ययामृतमश्नुते सा विद्या 'विद्ययामृतमश्नुते' इति श्रुतेः । **प्रकरणित्वमिति** सामान्ये नपुंसकं दृढभक्तिरितिवत् । ब्रह्मविद्याप्रकरणि किमत्र प्रकरणीत्याकाङ्क्षायां लिङ्गविशेषानालिङ्गितायां ब्रह्मविद्येति योजनात् । **इत्यादिभिरिति** बहुवचनमेकतिङ् वाक्यमिति वाक्यानां बहुत्वं तथा हि ब्रह्मैवेदममृतं पुरस्ताद्भवति पश्चाद्ब्रह्म भवति दक्षिणतो ब्रह्म भवति इति अत्र ब्रह्मैव विश्वमित्यनुक्त्वा वाक्यरचनार्थं सर्वात्मभावस्य सूचकानां पुरस्तादित्यादिपदानां मुक्तिर्ज्ञापयति ब्रह्मवादे वक्ष्यमाणे पुरुषस्यापि निरूपणात् कदाचिदनुग्रहेण सर्वात्मभावं दद्यात् तदा पुरुषं ब्रह्मस्थले संनिवेश्य सर्वात्मभावोपि विद्येति वक्ष्यते च 'विद्यैव तु निर्धारणात्' इति सूत्रे सर्वात्मभावो विद्येति । **ब्रह्मवाद** इति । अयमर्थः । ब्रह्माथर्वनाम्ने स्वज्येष्ठपुत्राय ब्रह्मविद्यामुक्तवान् ब्रह्मा देवानामित्यादिश्रुत्या । तदर्थं ऋग्वेदादिरूपापरविद्यामुक्त्वा 'अथ परा यया तदक्षरमधिगम्यते' इति परां प्रतिज्ञाय 'यत्तदद्रेश्यमग्राह्य'मित्युपक्रम्य 'परिपश्यन्ति धीराः' इत्यनेन

रश्मिः।

तद्दर्शनमुक्त्वाऽत्र साधनानि वक्ष्यन्तेऽदृश्यत्वादिगुणकाधिकरणोक्तब्रह्मरूपमुक्तं ततश्च 'यथोर्णनाभिः सृजते गृह्णते च'इत्यनया सृष्टिमुक्त्वा तज्ज्ञानार्थं 'तपसा चीयते ब्रह्म'इत्यादिना तप उक्त्वा तस्य 'यस्य ज्ञानमयं तपः' इत्यनया स्वरूपमुक्त्वात्र तपोरूपब्रह्मणा ब्रह्म चीयते उच्छूनं क्रियते ततः परिपश्यन्ति धीरा इत्यत्र साधनं भक्तिज्ञानकर्मसु 'मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि, तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके' इत्यनया कर्माण्युक्त्वा यस्याग्निहोत्रमित्यादिना दर्शपूर्णमासचातुर्मास्याग्रायणादिरहितमग्निहोत्रं लोकान् हिनस्तीत्यतस्तत्सहितं कर्तव्यमित्युक्त्वा तदनन्तरमेतच्छ्रेय इत्यादिना पूर्वोक्तकर्ममात्रश्रेयो वदतां पण्डितंमन्यत्वमूढत्वजंघन्यमानत्वैर्विनिन्द्य कर्मादिभिर्लोकात्प्रच्यवमुक्त्वा तपःश्रद्धे इत्यादिना शान्तानां विदुषां भैक्षचर्यां चरतामृतपुरुषप्राप्तिमुक्त्वा तदर्थं वैराग्येण तज्ज्ञानार्थं गुरुसमीपगमनमुक्त्वा श्रोत्रियं ब्रह्मनिष्ठमित्यनेन गुरुचिह्नमुक्त्वा 'प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' इत्युक्तम्। द्वितीयमुण्डके पुरुषाक्षरयोर्निरूपणार्थं 'यथा सुदीप्तात्पावकात् विस्फुलिङ्गाः सहस्रशः' इत्यादिना पुनः सृष्टिमुक्त्वा—

'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः'॥

इति पुरुषोत्तममक्षरपरत्वेन निरुच्य 'एतस्माज्जायते प्राणः' इत्यादिना ततः सृष्टिमुक्त्वा'अग्निर्मूर्धा'इत्यादिना तस्य विश्वकायत्वं तस्य साकारब्रह्मत्वं वेदादिस्रष्टृत्वं चोक्त्वा तत 'एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य'इत्यनया तस्य गुहानिहितस्य ज्ञानेनाविद्यालिङ्गदेहभेदमुक्त्वाऽऽविःसंनिहितमित्यादिना विरुद्धधर्माश्रयत्वमुक्त्वा शरधनुर्न्यायं चोक्त्वाऽऽदिना मनोमयस्य हृदये आविर्भूतेऽक्षरात्मके ब्रह्मपुरे प्रतिष्ठामुक्त्वा आनन्दरूपममृतमित्यनया कमनीयत्वमुक्तवोच्यते 'ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण, अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्'इति प्रपञ्चब्रह्मात्मकत्वमित्येष ब्रह्मवाद इति। **प्रतीयत** इति तथा च शंकराचार्यस्य भाष्यं द्युभ्वाद्यायतनसूत्रस्थं तदसंगतमिति सूचितम्। मायावादप्रतिपादकम्। तथा हि सूत्रं व्याख्यायोच्यते तदुक्तं भवति न कार्यप्रपञ्चविशिष्टो विचित्र आत्मा विज्ञेयः किं तर्ह्यविद्यया कृतं विद्यया प्रविलापयन्तस्तमेवैकमायतनभूतमात्मानं जानथैकरसमिति यथा यस्मिन्नास्ते देवदत्तः तदानय इत्युक्त आसनमेवानयति न देवदत्तं तद्वदायतनभूतस्यैकरसस्यात्मनो विज्ञेयत्वमुपदिश्यते। विकारानृताभिसंधस्य चापवादः श्रूयते 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति नैतत् तथा हि यस्मिन् द्यौरित्यस्यामोतवचनात् 'ओतप्रोतमिदं विश्वं तन्तुष्वङ्ग यथा पटः' इत्यत्रोक्तस्य समवायित्वस्य स्फोरणात् भक्तिमार्गे सांख्योक्तसत्कार्यवादस्य सत्त्वात् यस्मिन् पटस्तदानय इत्युक्ते तन्तूनां पटरूपाणामेवानयनं न तु तन्तुमात्रस्य पार्थक्याभावात् सोयं दृष्टान्तः। एकरसत्वं तु 'सर्वरसः' इति श्रुतेः सर्वरसस्यैकदेशिसिद्धं शान्तरसमनुरुणद्धि इति अत एव पुरुषविधब्राह्मणे पुरुषविध आत्मोच्यते 'आत्मैवेदमग्र आसीत् पुरुषविध' इति श्रुतेः रसत्वेनैकरसं साकारं ब्रह्म प्रतिपादितमेव नानेव पश्यतीत्यत्र नानापदं नानेकवाचकं किं तूभयवाचकं तदुभयं तु शारीरब्राह्मणे अप्रमेयादिकं सर्ववशित्वादिकं च सगुणनिर्गुणरूपमुभयं तदिव पश्यति किं तु विद्वन्मण्डनोक्तदिशैकमेवेति श्रुतिपदार्थः। इतः पूर्वं 'मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन' इत्यस्यां नानापदं करणवाचकं 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः' 'ते निचिक्युर्ब्रह्म पुराणमग्र्यम्' इति श्रुतौ चक्षुरादिकरणाधिदैविकोक्तेः तथा च विश्वः।

रश्मिः ।

'नाना विनार्थे विभवे नानानेकोभयार्थयोः ।
स्थाने तु करणार्थे स्याद्युक्तसादृश्ययोरपि' ॥ इति ।

अविद्याकृतप्रविलापनं तु ज्ञानपक्षेस्त्येव । योर्थः स भाष्येग्रे स्पष्टीभविष्यतीति 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इत्यत्र प्रज्ञा भावना न प्रज्ञा निश्चयज्ञानमिति भाष्ये वक्ष्यन्ति । रामानुजमाध्वनिम्बार्कभास्कराचार्यादिभिः प्रपञ्चो नित्योऽभ्युपगम्यते इति न विरोधः । देशकालौ प्रकरणं ताविह ब्रह्मप्रतिपादनस्य भवत इति ब्रह्मणो विद्यायाः प्रकरणं तस्मात् ! किं च उभयाकाङ्क्षा प्रकरणं तदिह संघट्यते 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद् यैस्तु चीर्णम्' इति श्रुतेः यस्मिन्नित्यादिश्रुतेश्च लिङ्गादिकल्पनामन्तरेणाङ्गत्वबोधकः शब्दः श्रुतिर्नास्ति तेषामिति श्रुतौ वाक्यद्वयं परस्यां पूर्वार्धे वाक्यमुत्तरार्धे वाक्यत्रयमतस्तेषामिति श्रुतिवाक्यस्य पूर्वोत्तरार्धयोश्च दध्ना जुहोतीतिवत् एकवाक्यत्वाभावात् । अत्र दध्नेति तृतीयाश्रुत्या दध्नो होमाङ्गत्वबोधः । तदत्र वाक्यद्वये वाक्यचतुष्टये च वर्तते तेन वाक्यद्वयेन वा पूर्वोत्तरार्धयोः । तस्मिंस्तयोर्लिङ्गमपि न । लिङ्गं द्विविधमर्थगतं शब्दगतं च तत्रार्थगतं सामर्थ्यं स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यतीतिश्रुतिवत् तृतीयाभावान्नास्ति । शब्दगतं सामर्थ्यं बर्हिर्देवसदनं दामीत्यत्र अत्रास्य मन्त्रस्य बर्हिर्लवणसामर्थ्यं दामीति शब्दादालोच्यानेन मन्त्रेण लवनं विदध्यादिति श्रुतिं कल्पयित्वा लवनाङ्गस्य बोधनात् तदपि वाक्यद्वये वाक्यचतुष्टये च । वाक्यं नाम पदानां वाक्यानां वैकवाक्यता तत्र त्रयो वेदा अजायन्त इत्येतामर्थवादवाक्यरूपामुपक्रम्य उच्चैः ऋचा क्रियते इत्यादिविधिवाक्यरूपाभिरुच्चैष्ट्वादिधर्माणां ऋगादिमन्त्राणामङ्गत्वं बोध्यते तद्वत्प्रकृते यथासंख्याभावात् नास्ति । वाक्यानामेकवाक्यता स्वार्थबोधे समाप्तानां वाक्यानां पुनराकाङ्क्षावशेनैकवाक्यता यथा आहवनीये जुहोति, गार्हपत्ये हवींषि श्रपयति, दक्षिणाग्नावन्वाहार्यं पचति, अत्रानारभ्याधीतानामेषां वाक्यानां 'स्वर्गकामो यजेत' इत्यादिक्रतुविधिवाक्यानां च वाक्यैकवाक्यतया आहिताग्नेरेव कर्तुः क्रत्वङ्गत्वं लिङ्गश्रुतिकल्पनेन बोध्यते । एकवाक्यतया सामर्थ्यमालोच्याहिताग्निं कर्तारं क्रत्वङ्गं कुर्यादित्येव तद्वत्प्रकृतेपि वाक्यद्वयस्य वाक्यचतुष्टयस्य च पुरुषाक्षरौ निरूप्य एतद्यो वेद निहितं गुहायामिति वेदनवाक्यस्य चैकवाक्यतया पञ्चाग्निविद्यासाधितदेहस्य कर्तुर्ज्ञानाङ्गत्वं लिङ्गश्रुतिकल्पनेन बोध्यते । एकवाक्यतया सामर्थ्यमालोच्य पञ्चाग्निविद्यासाधितदेहं कर्तारं ज्ञानाङ्गं कुर्यादिति । परं तु वाक्यद्वयस्य विषये पूर्वोत्तरार्धविषये च न किमप्यागतम् । अत उभयोरुपकार्योपकारकयोराकाङ्क्षा साकाङ्क्षा धर्मसंनिधौ भावनायाः कथमित्याकाङ्क्षा । प्रकरणं भाट्टभास्करोक्तम् । तद् द्विविधं महाप्रकरणमवान्तरप्रकरणं च, तत्राद्यं यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'इति वाक्ये स्वर्गकर्मिकाया दर्शपूर्णमासयागकरणिकाया भावनायाः कथमित्याकाङ्क्षास्ति । संनिहितेष्वनिर्दिष्टफलेषु 'समिधो यजति'इत्यादिवाक्येषु समिद्यागेनेष्टं भावयेत् किमित्यस्ति फलविशेषाकाङ्क्षा फलविशेषाकाङ्क्षोपकार्याकाङ्क्षा कथमित्याकाङ्क्षोपकार्याकाङ्क्षा । एवं चाकाङ्क्षया समिदादिवाक्येन दर्शपूर्णमासवाक्यैकवाक्यतां कल्पयित्वा समिदाद्यङ्गानां प्रधानोपकारकत्वसामर्थ्यं कल्पयित्वा एतैः प्रधानोपकारं कुर्यादिति श्रुतिं कल्पयित्वा समिदादीनां दर्शपूर्णमासयागाङ्गत्वं ज्ञायते इत्थं च दर्शपूर्णमासाभ्यां स्वर्गं भावयेत् कथमित्याकाङ्क्षायां प्रयाजादिभिरदृष्टोपकारं कृत्वाऽवघातादिभिः द्रव्यदेवताभ्यां च यागं संपाद्येत्यन्वयः प्रयाजाद्यारादुपकारकं यागजादृष्टं धर्मः अवघातादि संनिपत्योपकारकं द्रव्यदेवते संनिपत्योपकारिकाया 'व्रीहीनवहन्ती'त्यादेस्तदर्थत्वेनोपात्ते

रश्मिः ।

तद्वत्प्रकृते 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्'इति मुण्डकसमाप्तिवाक्ये तेषामन्तेवासिनां संबन्धः प्रवचनम्। 'प्रवचनꣳसंधान'मिति श्रुतेः तेन संबन्धेनाचीर्णशिरोव्रतव्यवच्छिन्नान्तेवासिसंबद्धाभिन्नब्रह्मविद्याकर्मिका व्यक्तवागनुकूला भावनाज्ञाविषयास्तस्याः कथमित्याकाङ्क्षास्ति संनिहितेषु यस्मिन् द्यौरित्यादिषु निर्दिष्टफलेषु जानथ आत्मानमित्यत्र आत्मविषयकं ज्ञानं कुर्यात् किमित्यस्ति फलविशेषस्योपकार्यस्याकाङ्क्षा । एवं चाकाङ्क्षया यस्मिन् द्यौरित्यादिवाक्येन तेषामेवैतामिति वाक्यैकवाक्यतां कल्पयित्वा यस्मिन् द्यौरित्याद्युक्ताङ्गानां ज्ञानरूपाणां प्रधानोपकारकत्वसामर्थ्यं च कल्पयित्वा एतैः प्रधानोपकारं कुर्यादिति श्रुतिं प्रकल्प्य यस्मिन् द्यौरित्याद्युक्तज्ञानानां ब्रह्मविद्याङ्गत्वं ज्ञायते। इत्थं च ब्रह्मविद्याकर्मकं वदनं कुर्यात् कथमित्याकाङ्क्षायां यस्मिन्नित्याद्युक्तज्ञानैर्ब्रह्मविद्योपकारं कृत्वा भक्तेच्छादिभिः संनिपत्योपकारैः द्रव्यदेवताभ्यां च ब्रह्मविद्यां संपादयेत्यन्वयः। तथा च प्रकरणाद्भावनाऽऽरादुपकारिका गृहीतेति राणकमतम्। मित्रमते तु सर्वापि क्रिया प्रकरणेन गृह्यते संनिपत्योपकारिकायाः श्रुतिलिङ्गवाक्यैः द्रव्याद्यर्थत्वेनावगताया अपि द्रव्यादिस्वरूपे वैयर्थ्यात् प्रकरणेन क्रत्वङ्गता ज्ञायते इति। तत्प्रकारो दर्शित एव इत्थं चेत्यादिना । एवं च प्रकृतिनिरूपणं न प्रकरणगृहीतं जीवनिरूपणमपि न प्रकरणगृहीतम्। [अतः परं तृतीयमुण्डकमपि ब्रह्मविद्यान्तर्गतत्वात् कल्प्यते] पूर्वार्धोत्तरार्धयोरङ्गाङ्गिभावग्राहकमवान्तरप्रकरणं तल्लक्षणमङ्गभावनायाः कथमित्याकाङ्क्षा तद्वाचनिकानां प्रयाजादीनां प्रकृते ज्ञानरूपाङ्गानां च ग्राहकम्। किं च तत्संदंशपठितानां च ग्राहकम्। संदंशलक्षणं मीमांसार्थप्रदीपे 'संदंशो नाम एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तराले विहितत्वम्' । यथा तद्धि समानयते उपभृत इत्यादि, यो वैश्यजानां मिथुनं वेदेत्यादि च । अत्र तद्धीत्यादिना प्रयाजानुवादेन किंचिदङ्गं विधाय पश्चादपि प्रयाजानुवादेन किंचिदङ्गं विधीयते अतः प्रयाजाङ्गमध्ये पठितमभिक्रमणं प्रयाजाङ्गं भवतीति सिद्धम्। एवं प्रकृतेपि। एवं चोत्तरार्धे जानथ आत्मानमित्यस्य कथमित्याकाङ्क्षायां पूर्वार्धे यस्मिन् द्यौः अन्तरिक्षं सह प्राणैः मन ओतं भवति तमात्मानं जानथेत्यन्वयः प्रकरणेन। अतः परं तृतीयमुण्डकमपि ब्रह्मविद्यांतर्गतत्वात्कल्प्यते विजयते च। तत्र प्रथममुण्डके कर्ममार्गमुक्त्वा विनिन्द्य च ज्ञानमार्ग उक्तः। द्वितीयमुण्डके क्षराक्षरपुरुषोत्तमनिरूपणं कृतम्। तृतीयमुण्डके जीवशोकनिराकरणाय भक्तिमार्ग उच्यते द्वा सुपर्णेति। गुहां प्रविष्टावात्मानावित्यधिकरण उद्दिष्टा 'ज्ञानी चेद्भजते कृष्णम्' 'तस्माज्ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इति गीतातो ज्ञानमार्ग उच्यते 'यदा पश्यः पश्यते' इति। इयं 'हानौ तूपायनशब्दशेषत्वात्'इति सूत्रे विवृता। अतिवादी अतीत्य सर्वानन्यान् वदितुं शीलमस्य यतः यत्सर्वं तदात्मैवेति दृष्टम्। अधुना सत्यादीनि ज्ञानसहकारीणि साधनानि विधीयन्ते सत्येनेति। ओतमासमन्ताच्छब्दितं उङ् शब्दे भ्वादिरात्मनेपदी अनिट्। क्रममुक्तिमाह यं यमिति। मुक्तावतिवर्तिन आह कामानिति भोगान्। सद्योमुक्तिमाह पर्याप्तेति। इहेति हृदि बहिर्वा प्रकटे ब्रह्मणि। भक्तिमार्गमाह नायमिति। श्रुत्यर्थो 'विद्यैव तु निर्धारणात्' इति सूत्रेस्ति बलं भक्तिः भगवद्वशीकरणसामर्थ्यरूपत्वात्। प्रमादादि स्वरूपमपि 'सोध्यक्षे तदुपगमादिभ्यः' इति सूत्रभाष्ये। भक्तिमार्गस्त्वेकादशस्कन्धैकादशाध्यायोक्तः 'यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः' इत्येकादशाध्यायोक्तवाक्यार्धस्य सेवाप्रकरणे लिखनात्। एकोनत्रिंशाध्यायोक्तश्च 'लघुस्वमार्गवक्ता च' इति पुरुषोत्तमसहस्रनाम्नो ग्रन्थात्।

स्थित्यदनाभ्यां च ॥ ७ ॥

सर्वस्याप्यन्यथाभावशङ्कया विशेषहेतुमाह । द्वा सुपर्णेति वाक्ये, अनश्नन्नन्यो अभिचाकशीतीति केवलस्थितिः परमात्मनः, कर्मफलभोगो जीवस्य । अतः स्थित्यदनाभ्यां जीवपरमात्मानावेव मध्ये परामृष्टौ । न हि सांख्यमतमेतादृशं भवति । अतोऽस्य वैशेषिकोपपत्तेर्विद्यमानत्वात् प्रातिलोम्येन सर्वा उपपत्तयो दृढा इति द्युभ्वाद्यायतनं भगवानेवेति सिद्धम् । यद्यपि पैङ्ग्युपनिषदि, द्वा सुपर्णेत्यस्यान्यथा व्याख्यानं प्रतिभाति, तदृचा प्रदेशविशेषेऽन्यथा व्याख्यानं न दोषाय । तस्मात् सत्त्वक्षेत्रज्ञौ जीवब्रह्माणौ व्याख्येयौ॥ ७ ॥

इति प्रथमाध्याये तृतीयपादे प्रथमं द्युभ्वाद्यधिकरणम् ॥ १ ॥

भाष्यप्रकाशः ।

स्थित्यदनाभ्यां च ॥ ७ ॥ सर्वस्येत्यादि ब्रह्मपदस्य जीवसाधारण्यात् सर्वस्य प्रकरणस्य जीवपरत्वशङ्कया तद्गतं तमाहेत्यर्थः । प्रातिलोम्येनेति स्थित्यदनयोः प्रकरणबलाधायकत्वं तस्य तत्पूर्वहेतुबलाधायकत्वमित्येवं वैपरीत्येन । ननु न दृढाः । द्वासुपर्णेति मंत्रस्य पैङ्गिरहस्यब्राह्मणे सत्त्वक्षेत्रज्ञपरत्वेन व्याख्यानादित्यत आहुः यद्यपीत्यादि । जीवब्रह्माणाविति व्यष्टिसमष्टिजीवौ । अमुक्तमुक्तजीवौ वा । इदं यथा तथा मया गुहां प्रविष्टावित्यधिकरणस्थे, विशेषणाच्चेति सूत्रे सम्यगुपपादितमिति नात्रोच्यते । एवमत्राधिकरणे, 'यस्यान्तःस्थानि भूतानि' इति विचारितम् ॥ ७ ॥ इति प्रथमं द्युभ्वाद्यधिकरणम् ॥ १ ॥

रश्मिः ।

'कृष्णवाक्यानुसारेण शास्त्रार्थं ये वदन्ति हि ।
ते हि भागवताः प्रोक्ताः शुद्धास्ते ब्रह्मवादिनः' ॥

इति निबन्धाच्च । ज्ञानिनां फलमाह संप्राप्येति । शाब्दज्ञानवतां फलमाह वेदान्तेति । मानसीसेवाफलमाह यथा नद्य इति । परात्परमिति फलम् ॥ ६ ॥

स्थित्यदनाभ्यां च ॥ ७ ॥ जीवेति अयमात्मा ब्रह्मेति श्रुतेः । तद्गतमिति मुण्डके तृतीयमुण्डकप्रारम्भगतम् । भाष्ये । कर्मेति 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति श्रुतेः । नहीति 'मुक्तिरन्तरायध्वस्तेर्न परः' इत्यादिवदतां सांख्यानां जीवव्यापकत्वात् समानवृक्षपरिष्वङ्गरूपम् । उपाधेस्त्वप्रयोजनकत्वं तददर्शिनित्वेन श्रुतीनामुपाधिपुरस्कारेणानिरूपणात् । अस्येति सिद्धान्तस्य । प्रकृते । तस्येति प्रकरणस्य भेदव्यपदेशरूपहेतुबलाधायकत्वम् । न च स्थित्यदनाभ्यामिति हेतुर्भेदव्यपदेशहेतौ जीवनिराससामर्थ्यमादधाति भेदव्यपदेशश्च प्रकरणाख्ये हेतौ सामर्थ्यमादधातीति शङ्क्यम् । एकेनैव भेदे व्यपदिष्टे उभयोः सूत्रयोरेकतरस्य वैयर्थ्यापातात् । आनुलोम्ये तु ब्रह्मजीवविभागाभावाद्भेदव्यपदेशहेतुर्न दृढः सत्प्रतिपक्ष इत्यर्थः । प्राणभृद्भेदस्यावास्तविकत्वेन भेदव्यपदेशाभावात् । द्वा सुपर्णेति स्थित्यदनरूपहेतुबोधकस्य मन्त्रस्य । सत्त्वेति तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वमनश्नन्नन्योऽभिचाकशीति ज्ञस्तावेतौ सत्त्वक्षेत्रज्ञाविति व्याख्यानात् । सत्त्वं स्वप्नद्रष्टृ ज्ञः शारीरः । तथा च द्विवचनासंगतिरित्याशयवन्त आहुः जीवेति । व्यष्टीति । समष्टिर्वैराजः 'स च पुरुषो भवत्येव स स्वप्नद्रष्टा 'कामं कामं पुरुषो निर्मिमाणः' इति श्रुतेः । एवं मुक्तजीवोपि पुरुषः स सत्त्वं 'अल्पाच्तरं पूर्वम्' इति सूत्रेण व्यष्टिपदस्य पूर्वनिपातः 'अजाद्यदन्तम्' इति सूत्रेणामुक्तपदस्य पूर्वनिपातः । विचारितमिति । आधाररूपप्रतिपादकत्वेन पादस्य ॥ ७ ॥ इति प्रथमाधिकरणम् ॥ १ ॥

भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥ (१।३।२)

इदं श्रूयते। 'यो वै भूमा तत् सुखम्' इति। सुखलक्षणमुक्त्वा भूम्नो लक्षणमाह। 'यत्र नान्यत् पश्यति नान्यच्छृणोति। नान्यद्विजानाति स भूमा' इति। तत्र संशयः। भूमा बाहुल्यमाहोस्विद् ब्रह्मेति। तत्र प्रपाठकारम्भे, ततस्त ऊर्ध्वं वक्ष्यामीति प्रतिज्ञातत्वाद् वेदादीनां नामत्वमुक्त्वा ततो भूयस्त्वं वागादीनां प्राणपर्यन्तानामुक्त्वा मुख्यप्राणविद्याया अवरब्रह्मविद्यात्वख्यापनायार्धप्रपाठकं समाप्य ततोऽपि विज्ञानादीनामन्तरङ्गाणां सुखान्तानां भूयस्त्वमुक्त्वा सुखस्य फलत्वात् तस्यैव भूयस्त्वं वदति। यद्यपि, तरति शोकमा-

---

भाष्यप्रकाशः।

भूमा संप्रसादादध्युपदेशात्॥ ८ ॥ विषयवाक्यमुपन्यस्यन्ति इदं श्रूयत इत्यादि। श्रूयत इति छान्दोग्यनवमप्रपाठके सनत्कुमारनारदसंवादे श्रूयते। अत्र कः संशयः, कुतश्चेत्यत आहुः तत्रेत्यादि, वदतीत्यन्तम्। समाप्येति अपह्नवनिवारणश्रावणेन समाप्य। तथा च भूयस्त्वमुपक्रम्यान्ते, यत्र नान्यदित्यादिना नित्यसुखभूयस्त्वमेवोपसंहरति। तस्माद् बाहुल्यं वाक्यार्थत्वेन वक्तुं शक्यते। मध्ये च मुख्यप्राणविद्याया अवरत्वबोधनं ब्रह्मलिङ्गम्। बृहदारण्यके व्रतमीमांसायां ब्रह्मोपासकस्य जीवस्यापि मुख्यप्राणव्रतधारणस्यैवाभिप्रेततया जीवापेक्षया प्राणस्योत्कर्षे बोधितेऽप्येष तु वा अतिवदति यः सत्येनातिवदतीत्यनेन सत्यापेक्षया निकर्षबोधनात्। अतो ब्रह्मापि तथा वाक्यार्थत्वेन वक्तुं शक्यते। अत एवं संशय इत्यर्थः। पूर्वपक्षमाहुः

रश्मिः।

भूमा संप्रसादादध्युपदेशात्॥ ८ ॥ कुतश्चेति कस्माद्धेतोः किं प्राणो भूमा स्यादाहोस्वित् परमात्मेति शंकरभाष्योक्तसंशयानङ्गीकार इत्यतस्तत्रास्वरसमाहुरित्यर्थः। तत्रेत्यादि। भाष्ये। श्रुत्यर्थस्तु 'ततो यदधीतं तेनोपसर' नानन्तरमिति नारदं प्रति सनत्कुमारोक्तिः वक्ष्याम्यहं सनत्कुमारः। तत वेदादितः। प्रकृते। अपह्नवेति 'तं चेद्ब्रूयुरतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत' इति श्रुत्या हेतुना। अतिवादी नामाद्याशान्तं जगदतीत्य वदनशीलः प्राण आशादिभ्यो भूयानिति वदनशीलः विद्यात्वान्नापह्नवः खलत्वापादकत्वात् 'सरस्वती ज्ञानखले यथा सती' इति दशमस्कन्धात्। विद्यासमाप्त्यर्धप्रपाठकसमाप्तिः। यथैकं भगवतो रूपं निरूप्य शाखा समाप्नोति। तस्मादिति उपसंहारस्य निर्णायकत्वात्। अवरत्वेति विद्यासमाप्तेरवरत्ववाचकत्वं व्यञ्जनया। अत्र हेतुः बृहदिति। सत्यान्नब्राह्मणे सत्येन सर्वातिक्रान्तभूमाख्यपरमार्थसत्यविज्ञानवत्तयाऽतिवदति प्राणवेत्ता तु नामाद्यपेक्षयैवातिवादी न तु निरङ्कुशं सर्वापेक्षयाऽतिवादी। अत इति ब्रह्मलिङ्गसत्त्वात्। अतोऽर्धप्रपाठकसमाप्तविद्याविषयप्राणस्य विद्यान्तरे विज्ञानादिविषयेऽसंचारोऽतो बाहुल्यं प्रथमा कोटिर्न प्राणः। अस्मिन् पक्षे प्राणविद्यां समाप्य 'यदा वै विजानाति' इत्युक्तश्रुतेर्विज्ञानं वा व ध्यानाद्भूय इति श्रुत्युक्तभूयस्त्वविशिष्टं विज्ञानं करोतीत्यर्थः। प्राणो वा आशाया भूयानित्युक्तप्राणविद्याया अवरप्राणविद्यात्वापत्तिः। न चास्त्वेवमिति वाच्यम्। प्राणस्यैतस्य यथा वा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वं समर्पितमिति ब्रह्मलिङ्गकत्वात्। 'प्राणो हि पिता प्राणो माता प्राण आचार्यः' इति श्रावणाच्च 'पिताहमस्य जगतो माता' इति 'आचार्यं मां विजानीयात्' इति च स्मरणात्। अत

त्मविदिति नारदप्रश्नाद् भूम्नो ब्रह्मत्वं प्रकरणाद् वक्तुं शक्यते, तथापि तस्यैवाथात आत्मादेश इत्यहंकारादेशवदात्मादेशोऽप्यस्ति । तेनाब्रह्मत्वेऽपि प्रश्नसिद्धिः । तस्य सुखबाहुल्यस्य स्वे महिम्नि प्रतिष्ठितत्वं सर्वतः पूर्णविषयलाभेऽपि भवति, सुषुप्तावपीति तयोरन्यतरद् ग्राह्यम् । तत्राप्यन्तरङ्गत्वात् सुषुप्तिरेवात्र

भाष्यप्रकाशः ।

यद्यपीत्यादि । तस्यैवेति भूम्न एव । अयमर्थः । यद्यप्यत्र भूयस्त्वं प्रकृतं तथाप्यस्य वाक्यस्यात्मज्ञानार्थकनारदप्रश्नेन प्रवृत्तत्वादात्मैव प्रकरणी । स एवोपसंहारेऽपि भूमत्वेन निश्चायितोऽमृतत्वेन विशेषितश्चात उपक्रमोपसंहाररूपात् प्रकरणाद् भूम्नो ब्रह्मत्वं वक्तुं शक्यते । तथाप्युपान्ते अथातोऽहंकारादेश इतिवदथात आत्मादेश इत्यादिनोक्त आत्मादेशोऽप्यस्तीत्यहंकारादेशे सर्वत्र विद्यमानत्वेन सर्वत्वेन च भूयस्तयोक्तस्याप्यहंकारस्य तदुपहितस्यात्मनो वा यथा न ब्रह्मत्वं तथा आत्मादेशे तथोक्तस्य केवलस्यात्मनोऽपि न ब्रह्मत्वम् । आत्मा चात्र सुखस्य स्वरूपमेव । पूर्वाधिकरणेऽनारोपितानागन्तुकस्य वस्तुस्वरूपस्यैवात्मपदवाच्यताया उपगमात् । न च शोकतरणरूपफलाभावात् प्रश्नापूर्तिः शङ्क्या । विविक्तजीवात्मज्ञानस्येव तादृशसुखस्वरूपज्ञानस्याप्यात्मज्ञानत्वेनात्मवित्तायामुक्तफलोपपत्त्या पूर्तिसिद्धेः । ब्रह्मण एवात्मत्वादिना ज्ञानस्य विवक्षितत्वे गमकानुपलम्भात् । नच भूम्नः स्वमहिमप्रतिष्ठितत्वश्रावणात् तस्य च ब्रह्मासाधारणत्वाद् ब्रह्मत्वं शङ्क्यम् । तस्यार्थस्यात्राभावात् । आत्मैवाधस्तादित्यादिना तस्य सर्वत्र व्याप्तेरुक्तत्वात् सर्वतः पूर्णविषयलाभे सुखपूर्णतयाऽनाकाङ्क्षायां तस्य पूर्णत्वानुसंधाने स्वप्रतिष्ठतायाः संभवदुक्तिकत्वात् ।

रश्मिः ।

एतदग्रेऽपह्नवनिवारणेन न प्राणविद्यासमाप्तिरपि तु ब्रह्मरूपप्राणविद्यातः पूर्वं संकल्पविद्या 'संकल्पो वाव मनसो भूयान्' इत्याद्युक्त्वा 'तत्रान्नस्य संक्लृप्त्यै प्राणं संकल्प्यते प्राणानां संक्लृप्त्यै मन्त्राः संकल्प्यन्ते' इति श्रुत्या संकल्पात्मकप्राणा सन्त्यतोवरप्राणविद्यासमाप्तिः । अत्र टीकायां यदिदं फलावसानं जगत् स एष प्रत्यक्षः संकल्प एवेति जगदन्तर्गताः प्राणा इति । अतोत्र सभाष्येत्यादिभाष्यप्रकाशे अपह्नवनिवारणश्रावणेनासमाप्येति पाठः किं तु संकल्पो वा व मनसो भूयानित्याद्युक्त्वावरप्राणविद्यातो यः संकल्पं ब्रह्मेत्युपास्ते इत्यनेन समाप्य मध्ये चेत्यस्य मध्ये संकल्पो वा व मनसो भूयान् इत्याद्युक्तश्रुत्या मुख्यप्राणेत्यादिः । अन्यत् समानम् । श्रुत्यर्थस्तु अन्नस्य संक्लृप्त्या संकल्पात् सामर्थ्यात् प्राणः संकल्प्यते सामर्थ्यं करोति समर्थो भवतीति यावत् । एवं प्राणाः संकल्प्यन्ते समर्था भवन्तीति । शब्दविद्यावान्तरप्राणविद्याऽर्थविद्या ब्रह्मविद्या । एवं चान्तरङ्गत्वमर्थत्वं बहिरङ्गत्वं सोपस्करशब्दत्वमुपस्करत्वं मन आदीनाम् । 'मनः पूर्वरूपं वागुत्तररूपम्' इत्यादिश्रुतिभ्यः पूर्वरूपत्वादिमत्त्वं तट्टीकायां स्पष्टम् । अमृतत्वेनेति 'यो वै भूमा तदमृतम्' इति श्रुतेः । उपक्रमेति उपक्रमोपसंहारावालोच्य देशकालरूपात्प्रकरणात् । उपान्त इति अन्तस्य समीपमुपान्तम्, तत्र । 'तृतीयासप्तम्योर्बहुलम्' इति सूत्रेण सप्तम्या बहुलमम्भावः । केवलस्येति अनुपहितस्याहंकारेण कदाचिदुपहितस्य । यद्वा आत्मैवात्मोपाधिरहंकारवत् । आत्मादेश इत्यत्रात्मनः कर्मत्वमुपाधिर्वा । उपगमेति जानथ आत्मानमित्यत्र । तेनाब्रह्मेति भाष्यं विवरामासुः न च शोकेत्यादि । उक्तेति शोकतरणरूप-

भूमत्वेनोच्यते। तेन सुखबाहुल्यम्। सुषुप्तिरूपमेव भूमेत्येवं प्राप्ते उच्यते। भूमा भगवानेव। कुतः। संप्रसादादध्युपदेशात्। संप्रसादः सुषुप्तिः। तस्मादधि आधिक्येनोपदेशात्। यद्यपि नान्यत् पश्यतीत्यादि समानं तथापि स एवाधस्तादित्यादिना तु ततोऽप्यधिकधर्मा उच्यन्ते। न हि सुषुप्तेः सर्वत्वादिधर्माः संभवन्ति। आत्मशब्दश्च मुख्यतया परिगृहीतो भवति। भावशब्दस्यापि सर्वत्वाद् भगवति वृत्तिरदोषः। तस्माद् भूमा भगवानेव॥ ८॥

भाष्यप्रकाशः।

यदि च तस्य लाभस्य प्रयाससाध्यत्वेन सुखबाहुल्यं नाङ्गीक्रियते तदा सुषुप्तिरस्तु। तत्रापि 'न कंचन कामं कामयते' इति 'तद्यथा प्रियया स्त्रिया संपरिष्वक्तः' इत्यादिश्रावणात्। अत उभयोर्मध्ये यदुचितं तदङ्गीकार्यमिति तथेत्यर्थः। सिद्धान्तं व्याकुर्वते उच्यत इत्यादि। संप्रसादः सुषुप्तिरिति बृहदारण्यकेऽस्ति। 'स वा एष एतस्मिन् संप्रसादे रत्वा चारित्वा' इति। सम्यक् प्रसादोऽस्मिन्निति व्युत्पत्त्या संप्रसादः सुषुप्तिः। तत्र यद्वै तन्न पश्यतीत्यादिनाऽन्यदर्शनाद्यभाव उच्यत इति, नान्यत् पश्यतीत्यादि सुषुप्त्या समानम्। तथापि, स एवाधस्तादित्यादिनोक्ता सर्वत्र व्याप्तिः सर्वत्वं च ततोऽधिकमुच्यते। तन्न संगतं भवत्यात्मशब्दस्य मुख्यवृत्तता च वियुज्यते। नच भावार्थप्रत्ययं प्रक्रम्य, 'बहोर्लोपो भू च बहोः' इति पाणिनीयसूत्रे व्युत्पादितो भूमशब्दो नानात्वं बाहुल्यं वा वक्ष्यति। तत्रापि प्रकृते, यदल्पं तत्तन्मर्त्यमिति श्रावणात् संख्यां परित्यज्य बाहुल्यमेव वदिष्यति। स च धर्म एव, न तु ब्रह्मेति शङ्कनीयम्। भगवतः सर्वत्वस्यात्र श्रावणेन सर्वत्वाद् भावशब्दस्यापि भगवति वृत्तिरदोषः सर्वशब्दबीजभूतप्रणवार्थत्वेन तत्रैव सर्वेषां मुख्यफलोपपत्त्या।

रश्मिः।

तस्येति भाष्यं विवरामासुः न चेति। सुषुप्ताविति भाष्यं विवरामासुः यदि चेति। तथेति। सुषुप्तित्वेन सुषुप्तिप्रतिपादकः पूर्वपक्षः। भाष्ये। पूर्णविषयलाभस्य पूर्णविषयसापेक्षत्वेन बहिरङ्गत्वादाहुरन्तरङ्गेति अन्यानपेक्षत्वेनान्तरङ्गत्वादित्यर्थः। समानमिति भाष्यं विवृतम्। सुषुप्त्या समानमिति। भावेति भाष्यं विवरामासुः। न च भावेति। प्रकृते। छान्दोग्ये नानात्वमिति भूमा नानात्वसमानार्थः। तदित्थम्। भूमेत्यत्र बहुशब्दाद्भावे इमनच् 'बहोर्लोपो भू च बहोः' इति सूत्रेण नानात्वमित्यत्र नञो नाञ् पृथग्भावे वर्तमानात् 'विनञ्भ्यां नानाञौ न सह' इति सूत्रात् 'असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ विना नाना'। एवं च बहुत्वं नानात्वपदस्यार्थो लक्षणया पृथग्भावस्य नानात्वस्यापेक्षाबुद्धिजननद्वारा बहुत्वकारणत्वात् पृथक्त्वे सति अयमेकोऽयमेको ह्ययमेक इत्यपेक्षाबुद्धिः तदन्विमे बहव इति बहुत्वमुपपद्यत इति। बाहुल्यमिति आकाशत्वं 'बहुलं प्राज्यनभसोः' इति विश्वः। भूमा बंहि वृद्धौ कर्तरि उ प्रत्ययः। 'लङ्घिबंह्योर्न लोपश्च' इत्यनेन सूत्रेण बंहते बहु बहून् लातीति 'आतोनुपसर्गे कः' बहुत्वं वह प्रापणे कर्तर्युलच् उभयोर्भावे ष्यञ् भूमा बाहुल्यसमानार्थः ततो भावे इमनिच् 'बहोर्लोपो भू च बहोः' इति सूत्रेण प्रकृतिप्रत्यययोर्विकारः। सूत्रार्था वृत्तिः 'बहोः परयोरिमेयसोर्लोपो बहोश्च भूरादेश' इति भूमशब्दस्य पृथ्व्यादित्वात् 'पृथ्व्यादिभ्य इमनज्वा' इति सूत्रेण भावे इमनच्। सर्वेति अत्र छान्दोग्ये 'स एवेद॰सर्वम्' इति श्रुत्या स आत्मेति सर्वत्वस्य श्रावणेन। भावशब्दस्य भावप्रत्ययान्तभूमशब्दस्य। ननु आकाशत्वे आनन्दत्वरूपेऽभिधावृत्तिर्बाहुल्यपदस्यातो नानन्दे भगवति वृत्तिरिति चेत्तत्राहुः सर्वेति सर्वेषां शब्दानां बीजं तादात्म्य-

भाष्यप्रकाशः ।

भूयस्त्वाधेति । तस्माद्भूमा भगवानेवेति सिद्धमित्यर्थः ।

अत्र संशयोपन्यासे प्रथमकोटौ शंकरभास्करमध्वाचार्याः शैवश्च प्राणमादृत्य सुषुप्तौ तस्य जागरणात् संप्रसादत्वं तस्याहुः ।

तद्विज्ञानेन्द्रभिक्षुणैवं दूष्यते । प्राणस्य सुखरूपताया एवासंभवेन संशयासंभवात् । अस्मिन् प्रकरणे प्राणादाधिक्योपदेशाभावात् संप्रसादशब्दस्य प्राणावाचकत्वाच्च । श्रुतौ संप्रसादशब्दो जीवे सुषुप्ताख्यतदवस्थायां च दृश्यते । स एष संप्रसादोऽस्माच्छरीरात् समुत्थायेति, स वा एष एतस्मिन् संप्रसादे रत्वा चरित्वेति । तत्र जीवे संप्रसादस्यौपाधिकतया धर्मधर्म्यभेदेनौपचारिकः । सुषुप्तावस्थायां तु प्रक्षतिणं सत्त्ववृद्ध्या संप्रसीदति चित्तमस्यामिति व्युत्पत्त्या यौगिकः । प्रसादप्रीत्योः पर्यायत्वात् सुख एव संप्रसादशब्दो मुख्यः । सत्त्वे तु प्रसादरूपिणि सकलस्मृतिषु प्रसिद्ध एव संप्रसादशब्द इति । प्राणे च संप्रसादशब्दो न क्वापि दृश्यत इति संप्रसादशब्दस्य प्राणार्थत्वोपवर्णनमनुचितमिति ।

अत्रापि कश्चिद् विशेषः । क्रमसंक्रमशब्दयोरिव प्रसादसंप्रसादशब्दयोरपि नैकार्थत्वम् । अतः संप्रसादशब्दः सुखविशेषे यौगिक एव । सत्त्वे तु स्मृतावपि न प्रसिद्ध इति तदनुपन्यासादेव ज्ञायते । सुषुप्तौ च न प्रतिक्षणं सत्त्ववृद्धिः । तस्यास्तामसावस्थात्वात् । 'तमोऽभिभूतः

रश्मिः ।

कारणं तद्भूतः प्रणवः ॐकारो अर्थोऽभिधेयं यस्य भूमशब्दस्य तेन हेतुना तत्र भगवति एव मुख्यवृत्तित्वम् । ॐमित्येकाक्षरं सर्वे शब्दास्तस्योपव्याख्यानभूताः यथा घटस्य कलश इत्युपव्याख्यानमतो भूमशब्देभ्यः ॐकारार्धमात्रात्मककृष्णवाचकेपि सन्नानन्दत्वे शक्तिसंकोचलक्षणया रूढ्या वर्तत इति प्रस्थानरत्नाकरे स्फुटम् । तथा चात्र यदि भूमशब्दस्य शक्तिसंकोचलक्षणया रूढ्या प्रयोगः स्यात्तदा धर्मवाचकत्वं स्यान्न त्वेवमभिधया योगरूपया भगवति प्रयोग इति धर्मिवाचकत्वम् । ननूपव्याख्यानमुपसमीपवर्तिनामीश्वरस्य पदार्थानां घटादीनां सर्वे शब्दा व्याख्यानं यथालोकमन्यथोपसर्गवैयर्थ्यमिति चेन्न 'प्रकाशाश्रयवद्वा तेजस्त्वात्' इति सूत्रेण धर्माभेदो धर्मिण इति धर्मवाचकस्यापि भूमशब्दस्य धर्मिवाचकत्वात् । तृतीयाध्याये लिङ्गभूयस्त्वाधिकरणे स्फुटम् । एतेन यच्छंकराचार्यैः अत्र प्राणस्य संप्रसादत्वं स्वीकृत्य यदत्र प्राणादधि सत्यं वक्तव्यं प्रतिज्ञातं तदेव भूमेहोच्यत इति गम्यते इत्युक्तं तस्रत्युक्तम् । सुषुप्तेः संप्रसादत्वमुक्तं तद्द्रढयितुमाहुः अत्रेति । आहुरिति तथा च शंकरभाष्यम् । तस्यां च संप्रसादावस्थायां प्राणो जागर्तीति प्राणोत्र संप्रसादोऽभिप्रेयत इति । अत्रापीति प्राणस्येत्यत्र प्राणः संकल्पात्मको गृह्यते यः संकल्पो वा व मनसो भूयान् इति श्रुत्युक्तो नतु प्राणो वा आशाया भूयानित्युक्तस्तस्य प्रस्तत्वात् सुखस्य तु तदाधिक्यं मनोवागगोचरत्वेनानन्दमयाधिकरणे प्रतिपादनात् । प्राणाधिक्योपदेश आर्थिकोस्त्यतो हेत्वन्तरमाह संप्रसादेति । तदनुपेति । भिक्ष्वाचार्यैः स्मृत्युपन्यासादेव तस्या इति सुषुप्तेः तामसस्य जीवस्यावस्थात्वात् । गुणत्रयविभागयोगाध्यायस्मृतयः प्रकृतिगुणपराः 'तमस्त्वज्ञानजं विद्धि' इति तत्र वाक्यात् 'न यत्र माया' इतिवाक्यात् तत्र सत्त्वरजस्तमःसाम्यावस्थारूपप्रकृतेरभावात् । श्रुत्या सत्त्ववृद्ध्यसिद्धिमाहुः तम इति तमः ताम्यतीति तमु ग्लानौ दिवादिः । ग्लै म्लै हर्षक्षये हर्षक्षयं करोतीति तमः हर्षक्षयकर्त्रा अभितः भूतो व्याप्तः इडभावः सुखरूपस्य

भाष्यप्रकाशः ।

सुखरूपमेति' इति श्रुतिः सत्संपत्तिमेव वदतीति न तयापि तथात्वसिद्धिः । जागरणं तु ज्ञानप्रधानेन सत्त्वेनेति मम प्रतिभाति ।

रामानुजाचार्यास्तु संशये भूमगुणविशिष्टं प्रत्यञ्चं प्रथमकोटौ निक्षिप्य प्राणसहचारित्वादत्रत्योपक्रोशानुपक्रोशाभ्यां तस्य चेतनत्वं निश्चित्य प्राणशब्दवाच्यत्वं चाङ्गीकृत्य सूत्रव्याख्याने

रश्मिः ।

सुखरूपस्य रूपं मोहनमेति इक्ष् गतौ सुखमोहनगमनं सत्संपत्तिः पुरितन्नाडीहृदयानां वा व्यवच्छेदः एवकारेण कुयुक्तिव्यवच्छेदः सद् ब्रह्म 'अस्ति ब्रह्मेति चेद्वेद' इति श्रुतेः अस्तीति सत् शता । तथात्वेति तथा सत्त्वेन प्रकारेण सत् तस्य भावः सत्त्वं तस्य सिद्धिः । ज्ञानेति ज्ञानं प्रधानं कर्मनिद्रे अभिभूय यस्य । एतद्गुणत्रयविभागयोगाध्याये स्पष्टम् । एतादृशपुराणमप्युपबृंहकं ज्ञेयम् । एवं पुराणोपबृंहितायाः 'तमोभिभूतः सुखरूपमेति' इत्यस्या । ममेत्याहुः ममेति । तेन सुषुप्तिस्त्वकामरूपो भगवान् इत्यस्य एवं जाग्रत्स्वापावित्यादेश्च सुषुप्त्युत्क्रान्त्योर्भेदेन इति सूत्रभाष्यस्य न विरोधः । इन्द्रियैर्विषयोपलब्धिर्जागरितं बुद्धेः कारणात्मनावस्थानं सुषुप्तिरिति पञ्चीकरणस्य च न विरोधः । तेषां श्रुतिमतस्य भिन्नत्वात् परस्परम् । श्रुतिविरोधे श्रुत्यन्तरमतं भाष्योक्तमविरोधे त्वोम् । अयमर्थोऽग्रे सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यधिकरणे प्रपञ्चनीयः । संशयविषये शंकराचार्यमतस्योपन्यासात् स्मृतं तद्विषये रामानुजमतमुपन्यस्य किंचिदाहुः रामेति । तद्वाचकशब्दः क इत्याकाङ्क्षायामाहुः प्राणेति । प्राणसहचारो जीवस्य जीव प्राणधारण इतिधातुपाठात् । ततः प्राणशब्दवाच्यत्वमिति योजनया प्राणशब्दो जीववाचक इति भावः । प्राणशब्दः क इति चेन्न प्राणो वा आशाया भूयानिति श्रुतौ तस्य सत्त्वात् । सहचारात्प्राणशब्दवाच्यत्वं 'वसन्तादिभ्यष्ठक्' इत्यत्र साहचर्यात्ताच्छब्द्यम् । वसन्तसहचरितमध्ययनं वसन्ताध्ययनमिति महाभाष्योक्तेस्तद्वत् । ननु तथापि यथा वा 'अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वं समर्पितम्' इतिश्रुत्या जडदृष्टान्तात्सहचारमनादृत्य जडप्राणे प्राणपदशक्तिरस्तु न प्रतीचि चेतनेस्त्विति चेत्तत्राहुः अत्रत्येति अत्र छान्दोग्ये प्राणो वा आशाया भूयान् यथा वा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वꣳसमर्पितम् । प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः स यदि पितरं वा मातरं वा स्वसारं वा आचार्यं वा ब्राह्मणं वा किंचिद्भृशमिव प्रत्याह धिक् त्वास्त्वित्येवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमसि आचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीत्यथ यद्यप्येतानुत्क्रान्तप्राणाञ्छूलेन समासं व्यतिषं दहेत् नैवं तं ब्रूयुः पितृहासि न मातृहासीति न भ्रातृहासीति न स्वसृहासीति नाचार्यहासीति न ब्राह्मणहासीति श्रुतिभवाभ्यां 'अव्ययात्त्यप्' इति सूत्रेण त्यप् भवार्थे । प्राणः प्राणेन स्वशक्त्यैव स्वेन वा याति स्वतन्त्रत्वात् । प्राणः प्राणं स्वात्मानमेव प्राणाय स्वात्मने एव ददाति अप्राणस्य दातृप्रतिग्राहित्वासंभवात् शूलेन प्रसिद्धेन कृत्वा सं आसं सं अस्य पुंजीकृत्य व्यतिषं व्यत्यस्यावयवान् विभज्य दहेत् भस्मीकुर्यात् इति श्रुतिविषयपदार्थः । उपक्रोशः पितृहामातृहेत्यादिना सप्राणेषु पितृप्रभृतिषु उपमर्दकारिणि हिंसकत्वनिमित्तोपक्रोशः तेष्वेव विगतप्राणेष्वत्यन्तोपमर्दकारिण्युपक्रोशाभावः ताभ्यां प्राणो ह पिता प्राणो माता इत्यादयस्तस्य प्राणस्य चेतनत्वमवगमयन्ति अतश्चेतनत्वं निश्चित्य । तस्येति प्राणस्य उक्तेति एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते इति श्रुत्येत्यर्थः । संशयपूर्वपक्षग्रन्थत्वाद्युक्तमेवैत-

धर्मोपपत्तेश्च ॥ ९ ॥

नान्यत् पश्यतीत्यादयोऽपि धर्मा ब्रह्मणि न विरुद्ध्यन्ते । 'स्वाप्ययसंप-

भाष्यप्रकाशः ।

तस्यैव संप्रसादत्वमुक्तश्रुत्याऽऽहुः । तद्युक्तमेव । सप्तमीतत्पुरुषेण सुषुप्ताविव षष्ठीतत्पुरुषेण जीवेऽपि योगस्य सत्त्वात् । सिद्धान्ते तु जीवापेक्षया प्राणोत्कर्षस्य बोधनाज्जीवस्यापि निवृत्तेस्तत्संप्रसाद-तागमकस्यात्राभावाच्च तदनुल्लेखः ।

विषयवाक्ये तु रामानुजमध्वभास्कराचार्या भिक्षुशैवौ च, यत्र नान्यत् पश्यतीत्यादे-र्भूमातिरिक्तयावद्दर्शननिषेधो नार्थः । किं तु निरवधिसुखरूपे ब्रह्मण्यनुभूयमाने ब्रह्मस्वरूपत-द्विभूत्यन्तर्गतत्वात् कृत्स्नस्य वस्तुजातस्यैश्वर्यविशिष्टब्रह्माभिन्नत्वेन न पश्यतीति । एतदेवोपपा-दयति वाक्यशेषः, स वा एष एवं पश्यन्नेवं मन्वान इत्यादिः । अग्रे—

'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् ।
सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वशः' ॥

इति मन्त्रश्च । इदं चास्माकमप्यभीष्टम् ॥ ८ ॥

धर्मोपपत्तेश्च ॥ ९ ॥ ननु भवतु संप्रसादाद् भूम्न आधिक्योपदेशस्तथापि भूमजि-ज्ञासया प्रश्ने भूमलक्षणत्वेन, यत्र नान्यत् पश्यतीत्यादिवाक्यमुच्यते । तत्र योऽन्यदर्शनादि-निषेधः स तु सुषुप्तेरसाधारणः । तदितरल्लक्षणं तु नेहोच्यते । भूम्न इति भूमपर्यन्ता अन्यवि-द्याऽस्तु । ततो भूमाधारमारभ्यात्मविद्येति शङ्कायामिदमुच्यते धर्मोपपत्तेरिति । तदेतद् व्याकर्तुं गृह्णन्ति नान्यदित्यादि । कुतो न विरुद्ध्यन्त इत्याकाङ्क्षायां विभजन्ते स्वाप्ययेत्यादि । यथाऽस्मिन् सूत्रे ब्रह्मधर्माविर्भावः स्वाप्ययसंपत्त्योर्नियतः । मय्येव सकलं जातमित्या-दिवाक्यानुरोधात् । अन्यत्रानियत इति वामदेवसूत्रे व्युत्पादितम् । तेन न्यायेनान्यदर्शनाद्यभा-वोऽपि मैत्रेयीब्राह्मणे, स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीत लवणमेवैतदित्येकीभावदशायां, यद्वै तन्न पश्यति पश्यन् वै तद् द्रष्टव्यं

रश्मिः ।

दित्याहुः तदिति वस्तुतस्तु संशये भूमपदोपस्थापिते भूयस्त्वरूपगुणनिक्षेपो युक्तः भूमपदस्य भावशब्दत्वेन धर्मिप्रत्यगवाचकत्वात् । भूयस्त्वधर्मवाचकत्वात् । षष्ठीति संप्रसीदति चित्तमस्येति विग्रहः 'एहीडादयोन्यपदार्थे' इति सूत्रेण समासः । बोधनादिति बृहदारण्यके व्रतमीमांसायां बोधनात् । तत्संप्रेति जीवसंप्रसादतागमकस्यात्र छान्दोग्येऽभावात् । एष संप्रसाद इत्यस्या बृह-दारण्यकस्थत्वेन 'यजुर्वेदस्तु मानुषः' इति मनुस्मृतेश्छान्दोग्ये पित्र्ये प्रवृत्त्यभावात् । भिक्षुशैवौ वेति भगवन्ताविति शेषम् । स वा इति स वै एष विद्वान् एवं यथावद्भूमानं पश्यन् साक्षादनुभवन् । पश्यतीति पश्यः ज्ञानी । दुःखतां दुःखसत्ताम् । सर्वमात्मानं सर्वशः सर्वं ददाति यतः सर्व-माप्नोति मनोरथैः पूर्णो भवति । अभीष्टमिति लिङ्गभूयस्त्वाधिकरणे स्वीकारात् । यत्तु भूम्नि दृष्टे तदन्यं न सुखत्वेन नापि तु सुखसाधनत्वेन पश्यतीति तत्र ग्रन्थः स तु भूमाभिन्नसर्वदर्शनानन्तररस-रूपात्मदर्शने भवति शंकराचार्यकृतं व्याख्यानमुत्तरसूत्रे दूष्यम् ॥ ८ ॥

धर्मोपपत्तेश्च ॥ ९ ॥ भूमाधारमिति स भगवः कस्मिन् प्रतिष्ठितः इत्यादिश्रुत्युक्तम् ।

भाष्यप्रकाशः।

न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलापो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येदित्यविभागदशायां चेत्युभयत्राम्नानाद्दशाद्वये नियतः। यत्र नान्यत् पश्यतीति वाक्यो-

रश्मिः।

तथा च भूमलक्षणस्य सुषुप्तावतिव्याप्तिरिति भावः। उभयत्रेति स्वाप्ययसंपत्त्योः स्वाप्ययः सुषुप्तिः संपत्तिर्मोक्षः। सिन्धुरुदकं तत्र भवः सैन्धवः खिल्यः शकलः स चासौ खिल्यश्च सैन्धवखिल्यः। प्रास्तः प्रक्षिप्तः उदकं सदेवानु उदकभावस्य पश्चाद्विशेषेण लीयेत इत्यभ्यनुज्ञायां लिङ्। अस्य विलीनखिल्यस्य नाहास्योद्ग्राहणाय नैव कश्चित् सुनिपुणोपि शक्तः स्यात् लवणमेवाददीतेति योजना। एतदिति आविष्कृतम्। स्वाप्यसंपत्त्योरेकीभावदशायां दृष्टान्तः कैवल्यावस्थायां दृष्टान्त इति टीकायां तद्भाष्यविरुद्धम्। 'यत्र हि द्वैतमिव भवति' इत्यादि उभयत्राम्नानात् इतिभाष्यविरुद्धम्। अथ न विरुद्धं प्रकारभेदेन मैत्रेयीब्राह्मणे ज्योतिर्ब्राह्मणे चाम्नानमुभयत्र स्वाप्ययसंपत्त्योरिति भाष्यार्थात्। ज्योतिर्ब्राह्मणमाहुः यत्र हि द्वैतमिवेति भाष्योक्तादिपदार्थत्वेन। यद्वेति स्त्रीपुंपरिष्वङ्गदृष्टान्तेनैकत्वा-पत्तिवशात् विशेषज्ञानाभावो न स्वयं ज्योतिष्ट्वाभावात् इत्युक्तमेव नोद्यपूर्वकं स्पष्टीक्रियतेत्र। तत्तत्र सुषुप्तौ यदात्मानं वै नैव पश्यतीति यज्जानीष इति शेषः। तन्नेति पदद्वयमावृत्त्य पुनर्योजनीयम्। तस्य पदद्वयस्य तथा मा मंस्था इत्यर्थः। यतस्तत्र स्वरूपचैतन्येन सर्वसाक्षित्वात् पश्यन् वैतत् वर्णलोपस्तत्र सुषुप्तौ दृष्टव्यत्वेन न पश्यतीत्यर्थः। तत्र प्रथमप्रतिज्ञायां हेतुमाह न हीति द्रष्टुर्या सर्वसाक्षिणी दृष्टिः यद्वा द्रष्टुः कूटस्थस्य चिन्मात्ररूपस्य स्वरूपभूता या दृष्टिः तस्याः हि यस्माद्विपरिलोपो विनाशो न विद्यते अग्न्युष्णत्ववत्। अत्रापि हेतुः अविनाशित्वात्। विनाशहेतुपरिणामहीनत्वादित्यर्थः। विशेषप्रतिज्ञानाभावरूपं द्वितीयप्रतिज्ञाहेतुमाहुः नत्विति नास्त्विवत्यपपाठः आन्यत्रिको वा अत एव 'न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' इति पाठः काण्वमाध्यन्दिनभेदेन विस्तरेणार्थः। तत्तत्र सुषुप्तौ आत्मरूपाद्वितीयं प्रमातृस्वरूपमन्यच्चक्षुरादिलक्षणं करणं विभक्तं स्वरूपाद्विलक्षणं प्रमेयं न त्वस्ति यत्प्रमेयं प्रमाता प्रमाणेन पश्येदित्यर्थः। एतेन ज्योतिर्ब्राह्मणेन स यथेत्युक्तदृष्टान्तवचनमनु एवं वा अरे इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः सा होवाच मैत्रेयी अत्रैव मा भगवानमूमुहन् न प्रेत्य संज्ञास्तीति सहोवाच याज्ञवल्क्यः न वा अरे अहं मोहं ब्रवीमि अलं वा अर इदं विज्ञानाय यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् तत्केन कं जिघ्रेदित्यादिश्रुतयोऽनुसंधेया इति ज्ञायते। अर्थास्तु यथोक्ताः दृष्टान्त एवमेवारे मैत्रेयि विलीनखिल्यभावमिदं ब्रह्मात्मतत्त्वं महदनवच्छिन्नं भूतं न विद्यतेन्तःकरणं पूर्वावधिभूतं यस्य न विद्यते पार उत्तरावधिभूतं कार्यं यस्य विज्ञानश्चासौ घनश्च भूतेभ्यः शरीरकरणविषयाकारपरिणतेभ्यो निमित्तेभ्यो मनुष्योहं ब्राह्मणोहमित्यादि खिल्यभावेन समुत्थाय कर्मक्षयेण विनश्यन्ति तान्यनु पश्चा-लक्षीकृत्य वा विनश्यत्यदर्शनं करोति। प्रेत्य मृत्वा प्रकर्षेण गत्वा वा संज्ञा मनुष्यादिरूपाः। अत्रैवेति एकस्मिन्नेव वस्तुनि ब्रह्मात्मकं पूर्वं विज्ञानघन एवेत्युक्त्वा पुनर्न प्रेत्य संज्ञास्तीति विरुद्धं वदन् भगवान् प्रजावान् मा मां अमूमुहत् मोहितवानस्ति। मोहं मोहनं वाक्यं नैव ब्रवीमि न प्रेत्य संज्ञास्तीति तु विशेषविज्ञानाभावस्यैवोक्तत्वात्। अत उक्तो विज्ञानघनो विज्ञानायालं विज्ञातुं युक्तः।

रश्मिः ।

विशेषविज्ञानाभावं दृढीकुर्वन् आह याज्ञवल्क्यः यत्र हीति । प्रकृतमनुसर्यते यत्रेत्यस्य स्वाप्ययसंपत्त्योरित्यर्थं दूषयन्त आहुः **तदुभयेति** । **उभयत्र** स्वाप्ययसंपत्त्योः । **तदद्वैत**दर्शनम् । **स** याज्ञवल्क्यः । तां दशाम् । प्रकारेति मैत्रेयीब्राह्मण इतरमिति पदादितरत्वेन प्रकारेण । ज्योतिर्ब्राह्मणे द्रष्टव्यमिति पदात् द्रष्टव्यत्वेन प्रकारेण एकीभावप्रकारेणाविभागप्रकारेणेति वार्थः । तया मैत्रेय्या दशया वा । तथा द्रष्टव्यत्वेन तद् द्रष्टव्यत्वं जनकं प्रत्यवदत् । तत इति । ननु मैत्रेयीब्राह्मणं ज्योतिर्ब्राह्मणं च भाष्योक्ताया यत्र हि द्वैतमिवेति श्रुतेरनुरोधेनोक्तमुक्तानुशासनासीति श्रुतिस्तु द्वितीयमैत्रेयीब्राह्मणे तयोरग्रेतनेस्तीति तस्याः का संगतिरिति चेन्न अमृतत्वार्थिन्या हि मैत्रेय्याः प्रव्रजनकामो याज्ञवल्क्योऽमृतत्वसाधनवक्ता यावत्साधनान्युक्तवांस्तेषां च साधनानामग्रेतनमैत्रेयीब्राह्मणे समाप्तत्वात् 'उक्त्वा प्रवव्राज' इति श्रुतेस्तथावसायात् तथा च प्रतिबन्धकीभूतजिज्ञासाया मधुब्राह्मणादिनिरूपणैर्विवृत्तौ सत्यामवश्यवक्तव्यत्वेनामृतत्वसाधनानामवसरसंगतिः । प्रलय आत्यन्तिकः मोक्ष इति यावत् । अत्र ब्रह्मब्रह्मसंबन्धजीवानां विद्यमानत्वेन धर्माणामन्यादर्शनादीनां भगवत्युपपत्तिं समर्थयन्ति स्म **तथा चेति** । **ब्रह्मसंबन्ध** इति । तथा च संबन्धस्यापि ब्रह्माधीनत्वात् ब्रह्मण्येवान्यादर्शनादयो धर्मा न सुषुप्तौ नापि ब्रह्मसंबन्धे इति भावः । ननु सुषुप्तिस्त्वकामरूपो भगवानिति तत्रातिव्याप्तिः कथम् । सत्यम् । तद्रूपस्यालक्ष्यत्वात् जगज्जन्मादिकर्तृब्रह्मणो लक्ष्यत्वात् । ननु 'मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः' इति जीवस्य तिरोहितानन्दैश्वर्यादेराविर्भावेन हेतुना ब्रह्मात्मतया स्थितिर्जीवधर्मः इति मुक्तिप्रयुक्तान्यादर्शनादयो जीवधर्मा इति चेन्न एकीभावात् । तथाप्यन्यादर्शनादयो ब्रह्मसंबन्धप्रयुक्ता एव । जीवन्मुक्तानामपि तिरोहितानन्दैश्वर्यादेराविर्भावेपि प्रवचनादिदर्शनान्नान्यादर्शनादय इति । **नान्येतिं** न सुषुप्तीत्यर्थः । **भाष्ये** आदिपदार्थत्वेन ज्योतिर्ब्राह्मणं व्याकृतं तत्रोभयत्रेति भाष्यं प्रमाणं भाष्येपि सूत्रांशं स्वाप्ययसंपत्त्योरित्येवमस्ति स्वाप्ययसंपत्तिपदार्थयोर्व्याकृतयोर्भाष्ययुक्तिरुक्ता । युक्तिमन्यामाहुरित्याहुः **युक्त्यन्तर**मिति । संपत्तिपदार्थस्य प्रसिद्धत्वात्स्वाप्ययपदार्थस्य छान्दोग्ये नवमप्रपाठकेऽविभागमन्तरानुपपद्यमानस्य प्रसिद्धिः । तथाहि । संपद्याविर्भावकैर्भक्तैः 'लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि' इत्यधिकरणे वक्ष्यमाणापि क्रीडा समन्वयेऽस्मिन्नध्याये ज्ञानसंपादिकां क्रीडामविभज्य वर्तते भक्तमनोरथाभावेन तत्पूरकक्रीडायाः ज्ञानिक्रीडान्तर्गतायाः अप्याविर्भावाभावात् । मर्यादाभक्तं प्रत्यपि पुष्टिभक्तक्रीडा नाविःकरणात् । उभौ ज्ञानिमर्यादाभक्तौ प्रति यथानुभवं सुषुप्तिव्याकरणसिद्धस्यैतादृशस्य भाष्ये व्याकरणं मत्वाहुः **तथा चेति** । तथा च व्याख्यानं ज्ञानित्वेन प्रसिद्धानां स वा एष इत्यस्याः भूमा कस्मिन् प्रतिष्ठित इति नारदप्रश्ने सनत्कुमारेण स्वे महिम्नि इत्युत्तरिते भूमा न प्रतिष्ठित एवं ब्रवीमीति सनत्कुमारेण पूर्वोक्ते हेतुमाह 'स एवाधस्तात् स उपरिष्टात् स पश्चादित्यादि । यतः स भूमैवाधस्तात् स उपरिष्टात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एव भूमैव सर्वं तद्व्यतिरेकेणाभावान्नासौ परमार्थतः क्वचित्प्रतिष्ठित इति फलितार्थः । यत्र नान्यत्पश्यतीत्यधिकरणतया निर्देशात्स एवाधस्तादिति च परोक्षतया निर्देशात् द्रष्टुर्जीवादन्यो भूमेति शङ्का स्यात् तद्व्युदासार्थमहंकारस्य ब्रह्मपुत्रत्वात् 'आत्मा वै पुत्रनामासि' इति श्रुतेस्तदभेदार्थं वा भूमानमहमात्मतया निर्दिदेश अथातोहंकारादेश इति । अथेत्यनन्तरं भूम्नि जीवभेदशङ्काया ब्रह्मात्मकाहंकारभेदशङ्काया वा उदितत्वादहमित्याकारेण भूमा निर्दिश्यत इत्यर्थः । समानमन्यत् । अविवेकिभिर्देहस्याहमिति निर्दिश्यमानत्वात् तस्यात्मत्वशङ्कामात्मनामवताराणां सविकल्पकज्ञानानां वा भेदशङ्कां वारयितुमाह

स्योरन्यतरापेक्षमाविष्कृतं हि इति न्यायेन। यत्र हि द्वैतमिव भवतीत्यादिश्रुत्या उभयत्राम्नानात्। अन्यादर्शनादयो भगवति न विरुध्यन्ते। चकारात् फलं तस्यैवोपपद्यत इत्याह। स वा एष एवं पश्यन्नित्यादिना सहस्राणि च विंशतिरित्यन्तेन। तेन भूमा ब्रह्मैवेति सिद्धम् ॥ ९ ॥

इति प्रथमाध्याये तृतीयपादे द्वितीयं भूमाधिकरणम् ॥ २ ॥

भाष्यप्रकाशः।

क्तस्तु भूमविद्यायामनियतः। 'न पश्यः' इति मन्त्रे, सर्वं हि पश्यः पश्यतीति वाक्यानुरोधात् 'यस्मिन् विदिते सर्वं विदितं भवति' इत्यादिवाक्यानुरोधाच्चेत्यर्थः। अत एतेऽन्यादर्शनादयो धर्मा भगवति न विरुध्यन्तेऽतो लक्षणेऽतिव्याप्त्यभावाद् भूमविद्या ब्रह्मविद्या, नान्यविद्येत्यर्थः। एतदेव विशदयन्ति चकारादित्यादि। तस्यैवेति अविभागद्रष्टुः। प्रलये संज्ञाभावात् स्वेन रूपेण दृष्टत्वाभावादिति इदं सर्वं तृतीयाध्याये लिङ्गभूयस्त्वाधिकरणे व्युत्पाद्यमतोऽत्र नोच्यते। फलं किमित्यत आहुः स वा इत्यादि। तथा चेदमविभागदशागमकमित्यर्थः। एवं चानेनाधिकरणेन बहिर्व्याप्तस्याप्यानन्दमयत्वं साधितम्। तथानन्दमयाधिकरणोक्तस्यानन्दमयत्वस्य बुद्धिवृत्तिरूपसुषुप्ति-

रश्मिः।

अथात्मादेश इति आत्मना स्वरूपेण दिष्यते भूमा। यद्वा। अवतारादेशः सविकल्पकज्ञानादेशो वा। समानमन्यत्। इदं सर्वमात्मैवेति पश्यतो जीवन्मुक्तस्य फलमाह स वा एष इति। स वै एष विद्वान् मननविज्ञानाभ्यां तर्कौपदेशिकरूपाभ्यामेवं यथावद्भूमानं पश्यन् साक्षादनुभवन् आत्मत एव रमणं यस्य स आत्मरतिः। स्त्र्यादिबाह्यसाधनवती क्रीडेति भेदः। आत्मत एव, मिथुनं द्वन्द्वजसुखं यस्य स आत्ममिथुनः आत्मत एव, आनन्दः शब्दादिविषयसुखं यस्य स आत्मानन्दः। अविदुषस्तु एतत्सर्वं देहादिबाह्यसाधननिमित्तं विदुषस्त्वात्मज्ञाननिमित्तं चेत्यर्थः। भाष्ये। फलमिति स वा एष इति श्रुत्युक्तम्। सुषुप्तौ तु 'सुखमहमस्वाप्सं न किंचिदवेदिषम्' इति यथानुभवम्। यत्तु चतुर्थाध्यायोपान्ते भाष्यं निर्गुणब्रह्माविर्भावः सुषुप्तौ संपत्तौ तु 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुतिसिद्धो यथाधिकारं स्वधर्मसहितब्रह्मसंपत्तिरिति। तत्राकामरूपो भगवान् सुषुप्तिरिति भाष्येण न विरोधः। अस्यैव सुखरूपस्य निर्गुणत्वात्। संपत्तौ तु कर्मविमोक्षे आत्मसुखं ब्रह्म, ज्ञानिमोक्षे निर्गुणं ब्रह्म। मर्यादाभक्तमोक्षे स्वधर्मसहितस्याविर्भावः अक्षरधियां त्ववरोधः' इति सूत्रभाष्यात्। पुष्टभक्तमोक्षे ततोधिकधर्मसहितस्य चतुर्थाध्यायोपान्तभाष्यात् सर्वात्मभाववद्भक्तमोक्षे ततोपि पूर्णानन्दस्य 'फलमत उपपत्तेः' इति सूत्रभाष्यात् पूर्वाधिकरणेनास्य संगतिरूपमधिकरणाङ्गमाहुः एवं चेति। आधाररूपस्य प्रतिपादके 'भूमा संप्रसादादध्युपदेशात्' इत्यधिकरणे आधारप्रतिपादकत्वावश्यकत्वेऽत्राधारस्य सर्वान्तरस्याधारस्य आनन्दमयाधिकरणे आनन्दमयत्वप्रतिपादनात् बहिष्ठस्याधारस्य भूमरूपस्य प्रतिपादनादाधार औपश्लेषिको वैषयिकोऽभिव्यापकश्च तेष्वभिव्यापकः प्रतिपाद्यः 'तिलेषु तैलं दधनीव सर्पिः' इति श्रुतेः। अत आधाररूपस्य प्रतिपादनेन स्मृतस्य भूम्न उपेक्षानर्हत्वात्प्रसङ्ग एव। सदंशेन जडा चिदंशेन जीवा आनन्दांशेनान्तर्यामिणो यद्यपि तथापि 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः सर्वेषां प्रतियोगिभेदेन 'यो यज्जनकस्तत्तद्गुणको, यो यद्गुणकः स तदात्मकः' इति व्याप्तिभ्यां आनन्दरूपत्वेन भूमा ह्याधारः।

अक्षरमम्बरान्तधृतेः ॥ १० ॥ (१।३।३).

गार्गीब्राह्मणे 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च' इति । 'स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनणु' इत्यादि श्रूयते । तत्र संशयः ।

भाष्यप्रकाशः ।

धर्मत्ववारणं कृतमतः प्रसङ्ग एव संगतिः । तथा 'येन सर्वमिदं ततम्' इत्यपि साधितम् । सर्वस्य विस्तारस्य सुखप्रयुक्तत्वादिति । 'भक्त्या लभ्यस्त्वनन्यया' इति तु साधनाध्याये विचार्यम् ॥९॥

इति द्वितीयं भूमाधिकरणम् ॥ २ ॥

अक्षरमम्बरान्तधृतेः ॥ १० ॥ विषयादिकमुपन्यस्यन्ति **गार्गीब्राह्मण इत्यादि ।** अत्र प्रथमे ब्राह्मणे, यदिदं सर्वमप्स्वोतं च प्रोतं च कस्मिन् वाऽऽप ओताश्च प्रोताश्चेत्यादिप्रश्नोत्तरैरब्वाय्वाकाशान्तरिक्षलोकद्युलोकादित्यलोकचन्द्रलोकनक्षत्रलोकदेवलोकगन्धर्वलोकप्रजापतिलोकब्रह्मलोकपर्यन्तं पूर्वपूर्वस्योत्तरोत्तरस्मिन्नोतप्रोतत्वं निरूप्य पुनः प्रश्नान्तराभावार्थं, 'मा ते मूर्धा व्यपतदनतिप्रश्न्या वै देवता अति पृच्छसि गार्गि मातिप्राक्षीः' इत्युक्तम् । तत आरुणिसंवादोत्तरं

रश्मिः ।

श्रुतिसूत्ररूपैका कोटिरुक्ता । गीताभागवतरूपकोट्येकदेशमाहुः **तथेति** । ततमित्येतत्तनु विस्तार इत्यस्य रूपमित्याहुः **सर्वस्येति** । **सुखेति** । तथा च श्रुतिः 'यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यम्' इति । अत्र सुखेन कृतिः कृत्या संपादनं संपादनेन श्रद्धा श्रद्धया मननं मननेन विज्ञानं तेन सत्यवदनमिति क्रमः । जानाति इच्छति यतते इत्यत्रेच्छा न सर्वत्र निविशतेऽपि तु क्वचिदेवातो विज्ञानेन सत्यवदनरूपक्रियाया न विरोधः । 'लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि' इत्यधिकरणे सर्वात्मभावपरतया स्वप्रपाठकस्य वर्णने शक्तिः का शक्तेर्ज्ञानिनिरूपितार्थे उपक्षीणत्वात् इत्याशङ्क्याहुः **भक्त्येति** । एकादशाध्याये विश्वरूपदर्शनेस्तीदं वाक्यं तत्र विश्वरूपं साकारब्रह्मरूपं अनन्यभक्तिलभ्यत्वात् विष्णुरूपं वा विश्वरूपदर्शने इत्यध्यायसमाख्याप्रामाण्यात् न अन्या प्रेमलक्षणा नवधा गौणभक्तयश्च तद्रूपाऽनन्या सर्वात्मभावरूपा तया भक्त्या न अन्यः पुरुषोत्तमभिन्नो विषयो यस्याः सा वा । **साधनेति** लिङ्गभूयस्त्वाधिकरणे तथा च भक्तिमार्गीयस्याप्यर्थस्य सत्त्वात् भक्तसंबन्धेन ज्ञानमार्गीयार्थविरोधे वक्ष्यमाणार्थे शक्तिः सैव । यथा संयोगेन सशङ्खचक्रो हरिरित्यत्र हरिपदस्य विष्णौ न सिंहे नापीन्द्रे न वानरादौ तदुक्तं 'तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते' इति विशिष्टानां ज्ञानिभ्यो भक्तानां पौरुषसभाजनं पृथक् स्वाधिकारानुसारेण छान्दोग्यार्थे शक्तिभ्यः । तथाऽविदुषो घटादेर्घटत्वादिनावबोधः विदुषस्तु तिरोहितचिदानन्दप्रकटसदंशेनावबोधः । तथा च घटत्वेन कम्बुग्रीवादिमत्त्वेनावच्छिन्ने घटे शक्तिराद्यस्य द्वितीयस्य तु तिरोहितचिदानन्दत्वेन घटत्वरूपेण वस्तुविशेषनियतेनावच्छिन्ने सदंशे शक्तिस्तद्वत् ॥ ९ ॥

इति द्वितीयाधिकरणम् ॥ २ ॥

अक्षरमम्बरान्तधृतेः ॥ १० ॥ अप्स्वोतमिति अप्स्वोतं प्रोतं पटस्तन्तुष्विव समवायेन संबद्धम् । **वाय्विति** वायौ गार्गीति वाक्योक्तेः । **आरुणीति** गार्गीब्राह्मणं समाप्यान्तर्यामिब्राह्मणीयारुणिसंवादोत्तरमक्षरब्राह्मणे दिव उपरितनाण्डकपालात् अर्वागित्यधः द्यावापृथिव्योरन्तरा

किमक्षरशब्देन पदार्थान्तरं, ब्रह्म वेति । तत्राचेतनसाधारण्याद् बाणतुल्यत्वादाकाशवदस्याप्यब्रह्मत्वमेव । द्युभ्वाद्यायतनविरोधस्तु तुल्यः । अत एवागतार्थता अदृश्यत्वाद्यधिकरणेन । न हि तत्र विरुद्धधर्मा आशङ्क्य निराक्रियन्ते । अतोऽचेतनतुल्यत्वाद् ब्रह्मवादस्यासमाप्तत्वादाग्रहाविष्टत्वात् प्रष्टुः स्त्रीत्वाच्च, 'स्मरो

भाष्यप्रकाशः ।

पुनरपि गार्गी पप्रच्छ । 'यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं च' इति । तत्र आकाश इत्युत्तरे, पुनराकाशविषयके ओतप्रोतत्वप्रश्ने, एतद्वै तदक्षरं गार्गीत्याद्युत्तरम् । सोऽत्र विषयः । तत्राक्षरशब्दे संशयः । किं पदार्थान्तरं ब्रह्म वेति । अत्र पदार्थान्तरपदेन जडजीवयोर्ग्रहणम् । तत्र ओतप्रोतत्वं विकारित्वापादकतया जडलिङ्गम् । 'अमृताक्षरं हरः, क्षरात्मानावीशते देव एकः' इति श्रुत्यन्तरे अक्षरपदं जीवबोधकतया प्रसिद्धं जीवलिङ्गं प्रशासनं च ब्रह्मलिङ्गमिति त्रिष्वपि बीजम् । पूर्वपक्षमाहुः तत्राचेतनेत्यादि । ओतप्रोततया विकारित्वेनाचेतनसाधारण्यात् । 'अहं त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वां द्वाभ्यां प्रश्नाभ्यामुपोदस्थाम्' इति द्वयोः प्रश्नयोः क्लेशजनकतया प्रथमप्रश्नोत्तरभूताकाशवदस्य द्वितीयप्रश्नोत्तरभूतस्याक्षरस्याप्यब्रह्मत्वमेव । किंच । यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतमित्यत्र यथोतत्वं पदार्थभेदेन भारवाहकत्वमवगमयत्येवमत्र प्रोतत्वमपि, 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति स्मार्तदृष्टान्ताद् भारवाहकत्वमेव गमयिष्यतीति द्युभ्वाद्यायतनत्वेन विरोधोऽपि तुल्यः, तत्रेवात्रापि समानः । किंचादृश्यत्वाद्यधिकरकरणे

रश्मिः ।

मध्ये यत् प्रसिद्धे द्यावापृथिवी द्यावापृथिवी इमे । अत्र प्रथमकोटौ वर्णो निवेश्यते शांकरैस्तदनिवेशे हेतुमाहुः **अत्र पदे**ति । जडजीवयोरित्यत्र 'अभ्यर्हितं पूर्वम्' इति सूत्राप्राप्तिर्वेदान्त उभयोरभ्यर्हितत्वात् 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतौ' इति श्रुतावुभयोरेतदात्मनस्तस्य च भावत्वात् । **ईषत** इति ईष दानगतिवधेष्विति गच्छतीत्यर्थः । भ्वादिरात्मनेपदी सेट् । **प्रसिद्ध**मिति न प्रसिद्धिरुपरोद्धुं शक्येति न्यायेन नामृताक्षरमिति हरविशेषणम् । **प्रशासन**मिति 'एतस्य वाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठतः' इति श्रुतेः । **त्रिष्वि**ति ब्रह्मजीवजडग्रहणेषु । बाणेत्यादिभाष्यं विवरामासुः अहमित्यादिना । श्रुत्यर्थस्तु अहं गार्गि त्वा त्वां याज्ञवल्क्य काशिषु भवः काश्यः शूरत्वेन प्रसिद्धः विदेहो विदेहानां राजा उग्रपुत्र इति षष्ठीतत्पुरुषः । उज्ज्यमवतारितेज्याकं धनुरधिज्यमारोपितेज्याकं कृत्वा द्वौ बाणवन्तौ बाणः शराग्रे संधीयमानो वंशखण्डः तद्वन्तौ शरौ यद्वा बाणावन्तौ बाणौ मनोहरौ । तौ च सपत्नातिव्याधिनौ शत्रुभेदिनौ उपोत्तिष्ठेत् शत्रुसमीपे तिष्ठेत् तद्वदहं गार्गी त्वां याज्ञवल्क्यं उपोदस्थां त्वत्समीपे स्थितवत्यस्मीति । इदमित्थतयाऽविषये आधिर्भवतीति क्लेशः । **प्रथमे**ति यदूर्ध्वमित्यादिनोक्तप्रथमप्रश्नस्तदुत्तरमाकाशे ओतं प्रोतं चेति । **द्वितीये**ति कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति द्वितीयप्रश्नस्तदुत्तरति 'एतद्वै तदक्षरं गार्गि' इति । तथा चैवमेवाहं त्वां द्वाभ्यां प्रश्नाभ्यामुपोदस्थामित्युक्त्या बाणतुल्यत्वमिति भाष्यार्थः । द्युभ्वादीति भाष्यं विवरामासुः किं चेति । **तत्रेवात्रे**ति आकाश इवाक्षरेपीत्यर्थः । **अत एवे**ति भाष्यं

स्मा व आकाशाद्भूयान्' इतिवत् कयाचिदुपपत्त्या स्मरणकालभूतसूक्ष्मप्रकृतिजीवविशेषाणामन्यतरपरिग्रह इति वक्तव्यमुपासनार्थम्। अत्र हि प्रापञ्चिकसर्वधर्मराहित्यं ब्रह्मधर्मत्वं च प्रतीयते। तदुपासनार्थत्व उपपद्येत । ब्रह्मपरिग्रहे तु वैयर्थ्यमेव। उपदेष्टृत्वाभावात् । तस्मादक्षरमन्यदेव ब्रह्मधर्मत्वेनोपास्यमित्येवं प्राप्ते। उच्यते।

अक्षरं परमात्मैव । कुतः । अम्बरान्तधृतेः । श्रुतिं व्याख्याय

भाष्यप्रकाशः ।

अक्षरस्य ब्रह्मरूपतायाः सुविचारितत्वात् किमनेनाधिकरणेन । अतः पृथग्विचारादेव विषयभेदोऽवसीयत इति न तेनास्य गतार्थता। न हि तत्र विरुद्धधर्मा आशङ्क्य निराक्रियन्ते अत्र तु ते तथाक्रियन्त इति सिद्धो विषयभेदः । अतो विषयभेदादचेतनतुल्यत्वाद् ब्रह्मवादस्यारुणिसंवादेऽन्तर्यामिनिरूपणेनैव समाप्तत्वात् प्रष्टुर्गार्गीरूपस्याग्रहाविष्टत्वेन स्त्रीत्वेन च ब्रह्मविद्याश्रवणेऽनधिकारित्वादत्र, 'स्मरो वा आकाशाद् भूयान्' इत्यत्र यथा आकाशं भोग्यत्वेन गृह्णतः स्मरणस्य तद्व्याप्त्या बृहत्त्वयोगेन भूयस्त्वं तथा, अश्नुत इति नक्षरतीति वा योगेन कयाचिदुपपत्त्या स्मरणादन्यतमस्याचेतनस्य जीवविशेषस्य वोपासनार्थं परिग्रह इति वक्तव्यम्। यत् पुनरत्राक्षरेऽस्थूलादिवाक्यैः प्रापञ्चिकधर्मराहित्यं प्रशासनरूपब्रह्मधर्मवत्त्वं च प्रतीयते, तत्तूपासनार्थम्। न चात्रैतदनुरोधेन ब्रह्मैव वाक्यार्थ इति युक्तम्। प्रष्टुर्ब्रह्मश्रवणानधिकारस्योपपादितत्वेनात्र वक्तुरुपदेष्टृत्वाभावाद् वाक्यवैयर्थ्यापत्तेरिति। सिद्धान्तं व्याकुर्वन्ति उच्यत इत्यादि। नन्वम्बरान्तधृतेर्विषयवाक्ये अदृश्यमानतया तस्याक्षरे वक्तुमशक्यत्वात् स्वरूपासिद्धोऽयं हेतुरित्याशङ्क्याहुः श्रुतिमित्यादि। तथा च तात्पर्यसिद्धत्वान्न स्वरूपासिद्ध इत्यर्थः। तात्पर्यसिद्धत्वं व्याकुर्वन्ति

रश्मिः ।

विवरांबभूवुः किं चेति। तथेति आशङ्क्य निराकार्यत्वेन क्रियन्ते। नन्वदृश्यात्वादिकमदृश्यत्वाद्यधिकरणेऽनुपपन्नं स्थौल्यादीनां सत्त्वेन दृश्यत्वात् इत्याशङ्क्यात्राधिकरणे अस्थूलमनणिवत्यादौ श्रुतौ नञारोपापवादन्यायेन निराक्रियन्ते। अत इत्यादिभाष्यं विवरांचक्रुः अत इति। आग्रहेति अनतिप्रश्न्येत्यादिना प्रश्ननिषेधेपि पुनः प्रश्नद्वयकरणादाग्रहो द्योत्यते। स्मर इति स्मरो वा व आकाशाद्भूय इत्यपि पाठः। अत्र छान्दसं नपुंसकत्वम्। भोग्यत्वेनेति विषयत्वेन। अश्नुत इति अयं योगः स्मरणस्य कालस्य भूतसूक्ष्माणां शब्दरूपरसगन्धस्पर्शाणां च छान्दसः प्रत्ययः क्वाचित्कमात्मनेपदित्वमनुसंधाय क्षर संचलने इत्यस्य भ्वादेः परस्मैपदिनो न क्षरत इति जीवप्रकृत्योः पचाद्यच्। अत एव तस्मान्नक्षरत्यश्नुते वेत्यक्षरं परमेव ब्रह्मेति शंकरभाष्ये परस्मैपद्युक्तः। कयेति स्मरणस्य कालस्य च व्यापकव्याप्त्या भूतसूक्ष्माणां च प्रकृतेस्तु आप्राकृतिकलयात् क्षरणाभावः जीवेषु स्पष्टो योगः। स्मरणादीति । अन्यतरेति भाष्यं निश्वासत्वेन महाभाष्यवत् प्रमाणं न तु भाष्यप्रकाश इति बहूनां निर्धारणे डतमजुक्तः। ननु सूत्राण्यनु व्याख्यातानि व्याख्यातानीति मैत्रेयीब्राह्मणश्रुतेः कुत एतदिति चेन्न सूत्रानुसारित्वेन महाभाष्याननुसारित्वात्। अत्र हीति भाष्यं विवरांचक्रुः यत्पुनरिति। ब्रह्मपरीति भाष्यं विवरामासुः न चेति। एतस्य ब्रह्मधर्मवत्त्वस्यानुरोधेन। स्वरूपेति। पक्षे व्याप्यत्वाभिमतस्याभावः स्वरूपासिद्धिः। यथा ह्रदो द्रव्यं धूमादिति। तथा चेति।

सिद्धं हेतुमाह । अत्रैक एव प्रश्न उत्तरं चैकम् । आकाशस्यावान्तरत्वमेव । तेनाम्बरान्तानां पृथिव्यादीनां विधारकः परमात्मैव । द्युभ्वाद्यायतनसिद्धो धर्मोऽत्र हेतुः न तदश्नोति कश्चनेति मुख्यतया परिगृहीतो भवति । अन्यथा मूर्ध्नो विपतनं च भवेत् । न ह्यन्यः सर्वाधारो भवितुमर्हति । परोक्षेण ब्रह्मकथनाऽर्थमक्षरपदमन्यनिराकरणार्थं तद्धर्मोपदेशश्च । तस्मादक्षरं परमात्मैव ॥ १० ॥

भाष्यप्रकाशः ।

अत्रैक इत्यादि । यद्यप्यत्र 'द्वाभ्यां प्रश्नाभ्यामुपोदस्थाम्' इति द्वौ प्रश्नौ प्रतीयेते, तथापि पूर्वब्राह्मणे यथा तावत्सु प्रश्नेषु कृतेष्वपि न प्रश्नपरिसमाप्तिरेवमत्राकाशप्रश्नेऽपि, ततः कस्मिन् वा आकाश ओतश्च प्रोतश्चेति प्रश्ने आकाश एवेत्युक्त्वा तमाकाशमक्षरत्वेन निगमयत्येतद्वै तदक्षरमिति । एतत् त्वत्कृतद्वितीयप्रश्नोत्तरभूतं यदाकाशं तदक्षरमित्येवं वचनव्यक्तेः । अत आकाशस्याप्यवान्तरत्वमेवेति पूर्वब्राह्मणे सर्वपदोक्तां पृथिवीमारभ्यात्र प्रथमं य आकाश उक्तस्तदन्तानां या धृतिर्धारणं तेन हेतुना अम्बरान्तानां पृथिव्यादीनां विशेषेण परानपेक्षतया धारकः परमात्मैव ।

रश्मिः ।

भाष्ये । श्रुतिं व्याख्यायेत्यस्य कस्मिन्नु खल्वित्यादिविषयश्रुतिं व्याख्याय सर्वोतत्वप्रोतत्वाभ्यां अम्बरान्तधृतिरूपो हेतुः सिद्धस्तत्सिद्धं हेतुं आह व्यास इत्यर्थः । एवं च तात्पर्यं अम्बरान्तधृतौ इत्यम्बरान्तधृतेस्तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यसिद्धत्वादित्यर्थः । **तावत्स्विति** कस्मिन् वा आप ओताश्च प्रोताश्चेत्यादिषु प्रथमब्राह्मणस्थेषु । **न प्रश्नेति** द्वयोः प्रश्नयोः करिष्यमाणत्वात् । **आकाशेति** द्वितीयप्रश्नस्य करिष्यमाणत्वात् तथा च प्रश्नापरिसमापकत्वेनैकस्योक्तरूपेणाविवक्षितत्वं शुक्तिरजतेत्यत्र रजतवत् । रजतमादाय द्विवचनोपपत्तिवत् । द्वाभ्यां प्रश्नाभ्यामित्यत्राविवक्षाप्रयोजकं प्रश्नापरिसमापकत्वमादाय द्विवचनोपपत्तिः । **आकाश एवेति** प्रश्नद्वयमुत्तरद्वयं चैकविधं द्वितीयविधायामेवकारोधिकः । **निगमयतीति** एतद्वै तदक्षरमिति वक्ष्यमाणश्रुतावेतत्पदेनाकाशं परामृश्याक्षरमित्यक्षरत्वोक्तेर्निगमयति प्रापयति । **अवान्तरत्वमिति** प्रश्नापरिसमापकत्वं वाय्वादिप्रश्नवत् । **त्वत्कृतेति** न चैकविधं प्रश्नद्वयमिति कथं द्वितीयत्वमिति शङ्क्यम् । अनूद्यानुवादयोः कलशो घट इत्यत्र कलशोनूद्यः तस्यानुवादो घट इति उभयोरेकत्वम् । यथा वा 'ब्रह्मविदाप्नोति परम्' इत्यत्र ब्रह्मानूद्य सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मानुवादः अत्रोभयब्रह्मपदयोरर्थयोरेकत्वम् । तस्य सत्त्वात् । **धारणमिति** पतनप्रतिबन्धव्यापार इति यावत् । द्युभ्वाद्यायतनं द्युभ्वाद्यायतनत्वं पतनप्रतिबन्धकव्यापारस्तेन रूपेणेति द्युभ्वाद्यायतनं भूमाऽक्षरम् । तेनेति भाष्यं विवरांबभूवुः **तेनेति** । परेति । पतनप्रतिबन्धकव्यापारातिरिक्तशक्त्यनपेक्षतया धारको विधारकः । कस्मिन्नाकाश ओतश्च प्रोतश्चेति प्रश्नवचनात् यस्मिन्नोतश्च प्रोतश्च पृथिव्यादिरेतदाकाशरूपं गार्गि अक्षरमित्युत्तरादम्बरान्तधारणमोतप्रोतधारणात्मकं वक्तव्यं तच्चाकाशौतप्रोतधारणं पृथिव्यादिसाधारणमिति हेतोर्नद्यादौ साधारणत्वेनाक्षरस्य परमात्मत्वासाधकत्वमाशङ्क्य ओतप्रोतधारणं समवायिकारणतासमानाधिकरणमित्याशयकं द्युभ्वाद्यायतनसिद्धो धर्मोत्र हेतुरिति भाष्यं तत्तात्पर्यं वदन्तः परमात्मैवेति भाष्ये एवकारेण जीवजडव्यावर्तकेन परमात्मनि

१ अनुवादार्हः ।

भाष्यप्रकाशः।

अयमर्थः। पूर्वब्राह्मणे अब्वाय्वनन्तरमाकाशस्योक्तत्वेऽप्यत्र पुनर्यदाकाशकथनं तन्न भूताकाशपरं किंतु भूतसूक्ष्मकालप्रकृत्यन्यतमं यद्वस्तु तत्परम्। तच्च मतान्तरे पदार्थान्तरम्। सिद्धान्ते तु प्रथमं कार्यं तत्। ततोऽधिको धारको न जीवविशेषोऽपि भवति। उक्ताकाशौतप्रोतत्वस्य जीवे क्वाप्यसिद्धत्वात्। एवं जडजीवयोर्निवृत्तौ तद् ब्रह्मकार्यत्वेनैव निश्चीयते।

रश्मिः।

प्राप्तं भारवाहकत्वं वारयामासुः **अयमर्थ** इति। **भूते**ति भूतसूक्ष्माणि शब्दरूपरसस्पर्शगन्धाः भूतानां सूक्ष्माणि रूपाणि भूतसूक्ष्माणि। **तत्पर**मिति अन्यथा पौनरुक्त्यापत्तेः। काश शब्दे भ्वादिः परस्मैपदी सेट्। काश दीप्तौ दिवादिः आत्मनेपदी सेट्। योगेन शब्दपरम्। परंपरया काश्यत इति योगेन रूपादिषु 'परान्वयाच्छब्दवांश्च' इति वाक्यात्। काश दीप्तावित्यस्मात्प्रत्यये आकाशः कालः प्रकृतिश्च। कालस्य लक्षणं 'अन्तः सच्चिदानन्दत्वे सति व्यवहारे ईषत्सत्त्वेन प्रकटत्वम्' प्रकृत्यास्तु 'भगवन्निर्मितत्वे सति मुख्यं भगवद्रूपत्वम्' लक्षणम्। एतच्च प्रस्थानरत्नाकरे स्पष्टम्। **मतान्तर** इति उपनिषद्व्याख्यातुर्मते अविद्याशबलित ईश्वरः पदार्थान्तरं प्रकृतिरूपम्। नैयायिकमते द्रव्यमात्मा कालश्चेतिं पदार्थान्तरम्। परमाणुरूपा वा शब्दादयः। प्रथमं कार्यमिति शब्दरूपाकाशात्मकम्। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति श्रुतेः अत्र मात्रात्मक आकाशो विवक्ष्यते। वाराहे चातुर्मास्यमाहात्म्ये चतुर्दशेध्याये 'एवं पूर्वमभूत्सृष्टिः सूक्ष्मरूपैः' इति वाक्यरूपपुराणप्रतीकज्ञानेन मोहाभावात्। यद्वा यथाश्रुत एवार्थः। पूर्वब्राह्मणे संपत्त्याविर्भाविते रूपे सर्वौतप्रोतत्वं विचारितमन्तिमे कस्मिन् प्रजापतिलोकाः ओताश्च प्रोताश्चेतीति गार्गीप्रश्ने ब्रह्मलोकेषु गार्गीत्युत्तरात्संपत्तिरूपोक्तेः ब्रह्मलोकस्याक्षरत्वात् सर्वकारणकारणस्य प्राप्यत्वात्। अत्र तु सुषुप्त्याविर्भाविते रूपे सर्वौतप्रोतत्वस्य न तदश्नोति कंचनेति श्रुतेरभावात् प्रथमकार्यस्यौतप्रोतसहितस्याक्षराभेदस्योपपादनात्। ननु भूतसूक्ष्मकालप्रकृतिजीवविशेषाणामन्यतममित्यपि सुवचमिति चेत्तत्राहुः **तन्न** इति। भौतिकाकाशात् जीवविशेष उपासापचितजीवः कुतस्तरां साधारणजीवजडौ एकस्याणुत्वाज्जडस्य परिच्छिन्नपरिमाणवत्त्वात् तेन ग्रामं गच्छन् तृणं स्पृशतीति न्यायेन सामान्यतः पूर्वपक्षोपास्तः। **उक्ते**ति भूतसूक्ष्मादिरूपाकाशौतप्रोतत्वस्य क्वापीति मुक्तिकालेप्युक्ताकाशाभेदो न त्वोतप्रोतत्वम्। **तदि**ति आकाशरूपं कार्यम्। एतेन एतद्वै तदक्षरं गार्गि यस्मिन्नाकाश ओतश्च प्रोतश्चेति श्रुतेः अक्षराधिकरणकाकाशनिरूपिततादात्म्यस्य सत्त्वात् कार्यकारणवस्त्वैक्यपरामर्शः।

'कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत्।
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते' ॥

इति। सप्तमस्कन्धात्। यस्तु स होवाच एतद्वै तदक्षरमिति श्रुतिव्याख्याने स याज्ञवल्क्यो ह उवाच यत्त्वं पृष्टवत्यसि कस्मिन्नु खल्वित्यादिना व्याकृतानामाकाशाधिष्ठानं तद्वै अव्याकृताधिष्ठानमेतदक्षरमित्यक्षराकाशयोराधाराधेयभावः स श्रौतोपि भारवाहकत्वापादको नाङ्गीक्रियते। श्रौतोपि अक्षरे आकाशः इत्याधाराधेयभावोऽभिव्यापकाधारे सप्तमीं स्वीकृत्य निर्वाह्यते 'तन्तुष्वङ्ग यथा पटः' इति दृष्टान्तात्। आरोपापवादेनादृश्यत्वाद्यधिकरणोक्तमदृश्यत्वादिकं पूर्वं पूर्वपक्षे समर्थितं तन्मायावादे, सिद्धान्ते पुनरक्षरविचारस्य समर्थनामाहुः **पुनरि**ति। तुः पूर्वपक्षं वारयति। विरुद्धधर्माधारत्वं प्राग्वैश्वानराद्यधिकरणे ब्रह्मण उक्तमेवेति प्रागेवोक्तमित्यस्यार्थः। ननु प्राक् पूर्वपक्षे उक्तमित्यर्थः

रश्मिः ।

कुतो न इति चेन्न पूर्वपक्षत्वेन सैद्धान्तिकार्थाभावात् । न च कथं विरुद्धधर्माधारत्वसमर्थनं यावताऽस्थूलमनण्वित्यादिनाऽत्यन्ताभावप्रतिपादनादारोपापवादलक्षणसंगत्या श्रौतधर्मनिषेधात्कैर्धर्मैरदृश्यत्वविरुद्धैर्विरुद्धधर्माधारत्वमिति वाच्यम् । अस्थूलमनण्वित्यादिना पर्युदासप्रतिपादनात् तथाहि ।

'सर्वतः पाणिपादान्तं सर्वतोक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्त्य तिष्ठति' ॥

इत्यत्र श्रुतौ 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति च 'सर्वतः पाणिपादं तत्' इत्यादिश्च गीता । एतस्मात्साकारब्रह्मणः सर्वेन्द्रियाभासवत इत्यर्थः । 'नासतो विद्यते भावः' इति गीतायाः । तदुक्तम् । 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्' इतिगीतायाम् । तथा चास्थूलमित्यत्र भेदवत् भेदप्रतियोगी सदृशं नञर्थ उक्तश्रुत्यादिभ्यः । एवं च स्थूलभिन्नस्थूलसदृशमक्षरमित्यर्थः । एवमनण्वित्यादावपि । ननु अलोहितमच्छायमित्यत्र कथमिति चेन्न लोहितभिन्नलोहितसदृशं छायास्त्यस्य तद्वस्तु च्छायं तद्भिन्नतत्सदृशमिति व्युत्पत्तिसंभवात् । ततश्चारोपापवादसंगतिं त्यक्त्वा निर्वाहकसंगत्या स्थूलभिन्नस्थूलसादृश्यैर्धर्मैरदृश्यत्वविरुद्धैः विरुद्धधर्माधारमिति । ननूक्तं श्रौतधर्मनिषेधान्नैवमिति चेन्न प्रक्षालनपङ्कन्यायापत्त्या श्रौतधर्मानिषेधात् । स्पष्टं चेदं विद्वन्मण्डने नन्वेवमारोपापवादसंगतित्यागापत्तिरिति चेन्न ब्रह्मनिरूपणार्थं निर्धर्मसधर्मनिरूपकश्रुत्योर्निरूपणम् । सत्यं ज्ञानमनन्तं ब्रह्मेति अथात आदेशो नेति नेतीति निर्धर्मकब्रह्मनिरूपणानन्तरं किं ब्रह्मनिरूपणनिर्वाहप्रयोजकमिति जिज्ञासया 'यतो वा इमानि भूतानि जायन्ते' इत्यादिभिः सधर्मकनिरूपणात् निर्वाहकसंगतिस्वीकारात् । ननु क्वोक्तेयं संगतिरिति चेन्न आरोपापवादवत् अथातो ब्रह्मजिज्ञासेति प्रतिज्ञाय जन्माद्यस्येत्यत्रैवेति । किं च वेदस्तुतौ 'कथं चरन्ति श्रुतयः साक्षात्सदसतः परे' इति राजप्रश्ने 'बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः' इतिशुकोत्तरात् । विद्वन्मण्डने च 'जगदप्रत्ययासितः इति कारिकांशप्रतिपादके तथा हि जगदप्रतीतिप्रसङ्गान्नहि जगत्प्रतीतिः श्रुतिसिद्धा येन पूर्वं बोधयति पश्चान्निषेधतीत्युच्येत अनधिगतार्थगन्तृत्वलक्षणप्रामाण्यभङ्गप्रसङ्गात् । न च वेदेषु सर्वस्याधिगतत्वेनासंभव इति वाच्यम् । लोकेऽनधिगतेत्यादेर्लक्षणत्वान्नासंभवः । नन्विमानि भूतानीति लोके प्रयोगात्कथं लोके अनधिगतार्थत्वमिति शङ्क्यम् । 'प्रधानाज्जगज्जायते' इति सांख्यानां प्रधानकारणवादः नैयायिकानां परमाणुकारणवादः शांकराणां मायाशबलकारणवादः इति यतो वै जायन्त इत्यस्यानधिगतत्वात् तदन्तःपातिन इमानि भूतानीत्यस्यापि लोकेऽनधिगतत्वात् भक्तिमार्गान्तःपातिनां ज्ञानपूजादीनां भक्तित्ववत् । भक्तिहंसे स्पष्टम् । ननु अग्निर्हिमस्य भेषजमित्यत्रानधिगतांशाभावात् कथं निर्वाह इति चेन्न अर्थस्य भगवदवयवत्वेनाधिदैविकत्वेन लोकानधिगतत्वात् । शब्द इति चेदित्यादिसूत्रे वक्ष्यतेऽग्रेऽत्रैव पादे किं तु लोकसिद्धा तथा च तत्र विचित्रजगत्कृतौ कर्त्रपेक्षायां कर्तारमेवोपदिशति सधर्मनिरूपिका श्रुतिरिति न तु लोकसिद्धमेव जगदनूद्य तत्र कर्तारं बोधयित्वा पश्चान्निषेधतीत्यारोपापवादमाशङ्क्य ग्रन्थः । प्रकृतमुच्यते । ननु गीतायां 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति पदार्थानां भेदः प्रतीयते ततश्च भारवाहकत्वापत्तिरिति चेत्तत्राहुः पदार्थेति । प्रोतेति । प्रकर्षेणोतं उङ् शब्दे भ्वादिरात्मनेपद्यनिट् शब्दितमेतावन्मात्रेण भवति ओतप्रोतत्वमात्रेण

भाष्यप्रकाशः ।

पुनर्विचारस्तु विरुद्धधर्माधारत्वसमर्थनायेति प्रागेवोक्तम् । पदार्थभेदस्तु प्रोतत्वमात्रेणैव न त्वोतप्रोतत्वेन । तस्योपादानकारणतागमकत्वात् ।

'नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे ।
ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः' ॥

इति श्रीभागवतवाक्येन तथा निश्चयात् । नातो भारवाहकत्वापत्तिः । अत्र 'न तदश्नोति' इत्यस्य विकरणव्यत्ययेन भोजनार्थग्रहणेऽन्यकर्तृकतन्निषेधः पुरुषभोग्यां प्रकृतिं व्यावर्तयति । अन्यकर्मकतन्निषेधश्च सर्वभक्षयितारं कालम् । पदव्यत्ययेन व्याप्त्यर्थग्रहणे तु द्वावपि निषेधौ व्यापकत्वं

रश्मिः ।

पदार्थभेदः कुतो नेत्यतो हेतुमाहुः **तस्येति** ओतप्रोतत्वस्य । **तथेति** इदमर्थनिष्ठौतप्रोतत्वस्य जगदीश्वरनिष्ठसमवायिताबोधकत्वनिश्चयात् । तथा चैतादृगोतप्रोतधारणं न पृथिव्यादिसाधारणमिति हेतोरपि न साधारणत्वमिति सुसाध्यमनेन हेतुनाऽक्षरस्य परमात्मत्वमिति भावः । सिद्धमाहुः **नात** इति तथा च तन्तुषु पटः शब्दितः पामरैरतः शास्त्रादिना शब्दित इत्युक्तम् । ओतप्रोतशब्दाभ्यां यथा तथा यदिदं सर्वमित्युक्तं पृथिव्यादिकं पूर्वब्राह्मणोक्तं उत्तरब्राह्मणोक्तम् । दिव उपरि वर्तमानं पृथिव्या अधो वर्तमानं भूतं भविष्यद्भवच्च कैश्चिदोतमीश्वरकृतमिदमिति शब्दितं शास्त्रैरीश्वरसमवेतमिति शब्दितं प्रकर्षेणोतं प्रोतं ब्रह्मणः साकारत्वान्न तु किंचिदन्यद्धारकारकमित्युक्तम् । किं च स्वशब्दाद्द्युभ्वाद्यायतनं तत् समवायि अम्बरान्तधृतिमदिति यावत् । एवं द्युभ्वाद्यायतने ब्रह्मणि सिद्धो यो धर्मोऽम्बरान्तधृतिरूपः सोत्राक्षरत्वे साध्ये हेतुरिति द्युभ्वेत्यादिभाष्यार्थः । **भाष्ये** । ननु पूर्वपादेधिकरणत्रयेण भोगप्रसाधनाज्जीवजडयोर्भोक्तृभोग्यत्वाभ्यां न तदश्नोतीति श्रुत्याक्षरमन्यदेव ब्रह्मधर्मत्वेनोपास्यमित्याशङ्क्याहुः **न तदश्नोतीति** । द्युभ्वादीनां पतनं तस्य प्रतिबन्धको यो व्यापारो धृतिस्तया कृत्वा न तदश्नोतीत्यादिः । तदुक्तं 'स्वरूपं द्विविधं चैव सगुणं निर्गुणं तथा' इति । इदं सुषुप्तिसामयिकं 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति गीतायाः । पूर्वपादेधिकरणत्रयेण भोक्तृरूपं संपत्तिसामयिकं पूर्वब्राह्मणोक्तमिति । इदं **श्रीगोस्वामिमत**मुत्तरसार्धाध्यायेऽस्यार्थस्योक्तेः । भाष्यप्रकाशे त्वाचार्यमतेन पटतन्तुवद्धारवाहकत्वं वारितम् । स्वमतेन वा वारितम् । **अन्यथेति** सधर्मकनिर्धर्मकयोः स्वाप्ययसंपत्ती अपेक्ष्य रूपयोरङ्गीकारत्वम् । प्रकारेऽर्थादनङ्गीकारस्य प्रकारत्वे । **भवेदिति** संपत्तिसामयिकब्रह्मनिरूपणे तत्र श्रावितानतिप्रश्न्यत्वातिक्रमाद्भवेत् । स्वाप्ययसामयिकरूपविषयकप्रश्ने तु तस्यानतिप्रश्न्यत्वाभावात् न मूर्धविपातः । **प्रकृते** । स्वाचार्यमतेनार्थमाहुः **अत्र नेति** । अश भोजन इत्यस्य क्र्यादित्वेन स्वादिश्नौश्नाभावात् श्नाविकरणव्यत्ययः । **अन्येति** कश्चन इत्यत्र कोप्यन्यो नाश्नातीति सर्वनाम्नि क इति सर्वेषां नाम सर्वनाम तत्कर्तृकभोजननिषेधः । **पुरुषेति** प्रकृतेरेवान्यभोग्यत्वेन तत्संसृष्टस्य ब्रह्मणोत्र भोग्यत्वेन तन्निषेधः प्रकृतिसंसृष्टतां व्यावर्तयति तथा च प्रकृत्यसंसृष्टं संसारी जीवोऽन्यो वा न प्राश्नातीत्यर्थः । **अन्य** इति तत् ब्रह्म न कंचन सर्वनामानं अश्नातीत्यर्थे उत्तरभाष्यानुसारिणि सर्वभक्षयितारमिति विरुध्यतेऽतः कं ब्रह्माणं संवत्सरं नाश्नातीत्यर्थस्तन्मते । 'सदेव सोम्येदमग्र आसीत्' इत्यत्र कालस्य भगवत्त्वात् । स्वं स्वयं नाश्नाति । **पदेति** अश्नुते इति परस्मैपदस्थाने आत्मनेपदम् । अशूङ् व्याप्तौ स्वादिरात्मनेपदी वेट् । अश भोजने क्र्यादिः परस्मैपदी सेट् । अतिमहत्त्वाद् व्यापकत्वं कस्याप्यव्यापकत्वे तदभावम् । ननु न कोपि कमपि च

८१ ब्र० सू० र०

भाष्यप्रकाशः।

तदभावं च बोधयन्तौ विरुद्धधर्माश्रयत्वं वस्तुपरिच्छेदराहित्यं च तस्य समर्थयतः। अतो न तदश्नोतीत्यादिना ब्रह्मापेक्षयाधिकस्य ब्रह्मापेक्षयान्यस्य च निराकरणेन, द्युभ्वाद्यायतनाधिकरणे सिद्धस्य तत्स्वरूपात्मकतया तद्धारकत्वस्य हेतोर्मुख्यतया मूर्धविपाताभावाय परिगृहीतत्वात्। नच श्रोतृदोषादवक्तव्यत्वम्। तस्यास्तथात्वेऽपि ब्रह्मविच्वेनाधिकारित्वात्। पूर्वमतिप्रश्ने ब्रह्मज्ञत्वाभावसंभावनया मूर्धविपातस्योक्तत्वेन गार्ग्या अब्रह्मविच्वे उक्तप्रश्नान्मूर्धविपतनं च भवेत्। तत्तु न जातमतस्तस्या अधिकारित्वेन तां प्रत्युपदेशो नायुक्त इति सर्वाधारत्वेनात्र ब्रह्मैवोपदिश्यते। न ह्यन्यो निरङ्कुशः सर्वाधारो भवितुमर्हतीत्युक्तत्वात्। नन्वेवं सति ब्रह्मपदस्य कुतो नोक्तिरिति शङ्क्यम्। परोक्षेण कथनार्थमक्षरपदात्। तत्रापि गमकं न तदश्नोति कश्चनेत्यादिना ब्रह्मधर्मोपदेशः। अत एव ब्रह्मवादस्यापि न समाप्तिः। तस्माद् बाधकानामभावात् साधकानां सत्त्वाच्चाक्षरं परमात्मैवेत्यर्थः।

रश्मिः।

व्याप्नोति इत्यसंगतमत आहुः **विरुद्धेति**। तथा च व्यापकविरुद्धो धर्म एषोऽव्यापकत्वं यः न कमपि पदार्थं व्याप्नोतीति वस्तुभ्यः परिच्छेदस्य राहित्यम्। न च वृद्धिह्रासभाक्त्वमित्यादिसूत्रविरोध इति शङ्क्यम्। 'यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति' इति षष्ठस्कन्धात्। **ब्रह्मापेति** विकरणव्यत्यये सर्वेषां ब्रह्मापेक्षयाऽल्पत्वेनातिमहतो भोगाभावे आधिक्यं निराकरोति पदव्यत्यये विरुद्धधर्माधारत्वान्न ततोधिकः कश्चन। द्वितीयनिषेधपक्षमाहुः **ब्रह्मेति**। विकरणव्यत्यये तद्ब्रह्म कंचनान्यं नाश्नाति ब्रह्मातिरिक्ताभावादित्येवमन्यन्निराकरोति पदव्यत्यये कंचनान्यं न व्याप्नोति ब्रह्मातिरिक्ताभावात् इत्येवमन्यं निराकरोति। **मूर्धेति**। ब्रह्मात्मकत्वेन ज्ञानेऽव्ययैकभावेक्षणाद् ब्रह्मज्ञत्वे पुष्टिरपि भवतीति मूर्धपातकस्य ब्रह्मत्वेपि वारणम्। न च भारेत्यादिपाठस्तदा तु श्रुतिं व्याख्यायेत्यारभ्य परमात्मैवेत्यन्तस्य भाष्यस्यार्थमाहुः **अयमर्थ** इति। **तथा निश्चयेति** अत्रैक एवेत्यादि भाष्यार्थस्य विधारकत्वेन निश्चयात्। श्रुतिं व्याख्याय सिद्धं हेतुमाहेति भाष्ये का श्रुतिः किं तस्या व्याख्यानं क सिद्धो हेतुस्तमाहेत्याकाङ्क्षायां द्युभ्वादीत्यारभ्यार्हतीत्यन्तं भाष्यं तद्विवरामासुः **न च भारेति**। अत्र न तदश्नोति तस्या व्याख्यानं चाहुः। अत्र न तदश्नोतीत्यारभ्य समर्थयत इत्यन्तेन ग्रन्थेन। क सिद्धो हेतुरित्याशङ्क्य न तदिति भाष्यस्य व्याकृतत्वेन द्युभ्वादीति भाष्यविवरणमाहुः **अतो नेति** श्रुतेर्व्याख्यातत्वादित्यत इत्यस्यार्थः। **प्रष्टुः स्त्रीत्वा**दिति पूर्वपक्षग्रन्थमपाकुर्वन्ति स्म **न चेति**। श्रोतुः स्त्रीत्वरूपाद्दोषात्। **अन्यथेति** भाष्यं विवरांचक्रुः **पूर्वमिति**। प्रथमगार्गीब्राह्मणे ब्रह्मज्ञत्वाभावसंभावनया मूर्धविपातस्योक्तत्वेनेति 'कस्मिन्नु ब्रह्मलोका ओताश्च प्रोताश्च' इति प्रश्नेनाब्रह्मज्ञत्वसंभावनया मातिप्राक्षी माते मूर्धा व्यपतदित्यनेनोक्तत्वेन न हि ब्रह्मज्ञा एवं पृच्छेत् ब्रह्मलोकपर्यन्तं ब्रह्म। आनन्दमीमांसायां 'ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः' इति ब्रह्मलोकादुत्तरं ब्रह्माभावात्। **उक्तेति** द्वितीयगार्गीब्राह्मणोक्तप्रश्नात्। **उपदिश्यत** इति। तेन भाष्यस्यान्यथापदस्यात्र ब्रह्मोपदेशाभाव इत्यर्थो ज्ञापितः ब्राह्मणाज्ञया प्रश्नः कृतो गार्ग्या अतो मूर्धविपाताभाव इति टीकायामुपनिषद्व्याख्यातात्। हेतुमुखेन ह्यन्य इति भाष्यं विवृण्वन्ति स्म **न ह्यन्य** इति। जीवो वा जडो वा नहि इत्याचार्यैर्भाष्य उक्तत्वात्। परोक्षेणेत्यादिभाष्यमवतारयांबभूवुः **नन्वित्यादि**। **परोक्षेणेति** अक्ष्णः परमिति विग्रहात् सर्वमप्यध्यात्ममाधिदैविकं च परोक्षं तेन रूपेण ब्रह्मकथनार्थम्। 'परोक्षवादो वेदो यम्' इत्याविर्होत्रेण 'परोक्षं च मम प्रियम्' इत्यत एवोक्तं भगवतापि। **अन्येति** भाष्यं

भाष्यप्रकाशः ।

अत्र शंकराचार्यास्तु, अक्षरशब्दस्य वर्णे प्रसिद्धत्वादत्रोङ्कार एव व्यावर्त्य इत्याहुः । तद्भास्कराचार्यैरेवं दूषितम् । ॐकारोऽत्र न वक्तुं शक्यः । अलोहितमच्छायमित्येवमादिनिषेधानुपपत्तेरिति ।

भिक्षुणा तु द्रव्यधर्माणां स्थूलत्वादीनां प्रणवे प्रसक्त्यभावेन तन्निषेधानौचित्याद् वर्णसामान्यवाचिनोऽक्षरशब्दस्य प्रणवरूपवर्णविशेषवाचिताया ॐमित्यादिविशेषणानां क्काप्यदर्शनाच्चेत्यप्युक्तम् ।

यत्तु वाचस्पतिमिश्राः । अत्र प्रधानस्य पूर्वपक्षकोटिनिक्षेपेण परमात्मनः सिद्धान्तीकरणे अम्बरान्तधृतिरूपेण हेतुना प्रधाननिराकरणासंभवः । तस्यापि सांख्यैरुपादानत्वेन सर्वाधारत्वाङ्गीकारात् । अथ नाधिकरणत्वमात्रं धृतिः, किंतु प्रशासनाधिकरणता, तदा अक्षरं प्रशासनादिति सूत्रकारो वदेत् । तावतैव प्रधानाऽपाकरणसिद्धेः । तस्माद् वर्णाक्षरनिराक्रिया सूत्रार्थः । नच स्थूलत्वादीनां वर्णेष्वप्राप्तेरस्थूलमित्यादिनिषेधानुपपत्तिरिति शङ्क्यम् । निषेधे प्राप्तिपूर्वकत्वनियमस्याभावात् । नान्तरिक्षे न दिवीत्यग्निचयननिषेधस्याप्राप्तावपि दर्शनात् । अतो न किंचनैतदित्याहुः ।

तन्मन्दम् । गत्यन्तरसद्भावे नित्यानुवादत्वाङ्गीकारस्यासंगतत्वात् । चयनस्थलेऽपि

रश्मिः ।

विवरामासुः तत्रेति अक्षरपदेन ब्रह्मकथने । सोप्यन्यनिराकरणार्थं प्रकृत्यादिनिराकरणार्थम् । अत एवेति ब्रह्मपदाभावादेव न ब्रह्मवादः किं तु सुषुप्तिसाक्षिप्राज्ञवादः न तदश्नोति कश्चनेति श्रुतेः ततश्चरमवर्णाभावान्न चरमवर्णध्वंसरूपा समाप्तिः । तस्मादिति व्याख्येयं भाष्यीयं पदम् । बाधकानां जडजीवप्रकृतीनाम् । साधकानामम्बरान्तधृत्यादीनामेवकारः 'स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि' इति प्रमाणात् । निषेधेति वर्णे लोहितत्वाद्यभावात् प्राप्तिपूर्वकनिषेधानुपपत्तेः । भिक्ष्विति भगवता । प्रणवेति चतुर्थ्यन्तमिदं पदम् । तत्सिद्ध्यर्थमित्यर्थः । पूर्वपक्षेति वर्णः पूर्वपक्षकोटौ यद्यपि शंकरभाष्ये तथापि ।

'युक्तिभिरतिशिथिलाभिः समादधानो दृढान्दोषान् ।
वाचस्पतिरपि भाष्ये व्याख्याव्याजेन दूषणं ब्रूते' ॥

इति श्रीपुरुषोत्तमज्ञानात् साधु । मन्दमिति स्वैरं भाषणम् । गत्यन्तरेति सिद्धान्तोक्तरीतिर्गत्यन्तरम् । नित्येति 'उभयस्य युगपत्प्राप्तौ इतरव्यावृत्तिपरो यो विधिः स परिसंख्याविधिः' यथाऽत्र ह्येवावपन्ति इति । अत्र पवमानस्तोत्रस्य तदन्यस्तोत्रस्य च युगपत्प्राप्तौ सत्यामेवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात् प्रयोजनाभावे परिसंख्याया नित्यानुवादत्वम् । 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्यत्र ह्यर्थवादे फलतः परिसंख्या चयने गर्दभाभिधानीनिवृत्तिः फलं तत्फलं लिङ्गतोपि भवतीति तत्र तात्पर्यं न कल्प्यते यदा तदा नित्यानुवादत्वमेवं प्रकृतेपि सूत्रे 'सहोवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलम्'इत्याद्यर्थवादे यो वा एतदक्षरमविदित्वा गार्गि अस्मिन् लोके जुहोति ददाति तपस्तप्यत्यपि बहूनि वर्षसहस्राण्यन्तवानेवास्य लोको भवति इत्युक्तविधेर्यदि वर्णनिवृत्तिः प्रकृतिनिवृत्तिश्च 'ॐमित्येकाक्षरं ब्रह्म' 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इति जैमिनिसूत्रैकदेशेन चानिवर्त्यस्याक्षरस्य 'जन्माद्यस्य यतः' इति सूत्रे शंकरभाष्य एव निवृत्तायाः प्रकृतेश्च

सा च प्रशासनात्॥ ११॥

ननु क्वचिद्वाक्ये विधारणं ब्रह्मधर्मत्वेनाश्रितमित्यन्यत्रापि न तथाश्रयितुं शक्यते। नियामकाभावादित्यत आह। सा च विधृतिरत्रापि वाक्ये ब्रह्मधर्म एव। कुतः। प्रशासनात्। 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी

भाष्यप्रकाशः।

देवप्रभृतीनां कर्माधिकारस्याऽग्रे स्थाप्यत्वात् तेषां लोकान्तरेऽपि करणसामर्थ्यसत्त्वेन तद्वारणार्थत्वात् सिद्धान्तोक्तरीत्या सुखेन प्रधानवारणसंभवेन गत्यन्तरस्य सत्त्वादिति। अतो वृथाऽयं प्रयास इति ध्येयम्। अत्रैवं प्रयोगः सिध्यति। अस्थूलादिवाक्योक्तमक्षरं परमात्मैव। इतराभोग्यत्व इतराभोक्तृत्वे च सत्यम्बरान्तधारकत्वात्। यन्नैवं तन्नैवमिति। अश्नोतेर्व्याप्त्यर्थकत्वे तु विरुद्धधर्माधारत्वे सति तथात्वादिति॥ १०॥

सा चा प्रशासनात्॥ ११॥ सूत्रमवतारयन्ति नन्वित्यादि। क्वचिद्वाक्ये इति यस्मिन् द्यौरिति वाक्ये। व्याकुर्वन्ति सा चेत्यादि। श्रुतिव्यतिरिक्तशास्त्रसिद्धं यन्मूलं कारणं तदत्र विषयवाक्य आकाशत्वेनोक्तम्। तद्वारणस्यान्यधर्मत्वं न संभवत्येव। तथापि, 'मूले

रश्मिः।

व्यावृत्त्योः प्रयोजनत्वाकल्पने नित्यानुवादो विषयवाक्यम्। **अग्र** इति तदुपर्यपीत्यधिकरणे। **प्रधाने**ति। अभिन्ननिमित्तोपादानत्वस्य ब्रह्मधर्मत्वेन प्रधानस्य समवायित्वाभावात् तथा संभवेनाम्बरान्तधृतेरित्यत्र पतनप्रतिबन्धकव्यापारो धृतिर्धारणं तत्रैव धृतिपदस्य शक्तेः न तु समवायित्वं धारणमित्याशयेन न तदश्नोति कश्चनेति मुख्यतया परिगृहीतो भवतीति भाष्यं तत्सिद्धं हेतुमाहुः अथवा सिद्धं हेतुमाहु**रितरे**ति। श्रुतिं व्याख्याय सिद्धं हेतुं द्युभ्वाद्यायतनाधिकरणे सिद्धो धर्मोत्र हेतुस्तद्रूपमाहेति भाष्ययोजने न तदश्नोतीति श्रुतिं व्याख्याय तदर्थं विशेषणीकृत्य द्युभ्वाद्यायतनाधिकरणे सिद्धो धर्मो द्युभ्वादिरूपाम्बरान्तस्य तदात्मकस्य धारकत्वं समवायित्वं तस्मादित्येवं हेतुः समर्थितः। एवं द्वितीयाभासानुरोधिहेतुः समर्थितोपि प्रथमाभासेनेदानीं समर्थ्यते। तथाहि समवायसंबन्धस्थले न तदश्नोतीति श्रुतिबलादभोजकः श्रुतिसिद्धो धर्मो योगरूपो यथा श्रीगोवर्धनप्रसङ्गे 'गोपाये स्वात्मयोगेन' इति। योगश्चाश्रयताख्यो धारणपदवाच्यो निवेश्यते। एवं चाम्बरान्तधृतेरित्येव हेतुः यन्नैवमिति यथा घटः॥ १०॥

सा च प्रशासनात्॥ ११॥ श्रुतीति सांख्यशास्त्रम्। तथा च सूत्रं 'प्रधानाज्जगज्जायते' इति आनुमानिकमित्याद्यधिकरणेऽस्य मतस्य श्रुतिव्यतिरिक्तशास्त्रत्वं वक्ष्यते। किं च यदत्र परव्याख्यानं पूर्वं गार्गीब्राह्मणे वायोरोतत्वप्रोतत्वप्रश्ने आकाश एवेत्युत्तरं अत्राकाशः पञ्चीकृत इति। तथाक्षरब्राह्मणे कस्मिन् वा आकाश ओतश्च प्रोतश्चेति प्रश्ने आकाशपदमव्याकृताधिष्ठानवाचकं तदेवाक्षरं परं ब्रह्मेति। तदिदं श्रुतिव्यतिरिक्तशास्त्रसिद्धम्। स्वबुद्धिपरिकल्पितशास्त्रार्थरूपम्। वैश्वानराद्यधिकरणे ब्रह्मणो विरुद्धधर्माश्रयत्वस्योपपादनात्। **आकाशत्वेने**ति अत्रैवं बृहदारण्यकभाष्यं शांकरम्। कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति आकाशमेव तावत्कालत्रयातीतत्वाद् दुर्वाच्यं ततोपि कष्टतरमक्षरं यस्मिन्नाकाशस्यौतप्रोतत्वं वाच्यमतो दुर्वचं प्रश्नं मन्यते गार्गीति तद्दोषद्वयमपि परिजिहीर्षन्नाह सहोवाच याज्ञवल्क्यः एतद्वैतद्यत्प्रष्टव्यसि कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति किं तदक्षरं न क्षीयते न क्षरतीति वा अक्षरमिति। **न स**मिति। न हि मूलमन्याश्रितं भवतीति भावः।

विधृतें तिष्ठतः' इति प्रशासनेन विधारणमन्यधर्मो भवितुं नार्हति । अप्रतिहताज्ञाशक्तेर्भगवद्धर्मत्वात् । तस्मादक्षरं ब्रह्मैव ॥ ११ ॥

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

ननूक्तमुपासनापरं भविष्यतीति । तत्राह । अन्यभावव्यावृत्तेः । अन्यस्य

भाष्यप्रकाशः ।

मूलाभावादमूलं मूलम्' इति सांख्यप्रवचनसूत्रोक्तन्यायेन द्वितीयवाक्योक्ताकाशमपि पूर्ववाक्योक्ताकाशत्वेनादृत्य, तस्यैवाक्षरत्वं चादृत्य तस्य स्वाधारत्वेनाम्बरान्तधृतेरन्यधर्मत्वं ग्रहिलतया यदुच्यते, सा त्वयाऽन्यधर्मत्वेनाभ्युपगम्यमानापि विधृतिर्ब्रह्मधर्म एव । न हि तत् स्वसामर्थ्येन विधरति किंत्वेतस्यैवेति श्रुत्युक्तशासनसामर्थ्येन । यथा स्वर्गात् पततस्त्रिशङ्कोर्विधृतिस्तिष्ठेति विश्वामित्राज्ञया जायमाना तद्धर्म एव, न तु त्रिशङ्कुधर्मस्तद्वत् । नच 'अक्षरं प्रशासनाद्' इति सूत्रापत्तिः । ग्रहिलतयाऽन्यधर्मत्वेनापाद्यमानाया एव तद्धृतेः प्रशासनहेतुकताया ग्रहिलतावारणार्थं विवक्षितत्वेनाम्बरान्तधृतिपदस्यावश्यकतया तदापत्त्यभावादित्यर्थः ॥ ११ ॥

अन्यभावव्यावृत्तेश्च ॥ १२ ॥ सूत्रमवतारयन्ति **नन्वित्यादि** । प्रशासनहेतुकत्वं विधरण उपासनार्थमारोपितं भविष्यतीत्यर्थः । सिद्धान्तं व्याकुर्वते **अन्यस्येत्यादि** । कार्यकारणभावभेदेनेत्यस्य अब्रह्मत्वे हीत्यनेनान्वयः । ततश्चायमर्थः । एतद्वै तदक्षरं गार्गि अदृष्टं द्रष्टृश्रुतं श्रोत्रमतं

रश्मिः ।

द्वितीयेति यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं चेति द्वितीयं वाक्यम् । **पूर्वेति** पूर्वं वाक्यं पूर्वोक्तमेव । **आदृत्येति** यदूर्ध्वं याज्ञवल्क्येत्यादिप्रश्नः प्रतिवचनं चोक्तस्यैवार्थस्यावधारणार्थं पुनरुच्यते न किंचिदपूर्वग्रन्थान्तरमुच्यते इति भाष्यात् । **आदृत्येति** बृहदारण्यकभाष्योपन्यासे उक्तमेतत् । **स्वेति** स्वमक्षरमाधारमात्रं यस्य तत्त्वेन । स्वस्याधारत्वेनेति वा । अम्बरान्तधृतेः स्वाभिन्नायाः अन्यधर्मत्वं शबलितधर्मत्वं प्रधानधर्मत्वं वा । सूत्रभाष्ये सा चाम्बरान्तधृतिः परमेश्वरस्यैव कर्म नाचेतनस्य प्रधानस्य प्रशासनं संभवति न ह्यचेतनानां घटादिकारणानां मृदादीनां घटादिविषयं प्रशासनमस्ति इत्याकारके ग्रहिलतयौतप्रोतत्वकथनेन विस्पष्टं समवायित्वप्रतीतावपि स्मृत्युपष्टब्धायां स्वकल्पितमताग्रहवादितया यदुच्यते । **सा चेति** भाष्यं विवरांचक्रुः **सा त्वयेति** । अप्रतीतिभाष्यार्थमाहुः **नहीति** । **तत्** आकाशम् । **शासनसामर्थ्येन** आज्ञासामर्थ्येन । एतेन योगोपि शासनाश्रयताख्योऽभोजकः संबन्धः । **सूत्रेति** प्रशासनस्यैव मुख्यधर्मत्वाल्लाघवाच्च । शास्त्रस्य सूत्रानुसारियुक्तिमत्त्वादाहुः **ग्रहिलेति** । ननु गौरवम् । कथमप्रामाणिकं सोढव्यमिति चेन्न प्रथमोपस्थितहेतुत्यागे मानाभावात्तत्र भोजकसंबन्धवारणाय सा चेत्यादिसूत्रावश्यकत्वात् गौरवाभावात् ॥ ११ ॥

अन्यभावव्यावृत्तेश्च ॥ १२ ॥ प्रशासनेति भावप्रत्ययरहितः पाठः । **अन्यस्येत्यादीति** अन्यस्य जीवस्य जडस्य च । **अब्रह्मेति** ब्रह्मभिन्नब्रह्मसदृशस्य जीवादेः सत्यज्ञानानन्दत्वेन सदृशस्य धर्म इत्यर्थः । तस्याब्रह्मधर्मस्यात्र विचारे व्यावृत्तेः । तेन शंकराचार्योक्तोऽन्यभावाद्व्यावृत्तिरितिपञ्चमीतो निराकृतोनभिधानात् । न च सुप्सुपेति समासः अगतिकगतित्वात् । अन्वय इति पदपदार्थसंबन्धः स चेत्थम् । कार्यकारणयोर्भावाभ्यां धर्माभ्यां भेदेन कार्यस्याब्रह्मत्वं भवति मायाविशिष्टत्वात् परमात्मनस्तथा मायाविशिष्टत्वाभावात् । तेन धर्मेण हेतुनाऽब्रह्मणि ब्रह्मभिन्ने ब्रह्मत्वेनोपासना भवति

भावोऽन्यभावः। अब्रह्मधर्म इति यावत्। तस्यात्र व्यावृत्तेः। अब्रह्मत्वे हि ब्रह्मत्वेनोपासना भवति। कार्यकारणभावभेदेन। न ह्यत्र तादृशो धर्मोऽस्ति।

चकाराद् 'यो वा एतदक्षरमविदित्वा गार्गि' इत्यादिना शुद्धब्रह्मप्रतिपादनमेव, नोपासनाप्रतिपादनमिति। तस्मादक्षरं ब्रह्मैवेति सिद्धम्॥ १२॥

इति प्रथमाध्याये तृतीयपादे तृतीयमक्षराधिकरणम्॥ ३॥

भाष्यप्रकाशः।

मन्तविज्ञातं विज्ञातृ नान्यदस्ति द्रष्टृ नान्यदस्ति श्रोतृ नान्यदस्ति मन्तृ नान्यदस्ति विज्ञात्रेतद्वै तदक्षरं गार्गि यस्मिन्नाकाश ओतश्च प्रोतश्चेत्याकाशधर्तर्यक्षरे द्रष्टृत्वादिचेतनधर्मकथनेन धरणे जडधर्मत्वव्यावृत्तेर्धरणस्य चाकाशौतप्रोतत्वरूपस्वरूपबोधनेन जीवधर्मत्वव्यावृत्तेरक्षरस्याब्रह्मत्वनिवृत्तावब्रह्मणि ब्रह्मत्वेनोपासनाया वक्तुमशक्यत्वादिति। युक्त्यन्तरमाहुः चकरादित्यादि। यो वा एतदक्षरमविदित्वा गार्गि अस्मिँल्लोके जुहोति ददाति तपस्यत्यपि बहूनि वर्षसहस्राण्यन्तवानेवास्य स लोको भवति। यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात् प्रैति स कृपणोऽथ यो वा एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात् प्रैति स ब्राह्मण इति श्रावणं चकारेण संगृह्यत इत्यर्थः। अत्र च जडजीवसंबन्धिनां विरुद्धधर्माणामाशङ्क्य निराकरणादुपोद्घातसंगतिः। किंवाक्षरोपासनं ज्ञानमार्गीयाणां केषाञ्चिन्मुख्यं 'ये त्वक्षरमनिर्देश्यम्' इत्यादिगीतावाक्यात्। भक्तिमार्गीयाणां त्वक्षरज्ञानमङ्गत्वेन प्रविशतीत्यग्रे अक्षरधियामित्यन्यत्र वाच्यं तेनेदं मार्गद्वयोपयोगीति तदुभयोत्तरं प्रसङ्गत उक्तम्। तेनात्र क्रमनियामिका प्रसङ्गोपि संगतिरिति। आशङ्क्य

रश्मिः।

प्रकृते तु तादृशोऽब्रह्मत्वसाधकः कार्यकारणयोर्भेदसाधकश्च धर्मो न हि दृश्यत इति ह्यब्रह्मत्वेनेत्यादिभाष्यार्थः। विवरामासुः ततश्चेति। अब्रह्मत्वनिवृत्तावित्यन्तेन ग्रन्थेन तस्यात्र व्यावृत्तेरिति भाष्यं विवृतम्। अब्रह्मत्वेनेत्यादि भाष्यं विवरांबभूवुः अब्रह्मणीति। अब्रह्मत्वेन धर्मेणाब्रह्मणि उपासना भवति ब्रह्मत्वेनोपासना भवति तस्या वक्तुमशक्यत्वं न हि तादृशो धर्मोत्रास्ति ततश्च धर्म्युपासनाविषयो नास्तीति तस्मादित्यर्थः। एवमब्रह्मणि ब्रह्मत्वेनेति शेषं पूरयित्वाऽब्रह्मत्वेनेत्यादिभाष्यं विवृतम्। अधुनाऽब्रह्मत्वेनेति भाष्यं शेषं विना व्याख्यायते व्यासोस्माकं गुरुरिति व्याससूत्रवद्भाष्यस्य सर्वतोमुखत्वात् जगतो ब्रह्मात्मकत्वेन तस्याब्रह्मत्वेनोपासना भवति उपासनाया अन्यधर्मविशिष्टविषयविषयिणीत्वात् तादृश अब्रह्मधर्मो ह्यत्र नास्ति यादृशेन धर्मेणोपासना भवतीति। प्रैतीति म्रियते। श्रावणमिति। फलनिन्दयोः श्रावणम्। अनुक्तसमुच्चये चकारः। न च श्रुतौ विदित्वेति वेदनमुपासनमिति नोपासनेति भाष्यं कथमिति शङ्क्यम्। वेदनं ज्ञानम्। उपासनोप समीपे स्थित्वा यथायोग्यकरणम्। इति तयोर्भेदात्। अत्र चेति एतदुपपादितमक्षरमित्यादिसूत्रस्थभाष्यप्रकाशे पुनर्विचारस्तु इत्यादिभाष्यप्रकाशरश्मौ। उपोद्घातसंगतिरिति पूर्वपादस्थेनादृश्यत्वाद्यधिकरणेनास्य बुद्धिस्थोपोद्घातः संगतिः। आशङ्क्येति द्वितीयसूत्रेऽदृश्यत्वादिकमदृश्यत्वाद्यधिकरणेऽनुपपन्नं स्थौल्यादीनां सत्त्वेन दृश्यत्वादित्याशङ्क्य हेतोरम्बरान्तधृतेरम्बरान्तानां प्रशासनस्य धारणस्य तृतीयसूत्रेण सह ब्रह्मधर्मत्वस्य साधनात्। विरुद्धानामन्येषामपि स्थूलभिन्नस्थूलसदृशत्वादीनां ब्रह्मधर्मत्वेप्यदृश्यत्वं

ईक्षतिकर्मव्यपदेशात् सः ॥ १३ ॥ (१।३।४)

पञ्चमप्रश्ने, 'एतद्वै सत्यकाम परश्चापरं च ब्रह्म यदोङ्कारस्तस्माद् विद्वानेते नैकतरमन्वेति यद्येकमात्र' इत्यादिना एकद्वित्रिमात्रोपासनया ऋग्यजुःसामभिर्मनुष्यलोकसोमलोकसूर्यलोकप्राप्तिपुनरागमने निरूप्यार्धचतुर्थमात्रोपासनया परं पुरुषमभिध्यायीत। स तेजसि परे संपन्नो यथा पादोदरस्त्वचेत्यादिना, परात् परं पुरिशयं पुरुषमीक्षत इति। तत्र संशयः—परपुरुषः परमात्मा ध्यान-

भाष्यप्रकाशः ।

निराकरणं च द्वितीयसूत्रे हेतोः साधनाज्ज्ञेयम् । एतेनाधिकरणेन परत्वं साधितम् । तेन स्थितिकर्तृत्वं तदाधारत्वं च पदार्थान्तरभूते प्रधाने आशङ्क्य तत्रातिव्याप्तिर्निवारितेति सैवाधिकरणसंगतिः ॥ १२ ॥

इति तृतीयमक्षराधिकरणम् ॥ ३ ॥

ईक्षतिकर्मव्यपदेशात् सः ॥ १३ ॥ विषयवाक्यमुपन्यस्यन्ति । **पञ्चमप्रश्न** इत्यादि । **पञ्चमप्रश्न** इति आथर्वणानां प्रश्नोपनिषदः पञ्चमे प्रश्ने । **ईक्षत** इति वदतीति शेषस्त्रुटिर्वा । संशयस्तु ध्येयविषय इत्याहुः तत्रेत्यादि । परापरयोरुभयोरपि प्रकृतत्वं संदेहबीजम् । पूर्वपक्षमाहुः तत्रामुख्येत्यादि । अत्रोङ्कारेणोपायेन ब्रह्मोपासनार्थमोङ्कारस्य द्विविधब्रह्मरूपतामुक्त्वा तेनैवायनेनैकतरमन्वेतीत्येकतरप्राप्तिं प्रतिज्ञाय साधनैक्ये

रश्मिः ।

दिव्यचक्षुराद्यभावाज्ज्ञेयम् । चकारात्तृतीयसूत्रे उपासनमाशङ्क्य निराकरणं तत्र हेतुर्द्वितीयेति । हेतोः प्रशासनधारणस्य साधनात् तृतीयसूत्रे ब्रह्मधर्मत्वसाधनात् । तथा चोपासातः प्रधानादेः धारकत्वसंभवात् प्रशासनाधारकत्वेन धर्मेणोपासनाशङ्कोदेतीति तन्निराकरणमित्यर्थः । **परत्वमिति** परविद्याविषयत्वमक्षरत्वं तदेव परत्वं 'अथ परा यया तदक्षरमधिगम्यते' इतिमुण्डकश्रुतेः । ज्ञानिनामुपास्यमिदम् । भक्तानां तु तत्र स्थितमपि तेनात्राधिकरणेऽदृश्यत्वाधिकरणेऽग्निर्मूर्धेत्यादिना रूपोपन्यासादत्र च प्रशासनोपदेशात् निर्गुणब्रह्मसिद्ध्य 'न हि स्वबुद्ध्या वेदार्थं परिकल्प्य तदर्थं विचारः कर्तुं शक्यः' इति तु 'अथातो ब्रह्मजिज्ञासा' इत्यधिकरणभाष्यं समर्थितम् । अत्र ब्रह्मधर्मोक्तेश्चेति वक्तव्ये पूर्वपक्षेऽन्येषामुक्तेरेवं सूत्रितमन्यपदघटितम् ॥ १२ ॥

इति तृतीयाधिकरणम् ॥ ३ ॥

ईक्षतिकर्मव्यपदेशात् सः ॥ १३ ॥ **त्रुटिर्वेति** वाकारोनादरे । अन्तःकरणं प्रति उक्तिसंभवात् 'भक्तं प्रति यदाकर्ण्य भक्तो निश्चिन्ततां व्रजेत्' इति । भक्तं प्रत्यप्युक्तिसंभवाच्च । विषयवाक्यार्थोऽग्रे वक्तव्यः इति तमुपेक्ष्य संशयग्रन्थार्थमाहुः **संशय** इति । ध्येयो विषयो यस्य । **परापरयोरिति** परं चापरं च ब्रह्मेति श्रुतेः । **उक्तेति** विषयवाक्यं तु भाष्य उक्तं तत्पूर्वपक्षे व्याचक्रुः । हे सत्यकाम शैब्येति संबोध्य भगवान् पिप्पलाद उक्त्वा वदतीत्यन्वयः । अथ हैनं शैब्यः सत्यकामः पप्रच्छ स यो ह वै तद्भगवन्मनुष्येषु प्रायणं तमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति तस्मै स होवाचैतद्वै सत्यकामेत्यादिश्रुतेः । एनं पिप्पलादम् । तेनेति ॐकारध्यान-

१, चितम् ।

भाष्यप्रकाशः ।

कथं फलभेद इत्याकाङ्क्षायां भावनाप्रकारभेदस्य तत्र नियामकत्वं बोधयितुमेकद्वित्रि-

रश्मिः ।

रूपेणैवायतनेनोपास्तिसाधनेन परापरयोरेकतरमित्यर्थः । **भावने**ति उपासनाप्रकारभेदस्य । उपासना मनोव्यापारः । **एके**ति तद्यथा एकतरमन्वेतीत्यस्या अग्रे स यद्येकमात्रमभिध्यायीतेति श्रुत्यैका-मात्राऽकाररूपैकमात्रा एकमात्रा मनसि विद्यते यस्योपासकस्य स एकमात्रः । नपुंसकत्वं छान्दसम् । न चैकमात्रमित्येवमभिध्यानकर्मेति शङ्क्यम् । मनसि संपन्नस्य ध्यानकर्मत्वात् । द्विमात्रेण मनसि संपद्यत इति वक्ष्यमाणत्वेनोंकारस्य करणत्वेन कर्मत्वाभावात् । न च संपत्तिकरणत्वेप्यभिध्यान-कर्मत्वमिति शङ्क्यम् । परं पुरुषमभिध्यायीतेति परपुरुषस्याभिध्यानकर्मत्वात् । एकमात्र अभिध्यायीते-त्यपि पाठः वर्णविकारो वाऽकारस्य मकार इति । त्रयं सिद्धान्ते पूर्वपक्षे त्वेकमात्रमोंकारमित्येवार्थः । अस्य शरीरं ब्रह्मविद्योपनिषदि ।

'ऋग्वेदो गार्हपत्यः पृथिवी ब्रह्म एव च ।
अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः' ॥ इति ।

शरीरमप्युपास्यम् । स यदीत्यस्या अग्रे स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसंपद्यते तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया संपन्नो महिमानमनुभवतीति । तेनाकारेण तूर्णं शीघ्रं मनुष्यलोकं जगत्यन्तर्गतं स द्विजाग्र्यः महिमानं विभूतिं सिद्धान्ते महिमानं शिवं महिमानमीशमिति श्रुतेः । महिमपदात्सर्वात्मभावोपि तादृशश्चेत् तृतीयाध्याये महिमपदस्य सर्वात्मभावे शक्त्युक्तेः । एवमेकमात्रोपासनया मनुष्यलोको व्याकृतः । अथ द्विमात्रोपासनया चन्द्रलोकप्राप्तिस्ततः पुनरावृत्तिश्चोच्यते तथा हि अथ यदि द्विमात्रेण मनसि संपद्यते सोन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकं स सोमलोकविभूतिमनुभूय पुनरावर्तत इति । अस्यार्थः । यदि पुनर्द्विमात्रविभागज्ञो द्विमात्रेण विशिष्टमोंकारमभिध्यायेत् सैकमात्रके मनसि यजुर्मये सोमदैवत्ये संपद्यते एकाग्रतयात्मभावं गच्छति स एवं संपन्नो मृतोऽन्तरिक्षमन्तरिक्षाधारं द्वितीयमात्रानुरूपं द्वितीयमात्रारूपैरेव यजुर्भिरुन्नीयते सोमलोकं तत्र सोमलोके विभूतिमनुभूय मनुष्यलोकं प्रति पुनरावर्तते सिद्धान्ते सोन्तरिक्षं द्विमात्रेणो-न्नीयते विभूतिं न तु परपुरुषमतः पुनरावर्तते इत्यर्थः । अत्र ब्रह्मविद्योपनिषत् ।

'यजुर्वेदोन्तरिक्षं च दक्षिणाग्निस्तथैव च ।
विष्णुश्च भगवान् देव उकारः परिकीर्तितः' ॥ इति ।

इति सोमलोकप्राप्तिस्ततः पुनरागमनम् । अथ त्रिमात्रोपासनया लोकप्राप्तिरुच्यते पुनरागतिश्च यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सामभिरुन्नीयते सूर्यलोकं स सूर्यलोके विभूतिमनुभूय पुनरावर्तते । इत्यनया परं पुरुषं प्रतीकान्तर्गतं प्रतीकेनाभिध्यायीत स तेजसि तृतीयमात्रारूपे तेजसि संपन्नो भवति सिद्धान्तेप्ययमर्थः । एवं ब्रह्मोपनिषत् ।

'सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च ।
ईश्वरः परमो देवो मकारः परिकीर्तितः' ॥ इति ।

एवं जायस्व म्रियस्वेति तृतीयमार्गं निरूप्येत्यर्थः । **अर्धचतुर्थे**ति यः पुनरर्धचतुर्थमात्रेणोमित्ये-तेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि परे संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्तः सोथर्वभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते

विषयः आहोस्विद् विराट्पुरुषो ब्रह्मा वेति। तत्रामुख्यप्रवाहपतितत्वाद् ब्रह्मलोकं गतस्य तदीक्षणमेव च फलं श्रूयते। न हि परमपुरुषस्य ब्रह्मत्वे तज्ज्ञानमेव फलं भवति। तस्माद् विराड् ब्रह्मा वा अभिध्यानविषय इत्येवं प्राप्ते।

भाष्यप्रकाशः।

मात्रोपासनया तत्तल्लोकप्राप्तिपुनरागमने निरूप्यार्धचतुर्थमात्रोपासनया परे तेजसि संपत्तिं पापनिर्मोकं ब्रह्मलोकप्राप्तिं चोक्त्वाऽन्ते परपुरुषेक्षणं फलत्वेन वदति। तत्र परपुरुषध्यानस्य त्रिमात्रेणाप्युक्तत्वादर्धचतुर्थमात्रेण परपुरुषध्यानस्यापि तत्तुल्यकक्षत्वेनामुख्यप्रवाहपतितत्वात् तत्प्राप्यब्रह्मलोकस्याप्यमुख्यत्वात् तं लोकं गतस्य यत् परपुरुषेक्षणं तत् पूर्वापेक्षया परात् परस्यैवेक्षणं फलं श्रूयते। न तु सर्वतः परस्य। न हि तत्रोक्तस्य परमपुरुषस्य ब्रह्मत्वे तज्ज्ञानमेव फलं भवतीति वक्तुं शक्यते। ब्रह्मविदाप्नोति परमित्यादिश्रुत्यन्तरे तत्प्राप्तेः फलत्वेनोक्तत्वात्, सोऽश्नुत इत्यादिना विवरणाच्च। अतस्तस्मात् फलरूपात् तात्पर्यलिङ्गात् परमात्मनो वक्तुमशक्यत्वेन विराड् वा, तदभिमानी ब्रह्मा वा ध्यानविषयः। नच जीवघनादिति परविशेषणानन्वयः। अत्र ल्यब्लोपपञ्चम्या पूर्वेभ्यः परं जीवघनं प्राप्य पुरिशयमित्य-

रश्मिः।

इत्येवं वदतीत्यर्थः। यथा पादोदरः सर्पस्त्वचा विनिर्मुच्यते जीर्णः पुनर्नवो भवति। **नहीति** भाष्यं विवरामासुः **नहीति**। **ब्रह्मविदिति** 'ब्रह्मविदाप्नोति परं तदेषाभ्युक्ता सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इति श्रुतिस्त्वानन्दमयाधिकरणे व्याख्याता। **तस्मादिति** भाष्यं विवरांचक्रुः **अत** इति। फलं ब्रह्मज्ञानं अन्यत्र तात्पर्यस्य लिङ्गात् पूर्वपक्षिमतेनोक्तम्। **तदभिमानी**ति। तथा च शंकरभाष्यम्। जीवानां हि सर्वेषां करणपरिवृतानां सर्वकरणात्मनि हिरण्यगर्भे ब्रह्मलोकनिवासिनि संघातोपपत्तेर्भवति ब्रह्मलोको जीवघन इति घनो मूर्तिः जीवलक्षणो घनो जीवघन इति च तथा च जीवाभिमानीत्यर्थः। यद्वा विराडभिमानीत्येवार्थः तथा च रामानुजभाष्यं समष्टिपुरुषोण्डाधिपतिश्चतुर्मुख उत सर्वेश्वरः पुरुषोत्तम इति संशयग्रन्थे। न चात्रार्थे किं मानमिति शङ्क्यम्। संप्रदायप्रदीपे 'शांकरा मम मतं पूर्वपक्षयन्ति तत् त्वं प्रकाशय' इत्याचार्यान् प्रति भगवदाज्ञा यतः। जीवघनमिति ब्रह्माणमित्यन्येऽक्षरमिति स्वमतम्। **पुरीति** पुरिशयमीक्षत इत्यन्वयेन। अक्षरादिति यदत्र **शंकराचार्याः** कस्तर्हि जीवघन इत्युच्यते घनो मूर्तिः जीवलक्षणो घनो जीवघनः सैन्धवखिल्यवद्यः परमात्मनो जीवरूपः खिल्यभाव उपाधिकृतः परश्च विषयेन्द्रियेभ्यः सोत्र जीवघन इति तस्मात्परो यः परमात्मेक्षणकर्मभूतः स एवाभिध्यानेपि कर्मभूत इति गम्यते इति न हीदमुचितं परब्रह्मणोऽक्षरादपि परत्वात् 'अक्षरात्परतः परः' इति श्रुतेः 'अक्षरादपि चोत्तमः' इति स्मृतेश्च न च जीवघनत्वासंभव इति वाच्यम्। अस्या एव श्रुतेः। न च 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपास्तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति' इति मुण्डकात् केवलजीवघनत्वासंभव इति वाच्यम्। अत्र परेक्षणफलाधिकारिणां ग्रहणात्। न च लोकत्वासंभव इति शङ्क्यम् ॐनमो नारायणायेति मन्त्रोपासको वैकुण्ठं भगवल्लोकं गमिष्यतीत्यात्मबोधोपनिषच्छ्रुतेः। रामानुजाचार्यास्तु यच्छंकरभाष्ये अपर आह स सामभिरुन्नीयते ब्रह्मलोकमित्यतीतानन्तरवाक्यनिर्दिष्टो ब्रह्मलोकः परश्च लोकान्तरेभ्यः सोत्र जीवघन इत्युच्यते जीवानां हि सर्वेषां करणपरिवृतानां

उच्यते । सः अभिध्यानविषयः परपुरुषः परमात्मैव । कुतः । ईक्षतिकर्मव्यपदेशात् । जीवघनात् केवलजीवाधारभूताद् ब्रह्मलोकात् पररूपपुरुषदर्शनमीक्षतिः । तस्याः कर्मत्वेन व्यपदेशादुभयोः कर्मणोरेकत्वमपरं त्रिमात्रपर्यन्तं निरूप्य परं ह्यग्रे निरूपयति । तथैव च श्लोके तिस्रो मात्रा इत्यादि ।

भाष्यप्रकाशः ।

न्वयेन परविशेषणत्वाभावादिति प्राप्त इत्यर्थः । सिद्धान्तं व्याकुर्वते । उच्यत इत्यादि । जीवघनादित्यादि । जीवानां केवलानां मुक्तानां घनः पिण्डीभावो यत्र तादृशात् केवलजीवाधारभूताद् ब्रह्मलोकादक्षरात् । उभयोः कर्मणोरेकत्वमिति ध्यानेक्षणकर्मणोरेकविषयत्वम् । तद्विवृण्वन्ति अपरमित्यादि तथाच पूर्वं द्वे ब्रह्मणी उक्त्वा, ॐकारेणैकतरमन्वेतीत्यादिना अपरं ब्रह्म त्रिमात्रपर्यन्तं निरूप्य, परं ब्रह्म ह्यग्रे निरूपयति । यदि तन्न निरूपयेत् प्रतिज्ञा न पूर्येत । तथैव चाग्रिमे श्लोके तिस्रो मात्रा इत्यादिना मात्रात्रयस्य मृत्युमत्त्वादिकमुक्त्वा ऋग्भिरेतमिति द्वितीयमन्त्रे, सामभिर्यत् तत् कवयो वेदयन्त इति त्रयीमयं तृतीयमात्राफलं निरूप्योत्तरार्धे तमोङ्कारेत्यादिना यत्तच्छान्तमजरममृतमभयं परं परायणं चेति फलान्तरं न वदेत् । नच जीवघनादित्यादौ ल्यब्लोपे पञ्चम्यपि । तथा सति प्राप्तौ जातायामीक्षणस्यार्थादेव सिद्ध्या

रश्मिः ।

सर्वकरणात्मनि हिरण्यगर्भे ब्रह्मलोकनिवासिनि संघातोपपत्तेर्भवति ब्रह्मलोको जीवघन इति तत्र वदन्ति ब्रह्मलोकपदेनात्र चतुर्मुखलोकः संगृह्यते ईक्षतिकर्मणः परमात्मत्वनिश्चयेन तदीक्षितुः स्थानतया निर्देशात् न हीदं परमात्मेक्षितुः क्षयिष्णुस्थानेवस्थातुं युक्तम् । किं च यथा पादोदरस्त्वचेति श्रुतौ सर्वपापविनिर्मुक्तस्य प्राप्यतयोच्यमानं न चतुर्मुखस्थानमिति । माध्वास्तु तदैक्षतेतीक्षतिकर्मव्यपदेशमाहुः । भास्कराचार्यास्तु परात् शरीरेन्द्रियेभ्यः परात् जीवात् हिरण्यगर्भलोकरूपात् पराद्वेत्याहुः । एवं भिक्षुशैवयोर्भगवतोर्मतयोः द्रष्टव्यम् । प्रतिज्ञेति परापरब्रह्मविषयिणी । परस्यानिरूपणात् । तथैवेति भाष्यं विवरांबभूवुः तथैवेति विषयवाक्यानन्तरं तदेतौ श्लोकौ भवतः ।

'तिस्रो मात्रा मृत्युमत्यः प्रयुक्ताः अन्योन्यसक्ता अनुविप्रयुक्ताः ।
क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः' ॥

इति श्लोके । मृत्युमत्त्वेति आदिनाऽन्योन्यसक्तत्वं नाविप्रयुक्तत्वं बाह्याभ्यन्तरमध्यमासु जाग्रत्स्वप्नसुषुप्तस्थानपुरुषाभिध्यानलक्षणासु जानातीति ज्ञः न कम्पते कपि चलने भ्वादिरात्मनेपदी सेट् । चल विलसने तुदादिः परस्मैपदी सेट् । न विलसति फलज्ञत्वात् । ऋग्भिरिति 'ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वेदयन्ते तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं परायणं च' इति द्वितीयमन्त्रे एतं मनुष्यलोकं यत्सूर्यलोकं वेदयन्ते ज्ञपयन्ति ॐकारेणोपायेन 'ओमित्येकाक्षरं ब्रह्म' इति श्रुतेः । यद्वा ओंकारः कपर्दी यद्वा प्रणवः प्रकृतिः राधा गुरुः प्रसिद्धेः 'क्रिया सा राधिका देवी' इति स्मृतिः ताभ्यामुपायाभ्यां वा तद्रूपत्वात् । तैरुपायैर्वा । शरीरनिरूपिकासु ब्रह्मविद्योपनिषच्छ्रुतिषु एकमात्राभिध्याने ऋग्वेदो हि कपर्दी । 'वेदः शिवः शिवो वेदः' इति श्रुतेः । गार्हपत्यः पृथिवी च लक्ष्मीः 'क्रिया सा राधिका देवी' इति वाक्यात् त्रिविधकर्मसु गार्हपत्यस्य सत्त्वात् 'भूर्लक्ष्मीर्भुवर्लक्ष्मीः' इति श्रुतेः । ब्रह्मा प्रभुः 'सत्त्वं रजस्तम इति' श्रीभागवतात् । एवं सर्वत्र

अभिध्यानस्य हि साक्षात्कारः फलम्। अतः फलरूपज्ञानस्य विषयत्वात् परपुरुषः परमात्मैव। मन्दशङ्कानिवृत्त्यर्थमेवेदं सूत्रम्। अत्र सर्वसंकरवादिनामन्यथा पाठो भ्रमात्। तत्रापि विचारस्तुल्यः॥ १३॥

इति प्रथमाध्याये तृतीयपादे चतुर्थमीक्षतिकर्माधिकरणम्॥ ४॥

भाष्यप्रकाशः।

वाक्यवैयर्थ्यमित्याशयेन युक्त्यन्तरमाहुः **अभिध्यानस्ये**त्यादि। नन्वस्मिन् पादे आधाररूपस्वरूपस्य निरूप्यत्वादत्र च तस्या अदर्शनादेतत्सूत्रप्रणयनस्य किं प्रयोजनमत आहुः **मन्दे**त्यादि। परं ब्रह्म न दृश्यमिति मन्दशङ्कानिवृत्त्यर्थमित्यर्थः। एतेन प्रसङ्गः संगतिरित्यपि बोधितम्। अत्र ध्यानविषयस्येक्षतिकर्मत्वप्रतिपादनेनोपासनानां फलं साक्षात्कार इति न्यायेन सा तेन बुद्धिस्थानात्मिकाऽधिकरणसंगतिरपि बोधिता। आधारत्वं तु परायणपदादेव प्राप्यत इति न दोषः। ननु शंकराचार्यैर्यः पुनरेत त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नः स सामभिरुन्नीयते ब्रह्मलोकमिति पाठोऽङ्गीक्रियते। न तु, सामभिरुन्नीयते सूर्यलोकं स सूर्यलोके विभूतिमनुभूय पुनरावर्तते यः पुनरर्धचतुर्थमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि परे संपन्न इति सोऽथर्वभिरुन्नीयते ब्रह्मलोकमिति पाठोऽतोऽस्याधिकत्वान्न पूर्वोक्तरीतिकोऽर्थ इत्याशङ्कायामाहुः **अत्र सर्वसंकरे**त्यादि। इदानीन्तनपुस्तकेष्विदानीन्तनेष्वध्येतृष्वप्येतस्याधिकपाठस्य दर्शनात् तिसृणामपि मात्राणां मृत्युमत्त्वेन तौल्यात् साधनवैजात्याभावे फलवैजात्यस्यानुपपन्नत्वान्माण्डूक्यादौ तुरीयोपासनार्थमर्धमात्रोक्तिदर्शनाच्च तेषां तथा पाठो भ्रमादेव। न च विचारवैसादृश्यम्। तत्रापि पाठे विचारस्तुल्य इति न दोष इत्यर्थः। एवं भास्कराचार्याद्यङ्गीकृतपाठेऽपि द्रष्टव्यम्।

अत्र माध्वाः, सदेव सौम्येति छान्दोग्यवाक्यं विषयत्वेनोपन्यस्य कारणतया सच्छब्देनोच्यमानं किं प्रधानमुत विष्णुरिति संदेहे, बहु स्यां प्रजायेयेति सतो बहुभावाख्यविकारश्रवणाद्, विष्णोस्तु, 'अविकारः सदा शुद्धो नित्य आत्मा सदा हरिः' इतिवाक्येनाऽविकारित्वबोधनात् प्रधानमेवेति प्राप्तौ, तदैक्षत बहु स्यामितीक्षणरूपं यत् कर्म चेतनकर्तृकेक्षणक्रिया तद्व्यपदे-

रश्मिः।

राधादामोदरकपर्दिनः ॐकाराः। ओंकारपदं योगिकं वेदान्ते रूढ्यभावात् तत्तच्छरीररूपशक्यतावच्छेदकभेदाद्द्वन्द्वः अव्ययत्वाल्लुप्ततृतीयाका अकारोकारमकारार्धमात्राः। **मन्दे**ति खलशङ्कानिवृत्त्यर्थं मूर्खशङ्कानिवृत्त्यर्थं वा। **एतेने**ति अक्षरस्य प्रशासितृनिरूपणानन्तरं स्मृतस्य तस्य दृश्यत्वस्य निरूपणेनेत्यर्थः। पूर्वपादोक्तादृश्यत्वाधिकरणेन तु विरुद्धधर्मबोधनादुपोद्घातो बुद्धिस्थसंगतिरिति ज्ञेयम्। भाष्य एवकारस्याध्याहृतेन भवतिनान्वयादत्यन्तायोगव्यवच्छेदार्थकत्वमित्याशयवन्त आहुः **आधारे**ति। परमयनं स्थानमाश्रयः। **फले**ति यत्तच्छान्तमजरमित्युक्तफलवैजात्यस्य। उपनिषदन्तरसंमतिमाहुः **माण्डूक्ये**ति। आदिपदेन गोपालतापिनीयोपनिषत्। **तत्रापी**ति भाष्यं विवरामासुः **न चे**ति। सर्वेषां संकरवादिनामिति समासमङ्गीकृत्याहुः **एव**मिति। परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः संकरः। यथा भूतत्वमूर्तत्वयोः जातिबाधकः। शंकराचार्याणां भाट्टमतस्य न्यायमतस्य बौद्धमतस्य संकरः। भास्कराद्याचार्याणां शंकराचार्यमतस्य संकरः। माध्वमते स्वरसमाहुः **अत्रे**ति विजायत इति स्वभावात्। **कर्मे**ति 'तदैक्षत' 'एकोहं बहु स्यां प्रजायेय' इत्यत्र 'पश्य

भाष्यप्रकाशः।

शात् सत्पदवाच्यः स विष्णुरेव। नच बहुभावोक्तिविरोधः। 'अजायमानो बहुधा विजायते' इति श्रुत्यन्तरोक्तस्वरूपबहुत्वेनैव तदुपपत्तेरिति व्याचक्रुः।

तच्चिन्त्यम्। ईक्षतिमात्रप्रयोगेऽपि क्रियात्ववैशिष्ट्यबोधस्य सुकरतया कर्मपदवैयर्थ्यप्रसङ्गात्। किंचात्रेक्षणक्रियायां कर्मत्वेनान्वीयमानस्य बहुभवनस्य स्वरूपबहुत्वादेव चारितार्थ्ये, प्रजायेयेत्याकारान्तरोल्लेखस्यापि वैयर्थ्यप्रसङ्ग इत्यपि ध्येयम्।

विज्ञानेन्द्रभिक्षुस्तु शंकराचार्योक्तं विषयवाक्यपाठं तद्रीत्याऽधिकरणरचनां चोपन्यस्य तत्रोदाहृतवाक्यस्थां त्रिमात्रप्रणवेनोक्तामुपासनामुत्तरस्मिन् प्रश्ने, तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता इत्यनेन विनिन्द्य तुरीयाख्यस्यामात्रस्य परब्रह्मण उपासनां तत्रैव प्रश्ने वक्ष्यति, नातः परमस्तीति प्रशंसापूर्वकम्। अतोऽवधार्यते, पञ्चमे प्रश्ने परब्रह्मोपासनां न विदधातीति। किंच। यदभिध्यायति तत् साक्षात्करोतीति सामान्यत एव प्राप्ततया तद्वचनं व्यर्थमिति पञ्चमप्रश्ने कार्यब्रह्मोपासनायाः परब्रह्मदर्शनं फलमुक्तमित्येवं तदबोधरूपं दूषणमुक्त्वा षष्ठप्रश्नस्थस्य सइतिशब्दस्य सूत्रे प्रत्यभिज्ञायमानत्वात् तत्रत्यम्, इहैवान्तःशरीरे स पुरुषो यस्मिन्नेताः षोडशकलाः प्रभवन्तीति वाक्यं विषयत्वेनोदाजहार। स जीवः, परमात्मा वेति संशये, सः, सशब्देनोक्तः पुरुषः परमात्मैव। कुतः। ईक्षतिकर्मव्यपदेशात्। स ईक्षाञ्चक्र इति वाक्यशेषे सशब्देन परामृष्टस्य यथोक्तपुरुषस्य ईक्षणरूपकर्मकथनाद् गौणकर्मणां प्राणादीनां वा कथनात्। नहीदं प्राणादि-

रश्मिः।

मृगो धावति' इतिवदेकोहं बहु स्यामिति तदैक्षत इत्येवं बहुभवनस्य कर्मत्वेन एतावता वाक्येन चारितार्थ्ये। तत्र हेतुः स्वरूपेति तैर्नियतभेदस्वीकारादिति भावः। स्वमते यदेकमव्यक्तमनन्तरूपमिति श्रुतेः साकारं ब्रह्म। आकारेति इच्छाया इति शेषः। स्वमते तूक्तं ब्रह्म तदैक्षत एकोहं बहु स्यां प्रजायेय उच्चनीचभावेन क्रीडार्थं जायेयेत्याकारान्तरोल्लेखः साकारस्य ब्रह्मण एकत्वात्। उत्तरेति पञ्चमादुत्तरेस्मिन् षष्ठे। वक्ष्यतीति षोडशकलं पुरुषं निरूप्य तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति तान् होवाचैतावदेवाहमेतत्परं ब्रह्म वेद नातः परमस्तीति श्रुत्या वक्ष्यति। तान् भारद्वाजसत्यकामगार्ग्याश्वलायनवैदर्भिकात्यायनान् पिप्पलाद उवाचेति श्रुतिपदार्थः। अत इति व्यर्थत्वमालोच्य। तदबोधेति पिप्पलादाबोधरूपम्। स इतीति। वक्ष्यमाणविषयश्रुतिस्थस्य। तत्तेदंताप्रकारकं ज्ञानं प्रत्यभिज्ञा यथा सेयं दीपमालिका तदिदं जलमिति। तत्रत्यमिति षष्ठप्रश्ने भवम्। षोडशेति षोडशकलास्तत्रैव स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियमनो अन्नमन्नाद् वीर्यं तपो मन्त्राः कर्म लोकेषु नाम चेति श्रुतावुक्ताः। स इति विषयवाक्यस्थं प्रत्यभिज्ञातम्। शरीरे स पुरुष इत्यर्थः। सशब्देनेति स इतिशब्देन। षष्ठप्रश्नस्थां श्रुतिमाहुः स ईक्षामिति। यथोक्तेति यथावद्विषयवाक्योक्तपुरुषस्य। पुरुषेति स्वनिष्ठव्यापारजन्यफलाश्रयताख्यसंबन्धे षष्ठी पुरुषनिष्ठव्यापारश्चक्रे इति क्रियोक्तस्तज्जन्यं फलं करणमीक्षानिष्ठं तदाश्रय ईक्षा तन्निष्ठकरणानुकूलः पुरुषनिष्ठो व्यापारः। तथा चेक्षणरूपं यत्करोतेः कर्म तस्य कथनात्। हेतोर्द्वितीयां व्याख्यामाह गौणेति 'स प्राणमसृजत' इत्यादिश्रुतौ सर्जनकर्मणां प्राणादीनां ईक्षतेर्गौणकर्मत्वं स ईक्षांचक्रे इत्यत्रेक्षा इच्छा तां प्राणादिसर्जनविषयिणीं स चक्र इत्यन्वयः। तथा च स प्राणादि सृजेयमितीक्षामिच्छां चक्र इत्यर्थः। एवं च सर्जनमुख्यकर्मणां प्राणादीनां तत्सर्जनकर्मिकायां चक्र इति

भाष्यप्रकाशः ।

षोडशकलासृष्ट्यर्थमीक्षणं जीवस्य संभवति । ईक्षायाः करणादीनां तदानीमभावादित्येवं सौत्रं हेतुं द्विधा व्याचख्यौ ।

अत्रापि पूर्वव्याख्याने सूत्रस्थकर्मपदवैयर्थ्यमेव दोषः । द्वितीये तु कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति श्रावितस्य मुख्यस्येक्षतिकर्मणस्त्यागः स्वयमेव बोधित इति स एव दोषः । तिस्रो मात्रा इति निन्दावाक्यं च पञ्चमप्रश्नस्थमेव, न तु षाष्ठमित्यपि ।

शैवस्तु शंकराचार्योक्तमेव विषयवाक्यमुपन्यस्य, परमेश्वरोऽन्यो वेति संशये, ईक्षतिविषयः परमेश्वर एव । उत्तरत्र, तमोङ्कारेणायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं परायणं चेति तदसाधारणशान्तत्वादिधर्मव्यपदेशादिति व्याचख्यौ ।

तदप्यसंगतम् । हेतोरसौत्रत्वात् । तद्धर्माधिकरणेनैव गतार्थतयाऽधिकरणवैयर्थ्यापाताच्च । सूत्रे हेतुशरीरे प्रविष्टस्येक्षतिकर्मण ईक्षतिविषयत्वेन पक्षतयाङ्गीकाराच्च । विशेषतस्तु प्रहस्त एव दत्तोत्तर इत्युपरम्यते ॥ १३ ॥

इति चतुर्थमीक्षतिकर्माधिकरणम् ॥ ४ ॥

रश्मिः ।

क्रियायां गौणं कर्मत्वम् । **करणेति** मनआदीनाम् । **तदानीमिति** सृष्टिप्राक् काले । **द्वितीय इति** प्राणादीनां सर्जनकर्मत्वेनेक्षतिकर्मत्यागः । **इत्यपीति** दोष इत्यनेनान्वयः । न विदधातीत्यप्यसंभवि । षड् भारद्वाजादीन् प्रति नातः परमस्तीति प्रशंसावाक्यात् । न च क्रमेण विद्योत्कर्षाद्भारद्वाजं प्रत्युक्तविद्याऽतः शब्दार्थ इति वाच्यम् । षण्णां परब्रह्मान्वेषणपराणां परब्रह्माकथने पिप्पलादस्य प्रतारकत्वापत्तेः । न च षाष्ठी परब्रह्मविद्या षड् भारद्वाजादीन् प्रत्युक्तेति शङ्क्यम् । नापृष्टो ब्रूयादिति न्यायेन षष्ठे प्रश्ने षण्णां पृच्छकत्वाभावात् । षष्ठप्रश्ने आधारत्वेनानिरूपणादाधारनिरूपकेस्मिन् पादे तस्याविषयत्वाच्च । व्यपदेशमात्रस्यैव हेतुत्वेन कथमसौत्रत्वमस्येत्यपेक्षायां दूषणान्तरमाहुः **तद्धर्मेति** । ननु तद्धर्मेऽधिकरणपदस्य कथं सामानाधिकरण्यम् । उच्यते । अन्तस्तद्धर्माधिकरणेनेति पठित्वा नामैकदेशेऽधिकरणपदसामानाधिकरण्यस्य सुवचत्वात् । पञ्चाङ्गमधिकरणं पञ्चाङ्गं नामेति । **वैयर्थ्येति** तेन रामानुजाचार्योक्तं ईक्षतिकर्म स व्यपदेशादिति पदत्रयोपन्यासः प्रत्युक्तः । स ईक्षतिकर्म परमात्मा तद्धर्मव्यपदेशादित्यस्यान्तस्तद्धर्माधिकरणेन गतार्थतामुक्त्वा स इति पक्षेणैव गतार्थतायामीक्षतिकर्मणः पक्षतानौचित्यमित्याशयेनाहुः **सूत्र इति** । न च शिवः सूर्यान्तःस्थ इत्यन्तस्तद्धर्माधिकरणे शैवमतमत्र तु ईक्षतिविषयः परमेश्वर इति वाच्यम् । पर्वतमहानसादिपक्षभेदस्य वह्निमान् धूमादित्यत्र दर्शनेनादोषाजनकत्वात् । **विशेष इति** दिनकर्यां निग्रहस्थानेषु न्यूनतालक्षणनिग्रहस्थानस्योक्तेर्विशेषो न्यूनतालक्षणनिग्रहस्थानरूपः परमेश्वर एवेत्यनेनाम्बिकाव्यवच्छेदेन तन्मतेऽम्बिकाया ईक्षतिविषयत्वाभावेन न्यूनतासत्त्वात् । 'ते ध्यानयोगानुगताभ्यपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति मन्त्रस्याम्बिकां ध्यायतां तत्साक्षात्कारोपवर्णनपरत्वमुक्तम् । अत्र प्रहस्तः भवदुपन्यस्तेक्षतिकर्माधिकरणोक्तरीत्यापि ध्यानकर्मत्वं तस्यैव सिद्ध्यति नाम्बिकाया इति । किं च प्रतीयते तावदुमासहायमित्यादिमन्त्रवर्णेभ्यस्तुरीयस्योमासहायित्वादिविशिष्टा मूर्तिः । सापि न ध्यानार्थमारोपितेति शक्यं वक्तुम् । छान्दोग्ये समानप्रकरणे गुणोपसंहारन्यायेन उपास्यब्रह्मणः उदाहृतमन्त्रवर्णसिद्धमूर्तिसिद्धवत्कारेण 'एष

रश्मिः।

आत्मापहतपाप्मा' इत्यादिना शरीरत्वसामान्येन प्रसक्तानां जरामरणजिघत्सापिपासादीनां प्रतिषेधदर्शनात्। अन्यथा तेषामप्रसक्तप्रतिषेधत्वापातात्। न च मूर्तिवदजरत्वादयोपि केवलमुपासनार्थमारोपिता एवोत्पत्स्यन्ते इति वाच्यम्। तत्रैवास्मिन् कामाः समाहिता इत्यादिना तेषामनारोपितेश्वरगुणत्वस्फुटीकरणात्। सर्ववेदान्तप्रत्ययन्यायेन तत्र विग्रहविशिष्टस्यैव ब्रह्मण उपास्यत्वेन स्थितेरौचित्यात्। तस्मिन्यदन्तस्तदन्वेष्टव्यमित्यादिना विधानायानुद्यमानस्यातिथ्यायामनुयाजादिनिषेधवत्। स्तुत्यर्थत्वायोगाच्च। तस्माद्विग्रहगुणस्याजरत्वादेः स्वरूपतो विद्यमानत्वेन निर्दिश्योपास्यतया विधानेनानारोपितत्वावसायात् तद्गुणकस्य विग्रहस्याप्यनारोपितता निश्चीयते इत्युपगन्तव्यैव तुरीयस्यापि साम्बत्वादिलक्षणा का मूर्तिरिति तदप्यसंगतमेव। उक्तहेतुभिर्विग्रहमात्रस्यैवानारोपितत्वनिश्चायनात् उमासहायेत्यादिमन्त्रवर्णसिद्धस्यैव विग्रहस्यात्रोपगमे विनिगमकाभावात्। अग्रे समानप्रकरणे इन्द्रप्रजापतिसंवादेऽपहतपाप्मत्वादिलक्षणकमेवात्मानमुपक्रम्य चतुर्थपर्याये एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति पुरुषोत्तमत्वश्रावणेनोक्तत्यागायोगात्। क्षराक्षरव्याकृतापेक्षया उत्तमः कृतनिर्वचनोप्ययं गीतास्विति शंकराचार्यभाष्यात्। तेनापि तदनुसारिणा पुरुषोत्तमस्यैवोपगन्तव्यत्वात्। स्वशाखाप्रकरणगतलिङ्गविरोधेन शाखान्तरस्थमन्त्रवर्णसिद्धस्येह सिद्धवत्कारस्याशक्यत्वाच्च। किं चैतत्प्रकरणोत्तरं श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये इति मन्त्रव्याख्याने श्यामो गम्भीरो वर्णः श्यामवच्छ्यामं हार्दं ब्रह्मात्यन्तदुःखग्राह्यत्वात्। तद्धार्दं ब्रह्म ज्ञात्वा ध्यानेन तस्माच्छ्यामाच्छबलं शबल इव शबलोऽरण्योऽनेककाममिश्रत्वात् ब्रह्मलोकशाबल्यम्। तं ब्रह्मलोकं शबलं मनसा शरीरपातादूर्ध्वं गच्छेयमित्युक्तम्। शंकरभाष्ये अरण्यशब्दश्च पूर्वप्रकरणे ब्रह्मलोकपरिखारूपार्णवद्वयवाचकत्वेन श्रुत्यैवोक्तः 'अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके' इत्यनेन। अयमेव चार्थो वाराहे चातुर्मास्यमाहात्म्ये चतुर्दशाध्याये उपबृंहितः। तत्र हि श्वेतद्वीपानन्तासनवैकुण्ठाख्यस्थानत्रयं प्रक्रम्य तन्मानं चोक्त्वा श्रीभूदुर्गाख्यांस्तद्भागांश्चोक्त्वावान्तरप्रलये तदनाशं चोक्त्वा महाप्रलये भूदुर्गाभागयोर्नाशं ब्रह्मोत्पत्तावुत्पत्तिं चोक्त्वा।

'श्रीभागे संस्थिता ये तु न तेषां प्रलये भयम्।
शाश्वतः स तु लोको मे न नश्येद् ब्रह्मणो लये॥
मुक्ता एव तु मां तत्र वीक्षन्ते सर्वदैव तु'।

इत्याद्युक्त्वा श्रीभूमिभागयोः श्रीदुर्गाभागयोश्च मध्ये 'अरनामामृताम्भोधिर्ण्यनामामृतसागरः' इति पीयूषार्णवावुक्तौ तेनापि च्छान्दोग्योक्त आत्मा ब्रह्म भगवानेवेति लोकलिङ्गादपि निश्चीयते। किं च श्यामत्वं च भगवत एव लिङ्गम्। 'अथ वा शून्यवद्गाढं व्योमवद्ब्रह्म तादृशम्' इत्यत्र निबन्धे आचार्यचरणैर्व्यवस्थापितम्। ब्रह्मदर्शने श्यामवर्णोपपादनार्थम्। चक्षुषः सामर्थ्यप्रतिघाते वस्तुस्वभावादेव श्यामत्वं प्रतीयते स्वरूपमेव तन्न तु रूपमिति। किं चात्रापि श्यामो वर्णो भगवत्येव प्रसिद्धस्तेन शाखान्तरस्थमन्त्रवर्णसिद्धग्रहणाग्रहेपि उत्तमपुरुषत्वारण्यलोकश्यामलिङ्गानुगुण्यात् 'सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम्' इति गोपालतापिनीयमन्त्रवर्णसिद्धमेव सुग्रहम्। तथा सति तत्पूज्यं शांकरभाष्यमप्यत्रानुगुणं न तु शिवे। तस्मादपि पूर्वत्र शिवरूपाङ्गीकारोनुचित एव। यत्तु छान्दोग्ये दहरोस्मिन्नन्तर आकाश इति दहराधिकरणोक्तन्यायाद् ब्रह्मपरेणाकाश-

दहर उत्तरेभ्यः ॥ १४ ॥ (१।३।५)

'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' इत्यादि श्रूयते । तत्र

भाष्यप्रकाशः ।

दहर उत्तरेभ्यः ॥ १४ ॥ विषयवाक्यमाहुः **अथ यदिदमित्यादि** । **श्रूयत** इति छान्दोग्ये दशमप्रपाठकारम्भे श्रूयते । संशयमाहुः **तत्रेत्यादि** । अत्र हि ब्रह्मपुरे शरीरे दहरपुण्डरीकं हृदयकमलं वेश्म । तस्यान्तर्दहराख्य आकाशः । तदन्तर्यद्वर्तते तदन्वेष्टव्यत्वेनोपदिष्टम् । तत आकाशान्तः किं विद्यत इति प्रश्ने, यावान् वेत्यादिना हार्दाकाशस्य व्यापकत्वकथनपूर्वकं, तस्मिन् द्यावापृथिव्यादिसर्वसमाधानं प्रत्युत्तरयति । तेषां च स्वेन रूपेण प्रत्यक्षादिसिद्धतया नान्वेष्टव्यत्वं सिद्ध्यतीति केन रूपेणान्वेष्टव्यता, कस्यचिदन्यस्य वेति । किंच । पुरप्रध्वंसे किमितिशिष्यत इति प्रश्नान्तरे, नास्य जरयैतदित्यादिना ब्रह्मपुरस्य नित्यतामुक्त्वा तस्मिन्

रश्मिः ।

पदेनोपास्यं ब्रह्म प्रस्तुत्य तस्मिन् यदन्तस्तदन्वेष्टव्यमित्यादिना तदन्तर्वर्तित्वेनोपदिष्टानां सत्यकामादिगुणानामुपासनस्य च शिव एवान्वयः । तैत्तिरीयोपनिषत्स्थदहरविद्योपदिष्टविशोकत्वगुणान्वयस्वारस्यसिद्धब्रह्मतात्पर्यकेन गगनपदेन पूर्वापरमन्त्रसमर्पितं शिवरूपमेव ब्रह्म प्रस्तुत्य तस्य हृदयपुण्डरीकान्तर्वर्तित्वोपदेशात् । 'कामादितरत्र तत्र च' इत्यधिकरणे छान्दोग्याम्नातसत्यकामत्वादीनां बृहदारण्यकस्थवशित्वादिभिः सहोपसंहारस्य सर्वैरभ्युपगतत्वाच्चेत्युक्तम् । तत्तु दहरविद्योत्तरमिन्द्रप्रजापतिसंवादे कण्ठरवेण पुरुषोत्तमप्रतिपादनात् तैत्तिरीयोपनिषद्यणोरणीयानित्यनुवाकस्य शिवोपासनापरताया निराकरिष्यमाणत्वात् तत्रापि भवदभिमताप्रवेशादात्मप्रबोधोपनिषन्नारायणोपनिषदोः कण्ठरवेण दहरपुण्डरीके नारायणस्थितेरुक्तत्वाच्च दूरतरनिरस्तं ज्ञेयम् । यत्तु आत्मबोधोपनिषदिति समाख्याप्रामाण्यादात्मबोधोपनिषदिति नाम । आत्मप्रबोधोपनिषदं मुहूर्तमुपासित्वेति श्रुतौ तु आत्मबोधोपनिषदं प्रोपासित्वेत्यन्वयः इति मट्टीकायां तदपि युक्तम् ॥ १३ ॥

इति चतुर्थाधिकरणम् ॥ ४ ॥

दहर उत्तरेभ्यः ॥ १४ ॥ अत्र शंकराचार्यास्त्रिकोटिकसंशयमाहुः तत्र भूताकाशस्य निवेशासंभवात् द्विकोटिक एव संशय इत्याशयकं भाष्यमित्याशयेनाहुः **अत्र हीति** । श्रुतावस्मिन्नित्यस्य वेश्मनीत्यर्थस्तदाहुः **तस्यान्तरिति** अन्तः मध्ये न तु दहरमित्यस्यैव व्याख्यानं काठिन्यात् कुतः पुण्डरीकासामानाधिकरण्यात् । **प्रतीति** श्रुतिः प्रत्युत्तरयति कया श्रुत्या 'तं चेद् ब्रूयुः यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वा विजिज्ञासितव्यमिति स ब्रूयाद्यावान् वा अयमाकाशस्तावान् एषोन्तर्हृदय आकाशः उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' इति श्रुत्या । आदिपदेनोभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमिति श्रुत्युक्तं सर्वम् । **प्रत्यक्षादीति** आदिना अनुमानशब्दोपमानानि । **किं जीव** इति भाष्यं विवरामासुः **केनेति** । वासनारूपसर्वसमाहितत्वेन आकाशो दहरो जीवोन्वेष्टव्यो ज्ञानकल्पितत्वेन वेत्युभयोः केन रूपेणान्वेष्टव्यतेति प्रश्नः । कस्यचिदेतादृशोपासनोपचितसामग्रीकस्य तदन्यजीवस्यान्वेष्टव्यता वा । ब्रह्मणि द्वितीयकोटौ रूपे साकारत्वं समाहितसर्वशासनाश्रयत्वे संशयविषयौ वक्तुमाहुः **किं चेति** । **नास्येति** 'नास्य जरयैतज्जीर्यति न वधे-

संशयः। किं जीवोऽन्वेष्टव्यो ब्रह्म वेति। जीवब्रह्मवादो निर्णीयते। श्रुत्यर्थोऽत्र हि निर्णेतव्यः। तद् यदस्मिन् वाक्ये परमार्थतो जीव एव ब्रह्म चेच्छास्त्रं च तत्रैव

भाष्यप्रकाशः।

कामानां समाधानं चोक्त्वा, एष आत्मेत्यादिना अपहतपाप्मत्वादिगुणकमात्मानं प्रत्युत्तरयति। तेन शरीररूपादनित्याद् ब्रह्मपुरादन्यः सत्यब्रह्मपुररूपः पूर्वोक्तद्यावापृथिव्यादिरूपसर्वकामाधार एष आत्मेत्यादिनोक्त आत्मा सत्यब्रह्मपुरत्वेन सिद्ध्यति। यदि च कामवदात्मनोऽप्याधेयत्वमुच्यते, तदा पुराकाङ्क्षा न पूर्यते। अत आत्मन एवातिशिष्टब्रह्मपुरत्वमिति निश्चयः। एवं सति, ब्रह्मपुरमित्यत्र यदि षष्ठीसमासस्तदास्यात्मनो जीवत्वम्। यस्यात्मा शरीरमिति श्रुत्यन्तरात्। यदि समानाधिकरणसमासस्तदा आत्मा ब्रह्मैव। अतोऽनित्यपुरनाशेऽतिशिष्टो यो नित्यो दहराकाशरूप आत्मा, स जीवो वा, ब्रह्म वेत्येव संशयाकारः पर्यवस्यति। न तु भूताकाशकोटेस्तत्र निवेशः। उक्तरूपत्वस्य तत्राभावादिति। अत्र दहरान्तर्वर्तिन उत्तरप्रकरणे चात्मनोऽन्वेष्टव्यत्वं श्राव्यते। ततश्चान्वेष्टव्यः क इत्यपि संशयः। तदेतदुक्तम्, किं जीवोऽन्वेष्टव्यो ब्रह्म वेति। ननु तल्लिङ्गाधिकरणे आकाशशब्दोदितस्य सर्वाधारत्वब्रह्मत्वयोर्विचारितत्वात् किमनेनाधिकरणेनेति शङ्कायां तत्प्रणयनप्रयोजनमाहुः जीवेत्यादि। उपाधिभेदात् स्वरूपविस्मरणाद्वा इदानीं भेदेऽपि वस्तुतश्चैतन्यमात्रत्वाज्जीवाभिन्नमेव ब्रह्मेति वादो जीवब्रह्मवादः। स संभवति, न वेति निर्णी-

रश्मिः।

नास्य हन्यते एतत्सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिताः एष आत्मापहतपाप्मा विजरो विमृत्युः' इत्यनया। **प्रतीति** श्रुतिः। **आत्मेत्यक्षरः**। ननु नास्य जरयेति श्रुतेरस्य देहस्य जरयैतदन्तराकाशं ब्रह्म देहवन्न विकुरुते। एवमग्रेपि ब्रह्मपुरमित्यत्र समानाधिकरणसमासात् ब्रह्मैव पुरमित्यर्थात् न ब्रह्मणः पुरमक्षरं नित्यमित्याशङ्कायामाहुः **यदीति**। दहरस्याप्याधेयत्वं समानाधिकरणसमासादुच्यते तदा यदैतज्जरा व्याप्नोति प्रध्वंसते वा किं ततोतिशिष्यते इति प्रश्ने नास्य जरयेत्याद्युक्तम्। तत्र पुरनिरूपणाभावो यदि तर्हि पुराकाङ्क्षापूरणाभावात् व्यर्थ एवारम्भः अतो ह्यनित्यदेहादतिरिक्तस्याक्षरात्मकस्य ब्रह्मलोकस्योक्तिरत्रेति मन्तव्यमित्यर्थः। **अतिशिष्टेति**। एतच्च सर्वनिर्णये 'प्रभुत्वेन हरेः स्फूर्तौ लोकत्वेन तदुद्भवः' इति श्रीआचार्यैरुक्तम्। भक्तिमार्तण्डे प्रमेयप्रकरणे मयैतन्निपुणतरमुपपादितम्। **आत्मन** इत्यक्षरस्य। **आत्मेति** आत्माक्षरो ब्रह्म भवत्येव। **उक्तेति** दहराकाशरूपात्मत्वस्य तस्योत्पत्तेर्द्वितीयाध्याये वक्ष्यमाणत्वादिति भावः। **अत्र** इति छान्दोग्ये दहरान्तर्वर्तिनो जीवस्य प्रकरणं पूर्वमुत्तरे ब्रह्मप्रकरणे। अथ यदिदमित्येवं जीवप्रकरणे श्राव्यते तं चेद्ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुर इत्येवं ब्रह्मप्रकरणे श्राव्यते। अन्वेष्टव्यत्वं तु 'सर्वे कामाः समाहिताः' इति श्रुत्या सर्वकामसमाहितत्वरूपमन्वेषणहेतुसत्त्वात्। तदर्थाध्याहारेण। तत इति किमः संशयार्थकत्वं क्वचित्कोशे 'किमः प्रश्ने कुत्सायां च' विश्वकोशे। ब्रह्मजीवयोः कः इति संशयः ब्रह्मसाकारत्वेन संशयविषयोपहतपाप्मत्वादिगुणकथनात् समाहितः सर्वेषां शासनाश्रयस्य निर्गुणत्वात्। जीवोपि वासनारूपः सर्वसमाहिताणुत्वेन न त्वज्ञानकल्पिततत्वेन तदभावात्। **उपाधीति** पराभिध्यानतिरोहितानन्दत्वादिरूपाधिः अतिरोहितानन्दादिश्च ब्रह्मजीवयोरूपाधी। **ब्रह्मेति** अग्रे इतीत्यध्याहार्य योजनीयम्। **वाद इति**। उदर्कवदनं न वेति भेदवादे नैयायिकैः श्रुतीनां भेदपरत्वम्। सत्यं भिदा सत्यं भिदा

१. ईषत्कालीयफल इति विश्वः।

समासं चेद् व्यर्थमधिकरणारम्भः । इदमेव च वाक्यं, श्रुत्या वक्तव्यं च भवेत् । तस्मादस्मिन्नधिकरणे मुख्या सर्वसंकरवादादिनिराकृतिः । किं तावत् प्राप्तम् ।

भाष्यप्रकाशः ।

यते । तथाचैतन्निर्णयस्य पूर्वमकृतत्वात् तदर्थमेतत्प्रणयनमित्यर्थः । ननु किं तन्निर्णयेनेत्यत आहुः श्रुत्यर्थ इत्यादि । हि यतो हेतोः संदेहनिरासायैव प्रवृत्तत्वाच्छ्रुत्यर्थो निर्णेतव्यः । तथाच तन्निर्णयायैतन्निर्णय इत्यर्थः । एतेन बुद्धिस्थस्य विचारादुपोद्घातगर्भः प्रसङ्गः संगतिरिति बोधितम् । नन्वस्याधिकरणस्यैतदेव प्रयोजनमित्यत्र किं गमकमत आहुः तदित्यादि । समासमिति पर्यवसितम् । व्यर्थमिति सामान्ये नपुंसकम् । तथाच यदि तथा स्यात् तदोपाधिभेदस्येतरत्वाप्रयोजकत्वादाकाशतुल्यतासंभवादितरपरामर्शसूत्रव्याहत्याऽधिकरणारम्भो व्यर्थ एव स्यात् । एतस्यैव वाक्यस्य श्रुतिवाच्यत्वापातेन, नेति निषेधोऽपि न संभवेत् । तस्मादस्मिन्नधिकरणे जीवब्रह्मैक्यकृतसर्वसंकरवादस्य मायावादस्य च निराकृतिरेव मुख्या । सा च जीवस्य परममुक्तिदशायामपि ब्रह्मनियम्यत्वे पर्यवस्यति तदिदं परामर्शसूत्रे प्रदर्शयिष्यामः ।

रश्मिः ।

सत्यं भिदा सत्यो जीवः सत्यो जीवः सत्यो जीवः इति श्रुत्या भेदश्चोक्तः तथा श्रुत्यन्तरम् ।

'यथा पक्षी च सूत्रं च नानावृक्षरसा यथा ।
यथा नद्यः समुद्रश्च शुद्धोदलवणे यथा ॥
यथा स्तेनापहार्यौ च यथा पुंविषयावपि ।
तथा जीवेश्वरौ भिन्नौ सर्वदैवाविलक्षणौ' ॥ इति ।

इतिहासे च 'यदधीना यस्य सत्ता तत्तदित्येव भण्यते ।
विद्यमाने विभेदेपि मिथो नित्यं स्वरूपतः' ॥ इति ।

स्मृतिश्च 'भिन्ना जीवाः परो भिन्नः तथापि ज्ञानरूपतः ।
प्रोच्यन्ते ब्रह्मरूपेण वेदवादेषु सर्वशः' ॥ इति ।

अतो न वा संभवति इति हेतोर्निर्णीयत इत्यर्थः । पञ्चमाङ्गमाहुस्तल्लिङ्गाधिकरणेन । एतेनेति चिन्तां प्रकृतोधिकरणविचारस्तत्सिद्ध्यर्थां तल्लिङ्गाधिकरणविषयिणीं प्रकृत उपोद्घातं विदुर्बुधाः तादृशचिन्तायां तल्लिङ्गाधिकरणं विषयः प्रकृताधिकरणविचारसिद्धिफलक इत्येवं प्रसङ्गसंगत्यन्तर्गतस्मरणविषयस्योपेक्षानर्हत्वमित्युपोद्घातगर्भः प्रसङ्गः चतुर्थकेक्षत्यधिकरणोक्तरीत्या वा संगतिः समर्थनीया । **प्रवृत्तेति** व्यासस्य प्रवृत्तत्वात् । **तन्निर्णय** इति जीवब्रह्मवादनिर्णयः । **इतरत्वेति** यथाहुर्नैयायिका विशिष्टं शुद्धान्नातिरिच्यत इति । **तथेति** जीवे पर्यवसितत्वेन प्रकारेण शास्त्रं स्यात् । **व्यर्थ** इति मानाधीना मेयसिद्धिः मानं व्याहत्यांशतो विगतोर्थोभिधेयं यस्यैतादृशः स्यात् । **इदमेवेति** भाष्यं विवरामासुः **एतस्यैवेति** । **श्रुतिवाच्येति** । श्रुतिर्निरपेक्षो रवस्तया वाच्यं वचनार्हम् तत्तापातेनेतरपरामर्शसूत्रे नेतिनिषेधो न, किं च द्वा सुपर्णेति श्रुतिरवक्तव्या च भवेत् । **तस्मादिति** भाष्यं विवरामासुः **तस्मादिति** । सर्वसंकर उक्तः पूर्वाधिकरणे । **मायेति** मायेत्यसुरा इति श्रुतेः सर्वं मायेतिवादस्य । ननु दहरसूत्रे सर्वसंकरवादादिनिराकरणवाचकपदज्ञानं प्रमाणं

दहर आकाशो जीव इति। अत्रावान्तरप्रकरणद्वयम्। तत्र द्वितीये प्रजापतिप्रकरणे जीव एवाऽमृताऽभयरूपः प्रतिभाति। स्पष्टार्थं च द्वितीयप्रकरणम्। तस्मात् प्रथमेऽपि जीव एव तादृशधर्मवान् भवितुमर्हति। अर्थानुगुण्यमपि व्याख्येयम्।

भाष्यप्रकाशः।

अतोऽधिकरणसार्थक्यानुपपत्तिरेव प्रणयनप्रयोजनगमिकेत्यर्थः। एवं संशयाकारादिकं निश्चित्य पूर्वपक्षमाहुः किं तावदित्यादि। उपपादयति अत्रेत्यादि। अत्र दहरबोधके महावाक्येऽवान्तरप्रकरणद्वयम्। एकं दहरविद्यारूपं, द्वितीयमिन्द्रप्रजापतिसंवादरूपम्। उभयत्राप्यपहतपाप्मत्वादिगुणक आत्मैव प्रतिपाद्यः। तत्र द्वितीये प्रजापतिप्रकरणे चतुर्भिः पर्यायैर्जाग्रत्स्वप्नसुषुप्तमुक्तावस्थभेदेन जीवस्यैव प्रतिपादनाज्जीव एवाऽमृताऽभयरूपः श्रावितः प्रतिभाति। तच्च प्रकरणं स्पष्टार्थम्। य एषोऽक्षिणि पुरुषो दृश्यत इति द्रष्टारमुपक्रम्य, एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति प्रतिपर्यायं प्रतिज्ञादर्शनात्। एवमसंदिग्धस्य तस्य पूर्वप्रकरणव्याख्यारूपतया औचित्यात्। अतस्तदनुरोधेन प्रथमेऽपि जीव एवाऽपहतपाप्मत्वादिधर्मवान् भवितुमर्हति। किंच। यदि कश्चिदर्थः पीड्येत, तदा प्रकरणान्तरं भिन्नं कल्प्येत। अतस्तदभावायार्थानुगुण्यमपि व्याख्येयम्। तच्चैवम्। अत्र हृदयाकाशं प्रक्रम्य, तस्य ब्रह्मपुरत्वं चोक्त्वा, तत्र, एष आत्मापहतपाप्मेत्यङ्गुल्येव निर्दिश्यते। तेनायमेव जीवो ब्रह्मेति सिद्ध्यति। 'अयमात्मा ब्रह्म विज्ञानमयः' इति श्रुतेश्च। एवंच मैत्रेयीब्राह्मणमप्यनुगुणं भविष्यति। तत्रापि, न वा अरे

रश्मिः।

नास्तीत्याकाङ्क्षायामाहुः अतोधीति। श्रुतार्थापत्तिरत्राभिहितानुपपत्तिरूपाऽधिकरणार्थो ह्यभिधार्थः सोत्रानुपन्नत्वेन ज्ञातस्तल्लिङ्गाधिकरणेन गतार्थत्वात्। तथा सन्नर्थान्तरं सर्वसंकरवादादिनिराकरणरूपं कल्पयति। यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र वाक्यावगतज्योतिष्टोमस्य क्षणिकतया स्वर्गसाधनतानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यत इति वेदान्तपरिभाषाकारः। वस्तुतस्तु द्वारमित्यादौ द्वितीयाभिहिता कर्मतानुपपन्ना सती स्वान्वययोग्यां क्रियां कल्पयतीत्यभिहितानुपपत्तिरेवार्थाध्याहारपक्षमादायादरणीया लाघवात् तया च सर्वसंकरवादादिनिराकरणस्य सूत्रावाच्यत्वेप्यभिहितानुपपत्तिरूपप्रमाणप्रमितत्वेन सर्वसंकरवादादिनिराकरणवाचकपदज्ञानं प्रमाणं नास्तीत्यसिद्धम्। शब्देन प्रत्यक्षेण वा प्रमितस्यार्थस्यार्थान्तरं विनानुपपद्यमानस्योपपत्तयेऽर्थान्तरकल्पना ज्ञेयं प्रमाणान्तरमिति मीमांसकाः पदरूपवाचकस्याध्याहृतस्य सत्त्वाच्च। अधिकरणार्थस्यानुपपन्नत्वाभावात् सार्थक्यपदम्। यदि च तल्लिङ्गाधिकरणेन गतार्थत्वादधिकरणार्थस्यानुपपत्तिरस्त्येवेति सार्थक्यपदमसंगतमिति तत्स्थलेऽर्थपदं प्रयोक्तव्यमिति विभाव्येत तदा त्वोम्। यद्वा अधिकरणसार्थक्येत्यस्यायमर्थः। अर्थेन सह सार्थः सार्थ एव सार्थकम्। अधिकरणस्यार्थस्य चानुपपत्त्यभावादधिकरणं सार्थकं सार्थकमेव सार्थक्यं स्वार्थे ष्यञ् तादृशस्यानुपपत्तिः। अधिकरणप्रणयनस्य प्रयोजनं सर्वसंकरवादादिनिराकरणं तस्य गमिका तत्र प्रमाणमित्यर्थ इत्यर्थः। संशयेति आदिपदेनाधिकरणप्रयोजनम्। तत्र द्वितीय इति भाष्यं विवरामासुः तत्र द्वितीयेति। पर्यायैः प्रकारैः। तच्चेति। स्पष्टार्थमिति भाष्यविवरणम्। एतमिति एतं पूर्वोक्तमक्षिणि द्रष्टारं तु एव ते तुभ्यमिन्द्राय भूयः पुनरहं प्रजापतिरनुव्याख्यास्यामीत्यर्थः। यं पूर्वं मयाऽक्षिणि द्रष्टृत्वेन पुरुष उक्तस्तम्। तस्मादिति भाष्यं विवरीतुमाहुः एवमसंदिग्धेति। तस्येति द्वितीयप्रकरणस्य।

१: अधिकरणा।

अयमेव जीवो ब्रह्म। अयमात्मा ब्रह्मेति श्रुतेः। मैत्रेयीब्राह्मणं चानुगुणं भविष्यति। तस्य पुरं शरीरम्। तत्र हृदयकमलं सूक्ष्मम्। तत्राराग्रमात्रो जीव एवाकाशः। तात्स्थ्यात् तद्व्यपदेश इति। अन्वेष्टव्यस्तु तस्मिन् विद्यमानस्तन्महिमा। वासनारूपेण सर्वं तत्र वर्तत इति।

अन्यथोभयत्र सर्वकथनं विरुद्धमापद्येत। भूतानि महाभूतानि पुत्रा-

---

भाष्यप्रकाशः।

पुत्राणां कामायेत्याद्युक्तानां जीवलिङ्गानां बाहुल्येन तस्यापि जीवपरत्वात्! नचैतन्मात्रमेवार्थानुगुण्यं, किं त्वन्यदपि। तदेव भाष्ये तस्य पुरं शरीरमित्यादिना व्याख्यातम्। सूक्ष्ममिति हार्दाकाशरूपम् 'तस्यान्ते सुषिरꣳ सूक्ष्मम्' इति श्रुत्यन्तरात्। मैत्रेयीब्राह्मणादत्रैतावान् विशेषः। तत्र श्रोतव्यत्वादिकं जीवस्योच्यते। 'आत्मा वा अरे श्रोतव्यः' इति श्रावणात् अत्र तु तस्मिन् यदन्तस्तदन्वेष्टव्यमित्याकाशान्तर्वर्तिनोऽन्वेष्टव्यत्वमुच्यत इति। तथा सत्यत्र तन्महिम्नोऽन्वेष्टव्यत्वं तदाह अन्वेष्टव्य इत्यादि। महिम्नः स्वरूपमाह वासनेत्यादि। तथाच वासनारूपेण तत्र विद्यमानमत्रोक्तं सर्वमेव तन्महिमेत्यर्थः। इदमेव तापनीयेऽप्युक्तं, 'सर्वं सर्वमयं सर्वे जीवाः सर्वमयास्तथाप्यल्पाः' इति। नन्वत्रेदृश एव महिमोच्यत इति कथं ज्ञेयमत आह अन्यथेत्यादि। यदि जीवमहिम्नो वासनारूपत्वं नोपगम्येत, तदा, यावानित्यादिनाऽन्तर्बहिश्च सर्वनिरूपणं प्रत्यक्षविरुद्धमापद्येत। नच वासनारूपस्य सर्वस्याङ्गीकारे यथाकथंचिद् द्यावापृथिव्यादिवासनासंभवेऽपि, सर्वं समाहितं सर्वाणि च भूतानीति भूतपदविरोधः स्यात्। 'न

रश्मिः।

तदन्विति द्वितीयप्रकरणानुरोधेन। **अर्थानुगुण्यमिति** भाष्यं विवरीतुमाहुः **किं चेति**। **तदभावायेति** प्रकरणान्तरत्वाभावाय। **मैत्रेयीति** भाष्यविवरणम्। **एवं चेति**। **तस्येति** भाष्यं विवरीतुमाहुः **न चेति**। **तदेवेति** अन्यदप्यर्थानुगुण्यम्। ब्रह्मपुर इति श्रुतिव्याख्यानेन व्याख्यातम्। **श्रुत्यन्तरेति**। न च शरीरस्यान्ते मध्ये सुषिरदाताकाशो न तु सुषिरम्। 'भूतानां छिद्रदातृत्वं बहिरन्तरमेव च' इति तृतीयस्कन्धादिति शङ्क्यम्। पूर्वपक्षत्वेन परमतत्वात्। तत्राकाशे 'बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोपि दृष्टः' इत्यौपाधिकः आराग्रमात्रः। ननु भाष्ये तत्र जीव इत्युक्ते कथमाकाशाभेद इत्याकाङ्क्षायामाह **तात्स्थ्यादिति** तात्स्थ्यादित्याकाशस्थत्वात् जीवस्याकाशव्यपदेशः आकाशाभेद इत्यर्थः। 'ब्राह्मणो वै सर्वा देवता' इतिवत्। **इति श्रावणादिति** अयमात्मा ब्रह्मेति श्रुतेरात्मपदस्य जीवे शक्तत्वात्। **आकाशान्तरिति** समाहितसर्वकामरूपपदार्थस्य। **वासनेति** 'ऊतयः कर्मवासनाः' कर्मभिर्भिन्नाः सप्तमस्कन्धे निरूपिताः अन्यत्र

'दृढभावनया त्यक्तपूर्वापरविचारणम्।
यदाऽऽदानं पदार्थस्य वासना सा प्रकीर्तिता'॥

इति एतेन रूपेण। **तत्र** जीवे। **सर्वमया** इति कर्मजवासनारूपसर्वमया सर्वप्रचुरा जीवाः। **अल्पा इत्यणवः**। उपाधिभिरित्यन्ये। उभयत्रेति पदं व्याचकार **अन्तरिति**। **भूतानीति** भाष्यं विवरीतुमवतारयन्ति स्म **न चेति**। **यथाकथमिति** यथा येन प्रकारेण कथं केन प्रकारेण चित् यदि। आकृतिग-

दयो वा। तं चेद् ब्रूयुरित्यादिना नित्यतामुपपाद्य एष आत्मेत्यादिना तस्यैव ब्रह्मत्वमुपदिशति। तज्ज्ञानं च प्रशंसति । स्वात्मज्ञानिनः कामसिद्धिं चाह य इहेत्यादिना । येऽपि च विरुद्धा धर्माः प्रतिभान्ति, अहरहर्गमनादयस्तेऽपि स्वकल्पितजीवानां स्वप्नमायामनोरथादिषु तेषामेव गमनागमने प्रति।

भाष्यप्रकाशः।

हिंस्यात् सर्वा भूतानि' इत्यादौ भूतपदस्य जीवविशिष्टदेहवाचकताया निश्चितत्वात् प्रकृते च भूतपदस्य सर्वपदेन विशेषणाल्लोके च तत्तज्जीवविशिष्टसर्वदेहविषयकानुभवस्य वक्तुमशक्यतया तद्विषयकवासनाया अशक्यवचनत्वादिति शङ्क्यम्। विशेषणीभूतस्य सर्वपदस्य वृत्तिसंकोचे भूतानीत्यनेन महाभूतानि पुत्रादयो वा ग्रहीतुं शक्यन्त इति तदभावात् । नन्वेतस्य जीववाक्यत्वाङ्गीकारे, तं चेद् ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुर इत्यादिनोक्ता दहरनित्यता, तदन्तःस्थस्य ब्रह्मत्वोपदेशादिश्च विरुध्येतेति शङ्कायामग्रिमग्रन्थं योजयन्ति तं चेदित्यादि। तस्यैव ब्रह्मत्वमुपदिशतीति जीवस्यैव ब्रह्मत्वमुपासनार्थमुपदिशति। य इहात्मानमनुविद्य व्रजन्तीत्यादेस्तात्पर्यमाहुः तज्ज्ञानमित्यादि। तथा च न विरोध इत्यर्थः। ननु भवत्वेवमन्यवाक्यानां संगतिस्तथापि, 'इमाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' इत्यादेर्ग्रन्थस्य संगतिस्तु न भविष्यति। जीवान्तराणां जीवान्तरे गमनाभावात् । अहरहर्गमनकथनेन ब्रह्मणो लोको ब्रह्मलोक इति षष्ठीसमासस्योपगन्तुमशक्यतया सत्यलोकादेरविवक्षितत्वाद् ब्रह्मैव लोको ब्रह्मलोक इति मयूरव्यंसकादिवत् समानाधिकरणसमासस्यैवाश्रयणीयतया ब्रह्मण एव तत्र विवक्षितत्वेन ब्रह्मलोकपदासंगतेश्चेति चेत्तत्राह येऽपीत्यादि। स्वकल्पितजीवानामिति स्वाज्ञानकल्पितजीवानाम् । तादृशा जीवाः कुत्र सिद्धा इत्याशङ्कायामाह स्वप्नेत्यादि । प्रतिर्लक्षणे। स्वप्नादिषु तेषां जीवानां सिद्धत्वादहरहर्वाक्यं तानेव लक्षीकृत्य प्रवृत्तम्। श्रुत्यन्तरे,

रश्मिः।

णत्वेन यथाकथंचिदिति निपात इति चेदर्थस्त्वयमेव तथा च बहुद्रष्टुर्बहुश्रुतस्य द्यावापृथिव्यादेर्यथादर्शनं शाब्दानुभवात्तज्जन्या वासनास्तासां संभवेपीत्यर्थः। कर्मजन्यत्वं भोग्यादृष्टजन्यत्वाच्छाब्दाद्यनुभवविषयाणां भूतपदविरोधं स्पष्टयामास न हिंस्यादिति। सर्वेति सर्वाणि शसो डादेशः सुपां सुलुगिति सूत्रेण। विशेषणीति सर्वं समाहितं सर्वाणि च भूतानीत्यत्र विशेषणीभूतस्य। तदभावादिति अनुभवविरोधाभावात्। दृढभावनया पदार्थादानं विवक्षितं तेन वाक्योक्तवासनाप्रकीर्तनं संभवति। तं चेदिति आदिपदेन सर्वꣳसमाहितꣳसर्वाणि च भूतानि सर्वे कामा यदा तदा जरा वाप्नोतीति श्रुतिसंग्रहः तमेवमुक्तवन्तमाचार्यमन्तेवासिनश्चेद्ब्रूयुरस्मिन् ब्रह्मपुरे देहे इदं सर्वं द्यावापृथिव्यादिकं समाहितं चेद्यदि समाहितानि सर्वाणि स्थावरजङ्गमानि भूतानि सर्वे च कामाः काम्यमानविषयाः समाहितास्तदा यदा यस्मिन् काले एतच्छरीरं जरावलीपलितादिलक्षणां वाप्नोति वाशब्दाद्वयोहानिं वाप्नोति। य इहेति य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवत्यथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामाꣳस्तेषां सर्वेषु लोकेषु कामचारो भवतीत्यस्याः श्रुतेः। तज्ज्ञानमिति तत्प्रसिद्धं ज्ञानं च जैवम्। न विरोध इति एकस्य कर्मकर्तृभावविरोधो न। अशक्यतयेति साधनमन्तरा ब्रह्मणो लोकेऽहरहर्गमनासंभवादशक्यतया। स्वप्नादीति तेन भाष्ये स्वप्नश्च माया च मनोरथश्च आदिपदेन प्रतिक्षणनूतनदेहः एतेषु तेषां जीवानां सिद्धत्वादेव गमनागमने लक्षीकृत्य

स्वातिरिक्तस्य ब्रह्मणोऽभावात् । एवं लोकाधारत्वमपि । ब्रह्मचर्यं च तस्य साधन-

भाष्यप्रकाशः ।

सता सोम्य तदा संपन्नो भवतीति सुषुप्तावेव सत्संपत्तेर्दृष्टत्वात् । ततः पूर्वं स्वप्नावस्थायां कल्पितजीवबाहुल्यात् । अतस्तेषामेव ते तत्रोच्यतेऽतो न तद्विरोध इत्यर्थः । नन्वेवं कल्पने किं बीजमत आह **स्वातिरिक्ते**त्यादि । तत् त्वमसि, अयमात्मा ब्रह्म, स यो ह वै तत् परं ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुत्यन्तरे तथैव सिद्धत्वादित्यर्थः । ननु तथापि, य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति लोकाधारत्वं यदुक्तं तस्य कथं संगतिरित्यत आह **एवमि**त्यादि । यथा गन्तारोऽज्ञानकल्पितास्तद्वल्लोका अपीति तादृशतदाधारत्वमपि नासंगतमित्यर्थः । नन्वग्रे तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्तीत्यादिना यज्ञादीनां ब्रह्मचर्यत्वेन रूपेण ब्रह्मलोकप्राप्तिसाधनत्वमुक्तम् । ततोऽथ 'या एता हृदयस्य नाड्यः' इत्यादिना, तयोर्ध्वमायन्नमृतत्वमेतीत्यन्तेन तत्र गमनस्योपायभूतो योगो गमनप्रकारश्चोक्तः । तत् सर्वं गन्तुः काल्पनिकत्वे कथं संगच्छते तत्राह **ब्रह्मचर्यमि**त्यादि । **तस्ये**ति अज्ञानकल्पितस्याविदुषः कर्मणामविद्वद्-

रश्मिः ।

प्रोक्ता इति यत्किंचिद्भाष्यप्रकाशेन सह भाष्यार्थः । उच्येते तदेत्यत्राकारः पतितः । **तद्विरोध** इति अहरहर्गमनादिविरोधः । **तथैवे**ति जीवाभिन्नत्वेनैव सिद्धत्वात् । **य आत्मे**ति श्रुत्यर्थस्तु अथपदं पूर्वं वर्तते तस्यार्थः । अथशब्दो गुणान्तरैः स्तुतिप्रारम्भार्थः य आत्मा संप्रसादस्वरूपः स सेतुरिव सेतुः सेतुसादृश्यमाह विधृतिरिति सेतुविधरणः सर्वस्य जगतो वर्णाश्रमादिभेदवतो विधारक इत्यर्थः । जगद्विधारणप्रयोजनमाह **एषामि**ति एषां भूरादिलोकानामसंभेदाय अविनाशायेति । **अनुविन्दन्ती**ति अनुलभन्ते तद् ब्रह्मलोकं ये एवाऽनुलभन्त इत्यर्थः । **यज्ञे**ति अथ यद्यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तदिति श्रुतेः । आदिपदेन अथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तत् । अथ यत्सत्रायणमित्याचक्षते ब्रह्मचर्यमेव तत् । **ब्रह्मलोके**ति ब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दते इति श्रुतेः तं ब्रह्मलोकम् । विन्दते लभते । **ततोऽथे**ति ब्रह्मचर्यादिसाधनसंपन्नस्य यथोक्तब्रह्मोपासकस्य मूर्धन्यनाड्या गतिं विवक्षुराह अथाधिकारिणः सफलोपास्तिविधानानन्तरं **या एता** वक्ष्यमाणा **हृदयस्य** पुण्डरीकाकारस्य संबन्धिन्यो **नाड्यस्ताः** पिङ्गलस्याणिम्नः इति षष्ठ्यौ तृतीयार्थे तत्पूर्णास्तिष्ठन्ति एवमादि यस्य ग्रन्थस्य तेन । **तया** मूर्धानं लक्षीकृत्य निःसृतया नाड्या सुषुम्णाख्यया **ऊर्ध्वमायन्** गच्छन् अमृतभावमेति गच्छति एवमन्तो यस्य तेन । **तत्रे**ति ब्रह्मलोके **गमने**ति । **योग** इति स ओमिति वा होद्वामीयते स यावत् क्षिप्येत् मनस्तावदादित्यं गच्छत्येतद्वै लोकद्वारं विदुषां प्रपदनमिति श्रुत्योक्तः । तत्र स जीवः ॐमिति वा ह उत् वा मीयते शब्दयते गच्छतीत्यन्ये व्याहरतीति वा 'ॐमित्येकाक्षरं ब्रह्म व्याहरन्' इति गीतायाः । एष आदित्यगमनस्योपायः । यावन्मनःक्षेपः प्रेरणं तावदिति योगः 'परो हि योगो मनसः समाधिः' मनो यत्र निषिक्तमस्येति आदित्यं ब्रह्मलोकम् । अन्तस्तद्धर्मोपदेशादिति सूत्रात् । **गमने**ति 'अथ यत्रैतदस्माच्छरीरात् उत्क्रामति अथैतैरेव रश्मिभिरूर्ध्वं आक्रमते' इति श्रुत्योक्तः । अथ तदा एतैरेवादित्यरश्मिभिः नाडीप्रसृप्ताभिरेवोर्ध्वमाक्रमत इति । **अविदुष** इति ननु निरोधोऽविदुषामिति श्रुतेरव्यवहितपूर्वमेतद्वै खलु लोकद्वारं विदुषां प्रपदनमिति श्रुतेर्विदुष इति तस्येतिपदस्य व्याख्यानं न त्वविदुष इति चेत्तत्राहुः **कर्मणामि**ति । तथा चायं विद्वानविद्वान् अविद्वच्छब्दवाच्यः तर्हि को

मिति। योगश्च, तयोर्ध्वमायन्नमृतत्वमेतीति च। तस्माज्जीव एव दहर इत्येवं प्राप्ते उच्यते। दहरः परमात्मा, न जीवः। कुतः। उत्तरेभ्यः। उत्तरत्र वक्ष्यमाणेभ्यो हेतुभ्यः। तेषामपि साध्यत्वादेवमुक्तम्। जीवो नाम भगवदंशो, न भगवानेवेत्यग्रे वक्ष्यते। 'अंशो नानाव्यपदेशात्' इति। नापि ब्रह्म तावन्मात्रमिदमप्यग्रे वक्ष्यते। अधिकं तु भेदनिर्देशादिति। तस्मादिदं प्रकरणं न जीवब्रह्मविद्यापरम्। किंतु ब्रह्मवाक्यमेवेति ॥ १४ ॥

भाष्यप्रकाशः।

धिकारकत्वादविद्वत्त्वस्य चाज्ञानिकत्वात् तादृशस्यैव तत्साधनमुपायः प्रकारश्च। न हि विदुषो ब्रह्मभूतस्य व्यापकस्य तत् संभवतीति जीवभावस्याज्ञानकल्पितत्वाङ्गीकारे सर्वस्यापि संगतिः। सिद्धमाह तस्मादित्यादि। पूर्वमादृतादुत्तरप्रकरणस्वारस्यात् तथेत्यर्थः। एवं पूर्वपक्षमुक्त्वा सिद्धान्तं व्याचक्षते उच्यत इत्यादि। न जीव इति वस्तुतो ब्रह्माभेदेऽप्यज्ञानकल्पितभिन्नभावो जीवो न। एतादृशस्य निवारणे अंशभूतस्य जीवस्य निवारणमनुक्तसिद्धम्। अत उभयविधोऽपि जीवो नेत्यर्थः। उत्तरत्रेति वाक्यशेषे। उभयविधोऽपि जीवोऽत्र निराक्रियत इति बोधयितुं जीवस्वरूपमाहुः जीवो नामेत्यादि। नापीत्यादि च एतेन स्वोपपादनीयस्य प्रकारस्याकाल्पनिकत्वं बोधितम् ॥ १४ ॥

रश्मिः।

विद्वानित्यतः आह नहीति। ननु निरोधोऽविदुषामित्यत्राविद्वच्छब्दार्थः कः इति चेत्कर्माप्यविदुषामित्यर्थः इति गृहाण। पूर्वमिति पूर्वपक्षे। वाक्येति वक्ष्यमाणसूत्रविषयीभूते। तथा च विषयवाक्ये ब्रह्मपुरं शरीरं आत्मोपनिषदि बाह्यदेहस्यात्मत्वात्। तत्र दहरमक्षरं बालकं वा पुण्डरीकं वेश्म ब्रह्मगृहम्। नैतत्। दहरपदस्याक्षरे शक्तेः सर्वेषां शब्दानां ब्रह्मवाचकत्वात्। शक्तिसंकोचलक्षणरूढ्या बालके दहरपदम्। यद्वा। अर्भकौकस्त्वादित्यादिसूत्रे तथाव्याख्यानाद्दहरो बालकः अस्मिन् वेश्मनि अन्तर्दहराकाशः तस्मिन् यदन्तः सर्वे कामास्तदन्वेष्टव्यम्। तत्र दहरः परमात्मा बालकग्रहणे धर्मानुपपत्तेरतो भाष्ये 'ज्ञानशक्तिक्रियाशक्ती संदिह्येते परस्थिते' इत्युक्ते शक्ती विचार्ये परं तु आधारनिरूपणं भज्येतातोत्रोक्तधर्माधारो दहरः परमात्मेति। ननु दहरपदस्य मूषिकादौ शक्तेः तत्रैव धर्माणामुपासनार्थमुपसंहारे को दोषो भक्तिस्तु भविष्यत्येवोपासनासत्त्वात् 'श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते' इति वाक्यादिति चेन्न श्रीआचार्यवाक्येष्वविश्वासस्यापराधेषु गणनादपराधप्रसङ्गात्। 'दहरो मूषिकायां च स्वल्पभ्रातरि बालके' इति विश्वकोशे त्रिषु शक्त्युक्तावपि नामनारायणादिकोशेष्वन्यत्रापि शक्तेः। किं च दहरपदं परमात्मवाचकं ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानमिति मण्डूकोपनिषच्छ्रुतेः। अत्र ओमितिपदं दहरवाचकम्। ओमितिपदस्य ब्रह्मव्याख्यानस्य इदंपदजातमुपसमीपवर्तिनां पदार्थानां व्याख्यानत्वादुपव्याख्यानं यद्यपि तथाप्यग्रेभूतं भवद् भविष्यदिति सर्वमोंकार एवेति श्रुत्या वाच्यवाचकाभेदविवक्षया ओंकाराभेदोक्तेर्दहरपदमपि ओंकारवाचकमिति। ननु तथापि परमात्मैकदेशमूषिकादौ श्रुतिप्राप्ता शक्तिः श्रुत्यन्तरेण परमात्मनि प्रोक्ता तत्र किं कारणमिति चेच्छृणु मूषिकादावपि दशविधलीला सहितस्य भगवतोवस्थानाच्छ्रुतीनां तद्दर्शकत्वेन परमात्मनि शक्तिः प्रोक्तेति। तथा च सुबोधिनी 'एकैकस्मिन् पदार्थे दशविधलीलासहितो भगवाँस्तिष्ठति' इति। एवमन्यत्र ॥ १४ ॥

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥ १५ ॥

उत्तरहेतूनां मध्ये हेतुद्वयमाह गतिशब्दाभ्याम् । गतिर्ब्रह्मलोकगमनम् । 'एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' इति । 'एष आत्मापहतपाप्मा सत्यकामः सत्यसंकल्पः' इति केवलभगवद्वाचकाः शब्दा ब्रह्मलोकशब्दश्च । ननूक्तं जीवस्यैवैते शब्दा गतिश्च मनोरथादिकल्पितानामिति । तन्निराकरणायाह । तथाहि । तथैव गतिशब्दौ भगवत्येव युक्तौ । अनृतेनापिधानं हि तेषां विशेषणम् । अज्ञानावेष्टितत्वमित्यर्थः । न त्वज्ञान-

भाष्यप्रकाशः ।

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥ १५ ॥ सूत्रमवतारयन्ति उत्तरेत्यादि । व्याकुर्वन्ति गतिरित्यारभ्य युक्तावित्यन्तम् । गतेरज्ञानकल्पितजीवपरत्वं यदुक्तं तत् परिहरन्ति अनृतेनेत्यादि विरोधश्चेत्यन्तम् । तेषामिति प्रजाशब्दोक्तानां जीवानाम् । अयमर्थः । पूर्वपक्षी हि जीवपरमात्मनोरज्ञानकल्पितं भेदं पारमार्थिकमभेदं च वदन्नज्ञानकार्यान्तःकरणावच्छिन्नत्वाज्जीवस्वरूपमज्ञानकल्पितं मन्यते । अज्ञाननाशेऽवच्छेदकनाशात् तन्नाशं चानुजानाति ।

रश्मिः ।

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥ १५ ॥ गतिरिति । भाष्ये । एवमेवेति यथा हिरण्यनिधिं भूमेरधस्तान्निक्षिप्तं निधिक्षेत्रानभिज्ञा निधेरुपर्युपरि संचरन्तो निधिं न लभेरन्, एवमेव सुषुप्तिकाले प्राप्तवन्त्योपि न लभन्त इत्यर्थः । उक्तमिति पूर्वपक्ष उक्तम् । **मनोरथादीति** । मनोरथस्य आदी स्वप्नमाये मनोरथ आदिर्यस्य प्रतिक्षणनूतनदेहस्य मनोरथादी च मनोरथादिश्च मनोरथादयस्तैः कल्पितानाम् । तथा हीति सौत्रं पदं व्याख्येयम् । व्याचक्रुः तथा हीति पदद्वयम् । न तु तथा हीति निदर्शने व्याख्यानात् । हीत्यस्य व्याख्यानं भगवत्येवेति युक्तार्थे हिशब्द इत्यर्थः । अत्र सूत्रे एवकारो मण्डूकप्लुत्या वर्ततेऽतस्तथैव उक्तप्रकारेणैव गतिश्च शब्दश्च तौ भगवति अथातो ब्रह्मजिज्ञासेति सूत्रानुवर्तितब्रह्मणि अत्राप्येवकारः संबध्यते । एवकारेण जीवव्यवच्छेदः । **प्रकृते** । **अनृतेनेति** श्रुत्यर्थस्तु भाष्य एवास्ति । नन्वनृतेन प्रत्यूढाः इत्यस्या रत्नप्रभाकारेणाप्यज्ञानेनावृता इत्यर्थस्वीकारात् कं प्रत्याक्षेप इति चेन्न । एवमाक्षेपसंभवात् । जीवत्वस्याज्ञानकल्पितत्वे न वस्त्वभावान्नाज्ञानावृतत्वमर्थः संभवति परेषाम् । न हि जलचन्द्राः केनाप्यावृता भवन्ति किं च यद्येन कल्पितं तत्तेनावृतं भवतीति नियमादावृतत्वं यथाकथंचिदभ्युपेयते तदापि न त्वदभिमता ज्ञानावृतत्वरूपाज्ञानकल्पितत्वं किं तु युक्तं भाष्योक्तमज्ञानावेष्टितत्वं वस्तुभूतस्य जीवस्येत्याक्षेपः अज्ञाननाशेपि स्मरणदर्शनादित्याशयेन भाष्यं प्रपञ्चयामासुः अयमिति । पूर्वपक्ष उक्तः स विघतेऽस्य स पूर्वपक्षी तत्राराग्रमात्रो जीव एवाकाश इत्याह स च द्वितीयाध्यायतृतीयपादे शंकररूपः । **अज्ञानेति** बुद्ध्यादिकल्पितम् । 'बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोपि दृष्टः' इति श्रुतेः । **अज्ञानकार्येति** अन्तःकरणमेव तैः बुद्धिपदेनोच्यते तथा च बुद्ध्यवच्छिन्नत्वादित्यर्थः । यावदात्मभावित्वसूत्रे एतदुक्तं तैः । परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेणास्तीति । **अज्ञानेति** तथा च यावदात्मभावित्वसूत्रभाष्यं यावदयमात्मा संसारी भवति यावदस्य सम्यग्दर्शनेन संसारित्वं न निवर्तते तावदस्य बुद्ध्यादिसंयोगो न शाम्यतीति अवच्छिनत्तीत्यवच्छेदकं बुद्धिरूपम् ।

भाष्यप्रकाशः।

आत्मनो व्यापकत्वाद् गमनागमने उपाधिनिष्ठे अङ्गीकुर्वंस्ते जीवात्मन्यौपचारिके मन्यते। तदिदमेतद्वाक्यविचारे विरुद्ध्यते। अत्र हि ब्रह्मलोकेऽहरहर्गच्छतामपि ब्रह्मलोकाज्ञाने हेतुभूतं विशेषणम्, अनृतेन प्रत्यूढा इति। तत्रानृतपदस्याज्ञानवाचकत्वाङ्गीकारेऽपि प्रत्यूढपदं पिहितत्वमेव ब्रूते। अनृतापिधाना इति वाक्यान्तरस्वारस्यात्। न तु तत्कल्पितत्वम्। क्वापि तथा अदर्शनात्। अतस्तस्याज्ञानावेष्टितत्वमर्थो न त्वज्ञानकल्पितत्वम्। तत्र हेतुर्दृष्टत्वम्। यतः सुष्वापादुत्थितः सर्वोऽपि, न किंचिदवेदिषमिति सुषुप्तौ स्वस्याज्ञानावेष्टितत्वमेवाहेति दृश्यते। यदि हि गन्ता अज्ञानकल्पितः स्यात् तदा जागरणे अज्ञाननाशे तस्यापि नाशात् स्मरणं नावकल्प्येत। अतो गन्तृत्वेन स्वाप्निकादीनां कल्पनमसंगतम्। नाप्यवच्छिन्नस्य गन्तृत्वम्। प्रदेशानामचलत्वेनोपाधावेव तत्पर्यवसानात्। नचाराग्रमात्रत्वस्य बुद्धिगुणकृतत्वेनावास्तवत्वाद् वस्तुतो ब्रह्मरूपस्य जीवस्य व्यापकत्वेनौपचारिकमेव गमनमतो गन्तुरभाव एव वास्तव इति युक्तम्। तथा सति, अननुविद्य व्रजन्तीत्यादिना अज्ञानिनः फलाभावस्य श्रुत्यैवोक्तत्वेन, ज्ञानिनश्चाज्ञाननाशाद् गमनाऽभावस्य त्वया व्युत्पादितत्वेन, अथ य इहात्मानमनुविद्य व्रजन्तीत्याद्युक्तस्य गन्तुरनङ्गीकारे द्विविधगतिबोधकशास्त्रवैफल्यापत्तेः। न चाराग्रमात्रत्वस्य चरमवृत्तावेव

रश्मिः।

गमनेति अहरहरितिश्रुत्युक्ते। **अङ्गीकुर्वन्निति** अत्र संधिः प्रमादात्। **औपेति** सिंहो माणवक इतिवत्। **क्वापीति** स्वप्नादौ तथा कल्पितत्वेन प्रकारेण। अज्ञानावेष्टितत्वं क्व दृष्टमित्याकाङ्क्षामपनुदन्तोऽ**ज्ञानेति** भाष्यं विवृण्वन्ति स्म **अत** इति। **दृष्टत्वादिति** भाष्यं विवृण्वन्ति स्म **तत्रेति**। गतिशब्दाभ्यां दहरः परमात्मा इत्येकं वाक्यं गतिशब्दौ तथाहि भगवत्येव युक्तौ द्वितीयं वाक्यं दृष्टमितिसूत्रांशेन फलितोऽर्थो दृष्टत्वादिति। अज्ञानावेष्टितत्वेन दृष्टं यतोतो गतिशब्दौ तथाहि भगवत्येव युक्तौ इति तृतीयं वाक्यं गतिर्जीवरूपपरनिष्ठव्यापारजन्या संयोगविशेषरूपा भगवति शब्दस्तु वाच्यवाचकताख्यसंबन्धेनेति। अधुना दृष्टमित्यस्यार्थं वक्तृभाष्यं तथाहीत्यावृत्य योजितवान्। कर्मणि क्तस्य द्योतकं विवरामासुः **यत** इति। **दृश्यत** इति सर्वैरज्ञानावेष्टितत्वं दृश्यते। **अज्ञानेति**। विदुषस्तत्त्वमसीतिवाक्योत्थब्रह्मापारोक्ष्येणाज्ञाननाशे। **स्मरणमिति** 'न किंचिदवेदिषम्' इत्येवं न शब्दोक्ताभावप्रतियोगिस्मरणम्। यतोऽभावज्ञाने प्रतियोगिज्ञानं कारणम्। **स्वाप्निकेति** जीवानाम्। आदिपदेन सुषुप्तिः। **अवच्छिन्नस्य** बुद्धिरूपावच्छेदकावच्छिन्नस्य। **प्रदेशेति** बुद्ध्यादिरूपशरीरप्रदेशयोगेन विभक्तस्यात्मनः प्रदेशरूपाणां जीवानामाकाशवदचलत्वेनोपाधिर्बुद्ध्यादिस्तस्मिन्। यथा घटे चलति नभसि चलनप्रतीतेस्तादृशचलनस्योपाधौ घटादौ पर्यवसानं तद्वत्। **न च गन्तुरित्यादिभाष्यं** विवरीतुमाहुः **न चारेति**। **बुद्धीति** एतच्च द्वितीयस्य तृतीयपादे तद्गुणसारत्वसूत्रे उक्तं शंकराचार्यैः। **इत्यादिनेति** एतांश्च सत्यान् कामाँस्तेषाँ सर्वेषु लोकेष्वकामचारो भवतीत्यादिपदसंग्राह्यम्। **त्वयेति** त्वया शंकराचार्येण तद्गुणसारत्वसूत्रभाष्ये तथोत्क्रान्त्यादीनामप्युपाध्यायत्ततां दर्शयतीत्येवं व्युत्पादितत्वेन। **इत्यादीति** 'एतांश्च सत्यान् कामाँस्तेषाँ सर्वेषु लोकेष्वकामचारो भवति' इत्यादिपदसंग्राह्यम्। **द्विविधेति** अननुविद्यव्रजनमनुविद्यव्रजनं चेति गतिद्वयम्। उपक्रान्तत्वाद्गतिद्वयबोधकं शास्त्रमेतदुक्तम्। अन्यदपि शास्त्रं विफलं स्वरूपनाशहेतुत्वात्। न ह्यात्मेतिभाष्यं विवरीतुमाहुः **न चारेति**। **चरमेति** अहं ब्रह्मास्मीति शाब्दापरोक्षचरमवृत्तौ। वृत्तिर्नाम विषयचैतन्याभि-

परिकल्पितत्वम् । दृष्टत्वात् । तथैव हि दृश्यते । सर्वोऽप्याह, न किंचिदवेदिषमिति । नच गन्तुरभाव एव । शास्त्रवैफल्यापत्तेः । न ह्यात्मनाशः पुरुषार्थः । कर्मकर्तृविरोधश्च तथा । अपहतपाप्मत्वं च । तद्विरुद्धधर्माणामनुभवात् । भग-

भाष्यप्रकाशः ।

नाशात् ततः पूर्वं मूलाज्ञानमात्रत्वेनाराग्रमात्रत्वसत्तया गन्तुरपि सत्त्वान्न शास्त्रवैफल्यमिति वाच्यम् । तथा सत्यत्र गन्तृत्वेन विवक्षितस्यात्मनश्चरमवृत्तौ नाशात् तस्या वृत्तेर्हेयत्वापत्तिः । न ह्यात्मनाशः पुरुषार्थ इति । किंच । जीवस्य वस्तुतो ब्रह्माभेदेन गन्तुरनङ्गीकारे, आत्मानमनुविद्य व्रजन्तीत्युक्तस्य ज्ञानक्रियायामात्मगन्त्रोः कर्मकर्तृभावस्यापि विरोधः । कृतकायव्यूहस्य योगिन इवोपाधिभेदेऽप्यात्मभेदस्फूर्तेरदर्शनात् । अत्रत्यकर्मकर्तृभावस्य च भेदमूलकताया एकवचनबहुवचनयोः प्रयोगादेव स्फुटत्वादिति । एवमनृतेन प्रत्यूढा इत्यस्याज्ञानावेष्टितत्वमात्रबोधकत्वात् तस्य च सुषुप्तिसाक्षिणा दृष्टत्वाज्जीवपरमात्मनोरंशांशिभावेन भेदसिद्धौ तद्गतेर्ब्रह्मविषयकत्वमेव युक्तमिति दृष्टत्वेन हेतुना साधितम् । अतः परं शब्दस्य ब्रह्मपरत्वं दृष्टत्वेन साधयन्ति तथेत्यादि । अपहतपाप्मत्वं च धर्मान्तराणामप्युपलक्षकम् । तेषां जीवपरतायामयुक्तत्वे ब्रह्मपरतायां युक्तत्वे च दृष्टं प्रमाणत्वेन दर्शयन्ति तद्विरुद्धेत्यादि । तथाचोभयत्रापि दृष्टस्यैव साधकत्वात् तेऽपि शब्दा ब्रह्मपरा एव युक्ता इत्यर्थः । ब्रह्मलोकपदस्य ब्रह्मपरत्वं पूर्वपक्षग्रन्थ एव साधितमतो नात्र शङ्कांशः । ननु ब्रह्मवादेऽपि सर्वस्य ब्रह्मात्मकत्वाज्जीवब्रह्मणोरंशांशिभावजनकस्य विभागस्याज्ञानकृतत्वमेव वाच्यम् । क्रियया विभागाङ्गीकारे ब्रह्मणोऽप्यनित्यत्वा-

रश्मिः ।

व्यञ्जकोन्तःकरणाज्ञानयोः परिणामविशेष इति तत्त्वानुसंधाननामग्रन्थे । **नाशादिति** एतच्च यावदात्मभावित्वसूत्रभाष्ये परैरुक्तप्रायं तर्कात् । अत्र हेतुमाहुरित्याहुः **न ह्यात्मेति** । **कर्मकर्त्रिति** भाष्यं विवरामासुः **किं चेति** । **आत्मगन्त्रोरिति** । आत्मानमित्यात्मा तद्य इहेत्युक्ता अथ य इहेत्युक्ताश्च व्रजनकर्तारो गन्तारः । **कृतेति** कृतः परकायेषु व्यूहः प्रवेशो येन । **एकेति** य आत्मानं व्रजन्तीत्यत्र श्रुत्यंशे । तस्याज्ञानपिहितत्वरूपाज्ञानवेष्टितत्वस्य च सुषुप्तिसाक्षी प्राज्ञः साक्षित्वात्सुषुप्तिद्रष्टृत्वम् । **तद्गतेर्जीवगतेः** । **धर्मेति** । सत्यकामसत्यसंकल्पौ धर्मान्तरौ ब्रह्मलोकशब्दप्रतिपाद्यत्वं च । **तद्विरुद्धेति** । अपहतपाप्मत्वादिविरुद्धपाप्मत्वासत्यकामत्वासत्यसंकल्पत्वब्रह्मलोकशब्दाप्रतिपाद्यत्वानाम् । **उभयत्रेति** गतौ शब्दे च । **भाष्ये** । ध्यानादावित्यादिपदेन धारणा 'चिन्तयन् चेतसा कृष्णं मुक्तो भवति संसृतेः' इति तं ध्यायेदिति च ध्यानमुक्तमेव । ननु समाधिः कुतो नोक्त इति चेन्न संप्रज्ञातसमाधेः सिद्धिहेतुत्वेनामोक्षफलकत्वात् । असंप्रज्ञातस्य मोक्षफलकत्वेन मोक्षे चाभेदात् । **प्रकृते** । **विभागस्येति** सर्वे जीवा व्युच्चरन्तीति विभागस्य । **अज्ञानेति** ज्ञानविरुद्धा संपदज्ञानम् 'अज्ञानं यदतोन्यथा' इति गीतायाः । तद्विशेषा अन्ये माया भिदा बुद्धिरन्तःकरणमविद्या देहाध्यासान्तःकरणाध्यासप्राणाध्यासेन्द्रियाध्यासस्वरूपविस्मरणानि । कर्म च मिथ्याज्ञानतृष्णापदैरज्ञानशक्तिरूपसत्त्वरजस्तमःपदैर्वाच्याः सत्त्वं ब्रह्मव्यतिरिक्तत्वेन ज्ञानजनकं रजो विक्षेपशक्तिः तम आवरणशक्तिः । मायिकसृष्टौ रजः कारणम् । विक्षेपशक्तिर्लिङ्गादि ब्रह्मान्तं जगत्सृजेदिति तत्त्वानुसंधाने तत्कृतत्वमित्यर्थः । **क्रिययेति** नैयायिकैर्विभागनिरूपणे प्रतिपादितविभागाङ्गीकारे । **अनित्यत्वेति** विका-

वति तु इदानीमेव तेषामनुभवः । ध्यानादावुपलब्धेः । पृथिवीशरावववदेव जीव-ब्रह्मविभागो न त्वज्ञानकृतः । तथाहि । अज्ञानं नाम चैतन्यान्तर्भूतं तच्छक्ति-रूपमनादि । उत बहिर्भूतम् । सांख्यवत् । न । बहिर्भूतं चेत् । सांख्यनिराकरणेनैव निराकृतम् । अन्तःस्थितायाः शक्तिरूपायाः स्वरूपाविरोधिन्या न स्वरूपविभेद-कत्वम् । आश्रयनाशप्रसङ्गात् । कल्पनायाश्चाप्रामाणिकत्वात् । बहिःस्थितस्यैव हि भेदकत्वम् । कुठारादिवत् । नापि वायुवत् । तच्छक्तित्वात् । किंच । कोऽयं ब्रह्मवादे

भाष्यप्रकाशः ।

पत्तेः । अतो घट्टकुटीप्रभातन्यायापातात् किं तन्मतदूषणप्रयासेनेत्यत आहुः । **पृथिवीत्यादि** । तथाच, बहु स्यामित्यादीच्छया कृत इति विभागवत्त्वस्यैवाविभागोऽपि पृथिवीशरावदृष्टान्तादेव सिद्ध्यतीति न दोष इत्यर्थः । ननु विभागस्याज्ञानकृतत्वेऽप्येतत्तुल्यमित्याकाङ्क्षायां तद् दूषयि-तुमज्ञानं विकल्पयन्ति **तथाहीत्यादि** । द्वितीयपक्षदूषणं स्फुटम् । प्रथमं दूषयन्ति **अन्तरि-त्यादि** । अयमर्थः । यदि सा स्वरूपाविरोधिनी तदा स्वरूपभूताञ्जीवान् न व्याप्नुयात् । अथ स्वरूपविरोधिनी तदा जीवानिव परमात्मानमपि व्याप्य जीवमिव तं कुर्यात् । तथा सति तस्या आश्रयनाशप्रसङ्गाद् ब्रह्मशक्तित्वमपि भज्येत । यदि च तस्यास्त्रिगुणात्मकत्वमुपगम्य शुद्धसत्त्वे-नेश्वरोपाधित्वं, मिश्रसत्त्वेन जीवोपाधित्वमित्येवं स्वरूपाविरोधविरोधाभ्यां विभेदकत्वं कल्प्येत तदा श्रुत्याद्यनुक्तत्वेन तस्याः कल्पनाया एवाप्रामाणिकत्वादसंगतमेव विभेदकत्वम् । यतो लोके शास्त्रे च बहिःस्थितस्यैव भेदकत्वं कुठारादिवत् । ननु 'नासिके निरभिद्येतां दोधूयति नभस्वति' इत्यत्रान्तःस्थस्यापि वायोर्भेदकत्वं दृष्टमिति चेत् तत्राहुः **नापीत्यादि** । तथाच वायो-रन्तःस्थत्वेऽपि ब्रह्माण्डशक्तित्वाभावादेतस्यास्तु ब्रह्मशक्तित्वाद् दृष्टान्तवैषम्येणायं पक्षोऽप्य-

रश्मिः ।

रित्वापातेनानित्यत्वं घटादिदृष्टान्तेन तस्यापत्तेः । **घट्टकुटीति** अयं न्यायोऽत्रैवाग्रे द्वितीयाध्यायोपान्ते ज्ञानप्रक्रियायामस्ति । यथा स्तेयकृतो घट्टकुट्या निर्गतस्य तत्रैव प्रभातं तथा जीवब्रह्मवादनिर्णयार्थं प्रवृत्तस्याज्ञानकृतजीवब्रह्मवाद एव पर्यवसितिः । न त्वैच्छिको जीवब्रह्मविभागः सर्वस्य ब्रह्मात्मकत्वेन विभागस्याज्ञानकृतत्वात् । **इत्यादीति** आदिपदेन 'प्रजायेय' इति पदम् । एकसंब-न्धिज्ञानस्यापरसंबन्धिस्मारकत्वेनाहुस्तथैवेति । 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतात्रयोदशाध्याये विभक्तप्रत्ययासाधारणं कारणं विभक्तत्वमिवाविभक्तप्रत्ययासाधारणं कारणम-विभक्तत्वं स्मृतम् । पृथिवीत्वेन पृथिवीशरावावविभक्ताविति प्रत्ययवत् भगवदिच्छया ब्रह्मजीवयो-र्ब्रह्मत्वेनाविभागः ब्रह्मजीवौ ब्रह्मत्वेनाविभक्ताविति प्रत्ययात् । एतदिति सर्वस्य ब्रह्मात्मकत्वम् । एवं तात्त्विकान्यथाभावे इवातात्त्विकान्यथाभावे ब्रह्मात्मकत्वं तुल्यमिति विवर्तेन विकल्प इत्यर्थः । **तथाहीति** इदमव्ययं निदर्शने । अत्र । **भाष्ये** । **अनादीति** यावदात्मभावीत्यर्थः । **निरा-कृतमिति** तुरीयपादे निराकृतं भविष्यति । तथानुख्यानाय **कल्पनाया** इतिभाष्यं विवरीतुमाहुः **यदि चेति** । **विरोधेति** ईश्वरत्वस्य जीवत्वस्य च सहानवस्थानलक्षणविरोधः । संसारित्वदशायां मुक्तत्वदशायां जीवत्वाभावादविरोधः । **कुठारादीत्यादिपदेन** शास्त्रीयबहिर्योगादिः पञ्चरात्राद्युक्तः । हृदयग्रन्थिभेदनः । शास्त्रेपि कुठारादिरेव वा । **भेदकत्वमिति** विराण्नासिकयोस्तद्वद्ब्रह्मजीवयोः । **ब्रह्मशक्तीति** तथा चाज्ञानं यदि ब्रह्म स्यात् तद्धर्मो भेदकत्वं वायौ स्यान्नत्वेवमतोऽज्ञानस्याभे-

प्रद्वेषो येन मिथ्यावादः परिकल्प्यते। अज्ञानादिति चेत्। पीतशङ्खप्रतिभानवद्युक्तं मतकरणम् । ब्रह्मविदुपासनया तु गमिष्यति। शर्कराभक्षणेनेव पीतप्रतीतिः।

सर्वज्ञेन हि वेदव्यासेन भाविमिथ्यावादनिराकरणेनेदमधिकरणमारब्धम् ।

भाष्यप्रकाशः ।

संगत इत्यर्थः। एवं जीवब्रह्मभेदस्याज्ञानिकत्वं दूषयितुमज्ञानं विकल्प्य दूषितम् । अतः परं तन्मतस्य प्रत्यक्षश्रुतिविरुद्धत्वाय दूषणान्तरमाहुः किंचेत्यादि । बहु स्यामिति प्रत्यक्षश्रुतिसिद्धे ब्रह्मवादे कोऽयं प्रद्वेषो येन प्रपञ्चमिथ्यावादः कल्प्यते। प्रत्यक्षादिना प्रपञ्चे ब्रह्मत्वाज्ञानादिति चेत् तर्हि पीतशङ्खेत्याद्युक्तरीत्या सत्सङ्गेन तादृशाज्ञाननिवृत्तौ तदादरस्यापि निवृत्तेरपार्थं मतकरणमित्यर्थः । ननु भवत्वेवं तथाप्येतस्य मतस्याधुनिकत्वादेतन्निराकरणायाधिकरणप्रणयनकथनं त्वयुक्तमेवेत्यत आहुः सर्वज्ञेनेत्यादि। निराकरणेनेति हेतौ तृतीया। 'प्रकृत्यादिभ्य उपसंख्यानम्' इति वार्तिकात् स्वरूपे वा। तथाच पुराणेषु भाविसूतोक्तिकथनवदत्र भाविमि-

रश्मिः ।

दकत्वेन दृष्टान्तेत्यादिः। **ब्रह्मवाद** इति ब्रह्म सर्वमिति वादो ब्रह्मवादस्तस्मिन्। तथा च गीता 'अहं सर्वस्य प्रभवः' इति अविद्योपादानकं सर्वं नास्ति अतो न मायावादः। उत्तराच्चेति सूत्रे स्फुटः। **अज्ञान**ादिति भाष्यं विवरामासुः **प्रत्यक्षादी**ति। इत्यादीति पीतः शङ्ख इति शङ्खशौक्ल्यप्रतिकूलस्य पीतस्यान्यस्य भावनं स्मरणं तद्वत्। सिद्धान्ते तु अन्यस्य बुद्धिरूपस्य भावनं व्यापनं तेन ख्यातिस्तस्येति ख्यातिवादे प्रपञ्चितान्यख्यातिः। **सत्सङ्गे**नेति प्रकाशसमाप्तावुपासनायां भक्तिसाहित्यकथनादुपासनाङ्गसत्सङ्गो गृह्यते। **भाष्ये** उपासनापदाच्चात्र सन्तः साधवः ब्रह्मसत्ताविदो वा 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति श्रुतेः तेषां सङ्गेन भवन्ति सुभगा लोकपावनीः कथास्तज्जोषणात् सनातने निश्चला भक्तिर्भवति तत्र यादृशी मर्यादाभक्तिर्भवति तादृशी पुनरुत्थानशून्याऽज्ञाननिवृत्तिः। अत्र पक्षे ब्रह्मवित्सहकृतोपासना ब्रह्मविदुपासना तयेति भाष्यार्थः। यद्वा सत्सङ्गेनेति ब्रह्मविदुपासनयेति भाष्यार्थः। **गमिष्यती**ति भाष्यस्य तादृशाज्ञानस्य शङ्खपीतत्वरूपानिर्वचनीयख्यातिरूपाज्ञानस्य निगमनं निवृत्तिं करिष्यतीत्यर्थः। तस्यां सत्यामन्येषां तदादरस्य कल्यतिरिक्तेषु युगेषु निवृत्तेरपार्थमित्यादिः 'कलौ तदादरो मुख्यः' इति निबन्धः। ब्रह्मविदुपासनाया भ्रमनिवृत्तिकारणत्वम्। शिक्षायां 'अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्याद्ये तत्र ब्राह्मणाः संमर्शिनः युक्ताः अयुक्ताः अलुक्षाः धर्मकामाः स्युः यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः' इति। वृत्तविचिकित्सा संशयस्तस्य भ्रमोपलक्षक इति। ननु ब्रह्मविदुपासनया न सर्वोत्तममार्गश्रवणमेकादशस्कन्धोक्तस्य न वा सांख्यस्येति कथं ब्रह्मविदुपासनयेत्यादि। मैवं। उपपादितस्य शास्त्रार्थत्वात्। न चान्योपपादितमपि शास्त्रार्थ इति वाच्यम्। अस्य परमार्थविदङ्गीकृतत्वात्। नन्वन्येपि परमार्थविद इति शङ्क्यम्। धर्मस्थाने नवमे उक्तम्। बृहस्पतेरेषां सत्त्वात्। मायावादमसच्छास्त्रमिति पुराणाच्च। **स्वरूप** इति गोत्रेण गार्ग्य इतिवदभेदे प्रातिपदिकार्थे वा। **भावी**ति भाविनी सूतस्योक्तिः यथाऽग्निपुराणे 'सूत त्वं पूजितोस्माभिः सारात्सारं वदस्व नः' इति शौनकोक्तः सूतः 'गीतासारं प्रवक्ष्यामि सर्वगीतोत्तरोत्तरम्। कृष्णो यमर्जुनायाह' इति प्रतिज्ञाय 'दैवी ह्येषा

तस्माज्जीवानामेवाज्ञानदर्शनाद् ब्रह्मणः सर्वज्ञत्वदर्शनाद् गतिशब्दौ ब्रह्मविषयावेव न जीवविषयौ। किंच, लिङ्गं च वर्तते। 'यथैवेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते' इति। न हि स्वाज्ञानं स्वस्य संभवति। हिताकरणप्रसक्तिश्च। नच ज्ञानेन सामर्थ्यमुद्बुद्धमिति वाच्यम्। विरोधित्वात्। न हि ज्ञाने जाते कर्तृत्वमस्तीति विप्लववादिनोऽङ्गीकुर्वन्ति।

विरुद्धा च कल्पना। अहं ब्रह्मास्मीति। अत एव सर्वभावश्रुतेः। तज्ज्ञानं

भाष्यप्रकाशः।

ध्यावादनिराकरणेन हेतुना वा तन्निराकरणरूपं वा इदमधिकरणमतस्तथा कथनं नायुक्तमित्यर्थः। सिद्धमाहुः तस्मादित्यादि। अत्र दर्शनद्वयं क्रमेण गतिशब्दयोस्तथात्वसाधकं ज्ञेयम्। एवं दृष्टं व्याकृत्य लिङ्गं व्याकुर्वन्ति किंच लिङ्गमित्यादि। गतिशब्दयोर्ब्रह्मपरत्वे लिङ्गमपि वर्तते इत्यर्थः। पूर्वं गतेर्लिङ्गं व्युत्पादयन्ति यथेत्यादि। अत्र हि वाक्यशेषे, तद्य इहात्मानमननुविद्य व्रजन्तीत्यात्माज्ञानं लोकक्षयहेतुत्वेनोच्यते। यद्यात्मा ब्रह्माभिन्नः स्यात् तदा अपहतपाप्मादिगुणकत्वात् स्वस्य स्वाज्ञानं न संभवति अत इदमज्ञानं जीवस्य ब्रह्मभिन्नत्वं बोधयद्गतेर्ब्रह्मविषयत्वे लिङ्गमित्यर्थः। किंच। यदि गन्तॄणां मनोरथादिकल्पितत्वं स्यात् तदा अज्ञानिवज्ज्ञानिनामपि तेषां मिथ्यात्वात् तेषु सर्वलोककामचाररूपहितस्याप्यकरणप्रसक्तिः। अत इदं हितकरणमपि गतेः सत्यजीवकर्तृकत्वं बोधयद्गतेर्जीवभिन्नब्रह्मविषयत्वे लिङ्गमित्यर्थः। नन्विदं हितकरणं न गतेर्जीवभिन्नब्रह्मविषयत्वे लिङ्गम्। ज्ञानेनाज्ञाननाशात् कल्पितरूपनिवृत्तौ सामर्थ्योद्बोधेन ब्रह्माभिन्नेऽपि तस्मिन् हितस्योपयोगादित्यत आहुः नचेत्यादि। विरोधित्वादिति अनुविद्य व्रजन्तीति श्रुत्युक्तव्रजनविरोधित्वात्। तदेव व्युत्पादयन्ति न हीत्यादि। तथाचैवं कल्पनस्यासंगतत्वाद्धितकरणस्य जीवभिन्नब्रह्मविषयकगतिलिङ्गत्वमक्षुण्णमित्यर्थः। एवं गतेर्लिङ्गं व्याख्याय शब्दस्य तथात्वे लिङ्गं व्युत्पादयन्ति विरुद्धेत्यादि। जीवस्य ब्रह्माभिन्नत्वकल्पनापि

रश्मिः।

गुणमयी' 'यस्यां जाग्रति भूतानि' इत्यादीनि कतिचित्पदान्येवोक्तवान्। इदं भाविसूतोक्तिकथनं तद्वत्। तथात्वेति भाविमिथ्यावादनिराकरणं प्रकारः। षष्ठ्या लुक्। तस्य तु अव्यये स्तः साधकं ज्ञेयमित्यर्थः। अपीति भाष्यस्थस्य लिङ्गं चेति चकारस्यार्थः। सौत्रचकारस्याग्रे व्याख्यानात्। लिङ्गं शब्दस्य सामर्थ्यम्। कः शब्दः किं तत्सामर्थ्यमित्याकाङ्क्षायामाहुः अत्रेति। अत्र यथैवेहेति श्रुतौ कर्मजितपदस्यात्माननुवेदनोत्तरकालिकमरणकर्तृकर्मजिते शक्तिः तस्या ग्राहकं वाक्यशेषम्।

'शक्तिग्रहं व्याकरणोपमानात् कोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः'॥

इति नैयायिकसिद्धान्तमुक्तावलीवाक्यादाहुः वाक्यशेष इति। तद्ये व्रजन्ति म्रियन्ते। अपहतेति आदिपदेन सत्यकामसत्यसंकल्पब्रह्मलोकत्वानि स्वस्य स्वाज्ञानाभावे हेतुत्वेनोक्तानि। अज्ञानमिति कर्मजितपदसामर्थ्यान्तर्गतमिति बोध्यम्। नन्वज्ञानं लिङ्गमित्यभेदानुपपत्तिरिति चेन्न। लिङ्गपदेनाज्ञानमात्रस्य ग्रहणात्। ब्रह्मवीति ब्रह्मणाश्रयताख्यसंबन्धेन विशेषेण सिनोति संबध्नातीति विषया तत्त्वे। हितेत्यादिभाष्यं विवरामासुः किंचेति। अकरणेति ज्ञानिसेवावत्। ब्रह्मविषयेति पूर्ववत्। सामर्थ्येति शारीरज्ञानेन शरीरभोगेषु सामर्थ्यस्य शक्तत्वस्य कर्मणोद्बोधोऽङ्गीकृतस्तेन। अक्षुण्णमिति क्षुध बुभुक्षायां क्तो नत्वम्। तथात्व इति। ब्रह्मविषयत्वे प्रकारे तु। लिङ्गमिति

च तस्य सार्वज्ञ्ये लिङ्गम् । तस्य हि स गुणो भगशब्दवाच्यानामन्यतरः । स चेज्जीवे समायाति तत्कृपया तस्यैवास्यापि माहात्म्यं भवति । तस्माल्लिङ्गादपि गतिशब्दौ ब्रह्मविषयौ । चकारात् 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति श्रुत्या ब्रह्मत्वेन ज्ञानं नात्मनो मोक्षाय । ब्रह्मण एव तु ज्ञान-

---

भाष्यप्रकाशः ।

श्रुतिविरुद्धा । बृहदारण्यके, 'तद्यो यो देवानां प्रत्यबुद्ध्यत तथर्षीणां तथा मनुष्याणाम्' इत्य-नेकजीवानुपक्रम्य, तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदꣳ सर्वं भवतीति ज्ञानान-न्तरमेव श्रुतेः । यदि हि जीवस्य ब्रह्माभेद एव स्यात् तदा ब्रह्मणः सर्वभावस्य पूर्वमुक्तत्वात् पुनस्तत्सजातीयेन ज्ञानेन पश्चाज्जीवानां सर्वभावं न वदेत् । प्रागुक्तेनैव चारितार्थ्यादिति । नच पाश्चात्याद् ब्रह्माऽहमिति ज्ञानात्तदभेदसिद्धिः । यतस्तज्ज्ञानं जीवस्य सर्वज्ञत्वे लिङ्गम् । यदि हि सर्वज्ञो न स्यात् स्वस्य ब्रह्मात्मत्वं नानुसंदध्यादिति । तच्च ज्ञानं भगवत एव गुणो भगशब्दवाच्यानामैश्वर्यादीनामन्यतम इति पाश्चात्यत्वाद् गम्यते । स च तत्कृपया जीवे समायाति । तदा भगवत इव जीवस्यापि माहात्म्यं भवति । यथा वामदेवादेः । एवं प्रकृतेऽपि सर्वलोककामचारसत्यसंकल्पादिरूपं माहात्म्यमपि भगवद्दत्तैश्वर्यरूपत्वाज्जीवभि-न्नब्रह्मज्ञाने लिङ्गम् । तस्मादप्यपहतपाप्मादिरूपः शब्दो जीवभिन्नब्रह्मपर इति । एवं साधयित्वा निगमयन्ति तस्मादित्यादि । सौत्रस्य चकारस्य प्रयोजनमाहुः चकारादित्यादि । ब्रह्मत्वेन

रश्मिः ।

वक्ष्यमाणबृहदारण्यकसामर्थ्यं तत्रापि यः प्रत्यबुद्ध्यत स इदं सर्वं भवतीत्यस्य सामर्थ्यम् । सर्वभाव-श्रुतिं दर्शयन्त एवात एवेति भाष्यार्थमाहुः बृहदिति । प्रत्यबुद्ध्यतेति । आत्मानं यथावद्बोधितवान् । तदिदमिति प्रकृतं ब्रह्म तदेतत्पदार्थः । एतस्मिन्नपि काले निवृत्तबाह्यौत्सुक्यो यः कश्चिदहं ब्रह्मास्मीत्येवं वदेदित्यर्थः। भवतीति सर्वभावस्य श्रुतेरित्यन्वयः। ज्ञानानन्तरमिति यः प्रत्यबुध्यतेति ज्ञानानन्तरम् । भाष्ये । त इति क्रमवाचकं पदम् । ज्ञानानन्तरमित्यत इति पदार्थः । पूर्वमिति 'ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्सर्वमभवत्' इति श्रुत्या पूर्वमुक्तत्वात् । तज्ज्ञानं चेति भाष्यमवतारयामासुः न चेति। भाष्ये। तज्ज्ञानमिति स्मार्तमप्रयुक्त्वा भगवदिच्छया मनोरमाकारकृतप्रयोगं स्वयमङ्गीचक्रुः इतीति । जीवचैतन्यमणु सर्वशरीरव्यापि गन्धवदिति भावः । तर्हि कस्य तज्ज्ञानमित्याकाङ्क्षायां तस्य हीति भाष्यं विवरामासुः अन्यतम इति। तेन भाष्ये भगशब्द-वाच्यानामन्यतम इत्यपि पाठ इति बोधितम् । न चान्यतर इत्यपप्रयोगः इति शङ्क्यम् । अस्य भाष्यीयत्वात् । अत एव महाभाष्येऽयं प्रयोगः भाष्यस्य निःश्वसितत्वेन पुराणादिवत्प्रामाण्यात् । तत्कृपेति । 'युक्तं भगैः स्वैरितरत्र चाध्रुवैः' 'तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात्' इति वाक्या-भ्याम् । इतीति लिङ्गं कारणं वा परतन्त्रशक्तिर्मृग्या । निगमेति नैयायिकानां तस्मात्तथेति निगमनवत् । एतत्प्रयोजनमबाधितत्वादिकं दीपिकायाम् । तथा च पूर्वभाष्योपपादितमबाधितमिति भावः । अबाधितं प्रकृतोचितं बोध्यम् । चेति । अहं ब्रह्मास्मीति मोक्षार्थिनां विरुद्धमिति समुच्चय-बोधकस्य चकारस्य समुच्चय एव प्रयोजनम् । भाष्ये । श्रुतौ ह्यतिमृत्युर्मोक्षोऽयनरूपश्च । प्रकृते ।

मात्मत्वेनापि। तस्माद्दहरः परमात्मा ॥ १५ ॥

भाष्यप्रकाशः।

ज्ञानं नात्मनो मोक्षायेति। आत्मनो ब्रह्मत्वेन ज्ञानं न मोक्षायेति योजना। अयमर्थस्तूक्तश्रुतिस्थात्तमेवेति तत्पदसंबद्धादेवकाराद् गम्यते एवं च, य एवं वेदाहं ब्रह्मास्मीति पुरुषविधब्राह्मणोक्तं ज्ञानं सर्वभावमात्रफलकत्वात् पूर्वकक्षैवेति। वस्तुतस्तु तत्रापि पूर्वं ब्रह्मणः सर्वरूपत्वज्ञानानन्तरमेवैवं ज्ञानमिति न विरोधः। एवमहंग्रहोपासनेऽपि बोध्यम्। सिद्धमाहुः तस्मादित्यादि। एवं दृष्टलिङ्गाभ्यामुपष्टब्धाद् गतिशब्दरूपाद्धेतुद्वयात् तथेत्यर्थः।

शंकराचार्यादयस्तु, गतेर्ब्रह्मपरत्वं, 'सता सौम्य तदा संपन्नो भवति' इति श्रुत्यन्तरे दृष्टम्। एतदेवाहरहर्ब्रह्मलोकगमनं दृष्टं ब्रह्मलोकपदस्य सामानाधिकरण्यवृत्तिपरिग्रहे लिङ्गमिति व्याचक्रुः।

रामानुजाचार्यास्तु, 'एवमेव खलु सौम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामहे' इति, सत आगम्य न विदुः सत आगच्छाम इति च गतेर्ब्रह्मपरत्वे दृष्टम्। एष ब्रह्मलोकसम्राडिति होवाचेति ब्रह्मलोकशब्दस्य ब्रह्मपरत्वे दृष्टं दहराकाशं प्रकृत्य सर्वेषां क्षेत्रज्ञानां प्रलयकाल इव सुषुप्तिकाले श्रूयमाणं गमनमवस्थानं तस्य दहरस्य ब्रह्मपरत्वे पर्याप्तं लिङ्गम्। तथा ब्रह्मलोकशब्दश्च समानाधिकरणवृत्त्याऽस्मिन् दहराकाशे प्रयुज्यमानोऽस्य ब्रह्मपरत्वे पर्याप्तं लिङ्गम्। निषादस्थपतिन्यायाच्च षष्ठीसमासात् समानाधिकरणसमासो न्याय्यः। अथवा, अहरहर्गच्छन्त्य इति न सुषुप्तिविषयम्। किंत्वन्तरात्मत्वेन वर्तमानस्य दहराकाशस्य परमपुरुषार्थभूतस्योपर्युपरि गच्छन्त्यः सर्वस्मिन् काले वर्तमानास्तमजानन्त्यस्तं न विन्दन्ति न लभन्ते यथा हिरण्यनिधिं

रश्मिः।

ब्रह्मत्वेनेति महत्प्रतीकं सुखबोधाय सर्वत्र। अत्र तु बालानां ग्रहणधारणाभाववतां सुखबोधाय। **आत्मन** इति जीवस्य। **भाष्ये**। **आत्मत्वेनेति**। अपिना ब्रह्मत्वेन तथा च ब्रह्मात्मत्वेन ब्रह्मत्वेनाश्रितत्वात् ब्रह्मणि जीवधर्मयोगात् जीवत्वेनापि ज्ञानं मोक्षं प्रयच्छति न तु जीवो ब्रह्मत्वेन ज्ञातः प्रयच्छत्युक्तश्रुतेः 'फलमत उपपत्तेः' इति तत्त्वसूत्रात्। गोपालतापिनीये सोहमित्यवधार्य गोपालोहमिति भावयेदित्युक्तमतो ब्रह्माहमस्मीति त्यक्त्वाऽहं ब्रह्मास्मीतिविरुद्धं कल्पनम्। **प्रकृते**। श्रुतिविरोधं परिजहुः **एवं चेति**। **सर्वेति** मात्रपदेन मोक्षसर्वज्ञानयोर्व्युदासः। **पूर्वकक्षेति** एकविज्ञानेन सर्वविज्ञानस्य पूर्वकक्षा। एकविज्ञानं तदपि नेति भावः। ननु तथाप्यहं ब्रह्मास्मीत्यभेदान्वयस्त्वक्षुण्णः कटकं सुवर्णमिति प्रत्ययवत्तत्राहुः **वस्त्वति**। **एवं ज्ञानमिति** अहं ब्रह्मास्मीति ज्ञानं तथा चात्राभेदान्वयेपि ब्रह्मणः सर्वरूपाद् भेदेन भेदः। एतच्च तज्ज्ञानं तस्य सार्वज्ञ्ये लिङ्गमिति भाष्यप्रकाश उक्तम्। सोहमित्याद्यहंग्रहोपासनेपि भेदं भगवद्दत्तज्ञाने त्वभेदमतिदिदिशुः एवमिति। ब्रह्म जीवभिन्नं बोध्यम्। तस्मादित्यस्य सूत्रोक्तहेतोरित्यर्थमाहुः एवमिति सूत्रे यतो दृष्टं यतो लिङ्गमित्येवं यच्छब्दार्थाध्याहारं कृत्वा पञ्चम्यन्तं दृष्टलिङ्गाभ्यामिति। उपष्टब्धयोर्गतिशब्दयोः तथाहीत्यस्यार्थयोः तथैव गतिशब्दौ भगवत्येव युक्तौ इति भाष्योक्तयोः सतोः परंपरोपष्टब्धादित्यर्थः। तथेति दहरः परमात्मत्वेन ज्ञेय इत्यर्थः। चकारार्थः पृथक्। **श्रुत्यन्तर** इति आन्यत्रिकश्रुतौ। **एतदेवेति** श्रुत्यन्तरोक्तं दृष्टमेवेति योजना। **ब्रह्मैव** लोको ब्रह्मलोकः इति कर्मधारयः। भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वं सामानाधिकरण्यं कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः। **निषादेति** पूर्वतन्त्रे षष्ठेस्ति निषादः स्थपतिः

भाष्यप्रकाशः ।

निहितं तदजानाना इति । एषा अजानतीनां प्रजानां सर्वदा गतिरस्य दहराकाशस्य ब्रह्मतां गमयति । परस्य ब्रह्मणोऽन्तरात्मतयाऽवस्थितस्य स्वस्मिन् वर्तमानाभिः प्रजाभिरवेदनमन्तर्यामिब्राह्मणे दृष्टम् । य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयतीत्येवं गतेर्ब्रह्मपरत्वे दृष्टं लिङ्गं च द्विधा व्याचकुः ।

मध्वाचार्यास्तु, उत्तरेभ्य इत्यस्य, 'एष आत्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इत्युत्तरप्रकरणस्थां श्रुतिं हेतुबोधकत्वेनोपन्यस्य, गतिशब्दसूत्रे दहरप्रकरणस्थयोर्गतिशब्दयोरग्रिमसूत्रस्थधृत्यादेश्च पृथग्घेतुत्वमाहुः । तत्र पूर्वप्रकरणस्थहेतूननादृत्य वादकवलितानां हेतूनां पूर्वं किमर्थमादरस्तैर्दहरस्य परमात्मत्वसिद्धौ च किमर्थं सूत्रान्तरप्रणयनं तेषां निर्विवादत्वे वा, इतरपरामर्शादिसूत्राणां किमर्थमारम्भ इति चिन्त्यम् ।

यदपि जयतीर्थः । 'यो वेद निहितं गुहायाम्' 'तस्यान्ते सुषिरं सूक्ष्मम्' 'हृद्येष आत्मा' इति श्रुतिभिर्ब्रह्माकाशजीवेषु साधारणस्य हृदयपद्मस्थत्वलिङ्गस्य भगवति समन्वयप्रतिपादनादस्ति शास्त्रादिसंगतिरित्याह । तत्रापि सूत्रकृता दहरपदोच्चारणाद्दहरत्वेन पक्षत्वं बोध्यते । न तु हृत्पद्मस्थत्वेनेति तस्य विचारविषयत्वमेव चिन्त्यम् । कथंचित् तद्विषयत्वापादनेऽपि तस्य जीवाकाशसाधारण्यस्यापरिहारादधिकरणवैयर्थ्यस्यापि प्रसक्तिरित्यवधेयम् ।

एवं रामानुजाचार्यमतमपि विषयवाक्यगतस्य दृष्टस्य लिङ्गस्य सिद्धान्तोक्तरीत्या प्राप्तस्याविचारेणान्यत्रिकस्य तस्य ग्रहणाच्चिन्त्यम् ।

एवं शांकरेऽपि बोध्यम् ।

किंच, 'परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः' इतिवद्, दहरो गतिशब्दधृतिमहिमप्रसिद्धिभ्य इत्येवं वक्तुं शक्यत्वेऽपि यदुत्तरेभ्य इत्युत्तरवाक्यगतत्वेनैवोल्लेखः सूत्रकृता कृतो न स्वेन रूपेणातो ज्ञायते एते हेतवः साध्यत्वेनैव सूत्रकारस्याभिमता इति । यदि हेतूनां सिद्धत्वं स्यात् तदा स्वेनैव शब्देन वदेत् । गत्यादिसूत्राणि च न प्रणयेत् । अतस्तेषां स्वतन्त्रतया व्याख्यानमपि चिन्त्यम् ॥ १५ ॥

रश्मिः ।

निषादस्य स्थपतिः । **गमयती**ति तथा चेदं गतेर्लिङ्गान्तरमित्यर्थः । **उत्तरे**ति प्रकरणद्वयं पूर्वपक्ष उक्तं प्रजापतिप्रकरणस्था । **पृथगि**ति । पृथगग्रे हेतुत्वम् । वाग्घरिरितिवत् । **शास्त्रादी**ति आदिपदेन न्यायशास्त्रम् । **पक्षत्वमि**ति दहरः परमात्मा उत्तरेभ्य इत्यत्र । पदभेदेप्यर्थैक्याददोषं मन्वानं प्रत्याहुः **कथंचि**दिति । **बोध्यमि**ति । आन्यत्रिकदृष्टादरणरूपं दूषणं बोध्यम् । **स्वतन्त्रे**ति उत्तरेभ्य इत्यस्य नैरपेक्ष्येण फलानुकूलव्यापारवत्त्वम् । प्रधानीभूतधात्वर्थं प्रति आश्रयत्वरूपस्वातन्त्र्यस्य मनोरमोक्तस्यात्राभावात् । भास्कराचार्यभाष्येपि । एवमेवेमाः प्रजा इति श्रुतिर्गतिनिरूपणे । ब्रह्मलोकशब्दश्च कर्मधारयवृत्त्या । दृष्टं सता सोम्य इत्यादि एतत्प्रयुक्तम् ॥ १५ ॥

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥

अपरं हेतुमाह। धृतेः। 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय' इति,। न हि सर्वलोकविधारकत्वं ब्रह्मणोऽन्यस्य संभवति। चकारात् सेतुत्वमपि। तदन्वेष्टव्यं तद्विजिज्ञासितव्यमिति लोकविधारणस्य माहात्म्यरूपत्वात् तस्यैव कर्मत्वमित्याह। महिम्न इति। महिमैष पुरुषस्य, न तु वासनारूपेण तस्मिन् विद्यमानत्वम्। संसारिधर्मत्वेनामाहात्म्यरूपत्वात्। नच विरुद्धमुभयत्रैकस्य दर्शनमिति वाच्यम्। अस्याऽस्मिन्नुपलब्धेः। अस्य एतादृशविरुद्धधर्माश्रयमाहात्म्यस्यास्मिन् भगवत्येवोपलब्धेः। ज्यायानाकाशाद्, यावान् वा अयमाकाशः, अणुः स्थूल इति। यशोदादयश्च बहिःस्थितमपि जगदन्तः प्रपश्यन्ति। न त्वेतादृशो जीवो भवितुमर्हति। तस्माद् ब्रह्मैव दहरः ॥ १६ ॥

भाष्यप्रकाशः।

धृतेश्च महिम्नोऽस्याऽस्मिन्नुपलब्धेः ॥ १६ ॥ सूत्रमवतारयति। अपरमिति। उत्तरेभ्य इत्यनेन हेतुबाहुल्यस्य प्रतिज्ञातत्वात् तत्पूरणार्थमन्यं हेतुमाहेत्यर्थः। विषयवाक्ये विधृतिशब्दः, क्तिचूक्तौ च संज्ञायामित्येतद्विहितकर्त्रर्थकक्तिजन्तः। तथाच विधारक इत्यर्थः। तदत्र विधारकत्वं सूत्रे धृतिपदेनोच्यत इत्याशयेन हेतुं व्याकुर्वन्ति न हीत्यादि। सेतुत्वमिति स्वयं साधनीभूय निःसाधनपारप्रापकत्वम्। श्रुतौ त्वसंभेदपदमसांकर्यबोधकम्। अग्रिमं व्याकुर्वन्ति तदित्यादि। उक्तश्रुतिनिरूपितमन्वेषणादिकर्मत्वम्। तस्य विधारणस्येत्याशयेन हेत्वन्तरमाहेत्यर्थः। महिमेत्यादि पुरुषसूक्ते, एतावानस्येति मन्त्रे महिम्नो ब्रह्मज्यायस्त्वगमकत्वं श्रुत्यैवोक्तमतोऽस्मान्महिम्नोऽपि तथेत्यर्थः। एवंच लोकधारणस्य स्वेन रूपेण महिमत्वेन रूपेण चेति द्वेधा हेतुत्वमित्याशयः। लोकविधारणस्य कथं महिमरूपतेत्यतस्तद् व्युत्पादयन्ति नचेत्यादि। एकस्य द्यावापृथिव्यादेरुभयत्र अन्तर्बहिश्च दर्शनं विरुद्धमिति न वाच्यमित्यर्थः। ज्यायानित्यत्राकाशादाधिक्यस्य, यावानित्यत्र तत्तौल्यस्य, अणोरणीयान् महतो महीयानित्यत्राणुः स्थूल इति प्रत्यक्षश्रुतौ, श्रीयशोदादिभिश्चैकस्यैव प्रपञ्चस्य बहिश्च मुखान्तश्चोपलब्धेर्विरु-

रश्मिः।

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥ स्वयमिति पुष्टिर्व्याकृता। सेतुः पङ्क्तिस्तदा साधनपङ्क्तिः पौष्टिकानाम्। भाष्ये। अन्वेष्टव्यमित्यादौ कर्मणि तव्यः। माहात्म्यं देवत्वं तस्मात्। तस्य लोकविधारणस्यैव कर्मत्वमन्वेषणकर्मत्वं लोकविधारणादिमाहात्म्यमन्वेष्टव्यमिति। प्रकृते। अन्वेषणेति अयं कर्मत्वमिति भाष्यार्थः। एतावानिति 'एतावानस्य महिमाऽतो ज्यायाँश्च पुरुषः' इति श्रुतिः। ननु ह्युक्तश्रुतौ महिमपदाभावात् कथं हेतुत्ववर्णनमित्याकाङ्क्षायां भाष्याशयमाहुः एवं चेति। स्वेनेति लोकधारणत्वेन। अन्तरिति 'तस्मिन् यदन्तस्तदन्वेष्टव्यम्' इत्यन्तः। 'उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' इति वान्तः। यशोदेतिभाष्यं विवरामासुः श्रीयशोदेति। धृतेश्च दहरः परोऽस्य धृतिरूपस्य नियमनस्य च महिम्नोऽस्मिन् ब्रह्मण्युपलब्धेः।

प्रसिद्धेश्च ॥ १७ ॥

आकाशशब्दवाच्यत्वप्रसिद्धिः । अपहतपाप्मत्वादिप्रसिद्धिः । किं बहुना प्रकरणोक्तसर्वधर्मप्रसिद्धिर्भगवत्येव, न जीवे संभवत्यतोऽपि भगवानेव दहरः । चकाराद्विधिमुखेनाधिकरणसमाप्तिः सूचिता ॥ १७ ॥

भाष्यप्रकाशः ।

द्धधर्माधारत्वस्य स्फुटत्वान्महिमरूपत्वमित्यर्थः । नच तन्मायया प्रदर्शितमिति वाच्यम् ।

'किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः ।
अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ।
अथो यथावन्न वितर्कगोचरं चेतोमनःप्राणवचोभिरञ्जसा ।
यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणताऽस्मि तत्पदम् ।'

इति मायादिपक्षनिराकरणपूर्वकं भगवद्योगदर्शनकारणतास्थापनादिति । तदेतन्निगमयन्ति न त्वित्यादि ॥ १६ ॥

प्रसिद्धेश्च ॥ १७ ॥ प्रकरणोक्तसर्वधर्मप्रसिद्धिरिति 'अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके' इत्यादिनोक्ता । ऐरसरःसोमसवनाश्वत्थाऽपराजिताख्यब्रह्मपुरप्रभृतिसर्वधर्मप्रसिद्धिः । एतदुपबृंहणं च 'अरनामाऽमृताम्भोधिर्ण्यनामाऽमृतसागरः' इति वाराहे चातुर्मास्यमाहात्म्ये । तदुभयान्तःस्थश्रीभागाख्यनित्यभगवल्लोकप्रसिद्धिः । पुराणान्तरेऽन्येषां च धर्माणां भगवदीयत्वप्रसिद्धिश्चेति ज्ञेयम् ॥ १७ ॥

रश्मिः ।

श्रुत्यन्तर इति रत्नप्रभोक्तो नार्थ उत्तरेभ्यः इति सत्त्वांशेनोत्तरेषां हेतूनां बहुत्वोक्तेः महिम्न इति पञ्चम्यन्तमिति ज्ञापनात् ॥ १६ ॥

प्रसिद्धेश्च ॥१७॥ आकाशवाच्यत्वापहतपाप्मत्वाद्यतिरिक्तधर्माणामस्मिन् प्रकरणे आधेयतयाभावात्केषांचिदप्रसिद्धत्वात्प्राकरणिकमभिव्यापकाधारं पुराणान्तरप्रसिद्धिं चापेक्ष्य धर्मरूपमित्याहुः अरेति श्रुतिरत्र 'अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरम्मदीय९सरस्तदश्वत्थः सोमसवनः तदपराजिता पूर्ब्रह्मणः प्रभुविमित९हिरण्मयम्' इति । इतो भूलोकात्तृतीयस्यां ऐरं इरा अन्नं तन्मयमैरो मण्डस्तेन पूर्णमैरंमदीयं सरः त दधिकारिणां हर्षोत्पादकं सोममममृतं विमितं निर्मितम् । अन्येषामिति द्वितीये प्रजापतिप्रकरणे 'य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः' इति श्रुत्युक्तानां विजरत्वादीनां श्रीभागवते 'कृष्णस्तु भगवान् स्वयम्' इतिभगवदीयत्वप्रसिद्धिः । पाद्मे ।

'क्व व्रणादि क्व चाज्ञानमचिन्त्यानन्तसद्गुणे ।
दुर्लभत्वाच्च मोक्षस्य दर्शयेत्तानजो हरिः' ॥ इत्येवम् ।

अन्यनिषेधमुखेन पुनर्विचारयति ॥

इतरपरामर्शात् स इति चेन्नासंभवात् ॥ १८ ॥

ननु ब्रह्मैताहृशं जीवो नैताहृश इति न क्वचित् सिद्धमस्ति। श्रुत्येकसमधिगम्यत्वादुभयस्वरूपस्य ब्रह्मवादे। अतो यथा सर्वत्र ब्रह्मणोऽसाधारणधर्मदर्शनात् तत्तत्प्रकरणं ब्रह्मण इति निश्चीयते। एवमिहापि जीवस्यासाधारणधर्मदर्शनाज्जीवप्रकरणमिति कुतो न निश्चीयते । निश्चिते तु तस्मिन्नाकाशतुल्यत्वादयो धर्मा जीवस्यैव भविष्यन्ति नान्यस्येत्यभिप्रायेणाह इतरपरामर्शात् सः । इतरो जीवस्तस्य परामर्शः। उपक्रमोपसंहारमध्यपरामर्शैः संदिग्धे निर्णयः । तत्रात्मविदः सर्वान् कामानुक्त्वा मध्ये, 'अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाचैतदमृतमभयम्' इत्यादि मध्ये। अग्रे, अथ 'य आत्मा स सेतुः' इति।

भाष्यप्रकाशः।

इतरपरामर्शात् स इति चेन्नासंभवात् ॥ १८ ॥ अत्र चतुःसूत्र्या भूताऽऽकाशवारणं, ततोऽग्रिमचतुःसूत्र्या जीववारणमिति रामानुजाचार्या मेनिरे । प्रकृते त्वादित एव जीवब्रह्मवादो निवारित इत्यस्याश्चतुःसूत्र्याः किं प्रयोजनमत आहुः अन्यनिषेधेत्यादि । तथाच तत्र दहरस्य जीवव्यतिरिक्तपरमात्मत्वं स्थापितम् । अत्र त्वितरस्य दहरत्वं दूषयतीति नानर्थक्यमित्यर्थः । आशङ्कांशमवतारयन्ति नन्वित्यादि । जीवासाधारणधर्माणां प्रदर्शनार्थं परामर्शमुदाहरन्ति तत्रात्मविद इत्यादि । अभयमित्यादीति उक्त्वेति शेषः । सेतुरिति। वक्तीति शेषः । उपक्रमे, स यदीत्यादिकथनेन स्फुटत्वान्मध्यस्य जीवपरत्वं व्याकुर्वन्ति

रश्मिः।

भगवदीयत्वं जरादीनां मायिकत्वेनोक्तेस्तत्र ।

भाष्ये सूचितेति नात्र वाचकता संभवति प्रसिद्धिपदेन प्रकरणोक्तयावद्धर्मसिद्ध्या ब्रह्मण्यधिकरणप्रतिपादकचरमवर्णस्यर्द्धेर्ध्वंसस्तिरोभावस्तद्रूपसमाप्तर्द्धिवर्णाधीनत्वेनर्द्धिवर्णेनैव गणनात् चरमवर्णध्वंसः समाप्तिः तथा च भारतम् ।

'यदधीना यस्य सत्ता तत्तदित्येव भण्यते ।
विद्यमाने विभेदेपि मिथो नित्यं स्वरूपतः' ॥ इति ।

तथा च द्योतितेत्यर्थः । द्योतकश्चकारः । द्योतकत्वं तात्पर्यग्राहकत्वम् ॥ १७ ॥

इतरपरामर्शात् स इति चेन्नासंभवात् ॥ १८ ॥ अत्रेति दहराधिकरणेऽष्टसूत्रे । भूताकाशेति स्पष्टम् । परामर्शमिति उपस्थापनम् । अवस्थावन्तं जीवं शक्नोति उपस्थापयितुमिति य एष संप्रसाद इति वाक्यशेषीयपरामर्शमुक्त्वा भाष्यात् । उपक्रम इति अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामाँस्तेषां सर्वेषु लोकेषु कामचारो भवतीति भाष्योक्ता आत्मविदः सर्वकामोक्तिः । एतस्याः सर्वकामोक्तेः प्रपञ्चः स यदीत्यादि तत्कथनेनैवं स्फुटत्वादित्यर्थः । 'स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' इत्यादिश्रुतिः, समुत्तिष्ठन्ति आत्मसंबन्धित्वमापद्यन्ते । तत्रेत्यादीति संप्रसीदत्यस्यां चित्तमिति विग्रहे छान्दसं पुंस्त्वम् । अयमर्थ उदाहृतवाक्ये जीवस्तादृशो न वेति संशये पूर्वपक्षीयस्तथापि मुक्तजीवपरत्वे त्वविरुद्ध इति किंचिदुच्यते। ननु शंकरभाष्ये

तत्र संप्रसादः सुषुप्तिः जीवावस्था । तत्र परसंबन्धनिमित्तेन स्वेनैव रूपेणाभिनिष्पत्तिवचनाज्जीव एवैतादृश इति गम्यते । न ह्यत्र परमात्मनोऽयं धर्मः संभवति । अतः सर्वमेव प्रकरणं जीवपरं भविष्यतीति स एव जीव एव प्रकरणार्थ इति चेत् । न । जीवस्तादृशो न भवति । विरुद्धधर्मत्वेनैव सर्वत्र तन्निश्चयात् । उभयोरेकरूपत्वे ह्युभयत्वमेव न स्यात् । ऋतं पिबन्तावित्यादिवाक्यविरोधश्च । अतो न जीवस्तादृश इत्यभिप्रायेणाह असंभवात् । न हि जीवे

भाष्यप्रकाशः ।

तत्रेत्यादि । अत्र मध्ये 'तद्यथापि हिरण्यनिधिम्' इत्यनात्मविदो ब्रह्मसमीपगमनेऽपि ब्रह्माप्राप्तिं प्रतिपाद्य आत्मनो हृदि स्थितिं यत् प्रतिपादयति तद् ब्रह्मविदः प्रशंसार्थम् । ततः 'अथ य एष संप्रसादः' इत्यादिना तस्यैवात्मनो मध्ये ब्रह्मत्वं प्रतिपाद्याग्रे समाप्तौ, अथ य इत्यादिना सेतुत्वमात्मनो वक्ति । तत्र मध्ये उक्तस्य संप्रसादस्य जीवावस्थाविशेषत्वं बृहदारण्यके, अस्मिन् संप्रसादे रत्वा चरित्वेत्यत्र सिद्धम् । अत्र च तस्यामवस्थायां परसंबन्धेनास्य स्वरूपाभिनिष्पत्तिवचनं जीवाऽसाधारणं लिङ्गम् । तेनोपक्रमगतमात्मवेत्तृत्वमपि स्ववेत्तृत्वरूपं जीवस्यैव धर्म इति गम्यते । अज्ञानस्य जीवधर्मत्वं तु स्फुटमेव । मध्यवर्तित्वं च सेतुत्वम् । तेन तथात्वं तस्यापि । तथा चात्र प्राप्यत्वादिना ब्रह्मणः प्रतिपादनेऽपि, न तस्य प्रकरणित्वमतो जीव एव प्रकरणार्थ इत्यर्थः । एवमितरपरामर्शं व्याख्याय तस्यासाधकत्वं स्फुटीकुर्वन्ति नेत्यादि । तादृश इति प्रकरणार्थः । तन्निश्चयादिति जीवत्वनिश्चयात् । तथाच स्याज्जीवः प्रकरणी यदि ब्रह्मविरुद्धधर्मत्वं जीवस्य सर्वत्र नोच्येत । उच्यते तु तदतो नात्र जीवः शक्यवचन इत्यर्थः । ननु पूर्वमुक्तं यज्जीवान्नातिरिक्तं ब्रह्मेति, विरुद्धधर्माणां त्वध्यास इति । अतस्तदङ्गीकारे को दोष इत्यत आहुः उभयोरित्यादि । असंभवं व्याकुर्वते न हि जीव इत्यादि । हृदयान्तर्वर्तिनि

रश्मिः ।

सुषुप्त्यवस्थावान् जीवो व्याकृतः । उपनिषट्टीकायां संप्रसादो विद्वान् जीवो व्याकृत इति कुतश्छान्दसं पुंस्त्वं स्वीकृत्य सुषुप्तिर्व्याकृतेति चेन्न आद्ये लक्षणाप्रसङ्गात् द्वितीये स वा एष संप्रसादे रत्वा चरित्वेति श्रुतिविरोधात् छान्दसे प्रयोगे छान्दसपुंस्त्वस्यादोषात् । तथा च य एष जीवः संप्रसादे 'सुपां सुः' सुषुप्तावाविर्भूतस्वरूपो हि स्वेन रूपेणाभिनिष्पद्यते इत्यर्थः । श्रुतिसूत्रयोरेककोटित्वात् । **आत्मन** इति 'स वा एष आत्मा हृदि' इति श्रुत्याम् । **ब्रह्मे**ति स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमिति तस्मात् हृदयमहरहर्वा एवंवित् स्वर्गलोकमेतीति श्रुत्याम् । नामादाविव हृदयाकाशे ब्रह्मदृष्ट्यारोपमात्रमिति शङ्कां वारयति **स वा** इति । स प्रसिद्ध आत्मा आकाशशब्दवाच्यः । **हृदय**मिति वर्णलोपः । स्वर्गमात्मसुखं हार्दं ब्रह्म एति 'अथ य एष' इति श्रुतिर्व्याख्याता । रत्वा रमु क्रीडायाम् । आनन्दभुगिति श्रुतेः । चरित्वा श्रुतिप्रामाण्यात् । चर गतिभक्षणयोः । **तत्र** परेति भाष्यं विवरामासुः **अत्र** चेति । **तस्या**मिति **तत्रे**ति भाष्यार्थः संप्रसादे । अज्ञानस्य ख्यातेः 'आदेहान्तात् क्वचित् ख्यातिः'इत्येकादशाष्टादशाध्यायवाक्यात् । **मध्ये**ति हृदयस्येति ज्ञेयम् । समुद्रादिमध्यवर्तित्वसाम्यात् । **तथात्व**मिति जीवधर्मत्वम् । **तस्य** ब्रह्मणः । **न ही**ति । **अय**मिति संप्रसादश्रुत्युक्तः । **स्वेन** रूपेणाभिनिष्पन्दनरूपो धर्मः । **तादृश** इति जीवः केवलो विशेषणाभावात् । **भाष्ये** । तेन परामर्शस्यासाधकत्वं मुक्तसाधकत्वेपि । **पूर्व**मिति विधिमुखाधिकरणपूर्वपक्षे निषेधमुखविचारेपि दोषोद्घाटनस्यावश्यकत्वात् । **आहु**रिति दोषमाहुः । गतिशब्दयोर्विधिमुखेनाधिकरणेऽभिधावृत्तेरुक्तत्वात्

जगदाधारत्वादिकं संभवति। न हि परामर्शमात्रेण सर्ववेदान्तविरुद्धं कल्पयितुं शक्यते। परामर्शस्यान्यार्थत्वमुत्तरत्र वक्ष्यति। तस्माद् दहरो जीवो न भवितुमर्हति। वाक्यार्थो यथोपपद्यते तथोत्तरत्र वक्ष्यते। ब्रह्म त्वेकमेव नोभयमिति निश्चयः॥ १८॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु॥ १९॥

उत्तरात् प्रकरणात् प्राजापत्यात्। तत्र हि दिव्ये चक्षुषि मनोरूपे प्रती-

---

भाष्यप्रकाशः।

जीवे अखिलजगदाधारत्वस्यासंभवादित्यर्थः। गतिशब्दयोरुपपादनसापेक्षत्वात्तदुभयमत्र नोक्तम्। तर्हि परामर्शस्य का गतिरित्यत आहुः **न हि परामर्शेत्यादि**। **नोभयमिति** नावस्थाभेदभिन्नम्। स्फुटमन्यत्॥ १८॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु॥ १९॥ तस्य प्रकरणस्य जीवपरत्वं व्युत्पादयति **तत्रेत्यादि**। **दिव्ये चक्षुषि मनोरूपे** इति मनोऽस्य दैवं चक्षुरिति प्रजापतिना वक्ष्य-

रश्मिः।

न निषेधमुखेनाधिकरणविचारे प्राप्तिस्तथापि लक्षणातात्पर्याभ्यां जीवान्नातिरिक्तं ब्रह्मेत्यादिपक्षस्येव गतिशब्दयोः प्राप्तिरत आहुः **गतिशब्दयोरिति**। **तर्हीति**। यद्ययमाभासस्तावदादिपदेन संगृहीतस्य परामर्शस्येत्यादिभाष्यस्य प्रतीतिस्तदा नहीत्यादिभाष्यस्य। ननु बुद्ध्याद्युपाधिपरिच्छिन्नस्य न जगदाधारत्वादिकं संभवति वस्तुगत्या तु ब्रह्मैव जीव इति कुतो जीवे जगदाधारत्वादेरसंभव इत्यत आहुः **नहीत्यादि**। **सर्ववेदान्तविरुद्धमिति** बुद्ध्यादिपरिच्छेदकल्पनम्। **भाष्ये**। **उत्तरत्रेति** 'अन्यार्थश्च परामर्शः' इति सूत्रे स्वस्यैवं ज्ञाने हि ब्रह्मसुखं फलं ब्रह्मज्ञानापेक्षायामुपयुज्येतेति। **उत्तरत्रेति** सूत्रे। सुषुप्तावस्थायां भगवदाविर्भावात् तथावचनमिति। **प्रकृते**। **नावेति** न उभौ अवयवौ यस्येत्युभयं नावस्थाभेदेन भिन्नमिति यावत्॥ १८॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु॥ १९॥ **तस्येति** 'य आत्माऽपहतपाप्मा' इत्यादिकस्य। **जीवेति**। ननु त्रिसूत्रमिदमधिकरणं वैयासिकन्यायमालायामङ्गीकृतं तत्कुतो नाङ्गीक्रियते इति चेन्न शंकरभाष्ये दहरशेषत्वेऽप्यधिकरणत्वाविरोधो यद्यपि तथापि विषयवाक्यमात्रभेदेऽधिकरणभेदाननुसंधानात् संशयादिभेदेऽनुसंधानात् संशयपूर्वपक्षसिद्धान्ताभेदेनाधिकरणान्तरत्वसंदेहात्। न चांशीशादिभेदः यथाह वैयासकिन्यायमालायां भारतीतीर्थः प्रजापतिविद्यायां य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचेति विषयवाक्यं तत्र जीवो वा ब्रह्म वेति संशयेऽवस्थात्रयोपन्यासाज्जीव इति पूर्वपक्षे य आत्मा अपहतपाप्मा विजरो विमृत्युरिति परमात्मानमुपक्रम्य स उत्तमः पुरुष इत्यन्ते परमात्मन एवोपसंहारात्। न चैवं जागरणाद्युपन्यासवैयर्थ्यमिति वाच्यम्। शाखाचन्द्रन्यायेन परमात्मबोधोपयुक्तत्वात्तस्मादीश्वरोऽक्षिपुरुष इति वाच्यम्। 'अन्तर उपपत्तेः' इत्यधिकरणेनैव गतार्थत्वात्। तत्र छान्दोग्योपकोसलविद्यास्थं 'य एषोऽक्षिणि पुरुषो दृश्यते' इति विषयवाक्यम्। प्रतिबिम्बो वा ब्रह्म वेति संशये प्रतिबिम्बमिति पूर्वपक्षे ब्रह्मेति सिद्धान्तः 'अनवस्थितेरसंभवाच्च नेतरः' इति सूत्रे जीवो निवारितः इति वेदान्ताधिकरणमालायां श्रीपुरुषोत्तमाः। अतो जीवपरत्वं व्युत्पादयतीत्यर्थः। अस्यार्थस्य दृष्यत्वाद्व्युत्पादितः शङ्काग्रन्थः। **मनोऽस्येति** आत्मनो मनो दैवं दिव्यं चक्षुः

यमानो जीव एवाऽमृताऽभयरूपो निरूपितः। तस्यैवोदशरावे जाग्रत्साक्षित्वं, तदनु स्वप्नसाक्षित्वं, तदनु सुषुप्तिसाक्षित्वं निरूप्य सर्वत्र तस्याऽमृतरूपत्वमेव निरूप्यावस्थानामतात्त्विकत्वमुक्त्वा समाध्यवस्थायां मनसि तमेव जीवं तादृशं

भाष्यप्रकाशः।

भाणत्वाद्, 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्यत्रोपदिश्यमाने तस्मिन्। नन्वग्रे, योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इति प्रश्ने, एष उ एवैषु सर्वेष्वन्तरेषु परिख्यायत इति प्रत्युत्तरात् प्रतिबिम्बपुरुष एवात्र प्रतीयत इति कथमस्य मनसि प्रतीयमानजीवरूपत्वमित्यत आह तस्येत्यादि। यदि हि प्रतिबिम्बात्मैवात्रोपदेश्यः स्यात् तदा, उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमित्यनेन यत्संबन्धिप्रतिबिम्बे अज्ञातं तस्यात्मत्वं बोधितम्। ततस्ताभ्यामुदशरावेऽवेक्षणेन शरीरस्यात्मत्वे स्वज्ञानविषये बोधिते ततोऽपि निवार्य जाग्रत्साक्षिणं मनस्यहंवित्त्या प्रतीयमानं बोधयितुं साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथामित्यादिना, एष आत्मेति वाक्येन द्रष्टात्मा बोधितः। ततस्तावता तदज्ञाने देहा-

रश्मिः।

देशान्तरव्यवहितवस्तुज्ञानहेतुत्वात्। **तस्मिन्निति** दिव्ये चक्षुषि। **प्रतीयमान** इत्यादिभाष्यस्थमन्वेति **एष उ एवेति** प्रतिबिम्बपुरुषः। **अन्तेष्विति** मध्येषु। **तस्येत्यादीति** जीवस्य। **उदेति** उदकसंबन्धिशरावे आत्मानमवेक्ष्य यत्तत्रात्मानं पश्यन्तौ युवां इन्द्रविरोचनौ आत्मा देहस्तत्संबन्धि जीवादि न विजानीथस्तन्मे प्रब्रूतमित्यर्थः। **यत्समिति** आत्मोपनिषदि आत्मपदस्य देहादित्रिषु शक्तिः तत्र यद्देहरूपात्मसंबन्धिवस्तु देहप्रतिबिम्बेऽज्ञातम्। प्रतिबिम्ब अज्ञातमिति स्मार्तः प्रयोगः। **तस्येति** जीवरूपस्य तन्मे प्रब्रूतमित्यनेन बोधितम्। अग्रेतनसंदर्भे जीवनिरूपणात्। **बोधितेति** तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव आलोमभ्यः आनखेभ्यः प्रतिरूपमित्यनया। **बोधेति** यथा साध्वलंकारादिपिहितात्मावेक्षणेन देहेऽज्ञातस्तथा देहप्रतिबिम्बेऽज्ञातो जीवः आत्मेत्येवं बोधयितुम्। **इत्यादिनेति** इति तौ साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वा उदशरावे अवेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुर्यथैवेदमावां भगवः साध्वलंकृतौ सुवसनौ परिष्कृतावित्येष आत्मेति होवाचेति श्रुतिसंग्रहः। स्पष्टम्। **द्रष्टेति** जीवप्रसङ्गान्मायिकं द्रष्टृत्वं विवक्षितम्। यद्वाविर्भूतः स्वरूपो वक्ष्यत इति 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति श्रुतेः। 'भुङ्क्ते गुणान् षोडश षोडशात्मकः' इति श्रीभागवताच्च द्रष्टात्मा तत्तदिन्द्रियरूपं स्वयं ताभ्यां युक्तमात्मा भोक्ता। यथा विषयेन्द्रियमनोभिर्युक्तमुन्नेयम्। आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेन ततः प्रत्यक्षमिति नैयायिकप्रक्रियास्थले वेदान्तिनामिव मतत इति। द्रष्टात्मना बोधनादनुमानादिना तस्य देहलिङ्गविलक्षणस्य शुद्धात्मनोऽज्ञाने तावतेति वाक्यालंकारे। आकृतिगणत्वात् मनोरमायामदर्शनात् यावत्तावट्टाब् वा भागुरिमते तदा यावत्तावदेतौ साकल्यावधिमानावधारणार्थौ इतीमावपि तदर्थकौ 'यावता च परिच्छेदे' इति विश्वः। **देहात्मेति** उभयदेहात्मेत्यर्थः। तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्त्यनेन पराभवं तस्मादद्यापीहाददानमश्रद्दधानमयजमानमाहुरासुरो बतेत्यनेनासुरत्वं च। श्रुत्यर्थस्तु एवमपि देहमेवात्मानं मत्वा गच्छन्तौ ज्ञात्वा तयोरनिष्टशङ्कया श्रावयन् प्रजापतिरुवाचानुपलभ्य शास्त्राचार्याभ्यामज्ञात्वाऽननुविद्य स्वप्रत्यक्षगोचरं चाकृत्वात्मानं विपरीतज्ञानौ व्रजतोतो यतरे ये

भाष्यप्रकाशः ।

त्मज्ञानवतां पराभवं तेषामसुरत्वं चोक्त्वा तत इन्द्रस्य पुनः प्रत्यागमने तं प्रति जीवस्यैव स्वप्नसाक्षित्वं पुनः सुषुप्तिसाक्षित्वादिकं प्रतिपादयति । अतोऽत्र जीव एवोपदेष्टव्यो न प्रतिबिम्बो

रश्मिः ।

केचनैतदुपनिषदो देहात्मशाब्दज्ञानवन्त इति यावत् । तथा तस्मात् देहात्मज्ञानवत्त्वात् । अददानं अदानशीलं यजमानशून्यम् । दद दाने भ्वादिरात्मनेपदी सेट् । दध धारणे भ्वादिरात्मनेपदी सेट् । शिष्टा इति शेषः । **तत** इति देहादिनाशे प्रतिबिम्बनाशरूपदोषाद्धेतोः । विरोचनस्तु अनुपलभ्येत्यादिवाक्यं शृण्वन्नप्यविचार्यैवासुरानेतान् देहात्मविद्यामुवाचेन्द्रस्तु देवत्वाद्देहात्मविद्यायां देहादिनाशे प्रतिबिम्बनाशाद्दोषं पश्यन् पुनराजगाम प्रजापतिसकाशम् । तदेतदुक्तमिन्द्रस्येति । **जीवस्येति** य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स्वप्नसाक्षित्वं महीयमानः स्त्र्यादिभिः पूज्यमानश्चरतीत्यस्य स्वाप्निकान् भोगान् भुङ्क्ते इत्यर्थात् । ततश्च देहस्यान्ध्यादिसत्त्वेपि स्वप्नात्मनोऽनान्ध्यादि विचार्येन्द्रः पुनराजगाम ततश्च तं प्रति सुषुप्तिसाक्षिकं तद्यत्रैतत् सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचेति सुषुप्तिसाक्षित्वम् । आदिपदेन उत्तमपुरुषावस्था तां प्रतिपादयति सुषुप्तावपि बिडौजा भोग्यं नाद्राक्षीत् सहोवाच नाहं खल्वयं भगव एवं संप्रत्यात्मानं जानाम्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति श्रुतेः । स इन्द्रः । भगवन् प्रजापते । अत्र सुषुप्तौ । यदा यदा ब्रह्मचर्येण मृदितकषायाय बिडौजसे होवाच प्रजापतिरेष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुष इत्यनया जीवन्मुक्तादिदशामाह एष संप्रसादो जीवः स्वाविद्यावस्थायां शरीरसाम्यमापन्नः केनचिदाचार्येण नासि त्वं देहादिधर्मा किं तु तत्त्वमसि इति प्रतिबोधितः सन्नस्माच्छरीरात् समुत्थाय देहादिभावनां हित्वा परं परमात्मलक्षणं ज्योतिरुपसंपद्य स्वेनात्मीयेन रूपेण सदात्मनैवाभिनिष्पद्यते अभिनिष्पद्यमानस्य स्वरूपमाह स उत्तम इति परेषां व्याख्या ।

'ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः ।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित्' ॥

इति पत्रावलम्बनात् । **कठिनोऽप्यर्थो यथाबुद्धि तावदुच्यते।** एष गच्छन् इण गतौ अदिप्रत्ययः 'एतेस्तुट् च' इति सूत्रात् । **समिति** षम वैक्लव्ये क्विप् भ्वादिः परस्मैपदी सेट् समति । वैक्लव्यं वेतीति विप्रजनादिकर्ता विप्रजनकान्त्यसनासादनेषु अदादिः परस्मैपदी अनिट् सिद्धान्तकौमुद्यां तु गतिव्याप्तिप्रजनेत्यादिपाठः सादनस्थले स्वादनं च बाहुलकाड्डिः वातेर्डिच्चेति सूत्रेण । वा गतिगन्धनयोरिण् डिद्वा कुवृ शब्दे भ्वादिरात्मनेपद्यनिट् क्रवते क्लवते क्लवः भ्वादेराकृतिगणत्वाद्वा क्लवः । 'पचाद्यच्' प्रजनादिकं प्राति पिप्रर्ति वा प्र 'आतोऽनुपसर्गे कः' पचाद्यज्वा । प्रा पूरणे अदादिः परस्मैपद्यनिट् पृ पालनपूरणयोः अदादिर्जुहोत्यादिः परस्मैपद्यनिट् । **सादः** षद्लृ विशरणगत्यवसादनेषु भ्वादिः परस्मैपद्यनिट् । सीदतीति सादः प्रश्च सादः प्रसादः कर्मधारयः भावे घञ् पचाद्यचि स्वार्थे अण्वा । विअर्थ उक्तः । शॄ हिंसायां क्र्यादिः परस्मैपदी सेट् शृणाति शरणं अत्ता चराचराणां छान्दसो ल्युः । अन्यथासुसश्शुशरुः । शीर्विः शरीरं शर्वश्शृदिति स्यात्सूत्राणि कृदन्ते सन्ति न च शरणमिति धात्वन्तरस्येति शङ्क्यमनुपलम्भाद्धात्वन्तरस्य शृणात्यनेन करणे ल्युड् बुद्धिप्रेरककृष्णस्य सत्त्वात् । यत्तु शॄ वायुवर्णनिवृत्तेषु इति सूत्रमुणादिपञ्चमपादसमास्यनन्तरं तत्तु वायुवर्णनिवृत्तेषु अर्थविशेषेषु प्रवर्तते।

प्रतिपादयति। अतो जीवोऽपि वस्तुतस्तादृश एवेति प्रकृतेऽपि परामर्शात् स एवेति चेत्। एवमाशङ्क्य परिहरति तुशब्देन। नायमर्थो दूष्यते, किंतु किंचिद-

भाष्यप्रकाशः।

नापि शरीरमित्यर्थः। तेन सिद्धमाह **अत** इत्यादि। **तादृश** इति अमृताऽभयादिरूपत्वाद-पहतपाप्मादिरूपत्वाच्च वस्तुतो ब्रह्मात्मक एवोत्तरप्रकरणे सिद्ध इति पूर्वत्रापि स एव ग्राह्य इत्यर्थः। परिहारं व्याकुर्वते **एवमि**त्यादि। ननु प्रकरणस्य जीवपरत्वे निराकार्ये अत्र नकारः कुतो नोक्त इत्यत आहुः **नायमर्थ** इत्यादि। **किंचिदि**ति तत्र कारणम्। तर्हि कथं परिहार

रश्मिः।

शादो वायुः करणे घञ्। न च सामान्याद्विशेषो बलवानिति घञा भाव्यमिति शङ्क्यम्। शूद विशरणेति ज्ञापकात् क्वचित्सामान्यमपि विशेषस्य बाधकमिति तथा च सूत्रं वाऽसरूपोऽस्त्रियामिति। अस्मिन्धात्वधिकारे असरूपोपवादप्रत्ययः उत्सर्गस्य वा बाधकः स्त्र्यधिकारोक्तं विनेति वृत्तिः। सीदति सादं कृष्णेन जीवः करोति साधनैर्जीवन्मुक्त्यन्तरे कृष्णः सादं वक्ष्यमाणवाक्यात् कारयति जीवं सादयतीति साद इति वा पचाद्यच्। 'निवेदितात्मा विचिकीर्षितो मे' इति वाक्यात् कृष्णोक्त्या-विर्भूतं स्वरूपं, जीवन्मुक्तानां त्वक्षरम्। किं च गमनं करोतीति वा 'स तत्र पर्येति' इति श्रुतेः। अवति अव रक्षणप्रवेशतृप्तिकान्तिगतिक्रियादीप्तिप्रीत्यवगमस्वाम्यर्थादिषु स्वरवर्णानुक्रमहैमधातुपाठे। धातुपाठे तु अव रक्षणगतिकान्तिप्रीतितृप्तिअवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्ग-नहिंसादानमानवृद्धिषु परस्मैपदी भ्वादिः क्रीडन्निति श्रुतेः। पचाद्यच्। षद्लृ विषादे भावे ल्युट् सादनं विधानं करोति। इति षद्लृ विशरणेत्यादिष्वर्थेषु सदिर्व्याकृतः। **अस्मात्** परस्मैपदी सेट् भ्वादिः। इदि परमैश्वर्ये इन्दति इदं 'इन्देः कमन्न लोपश्च' इति सूत्रेण कमन्। कमिर्नलोप इत्यपि पाठः कपिः परमैश्वर्यकर्तुः **शरीरात्**। शॄ हिंसायां शृणाति 'कॄशॄपॄकटिपटिशौटिभ्य ईरन्' इति सूत्रेणेरन्। हिंसकात्। अत्र सुषुप्तेरुत्तमावस्थायां हिंसकः क इति प्रश्ने जीवन्मुक्त्युपक्रमात् द्वादशाङ्गस्य देहस्य हिंसकस्य क्षेत्रस्थयवादीनां सप्राणत्वात् तद्धिंसकस्य 'अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरम्' इति वाक्यात् 'अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्' इति गीतायाश्च परमैश्वर्यकर्तृत्वाच्च ग्रहणम्। क्षेत्रस्थानां सेवायां गुरुमन्तरा हिंसकोपि परमैश्वर्यकर्ता ल्यब्लोपे पञ्चमी तत्प्राप्य। न च योगरूढ्याः प्राप्तेर्योगत्यागापत्त्याऽपसिद्धान्त इति वाच्यम्। आत्मोपनिषदि तस्याप्यात्मत्वात्। यथोत्तरार्धे ब्राह्मणपुत्रस्य देहोपि न लब्धः अततीत्यात्मेति व्युत्पत्तेः। सर्वस्य ब्रह्मत्वाच्च। **उत्थाय**। उद् उन्दि क्लेदने उच्छब्दो हि 'उदि ग्रहः' इति सूत्रे दृश्यते 'अन्येभ्योपि दृश्यते' इति क्विप् क्लेदनकर्ता। सम् प्रजनादिकर्ता शब्दकर्तेति पूर्वमुक्तं वैक्लव्यनिरूपणे। एवं च शरीरं प्राप्य प्रजनकान्त्यसनासादनकर्ता क्लिद आर्द्रभावे दिवादिः परस्मैपदी वेट् आर्द्रभावकर्ता आ ऋ गतौ अदादिर्जुहोत्यादिः परस्मैपद्यनिट् क्विप्। द्रा कुत्सायां गतौ अदादिः परस्मैपदी अनिट्। कुत्सा कुर्दि क्रीडायां आत्मनेपदी सेट् कुर्दितुमिच्छा इच्छायां सन्। कुत्स अवक्षेपणे चुरादिर्वा आत्मनेपदी सेट्। अततीति आ बाहुलकादुट् प्रत्ययः। आप्नोतीति आ क्विप् पृषोदरादित्वात्पलोपः सततगन्ताऽऽपको वा। अद् क्विप्। ऋ प्राणग-त्योर्वा भ्वादिः परस्मैपद्यनिट्। 'आतोऽनुपसर्गे कः' द्रः आर्द्रः। भावः सत्ता तत्कर्ता क्लिदि शोचने क्लिदि परिदेवने अनयोर्न ग्रहणं नुमा सहभावात् तत्प्राणाचार्ये स्थित्वा प्राण आचार्य इति नवमप्रपाठक-श्रुतेः। गतिनिवृत्तिं कृत्वा ष्ठा गतिनिवृत्तौ भ्वादिः परस्मैपद्यनिट् विज्ञानमयं स्वानुकूलं कर्तुं तमाचार्ये

न्यदस्तीति न नकारप्रयोगः । तदाह । आविर्भूतस्वरूपः । स्वाप्ययसंपत्त्योर्भगवदाविर्भावो जीवे भवति । नृसिंहोपासकस्य नृसिंहाविर्भाववत्। ब्रह्मण उपदेशसमये भगवदाविर्भावात्। सर्वत्र स्वात्मानं पश्यन्निन्द्रेऽपि तथैवोपदिष्टवान्

भाष्यप्रकाशः।

इत्यत आहुः तदाहेति। तस्माद्धेतोः कारणभूतं प्रकारमाहेत्यर्थः। आविर्भूतस्वरूप इति प्रजापतिवाक्ये परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रावणात्। आविर्भूतं प्रकटीभूतं ब्रह्मस्वरूपं यस्मिन् स तथेत्यर्थः। आविर्भाव एव कथमित्यत आहुः स्वाप्ययेत्यादि। अनुगमाधिकरणे, मय्येव सकलं जातमित्यादिवाक्यानुरोधादुत्तमाधिकारिणामुपदेशभावनादिष्वपि जीवे ब्रह्मसंपत्तिर्भवतीत्युपपादितम् । अतोऽत्रापि प्रजापतिजीवे ब्रह्माविर्भावाज्जीवे अमृताऽभयरूपत्वाद्युपदिश्यते। न तु जीवो वस्तुतस्तथेत्यर्थः। नन्वेवमर्थोक्तावत्र किं गमकमत आहुः

रश्मिः।

योजयितुं गतेर्निवृत्तिम् । नि निष्क परिमाणे चुरादिरात्मनेपदी सेट् डित् 'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे' इति कारिकायाः वर्तनं कुर्यात्। तादृशी गतिनिवृत्तिरत्र विवक्षिता। परं पॄ पालनपूरणयोः क्र्यादिः परस्मैपदी सेट् पृणाति 'पचाद्यच्' न च पृभिदिव्यधिगृधिधृषिभ्यः कुः स्यादिति कुप्रत्ययः शङ्क्यः वासरूपोऽस्त्रियामिति सूत्रेण बाधस्य विकल्पात् 'भृदॄप्रां ह्रस्वो वा'इति ह्रस्वः। ज्योतिः द्युत दीप्तौ द्युतेरिसिन्नादेश्च ज इति भ्वादिरात्मनेपदी सेट् द्योतते इति ज्योतिः। उपसंपद्य उप अत्र टु वप बीजतन्तुसन्ताने भ्वादिरुभयपदी-अनिट्। वेपृ कम्पने भ्वादिरात्मनेपदी सेट् उक्तकारिकायाः कर्तरि पचाद्यच् संप्रसारणं वेपते कपि चलने भ्वादिरात्मनेपदी सेट् चलति विलसति भरति वा चल विलसने तुदादिः परस्मैपदी सेट् चल भृतौ चुरादिः परस्मैपदी सेट् तथा चोप इत्यस्य विप्रजनादिकर्ता लासस्य श्लेषरूपस्य क्रीडायाश्च कर्ता भरिता च। संप्रजनादिकर्ता शब्दकर्ता च। पद्य पद गतौ दिवादिरात्मनेपद्यनिट् पदनं कृत्वा, स्वेन स्वन शब्दे भ्वादि-पर-सेट् ड प्रत्ययः स्वनति। आप्तिराविष्कारः फलानां कर्ता तेनास्यादिकर्तृत्वं 'अन्येभ्योपि दृश्यते' इति सूत्रं डस्य तेन। न च छन्दसीति निवृत्तमिति कथं 'ड' प्रत्ययः बाहुलकाद्भविष्यति।

'क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति'॥

स्व शब्दोपतापयोर्वा डः स्वरति स्वं भ्वादिः प-अ-धातुः स्वरुः स्वर् इत्यस्यैव रूपं लौकिकम्। अत्र जीवीयरूपम्। शब्द आविष्कारे उपपूर्वत्वाभावात् आ आप्ता वाक्यत्वात्। नाङ् विप्रजनादिकर्ता सुद् लीलाविष्कारकर्ता कारः कृतिः कालस्तस्य कर्ता। यद्वा उप इत्यस्यार्थ उक्तः। तप ऐश्वर्ये दिवा-आ-अनिट्। तप संतापे समर्थ उक्तः ताप ऐश्वर्यं भ्वा-पर-अनिट् न तप दाहे इत्यस्य सुषुप्तावपि दाहाभावे तदुत्तमदशायां दाहाभावात्। ऐश्वर्यं व्यापकत्वं तप आलोचने इत्यस्यापि न। आलोचनस्य विद्यान्तर्गतस्य मायिकत्वात् 'विद्याविद्ये' इति वाक्यात्। तथाच वि प्रजनादिकर्ता लासस्य श्लेषरूपस्य क्रीडायाः कर्ता भरिता च व्यापकः तेन रूपेणेति संबन्धः पुराणमतानुकूलमत्रानुसंधेयं तदज्ञाने सर्वमौढ्यात्। रूपेण रूप मोहने दिवादिः परस्मैपदी सेट्। मुह वैचित्ये दिवादिः परस्मैपदी सेट्। चित संज्ञाने भ्वादिः परस्मैपदी सेट्। चित ज्ञाने चुरादिरात्मनेपदी सेट्। रूप्यते ज्ञायते पूजनादिकर्त्री

रश्मिः ।

शब्दकर्त्री च ज्ञायते भावे घञ् । रूपं ज्ञानं तेन रौति रूपं 'खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः' इति सूत्रात्पप्रत्ययः । निपातनाद्दीर्घः इति तत्सौत्रम् । अभि ।

'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु' ॥ इति डिन् प्रत्ययः ।

ञिभी भये टिलोपः । भि अदादिर्जुहोत्यादिः परस्मैपद्यनिट् तस्यैव रूपं डौ । अ । न क विनाशे चुरादिः परस्मैपदी सेट् न क्यते भावे ड उभौ प्रत्ययौ । भि प्रतियोगी वि-प्रजनादिकर्ता नाशः न भीयते भयाभाव इति यावत् । निष्पद्यते । निष्क परिमाणे निष्कयति परिमाणं करोति । परि पॄ सर्वधातुभ्यः इन्निति सूत्रेणेन् प्रत्ययः पालकः पूरणकर्ता च । माङ् माने शब्दे च अदादिर्जुहोत्यादिरात्मनेपद्यनिट् । माते माति वा सिद्धान्तकौमुद्यां मातुरिति दर्शनात् । प्रायपाठः सकलधातुपाठे भावप्रत्ययस्येति मानमित्यत्र भावे ल्युट् । मानं शब्दं च करोति । आप्नोति वा पालनपूरणमानशब्दकर्तोक्तः । पद्यते गच्छति । स इति तजितनियजिभ्यो डिच्चेति डिददि स्तत् । सः तनुविस्तारे तनादिः परस्मैपद्यात्मनेपदी च सेट् । स्तृ आच्छादने स्वादिः उभयपद्यनिट् वि-प्रजनादिकर्ता आच्छादनकर्ता तनोति अदि प्रत्ययः डित् टिलोपः । आच्छादनम् । आस तत गतिकर्ता च । छद ऊर्जने भ्वादिः परस्मैपदी सेण्न गृह्यते । घटादित्येतच्छेदने इति स्यात् । किं तु छद संवरणे चुरादिः परस्मैपदी सेट् छाद्यते छादनं भावे ल्युट् । सम् प्रजनादिकर्ता शब्दकर्ता वरणस्य संभक्तिरूपस्य स्वीयत्वेनाङ्गीकारस्य वा कर्ता आविर्भूतस्वरूपो जीव इति वृङ्वृञोरर्थः । दास्यातिरिक्तो यो वा वृङ् संभक्तावित्यस्यार्थः । ईश्वरे दास्याभावाज्जीवीयं वा दास्यम् । उत् उङ् शब्दे कर्तरि क्विप् तुक् । शब्दकर्ता । तमः तमु काङ्क्षायां दिवादिः परस्मैपदी सेट् ताम्यति पचाद्यच् । पुरुषः पुर अग्रगतौ तुदादिः परस्मैपदी सेट् । पुरमुषति उष दाहे भ्वादिः परस्मैपदी सेट् पृङ् व्यायामे तुदादिरात्मनेपद्यनिट् 'अन्येभ्योपि दृश्यते' इति क्विप् । पुरा आस पुरि शेते इति व्युत्पत्त्यन्तरेपि सुबोधिन्याम् । यतस्तदज्ञाने सर्वमौख्यमिति निबन्धोतः । पुराणमतेनापि तुरीयावस्थोच्यते । एष गच्छन् 'आकाशवत्सर्वगतश्च नित्यः' इति सर्वत्र गच्छन् । सुषुप्तेरुत्तरावस्थेति 'स्वाप्ययसंपत्त्योः' इति सूत्रात् सधर्मकाविर्भावः । सुषुप्तौ निर्गुणाविर्भावस्योक्तत्वेनोत्तमावस्थायां सधर्मकाविर्भावौचित्यात् । उभयोरभेदो विद्वन्मण्डनेस्ति । उत्तमावस्था भक्तिज्ञानकर्मपुष्टिमार्गानुरोधेनानेकधा तदेजतीति श्रुतेः । एजृ कम्पने भ्वादिरात्मनेपदी सेट् छान्दसं परस्मैपदम् । कपि चलने । चलति चल विलसने लस श्लेषक्रीडयोः क्रीड विहारे वि अर्थः बाहुलकस्यागतिकगतित्वादुक्तौ एवं प्रकृतिप्रत्ययौ । अग्रेपीमौ न तु वख गतावित्यादेः प्रयोगः प्र-पूरकः वाच्यार्थस्योक्तप्रायत्वात् वक्ष्यमाणत्वाच्च तात्पर्यार्थ उच्यते । जनः पचाद्यच् प्रादुर्भावकर्ता निर्गुणमभेदेन साकाररूपप्रादुर्भावकर्ता तात्पर्यार्थोऽयं 'सर्वतःपाणिपादान्तम्' इति वाक्यात् वाच्यार्थो अग्रे । कान्तिरिच्छा तस्याः कर्ता जीवन्मुक्तप्रकरणात् मुक्तफलयोग्येच्छा । असनं प्रेरणं तस्य कर्ता । प्र-पूरकः ईरणं ईर क्षेपे चुरादिः परस्मैपदी सेट् । क्षिप प्रेरणे प्र-पूरकः । पूरकत्वद्वयं कर्मठज्ञानिभक्तपूरकत्वं द्योतयति प्रवृत्तिनिवृत्तिभेदेन मार्गस्य द्वैविध्यात् प्रेरक इत्यर्थः । आसादनम् वि-प्रजनादिकर्ता । आ आप्ता सादनस्य कर्ता सादनं विशरणम् । अत्र वि-प्रजनादीनां शरणं हिंसा तस्य कर्ता सीदतेर्विशरणोऽर्थो व्याकृतः । गतेः कर्ता अवसादनमत्र अव रक्षणकर्ता गतिकर्ता । ननु पुनरुक्ती रक्ष पालने पल गताविति धातुपाठात् इति चेन्न रक्षणकर्ता

रश्मिः।

गमयिता गतिकर्ता गन्तेति भेदात्। इच्छा न गृह्यतेऽग्रे तस्या उक्तेः। कान्तिः कामः काम्यते इति व्युत्पत्तिः। भगवता तथा च पुष्टिमार्गो द्योत्यते। श्रीगोपीजनवल्लभाय नमः। प्रीतिकर्ता प्री तृप्तिकान्त्योः क्र्यादिः उभयपदी अनिट्। कामस्य तृप्तिरानन्दः पुनः कामः पुनस्तृप्तिः भावे क्तिन्। इयमव रक्षणे इति धातुपाठस्था। तृप प्रीतौ दिवादिः परस्मैपदी वेट्। तृप प्रीणने स्वादिः परस्मैपदी सेट् तृप्यति तृप्नोति प्रीतिस्तूच्यते सांप्रतम्। पृण प्रीणने तुदादिः परस्मैपदी सेट् पृण्यते भावे ल्युट्। प्रीणनं बाहुलकात् यद्वा प्रीङ् युच् तुट् रीङ। अव अस्यार्थस्तूच्यते सांप्रतम्। रक्षणगति-कान्तिप्रीतितृप्तयोऽवगमपूर्वोक्तास्तासां गमः ग्रहवृद्दनिश्चिगमश्चेति अप्रत्ययः। गमनं प्रवेशः। विश प्रवेशे तुदादिः परस्मैपदी अनिट् प्र-प्रवेशः प्र-पूरकस्य प्रः पूरको वेशः प्रदीपवदिति व्याससूत्रात्। श्रवणं भक्तकृतकीर्तनानाम्। श्रु श्रवणे स्वादिः परस्मैपदी सेट् श्रूयते भावे ल्युट्। श्रु गतौ न गृह्यते गतीनां निविष्टत्वेनाकाङ्क्षाभावात्। स्वामी स्वन शब्दे ड प्रत्ययः। आस्यादिकर्ता गतिः शब्दः भक्तयश्च अम गतिशब्दभक्तिषु भ्वादिः परस्मैपदी सेट् तथा च स्वश्चासावमः घञर्थे कः स्वामः सोऽस्यास्तीति स्वामी स्वामी कर्तेत्यभेदान्वयोऽन्यत्र तु भेदान्वयः मायाया भगवच्छक्तित्वात्। भेदस्य मायिकत्वात्। अर्थः अर्थ उपयाचने चुरादिः उप प्रजनादिकर्ता श्लेषस्य गतिरूपस्य कर्ता क्रीडाया विहार-रूपायाः कर्तात्र वि प्रजनादिकर्ता श्लेषकर्ता क्रीडाकर्ता टु याच याच्ञायां भ्वादिरुभयपदी सेट अत्र 'ऋहलोर्ण्यत्' इति सूत्रेण ण्यत् न सकलधात्वर्थप्रायपाठात् भावे ल्युट्। अर्थ्यते उपार्थेभ्यो वाच्यते इत्यर्थः कर्मप्रत्ययः उपार्थत्वेनोक्तानां याच्ञाकर्तोक्तः सामान्ययाचनकर्ता याचने इत्यस्य व्याख्यानं वक्ष्यते। याचनं व्याख्यातप्रायं क्रिया भावे शः 'कृञः श च' इति सूत्रेण इयङ् टाप् करणकर्ता डु कृञ् करणे तनादिरुभयपदी अनिट् 'क्रिया सा राधिका देवी' इति राधास्तोत्रादावस्ति श्रुतिरत्र 'तस्मान्न भिन्ना एतास्ता आभिर्भिन्नो न वै विभुः' इति कृष्णोपनिषदि। अत्र बृहद्वामनपुराणं उत्तरस्थानं खिलं च भृग्वादीन् प्रति ब्रह्मणो वाक्यानि।

'षष्टिवर्षसहस्राणि मया तप्तं तपः पुरा। नन्दगोपव्रजस्त्रीणां पादरेणूपलब्धये॥
तथापि न मया प्राप्तास्तासां वै पादरेणवः। श्रुत्वैतद् ब्रह्मणो वाक्यं भृगुः प्राहाथ सादरम्॥
वैष्णवानां पादरजो गृह्यते त्वद्विधैरपि। सन्ति ते बहवो लोके वैष्णवा नारदादयः॥
तेषां विहाय गोपीनां पादरेणुस्त्वयापि यत्। गृह्यते संशयो मेत्र को हेतुस्तद्वद प्रभो॥
ततो ब्रह्मा भृगुं प्राह चिन्तयित्वा पुरातनीम्। कथां सर्वश्रुतीनां यद्रहस्यं परमाद्भुतम्॥

ब्रह्मोवाच—

न स्त्रियो व्रजसुन्दर्यः पुत्र ताः श्रुतयः किल। नाहं शिवश्च शेषश्च श्रीश्च ताभिः समाः क्वचित्॥
प्राकृते प्रलये प्राप्ते व्यक्तेऽव्यक्तं गते पुरा। शिष्टे ब्रह्मणि तन्मात्रे कालमायातिगेऽक्षरे॥
ब्रह्मानन्दमयो लोको व्यापिवैकुण्ठसंज्ञिकः। निर्गुणोऽनाद्यनन्तश्च वर्तते केवलेऽक्षरे॥
अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तमम्। तल्लोकवासी तत्रस्थैः स्तुतो वेदैः परात्परः॥
चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरा। तुष्टोस्मि ब्रूत भो प्राज्ञा वरं यन्मनसीप्सितम्॥

श्रुतय ऊचुः—

नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत। सगुणं ब्रह्म सर्वेदं वस्तुबुद्धिर्न तेषु नः॥
ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं निर्गुणं परम्। वाङ्मनोगोचरातीतं ततो न ज्ञायते तु तत्॥

रश्मिः ।

आनन्दमात्रमिति यद्वदन्तीह पुराविदः । तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः ॥
श्रुत्वैतद्दर्शयामास स्वं लोकं प्रकृतेः परम् । केवलानुभवानन्दमात्रमक्षरमध्यगम् ॥
यत्र वृन्दावनं नाम वनं कामदुघैर्द्रुमैः । मनोरमनिकुञ्जाढ्यं सर्वर्तुसुखसंयुतम् ॥
यत्र गोवर्द्धनो नाम सुनिर्झरदरीयुतः । रत्नधातुमयः श्रीमान् सुपक्षिगणसंकुलः ॥
यत्र निर्मलपानीया कालिन्दी सरितां वरा । रत्नबद्धोभयतटी हंसपद्मादिसंकुला ॥
नानारासरसोन्मत्तं यत्र गोपीकदम्बकम् । तत्कदम्बकमध्यस्थः किशोराकृतिरच्युतः ॥
दर्शयित्वेति च प्राह ब्रूत किं करवाणि वः । दृष्टो मदीयो लोकोयं यतो नास्ति परं वरम् ॥

श्रुतय ऊचुः—

कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः । कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयम् ॥
यथा तल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षाऽजनि नस्तथा ॥

श्रीभगवानुवाच—

दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथः । मयानुमोदितः सम्यक् सत्यो भवितुमर्हति ॥
आगामिनि विरञ्चौ तु जाते सृष्ट्यर्थमुद्यते । कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥
पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले । वृन्दावने भविष्यामि प्रेयान् वो रासमण्डले ॥
जारधर्मेण सुस्नेहं सुदृढं सर्वतोधिकम् । मयि संप्राप्य वः सर्वे कृतकृत्या भविष्यथ ॥

ब्रह्मोवाच—

'श्रुत्वैतच्चिन्तयन्त्यस्ता रूपं भगवतश्चिरम् । उक्तकालं समासाद्य गोप्यो भूत्वा हरिं गताः' ॥

इति । अत्र हि श्रुतिभिः सर्ववेदान्तप्रत्ययं गुणातीतं वाङ्मनोगोचरातीतमानन्दैकरूपं यत् तव रूपं तत्प्रदर्शयेति प्रार्थितो भगवान् गोकुलं तत्स्थितं स्वस्वरूपं लीलां तत्र क्रियमाणां च प्रदर्शितवान् इत्युच्यते । अन्यद्विद्वन्मण्डने स्फुटम् । न च राजसं पुराणमिति नो मतमुत्कृष्टमिति शङ्क्यम् । पद्मपुराणे राजसपुराणान्युक्त्वा राजसानां स्वर्गदत्वं शुभत्वं चोक्तमिति । न च स्वर्गपदेन स्वर्गलोकोक्तेस्तृतीयमार्गीयत्वं राजसानां पुराणानामिति शङ्क्यम् । स्वर्गपदस्यात्मसुखवाचकत्वात् । स्पष्टं चेदं निबन्धे । दुःखाभावस्य सुखस्य च पुरुषार्थत्वादुभयोरेकं सुषुप्तावेकं जीवन्मुक्तादिदशासु । कामिनीभावमासाद्येत्यादिषूद्भाविताशङ्का भक्तिमार्तण्डफलप्रकरणनित्यलीलोपपादने निराकृता । प्रकृतमुच्यते । सिसृक्षयाग्रे एतद्रूपात्सृष्टिरुच्यते । इच्छा इष्यते भावे शः निपातः तस्याः कर्ता दीप्तिकर्ता दीप दीप्तौ दिवादिः आत्मनेपदी सेट् दीप्यति तमोनुत् । आसीदिदं तमोभूतमप्रज्ञातमिति मनुस्मृतेः । निबन्धेपि सृष्टिनिरूपणे 'कदाचित्पुनरन्यथा' इति दर्शनात् । अवाप्तिकर्ता अव स्थूलभुक्रक्षणगत्यादिकर्ताऽऽप्तिकर्ता विश्वस्मिन् । आलिङ्गनकर्ता । आ-वि-प्रजनादिकर्ता जनी प्रादुर्भावे प्र-पूरकः अद भक्षणे । अदादिः परस्मैपद्यनिट् अति बाहुलकादुत् । यद्वा । आ-वि-प्रजनादिकर्ता जन गतावत्र आप्ता च दृङ् अनादरे आदुः उद्गुणः क्विपि । भावः सत्ता गतिकर्ता हिंसाकर्ता चराचरभक्षको दुष्टहिंसको वा दानकर्ता स्पष्टम् । ऋतुदानकर्ता वा 'अहं बीजप्रदः' इति गीतायाः । भानकर्ता समन्वयेन जगति भाति भा दीप्तौ अदादिः परस्मैपद्यनिट् दीप दीप्तौ वृद्धिकर्ता वर्धते वृधु वर्धने भ्वादिः आत्मनेपदी वेट् । वृद्ध भासे चुरादिः परस्मैपदी सेट् भासते दीप्यते न च पुनरुक्तिः शङ्क्या । भक्तिज्ञानभेदेन द्वेधा प्रदीपनात् । प्रकृतमनुसर्यते शद्लृ विशरणगत्यवसादनेषु इत्यत्राषन्तो धातुपाठो व्याकृतः ।

रश्मिः ।

सादनं व्याक्रियते षद्लृ विषादे तुदादिः परस्मैपदी अनिट् सादनं विषादः। विकारार्थः प्रजनादिस्तस्य कर्ता। सादः सकलसद्यर्थार्थकः। स्थूलभुजि सीदतेरर्थ उक्तः। पुनरुक्तिमापद्यमानोऽवाद्यर्थसहितो हि सीदतेरर्थः। सूक्ष्मभुजि ज्ञातव्यः स्वप्रेश्लेषं करोति। श्लिष आलिङ्गने दिवादिः परस्मैपदी सेट्। श्लिष्यति आ आप्ता लिगि गतौ सेट् लिङ्गति भ्वादिः परस्मैपदी गतिं करोति गच्छन्नित्यर्थः। एकवाक्यता जाता ङसेर्द्वितीयोर्थः क्रीडा क्रीड विहारे भ्वादिः परस्मैपदी सेट् विहरति। वि-प्रजनादिकर्ता सन् हरति। हारं हरणं भक्तेच्छया प्रजनादिकर्ता भक्तमनसां हरणं करोति। व्याख्यातमेष इति। संप्रसादो व्याक्रियते। संप्रजनादिकर्ता शब्दकर्ता च। प्रशब्देन पूरकः सादः सीदत्यर्थार्थकः। प्रजनादिकर्तृत्वं स्फुटम्। तत्र जनी प्रादुर्भावे दिवादिरात्मनेपदी सेट् प्र-पूरकः आ आप्ता दुर् दृ विदारणे क्र्यादिः परस्मैपदी सेट् दृङ् अनादरे वा तुदादिः आत्मनेपद्यनिट् विच् गुण 'ऋत उत सार्वधातुके' इतिसूत्रात् भावः सत्ता अस् भुवि तल् भूसत्तायां षदेर्वा सत्ता। अत्र समर्थे विशब्दश्च स्वार्थे ष्यञ् वा तत्र विकारार्थे प्र-पूरकः जनार्थे प्र-पूरकः आ आप्ता दुरर्थे नञ् विनाशः व्यर्थे प्रपूरकः जन गतौ तुदादिः परस्मैपदी सेट् जनो गतिः घञर्थे कविधानं गम्लृ गतौ कान्त्यर्थे इच्छा असनार्थे प्रेरणम्। प्रार्थे पूरकत्वं ईरणं क्षेपः आसादनार्थे आ आप्ता सादनं विस्तारः कर्तव्यः अवार्थेऽनवस्थाऽङ्गीकार्या नाशार्थे अदर्शनम् नञ् विनाशार्थः व्यर्थ उक्तः नाशार्थः अदर्शनम्। पुनर्नञाद्यर्थे अनवस्थाङ्गीकार्या आ आप्ता दर दृ विदारणे दरः व्यर्थः प्र पूरकः जन गतौ जनोगतिः कान्त्यर्थे इच्छा असनार्थे प्रेरणम् प्रार्थे पूरकत्वं ईरणं क्षेपः। आत्मना विदारणं भयं दृ भये भ्वादिः परस्मैपदी सेट् 'सोऽबिभेत्' इति श्रुतेः दृङ् अनादर इति वा एवं जनिर्दुरन्तो व्याकृतः। भावः सत्ता समर्थे शब्दः। शब्द आविष्कारे चुरादिः परस्मैपदी सेट् उपसर्गात्तु भाषणाविष्कारयोः प्रतिशब्दयति। शुको मुक्तो वामदेवो मुक्त इति तयोः शब्दः प्रथमस्कन्धे गुणत्रयविवरणाध्याये पाद्मे पाषण्डोत्पत्तौ च। ननु कथं धात्वर्थसंगतिरिति चेदुच्यते। आ आप्ता विप्रजनादिकर्ता केचन ब्रह्मधर्माः केचनमुक्तयोः सुट् आविष्कारार्थः न चाविष्कारपदस्य सोर्थ इति शङ्क्यम्। 'संपरिभ्यां करोतौ भूषणे' 'समवाये च' इति सूत्रस्य संपरिपूर्वकस्य करोतेः सुट् स्यात् भूषणे संघे चार्थे इतीति वृत्तेः लोके त्वाविष्कारपदस्यार्थः परिनिविभ्यः इति षः। 'ये धातुशब्दाः' इति पत्रावलम्बनात्। कारः कृतिश्चेष्टा काल इति यावत् आ····भगवदाविष्कारकालः तस्य कर्ता। न च व्यपेक्षावादे संप्रसादत्वेन बोधो न स्यात् इति शङ्क्यम्। व्यपेक्षावादिभिरुपपादनेन पुनरुपपादनानाकाङ्क्षायाः प्रकारार्थः पूरकः 'पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते' इति बृहदारण्यकात्। सादस्तु अवोपसर्गघटित इति मद्यर्थकः प्रेरणाणिजघटितश्चातो ज्ञानकर्मभक्तिपुष्टिमार्गानुरोधेन व्याख्येयः। मुक्तावक्षराविर्भावः। अक्षरधियामिति सूत्रात् तदानीं सादो णिज् न हि न सीदतेर्व्युत्पन्नः कर्ममार्गेण ब्रह्मणो मुक्तेः स्वर्गपदेनात्मसुखं सादः पूर्वोक्तः परंतु कृष्णेन प्रेरितः सादो ब्रह्म वा। भक्तिमार्गेप्येवम्। पुष्टौ तु प्रेरणा णिजन्तः 'निवेदितात्मा विचिकीर्षितो मे' इति वाक्यात्। ननु संप्रसादशब्दस्य समस्तत्वेन समासशक्त्या नायमर्थः संभवति मैवं वेदत्वात्। निपुणेन शाब्दबोधे संपादनीये शक्तेः शाब्दबोधविषये सूपपादत्वात्। 'शाशपिभ्यां ददनौ' इति सूत्रेण दन् उत्प्रत्ययान्तः शब्दः स सौत्रः शादो जम्बालशष्पयोर्न च संप्रसादः सुषुप्तिः इति भाष्यविरोध इति शङ्क्यम्। अत्र सुषुप्तेर्विषयाभावात्।

रश्मिः ।

'योन्तःसुखोन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति' ॥

इति गीतासंन्यासयोगाध्याये ब्रह्मभूत आविर्भूततिरोहितानन्दः इति ब्रह्मभावयुक्तम् । इति 'मुक्तोपसृप्यव्यपदेशात्' सूत्रात् । किं च गीताष्टादशाध्याये ।

'सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥
बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥
अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥
ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्' ॥

'भक्त्या मामभिजानाति' इति फलात्मकं ज्ञानमुक्तम् । तेनायं ब्रह्मभावो भक्तिमार्गीयः पुष्टिमार्गीयस्तु भगवदनुग्रहेण भक्तिमात्रमिति नास्ति कर्ममार्गीयोपि । भगवदर्पणेन फलानासक्ततामात्रं ब्रह्मभावस्थानापन्नं कर्मयोगाध्याये 'असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः' इति गीतायाः । प्रकृतमुच्यते । अस्माच्छरीरात् व्याक्रियत इदि परमैश्वर्ये परः पृ प्रीतौ स्वादिः परस्मैपदी अनिट् पृणोति पुत्रेपि तेन परः पचाद्यच् । वासरूपोऽस्त्रियामिति सूत्रप्रवर्तनान्न परुरित्यादि प्रीञ् तृप्तिकान्त्योः तृप प्रीतौ कान्तिरिच्छा प्रीतिमनु इच्छां करोति समीयते मानविषयः क्रियते येन स परमोक्षरः तत्रूपमैश्वर्यम् व्यापकत्वं साधनद्वारा तत्कर्तुः अश्नोतेर्वरट् 'अश्नोतेराशुकर्मणि वरट् च'इति सूत्रेण च अकारस्य इकारः संपादकः यद्वा 'स्थेशभासनिसकसो वरज्' इति सूत्रेण वरच् । ईश ऐश्वर्ये अदादिरात्मनेपदी सेट् ईष्टे ईश्वरः तस्य भावः ऐश्वर्यम् शरीरात् हिंसकात् उपपादि मया । मुक्तौ तु संसारः हिंसकात् । भक्तमुक्तौ तु अभेदं भगवत्सेवोपयोगिसंसारातिरिक्तसंसारयोर्हिंसकात् । पुष्टौ तु उक्तद्वयस्य मर्यादायाश्चापि हिंसकात् । तच्छरीरं प्राप्य । समुत्थायेति व्याक्रियते सं-प्र-पूरको जनो गतिः घञर्थे कः प्रादुर्भावो वा गतिः स्पष्टा प्र-पूरकः । आ आसा दुर् अनादरकर्ता भक्तमनोरथात् । अनादरकर्म वा भावी स्थितिरिति दरति द्रियते वा दुर् अ नञोः । नञर्थो विनाशः वि-प्र-पूरकः जनो गतिर्घञर्थे कात् । कान्तिरिच्छा । असनं क्षेपः पूरकत्वं च आसादनं आ वि-प्रजनादिकर्ता आसा सादनं षद्लृ विशरण इत्याद्यर्थकं आङः सादाभावान्न सद मतौ इत्यस्य चुरादिः परस्मैपदी सेट्के रूपं आङः परस्मैव सद गतावित्यस्य प्रयोगसत्त्वात् । अत्र विकारो निविष्टः विकारार्थे आसादनं तत्र पुनर्विकार एवमनवस्थाङ्गीकर्तव्या । षद्लृ विशरणगत्यवसादनेषु अत्रावार्थेऽनवस्थाङ्गीकार्या मुक्तानामनेकविधत्वात् । नित्यलीलासत्त्वाच्च क्वबार्थं आ आसा वि-प्रजनादिकर्ता सुडर्थः । आविष्काररूपः कारः करणं कालः इति समर्थः । उदर्थः स्पष्टः । स्थाय यथाशास्त्रं प्राणाद्याचार्येषु गतिनिवृत्तिं कृत्वा निवृत्त्यन्वर्थतं नि निष्क परिताप्ये परि पृ पालनपूरणयोः पृ प्रीतौ पृ व्यायामे पृ पूरणे

रश्मिः ।

सर्वधातुभ्य इन् इतीन् अव्ययादाप् सुप इति सूत्रेण अव्ययत्वात् सुपो लुक् । पत्ति पिपर्ति पृणोति परति पारयतीति वा परि । मानं माने । माङ् माने शब्दे च स्पष्टम् । शब्दः आ आप्ता वि वीप्रजन-कान्त्यादिषु सुट् आविष्कारार्थकः कारः कृतिः कालः । पर्यर्थस्य मानं आप्तिः पूरणं एतदादिकर्ता वर्तनं कुर्यात् परं स्पष्टं ज्योतिः द्युत दीप्तौ दीप दीप्तौ सूर्यनारायणं मुख्याधिकारिणं नारायणमात्रं वा ।

'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः' ॥

इति वाक्यात् । दीप्तियुक्तं वा विशेषानुपलब्धेः धातुपाठे उपसंपद्येति स्पष्टम् । **स्वेन** स्वन् शब्दे स्वनति यत्नः सर्वभावः 'स सर्वविद्भजति मां सर्वभावेन भारत' इति पुरुषोत्तमयोगाध्याय-वाक्यात् अत्र श्रुतौ उत्तमः पुरुष इत्युक्तेः अत्र सर्वभावः सर्वात्मभावोपि यथा 'सर्वदा सर्वभावेन भजनीयो व्रजाधिपः' इत्याचार्यचतुःश्लोक्यां तथा श्रीगोस्वामिनां 'सदा सर्वात्मभावेन भजनीयो व्रजाधिपः' इति ग्रन्थेस्ति तेन रूपेण यदि चोत्तमः पुरुष इति श्रुतौ ह्युत्तमत्वपुरुषत्वयोः जीवधर्मत्वं तदा यत्नो ज्ञानभक्त्यादिरूपः यद्वा स्व शब्दोपतापयोः ड प्रत्ययः स्वं अन्यत् पूर्ववत् । **रूपेणे**ति स्पष्टम् । अभिनिष्पद्यते भयाभावस्तस्य संबन्धी । अभयो वा । निरुपसर्गार्थः स्फुटः निस वा अर्थः कल्पनीयः स्फुटमन्यत् । जीवन्मुक्तादिविषये पुराणं प्रसिद्धमिति दिक् । यतोऽनुक्तमप्यूहते पण्डितो जनः । प्रकृतमनुसर्यते । एवं प्रतिपादयति उत्तमावस्थाम् । **तस्मा**दिति तदाहेत्यत्र तदित्यव्ययं पञ्चम्यन्तं तस्यार्थः प्रकारमिति कर्माध्याहारः । अत्र शंकराचार्याः आविर्भूतं ब्रह्मस्वरूपं यस्येति जीवब्रह्मवादमाश्रित्याहुः तन्न ब्रह्मजीवविभागस्य ब्रह्मेच्छाकृतत्वव्युत्पादनात् जीवत्वस्य वास्तविकत्वा-दित्याहुः **तथे**त्याविर्भूतस्वरूपत्वेन । **स्वाप्ययेत्यादी**ति एतच्च स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हीति सूत्रे फलाध्यायोपान्त्यस्थे वक्ष्यते । **अनुगमे**ति प्रथमपादेऽन्तिमाधिकरणे । **उपे**ति आदिपदेनो-पासना । यदत्र शंकराचार्याः । विवेकज्ञानाभावादनाविर्भूतस्वरूपः सन् विवेकविज्ञानादाविर्भूतस्वरूप इत्युच्यते न चान्यादृशाविर्भावानाविर्भावौ स्वरूपस्य संभवतः स्वरूपादेवेत्याहुः तन्न तथासति मय्येवेति वाक्यान्तरेऽधिकरणत्वेन जीवोक्त्यसंभवापत्तिरित्याशयेन द्वितीयं स्थलमुक्तम् । एतेन नृसिंहोपासनेत्यादिभाष्यं विवृतं ज्ञेयम् । **तथे**ति अमृतत्वाभयत्वरूपेण । **भाष्ये** । **तथे**ति स्वात्मत्वेनैव । **प्रकृते** । **अन्यथे**ति । **उदशरावे** उदकयुक्ते शरावे । **तस्य** जीवस्य जाग्रत्साक्षित्वं इन्द्रियैर्विषयग्रहणलक्षणजाग्रदवस्थासाक्षित्वं तच्च ज्ञानज्ञेयानामाविर्भावतिरोभावज्ञानात्स्वयमेवमा-विर्भावतिरोभावहीनः स्वयंज्योतिः स साक्षीत्युच्यते इति सर्वोपनिषच्छ्रुतेः स्वयं ज्योतिष्ट्वं तदाविर्भूतस्वरूपत्वेन जीवस्यास्त्येव । एवं स्वप्नः सुप्तस्य विज्ञाने तत्साक्षित्वम् । सुषुप्तिस्तु अकामरूपो भगवान् तत्साक्षित्वं तदन्वेतदमृतमभयमेतद् ब्रह्मेति श्रुतिभिः सर्वत्रावस्थात्रयेषु तस्य जीवस्यामृत-रूपत्वमेव निरूप्यावस्थानामतात्त्विकत्वं शरीरस्य नाशमनु एष नश्यति नाहमत्र भोग्यं पश्यामीत्ये-वमवस्थात्रये विजातीयश्रुत्योक्त्या उपसंपद्येत्यत्रोपोपसर्गे व्याख्याते क्रीड विहार इत्यस्य व्याख्याने प्रजनादिकर्ता हारो हरणं चोक्तम् । तत्पुष्टिमार्गीयमुख्यत्वाद्विवृतम् । अत्र तु पूरकस्याविर्भूतत्वात् प्र-पूरकः जनः प्रादुर्भावकर्तृत्वाद्ब्रह्मणः तस्य गतिकर्ता प्रेरणकर्ता साधनेषु मनसः कर्मज्ञानभक्ति-योगेषु कर्मणि योगः 'योगः कर्मसु कौशलम्' इति कर्मयोगाध्यायात् कर्मयोगः कर्मसु कौशलम् । ज्ञाने योगः आत्मदर्शकत्वम् 'अयं हि परमो योगो यद्योगेनात्मदर्शनम्' इति वाक्यात् । भक्तौ

प्रजापतिः। अन्यथा प्रतिबिम्बादावमृताऽभयवचनं मिथ्या स्यात्। इन्द्रे त्वाविर्भावाभावात् प्रजापत्यसन्निधाने विपरीतं पश्यति । अतस्तावन्मात्रदोषपरिहारायान्यथोपदेशः । स्वप्नादिषु तथा प्रकृतेऽपि । सुषुप्तावस्थायां भगवदाविर्भावात् तथा वचनम् । तस्मादुभयमपि भगवत्प्रकरणमेव । एवमन्यत्रापि भगवदावेशकृता भगवद्धर्माभिलापा ऊह्याः। तस्माद्दहरः परमात्मैव ॥ १९ ॥

भाष्यप्रकाशः।

अन्यथेत्यादि । प्रतिबिम्बादावित्यत्रादिपदेन शरीरसंग्रहः । तथाच यदि पुरःस्फूर्तिकमाद्रियते, तदा बाधितार्थत्वप्रसङ्गः । यदि चैतं त्वेव त इत्यादिवाक्यानुरोधात् प्राकरणिकमाद्रियते, तदा तु प्रजापतिना स्वाभिसंहितस्य परमात्मन एवानुव्याख्येयत्वकथनादिन्द्रस्य तदबोधेन तत्र जीवोक्तिभ्रमेति तन्निवृत्त्यर्थं तस्य परं ज्योतिःसंबन्धेन स्वरूपाभिनिष्पत्तिवचनान्न तस्य तथात्वं स्वाभाविकमपि तु ब्रह्मस्वरूपाविर्भावकृतमेवेति नैतदनुरोधेन पूर्वप्रकरणेऽपहतपाप्मत्वादिगुणकत्वं प्रकरणित्वं च जीवे वक्तुं शक्यम् । प्रजापतिवाक्येऽपि जीवस्य प्रकरणित्वेनासिद्धत्वादित्यर्थः । नन्वेवं सतीन्द्रस्य कुतः संदेहसंभव इत्यत आहुः **इन्द्रे त्वित्यादि । प्रजापत्यसन्निधाने** इति अन्यथा तदानीमेव व्युत्तिष्ठेदनाप्तत्वं वा प्रजापतौ निश्चिनुयात् । **तावन्मात्रदोषपरिहारा-येति** स्वासन्निधाने विपरीतदर्शनपरिहाराय । **अन्यथोपदेश** इति देहादिविलक्षणतयोपदेशः । **तथा वचनमिति** स्वरूपाभिनिष्पत्तिवचनम् । शेषं स्फुटम् ॥ १९ ॥

रश्मिः ।

योगो ध्यानादिसमाध्यन्तरूपः सर्वत्र प्रसिद्धोपदेशादित्यधिकरण उक्तः । एवं समाध्यवस्थायां मनसि सर्वतो निवृत्तव्यापारे इत्यादि तदधिकरणभाष्येऽधिकरणत्वेनोक्ते मनसि तं पूर्वोक्तमेवं जीवं तादृशमवबोधकर्तारं मनोस्य दैवं चक्षुरिति श्रुतौ प्रत्यभिज्ञायते जीवन्मुक्तप्रसङ्गेनोपलब्धनिजसुखानुभवस्याधिकरणोक्तस्यात्र विवक्षितत्वात् । एतेन तस्योदशराव इत्यादिभाष्यफक्किकापि विवृता । अस्मात्प्रकारादन्येन प्रकारेणेत्यर्थः । **बाधितेति** अमृताभयांशे बाधितः प्रतिबद्धोर्थो यस्यास्तत्त्वप्रसङ्गः । यदत्र शंकराचार्याः एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मादिति प्रतिज्ञाय अत्र अन्यत्र इत्यन्यत् मघवन् मर्त्यं वा इदं शरीरमित्यादिना प्रपञ्चेन शरीरादुपाधिसंबन्धप्रत्याख्यानेन संप्रसादशब्दोदितं जीवं स्वेन रूपेणाभिनिष्पद्यते इति ब्रह्म स्वरूपापन्नं दर्शयन्न परस्माद्ब्रह्मणोऽमृताभयस्वरूपादन्यं जीवं दर्शयतीत्याहुः तं निराचक्रुः **यदि चेति । प्राकरणिकमिति** जीवम् । **स्वेति** मनोरूपे दिव्ये चक्षुष्यभिसंहितस्य । ननु कुत एतदिति चेन्न मनोवबोधो मनुते इति व्युत्पत्तेः मनोस्य दैवं चक्षुरिति श्रुतौ मनसोवबोधात्मकस्य पूर्वमुपपादनात् । दैवं दिव्यं 'दिव्यं ददामि ते चक्षुः' इति गीतैकादशाध्यायवाक्यात् । चष्टे चक्षः चक्षिङ् व्यक्तायां वाचि अदादिरात्मनेपदी सेट् । **अस्य** जीवन्मुक्तस्य मनोऽधिकरणात्मकमवबोधरूपमस्य जीवन्मुक्तस्य परमैश्वर्य कर्तृ । दैवं दिव्यं दिवि भवं भवार्थे यत् । चक्षुः क्रिया चष्टे चक्षिङ् व्यक्तायां वाचि अदादिरात्मनेपदी सेट् चष्टे वि-प्रजनादिकर्तृ सत् अक्ता अज गतिक्षेपणयोः भ्वादिः परस्मैपदी सेट् अज्यते भावे क्तः टाप् एतादृशी क्षेपणं प्रेरणं पूरक क्षेपरूपा गतिरूपा वाक् वच परिभाषणे अदादि परस्मैपदी अनिट् क्वचिद् वच भाषणे भाष व्यक्तायां वाचि वक्तीति वाक् तस्याः कर्तृ भाषणकर्तृ कर्तृ । एवेति भूयः पदादेवेति ।

अन्यार्थश्च परामर्शः ॥ २० ॥

परामर्शस्य प्रयोजनमाह। अन्य एवार्थः प्रयोजनं यस्य। तस्माद् यमहरहर्वा एवंवित् स्वर्गं लोकमेति। स्वस्यैवं ज्ञाने हि ब्रह्मसुखं फलं ब्रह्मज्ञाना-

---

भाष्यप्रकाशः।

अन्यार्थश्च परामर्शः ॥ २० ॥ सूत्रमवतारयन्ति परामर्शस्येत्यादि। सोऽर्थः को वेत्यपेक्षायामाहुः तस्मादित्यादि। प्रथमे प्रकरणे, तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति, तानि ह वा एतानि त्रीण्यक्षराणि स ति यमिति। तद्यत् सत् तदमृतमथ यत् ति तन्मर्त्यमथ यद् यं तेनोभे यच्छति। यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवंवित् स्वर्गं लोकमेतीति वाक्ये स्वस्य भगवद्विषयके अमृतमर्त्ययमयितृत्वज्ञाने सति ब्रह्मसुखं फलमुक्तम्। अतस्तत्साधनभूत-

रश्मिः।

एतं त्वेव ते भूयोनु व्याख्यामीति श्रुतेः। तन्निवृत्तीति केवलजीवनिरूपणभ्रमनिवृत्त्यर्थम्। अमृताभययोर्ब्राह्मत्वार्थं च। तथात्वममृताभयरूपत्वम्। असिद्धेति य आत्मा अपहतपाप्मेत्यादिप्रश्नवाक्येऽपहतपाप्मेत्यादिकथनात् उत्तरे चामृताभयरूपत्वकथनाच्च ब्रह्मधर्मोक्तेर्जीवस्यासिद्धत्वात्। न च जीवो नैतादृश इत्यत्र को हेतुरिति शङ्क्यम्। अवस्थाभेदानामेव तत्त्वात्। न च न तासामवस्थानां तदभावगमकत्वमागन्तुकत्वादिति शङ्क्यम्। घ्नन्ति त्वेवैनं विच्छादयन्तीवा प्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीति एतद्विरुद्धधर्माणां भयादीनां जीवे बोधनात्। स्वप्न एनं जीवं केचन घ्नन्तीव विद्रावयन्तीवेत्येवमप्रियवेत्ता भवति रोदितीवेत्येनमप्रियवेत्ता। नाहमिति प्रजापतिं प्रतीन्द्रोक्तिः एवं सति परमात्मन्युपदिष्टे सति 'छिद्यन्ते सर्वसंशयाः' इति श्रुतेः। संशयनाशात्कुतः। अन्यथेति विपरीतं भ्रमविषयः शरीरादावनात्मत्वं तस्य दर्शनं करोतीतीन्द्रः परं त्वाविर्भावाभावात् प्रजापत्यसंनिधाने चेति भाष्य उक्तम्। तत्र प्रजापत्यसंनिधान इति न वक्तव्यमेकेन हेतुना चारितार्थ्यात् मैवं अन्यथा प्रजापत्यसंनिधान इति वाक्याघटितत्वेन भाष्यफक्किकाप्रकारेण। तदानीमिति प्रजापतिसंनिधिकाले ॥ १९ ॥

अन्यार्थश्च परामर्शः ॥ २० ॥ परामर्श उपस्थापनम्। सूत्रमिति ननु प्रकरणद्वयं ब्राह्ममेवेति जीवपरामर्शः किंप्रयोजनक इत्याकाङ्क्षायां सूत्रमवतारयन्ति स्म। तस्मादित्यस्यार्थं वक्तुमाहुः प्रथम इति। सतीति स एकमक्षरम् ति द्वितीयं इकार उच्चारणार्थः इत्यन्ये सिद्धान्ते तु वेदो नाक्षरमात्रमप्यन्यथा वक्तीति वरेणियं वरेण्यमितिवत् सतियं सत्यमिति भवति अन्यत्र मित्र वयं च सूरयः मित्रा वयमिति प्राप्ते निरुक्तपक्षे वर्णलोपः। यं तृतीयम्। तेनेति यकाराक्षरेणोभे सति अक्षरे यच्छति ददाति संयोजयति इत्यपरे। तस्मादिति पूर्वोक्तस्य यदित्यस्य यस्मादित्यर्थोऽनेनोभे यच्छति यस्मात्तस्मादित्यर्थः। यमिति योंश उभे यच्छति सोंशोयमिति। दा दाने इत्यस्य यच्छादेशः डमुप्रत्ययश्च। रश्मौ साध्येर्थे यता पूर्वं साधितं सत्यनया व्युत्पत्त्या विकल्प्यते। यद्यप्युक्तार्थस्य बाधः तथापि साङ्गो वेदो ध्येयो ज्ञेयश्चेति श्रुतावङ्गपदार्थत्वेन श्रुतित्वात् अव्ययः। स्वर्गमिति हृदयब्रह्मलोकम्। स्वस्येति भाष्यं व्याचख्युः स्वस्येति अमृतं स मर्त्यं ति जयोर्नियमयितृत्वज्ञाने। अत्र यम उपयमे भ्वादिः परस्मैपदी सेद् इत्यस्य रूपम्। उभे यच्छतीत्यत्र मकारस्य यकारः। छन्दसि व्यत्ययः यथा तपसो गामदुक्षत्। अधुक्षदिति प्राप्ते। तथा मकारस्य यः व्यत्ययः।

पेक्षायामुपयुज्येत । भगवतश्च तदाविर्भावो भवतीति चकारार्थः । संपत्तौ भगवदावेशकथनार्थं वक्ष्यति च, 'स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि' इति चतुर्थे । तस्मान्न परामर्शेनान्यथा वल्गनम् ॥ २० ॥

भाष्यप्रकाशः ।

ब्रह्मज्ञानाऽपेक्षायाममृतभूतजीवज्ञानमुपयुज्येत । युक्तं चैतत् । न हि यन्तव्यज्ञानं विना तद्यमयितृत्वं ज्ञातुं शक्यते । अतो मर्त्यस्य प्रसिद्धत्वादमृतज्ञापनार्थं जीवपरामर्शः स च जीवस्य परममुक्तिदशायामपि ब्रह्मनियम्यत्वे पर्यवस्यति परं ज्योतिरुपसंपद्यत्वेन रूपेणाभिनिष्पन्नस्यैव जीवस्यामृतरूपत्वसिद्धेः । अतस्तदानीमपि परापरभावघटित एवाभेद इति ज्ञानार्थं परामर्श इति फलति । इदमेव 'अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्' इति वेदस्तुतावपि सिद्धम् । अग्रिमेपि ज्योतिर्दर्शनाधिकरणेपि अतिरिक्तभगवद्धर्मत्वेन भगवन्निर्णायकतया वक्तव्यम् । किं च । इतः पूर्वमथ य एष संप्रसाद इत्यादिना स्वरूपाभिनिष्पत्तिकथनात् तदा ज्ञानदशायां भगवदाविर्भावो ज्ञापितः । सोऽयमेतत्सूत्रस्थस्य चकारस्यार्थः । तेन सूत्रेऽन्यार्थ इत्यस्य, स्वरूपयोग्यतासिद्ध्यर्थः, संपत्तौ भगवदावेशकथनार्थश्चेत्यर्थः सिद्ध्यति । तथाच फलार्थं स्वरूपयोग्यतासहकारिसंपत्त्योर्बोधनाय जीवपरामर्श इत्यर्थः । ननु कैश्चित् मघवते परमं रूपं करतलस्थबिल्ववत् प्रदर्शयितुं य एषोक्षिणीत्यादि कर्तृभोक्तृत्वादि जैवरूपपरामर्श इति । अन्यैस्तु, यदस्योपसंपत्तव्यं परं ज्योतिस्तद् अपहतपाप्मत्वादिगुणविशिष्टतयोपास्यमित्येतदर्थं जीवपरामर्श इति नानाव्याख्यानादयमेव सूत्रार्थ इति कथं निश्चेयमित्यत आहुः वक्ष्यतीत्यादि तथा चैतत्सूत्रस्वारस्यादयमेवार्थ इत्यर्थः ॥ २० ॥

रश्मिः ।

ब्रह्मैति स्वर्गपदस्य ब्रह्मसुखवाचकत्वं निबन्धे स्पष्टम् । जीवेति । परामर्श उपस्थापनम् । ननु तथापि जीवे कथममृतशब्दप्रयोगः इत्याशङ्कामपनुदन्तश्चकारार्थं भाष्ये आहुः भगवतश्चेत्यादिना । तद्विवृण्वन्ति स्म किं चेति । अर्थ इति तथा च भगवत आविर्भावेन जीवस्याक्षरात्मकत्वादमृतपदप्रयोगो न दुर्घट इति भावः । चकारार्थमाहुः संपत्ताविति । स्वरूपेति स्वरूपयोग्यताऽन्यपदस्यार्थः । चकारार्थः सहकारीत्यादिः । जीवेति न तु प्रकरणित्वाय । भास्कराचार्यमतमाहुः कैश्चिदिति । शंकराचार्यमतमाहुरन्यैरिति । नानेति ब्रह्मामृतवर्षिणीकृता तु अत्र ब्रह्मोपदेशो जीवोपसंपत्तव्यत्वेन रूपेण स च जीवपरामर्शमन्तराऽनुपपद्यमानः सञ्जीवं परामृशतीति ब्रह्मपर एवायं परामर्श इत्युच्यते । रामानुजाचार्यैस्तु प्रजापतिवाक्ये च मुक्तात्मस्वरूपयाथात्म्यविज्ञानं दहरविद्योपयोगितयोक्तम् । अतो मुक्तस्य तदुपसंपत्त्यपहतपाप्मत्वादिकल्याणगुणविशिष्टस्वाभाविकरूपप्राप्तिकथनेन तद्धेतुत्वरूपं परपुरुषसाधारणरूपमुपदेष्टुं प्रजापतिवाक्योक्तजीवस्यात्र परामर्श इति । मध्वाचार्यैस्तु यं प्राप्यत्वेन रूपेण जीवो निष्पद्यते स एष आत्मेति परमार्थश्च परामर्श इति उत्तराच्चेति सूत्रोक्तयत्प्रसादात् स मुक्तो भवति स भगवान् पूर्वोक्त इति चकारार्थः । इति नानाव्याख्यानादित्यर्थः । इत्यर्थ इति । भाष्ये । अन्यथेति जीवब्रह्मवादकल्पनादन्येन प्रकारेण ब्रह्मवादनयनम् । वल्ग गतौ भ्वादिः परस्मैपदी सेट् ॥ २० ॥

१. कल्पनम् ।

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥

ननु न वयं जीवे उपपत्तिरस्तीति जीवप्रकरणं कल्पयामः किंतु ब्रह्मणि नायमर्थ उपपद्यते । अल्पश्रुतेः । अल्पे हि पुण्डरीके कथं भगवदवस्थानम् । व्यापकत्वश्रवणात् । यावान् वाऽयमाकाश इति । तस्माद् विरोधपरिहाराय जीव एवाराग्रमात्रस्तथा भवत्विति कल्प्यत इति चेत्तर्हि भवान् सम्यग्विचारकोऽस्मदीय एव । परं तत्समाधानं पूर्वमेवोक्तं 'निचाय्यत्वादेवं व्योमवच्च' इत्यत्र । तन्न प्रस्मर्तव्यम् । विरोधस्तु सर्वभवनसमर्थे ब्रह्मणि नाशङ्कनीयः । तथा पुरुषशरीरं च ।

'पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः ।
आविस्तरां प्रपश्यन्ति सर्वशक्त्युपबृंहितम्' ॥

इति भगवद्वाक्यात् । तस्माद् भगवानेव दहर इति सिद्धम् ॥ २१ ॥

इति प्रथमाध्याये तृतीयपादे पञ्चमं दहराधिकरणम् ॥ ५ ॥

अनुकृतेस्तस्य च ॥ २२ ॥ (१।३।६)

दहरविरुद्धं वाक्यमाशङ्क्य परिहरति । 'न तत्र सूर्यो भाति, न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा

भाष्यप्रकाशः ।

अल्पश्रुतेरिति चेत् तदुक्तम् ॥ २१ ॥ तथा पुरुषशरीरं चेति । विजिघत्सोऽपिपास इत्यादिभिर्धर्मैः सूचितं पुरुषशरीरं च विरुद्धमिति नाशङ्कनीयमित्यर्थः । स्फुटमन्यत् । एवमत्र जीवब्रह्मवादनिराकरणेन जीवादधिको विरुद्धधर्माश्रयो भगवानिति साधितम् । तेन भक्तिमार्गीयोपासनायां तादृश एव साक्षाद्भवतीत्यपि सिद्ध्यति । अत्र च, यावान् वेति वाक्येन स्थितिकर्तृत्वं हार्दाकाशेऽतिव्याप्तमाशङ्क्य तन्निवारितमिति बुद्धिस्थानात्मिकैवाधिकरणसंगतिः ॥ २१ ॥

इति पञ्चमं दहराधिकरणम् ॥ ५ ॥

अनुकृतेस्तस्य च ॥ २२ ॥ उपोद्घातरूपामधिकरणसंगतिं बोधयितुमाहुः दहरेत्यादि । मुण्डककठवल्ल्योर्ब्रह्मप्रकरणत्वस्यादृश्यत्वाद्यधिकरणेषु साधितत्वात् तद्वाक्यस्य ब्रह्मपरत्वेन तद्विरुद्धं

रश्मिः ।

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥ भाष्ये । यावानिति 'तावानेष अन्तर्हृदय आकाशः' इति । तथेति तदन्तःस्थत्वेन भवति । पूर्वमिति द्वितीयपादे । स्फुटमिति । पुरुषत्वे चेति वाक्यमेकादशस्कन्धस्थम् ॥ २१ ॥

इति पञ्चमाधिकरणम् ॥ ५ ॥

अनुकृतेस्तस्य च ॥२२॥ अदृश्येति आदिपदेनात्ता चराचराधिकरणम् । तद्विरुद्धमिति सूर्याद्यभानविरुद्धम् । तद्भानं तस्य कथकरूपम् । 'यावान्वा अयमाकाशस्तावानेषोन्तर्हृदयाकाशः उभे ह्यस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि

सर्वमिदं विभाति' इति कठवल्ल्यामन्यत्र च श्रूयते । यत्तच्छब्दानामेकार्थत्वं प्रकरणाद् ब्रह्मपरत्वं चाऽवगतम् । अर्थाच्च संदेहः ।

यस्मिन् द्यौरित्यत्र सूर्यादीनां ब्रह्माधारत्वमुक्तम् । अस्मिंश्च वाक्ये पूर्वार्धे तत्र तेषां भानं निषिध्यते ।

'यत्र यत् सर्वदा तिष्ठेत् तत्र चेत्तन्न भासते ।
क्व भासेताप्यपेक्षायां कर्मत्वे श्रुतिबाधनम्' ॥

भाष्यप्रकाशः ।

दहरवाक्यं न ब्रह्मपरमित्येतन्निरसितुं तथाशङ्क्येत्यर्थः । कठवल्ल्यामन्यत्र चेति तस्याः पञ्चमवल्लीसमाप्तौ, मुण्डकस्य द्वितीयमुण्डकसमाप्तौ च श्रूयते । विषयमुक्त्वा संशयं तद्बीजं चाहुः यत्तदित्यादि । कठवल्लीस्थानां, य एष सुप्तेषु जागर्ति, मन्त्रान्तरे, 'तस्मिन् लोकाश्रिताः सर्वे' इति । अस्मिन् मन्त्रे तमेव भान्तमिति । मुण्डके, 'यत्र देवः क्रतुभिर्भूतिभावनः' इति, मन्त्रान्तरे, न तत्र सूर्यो भातीति यत्तच्छब्दानामेकार्थत्वं ब्रह्मपरत्वं चावगतम् । तथाप्यर्थादेव संदेह इत्यर्थः । अर्थात् कथं संदेह इत्याकाङ्क्षायां तमुपपादयन्ति यस्मिन्नित्यादि । उक्तमुण्डकश्रुतौ द्युलोकादीनां भगवदाधारकत्वकथनात् सूर्यादीनां ब्रह्माधारत्वमुक्तम्, एतद्वाक्यपूर्वार्धे च भानं निषिध्यते । अतः संदेहः । नच भाननिषेधमात्रात् कथं संदेह इति शङ्क्यम् । यत्र यदित्याद्युक्तरीत्या बाधितार्थत्वेन संदेहसंभवात् । नचोत्तरार्धे तमेवेत्यादिना तदपेक्षयाधिकभान एव निषेधपर्यवसानसिद्धेर्न बाधितार्थत्वमिति वाच्यम् । तदाप्यकर्मकस्य धातोः कर्मकथनेन कर्मत्वे

रश्मिः ।

यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितम्' इति दहरवाक्यम् । **बीजमिति** अर्थरूपम् । **जागर्तीति** अग्रे 'कामं कामं पुरुषो निर्मिमाणः तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते' इति । **मन्त्रान्तर** इति संनिहिततरे । **इतीति** । अग्रे 'तदु नात्येति कश्चन एतद्वै तत्' इति । **मन्त्र** इति । व्यवहित इति विशेषणम् । **भूतिभावन** इति । अग्रे 'स्वयं विभूत्या विरजः प्रकाशते' इति । **मन्त्रान्तर** इति संनिहिततरे । **भाष्ये चकार** एवकारार्थे इत्याहुः **अर्थादेवेति** । **उक्तेति** भाष्योक्तेत्यर्थः । श्रुतिस्तु 'यस्मिन्द्यौः पृथिवी चान्तरिक्षं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः' इति । **यत्र यदिति** भाष्यमवतारयन्ति स्म **न चेति** । **यत्रेति** यत्र यदित्यादिभाष्योक्तरीत्या । **निषेधेति** यथा सूर्यभाने चन्द्रतारकाभानं तद्वत् । **अप्यपेक्षायामिति**भाष्यं विवृण्वन्ति स्म **न चोत्तरेति** अप्यपेक्षास्वरूपं विवृतम् । अबाधितार्थत्वापेक्षेयम् । तस्यामपीति भाष्यार्थः । **क्व भासेतापीत्यपरन्वयो** वा । कार्यत्वमिति भाष्यं विवरामासुः **तदापीति** । अकर्मकत्वं धातुना गृहीतकर्मत्वेन तथा च कस्यचित् ।

'लज्जा सत्ता स्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।
शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः' ॥ इति ।

कर्मेति दहरविद्यायां यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमित्यत्र समाधीयते सर्वमिति सर्वं कर्मरूपम् । दधातेर्हि तादौ किति । अस्ति सूर्यभाः सापि समाहितोच्यते छान्दोग्ये । मुण्डके तु न तत्र सूर्यो भातीति भा निषिध्यते इति कार्यत्वे भारूपकर्मत्वे च छान्दोग्यश्रुतिबाधनम् । भाष्यं व्याख्याय शेषं पूरयामासुः **तेनेति** तथा च सूर्यादेः भानं तत्र वर्तते न वेति संदेहः पर्यवसितः ।

यत्रेत्यधिकरणसप्तमी। यत्र लोकान्तरस्थितानामप्यभानं, तत्राग्नेः का वार्तेति वचनात् सत्यलोकस्थितः कश्चित् तेजोविशेष एव वाक्यार्थ इत्येवं प्राप्ते।

उच्यते। अनुकृतेस्तस्य। भगवदनुकारार्थमेवैतद्वचनम्। स्वतो भाननिषेधः पूर्वार्धे। सर्वोऽपि पदार्थस्तमेवानुकरोति, सूर्यं रश्मय इव, छाया पुरुषमिव। तस्माद् वाक्ये भगवदनुकारित्ववचनान्न नानार्थकल्पनम्। किंच तस्य भासा सर्वमिदं विभाति' इति सूर्यादीनां स्वतः प्रकाशो नास्त्येव। घटवत्। भगवत्प्रका-

भाष्यप्रकाशः।

श्रुतिबाधनम्। तेन संदेह इत्यर्थः। अत्र पूर्वपक्षी श्रुतिं व्याकुर्वन् समाधत्ते तत्रेत्यादि। अस्याः श्रुतेर्न सूर्यादीनामभाने तात्पर्यं, किं तु, 'गजा यत्र न गण्यन्ते मशकानां तु का कथा' इतिवद् यत्र लोकेत्याद्युक्तरीत्या वचनादग्न्यभान एव तात्पर्यमतो न पूर्वार्धे दोषः। उत्तरार्धे तु, तमेव भान्तमिति कथनादग्न्यप्रकाशशालिनि सत्यलोके स्थितः कश्चित् तेजोविशेष एवोच्यते सूर्यादितेजोऽभिभावकः। इदानीमपि।

'खद्योतो द्योतते तावद् यावन्नोदयते शशी।
उदिते तु सहस्रांशौ न खद्योतो न चन्द्रमाः' ॥

इति तेजोविशेषस्यैव सजातीयाभिभावकत्वस्य प्रसिद्धत्वात्। नच कर्मत्वांशे श्रुतिबाधः। अनोः कर्मप्रवचनीयत्वेन तद्योगे जाताया द्वितीयाया उपपदविभक्तित्वेनार्थाभावादतः स एवाबाधितो वाक्यार्थ इत्येवं प्राप्ते इत्यर्थः। समाधिं व्याकुर्वते भगवदित्यादि। सत्यलोके अग्न्यभाने वाक्यपूर्वार्धतात्पर्यं यदुक्तं तन्न। उत्तरार्धे सर्वस्य तदनुकारित्वकथनात् सर्वस्य तद्भासा भानकथनाच्च। तथा सति सर्वस्य भगवदनुकारार्थमेवैतद्वचनम्। एतस्यैव विवरणं, स्वतो भाननिषेधः पूर्वार्ध इत्यादि। तर्हि पूर्वपक्षोक्ततेजोविशेषानुकारार्थमेव वाक्यप्रवृत्तिरस्त्विति चेत्तत्राहुः तस्मादित्यादि। उपनिषद्द्वयेऽपि वाक्यस्य प्रकरणसंदष्टत्वात् प्रकरणिभूतभगवदनुकारित्ववचनमनुसंधाय अन्यार्थभूततेजोविशेषकल्पनं न युक्तमित्यर्थः। सिद्धमाहुः

रश्मिः।

खद्योतः पक्षिविशेषो गुदप्रत्यक्षतेजाः सूर्यादितेजोभिभवे तमेव भान्तमनुभाति सर्वं इत्यत्र सर्वं कर्तृ तं भान्तं भातीति वचनव्यक्तेः कर्मत्वांशे श्रुतिबाधनम्। **अर्थाभावादिति** कर्मरूपार्थाभावात्। एवमिति सूर्यादेस्तत्र न भानमिति पूर्वपक्षे प्राप्ते। **तदन्विति** तस्य ब्रह्मणोऽनुकृतिरनुकारोऽनुकरणमिति यावत्। सोस्यास्तीत्यनुकारि सर्वम्। अनुकारि सर्वं इति वा सर्वोपि पदार्थ इति भाष्यात्। इत्यादीति। **भाष्ये। सर्वोपीति**। तेन ताण्डवनृत्यादिकमपि तदीयनृत्यादिकमनुकरोतीत्युक्तम्। दशमे पञ्चदशे

'उपगीयमानचरितः स्रग्वी संकर्षणान्वितः।
क्वचिच्च कलहंसानामनुकूजति कूजितम्।
अभिनृत्यति नृत्यन्तं बर्हिणं हासयन् क्वचित्' ॥

इति तु रसान्तःपातिनः पदार्थास्तदात्मकाः लौकिकीभाषा वा। **वाक्येति** 'न तत्र सूर्यो भाति' इति पूर्वार्धे सूर्यादिभाननिषेधः। 'तमेव भान्तमनुभाति' इत्युत्तरार्धे भानमित्येवं विरोधे तस्य भासेत्युत्तरार्धनिर्णायकत्वाद्वाक्यशेषमित्युच्यते। भानं नास्ति ब्रह्मभासा तु भानमिति। ननु विषयवाक्ये सर्वस्य कर्तृत्वेन क्रियायां स्वातन्त्र्यात् ब्रह्मणस्तु न तत्रेत्यधिकरणत्वात्

शेनैव प्रकाशवत्त्वमिति चकारार्थः । तस्मात् स्वतोऽभाने लक्षणया कर्मत्वे वा भगवत्परत्वे सिद्धे नान्यार्थकल्पनम् ॥ २२ ॥

अपि स्मर्यते ॥ २३ ॥

व्याख्यातेऽर्थे संमत्यर्थमाह । अपीति समुच्चयः ।

भाष्यप्रकाशः ।

तस्मादित्यादि । तस्य भासेत्यादिवाक्यशेषात् स्वतोऽभाने अनुकरणवचनात् कर्तृक्रियया अनाप्यस्यापीष्टतमत्वमात्रेणाऽऽप्यसारूप्यप्रयुक्तया गौण्या कर्मत्वे वा वाक्यस्य भगवत्परत्वसिद्धौ नान्यार्थकल्पनं युक्तमित्यर्थः ॥ २२ ॥

अपि स्मर्यते ॥ २३ ॥ अत्र भाष्यमुत्तानार्थम् । एवमत्र सूर्याद्यभासनाशङ्कितविरोधपरिहारेण दहरवाक्यानुगुण्यमस्य साधितम् । किंच परामर्शसूत्रे जीवस्य मुक्तिपर्यन्तासु सर्वावस्थासु

रश्मिः ।

तस्य भासेत्यत्र संबन्धित्वाच्च सूर्यादिपरमिदं वाक्यमित्याकाङ्क्षायामाहुः **अनुकरणेति** तथा चास्माद्धेतोः शब्दतो गौणत्वेप्यर्थतो मुख्यत्वाद् गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययेन ब्रह्मपरं वाक्यम् । **लक्षणयेति** भाष्यं विवरामासुः **कर्त्रिति** । अयमर्थः । फलं मुख्यं न कर्ता तथाहि 'कर्तुरीप्सिततमं कर्म' इति पाणिनिसूत्रे कर्तुः क्रियया यमिष्टतमं कारकं कर्म तच्च त्रिविधं कर्म प्राप्यं विकार्यं निर्वर्त्यं च प्राप्यं ग्रामादि ग्रामं गच्छतीत्यादौ, विकार्यं काष्ठादि काष्ठं भस्म करोति, निर्वर्त्यं घटं करोति क्रियानिष्पाद्यम् । तत्र तमेव भान्तमनुभाति सर्वमित्यत्र ब्रह्मणो विकार्यनिर्वर्त्यत्वयोरभावेनाप्यकर्मत्वं वाच्यम् । तदपि न परसमवेतधात्वर्थतावच्छेदकफलशालित्वं तच्च भानं धातुना गृहीतकर्मत्वेन भातेरकर्मकत्वान्नास्त्यतः कर्तृक्रिययाऽनाप्यस्य भगवतः सूर्याद्यपेक्षया नृप स्वात्मैव वल्लभः इति वाक्यादिष्टतमत्वमात्रं तेन आप्यस्य ग्रामादेः सारूप्यं तत्प्रयुक्तया 'लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता' इति काव्यप्रकाशात्स्वोत्कृष्टत्वसंबन्धेनेष्टतमत्वमुभयत्रापि दृश्यमानं लक्षितं तेन गुणेन योगात् गौण्या भगवतः कर्मत्वं तस्मिन् सति अनुकरणस्यानुकार्याधीनत्वेन भगवता मुख्यत्वाद्वाक्यस्य भगवत्परत्वसिद्धिस्तस्याम् । ननु अन प्राणने अनितीत्यनु उप्रत्ययः पूरकप्राणकर्तरि अनुप्रयोगस्तत्संपर्कात् भातेरकर्मकस्यापि सकर्मकत्वाल्लक्षणया कर्मत्व इतिभाष्यं कुत इति चेन्न तथासति सर्वं कर्तृ भान्तं तं स्वगतसदृशानां पूरकाणां कर्मनिष्ठप्राणानामकर्तृत्वे कर्तारं करोति इत्यनुभातीत्यस्यार्थः स चासंगतः सर्वाकर्तृत्वे भगवतः प्राणानां नित्यत्वेनाकृतिसाध्यत्वेन बाधितार्थत्वप्रसङ्गात् । एवमपि सूर्यादिनिष्ठमेव पूरकत्वादि ततश्चाकर्मकत्वे लक्षणया कर्मत्व इतिभाष्यं नित्यलीलानिरूपणस्य च आविर्भावतिरोभाववतः श्रुतावभावात् । **इत्यर्थ** इति तदपेक्षया सूर्यादेर्नाधिकं भानं न तु भानाभावस्तत्रेति सूर्याद्याधारो विचारितः सूर्यादिभानभानाभावधर्माभ्याम् । अथातो ब्रह्मजिज्ञासेत्यत्र शेषषष्ठ्या ब्रह्मसंबन्धिनां विचारस्य प्रतिज्ञातत्वात् ॥ २२ ॥

अपि स्मर्यते ॥ २३ ॥ **भाष्ये** । **इति चेति** सौत्रोपि चकारार्थ इति भाष्यार्थः । **प्रकृते** । **विरोधेति** । छान्दोग्यीयदहरविद्याविरोधेत्यर्थः । **साधितमिति** तेन मुक्तिदशायां तदनुकारित्वरूपमेव साम्यं जीवस्य तु न परममित्यप्यबोधि तेनोपोद्घात उक्तः स एवम् । प्रकृतं छान्दोग्ये दहरविद्यायां यच्चास्येहास्ति यच्च नास्ति तत्सर्वं तदस्मिन् समाहितमित्युक्त्यां सूर्यादिकं सप्रकाशं

१. भगवतः ।

'न तद् भासयते सूर्यो न शशाङ्को न पावकः'।
'यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्' ॥

इति च । तस्माद् भगवानेव सर्वावभासकः । तमेव सर्वमनुकरोतीति सिद्धम् ॥ २३ ॥

इति प्रथमाध्यायस्य तृतीयपादे षष्ठमनुकृत्यधिकरणम् ॥ ६ ॥

भाष्यप्रकाशः ।

ब्रह्मनियम्यत्वं सिद्धम् । तत्प्रसङ्गेनात्रजीवस्य मुक्त्यवस्थायामपि ब्रह्मानुकारित्वमेव कठवल्ल्यां ऋतं पिबन्तावित्यत्र परमपरार्ध्यब्रह्मलोकेपि जीवस्य ब्रह्मछायात्वेनैवासिद्धत्वात् न त्वत्यन्ताभेदः इत्येतद्बोधनायेदमत्र विचारितं तेनेदमधिकरणं पूर्वाधिकरणोपोद्घाततया तस्यैव शेषः ।

रामानुजाचार्यास्तु, इदं सूत्रद्वयं पूर्वाधिकरण एव योजयन्ति । अर्थं त्वेवमाहुः । तस्य दहराकाशस्य ब्रह्मणोऽनुकारादयमपहतपाप्मादिगुणको विमुक्तबन्धः प्रत्यगात्मा, न दहराकाशः । तदनुकारस्तत्साम्यम् । तच्च निरञ्जनः परमं साम्यमुपैतीत्यत्र श्रूयते । अतोऽनुकर्ता प्रजापतिवाक्यनिर्दिष्टः । अनुकार्यं ब्रह्म दहराकाश इति । स्मृतिश्च, 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः' इति । अधिकरणान्तरत्वे बाधकं त्वेवमाहुः । न तत्र सूर्यो भातीति मन्त्राकरभूतस्य वाक्यस्य ब्रह्मप्रकरणत्वम्, अदृश्यत्वाद्यधिकरणद्युभ्वाद्यायतनाधिकरणाभ्यां निर्णीतम् । ज्योतिश्चरणाद्यधिकरणेषु परस्य ब्रह्मणो भारूपत्वमप्यवगतमतो ब्रह्मत्वे भारूपत्वे च संदेहाभावेन पूर्वपक्षानुत्थानात् । श्रुतावनुभातिपदेन सूत्राक्षरवैरूप्याच्चेति । तत्र प्रकरणेन संदेहापायेऽप्यर्थस्य लिङ्गरूपत्वेन प्रबलतया पूर्वोक्तरीत्या पूर्वपक्षस्य शक्यवचनत्वात्, स्वकृतव्याख्यानेऽपि विषयवाक्ये साम्यपदेन सूत्राक्षरवैरूप्यस्य तौल्याच्च तच्चिन्त्यम् ।

भिक्षुस्तु विषयानुल्लेखान्नाधिकरणान्तरम् । किं तु पूर्वसूत्रोक्ताल्पश्रुतिदूषणपरिहारायेदं द्वयम् । तत्रानुकारित्वं च मुखतत्प्रतिबिम्बयोरिव शक्तिशक्तिमतोर्जीवब्रह्मणोः समानव्यापारकत्वम् । तथाच जीवे लिङ्गानुकरणादिव ब्रह्मणि जीवानुकरणादुपपद्यते शक्तेरल्पत्वं शक्तिमत्युपचर्यत

रश्मिः ।

समाहितमित्युक्तम् । तत्सिद्ध्यर्था चिन्ता न तत्र सूर्यो भातीत्यत्र कृतेति सा चिन्तोपोद्घातः । **प्रजापतीति** 'सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्' 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः' इति वाक्यनिर्दिष्टः पर्येति पर्यटन् जक्षन् भक्षन् भोगान् पुरुषोत्तमेन स तदनुकर्तेति श्रुत्यर्थः । द्वितीयसूत्रार्थमाहुः **स्मृतिरिति** । **सूत्राक्षरेति** अनुकृतिरूपेत्यर्थः । **प्रकरणेति** उभयाकाङ्क्षा प्रकरणम् । देशकालौ वा प्रकरणम् । प्रकृष्टं साधकतमं वा करणम् । 'साधकतमं करणम्' इतिसूत्रात् । 'लिङ्गं शब्दस्य सामर्थ्यम्' 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम्' इति तथा । तथा च भाष्यमर्थाच्च संदेह इति चकारेणानुकार्यानुकरणभावस्यादृश्यत्वाधिकरणद्युभ्वाद्यायतनाधिकरणाभ्यामनिर्णीतत्वं समुच्चीयते । **भिक्षुरिति** भगवान् । **अल्पश्रुतीति** अल्पश्रवणं तेन दूषणं विरुद्धधर्माधारत्वं तत्परिहाराय । **लिङ्गेति** अणुत्वस्यानुकरणात् पृथगुपदेशादिति सूत्रे द्वितीयस्य तृतीयपादे जीवात्पृथगणुत्वस्वीकारात् लिङ्गत्वं तु अणुशब्दसामर्थ्यम् । **उपपद्यत** इति अल्पत्वमुपपद्यते । द्वितीयसूत्रार्थमाहुः **स्मृतिरिति** । **लिङ्गान्विति** अणुशब्दसामर्थ्यानुरोधेन पृथगणुत्वोप-

शब्दादेव प्रमितः ॥ २४ ॥ (१।३।७)

प्रसङ्गात् पुनर्बाधकान्तरमाशङ्क्य परिहरति ।

'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सति' ॥

तथा, 'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः' इति तत्रैव श्रूयते । 'यावान् वा अयमाकाशः' इति व्यापकत्वमन्तःस्थितस्य प्रतीतम् । अङ्गुष्ठमात्रता चात्र प्रतीयते । अतो विरोधाज्जीवस्यैव लोकान्तरगन्तृदेहवत उपासनार्थमीशानत्वादिधर्माः ।

अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति तन्निवृत्त्यर्थम् । तस्मादङ्गुष्ठ-

---

भाष्यप्रकाशः ।

इति भावः । स्मृतिश्च, 'कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः' इति । 'शब्दादेव प्रमितः' इति सूत्रमप्यल्पत्वसाधनार्थम् । परमात्मा, अणोरणीयान् महतो महीयानित्यादिशब्दादेव अत्यल्पः प्रकर्षेण मितोऽवगत इत्यर्थात् । न त्वधिकरणान्तरमित्याह ।

तदपि मन्दम् । तदुक्तमिति सूत्रांशेनैव स्थानाल्पत्वदोषपरिहारसिद्धौ पुनस्तदर्थकप्रयासस्य वैयर्थ्यात् । जीवाल्पत्वस्य लिङ्गानुरोधेनौपचारिकत्वात् तस्य किं वानुकरणमित्यप्यसंगतम् । संकुच्य प्रदेशविशेषेण स्थितिरूपस्यैव व्यापारस्य पूर्वत्रापि सिद्धेर्विशेषाभावाच्च । अल्पत्वस्य पूर्वोक्तयुक्तिभिरवास्तवत्वाङ्गीकारे पुनस्तस्य शब्देन प्रमितत्वोक्तेरप्यसंगतत्वाच्चेति । न च विषयानुल्लेखादधिकरणान्तरत्वाभाव इत्यपि युक्तम् । उक्तरीत्यार्थेन संदेहे तन्निरासस्यावश्यकत्वादिति दिक् ॥२३॥

इति षष्ठमनुकृत्यधिकरणम् ॥ ६ ॥

शब्दादेव प्रमितः ॥ २४ ॥ बाधकान्तरमिति परिमाणविरोधरूपं तदित्यर्थः । तत्रैव श्रूयते इति । अस्य विषयः कठवल्ल्याश्चतुर्थवल्लीसमाप्तौ श्रूयते । संशयमाहुः यावानित्यादि । तथाचातो विरोधात् संशय इत्यर्थः । पूर्वपक्षमाहुः अत इत्यादि । जीवस्यैवेति 'अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः' इति श्रुत्यन्तरात् तस्यैवेत्यर्थः । ननूपासनार्थमपीशानत्वादिधर्माणामेव ग्रहणे को हेतुरित्यत आहुः अङ्गुष्ठेत्यादि । तथाच तस्मादङ्गुष्ठमात्राद् व्यतिरिक्तत्वमस्मिन् मुक्तजीवे बोधयितुमेतेषां धर्माणां निरूपणमित्यर्थः । अङ्गुष्ठमात्र-

रश्मिः ।

देशाज्जीवेऽणुत्वमौपचारिकं मन्यन्ते भिक्षवः । इत्यपीति इति हेतोर्ब्रह्मणि जीवानुकरणमप्यसंगतम् । संकुच्येति उपाधिना संकुच्येत्यर्थः । पूर्वत्रेति अनुकारित्वलक्षणे ब्रह्मणि जीवसंबन्धिनः सिद्धेः । पृथगुपदेशादिति सूत्रार्थादविशेषात् । अनुकृतिसूत्रवैयर्थ्यमिति भावः । चेतीति चकारेण श्रुत्योर्विरोधे विकल्पप्रास्यौपाधिकत्वमात्रस्यासिद्धेः । दिगिति तेन साम्यं(स्य) हानौ तूपायनशब्दशेषत्वादिति सूत्रे विचारयिष्यते द्वितीयमते पृथगुपदेशादिति सूत्रे चैतन्यगुणस्य पार्थक्यसाधनभाष्यविरोधः ॥ २३ ॥

इति षष्ठाधिकरणम् ॥ ६ ॥

शब्दादेव प्रमितः ॥ २४ ॥ भाष्ये । प्रसङ्गसंगत्याशङ्क्येत्यस्यार्थः । श्रूयत इति तत ईशानादिधर्मविशिष्टात्-वि-वीप्रजनकान्त्यसनासादनेषु प्रजनादिकर्ता जीवन्मुक्तौ जुगुप्सते संदेग्धि

मात्रो न भगवानेवं प्राप्तमत उत्तरमाह शब्दादेव प्रमितः। अत्र संदेह एव न कर्तव्यः। शब्दादेव प्रकर्षेण विमानात्। यथा दहरवाक्ये सूक्ष्मस्यैव व्यापकत्वं, तथाऽङ्गुष्ठमात्रस्यैवेशानत्वम्। यदि भगवाँस्तादृशो न स्यादन्यस्य तादृशत्वं नोपपद्येत। तस्माद् भगवतः सर्वतःपाणिपादान्तत्वाद् यत्र यावानपेक्ष्यते तत्र तावन्तं श्रुतिर्निरूपयतीति अङ्गुष्ठमात्रः परमात्मेति सिद्धम्॥ २४॥

हृद्यपेक्षया तु मनुष्याधिकारत्वात्॥ २५॥

नन्वनेकरूपत्वं विरुद्धधर्मवत्त्वं माहात्म्यार्थं स्वरूपे निरूपयति। प्रादेशमात्रत्वं च ध्यानार्थम्। अङ्गुष्ठमात्रत्वस्य कोपयोग इति चेत् तत्राह। तुशब्देन

भाष्यप्रकाशः।

मिति वाक्यं तु सावित्र्युपाख्याने। 'अथ सत्यवतः कायात् पाशबद्धं वशं गतम्' इति तत्पूर्वार्धम्। सत्यवाँस्तु सावित्र्याः पतिरिति। सिद्धान्तं व्याकुर्वन्ति अत्रेत्यादि। शब्दादेवेत्यादि वाक्ये पूर्वार्धेऽङ्गुष्ठमात्रत्वमुक्त्वोत्तरार्द्धे तावन्मात्रस्यैव भूतभव्येशानत्वं वक्तीति वाक्यरूपाच्छब्दादेव प्रकर्षेण विरुद्धधर्माश्रयतया मानादित्यर्थः। तदेव व्याकुर्वन्ति यथेत्यादि। किंच। पूर्वाधिकरणविषयवाक्ये सर्वस्य भगवदनुकारकत्वसिद्धेरत्र प्रत्यक्षस्यापि दृष्टान्तविधया गमकत्वं वक्तुं तर्कमाहुः यदीत्यादि अन्यस्य तादृशत्वमिति स्वल्पस्यापि राजादेरनेकजनेशनशीलत्वम्। एतेन जीवस्य ब्रह्मभावेप्यणुत्वादिविरुद्धधर्माविर्भावेप्यैवं युक्तिरित्यपि सूचितम्। सिद्धमाहुः तस्मादित्यादि॥ २४॥

हृद्यपेक्षया तु मनुष्याधिकारत्वात्॥ २५॥ अन्ये तु, अपेक्षयेत्यस्य हृदयस्थानापेक्षयेत्यर्थं वदन्ति। तन्मते परिमाणमौपाधिकम्। सिद्धान्ते तु, अणोरणीयान् महतो महीयानिति, यदेकमव्यक्तमनन्तरूपमिति श्रुतिभ्यामुभयथा तात्त्विकं परिमाणमिति भेदः। प्रमाणान्तरत्व इति परिमाणान्तरत्वे स्फुटमितरत्। इदमप्यधिकरणं दहराधिकरणस्यैव शेषः।

रश्मिः।

गोप्तुं रक्षितुमिच्छति वा यद्वा नकारवर्णागमो न किं तु न ततो न विस्तृतः गोप्तुमिच्छति। इतीति तथा च हृदयाकाशमुक्तजीवोऽङ्गुष्ठमात्र इति पूर्वपक्षः। मानादिति प्रवेशात्। राजादेरिति आदिना दीपप्रेतादि। भाष्ये। परमात्मेति तेनाङ्गुष्ठमात्रमिति पुराणमतमिति भावः॥ २४॥

हृद्यपेक्षया तु मनुष्याधिकारत्वात्॥ २५॥ अत्रान्योपि शंकराचार्यमताद्भेदस्तमाहुः अन्य इति शंकराचार्यादयः। परिमाणेति अत्र बभ्रमुः यद्वा परिमाणान्तरत्वे वास्तवे तिष्ठतु वार्ता प्रमाणं शब्दः पूर्वसूत्र उक्तम्। अन्यत्प्रत्यक्षादि प्रमाणं प्रमाणान्तरं तस्य भावे सत्तायां किमेतन्न संभवति येन शब्दादेवेत्येवकार उपात्तस्तत्राहेति भाष्यार्थः। प्रत्यक्षादीनां मनुष्यहृदयस्य प्रत्यक्षादिविषयत्वाभावादेवकारः इति भावः। हृदयं अङ्गुष्ठमात्रवत् शब्दात् इत्यत्रापि यत्र योग्यशब्दस्तत्राङ्गुष्ठमात्रवत्त्वं इति योग्यशब्दरूपश्रुतावेव प्रामाण्यपर्यवसानम्। स्फुटमिति। तदित्थम्। अनेकेति 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इति श्रुत्या साकारं ब्रह्म अन्तस्तद्धर्माधिकरण उक्तं तद्गृहीतम्। न तु वैश्वानराधिकरणोक्तम्। अङ्गुष्ठमात्रस्यानेकरूपान्तर्गतस्यात्र प्रतिपिपादयिषितत्वात्। ननु प्रादेशमात्ररूपस्य कोपयोग इत्यत आहुः विरुद्धेति वैश्वानराधिकरणोक्तम्। इमे लक्षणे। प्रयोजनमाहुः माहात्म्येति देवत्वार्थम्। देवत्वं प्रयोजनं नैयायिकोक्तेतरभेदः प्रयोजनमवान्तरं व्यवहारोपि। स्वरूप इति लक्ष्ये यथा कम्बुग्रीवादिमान् घट इति अत्र कम्बुग्रीवादिमत्त्वं लक्षणं घटो लक्ष्यः। निरूपयति श्रुतिः। पृच्छति स्म प्रादेशेति। वैश्वानराधिकरणोक्तं ध्यानार्थं

निःप्रयोजनत्वं निराक्रियते । अस्ति प्रयोजनम् । तदाह । **हृदि अङ्गुष्ठमात्रं निरूप्यते** । केन हेतुना । **अपेक्षया** ईश्वरकार्यापेक्षया । 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति स्मृतेः । रक्षार्थमङ्गुष्ठमात्र इत्यर्थः । ननु प्रमाणान्तरत्वे किमेतन्न संभवति, तत्राह । **मनुष्याधिकारत्वात्** । मनुष्यानधिकृत्येदं मृत्यूपाख्यानं प्रवृत्तम् । अतो मनुष्याणां हृदयस्याङ्गुष्ठमात्रत्वात् । यद्यपि हृदयं स्थूलं, तथापि धर्मरूपं तावदेव । तावन्मात्रस्यैवावदानश्रवणात् । तस्मादङ्गुष्ठमात्रस्यैव सर्वधर्मरक्षकत्वादङ्गुष्ठमात्रोऽत्र भगवानेवेति सिद्धम् ॥ २५ ॥

इति प्रथमाध्याये तृतीयपादे सप्तमं शब्दादेवेत्यधिकरणम् ॥ ७ ॥

भाष्यप्रकाशः ।

अग्रिमं चाधिकरणद्वयमधिकारनिरूपकत्वात् प्रासङ्गिकम् । ईश्वरकार्यापेक्षामुपपादयन्ति ईश्वर इत्यादि । तथा चानया स्मृत्या हृदीश्वरत्वेन स्थितौ रक्षार्थं तथेति तदेवेश्वरकार्यम् । तैत्तिरीयोपनिषदि ।

'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठे च समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्' ॥

इतिमन्त्रे सर्वजगदीशादिपदसमभिव्याहृते विश्वभुक्पदे विश्वं भुनक्ति पालयतीत्यर्थ एव तात्पर्यावसायादित्यर्थः । एतत्परिमाणस्य रक्षार्थत्वे शङ्कते नन्वित्यादि । प्रमाणान्तरत्व इति परिमाणान्तरत्वे । तत्समाधानाय हेतुं व्याकुर्वन्ति मनुष्यानित्यादि । तथा च स्थित्यर्थमेतत्परिमाणमित्यर्थः । तथा सति कथं रक्षार्थत्वमित्यत आहुः यद्यपीत्यादि । स्थूलमिति 'केचित्स्वदेशान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्' इति स्मृति····न सिद्धमाहुः तस्मादित्यादि तथा च परिमाणान्तरेण रक्षासिद्धावपि श्रौतस्य हृदयस्य तावत्त्वात् सर्वधर्मरक्षार्थमङ्गुष्ठमात्रः इत्यर्थः । अन्ये त्वत्रापेक्षया इत्यस्य हृदयस्थानापेक्षयेत्यर्थं वदन्ति । तन्मते परिमाणमौपाधिकं सिद्धान्ते तु 'अणोरणीयान् महतो महीयान् यदेकमव्यक्तमनन्तरूपम्' इति श्रुतिभ्यां उभयथा तात्त्विकं परिमाणमिति भेदः एवमत्र दहराद्यधिकरणत्रयेण नानाविधविरुद्धधर्माश्रयत्वसाधनात् वैश्वानराधिकरणे आग्रहवादशङ्कापि निराकृता बोध्या ॥ २५ ॥

इति सप्तमं शब्दादेवेत्यधिकरणम् ॥ ७ ॥

रश्मिः ।

'प्रादेशमात्रं पुरुषं वसन्तम्' इति वाक्यात् । अत्र धारणा ध्यानपूर्विकेत्यदोषः अङ्गुष्ठमात्रत्वस्योपयोगः क्वेति प्रश्नः । त्विति निःप्रयोजननिराकरणसमुच्चायकेन । **रक्षार्थ**मिति 'भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया' इत्युत्तरार्धं गीतायाम् । उच्चावचमार्गेषु भ्रामणेन कुमार्गतो रक्षार्थम् । स्थितिः रक्षार्थमुत्पन्नानां तन्मर्यादया पालनम् । तदर्थं भ्रामयन् वा । **ननु प्रमाणे**ति व्याकृतमिदम् । मनुष्यानिति ।

'नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम् ।
उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते' ॥ इति ।

श्रुतौ मेधाविपदान्मनुष्यानधिकृत्य । मृत्यूपेति मृत्यूक्तमुपाख्यानं मृत्यूपाख्यानं मध्यमपद-

---

१. श्रीमत्पुरुषोत्तमचरणैः स्वहस्ताक्षरेण शोधिते एकस्मिन् पुस्तके पूर्वप्रकाशस्योपरि कृष्णरेखाकरणेन तं व्यर्थीकृत्य एतावान् प्रकाशः नवीनतया प्रकटीकृतः सोऽत्र दीयते ।

तदुपर्यपि च बादरायणः संभवात् ॥ २६ ॥

अङ्गुष्ठमात्रनिरूपणार्थं मनुष्याधिकारे निरूपिते कस्यचिद् भ्रमो भवेत्

भाष्यप्रकाशः ।

तदुपर्यपि चं बादरायणः संभवात् ॥ २६ ॥ अत्रानुप्रसङ्गः संगतिरिति बोधयन्तः सूत्रमवतारयन्ति अङ्गुष्ठमात्रेत्यादि । कस्यचिदिति जैमिनीयादिदर्शनाभि-

रश्मिः ।

लोपी समासः उपाख्यानं त्वग्नेस्तावदपि धर्मरूपं न मनुष्याणामेवापि तु छागादीनामपीत्याशयेन प्रमाणयन्ति स्म तावदिति । अवदानेति 'गाभेर्मांसंविकथ' इति मन्त्रेणावदाने आग्नेयस्य पुरोडाशस्य मध्यादङ्गुष्ठपर्वमात्रं तिरश्चीनमवद्यतीत्यत्र श्रवणात् । सिद्धमाहुः तस्मादिति । भगवानेवेति तेनाङ्गुष्ठमात्रं जीवमनूद्येशानादिपदैस्तेन ब्रह्माभेदो बोध्यते इति शंकराचार्योक्तं निरस्तम् ।

'अङ्गुष्ठमात्रः पुरुषोन्तरात्मा सदा जनानां हृदये संनिविष्टः ।
तं स्वाच्छरीरात्प्रवहेन्मुञ्जादिवेषीकां धैर्येण' ॥

'तं विद्याच्छुक्रममृतम्' इति वाक्यशेषेपि अन्तरात्मनः संवेशो रक्षार्थः । तमङ्गुष्ठमात्रं भगवन्तम् । तं जीवमित्यन्ये प्रवहेत् पूरकः सन् वर्धयेत् । व्यापकं करणेनाङ्गुष्ठमात्रं विरुद्धधर्माश्रयत्वाय कुर्यात् । पृथक्कुर्यादित्यन्ये । तस्मिन् पक्षे तं विदिति कर्मतानुपपत्तिः । तमेव विदित्वेति श्रुतेः । मुञ्जादिति गवां दुःखददर्शनकौषधिविशेषादिषीकां तृणविशेषरूपां वर्धयेदिव स्वं शब्दादिकरं स्वृस्वन्धातुः शरीरं त्रयोग्नयः श्रियन्ते इति गर्भोपनिषदि श्रिञ् सेवायाम् । शृ आदेशः ईरन् शरीरं बह्वायासकरं भक्तानां सेवोपयोगिरूपं भक्तसेवानुपयोगि दुःखदं भवतीति दृष्टान्तसंगतिः । लौकिकी व्याख्या 'इषीकाटवीं निर्विविशुः' 'मुञ्जाटव्यां भ्रष्टमार्गम्' इत्यनयोः सुबोधिन्याः । धातुपाठेऽस्यादर्शनात् मुञ्जमुञ्जिवारावामप्रियतृणे भ्वादिः भ्वादेराकृतिगणत्वात् अन्यो वा प्रकार इति सौत्रत्वादिः मजि शब्दे सारस्वते जप्रत्ययः ।

'यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः' ॥ इति ।

शुक्रमिति शुचू शोके भ्वादिः परस्मैपदी सेट् शोचति ऋज्रेन्द्रेति रन् पूतीभावं करोति शुच पूतीभाव इति धातुपाठात् । पूङ् पवन एवेत्यनवस्थानिवृत्तिः तस्य वेदनमुच्यते न जीवस्येति अङ्गुष्ठमात्रं पुरुषमिति तु पुराणमतं वेदाः श्रीकृष्णवाक्यानीति प्रमाणेष्वसत्त्वात् । परमतभाषा । एतदितरत् स्फुटमित्यर्थः ॥ २५ ॥

इति सप्तमाधिकरणम् ॥ ७ ॥

तदुपर्यपि च बादरायणः संभवात् ॥ २६ ॥ अत्रान्विति । तेन पूर्वाधिकरणे प्रसङ्गसंगतिर्बोधिता । पूर्वत्र कठवल्लीविचारे तत्रत्याङ्गुष्ठमात्रनिरूपकश्रुतिस्मरणेनाङ्गुष्ठमात्रं प्रसङ्गान्निरूपितम् । अनु पश्चान्मनुष्याधिकारे निरूपिते सर्वत्र मनुष्याधिकारनिवृत्त्यर्थं स्मृतस्य देवादीनामधिकारस्योपेक्षानर्हत्वात् प्रसङ्गसंगत्या निरूपणमित्यनुप्रसङ्गः संगतिरिति बोधयन्तः सूत्रमिति । एतेन विषयाद्यभावादनधिकरणत्वं बोधितम् । एतत्कृतवेदान्ताधिकरणमालायामधिकरणमिदमित्युक्तम् । तथा

१. तदुपर्यपि च इति प्रकाशपाठे चकारोधिकः ।

सर्वत्र ब्रह्मविद्यायां मनुष्याणामेवाधिकार इति । तन्निराकरणार्थं देवादीनाम-

भाष्यप्रकाशः ।

निविष्टस्य । जैमिनीया ह्येवं मन्यन्ते । अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तश्च वैदिके कर्मण्यधिकारी । तत्र पूर्वं सामर्थ्यमपेक्षितम् । तच्च देवादीनां नास्ति । तेषां शरीराभावात् । न च मन्त्रार्थवादाभ्यां तत्सिद्धिः । तयोः कर्मविधिशेषत्वेनान्यपरतया तत्प्रतिपादने तात्पर्याभावात् । कर्मविधयश्च सापेक्षितोद्देश्यत्वातिरिक्तं देवतागतं धर्मान्तरं किमपि नापेक्ष्यन्त इति

रश्मिः ।

च भाष्यम् । यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत् । तथर्षीणां तथा मनुष्याणामिति । अधिकरणरचनात्त्वेवं तथा हि वैयासिकन्यायमालायामपि अधिकरणमिदमित्युक्तम् । तत्र बृहदारण्यकतृतीयाध्याये श्रूयते तद्यो देवानां प्रत्यबुध्यत स एव तदभवत् तथर्षीणामिति देवतानां मध्ये यो यो ब्रह्म बुबुधे स स एव ब्रह्माभवदित्यर्थः । नाधिक्रियन्ते विद्यायां देवाः किं वाधिकारिण इति संशयः । तत्र देवर्ष्यादयो विद्यायां नाधिक्रियन्ते इति तावत्प्राप्तं कुतः 'अर्थी समर्थो विद्वान्' अधिक्रियते इत्युक्तानामधिकारहेतूनामशरीरेषु देवेष्वसंभवात् । न च मन्त्रार्थवादादिभ्यो देवतानां विग्रहवत्त्वम् । विध्येकवाक्यतापन्नानां स्वार्थे तात्पर्याभावात् इति प्राप्ते ब्रूमः । त्रिविधो ह्यर्थवादः गुणवादोऽनुवादो भूतार्थवादश्चेति तथा चाहुः—

'विरोधे गुणवादः स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः' ॥ इति ।

आदित्यो यूपः यजमानः प्रस्तरः इत्यादिषु प्रत्यक्षविरोधे सत्यादित्यवद्यागनिर्वाहकत्वगुणः आदित्यादिशब्दैरुपलभ्यते इति गुणवादः । अग्निर्हिमस्य भेषजम् वायुर्वै क्षेपिष्ठेत्येवमादिषु मानान्तरसिद्धार्थवादित्वादनुवादित्वं तयोरुभयोः स्वार्थे तात्पर्याभावात् । इन्द्रो वृत्राय वज्रमुदयच्छत् इत्यादिष्वविरुद्धेष्वननुवादेषु भूतार्थवादेषु स्वतः प्रामाण्यादेव स्वार्थे तात्पर्यस्य निवारयितुमशक्यत्वात् पदैकवाक्यतया स्वार्थेऽवान्तरं तात्पर्यं प्रतिपद्य पश्चाद्वाक्यैकवाक्यतया विधिषु महातात्पर्यभूतार्थवादाः प्रतिपद्यन्ते मन्त्रेष्वप्ययं न्यायो योज्यः । तथा च मन्त्रार्थवादादिबलात् देवादीनां विग्रहवत्त्वे सति श्रवणादिषु सामर्थ्यं सुलभम् । अर्थित्वं चैश्वर्यस्य क्षयित्वातिशयत्वदर्शनान्मोक्षसाधनं ब्रह्मविद्या विषयमुपपद्यते । विद्वत्ता चोपनयनाध्ययनरहितानामपि स्वयं भातवेदत्वात् सुलभैव तस्माद्देवादीनामधिकारो न निवारयितुं शक्यः निर्गुणविद्यायाम् । अतो नवीनमतेनाधिकरणम् । अतः प्राचां मतेनोक्तं सूत्रमिति । **मन्यन्त** इति अवबोधं कुर्वते । अर्थीति षष्ठस्य सप्तमे पादे चिन्तितम् । अर्थो धनं दक्षिणा स्वदाने सर्वमविशेषादित्यधिकरणे । समर्थः षष्ठस्य द्वितीयाधिकरणे चिन्तितम् । 'फलार्थत्वात्कर्मणः शास्त्रं सर्वाधिकारं स्यात्' इत्यधिकरणेऽन्धादेरशक्तस्य नाधिकारः किं त्वनन्धापङ्ग्वादिरूपस्य शक्तस्याधिकारः विद्वान् सप्तमेधिकरणेऽष्टमे च पादे द्वितीयेधिकरणे एवं चतुर्थोपि ज्ञेयः । **न च मन्त्रेति** मन्त्रार्थवादादिभ्यो विग्रहादिपञ्चकं नवमस्य चतुर्थाधिकरणेस्ति सहस्राक्षो गोत्रभिद् वज्रबाहुरिति विग्रहः । अग्निरिदं हविरजुषतेति हविःस्वीकारः । अद्धीदिन्द्र प्रस्थिते मा हवींषीति हविर्भोजनम् । तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति इति तृप्तिप्रसादौ । **कर्मविधीति** प्रथमस्य द्वितीयपादे 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' इत्यधिकरणेऽर्थवादानां कर्मविधिशेषत्वं वायव्यं

धिकारमाह तदुपर्यपि । मनुष्यापेक्षयार्वाक्तनानामधिकारो नास्ति। तत्रापि वैदिकधर्महेतोस्त्रैवर्णिकानां धर्मयुक्तानामागतम् । ततोऽपि ये साध्यादयो धर्मयुक्तास्तेषामप्यधिकारः। तत्र जैमिनिप्रभृतीनां न संमतिरिति स्वनामग्रहणम्। विशिष्टत्रैवर्णिकानारभ्य प्रजापतिपर्यन्तं शतानन्दिनामधिकारं मन्यते बादरा-

भाष्यप्रकाशः ।

तच्छेषभूतौ तौ तदतिरिक्तं विग्रहं न साधयितुं शक्तौ। शरीराभावादेव च नार्थित्वमपीति। तदेतन्निराकर्तुं देवादीनामधिकारमाहेत्यर्थः । नन्वधिकारविचारे सर्वेषामेव विचारणीयः स कुतो न विचार्यत इत्यतः सूत्रं विवृण्वन्ति तदुपरीत्यादि। मनुष्यादर्वाक्तनेषु योग्यताभावादेव नास्ति। मनुष्येष्वपि वैदिकधर्मं प्रति कारणभूतस्योपनयनादेः सकाशात् त्रैवर्णिकानां धर्मयुक्तानामेवाधिकार इति जैमिनिसूत्रेष्वेव सिद्धम्। तदुक्तानामप्यविरुद्धानामत्राभ्यासादिवदुपादेयत्वात्। तच्चात्रापिशब्दोक्तिमहिम्नैवावगतं सूचितमित्यर्थः। शेषं प्रकटार्थम्। संभवं विवृण्वन्ति धर्मेत्यादि। 'तं विद्याकर्मणी समन्वारभेते' इति श्रुत्या शरीरारम्भं प्रति तयोः कारणत्वात् तयोः

रश्मिः ।

श्वेतमालभेत इति कर्मविधिस्तच्छेषत्वं वायुर्वै क्षेपिष्ठा देवता इत्यर्थवादो यतः क्षिप्रगामिस्वभावतया शीघ्रफलदो वायुरस्य पशोर्देवता ततः प्रशस्तमिमं वायव्यं पशुमालभेतेति वाक्ययोरन्वयः। चतुर्थाधिकरणे तदर्थशास्त्रादित्यस्मिन् मन्त्राणां विधिशेषत्वम्। उरु प्रथस्वेति मन्त्रः कश्चित्। अस्यार्थः भो पुरोडाश उरु विपुलता यथा भवति तथा त्वं प्रथस्व प्रसरेति। दृश्यमानार्थानुस्मरणमेव यागप्रयोगे मन्त्रोच्चारणस्य प्रयोजनम्। तात्पर्येति अभिधासत्त्वेपि वक्तुरिच्छाभावादिष्टोर्थो बलीयान्। तच्छेषेति कर्माणि यागादीनि तेषां विधयः। तेषां शेषभूतौ मन्त्रार्थवादौ। योग्यतेति सुतलादिषु बिलेषु सुतले बलिः 'सुतलस्थापितबलिः स्वर्गाधिकसुखप्रदः' इति पुरुषोत्तमसहस्रनाम्नः। रसातलं नागलोकः तयोर्बलेर्नागानां च ज्ञानयोग्यता 'आत्मनिवेदने बलिः' इति कस्यचिद्वाक्यात्। 'सर्पाः सत्रमासत' इति श्रुतेः चित्तशुद्धिद्वारा नागानामिति। मैवं। पूर्वस्य पुराणमतत्वात्। श्रुतेस्त्वाधिदैविकनागपरत्वं शब्द इति चेदिति वक्ष्यमाणसूत्रे यागीयपदार्थानामलौकिकत्वस्य वक्ष्यमाणत्वात्। तत्रापीति भाष्यं विवरामासुः मनुष्येष्विति। धर्मयुक्तानामिति त्रैवर्गिकाणाम् । चतुर्थस्य धर्माभावात् अनधिकारात् । जैमिनीति सूत्राणि तु षष्ठस्य प्रथमे पादे सूत्राणि चतुर्दश। जैमिनीयन्यायमालायां सप्तमेधिकरणे 'चातुर्वर्ण्यमविशेषात्'। 'निर्देशाद्वा त्रयाणां स्यात् अग्न्याधेये ह्यसंबन्धः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेयः' 'निमित्तार्थेन बादरिः तस्मात्सर्वाधिकारं स्यात्' 'अपि वान्यार्थदर्शनाद्यथाश्रुति प्रतीयेत' 'निर्देशात्पक्षे स्यात्' 'वैगुण्यान्नेति चेत्' 'न काम्यत्वात्' 'संस्कारे च तत्प्रधानत्वात्' 'अपि वा वेदनिर्देशादपशूद्राणां प्रतीयेत' 'गुणार्थत्वान्नेति चेत्' 'संस्कारस्य तदर्थत्वाद्विद्यायां पुरुषश्रुतिः'। 'विद्यानिर्देशान्नेति चेत्' 'अवैद्यत्वाद्यभावः कर्मणि स्यात्' 'तथा चान्यादर्शनम्' इति सूत्रेषु। बादरायणशब्दोक्त्या जैमिनिमतं कुतोपन्यस्तमत आहुः तदुक्तानामिति । अभ्यासेति आनन्दमयोऽभ्यासादित्यत्राभ्यासः। आदिपदेन श्रुतिलिङ्गादि। उपेति प्रमाणभेदशेषत्वप्रयुक्तिक्रमाधिकारातिदेशद्वयोहबाधतन्त्रप्रसङ्गानां द्वादशाध्यायार्थानामुपादेयत्वात् । अत्रापीति सूत्रे शब्देति बादरायणशब्दमहिम्ना। सूचितमिति व्यञ्जनयोक्तम्। व्यासशिष्यत्वेन बदरमयनं यस्य जैमिनेरिति योगस्य बादरायणपदस्य जैमिनौ सत्त्वात्। निष्ठा चेति लिङ्गानुशासनसूत्रादधिकाराद्यागतमित्यपि भाष्यार्थः। अधिकारमात्र आग्रहे

यणः । कुतः । संभवात् । संभवति तेषां ज्ञानाधिकारः । धर्मज्ञानाभ्यां साति-

रश्मिः ।

अधिकार आगतमित्यपि प्रयोग उक्तसूत्रात् । भावे या निष्ठा तदन्तं क्लीबं स्यादित्युक्तसूत्रवृत्त्यनादरात् । ततोपि त्रैवर्णिकेभ्यो ये साध्यादय इत्येवं भाष्यं प्रकटार्थमित्याहुः **शेषमिति** । किं च । **भाष्ये । विशिष्टेति** धर्मयुक्तेत्यर्थः । **मन्यत** इति आनन्दमीमांसाया मन्यते । **प्रकृते । तयोरि**ति पूर्वप्रज्ञा चेत्यग्रेतनश्रुत्युक्तप्रज्ञा तु नोक्ता । समन्वारभत इत्यस्य वचनविपरिणामेनानन्वयात् किं तु च इत्यस्य चन्दते आह्लादं करोति इत्यर्थात्तेनान्वयः । अन्येभ्योपीति डः इति व्याख्यासुधायां भानुदीक्षितः । चि चयने स्वादिरुभयपदी अनिट् चक तृप्तिप्रतिघातयोः भ्वादिरात्मनेपदी सेट् डः यथोपपत्ति सर्वं साधु । पूर्वप्रज्ञा पूरी आप्यायने दिवादिरात्मनेपदी सेट् पूर्यतेः 'सर्वनिघृष्व' इति सूत्रेण बाहुलकाह्वन् आ-आप्ता अपि न पियति पि गतौ तुदादिः परस्मैपद्यनिट् अगन्ता आ सततगतिकर्ता अयनं अय गतौ भ्वादिः आत्मनेपदी सेट् भावे ल्युट् प्रा पूरणे प्र-ज्ञाऽवबोधने क्र्यादिरुभयपद्यनिट् अव रक्षणादौ बुध अवगमने बुध ज्ञाने भ्वादिः दिवादिः परस्मैपद्यात्मनेपदिनौ सेडनिटौ अव रक्षणादौ गमॢ गतौ अवार्थे अवगमप्रवेशेऽनवस्था अङ्गीकार्या देहानां बहुविधत्वात् तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । जानातीति ज्ञः 'इगुपधज्ञाप्रीकिरः कः' इति कः तथा चाप्ताऽगन्ता सततगतिकर्ताऽयनकर्ता पूरणकर्ता रक्षणादिकर्ता गतिकर्ता देहाह्लादं करोति न चेदं मुक्तस्य संभवति मैवं विशिष्टत्रैवर्णिकानारभ्येति भाष्यात् । विच्छिद्य साधनानामङ्गीकार्यत्वात् । जीवन्मुक्तस्य न विच्छेदप्रयोजनम् । साधनानामपि श्रुतिप्रामाण्यात अवक्रमणानन्तरमनुवृत्तिः उपास्यधर्मानुवृत्तिश्च देहस्त्वाक्षेपलभ्यः । **ताभ्यामिति** तादृशेत्यस्य ब्रह्मविद्योपयोगीत्यर्थः । ननु ताभ्यां विद्याकर्मभ्यां तत्र विद्या विद ज्ञाने अदादिः परस्मैपदी सेट् संज्ञायां समजेति क्यप् टाप् च ज्ञान इत्यत्र ज्ञा अवबोधने भावे ल्युट् । अव रक्षणादौ बुध बोधे भ्वादिरात्मनेपदी सेट् बुध ज्ञान इत्यस्य ग्रहणे आत्माश्रयः । बुध अवगमन इत्यस्य ग्रहणेऽवघटितत्वेन गौरवम् । तथा च विद्यारक्षणादेर्बोधस्य च कर्त्री कर्म सर्वधातुभ्यो मनिन् करोति क्रियते वा कर्म धातुस्तनादिरुभयपदी अनिट् तनु विस्तारे डित् अदिप्रत्ययः वि-प्रजनादिकर्ता स्तृञ् आह्वाने स्वादिरुभयपदी अनिट् आ आप्ता छद ऊर्जने भ्वादिः परस्मैपदी सेट् ऊर्ज बलप्राणनयोः चुरादिः परस्मैपदी सेट् बल प्राणने चुरादिः परस्मैपदी सेट् प्राणनम् प्र-अन प्राणने चुरादिः परस्मैपदी सेट् इट् प्र-पूरणकर्ता अनिति यश्च बलार्थ उक्तः प्र-पूरकः पुनः प्रपूरकः अननकर्ता च तं भवाय नाशायेति वाक्याद्देवं देहं उक्तकर्ता करणार्थः कालश्च समारभेते सम् षम वैक्लव्ये भ्वादिः परस्मैपदी सेट् वि-प्रजनादिकर्ता कुङ् शब्दे भ्वादिः कवते शब्दकर्ता तं देहं आ आप्ता तं रभेते रभि शब्दे भ्वादिः आत्मनेपदी सेट् शब्द आविष्कारे आ सततगन्तारं वि-प्रजनादिकर्तारं सुडर्थः । आविष्कुरुतः करणे कृतौ काले इति यावत् । टीकायां तु विद्याशब्देनेह प्रमाणाप्रमाणजनितज्ञानमात्रं विहितप्रतिषिद्धादिरूपमात्मज्ञानव्यतिरिक्तमुच्यते शास्त्रलोकस्वभावोत्पन्नदृष्टादृष्टार्थरूपवाङ्मनःकायसाध्यं सर्वकर्मशब्देनोच्यते तदुत्पन्नफलभोगजनितः संस्कारो हृद्याश्रितः पूर्वप्रज्ञेत्युच्यते समन्वारभेते अनुगच्छतः पूर्वप्रज्ञा चानुगच्छति इत्याहुः अपरोक्षज्ञानार्थं पञ्चाग्निविद्यानिष्पन्नदेहो वक्ष्यते तृतीयाध्यायेऽत्र तु परोक्षापरोक्ष-

शयाभ्यां हि तादृशजन्मसंभवात् । न हि तेषां पूर्वसंस्कारो लुप्यते । अक्षरपर्यन्तं शतोत्कर्षश्रवणादुपर्यपेक्षा ।

भाष्यप्रकाशः ।

सातिशयत्वे ताभ्यां तादृशदेवादिजन्मसंभवात् । जन्मनि, 'यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्' इति मन्त्रोक्तलिङ्गेन जन्मत एव प्रजापतेरुपनीतत्वे, 'यो वै वेदाँश्च प्रहिणोति तस्मै' इति वेदाध्ययनत आक्षेपादपि च सिद्धेः । ब्रह्मणे ब्राह्मणमालभते, क्षत्राय राजन्यं, मरुद्भ्यो वैश्यमिति श्रुत्या ब्राह्मण्यादीनां देवतात्वात् तासां चोपनयनादिनाऽनुग्रहतपःप्रभृतिभ्योऽपि मतङ्गविश्वामित्रप्रभृतिषु स्मरणादुपनयनाभावे ब्राह्मण्यादौ सिद्धे, देवादिष्वपि शतानन्दिश्रुतौ,

रश्मिः ।

ज्ञानार्थं विद्याकर्मणोरतिशयविचारार्थमाहुः **जन्मनीति** । **प्रहिणोतीति** । प्रा-पूरणे पूरकः सन् हिनोति गच्छति हृदि वर्धयति च वेदान् तस्मै विस्तारकाय । अध्ययनं गुरुमुखादक्षरग्रहणम् । **आक्षेपादिति** ब्रह्मत्वेनातिशयतर्कात् । सिद्धेः अध्ययनवेदज्ञानभक्त्यादिभिरतिशयसिद्धेः भगवान् ब्रह्म कार्त्स्न्येनेति वाक्यम्, श्रद्धारतिर्भक्तिरनुक्रमिष्यतीति । मुख्यदेवे उपनीतत्वरूपाधिकारेण विद्यावेदाध्ययनादिः तदनुकर्म च ते संस्काररूपातिशययुक्ते ताभ्यां तादृशजन्मोक्तम् । अन्येष्वाहुरतिशयान् । **ब्रह्मण** इति । तैत्तिरीयक इयम् । अतो योगरूढ्यार्थः । आलभतिर्न हिंसार्थ इति सुबोधिन्याम् । डुलभष् प्राप्तावित्यालम्भः स्पर्शः । **इतीति** मरुतो वै देवानां विशः इत्यन्तया श्रुत्या ब्राह्मणं राजन्यं वैश्यमित्यत्र ब्राह्मणत्वादिविशिष्टब्राह्मणादिषु शक्तेर्ब्राह्मणादिपदानामतो ब्राह्मणादिपदोक्तब्राह्मण्यादीनां देवतात्वमन्यथा लभत इत्युक्तालभनानुपपत्तेः तदुक्तं ब्राह्मणत्वादिदेवतायाः देवा यच्छासनानुसारेण ब्राह्मणत्वादिदेवताः देहे तिष्ठन्ति लोकस्य तं हरिं सर्वदा श्रये इति । **स्मरणादिति** ।

'जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते ।
वेदाभ्यासाद्भवेद्विप्रो ब्रह्मज्ञो ब्राह्मणः स्मृतः' ॥

इत्युपनयनादिना स्मरणम् । अनुग्रहेण पञ्चमस्कन्धे 'यवीयांस एकाशीतिर्जायन्ते याः पितुरादेशकरा महाशालीना महाश्रोत्रियाः यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवु'रिति स्मरणम् । पितुः ऋषभस्यादेशकराः इत्यनुग्रहभाजः । तपसा ।

'गाधेरभून्महातेजाः समिद्ध इव पावकः ।
तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम्' ॥

इति विश्वामित्रस्मरणम् 'तपोनुग्रहाभ्याम् । महाभारते उपनीतस्य पित्राज्ञया चयनार्थं गर्दभाश्वयुक्तेन रथेनेष्टकानयनार्थं गच्छतो मतङ्गस्य मध्ये देवगर्दभीवचनात् स्वमातरि व्यभिचारिणीत्वज्ञाने स्वस्य चण्डालत्वज्ञानं ततो मातापितरौ त्यक्त्वा तपोर्थं गमनं बहुकालं तपःकरणेन प्रसन्नादिन्द्रात् ब्राह्मणत्वं प्राप्तमित्युक्तेः स्मरणम् । प्रभृतिपदेन ।

'सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा ।
दृश्यते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः' ॥ इति ।

भारताजगरे युधिष्ठिरवचनरूपं स्मरणम् । तस्मादित्यर्थः । **ब्राह्मण्येति** ब्राह्मण्यादिरूपेऽतिशये सिद्धे । **शतेति** शतमानन्दा विद्यन्ते येषां ते शतानन्दिनो बृहदारण्यके आनन्दमीमांसायामुक्ताः

अतोऽक्षरप्राप्तेः शुद्धब्रह्मविद्याहेतुकत्वादुत्तरोत्तरमुपदेष्टॄणां विद्यमानत्वात्

भाष्यप्रकाशः ।

श्रोत्रियस्य चाकामहतस्येति लिङ्गादध्ययने सिद्धे, 'कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता । **मयादौ ब्रह्मणे प्रोक्ता'** इति संदर्भेण देवादीनामध्ययने पुराणेऽप्युपबृंहितेऽधिकारयुक्त-जन्मसंभवादित्यर्थः । नच सातिशयत्वेऽपि पूर्वसंस्कारस्य कालेन लोपादसंभव इति शङ्क्यम् । न हि तेषां पूर्वसंस्कारो लुप्यते । यथा नारदस्य । नच मन्त्रार्थवादयोर्देवविग्रहासाधकत्वम् । **यज्ञोपवीतमन्त्रस्य** क्वापि विधौ शेषभावाभावाद्, यस्यै देवतायै हविर्निरुप्तं स्यात् तां मनसा ध्यायेदिति ध्यानविधेर्देवताविग्रहमन्तरेणानर्थक्यप्रसङ्गादशरीराया देवताया बुद्धावनारोहात् । अत एव, वज्रहस्तः पुरन्दर इत्यादयोऽपि विद्यमानगुणप्रकाशन एव स्मारकत्वं प्राप्नुवन्ति । अर्थवादा अपि स्तावकत्वं तदैव लभन्ते यदि देवताया विग्रहो भवति । स्तुतेरुत्कर्षा-धायकगुणवर्णनरूपत्वेन गुणाभावे असत्कथनं प्रतारकतां संपादयेदतः स्तावकत्वेऽपि विग्रहसाध-कत्वमक्षुण्णम् । एवं सामर्थ्ये विद्वत्त्वे च सिद्धे शतानन्दश्रुतावक्षरपर्यन्तं शतोत्कर्षश्रावणा-

रश्मिः ।

तेषां श्रुतौ । **लिङ्गादिति** श्रोत्रियश्छन्दोधीते इति काम इच्छा तस्य विनाशेन हतस्येति लिङ्गाच्छब्दयोः सामर्थ्यात् । **सिद्ध इति** । तथा च आगमापगमाभ्यां ब्राह्मण्यादिर्न जातिः किं तु देवतेति भावः । विशेषस्तु ब्राह्मणत्वादिदेवतावादे द्रष्टव्यः । **पुराण** इति एकादशस्य चतुर्दशेध्याये । **अधिकारेति** अतिशयेत्यर्थः । **न हि तेषामित्यादिभाष्यमवतारयामासुः न च सा**तीति । **कालेनेति** । 'कालेन नष्टा प्रलये वाणी' इति वाक्यात् सृष्टिप्राक्काले अतिशयासंभवः । **यथेति** प्रथमस्कन्धे स्पष्टः । **अक्षरपर्यन्तमिति** भाष्यमवतारयांबभूवुः **न चेति** । विधिशेषत्वे तस्यार्थेषु तात्पर्याभावात् । अभ्युपगम्य विध्यशेषं वाक्यमाहुः **यज्ञोपेति** । **शेषेति** तथा च यदि क्वचिदयं मन्त्रः शेषभावं प्राप्तः स्यात्तदा स्वप्रकाशितफलदेवतः क्रतुः स्वापूर्वं साधयतीति सिद्धान्तः सर्वाद्दतो भवेन्न त्वेवमतोयं देवविग्रहसाधक एव सहजमिति भावः यदपि शब्दमात्र देवता अर्थस्तु प्रातिपदिकानुरोधात् चेतनो वा कश्चित् स्वीक्रियते न तु विग्रहादिमान् । उपासनादौ परध्यानमात्रमाहार्यं तस्येति वदन्ति भाट्टाः तत्राहुः **यस्यै देवताया इति** हविषो निर्वापः कृतः स्यात् । **बुद्धाविति** 'बुद्धिर्विज्ञानरूपिणी' इति वाक्यात् विशिष्टं ज्ञायते येन तद्विज्ञानं तद्रूपमस्यास्तीति विज्ञानरूपिणी तस्याम् । न च चेतनत्ववैशिष्ट्येन बुद्धावारोहोस्तीति वाच्यम् । अणुत्वेन बुद्धावनारोहात् । यच्चोक्तं सनादावित्यादि तत्राप्युच्यते आहार्यं बाधकालीनमिच्छाजन्यं ध्यानं चिन्तनम् । बाधो विग्रहाभावप्रयुक्तविषयाभावजन्य इति । अविद्यमानशरीरारोपेणापि शरीरमात्रस्य ध्यानकर्मत्वं न देवतायां देवतात्वेन तस्या अविषयत्वात् । शुक्ताविदं रजतमित्यत्र शुक्ते रजतत्वेन इव । ततश्च ध्यानविषयस्य देवतात्वप्रकाराभावेन देवतात्व-विशिष्टदेवतायाः ध्यानविषयत्वबोधकश्रुतिविरोधः एतदेवाहुः **अत एवेति** पदेन । **इत्यादय इति** आदिपदेन सहस्राक्षो गोत्रभिद् वज्रबाहुरिति इन्द्रो वृत्राय वज्रमुदयच्छदिति । मन्त्रा इति विशेष्यम् । वेदो अक्षरमात्रमपि नान्यथा वदतीति भाष्यादाहुः **एवेति** । **उत्कर्षेति** उत्कर्षाणामाधा-यका ये गुणाः तेषां वर्णनम् । **अक्षुण्णमिति** । ननु देवताया विग्रहे सति वेदानित्यत्वप्रसङ्ग इति चेन्न वैदिकपदार्थानां भिन्नत्वस्यात्र सूत्रे वक्ष्यमाणत्वात् । यदपि नवमस्य चतुर्थाधिकरणे विग्रहादि-

प्रजापतिपर्यन्तं सर्वेषामधिकारः संभवति। संभववचनाद् दुर्लभाधिकारस्तत्रेति सूचितम्। 'यो यो देवानां प्रत्यबुध्यत स एव तदभवत् तथर्षीणां तथा मनुष्याणाम्' इति। तदुपर्यप्यधिकारः सिद्धः॥ २६॥

भाष्यप्रकाशः।

दुपर्यपेक्षापि निर्बाधैव। अधिकारपर्युदासस्तु न क्वापि श्रूयते। सिद्धमाहुः अत इत्यादि। नन्वत्र सत्त्वादित्यनुक्त्वा, संभवादिति कस्मादुक्तमित्यत आहुः संभवेत्यादि॥ २६॥

रश्मिः।

पञ्चकप्रतिपादकयोः मन्त्रार्थवादयोः स्वार्थे तात्पर्याभाव इति तदप्यभिधावृत्तिमादाय विरुद्धमिति अक्षरेति भाष्यं विवृण्वन्ति स्म शतेति। तैत्तिरीयेऽतिशयस्य स्पष्टत्वात् शतमानन्दास्ते ये शतं मानुषआनन्दाः स एको मनुष्यगन्धर्वाणामानन्दः इत्यारभ्य ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्येत्यन्तश्रुतौ तथा च शतानन्दानां प्रतिपादिका श्रुतिः शतानन्दश्रुतिः तस्यामिति षष्ठीतत्पुरुषः। अत एवाहुरक्षरेति ब्रह्मलोकपर्यन्तम्। तथा च बृहदारण्यके ते ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्द इति। साधनवैजात्येन फलवैजात्यमतिशयाभावेपीत्येवं बोधकस्य श्रोत्रियोऽवृजिनोऽकामहत इत्यस्य वाक्यस्योक्तिः। आरम्भे चाथ ये शतं मनुष्याणामानन्दाः स एकः पितृणां जितलोकानामानन्दः इति जितलोकत्वस्योक्तिः। ननु तर्ह्यतिशयो मास्त्विति चेन्न तर्हि तेषां पूर्वसंस्कारो लुप्यते इति भाष्यात्। तथा च विचार्यमाणे श्रोत्रिय इत्यत्र ङसः सुः सुपां सुलुक् इति सूत्रात्। अथेत्यानन्तर्येण भिन्नप्रक्रमे। यदत्र बृहस्पत्यानन्दस्थले गन्धर्वानन्दः स श्रुतित्वाद्वैकल्पिकः। श्रोत्रियस्येत्यत्र चकारार्थ आह्लादितः चदि आह्लादे डः। चकारसिद्धिः। अकामत्यत्र कामपदार्थः मानुष्यकैः कामैर्भोगैः संपन्नतमः इति बृहदारण्यकश्रुत्यन्तरोक्तोऽत्र एवं शतेन फलोत्कर्षस्य श्रवणमेव श्रावणं तस्मात्। उपर्यप्यपेक्षातिशयरूपाधिकारस्य निर्बाधास्ति। ननूपरि मनुष्याधिकारभिन्नतदधिकारसदृशोधिकारोस्ति इति चेत् तत्राहुः अधीति पर्युदासः सदृग्ग्राहीत्यतोधिकारभिन्नाधिकारसदृश इत्यधिकारपर्युदास इत्यस्यार्थः। **अत इत्यादीति। भाष्ये। अक्षरेत्यादि।** एतच्चाक्षरधियामवरोधः सामान्यतदभावाभ्यामित्यधिकरणे स्फोरिष्यति प्रकृते तु ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्येत्येवं विदोऽन्नमयाद्युपसंक्रमो भवति स य एवंवित् अस्माल्लोकात्प्रेत्य एतमन्नमयमात्मानमुपसंक्रामतीति श्रुतेः। वित् विद् ज्ञाने क्विप् ज्ञानं च ज्ञा अवबोधने अव रक्षणादौ बुध अवगमने तथा च रक्षणादिकर्ता रक्षणादिकर्तुर्गमनं कुरुत इति विदित्यस्यार्थः। यदि च बुध बोधे बुध ज्ञाने भ्वादिदिवादी आत्मनेपदिनौ सेडनिटौ तदा रक्षणादिकर्ता बोधं ज्ञानं वा कुरुते इत्यर्थः। सर्वत्र ससाधनं गमनादित्रयम्। श्रूयते स्मर्यते चात उत्तमक्षरप्राप्तेरित्यादि उत्तरोत्तरमित्यादि च शुद्धब्रह्मविद्या सर्वत्र प्रसिद्धाधिकरणे ब्रह्मरूपोक्ता। ब्रह्मविद्या तु ब्रह्मविद्योपनिषदुक्ता ब्रह्मविष्णुमहेश्वरेभ्यः उत्पत्तिस्थितिप्रलयाः तेषां स्वरूपाणि च यत्र सा सत्त्वादिविशिष्टानां निरूपणं यत्रेत्यशुद्धत्वम्। उपदेष्टारोपि अवेत्यस्यार्थभूता रक्षणादिकर्तारः। तत्र सैषानन्दस्य मीमांसा भवतीत्युपक्रम्य युवा स्यात् साधु युवाध्यापकः इति युवा आशिष्ठो दृढिष्ठो बलिष्ठः उक्तः स काम्यकर्मफलपूर्णः। तस्य शतमानन्दा ये मनुष्यगन्धर्वानन्द एकस्ते। युवा यु मिश्रणे अ.प.से. यौति कनिन्युवृषीति कनिन्। मिश रोषशब्दयोः भ्वादि परस्मैपदी सेट् रुष रोषे दिवादिः परस्मैपदी सेट् शब्द आविष्कारे चुरादि

रश्मिः ।

परस्मैपदी सेद युवा रोषशब्दयोः कर्ता अत्रोपदेष्टारौ एकादशचतुर्दशाध्याये 'धर्ममेके यशश्चान्ये' इति । सार्धे श्लोके धर्मं वशिष्ठादयोऽष्टादश जैमिनिप्रभृतयश्च । वदन्ति च केचित् 'धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते' केचिद्धर्म एव प्रवर्तन्ते वदन्ति च ।

'मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषेधयोः ।
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ॥ इति ।

इत्येक उपदेष्टा मनुष्यगन्धर्वोपदेष्टारः आचार्या मनुश्च सूचयन्ति च भावार्थपादकरणेन सर्वोत्तममार्गाङ्गीकरणेन स मार्ग एकादशस्कन्धसप्तदशाष्टादशाध्यायोक्तः । तत्र च—

'इति मां यः स्वधर्मेण भजेन्नित्यमनन्यभाक् ।
सर्वभूतेषु मद्भावो मद्भक्तिं विन्दतेऽचिरात्' ॥
'भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरम् ।
सर्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः' ॥ इति वाक्याभ्याम् ।

मनुर्यथा—'राजतो धनमन्विच्छेत् संसीदन् स्नातकः क्षुधा ।
याज्यान्तेवासिनोर्वापि न त्वन्यत इति स्थितिः' ॥ इत्यादि ।

गन्धर्वपदस्य वक्ष्यमाणद्वितीयविग्रहे ।

'पाषण्डिनो विकर्मस्थान् बैडालवृतिकाञ्छठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्' ॥ इति ।

विकर्मस्थान् मनुष्यहिंसकान् हिंसन्ति ये तेपि वक्तुं शक्यन्ते अग्रे यौगिकार्थोक्तौ स्पष्टोयमर्थः । यद्यपि श्रुतयश्च श्रीमान् कृष्णो गीतायां चाचार्या आत्मनिवेदनपद्धतौ ह्युपदेष्टारस्तथापि विशेषत उपदेष्टॄणां विद्यमानत्वमुच्यते इति द्वितीयः । मनुष्यगन्धर्वाणां शतानन्दा देवगन्धर्वाणामेक आनन्दः । उपदेष्टा शिवः विद्याकामस्तु गिरिशमिति द्वितीयस्कन्धात् अस्मात्सूत्रात् व्यासो भगवानप्युपदेष्टा । किं च । त एवैकानन्दो दिव्यगन्धर्वाणां परोक्षवादात् 'जगुः किन्नरगन्धर्वाः' इति दशमस्कन्धात् । उपदेष्टा ज्ञानेन भक्त्या शिवः समानशीलत्वात् मैत्र्या । गन्धर्वपदस्य लौकिको योगरूढोर्थः प्रतीयते स वेदे, वेदान्ते तु ये धातुशब्दा यत्रार्थेति पत्रावलम्बनाद्यौगिकोर्थः । स यथा गन्ध अर्दने चुरादिः आत्मनेपदी सेट् गन्धयते गन्धः पचाद्यच् गन्धं अर्दकं अर्वति अर्व गतौ स्वरवर्णानुक्रमहैमधातुपाठे अर्व हिंसायां भ्वादिः परस्मैपदी सेट् गच्छति हिनस्ति वा गन्धर्वः । कर्मण्यण् । शकन्ध्वादिः । मनुष्यगन्धर्वा मनुष्यार्दकगन्तारो मनुष्यार्दकहिंसितारो वा अकामा भवन्त्येव 'अकामः पुरुषं परम्' इतिवाक्यात् । परपुरुषार्चनादिषु शिवादयः श्याचार्यादयश्चोपदेष्टारो भवन्त्येव । अकामा इत्थम् । मनुष्यगन्धर्वा हि मनुष्यपदेन मन ज्ञाने दिवादिरात्मनेपद्यनिट् ज्ञानकर्तुः प्रादुर्भूतं प्र-पूरकं आ-आप्तृ वि-प्रजनादिकर्तृ सत् दुर् अनादरे दङ् अनक्कविनाशे विप्रजनादिकर्तृ नाशोऽदर्शनम् तस्य कर्तृ आ-वि-प्रजनादिकर्तृ आप्तृ च दरे दृ विदारणे क्र्यादिः परस्मैपदी सेट् । वि-प्रजनादिकर्तृ दारणं दृ भये भ्वादिः परस्मैपदी सेट दर अप् प्रत्ययस्तस्मिन् दङ् अनादरे दृ विदारणे एतयोर्न रूपमन्योन्याश्रय आत्माश्रयश्च स्याताम् । ञिभी भये जुहोति. परस्मै. अनिट् मनु अवबोधे तनो. आ-से-वा मन्यते मनुते वा मनुः शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेति सूत्रेण उः मनोरपत्यं जातिः प्रादुर्भावो वा मनुष्यो मनोर्जातावुञ्यतौ षुक् च यत्षुकौ । एवं च ज्ञानावबोधान्यतराश्रयस्य जातिः प्र-पूरकं आ-आप्तृ इत्याद्युक्तं प. अ. इत्यन्तम् ।

रश्मिः ।

एतावन्तः पदार्था उच्यन्ते । मन स्तम्भे चुरादिरा. सेट्. एतस्य मानुरिति रूपं भवति इत्यनिष्टो धातुः सः । गन्धर्वपदेन गन्ध अर्दने अर्द गतियाचनयोः भ्वा-प-से अर्द हिंसायाम् वा । चुरा-आ-से गतियाचनहिंसार्थका गत्यादयस्त्रयोपि । अर्थनिर्देशकाः प्रायेण भावप्रत्ययान्ताः तथा च मनुष्यान् गत्वा याचकानर्वन्ति गच्छन्ति मनुष्याणां हिंसकान् । अर्द हिंसायां हिंसन्ति अर्व हिंसायां ते मनुष्यगन्धर्वाः एतावन्तः पदार्था उच्यन्ते तेषामानन्दपदार्थः आ-वि-प्रजनादिकर्तृ आप्तृ च नन्दः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति न ल्युः छन्दसि विकल्पात् । वर्णलोपो वा भावे घञ् । टु नदि समृद्धौ भ्वा-प-से-षम वैक्लव्ये भ्वा-प-से-क्विप् ऋद्ध वृद्धौ दिवादि-प-से-वृद्ध वृद्धौ भ्वा-आ-वेट् यदि च वध भासे चु-प-से-तदा भास दीप्तौ दीप दीप्तौ इति ज्ञेयम् । योऽकामो निष्काम आप्तकाम आत्मकामो भवतीति शारीरकब्राह्मणे आनन्दप्रस्तावे आत्मकामातिरिक्तानुपयोगात् । प्रजापतेर्धर्ममार्गेण मोक्षाधिकारिण आनन्दस्य वक्ष्यमाणत्वात् । ज्ञानावबोधान्यतराश्रयस्य पूरकाः पुत्रादीनां गत्वा याचकानां ज्ञानावबोधान्यतराश्रयस्य हिंसकानां चाकामत्वस्य युक्तत्वाच्च श्रोत्रियस्य चाकामहतस्येति श्रुतेः । एवं देवगन्धर्वपदार्थे देव इति दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुति-मोदमदस्वप्नकान्तिगतिषु दि. प. से. तस्य न रूपं फलाध्याये प्रत्यक्षोपदेशादिति सूत्रभाष्येस्य नित्य-लीलास्थरूपपरत्वात् । नापि देवृ देवने तस्य भ्वा-आ-सेटः आत्माश्रयापत्तेः । नापि देवि देवने तस्य भ्वादेरात्मनेपदिनः सेटः इदित्वान्नुमः प्रसङ्गात् । नापि दिवि प्रीणने तस्य भ्वादेः प-सेटः नुम्प्रसङ्गात् नापि दिव पीडायां तस्य चुरादेरात्मनेपदिनः सेटः आनन्दप्रस्तावात् । दिव परिकूजने चुरादिरात्मनेपदी तस्य रूपं देवयति । परिकूजति पचादिषु पाठात् अच् नन्दिग्रहीति सूत्रेण, देवाः । परि पृ पालनपूरणयोः सर्वधातुभ्य इन् । कूज शब्दे भ्वा-प-से-भावे ल्युट् परिकूजन इत्यत्र करणाधिकरणयोश्चेति सूत्रेण 'नपुंसके भावे क्तः' इति सूत्रेण वा परिकूजनं गीतायाम् ।

'देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' ॥ इति ।

गन्धर्वपदार्थः समानः । अत्र देवाश्च गन्धर्वाश्चेति द्वन्द्वः बृहदारण्यके देवलोकगन्धर्वलोकयोः पृथगुपादानात् । तथा च देवा अत्र पूरकस्य पर्यर्थस्य । आ आप्तारः । वि-प्रजनादिकर्तारः । अत्र प्र-पूरकाः प्रादुर्भावार्थस्य जनेरर्थः प्र-पूरकाणामपत्यादीनाम् । आ स्मरणे आप्तॄणां कृष्णप्रियाणां प्रजनादिकर्तॄणाम् । अत्र आत्मनः पूरकाणां मातापित्रादीनां च पूरकाणामिति प्रद्वयार्थः । जन गतौ वा-तु-प-से-अनवस्थाभिया तदैकः प्रशब्दः आत्मनः । प्रपूरकाणां गन्तॄणां पद्भ्यां सेवकानां कान्त्या-श्रयाणाम् । असनस्य प्रेरणस्य प्रपूरकाय ईरणं क्षेपः पूरकस्य प्रेरणं तस्य कर्तॄणाम् । अदादेरात्मनेपदिनः सेट् इर गतिकम्पनयोरित्यस्य न रूपं गतेरुक्तत्वात् आसादनं आ व्याप्तौ वि-प्रजनादिकर्तॄणाम् आप्तॄणां च षद्लृ विशरणगत्यवसादनेषु भ्वा-प-अ-भगवत्सेवायामप्येतेषां कर्तॄणाम् । षद्लृ विषादे तु-प-अनिट् अत्रार्थे विकारस्यार्थोधिकः । प्रकृतमुच्यते एतेषां कान्तिरिच्छा तस्याः कर्तारः असनं तस्य कर्तारः आसादनं आ-वि-प्रजनादिकर्तारः आप्तारश्च सादनं वि-प्रजनादिकर्तारः शरणा हिंसितारः सेवाप्रतिकूलकामक्रोधादीनामपि । गन्तारः सेवायामपि । अव रक्षणादौ रक्षणं भगवतोपि । भक्तिमार्गे रक्षितर्यपि भगवति रक्षणार्हधर्मप्राकट्यस्य टिप्पण्यां षष्ठाध्याये उक्तत्वात् । आदिपदार्थेषु गतिकान्ती स्पष्टे । प्रीतिः सेवोपयोगिपुत्रादिष्वपि । तृप्तिरात्मनोपि षष्ठाध्यायटिप्पण्याः अवगमः अवार्थानां

रश्मिः ।

रक्षणादीनां गमः ग्रहवृहनिश्चिगमश्चेत्यम् भावे । स च प्रवेशो हि प्र-पूरके भगवत्यपि मनोवेशो मनः प्रवेशोपि धर्ममार्गस्य प्रजापत्यानन्दपर्यन्तं सत्त्वात्तन्मार्गीयं सर्वं ज्ञेयम् । तन्मध्ये केषांचिद्भक्तावुक्तं सर्वं ज्ञेयम् । श्रवणमपि भगवतोपि 'कथायां सक्षणा हरेः' इति श्रीभागवताद्धर्ममार्गेपि स्वामिकर्तेति उत्तराच्चेति सूत्रभाष्यप्रकाशरश्मावुक्तम् । अर्थ याचने अप्युक्ते क्रिया भावे शः तथा च स्वामिनः कर्तारः अर्थकर्तारः याचनकर्तारः क्रियाकर्तारः इच्छा भावे शः निपातः तस्याः कर्तारः तदनुकूलदीप्तिकर्तारः अवाप्तिः अवार्थस्य रक्षणादेः कर्तारः आप्तिकर्तारः आप्लृ व्याप्तौ आलिङ्गनम् । आ वि-प्रजनादिकर्तारः । आप्तारः लिगि गतौ भ्वा-प-से-गन्तारः हिंसाकर्तारः दानकर्तारः भानकर्तारः वृद्धिकर्तारः धनादेरपि । उच्यन्ते । तेषामुपदेष्टा भगवान् व्यासः अस्मात्सूत्राज्ज्ञायते गन्धर्वा उक्तार्थाः उपदेष्टा भगवान् व्यासोऽस्मात्सूत्रादेव । देवानां गन्धर्वाणां चानन्दतारतम्यं नास्ति सकलतारतम्यादत्रोभयोरानन्द-तारतम्यं यदुच्येत यौक्तिकं तत् । अतो बृहदारण्यकश्रुत्या देवानां गन्धर्वाणां चानन्दभेदेनात्रा-नन्दैक्यविकल्पमात्रम् । एतेषां शतानन्दाः पितॄणां रक्षकाणां चरो मृत्युः तस्य लोकाः प्रेक्षका भासका वा कालादयः ते लोका येषां तेषामेक आनन्दः प्रकारेण पूरका उच्यन्ते । तथा च पितॄणामित्यस्य रक्षकत्वं मृत्य्वात्मकत्वेन विवक्षितम् । द्वितीयब्राह्मणे मृत्युरस्यात्मा भवतीति श्रुतेः । अस्येतीदमा बहुत्वविशिष्टा गृह्यन्ते उपलक्षणात् । न ह्येतावत्यां सृष्टावेक एव मृत्य्वात्मेति नियमोस्ति । काङ्क्षा ग्लानिकर्त्रोः मृत्युरूपत्वेन निरूपणं मृत्युर्वै तमः इति तृतीयब्राह्मणश्रुत्याम् । तम काङ्क्षायां ताम्यति दि-प-से-तम ग्लानौ·······ग्लै हर्षक्षये हृष हर्षे दि-प-से-हृष अलीके स्वा-प-सेडिति । अलं भूषणपर्याप्तिवारणेषु भ्वा-प-से-भूष अलंकारे भ्वादिः आप्लृ व्याप्तौ वृङ् संभक्तौ क्र्यादिरा-से । षम वैक्लव्ये भज सेवायां सेवृ सेवने भ्वा-आ-से-षिवु गतौ-दि-प-से-एतेषां शतानन्दा आजानजानां देवानामेक आनन्दः आ-वि-प्रजनादिकर्तुः गन्तुर्वा आप्तुः जानात् जनी सौत्रं तु निरूपणम् । म्रियते मृत्युः भुजिमृङ्भ्यां युक्त्युकाविति सूत्रेण त्युक् प्रादुर्भावे प्र-पूरकात् आ-विप्रजनादिकर्तुः गन्तुर्वा आप्तुः जानात् जनी प्रादुर्भावे प्रपूरकात् आ विप्रजनादिकर्तुः आप्तु दुङ् दङ् अनादरे नञ् नक विनाशे डञ् प्रत्ययः विकारस्यार्थः । वीप्रजनं कान्तिगत्यसनासादनेषु बाहुलकात् डिः वातेर्डिर्वा प्र-पूरककर्तुः जन शब्देन गन्तृकर्तुः । कान्तिकारकात् गन्तुः । असनकारकात् आसादनकारकात् । श्रुत्युक्ताजानात् जन्यतेः शानच् [सूत्रं तु 'हलः श्नः शानज्झौ' । छन्दसि शायजपि अपिशब्दा-च्छानजिति] एतस्माज्जायन्ते एतज्जातानां मानुषआनन्द इति पक्षान्तरे । ज्ञा अवबोधने इत्यस्य रूपमाजाना इति तेभ्यो जायन्ते इत्याजानजा तेषां देवानाम् । पञ्चम्यामजाताविति डः । जनेरेव इत्य-स्मात्त अन्येभ्योऽपि इति डः एतेषां शतानन्दाः कर्मदेवानां देवानामेक आनन्दः । कर्मदेवत्वं कर्मणा देवत्वं संपद्यन्ते ये तत्त्वम् । कर्मणा देवत्वमपि संपद्यन्ते इति बृहदारण्यकज्योतिर्ब्राह्मणात् । एतदेकवाक्यतया तैत्तिरीये 'ये कर्मणा देवानपियन्ति' इत्यस्याः अर्थः । देवपदार्थः पूर्वोक्तः एतेषां शतानन्दाः देवानामेक आनन्दः । देवपदार्थस्तूक्तः । एतेषां शतानन्दा इन्द्रस्यैक आनन्दः । इदि परमैश्वर्ये इन्दतीति इन्द्रः ऋज्रेन्द्रेत्यादिना रक् परः पालकः पूरकश्च ज्ञायते येन सोऽक्षरः यद्वा परो माति परमः तस्य ऐश्वर्यं ईश ऐश्वर्ये 'इन्द्रस्य युज्यः सखा' इति श्रुतेः परमैश्वर्याश्रयः । अयं सर्वोत्तममार्गीयः मार्गस्तु श्रीभागवतैकादशस्कन्दसप्तदशाष्टादशाध्यायोक्तः । यद्यपि प्रजापति-र्नैषमुच्यतेऽनेन मार्गेण तथाप्यधिकारिणाऽनेन न मुच्यते सखित्वेन स्वाभाव्यात् मार्गमात्रम् । एतस्य

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २७ ॥

नन्वेवमुपरितनानां ज्ञानाधिकारे स्वीक्रियमाणे तत्पूर्वभाविष्वप्यधिकारो वक्तव्यः । कर्मणि वेदाध्ययने उपनयनादिषु च । ततश्च तेषां ब्राह्मण्याद्यभावा-देशद्रव्याद्यभावाच्च पौराणिकेन मतेन देवान्तराभावाच्च तदभावेऽपि क्रियमाणे

भाष्यप्रकाशः ।

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २७ ॥ तत्पूर्वभाविष्वित्य-स्यैव व्याख्यानं, कर्मणीत्यादि । ततश्चेत्यादि । ततश्च अङ्गीक्रियमाणादधिकारादेव तेषां ब्राह्मण्याद्यभावात् । अधिकारस्य विप्रतिपन्नतया तद्बलेन ब्राह्मण्यादेर्वर्णस्याक्षेप्तुमशक्यत्वात् । पूर्वोक्तरीत्या तदापादनेऽपि देशस्य पृथिवीरूपस्य व्रीह्यादिरूपद्रव्यस्य आदिपदेन स्वर्लोकादौ सूर्यादिगत्यभावाद्दर्शादिकालस्याऽभावाच्च । 'पुराणं हृदयं स्मृतम्' इति तेषु, चेन्द्राद्यतिरिक्ता-स्तेऽन्ये न प्रसिद्धा इति पौराणिकेन मतेन देवान्तराभावाच्च । ऐन्द्रं दध्यमावास्या-

रश्मिः ।

शतानन्दा बृहस्पतेरेक आनन्दः बृहतां पतिः तद्बृहतोरिति सुट् तलोपः बृह वृद्धौ वृद्धिकर्तॄणां पाति इति पतिः पातेर्डतिः अयमुपदेष्टा सुराचार्यत्वात् । तस्य शतानन्दाः प्रजापतेर्विष्णोरेक आनन्दः विष्णोः प्रजापालकत्वेन प्रजापतिपदशक्तिस्तत्र । 'न कुर्यां कर्म चेदहम् । संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः' इतिगीतायाः । सर्वोत्तममार्गोऽस्त्येव । उपदेष्टा कृष्णः एतावत्पर्यन्तं कर्ममार्गस्तत्प्रधानो भक्तिव्यापारी सर्वोत्तममार्गश्चोक्तः ज्ञानभक्तिमार्गौ उच्येते । एतेषां शतानन्दाः ब्रह्मण एक आनन्दः ब्रह्म अक्षरं गणितानन्दत्वात् । तदभेदेनैव पुरुषोत्तमोक्तिः 'वेदस्य विद्यमानत्वान्मर्यादाया व्यवस्थितेः' पूर्णानन्दः पुरुषोत्तमः 'यतो वाचो निवर्तन्ते' इति श्रुतेः ज्ञानिप्राप्योऽक्षरः तस्योपदेष्टा याज्ञवल्क्यो गार्गीब्राह्मणे । भक्तप्राप्यः पुरुषोत्तमः तस्योपदेष्टा याज्ञवल्क्यः 'मृत्योः स मृत्युमाप्नोति' इति ब्राह्मणे । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति श्रुतेः । प्रज्ञा भावना । न चात्राक्षर-मुच्यत इति वाच्यम् । 'स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः' इति श्रुतेः 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः' इति श्रुतेश्च । शाण्डिल्योपि भक्तिमीमांसाकरणात् सर्वात्मभावस्योपदेष्टा सनत्कुमार-श्छान्दोग्यनवमप्रपाठके । प्रकृतमुच्यते गतो भाष्यविचारः । **संभवादितीति** तेन भाष्ये संभववचनादित्यत्र नीलं सरोजं भवत्येवेति दृष्टान्तो योजनीयः । **भाष्ये** । जैमिनेर्वेदतत्त्वज्ञत्वेन तन्मतविरुद्धेर्थे श्रुतिमाहुः **यो य इति** ॥ २६ ॥

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २७ ॥ तदिति ज्ञानपूर्वभाविषु । **भाष्ये** । **कर्मणीति** क्रियते इति कर्मेति वेदाध्ययनं 'साङ्गो वेदोऽध्येयो ज्ञेयश्च' इति अर्थस्यात्यन्ताप्र-विवेकात्कर्मपदेनैव संगृह्यते । बहुत्वाच्च बहुत्वमाहुः **उपेति** तं ह्योपनिन्य इत्यादिषु संस्कारपरामर्शादिति सूत्रे वक्ष्यमाणासु उपनयनस्य विद्यादाने पूर्वत्वेन तदादिषु षोडशसंस्कारेषु । **ततश्चेति** । चोवधारण इत्याहुः **अङ्गीति** । अयं हेतुः श्रुतिविरोधे । ननु कर्माधिकाराद्ब्राह्मण्यादिरध्याहरिष्यते इत्याकाङ्क्षायामाहुः **अधीति** । **विप्रतीति** । संदिग्धतया । **देशेति** भाष्यं विवृण्वन्ति स्म **पूर्वेति** । ब्रह्मणे ब्राह्मणमालभते क्षत्राय राजन्यं मरुद्भ्यो वैश्यं 'मरुतो वै देवानां विशः' इति श्रुत्युक्तरीत्या ब्राह्मण्यादिप्रापणे । **सूर्यादीति** तथा च पञ्चमस्कन्धनिबन्धः 'भूमेर्लक्षं विभावसुः' इति । **अभावाच्चेति** एतेषामभावो द्वितीयस्कन्धषष्ठाध्याये 'नाविदन् यज्ञसंभारान्' इत्यादिसंदर्भे उक्तः । **देवान्तरेति** षष्ठस्य तृतीये

कर्मणि श्रुतिविरोध इति चेन्न । अनेकप्रतिपत्तेर्दर्शनात् । बहूनां प्रतिपत्तिर्दृश्यते । बहवोऽत्र कर्मणि प्रवर्तमाना दृश्यन्ते । 'साध्या वै देवाः सुवर्गकामा एतत् षड्रात्रमपश्यत् तमाहरत् तेनाऽयजन्त' । 'सोऽग्निष्टोमेन वसूनयाजयत् । स उक्थ्येन रुद्रानयाजयत् । सोऽतिरात्रेणादित्यानयाजयदित्यादि' । यथैकशतं वर्षाणि प्रजापताविन्द्रो ब्रह्मचर्यमुवासेति । भूमावागत्य ऋषीन् वृत्वा यज्ञकरणं च श्रूयते, देवा वै सत्रमासतेत्यादौ । दर्शनवचनात् स्वस्यापि ऋत्विक्त्वं कर्म-

भाष्यप्रकाशः ।

यामित्यादाविन्द्रस्येन्द्रान्तराभावात् स्वयं स्वस्य यजने अपूर्वानुत्पत्तिप्रसङ्गादप्रयोजकत्वाच्च तदभावे प्राप्ते, तथात्वेऽपि क्रियमाणे कर्मणि श्रुतिविरोध इत्यर्थः । सिद्धान्तांशं व्याकुर्वन्ति **बहूनामित्यादि** । एतस्यैव व्याख्यानं **बहव** इत्यादि । वर्णसत्तायाः पूर्वं साधितप्रायत्वादाश्रमसत्तामाहुः **यथे**त्यादि । देशसत्तामाहुः **भूमा**वित्यादि । एतेन, आदित्या वा अस्माल्लोकादमुं लोकमायन्नित्यादि स्मारितम् । तेन कालद्रव्यसत्तापि सिद्ध्यति । ऋत्विजोऽपि,

रश्मिः ।

'न देवताग्निशब्दक्रियमन्यार्थसंयोगात्' इत्यधिकरणे देवताप्रतिनिधिनिषेधोपि द्रष्टव्यः । ननु दृष्टस्य फलस्याभावात् कथमपूर्वानुत्पत्तिप्रसङ्गः इति चेत्तत्राहुरप्रेति । **तदभाव** इति ब्राह्मण्याद्यभावे । ब्रह्मणे ब्राह्मणमित्यस्यां आलभत इत्यत्र लेडाश्रयणमन्तराप्यर्थसिद्धेरर्थवादत्वस्य सुवचत्वात् तत एव स्वार्थे तात्पर्याभावात् न ब्राह्मण्यादिसाधकत्वम् । **अतथात्व** इति ब्राह्मण्यादिस्तथापदार्थः स्वाभावे प्रकारत्वात् । तद्भावस्तथात्वं ब्राह्मण्यादिसत्ताऽतथात्वं ब्राह्मण्यादिसत्ताऽभावस्तस्मिन् । **श्रुतिवी**ति ब्राह्मण्यादिप्रतिपादकानां श्रुतीनां विरोधः सहानवस्थानलक्षणः । केन सह श्रुतीनामनवस्थानमिति चेदुच्यते देवकर्मभिः सह ब्राह्मण्यादिप्रतिपादिकानां स्वप्रतिपाद्यब्राह्मण्याद्यभावात् प्रतिपादकत्वेनानवस्थानम् । श्रुतयस्तु ब्रह्मणे ब्राह्मणमित्यादिः । बृहदारण्यके पुरुषविधब्राह्मणे च 'ब्रह्म वा इदमग्र आसीत्' 'एकमेव' 'तदेक५सन्नव्यभवत्' 'तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशानः' इति । स नैव व्यभवत् स विशमसृजत 'यान्येतानि देवजातानि गणशः आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत' इति । स 'नैव व्यभवत् स शौद्रं वर्णमसृजत पूषणमियं वै पूषेय५हीद५सर्वं पुष्यति यदिदं किं च' इति श्रुतिः । श्रुतौ देवत्रा देवेषु इयं पृथिवी इयं पृथ्वीपूर्वश्रुतिनिर्वचनश्रुतिस्थत्वात् । अन्यट्टीकायाम् । देशद्रव्यकालानां श्रुतयः समे देशे दर्शपूर्णमासाभ्यां यजेत । पौर्णमास्यां पौर्णमास्या यजेत । अमावास्यायाममावास्यया यजेत । दर्शपूर्णमासयोश्चत्वार ऋत्विजः इति । द्रव्यस्य श्रुत्यन्तरमपि व्रीहीनवहन्ति इन्द्रस्येन्द्रान्तरे तु शंकरभाष्यम् । योगिवदिन्द्रान्तरम् । तथा चैन्द्रं दधि इत्यत्रेन्द्रो देवतास्येत्यैन्द्रम् । सास्य देवतेति सूत्रेणाण् । तद्दधि इन्द्रस्य याजकस्येति प्राप्तं तदिन्द्रान्तराभावादित्यनेनाभावेन प्रतियुज्यते । **सिद्धान्ते**ति यद्येवं स्यात्तर्हि बहूनां प्रवृत्तिर्न स्याद् दृश्यते तु बहूनां प्रवृत्तिरतो नैवमित्याशयेन तं व्याकुर्वन्ति स्मेत्यर्थः । **भाष्ये** । **साध्या** इति साध्यनामका देवाः स्वर्गमात्मसुखं तत्कामाः । **स** इति प्रजापतिः अग्निष्टोमादिकं षड्रात्रं च यागनामानि । **भूमावागत्ये**ति 'सत्रं स्वर्गाय लोकाय सहस्रसममासत' इति वाक्यात् श्रुतावपि भूमावागमनम् । प्रकृते । भूमावित्याद्यर्थे श्रुतिमाहुः **एतेने**ति । अस्माद्भूर्लोकादमुं स्वर्लोकम् । एतेनेति भूमावागतिकथनेन । सूर्यादिगतिदर्शनात्कालसत्ता अत एव द्वितीयस्कन्धे ।

करणं च द्योतयति । अथवा सर्वपदार्थानामनेका प्रतिपत्तिर्बहुधोपयोगो वेदे दृश्यते । यथा चतुर्धाकरणादि, परिधिप्रहरणादि, तुषोपवापादि, तद्विद्यमाने क्रियते, नाविद्यमाने । तथा यत्र ये पदार्था न सन्ति तत्र कर्म तदभावेऽपि भवति । तथाहि दृश्यते । पर्वते सोमवाहकाऽनोऽभाववत् । 'यज्ञेन यज्ञमयजन्त देवाः' ।

भाष्यप्रकाशः ।

अग्निर्होता आश्विनाध्वर्यू उभौ हि वै देवानाᳪ शमितारौ अध्रिगुश्चापापश्चेत्यादिश्रुत्या ज्ञेयम् । प्रकारान्तरेण हेतुं व्याकुर्वन्ति अथवेत्यादि । नाविद्यमाने इत्यन्तमेकधा प्रतिपत्तिर्व्याख्याता । प्रकारान्तरं दर्शयन्ति तथा यत्रेत्यादि । सोमवाहकाऽनोऽभाववदिति । सोमवाहकं यदनः शकटं तदभाववत् । तथा च कृष्णलेष्ववघातो यथा वैतुष्यरूपद्वारबाधाल्लुप्यते, तथात्र मार्गरूपद्वार-बाधादनोऽपि लुप्यत इति तस्मिन् क्वचिदविद्यमानेपि कर्म क्रियत इति तद्वदित्यर्थः । यज्ञेने-

रश्मिः ।

'ततस्ते भ्रातर इमे प्रजानां पतयो नव ।
अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ॥
ततश्च मनवः काले ईजिरे ऋषयोऽपरे ।
पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुम्' ॥ इति ।

द्योतयतीति तदुक्तं प्रथमस्कन्धे ।

'धृतव्रतेन हि मया छन्दांसि गुरवोऽग्नयः ।
मानिता निर्व्यलीकेन गृहीतं चानुशासनम्' ॥ इति ।

प्रकारेति पूर्वपक्षमत्यन्तमनुकूलयितुं शेषबाधश्रुतिप्रतिनिधिपुराणेतिहासमतैः प्रकारान्तरेणे-त्यादि । अथवेत्यादीति । चतुर्धेति । तृतीयस्य पञ्चदशाधिकरणे आग्नेयं चतुर्धा करोतीति दर्शपूर्णमासयोः श्रूयते तत्राग्नेये विद्यमानत्वाच्चतुर्धाकरणं ऐन्द्राग्नाग्नीषोमीययोः पुरोडाशयोरग्नि-संबन्धादाग्नेयशब्देन पुरोडाशत्रयोपलक्षणेप्यमुख्यत्वेन तयोरविद्यमानत्वात् तयोश्चतुर्धाकरणाभावः । तथा उपरि देशाद्यभावेनाविद्यमानदेशादौ समे देशे इत्यादीनां श्रुतीनां कर्मणि न विरोधः ऐन्द्राग्नाग्नीषोमीययोः पुरोडाशयोराग्नेयं चतुर्धा करोतीति श्रुतिविरोधाभाववत् । आदिपदेन बर्हि-र्देवसदनं दामीत्यत्र श्रुतौ मुख्यं कुशकाशादिदशदर्भरूपं गौणतत्सदृशं तृणान्तरं बर्हिपदवाच्यं तत्र गौणे बर्हिःश्रुतिविरोधाभाववत् कर्मणि श्रुतिविरोधाभावः । चतुर्धाकरणं दशमस्य द्वितीयपादेप्यस्ति । परीति परिधीन् प्रहरतीति तुषानुपवपति इत्यत्रापि तृतीयाष्टकब्राह्मणे तृतीयाध्याये पूर्वा, आरणे द्वितीया । तदिति यथा च अविद्यमाने चतुर्धाकरणादौ न श्रुतिविरोध इति भावः । तथा चाविद्यमानदेशादिर्नोपरि क्रतुशेष इत्युक्तम् । प्रकृते । प्रकारेति बाधरूपम् । तथा यत्रेत्यादीति भाष्यस्य तथाहि कर्मणि तदभावो दृश्यत इत्यर्थः । सोमेति सोमवल्लीवाहकम् । वैतुष्येति दशमे चिन्त्यते । कृष्णलेषु सुवर्णशकलेषु व्रीहिवत्तुषाभावात् लुप्यते इति बाधरूपप्रकारान्तरम् । श्रौतं प्रकारान्तरमाहुः यज्ञेनेत्यादीति । शंकरभाष्ये देवतान्तराणि ऐन्द्रं हविरित्यादिस्थलेषु योगिनां यथा स्वरूपान्तरम्, तद्वत् । सिद्धान्त आहुः एतेनेति । यज्ञेनेति श्रुतितदर्थकथकपुराणेन । अत्र हेतुं

'इति संभृतसंभारः पुरुषावयवैरहम्।
तमेव पुरुषं यज्ञं तेनैवाऽयजमीश्वरम्' ॥

इत्यादिवाक्यैः सर्वसंभृत्युपपत्तिश्च। आधुनिकान् प्रति वेदविभागाज्जैमिनेस्तथा निर्णयः। तस्मात् कर्माधिकारः कर्मकरणं चोपर्यपि सिद्धम् ॥ २७ ॥

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥ २८ ॥

ननु मास्तु कर्मकरणे विरोधः। शब्दे तु भविष्यति। अर्थज्ञानानन्तरं हि कर्मकरणम्। वेदाचार्थज्ञानम्। तत्र साध्यादीनां वेद एव कर्मकरणं श्रूयते। तत्र

भाष्यप्रकाशः।

त्यादि। एतेन देवतासद्भावोऽप्युक्तः। पुरुषावयवरूपाणां तेषां सत्त्वादिति। तथाच प्राथमिकानां यागे भगवानेव देवतास्थानापन्नः। एकं सद्विप्रा बहुधा वदन्तीति। अतो देवतान्तराभावेऽपि न तेषां कर्मकरणे विरोध इत्यर्थः। तर्हि जैमिनीयस्मृतेः का गतिरित्यत आहुः आधुनिकेत्यादि। तथा चासर्वज्ञान् प्रत्येकवेदज्ञस्य मनुष्यमात्राधिकारनिर्णय इत्यर्थः। तेन, 'जैमिनीये च वैयासे न विरोधोऽस्ति कश्चन' इति पुराणवाक्यमपि समर्थितं ज्ञेयम्।

अन्ये तु देवानां विग्रहाङ्गीकारे एककालिकनानायागेषु तत्सन्निधानविरोध इत्येवं व्याख्याय सौभर्यादिवद्योगेनानेकशरीरग्रहणमनेकप्रतिपत्तिपदार्थत्वेन व्याख्याय समादधते ॥ २७ ॥

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥ २८ ॥ आशङ्कांशं व्याकुर्वन्ति नन्वित्यादि। पूर्वोक्तरीत्याऽधिकारव्यवस्थापनेन देवेषु कर्तृत्वापादनात् तैः कर्मकरणे मास्तु

रश्मिः।

वदिष्यन्तः पुराणमतप्रतिपन्नप्रकारान्तरं च वदन्तः प्रतिनिधिरूपप्रकारान्तरं वदन्त एव हेतुमाहुः पुरुषेति। एतेनेति संभृतेति भाष्यमपि विवृतम्। यज्ञेनेति श्रुतौ यज्ञपदार्थद्वयमत्रोक्तम्। ग्रन्थकर्तृमते पुराणेनोपबृंहणं श्रुतेरिति श्रुत्युपबृंहणं ज्ञेयमत एवोपबृंहकत्वेन संभृतेति भाष्यमुपन्यस्तम्। प्रतिनिधिः षष्ठस्य तृतीये पादे चतुर्थेधिकरणे व्रीह्यादिद्रव्याभावे तत्प्रतिनिधिनिष्पाद्यं कर्म भवति न तु श्रुतद्रव्याभावे कर्मलोप इति चिन्तितम्। एकं सद् ब्रह्म। देवेति इदं देशादेरप्युपलक्षकम्। भाष्ये। इत्यादीति आदिपदेनेतिहासोक्तं प्रकारान्तरं 'स्वाध्याययज्ञानयज्ञाश्च' इति गीतोक्तं प्रकारान्तरम्। शोभनैर्नियमैर्युतस्य आशब्दार्थयोः शङ्कारहितस्य वेदस्याध्ययनं यज्ञ इति। जैमिनीति षष्ठाध्यायोक्तस्य चातुर्वर्ण्यमविशेषादित्यधिकरणरूपायाः। प्रत्येकेति प्रथमस्कन्धे सामगो जैमिनिः कविरिति सामरूपैकवेदज्ञस्य। तेनेति सूत्रभाष्ययोः जैमिनिनाम्ना। अन्ये त्विति शंकराचार्यादयः। सौभर्यादीति नवमस्कन्धस्य षष्ठेध्याये इदमुपाख्यानमादिपदेन योगी इदं च रामानुजभाष्ये शंकरभाष्ये तु बृहदारण्यकशाकल्यब्राह्मणस्था श्रुतिः 'कति देवा' इत्युपक्रम्य त्रयस्त्रिंशत्त्वेन देवा इत्येकैकस्यैव देवतात्मनोऽनेकरूपतां दर्शयति प्राणैकरूपतां च दर्शयति कतम एको देव इति प्राण इतीति श्रुतेः। स्मृतिश्च।

'आत्मनां च सहस्राणि बहूनि भरतर्षभ।
योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्' ॥ इति स्थितम्।

अत्र देवतांशेनेकप्रतिपत्तेरविरोधः। सिद्धान्ते स्वस्य स्वयजने किं फलं वृत्तमित्यपि चिन्त्यम् ॥ २७ ॥

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥ २८ ॥ भाष्ये। वेदाचेति पदजन्यपदार्थोपस्थितेः सत्त्वात्। प्रकृते। उत्पत्तावित्यादि प्रथमज्ञप्तिरुत्पत्तिरत्र।

ज्ञाने कर्मकर्तृविरोधः। अन्यकल्पनायां त्वनवस्था। व्यवस्थापकाभावात्। वेदो वसूनां वृत्तान्तं वदन् वसूनामधिकारं वदेत्। वदन् वा कथमनित्यो न भवेदिति चेन्न। अतः प्रभवात्। अतः शब्दात् प्रभवः शब्दोक्तपदार्थानाम्।

वेदोक्ताः सर्व एव पदार्था आधिदैविका एव पुरुषावयवभूताः। सर्वानुकारित्वाद् भगवतः। अतो नामप्रपञ्चो वेदात्मको भिन्न एवाङ्गीकर्तव्यः। स केवलं शब्दैकसमधिगम्यः। वेदैश्च सर्वैरहमेव वेद्य इति। अतस्तस्य प्रपञ्चस्य

भाष्यप्रकाशः ।

विरोधस्तथापि शब्दे तु भविष्यति। कथमित्याकाङ्क्षायां व्युत्पादयन्ति अर्थेत्यादि। ज्ञाने कर्मकर्तृविरोध इति तत्र वेदजन्यज्ञाने विचार्ये तस्य ज्ञानस्य साध्याख्यदेवसाध्ययागात्मककर्मरूपविषयसापेक्षत्वात् तत्कर्तॄणां साध्याख्यदेवानां तद्यागार्थं प्रवृत्तत्वेन वाक्यार्थप्रमितिसमये तस्य विषयस्याभावेनोत्पत्तौ ज्ञप्तौ चात्माश्रयाज्ज्ञाने कर्मकर्तृविरोधः। श्रुतौ यागकर्तॄणां भूतत्वेन निर्देशाज्ज्ञानविषयभूतानां समनन्तरभाविज्ञाने कर्मकर्तृविरोध इति वा। न च ते साध्याख्या देवाः, सा यागव्यक्तिश्चान्यैवेति युक्तम्। अन्यकल्पनायां त्वनवस्था। व्यवस्थापकाभावात्। तस्माद् वेदो वसूनां वृत्तान्तं वदँस्तेषामधिकारं वदेत्। ततश्चैवमधिकारं वदँस्तदानीमर्थाभावेन शब्देऽर्थसंबन्धस्याशक्यवचनत्वादिदानीन्तनेन तेन संबन्धं प्राप्नुवन् पदपदार्थसंबन्धद्वारा शब्दस्य पाश्चात्यत्वं संपादयन् कथमनित्यो न भवेत्। तथाच देवानां कर्माधिकाराङ्गीकार एवं शब्दे विरोध इत्यर्थः। परिहारांशं व्याकुर्वन्ति अतः शब्दादित्यादि। प्रभव इति प्रकर्षेण भवो विद्यमानता। तथाच शब्दोक्तपदार्थानां शब्दादेव नित्यतावधारणान्न पूर्वोक्तो विरोध इत्यर्थः। तदुपपादयन्ति वेदोक्ता इत्यादि। सर्वानुकारित्वादिति सर्वमनुकारि यस्य तादृशत्वात्। अतोऽनुकारिणः सकाशादनुकार्यस्य भिन्नत्वात्। अत इति वेदैकवेद्यत्वेन लौकिकप्रमाणाविषयत्वात्। वेदात्मक इति ज्ञानात्मकः। तथाच साध्यादिभिर्देवैर्वेदादवगम्यमानस्य प्रपञ्चस्य भिन्नत्वात् तेनैव सह पदानां संबन्धान्न ज्ञाने कर्मकर्तृविरोधो, न वा

रश्मिः।

ज्ञाने कर्मकर्त्रीति भाष्यात्। ज्ञप्ताविति ज्ञप्तिमात्रे। ज्ञान इति शब्दे कर्मकर्तॄणां देवानां साध्यादीनां भूतवर्तमानत्वाभ्यां विरोधः सहानवस्थानम्। श्रुताविति 'यज्ञेन यज्ञमयजन्त देवाः' इति श्रुतौ अयजन्त इति लङा तथा निर्देशादित्यर्थः। ज्ञानेति भूतवर्तमानत्वाभ्यां कर्मकर्तृविरोधमुक्त्वा कर्मकर्तृत्वाभ्यां विरोधमाहुः ज्ञानवीति। साध्यादीनां कर्तृत्वेन ज्ञानविषयभूतानां कर्मत्वेन समनन्तरभाविशाब्दज्ञाने। अन्येति भाष्यं विवृण्वन्ति स्म न च त इति ते भूतत्वेन प्रतीयमाना सा भूतत्वेन प्रतीयमाना। शब्दादेवेति। ननु 'वाचा विरूप नित्यया' इति श्रुत्या शब्दरूपया वेदस्य नित्यत्वेप्यर्थस्य नित्यतायां कः शब्दः इति चेन्न 'अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा' इति शब्दात् विरूपया विविधरूपया। न उच्छित्तिर्येषां ते अनुच्छित्तयः अनुच्छित्तयो धर्मा यस्येत्यनुच्छित्तिधर्मा। सर्वमिति सर्वं जगत् अनुकार आत्मानुकारो यस्यास्ति तादृशं यस्य यत्संबन्धि सदेव। अत इति इदं भाष्यीयं पदं व्याख्येयम्। अनुकारि जगत् अनुकार्य आत्मा ज्ञानात्मक इति। 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इति जैमिनिसूत्रात्। 'नारायणपरा वेदाः' इति वाक्यात्। भिन्नत्वादिति आधिदैविकत्वेन भिन्नत्वात्। भूतभावित्वे कर्मकर्मप्रतिपादकवेदयोरनुभूयेते नित्यत्वे तयोः भूतभावित्वे

भिन्नत्वान्न विरोधः शब्दे । कथमेवमत आह । प्रत्यक्षानुमानाभ्याम् । प्रत्यक्षं तावदिदानीमपि यजमानो यजमानकृत्यमृत्विजश्च स्वकृत्यं वेदादेवावगच्छन्ति । न चाकृतिमात्रवाचकत्वेनाविरोधः । सर्वत्र लक्षणाप्रसङ्गात् । यः सिक्तरेताः स्यादित्यादिषु विरोधश्च ।

भाष्यप्रकाशः ।

वेदानित्यत्वम् । भूतभावित्वव्यवहारकालेऽपि तद्धर्मवत्त्वेन तस्य सत्त्वात् । अन्यथा भूतत्वभावित्वयोर्निराश्रयत्वप्रसङ्गेन तयोर्धर्मत्वस्य व्यवहारस्य चोच्छेदप्रसङ्गात् । अतो न विरोधः शब्द इत्यर्थः । अत्र प्रत्यक्षविरोधमाशङ्कते कथमित्यादि । युक्तिं व्याकुर्वते प्रत्यक्षमित्यादि । वेदादेवावगच्छन्तीति । सिद्धमेव कृत्यं वेदादेव वृद्धव्यवहारादिनाऽवगच्छन्ति । तथा च यथा कर्म तद्वेदैकगम्यं तथा पदार्था अपीत्यर्थः । ननु पदार्थसंबन्धनित्यत्वार्थमतिरिक्तप्रपञ्चाङ्गीकारोऽनर्थकः । जैमिनीयोक्तरीत्या आकृतिवाचित्वेऽपि तत्सिद्धेः । न च व्यक्त्यप्रतीत्यापत्तिः । आक्षेपादेव तत्सिद्धेरित्येकदेशिनो मन्यन्ते । तदसंगतमित्याशयेनाहुः न चाकृतीत्यादि । अयमर्थः । व्यक्तेराक्षेपलभ्यत्वं वदतामाक्षेपो नाम कः पदार्थ इति वक्तव्यम् । स किमनुमानं, लक्षणा वा । नाद्यः । शब्दस्यानुमानविधया बोधकत्वे प्रमाणान्तरत्वभङ्गप्रसङ्गात् । शब्दसहकृतानुमानस्यैव प्रमाणत्वे लाघवात् । न चानुमानस्यैव सहकारित्वमिति वाच्यम् । नियामकाभावात् । नेतरः । सर्वत्र लक्षणाप्रसङ्गात् । तथाच पक्षद्वयेऽपि दोषप्रसङ्गाज्जैमिनी-

रश्मिः ।

विरुद्धे भविष्यतः इत्यत आहुः भूतेति भूतभावित्वधर्मवत्त्वेन तस्य कर्मणो वेदस्य च सत्त्वात् । नन्वप्रतीतकर्मादिरूपधर्म्यङ्गीकारे का युक्तिरित्याकाङ्क्षायामाहुः अन्यथेति । तयोर्निराश्रययोः कालाश्रयत्वे प्रकारे सति । धर्मत्वस्येति तद्वृत्तित्वं धर्मत्वं कर्माद्यवृत्तित्वेन कर्मादिधर्मत्वस्योच्छेदः । भाविकर्मभूतं कर्मेति भावी मन्त्रो भूतो मन्त्र इति व्यवहारस्य चोच्छेदः । विशेषस्तु विद्वन्मण्डने द्रष्टव्यः । अत इति । शब्दे वेदाख्ये वर्तमानत्वभूतत्वभावित्वानां नित्यत्वप्रतीतानित्यत्वयोश्च न विरोधः । प्रत्यक्षेति । प्रत्यक्षेण गृहीतकर्मादिः शब्दशतेनापि नो वारयितुं शक्य इत्येवम् । भाष्ये । युक्तिरिति तर्के । प्रत्यक्षमिति तत्त्वनिर्धारणे निर्धारितं प्रत्यक्षमित्यर्थः । प्रकृते । सिद्धमिति वृद्धा यजमानादयः । तेषां व्यवहारा आचमनादयः आदिपदेन शक्तिग्राहकव्याकरणादयो नैयायिकानां कवीनां संयोगादयश्चैभिरवगच्छन्ति वेदार्थयजमानादीनां भिन्नत्वेपि व्याकरणादिभिः शक्तेर्गृहीतत्वेन जानन्तीत्यर्थः । तदेवाहुः तथा चेति । तथा चाधिदैविकादिभेदस्य शास्त्रसिद्धत्वान्नात्र प्रत्यक्षं प्रयोजकम् । जीवबुद्ध्या शतशोपि विचारितं मिथ्या भवति यतः । जीवानां मायया मोहितत्वाच्च । तथेति वेदैकसमधिगम्यत्वेन पदार्था आधिदैविकाः यजमानादौ त्वाधिभौतिकत्वे तदावाहनम् । तदुक्तं भावार्थपादभाष्ये 'लौकिके च तदावाहनादतीन्द्रियत्वमेवेति । संस्कारादिभिरावाहनमतिरिक्तमित्याधिदैविकम् । जैमिनीये त्वाकृत्यधिकरणे । एके इति शंकराचार्यादयः । सर्वत्रेति भाष्यं विवरीतुमाहुः व्यक्तेरिति । अनुमानमिति गोत्वं व्यक्त्याश्रितं जातित्वादित्येवं रूपम् । लक्षणेति घटत्वादीनां घटत्वादिविशिष्टे लक्षणा शक्यसंबन्धस्तु समवायादिः । हेतौ हेतुमाहुः शब्देति । ननु न लाघवं शब्दसहकृतत्वमनुमाने यथा तथानुमानसहकृतत्वं शब्द इति प्रामाणिकमिति चेन्न । प्रथमतः शब्देन घटत्वाद्यभिहिते पश्चादनुमानात् । एवं चानुमानसहकृतत्वे शब्देङ्गीक्रियमाणे नियामकाभाव

भाष्यप्रकाशः।

यानुसरणेनाविरोधसाधनमसंगतमित्यर्थः । अनुमानपक्षस्त्वतिशिथिलत्वाद् भाष्ये नोट्टङ्कित इति ज्ञेयम् । नन्वस्तु लक्षणा, जैमिनेरप्यस्मिन्नंशे आदरणीयत्वात् प्राचीनवृत्तिकारैरैकशास्त्र्य-स्यैवादृतत्वादित्यत आहुः य इत्यादि । अयमर्थः । न हि सर्वत्र वेदे शक्ता एव शब्दाः प्रयुज्यन्ते । किंतु यौगिका अपि । यथा, यः सिक्तरेताः स्यात् प्रथमायां तस्य जित्या-मुपदध्यादिति सिक्तरेतःपदम् । न हि तत्राकृतिः काचित् संभवति, या व्यक्तिरूपं सिक्तरेत-समाक्षिपेत् । किंतु सिक्तरेतस्त्वं तत्रोपाधिः । स च रेतःसेकानन्तरभावित्वादनित्य इति । अवयवशक्त्या बोधनेऽपि सिक्तत्वं सेकानन्तरभावित्वादनित्यमतस्तत्र पदसंबन्धाङ्गीकारे शब्दा-नित्यत्वस्यापरिहाराद्दोषतादवस्थ्यमित्यर्थः । ननु नास्माभिर्जातावुपाधौ वा शक्तिराद्रियते, अपि

रश्मिः।

इत्येतदेवाहुर्न चेति । अतीति । अयं पक्षो भट्टमते स चिन्तामणावेवं दूषितः । न हि जातित्वं व्यक्त्याश्रितत्वसाधकं पदानुपस्थितत्वात्तस्य । उपस्थितत्वे वा जातिवित्तिवेद्यैव व्यक्तिः । किं चानुमाना-द्व्यक्त्याश्रितं गोत्वमिति धीर्न तु गौरिति अतोतिशिथिलत्वात् नोट्टङ्कित इति । लक्षणापक्षस्तु भाट्टभास्करे यथैव गवादिशब्दानां जातौ शक्तिमाश्रित्याविनाभावेन व्यक्तौ लक्षणाऽऽकृत्यधिकरणन्यायसिद्धा तथाऽऽख्यातानां कृतौ शक्तिमाश्रित्य तद्वति कर्तरि लक्षणेति राणक इति प्रोक्तमतो राणकमतमपाकर्तुं मिश्रमतमपाकर्तुं चानूदित इति ज्ञेयम् । यदि चाक्षेपस्तर्क इत्युच्यते तदापि तर्कस्य मीमांसापेक्षत्वा-द्गौरवम् । 'तर्को मीमांसया युतः' इति वाक्यात् । प्राचीनेति बोधायनप्रभृतिभिः षोडशलक्षणी मीमांसादृता । चत्वारोऽध्याया वेदान्तमीमांसाया द्वादश जैमिनेरध्याया इति षोडश । शक्ता इति रूढाः । अपीति । तथा च वेदे योगरूढाः शब्दा इत्यर्थः । तथा चाचार्यकारिका 'विचारो योगरूढितः' इति । नहीति । सिक्तरेताः पुरुष इति पुरुषत्वं आकृतिः सिक्तरेतस्त्वमुपाधिः व्यक्तेरभेदस्य जाति-बाधकस्य सत्त्वात् ।

'व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः ।
रूपहानिरसंबन्धो जातिबाधकसंग्रहः' ॥

इति नैयायिककारिका । भाष्ये । इत्यादिष्विति आदिपदेन 'इषे त्वोर्जे त्वा' इत्यादि अत्र युष्मत्त्वे न जाती किं तु शाखात्वे जाती इषे त्वा त्वां शाखां छिनद्मीत्यर्थात् । ऊर्जे त्वा त्वां शाखामनुमार्ज्मीति । प्रकृते । इत्यर्थ इति किं च 'स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा' यथा तीरत्वेनोपस्थितेर्गङ्गापदस्य । इह तु गोत्वादन्येन रूपेण व्यक्तेर्नोपस्थितिरपि तु गोत्वेनैव । व्यक्तित्वेन सास्नादिमत्त्वेन नोपलक्ष्यत्वे गोपदात् व्यक्तित्वादिधीः स्यात् । न च गोत्वसंबन्धिनि गोत्वविशिष्टे लक्षणेति वाच्यं गोत्वेन साक्षादानयनानन्वय इति व्यक्तेरवच्छेदकतयान्वये मुख्यत्वेन लक्षणयापि गोत्वावच्छिन्नैव व्यक्तिः क्रियार्थान्वयिनी न केवला व्यक्तिरिति गोत्वविशिष्टस्य लक्ष्यत्वे युगपद्वृत्तिद्वयविरोधप्रसङ्गात् गोत्वेपि लक्षणाप्रसङ्गाद्वा । किं च जातिमात्रे न शक्तिः न वा व्यक्तौ लक्षणा जातौ मुख्यप्रयोगाभावात् शक्तिलक्षणयोस्तन्मूलकत्वात् । प्रयोगो हि व्यवहारहेतुज्ञानार्थः, न च जातिमात्रे निर्विकल्पकाद्व्यक्तिमनादायैव केवलजातिव्यवहारस्तस्या विशिष्टज्ञानसाध्यत्वात् गां पश्य, घटो नश्यति इत्यादौ गोत्वादिविशिष्टस्यैव ज्ञानं व्यवहारश्चातः एकवित्तिवेद्यत्वाज्जातिविशिष्टं शक्यम् । किं च तृतीयायाः करणकत्वे इव गोगोत्वे शक्ये इति

न च प्रवृत्तिनिमित्तस्यैव वाच्यत्वम् । प्रवृत्तिवैयर्थ्यापत्तेः । संकेतग्रहविरोधाच्च । सर्वस्यापि पदार्थस्य भगवत्त्वान्नानुपस्थितिदोषः । संकेतग्रहेऽपि ।

भाष्यप्रकाशः ।

तु पदप्रवृत्तिनिमित्ते । स कोऽप्यस्तु । तस्य नित्यत्वान्न कोऽपि दोष इत्यत आहुः **न च प्रवृत्तीत्यादि** । प्रवृत्तिनिमित्तस्य धर्मस्य सर्वत्र नित्यतैवेति नियमाभावान्नित्यसंबन्धाभावे च तेन व्यक्त्यनाक्षेपात् तां विना कार्यासंभवे पदप्रवृत्तिवैयर्थ्यापत्तेरित्यर्थः । अथ तादृशस्याप्यर्थबलादाक्षेपकत्वमाक्षेपश्चोपनय इति विभाव्यते तदा दूषणान्तरमाहुः **संकेतेत्यादि** । तादृशस्थले हि संकेतग्रहो व्यवहारादिना वाच्यः । तत्र व्यवहारादिस्तु व्यक्तावेव पर्यवस्यन्नानुपस्थिते प्रवृत्तिनिमित्ते संकेतं ग्राहयिष्यति । यदि च नागृहीतविशेषणन्यायेनोपस्थितिरङ्गीक्रियते तदापि समानसंवित्संवेद्यत्वापातेन विशिष्ट एव शक्तेः पर्यवसानमनित्यतानुद्धार इति तद्विरोधादित्यर्थः । ननु मास्त्वेकदेशिमतं तथापि वैदिकसृष्टेरतिरिक्तत्वाङ्गीकारे तस्या अगोचरत्वेनानुपस्थितत्वात् तत्र संकेतग्रहो दुर्लभ इत्यत आहुः **सर्वस्येत्यादि** । तथाच पूर्वेषां ब्रह्मादीनां भगवद्दर्शनेनोपस्थितेः सुकरत्वाददोषः । ततोऽर्वाचीनानामिदानीन्तनपर्यन्तानां तु

रश्मिः ।

वाच्यम् गोत्वव्यक्तिप्रसिद्धीप्रसंगात् भवति तु गौरितीत्यादिनैयायिकोक्तदूषणानि ज्ञेयानि । **स क** इति स पदार्थः । **प्रवृत्ती**ति यथा घटपदप्रवृत्तिनिमित्तं घटत्वम् । **इति नियमे**ति जातिमात्रे नित्यतानियमोस्तु न तु सिक्तेरतस्त्वादिषु सामान्यत्वादिषु च । **उपनयः** इति तर्कः एकवित्तिवेद्यत्वं वा । **संकेते**ति अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरेच्छानुरूपः संकेतः शक्तिः, अभिधा च तस्य ग्रहो व्यवहारादिभिः ।

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः' ॥

व्यक्ताविति घटोयमित्यादिषु अन्येषां जात्याद्यभावात् । **यदि चे**ति दण्डीत्यादौ न गृहीतदण्डरूपं विशेषणं यया सा बुद्धिर्न विशिष्टं घटदण्डिरूपमुपसंक्रामतीति यथाह विश्वनाथः सिद्धान्तमुक्तावल्यां विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वादिति । एवं विशेषणीभूतजात्याद्यग्रहे विशिष्टाग्रहः संदर्शितः । **अनित्यते**ति व्यक्तीनामनित्यत्वेनानित्यतानुद्धारः तस्य संकेतग्रहस्य विरोधात् । **अग**विति । वृद्धव्यवहाराद्यगोचरत्वेन प्रयोज्यप्रयोजकवृद्धागोचरत्वेन वा । **भगव**दिति भगवद्दर्शनेन प्रतिपाद्यप्रतिपादकत्वरूपसंबन्धग्रहस्ततो भगवान् भगवत्पदवाच्योस्तीत्यत्र भगवत्पदवाच्याभिन्न भगवन्निष्ठा सत्तेति शाब्दबोधः । उपमितौ तु भगवत्पदवाच्योयमिति प्रतीतिः । भाट्टास्तु यासौ पूर्वमस्माभिर्दृष्टा गौः सा नेतरावयवेन सदृशीप्रतीतिमाहुरुपमितेः । अतो भगवान् भगवत्पदवाच्य इति शाब्दबोधः । दृष्ट एव स्नेह इत्युपपत्तिरिति भाष्यात्स्नेहे जाते तत्स्वाभाव्याद् ।

'वेदाक्षराणि यावन्ति कथितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः' ॥

इति वाक्यविस्पष्टायाः 'तमुस्तोतारः पूर्व्यं यथाविद ऋतस्य गर्भं जनुषापिपर्तन आस्य जानन्तो नामचिद्विवक्तन महस्ते विष्णोः सुमतिं भजामहे' इति श्रुत्या ऋषित्वेन भगवदिच्छया दर्शनात्तेन भगवन्नामसु शक्तिग्रहः भगवतः ।

रश्मिः ।

'आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः' ॥ इतिवाक्यात् ।
'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ।
तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत्' ॥ इतिवाक्यात् ।

मनीषया पदपदार्थसंबन्धरूपायाः शक्तेर्ग्रहः । ननु भगवद्दर्शनं पदार्थो यस्मिन्निति रूपं तत्र कानि पदानीति चेन्न मनीषायाः पदपदार्थसंबन्धग्रहे कारणत्वात् । ननु पदानि तदानीं न सन्तीति चेन्न 'तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः' इति वाक्यात् मनीषायां वेदरूपपदसत्त्वात् तथा च श्रुतिः 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं वै देवमात्मबुद्धिप्रकाशम्' इति ब्रह्मणो भगवद्दर्शनं गोपालतापिनीयेऽस्ति यो विद्यास्तस्मै गोपायति कृष्णः यस्तं ह देवमात्मवृत्तिप्रकाशमिति पूर्वपादानन्तरं पादद्वयं गोपालतापिनीये । अत्रात्मवृत्तिरात्मनो मनसो वर्तनमेकादशधा 'एकादशामी मनसो हि वृत्तयः' इति वाक्याद्यद्यपि वक्तुं शक्यते तथापि वेदप्रसङ्गादात्मनां वैदिकपुरुषशरीराणां वृत्तिर्वर्तनं हरिनाम्नां ग्रहणमिति यावत् । तस्य प्रकाशरूपं 'मुमुक्षुर्वै शरणमनुव्रजेत्' इति श्रुत्यंशेनान्वयः । एवं च वेदा नामसु शक्ताः क्रियायां वेति संकटे 'यावानर्थ उदपाने' इति गीतारूपवाक्यशेषात् इतिहासशरणानां पूर्वोक्तोर्थो वैदिकानां क्रियारूपोर्थ इति । यद्वा । भगवद्दर्शनेनोपस्थितेरित्यस्यायमर्थः । भगवद्दर्शनाभिन्नोपस्थितेरिति । अभेदके । प्रकृत्यादिभ्य उपसंख्यानमिति वार्तिकेन तृतीया । तदुक्तं प्रस्थानरत्नाकरे अथ प्रसङ्गादिदं विचार्यते वैदिकपदपदार्थानां भिन्नत्वात् कथं तत्र संबन्धग्रहः कस्य वा संबन्धस्य ग्रह इति । तत्र भगवद्दयया वृद्धव्यवहारादिनेति ब्रूमः । अत्रादिपदेन उपमानाप्तवाक्ये ग्रहीतव्ये कथमिति चेदुच्यते यो वै ब्रह्माणमिति श्रुतौ ब्रह्मणे वेदपाठनस्यात्मबुद्धिप्रकाशनस्य चोक्तेः । अत्राप्तवाक्याच्छक्तिग्रहः । पुरुषसूक्ते तु शक्रस्य वृद्धव्यवहारेण 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते । धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' इति । अत्र यज्ञः नाम कर्ता वृद्धः प्रयोजकः प्रयोज्यवृद्धो धाता उदाहारकत्वात् । शक्रो बालस्थाने शक्ल शक्तौ स्फायितञ्चीतिरक् शक्नोति स्वा. प. अ. । उपमानाच्छक्तिग्रहो यथा पुरुषसूक्ते सहस्रशीर्षा पुरुषः अन्तस्तद्धर्माधिकरणोक्तः 'अत्यतिष्ठद्दशाङ्गुलम्' इति श्रुतेः । एतस्य वैश्वानराधिकरणोक्तविरुद्धधर्माश्रयत्वेनाभिव्यापकरूपे भक्तमनोरथाविषये साकारे ब्रह्मणि यतो वाचो निवर्तन्ते इति श्रुतिविषये परब्रह्मपदस्य संकेतग्रहः । तथाहि विराट्सदृशं परं ब्रह्मेति भाष्यादवगत्य अपि संराधने कृते परब्रह्म पश्यति ततः इदं वस्तु परब्रह्मपदवाच्यमित्युपमितिरियं प्रत्यक्षेन्तर्भवतीति प्रस्थानरत्नाकरे । तथा च सर्वस्येति भाष्यस्यायमर्थः ।

'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी' ॥ इति

भाषापरिच्छेदेन शक्तानां वर्णपदानां वर्णादिज्ञानसत्त्वेपि द्वारभूतस्य पदार्थोपस्थितेर्विषयस्याधिदैविकत्वेनाभावादभावेन शाब्दबोधकारणवैकल्यरूपो दोषः प्राप्तः स न । आधिदैविकानामप्यर्थानां भगवत्त्वात्तेन रूपेणाधिदैविकानामप्युपस्थितेरिति । संकेतग्रहः सहकारी तत्सत्त्वेपि वैयाकरणास्तु अर्थसापेक्षशब्दस्वरूपमेव वाचकत्वापरनामकं शक्तिःकारणत्वादिवदित्याहुः, सिद्धान्ते तु साधुत्वापरपर्याया अनादिवाचकत्वरूपा अर्थबोधाविर्भावकशक्तिरतिरिक्तैव नच गौरवम् । परास्य

जमदग्नीनां पञ्चावत्तमित्यनुमानम्। न हि स्वयं जामदग्न्य इति प्रत्यक्षोऽनु-

भाष्यप्रकाशः।

संप्रदायपारंपर्यात् सर्वस्य भगवदनुकारित्वेन लौकिकसदृशतयोपमानेन संकेतग्रहसौकर्याददोषः। अन्यथावादिनां त्वज्ञानमेवातो न कोऽपि दोष इत्यर्थः। अतो जैमिनिमते वेदाद्धर्मावगतिरिव व्यासमते वैदिकपदार्थानामप्यवगतिरिति कर्मावगतिप्रत्यक्षेण साधितम्। अनुमानेन साधयितुं तदाहुः जमदग्नीत्यादि। नच मनुष्यत्ववत् तदपि प्रत्यक्षमिति वाच्यम्। भारते ब्राह्मण्यविचारे,

'जातिरत्र महासर्प मनुष्यत्वे महामते।
संकरात् सर्ववर्णानां दुष्परीक्ष्येति मे मतिः।
सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः' ॥

इति कथनात्। 'स्त्र्यपराधात् कर्तुश्च पुत्रदर्शनम्' इति जैमिनीयसूत्रेऽपि पुत्रदर्शनमात्र-कथनेन तज्जात्यदर्शनसूचनात्। प्रवरानुमन्त्रणश्रुत्या, 'यन्मे माता प्रममाद यच्चचारानुव्रतम्' इति श्रुत्या च तथा निश्चयात्। नच, बीजाद्योनिर्बलीयसीति प्रसिद्धेर्मातृगोत्राद् गोत्रनिर्णय इति वाच्यम्। 'माता भस्त्रा पितुः पुत्रो येन जातः स एव सः' इति शास्त्रापेक्षया तस्या

रश्मिः।

शक्तिर्विविधैवेति श्रुतेः। विस्तरः प्रस्थानरत्नाकरेऽस्ति। वर्णेषु पदेषु च शक्तिः वाक्येषु तु बुद्धिपरि-कल्पिता। संप्रदायेति प्राचां व्यवहाराप्तवाक्योपमानविवृतिपारंपर्यात्। तेषूपमानमाहुः सर्वस्येति सर्वस्यानुकारोऽनुकरणं भगवदनुकारोऽस्यास्तीति भगवदनुकारी तत्त्वात्। लौकिकभगवत्सदृशतयो-पमानेन। तद्यथा लौकिको भगवान् विराडात्मा तद्द्रष्टृभिर्ब्रह्मादिभिः भृग्वादिसप्तर्षिपर्यन्तैः देवदा-नवगुह्यकादिभ्यः उक्तं वैदिकविराडवयवसदृशा लौकिकविराडाज्जातवाचकपुरुषसूक्तोक्तपदवाच्या इति पश्चात् देवदानवगुह्यकादिभिः यागादिषु ते पदार्था विराडाज्जाता दृष्टा तत्र वैदिकविराडवयव-सादृश्यज्ञानं यज्जातं तदुपमितिकरणं तदनन्तरं वैदिकविराडवयवसदृशाः लौकिकविराडाज्जातवा-चकपुरुषसूक्तोक्तपदवाच्या इत्यतिदेशवाक्यार्थस्मरणं यज्जायते तदेव व्यापारः तदनन्तरं तल्लौकिक-विराडाज्जातवाचकपुरुषसूक्तोक्तपदवाच्या इति ज्ञानं यज्जायते तदुपमितिरिति। तथा च सादृश्यज्ञानेन लौकिकं भगवत्सदृशताप्रकारकेण लौकिकभगवत्सदृशविशेष्यकेनोपमानेन संकेतग्रहसौकर्याद्दोषः संकेतग्रहाभावरूपः स न इत्यर्थः। अन्यथेति अनुमाननिवेशनकल्पकत्वं वदतां त्वज्ञानमित्युक्तम्। तत्प्रस्थानरत्नाकरे स्पष्टम्। इत्यर्थ इति इति सर्वस्येति भाष्यस्यार्थः। अवगतिरिति आधिदै-विकत्वेनावगतिरित्येवम्। कर्मेति कर्मणां याजमानादीनामवगतिरिदानीमपीति भाष्योक्तरीत्या प्रत्यक्षं तदात्मकेन प्रत्यक्षेण। साधितमिति अनुमेति। तदिति। जैमिनिमते वेदाद्धर्मावगतिरिव व्यासमते वैदिकपदार्थानामप्यवगतिरित्येवमनुमानेन साधयितुमाहुरित्यर्थः। जमदग्नीत्यादीति। भाष्ये। अवत्तं अवदानम्। प्रकृते। स्वयं जामदग्न्यमिति पाठमङ्गीकृत्याहुः न चेति। तदपीति जामदग्न्यत्वमपि। भाष्ये भावप्रधानत्वादेतच्छन्दस्। येनेन्द्रियेण यद्गृह्यते तेनेन्द्रियेण तद्गता जातिः तदभावश्च गृह्यते इति। प्रवरेति तस्य मे अग्निरुपद्रष्टा वायुरुपश्रोताऽऽदित्योऽनुख्याता द्यौः पिता पृथिवी माता प्रजापतिर्बन्धुः य एवास्मि स सन् यजे इति श्रुत्या। तस्याः प्रसिद्धेः।

भवोऽस्ति । परोक्षव्यवहारस्यैवानुमानत्वमिति ब्रह्मवादः । तस्मात् प्रत्यक्षानुमानाभ्यामिदानीन्तनभौतिकयज्ञपदार्थेषु भगवदवयवावेशस्तथाऽमुत्रापि । तस्माद् वैदिकः पदार्थः सर्वोऽप्याधिदैविको भिन्न इति सिद्धम् ॥ २८ ॥

भाष्यप्रकाशः ।

दुर्बलत्वादिति । नन्वत्र जामदग्न्यज्ञाने हेत्वदर्शनात् कथमस्यानुमानत्वमित्यत आहुः **परोक्षे-त्यादि** । तथाच परोक्षेण स्वस्य यथा जामदग्न्यत्वावगतिस्तथा परोक्षेणापि तस्य प्रपञ्चस्यावगतिरित्यर्थः । सिद्धमाहुः **तस्मादित्यादि** ।

रश्मिः ।

नन्वत्रेति जमदग्नीनामिति श्रुतौ । **परोक्षेणेति** अक्ष्णः परमिति परोक्षं तेन । **अपीति** अनेन परोक्षेण सह प्रत्यक्षं समुच्चितम् । ननु कथमेकस्याधिदैविकस्य प्रत्यक्षाप्रत्यक्षे इति चेन्न ।

'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते ।
तपसा वेदयुक्त्या तु प्रसादात् परमात्मनः' ॥ इति श्रुतेः ।

तप आदियुक्तानां प्रतिपद्यते इत्यनेन पदेन प्रतिनिधिपदनं तदयुक्तानां तु परोक्षमिति विवेकात् । **भाष्ये । ब्रह्मवाद** इति ब्रह्मैव सर्वमिति वादः सर्वान्तर्गतस्यैकस्यापि प्रसिद्धानुमानिकत्वे तु तस्य पदार्थस्यानुमानगम्यत्वेन सर्वं खल्विदं ब्रह्मेत्यौपनिषदत्वाभावेन 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतिविरोधः । ननु इदानीमपि इत्याद्युक्तभाष्ये वेदादवगच्छन्तीत्युक्त्या यजमानादिकृत्यानां वेदरूपशब्दादवगतिकथनात्कृत्यादिविषयकं शाब्दं ज्ञानं प्रतीयते । तद्विरुद्धं प्रत्यक्षं तावदित्युपक्रमेण प्रत्यक्षज्ञानस्य विवक्षितत्वादित्याकाङ्क्षायां स्वयमाहुः **तस्मादिति** । प्रत्यक्षपदेन शाब्दं प्रत्यक्षं गृह्यत इति चेन्न । 'परोक्षव्यवहारस्यैवानुमानत्वेनानुमानाभ्यामिति सूत्रशेषापत्तेः अतः प्रत्यक्षानुमानाभ्यां हेतुभ्यां भगवदवयवानामावेशः । मौढ्याभावाय पुराणोक्तानां जैमिनिसूत्रोक्तप्रकारेण स्वीक्रियत इत्यर्थः । व्याससूत्रसहकारेण तथामुत्रापि देवादिलोक इत्यर्थः । तथा च भावार्थपादभाष्यम् । जैमिनिसूत्रोक्तप्रकारे 'भावार्थाः कर्मशब्दाः' इति सूत्रस्य । क्रियामात्रं यदि स धर्मो भवेत् तदा न वक्तव्यम् । किं त्वतीन्द्रियो यागादिः स्थिरो धर्मस्तत्र सामान्यं नित्यमिति नित्यता प्रतिपादिता विशेषस्त्वतीन्द्रियता । द्रव्यदेवतासंबन्धो हि यागः देवताया अतीन्द्रियत्वात् तत्संबन्धोप्यतीन्द्रियः । संबन्धश्च प्रीतिहेतुत्वेन स्वीकारः । द्रव्यं चालौकिकमित्यनित्यतायां न कोपि हेतुः । न हि चेष्टा यागो येन विनाशः कल्प्यते अदृष्टं वा । ये क्षणिकत्वं अदृष्टं वा कल्पयन्ति न ते यागपदार्थं विदुः भावार्था ये कर्मशब्दा इत्यर्थः । दानमपि परस्वत्वापादनमतीन्द्रियं लोकास्तु तद्विषयककायिकव्यापारे तत्प्रयोगमाहुः । ननु अवघातादय ऐन्द्रियकाः आशुतरविनाशिनश्चेति चेन्न मन्त्रेण चावघातो देवपत्न्यश्च कर्त्र्यः लौकिके च तदावाहनादतीन्द्रियत्वमेव । फले संपन्ने तस्य तिरोभावः । स एवार्थः । लौकिकस्तु संसारहेतुत्वादनर्थः । अत एव विधीयते पुरुषः प्रवर्त्यत इति । अत्र भौतिकयज्ञपदार्थेषु भगवदवयवावेश उक्तः स प्रस्थानरत्नाकरे संस्कारादिनोक्तः । तेषां नित्यपरिच्छिन्नत्वाद्धमागमरूपयोराविर्भावतिरोभावयोस्तत्र सत्त्वात् । व्यापकत्वपक्षे तु विहितकार्यानुकूलत्वरूपसंनिधानस्यैवावेशत्वादिति । न चातीन्द्रियस्याप्रत्यक्षात् यजमानादीनां लौकिकानां प्रत्यक्षेणातीन्द्रियांशे शाब्दमिति प्रत्यक्षं तावदिति भाष्यविरोधस्तदवस्थ इति शङ्क्यम् । अती-

भाष्यप्रकाशः ।

शंकराचार्यादयस्तु, एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानित्यादिप्रत्य-

रश्मिः ।

न्द्रियविशिष्टग्रहे लौकिकमात्राग्रहात् । न च विशिष्टं शुद्धान्नातिरिच्यते इति दोषतादवस्थ्यं शङ्क्यम् । संस्काराणामावाहनस्य च वैयर्थ्यापातात् अतः संस्कारादिविशिष्टं शुद्धाद् व्रीह्यादेरतिरिच्यते तथा च भावार्थपादभाष्यम् । तस्य च शेषभूतत्वादिति सूत्रस्य संस्कृतं हि द्रव्यमुत्तरत्रोपयुज्यत इति । अतः संस्कृतावाहितयोः प्रत्यक्षम् । शुद्धप्रत्यक्षादतिरिक्तम् । अतः प्रत्यक्षं तावत् इत्युपक्रमभाष्यम् । अथ न हि स्वयं जामदग्न्य इतीति भाष्यपाठस्तर्हि जमदग्नेर्गोत्रापत्यं जामदग्न्यः मधुबभ्र्वोर्ब्राह्मणकौशिकयोरिति सूत्रेण छान्दसो यञ्प्रत्ययः । च्छन्दसि बहुलमिति कौशिकगोत्रे जमदग्नेः सत्तायाः नवमस्कन्धे षोडशे ।

'इति कौशिकगोत्रं हि विश्वामित्रैः पृथग्विधम् ।

प्रवरान्तरमापन्नं तद्धि चैवं प्रकल्पितम्' ॥ इति वाक्यात् ।

एवमित्यनेनोक्तप्रकारे पूर्वं कुशकथायां ऋचीकार्थकथासत्त्वात् । ननु कुशस्य कुशाम्बुस्ततो गाधिः तस्य सत्यवती कन्या ऋचीकर्षेः कलत्रं ततो जमदग्निस्तस्य परशुरामो जामदग्न्य इति कथं कौशिकगोत्रे जमदग्नेः सत्ता कथं मधुबभ्र्वोश्चेति सूत्रप्रवृत्तिः यञो गोत्रे यञ् इति वृत्तिरिति चेन्न वान्यस्मिन् सपिण्डे स्थविरतरे जीवति । भ्रातुरन्यस्मिन् सपिण्डे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं स्थानेन वयसा चोत्कृष्टे पितृव्ये मातामहे भ्रातरि वा जीवति । इति व्याकरणात् । ननु गाधौ जीवति जामदग्न्यस्य युवसंज्ञा न तु गोत्रसंज्ञेति चेन्न । 'ऐलस्य चोर्वशीगर्भात्षडासन्नात्मजा नृप' इत्युर्वशीवंश्यसंबन्धित्वेन 'यूनश्च कुत्सायां गोत्रसंज्ञेति वाच्यम्' इति वार्तिकेन यूनो गोत्रसंज्ञासत्त्वात् । श्रुतौ तु जमदग्नीनामित्यत्र जामदग्न्यानां वसुमदादीनां परशुरामान्तानां पञ्चावत्तमिति प्राप्ते यञञोश्चेति सूत्रेण यञो लुक् । जमदग्नीनां जमत् । जमु अदने जमतामग्नीनां तथाच वृत्तिः गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयोर्लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियामिति । पञ्च अवत्तं 'अच उपसर्गात्तः' अजन्तादुपसर्गात्परस्य दा इत्यस्य घोः अचस्तः स्यादिति दा इत्याचस्तः क्तप्रत्यये । अवदानम् । 'अवदानमतिवृत्तं कर्मखण्डनयोरपि' इति विश्वः । तथा च जामदग्न्य इति ज्ञानं अपत्यप्रत्ययांशे शास्त्रीयं न तु जमदग्निप्रत्यक्षेण जमदग्न्यपत्यप्रत्यक्षेपि जामदग्न्यस्य प्रत्ययार्थः प्रत्यक्षः । वेदाज्जायमानं श्रौतं ज्ञानम् । **परोक्षेति** 'प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानम्' इति सांख्यप्रवचनसूत्रात् । न च शाब्दज्ञानेऽतिव्याप्तिरिति वाच्यं सूत्राक्षरविचारे तु नाव्याप्तेः । ननु जातिशक्तिखण्डनेन जामदग्न्य इत्यत्र व्यक्तावेव शक्तिरुक्ता स्यात् इति चेत्सत्यम् । प्रस्थानरत्नाकरे तथाप्रतिपादनात् । 'जातिव्यक्तिविभागोयं यथावस्तुनि कल्पितः' इति षष्ठस्कन्धात् । तथापि स एकधा भवति त्रिधा भवति इति श्रुतेर्जातिरूपत्वेनाविर्भावे विशिष्टे शक्तिर्यतो जातिर्व्यक्तिं विनाऽनुपपद्यमाना तामाक्षिपति शास्त्रार्थप्रतिपादकद्वितीयस्कन्धस्य सुबोधिन्याम् पञ्चमश्लोके विशिष्टे शक्त्युक्तेः । सूत्रार्थस्तु आधिदैविकप्रपञ्चः 'अतः प्रभवात् प्रत्यक्षानुमानाभ्याम्' साध्यतावच्छेदकसंबन्धः आश्रयता हेतुतावच्छेदकसंबन्धः विषयता केवलव्यतिरेकि यन्नैवं तन्नैवं लौकिकप्रपञ्चवत् । आधिदैविकप्रपञ्चः शब्दात्यन्ताप्रविविक्ततया शब्दः स्वस्य वसूनां वृत्तान्तप्रतिपादकत्वेनापि नानित्यः । अतः प्रभवादिति साध्यतावच्छेदकसंबन्धः आश्रयता, हेतुतावच्छेदकसंबन्धः प्रतिपाद्यता, केवलव्यतिरेकि । प्रकृतमनुसर्यते एत इति अर्थस्तु एत इति इति मन्त्रस्य पदेनासृग्रमिति मन्त्रस्य

अत एव च नित्यत्वम् ॥ २९ ॥

साधिकां विशेषोपपत्तिमाह। अत एव अस्मादेव हेतोर्वेदस्य नित्यत्वम्। सर्वप्रपञ्चवैलक्षण्येन। चकाराद् ब्रह्मतुल्यत्वम्। शब्दब्रह्म वेदपुरुष इत्यादिवाच्यत्वम्। अस्यास्तु सृष्टेर्ब्रह्मोपादानस्य सर्वज्ञतया कथनं तन्माहात्म्यनिरूपणार्थम्। बन्धिका ह्येषा। मोचिका तु सा। अत एव ऋषीणामप्यत्र मोहः। निःश्व-

---

भाष्यप्रकाशः।

क्षश्रुतिं 'सर्वेषां स तु नामानि रूपाणि च पृथक् पृथक्' इत्यादिस्मृतिरूपमनुमानं चोपन्यस्य शब्दनिमित्तिकां व्यक्त्युत्पत्तिमङ्गीकृत्य सूत्रं व्याचक्षते। तथा सति, समाननामरूपसूत्रस्यानावश्यकता स्यादित्यवधेयम् ॥ २८ ॥

अत एव च नित्यत्वम् ॥ २९ ॥ सूत्रमवतारयन्ति **साधिकामित्यादि**। व्याकुर्वन्ति **अत एवेत्यादि**। **अस्मादित्यस्यैव** विवरणं, **सर्वप्रपञ्चवैलक्षण्येनेति**। ननु यदि वैदिकसृष्टिरन्येव तदा श्रुतौ, यतो वा इमानीत्यादिषु ब्रह्मण एतत्सृष्ट्युपादानत्वकथनं निष्प्रयोजनकं स्यादित्यत आहुः **अस्या इत्यादि**। **ब्रह्मोपादानस्येति** ब्रह्मरूपस्योपादानस्य। **तन्माहात्म्यनिरूपणार्थमिति**। तस्या वैदिक्याः सृष्टेः प्रकटसच्चिदानन्दरूपत्वब्रह्मधर्मसंपन्नत्वादिरूपमाहात्म्यनिरूपणार्थम्। उभयोर्वैलक्षण्यं स्फुटीकुर्वन्ति **बन्धिकेत्यादि** स्मृत्यन्तरविरोध-

रश्मिः।

पदेन च देवमनुष्यौ स्मृत्वा प्रजापतिरसृजेति आदिशब्देन इन्दव इति पितॄन् तिरः पवित्रमिति ग्रहानाशब्द इति स्तोत्रं विश्वानीति शस्त्रं अभिसौभगेत्यन्याः प्रजाः इति श्रुतिः। इमानि बीजानि पदानि। इत्यादीति। उत्तरार्धं तु 'वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे' इति। **स** इति महेश्वरः। **व्यक्तीति** अर्थेन नित्यसंबन्धाय देवादिव्यक्त्युत्पत्तिम्। **अवेति** यत्तु स्फोटोऽदूषि स तु भागवतीयद्वादशस्कन्धस्य।

'शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक्।
येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः' ॥ इति वाक्यविरुद्धम् ॥ २८ ॥

अत एव च नित्यत्वम् ॥ २९ ॥ **साधिकामिति** नित्यत्वसाधिकां विशेषामधिकां उत्कृष्टां वा उपपत्तिं ब्रह्मतुल्यत्वरूपामाहेति भाष्यस्यार्थः। **प्रकृते**। **व्याकुर्वन्तीति** यत्तु शंकराचार्यादयः पूर्वसूत्रकथितं वेदनित्यत्वमेतद् दृढयतीत्याहुः तन्न पुनरुक्त्यापातादित्याशयेन प्रकारान्तरेण व्याकुर्वन्तीत्यर्थः। **विवरणमिति** विभक्तिभेदेप्यर्थसाम्यादिति भावः। यद्वा करणमेव अस्मादतः प्रभवादेव सर्वप्रपञ्चे यथाविर्भावतिरोभावदर्शनेपि ब्रह्मत्वेन नित्यत्वं तद्वैलक्षण्यमाविर्भावादिराहित्यं तेन करणेन वेदस्य नित्यत्वं शब्दब्रह्मत्वेनात्मतया च ब्रह्मवन्नित्यत्वम्। इदमुक्तं भवति यथा जगज्जन्मादिकर्तृत्वं ब्रह्मलक्षणं तद्वत् आधिदैविकप्रपञ्चकर्तृत्वं शब्दब्रह्मलक्षणम्। **इत्यादिष्विति**। भूतानि जायन्ते छन्दांसि जज्ञिरे तस्मादित्यादिषु यत इति जन्माधिकरणविषयवाक्यम्। **प्रकटेति** आदिना शब्दब्रह्मादिपदवाच्यत्वम्। **स्मृत्यन्तरेति** जन्माद्यस्येति स्मृत्यविरोधो मोचकत्वमोहकत्वयोः सहानवस्थानलक्षणस्तम्। 'वेदो नारायणः साक्षात् स्वयंभूरिति शुश्रुम' इति स्मृतेः अन्यज्जन्माद्यस्य यत इति वाक्यं स्मृत्यन्तरं तेन विरोधम्। यद्वा—

सितवचनाच्च । तस्याप्ययं प्राणभूतो नित्य इति । अर्थप्राधान्याद् ब्रह्मविद्या परा विद्या । प्रपञ्चभेदादेव लौकिकवैदिकशब्दव्यवहारभेदौ । तस्मादाधिदैविकप्रतिपादकत्वाद् वेदस्य नित्यत्वम् ॥ २९ ॥

भाष्यप्रकाशः ।

माशङ्क्य परिहरन्ति **अत एवेत्यादि** । तथाच श्रुतिविरुद्धं तदुक्तमप्रमाणमित्यर्थः । **सूत्रस्थस्य चकारस्यार्थान्तरमाहुः निःश्वसितेत्यादि** । ननु सर्वस्य वेदस्य भगवन्निरूपकत्वे उपनिषत्सु अथ परेत्यादिनोक्तः परापरविभागो न स्यादित्यत आहुः **अर्थप्राधान्यादित्यादि** । तथाच सर्वस्य वेदस्य तथात्वेऽपि ऋग्वेदादिविद्यायाः कर्मादिप्राधान्येन निरूपणान्न प्राधान्यम् । ब्रह्मविद्यायास्तु तत्प्राधान्यमतो न परापरविभागभङ्ग इत्यर्थः । वैदिकप्रपञ्चस्य भिन्नत्वे गमकान्तरमाहुः **प्रपञ्चेत्यादि** । यद्यपि, लोकेऽवगतसामर्थ्यः शब्दो वेदेऽपि बोधक इति लोकवेदाधिकरणे लोकवेदयोः शब्दैक्यं वार्तिकेऽङ्गीकृतम् । तथापि तस्य जैमिनिनानुक्तत्वात् । तत् कल्पितमतः शब्दभेदः व्यवहारभेदस्तु प्रसिद्ध एवेति तावपि तद्गमकावित्यर्थः । सिद्धमाहुः **तस्मादित्यादि** ॥ २९ ॥

रश्मिः ।

'ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति' ॥ इति ।

मार्कण्डेयवाक्यं स्मृत्यन्तरं तेनोक्तविरोधः । श्रीभागवतस्य वेदवेदान्तसारत्वात् तथा चेत्युत्तरग्रन्थो विरुध्येत । **अत एवेत्यादीति** श्रुतिविरुद्धस्याप्रामाण्यादेव प्रथमपक्षे मोचकत्वादेवेत्यर्थः । सर्वमुक्त्यभावाय मोचकत्वमोहकत्वयोः सहावस्थानमिति भावः । द्वितीयेऽर्थे सति प्रयोजनमाहुः **तथा चेति** । 'वाचा विरूपनित्यया' इति श्रुतिविरुद्धम् । तथा चात्र पक्षे ऋषीणामपि अत्र मोहो मार्कण्डेय उक्तः इति भाष्यार्थः । **निःश्वसितेत्यादीति** तथाच चकारो 'निःश्वसितमस्य वेदाः' इति श्रुतेर्वेदेषु नित्यत्वसमुच्चायक इति भाष्यार्थः । तेनात एवेति सौत्रे पदे भाष्येऽर्थान्तराय पुनरुपात्ते इति ध्वनितम् । अत एव मार्कण्डेयस्याप्रामाण्यादेव च निःश्वसितवचनाच्च वेदानां नित्यत्वमिति सूत्रस्यार्थान्तरम् । अथ वा । भाष्ये निःश्वसितेत्यत्र चकारादत एवेत्यत्राप्यन्वेतु देहलीदीपन्यायेन तथा चात एव ऋषीणामप्यत्र मोह इति हेतोः निःश्वसितवचनाच्च तस्यापि तच्छब्दनिर्दिष्टब्रह्मणोप्ययं वेदः प्राणभूतो नित्यस्तस्य नित्यत्वात् । **प्रकृते । तथा चेति** । **कर्मादीति** आदिना ब्रह्मधर्माः षट् । सुबोधिन्यां वेदार्थत्वेनोक्तेः । यद्वा । **अर्थेति** । प्राणरूपार्थस्य वेदैः सहाभेदो हि श्रुतावस्ति सोऽर्थशब्दयोरर्थप्राधान्यं द्योतयति तस्मात् ब्रह्म चासौ विद्या ब्रह्मविद्या कर्मधारयः शब्दप्राधान्यादृग्वेदादिरपरा विद्या तथा चाक्षराधिगमकत्वं परविद्यात्वमित्यत्रार्थप्राधान्ये सति तत्त्वं बोध्यम् । 'अथ परा यया तदक्षरमधिगम्यते' इति मुण्डकम् । **सूत्रस्थस्य चकारस्येति** भाष्यप्रकाशस्यायमपरोर्थः । यत्तु शंकराचार्याः 'यज्ञेन वाचः पदवीयमायंस्तामन्वविन्दन्नृषिषु प्रविष्टाम्' इति श्रुतेः वेदशब्दं नित्यमाहुः तथा तदनुकूलं वेदः अवान्तरप्रलयावस्थायी जगद्धेतुत्वादीश्वरवदित्यनुमानं च अवान्तरप्रलयावस्थायित्वमेव च नित्यत्वमित्याहुस्तन्निराकर्तुं सूत्रस्थस्येत्यादीत्यर्थः । यज्ञेन शोभनकर्मणा वाचो वेदस्य पदवीयं ग्रहणयोग्यतामायन् प्राप्तवन्तः अतस्तामृषिषु विद्यमानां वाचं याज्ञि-

रश्मिः।

काऽन्वविन्दँल्लब्धवन्तः। तथा च पूर्वस्थितामेव वाचं सर्वे ज्ञातवन्त इति तात्पर्यार्थः। **निःश्वसितेत्यादी**ति तथा चेश्वरात्मकत्वरूपं नित्यत्वं वेदस्य न तु तदुक्तमिति भावः। **नन्व**स्त्वीश्वरस्य नित्यता कथं तादृशी तन्निःश्वासस्येत्यत आहुः **तस्यापी**ति। **तस्ये**ति ईश्वरस्य। तथा च सिद्धान्ते साकारत्वात् तादृशी नित्यता सूपपन्नेति भावः। **लोकवेदे**ति पूर्वतन्त्रे प्रथमस्य तृतीयपादस्थे। **जैमिनिने**ति। 'प्रयोगचोदनाभावादर्थैकत्वमविभागात्स्यात्' इत्यादिषु सूत्रेषु शब्दैक्यस्यानुक्तत्वादित्यर्थः। तथाहि यन्माधवीयजैमिनिन्यायमालाविस्तरे अर्थैकत्वं पदैक्यमन्तरा न संभवतीति पदैक्यं तर्कयित्वा अर्थैकत्वं महता संरम्भेण साधितम्। तत्र पदैक्यमन्तराप्यर्थैकत्वं पर्यायेषु दृष्टमिति तन्मन्दमिति अतो लोकवेदाधिकरणस्य कल्पितत्वेनाप्रामाणिकत्वम्। किंचाकृत्यधिकरणस्य वर्णकत्वेनोक्तिर्लोकवेदाधिकरणस्य कल्पितत्वं स्फोरयति। अधिकरणान्तरस्य प्रसिद्धस्य वर्णकत्वायोगात्। न चैकस्यैकत्र विधिनिषेधमुखेन द्वेधा निरूपणमत्र भाष्य एव दृष्टम्। इत्येकत्र लोकवेदाधिकरणस्याकृत्यधिकरणस्य वर्णकत्वे न दोष इति शङ्क्यम्। तत्र दहराधिकरणे विषयैक्यादत्र तु लोकवेदयोः पदपदार्थैक्यं लोकवेदाधिकरणे विषय आकृत्यधिकरणे तु जातौ शक्तिनिर्धार इति विषयभेदात्तथा। यदि चैकत्राधिकरणद्वयं नास्ति किं तु सर्वेषां सूत्राणां द्वेधा व्याख्यानात् अधिकरणद्वयमिति विभाव्येत तदा युगपद्वृत्तिद्वयविरोधः अतो ह्यप्रसिद्धेः कल्पितमतः शब्दभेदः। तथाचोक्तं स्वरादिभेदाद्वैदिकशब्दा भिन्ना इति। न च छान्दसप्रक्रियायां नियतस्वरवर्णागमतल्लोपविकरणव्यत्ययादिदर्शनेपि न तैस्तयोर्भेदसिद्धिः। अर्थभेदाभावे तदेवेदं गोपदमित्यादिप्रत्यभिज्ञया भेदाभावे च सिद्धे तेषां तदसाधकत्वादिति वाच्यम्। अर्थभेदस्यानधिगतार्थगन्तृत्वेन वाक्येषु सत्त्वात्। न चार्थैकत्वमिति जैमिनिसूत्रांशस्य विरोध इति शङ्क्यम्। पदार्थैकत्वमित्यर्थात् न हि यागपदार्थो लोकवेदयोर्भिन्नः किंतु 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र यागत्वेन स्वर्गत्वेन कार्यकारणभावो लोकेऽनधिगतो वाक्यार्थोऽन्वये निविशते स लोकभिन्नोर्थः। किं च लोके रूढिर्योगमपहरति घटादिपदेषु। वेदे तु योगरूढिर्योगश्च तदुक्तं पूर्वमीमांसाकारिकासु 'अतो धर्मावबोधाय विचारो योगरूढितः' इति वेदे योगरूढिः।

'ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित्' ॥ इति।

वेदान्ते योगः पत्रावलम्बने। वेदे तु योगरूढिर्विशेषवाक्यात् परिशेषाद्वेदान्ते योगः। तथा च श्रुतिः प्रयतं पुरुषंत्मनेति। लोकेत्याकारादित्वेन नियत आत्मशब्दः। ब्राह्मणा इति लोके वेदे तु ब्राह्मणासः पितरः सोम्यासः इति। न च प्रयोक्तॄणां भेदेप्येकैकस्य पुरुषस्य यथा बहुकृत्व उच्चारणभेदेपि त एवामी वर्णा इति प्रत्यभिज्ञानात् वर्णैक्यम्। तथा यानि लोके गवादिपदानि तान्येव वेदेऽधीयमानानि इत्यबाधितप्रत्यभिज्ञया पदैकत्वमभ्युपेयमिति शङ्क्यम्। पदभेदे सति प्रत्यभिज्ञाया मायिकत्वात्। **व्यवे**ति व्यवहारभेदस्तु पत्रावलम्बने प्रसिद्धः।

'लौकिको वैदिकश्चैव व्यवहारो द्विधा मतः।
लोकसिद्धं पुरस्कृत्य वैदिको बोध्यते यथा' ॥

इत्यादिना ग्रन्थेन।

समाननामरूपत्वादावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ३० ॥

एवं शब्दबलविचारेण वेदप्रामाण्यस्य सिद्धये भिन्न एव प्रपञ्चो ह्याधिदैविकः सर्वत्र सिद्धः । इदानीमर्थबलविचारेणोत्तरकाण्डे किंचिदाशङ्क्य परिहियते

भाष्यप्रकाशः ।

समाननामरूपत्वादावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ३० ॥ संदेहाभावाय पूर्वसूत्रसिद्धमनुवदन्तः सूत्रमवतारयन्ति एवमित्यादि । सर्वत्रेति सर्वस्मिन्नेव वेदे । तेन, आदित्या वा अस्माल्लोकात्, अथ यदिदमस्मिन् ब्रह्मपुरे, धन्वन्निव प्रपा असीत्यादौ विधेयस्तुत्यर्थं परिचायनार्थं दृष्टान्ताद्यर्थं वा लौकिकसृष्टिकीर्तनं तत्रापि, सदेव सौम्येति, हन्ताहं मदेव मन्मात्रं द्वितीयमिति, विश्वं वै ब्रह्मतन्मात्रमित्यादिभिर्ब्रह्मरूपत्वेन तस्या अपि नित्यत्वावधारणान्न संबन्धानित्यतेति वेदस्य नित्यत्वमक्षुण्णमेवेत्यर्थः । अर्थबलविचारेणेति । तत्तेजो-

रश्मिः ।

'व्यवहारः संनिपातो मनोमात्रेन्द्रियासुभिः ।
संनिपातस्त्वहमिति ममेत्युद्धव या मतिः' ॥

इत्येवं लक्षितः । सोयं भावाद्वैतसात्त्विकज्ञाने प्रतिबध्नाति

'कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत् ।
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते' ॥

इति सप्तमस्कन्धे

'सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं सात्त्विकं स्मृतम्' ॥

'कैवल्यं सात्त्विकं ज्ञानम्' इति गीता । श्रीमद्भागवते अयं वेदान्तव्यवहारः । वैदिकस्तु यजमानादिविषयः मोक्षादिफलकः एताभ्यां मोक्षशास्त्रीयाभ्यां पुरुषस्य मनोमात्रेन्द्रियासुभिः अहंममेति या बुद्धिः सा निवर्तते तदनु रजस्तमसोः क्षीयमाणतयाऽप्राबल्येन क्रमेण मिश्रणाभावे केवलसात्त्विकत्वात् औषधाज्जायमानस्य भावस्य संनिपातनिवर्तकत्वात् । तत्र पृथग्बुद्धेर्विद्यमानत्वेपि प्रबलेन सत्त्वेन ग्रस्यमानतया तस्याः अकिंचित्करत्वात् । लौकिकव्यवहारस्तु वैदिकव्यवहारबोधाय पुरस्कृत आवरणशक्तिमायाप्रत्यूढत्वात् । अनृतेन प्रत्यूढमिति श्रुतेः प्रतिकूलं प्रापितं वितर्कितं वा तदिदं राजसज्ञानविषयम् । मायासामग्र्या राजसं ज्ञानं नानाकारं भवति ।

'पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्' ॥
'रजो वैकल्पिकं स्मृतम्' इति च भगवद्वाक्यात् ।

इदमेवं व्यवहारोपयोगि । इमौ भेदौ वेदनित्यत्वगमकौ इत्यर्थः । भाष्ये । आधीति तेनाकृतिवाचकत्वाद्वेदनित्यत्वमिति वदन्तः शंकराचार्यादयः प्रत्युक्ताः ॥ २९ ॥

समाननामरूपत्वादावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ३० ॥ भाष्ये । वेदेति वेदप्रमाणस्य नित्यत्वसिद्धये । तस्मादाधिदैविकप्रतिपादकत्वात् वेदस्य नित्यत्वमिति भाष्यात् । प्रमाणपदं तु संदिग्धानामर्थानां राजसतामसानधिकारात्प्रमाणस्य प्राधान्यद्योतकम् । यदि च ।

दार्ढ्यार्थम् । नन्वस्य प्रपञ्चस्याऽनुकारित्वेन वाच्यत्वेन वा स्वीक्रियमाणत्वे सृष्टिप्रलययोर्विद्यमानत्वादनित्यसंयोगः प्राप्नोति तत्राह समाननामरूपत्वादावृत्तावप्यविरोधः । वस्तुतस्तु भगवद्रूपत्वादाविर्भावतिरोभावेच्छयैव तथात्वान्नावृत्तिशङ्कापि । तथापि लोकबुद्ध्यनुसारेणावृत्तावपि समाननामरूपत्वात् ।

भाष्यप्रकाशः ।

ऽसृजतेत्यादेः सृष्ट्यनित्यताबोधकत्वात्तादृगर्थबलविचारेण । एतद्विचारेणाशङ्कामाहुः **नन्वि**त्यादि । समाधिं व्याकुर्वन्ति **वस्तुत** इत्यादि । **तथात्वा**दिति अनित्यत्वेन प्रतीयमानत्वात् । तथोक्तं विष्णुपुराणे प्रथमेंऽशे—

'तदेतदक्षयं नित्यं जगन्मुनिवराऽखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवत्' ॥ इति ।

रश्मिः ।

'सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिणः ।
भवान्तसंभवा दैवात् तेषामर्थे निरूप्यते' ॥ इति निबन्धात् ।

न प्रमाणापेक्षा तर्हि वेदस्य प्रमाकरणस्य विषयसापेक्षस्य सिद्धय इत्यर्थः । आधिदैविकप्रपञ्चविषयकप्रमाकरणलक्षणे बोध्या । **प्रकृते** । तेनेत्यादि । **भाष्ये** । **पूर्वोक्तदार्ढ्यार्थमुत्तरकाण्डे परिह्रियते** इत्युक्तत्वात् पूर्वोत्तरकाण्डविषयत्वेनेत्यर्थः । आदित्या वा अस्माल्लोकादमुं लोकमायन् इत्यत्रामुं विप्रकृष्टं लोकम् । **स्तुत्यर्थ**मिति विधेयो यागादिस्तस्य स्तुत्यर्थमुत्कर्षाधायकगुणवर्णनार्थं लोकपदेन लौकिकसृष्टिकीर्तनम् । गुणास्तु फलसाधकत्वादयः ।

'आगमोर्थः प्रजा देशः कालः कर्म च जन्म च ।
ध्यानं मन्त्रोथ संस्कारो दशैते गुणहेतवः' ॥

इत्युक्तदेशादौ ईदृशो यागादिः फलसाधको यदर्थमादित्या आयन् इति यागादिस्तुतिः श्लोकस्त्वेकादशस्कन्धे त्रयोदशे । न च सत्त्वगुणहेतव एते इति वाच्यम् । ईदृशः सात्त्विको यागादिरित्यर्थात् 'तत्तत्सात्त्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते' इति वाक्यात् । प्रचक्षते प्रशंसन्तीत्यर्थः । अथ यदिदमिति दहराधिकरणे विचारितं तत्र यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति हृदयाकाशे सृष्टिपरिचायनार्थं लौकिकाकाशकीर्तनम् । आकाशशरीरं ब्रह्मेति लौकिकसृष्टताधारकथनेन लौकिकसृष्टिकथनम् । धन्वन्निवेत्यत्र धन्वनि मरुदेशे प्रपा पानीयशाला स्यात् दृष्टान्तार्थं धन्वपदेन लौकिकसृष्टिकीर्तनम् । तथा चानित्यसंयोगः स्यात् तत्राहुः **तत्रापी**ति । 'सदेव सोम्येदमग्र आसीत्' अहमेव मन्मात्रम् तदेव तन्मात्रम् । स्वार्थे मात्रच् । **तस्या** इति लौकिकसृष्टेः । **नन्वित्यादी**ति भगवदनुकारोऽस्य विश्वस्यास्तीत्यनुकारि विश्वम् । आवृत्तिः प्रवाहः तथात्वपदस्य रूढार्थमाहुः **अनित्ये**ति । विषयपदार्थमाहुः **एतदि**ति । विकल्पः पक्षः तत्र पक्षद्वयमवताराणां 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः' इति वाक्यात् पक्षद्वयमन्येषाम् । जन्मनाशयोः सकारणत्वार्थमाहुः **आविरि**ति एतौ मुरवैरिनिष्ठौ ज्ञेयौ । **अपीती**ति । इति प्रकारे । आवृत्तावपीति प्रकारकस्य भाष्यस्य । **नित्ये**ति नित्यप्रलयो द्वादशस्कन्धे चतुर्थे ।

समुद्रे जलप्रक्षेपवत् । पुनरुपादाने तदेवेति निश्चयाभावेऽपि नामरूपयोस्तुल्यत्वादन्यस्य भेदकस्याभावान्नानित्यसंयोगविरोधः। कुतः। दर्शनात् । दृश्यते हि तथा । वेदपितृमातृस्त्रीभर्तृशरीरगङ्गादिषु तदेवेदमिति व्यवहारस्य सिद्ध-

---

भाष्यप्रकाशः ।

एतद्विकल्पचतुष्टयवद्वा । आविर्तिरोभावाभ्यां तथा विकल्पवद्वेत्यर्थः । उभयथापि, न वास्तवनित्यत्वबाधः । आवृत्तावपीत्यस्यैव व्याख्यानं समुद्र इत्यादि । प्रक्षेपवदिति सप्तम्यर्थे वतिः । दर्शनं व्याकुर्वन्ति वेदेत्यादि तथा च नित्यप्रलयविचारे शरीरादेः प्रतिक्षणमन्यान्यत्वेऽपि प्रवाहैक्येनैवैकस्मिन् शक्यताभिमन्यत इति तत्तत्प्रवाह एव पदानां शक्तिः । स चानादिसृष्टिवादिनो मीमांसकस्य मतेऽप्यविच्छिन्नत्वान्नित्यः । अतो यथा, अव्यतिरेकश्चार्थे-

रश्मिः ।

'नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप ।
उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥
कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा ।
परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ॥
अनाद्यन्तवतानेन कालेनेश्वरमूर्तिना ।
अवस्था नैव दृश्यन्ते वियति ज्योतिषामिव' ॥ इत्युक्तः ।

प्रवाह इति । व्यक्तिशक्तिपक्षः ।

'सर्ववेदमयेनेदमात्मनात्मात्मयोनिना ।
प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते' ॥ इत्यादिस्मृतिभ्यश्च ।

अविच्छिन्नेति 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' इति श्रुतेः । एवेति प्रस्थानरत्नाकरे प्रवाहे शक्त्युपपादनात् विशिष्टपक्षव्यावर्तकः । सुबोधिनी तु परमतभाषा न विशिष्टशक्तिस्वीकारपरेत्याशयो बोध्यः । पत्रावलम्बने तु धर्मेषु शक्तिपक्षः स च भाष्ये नास्तीति पत्रावलम्बनमतं न भाष्यमतमिति भावः । मतद्वयस्य भाष्ये दर्शनाच्छक्तिविषयेपि मतद्वयम् । भाष्ययोर्दर्शनाच्च यथा भावार्थपादभाष्ये ईश्वरः प्रवर्तयतीति मतं दृष्टविरोधीति भाष्ये तु एष उ एव साधुकर्म कारयति यमुन्निनीषतीति श्रुतेः 'प्रवर्तकत्वं कृष्णस्य' इति च वाक्यात् कृष्णः प्रवर्तकः । त्रेधा हि पुरुषः प्रवर्तते पुरुषश्च त्रेधा भवति काममयो वैदिको दुःखासहिष्णुश्चेति तत्र स्वर्गकामपदादाद्यः विधेर्द्वितीयः अर्थवादैस्तृतीयः प्रवर्ततेऽतो वैदिककाममययोः पत्रावलम्बनोक्तपक्षः दुःखासहिष्णोर्भाष्यपक्षः इति विवेकः । **अव्यतिरेक** इति सूत्रं तु 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति । अर्थस्तु औत्पत्तिकः शब्दस्तावदुत्पत्तिमारभ्यैवार्थेन संबद्धः श्रीमद्विठ्ठलनाथानामुक्तिः 'न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते' अनुभवस्तु तथैव । घट इत्युक्ते घटरूपोर्थोपि मनसा प्रतीयेत न तु द्रव्यरूपोर्थः । तदाहुस्तस्येत्यादिः । तस्य शब्दे अर्थवैशिष्ट्यस्य ज्ञानमुपदेशः उपदेशद्वारा भाक्तप्रयोगस्तु तस्य ज्ञानं उपदेशत्वगुणयोगात् उप समीपे दिश्यते आदिश्यते कथ्यते इति विग्रहात् । अतीन्द्रियपदार्थवाचकः कथं भूतभाविपदार्थवाचकशब्दैरर्थसंबन्धो भवितुमर्हति अर्थाभावादित्याशङ्क्याहुः अव्यतिरेक इत्यादि । अनुपलब्धे भूते भाविनि

त्वात्। 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्, दिवं च पृथिवीं चान्तरिक्षमथो सुवः' इति। स्मृतेश्च।

'सर्ववेदमयेनेदमात्मनात्मात्मयोनिना।
प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते॥'

इत्यादिस्मृतेः। सर्वस्मृतेश्च 'ऋषीणां पूर्वचरितस्मरणं स्मृतिरुच्यते' इति। अतोऽर्थबलविचारेऽपि पदार्थानां नित्यत्वान्न वेदस्यानित्यसंबन्धः॥ ३०॥

भाष्यप्रकाशः।

ऽनुपलब्धे इत्यत्र व्यवहाराव्यतिरेकेण प्रवाहनित्यतया धर्मे शब्दसंबन्धतद्ग्रहौ, तथा वस्त्वन्तरेऽपीति नानित्यसंयोग इत्यर्थः। अविच्छेदे प्रमाणं दर्शयन्ति सूर्येत्यादि। सर्वासां स्मृतीनां कथं प्रवाहाविच्छेदसाधकत्वमित्यत आहुः ऋषीणामित्यादि। लक्षणार्थविचारादेवाविच्छेदावगतिरित्यर्थः॥ ३०॥

रश्मिः।

चार्थे अव्यतिरेकः शब्दाव्यतिरेकः शब्दमिश्रीभाव एव शब्देषु चार्थाव्यतिरेकः। तत्। तत्र बादरायणस्य तत्संबन्धि तदुक्तमिति यावत्। सूत्रं प्रमाणम्, किं तत्सूत्रं 'शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्' इति कुतस्तदुक्तं प्रमाणं अनपेक्षत्वात्। ज्ञानावतारत्वेन तदुक्ते विचिकित्सानुदयात्। अतः शब्द एव मुख्यं प्रमाणम्। ज्ञानात्मकत्वाच्च शब्दस्य प्रामाण्यमक्षुण्णमिति सूत्रार्थः। अत्रानुपलब्धे भाविनि भूते चार्थेऽव्यतिरेकः शब्दमिश्रीभाव एवेति व्यवहारो वर्तमानस्य समीपवर्तिनः अव्यवहारो भूतभाविवस्तूनां तन्मिश्रीभावेनेति व्यवहाराव्यवहाराव्यतिरेकेणेत्यस्यार्थः। सूर्येत्याद्युक्तश्रुतिस्मृतिभ्यः प्रवाहः आवृत्तिस्तस्य नित्यतया धर्मे भावार्थपादोक्ते द्रव्यदेवतासंबन्धरूपयागेतीन्द्रिये भाविनि भूतेपि यागादिशब्दसंबन्धः प्रतिपाद्यप्रतिपादकभावरूपः 'शक्तिग्रहं व्याकरणेति नैयायिककारिकया संबन्धग्रहः तदेतदुक्तं धर्मे शब्दसंबन्धतद्ग्रहाविति। लोके तु तद्विषयककायिकव्यापारे भूते भाविनि चापि यागादिशब्दसंबन्धं तद्ग्रहं चाहुः तत्र त्रिक्षणावस्थायिव्यापारप्रवाहेपि तौ। येऽदृष्टं क्षणिकत्वं वा कल्पयन्ति न ते यागपदार्थं विदुरिति भावार्थपादभाष्यात् न तत्र ताविति ज्ञेयम्। पूर्वकाण्डदृष्टान्तेनोत्तरकाण्ड आहुः तथेति। वस्त्वन्तरप्रपञ्चेऽनुकारित्वे वाच्यत्वे च श्रौतप्रपञ्चपदसंबन्धतद्ग्रहौ। 'धर्मादिष्वनियमः' इति अल्पाच्तरस्य परनिपातः पूर्वप्रयोगार्हस्य। अनित्येति। ननु वेदेषु मा भूदनित्यसंबन्धो लौकिके तु स्यादिति चेन्न भाष्य एव वस्तुतस्त्वित्यादिना दत्तोत्तरत्वात्। अतः शब्दत्वावच्छेदेन नित्यत्वमिति भावः। ननु वेदोऽनित्यपदार्थान् वदतु स्वयं तु नित्य इति कल्पने को दोष इति चेन्न। वेदस्य स्वायोग्यपदार्थसंबन्धे ब्रह्मतुल्यत्वादिहानौ स्वरूपनाशप्रसङ्गात्। सूर्येत्यादीति क्लृप् सामर्थ्ये भ्वादिः आत्मनेपदी वेट्। सर्ववेदेति। अस्यार्थः। इदं विश्वमात्मनि यस्य एतादृशेनात्मना पुनः कीदृशेन सर्ववेदमयेनाधिदैविकसृष्टिकरणार्थं पुनः कीदृशेनात्मना हिरण्यगर्भस्य योनिनोपादानकारणेनोक्त इति शेषः एतादृशात्मा ब्रह्मा कथमुक्त इत्यत आह प्रजा सृजेत्यादिः आदिना पौराणिकी स्मृतिः।

'तत्र सुप्तस्य देवस्य नाभौ पद्ममजायत।
तस्मिन् पद्मे महाभाग वेदवेदाङ्गपारगः।
ब्रह्मोत्पन्नः स तेनोक्तः प्रजा सृज महामते'॥ इति।

मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ ३१ ॥

अर्थबलविचारे एवैकदेशेन पूर्वपक्षमाह । ननु मध्वादिविद्यासु देवानामनधिकारात् सर्वत्रैवानधिकारः । तथाहि । 'असौ वा आदित्यो देवमधु' तस्य द्यौरेवेत्यादिना सूर्यस्य देवमधुत्वं प्रतिपादितम् । रश्मीनां वेदत्वं च । तत्र वसुरुद्रादित्यमरुत्साध्याः पञ्च देवगणाः स्वमुख्येन मुखेनाऽमृतं दृष्ट्वैव तृप्यन्ति । पञ्चविधा एव च देवाः । स्वतः सिद्धं च तेषां तन्मधु । अनुपासकत्वान्न देवान्तरकल्पना । कृतार्थत्वाच्च । ब्रह्मणोऽपि देवत्वम् ।

भाष्यप्रकाशः ।

मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ ३१ ॥ सूत्रमवतारयन्ति **अर्थेत्यादि** । **एकदेशेनेति** उपासनाविशेषरूपेण तदेकदेशेन । अनधिकारं व्युत्पादयितुं विषयवाक्यस्थं प्रमेयं पूर्वमाहुः **तथाहीत्यादि तन्मध्वित्यन्तम्** । नाडीत्वं मधुच्छिद्रत्वम् । **स्वमुखेन मुखेनेति** अग्नीन्द्रवरुणसोमब्रह्मरूपेण मुखेन । **पञ्चविधा एवेति** तावतामेव तत्रोक्तत्वात्तथा । अनधिकारं स्फुटीकुर्वन्ति **अनुपासकेत्यादि** । अयमर्थः । ब्रह्मविद्याधिकाराभ्युपगमे विद्या-

रश्मिः ।

सूत्रस्थचकारार्थमाहुः **सर्वेति** । चकारः सर्वस्मृतेर्वाचक इत्यर्थः । **ऋषीणामित्यादीति** कर्तरि षष्ठी । **लक्षणेति** स्मृतिसाधारणलक्षणस्यार्थे विचारात् पूर्वकल्पीयाचारस्मरणस्य बोधनेन सृष्टियथापूर्वतायाः साधनेन प्रवाहनित्यत्वस्य सिद्धत्वात् प्रवाहाविच्छेदावगतिः ॥ ३० ॥

मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ ३१ ॥ तदेकेति उपासनैकदेशेन । **विषयेति** अयमर्थः । अर्थबलशब्दबलयोरत्र सूत्राष्टके वक्तव्यत्वाच्छब्दबले सूत्रपञ्चकेन विचारिते विषयो विशयश्चैवेत्यत्र विषयस्य शब्दत्वेपि यो यो देवानां प्रत्यबुध्यतेति श्रुतिप्रमाणकः कश्चिन्न तु श्रुतिरूपोऽतः श्रुतिरूपविषयवाक्यस्थमिति । विशयादीनां शब्दबलविचारेऽनुक्तेश्चात्र प्रमाणस्य भाष्यीयपूर्वपक्षपदस्य दर्शनाच्च । तथा च पञ्चसूत्र्यां 'शब्दादेव प्रमितः' इत्यधिकरणेऽङ्गुष्ठमात्रनिरूपणार्थं मनुष्याधिकारे निरूपिते कस्यचिद्भ्रमो भवेत् सर्वत्र ब्रह्मविद्यायां मनुष्याणामेवाधिकार इति तन्निराकरणार्थं देवादीनामधिकार उक्तः । अतस्तत्र न विषयादिपञ्चकरूपाधिकरणरचनापेक्षास्ति । **तथाहीत्यादीति** इयं श्रुतिश्छान्दोग्ये पञ्चमप्रपाठकेस्ति । **नाडीत्वमिति** । आदिपदसंगृहीतश्रुतौ 'तस्य प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः' इति पठितं तदनेन व्याकृतम् । तदेव प्रसिद्धमधुन इव मध्वाधारच्छिद्रत्वं कथं व्याख्यानमिदमिति चेन्न भगवदिच्छया प्रसिद्धार्थकथनेऽबाधात् । रूढार्थप्रसिद्धिर्भगवदिच्छया तथैवार्थः क्रियतेस्माभिरपि न तु 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' इति मनेर्धः उप्रत्ययश्च प्रसिद्धे मधुनि योगाभावात् । ननु तर्हि कोर्थ इति चेन्न सिद्धान्तसूत्रे वक्ष्यमाणत्वात् । **मुखेनेति** तथा च श्रुतयः । तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न देवा अश्नन्ति पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति । अथ यद्द्वितीयममृतं तद्रुद्रा उपजीवन्तीन्द्रेण मुखेनाग्रे पूर्ववत् । अथ तृतीयममृतं तदादित्याः उपजीवन्ति वरुणेन मुखेनेत्यग्रे पूर्ववत् । अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेनेत्यग्रे पूर्ववत् । अथ यत्पञ्चममममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेनाग्रे पूर्ववदिति । **तत्रेति** छान्दोग्यपञ्चमप्रपाठके । टीकायां तु तृतीयाध्याये क्वचित्तृतीयप्रपाठक इति पठन्ति । **भाष्ये । स्वत इति** रश्मित्वेन 'प्रकाशाश्रयवद्वा

भाष्यप्रकाशः।

त्वाविशेषान्मधुविद्यायामपि देवानामधिकारो वक्तव्यः। तत्रासौ वा आदित्यो देवमध्विति मधुत्वेनोपवर्ण्यमानस्यादित्यस्य विद्याविषयत्वादादित्यः कमन्यमादित्यमुपासीत। किंचाग्रे आदित्याश्रितानि पञ्च रोहितादीन्यमृतान्यनुक्रम्य वसुरुद्रादित्यमरुत्साध्याख्यान् पञ्च देवगणाँस्तदुपजीवकानुक्त्वा, स य एतदेवममृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवाऽमृतं दृष्ट्वा तृप्यतीत्यादिना वस्वाद्युपजीव्यान्यमृतानि विजानतो वस्वादिरूपत्वप्राप्त्या स्वगणमुख्यमुखेन तृप्तिरुच्यते। सा चोपासनातः प्रागेव वस्वादिरूपेण वर्तमानानां पुनस्तत्प्राप्तिकथनात् प्राप्यप्राप्त्रोर्वेद्यवेत्त्रोरैक्यापत्त्याऽनुपपन्ना भवति। न च वस्वादिप्राप्या वेद्याश्चान्ये कल्पयितुं शक्यन्ते। प्रमाणाभावात्। अधिकारानङ्गीकारे तु तेषामनुपासकत्वात् कृतार्थत्वाच्च न देवान्तरकल्पना। न च मास्तु मधुविद्याधिकारः। तावता ब्रह्मविद्याधिकारो न वारयितुं शक्यः। तेषां मोक्षार्थित्वात् तत्र बाधकाभावाच्चेति वाच्यम्। यतो ब्रह्मणोऽपि देवत्वम्, देवत्वेन च तस्याप्युपासकमध्ये प्रवेशेनोपास्यत्वप्राप्यत्वयोर्विघटनादिति। अत्र च मध्वादीत्यादिपदेन, अग्निः पादो

रश्मिः।

तेजस्त्वात्' इति सूत्रविषयत्वेन रश्म्यभेदात् स्वतः सिद्धम्। **प्रकृते**। अग्र इति असौ वा आदित्यो देवमधु तस्य द्यौरेवेत्यस्याग्रे। तिरश्चीनवंशोऽन्तरिक्षमपूपो मरीचयः पुत्राः तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः ऋच एव मधुकृत ऋग्वेद एव पुष्पम् ता अमृता आपस्ता वा एता ऋच एतमृग्वेदमभ्यतपंस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोऽजायत तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतदादित्यस्य रोहितꣳरूपमिति। तस्य देवतिर्यग्गतवतः मधुनः द्यौरेव तिरश्चीनवंशः तत्प्रसिद्धमधुन इव चिन्तयेत्। अन्तरिक्षमपूपः। सवितृमध्वाश्रयत्वात् मरीचयः लक्षणया रश्मिस्थाः सवित्राकृष्टाः भौमा आपः। पुत्रा इव मध्वपूपच्छिद्रभ्रमरबीजस्थानीयाः तस्य रसमध्वाश्रयस्य सवितुर्ये प्राञ्चः पूर्वदिग्गता रश्मयः ता एवास्य मधुनाड्यः प्रसिद्धमधुन इव मध्वाधारच्छिद्राणि तत्र ऋच एव ऋङ्मन्त्राः एव मधुकृतो भ्रमराः कुतः ऋङ्मन्त्रा हि सोमाहुत्यपोऽपूर्वरूपा आदाय लोहितं रूपं सवित्राश्रयं मधु कुर्वन्तीति मधुकृतः। ऋग्वेदः ऋग्ब्राह्मणभागः। तद्विहितं कर्म एव पुष्पं पुष्पस्थानीयं ताः प्रसिद्धाः कर्मणि प्रयुक्ताः अमृता आपः सोमाज्यपयोरूपाहुतयः अपूर्वीभूताः अत्र पुष्पाश्रयाप्स्थानीया इत्यर्थः। ता वा एता भ्रमरस्थानीया ऋचः कर्मपुष्पेभ्यः आहुत्यपूर्वरूपरसमादातुकामाः ऋग्वेदं तद्विहितकर्मपुष्परूपमभ्यतपन् रसनिःश्रवार्थं व्यापारमकुर्वन् यथावत् कर्म निरवर्तयन्नित्यर्थः। ऋग्भिर्मन्त्रैः शस्त्राद्यङ्गभावमुपगतैः क्रियमाणं कर्म रसनिर्वर्तकं भवति। पुष्पाणीव भ्रमरैराकृष्यमाणानि। रसान्मधुनिष्पत्तिमाह **तस्याभितप्तस्येति**। तस्य ऋग्वेदविहितकर्मपुष्पस्याभितप्तस्य ऋग्भ्रमरैर्निर्वर्तितस्य यशस्तेज आदिः रसोऽजायत। यशो विश्रुतम्। तेजस्त्वग्गतं दीप्तिः। इन्द्रियं प्रसिद्धं वीर्यं सामर्थ्यम्। बलमन्नाद्यं अन्नं च तदाद्यं च। रसो मध्वाख्योऽजायत उत्पन्नः। **तद्व्यक्षरदिति** तद्यश आदि अन्नान्तं मधु व्यक्षरत् विशेषेणोर्ध्वमक्षरत् अगमत्। **तदादित्यमिति** गत्वा च तन्मधु आदित्यमभितः पार्श्वतः आदित्यस्य पूर्वभागमश्रयत्। **तद्वा एतदिति** तद्वै तदेव पूर्वोक्तमेवैतत्प्रत्यक्षं मधु किं तत् यदेतद् उद्यत आदित्यस्य रोहितं रक्तरूपं दृश्यत इत्यर्थः। एवं अथ येऽस्य दक्षिणा रश्मयः ता एवास्य दक्षिणा मधुनाड्यः यजूꣳष्येवेत्यादिः आदित्यस्य शुक्लं रूपमित्यन्ता श्रुतिः। **एवमथ** येस्य प्रत्यञ्चो रश्मयः ता एवास्य प्रतीच्यो मधुनाड्यः सामान्येवेत्यादिः आदित्यस्य कृष्णं

आदिशब्देन सर्वा एव देवोपासनविद्या गृहीताः । अतस्तेषामुपास्यत्वात् कृतार्थत्वाच्च नाधिकारः । न हि प्रयोजनव्यतिरेकेण कस्यचित् प्रवृत्तिः संभवति । मोक्षस्याप्यधिकारनिवृत्तावुत्तरमार्गवर्तित्वात् स्वत एव सिद्धिः । यावदधिकारमिति न्यायात् । वसूनयाजयदित्यत्रापि भाविन्येव संज्ञा । तस्मान्मनुष्याधिकारकमेव ज्ञानं कर्म चेति न देवानामधिकार इति जैमिनिराचार्यो मन्यते । मनुष्याणामेव ज्ञानकर्मणोस्तरतमभावबतां तत्तद्रूपभोगानन्तरं मोक्षप्राप्तेरिति ॥ ३१ ॥

भाष्यप्रकाशः ।

वायुः पाद आदित्यः पादो दिशः पाद इति, वायुर्वाव संवर्ग इति, 'आदित्यो ब्रह्मेत्यादेशः' इत्याद्याः सर्वा एव देवोपासनाविद्या गृहीताः । तेन सिद्धमाहुः अत इत्यादि । ननु मोक्षेच्छायां सत्यां कुतो नाधिकारः । ब्रह्मविद्यामन्तरेण तदसिद्धेरित्यत आहुः मोक्षेत्यादि । पूर्वोक्तरीत्याऽनुपपत्तिबलादधिकारनिवृत्तौ तेषां मोक्षेच्छासत्त्वे तु देवयानस्योत्तरमार्गत्वादेतेषां च देवत्वेन तद्वर्तित्वात् स्वतो मार्गबलादेव मोक्षस्यापि सिद्धेर्न विद्यावश्यकत्वमित्यर्थः । अत्र प्रमाणं यावदित्यादि । ननु सोऽग्निष्टोमेन वसूनयाजयदित्यादिश्रुत्या यागाधिकारे सिद्धे ब्रह्मविद्यायामपि तत्कल्पने को दोष इत्यत आहुः वसूनित्यादि । तथाच मूल एव कुठार इत्यर्थः । सिद्धमाहुः तस्मादित्यादि ॥ ३१ ॥

रश्मिः ।

रूपमित्यन्ताः । अथ येस्योदञ्चो रश्मयः ता एवास्योदीच्यो मधुनाड्यः अथर्वाङ्गिरस एवेत्यादिः आदित्यस्य परं कृष्णं रूपमित्यन्ताः । अत्रेतिहासपुराणं पुष्पमिति श्रुतिः । अथ येस्योर्ध्वा रश्मयः ता एव तस्योर्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता आपस्ते वा एते गुह्याः आदेशा एतद्ब्रह्माभ्यतप९स्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्य९रसोऽजायत इत्यादिः आदित्यस्य क्षोभित इवेत्यन्ता एतानि पञ्च रोहितादीनि । **अमृतानीति** ते वा एते रसानां वेदा हि रसास्तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृतानीति श्रुतेः । अर्थः स्पष्टः । उक्त्वेति तद्यन्तत्प्रथममित्याद्युक्तश्रुतिभिरुक्त्वा । **इत्यादिनेति** आदिपदेन स एतदेव रूपमभिसंविशन्ति एतस्माद्रूपादुदेति इति । मुखमत्रोपायः । 'मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि' इति कोशात् । उपायत्वं देवहविःप्रापकत्वं तदग्निमुखा वै देवाः इत्यत्रात्रोपायत्वं सर्वात्मभाववत्त्वं साधारणदेवपदसमभिव्याहारस्योपायत्वे हविःप्रापकत्वबोधकत्ववद्विशेषवसुपदसमभिव्याहारस्योपाये सर्वात्मभाववत्त्वं बोधकत्वात् । न चान्यविधोपाय उपायत्वमन्यविधमिति वाच्यम् । आचार्यसूचकाग्निपदसमभिव्याहारात् सर्वात्मभाववत् तदादि वा सूचकवसुपदसमभिव्याहाराच्चान्यविधत्वयोरभावात् तदुक्तमग्निश्चकार तत्त्वार्थदीपमिति एवमाचार्याणां प्रत्यक्षप्रमाणमुक्तं वेदस्य प्रत्यक्षमूलत्वात् । प्रसङ्गादाचार्याः नूतनमार्गप्रवृत्त्यनुमानमानं प्रमाणं हेतुतावच्छेदकसंबन्धः । प्रवर्त्यप्रवर्तकत्वम् आचार्यत्वं नूतनमार्गप्रवर्तकत्वमिति सुबोधिन्याम् । आचार्या इत्यज्ञातवक्तृकः शब्दः प्रमाणमैतिह्यनामा । **अन्य इति** शंकराचार्यभाष्योक्तयोगिवद्दृष्टान्तेन कल्पयितुं **प्रमाणेति** स्वस्य रुद्राद्युपाये प्रवृत्तौ प्रमाणाभावात् । **अनुपेति** भाष्यं विवृण्वन्ति स्म अधीति । **ब्रह्मणोपीत्यादिभाष्यमवतारयांबभूवुः न वेति । देवत्वमिति** 'देवस्तुर्यो विभुः स्मृतः' इति मण्डूकोपनिषच्छ्रुतेः । **आदीति** भाष्यं

ज्योतिषि भावाच्च ॥ ३२ ॥

किंच। तेषां सर्वेषामनधिकारः प्रत्यक्षत एव दृश्यते। सर्वे हि नक्षत्रादिरूपेण महाभोगवन्तो जगदवभासकत्वेन ज्योतिश्चक्रे दृश्यन्ते। अग्निः पुच्छस्य प्रथमं काण्डमित्यादिश्रुतेश्च। न हि तादृशां प्राप्तैश्वर्यवतां सर्वोपास्यानां मोक्षदातॄणां ज्ञानकर्मणोः कश्चनोपयोगोऽस्ति। तस्मादनधिकार एव देवानामित्येवं प्राप्ते ॥ ३२ ॥

उच्यते—

भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥

तुशब्दः पक्षं व्यावर्तयति। भावं देवानामधिकारस्य सद्भावम्। बादरायण आचार्यः। गौणसिद्धान्ताभावाय स्वनामग्रहणम्। किमार्षेण ज्ञानेन। तथा सति तुल्यत्वमत आह अस्ति हि। अस्ति वेदे, 'प्रजापतिरकामयत प्रजायेय' इति

भाष्यप्रकाशः।

ज्योतिषि भावाच्च ॥ ३२ ॥ अग्निः पुच्छस्येति श्रुतिस्तैत्तिरीयाणामारण्यके शिशुमारोपस्थापनेऽस्ति। शेषं निगदेन व्याख्यातम् ॥ ३२ ॥

भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥ वेदे सत्त्वमुपपादयन्ति प्रजापतिरित्यादि। अयमर्थः। अयं हि भूतार्थवादो यस्यैवं विदुषोऽग्निहोत्रं जुह्वतीति विद्वद्वाक्यशेषः। स यदि स्वार्थे

रश्मिः।

विवृण्वन्ति स्म अत्र चेति। देवोपासनविद्यात्वं तु आदित्यस्य पादत्वेन संवर्गत्वेन ब्रह्मत्वेन च शंकरभाष्येप्येता अपिपदेन यस्यादित्यः शरीरमिति श्रुत्युक्तोपासना सा च शरीरत्वेन। यावदित्यादीति अयं न्यायः साधनाध्याये तृतीयपादेस्ति 'यावदधिकारमवस्थितिराधिकारिकाणाम्' इति। मूल इति मूलं वसूनयाजयत् इति ब्रह्मविद्याधिकारकल्पने। तत्र मूले कुठारो मनुष्याणां याजकर्मत्वेनाङ्गीकारात् वसुसंज्ञाया भाविनीत्वं तत् फलम्। ब्रह्मविद्याधिकारं वदतस्तद्वदनहानिः यथा कश्चिद्वृक्षारूढः स्वस्थितिमूलं शाखां कुठारेण छिन्दन् पतति। किं च देवाधिकारबोधिकायाः श्रुतेस्तात्पर्यमाह जैमिनिः वसूनिति मनुष्याणां यागानन्तरभाविनी वसुसंज्ञेति। मनुष्याणामधिकारबोधिका श्रुतिरिति भावः। तस्मादित्यादीति। तत्तद्रूपेति। ब्रह्मणोपि देवत्वमिति ब्रह्मरूपवस्वादिरूपैः भोगानन्तरम् ॥ ३१ ॥

ज्योतिषि भावाच्च ॥ ३२ ॥ शिशुमारेति पञ्चमस्कन्धेस्ति। तत्र पुच्छमूले धाता विधाता चेति लाङ्गूलाग्रादधो भागे प्रजापतिरग्निरिन्द्रो धर्म इति अग्रे ध्रुव इति भेदेन। उपस्थानमादित्यस्य यथादित्येन रजसेति मन्त्रेण तथा। भाष्ये। प्राप्तेति प्राप्तानामैश्वर्यवतां भगवतः प्राप्तैश्वर्यवतामिति सिद्धान्ते। सर्वोपास्यत्वं पञ्चमस्कन्धे एतदु हैव विष्णोरित्यादिनोक्तम्। मोक्षदातृत्वं ब्रह्मदेवस्य ॥ ३२ ॥

भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥ भाष्ये। किमिति न किमपीति कुत्सार्थकं किम्। तथेति समाधिभाषाया आर्षज्ञानमिवात्र ज्ञानं तस्यात्र कुत्सितत्वे सति जैमिनिमततुल्यत्वम्। अस्तीति वेदे देवानामधिकारोस्ति। प्रकृते। भूतेति 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इति-

स एतदग्निहोत्रं मिथुनमपश्यत्। तदुदिते सूर्येऽजुहोदिति' । देवा वै सत्रमासतेत्यादिभिः कर्माधिकारो निश्चितः। तद् यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवदित्यादि। तथेन्द्रप्रजापतिसंवादे, ब्रह्मा देवानामिति च । एवमेवंविधैर्वाक्यैर्देवानामप्यधिकारोऽस्ति। यत्र च पुनर्देवानां फलभोग एव प्रतीयते, न

भाष्यप्रकाशः ।

प्रमाणं न स्यात्, तदा तादृशज्ञानेनान्यस्याप्यग्निहोत्रिणः प्रजारूपं फलमपि न स्यात्। अतोऽग्निहोत्रद्रष्टृत्वं तद्धोतृत्वं चावश्यमभ्युपेयम्। न चात्र प्रजापतिरिति भाविनी संज्ञा वक्तुं शक्या। ततः पूर्वमन्यस्याभावात्। 'यो ब्रह्माणं विदधाति पूर्वम्' इति श्रुतेः। एवं सिद्ध एकत्राधिकारे, देवा इत्यादिभिः कर्मणि, यो य इत्यादिभिर्ज्ञाने च देवानामधिकारो निश्चितः। एवमित्यादिकं

रश्मिः ।

वन्नायमादित्यो ब्रह्मेत्यादेश इतिवद् विरुध्यति नाप्यनुवदते वायुर्वा व संवर्ग इतिवत्। किं तु पूर्वं जातमर्थं प्रकाशयति भूतार्थवादः। तथा च वार्तिकम्—

'विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः' ॥ इति ।

अत्र भाष्य आदिपदेन 'साध्या वा देवाः स्वर्गकामाः एतं षड्रात्रमपश्यन् तमाहरत् तेनायजन्त' इति संग्रहीतव्या। अयमितिपदेन लङन्तपदघटितश्रुतिचतुष्टयपरामर्शात् द्वितीयायां विशेषमाहुः **यस्यैव**मिति द्वितीयस्य चतुर्थपादेस्ति। अग्निहोत्रविषये बह्वृचब्राह्मणं यावज्जीवमग्निहोत्रं जुहोतीत्यत्र यावज्जीवशब्दः कृत्स्नजीव[न]वाचकस्ततश्च तत्पुरुषधर्मं निमित्तीकृत्याग्निहोत्रप्रयोगो विधीयते इति विद्वदविद्वत्साधारणोऽग्निहोत्रप्रयोगः। अत्र चाग्निहोत्रमिथुनमपश्यदिति भूतार्थवादस्तेनास्मदीयाः एवं विदुषो यावज्जीवमग्निहोत्रं प्रतीयन्त्यत्रेति विद्वदग्निहोत्रप्रयोगः तत्र विद्वद्वाक्यशेषापेक्षास्ति। ननु विद्वदविद्वत्साधारणप्रयोगो वैधः 'विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत्' इति वाक्यसिद्धश्चेति भूतार्थवादेन कथं विकल्प्यते इति चेत्तत्राहुः **स यदीति स** भूतार्थवादः। **न स्यादिति**। न च काकतालीयन्यायेन फलमस्तु इति वाच्यम्। निर्बन्धेनाप्रवृत्त्यापत्तेः। विदुष इति वाक्यं तु विदुषः सकलकर्मसिद्धिमाह न तु विद्वदविद्वत्साधारणप्रयोगम्। **अन्यस्येति** मनुष्यत्ववत्संज्ञाकारणस्य वसुनिष्ठस्येव प्रजापतित्वान्यस्य। **एवमिति** एवं पूर्वोक्तप्रकारेणासौ वा 'आदित्यो देवमधु' इत्यादीति न्यायादित्यन्तभाष्योक्तवृत्तान्त एकत्र देवा इत्यादिभिः कर्मण्यधिकारे सिद्धे। चोप्यर्थे। एवं पूर्वपक्षे पूर्वसूत्रोक्तदोषद्वयं ज्ञानकर्माधिकाराभावरूपमुद्धृतम्। द्वितीयसूत्रोक्तं दोषमुद्धर्तुमाहुः **एवमितीति**। एवंप्रकारो यत्र एवमेवंविधैर्वाक्यैर्देवानामप्यधिकारोऽस्तीति भाष्ये तदादि यस्य यत्र चेति भाष्यस्य तद्भाष्यं स्फुटार्थम्। करणं भाष्ये कृतिः। **अधीति** असौ वा आदित्य इत्यस्यार्थ उक्तो भगवदिच्छया ये लौकिकाः शब्दास्त एव वैदिका इति 'ये धातुशब्दाः' इति पत्रावलम्बनात्त्वर्थान्तरमुच्यते सिद्धान्ते परं तु भगवदिच्छयैव सिद्धान्ते, अन्यार्थे इच्छाभावात्। ननु पत्रावलम्बने कर्मकाण्डश्रुत्युल्लेखात् कर्मकाण्डविषयेऽस्तु न तु ज्ञानकाण्डेपीति चेन्न तत्र 'विचारो योगरूढितः' इति पूर्वमीमांसाकारिकाया योगरूढेः 'तथैवार्थो वेदराशेः' इत्यत्रैवकारेण रूढेर्व्यवच्छेदात्। वेदान्तानामपि वेदत्वमतो योगमात्रं वेदान्त इत्येवकारपर्यालोचनलभ्यम्। अतोस्यां कुत्राधिकारः पर्यवसन्न इत्यर्था उच्यन्ते। **असाविति** अद् भक्षणे असुन् अत्ता। **वै** वातीति। वा गति-

रश्मिः ।

गन्धनयोरनिट् अ.प.डैः । गन्ता गन्धयिता, गन्ध अर्दने चुरादिः अर्द गतियाचनयोः भ्वा.प.से.अर्द हिंसायां चुरादिः आ.से.याचिता बाललीलादौ हिंसिता वा दैत्यानाम् । आदित्य इति दितिः दाप् लवने क्तिच् घुमास्थेतीत्वम् । न दितिरदितिः द्वैधीकरणकर्त्री विनाशकर्त्री लुञ् छेदने क्र्यादिः उ.से.छिदिर् द्वैधीकरणे रु.उ.अ.नक्क विनाशे चुरादिः प.से.अत्र नक्कतीति कर्तरि डैडञौ अदितेरपत्यादिरादित्यः 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' सर्वमत्तुमध्रियत इति बृहदारण्यकात् । अत्ता गन्ता गन्धयिता च द्वैधीकरणकर्त्र्या विनाशकर्त्र्या अपत्यं पातकर्तृ विनाशकरणं पत्लृ पतनेण्यत् । पत्लृ गतौ भ्वादिः प. सेटो विसर्गलोपः । देवानां क्रीडादिकर्तृणां मधुः गमनकर्तृ विनाशकरणमिति पातकर्तृविनाशकरणमित्यस्यार्थः । ण्यविधायकेन 'ऋहलोर्ण्यत्' इति सूत्रेण ण्यदृद्ध्यभावश्छान्दसः पुंनाम्नो नरकात्रायत इति पुत्र इति प्राचां पर्यायवादात् । पुत्रपर्यायश्चापत्यशब्दः । 'मनेर्धश्छन्दसि' इत्युसिर्धश्च अवबोधकर्ता अवक्षरणादौ बुध अवगमने । तस्येति तनु विस्तारे विस्तारकस्य स्तृञ् आच्छादने छद ऊर्जने ऊर्ज बलप्राणनयोः द्यौः द्योतन्तेस्यामिति द्यौर्गोवत् बाहुलकाद् द्युतेर्डोः लौकिकशब्दोधिकरणव्युत्पत्तेरुणादिषु पञ्चमाध्यायान्ते 'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे' इति कारिकां प्रक्षिप्योक्तत्वात् । द्यु अभिगमने द्यौति डौरलौकिकः 'ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः' इतिवाक्यात् अ.प.अनिट् भीविनाशाय गन्ता तस्य एव, इण् गतौ अ.प.अ.'इणशीभ्यां वन्' भावेऽयनमित्यर्थः । तिरश्चीनवंशः तरणं तृ प्लवनतरणयोः भ्वा.प.से.असुन् क्वचिदपवादविषये प्रीतिर् प्लवनं प्लुङ् गतौ इत्यस्य रूपम् । पुराणाद् गतिः फलं तस्मै [प्रेवृ सेवने भ्वा.आ.से.अजूविकारस्तस्मै] अचीनः विभाषां चेरिति खः वर्णलोपः । अञ्चु गतिपूजनयोः अच इत्येके, पूजनाय अञ्च गमनाव्यक्तशब्दयोरित्यस्य न रूपं अव्यक्तशब्दस्य प्रकरणेऽनुपयोगात् भ्वा.उ.सेट् वंशः वंशशब्दनिर्वचनं टुवम उद्गीर्णे भ्वादिः प.से. 'वृभृवमिकुभ्यः शक्' वमति वम्यते वा वंशः । उत् उङ् शब्दे क्विप् तुक्, शब्दात् गिरणं विज्ञानं तस्य कर्तृ गृ विज्ञाने चुर.आ.से.विज्ञानस्य कारणं दैवीसंपत्तस्य कर्तृ विज्ञानस्य कृत्यजन्यत्वात् । गिरणं न सेचनं तथाहि गृ.सेचने भ्वादिः प.अ.सिचिर् क्षरणे षिच क्षरणे तु.उ.अ । क्षर संचलने भ्वादिः प. । चल कंपने भ्वा.प.से.कपि चलने भ्वा.आ.सेट् इत्यन्योन्याश्रयात् नापि चल विलसन इत्यस्य तु.प.से.लस श्लेषक्रीडयोः भ्वा.प.से.श्लिष आलिङ्गने दि.आ.अ.लिगि गतौ भ्वादिः प.सेट्.इत्यस्यैवकारार्थगमनेऽनन्वयात् । उदर्थानन्वयाच्च गौरवाच्च । नापि लिगु चित्रीकरणे चु.प.से.प्रयोजनाभावात् । अथ श्लिष दाहे भ्वा.प.सेटः असंभवात् । नापि श्लिष संश्लेषे इत्यस्य श्लेषांशे आत्माश्रयम् । अयं चुरा.प.सेट् । क्रीडार्थ उच्यते, क्रीड विहारे भ्वा.प.से.संभवति अप्रयोजकत्वात् । नापि चल भृतावित्यस्य चुरा.प.सेटः अप्रयोजकत्वात् । अतो गृ विज्ञान इत्यस्य रूपं उद्गीर्ण इत्यत्रात्र । अत्र 'उन्योर्ग्रः' इति सूत्रेण घञ् तु न धातुपाठकृताकृतत्वात् । अन्तरिक्षमपूप इति द्यावापृथिव्योरन्तरीक्ष्यते ईक्ष दर्शने कर्मणि घञ् छान्दसं ह्रस्वत्वम् । अन्तरीक्ष्यते नक्षत्रजालं जगद्वास्मिन् इत्यधिकरणव्युत्पत्तिस्तु नोचिता । लुटा घञो बाधप्रसङ्गात् । लौकिकीत्वाच्च । दृशिर् प्रेक्षणे इति दर्शनं प्रेक्षणं ज्ञेयम् । पूञ् पवने क्र्यादिरुभयपदी सेट् पूनाति पूयते पूपः न पूपोऽपूपः नञ्समासः । अन्तः अतिबन्धने भ्वा.प.से. बाहुलकादरन् प्रातः पुनरितिवत् । अत सातत्यगमने अरन् । पण स्तुतौ अर उकारश्चास्य । अन्तरव्ययं बन्धकैः कामक्रोधादिभिरीक्ष्यते यः पदार्थः सोन्तरिक्षम् । रूपप्रपञ्चः सोपूपो न पुनातीत्यर्थः । अतोऽयनमित्यर्थः । व्याख्यासुधायां प्रकारान्तरमव्ययवर्गे तन्मध्यवाचकान्तःशब्दस्य लौकिकस्य ।

रश्मिः ।

किं चामृगत्यादौ भ्वा. प. सेट् हसिमृग्रिण्वामीति तन् । मरीचयः पुत्राः इति म्रियन्ते कामादय एषु मृकणिभ्यामीचिः पुन्नाम्नो नरकात्त्रायन्त इति पुत्राः भक्तिज्ञानादिप्रतिपादका वेदा नामप्रपञ्चरूपाः पुवो ह्रस्वश्चेति सूत्रात् पूञ् पवने क्र्यादि चु.सेट् ष्ट्रन् पुनात्यनेन पुंनाम्नो नरकादिति अतो देवत्वाद्वा बालत्वाद्वा तस्य विस्तारकस्य ये देवाः पूजादिकर्तारः । प्राञ्चः प्र.पूरका गन्तारः अञ्चे क्विन् ऋत्विगादिना रश्मयो व्यापकाः अश्नोतेरश चेति मिः अश्नुवत इति रश्मयोत्र मुक्ताः त एवेति वक्तव्ये ता एवेति विधेयलिङ्गं विस्तारका एवायनं कर्तरि ल्युः । अस्य इदि परमैश्वर्ये परमैश्वर्यवतः । प्राच्य इति प्राञ्चति ऋत्विगादिना क्विन् । अञ्चु गतिपूजनयोः पूजादिकर्त्र्यः । भ्वा.प.से.प्रपूरिका गव्यः मधुनाड्यः इति ज्ञानकर्तुः नल गन्धे णल बन्धे भ्वा.प.से.नालयति पचाद्यच् डलयोरेकत्वं हलविकारः गौरादिः गौरादित्वान् ङीष् । गव्यः याच्ञाकर्त्र्यः गत्वा याचिका इति यावत् । गन्ध अर्दने अर्द गति-याचनयोरिति बन्धार्थकधातुस्तु टवगादिस्तवर्गादितो निर्बलः, नाड्य इत्यत्र तवर्गपञ्चमादित्वाच्छन्दस्य । ऋच एव मधुकृत इति । मधोर्ज्ञानकर्तुः भक्तिज्ञानादिभ्यः कृतः कृती छेदने द्वैधीकारिकाः ऋञ्मनोरथेन क्रीडाप्राकट्यात् क्रीडाया अद्वैतविरुद्धत्वात् । गोप्यो गावो ऋच इति कृष्णोपनिषदः । 'वने वृन्दावने क्रीडन् गोपगोपीसुरैः सह' इति श्रुतेः, तथा च फलाध्यायभाष्यम् । अचलत्वं चापेक्ष्येति सूत्रस्य लीलाविष्करणमनाविष्करणं चापि तदिच्छयैवेत्याहेति डुकृञ् करणे वा क्विप् तुक् भक्तिज्ञानादीनां कर्तृ कर्त्र्यः । अयमर्थः—'आसीज्ज्ञानमथो ह्यर्थः' इति श्रीभागवतैकादशस्कन्धाज्ज्ञानं स्वयं प्रकाशं वैकुण्ठात्मकं द्वितीयस्कन्धनवमाध्यायसुबोधिन्युक्तं विद्वन्मण्डनोक्तं च तत्र गोप्यो गावो ऋग्रूपाः सन्त्येवात्र तु बीजरूपा अपि । ऋचस्तु ऋच स्तुतौ संस्तुतावित्यपि तुदा. प.सेट् ऋच्यन्ते स्तूयन्ते ब्रह्मात्मदेवादय आभिरिति ऋचः क्विप् । ऋचो अयनं उत्तरदेशसंयोगानुकूलो व्यापारः, न च गुणे गुणानङ्गीकार इति शङ्क्यमन्यमतत्वात् ऋचां 'वेदा यथा मूर्तिधरास्त्रिपृष्ठे' इति वाक्यात् मूर्तित्वाच्च । टो हि सुपां सुलुगिति सुः एवकारार्थाय अनेन हेतुना मधुकृत इत्यर्थः । ऋग्वेद एव पुष्पमिति स्नातको ज्ञानकर्तैव अयनेन स्ववृत्त्या विकाशकर्ता पुष्प विकाशे पचाद्यच् पुष्प्यति दि.प.सेट् काश शब्दे भ्वा.प.से.तस्य न रूपं एकदेशान्वयापत्तेः किं तु काश दीप्तावित्यस्य दिवा.आ.सेटो रूपं काश्यत इत्यर्थः । पुष धृतौ । चुरा.प.सेटः स्वप्शिल्पति सप्तस्वभावान्न रूपं, पुष विभागे दि.प.सेटोपि न रूपं पद्यादित्वात् । पुष पुष्टौ भ्वा.क्र्या.प.से.दि.प.अ.एतेषां न रूपमात्माश्रयात् । **ता अमृता आप** इति ता विस्तारिकाः अमृता न मृतं मरणमस्त्यस्मिन् अपामवान्तरप्रलयाश्रयत्वात् । प्राणस्यापोमय-त्वात् 'आपोमयः प्राणः' इति श्रुतेः साधुरापोमय इति व्याख्यासुधायाम् । आपः आप्नुवन्ति आप्यन्ते वा आप्लृ व्याप्तौ स्वा.प.अ. क्विप् । **ता वा** इति ता विस्तारिका वै वान्ति डैः वा गतिगन्धनयोः गव्यः गन्धयित्र्यः । एता इति एतैस्तुद् चेत्यादिस्तुद् । गव्यः ऋचः इति स्तुतिकर्त्र्यः । एतमिति गन्तारं ऋग्वेदं पूर्वव्याख्यातम् । अभ्यतपन् भयाभावायातपन् विचारितवन्त्यः विद्याप्रस्तावात् निबन्धे विद्यापञ्चपर्वसु तप आलोचन इत्यस्य ग्रहणात् । लोचृ दर्शने भ्वा.आ.से.करणे ल्युट् अस्मान्निबन्धादेव । भाज पृथक्कर्मणीतिवत् क्रियते कर्मेति व्युत्पत्तेः भावव्युत्पत्तेः क्वचिद्व्यभिचार-बोधनात् । तप संतापे भ्वा.प.अ. तप ऐश्वर्ये दि.आ.अ.तप दाहे चुरा.आ.से.एतेषां न रूपं निबन्धेऽ-ग्रहणात् । **तस्येति** । विस्तारकस्याभितस्तस्याभयाय विचारितस्य । **यश** इति अश्नुते व्याप्नोति 'अशेर्देवने युट् च' इति असुन् व्यापकदेवनम् । **तेज** इति तिज निशाने तेजयति तिज्यतेनेन वा तेजः

रश्मिः ।

असुन् शानि तेजने भ्वा.उ. । **इन्द्रियमिति** इदि परमैश्वर्ये इन्द्रस्यात्मनो लिङ्गमिन्द्रियमित्यादिना घच् निपातितः **वीर्यमिति** वीर विक्रान्तौ चु.प.से.पचाद्यच् तत्र साधुरिति यत् अचो यद्वा । **अन्नाद्यमिति** टीकायां वर्णलोपः अन्नमाद्यं अद भक्षणे क्त-प्रत्ययः ऋहलोर्ण्यच्च भक्षितमदनीयं च । **रस** इति रस आस्वादने चुराद्यदन्तः कर्मणि घञ् स्वाद आस्वादने भ्वा.आ.से. । **अजायत** इति जनि प्रादुर्भावे दि.आ.से.एतानि रसान्तानि पूरकाणि व्यापकानि । दृ भये भयसंयुक्तानि सत्तावन्ति कृतानि परं वेदसृष्टित्वेनाधिदैविकानि कृतान्युत्पादितानि । **तद्वीति** तद्विस्तारक आदित्यः अव्ययत्वात्तदित्यस्य । विप्रजनादिकर्ता अक्षरत् । क्षर संचलने भ्वादि.प. चल विलसने.लस श्लेषक्रीडयोः श्लिष आलिङ्गने लिगि गतौ समगच्छत् । क्रीड विहारे विप्रजनादिकर्ता सम् अहरत् । **तदादित्यमिति** तदित्युक्तार्थः यश आदिः आदित्यमुक्तार्थमश्रयत् असेवेत षिवृ गतौ दि.प.से अगच्छत् अनुवृत्तिं कृतवान् इति यावत् । अनुवृत्तिः सेवापदार्थ इति सुबोधिन्यां प्रथमस्कन्धस्य । कुत इत्यत आह **अभित** इति भीविनाशाद्धेतोः । **तद्वा** इति तद्वै एतत् यत् एतत् आदित्यस्येति षण्णां पदानामुक्ता अर्थाः । **रोहितं रूपमिति** रुह जन्मनि भ्वा.प.अ.रोहति प्रादुर्भवति रुहेरश्च लोवेति तन् । रूपमिति रूप रूपकरणे इति चुरादेरूपं तथाप्यात्माश्रयात् रूप विमोहने दि.प.से.अच्.अन्येषामपीति दीर्घः यद्वा रु शब्दे अ.प.से.रूयते आविष्क्रियते रूपं खष्पशिल्पेति पप्रत्ययो दीर्घश्च निपातितः । अतो नात्माश्रयः । एवं पञ्चामृतानि निरूपितानि तत्र प्रथमामृतं ये जीवन्ति तानाह तद्यत्प्रथमामृतमिति तद् विस्तारकं यद् याजकं प्रथते प्रथ विस्तारे प्रथ प्रख्याने च भ्वादिः आ.से.प्रथेरमच् ख्या प्रकथने कथ वाक्यप्रबन्धे वाक्यानां प्रपूरकं बन्धनस्य कर्तृ बन्ध संयमने चु.प.से.यम उपरमे भ्वा.प.से.उप उक्तार्थं रम कीडायां क्रीड विहारे विहारो विहरणं तस्य कर्तृ यत्तु यम परिवेषणे चु.प.से. परि.पूरकं विष् सेचने भ्वा.प.से.सिचिर् क्षरणे क्षर संचलने चल विलसने लस श्लेषक्रीडयोः श्लिष आलिङ्गने लिगि गतौ तदा तु बन्धनस्य कर्त्रित्यस्य गमनस्य कर्त्रित्यर्थः । यदपि विषॣ व्याप्तौ अ.जुहो.उ.अ.वी प्रजनकान्तिगत्यासनासादनेषु आपॣ व्याप्तौ व्यापनस्य कर्त्रि निबन्धनस्य कर्त्रित्यस्यार्थः । स तु आसादनांशेऽवोपसर्गस्य सत्त्वात् तदर्थसंनिवेशे । यदपि विप्र वियोगे क्र्या.प.से.वी प्रजनादिषु युजिर् योगे रु.उ.अ.तत्र योगो युज समाधौ दि.आ.अनिटः.सम् आ डुधाञ् धारणपोषणयोः पुष धृतौ चुरादिः प.से.पुषेः पुष्ट्यर्थे आत्माश्रयः । प्पुष इत्यस्य प्रसक्तिर्नास्ति पद्वयादित्वात् तत्र धारणपोषणयोरित्यत्र पुनरुक्तिप्रसङ्गः । यदि च धृञ् धारण इत्यस्याग्रहणे धृङ् अवध्वंसने भ्वा.आ.अ.धृङ् स्थाने तु.आ.अ. एतयोर्ग्रहणे न पुनरुक्तिप्रसङ्गः इत्युच्येत तदा तु वाक्यानामित्यनेनानन्वयः । नापि धृञ् वरणे इत्यस्य भ्वा.प.से.नापि धृ कौटिल्ये भ्वा.प.अ. वाक्यानामित्यनेनानन्वयः यदपि योगो युज संपर्के चु.प.सेटः पृच द्वयं संपर्के रु.चु.प.से. वाक्यानां प्र.पूरकं संपर्कस्य कर्त्रिति वाक्यानां प्रपूरकं बन्धनस्य कर्त्रित्यस्यार्थः संभवति । अमृतमिति न म्रियतेऽनेन । तनिमृङ्भ्यां किंचेतितन् । अग्रे श्रुतिः तद्यत्प्रथमममृतं तद्वसव उपजीवन्त्यग्निना मुखेन न देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यन्तीति । तत् विस्तारकं वातेर्डिच्चेति सूत्रेण वा गतिगन्धनयोर्डिदिण् । वि.वसवः वस निवासे भ्वा.प.से.वसन्तीति वसवः 'शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' इत्युः । देवा उपजीवन्ति दुवेपृ क्रीडाविहारैर्जीवन्ति । जीव प्राणधारणे भ्वा.प.से.प्राणं धारयन्ति । अग्निना अगि गतौ अङ्गतीत्यग्निः गं आचार्येण मुखेन खन् अवदारणे भ्वा.उ.से.अ.जलौ

करणं, तत्रापि तेषामधिकारोऽङ्गीकर्तव्यः । हि युक्तोऽयमर्थः । एते हि वसव आधिदैविकभगवदवयवभूताः । अनशनात् । अन्यथा वसुत्वादिविरोधः ।

भाष्यप्रकाशः ।

स्फुटार्थम् । तत्र बाधकस्य सत्त्वात् कथं युक्त इत्यत आहुः एते हीत्यादि । साधकं हेतुमुक्त्वा बाधकं तर्कमाहुः अन्यथेत्यादि । अतिरिक्तानङ्गीकारे पूर्वपक्षोक्तरीत्या वसुत्वादिविरोधः ।

रश्मिः ।

डित् खनेर्मुट् चोदात्त इति सूत्रेणाच् अल् च डित्स्यात् । धातोर्मुट् स चोदात्तः इति वृत्तिः खन्यते खनति वा तन्मुखं प्रथममममृतमाचार्यो वा अस्मदीयः वसुभिराचार्याः खन्यन्ते पूर्वं पश्चादुपजीवन्ति इति तेन हेतुना । इदमुक्तं भवति—अव रक्षणप्रवेशतृप्तिकान्तिगतिक्रियादीप्तिप्रीत्यवगमस्वाम्यर्थ-याचनश्रवणहिंसेच्छावृद्ध्यालिङ्गनावाप्तिदहनभावेषु भ्वा.प.सेट् एभ्यः दारणं भयं तत्कर्त्रा दृ भये भ्वा.प.से.अवदारणार्थकखनतिना । नाश्नन्ति अश भोजने क्र्या.प.से. भोजनविनाशं कुर्वन्ति पानस्य गमनस्य विनाशं कुर्वन्ति पा पाने भ्वा.प.अ., पा रक्षणे अ.प.अ., रक्ष पालने भ्वा.प.से., पल रक्षाय चु.प.से. अन्योन्याश्रयभियैतं विहाय पल गतौ भ्वा.प.सेटो ग्रहणम् । एतदिति गन्तृ एव इण् गतौ इण्शीभ्यां वन्निति वन् । अयनममृतं न म्रियतेऽनेन । दृष्ट्वा दृशिर् प्रेक्षणे । तृप्यन्ति तृप प्रीतौ दि.प.वेट् प्रीङ् तृप्तिकान्त्योः क्र्य.उ.अ. कामयन्ते च । कमु कान्तौ भ्वा.आ.से. कमेर्णिङ् स्वार्थे । त इति विस्तारकाः । एतद्गन्तृ एव अयनं तेन । रूपं व्याख्यातं भी विनाशाय प्र पूरकं रूपं पूरकः सन्वा सम् विशन्ति एतस्माद्गन्तृरूपात् रूपकरणकर्तुः उच्छब्दकर्तारो यन्ति गच्छन्तीत्यर्थः । देवान्तर्गता द्योतन्ते तेषां तृप्तीच्छयोरत्रोक्तेः पूरकत्वविषयिणी अभिसंवेशविषयिणी उद्ययनविषयिणी चेच्छासत्त्वाद् भक्त्याद्यधिकारोङ्गीकर्तव्य इत्यर्थः । **बाधकस्येति** अनुपासकत्वरूपस्य कृतार्थत्वरूपस्य च । **एते हीत्यादीति** वस्वादिपञ्चगणसंख्याः ।

'वसवश्चाष्ट संख्याताः षट्त्रिंशत्तुषिता मताः ।
अभास्वराश्चतुःषष्टिर्वाता पञ्चाशदूनकाः ॥
महाराजिकनामानो द्वे शते विंशतिस्तथा ।
साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः' ॥ इति ।

पञ्चातिरिक्तानां यथासंभवं पञ्चस्वन्तर्भावः पञ्चमप्रपाठके पञ्चविधदेवोक्तेः । आधिभौतिकानां त्वशनमद्धीदिन्द्र प्रस्थिते मा हवींषीत्यत्र । तर्कं व्याकुर्वन्ति स्म **अतीति** । अतिरिक्तत्वेन प्रकारेणानङ्गीकारे यद्यतिरिक्ता न स्युराधिभौतिकादिषु न वसेयुरित्यन्यथाज्ञानं तर्कः । ननु 'विरोधः कर्मणीति चेन्न' इति सूत्रशंकरभाष्येऽतिरिक्ताङ्गीकारोस्तीति चेत्तत्राहुः **पूर्वेति** । मध्वादिसूत्रोक्तपूर्वपक्षरीत्यातिरिक्तत्वेन प्रकारेणानङ्गीकारे वसुत्वेति वक्ष्यमाणरीत्या तु वेत्तुर्वसुत्वादिविरोधः । ज्ञानेनादित्यत्वप्राप्तेः प्राप्तत्वात् । अत्र तु वसूनामेवैको भूत्वेति श्रूयते । यद्वा । अन्यथा अनाधिदैविकत्वे प्रकारे वसतीति व्युत्पत्त्या निवासकर्तृत्वस्यादिपदेन 'वासवं सामाभिगायति' इत्यत्र 'सास्य देवता' इति सूत्रेण देवतार्थकाणूविरोधः । वसवो देवता अस्य साम्न इति वासवमित्यस्य व्युत्पत्तेः । यथा तत्रेति छान्दोग्ये चतुर्थप्रपाठके ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवन९रुद्राणां माध्यन्दिन९-सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनं क तर्हि यजमानस्य लोक इति स यस्तन्न

१. ज्ञानकर्माधिकारः ।

यद्वसूनां प्रातःसवनमित्यादिवत्। न हि जीवविशेषा दृष्ट्वा तृप्यन्ति।

भाष्यप्रकाशः।

तत्र दृष्टान्तः यद्वसूनामित्यादि। यथा तत्र यजमानाय वस्वादयोऽधिकारिणो वासवादिसामगानेन प्रातरादिसवनानि प्रयच्छन्ति, तथात्राऽप्यमृतदानमेवोच्येत, न तु वस्वादिभावोऽपि। अतोऽत्र वेत्तुर्वस्वादिभावार्थापत्त्या उपास्या अतिरिक्ता अङ्गीकार्या इत्यर्थः। अनशनस्यैत-

रश्मिः।

विद्यात् कथं कुर्यादथ विद्वान् कुर्यात् पुरा प्रातरनुवाकस्योपाकरणाज्जघनेन गार्हपत्यस्योदङ्मुखे उपविश्य स वासव९ सामाभिगायति लो ३ कद्वारमपा वा ३ र्णू ३३ पश्येम त्वा वय९रा ३३३३३ हु ३ आ २३२ जा ३ यो ३ आ ३१११ इत्यथ जुहोति नमोग्नये पृथिवीक्षिते लोकं मे यजमानायविंदैषा वै यजमानस्य लोके एतास्म्यत्र यजमानः परस्तादायुषः स्वाहापजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै वसवः प्रातः सवन९ प्रयच्छन्तीति श्रुत्या यजमानायेत्यादिः। तथा चेति छान्दोग्ये पञ्चमे प्रपाठके तद्यत्प्रथममृतं तद्वसव उपजीवन्तीत्युपक्रम्य स य एतदेवममृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशन्ति एतस्माद्रूपादुदेति स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्य९ स्वाराज्यं पर्येतेति श्रुत्या। वस्वादीत्यत्रादिपदेन रुद्राणामेवैको भूत्वा, आदित्यानामेवैको भूत्वा मरुतामेवैको भूत्वा साध्यानामेवैको भूत्वेति श्रुतिचतुष्टयम्। श्रुत्यर्थस्तु सद्वादिनो वदन्ति सद् ब्रह्मेति भाष्यात्। वद व्यक्तायां वाचि वि-प्रजनादिकर्त्री वी प्रजनकान्तिगत्यसनासादनेषु वातेर्डिरिति वातेर्वा रूपम्। देवानां अक्ताः अज गतिक्षेपणयोः भ्वा. प. से. अञ्जिघृषिभ्यः क्तः इति क्तः। गत्री क्षेपिका च क्षिप प्रेरणे प्रा पूरणे इर् गतौ कम्पने च अ. आ. से. कपि चलने भ्वा. आ. से. चल विलसने लस् श्लेषक्रीडयोः श्लिष आलिङ्गने लिगि गतौ क्रीड विहारे हृञ् हरणे। स्वव्यापारैर्व्यापिका सती गत्री विहर्त्री च। तस्यां वाचि। वदिः वच भाषणे अ. प. अ. उच्यते वक्ति वा वाक् क्विब्वचीत्यादिना क्विप्दीर्घौ भाष व्यक्तवाचि भ्वा आ. से. भाषणरूपायाम्। तथा च वदन्तीत्यस्य स्वव्यापारैरर्थव्यापकं गन्तृ विहर्तृ च भाषणं कुर्वन्तीत्यर्थः। यद्वसूनामिति यत् षष्ठ्या लुक् याजकानां वसूनां वसतां प्रातः प्राततीति प्र. पूरकः सततगतिकर्ता। सवनं सु प्रसवैश्वर्ययोः भ्वा. प. अ. प्र. पूरकमैश्वर्याश्रयश्च। रुद्राणां रुर्वैदिकः शब्दस्तं द्रवति द्रु गतौ भ्वादेराकृतिगणत्वात्। रोदयति रोदेर्णिलुक् चेति रक् रुद्रस्तेषां देवानां माध्यंदिनं मां ध्यायति ध्यै चिन्तायां 'आतोनुप' इति कः मध्यं तदेव माध्यं यद्वा मह पूजायां भ्वा. प. से. मह्यते अघ्न्यादयश्चेति यक् प्रज्ञाद्यण् माध्यम्। दिनमिति दीयते क्षीणं भवति करोति दीङ् क्षये दि. आ. अ. इणसिञ्जिदीङ् इति नक् क्षयकर्तृ येषामित्युपक्रम्य 'हरिष्ये तद्धनं शनैः' इति वाक्यं 'तच्चिन्तयान्यं निभृतो न वेद' इति प्रयोजनं 'भूमिर्मोत्रा तथा चान्ये दुःखभाजो हरिप्रियाः' इति भूभारक्षयद्वारेव क्षयद्वारा भक्तिर्वा प्रयोजनं सवनमुक्तार्थम्। आदित्यानामदितेरपत्यानां चकारेणाह्लादकानां चदि आह्लादे चन्दते अन्येभ्योऽपीति डः विश्वेषां विश प्रवेशने तु. प. अ. 'अशुप्रुषिलटिकणिखटिविशिभ्यः क्वन्' सर्वनामसंज्ञोयम्। चकारेणाह्लादकानां देवानां तृतीयसवनम् त्रयाणां पूरणं सवनम्। त्रेः संप्रसारणं चेति त्रेः संप्रसारणं तीयप्रत्ययश्च। अग कुटिलायां गतौ भ्वा. प. से.। केति कै शब्दे भ्वा. प. अ. कायतेर्डिमिः किम् कस्मिन्निति क किमोत् सप्तम्यन्तात्किमोऽद्वा स्यात् पक्षे त्रल् काति किमः केत्यादेशः स्यादति अधिकरणभूते शब्दकर्तरि

तस्मादिदं ब्रह्मप्रकरणमेव । योऽपि देवोपासनवत् प्रतीयते स भगवदंश

भाष्यप्रकाशः ।

स्साधकत्वे युक्तिमाहुः न हीत्यादि । नन्वेवमाग्रहे किं बीजमत आहुः तस्मादित्यादि । तथाचेदमेव

रश्मिः ।

तर्हि विस्तारके यजमानस्य पूजादिकर्तुः । लोक इति लोकृ दर्शने दृशिर् प्रेक्षणे प्रा पूरणे ईक्ष दर्शने ज्ञानभक्त्यादिलोकः शब्दकर्तरि । शब्द आविष्कारे व्यापके प्रादुर्भूते काले ज्ञानभक्त्यादीत्युक्तम् । 'कालात्मा भगवान् जातः' इति ज्ञापयितुं तथा 'कलाभिः पञ्चदशभिः स्वपक्षव्यापकैः स्तुतिः' इति सुबोधिन्याः ।एति इण् क्तिच् इतिः लोक इति एता ब्रह्मप्राप्तेः कर्ता । स इति स विस्तारकः यः पूजादिकर्ता । तद्विस्तारकं न विद्यात् जानीयात् कथं नाम शब्दकर्तृ प्रकारेण कुर्यात् । अर्थेति अर्थयते अर्थ याच्ञायां चु. उ. से. अन्येभ्योपीति डः पृषोदरादित्वाड्डलोपः याचको विद्वान् विस्तारकस्य विद्वान् कुर्यात् याचको श्रीमद्भागवतप्रसङ्गस्य 'ज्ञात्वाऽज्ञात्वा च कर्माणि' इति वाक्यमनुसंधेयम् । पुरेति पुर अग्रगमने तु. प. से. बाहुलकात्का अग कुटिलायां गतौ भ्वा. प. से. हृत्रेन्द्रेति साधुः । कुट कौटिल्ये तु मिथिलादयश्चेति लच् ।प्राततीति प्रातः अट् अत सातत्यगमने ।संतन्यते तनु विस्तारे क्तः अनुदात्तोपदेशेति न लोपः । समोवाहिततयोरिति वा समो मलोपः पक्षे सन्ततम् । अनुवाकस्य अनु अनिति अन प्राणने बाहुलकादुः । वाकं वातीति क्विप् । काम्यते कम् । कमु कान्तौ णिजभावे विच् वागेव वाक् इति वा स्वार्थेऽण् । उच्यत इति वाकः घञ् 'चजोः कुघिण्यतोः' इति कुत्वं वा । तस्येत्यर्थः । व्यापकजीवन्मुक्तगुर्वाद्यर्थकरणात् । उप वेपृ कम्पने गतिविहारयोराकरणात् व्यापककरणात् । चतुर्थ्यर्थे बहुलं छन्दसि षष्ठी स्यादिति वैदिकप्रक्रियायाः सूत्रेण षष्ठी तेनानुवाकायेत्यर्थः । जघनेनेति हन्तेः शरीरावयवे चेति द्वित्वमच्च । अव उङ् शब्दे अच् यु मिश्रणे एचोयवायावः गन्ता । गार्हपत्यस्येति गृहपतिना संयुक्तो ञ्यः । योगक्षेमः । उदक उद् अचतीत्युदक् ऋत्विगादिना क्विन् । मुखं खन् मुट् । खनति अल् डित् अवार्थेभ्यो भयकर्तारं गत्वा विक्रत्येत्यर्थकः । उपः वेपृ डुवप् वा । विश्य विश प्रवेशने पूरकाद्धेतोर्विश्य । स विस्तारकः । वासव८वसुदेवताकं साम । स्यति षोन्तःकर्मणि दिवा. प. अ. मनिन् मद्भक्तपूजाप्यधिकेति वाक्यात् आधिक्यं प्राथम्यम् । अन्योन्याश्रयात् षोन्तकर्मणि धातुनिष्पन्नं साम योजनीयम् । कालकर्ता समाधिस्तत्कर्तरि साम सांत्वने चु. प. से. सान्वनं सामयोगः सान्त्व सामयोगे चु. प. से. साम सान्त्वप्रयोगे भीविनाशाय गायति भीरत्र प्राकृतत्वात् ।

'अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः' ॥ इत्येकादशस्कन्धात् ।

युज समाधौ युज संपर्के कालकर्तृसमाधिकर्तारम् । कालकर्तृसंपर्ककर्तारं वाभिगायति । षोन्तकर्मणीत्यत्रान्तःशब्दः अति बन्धने अरन् । अमेस्तुट् चेति अमेर्वा रूपं लौकिकमरनन्तम् । बन्ध संयमने यम उपरमे यम परिवेषणे विष सेचने भ्वा. प. से. विष्लृ व्याप्तौ अ. जु. उ. से. विष वियोगे क्या. प. से. शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्यादिति नैयायिककारिकायां 'सान्निध्यतः सिद्धपदस्य वृद्धाः' इति प्रोक्तेः सिद्धपदसान्निध्यात् शक्तिग्रहः । अन्तःस्वरूपं मनोहरम् । कर्म कालः क्रियते इति कर्म इति व्युत्पत्तेः । कालश्चेष्टेति भागवतम् । 'कालोस्मि लोकक्षयकृत् प्रवृद्धः' इति गीता । 'कर्मैव गुरुरीश्वरः' इति भगवद्वाक्यं श्रीगोवर्धनप्रसङ्गे । यद्वा अम गतिशब्दभक्तिषु यद्वा अम रोगे भ्वा. चु. प. सेटौ 'हसिमृग्रिणवाऽमिदमिलूपूधुर्विभ्यस्तन्' । तिष्ठतु लौकिकस्त्वयमिति पूर्वं व्युत्पत्तिर पि

रश्मिः ।

तु विश्वः 'अतः प्रान्तेऽन्तिके नाशे स्वरूपे च मनोहरे' इति षोन्तकर्मणीति विसर्गरहितपाठो यदा तदा सुलोपः । 'अन्तः मध्ये तथा प्रान्ते स्वक्रियार्थे विचेतसि' इति विश्वः । पचाद्यच् विसर्गसाहित्ये । सामस्वरूपमाह लोकेति । ज्ञानभक्त्यादिर्लोकः द्वारं च द्द वरणे द्वारयति द्वार्यते वा पचाद्यच् वृञ् वरणे स्वा. उ. से. अपा वार्ष्णुः इति । अप आप्ऌ व्याप्तौ क्विप् आपः कर्माख्यायां ह्रस्वो नुट् चेति नुट् । असुन् अपः । सकारवर्णलोपः । अप् आ आप्ऌ व्याप्तौ वेरर्थः प्रपञ्चनीयः व्यापक इत्यर्थः । वार्ष्णु वृषु सेचनसंघातवधेषु भ्वा. प. से. विकरणव्यत्ययः श्नुः गुणः लोण्मध्यमपुरुषैकवचनम् । प्लुतस्तु विचार्यमाणानां वाक्यानां टेः प्लुतः इति वैदिकीप्रक्रियायाः वकारस्य यद्वा प्रतिश्रवणे चेति सूत्रे वाक्यस्य टेः प्लुतोभ्युपगमे प्रतिज्ञाने आभिमुख्ये चेति वृत्त्याऽऽभिमुख्ये श्नु इत्यस्य टित्वात् । वकारस्य तु 'गुरोरनृतोऽनन्तस्याप्येकैकस्य प्राचाम्' इति सूत्रेण बाहुलकात् हेव्यापक 'अनुदात्तमभिपूजितयोः' इति सूत्रेणाभिपूजितवाक्ये प्लुतो वा । वध संयमने चु. प. से. यम उपरम इत्यादि ज्ञेयं गत्वा याचस्व । पश्येम त्वा त्वां हे व्यापक । हिंसकं विरहे । 'युष्यसिभ्यां मदिक्' युष हिंसायां भ्वा. प. से. अस भुवि असु क्षेपे दि. प. से. असु गत्यादानदीप्तिषु भ्वा. उ. से. वयं नित्यक्रीडायां सत्तादिकर्तारः असु क्षेप इत्यस्यापि रूपम् । भू सत्तायां क्षिप प्रेरण इत्याद्यूह्यम् । रा राजृ दीप्तौ भ्वा. आ. से. राजते कनिन्युवृषीति कनिन्प्रत्ययः । हु हूयते हु दानादनयोः बाहुलकान्मः कुममस्य लुक् अलुकि हुम् । आ व्याप्तिः क्तिच् व्यापकं वा जा 'व्यवहिताश्च' इति वैदिकप्रक्रियासूत्रान्मध्ये अव्ययद्वयम् । त्वां राजानं सुपो डा । हु दानादानाभ्याम् । श्रौत आव्यापकं यो इति यः अ इति छेदः याजकः अम् विष्णुम् आव्यापकमिति एता । अथ । अर्थ्यते अर्थयित्वा साम जुहोतीत्यर्थः । नम इति णम प्रह्वत्वे भ्वा. प. से. असुन् प्रह्वत्वं ह्व कौटिल्ये भ्वा. प. अ. अस्य लौकिकत्वे त्वनन्तस्यापि प्रश्नाख्यानयोरिति वैदिकप्रक्रियासूत्रेण प्रश्ने अगमा३पूर्वा३न् ग्रामा३नित्यन्येभ्योपीति डः । अग्नये अगि गतौ अङ्गति पृथिवीति प्रथते प्रथ विस्तारे भ्वा. आ. से. प्रथ प्रख्यानेपि रूपं तदेव प्रथेः शिवन् संप्रसारणम् । षित्वान्ङीष् । तस्यां क्षिते निवसते क्षि निवासगत्योः तु. प. अ. अग्निविशेषणम् लोकं भक्तिज्ञानात्मकं यजमानाय विन्द लभस्व एष गन्ता 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति श्रुतेः तस्य लोको ज्ञानादिः वै वाति डैः यजमानविशेषणं याचकस्य यजमानस्य एतास्मि अहं सत्तादिकर्ता यजमानः । परस्तादिति परा अस्तातिः परस्यां दिशि जन्यमात्रं कालोपाधिरिति कालवृत्तौ स्वार्थे अस्तातिः 'विभाषा परावराभ्याम्' इति सूत्रेण दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिक्देशकालेष्वस्तातिरिति सूत्रमनुवर्ततेऽत्र । ननु पृ पालनपूरणयोरिति पूरके काल इति युक्तं कुतो दिशीति उच्यते दिक्कालौ नेश्वरादतिरिच्येते इति पदार्थखण्डनमण्डने शिरोमणिरितीश्वरपूरककालशरीरत्वाद्दिशीति । आकाशशरीरं ब्रह्मेति श्रुतेः सूत्रस्य लौकिकत्वाद्वाऽलौकिके यावदपेक्षितम् । पालनपूरणकर्तरि । अत्रेति परमैश्वर्यवति । इदि परमैश्वर्ये इत्यस्येदम् । आयुष इति । आङ्पूर्वो युष हिंसायाम् । भ्वा. प. से. विच् युष्यते युषति वा युट्—आयुः आयुषी अततीत्या डाङ् बाहुलकाद्युष् । तद्धितः । स्वाहेति स्वाद आस्वादने भ्वा. आ. से. स्वादतेनेन आप्रत्ययः पृषोदरादित्वाद्दस्य हः सुष्ठु आहूयते अनेन वा डा प्रत्ययः भक्तिज्ञानादिः अपजहीति अपः आप्ऌ व्याप्तौ जहि । परिघमिति पूरकं पालकं च यं परौ घ इति सूत्रेण परिहन्यतेऽनेनेति करणे अप् घश्चादेशः परौ हन्तेरप् स्यात् करणे घशब्दश्चादेश इति वृत्तिः आत्मा प्रपत्त्यादिना । इतीति एता उक्ता उत् शब्दः कर्त्रा तिष्ठति । ष्ठा गतिनिवृत्तौ यतिं नि प्राप्य करोति तस्मा इति विस्तारकाय । वसवः वसन्तः प्रातः पूरकं सततपन्तार-

भाष्यप्रकाशः।

ब्रह्मवाक्यत्वे लिङ्गमित्यर्थः। देवोपासनवदिति। देवोपासने उपास्यवदिति पाठः प्रतिभाति। सप्तम्यर्थे वा वतिः। ननूभयत्र कल्पनातौल्ये पूर्वपक्षरीत्यैव निर्णयोऽस्तु। विशेषाभावादित्यत

रश्मिः।

मीश्वरं प्रयच्छन्तीत्यर्थः दाण्धातोः यच्छादेशः। ददति। प्रकृतमुच्यतेऽधुना। प्रातरादित्यादिपदेन माध्यंदिनं सवनं तृतीयं सवनं च। तथात्रापीत्यत्र तद्यत्प्रथमममृतमित्यादि छान्दोग्ये तद्व्याकृतम्। स य एतदिति व्याक्रियते। स विस्तारकः य इति याजकः एतदिति गन्तृ एवं गन्तुः अमृतमानन्दरूपं वेद जानाति छन्दसि लुङ्लिङ्लिटः धात्वर्थानां संबन्धे सर्वकालेष्वेते वा स्युरित्यनेन लडर्थे लिट्। वसूनामेव गन्ता तेषु। एक इण्। 'इण्भीति' कन् गन्ता तस्यासाधारणस्य वेदस्य सर्वात्मभाववत्। भूत्वा सत्तां कृत्वाऽग्निनैवेत्यादि व्याख्यातम्। स यावदिति स विस्तारकः। यावत् या प्रापणे अ. प. अ. प्रथमान्ताद्वतिः प्रापकः आदित्यः अक्लिष्टकर्मा लवनकर्त्रीं विनाशकर्तृकर्त्र्याः। अपत्यं न पतत्यनेनेत्यपत्यं ण्यत् वृद्ध्यभावश्छान्दसः पुंनाम्नि नरके अनेन न पतन्तीति यत्परिमाणं यस्य तद्धिता इति बहुवचनेनान्येऽनुक्ता अपि तद्धिता ज्ञापिताः तेन डावतुः यावदिति वा। पुरस्तादिति पूर्वस्मिन् सप्तमीत्यस्तातिः अस्ताति चेति पुरादयः पूर्वपूरणे भ्वा. प. से. पूर्वति अच् पूरक इत्यर्थः। उच्छब्दः। कर्ता एता तृच् गन्ता आदित्यः स च मधुरिति बोध्यम्। पश्चादिति अवरस्मिन् पश्चादित्यनेनावरस्य सप्तमीपञ्चमीप्रथमान्तस्य निपातः। अवरमवरीणाति रीङ् स्रवणे क्र्या. प. अ. ङ. यद्वा रा. आदानेऽवराति अव धातोरर्थकर्तॄन् सन्मार्गवर्तिनः आ. व्यापकान् कृत्वा यथाधिकारं ददातीत्यवरं परं ब्रह्म तस्मिन् च्छब्दकर्तेत्यादि पूर्वोक्तमन्वेति पसि विनाशे वा. चु. प. से. पसयति पश्चात् बाहुलकाच्चात्प्रत्ययः। 'स्तोश्चुना श्चुः' नकारलोपः पूरके विरुद्धशब्दकर्तॄन् विनाशयति भक्तिमार्गे। अस्तमिति अस्यते असु क्षेपे दि. प. से. क्तप्रत्ययः एता गन्ता तस्य वसूनां वा व गन्ता। तावदिति तत्परिमाणमस्य डावतुः तद्धितः विस्तारकं परिमाणम्। आधिपत्यमिति पातीति पतिः पातेर्डतिः पतावित्यधिपति तस्य भावः आधिपत्यम्। अधिकरणरूपरक्षकत्वम्। स्वं स्वन शब्दे शब्दकर्तुः वसूनां मध्ये शब्दकर्तुरित्यप्यन्वयः। आ. व्यापकं राज्यं राज्ञो भावः। पर्येता। परिपूरकः एता एष्यति अद्यतनकालो विवक्षितः इत्यर्थः। अमृतदानं स एतदेव रूपमभिसंविशतीत्यमृतदानं वस्वा·········वा तरोक्तं गृह्यते यद्वा वसवः प्रातःसवनं प्रयच्छन्तीत्यमृतदानं (वस्वादीति अर्थापत्तिस्त्वेवं) भाष्यार्थमाहुः अत इत्यादि। अत्र छान्दोग्ये पञ्चमे प्रपाठके स य एतदेवममृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनेत्यादिना वेत्तुर्वस्वादिभावेनार्थापत्तिः वेदार्थत्वेन नित्यसंयोगार्थं वसव आध्यात्मिकाः आधिदैविकानां भगवदवयवत्वात् उपास्यत्वात्। एवं च शब्देन प्रमितस्योपजीवकवसुरूपस्यार्थस्यार्थान्तरं विनाऽनुपपद्यमानस्योपपत्तयेऽर्थान्तरमुपास्याधिदैविकवसुरूपं 'यो यदंशः स तं भजेत्' इति वाक्यात् भगवन्मूर्धसन्निविष्टम्। लोकत्रयपक्षे। तस्य कल्पना तया उपास्या अतिरिक्ताः। अर्थापत्तिलक्षणं-प्रत्यक्षेण शब्देन वा प्रमितस्य अर्थान्तरं विनाऽनुपपद्यमानस्योपपत्तयेऽर्थान्तरकल्पना। ननु च कं प्रति उक्तिरेषा उपास्या अतिरिक्ताः सन्त्वेवेति चेन्न पुराणवासनाशून्यान् प्रति उक्तिरेषा इत्यवोचाम। नहीत्यादीति। जीवेति 'शिशुमारः सर्वमूर्तिराधिदैविकरूपधृक् यः सः। इदमेव दृष्ट्वा तर्पणमेव। इति पाठ इति उपासना पदे लक्षणापत्त्या पक्षान्तरमाहुः सप्तम्यर्थे इति। मास्तूपासनपदस्यार्थापत्तिलभ्योपास्यवसुषु लक्षणापत्त्यर्थमात्रप्रयमार्था-

एवाधिदैविकः । न वा पूर्वकल्पेन निर्णयः । तथा सति तेषामभावादनुपास्यत्वम् । अनित्यता च वेदस्य स्यात् । तस्माद् देवानामप्यधिकार इति शब्दबलविचार एव युक्त इति सिद्धम् ॥ ३३ ॥

इति प्रथमाध्याये तृतीयपादे अष्टमं तदुपर्यप्यधिकरणम् ॥ ८ ॥

शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि ॥ ३४ ॥

इदानीं शूद्रस्याधिकारो निराक्रियते । यथा कर्मणि एतया निषादस्थपतिं

भाष्यप्रकाशः ।

आहुः न वेत्यादि । अनित्यतेति एतेषामेवोपास्यत्वे अनित्यतेत्यर्थः । एवमत्र देवादीनामपि कर्माद्यधिकारस्थापनेन तेषामपि हृद्यङ्गुष्ठमात्ररूपेण स्थितिरित्यपि साधितम् ॥ ३३ ॥

इति अष्टमं तदुपर्यप्यधिकरणम् ॥ ८ ॥

शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि ॥ ३४॥ अनुप्रसङ्गरूपां संगतिं बोधयितुमाहुः इदानीमित्यादि । जैमिन्यनभिप्रेते देवाधिकारे स्थापिते तद्वदत्र शूद्राधिकारोऽपि संभाव्यत इत्याशङ्कायां स निराक्रियत इत्यर्थः । ननूपनयनाद्यभावेन वैदिककर्मादावनधिकारस्य तस्मिन् सिद्धत्वात् संभावनैव कुत इति चेन्न । ब्रह्मविद्याया उपनयनानपेक्षत्वात् । वैश्वानरविद्यायां तान्हानुपनीयैवैतदुवाचेति श्रावणात् । नच तत्र प्राचीनशालादीनां ब्राह्मणत्वेन तस्योत्सर्गसिद्धत्वाद् वैशेषिकस्यैव तत्रानपेक्षा, न त्वौत्सर्गिकस्येति वाच्यम् । तथा सति तस्य प्रतिनियतवर्णोचितशास्त्रीयसंस्कारत्वे पर्यवसानात् सच्छूद्रे च तदुचितस्य तस्य सत्त्वेनैवाधिकारसिद्धेः ।

रश्मिः ।

तिरिक्तो भवतु इति भावः । देवोपासने इव योर्थः प्रतीयते स भगवदंशः यद्वा प्रथमान्ताद्वतिः योप्यर्थो देवानामुपासनं उपास्योपासकव्यतिरिक्तं तद्वत्प्रतीयते उपासकादिराध्यात्मिकः आधिदैविक इति 'यस्तु आध्यात्मिकः प्रोक्तः सोऽसावेवाधिदैविकः' इति वाक्यात् ब्रह्मण एतादृकूत्वात् । वा न वेत्यादीति पूर्वकल्पः पूर्वपक्षः । तेषामिति उपासकानामभावात् उपासकत्वनिरूपितोपास्यत्वाभाव इति भाष्यार्थः । ननु शंकरभाष्ये योगिवद्देवानामुपास्योपासकत्वं रूपान्तरग्रहणेनोपपादितमेवेत्यत आहुः भाष्ये नित्यतेत्याशयेनाहुः एतेषामिति । अनित्यसंयोगापत्त्यादनित्यतेति भावः ॥ ३३ ॥

इति अष्टममधिकरणम् ॥ ८ ॥

शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि ॥ ३४ ॥ अन्विति तेन पूर्वाधिकरणे प्रसङ्गसंगतिर्बोधिता । पूर्वत्र मनुष्याधिकारविचारेण स्मृते देवाधिकारे विचारिते जैमिन्यनभिप्रेते प्रसङ्गसंगतिः देवाधिकारेण स्मृते तदेवात्र शूद्राधिकारनिराकरणे उपेक्षानर्हत्वादनुप्रसङ्गः । शूद्राधिकार इति जैमिन्यनभिप्रेतः । तस्मिन्निति अपशूद्राधिकरणे षष्ठस्य प्रथमे पादे । तान् हेति छान्दोग्यसप्तमप्रपाठकेस्ति । तान् प्राचीनशालादीन् । कैकयराजोवाच । वैशेषिकेति छान्दोग्यटीकायामुक्तत्वात् विशेषेण संसृष्टस्य नमस्काररूपोपनयनस्य । औत्सर्गिकस्येति षोडश संस्कारान्तर्गतस्योपनयनस्य । तथा सतीति उपनयनस्य नमस्काररूपत्वे प्रकारे सति 'उपनीय' इत्यस्य टीकायां पादयोः पतनमकारयित्वेत्यर्थात् । तस्येति वैशेषिकस्य । प्रतीति । ननु प्रतिवर्णोपचितेति वक्तव्ये नियतपदमधिकमिति चेन्न शूद्रेषु सच्छूद्रग्रहणार्थं नियतपदस्यावश्यकत्वात् । प्रतिनियता वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्रा इत्येवं तेषामुचिता ये शास्त्रीयाः संस्कारास्तत्त्वे । सच्छूद्र

याजयेत् सा हि तस्येष्टिरिति श्रुतेर्हविष्कृदाधावेति शूद्रस्येति लिङ्गाद् दोहादौ च शूद्रस्याधिकारः । एवमिहापि संवर्गविद्यायां शूद्रस्याधिकार इति तन्निराकरणार्थमिदमधिकरणमारभ्यते ।

एवं श्रूयते । जानश्रुतिर्ह पौत्रायण इत्यत्र हंसवाक्यश्रवणानन्तरं सयुग्वनो रयिक्वस्य समीपं गतः जानश्रुतिः पौत्रायण रयिक्वेमानि षट्शतानि गवामित्या-

---

भाष्यप्रकाशः ।

नच तस्य सामर्थ्यार्थित्वयोरभावः शङ्क्यः । विद्यायां बौद्धसामर्थ्यस्यैवापेक्षणात् । तस्य च प्राक्तनपुण्येनैव सिद्धेः । 'श्रावयेच्चतुरो वर्णान्' इति पुराणश्रावणविधानात् तच्छ्रवणेऽर्थित्वस्यापि सिद्धेः । तर्हि विद्वत्ताभाव एव बाधकोऽस्त्विति चेत् तत्राहुः यथेत्यादि । संवर्गविद्यायां कथमधिकार इति शङ्कायां तद्बीजं बोधयितुं विषयवाक्यमुदाहरन्ति एवमित्यादि उपदिष्टवानित्यन्तम् । श्रूयत इति छान्दोग्ये षष्ठप्रपाठकारम्भे एवं श्रूयते । सयुग्वन इति । युक्तवानिति युग्वा शकटविशेषः । तेन सह वर्तमानः सयुग्वा तस्य । रयिक्व इति तस्य रूढं नाम । जानश्रुतिरिति । जनश्रुतेरपत्यम् । पौत्रायण इति । पुत्रस्य पौत्रः । देवतामिति । उपास्यां देवताम् । अ ह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति । अः प्रतिषेधे । हेत्याश्चर्ये । हारेत्वा हारेण युक्त इत्वा रथः । शूद्रेति संबोधनम् । गोभिः सह यदानीतं तत्सर्वं तव निकट एव तिष्ठत्वित्यर्थः । केचित्तु, अरे शूद्र त्वा त्वाम् अहह धिक् । स आनीतो रथादिर्ह तवैवास्त्वित्येवं

रश्मिः ।

इति सञ्छूद्रौ गोपनापितौ । अभाव इति यथाह माधवीये जैमिनीयन्यायमालाविस्तरे क्रतुविधिवैयर्थ्यपरिहाराय शूद्रस्याविहिता विद्यापि कल्प्यते क्रतुविधयश्चात्रैवर्णिकानुष्ठानेनैव चरितार्थाः । अतो न शूद्रस्य विद्यां कल्पयतीति अतो विद्यासामर्थ्यं श्रवणार्थित्वं तयोरभावः । बौद्धेति बुद्ध्या निष्पाद्यते इति बौद्धं शैषिकोण् । सामर्थ्यं तस्य । यथेत्यादीति श्रुत्यर्थस्तु वास्तुमयं रौद्रं चरुं निर्वपेत् इति प्रकृत्य श्रूयते एतयेति । एतयेष्ट्या निषादस्थपतिमित्यत्र न षष्ठीतत्पुरुषः निषादानां स्थपतिरिति ब्राह्मणत्वादित्रिकवाचिना निषादशब्देन तन्त्रिकसंबन्ध उपलक्ष्येत ब्राह्मणत्वाद्यन्यतमत्वं शक्यतावच्छेदकमिति अतो निषादश्चासौ स्थपतिश्चेति कर्मधारयः अत्र निषादत्वत्वं शक्यतावच्छेदकं षष्ठी नास्तीति नोक्तदोषः हविः पयआदि तत्कृत् । आधाव धावु गतिशुद्ध्योः भ्वा. उ. से. आगच्छ लोट्मध्यमपुरुषः इति शूद्रस्य शूद्रसंबन्धि दोहादावित्यादिपदेन धावनमन्त्रश्रवणयोर्ग्रहणम् । संवर्गेति संवर्गस्य वायोः प्राणस्य विद्या 'वायुर्वाव संवर्गः' इति श्रुतेः प्राणो वाव संवर्ग इति श्रुतेश्च । तद्बीजमिति अधिकारबीजम् । शूद्रेति संबोधनम् । सयुग्वन इति प्रतीकं हंसवाक्येत्यादि लौकिकशब्दैर्भगवदाज्ञया सृष्ट्यर्थं मोहकैर्ब्राह्मणैः स्पष्टं व्याकृतमिति न व्याकृतम् । यदि च पूर्वमीमांसाकारिकासु 'लोकदृष्ट्या यदा वेदः स्पृश्यते नाशमेति हि' इति कारिकाया लोकदृष्ट्या स्पर्शे उक्तो नाशो अलौकिकशब्दैः व्याकरणमपेक्षते इत्युच्येत तदपि भगवदिच्छाभावात् क्वचिदुच्यते तद्दिशान्यत्रापि बोध्यम् । श्रुतिस्तु जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस स ह सर्वतः आवसथान् मापयांचक्रे सर्वत एव मेऽत्स्यन्तीति अथ ह हंसाः निशायामतिपेतुः तद्धैवं हंसो हंसमभ्युवाद होहोऽयि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं

दिना देवतां पृष्टः प्रत्युवाच। अ ह हारे त्वा शूद्र तवैव सह गोभिरस्त्वित्यादिना जानश्रुतिं शूद्रशब्देन संबोध्य, पुनश्च, शूद्राऽनेन मुखनेत्युक्त्वा संवर्गविद्यामुपदिष्टवान्। अतोऽत्र विद्यायां जातिशूद्रस्याप्यधिकार इत्याशङ्क्य परिहरति। नात्र शूद्रशब्दो जातिशूद्रवाची। किंतु मत्सरयुक्तस्त्वमत्र नाधिकारीति तथा संबोधनम्। तदाह। शुक् शोकः, अस्य जानश्रुतेः समजनि। तत्र हेतुः। तदनादरश्रवणात्। तस्माद्धंसादनादरस्य श्रवणात्। कंवर एनमेतत्सन्तं सयुग्वानमिव रयिक्रमात्थेति स्वापकर्षश्रवणात्। किमतो यद्येवमत आह तदाद्रवणात्। तत् तदनन्तरम् आद्रवणात्। शुचमनु आद्रवतीति शूद्रः। परोक्षवादार्थं दीर्घः

भाष्यप्रकाशः।

व्याकुर्वन्ति। मुखेनेति द्वारेण। सूत्रमवतार्य व्याकुर्वन्ति। अत इत्यादि। कं वर एनमेतदित्यादि। कं वरा, कम् उ अरे एनं राजानमेतावत्कर्मकर्तारं सन्तं सयुग्वानं रयिक्रमिवात्थेत्यर्थः। शुचमन्वित्यादि। अत्र दीर्घः पृषोदरादित्वाद् वर्णान्तरलोपस्याप्युपलक्षकः।

रश्मिः।

दिवाज्योतिराततं तन्मा प्रसांक्षीः। तत्त्वा मा प्रधाक्षीरिति तमु परः प्रत्युवाच कम्वर एनमेतत्सन्त९ सयुग्वानमिव रैक्व मात्थेति योनुकथ९ सयुग्वा रैक्व इति। यथा कृताय विजितायाधरेयाः संयन्त्येवमेन९ सर्वं तदभिसमैति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति तदु ह जानश्रुतिः पौत्रायणः उपशुश्रावेति। श्रद्धयादेयो हि श्रद्धापुरःसरमेव ब्राह्मणेभ्यो देयमस्येति णिनिः। बहु प्रचुरं दातुं शीलमस्येति बहुदायी। भोजनार्थं बहु पाक्यमस्यास्तीति बहुपाक्यः। क्वचिद्देशे आस बभूव स ह सर्वतः सर्वासु दिक्षु आवसथान् वसतिस्थानानि मापयांचकार कारितवान् शब्दितवान्वा। सर्वत एव सर्वावसथेष्वेव मे मम अन्नमत्स्यन्तीति लोका इत्यभिप्रायवान् विशिष्टान्नदानफलं दर्शयितुमाह अथ हेति अथ एवं सति ह कस्मिंश्चिद्घर्मकाले निशायां हर्म्यतलस्थे राजनि हंसा राज्ञो दर्शनगोचरे निपेतुः गतवन्तः। तत् तस्मिन् काले पृष्ठतः पतन्नेको हंसोग्रतः पतन्तं हंसं होहोऽयि भल्लाक्ष भल्लाक्ष इत्यादरेण संबोध्य मा प्रसांक्षीस्तेन ज्योतिषा सह संबन्धं मा कार्षीः तत्र हेतुः तज्ज्योतिस्त्वा त्वां मा प्रधाक्षीः छान्दसत्वान्मध्यमः मा कार्षीद् दहनं। तमुपर अग्रगामी हंसः कं उ अरे इतिच्छेदः। अरे हंस एनं प्राणिमात्रं कमु सन्तं केन माहात्म्येन युक्तं सन्तं जानन् त्वं एतत्पूर्वोक्तं वचनमात्थ कमिव रैक्वमिव रैक्वतुल्यत्वेनोक्तवानसि। कीदृशं रैक्वं सयुग्वानं कथं केन प्रकारेण यो रयिको वर्तते इति एनं रैक्वं। तत्र दृष्टान्तः यथा कृतायेति ईयते प्राप्यते जयोऽनेनेत्यायः इणो वातो रकर्तरि च कारके संज्ञायामिति सूत्रेण घञन्तमिदं रूपमक्षवाचकं द्यूतसमये वराटकगणनायां यत्र चत्वारोवशिष्यन्ते स प्रकृतायः यत्र त्रयः स त्रेतायः यत्र द्वौ द्वापरः यत्रैकः स कलिनामा यथा लोके कृतो नामा यः अक्षः द्यूतसमये प्रसिद्धश्चतुरङ्कः तस्य विजिताय विजयार्थं इतरे अधरेया न्यूना अक्षास्त्र्यङ्कद्व्यङ्कैकाङ्काः क्रमेण त्रेताद्वापरकलिनामानः संयन्ति तत्रान्तर्भवन्ति न्यूनसंख्याया अधिकसंख्यायामन्तर्भूतत्वादिति। यस्तदिति यद्वेद्यं स रैक्वो वेद तद्वेद्यं योऽन्योपि वेद तत्फलेपि सर्वं सर्वप्राणिजातधर्मफलमन्तर्भवतीति। स मयेति स एवं भूतो विद्वान् मया एतदेवं रैक्ववत्कृतायः स्यानीथ उक्त इत्यर्थः। इति शब्दो हंसवाक्यसमाप्त्यर्थः। प्रकृतमुच्यते युग्वेति [illegible]।

सर्वज्ञत्वख्यापनाय। रूढिर्योगमपहरतीति न्यायात् कथमेवमत आह सूच्यते हि। स्वस्य सर्वज्ञत्वं सूच्यते। हंसवाक्याच्छोके जाते, त्वमागत इति। अन्यथा प्रप-

---

भाष्यप्रकाशः।

रूढिरित्यादि। पूर्वतन्त्रे उक्तन्यायाद् रथकारपदे रूढिरेवादृता, न तु योग इति कथमत्र तद्विरुद्धमाद्रियत इत्यर्थः। ननु स्वस्य सूचनमेवात्राभिप्रेतमिति कथं ज्ञेयमत आहुः अन्य-

रश्मिः।

नश्चछान्दसोन्त्यस्य विशेषणं पापकर्षणार्थं लौकिकी व्युत्पत्तिस्तु युगं वहतीति युग्यो बलीवर्दः सोस्यातीति युग्वा शकटी मत्वर्थीयः अकारः। तया सह वर्तते इति सयुग्वा ड्वनुप्रत्ययान्तो निपात इति। विशेषणं संपत्ति सूचनार्थमिति सा क्लिष्टा सोधस्ताच्छकटस्य पाप्मानं कषमाणमिति श्रुतिर्नपुंसकलिङ्ग-विरुद्धा च। रूढमिति समुदायशक्ती रूढिस्तद्युक्तं जनश्रुतेरिति छान्दस इञ् तस्यापत्यमिति सूत्रेण वा। जानश्रुतिशब्दस्य पौत्रायणस्यार्थमेवमुक्तं एतेन जनश्रुतस्यापत्यमिति विग्रहे अपत्यस्य प्रपौत्रत्वेन विवक्षापत्तिः। लोके तु जनश्रुतस्यापत्यं अत इञ्। पौत्रायण इति पुत्रस्यापत्यं पौत्रिः तस्यापत्यमत इञ् वा तस्यापत्यं पौत्रायणः यञिञोश्चेति फक्। टीकायां तु जनश्रुतपौत्रस्यापत्यं पौत्रायण इति तदभेदान्वये विरुणद्धि। न च जनश्रुतस्यापत्यमिति विग्रहे अपत्यं प्रपौत्रत्वेन विवक्षितमिति वाच्यं ॐ देवतामितीति। अत्र पूर्वं हंसवाक्यश्रवणानन्तरमिति भाष्योक्तवाक्यश्रवण-श्रुत्युपयुक्ता श्रुतिरुपन्यस्ता। अधुना रयिक्वेमानीति श्रुत्युपयुक्ता श्रुतिरुच्यते हंसवाक्यश्रवणानन्तरं पठ्यते सह संजिहान एव क्षत्तारमुवाचाङ्गारे ह सयुग्वानमिव रयिक्वमात्थेति यो नु कथं स युग्वा रैक्व इति यथा कृताय विजितायाधरेया संयन्त्येवमेनं सर्वं तदभिसमैति यत्किं च प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति स ह क्षत्तारन्विष्य नाविदमिति प्रत्येयाय त९होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्छेति सोधस्ताच्छकटस्य पाप्मानं कषमाणमुपोपविवेश तं होभ्युवाद त्वं नु भगवः सयुग्वा रैक्व इत्यहं ह्यरा ३ इति ह प्रतिजज्ञे स ह क्षत्ताविदमिति प्रत्येयाय। तदुह जानश्रुतिर्ह पौत्रायणः षट् शतानि गवां निष्कं अश्वतरीरथं तदादाय प्रतिचक्रमे इति श्रुत्यर्थो भाष्ये सयुग्वन इत्यादिनोपनिबद्धः तं हाभ्युवाद रयिक्वेमानि षट् शतानि गवामयं निष्कोऽयमश्वतरीरथो नु म एतां भगवो देवता९शाधि यां देवतामुपास्से इत्युपास्यां देवतां श्रुतौ संजिहानः खट्वां त्यजन् क्षत्तारं सूतं अङ्ग अरे यो रैक्वः कथं सयुग्वा ऋच्छेति गच्छ स क्षत्ता पाप्मानं हि सन्तं कष हिंसायां भ्वा.प.से.छांदसः कानच् पामानमित्यपपाठः अ इति 'अ प्रतिषेधे अ स्यादभावे स्वल्पार्थे' इति विश्वः अभावस्यार्थे। ह हन्ति ३-अनाश्चर्यं हन्ति सिद्धान्तपक्षं पदत्रयव्याख्यास्वरसेनाहुः केचिदिति विरलाः ह हेति परिक्लेशे तदनुमापकः शब्दो धिगिति। भाष्ये। आदिपदेनेतिपदं गृह्यते। ननु अरे शूद्रेति संबोध्येति वक्तव्ये शूद्रपदमात्रं कुत इति चेन्न अरे इत्यस्य कचिददर्शनात्। एव एव हारे त्वेति व्याकृतं नन्वरे शूद्रेति व्याख्यानमत्र दृश्यते इति चेन्न अन्यार्थत्वात्। संबोधनं च वाक्यार्थबोधाश्रयत्वेन वक्तुरिच्छाविषयत्वम्। उक्तश्रुतिवाक्यबोधाश्रयत्वेन वक्तू रयिक्वस्येच्छाविषयत्वं जानश्रुतेरस्तीति। भाष्ये। पुनश्चेति एतावद्धनेऽगृहीते सहस्रं गवामित्यादिना ततोप्यधिके द्रव्ये दुहितृसहिते ग्राहिते च शूद्रानेनैव मुखेनालापयिष्यथा इति विद्यां शाधीति वदिष्यसि एवमुक्त्वा वायुर्वा संवर्गः

न्नस्य धिक्कारवचनमनर्थकं स्यात् । युक्तश्चायमर्थो ब्रह्मविदः सर्वज्ञतेति । तस्य मात्सर्यनिराकरणं वा संबोधनफलम् । तस्माच्छुचं प्रत्याद्रवणादेव शूद्रपदप्रयोगो न जातिशूद्रवाची ॥ ३४ ॥

भाष्यप्रकाशः ।

थेत्यादि । ननु स्वस्य सर्वज्ञत्वख्यापनार्थं प्रपन्नधिक्कारवचनमपि ब्रह्मविदोऽनुचितमित्यरुच्या पक्षान्तरमाहुः **तस्य मात्सर्येत्यादि** । एवमुक्ते मत्सरस्यातिदोषत्वं ज्ञात्वा तं स त्यजेत् तदुपाख्यानं श्रुत्वाऽन्योऽपि त्यजेदित्येतदर्थं तथा वचनमतो नानुचितमित्यर्थः । **तस्मादिति** । गमकेन योगोपोद्बलने रूढेरकिंचित्करत्वात् ॥ ३४ ॥

रश्मिः ।

इत्यादिना संवर्गविद्यामुपदिष्टवानित्यर्थः । संवृङ्क्ते सर्वान् ग्रसतीति संवर्गो वायुः प्राणश्च । **प्रकृते** । **द्वारेणेति** शास्त्रीयाभ्युपायेन ।

'ब्रह्मचारी धनादायी मेधावी श्रोत्रियप्रियः ।
विद्यया विद्यां यः प्राह तानि तीर्थानि षण्मम' ॥ इति वाक्यात् ।

'तस्या मुखमुपोद्गृह्णन्' इत्यत्र मुखमुपायत्वम् । **तस्याः** जानश्रुतेर्दुहितुः । **सयुग्वानमिति** कर्ममात्रकर्तारं जानश्रुतिं ज्ञानिनं रयिक्कमिव भणसि तदुक्तम् । 'कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम्' इति । **अत्रेति** । शुचा आद्रवति गच्छति द्रु गतौ शुच उकारस्य दीर्घः स च वर्णान्तरस्य चकारस्य लोपस्याकारलोपस्य चोपलक्षकः । न चाकारलोपस्य किं प्रयोजनमिति वाच्यम् । ईदृशद्रवणस्य शूद्रत्वप्रयोजकत्वेनाकारस्य विग्रहे सत्त्वात् । **भाष्ये** । **तदिति** पञ्चम्यन्तमव्ययं क्रमवाचि तदनन्तरमित्यर्थः । न च तदेति वेदः मन्यथा शुचः पूर्वमपि द्रवेदेव । अन्येभ्योपीति ठः आद्रवणस्य विग्रहान्तःपातित्वात् शुचमन्वित्यर्थकथनम् । अलौकिकविग्रहो वा । ननु शुद्र इत्युक्ते लाघवं न तु दीर्घे कृते इति चेन्न । 'परोक्षवादो वेदोयं परोक्षं च मम प्रियम्' इति भगवद्वाक्यात् तदर्थे दीर्घः तथा च श्रुतिः षड्ढूतꣳसन्तं षड्ढोतेति आचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति । ननु ज्ञानिनि राजकन्याग्राहित्वं गोसहस्रादिग्राहित्वेन वैराग्यपरितोषयोरभाववत्त्वं न संभवतीति चेत्तत्राहुः **सर्वेति** । रयिक्कस्य सर्वज्ञत्वख्यापनाय । **प्रकृते** । **रथेति** षष्ठस्य प्रथमे पूर्वतन्त्रे चिन्तितम् । रथस्य कारो रथकारः इति योगस्य त्रिषु वर्णेषु सत्त्वादाधानश्रुतेः 'वर्षासु रथकार आदधीत इति रथकाराधाने त्रैवर्णिको रथकारोधिक्रियते । रथं करोतीति रथकारः । कर्मण्यण् । मैवं । रथकारपदस्य संकीर्णजातिविशेषे रूढत्वात् । वैश्यायां क्षत्रियाज्जातो माहिष्यः शूद्रायां वैश्यादुत्पन्ना करिणी तस्यां करिण्यां माहिष्यादुत्पन्नो रथकारः । 'माहिष्येण करिण्यां तु रथकारः प्रजायते' इति याज्ञवल्क्यादिति । **सूचनमिति** हंसवाक्यादित्यादिभाष्यार्थे व्यञ्जनावृत्तिरेवात्राभिप्रेता । **अन्यथेत्यादीति** । **भाष्ये** । **धिक्कारेति** तेन केचित्त्वित्यादिनोक्तव्याख्यानं सिद्धान्तपक्ष इति बोधितम् । **अकिंचिदिति** तथा च व्याससूत्राविरोध एव वचनाद्रथकारस्याधानस्य सर्वशेषित्वादित्यधिकरणस्य जैमिनिप्रणीतस्य प्रामाण्यमिति निबन्धटीका स्मारिता ॥ ३४ ॥

कुत एवमत आह—

क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

जानश्रुतेः पौत्रायणस्य क्षत्रियत्वमवगम्यते। गोनिष्करथकन्यादानात्। न हि क्षत्तृप्रभृतयो ह्येते क्षत्रियादन्यस्य संभवन्ति। राजधर्मत्वात्। न ह्यन्यो ब्राह्मणाय भार्यात्वेन कन्यां दातुं शक्नोति। न च प्रथमहंसवाक्यं शूद्रे संगच्छते। उपदेशाच्चेति चकारार्थः।

भाष्यप्रकाशः।

क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥ सूत्रमवतारयन्ति **कुत** इत्यादि। ननु मास्तु शूद्रशब्दोऽत्र जातिशूद्रवाची, तथापि जानश्रुतिजातेरनुक्तत्वात् तदपेक्षायां स एवानुपूर्वीसामान्याज्जातिमपि बोधयिष्यतीति कुतस्तदनादर इत्यत आहेत्यर्थः। **क्षत्तृप्रभृतय इति।** बहुपाक्यत्वावसथकरणब्राह्मणभोजनक्षत्रन्ताः। बहुपाक्यत्वादीनां धर्मिष्ठे धनवति शूद्रे कदाचित् संभवेऽपि क्षत्तृस्थापनस्य राजधर्मत्वेनान्यत्रासंभवात् तत्प्रभृतित्वमुक्तम्। तस्यापि कथंचित् संभवमाशङ्क्य हेत्वन्तरमाहुः **न ह्यन्य** इत्यादि। पुराणादौ तद्दानस्य क्षत्रियकृतत्वेन स्मरणात् तथेत्यर्थः। शूद्रादारोपसंग्रहस्य मनुप्रभृतिभिरुक्तत्वात् तस्य च कन्यादानहेतुकत्वात् तस्यापि संभवमाशङ्क्य हेत्वन्तरमाहुः **नचेत्यादि। प्रथमहंसवाक्यमिति।** हो होयि भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीरिति वाक्यम्। हो होयीति भयसूचकं संबोधनम्। दिवेति द्युलोकेन दिनेन वा। प्रधाक्षीरिति पुरुषव्यत्ययः। मा प्रदहत्वित्यर्थः। त्वा इत्यत्र सोर्डादेशो वा। तथाचैतादृशमाहात्म्यस्य शूद्रे अश्रुतत्वादस्मृतत्वाच्च न शूद्रे संगच्छत इत्यर्थः। **उपदेशादिति** रयिक्कृतादुपदेशात्। शूद्रे विद्योपदेशस्य क्वाप्यसिद्धत्वादत्रापि शूद्रश्रोतृकत्वस्याशक्यवचनत्वात् तथेत्यर्थः। एतेन यथा कृतायविजितायाधरेयाः संयन्त्येवमेतं सर्वं तदभिमभिसमैति यत्किंच प्रजाः साधु कुर्वन्तीति रयिक्कमाहात्म्यबोधकस्य द्वितीयहंसवाक्यस्याप्यत्र प्रामाण्यं बोधितम्।

रश्मिः।

क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥ स एवेति यो जातिशूद्रवाची स एव शूद्रशब्दः शकारोत्तरोकारोत्तरदकारोत्तररेफोत्तराकारानुरूपानुपूर्वीसाम्यात् आकृत्यधिकरणेन जातिशूद्रत्वं अपिपदेन द्रव्यं बोधयिष्यति। **तदनेति** जातिशूद्रवाचित्वानादरः। **क्षत्त्रिति** अनेन क्षत्रियप्रभृतय इति पाठः क्वचित्पुस्तके कुतश्चिद्धेतोरिति बोधितम्। सहेतुस्तु तस्माच्चैत्ररथो नामैकः क्षत्रपतिर्जायत इति श्रुतिः। **बह्वीति** श्रुतिरुक्ता सह सर्वत आवसथान् मापयांचक्रे इत्यावसथकरणं सर्वत एव मेऽत्स्यन्तीति ब्राह्मणभोजनम्। स संजिहान एव क्षत्तारमुवाचेति। **क्षत्ता। पुराणेति।** तद्दानस्येति दुहितृदानस्य। नवमे सौभर्यादिभ्यः। आदिपदेनेतिहासे द्रष्टव्यम्। **मन्विति** तृतीयाध्याये मनुस्मृतिः।

'शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृता।
ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्र्यजन्मनः' ॥ इति।

पुरुषव्यत्ययायाहुः **त्वेति** त्वं मा प्रधाक्ष्यप्रदहेत्यर्थः। **तथेति** न जातिशूद्रत्वं किं तु क्षत्तृत्वम्। **द्वितीयेति** अग्रगामी पश्चाद्गामी च हंसः। **अत्रेति** क्षत्रियत्वावगतौ। **अत्र हेतुः**

तथापि संवर्गविद्यायां शूद्रस्यैवाधिकारं मन्वानस्य निराकरणार्थं हेतुमाह उत्तरत्र चैत्ररथेन लिङ्गात्। अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिमित्युत्तरत्र ब्राह्मणक्षत्रियौ तौ निर्दिष्टौ। कक्षा सेना यस्येति। कक्षसेनस्यापत्यं काक्षसेनिरिति। अस्य व्याख्यानं, चैत्ररथ इति। चित्रा रथा यस्य तस्यापत्यं, तेन चैत्ररथेन। कक्षारूपा रथा इति। व्याख्यानम्। एतेन वै चित्ररथं

भाष्यप्रकाशः।

हीनान्यवर्णकन्यायाः प्रथमतः संग्रहे स्ववर्णहानेर्भलन्दनोपाख्याने सिद्धत्वाद्रयिक्वप्रथमविवाहस्यान्यत्राप्रसिद्धेरेतत्कन्याग्रहणेन दूष्यतायां रयिक्वे तादृशमाहात्म्यस्यासंगत्यापत्तेरिति। ननु हंसवाक्यस्य धर्मिष्ठत्वादिमात्रबोधकत्वं, न तु क्षत्रियासाधारण्यमिति शङ्कायां सूत्रशेषमवतारयन्ति तथापीत्यादि। एवं ग्रहिलवादेन तथा मन्वानं निराकर्तुं हेतुमाहेत्यर्थः। उत्तरत्रेति उपसंहारवाक्ये। कथं तत्र क्षत्रियत्वावगतिरित्यत आहुः कक्षा सेनेत्यादि। तेन चैत्ररथेनेति क्षत्रियत्वावगतिरिति शेषः। काक्षसेनिपदस्य कथं चित्ररथपदव्याख्यानत्वमित्यत आहुः कक्षारूपा इत्यादि। 'कक्षः स्यादन्तरीयस्य पश्चादञ्चलपल्लवे। स्पर्द्धापदे च दोर्मूले' इति कोशे स्पर्द्धास्थानं कक्षापदेनोच्यते। तथाच चित्रत्वात् स्पर्धास्थानरूपा रथा इति हेतोः कक्षापदं चित्रपदव्याख्यानम्। सेनापदं च रथपदव्याख्यानमित्यर्थः। एवं क्लेशेन व्याख्याने किं बीजमित्याकाङ्क्षायां लिङ्गपदं विवृण्वन्ति एतेनेत्यादि। इदं च छन्दोगानां द्विरात्रे श्रूयते। एतेन वै चैत्ररथं कापेया अयाजयँस्तमेकाकिनमन्नाद्यस्याध्यक्षमकुर्वंस्तस्माच्चैत्ररथो नामैकः क्षत्रपतिर्जायत इति। तथाच समानान्वयानां समानान्वया एव याजका भवन्तीति प्रायेण दृष्टम्। अतः कापेयसं-

रश्मिः।

हीनान्येति हीनः क्षत्रियादन्यवर्णस्तस्य कन्यायाः। भलन्देति अत एव मनुः—

'हीनजातिं स्त्रियं मोहादुद्वहन्तो द्विजातयः।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम्'॥ इति तृतीयाध्याये।

धर्मिष्ठेति आदिपदेन ज्ञानित्वम्। **क्षत्रियेति** क्षत्रियत्वावगतावन्यसाधारण्यरहितं प्रामाण्यम्। **एवमिति** एवं सत्यपीत्यर्थः। **उपेति** तथा चोत्तरत्रोपसंहारवाक्ये चैत्ररथेन हेतुना ब्राह्मणक्षत्रियोर्लिङ्गात् क्षत्रियत्वावगतिरित्यर्थः। **कक्षा सेनेत्यादीति** कक्षसेन इत्यत्र कक्षापदस्य छांदसं पुंस्त्वम्। काक्षसेनिरित्यत्रात इञ्। **क्षत्रियेति**। ननु तेन चैत्ररथेन कक्षारूपा रथा इति व्याख्यानमिति कुतो नान्वय इति चेन्न चैत्ररथपदस्य सौत्रानुवादत्वेन कक्षेत्यादिकस्य सूत्रान्तःपातप्रसङ्गात्। न चास्तु सूत्रान्तःपातः क्षत्रियत्वावगतेः चकारार्थोपदेशादुत्तरत्र चैत्ररथेन कक्षारूपा रथा इति व्याख्यानं ब्राह्मणक्षत्रियौ लिङ्गादिति व्याख्यास्यते इति वाच्यं गौरवात्। क्षत्रियत्वावगतेश्चोपदेशात् उत्तरत्र चैत्ररथेन हेतुना लिङ्गाच्चेत्यर्थे लाघवात्। **चित्रपदव्याख्यानमिति** स्पर्धास्थानं कक्षापदार्थः। तच्चाश्वतरी। चित्रा अश्वतरीयुक्ता रथा यस्य 'रथस्त्वश्वतरीयुक्तश्चित्र इत्यभिधीयते' इति ब्रह्मपुराणात्। कोषेति कोषशब्दो मूर्धन्यषकारान्तोमरकोषे। **एतेनेति**। **द्विरात्रेण**। अन्येर्थाः स्पष्टाः अन्यत्र। **तथा चेति** श्रुतिद्वयस्य भाष्यीयत्वेन कक्षा सेना यस्येति व्याकरणस्य भाष्यीयत्वेपि प्राबल्ये प्रकारे च। समानः एकयाज्ययाजकभावः अन्वयः संबन्धरूपो येषाम्। **अत इति** श्रुतिद्वयस्य भाष्यीयत्वेन प्राबल्यात्।

कापेया अयाजयन्निति । शौनकश्च कापेयो याजकः । याज्यश्च चित्ररथस्य पुत्रः काक्षसेनिरिति । ब्रह्मचारी ब्रह्मवित् । इमौ तु संवर्गविद्योपासकौ । प्राणाय हि

भाष्यप्रकाशः ।

बन्धात् काक्षसेनिश्चैत्ररथ इति तथेत्यर्थः । परिविष्यमाणौ ब्रह्मचारी बिभिक्ष इत्यादेस्तात्पर्यमाह । ब्रह्मचारीत्यादि । इमौ शौनकाभिप्रतारिणौ संवर्गविद्योपासकौ । संवर्गस्त्वधिदैवतं वायुरध्यात्मं

रश्मिः ।

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः' ॥

इत्यत्रोक्तेषु व्याकरणादिषु सिद्धपदस्य कापेयस्य शौनकत्वेन श्रीभागवते प्रसिद्धपदस्य सांनिध्यात् । तथेति जानश्रुतेः काक्षसेनिरूपचैत्ररथस्य क्षत्रियत्वेन प्रकारेणावगतिरित्यर्थः । काक्षसेनिश्चैत्ररथः इति कोषव्याकरणाभ्यां कक्षा सेनेत्यादि भाष्ये सिद्ध्यति । विवृतेरपि सिद्ध्यति श्रुतिद्वयोक्त्याभिव्यक्तसिद्धपदसांनिध्यतः शक्तिग्रहः आद्दतः । चित्ररथेन हेतुना लिङ्गं चित्रपदसामर्थ्यं तस्मात् । अत्र क्लिष्टत्वे चैत्ररथेन हेतुना क्षत्रियत्वावगतिलिङ्गादपि सा वाक्यशेषसामर्थ्यात् । न चात्रपक्षे लिङ्गपदं विवृण्वन्तीति प्रकाशविरोध इति शङ्क्यम् । तस्याभासस्य ब्रह्मचारीत्यादीत्यत्रानुकर्षात् । न चाभासद्वयापत्तिः द्वितीयाभासे तात्पर्यं चाहुरिति चकारपरामर्शात् । न चात्र किं मानमिति शङ्क्यम् । भाष्यीयस्येतिपदस्य चैत्ररथपदव्याख्यानसमाप्तिद्योतकस्य मानत्वात् । न च चित्ररथेन हेतुना लिङ्गं चित्ररथपदसामर्थ्यं तस्मादित्यर्थेऽनुकर्षवैयर्थ्यमिति वाच्यम् । अस्य क्लिष्टत्वेऽनुकर्षादरात् । अस्य क्लिष्टत्वे किं मानमिति चेन्न । बहुभिर्हेतुभिः क्षत्रियत्वावगतेः साधनस्य भाष्याभिमतत्वात् । भाष्याभिमतत्वे तु एवं क्लेशेन व्याख्याने किं बीजमित्याकाङ्क्षायां लिङ्गपदं विवृण्वन्ति परिविष्यमाणौ ब्रह्मचारी विभिक्षे इत्यादेस्तात्पर्यं चाहुरित्याभासः ब्रह्मचारीत्यादीत्यस्य । **ब्रह्मचारीत्यादीति** अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी विभिक्षे तस्मा उ ह न ददतुरिति श्रुतिः संवर्गविद्योपदेशानन्तरं वर्तते । **इमाविति** । **एतयोः** प्राणवाय्वोः । स्तुत्यर्थमाख्यायिकामाह । **अथ ह शौनकमिति** शौनको नामतः कपेर्गोत्रापत्यं कापेयं अभिप्रतारी नामतः कक्षसेनस्यापत्यं काक्षसेनिः इमौ द्वावित्याहुः **इमाविति** इमौ तु विष वियोगे क्र्यादिः प. से. विष्णुत इति विष्यमाणो परितो विशेषेण संवर्गविद्यां युज्यमानौ ब्रह्मचारी ब्रह्मवित् विभिक्षे भिक्षितवान् । तस्मै संवर्गविद्यामन्नं वा न ददतु यतः संवर्गविद्योपासकौ ।

'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्' ॥

इति वाक्यात् प्राणाय हि भिक्षा न तु ब्रह्मविदे तस्मान्न ददतुरिति स्थूलार्थः । न ददतुरित्यस्य ग्रन्थस्य भाष्यप्रकाशस्य । भाष्यस्य ब्रह्मचारी ब्रह्मवित् इमौ ददतुर्ब्रह्मवित्त्वव्यवच्छेदकः । संवर्गविद्योपासकौ न तु ब्रह्मविदौ प्राणाय हि यतो भिक्षा उक्तवाक्यात् तस्मात् ब्रह्मवित्त्वात् प्राणाय देयत्वाच्च संवर्गविद्यामन्नं वा न ददतुरिति प्राञ्जले व्याख्यानेपि दुरूहे जिज्ञासोदयाद्ब्रह्मचारीत्यादि तस्मादित्यनेन भाष्येण युयुजुः । **इमाविति** इमौ त्विति भाष्यार्थोयं कः संवर्ग इत्यत आहुः **संवर्गेति** । वायुर्वा व संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति यदा सूर्योऽस्तमेति वायुमेवाप्येति । यदा चन्द्रोऽस्तमेति वायुमेवाप्येति

भाष्यप्रकाशः।

प्राणः। यतो हेतोः प्राणाय भिक्षा। अन्नस्य प्राणभोगार्थत्वात्। तदयं ब्रह्मचारी जानाति न वेति संदिह्य न ददतुः। ततो—

'महात्मनश्चतुरो देव एकः कः सो जगार भुवनस्य गोपाः।
तं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन् बहुधा वसन्तम्' ॥

इति ब्रह्मचार्युक्तः श्लोकः।

'आत्मा देवानां जनिता प्रजाना९ हिरण्यदंष्ट्रो बभसो न सूरिः।
महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्ति' ॥

इति कापेयोक्तश्चेत्युभावपि श्लोकौ भगवतः प्रजापतिरूपबोधकत्वात् परंपरया भगवत्संबन्धिनौ। श्लोकार्थस्तु, महात्मनो माहात्म्ययुक्तान्, चतुरश्चतुःसंख्याकान् अग्निसूर्यचन्द्रापरूपान् देवान् वायुरूपेण, वाक्चक्षुःश्रोत्रमनोरूपान् प्राणान् प्राणरूपेण यो देव एकः कः प्रजापतिः सो जगार ग्रसितवान्। भुवनस्य भूतोद्भवस्थानस्य भूरादिलोकस्य गोपा रक्षकः। हे कापेय तं मर्त्या मरणधर्माणो विवेकशून्या नाभिपश्यन्ति न जानन्ति। हे अभिप्रतारिन्, बहुधा अध्यात्माधिदैवताधिभूतप्रकारैर्वसन्तमिति। द्वितीयश्लोके तु, हिरण्यदंष्ट्र इति, अमृतदंष्ट्रः। बभसो भक्षणशीलः। न सूरिः, न विद्यतेऽन्यः सूरिर्यस्मात् सः। अनद्यमानोऽन्यैरभक्ष्यमाणः। यद् यस्माद् अनन्नम् अग्निवागादिरूपमत्ति भक्षयति तस्मान्महामहिम इत्येवं वयं जानीम इति। तथाचेयं परंपरिता

रश्मिः।

यदाप उच्छुष्यति वायुमेवापियन्ति वायुर्ह्येवैतान् संवृङ्क्ते इत्यधिदैवतम्, अथाध्यात्मं प्राणो वा व संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राण९श्रोत्रं प्राणं मनः प्राणो ह्येवैतान् सर्वान् संवृङ्क्ते इति तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणं प्राणेष्विति श्रुत्युक्तः। संवर्ग इत्यस्य संवृङ्क्ते इति व्युत्पत्तिः। उद्वायति उद्वासनं करोति शाम्यति। अप्येति अपि एति संवृङ्क्ते ग्रसति। दैवतेषु अधिदैवतम्। अव्ययीभावः। आत्मसु अध्यात्मम्। प्राणायेति भाष्यं विवृण्वन्ति स्म यत इति। हेरर्थः। प्राणेति निरन्नस्य प्राणा विपद्यन्त इति। अन्नस्य प्राणार्थत्वमध्यस्तजीवार्थम्। प्राणा इति प्राणभोगो जीवस्य। ब्रह्मचारीति भाष्यं विवृण्वन्ति तदयमिति। जानातीति ब्रह्मवित्त्वाज्जानातीति हेतोः वा विकल्पं न संदिह्य तत्संवर्गविद्यामन्नं वा न ददतुः। ननु प्राञ्जलार्थपरित्याग इति चेन्न दुरूहत्वात्। यथा 'एषोऽङ्गनावेषधरः किरीटी जित्वा वयं नेष्यति चाद्य गावः' इत्यत्र श्लोके प्राञ्जलार्थो वयं जित्वा गावो नेष्यतीति तथाप्यन्वयाभावात् तमव रक्ष यं जित्वा वः युष्माकं गा नेष्यतीति दुरूहान्वयस्तद्वत्। अथ वा तत्संवर्गविद्योपासनां ब्रह्मचारी ब्रह्मवित्वात्तज्जानाति संवर्गविद्योपासनासमये विभिक्ष इति न जानातीति संदिह्य तथापि क्लिष्टम्। ननु संवर्गविद्यायां वायुर्मुख्य इत्यधिदैवतमित्यधिदैवतत्वात् प्राणो गौणः अध्यात्मत्वात् ततश्च वायवे हि भिक्षेति वक्तव्ये प्राणाय भिक्षेति भाष्यं कुतः इति चेन्न। वायोरत्र वायोरग्निरग्नेरापः इति श्रुत्युक्तकार्यवायोः ग्रहणापेक्षयाऽध्यात्ममित्यनेनात्मसंबन्धिप्राणस्य मुख्यत्वात्। उभाविति भाष्यं व्याचक्रुः तत इति। एकादशाक्षरी जातिः वायुरूपेण प्राणरूपेणेति संवर्गविद्यायां स्पष्टम्। परंपरितेति। यदि तु क इति प्रश्ने न चतुर्मुखे। हिरण्यदंष्ट्रः बभसः इति हिरण्मयवपुषि भगवति अपेक्षितमोक्तरि भगवति

भिक्षा। तस्मान्न ददतुः। उभावपि श्लोकौ भगवतः। तेन प्रकृतेऽप्येतौ गुरुशिष्यौ ब्राह्मणक्षत्रियावेवेति गम्यते । तस्मान्न जातिशूद्रः संवर्गविद्यायामधिकारी॥ ३५॥

संस्कारपरामर्शात् तदभावाभिलापाच्च ॥ ३६ ॥

इदानीं शूद्रस्य क्वचिदपि ब्रह्मविद्यायामधिकारश्चेदत्राऽपि कल्प्येत। तत्तु नास्ति। सर्वत्र संस्कारपरामर्शात्। उपनयनसंस्कारः सर्वत्र परामृश्यते। तं होपनिन्ये अधीहि भगव इति होपससाद। तान् हानुपनीयेत्यादि प्रदेशेषूपनमनपूर्वकमेव विद्यादानं प्रतीयते शूद्रस्य तु, तदभावाभिलापात्। चतुर्थ एकजातिस्तु शूद्र इति, न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हतीति शूद्रस्य संस्कारनिषेधात्। चकारान्न शूद्राय मतिं दद्यादिति निषेधः ॥ ३६ ॥

भाष्यप्रकाशः ।

ब्रह्मविद्या, न तु साक्षात्। तेन सिद्धमाहुः। तेनेत्यादि। उत्तरस्मिन् वाक्यशेषे । संवर्गविद्योपासकयोर्ब्राह्मणक्षत्रिययोरेवोक्तत्वेन प्रकृते तथेत्यर्थः । फलितमाहुः तस्मादित्यादि। तथाच परंपराविद्यायामपि यत्र नाधिकारस्तत्र साक्षाद्विद्यायां किं वाच्यमिति भावः ॥ ३५ ॥

संस्कारपरामर्शात् तदभावाभिलापाच्च॥३६॥ ननु, 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' इति जैमिनिना श्रुत्यपेक्षया लिङ्गादीनां दौर्बल्यस्य साधितत्वात् तत्रापि क्लिष्टानां तेषां सुतरां तथात्वाच्छ्रुत्यैवाधिकारः शूद्रस्यादर्तव्य इत्याशङ्कायां सूत्रं पठित्वार्थमाहुः इदानीमित्यादि। बुद्धिस्थायां शङ्कायाम्, अधीहि भगव इति होपससादेति सनत्कुमारनारदसंवादस्थं प्रतीकम्। तत्र च, यद्वेत्थ तेन मोपसीदेत्यामन्त्रणे, ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमिति वेदाध्ययनलिङ्गादेवोपनयनसंस्कारप्राप्तिः। तान् हानुपनीयैवेति वैश्वानरविद्यायामपि प्राचीनशालादीनां षण्णां महाश्रोत्रियत्वलिङ्गादेव तत्प्राप्तिः। निषेधस्तु

रश्मिः ।

च न चतुर्मुखे।तदा न परंपरिता। तदा महात्मनश्चतुरोंशानभिपश्यन्ति। स्वगतद्वैतापत्तिमाशङ्क्याह देव एक इति 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतेः। अग्रे स्पष्टम्। द्वितीये यदनन्नमत्तीति भगवल्लिङ्गं 'अनश्नन्नन्योभिचाकशीति श्रुतेः । महान्तं महत्तत्त्वम्। ननु संवर्गविद्यायामुत्कृष्टेश्वरनिरूपणस्य को हेतुरिति चेच्छृणु ब्रह्मचारिणो वाक्यत्वात्तस्य च ब्रह्मज्ञत्वात् ॥ ३५ ॥

संस्कारपरामर्शात् तदभावाभिलापाच्च ॥ ३६ ॥ तेषामिति शुगस्य तदाद्रवणात् सूच्यते हीति वाक्यम्। उत्तरो वाक्यशेषः । तत्स्थब्राह्मणक्षत्रियलिङ्गं च। एतेषामुपपादितानाम्। श्रुत्येति अ ह हारे त्वा शूद्रेति श्रुत्या। बुद्धीति अस्मिन् काले दानीं च। अस्यामित्यर्थस्तदर्थ उक्तः। यद्वेत्थेति नारदं प्रति सनत्कुमारवाक्यम् । उपसीदेति लोट् आमन्त्रणे तच्च कामचारानुज्ञा अध्येमि स्मराम्यहमिति नारदोक्तिः। उपनयनेति 'अष्टवर्षं ब्राह्मणमुपनयीत' इत्यादि श्रुतेः। वैश्वानरेति छान्दोग्ये सप्तमप्रपाठकेस्ति। तान्निति प्राचीनशालादीन्। ननु अनुपनीयेति सनत्रूपदमिति कथं तत्प्राप्तिरिति चेत्तत्राहुः निषेध इति। विशेषेण गृह्यते ये प्राचीनशालादयस्ते वैशेषिकाः शैषिकोऽण् वैशेषिकस्येति सामान्ये नपुंसकमित्येकवचनं यद्वा टीकायामुक्तस्योप समीपेऽनीय पादयो

तदभावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥

इतश्च न शूद्रस्य सर्वथाधिकारः । तदभावनिर्धारणे शूद्रत्वाभावनिर्धारण एव गुरुशिष्यभावप्रवृत्तेः । सत्यकामो ह जाबाल इत्यत्र, गौतमः सत्यकाममुपनिन्ये । नैतदब्राह्मणो विवक्तुमर्हतीति सत्यवचनेन शूद्राभावं ज्ञात्वैव । चकार एवार्थे । चकारेण निर्धारणमुभयज्ञानार्थम् । वर्णित्वं शूद्राभावं च । तस्मान्न शूद्रस्याधिकारः ॥ ३७ ॥

भाष्यप्रकाशः ।

वैशेषिकस्यैवेति न दोषः । शेषं स्फुटम् । तथाचात्र 'आनर्थक्ये प्रमाणानां विपरीतं बलाबलम्' इति न्यायान्न शूद्रश्रुतिमात्रेणाधिकारसिद्धिरित्यर्थः ॥ ३६ ॥

तदभावनिर्धारणे च प्रवृत्तेः ॥३७॥ किमुभयमित्यपेक्षायामाहुः । **वर्णत्वमित्यादि** । अयमर्थः । तद्वाक्यान्निश्चितेऽपि ब्राह्मणबीजत्वे व्यभिचारजन्यत्वाच्छूद्रता स्यात् । तदभावस्तु वामदेव्यसामोपासकस्य न कांचन परिहरेदिति सर्वगामित्वाभ्यनुज्ञानात् तज्जन्यस्य व्यभिचारदोषानाक्रान्तत्वाद् वर्णत्वशूद्रत्वाभावं ज्ञात्वेति पूर्वेण संबन्धः ॥ ३७ ॥

रश्मिः ।

पतनमकारयित्वैवेति व्याकृतेर्नमस्काररूपस्य उपनयनविशेषार्थत्वेन गृह्यते इति वैशेषिकं तस्य । शैषिकोऽण् । तान् हानुपनीयेत्यत्र अन्यानुपनीयेति तात्पर्यवृत्त्या द्योतनादुपनयनपूर्वकमित्यादि भाष्यमन्वेत्येव यद्वा हन्ति इति हः तान् हानुपनीयेति पदच्छेदः । महाश्रोत्रियत्वेनाविद्याहन्तॄन् तथा च सुखेन भाष्यान्वयः । महाश्रोत्रियत्वेपि द्रव्याद्यभावाद्युवावस्थायामप्यनुपनीता इति ज्ञायते । न च टीकोक्तं तर्ह्यस्त्विति शङ्क्यम् । अनुपनीयेत्यस्य तन्मते शक्त्यभावात् । **शेषमिति** एकजातिः उपनयनहीनः न शूद्रः इति स्मृती मनोर्दशमाध्यायस्थे पातकं भक्ष्याभक्ष्याविभागकृतं न शूद्रायेति चतुर्थाध्यायस्था मनुस्मृतिः मतिं विद्याम् । एवं शेषं स्फुटमित्यर्थः । सिद्धमाहुः **तथा चेति** । प्रमाणानां 'शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि' वाक्यशेषः ब्राह्मणक्षत्रियलिङ्गम् । एतेषामानर्थक्यं विरोधो नञर्थविरुद्धार्थकत्वं तस्मिन् सति अह हारे शूद्रेति निरपेक्षरवरूपश्रुत्यपेक्षया लिङ्गवाक्यानां शुगस्य तदनादरेत्यादीनां बलीयस्त्वम् । **शूद्रश्रुतीति** । शूद्रस्य निरपेक्षरवमात्रेण ॥ ३६ ॥

तदभावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥ भाष्ये । कुत्रेत्याकाङ्क्षायामित्यत्रेति छान्दोग्ये एव षष्ठप्रपाठके जबालाया अपत्यं जाबालः । एतदिति त्वदुक्तं वचनं तच्च जाबालपृष्टगोत्रतन्मात्रुक्तगर्भितम् । सा मा प्रत्यब्रवीत् 'बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि' इति सोहं सत्यकामो जाबालोस्मि भोः इति भो गौतम स्पष्टमन्यत् । **सत्येति** किं नु गोत्रो नु सोम्यासि इति गौतमेनोक्तः सत्यकामो नाहं वेद भो यद्गोत्रोहमस्मि इत्यादिसत्यवचनेन । शूद्रतेति प्रकृतग्रन्थः । सामानाधिकरण्यसंबन्धेन लक्षणया संस्कारानर्हता । **कांचनेति** स्त्रियम् । **वर्णित्वेति** । **भाष्ये** । शूद्राभावमित्यत्र भावप्रधानो निर्देश इति भावः ॥ ३७ ॥

श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥ ३८ ॥

दूरे ह्यधिकारचिन्ता । वेदस्य श्रवणमध्ययनमर्थज्ञानं त्रयमपि तस्य प्रतिषिद्धम् । तत्सन्निधावन्यस्य च । अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमिति । यद्यु ह वा एतच्छ्मशानं यच्छूद्रः । तस्माच्छूद्रसामीप्ये नाध्येतव्यमिति । उदाहरणे जिह्वाच्छेदो, धारणे शरीरभेद इति । दोहादौ शूद्रसंबन्धे मन्त्राणामभाव एव ।

स्मृतिप्रयुक्त्यापि वेदार्थे न शूद्राधिकार इत्याह स्मृतेश्च ॥ 'वेदाक्षरविचारेण शूद्रः पतति तत्क्षणादिति । चकारस्त्वधिकरणसंपूर्णत्वद्योतकः । स्मार्तपौराणिकज्ञानादौ तु कारणविशेषेण शूद्रयोनिगतानां महतामधिकारः । तत्रापि न कर्मजातिशूद्राणाम् । तस्मान्नास्ति वैदिके क्वचिदपि शूद्राधिकार इति स्थितम् ॥ ३८ ॥

इति प्रथमाध्याये तृतीयपादे नवमं शुगस्येत्यधिकरणम् ॥ ९ ॥

भाष्यप्रकाशः ।

श्रवणाध्ययनार्थं प्रतिषेधात् स्मृतेश्च ॥३८॥ यद्यु वेति । यदि उ वेति पदच्छेदः । शेषं निगदेन व्याख्यातम् । एवं सूत्राणि व्याख्याय प्रासङ्गिकमाहुः स्मार्तपौराणिकेत्यादि । अयमर्थः । पुराणान्तरे, 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः' इति शूद्रस्यापि सामान्यतः श्रावणविधानात् । स्मृतिकौमुद्यां स्कान्दे ।

'अस्ति शूद्रस्य शुश्रूषा पुराणेनैव वेदनम् ।
वदन्ति केचिद् विद्वांसः स्त्रीणां शूद्रसमानताम्' ॥ इति ।
'सिद्धान्तश्रवणं प्राहुर्द्विजानां मुनिसत्तम ।
शूद्राणां च विरक्तानां तथा स्त्रीणां महामुने ।
सिद्धान्तश्रावणं प्रोक्तं पुराणश्रवणं बुधैः' ॥

इति श्रवणबोधनात् । एकादशस्कन्धेऽपि, 'साधवे शुचये ब्रूयाद् भक्तिः स्याच्छूद्रयोषिताम्' इति भगवद्वाक्यात् । प्रथमस्कन्धे,

'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
इति भारतमाख्यानं कृपया मुनिना कृतम्' ॥

इति वाक्याच्च भारतपुराणश्रवणमसंदिग्धम् । ततश्च बुद्धिमतां ज्ञानमपि भवत्येव । परं तु तादृशज्ञाने,

रश्मिः ।

श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥ ३८ ॥ भाष्ये । अथास्येति । माध्वास्त्वत्र श्रवणे त्रपुजतुभ्यां श्रोत्रपरिपूरणमध्ययने जिह्वाच्छेदः । अर्थावधारणे हृदयविदारणमिति प्रतिषेधादिति भाष्ये आहुः । रामानुजभाष्ये तु अथास्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रप्रपूरणम् । उदाहरणे जिह्वाच्छेदो धारणे शरीरभेदः इति स्मृतेश्चेति योगं भङ्क्त्वा तदर्थत्वेन स्मृतिरियमुक्ता । त्रपुजतुभ्यामिति सीसलाक्षारसाभ्याम् । अस्य शूद्रस्य श्रोत्रप्रतिपूरणं प्रायश्चित्तम् । अध्ययनप्रतिषेधश्रुतिमाहुः पद्यु हवेति । तेन शूद्रसंनिधावन्यस्य ब्राह्मणादेश्चेत्यस्य भाष्यस्य हेतुरियम् । अत एवार्थे-

भाष्यप्रकाशः ।

'आसक्तौ भगवानेव शापं दापयति क्वचित् ।
अहंकारेऽथवा लोके तन्मार्गस्थापनाय हि' ॥

इत्युक्तरीतिकेन शापादिना कारणविशेषेण शूद्रयोनिगतानां महतां विदुरवेदवादिदासीसुतसदृशां फलमुखोऽधिकारः । तादृशामेव तत्र कृतार्थत्वस्मरणात् । तत्र शूद्रयोनिगतत्वेऽपि न कर्मजातिशूद्राणाम् ।

'अत्रापि वेदनिन्दायामधर्मकरणात् तथा ।
नरके न भवेत् पातः किंतु हीनेषु जायते' ॥

इत्युक्तरीतिकेन कर्मणा जातिशूद्राणां न फलमुखोऽधिकार इति । ज्ञानादावित्यादिपदेन,

'जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् ।
देवताराधनं चैव स्त्रीशूद्रपतनानि षट्' ॥ इत्येतेषां संग्रहः ।

विदुरादीनां तीर्थयात्रादिदर्शनात् । इतरेषां त्वेतानि निषिद्धान्येव । अत एवेदानीन्तनानां तत्कर्तॄणां कामक्रोधादय एव दृश्यन्ते, न तूपशम इति । एतदधिकरणद्वयं प्रासङ्गिकम् ।

रश्मिः ।

ज्ञानानुष्ठानयोः प्रतिषेधो भवति इति शंकरभाष्यम् । तत्र अनुष्ठानमधिकम् । **अधिकरणेति** न चानुक्तस्याधिकरणसंपूर्णत्वस्य वाचकश्चकार इति शङ्क्यम् । स्मृतिसमुच्चयवाचकत्वेन तस्यार्थस्य व्यञ्जनया द्योत्यत्वात् । स्मार्तपौराणिकज्ञानादाविति भाष्ये स्मार्तानां पौराणिकानां ज्ञानादाविति षष्ठीतत्पुरुषमित्याहुः बुद्धिमतामपि स्मार्तानां पौराणिकानां च । **आसक्ताविति** । पुष्टिप्रवाहमर्यादास्था कारिका । अन्यासक्तौ सत्याम् । यथा नलकूबरमणिग्रीवादेः । क्वचिदिति यत्रासक्त्यौत्कट्यं तत्र काले देशे वा । एवमहंकारे यथा चित्रकेतुपरीक्षितोः इन्द्रद्युम्नादौ । उभयाभावे कथं शाप इत्याशङ्क्याहुः **लोक इत्यादि** । यद्येवं न कुर्यात्तदा लोके भक्त्याद्याविर्भावाभावात् मर्यादादिमार्गा न भवेयुः तथा सति लोकोच्छित्तिः स्यादतो लोकसंग्रहार्थं तथाकरणम् । अत्र गमकमाहुः **हीति** । 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति वाक्येन तथा निश्चयात् तत्रेति पुराणादौ तृतीयस्कन्धे मैत्रेय उवाच 'यत्त्वयानन्यभावेन गृहीतो हरिरीश्वरः' इति विदुरम् । विवृण्वन्ति स्म **अत्रापीति** इयं शास्त्रार्थ प्रकरणे । **प्रव्रज्येति** संन्यासः । अत्र शूद्रपदं कर्मजातिशूद्रपरमित्याहुः **विदुरेति** । **इतरेषामिति** कर्मजातिशूद्राणाम् । **फलेति** ।

'अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ।
लोकस्याजानतो व्यासश्चक्रे सात्वतसंहिताम्' ॥ इति ।
'तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम्' ॥

इति वाक्योक्तफलबलात् । **तेनेति** शूद्रेष्वपि शापशूद्रकर्मजातिशूद्रयोर्भेदेन । **अथेदमिति** अत्रापि पूर्वमिदं विचार्यते अत्र मनुस्मृतय उपन्यस्ताः । तास्तु श्रौतधर्मबोधकश्रुतिबाधिताः किं च सत्ययुगे प्रचारिता त्रेतादावव्याप्ता । अपि च वसिष्ठहारितव्यासपराशरभरद्वाजकश्यपप्रणीताः सात्त्विक्यः । याज्ञवल्क्यात्रितित्तिरिदक्षकात्यायनविष्णुप्रणीता राजस्यः । गौतमबृहस्पतिसंवर्तयम-

रश्मिः ।

शङ्खोशनःप्रणीतास्तामस्यः स्मृतयः । द्वादशस्मृतयो मुक्तिस्वर्गदाः शुभाश्च षट् निरयप्रदाः सात्त्विक-पद्मपुराणोक्ता तास्वगणिता चेति शूद्राणां विद्याधिकारः स्मार्तस्तु स्यान्न स्याद्वेति । स्यात् । मनुस्मृतेः सर्वसंमतत्वेपि दोषाणामुक्तत्वात् व्यवहारमयूखेस्या अभिप्रायवर्णनाच्चेति प्राप्तेऽभिधीयते । भाष्योक्तत्वान्मनुस्मृतेर्मुख्यत्वं श्रुतिबाधितत्वं नास्ति गेहस्थानीयत्वेन निबन्ध उक्तेः । शरीरस्थानीय-श्रौतधर्मस्य गृहोपस्करस्थानीयः पौराणधर्मः । तदुक्तम्—

'श्रुतिस्मृती ममैवाज्ञे यस्ते उलङ्घ्य वर्तते ।
आज्ञाच्छेदी ममद्वेषी मद्भक्तोपि न मे प्रियः' ॥ इति ।

सत्ययुगे प्रचारितत्वमपि ।

'कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः' ॥ इति ।

पराशरस्मृतेरुक्तम् । सा तु युगह्रासानुरूपतः ।

'न कश्चिद्वेदकर्ता च वेदं स्मृत्वा चतुर्मुखः ।
तथैव धर्मं स्मरति मनुः कल्पान्तरान्तरे' ॥
'अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ।
अन्ये कलियुगे नृणां युगधर्मानुसारतः' ॥
'तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुः दानमेकं कलौ युगे' ॥ अग्रे ।

'कृते तु मानवा धर्माः' इति पाराशरस्मरणात् । टीकायां तु माधवाचार्याः । तर्हि त्रेतादिषु तपो नाद्रियेत कृतज्ञानयज्ञदानानि नाद्रियेरन् इति चेन्न । इतरव्यावृत्तिरूपायाः परिसंख्याया अत्र विवक्षितत्वात् । न खल्विदानीं कश्चित् अनुष्ठानविधिर्वक्तुमुपक्रान्तः येन विधिशेषः परिसंख्या शङ्क्येत भविष्यति तु षट्कर्माभिरत इत्यादिना तदुपक्रमः । युगसामर्थ्यं केवलमत्र निरूप्यते, यथा वसन्ते पुष्पप्राचुर्यं ग्रीष्मे संतापबाहुल्यम् । इत्यादि ऋतुसामर्थ्यं तथा कृतादिसामर्थ्येन तप आदिप्राचुर्यमित्याहुः अतो न मनुस्मृतिस्त्रेतादावव्याप्ता तास्वगणितेत्यसिद्धम् । भृगुप्रोक्तत्वेन तैत्तिरत्वात्षड्-राजसेष्वस्यास्तैत्तिरपदेन गणनात् । तैत्तिरपदं त्वेवं स्मर्यते ।

'याज्ञवल्क्यं च आत्रेयं तैत्तिरं दक्षमेव च ।
कात्यायनं वैष्णवं च राजसाः स्वर्गदाः शुभाः' ॥ इति पाद्मे ।

न च तैत्तिरपदेन भृगुप्रोक्ते मानाभावः । मानमस्ति यथाह पैठीनसिः—

'तेषां मन्वङ्गिरोव्यासः गौतमात्र्युशनोयमाः ।
वसिष्ठदक्षसंवर्तशातातपपराशराः ॥
विष्ण्वापस्तम्बहारीताः शङ्खः कात्यायनो भृगुः ।
प्रचेता नारदो योगी बोधायनपितामहौ ॥
सुमन्तुः कश्यपो बभ्रुः पैठीनो व्यास एव च ।
सत्यव्रतो भरद्वाजो गार्ग्यः कार्ष्णाजिनिस्तथा' ॥

रश्मिः ।

'जाबालिर्जमदग्निश्च लौगाक्षिर्ब्रह्मसंभवः ।
इति धर्मप्रणेतारः षड्विंशदृषयस्तथा' ॥

इत्यत्र भृगोः प्रमाविषयत्वात् । षड्विंशदृषय इति न परिसंख्या तथासति वत्समरीचिदेवलपारस्करप्रभृतीनां धर्मशास्त्रप्रणेतृत्वं न स्यात् इति माधवाचार्याः । वयं तु परिसंख्यामः । तदज्ञाने सर्वमौढ्यमिति निबन्धात् । पुराणे च परिसंख्या दृश्यते । तथाहि पद्मपुराणे गुणत्रयकथने पुराणान्युक्त्वा

'तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणात्मिकाः ।
सात्त्विका राजसाश्चैव तामसाः शुभदर्शने ॥
वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा ।
भारद्वाजं काश्यपं च सात्त्विका मुक्तिदाः शुभाः ॥
याज्ञवल्क्यं च आत्रेयं तैत्तिरं दाक्षमेव च ।
कात्यायनं वैष्णवं च राजसाः स्वर्गदाः शुभाः ॥
गौतमं बार्हस्पत्यं च सांवर्तं च यमस्मृतम् ।
शाङ्ख्यं चौशनसं देवि तामसा निरयप्रदाः ॥
किमत्र बहुनोक्तेन पुराणेषु स्मृतिष्वपि ।
तामसा नरकायैव वर्जयेत्तान् विचक्षणः' ॥

इति पार्वतीं प्रति शिवः । ननु तर्हि राजसस्मृत्यपेक्षया सात्त्विकस्मृतिर्ज्यायसीति चेन्न शुभदत्वे समाने स्वर्गपदस्यात्मसुखवाचकत्वस्वीकारात् । 'यन्न दुःखेन' इति वाक्यशेषात्तत्र शक्तिः । तेन मनुस्मृतेरभिप्रायवर्णनमसंगतम् । नन्वष्टादशस्मृतिनिर्णायकत्वेनास्या उत्कर्षात् अंशतः आत्माश्रय इति चेन्न, मानवे नवमाध्याये—

'उदितोयं विस्तरतो मिथो विवदमानयोः ।
अष्टादशसु मार्गेषु व्यवहारस्य निर्णयः' ॥

इति स्मृतेष्टीकायां अष्टादशसु ऋणादानादिव्यवहारेषु मिथः परस्परं विवदमानयोरर्थिप्रत्यर्थिनोः कार्यनिर्णयो विस्तरेणोक्त इत्यर्थात् । अष्टादशसु स्मृतिमार्गेष्विति अर्थाभावात् । तदज्ञाने सर्वमौढ्यमिति निबन्धे सर्वपदेन स्मृतीनामपि संग्रहेऽष्टादशमार्गपदेनाष्टादशस्मृतिमार्गग्रहणसंभवः श्याचार्यमार्गे तर्हि मनुस्मृतौ कुत आग्रहः सर्वाद्यत्वात् भेषजत्वाच्च सर्वाद्यत्वे वाराहपुराणम् । मन्वाद्याः स्मारका इति न च पुराणे वासिष्ठं चैव हारीतमिति पठितत्वात् वसिष्ठादिस्मृतिरिति शङ्क्यम् । वाराहवाक्यस्य वाक्यशेषत्वेन सर्वा संग्राह्य प्रवृत्तत्वात् मनोराद्या वसिष्ठादिस्मृतयः मनुराद्यो यासां दाक्षकात्यायनादीनामन्येषां च ताश्च मन्वाद्या मन्वाद्याश्च मन्वाद्याश्च मन्वाद्याः इति समासात् । न च मनुरादिर्यासामिति सोस्तु प्रसिद्धेरिति वाच्यम् । अष्टादशसु मार्गेषु निर्णय इत्युक्तेः । न च तर्हि पाठक्रमानादरे कः क्रम इति वाच्यम् । ईश्वरवराहाज्ञया पुराणे ज्ञातः क्रमः प्रधानक्रमः । तेन क्रमेण योगाङ्गानां धर्माङ्गानां स्मृतीनां क्रम आश्रियते स मुख्यः क्रमः स चात्रेति । न च प्रधानत्वं नास्ति फलसंबन्धाभावादिति शङ्क्यम् । पुराणफलस्य सत्त्वात् । न चाष्टादशस्मृतिमार्गव्यतिरिक्तस्मृतीनां का गतिरिति चेच्छृणु वराह एव ।

भाष्यप्रकाशः ।

अथ प्रसङ्गादिदं विचार्यते । शूद्रादयः सर्वं भारतं पुराणं च पठेयुर्न वेति । तत्र,

'भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ।
दृश्यते यत्र वै धर्मः स्त्रीशूद्रादिभिरप्युत' ॥

इति प्रथमस्कन्धे,

'विप्रोऽधीत्याप्नुयात् प्रज्ञां राजन्योदधिमेखलाम् ।
वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात्' ॥

इति द्वादशस्कन्धे च धर्मदर्शनश्रीभागवताध्ययनयोर्बोधनात् । 'तस्माद् भारत सर्वात्मा' इत्यत्राभयेच्छायां सर्वसाधारण्येन कीर्तनविधानाच्च सर्वमेव भारतं पुराणं च सर्वे पठेयुरित्येवं प्राप्ते ।

अभिधीयते । ब्रह्मज्ञानभागांशव्यतिरिक्तमेव पठनीयम् । धर्मब्रह्मणोरतीन्द्रियत्वेन प्रथमवाक्ये दृशेर्मुख्यार्थस्य ग्रहीतुमशक्यतया धर्मादिशाब्दज्ञानमात्रार्थकत्वेन पाठाप्रापकत्वात् । द्वितीयेऽप्यधीत्येत्यस्य स्मरणाध्ययनसाधारण्यात् स्मृत्वा गुरुमुखाद्वा गृहीत्वेत्यर्थेन तथात्वात् । नच स्वाध्यायब्राह्मणश्रुतौ, प्राङासीनः स्वाध्यायमधीयीतेत्यादौ केवलोच्चारणेऽपि तथा प्रयोगात् तत्प्राप्तिरिति वाच्यम् । विनिगमनाविरहात् । न चेतः पूर्वं, य एतां श्रावयेदिति सर्वां संहितां पठन्ननश्नन् प्रयत इति पाठं च प्रक्रम्य, विप्रोऽधीत्येति श्लोककथनादुपक्रम एव विनिगमकोऽस्त्विति वाच्यम् । तत्रापि श्रावणाद्युत्तरमेतत्कथनेनाध्ययनशब्दमहिम्ना च श्रावणौत्तर्ये सिद्धे,

रश्मिः ।

'वेदार्थोक्तानुसारेण मन्वाद्याः स्मारकाः स्मृताः ।
तेषां वै स्मृतयो नाना धर्मनिर्णायका भुवि' ॥

इत्यष्टादशातिरिक्तानां नानानाम्नां नानानामकधर्मनिर्णायकत्वात् । भेषजत्वे श्रुतिः यद्यन्मनुर्वै यत्किंचिदवदत्तद्भेषजं भेषजताया इति छान्दोग्यब्राह्मण इति टीकाकृत् । माधवटीकायां पराशरस्मृतेः यत्किंच मनुरवदत्तद्भेषजमिति श्रुतिर्मानवी ऋचौ धाय्ये कुर्यादिति विधाय तद्विधिस्तावकत्वेन यद्वै किंच मनुरवददित्यस्याः पाठात्स्वार्थे तात्पर्याभावात् इति भणितम् । तस्य विवेरयमर्थः । इष्टिविकृतरूपे सोमारौद्रे चरौ अतिदेशतः प्राप्तासु सामिधेनीषु मध्ये प्रक्षेप्तव्यौ धाय्यासंज्ञकौ द्वौ यौ मन्त्रौ तौ मानवौ कर्तव्याविति । ननु तत्र मनुपदस्य स्मृतिकर्तृमनुवाचकत्वेऽनित्यसंयोगापत्तिरत आधिदैविकमनुवाचकत्वमतः स्मृतौ मनुपदेन प्रत्यभिज्ञाभावात् मनुस्मृतेः कुतो भेषजत्वमिति चेन्न । श्रुतीर्दृष्ट्वा मनुस्मृतिं चकारेत्यनुवादरूपत्वेन यथाकथंचित् प्रत्यभिज्ञासत्त्वात् । प्रकृतमनुसर्यतेऽस्माभिः । **अथेति** पुराणविषये निरूपिते स्मृतस्य भारतविषयस्योपेक्षानर्हत्वात् । **धर्मेति** धर्मदर्शनं प्रथमवाक्ये भारतरूपे । **अभीति** महतामधिकार इति भाष्ये विस्तरोभिधीयते । **धर्मेति** भावार्थपादभाष्ये धर्मातीन्द्रियता । **ब्रह्मणस्तु** विशेषणानास्कन्दितेन्द्रियातिक्रान्तता । धर्मस्यापि 'धर्मो यस्यां मदात्मकः' इति वाक्यात् । ननु पाठाभावे कथं शाब्दं ज्ञानं पदजन्यपदार्थोपस्थितेरभावादित्यतः । द्वितीयेप्येतत्सोपपादकमाहुः **द्वितीय** इति । पाठो ह्युच्चारणं तस्य श्रवणस्मरणयोर्निर्वाहकत्वं मुक्तिभक्तिजनकत्वं चेति शाब्दज्ञानमात्रार्थत्वं नास्ति तर्हि पाठव्यतिरेकेण केनापि शाब्दज्ञानकारणेन भाव्यमित्यत आहुः **स्मृत्वेति** । तथा च स्मरणाध्ययनाभ्यां शाब्दज्ञानमिति भावः । न च स्मरणनिर्वाहकपाठप्राप्तिरिति शङ्क्यम् । यत्र स्मरणमात्रं तस्योदाहरणत्वात् । **तथा प्रेति** । अधीयीत इत्यध्ययनप्रकारकप्रयोगात्पाठप्राप्तिः । **विनिगमनेति** । अधीयीत इत्यस्य स्मरेदित्यर्थस्यापि संभवात् । **श्रावणादिति** 'य एवं श्रावयेन्नित्यं

भाष्यप्रकाशः ।

कपिलदेवैः स्वमातुरप्यौपनिषदभागवतज्ञानयोरनुक्तत्वेन स्त्रीशूद्रयोस्तदंशाश्रावणे तयोस्तच्छ्रवणानधिकारे च सिद्धे,

'शूद्रयोनावहं जातो नातोऽन्यद् वक्तुमुत्सहे ।
कुमारस्य तु या बुद्धिर्वेद तां शाश्वतीमहम्' ॥

इत्युद्योगे ॥ सनत्सुजातीयारम्भे विदुरवाक्याज्ज्ञानोत्तरमपि वदनानधिकारे च सिद्धे, श्रवणपठनयोः पठन एव वा तावदंशत्यागस्यैवौचित्यात् । तथा प्रणवादिमान् वैदिकमन्त्रयुक्तोऽपि त्याज्यः । वेदः प्रणव एवाग्र इति, स सर्ववेदोपनिषद्वेदबीजं सनातनमित्यादिवाक्यैः प्रणवस्य विशेषतो वेदत्वनिश्चयात् । औपनिषदानां नारायणाष्टाक्षरादीनां मन्त्राणां नारायणकवचादौ प्रत्यभिज्ञानाच्च । नच देवतादिवाचकपदवत् प्रत्यभिज्ञाया अप्रयोजकत्वमिति शङ्क्यम् । 'नाममन्त्रस्तु शूद्रस्येति'

रश्मिः ।

यामं क्षणमनन्यधीः' आदिना 'श्रद्धावान् योऽनु शृणुयात् पुनात्यात्मानमेव सः' इति श्रवणसंग्रहः । **श्रवणेति** सप्तमीद्विवचनान्तम् । **त्याज्यः** भागस्त्याज्यः । प्रणवादिमतस्त्यागे हेतुः वेदः प्रणव इति । इत्यादीनि स सर्वेत्यादि येषां वाक्यानां तानि इत्यादीनि तानि वाक्यानि तैः । वैदिकमन्त्रयुक्तस्य त्यागे हेतुः **औपनिषदेति** । उपनिषदः नारायणरामतापिनीयनृसिंहतापिनीयरूपाः ताभिर्गृह्यन्ते शैषिकोण् । तेषां नारायणाष्टाक्षरमन्त्रः ॐ नमो नारायणमिति मन्त्रोपासको वैकुण्ठं भगवल्लोकं गमिष्यति इति श्रुत्युक्तः ।

'जीववाची नमो राम चात्मारामेति गीयते ।
तदात्मिका या चतुर्थी तथा मायेति गीयते' ॥ इति ।

रामतापिनीयश्रुत्युक्तः पञ्चाक्षरः नमो रामायेति **समेतीति** च । तथा द्वाविंशाक्षरो नृसिंहतापिनीयोक्तः ॐ यो वै नृसिंहो देवो भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः इति अन्यो वा नारायणकवचे यथा 'ॐ नमो नारायणायेति विपर्ययमथापि वा' इत्यष्टमे षष्ठस्य । प्रत्यभिज्ञानं नारायणकवचे तत्तेदन्ताप्रकारकं ज्ञानं प्रत्यभिज्ञा' सोयं नारायणमन्त्र इति । नमो रामायेति प्रसिद्धम् । रामरक्षास्तोत्रे

'रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न विन्दते पापं भुक्तिं मुक्तिं च विन्दति' ॥

इति रामेति मन्त्रप्रत्यभिज्ञानम् । एवं नृसिंहमन्त्रस्य प्रत्यभिज्ञानं बोध्यम् । एवं च सति ब्रह्मज्ञानव्यतिरिक्तोपि पुराणाद्यंशो न पठनीयः प्रत्यभिज्ञासाम्यादित्याशङ्क्य समादधुः **न चेति** । अस्या देवतायाः सायुज्यमिति 'तन्मूला देवताः सर्वाः' इति दशमे । परदेवताप्रसादेति पञ्चमे देवतावाचकपदम् । एवं 'विष्णोः कर्माणि पश्यत' इति संहितास्थम् । 'विष्णोस्तु त्रीणि रूपाणि' इत्यत्र विष्णुवाचकं पदम् । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इत्युपनिषत्स्थं 'बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः' इति वेदस्तुतौ इन्द्रियादिवाचकं पदं तेष्विव प्रत्यभिज्ञायाः ऐक्येऽप्रयोजकत्वम् । **एतेषामिति** शूद्रादीनाम् । ब्रह्मज्ञानवाचकपुराणादेः प्रणवादिमतो वैदिकमन्त्रयुक्तस्य च पुराणादेश्चानुज्ञाभावेन । न च ब्रह्मवानिति पदेन ब्रह्मज्ञानानुज्ञेति वाच्यम् । ब्रह्मपदस्य स्वाहाकारनमस्कारादिरूपवेदानुवाद-

भाष्यप्रकाशः ।

'स्वाहाकारनमस्कारौ मन्त्रौ शूद्रे विधीयते ।
ताभ्यां शूद्रः पाकयज्ञैर्यजेत ब्रह्मवान् स्वयम्' ॥

इत्यानुशासनिकपर्वादौ तदनुज्ञादर्शनेनैतेषां च तदभावेनैतद्दृष्टान्तस्यात्र वक्तुमशक्यत्वात् । किंच द्वितीयस्कन्धे श्रीशुकैः 'श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्च' इति श्रवणात् तृतीयं स्मरणमुक्तम् । प्रथमे सूतेनापि, 'श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च' इति तथोक्तम् । एवं प्रकृतेऽपि श्रवणपठनफलकथनोत्तरं स्मरणस्यापि तद् वाच्यम् । अन्यथाऽऽकाङ्क्षान्तरोदयप्रसङ्गात् । अतः सादेश्यादप्यधीत्येति पदं स्मरणार्थकमवसीयते । यत्तु

'ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः ।
वैश्यः पठन् विट्पतिः स्याच्छूद्रः सत्तमतामियात्' ॥

इति चतुर्थस्कन्धीयम् । तत्तु पृथुचरितमुपक्रम्य पठितत्वात् प्रकरणावरुद्धमिति न तेन सर्वपाठः प्रापयितुं शक्यते । नच 'पठेच्च नियमं कृत्वा श्रीभागवतमादराद्' इति निबन्धे श्रीमदाचार्यैरुक्तत्वात् सर्वं पठनीयमिति शङ्क्यम् । तत्रापि तदंशत्यागे बाधकाभावात् । अन्यथा

'यदौपनिषदं ज्ञानं श्रीभागवतमेव वा ।
वर्णिनामेव तद्धि स्यात् स्त्रीशूद्राणां ततोऽन्यथा' ॥

इति तृतीयस्कन्धीयनिबन्धवाक्यस्य, 'भागवतज्ञानमपि त्रैवर्णिकानामेव । उपासनायाः प्राधान्यात् । यदेव भगवता ब्रह्मणे प्रोच्यते, तत् त्रैवर्णिकानामेवेति ज्ञातव्यम्' इति तत्प्रकाशग्रन्थस्य च विरोधापत्तेः । नचैकादशस्कन्धेऽपि, 'एष तेऽभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः' इति

रश्मिः ।

कत्वात् । न च पौराणब्रह्मज्ञानादेः स्वतन्त्रत्वेन पुराणादिवत्प्राप्तिः बाधकाभावादिति शङ्क्यम् । भावबोधेऽङ्गत्वेनास्वतन्त्रत्वात् । तदुक्तं सर्वनिर्णये—न च ब्रह्मज्ञानमन्तरेण पुराणपठनं व्यर्थमिति वाच्यम् । व्यर्थत्वे भगवतो गुह्यजन्माभावस्य हेतुत्वात् । 'यस्मिन्न मे पावनमङ्ग कर्म' इत्युपक्रम्य 'वन्ध्यां गिरं तां बिभृयान्न धीरः' इति वाक्यात् । विप्रोधीत्येत्यत्र नेङ् अध्ययने अ. आ. अनिटो रूपम् । किं तु इक् स्मरणे अ. प. अनिटः तस्मान्न पाठप्रापकत्वमित्याहुः किं चेति । तथोक्तमिति ध्यै चिन्तायां भ्वा. प. अ. चिती स्मृत्यां चु. प. से. 'अचो यत्' । श्रवणकीर्तनस्मरणप्रकारेणोक्तम् । श्रवणपठनेति । फलबोधके वाक्ये उक्ते तदिति फलम् । आकाङ्क्षेति सादेश्यात्स्मरणाकाङ्क्षा ततोन्या फलबोधाकाङ्क्षाऽऽकाङ्क्षान्तरं तस्योदयप्रसङ्गात् । सादेश्यादिति स्मरणसमानस्तृतीयो देशः तस्य भावात् । सादेश्यं यथासंख्यरूपम् । तेन यथासंख्यपाठरूपदेशसामान्येन श्रवणदेशे श्रवणं कीर्तनदेशे कीर्तनं स्मरणदेशे अधीत्येति स्मरणम् । न तु पाठः । यथा समिधो यजतीत्यादिः । समिधः समिधो अग्न आज्यस्य व्यन्त्वित्यादि च । समिधः समिधो अग्न इत्यादिपञ्चमन्त्राणां यथासंख्यपाठरूपदेशसामान्येन प्रथमप्रयाजस्य समिधो यजतीत्युक्तस्य प्रथमो मन्त्रोऽङ्गे द्वितीये द्वितीयः इत्येवमङ्गत्वं बोधयति इति तथा । सर्वपाठ इति पृथुचरितव्यतिरिक्तसर्वपाठः । उपेति भागवतज्ञानमित्युक्ते मनोव्यापारविशेषः प्रतीयते 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इत्यत्र मनोवृत्तित्वात् । उपासनायाश्च मनोव्यापारविशेषरूपाया ग्रहणं न तु

भाष्यप्रकाशः ।

कथनाच्चतुःश्लोकीतुल्यतयोपदेशस्य तत्रापि सत्त्वात् तत्राप्यनधिकारः शङ्क्यः । तदग्रे,

'नैतत् त्वया दाम्भिकाय नास्तिकाय शठाय च ।
अशुश्रूषोरभक्ताय दुर्विनीताय दीयताम्' ॥
'एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च ।
साधवे शुचये ब्रूयाद् भक्तिः स्याच्छूद्रयोषिताम्' ॥

इति कथनात् कर्मज्ञानादिमिश्रतयोपदेशाच्च तादृशां श्रावणे बाधकाभावेन तत्र तेषां श्रवणाधिकारस्य सिद्धेः । अन्यथा तद्विरोधापत्तेश्च । नचाभयेच्छायां तदर्थं कीर्तनस्य विरोधः शङ्क्यः । तत्र भगवत एव कथनाच्छ्रीभागवतपदाभावाच्चोक्तैकदेशातिरिक्तभागवतकीर्तनादपि तत्परिहारसिद्धेः । पुरुषोत्तमसहस्रनामपाठस्यापि फलोक्तिप्रसङ्गे, 'सहस्रं यैस्तु पठितैः पठितं स्याच्छुकाऽमृतम् । इत्याचार्याणां वाक्यात् तस्मादपि तत्सिद्धेश्च । ये पुनरेतानि वाक्यान्याश्रित्य स्वस्यापि पाठाधिकारं शूद्रा आपादयन्ति, तेषां मात्सर्यादिदोषग्रासेन श्रीभागवतोक्तधर्मेष्वप्यनधिकारः । 'धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सताम्' इति वाक्यात् । किं पुनः पाठे । एतेनैव गीतापाठो व्याख्यातः । तत्राप्यध्यायसमाप्तौ, उपनिषत्सु ब्रह्मविद्यायामिति दर्शनात् । तस्मादुक्तातिरिक्तमेव शूद्रैः पठनीयम् । न तु श्रावणीयं, पाठनीयं वा । विध्यभावादिति निष्कर्षः ॥ ३८ ॥

इति नवमं शुगस्येत्यधिकरणम् ॥ ९ ॥

रश्मिः ।

उपसमीपे स्थित्वा यथायोग्यकरणरूपायाः ज्ञानपदेनाप्रतीतेः । एवं च ज्ञानस्य प्राधान्यात् विशेष्यत्वात् । **चतुःश्लोकी**ति तत्र ब्रह्मवादस्य सुबोधिन्यां करणात्तत्तुल्यत्वम् । **तत्रापी**ति एकादशस्कन्धे एकोनत्रिंशे श्रीभगवानुवाचोद्धवं प्रति । 'कुर्यात्सर्वाणि कर्माणि' इत्यादि । तेनोक्ते । ननु ब्रह्मवादसंग्रहातिरिक्तं शूद्रयोषिद्भ्यो ब्रूयादित्यर्थो यद्वा दोषविहीनायेत्येवमादिभ्यो ब्रूयात् शृण्वन्तीनां शूद्रयोषितां भक्तिः स्यादित्येवमर्थ इति न भक्तिः स्याच्छूद्रयोषितामित्यस्याप्रयोजकत्वमिति चेत्तत्राहुः **कर्मे**ति 'कुर्यात्सर्वाणि कर्माणि' इति कर्म । **तद्धी**ति भक्तिः स्याच्छूद्रयोषितामित्यस्य विरोधापत्तेः । न च एतादृश एव ब्रह्मवाद इति शङ्क्यम् । तत्राधिकारस्तर्हि वर्तत एव । **तदर्थ**मिति अभयार्थम् । कीर्तनस्य पाठरूपस्य शूद्रयोषित्सु सहानवस्थानम् । **तत्रे**ति तस्माद्भारत सर्वात्मेति द्वितीयस्कन्धे । **भगवत** इति 'भगवान् हरिरीश्वरः श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम्' इति । एवकारेण श्रुतिस्मृत्योः ब्रह्मात्मनोर्व्यवच्छेदः । **तदि**ति शङ्कापरिहारसिद्धेः । **शुकामृत**मिति शुकदेवस्यामृतं 'तव कथामृतं तप्तजीवनम्' आनन्ददातृ तस्मादित्यानन्ददातुः कीर्तनात् । **तत्सिद्धेरभय**सिद्धेः । पुराणमतम् । तेनाभयंचिदिति भाष्यस्य न विरोधः । एति यदि शूद्रादीनां पाठे नाधिकारः स्यात्तदा इमानि वाक्यानि न स्युरिति तर्कयन्ति इति **वाक्या**दिति । निर्मत्सराणां सतां वेद्यमिति निर्मत्सराः सन्तोधिकारिणो न तु मात्सर्ययुक्ता इति भावः । **किं पुन**रिति । सत्सङ्गेन भागवतोक्ताः स्वधर्माः तदनु अध्ययनानन्तरं पाठः 'श्रुत्वान्येभ्य उपासते' ॥ ३८ ॥

इति नवममधिकरणम् ॥ ९ ॥

कम्पनात् ॥ ३९ ॥

कठवल्लीविचारेण निश्चिता ह्यधिकारिणः।
वाक्यान्तरं च तत्रत्यं चिन्त्यते प्रलयावधि ॥

'यदिदं किंच जगत् सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति' इति। अत्र प्राणवज्रोद्यमनशब्दाभ्यां संदेहः। किं प्राणोपासना, इन्द्रोपासना वा, ब्रह्मवाक्यं वेति। बाधकशब्दस्य श्रुतित्वान्न प्रकरणेन निर्णयः। 'अमृतं वै प्राणाः' इति श्रुतेः। प्राणोपासकस्याप्यमृतप्राप्तिर्युज्यते। इन्द्रस्याप्यमरत्वात्। वज्रमुद्यतमिति प्राणपक्षे वियोजने मरणजनकत्वाद्

भाष्यप्रकाशः।

कम्पनात् ॥ ३९ ॥ एवं प्रासङ्गिकमधिकारनिरूपणं कृत्वा पूर्वप्रस्तुतमेव पुनः सिंहावलोकनेन विचारयतीत्याहुः **कठवल्लीत्यादि** । हि यतो हेतोर्मृत्यूपाख्यानं मनुष्यानधिकृत्य प्रवृत्तम्। अतः, 'शब्दादेव प्रमितः' इत्यधिकरणे प्रस्तुतेन कठवल्लीस्थाङ्गुष्ठमात्रविचारेणाधिकारिस्मरणे प्रसङ्गात् ते निश्चिताः। च पुनः प्रासङ्गिकसमाप्तौ तत्रत्यं षष्ठवल्लीस्थं वाक्यान्तरं चिन्त्यते। अवसरसंगत्या विचार्यते । तच्चिन्तनस्य किं प्रयोजनमत आहुः **प्रलयावधीति**। तद्वाक्यप्रतिपाद्यं रूपं प्रलयस्यावधिभूतम्। तस्य ज्ञाने तत्र लयः स्यादतो हेतोश्चिन्त्यत इत्यर्थः। विषयवाक्यं, संदेहबीजं, संदेहाकारं चाहुः **यदिदमित्यादि** । **वेतीत्यन्तम्** । ननु प्रकरणस्य ब्राह्मत्वात् तेनैव निश्चये विचारोऽनर्थक इति शङ्कायामाहुः **बाधकेत्यादि** । तथाच प्रकरणापेक्षया श्रुतेर्बलिष्ठत्वात् प्रकरणेन न निर्णय इत्यतो विचार आवश्यक इत्यर्थः। पूर्वपक्षमाहुः **अमृतमित्यादि**। तथा अमृतपदस्याप्यनेकार्थत्वाद् वाक्योक्तफलेनापि न निर्णय इत्यर्थः। तर्हि प्राणविद्यैवास्त्वित्यत आहुः **इन्द्रस्येत्यादि**। तदुपासकस्याप्यमृतत्वप्राप्तिर्युज्यत इति पूर्वेण संबन्धः, इन्द्रस्यात्र कथं प्राप्तिरित्यत आहुः **वज्रमुद्यतमिति** । तथाच लिङ्गात् प्राप्तिरित्यर्थः।

रश्मिः।

कम्पनात् ॥ ३९ ॥ अवसरेति अत्र प्रतिबन्धकीभूतजिज्ञासा। केऽधिकारिण इति । **तत्र लय** इति प्रेक्षावत्प्रवृत्त्यर्थं फलस्य बाध्यत्वादिति भावः। **विचार** इति ब्रह्मवाक्यं चेति कोटीतरकोटीद्वयं प्रक्षिप्येषा मीमांसानिष्फला प्रकरणादेव ब्रह्मवाक्यत्वसिद्धेरिति तर्के **आहुरिति** विचारसार्थक्यमाहुः तेन तृतीयकोटीतरकोटिद्वयसिद्ध्याऽयं ग्रन्थः संशयशेषः। **बाधकेत्यादीति**। प्राणवज्रोद्यमनशब्दौ श्रुतीबाधकशब्दौ । **विचार** इति । **ब्रह्मवाक्यं वेति**····कोटीतरकोटी प्रक्षिप्य मीमांसा । **न निर्णय** इति । ब्रह्मवाक्यत्वनिर्णयो मीमांसानिष्फलत्वसंपादकः। **इत्यर्थ** इति इत्यर्थः प्रयोजनम् । अन्यथा पूर्वपक्षग्रन्थे ब्रह्मवाक्यं वेति कोटेरितरकोटिद्वयसंपादको ग्रन्थः संगतो न स्यात् । अत एव प्राणेत्याद्युत्तरभाष्ये हेतुतास्य स्फुटा प्रतीयते। **लिङ्गादिति** लिङ्गं शब्दस्य सामर्थ्यम्। **भाष्ये। प्राणपक्ष** इति स्ववियोजने मरणजनकत्वं स्फुटमतस्तद् भूतपूर्वं भयमतस्तज्जनकत्वमपीति लक्षणया भयं प्राण इति भयरूपत्वमित्यर्थः। प्राणपक्षे भयमित्यस्य संगतिमिवेन्द्रपक्षे प्राण इत्यस्य संगतिमाहुः **इन्द्रपक्ष** इति। **बलेति** द्वितीयस्य दशमाध्यये 'हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया। तयोस्तु बलवानिन्द्रः' इति वाक्ये बलमिन्द्रिय-

भयरूपत्वम् । इन्द्रपक्षे बलाधिष्ठातृत्वात् प्राणत्वम् । तस्मात् प्राण इन्द्रो वा वाक्यार्थ इत्येवं प्राप्ते । उच्यते । कम्पनात् । कम्पनमत्र प्रथमवाक्यार्थः । स च भयहेतुकः । अविशेषेण सर्वजगत्कम्पनं भगवद्धेतुकमेव भवति ।

नचैकान्ततो वज्र इन्द्रस्यैवायुधं भवति । अग्निहृदयत्वात् । तस्य तांतस्य हृदयमाच्छिन्दत् साऽशनिरभवदिति श्रुतेः । तस्मान्मारकरूपमेवेदं भगवतः ।

भाष्यप्रकाशः ।

तस्मादिति प्रकरणापेक्षया श्रुतिलिङ्गयोः प्रबलत्वात् । तथाच ब्रह्मवाक्यत्वाभावे पूर्वपक्षे तात्पर्यम् । सिद्धान्तं व्याचक्षते उच्यत इत्यादि । अत्र हि, यदिदं किंचेति पादत्रयमेकं वाक्यम् । य एतदिति तुरीयपादो भिन्नं वाक्यम् । तत्र, यदिदं किंच परिदृश्यमानमपरिदृश्यमानं च सर्वं जगत् प्राणे विद्यमाने निःसृतं बहिरागतं सदेजति कम्पते । तत्र हेतुः । महतां भयं यस्मात् तादृशं वज्रमायुधमुद्यतं जगन्नियमनायोल्लासितमिति पदसंबन्धात् कम्पनमत्र प्रथमवाक्यार्थः । स च भयहेतुकः । तेन स्वतः कम्पनं वार्यते । तथा, यदिदं किंचेत्यनेन सर्वपदे संकोचो वार्यते । अतोऽविशेषेणासंकोचेनेदृशं सर्वं जगत्कम्पनं भगवद्धेतुकमेव भवति । न प्राणे । तस्य स्ववियोगेन भयजनकतयेदृशकम्पनाहेतुत्वात् । ननु तर्हि श्रुतेः साधारणत्वान्माऽस्तु प्राणः, किंत्विन्द्र एवास्तु । वाक्यापेक्षया लिङ्गस्य प्राबल्यादित्यत आहुः नचेत्यादि । सिद्धमाहुः तस्मादित्यादि । यस्मादिन्द्रप्राणौ नात्र शक्यवचनौ तस्मात् तथेत्यर्थः । ननु तथापि प्राणशब्दवाच्यत्वस्य, 'अत एव प्राणः' इत्यधिकरण एवावधारितत्वादस्याधिकरणस्य किं

रश्मिः ।

मिन्द्रो देवतेत्युक्तेः । प्रकृते । प्रकरणेति । पूर्वतन्त्रीयं प्रकरणादि स्पष्टम् । वाक्यमिति एकतिङ् वाक्यम् । अग्रे तु सुप्तिङ्चयो वाक्यम् कोशोक्तम् । कोशशब्दस्तालव्यान्तोपि भ्वादेराकृतिगणत्वात् कोषस्तु बहुषु स्थलेषु । प्रथमेति । ननु कथं कम्पनं वाक्यार्थ इति चेन्न मिश्रमते फलमात्रं धात्वर्थ इति धात्वर्थविशेष्यकबोधे कम्पनस्य विशेष्यत्वम् । ब्रह्मकृतं जगन्निष्ठव्यापारजन्यं कम्पनमिति । न च मण्डनमिश्रमते प्रथमान्तविशेष्यको बोध इति कुतः कम्पनविशेष्यको बोध इति शङ्क्यं देवदत्तेन स्थीयते इत्यादिस्थले तदभावादिति वैयाकरणोक्तदूषणग्रासात् । न च व्यापारविशेष्यकबोधोस्त्विति शङ्क्यम् । धात्वर्थत्वाभावात् भावप्रधानमाख्यातमिति यास्कोक्तेः । व्यापारमात्रमाख्यातार्थ इत्यादि स्पष्टमाख्यातवादे गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति । विशेष्ये धात्वर्थे वाक्यार्थपदप्रयोगः । न च सुप्तिङ्चयस्यान्वयो वाक्यार्थः । कृत्रिमत्वेनान्यवाग्विमोकश्रुतिविरुद्धत्वात् अस्माभिरेव भगवदिच्छया प्रोच्यते । नाचार्यैरिति । श्रुतेरिति विषयवाक्यरूपायाः ब्रह्मप्राणसाधारणत्वात् । लिङ्गस्येति । ननु न महद्भयं वज्रमुद्यतमितीन्द्रलिङ्गम् । किं तु श्रुतिरेषा निरपेक्षरवत्वादिति चेन्न । ईश्वरवाचकस्यास्येन्द्रे शक्तिसंकोचलक्षणा रूढिरिति । किं च निरपेक्षत्वे नामलिङ्गादिकल्पनाव्यतिरेकेणाङ्गत्वबोधकत्वम् । यथा दध्ना जुहोतीत्यत्र दध्नेति तृतीयाश्रुत्या दध्नो होमाङ्गत्वबोधात् । तथात्र नास्ति । महद्भयं वज्रमुद्यतमित्यत्र शब्दगतं सामर्थ्यं उद्यन्तमिति शब्दादस्य भागस्य वज्रोद्यमनसामर्थ्यमालोच्यानेन भागेनोद्यमनं प्रतिपत्तव्यमिति श्रुतिं कल्पयित्वोद्यमनाङ्गस्य बोधितत्वात् । उद्यमनस्य कम्पनाङ्गत्वं हेतुरिति यावत् । न च 'बर्हिर्देवसदनं दामि' इत्यत्र

प्राणशब्दवाच्यत्वं तु पूर्वमेव सिद्धम् । तस्मात् सर्वजगत्कम्पनं भगवत्कृतमिति भगवानेव वाक्यार्थः ॥ ३९ ॥

इति प्रथमाध्यायतृतीयपादे दशमं कम्पनाधिकरणम् ॥ १० ॥

भाष्यप्रकाशः ।

प्रयोजनमत आहुः प्राणेत्यादि । तस्मादिति । यस्मादुक्तवाक्यार्थरूपत्वं न पूर्वत्र प्राणशब्द-शब्दिते सिद्धं तस्मात् । अत्रैतादृशस्य हेतोर्वाक्यान्तरे अदर्शनाद्धेतुरेव पक्षमाक्षेप्स्यतीत्याशया-द्विमृष्टनिष्ठविशेषान्तरविमर्शावधारणेनैव तत्स्फुरणाच्च पक्षानुल्लेख इति न न्यूनता । आधारता तु विषयवाक्य एव स्फुटा । अत्राऽवान्तरप्रलयकर्तृत्वं प्राणे आशङ्क्य तन्निवारणाय अङ्गभयोत्पाद-कत्वेन तद् ब्रह्मणि साधितम् । तेन बुद्धिस्थानात्मिकैवाधिकरणसंगतिः ।

रश्मिः ।

ल्वनं मन्त्रान्तर्गतमत्र तु वज्रमुद्यतमित्यत्र कम्पनं नान्तर्गतमिति दृष्टान्ताभावः शङ्क्यः । प्रथमवाक्ये कम्पनस्यान्तर्गतत्वात् । तथेति मारकरूपत्वेन प्रकारेणाशनिर्वज्रमिति यावत् । तस्याग्नेर्जातस्य हृदयमिति भगवतो रूपं 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति गीतायाः । 'यदेकमव्यक्त-मनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इति महानारायणीयोपनिषच्छ्रुतेर्ब्रह्मणः साकारत्वात् । अत एव एवकारः । इत्यधीति प्रथमचरणस्थे । किमिति तथा श्रुतौ प्राण इति प्रथमान्तमपि संभवति महद्भयं वज्रमुद्यन्तं प्राणे सर्वं जगदेजतीत्यर्थादिति भावः । प्राणेत्यादीति अत्र तु साकारब्रह्मणोऽग्निहृदयरूपं स्वहृदयरूपं मीमांसितमिति भावः । श्रुतौ प्राण इति सप्तम्यन्तं न प्रथमान्तमिति भावः । न्यूनताख्यनिग्रहस्थानं परिजह्नुः सूत्रे अत्रेति । एतादृशस्येति साध्यपक्ष-शून्यस्य सूत्रान्तररहितस्य । हेत्वन्तरमाहुः विमृष्टेति । विमृष्टं यद्विषयवाक्यं तन्निष्ठो विशेषः वज्ररूपा-ग्निहृदयप्रतिपादकत्वं तदन्यो विशेषस्तस्माद् ब्रह्मप्रतिपादकत्वम्, भगवानेव वाक्यार्थ इति भाष्यात् तस्य विमर्शावधारणमुक्तभाष्यात् । विमर्शस्तु वाक्यं भगवत्प्रमितिजनकं कम्पनात् । आश्रयता साध्यतावच्छेदकसंबन्धः प्रतिपादकता हेतुतावच्छेदकसंबन्धः यन्नैवं तन्नेवं घटोस्तीति वाक्यवदिति । तदवधारणेनैव पक्षादिस्फुरणादित्यर्थः । एतेन हृदयब्राह्मणं बृहदारण्यकस्थं स्मारितम् । तेन हृदयपदं व्युत्पादितम् । तथा हि । एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वमिति स्पष्टम् । अभिहरन्त्यस्मै स्वाश्चान्ये च बलिमिति । हृ संप्रदाने प्रत्यय औणादिकः क्विप् । अस्यां व्युत्पत्तौ प्रमाणमुच्यते तदेतत्त्र्यक्षरं हृदयमित्युपक्रम्य हृ इत्येकमक्षरं अभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेदेति श्रुत्या हृ इत्येकाक्षर-वेत्तुः फलं स्वाश्चान्ये च बलिं स्वं स्वं कार्यं च निरोधलक्षणोक्तप्रकारेणाभिहरन्ति इति तत्फलं तदा भवति यदा वेद्यं 'हृ' इत्येकाक्षरं तथा भवेत् । स्वा स्वा इन्द्रियाणि । जसो डा । अन्ये विषयाः । 'द' इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेदेति श्रुतेः । स्वाश्चान्ये चास्मै वेत्रे स्वं स्वं वीर्यं ददति तस्माद् ददत्यस्मा इति दः 'आतोनुपसर्गे कः' संप्रदानेऽस्माज्ज्ञापकात् । यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेदेति श्रुतेः य एवं वेद स स्वर्गमात्मसुखमेति तस्मादेतीति 'यम्' एरच् 'इको यणचि' तथा च हृं च दश्च यं चेत्येषां समाहारो हृदयमिति व्युत्पत्तिः सिद्धा । अग्नेराचार्यत्वेन सर्वात्म-भावकेन निरोधेन हृदयब्रह्मार्थं बलिं स्वस्वकार्यं च अभिहरन्तीत्युक्त्वा सर्वतो निवृत्तव्यापारा भगवत्परा ददत्यस्मा इत्युक्त्वा स्वर्गयुक्ताद्भगवत आत्मसुखं य एवं वेद स एति स्वाश्चान्ये च यन्ति श्रोत्रोदक्षगुणा सती आनन्दरूपा यदा सेवा जायते तदा एवं भवति तदुक्तं मध्वभाष्ये पुराणमतेपि ।

९६ ब्र० सू० र०

ज्योतिर्दर्शनात् ॥ ४० ॥ (१।३।११)

'य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरभिसंपद्य स्वेन

भाष्यप्रकाशः ।

यत्तु शंकराचार्यैरत्र ब्रह्मप्रतिपत्तौ पूर्वोत्तरपर्यालोचनादिति हेतुरुक्तः । तत्तु सूत्रमेव विरुणद्धि । सूत्रे कम्पनस्यैव हेतुत्वेन कथनात् । योऽप्येजयितृत्वस्य ब्रह्मधर्मत्वे न प्राणेनेति मन्त्रस्य तद्बोधकतयोपन्यासः सोऽपि तथा । मन्त्रे जीवनस्य तथात्वेनोक्ततया कम्पनाबोधकत्वादिति ॥ ३९ ॥

इति दशमं कम्पनाधिकरणम् ॥ १० ॥

ज्योतिर्दर्शनात् ॥ ४० ॥ य एष इत्यादि । इदं छान्दोग्ये दशमप्रपाठके दहरविद्याया-मिन्द्रप्रजापतिसंवादे च पठ्यते । एतावान् परं विशेषः । पूर्वत्र, निष्पद्यत इत्यनन्तरं स आत्मेति वाक्यशेषः । द्वितीये तु, स उत्तमः पुरुष इति । तत्रोत्तरवाक्यमसंदिग्धम् । गीतायाम्, 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' इत्युपबृंहणेनास्य जीवबोधकताया वक्तुमशक्यत्वात् । तेन स

रश्मिः ।

'चक्रं चंक्रमणादेष वर्जनाद्वज्रमुच्यते ।
खण्डनात्खड्ग एवैष हेतिनामा हरिः स्वयम्' ॥ इति ।

स्वयं पदादिदं भगवतो मारकं रूपम् । प्रकृतमनुसरामः । **पूर्वोत्तरेति** । पूर्वोत्तरयोः श्रुत्योः पूर्वोच्यते ।

'तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते ।
तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन' ॥ इति तद्भाष्ये ।

उत्तरोच्यते ।

'भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः' ॥ इति ।

उभयत्रापि ब्रह्मैव प्रतिपाद्यते न वायुरिति मध्येपि ब्रह्मैव प्रतिपाद्यम् । **न प्राणेनेति** ।

'न प्राणेन नापानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ' ॥

इति मन्त्रस्य ॥ ३९ ॥

इति दशममधिकरणम् ॥ १० ॥

ज्योतिर्दर्शनात् ॥ ४० ॥ **दहरविद्यायामिति** पूर्वान्वयि । **तत्रेति** । **द्वितीये इन्द्र-प्रजापतिसंवादे** । **जीवेति** यथा स आत्मेत्युत्तरवाक्ये आत्मपदस्य जीवबोधकत्वमपि अयमात्मा ब्रह्मेति श्रुतेः । तथा जीवबोधकताया इत्यर्थः । **तेनेति** । इयमिन्द्रप्रजापतिसंवादस्था । स उत्तमः पुरुषरूपः । तत्र पुरुषोत्तमे क्रीडन् क्रीड विहारे । रममाणः पर्येति पर्यटति स्त्रीभिरिति मानसोत्थस्त्रीभिः सह यानैर्वा ज्ञातिभिर्वा । न उपजन९सूक्ष्मशरीरं इदं स्थूलशरीरं च स्मरति । स यथा प्रयोग्य इति । प्रयोग्यः प्रयुज्यते इति प्रयोग्यः भ्वादिः । आचरणे आचरति गच्छत्यनेनेत्याचरणं रथादिस्तत्र युक्तः । एवमेवास्मिन् विस्मृतशरीरेऽयं प्राणो ईश्वरेण नियुक्तो वर्तते । श्रुतिस्तु 'तत्र पर्येति जक्षन् क्रीडन् स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजन९स्मरतीद९शरीर९स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे

रूपेणाभिनिष्पद्यते' इति। तत्र संशयः। परं ज्योतिर्महाभूतरूपं ब्रह्म वेति।
ब्रह्मधर्माश्च ये केचित् सिद्धा युक्त्यापि साधिताः।
निर्णायकास्ततोऽप्यन्ये चत्वारोऽत्र निरूपिताः॥

भाष्यप्रकाशः।

तत्र पर्येति जक्षन् क्रीडन्नित्यग्रिमे वाक्ये तच्छब्दद्वयेनोभयोः परामर्शेऽपि विभक्तिसामानाधिकरण्यं सन्निधिं चानादृत्य व्यवहितं व्यधिकरणविभक्तिबोधितमपि ब्रह्मैवादरणीयमिति निश्चयात्। अतो दहरविद्यास्थं वाक्यमेव विषयः। संशयस्तु स्फुट एव। तद्बीजं तु प्रकरणापेक्षया श्रुतेः प्राबल्यम्। ज्योतिश्चरणाधिकरणेनास्य गतार्थतानिरासायास्य प्रयोजनं कारिकयाहुः ब्रह्मेत्यादि। चत्वार इति। उपसंपत्तव्यत्वम् उपसंपन्नस्वरूपाभिनिष्पादकत्वम्। पूर्ववाक्यगतं

रश्मिः।

प्राणो युक्त' इति। उभयोरिति जीवोत्तमपुरुषयोः। अनादृत्येति। स तत्रेति विभक्तिसामानाधिकरण्यानादरः स तत्रेत्यत्रैव संनिध्यनादरः जीवद्वारा पर्यटनस्येश्वरे सत्त्वात् तत्रेति सप्तमी। 'चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे' इति वाक्याज्जीवश्चैत्यम्। स्वतत्त्वव्यवहितमप्युभयं ब्रह्मैव। ननु एकरसत्वासक्तित्वविरुद्धमिदं रूपमिति चेत्तत्राहुः आदरणीयमिति श्रुतिप्रामाण्यादादरणीयम्। ननु श्रुतिरन्यार्था भवतीति चेत्तत्राहुः इति निश्चयादिति। (भाष्ये) विरुद्धधर्माश्रयब्रह्मोपपादनमिति इति निश्चयात्। किं च सुषुप्तिसामयिकं रूपं निर्गुणमिति हेतोर्निश्चयात्। सगुणनिर्गुणयोरैक्याच्च विद्वन्मण्डने इति।

अत इति इन्द्रप्रजापतिसंवादस्थस्यासंदिग्धत्वात्। दहरविद्यास्थस्य संदिग्धत्वात्। स्फुट इति दहरविद्यास्थे स आत्मेत्येवं य एष संप्रसाद इति वाक्यस्य शेषे वाक्ये तच्छब्देन महाभूतज्योतिःसंपन्नजीवात्मा वा ब्रह्मरूपज्योतिःसंपन्नजीवात्मा वेति संदेहज्ञाने विशेषणभूतविषयवाक्योक्तज्योतिर्ज्ञानं कारणम्। किं ज्योतिर्ब्रह्म उत महाभूतमिति तस्मात्संशयः स्फुटः। कल्पितसंशयबीजं तु स आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति वाक्यशेषे ब्रह्म इत्यस्य विधानार्थं उपासार्थश्च ग्रहणसंभवः। न च कल्पितसंशये भाष्यसंशयपर्यवसानमिति शङ्क्यम्। भाष्यसंशयादिभिरात्मनो ब्रह्मरूपज्योतिःसंपन्नजीवात्मत्वे निश्चिते स आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेत्यत्र आत्मा ब्रह्मरूपज्योतिःसंपन्नजीवात्मा न महाभूतज्योतिःसंपन्नजीवात्मेति सिद्धान्तसंचारात्। स आत्मेति वाक्यशेषस्य एष आत्मेत्यपि पाठः क्वचित्पुस्तके तेनैव ब्रह्मेत्यस्योपासार्थत्वहानेः कल्पितसंशयोपशमः। प्रकृतमनुसरामः। भाष्यप्रकाशे श्रुतेरिति रूढिर्योगमपहरतीत्यस्याः पूर्वत्रासति बाधकेऽङ्गीकारोक्तेः। प्रकरणाप्राबल्यादकारणत्वाच्च रूढेरित्यनुक्त्वा श्रुतेरित्युक्तम्। सा च परं ज्योतिरित्यत्र कर्मवाचकद्वितीयाश्रुत्या उपसंपदनाङ्गत्वं उपसदनकर्मत्वम्। अत्र लिङ्गादिकल्पनव्यतिरेकेण महाभूतज्योतिर्वासनाप्राबल्यात् प्रतीयते इति बीजत्वम्। श्रुतेर्निरपेक्षस्वरूपायाः। ब्रह्मेत्यादीति निरूपणं हि लक्षणैस्तानि चासाधारणधर्मरूपाणि इति ब्रह्मनिरूपणार्थं धर्मापेक्षायां ब्रह्मधर्माश्चकारात् तद्रूपं ब्रह्म यद्वा चकारात् जीवमुख्यप्राणलिङ्गानि। 'जीवमुख्यप्राणलिङ्गादिति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्' इति सूत्रभाष्ये जीवमुख्यप्राणव्यवहिताः। ये केचिदिति सामान्यतो निर्देशः। सिद्धा इति सत्यज्ञानानन्तानन्दादयः ते जन्माद्यस्य यत इत्यधिकरणे यत इति पदेन ब्रह्मवाक्यत्वनिर्णायकाः निरूपितप्रायाः युक्त्या अपिपदेन श्रुत्या च समन्वयाद्यधिकरणेषु समवायित्वेनाशब्दत्वादयः साधिताः परेषां मतभेदेन। निर्णायका निरूपिताः ततोप्यन्य इति तेभ्योप्यन्ये।

तत्र रूढ्योपपत्त्या च महाभूतमेव ज्योतिरित्येवं प्राप्ते । उच्यते । ज्योतिर्ब्रह्मैव । कुतः । दर्शनात् । सर्वत्र दर्शनं न्याय इति यावत् । सुषुप्तौ सर्वत्र, 'सता सौम्य तदा संपन्नो भवति । सति संपद्य न विदुः सति संपद्यामहे' इति ।

भाष्यप्रकाशः ।

हृदयत्वं सत्यपदोक्तं मर्त्याऽमृतनियामकत्वं चोत्तरवाक्यगतम् । तद्यथापि हिरण्यनिधिमित्यारभ्यैवंवित् स्वर्गं लोकमेतीति वाक्यैक्यात् । निरूपिता इति निर्णायका निरूपिताः । अतो न गतार्थतेत्यर्थः । पूर्वपक्षमाहुः तत्रेत्यादि । उपपत्त्येति । अस्माच्छरीरात् समुत्थायेत्यादिबोधितया तथा । राजशिबिराणि तीरात् समुत्थितानीत्यादौ लोके समुत्थानस्योद्गमने प्रयोगदर्शनादत्र च शरीरादुद्गमनोत्तरं ज्योतिष उपसंपत्तिबोधनात् । तस्याश्चार्चिरादिमार्गेण जीवस्य गमने अर्चिराद्यपेक्षया आदित्यादेः परत्वादिति । सिद्धान्तमाहुः उच्यत इत्यादि । सर्वत्र दर्शनमिति । समानप्रकरणे एतत्स्थाने ब्रह्मवाचकपददर्शनम् । तथा च यत्र ब्रह्मवाचकं पदमभिधीयते तस्मिन् स्थाने । अत्र ज्योतिःपदं दृश्यते अतस्तथेत्यर्थः । तदेव दर्शयन्ति सुषुप्तावित्यादि ।

रश्मिः ।

उपेति परंज्योतिरुपसंपद्य इत्यनेनोपसंपत्तव्यत्वं स्वेन रूपेणाभिनिष्पद्यत इत्यनेनोपसंपन्नेत्यादिः । पूर्वेति स वा एष आत्मा हृदि तस्यैतदेव निरुक्तꣳहृदयमिति तस्माद्धृदयमहरहर्वा एवंवित्स्वर्गं लोकमेतीति श्रुतिगतम् । हृदीत्यत्र ङेर्लुक् हृदयम् । उत्तरेति उत्तरवाक्यं तु तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति तानि ह वा एतानि त्रीण्यक्षराणि सतियमिति तद्यत्सत् तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छति यदनेनोभे यच्छति तस्माद्यमहरहर्वा य एवंवित्स्वर्गं लोकमेतीति श्रुतिवाक्यगतम् । सतीत्यत्र ङेर्लुक् सत्यम् । यमित्यत्र कर्तरि अन्येभ्योपीति यम् । यच्छादेशो दाण्धातोः । स इत्यस्य पारिभाषिकोर्थोऽमृतम् । मर्त्यं तिइत्यस्य । ननु य एष संप्रसाद इति श्रुतावेव चत्वारो धर्मा वक्तव्या इत्याकाङ्क्षायामाहुः तद्यथेति । न गतार्थतेति तथा च ज्योतिश्चरणाधिकरणे ज्योतिष्ट्वं श्रुतियुक्तिभ्यां साधितो धर्मोत्र तु उपसंपत्तव्यत्वं सिद्धप्रायं ज्योतिष्ट्वं पुरस्कृत्योच्यते इति तथेत्यर्थः । कथमस्य युक्तित्वं अत आहुः राजेति । तथा च दृष्टान्तेनोपपादनं युक्तिर्यथा श्वेतकेतूपाख्याने न्यग्रोधफलमाहरेत्यादि । न त्वन्यथाज्ञानरूपस्तर्कः । इतीति राजेत्यादिदृष्टान्ते राजशिबिराणि तीरात्समुत्थितानि स्वेष्टदेशपूर्वदेशात् महाभूतज्योतिःस्थानापन्नान्प्राप्य स्वरूपरूपस्थानीयमिष्टदेशं प्राप्नुवन्तीति । तथा च शंकरभाष्यम् । नाडीखण्डे अथ यत्रैतदस्माच्छरीरात् उत्क्रामति अथ एतैरेव रश्मिभिरूर्ध्वमाक्रमते इति मुमुक्षोरादित्यप्राप्तिरभिहितेति । समानेति इदं प्रकरणं वाजिनामतो वाजिशाखायामेतद्वाक्यं द्रष्टव्यम् । न बृहदारण्यके न छान्दोग्येऽन्यत्रैव वाक्यमिदम् । 'शब्दविशेषात्' इत्यधिकरणे स्पष्टः समानप्रकरणविचारः । तथेति ज्योतिःपदस्य ब्रह्मवाचकत्वम् । सुषुप्तावित्यादीति इमाः श्रुतयोऽष्टमप्रपाठकस्थे द्वे दशमस्यार्थोपनिबन्धनाऽपरा इत्येवं तिस्रः । अत्र सच्छब्दस्य ब्रह्मणि शक्तिः 'ॐ तत् सदिति निर्देशो ब्रह्मणः' इति गीतायाः । अत्र ब्रह्मज्योतिर्दर्शनादिति जिज्ञासाधिकरणाद् 'ब्रह्म' इत्यनुवर्त्य पक्षं ब्रह्म कृत्वा सूत्रार्थो न भवति पक्षस्य सूत्रेऽनुपादानात् । किं तु ज्योतिर्ब्रह्मदर्शनात् । ज्योतीरूपपक्षस्य सूत्रे उपादानात् । अत एव पक्षहेतूपादानकृतदोषोपि न । पर्वतो धूमादित्यप्रयोगः पर्वतस्य प्रत्यक्षत्वात् । तद्वज्ज्योतिषः शब्दप्रमाणविषयस्य पक्षत्वं दर्शनादित्युक्ते दर्शनविषयत्वादित्यर्थो भवति तदा मायाया ब्रह्मत्वापत्तिः । तद्वारणाय

अहरहर्ब्रह्मलोकं गच्छन्तीत्यादिप्रदेशेषु ब्रह्मसंपत्तिरेवोक्ता । अत्रापि संप्रसादवचनात् परं ज्योतिर्ब्रह्मैव । तस्माद् यः कश्चन शब्दो ब्रह्मस्थाने पठितस्तद्वाचक एवेति ॥ ४० ॥

इति प्रथमाध्याये तृतीयपादे एकादशं ज्योतिरधिकरणम् ॥ ११ ॥

भाष्यप्रकाशः ।

संप्रसादवचनादिति । सुषुप्तावस्थत्वबोधकादेतद्वचनात् । सिद्धमाहुः तस्मादित्यादि । अत्र जीवस्वरूपापत्तिहेतुत्वेन महाभूतरूपे ज्योतिषि प्रलयकर्तृत्वस्यातिव्याप्तिर्बुद्धिस्था निवारिता ॥४०॥

इत्येकादशं ज्योतिरधिकरणम् ॥ ११ ॥

रश्मिः ।

सर्वत्र पदं मायाया अदर्शनात् । 'नास्ति श्रुतिषु तद्वार्ता' इति निबन्धाच्छ्रुतिषु मायाया अदर्शनात् । सर्वत्र श्रुत्यादिषु इडादिशब्दानां दर्शनात्तदर्थस्य ब्रह्मत्वं स्यात्तद्वारणाय संपूर्वकपदेः समभिव्याहारे सर्वत्र दर्शनं वाच्यम् । इषे त्वेत्यादाविडादीनां तन्नास्तीति न तदर्थस्य ब्रह्मत्वम् । संपूर्वकपदेः समभिव्याहारे सर्वत्र दर्शनमुपसौम्य तदादिपदानां संभाव्येत तद्वारणाय संपूर्वकस्य पदेः समभिव्याहारे ब्रह्मस्थाने पठितस्य सर्वत्र दर्शनं हेतुः । न च भाष्यीयहेतुविघटनमिति शङ्क्यम् । तस्माद्यः कश्चन शब्दो ब्रह्मस्थाने पठितस्तद्वाचक एवेति भाष्यात् । न च स्वप्नदृष्टे हेतोः साध्याभाववद्वृत्तित्वेन साधारण्यमिति शङ्क्यम् । 'अत एव च नित्यत्वम्' इति सूत्रे वेदस्य ब्रह्मतुल्यत्वेन मिथ्यात्वाभावात् । तथा च हेतोः साध्यवद्वृत्तित्वेन न साधारण्यम् । ब्रह्मव्यतिरिक्तसृष्टौ हेतुसन्नयने वेदे इति विशेषणं देयम् । नन्वेवमपि ब्रह्मस्थाने पठितस्य सतो ज्योतिषश्च सर्वत्रादर्शनात् स्वरूपासिद्धो हेतुरिति चेन्न । ब्रह्मस्थाने पठितस्य ब्रह्मवाचकत्वस्य सर्वत्र दर्शनं हेतुरित्यर्थात् ब्रह्मवाचकत्वं तु पदभेदेपि सतो ज्योतिषश्च समानमिति न स्वरूपासिद्धो हेतुः । न च सर्वत्र दर्शनमित्येवास्तु विशेषणस्य किं प्रयोजनमिति वाच्यम् । यस्य कस्यचिद् सर्वत्र दर्शनादपि ब्रह्मत्वसिद्धेः । अतो वेदे संपूर्वकस्य पदेः समभिव्याहारे ब्रह्मस्थाने पठितस्य ब्रह्मवाचकत्वस्य सर्वत्र दर्शनादिति हेतुः साध्यतावच्छेदकसंबन्धः स्वाश्रयवाचकता । शब्दार्थयोरत्यन्ताप्रविवेके आश्रयता हेतुतावच्छेदकसंबन्धो विषयता इति न साध्यहेत्वोः अर्थवाचकशब्दोभयनिष्ठत्वं जैमिनिमतस्य व्यासचरणैः यत्र कुत्राङ्गीकारादर्थशब्दयोः पक्षत्वापत्तावपि अतिदोषो नास्ति । ननु य एष संप्रसाद इति दहरविद्यास्थेऽयं हेतुर्न गच्छति हेतोः सुषुप्तिवाक्यीयत्वात् इत्याशङ्क्याहुः सुषुप्तेति । तथा च संप्रसीदत्यस्यां चित्तमिति व्युत्पत्तेः विज्ञानेन्द्राचार्यैः कृतत्वात् सुषुप्तिः जीवे संप्रसादस्यौपाधिकतया धर्मधर्म्यभेदेनौपचारिकः संप्रसादशब्दः । एवं जीवे सुषुप्तावस्थात्व बोधकात् आकृतिशक्तिवादिमतेनोक्तम् । तथा च दहरविद्यायामपि सुषुप्तिरस्तीति हेतुर्गच्छत्येवेति भावः । अत्र स एष संप्रसाद इत्यत्र जीवः संप्रसादशब्दवाच्यः संप्रसाद इत्यत्र सुषुप्तिः संप्रसादशब्दवाच्या तदा सुषुप्तावस्थाबोधकत्वम् । तद संप्रसाद इति सप्तम्यन्तं ङेः सुः । तथा च जीवोऽस्माच्छरीरात् समुत्थाने सुषुप्तिविशिष्टः सुषुप्तौ वा उत्तिष्ठति तदुक्तं प्राज्ञेनात्मनान्वारूढ उत्सर्जद्यातीति वचने । न च मध्वभाष्ये अन्वारूढो विष्णुरिति जीवः कुतोन्वारूढ इति शङ्क्यम् । विष्णुत्वाज्जीवस्यापि । सर्वो विष्णुर्यतः परं ज्योतिरुपसंपत्तिः सुषुप्त्यनुवादिका स्वेन रूपेणाभिनिष्पद्यत इति । आत्मरूपेण ज्ञानी भक्तोपि आत्मीयाभ्यामलौकिकसामर्थ्यभगवत्सेवोपयोगिदेहाभ्यां सक्त एव निष्पद्यते ॥ ४० ॥

इत्येकादशाधिकरणम् ॥ ११ ॥

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥ (१।३।१२)

'आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म' इति श्रूयते। तत्राकाशशब्दे संदेहः। भूताकाशः परमात्मा वेति। नामरूपनिर्वाहमात्रत्वमवकाशदानाद् भूताकाशस्यापि भवतीति न ब्रह्मपरत्वम्। अन्यस्य च नियामकस्याभावादित्येवं प्राप्ते। उच्यते। आकाशः। परमात्मा। अर्थान्तरत्वादिव्यपदेशात्।

भाष्यप्रकाशः।

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥ श्रूयते इति । छान्दोग्यसमाप्तौ श्रूयते। आकाशशब्दे संदेह इति। उभयत्र प्रयोगसाधारण्यात्। श्रुतौ वैशब्दात् प्रसिद्ध्यनुग्रहेण ब्रह्मशब्दोक्त्या चोभयोर्बोधनाच्च शब्दे संदेह इत्यर्थः। अनेन बीजमुक्तम् । पूर्वपक्षमाहुः नामेत्यादि। नामरूपयोर्निर्वाहोऽविच्छेदेन चालनम्। तत्कर्तृत्वमात्रमत्र प्रतीयते, न तु कश्चिदन्यो धर्मः। तच्चावकाशदानाद् भूताकाशस्यापि संभवतीत्याकाशपदस्य न ब्रह्मपरत्वम् । न च धर्मस्य सामान्यत्वेन प्रकरणबलाद् ब्रह्मपरत्वमेव कुतो नाद्रियत इति शङ्क्यम् । प्रजापतिरुवाचेत्यस्य द्विरुक्त्या ब्रह्मप्रकरणस्य समाप्त्यवगमात्। श्यामाच्छबलमित्यादिना प्रकरणान्तरेण व्यवधानाच्च। नापि जीवपरत्वं शङ्कितुं शक्यम् । अभिसंभवानीत्यस्य द्विरुक्त्या तत्प्रकरणस्यापि समाप्तेः। आकाशपदस्य जीवे क्वापि प्रयोगादर्शनाच्च । अतोऽस्यैव धर्मस्य यद् ब्रह्मधर्मतानियामकं तदत्र किमपि न दृश्यते। न चोपसंहारगतानां ब्रह्माऽमृतात्मशब्दानां तथात्वम्। अवकाशदानकृतबृंहणनित्यत्वव्यापकत्वगुणयोगेन प्रशंसानिबन्धनया गौण्यापि नेतुं शक्यत्वात् । नापि, ते यद-

रश्मिः।

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥ छान्दोग्यसमाप्तौ इति चरमवर्णध्वंसः समाप्तिर्नास्ति नैयायिकमताभावात् । अतश्चतुर्दशानुवाकः समाप्तिपदेनोच्यते पञ्चदशानुवाको यद्यपि समाप्त्यनुवाकस्तथापि तत्र तद्धै तद्ब्रह्मा प्रजापतये उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः इति विद्यापरंपरामुक्त्वाऽऽचार्यकुलाद्वेदमधीत्येत्यादेः 'कृत्स्नभावात्तु गृहिणोपसंहारः' इति सूत्रे विषयवाक्यत्वेन भक्तिमार्गीयत्वेन दुर्लभाधिकारविषयत्वात् चतुर्दशानुवाकः समाप्त्यनुवाकः। **शब्द** इति आकाशशब्दे सति अर्थयोः संदेहः। शब्दसंदेहस्य प्रथमपादे निवारणात् द्वितीयपादे आधेयार्थसंदेहं निवार्य तृतीयपादे आधारसंदेहवारणात्। यद्वा नायं नियमो यः सर्वत्रार्थसंदेह अतः शब्दे संदेहः। **बीज**मिति आकाशशब्दरूपम्। **अन्यस्ये**ति भाष्यं विवरीतुमाहुः **न चे**ति। **धर्मस्ये**ति नामरूपयोरविच्छेदेन चालनस्य। **समानत्वेन** स्वार्थे ष्यञ् । **द्विरुक्त्ये**ति क्वचित्पुस्तके छान्दोग्ये एकवारमुक्तिर्वर्तते। **प्रकरणे**ति। जीवप्रकरणेन दहरप्रकरणेनेति यावत्। इदं त्रयोदशात्मकानुवाकेनोच्यते । अतो द्वादशानुवाकपर्यन्तमुक्तस्येन्द्रप्रजापतिसंवादस्य ब्रह्मप्राकरणिकस्य त्रयोदशानुवाकोक्तेन व्यवधानात्। **नापी**ति व्यवहितब्रह्मप्रकरणात् माभूदाकाशस्य ब्रह्मपरत्वम्। अव्यवहितजीवप्रकरणात् जीवपरत्वं तु स्यादिति शङ्कितुम्। **अस्ये**ति नामरूपयोरविच्छेदेन चालनस्य। **ब्रह्मामृते**ति तदमृतं स आत्मेति विषयवाक्योत्तरं पठनात्। **तथात्व**मिति ब्रह्मधर्मतानियामकत्वप्रकारेण । त्वं न च वदेरिति योजना। **अवे**ति बृंहणत्वाद् ब्रह्मत्वं नित्यत्वादमृतत्वं व्यापकत्वादात्मत्वमिति एकं प्रत्यक्षसिद्धं द्वयं 'आकाशवत्सर्वगतश्च नित्यः' इति गीतालभ्यम्। **प्रशंसे**ति प्रशंसया निबन्धनं कल्पनं यस्याः सा प्रशंसानिबन्धना गौणी। उपचारार्थ-

यद्भूताकाशस्य प्रयोजनं श्रुतिसिद्धं, तस्मादन्यस्य व्यपदेशः कार्यान्तरादिव्यपदेशश्च । यत्रैव हि सिद्धवत्कारेणोत्कृष्टधर्मा अतदीयास्तदेव ब्रह्मेति । नापि नामरूपनिर्वाह आकाशस्य माहात्म्यहेतुर्भवति । वै निश्चयेनेति सिद्धवत्कारान्नोपासनापरत्वम् ।

भाष्यप्रकाशः ।

न्तरेत्युक्तस्य नामरूपान्तर्वर्तित्वस्य तथात्वम् । व्यापकतयाऽऽकाशेऽपि तत्सिद्धेः । अत उपक्रमगतस्याकाशपदस्योच्चारणमात्रेण भूताकाशावगमात् स एव ग्राह्य इत्येवं प्राप्त इत्यर्थः । सिद्धान्तं व्याचक्षते । यद्भूतेत्यादि । अर्थः प्रयोजनं यद्भूताकाशस्य श्रुतिसिद्धं वायुजननं तस्मादन्यस्य व्यपदेशः । ते यदन्तरेत्यनेनोक्तस्यासमन्तात् तदन्तःस्थापनरूपस्यादिपदेन ब्रह्मत्वादेश्च यो व्यपदेशः कथनम् । तथा च, अन्तरः अर्थो यस्मादित्यर्थान्तरम् । वाऽऽहिताग्न्यादिष्विति परनिपातः । एवमत्र बहुव्रीहिणा कर्ता बोध्यते । अन्योऽर्थोऽर्थान्तरमिति नित्यसमासपक्षे लक्षणया कर्तृलाभः । तस्य भावोऽर्थान्तरत्वम् । तदादीनि । ते यदन्तरेत्युक्तं बहिःष्ठान्तःस्थापनम् ।

रश्मिः ।

सादृश्यात्मकशक्यसंबन्धरूपा गौणी तया नेतुं तद्यथा आकाशो ह वा इत्यत्र ब्रह्म आकाशं अत्र सत्यत्वादिविशिष्टसत्यत्वाद्युपचारविशिष्टा अर्था बृंहणनित्यत्वव्यापकत्वानि ब्रह्मविशिष्टानि तैः सादृश्यं ब्रह्मगतभूयोधर्मवत्त्वमाकाशे तदेवाकाशे शक्यस्य ब्रह्मत्वादिविशिष्टब्रह्मणः संबन्धः । तद्रूपा गौण्याकाश इति लक्षणसमन्वयः । यथा छत्रिणो यान्ति इत्यत्रेयम् । उपचारो लक्षणा यथाऽत्रैव शक्यस्य सत्यादेः संबन्ध आधेयता बृंहणादिनिष्ठा । तदुक्तम् 'लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता' इति काव्यप्रकाशे । तथात्वमिति ब्रह्मधर्मत्वं तु अम् । शैघ्र्यं भातीत्यर्थः । अम् शैघ्र्याल्पयोरिति मनोरमा । ते नामरूपे यद्यस्यान्तरा मध्ये इति श्रुत्यर्थः । वाय्विति । आकाशाद्वायुरिति श्रुतेः तैत्तिरीयायाः । वायुजननं प्रयोजनं फलं कार्यमिति यावत् । अन्तर आ इति छेदं मत्वाहुः आसमन्तादिति । हरिभ्यां याह्योक आ इतिवत् । छन्दसि परेपीति परनिपातः अन्तःस्थापनं बहिष्ठस्य । ब्रह्मेति तद्ब्रह्म तदमृतं स आत्मेति श्रुत्युक्तस्य । अन्तर इति । वायुजननादन्तरोऽन्यः । बहिष्ठस्यान्तःस्थापनरूपः । अर्थः कार्यं यस्मात् कर्तुः 'जनिकर्तुः प्रकृतिः' जायमानस्य हेतुरपादानं स्यात् इति पञ्चमी क्वचित् । परनिपात इति अर्थो जायमानो विवक्ष्यते । क्वचिदाहिताग्न्यादीनामाकृतिगणत्वादिति भावः । आहिताग्निः अग्न्याहितः जातपुत्र पुत्रजातः जातदन्ता जातश्मश्रुः तैलपीतः घृतपीतः ऊढभार्यः गतार्थः इत्याहिताग्न्यादयः । ननु षष्ठीसप्तम्यौ बहुव्रीहावन्यपदार्थोत्तरं कुतो नोक्ते अत आहुः एवमत्रेति । ननु नित्यसमासः कुतो न कृत इत्याकाङ्क्षायां लक्षणापत्त्या न कृत इत्याहुः अन्य इति । लक्षणयेति । शक्यसंबन्धः कार्यकारणभावः । सूत्रे भावप्रत्ययाद्भाष्ये विशेषं पूरयन्तः आहुः तस्य भाव इति भाष्यशेषपूरणाभावे आकाशोर्थान्तरादिव्यपदेशादिति पाठो ध्वन्यते । कुतः, यतोऽर्थान्तरं बहिष्ठस्यान्तःस्थापनं तस्य व्यपदेशोत्र न त्वन्तःस्थापनत्वस्येति । परं स्पष्टत्वेन पाठो न ध्वनितः त्वपदरहितपाठादर्शनात् । कार्यान्तरेति भाष्यं विवृण्वन्ति स्म तदादीनीति । कार्यान्तरं कार्यं वायुजननं तदन्यद् बहिष्ठस्यान्तःस्थापनं भावप्रधानो निर्देशः । एष तच्छब्दार्थः । अर्थान्तरत्वमिति यावत् एष तच्छब्दार्थः । तत् अर्थान्तरत्वमादिर्येषां तानि तदादीनि सामान्ये नपुंसकं यद्वा

भाष्यप्रकाशः ।

ब्रह्मादिश्रुतयश्च । तेषां व्यपदेशात् कथनादाकाशो ब्रह्मैव । नहि रूपान्तर्गतस्य निरूह्यस्याकाशस्यासंकुचितं तन्निर्वोढृत्वं संभवति न वा क्वापि श्रुतावाकाशमाहात्म्यहेतुत्वेन तदुक्तमस्ति । नाप्यसंकुचितं तयोरन्तःस्थापनं बृंहणं वा तथा । वायुजनकत्वस्यैव श्रावणात् । अत आकाशकार्यातिरिक्तकार्यकर्तृत्वादेरत्रोक्तत्वाद् ब्रह्मादिश्रुतीनां चानुकूल्यादुपसंहारस्य प्राबल्यमिति ब्रह्मैवाकाशः । स्वारसिकं च शब्दानां ब्रह्मवाचकत्वमतो न लक्षणादोषोऽपि । तेनेदं सिद्धम् । यत्रैव

रश्मिः ।

कार्यान्तरादिव्यपदेशश्चेति भाष्यस्यायमर्थः । कार्यमर्थान्तरत्वं तदन्यत् बहिष्ठान्तःस्थापनं तत्कार्यान्तरं तदादि येषामिति तदादीनि । भाष्ये चकारश्रावणात् । नन्वर्थान्तरत्वादिव्यपदेशादित्यत्र नामरूपनिर्वोढृत्वं हेतावप्रविष्टमिति न्यूनतादोषस्तद्वारणायाहुः **नहीति** । रूपप्रपञ्चः नामप्रपञ्चश्च तयोर्मध्ये रूपप्रपञ्चान्तर्गतस्य निरूह्यस्य नामरूपाभ्यां अन्य इव ऊह्यः वह प्रापणे प्राप्यस्य निर्वाह्यस्यई तर्क्यस्य वा ऊह वितर्के ऋहलोर्ण्यत् । **तन्निर्वोढृत्वं** रूपनामनिर्वोढृत्वम् । **तदुक्तमिति** निर्वोढृत्वमुक्तम् । तथेत्याकाशकार्यत्वेनोक्तम् । 'तदमृतं स आत्मा' इति श्रुतेः । विषयवाक्येनुक्तेर्बृंहणपर्यन्तमुक्तम् । **उपसंहारस्येति** आकाशो ह वा इत्यत्राकाशपदमुपक्रमे । उपसंहारे तद् ब्रह्मेति ब्रह्मपदं स आत्मेति आत्मपदं वा । तत्रोपक्रमस्य भाष्योक्तरीत्या संजातविरोधित्वेन प्रकरणादुपसंहारस्यासंजातविरोधित्वेन प्राबल्यम् । नन्वाकाशपदं वियति रूढं आकाशशरीरं ब्रह्मेति आरणे । 'आत्मन आकाशः संभूतः' इति तैत्तिरीये च तत्र ब्रह्म आकाश इत्युक्तौ शरीरशारीरकभावसंबन्धो वा कार्यकारणभावसंबन्धो वा लक्षणा वाच्येत्यत आहुः **स्वारसिकमिति** । वेदान्ते असति बाधके रूढिर्योगमपहरतीति शुगस्य तदनादरश्रवणादिति सूत्रे व्युत्पत्तेर्विशेषितत्वेन प्रकृते व्याकरणरूपाङ्गबाधरूपबाधकस्य सत्त्वात् आकाश्यते दीप्यते इत्याकाश इति योगस्य सुवचत्वेन स्वारसिकत्वम् । तथा चार्थान्तरत्वस्यादी आकाशत्वनामरूपत्वनिर्वोढृत्वे ते अर्थान्तरत्वादी अर्थान्तरत्वादी च अर्थान्तरत्वादयश्चार्थान्तरत्वादयः स्वरूपैकशेषः अर्थान्तरत्वादीनां व्यपदेशः अर्थान्तरत्वादिव्यपदेशस्तस्मादिति हेत्वर्थः । सिद्धमाहुः **तेनेति** । इदं भाष्ये व्युत्पादनं व्युत्पत्तिरिति यावत् । वक्ष्यते प्रकारभेदेन यत्रैवाकाशादौ सिद्धवत्कारेण भावे घञ् सिद्धवत्करणेन वा इत्यादिपदयोगेनोत्कृष्टनामधर्मरूपनामनिर्वाहकत्वादयः अतदीया यत्र इति निर्दिष्टाधिकरणाः संबन्धिनः तदेवाधिकरणं ब्रह्म यथात्राकाशः परमात्मा यथा च उषा वा अश्वस्य शिरः सूर्यश्चक्षुः वातः प्राणः इति अत्रैवकारेण सिद्धवत्कारोस्ति अतदीयाः अश्वासंबन्धिनः तदश्वरूपाधिकरणं ब्रह्म न हयः व्युत्पत्तौ दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणमिति द्वितीयस्कन्धान्नैवेह किं च नाग्र आसीदिति श्रुतेरिहेत्याश्रयनिर्देशादन्यविभक्त्यन्तं पदं त्यक्त्वा सप्तम्यन्तमुक्तम् । यत् सिद्धवत्कारेण उत्कृष्टधर्मा इत्यत्र प्रकाशाश्रयन्यायेनाभेदान्वयः । सूर्यः प्रकाश इतिवत् । एवं यत्प्रति सिद्धवत्कारेणोत्कृष्टधर्माः येन सिद्धवत्कारेणोत्कृष्टधर्माः यस्मा उत्कृष्टधर्माः यस्मादुत्कृष्टधर्माः यस्योत्कृष्टधर्माः इत्यत्र यल्लक्षीकृत्योत्कृष्टधर्मा इत्यादि बोध्यम् । एवकारेणेन्द्रप्रतर्दनसंवादे जीवीयधर्माः जीवे यत्रेति यत्पदवाच्यप्राणरूपाधिकरणात् अन्यस्मिन्नतदीयाः अप्राणसंबन्धिनः उक्ता इति जीवस्य व्यवहारकाले भेदेन व्यपदेशस्यांशिब्रह्मत्वापत्तिर्वार्यते । जीवस्य प्राणेतरस्य व्यवच्छेदात् । इतरव्यवच्छेद एवकारार्थः । 'प्राणस्तथानुगमात्' इत्यधिकरणे इन्द्रप्रतर्दनसंवादो व्याकृतः । सिद्धवत्कारेणेति पदं चेन्न दीयते तदा 'शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्' इत्यत्रोक्तव्युत्पत्त्या राज्ञः शंभुत्वापत्तिः

भाष्यप्रकाशः ।

सिद्धवत्कारेणोत्कृष्टधर्मा अतदीयास्तदेव ब्रह्मेति । अथ लोकदृष्ट्या विचार्यम् । तदसंगतम् । 'अदो ददाति श्वसतां पदं यन्नियमान्नभः' इति स्मृतेस्तस्यापि भगवदधीनत्वान्नामरूपनिर्वाह आकाशस्य

रश्मिः ।

तद्वारणाय सिद्धवत्कारेणेति पदम् । तथाहि चन्द्रालोककारिकेन्द्रपदघटिता कार्यान्यथा तदीयपदोक्तशंभुसंबन्धित्वस्य समदृष्टितायामभावादेव व्युत्पत्त्यसंचारे सिद्धवत्कारस्य किं प्रयोजनं स्यात् यद्वाऽऽलंकारिकाणां शंभुरसमदृष्टिर्वेदान्तिनां तस्य समदृष्टित्वेन वा शंभुसंबन्धित्वस्य समदृष्टितायामभावः ततश्च व्युत्पत्त्यसंचारे राज्ञः शंभुत्वापत्तिः सा वारिता । यतो वा इत्यादिपदानां सिद्धवत्कारबोधकानामभावोत्र । अद्य इत्यस्यास्मिन्नूहनीयत्यर्थात् न सिद्धवत्कारवाचकत्वं उत्कृष्टताधर्मेषु चेन्नोच्येत तर्हि मर्यादापुष्टस्य पुष्टत्वापत्तिः अत्रोदाहरणं किमिति चेन्न ।

'भक्तो मार्यादिकश्चैव विधर्मैरपि संगतः ।
अनुग्रहेण पुष्टः स्याद्यत्र सात्र ह्युदाहृतिः' ॥

व्युत्पत्तिसंचारे तु पुष्टत्वं स्यात् । विधर्मा ह्यनुत्कृष्टा इति व्युत्पत्त्यसंचारः । **अतदीया** इति । किमर्थमेतदर्थम् । अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्यत्र व्युत्पत्तिसंचारे प्राणस्य ब्रह्मत्वापत्तिः प्रज्ञात्मेदमिति ह्यात्मपदाद्यत्रैव प्राण एव सिद्धवत्कारेण सिद्धवत्कारवाचकः श्रौत एवकारस्तदर्थेनोत्कृष्टधर्माः प्रज्ञात्मत्वादयस्तदेव ब्रह्म । अत्र ब्रह्मपदाभावात् प्रज्ञात्मेति पदसत्त्वात् प्रज्ञात्मा । अतदीयपदस्य व्युत्पत्तौ सत्त्वे तु उत्कृष्टा धर्मा अतदीया न सन्तीत्यथ खलु इत्युक्त-प्राणस्य न प्रज्ञात्मत्वं प्रज्ञात्वमात्मत्वं च किं तु प्रज्ञारूपत्वं तथा च यत्रैवाकाशादौ हि निश्चयेन सिद्धवत्कारेण वैकारादिवाच्येनोत्कृष्टा धर्मास्ते यदन्तरा तद् ब्रह्मेत्युक्ता अतदीया अनाकाशीयाः तदेवाकाशमेव ब्रह्मेति व्युत्पत्तिसमन्वयः । **नापीति** भाष्यं विवरीतुमाहुः **अथ लोकेति** । लोकदृष्ट्यावकाशदानात् नामरूपनिर्वाहकत्वं विचार्यम् । तन्नैयायिकमते न लौकिकदृष्टित्वात्तस्य । तत्र यमस्मृतौ । **यन्नियमात्** यस्यान्तर्यामिणो नियमनात् । **श्वसतां** प्राणिनाम् । **पदं** स्थानं श्वासावकाशमिति यावत् । **भगवदिति** भगवदधीनत्वमालोच्य तस्माद्धेतोर्वा समवायिकारणे कारणैकार्थप्रत्यासत्त्या सत्ताहेतुर्नामरूपनिर्वाहः तथाहि आकाशो भूतानां छिद्रदातृत्वे सति बहिरन्तर-व्यवहारविषयत्वे च सति प्राणेन्द्रियान्तःकरणाधारत्वम् । तत्रेदं लक्षणमाधिदैविकाधिभौतिकाध्यात्मि-काकाशस्य क्रमेण । भूतानां छिद्रदातृत्वमाधिदैविकस्येत्येवं लक्षणलक्षितः जन्यश्च 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति श्रुतेः । तत्रोक्तवाक्येन भगवद्रूपसमवायिकारणनिष्ठो नामरूप-निर्वाहः 'नामानि कृत्वाभिवदन् यदास्ते', 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिभ्याम् । लक्षणसंगमनं तु कारणेन नामरूपनिर्वाहकारणेनाकाशेन सहैकार्थे ब्रह्मणि तादात्म्येन वृत्तित्वे सति कारणं नामरूपनिर्वाहस्येति । यथा घटरूपं प्रति कारणेन घटेन सह कारणस्य कपालरूपस्यैकार्थे कपाले प्रत्यासत्तिरस्तीति । न चाकाशनामरूपनिर्वाहयोः न समवायः किं तु स्वरूपसंबन्ध इति शङ्क्यम् । 'समवायाभ्युपगमात्' इति सूत्रे समवायं दूषयित्वा तादात्म्याङ्गीकारात् । तेनैव लक्षणं संगमयितव्यम् । न च समवाय्यसमवायिकारणमिति प्रतीतिविरोध इति शङ्क्यः । एतस्यास्ता-दात्म्यविषयिणीत्वात् । एतादृशरूपनामनिर्वाहो ब्रह्मनिष्ठ आकाशस्य महात्मनो भावः भूतानां छिद्रदातृत्वादिः तस्य हेतुरसमवाय्यपि न भवति निमित्तत्वेनासमवायिनोऽङ्गीकारात् । तव तु

निर्वाहस्य ब्रह्मधर्मत्वं न श्रुत्यन्तरसिद्धमिति विचारः । अर्थापत्तिसूचक-

भाष्यप्रकाशः ।

माहात्म्यहेतुरपि न भवति । न च तर्ह्युपासनार्थं तदुक्तिराकाशेऽस्त्विवति वाच्यम् । यतो, वै निश्चयेनेति सिद्धवत्कारान्नोपासनापरत्वं वक्तुं शक्यते । तस्माद् ब्रह्मधर्म एवायं निर्वाह इत्यर्थः । ननु यद्ययं निर्वाहो ब्रह्मधर्म एव, तदा, तद्धर्माधिकरणेन वा, तल्लिङ्गाधिकरणेन वा गतार्थत्वाद् व्यर्थः सूत्रारम्भ इत्यत आहुः निर्वाहस्येत्यादि । तत्रापि विशेषमाहुः अर्थापत्तीत्यादि । यद्यपि कम्पनमपि न प्रसिद्धश्रुत्यन्तरसिद्धं तथापि प्रकरणबलादुत्तरवाक्ये कम्पनहेतोर्ब्रह्मणः सकाशाद् भयस्योक्तत्वाच्च तस्य ब्रह्मकार्यत्वनिश्चयेन ब्रह्मवाक्यत्वसाधकता तस्य युक्ता । प्रकृते तु वाक्यस्यानारभ्याधीतत्वात् प्रमाणान्तराभावाच्च न कथमपि ब्रह्मवाक्यत्वसिद्धिरतोऽयमेव न्यायस्तथेत्यर्थः । नन्वस्त्वेवं तथापि पक्षनिर्देशोऽत्र न युक्तः । किं तु ब्रह्मत्वमात्रं साधनीयम् ।

रश्मिः ।

आकाशस्य माहात्म्यस्य महतः परममहत्परिमाणविशिष्टस्य आत्मनो व्यापकस्य भाव आकाशत्वं तस्य हेतुरपि न भवति अपिपदेनाकाशत्वमतः कथं लोकदृष्ट्या नामरूपनिर्वाह आकाशधर्मः । आकाशस्तु तव नित्यो निरवयवत्वेन समवायाद्यभावात् शब्दाश्रयत्वेन सिद्धश्च । वै नीति भाष्यं विवरीतुमाहुः न च तर्हीति । तदुक्तिर्नामरूपनिर्वाहोक्तिः । वा इति तथा च वै एवादिप्रयोगः सिद्धवत्कारः । तद्धर्मेति प्रथमपादेऽधिकरणे स्तः । अन्तस्तद्धर्माधिकरणेनाकाशवार्तेत्यत उक्तं न वा तल्लिङ्गेति । तत्रापीति निर्वाहस्य ब्रह्मधर्मत्वोपपादके·······पि । विशेषमर्थापत्तिसूचकत्वरूपम् । कम्पनादिति न्यायस्यार्थापत्तिसूचकत्वं कुतो नेत्यत आहुः यद्यपीति । तस्येति कम्पनस्य । वह्निमान् धूमादितिवद्युक्ता । प्रमाणेति नामरूपनिर्वाहे प्रमाणान्तराभावात् । तथेति अर्थापत्ति-सूचकत्वेन प्रकारेण वर्तत इत्यर्थः । एवकारेण तल्लिङ्गाधिकरणन्यायोपि नार्थापत्तिसाधकः । यतस्तत्र जगज्जन्मादिकर्तृत्वस्य ब्रह्मणि प्रसिद्धस्यातिव्याप्तिवारणायापि आकाशपदार्थो ब्रह्मैवेत्युक्तम् । अर्थापत्तिस्त्वेवं प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्यार्थान्तरं विना उपपद्यमानस्योपपत्तयेऽर्थान्तर-कल्पना । अत्र शब्देन प्रमितस्यार्थस्य वाक्यार्थस्यार्थान्तरमुक्तरीत्या ब्रह्मपरत्वलक्षणं विनोक्तप्रकारेणा-नुपपद्यमानस्योपपत्तयेऽर्थान्तरस्योक्तस्य कल्पनेति । अन्यथानुपपत्तिजन्याप्यर्थापत्तिर्ज्ञेयाऽग्रेधिकरणे तथोपपद्यमानत्वात् । उक्तव्युत्पत्तौ सूत्रं मानं सूत्रतात्पर्यवृत्तिरर्थापत्तौ अर्थापत्तिर्न प्रमाणान्तरं प्रत्यक्षशब्दयोरनुग्राहिका प्रत्यक्षादिप्रमितार्थज्ञानदार्ढ्यहेतुत्वात् अभ्यासादिवत् अतस्तद्गमकस्य वली-यसो भावान्न प्रमाणान्तरम् । अतोऽनुपपद्यमानार्थवाचकयोस्तात्पर्यवृत्तिरर्थान्तरकल्पने । काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातके तात्पर्यवत् । नैयायिकानां लक्षणात्र स्पष्टा त्वग्रेतनाधिकरणे भविष्यति । ब्रह्मत्वेति 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुतेः । सर्वप्रमाणातीतत्वात् । अन्येति मध्यमपदलोपी समासः । पदजन्यपदार्थोपस्थितेः कारणत्वात् । अन्यस्य वाच्यस्य वा । भाष्ये । अन्यवाच्यस्यातद्धर्मा इत्यन्वयः । यत्रेत्यस्य तद्धर्मा इत्युक्तेऽन्यवाच्यस्यानन्वयापत्तेः । यत्रेत्यस्य प्रतिपादिकासु श्रुतिषु इत्यर्थः । भाष्ये । सिद्धकथने यत्रैव हि सिद्धवत्कारेण इत्यस्यां व्युत्पत्तौ यत्राधिकरण इत्यर्थादर्थपरत्वं व्याकृतमेव । अतदीया अत्र यत्रेत्युक्ताधिकरणस्यातदीयाः ।

स्त्वयमेव न्याय इति । तस्माद् यत्रैवातद्धर्मकथनमन्यवाच्यस्य तत्रैव ब्रह्मपरत्वमिति सिद्धम् ॥ ४१ ॥

इति प्रथमाध्याये तृतीयपादे द्वादशमर्थान्तराधिकरणम् ॥ १२ ॥

भाष्यप्रकाशः ।

ततश्च वाक्यस्यापि ब्रह्मवाक्यत्वं सुखेनैव सिद्ध्येदित्यत आहुः तस्मादित्यादि । अन्यवाच्यस्येति अन्यवाचकपदवाच्यस्य । तथा चैतदर्थं पक्षनिर्देश इत्यर्थः । एवं प्रयोजनकथनेनास्य, तल्लिङ्गाधिकरणेन गतार्थता तत्प्रपञ्चत्वं च निवारितम् । अत्र चाकाशस्य नामादिनिर्वाहकत्वेन स्थितिकर्तृत्वस्यातिव्याप्तिमाशङ्क्य बुद्धिस्था सा निवारिता ।

यत्तु शिवतत्त्वविवेके, उपक्रमस्थाभ्यामाकाशश्रुतिप्रसिद्धलिङ्गाभ्यामस्य वाक्यस्य भूताकाशपरत्वेऽपि पाश्चात्यानामसंकुचितनामरूपनिर्वोढृत्वतदर्थान्तरत्वाऽमृतत्वलिङ्गब्रह्मात्मश्रुतीनां भूयस्तया प्राबल्यात् तदनुरोधेनोपक्रमप्रापितमपि भूताकाशपरत्वमपोह्य ब्रह्मपरत्वं स्थाप्यत इत्युक्तम् । तत् सूत्रविरुद्धमेव । लिङ्गभूयस्त्वस्यात्र हेतुत्वानुल्लेखात् ।

यत्तु शंकराचार्याः । ते यदन्तरेत्यस्य नामरूपे यद्भिन्ने इत्यर्थान्नामरूपाभ्यां व्यतिरिक्तमर्थान्तरं व्यपदिशतीति नामरूपव्यतिरिक्तत्वं ब्रह्मलिङ्गं हेतूकृत्यास्य तल्लिङ्गाधिकरणप्रपञ्चत्वमूचुः ।

तन्मतेऽधिकरणवैयर्थ्यमेव । निर्वाहस्य स्थितिरूपत्वेन तल्लिङ्गाधिकरणविषयवाक्यादेव

रश्मिः ।

व्युत्पत्तिसमन्वयः । यत्रैवाकाशो नामरूपयोर्निर्वहितेत्यत्रैव अन्य अन्यपदवाच्यस्याकाशस्यातद्धर्मास्ते यदन्तरा तद् ब्रह्मेत्यादयस्तेषां कथनमिति तत्रैव आकाशो ह वै नामरूपयोरित्यत्रैव ब्रह्मपरत्वमिति । एतदर्थमिति अन्यवाच्यस्येत्यर्थः । ननु पक्षनिर्देशोऽनुचितः । 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुत्या तन्निषेधादिति चेन्न भाष्येणौपनिषदपुरुषव्याख्याने तत्प्रकाशे तदनुगुणानुमानस्योचितत्वात् । 'अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरम्' इति वाक्यात् । तल्लिङ्गाधिकरणेऽस्य प्रयोजनमाकाशपदार्थो ब्रह्मेति भाष्यात् तत्रत्यादाकाशपदार्थाभेदो ब्रह्मणः अस्याधिकरणस्य तु यत्रान्यवाचकपदवाच्ये सिद्धवत्कारेणोत्कृष्टा धर्माः अतदीयाः तदेवार्थापत्त्या ब्रह्म ज्ञेयमिति प्रयोजनं तदाहुः एवं प्रयोजनेति । असंकुचितेति आकाशस्य कार्यत्वेन नामरूपनिर्वाहस्यापि कार्यत्वात् तेन संकुचितं ईश्वरे तु कारणत्वान्न तेन संकुचितमित्यसंकुचितेत्यर्थः । तदर्थेत्याकाशादर्थान्तरत्वेत्यर्थः । असंकुचितेत्यादीनाममृतत्वान्तानां लिङ्गानि ब्रह्मात्मनोः श्रुती । तानि च ते चासंकुचितनामरूपनिर्वोढृत्वतदर्थान्तरत्वामृतत्वलिङ्गब्रह्मात्मश्रुतीनाम् । तदनुरोधेनेति श्रुतिलिङ्गानुरोधेन । हेतुत्वेति न चार्थान्तरत्वादीत्यादिपदेन लिङ्गभूयस्त्वप्राप्तिरिति शङ्क्यम् । उल्लेखपदेन सौत्रहेतुतावच्छेदकानाक्रान्तत्वात् । श्रुतिलिङ्गे न लिङ्गमिति प्रतीतेः । श्रुतिलिङ्गयोः लिङ्गेनाभेदोपि न संभवति । तल्लिङ्गेति विषयवाक्यं तु अस्य लोकस्य का गतिरित्यादि आकाशः परायणमित्यन्तम् । न च निर्वाहस्य ब्रह्मधर्मत्वं न श्रुत्यन्तरसिद्धमिति भाष्यविरोध इति शङ्क्यम् । ते यदन्तरा तद्ब्रह्मेति श्रुत्या निर्वोढे नामरूपे ब्रह्ममध्ये स्तः इत्यर्थो हि अन्तःस्थापनमन्तरा न भवतीत्याशयेन ते यदन्तरेत्यनेनोक्तस्यासमन्तात् तदन्तःस्थापनरूपस्येति भाष्यप्रकाशस्य प्रणयनान्न स्थितिरूपार्थो निर्वाहस्य किं तु योगक्षेमरूपः तस्यान्तःस्थापनेन साकं जन्यजनकभावसंबन्धान्निर्वाहस्यान्तःस्थापनं लाक्षणिकोर्थ इति । न च तल्लिङ्गाधिकरणविषयवाक्यगतस्य आकाशस्थितिकर्तृत्वस्य स्थितिरूपत्वेनात्राधिकरणे चान्तः-

भाष्यप्रकाशः ।

प्राप्ततया प्रपञ्चरूपत्वस्य वक्तुमशक्यत्वात् । नामरूपव्यतिरिक्तत्वस्य स्पष्टलिङ्गत्वेनैतत्प्रणयनानावश्यकताया अपरिहाराच्च ।

भास्कराचार्योक्तमप्येतेनैव व्याख्यातप्रायम् ।

यदपि विज्ञानभिक्षुः । यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः । आकाशो वै नामरूपयोर्निर्वहिता । परमे व्योमन् प्रतिष्ठितेत्यादिषु ब्रह्मैवाकाशशब्दवाच्यं भवति । अर्थान्तरत्वादिव्यपदेशात् । अर्थस्य अन्तरोऽर्थान्तरः । तस्य भावस्तत्त्वम् । आदिपदेन नित्यत्वासंगत्वसूक्ष्मत्वादयो ग्राह्याः । तेषां व्यपदेशात् । 'आकाशवत् सर्वगतश्च नित्यः' इत्यादिषु कथनादित्याह ।

तन्मते व्यापकत्वकृतस्यार्थान्तर्वर्तित्वस्याकाशसाधारण्याद्, यावान् वेत्येतद्भिन्नेषूक्तवाक्येष्वाकाशपदेन केवलब्रह्मासिद्ध्या लिङ्गसत्त्वे च तल्लिङ्गाधिकरणेन गतार्थत्वापत्त्याऽधिकरणवैयर्थ्यमेव ।

शैवस्तु । आकाशो भूतं, जीवो, ब्रह्म वा ? इति संदिह्य, अमृतत्वादितद्धर्मव्यपदेशादित्याह ।

तदपि, यदत्ति तदमृतमिति, 'अमृताऽक्षरं हरः' इति जीवेऽप्यमृतप्रयोगात् सौत्रहेतोरयोगाच्चासंगतमेव ।

रश्मिः ।

स्थापनस्योक्तेः प्रपञ्चरूपत्वमस्त्येवेति शङ्क्यम् । विषयवाक्येऽस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायान् इत्यत्रोद्यमनास्तगमनयोर्मध्ये स्थितेः कल्पितत्वेन तल्लिङ्गाधिकरणविषयवाक्यगतस्याकाशस्थितिकर्तृत्वस्य काल्पनिकत्वेन तत्प्रपञ्चरूपस्याभावात् । तस्माद्वेदेऽक्षरमात्रस्याप्यसत्यार्थस्याभावात् वैदिकानां न संदेहोपीति भाष्यम् । सिद्धान्तसिद्धेर्थे श्रुतिः काठके ।

'अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च' ॥ इति ।

भास्करेति शंकराचार्यवदुक्तम् । **एतेने**ति स्पष्टलिङ्गत्वेनैतत्प्रणयनानावश्यकतायाः अपरिहारेण । **अर्थान्तरि**ति अर्थस्यान्तवर्तित्वस्य । **यावानि**ति अत्र दृष्टान्तदार्ष्टान्तिकयोराकाशपदप्रयोगात् एकत्राकाशस्य ब्रह्मत्वे साधिते आकाशान्तरे हेतुसत्त्वेपि ब्रह्मत्वरूपसाध्याभावाद्धा हेतोर्बाधितत्वेनैकत्र केवलब्रह्मसिद्ध्या तद्भिन्नेष्वित्युक्तम् । न च ब्रह्मत्वाभावः क्वापि नास्तीति न हेतोर्बाधितत्वमिति शङ्क्यम् । साधनसाध्यब्रह्मत्वाभावस्य विवक्षितत्वात् । तर्हि साधनसत्त्वाद् ब्रह्मत्वं साध्यतामिति वाच्यम् । आकाशत्वप्रत्यक्षेण ब्रह्मत्वाप्रत्यक्षात् । न च हेतोः साध्याभाववदाकाशान्तरे साधारण्यमिति शङ्क्यम् । इष्टापत्तेः दूषणप्रकरणात् । **आकाशो**ति आकाशपदेनोपस्थापितपक्षेऽर्थान्तर्वर्तित्वेन हेतुना केवलब्रह्मासिद्धिरनेनैव हेतुनाकाशत्वस्यापि सिद्धेः । **लिङ्गसत्त्व** इति तद्ब्रह्मेति पूर्वत्र परम इति द्वितीये लिङ्गम् । न च श्रुतित्वमिति शङ्क्यम् । आकाशो ह वा इत्यत्र परमे व्योमन्नित्यत्र च ब्रह्मपरमयोः सामर्थ्यमालोच्याकाशव्योमनी अभेदान्वययोग्ये इत्यभिधात्र्यौ श्रुती पृथक्कल्पयित्वा ब्रह्मपरमयोरभेदान्वयेऽङ्गत्वबोधनात् लिङ्गलक्षणसत्त्वात् । श्रुतेस्तु निरपेक्षस्वरूपत्वात् । हेतोः साधारण्यमाहुः **तदपी**ति । छान्दोग्ये दशमे प्रपाठके तद्यत्सत्तदमृतं,

भाष्यप्रकाशः ।

रामानुजाचार्यास्तु आकाशपदोक्तो मुक्तात्मा, परमात्मा वा ? इति संदेहे । अश्व इव रोमाणि विधूय पापमिति मन्त्रे मुक्तस्यानन्तरं प्रकृतत्वात्, ते यदन्तरेत्यत्रापि नामरूपविमुक्तस्य

रश्मिः ।

अथ यत्ति तन्मर्त्यं, अथ यद्यं तेनोभे यच्छति इति श्रुतं तत् 'अन्यार्थश्च परामर्शः' इति सूत्र उक्तम् । तत्र तिकारस्य मर्त्यत्वेपि 'य एष संप्रसादः' इत्युक्त्वा 'एष आत्मा' इति होवाचैतदमृतमभयमेतद् ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति तानि ह वा एतानि त्रीण्यक्षराणि 'स. ति. यम्' इति वाक्यमुक्त्वा तद्यत्सत्तदमृतमित्याद्युच्यतेऽतोमृतशरीरनिविष्टत्वात्तिकारोप्यमृतं न चामृतशरीरनिविष्टत्वेपि मर्त्यत्वं कथमिति वाच्यम् । मर्त्यत्वस्य तिरोभावमादाय व्युत्पाद्यत्वात् । 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः' इत्यमृतधर्मत्वात् । तेन यत्तीति भाष्यप्रकाशो न श्रुतिरूपः । अमृताक्षरमिति श्वेताश्वतरे ।

'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।
तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः' ॥

इति अभिधानं चोद्याजनं च तयोः समाहारः । जीवेपीत्यपिना हरः । तथा च जीवहरयोरमृतत्वादिसत्त्वात् साधारण्यम् । सौत्रेति न चामृतत्वादि तद्धर्मव्यपदेशादिति हेतौ अमृतत्वस्यादयोऽमृतत्वादयः । नामरूपनिर्वोढृत्वादयः अमृतत्वमादिर्यस्य तदमृतत्वादि आत्मत्वं अमृतत्वादयश्च अमृतत्वादि चामृतत्वादयः अमृतत्वादीनां तद्धर्माणां व्यपदेशः अमृतत्वादितद्धर्मव्यपदेशः इति समासात् कथं सौत्रहेतोरयोग इति शङ्क्यम् । समासस्यागतिकगतित्वात् । एककोटिस्पष्टत्वाद द्वितीयकोटिबीजं पूर्वपक्षे स्पष्टम् । अश्व इति देहलीदीपन्यायेन पूर्वापरग्रन्थहेतुत्वम् । श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व इवेत्यादिः । अत्र श्यामं अमआत् श्यामं शबलं प्रपद्ये प्रपत्तिमार्गविषयं करोमि श्यामं वर्णतः शबलं सुन्दरम् । इन्द्रियैः शबलात् सुंदराद्धेतोः श्यामं प्रपद्ये । तत्प्रपत्तिमनेकदृष्टान्तेनाह अश्व इवेति । यथाश्वो रोमाणि विधूय कम्पनेन श्रमं पांश्वादिं च रोमतोपनीय निर्मलो भवति । एवं हार्दब्रह्मज्ञानेनोपासको मर्यादाभक्तः पापविधूननश्रवणात् । शरीरं धूत्वा पापं धर्माधर्माख्यं विधूय निर्मलः सन् चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि अभिसंभवामीति अस्या अर्थः । चन्द्र इव यथा राहुग्रस्तश्चन्द्रो राहोर्मुखात्प्रमुच्य भास्वरो भवत्येवमुपासको ह शरीरं धूत्वा प्रहाय कीदृशमकृतं आत्मरूपं आत्मोपनिषदि शरीरस्यात्मत्वात् । इहैव ध्याने कृतात्मा कृतकृत्यः सन् अहं अकृतं नित्यं ब्रह्मलोकमभिसंभवामीति । द्विरुक्तिर्ज्ञानिभक्तयोर्द्वित्वात् । श्याममिति हेतुगर्भं विशेषणम् । यतो ज्ञानिनः श्यामात् ।

'अथवा शून्यवद्गाढं व्योमवद्ब्रह्म तादृशम् ।
प्रकाशते लोकदृष्ट्या नान्यथा दृक् स्पृशेत्परम्' ॥

इति निबन्धात् श्यामाद् गाढत्वात्प्रपद्यन्ते भक्तास्तु शबलाद्धेतोः गाढं शून्यवद्धातं प्रपद्यन्ते इति केवलगाढे भक्तानां प्रयोजनाभावेन गौरवाऽज्ञानमात्रेणाकाङ्क्षापूरणात् । पूर्वपक्ष्यर्थमाह ते यदन्तरिति ते नामरूपे विना यदित्यर्थः । 'अन्तरापि विनार्थे स्यात् मध्यार्थनिकटार्थयोः' इति विश्वः ।

भाष्यप्रकाशः।

तस्यैवाभिधानात्। नामरूपनिर्वाहकत्वस्य तत्पूर्वावस्थायां संभवात्। मुक्तावस्थायां ब्रह्मादि-शब्दानां संभवात्। असंकुचितप्रकाशयोगेनाकाशप्रयोगस्यापि संभवान्मुक्तजीव एवात्रोच्यत इति पूर्वपक्षे। अत्र परमात्मैव। अर्थान्तरत्वादिव्यपदेशात्। आकाशो वै नामरूपयोर्निर्वहितेति निर्वोढृत्वमत्रोच्यते। तच्चामुक्तस्य नामरूपभाक्त्वान्मुक्तस्य जगद्व्यापारराहित्यादित्येवमुभयोर्न संगच्छते। ईश्वरस्य तु, अनेन जीवेनात्मनेति, यः सर्वज्ञः सर्ववित्, तस्मादेतद् ब्रह्म नाम-रूपमन्नं च जायते, सर्वाणि रूपाणि विचित्येत्यादिषु श्रुत्यन्तं तदेवोपपादयति। ते यदन्तरेति। यद् यस्माद् अयमाकाशस्ते नामरूपे अन्तरा ताभ्यामस्पृष्टोऽर्थान्तरभूतस्तस्मात् तयोर्निर्वोढा अपहतपाप्मत्वात् सत्यसंकल्पत्वाच्च निर्वहिता। आदिपदेन ब्रह्मत्वादीनां संग्रहः। तथाचा-न्योर्थोऽर्थाऽन्तरं, तस्य भावस्तत्त्वम्। तदादीनां व्यपदेशादित्यर्थः। न च मुक्तस्यानन्तरं प्रकृत-त्वान्नैवमिति वाच्यम्। मन्त्रेऽपि ब्रह्मलोकमभिसंभवानीति परस्यैव ब्रह्मणः प्रकृतत्वादित्याहुः।

तत्र सर्वापेक्षया प्रबलां श्रुतिमतिहाय लिङ्गाद्यपेक्षया निर्बलं प्रकरणमादाय संशयो-त्थापनं चिन्त्यम्।

मध्वभाष्यव्याख्यायां जयतीर्थस्तु। ते यदन्तरेत्यस्य, यद् ब्रह्म ते अन्तरा नामरूपे विना वर्तत इति व्याख्यानं कृत्वा, नामरूपराहित्याख्यविलक्षार्थव्यपदेशात्, तद् ब्रह्मेति ब्रह्मत्वव्यपदेशाच्च। यद्वा। अर्थान्तरत्वं रूपराहित्यम्। आदिपदेनाऽनामत्वमित्येवं सौत्रं हेतुं व्याचख्यौ। तच्चानामरूपत्वं भाष्यकारैरनामासौ प्रसिद्धत्वादरूपो भूतवर्जनादिति ब्राह्म-वाक्येनोपबृंहितम्॥ ४१॥ इति द्वादशमर्थान्तरव्यपदेशाधिकरणम्॥ १२॥

रश्मिः।

तस्येति मुक्तजीवस्य। **तत्पूर्वेति** मुक्तिपूर्वावस्थायाम्। मुक्तानामवस्थायाम्। **ईश्वरस्येति** चिदचिद्वि-शिष्टस्यातो नेश्वरनिर्वोढृत्वस्य मुक्तजीव आपत्तिः। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति छान्दोग्ये। जानातीच्छति यतते इत्याहुः **य** इति। **तस्मादिति** तैत्तिरीयाणां नारायणोपनिषदि 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते' इति श्रुतम्। **ते नामेति** नामरूपे अन्तरा ताभ्यामिति तद्भाष्यम्। अत्र नामरूपाभ्यां सुपां सुलुक् इति शे नामरूपेऽतोत्र लौकिकद्विवचनस्ये-कारस्याभावान्न प्रकृतिभावः। **अस्पष्ट** इति अन्तरा निकटार्थक इति भावः। विनार्थकत्वेप्ययमर्थो भवति। **तस्मादिति** अन्यो ह्यन्ययोर्निर्वाहको भवतीति वैषम्यनैर्घृण्याभ्यां पापसंभवमालोच्याहुः **अपहतेति**। सत्यसंकल्पस्य निर्वाहहेतुत्वादाहुः **सत्येति**। व्युत्पत्तिमाहुः **तथा चेति**। प्रत्यगा-त्मनोऽन्योर्थः आकाशः अर्थान्तरम्। **तदादीनामि**त्याकाशत्वादीनाम्। **मुक्तस्येति**। अश्व इवेति श्रुतेः। **नैवमिति**। ब्रह्मवाक्यत्वं न। **श्रुतिमिति** आकाशश्रुतिम्। **प्रकरणमिति** मुक्तस्य प्रकरणं तथा च भाष्यं प्रजापतिवाक्ये च प्रत्यगात्मनो मुक्त्यवस्थान्तं रूपमभिहितमनन्तरं च विधूय पापमिति स एव मुक्तावस्थः प्रस्तुतोऽतोत्राकाशो मुक्तात्मेति प्राप्ते उच्यते आकाशोर्थान्तरत्वादिव्यपदेशादिति। प्रजापतिवाक्यं तु मघवन्मर्त्यमित्यारभ्य प्रजापतिरुवाचेत्यन्तम्, द्वादशानुवाकरूपम्। **अनामेति** अनेन प्रसिद्धत्वस्य नामरूपकरणकार्यत्वमुक्तम्। नाम्ना प्रसिद्धो भवतीति पञ्चमहाभूतवर्जनादरूपो नाकृतिकः। **एवं ब्रह्मणो**ऽक्षररूपं सुषुप्तावाविष्कृतं इति न साकारब्रह्मत्वप्रतिबन्धकमत्र पुराणमतत्वं दूषणम्॥४१॥

इति द्वादशाधिकरणम्॥ १२॥

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥ (१।३।१३)

बृहदारण्यके ज्योतिर्ब्राह्मणे, 'याज्ञवल्क्य किं ज्योतिरयं पुरुषः' इत्यारभ्य, 'अभयं॰ ह वै ब्रह्म भवति य एवं वेद' इत्यन्ते संदेहः। किं ब्रह्मवाक्यमेतदुत जीवस्येति। जीवस्य ब्रह्मत्वप्रतिपादने जीववाक्यत्वम्। स्वातन्त्र्येण ब्रह्मण एव ज्ञानकर्मत्वे ब्रह्मवाक्यत्वमिति।

भाष्यप्रकाशः।

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥ विषयवाक्यमाहुः बृहदारण्यक इत्यादि य एवं वेदेत्यन्ते संदेह इति। बृहदारण्यक इति तस्य षष्ठे प्रपाठके। अत्र, पत्यादिशब्दसूत्रात् तावदन्तं विषयवाक्यं ब्राह्मणभेदेऽपि द्विरुक्त्यर्थादिरूपवाक्यभेदकादर्शनाच्चेति ज्ञेयम्। तेन ज्योतिर्ब्राह्मणं शारीरब्राह्मणं चेत्युभयोरत्र विषयवाक्यत्वात् तत्र संदेह इत्यर्थः। संदेहाकारमाहुः किं ब्रह्मेत्यादि। तथा च वाक्यमेव संदिग्धं न तु पूर्ववद्वाक्यगतः कश्चिदेव शब्द इत्यर्थः। संदेहबीजमाहुः जीवस्येत्यादि। स्वातन्त्र्येणेति मुख्यतया। ज्ञानकर्मत्वे इति ज्ञेयत्वे। तथाचोभयथापि शक्यवचनत्वं संदेहबीजमित्यर्थः। अत्र पूर्वा कोटिः शंकराचार्यादृता बोध्या। तर्ह्युभयथा शक्यवचनत्वे कथं संदेहनिवृत्तिरित्याकाङ्क्षायामर्थज्ञानान्निवृत्तिरित्यभिप्रेत्य तत्तात्पर्यबोधकं हेतुमवतारयन्ति यद्यपीत्यादि। संदेहो ह्युभयसाधारणैः पदैस्तादृशैरवान्तरवाक्यैश्च भवति। यदा पुनस्तेषां प्रयोजनविचारात् तात्पर्यमवधार्यते तदैकतरपक्षपाते

रश्मिः।

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥ षष्ठ इति शाखान्तरेऽयं षष्ठः शंकरभाष्येपि षष्ठ-प्रपाठकः। शाखान्तरे तु चतुर्थः प्रपाठक इति ज्ञेयम्। अत्रेत्यधिकरणे। तावदिति तावत्साकस्ये उत्तरसूत्रे सर्वस्य वशीत्यादिशारीरब्राह्मणश्रुतिदर्शनात्सकलशारीरब्राह्मणस्यान्तमस्मिन् तत्। ज्योतिर्ब्राह्मणशारीरब्राह्मणयोर्भेदेपि। भेदः संज्ञाभेदात्। द्विरुक्तीति यत्रैतदूर्ध्वोच्छ्वासी भवति इति ज्योतिर्ब्राह्मणे समाप्तौ द्विरुक्तेः स यत्रायं शारीर इति शारीरब्राह्मणारम्भे। अथशब्दस्यादिपदेन स इत्यनेन अव्यवहितपूर्वपरामर्शकेनोभयोर्ब्राह्मणयोरैक्यम्। ननु कथं भेदाभेदाविति चेन्न। भेदाभेदवादस्य श्रीपुरुषोत्तमजित्कृतस्य सत्त्वात्। शारीरेति अन्यत्र तु शारीरकब्राह्मणमुच्यते। श्रुतौ तु शारीरपदम्। भेदाभेदवादापत्त्याऽन्यो भेदांशेऽभिप्रायो भाष्यस्योच्यते। भिदां 'मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति' इति भगवद्वाक्यात् भेदस्य मायामात्रत्वेन सखण्डब्रह्मवाद उपयोगात् भेदोपादानं सर्वत्रात्र त्वाचार्याणां भेदादर्शनमनुमीयते इति। अन्यथा भेदमात्रस्य ऋतेर्थे प्रतीयमानत्वं न स्यात्। अभेदे सति भेदस्य ऋतेर्थे प्रतीयमानत्वस्य क्वाप्यदर्शनात्। पूर्वेति आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म इत्यत्राकाशशब्दवत्। ज्ञेयत्व इति ज्ञानविषयत्वे। अर्थज्ञानादिति संशयनिवर्तकनैकव्यस्थानापन्नादर्थज्ञानात् सिद्धान्तपूर्वपक्षाभ्यां जायमानात्। तथा च संशयनिवृत्तिः पूर्वपक्षात्, पूर्वपक्षनिवृत्तिः सिद्धान्तात्। तेषु अर्थबोधकेषु ब्राह्मणपदवाक्येषु तात्पर्यं तत्प्रतीतीच्छयोच्चरितत्वं तस्योक्तस्यार्थज्ञानं भावयित्वैवमुच्चरितत्वं तस्य बोधकं भेदेन व्यपदेशादिति हेतुम्। पदैः आनन्दमयादिभिः अत्राकाशादिपदैरवान्तरवाक्यैः आकाशो ह वै नामरूपयोर्निर्वहितेति यदन्तरा तद् ब्रह्म इत्येवं विधैः। तात्पर्यमिति यथा तत्रैव ब्रह्मणि तात्पर्यावधारणम्।

यद्यप्यर्थज्ञाने न संदेहस्तथापि नियामकं हेतुमाह भेदेनेति । तस्यायमर्थः । किंज्योतिरयं जीव इति प्रश्ने सूर्यचन्द्राग्निवाङ्निराकरणानन्तरम्, आत्मज्योतिः । आत्मा भगवानेवास्य ज्योतिरित्युत्तरानन्तरं, कतम आत्मेति प्रश्ने,

भाष्यप्रकाशः ।

सोऽपैतीत्यर्थज्ञाने सति न संदेहस्तथापि तदेव कथं स्यादित्याङ्क्षायां विवक्षितार्थनियामकं हेतुमाहेत्यर्थः । भेदेनेति । व्यपदेशादिति पूर्वसूत्रोक्तहेत्वेकदेशोऽत्रानुवर्तते । तथाच, भेदेन व्यपदेशादित्येतावानत्र हेतुरित्यर्थः । नन्वयं हेतुर्जीवब्रह्मताप्रतिपादकवाक्यत्वाङ्गीकर्तृभिस्तत्प्रतिपादकत्वेनैवाद्रियते । तथाहि । अत्र योऽयं विज्ञानमयः प्राणेष्वित्युपक्रमे जीवलिङ्गादुपसंहारे च, स वा एष इत्यनेन तस्यैव परामर्शान्मध्ये बुद्धान्ताद्यवस्थोक्तेश्च संसार्युच्यत इत्याशङ्क्य पुनः पुनर्मोक्षप्रश्नात्तत्र तत्रानन्वागतपदस्य पुण्यपापबुद्धान्ताद्यवस्थासंबन्धराहित्यबोधकस्य प्रयोगाच्च तैर्मुक्तं तत्स्वरूपं प्राज्ञपदोक्तादीश्वराद् भेदेनोच्यत इति कथनात् । अतः कथमस्य विवक्षितार्थनियामकत्वमित्यपेक्षायां तद् व्युत्पादयन्ति तस्यायमर्थ इत्यादि । अयमिति वक्ष्यमाणरीतिकः । जीव इति श्रौतस्य पुरुषपदस्यार्थः । आत्मा भगवानिति याज्ञवल्क्यस्याशय

रश्मिः ।

एकतरेति एकतरस्य । सिद्धान्तपूर्वपक्षयोरेकतरस्य सिद्धान्तस्य पक्षपाते । स संशयः पूर्वपक्षश्च अप. आ. एति इति पदच्छेदः पूर्वं आ. एति इत्यत्र वृद्धिः पश्चादपस्य पररूपे प्राप्ते वृद्धिः । यद्वा एकारः स्मृतौ एतीति सुब्धातुः एङादौ सुब्धातौ वा पररूपमिति पक्षे वृद्धिः उपैडकीयतीतिवत् । स स्मृतिविषयो न भवति न करोति विषयतामिति वा वस्तुतस्तु स्मार्तः प्रयोगः । तेनावैहि इति वृद्धेरसाधुत्वेपि पूर्वोक्तरीत्या साधनीयः । स्मृतिस्तु 'उपैति शान्तरजसम्' इति गीताष्टमाध्याये तदेवार्थज्ञानम् । **विवक्षिते**ति भेदेन व्यपदेशो विवक्षितार्थं नियमयतीति । जीवेति शंकराचार्यैः । **स वा एष** इति 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु' इति वाक्येन । पुनरिति यदत ऊर्ध्वं विमोक्षायैव ब्रूहीति पदे पदे प्रश्नात् । **तत्र तत्रे**ति पदे पदे । पदे पदे प्रतिवक्ति । अनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवतीति भाष्यम् । अनन्वागतमसंबद्धम् । पुण्येति संबन्धराहित्यमनन्वागतपदस्यार्थ उक्तः । कैरसंबद्ध इत्याकाङ्क्षायामाहुः पुण्येन पापेन बुद्धान्ताद्यवस्थाभिरसंबद्धः । **प्राज्ञे**ति अयं पुरुषो प्राज्ञेनात्मना संपरिष्वक्त इत्यादिना । **अस्ये**ति हेतोः । तस्येति हेतोः । **श्रौतस्ये**ति किं ज्योतिरयं पुरुष इति श्रुतिसंबन्धिनः । **भाष्ये** । **इति प्रश्न** इति जनकसम्राजः प्रश्ने आदित्यज्योतिरिरिति सम्राडिति होवाचेत्युत्तरेऽस्तमित आदित्ये याज्ञवल्क्य किं ज्योतिरेवायं पुरुषः इति चन्द्रज्योतिरेवायं पुरुष इत्यादित्यनिराकरणेनैवं चन्द्रादिनिराकरणं ज्ञेयम् । **इत्युत्तरे**ति अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तायां वाचि किं ज्योतिरेवायं पुरुष इत्यात्मज्योतिः सम्राडिति होवाचेत्यन्तरानन्तरमित्यर्थः । **प्रकृते** । **याज्ञवल्क्यस्ये**ति । कुतः क्रियामात्रस्य तन्मूलत्वाय । सन्मूलाः सोम्येमाः सर्वाः प्रजाः इति श्रुतेश्छान्दोग्येऽष्टमे । इन्द्रियान्तःकरणधर्मानुकार्यार्थं च तत्रानुकरणमाहेति भाष्यात् । 'द्वा सुपर्णा सयुजा सखाया समाने वृक्षे परिषष्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति' इति श्रुतौ जीवब्रह्मणोः समानत्वेन क्रीडोक्ता तत्प्रपञ्चार्थम् । स समानः सन् जीवतुल्यः सन् क्रीडतीति भाष्यात् । अतो भगवतो ह्युभयधर्मा उच्यन्तेऽतो याज्ञवल्क्याशयोप्युक्तः । **तत्रे**ति आत्मशब्दस्य जीवभिन्नभगवद्वाचकत्वे ।

योऽयं विज्ञानमयो ज्ञानरूप इन्द्रियेषु हृदि च प्रकाशमान इत्युत्तरे, जीवोऽप्येतादृश इति तन्निराकरणार्थं स समानः सन् जीवतुल्यः सन् क्रीडतीत्याह ।

भाष्यप्रकाशः ।

उक्तः । तत्र युक्तिस्तु यदि जीवः स्वज्योतिः स्यादादित्यादिसत्तायामपि तदनपेक्ष एव पर्ययनादिकं कुर्यात् । एवं त्वादित्यादिवद् यदा भगवाननुगृह्णाति तदा तत् कुरुते, नो चेन्नेति कार्यकादाचित्कत्वरूपाऽवगन्तव्या । तस्या अनुक्तत्वादात्मज्योतिरित्युत्तरानन्तरं राज्ञा आत्मविषयकः, कतम आत्मेति प्रश्नः कृतः । स च न देहेन्द्रियप्राणान्तःकरणेष्वन्यतमस्यात्मत्वसंभावनामूलकः । सम्राट्त्वेन बहुश्रुततया तस्य तत्कोट्यनुपस्थानात् । मेधावी राजेत्यग्रे कथनाच्च । किं तु जीवब्रह्मकोटिमूलक एव । तादृशे प्रश्ने, योऽयमित्यादिनोक्तमुत्तरम् । तत्रान्तर्ज्योतिरित्यस्य तेषु प्रकाशमान इत्यर्थः । इदं च प्रकाशमानत्वं जीवस्याभिमानतया भगवतस्त्वन्तर्यामितयेत्युभयसाधारणम् । अत एतावत्युत्तरे उक्ते जीवोऽप्येतादृश इति तस्य संदेहो नापैष्यतीति

रश्मिः ।

युक्तिस्तर्कः । **पर्ययनेति** कुर्यादित्यन्तस्तर्कः । मिथ्याज्ञानं तर्क इति अन्यत्फलितम् । पूर्वं किंज्योतिरयं पुरुष इत्यत्र किं ज्योतिरस्येति किंज्योतिः व्यवहारे स्वयंज्योतिरुत परज्योतिरयं जीवः इति प्रश्ने आदित्यज्योतिः सम्राड् इति होवाचादित्येनैव ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपर्येति इत्युत्तरे पर्ययनादिकम् । अनयाऽऽदित्येन चक्षुरनुग्राहकेणास्ते गच्छति कर्म कुरुते पुनः परिवर्तते इत्युक्तम् । परि रकारस्य लकारः अय गतौ । टीकाकृद्व्याख्यानं दूषयांबभूवुः **स चेति** । याज्ञवल्क्यं प्रति जनकप्रश्नः । प्रच्छ ज्ञीप्सायाम् तु. प. अ. संप्रसारणम् । अत्र तु यजयाचयतविछप्रच्छरक्षोनङिति नङ् कर्मणि । प्रश्ने चासन्नेति ज्ञापकान्न संप्रसारणम् । ङित्वं तु यज्ञः याच्ञा यत्न विश्नः प्रश्नः रक्ष्णः इत्यत्र विश्न इत्यत्र गुणनिषेधाय । एवं च ज्ञानेच्छाविषयः प्रश्नः ज्ञीप्सार्थज्ञानेच्छाप्रकृत्यर्थः । विषयः प्रत्ययार्थः । अत्रात्मविषयो ज्ञानेच्छाविषय इत्यर्थः । भवति चात्रात्मविषयः ज्ञानमात्मविषयकं तद्विषयिण्या जनकराज्ञ इच्छाया विषयो ज्ञानमिति आत्मज्ञानं मम स्यादितीच्छा । अयं प्रश्नः बुद्ध्यादिषु कतम आत्मा इति प्रश्नः इति टीकायाम् । मूलं कारणम् । बहिति याज्ञवल्क्यसङ्गकथनात् । **तत्कोटिर्बुद्ध्यादिकोटिः** । एकस्मिन् विरुद्धधर्मज्ञानस्य संशयत्वात् । अन्यथा घटपटाविति ज्ञानस्यापि संशयत्वापत्तिः । **मेधेति** मेधा धारणावती बुद्धिः । तथा च यदि देहेन्द्रियादिषु अन्यतमः पृष्टः स्यात्तदोत्तरोत्तरोक्ताधारणेन प्रश्नान् मेधावीति विशेषणं नोच्येत । **तादृशे प्रश्न इति** । प्रश्न इत्यन्तं भाष्यं विवृतम् । सूर्यचन्द्राग्निवागात्मसु कतम आत्मा जीवसकलक्रियामूलमिति प्रश्नः । **योयमिति** योयं विज्ञानमयः पुरुषः प्राणेषु हृन्तर्ज्योतिः । **तेषु** प्राणेषु । हृन्मनस्तत्रेति न व्याख्यानं अप्रसिद्धेः । प्राणा इन्द्रियाणि तत्र मनःस्थितिः ।

'श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते' ॥

इति गीतायां पञ्चदशेपि । मनः कर्म अयमीश्वरः कर्तेति 'स मानसीन आत्मा जनानाम्' इति श्रुत्या चकारः । अपि च मानसप्रत्यक्षसंग्रहाय चकारलोपो भाष्ये ध्वनितोत्रातः प्राणेषु हृदि चान्तर्ज्योतिरिति । चकारसहिता श्रुतिर्वा गीती शीघ्रीति वाक्यात् । **इत्युत्तर** इति भाष्यं विवृण्वन्ति **स्म तस्येति** । जनकस्य श्रोतुः । **अपैष्यतीति** । अप. आ. एष्यतीति छित्त्वा पूर्ववत्साधनीयः ।

भाष्यप्रकाशः ।

तन्निराकरणार्थं स समानः सन्नित्याद्याह । एवं विज्ञानमयत्वस्य प्राणान्तर्वर्तित्वस्य च साधारण्यबोधनेन तयोर्जीवलिङ्गता निवारिता । तेनैवोपसंहारस्यापि जीवपरत्वं वारितप्रायमेव । अतःपरं स समान इत्यादेरर्थो विचार्यते । तत्र स इत्यादित्यादिवज्जीवानुग्राहकः । क्रीडा तु, उभौ लोकौ संचरति ध्यायतीव लेलायतीवेत्युक्ता । लेलायतीवेत्यस्य लोलायतीवेत्यर्थः । ओकारस्थान एकारः ।

यत्तु विज्ञायतेऽनेनेति विज्ञानं बुद्धिः । तन्मयस्तत्प्रायःप्राणेष्विति सामीप्ये सप्तमी । बुद्धीन्द्रियकर्मेन्द्रियप्राणात्मकपञ्चदशप्राणसमीपस्थो हृद्यन्तर्ज्योतिरिति लक्षणया हृदयस्थबुद्धावन्तर्वर्तमानं ज्योतिरात्मा । आत्मनैवायं ज्योतिषेत्युपक्रमात् पुरुषः पूर्णः स हृद्यन्तर्ज्योतीरूप आत्मा समानः सन् प्रकृतत्वात् सन्निहितत्वाच्च बुद्ध्या सदृशः सन्नन्योन्यधर्माध्यासे सति तप्तायःपिण्डवत् तादात्म्यमापन्नः सन्निति कैश्चिद् व्याख्यातम् ।

तन्मन्दम् । बुद्धेरत्राप्रकृतत्वेन तत्साहश्यकथनस्यासंगतत्वात् । विज्ञानमय इत्यत्र विज्ञानपदे, नित्यं विज्ञानमानन्दं ब्रह्मेति ब्रह्मवाचकत्वत्यागेन योगग्रहणे बीजाभावे बुद्धेर्ग्रहीतुमशक्यत्वात् । यद्यत्र बुद्धिरभिप्रेता स्याद् वाङ्निराकरणोत्तरं, बुद्धिज्योतिरित्यपि मध्ये वदेत् । अतोऽत्र विज्ञानमयपदे ज्ञानप्रचुरं सर्वज्ञं ब्रह्मैवाभिप्रेतम् । अनुग्राहकत्वेनात्मन एवो-

रश्मिः ।

एङि पररूपमित्यस्य न प्राप्तिः । इत्यादीति । स समानः सन्नुभौ लोकौ संचरतीत्याह । तेनैवेति साधारण्येनैव । उपसंहारस्तु स वा एष महानज आत्मायं विज्ञानमयः प्राणेष्विति । अनुग्राहक इति सकलक्रियासंपादनद्वारा । संचरतीत्यस्य क्रीडतीत्यर्थो भाष्ये उक्तः, तत्र प्रकृत्यर्थं प्रपञ्चयामासुः क्रीडेति । उभाविहपरलोकौ ध्यायतीवेत्यादौ अनुकरणं भाष्ये वक्ष्यते । आदिपदार्थस्तु बुद्धिसहित-इत्यादि भाष्येणाग्रे वक्ष्यते । अज्विकारमाहुः ओकारेति । लुल धातुः भ्वादेराकृतिगणत्वात् । यद्वा । लोलमेति गच्छतीति लोलायः एरच् । लोलायमिवाचरति लोलायति । ननु लेलीयते इत्यत्रेकारस्याकारमात्रविकारे कृते लाघवमिति चेन्न लाघवस्य वेदे अप्रयोजकत्वेन लिङ् श्लेष इत्यस्य रूपे विनिगमनाविरहात् । ये धातुशब्दा यत्रार्थे इति पत्रावलम्बनानुरोधे तु यथान्यायम् । टीकाकृद्व्याख्यानं स्वव्याख्यानपोषाय दूषयामासुः यत्त्विति । लक्षणयेति । वृत्तिवर्तकभावसंबन्धः सामान्यविशेषभावः संबन्धो वा वृत्तिमतोर्बुद्धिहृदययोः 'बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यपरोपि दृष्टः' इति श्रुतावणुत्वस्य बुद्ध्याद्युपाधिकृतत्वेन बुद्धावन्तर्वर्तमानम् । अन्योन्येति आत्मधर्माः निर्गुणत्वशान्तत्वादयः बुद्धिधर्मा आराग्रमात्रत्वादयः । अप्रकृतेति । 'योऽयं विज्ञानमयः प्राणेषु' इत्यत्र विज्ञानमयपदस्य जीवब्रह्मसाधारण्यादिति भावः । योगेति विज्ञानं बुद्धिस्तद्विकारस्तत्प्रचुरं वाऽणु जीवत्वं विज्ञायतेऽनेनेति व्युत्पत्त्या विज्ञानं बुद्धिः तत्प्रायस्तन्मय इति च । ननु 'बुद्धिर्विज्ञानरूपिणी' इति वाक्यात् । कुतो योगादरे बीजाभाव इति चेत्तत्राहुः यद्यत्रेति । मध्य इति आत्मवाचोर्मध्ये । तथा च सति करिष्यमाणो विज्ञानमयपदार्थो बुद्धितदुपाधिकात्मरूपः संगच्छेत । कतम आत्मेत्यत्रात्मोपाधिकः पृष्टः शारीरत्वात् । तत्र 'बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यपरोपि दृष्टः' इत्यत्र बुद्धेः सत्त्वात् मध्ये पाठाभावे कुतो बुद्धिः समनुवर्तेत योयं विज्ञानमय इत्यत्रेति भावः । विज्ञानेति। सप्तमी अभिव्यापकाधारे ब्रह्मणो वर्णवद्व्यापकत्वात् । अन्विति सकलक्रियासामास्ते इत्याद्युक्त-

तस्योभयधर्मा अप्युच्यन्ते क्रियामात्रस्य तन्मूलत्वाय। तत्र हि चत्वारि

भाष्यप्रकाशः ।

क्तत्वात् । तस्य चान्तर्यामितया सर्वेष्वेव प्राणेष्ववस्थानात् । हृद्ययमिति श्रुतेर्हृद्यप्यवस्थानात् । एवं च हृदीत्यत्र लक्षणापि न स्यात् । परं त्वेतेषां पदानां कथंचिज्जीवेऽपि वृत्तेस्तस्य निराकरणाय स समानः सन्नित्यादि वदतीत्येव युक्तम् । श्लेषेण परोक्षवादस्तु, स मेने न वदिष्य इति प्राथमिकाभिसंधानाद् भगवतः परोक्षप्रियत्वज्ञानाच्च । तस्मादुक्त एवार्थ इति निश्चयः। ननु यद्यत्र ब्रह्म प्रतिपाद्यं स्यात् तदा ब्रह्मधर्मा एवाग्र उक्ताः स्युर्न जीवधर्मा इत्यत आहुः **तस्योभयेत्यादि** । जीवमुख्यप्राणलिङ्गसूत्रे ब्रह्माश्रितत्वेन हेतुना जीवधर्माणां ब्रह्ममूलकत्वस्य साधितत्वात् तद्वदत्रापि जीवक्रियाणां तन्मूलत्वं बोधयितुं तद्धर्मा उच्यन्ते । भगवद्धर्माश्चोच्यन्त इति तस्यैवोभये धर्मा इति न ब्रह्मप्रतिपादकत्वक्षतिरित्यर्थः । एवं ब्रह्मधर्मकथनव्युत्पादनेन प्रकरणस्य ब्राह्मत्वं प्रतिपाद्य क्रीडां व्युत्पादयितुमुभौ लोकावित्यादेरर्थमाहुः **तत्रेत्यादि** । तत्र

रश्मिः ।

नामनुग्राहकत्वेन । एवकारेणोपाधिव्यवच्छेदः संचरतीत्यन्तस्य क्रीडतीत्यन्तं विवरणं जीवब्रह्मानेकार्थत्वाद्भवति तद्वेदान्तेऽसंगतं शारीरब्राह्मणस्याब्रह्मपरत्वादत आहुः **श्लेषेणेति** । श्लेषस्तु वाक्यशेषव्यञ्जनाभाष्यादिभिरनेकार्थप्रयोगः । यथा 'स्वर्गकामो यजेत' इत्यत्र वाक्यशेषत्वादात्मसुखं प्रसिद्धेर्लोक उच्यते यथा वा भद्रात्मनो दुरधिरोहतनोरित्यत्राभिधाव्यञ्जनाभ्यां राजगजयोर्बोधः यथा च हरिरित्युक्ते विष्णुचन्द्रयोर्बोधस्तथात्र भाष्यादनेकार्थत्वरूपः श्लेषस्तेन परोक्षस्य ब्रह्मणो वाद इत्यर्थः । **स मेन इति** स याज्ञवल्क्यो न वदिष्य इति मेने । अत्र पदयोजनान्तरेणानेकार्थरूपः श्लेषः । अनेन राज्ञा सहाहं वदिष्ये स च राजा मे याज्ञवल्क्यं वदिष्यते इति पुरुषव्यत्ययेनान्वयात् । प्राथमिकोर्थः । ननु प्राथमिकेर्थेस्तु अत्र किमागतं तत्राहुः **भगवत** इति । याज्ञवल्क्यस्य भगवतः परोक्षेत्यादि । **उक्त** इति व्यवस्थया जीवब्रह्मपररूपः । ननु परोक्षवादोऽन्यत्र निगमयितार इत्यस्य निगन्तव इति अति परोक्षवादो निघण्टव इति षड्ढू द्वर्त[१]सन्तं षड्होतेत्याचक्षते परोक्षेणेति इन्ध इत्यस्येन्द्र इति परोक्षवादोऽत्र त्वनैवमिति चेन्न परोक्षवादस्य सत्त्वात् व्युत्पत्तेः सत्त्वात् अपरोक्षं ब्रह्म तु उषस्तब्राह्मणे । कहोडब्राह्मणे च योऽशनाया पिपासा शोकं मोहं जरामृत्युमत्येतीति श्रुतेऽसुषुप्तिसामयिकमाधिभौतिकं प्रसिद्धत्वात् यः प्राणेन प्राणितीत्यादिनोक्तव्यानरहितचतुर्वाय्वाश्रयत्वमाध्यात्मिकं 'प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्' इति गीता । तेन 'दृष्टेः द्रष्टारं पश्येर्न श्रुतेः श्रोतार[१]श्रृणुयान्न मतेर्मन्तारं मन्वीथाः न विज्ञातेर्विज्ञातारं विजानीयात्' इति श्रुतेः द्रष्टृत्वादय उक्तास्तद्वत्त्वमाधिदैविकम् । यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः तन्मे व्याचक्ष्वेति सावधारणश्रुतेः । आध्यात्मिकाधिभौतिकयोस्तु यत्साक्षादपरोक्षाद् ब्रह्मेत्यसाधारणश्रुतेः । टीकायां तु यदुषस्तेन पृष्टं तदेवाहं कहोडः पृच्छामीत्येवमेवकारव्याख्या । अत्र ब्राह्मणव्यत्ययः काण्वादिपाठभेदात् । **जीवमुख्येति** इदं सूत्रं प्रथमचरणेस्ति। **तस्यैवेति** ब्रह्मणः । **तस्येति** भाष्यपदमपि व्याकृतम्। **क्रियामिति** क्रियामात्रस्य तन्मूलत्वायेति भाष्योक्ताम्। आस्ते पल्ययते कर्म कुरुते विपर्येतीति श्रुतेश्चतुर्धा । यत्तु उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणीत्युक्त्वा यद्यपि सर्वेषां कर्मणां

१. दशहूत[१]सन्तं दशहोतेत्याचक्षते।

स्थानानि । अयं लोकः परलोकः स्वप्न इति त्रयं जीवसमानतया अनुभवति । तत्र स्वप्नस्य मिथ्यात्वाद् द्वयमेव । सुषुप्तं च चतुर्थम् । जीवस्य तु मोक्षोऽपि ।

तत्रास्मिँल्लोके जीवस्यानीशित्वं प्रत्यक्षसिद्धम् । मोक्षे त्वैक्यम् । स्वप्नस्तु

भाष्यप्रकाशः ।

भगवत्क्रीडायामेतल्लोकपरलोकसंध्यसंप्रसादाख्यानि चत्वारि स्थानानि । तेष्वेतल्लोकादित्रयं जीवसमानतयाऽनुभवति । समानः सन्नुभौ लोकौ संचरतीति श्रावणात् । न च त्रयाणां सत्त्वे कथं द्वयोर्निर्देश इति शङ्क्यम् । तत्र तेषु स्थानेषु, स्वप्नस्य मिथ्यात्वात् सत्यं द्वयमेवेत्य-भिप्रायेणोभयनिर्देशात् । सुषुप्तं च चतुर्थम् । स एष तस्मिन् संप्रसादे रत्वा चरित्वेति वक्ष्य-माणाल्लिङ्गात् । जीवस्य तु मोक्षोऽपि पञ्चम इति शेषः । एषोऽस्य परमो लोक इति वक्ष्यमाण-त्वात् । तत्र समानताया भेदतन्त्रत्वात् तं सर्वत्र वक्तुं विशेषमाहुः तत्रास्मिन्नित्यादि । तत्राद्येऽ-नीशत्वाद् भेदः प्रत्यक्षसिद्धोऽतो नोक्तः । मोक्षे त्वैक्यमविभागे सत्यभेदप्रतीतिविषयत्व-

रश्मिः ।

गमनेऽन्तर्भावः कर्तुं शक्यते तथापि स्वतन्त्रेच्छमुनेः पर्यनुयोगानर्हत्वात् पञ्च कर्माणीति. मतं तेन पल्ययनेऽन्येषामन्तर्भाव इति वचस्तत्र आस्ते इत्यादिप्रयोगस्थले पल्ययते इति प्रयोगापत्तेः । न च संयोगानुकूलव्यापारस्य चतुर्षु सत्त्वादिष्टापत्तिरिति वाच्यम् । पृथगर्थधातूनां प्रयोगात् वैयाकरणमतेऽन्येषामपि धात्वर्थानां सत्त्वात् । सर्वो हि पूर्वमास्ते पश्चाद्गच्छति आगच्छति च अवान्तरक्रियाणां तिसृष्वन्तर्भावो निरुक्त उपपादितः यथा यच्च व्रजितं व्रजिष्यमाणं च यच्च मध्ये स्थितं शयितं भुक्तं तत्सर्वमेकीकृत्य वक्तारो भवन्ति व्रजति देवदत्त इति एवमास्ते इत्यादौ बोध्यम् । एवं प्रपञ्चे प्रपञ्चनिर्माणसमये स्वप्राप्त्यर्थं भक्तिमार्गनिरमासीत्तत्र क्रियामाह श्रुतिः कर्म कुरुते इति अतो भाष्ये **क्रियामात्रस्ये**ति मात्रपदम् । **तन्मूलत्वाये**ति आत्ममूलत्वाय । अयमर्थः । 'अत एव च नित्यत्वम्' इति सूत्रे वेदस्य ब्रह्मतुल्यत्वमुक्तम् । तदर्थं धर्मरूपक्रियायाः ब्रह्मतुल्यत्वं तेनैव ज्ञातव्यम् । 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' इति जैमिनिसूत्रात् । 'धर्मो यस्यां मदात्मकः' इति भगवद्वाक्याच्च ।

'कर्मणा जायते जन्तुः कर्मणैव प्रलीयते ।
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते' ॥

इत्यादिभिः साधनप्रकरणे एकविंशाध्याये कर्महैतुकवादे निष्ठात्याजनायोक्तम् । हैतुकानामाहत्य 'हेतुवादेथ हृद्रूढे ब्रह्मवादो न वाच्यकः' इति ब्रह्मवादो न वाच्य इति । अतः क्रियापि चतुष्पदा ब्रह्मतुल्यत्वात् । ते चत्वारः पादाः आस्ते इत्याद्युक्ताः तेष्ववान्तरक्रियासन्निवेशो ब्रह्मपादेषु विश्वादिषु तत्तत्पदार्थसंनिवेशवत् । अत एव पञ्चरात्रे क्रियाज्ञानमित्युक्तम् 'आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम्' इति । **उभावि**ति स समानः सन्नुभौ लोकौ संचरतीत्यत्र । **श्रावणा**दिति 'द्वा सुपर्णा सयुजा सखाया समाने वृक्षे परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योभिचाकशीति' इत्यत्र सुपर्णत्वादिना जीवे ब्रह्मानुकरणम् । 'ततो ह जातो भुवनस्य गोपा हिरण्मयः शकुनिर्ब्रह्मनाम' इत्यत्र सुपर्णत्वात् । एतैर्धर्मैः समानः । **तत्र स्वप्नस्ये**ति भाष्यमवतारयन्ति स्म **न** चेति । द्वयोर्लो-कयोः । **स्वप्नस्ये**ति स्वपिति स्वप्नः स्वपो नन् इति सूत्रेण नन् ञिष्वप् शये शीङ् स्वप्ने स्वप्नं सुप्तस्य विज्ञानं करोति इति स्वप्नः विज्ञानस्य कृत्यविषयत्वेन विज्ञानसाधनमायिकविषयं करोति उपादानतयेति । **स्वप्नस्तु मायेति** भाष्येण वक्ष्यते तस्य । **सुषुप्तं चे**ति भाष्यम् । **लिङ्गा**दिति संप्रसाद इत्यस्य

माया। अतःपरं द्वयमवशिष्यते। तत्र श्रुत्यैव भेदः प्रतिपादितः।

तत्र भगवतो जीवसाम्ये अन्तःकरणेन्द्रियधर्माः प्राप्नुवन्तीति तत्रानुकरणमाह ध्यायतीव लेलायतीवेति। बुद्धिसहितः स्वयमेव स्वप्नो भूत्वा जागरणा-

भाष्यप्रकाशः।

लक्षणमत्र, 'ब्रह्मैव सन् ब्रह्माप्येति' इति श्रुत्यैव वक्ष्यतेऽतस्तत्रापि नोक्तः। स्वप्नस्तु माया। अतस्तत्रापि नोक्तः। अतःपरं द्वयमवशिष्यते। सुषुप्तिः परलोकश्च। तत्र भेदः श्रुत्यैव। अयं शारीर आत्मा प्राज्ञेनात्मना संपरिष्वक्त इति। अयं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ इत्यनेन प्रतिपादितः। तथा च मोक्षव्यतिरिक्तेषु सत्येषु सर्वेषु स्थानेषु भेदस्य सिद्धत्वात् तस्यैव जीवे ब्रह्मतानिरासकतया विवक्षितार्थनियामकत्वमित्यभिप्रेत्याचार्यः सुषुप्त्युत्क्रान्त्योरित्याहेत्यर्थः। एवं विशेषं बोधयित्वा इह लोके क्रीडाप्रकारमाहुः तत्रेत्यादि। तथा चेह लोकेऽनुकरणेन क्रीडेत्यर्थः। इदं चावतारदशायामपि पुराणेषु तत्र सिद्धम्। चेरतुः प्राकृतौ यथेत्यादौ च। स्वप्ने क्रीडाप्रकारमाहुः बुद्धीत्यादि। अयं च, सधीः स्वप्नो भूत्वेत्यादेरर्थः। तथा च तत्र

रश्मिः।

लिङ्गात् संप्रसादः सुषुप्तिः। **जीवस्येति** तु भाष्यम्। एष मोक्षोऽस्य जीवस्य। सर्वत्र इति अवस्थासु। भेदाभेदवादस्यैतत्कृतस्य सत्त्वात् भाष्याभिप्रायमाहुः **तत्राद्य** इति। **अत्रेति** मोक्षे। 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतात्रयोदशाध्याये ब्रह्मनिरूपणे। **तत्रापीति** मोक्षेपि भेदो **नोक्तः**। **स्वप्न** इति। इदमपि भाष्यम्। **अतः परमिति** भाष्यं द्वयमेतद्व्याकुर्वन्ति स्म **सुषुप्तिरिति**। **तत्र श्रुत्येति** भाष्यं विवृण्वन्ति स्म **तत्र भेद** इति। **विवक्षितेति**। जीवभेदेन ब्रह्मरूपार्थनियामकत्वम्। अत्रोत्क्रान्तिः परलोको व्याकृतः। **विशेषमिति** जीवाद्भेदलक्षणं विशेषम्। **अनुकरणेनेति**। ननु जीवो ब्रह्मानुकरोति न तु ब्रह्म जीवमिति चेन्न। नात्रानुकृत्यधिकरणानुसारि भाष्यं किं तु 'जीवमुख्यप्राणलिङ्गात्' इति सूत्रानुसारि तत्र प्रथमवर्णके जीवधर्माणां जीवद्वारा भगवद्वृत्तिरुक्तैव अन्तःकरणेन्द्रियधर्माणामनुकरणेनेत्यर्थात् 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्' इति गीतात्र। **पुराणेष्विति** श्रीभागवतब्रह्मवैवर्तपद्मविष्णुपुराणेषु तत्र श्रीभागवते एकादशाध्याये दशमस्कन्धे।

'तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ।
सप्रातराशौ तौ वत्सांश्चारयन्तौ विचेरतुः'॥

इति वत्सपालकत्वादि जीवानुकरणम्। तत्र पुराणान्तरे श्रीरघुनाथजितः पुरुषोत्तमसहस्रनामटीकायाम्।

'सूर्यकोटिसमप्रभः। सुधाकोटिस्वास्थ्यहेतुः कामधुक् कोटिकामदः।
समुद्रकोटिगम्भीरस्तीर्थकोटिसमाह्वयः। सुमेरुकोटिनिष्कम्पः'।

इति। एवमन्यत्र। **चेरतुरिति** इदं दशमस्यैकादशाध्यायेस्ति। आदिपदेन।

'चकोरक्रौञ्चचक्राह्वभारद्वाजांश्च बर्हिणः।
अनुरौति स्म सत्त्वानां भीतवद्व्याघ्रसिंहयोः'॥

इत्यस्य दशमद्वादशोक्तस्य संग्रहः। तथा चेश्वरो ध्यायतीव लेलायतीव। **अयमिति सधीः स्वप्नो भूत्वेमं** लोकमतिक्रामतीति श्रुतिः स ईश्वरः धिया सह स्वप्नः सुप्तविज्ञानं भूत्वा विषयस्तु माया

नुसंधानं न करोति । एवं जाग्रत्स्वापौ ब्रह्मणो लोकद्वयं जीवस्य स्थानत्रयमाह स वा अयमिति कण्डिकाद्वयेन । स इति पूर्वप्रक्रान्तो जीवः । जीवस्य शरीरेन्द्रि-

भाष्यप्रकाशः ।

मायारूपेण जागरणाननुसंधानरूपा जीववत् क्रीडेत्यर्थः । एवमुभयत्र भगवत्क्रीडामुक्त्वा, स वा अयं पुरुष इति, तस्य वा एतस्य पुरुषस्येति कण्डिकाद्वयस्यार्थमाहुः जीवस्येत्यादि । पूर्वप्रक्रान्त इति । किंज्योतिरयं पुरुष इति प्रश्ने प्रक्रान्तो न तु, स समान इत्यत्रोक्तः । अयमितीदमा प्रत्यभिज्ञानात् । कण्डिकाद्वयसिद्धमर्थमाहुः जीवस्येत्यादि । दुःखदातृत्वं च पाप्मपदाज्ज्ञेयम् । तथा चैतद्बोधनेनानीशत्वख्यापनार्थमेतत्कण्डिकाद्वयकथनमित्यर्थः । अथ

रश्मिः ।

'न तत्र रथा न रथयोगा न पन्थानः' इति श्रुतेः 'सन्ध्ये सृष्टिराह हि' इत्यत्र वक्ष्यन्ति । इमं लोकमिन्द्रियैर्विषयग्रहणं जाग्रदवस्थारूपमतिक्रामति तस्यानुसंधानं न करोति स्वतन्त्रत्वात् । अत्र सुप्तस्य विज्ञानं धीः 'बुद्धिर्विज्ञानरूपिणी' इति वाक्यात् । तत्प्राप्य । भुङ् प्राप्तौ भ्वा. आ. से. इडभावश्छान्दसः । अनिड्धातुसत्त्वे नास्य प्रयोगः इति चेद्भूसत्तायामित्यस्यैवास्तु । विज्ञानस्य सत्तां कृत्वा इत्यर्थः । एतदाशयेनाहुः तथा चेति । जागरणस्याननुसंधानं यत्र स्वप्ने एतदुक्तिस्तु स्वप्नसृष्टेर्मिथ्यात्वाद्भगवांस्तान्न पश्यतीति अक्रीडासाधनमिति जीवद्वारा पश्यतीति जीववत् क्रीडेत्यर्थः । स्वप्नसृष्टेः मायोपादानकारणं ईश्वरः कर्तेति 'ऐन्द्रजालिकपक्षेपि तत्कर्तृत्वं नटे यथा' इति निबन्धात् । एवमिति भाष्यार्थमुपनिबबन्धुः एवमिति । उभयत्रेति जाग्रत्स्वप्नयोः । स्वापः शयनं स्वप्न इति यावत् । अज्ञानपात्रकरूपोर्थो ध्वन्यते स्वप्नस्थाने स्वापपददानेन भाष्ये 'स्वापः स्पर्शाज्ञतानिद्राशयनाज्ञानपात्रकः' इति विश्वात् । लोकद्वयमिति भाष्ये जाग्रद्दर्शनं लोकृ दर्शने इति धातुपाठात् स्वापस्तु लोको मायारूपभासात् । लोकृ भासेऽर्थविशेषे चेति । स वा अयमिति । स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः संसृज्यते स उत्क्रामन् म्रियमाणः पाप्मनो विजहातीति । तस्य वा इति । तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं संध्यं तृतीयꣳस्वप्नस्थानं तस्मिन् संध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानं चेति । जीवस्येत्यादीति । भाष्ये । स्थीयतेऽस्मिन् इति स्थानम् । प्रक्रान्त इति । योयं विज्ञानमयः प्राणेषु इति प्रक्रान्तः । अयमिति । स वा अयमित्यत्रायमित्यादिः । न च स समान इत्यस्य प्रत्यभिज्ञानमिति शङ्क्यम् । अस्य ब्रह्ममात्रवाक्यत्वात् । पाप्मेति पाप्मपदाज्ज्ञेयमिति स्मार्तः प्रयोगः तेन 'स्तोः श्चुना श्चुः' इत्यस्य न प्राप्तिः 'झलां जशोन्ते' इत्यस्य सपादसप्ताध्यायीस्थत्वेन त्रिपादीस्थस्य स्तोः श्चुना श्चुरित्यस्याप्राप्तेः 'झलां जश् झशि' इत्यस्य त्रिपाद्यामपि स्तोः श्चना श्चुः इत्यस्मात् परत्वेन तत्प्रति तस्यासिद्धत्वात् । तेन पाप्मपदाज्ज्ञेयमित्यत्र स्तोः श्चुना श्चुरिति प्रापयित्वा झलां जश् झशीति प्रापणीयम् । इति तयोस्त्रिपादीस्थत्वेन 'झलां जशोन्ते' इति सूत्रं प्रत्यसिद्धत्वात् । एतस्य त्रिपादीस्थत्वे पूर्वत्वात् । त्रिपाद्यामपि पूर्वं प्रति परशास्त्रस्यासिद्धत्वात् । अनीशेति तत्रास्मिन् लोके जीवस्यानीशित्वं प्रत्यक्षसिद्धमिति भाष्यात् । भाष्ये पूर्वप्रक्रान्त इति पाठे वर्णागमः । अग्निवाक्यत्वेन वेदतुल्यत्वात् । दुःखदातृत्वं तु पाप्मभिः 'पाप्मभिः संसृज्यते' इति श्रुतेरिति पाप्मपदाज्ज्ञेयमित्यनेन भाष्यप्रकाशेनोक्तम् । तत्र दुःखदातृत्वं कर्मानुरोध्यात्मनः इति ज्ञेयम् । पाप्मानस्तु कर्मानुरोध्यात्मेच्छया ब्रह्मात्मके जगति सुखवत्यपि ईर्ष्यासूयामत्सरादिरूपाः तैर्दोषैः मलिनीकृते चित्ते सुखं दुःखायत इति स्मरितें

याणां दुःखदातृत्वमेव। अथेति भगवच्चरित्रम्। स तु स्वस्यानन्दं जीवस्य दुःखं च पश्यति।

भेदोऽथशब्दात्। जीवस्यानीशित्वात् येन प्रकारेणायं जीवः परलोके गच्छति तमुपायं भगवानेव करोति।

भाष्यप्रकाशः ।

यथाक्रममित्यादेरर्थमाहुः अथेतीत्यादि । चरित्रस्य स्वरूपमाहुः स त्वित्यादि । तदुक्तम्, अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दाँश्च पश्यति स इत्यन्तेन। श्रुत्यर्थस्तु, अथेति भिन्नप्रक्रमे । यथाक्रमः । आक्रमत्यनेनेत्याक्रम आश्रयोऽवष्टम्भो विद्याकर्मपूर्वप्रज्ञालक्षणो यादृश आक्रमो यस्यासौ यथाक्रमः। अयं जीवः परलोकस्थाने भवति। परलोकस्थाने प्राप्तव्ये सति यादृशविद्याकर्मपूर्वप्रज्ञायुक्तो भवति तमाक्रमं विद्यादिलक्षणमाक्रम्यावष्टभ्य । उभयान् एतस्यैव व्याख्यानं, पाप्मन आनन्दाँश्चेति । पश्यति स परमात्मेति। तथा च जीवस्य क्वचिद् विद्यया परलोकः, क्वचित् कर्मपूर्वप्रज्ञाभ्याम्। भगवाँस्तु तत्तदन्तर्यामितया लोकान्तर्यामितया च तत्तन्नियमयन् स्वस्यानन्दं जीवस्य दुःखं च सुखं च पश्यतीत्येषा परलोके जीववत् क्रीडेत्यर्थः। नन्वस्यां कण्डिकायां भगवच्चरित्रमेवोच्यत इत्यत्र किं गमकमत आहुः भेदोऽथशब्दादिति। तथा च क्रमभेद एव गमक इत्यर्थः। तत्र यत् सिद्धं तदाहुः जीवस्येत्यादि। तथा चैषा द्वितीया तत्रत्या क्रीडेत्यर्थः।

यत्रायं प्रस्वपितीत्यारभ्य, न प्रतिपद्यत इत्यन्ते यत् सिद्ध्यति तदत्र न प्रदर्शितमतः प्रदर्श्यते। यत्रायं प्रस्वपिति। यत्र स्थाने अयं जीवः प्रस्वपिति निद्राति, तत्र जीवस्य स्वामात्रु-

रश्मिः ।

शर्करा यथा कटुरसायते मिष्टापि तथा। तदुक्तं वाराहे चातुर्मास्यमाहात्म्ये चतुर्विंशेऽध्याये ।

'असूयेर्ष्यादिदोषाणां संसर्गान्मलिनीकृते ।
सुखं दुःखायते चित्ते ज्वरिते शर्करा यथा' ॥ इति ।

अथ यथेति। पूर्वमुक्तां श्रुतिं वक्तुमाहुः **तदुक्तमिति**। कण्डिकाद्वयानन्तरमेवोक्तं भगवानवष्टभ्येत्यवष्टभ्येत्यस्य कर्ता तथा च भगवान् आक्रमं कृत्वेत्यर्थः 'कर्ता कारयिता हरिः' इति वाक्यात्। ननु 'एष उ एव' इति श्रुत्यावष्टभ्य इत्यस्य कारयित्वेत्यर्थ इति चेन्न जीवस्यानीशित्वादित्यग्रेतनभाष्यात् । **भगवांस्त्विवति** अत्र नश्छव्यप्रशानिति सूत्रेण रुः, विसर्गः सत्त्वम्. अनुस्वारागमः भगवांस्त्विवति पाठः । **तत्तदिति** जीवपृथिव्याद्यन्तर्यामितया । **जीवस्येत्यादीति** ईशनमीशः नेशनमनीशः अनीशोऽस्यास्तीत्यनीशी तृतीयाध्यायद्वितीयपादे पराभिध्यानसूत्रे वीर्यतिरोभावात्सर्वदुःखसहनमिति भाष्यात् भगवानेवेत्येवकारस्तु परात्तु तच्छ्रुतेरिति द्वितीयाध्यायसूत्रात्। तथा च जीवस्य क्वचिदिति भाष्यप्रकाशस्य कर्मपूर्वप्रज्ञाभ्यामित्यस्याग्रे तत्र जीवस्य कर्तृत्वं भगवत्संबन्धादेव भगवत्संबन्धस्तु अन्तर्यामिणोऽधिदैवादिनिष्ठस्य संबन्धादित्याहुरिति शेषं पूरयित्वा भगवांस्त्विवति योजनीयम्। **यत्रायमिति** तत्र यत्रायं प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति । न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते न तत्रानन्दाः मुदः प्रमुदो भवन्ति अथानन्दान् मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति अथ वेशान्तान् पुष्करिणीः स्रवतीः सृजते स हि कर्तेत्यन्तस्य यत्र स्थान इत्यारभ्य निश्चय इत्यन्तग्रन्थेनार्थानाहुः

भाष्यप्रकाशः।

भवप्रकारं वक्ष्यँस्तद्धेतुभूतं भगवत्स्वापप्रकारमाह। अस्य जाग्रदवस्थायामनुभूयमानस्य लोकस्य, सर्वावतः सर्वपदार्थयुक्तस्य, मात्रां वासनात्मकमंशमुपादाय गृहीत्वा स्वयं भगवान् विहृत्य वासनाग्रहणे ज्ञानस्य स्थूलरूपतिरोभावाज्जाग्रद्देहं निःसंबोधं कृत्वा स्वयं निर्माय वक्ष्यमाणप्रकारेण नानापदार्थनिर्माणं कृत्वा, तत्र करणं स्वेन भासा स्वधर्मात्मकेन ज्ञानेनेति स्वेन ज्योतिषा प्रस्वपिति, अलुप्तदृक्स्वभावेन स्वरूपेण, 'स सर्वधीवृत्त्यनुभूतसर्वः' इत्यत्र स्वप्नजनेक्षितैकपदव्याख्यानव्युत्पादितया रीत्या सर्वं स्वाप्निकं विषयीकुर्वन् प्रस्वपितीति प्रकार उक्तः। अतःपरं जीवस्य तत्प्रकारमाह अत्रायमित्यादि। अत्रास्मिन् भगवत्स्वापे, अयं पुरुषो जीवः स्वयंज्योतिर्भवति। भगवज्ज्योतिषा स्वप्नमनुभवन्नात्मज्योतिर्भवतीत्यर्थः। ननु दृश्यानां बहिःष्ठत्वात् स्वप्नेऽन्तस्थः किं पश्यतीत्याकाङ्क्षायां स्वाप्नसृष्टेर्भिन्नत्वाय तत्र भगवत्कृतां सृष्टिमाह न तत्र रथा इति कण्डिकया। अत एव, स हि कर्तेत्युक्तं न त्वयं कर्तेति। किं च, स्वप्नेऽपि सर्वपदार्थान् प्रति न जीवस्य कर्तृत्वं प्रतीयते। सिद्धवदेव बहूनां प्रत्ययात्। स्वदुःखजनकपदार्थं प्रति स्वकर्तृत्वस्यासंगतत्वाच्च। अत्राप्यग्रे, घ्नन्तीव जिनन्तीवेति श्रावणाच्च। तस्माद् भगवानेव स्वप्नसृष्टिकर्तेति निश्चयः। इममेवार्थं श्लोकैः संगृह्याह तदप्येते श्लोका इति। तत् तत्र पूर्वोक्तेऽर्थेऽपि, एते वक्ष्यमाणाः श्लोका मन्त्राः सन्तीति शेषः। तानाह स्वप्नेनेति स्वप्नेन मायिकेन रूपेण शारीरं जीवमभिप्रहत्य तिरस्कृत्य असुप्तः स्वयं, सुप्तान् प्राणादीन् अभिचाकशीतीति प्रकाशयति।

रश्मिः।

तद्धेत्विति। जीवस्यानीशत्वादिति भावः। **सर्वपदे**ति सर्वपदे दीर्घ आर्षः अथ वा सर्वा व्यक्तयो विद्यन्तेऽस्य यस्येति व्युत्पत्तौ मतुप् मतुपो मस्य वः। सर्वावत्त इति पाठे सर्वेषामवदत्तः स्वयम्। 'अच उपसर्गात्तः' इति सूत्रेण 'दा' इत्यस्याकारस्य तकारः। **वासने**ति कर्मभिः पृथक् ताः कर्मभिरेवोक्ताः सप्तमस्कन्धनिबन्धेऽतिस्फुटाः। **उपादाये**ति अपादायेत्यपि पाठः। अर्थस्त्वयमेव। **स्वयमिति**। स हि सर्वकर्तेति श्रुत्युक्तः स्वयं कर्ता। **तत्र करण**मिति तत्र वक्ष्यमाणस्वापे नानापदार्थनिर्माण इति नार्थः। तत्र मायायाः करणत्वात्। स्वप्नस्तु मायेतिभाष्यात्। स्वं भासा माया वा ज्ञानकाशत्वात्। तदा तत्रेत्यस्य नानापदार्थनिर्माण इत्यर्थः। अर्थमाहुः **अलुप्ते**ति। **रीत्ये**ति सर्वस्य मिथ्यात्वाद्भगवानेव पश्यतीति। नेन्द्रियादिः गोलकस्य मिथ्यात्वात्। तदभाव इद्रियाणामसामर्थ्यात्। **तत्प्रकारमिति** स्वप्नप्रकारं जीवस्य साक्षित्वेनावस्थानरूपम्। **आत्मज्योतिरि**ति भगवज्ज्योतिः तेन जीवः साक्षी। **अन्तःस्थ** इति देहान्तःस्थः। **तत्रे**ति स्वप्ने। भगवत्कर्तृकां न तु भगवदुपादानिकाम्। **स हीति** स भगवान्। **न त्वयमिति**। अयं श्रुतिभिः शाब्दप्रत्यक्षविषयोऽभिन्ननिमित्तोपादानरूपः अयं जीवो वा। आत्मत्वाज्जीवस्य कर्तृत्वम्। **असंगते**ति इष्टसाधनताज्ञानस्य प्रवर्तकत्वात्। अदृष्टद्वारेति चेन्न ईश्वरस्यादृष्टसंबन्धापत्तेः। **स्वप्नेने**ति स्वप्नेन शारीरमभिहत्यासुप्तः सुप्तानभिचाकशीति। शुक्रमादाय पुनरैति स्थानं हिरण्मयः पौरुष एकहंस इति मन्त्रः। एकहंसपदार्थमाहुः **एक** इति। एके मुख्यान्यकेवलाः इति कोशः। **सुप्ते**ति सुप्तो जीवादिः तेन तिरस्कृतान् जाग्रत्पदार्थान्। हसतीति हंसः न वर्णागमः। पचाद्यच् गमनरूपार्थासंगतेर्न हन्ति गच्छति हंसः वृत्रवदिहनीति सः। यद्वा अचि 'भवेद्वर्णागमाद्धंस' इति सकृ। नापि टीकाकृद्व्युत्पत्तिः। हिनस्ति वेति हिंसार्थकत्वमादृत्य। नश्चापदान्तस्य झलीत्यनुस्वारः न हि परमात्मा सुप्ततिरस्कृतान् गच्छति अनु-

भाष्यप्रकाशः ।

शुक्रं शुद्धं स्वप्रकाशितं जीवमिन्द्रियादिकं चादाय पुनरैति आगच्छति । स्थानं जाग्रल्लोकं हिरण्मय आनन्दमयः, पौरुषः पुरुषः, पुरुषस्य जीवस्य सखा । एकहंसः । एको मुख्यः सन् सुप्ततिरस्कृतान् हसतीत्यर्थः । अन्यदपि स्वाप्नं विशेषमाह प्राणेनेति । प्राणेन पञ्चवृत्तिना आसन्येन, अपरं निकृष्टं स्थूलं कुलायं नीडं शरीरं रक्षन् मरणशून्यं कुर्वन् अमृतः । पञ्चम्याः स्वादेशः । अमृतात् कुलायाद् बहिर्बुद्धिसंपर्करहिते देशे चरित्वा स्वाप्नं भोगं कृत्वा तत्कौतुकं दृष्ट्वेति यावत् । सः परमात्मा, यत्र कामम् । लिङ्गमशिष्यम् । यत्रेच्छा तत्र, अमृतः, अमरणधर्मा ईयते गच्छति । हिरण्मय इत्यादिकं पूर्ववत् । यत्र काममिति विवृणोति । स्वप्नान्ते इति स्वाप्नान्ते स्वप्नदेशे । ईयमानः प्राप्नुवन् । शेषं स्फुटम् । रूपाणि देव इत्यादेः प्रदर्शितस्वप्नकथनस्य प्रयोजनं स्वयंज्योतिष्ट्वसमर्थनमित्यभिप्रायेणाह आराममिति । आराममारमणं क्रीडेति यावत् । अत्र यदि जीवः कर्तृत्वेनाभिप्रेतः स्यात् तदा, आरामं स्वस्य पश्यन्ति न स्वं पश्यति कश्चनेति श्रुतिर्ब्रूयात् । तं कश्चनेति कर्मकर्तृभावं च न ब्रूयात् । एवं क्रीडां बोधयित्वा तस्या दुर्ज्ञेयत्वाय जागरणं निषेधति तदित्यादि । तत् तस्मात् को वेद तस्मिन् समये भगवान् किं प्रदर्शितवानिति ज्ञानाभावात् कारणात् । आयतं गाढसुप्तं, न बोधयेत् । न जागरयेत् । तत्र हेतुः इत्याहुरित्यादि । इति एवं वक्ष्यमाणं चिकित्सका आहुः । दुर्भिषज्यं दुश्चिकित्स्यत्वमस्मै सुप्ताय भवति । यदि बोधयेत् । यं देशमयं पश्यन् स्थितस्तमेष न प्रतिपद्यते, न प्राप्नोति । अत्रोदाहरणं बाणदुहिता ऊषा

रश्मिः ।

संधानात् । नापि हिनस्ति नित्यत्वाज्जाग्रत्पदार्थानाम् । न चेदं व्यत्ययो बहुलमिति सूत्रस्य प्रपञ्चभूताः सर्वे विधयः छन्दसि विकल्पन्ते इति परिभाषा तस्या अविषयं प्रतिपद्यते येन वृतृवदीत्यादिसूत्रस्या-लौकिकस्य विषयो भवेत् न त्वेवमतोऽङ्गभूतसूत्रानुरोध्यर्थं त्यक्त्वा कुत उत्सूत्रं व्याख्यानमिति वाच्यम् । अग्रे हंसपदेऽस्य सूत्रसंचारोस्तीति निरवकाशत्वाभावात् । धातूनामनेकार्थत्वाच्च । न च सूत्रेण हन्तेः प्राप्तिः हसतेः प्राप्तिः कुतः इति वाच्यम् । जक्षद्धंस इत्युत्तरवाक्येऽन्वयेन जक्ष्यर्थस्य हसनस्यार्थासंगतेर्हेतोः पूर्ववाक्येपि सत्त्वात् नाकस्मिकत्वम् । जक्षभक्षहसनयोरिति । प्राणेनेति

'प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा ।
स ईयतेऽमृतो यत्र कामं हिरण्मयः पौरुषः एकहंसः' ॥

इति मन्त्रः । स्वादेश इति सुपां सुलुगिति सूत्रेण । लिङ्गमिति लिङ्गं काममित्यत्र नपुंसकमाक्षेप्यम् । अशिष्यमशिष्टं न शासितमिति यावत् । कामपदार्थमाहुरिच्छेति । कमु कान्तौ कान्तिरिच्छा । स्वप्नान्त इतीति ।

'स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि ।
उतेव स्त्रीभिः सह मोदमानो जक्षदुत वापि भयानि पश्यन्' ॥ इति मन्त्रः ।

स्फुटमिति जक्षभक्षहसनयोः रु. प. से. शता जक्षतीति जक्षत् । अत्रार्थासंगतेरभावात् हन्तीति हंसः यत्रेच्छा तत्र गमने वराहवद्धिनस्त्येवेति विकल्पेन लौकिकसूत्रस्य प्रवृत्तिः । आराममिति 'आराममस्य पश्यन्ति न ते पश्यन्ति कश्चन' इति स्वयंज्योतिष्ट्वं स्वतन्त्रज्योतिष्ट्वं तत्समर्थनमाहुः अत्रेति । पश्यतीति । जीवा इति वचनव्यत्ययेनान्वयो न तु जना इत्यध्याहारेणेति ज्ञेयम् । तमिति आत्मानम् । न ब्रूयादिति कर्मकर्त्रोरेकत्वान्माया तदास्तीति चेन्न ईश्वरस्य मायासंबन्धापत्तेः । बुद्धिरिति चेन्न मायिकीत्वात् । जागरणमिति जागरणे तस्य तस्या अदुर्ज्ञे-यत्वात् । तदिति तन्नायतं बोधयेदित्याहुः दुर्भिषज्य᳚हास्मै भवति यमेष न प्रतिपद्यत इति मन्त्रः ।

अथो खल्विति भगवतो न जागरितस्वप्नभेदोऽस्तीति पक्षः। परं स्वयज्योतिष्ट्वं तत्र स्पष्टम्। एतावद्दूरे भगवच्चरित्रमङ्गीकृत्य जीवविमोक्षार्थं प्रश्नः। स वा एष इति जीववाक्यम्। तस्य सहजः सङ्गो नास्तीति स्वप्नसङ्गाभावं

भाष्यप्रकाशः ।

ज्ञेया। एवं भगवतः स्वप्नमङ्गीकृत्य स्वयंज्योतिष्ट्वं साधितम् । अतःपरं भगवतः स्वप्नमनङ्गीकृत्य तथात्वं साधयतीत्याहुः अथो इत्यादि। तथा च मतान्तरतयोल्लेखादयमन्यः पक्ष इत्यर्थः। श्रुत्यर्थस्तु। अथो इति भिन्नप्रक्रमे। खल्वाहुः। अर्थादन्ये। किमेष पूर्वोक्तोऽस्य भगवतो जागरितदेश एव। हि यतो हेतोः। यान्येव पदार्थजातानि जाग्रत् पश्यति तान्येव सुप्तः पश्यतीति। तदुक्तं श्रीभागवतेऽपि, 'लोकानपीतान् ददृशे स्वदेहे' इति। तथा च यत्रापीतानामपि दर्शनं, तत्र स्थितानां दर्शने कः संदेह इति भगवतो न जागरितस्वप्नभेद इति प्रलय इवात्रापि स्वयंज्योतिष्ट्वमिति तदाशयः। एतस्य मतान्तरत्वे हेतुमाहुः परमित्यादि। तत्रेति। व्याख्याते पक्षे पूर्वमादित्यादीनां कथनाज्जागरिते स्वयंज्योतिष्ट्वस्यास्पष्टत्वादत्रास्यानुपयोगित्वम्। परप्रतिपत्त्यभावादतः पूर्वोक्त एव पक्षो युक्त इति तदाशय इत्यर्थः। एतच्छ्रवणोत्तरम्, एवमेवैतद् याज्ञवल्क्येति जनकेनाङ्गीकारात् प्रश्नोत्तरपूर्तिर्जातेति सिद्धम्। अतःपरं यो मोक्षप्रश्नः, अत ऊर्ध्वं विमोक्षायैव ब्रूहीति स कुत इत्यपेक्षायामाहुः एतावदित्यादि। स समानः सन्नित्यारभ्य स्वप्नपर्यन्तं भगवच्चरित्रं बन्धकमङ्गीकृत्य मोक्षस्तर्हि कथमित्याशयेन तत्प्रश्न इत्यर्थः। तर्हि मोक्षसाधनं तत्र वाच्यम्। जीवाऽवस्थादिकथनस्य कः प्रसङ्ग इत्यत आहुः स वा एष इत्यादि। जीववाक्ये-

रश्मिः ।

आयतं भृशमत्यर्थमित्यन्ये । भगवत इति स्वप्नस्तु मायेति भाष्यात् । मायामायाविनोराधाराधेयभावः। तथात्वमिति स्वयंज्योतिष्ट्वं तु भ्रम्। अन्य इति तेन पूर्वोक्तपक्षे बीजमप्युक्तम्। मतान्तरत्वाय श्रुत्यर्थमाहुः श्रुत्यर्थ इति। श्रुतिस्तु अथो खल्वाहुः जागरितदेश एव अस्येष इति यान्येव जाग्रत्पश्यति तानि सुप्त इत्यत्र अयं पुरुषः स्वयंज्योतिर्भवति। इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति। श्रीभागवत इति तृतीयस्कन्धे। अपीतान् अपि इतान् अपीता लोकाः स्वप्ने स्थिता जाग्रति। अत्रापि स्वप्नेपि। प्रलये विश्वाभावः। स्वप्नेपि मायेति। तदाशयो याज्ञवल्क्याशयः। अत्रेति जाग्रत्स्वप्नभेदाभावपक्षे। अस्येति। स्वयं ज्योतिष्ट्वस्य जाग्रद्दृष्टीनां स्वप्नेपि दर्शनेन विघटनात्तस्यानुपयोगित्वम् । जाग्रता चारितार्थ्यात्। परप्रतिपत्त्यभावात् । स्वप्न एव स्वयंज्योतिष्ट्वस्य परप्रतिपत्तिरस्ति। तदादित्यादेरभावादिन्द्रियाणां गोलकाभावेन प्रदर्शनासामर्थ्यात्। गोलकस्य च स्वाप्नस्य मिथ्यात्वात् भगवानेव पश्यतीत्युक्त्याध्यवसीयत इति । अतः कारणात् परममुत्कृष्टं स्वयंज्योतिष्ट्वं तत्र जाग्रत्स्वप्नभेदपक्षे स्पष्टम्। तत्र स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीत्याधिक्यात् पूर्वोक्त एव पक्षो युक्त इति। तदाशय इति अत्रायं स्वयंज्योतिर्भवतीति श्रुतेर्याज्ञवल्क्यस्य चाशयः । बन्धकमिति बन्धिका ह्येषा इति अत एव च नित्यत्वमिति सूत्रभाष्यस्वारस्यात्। जीवेति आदिपदेनासंगत्वम्। जीवेति। भाष्ये। स वा एष इति जीववाक्यम्। एतस्याग्रे तेनेति शेषं पूरयित्वा हेत्यनेनान्वयः कर्तव्य इति भावः। स वा एष एतस्मिन् स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यदत्र किंचित्पश्यति अनन्वागतः तेन भवत्यसंगो ह्ययं पुरुष इत्येवमेवैतत्

प्रत्यक्षतः प्रदर्शयन्नसङ्गत्वमाह । तावतापि जागरणावस्थायामसङ्गत्वज्ञानाय पुनः प्रश्नः । तत्र मत्स्यदृष्टान्तोऽवस्थाभेदज्ञानाय क्रियाज्ञानप्रधानः ।

भाष्यप्रकाशः ।

नाहेत्यर्थः । श्रुत्यर्थस्तु, स वा एष जीव एतस्मिन् स्वप्नान्ते स्वप्नदेशे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रातिलोम्येन नितरामयो गमनं यथा स्यात् तथा, प्रतियोनि यौति मिश्रीभवतीति योनिर्जागरितादिस्थानं तल्लक्ष्यीकृत्य आद्रवत्यागच्छति बुद्धान्ताय जागरणायैव । एवं जीवस्य क्रियां बोधयित्वा तस्यासंगत्वं व्युत्पादयति । स यदत्र किंचित् पश्यत्यनन्वागतः । अनुलक्ष्यीकृत्याऽऽगतोन्वागतस्तद्भिन्नोऽनन्वागतः साक्षिभूत उदासीनः सन् पश्यतीत्यनुभवसिद्धम् । तत्रत्यसुखदुःखेषु तत्साधने चानासक्तेरनुभवसिद्धत्वात् । तेन साक्षित्वेन हेतुना भवत्यसङ्गोऽनासक्तो हि निश्चयेनायं पुरुष इतीति । तथा च मोक्षे स्वरूपयोग्यताबोधनं प्रसङ्ग इत्यर्थः । द्वितीयप्रश्नतात्पर्यमाहुः तावतापीत्यादि । स्वप्ने असंगत्वे ज्ञातेऽपि जाग्रत्यासक्तिदर्शनात् तस्या योग्यताया अकिंचित्करत्वमतस्तत्रासंगतत्वज्ञानाय पुनः प्रश्न इत्यर्थः । श्रुतावत ऊर्ध्वमित्यस्य स्वप्नादुत्कृष्टायां जाग्रदवस्थायामित्यर्थः । उत्तरस्य तात्पर्यमाहुः तत्रेत्यादि । तत्रेति उत्तरे । क्रियाज्ञानप्रधान इति क्रियाया ज्ञानं मुख्यं यत्र तादृशः । तथा च यथा नदीक्रियाविलक्षणया क्रियया मत्स्ये नदीभिन्नत्वज्ञानं, कूलद्वये संचरणात् तत्र तत्र सहजासक्तिशून्यत्वज्ञानं च । तथा जीवस्य स्वप्नदेशे बुद्धदेशे च संचरणक्रिययाऽवस्थाद्वयभिन्नत्वज्ञानम् । उभयत्र संचरणाच्च तत्र तत्र सहजासक्तिरहितत्वज्ञानम् अतोऽयं दृष्टान्तस्तदर्थं तथेत्यर्थः । एवं जागरितेऽप्यस्यासङ्गत्वे ज्ञाते, एतस्य सहजासक्तिः केत्याकाङ्क्षा स्यात्, तदर्थं प्रश्नं च कुर्यादतस्तदर्थं स्वत एवाग्रिमं वरदानानुरोधाद् वक्तीत्यग्रेऽनुशशासेति पदोक्त्या ज्ञायते । तदर्थं सर्वस्य

रश्मिः ।

याज्ञवल्क्य सोहं ते भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति श्रुतिः । रत्वेति रमु क्रीडायाम् क्त्वा । पुण्यमिति पुणति तु. प. से. पुण शुभे कर्मणि इगुपधेति कः । पुणेषु भवं पुण्यम् । वैदिकीप्रक्रियास्थेन 'भवे च्छन्दसि' सप्तम्यन्ताद्भवार्थे यदित्यनेन यत् । पापमिति । पान्त्यस्मादात्मानमिति पापं पा रक्षणे पानीविषिभ्यः प इति पप्रत्ययः । योनिरिति वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो निदिति नित् । तत्रत्येति । स्वाप्निकसुखदुःखेषु । अयमिति जीवः । स्वरूपेति मोक्षो हि अन्यथारूपं हित्वा स्वरूपेण व्यवस्थितिरूपः । स्वरूपं हि तत्त्वपरित्यक्तं तत्त्वान्यष्टाविंशतिः । तत्र मोक्षे स्वरूपे योग्यता एकपदार्थेऽपरपदार्थसंसर्गरूपा । मोक्षरूपे पदार्थे अपरपदार्थस्यानासक्तिरूपस्य जन्यजनकभावो योग्यता तद्बोधनं तत्स्मारणं प्रसङ्गः । तथा चैतादृशस्मारणेनोपेक्षानर्हत्वं तेन च जीवावस्थादिकथनमिति भावः । द्वितीयेति अत ऊर्ध्वं विमोक्षाय ब्रूहीति । उत्तरस्येति तद्यथा महामत्स्यः उभे कुले अनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति बुद्धान्तं च स्वप्नान्तं चेति । तत्र तत्रेति पूर्वस्मिन् कूलेऽपरे कूले सहजासक्तिशून्यत्वज्ञानं नद्यां वासात् स्रोतसा वशीकृतत्वाद्वा । तदर्थमिति अवस्थाभेदज्ञानाय तथापृष्ठप्रतिवाक्यमित्यर्थः । विश्वात् । तदर्थमिति सहजासक्तिज्ञानाय । तदर्थमिति प्रश्नाभावार्थम् । स्वत इति स्वतो याज्ञवल्क्योऽग्रिमं ग्रन्थं वरदानं वरमुत्कृष्टं कामप्रश्ने दानं तदनुरोधात् दानानुरूपं वक्ति । अत्र गमकमाहुः इतीति इत्येवमग्रेऽनुशशासेति पदोक्त्या ज्ञायते । तथाहि । अनु भागे इत्थंभूताख्याने वा । शशास

श्येनसुपर्णदृष्टान्तस्तु सुषुप्तौ भगवत्स्वरूपप्राप्तयेऽवस्थान्तः । यत्रेति च

भाष्यप्रकाशः ।

ग्रघट्टकस्यार्थं वक्ष्यन्तः श्येनादिदृष्टान्ततात्पर्यमाहुः श्येनेत्यादि । तत्र भगवत्सत्त्वे किं मानमत आहुः अवस्थेत्यादि । एतस्मा अन्ताय धावतीत्यन्तपदोक्तोऽवस्थान्तः । यत्र सुप्त इत्यग्रिमं वाक्यं च सुषुप्तौ भगवत्सत्त्वे मानम् । श्रुतौ, सल्लयायैव ध्रियत इत्यस्य सम्यग् लयः श्लेषो यत्र तादृशस्थानाय गच्छतीत्यर्थादन्तपदेन भगवल्लाभः । यत्रेति वाक्ये तु सर्वकामनाभावकथनेन तल्लाभादित्यर्थः । तत्प्राप्तिश्च न धावनमात्रेण, किं तु हेत्वन्तरेणेति वक्तुं, ता वा अस्यैता

रश्मिः ।

शास अनुशिष्टौ अ. प. सेटो रूपं न तु शास् इच्छायाम् । अ. आ. सेटः । वक्तीति भाष्यप्रकाशात् । श्रुतौ परस्मैपदाच्च । जानातीच्छति यतते इति शास्त्रकथनात्तस्य च प्रयत्नपूर्वकत्वेनेच्छार्थस्याशक्यत्वाच्च । शिषृ विशेषणे रु. प. अ. शेषणम् । शिष प्रसवोपयोगे चु. प. से. भावार्थकल्युडन्तम् । तेन एनमनुशशासेति श्रुतौ एतस्य जनकस्य सम्राजो नु नाम भागमग्रिमं तस्य शासनं प्रसवोपयोगं चकार याज्ञवल्क्यो भगवान् इत्थंभूताख्यानं प्रकारविशेषनिरूपकं वाक्प्रसवोपयोगं चकारेति वा । वैयाकरणास्तु अनुना द्योत्यते भागरूपोर्थः । एनमित्यत्र द्वितीयार्थः स अर्शआद्यजन्तेन तत्स्वामी उच्यते इति । तन्मते जनकाभिन्नं भागस्वामिनं शशास्सेत्यर्थः । तथा जनकाभिन्नेत्थंभूतं आख्यानं आख्यायतेऽनेन तदग्रिमं शशासेति द्विकर्मकः ।

'दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्' ॥ इति ।

अग्रिमं एनमनुशशासेति द्विकर्मकोयं शासिः । तदर्थमिति अनुशशासेति पदोक्त्या ज्ञानार्थम् । श्येनेत्यादीति तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः स९ंहत्य पक्षौ सल्लयायैव ध्रियते एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यतीति श्रुतिः । तत्रेति सुषुप्तौ । अचेति स्वप्नावस्थाया अन्तो यत्र भगवति सुषुप्तिरूपे सोऽवस्थान्तः यत्रेत्याश्रयणीये भगवति । कथमित्यपेक्षायामाहुः श्रुताविति । श्येनस्तु श्रान्तः पक्षौ संहत्य प्रसार्य सति निर्गुणे लयायैव ध्रियते पतनप्रतिबन्धः क्रियते । श्येनः श्रान्तः इत्यत्र टः सुः सुपां सुलुगिति सूत्रेण श्येनेन श्रान्तेनेत्यर्थः । निर्गुणलयः सुषुप्तौ इति सगुणलयाय दृष्टान्तान्तरमाह सुपर्णो वेति सुपर्णो गरुत्मान् । सगुणलयायैव पतनप्रतिबन्धः क्रियते । सुपर्णेनेति पूर्ववत् । अत्र समासदौर्घट्यादाहुः सल्लयायेति प्रकाशे । गच्छतीति टः सुमनाद्यत्य धातूनामनेकार्थत्वं स्वीकृत्य यकःस्थाने यङं वर्णलोपं चाश्रित्योक्तं तदुक्तम् ।

'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां तदपि च सिद्ध्यति बाहुलकेन' ॥ इति ।

वैदिकप्रक्रियायाम् । यद्वा त्रुटिरत्र तादृशस्थानायेत्यग्रे तादृशस्थानाय निर्गुणसगुणप्राप्तये श्येनेन सुपर्णेन वा ध्रियते एवमेवायं पुरुषो जीव एतस्मै अन्ताय धावतीत्येवं रूपा । धावतीत्यस्यार्थमाहुः गच्छतीति । धावु गतौ शुद्धौ च भ्वा. उ. से. । ननु भाष्ये सुषुप्तौ भगवत्स्वरूपप्राप्तये इत्युक्तं तत्कथं दृष्टान्तौ भित्त्वा व्याख्यातमिति चेन्न । सगुणनिर्गुणयोर्विद्वन्मण्डने भेदभङ्गात् । चिक्रीडिषयाविर्भावे विशेषः । ता वा अस्यैता इत्यादेरिति ता वा अस्यैता हिता नाम नाड्यो यथा केशः

भगवान् पञ्चवर्णनाडीकृत एवास्य क्लेशो भगवत्कृत एवानन्द इति स्वप्नानन्दो

भाष्यप्रकाशः ।

इत्यादेस्तात्पर्यमाहुः पञ्चेत्यादि । भगवद्रूप इति अक्षरात्मकः । तथा श्रुतौ नाडीः प्रक्रम्यान्ते, अविद्यया भयं मन्यत इत्युपसंहारात् तास्वेवाविद्यासंबन्धो दुःखदः । अग्रे तु भगवत्संबन्धात् साभिभूयते । ततोऽथेति प्रक्रमान्तरादुपसंहारे लोकपदाच्चाक्षरम् । ततः पुनरथशब्दात् कामाभाव-

रश्मिः ।

सहस्रधा भिन्नस्तावताणिम्ना तिष्ठति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लौहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विछायति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया भयं मन्यते अथ यत्र देव इवराजेवाहमेवेद५सर्वमस्मीति मन्यते सोस्य परमो लोक इति अस्यास्तात्पर्यम् । तृतीयाध्यायद्वितीयपादे तदभावाधिकरणे सुषुप्तिर्द्विविधेत्युक्तम् । नाडीषु आत्मनि चेति पदद्वयात्सूत्रे । अर्थस्तु ता वै यत्तदोर्नित्यसंबन्धाद् यत्र सुप्त इत्यत्र यच्छब्दार्थरूपाः 'तदभावो नाडीषु तच्छ्रुतेरात्मनि च' इति सूत्रेण निश्चिताश्चेत्यर्थो भवति तथापि यत्रेति च भगवानिति भाष्यात् यत्रेत्यस्य भगवतीत्यर्थात् ता वै प्रसिद्धाः सूत्रेण निश्चिताश्चेत्यर्थः । अस्य शिरःपाण्यादिलक्षणाया पुरि शेते इति पुरुषः सास्य हितानाम नाड्यो हि । तावतेति तावत्परिमाणेनाणिम्ना अणुत्वेन तिष्ठन्ति । ताः शुक्लस्येत्यादि तृतीयार्थे षष्ठी शुक्लादिभिः पूर्णाः तदुक्तं शुश्रुते ।

'अरुणा शिरा वातवहा नीलाः पित्तवहाः शिराः ।
असृग्वहाथ रोहिण्यः गौर्यः श्लेष्मवहाः शिराः' ॥ इत्यादि ।

जीवो हृत्स्थोपि व्यतिरेकवत्त्वात् नाडीषु स्वगुणभूतचैतन्येन व्याप्तः सन्नाडीभिः क्लिष्टो भवति । वातादिभिः क्लेशः सर्वानुभूतोपि । अथ भिन्नप्रक्रमेण तासु स्वप्नदनाडीषु व्यवतिष्ठमाने सति यस्मिन् स्वप्नकाले एनं स्वप्नदशं घ्नन्तीव तस्करादयो अन्ये केचन जिनन्तीव वशीकुर्वन्तीव दासरूपेण कदाचिद्धस्तीव विच्छापयति विछादयति विद्रावयति हल्व्यत्ययः परोक्षवादार्थं निगमयितारः इत्यस्य निगन्तव इति परोक्षवादवत् । निरुक्तौ । तथा गर्तं जीर्णकूपादिकं प्रपततीव न वस्तुतः किं तत इत्यत आह 'यदिति' यदेव जाग्रत् जाग्रति पश्यति तदेव भयं यत्रास्मिन् स्वप्ने अविद्यया वासनात्मिकया मन्यते जानाति उच्चनाडीकृत एवास्य क्लेश इत्युक्त्वा भगवत्कृत एवानन्द इति स चानन्दः स्वप्नानन्दो भगवद्रूपः परमो लोक इत्याह 'अथेति' क्लेशदनाड्यन्तरसंबन्धेन भिन्नप्रक्रमो भगवत्संबन्धात् क्लेशदाक्लेशदनाडीव्यतिरिक्तपुरितन्नाड्यां नाडीषु वा हृदये वेति विकल्पार्थकोऽथ शब्दः इति तृतीयाध्याये 'तदभावो नाडीषु' इति सूत्रभाष्यप्रकाशे यत्र स्वप्ने राजेव देव इवाहमेवेद५सर्वमस्मीति मन्यते जीवस्तं प्रति मोक्षानन्दो भगवत्कृत एव जीवस्यानीशत्वात् । विषयानन्दे राजेवेति दृष्टान्तः । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः । स स्वप्नानन्दो भगवान् अदृश्यत्वादिगुणकाधिकरणे अक्षराभिन्न उक्तस्तद्रूपः परमो लोक इति भाष्यात् । लोकस्याक्षरत्वादिति । तथा चेति । अविद्येति । वातपित्तकफादिरूपायाः संबन्धोऽविद्यायाः । सेति वातादिरूपा । अत इत्यस्याविद्याराहित्यलिङ्गादित्यर्थः । ब्रह्मलोक आनन्द इति श्रुतेराहुः लोकपदादिति । ननु सुषुप्तिनिरूपणे स्वप्ननिरूपणस्य किं प्रयोजनमिति चेन्न अभावनिरूपणस्य प्रतियोगिनिरूपणाधीनत्वेन

भगवद्रूपः परमो लोकः। सुषुप्तिस्त्वकामरूपो भगवान्। अत्र ज्ञानाभावादुभयोः स्पष्टतया भेदनिर्देशः। शारीरः प्राज्ञ इति।

भाष्यप्रकाशः।

रूपलिङ्गप्रत्यभिज्ञानाच्च सुषुप्तिः सुष्ठु सुप्तिर्यत्रेति तत्स्थानं भगवान्। तेन तत्संबन्धादस्यापि सुषुप्तिरित्यर्थः। तत्र जीवेश्वरयोर्निर्देशस्य तात्पर्यमाहुः **अत्रे**त्यादि। तद्वा अस्यैतदात्मकाममिति श्रुतौ तद् अन्ताय धावदेतद् उच्यमानमस्य जीवस्य आत्मकामरूपमकाममाप्तकाममित्युक्तम्। अत उभयोः साधर्म्ये भेदज्ञानाभावात् तज्ज्ञानार्थं स्त्रीदृष्टान्तपरिष्वङ्गक्रियातृतीयाविभक्तिभिर्भेद-निर्देशः कृत इत्यर्थः। बाह्याभ्यन्तरज्ञानाभावस्तु परिष्वङ्गहेतुक इति श्रुतावेव स्फुटम्। तथा च यद्यवस्थात्रयमुक्तं जीवस्वरूपमेतन्महावाक्ये विवक्षितं स्यात् तदा शारीरप्राज्ञयोर्भिन्नावस्थावै-शिष्ट्येऽपि स्वरूपभेदादत्रोक्तमेतत्त्रयं विरुध्येत। यदि च परिष्वङ्गो नामात्यन्तमैक्यमिति

रश्मिः।

न स्वप्नं पश्यतीत्यत्र प्रतियोगिनिरूपकत्वात्। **सुषुप्तिस्त्वि**ति भाष्यमवतारयामासुः **तत्र** इति। परमो लोक इत्यनन्तरं 'अथ यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति' इति श्रुतिस्त-त्तात्पर्यमाहुः **अथ शब्दा**दिति। यत्र नाडीषु भगवति वा सुप्तो जीवः कामं काम्यते इति कामस्तम्। अत्र सुप्त इति स्वप्नविषय उक्तः। न स्वप्नं पश्यतीति स्वप्नदर्शनाभाव उक्तः। किं च नाडीषु भगवति च सुप्त इत्यसंभवि स्वप्ननिषेधादत्रोच्यते। सुप्त इति पदेन सुप्तविषयकज्ञानरूपस्वप्नविषय उक्तः। न स्वप्नं पश्यतीत्यत्र स्वप्नो माया स्वप्नसृष्टिविषयकज्ञानकर्त्री रूपा। स्वप्न इत्यत्र कर्तरि नन् स्वीकारात्। नाडीषु भगवति वा सुप्त इत्यत्र वर्णलोपः। सुषुप्त इत्यर्थः। निरुक्तेस्ति। व्याकरणेन तु धातोरेव सुषुप्तोर्थः। सुषुप्त इत्यत्र तथादर्शनात्। सूपसर्गो द्योतक इति सिद्ध्यति। गाढत्वं शोभनत्वं तत्सूप-सर्गद्योत्यं तथा च 'तदभावो नाडीषु तच्छ्रुतेरात्मनि च' इति गाढसुप्तो ज्ञानरहित इति। षुलोपो वाहोरात्रवत्। अहोरात्रमित्यत्रात्रयोर्वर्णयोर्लोपः। अथ सुषुप्त इत्यत्र न स्वप्नं पश्यतीति श्रुतेः स्वप्नाभावप्रकारः। सुषुप्त इत्यत्र शोभनत्वं गाढत्वं तच्च निद्रया स्वप्नाच्छादितत्त्वं तथा च निद्राच्छादित स्वप्नविषयत्वं सुषुप्तत्वमिति। इदं हेतुद्वयमग्रे। प्रत्यभिज्ञानं तु नाड्यादिषु संपन्नस्य कामाभावे सोयं सति संपन्नस्य कामाभाव इति तत्तेदन्ताप्रकारकज्ञानत्वात्। आभ्यां हेतुभ्यां शोभना निद्रा-च्छादितस्वप्ना सुप्तिर्यत्रेति सत् स्थानं स्थीयतेऽस्मिन्नधिकरणे ल्युट्। **अस्यापी**ति जीवस्यापि। **भेदज्ञाने**ति। न चास्यैतद्रूपमिति षष्ठ्या भेदज्ञानमस्त्येवेति शङ्क्यम्। अभेदेपि षष्ठीसंभवात् राहोः शिर इतिवत्। **स्त्रीदृष्टान्ते**ति स्त्रीदृष्टान्तश्च परिष्वङ्गक्रिया च तृतीयाविभक्तिश्च ताभिः। तथा च 'प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्। एवमेवायꣳशारीरआत्मा प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं कंचन वेद नान्तरम्' इति श्रुतिः। प्राज्ञः सुषुप्तिसाक्षी। अनेन सुषुप्तौ जीवब्रह्मणो भेदेन व्यपदेशात् नेदं जीवब्रह्मताप्रतिपादकं वाक्यं किं तु ब्रह्मवाक्यमिति सिद्धः सूत्रार्थः। अत्र परमार्थतो जीव एव ब्रह्म चेच्छास्त्रं च तत्रैव समाप्तं चेद् दहराधिकरणे साधितमपि दहरविद्याया जीवब्रह्मविद्यात्वाभावमपीदमधिकरणं विघटयेत्। ननु शंकरभाष्येऽत्राधिकरणे जीवब्रह्मताप्रतिपादकत्वं वाक्यस्योक्तमिति कुतो ब्रह्मवाक्यत्वमित्याकाङ्क्षायां शंकरभाष्योक्तमसंसारिजीवपरत्वेन जीवब्रह्मता-प्रतिपादकत्वं दूषयन्तोऽस्य हृदयमाहुः **तथा चे**ति। **यदी**ति सुषुप्त्युत्क्रान्त्योरवस्थयोः शारीराद्भेदेन ईश्वरस्य प्राज्ञशब्देन व्यपदेशादिति सूत्रार्थवेलायाम्। तथा हि। सुषुप्तौ तावद्भ्यपदेशो दृश्यते तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं वेद किंच नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति। उत्क्रान्तावपि अयं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढः

भाष्यप्रकाशः ।

विभाव्यते, तदापि लक्षणादोषो दृष्टान्तविरोधश्च दुरुद्धरः । तस्मान्नेदं जीवब्रह्मताप्रतिपादकं वाक्यमिति हृदयम् ।

रश्मिः ।

उत्सर्जद्यातीति शारीराद्भेदेन परमात्मानं प्राज्ञशब्देन व्यपदिशति 'अन्वारूढः' अधिष्ठितः 'उत्सर्जत्' वेदनातः शब्दं कुर्वन् इति ब्रह्मामृतवर्षिण्याम् । अवस्थात्रयेण मुक्तं तथा च शंकरभाष्यं यदुक्तमाद्यन्तमध्येषु शारीरलिङ्गात्तत्परत्वमस्य वाक्यस्येत्यत्र ब्रूमः उपक्रमे तावद्योयं विज्ञानमयः प्राणेष्विति न संसारिस्वरूपं विवक्षितं किं तर्हि अनुद्य संसारिस्वरूपं परेणास्यैकतां विवक्षति । अतो ध्यायतीव लेलायतीवैवमेवाद्योत्तरग्रन्थप्रवृत्तिः संसारिधर्मनिवृत्तिपरा लक्ष्यते तथा चोपसंहारेपि यथोपक्रममेवोपसंहरति स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेष्विति । योयं विज्ञानमयः प्राणेषु संसारी लक्ष्यते स वा एष महानज आत्मा परमेश्वर एवास्माभिः प्रतिपादित इत्यर्थः । यस्तु मध्ये बुद्धान्ताद्यवस्थोपन्यासः तत्संसारिस्वरूपविवक्षां मन्यते स प्राचीमपि दिशं प्रस्थापितः प्रतीचीं प्रतिष्ठेत यतो न बुद्धान्ताद्यवस्थोपन्यासेनावस्थावत्त्वं संसारित्वं वा विवक्षति । किं तर्हि अवस्थारहितत्वमसंसारित्वं च । कथमेतदवगम्यते यदत ऊर्ध्वं विमोक्षायैव ब्रूहीति पदे पदे पृच्छति यत्र किंचित्पश्यति अनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुषः इति । पदे पदे प्रतिवक्ति अनन्वागतं पुण्येन अनन्वागतं पापेन तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवतीति । तत्परत्वं संसारिपरत्वम् । संसारिधर्मेति बुद्धौ ध्यायन्त्यां स्वयमात्मा ध्यायतीव चलत्यां चलतीव वस्तुतो न ध्यायती न लेलायति इत्यर्थात् संसारिधर्मनिवृत्तिपरा । **यदत** इति अतः कामादिविवेकानन्तरं मोक्षसाधनाऽभूत् । साक्षात्कारायैव ब्रूहि इति जनकप्रश्नार्थः । तेन जाग्रद्भोगादिनाऽनन्वागतोऽसंस्पृष्टो भवत्यसंगत्वादित्यर्थः । अत्र समस्या केषांचित् तवैवेदं तु नो ममेति । तस्यास्य पादस्य समस्यया पूर्णस्येदं स्वरूपं

'शारीरं भाष्यव्याख्यानं व्याख्यान्तरा विदाकृतम् ।
नातिदार्ढ्यात्तदेवं हि तवैवेदं तु नो मम' ॥

इति मत्कृतं समस्याकृदाशयप्रकाशकं दूषणमाहुः **तदे**ति । सूत्रार्थवेलायाम् । **भिन्ने**ति सुषुप्त्युत्क्रान्तिरूपभिन्नावस्थावैशिष्ट्ये । एतदिति स्त्रीदृष्टान्तपरिष्वङ्गक्रियातृतीयाविभक्तिश्वेत्येतत्त्रयम् । विरोधाभावमाशङ्क्य वारयामासुः **यदि** चेति । **अत्यन्तमैक्य**मिति तदुपपादितं यतो ध्यायतीवेत्यादिना पूर्वम् । **लक्षणे**ति परिष्वङ्गो हि स्पर्शस्तज्जन्यमैक्यमिति जन्यजनकभावः । शक्यसंबन्धो लक्षणा । **दुरुद्धर** इति । दृष्टान्ते तादृशैक्यस्यासंभवादिति भावः । भवतीति क्रियापदम् । अत्र स्याद्विरुध्येतेत्येवं हेतुहेतुमद्भावाभावान्न लिङ् किं तु लडेव । एतर्ह्यपि सुषुप्तिस्त्वकामरूपो भगवानित्यत्र तु भाष्ये अन्यविधसुषुप्तिप्रसङ्गः । अकामरूपस्यासंसारित्वेपि आत्मकामरूपसमानाधिकरणस्यास्य संसारित्वात् । अत इदमेकं बाधकम् । सुषुप्तिस्तु बुद्धेः कारणात्मनावस्थानं बुद्धेर्यत्कारणं तस्यैव तद्वासनाविशिष्टस्य पुनर्बुद्ध्युत्पादनयोग्यतावस्थितिरिति पञ्चीकरणभाष्ये तस्यैव कर्मण एवेत्यर्थः । तथा च श्रुत्यर्थः । अस्य सुषुप्तौ सर्वात्मकत्वमापन्नस्यात्मनस्तदेतत्प्रकृतं रूपमाप्तकामं काम्यन्त इति कामाः सुखादयः आप्ता यस्मिन्रूपे तदाप्तकामं एवं सति हिरण्यगर्भतुल्यत्वं स्यादित्यत

भाष्यप्रकाशः।

'जाग्रत् स्वप्नः सुषुप्तिश्च गुणतो बुद्धिवृत्तयः।
तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः' ॥

इत्यादिवाक्योक्ता वृत्तयस्तु विषयोपधानाज्जायन्ते। जाग्रति तथा निश्चयात्। विषयस्तु ततो भिन्न इति भगवतः सुषुप्तित्वोक्तौ न किंचिद् बाधकम्। तमोऽभिभूतः सुखरूपमेतीति श्रुत्युक्तोऽभिभवस्तु भेदज्ञानाभावे हेतुः। 'अविद्याप्युपकाराय विषवज्जायते नृणाम्' इति मार्कण्डेयपुराणोक्तन्यायादागमनं प्रति च। ततोऽन्यत्र बुद्धान्ताय गमनं चाविद्ययैवेति न कोऽपि क्वापि विरोधः। अतः परमात्मकामे रूपे आप्तकामत्वमकामत्वं च कुत इत्याकाङ्क्षापूरणाय,

रश्मिः।

आह आत्मकाममिति। आत्मैव कामः सुखसाक्षात्कारलक्षणो यस्मिन् विज्ञानमित्येतदानन्दरूपे ब्रह्मणि तदात्मकामं अत एव एतदकामं कामरहितं रूपं काम्याभावादिति टीकायाम्। यद्वा। अस्य बुद्ध्युपाधिकस्य रूपं न शुद्धस्येति कारणात्मना बुद्धेरवस्थानं सुषुप्तिरिति द्वितीयं बाधकम्। तमसा बुद्धिवृत्तिः सुषुप्तिरिति तृतीयं बाधकम्। तत्र न प्रथमं स्वाप्ययसंपत्त्योरन्यतरेति सूत्रे स्वाप्यये ब्रह्म निर्गुणमित्यसंसारित्वात्। आत्मकामरूपसमानाधिकरणं श्रौतमुपपादनीयं तद् द्वितीयं मायिकत्वेन बुद्धेः कारणात्मनावस्थानस्याभावात्। ब्रह्मवादेऽनुपयोगात्। न तृतीयमित्याहुः जाग्रत्स्वप्न इति गुणतः सत्त्वरजस्तमोभिः। तथा च तामस्या बुद्धेः वृत्तिः सुषुप्तिः यतोहरहः सुषुप्तौ निर्गुणं गच्छन्त्याः प्रजास्तं न विन्देयुः। बुद्धेस्तमसावरणात्। ब्रह्मपदार्थं लिङ्गदेहत्वेन चित्तं पश्यति तत्सुषुप्तम्। अत एव नीलप्रतीतिलिङ्गस्य नीलत्वादिति केचित्। तदुक्तम्—

'अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी' ॥ इति।

आदिपदेनेयं गीता। विषयोपेति। ननु सुषुप्तौ विषयाभावात् कथं विषयोपधानमिति चेन्न। जीवकर्मणां विषयत्वात्। सुखमहमस्वाप्सं न किंचिदवेदिषमित्यज्ञाने कर्मणां हेतुत्वेन तादृशविषयोपधानाच्चात एव विषयविषयितया जायन्ते इत्यनुक्त्वा सुषुप्तिविषयोपधानसंग्रहाय विषयोपधानाज्जायन्ते इत्युक्तम्। जाग्रतीति इन्द्रियैर्विषयसाक्षात्कारो जाग्रत्। विषय इति कर्मविषयः ततः सुषुप्तेः जीवब्रह्मभेदो वा दृष्टान्तवाक्योक्तो विषयः। तत्त्वमसीत्यत्र तस्य त्वमसीत्यपि च्छेदात्। किंचिदिति सर्वोपनिषन्नामकोपनिषदि चतुर्दशकरणोपरमाद्विशेषविज्ञानाभावाद्यदा (चब्दादी न्नोपलभते तदात्मनः) सुषुप्तमिति श्रुतिविरोधरूपं बाधकमपि न। मनु अवबोधे भगवानवबोधोवबोधकर्ता वा। दशेन्द्रियाणि चत्वारो मनोबुद्धिचित्ताहंकारा इति चतुर्दशविज्ञानाभावान्निर्गुणत्वात्। ननु मनः प्रसिद्धं कुतो न इति चेन्न वेदान्तयोगादरणेन योगरूढ्यभावात्। किं च सुषुप्तिरूपभगवतो विषयापत्तिरूपबाधकमपि न सुषुप्तौ भगवत्स्वरूपप्राप्तये इति भाष्ये श्रुत्यन्तरमाहुः तम इति तमसाभितो व्याप्तः सुखस्य भूमरूपस्य निर्गुणं रूपमेति प्राप्नोति। प्राज्ञशारीरयोर्भेदज्ञानाभावे हेतुः न तु तमसा सुषुप्तिरूपेणाभितो व्याप्त इति व्याख्याने हेतुः। अत्र हेतुमाहुः अविद्येति। तमोऽविद्या। देहेन्द्रियास्वन्तःकरणस्वरूपविस्मरणेषु स्वरूपविस्मरणात्मकपूर्वरूपत्वात्। ननु स्वरूपविस्मरणं भावल्युडन्तम्। तमः कर्तृप्रत्ययान्तं पदं कथमुभयोः सामानाधिकरण्यमिति चेन्न स्वरूपविस्मारकत्वात् स्वरूपविस्मरणस्य स्वरूपे आत्मनि सत्त्वात्। विषयवदिति। 'तादृशस

नाड्याच्छादनाभावोऽतिच्छन्दः, तत्र भगवत्स्वरूपं गतस्य बाह्येन्द्रियधर्माभावमाह विजानीयादित्यन्तेन । बाह्येन्द्रियाणां सलिलत्वमिति पूर्वोपपत्तिः ।

भाष्यप्रकाशः ।

तद्वा अस्यैतदतिच्छन्द इत्यादिग्रन्थ इत्याशयेन तत्तात्पर्यमाहुः **नाड्येत्यादि** । **तत्रेति** सुषुप्तौ । **बाह्येन्द्रियधर्माभावमिति** बाह्यादीनां त्रयाणामभावम् । **पूर्वोपपत्तिरिति** पूर्वोक्ते सर्वस्मिन् युक्तिः । श्रुत्यर्थस्तु, तद् आत्मकामं वै निश्चयेन अस्य जीवस्य एतत् प्राज्ञपरिष्वक्तमतिच्छन्दः ।

रश्मिः ।

बलाद्वापि देहत्यागो विमुक्तिदः' इति निबन्धात् । **विषभक्षणेन देहं त्यजतीति** न्यायस्त्वनुपकर्तुरुपकर्तृत्वे क्वचिदिति । अयं हेतुरवस्थात आगमनेपि इत्याहुः **आगमनमिति** । ननु कथमवस्थात आगमनेऽविद्याहेतुत्वं यतः सर्वो हि स्वकृतं भुङ्क्ते इति कर्मणां हेतुत्वमिति चेन्न 'अविद्यायामन्तरे वर्तमानाः' इति मुण्डके कर्मण्यविद्यापदप्रयोगात् । सर्वं सर्वमयमिति च । इदानीं तद्वा अस्यैतत् । 'आत्मकाममाप्तकाममकाम१९रूपम्' अस्याः 'तमोभिभूतः सुखरूपमेति' इत्यस्याश्च विरोधश्चिन्त्यते । तद्वा इत्यत्रास्येत्यस्य तमोभिभूतस्येति विशेषणम् । न च विशेषणवैयर्थ्यमिति शङ्क्यम् । प्राज्ञशारीरयोर्भेदज्ञानाभावे हेतुत्वात् । **तत्र** इति सुषुप्तेरन्यत्र स्वप्नजागरितस्थानयोः । बुद्धान्ताय जागरितस्थानाय । **आत्मकाम** इति आत्मानः कामाः काम्यन्त इति कामाः कल्याणगुणाः यस्मिन्रूपे । आप्ताः कामा यस्मिन्रूपे । न सन्ति कामा यस्मिन्रूपे तद्रूपमात्मकाममाप्तकाममकामं आप्तकामं पूर्वोत्तराभ्यामन्वेति देहलीदीपन्यायात् । ननु त्रिष्वस्य विशेषत्वे किं गमकमिति चेन्न प्रथमत्यागे मानाभावस्य गमकत्वात् । ननु रूपं विशेष्यं न त्वात्मकाममिति चेन्न रूपसामान्यावच्छेदकत्वेन रूपाभेदविवक्षणात् । ननु तथापि सुषुप्तिस्त्वकामरूपो भगवान् इति भाष्याद् कामस्य रूपसामान्यावच्छेदकत्वमुचितं प्रथमसंनिहितयोः संनिहितस्य बलीयस्त्वद्योतनात् भाष्ये इति चेन्न । भाष्य एव भगवत्पदात् । तस्य त्वब्रह्मवाचकत्वेन ब्रह्मणश्च सधर्मकनिर्धर्मकत्वेन विरुद्धधर्माश्रयत्वेनाकामत्वात्मकामत्वयोरकामत्वं कुतः तत्प्रसङ्गादात्मकामत्वं च कुत इति प्रश्नात् । अत्रोत्तरं नाड्याच्छादनाभावात् सुषुप्तेरकामं रूपं सकलसाधारणं भक्तानां तदा प्रपत्त्यभावात् न तान् प्रत्यप्यात्मकाममकामाप्तकामाभ्यां निगूढत्वात् । तदुक्तम् ।

'आत्मा यावत्प्रपन्नोऽभूत्तावद्वै रमते हरिः ।
सोन्तःकरणसंबन्धी तिरोधत्ते हरिश्च सः' ॥ इति ।

'स्वरूपं द्विविधं चैव सगुणं निर्गुणं तथा' इति सुबोधिनीगोपालतापिनीययोः । अत्र द्वन्द्व इत्याहुः **बाह्येति** । दर्शनादर्शनरूपे ह्यर्थे । **पूर्वोक्तेति** तेन पूर्वस्मिन्नुपपत्तिः पूर्वोपपत्तिः । सप्तमीति योगविभागात्सुप्सुपेति वा समासः । प्रघट्टकार्थमाहुः **श्रुत्यर्थ इति** । **तदिति** । 'तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्माऽभयं रूपमशोकान्तरम्' इति श्रुतिः । **आत्मकाममिति** अकामं वै निश्चयेनेति वक्तव्ये त्रयाणामभेदादिदमेवोपात्तम् । जीवस्य प्राज्ञपरिष्वक्तत्वात् । प्राज्ञापरिष्वक्तमात्मकाममतिच्छन्द इति योजना ।

भाष्यप्रकाशः ।

छादयतीति छन्दो नाडी । अतिक्रान्तं छन्दांसीत्यतिच्छन्दस्तदादिगुणकमतस्तथा । तर्ह्यपहतपाप्मत्वादिकमेव कथमित्यत आह अत्र पितेत्यादि । तथाच नाडीछादनाभावेन पित्रादीनां देहसंबन्धिनां स्तेनादीनां देहानां च संबन्धविरहादपहतपाप्मपुण्यपापाऽसंबन्धादभयं तीर्णशोकत्वादशोकान्तरमित्यर्थः । तर्हि पित्रादीनां पापान्तानां सत्त्वे कथं तदसंबन्ध इत्यत आह

रश्मिः ।

छादेति संवृणोति । छद संवरणे चु. प. से. वृञ् वरणे स्वा. उ से. छन्द इति । चदि आह्लादने दीप्तौ च भ्वा. प. से. 'चन्देरादेश्च छः' इत्यसुन् । छन्दसि सर्वे विधयो विकल्प्यन्ते इति विकल्पात् । अतः सार्वधातुभ्योऽसुन् इत्यसुन् वर्णागमाच्छन्दः । न च प्रकृतेर्विकल्पो नास्तीति वाच्यम् । छत्वविकल्पेन चकारश्रवणापत्तेश्चन्द इति । तथा च नाडीरूपाऽऽच्छादनस्याभावोऽतिच्छन्द इति भाष्यार्थः । अत्राभावस्य भावेन रूपेणाभेदान्वयोऽभावस्य विष्णुत्वात् । पुराणात् । ननु ह्यात्मकामेऽकामे रूपेऽकामत्वमात्रं कुतः इति प्रश्ने नाड्येत्यादि भाष्यं प्रवृत्तं तत्राङ्गेन व्याकरणेन छन्दसोराह्लादकदीपकयोरभावेऽतिच्छन्दः आह्लादाभावान्निर्गुणत्वं दीप्त्यभावः स्पष्ट इति चेन्न आह्लादजन्यत्वे साकारत्वस्यापसिद्धान्तात् । तदादीति । अतिच्छन्दस्त्वादिगुणकमात्मकाममतः कारणात्तथाकामत्वमकामत्वेऽस्य कारणत्वमित्थम् । अतिच्छन्दस्त्वेन नाडीरूपाऽऽच्छादनाभावान्न साकारकल्याणगुणकत्वमतोऽकामत्वम् । अपहतः पाप्मा धर्माधर्मलक्षणो यस्मिन्रूपे तदपहतपाप्माऽतोपहतपाप्मत्वेनाकामत्वं न विद्यते भयं यत्र रूपे रसरूपान्तर्गतमपि तदभयमतो रसत्वाभावादप्यकामत्वम् । शोकः संसारजः तदन्यः शोको रसान्तर्गतोपि स शोकान्तरं न विद्यते शोकान्तरं यत्र रूपे तदशोकान्तरमतः शोकान्तरत्वेनाकामत्वमिति । अत्र पितेत्यादीति 'अत्र पिताऽपिता भवति माताऽमाता लोकाअलोका देवा अदेवा वेदा अवेदाः अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा पौल्कसोऽपौल्कसश्चाण्डालोऽचाण्डालः श्रमणोऽश्रमणः तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति' इति श्रुतिः । अत्र सुषुप्तौ भगवद्रूपायाम् । अधर्मप्रयोजनात् वक्तुं पुनरत्रेति । भ्रूणहा मुख्यो ब्राह्मणहन्ता । पौल्कसः शूद्रायां ब्राह्मणाज्जातो निषादस्तस्मात् क्षत्रियायां जातः पुल्कस एव पौल्कस इति टीकायाम् । वेदान्तत्वाद्योगः सिद्धान्ते । चाण्डालो ब्राह्मण्यां शूद्राज्जातो जात्या चण्डालः । चण्डाल एव चाण्डालः चडि कोपे भ्वा. आ. से. कृदन्तः सिद्धान्ते श्रमणः परिव्राट् टीकायाम् । श्रम खेदतपसोः दि. प. से. नन्द्यादित्वाल्ल्युः । खिन्नः तापसो वानप्रस्थः, सर्वेषु प्रकारेषु यत्किंचित्तापसत्वविशिष्टः सिद्धान्ते । अनन्वागतमसंबद्धम् । ननु सुषुप्तौ न सृष्टिरतः पित्राद्यभावात्कथं तदभाव इति चेन्न । जीवरूपेण तस्य विश्वस्मिन् सुषुप्त्यतिरिक्ताधिकरणे पित्रादिसत्त्वात् । भावार्थमाहुः तथा चेति । नाडीरूपछादनाभावेन । न च नाडीछादनयोरेकार्थत्वाभावान्नैवमिति शङ्क्यम् । एकार्थत्वात् । नाडी नालयति नल गन्धे पचाद्यच् । डलयोरेकत्वं गौरादिः । गन्ध अर्दने चु. आ. से. । अर्द गतियाचनयोः भ्वा. प. से. । अर्द हिंसायां चु. आ. से. । नाडी गतिकर्त्री । छादनं छद संवरणे सं संभजनकर्तृ । गमनेन सं सं भजतीति प्रयोगे गमनाभिन्न सं सं भजनकर्त्रीति गमन सं सं भजनयोरेकार्थत्वात् । प्रकृत्यर्थस्यैवैकार्थत्वात् । प्रत्ययार्थस्य च कर्तृरूपस्य चैकार्थ्यात् । विशिष्टं शुद्धान्नातिरिच्यते इति नैयायिकोक्तेः विशिष्टसत्तायाः सत्तायाश्चैकत्वादिति । एवं गमनात्मकं भजनं सं संभजनम् । जीवस्यापि पिताऽपितेत्यादि भवति सुषुप्तौ ततो जीवविषय आहुः तर्हीति । अत्र

भाष्यप्रकाशः ।

यद्वै तदित्यादि । वै एवकारार्थः । यद् वै यदेव तद् पूर्वोक्तं पित्रादिकं न पश्यति, सुषुप्तौ भगवत्स्वरूपं प्राप्तो न चक्षुर्विषयीकरोति तत् द्रष्टव्यं पूर्वोक्तं पश्यँश्चक्षुर्गोचरीकुर्वन्नेव न पश्यति । एवमुभयं प्रतिज्ञाय पूर्वं दर्शनमुपपादयति । हि यतो हेतोर्द्रष्टुर्जीवस्य दृष्टेस्तद्धर्मरूपस्य ज्ञानस्य विपरिलोपो दर्शनसाधनतद्विषययोस्तत्राभावेन विरोधात् सर्वात्मनादर्शनं तन्न विद्यते । कुतः । अविनाशित्वात् । प्रकाशकस्यात्मज्योतिषः, 'सर्वे जीवाः सर्वमयाः' इति श्रुत्यन्तरात् सर्वप्रचुरस्य जीवस्वरूपस्य च नित्यत्वात् । तर्ह्यदर्शनं कुत इत्यतस्तदुपपादयति । तुः शङ्कानिरासे । यत् पश्येदत्र यत्पदेन करणस्य विषयस्य च संग्रहः । तद् द्वितीयं करणं विषयश्च ततोऽन्यद् विभक्तं नास्ति । तथाच बाह्यस्य विषयस्य विभक्तस्य करणस्य चाभावात् । तद्धर्मरूपस्य दर्शनस्याभाव इत्यर्थः । एवमग्रेऽपि सर्वत्र एवमत्र बाह्येन्द्रियधर्माणामभावः प्रतिपादितः । अतः परमन्यत्व-विभक्तत्वयोरभाव एव कथमित्यतस्तदुपपादयति सलिल इत्यादि । एको मुख्यो द्रष्टा भगवानेव

रश्मिः ।

सुषुप्तौ जीवस्य पिताऽपितेत्यादि भवतीत्यस्मिन् पक्षेऽर्थः । सुषुप्तावनुभवस्याकिंचित्करत्वात्कथमिति प्रश्नः । वा इति । 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति' इति श्रुतिः । उपेति 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽ-विनाशित्वात्' इति श्रुतिरुपपादयति । तद्धर्मेति । चतुर्विधनित्यज्ञानेषु चैतन्यरूपस्य । तत्रेति सुषुप्तौ । विरोधादिति ज्ञानस्य चैतन्यस्याकामेन भगवता सहानवस्थानलक्षणविरोधात् । भगवतोऽज्ञाना-विषयत्वात् । तर्हि विषयाद्यभावात् सर्वथा ज्ञानाभावेनानित्यत्वं ज्ञानस्य स्यात्तत्राहुः सर्वात्मनेति सर्वथा । यस्मिन्नदृष्टे कोपि पुरुषार्थो न सिद्ध्यति तत्सर्वात्मनाऽदर्शनम् । आत्मेति जीवचैतन्यस्य । सर्वमेति सर्वविकार इति ह्यचश्छन्दसीति सूत्रेणार्थो भवति तथापि जीवस्याविकृतत्वात् न संभवति जाग्रज्जीवाद्यं तदात्मना सुषुप्तस्य दर्शनेऽङ्गीकृते सुषुप्तिकालेऽदर्शनं कुत इति पृच्छति तर्हीति । उपेति न तु तद् द्वितीयमस्ति ततोन्यद्विभक्तं यत्पश्येदिति श्रुतिरुपपादयति । तद्धर्मेति जीवधर्मरूपस्य । अभावस्तिरोभावः अतो नानित्यत्वम् । सर्वत्रेति । यद्वै तन्न जिघ्रति जिघ्रन् वै तद् घ्रातव्यं न जिघ्रति न तु घ्रातेर्घ्राणाद्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोन्य-द्विभक्तं यज्जिघ्रेदित्यत्र । एवं यद्वै तन्न रसयति रसयन् वै तद्रसं न रसयतीत्यादि । यद्वै तन्न वदति वदन् वै तद्वक्तव्यं न वदतीत्यादि । यद्वै तन्न शृणोति शृण्वन् वै तच्छ्रोतव्यं न शृणोतीत्यादि । यद्वै तन्न मनुते मन्वानो वै तन्मन्तव्यं न मनुत इत्यादि । यद्वै तन्न स्पृशति स्पृशन् वै तत्स्प्रष्टव्यं न स्पृशतीत्यादि । यद्वै तन्न विजानाति विजानन् वै तद्विज्ञेयं न विजानातीत्यादि । आसु श्रुतिषु । बाह्येति बाह्या जाग्रदनुभूताः । इन्द्रियाणि चक्षुरादीनि । धर्मा ज्ञानानि । अत्र पक्षे कुत इन्द्रियचतुष्टयपरित्याग इति प्रश्नः प्राप्नोति प्रातीतिकार्थपरित्यागश्च अतो बाह्येन्द्रियाणां ये धर्मास्तेषामभाव इति भाष्यार्थे चतुर्णामान्तरेन्द्रियत्वं ध्वन्यते तेन दोर्मेढ्राङ्घ्रिपायूनां चतुर्णामणुत्वेन प्रतीतानां सत्त्वं सुषुप्तौ इन्द्रोपेन्द्रमित्रकानां चतुर्णां देवानामकामभगवत्सुषुप्तिसामयिकत्वम् । आनन्दभुगिति श्रुतेः आनन्दभोगे कस्य प्रजापतेर्देवस्योपयोगः । एवमिन्द्रोपेन्द्रमित्राणामुपयोगः यथा प्रियया स्त्रिया संपरिष्वक्त इत्यादि-दृष्टान्तश्रुतेः । इन्द्रोपेन्द्रपदाभ्यां सर्वतःपाणिपादान्तमित्युक्तं रूपमपि । जीवोक्षरः तस्य निर्गुणब्रह्म-प्राप्तिरत्र सुषुप्तौ । श्येनसुपर्णदृष्टान्तस्तु भगवत्स्वरूपप्राप्तये इति भाष्यात् । विशेषस्तु ह्यनधिकारात् स्वयं ज्ञातव्यं रहस्यत्वात् । एक इति । सलिल एको द्रष्टाऽद्वैतो भवतीति श्रुतिः । सलिल इति सल

एष ब्रह्मलोक इत्यारभ्य, अनुशशासैतदमृतमित्यन्तेनानन्दरूपो भगवान्

भाष्यप्रकाशः ।

सलिलः । 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति' इति श्रुत्यन्तरात् सलिलवत् । अद्वैतः । द्विधा इतं द्वीतम् । तस्य भावो द्वैतम् । न विद्यते द्वैतं यस्मिन्नित्यद्वैतो भवतीति तदानीं भगवतः सर्वात्मकत्वप्राकट्येन द्वैतराहित्यादन्यत्वविभक्तत्वयोरभाव इत्यर्थः । तदिदमाहुः बाह्येत्यादि । एतदग्रिमग्रन्थस्य तात्पर्यमाहुः एष इत्यादि । एष इत्यनेन, एको द्रष्टेत्यनेनोक्तं मुख्यं द्रष्टारं परामृश्य ब्रह्मलोकपदेन तस्य ब्रह्मात्मकस्थानत्वं विधाय जीवस्य तावत्पर्यन्तं प्राप्तिरिति बोधनाय,

रश्मिः ।

गतौ भ्वा. प. से. सलति सलकलीति लच् । गन्तेत्यर्थः । योगमात्राद्वेदान्ते । बृहदारण्यकटीकानुरोधादाहुः यथोदकमिति । यथोदकं तादृगेव भवति तथात्मा भवतीति श्रुत्यन्तर आत्मोदकयोः दृष्टान्तदार्ष्टान्तिकभावात् । अत्रापि योगरूढ्या दृष्टान्तदार्ष्टान्तिकभावाद्यथा सलिल इत्यर्थः । द्वैतमिति द्वैतपदाद्यञि यकारलोप इति भावः । द्वयोर्भावो द्विता सैव द्वैतं प्रज्ञादेराकृतिगणत्वात् 'प्रज्ञादिभ्यश्च' इत्यण् इति केचित् । कैय्यटे तु द्वाभ्यामितं प्रकारद्वयेन विरुद्धत्वाद्भिन्नाधारवर्तिना युक्तं वस्तु द्वीतं तत्र भवं द्वैतं संशयरूपं ज्ञानं यद्वा द्वयोर्भावो द्विता तत्र भवं द्वैतं तदेव संशयज्ञानमित्युक्तम् । तदिदमिति । तर्ह्यदर्शनमेव कुत इत्यारभ्योक्तम् । बाह्येत्यादीति । बाह्येन्द्रियाणां सलिलत्वं विषयगन्तृत्वमान्तराणां चतुर्णामसलिलत्वं विषयागन्तृत्वमिति पूर्वोक्ते दर्शनादर्शनरूपेर्थे उपपत्तिः । एष इति । एष ब्रह्मलोकः सम्राडिति हैनमुवाचैषास्य परमा संपत् एषोस्य परमो लोक एषोस्य परमानन्दः एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति स यो मनुष्याणां राद्धः समृद्धो भवति अन्येषामधिपतिः सर्वैर्मानुष्यकैः कामैः संपन्नतमः स मनुष्याणां परम आनन्दः अथ ये शतं मनुष्याणामानन्दाः स एकः पितृणां जितलोकानामानन्दः । अथ ये शतं पितृणां जितलोकानामानन्दाः स एकः कर्मदेवानामानन्दः ये कर्मणा देवत्वमपि संपद्यन्ते । अथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतमाजानदेवानामानन्दाः स एको देवलोक आनन्दः यश्च श्रोत्रियोऽवृजिनोऽकामहतः अथ ये शतं देवलोक आनन्दाः स एको गन्धर्वलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं गन्धर्वलोक आनन्दाः स एकः प्रजापतिलोक आनन्दो यश्चाश्रोत्रियोऽवृजिनोऽकामहतः । अथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः एष ब्रह्मलोकः सम्राडिति हैनमनुशशासैतदमृतमित्यनेन संदर्भेण । ब्रह्मात्मकेति । एतेन ब्रह्मलोकपदे ब्रह्म चासौ लोक इति कर्मधारयोऽसूचि । ननु एष इत्यनेन सुषुप्तिरूपमकामं परामृष्टुं योग्यं न तु बाह्येन्द्रियरूप एको द्रष्टेति चेन्न । अपहतपाप्मप्रपञ्चत्वेनादोषात् । अपहतपाप्मत्वस्य सत्यत्वादिवदसाधारणधर्मत्वात् । न चाभयपदमपि वर्तते इत्यभयं चित् ज्ञानमिति यावत् तस्य परामर्षोस्त्विति वाच्यम् । ज्ञानपदेनानुक्तत्वात् । अमृतमानन्दोऽभयं चित् सद् ब्रह्मेति भाष्ये सत्पदेन ब्रह्मणः पृथगुपादानात् । नन्वकामरूपस्य परामर्षः स्यादिति चेन्मैवम् । रूपेऽकामत्वं न चाकामं रूपमपहतपाप्मत्वेन ग्राह्यमसाधारणधर्मत्वादित्युपपत्तेः । सम्राडिति जनकं संबोध्य एनं जनकं याज्ञवल्क्य उवाच । तावदिति साधनैरिति बोध्यम् । पुष्टिभक्त्यादिभिस्तु सगुणस्यापि प्राप्तिः । एतदिति मात्रा कल्प

भाष्यप्रकाशः ।

एषास्य परमा संपदित्याद्युक्त्वा तस्य माहात्म्यबोधनायाऽन्येषामानन्दानामेतदंशत्वं बोधयित्वा,

रश्मिः ।

अंश इति यावत् । विरुद्धधर्माश्रयत्वादनंशकस्यांशोपि टीकायां त्वेतस्यैव ब्रह्मानन्दस्य मात्रां कलाम् । पूर्णस्याप्यानन्दस्याविद्योत्थानेकबुद्धिवृत्त्यवच्छेदवशात् मात्राशब्दार्हां विषयेन्द्रियसंबन्धकाले विभाव्यमानान्यान्याविद्यकानि ब्रह्मादिस्तंबपर्यन्तानि भूतानि उपजीवन्त्युपभुञ्जते इति बुद्ध्युपाधिनांशत्वमुक्तम् । राद्धः संसिद्धः अविद्यां गमयित्वा सिद्धः । 'अविद्यां गमयित्वाऽन्यं नवतरं कल्याणतरं रूपं तनुते पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वा अन्येभ्यो वा भूतेभ्यः' इति वक्ष्यमाणश्रुतेः । अन्येषां भूतानां संबन्धि वा रूपमित्यर्थः । सज्ञान्नष्टस्य मुक्त्यभावात्तस्य श्रीमतां शुचीनां गेहे जननात्तस्य मानुषरूपस्यानन्दः 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते' इति वाक्यात् । युधिष्ठिरादीनां चानन्दोयम् । अदृष्टग्रहादिवशाज्जातानामादिशब्दार्थानां च । मानुष्यकैरिति । इवार्थे कन् प्रवृत्तिमार्गनिष्ठानां मानुष्याणां सदृशैर्निवृत्तिमार्गीयाणां कामैः प्रवृत्तिमार्गस्य जाघन्यात् । तथा च मानुष्यकैः कामैः कर्मज्ञानभक्त्युपयुक्तैः निवृत्तिमार्गीयैरपि संपन्नतमः । प्रवृत्तिमार्गे आत्मनिवेदनगुरुशिष्यसंवार्चने उक्तः त्वं ज्ञातिधर्मकुलधर्मदेशधर्मग्रामधर्मपरिपालनेन देवपितृयजनेन कृत्वोर्जवत्सुखी भविष्यति मृतः सद्गतिं यास्यसि इति सर्वत्र प्रसिद्धमित्येवमन्ये मार्गा अपि ततो द्रष्टव्याः । 'यजुर्वेदस्तु मानुषः' इति मनुस्मृतेर्यजुर्वेदार्थानां मनुष्याणामानन्दः अतो नानित्यसंयोगः । एतेषामपेक्षया पितृणामुत्कृष्टत्वं सामवेदार्थत्वेन नित्यत्वात् । तेपि युधिष्ठिरादितुल्या इति भेदकं विशेषणम् । जितेति जितः स्ववशीकृतो लोकः [भक्तिमार्गपरंपरासिद्ध्यर्थं तन्तुसन्तानरूपो येषां भगवत्त्वेपि पितृणाम्] चरस्य मृत्योर्लोकः प्रेक्षको भासको वा कालो यैस्तेषाम् । कालजयो भीष्मस्य । मनुष्याणां परमानन्दानन्तरं पितृणामानन्दकथनं परमानन्दिनां मनुष्याणां भक्तिमार्गपरंपरासिद्ध्यर्थं तन्तुसंतानकामना तया पितृणां यष्टव्यत्वात् । 'तन्तून् तन्वन् पितृन् यजेत्' इति द्वितीयस्कन्धात् । पितरश्चाग्निष्वात्तादयः । के ते इत्यत आह य इति, ये जितलोका पितरः सामवेदार्थभूताः कर्मणा कर्मविद्याविशेषेण शंकरभाष्योक्तेन देवत्वमृग्वेदार्थत्वमपि संपद्यत इत्यर्थः । अत आनन्दोत्कर्षः । ततश्च पूर्वोत्तरभावः । पितृणां कर्मदेवानां च । मनुष्याणां परमानन्दानन्तरं कर्मदेवानामानन्दकथनं भजने वेदज्ञानेन्द्रियधनरूपश्रीपूर्वकत्वाय ताश्च 'ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम् । इन्द्रमिन्द्रियकामस्तु' इति पादत्रयेण 'देवीं मायां तु श्रीकामः' इति पादेन चोक्ताः ता वेदज्ञानेन्द्रियश्रियो न धर्तुं शक्या आश्रयनाशकत्वादतस्तद्धारकदुर्धर्षतेजःकामना तया कर्मदेवानां यष्टव्यत्वात् । 'तेजस्कामो विभावसुम्' इति वाक्यात् । विभावसुरग्निः विशेषेण भा दीप्तिः वसु धनं यस्य इति विभावसुशब्दनिर्वचनं सुबोधिन्याम् । बहुवचनात् 'वसुकामो वसून् रुद्रान् वीर्यकामोथ वीर्यवान्' इत्याद्युक्ता वस्वादयोऽग्रेऽनुपयुक्ता ग्राह्याः सेवायां तत्कामनाभिर्यष्टव्यत्वात् । एतावत्पर्यन्तं कामहतानामानन्दः कर्मविद्याविशेषेणोक्तोतः परमकामहतानामानन्दः आजानेति आजाननेतिपाठः आजानजेत्यर्थः हल्विकारः आ, गन्तुः, आद्युः जायन्त इत्याजानाः शानच् । सूत्रं तु 'हलः श्नः शानज्झौ' । छन्दसि शायजपि । अपि शब्दाच्छानजिति तेभ्यो जायन्तेऽतः आजाननाः आजान इति देवलोकः तस्मिन् जाताः आजानजा देवाः स्मार्तकर्मविशेषतो देवस्थानेषु जाताः इति शंकरभाष्यं ब्रह्मवित्प्रपाठकस्य । अकामहतत्वकृत आनन्दोत्कर्षः श्रोत्रियत्वावृजिनत्वे पूर्वत्रापीति

रश्मिः ।

शांकरमते । स्वमते तु पञ्चीकरणस्थाने त्रिवृत्करणवत् पूर्वत्र ते संदिग्धे । अकामहतत्वकृत आनन्दोत्कर्षो वैराग्यस्य भगवत्त्वात् । 'जनयत्याशु वैराग्यम्' इत्यस्य सुबोधिन्यां भगवत्त्वं वैराग्यस्य । 'अथर्वा ह्युत्तमो वेदश्चतुष्के त्रिषु सामवत्' इति वाक्यादथर्वाजानदैवत्य इत्यथर्वकृतोत्कर्षोपि । ततश्च पूर्वोत्तरभावः कर्मदेवानामाजानदेवानां च । मनुष्याणां परमानन्दानन्तरमाजानदेवानामानन्दानां कथनं भजने विद्याकामना तया गिरिशस्य यष्टव्यत्वात् । 'विद्याकामस्तु गिरिशम्' इति वाक्यात् । गिरिशे यष्टे विद्ययाऽकामत्वे संपन्ने यद्वा शमदमाद्युपेत इति सूत्रभाष्योक्ते स्वतोऽकामत्वे वा संपन्ने 'अकामः पुरुषं परम्' इति वाक्यात् । सेवायां स्वर्गस्यात्मसुखस्य कामना तयाऽदितेः सुतान्तर्गताजानदेवानां यष्टव्यत्वान्मनुष्याणां परमानन्दानन्तरमाजानदेवानन्दकथनं 'स्वर्गकामोऽदितेः सुतान्' इति वाक्यात् । देवत्वाददितेः सुतत्वमाजानानाम् । यश्चेति सुपां सुः येषां याजकानां आजानदेवानां तेऽमुं लोकमयजन्निति श्रुतेः । च आह्लादेन श्रोत्रियाणां छन्दोऽध्येतॄणां अपापानामित्यवृजिनपदार्थः । वृजि वर्जने अ. आ. से. वृज्यते वृजेः किच्चेतीति नचू न विद्यते वृजिनं वर्जनं येषां ते अवृजिनास्तेषामिति वा । अकामहतः अकामहतानामानन्दाः । यद्वाच सुलुक् आह्लादः श्रोत्रियैः भिसः सुः छन्दोध्येतृभिरवृजिनैः अकामहतैः नात्र पक्षे आनन्दानुत्कर्षः । तदुक्तं 'महानुभावाः प्रायेण शास्त्रं शुद्धत्वहेतवे' इति । अथेति देवलोकः स्वर्गलोकः । तत्र स वा यश्चेति पूर्ववत् । येषां याजकानां देवानाम् । अकामहतत्वोत्कर्षकृत आनन्दोत्कर्षो देवलोकस्य फलत्वात्तत्कृत आनन्दोत्कर्षश्च ततश्च पूर्वोत्तरभाव आजानदेवानां देवलोकानन्दानां च । मनुष्याणां परमानन्दानन्तरं देवलोकानन्दकथनं भजने भूमौ भगवद्भजनं कृत्वा दिव्यानां पदार्थानामभावात् स्वर्गे कर्तव्यमिति स्वर्गकामना भवति तत्रादित्याः प्रभवः तेमुं लोकमयजन्निति श्रुतेः अतः कारणादादित्यानां यष्टव्यत्वात् । 'स्वर्गकामोऽदितेः सुतान्' इति वाक्यात् । अत्र स्वर्गो लोकः । अथेति गन्धर्वेति गन्ध अर्दने चु. आ. से. अर्दगतियाचनयोः भ्वा. प. से. अर्व गतौ गन्धाय गत्वा याचनाय गच्छन्ति तैत्तिरीयानन्दमीमांसायां मनुष्यगन्धर्वपदात् मनुष्यानवबोधकर्तॄन् गत्वा लब्धावबोधा अन्यत्र तुरीयाश्रमे याचनाय भिक्षार्थं गच्छन्तीत्यर्थः । 'भिक्षुचर्यां चरन्ति' इति श्रुतेः । गन्धर्वपदं शकन्ध्वादि तेषां लोको भासकस्तत्र । यश्चेति पूर्ववत् । येषां याजकानां गन्धर्वाणामकामहतत्वोत्कर्षकृतः आनन्दोत्कर्षः । तुरीयाश्रमकृत उत्कर्षश्चानन्दानां ततश्च पूर्वोत्तरभावो देवलोकानन्दानां गन्धर्वलोकानां च । मनुष्याणां परमानन्दानन्तरं गन्धर्वलोकानन्दकथनम् । सेवायां स्वर्गो धर्मकामना तयोत्तमश्लोकस्य यष्टव्यत्वात् । 'धर्मार्थमुत्तमश्लोकम्' इति वाक्यात् सेवायां रूपकामना तया गन्धर्वाणां यष्टव्यत्वम् । 'रूपाभिकामो गन्धर्वान्' इति वाक्यात् । गन्धर्वा राष्ट्रभृतो देवताः 'एते वै गन्धर्वाप्सरसो यद्राष्ट्रभृतः' इति श्रुतेः । अथेति प्रजापतिः विष्णुः वेदान्ते योगमात्रात् । तस्य लोकस्तत्रानन्दः । आ. गन्तुः आप्नुः समृद्धिरानन्दः । यश्चेति । विष्णुयाजकानां चकारार्थः आह्लादेन आह्लादो वेति पूर्ववत् । अत्राप्यकामहतत्वोत्कर्षकृत आह्लादोत्कर्षः । विष्णुकृत आनन्दोत्कर्षः । सेवायां यशसो भक्तिकारणस्य कामना कीर्त्यां हि सर्वे समायान्ति पश्चात्त-द्वृत्तमनुतिष्ठन्ते 'यज्ञो वै विष्णुः' यशः प्रासवान् 'देवा वै सत्रमासत' ऋद्धिपरिमितयशस्कामा इत्यत्र यज्ञेनैव यशसः प्रासत्वात् स सेव्योऽतो मनुष्याणां परमानन्दकथनोत्तरं प्रजापत्यानन्दकथनम् । पूर्वोत्तरभावः आनन्दयोः स्पष्टः । एतावत्पर्यन्तं कर्ममार्गः तत्प्रधानो भक्तिव्यापारी सर्वोत्तममार्गश्चोक्तः । ज्ञानभक्तिमार्गावुच्येते अथेति । ब्रह्मणो द्रुहिणस्यानुक्तत्वात् ब्रह्मणो लोक इत्यपि ब्रह्मणो द्रुहिणस्य

भाष्यप्रकाशः ।

एष ब्रह्मलोकः सम्राडिति निगमयित्वा तस्य परब्रह्माभिन्नत्वाय भूमवाचकेनाऽमृतपदेनोपसंहारात् तथेत्यर्थः । ननु स्वप्ने जीवस्यासंगतत्वश्रवणेऽपि जागरिते सङ्गेन स्वरूपयोग्यताविघटनमाशङ्क्य तत्रापि तज्ज्ञानार्थं मोक्षसाधनप्रश्ने, तद्यथा महामत्स्य इति महामत्स्यदृष्टान्तेन पुनः पुनः स्वप्ना-

रश्मिः ।

कर्मणा मोक्ष इति सर्वोत्तममार्गीयत्वम् । अक्षरपुरुषोत्तमयोस्त्वभेदात् ब्रह्मपदेनोपादानं फलत्वं च । ब्रह्मणः श्रीपुरुषोत्तमस्याक्षराभेदादेव प्रक्रान्तसुषुप्तिरूपनिर्गुणरूपानन्दप्रस्तावेऽभिधेयत्वम् । श्रुतित्वात्तैत्तिरीयानन्दमीमांसोक्तन्यूनानन्दकथनेपि न न्यूनतालक्षणनिग्रहस्थानम् । ननु तथापि प्रजापत्यानन्दात्पूर्वमिन्द्रबृहस्पत्योरानन्दौ कुतो नोक्तौ इति चेन्न । सेवायामिन्द्रियकामना तयेन्द्रस्य यष्टव्यत्वं बृहस्पतेस्त्वपृथक्भावेन देवेष्वन्तर्भावाद् यष्टव्यत्वमतस्तदानन्दयोरन्यानन्दसंमिश्रणात् तयोरनुक्तेः यश्चेति पूर्ववत् । विस्तारोपि वर्तते स उन्नेयः इति शुभम् । ब्रह्मत्वादानन्दोत्कर्षः स्पष्टः पूर्वोत्तरभावश्च स्पष्टः । मनुष्याणां परमानन्दकथनोत्तरं ब्रह्मानन्दकथनं भजने ब्रह्मवर्चसः कामना तया हिरण्यगर्भस्य यष्टव्यत्वात् । 'ब्रह्मवर्चस्कामस्तु यजेत ब्रह्मणस्पतिम्' इति वाक्यात् । भजने इयं कामना प्रथमं कर्तव्या ।

'ज्ञात्वाऽज्ञात्वा च कर्माणि जनोयमनुतिष्ठति ।
विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत्' ॥

इति वाक्याद्ब्रह्मगतं वेदगतं वा वर्चस्तेजः प्रकाशनसामर्थ्यं ब्रह्मधर्माणाम् । न च ते वेदेन प्रकाश्यन्ते इति वाच्यम् । वेदस्य ब्रह्ममात्रप्रकाशकत्वादतो ब्रह्मणः पतिः तत्सामर्थ्यं दातुं शक्तो यष्टव्यः । ब्रह्मधर्मान् सर्वान् गृहीत्वा जगति प्रकटनार्थं या रजोगुणदेवता ब्रह्मणः पतिः सैवोपास्येति । 'आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम्' इति वाक्यं तु गुह्याधिष्ठातृपरम् । तथा भजने वैराग्यकामना तयाक्षरब्रह्मणो यष्टव्यत्वात् मनुष्याणां परमानन्दकथनोत्तरं ब्रह्मानन्दकथनम् । 'अकामः पुरुषं परम्' इति वाक्यात् । तथा मनुष्याणां परमानन्दकथनोत्तरं ब्रह्मानन्दकथनं भजनेससाधनभक्तिकामना तया परपुरुषस्य यष्टव्यत्वात् ।

'अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम्' ॥

इति वाक्यात् । अकामो वैराग्यवान् इति वैराग्यं भक्तिसाधनम् । सर्वे कामा द्वितीयस्कन्ध-तृतीयाध्यायोक्ता ब्रह्मवर्च आदयः । भक्तिसाधनानि । मोक्षो भक्तिसाधनं 'मुक्तोपसृप्यव्यपदेशात्' इति व्याससूत्रात् । भक्तिस्तु—

'तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान् नृणाम्' ॥

इति वाक्योक्तात्र संबध्यते । प्रकृतमनुसरामः । एवमेतदंशत्वं बोधयित्वा । निगमयित्वेति एष ब्रह्मलोकः सम्राडिति शब्दवृत्त्यवयवविभाजकोपाधिमत्त्वं निगमनत्वम् । यथाहुर्नैयायिकाः पञ्चावयवान् प्रतिज्ञाहेतूदाहरणनिगमनानि पञ्चावयवाः परार्थानुमाने । तदेवं निगमयित्वा तदनु हैत-दनुशशासेत्यनुशासयित्वेति शेषः । सुषुप्त्युपक्रमाद् ब्रह्मलोकपदमक्षरस्य वाचकं तस्य ब्रह्मलोकत्वात् तेनामृतपदस्य भूमवाचकस्यार्थस्यामृतस्याभेदसंसर्गानुपपत्तिमाशङ्क्याहुः तस्येति अक्षरस्य । भूमेति यो वै भूमा तदमृतमिति छान्दोग्यात् । फलत्वाय प्रतिपादितत्वेन प्रकारेण भगवानिति तथेत्यस्यार्थः । स्वरूपेति मोक्षे स्वरूपयोग्यताविघटनम् । तत्रापीति जागरितेप्यसङ्गज्ञानार्थम् । मोक्षेति

प्रतिपादितः फलत्वाय । एतावता उभयासङ्गः प्रतिपादितः ।
तस्यानुभवारूढत्वाय पुनः प्रश्नः । दर्शनादर्शनावापोद्वापाभ्यां सिद्धमसङ्गो

भाष्यप्रकाशः ।

न्तबुद्धान्तसंचरणादेवासङ्गत्वं सिद्धम् । तदुत्तरं श्येनसुपर्णमारभ्य यदेतावत् सुषुप्तिमाहात्म्यमुक्तं तस्य किं प्रयोजनमत आहुः एतावतेत्यादि । पुनः पुनरुभयत्र संचरणादुभयत्र समाना तस्या-सक्तिरिति स्यादतस्तन्निवृत्त्यर्थमेतावान् ग्रन्थ इत्यर्थः । तर्हि पुनर्मोक्षसाधनप्रश्नस्य किं प्रयोजन-मत आहुः तस्येत्यादि । यदि सुषुप्तेः सकाशात् तस्य भेदो न ज्ञायेत, तदेश्वराद् भेदोऽपि न ज्ञायेतेति तस्यानुभवारूढत्वाय स इत्यर्थः । उत्तरस्य तात्पर्यमाहुः दर्शनेत्यादि । तत्रापि स्वप्ना-न्तवद् वाक्यम् । अत्र संप्रसादः सुषुप्तिः । सम्यक् प्रसादो यत्रेति समासात् । रमणं स्वरूपान-न्दानुभवः । आनन्दभुगिति श्रुतेः । चरणं सत्संपत्तिः । सता सौम्य तदा संपन्नो भवतीति श्रुतेः । पुण्यदर्शनमानन्दानुभवः । तस्य तत्फलत्वात् । अत्र सुखमस्वाप्समित्यनुस्मरणात् । पापदर्शनं तु

रश्मिः ।

'अत ऊर्ध्वं विमोक्षाय ब्रूहि' इति श्रुत्या प्रश्ने । सिद्धमिति पूर्वमेतच्छ्रुतिव्याख्याने सिद्धम् । यदेतावदिति यच्छब्दद्वयं चिन्त्यम् । यत् यत्र ग्रन्थे वा । तस्य ग्रन्थोक्तसामर्थ्यस्येत्यर्थः । अत्र मूलपुस्तकप्रतिपुस्तके यदेतावच्छुषुप्तिमाविष्य यदुक्तं तस्य किं प्रयोजनमिति पाठः स लेखकस्य वर्णभ्रमात् वर्णभ्रंशाच्च स्फुरति चेद्बोध्यः संशोधितस्तु व्याकृतः प्रायोयं शोधितः प्राचीनैरस्ति । उभयत्रेति बुद्धान्तस्वप्नान्तयोः । असक्तिरसङ्गः । तथा च माहात्म्यामाहात्म्याभ्यामसामान्यं सुषुप्तिजागरिता-सङ्गस्येति भावः । तथा च माहात्म्यामाहात्म्याभ्यामेतावतोभयासङ्गः प्रतिपादितः इति भाष्यार्थः । तर्हीति । सोहं भगवते सहस्रं ददामि अत ऊर्ध्वं विमोक्षायैव ब्रूहीति प्रश्नस्य । तस्येति शारीरस्य । ईश्वरादिति । भाष्ये । सुषुप्तिस्त्वकामरूपो भगवान् इत्युक्तत्वादिति भावः । न ज्ञायेतेति पुनः पुनः कथने शास्त्रार्थो हृदयारूढो भवतीति प्रश्नः पुनरपि । ननु कथनरूपमुत्तरमेवास्तु तर्हि प्रश्नस्य किं प्रयोजनमिति चेन्न । नापृष्टो ब्रूयादिति सुबोधिन्या उत्तराभावप्रसङ्गात् । तस्येति तस्य शारीरस्य मोक्षे स्वरूपयोग्यताया अनुभवारूढत्वाय स पुनः प्रश्न इत्यर्थः । तस्य भगवतो वा 'ऋते ज्ञानान्न मुक्तिः' इति श्रुतेः । उत्तरस्येति 'स वा एष एतस्मिन् संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यदत्र किंचित् पश्यत्यनन्वागतस्तेन भवति असङ्गो ह्ययं पुरुषः इत्येवमेवैतद् याज्ञवल्क्य सोहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहि'इत्यत्रोत्तरस्य तात्पर्यम् । अत्रेति अप्येवकारार्थे अत्र माध्यंदिनपाठे । अत एव काण्वा इदं वाक्यं न पेठुः स्वप्नान्तवत् इति प्रथमान्ताद्वतिः स वा एष तस्मिन् स्वप्नान्त इति वाक्यवत् स्वप्नश्चासावन्तः बृहदारण्यकटी-काकृद्व्याख्यानमाहुः अत्रेति वाक्ये । तस्येति तस्यानन्दस्य पुण्यफलत्वात् । कार्यकारणभावसंबन्धेन पुण्यस्यानन्दे लक्षणा सा दुष्टेत्यत्रानुस्मरणं प्रयोजकमाहुः अत्र सुखमिति । सुखानन्दयोरभेदः । अन्विति । आनन्दानुभवजन्यत्वात्तज्जन्यसंस्कारमनुस्मरणात् । नन्वनुस्मरणमाधुनिककल्पितं न श्रुतौ पुण्यपदे लक्षणां प्रयोजयति इति चेत्तस्य तत्फलत्वादित्यस्य भाष्यप्रकाशस्यान्यार्थकत्वात् । तथाहि । उक्तार्थस्य बृहदारण्यकटीकास्थत्वात्स्वमते । पुण्यस्य शुभकर्मकर्तुः तत्फलत्वात् । तस्यार्हणकर्तुः फलत्वात् । शुभकर्मकर्तुः फलत्वाभावाच्छुभकर्मणः फलत्वमत्र । शुभं कर्म आनन्दः आनन्दः साधनैः क्रियते इति कर्म आनन्दवाचकः शुभत्वं निर्गुणादिब्रह्मत्वं कामतृप्तित्वं वा कामस्य तृप्तिरानन्द इति वाक्यात् ।

ह्ययं पुरुष इति । एवं जीवं सुषुप्तौ भगवन्तं च ज्ञात्वा मोक्षोपायं पृच्छति । तत्र याज्ञवल्क्यस्य भयं जातं, सुबुद्धिरयं निर्बन्धेनापि सर्वं ज्ञास्यतीति जीवब्रह्मधर्मा-

भाष्यप्रकाशः ।

न किंचिदवेदिषमित्यज्ञानानुस्मरणम् शेषं पूर्ववाक्यसमानम् । अत्र बुद्धान्ताऽऽद्रावणकृतो यो दर्शनावापोऽदर्शनोद्वापश्च, ताभ्यां कृत्वा सुषुप्तावपि साक्षित्वेनैव दर्शनं सिद्धम् । अतस्ततोऽपि भिन्न इति तत्राप्यनासक्तत्वादसङ्गो ह्ययं पुरुष इति सिद्धम् । तत्स्वरूपस्यावस्थातो भिन्नत्वं, तास्वनासक्तत्वं च सिद्धम् । तावता तस्य मोक्षे स्वरूपयोग्यताऽनुभवारूढा जातेत्यर्थः । अग्रिम-प्रश्नतात्पर्यमाहुः एवमित्यादि । जीवं मोक्षयोग्यत्वेन, भगवन्तं तद्दातृत्वेन च ज्ञात्वा तत्प्रश्न इत्यर्थः । उत्तरस्य तात्पर्यमाहुः तत्रेत्यादि । सर्वं ज्ञास्यतीति । कामप्रश्नव्याजेन सर्वं ज्ञानं मदीयं ग्रहीष्यतीति । आहेति । कामप्रश्नवरदानस्य भयस्य चानुरोधादुक्तरीत्या मोक्षोपायं

रश्मिः ।

सर्वधातुभ्यो मनिनिति कृञो मनिन् कर्मणि छान्दसः । पुण कर्मणि शुभे तु. प. से. पुणति इगुपधेति कः पुणः तमर्हतीत्यर्हणकर्तरि यत् पुण्यम् । आनन्दोतः पुण्यदर्शनमानन्दानुभवः । अपि च पुणे साधुः पुण्यं तत्र साधुरिति यत् । शुभकर्मकर्तरि कार्यं साध्नोतीति कार्यमानन्दस्तस्य साधकः साधुरात्मा । तथा च तस्यानन्दसाधकस्य तत्फलत्वात् शुभकर्मकर्तृफलत्वात् । शुभकर्मकर्तुरानन्दसाधक आनन्दो भगवान् विवक्षितः । किं च पुनाति यः स पुण्यमानन्दः ।

'प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम् ।
धुनोति शमलं कृष्णः सलिलस्य यथा शरत्' ॥ इति वाक्यात् ।

पूञो नुट् ह्रस्वश्चेति यत् ह्रस्वश्चेति । सुखमहमस्वाप्समित्यानन्दानुभवः । अयं घट इत्यनुभववत् पात्यस्मादात्मानमिति पापं पा रक्षणे अ. प. अ. भीत्रादित्वादपादाने यद्वा पिबति भक्षयति कर्तारं पा पाने भ्वा. प. अ. अज्ञानमित्याहुः न किंचिदिति । न किंचिदवेदिषमित्यज्ञानं पापं अनुस्मरणं दर्शनं सुखमस्वाप्सं न किंचिदवेदिषम् इति सुषुप्त्यनुभवः संपूर्णः । संस्कारोद्बोधमनु-लक्षीकृत्य स्मरणमनुस्मरणम् । शेषमिति । भगव इति पाठे त इत्यस्य लोपः भगव इति छेदोत्र बोध्यः । भाष्यं व्याचक्रुः अत्रेति । बुद्धान्ताय जागरिताय आद्रावणमागमनं व्याप्तुः सकाशाद्गमनम् । तस्य कृतित्वेन जानातीच्छति यतते इत्यत्रेच्छापरित्यागेन ज्ञानानुमापकत्वम् । अत आद्रावणकृतः दर्शनस्य पुण्यपापज्ञानस्यावापः दृष्ट्वैव पुण्यमित्यादौ । न च सुषुप्तावनुभवो बाधक इति वाच्यम् । श्रौतत्वेन दर्शनस्याननुभवस्याबाधकत्वात् । कृत्यकारणस्यादर्शनस्योद्वापश्च जीवस्य साक्षित्वेन वर्तमानस्य दर्शनं पुण्यादिदर्शनम् । ततोपीति सुषुप्तेरपि न आ असक्तत्वात् । अनेति न आ असक्तत्वम् । तस्येति जीवस्य । अग्रिमेति प्रश्नस्तु श्रुत्युपन्यास उक्तः । एवमित्यादीति एवमसङ्गं जीवं मोक्षयोग्यत्वेन ज्ञात्वा सुषुप्तौ सत्यां सतिसप्तम्याः सामानाधिकरण्यमर्थः सुषुप्तिः समानाधिकरणं सुषुप्तावित्यस्यार्थः । तथा च सुषुप्तिरूपमकामं भगवन्तं जनको ज्ञात्वा । यद्वा सुषुप्तौ अकामरूपे भगवति एवं जीव-मिति योजना । अत्र भगवत्पदोक्तितात्पर्यमाहुः तद्दातृत्वेनेति । भगपदार्थेषु केनचित्तद्दातृत्वम् । उत्तरस्येति । अत्र याज्ञवल्क्यो बिभयांचकार मेधावी राजेति मां तेभ्य उदरौत्सीदित्युक्त्वा स यत्राणि-मानं न्येति जरया वोपतपता वाणिमानं निगच्छति यथाम्रमौदुम्बरं वा पिप्पलं वा बन्धनात् प्रमुच्यते एवमेवाय९शारीर आत्मैभ्योऽङ्गेभ्यः संप्रमुच्य प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैवेत्युत्तरस्य । कामप्रश्नेति । ननु भाष्ये निर्बन्धेनेति हेतुरस्ति ह्यस्य किं प्रयोजनमिति चेन्न । सर्वं ज्ञास्यतीति

नेकीकृत्य जीवोपक्रमेण ब्रह्मोपसंहारेणाह । तत्र, स यत्रेति जीवस्य मूर्च्छोपता-

भाष्यप्रकाशः ।

वक्तुं पूर्वं सकामस्य कर्तुर्मरणावस्थां सप्रकारामुक्त्वा ततो निष्कामस्य कर्तुर्मोक्षोपायं सुषुप्त्यवस्थयै-कीकृत्य श्लिष्टतया आहेत्यर्थः । श्रुतौ तु, अन्तेभ्य उदरौत्सीदिति प्रश्ननिर्णयावसानेभ्यः पुनः-पुनरवरोधं कृतवानिति हेतोर्भयं जातमित्यर्थः । उत्तरं विवृण्वन्ति स यत्रेत्यादि । श्रुतौ तु, अणिमानं स्थूलशरीरकार्श्यम् । उपतपतेति उपतापजनकेन ज्वरादिना, न्येति प्राप्नोति । ततोऽणिमानं ज्ञानकार्श्यरूपां मूर्च्छां नितरां गच्छति । बन्धनादिति वृन्तात् । संप्रमुच्येति

रश्मिः ।

हेतुवाचकेतिशब्दस्य देहलीदीपन्यायेन भये जीवधर्मानेकीकृत्य वचने च हेतुत्वेन उभयोरेकतरार्थे हेत्वन्तरस्यास्य प्रयोजनसत्त्वात् । तथा च सुबुद्धिरयं निर्बन्धेनापि सर्वं ज्ञास्यतीति हेतुना तत्र याज्ञवल्क्यस्य भयं जातं कामप्रश्नव्याजेन मदीयं सर्वं ज्ञानं ग्रहीष्यतीति हेतुना जीवब्रह्म-धर्मानेकीकृत्येत्यादिरिति भाष्यार्थः । अत्र निर्बन्धः । 'निर्बन्धं तस्य तं ज्ञात्वा' इत्यस्य सुबोधिन्युक्तदिशा सर्वज्ञानरूपोऽवश्यसर्वज्ञानसाधकयत्नः । न च निर्बन्धेन सर्वज्ञानस्य न भयहेतुत्वं किं तु क्रोधस्येति वाच्यम् । पापाद्भयमित्याशयात् । पापं तु सर्वज्ञानाविषये ब्रह्मणि सर्वज्ञानात् । 'यस्यामतं तस्य मतं मतं यस्य न वेद सः' इति श्रुतेः 'यतो वाचः' इति श्रुतेश्च । पापं—

'योन्यथासन्तमात्मानं अन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चौरेणात्मापहारिणा' ॥

इति श्रुतेः । सर्वज्ञानाविषयस्य ब्रह्मणः सर्वज्ञानविषयत्वेन प्रतिपादनकर्ता अन्यथा प्रतिपद्यते इत्यस्यार्थः । ननु तर्हि स्पष्टमेव कुतो नोक्तमिदमित्थतया ज्ञातुं शक्यं न भवति ब्रह्मेति अनतिप्रश्न्या वै देवतेति चेत्तत्राहुः कामेति । कामप्रश्नमिषेण सर्वं ज्ञानं मदीयं ग्रहीष्यतीति स्पष्टं नोक्तम् । किं तु जीवब्रह्मेत्याद्युक्तम् । कामप्रश्नवरदानस्य अन्यथयितुमशक्यत्वेन स्पष्टं नोक्तम् । तदाहुः आहेति । कामप्रश्नवरदानस्य भयस्य चानुरोधात् इति । कामप्रश्नवरदानं तूपक्रमे तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तं हास्मै ददाविति । जीवब्रह्मधर्मानिति भाष्यं विवरीतुमाहुः उक्तेति । स समानः सन्नित्यादिनोक्तस्वप्नजागरणयोः संचरणोक्त्या सुषुप्त्युक्त्या च स्वप्नजागरणसुषुप्तिबोधकश्रुत्युक्तरीत्या सुषुप्तिर्भगवान् । जीवब्रह्मधर्मसंश्लिष्टतया मां तेभ्य इत्युक्तौ विवक्षितबहुवचनानुपपत्तिः प्रश्नेभ्यः उद्बोधाभावात् । अत आहुः अन्तेभ्य इति मा मां अन्तेभ्यः इति छेदः । 'अन्तः प्रान्तेन्तेन्तिके नाशे स्वरूपे मनोहरे' इति विश्वादन्तपदं त्रिष्वाहुः प्रश्नेति । अन्तिकवाचकान्तपदार्थः प्रश्नः निकटत्वात् । निर्णय उत्तरं प्रान्तवाचकान्तपदार्थत्वात् । अन्तोऽव-सानं तेभ्यः । प्रश्नाश्च निर्णयाश्च अवसानं चेति विग्रहः । अवेति रुधिर् आवरणे रु. उ. अ. उत् । उङ् शब्दे । क्विप् । तुक् । शब्देन व्याप्तुः संबन्धिरोधं वरणं वक्तृत्वेन स्वीकरणं कृतवान् इति हेतोर्भयं जातमिति । उक्तवरणे निर्बन्धेन सर्वं ज्ञानं जनकस्य भवत्वेवेत्युक्तवाणस्य निर्बन्धेन सर्वज्ञानद्वारा भयहेतुत्वमस्ति निर्बन्धेन सर्वज्ञानस्य भयहेतुत्वमुक्तमेव । उत्तरमिति जीवोपक्रमं वदन्त एवोत्तरं सजीवः शिरःपाण्यादिमान् देहो वा । उपतापेति । उपतपतीत्युपतपत् तेनोप-तापकर्त्रेत्यर्थो भवति । तदुक्तं कर्ता जनको भवत्येव । बन्धनात्प्रमुच्यत इति पाठः । अडभावश्छान्दसः तदर्थमाहुः वृन्तादिति । 'वृन्तं प्रसवबन्धे स्यात् वटधाराकुचाग्रयोः' इति विश्वात् । प्रसवबन्धा-

पावस्था । तद्यथा अन इति मरणावस्था । तत्र भगवानेवैनं लोकान्तरे नयति ।
तद्यथा राजानमिति भगवत्सन्मानम् । एवंविदमिति वचनात् । जीवस्तु

भाष्यप्रकाशः ।

ममतात्यागेन स्वगुणं चैतन्यमाकृष्य । प्रतियोनीति स्थूलशरीरं लक्ष्यीकृत्य । प्राणायेति पुनरुज्जीवनाय । सा स्थूलदेहप्राप्तिरस्य येन हेतुना प्रकारेण च भवति तं हेतुं प्रकारं वक्तुं मरणावस्थोच्यत इत्याहुः **तद्यथा अन इति । मरणावस्थेति** । हेतुर्भगवान् दार्ष्टान्तिके स्पष्टः । श्रुतौ सुसमाहितमिति, भाराक्रान्तम् । उत्सर्जदिति, शब्दं कुर्वत् । शारीर आत्मेति लिङ्गशरीरविशिष्टो जीवः । अन्वारूढ इति शाकटिकेनेवाधिष्ठितः । उत्सर्जदिति वेदनया हिक्कादिशब्दान् कुर्वन् । अग्रिमकण्डिकयोरर्थमाहुः **तद्यथा राजानमित्यादि** । श्रुतौ । प्रत्येनसः,

रश्मिः ।

दित्यर्थः । रसप्रसवेन फलं बध्यतेऽस्मिन् बन्धनं वृन्तम् । तस्माद्बन्धनात्प्रमुच्यते वा तनुगुरुत्वादिना प्रमुच्यत व्यच्छिद्यत । अङ्गेभ्यो द्वादशेभ्यः । **ममतेति** । ननु देहादिषु अभिमानं कारयति साऽविद्या तमभिमानं त्याजयति सा विद्येति सकामस्य कर्तुर्मरणावस्थाप्रकारोक्तौ कुतो ममतात्यागो विद्याभावादिति चेन्न अयं ममतात्यागो न विद्याकृतः स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति वक्ष्यमाणश्रुतेः अर्थोग्रे वाच्यः । प्रतिन्यायमित्यस्य प्रति प्रातिलोम्येन नि नितरामायो गमनं यथा स्यात्तथेत्यर्थः । क्रियाविशेषणम् । **जीवनायेति** । जीव प्राणधारणे प्राणधारणाय । तथा च प्राणाय ञ्योर्लुक् प्राणानामायो जीवाद् गमनं तस्मै प्राणानां जीवादुद्गमने धारणं भवति । **तद्यथेति** । तद्यथा अनः सुसमाहितमुत्सर्जद्यायादेवमेवाय९शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जद्यातीति श्रुतिः । **भाराक्रान्तमिति** । फलितार्थोयं सुसमाधीयते स्म सुसमाहितं दधातेर्हि । तादौ क्तिति । सुषु गतौ सूयते क्विप् । तुगभावः डुर्वा । सम् षम् वैक्लव्ये क्विप् । आप्लृ व्याप्तौ डाङ् डा वा । निरुक्ते निपातः पादपूरणे इति तदर्थमपहायाहुः **शब्दमिति** उच्छब्दार्थः । उङ् शब्दे क्विप् । शब्दाभिन्नं सृज विसर्गे विसर्गं कुर्वत् इत्युपसर्गत्वं उतो व्याकरणमतेनार्थः । **शाकेति** । **प्राज्ञेनेति** दार्ष्टान्तिके । **अधिष्ठित** इति अत्र पर्यायता । अनुचैतन्याकर्षं लक्षीकृत्य जीव आरूढः आ व्याप्तुः स्वस्मात् । रुह जन्मनि कर्मवशाज्जन्मविषयः योग्येन जन्मना संबद्ध्यते । विशेषेण सीयते इति षयः कर्मण्येरच् । शब्दानिति । विसर्गात् । **भाष्ये** । जीवस्य निराकारस्य प्राज्ञ आत्मा लोकान्तरे वक्ष्यमाणेत्यनेनेति प्राहुः **तत्रेति** तत्र मरणावस्थायां सत्यां भगवत्प्राज्ञपदोक्त एनं जीवं लोकान्तरे नयतीति प्रासङ्गिकं प्रकाशेन व्याख्यातम् । प्राज्ञपदोक्तितात्पर्यं चोक्तम् । **प्रकृते** । **अग्रिमेति** तथा च राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायात्ययमागच्छतीति । इत्येव९हैवंविद९सर्वाणि भूतानि प्रतिकल्पन्ते इदं ब्रह्म आयातीदमागच्छतीति । तद्यथा राजानं प्रयियासन्तं उग्राः प्रत्येनसः सूतग्रामण्यः उपसमायान्त्येव९हैवंविदं प्राणाः उपसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवतीत्येतयोः । तद्विस्तृते यथा येभ्यो याजकेभ्यः प्रकारेभ्यः उग्राः उच्यन्ति उच समवाये दि. प. से. ऋज्रेत्यादिना रन् । गश्चान्तादेशः । **समप्रतीति** एनः पापं तद्वन्तं पापिनं लक्षयति तद्वान् पापो जात इति न लक्षणा वा तेषां पापिनां पापानां प्रति । प्रतिरारम्भेऽतस्तद्योगे लक्षणेत्थंभूताख्यानेति सूत्रेण द्वितीया न । आरम्भः स चार्थात् पापिनां शासनार्थं नियोगः । तादृशनियोगयुक्ता एनसः पापाः प्रत्येनसः मध्यमपदलोपी समासः एनोभ्योतिक्रान्ताः पापिनां शासनार्थं

नैवंवित् । सिद्धवद्वचनान्न ज्ञानविधिः । वाक्यभेदप्रसङ्गाच्च ।

भाष्यप्रकाशः ।

पापिनां शासनार्थं नियुक्ताः । ग्रामण्यो, ग्रामनायकाः । प्रतिकल्पन्ते, उद्युज्य स्वोपयोगाय प्रतीक्षन्ते । भूतानि शरीरान्तरारम्भणायेश्वरेण नियुक्तानि । ननु जीवब्रह्मणोरुभयोरपि तत्र गमने कथं ब्रह्मण एव सन्मानमित्यत आहुः एवंविदमित्यादि । नैवंविदिति संसारिण उपक्रान्तत्वादेवंवित्पदे परामृष्यमाणो जीवत्वेन न वक्तुं शक्य इत्यर्थः । ननु प्राज्ञान्वारोहान्तज्ञानवन्तमनूद्य, तस्मिन् ब्रह्मायातीति ज्ञानकथनात् पूर्वोक्तकर्मफलविदः संसारिणो जीवस्यैवेदं सन्मानं, न ब्रह्मण इति चेत् तत्राहुः सिद्धवदित्यादि । अत्र किमेवं ज्ञानं विधीयते, उतानूद्यते । नाद्यः । सिद्धवचनात् । एवंविद्भवेदिति विधिवाक्यं कल्पयित्वैतद्योजनेन वाक्यभेदप्रसङ्गाच्च । अतोऽनूद्यत इत्येत्र वक्तव्यम् । तथा सति जीवस्य तथात्वबाधाद् ब्रह्मण एव सन्मानमित्यर्थः ।

यत्तु पूर्वं भूतानि राजभृत्यवद्देहमारभ्य प्रतीक्षन्ते । पश्चादात्मा राजवत् तत्र गच्छतीत्यंशोऽत्र न विवक्षितः । शरीरारम्भकैर्भूतैः सहैवात्मनो गमनमिति राद्धान्तस्थितेरित्युक्तम् ।

तत् साहसमेव । अविवक्षितत्वे मानाभावात् । दृष्टान्तकथनवैयर्थ्यप्रसङ्गाच्च । प्रयियासाबोधिकायामग्रिमकण्डिकायां प्राणोपसमायनोक्तिवद् भूतोपसमायनस्यानुक्तत्वेन भूतैः सह गमनसिद्धान्तस्याप्रयोजकत्वाच्च । श्रुतौ । उपसमायन्तीति स्वस्ववसतिं त्यक्त्वा तेन सह गन्तुं

रश्मिः ।

नियुक्ताः प्रत्येनसो वा । 'निरादयः क्रान्त्याद्यर्थे पञ्चम्याः' इति समासः सूताः ब्राह्मण्यां क्षत्रियाज्जाताः । सर्वे वा सूताः । अन्नैः भक्षणैः पृथ्वीभिर्वा केचित्तु भक्ष्यादिप्रकारैः मदिरादिभिरित्यर्थमाहुः पानैरिति । त्रातैः आवसथ्यैः आवसन्त्यत्र वस निवासे 'उपसर्गे वसः' इत्यथच् । यत् । आवसथैरिति पाठे न प्रासादादिभिः । प्रतीक्षन्त इति प्रति प्रतिनिधिभिः समर्था भवन्ति कुर्वन्ति वा सामर्थ्यम् । अयमिति राजा आयात्याप्रापयति जीवमागच्छति स्वयम् । पुनरुक्तिरादरार्थेत्यन्ये । इत्येवमिति इति पदाद्यो गच्छन्तं जीवं एवमित्यस्य ए इत्थं वमुद्गिरन्तम् । टुवम उद्गिरणे विच् । कंचित् ह इत्यस्य घ्नतो ज्वरादीन् पुरीम् । चतुर्थस्कन्धे पुरञ्जनोपाख्याने विशेषो द्रष्टव्यः । हन्तीति ह हन्तेर्डप्रत्ययः । एवं नामेत्थमुद्गिरन्तं उच्छब्देन विजानन्तम् वित् तं विदं गृ विज्ञाने चु. आ. से. द्वितीयमेवं प्रकारान्तरेण पूर्वप्रकारवाचि । एवंविदमिति वचनादिति भाष्यात् । पूर्वोक्तप्रकारेण विदमित्यर्थः । सर्वाणि देहारम्भकाणि भूतानीति व्याकृतं प्रकाशे । दीर्घपाठे इ आश्चर्ये प्रतिकल्पन्त इत्यस्यार्थ उक्तः । आयाति जीवं प्रापयति इदं ब्रह्मागच्छति आगच्छति इति । एतिं समानवृक्षम् । 'द्वा सुपर्णा सयुजा सखाया' इति श्रुतेः । नैवंविदितीति । तथा च श्रुतिः जरया वोपतपता वाणिमानं निगच्छतीति तदाहुः संसारिण इति इदानीं मूर्च्छितस्योक्तेः मूर्च्छिष्यतः संसारिणः । पूर्वोक्तेति प्राज्ञान्वारोहान्तकर्मफलविदः । वाक्येति भाष्यं विवृण्वन्ति स्म नं ज्ञानविधिरित्यत्र द्वितीयहेतुबाधकम् । एवं विदिति । वाक्येति एकतिङ्वाक्यम् । तथात्वेति एवं वित्त्वबाधात् । 'परात्तु तच्छ्रुतेः' इति सूत्रात् । तथा च पूर्वोक्तकर्मफलवित्त्वं भगवत एव । टीकाकृन्मतमाहुः यत्त्विति । आत्मानं प्रतीक्षन्ते प्रयातुमिच्छा प्रयियासा तस्या बोधिकायाम् । द्वितीयकण्डिकार्थमाहुः स्वस्वेति स्वस्य स्वस्य प्राणस्य वसतिम् ।

'हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः' ॥

इति वाक्योक्तं स्थानं हृदादि । तेनेति भगवता । एवंविदमिति वचनात् । अत्र प्राणा

स यत्रेति जीवे मोहोऽधिकः । अथैनमेते प्राणा इति भगवच्चरित्रं, संपद्यत

भाष्यप्रकाशः ।

निकटे समायान्ति । यत्रैतदूर्ध्वोच्छ्वासी भवतीति, पूर्वोक्तमरणावस्थाया उपसंहारे स्मारणम् । अतः परं शारीरब्राह्मणस्यार्थमाहुः स यत्रेत्यादि । स यत्रायं शारीर आत्मा लिङ्गविशिष्टो जीवः । अबल्यं नीत्य, पूर्वोक्तोपतापादिना नैर्बल्यं नितरां प्राप्य । संमोहमिव न्येति, मरणावस्थायामधिकं मोहं प्राप्नोति । तदा तूत्क्रमणस्य कर्तुमशक्यत्वात् तदुपायं भगवानेव करोति । यथाक्रमोऽयं परलोकस्थान इत्यादिना पूर्वं तस्योक्तत्वात् । तदिदानीं सविस्तरं वदामीति ज्ञापनायाथैनमेते प्राणा इत्यथशब्दः । नच प्राणाः स्वत एवायान्तीति शङ्क्यम् । जडत्वात् । अतो जीवे संमुग्धे भगवत्प्रेरिता एवायान्तीत्याशयेनाहुः अथैनमित्यादि श्रुतौ । अथेति भगवत्प्रेरणोत्तरम् । प्राणा वागादयः । स इति जीवः । तेजोमात्रा इति प्रज्ञांशभूतानि करणानि । समभ्याददान इति । उपसंहरन् । अवक्रामति । अन्यतश्चैतन्यमुपसंहृत्य हृदयेऽभिव्यनक्ति । चाक्षुष इति । चक्षुषि भवः सूर्यांशः । पराङ् न पर्यावर्तत इति । स्वकार्यरहितो भवति । अरूपज्ञ इति जीवस्तथा भवति । तत्र हेतुः । एकीभवतीति । लिङ्गात्मना करणग्रामे

रश्मिः ।

वागादय इति टीकाकृद्व्याख्यानम् । तत्समायन्तीत्यनेन वागादीनामन्वयमलभमानं विरुणद्धि अतः प्राणा वायवः । यद्वा प्राणा वागादयः एत एवाग्रे भगवत्प्रेरणया जीवे समायास्यन्तीति । **यत्रैतदिति** एतद् ब्रह्म । **ऊर्ध्वोच्छ्वासीति** । इ आश्चर्ये उपसमिति भाष्योक्तस्य ब्रह्मोपसंहारेणाहेत्वस्योपसंहारस्योत्तरब्राह्मणान्ते वक्तव्यत्वम् । **स यत्रेति** । स यत्रायं शारीरः आत्मा अबल्यं नीत्य संमोहमिव न्येतीति श्रुतिः । अत्रात्मा भगवान् न जीवे मोहोधिक इति भाष्यादित्याहुः **लिङ्गेति** । **तदेति** तदापीत्यर्थः । परात्तु तच्छ्रुतेरिति न्यायात् । **अथैनमिति** अथैनमेते प्राणाः अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति इति पूर्वश्रुतिशेषश्रुतिः । कार्त्स्न्येऽथशब्दः । अनन्तरार्थे वा भगवत्प्रेरणानन्तरमित्यर्थः । भगवत्प्रेरणोत्तरमिति यावत् । **प्रज्ञेति** तेजांसि प्रज्ञांशभूतानि प्रज्ञाया अवबोधत्वात् । मात्राः करणानि मात्राशब्दस्य प्रमाणवाचकत्वात् । मीयन्ते विषया याभिस्तास्तेजोमात्राश्चक्षुरादिकरणानि टीकाव्युत्पत्तिरेषा अथवा सविस्तारकः । वि गन्ता स्तृञ् आच्छादने आ व्याप्तुः छद अपवारणे चु. प. से. वर ईप्सायां चुरादि. प. से वारकः ईप्साकर्ता देहे स्पृहाकर्तृत्वं व्याप्तुर्भगवतः सकाशात्तद्दशायामित्युक्तम् । अप इत्यस्यार्थः कर्तव्यः अन्यथा मूर्च्छितस्य देहस्पृहाभावप्रसङ्गात् । एता इति गत्र्यः तेजसो निशानकर्तुः मात्रा मानस्य चित्तोन्नतेः कर्त्र्यः मान्ति चित्तोन्नतिं कुर्वन्ति मात्राः हुयामेति त्रन् । उपेति । यद्वा सम् षम वैक्लव्ये क्विप् । वि गन्तृत्वेन क्लव्येन शब्दकर्तृत्वेन वर्तमानो जीवः अभि अभये अभयाय आव्यासे प्राज्ञाय ददानः हृदयमेव हृदयमेति । अनु अन प्राणने अनिति बाहुलकादुः । अव रक्षणादौ वाति वानं वा डः नञ् अव न गच्छति हृदयमेतीत्युक्तम् । तत्र विशेषः क्रामति अदृश्यपादयोर्विक्षेपं करोति सर्वतः पाणिपादान्तस्यांशो जीवोऽप्यंशतः सर्वतः पाणिपादान्त इति । **चाक्षुष इति** स यत्रैष चाक्षुषः पुरुषः पराङ्पर्यावर्ततेऽथारूपज्ञो भवति एकीभवति न पश्यतीत्याहुरिति श्रुतिः । चक्षुषि व्यक्तवाक्कर्तरि ॐकारे चक्षिङ् व्यक्तायां वाचि । पश्यन् चक्षुर्भवतीति श्रुतेः **सूर्यांशः'** सूर्यस्यांशस्तत्र भवः । **करणग्रामो लिङ्गदेहः** । आहुरित्यनेन अस्वरसोऽसूचि । स तु 'तदेवैतत्प्रकारेण भवतीति

भाष्यप्रकाशः ।

मिश्रीभवति । तदा पार्श्वस्थान्न पश्यतीत्याहुस्तद्विदः । एवमग्रेऽपि सर्वत्र । एवमुपसंहृते करणग्रामे निष्क्रमणसाधनीभूतं व्यापारमाह तस्येत्यादिना । हृदयस्याग्रं, हृदयच्छिद्रनाडीमुखं प्रद्योतते भगवज्ज्योतिषा स्वप्न इव तदानीं प्रकाशयुक्तं तिष्ठति । प्राण इति मुख्यः प्राणः । प्राणा इति वागादयः । अनूत्क्रामन्तीति । मुख्यप्राणगमनोत्तरं सहैकीभूय गच्छन्ति । संज्ञानमिति । पूर्वोक्तप्रद्योतादेहत्वेन भातां बुद्धिम् । अन्ववक्रामतीति । अश्ववत्तामारोहति । सविज्ञानो रश्मिः ।

श्रुतेर्मतम्' आविर्भावतिरोभावशालिनो ब्रह्मणः इच्छातो भोक्तृकर्मक्षये तिरोभावान्न पश्यतीति । सर्वत्रेति । एकीभवति न जिघ्रतीत्याहुः, एकीभवति न रसयतीत्याहुः, एकीभवति न वदतीत्याहुः, एकीभवति न शृणोतीत्याहुः, एकीभवति न मनुते इत्याहुः, एकीभवति न स्पृशतीत्याहुः, एकीभवति न विजानातीत्याहुरित्यत्र । एवमिति । मिश्रीभावेन । हृदयस्येति तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्त॰ सर्वे प्राणाः अनूत्क्रामन्ति संज्ञानमेवान्ववक्रामति स एष ज्ञः सद्विज्ञानो भवति तं विद्याकर्मणी समान्वारभेते पूर्वप्रज्ञा च तद्यथा तृणजलायुका तृणस्यान्तं गत्वात्मानमुपसंहरति एवमेवायं पुरुष इदं शरीरं विहत्य अविद्यां गमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति 'तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतर॰रूपं तनुते एवमेवमेवायं पुरुषः इद॰शरीरं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतर॰रूपं तनुते पित्र्यं वा गान्धर्वं वा ब्राह्मं वा प्राजापत्यं वा दैवं वा मानुषं वाऽन्येभ्यो वा भूतेभ्यः' इति श्रुतिः । तस्य अथवा सविस्तारक इत्यादिनोक्तार्थस्य ह एतस्य प्रकृतस्योपसंहृतकरणस्य गन्तुः । हृदयेति हृदये छिद्रं जीवप्रत्ययोपाधिरूपं तस्याग्रं नाडीमुखं नाडीरूपे निःसरणोपायः । अयं सकलसाधारणः विद्वांस्तु एकशततम्या नाड्या मूर्धन्या निष्क्रामति ।

'शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति' ॥ इति ।

यतः श्रुतिराह । मुख्य इति आसन्यः । पूर्वोक्तेति भगवज्ज्योतिषा प्रद्योतनात् । 'अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्' इति स्मृतौ तादृशसमयेऽङ्गुष्ठमात्रतोक्ता तां समर्थयितुमाहुः तां बुद्धिमिति ।

'अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः ।
बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यपरोपि दृष्टः' ॥

इतिश्रुतेः तथा च कामाहंकारबुद्धिगुणानामुपलक्षिका बुद्धिः तथा च सम्यग्विशेषेण ज्ञानं संज्ञानं विज्ञानमित्यर्थः । 'स एष ज्ञः' 'स विज्ञानो भवति' । इति श्रुतेः । क्रामतीत्यत्र क्रमु पादविक्षेपे इति पादविक्षेपार्थमाहुः अश्ववदिति पादविक्षेपेणाश्वं यथा रोहति तथा पादविक्षेपेण बुद्धिमारोहति न च तत्स्था बुद्धिरिति शङ्क्यम् । अङ्गुष्ठमात्रतासाधकत्वात् । यथाकथंचिदश्ववद् बुद्धिः । विशेषविज्ञानवानिति बुद्धिमान् 'बुद्धिर्विज्ञानरूपिणी' इति वाक्यात् । यदि च हृदयस्याङ्गुष्ठमात्रत्वं हृद्यपेक्षया त्वितिसूत्रेऽतो मानुषाणां हृदयस्याङ्गुष्ठमात्रत्वादिति भाष्यात् । इति विभाव्येत । आराग्रमात्रोऽङ्गुष्ठमात्राद्भगवतोऽपरः हृदयस्थत्वात् । हृदयस्याङ्गुष्ठमात्रत्वात् । अपिपदेन परः भिन्नो दृष्ट इति च विभाव्येत । तदापि स्मृतिबलात् जीवस्यास्त्येव । हृदयमेवान्ववक्रामतीति श्रुतेः । ननु तर्हि तयैवाङ्गुष्ठमात्रता जीवस्य भवतु किं बुद्ध्येति चेन्न । तर्हि संज्ञानं नाम विशेषविज्ञानोद्भासिनं

भाष्यप्रकाशः ।

भवति, गमनार्थं विशेषज्ञानवान् भवति, । तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति । विद्या सदसद्विषयकं ज्ञानम् । कर्माऽदृष्टरूपं लिङ्गगतिरूपं च । यद्वा, विद्या उपासनात्मकं ज्ञानम् । कर्म यज्ञादिरूपम् । यथाक्रतुरस्मिन् लोक इत्यादिश्रुतेः पूर्वप्रज्ञा, संस्कारात्मना वर्तमानं ज्ञानम् । समन्वारभेते अनुगच्छतः । जलायुका जलौका । निहत्येत्यस्य व्याख्यानमविद्यां गमयित्वेति ।

रश्मिः ।

गन्तव्यम् । अन्ववक्रामति उद्गच्छति इति तव मनीषितं तदसंगतम् । आक्रममाक्रामतीति श्रुतावाक्रमस्य गन्तव्यस्य वक्ष्यमाणत्वात् । अतो हृदयस्याग्रे प्रद्योतितेऽङ्गुमात्रहृदयजीवो निःसरतीत्युक्तम् । इदं निःसरणं संसारिणस्तस्य कर्मवैशिष्ट्यादित्याहुः तमिति । तं जीवम् । विद्यापदेन पञ्चपर्वविद्या नात्र विवक्षिता कर्मोक्तेः विद्यायाः कर्मनाशकत्वात् । कर्मणां प्ररोहैकस्वभावत्वाच्चाहुः सदिति । तदुक्तम् । विद्याशब्देनेह प्रमाणाप्रमाणजनितं ज्ञानमात्रं विहितप्रतिषिद्धादिरूपमात्मज्ञानव्यतिरिक्तमुच्यत इति टीकाकृता । अदृष्टेति 'धर्माधर्मावदृष्टं स्यात्' । लिङ्गेति पूर्वं मुख्यप्राणेत्याद्युक्ता लिङ्गगतिः । टीकायां तु तेनैव शास्त्रलोकस्वभावेभ्य उत्पन्नं दृष्टादृष्टार्थरूपं वाङ्मनःकायसाध्यं सर्वं कर्मशब्देनोच्यते इत्युक्तम् । सर्वत्र प्रसिद्धाधिकरणानुसारेणाहुः यद्वेति । पूर्वाभ्यां ज्ञानकर्मभ्यां जन्यौ संस्कारवासनात्मकौ संस्कारौ ताभ्यां आत्मा स्वरूपं तेन । यद्वा । पूर्वोक्तज्ञानेन जन्यः संस्कारस्तेन जन्य आत्मा स्वरूपं यस्य तेन । रभि राभस्ये भ्वा. आ. अ. 'रभसो हर्षवेगयोः' इति विश्वात् । रभसो वेगः वेगश्चोविजी भयचलनयोरिति धातुपाठाच्चलने । चल कम्पने । कपि चलने । इति चलनार्थ इत्याहुः अनुगच्छत इति सम् गन्तारं जीवं पूर्वोक्तम् । शब्दे शब्दआविष्कारे । आप्तुर्भगवतो वियोगकाले विष् वियोगे क्विप् । कारः कृतिः काल इति यावत् । अनु अनन्तौ गच्छतः । तथा च तदापि प्राणधारणाजीवत्वम् । पूर्वप्रज्ञा च अत्र चकारार्थः । आह्लादयति समन्वारभते वा । समन्वारम्भे इति पाठे तु रभि राभस्ये भ्वा. आ. से. अन्यच्च श्रुतौ च,

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' ॥ इति ।

अत्र परावरदर्शनस्य भिदादिसमानाधिकरणत्वेनानुगमनं हृदयग्रन्थ्यादीनां स्फुटति तत्र विद्यापदेन हृदयग्रन्थिः पूर्वप्रज्ञापदेन पंचपर्वाविद्या ब्रह्मस्तुतौ सुबोधिन्यान्ते च पूर्वं ज्ञाते च देहेन्द्रियप्राणान्तःकरणाध्यासरहिता ज्ञाता इति,

'वैराग्यं सांख्ययोगौ च तपो भक्तिश्च केशवे ।
पञ्चपर्वेति विद्येयं यया विद्वान् हरिं विशेत्' ॥ इति निबन्धे ।

अत्र विद्यया 'मनो यत्र निषक्तमस्य' इति वाक्यात् तत्तत्प्राप्तिस्तत्र तं जीवम् । विद्या जीवनिष्ठः सम् अनुमनोनिषक्तपदार्थात्पश्चाच्चक्षुरादेरारोप उद्यमः तदनुकूलव्यापारवती तथा कर्म प्ररोहैकस्वभावत्वात् स्थूलदेहोत्पत्तिः । कारणं जीवनिष्ठः सम् अनुमनो निषक्तपदार्थात्पश्चात् आरम्भो राभस्यं कर्मवशगत्वात् तदनुकूलव्यापारवत् । एवमपि न्यूनताख्यनिग्रहस्थानमित्याशङ्क्याह पूर्वप्रज्ञेति । पूर्वप्रज्ञा पञ्चपर्वा विद्या सापि त्वानुगृहीतजीवकृष्णसालोक्यप्राप्तजीवदेहहेतुः तद्वदन्ते यं पुरुष इत्युपक्रम्य पित्र्यं वा गान्धर्वं वा ब्राह्मं वेति । रूपं तनुते इत्युक्तरूपविशेषणं संपद्याविर्भावाधिकरणे चोक्तम् । तस्य देहान्तरप्राप्ति—

भाष्यप्रकाशः ।

अज्ञानं प्रापयित्वा, निश्चेष्टं कृत्वेत्यर्थः । पेशस्कारी भ्रमरीविशेषः । पेशसो रूपस्य मात्रामपादायापच्छिद्यान्यं खरुद्धकीटीयं नवतरं रूपं तनुत एवमयं पुरुष इदं स्थूलशरीरं निहत्य तस्माद् रूपाद् वासनया तदंशं गृहीत्वेति यावत् । त्यक्ते पूर्वशरीरे वासनया कथं तदंशग्रहणमित्यत

रश्मिः ।

'देहे पञ्चत्वमापन्ने देही कर्मानुगोऽवशः ।
देहान्तरमनुप्राप्य प्राक्तनं त्यजते वपुः ॥
व्रजन् तिष्ठन् पदैकेन यथैवैकेन गच्छति ।
यथा तृणजलौकैवं देही कर्मगतिं गतः' ॥

इति वाक्याभ्यां स्फुटीकृतामाहुः **तद्यथेति** । तत्तत्र दृष्टान्तः जलायुष्का इत्यत्र वर्णलोपः । हन हिंसागत्योस्तत्र गत्यर्थो हनिरित्याह श्रुतिरित्याशयेनाहुः **व्याख्यानमिति** । अज्ञानं ज्ञानाभावं विषयत्वेन ज्ञानं शरीरे तत्रैव विषयत्वेन ज्ञानाभावं गमयित्वा शरीरमदृष्ट्वेति यावत् । यद्वा निश्चेष्टं कृत्वेत्यर्थः । अन्यमाक्रमं देहं आक्रम्यते इत्याक्रमो देहः आत्मानं पादव्यतिरिक्तं उपसंहरति जीवो भगवत्कर्तृत्वविशिष्टः । आक्रमारम्भकानाह **तद्यथेति** तत् तत्र देहारम्भकविचारे पेशस्कारीति मूर्धन्यषकारः आन्यत्रिकप्रयोगानुरोधात् । भ्रमरीति श्रीभागवते सप्तमस्कन्धे—

'कीटः पेशस्कृता रुद्धः कुड्यान्तमनुसंस्मरन् ।
संरम्भभययोगेन विन्दते तत्सरूपताम्' ॥

इत्यत्र तथा व्याख्यानात् पूर्वं पिषृ संचूर्णने रु. प. अ. रूपमुक्त्वा पिश इत्यस्य रूपमाहुः **पेशस इति** । पिश अवयवे तु. प. से. असुन् अवयवकर्तृ रूपस्य । रूपत्वं मूर्तत्वं तच्च परिच्छिन्नपरिमाणवत्त्वं तन्निष्ठस्यावयवानुकूलव्यापारस्य विवक्षितत्वात् । मात्रां लेशमपछिद्य आमुः सकाशाद् अपद्वैधीकृत्यावयवावयवित्वे द्विधा धीविषयं कृत्वाऽर्थाद् दत्त्वा अन्यं स्वरुद्धेत्यादि । **निहत्येति** अविद्यां गमयित्वा । माया भिदा सा स्वस्माल्लिङ्गाच्च शरीरगा तया जन्यो भेदः पञ्चसु महाभूतेषु पञ्चधाविभक्तदेहेऽविद्यापदवाच्यः तदुक्तम् । 'भिन्ने पञ्चात्मके देहे गते पञ्चसु पञ्चधा' इति पिण्डोपनिषदि । तथा च जगदन्तर्गतदेहस्यात्मत्वात् अविद्याप्रापणं कृत्वाऽऽत्मरूपपञ्चमहाभूताद्यंशस्य ग्रहणं प्राप्तं तदाहुः **तस्मादिति** यावदित्यवधौ शरीरं क्षेत्रं तच्च—

'महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः' ॥
इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम्' ॥

इति गीतात्रयोदशे उदाहृतम् । **श्रुतावन्यमित्यादि** । रूपं मूर्तं पित्र्यं पितृभ्यो हितं पितृलोकभोगयोग्यं यदि पितृलोककामो भवेत् । गान्धर्वलोककामो गान्धर्वं रूपं ब्राह्मं भक्तिमतो रूपं मध्ये वेदान्तत्वादुक्तम् । अखण्डं कृष्णवत्सर्वमिति

'काचं मणिं काञ्चनमेकसूत्रे ग्रथ्नन्ति मूढा न हि तत्र चित्रम् ।
विवेकवित्पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह' ॥

इत्यवेदान्तविषयं कस्यचित् । प्राजापत्यं वैष्णवं रूपं विष्णुलोकभोगयोग्यं । दैवं हिरण्यगर्भेन्द्रतडिदादिलोकं तत्तल्लोकभोगयोग्यं सत्यलोकादि । सात्त्विकानां 'ऊर्ध्वं गच्छन्ति सत्त्वस्थाः

भाष्यप्रकाशः ।

उपपादयति । स वा अयमात्मेत्यादिना । तथाच सर्वमयत्वेन नानावासनाशालित्वाद् या वासना

रश्मिः ।

इति । मानुष्यं मनुष्यलोकभोगयोग्यम् । राजसानां 'मध्ये तिष्ठन्ति राजसाः' इति । अन्येभ्य इति षष्ठ्यर्थे चतुर्थी । अन्येषां भूतानां प्रेततिर्यगादीनां संबन्धि शरीरं कुरुते इति प्रत्येकं संबद्ध्यते । उपपादयतीति श्रुतिः कर्त्री । श्रुतयः प्रतिपादयन्तीति वा । श्रुतिलिखापितम् । स वा अयमिति । अयमात्मा ब्रह्म विज्ञानमयो मनोमयो वाङ्मयः प्राणमयश्चक्षुर्मयः श्रोत्रमय आकाशमयो वायुमयस्तेजोमय आपोमयः पृथ्वीमयः क्रोधमयोऽक्रोधमयो हर्षमयो धर्ममयोऽधर्ममयः सर्वमयस्तदेदंमय अदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति श्रुतयः । अत्र ब्रह्मेत्यन्तेनासङ्गः । स्वरूपमुक्तम् । आध्यासिकं रूपमाहुः विज्ञानमय इत्यादिना । जीवस्याविकृतत्वात् । प्राचुर्ये मयड्विकारे । विज्ञानं बुद्धिस्तत्प्रचुरः मया जानन्तीति बुद्ध्यध्यासः । अहं मन्व इति इति मनोध्यासः । मया वक्तव्यार्थो ज्ञात इति वागध्यासः । अहं देहं धारयामीति प्राणाध्यासः । पश्यामीति चक्षुषः । शृणोमीति श्रोत्रस्य एतावत्पर्यन्तं सहैव गतानां बुद्ध्यादीनामनुवादः मात्रापादानामतः परमाकाशमय इत्यादीनां पञ्चमहाभूतानामुच्यते यथाकर्तुं शीलमस्यास्तीति यथाकारी यथाचरितुं शीलमस्यास्तीति यथाचारी यथातथाशब्दौ व्याकरोति साध्वीति अग्रे स्पष्टम् । तदुक्तम् । शरीरं निहत्य पञ्चसु महाभूतेषु पञ्चधा गमयित्वा—

'त्र्यहं वसति तोयेषु त्र्यहं वसति चाग्निषु ।
त्र्यहमाकाशतो भूत्वा दिनमेकं तु वायुगः' ॥
तस्यैतस्य जीवस्य पिण्डदानेन संभवः ।

तथाहि पिण्डोपनिषदि त्र्यहं वसतीति पूर्वोक्तमुक्त्वा पठ्यते—

प्रथमेन तु पिण्डेन कालातान्तस्य संभवः ।
द्वितीयेन तु पिण्डेन मांसत्वक्शोणितोद्भवः ॥
तृतीयेन तु पिण्डेन मतिस्तस्याभिजायते ।
चतुर्थेन तु पिण्डेन अस्थि मज्जा प्रजायते ॥
पञ्चमेन तु पिण्डेन हस्ताङ्गुल्यः शिरोमुखम् ।
षष्ठेन तु पिण्डेन हृत्कण्ठतालु जायते ।
सप्तमेन तु पिण्डेन दीर्घमायुः प्रजायते ॥
अष्टमेन तु पिण्डेन वाचं पुष्यति वीर्यवान् ।
नवमेन तु पिण्डेन सर्वेन्द्रियसमाहितः ॥
दशमेन तु पिण्डेन भावानां प्लवनं तथा ।
पिण्डपिण्डे शरीरस्य पिण्डदानेन संभवः पिण्डदानेन संभवः ॥

इतीत्यत्र संघातात्संघातस्य शरीरस्य संघातदानेन द्विरुक्त्या मर्यादाप्रवाहयोः संभवः । पिडि संघाते भ्वादिः आ. से. । चमितुं शीलमस्येति चामी आत्मा तेषु । कलातः बुद्धितः । कुवर्णागमः प्राक्पाठात् । वीर्यवान् भवति । पिण्डपिण्डे । पिण्डात् पिण्डस्य ङसः शे । अत्रेति त्यक्तदेहान्मात्रा-

इत्यन्तेन श्लोके तद् ब्रह्म अस्य जीवस्य अकामयमानस्य भगवतः स्वरूपं पूर्वमेवोक्तमनुवदति ।

भाष्यप्रकाशः ।

तदा कर्मणोद्बुद्ध्यते तया पूर्वस्माद् रूपांशोपादानमित्यर्थः । अत्र पक्षान्तरमाह । अथो खल्वित्यादि । तेन कस्य चित् कर्मणा वासनोद्बोधे तदनुरूपो देहः । कस्यचित्तु कामाधीनः । यथा नृगस्य । उभयत्रापि भगवदिच्छा नियामिका । एवं जीवस्य लोकान्तरप्रापकं भगवच्चरित्रं विस्तारेणोक्तम् । अस्य भगवच्चरित्रत्वे गमकमाहुः श्लोक इत्यादि । श्लोकस्तु सार्द्धः—

'तदेव तत् सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य ।
प्राप्यान्तं कर्मणस्तस्य यत् किं चेह करोत्ययम् ।
तस्माल्लोकात् पुनरेत्यास्मै लोकाय कर्मणे ॥'

रश्मिः ।

ग्रहणे पक्षस्तदेव तदन्यत् कर्मपक्षः पक्षान्तरम् । अथवेति । अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तथा क्रतुर्भवति यथा क्रतुर्भवति तथा कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते इति श्रुतयः । आहुरन्याः श्रुतयः काम इच्छा तत्प्रचुरः कामो विषयोपादित्सेत्यन्ये । यथाकामः । देवपूजासंगतिकरणदानप्रकारेण इच्छा यस्य तादृशो भवति । यादृशकामविशेषेण युक्तो भवतीत्यन्ये । तथा क्रतुर्यस्य तादृशो भवति । इदमुक्तम् । देवपूजासंगतिकरणदानविषयिणीच्छा तद्वान् भवति तथाविस्तारकप्रकारकक्रतुर्यज्ञस्तद्वान् भवति । वि. गन्ता स्तृञ् आच्छादने आप्त्रेरित्या इत्यस्यार्थः आप्त्रे ब्रह्मणे । छद संवरणे । सम्. वि गन्धनस्य गत्वा याचनस्य कर्ता शब्दकर्ता । वरणं सभक्तिस्तस्य कर्ता तस्य क्रतुस्तद्वान् भवतीति । अतः परं यथा क्रतुरित्यादेरर्थः । देवपूजादिप्रकारेण क्रतुर्यस्य देवपूजादिविशिष्टक्रतुमान् भवति । तत्कर्म विस्तारकं कर्म । यत्कर्म । देवपूजादिकर्म । तदभिसंपद्यते । तद्विस्तारकम् । अभि अभयं-सम्-गन्तृ-शब्दकर्तृ पद्यते गच्छतीति एवं काममयस्य मुख्यफलपर्यन्तमुक्तम् । वेदान्तत्वात् कर्मणा देहः फलं तदाद्यन्तर्भाव्य तदाहुः तेनेति कस्येति । देहकामस्य कर्मणा संचितेन प्रारब्धकर्मणो भोगेन नाशात् । क्रियमाणेन कर्मणा वा संसारिप्रकरणा-तदनुरूपो देहो मानुषादि देवपूजादि कर्माप्रसक्तं तेन पित्र्यादिदेहप्राप्तिः । नृगस्येति—

'पूर्वं त्वमशुभं भुङ्क्ष्व उताहो नृपते शुभम् ।
नान्तं दानस्य धर्मस्य पश्ये लोकस्य भास्वतः ॥
पूर्वं देवाशुभं भुञ्जे इति प्राह पतेति सः ।
तावदद्राक्षदात्मानं कृकलासं पतन् प्रभो' ॥ इति दशमस्कन्धात् ।

नियामिकेति 'एष उ एव साधु कर्म कारयति यमुन्निनीषति एष उ एवासाधु कर्म कारयति यमधो निनीषति' इत्यत्रेच्छार्थसन्घटितनीञः प्रयोगात् । **भगवच्चरित्रमिति** जीवस्यानीशत्वादिति भावः । **श्लोकस्त्विवति** तदेष श्लोको भवतीति श्रुतिः तत् तत्र ब्राह्मणोक्तेर्थे एष इत्यस्यार्थः सार्ध इति । ये धातुशब्दा यत्रार्थे इति पत्रावलम्बनादथवित्यादिश्रुतीनामर्था उक्ता भगवदिच्छया

भाष्यप्रकाशः ।

इति । अर्थस्तु, स जीवः, तत् सह । तृतीयाया लुक् । तेन ब्रह्मणा प्राज्ञेन सह । तदेव एति इति प्राप्नोति । तत् किमित्यत आह । अस्य जीवस्य लिङ्गं लिङ्गशरीरे प्रधानभूतं मनः । कर्मणा पूर्वकृतेन कर्मणा यत्र यस्मिन्नर्थे निषक्तं नितरां सक्तमिति । शेषं स्फुटम् । तथा च पूर्वत्र भगवच्चरित्रं यदि प्रतिपाद्यं न स्यात् तदा श्लोके तत्सहेति न वदेत् । भगवदन्यारूढत्वोक्तिश्च पौर्वत्रिकी मुधा स्यादतस्तथेत्यर्थः । अतः पूर्वोक्तभयादकामयमानस्य मोक्षोपायं गूढतया वदन् मुच्यमानावस्थां सुषुप्तिसमानत्वेन श्लिष्टतयाह । अथाकामयमान इत्यादि, सम्राडित्यन्तेन । तत्र मोक्षावस्थायाः प्रकरणेन प्रतीयमानत्वात् सुषुप्त्यवस्थां व्याकुर्वन्ति अकामयमानस्येत्यादि । अकामयमानस्य जीवस्य भगवत्सबन्धि यत् स्वरूपं, तद्वा अस्यैतदात्मकाममाप्तकाममकाम९

रश्मिः ।

प्रकटार्थप्रत्यूढा इति तदिच्छानुसार्यर्थमाहुः अर्थस्त्विति तद्ब्रह्मैवेतीति संबन्धः सत् सद्ब्रह्मेति भाष्यात् विशेषणमत्र सतदिति पाठमङ्गीकृत्याहुः स जीव इति । तदेव एतीति व्याख्यातम् । तत्किमिति । तत्पदार्थो भाष्ये ब्रह्मोक्तं मुख्ये कार्यसंप्रत्ययेन सामान्यस्तत्पदार्थः किमिति प्रश्नः । प्रधानभूतमित्यर्थालिङ्गैः इन्द्रियनायकत्वात् । तथेति भगवच्चरित्रत्वम् । अग्रिमग्रन्थमवतारयांबभूवुः । अत इति अस्य ग्रन्थस्यानन्तरं पूर्वोक्तात् अस्मै लोकाय कर्मणे इति गतागतभयात् । वदन् वेदः । श्लिष्टेति सुषुप्तिश्लिष्टतया । अथेति अथाकामयमानो योकामो निष्काम आत्मकाम आप्तकामो भवति न तस्मात्प्राणा उत्क्रामन्ति अत्रैव समवनीयन्ते ब्रह्मैव सन् ब्रह्माप्येति । तदेष श्लोको भवति ।

'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' ॥ इति ।

तद्यथाहि निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेद९शरीर९शेतेऽथायमनस्थिकोऽशरीरः प्राज्ञः आत्मा ब्रह्मैव लोक एव सम्राड् इति श्रुतिः । व्याकुर्वन्तींति सुषुप्तिपक्षेण व्याकुर्वन्ति स्म अकामेति । अस्येति भाष्यस्यार्थः । प्राणस्थितीति न तस्मात्प्राणा उत्क्रामन्ति इति श्रुतेः । भगवत इति । भगवत्कर्तृकत्वस्य जीवे सत्त्वात् । भगवतः सकाशाज्जीवस्य निर्गमने । अथेति तथा च हल्व्यत्ययः । समवनीयन्ते इत्यत्रेति भावः । श्लोकेति तत्तस्मिन्नुक्ते मोक्षतत्साधनेर्थे अत्रास्मिन्नेव शरीरे । अत्रेदं वक्तव्यम् । एतच्छ्लोकीयस्यास्येत्यस्याकामयमानस्येत्यादिना प्रकाशे व्याख्यानं तदसंगतं पाश्चात्यत्वादिति । अतोत्र भ्रमो भाति तस्मात्सार्धश्लोकादारभ्य व्याख्यान्तरं रच्यते तदेवेत्यादि । तदेव ब्रह्मैव सत् सद् ब्रह्मेति भाष्यात् । तदवस्थायामन्येषामसत्त्वात् । असन्मृत्युरिति श्रुतेः । तदिति ब्रह्मकर्मणा सहास्याकामयमानस्य मनो यत्र नितरां सक्तं तल्लिङ्गमेति । कर्मणोन्तमवसानं प्राप्य । अयं भगवान् न च जीवः । कर्ता कर्मसंबद्धश्चेति वाच्यम् । एष उ एव साधु कर्म कारयतीति परात्तु तच्छ्रुतेरित्यत्र कर्तृत्वं कृतिमत्त्वं स्वातन्त्र्यं वा कर्तृत्वम् । 'स्वतन्त्रः कर्ता' इति सूत्रात् । श्लोके तद्ब्रह्मेत्यादि भाष्यं व्याकृतम् । एवम्—

'निर्विण्णानां ज्ञानयोगः कर्मयोगस्तु कामिनाम् ।
न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिदः' ॥ इति ।

भगवन्निर्गमने हि प्राणानां निर्गमनात् तस्य चेच्छाधीनत्वात् तदभावे इन्द्रियाणि सुषुप्तौ तत्रैव समवलीयन्ते । ब्रह्मैव सन् कूटस्थः सन् । अपिः समु-

भाष्यप्रकाशः ।

स्वरूपमिति सुषुप्तिस्थले पूर्वमुक्तम् तत्प्राणस्थित्यर्थमनुवदति । तत्रहेतुः **भगवन्निर्गमन** इत्यादि । **भगवन्निर्गमन** इति । भगवतः सकाशाज्जीवस्य निर्गमने । **तस्येति** निर्गमनस्य **समवलीयन्ते** इति समवनीयन्त इति श्रौतपदस्यार्थकथनम् । अस्मिन् पक्षे, **ब्रह्मैव** सन्नित्यस्यार्थमाहुः **ब्रह्मैवेत्यादि** । ब्रह्माप्येतीत्यत्र ब्रह्मेति प्रथमान्तम्, एतीत्यस्य कर्तृ । एतीति प्रादुर्भवतीत्यर्थः ।

रश्मिः ।

वाक्योक्तकामिनां कर्मयोगः कथितः अन्यद्वयं वक्तुमतः परमथाकामयमान इत्यस्य अर्थमाहुः **भगवत** इति । पूर्वोक्तं तद्वा अस्यैतदात्मकाममाप्तकाममकाम४ स्वरूपमिति सुषुप्तिस्थले पूर्वमुक्तम् । अथाकामयमान इत्यनयानुवदति । अकामयमान इत्युद्देश्यम् । **निष्काम** इति । अकामपद-विवरणम् । ब्रह्मविदाप्नोति परमित्यत्र ब्रह्मपदस्य सत्यं ज्ञानमनन्तं ब्रह्मेति विवरणवत् । अतो अनूद्यानुवादयोः पदत्रयं विधायकम् । **भगवन्निर्गमन** इति उत्तरत्र हेतुः । तदुक्तम् ।

'शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्' ॥ इति गीतायाम् ।

एतानि मनःषष्ठेन्द्रियाणि आशयात् कुसुमादेः स्थानात् । जीवनिष्ठमपीदं निर्गमनं परात्तु तच्छ्रुतेरिति व्याससूत्रात् । **तस्येति** भगवन्निर्गमनस्य । **तदभावे** इच्छाभावे । **इन्द्रियाणीति** प्राणपदवाच्यानि । **सुषुप्तौ** इति सुषुप्तिपदवाच्ये तत्र निर्गुणे ब्रह्मणि समवलीयन्ते भाष्यत्वात् । भक्तिमार्गे तु हृदि प्रकटे भगवति । न च भक्तिमार्गो नास्त्यत्रात्मकामाप्तकामयोः ज्ञानित्वसंभवात् ।

'कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते' ॥ इति गीतायाः ।

अन्यथा मिथ्याचारप्रसङ्गात् । कर्मयोगाध्यायोक्तत्वेपि ज्ञानमार्गेपकर्षो वाक्यस्य बाधका-भावादिति वाच्यम् । आत्मनः कामो भक्तिरिच्छारूपा यस्येति बहुव्रीहिणा तस्य सूचनात् । स्नेहवदिच्छाया भक्तित्वस्य तृतीयस्कन्धे सत्त्वात् । **ब्रह्मैव सन्निति** । ब्रह्मैव सन् कूटस्थः सन् ब्रह्माविर्भवतीत्यन्वयः । **कूटस्थ** इति स च 'ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिरष्टविशिष्ट-तयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते' इति सर्वोपनिषच्छ्रुत्युक्तः । अत्रैकं क्रियाविशेषणम् । त्रीणि प्रथमान्तानि पदानि । अष्ट—

'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा' ॥

इति गीतोक्ताः प्रकृतयः । इदमेव कपालाष्टकम् । चलनायालं भवतीतीदमष्टकम् बुद्धेर्बुद्धि-स्थत्वं तु बहुव्रीहेर्नास्ति । ननु सर्वोपनिषदि सत्यादिरूपाण्युक्तानि । तान्येवकारेण व्यावर्त्य ब्रह्मपदस्य कूटस्थे शक्तौ किं मानमिति चेन्न समाख्याप्रामाण्यात् ब्रह्मोपनिषदुक्तलक्षणस्यैव मानत्वात् । तथा हि । दिव्ये ब्रह्मपुरे विरजं निष्कलं शुभ्रमक्षरं यद्ब्रह्म विभातीत्युक्त्वा किंचिदन्यं निरूप्य कपालाष्ट-कमाह कमात्मानं पालयतीति कपालो वा भूम्यबादिः पूर्वोक्तः तमलं निविशतेऽतोष्टविशिष्टतयो-पलभ्यमानः अक्षरात्मकं जगदिति प्रसिद्धम् । ब्रह्मादिपिपीलिकापर्यन्तं सर्वप्राणिबुद्धिः सर्वेषां प्राणिनां

मये । सह स्थिते जीवे ब्रह्माविर्भवतीत्यर्थः । जीवे ब्रह्माविर्भावो न संगत इति तत्प्रतिपादनार्थं श्लोकः । जीवोपदेशप्रकरणाभावेन सिद्धवद्वचनान्न जीवन्मुक्तावस्था । नाप्यसंप्रज्ञातसमाधिः । मतान्तरत्वात् । ब्रह्मप्रकरणत्वान्न जीवस्य सद्यो,

भाष्यप्रकाशः ।

यदा सर्वे प्रमुच्यन्त इति श्लोकप्रयोजनमाहुः जीव इत्यादि । नन्वत्रोत्क्रमणस्यैवोपक्रान्तत्वाज्जीवन्मुक्ताद्यवस्थैवाकामयमानस्य वाच्या, न तु सुषुप्त्यवस्थेति शङ्कायां सुषुप्त्यवस्थाज्ञापनाय ता दूषयन्ति जीव इत्यादि । यथा हि काठके, अन्यच्छ्रेय इत्यादिकं जीवोपदेशो, न तथात्र जीवस्वरूपोपदेशः । येन तदनुरोधाज्जीवन्मुक्तिरत्रोच्येत । किं तु, सिद्धवदुच्यते । अतो न सा । अथो खल्वाहुरित्यादिनोक्तस्य काममयपक्षस्य मतान्तरत्वादकामोऽपि तेनैव मतेनोच्यत इति

रश्मिः ।

बुद्धिः एकमेव परं ब्रह्म विभाति हृद्याकाशे तद्विज्ञानमाकाशमिति श्रुतेः । बुद्धिर्विज्ञानरूपिणीति वाक्यं सर्वप्राणिनां बुद्धयः स्थाः यस्मात् तिष्ठन्ति इति स्थाः 'आतोऽनुपसर्गे कः' किं च भक्तिमार्गस्याकामपदेन निरासाज्ज्ञानमार्गीयं रूपं कूटस्थपदेनोक्तम् । प्राज्ञपदाच्च । तदुक्तं तृतीयस्कन्धे सप्तमे 'यत्सेवया भगवतः कूटस्थस्य मधुद्विषः' इति श्लोके कूटस्थस्येति ज्ञानमार्गानुसारीति तदवस्थायां भक्तिमार्गीयरूपस्यासंभवाच्च । अपिरिति अव्ययादाप्सुप इति न सुपो लुक् अनुकरणशब्दत्वात् । 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' इतिवत् । समुच्चितार्थमाहुः सहेति । प्रकृतमनुसरामः । जीव इत्यादीति । न संगत इति तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत् इति बृहदारण्यके न जीवे ब्रह्माविर्भावोऽपि तु प्रत्यबुध्यतात्मानं यथावद् ब्रह्मांशत्वेन प्रतिबोधितवान् । तत्सर्वात्मकं ब्रह्माभवदित्यर्थः । ता इति जीवन्मुक्त्याद्या अवस्थाः । जीव इत्यादीति । जीवो इत्यादीति स्थिते 'एचोयवायावः' 'लोपः शाकल्यस्ये'ति सूत्राभ्यां अवकारलोपश्च । काठक इति द्वितीयवल्ल्यां 'अन्यच्छ्रेयोन्यदुत प्रेयः ते उभे नानार्थे पुरुषं सिनीतः तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते' इति श्रुतिः । श्रेय इति अतिशयेन प्रशस्तम् । द्विवचने ईयसुन् 'प्रशस्यस्य श्रः' श्रेयो मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत् इति सिनीते षिञ् बन्धने क्र्या. उ. अ. सिन्वाते स्वादिरपि उ. अ. प्रेयः पदार्थः पुष्पु पुत्रादिः ।

'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोपि बहवो यं न विद्युः ।
आश्चर्यो वक्ता कुशलोस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः' ॥

इति जीवनिरूपणं पुनर्वरमापद्यते मे इति मृत्युना स्ववशापत्त्युक्तेः अत्रैव गुहाहितं गह्वरेष्ठं पुराणमिति श्रुतिः । अग्रे 'नायं हन्ति न हन्यते' इत्युक्त्वा 'अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्' इति जीवन्मुक्तदशोक्ता । तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः इति । अत्राक्रतुरिति जीवोपदेशः । वीतशोक इति जीवन्मुक्तोपदेशः । तदुक्तमन्यच्छ्रेय इत्यादिकं जीवोपदेश इति । नापीत्यादिभाष्यं विवृण्वति स्म अथविति । मतेति । आहुरित्यस्य क्रियापदस्य श्रुत्यन्यकर्तृकत्वादिति भावः । असंप्रेति । तेन संप्रज्ञातसमाधिः सुषुप्त्यवस्था च लभ्यते । संप्रज्ञातसमाधिरकामादिपदतात्पर्यार्थपक्षे सुषुप्तिस्त्वभिधेयार्थपक्षे इति विवेकः । किं च अन्योपि प्रकारः । वेदवेदान्तसांख्ययोगपञ्चरात्रपाशुपतमतरूपषट्शास्त्रेषु समाधेर्योगशास्त्रीयत्वमपि मतान्तरत्वं न चास्मिन् व्याख्याने संप्रज्ञातस्य मतान्तरत्वात्तात्पर्यार्थविरोधः प्रत्युतः प्रतीतार्थस्य

मुक्तिः फलम्। उत्क्रमण एव ब्राह्मणस्याप्युक्तत्वात्। तद्यथेति सुषुप्तशरीरम्। अनस्थिक इत्यादि, सम्राडित्यन्तमुपसंहारः।

भाष्यप्रकाशः।

तेनासंप्रज्ञातसमाधिरपि न वक्तुं शक्यः। मुख्यं प्रकरणं ब्रह्मणोऽवान्तरं चोत्क्रमणस्येति स्वतः स्वरूपावस्थानरूपा सद्योमुक्तिरपि न फलत्वेन वक्तुं शक्या। तत्र हेतुः उत्क्रमण इत्यादि। ऊर्ध्वोच्छ्वासीभवतीत्युत्क्रमण एवोपक्रान्ते शारीरब्राह्मणस्योक्तत्वात्। तथाच तदनादृत्य

रश्मिः।

त्यागायोगाच्छास्त्रान्तरीयस्य ग्रहणे बाधकाभावात्। न च संप्रज्ञातसमाधेः सिद्धिहेतुत्वेनामोक्षफलकत्वात् अप्रतिषिद्धमनुमतं भवतीति न्यायासंचारात्कुतः प्राप्तिरिति शङ्क्यम्। योऽकाम इति श्रुतावकामादिपदानां तात्पर्यार्थस्याप्यङ्गीकारात्। तत्र च भक्तिनिवेशेन निर्गुणब्रह्माविर्भावमात्रेणानिर्वाहान्न्यायप्राप्तं समाधिमुररीकृत्य भक्तेः समाधेयत्वात्। शास्त्रान्तरीयसिद्धिफलकत्वमात्रत्यागात्। एकादशे पञ्चदशाध्याये।

'निर्गुणे ब्रह्मणि मयि धारयन् विशदं मनः।
परमानन्दमाप्नोति यत्र कामोऽवसीयते'॥

इति वाक्ये सिद्धीनामकथनात्। प्रत्युत परमानन्दपदेन भक्तेरनुग्रहजन्यायाः सत्त्वोक्तेर्विद्वन्मण्डनोक्तदिशा निर्गुणसगुणयोरभेदसिद्धत्वेनाकामादिपदतात्पर्यार्थे भक्तिहेतूक्तदिशाऽनुग्रहेण भक्त्या भक्तमनोरथपूरकरूपफलकत्वसंभवेन सिद्धिफलकत्वासंभवात्। अप्रज्ञातसमाधेः मोक्षफलकत्वेन मतान्तरीयत्वं लक्षणं तु सम्यक् संशयविपर्ययानध्यवसायरहितत्वेन न ज्ञायते प्रकर्षेण विशेषरूपेण स्वोपास्यस्वरूपेण ज्ञायते भाव्यस्वरूपं येन स संप्रज्ञातसमाधिर्भावनाविशेषः। भावना हि भाव्यस्य विषयान्तरपरिहारेण चेतसि पुनः पुनर्निवेशनं तथा च सांख्यप्रवचनसूत्रवृत्तौ 'समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपतः' इति। ब्रह्मप्रेति भाष्यं विवृण्वन्ति स्म मुख्यमिति। स्वत इति। ईश्वरविचारितस्वरूपावस्थानरूपसद्योमुक्तेर्यद्यपि सत्त्वं तथापि जीवविचारितसद्योमुक्तिः सांख्ययोगाभ्यां बालबोधे उक्ता सा स्वतः स्वीयसाधनैः परतः सद्योमुक्तिर्विष्णुशिवाभ्यां ताभ्यां फलदानोक्तेः तद्वदीश्वरविचारितसद्योमुक्तौ स्वतस्त्वपरतस्त्वयोः विवक्षां कृत्वा परतः सद्योमुक्तिर्नास्ति सत्त्वतमोगुणावैशिष्ट्यात्। ब्रह्मप्रकरणान्न स्वतोपि किं तु ब्रह्मणः सकाशात्। सापि न प्राज्ञत्वेन सुषुप्तिसाक्षित्वमात्रकार्यकारित्वेन मुक्तिदत्वाभावात्। स्वतः स्वरूपावस्थानरूपा सद्योमुक्तिरपि न फलत्वेन वक्तुं शक्येत्यर्थः। अपिपदेन परतः स्वरूपावस्थानरूपा सद्योमुक्तिः। ननु तर्हि मा भूतादीश्वरविचारितमुक्तौ स्वतस्त्वपरतस्त्वे मास्तु ब्रह्मप्रकरणस्य हेतुत्वं प्रसङ्गात् सद्योमुक्तिरस्तु इत्याशङ्क्य अन्यं हेतुमाहुरित्याहुः तत्रेति। हेतुः अन्यो हेतुः ऊर्ध्वेति ज्योतिर्ब्राह्मणं समाप्येति शेषः। ऊर्ध्वोच्छ्वासीभवतीति ज्योतिर्ब्राह्मणं समाप्यशारीरब्राह्मणे उपक्रान्ते उत्क्रमणे तमुत्क्रामन्तमित्याद्युक्तोत्क्रमणे एव शारीरश्चासौ ब्राह्मणश्च 'ब्रह्म जानाति ब्राह्मणः' तस्योक्तत्वात्। ब्राह्मणोक्तिस्तु संज्ञानमेवान्ववक्रामति स एष ज्ञः सविज्ञानो भवतीति श्रुतिवाक्याभ्याम्। तथा च जीवब्रह्मणोः कर्मत्वकर्तृव्यपदेशात् ऐक्याभावान्न प्रसङ्गात्सद्योमुक्तिः फलत्वेनेति भावः। भाष्यार्थस्तु उत्क्रमण एव ज्ञादिपदोक्तस्य ब्राह्मणस्य अपिपदेन जीवस्य चोक्तत्वादिति अत्र क्रममुक्तिः सूच्यते परं तु अत्रैव समवलीयन्त इति श्रुतिविरुद्धा न

भाष्यप्रकाशः ।

अकामत्वमात्रेण रूपेण उत्क्रान्तिशून्या सद्योमुक्तिरपि न वक्तुं शक्येत्यर्थः । अतः सुषुप्तिप्रकरणाभावेऽप्यकामत्वादिना सौषुप्तिकलिङ्गेन, तद्यथाऽहिनिर्ल्वयनीत्यग्रिमवाक्येऽपि शेत इति शयनलिङ्गेन चावान्तरमुत्क्रमणप्रकरणं बाधित्वा सुषुप्तिरेव जनकेन ज्ञातव्या । तदा तु न वदिष्यत इति मदभीष्टसिद्धिः । अथ लिङ्गस्य मुक्त्यवस्थासाधारणत्वात् तदनादृत्य प्रकरणबलेन ज्ञास्यति तदा तु स्वकृतवरदानानुरोधाद् विशिष्य वक्तव्यमित्याशयेन, अथायमनस्थिकोऽशरीरः प्राज्ञ आत्मा ब्रह्मैव लोक एव सम्राडित्यन्तं श्लिष्टवचनमुपसंहारः । अत्र श्रुतावनस्थिक इति स्थूलशरीरराहित्यम् । तच्च जीवन्मुक्तस्य सुषुप्तस्य चाभिमानाभावात् तुल्यम् । प्राज्ञ आत्मेति सुषुप्ति-

रश्मिः ।

विवक्षिता । शांकरा असंसारिपरत्वेन शारीरब्राह्मणं व्याकुर्वन्ति तं निषेधन्ति स्म अत इति । तद्यथेति भाष्यं व्याचक्रुः तद्यथेति । तद्यथेति श्रुत्यर्थस्तु तत् तत्र दृष्टान्तः यथाऽहिर्नागः तस्य निर्ल्वयनी स निलीयते यस्यां सा निर्ल्वयनी अहित्वक् तथा च परोक्षवाद इति भावः । निलयनीत्यस्य निर्ल्वयनीति लूयते इति लूः देहः क्विप् । निर्गता लुवो निर्लू रहितत्वक् निर्लूरयनी निर्ल्वयनी । स्त्रीत्वविवक्षायां ङीप् वल्मीके तत्स्थाने मृता सर्पदेहत्यक्ता शयीत स्वप्नं कुर्वीत । मृता मृतः प्रत्यस्ता प्रत्यस्तः सुपोर्डादेशः । स्वप्नस्तु माया । सदसतीं मायां कुर्वीत । इद१शरीरं सुषुप्तशरीरम् । शेते इत्यन्वयो भाष्ये । एवेति जीवन्मुक्त्याद्यवस्था व्यवच्छिनत्त्येषः । न तु संप्रज्ञातसमाधिम् । तस्य तात्पर्यार्थविषयत्वेनाभिधेयार्थे प्रसक्त्यभावात् । तदा त्विति स मेने न वदिष्य इतीति श्रुतिः । स याज्ञवल्क्यो न वदिष्य इति मेने । यद्वाऽनेन राज्ञा सहाहं वदिष्ये स च मे वदिष्यत इति पुरुषव्यत्ययेनान्वयः । पूर्वार्थे मम याज्ञवल्क्यस्याभिप्रायसिद्धिः । राज्ञोधिकाराभावान्न वदिष्य इति मेने याज्ञवल्क्यः स इति । अनस्थिक इत्यादिभाष्यमवतारयामासुः । द्वितीयार्थमङ्गीकृत्य अथेति । तदनेति सुषुप्तिमभिधेयामनादृत्य तात्पर्यविषयभूतं संप्रज्ञातसमाधिं प्रकरणं ब्रह्मणस्तद्बलेन ज्ञास्यतीत्यर्थः । स्वकृतेति । स्वेन याज्ञवल्क्येन कृतो यो वरदानानुरोधस्तस्मात् । स ह कामप्रश्नमेव वव्रे त१ह्वास्मै ददाविति श्रुतिरत्र स राजा तं कामप्रश्नं वरमस्मै राज्ञे याज्ञवल्क्यो ददौ इति वरदानं तस्यानुरोधात् । अथायमिति अथायं संप्रज्ञातसमाधिस्थः शेते इति पूर्वेणान्वयः । अनस्थिक इत्याद्युपसंहारः अनस्थिक इत्यादि सम्राडित्यन्तमुपसंहार इति भाष्यात् । श्लिष्टेति संप्रज्ञातसमाधिरूपमुक्तिसद्योमुक्तिरूपमुक्तिसंश्लिष्टवचनं यथा भवति तथोपसंहारः समाप्तिः । श्लिष्टमुच्यतेऽनेति श्लिष्टवचनं वा । जीवन्मुक्तपदं संप्रज्ञातसमाधियुक्तस्य लक्षकं जीवन्मुक्त्याद्यवस्थानां भाष्ये प्रत्याख्यानात् । श्रुत्यर्थस्तु अथ तदनन्तरं अयं संप्रज्ञातसमाधिस्थः शेते इत्यन्वयः । उपसंजहार । अनस्थिक इति । अनस्थिकः सर्पवत् तत्र निर्ममाहंकृतित्वात् अशरीरश्च तत एव । प्राज्ञः सुषुप्तिसाक्षी आत्मा परमात्मा । अत्र संप्रज्ञातसमाधेर्निवेशादात्मपदात् जीवांशमादायाह मुक्तिपक्षे । ब्रह्मैवेति जीवो ब्रह्मैव । सुषुप्तिपक्षे लोकत्वमक्षरत्वम्, जीवो लोकोऽक्षर एव ह सम्राडिति होवाच याज्ञवल्क्य इति । अत्र पूर्वं शरीरं शेते इति शरीरस्य स्वप्नानुकूलव्यापारवत्त्वमुक्तं तत्र स्वप्नो माया माया तु सदसती तत्र कः सदंशः कोऽसदंश इति विचारः । अनस्थिकोऽशरीर इत्यत्र [हेतुगर्भं विशेषणमन-

१. स्तो ।

भाष्यप्रकाशः।

साक्षिपरमात्मनोर्वाचकमित्यवस्थाद्वयसाधारणम्। तत्र आत्मा इत्यनेन जीवात्मानमनूद्य, ब्रह्मैव लोक एवेति विधत्ते। तत्र मुक्तिपक्षे जीवस्य ब्रह्मत्वविधानम्। सुषुप्तिपक्षे लोकत्वविधानम्। सम्राडिति राज्ञः संबोधनम्। अतोऽत्र श्लिष्टतयोपसंहार इत्यर्थः। एतेन सुषुप्तिव्याख्याने बीजं प्रदर्शितम्। याज्ञवल्क्यभयानुरोधादिदमेतावत् सुषुप्तिपरत्वेन व्याख्यातम्। अग्रे च वरदानुरोधान्मुक्तिपरत्वेन व्याख्यास्यत इति न कोऽपि क्वापि संदेहः। एतदग्रे, सोऽहं

रश्मिः।

स्थिकत्वादशरीर इति] अनस्थिकत्वांशे सती माया अस्थीनामनस्थिकदेहेष्वदर्शनात्। अत्रानस्थिकपदात्तददर्शनमुक्तं तथा च न विद्यन्तेऽस्थीनि यस्मिन् सोनस्थिकः। दर्शनविषयत्वेन संप्रज्ञातसमाधिस्थस्य न विद्यन्तेऽस्थीनि। ऋतेर्थं प्रतीयमानत्वाच्च माया। सतीत्वं तु यदस्ति यन्नास्ति तदेव विष्णुरित्येवं विष्णुपुराणे दर्शनान्नास्तीति प्रतीतिविषयस्य विष्णुत्वेन मृत्युव्यतिरिक्तत्वात्। शरीरांशेप्येवं सतीत्वं न विद्यते दर्शनविषयत्वेन शरीरं यस्मिन्निति।

'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति'॥

इत्यशरीर आत्मा अन्यजीवानां द्रष्टृत्वं तु ब्राह्ममेव तद्यदि ह्यस्थिरशरीरविषयकं दृष्टं तदा असतीप्रतीतिविषयस्य भिदांशे मायात्वेन 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति श्रुतेः। 'न प्रतीयेत चात्मनि' अस्थि शरीरे मायेति पुराणमतम्। तथा च सर्वोपनिषत् 'अनादिरन्तर्वर्ती प्रमाणाप्रमाणसाधारणा न सती नासती स्वयमविकाराद्विकारहेतौ निरूप्यमाणेऽसती अनिरूप्यमाणे सती लक्षणशून्या सा मायेत्युच्यते। अनादिरिति देवामरन्यायेन। भिदारूपेण प्रमाणाप्रमाणविषयत्वेन साधारणा भिदानां दोषसहितदोषरहितचक्षुरादिग्राह्यत्वात्। ज्ञानकाशयेति वाक्यात्। ज्ञानतुल्यत्वमाह नेत्यादिनाऽविकारादित्यन्तेन। **विकारेति** षड्भावविकारास्तेषां हेतावस्थिशरीरादौ निरूप्यमाण इति पूर्वं व्याख्यातम्। लक्षणेत्यत्र मकारागमः लक्षणशून्या। इयमप्रसिद्धत्वाददृश्यमाना अतो 'नास्ति श्रुतिषु तद्वार्ता दृश्यमानासु कुत्रचित्' इति निबन्धो निर्दोषः। तथा च शरीर शेत इत्यत्र शरीरनिष्ठः सदसती माया भिदा वा माया तदनुकूलो व्यापार इत्यर्थः। अयं व्यापारोत्रेति इदं पदवाच्ये परमैश्वर्यकर्त्राश्रये इह लोके वा शरीरे वास्ति अत्र ब्रह्म समश्नुत इति श्रुतेः। प्रकृतमनुसरामः। **तत्रेति** संप्रज्ञातसमाधिस्थस्य सद्योमुक्तस्य सुषुप्तस्य वा परमात्मनि। अस्यां दशायां परमात्मवाचकात्मपदस्य जीवात्मवाचकत्वमप्यैक्यात्। अतः पूर्वं परमात्मवाचकत्वस्याप्यात्मपदस्य जीववाचकत्वमित्याहुः **आत्मा इत्यनेनेति**। एवकारद्वयतात्पर्यमाहुः **तत्र मुक्तीति** सद्योमुक्तिपक्षे संप्रज्ञातसमाधिपक्षेपि। **ब्रह्मत्वेति** विरुद्धधर्माश्रये ब्रह्मत्वविधानम्। **लोकत्वेति** अक्षरत्वविधानम्। **अत इति** अवस्थाद्वयसाधारण्यात्। **श्लिष्टतया** सद्योमुक्तिसंप्रज्ञातसमाधिश्लिष्टतया। **एतेनेति**। प्राज्ञपदेन। **कोपीति** भाष्ये सुषुप्तेरुक्तत्वात् संप्रज्ञातसमाधिस्थो व्याकर्तव्यो नो वा व्याकर्तव्य इति संदेहः। **क्वापीति** श्लिष्टतयोपसंहारेपि याज्ञवल्क्यभयानुरोधवरदानानुरोधाभ्यां श्रौताभ्यां वस्तुतस्तु संप्रज्ञातसमाधिरपि भाष्ये जीवन्मुक्त्यादिनिराकरणात् सूचितैव। **तेनेति** प्रश्नाभावेन। जीवन्मुक्तिपदलक्षितसंप्रज्ञातसमाधेः सुषुप्तेः सद्योमुक्तेश्च संश्लेषे मोक्षप्रश्नस्य पौनःपुन्यस्यासंगतिमालोच्याहुः **श्लोका इत्यादि भाष्याभासं एतदग्र इति**। **लिङ्गस्येति**। जीवन्मुक्त्याद्यवस्थाप्रत्याख्यानेन

श्लोका अत्र त्रयोदश सर्वनिर्धारकाः । आद्यो ब्रह्मविद्गतेः । एष इति सुषुप्तौ नाडीत्वात् पञ्चवर्णाः । अन्धन्तम इति द्वाभ्यामनेवंविदो निन्दा । तदेव सन्त इति बुद्धिमतां वचनम् । आत्मानमिति वैराग्यम् । यस्यानुवित्तिरिति नव-

भाष्यप्रकाशः ।

भगवते सहस्रं ददामीति जनकवाक्यम् । तत्र न पुनर्मोक्षप्रश्नः । तेन एवं श्लिष्टप्रयोगेऽपि जनकेन लिङ्गस्य साधारण्यं प्रकरणस्योत्क्रमगोचरत्वादसाधारण्यं चावगत्य, अथाकामयमान इति निष्कामप्रकरणं मतान्तराद् विविक्तत्वेन सिद्धान्ते निवेश्य तत्र सद्योमुक्त्यवस्थामवधार्य, ब्रह्माप्येतीत्यत्र ब्रह्मपदं च द्वितीयान्तमवगत्य, तत्रास्य ब्रह्मभूतस्य लयं चावगत्य, श्लोकमप्येतदवस्थाप्रतिपादकत्वेनावगत्य, अहिनिर्ल्वयनीदृष्टान्तं मृतशरीरपरमेवावगत्य, अप्राज्ञ आत्मा ब्रह्मैवेत्यस्य प्राज्ञत्वादयमात्मा ब्रह्मैव सन् लोक एव ब्रह्मापीतो ब्रह्मलोकात्मको भवतीति निश्चितवान् । तेन जाग्रद्दशायां हृदयस्थसर्वकामप्रमोको मोक्षसाधनत्वेनावधारित इति बोधितम् । तदा याज्ञवल्क्योऽपि तस्य सम्यग्बोधनाय सर्वं सिद्धान्तमाह तद्विवृण्वन्ति **श्लोका** इत्यादिना । **अत्र त्रयोदशे**ति । एकोपक्रमगतास्त्रयोदश । **आद्यो ब्रह्मविद्गते**रिति ब्रह्मविदः सद्योमुक्तिमुक्त्वा ततो न्यूनाधिकारिणो ब्रह्मविदः क्रममुक्तेर्बोधकः, 'अणुः पन्था' इति श्लोकः । तस्मिन् शुक्लमिति श्लोकस्तु निष्क्रमणमार्गबोधक इत्याहुः **एष इत्यादि । बुद्धिमतां वचन-**

रश्मिः ।

तस्यैव सुषुप्तिसद्योमुक्तिसंप्रज्ञातसमाध्यवस्थासूचकस्य लिङ्गस्य । **असाधारण्य**मिति । सुषुप्तिसंप्रज्ञातसमाधिस्थसद्योमुक्तिषु साधारण्याभावः । उत्क्रमणाभावात् । उत्क्रम्य तोयादिवासे तु साधारण्यम् । **सद्ये**ति सद्योमुक्तिर्न मूलत्वेन । **द्वितीयान्त**मिति ननु ब्रह्मैव सन् कूटस्थः सन् ब्रह्माविर्भवतीति भाष्यव्याख्यानात् कथमेवमिति चेन्न ब्रह्मपदं च प्रथमान्तमवधार्येति पूर्वेणान्वयः । आविर्भावमित्येवमाविर्भवतीति भाष्यस्य आविर्भावं करोतीत्यर्थं कृत्वाध्याहार्याविर्भावपदं द्वितीयान्तमित्यर्थः । **तत्रास्ये**ति तत्रापिपदसमुच्चिते जीवेऽस्य परमैश्वर्यकर्त्राश्रयस्य कूटस्थब्रह्मभूतस्य ब्रह्मणो लयं श्लेषं चावगत्येत्यर्थः । **श्लोकमपी**ति अमृतपदं मुख्यवृत्तम् । 'भगवानेव हि फलं स यथाविर्भवेद्भुवि' इति निरोधलक्षणग्रन्थात् । **अय**मिति । यथायं शेते इत्यत्रायमित्युक्तः । **एवे**ति उपसंहारव्यवच्छेदक एवशब्दः । उपसंहारेन्यान्वयायाहुः **प्राज्ञे**ति । **ब्रह्मैव** कूटस्थः सन् ज्ञान्युपास्यः सन् लोकोक्षर एष एव आत्मैव । कीदृश इत्यत आह **ब्रह्मापी**ति ब्रह्मा अपि । अपि पदार्थे जीवे इतः प्राप्तः । नपुंसकस्य पुंस्त्वेन निर्देशोऽवताररूपसंग्रहाय 'कृष्णस्तु भगवान् स्वयम्' इति वाक्यात् । अत्र संप्रज्ञातसमाधिरप्यूह्यः । भावार्थमाहुः **ब्रह्मे**ति । ब्रह्मकर्तृकलोकात्मनि मनसि यस्य जीवस्य स तथोक्तः । **इति बोधित**मिति जनकेन मोक्षार्थिना कर्त्रा पुनर्मोक्षप्रश्नाभावेन कारणेन मया बुद्धमिति बोधितम् । अन्यथा न दद्यादिति सहस्रं मोक्षार्थित्वादतः संप्रज्ञातसमाधेर्मोक्षत्वं व्यज्यते तदुक्तम् । 'यं लब्ध्वाप्यवमन्येत समाधिः परिकीर्तितः' इत्यमृतबिन्दूपनिषदा गीता चात्मसंयमयोगाध्यायस्था ।

'यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति' ॥ इत्युपक्रम्य,
'स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा' इति ।

सर्वमिति वरदानानुरोधात्सर्वं सिद्धान्तम् । **एकोपे**ति एकश्चासावुपक्रमश्चारम्भस्तत्र

रश्मिः ।

गतास्तदुपक्रमसामीप्यं गताः सर्वसिद्धान्तनिर्धारकाः वरदानानुरोधाद्याज्ञवल्क्येनोक्ताः इति होवाच याज्ञवल्क्य इति वक्ष्यमाणश्रुतेः । अत्रात्मवदथाकामयमान इत्यादिना ज्ञानसाध्या सुषुप्तिः कारिकायां संप्रज्ञातसमाधिः सूचिता न जीवस्य सद्योमुक्तिः फलमिति भाष्ये सद्योमुक्तिः फलत्वेन न विवक्षितेति सूचितमतः परं ब्राह्मणद्वयार्थस्य निर्धारणं चकार । पूर्वोक्तपित्र्यादिरूपदेहार्थं लोकानुदाजहार । **तदप्येते श्लोका** इति तत्तस्मिन्नात्मकामस्य ब्रह्मविदः सद्योमुक्तिः तात्पर्यार्थे संप्रज्ञातसमाधिर्भक्तस्य सुषुप्तिर्जीवस्य ज्ञानिन इत्यर्थे ब्राह्मणद्वयं तन्निर्धारकाः श्लोका भवन्ति । तस्याद्यं श्लोकं कर्ममार्गस्य तदेव सक्तदिति श्लोकेन 'गतागतं कामकामा लभन्ते' इत्युक्तत्वात् भक्तज्ञानवाचकब्रह्मवित्पदघटितं किं च हिरण्यगर्भस्य कर्मठस्य ब्रह्मवित्त्वमुक्तत्वात् अकामयमानो विधिरतः कर्मठेषु विधिमात्रबोधक-ब्रह्मवित्पदघटितं विवृण्वन्ति स्म **ब्रह्मविद** इति संज्ञानमेवान्ववक्रामति स एष ज्ञ इत्युक्तः सद्योमुक्तस्तस्य । न्यूनाधिकारित्वं ब्रह्मव्यसनाभावेन द्वितीयस्कन्धोक्तं 'यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारम्' इत्यादिभिर्लोकदिदृक्षुत्वमुत्क्रम्येति लिङ्गात्क्रममुक्तिः 'अणुः पन्थाः विततः पुराणो माऽस्पृष्टोनुवित्तोमयैव । तेन धीरा अपि यन्ति ब्रह्मविदः उत्क्रम्य स्वर्गं लोकमितो विमुक्ताः' इति श्लोकः अणुः सूक्ष्मः भगवत्कृपारूपः पन्थाः मार्गो वितरो विततः कर्मज्ञानभक्तिरूपेण विस्तृतः पुराणः प्राचीनः 'मार्गास्त्रयो मया प्रोक्ताः नृणाम्' इति वाक्यात् । पुरा अणोर्जीवस्य वा । मां याज्ञवल्क्यं स्पृष्टः संबद्धः संबन्धानन्तरं मयैव वित्तो ज्ञातः तेन शरणमारभ्य आ सर्वात्मभावम् । धीराः विद्वांसः आवृत्तचक्षुष्काः प्रत्यगात्मेक्षकाः अपियन्ति अप्ययं सुषुप्तिं कुर्वन्ति । अत्रैव सद्योमुक्तिं फलभिन्नां पूर्वोक्तरीत्या प्राप्नुवन्ति ब्रह्मविदो लोकभोगकामा ब्रह्मादयो भक्ताः लोकमात्म-सुखाभिन्नमक्षरं 'प्रभुत्वेन हरेः स्फूर्तौ लोकत्वेन तदुद्भवः' इत्युक्तं यन्ति भगवत्सेवोपयोगिदेहाना-मक्षरत्वात् । ज्ञानिनो ब्रह्मवित्पदवाच्याः स्वर्गमात्मसुखं यन्ति । 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति सूत्रात् । इतो देहात् विमुक्ताः अकामो निष्काम इत्यस्य सूचितार्थे क्रियमाणे भक्ता लभ्यन्ते तेषां भक्तिभिः प्रसन्ने हरौ भाष्यसूचितसंप्रज्ञातसमाधिः श्रुत्युक्तसमाधिलक्षणात् । ननु पूर्वं लोकः पश्चात्समाधिः पूर्वं समाधिः पश्चाल्लोको वा मोक्षाय प्रश्नात् । मैवं, योगं युञ्जानस्य समाधेः पूर्वप्रज्ञायामन्तर्भावात् तं विद्याकर्मणी समारभेते पूर्वप्रज्ञा चेति श्रुत्या सहगमनात् । तत्र साधन-दशायां तनुवित्तजसेवामानसीसेवोक्तसमाधिरूपा यदि फलरूपा सत्यन्यफलत्वेन न ग्राहयति । तदा कर्मनिर्हारिणी कर्मपदवाच्योक्तश्रुतौ विद्या तु 'ज्ञानी चेद्भजते' इति वाक्यात् ज्ञानं माहात्म्यज्ञानमैक्यज्ञानं सर्वभूतेषु भगवज्ज्ञानं भक्तेषु भगवद्भक्तत्वेन ज्ञानं तत्सेवा चेति । तत्र सत्ये भक्तजीवस्यापि ज्ञाने संप्रज्ञातस्यानन्ते समाधेरिति बोध्यम् । किं पुनः 'रसो वै सः' इति श्रुतेः सर्वा भक्तिरससामग्री संकर्षणात्मकवेदात्मकानन्तरूपेति सर्वं रसस्वरूपं सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्युक्तम् । तस्य प्राप्त्यात्र मार्गे संप्रज्ञातसमाधेर्मोक्षत्वात् । फलानुरोधेन सर्वा साधनसामग्री कल्प्या । तदुक्तं षष्ठाध्याये गीतायाः ।

'युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति' ॥ इति ।

न चायं योगः आत्मसंयमयोगाध्यायस्थत्वात् । तदुक्तम् । 'मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च' इत्येकादशस्कन्धे । मत्संस्था मम संस्था भक्तिर्यत्र तनुवित्तजरूपा साधनत्वेन ताम् । तत्संस्थस्यामृतत्वोपदेशादिति शाण्डिल्यसूत्रे संस्थापदस्य भक्तिवाचकत्वात् । तथोपसंहारे ।

रश्मिः ।

'योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः' ॥ इति ।

पूर्वोक्तसमासं सूचयति । शान्तिरिति क्तिजन्तं शाम्यतीति शान्तिरिति भाष्यसूचितार्थसंप्रज्ञातसमाधिसंवाद्यर्थोऽतोन्यटीकासु यथास्थितोर्थः । प्रातिलोम्येनाथ अकामयमान इत्यादिश्रुतीनां निर्धारार्थः कारिकयोक्तः । उत्क्रमणे नाडीनामुपयोगात्ता वा अस्यैता इत्यारभ्य परमो लोक इत्यन्तं निर्धारयामास कारिका । तदाहुः **तस्मिन्निति** । श्लोकस्तु तस्मिञ्छुक्लमुत नीलमाहुः पिङ्गलं हरितं लोहितं च । एष पन्था ब्रह्मणा ह्यानुवित्तस्तेनैति ब्रह्मवित्तैजसः पुण्यकृच्चेति । तस्मिन् मोक्षमार्गे । तैजसः स्वप्नसाक्षी स चारम्भ उक्तः सुषुप्तेः पूर्वं सुषुप्तिकथनं फलनिरूपणेऽनुवादाय । तेन पूर्वकारिकाविषयः । आनन्दमीमांसा निर्गुणस्य सुषुप्तिरूपस्यानन्दनिरूपणं फलत्वाय । तस्यानुभवारूढत्वाय पुनः प्रश्नः । पुनरपि मोक्षार्थं जीवोपक्रमेण ब्रह्मोपसंहारेणाह पापः पापेनेत्यन्तेन । तत्रान्येभ्यो वा भूतेभ्यः इत्यत्र वाकारं गर्हायां स्वीकृत्याधोनिनीषया क्रोधकर्मकर्तॄणां निन्दा तदाहुर्भाष्येन्धन्तम इति ।

'अन्धन्तमः प्रविशन्ति ये संभूतिमुपासते ।
ततो भूय इव ते तमो य उ संभूत्याꣳरताः' ॥
'असुर्या नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधा जनाम्' ॥

तमो मृत्युः ग्लानिकर्तृ काङ्क्षाकर्तृ वा । प्रविशन्ति । संभूतिमविद्याम् । भगवन्तं त्यक्त्वा संभूत्यां विद्यायां असुर्याः अनन्दाः । जनाम् जनाः आम् । सोर्डा । आमर्थस्तु अङ्गीकृता इति आम् अङ्गीकारे इति मनोरमा । तदुक्तं **पापः पापेनेति** यथाकारीत्यस्या अर्थं निर्धारयामास कारिका तदेव सन्त इति तदेवसन्तस्तदु तद्भवामो न चेदवेदीन्महती विनष्टि येन विदुरमृतास्तेभवन्त्यथेतरे दुःखमेवोपयन्तिति इदं वचनं बुद्धिमतामिति भाष्ये तद्विवृण्वन्ति स्म **सद्य** इति तदेव सन्त इत्यस्य इहैव देहे अज्ञानरहिताः सन्तस्तदु ब्रह्म उ विश्व इत्यर्थात् ज्ञानवतां तद्भवाम इत्यस्य ब्रह्म भवाम इत्यर्थात् सद्योमुक्तिभाजां ये तद्विदुरमृतास्ते भवन्तीत्यस्य । ये तदमृतमानन्दं तिरोहिताविर्भूतं विदुरिति ब्रह्मभावः । तिरोहितस्याविर्भावे ब्रह्मभाव इति ग्रन्थात् । तेन ब्रह्मभावेन । अमृतास्ते भवन्ति । इत्यस्यामृतस्यानन्दस्य प्राप्त्यानन्दा भवन्तीत्यर्थः । न चेदित्यस्यायमर्थः । न चेद्विदितवन्तो वयं तदावेद्यज्ञानी स्यां सा महती विनष्टिर्विनाशः स्यादित्यर्थः । **शेषमिति** । आत्मानमित्यादि भाष्यं स्फुटम् । तदित्थम्—

'आत्मानं चेद्विजानीयादहमस्मीति पुरुषः ।
किमिच्छन् कस्य कामाय शरीरमनु संज्वरेत्' ॥ इति ।

आत्मानं परपुरुषं चेद्ययं परमैश्वर्यकर्ता अहमणुर्जीवोस्मि सुषुप्तिसमयेऽफलं सद्योमुक्तिसमये संप्रज्ञातसमाधिसमये विषयवैतृष्ण्याद्वैराग्यं आप्तकामत्वाद्विषयवैतृष्ण्यम् । शरीरतापमनु तप्येत इति शरीरमनुसंज्वरेदित्यस्यार्थः । एवं वैराग्यवतो दोषनाशद्वारा विज्ञानं वक्तुमाहेत्याहुर्भाष्ये **यस्यान्विति** । 'स्तुवन्ति दोषनाशाय तत्राविष्टो भवेद्यथा' इति सुबोधिन्याः । स्तुतिरुत्कर्षाधायकगुणवर्णनम् । चकारः समुच्चयेऽतो नवभिः स्तुतिविज्ञाने उच्येते ।

रश्मिः ।

'यस्यानुवित्तः प्रतिबुद्ध आत्मा अस्मिन् संदेहे गहने प्रविष्टः ।
सविश्वकृत्स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव' ॥

भाष्ये यस्यानुवित्तिरिति पाठः । अस्मिन् प्रसिद्धे संदेहे संदिह्यते उपचीयते तेजोबन्नादिभूतैरिति संदेहः ऋहलोर्ण्यत् । यकारलोपश्छान्दसः । तकारागमः । तस्मिन् किं लक्षणे गहने आध्यात्मिकाद्यनेकार्थसंकीर्णत्वात् दुर्विषये प्रविष्टः आत्मा यस्य येन ब्राह्मणेनानु ब्रह्मज्ञानमनुवित्तो ज्ञातो भक्त्यापि प्रतिबुद्धः प्रति प्रतिनिधौ प्रतिनिधिरूपसर्वात्मभावरूपबोधविषयः । ब्राह्मं चेति रूपविशेषणस्य श्रुतावुक्तेः स सर्वात्मभाववान् भक्तो वा विश्वकृदित्यादि । तस्येश्वरस्य लोकोऽक्षरः 'आत्मा यावत्प्रपन्नोभूत्तावद्वै रमते हरिः' इति 'सोन्तःकरणसंबन्धि तिरोधत्ते हरिश्च सः' । इत्याह सविति उ आश्चर्ये स जीवो लोकोऽक्षर एव न तु भगवत्संबन्धी । 'जीवाः स्वभावतो दुष्टाः' तेषां संयोगविप्रयोगदानादीश्वरोत्कर्षः । तदाधायका गुणाः संयोगादिदातृत्वादयः । तेषां वर्णनमस्त्येव विज्ञानं च ।

'यदैतमनुपश्यन्ति आत्मानं देवमञ्जसा ।
ईशानं भूतभव्यस्य न तदा विचिकित्सति' ॥

एतं हृदयस्थमात्मानमञ्जसा साक्षात् अनुपश्यति आचार्याल्लब्धप्रसादमनुपश्यति 'अपि संराधने प्रत्यक्षानुमानाभ्याम्' इति सूत्रात्संराधनानन्तरं वा पश्यति उभयानन्तरं वा पश्यति विचिकित्सति संदेग्धि यद्वा जुगुप्सते गुप्तिं नेच्छति किं तु भक्तिमार्गानुसरणात् हरेर्हरित्वं स्वस्येच्छति अर्थात् देवात् । गुप गोपनकुत्सनयोः चु. आ. से. गोपनं नेच्छति साधनमन्तरा पश्यतीत्युत्कर्षाधायका गुणाः असाधनवतां स्वस्य प्रत्यक्षविषयत्वादयस्तेषां यथाकथंचिद्वर्णनं विज्ञानं च ।

'यस्मिन् पञ्च पञ्चजनाः आकाशश्च प्रतिष्ठितः ।
तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोमृतम्' ॥

यस्मिन् पञ्चवक्ष्यमाणवाक्यगतज्योतिषा सह तदग्रवाक्योक्तप्राणचक्षुःश्रोत्रमनांसीति पञ्च पञ्चजनसंज्ञकाः तमेवात्मानं मन्ये ब्रह्मामृतो विद्वानमृतोस्मि अमृत आनन्दः ज्ञानमात्रेणामृतसंपादकत्वादयो गुणाः तेषां वर्णनमत्र विज्ञानं च । इयं कारिका········पादे 'न संख्योपसंग्रहादपि इतिं सूत्रे विचरिष्यते । यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते तद्देवाः ज्योतिषां ज्योतिरायुर्होपासतेमृतम् । यस्माज्ज्योतिश्चक्रादर्वाक् अधः संवत्सरकालोऽहोभिः स्वावयवैः परिवर्तते न तं स्पृशति । न परिछिनत्ति देवा उपासते कालापरिच्छिन्नस्य देवोपास्यत्वादय उत्कर्षाधायकगुणास्तेषां वर्णनं विज्ञानं चं प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः । ते निचिक्युर्ब्रह्मपुराणमग्र्यं मनसैवावासव्यं नेह नानास्ति किंचन । अर्धप्रपाठकः । प्राणस्य प्राणः आधिदैविक आधिभौतिकस्य प्राणः एवमग्रेपि । ते ब्राह्मणा अग्र्यमग्रे भवं अत एव पुराणं चिरंतनं ब्रह्म निचिक्युः ज्ञातवन्तः सर्वस्माद्विभक्तवन्तः केन साधनेनेत्यत आह मनसेति आचार्योपदेशं प्राप्य मनसैव ब्रह्म प्रासव्यं मानसी सेवा कर्तव्या न तु भक्त्यावासव्यमिति चेन्न वेदान्ते मनसावबोधकर्त्रेत्यर्थात् प्रेमलाभात् सहकारिकारणत्वं वा मनसः । नाना भेदः साकारब्रह्मणोऽनेकेषु रूपेषु मनोवासव्यं रूपं वा तादृग्ब्रह्म जीवानामवाप्तुं योग्यं इत्युत्कर्षः । तदाधायकगुणवर्णनं स्तुतिरस्ति विज्ञानं च ।

'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।
मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्' ॥

भिर्ब्रह्मस्तुतिः । तद्विज्ञानं च । पुनरेतदेव स्पष्टतयोपदिशति । स वा अयमात्मे-

भाष्यप्रकाशः ।

मिति । सद्योमुक्तिभाजां ज्ञानवतां ब्रह्मभावेन ब्रह्मप्राप्तिवचनम् । शेषं स्फुटम् । शेषस्यार्थमाहुः पुनरित्यादि । अत्रैतद् बोध्यम् । यस्यानुवित्त इत्यस्योत्तरार्धे, स विश्वकृदित्यादिना यत् सर्वकर्तृत्वमुक्तं तत् स वा एष आत्मा सर्वस्य वशीत्यारभ्य, सेतुर्विधरण इत्यन्तेन स्पष्टीकृतम् । तस्य लोक इत्युक्तं लोकाधिपत्वं च, एषां लोकानामसंभेदायेत्यनेन । यत् पुनः पूर्वार्धे, यस्यानुवित्त इत्यादिनोक्तम्, अग्रिमश्लोकैश्च तत् तमेतं वेदानुवचनेनेत्यारभ्य आन्तं स्फुटीकृतमिति ।

रश्मिः ।

मृत्योरसतः सकाशान्मृत्युमसन्तं प्राप्नोति यः पूजादिकर्ता नानाभेद इव पश्यति किं तु 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' पश्यति । अनु कर्मज्ञानभक्तीरनुद्रष्टव्यम् । पूजादिकर्तुरनुरोधात् विभक्तमिवेत्युत्कर्षः । तदाधायकगुणा विभक्तसादृश्यादयस्तद्वर्णनमस्ति विज्ञानं च—

'विरजः पर आकाशादज आत्मा महान् ध्रुवः' ।
'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद् बहून् शब्दान् वाचो विग्लापनं हि तत्' ॥ इति ।

विगतं रजो धर्माधर्मादिलक्षणं यस्मात् स विरजः महान् परिमाणतः । धीरो धीमान् धीर्धारणावती बुद्धिः तया विज्ञाय मोक्षेतरत्वेन ज्ञात्वा भक्तिविषयत्वेन विज्ञाय 'भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः' इति वाक्यात् । एवं शास्त्रोत्थज्ञानविषयं कृत्वा प्रज्ञां सिद्धान्तमुक्तावल्युक्तसंराधनेन प्रत्यक्षं कुर्वीतेत्यर्थः । विग्लापनं साकारस्यानन्तमूर्तेस्तत्तन्मूर्तिष्वनादरकर्तृ । बहुष्वादरो न संभवतीति सुबोधिन्याः । एतावान् भाष्ये विज्ञानपदार्थः स्तुतिश्च अत्र द्वौ श्लोकौ सार्धौ यतः पठितावतोऽष्टौ श्लोकाः । प्राणस्येत्यत्र श्लोकद्वयमिति नवभिरिति भाष्यम् । अग्र्यमित्यन्त एकः मनसेति द्वितीयः । आज्ञावत्त्वात् । पुनरिति भाष्यमवतारयामासुः शेषेति । कथमुपदिशतीत्यत आहुः अत्रेति 'स वा एष आत्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं च स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयानेष भूताधिपतिरेष लोकेश्वर एष लोकपालः स सेतुर्विधरण एषां लोकानामसंभेदाय' अत्र भगवत्स्तुतिर्विज्ञानं चैकत्रोच्यते । उत्कर्षाधायकगुणवर्णनं स्पष्टं शाब्दं विज्ञानं च वशमस्यास्तीति वशी । साधुना वेदविहितेन । असाधुना वेदनिषिद्धेन सर्वस्य वश्यादिकं स विश्वकृदित्यादिना सर्वकर्तृत्वमुक्तम्, तन्निर्वाह्यमित्येकवाक्यता । उत्पत्तिस्थितिप्रलयानां परस्परनिर्वाहकत्वम् । स भगवान् सेतुः सिनोति बध्नातीति सेतुः । रूपप्रपञ्चकरणात् । वर्णाश्रमादिव्यवस्थाविधारकः अत उक्तं स्पष्टीकृतमिति । तस्य लोक इति तस्य भगवतो लोकोऽक्षरः इति प्राप्तं लोकाधिपत्यम् । किमर्थं लोकाधिपत्यमित्याकाङ्क्षायामाह एषां भूरादिब्रह्मलोकान्तानामाधिदैविकानामसंभेदायासांकर्याय एकवर्णता माभूदिति । तमेत्तमिति 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चैतमेवं विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्ति एतद्धस्म वै पूर्वे ब्राह्मणाः अनूचानाः विद्वा९सः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोयमात्माऽयं लोक इति ते ह स्म तु पुत्रेषणायाश्च वित्तेषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षुचर्यां चरन्ति या ह्येव पुत्रेषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणा उभे ह्येषणे एव भवतः । स एष नेति नेत्यात्माऽग्राह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्यते

रश्मिः ।

न बध्यते इत्यतः पापमकरवमित्यतः कल्याणमकरवमित्युभे ह्येष तरत्यमृतः साध्वसाधुनी नैनं कृताकृते तपतो नास्य केनचन कर्मणा लोको मीयते तदेतदृचाभ्युक्तम् एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् तस्यैव स्यात् पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन'इति। तस्मादेवं विच्छान्तो दान्तः उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत् सर्वमेवं पश्यति सर्वोप्यात्मा भवति सर्वस्यात्मा भवति सर्वं पाप्मानं तरति नैनं पाप्मा तरति सर्वं पाप्मानं तपति नैनं पाप्मा तपति विजरो विजिघत्सोऽपिपासो ब्राह्मणो भवति य एवं वेद स वा एष महानज आत्मा अन्नादो वसुदानः स यो हैवमेतं महान्तमजमात्मानमन्नादं वसुदानं वेद विन्दते वसु स वा एष महानज आत्माऽजरोऽमृतोऽभयोऽमृतो ब्रह्माभयं वै ब्रह्माभय९हि वै ब्रह्म भवति य एवं वेद इत्येतासु । ब्राह्मणा विविदिषन्ति इत्यत्र तत्र तु यस्य ब्रह्मज्ञानमनुवित्त इति केषांचिद्विविदिषाविषयः। कैश्चिद्वित्त इति विशेषः। रामानुजाचार्यमते तु सनर्थस्याविवक्षातः ब्राह्मणा विदन्तीति कालभेदमात्रम् । तमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीत्यत्र तत्र तु तस्य लोकः स उ लोक एवेति लोकव्रजनोत्तरं भक्तितदभावाभ्यां स्थितिरिति विशेषः एतद्धस्म वा इत्याद्यत्र तत्र तु यदैतमनुपश्यति इत्यादीति केषांचिदात्माभावप्रयुक्तः किं प्रजयेति क्षेपः केषांचिदात्मानुदर्शनवतां न तदा विचिकित्सतीति नावक्षेपेति विशेषः। विचिकित्सति जुगुप्सत इत्यर्थः। गुप गोपनकुत्सनयोः भ्वा. आ. से. कुत्स अवक्षेपे चु. आ. से. श्रुत्यर्थः स्पष्टः पूर्वत्र अस्या श्रुतेरर्थः। एतद्धस्म एतत्समीपतरवर्ति पूर्वोक्तं ह प्रसिद्धे स्म भूतकाले वै निश्चयेनानु गुरूच्चारणमनु उचाना वदन्तः किं क्षेपे उभे लोकेषणाभिक्षचर्याचरणेषणे चरणस्येषणात्वायैवकारः इति स एष नेति नेति अत्र तत्र यस्मिन् पञ्चेत्येकत्रात्मामृतयोः स्वरूपमुक्तं स्पष्टतयैकत्रत्वस्पष्टतयेति विशेषः । कारिकोक्तात्मस्वरूपमाह स एष नेति मूर्तामूर्तब्राह्मणोक्त आत्मा केनाप्यगृह्यः न गृह्यते केनापि। अशीर्यः केनापि कोपि न शीर्यते असङ्गः असितोऽबद्धः न केनापि कर्त्रा सज्यते इतिः प्रकारे अतः कारणात्। एष आत्मा। अमृतस्वरूपमाह अमृत इति मीयत इति। जयोऽभिभवः क्रियते लोकस्याभिभवः क्रियते। तदेतदिति तदेतत्पूर्वेणोक्तम्। वस्तुतत्त्वमृचाप्युक्तम्। एष साधननिःस्पृहो नेति नेत्यादिलक्षणत्वरूपभूते महिमा ऐश्वर्यविशेषः स्वाभाविकत्वान्नित्यः कुतः शुभकर्मणा न वर्धते यत एष महिमा तस्यैव ब्राह्मणस्य पदं गम्यं वित्तं ज्ञातं तं महिमानं विदित्वा य एवं वेदान्योपि सोप्येवं भवति। स वा एष इत्यत्र तत्र तु यस्मादर्वागिति। ज्योतिश्चक्रं स्पष्टतयोच्यते। उपासना च ज्ञानात्मा वसुदान इत्यन्तेन ज्योतिर्निरूपणम्। स य इत्यादिनोपासनायाः सफलायाः स वा एष इत्यत्र तत्र तु प्राणस्य प्राणमिति तदितीत्यन्तम्। प्रमेयविशेषेपि विलक्षणप्रमेयाभावात्। अत्र प्राणाद्याधिदैविकम्। ये विदुस्ते पुराणमग्र्यं ब्रह्म निचिक्युरित्युक्तम्। तत्रामृत इत्यन्तेनांशेन ये विदुस्ते उक्ताः पुराणमग्र्यं ब्रह्म ब्रह्माभयमिति पदद्वयेन। मनसैवावाप्तव्यमित्युक्तं प्राप्तुं योग्यं त्वया प्राप्तमिति जनकप्राप्तोसि इत्यनेनांशेनोक्तम्। पुनश्च मृत्योरित्यनेन भेदसदृशदर्शनं मृत्युप्रापकमित्युक्त्वा चक्षुराद्यप्रमेयं ध्रुवमास्यनन्तरं मनोदर्शनयोग्यमित्युक्तम्। तेन ससंबोधो मोक्षः सूचितः। एवं प्रकाशे स वा अयमिति भाष्यं विवृतम्। तत्र जीवस्यानिशीत्वात् येन प्रकारेण जीवः परलोके गच्छति तमुपायं भगवानेव करोतीति भाष्यात्। भगवता त्वन्निष्ठेन मोक्षो मह्यं दत्त इति भक्तिरहस्यभजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन् मनःकल्पनमिति मानसी सेवा तत्र मुख्या यद्यपि तथापि मानस्यां दास्यवित्तं साधनं मन्वान आह

त्यादि । अभयं वै जनक प्राप्तोऽसीत्यन्तम् । काण्वानां क्वचित् पाठभेदेऽप्ययमेवार्थः । अत्र प्रकरणे जीवो वाच्य इति प्राप्ते ।

भाष्यप्रकाशः ।

पूर्वपक्षमाहुः अत्र प्रकरणे जीवो वाच्य इति । अयमर्थः । अत्रोपक्रमे, कतम आत्मेति प्रश्ने, योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इति शारीरलिङ्गादुपसंहारे च, योऽयं विज्ञानमयः प्राणेष्विति कण्वपाठे तदपरित्यागान्मध्ये बुद्धान्ताद्यवस्थोपन्यासेन तस्यैव प्रपञ्चनाच्च । यद्यपि संसारी प्रतीयते, तथापि मध्ये, ध्यायतीव लेलायतीवेति ग्रन्थे संसारिधर्मनिराकरणात् । उपसंहारे च, स वा एष महानज आत्मेति संसारिधर्मरहितपरमेश्वरात्मकत्वबोधनात् । उपक्रमोक्तविज्ञानमयत्वादेस्तस्मिन्नपि सत्त्वेन उपक्रमस्य संदिग्धतया नैर्बल्यात् । माध्यमिकबुद्धान्ताद्यवस्थोपन्यासस्य च संसार्यवस्थानुवादेन तद्रहितदशायां परमेश्वराभेदबोधनपरत्वावगमात् । सुषुप्त्यादौ भेदबोधनस्यापि संसारिदशायामेव पर्यवसानात् । पुनः पुनर्मोक्षप्रश्नेन, यत् किंचित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गोऽयं पुरुष इति तदुत्तरे पुनः पुनरनन्वागततया असङ्गत्वप्रतिपादनेन, अनन्वागतं पुण्येनानन्वागतं पापेनेति कर्मसंबन्धराहित्यस्य च प्रतिपादनेन,

रश्मिः ।

सोहमिति विदेहैर्देशैः समानामन्यां महीं मां चापि पुत्रादिभिः सह दास्यायेति स वा एष इत्युपसंहारः तत्र तु विरजः पर इति । अत्र धीरार्थस्पष्टीकरणं ब्राह्मणार्थस्पष्टीकरणं ज्ञानिभक्तज्ञेयत्वेनात्मनः उपसंहारश्च । तथा चायं श्रुत्यर्थः । स वा एष महानज आत्माऽजरोऽमरोऽभयोऽमृतः इत्यंशः स्पष्टः धीरो ज्ञानी भक्तश्चेत्याह फलबलेन ब्रह्माभयं वै निश्चयेनेति ज्ञानी । भक्तस्तु ब्रह्माऽभयं हि वै हि शब्देन विशेषः । ब्रह्मा ब्राह्मणो ब्रह्मज्ञो भवति । य एवं वेद कर्ममार्गे सोपि ब्रह्मा भवतीति परं कृपाप्रसादयुक्तः कश्चिदित्यर्थः । प्रकृतमनुसरामः । आन्तमिति अन्तमाभिव्याप्येत्यन्तम् । ब्राह्मणान्तम् । भाष्ये काण्वानामिति षोडशकण्डिकानन्तरं स्वप्नान्त इत्यत्र स्वप्न इति पाठो यद्वा संप्रसाद इति पाठः बुद्धान्तायेत्यत्र स्वप्नायेति पाठः । त्रिंशकण्डिकानन्तरं हैनमनुशशास याज्ञवल्क्य एषास्य परमा गतिरिति पाठः । त्रयस्त्रिंशकण्डिकानन्तरं जितलोकानामानन्दा इत्यस्याग्रे स एको गन्धर्वलोक आनन्दोथ ये शतं गन्धर्वलोक आनन्दा इति पाठः गन्धर्वलोकस्थले प्रजापतिलोकः पठ्यते । विचिकित्सतीत्यत्र विजुगुप्सते इति पाठः । अत्र स्वप्नान्तसंप्रसादपदयोः सामानाधिकरण्यं प्रसिद्धम् । तथा स्वप्नबुद्धान्तयोर्गतिसंपदोश्च लोकपौर्वापर्यं विकल्पेनेत्ययमेवार्थः इदानीं विचिकित्सतीत्यस्य विजुगुप्सते इति पर्यायः कथमिति चिन्ता अत्र कित निवासे भ्वा. प. से. निवसितुमिच्छति । गुप गोपनकुत्सनयोः भ्वा. आ. से. गोपितुमिच्छति सन् निवसितुमिच्छति यः स आत्मानं गोपितुमिच्छत्यात्मानं गोपितुमिछति यः स निवसितुमिच्छतीति जीवो वाच्य इति शंकराचार्यसिद्धान्तः पूर्वपक्षे उक्तः ब्रह्मपरत्वेन व्याकृतस्य ब्राह्मणद्वयस्य शांकररीत्यार्थमाहुः अयमर्थ इति संसारीति ध्यायति बुद्धिः जीवोपि ध्यायतीव लक्ष्यते यथा बुद्धौ ध्यायन्त्यां जीवो ध्यायतीव प्रतीयते यथा गच्छन्त्यां नावि तटस्थास्तरवश्चलन्तीव प्रतीयन्ते लेलायतीव बुद्धौ चलन्त्यां जीवश्चलतीव प्रतीयते । एवं संसारिधर्मनिराकरणात् । तस्मिन्निति संसारिधर्मरहिते । नैर्बल्यादिति । तथा च उपसंहारस्यासंजातविरोधित्वेन संसारिधर्मरहितपरमेश्वरपरत्वं संदर्भस्येति भावः । तद्रहितदशेति विशेषदर्शनोत्तरं तद्रहितदशायाम् । अनन्वागतः कर्मसंबन्धरहितः । प्रतिपिपादयिषितोऽभेद ऐक्यरूपसंख्यारूपोऽत-

अभिधीयते । ब्रह्मेव प्रकरणार्थः । सुषुप्तावुत्क्रमणे च जीवब्रह्मणोर्भेदेन व्यपदेशात् ।

भाष्यप्रकाशः ।

तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवतीति सर्वदुःखतरणश्रावणेन च परमात्माभिन्नासंसारिरूपप्रतिपादनपरमेवैतद्वाक्यमित्यतोऽत्रासंसारी परमेश्वराभिन्नो जीवो वाच्य इत्यर्थः । सिद्धान्तं व्याकुर्वन्ति ब्रह्मैवेत्यादि । अयमर्थः । सत्यमत्र मुक्तजीवस्तथा निरूप्यते । तथापि स न प्रकरणार्थः । तत्र हेतुः सुषुप्तावित्यादि । तथा च यदि मुक्तो जीवो ब्रह्माभेदेनात्र प्रतिपाद्यः स्यात् तदा अवस्थाभेदस्याप्रयोजकत्वेन तत्र जीवं परमेश्वरान्न भिन्द्यात् । प्रतिपिपादयिषिते अभेदे भेदकथनस्य प्रयोजनशून्यतया वैयर्थ्यप्रसङ्गात् । नच संसार्यवस्थायां भेदबोधनाय तदिति युक्तम् । तदानीं जाग्रत्स्वप्नयोरज्ञत्वादिवैशिष्ट्यस्य प्रत्यक्षसिद्धत्वेन सुषुप्तिमरणयोस्तमोऽभिभवेन तथात्वस्याज्ञानेऽपि सौषुप्तिकस्मरणेन मृतानां भूतादिभावदर्शनेन चानुमानसिद्धतया तत्कथनवैयर्थ्यानपायात् । अतो ज्ञायमानावस्थासिद्धं भेदमनूद्य यदज्ञायमानावस्थासिद्धं भेदमनुवदति तदसंसार्यवस्थायामपि भेदबोधनायैवानुवदति । यथोदकं शुद्धं शुद्धे आसिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमेति काठके तथैव श्रावणात् । नच तर्ह्युपक्रमाद्यनुरोधादसंसारी परमेश्वरसमानधर्मा जीवो वाच्योऽस्त्विति वाच्यम् । उपक्रमे किं ज्योतिरयं पुरुष इति प्रकाशकप्रश्ने, आदित्याद्यनन्तरमात्मज्योतिरित्युत्तरे पुरुषस्य प्रकाशापेक्षितत्वेनाप्रकाशकत्वात् । प्रकाशक आत्मा क इत्याशयेन पृच्छति । कतम आत्मेति । तत्र स्पष्टतया वक्तव्येऽप्युत्तरे याज्ञवल्क्यो, न वदिष्य इति स्वाभिसंधेर्वरदानस्य चानुरोधाच्छ्लिष्टमेवोत्तरं ददातीति पूर्वं व्युत्पादितम् । अतस्तद्विचारे, अत्रायं स्वयञ्ज्योतिर्भवतीति निगमनवाक्ये परमात्मैव स्वयंपदवाच्यः सिद्ध्यतीत्युपक्रमगतः प्रश्नस्तत्पर एव पर्यवस्यति । तथापि श्लिष्टप्रयोगाज्जनकेन सम्यङ् न ज्ञातः । एतावज्ज्ञातं, संसारिव्यतिरिक्तः प्रकाशक इति ।

रश्मिः ।

स्तस्याभावरूपत्वाभावान्न भेदरूपप्रतियोगिनः प्रयोजकत्वमित्याहुः प्रतीति । तम इति ज्ञानावरणदर्शनात्तमोभिभवः । तथात्वस्येति अज्ञत्वादिवैशिष्ट्यस्य । सौषुप्तीति सुखमहमस्वाप्सं न किंचिदवेदिषमिति स्मरणेन तथा च न किंचिदवेदिषमित्यत्र किंचिद्विषयकवेदनप्रतियोगिकाऽभावः किंचिद्विषयकवेदनं विनानुपपद्यमानं पूर्वं किंचिद्वेदनं ज्ञापयति । भूतादिभावश्च मरणेऽज्ञत्वादिवैशिष्ट्यम् । सुषुप्तः पूर्वमज्ञत्वादिविशिष्टः न किंचिदवेदिषमिति स्मरणाद् देवदत्तवत् । मृतः अज्ञत्वादिविशिष्टः प्रेतयोनेः धुन्धुकारिवत् । धुन्धुकारी श्रीभागवतमहात्म्येस्ति यन्नैवं तन्नैवं जनकवत् । तत्कथनेति भेदकथनेत्यर्थः । अधुना 'स ईक्षांचक्रे' 'एकोहं बहु स्यां प्रजायेय' इति भेदस्यैच्छिकत्वात् तादृशभेदमादायाहुः अत इति । अज्ञायमानेति सुषुप्त्युत्क्रान्त्यवस्थाऽज्ञायमानावस्था तत्सिद्धं भेदं सुषुप्त्युत्क्रान्त्योर्भेदेनेति सूत्रे व्यासोनुवदति सिद्धस्य कथनमनुवादः । अत्र श्रुतिं प्रमाणयामासुः यथोदकमिति । पुरुषस्येत्यात्मनः । तत्रेति अन्ते । श्लिष्टमिति संसारिश्लिष्टं असङ्गत्वरूपमुक्तिश्लिष्टं वा इयं स्वप्नावस्था । पूर्वमिति ब्राह्मणव्याख्याने । तद्विचार इति प्रकाशकात्मविचारे । उपक्रमेति कतम आत्मेति प्रश्नः । किं ज्योतिरयं पुरुष इति वा प्रश्नः । तत्पर इति जाग्रदवस्थातिक्रमेण स्वाप्निकात्मपर एव । श्लिष्टेति स्वप्नासङ्गत्वरूपमुक्तिश्लिष्टप्रयोगात् ।

आकाशवद् ब्रह्मनिर्धार एव युक्तः ॥ ४२ ॥

भाष्यप्रकाशः ।

ततस्तत्संदेहनिवारणाय पृच्छति । विमोक्षाय ब्रूहीति । तदापि श्लिष्टमेवोत्तरं ददाति । स एष एतस्मिन् संप्रसादे रत्वा चरित्वेत्यादि । तदा जीवस्यासंगतत्व उक्तेऽपि जनकस्य संदेहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि मत्स्यादिदृष्टान्तं वदन् स्वप्नसुषुप्ती अवस्थे उक्त्वा सुषुप्तौ परमात्मानमसङ्गादपि जीवाद् भेदेनाह । तदापि तस्य प्रकाशकसंदेहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि संप्रसादवाक्येनैवोत्तरे पुनरपि मोक्षाय पप्रच्छ । तदा याज्ञवल्क्यो राज्ञो मेधावित्वाद् भीतो मरणावस्थां संसारिणो वदन् परमेश्वराज्जीवस्य भेदमाह । तदापि श्लिष्टप्रयोगात् तस्य संदेहो न निवृत्त इत्यकामयमानस्य सद्योमुक्तिमाह । तत्र, ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः प्राज्ञ आत्मा ब्रह्मैवेति च श्रुतेर्जीवस्य ब्रह्मभाव एव मुक्तिः । प्राज्ञ आत्मा ब्रह्म योऽस्ति स एव प्रकाशकः । तज्ज्योतिषैवायं जीवः सर्वं करोतीति ज्ञात्वा, सोऽहं भगवते सहस्रं ददामीत्युक्तवान् । तदा याज्ञवल्क्यस्त्रयोदशश्लोकैः सर्वं शास्त्रार्थमुक्त्वा, स एष आत्मेत्यादिना तमेवार्थं स्पष्टमुक्तवान् । तदा जनको विदेहान् स्वात्मानं च दास्यार्थं तस्मै दत्तवान् । विद्यां च याज्ञवल्क्यः समापितवान् । अत उपक्रमोपसंहारयोः परमात्मन एव प्रकृतत्वसिद्ध्या तस्यैव प्रकरणित्वमिति सिद्धम् । तदाहुः आकाशवदित्यादि । तथाच यथा पूर्वाधिकरणे अन्यथानुपपत्तिबलादाकाशवाक्यस्य ब्रह्मपरत्वनिर्धारस्तथात्र भेदव्यपदेशान्यथानुपपत्तिबलात्

रश्मिः ।

श्लिष्टमिति स्वप्नासंगत्वरूपमुक्तिश्लिष्टम् । **स एष एतस्मिन् संप्रसादे** इति । काण्वानां स्वप्नायेति प्रसङ्गो यं ह्ययं पुरुष इति चात्रैव श्रावणात् । अतो न पुनरुक्तिः स्वप्नासङ्गत्वरूपमुक्तिकथनस्य । **मोक्षायेति** जागरणासङ्गत्वमुक्तये वदन् वेदः । **स्वप्नेति** ईश्वरस्य स्वप्नजागरणाभेदाज्जागरणसुषुप्ती इत्यर्थः । **सुषुप्ताविति** जागरणोपलक्षिका सुषुप्तिजागरणयोः । **मोक्षायेति** मोक्षार्थम् । भगवतेऽनु भगवत्त्वाय । **मोक्षायेति** सुषुप्तिसंप्रज्ञातसमाधिसद्योमुक्तिरूपमोक्षाय । **श्लिष्टेति** सद्योमुक्ति-संप्रज्ञातसमाधिसुषुप्तिसंश्लिष्टप्रयोगात् । **प्राज्ञ** इति सुषुप्तौ प्राज्ञः । संप्रज्ञातसमाधावात्मा सद्योमुक्तौ **ब्रह्मेति** पदत्रयम् । यद्वा । प्राज्ञश्चात्मा प्राज्ञात्मा ब्रह्मेत्यर्थः । **विदेहान्** इति विदेहामित्यत्र विदेहानिति पाठमङ्गीकृत्योक्तम् । **अत** इति उपक्रमगतप्रश्नस्य जाग्रदवस्थातिक्रमेण स्वाप्निकात्मपर्य-वसानात् एष आत्मेत्युक्तोपसंहाराभ्याम् । **अन्यथेति** यत्रैव सिद्धवत्कारेणोत्कृष्टधर्मा अतदीयाः तदेव ब्रह्मेति व्युत्पत्तिः । अनयार्थापत्तिः सूच्यते परं कारणाभावात् निर्विषयार्थापत्तिर्न संभवतीति पार्थसारथिमिश्रमतानुसारेण कारणमन्यथानुपपत्तिरूपमुक्तम् । तथा हि । अत्र ब्राह्मणद्वये जीवस्य ब्रह्मत्वप्रतिपादनपक्षः स्वातन्त्र्येण ब्रह्मण एव ज्ञानकर्मत्वपक्षः तयोराद्यपक्षे । अत्र शब्देन ब्राह्मणद्वय-रूपेण पृथितस्य ब्राह्मणद्वयार्थब्रह्मोपक्रमवाच्यत्वाभावरूपार्थस्यार्थान्तरमुपसंहारब्रह्मार्थत्वं विनानुप-पद्यमानस्योपपत्तये उपसंहारब्रह्मार्थत्वकल्पनार्थापत्तिः । अर्थस्योपसंहारब्रह्मार्थत्वरूपस्यापत्तिः कल्पना । यस्माद् ब्राह्मणद्वयार्थं ब्रह्मादिज्ञानात्तदा ब्राह्मणद्वयार्थब्रह्मोपक्रमवाच्यत्वाभावोऽर्थापत्तिः सा यत्रैव हीति व्युत्पत्त्या व्यज्यते यत्रैव जीव एव उत्कृष्टधर्मा ज्योतिरात्मत्वकर्तृत्वरूपा अतदीया अजीवीयाः सिद्धवत्कारेण स वा अयमित्यत्र तस्य वा एतस्येत्यत्र च कण्डिकायां वै प्रयोगेण तद्यथा राजानमिति वाक्यद्वये हकारप्रयोगेण तदेव जीव एव ब्रह्म । अत्र प्रमाणं सूत्रं वाच्यार्थं उक्तः

भाष्यप्रकाशः ।

प्रकरणस्य ब्रह्मपरत्वनिर्धार इत्यर्थः । किं चात्र संसारिणोऽपि जीवस्य परमेश्वराद् भेदसाधनेन मुक्तावस्थायामपि जीवे ब्रह्मलक्षणस्य नातिव्याप्तिरिति बुद्धिस्थं प्रसङ्गाद् बोधितम् ॥ ४२ ॥

रश्मिः ।

सूच्यार्थोऽर्थापत्तिरस्याः इयमपि प्रमाणान्तरं नास्ति शब्दानुग्राहिका त्वियम् । प्रत्यक्षादिप्रमितार्थज्ञानदार्ढ्यहेतुत्वादभ्यासादिवदिति स्थितं प्रस्थानरत्नाकरे । अत्र ब्राह्मणद्वयार्थो ब्रह्मोपक्रमे वाच्यत्वेन नास्तीत्यत्र ब्राह्मणद्वयार्थत्वसंसृष्टोपक्रमवाच्यत्वाभावस्यानुपपत्त्या उपसंहारस्य ब्रह्मार्थत्वं कल्प्यते तथा चोपक्रमापेक्षयासंजातविरोधित्वेनोपसंहारस्य प्राबल्याद्ब्रह्मरूपोऽर्थः यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र पीनत्वानुपपत्त्या रात्रिभोजनं कल्प्यत इति । ननु ब्राह्मणद्वयार्थो जीवोपसंहारे वाच्यत्वेन नास्तीत्यत्र ब्राह्मणद्वयार्थत्वसंसृष्टोपसंहारवाच्यत्वाभावस्यानुपपत्त्यानुपक्रमस्य जीवपरत्वं कुतो न कल्प्यते इति चेन्न । जीवोपक्रमेण ब्रह्मोपसंहारेणाहेति भाष्यस्य स यत्राणिमानं न्येतीत्यवान्तरोपक्रमविषयत्वात् । ब्रह्मैव प्रकरणार्थ इति भाष्याच्च ।

'सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः ।
वने वृन्दावने क्रीडन् गोपगोपीसुरैः सह' ॥

इत्यत्र यथा भक्तियोग्यं भगवद्रूपं सूच्यते ते अन्येषामतथात्राप्यर्थापत्तिः सूच्यते मुद्रालंकारः । नन्वर्थापत्तिरनुमानम् । ब्रह्म उपसंहारार्थः । ब्राह्मणद्वयार्थत्वे सति उपक्रमवाच्यत्वाभावात् यन्नैवं तन्नैवं वियद्वदिति चेन्न न प्रमाणान्तरं शब्दानुग्राहिका त्वियमिति पूर्वमुक्तत्वात् ब्राह्मणद्वयार्थत्वसंसृष्टोपक्रमवाच्यत्वाभावः उपसंहारार्थ एतदुभयविषयकज्ञानयोरेककालिकत्वेन हेतुहेतुमद्भावाभावात् । न च तयोः नैककालिकत्वमिति वाच्यं उपसंहारार्थमनन्तरभाव्य ब्राह्मणद्वयार्थत्वोपक्रमवाच्यत्वाभावयोः संसृष्टयोः प्रत्येतुमशक्यत्वेन तत्संसर्गग्रहदशायामुपसंहारार्थान्तरभावस्य नियतत्वादेककालिकज्ञानविषयत्वस्यानपनोद्यत्वात् । न च एवं प्रमाणान्तरत्वाभावेपि शब्दस्य प्रमाणत्वे तात्पर्यवृत्तौ सत्यां केवलस्य ब्राह्मणद्वयार्थत्वस्योपक्रमवाच्यत्वाभावस्य वा गमकत्वाभावात्संसृष्टमुभयं गमकमित्यङ्गीकार्यम् । तथा सति तयैव संविदोपसंहारार्थस्यापि प्रमितत्वादेतत्कालमेव प्रभानमित्यर्थापत्तावपि अनुग्राह्यभावेनानुग्राहकत्वसिद्धिर्न स्यादिति चेन्न । संसृष्टबुद्धेरेवानुग्राह्यत्वात् । न च कारणाभावः शङ्क्यः । यथा पूर्वाधिकरणेऽन्यथानुपपत्तिरूपकारणबलादर्थापत्त्याकाशवाक्यस्य ब्रह्मपरत्वनिर्धार इति । तथाहि । अर्थान्तरकल्पनया समाधेयत्वेनोच्यमानप्रमाणसिद्धयोरर्थयोः एकस्य वा परस्परं तदितरेण वा प्रकारेण प्रतिघातोऽन्यथानुपपत्तिः तत्समाधानायार्थान्तरकल्पनं चार्थापत्तिः तया च समाहिते प्रतिघाते प्रमितयोः संसृष्टबुद्धिः प्रमेयप्रमारूपेति प्रमितस्य वा । द्वारमित्यादौ । अर्थान्तरमाकाशस्य परमात्मवाचकत्वं तत्कल्पनया समाधेयत्वेनोच्यमानयोराकाशो ह वा इति प्रमाणसिद्धयोराकाशत्वं ते यदन्तरा तद् ब्रह्मेत्युक्तनामरूपान्तर्वर्तित्वं चेत्येतयोरर्थयोः प्रतिघातः । तत्समाधानार्थमर्थान्तरस्याकाशस्य परमात्मरूपत्वस्य कल्पनमर्थापत्तिः । अनया समाहिते प्रतिघाते उक्तयोरर्थयोः संसृष्टबुद्धिस्तयाकाशवाक्यस्य परब्रह्मत्वनिर्धारः । तथात्र ब्राह्मणद्वयेपि । ब्राह्मणद्वयार्थत्वोपक्रमवाच्यत्वाभावयोरर्थयोर्ब्राह्मणद्वयप्रमाणसिद्धयोः अर्थान्तरस्योपसंहारे ब्रह्मार्थकत्वस्य कल्पनया समाधेयत्वेनोच्यमानयोः परस्परं प्रतिघातो वर्तत इत्यन्यथानुपपत्तिर्वर्तते । एतादृशं प्रतिघातं निमित्तीकृत्य अर्थापत्तिः प्रकृते प्रवर्तते उपसंहारस्य ब्रह्मार्थकत्वकल्पनरूपात्रापीति ब्राह्मणद्वयस्य ब्रह्मपरत्वनिर्धार इत्यर्थः॥४२॥

पत्यादिशब्देभ्यः ॥ ४३ ॥

किंच । सर्वस्य वशीत्यादिशब्देभ्यः स्पष्टमेव ब्रह्मप्रकरणमिति ॥ ४३ ॥

इति प्रथमाध्यायतृतीयपादे त्रयोदशं सुषुप्त्युत्क्रान्त्यधिकरणम् ॥ १३ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये प्रथमाध्यायस्य तृतीयः पादः ॥ १ ॥ ३ ॥

भाष्यप्रकाशः ।

पत्यादिशब्देभ्यः ॥ ४३ ॥ भेदव्यपदेशेन प्रकरणस्य ब्रह्मपरत्वसाधनं क्लिष्टमित्यतो हेत्वन्तरं वदतीत्याशयेनाहुः किं चेत्यादि । तेषामुपासनार्थत्वं वारयितुं बहुवचनम् । तथाच यदि ते शब्दा उपासनार्थाः स्युः, सकृदुक्ताः स्युर्न त्वसकृत् । न वा विवृताः स्युः । यतस्ते तथा, अतो न जीवस्य तथोपासनार्थाः । किं तु परमेश्वरस्य जीवाद् भेदनार्था एवेत्यहंग्रहोपासनापेक्षया ईश्वरत्वेन पृथक्तयोपासनैव युक्तेत्यर्थः ॥

अत्र शंकराचार्याः । किमिदं वाक्यं संसारिरूपान्वाख्यानपरमुतासंसारिस्वरूपप्रतिपादनपरमिति संशये, संसारिपरमिति पूर्वपक्षं, संसाररहितपरमेश्वराभिन्नजीवात्मप्रतिपादनपरमिति सिद्धान्तमाहुः । भेदव्यपदेशं च संसारिभेदपरमाहुः ।

तदसंगतमित्युपपादितम् ।

भास्कराचार्यास्तु, किं संसारिस्वरूपपरम्, उत पररूपपरमिति संशये, पररूपपरमिति सिद्धान्तयन्ति ।

रश्मिः ।

पत्यादिशब्देभ्यः ॥ ४३ ॥ क्लिष्टमिति उपक्रमे जीवब्रह्मोभयपरताभानोक्तेः परस्परप्रतिहतशब्दयोः वाक्ययोर्वा तात्पर्यवृत्त्यार्थान्तरकल्पनं वाच्यं तदर्थान्तरकल्पनं उपसंहारस्य ब्रह्मार्थत्वकल्पनं तदेवार्थापत्तिः । उपसंहारप्राबल्यं चेति क्लिष्टम् । तथा च भाष्यम् । जन्माद्यस्य यत इत्यस्याथ वा किमनया कुसृष्ट्येति । ननु किंचेत्यनेन भाष्ये ब्रह्मनिर्धारे कार्त्स्न्येनोपपादकोक्तेः कुत पूर्वोक्तोपपादकास्वरसेन व्याख्यानमिति चेन्न अस्वरसपूर्वकव्याख्यानस्य किं चेत्यस्यान्योपपादकारम्भार्थत्वस्वीकारेण प्रवृत्तत्वात् 'किं चारम्भे च साकल्ये' इति विश्वः । **तेष**।मिति पत्यादिशब्दानाम् । श्रुत्यर्थस्तूक्तः । **न त्विति** वश्यादिपदानां टीकायां कथंचित्कृत्यमुक्तम् । तदरुच्यापर्यायत्वेसकृदुक्तिः एष भूताधिपतिरित्यादिना विवृताः पर्यायकथनं विचरणम् । यद्वात्रैवासकृदुक्तिः । नासर्वमस्य वशे वर्तते कुतः सर्वस्येशान इति राजकुमारोपीदृश इत्याशङ्क्य सर्वस्याधिपतिरिति टीका निर्दुष्टा यतोऽतो नारुचिरत्र तावतैवोपासनसिद्धेरसकृदुक्त्यादि वैफल्यम् ब्रह्मप्रकरणसाधकत्वे तु जीवस्याप्युपक्रम उक्तेरसकृदुक्त्या विवरणेन चाप्राबल्यमिति । **तथेति । सर्ववशित्वादिभिः । भेदका** इति संज्ञादयो भेदकाः पूर्वतन्त्रे द्वितीयाध्याय उक्ताः अहंग्रहोपासना गोपालोहमिति भावयेदिति गोपालतापिनीये । न चासंभेदायेत्यस्यासंकर्यायेत्यर्थापेक्षया असम्यग्भेदाय विभक्तमिव स्थितये इत्यर्थो ज्यायान् इत्यहंग्रहोपासना युक्तेति शङ्क्यम् । जीवे ब्रह्माविर्भवतीति भाष्याद्यद्याप्येवं तथापि

भाष्यप्रकाशः ।

तन्मतं संदिग्धमिव । तत्र यदि मुक्तजीवपरं, तदा तु पूर्वोक्तदूषणग्रस्तमित्यप्रयोजकम् । यदि केवलपरमेश्वरपरं, तदा तु न दुष्टम् ।

रामानुजाचार्यास्तु, अत्र पक्षानुल्लेखादिदं सूत्रद्वयं पूर्वसूत्रशेषत्वेन योजयन्ति । तेन तन्मतेऽत्र जीवाद् भिन्न एव परमेश्वरः प्रतिपाद्यः । एवं तच्चौरमतेऽपि ।

अत्रेदं बोध्यम् । सत्यमत्र पक्षानुल्लेखस्तथापि, आद्ये विषयवाक्ये आकाशः पक्षो द्वितीये त्वात्मा पक्ष इति पक्षभेदाद्धेतुभेदाच्चाधिकरणभेद एव युक्तः । अन्यथा, अर्थान्तरत्वादिव्यपदेशादिति सर्वस्य हेतोरनुवृत्त्याऽप्यात्मनः प्रत्यगात्मभेदसिद्धिर्भेदेनेति पदस्य, पत्यादिसूत्रस्य च वैयर्थ्यापत्तेदुर्वारत्वादिति ।

माध्वास्तु, स वा एष संप्रसादे रत्वा चरित्वेत्यादिना स्वप्नादिद्रष्टा यः प्रतिपादितोऽसङ्गत्वेन च, स जीवो, ब्रह्म वेति संशये, सुषुप्त्यादौ जीवाद् भेदेन व्यपदेशाद् ब्रह्मैवात्र प्रतिपाद्यम् । स्वप्नस्य सत्यत्वात् तद्द्रष्टृत्वं सर्वज्ञे ब्रह्मण्यविरुद्धम् । तस्मादसङ्गं ब्रह्मैवेत्याहुः । द्वितीयसूत्रे च पत्यादिशब्दानां श्रावणात् परमेश्वर एव प्रतिपाद्यो न तु, स वा एष महानज आत्मेति वाक्यप्रतिपादितः । अजशब्दवाच्यश्च चतुर्मुख इत्याहुः ।

भिक्षुस्तु, अत्रोत्क्रान्तिशब्दो जीवस्य देहत्यागमात्रपरतया मोक्षादीनामपि संग्राहकः । मोक्षावस्थायामपि निरञ्जनः परमं साम्यमुपैतीति साम्यान्तर्गतस्य भेदस्य व्यपदेशात् ब्रह्मैव सन् ब्रह्माप्येतीत्युक्तवाक्येऽप्यप्ययस्य भेदतन्त्रत्वाच्च । ब्रह्मैव सन्निति तु त्यक्तदेहाभिमान इति, प्राप्तगौणब्रह्मभाव इति वेत्यर्थबोधकम् । प्रलयावस्थायां च यत् प्रयन्त्यभिसंविशन्तीत्यादिश्रुतौ कोशखड्गयोरिव प्रवेष्टव्यप्रवेष्ट्रोर्भेदोऽवगम्यत इति । नन्वेवमपि सुषुप्तावेकीभावः । तुरीयाख्ये महाप्रलये च ब्रह्मचिन्मात्रावशेषो जीवो माण्डूक्यादिवाक्येभ्यः सेत्स्यतीति चेन्न । उक्तबृहदार-

रश्मिः ।

फलत्वेन सद्योमुक्तेर्निषेधात् संप्रज्ञातसमाधिसूचनात् सुषुप्त्युक्तेश्चाहंग्रहस्यानुक्तेः । पूर्वसूत्रेति तथाहि पूर्वसूत्रे मुक्तात्मप्रतिषेधेन परमात्माकाशशब्दार्थ उक्तः । अथ स्यात् प्रत्यगात्मनोर्थान्तरमेव नास्ति ऐक्योपदेशात् द्वैतप्रतिषेधाच्च शुद्धावस्था एव प्रत्यगात्मनोर्थात् परं ब्रह्म परमेश्वर इति व्यपदिश्यतेऽतः प्रकृतान्मुक्तात्मनोऽभिसंभवितुर्नार्थान्तरमभिसंभाव्यो ब्रह्मलोकः । अतो नामरूपयोर्निर्वहिताकाशोपि स एव भवितुमर्हतीति अत उत्तरं पठति श्रीसुषुप्त्योत्क्रान्त्योर्भेदेन श्रीव्यपदेशादिति वर्तते सुषुप्त्युत्क्रान्त्योः प्रत्यगात्मनोर्थान्तरत्वेन परमात्मनो व्यपदेशात् प्रत्यगात्मनो अर्थान्तरभूतः प्रत्यगात्मेति तथा हि द्वितीयः सूत्रे यं परिष्वञ्जक आत्मोत्तरत्र पत्यादिशब्दैः व्यपदिश्यते सर्वस्याधिपतिः सर्वस्य वशीति । एवं च पतित्वजगद्विधरणसर्वेश्वरत्वादयः प्रत्यगात्मनि मुक्तावस्थेपि न कथंचित्संभवन्ति । अतो मुक्तात्मनोऽर्थान्तर्भूतो नामरूपयोर्निर्वहिता आकाश इत्येवं पूर्वसूत्रशेषत्वेन योजयन्ति । न तु स्वमते कुतो न शेषत्वमत आहुः **अत्रेदमिति** । **पक्ष इति** । आकाशः परमात्मा अर्थान्तरत्वादि व्यपदेशात् । आत्मा प्रकरणार्थः । सुषुप्तावुत्क्रमणे च जीवब्रह्मणोर्भेदेन व्यपदेशादिति तथा च भाष्यम् । **ब्रह्मैव प्रकरणार्थ इत्यादि** अन्यथेत्येकाधिकरणत्वे प्रकारे सति । **भेद इति** इमे अविभागाद्वैतवादिनः अतोऽविभाग इत्यर्थः । **एकीभाव इति** नाविभागाद्वैतमिति भावः । **माण्डूक्येति**

भाष्यप्रकाशः ।

ण्यकवाक्ययोरविभागपरत्वस्यागत्या वक्तव्यतया तदेकवाक्यत्वेनेतरश्रुतेरपि तत्परत्वावधारणात् । अविभागो वचनात् इति सूत्रे व्यासैरपि वक्ष्यमाणत्वाच्चेत्याह ।

तत्र यदविरुद्धं; तद् ग्राह्यम् । शेषे उदासीना वयम् ।

एवमस्मिन् पादे पदार्थान्तरेऽतिव्याप्तिवारणात् तल्लिङ्गाद्यधिकरणोक्तार्थप्रपञ्चनेनोपास्य-

रश्मिः ।

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सुषुप्तस्थाने एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पाद इत्येकीभावो माण्डूक्योपनिषदि ।

'प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान्
भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ।
पीत्वा सर्वान् विशेषान् स्वपिति मधुरभुक् मायया मोहयन्नो
मायासंख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोस्मि' ॥

इति च माण्डूक्ये । अगत्येति जीवब्रह्मप्रतीत्या मुक्तिप्रतीत्या चागतिस्तया । न चैक्यमस्त्विति शङ्क्यम् । छान्दोग्ये श्वेतकेतूपाख्याने यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान् समवहारमेकता९ँरसं गमयन्तीत्यत्राविभागोक्तेः अविभागाद्वैतान् निस्तिष्ठन्ति निष्पादयन्ति । नानेति नानागतीनां नानादिक्कानाम् । समवेति समाहृत्य एकतां मध्वात्मकताम् । इत्यविभागाद्वैतसिद्धेः । तत्परत्वेति अविभागाद्वैतपरत्वावधारणान्न त्वात्यन्तिकैक्यपरत्वावधारणात् । **अविभागेति** इदं फलाध्याये द्वितीयपादेस्ति जीवस्य मुक्तौ ब्रह्मणा सहाविभागः । **यदविरुद्धमिति** तत्रासङ्गं ब्रह्मेति विरुद्धम् । तस्य विरुद्धधर्माश्रयत्वात् । सेतुर्विधरण इत्यत्रैवोक्तेः पतनप्रतिबन्धकव्यापारस्य विधरणपदार्थत्वात् । द्वितीयसूत्रोक्तमविरुद्धम् । अजपदार्थो विरुद्धः अजपदस्यान्यार्थकत्वात् मोक्षादीनां संग्रहोऽविरुद्धः सद्योमुक्त्याद्यङ्गीकारात् । त्यक्तदेहेत्यादिकं विरुद्धम् । ब्रह्मैवसन्नित्यस्यांशस्य कूटस्थः सन्नित्यर्थात् । कोशखङ्गयोरिति विरुद्धम् । सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयते इति दृष्टान्तात् । इतरश्रुतेस्तत्परत्वावधारणं विरुद्धम् 'अविभक्तं च भूतेषु' इत्यत्र नञर्थानां षट्कात् ।

'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः' ॥

अब्राह्मणः अपापमनश्वः अनुदरा कन्या अपशवो वा अन्ये गो अश्वेभ्यः अधर्म इत्युदाहरणानि । **तल्लिङ्गादिति** आदिपदेन दहराधिकरणं **उपास्येति** ज्योतिरधिकरणे ज्योतिः शरीरात् समुत्थिताधिकरणम् । नामरूपान्तर्वर्तित्वेन नामरूपाधाररूपोपास्यनिरूपकेत्यर्थः । तथा ब्रह्मप्रकरणमित्यस्मिन्नधिकरणे ब्रह्म सर्वाधिकरणं देशकालौ प्रकरणमिति देशकालरूपाधिकरणं च प्रत्यपादि । जीवे

भाष्यप्रकाशः ।

रूपनिरूपकवाक्यविचारादुपासनाधिकारिविचारपूर्वकं त्रयोदशाधिकरण्या आधाररूपो भगवान् विचारितः ॥ ४३ ॥

इति त्रयोदशं सुषुप्त्युत्क्रान्त्यधिकरणम् ॥ १३ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रकिरणनिवारितहृदयान्धकारेण
पीताम्बरात्मजपुरुषोत्तमेन कृते ब्रह्मसूत्राणुभाष्यप्रकाशे
प्रथमाध्यायस्य तृतीयः पादः समाप्तः ॥ १ ॥ ३ ॥

रश्मिः ।

ब्रह्माविर्भवतीति जीवरूपाधारोपि । आधारनिरूपके पादे तदुपर्यपील्याद्यधिकरणतात्पर्यमाहुः उपासनेति । विचारित इति संगतिस्तूपोद्घातोग्रे पादे कथयिष्यते ॥ ४३ ॥

इति त्रयोदशाधिकरणम् ॥ १३ ॥

इति श्रीविट्ठलमण्डनश्रीगिरिधार्यात्मजश्रीदामोदरभ्रात्रीयेण श्रीगोविन्द-
रायपौत्रेण पूर्णवेत्रा श्रीविट्ठलरायभ्रात्रीयश्रीगोकुलोत्सवात्मज-
गोपेश्वरेण कृते भाष्यप्रकाशरश्मौ प्रथमाध्याये
तृतीयः पादः संपूर्णतामगमत् ॥ १ ॥ ३ ॥



श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाश-संपूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वर-
जिच्चरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

प्रथमाध्यायस्य चतुर्थः पादः

'भगवद्धर्मपरायणसद्व्रतश्रेष्ठिगोवर्धनदास सुन्दरदास' इत्यस्य पुष्टिमार्गीय-
संस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतः 'प्राप्तभगवत्पद-
मूलचन्द्र तुलसीदास तेलीवाला, बी. ए., एलूएल्. बी.,
वकील, हाइकोर्ट' इत्येतेषां सुहृद्भिः
संशोध्य 'निर्णयसागर' मुद्रणालये
मुद्रयित्वा प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४६४. संवत् १९९८.

मूल्यं रूपकचतुष्टयम् ।

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya Sagar' Press,
26-28, Kolbhat Street, Bombay 2.

Published by Dhirajlal Vrajdas Sanklia, B. A., LL. B., Advocate
at Khakhar Building, C. P. Tank, Bombay 4.

EDITORS' NOTE.

The publication of this great work, the Anu Bhashya together with the commentary Prakasha thereon by Shri Purushottamaji, the erudite Acharya of Vallabha Sampradaya, and the Rashmi on both of these by Goswami Shri Gopeshvarji, who flourished in the nineteenth century and who is known to have written various books and commentaries on Shuddhadwaita Philosophy and allied subjects, was undertaken under the auspices of the Trust of the Late Sheth Gordhandas Soondardas Mulji Jetha, by Mr. Mulchandra Tulsidas Telivalla. He began to publish these from the Third Adhyaya of Anu Bhashya, and published in February 1926, the First Pada of the said Adhyaya. The reader is referred to the introduction of the said Pada in which a short history is given of the author and the literature on the Anu Bhashya available in the Shuddhadwaita Sampradaya.

He published the Second and Third Padas of the Third Adhyaya, and the reader is referred to the Preface of the Third Pada published on 27-4-1927, in which is established the connection of Shri Krishnachandraji with the great work. By the impenetrable will of God, the Editor, Mr. Telivalla, died suddenly on 26-6-1927, to the utter dismay and consternation of us, his friends and collaborators.

Through extreme diffidence, and with the consent of the Trustees of Sheth Gordhandas Soondardas Trust, we took upon ourselves to continue the work left incomplete by our colleague. We are thankful to the Almighty for removing all difficulties and putting facilities in our way of completing this stupendous task.

In the middle of the task, we were deprived of the help of one of our colleagues, the late Mr. Gordhandas Pragji of the Editorial Staff of the Bombay Samachar. His enthusiasm and rigidity of purpose are still present in our minds. We may frankly mention that Shastri Kalyanji Kanji of Gondal has been chiefly instumental in getting the work carried through the Press. He deserves our thanks, and the Sampradaya will always remain indebted to him for this.

It was our intention to provide the reader with the comparative views of the different Bhashyakaras on the various Adhikaranas of the Brahma Sutras, which have been so lucidly given by Goswami Shri Purushottamaji, and with a view to have them in the Introduction to this publication, we requested Prof. G. H. Bhatt, M. A., Professor of Sanskrit in the Baroda

College, to take up the work, and he readily undertook to do it. Unfortunately, on account of other engagements, he could not find time to do it. We, however, wish that he may be able to do this as an Introduction to the Translation of the Anu Bhashya, which he has undertaken under the Gaekwar Oriental Series. In these circumstances and in view of the daily growing scarcity of paper and printing materials, we have thought it fit to give as Preface to this work the very clear analysis of the Adhikaranas made by Goswami Shri Purushottamaji himself in his Adhikaranamala, and to complete this work, without further delay.

We are thankful to H. H. Goswami Shri Gokulnathaji Maharaja of Bombay, for his favour of co-operation and consent for getting the work published, and it may be safely said that the present work sees the light of day through his good offices with the Trustees, and chiefly with the late Mr. Lalji Naranji, one of the Trustees.

Thus by the grace of God we have been able to complete the work left unfinished by our friend the late Mr. Mulchandra Telivalla, and we offer this fruit of our labour of love at the Lotus Feet of Lord Shri Krishna.

Bombay,
31st May 1942.

DHIRAJLAL VRAJDAS SANKALIA.
JAMNADAS KANJEE.
HIRALAL MOOLJEE.
PURUSHOTTAM KANJEE.

श्रीकृष्णाय नमः ।

वेदान्ताधिकरणमाला ।

श्रीपुरुषोत्तमविरचिता ।

प्रथमोध्यायः ।

श्रीबालकृष्णमाचार्यान् प्रभून् श्रीविठ्ठलेश्वरान् । व्यासाचार्यांस्तद्वचांसि प्रणमामि पुनः पुनः ॥ भाष्यप्रकाशे विस्तीर्णोर्थोवगन्तुं न शक्यते । सर्वैरतोर्थं सङ्गृह्य न्यायमाला वितन्यते ॥ २ ॥

तत्र तावद् व्यासचरणैरज्ञजनानुग्रहार्थं सर्ववेदार्थरूपस्य ब्रह्मणः स्वरूपसाधनफलमतान्तरनिराकरणभेदेन **चतुर्धा** विचारोत्र शास्त्रे क्रियते । तत्र सर्ववेदार्थरूपं ब्रह्मैवेति ज्ञापयितुं चतुर्लक्षण्यां तत्सम्बन्धि सर्वं विचारितम् । तत्र **प्रथमेध्याये** सर्वेषां वेदान्तानां ब्रह्मण्येव समन्वयः, वेदार्थनिश्चयश्च वेदान्तविचाराधीन इति सर्वोपि वेदो ब्रह्मण्येव **प्रमाण**मित्युक्तम् । **द्वितीये** च श्रुतीनां परस्परविरोधपरिहारेण विरुद्धस्मृतीनां दूषणेन च ब्रह्मैव **प्रमेय**मिति निर्णीतम् । **ततस्तृतीये**न्तरङ्गं बहिरङ्गं च **साधनं** सोपकरणं विचारितम् । **ततश्चतुर्थे** फलप्राप्तिप्रकारस्तदनुभवप्रकारो ब्रह्मैव च फलमिति निर्णीतमिति **शास्त्रार्थसङ्ग्रहः** ।

तत्र **प्रथमे**ध्याये सर्वेषां वेदान्तानां ब्रह्मणि समन्वयश्चतुर्भिः पादैर्वक्तव्यः । तत्रासन्दिग्धेषु वेदान्तवाक्येषु विचारासञ्चारात्सन्दिग्धान्येव निर्णेतव्यानि । तानि चतुर्धा, कार्यप्रतिपादकानि, अन्तर्यामिप्रतिपादकानि, उपास्यरूपप्रतिपादकानि प्रकीर्णकानि चेत्यतश्चत्वारः पादाः ।

तत्र **प्रथमपादे** ब्रह्मसम्बन्धिविचारं प्रतिज्ञाय ब्रह्म लक्षयित्वा ततः कार्यवाक्यानि विचारितानि ।

तत्र **प्रथमे एकसूत्रे जिज्ञासाधिकरणे** षडङ्गैरेव वेदार्थनिश्चयस्य संभवादत्यन्तनिश्चयस्य तपःप्रभृतिभिरेव संभवात्तदर्थं किं वेदान्तविचारेणेत्याशङ्क्य, ऋषिभिर्नानाशास्त्राणां कृतत्वात्तच्छ्रवणेन बुद्धिदोषान्मन्दानां संदेहसम्भवे तन्निवारणार्थं विचारशास्त्रं कर्तव्यम् । तत्र यद्यपि 'सर्वे वेदा यत्पदमामनन्ति' इति, 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिश्रुतिस्मृतिभिर्ब्रह्मैव सर्ववेदार्थः, तथापीदं वाक्यं वेदान्ते श्रुतं 'तं त्वौपनिषदं पुरुषं पृच्छामी'ति, पुरुषरूपता च तत्रैव श्रुता, 'वेदान्तविज्ञानसुनिश्चितार्था' इतिवाक्येन वेदान्तानामर्थनिश्चायकत्वं च तत्रैव श्रुतम्, अत इदानीं तपःप्रभृतीनामसंभवाद्वेदान्तविचारेणैव वेदार्थरूपब्रह्मस्वरूपनिश्चय इत्यभिसंधाय ब्रह्मसंबन्धिविचारः श्रीबादरायणाचार्यैः प्रस्तुत इत्युक्तम् । अतोग्रिमाणि यान्यधिकरणानि शास्त्रसमाप्तिपर्यन्तं तानि सर्वाण्यस्यैव विषय इति तेषामस्य च विषयविषयिभावः संगतिरित्यपि बोधितम् ॥ १ ॥

---

१. ग्रन्थे अस्मिन् प्रतिपाद्यः को विषय इति प्रस्तावनायां वक्तव्यमावश्यकं प्रकाशकानाम् । साधारणसंशोधको यं सारमुद्धरेत् तदपेक्षया श्रीमदणुभाष्यप्रकाशकारैः गो. श्रीपुरुषोत्तमचरणैः अणुभाष्याधिकरणतो सारमात्रं संगृह्य अधिकरणमाला रचितास्ति सैवास्माभिः ग्रन्थप्रतिपाद्यविषयतयात्र मुद्रापितास्ति । सा यद्यपि तेलीवालापंडितैः संशोध्य पृथक् मुद्रितास्ति तथापि विपुलविस्तरार्थं पुनर्मुद्राप्यते इति न मोघास्मत्कृतिरिति विदांकुर्वन्तु विद्वांसः ।

ततो **द्वितीये एकसूत्रे जन्माद्यधिकरणे** ब्रह्म किंलक्षणकं किंप्रमाणकं चेत्याकाङ्क्षायां जगदुत्पत्तिस्थितिकारणं ब्रह्मेति सूत्रांशेन लक्षितम् । ततोंऽशान्तरेण वेदरूपशास्त्रप्रमाणकं ब्रह्मेत्युक्तम् । तेन कर्तृरूपं निमित्ततया सिध्यति ॥ २ ॥

ततस्**तृतीये एकसूत्रे समन्वयाधिकरणे** ब्रह्म जगतः कर्तृ निमित्तं चेति चेत्, किं जगतः समवायीत्याशङ्कायामनारोपितानागन्तुकरूपेण समनुगमाद्ब्रह्मैव जगतः समवायीति निर्णीतम् । तेनाभिन्ननिमित्तोपादानवादोऽस्मिन् शास्त्र इति बोधितम् ॥ ३ ॥

एवं **त्रिसूत्र्या** ब्रह्मणो जिज्ञासा ब्रह्मलक्षणं तद्विचारस्य कर्तव्यता च साधिता । ये पुनः कर्तृत्वे वैषम्यादयो दोषाः, समवायित्वे च विकृतत्वादयः, ते सर्वेऽग्रिमाध्याये परिहर्तव्याः, विचारकर्तव्यतायाः प्रतिज्ञातत्वात् । तत्र सच्चिदानन्दरूपत्वस्य ब्रह्मणः स्वरूपलक्षणत्वात्पूर्वोक्तं कार्यलक्षणं त्रिष्वप्यनुगतं वक्तव्यम्, अन्यथा लक्षणेऽव्याप्तिप्रसङ्गात् । अन्यतश्च निवारणीयम्, अन्यथातिव्याप्तिप्रसङ्गात् । असंभवश्च निवारणीयः ।

तत्र द्वाभ्यामधिकरणाभ्यां सद्रूपे तल्लक्षणं योजितम् । अतःपरं चिद्रूपेऽव्याप्तिनिवारणाय प्रकृतिपरमाण्वादावतिव्याप्तिनिवारणाय च **चतुर्थे सप्तसूत्रमीक्षत्यधिकरणमा**रभ्यते । तत्र **प्रथमसूत्रे** 'यतो वाचो निवर्तन्ते'इत्यादिश्रुत्या ब्रह्मणः सर्वव्यवहारातीतत्वेन सर्वप्रमाणागोचरतया तज्ज्ञानासंभवाद्विचारो व्यर्थ इत्याशङ्क्य, ब्रह्म सर्ववेदान्तप्रतिपाद्यम्, 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रम्य, 'तदैक्षत', 'बहु स्यां प्रजायेय' इत्यनेनेक्षणस्य बहुभवनस्य च श्रावणात् । अतः सृष्टेः पूर्वमव्यवहार्यत्वेपि तदनन्तरं तत्कर्तृत्वेन तदुपादानत्वेन च व्यवहार्यत्वं श्रुत्योच्यत इति तया तज्ज्ञानस्य संभवात्तद्विचारो न व्यर्थ इति बोधितम् । ईक्षणकर्तृत्वेन चेतने तस्मिन् पूर्वोक्तलक्षण-समन्वयाच्चिद्रूपे लक्षणाव्याप्तिरपि परिहृता । तेनैव प्रकृतिपरमाण्वादावतिव्याप्तिरपि निवारिता, असंभवश्च निवारितः । ततो **द्वितीयसूत्रे** तस्येक्षणकर्तुरात्मशब्दवाच्यत्वात्प्राकृतगुणवत्त्वं निवारितम् । ततस्**तृतीये** तदुपासकस्य मोक्षरूपफलकथनादपि तन्निवारितम् । ततश्**चतुर्थे** जगद्धेयत्वस्याकथनादपि तन्निवारितम् । एवं **चतुःसूत्र्यां** कार्यविधिमुखेन तद्विचार उक्तः । ततोऽग्रे **त्रिसूत्र्यां** कार्यनिषेधमुखेन तद्विचार्यते, निषेधश्च प्रलयात्मकः । तत्र **पञ्चमे** स्वाप्ययसूत्रे जीवसुषुप्तिर्ब्रह्मसंबन्धेनोच्यते । सा च मोक्षभिन्नापि जाग्रदादिवत्कर्मसंबन्धरहितेति प्रलयतुल्या । सा च स्वसंबन्धेनैव जायत इति भगवतस्तत्कर्तृत्वम् । ततः **षष्ठे** मोक्षदशायां जीवस्य भगवत्तुल्यत्वं श्रुत्योक्तम् । तत्र मैत्रेयीब्राह्मण आदिमध्यावसानेषु ब्रह्मण एव बोधनात् तद्दातृत्वं ब्रह्मण एवेति बोधितम् । ततः **सप्तमे** सर्वप्रलये ब्रह्मैवावशिष्यत इति श्रुत्या बोध्यते । अतः प्रलयो ब्रह्मकर्तृक एवेति बोधितम् । एवमनेनाधिकरणेन चित्स्वरूपे कार्यलक्षणयोजनादव्याप्तिः परिहृता । चित्स्वरूप-त्वबोधनात्प्रकृत्यादावतिव्याप्तिरपि परिहृता ॥ ४ ॥

ततः **पञ्चमेऽष्टसूत्र आनन्दमयाधिकरण** आनन्दे लक्षणयोजनेन तत्राव्याप्तिः परिह्रियते । तत्र **प्रथमसूत्रे**ऽविशेषेण पुनःकथनरूपादभ्यासादानन्दमयस्य ब्रह्मत्वं स्थापितम् । तत्र **प्रथमवर्णके** आनन्दस्यार्थतोभ्यासः शब्दतश्च । **द्वितीयवर्णके** तु 'तस्यैष एव शारीर आत्मा यः पूर्वस्य'ति-वाक्याभ्यास उक्तः । एवमभ्यासेन मयट्प्रवाहाद्भेदे साधिते आनन्दमयस्य ब्रह्मत्वम् । यथा पूर्वतन्त्रे यजत्यभ्यासात्कर्मणस्तद्वत् । ततो **द्वितीयसूत्रे** मयटो विकारार्थत्वादानन्दमयस्य न ब्रह्मत्वमिति

सूत्रांशेनाशङ्क्य, मयटः प्राचुर्यार्थकत्वान्न मयट्प्रत्ययेनान्नब्रह्मत्वं वक्तुं शक्यत इत्यंशान्तरेण समाहितम् । ततस्तृतीये सूत्रे आनन्दजनकत्वेन तत्कारणत्वान्मयटो विकारार्थत्वं निवारितम् । ततश्चतुर्थसूत्रे 'सत्यं ज्ञान'मितिमन्त्रे योर्थ उक्तः स एव संपूर्णे प्रपाठके प्रपञ्च्य गीयते, अत आनन्दमयो ब्रह्मैवेति निर्णीतम् । ततः पुनरग्रिमया चतुःसूत्र्यायमेवार्थो निषेधमुखेन निर्णीयते । तत्र प्रथमेन जीवस्यानन्दमयत्वं निराक्रियते, जीवे निरङ्कुशजगत्कर्तृत्वादिरूपस्य माहात्म्यस्यानुपपद्यमानत्वात् । द्वितीये 'ह्यानन्दीभवती'त्यादिना जीवस्यानन्दनीयत्वमुच्यते, न त्वानन्दत्वम्, अतो भेदव्यपदेशादपि जीवस्य नानन्दमयत्वमित्युक्तम् । ततस्तृतीये 'सोकामयते'तिचेतनधर्मस्य कामस्य जडायां प्रकृतावनुपपद्यमानत्वात्सापि नानन्दमयीत्युच्यते । ततश्चतुर्थेस्य जीवस्यानन्दमये ब्रह्मणि योगमुपसङ्क्रमरूपं फलत्वेन कथयति श्रुतिः, तेन जीवापेक्षया उत्कृष्ट एवानन्दमयो, न तु जीवादपकृष्टः । तस्मादानन्दमयो ब्रह्मैवेति निरूपितम् । एवं चतुःसूत्र्यां जीवजडनिषेधमुखेनानन्दमयो विचारितः । एवमष्टसूत्र्यानन्दमयस्य ब्रह्मत्वे साधिते निरङ्कुशजगत्कारणत्वं तत्रैव पर्यवस्यतीत्यानन्देपि लक्षणसमन्वयात्तत्राव्याप्तिः परिहृता । जीवजडयोर्निवारणादतिव्याप्तिश्च एवमधिकरणचतुष्टयेन सच्चिदानन्देषु लक्षणसमन्वयादसंभवोप्यर्थादेव परिहृतः । तेन जन्माद्यधिकरणस्य शेषभूतमधिकरणत्रयमिति शेषशेषिभावः संगतिः ॥ ५ ॥

ततः षष्ठे द्विसूत्रेन्तस्तद्धर्माधिकरणे आदित्यान्तरक्ष्यन्तश्च विद्यमानो हिरण्मयः पुरुष उदित्यादिब्रह्मधर्मोपदेशाद्ब्रह्मैवेत्युक्तम् । ततो द्वितीयसूत्रे 'यमादित्यो न वेदे'तिश्रुत्यादित्याद्भेदनिर्देशेनापि तस्य ब्रह्मत्वं स्थापितम् । तदज्ञाने सति, यदि तस्य ब्रह्मत्वं न विचार्येत तदा, तदज्ञाने सति, 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवंविदि'त्युक्त्वाग्रे 'एतमानन्दमयमात्मानुपसङ्क्रामती'त्यनेन श्रावितं तद्विदोक्षरसायुज्यं परब्रह्मप्राप्तिश्च नोपपद्येत । तस्माद्धेतुतागर्भया प्रसंगसंगत्यैतद्विचारितम् ।

किंच, अयं जन्मादिसूत्रस्थविचारः सर्वस्याग्रिमविचारस्य मूलम् । तत्राग्रे 'फलमत उपपत्ते'रित्यनेन सर्वफलदाता भगवानेवेति वक्तव्यम् । ततोग्रे चतुर्थेध्याये निषेधमुखेन प्रतीकोपासना, विधिमुखेनाङ्गोपासनाश्चादित्यादिमतिसूत्रे वक्तव्याः । तत्र मतान्तरोक्तरीत्या प्रतीकोपासनानामब्रह्मपरत्वेपि तद्वाक्योक्तफलसिद्धिस्तत्तदन्तःस्थाद्ब्रह्मण एवेति ज्ञापनायाङ्गोपासनानां ब्रह्मपरत्वे तदुक्तभवान्तरफलं तत्क्रतुत्वरूपं मुख्यं फलं च भगवत एवेति ज्ञापनाय चाप्येतद् बोध्यम् ॥ ६ ॥

ततः सप्तम एकसूत्रे तल्लिङ्गाधिकरणे, अष्टम एकसूत्रेतिदेशाधिकरणे च ब्रह्मप्रकरणे आकाशप्राणादिशब्दैः ब्रह्मैवोच्यते, निरङ्कुशजगत्कारणत्वरूपब्रह्मलिङ्गादिति विचारितम् । तेन पूर्वोक्तलक्षणेतिव्याप्तिदोषः परिह्रियत इति पूर्वोक्तशेषभूतमिदमधिकरणद्वयम् । पञ्चमाद्यधिकरणद्वये प्रत्ययकृतसंदेहनिरासः, सप्तमाद्यधिकरणेषु तु प्रकृतिकृतसंदेहनिरास इति विशेषः, प्रकृतिप्रत्ययभेदेन शब्दस्य द्विविधत्वादिति । षष्ठाद्यधिकरणत्रयस्य विषयवाक्यान्युद्गीथविद्यास्थान्युक्तानि । तेन कर्माङ्गोपासनास्वपि ब्रह्मैव फलदम्, तज्ज्ञानेनैव च कर्मणो वीर्यवत्तरत्वमित्यपि बोधितम् । तेन प्रसङ्गोपि संगतिः ॥ ७ ॥ ८ ॥

ततो नवमे चतुःसूत्रे ज्योतिश्चरणाधिकरणे 'अथ यदितः परो दिवो ज्योतिर्दीप्यत' इतिवाक्ये ज्योतिःशब्देन ब्रह्मैवोच्यत इति निर्णीतम् । तत्र प्रथमसूत्रे 'एतावानस्य महिमे'तिमन्त्रे

भूतात्मकानां चरणानां ब्रह्मधर्मत्वाज्ज्योतिःशब्देन ब्रह्मैवोच्यत इति निर्णीतम् । ततो **द्वितीयसूत्र** एतत्संदर्भारम्भे गायत्रीछन्द एवोच्यत इति न चरणानां ब्रह्मधर्मत्वमिति सूत्रांशेनाशङ्क्यांशान्तरेण समाहितम् । भगवति चेतोर्पणार्थं संदर्भादौ गायत्री प्रस्तुता, तयोपासने ब्रह्मदर्शनं भवतीति तस्माद्ब्रह्मण एव पादाः, न गायत्र्या इत्युक्तम् । ततस्**तृतीये** गायत्रीछन्दो हि शब्दरूपम्, भूतपृथिवीशरीरहृदयान्यर्थरूपाणि । तेषां शब्दरूपछन्दःपादत्वं न संगच्छते । अतो ब्रह्मण एव पादा इत्युक्तम् । ततश्**चतुर्थसूत्रे** यद्यप्येवं पादानां ब्रह्मधर्मत्वमायाति, तथापि 'एतावानि'तिमन्त्रे 'दिवी'ति सप्तम्या पादानां द्युलोकाधारत्वकथनेन विवक्षितस्य ज्योतिषस्तदाधारत्वमुक्तम् । 'अथ यदतः परो दिव' इतिपञ्चम्यानाधारत्वमुच्यत इत्युपदेशभेदाज्ज्योतिर्न ब्रह्मेत्याशङ्क्य, यथा 'वृक्षे श्येनो वृक्षाग्रात्परतः श्येन' इतिविभक्तिभेदेपि यथैकार्थ्यप्रत्यभिज्ञा न विरुध्यते, तथात्रापीति न दोष इति समाहितम् । तस्मादत्र ज्योतिःशब्दवाच्यं ब्रह्मैवेति निर्णीतम् । यद्यपि पूर्वाधिकरणन्यायेन ज्योतिःशब्दस्य ब्रह्मवाचकत्वमायाति, तथाप्यत्र प्रकरणस्य लिङ्गस्य च संदिग्धत्वात्पुनर्विचारितम् । तेन सामान्यविशेषभावः पूर्वाधिकरणसङ्गतिः । एतेनान्या अपि पादसंबद्धाः प्रणवादिविद्या अपि ब्रह्मपरा इत्यपि बोधितम् ॥ ९ ॥

ततो **दशमे चतुःसूत्रेनुगमाधिकरणे** कौशीतकिब्राह्मणस्थ इन्द्रप्रतर्दनसंवादे 'प्राणोहमस्मि प्रज्ञात्मे'त्यादिनोच्यमानः प्राणो ब्रह्मैव, नासन्यो, नापि जीवः, तस्य ब्रह्मत्वाङ्गीकार एव वाक्योक्तपदार्थसंगतेरित्युक्तम् । तदुपपादितं च **भाष्ये** । ततो **द्वितीयसूत्रे** वक्त्रेन्द्रेण प्रतर्दनं प्रति स्वात्मैव प्राणत्वेनोपदिश्यत इति न तस्य ब्रह्मबोधकत्वमिति सूत्रांशेनाशङ्क्य, ततोंशान्तरेण समाधानायास्मिन् प्रकरणे ब्रह्मसंबन्ध एव भूयानुपलभ्यते, तस्मादत्र प्रतिपाद्यः प्राणः परमात्मेत्येवं प्रतिपादितम् । ततस्**तृतीये** यदि ब्रह्मैवात्र प्रतिपाद्यं तदा 'मामेव विजानीही'तिस्वात्मोपदेशस्य का गतिरित्याशङ्कायामयमुपदेशः शास्त्रदृष्ट्या, न तु लोकदृष्ट्या । शास्त्रे च ब्रह्मज्ञाने सति ज्ञातुर्ब्रह्माभेदेन सर्वभाव उच्यते । यथा श्रुत्यन्तरे वामदेवस्य सर्वात्मभाव उच्यते, 'तद्धैतत्पश्यन्नृषिर्वामदेव' इत्यादिना, तद्वदत्रापि ज्ञानेन ब्रह्मात्मभावात्स्वस्योपास्यत्वेनोपदेश इत्युक्तम् । ततश्**चतुर्थे** नन्वस्मिन्प्रकरणे जीवधर्मा मुख्यप्राणधर्माश्च भूयांस उपदिश्यन्त इति नास्य ब्रह्मप्रकरणत्वमिति सूत्रांशेनाशङ्क्यांशान्तरेण समाधानमाह । यदि जीवप्राणब्रह्मणां धर्मदर्शनात्त्रयाणां मुख्यत्वं स्वीक्रियेत, तथा सत्युपासनात्रयप्रसङ्गाद्वाक्यभेद आपद्येत । स तु दुष्ट इति न युक्तः । तथा सति योत्र जीवधर्माणां प्राणधर्माणां चोपदेशः, सोत्र जीवस्य ब्रह्माश्रितत्वात्, प्राणस्य तु तद्योगात् । तस्मात्ते सर्वे ब्रह्मधर्मा एवेति प्राणो ब्रह्मैवेति प्रतिपादितम् । इदं चाधिकरणं पूर्वोक्तसर्वनिगमनार्थम् । इदं यथा तथा **भाष्यप्रकाशादवगन्तव्यम्** । भाष्ये तु **चिदचित्संश्लेषनिवारणार्थ**मित्युक्तम् । ब्रह्मवादे केवलस्यैव ब्रह्मणो जगत्कारणत्वेन चिदचिच्छरीरापेक्षाराहित्यादिति । तेन न पुनरुक्तिदोषः । कार्यप्रतिपादनद्वारा वाक्यानां स्वरूपपरत्वं नवस्वप्यधिकरणेषु स्पष्टम् ॥ १० ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां प्रथमाध्यायस्य प्रथमः पादः ॥

एवं प्रथमपादे कार्यप्रतिपादकानां वाक्यानां ब्रह्मणि समन्वयो विचारितः । प्रकृतिप्रत्ययभेदेन शब्दस्यान्यपरत्वसंदेहे तन्निवारणं च कृतम् । अतःपरं द्वितीयादिष्वर्थसंदेहो निवारणीयः । जीवजडतत्समुदायभेदेनार्थस्य त्रैविध्यात् । तत्र **द्वितीयपादे** जीवपुरःसरेणार्थसंदेहो निवारणीयः । अन्तर्यामिप्रतिपादकानां वाक्यानां ब्रह्मणि समन्वयो वक्तव्यः । तेन पादानामेककार्यत्वं संगतिः ।

तत्र **प्रथमे चतुःसूत्रे सर्वत्र प्रसिद्धोपदेशाधिकरणे** छान्दोग्यस्था शाण्डिल्यविद्या विचार्यते । तत्रास्यां विद्यायां 'मनोमयः प्राणशरीर'इत्यनेन विज्ञानमयस्य जीवस्य मनोमयत्वादिधर्मवैशिष्ट्ये तैरेव च धर्मैः कर्तृत्वनिर्वाहाद्ब्रह्मणो जगत्कर्तृत्वमपि नोपपद्यत इत्याशङ्कायां, जीवस्य ब्रह्मत्वेनोपासनं निवार्य, सर्ववेदान्तप्रसिद्धस्य ब्रह्मण एवोपदेशाद्ब्रह्मैवात्रोच्यत इति **प्रथमसूत्रे** आक्षेपनिवारणादाक्षेपोधिकरणसंगतिरित्युक्तम् । ततो **द्वितीयसूत्रे**स्यां विद्यायां फलत्वेन विवक्षिता ये गुणास्तेषां प्राप्तिर्भगवत्स्वरूपलाभात् तत्सारूप्यलाभाद्वोपपद्यते, अतोपि तथेत्युक्तम् । **ततस्तृतीयसूत्रे** तिरोहितानन्दत्वेन निराकारत्वादपि नात्र जीव उच्यते, किंतु ब्रह्मैवेत्युक्तम् । **ततस्तुरीये** ब्रह्मात्र ध्येयत्वेन प्राप्तत्वेन च व्यपदिश्यते, जीवस्तु प्राप्तृत्वेन ध्यातृत्वेन च व्यपदिश्यत इत्युक्तम् । तेनात्रान्तर्यामिभूत ब्रह्मैवोच्यत इति साधितम् ॥ १ ॥

ततो **द्वितीये चतुःसूत्रे शब्दविशेषाधिकरणे** वाजिशाखास्थं 'यथा व्रीहिर्वा यवो वे'त्यादिविषयवाक्यमुपन्यस्य, तत्रान्तरात्मन्युक्तो हिरण्मयः पुरुषो न जीवः, किंतु ब्रह्मैव, शब्देनोक्ताद्धिरण्मयत्वरूपाद्विशेषादित्युक्तम् । ततो **द्वितीये सूत्रे** ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठती'ति गीतास्मृतेरपि हृद्देशे वर्तमानस्य ब्रह्मत्वमित्युक्तम् । **ततस्तृतीयसूत्रे** व्यापकस्येश्वरस्याल्पे हृदयस्थाने स्थितेरयुक्तत्वाच्छ्रुतौ व्रीह्यादितुल्यताश्रावणाच्च तस्य ब्रह्मत्वं न युक्तमिति सूत्रांशेनाशङ्कयांशान्तरेण समाहितम् । हृदये निदिध्यासने कृते ब्रह्म ज्ञातुं शक्यते, तत्रैव साक्षात्कारात् । तस्माद् हृदयस्य स्थानत्वमुच्यते । अन्ये त्वत्र दृष्टान्तमप्याहुर्यथा सर्वलोकपतिरप्ययोध्यापतिरिति । तस्मान्न व्यापकत्वहानिः । यत्पुनर्व्रीह्यादितुल्यत्वकथनं तत्तु चतुर्विधभूतान्तरवर्तित्वज्ञापनार्थम् । अतो व्योमवत्सर्वत्र स्थितिर्बोध्यते । तस्मान्न दोष इत्युक्तम् । **ततश्चतुर्थसूत्रे** तस्य हृदये वर्तमानत्वे जीववत्सुखदुःखभोगोपि संभवतीति सूत्रांशेनाशङ्क्यांशान्तरेण समाहितम् । तस्य स भोगो न संभवति, तस्य सर्वरूपत्वानन्दरूपत्वादिरूपाणां विशेषाणां विद्यमानत्वादिति । तस्माद्ब्रह्मैवात्रोच्यते । इदं चाधिकरणमन्तर्यामिणो रूपनिश्चायनार्थं हिरण्मयपुरुषत्वेनान्तस्तद्धर्माधिकरणविषयवाक्योक्ताकारस्य मासाग्निहोत्रे नित्याग्निहोत्रधर्मवद्वक्तुं शक्यत्वादिति मम प्रतिभाति । संगतिरत्र प्रसङ्गो बोध्यः ॥ २ ॥

ततस्तृतीये द्विसूत्रे अत्ता चराचरेत्यधिकरणे 'यस्य ब्रह्म च क्षत्रं चे'तिकाठकवाक्योक्तं ब्रह्मक्षत्रात्तृत्वं न जीवस्य, किंतु ब्रह्मण एवेति निर्धारितम् । तत्र **प्रथमसूत्रे** चराचरग्रहणं हेतुः, चरो मृत्युरचरं कस्याप्यचाल्यम्, ब्रह्मक्षत्राणां संपद्यमानानां भोगः साधितः, सर्वरूपत्वात्मकं वैशेष्यं च । **द्वितीयसूत्रे** च प्रकरणं हेतुः । तथा च जीवाशक्यभोगस्य चराचरस्य ग्रहणरूपाल्लिङ्गादस्य वाक्यस्य ब्रह्मप्रकरणपठितत्वाच्चात्रोक्तं ब्रह्मैवेति सिध्यति । मोक्षापेक्षिब्रह्मक्षत्रप्राणानामुत्क्रमणाभावेनान्तःप्रकटे भगवत्येव लयादन्तर्यामित्वमपि सिद्धम् पूर्वाधिकरणे ब्रह्मणो जीवविलक्षणस्य भोगस्योक्तत्वात्तत्साधनायात्रोपोद्घातेनानन्दरूपाद्वैशेष्यात्संपन्नजीवसाहाय्येन भोगो विचारितः, अन्तर्यामिधर्मविचारस्यैव प्रकृतत्वादिति ॥ ३ ॥

ततश्चतुर्थे द्विसूत्रे **गुहां प्रविष्टावित्यधिकरणे** 'ऋतं पिबन्ता'विति काठकवाक्यं विषयत्वेनोपन्यस्यात्र जीवद्वयं नोच्यते, किंतु जीवब्रह्मणी उच्येते । अत्र जीवब्रह्मणोरेव प्रतिपाद्यत्वदर्शनात् । इतः पूर्वं 'येयं प्रेते विचिकित्सा'इति 'अन्यत्र धर्मा'दिति वाक्यद्वयेन तयोरेव पृष्टत्वादिति **पूर्वसूत्र** उक्तम् । ततो **द्वितीयसूत्रे** पूर्वप्रकरणोक्तविशेषणबलादप्यत्र जीवब्रह्मणी एवोच्येते इति साधितम् । पूर्वाधिकरणोक्तब्रह्मक्षत्रभोगोत्रैवेतिज्ञापनार्थम् । तेनानुप्रसङ्गः संगतिः ॥ ४ ॥

ततः **पञ्चमे पञ्चसूत्र अन्तर उपपत्तेरित्यधिकरणे** छान्दोग्ये उपकोसलविद्यास्थं 'य एषोक्षिणि पुरुषो दृश्यत'इतिवाक्यं विषयत्वेनोपन्यस्य अक्षिपुरुषस्य ब्रह्मत्वं निर्धारितम् । तत्र **प्रथमसूत्र** आर्षदर्शनस्योपपद्यमानत्वान्न तत्र प्रतिबिम्बस्य ब्रह्मत्वेनोपासना विधीयते, किंतु ब्रह्मैवेत्युक्तम् । ततो **द्वितीयसूत्रे** सर्वलोकस्य भामवामनयनरूपस्थानादिव्यपदेशात्तदेव साधितम् । ततस्**तृतीये**ऽमृतादिपदकथनादपि तत्साधितम् । ततश्च**तुर्थसूत्रे** तदुपासकस्य ब्रह्मविद्गतिकथनादपि तत्साधितम् । ततः **पञ्चमसूत्रे** जीवो निवारितः । एवं चात्र **पञ्चसूत्र्यां** स्थानमाहात्म्यादिरूपं वैशेष्यं बोधितम् । अक्षिस्थितस्य भोगस्तु वाजिनां मण्डलब्राह्मणे प्रसिद्धः । एवमधिकरणत्रयेण भोगदोषासंसर्गहेतुभूतं वैशेष्यमक्षिस्थितस्य पुरुषस्यान्तर्यामित्वं च विचारितम् ॥ ५ ॥

ततः **षष्ठे त्रिसूत्रे अन्तर्याम्यधिकरणे** बृहदारण्यकस्थमन्तर्यामिब्राह्मणं विषयवाक्यत्वेनोपन्यस्तम् । अन्तर्यामी सर्वत्रैकः, अथवाधिदैवादिशब्दभेदाद्भिन्नः, तत्तदभिमानी जीवो वेत्याशङ्क्य **प्रथमसूत्रे** पृथिव्यादीनां तदभिमानिनां च ये धर्मास्तेषां भगवत्प्रयुक्तत्वबोधनादन्तर्यामी सर्वत्र भगवानेवेति निर्णीतम् । आधिदैवादिसञ्ज्ञोपि स एवेति च । ततो **द्वितीयसूत्रे**ऽन्तर्यामी ब्रह्मवादे न प्रसिद्धः, जीवब्रह्मजडानामेव प्रसिद्धत्वात् । ततोऽन्तर्यामी साङ्ख्यपरिकल्पितः कश्चिद्भविष्यतीत्याशङ्क्य, नात्र साङ्ख्यमतम्, तद्धर्माणामनभिलापात्, अतोऽन्तर्यामी भगवानेवेति ब्रह्मवादसिद्ध इत्युक्तम् । ततस्**तृतीयसूत्रे**ऽन्तर्यामी जीवो न संभवति, काण्वशाखायां 'यो विज्ञाने तिष्ठ'न्निति माध्यन्दिनीयशाखायां च 'य आत्मनि तिष्ठ'न्नितिवाक्याभ्यां जीवाद्भेदस्य श्रावणादित्युक्तम् । अस्मिन्नधिकरणे स्थितिकर्तृत्वनिर्वाहकतयोपोद्घातेन सर्वनियमनं विचारितम् । गुहांप्रविष्टावित्यधिकरणे प्रतिगुहं भिन्नतया प्रवेशादन्तर्यामिणां भेदे प्राप्ते तदभावाय तस्यैक्यमत्र साधितम् । तेन रूपभेदाद्भिन्नोप्येक एवान्तर्यामी नामेत्युक्तं भवति ॥ ६ ॥

ततः **सप्तमे त्रिसूत्रे अदृश्यत्वाधिकरणे** 'अथ परा यया तदक्षरमधिगम्यत' इति मुण्डकस्थं वाक्यं विषयत्वेनोपन्यस्येयमुपनिषत् साङ्ख्यविद्या ब्रह्मविद्या वेत्याशङ्क्येयं ब्रह्मविद्यैव । यद्यप्यत्राक्षरं पुरुषश्चेत्युभयमुच्यते, पुरुषस्याक्षरात्परत्वं चोच्यते, एवं परापरभावेप्यक्षरं परमात्मैवेति निर्णीतम् । तत्र **प्रथमसूत्रे** अदृश्यत्वादिगुणकोऽक्षरत्वेनोक्तः परमात्मैव, विश्वजनकत्वरूपस्य ब्रह्मधर्मस्य तत्रोक्तेरित्युक्तम् । ततो **द्वितीयसूत्रे** अत्राक्षरपुरुषौ साङ्ख्यविद्यासिद्धप्रकृतिपुरुषावेवेत्याशङ्क्य, तौ नात्र संभवतः, अक्षरस्य सर्वज्ञत्वादिना पुरुषत्वेन च विशेषणात्, पुरुषस्य च दिव्यत्वादिना प्राणादिजनकत्वेन च विशेषणात् । न हीदं साङ्ख्ये सिध्यति । किंच, अत्र हि समाप्तावादौ मध्ये च ब्रह्मविद्या इति विद्याविशेषणमुक्तम् । तस्मादपि नात्र साङ्ख्यसिद्धौ प्रकृतिपुरुषावित्युक्तम् । ततस्**तृतीयसूत्रे** 'अग्निर्मूर्धे'त्यादिना यद्रूपमुक्तं तद्विश्वकायस्य ब्रह्मण एव संगच्छते न तु साङ्ख्यसिद्धस्येत्युक्तम् । तेन सृष्टिपूर्वदशायामप्यक्षरनियामकत्वाद्भगवतोऽन्तर्यामित्वं नित्यमित्युपोद्घातने बोधितम् ॥ ७ ॥

ततोऽष्टमे नवसूत्रे वैश्वानराधिकरणे पूर्वाधिकरणोक्तं रूपं साङ्ख्यसिद्धकार्येश्वरस्य कुतो न ? अक्षरपरमपुरुषयोर्भेदाभेदौ च कथमित्याकाङ्क्षायां, छान्दोग्यस्थां वैश्वानरविद्यां विषयवाक्यत्वेनोपन्यस्य, रूपस्य नित्यत्वं विरुद्धधर्माश्रयत्वं च तत्रोपोद्घातेन विचारितम् । तत्र प्रथमसूत्रे वैश्वानरशब्दवाच्यो हिरण्यगर्भादिः परमात्मा वेति संशये, हिरण्यगर्भादिबोधकसाधारणशब्दाद्यो विशेषः प्रादेशमात्रस्यैवाभितो विगतमानत्वरूपः, तस्मादित्युक्तम् । ततो द्वितीयसूत्रे 'केचित्स्वदेहान्तर्हृदयावकाश'इत्यादिस्मृत्युक्तस्यानुमापकत्वम् । अतः प्रादेशमात्रो द्युमूर्धत्वादिविशिष्टः परमात्मैवेत्युक्तम् । ततस्तृतीयसूत्रे ननु प्रादेशमात्रस्मृत्या वैश्वानरपदस्य भगवत्परत्वं निर्णेतुं न शक्यम्, 'अहं वैश्वानरो भूत्वे'ति जाठराग्निपरत्वस्यापि स्मरणात्, समानप्रकरण 'एष वा अग्निर्वैश्वानर' इत्यग्निसमभिव्याहारेण श्रावणाद् भगवद्विभूतित्वाच्च । अत्राप्यग्नेः 'हृदयं गार्हपत्य' इत्यादिना त्रेताग्निकल्पनश्रावणात् पुरुषेऽन्तःप्रतिष्ठितत्वश्रावणाच्च न भगवत्परत्वं शक्यवचनमिति सूत्रांशेनाशङ्क्य, नात्र भगवत्परत्वं निषेद्धुं शक्यम्, भगवतो भोक्तृत्वं वक्तुं श्रुतावग्निदृष्ट्युपदेशाज्जाठरे द्युमूर्धत्वादिधर्माणामसंभवाच्च । नच तदुपासनार्थमिति शङ्क्यम्, वाजसनेयिभिः पुरुषत्वस्य श्रावणादित्येवमंशान्तरेण समाहितम् । तस्माद्वैश्वानरः परमात्मैव । ततश्चतुर्थे उक्तहेतुभ्य एव जाठरोऽग्निर्देवतारूपोग्निश्च न संभवतीत्युक्तम् । एवं चतुर्भिः सूत्रैर्वैश्वानरस्य ब्रह्मत्वं निर्णीतम् । ततोग्रिमैः पञ्चभिः सूत्रैस्तस्य परिमाणं विचार्यते, ग्रहिलवादिनिवृत्त्यर्थम् । तत्र पञ्चमे जैमिनिमतेन परिमाणविरोधपरिहारमाह, व्यापकस्य प्रादेशमात्रत्वं कल्पनां विना साक्षादपि संभवति, यथाकाशस्य । तथा च 'प्रादेशमात्रमभिविमान'मित्यत्र शब्दक्रमादर्थक्रमो बलिष्ठ इति जैमिनेराशयो बोधितः । ततः षष्ठे निराकारमेव ब्रह्म मायाजवनिकाच्छन्नं विष्ण्वादिदेवताधिष्ठितेन पुरुषाकारेणाभिव्यक्तः पुरुषविधोऽन्तर्यामी, न तु स्वाभाविकस्तस्याकार इत्याश्मरथ्यस्य मतमुक्तम् । ततः सप्तमेऽनुस्मृतिवशात्पुरुषाकारो 'यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाये'तिस्मृतेः साधकानुग्रहार्थमिति बादरिमतमुक्तम् । ततोष्टमे पूर्वोक्तं नियतपरिमाणवादबोधकं जैमिनिमतं तदेकदेशिनो, न तस्येतिबोधनार्थं पुनर्जैमिनिमतमाह । श्रुतौ 'प्रादेशमात्रमिह वै देवा' इत्यारभ्य अभिसंपादयिष्यामी'तिकथनात्सम्पत्तिनिमित्तं प्रादेशमात्रत्वम्, न तु वास्तवमिति तदाशय उक्तः । ततो नवमे 'आमनन्ति चैनमस्मि'न्नितिसूत्र 'एनं वैश्वानरमस्मिन्मूर्धचिबुकान्तराले' जाबालाः समामनन्ति 'एषोव्यक्त' इत्यादिना । तस्मात्प्रादेशमात्र एव व्यापकः, अतो वस्तुभावादेव विरुद्धधर्माश्रय इति वैश्वानरो भगवानेवेति स्वसिद्धान्त उक्तः । एवमस्मिन्पादे स्थितिरूपकार्यनिर्वाहार्थमन्तर्यामिप्रतिपादकानि वाक्यानि विचारितानि ॥ ८ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां प्रथमाध्यायस्य द्वितीयः पादः ॥

अतःपरं मोक्षदातृत्वार्थमुपास्यरूपप्रतिपादकानि वाक्यान्यस्मिन्पादे विचार्यन्ते, साधनाध्याये गुणोपसंहारपादे तत्तन्मार्गभेदेनोपासनाया एव साधनत्वेन वक्ष्यमाणत्वात् ।

तत्र प्रथमे सप्तसूत्रे भ्वाद्यधिकरणे 'अस्मिन् द्यौः पृथिवी'तिमुण्डकवाक्यं विषयत्वेनोपन्यस्य, तत्र किं साङ्ख्यसिद्धं प्रधानमुच्यते, ब्रह्म वेति संशये, प्रधानं निरस्य ब्रह्मैवेति साध्यते ।

तत्र **प्रथमसूत्रे** स्वशब्दो हेतुत्वेन, स च श्रुतिस्थ'स्वात्मान'मित्यात्मशब्दस्य वाचकः। तथा च द्युभ्वादीनां भारत्वं तदा स्याद्यदि तेषां सूत्रे मणिगणवत् प्रोतत्वं स्यात्, न तु तथा, तेषां कार्यतयैतदात्मकत्वेनैतत्स्वरूपान्तःपातित्वात्। न च सेतुत्वेन साधनत्वबोधनात्फलरूपत्वाभावे सति न ब्रह्मत्वमिति शङ्क्यम्। 'अमृतस्य सेतुरित्यत्र षष्ठ्याऽभेदबोधकत्वेन फलरूपत्वानपायात्। तस्माद् द्युभ्वाद्यायतनं ब्रह्मैव। ब्रह्मणो व्यापकत्वव्युत्पादनं तु पूर्वमन्त्रे 'लक्ष्यं सर्वगतं चैवे'त्यनेन ब्रह्मणः सर्वगतत्वकथनात् तद्बोधनार्थमित्युक्तम्। ततो **द्वितीयसूत्रे** ननु भवतु ब्रह्मत्वं तथापि तज्ज्ञानेन सर्वविज्ञानस्योपक्रान्तत्वादन्यवाग्विमोकः कथं संगत इत्याशङ्क्य, ब्रह्मणि मुक्तोपसृप्यत्वं वक्तुं शररूपस्य जीवस्य पूर्वमन्त्रे ब्रह्मणि योजनस्योक्तत्वात् तस्य निरध्यस्तत्वरूपं मुक्तत्वमन्यवाग्विमोकेन बोध्यत इति तदपि संगच्छत इत्युक्तम्। ततस्**तृतीयसूत्रे** एतत्प्रकरणे जडधर्मबाहुल्यस्य जडदृष्टान्तस्य चोक्तत्वादत्र प्रधानमेवाङ्गीकार्यमित्याशङ्क्य, तद्बोधकानां निःसंदिग्धानां धर्माणामदर्शनाद्ब्रह्मबोधकानामात्मसर्वज्ञानन्दरूपादिशब्दानां निःसंदिग्धानां दर्शनान्न प्रधानमङ्गीकर्तुं शक्यम्, किंतु परमात्मैवेत्युक्तम्। ततश्**चतुर्थसूत्रे** तर्हि जडजीवविशिष्टः साङ्ख्यवादोत्रास्त्वित्याशङ्क्य, तद्वाचकनिःसंदिग्धशब्दाभावात् न जीवो, नापि प्रधानम्, किंतु सर्वज्ञत्वादीनां ब्रह्मधर्माणां निःसंदिग्धानां दर्शनाद्ब्रह्मैव। ततः **पञ्चमसूत्रे** 'तमेवैकं जानथात्मान'मिति ब्रह्मणि ज्ञानकर्मत्वस्य जीवे ज्ञानकर्तृत्वस्य बोधनेन भेदव्यपदेशात् न जीवपरत्वं तस्येत्युक्तम्। ततः **षष्ठे सूत्रे** अस्य वाक्यस्य ब्रह्मप्रकरणपठितत्वादपि न जीवपरत्वमित्युक्तम्। ततः **सप्तमे सूत्रे** 'द्वा सुपर्णा'विति श्रुतौ परमात्मनः शरीरे स्थितिमात्रं प्रकाशकत्वं च श्राव्यते, जीवस्य तु कर्मफलभोगोपीति स्थित्यदनाभ्यां ब्रह्मजीवौ पृथगेव निर्णीयेते। तस्मादपीदं ब्रह्मवाक्यमेव, न तु प्रधानजीवसंदेहात् साङ्ख्यपरमिति निर्णीतम्। तेन पूर्वपादोक्तमन्तर्यामिरूपमपि व्यापकत्वसर्वात्मकत्वादिगुणविशिष्टमेवोपासनीयमिति साधितम्। अत्र शरधनुर्न्यायश्रावणात्पृथगुपासनं ज्ञानमार्गीयाणामपि कर्तव्यत्वेन बोधितम्॥ १॥

ततो **द्वितीये द्विसूत्रे भूमाधिकरणे** 'यो वै भूमा तत्सुख'मिति छान्दोग्यस्थसनत्कुमारनारदसंवादगतं वाक्यं विषयत्वेनोपन्यस्य, तत्र बाहुल्यं सुषुप्तिश्च नोच्यते किंतु ब्रह्मैवेति साधितम्। तत्र **प्रथमसूत्रे** सुषुप्तेः सकाशादाधिक्यस्य 'स एवाधस्तादि'त्यादिना बोधनात् मुख्यवृत्त्यात्मशब्दपरिग्रहसंभवाद् ब्रह्मणः सर्वशब्दवाचकत्वेन भाववाचकशब्दानामपि ब्रह्मपरत्वसंभवाच्च भूमा भगवानेवेत्युक्तम्। ततो **द्वितीयसूत्रे** 'नान्यत्पश्यती'त्यादिनोक्ता अन्या दर्शनादयो धर्मा अप्याविर्भूते परस्मिन् भगवति तद्दर्शनेन तदैक्यात्तदविभागाद्वा तदेकतानतायां संभवन्तीति भूमा ब्रह्मैवेति साधितम्। तेन नित्यनिरवध्यानन्दरूप एवान्तर्याम्युपास्य इति पृथगपि भक्तिमार्गीयैरुपास्य इति बुद्धिस्थं प्रसङ्गाद्बोधितम्॥ २॥

ततस्**तृतीये त्रिसूत्रे अक्षराधिकरणे** बृहदारण्यकस्थ'मेतद्वै तदक्षरं गार्गी'तिवाक्यं विषयत्वेनोपन्यस्य, **सूत्रद्वयेना**ज्ञया पृथिव्याद्यम्बरान्तधारकत्वेनाक्षरस्य ब्रह्मत्वं साधितम्। ततस्**तृतीये सूत्रे** तस्य प्रशासनस्य जीवधर्मत्वव्यावृत्त्याक्षरज्ञानफलबोधनेन च ब्रह्मत्वम्। अत्र च पूर्वपादेऽदृश्यत्वाधिकरणेन विचारितस्याक्षरस्य विरुद्धधर्मत्वबोधनमिति बुद्धिस्थोपोद्घातः संगतिः। अक्षरोपासनं च ज्ञानमार्गीयाणां केषाञ्चिन्मुख्यम्, 'ये त्वक्षरमनिर्देश्य'मित्यादिगीतावाक्यात्। भक्तिमार्गीयाणां त्वक्षरज्ञानमङ्गत्वेन प्रविशतीत्यग्रे 'अक्षरधिया'मित्यत्र वाच्यम्। तेनेदं मार्गद्वयोपयोगीति तदुभयोरन्तरं प्रसङ्गत उक्तम्। तेनात्र क्रमनियामिका प्रसङ्गः सङ्गतिः॥ ३॥

ततश्चतुर्थे एकसूत्रे ईक्षतिकर्माधिकरणे प्रश्नोपनिषत्पञ्चमप्रश्नस्थ'मेतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कार' इतिवाक्यं विषयत्वेनोपन्यस्य, अत्र ध्येयः परमात्मैव, न तु विराड्, ब्रह्मा वा । 'परात्परं पुरिशयं पुरुषमीक्षत' इतिवाक्यशेषे ईक्षतिकर्मत्वेन जीवघनादक्षरात्परस्यैवोक्तत्वात् । अत्र ध्यानविषयस्येक्षतिकर्मत्वप्रतिपादनेनोपासनानां फलं साक्षात्कार इत्यप्यनेन साधितम् । तेन प्रसङ्गः संगतिरिति बोधितम् ॥ ४ ॥

ततः पञ्चमे अष्टसूत्रे दहराधिकरणे 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मे'त्यादि छान्दोग्यस्थं वाक्यं विषयत्वेनोपन्यस्य, तत्र दहरशब्दवाच्य आकाशः परमात्मैव न जीव इति निर्णीयते । तत्र प्रथमसूत्रे उक्तछान्दोग्यवाक्ये वक्ष्यमाणेभ्यो हेतुभ्यो दहरः परमात्मैवेत्युक्तम् । ततो द्वितीयसूत्रे 'यथा सुवर्णनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तोपि न विदुः एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ती'त्यनेनोक्तं प्रजाशब्दवाच्यानां जीवानां यद् ब्रह्मलोके गमनं सा गतिः 'एष आत्मापहतपाप्मा सत्यसङ्कल्प'इत्यत्रापहतपाप्मत्वादिविशिष्ट आत्मशब्दः पूर्वोक्तो ब्रह्मलोकशब्दश्च ताभ्यां हेतुभ्यां दहरः परमात्मैव । न च जीवपरमात्मनोस्ततो भेदाभावात्स्वप्नदशायामज्ञानकल्पितानामेव ब्रह्मलोकगमनमात्मशब्दश्च जीवसाधारण इति न ताभ्यां परमात्मसिद्धिरिति शङ्क्यम् । अत्र हि प्रजानां ब्रह्मलोके गच्छन्तीनां 'अनृतेन प्रत्यूढा' इति विशेषणं दृश्यते । तदर्थस्तु अनृतेन पिहितत्वम् । 'अनृतापिधाना' इतिश्रुत्यन्तरे तथादर्शनात् । तच्च सुषुप्तौ 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिष'मित्यनुभवस्तासां प्रजानामज्ञत्वं साधयति, न त्वज्ञानकल्पितत्वम्, अज्ञानकल्पितत्वे सति ब्रह्मलोकगतिर्न संगच्छते, तथापहतपाप्मत्वादिविशेषणादात्मशब्दश्च न संगच्छते, अतो गतिशब्दयोर्ब्रह्मपरत्वाद्दहरः परमात्मैव । किं च, अत्र 'तद्य इहात्मानमननुविद्य व्रजन्ती'त्यात्माज्ञानं लोकक्षयहेतुत्वेनोच्यते । यद्यात्मा ब्रह्माभिन्नः स्यात्तदापहतपाप्मादिगुणकत्वात्स्वस्य स्वाज्ञानं न स्यात् । अत इदमज्ञानं जीवस्य ब्रह्मभिन्नत्वं बोधयद् गतेर्ब्रह्मविषयत्वे लिङ्गम् । एवमपहतपाप्मत्वादिविशेषणान्यप्यात्मशब्दस्य ब्रह्मपरत्वे लिङ्गमिति प्रागेवोक्तम् । अतो दहरः परमात्मैवेति साधितम् । ततः तृतीयसूत्रे 'य आत्मा सेतुर्विधृति'रितिश्रुतेः सर्वलोकविधारकत्वात्स्वयं साधनीभूय संसारपारप्रापकत्वात् एकस्यैवाकाशद्यावापृथिव्यादेरन्तर्बहिःस्थापनेन तस्य सर्वलोकधारणस्य महिमरूपत्वात् तस्य महिम्नो विरुद्धधर्माश्रयत्वरूपतया श्रीयशोदादिभिरन्तर्बहिरुपलब्धश्च दहरः परमात्मैवेत्युक्तम् । ततश्चतुर्थे आकाशशब्दवाच्यत्वप्रसिद्धेरपहतपाप्मत्वादिप्रसिद्धेः प्रकरणोक्तसर्व-धर्मप्रसिद्धेश्च दहरः परमात्मैवेत्युक्तम् । एवं चतुःसूत्र्या विधिमुखेन दहरस्य परमात्मत्वं विचारितम् ।

अतः परमग्रिमचतुःसूत्र्येतरनिषेधमुखेन तस्यैव परमात्मत्वं पुनः साधयति । ततः पञ्चमे अस्मिन् प्रकरण आदिमध्यावसानेषु सम्प्रसादादिशब्दैर्जीवस्य परामर्शाज्जीव एव दहर इति सूत्रांशे-नाशङ्क्य, जीवे जगदाधारत्वादेरसंभवात् स न दहर इत्युक्तम् । ततः षष्ठ एतदनंतरमुक्त इन्द्रप्रजा-पतिप्रकरणे जीवस्यैवामृताभयत्वादिरूपेणोक्ततयात्रापि स एव परामृश्यतामिति सूत्रांशेनाशङ्क्य, तत्र प्रजापतिरुपदेशसमय आविर्भूतब्रह्मरूपो जातः, यथा नृसिंहोपासको नृसिंहाविष्टो भवति, अतस्त-यामृतत्वात्सर्वत्रात्मानं पश्यन्नुपदिष्टवान्, अतो न तत्र जीवः प्रकरणार्थः । अतस्तदनुरोधेनात्र जीवस्य ब्रह्माभिन्नत्वं न वक्तुं शक्यम् । तस्माद्दहरः परमात्मैव । ततः सप्तमे तर्हि तत्र जीवपरामर्शस्य किं

प्रयोजनमित्याकाङ्क्षायां पूर्वप्रकरणे सत्यनामकस्य ब्रह्मणो ज्ञानेन ब्रह्मसुखरूपं फलमुक्तम् । तदपेक्षायां तादृशं ब्रह्मज्ञानमावश्यकम् । तत्र सच्छब्देनामृतस्य जीवस्य, तिशब्देन मर्त्यस्य जडस्य, यशब्देनोभयनियामकस्य ब्रह्मण उक्तत्वात् । नियम्यद्वयज्ञानाभावे नियामकस्य ब्रह्मणो ज्ञानासंभवात् । तदर्थं शब्दोक्तस्य नियम्यस्य जीवस्य स्वरूपज्ञानाय जीवपरामर्शः, न तु प्रकरणित्वेनेत्युक्तम् । ततोऽष्टमे भवत्वेवं तथाप्यल्पे हृदयपुण्डरीके आकाशरूपस्य ज्यायसो ब्रह्मणः स्थितिर्न संभवतीत्यतो जीव एवोच्यतामित्याशङ्कायां 'निचाय्यत्वादेवं व्योमवच्चे'त्यत्र विरुद्धधर्माश्रयत्वेन ब्रह्मणः स्थितिर्वक्तुं शक्येत्युक्तम् । तादृशत्वस्यात्राप्यनुसंधेयत्वात्तेन तत्समाधिसिद्धिरिति दहरः परमात्मैव । अत्र बुद्धिस्थस्य विचारादुपोद्घातगर्भः प्रसङ्गः सङ्गतिः । किं च, परामर्शसूत्रे जीवस्य सर्वावस्थासु ब्रह्मनियम्यत्वस्यैव सिद्धत्वात्, अतो जीवस्य परममुक्तिदशायामपि ब्रह्मनियम्यत्वमेव सिध्यति । वेदस्तुतावपि 'अजनि च यन्मयं तदविमुच्य नियंतृ भवे'दित्यत्र तथैव सिद्धत्वाच्च ॥ ५ ॥

ततः षष्ठे द्विसूत्रे **अनुकृत्यधिकरणे** 'न तत्र सूर्यो भाती'ति कठवल्लीस्थं वाक्यं विषयत्वेनोदाहृत्य, लोकप्रकाशकानां सूर्यादीनां दहरांतःस्थत्वकथनात् कठवल्लीस्थमुक्तवाक्यं तद्विरुद्धमित्याशङ्क्य, तेषां स्वतो न प्रकाशकत्वम्, किंतु भगवदनुकारित्वाद्भगवत्प्रकाशेनैव प्रकाशकत्वं सर्वत्र सर्वदेतिप्रसङ्गान्निर्णीतम् । तेन जीवस्य मुक्तिदशायां तदनुकारित्वरूपमेव साम्यम्, न तु परममित्यपि बोधितम् । अन्यथैतद्विचारस्यात्र निष्प्रयोजनत्वापत्तेरिति ॥ ६ ॥

ततः सप्तमे द्विसूत्रे **शब्दादेव प्रमित इत्यधिकरणे** कठवल्लीस्थमङ्गुष्ठमात्रवाक्यं विषयत्वेनोदाहृत्याङ्गुष्ठमात्रस्य भूतभव्येशानत्वं शब्दादेव प्रमीयते इति **प्रथमसूत्रे** निर्णीतम् । **द्वितीये** च तस्य तत्र स्थितिर्मनुष्याणामधिकारार्थेति निर्णीतम् । अत्रापि प्रसङ्ग एव सङ्गतिः । इदं च जीवस्य मुक्तिदशायां ब्रह्माविर्भावेन विरुद्धधर्माश्रयत्वे फलिष्यति ॥ ७ ॥

ततोष्टमेष्टसूत्रे **तदुपर्यपीत्यधिकरणे** प्रसङ्गाद्देवादीनां ब्रह्मविद्यायामधिकारो विचारितः । तत्र **प्रथमे सूत्रे** मनुष्येषु त्रैवर्णिकानामुपनयनादिसंस्कारवतां कर्माधिकाराद् ब्रह्मविद्यायामप्यधिकार इति पूर्वतन्त्रादेव सिध्यति । ततो मनुष्याद्धीनजातीयानां तु योग्यताऽभावादेव नाधिकारः । अतः परं मनुष्यादुत्कृष्टानां ब्रह्मविद्यायामधिकारः संभवादुक्तः । यद्यपि देवादीनामुपनयनादिकं न प्रसिद्धम्, तथापि यज्ञोपवीतमन्त्रे 'प्रजापतेर्यत्सहजं पुरस्तादि' तिश्रावणात्तन्न्यायेनान्यत्रापि जन्मानुग्रहविशेषतपःप्रभृतिभिर्मतङ्गविश्वामित्रादीनामिवाधिकारः संभवति । तस्मादप्यधिकार इत्युक्तम् । ततो **द्वितीयसूत्रे** पूर्वसूत्रोक्तस्य देवादीनामधिकारस्य विप्रतिपन्नतया तद्बलेन तेषु ब्राह्मण्यादेर्वक्तुमशक्यत्वात्, तेषां स्वर्गस्थत्वेन पृथिवीरूपदेशस्य, व्रीह्यादिरूपद्रव्यस्य तत्र सूर्यगत्यभावेन दर्शादिरूपकालस्य च, तदतिरिक्तदेवाभावेनोद्देश्यदेवतान्तरस्यापि वक्तुमशक्यतया तदभावेपि कर्मकरणे श्रुतिविरोध इति सूत्रांशेनाशङ्क्य, अंशान्तरेण प्रजापतिन्यायाद् वर्णसत्तायाः साधितप्रायत्वात्, 'इन्द्रो द्वात्रिंशद्वर्षाणि प्रजापतौ ब्रह्मचर्यमुवासे'तिश्रावणादाश्रमसत्तायाः, 'साध्या वै देवाः सुवर्गकामा एत९षड्रात्रमपश्यन् तमाहरन् तेनायजन्ते'तियज्ञकरणश्रावणाद्, 'देवा वै सत्रमासते'त्यादौ भूमावागत्य ऋषीन् वृत्वा यज्ञकरणश्रावणाच्चानेकधोपयोगो देवानां वेदे दृश्यते । भगवदवयवरूपा ये देवास्ते तेषामुद्देश्या अपि भवंति । 'उभौ वै देवाना९ शमितारौ अध्रुगुश्चापापश्चे'त्यादौ ऋत्विजोपि श्राव्यंते । तस्मान्न श्रुतिविरोध इत्युक्तम् । ततस्तृतीये ननु वेदात् कर्म ज्ञात्वा पश्चात् कर्तव्यं देवैः, तत्र देवानां कर्म-

करणं वदन् वेदो देवानामधिकारं वदेत् । देवाश्च जन्या इति वेदार्थज्ञानसमये तेषामभावाद्, ज्ञसौ चात्माश्रय इति कर्मकर्तृणां ज्ञातृत्वेन वक्तुमशक्यत्वात् कर्मकर्तृविरोधः । वेदश्च तेषां वृत्तान्तं वदन् स्वयं कथं नित्यो भवेत् । अतो वेदानित्यत्वापादकत्वादयं देवाधिकारपक्षो न सङ्गत इति सूत्रांशेनाशङ्क्य, अंशान्तरेण समाधिमाह, शब्दोक्ताः पदार्थाः सर्वे एवाधिदैविका भगवदवयवरूपाः, शब्द एव विद्यंते, नित्यास्तैः सह पदानां सम्बंधोपि नित्य इति न वेदस्यानित्यत्वम् । इदमेव चतुर्थेन सूत्रेण वक्तव्यम् । न च वैदिकपदार्थानामतिरिक्तत्वाङ्गीकारे प्रत्यक्षविरोधः शङ्क्यः । इदानीमपि यजमानर्त्विक्प्रभृतीनां वेदादेव सपरिकरकर्मावगतेर्वृद्धव्यवहारादिना दर्शनेन वैदिकपदार्थांतरेष्वपि तेनैवावगतिसम्भवात् । अतो यैर्भगवान् दृष्टस्तेषां तु तत्रैव सर्वपदार्थदर्शनात्तेष्वेव संकेतग्रहः, ततोर्वाचीनानामिदानीन्तनपर्यंतानां तूपमानात्तेषु संकेतग्रहः, भगवतः सर्वानुकारित्वात् । किं च, यथा 'जमदग्नीनां पञ्चावत्त'मित्यत्र स्वस्मिन् जामदग्न्य इति प्रत्यक्षज्ञानाभावेपि परोक्षानुभवो भवति, तथा वैदिकप्रपञ्चस्यापि परोक्षानुभवो भवत्येवेति वैदिकप्रपञ्चोतिरिक्त एव । तस्मान्न ज्ञाने कर्मकर्तृविरोध इति सूत्रद्वयेनोक्तम् । ततः पञ्चमे ननु भवत्वेवं वैदिकसृष्टिरतिरिक्ता, तथापि 'यतो वा इमानि भूतानि जायंते'इत्यादिषु सृष्ट्यादिरुच्यते इति तदनुरोधेनानित्यापि सृष्टिर्वेदे उच्यते इत्यङ्गीकार्यम् । तथा ये देवाः कर्म कुर्वंति तेप्यनित्या इति च । एवं सति वेदस्य तद्वाचकत्वे शब्दार्थयोर्नित्यसंबंधविरोधः, अतस्तदभावार्थमाकृतावेव संबंधो वक्तव्यः । तथासति किं जैमिनिमतदूषणेनेत्याशङ्क्य, लोकदृष्टिमङ्गीकृत्य तद्रीत्यापि समाधानमाह । यद्यपि सर्वस्य भगवद्रूपत्वादुत्पत्तिप्रलययोः सञ्चरप्रतिसञ्चररूपत्वेन वस्तुनित्यत्वाबाधकतया दर्शनादर्शनयोरेव नित्यानित्यत्वपर्यवसानम्, न तु वस्तुनीति न काचिदाशङ्का । तथापि लोकदृष्ट्या प्रपञ्चस्य देवादीनां चानित्यत्वाङ्गीकारे तत्तत्प्रवाहे एव शब्दसंबंधः । लोकेऽपि शरीरगङ्गाप्रभृतिषु प्रवाहे एव शब्दसंबंधदर्शनात् । अतो देवादीनां तत्कर्मणां चानित्यत्वेपि तत्प्रवाहस्य नित्यत्वात् तद्बोधके वेदेपि नानित्यत्वं शङ्कितुं शक्यते इति । ततः षष्ठसूत्रे ननु यद्यपि श्रुतिविरोधपरिहारेण कर्मण्युपासने च देवानामधिकारः प्रतिपादितस्तथापि छांदोग्ये 'असौ वा आदित्यो देवमध्वि'त्यादिनोक्तायां मधुविद्यायां स न सङ्गच्छते । तत्र मधुत्वेनोपवर्ण्यमानस्यादित्यस्य विद्याविषयत्वात् स कमन्यमादित्यमुपासीत । एवं संवर्गविद्यादिषु वाय्वादीनां विषयत्वात्तेषामप्यनधिकारो बोध्य इत्याद्युक्तम् । ततः सप्तमे 'अग्निः पुच्छस्य प्रथमं काण्ड'मित्यादिश्रुतिष्वग्न्यादीनां देवानां ज्योतिर्गणे विद्यमानत्वकथनात्तेषां च तत्र महाभोगकथनात्प्राप्तफलत्वेनोपासनायामधिकारो न संगत इत्येवं जैमिनिमतेनाशङ्कितम् । ततोऽष्टमे तत्परिहारमाह, वेदे हि प्रजापत्यादीनां कर्माधिकारो निरूप्यते, 'प्रजापतिरकामयत प्रजायेयेति', 'स एतमग्निहोत्रमिथुनमपश्यत्, तदुदिते सूर्येऽजुहोदि'त्यादिषु । तथा ज्ञानेपि श्रूयते, 'तद्यो यो देवानां प्रत्यबुध्यत स एव तत्तदभव'दित्यादिषु । अत्र च भूतार्थवादः, तेन स्वार्थे प्रमाणं न स्यात् तदा तादृशाग्निहोत्रहोमेन तादृशज्ञानेनान्यस्यापि फलं न स्यात् । अतः कर्मणि ज्ञाने चाधिकारोयमवश्यमभ्युपेयः । ये पुनरुपास्यत्वेन तत्रोक्तास्ते भगवदंशा एव । 'न ह वै देवा अश्नन्ति न पिबन्ती'त्यनशनतादिरूपाल्लिंगात् । इदं च पूर्वमेव साधितम्, तथापि जैमिनिमतनिराकरणाय पुनरुक्तम् । एवमष्टभिः सूत्रैर्देवानामधिकारो वेदनित्यत्वं च प्रसङ्गान्निर्णीतम् ॥ ८ ॥

---

१. आदित्यानामिति पाठः । २. विषयतया देवानामधिकार इति पाठः ।

ततो **नवमे पञ्चसूत्रे शुगस्येत्यधिकरणे** शूद्राणां ब्रह्मविद्यायामधिकारोनुप्रसङ्गान्निराकृतः। तत्र **प्रथमसूत्रे** छांदोग्यस्था संवर्गविद्या विषयत्वेनोपन्यस्ता । तत्र च जानश्रुतिं 'हा शूद्रे'त्येवं संबोध्य पश्चात् संवर्गविद्योपदिष्टा । तस्माज्जातिशूद्रस्याप्यधिकार इत्याशङ्कायाम्, नात्र शूद्रशब्दो जातिवाची, किंतु शुचा आद्रवतीति शूद्र इति यौगिकः । अतो योगेन जानश्रुतेर्मत्सरित्वं बोधयति । तेन पूर्वं धिक्कारः पश्चाच्चोपसरणेन मत्सरत्यागे विद्योपदेश इति नात्र जातिशूद्रस्याप्यधिकार इत्युक्तम् । ततो **द्वितीयसूत्रे** जानश्रुतिजातेः श्रुतावनुक्तत्वात् योगापेक्षया च रूढेः प्रबलत्वादत्र शूद्रशब्दो रूढ एव सन् जानश्रुतिजातिं बोधयतीति जातिशूद्रस्याप्यधिकारोस्त्वित्याशङ्कायां जानश्रुतेः क्षत्रियत्वमुत्तरत्र प्रकरणान्तरे काक्षसेनिपदादवगम्यते । कक्षा स्पर्धास्थानं सेना रथा यस्येति कक्षसेनस्तस्यापत्यं काक्षसेनिरिति क्षत्रियलिङ्गात् । यद्यपि तत् प्रकरणान्तरम्, तथापि छन्दोगानां द्विरात्रे 'एतेन वै चैत्ररथं कापेया अयाजय'न्निति श्रवणात् 'समानान्वयानां समानान्वया एव याजका भवन्ती'ति कापेयसंबंधेन काक्षसेनेः क्षत्रियत्वमवगतम् । अतो लिङ्गबलादस्य क्षत्रियत्वावगतेः जानश्रुतेः जातिर्निर्धार्यते । तस्माज्जातिशूद्रस्य नाधिकारः । यत्र परम्परितब्रह्मविद्यायामपि नाधिकारस्तत्र साक्षाद्ब्रह्मविद्यायां तु शङ्कितुमपि न शक्यते इत्युक्तम्। ततस्**तृतीये** श्रौतेषु साधनेषु सर्वत्रोपनयनसंस्कारपरामर्शाच्छूद्रे च तदभावान्नाधिकार इत्युक्तम् । ततश्**चतुर्थे** 'सत्यकामो ह जाबाल' इत्यत्र जाबाले शूद्रत्वाभावनिर्धारण एव गौतमेन तस्मिन् शिष्यभावः प्रवर्तितः । तस्मादपि जातिशूद्रस्य नाधिकार इत्युक्तम् । ततः **पञ्चमे** शूद्रस्य वेदे श्रवणाध्ययनार्थज्ञानानां निषेधश्रावणात् स्मृतिष्वपि वेदाक्षरविचारेण शूद्रस्य पातकथनाच्च नाधिकार इत्युक्तम् । एवमिदं प्रासङ्गिकमधिकरणद्वयम् ॥ ९ ॥

ततो **दशमे एकसूत्रे कम्पनाधिकरणे** कठवल्लीस्थं 'यदिदं किञ्च जगत् सर्व'मितिवाक्यं विषयत्वेनोदाहृत्य, किमत्रेंद्रः प्राणो ब्रह्म वा निरूप्यते इति संदेहे, प्राणेंद्रौ निवार्य, सर्वजगत्कंपनाद्धेतोर्ब्रह्मैवात्रोच्यते इति निर्धारितम् । तेनावतारदशायामपि भगवतो दण्डपाणित्वबोधनाय तत्र जीवानां सन्नतये च भगवत इदं कार्यं प्रसङ्गेनावसरेण वा विचारितम् ॥ १० ॥

तत **एकादशे एकसूत्रे ज्योतिर्दर्शनाधिकरणे** दहरविद्यास्थं 'परं ज्योतिरुपसंपद्ये'तिवाक्यं विषयत्वेनोपन्यस्य, ज्योतिःशब्देन महाभूतरूपं ज्योतिरुच्यते, उत ब्रह्म वेति संदेहे, महाभूतरूपं ज्योतिर्निवार्य, संपत्तिरूपादर्शनाद्ब्रह्मैवात्र निरूप्यते इति प्रसङ्गाद्विचारितम् । तत्प्रयोजनं तूपसंपत्तव्यत्वोपसंपन्नस्वरूपाभिनिष्पादकत्वपूर्ववाक्यगतहृदयत्वोत्तरवाक्यगतसत्यपदोक्तमर्त्यामृतनियामकत्वरूपाणां चतुर्णां धर्माणां निष्कर्षार्थत्वान्न ज्योतिश्चरणाधिकरणेन गतार्थता ॥ ११ ॥

ततो **द्वादशे एकसूत्रेऽर्थान्तरव्यपदेशाधिकरणे** छांदोग्यसमाप्तिस्थ'माकाशो वै नाम नामरूपयोर्निर्वहिते'तिवाक्यं विषयत्वेनोपन्यस्य, तत्र भूताकाशो ब्रह्म वेति संदेहे, भूताकाशस्य यत्प्रयोजनं वायुजननं तस्माद्भिन्नस्य प्रयोजनस्य नामरूपनिर्वाहकत्वरूपस्य कथनाद्, ब्रह्मादिश्रुतीनां च कथनाद्, ब्रह्मैवाकाश इत्युक्तम् । **तेनान्यवाचकपदवाच्यस्य यत्रैव तद्धर्मातिरिक्तधर्मकथनं तत्रान्यवाचकपदस्य ब्रह्मपरत्वमिति** न्यायबोधकमिदमधिकरणमिति प्रसङ्गादुक्तम् । **अतो न तद्धर्माद्यधिकरणादिना गतार्थता ॥ १२ ॥**

ततस्त्रयोदशे द्विसूत्रे सुषुप्त्युत्क्रांत्योरित्यधिकरणे बृहदारण्यकस्थं ज्योतिर्ब्राह्मणं शारीरब्राह्मणं चेत्युभयं विषयत्वेनोपन्यस्य, तयोः किं जीववाक्यत्वमुत ब्रह्मवाक्यत्वमिति संदेहे, उपक्रमस्यासञ्जातविरोधत्वेन प्राबल्यात्, तत्र च 'कतम आत्मे'तिप्रश्ने 'योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष' इति शारीरलिङ्गात्, 'योयं विज्ञानमयः प्राणे'ष्विति काण्वपाठे उपसंहारे च तादृशवाक्याद्, यद्यपि संसारी प्रतीयते, तथापि मध्ये 'ध्यायतीवे'त्यादिसंसारिधर्मनिराकरणादुपसंहारे च 'स वा एष महानज आत्मे'तिसंसारधर्मरहितपरमेश्वरात्मबोधनादन्यैश्च हेतुभिः परमात्माभिन्नो संसारी मुक्तो जीवः प्रतिपाद्यते इति पूर्वपक्षे, यदि मुक्तो जीवो ब्रह्माभेदेनात्र प्रतिपाद्यः स्यात्तदावस्थाभेदस्याप्रयोजकत्वात्सुषुप्तावुत्क्रांतौ च जीवं परमेश्वरान्न भिन्द्यात्, प्रतिपिपादयिषितेऽभेदे अवस्थया भेदकथनस्य निष्प्रयोजनतया वैयर्थ्यप्रसङ्गात्, जाग्रत्स्वप्नयोरज्ञत्वादिवैशिष्ट्यस्य प्रत्यक्षसिद्धत्वेन सुषुप्तिमरणयोस्तमोभिभवादज्ञानादिवैशिष्ट्याज्ञानेपि सौषुप्तिकस्मरणेन मृतानां भूतादिभावदर्शनेन चानुमानसिद्धतया तत्कथनवैयर्थ्यानपायाच्च । अतो यत् ज्ञायमानावस्थासिद्धं भेदमनुवदति तदसंसार्यवस्थायामपि भेदबोधनार्थैवानुवदति । 'यथोदकं शुद्धं शुद्धे आसिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमे'ति काठकेपि तथैव श्रावणात् । न च तर्ह्युपक्रमाद्यनुरोधादसंसारी परमेश्वरसमानधर्मा जीवो वाच्योस्त्विति शङ्क्यम् । उपक्रमादिष्वपि तथार्थाभावात् । तथाहि । उपक्रमे 'किंज्योतिरयं पुरुष' इति प्रकाशकप्रश्ने 'आदित्याद्यनंतरमात्मज्योति'रित्युत्तरे संसारिणः पुरुषस्य प्रकाशापेक्षित्वेनाप्रकाशकत्वात् 'प्रकाशक आत्मा क' इत्याशयेन पृच्छति 'कतम आत्मेति ?' । तत्र स्पष्टतया वक्तव्येप्युत्तरे याज्ञवल्क्यो 'न वदिष्ये' इति स्वाभिसंधेर्वरदानस्य चानुरोधात् श्लिष्टमेवोत्तरं दत्तवान् । अतस्तद्विचारे 'अत्रायं पुरुषः स्वयंज्योतिर्भवती'ति निगमनवाक्ये परमात्मैव स्वयंपदवाच्यः सिध्यतीत्युपक्रमगतः प्रश्नः सामान्योप्युत्तरे तत्पर एव पर्यवस्यति । तथापि श्लिष्टप्रयोगात् जनकेन सोर्थः सम्यङ् न ज्ञातः, किंत्वेतावत् ज्ञातं संसारिव्यतिरिक्त आत्मा प्रकाशक इति । ततस्तत्संदेहवारणाय पृच्छति 'विमोक्षाय ब्रूही'ति । तदापि पूर्वोक्तानुरोधात् 'स वा एष एतस्मिन् संप्रसादे रत्वा चरित्वे'त्यादि श्लिष्टमेवोत्तरं दत्तवान् । तदा सुषुप्तौ जीवस्यासङ्गत्वे उक्तेपि जनकस्य संदेहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि तथैव वदन् मत्स्यादिदृष्टांतेन स्वप्नसुषुप्ती अवस्थे उक्त्वा, सुषुप्तौ असङ्गादपि जीवात् परमात्मानं भेदेनाह, संपरिष्वक्तस्त्रीपुंदृष्टान्तेन । तदापि जनकस्य प्रकाशकसंदेहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि श्लिष्टवाक्येनैवोत्तरे, पुनरपि मोक्षाय पप्रच्छ । तदा याज्ञवल्क्यो राज्ञो मेधावित्वाद्भीतः संसारिणो जीवस्य मरणावस्थां वदन् परमेश्वराज्जीवस्य भेदमाह । तदापि श्लिष्टप्रयोगात्तस्य संदेहो न निवृत्त इति तदानीमकामयमानस्य सद्योमुक्तिमाह । तत्र 'ब्रह्मैव सन् ब्रह्माप्येती'तिश्रुतेः 'प्राज्ञ आत्मा ब्रह्मैवे'ति च श्रुतेर्जीवस्य ब्रह्मभाव एव मुक्तिः । प्राज्ञ आत्मा ब्रह्म योस्ति स एव प्रकाशकस्तज्ज्योतिषैवायं जीवः सर्वं करोतीति ज्ञात्वा जनकः 'सोहं भगवते सहस्रं ददामी'त्युक्तवान् । तदा याज्ञवल्क्यः श्लोकैः सर्वं शास्त्रार्थमुक्त्वा 'स एष आत्मे'त्यादिना तमेवार्थं स्पष्टमुक्तवान् । तदा जनको विदेहान् स्वात्मानं च तस्मै दत्तवान् । याज्ञवल्क्योपि तथा विद्यां समापितवान् । अत उपक्रमोपसंहारयोः परमात्मन एव प्रकृतत्वसिद्ध्या तस्यैव प्रकरणित्वम्, न तु ब्रह्मभावापन्नस्य जीवस्येति सिध्यति, समाप्तौ पत्यादिशब्देभ्यश्च । तस्मादिदं ब्रह्मवाक्यमेवेति ।

अत्र पादे उपास्यरूपाण्याधाररूपाणि च विचार्य ब्रह्मातिरिक्तानामनुकारित्वं च विचार्य समासौ यत् जीवब्रह्मणोर्भेदः साधितः, तेन मुक्तिदशायामपि जीवस्यानुकारित्वमेव, तदात्मकत्वात्, न त्वत्यन्ताभेदः, सर्वथा तौल्यं वेति प्रसङ्गादुपोद्घाताद्वेति विचारितम् ॥ १३ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदांताधिकरणमालायां प्रथमाध्यायस्य तृतीयः पादः ॥

अतीतेषु पादेषु **प्रथमे** कार्यरूपवाक्यानि, **द्वितीये** अन्तर्यामिवाक्यानि, **तृतीये** उपास्यरूपवाक्यानि विचार्य, सर्वेषां वेदांतानां ब्रह्मणि समन्वयः प्रतिपादितः। तद्दार्ढ्यार्थं प्रकीर्णकानि वाक्यानि विचार्यंते। तेषां च जीवजडसमुदायात्मकार्यनिरूपकतया कापिलमतश्रौतताभ्रमजनकत्वं प्रकीर्णत्वमिति तद्भ्रमनिरासायोपोद्घाततया तेषां विचारः।

तत्र **प्रथमस्य सप्तसूत्रस्यानुमानिकाधिकरणस्य प्रथमसूत्रे** 'इंद्रियेभ्यः परा ह्यर्था' इति काठकवाक्यं विषयत्वेनोपन्यस्य। तत्र ज्ञानकर्ममयाणि दशेंद्रियाणि भूतमात्राभेदभिन्ना दशार्था मनोबुद्ध्यहङ्कारमहत्तत्त्वाव्यक्तपुरुषाः साङ्ख्यमतसिद्धाः पदार्थास्तत्रोच्यंते इति कापिलमतमपि श्रौतमिति 'आनुमानिकमप्येकेषामिति चेदि'तिसूत्रांशेनाशङ्क्य, अंशांतरेण समाधानमाह। नात्र तन्मतसिद्धाः पदार्था उच्यंते, किंतु पूर्व'मात्मानं रथिनं विद्धी'त्यादिना शरीररूपकं यदुक्तं तत्रत्या ये रथादिभावेन पदार्था निविष्टास्ते एवात्रास्मिन् वाक्ये गृह्यंते। एतद्धि जीवप्रकरणम्। अत्र च तस्य मुक्त्युपायो निरूप्यते। 'योग्यं शरीरमारुह्य हरेः पदं गच्छे'दिति। तत्र योग्यं शरीरं रथः, आत्मा रथी, इंद्रियाणि हयाः, बुद्धिः सारथिः, मनः प्रग्रहः, भगवदीया विषयाः, तेषां हयानामात्मरूपाः सम्यक्त्वेन भावितत्वात्। बुद्धेरात्मा ब्रह्मविषयं विज्ञानं तन्महत्तत्त्वेनोच्यते। अव्यक्तं तु भगवत्कृपैव, पुरुषस्तु भगवानेवेति ब्रह्मवाद एवात्र सिध्यति, न साङ्ख्यमतम्। यतोग्रे 'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि'रितिमन्त्रेणात्मदर्शनपरिकरतयैव त उच्यंते। तस्माद्ब्रह्मवाद एवात्रेत्युक्तम्। ततो **द्वितीये सूत्रे** अव्यक्तशब्देन भगवत्कृपा वक्तुं न शक्यते, अत्र धर्मिप्रवाहमध्ये धर्मरूपायास्तस्या वक्तुमशक्यत्वादित्याशङ्क्य, अत्राव्यक्तशब्देन सूक्ष्ममुच्यते, तच्च ब्रह्मैव, धर्मधर्मिणोश्चाविनाभावेन स्थितत्वादभेद इति तदभिन्ना कृपैवात्रोच्यते इत्यदोष इत्युक्तम्, योग्यताबलात्। तथा च न प्रायपाठविरोध इत्युक्तम्। ततस्**तृतीये** ननु यद्युक्तयुक्त्या कृपाया ब्रह्मत्वम्, तदाऽभिन्नत्वे ब्रह्मभिन्नत्वमसङ्गतम्। अथ कयाचिद्युक्त्या तस्या धर्मत्वम्, तदा धर्मिप्रायपाठविरोध इत्युभयथापि दोषात्पूर्वसूत्रोक्तमसङ्गतमित्याशङ्क्य, कृपाया ब्रह्माभिन्नत्वेपि ब्रह्माधीनत्वाद्ब्रह्मभिन्नत्वम्, ब्रह्मभिन्नत्वात् ब्रह्मनियम्यत्वम्। अतो यथैकरूप्येण ग्रहणमभेदे युक्तिः, तथा नियम्यनियामकभावोपि भेदे युक्तिरित्युभयथाप्युपपन्नम्। न चाभेदेनैकत्वे नियम्यनियामकभावानुपपत्तिरिति शङ्क्यम्। 'ब्रह्मविदाप्नोति पर'मित्यत्रैकस्यैव ब्रह्मणः सच्चिद्रूपेण विषयत्वम्, आनंदरूपेण फलत्वमितिवदुपपत्तेः। तथा च कृपाविष्टः साधनम्, आनंदरूपः फलम्। अथवा, अव्यक्तं सच्चिद्रूपमक्षरम्, आनंदरूपः पुरुष इति तयोरभेदेपि परापरभावो युक्तः। अदृश्यत्वाद्यधिकरणे तथा साधितत्वात्। तस्मा'दिन्द्रियेभ्यः परा' इतिवाक्ये आनुमानिकं न किंचिदस्तीत्युक्तम्। एवं त्रिभिः सूत्रैर्वाक्यानां पूर्वापरसंबंधेन मतांतरं निराकृत्य ब्रह्मवादः प्रतिपादितः। इदानीं तु केव-

त्तैतद्वाक्यविचारेण मतांतरं निराकरोति । ततश्चतुर्थेऽस्मिन् वाक्येऽव्यक्तं ज्ञेयत्वेनोच्यते । कापिलमते तु 'गुणपुरुषान्तरज्ञानात्कैवल्य'मितिप्रवचनसूत्रात् प्रकृतिपुरुषयोरन्तरं मोक्षार्थं ज्ञेयम्, न त्वव्यक्तरूपा प्रकृतिः । अतो ज्ञेयत्वावचनादपि नात्र तन्मतसिद्धिरित्युक्तम् । ततः पञ्चमे ननु ज्ञेयत्वावचनमसिद्धम्, एतदुत्तरवाक्ये 'अशब्दमस्पर्शमरूपमव्यय'मित्यत्राव्ययस्य 'महतः परमव्यक्त'मित्यत्र महतः परस्याव्यक्तस्य ज्ञानान्मुक्तिश्रावणादितिसूत्रांशेनाशङ्क्य, अंशांतरेण समाधानमाह । अत्र संदर्भे श्रुतिलिङ्गवाक्यानां संदिग्धत्वान्न निर्णायकत्वम्, अतो 'महतः पर'मितिवाक्यस्या'शब्दमस्पर्श'मितिवाक्यस्य चेति द्वयोरेकवाक्यत्वम्, नान्येषामित्यत्र नियामकाभावेन प्रकरणस्यैव निर्णायकत्वं वक्तव्यम् । तच्च 'ऋतं पिबन्ता'वित्यारभ्य 'नाचिकेतमुपाख्यान'मित्यंतमेकं प्रकरणम् । तत्र चात्मानावेव परामृश्य जीवात्मनो रथित्वं तदुपकरणं फलं चोक्त्वा, अग्रे 'एष सर्वेषु भूतेष्वि'त्यारभ्यासमाप्ति परमात्मैव ज्ञेयत्वेन परामृश्यते इति मृत्युमुखात्प्रमोकरूपं फलं चोच्यते । अतः प्राज्ञः परमेश्वर एवात्रार्थः, नाव्यक्तं प्रधानम् । अतो ज्ञेयत्वावचनं नासिद्धमित्युक्तम् । तेन प्रकरणस्य नियामकत्वादशब्दवाक्यमपि भगवत्परमेवेत्युक्तम् । ततः षष्ठे ननु नेदमेकं प्रकरणम्, किंत्वि'न्द्रियेभ्यः परा' इत्यारभ्य 'नाचिकेतमुपाख्यान'मित्येकं भिन्नं प्रकरणम् । तत्र प्रथमं पदार्थान्निर्दिश्य, ततोग्रे पुरुषज्ञानं चोच्यते इति साङ्ख्यमतस्यापि निरूपणात्तस्याश्रौतत्वमसंगतमित्याशङ्क्य, तत्र परिहारमाह । अत्र हि त्रयः प्रश्नाः, अग्निजीवब्रह्मविषयकाः । तेषामुत्तराणि च त्रीणि । तत्र 'स त्वमग्नि'मितिप्रश्ने 'प्रतिब्रवीमी'त्याद्युत्तरम्, ततो 'येयं प्रेते' इतिजीवप्रश्ने 'देवैरत्रापी'त्याद्युत्तरम् । ततो'न्यत्र धर्मादि'तिब्रह्मप्रश्ने 'सर्वे वेदा' इत्याद्युत्तरम् । अतस्त्रय एव प्रश्नाः त्रीण्येवोत्तराणि च यदि साङ्ख्यमत'मिंद्रियेभ्य'इत्यादि स्यात्तदा चतुर्थे प्रश्नोत्तरे स्याताम् । ते तु न स्त इति नात्र तन्मतसिद्धिरित्युक्तम् । ततः सप्तमे ननु मतान्तरेन्यत्र प्रसिद्धाः शब्दा ब्रह्मवादे ब्रह्मपरतया कथं योजयितुं शक्या इत्याशङ्क्य, महद्दृष्टांत उक्तः । यथा महच्छब्दो 'महांतं विभुमात्मान'मित्यादौ ब्रह्मपरः, तथाव्यक्तशब्दोप्यक्षरपरः । तस्मादिंद्रियादिवाक्येन न साङ्ख्यमतसिद्धिः, किंतु ब्रह्मवाद एवात्र सिध्यतीत्युक्तम् ॥ १ ॥

ततो द्वितीये त्रिसूत्रे **चमसवदित्यधिकरणे** 'अजामेका'मित्यादीनि श्वेताश्वतरवाक्यानि विषयत्वेनोपन्यस्य, एतेषु मन्त्रेष्वजादिशब्दैः प्रकृतिः परामृश्यते, मुक्तामुक्तभेदेन जीवद्वैविध्यमजायाः प्रकृतेरेकत्वमग्रे कपिलस्य नाम च पठ्यते । यद्यपि किंकारणेत्युपक्रमाद्ब्रह्मविद्यात्वेनोपनिषत् प्रतीयते, तथापि पूर्वकाण्डे यथा प्रणवादिमन्त्राणां नानास्थले विनियोगान्न प्रकरणानुरोधः, तथैतेष्वपि मन्त्रेषु कपिलमतप्रत्यभिज्ञानान्नोपक्रमाद्यनुरोध इति साङ्ख्यमतमपि वैदिकमितिशङ्कायाम्, पूर्वसूत्रेण समाधिमाह । यथा 'अर्वाग्बिलश्चमस' इतिबृहदारण्यकमन्त्रे कर्मविशेषः । तत्रार्वाग्बिलं चमसं यशोरूपं सोमं सप्त होतारो भक्षयेयुरिति कल्पयितुं न शक्यते, तथा प्रकृतमन्त्रे लोहितशुक्लादिशब्दैः रजःसत्त्वादि कल्पयित्वा तद्वशेन सर्वमेव मतं कल्पयितुं न शक्यते, विशेषाभावात् । कपिलवाक्येपि कपिलशब्देन ब्रह्मैवोच्यते, न त्वनित्यर्षिः, नित्यानित्यसंयोगप्रसंगादित्युक्तम् । ततो द्वितीये सूत्रे ननूक्तस्य चमसमन्त्रस्य व्याख्यानं 'शिरश्चमस' इत्यादिना श्रुतौ क्रियते, तथात्र मन्त्रव्याख्यानाभावात्तद्दृष्टांतोत्र न युक्त इत्याशङ्कां तुशब्देन परिहरन्नजाशब्दार्थकथनमुखेन समाधत्ते । अत्राजाशब्देन ज्योतिरुच्यते, प्रथमकार्यरूपत्वाच्चतुर्मुखाजत्वन्यायेन । यथाजाल्पदोग्ध्री, तथैवेयं नश्वरफलदात्रीतिबोधनाय चाजाशब्देनोच्यते । सत्यकामब्राह्मणेग्निसोमसूर्यविद्युद्रूपचरणरूपतया हंसेनोक्तश्चतुष्कलो यो ब्रह्मणः पादस्तद्रूपत्वात् ज्योतीरूपा त्रिवृत्कृतत्वात्त्रिवर्णा ज्योतिरेवाजाशब्देनोच्यते । अत्रोपक्रमे ब्रह्मणः प्रकृत-

त्वात् 'तदेवाग्निस्तद्वायुस्तदादित्यस्तदु चन्द्रमा'इतिकथनाच्च। सा च चेतनाधिष्ठिता, मध्ये 'द्वासुपर्णे'ति मन्त्रकथनात्, अजद्वयं च जीवब्रह्मरूपं ताभ्यामधिष्ठिता । सा च प्रथमसृष्टिरबादिजननेन बहुप्रजास्रष्ट्री चेति । एतच्छंदोगशाखायामधीयते । अतस्तदनुसारेणायमेवार्थः, न तु मतांतररूप इत्युक्तम् । ततस्तृतीये ननु शब्दस्य वृत्तिद्वयं योगो रूढिर्वा । तत्र न जायते इति योगः प्रथमसृष्टौ न सङ्गच्छते, जननात् । रूढिस्तु छाग्याम्, साप्यत्र न सङ्गच्छते, तदाकाराभावात् । अतः कथमजाशब्देन प्रथमसृष्टिप्राप्तिः । साङ्ख्यमते तु प्रधानस्य जननानङ्गीकाराद्योगो निर्बाधः । तस्मात्साङ्ख्यमतमेवादर्तव्यमित्याशङ्कायां समाधिमाह । अत्र हि किंचित्कार्यार्थं परोक्षवादेनाजाशब्दस्तस्यां कल्पनयोपदिश्यते । यथाजावर्करसहिता सवत्सा स्वामिहिता, तथेयं जीवविशिष्टा कार्यवती भगवल्लीलोपयोगायेति भगवतः परोक्षप्रियत्वाच्चेति । तथा च यथा मध्वादिविद्यायां 'असावादित्यो देवमध्वि'त्यादौ (कल्पना, तथैवात्र)। अतो गौण्या तथोपदिश्यते । तस्मान्नाजामन्त्रेण साङ्ख्यमतसिद्धिरित्युक्तम् ॥ २ ॥

ततस्तृतीये त्रिसूत्रे **न सङ्ख्योपसङ्ग्रहाधिकरणे** 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठित'इतिवाक्यं विषयत्वेनोपन्यस्य, तत्र 'पञ्च पञ्चजना' इतिशब्दे पञ्च च ते पञ्च च पञ्चपञ्च, तादृशाश्च ते जनाश्च पञ्चपञ्चजना इत्येवं समस्य, अनेन शब्देन पञ्चविंशतिसङ्ख्यासङ्ग्रहादत्र साङ्ख्यसिद्धानि पञ्चविंशतितत्त्वान्युच्यंते इति साङ्ख्यमतसिद्धिरित्याशङ्क्य निषेधति । अत्रानेन समासेन पञ्चानां समूहानां पञ्चतया तदुक्ता सङ्ख्या सिध्यति, न त्वन्यथा । तेषां तु न समूहाः पञ्च । 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष' इतिभिन्नप्रकारेण सङ्ख्याव्युत्पादनात् । मन्त्रे आकाशस्यात्मनश्च ततोतिरेकेणोक्तत्वाच्च । तस्मान्न तन्मतसिद्धिरिति **प्रथमसूत्र** उक्तम् । ततो **द्वितीयसूत्रे** तर्हि को वा मन्त्रार्थः, किं च, तत्र प्रमाणमित्याकाङ्क्षायां बुद्धेः संशयाद्याः पञ्च वृत्तीर्जनयंतीति पञ्चजनास्तादृशा ये प्राणादयः पञ्च तेत्र पञ्च पञ्चजनशब्देनोच्यंते । अत्र 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदु'रितिवाक्यशेषः प्रमाणम्, 'संदिग्धेषु वाक्यशेषा'दितिन्यायात् । तस्मान्न तन्मतसिद्धिरित्युक्तम् । **ततस्तृतीयसूत्रे** ननु वाक्यशेषे कण्वशाखायां 'अन्नस्यान्न'मिति पाठाभावात् पञ्चवृत्तिजनकानां प्राणादीनां पञ्चसङ्ख्याकत्वं नास्तीति न वाक्यशेषस्य निर्णायकत्वमितिशङ्कायाम्, 'तद्देवा ज्योतिषां ज्योतिर्वायुर्होपासतेऽमृत'मिति पञ्चमस्य ज्योतिषः पाठात्तेन सङ्ख्यापूर्तिरिति वाक्यशेषस्य निर्णायकत्वमक्षुण्णम् । तस्माद्ब्रह्मवाद एवात्र, न साङ्ख्यमतसिद्धिरित्युक्तम् । एवमेतैस्त्रिभिरधिकरणैः श्रुतीनां ब्रह्मणि समन्वयार्थमुपोद्घातेन साङ्ख्यमतस्य श्रौतत्वं निराकृतम् ॥ ३ ॥

अतः परमग्रिमैः श्रुतिविप्रतिषेधं निराकरोति । तत्र **चतुर्थे एकसूत्रे यथाव्यपदिष्टाधिकरणे** ननु श्रुतौ सृष्टिप्रकारा बहुधा दृश्यंते, क्वचिदाकाशादिका, क्वचित्तेजआदिका, क्वचिच्च युगपत् सर्वसृष्टिः । तत्रैकस्य पदार्थस्य नानाप्रकारतया वक्तुमशक्यत्वात्सृष्टिवाक्यानामर्थवादत्वेन ब्रह्मस्वरूपमात्रज्ञापकत्वं वक्तव्यम्, न तु सृष्टौ तत्प्रकारे वा तात्पर्यम् । अतोध्यारोपापवादेन ब्रह्मणस्तटस्थत्वसिद्ध्या न पूर्वोक्तरूपं कारणत्वं सिध्यतीति श्रुतिं विहाय कपिलस्मृत्युक्तप्रकारेणैव जगद्व्यवस्थाङ्गीकार्येत्याशङ्कायाम्, आकाशादिवाक्येषु यद्यपि क्रमादिविप्रतिपत्तिः, तथापि ब्रह्मणः कारणत्वविप्रतिपत्तिर्नास्ति । एकत्र यादृशं ब्रह्मोच्यते तादृशमेव सर्वेषु सृष्टिवाक्येषु कारणत्वेनाभिप्रेयते । क्रमप्रकारादिभेदस्तु माहात्म्यस्यैव सूचकः । तस्मात् श्रुत्यैव निर्णय इति कारणत्वांशे स्मृतिर्न ग्राह्येत्युक्तम् ॥४॥

ततः **पञ्चमे एकसूत्रे समाकर्षाधिकरणे** नतु श्रुतौ क्वचित्सतः कारणत्वमुच्यते, क्वचिदसतः, क्वचिदुभौ निषिध्य तमसः, क्वचिद्व्याकृतस्येत्येवं विप्रतिषेधाद् ब्रह्मणोपि कारणत्वं न सिध्यति । तस्मात्स्मृतिरेव कारणबोधिका ग्राह्येत्याशंकायाम्, असदादिशब्देषु न निरात्मकत्वाद्यर्था उच्यंते, किंतु ततः समाकर्ष्य सर्वैः शब्दैर्ब्रह्मैवोच्यते । सर्वेषां शब्दानां प्रणवविकृतित्वेन प्रणवार्थे एव पर्यवसानात् । प्रणवस्य च ब्रह्मवाचकत्वात् । तस्मान्न विप्रतिषेध इत्युक्तम् । एवं **द्वाभ्यां** श्रुतौ शब्दविप्रतिषेध उपोद्घातेन परिहृतः ॥ ५ ॥

ततः **षष्ठे त्रिसूत्रे जगद्वाचित्वाधिकरणे** कौषीतकिब्राह्मणषष्ठाध्यायस्थं बालाक्यजातशत्रुसंवादं विषयत्वेनोपन्यस्य तत्र किं ब्रह्मसहितो जीवः कर्तृत्वेनोच्यते, उत ब्रह्मैव वेतिसंदेहे, ब्रह्मसहितस्य जीवस्यैव कर्तृत्वमाशङ्क्य, 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्य' इत्यजातशत्रुणा सिद्धांतकथनोपक्रमे एतच्छब्देनादित्यमण्डलादिजडोल्लेखात्पुरुषशब्देन च जीवोल्लेखात् जीवजडात्मकं जगद्यत्कर्तृकं तस्य वेदितव्यत्वकथनेन श्रुत्यंतरसिद्धब्रह्मण एव कर्तृत्वम्, न प्रकृत्यभिमानिजीवस्येति **प्रथमसूत्रे** उक्तम् । ततो **द्वितीयसूत्रे** जीवमुख्यप्राणलिङ्गदर्शनान्न ब्रह्मणः कर्तृत्वमितिसूत्रांशेनाशङ्क्य, अंशांतरेण पूर्वमनुगमाधिकरणे उक्तं समाधानं स्मारयामास । जीवस्य ब्रह्माश्रितत्वान्मुख्यप्राणस्य च ब्रह्मयोगादत्र तथात्वेन कथनं न स्वेन रूपेण । तस्माद्ब्रह्मैव कर्त्रित्युक्तम् । ततस्**तृतीये सूत्रे** प्रकृत्यभिमानिजीवस्य कर्तृत्वमप्यस्मिन् वाक्येऽनभिमतम्, जीवलयोद्गमयोर्ब्रह्मप्रतिपत्त्यर्थत्वात् । प्रश्नव्याख्यानाभ्यां तथावसायात् । वाजसनेयिनामेतत्समानप्रकरणेपि तथावसायाच्चेत्युक्तम् । एवमत्र जीवब्रह्मवादनिराकरणेन जीवविशिष्टा प्रकृतिरेव कारणमित्येतदुपोद्घातेन निराकृतम् ॥ ६ ॥

ततः **सप्तमे चतुःसूत्रे वाक्यान्वयाधिकरणे** जीवब्रह्मवादनिराकरणेन प्रकृतिकारणवादो निराक्रियते । तत्र बृहदारण्यकस्थं मैत्रेयीब्राह्मणद्वयं विषयत्वेनोपन्यस्य, तत्र जीवस्य प्रकरणित्वं ब्रह्मणो वेति संशये, वेदरूपमहावाक्यस्य ब्रह्मण्येवान्वयदर्शनात्, सुखरूपभगवदन्वयेनैव जीवस्यापि प्रियत्वात्, सर्वोपनिषदनुरोधेनास्यापि वाक्यस्य ब्रह्मण्येवान्वयादत्रापि ब्रह्मैवोच्यत इत्युक्तम् । ततो **द्वितीयसूत्रे**ऽस्मिन् वाक्ये ब्रह्मैवोच्यते इत्यत्रान्येषां ब्रह्मवादैकदेशिनां संमतिं वक्तुं प्रथममाश्मरथ्यमतेनाह । तन्मते हि ब्रह्मणा स्वस्य भोगनिष्पत्त्यर्थं विस्फुलिङ्गवत्प्रकटीकृतः स्वांशो जीवः, तेन जीवेनोपक्रमः, तस्यैव प्रियत्वेन संसूचनात्, उपक्रमस्य च बलिष्ठत्वात् जीवात्मैव प्रकरणीति स एव ज्ञेयत्वेनोपदिश्यते इतिशंकायाम्, नात्र जीवात्मनो ज्ञेयत्वेनोपदेशः, किंतु परमात्मन एव । जीवेनोपक्रमस्तु 'आत्मनि वा विज्ञाते सर्वमिदं विज्ञातं भवती'तिप्रतिज्ञायाः सिद्धिः तस्या लिङ्गम्, यदि हि जीवः परमात्मनः सकाशाद्भिन्नः स्यात्, तदा परमात्मज्ञाने तदज्ञानादात्मज्ञानेन सर्वज्ञानप्रतिज्ञा न सिध्येत् । अतस्तदर्थमुपक्रमे जीवः परामृश्यते, न तु प्रकृतिसंसृष्टस्य जीवस्य कारणत्वार्थमित्याश्मरथ्यमतमुक्तम् । ततस्**तृतीये सूत्रे**, यदत्रोपक्रमे गौणप्रियवैराग्यार्थं जीवकथनं, तत्त्वनादिसिद्धस्यापि जीवस्य संसारभावादुत्क्रमिष्यतो मुक्तौ जीवो भगवानेव भविष्यतीति बोधनार्थं लिङ्गम्, न तु प्रकृतिसंसृष्टजीवस्य कारणत्वार्थम् । तस्मान्नात्र प्रकृतिसंसृष्टजीवकारणवाद इत्यौडुलोमिमतमुक्तम् । ततश्**चतुर्थे सूत्रे** कयाचिदवस्थयावस्थितं ब्रह्मैव जीवः । अतः संसारदशायामपि जीवो ब्रह्मैवेति ज्ञापनार्थं तदुपक्रमो, नतु प्रकृतिसंसृष्टस्य जीवस्य कारणत्वार्थमितिकाशकृत्स्नमतमुक्तम् । तस्माद्ब्रह्मैवात्र कारणत्वेनोच्यते ॥ ७ ॥

ततोष्टमे पञ्चसूत्रे **प्रकृतिश्चेत्यधिकरणे** प्रकृतिः समवायिकारणम्, ब्रह्म तु निमित्तादिकारणमित्येवमाशंक्य, प्रकृतिशब्दवाच्यं ब्रह्मैवेति साधितम् । छांदोग्ये एकविज्ञानेन सर्वविज्ञानं यत् प्रतिज्ञातं, मृत्पिण्डादिदृष्टांतत्रयं च यदुक्तं, तदनुपरोधादितिहेतुश्च **प्रथमसूत्रे** उक्तः । तथा च यदि मूलकारणे ब्रह्मणि समवायिकारणत्वरूपं प्रकृतित्वं न स्वीक्रियेत, तदा प्रतिज्ञादिसामञ्जस्यं न स्यात्, अतस्तथेत्युक्तम् । ततो **द्वितीयसूत्रे** सृष्टौ भगवत्कृतमभिध्यानं 'बहु स्यां प्रजायेये'ति स्वस्य बहुरूपत्वेन उच्चनीचभावेन च यद्विचारणं तद्धेतुत्वेनोक्तम् । तेन स्वयमेव तत्तद्रूप इति सिध्यति । किंच, 'सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत' इत्येवमुपासनाप्युपदिश्यते । अतोपि प्रकृतिशब्दवाच्यं ब्रह्मैव । ततस्**तृतीये** 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते । आकाशं प्रत्यस्तं यंती'तिश्रुत्या ब्रह्मणः प्रपञ्चोत्पत्तिलयाधारत्वं साक्षादेवोच्यते । तच्च समवायित्वस्यैव लिङ्गम् । अतोपि प्रकृतिशब्दवाच्यं ब्रह्मैव । ततश्**चतुर्थे** 'तदात्मानं स्वयमकुरुते'तिश्रुतिः **ब्रह्मणः परिणाम**माह । परिणामश्चोपादानसमसत्ताककार्यापत्तिरूपः । अतोपि ब्रह्मैव प्रकृतिशब्दवाच्यम् । ततः **पञ्चमे** ननु जडस्य समवायिकारणं ब्रह्मास्तु, यत्तु चेतनाधिष्ठितं शरीरं तस्य शुक्रशोणितजन्यत्वदर्शनात् तत्र ब्रह्मणो निमित्तत्वम्, प्रधानस्य तु समवायित्वमित्यस्त्वित्याशङ्कायाम्, 'सदेव सोम्येद'–मित्यादिषु सृष्टिबोधकश्रुतिष्ववधारणदर्शनात् ब्रह्मैवोभयरूपम्, अन्यथावधारणविरोधापत्तेः । किंच, 'कर्तारमीशं पुरुषं ब्रह्मयोनि'मित्यादिषु योनित्वमपि ब्रह्मण एवोच्यते, पुरुषत्वं च । तस्मादक्षरपुरुषभावनोभयरूपो भगवानेव, योनिर्बीजं च । अतः कथञ्चिदपि न प्रकृतिप्रवेशः । एवं त्रिभिरधिकरणैरुपोद्घातेनार्थविप्रतिषेधः परिहृतः । अतः साङ्ख्यमतमशब्दमेव ॥ ८ ॥

ततो **नवमेधिकरणे** एकसूत्रे अन्येपि स्मार्ता वादा येषु ब्रह्मणः सर्वविधं कारणत्वं नोच्यते, ते सर्वे अश्रौता एवेत्यतिदिष्टम् । तदेवाग्रिमाध्याये विस्तरेण वक्ष्यते ॥ ९ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां प्रथमाध्यायस्य चतुर्थः पादः ।

प्रथमाध्यायः समाप्तः ।

द्वितीयोध्यायः ।

प्रथमाध्याये सर्वासां श्रुतीनां ब्रह्मणि समन्वयः प्रतिपादितः । स तदा स्थिरो भवति यदा श्रुतीनां **परस्परविरोधः** परिह्रियते, अन्ये **विरुद्धाः स्मार्ता** वादाश्च निराक्रियंते । अतस्तदर्थं **द्वितीयेऽध्याये** श्रुत्यविरोधं प्रतिपादयति, विरुद्धवादांश्च निराकरोति ।

तत्र **प्रथमे पादे युक्त्या** श्रुतिविरोधपरिहारः । ततो **द्वितीयपादे** स्मृतीनां वेदबोधकत्वाभावेपि ताभिः **स्वातन्त्र्येण** कश्चित् पुरुषार्थः सेत्स्यतीत्याशङ्कानिवृत्त्यर्थं बाह्याबाह्यमतान्येकीकृत्य तेषां निराकरणम् । मतैकीकरणं च भ्रान्तेस्तुल्यत्वबोधनार्थम् । **तृतीयपादे** प्रथमं भूतानामुत्पत्तिस्वरूपमुत्पत्तिक्रमश्च विचार्यंते, ततो **जीवात्मस्वरूपं** तद्धर्माश्च । **चतुर्थे** च **इन्द्रियोत्पत्तिक्रम**स्तत्स्वरूपादिकं च विचार्यते ।

तत्र **प्रथमाध्याये** 'अपि स्मर्यते, स्मृतेश्चे'तिकथनेन स्मृतिप्रामाण्याङ्गीकारात् तयैव श्रुत्यर्थनिर्णयः कार्यः, अन्यथा तद्वैयर्थ्यप्रसंग इत्याशङ्कानिवृत्त्यर्थं प्रथमं **सूत्रत्रयेण साङ्ख्ययोगस्मृत्यो**-

र्नित्यानुमेयश्रुतिमूलकत्वाभावाय प्रामाण्यमुपोद्घातेन निराकृतम्। ततः **प्रथमे सूत्रे** साङ्ख्यस्मृतेर्मोक्षैकोपयोगित्वात् तत्प्रामाण्यमङ्गीकृत्य तदनुरोधेनैव श्रुतिविप्रतिषेधः परिहार्यः, अन्यथा तद्वैयर्थ्यप्रसङ्गादितिसूत्रांशेनाशङ्क्य, तत्प्रामाण्याङ्गीकारे 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथे'त्यादिगीतास्मृतिविरोधः। तदप्रामाण्याङ्गीकारे च ब्रह्मकारणत्वबोधकश्रुतिविरोधः। अतो गीतास्मृतिप्रामाण्यमावश्यकम्। तेन श्रुतिविप्रतिषेधनिराकरणे कपिलस्मृतेर्न प्रामाण्यमित्युक्तम्। ततो **द्वितीये सूत्रे** प्रकृतिव्यतिरिक्तानां महदादीनां लोके वेदे चानुपलम्भात् तदुक्तयुक्तीनामप्रयोजकत्वमित्युक्तम्। ततस्तृतीये **सूत्रे** पूर्वोक्तश्रुतिस्मृतिविरोधाद् योगस्मृतिरपि साङ्ख्यवत् प्रधानकारणत्वांशेऽप्रमाणमित्युक्तम्। एतेषु पूर्वपादोक्तस्यैवार्थस्य परामर्शात् तदुपोद्घातगर्भः प्रसंगः संगतिः। एवमग्रेऽपि बोध्यम्। त्रीण्येतानि प्रत्येकमधिकरणानीति भाष्यप्रकाशादवगंतव्यम्॥ १,२,३॥

ततश्चतुर्थे **त्रिसूत्रे न विलक्षणत्वाधिकरणे प्रथमसूत्रद्वयेन** पूर्वः पक्षः। एकेनाग्रे सिद्धांतः। तत्र **प्रथमसूत्रे** चेतनं ब्रह्म जगदुपादानं न भवति, जगतो जडत्वेन ब्रह्मणस्तद्विलक्षणत्वात्। विलक्षणत्वस्य 'विज्ञानं चाविज्ञानं चे'तिश्रौतशब्दादेव प्रतीतेरित्युक्तम्। ततो **द्वितीये सूत्रे** ननु 'मृदब्रवी'दितिश्रुतौ मृदादेर्वक्तृत्वादिकथनेन मृदादिष्वपि चेतनत्वस्य श्रुत्यभिप्रेतत्वात् जगतोपि चेतनतया ब्रह्मसालक्षण्याद् ब्रह्मकार्यत्वमिति सिद्धांतिनाशङ्किते, अत्र मृदाद्यभिमानिनी देवतैव वक्तृत्वादिरूपेण व्यपदिश्यते, 'अन्यथा विज्ञानं चाविज्ञानं चे'तिचेतनाचेतनविभागरूपो विशेषो नोच्येत। 'अग्निर्वाग् भूत्वा मुखं प्राविश'दितिश्रुतौ देवताप्रवेशो वागादिषु नोच्येत। तस्माच्चेतनाचेतनात्मकं जगत् न ब्रह्मोपादेयमिति सूत्रद्वयेन पूर्वपक्ष उक्तः। ततस्**तृतीये** समाधिमाह। कार्यकारणयोर्वैलक्षण्यं लोके गोमयवृश्चिकादौ देहकेशादौ च दृश्यते। अतो विलक्षणत्वेन हेतुना जगति ब्रह्मोपादेयत्वबाधनं न शक्यवचनम्। सदंशस्य कार्यकारणयोस्तुल्यत्वेन सालक्षण्याच्च। तस्मान्न जगतो ब्रह्मकार्यत्वप्रतिषेधः॥ ४॥

ततः **पञ्चमे पञ्चसूत्रे असदिति चेदित्यधिकरणे** असत्कारणत्वसत्कारणत्वबोधकश्रुत्योः परस्परविरोधः परिह्रियते। तत्र **प्रथमे सूत्रे** 'असद्वा इदमग्र आसी'दितिश्रुतावसतः कारणत्वमुच्यते। 'सदेव सोम्येद'मित्यत्र च सतः कारणत्वमुच्यते, तयोः कथं विरोधपरिहार इत्याशङ्क्य, उक्तश्रुतौ 'असदि'ति यत् कथनं तत् छांदोग्ये 'कथमसतः सज्जायंते'ति कथनात् असतः कारणत्वनिषेधार्थम्। यत् पुनस्तैत्तिरीये तथावचनं तत् स्रक्ष्यमाणापेक्षया पूर्वसृष्टस्यासाधुत्वार्थम्, असाधुन्यप्यसदितिप्रयोगात्। कार्यस्थूलरूपसत्ताभावार्थं वा। अतो न श्रुत्योर्विरोध इत्युक्तम्। ततो **द्वितीये सूत्रे** ब्रह्मकारणवादे पूर्वपक्ष उच्यते। ब्रह्मकारणवादे यदा कार्यस्य ब्रह्मणि लयः, तदा कार्यधर्माः परिच्छिन्नत्वाशुद्धत्वादयो ब्रह्मणि भविष्यंतीत्यसंगतं ब्रह्मकारणत्वमित्येवं शंकाकरणात्। ततोग्रिमेषु तत्परिहार उक्तः। ततस्**तृतीये** ब्रह्मकारणवादो नासंगतः। कार्यस्य कारणे लये कार्यधर्मा न कारणे दृश्यंते, शरावरुचकादीनां मृदि लये शरावादिधर्मादर्शनादित्युक्तम्। ततश्चतुर्थे प्रतिबंदी उक्तः। तवापि सत्कार्यवादित्वात्सविशेषस्य कार्यस्य ये धर्माः परिच्छिन्नत्वव्यक्तत्वादयस्ते अव्यक्ते प्रधाने भविष्यंति। अतो न वयं पर्यनुयोक्तव्या इत्युक्तम्। ततः **पञ्चमे** सावद्यतर्कस्याप्रतिष्ठितत्वात्प्रतिवादिना तदनङ्गीकारेण दोषादविमोक इत्युक्तम्॥ ५॥

ततः **षष्ठे एकसूत्रे एतेनेत्यधिकरणे** सांख्यनिराकरणेनान्येपि वादा निराकृता इत्युक्तम्॥ ६॥ इदं कश्चिन्न मनुते अष्टाधिकरण एव पाद इति ब्रूते।

ततः **सप्तमे एकसूत्रे भोक्त्रापत्तेरित्यधिकरणे** ननु प्रलये सर्वस्य कार्यस्य कारणरूपतया एकरूपत्वे जाते पुनरुत्पत्तिदशायां भोग्यस्य स्रक्चंदनादेः भोक्तृत्वापत्तिः, भोक्तुश्चेतनस्य भोग्यत्वापत्तिरित्येवमविभागः स्यादितिसूत्रांशेनाशंक्य, अंशांतरेण समाहितम् । यथा लोके कटकमुपमृद्य रुचके क्रियमाणे कटकत्वं न भवति, तथोत्पत्तिदशायां भोग्यस्य भोग्यत्वेनैवोत्पत्तिः, भोक्तुर्भोक्तृत्वेनैवेति न विभागाभावः । कारणस्य चेतनत्वेन तस्य तस्य तथैवोत्पादनादित्युक्तम् । तेन 'विज्ञानं चाविज्ञानं चे'ति श्रुतौ कार्ये विभागाभावरूपो दोषः परिहृतः ॥ ७ ॥

ततोष्टमे **त्रिसूत्रे तदनन्यत्वाधिकरणे** छांदोग्यस्थे वाचारंभणवाक्ये कार्यस्य कारणाभिन्नत्वं प्रतिपादितम्, न तु कार्यमिथ्यात्वमित्युक्तं **प्रथमसूत्रे** । ततो **द्वितीयसूत्रे** कार्यस्य घटादेर्विद्यमानत्व एवोपलम्भः । नत्वविद्यमानत्वे । अतः श्रुत्यविरुद्धं प्रत्यक्षमपि कार्यस्य कारणानन्यत्वे प्रमाणमित्युक्तम् । ततस्तृ**तीये** प्रपञ्चस्य सदैव सत्त्वम्, 'सदेव सोम्येदमग्र आसी'दित्यादिश्रुतौ परिदृश्यमानबोधकादिदंपदात् । 'तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पव'दितिविष्णुपुराणवाक्याच्च । एवमनेनाधिकरणेन श्रुतिप्रत्यक्षाभ्यां कार्यस्य सदात्मकत्वेन ब्रह्मानन्यत्वं साधितम् ॥ ८ ॥

ततो **नवमे चतुःसूत्रे असद्व्यपदेशाधिकरणे** असत्कार्यवादो निराकृतः । ततः **प्रथमसूत्रे** 'असद्वा इदमग्र आसी'दितिश्रुतौ कार्यमसदितिव्यपदेशात् असत्कार्यवाद आस्थेय इतिसूत्रांशेनाशंक्य, सूत्रांशेन समाहितम् । एतद्वाक्यशेषे 'स आत्मानं स्वयमकुरुते'तिश्रावणात् कार्यस्य प्रागुत्पत्तेरात्मत्वेनैव रूपेण सत्त्वम्, नतु व्याकृतस्वरूपेण । तस्मादसत्त्वमुच्यते, न त्वसत्त्वेनेत्युक्तम् । ततो **द्वितीयसूत्रे** सत्कार्यवादस्थाभिर्युक्तिभिरात्मानमितिशब्दांतराच्च नासत्कार्यवाद आस्थेय इत्युक्तम् । युक्तयस्तु भाष्यप्रकाशादवगंतव्याः । ततस्**तृतीये** पटदृष्टांत उक्तः । यथा पटः संवेष्टितो न तावान् प्रतीयते, तथा कारणे कार्यं सूक्ष्मरूपत्वान्न प्रतीयते, प्रकटं तु प्रतीयत इत्युक्तम् । ततश्चतुर्थे प्राणादिदृष्टांत उक्तः । यथा प्राणादीनां नियमने जीवनमात्रम्, अनियमने त्वाकुञ्चनादिः संभवति, तथा जगदपि कारणे प्रविष्टं सन्मात्रं तिष्ठति, बहिःप्रकटं कार्यं करोति । अतोऽसत्कार्यवादो न प्रामाणिक इत्युक्तम् ॥ ९ ॥

ततो **दशमे त्रिसूत्रे इतरव्यपदेशाधिकरणे** चेतनकारणतायां प्राप्ता दोषाः परिह्रियंते । तत्र **प्रथमे** चेतनस्य जीवस्यापि ब्रह्मत्वात्सृष्टौ तस्य प्रवेशे दुःखित्वादिकं भवति । तच्च ब्रह्मणो हिताकरणत्वादिदोषप्रसक्त्या असंगतमित्याशंक्य, अग्रिमसूत्रद्वये परिहारमाह । तत्र **द्वितीये** ब्रह्म जीवादधिकम्, न तु जीवमात्रम्, तेन तद्दोषेपि न दुष्यति । यथा सुवर्णखण्डस्यान्यमेलनेन दुष्टत्वेपि न सुवर्णस्य दुष्टत्वम्, तद्धिताहितं च करोति, लोके स्वदेहेपि नखनिकृंतनकेशप्रसाधनादिदर्शनात् । जीवपरमात्मनोर्भेदस्तु विज्ञानानंदप्राधान्यभेदात् । आनंदस्याधिक्यं तु भूमविद्यायां तत्रैव ज्ञेयत्वस्य पर्यवसानात् । ततस्**तृतीये** यथा पार्थिवत्वाविशेषेपि हीरकपाषाणयोश्चंदननिंबयोश्च स्वभावभेदः, तथा जीवानामपि । तथा च ब्रह्मवादे लोकन्यायेन प्रत्यवस्थानं नोचितमिति साधितम् ॥ १० ॥

तत **एकादशे षट्सूत्रे उपसंहारदर्शनाधिकरणे** तत्रैकस्यैव ब्रह्मणः सर्वविधकारणत्वे ये दोषास्ते परिह्रियंते । तत्र प्रथमसूत्रे लोके मृत्कुलालचक्रचीवरादीनामुपादानकर्तृनिमित्तांत-

राणां परस्परभिन्नानां दर्शनादेकस्यैव सर्वविधकारणत्वमसंगतमिति सूत्रांशेनाशंक्य, क्षीरं यथा यदा दध्याकारेण परिणमति, तदा नान्यत्किञ्चिदपेक्षते, तथा ब्रह्मापीत्यंशांतरेण समाहितम् । ततो **द्वितीयसूत्रे** यथा देवर्षिपितर इतरनिरपेक्षा योगबलेन सर्वं कुर्वंति, तथा ब्रह्मापीच्छयेति समाधानांतरमुक्तम् । ततस्**तृतीये** ब्रह्मण उपादानत्वे कृत्स्नप्रसक्त्यादिर्दोष आशंकितः । ततश्**चतुर्थे** ब्रह्मणः स्वरूपं कारणत्वं च न लोकगम्यं येनैवमाशंक्येत, किंतु श्रुत्येकसमधिगम्यम् । सा च स्वत एव प्रमाणम् । सा च यथा वदति, तथैवांगीकार्यमित्येवं समाहितम् । ततः **पञ्चमे** ब्रह्मणः सर्वविधकारणत्वेपि देशकालाधिकरणापेक्षा त्वावश्यकीत्याशंक्य, 'परास्य शक्ति'रिति श्रुतेर्ब्रह्मणो विचित्रशक्तित्वाद्देशकालाद्यनपेक्षा युक्ता । 'आत्मन्येवात्मनात्मानं सृजेहमनुपालय' इत्यात्मन्यपि सृष्टिर्युक्तेत्युक्तम् । ततः **षष्ठे** प्रधानकारणवादेपि ते दोषास्तुल्या ये ब्रह्मकारणवादे दीयंते । तस्मात्पर्यनुयोगो न युक्त इत्युक्तम् ॥ ११ ॥

ततो **द्वादशेष्टसूत्रे सर्वोपेता इत्यधिकरणे** भगवतः कर्तृत्वे दोषान् परिहरति । तत्र 'स विश्वकृ'दिति श्रुतौ कर्तृत्वं बोध्यते, निर्वाहकाभावे तत्कथं संगच्छत इत्याकांक्षायां **प्रथमसूत्रे** सर्वशक्तियुक्तत्वं साधितम् । ततो **द्वितीये सूत्रे** ब्रह्मणो निरिंद्रियकत्वात्कथं कर्तृत्वम् । ततस्**तृतीयसूत्रे** ब्रह्मणः प्रयोजनाभावात्किमर्थं कर्तृत्वमित्येवमाशंकितम् । ततश्**चतुर्थे** लोकवल्लीलया समाहितम् । ततः **पञ्चमे** ब्रह्मणः सृष्टिकरणे जीवानां सुखदुःखसंभवात् वैषम्यनैर्घृण्ये स्यातामित्याशंक्य, जीवकर्मसापेक्षत्वान्न ब्रह्मणि दोष इत्युक्तम् । कर्मसापेक्षत्वेपि नेश्वरत्वहानिरिति चोक्तम् । ततः **षष्ठे** जीवानां प्रपञ्चप्रलयदशायां ब्रह्माविभागात्कथं कर्मसत्तेति[1] सूत्रांशेनाशंक्य, बीजाङ्कुरवत्प्रवाहानादित्वादिति सूत्रांशेन समाहितम् । ततः **सप्तमे** उपपत्त्या श्रुतिस्मृत्योस्तदुपलम्भाच्च जीवस्यानादित्वं समर्थितम् । ततो**ष्टमे** ब्रह्मणः सर्वसमर्थत्वात्सर्वं संगच्छत इत्युक्तम् । एवं चास्मिन्पादे पूर्वाध्यायचतुर्थपादस्थितं हृदिकृत्य सर्वं चिंतितम् । तेन बुद्धिस्थानात्मकोपोद्घातात्तद्गर्भः प्रसंगः संगतिरिति ॥ १२ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य प्रथमः पादः ॥

अथ **द्वितीयपादे** वेदविरुद्धा बाह्या अबाह्याश्च स्मृतयो दूष्यंते, तासां न परमफलसाधकत्वमिति ज्ञापनार्थम् ।

तत्र **प्रथमे षट्सूत्रे रचनानुपपत्तेरित्यधिकरणे** प्रधानस्य कर्तृत्वं दूष्यते । तत्र **प्रथमसूत्रे** अचेतनस्य प्रधानस्य बुद्धिपूर्वकक्रियारूपा या रचना सा नोपपद्यते, प्रधानस्याचेतनत्वेन क्रियाकारणभूताया बुद्धेस्तत्र वक्तुमशक्यत्वादित्युक्तम् । ततो **द्वितीये सूत्रे** लोकरचना यथा केवलादचेतनान्नोपपद्यते, तथा शुक्रशोणितजन्या शरीररचनापि । तत्र मातापित्रोरुभयोश्चेतनयोः प्रवृत्तिदर्शनात्, अचेतने केवले तादृशप्रवृत्त्यदर्शनादित्युक्तम् । ततस्**तृतीये** ननु केवलाचेतनेपि दुग्धे फेनरचनादयो विचित्रा दृश्यंते, तादृशे नदीजले च स्पंदनादयः । तद्दृष्टांतेनाचेतनस्य केवलस्य प्रधानस्यापि रचनाकर्तृत्वं प्रवृत्तिश्चास्त्विति सूत्रांशेनाशंक्य, अंशांतरेण समाधत्ते । तत्रापि दोह-

---

१. कर्मसत्तेति मूले पाठः ।

नाधिश्रवणयोश्चेतनकर्तृकयोर्निमित्तत्वेन दर्शनात्। नदीजले च मेघानां चेतनानां निमित्तत्वेन दर्शनादित्युक्तम्। ततश्चतुर्थे एवं त्रिभिः सूत्रैः केवलप्रधानस्य कर्तृत्वं दूषयित्वा केवलस्य तस्य परिणामं दूषयति। केवलं प्रधानं चेत् स्वतः परिणमेत, सर्वदैव परिणमेत्, तथा सति प्रलयो न स्यात्। गुणाश्च साम्यावस्थयावस्थिताः स्वत एव संक्षुभ्येरन्, तदा सृष्टिस्थितिप्रलया युगपदेव स्युः, कार्यं च सात्त्विकादिभेदेन न विभज्येतेत्युक्तम्। ततः पञ्चमे ननु तृणपल्लवादयः पशुभक्षिताः स्वभावादेव क्षीरभावेन परिणमंते इत्याशंकायां समाधीयते। यदि तृणादिकं स्वभावत एव क्षीरभावेन परिणमेत, तदा शृङ्गेपि क्षीरं लभ्येत, तत्तु न लभ्यते, धेन्वादिकृता भक्षणक्रिया च तत्र सहकरोतीति न केवलस्य प्रधानस्य परिणामः शक्यवचन इत्युक्तम्। ततः षष्ठे 'तुष्यतु दुर्जन' इति न्यायेन केवलस्य प्रधानस्य परिणाममभ्युपगम्य पुनर्दूषयति। यदि केवलस्य प्रधानस्य परिणामोऽभ्युपगम्यते, तदापि स किमर्थः। न च पुरुषार्थ इति वक्तव्यम्। प्रयोजनप्रेक्षापूर्वकप्रवृत्तेश्चेतनधर्मत्वेन केवले प्रधाने सा न वक्तुं शक्यते। तस्माद् दूषणतादवस्थ्यम्। एवमनेनाधिकरणेन केवलप्रधानकारणवादो निराकृतः॥ १॥

ततो **द्वितीये चतुःसूत्रे पुरुषाश्मवदित्यधिकरणे** पुरुषप्रेरितप्रधानकारणवादो निराक्रियते। पंग्वारूढोन्धो यथा गच्छति, तथा पुरुषाश्लिष्टं तत्प्रेरितं प्रधानं महदादिसृष्टिं करोतीत्येकं मतम्। अन्यच्च, यथा अयःकान्तसन्निधौ लोहस्य क्रिया, तथा पुरुषसन्निधानमात्रेण प्रधानस्य महदादिकर्तृत्वमिति द्वितीयम्। तत्पुनः सूत्रांशेनाशंक्य, अंशांतरेण दूषयति। प्रधानपुरुषयोर्व्यापकत्वेन संसर्गस्य सन्निधेश्च सार्वदिकत्वात्पूर्वोक्तदोषस्तदवस्थः। अनिर्मोक्षश्चाधिकः। तस्मान्मतद्वयमप्यसंगतमिति पूर्वसूत्रे उक्तम्। ततो **द्वितीयसूत्रे** प्रधानपुरुषयोर्मध्ये किं पुरुषस्यांगित्वं प्रधानस्य वा। तत्र नाद्यः, सर्वेषां पुरुषाणां समत्वेनैकस्य नियामकत्वम्, नान्येषामिति विभागो न स्यात्। न द्वितीयः, स्वतन्त्रेण प्रधानेन पुरुषाय स्वदोषा न प्रदर्शनीयाः। तथा सति दुःखाभावेन वैराग्याभावात् मोक्षार्थं प्रयत्न उच्छिद्येत। तस्मादंगित्वमनुपपन्नमित्युक्तम्। ततस्तृतीये ननु गुणा एवं विभागशः प्रवृत्तिमंतः, चलस्वभावत्वात्, चलदलदलवदित्येवमनुमाने पूर्वोक्ताः सर्वे दोषाः निराकृताः स्युरित्याशङ्क्य, तत्र दूषणमाह। एवं प्रकारांतरेणानुमितावपि न दोषपरिहारः, कार्यक्रमानुपपत्त्यादिदूषणग्रासात्। नहि गुणैः कालो ज्ञायते, येन प्रथमं रजः क्षुभ्यति, ततः सत्त्वम्, ततस्तम इति। अतो गुणेषु ज्ञानशक्तिवियोगात् सर्वमसमञ्जसमित्युक्तम्। ततश्चतुर्थे सांख्यमतवर्तिनां नानाविधानि मतानि लोके दृश्यंते। एकादशस्कंधे उद्धवप्रश्ने भगवता चानूदितानि। अतः परस्परविरोधादपि तन्मतमसंगतमित्युक्तम्। एवं दशभिः सूत्रैरधिकरणद्वयेन प्रधानकारणवादो निराकृतः॥ २॥

ततस्तृतीये **सप्तसूत्रे महद्दीर्घवद्वेत्यधिकरणे** न्यायवैशेषिकादिमतमवसरसंगत्या दूष्यते। ते हि परमाणूनां समवायित्वमंगीकृत्य, ईश्वरकृतात्तत्संयोगाद्भूतादिसृष्टिमंगीकुर्वंति। तत्र संयोगप्रकारो दूष्यते। परमाणूनां स्वरूपं ह्रस्वं परिमण्डलं च। तयोर्यद्युपर्युपरि संयोगः, तदा कार्यं यष्टिवन्महत्स्यात्। यदि तिर्यक्, तदा नौकादिवद्दीर्घं स्यात्। पुञ्जसंयोगस्तु तैर्नेष्यते। अतस्तन्मतमसंगतमिति प्रथमसूत्रेणोक्तम्। ततो **द्वितीयसूत्रे** परमाणुद्वयसंयोगः सार्वदेशिको वैकदेशिको वा। नांत्यः। प्रदेशांगीकारे प्रदेशवत्त्वस्य सावयवत्वव्याप्यत्वात्परमाणोः सावयवत्वमनित्यत्वं चापद्येत। नाद्यः। संयोगस्याव्याप्यवृत्तित्वनियमात्। किंच, कर्मजोऽवयवजश्च संयोगो द्विविधः।

तत्र निरवयवत्वान्नावयवज इत्युक्तम् । अथ कर्मजः । तत्र किं स्वभावादुत्पद्यते, ईश्वरसिसृक्षया वा । तयोरुभयोरपि नित्यत्वात्सर्वदा सृष्टिप्रसंगः । तस्मान्न स वक्तुं शक्यते इत्युक्तम् । ततस्तृतीये समवायो दूष्यते । स हि संबंधः, संबंधिद्वयनिरूप्यः । तथा सति द्व्यणुकस्य पूर्वमभावेन स कथं वक्तुं शक्यत इत्युक्तम् । ततश्चतुर्थे, किंच, परमाणोः समवायिन ईश्वरेच्छाजीवादृष्टयोर्निमित्तयोश्च सृष्टिप्राक्काले सत्त्वात् सामग्रीसमवधानजन्यस्य परमाणुकर्मणस्तज्जन्यस्य संयोगस्य च सर्वदा आपत्त्या तयोरपि नित्यत्वापत्तिरित्युक्तम् । ततः **पञ्चमे** परमाणुनित्यत्वं दूष्यते । परमाणुषु तै रूपाद्यंगीक्रियते । यच्च रूपादिमत्, तदनित्यं लोके दृष्टम् । अतः परमाणुरनित्य इत्युक्तम् । ततः **षष्ठे** यदि परमाणुषु रूपादिकं नांगीक्रियते, तदा द्व्यणुकादिषु रूपाद्यभावापत्तिः । कारणगुणाः कार्यगुणारंभका इति तन्नियमात् । अतो रूपाद्यंगीकारे तदनंगीकारे च दोषादसंगतः परमाणुकारणवाद इत्युक्तम् । ततः **सप्तमे** सर्ववैदिकानादृतत्वादप्यसंगतः परमाणुकारणवाद इत्युक्तम् ॥ ३ ॥

ततश्चतुर्थे **दशसूत्रे समुदाय उभयहेतुकेपीत्यधिकरणे** । एकोनविंशतिसूत्रैर्बौद्धमतान्यवसरसंगत्या निराक्रियंते । तत्र सौगताश्चतुर्विधाः वैभाषिकसौत्रांतिकविज्ञानवादिमाध्यमिकभेदात् । तत्र पूर्वं वैभाषिकमतं निराक्रियते । तेषां मते समुदायद्वयं जीवभोगार्थं संहन्यते । तत्र पृथिव्यादिपरमाणुसमुदाय एकः । रूपादिस्कंधसमुदायश्चापरः । रूपविज्ञानवेदनासंज्ञासंस्कारनामकाः पञ्चस्कंधाः । तदुभयसंबंधे जीवस्य संसारः, तदपगमे मोक्ष इति तेषां मतं प्रथमसूत्रे दूषयति । जीवस्य क्षणिकत्वेन तदुभयसमुदायाप्राप्तिः, तेन तदुक्तः संसारप्रकारो मोक्षश्चासंगत इत्युक्तम् । ततो **द्वितीये** क्षणिकत्वदूषणपरिहारं सूत्रांशेनोद्भाव्य, अंशांतरेण दूषयति । तन्मते प्रत्ययः कारणसमुदायः । तत्र संस्कारः । सर्वक्षणिकत्वेपि मध्यपातिभ्योऽविद्यादिभ्यः स्कंधप्रत्ययेभ्यो जन्मादयः जन्मादिभ्यः प्रत्ययेभ्यश्चाविद्यादय इत्येवं चक्रवत्परिवृत्तावपि न कारणव्यक्तिं प्रति कार्यव्यक्तेः प्रत्ययता, किंतु पूर्वपूर्वप्रत्ययस्योत्तरोत्तरप्रत्ययं प्रति कारणत्वम् । उत्तरोत्तरक्षणिकविज्ञानसंततेरेव जीवत्वम्, तादृशार्थं संततेरेव जडत्वम् । अतः क्षणिकविज्ञानसंतत्यात्मकस्य जीवस्य क्षणिकार्थं संतत्यात्मकसविषयेन्द्रियशरीराख्यरूपस्कंधसंबंध इति संसारः । रागादिरूपसंस्कारस्कंधविरामादेव तदभावरूपो मोक्षः । अतो न काप्यनुपपत्तिरितिसूत्रांशेनाशंक्य, अंशांतरेण तद्दूषयति । ये हि प्रत्यया उक्तास्ते सदृशीं संततिमुत्पाद्य नश्यंति । तथा सति विज्ञानसंततिरूपस्य जीवस्य पूर्वकालीनप्रियाप्रियसंस्पर्शाननुसंधानात् कथं वेदनादिस्कन्धात्मसंसारसिद्धिः, कथं च तदभावसिद्धिः, स्थिरस्य कस्याप्यभावात् । तस्मादसंगतं तन्मतम् । **ततस्तृतीये** । किंच, तन्मते स्थितिक्षणस्याभावात्प्रथमक्षणे उत्पत्तिः, द्वितीयक्षणे नाश इति प्रत्ययत्वस्यैवासंभवः, संघातस्य चासंभव इत्युक्तम् । एवं त्रिभिः सूत्रैः पुञ्जस्य कारणता दूषिता । **ततश्चतुर्थे** । असत्ये हेतौ फलोत्पत्तिरित्याकस्मिकत्वपक्षं दूषयति । तेषां हि प्रतिज्ञाद्वयम् । एका तु सर्वं क्षणिकमिति प्रतिज्ञा । द्वितीया तु आलंबनप्रत्ययसमनंतरप्रत्ययाधिपतिप्रत्ययसहकारिप्रत्ययाख्यांश्चतुर्विधान् हेतून् प्राप्य विज्ञानस्कंधात्मकं चित्तं वेदनास्कंधात्मकाश्चैत्ता उत्पद्यंत इति । तत्र द्वितीयांगीकारे वस्तुनः क्षणांतरसंबंधात्प्रथमप्रतिज्ञा नश्यति । द्वितीया चेन्नांगीक्रियते, तदा प्रतिनियतहेत्वभावात्सर्वं सर्वतो युगपदेव स्यात् । तस्मात्तदसंगतमित्युक्तम् । ततः **पञ्चमे** एवं तदुक्तमुत्पत्तिप्रकारं दूषयित्वा नाशप्रकारं दूषयति च । तत्र तेषां मते पञ्चपदार्थाः । एनं नाशयामीति बुद्धिपूर्वको विनाशः प्रतिसंख्यानिरोधः । तां विना यो नाशः स अप्रतिसंख्यानिरोधः । आकाशश्च । एतत्त्रयं निरूपाख्यम् । अवस्त्वित्ति

यावत् । तत्राकाशस्वरूपं तद्दूषणसूत्रे वाच्यम् । क्षणिकं संस्कृतं चेति पञ्च । तत्र क्षणिकं संस्कृतं चेति द्वयं पूर्वसूत्रेषु दूषितम् । अधुना निरोधद्वयं दूष्यते । तन्मते पदार्थाः सर्वे क्षणिकाः सदृशसंतानजननस्वभावाः । क्षणिकानां च नाशकसंबंधो न पूर्वदृष्ट इत्यन्त्यानामपि पदार्थानां नाशकसंबन्धाभावात्पूर्ववदेव संततिप्रतिबंधाभाव इत्यविच्छेदादित्युक्तम् । एवमत्र कार्यविचारेण निरोधद्वयं दूषितम् । ततः **षष्ठे** तद्द्वयस्वरूपविचारेण तद्दूषयति । तत्र वैभाषिकाः सौत्रांतिकाः योगाचाराश्च उक्तनिरोधैकदेशभूतेऽविद्याविनाशे मोक्षस्तद्दर्शनोक्तरीतिको भवतीति मन्यंते । तदसंगतम् । अविद्या(या)निर्हेतुके नाशेंगीक्रियमाणे तन्मतीयसाधनविधायकशास्त्रवैफल्यम् । सहेतुकनाशांगीकारे निर्हेतुकत्वप्रतिज्ञाहानिरित्युभयथापि दोष इत्युक्तम् । एवं सूत्रद्वयेन तदुक्तनाशप्रकारो दूषितः । ततः **सप्तमे** आकाशं दूषयति । तेषां मते आवरणाभाव एवाकाशः । सोपि निरूपाख्यः । तादृशेपि भूतांतरवद्वस्तुत्वव्यवहारस्याविशिष्टत्वात् । अत्र गृध्रः, अत्र श्येन इत्यादिव्यवहारस्य तत्रापि दर्शनात् । अवकाशरूपेण प्रत्यक्षत्वाच्चावस्तुत्वमसंगतमित्युक्तम् । ततोऽ**ष्टमे** पुनः संक्षेपेण क्षणिकवादं निराकरोति । सर्वत्र स एवायमिति प्रत्यभिज्ञा दृश्यते । क्षणिकत्वे तु तस्य नष्टत्वात्कालान्तरे प्रत्यभिज्ञा बाध्येत । तस्मादसंगतः क्षणिकवाद इत्युक्तम् । ततो **नवमे** तदभिमतामभावाद्भावोत्पत्तिं निराकरोति । ते हि बीजोपमर्दं विनांकुरोत्पत्तिं, दुग्धोपमर्दं विना दध्युत्पत्तिमपश्यंतो नष्टेभ्य एव बीजादिभ्यस्तत्तदुत्पत्तिं पश्यंतः केवलादभावादेव भावोत्पत्तिं मन्यंते । तथाचालीकादेवोत्पत्तिरिति सिध्यति । तदसंगतम् । दृष्टविरोधात् । यदि ह्यलीकादभावादेव केवलात्कार्यं स्यात्तदा बीजाद्दधि स्यात्, दुग्धादंकुरं च । तत्तु न दृश्यते । तस्मान्नाभावाद्भावोत्पत्तिरित्युक्तम् । ततो **दशमे** यद्यभावादेव सर्वं स्यात्, तदा तस्य सर्वत्र सुलभत्वात् कृषिहलादिसाधनरहितानामपि धान्यादिः सिध्येत् । तत्तु न दृश्यते । अतोपि नाभावाद् भावोत्पत्तिरित्युक्तम् । एवं दशभिः सूत्रैः वैभाषिकसौत्रांतिकयोर्मतं निराकृतम् ॥ ४ ॥

ततः **पञ्चमे पञ्चसूत्रे नाभाव उपलब्धेरित्यधिकरणे** कारणांशे पूर्वं निराकृतोपि विज्ञानवादी कार्यांशे निराक्रियते । विज्ञानवाद्येव योगाचारः । स हि बाह्यं प्रपञ्चं नीलं पीतं घट इत्येतत्सर्वं विज्ञानाकारं मन्यते, न तु बाह्यार्थोस्तीति । अनादिवासनयैव च भासत इति तन्मतम् । एवं यस्तेन बाह्यार्थाभाव उक्तः, स न युक्तः । यदि सर्वं ज्ञानाकारमेवानादिवासनया भासेत, तदा वासनाया अन्तः विद्यमानत्वात् सर्वं सर्वदा सर्वत्र भासेत । तत्तु नास्ति । अतः कदाचित्क्वचिदुपलंभात् बाह्यार्थोस्तीति मंतव्यमित्युक्तम् । ततो **द्वितीये** उपलब्धिमात्रेण वस्तुसत्त्वं चेत्तदा स्वप्नमायाभ्रमादिषु ये उपलब्धास्तेपि सत्याः स्युः । तस्मान्नोपलब्धिमात्रेण वस्तुसत्त्वं वक्तुं शक्यमित्याशङ्क्य निराकरोति । बाह्यः प्रपञ्चः स्वप्नादिविलक्षणः, बहुकालस्थायित्वात् । नहि तथा स्वप्नादिषु दृश्यते । तस्मात्तद्दृष्टान्तोप्यसङ्गत इत्युक्तम् । ततस्**तृतीये** यत्तैर्बाह्यार्थं विनैव वासनया ज्ञानवैचित्र्यमंगीक्रियते, तत्र बाह्यार्थं विना वासनैवानुपपन्ना, बाह्यार्थस्यैव वासनाजनकत्वात् । तस्य च तन्मतेऽभावादित्युक्तम् । ततश्**चतुर्थे** वासनाया आधारभूतस्य, अहमित्याकारो रूपादिविषय इंद्रियादिजन्योयं क्षणिकविज्ञानसंतानः कर्ता भोक्तेत्यभिमानवान् आलयविज्ञानाख्यः, तस्य क्षणिकत्वाद्वासनायाः आधारोपि न वक्तुं शक्यः । तस्मादपि तन्मतमसङ्गतमित्युक्तम् । ततः **पञ्चमे** सर्वथानुपपन्नत्वादपि तन्मतमसंगतम् । तेन माध्यमिकोप्यसंबद्धभाषित्वादुपेक्षित इत्यपि सूचितम् । एवं पञ्चदशभिः सौगता निराकृताः ॥ ५ ॥

ततः षष्ठे चतुःसूत्रे नैकस्मिन्नसंभवादित्यधिकरणे विवसनस्य स्याद्वादिनो निराकरणम् । स हि स्यादस्ति, स्यान्नास्ति, स्यादस्ति नास्ति, स्याद्वक्तव्यः, स्यादस्ति चावक्तव्यः, स्यान्नास्ति चावक्तव्यः, स्यादस्ति नास्ति चावक्तव्य इत्येवं सप्तभंगीं मन्यते । सप्तभंगी नाम सप्तानां भंगानां समाहारः । सा च सार्वत्रिकी । तदिदं प्रत्यक्षविरुद्धम् । न ह्यस्तिनास्त्यादिभंग एककालं सर्वेषां दर्शनगोचरीभवतीति । तस्मादसंभवन्नसंगतः । किंचेयं सप्तभंगी सार्वत्रिकीति तदुक्तसाधनेषु तदुपदेष्टृषु तीर्थंकरेषु तदुक्ते मोक्षरूपे फले चानुवर्तमाना सर्वेष्वेव तदुक्तेष्वनास्वासं जनयतीत्यतोऽप्यसंगतस्तद्वाद इत्युक्तम् । ततो द्वितीयसूत्रे तदुक्तमात्मस्वरूपं दूष्यते । स हि आत्मानं कृत्स्नं मन्यते । सृष्टिं च परमाणुभ्योंऽगीकरोति । मोक्षे च निरावरण आत्मा तिष्ठतीति । तदिदं दूष्यते । परमाणुभ्य एव सृष्ट्यंगीकारेणात्मनो वस्तुपरिच्छेदांगीकारादकार्त्स्न्यं सर्वत्वं न भवति । तथा च मोक्षदशायामवलोकाकाशवर्तित्वेन तत्कृतावरणसंभवान्निरावरणप्रतिज्ञाहानिः । किंच, सर्ववस्तुष्वात्माभावादात्मनामस्तिकायत्वप्रतिज्ञाहानिश्चेत्यर्थ इत्युक्तम् । ततस्तृतीये तदभ्युपगतो देहपरिमाणात्मवादो दूष्यते । स हि देहपरिमाण आत्मेति मन्यते । सूक्ष्मदेहे सूक्ष्मः । स एव स्थूलदेहे स्थूल इति । एवं पर्यायेण तत्तत्परिमाणांगीकारे अवयवोपचयापचयाभ्यामात्मनोपि विकारापत्तिः । संकोचविकाशेपि विकारस्य दुःपरिहारत्वादित्युक्तम् । ततश्चतुर्थे तदुक्तमात्मपरिमाणमेव दूष्यते । स हि मोक्षावस्थावस्थितजीवस्य परिमाणं नित्यं वदति । तदग्रे देहाभावात् । संसारावस्थायां त्वनित्यम् । तथा सति संसारावस्थायां चार्वाकवदात्मन अनित्यत्वापत्तिः । तथा सति मोक्षः कस्य स्यात् । अतः संसारावस्थायामपि तस्य नित्यं परिमाणमंगीकार्यम् । अणु वा महद्वा । तथा सति देहपरिमाणात्मवादस्त्वसंगत इत्येवं दूषितमित्युक्तम् ।

एतेषु षट्स्वप्यधिकरणेषु ब्रह्म जगदुपादानं न वेति संदेहः, तत्तन्मतविरोधः संदेहबीजम्, नेति पूर्वः पक्ष, सर्वसमयानामयुक्तत्वाद् ब्रह्मैवोपादानमिति सिद्धांतो ज्ञेयः । षष्ठे तु ब्रह्मैव विरुद्धधर्माधारम्, नेतरदिति नियमो युक्तो न वेति संदेहे, स्याद्वादिभिः सर्वत्र तथाभ्युपगमान्नेति पूर्वः पक्षः, स्याद्वादस्यासंगतत्वाद्ब्रह्मैव तथेति नियमो युक्त एव, श्रुत्या भक्तप्रत्यक्षेण च प्रमितत्वादिति सिद्धांत इति प्रकारांतरमधिकं ज्ञेयम् ॥ ६ ॥

ततः सप्तमे पंचसूत्रे पत्युरसामंजस्यादित्यधिकरणे नैयायिकवैशेषिकहैरण्यगर्भपातंजलकापालिककालामुखपाशुपतैशवा ईश्वरस्य निमित्तमात्रत्वं मन्यंते, न तूपादानत्वम्, तद्दूषयति । यदीश्वरः निमित्तमात्रं स्यात्तदा केषांचित्सुखं केषांचिद्दुःखं ददद्विषमो निर्घृणश्च स्यात् । अतो सामंजस्यात्तन्मतमसंगतम् । ततो द्वितीये तन्मते जीवब्रह्मणोर्विभुत्वादजसंयोगस्य वक्तुमयुक्तत्वेन पतित्वानुपपत्तिः । यजि च संबंधोंगीक्रियेत, तदापि विभुत्वनित्यत्वाभ्यां तुल्यत्वापत्त्या नियम्यनियामकभावानुपपत्तेः संबंधानुपपत्तिरित्युक्तम् । ततस्तृतीये ईश्वरः शरीरं किंचिदाधारं चाधिष्ठाय करोति, तद्विना वा । आद्ये तन्नित्यमनित्यं वा । आद्ये परमाणुपुंजरूपस्य तस्य कार्यानिर्वाहकत्वम्, अवयवित्वाभावात् । द्वितीये तु जन्यत्वम् । तथा सति तत्कर्तुर्निर्वक्तुमशक्यत्वादनवस्थापत्तिः । अथाशरीर एव करोतीति मतम्, तदा तु मुक्तानामिव तस्यापि कर्तृत्वानुपपत्तिः । अतोधिष्ठानानुपपत्त्या तन्मतमसंगतम् । ततश्चतुर्थे यथा जीवोऽशरीर एवेंद्रियादीनि करणान्यधितिष्ठति, नियमयति, तथेश्वरोप्यशरीर एव जीवान् नियमयिष्यतीति सूत्रांशेनाशंक्य, सूत्रांशेन समाहितम् । यदि जीवदृष्टांतेन तथांगीक्रियते, तदा तद्दृष्टांतेनैव तस्य सुखदुःखभोगाद्यापत्तिः । (ततः पंचमे तैर्जड-

जीवनियमनार्थं हीश्वरोभ्युपगम्यते । नियमनं चेयत्तायां संभवति । ततश्च तेषामियत्तापत्तिः । तथा सति तेषामंतवत्त्वम् । इयत्तापरिच्छिन्नेषु घटादिष्वंतवत्त्वस्य दृष्टत्वात् । एतद्दोषपरिहाराय जीवानां व्यापकत्वमसंख्येयत्वं चांगीक्रियते, तदा असंख्येयत्वस्य सर्वाज्ञेयत्वनियमात् सर्वतद्विषयकज्ञानस्येश्वरेऽभावेनासर्वज्ञता स्यात् ।) तदनापत्तौ नियामकाभावादित्युक्तम् । तेनेश्वरविषयेपि तन्मतमसंगतमित्युक्तं भवति ॥ ७ ॥

ततोष्टमे **चतुःसूत्रे उत्पत्त्यसंभवादित्यधिकरणे** पाञ्चरात्रमते योंशो हि श्रुतिविरुद्धः सोंशो दूष्यते । पंचरात्रस्य भगवत्प्रणीतत्वेपि तावतोंशस्य बुद्धिपूर्वकमेव गौतमशप्तानामृषीणामर्थे स्थापनात् । सोंशस्त्वयम् । ते हि परब्रह्मणो वासुदेवात् संकर्षणस्य जीवस्य, तस्मात्प्रद्युम्नस्य मनसः, ततोऽनिरुद्धस्याहंकारस्योत्पत्तिं वदंति । तेषां चतुर्णां व्यूहतां च वदंति । तदेतच्छ्रुतिविरुद्धम् । एवमुत्पत्तौ व्यूहत्वासंभवात् । व्यूहत्वे चैवमुत्पत्त्यसंभवात् । जीवोत्पत्तौ मोक्षस्याप्यसंभवात् । तस्मादयमंशो विरुद्ध इति पूर्वसूत्रे दूषितः । ततो **द्वितीये** संकर्षणात्प्रद्युम्नोत्पत्तिर्दूष्यते । कर्तुर्जीवात् करणस्य उत्पत्तिर्लोकविरुद्धा; मनसः करणादहंकारोत्पत्तिरपि तथा । अतः प्रद्युम्नादनिरुद्धोत्पत्तिरप्यसंगता । ततस्**तृतीये** तेषां सर्वेषां परमेश्वरत्वं चेदंगीक्रियते, तदा अनेकेश्वरत्वापत्तिरित्युक्तम् । ततश्च**तुर्थे** शांडिल्यश्चतुर्षु वेदेषु परं श्रेयः अलब्ध्वा इदं शास्त्रमधीतवान् । तथा तप्तचक्रादिधारणं च तत्र विहितम् । तदेतच्छ्रुतिविरुद्धम् । तप्तचक्रादिधारणस्य पुराणेषु शूद्रधर्मत्वेनोक्तत्वात् । वेदेषु परमश्रेयोलाभाभावकथनस्यापि तथात्वात् । तस्मादेतत्सूत्रचतुष्टयोक्तं दूष्यं यत् तद्वेदविरुद्धम् । एवं स्मृतिषु वेदविरुद्धांशदूषणेन सर्वाण्येव वेदविरुद्धानि शास्त्राण्युपलक्षणविधया दूषितानि ज्ञेयानि ॥८॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य द्वितीयः पादः ॥

अथ ततस्तृतीये पादे पूर्वं क्रमसृष्टौ भूतोत्पत्तिप्रकारस्तत्स्वरूपं च विचार्यंते ।

तत्र **प्रथमे सप्तसूत्रे न वियदित्यधिकरणे** आकाशोत्पत्तिर्विचारिता । तत्र छांदोग्ये तेजआदिका सृष्टिः, तैत्तिरीयके आकाशादिका, तत्रासृजतेति पदाभावादाकाशस्योत्पत्तिः संदिग्धा । तत्र **प्रथमसूत्रे** आकाशस्योत्पत्तिः छांदोग्ये न श्रूयते। तस्मान्नोत्पत्तिरित्याशंकितम् । ततो **द्वितीये** तैत्तिरीये द्वितीये सृष्टिप्रकरणे 'इदं सर्वमसृजते'ति श्रावणात् पूर्वं 'चात्मन आकाशः संभूत' इति कथनादस्त्युत्पत्तिरित्युक्तम् । तेन छांदोग्येपि तत्सृष्टिरनुमातव्येति सिध्यति । ततस्**तृतीये** आकाशस्य निरवयवत्वेन व्यापकत्वेन चाकाशस्योत्पत्तिर्न संभवति । तस्मादाकाशोत्पत्तिर्गौणीत्याशंकितम् । ततश्च**तुर्थे** 'वायुश्चांतरिक्षं चे'ति श्रुतावमृतत्वश्रवणादपि नोत्पत्तिः संभवतीत्युक्तम् । ततः **पंचमे** ननु तैत्तिरीये संभूत इतिपदस्य सर्वत्रानुवृत्तिदर्शनादेकत्र गौणी, अन्यत्र मुख्या, संभूतिपदस्य वृत्तिरिति न वक्तुं शक्यम् । युगपद्वृत्तिद्वयविरोधादित्याशंक्य, यथा 'तपसा ब्रह्म विजिज्ञासस्व, तपो ब्रह्मे'तिश्रुतौ एकस्यैव ब्रह्मशब्दस्यैकत्र मुख्या, तपसि गौणी, तथात्रापि पदावृत्त्या विरोधाभावो भविष्यतीत्युक्तम्। एवं त्रिभिः सूत्रैः पूर्वपक्षमुक्त्वा, **षष्ठे सप्तमे** च समाधानमाह । तत्र स्यादेवं यदि छांदोग्योक्ता एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा न बाध्येत । तत्रैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टांते कार्यकारणभावेन तद्व्युत्पादितम् । तदनंगीकारे तद्बाध्येत । तस्मादाकाशोत्पत्तिरंगीकार्यैवेत्युक्तम् । ततः

सप्तमे ननु निरवयवत्वादीनां बाधकानामुक्तत्वात्सा कथं संभवतीत्याशंकायाम्, आकाशो नोत्पद्यते, निरवयवत्वादित्येवं साधने, उत्पद्यते लौकिकव्यवहारविषयत्वादित्येवं साधने, उत्पद्यते, लौकिकव्यवहारविषयत्वादित्येवं सत्प्रतिपक्षत्वेन युक्तीनामप्रयोजकत्वमुक्तम् । तस्माच्छ्रुत्युक्ता आकाशोत्पत्तिरंगीकार्येत्युक्तम् ॥ १ ॥

ततो **द्वितीये एकसूत्रे एतेन मातरिश्वेत्यधिकरणे** एवमेव वायूत्पत्तिरिति साधितम् ॥ २ ॥

ततोग्रिमसूत्रे ब्रह्मणोप्युत्पत्तिरस्त्विति वितंडयाशंक्य, मूलभूतस्य सतः नित्यत्वव्यापकत्वयोर्निरंकुशत्वादुत्पत्तिर्न संभवतीत्युक्तम् ॥ ३ ॥

ततश्चतुर्थे एकसूत्रे तेजोत इत्यधिकरणे वायुतस्तेजस उत्पत्तिः समर्थिता ॥ ४ ॥

ततः **पंचमे एकसूत्रे आप इत्यधिकरणे** तेजस अपामुत्पत्तिः समर्थिता ॥ ५ ॥

ततः **षष्ठे एकसूत्रे पृथिव्यधिकारेत्यधिकरणे** छांदोग्ये अद्भ्यः सकाशादन्नोत्पत्तिरुक्ता, तैत्तिरीये च पृथिव्युत्पत्तिरिति विरोधपरिहारार्थमन्नशब्देन पृथिव्येवोच्यते । छांदोग्ये भूताधिकारात् 'यत्कृष्णं तदन्नस्ये'ति नीलरूपकथनात्तैतिरीये अद्भ्यः पृथिवीति शब्दांतराच्चेत्युक्तम् ॥ ६ ॥

ततः **सप्तमे एकसूत्रे तदभिध्यानादेवेत्यधिकरणे** आकाशभावापन्नात्परमेश्वराद्वायोरुत्पत्तिः, एवं वाय्वादिभावापन्नादग्रेपि तेजआदीनां ज्ञेया । सर्वकर्तृत्वस्य ब्रह्मलिंगत्वादित्युक्तम् ॥ ७ ॥

ततोष्टमे एकसूत्रे विपर्ययेणेत्यधिकरणे प्रसंगात्प्रलयप्रकारो विचारितः । क्रमसृष्टौ येन क्रमेणोत्पत्तिस्तद्विपरीतक्रमेण प्रलय इत्युक्तम् ॥ ८ ॥

ततो **नवमे द्विसूत्रे अंतरा विज्ञानमनसीत्यधिकरणे** विज्ञानशब्देन जीवः मनश्च एतयोरपि क्रमेण मध्ये उत्पत्तिरिति सूत्रांशेनाशंक्य, अंशांतरेण समाहितम् । विज्ञानमयो जीवात्मकः, मनोमयस्तु वेदात्मकस्तैत्तिरीये उक्तः । अतस्तयोरुत्पत्तिर्न वेदाभिप्रेता । नामरूपव्याकरणात्मिकायां सृष्टौ जीवस्य करणत्वेन वेदस्य च द्वारत्वेन तत्पूर्वभावितया सृष्टावुत्पत्त्यभावात् । यद्यपि न्यूनांशपूरणाय प्राणेंद्रियमनसां क्वचिदुत्पत्तिर्वक्तव्येति चेत् ? पुराणानां श्रुत्युपबृंहणत्वात्तदनुसारेणाकाशात्पूर्वमेव तत्कारणभावापन्नाद्ब्रह्मण एवेति जानीहि । ततो **द्वितीये** ननु विज्ञानमयस्य जीवस्यानुत्पत्तौ सर्वव्यवहारोच्छेदप्रसंग इत्याशंक्य, जीवस्यापि स्थावरजंगमशरीरे समागमरूपोत्पत्तिस्तु भवत्येव, न तु स्वरूपोत्पत्तिरूपा । अतो न व्यवहारोच्छेद इत्युक्तम् । तेन जीवोत्पत्तिर्भाक्तेति सूचितम् ॥ ९ ॥

ततो **दशमे एकसूत्रे नात्माऽश्रुतेरित्यधिकरणे** जीवस्य स्वरूपत उत्पत्तिर्निवारिता । देवदत्तो जात इत्यादौ देहोत्पत्तेरेव श्रवणेन जीवोत्पत्त्यश्रवणात् । 'न जायते न म्रियते वा विपश्चि'दित्यादिषु जन्ममरणाभावश्रावणेन नित्यत्वबोधनाच्चेति ॥ १० ॥

तत **एकादशे एकसूत्रे ज्ञोत एवेत्यधिकरणे** जीवो ज्ञानस्वरूपो ज्ञानधर्मा च विज्ञानमयः, 'विज्ञानं यज्ञं तनुते' इत्यादिस्वरूपबोधकश्रुतिभ्यः । 'न पश्यो मृत्युं पश्यति', 'द्रष्टा श्रोता मंते'त्यादिज्ञानधर्मत्वबोधकश्रुतिभ्यश्चेत्युक्तम् ॥ ११ ॥

ततो **द्वादशे दशसूत्रे उत्क्रांतिगत्यागतीनामित्यधिकरणे** तत्र जीवस्य नित्यत्वेन मध्यमपरिमाणस्य वक्तुमशक्यत्वात्परमाणु वा परिमाणं महद्वा संभवति । तत्र किं युक्तमित्या-

कांक्षायां परिमाणं विचारितम् । तत्र **प्रथमसूत्रे** 'स यदास्माच्छरीरादुत्क्रामती'ति, 'ये के चास्माल्लोकात्प्रयांती'ति तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण' इति श्रुतिषु उत्क्रांतिगत्यागतिश्रावणात् जीवोऽणुरित्युक्तम् । ततो **द्वितीये** 'ऊर्णनाभिर्यथा तंतून्सृजते हरत्यपि, जाग्रत्स्वप्ने तथा जीवो गच्छत्यागच्छते पुन'रिति श्रुताविंद्रियरहितस्य केवलस्यैव गत्यागतिश्रवणादपि तथेत्युक्तम् । ततस्**तृतीये** जीवोऽणुर्भवितुं नार्हति, 'स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेष्वि'ति विज्ञानमयस्य जीवस्य महत्त्वश्रावणात् जीवो नाणुरिति सूत्रांशेनाशंक्य, अंशांतरेण समाहितम् । उक्तश्रुतेर्ब्रह्मप्रकरणपठितत्वान्न तया जीवमहत्त्वसिद्धिरित्युक्तम् । ततश्**चतुर्थे** 'स्वयं विहत्य स्वयं निर्माये'ति स्वप्नविषयकश्रुतौ स्वशब्दः जीवस्याणुत्वं बोधयति । स्वप्ने शरीरमध्ये तावत्परिमाणस्य व्यापकस्य च विहारकर्तृत्वासंभवात् । 'वालाग्रशतभागस्य शतधा कल्पितस्य तु । भागो जीवः स विज्ञेयः स चानंत्याय कल्पते' इतिश्रुतौ जीवमुपक्रम्य तत्परिमाणबोधनाच्चाणुरित्युक्तम् । ततः **पञ्चमे** अणोर्जीवस्य सर्वशरीरव्याप्तिः कथं संगच्छते इत्याशंकायां यथा स्वल्पश्चंदनखंडः महाकटाहे तप्ततैले निक्षिप्तस्तैलं शीतलं करोति, तथा जीवोपि सामर्थ्यात्करोतीति व्याप्तौ युक्तिरुक्ता । ततः **षष्ठे** ननु चन्दनस्यावस्थानं प्रत्यक्षतो निश्चितम्, तेन तस्य तथात्वम् । जीवस्य स्थितिस्तु नैकत्र निश्चितेति स दृष्टांतो न वक्तुं शक्यते इति सूत्रांशेनाशंक्य, 'गुहां प्रविष्टा'विितिश्रुत्या जीवस्य हृदि स्थितिः शास्त्रान्निश्चितेति न दृष्टांतवैषम्यमित्युक्तम् । ततः **सप्तमे** जीवस्य यो गुणश्चैतन्यं तेन जीवः सर्वशरीरं व्याप्नोति । यथा मणेः कांतिर्बहुदेशव्यापिनी, तद्वदित्युक्तम् । ततो**ऽष्टमे** चैतन्यगुणस्य स्वाश्रयाधिकदेशवृत्तित्वं चंपकादिगंधवदवगंतव्यमित्युक्तम् । ततो **नवमे** चैतन्यगुणेन सर्वशरीरव्याप्तौ कौशीतकिब्राह्मणे 'हिता नाम पुरुषस्य नाड्य' इत्यादिना तासां नाडीनामणुत्वं तासु जीवस्य स्थितिं चाभिधाय, स एष इह प्रविष्टः 'आलोमभ्य आनखाग्रेभ्य' इत्यनेन व्याप्तिं प्रदर्शयति । तस्मात्सामर्थ्येन गुणेन च व्याप्तिरुपपन्नेत्युक्तम् । ततो **दशमे** 'प्रज्ञया शरीरं समारुह्ये'ति श्रुतौ प्रज्ञायाः करणत्वनिर्देशात्स्वरूपचैतन्याद्भिन्नं गुणरूपं चैतन्यं निरूपितम् । अतो गुणेन व्याप्तिरुपपन्नेति साधितम् ॥ १२ ॥

ततस्**त्रयोदशे चतुःसूत्रे तद्गुणसारत्वादित्यधिकरणे** जीवे ब्रह्मत्वव्यपदेशो मुख्यो गौणो वेत्याशंकायाम्, सुषुप्तिसाक्षिणि प्राज्ञे यथा ब्रह्मत्वव्यपदेशो गौणस्तथा 'प्रज्ञानघनस्तत्त्वमसी'त्यादावपि ब्रह्मगुणसारत्वाद्ब्रह्मत्वव्यपदेशो गौण इत्युक्तम् । ततो **द्वितीये** ननु नीचस्यात्युत्कृष्टत्वव्यपदेशो न युक्तः । न च प्राज्ञवदिति वाच्यम् । तथा सति प्राज्ञवत्तत्तिरोहितं स्यात् । तथा सति किं व्यपदेशेनेत्याशंक्य, समाधानमाह । यावदात्मा वर्तते, तावत्सर्वोत्कृष्टत्वं तस्य स्फुरति । अर्थादात्मा नित्य इति सर्वदैव स्फुरति । तस्मान्न दोष इत्युक्तम् । ततस्**तृतीये** (ननु) जीवे आनंदांशाभिव्यक्त्या ब्रह्मधर्माविर्भाव इत्युक्तम् । तन्न युक्तम् । आनंदांशस्य पूर्वमसत्त्वेन पश्चाज्जन्यत्वात्, जन्यत्वेन नश्वरत्वेन च व्याप्त्या तस्य नश्वरत्वप्रसंगादित्याशंक्य, यथा बालकस्य सदेव पुंस्त्वं यौवनेऽभिव्यज्यते, तथा पूर्वं सूक्ष्मरूपेण वर्तमान एवानंदो ब्रह्मभावे सत्यभिव्यज्यते । अतो न तस्य नश्वरत्वमित्युक्तम् । ततश्**चतुर्थे** नन्विदानीं सच्चिदांशावेव प्रकटौ, मोक्षे त्वानंदांशोपि प्रकटो भवतीत्येवमवस्थाभेदेन विभागे को हेतुरित्याशंक्य, तत्र हेतुमाह । यदीदानीमप्यानंदः प्रकटः स्यात्तदा सच्चिदंशवदिदानीमप्यानंद उपलभ्येत, संसारश्च न स्यात् । यदि कदापि न स्यात्तदा मोक्षावस्था विरुध्येत । नित्यनिरतिशयसुखाभिव्यक्तेरेव मोक्षत्वात् । यदि जीवो निरानंद एव, ब्रह्मैवानंदमय-

मिति नियमोंऽगीक्रियते, तदा 'ब्रह्मैव सन् ब्रह्माप्येती'तिश्रुतिर्विरुध्येत । अतः प्रमाणाद्यविरोध एवमंगीकारे हेतुरित्युक्तम् ॥ १३ ॥

ततश्चतुर्दशेऽष्टसूत्रे **कर्ता शास्त्रार्थवत्त्वादित्यधिकरणे** जीवस्य कर्तृत्वं व्यवस्थापितम् । सांख्यैः प्रकृतिगतमेव जीवे तत् प्रतीयत इत्यंगीक्रियते, तन्निवृत्त्यर्थम् । तत्र **प्रथमसूत्रे** शास्त्रार्थवत्त्वं हेतुरुक्तः । वेदादिषु जीवमेवाधिकृत्याभ्युदयनिःश्रेयसफलकानां यज्ञोपासनारूपाणां कर्मणां विज्ञानदर्शनादित्युक्तम् । ततो **द्वितीये** जीवस्य स्वतः कर्तृत्वाभावेपि संसारदशायां प्रकृतिसंसृष्टत्वेन विवेकाग्रहात्प्राकृतकर्तृत्वग्रहणेपि न शास्त्रानर्थक्यमित्याशंक्य, विहारोपदेशादिति हेतुरुक्तः । विहारः स्वेच्छाक्रीडात्मकभोगरूपो दहरविद्यायामुपदिश्यते, स च दहरविदः कर्तृत्वमाक्षिपतीति जीव एव कर्ता इत्युक्तम् । ततस्**तृतीये** 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाये'तिश्रुतौ विज्ञानादानकथनेन जीवस्य स्वातन्त्र्यबोधनात्तस्यैव कर्तृत्वमित्युक्तम् । ततश्च**तुर्थे** 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चे'तिश्रुतौ साक्षादेव कर्मकर्तृत्वव्यपदेशात् । तच्चेन्नांगीक्रियते, तदा श्रुतौ प्रथमानिर्देशो विरुध्येत । प्रथमानिर्देशाद्विपरीतस्तृतीयाविभक्तिनिर्देशश्चापद्येतेत्युक्तम् । ततः **पंचमे** यदि जीवस्य कर्तृत्वं स्यात्तदा स्वतंत्रत्वात्स्वाहितं न कुर्यादित्याशंक्य, यथा चक्षुषेष्टमनिष्टं चोपलभते, तथैवेंद्रियैः कर्म कुर्वन्निष्टमनिष्टं चाप्नोति । तथा च सांख्यवत् केवलभोक्तृत्वांगीकारेप्ययं दोषस्तुल्य इति कर्तृत्वे पर्यनुयोगो न कार्य इत्युक्तम् । ततः **षष्ठे** ननु स्वतंत्रश्चेदीश्वरवत् स्वार्थमन्यथा न कुर्यादित्याशंक्य, अस्य शक्तिस्तिरोहितेति तथा करोति । तावता न कर्तृत्वहानिरित्युक्तम् । ततः **सप्तमे** जीवस्य शक्तितिरोभाव एव कुत इत्याशंक्य, जीवस्य क्रियाज्ञानशक्तियोगेन घृतद्रवत्ववत् सिध्यति । अतस्तदभावाच्छक्तितिरोभाव इत्युक्तम् । **ततोष्टमे** ननु कर्तृत्वभोक्तृत्वयोर्भिन्नधर्मत्वं दृष्टम्, यथैको गृहं निर्मिमीते, अन्यस्तु तद्भुंक्ते, तस्मान्नेदं साधीय इत्याशंक्य, यथा तक्षा रथं पीठं वा निर्माय तत्रारूढो विहरति, तथा तयोरैकाधिकरण्यस्यापि दर्शनान्न दोष इत्युक्तम् । एवमनेनाधिकरणेन जीवस्य कर्तृत्वं साधितम् ॥ १४ ॥

ततः **पंचदशे द्विसूत्रे परात्तु तच्छ्रुतेरित्यधिकरणे** जीवस्य कर्तृत्वं स्वतो वा भगवतो वेत्याशंकायां भगवद्गतमेव कर्तृत्वं भगवदंशत्वाज्जीवे भासते । 'एष एव साधु कर्म कारयती'तिश्रुतेः । ब्रह्मणः सर्वरूपत्वान्न वैषम्यनैर्घृण्यादिदोष इति **प्रथमसूत्रे** उक्तम् । ततो **द्वितीयसूत्रे** क्रीडार्थं यो भगवता उद्यमः कृतो वर्तते, तदपेक्ष एव भगवान् स्वांशं जीवं तत्र तत्र तथा प्रवर्तयतीत्युक्तम् । दोषपरिहारस्तु सर्वरूपत्वादेव कृतः ॥ १५ ॥

ततः **षोडशे एकादशसूत्रे अंशो नानाव्यपदेशादित्यधिकरणे** जीवस्य ब्रह्मसंबंधिरूपमुच्यते तत्र **प्रथमसूत्रे** जीवो ब्रह्मणोंश एव । 'सर्व एवात्मानो व्युच्चरंति, कपूयचरणा रमणीयचरणा' इतिश्रुतौ बहुत्वेन व्यपदेशाद् 'ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उते'तिश्रुतौ ब्रह्मत्वेन च व्यपदेशाच्च । नह्येकस्य जीवस्य बहुत्वं ब्रह्मरूपत्वं चेत्युभयमंशत्वं विना संगच्छते । तस्मादंश इत्युक्तम् । ततो **द्वितीये** 'पादोऽस्य विश्वा भूतानी'तिमंत्रवर्णे जीवस्य पादत्वादप्यंशत्वमित्युक्तम् । ततस्**तृतीये** 'ममैवांशो जीवलोके जीवभूतः सनातन' इति स्मृतौ कंठत एवांशत्वमुक्तम् । एवं त्रिभिः सूत्रैर्जीवस्य ब्रह्मसंबंधिरूपमुक्तम् । ततश्च**तुर्थे** जीवस्य ब्रह्मांशत्वे तद्द्वारा ब्रह्मण्यपि या दोषसंबंधशंका सा द्वाभ्यां परिहृता इति न वक्तुं शक्यम् । जीवस्य दुःखित्वेन तदंशिभूते ब्रह्मण्यपि दुःखित्वादिप्रसंगात् । पाददुःखे पुरुषदुःखवदित्याशंक्य, तस्य परिहार उक्तः । तथाहि प्रकाशादीनां दुष्ट-

प्रकाश्यसंसर्गेपि न सूर्यादेर्दुष्टत्वम्, तथा ब्रह्मणोपि। वस्तुतस्तु दुष्टप्रकाश्यसंसर्गेपि प्रकाशस्यापि न दुष्टत्वम्। कुतः सूर्यादेः, तथा जीवस्य ब्रह्मणश्चेत्यदोष इति। ततः **पंचमे** स्मृत्यादिदोषपरिहार उक्तः 'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः। न लिप्यते फलैश्चापि पद्मपत्रमिवांभसे'ति। 'कर्मात्माप्यपरो योसौ मोक्षबंधैः स युज्यते' इति जीवस्य दोषसंसर्गो, न ब्रह्मण इति। ततः **षष्ठे** ननु जीवस्य यदि ब्रह्मांशत्वम्, तदा विधिविषयत्वाभावात्कर्मसंबंधाभावः फलासंबंधश्चेत्याशंक्य, जीवस्यापि न स्वतो विध्यादिविषयत्वम्, किंतु देहयोगादेव विधिनिषेधाधीनत्वमपि। तत एव यथा शवाग्निश्चंडालोदकं तद्घटादिश्च परिह्रियते, शिष्टसंबंधिनस्ते गृह्यंते, एवं जीवस्य देहसंबंधकृतौ गुणदोषौ न स्वत इत्युक्तम्। तेनैव फलसंबंधश्चेत्यपि साधितम्। ततः **सप्तमे** जीवस्य देहसंबंधाद्गुणदोषसंसर्गकथनं न युक्तम्, कालिकनित्यप्रलयेन देहस्य प्रतिक्षणमन्यान्यत्वादाधानकाले ब्राह्मण्यस्य वक्तुमशक्यत्वेन कर्मानधिकारप्रसक्तेर्जीवैक्यमादायाधिकारसाधने तु देहांतरेपि तदापत्तेरित्याशंक्य, देहांतरे पूर्वदेहसंतत्यभावान्न पूर्वदैहिककर्माद्यापत्तिः। एकस्मिन् देहे तु संततिसामान्यात्कर्माधिकारः सुघटः। ततः सिद्धे देहसंतत्यैक्ये तद्द्वारा जीवस्य गुणदोषसंसर्गौ न दुर्घटावित्युक्तम्। ततोऽष्टमे सच्चिदानंदस्य ब्रह्मणोंशोपि तादृश एव वक्तव्यः, तथासति कथं तस्य देहसंबंध इत्याशंक्य, जीवो ब्रह्माभास इत्युक्तम्। यथा अनाचारी ब्राह्मणो ब्राह्मणाभासः, अखिलब्राह्मणधर्माणामभावात्, एवमानंदांशस्य तिरोधानेन ऐश्वर्यादीनां ब्रह्मधर्माणामभावात् तादृशाकारस्य चाभावात् जीवोपि ब्रह्माभासः। तथा चानंदांशाभावाद्देहसंबंध इत्युक्तम्। एवं त्रिभिः सूत्रैर्जीवस्य स्वतो निर्दुष्टत्वे देहसंबंधाद्दोषसंबंधो देहसंबंधहेतुश्च साधितः।

ततोग्रिमेषु त्रिषु यन्नैयायिकादिभिर्भोगव्यवस्थया जीवनानात्वं व्यापकत्वं चांगीकृतं तद्दूष्यते। तत्र **प्रथमे** तेषामात्मनां व्यापकत्वेन सर्वमनइंद्रियदेहसंबंधाद्येनकेनचित्करणग्रामेण यत् कर्म क्रियते, तज्जन्यादृष्टस्य सर्वत्र तुल्यत्वाददृष्टनियमो न स्यात्। तस्मात्तदुक्तप्रकारेण जीवव्यापकत्वनानात्वस्थापनमसंगतमित्यर्थः। ततो **द्वितीये** विलक्षणमनःसंयोगेन पूर्वोक्तं सर्वं साधयंति। तद्दूष्यते। तत्र दृष्टादृष्टकारणकलापसामान्ये एकस्यैव वैलक्षण्यम्, नान्यस्येत्यत्र हेतोर्वक्तुमशक्यत्वादिति बोधितम्। ततस्**तृतीये** जीवस्य व्यापकत्वेपि प्रदेशभेदान्न दोष इति ते वदंति। तद्दूष्यते। यदि तथांगीक्रियते, तदा यत्र कर्मकरणेन यस्मिन्प्रदेशेऽदृष्टमुत्पन्नं, तस्य प्रदेशस्य देशांतरेऽभावात् तत्रोत्पन्नानां वस्तूनां भोगो न स्यात्, अदृष्टस्याचंचलत्वात्। तस्मान्न तदुक्तरीत्या तन्मतसिद्धिरिति त्रिभिः सूत्रैरुक्तम्। एवमेकादशभिः सूत्रैर्जीवस्य ब्रह्मसंबंधिरूपमुक्तम्॥ १६॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य तृतीयः पादः॥

पूर्वपादे जीवस्य स्थूलशरीरनिष्पादकानां भूतानां स्वरूपमुत्पत्त्यादिकं च विचारितम्। अस्मिन् पादे इंद्रियादीनां तदवसरसंगत्या विचार्यंते।

तत्र **प्रथमे पंचसूत्रे तथा प्राणा इत्यधिकरणे** इंद्रियाणां भूतवत् कार्यत्वं वा, जीववदंशत्वं वेति संदेहे जीववदंशत्वमिति निर्णीतम्। तत्र **प्रथमसूत्रे** पूर्वपादे निरूपितजीवस्य ये

१. वस्तु इति पाठः।

चिदंशत्वातिरिक्ता धर्मा उत्क्रांत्यादयस्ते सर्वेतिदिश्यंते । ततो **द्वितीये** ननु प्राणेषु नित्यत्वाश्रवणादुत्क्रांत्यादिश्रुतिर्गौणी भविष्यतीत्याशंक्य, एकैव श्रुतिर्जीवे मुख्या, प्राणादौ गौणीति वक्तुं न शक्यत इत्युक्तम् । ततस्**तृतीये** सृष्टेः पूर्वमपि प्राणादीनां स्थितिः श्रूयते । 'असद्वा इदमग्र आसी'दित्यारभ्य, 'प्राणा वा ऋषय' इत्यंतेन तन्निगमनात् । ततश्च**तुर्थे** मनःपूर्वो वागुत्तर' इतिश्रुतेर्मनसो वाक्पूर्वरूपत्वात् । वाचश्च वेदरूपाया 'वाचा विरूपनित्यये'ति श्रुत्या नित्यत्वश्रावणात्तत्पूर्वरूपस्य मनसः कथमनित्यत्वं भवेत् । ततः **पंचमे** 'तमुत्क्रामंतं प्राणोऽनूत्क्रामती'तिश्रुतौ सप्तानां गतिभिर्जीवगतिर्विशेष्यते । अतो जीवसमानयोगक्षेमत्वात्तेषामपि जीवतुल्यत्वमित्युक्तम् ॥ १ ॥'

ततो **द्वितीये एकसूत्रे हस्तादय इत्यधिकरणे** उत्क्रांतिश्रुतौ प्राणानां जीवेन सहोत्क्रमणकथनात् तेषां नित्यत्वमंशत्वं चांगीकृतम् । अतःपरं ते कतीति विचार्यते । श्रुतौ क्वचित् सप्तोक्ताः, क्वचिदष्टौ, क्वचिन्नव, क्वचिद्दश, क्वचिदेकादशेति नानापक्षाः श्रूयंते । तद्विप्रतिषेधपरिहारार्थं विचारः । तत्र 'हस्तौ चादातव्यं चे'ति श्रुतौ हस्तोपस्थपायुपादानां सप्तभ्योधिकानां कथनात् चक्षुस्त्वग्घ्राणरसनश्रवणमनोवाचां सप्तानां पूर्वं कथनाच्चैकादश, न तु सप्तैवेत्युक्तम् । तेषु पंच ज्ञानेंद्रियाणि, पंच कर्मेंद्रियाणि, उभयनायकमंतःकरणं मन इत्येवं तेषां विभागो ज्ञेयः ॥ २ ॥

ततस्**तृतीये एकसूत्रे अणवश्चेत्यधिकरणे** तेषां जीववत् परमाणुपरिमाणं विचारितम् ।

ततश्च**तुर्थे द्विसूत्रे श्रेष्ठश्चेत्यधिकरणे** मुख्यप्राणस्याणुत्वं विचारितम् । 'आनीदवातं स्वधया तदेक'मितिश्रुत्या अननात्मकत्वेन सृष्टेः पूर्वं सत्ता च प्रदर्शिता । ततो **द्वितीयसूत्रे** वायुर्वा, इंद्रियक्रिया वा, मुख्यः प्राणोस्त्वित्याशंक्य, 'एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च, खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी'तिश्रुतौ वायुभिन्नत्वेन पृथगुपदेशात् । वृत्तिवृत्तिमतोरभेदेन क्रियाया इंद्रियांतःपातित्वे सिद्धे तेभ्योपि प्राणस्य पृथक्त्वात् भिन्न एवासन्य इति साधितम् ॥ ४ ॥

ततः **पंचमे चतुःसूत्रे चक्षुरादिवत्त्वित्यधिकरणे** प्राणः स्वतंत्रः, परतंत्रो वेति शंकायाम्, मुख्यः प्राणोपि आसन्यत्वाद्भगवदधीनः । व्यवहारे तु जीवाधीनः । श्वेताश्वतरे इंद्रियादिजयवत् तज्जयस्याप्यनुशासनादित्युक्तम् । ततो **द्वितीये** प्राणश्चेज्जीवाधीनः, तदा करणवत् किंचिद्व्यापारं कुर्वन् जीवोपकरणरूपो भवेत् । तत्तु न करोतीति कथं तस्य जीवोपकरणत्वमित्याशंक्य, मुख्यप्राणस्य यः व्यापाराभावः सः करणत्वाभावात् । उपकरणत्वं तु देहस्थितिरूपकार्यस्य करणात् । अतो व्यापाराभावेपि तस्य जीवोपकरणत्वं न विरुद्धमित्युक्तम् । ततस्**तृतीये** ननु व्यापाराभावे तस्य जीवोपकारित्वमसमंजसमित्याशंक्य श्रुतौ 'अहमेवैतत् पंचधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामी'ति व्यपदिश्यते । अतो यथा मनसो द्वारभेदेन स्वरूपत एकादशवृत्तयस्तथा प्राणेपि पंचवृत्तयो व्यपदेशप्रामाण्यादंगीक्रियंते । ताभिरेव देहं स्थापयञ्जीवस्योपकरणं संभवतीत्युक्तम् । ततश्च**तुर्थे** तस्याप्यणुत्वं साधितम् ॥ ५ ॥

ततः **षष्ठे एकसूत्रे ज्योतिराद्यधिष्ठानं त्वित्यधिकरणे** वागादयः किं देवताधिष्ठानेन स्वस्वकार्ये प्रवर्तंते, स्वत एवेत्याशंक्य, आधिभौतिकाः आध्यात्मिकास्ते स्वस्वाधिदैविकाधीना इत्यग्न्यादिस्वस्वदेवताधिष्ठानेनैव प्रवर्तंते, न तु स्वत इति निर्णीतम् ॥ ६ ॥

ततः **सप्तमे द्विसूत्रे प्राणवतेत्यधिकरणे** अग्न्यादिदेवताः किं स्वत एव केवला वागादीनधितिष्ठंति, मुख्यप्राणसहिता वेत्याशंक्य, मुख्यप्राणसहिता एवाधितिष्ठंति । 'सोऽयमग्निः परेण

मृत्युमतिक्रांतो दीप्यत' इतिश्रुतेरित्युक्तम् । ततो द्वितीये प्राणस्य तत्संबंधस्य च नित्यत्वमुक्तम् । तेन प्राणसहिता एव देवा वागादीनधितिष्ठंति । तेनैव जीवस्य भोगसिद्धिः, तेषां जीवोपकारकत्वं च सिद्धमित्युक्तम् ॥ ७ ॥

ततोष्टमे **त्रिसूत्रे इंद्रियाणि तद्व्यपदेशादित्यधिकरणे** इंद्रियाणां प्राणाधीनसर्वव्यापारत्वात् प्राणशब्दवाच्यत्वाच्च प्राणवृत्तिरूपाणींद्रियाणीत्याशंक्य, तत्त्वांतराणीति सिद्धांतितम् । 'एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चे'ति तत्त्वोत्पत्तिबोधकश्रुतौ प्राणाद्भिन्नतयेंद्रियत्वेन व्यपदेशात् । नन्वेवं व्यपदेशमात्रेण भेदे सति प्राणापानादिव्यपदेशभेदादासन्योपि प्राणादिभ्यो भिन्नः स्यादिति नाशंकनीयम् । प्राणादिशब्दानां पाचकपाठकादिवदासन्ये यौगिकत्वान्न तद्भेदकत्वम् । इंद्रियशब्दस्य तु न यौगिकत्वम् । अतो नैतद्दृष्टान्तेनाशंकनीयमित्युक्तम् । ततोऽ**ग्रिमसूत्रद्वये** हेत्वंतरमित्युक्तम् । यत्रापि प्राणशब्दप्रयोगस्तत्रापि भेदेन श्रूयते । 'तमुत्क्रामंतं प्राणोऽनूत्क्रामती'ति, 'प्राणमुत्क्रामंतं सर्वे प्राणा अनूत्क्रामंती'ति । वैलक्षण्यं च, प्राणस्य चेंद्रियाणां च । 'सुप्तेषु वागादिषु प्राणो जागर्ति । स्वामिसेवकवच्चानेकं वैलक्षण्यम्' ॥ ८ ॥

ततो **नवमे एकसूत्रे संज्ञामूर्तिक्लृप्तिरित्यधिकरणे** भूतभौतिकसृष्टिः परमेश्वरादेवेति निर्णीय, नामरूपव्याकरणमपि परमेश्वरादेवेति निर्णीयते । तत्र नामरूपव्याकरणं लोके जीवानामेव दृष्टमिति हिरण्यगर्भादेव तद्व्याकरणमित्याशंक्य, नामरूपव्याकर्ता परमेश्वर एव । छांदोग्ये 'हंताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'तिश्रुतौ नामरूपव्याकर्तृत्वेन त्रिवृत्कुर्वतः परमेश्वरस्यैवोक्तत्वात् । नामव्याकरणं हि वाक्साध्यम् । रूपव्याकरणं क्रियासाध्यम् । वाक्क्रिये च शरीरं विना जीवस्य न संभवतः । शरीरं नामरूपव्याकरणोत्तरं भावि । तस्मान्न जीवस्तत्कर्ता, किंतु परमेश्वर एव तत्कर्तेत्युक्तम् ॥ ९ ॥

ततो **दशमे द्विसूत्रे मांसादिभौममित्यधिकरणे** 'एतस्माज्जायते प्राण' इतिश्रुतौ प्राणस्येंद्रियाणां च भगवतः सकाशात्सृष्टिरुक्ता । छांदोग्ये तु 'अन्नमशितं त्रेधा विधीयत इतिश्रुतौ मनःप्राणवाचां भौतिकत्वं श्राव्यते । 'अन्नमयं हि सौम्य मनः, आपोमयः प्राणः, तेजोमयी वागि'त्यनेन, 'एतस्माज्जायत' इतिश्रुत्युक्ताया उत्पत्तेः परम्परयाप्युपपद्यमानत्वात् । 'अन्नमय'मित्यादिश्रुतेस्तु मांसादिसाहचर्येण विशेषबोधकत्वात् । मनआदीनां भौतिकत्वमेवेति **प्रथमसूत्रेणाशंक्य, द्वितीयसूत्रे** तेषां तत्त्वांतरत्वमेवेति स्थापितम् । मनःप्रभृतीनामन्नमयत्वादिकं तु अन्नादिपोषितत्वेनाप्युपपद्यते । 'पंचदशाहानि माशी'रित्याद्युपपादकदर्शनात् । सर्ववाक्ये साक्षात्सृष्टेरुक्तत्वेन तत्र परंपरायाः प्रवेष्टुमशक्यत्वात् । तस्मात्तत्त्वरूपाणि तानि भगवत एवेति सिद्धांतितम् । एवमस्मिन्नध्याये सर्वोपि विरोधः परिहृतः ॥ १० ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य चतुर्थः पादः ।

द्वितीयाध्यायः समाप्तः ।

तृतीयोध्यायः ।

तृतीयाध्यायस्याधिकरणार्थसंग्रहः । ततस्तृतीयेऽध्याये जघन्यमध्यमाधिकारिणां साधनसंपत्तावुपनिषदां विद्याजनकता, अन्यथा तु सत्संप्रदायेपि परोक्षज्ञानजनकतैवेत्यतः **प्रथमे** पादेऽधि-

कारिणो जन्मनिर्धारः क्रियते । तत्र पंचाग्निविद्यया निष्पन्नदेहः स्वरूपतोऽधिकारीति तदर्थं तद्विद्यायाः पंचाप्याहुतयो विचार्यंते । तत्र ब्रह्मसंबंधिविचारविशेषरूपत्वाच्छास्त्रसंगतिः । साधनविचारशेषत्वादध्यायसंगतिः । तत्राष्टावधिकरणानि ।

तत्र **प्रथमेऽधिकरणे** जीवेंद्रियाणां होमाभावेनाशुद्धिमाशंक्य, तेषामपि शुद्ध्यर्थं जीवस्येतो लोकांतरगमनावसरे संस्कृतभूतसूक्ष्मेंद्रियसाहित्यं सप्तभिः सूत्रैः साध्यते । तत्र **प्रथमसूत्रे** संस्कृतभूतसूक्ष्मैः संपरिष्वक्त एव परलोकं गच्छतीत्युच्यते । ततो **द्वितीये सूत्रे** श्रुत्युक्तप्रश्ननिरूपणाभ्यामद्भिः संपरिष्वक्त एव गच्छतीति ज्ञायते, नतु भूतांतरसंपरिष्वक्त इत्याशंक्य, अपां भूतत्रयात्मकत्वं साध्यते । **ततस्तृतीयसूत्रे**, प्राणस्यापि गमनं बोध्यते । **ततश्चतुर्थे** प्राणगमनस्याग्न्यादिभावश्रुत्या बाधमाशंक्य, तन्निवारणेन प्राणानां परलोकगतिः साध्यते । ततः **पंचमे** श्रुतौ श्रद्धापदात्रापां होम इत्याशंक्य, श्रद्धापदेनाप एवोच्यंते इति निर्धार्यंते । ततः **षष्ठे सूत्रे**, सर्वे जीवास्तथा गच्छंति, उत ज्ञानोपयोगिन एवेत्याशंक्य, ज्ञानोपयोगिनो यज्ञादिकृतो गच्छंतीति निर्णीयते । ततः **सप्तमे** तेषां होमेन सोमभावेऽनिष्टमाशंक्य, तन्निवार्यत इति । एवं प्रथमाहुतिः सफला विचारिता भवति ॥ १ ॥

ततो **द्वितीये चतुःसूत्रे कृतात्ययाधिकरणे**ऽवसरसंगत्या सोमभावोत्तरं वृष्टिभावं प्राप्नोतीति द्वितीयाहुतिर्विचार्यते । तत्र **प्रथमसूत्रे** सानुशयो वृष्टिभावं प्राप्नोतीति बोधनार्थमनुशयो विचार्यते । अनुशयो द्विविधः । 'यद्यत्र नः स्वर्गसुखावशेषित'मिति श्रीभागवतवाक्याद्भोगसाधकसामग्रीशेषरूपं यत् फलं तदात्मकः सुखलेशरूप एकः, कर्मशेषरूपो द्वितीय इति निर्णीतम् । ततो **द्वितीयसूत्रे** आचरणात्तत्तद्योनिप्राप्तिमाशंक्य, चरणस्य पूर्वजन्मीनकर्मोपलक्षकत्वम्, नत्वग्रिमजन्मनि समीचीनकरणाहेतुत्वम् । तस्मादग्रिमार्थं कर्मशेषरूपोऽनुशयोऽवश्यमपेक्षणीय इत्युच्यते । **ततस्तृतीयसूत्रे** चरणस्य पूर्वजन्मीनकर्मोपलक्षकत्वे प्रयोजनाभावेन चरणश्रुतेरानर्थक्यप्राप्तौ तस्या जन्मविधायकत्वमंगीकर्तव्यम् । तथा सति कर्मशेषरूपानुशयवैयर्थ्यमित्याशंक्य, निष्कामसकामभेदेन द्विविधानां कर्मिणां मध्ये निष्कामस्य पूर्वोक्तफलशेषरूपोनुशयः । द्वितीयस्य तु सुकृतदुःकृतकर्मशेषरूप इति तस्य दुःशरीरप्राप्तिः, 'सुखानन्तरं दुःख'मितिन्यायेनोपपद्यते, तन्निवारणार्थं चरणश्रुत्या शरीरप्राप्तिरिति बोध्यत इति दुःशरीरनिषेधार्थं सा धूममार्गमुपक्रम्योक्ता । अतो धूममार्गस्य तदपेक्षत्वान्न सा कर्मशेषरूपानुशयप्रतिषेधिका । तस्मान्न सोमभावापन्नस्य वृष्टिभावबाधः, अन्यथा तादृशशरीरप्राप्तेराकस्मिकता स्यात्, अतोनुशय आवश्यक इति निर्णीयते । **ततश्चतुर्थे** द्विविधकर्मशेषरूप एवानुशय इति बादरिमतम् । तेन मोक्षपर्यंतमनुशयानुवृत्तिरिति बोध्यते । एवं द्वितीयाहुतिः सफला विचारिता ॥ २ ॥

ततोऽनिष्टादिकारिणामिति पञ्चसूत्रे तृतीयाधिकरणे इष्टादिकारिव्यतिरिक्तानां पंचाहुतिधूममार्गयोः संबंध इति **प्रथमसूत्रे** आशंक्यते । तेन सर्वेषां सोमभावप्राप्त्यनंतरं जन्मेत्याशंक्यते । ततो **द्वितीयसूत्रे** तन्निषिध्यते । यदि सर्वेषां स स्यात्तदा यमगतिश्रुतिर्विरुध्येत । तस्मान्न सर्वेषां सोमभावः । ततः सूत्रद्वयेन स्मृत्यापि यमगतिः स्थाप्यते । ततः **पञ्चमे सूत्रे** चित्रगुप्तादीनामपि यमसेवकत्वं निर्णीयते । तेन यमगतेरपि सत्त्वान्न सर्वेषां सोमभावः, किंतु मार्गद्वयस्थानामेवेत्युपोद्घातप्रसंगाभ्यां निर्णीयते ॥ ३ ॥

ततश्चतुर्थे **चतुःसूत्रे विद्याकर्मणोरित्यधिकरणे** । सर्वेषां चंद्रलोकप्राप्तिः श्रुता । पंचाग्निविद्याप्रस्तावे यमगतिस्तु नोक्ता । अतो विद्यया कर्मणा सोममार्ग इति न यममार्ग इति आशंक्य, वेदांते गौणमुख्यफलभेदार्थं तत्कारणत्वेन विद्याकर्मणोरुक्तत्वान्न तृतीयमार्गबाधकत्वमिति **प्रथमसूत्रे** निर्णीयते । ततो **द्वितीये सूत्रे** 'जायस्व म्रियस्वे'तिश्रुत्युक्तस्य तृतीयमार्गत्वमाशंक्य, तस्मिन्मार्गे पुण्यपापभोगस्यातिस्वल्पत्वान्न तेन यममार्गबाध इत्युक्तम् । अयं च पंचाहुतिनियमो मर्यादामार्गे एव, न सर्वत्र चेति निर्णीतम् । ततः सूत्रद्वये स्मृतिलौकिकदर्शनाभ्यां यममार्गसत्ता साधिता । तेन 'जायस्वे'ति मार्गो विवेचकसापेक्षत्वात् यममार्गे एव प्रविशतीति साधितम् ॥ ४ ॥

ततः **पञ्चमे त्रिसूत्रे तृतीयशब्दावरोध इत्यधिकरणे** । वृष्टेरन्नभावस्तृतीयाहुतेः फलम् । तत्र बीजावापं विना केवलवृष्टेरन्नासंभवात्प्रत्यक्षविरोधमाशंक्य, तृतीयाहुतौ देवहोमात्कारणभूतमेव जलं वर्षतीत्युच्यते । तस्माच्चान्नं श्रुताववोक्तम् । 'ता आप अन्नमसृजंते'ति । तस्मात्प्रत्यक्षस्य लौकिकत्वात्तद्विरोधो न दोषायेत्युक्तम् । ततो **द्वितीयसूत्रे**, 'वायुर्भूत्वा धूमो भवती'तिश्रावणात्ते वाय्वादयो जन्या इति तदनंतरभाविनी वृष्टिरपि जन्या, अपामिवेति कारणभूतं जलं न वक्तुं शक्यत इत्याशंक्य, वाय्वाद्याकृतिमात्रेण स्वरूपान्यथाभावाभावाद्वायुभवनाद्युक्तिर्गौणी । अतस्तदनुरोधेन वृष्टौ जन्या आपो वक्तुमशक्याः । तस्मात्कारणभूता एव ता आप इति निर्बाधमित्युक्तम् । ततस्**तृतीये सूत्रे**, शीघ्रमेव वृष्टेः सकाशादन्नरूपो भवतीत्युक्तम् । तेन तृतीयाहुतिः सफला विचारिता ॥ ५ ॥

ततः **षष्ठे द्विसूत्रे, अन्याधिष्ठित** इत्यधिकरणे, अन्नाद्रेतोभवनरूपा चतुर्थी आहुतिर्विचार्यते । तत्रान्नस्य कंडनपाकादौ क्रियमाणे जीवस्यापगमात्कथं जीवस्य रेतोभाव इत्याशंक्य, उप्ते बीजे पापिजीवांतराधिष्ठितेऽन्नरूपेण जायमाने पश्चाद्वृष्टौ देवहुतौ जीवोऽन्ने प्रविश्यातिथिवन्निरभिमानस्तत्र तिष्ठतीति न तस्य कंडनादिक्लेशः, किंतु पापिन एव सः । न च तस्यापगमः शंकनीयः । सिद्धान्नादेर्बहुकालपर्युषितत्वे कृमिभावदर्शनात् । एवं तस्यान्नस्य भक्षणेपि पापिन एवान्नभूतस्य जरणादिक्लेशः, नास्य निरभिमानस्येति तस्य रेतोभावो युक्त इत्युक्तम् । ततो **द्वितीये सूत्रे** तस्मिन्नन्ने पापिजीवसहभावादन्नस्याशुद्धौ कथं तेन योग्यदेहसंपत्तिरित्याशंक्य, यथा वैदिकेन प्रोक्षणादिसंस्कारेण लौकिकव्रीहीणां शुद्धिः, तथा वैदिकेन देवकृतहोमरूपसंस्कारेण तस्यान्नस्य शुद्धिरिति । तेन योग्यदेहनिष्पत्तिः निष्प्रत्यूहेत्युक्तम् ॥ ६ ॥

ततः **सप्तमे एकसूत्रे रेतःसिगधिकरणे**, रेतसः पुरुषभावो विचारितः ॥ ७ ॥

ततोष्टमे एकसूत्रे योनेःशरीरमित्यधिकरणे, गर्भस्य न पुरुषत्वम्, किंतु बहिर्निर्गतस्यैव पुरुषत्वमिति निर्णीतम् । अत्र सर्वत्रावसर एव संगतिरिति बोध्यम् ॥ ८ ॥

तेन जघन्याधिकारिणो देहनिष्पत्तिविचारः, मध्यमस्य च योगादिना देहसंपत्तौ पुनर्विचालनाभावाय वैराग्यविचारः पादार्थत्वेन सिध्यति । मुख्याधिकारिणां तु वरणादेव तत्सिद्धिरिति नात्र तद्विचार इति बोध्यम् ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य प्रथमः पादः ।

अथ **द्वितीये पादे** जीवस्य स्वरूपतो मुक्तियोग्यता विचार्यते । प्रथमपादोक्ताया योग्यताया ज्ञानोक्तिरूपे साधने एव पर्यवसानात् । तदुत्तरं विषयनिश्चयश्च क्रियते । तेनाधिकारसिद्ध्यनंतरं विषयस्य निश्चयो वेदांतार्थरूपब्रह्मस्वरूपस्य शाब्दं परोक्षज्ञानं हृदि स्थिरीभवतीत्येतदर्थं पादारंभः । तथा सति पादयोरेककार्यत्वं संगतिः । आनंतर्यनियामक उपजीव्योपजीवकभावश्चेति बोध्यम् । **अत्रैकादशाधिकरणानि** । तत्र प्रथमैस्त्रिभिः जीवस्य स्वप्नसुषुप्तिजाग्रदवस्था मुक्तियोग्यताज्ञापनार्थमुपोद्घातेन विचार्यंते । अंतिमैरष्टभिः ब्रह्मस्वरूपम् ।

तत्र **प्रथमे षट्सूत्रे संध्याधिकरणे** द्वाभ्यां स्वप्नसृष्टिर्भगवतस्तत्कर्तृत्वं च यद्बृहदारण्यके काठके च श्रावितं तत्सृष्टिसंबंधो जीवस्य भवतीति निरूपिता शुद्धिर्व्यर्थेत्याशंक्य, तृतीये तस्याः सृष्टेः मायामात्रत्वेन मिथ्यात्वं साध्यते । तेन जीवस्य तत्कृतगुणदोषसंबंधाभावान्न पूर्वोक्तशुद्धिनिरूपणस्य वैयर्थ्यम् । ततश्चतुर्थे स्वप्नसृष्टेर्मिथ्यात्वे तत्करणस्य किं प्रयोजनमित्याकांक्षाया स्वप्नस्य क्वचित् शुभाशुभसूचकत्वात्फलतः सत्यत्वम्, अन्यत्र तु तादृशभगवल्लीलाप्रदर्शनमात्रं प्रयोजनमित्युच्यते, तच्च वैराग्याय फलिष्यति । ततः **पंचमे** जीवस्यापि भगवदंशत्वात्कथं स्वप्ने दुःखसंबंधः, दुःखाद्यभिमानो वेत्याकांक्षायां भगवदभिध्यानात् जीवस्यैश्वर्यादिषड्धर्मतिरोभावेन जीवस्य बंधो भगवद्धर्मविपरीतधर्मवत्त्वं च भवति । तेन दुःखित्वादिकं तदभिमानश्च । ततो भगवदिच्छया कथंचिन्मोक्षश्चेति स्वमतमुक्तम् । ततः **षष्ठे** देहयोगाद्वा ऐश्वर्यादितिरोभावो बंधदुःखादिकं चेति मतांतरमुक्तम् । अस्मिन्पक्षे देहवियोगे सत्यैवैश्वर्याद्याविर्भावः, पूर्वस्मिन्पक्षे तु देहसद्भावेऽपि भगवदिच्छया ऐश्वर्याद्याविर्भावो बंधाभावश्चेत्यैश्वर्याद्याविर्भावदशायां दुःखित्वादिसर्वदोषाभावाद् मुक्तियोग्यता निष्प्रत्यूहेति सिद्धम् ॥ १ ॥

ततो **द्वितीये एकसूत्रे तदभावो नाडीष्वित्यधिकरणे** जीवस्य द्विविधा सुषुप्तिः । एका नाडीषु, द्वितीया सत्संपत्तौ । तत्र प्रथमायां दुःखाभावमात्रम्, द्वितीयायां तु सुखमपीति द्विविधायामपि सुषुप्तौ न प्रपंचसृष्टिरिति प्रसंगाद्विचारितम् ॥ २ ॥

ततस्तृतीये त्रिसूत्रे अतःप्रबोध इत्यधिकरणे प्रथमसूत्रे जाग्रदवस्थापि भगवत एव भवतीति, यत्र स्वपिति तत्रैव जागर्ति, पश्चाद्धृदयं समागच्छति चेति निरूपितम् । ततो द्वितीये सूत्रे स एव जीवः समायाति, अन्यो वेत्याशंक्य, कर्मानुस्मृत्यादिभिर्हेतुभिः स एव समायातीति निर्णीतम् । ततस्तृतीये सूत्रे मूर्च्छाविशेषेऽतिमुग्धे कर्मानुस्मृत्यादयो न संभवंति । तत्र स एवान्यो वेत्याशंक्य, तत्र स वाऽन्यो वेति संदेह एव पर्यवस्यतीति सिद्धांतितम् । अयं च विचारः प्रसंगानुप्रसंगायात एव ।

एवमधिकरणत्रयेण स्वप्नसुषुप्तिजाग्रद्रूपावस्थात्रयं भगवत्कृतमेव । तत्र जाग्रति जीवस्य मात्रासंसर्गवारणार्थमुपनिषदर्थनिश्चय आवश्यक इति सूचितम् । एताश्च गुणतो बुद्ध्यवस्थाः । तत्र स्वप्नो राजसः, सुषुप्तिः तामसी, जाग्रदवस्था सात्त्विकी । जीवस्तु देहयोगेन स्वस्मिन्नभिमन्यते, तस्मादेक एव जीवः स्वप्नादिदोषसंबंधरहितस्तादृशजन्मयुक्तो भगवज्ज्ञानरहितो ज्ञानाधिकारीति त्रिभिरधिकरणैः सिद्धमिति ज्ञेयम् ॥ ३ ॥

ततश्चतुर्थे त्रिसूत्रे उभयलिंगाधिकरणे ब्रह्मणः साकारत्वं निराकारत्वं चेत्युभयं सर्वत्र श्रूयत इति स्थानोपाधिकं तत्तदवच्छेदभेदेन च न वक्तुं शक्यत इत्युच्यते । न चोक्तप्रकारेण ब्रह्मभेदेंगीकृते न दोष इति वक्तुं शक्यम्, सर्वत्र ब्रह्मण एकस्यैव कथनाद्, भेददर्शने दोषकथनाच्च ।

१. दोषसंबंधाभानादसंगत्वादिति पाठः ।

एवमुभयलिङ्गविरोधे सिद्धे उपनिषदां पूर्वाध्यायद्वयोक्ता ब्रह्मबोधकता वक्तुं न शक्यत इत्याक्षेपसंगत्योक्तम् ॥ ४ ॥

ततः पंचमे पंचमसूत्रे अरूपवदेव हीत्यधिकरणे एकदेशिमतेन समाधानमुच्यते । सत्यमुभयलिंगविरोधस्तथापि 'सर्वकामः सर्वगंधः' इत्यादयो जडजीवधर्मा ब्रह्मण्युपदिश्यमाना उपासनार्थो भवंति । न च जडस्य भगवत्कार्यत्वाज्जीवस्य भगवदंशत्वात्तद्धर्मा अपि भगवद्धर्मा एवेति कथमुपासनार्थत्वमिति शंक्यम् । 'बहु स्या'मितीच्छया भगवत एव कार्यरूपतयांशरूपतया चैकदेशेन भवनात्कारणरूपस्य ततो भिन्नतया तस्मिन् रूपे जडजीवधर्मनिषेध एव युक्तः । तथा चाद्वैतपक्षे जडजीवधर्माणामपि ब्रह्मात्मकत्वाद् ब्रह्मत्वमेव, न तु ब्रह्मधर्मत्वम्, अतः सर्वकर्मत्वादीनां ब्रह्मण्युपचार एव, अरूपवतः सर्वप्रपञ्चविलक्षणस्यैवास्थूलादिवाक्यैः प्रधानत्वेन निरूपणात् । ततो द्वितीयसूत्रे एवं ब्रह्मणः सर्वव्यवहारातीतत्वे शास्त्रवैफल्यम्, 'मनसैवैतदाप्तव्य'मित्यादिश्रुतिविरोधश्चेत्याशंक्य, यथा सौरः प्रकाशो व्यवहार्योऽव्यवहार्यश्च स्वतो न कर्तुं शक्यते, आगते तु सूर्ये मेघाद्यभावेन सांनिध्यात् व्यवहर्तुं शक्यते, तथा लौकिकवाङ्मनोभिर्ब्रह्म स्वतो न व्यवहर्तुं शक्यते, ईश्वरसंनिधाने तु शक्यते, अतोऽसंनिधाने सर्वव्यवहारातीतत्वम्, संनिधाने तु धर्मवत्त्वेन व्यवहार्यत्वमिति न शास्त्रवैफल्यम् । नापि श्रुतिविरोधः । अन्यथा 'तं त्वौपनिषदं पुरुषं पृच्छामि', 'यतो वाचो निवर्तंत' इत्यादिष्वन्यतरवैयर्थ्यं स्यात् । अतः संनिधानासंनिधानाभ्यां सधर्मकत्वनिर्धर्मकत्वबोधनव्यवस्था मंतव्येत्युक्तम् । ततस्तृतीयसूत्रे 'आसीनो दूरं व्रजति,' 'अपाणिपादो जवनो ग्रहीते'त्यादौ परस्परविरुद्धा अलौकिकधर्माः अकारणककार्यवचनान्नित्याः श्राव्यंत इत्यव्यवहार्येपि तादृशधर्मसिद्ध्या शास्त्रवैफल्यनिरास इति किमर्थं संनिधानासंनिधानाभ्यां व्यवस्थांगीक्रियते, अलौकिकानींद्रियाण्येव कुतो नांगीक्रियंत इत्याशंक्य, बृहदारण्यके 'स यथा सैंधवघन' इत्यादिना कृत्स्नस्य ब्रह्मणः प्रज्ञानघनत्वश्रावणान्नेंद्रियाणि कल्पयितुं शक्यानि । न च क्रियाभावोपि । तत्रैव वेदानां निःश्वसितत्वस्य भूतसमुत्थानादेश्च श्रावणेन, तत्रैव निःश्वासोत्थानक्रिययोरुक्तत्वात् । अतो ब्रह्मैव सर्वाकारस्वरूपं, कृत्स्नत्वश्रावणात् । तस्मादिंद्रियकल्पनया विरोधपरिहारो न युक्त इत्युक्तम् । ततश्चतुर्थे सूत्रे नन्वभिन्ननिमित्तोपादानतया ब्रह्म जगत्कारणत्वेन सिद्धम्, कारणधर्मा एव च कार्ये भवंति, कामादयस्तु श्राव्यंते निषिध्यंते च, वेदवादिभिस्त्वणुवप्यन्यथा न कल्पनीयम्, अतः कथं विरोधपरिहार इत्याशंक्य, मूर्तामूर्तब्राह्मणे ब्रह्मणो रूपद्वयमुक्त्वा, 'अथात आदेशो नेति नेती'तिवारद्वयं कथनेन कार्यकारणयोः समानप्रकारनिषेधः कारणस्य ब्रह्मण एव स्वनिषेधश्च क्रियते। एवं रूपं निरूप्य 'सत्यस्य सत्य'मिति नाम च श्राव्यते, तेन प्रपंचातिरिक्तस्य ब्रह्मणो विद्यमानत्वात् तस्मिन् जडजीवधर्माणामौपचारिकत्वमेव युक्तम् । गीतास्मृतावपि 'सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जित'मिति 'अनादिमत्परं ब्रह्म न सत् तन्नासदुच्यते' इति चोच्यते । तेन श्रुतिस्मृतिभ्यां जडजीवधर्मरहितं ब्रह्मेति सिध्यतीत्युक्तम् । ततः पंचमे प्रपंचधर्मा ब्रह्मण्यौपचारिका इत्यत्र निदर्शनांतरमप्युच्यते, 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्, उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मे'तिस्मृतौ उपाधिना रूपभेदकथनात्, 'सम प्लुषिणे'त्यादावपि निरुपमस्य भगवतो यत् प्लुष्यादिकमुपमानं तदप्युपाधिसंबंधादेव जलसूर्यन्यायेन संभवति । तस्मात् साकारेपि ब्रह्मणि ते धर्मा न संतीत्यौपचारिका मंतव्याः, उपासनार्थमिति नोभयलिंगविरोध इत्येकदेशिमतेन समाधानम् । एतस्य मतस्य किंचिदंशेनोपादेयत्वाय प्रसंगादुक्तम् ॥ ५ ॥

ततः षष्ठे चतुःसूत्रे अंबुवद्ग्रहणादित्यधिकरणे एकदेशिमतं दूषयित्वा स्वमतेन विरोधः समाधीयते । यदुक्तं समवाय्यतिरिक्तस्य ब्रह्मणः समवेतजडजीवसंबंधात् सर्वकामत्वादयः प्रतिबिंबे बिंबधर्मवत् प्रतीयंते, तस्मादौपचारिका इति । तदयुक्तम् । तथाहि । समवाय्यतिरिक्तस्य ब्रह्मणो जडजीवेषु प्रतिबिंबो न वक्तुं शक्यः, तेषामस्वच्छत्वेन प्रतिबिंबाग्राहकत्वात् । ब्रह्मणो व्यापकत्वेन तत्र विद्यमानत्वाच्च । यदि ह्यस्वच्छे व्यापकस्य प्रतिबिंबः स्यात्, दारुण्याकाशस्य स्यात्, स तु न दृश्यत इति । तस्मादुक्तरीत्यौपचारिकत्वमंगीकृत्य समाधानमसंगतमिति प्रथमसूत्रे उक्तम् । ततो द्वितीयसूत्रे यथा व्यापकस्याप्याकाशस्य करकादिप्रवेशे वृद्धिह्रासभाक्त्वं, महानाकाशः स्वल्प आकाश इत्याद्यभ्रमप्रतीतेः । नच महत्त्वाल्पत्वादीनामौपाधिकत्वम् । करकादीनां व्यंजकत्वेन जनकत्वानंगीकारात् । तथा च यथाकाशे सदोदितव्यंग्यभेदेन व्यापकत्वाल्पत्वयोः सामंजस्यम्, तथा ब्रह्मणि निर्धर्मकत्वसधर्मकत्वयोरपि सामंजस्यात् ब्रह्मगता एव सर्वकामत्वादयो जडजीवाभ्यामभिव्यज्यंते । तस्मात्ते ब्रह्मगता एवेति आकाशधर्मवदुभयलिंगत्वविरोधपरिहारः । ततस्तृतीये सूत्रे दर्शनादपि विरोधपरिहारः क्रियते । न हि दृष्टेऽनुपपन्नं नाम, व्याघातात्, अतो विरुद्धधर्माश्रयमेव ब्रह्मेत्यवगंतव्यम् । दर्शनं च मृत्स्नाभक्षणोलूखलबंधनादिषु स्पष्टमिति परमार्थतः स्वरूपविचारेण ब्रह्मस्वभावादेव विरोधपरिहारः । ततश्चतुर्थे युक्त्यापि विरोधः परिह्रियते । प्रकृते ब्रह्मणि लौकिका जडजीवधर्माः निषिध्यंते । अस्थूलादिवाक्येषु स्थूलादिपर्युदासस्यैव दर्शनात् । तथा च पर्युदासः सदृग्ग्राहीति स्थूलसदृशं ब्रह्मेत्येवं सर्वत्र ब्रह्मस्वरूपं ग्राहयति । तथा सति सदोदितमेव तत् । न च व्यंग्यमेव तदिति वाच्यम् । यतो यत्रैव धर्मान् निषेधति, तत्रैवालौकिकान् वक्ति, यथाऽस्थूलादिवाक्ये 'एतस्यैवाक्षरस्य प्रशासने गार्गी'त्यादिनालौकिकं प्रशासितृत्वादिकं वदति, तथा सति तत्सहचरितत्वात् स्थूलत्वादयोप्यलौकिका एव सदोदिताः सेत्स्यंतीति लौकिकानां निषेधः, अलौकिकानां सत्ता, इति युक्त्या विरोधपरिहार इति मतेन शब्दबलविचारेण द्वेधा समाधानम् ॥ ६ ॥

ततः सप्तमे द्विसूत्रे तदव्यक्तमाह हीत्यधिकरणेऽर्थबलविचारेण विरोधः परिह्रियते, अन्यथा अर्थबलेन विचारकाणामृषीणामाक्षेप उत्तिष्ठेदिति तन्निवारणायायमारंभः । तत्र सर्वाणि विरुद्धवाक्यान्युदाहृत्य चिंत्यंते, 'न चक्षुषा गृह्यते,' 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत,' 'अपाणिपादः,' 'विश्वतश्चक्षु'रित्यादीनि विरुद्धवाक्यानि श्रौतत्वात् प्रमाणानि । वस्तुविचारे तु एकं वस्तु द्विरूपं न संभवति । अतः प्रमाणांतरानुरोधेन एकस्य स्वार्थे प्रामाण्यमन्यस्योपचरितार्थत्वं वक्तव्यम् । तत्र कस्य स्वार्थत्वं, कस्योपचरितार्थत्वमित्याकांक्षायां 'अगृह्यो नहि गृह्यते,' इति श्रुतिः प्रत्यक्षानुरोधिनी । नहि ब्रह्म केनचित् चक्षुषा वा मनसा वा दृष्टमस्ति, सर्व(स्व)रूपत्वे तु सर्वैर्द्रष्टुं शक्येत, तस्मात् सर्वधर्मवत्त्वेन प्रतिपादकानि वचनान्युपचरितार्थानि, अनुभवविरोधात्, अव्यक्तत्वबोधकानि तु स्वार्थप्रतिपादकानि, अनुभवसंवादादिति प्रथमसूत्रे पूर्वपक्षमुक्त्वा, अपि संराधन इति द्वितीयेन समाधानमाह । 'श्रद्धाभक्तिज्ञानयोगादवैहि,' 'यमेवैष वृणुते' इत्यादिश्रुतिभिः, 'भक्त्या त्वनन्यया शक्य' इत्यादिस्मृतिभिश्च साकारब्रह्मणो दर्शनमुच्यते । 'ततस्तु तं पश्यते निष्कलं ध्यायमान' इत्यनेन निष्कलस्यापि दर्शनमुच्यते । अतः प्रत्यक्षस्य रूपद्वयसाधारणत्वात् साकारमनंतगुणपरिपूर्णं निर्गुणं विरुद्धधर्माश्रयं ब्रह्मेति साक्षात्क्रियमाणार्थबलेन साक्षात्काररूपार्थबलेन वा निर्णय इति साधितम् ॥ ७ ॥

ततोऽष्टमे त्रिसूत्रे **प्रकाशादिवच्चेत्यधिकरणे** पूर्वोक्त एवार्थः प्रकारांतरेण स्थिरीक्रियते। तत्र यथा सूर्यचंद्रमणिप्रकाशादिषूष्णशीतौ उभयरूपाः स्पर्शाः प्रतीयमाना अपि तेजसि तावंतो नांगीक्रियंते, किंतूष्ण एव स्पर्शोंगीक्रियते, एवं हिमतप्तकुंडादिषु प्रतीयमाना अपि जले तावंतो नांगीक्रियंते, किंतु शीतस्पर्श एवांगीक्रियते, एवं सुवर्णे वर्णभेदा अपि, अतो न ते स्वाभाविकाः, तेजस्त्वादिस्वभावहानिप्रसंगात्, तथा ब्रह्मणोऽपि निर्विशेषत्वमेवांगीकर्तव्यं, सर्वत्र निर्विशेषं ब्रह्मेत्येव प्रसिद्धेः। अत एव 'अगृह्यो नहि गृह्यते' इत्यादिश्रुतयोऽपि संगच्छंते। न च पूर्वोक्तश्रुतिप्रत्यक्षादेः का गतिरिति शंकनीयम्। तपःप्रणिधानादिकर्मणि यथा तेषामुपासकानां कामस्तथा प्रकटीभवतीति तत्कामहेतुकं तादृशप्रत्यक्षम्। अत एव क्वचित्प्रत्यक्षं क्वचिदन्यथाप्रत्यक्षं च यद्येकवारमेकरूप एव प्रकटः स्यात्तादृशरूपमंगीक्रियेतापि, किंतु वारंवारं किंचिद्वैलक्षण्येन प्रकटीभवति। अतः प्रकाशोऽपि कृत्रिम एव, दीपप्रकाशवदित्येका शंका। तस्मान्न भक्तप्रत्यक्षेण निर्णय इति **प्रथमसूत्रे** उक्तम्। ततो **द्वितीयसूत्रे** एकस्य वस्तुनः निमित्तं विना प्रतिक्षणमन्यान्यादृशत्वं न वक्तुं शक्यते, अतोनंतरूपेणाविर्भावे भक्तकाम एव निमित्तम्। तथा सति तद्विग्रह एव, न तु ब्रह्मस्वरूपम्। अत एव 'यद्यद्धिया तु उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाये'ति तृतीयस्कंधे ब्रह्मणाप्युक्तम्। अतस्तच्छरीरमेव, न तु ब्रह्मस्वरूपमिति द्वितीया शंका। तस्मान्न श्रुत्या निर्णयः, नापि भक्तप्रत्यक्षेणेति सूत्रद्वयेनाशंक्य, **तृतीयसूत्रेण** सिद्धांतमाह। नैवं केवलयुक्त्या लौकिकदृष्टांतेन निर्णयः कर्तुं शक्यः, शास्त्रवैयर्थ्यप्रसंगात्। अत्र हि वेदादेव ब्रह्मस्वरूपमवगम्यते, तत्कथं स्वरूपशक्त्यैकतरनिर्णयः, वेदे निर्गुणत्वेनानंतगुणपूर्णत्वेन च व्यपदेशात्। तर्ह्येकस्यानेकधाभानं कथमिति तु न शंक्यम्। यथा एक एव सर्प ऋजुरनेकाकारः कुंडलश्च भवति, तद्वदुभयरूपताया उपपत्तेः। न चैवं यथाश्रुतांगीकारे शास्त्रवैफल्यं शंक्यम्, नानास्वभावैः सूरिव्यामोहे तन्निवारणार्थत्वेन शास्त्रसाफल्यात्। तस्माच्छ्रुतिप्रत्यक्षाभ्यां यत्पूर्वं निर्णय उक्तः, स एव सिद्धांत इत्युक्तम्॥ ८॥

ततो **नवमे त्रिसूत्रे प्रकाशाश्रयवद्वेत्यधिकरणे** धर्मस्वरूपविचारेण ब्रह्म सगुणं निर्गुणमिति पक्षद्वयमपि स्थाप्यते। तत्र धर्मा यदि ब्रह्मस्वरूपाद्भिन्नास्तदा कार्याः, यद्यभिन्नास्तदा ब्रह्मैवेत्याशंक्य, प्रकाशाश्रयवत् भिन्नाभिन्ना इति सिद्धांत उक्तः। यथा प्रकाशाश्रयाः सूर्यादयस्तेजःप्रकाशाद्भिन्नाः प्रकाशधर्मकत्वात्, अभिन्नाश्च तेजस्त्वात्, एवं 'परास्य शक्ति'रित्यादौ षष्ठीनिर्देशाद्भिन्नाः, सच्चिदानंदरूपत्वेनाभिन्नाश्च। तथा च धर्माणां भिन्नत्वेन ब्रह्मणोनंतगुणपूर्णत्वं, तेषामपि सच्चिदानंदरूपत्वेन ब्रह्माभिन्नत्वाद्ब्रह्मणो निर्गुणत्वमित्युभयमप्युपपन्नमिति स्वमतम्। ततः पूर्वं ब्रह्म निर्गुणमेव, पश्चादिच्छारूपेण, ततो धर्मरूपेण, ततः प्रपंचरूपेणाविर्भवतीत्युत्पत्तिविचारेण धर्माणां पश्चाद्भिन्नत्वेपि कार्यत्वाद्ब्रह्मत्वं. कटककुंडलादीनां सुवर्णत्ववदित्येकदेशिमतमपि सूत्रद्वयेनांगीकृतम्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अत्राप्युपपत्तेरिति। एतयोः प्रथममेव ज्याय इति भाष्यप्रकाशादवगंतव्यम्। एतेषां पंचानामप्यधिकरणानामेककार्यकारित्वं संगतिरवगंतव्या। पंचभिरपि श्रुतेर्बोधकताप्रकारस्यैव निश्चायनात्॥ ९॥

ततो **दशमे सससूत्रे परमतः सेतून्मानेत्यधिकरणे**, 'य आत्मा स सेतुर्विधरण' इत्यादिभिः श्रुतिभिर्ब्रह्मणः सेतुत्वादिकमुक्तम्, ब्रह्मणस्तथात्वे परत्वं न संगच्छते, सेत्वादीनां साधनादि-

---

१. विरुद्धधर्माश्रयस्वरूपप्रत्यक्षप्रामाण्यं दृढीक्रियते। २. शीतानुभवरूपा इति पाठः।

रूपत्वात् । अतो देशकालवस्तुस्वरूपकृतचतुर्विधपरिच्छेदरहितं ब्रह्मणोऽन्यदेव किंचित्परं वक्तव्यमिति **प्रथमसूत्रे** आशंक्य, **द्वितीये** 'सेत्वादिसामान्यात्सेत्वादिव्यपदेशार्थः । संसारसागरतरणोपायत्वात्सेतुत्वम्, निर्लेपत्वायाकाशत्वमित्यादिकं गौण्या व्यपदिश्यते । यथा कुंडपायिनामयने 'मासमग्निहोत्रं जुहोती'ति, तस्मात् गुणार्थमेव तदुक्तिः, न तु सर्वप्रकारकसाम्यार्थम् । अतः सेत्वादिदोषाभावात् ब्रह्मैव परम्, नान्यदिति समाहितम् । ततस्तृतीये यथा भूतादि पादवत्त्वेनोपासनीयम्, तथा गौण्यान्यसमानधर्मवत्त्वव्यपदेशस्य किं प्रयोजनमित्याकांक्षायां सेत्वादिधर्मवत्त्वेनोपासनीयमित्युपासनार्थत्वं प्रयोजनमुक्तम् । ततश्चतुर्थे स एवायमित्यतिदेशेप्युपासनासंपत्तेः किमर्थो धर्मातिदेश इत्याशंक्य, यथा चंद्रादित्याग्नितेजसां तेजस्त्वेनैक्येपि स्थानविशेषान्न समानप्रकाशकत्वम्, तथा स एवायमित्यतिदेशेऽपि न समानधर्मवत्त्वमिति ज्ञानसंभवात्, तन्निवृत्त्यर्थं धर्मातिदेश इति प्रयोजनमित्युक्तम् । तेन ब्रह्मैव सर्वत्रोत्कृष्टमिति साधितम् । ततः **पंचमे** ब्रह्मणोऽन्यत् परमितिमतस्य दूषणार्थं, यदि हि सत्यज्ञानाद्युक्तधर्मविशिष्टब्रह्मणोऽन्यत्किंचित्परं स्यात्, तदा येनकेनचित्प्रमाणेन प्रमितं स्यात्, यतो नैवमतो नैवमितिप्रमाणाभावरूपा युक्तिरुक्ता । ततः **षष्ठे** यथा ब्रह्मणि सेतुत्वादिकं श्रुत्योक्तम्, तथा 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुत्या समाभ्यधिकनिषेधोप्युक्तः । यदि ब्रह्मणः सकाशादधिकं परमन्यत्स्यात्तदा तन्न निषेधेत्, यत एवमतो नैवमिति युक्त्यंतरमुक्तम् । तस्मात्सेत्वाद्युक्तिर्गौण्येवेति साधितम् । ततः **सप्तमे** ब्रह्मणोन्यस्य परत्वनिरासेन 'आकाशवत्सर्वगतश्च नित्य' इत्यादिश्रुतिभ्य एव ब्रह्मणः सर्वगतत्वम्, नत्वनुमानैकशरणम् । अनुमानं तु श्रुतिसंवादित्वात्प्रमाणमस्त्विति फलितमुक्तम् । तेन ब्रह्मण एव परत्वम्, नान्यस्य । यद्यपि समन्वयविचार एवैताः श्रुतीः विचार्य दोषाः परिहृताः, तथापि स्वरूपविरोधपरिहारप्रस्तावात्पुनरुच्यंते । सर्ववाक्यप्रतिपाद्यमेकमेव ब्रह्मेत्यपि अर्थबलविचारेण न सिद्धम्, अतो विशिष्टज्ञानोत्पादनार्थं पुनः अर्थबलेन विचारितम्; अतो न दोष इति ज्ञेयम् । अर्थबलं च समाभ्यधिकरहितं यत्स्वरूपं तद्बलम् । एवं सर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणां भजनीयत्वप्रयोजकं रूपं वक्ष्यमाणोपोद्घाततया निरूपितम् । एवमग्रेऽपि ॥ १० ॥

तत **एकादशे चतुःसूत्रे फलमत इत्यधिकरणे** जघन्यमध्यमानामर्थे ब्रह्मणः फलदत्वं सूत्रद्वयेनोच्यते। ततस्तृतीये श्रुत्युपपत्तिभ्यां जैमिनिमतेन धर्मस्य फलदातृत्वमाशंक्य, चतुर्थेन भगवत एव कर्मकारयितृत्वान्न धर्मस्य फलदाने स्वातंत्र्यम्, किंतु ब्रह्मण एव इत्येवं तन्मतं दूष्यते ॥ ११ ॥

एवमष्टभिरधिकरणैः श्रुतीनां बोधकताप्रकारविचारेण तत्तदधिकारिणं प्रति श्रुतीनां तादृशतादृशबोधजनकत्वमित्यस्मिन्पादे निर्णीतमिति बोध्यम् ।

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य द्वितीयः पादः ।

अत्र पूर्वपादे श्रुतीनां बोधकताप्रकारनिरूपेण यथा परोक्षज्ञानजनकत्वं तथा निरूपितम् । अतःपरं यथा साक्षात्कारो भवति, तथा तत्साधनमुपासनारूपं वक्तव्यम् । उपासनायां च क्रियमाणायां धारणासिद्धौ मानसी मूर्तिरभिव्यक्ता भवति । तत उपासनापरिपाके साक्षात्कार इति तदर्थमस्मिन्पादे गुणोपसंहारोंतरंगविचारेण कर्तव्यतया विचार्यते । तत्र किमंतरंगमित्याकांक्षायां 'योगा-

स्त्रयो मया प्रोक्ता' इति भगवदुक्तेषु त्रिषु साधनेषु ज्ञानभक्ती अंतरंगे । तत्र निर्विण्णाधिकारकत्वात् ज्ञानस्यांतरंगता । निर्वेदाभावेपि लौकिकात्यासक्तिरहिताधिकारकत्वाद्भक्तेरंतरंगतेति भेदः । कर्म तु कामाधिकारकत्वाद्बहिरंगसाधनम् । अतः कर्मोपसंहारात्पूर्वं ज्ञानभक्त्युपयोगित्वात् पूर्वं गुणोपसंहारो विचार्यते ।

स कथं कर्तव्य इत्याकांक्षायां ज्ञानभक्त्योः सविषयत्वात् पूर्वं विषयो विचारणीयः । तत्र विषयः पूर्वसिद्धं ब्रह्म, तदेव च फलदाने समर्थमिति द्वितीयपादांते स्थितम् । तदेतत्स्मारयितुमुपसंहारोपोद्घातत्वेन ज्ञानभक्त्योर्विषयतया ब्रह्मणः ज्ञानभक्तिषु युक्ततयोपासनायाश्च सर्ववेदांतप्रत्ययत्वं सूत्रद्वयेन विचारितम् । तेन ज्ञानाधिकारिभिस्तैथैवोपासना कार्येति सेत्स्यति ॥ १ ॥

तत इदानींतनानां सर्वशाखाज्ञानाभावेन सर्ववेदांतप्रत्ययत्वस्यावधारयितुमशक्यत्वात्तेषामुपकाराय भक्तिमार्गीयोपासनोपकाराय काम्योपासनोपकाराय च तत्तच्छाखानुरुद्धशिष्टाचारमनुरुध्य, तत्तद्भक्तिमनुरुध्य, तत्तत्काममनुरुध्य च स्वाध्यायादिसूत्रद्वयेऽनुपसंहारहेतुकथनेन तत्तद्गुणोपसंहाररूपः संकोचो विचारितः ॥ २ ॥

ततो गुणोपसंहार एवास्य पादस्यार्थ इति बोधयितुमुपसंहारसूत्रेण सर्वोपसंहारतत्संकोचयोः काम्योपासनोपयुक्तोपसंहारस्य च बीजमुक्तम् । ततोऽन्यथात्वादिसूत्रत्रयमध्ये प्रथमेन सर्वोपसंहारपक्षेऽब्रह्मत्वरूपं बाधकं निवारितम् । ततो द्वाभ्यां संकोचपक्षे तदेव बाधकांतरेण भक्तिमार्गीयोपासकानामर्थे निवारितम् । ततश्च अनित्यत्वेन प्रतीयमानानां स्वरूपधर्माणामेकेन नित्यत्वं, तदग्रिमे तदुपपत्त्यर्थं भक्तनित्यत्वं, लीलापदार्थानां भगवदभेदश्चोपपादितः । एवं लीलापदार्थानां भगवदभेदे सति भगवत्तुल्यत्वं स्यादिति तन्निवृत्त्यर्थं पूर्णानंदत्वादीनां भगवदसाधारणधर्माणां तेष्वभाव आनंदादिसूत्रेण प्रतिपादितः । तेन भक्तेषु तदनुपसंहारः सिध्यति । ततः प्रियशिरस्त्वसूत्रे अधिकारिभेदेन स्वरूपोपासकस्य प्रियत्वादीनां शिरस्त्वादिरूपेणानुपसंहारस्तदुपसंहारश्च प्रतिपादितः । तत एकेनोपसंहारपक्षे बीजमुक्तम् । तत आध्यानादिसूत्रद्वये उपसंहारसंकोचे बीजमुक्तम् । एवमस्मिन्नधिकरणे पादार्थरूप उपसंहारप्रकारः सपरिकरो विचारितः । भगवतः कैवल्यरूपं मुख्यत्वरूपमैक्यं च समर्थितम् । ततोग्रे एतस्यैव प्रपंचः ॥ १ ॥

ततोग्रे चतुर्भिरधिकरणैरुपासनानियामकसंबंधिभेदे रूपात्मकः संबंधो विचार्यते । तत्रादौ **द्वितीये द्विसूत्रे आत्मगृहीत्यधिकरणे** तद्गुणोपसंहारनियमनाय तत्तद्विभूतिद्वारा ब्रह्मण एव फलदातृत्वसमर्थनाय भक्तिज्ञानमार्गोपकारकशांत्युत्पादनाय विभूतीनां ब्रह्मात्मकत्वभावनाय च अन्नमयादिषु विभूतिष्वानंदमयस्यैव शरीराभिमानित्वं विचारितम् ।

ततस्तृतीये षट्सूत्रे कार्याख्यानादित्यधिकरणे प्रथमसूत्रवर्णकद्वयमध्ये प्रथमवर्णकेन विभूत्युपासनेषु आनंदमयस्याध्यात्मिकरूपेणैव फलदातृत्वरूपविशेषसमर्थनाय पूर्वोक्तविभूतीनामन्नमयादीनां चतुर्णां पुरुषाणामाधिभौतिकत्वनिराकरणेनाध्यात्मिकत्वं समर्थितम् । द्वितीयेन वर्णकेन सर्वगुणोपसंहारायानाविर्भूतपुरुषोत्तमविग्रहस्यैवात्मत्वं ज्ञानभक्तिमार्गीयसाधारण्येन विचारितम् । ततो द्वितीयसूत्र आविर्भूतस्य श्रीकृष्णादिरूपस्याप्यात्मत्वमेवेति व्यापकत्वैकरसत्वसच्चिदानंदत्वादयः सर्वे धर्मा उपसंहर्तव्या इति केवलभक्तार्थं विचारितम् । ततस्तृतीयसूत्रे आवेशिनि गुर्वादावाविष्टे रूपे

१. प्रथमेति मूलपाठः ।　　२. सर्ववेदांतप्रत्ययत्वेन ।

सर्वभगवद्गुणोपसंहारः ज्ञानिभक्तार्थं विचारितः । ततस्त्रिभिरावेशिनि गुरुप्रतिमादावाविष्टे रूपे तदनुपसंहारः केवलभक्तार्थं विचारितः ॥ ३ ॥

ततश्चतुर्थे एकसूत्रे पुरुषविद्यायामित्यधिकरणे उत्तमाधिकारिभिरशेषगुणपूर्णं परं ब्रह्मैवोपास्यम्, न विभूतिरूपमिति साधितम् । आध्यात्मिकेषु विभूतिरूपेषु सर्वगुणानुपसंहारेऽसाधारणगुणानाम्नानरूपो हेतुश्चोक्तः ॥ ४ ॥

ततः पंचमे द्विसूत्रे वेधाद्यधिकरणे पूर्वसूत्रेणासन्यरूपे चेतनविभूतौ भगवत्संबंधाद्दोषाभावनिरूपणात्कैमुतिकन्यायेन मूलरूपस्य निर्दोषत्वं समर्थितम्, आधिभौतिकरूपाणां जीवानां सदोषत्वं च बोधितम् । ततो द्वितीये सूत्रे तत्सदोषत्वं भगवत्सकाशात् विभागदशायामेव, तथा सति मुक्तिदशायां तारतम्याभावे प्राप्ते भगवत्तुल्यतापि स्यादिति तन्निवारणार्थं तदापि न्यूनगुणकत्वं स्थापितम् । तेनाध्यात्मिकरूपेषु कतिपयगुणोपसंहारः, मूलरूपे सर्वगुणोपसंहारः । लौकिकरूपेषु मुक्तिदशायामेव निर्दोषत्वपरिमितगुणोपसंहारौ, न संसारदशायामिति निर्णीतम् । एवं चतुर्भिरधिकरणैः रूपभेदः प्रपंचितः ॥ ५ ॥

ततः षष्ठाधिकरणमारभ्य पंचदशभिरधिकरणैरुपसंहारनियामकस्तत्तन्मार्गरूपः संबंधिभेदस्तत्तदधिकारनियामकं मार्गतारतम्यं च निरूप्यते ।

तत्र षष्ठे द्विसूत्रे संपरायाधिकरणे अंतरंगसाधनयोर्ज्ञानभक्त्योर्मूलरूपोपासनासंभवादविशेषे प्राप्तेवसरसंगत्या स्वरूपतो मर्यादाभक्तेर्ज्ञानाज्ज्यायस्त्वस्य भक्तौ दोषाभावस्य च निरूपणेनांतरंगतरत्वं निरूपितम् ॥ ६ ॥

ततः सप्तमे एकसूत्रे गतेरर्थवत्त्वमित्यधिकरणे हेतुबोधनेन तदेव दृढीकृतम्, मार्गभेदेन पुष्टिभक्तेरंतरंगतमत्वं च निरूपितम् ॥ ७ ॥

ततोष्टमे उपपन्नाधिकरणे पुष्टिभक्तेरंतरंगतमत्वं दृढीकृतम् । एवं त्रिभिरधिकरणैरंतरंगसाधनानां त्रैविध्ये निर्णीते पूर्वं 'इतरे त्वर्थसामान्या'दित्यादिसूत्रत्रयेणोपसंहारानुपसंहारबीजबोधने कृते किमीयोपासनायां के के गुणा उपसंहार्या इत्याकांक्षापि पूरिता । ज्ञानमार्गीयोपासनायां तदुपयोगिनः सर्वे, तत्तद्भक्तिमार्गीयोपासनायां तु तत्तदुपयोगिनस्ते ते इत्यर्थादेव सिद्धेरिति ॥ ८ ॥

ततो नवमेऽनियमाधिकरणे ज्ञानापेक्षयांतरंगाणां भक्तीनां मुक्तिसाधने समुच्चयविकल्पयोरनियमः प्रसंगेन विचारितः । पादार्थसंगतिस्तु पूर्वसिद्धैवात्रापि ॥ ९ ॥

ततो दशमे आधिकारिकाधिकरणे आधिकारिकाणां मुक्तिसाधने प्रवृत्त्यर्थमाधिकारिकाणां भगवद्धर्माणां मुक्तिसाधनत्वाभाव उपोद्घातगर्भप्रसंगसंगत्या प्रतिपादितः । आधिकारिकाणां धर्माणां भगवत्संबंधितया साधनत्वप्राप्तावपवादसंगत्या उपोद्घातगर्भप्रसंगसंगत्या वा मुक्तिसाधनत्वाभावः प्रतिपादितः । उपसंहारस्तु ज्ञानादिमार्गानुरोधीति तदनुसारेणायातीति पादार्थेनापि संगतिः १०

ततः पूर्वं संपरायाद्यधिकरणेषु ज्ञानभक्त्योः स्वरूपतस्तारतम्यसाधनेपि विषयफलयोरविशेषादंतरंगतरत्वादिकस्याप्रयोजकत्वं प्राप्तमिति तन्निवारणार्थमेकादशे द्विसूत्रेऽक्षरधियामित्यधिकरणे ज्ञानभक्तिसंबंधिविषयफलयोर्भेदबोधनात् भक्त्यपेक्षया ज्ञानस्यापकर्षबोधनेन भक्तावंतरंगतरत्वादिकं तथैव संगत्या दृढीकृतम् । उपसंहारस्तु तत्तदुपयोगी प्रागेव सिद्धः ॥ ११ ॥

---

१. भौतिक इति पाठः । २. भक्ति इति पाठः ।

ततो द्वादशे त्रिसूत्रेंतरा भूतग्रामवदित्यधिकरणे श्रुतावहंग्रहोपासनस्य मुख्यत्वकथनात् ज्ञाने भक्तौ च तस्य तुल्यत्वादुभयोस्तौल्यस्य ज्ञानाधिक्यस्य वा प्राप्तौ तस्या उपासनाया मत्त्यैकदेशत्वकथनेन ज्ञानापेक्षया मुख्यभक्तेर्विरहरूपांतरंगसाधनत उत्कर्षः पूर्वोक्तसंगत्या प्रतिपादितः ॥ १२ ॥

ततस्त्रयोदशे द्विसूत्रे सैव हीत्यधिकरणे प्रथमसूत्रेण विहिताविहितरूपाया द्विविधाया अपि मध्यमभक्तेः पूर्वोक्तसंगत्या साधनत उत्कर्षः प्रतिपादितः । द्वितीयसूत्रेण भगवद्विषयककामादीनामपि मुक्तिफलकत्वकथनेन मुक्तौ भगवद्विषयकत्वरूपसाक्षात्संबंधस्यैव मुक्तिसाधनतावच्छेदकत्वम्, न तु ज्ञानत्वं भक्तित्वं वेति निरूपितम् ॥ १३ ॥

ततश्चतुर्दशे द्विसूत्रे आदरादित्यधिकरणे कैमुतिकन्यायेन कर्मापेक्षया भक्तिसाधनानामुत्कर्षः कर्मिप्रत्यवस्थाननिवृत्त्यर्थं प्रतिपादितः ॥ १४ ॥

ततः पंचदशे एकसूत्रे तन्निर्धारणाधिकरणे स्वकृतवेदमर्यादारक्षार्थं विहिताविहितभक्तिमार्गीयस्य कर्मकरणाकरणयोर्हेतुफले बोधिते । द्वितीयपक्षेपि मुख्यभक्तेः पूर्वोक्तभक्तिद्वयादुत्कर्षः साधनतः फलतश्च प्रसंगात् प्रतिपादितः ॥ १५ ॥

ततः षोडशे प्रदानवदित्यधिकरणे सर्वात्मभावात्मकमुख्यभक्तेर्विहितयावत्साधनसाध्यत्वनिराकरणेन वरदानवत्प्राप्तिरित्युक्तम् ॥ १६ ॥

ततः सप्तदशे दशसूत्रात्मके लिंगभूयस्त्वाधिकरणे सर्वात्मभावात्मकमुख्यभक्तेः स्वरूपमंतरंगतमत्वकाष्ठाबोधनार्थं श्रुतिवाक्यैः प्रपंचितम् ॥ १७ ॥

ततोऽष्टादशे त्रिसूत्रे व्यतिरेकाधिकरणे ज्ञानिनां पूर्णाक्षरज्ञानाभावस्य प्रतिपादनेन अग्रिमसूत्रद्वये निदर्शनकथनेन च भक्तानां पूर्णतज्ज्ञानकथनात्सर्वात्मभावरूपमुख्यभक्तिफलस्य भोग्यस्य पुरुषोत्तमज्ञानमध्यमभक्तिफलरूपपुरुषोत्तमसायुज्यादाधिक्यमर्थतः प्रतिपादितम् ॥ १८ ॥

तत ऊनविंशे एकसूत्रे भूम्न इत्यधिकरणे फलविचारेण सर्वात्मभावस्य साधनदशायां दुःखरूपदोषः परिहृतः ॥ १९ ॥

एवं च पंचदशभिरधिकरणैः संबंधिरूपमार्गस्तत्तारतम्यं च निरूपितम् । एवं स्वरूपपरासुपासनासु तारतम्यबोधनेन तासु तासु तत्तद्ध्यानोपयोगिनो गुणा उपसंहार्या इति पादार्थसंगतिः ।

ततो विंशे एकसूत्रे नानाशब्दादिभेदादित्यधिकरणे ततो न्यूनासु सत्त्वोपहितावताररूपोपासनासु नानात्वं विचारितम् ॥ २० ॥

ततोग्रिमे एकसूत्रे एकविंशे तासां तासां विकल्पो विचारितः । गुणोपसंहारस्तु तत्तद्ध्यानोपयोग्येवेति पूर्वोक्तैव व्यवस्था ॥ २१ ॥

ततो द्वाविंशे काम्योपासनासु समुच्चयविकल्पौ यथाकामं विचारितौ, तेन तासु तत्तत्कामोपयोगी गुणोपसंहारो बोधितः ॥ २२ ॥

ततस्त्रयोविंशे द्विसूत्रे अंगेष्वित्यधिकरणे उपासनांगानां व्रतानामाश्रयनित्यत्वं प्रसंगाद्विचारितम् ॥ २३ ॥

ततोऽग्रिमे द्विद्विसूत्रे समाहारादित्यधिकरणद्वये ज्ञानमार्गीयोपासनासु सर्वगुणोपसंहारानुपसंहारावधिकारिभेदेन विचारितौ । तेन ज्ञानमार्गीयो विचार एवात्र मुख्यो, भक्तिमार्गविचारस्तु भक्तौ भगवत्कृपारूपस्याधिकस्य साधनस्य प्रवेशान्न सर्वोपयोगी यद्यपि, तथापि शास्त्रारंभे ब्रह्मसंबंधिजिज्ञासाप्रतिज्ञानुरोधात्कृतः, तत्प्रयोजनं त्वग्रिमपादे 'भक्तिमार्गप्रचारैकहृदयो बादरायण' इति श्लोकेन वक्तव्यमिति ॥२४,२५॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ
वेदान्ताधिकरणमालायां तृतीयाध्यायस्य तृतीयः पादः ॥

वेदांतेषु कर्मांगभूता उद्गीथाद्युपासना उक्ताः । आचार्येणापि अंगेषु यथाश्रयभाव इत्यादिना पूर्वपादांते ता विचारिताः । भाष्यकारैरपि प्राचीनवृत्तिकारादिसंमतं 'पूर्वोत्तरकांडयोरैकशास्त्र्यमंगीकृतम् । तृतीयाध्यायारंभे च चतुर्थपादस्य कर्मोपसंहारोर्थ उक्तः । तथा सति ज्ञानेपि कर्मापेक्षास्तीति सिद्धम् । प्रकृतपादारंभे च प्रथमसूत्रेण स्वमतमुक्त्वा, ततः षट्सूत्रैरीश्वरस्य ज्ञानस्य च कर्मशेषबोधकं जैमिनिमतं पूर्वपक्षत्वेनोपन्यस्य, अधिकोपदेशादित्यादिभिर्नवभिः सूत्रैर्ज्ञानस्येश्वरस्य च यज्ञादिकर्मशेषत्वं निराकृतम् । ततः ऊर्ध्वरेतःसु चेति सूत्रेण ज्ञानस्य संन्यासाश्रमिणः कर्मशेषत्वमपि निराकृतम् । तेन ज्ञानस्य न कर्मशेषत्वम् । तेन पूर्वकांडवैयर्थ्यापत्तौ यज्ञादिकर्मणां यथाकथंचित्परंपरया मोक्ष एव फलत्वेन परामृश्यत इति नैकशास्त्र्यादिहानिरित्यभिसंहितम् । ततः परामर्शसूत्रे तदपवादं पूर्वपक्षीकृत्य, अनुष्ठेयसूत्रे ज्ञानसाधनत्वेन तत्करणमंगीकृत्य कर्मस्वातंत्र्यं निवारितम् । अग्रिमैः पंचभिः सूत्रैस्तदेव समर्थयित्वा ज्ञानस्योत्कृष्टत्वं साधितम् । एवं पंचविंशतिसूत्रात्मकेनाद्याधिकरणेन उपसंहारोपोद्घातत्वेन कर्मणः स्वातंत्र्यास्वातंत्र्ये विचारिते । तत्र भगवत्प्राप्तिरूपस्य पुरुषार्थस्य सर्वात्मभावरूपपुरुषोत्तमज्ञानैकलभ्यत्वमिति स्थितम् ॥ १ ॥

ततः कर्मणः किं परोक्षज्ञानसाधनत्वमपरोक्षज्ञानसाधनत्वं वेत्यपेक्षायां सर्वापेक्षेति षट्सूत्रे द्वितीयाधिकरणे साक्षात्कारस्य स्वरूपोपकारार्थं कर्मज्ञानभक्त्यपेक्षां प्रतिज्ञाय तत्तन्मार्गोक्तकर्मसापेक्षत्वं साधितम् । पूर्वपाद एवांतरंगसाधनविचारे ज्ञानभक्त्यावश्यकताया निरूपितत्वात् । ततो द्वितीयसूत्रे शमदमादीनां सत्त्वशोधकत्वे तैरेव ज्ञानसिद्ध्या यज्ञादिकर्मनिरपेक्षत्वमाशंक्य, तेषां विशेषानुष्ठेयत्वम्, न तु कर्मनिवारकत्वमिति तदानीमपि यज्ञादिकर्म कर्तव्यमेवेति सिद्धांतितम् । ततः ज्ञानिनः सर्वान्नभक्षणस्यानुज्ञानात्कामतः सर्वभक्षणे प्राप्ते आहारशुद्ध्यभावेन शमाद्यसंभवात् पयोव्रताद्यभावेन यज्ञादेरप्यसंभवाद्यज्ञशमदमादीनां साक्षात्कारजनकत्वमसंगतमित्याशंक्य, सर्वान्नानुमतेः प्राणात्ययाद्यापत्तिविषयत्वेनान्यदा तदप्राप्त्या तदानीं कामचाराभावात् यज्ञशमदमादिसंभवेन तेषां ज्ञानप्रतिबंधनिवर्तकतया कारणत्वं निर्बाधम् । यद्यपि पूर्णस्य ज्ञानस्य कर्मनाशकत्वम्, तथापि साधनदशायां तदपेक्षास्तीत्युपसंहारहेतुतया सर्वान्नानुमत्यादिसूत्रचतुष्टये साधितम् ॥ २ ॥

ततस्तृतीयेऽष्टसूत्रे विहितत्वाच्चाश्रमकर्मेत्यधिकरणे प्रथमसूत्रद्वयेन जातज्ञानस्यापि ज्ञानमार्गीयस्याश्रमधर्माणां नित्यत्वेन प्रत्यवायपरिहारकतया शमदमादिसहकारितया च कर्तव्यत्वं निर्णीतम् । तेनैव कर्ममार्गीयस्य निष्कामतायामपि तदावश्यकत्वमित्यर्थादेव बोधितम् । ततोऽग्रिमैः सर्वथापीत्यादिभिः षड्भिः सूत्रैर्विहितानां भगवच्छ्रवणादीनां पूर्वोक्तेभ्यः सर्वेभ्य आधिक्यं, तदविरोधेनैवाश्रमधर्माणां कर्तव्यत्वं, भगवद्धर्मकर्तुरनभिभवं, आश्रमधर्माणां फलसिद्धावंतरायरूपत्वादविरोधेनैव कार्यत्वं, भगवद्धर्माणां भक्तेस्तत्फलस्य च ज्ञानादिफलाज्यायस्त्वमंतरंगतरविचारेण निरूपितम्; तेन भगवद्धर्माविरोधेनैव ते कर्तव्या इत्युपसंहारप्रकारो दर्शितः ॥ ३ ॥

ततस्तत्फलं किं, कथं च तस्य ज्ञानफलादाधिक्यमित्याकांक्षायां **चतुर्थे एकसूत्रे तद्भूतस्ये**त्यधिकरणे भगवद्धर्माणां साधनदशायामुत्कृष्टत्वेपि फलदशायां मुक्तिभवने फलतो न कश्चिद्विशेष इत्याशंक्य, नियमादिभिर्हेतुभिस्तस्य नित्यत्वं, भक्तानां मुक्त्यनिच्छया तत आधिक्यं च मुख्यभक्तिमार्गस्योत्कर्षार्थं प्रसंगात्प्रतिपादितम् ॥ ४ ॥

ततः **पंचमे द्विसूत्रे न चाधिकारिकमित्य**धिकरणे मर्यादापुष्टस्यापि यत् भगवदीयत्वरूपमंतर्निष्ठारूपं यत्फलं तन्नित्यं, ज्ञानमार्गीयमुक्तेः सकाशादधिकमित्यनुप्रसंगेन निरूपितम् । एवमधिकरणद्वयेन पूर्वोक्तकर्मोपसंहारप्रकारे बीजं बोधितम् ॥ ५ ॥

ततः **षष्ठे चतुःसूत्रे बहिस्तूभयथेत्य**धिकरणे सर्वविधस्य पुष्टिमार्गीयस्य आश्रमरूपसंन्यासधर्मानुपसंहारार्थं साधनत उत्कर्षबोधनायानुप्रसंगेन गृहत्यागो विचारितः । स च मध्यमाधिकारे एवेति फलति ॥ ६ ॥

ततः **सप्तमे एकसूत्रे सहकार्यंतराधिकरणे** गृहत्यागिनो मर्यादापुष्टिमार्गीयस्य शमादिकं भावनासहकारित्वेन कर्तव्यम्, पुष्ट्यंशबाहुल्ये तु तेनापि भावनामात्रमेव कर्तव्यमिति साधनव्यवस्थानुप्रसंगाद् दर्शिता ॥ ७ ॥

ततोऽष्टमे **चतुःसूत्रे** गृहिणोपसंहाराधिकरणे, प्रथमसूत्रेण पूर्वोक्तेभ्यो जघन्याधिकारिणां त्यागानुकल्परूपं गृहे स्थित्वा भगवद्भजनं कर्तव्यमिति विचार्य, द्वितीयादिभिस्तस्य करणप्रकारस्तदाधिक्यं, भगवद्भावस्य लोकेष्वप्रकटनं, भगवद्भजनव्यतिरिक्तसमये लौकिककरणं, गृहिणोपसंहारश्रुतिमनुसृत्यानुप्रसंगाद्विचारितम् । तेन **विहितत्वाच्चाश्रमकर्मापीत्य**नेन यत्पूर्वमुक्तं तस्य प्रकारो बोधितः ॥ ८ ॥

ततो **नवमे एकसूत्रे एवं मुक्तिफलानियम** इत्यधिकरणे तादृशस्य देहपातोत्तरं मुक्तिर्वा भगवदीयत्वं वेति संशये **मुक्तिस्तु नियतैव, भगवदीयत्वं तु भगवत्कृपाधीनमित्यनियमो** निर्णीतः । तेनानुकल्पोपि मर्यादामार्गादधिकः, निरवध्यानंदपुरुषोत्तमसायुज्यादिति ॥ ९ ॥

एवमस्मिन्पादे बहिरंगविचारेण सप्रकारः कर्मोपसंहारो दर्शितः । एवमस्मिन्नध्याये चतुर्भिः पादैः सर्वसाधनं सप्रकारमुपदिष्टम् ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य चतुर्थः पादः समाप्तः ।

तृतीयाध्यायः समाप्तः ।

चतुर्थोऽध्यायः ।

अथ **चतुर्थाध्याये**वसरसंगत्या फलं निरूप्यते । तत्र फलं **ब्रह्मविद** इति **चतुर्भिः पादै**र्जीवतो म्रियमाणस्य गच्छतः प्राप्तफलस्य च क्रमेण तस्य यथाधिकारमवस्था निरूप्यंते ।

तत्र **प्रथमपादस्य द्विसूत्रे प्रथमेऽधिकरणे** प्रथमवर्णकेन श्रवणादीनामवांतरफलत्वाय तेषामावृत्तिः कर्तव्येत्युच्यते । तेन पूर्वपादांते गृहिणोपसंहारे सर्वेंद्रियाणामात्मनि प्रतिष्ठापनमुक्तम्, तत्प्रकारोत्र दर्शित इति पूर्वेण सह प्रकारप्रकारिभावः संगतिरिति बोध्यम् । **द्वितीयवर्णकेन** तु

ज्ञानभक्त्योः फलत उत्कृष्टत्वाय कर्ममार्गे आवृत्तिव्युत्पादनेन फलजघन्यत्वमपि बोधितम् । तेन कर्मणि तत्फले चानासक्तिरपि तत्प्रकारत्वेन बोध्यत इति सैव पूर्वेण सह संगतिरिति बोध्यम् ॥ १ ॥

ततो **द्वितीये त्रिसूत्रे आत्मेतीत्यधिकरणे** प्रथमवर्णकेन ज्ञानफलं द्विविधं विचार्यते । मुख्यं त्वात्मप्रवेशरूपमनश्वरम्, द्वितीयं त्वधिकारिषूपस्थितेषु तेभ्यो ज्ञानोपदेशरूपमवांतरफलम्, भगवदाज्ञापरिपालनात्मकम्, न त्वाचार्यत्वकामनाकृतमित्युच्यते । द्वितीये ननु 'न स पुनरावर्तत' इतिश्रुत्युक्तो ज्ञानभक्त्योः फलरूपः पुनरावृत्त्यभावः किं सावधिक उत निरवधिक इत्याशंकायाम्, निरवधिक इति सिद्धांत उच्यते । नित्ये भगवद्रूप आत्मनि ब्रह्मविदो जीवात्मनः शुद्धजले जलस्येव प्रवेशेन तादृक्त्वस्यैव श्रुतावुक्तत्वादिति, भक्तिमार्गे च भगवतो मुक्तोपसृप्यत्वेन सेवार्थं तन्निकट-स्थितेरपि नित्यत्वादिति । एवमात्मोपदेशस्यावांतरफलत्वं त्वत्रापि समानम् । ततो **द्वितीयसूत्रे** प्रतीकोपासकानां न मोक्षः, अतद्रूपे तत्त्वेनोपासनादिति । अतः सा न कर्तव्येति बोधितम् । **तृतीये** सर्वत्र ब्रह्मदृष्टिः कर्तव्येति बोधितम् । तथा च सर्वत्रात्मभावनात् तथा स्फुरणाच्च दुःखस्य निवृत्ते-स्तस्याप्यवांतरफलत्वम् । पूर्वपाद उक्तानां गृहत्यागिनां यदांतरं बाह्यं च साधनं तदत्रोपदिश्यत इत्यत्रापि तेन सह प्रकारप्रकारिभाव एव संगतिरिति बोधितम् ॥ २ ॥

ततस्**तृतीये पंचसूत्रे आदित्यादिमतय इत्यधिकरणे प्रथमसूत्रे** प्रतीकोपासना न कर्तव्या एव चेत्, ताः किमर्थमुपदिश्यंते, (नन्वेवमंगोपासना एव?) सिद्धांते प्रतीकोपासना इत्याकांक्षायाम्, अवसरसंगत्या सिद्धांते अंगोपासना एव प्रतीकोपासना इति तत्स्वरूपमुच्यते । ताश्चोपासना जघन्याधिकारिणां फलदानद्वारा माहात्म्यज्ञापनेन भक्तिद्वारा आधिभौतिकसर्वात्मभाव-रूपज्ञान एवोपकुर्वंतीत्युच्यते, अग्रिमसूत्रैस्तथैव प्रतिपादनात् । ततो **द्वितीयसूत्रे** भावनौत्कट्ये बहिर्भगवदध्यासरूपं प्राकट्यं फलमुच्यते । ततस्**तृतीये** ध्यानात्मनो मानसीमूर्तिसिद्धिरूपं फल-मुच्यते । ततश्**चतुर्थे** लीला अपि भगवान् तथा प्रकटयतीत्युच्यते । ततः **पंचमे** अधिकारौत्कट्येन तेषां तत्रैव फलत्वं भासत इति श्रीभागवतोक्तस्मृतिबलेनोच्यते । तस्मात् तासां ज्ञानोपकार एव फलमिति सिध्यति ॥ ३ ॥

ततश्**चतुर्थे एकसूत्रे यत्रैकाग्रतेत्यधिकरणे** बहिरंतर्भगवत्प्राकट्यवतोरुपासकयोर्न तार-तम्यमिति सिद्धांतः प्रसंगेन क्रियते ॥ ४ ॥

ततः **पंचमे एकसूत्रे आप्रायणेत्यधिकरणे** भगवत्प्राप्तिरूपपरमफलपर्यंतं तस्य सैवावस्था तिष्ठति । परमफलं च तस्य साक्षाद्भगवत्सेवनरूपं सिध्यतीत्यनुप्रसंगेन पुष्टिमार्गीयस्योक्तम् । इदमेव च पूर्वं तद्भूताधिकरणे प्रतिपादितमत्रांगोपासनाविषयेपि स्मार्यते । तेन पुष्टिमार्गीयस्य जीवत इदम-वांतरफलमिति बोधितम् ॥ ५ ॥

ततः **षष्ठे चतुःसूत्रे तदधिगम इत्यधिकरणे** मर्यादामार्गीयस्यावांतरफलमवसरसंग-त्योच्यते । तत्र **प्रथमसूत्रे** (चित्तशुद्धौ) ज्ञानोदये सति पूर्वपापनाशः, तदनंतरं पापस्यानुत्पत्तिः । **द्वितीयसूत्रे** पूर्वपुण्यस्य नाशः, तदनंतरं तदनुत्पत्तिः । कदाचित् प्रारब्धवशाद्भगवद्भावाच्युतौ उत्तरकर्मण उत्पत्तिरित्युक्तम् । ततस्**तृतीये** ज्ञानात् कर्मनाशे सति कर्मजन्यदेहस्यापि नाशादा-चार्याभावेन ज्ञानादिसंप्रदायोच्छेद इत्याशंक्य, अनारब्धकार्याणामेव तेषां नाशः, न प्रारब्धकार्याणा-मिति, तेषां भोगैकनाश्यत्वादित्युक्तम् । ततश्**चतुर्थे** ब्रह्मविदोग्निहोत्रादिकरणमपि प्रारब्धभोगरूप-

कार्यायैव, येषामग्निहोत्रकरणरूपं प्रारब्धमस्ति तेषां तत्करणरूपेण भोगेन तन्निवृत्तेः, न तु तस्य कर्मणः संश्लेष इत्युक्तम्। तेन मर्यादामार्गीयस्य कर्मसंसर्गाभाव इत्यनेनाधिकरणेनावसराद्वा प्रसंगाद्वा साधितम्॥ ६॥

ततः **सप्तमे त्रिसूत्रे अतोन्यापीत्यधिकरणे** पुष्टिमार्गीयस्य 'तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्याम् द्विषंतः पापकृत्या'मिति श्रुतिबलाद् विनैव भोगं प्रारब्धनिवृत्तिरिति **प्रथमसूत्र** उच्यते। ततो **द्वितीये** 'यदेव विद्यये'ति श्रुत्या ब्रह्मविदः कर्मकरणप्राप्तौ तत्संश्लेषमाशंक्य, इदं वाक्यं कर्मांगभूतोद्गीथोपासनाविषयम्, न तु ब्रह्मविद्याविषयम्, अतो न तस्य आपादयितुं शक्यते कर्मसंश्लेषो ब्रह्मविदः। किंच, यद्यनया कर्मकरणं प्रसक्तं क्रियते, तदा ब्रह्मवित्कर्ममोक्षायैव कर्म करोतीति तच्छ्लेषाभावायैव तत् फलिष्यतीति तु मर्यादामार्गरीत्या समाधानम्। पुष्टिमार्गीयस्तु केवलं भगवदासक्तः, भगवद्गुणानां च जीवगुणाः अंशाः, जीवनिष्ठं विद्यारूपं यज्ज्ञानं तद्भगवज्ज्ञानस्य अंश इति सिध्यति। तथा सति जीवनिष्ठविद्ययापि चेत् न मर्यादामार्गीयस्य कर्मश्लेषः, तदा भगवत्स्वरूपासक्तस्य पुष्टिमार्गीयस्य कर्मश्लेषः कैमुतिकन्यायेनैवापास्त इत्युक्तम्। ततस्तृतीये पुष्टिमार्गीयः पूर्वोक्तप्रकारेण स्थूललिंगशरीरे क्षपयित्वा ततो यथाधिकारं भगवत्साक्षात्कारादिरूपेण फलेन संपद्यत इति परमफलमुक्तम्। अत्र क्षपणं च कुरुक्षेत्रप्रसंगे व्रजभक्तानां जीवकोशध्वंसरूपम्। भोगश्च तदनंतरदर्शनादिरूपो जीवद्दशायामेव भवतीत्यवांतरफलपरिसमाप्तिरिति मम प्रतिभाति।

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य प्रथमः पादः॥

अथ द्वितीयपादे म्रियमाणस्य ब्रह्मविदोवांतरफलव्यवस्था अवसरसंगत्योच्यते।

तत्र **प्रथमे चतुःसूत्रे वाङ्मनसीत्यधिकरणे** तत्र **प्रथमसूत्रे** 'अथाकामयमान' इति वाजसनेयिश्रुतिमालंब्य म्रियमाणस्य पुष्टिमार्गीयस्य म्रियमाणदशायां बहिर्मनसि वा दर्शनं वेणुनादश्रवणं वा भवति, तदा तस्य वाङ्मनसि संपन्ना भवतीत्युक्तम्। ततो **द्वितीयसूत्रे** पूर्वोक्तेनैव हेतुना अन्यान्यपींद्रियाणि मनसा सह संगतानि भवंतीत्युक्तम्। ततस्तृतीये सर्वेंद्रियविशिष्टं मनः प्राणे संगतं भवतीत्युच्यते। ततश्चतुर्थे तत्सर्वविशिष्टप्राणो हृदि वा बहिर्वा प्रकटे भगवति लीनो भवतीत्युच्यते। तथा चानेन क्रमेण तस्येंद्रियाणि भगवति लीयंते, आत्मापि लीयते, 'न तस्मात्प्राणा उत्क्रामंति, अत्रैव समवनीयंते ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुतेरित्युच्यते। तस्यालौकिकदेहप्राप्तिश्चतुर्थे पादे वक्ष्यते॥ १॥

ततो **द्विसूत्रे द्वितीये भूतेष्वित्यधिकरणे** म्रियमाणस्य मर्यादामार्गीयस्य **व्यवस्था** अवसरगर्भेण प्रसंगेनोच्यते। तत्र **प्रथमसूत्रे** तस्येंद्रियाणि भूतेषु लीयंत इत्युच्यते, स्वयं तु हृद्येवं भगवंतं प्राप्य मुक्तो भवतीत्यपि तेन सूच्यते। ततो **द्वितीये सूत्रे** भक्तो ज्ञानी च मर्यादामार्गीयौ भवतः। तत्रोभयोरियं व्यवस्था, उत भक्तस्य पुष्टिमार्गे प्रवेश इत्याशंक्य, द्वयोरपीयं व्यवस्थेत्युच्यते।

ततस्तृतीये **नवसूत्रे समाना चासृतीत्यधिकरणे** उभयोर्मुच्यमानत्वेपि प्राणादिलयप्रकारे पुष्टिमर्यादास्थयोः कुत एवं (विशेषादेव) विशेष इति वक्तुं पुष्टिमार्गीयस्य मर्यादामार्गादाधिक्यमुपोद्घातेन विचारितम्। तत्र **प्रथमसूत्रे** साधनद्वारा मोचनेच्छा हि मर्यादामार्गीया मर्यादा,

विहितसाधनं विनैव मोचनेच्छा पुष्टिमार्गमर्यादा। अतस्तयोः संकरः कदापि न भवतीति विशिष्टेच्छया आधिक्यमुक्तम्। ततो **द्वितीये** पुष्टिमार्गीयमुक्तिदशायां मर्यादामार्गीयमुक्तेः संसारतौल्यव्यपदेश इत्युक्तम्, तेन पुष्टिमार्गस्याधिक्यं सूच्यते। ततस्**तृतीये** यदि तस्याः संसारतुल्यत्वं तदा तस्या हेयत्वं स्यात्, तद्बोधकश्रुतेः प्रतारकत्वं चेत्याशंकायाम्, पुष्टिमार्गीयं तत्त्वं दुर्ज्ञेयम्। अतस्तदज्ञानान्मर्यादामार्गीयमुक्तिर्येषामीप्सिता तान् प्रति तामेवोपादेयत्वेन श्रुतिर्वदति, रागिणः प्रति स्वर्गादि उपदिश्यते (तद्वत्[1]। ततश्**चतुर्थे** तर्हि ब्रह्मविदामिव तादृशानां भक्तानामपि स्वमार्गोपदेशनं क्वचिच्छ्रूयेत), यतो नैवम्, अतो नैवमित्याशंकायाम्, तदनुपदेशने बीजमाह। पुष्टिमार्गीयाणां हि अवस्थाद्वयम्, विरहः प्रियसंगो वा। तत्राद्ये स्वास्थ्याभावान्नोपदेशः। द्वितीये तु भगवत्संनिधानेन तदग्रे धार्ष्ट्यस्य कर्तुमशक्यत्वान्नोपदेशः। अत उपदेशाभावान्न तस्यासत्ता वक्तुं शक्येत्युक्तम्। ततः **पंचमे** भगवदीयानां विरह एव कथमित्याशंकायाम्, पुष्टिमार्गे भगवतो रसात्मकत्वस्यैव प्राकट्यात् तेनैव तदुपपत्तिरिति युक्त्या समाहितम्। ततः **षष्ठे** विरहांगीकारे श्रुतिविरोधमाशंक्य, श्रुतौ शरीरसंबंधिन एव दुःखस्य निषेधो, न भगवद्विरहजन्यस्येत्येवं समाहितम्। ततः **सप्तमे** श्रुत्या, **अष्टमे** च स्मृत्या तद्दृढीकृतम्। ततो **नवमे** सर्वासां रसावस्थानां सत्ता श्रीगोकुल एव विद्यत इति श्रुत्या व्यवस्थापितम्। एवं पंचभिः सूत्रैः प्रमाणपूर्वकं रसावस्थास्थापनेन पुष्टिमार्गस्य सर्वोत्कृष्टत्वं व्यवस्थापितम्। अतः पुष्टिमर्यादायामुपदेशेपि न कश्चिद् दोष इत्यर्थात् सूचितं भवति ॥ ३ ॥

ततश्**चतुर्थे एकसूत्रे अविभागो वचनादित्यधिकरणे** प्रसंगात् पुष्टिमार्गीयस्य नित्यलीलारूपफलानुभवस्य नित्यत्वं मर्यादामार्गात् फलतो विशेषप्रतिपादनाय विचारितम् ॥ ४ ॥

ततः **पंचमे एकसूत्रे तदोकोग्रज्वलनाधिकरणे** मर्यादामार्गीयस्य ब्रह्माण्डमध्ये सद्यो मुक्तिप्रकारो विचारितः। तदग्रिमे च अवसरसंगत्या मर्यादामार्गीयस्य जीवोत्क्रांत्यनंतरं क्रममुक्तिप्रकार उच्यते। तत्र साधारणस्यापि जीवस्य इंद्रियरूपाभिस्तेजोमात्राभिः सहैव येन केनचिद्द्वारेण निर्गमनम्, तथापि यस्य साधनेन (परमात्मा तुष्टः,) स जीवस्तु एकशतनाडीषु या शताधिका मूर्धन्या नाडी, तया ऊर्ध्वं त्य 'क्त्वा' निष्क्रामति, साधनेन तुष्टो यो हृदयवर्ती परमात्मा तदनुग्रहाद्विद्यासामर्थ्याच्च या भगवत्स्मृतिपरंपरा, तया तस्यानुग्रहः, तेन मूर्धन्यनाड्या निष्क्रमणमित्युक्तम् ॥ ५ ॥

ततः **षष्ठे चतुःसूत्रे रश्म्यनुसार्यधिकरणे**। तत्र **प्रथमसूत्रे** यः क्रमेण मोक्षाधिकारी रश्म्यनुसारी मूर्धन्युनाड्या निःसरति तस्यापि हृदयाग्रे प्रकाश इत्युक्तम्। ततो **द्वितीये[2] तृतीये** च रात्रिकृतोऽयनकृतो विशेषश्च नास्तीत्युक्तम्। ततश्**चतुर्थे** स्मृतौ धूममार्गस्याप्युक्तत्वात् तत्र च रात्रिदक्षिणायनादीनामुक्तत्वादर्चिरादिमार्गे च ज्योतिरुत्तरायणादीनामुक्तत्वान्मुच्यमानस्य कथं न विशेष इत्याशंक्य, स विशेषो योगिन एव, गती च ते स्मार्ते, अतो न ज्ञानिनः, तेन ज्ञानिन उत्क्रमणे सर्वोपि कालः समान इत्युक्तम्। एतस्य करणग्रामनिष्पत्तिस्तु यत्र प्रारब्धसमाप्तिस्तत्र भूतेष्वेव भविष्यतीति ज्ञेयम्। उपक्रमे तथैवोक्तत्वादिति ॥ ६ ॥

---

१. चिह्नांतर्गतफक्किका त्रुटितेति प्रतिभाति। २. इतः परं सूत्रत्रयं भिन्नाधिकरणत्वेन श्रीगोपेश्वरा इच्छंति, भाष्यप्रकाशिकाकाराः श्रीकृष्णचंद्राश्च।

एवमस्मिन् पादे पुष्टिमर्यादामार्गीययोर्म्रियमाणावस्था विचारिता ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य द्वितीयः पादः ॥

अथ **तृतीयपादे** क्रममुक्त्यधिकारिणो ब्रह्मविदोर्चिरादिमार्गेण गच्छतो व्यवस्थावसरप्राप्तोच्यते ।

तत्र प्रथमे चतुःसूत्रे अर्चिरादीत्यधिकरणे ज्ञानमार्गीयस्य भक्तस्य चेत्युभयोरर्चिरादिमार्गेण गमनम्, उत सद्योमुक्तिरितिसंशये, यथा ज्ञानिनो नियमाभावस्तथा भक्तस्यापीति पूर्वपक्षे, पंचाग्निविद्यायां ज्ञानमार्गीयाणामेवोपक्रांतत्वात्तेषामेव तेन मार्गेण गतिः, न तु भक्तस्यापीति निश्चीयते। ततस्त्रिभिः सूत्रैस्तन्मार्गपर्वनिर्धारः क्रियते । श्रुतिभेदेन पर्वभेदानामनेकधोक्तत्वात् मार्गभेदे प्राप्ते देवयानस्य मार्गस्य श्रुत्यंतरे यदैक्यमुक्तं तद्विरोधसंभवात् । पर्वसु निर्धारितेषु तु यस्य यत्पर्वभोगो भावी तं प्रति तत् पर्व, अन्यं प्रत्यन्यत् । यथा महामार्गे नानाग्रामेषु सत्स्वपि कस्यचित् कस्मिंश्चिद् ग्रामे अवांतरनिवासः, अन्यस्यान्यस्मिन् ग्रामे सः, तद्वत् । एवं पर्वभेदेप्युपपत्तौ ब्रह्मलोकगमनस्यैक एवार्चिरादिमार्गो देवयानाख्यः सिध्यतीति निर्णीतम् ॥ १ ॥

ततो **द्वितीये त्रिसूत्रे आतिवाहिकाधिकरणे** तेन मार्गेण कथं गच्छतीत्याकांक्षायामवसरगर्भेण प्रसंगेन गमनप्रकारो निर्धार्यते । तत्र पर्वभूतविद्युल्लोकपर्यंतं विद्यासामर्थ्येनैव गच्छति । ततो विद्युल्लोके अमानवः पुरुषो ब्रह्मलोकगमयिता तत्रागत्य तं विद्युल्लोकस्थं गंतारं ब्रह्मलोकं प्रापयतीति श्रावितम् । एवं सति येषां विद्युल्लोकभोगोस्ति ते वरुणादिलोकं गच्छंति । तत्र सः ब्रह्मलोकप्रापयिता आयाति न वेति संशये, तत्राप्यायाति, श्रुत्यंतरे प्रजापतिलोकानंतरमपि ब्रह्मलोकस्योक्तत्वात्, ब्रह्मलोकप्रापयितॄणां पुरुषाणां च बहुत्वात्, यस्य यल्लोकभोगेन प्रारब्धसमाप्तिस्तं तत एव लोकाद्ब्रह्म प्रापयंतीति **प्रथमसूत्रे** निर्णीतम् । तेषां ब्रह्मलोकप्रापका ये पुरुषास्ते आतिवाहिकशब्देनोच्यंत इत्यपि । ततो **द्वितीये सूत्रे** अपुनरावृत्तिश्रुत्या देवयानं पंथानं प्राप्तानां ब्रह्मवित्त्वात्तेषां सद्योमुक्तिरेवोचितेति तेषामवांतरलोकभोगजनिका कामनैव कुतः । किंच, 'यत्कर्मभिर्यत्तपसे'ति भगवद्वाक्ये मर्यादाभक्तस्य या लोकांतरकामनोक्ता सापि कुतः । तेषां सद्योमुक्तेरेव प्रथमाधिकरणे निर्धारादित्याशंक्य, केषांचित् ज्ञानिनां मर्यादाभक्तानां व्यामोहितत्वात् सा । व्यामोहश्च लीलासिद्ध्यर्थं, येऽवांतर्लोकाः कृतास्तत्सृष्टिसार्थकत्वाय भगवतैव क्रियते । अतो नानुपपत्तिरित्युक्तम् । ततस्**तृतीयसूत्रे** ये वरुणादिलोकं गतास्तेषां स्वत एव ब्रह्मप्राप्तिरस्तु । आतिवाहिकस्य विद्युल्लोकीयत्वश्रावणेन तेषु लोकेषु तदभावादित्याशंक्य, श्रुतावातिवाहिकस्य न विद्युल्लोकीयत्वमभिप्रेतम् । 'पुरुषोऽमानव एत्ये'ति श्रावणाद्ब्रह्मलोकीयत्वम् । वैद्युतत्वं तु तस्य विद्युल्लोकपर्यंतमागमनात् । अतो लोकांतरादपि ब्रह्मलोकप्राप्तावातिवाहिकापेक्षास्तीत्युक्तम् । किंच, वाजसनेयके 'ब्रह्मलोकान् गमयती'ति श्रावितम् । छांदोग्ये तु 'ब्रह्म गमयती'ति श्रावितम् । तेन मर्यादामार्गीयं भक्तं वैकुंठलोकान् गमयति । ज्ञानमार्गीयं त्वक्षरब्रह्म गमयतीत्यपि तत्र निर्णतिम् । एवमेतेन गमनप्रकारो निर्णीतः ॥२॥

ततस्तृतीये **अष्टसूत्रे कार्यं बादरिरित्यधिकरणे** पूर्वसूत्राधिकरणश्रुत्युक्तस्य प्राप्तव्यस्य ब्रह्मणः किमविकृतब्रह्मत्वम्, उत कार्यब्रह्मलोकत्वमिति संशये, प्रथमं **पंचसूत्रै**र्यद्बादरिमतमुक्तम्, तत्राधिकृतस्य परब्रह्मणो व्यापकत्वादत्रोक्तं गमनं न संगच्छते तस्मात्। किंच, श्रुत्यंतरे 'ब्रह्मलोका'-निति 'तेषु वसंती'ति च बहुत्वेन वासाधिकरणत्वेन च विशेषितत्वादपि तथा। तत्र ब्रह्मत्वव्यपदेशस्तु ब्रह्मसामीप्यात्। कल्पसमाप्तौ कार्यब्रह्मलोकस्य नाशे चतुर्मुखेन ब्रह्मणा सह तस्यापि चतुर्मुखवत् परब्रह्मप्राप्तेः श्रुतौ स्मृतौ चाभिधानादपि प्राप्यब्रह्मलोकोऽपर एव, न तु परब्रह्मेति पूर्वपक्षत्वेनोक्तम्। ततस्त्रिभिः **सूत्रै**र्जैमिनिमतं सिद्धांतत्वेनोक्तम्। तत्र **प्रथमसूत्रे** ब्रह्मशब्दस्य बृहत्त्वादिगुणविशिष्टत्वेन परस्मिन्नेव मुख्यवृत्तत्वात् गौण्याऽपरब्रह्मांगीकारो न युक्त इत्युक्तम्। ततो **द्वितीये** कौषीतकिश्रुतौ प्रजापतिलोकाद्ब्रह्मलोकस्य पार्थक्येनोक्तत्वात् छांदोग्ये अर्चिरादिमार्गप्राप्यत्वेन समाप्तौ 'ब्रह्म गमयती'त्युक्तत्वात् प्रजापतिलोकादन्यस्य कार्यब्रह्मलोकस्य कुत्राप्यश्रवणाद्गमनस्य प्रारब्धहेतुकत्वेन विलंब्यप्राप्तेः संभवाच्च न गमनादिश्रुतिस्मृतिविरोध इत्युक्तम्। **ततस्तृतीये** 'ब्रह्मविदाप्नोति पर'मिति श्रुतौ परप्राप्तिर्या उक्ता सैवाग्रिमर्चा विव्रीयते। तस्यां च ब्रह्मणा सह सर्वकामभोगलक्षणा या प्रतिपत्तिरुच्यते, सा परेणैव सह। कुत्रापि श्रुतौ कार्यरूपे प्रतिपत्तेरनभिप्रेतत्वात्। अतो ब्रह्मशब्देन परब्रह्मैवोच्यत इति सिद्धांतितम्। एवमष्टभिः सूत्रैः गंतव्यब्रह्मस्वरूपं प्रसंगान्निरूपितम्॥ ३॥

ततश्चतुर्थे **एकसूत्रे अप्रतीकालंबनाधिकरणे** पूर्वोक्तप्रकारेणातिवाहिकप्रापिता ब्रह्मप्राप्तिः किं सर्वेषामुपासकानाम्, उत केषांचिदेवेति संशये, अप्रतीकालंबनानेवातिवाहको नयतीति निश्चीयते। तत्र प्रतीकोपासका द्विधा। केचिदतस्मिंस्तत्त्वेनोपासकाः, अन्यं तु तदंगेषु तत्त्वेनोपासकाः। तत्राद्यानामुपासनैव व्यंगा। 'योऽन्यथा संतमात्मान'मिति वाक्योक्तदोषप्रसंगात्। द्वितीयानां तूपासनाव्यंगत्वाभावेपि 'यावन्मनसो गतं तत्रास्य कामचारो भवती'त्यादिश्रावणेन तत्क्रतुन्यायतस्तत्रैव पर्यवसानेन तेषां ब्रह्मप्राप्तेरनभिप्रेतत्वात्। पंचाग्निविद्यायास्तु अंगोपासनात्वेन प्रतीकत्वेपि वाचनिकत्वात् तेषां नयनम्। तस्मात् ये परब्रह्मोपासकास्तानेव नयतीति ज्ञानमार्गीया व्यवस्था। भक्तिमार्गीयस्तु निष्कामांगोपासनकर्ता भक्तः सन् भक्तिबलादेवातिवाहिकं विनैव स्वयं गच्छतीति तत्क्रतुश्चेति सूत्रशेषेण निश्चीयत इत्युक्तम्। एवमत्र चतुर्भिरधिकरणैः सप्रकारा गच्छद्ब्रह्मविद्व्यवस्थोक्ता। संगतिस्तत्रावसर एव॥ ४॥

ततः **पंचमे एकसूत्रे विशेषं च दर्शयतीत्यधिकरणे** भक्तिमार्गीयाणां ज्ञानमार्गीयाणां चाविशेषेणैव ब्रह्मप्राप्तिः, उत गमने विशेषात् फलप्राप्तावपि कश्चिद्विशेषोस्तीति संदेहे, 'ब्रह्मविदाप्नोति पर'मिति यजुर्व्याख्यानरूपायां 'सत्यं ज्ञान'मित्यस्यामृचि ज्ञानमार्गीयस्य अक्षरप्राप्तिरेव, भक्तिमार्गीयस्य तु 'यमेवैष वृणुते' इति श्रुत्युक्तवरणेन भक्त्या हृदि अक्षरब्रह्मप्रादुर्भावात्तत्र स्थितेन पुरुषोत्तमेन सह भोग उच्यते। तत्र भक्तिमार्गः पुष्टिमर्यादाकेवलपुष्टिभेदेन द्विविधः। तत्राद्यस्य यथाधिकारं पुरुषोत्तमानुभवरूपो भोगः। द्वितीयस्य तु यथाधिकारं ब्रह्मणा सह सर्वकामाशनरूप इति विशेषं श्रुतिर्दर्शयति। तस्माद् ब्रह्मप्राप्तावस्ति तयोर्विशेष इति प्रसंगगर्भया पूर्वोक्तसंगत्यैव निर्णीतम्॥ ५॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य तृतीयः पादः।

ततश्चतुर्थे पादे पंचभिरधिकरणैः प्राप्तफलस्य ब्रह्मविदो व्यवस्था वक्तव्या । तत्र ब्रह्मविदो भक्तिज्ञानमार्गभेदेन द्विविधाः । भक्तिमार्गीया अपि मर्यादापुष्टिकेवलपुष्टिभेदेन द्विविधाः । अवांतरभेदास्त्वनेके । तत्र ज्ञानमार्गीयाः पुष्टिमर्यादामार्गीयाश्च प्रायशः क्रमेणैव मुच्यंते । अतिकृपया तु केचित् सद्योऽपि । पुष्टिमार्गीयास्तु सद्य एव । एवमेतेषु ब्रह्मवित्सु ज्ञानमार्गीया अक्षरोपासकत्वात्तत्रैव पर्यवसन्नाः सद्यः क्रमेण वा तमेव प्रविशंति । पुष्टिमर्यादामार्गीयास्तु सद्यः क्रमेण वा नित्यं ब्रह्मलोकं प्राप्नुवंति । तेषां लौकिक्यामेव गुहायामक्षरम् । तत्र स्थितं पुरुषोत्तमं चानुभूय पुरुषोत्तमस्वरूपे प्रविशंतीत्येतावत्पूर्वपादांते सिद्धम् । ये पुनः क्रमेण नित्यं भगवल्लोकं प्राप्नुवंति, ते तत्रैव भगवंतं भिन्नमीश्वरत्वेनानुभवंतो यथाधिकारं सेवौपयिकदेहं प्राप्नुवंतीत्यर्थात् सिध्यति । तदपि तृतीयस्कंधे 'अथो विभूतिं मम मायाविनस्ता'मिति कपिलदेववाक्यादवसीयते ।

अतःपरं पुष्टिमार्गीयस्य प्राप्तफलस्य 'सोऽश्नुते सर्वान् कामान्' इति श्रुत्युक्ता व्यवस्थावशिष्यते । सा विशेषदर्शनसूत्रे संक्षेपेण सिद्धास्मिन्पादे प्रपंच्यते ।

ततः **संपद्याविर्भाव इति चतुःसूत्रे प्रथमाधिकरणे प्रथमसूत्रे** भगवत्स्वरूपे लीनस्य पुष्टिमार्गीयस्य स्वलीलानुभावनार्थं भगवता बहिराविर्भावः क्रियते, अनुगृहीतत्वात् । स चाविर्भावो भगवत्स्वरूपबलेनैव लीलाधिकरणे भवति, न तु प्रपंच इति श्रुतिबलादुक्तम् । ततो **द्वितीये** तस्यैवमाविर्भावेपि मुक्तत्वं नापैतीत्युक्तम् । तत**स्तृतीये** एवं फलदातुः परमात्मत्वमेवेत्युक्तम् । तत**श्चतुर्थे** 'सत्यं ज्ञान'मित्यस्या ऋचः 'ब्रह्मविदाप्नोती'त्यनेनैकवाक्यत्वं व्याख्यानव्याख्येयभावादस्ति, तस्मादयमेवार्थ इति निर्धारितम् ॥

ततो **द्वितीये अष्टसूत्रे ब्राह्मेणेत्यधिकरणे** येन देहेनायं जीवो लीलानुभवं करोति तादृशो देह उपोद्घातेनावसरेण वा विचारितः । तत्र **प्रथमसूत्रे** सच्चिदानंदात्मकेनैव देहेन ब्रह्मणा सह भोगान् भुंक्त इति स देहस्तादृशो ब्रह्मणा संपादित इति साधितम् । तत्प्रकरणे ब्रह्मात्मकानामेवान्नमयादिविभूतीनामुपन्यासादिति जैमिनिमतकथनमुखेन तत्संपत्तिश्च प्रदर्शिता । ततो **द्वितीयसूत्रे** प्रज्ञानघनश्रुत्या केवलज्ञानात्मको ब्रह्मणो विग्रहो बोध्यते । अतस्तादृशेन सह भोगकर्त्रा ज्ञानात्मकेनैव भवितव्यम् । नचैवमानंदानुभवेन सर्वकामाशनबाधः शंकनीयः । भगवतः पूर्णानंदत्वात् तत्संबंधेनैवानंदानुभवः सिद्धः । तस्माद्विग्रहं विनैव केवलस्वरूपेण भुंक्त इत्यौडुलोमिमतमुक्तम् । तत**स्तृतीये सूत्रे** 'सत्यं ज्ञान'मित्यस्यामृचि गुहाया उक्तत्वात् तस्याश्च विग्रह एव संभवात् श्रुतौ विग्रहत्वेनैवोपन्यासः । ते च विग्रहा भगवद्धाम्नि पूर्वमेव वर्तंते भगवद्धर्मरूपाः । तेषु कस्मिंश्चिदयं चिन्मात्र एवाविश्याभिमानं कृत्वा भगवदिच्छानुरूपलीलात्मकान् भोगान् भुंक्ते । तस्मान्न चिन्मात्रत्वस्य नित्यविग्रहवत्त्वस्य च विरोध इति मतद्वयं संगृह्य तादृशविग्रहेणैव भुंक्त इति स्वमतमुक्तम् । तत**श्चतुर्थे सूत्रे** तादृशदेहप्राप्तौ भक्ते भगवदनुग्रह एव हेतुरित्युक्तम् । तेन तादृशो भोगो न सर्वेषाम्, किंत्वत्यंतभगवदनुगृहीतानामेवेति वरणश्रुत्या सिध्यति । ततः **पंचमसूत्रे** अतो हेतोः भगवाननन्याधिपतिः । अनन्याश्च त एव ये साधनत्वेन (फलत्वेन) च भगवंतमेव जानंति । तस्मात्तदर्थमेवं भगवतः संकल्प इत्युक्तम् । तेन तदेकतानतया तदाश्रयतया च ते सर्वदा तिष्ठंतीति सिध्यति । ततः **षष्ठे सूत्रे** मुक्तस्य देहांगीकारप्रतिकूलं बादरिमतमाह । 'यत्र हि द्वैतमिव भवती'-त्यादिश्रुतिरमुक्तिदशायां द्वैतदर्शनमुक्त्वा 'यत्र त्वस्य सर्वमात्मैवाभू'दित्यादिना, मुक्तस्य द्वैतदर्शनं

निषेधति । तथा सति द्वितीयदर्शनाभावे कामभोगवार्तैव दूरेति तदाक्षेप्यो देहोपि दूरतरः । एतन्मते 'ब्रह्मविदाप्नोति पर'मित्यादिश्रुतिः पूर्वकक्षाविश्रांता । ततः **सप्तमे** बादरिविरुद्धं जैमिनिमतमाह । जैमिनिस्तु मुक्तस्य देहसत्तां मन्यते । 'ब्रह्मविदाप्नोती'ति श्रुतिः पूर्वकक्षाविश्रांतेत्यत्र मानाभावान्न बादरिमतं साधीयः । अनेन श्रुतिविरोधापत्तेः । श्रुतौ हि 'ब्रह्मविदाप्नोती'त्यत्र ज्ञानस्य तत्प्राप्तिसाधनत्वमुच्यते, 'नायमात्मे'त्यत्र वरणैकप्राप्यत्वम् । अतः साधनबोधकश्रुत्योः परस्परविरोधः । 'सोश्नुत' इत्यादिना परप्राप्तिरुपन्यस्यते । 'ब्रह्मैव सन् ब्रह्माप्येती'त्यत्र ब्रह्मणि जीवस्य लय उच्यते । अतः फलबोधकश्रुत्योर्विरोधः । एवं विरोधे सति तदभावाय गतिरवश्यं कल्पनीया । तत्र पुष्टिमर्यादाभ्यां मार्गभेदस्य सिद्धत्वात् तत्तन्मार्गीयस्य तत्तदेव फलं परममिति व्यवस्थितविकल्प एव ज्यायानिति नैकतरादरणं युक्तमिति । **ततोष्टमे** भगवान् व्यासः स्वसिद्धांतमाह । लोके हि शरीरं भूतजन्यं भोगायतनं च दृष्टम् । मुक्तस्य तु शरीरतदभावावाक्षेपलभ्यौ न निवारयितुं शक्यौ । अतः शरीरमेव तादृशं कल्पनीयं येन श्रुत्यविरोधः । तत्र भूमविद्याया'मात्मतः प्राण' इत्युपक्रम्य 'आत्मत एवेदं सर्व'मित्यंतेन भगवत एव सकाशाद्भोगोपयोगिसर्वसामग्रीश्रावणान्मुक्तस्य शरीरं न भूतजन्यम्, तस्मादशरीरम् । तत्रैव 'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानंद' इति श्रावणात्तच्छरीरं भोगायतनम् । तस्माच्छरीरमपि । एवमुभयविधत्व आस्थिते श्रुतीनां न कश्चिद्विरोधः ॥

ततस्तृतीये **द्विसूत्रे तत्त्वभावाधिकरणे** गुणोपसंहारपादोक्तं निर्दोषपूर्णगुणं भगवत्स्वरूपमेव फलमिति विचारितम् । तत्र **पूर्वसूत्रे** दोषरूपाणामज्ञत्वादीनां भगवति या प्रतीतिः, सा भ्रांता, स्वप्नवदर्थाभावेपि प्रतीयते । तस्माद् ब्रह्म निर्दोषमित्युक्तम् । ततो **द्वितीये सूत्रे** याः पौगंडादयोवस्थाः, ये च गुणास्ते सर्वे संत एव मायापसारणाद्भक्तानां प्रतीयंते । तस्माद् ब्रह्मानंतगुणपूर्णमवतारेपीत्युक्तम् । तथा चावसर एव संगतिरित्यर्थः ॥ ३ ॥

ततश्चतुर्थे **द्विसूत्रे प्रदीपवदित्यधिकरणे** फलानुभवोपकरणं प्रकृतत्वाद्विचार्यते । पूर्वाधिकरणयोः फलप्राप्त्युपकरणस्य फलस्वरूपस्य च विचारितत्वात् । अतोवसरोत्र संगतिः । तत्र **प्रथमसूत्रे** मुक्तस्य भगवत्कृपयाभिव्यक्ताभ्यां जैवज्ञानक्रियाभ्यां योगेपि न ताभ्यां भगवता सह कामभोगकरणसमर्थो भवति, किंतु यथा प्राचीनः प्रकृष्टो दीपः स्नेहयुक्तायामर्वाचीनायां वर्त्यां प्रविष्टस्तां समानकार्यक्षमां करोति, तथा भगवानपि स्वदत्ते मुक्तदेहे जीवेन सह प्रविष्टस्तं देहं स्वभोगरूपकार्यक्षमं करोति । यतो 'भर्ता स'न्निति भर्तृसूक्तारंभमंत्रे भगवतः क्रीडार्थं बहुधा आवेश उक्तः । तेनैवं ज्ञायते क्रीडोपयोगिभगवदावेश एव फलानुभवोपकरणमिति । ततो **द्वितीयसूत्रे** अस्थूलादिश्रुतेः सर्वकामभोगश्रुतेश्च यो विरोधः स सुषुप्तिमोक्षभेदेन भगवदाविर्भावप्रकारभेदात् परिहृतः ॥

ततः **पंचमे षट्सूत्रे जगद्व्यापाराधिकरणे** भोगप्रकारो विचारितः । तत्र **प्रथमसूत्रे** 'सोश्नुते सर्वान् कामा'निति श्रुतिर्मुक्तिप्रकरणस्था । तस्मात्तत्र न जगत्संबंधः । किंच, भगवल्लीला कालमायाद्यतीता । तेन प्राकृतं जगत् ततो दूरतरमिति न तत्संबंधः । अतो लौकिकव्यापाररहितमेव मुक्तस्य भोगकरणमित्युक्तम् । ततो **द्वितीयसूत्रे** 'सर्वं हि पश्यः पश्यती'तिश्रुत्युक्तप्रत्यक्षोपदेशेन तस्य जगद्व्यापारसाहित्यमाशंक्य, श्रुतौ सर्वपदेन न जगदुच्यते, किंतु लीलास्थाः पदार्था एवोच्यंते । तेषामेव दर्शनम् । अतो न श्रुतिविरोधः । किंच, पूर्वोक्तश्रुत्यनंतरं 'स एकधा भवती'ति भक्तस्य नानारूपबोधिकाश्रुतिः पठ्यते । तेन नानारूपैर्नानालीलां भगवदनुभावितामनुभवतीति न

लीलानामनित्यत्वम्, नापि काचिदन्यानुपपत्तिरित्युक्तम् । **ततस्तृतीये सूत्रे** 'आयास्य' इत्यागमनभविष्यत्त्वबोधकभगवद्वाक्याल्लीलानां भक्तरूपाणां चानित्यत्वमाशंक्य, भगवल्लीला प्राकृतविलक्षणा भगवदिच्छयैवोपपद्यमाना न कुतर्कैरन्यथा भाव्या, किंतु श्रुत्या नित्यत्वेनोक्तत्वादलौकिकानुसरणमेव कर्तव्यमित्युक्तम् । **ततश्चतुर्थसूत्रे** अस्मिन् सूत्रे कुतर्केणान्यथाभावनं न कर्तव्यमिति यदुक्तं तदेव श्रुतिप्रत्यक्षाभ्यां साधितम् । ततः **पंचमसूत्रे** जीवस्य भोगमात्र एव भगवत्साम्यम्, न तु सर्वथेति 'न तत्समश्चाभ्यधिकश्च दृश्यते' इतिश्रुतेर्न विरोध इत्युक्तम् । एवमत्र पंचसूत्र्या भगवतः परमफलत्वमर्थादुक्तं भवति । ततः **षष्ठे** ईदृशं परमफलं प्राप्य भक्तानां ज्ञानिनां चावृत्तिर्नास्ति । तत्र प्रमाणं च शब्दः श्रुतिरूपः स्मृतिरूपश्चेत्युक्तम् । एवं षड्भिः सूत्रैः फलभोगप्रकारो विचारितः ॥ ५ ॥

वेदांतीयन्यायमालामणुभाष्यानुसारिणीम् । सौकर्यायार्थबोधस्य चकार पुरुषोत्तमः ॥ १ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य चतुर्थः पादः ।

चतुर्थाध्यायः समाप्तः ॥

880

श्रीकृष्णाय नमः।

श्रीगोपीजनवल्लभाय नमः।

श्रीमदाचार्यचरणकमलेभ्यो नमः।

श्रीमद्ब्रह्मसूत्राणुभाष्यम्।

भाष्यप्रकाश-रश्मि-परिबृंहितम्।

अथ प्रथमोऽध्यायः।

चतुर्थः पादः।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥ (१।४।१)

एवं सर्वेषां वेदान्तानां ब्रह्मपरत्वे निर्णीते, केचिद् वेदार्थाऽज्ञानात् क्वचिद् वेदभागे कापिलमतानुसारिपददर्शनेन तस्यापि वेदमूलकत्वं वदन्ति। तन्निराकर-

---

भाष्यप्रकाशः।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥ अतीतेषु पादेषु प्रथमेऽतिव्याप्तिजनकशब्दकृतसंदेहवारणाय कार्यनिरूपकाणि वाक्यानि विचार्य, द्वितीयतृतीययोश्च यथायथं जीवजडरूपार्थकृततत्संदेहवारणायान्तर्याम्युपास्यरूपनिरूपकाणि च वाक्यानि विचार्य सर्वेषां वेदान्तानां साक्षात् परंपरया च ब्रह्मणि समन्वयः प्रतिपादितः। स तदा दृढीभवति यदा श्रौतत्वेनाभिमन्यमानस्य मतान्तरस्य श्रौतता निराक्रियते। अतस्तदर्थं चतुर्थे पादे जीवजडसमुदायात्मकार्थनिरूपकतया मतान्तरश्रौतताभ्रमजनकानि प्रकीर्णानि वाक्यानि विचार्यन्त इत्युपोद्घातबोधनाय पूर्वपादत्रयसिद्धमर्थमनुवदन्त एतत्पादार्थमाहुः एवमित्यादि। तथा च तन्निराकरणं प्रयोजनं, तादृशवाक्यविचारश्चार्थ इत्यर्थः। नन्वदृश्यत्वाद्य-

रश्मिः।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥ परंपरयेति जीवमुख्यप्राणलिङ्गादित्यत्र जीवमुख्यप्राणप्रतिपादकवेदान्तानां परंपरया समन्वय। उपोद्धात इति। तथाच प्रकृतः स च वेदान्तानां समन्वयः तत्सिद्ध्यर्थां चिन्तां मतान्तरनिराकरण-चिन्तामुपोद्घातं बुधा विदुरिति। ननु सांख्यमतनिराकरणमाकस्मिकमिति चेन्न, षट्सु शास्त्रेषु वेदवेदान्तयोरङ्गाङ्गिभावः परस्परं, स आरम्भ एव विचारितः। अधुना तृतीयशास्त्रस्य विचारः प्राप्तावसरः क्रियत इति योगः प्रत्युक्त एव। द्वितीयेध्याये पञ्चरात्रविचारः पाशुपतमतदूषणं 'येप्यन्यदेवता भक्ताः' इत्यादिना गीतायां स्पष्टमेव। नास्तिकादिमतानि दूष्यत्वेन पुराणप्रसिद्धानि द्वितीये द्वितीयपादे प्रतिवक्तव्यानीति ज्ञेयम्। तादृशेति प्रकीर्णकवाक्यविचारः प्रकीर्णकत्वं कापिलमतश्रौतताभ्रमजनकत्वं क्वचिद्वेदभागे कापिलमतेत्यादिभाष्यात्। समन्वयानुकूलः मतान्तर-श्रौतताभ्रमजनकवाक्यविचारः इत्यत्र विचारपदं तादृशसमन्वये लाक्षणिकं वा। समन्वयस्त्वध्यायार्थः।

णाय चतुर्थः पाद आरभ्यते। तत्र, ईक्षतेर्नाशब्दमिति सांख्यमतमशब्दत्वादिति निवारितम्। वेदेन प्रतिपादितमिति तत्राशङ्कते। आनुमानिकमप्येकेषाम्।

एकेषां शाखिनां शाखासु सांख्यपरिकल्पितप्रकृत्यादि श्रूयते।
'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥

भाष्यप्रकाशः।

धिकरणे एतादृशमपि वाक्यं विचारितमेवेति, किमनेन विचारेणेत्याशङ्कां समादधानाः सूत्रांशमवतारयन्ति तत्र ईक्षतेरित्यादि। तथाच यद्यपि तद्वाक्यं विचारितं, तथापि तन्मतस्य सर्वथा अश्रौतत्वमेवेति नोपपादितमतो विचार इत्यर्थः। एतेनास्य पादस्य, ईक्षतिसमन्वयसूत्रप्रपञ्चरूपत्वं बोधितम्। नन्वत्र प्रकृतिनिराकरणमेवास्तु। मतस्य श्रौततानिराकरणे किं गमकमित्या, काङ्क्षायामानुमानिकपदमेव गमकमित्याशयेन व्याकुर्वन्ति एकेषामित्यादि। तथा च पूर्वग्रन्थे-'कामाच्च नानुमानापेक्षा,' 'नानुमानमतच्छब्दात्' इत्यादौ केवलानुमानपदादत्र च संबन्धितद्धितान्तानुमानिकपदात् सांख्यप्रवचनीये, 'संघातपरार्थत्वात् पुरुषस्य' इति सूत्रेऽनुमानेन प्रकृतिसंबन्धित्वेन सिद्धः पुरुषोऽपि संग्राह्यत्वेन गम्यते। तयोश्च निराकरणे तन्मतमेव निराकृतं भवतीति सौत्रं पदमेव गमकमित्यर्थः। केषां शाखायामित्याकाङ्क्षायां विषयवाक्यमुदाहरन्ति इन्द्रियेभ्य

रश्मिः।

एतादृशमिति 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रम्' इत्यादिवाक्यं मायाप्रकृत्यविद्यावादानां श्रौतताभ्रमजनकम्। अवतारयन्तीति इदमुपलक्षणं तन्मतं पूर्वपक्षे निक्षेप्तुं शंकराचार्यमतेनावतारयन्ति स्म विचारितमिति। नन्वीक्षत्यधिकरणे तु शब्दाप्रतिपाद्यं न भवति ईक्षतेः श्रावणादित्युक्तं न प्रकृतिर्निवारिता शंकरभाष्ये तु निवारितेति चेन्न। प्रकृतिनिराकरणं सूचितार्थत्वेनाङ्गीकृत्य विचारितप्रायमित्यर्थः। नोपपादितमिति सूचितार्थपक्षे। एतेनेति सूचितार्थाङ्गीकारेण 'सर्वेषामेव शब्दानां व्यञ्जकत्वमपीष्यते' इति। बोधितमिति व्यञ्जनया बोधितं सूचितमिति यावत्। तथा चायं भाष्यार्थः। तत्रेति शांकरमतेस्माकं सूचितार्थपक्षे। इतीति इत्येवं तयोः पक्षयोराशङ्कत इत्यर्थः। ननु शांकरमतपूर्वपक्षस्य पूर्वपक्षकरणे किं फलमिति चेन्न सिद्धान्तस्य पूर्वपक्षतुल्यत्वात्। तथा च शांकरभाष्यमेतत्सूत्रसमाप्तौ। तदेवं पूर्वापरालोचनायां नास्त्यत्र परपरिकल्पितस्य प्रधानस्यावकाश इति। परपरिकल्पितस्येति प्रधानविशेषणान्मायाङ्गीकारध्वननात्। पूर्वग्रन्थ इति आनन्दमयाधिकरणे द्युभ्वाद्यायतनाधिकरणे च। संबन्धीति अनुमानेन संबद्ध्यत इत्यानुमानिकं 'शेषे' इति ठक्। इति सूत्रे प्रथमाध्यायस्थे। अनुमानेनेति। ननु आनुमानिकेनेति वक्तव्ये अनुमानपदं कुतः इति चेन्न। अनुमानेन प्रकृत्या सिद्धः पुरुषः संग्राह्यत्वेन काठके गम्यते। प्रकृतिसंबन्धित्वेन संघातपरार्थत्वेन सिद्धः पुरुषः संग्राह्यत्वेन गम्यते इत्यपि पदादर्थात्। तथा च सूत्राणि 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोहंकारात्पञ्चतन्मात्राणि उभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिगुणाः' 'स्थूलात्पञ्चतन्मात्रस्य' 'बाह्याभ्यन्तराभ्यां तैरहंकारस्य' 'तेनान्तःकरणस्य' 'ततः प्रकृतेः' 'संघातपरार्थत्वात्पुरुषस्य' तयोरिति प्रकृतिपुरुषयोः। इन्द्रियेभ्य इत्यादीति तथा च काठकपदाद्यजुर्वेदे चरकानाम द्वादशविधा

महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः' ॥ इति काठके श्रूयते ।

तत्र बुद्धेरात्मा अहंकारः । ततो महान् महत्तत्त्वम् । ततोऽव्यक्तं प्रकृतिः । ततः पुरुष इति । न ह्यहंकारादयः पदार्था ब्रह्मवादे संभवन्ति । तस्मादेवंजातीयकेषु तन्मतपदार्थानां श्रवणान्मायाप्रकृत्यविद्यावादा अपि श्रौता इति चेन्न ।

भाष्यप्रकाशः ।

इत्यादि । क्वात्र प्रकृत्यादीत्यतो व्याकुर्वन्ति तत्र बुद्धेरित्यादि । बुद्धेरात्मा अहंकार इति । पर इत्यनुषज्यते । बुद्धेः सकाशादात्मा । 'सर्वात्मनोऽन्तःकरणं गिरित्रम्' इत्यन्तःकरणत्वेन सिद्धस्य गिरित्रस्य, 'चन्द्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेन्द्रः' इति स्वस्मिन्नात्मपदप्रयोगादात्माऽहंकारः पर इत्यर्थः । शेषं स्फुटम् । तथा चैवमत्र सांख्यमतप्रत्यभिज्ञानात् तन्मतं श्रौतमिति तदाहुः नहीत्यादि । अपिशब्दार्थमाहुः तस्मादित्यादि । एवंजातीयकेष्विति । वक्ष्यमाणेष्वजादिवाक्येषु । मायाप्रकृत्यविद्यावादा इति । मायां तु प्रकृतिं विद्यात्, पञ्चाशद्भेदां पञ्चपर्वामधीम' इत्यादिवाक्येष्वभिमन्यमानाः । एवं पूर्वपक्षांशमनूद्य तद्दूषकं

रश्मिः ।

भवन्ति चरकाह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीयाः वार्तन्तव्याः श्वेताः अश्वतराः औपमन्यवः पाता ऐरिनेयाः मैत्रायणीयाश्चेति । श्वेताश्वतरोपनिषदिति प्रसिद्ध्याकारो न वाचनीयः यथालिखितपाठक इति हि भाष्ये पाठकाधमेषु गणनात् । अतो द्वादश । यद्वा चरका इत्युद्देश्यं अग्रे द्वादशविधेयानि । तथा चायं भाष्यार्थः । एकेषां मुख्येभ्यः सामाथर्वशाखिभ्योऽन्येषां यजुर्वेदशाखिनां शाखासु चरकादिनाम्नीषु यद्वा एकेषां चरकानां केवलानां शाखिनां शाखासु ह्वरकादिषु इति । कठशाखायामित्यर्थः । क्वात्रेति अत्र श्रुतिषु सांख्यसिद्धप्रकृत्यादि क्वेति प्रश्नः । सांख्यसूत्राण्युक्तान्येव । आत्मपदस्याहंकारवाचकत्वं बुद्धेः परत्वं च व्युत्पादयन्ति बुद्धेरिति । सर्वात्मनः पुरुषस्य । इदं द्वितीयस्कन्धेऽस्ति । अन्तःकरणत्वेनेत्यस्याहंकारत्वेनेत्यर्थः । चन्द्रो मनः । इदमुत्तरार्धे त्रिषष्टितमेऽध्याये शिवस्तुतावस्ति । अहं श्रीशिवः अहंकारः । आत्मेत्यात्मपदमहंकारवाचकम् । बुद्धेः परत्वमीश्वरस्य स्पष्टम् ।

'यश्च मूढतमो लोके यश्च बुद्धेः परं गतः ।
तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः' ॥

इति । भुजा इन्द्रः । स्वस्मिन्निति श्रीकपर्दिनि अहंकारे तथाच गिरित्रस्याहंकारस्य चन्द्रो मन इत्याद्युक्तरीत्या वाचकं यदात्मपदं तस्य प्रयोगात् कस्मिन्नित्यतः स्वस्मिन्नहंकाररूपे श्रीशिवे इति फक्किकान्वयः । चैत्रस्य गुरुकुलमित्यस्येवैकदेशान्वयः । सांख्येति तदिदं सांख्यमतं श्रुताविति सांख्यमतप्रत्यभिज्ञानम् । ननु वैदिकशब्दानां भिन्नत्वात्कथं श्रौतमिति चेन्न परमत ऐक्यात् अपीति मायाविद्यासमुच्चये रूपम् । ननु मायावादः शांकराणां प्रकृतिवादो निरीश्वरसांख्यानां अविद्यावादः सैषाऽविद्या जगत्सर्वमिति श्रीनृसिंहतापिनीयश्रुतेः तापिनीयशाखिनामनिर्णयकर्तॄणामिति त्रयाणां भेद उक्तो भाष्ये तेषामैक्यं पूर्वपक्ष इति प्रमाणपूर्वकं तं पक्षमाहुः मायां त्विति । पञ्चपर्वाविद्या तासामभेदान्वयः आदिनाऽजादिवाक्यानि । श्रौता इति समस्ता अभेदान्वयान् नामभेदेन प्रवृत्ताः व्यस्ता । अभीति अभिमन्यन्ते ये वादास्तेभिमन्यमानाः 'लटः शतृशानचौ' 'आने मुक्' ।

शब्दसाम्यमात्रेण न तन्मतं सिद्ध्यति ।

'संदिग्धानां पदार्थानां पौर्वापर्येण निर्णयः ।
न तु संदिग्धवाक्येन सर्वव्याकुलतोचिता' ॥
अत्र हि पूर्वम् ।
'आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' ॥

तदनु चत्वारि वाक्यानि । 'यस्त्वविज्ञानवान्' इत्यादि । तदनु 'इन्द्रियेभ्यः

भाष्यप्रकाशः ।

हेतुमवतारयितुं निषेधं व्याकुर्वन्ति शब्देत्यादि । तन्मतमिति । अहंकारमहत्तत्त्वप्रकृतिपुरुषाणामुत्तरोत्तरं परत्वबोधकं सांख्यमतं कुतो न सिद्ध्यतीत्यतः कारिकया तद्धेतुमाहुः संदिग्धेत्यादि । पौर्वापर्येणेति पूर्वापरसंदर्भेण । संदिग्धा ह्यस्मिन् वाक्ये पदवाच्या अर्थाः । पदानि वाक्यावयवभूतानि, वाक्यं च महावाक्यस्य । अतो महावाक्यानुरोधेन तदर्थो निर्णयः । न तु संदिग्धपदघटितवाक्येनावयविभूतस्य महावाक्यस्य व्याकुलता युक्ता । तथा च तद्व्याकुलीभावादेतन्मतं न सिद्ध्यतीत्यर्थः । तदेतद् व्युत्पादयन्ति अत्र हीत्यादि । अत्रेति प्रकरणे । हिर्हेतौ । चत्वारीति । विज्ञानसारथिवाक्यस्य क्वचिदिन्द्रियेभ्यः परा इत्याद्यनन्तरं दर्शनाच्चत्वारि, विज्ञान-

रश्मिः ।

ननु 'कर्तरि कृत्' इति चेन्न घञादौ कर्तरि कृदित्यस्याप्रवृत्तिवदत्राप्यप्रवृत्तेरिति वैयाकरणभूषणसारे सिद्धान्तनिर्णय उक्तत्वात् । निषेधमिति सौत्रनकारार्थम् । महेति अवयवभूतम् । व्याकुलतेति उक्तशरीररूपकविन्यस्तगृहीतिपरित्यागेन सूक्ष्मदर्शनपरित्यागेन च स्थूलदृष्ट्या शब्दपीडा युक्तेत्यर्थः । हिरिति । परा इतीति हेतोः इत्यग्रेन्वयः । चत्वारीति ।

'यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः' ॥
'यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः' ॥
'यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः ।
न स तत्पदमाप्नोति संसारं चाधिगच्छति' ॥
'यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते' ॥

इति चत्वारि । वदतीति सूत्रे व्यासो वदति । भाष्ये । पूर्वेति आत्मानं रथिनमित्यादिसंबद्धः । एवकारेण सांख्यमतव्यवच्छेदः । तमिति पूर्वसंबद्धार्थम् । प्रकृते । ननु प्रथमसुबोधिन्यां काव्यवद्रूपकनिरूपणे स्पष्टोर्थो भवति यद्यपि तथापि भागवते तथाकथनमनुचितं सर्ववेदसारोद्धारत्वात् । रूपकादिकं तु बुद्धिपरिकल्पितमिति रूपककरणं भाष्ये कुतः इति चेन्न ईश्वरवद्वेदोपि कर्तुमकर्तुमन्यथयितुं समर्थ इति ज्ञापनाय क्वचिद्रूपककरणात् 'अत एव च नित्यत्वम्' इति व्याससूत्रात्

पराः' इति । तत्र पूर्वसंबन्ध एवार्थ उचितस्तमाह शरीररूपकविन्यस्तगृहीतेः । शरीरेण रूप्यन्ते ये शरीरेन्द्रियादयस्ते विन्यस्ता यत्र रूपकभावेन रथादिषु तेषामेवात्र गृहीतिर्ग्रहणम् । अन्यथा प्रकृतहानाप्रकृतपरिग्रहापत्तिः ।

जीवप्रकरणं ह्येतन्मुक्त्युपायोऽस्य रूप्यते ।
योग्यं शरीरमारुह्य गच्छेदिति हरेः पदम् ॥

तत्र जीवस्य ब्रह्मप्राप्तौ मुख्यं साधनं शरीरम् । स रथः । सर्वसामग्रीसहिताऽपराधीनयानत्वात् । रथस्तु हयाधीनः । हयाश्च स्वबुद्ध्यधीनाः । सा च

भाष्यप्रकाशः ।

सारथिवाक्यार्थस्त्वग्रे कारिकया वक्तव्यः । एवं संदर्भे यत् सिद्धं तद्वक्तुं हेतुं वदतीत्याहुः तत्रेत्यादि । तत्रेति इन्द्रियेभ्य इति वाक्ये । विष्णुधर्मोत्तरे तृतीयकाण्डे । 'उपमानेन तुल्यत्वमुपमेयस्य रूपकम्' इति रूपकलक्षणाद् रूप्यते यत् तद्रूपमिति कर्मणि घञि कृते, 'इवे प्रतिकृतौ' इति कनि च कृते रूपकमित्यलंकारनाम सिद्ध्यतीत्यभिसंधाय हेतुं व्याकुर्वन्ति शरीरेणेत्यादि । स्वस्य स्वज्ञापकत्वेऽपि दोषाभावाच्छरीरेण रूप्यन्ते ये शरीरेन्द्रियादयस्ते यत्र

रश्मिः ।

यद्वेदं समाधानम् 'काव्यादीनामसत्यत्वान्नोपयोगः कथंचन' इत्यनुपयोगाद्धर्मवाचकलुप्तोपमा रूपकमत्र न काव्योक्तमिति तदाहुः विष्णुधर्मेति । उपमीयतेऽनेन करणे ल्युट् । उपमानम् । उपमातुमर्हमुपमेयम् 'हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते' इत्यत्र हंसी उपमानं तद्वाचकं 'इव' पदम् । कीर्तिरुपमेयं उपमानेन तुल्यत्वं स्वर्गङ्गावगाहनं उपमानोपमेयसाधारणधर्मः इयं पूर्णोपमा 'कर्पूरन्ती दृशोर्मम' इति धर्मवाचकलुप्तोपमा कर्पूरमिवाचरन्तीत्यर्थे विहितस्य कर्पूरवदानन्दात्मकाचारार्थस्य क्विप इवशब्देन सह लोपात् धर्मलोपस्त्वैच्छिकः दृशोरानन्दात्मकतयो कर्पूरन्तीति तदुपादानस्यापि संभवात् तथा चोपमेयसंबन्धिरूपकमिति भावः । अत्र शरीरेन्द्रियादयः उपमेयाः रथादीन्युपमानानि । घञीति कर्मणि घञि दीर्घत्वम् । रूप रूपकरणे चुरादिरिति । यद्वा रुशब्दः रुयते स्तूयते रूपं खष्पशिल्पेति सूत्रेण पप्रत्ययो दीर्घश्च निपातितः । ननु भाष्ये स्वार्थे कप्रत्ययो वक्ष्यते अत्रेवार्थे कुत उच्यते तत्राहुः अलमिति । अत्र भाष्ये शरीरेण पदेन रुयन्तेऽस्य परोक्षवादः रूप्यन्ते शब्द्यन्ते शरीरेन्द्रियादयः । ननु विषयाः कथं शरीरेण शब्द्यन्ते सत्यम् । जीवप्रकरणे मोक्षे निरूपणीये विषयाणां ब्रह्मत्वात् । 'सर्वेषां ब्रह्मता ततः' इति सिद्धान्तरहस्यात् तथा चात्मपदशक्तिर्विषयेषु । शरीरेन्द्रियादयः इत्यत्रादिपदेनानिन्द्रियं मनो वा आत्मन उपलक्षकम् । यद्वा सर्वे सर्वार्थवाचका इति शरीरस्य सर्ववाचकत्वेन शरीरेन्द्रियात्मवाचकत्वं यद्यपि तथापि अन्यावाचकत्वं दोषः स्यात् तद्वारणायात्मोपनिषदा शरीरस्यात्मत्वेन ग्रहणमिति शरीरेण त्रिविधात्मनापदेन रूप्यन्ते शब्द्यन्ते शरीरादयः शरीरद्वयात्मानः रथादिष्विति भाष्यात् । यत्रेत्यस्यार्थमाहुः रूपकेति रूपपदस्थले स्वार्थे कप्रत्ययेन सूच्यतेऽयमर्थः । तेषामिति रथादीनाम् । एतावतो हेतोः श्रुतौ सूत्रेण सांख्यमतनिराकरणाय प्रयुक्तेर्न विशेषणादिकृत्यमतिदुरूहम् । प्रकृते । एतदाहुः स्वस्येति । स्वस्य शरीरपदस्य स्वेषां प्रतिपाद्यत्वेन स्वीयानामर्थानां शरीरेन्द्रियादीनां ज्ञापकत्वेऽवबोधकत्वे अपिरेवकारार्थे अवबोधकत्व एवपदजन्यपदार्थोपस्थितिरुक्ता । दोषः सर्वार्थवाचकत्वं तस्याभावात् । शरीरेण

प्रग्रहाधीना। स च सारथ्यधीनः। स च स्वबुद्ध्यधीनः। सा च मार्गाधीना। स

भाष्यप्रकाशः।

वाक्ये रथादिषु रूपकभावेन अलंकारबोधितप्रतिकृतिभावेन विन्यस्ताः स्थापितास्तेषां सर्वेषां रथादिप्रतिकृतिभूतानामेवात्र गृहीतिर्ग्रहणम्। अतः शरीररूपा रूपकविन्यस्ताः। शरीररूपकविन्यस्ताः। रूपकविन्यस्तानां व्यावर्तकं शरीररूपत्वमित्युपसर्जनत्वात् तस्य पूर्वनिपातः। शाकपार्थिवादेराकृतिगणत्वाद् रूपपदलोपश्च। अतः शरीररूपकविन्यस्तानां गृहीतिर्ग्रहणं शरीररूपकविन्यस्तगृहीतिस्तस्मादित्यर्थः। तथा च स्यात् सांख्यमतापत्तिर्यद्यहंकारादीनां पदार्थानां तत्त्वेन गृहीतिः स्यात् सा तु नास्ति। यतः शरीरेण ये रूप्यन्ते शरीरेन्द्रियादयस्ते विन्यस्ता यत्र

रश्मिः।

शरीरपदेन रूप्यन्ते रुयन्ते रुशब्दे परोक्षवादात्। शब्द्यन्ते शब्दव्यापारोभिधा तद्विषयीक्रियन्ते ये शरीरेन्द्रियादयः। ननु काव्यनिषेधेन रूपकस्य।

'विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्।
रूपकं तु त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः॥
अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्।
अयमास्ते विना शंभुस्तार्तीयीकं विलोचनम्॥
शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्।
अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना॥
साध्वीयमपरा लक्ष्मीरसुधासागरोदिता।
अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोतिरिच्यते'॥

विषय्युपमानभूतं पद्मादि विषयस्तु उपमेयं वर्णनीयं मुखादि। रूपकं द्विविधमभेदरूपकं ताद्रूप्यरूपकं च। अयं हीति सार्धेनाभेदरूपकाणि। अस्या मुखेन्दुनेति सार्धेन ताद्रूप्यरूपकाणि आधिक्यन्यूनत्वानुभयोक्त्युद्देशक्रमप्रातिलोम्येनोदाहृतानीत्येवंरूपस्य विवक्षां वारयितुमाहुः अलंकारेति अलंकारबोधितस्य सदृशभावेन धर्मवाचकलुप्तोपमात्वेन रूपकस्य विन्यस्ताः विशेषेण नितरामस्ताः प्रेरिताः स्थापिताः शरीरेन्द्रियादयः स्वाभेदसंबन्धेनान्यत्र गतिनिवृत्तियुक्ताः कृताः भवन्ति त इत्यन्वयः। एतेन तेषामिति भाष्यपदं व्याकृतम्। कीदृशामित्यत आहुः प्रतिकृतयः सदृशाः भूतानि शरीरेन्द्रियादीनि येषां तेषां रथादीनां तथा च रथादयश्च ते प्रतिकृतिभूता रथादिप्रतिकृतिभूतास्तेषां रथादिप्रतिकृतिभूतानां तेषामिति रथादीनाम्। समासमाहुः अत इति उक्तकारणात्। रूपकेति शरीरेन्द्रियादीनाम्। व्यावर्तकं विशेषणम्। ननु विशेषणं शरीररूपा इति न तु शरीररूपकत्वमितीति चेन्न कप्रत्ययेन स्वार्थिकेन शरीररूपा शरीररूपकाणीत्येतयोरेकार्थबोधकत्वेन विशेषाभावात्। इवार्थे कप्रत्ययस्यालंकारनामत्वार्थं रूपकपदसूचितार्थनिबन्धनत्वात्। पूर्वेति 'उपसर्जनं पूर्वम्' इति पूर्वनिपातः सूत्रे व्यासपादैः कृतः। आकृतीति गणपाठे नास्ति कांचित्कमाकृतिगणत्वम्। अत उपपदस्य रूपपदस्य लोपः। आकृतिगणत्वाभावे शरीररूपका विन्यस्ता यत्रेति भाष्यप्रोक्तो बहुव्रीहिः। तस्मादिति ननु तस्या इति वक्तव्ये तस्मादिति कुत इति चेन्न शरीररूपकविन्यस्तग्रहणादित्यर्थे तात्पर्यात्। गृहीतेर्ग्रहणादिति वक्ष्यन्ति तथा च सामान्ये नपुंसकमिति भावः।

च प्राप्याधीन इति। एवं ज्ञात्वा युक्तसामग्रीकस्तद्देशं प्राप्नोति। तत्रेन्द्रियाणामात्मा विषयाः।

भाष्यप्रकाशः।

वाक्ये रूपकभावेन रथादिषु, आत्मानं रथिनं विद्धीत्यादिना, तेषामेवात्र गृहीतेर्ग्रहणात्। यदि ह्येवं नोपगम्येत तदा प्रकृतहानादिदोषावापद्येताम्। किंचेदं हीति निश्चयेन जीवप्रकरणम्। अत्रास्य मुक्त्युपायो, योग्यं शरीरमारुह्य हरेः पदं गच्छेदित्येवं विज्ञानसारथिमन्त्रेण रूप्यते। न ह्येतत सांख्यमते संभवति। स्वरूपावस्थानातिरिक्तस्य भगवत्पदप्राप्तिरूपस्य मोक्षस्य तैरनङ्गीकरात्। अत इन्द्रियेभ्य इति वाक्ये अहंकारादितत्त्वरूपो नार्थः। किंतु वक्ष्यमाणप्रकारकः। तथाहि। तत्र मुक्त्युपायेषु बोधनीयेषु वक्तव्ये रूपके जीवः स्वतन्त्रत्वाद् रथी। जीवस्येत्यादिना विवृतं शरीरं रथः। तत्र हेतुः सर्वेत्यादि। सामग्री इन्द्रियादिरूपा। अपराधीनता तु स्वायत्ततया। तेन शरीरे रथरूपकम्। रथस्तु गमने हयाधीन इतीन्द्रियेषु हयरूपकम्। हयबुद्धिस्थानापन्नाऽत्रेन्द्रियदेवता देवताप्राधान्य एवेन्द्रियाणां भगवत्परत्वस्य, 'देवानां गुणलिङ्गानाम्' इत्यत्र तृतीयस्कन्धे सिद्धत्वात्। देवतासाहित्यस्यार्थतः प्राप्तत्वाच्च एवमग्रेऽपि बुद्धिस्थानापन्ना देवतैव। हयबुद्धिस्तु प्रग्रहाधीनेतीन्द्रियनियामकमनसि तद्रूपकम्। एवमेव बुद्धौ सारथिरूपकम्। सारथिबुद्धिर्मार्गाधीनेति विषयेषु गोचरपदेन मार्गरूपकम्। रथिस्वरूपबोधनायात्मेन्द्रियेत्यर्धश्लोकः। ततो, मार्गस्तु प्राप्याधीन इति तद्बोधनाय प्रापकसामग्री निगमनपूर्वका, यस्त्वविज्ञानवानित्यादयश्चत्वारः श्लोकाः। प्राप्यनिगमनाय पञ्चम इति बोधयितुम्, एवं ज्ञात्वेत्यादिना हयरूपकपर्यन्तग्रन्थस्य तात्पर्यकथनम्। इन्द्रियविषयेषु देशरूपकस्य तात्पर्यं वक्तुम्, 'इन्द्रियेभ्यः परा' इत्यादेस्तात्पर्यमाहुः तत्रेन्द्रियाणामित्यादि। आत्मेति 'घ्राणं च गन्ध' इति न्यायेन भगवदिन्द्रियरूपतया तदाधिदैविकत्वात् तेषां नियामकाः। श्रौतस्य परपदस्यायमर्थः। यद्यप्याकर्षकत्वान्नियामकत्वमुक्तं श्रीभागवते। 'इन्द्रियैर्विषयाकृष्टैरिति'। अनुभवश्च कामिनीकुचकुम्भादिदर्शने चक्षुराद्याकर्षस्य।

रश्मिः।

अन्यथेति भाष्यं विवृण्वन्ति स्म **यदि हीति**। कारिकार्थमाहुः **किं चेति**। **योग्यमिति** तत्तल्लीलायोग्यम्। मयूरादिरूपमपि। **प्राप्तत्वाच्चेति** एतेन भाष्ये एतदनुक्तावपि न क्षतिरिति द्योतितम्। **पञ्चम इति**।

'विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः।
सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्'॥ इति।

भाष्येऽर्थपदार्थो विषयाः इत्युक्तम्। इन्द्रियाणामर्था विषया इति पाठे क्वचिदिन्द्रियाणामात्मा विषया इति पाठस्तमाहुः। **प्रकृते**। **आत्मेति**। घ्राणं च गन्ध इति अयं न्यायः द्वितीयस्कन्धे तु 'घ्राणोस्य गन्धो मुखमग्निरिद्धः' इति अस्यानन्तस्य गन्धो घ्राणग्राह्यो गुणो घ्राणेन्द्रियम्। **तदाधीति** इन्द्रियाधिदैविकत्वात्। **तेषामिति** इन्द्रियाणाम्। तथा च भाष्ये आत्माधिदैविकरूपा जसो डा। आचार्येषु भेदबुद्धेः अपराधेषु गणनात् तद्भाष्यस्य वेदतुल्यत्वात् सविसर्गो नकारः पतितो वा तथा चेन्द्रियाणां परा आत्मानः आधिदैविकाः अर्था विषया इति भाष्यार्थः। **अयमिति** नियामकरूपः। ननु न परपदस्यायमर्थः किं तु विषयपदस्येत्याहुः **यद्यपीति**। न विषयपदस्यार्थे

ते च मनसा सम्यक्त्वेन भावितास्तथा भवन्ति । विरक्तेन्द्रियाणामतथात्वात् । बुद्धेरात्मा विज्ञानम्, तद् ब्रह्मविषयकं महद् भवति । ततः परमव्यक्तं, न प्रकटं, भगवत्कृपैव । सा तु भगवदधीना, न साधनान्तराधीना । स च भगवान् स्वाधीन इति । एवमेवार्थस्तस्योचितः । किंच, दर्शयति स्वयमेवेममर्थम् ।

'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' ॥ इति ।

भाष्यप्रकाशः ।

तथापि नात्र तदभिप्रेतम् । मोक्षप्रकरणत्वादित्यभिप्रेत्याहुः ते चेत्यादि । तथाच मोक्षप्रकरणे यदिन्द्रियेभ्यः परत्वं विषयाणामुच्यते, तद् भगवदीयतया मनसा सम्यक्त्वेन भावितानामेव । यथा नवमस्कन्धादावम्बरीषादिचरिते, 'स वै मनः कृष्णपदारविन्दयोः' इत्यादिश्लोकत्रयोक्तास्तादृशाम् । न तु सामान्यानाम् । नापि ज्ञानीन्द्रियविषयविवक्षया । विरक्तेन्द्रियाणां विषयानाकृष्टत्वात् । अतः 'तस्यारविन्दनयनस्य' इत्यादिवद् यत्र भगवदभिप्रायः सा मोक्षप्रणाड्यत्र विवक्षिता, न तु शुष्कज्ञानप्रणाडीति बोधनाय तदुक्तिरित्यर्थः । एतेन अर्थेभ्यश्च परं मन इत्यपि व्याख्यातप्रायम् । मनसा सम्यक्त्वेन भावन एव तेषां तथात्वादिति । मनसस्तु परा बुद्धिरिति सारथिभावादेव स्पष्टम् । बुद्धेरात्मेत्यादिकं व्याकुर्वन्ति बुद्धेरात्मेत्यादि । विज्ञानमिति तत्कार्यभूतं विशिष्टज्ञानम् । तस्य बुद्धिनियामकत्वं तु ब्रह्मविषयकत्वेन महत्त्वादित्यर्थः ।

रश्मिः ।

इत्याहुः तथापीति । नात्रेति किं तु 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति श्रुत्युक्त आत्मेन्द्रियमनोयुक्तं भोक्ता विषयग्रहणेन सुखदुःखसाक्षात्कारवानित्याकर्षकत्वमभिप्रेतम् । ननु तद्वाक्यं हानोपादानबुद्धौ तु विशेष इत्युक्त्वा प्रस्थानरत्नाकरे व्याकृतम् । अत्र मोक्षप्रकरणे आत्मोपादानबुद्धौ[1] विशेषापेक्षायां कुतो नाभिप्रेतमिति चेन्न विषयोपादानबुद्धौ मनसा सम्यक्त्वेनाभावितत्वस्य मोक्षप्रकरणे प्रतिबन्धकत्वात् । ते च मनसा सम्यक्त्वेन भाविताः इति भाष्यात् । भावितानामिति गुरूपदेशादिना भगवदीयत्वादिना वा स्मृतानाम् । तादृशामिति क्रियाकलापं 'सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह' इति सर्वात्मभाववताम् । श्लोकत्रयार्थानुवादकोयं श्लोकः ।

'एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे ।
सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह' ॥ इति ।

तस्यारविन्देति तृतीयस्कन्धे सनकादिप्रसङ्गेस्ति । भगवदिति श्रुत्यभिप्रायः भगवत्पदस्य श्रुतिवाचकत्वं ब्रह्मपदवत् । तदुक्तं कृष्णोपनिषदि 'तस्मान्न भिन्ना एतास्ता आभिर्भिन्नो न वै विभुः' इति । अत्रेति आत्मानं रथिनमित्यादिश्रुतिषु । तदुक्तिरिति साधनोक्तिः । तेषामिति आधिदैविकानामर्थविषयाणाम् । तथात्वात् युक्तपदार्थत्वात् । एतेनैव विरक्तेन्द्रियाणामिति भाष्यमपि विवृतम् । अतथात्वात् अयुक्तपदार्थत्वात् । ननु शमदमाद्युपेतसूत्रे भक्तिमार्गीयस्य स्वतः शमाद्युक्तेः कुतो विरक्तेन्द्रियाणामतथात्वादिति भाष्यमिति चेन्न 'ततो भूय एव तमो ये संभूत्याᳪरताः' इति शारीरब्राह्मणात् । संभूत्यां विद्यायां पञ्चपर्वात्मिकायां वैराग्यादिरतौ सत्यां तमः प्रविशतीति कथनात् । महत्त्वादिति व्यापकधर्मस्य व्यापकत्वनियमात् । ननु ज्ञाने गुणे परिमाणं नास्ति गुणे गुणानङ्गीकारादिति चेन्न प्रकाशाश्रयन्यायेन ब्रह्माभेदपक्षेऽगुणे सत्त्वात् । एकं रूपं रसात्पृथगिति-

---

१. विषयोपादानबुद्धौ ।

सूक्ष्मया उपनिषदनुसारिण्या बुद्ध्या । भगवज्ज्ञाने हि तत्प्राप्तिरिति । चकारात्, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इति स्मृतिर्गृहीता । तस्मात्, साधनोपदेशान्न सांख्यमतमिह विवक्षितमिति ॥ १ ॥

भाष्यप्रकाशः ।

शेषं स्फुटम् । एवं हेतुं व्याख्याय दर्शनपदं व्याकुर्वन्ति किंचेत्यादि । इममिति पूर्वोक्तम् कथं दर्शयतीत्यत आहुः सूक्ष्मयेत्यादि । तथाच सूक्ष्मपदेन बुद्धेरुपनिषदनुसारित्वबोधनादुक्तरीत्या भक्तिप्रणाड्या प्राप्तिं दर्शयतीत्यर्थः । तेन श्रुतौ गम्यत इति गतिरिति प्राप्यत्वबोधनात्, स्मृतावपि, विशत इति पदेन तस्यैवार्थस्योपबृंहणादत्र प्राप्तिरूप एवार्थोऽभिप्रेतो दृश्यते, न तु रूक्षदर्शनरूपोऽतो नात्र सांख्यमतप्रत्यभिज्ञानमिति भावः ॥ १ ॥

रश्मिः ।

वद्वा । ब्रह्मगतपरिमाणस्य विज्ञाने भावात् ब्रह्मविषयकत्वमेव ज्ञाने वैशिष्ट्यम् । शेषमिति । ननु अव्यक्तपदस्य कृपायां शक्तिः कुत इति चेत्तत्राहुर्भाष्ये । नेति तथा च योग इति भावः । सत्त्व-रजस्तमःसाम्यावस्थारूपा प्रकृतिः व्यक्ता स्वकार्यद्वारापि । ननु अव्यक्तोक्षर इति चेन्न पुरुषपदेनैव ग्रहणात् । पुरि शेते इति व्युत्पत्तेः । पूरक्षरः अस्फुटेप्यभिधेयवदिति विश्वः । तथा चाव्यक्तमिति सामान्ये नपुंसकम् । अव्यक्तमित्यत्राज्विकारो वा अव्यक्ता आम् अङ्गीकारे । 'अव्यक्तं महदादिके' इति विश्वात् कृपायां वा । न चैवं मायावज्जगद्बीजेपि स्यादुपनिषद्भाष्ये तस्यापि महदादित्वादिति शङ्क्यम् । मायावादमसच्छास्त्रमिति तस्याकिंचित्करत्वात् । न च कृपातुल्यो भक्तोऽव्यक्तपदवाच्य इति वाच्यम् । अव्यक्तमिति नपुंसकलिङ्गादत एव न विष्णुर्वाच्यः । तथा च विश्वः । 'अव्यक्तः शंकरे विष्णौ' इति अयं श्लोकः ।

'अव्यक्तः शंकरे विष्णौ अव्यक्तं महदादिके ।
आत्मन्यपि स्यादव्यक्तमस्फुटेप्यभिधेयवत्' ॥ इति ।

ननु वरणमेवाव्यक्तमस्तु तस्य कार्येण स्पष्टत्वात् । ऋत्विग्वत् । तथा च कोशाच्छक्ति-ग्राहकात् शक्तिग्रहोऽव्यक्तपदस्य कृपायामित्युक्तम् । तथा हि अव्यक्तं न प्रकटं भगवत्कृपैवेति भाष्यम् । तत्राव्यक्तपदविग्रहः सूक्ष्मं त्विति सूत्रभाष्ये सर्वप्रकारेण न व्यज्यते तदव्यक्तमिति सूच्यते तत्र न व्यज्यते व्यनक्तिकर्मत्वावच्छिन्नप्रतियोगिताकाभावोर्थः अत्र न प्रकटमित्यस्यान्वयः । अभावेन शब्दार्थाभावस्याभेदः संसर्गः कर्मणि ते प्रत्ययार्थभूते प्रकटस्याभेदान्वयः व्यनक्तिप्रकट-कर्मत्वावच्छिन्नप्रतियोगिताकोभावः स भगवत्कृपाभिन्न इति भाष्यार्थः । तेनाव्यक्तमिति कर्मप्रत्य-यान्तं कृपा न प्रकटे कर्तृप्रत्ययान्ते तेषां कथमन्वय इति कुचोद्यं निरस्तम् । न साधनेति । ननु साधनैः कृपा लोके दृष्टा कुतो न साधनाधीनेत्युच्यते इति चेन्न भक्तिहेतुग्रन्थे उपपादित-प्रायत्वात् । तस्येति श्रुतिसंदर्भस्य । एवं शेषं स्फुटमित्यर्थः । उपनिषदिति । ननु सांख्यानु-सारित्वं कुतो न बोधितमिति चेन्न शास्त्रान्तरे शास्त्रान्तरीयस्तुतेरनौचित्यात् । छान्दसः सा काष्ठा सा परा गतिरित्यत्र पुरुषविशेषणत्वेन कर्मणि क्तिन् इत्याहुः गम्यत इति । स्त्रियां क्तिन् भावे लोके वेदे विकल्पात् कर्मण्यपि कर्तरि तु न भावेन बाधात् । उपेति । गतिरिति गमनकर्म पुरुषः । मां विशते । इति विशेः कर्म पुरुष इत्युपबृंहणात् । अत्रेति । आत्मा दृश्यत इत्यत्र । अभिप्रेति तथा चागूढ

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

नन्वव्यक्तशब्देन न भगवत्कृपा वक्तुं शक्या। धर्मिप्रवाहादित्याशङ्क्य परिहरति तुशब्दः। सूक्ष्मं तद् ब्रह्मैव। धर्मधर्मिणोरभेदात्। अव्यक्तशब्देन हि सूक्ष्ममुच्यते। तदेव हि सर्वप्रकारेण न व्यज्यते। अर्हत्वात्। तदेव अर्हं योग्यम्। उभयत्राप्ययं हेतुः। तस्माद्धर्मधर्मिणोरभेदाद् भगवानेव सूक्ष्ममिति तत्कृपैवाऽव्यक्तवाच्या ॥ २ ॥

भाष्यप्रकाशः।

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥ उभयत्रेति अव्यक्तस्य ब्रह्मत्वे, भगवत्कृपात्वे च। अयमर्थः। 'बुद्धेरात्मा महान् परः' इत्यत्र, 'अथ परा यया तदक्षरमधिगम्यते' इति श्रुत्यन्तरोक्तं ज्ञानं बुद्धिनियामकत्वेन परामृष्टम्। तच्च नायमात्मेति श्रुत्यन्तराद्वरणाधीनम्। वरणं च कृपयैवेति ज्ञानात् परस्य विमर्शे योग्यताबलात् कृपैव तथात्वेन सिद्ध्यति। सा च भगवद्धर्मः। धर्मधर्मिणोश्चाविनाभावेन स्थितत्वादभेद इति तस्या अपि ब्रह्मत्वं योग्यताबलादेव सिद्ध्यतीति तथेति। तथाच न प्रायपाठविरोध इत्यर्थः ॥ २ ॥

रश्मिः।

आत्मा प्राप्यत इत्यर्थः। न तु गूढः सूक्ष्म आत्मा दृश्यत इति प्रत्यभिज्ञानं तत्तेदंताप्रकारकं ज्ञानं प्रत्यभिज्ञा 'ये धातुशब्दा यत्रार्थे' इति पत्रावलम्बनात्पूर्वोक्तोर्थो धातूनामनेकार्थत्वादरेणासंभवीत्यतो गूढ आत्मा दृश्यते तदनन्तरं तं विशते इति पूर्ववद्विशतेः कर्म आध्याहारेण पूरयित्वा श्रुत्यर्थ इत्याहुः। भाष्ये। भगवदिति भगवज्ज्ञानं आत्मा दृश्यत इति तत्प्राप्तिस्त्वध्याहृत्य व्याकृता सैव। स्मृतिर्गीताष्टादशाध्यायस्था तेन मुख्यपक्षेण श्रुतिव्याकरणे संमतिरुक्ता अध्याहारे च। साधनेति सांख्ये तु 'मुक्तिरन्तरायध्वस्तेर्न परः' अन्तरायस्य निःसङ्गेप्युपरागस्याविवेकाज्जातस्य 'ध्यानधारणाभ्यासवैराग्यादिभिः निरोधोस्य' इति ध्यानादिसाधनैरन्तरायध्वस्तिः न निःसंगस्य सा साधनजन्या ॥ १ ॥

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥ भाष्ये। धर्मीति। ननु बुद्धेर्ज्ञानरूपायाः गुणत्वेन न धर्मिप्रवाह इति चेन्न मनोभेदत्वेनागुणत्वात्। प्रकृते। अत्राव्यक्तपदस्य योगेन कृपावाचकत्वेपि श्रुतौ क्वापि तद्वाच्यादर्शनात् कृपावाच्यानुपस्थित्या वरणोपस्थित्या वरणमहिम्ना कृपोपस्थितिमाहुः अयमिति। अपरं चात्मा विज्ञानमिति भाष्ये विज्ञानमपि बुद्धिरित्येकस्या नियम्यनियामकभावासंगतिरित्याहुः बुद्धेरिति। अथ परेति मुण्डके। नायमात्मेति श्रुतिर्मुण्डके। योग्यतेति यथा 'पातु वो दयितामुखम्' इत्यत्र मुखं सांमुख्यं न वदनं कामत्राणायोग्यत्वात्। यद्यपि चुम्बनादिना वदनमपि कामत्रायकं तदापि सांमुख्यमेव योग्यम्। असति तस्मिन् सर्वं वैरस्यायैवेति तस्यैवौचित्यम्। औचित्यं योग्यता। तथात्वेनेति विज्ञानात्परत्वयुक्तपदार्थत्वेन युक्तपदमव्यक्तपरम्। तथेति औकारस्य 'अव्ययादाप् सुपः' इति लुक्। अव्यक्तस्य ब्रह्मभगवत्कृपात्वे प्रकारौ। तथा चेति कृपाया ब्रह्मत्वेन धर्मित्वे च। भाष्ये। तस्मादिति प्रसिद्धात्। 'प्रकाशाश्रयवद्वा तेजस्त्वात्' इति व्याससूत्रात् धर्मधर्मिणोरभेदस्योक्तत्वात्। अव्यक्तपदवाच्या। प्रकृतमुच्यते इदं त्विह वक्तव्यम्। तद्वाच्यानुपस्थित्यैत्यादि तदसिद्धम्। लिकुञ्चीथा इत्यस्य वाच्यादर्शनेन योग्यार्थानुपस्थित्या पदवैयर्थ्यमतोव्यक्तपदयोगेनार्थोऽदुष्टः। नाप्यत्र वरणोपस्थितिर्युक्ता। इदं श्रुतिद्वयं 'विद्यैव तु

तदधीनत्वादर्थवत् ॥ ३ ॥

ननु धर्मित्वे परत्वमनुपपन्नम् । अन्यथा पूर्वोक्तो दोष इत्यत आह अभेदेऽपि कृपायास्तदधीनत्वात् परत्वम् । तत्र दृष्टान्तः । अर्थवत् । अर्थः पुरुषार्थः फलं, तद्वत् । 'ब्रह्मविदाप्नोति परम्' इत्यत्र एकस्यैव ब्रह्मणः सच्चिद्रूपेण विषयत्वमानन्दरूपेण फलत्वमिति । तथैवाक्षरपुरुषोत्तमविभागोऽपि । स्वधर्मा अपि स्वाधीनाः । स्वयमपि स्वाधीन इति । तथा कृपाविष्टः साधनम्, आनन्दरूपः फलमिति ।

भाष्यप्रकाशः ।

तदधीनत्वादर्थवत् ॥ ३ ॥ उक्तं समाधिमाक्षिपति नन्वित्यादि । यदि पूर्वोक्तयुक्त्या कृपाया ब्रह्मत्वं, तदा धर्मित्वे तद्भिन्नत्वरूपं परत्वं युक्तिरहितम् । यदि कयाचिद्युक्त्या धर्मत्वं तदा धर्मिप्रायपाठविरोधरूपो दोष इति पूर्वोक्तः समाधिरसंगत इत्याशङ्कायामस्यापि समाधिमाहेत्यर्थः । समाधिं व्याचक्षते अभेदेऽपीत्यादि । तथाचाभेदे यथैकरूप्येण ग्रहणं युक्तिस्तथा भेदे नियम्यनियामकभावो युक्तिरित्युभयमप्युपपन्नमित्यर्थः । एकत्वेऽपि नियम्यनियामकभाव एव कथमित्यत आहुः तत्रेत्यादि । तथैवेति एकत्वेऽपि गणितानन्दत्वागणितानन्दत्वात्मकरूपभेदेनैव तथाच रूपभेदेन सोऽप्युपपन्न इत्यर्थः । एतदेव निगमयन्ति स्वधर्मा इत्यादि, फल-

रश्मिः ।

निर्धारणात्' इत्यत्र पुष्टिमार्गसद्योमुक्तिपरत्वेन वर्णितमत्र मर्यादाभक्तौ क्रममुक्तौ च कुत उपतिष्ठेत बुद्धेर्बुद्धिनियामकत्वं तु घ्राणं च गन्ध इति न्यायेनोपपन्नम् । कृपोपस्थितिस्त्वनुकृत्यधिकरणसिद्धा । अन्यथा इति भारतमाख्यानं कृपया मुनिः कस्मादनुकुर्यात् ।

'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ।
इति भारतमाख्यानं कृपया मुनिना कृतम्' ॥

इति वाक्ये मुनिकृपया भारतीयपदैः वाक्यैश्च भारतार्थविज्ञानं स्त्र्यादीनां कृपया पदवाक्यैः भगवद्विज्ञानं भगवदीयमनुकरोतीति 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि' इति भक्तविषयकं भगवदीयं ज्ञानमिति अन्यच्च व्यक्तं प्रपञ्चरूपमपि ज्ञानं भगवान् अव्यक्त ईषद्व्यक्तस्तद्धर्मः तत्त्वत्वात् । अव्यक्तः परमात्मा 'ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते' इति वाक्यात् ॥ २ ॥

तदधीनत्वादर्थवत् ॥ ३ ॥ परत्वमिति 'अव्यक्तात्पुरुषः परः' इत्यत्र परनिष्ठम् । कयेति तत्र सूर्यः प्रकाशः सूर्यस्य प्रकाश इति धर्मधर्मिणोर्भेदाभेदयोरनुभवसिद्धतया प्रकाशाश्रयन्यायेन । यथैकेति नीलमुत्पलमित्यत्र । नियम्येति राज्ञः पुरुष इत्यत्र । एकत्व इति । ननु सच्चिद्रूपेणाक्षरत्वमानन्दरूपेण फलत्वमिति भाष्योक्तः कुतो नार्थः भाष्यार्थोपलक्षणत्वादस्यार्थस्य । न चात्रार्थे विकृतत्वं निरवयवत्वशब्दकोपो वा स्यादिति वाच्यम् । विकृतत्वस्य समन्वयाद्यधिकरणे वारणाद् द्वितीयस्य तु 'श्रुतेस्तु शब्दमूलत्वात्' इति सूत्रेणेति । निगमयन्तीति स्वधर्मा इत्यत्र तस्मादिति पूरयित्वा एतद्वाक्यनिष्ठावयवविभाजकोपाधिमत्त्वं निगमनत्वं यथा तस्माद्वह्निमानित्यत्र । प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवा तन्निगमनं कुर्वन्तीत्यर्थः । स्वधर्माः सत्यत्वादयः कृपादयश्च स्वयमपि 'न रोधयति मां योगो न सांख्यं धर्म उद्धव' इत्यादिना स्वस्य सर्वात्मभावस्याधीनः ।

अथवा अव्यक्तं सच्चिद्रूपमक्षरमेवास्तु। तस्मिन् सति विज्ञानस्य विषयाधीनत्वमर्थः।

एतेनान्येऽपि सर्वसंप्लववादिनो निराकृता वेदितव्याः । असंबद्धाभिलापाच्च।

भाष्यप्रकाशः।

मितीत्यन्तम्। अस्मिन् पक्षे अव्यक्तपदस्य यौगिकत्वाच्छैथिल्यं शङ्क्येतेत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि अक्षरमेव, 'अव्यक्तोऽक्षर इत्युक्तः' इति गीतावाक्यादव्यक्तमस्तु। नच लिङ्गविरोधः। 'अक्षरं ब्रह्म परमम्' इति ब्रह्मत्वविवक्षायां तत्रापि नपुंकसलिङ्गप्रयोगात् तस्य च भगवतः सकाशाद् भेदाभेदौ, गीतायाम्, 'एवं सततयुक्ता ये' इति प्रश्नोत्तरसंदर्भे स्फुटौ। धामत्वाद्भगवदधीनत्वं च स्फुटम्। अतस्तदधीनत्वादक्षरमेवाव्यक्तम्। अस्मिन् पक्षे यो दृष्टान्तस्तमाहुः तस्मिन्नित्यादि। तस्मिन्नक्षरे स्फुरिते सति, विज्ञानस्य बुद्धेर्यदक्षरात्मकविषयाधीनत्वं सोऽत्र दृष्टान्तभूतोऽर्थो ग्राह्यः। तथाच तद्विज्ञानं यथा अक्षरसारूप्येऽप्यक्षराद् भिन्नमक्षराधीनं च, तथा अक्षरमपि ब्रह्मसरूपं ब्रह्मणः परस्माद् भिन्नं तदधीनं चेत्यैक्येऽपि न परत्वानुपपत्तिप्रवाहविरोधावित्यर्थः।

एवं त्रिसूत्रीव्याख्यानेनैकदेशिकृतं व्याख्यानान्तरमपि निराकृतमित्याहुः एतेनेत्यादि। अयमर्थः। मायावादिनो ह्यानुमानिकसूत्रे अव्यक्तशब्देन रथरूपकविन्यस्तं शरीरमङ्गीकृत्य तस्य कथमव्यक्तशब्दिततत्वमित्याकाङ्क्षायां द्वितीयसूत्रे भूतसूक्ष्मस्याऽव्यक्तशब्दार्हत्वात् तत्कार्यस्य शरीरस्याव्यक्तशब्देन ग्रहणं यथा, 'गोभिः श्रीणीत मत्सरम्' इत्यत्र गोशब्देन पयस इत्युक्त्वा, तृतीयसूत्रे, तद् भूतसूक्ष्मं न स्वतन्त्रं येन प्रधानकारणवादः प्रसज्येत किंतु परमेश्वराधीनम्। तच्चावश्यकम्। शक्तिरहितस्य कर्तृत्वानुपपत्तेः। अतस्तदर्थवदित्युक्त्वा, अव्यक्तशब्दवाच्यामविद्यां वदन्ति। यथोक्तं तेषां भाष्ये । अविद्यात्मिका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिर्यस्यां स्वरूपबोधरहिताः शेरते संसारिणो जीवास्तदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टम् । 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इति श्रुतेः। क्वचिदक्षरशब्दोदितम्। 'अक्षरात् परतः परः' इति श्रुतेः । क्वचिन्मायेति सूचितम्। 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति मन्त्रवर्णादिति।

रश्मिः।

यौगिकत्वादिति योगस्य वेदान्ते मुख्यत्वेन पक्षान्तरोत्थाने तुष्यतु दुर्जनन्यायेन दोष उक्तः। इतिहासमतमाहुः। भाष्ये। अथ वेति। भेदाभेदाविति भेदोविभक्तकः 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतायाः। अत इति परत्वस्य नियामकत्वस्य प्रकरणात्। तदधीनत्वाद् ब्रह्माधीनत्वात् । आर्थिकस्तदधीनत्वादिति सूत्रार्थ उक्तः। दृष्टान्तोर्थवदित्यंशस्तं वक्तुमाहुः अन्यस्मिन् पक्ष इति। ननु भाष्ये दृष्टान्तत्वबोधकपदाभाव इति चेन्न अर्थ इति पदस्य बोधकत्वात्। अर्थस्तद्वदिति भाष्यार्थात्। पक्षान्तरे संपूर्णसूत्रार्थ उक्तः। अत्रेतिहासपक्षे एकमेव सूत्रम्। तत्पक्षस्यापि स्मृतेश्चेति सूत्रे कथनात्। क्वचिदेकार्थत्वेन क्वचित्पृथक्त्वेनेति। भूतेति शब्दरूपरसगन्धस्पर्शरूपस्य। तत्कार्येति पञ्चमहाभौतिकत्वाच्छरीरस्य। ग्रहणमिति लक्षणया।

भाष्यप्रकाशः ।

तदेतदसंगतम् । कारणग्रहणेनैव संभवति गत्यन्तरे कारणवाचिशब्देन कार्यग्रहणस्य लक्षणादोषयुक्तस्यानुचितत्वात् । 'द्वाविमौ पुरुषौ लोके' इति गीतोक्ते अक्षरे कारणत्वस्य श्रुत्यादिषु 'तन्मायाफलरूपेण' इत्याद्येकादशस्कन्धवाक्यैर्निर्द्धारणात् । अधीनत्वस्य धामत्वादेव सिद्धेश्च । तद्विहाय तत्प्रथमकार्यरूपमायापदवाच्यशक्तिग्रहणस्यानुचितत्वात् । 'यो वेद निहितं गुहायां परमे व्योमन्' 'ऋचो अक्षरे परमे व्योमन्' इत्यादिश्रुतावाकाशपदवाच्यत्वस्यापि तत्रैव स्पष्टत्वात् । 'अक्षरात् परतः परः' इत्यत्रापि परत इति विशेषणेन मायाशक्तिव्यावृत्त्या भगवद्धामरूपस्यैव तस्य सिद्धेः । अतो व्यासाशयविरुद्धत्वाद् अयमसंबद्धाऽभिलाप एव । जगद्बीजं तु भगवानेव । 'बीजं मां सर्वभूतानाम्' इति गीतावाक्यात् । अक्षरस्य कारणत्वं तु योनित्वात् । 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्' इति वाक्यात् । नच पुरुषत्वोक्तिविरोधः । 'त्वं स्त्री त्वं पुमान्' इत्यादिश्रुत्या सर्वरूपत्वेन सिद्धत्वादिति ।

रश्मिः ।

शक्यसंबन्धो लक्षणा, संबन्धः कार्यता, गोभिः पयोभिः मत्सरं सोमं श्रीणीत मिश्रितं कुर्वीत । तच्चेति । तदधीनत्वं शक्त्यधीनत्वम् । शक्तिरहितस्य परमेश्वरस्य नित्यस्य शुद्धबुद्धमुक्तस्वभावस्य । तदर्थवत् तदविद्याख्यं बीजं अर्थवत् न तेन विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यते शक्तिरहितस्य प्रवृत्त्यनुपपत्तेः । **तदस**मिति असंबद्धाभिलापाच्चेति भाष्यार्थ उक्तः । **कारणे**ति भूतसूक्ष्मग्रहणेन । **कार्ये**ति शरीरग्रहणस्य । **निर्धारे**ति चतुर्विंशे ।

'तन्मायाफलरूपेण केवलं निर्विकल्पितम् ।
वाङ्मनोगोचरातीतं द्विधा समभवद्बृहत्' ॥

इत्यत्र बृहत्पदात् 'गणितानन्दकं बृहत्' इत्यक्षरपदस्याक्षरे शक्तिः सिद्धान्तमुक्तावल्याम् । **स्पष्टे**ति । व्योमन्नित्यत्र सप्तम्या लुक् व्योम्नि आकाश इत्यर्थः । **परत इती**ति अदृश्यत्वादिगुणकाधिकरणे मायावादिनोऽक्षरान्मायायाः परतः । परो भूतयोनिरिति व्याचक्रुः । स्वमते तु अक्षरात् कीदृशः परतः इदं विशेषणं सांख्ये प्रधानस्याक्षरत्वात् तद्वारणायेत्यदृश्यत्वाधिकरण उक्तम् । सांख्यमतसादृश्यान्मायावादेप्याहुः **मायाशक्ती**ति । तथा चाक्षरमविद्यापरत्वं मायाप्रधानभिन्नत्वं तेनात्रैकः संप्लववादी । **एतेने**ति भाष्योक्तेतिहासमताङ्गीकारेणासंबद्धाभिलापेन च निराकृतः 'सम्यक् बाढप्रशंसयोः' इति विश्वात् सम्यक् प्रशस्तेङ्गीकृतो वा 'येप्यन्यदेवता भक्ताः' इति गीतोक्तेः । प्लवः शब्दः तेन तैर्वा वदितुं शीलमेषां ते संप्लववादिनः सर्वेषां संप्लववादिनः सर्वसंप्लववादिनः सर्वे च ते संप्लववादिनो वा । स्वस्ववादेन स्वीयदेवताप्राप्तेः । तत्र मायावादेन मायादेवताप्तिः तत्राधिकारिणां च कदाचित्कृष्णप्रसादयुक्तस्य मुक्तिरपि । अयं निराकृतः । इतिहासमतेनाक्षरेव्यक्तपदशक्तेर्मुख्ये संभवति गौणस्यान्याय्यत्वात् । असंबद्धाभिलापस्तु कारणग्रहणेनैवेत्यादिना प्रकाश एव कृतः । कारिकार्थैक्यं यथा **अनेके**ति । अनेकेषां रूढेः शब्दानां व्यापारव्यापारिभावः संबन्धः षष्ठ्यर्थः । **वाच्यं ब्रह्मे**ति ॐमित्येकाक्षरं ब्रह्म सर्वं तस्योपव्याख्यानमिति प्रस्थानरत्नाकरे स्पष्टम् । एवकारो विशेषणसंगतोऽयोगव्यवच्छेदकः यथा शङ्खः पाण्डुर एवेत्यत्र । ब्रह्मत्वायोगव्यवच्छेदवद्वाच्यमिति । वाच्यं विशेष्यम् । ब्रह्म विशेषणं व्यावर्तकत्वात् । आर्थिकमाहुर्नापरमिति उत्तरार्धं

अनेकरूढिशब्दानां वाच्यं ब्रह्मैव नापरम्।
शाक्तास्तांश्चेत् तथा ब्रूयुस्ते सन्मार्गाद् बहिष्कृताः॥

भाष्यप्रकाशः।

तदेतत् सर्वमभिसंधायाहुः अनेकेत्यादि। शक्तित इति। जैमिन्युक्तं भाट्टप्रसिद्धं लोकवेदाधिकरणमाश्रित्य लौकिकशक्तितः। तथेति प्रकृतिवाचकत्वम्। शाक्तास्तां चेदिति-क्वचित् पाठः। तदा तु, तां प्रकृतिं तथा जगद्बीजभूतां ब्रूयुरित्येवं योजना। तथाच, 'शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि'

रश्मिः।

व्याचख्युः जैमिन्यनुक्तमिति य एव लौकिकाः शब्दाः ते एव वैदिका इति वदन्ति तद्यदि जैमिन्युक्तं स्यात्तदा सर्वे विधयच्छन्दसि विकल्प्यन्ते इत्यादिपूर्वं व्याकृतेः स्फुटा इति कारिकांशव्याख्याने स्वरादिना भेदोपपादनं विरुद्धमिव भायात् अतो हि उत्पत्तौ वेत्यादिप्रथमपादाधिकरणमन्यथा व्याकरणीयं यल्लोकवेदाधिकरणमित्युच्यते। तर्हि शक्तितश्चेत्तथा ब्रुवाणा मीमांसकाः के इत्यत आहुः भाट्टेति तथा चाहुः जैमिनिन्यायमालाविस्तरे तदेवमधिकरणत्रये व्युत्पादनाय भाट्टप्राभाकरमतभेद उक्तः। अथ प्रायेण भाट्टमतमेवोपन्यस्यते इति चतुर्थाधिकरणावतरणे सप्तमाधिकरणकारिके।

'वेदवाक्यममानं स्यात् मानं वा नास्य मानता।
पृथक्संकेतवीक्षायामनपेक्षत्ववर्जनात्॥
वेदेपि लोकवन्नैव वाक्यार्थे संगतिः पृथक्।
ग्रहीतव्या ततो वाक्यं प्रमाणं नैरपेक्ष्यतः'॥ इति।

तथा च वृद्धव्यवहारेण लोके शक्तिग्रहः गृहीतशक्तिकः शब्दो वेदेपि बोधक इति इदं भाट्टमतं भाट्टप्रसिद्धम्। लौकिकशक्तितो वेदे व्यक्तपदे तथा प्रकृतिवाचकत्वं ब्रूयुः ते सन्मार्गादुक्तादोमित्येकाक्षरं ब्रह्मेत्यादि श्रौतान्मार्गाद्बहिःकृताः पाषण्डिन इति भावः। अत्रेतिहासमते रूढिशब्दान्तर्गतोव्यक्तशब्दोपि भवति। ननु पूर्वपक्षे यौगिकोव्यक्तशब्दः उक्तः वेदान्ते योगादरादितिहासे तु रूढिरव्यक्तपदस्याक्षरे। ननु योगोपि संभवीति चेन्न ज्ञानिनः प्रति व्यक्तत्वेन तदेव हि सर्वप्रकारेण न व्यज्यत इति भाष्यविरोधात्। अत एव न कोशोक्तशंकरादौ योगः। अत एव न योगरूढः शब्दः। ततो रूढ्यास्य वाच्यं ब्रह्माक्षरं ब्रह्मेत्यर्थः। विष्ण्वादयो वाच्या इति वदन्तः श्रौतान्मताद्बहिःकृताः विशिष्टाद्वैतवादिनोव्यक्तपदेनाक्षरग्रहणेनासंबद्धाभिलापेन च सर्वसंप्लववादिनो निराकरणं इदमयुक्तम्। 'आचार्यचैत्यवपुषा स्वगतिं व्यनक्ति' इति 'आचार्यं मां विजानीयान्नावमन्येत कंचन' 'सर्ववादानवसरं नानावादानुरोधि तत्' इति निबन्धे। तथापि नानावादानुरोधेन क्रीडतः क्रीडाप्रकाशपूर्वकनिर्दुष्टक्रीडानिरूपणं ज्ञेयमेवं पूर्वत्राग्रेपि बोध्यम्। यथा शंकराचार्यमतेव्यक्तपदेन शरीररूपमाया सैवाविद्या सोच्यते। एते तु शरीरमव्यक्तपदार्थमाहुः तत्र कोशः प्रमाणं तदपेक्षया गीताप्रमाणं प्रबलमिति नाव्यक्तवाच्यं शरीरमपि त्वक्षरमित्येतेनेति भाष्यार्थकृतनिराकरणं 'शरीरं रथमेव तु' इत्यत्र शरीरग्रहणेनानन्यलभ्यो हि शब्दार्थः इत्यसंबद्धाभिलापश्च। भास्कराचार्यमतेप्येवं अव्यक्तपदार्थः शरीरं असंबद्धाभिलाप भाष्यार्थकृतनिराकरणे पूर्ववत्। भिक्षुमतेपि ज्ञेयम्। माध्वमते तु अव्यक्तपदार्थो विष्णुरक्षरः। सोपि सत्त्वगुणोपाधिरतः सच्चिदक्षराद्भिन्नः इति गीताविरोधः

तस्मादिन्द्रियेभ्यः परवाक्ये नानुमानिकं किंचिदस्ति ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥

पूर्वापरसंबन्धेनार्थः प्रतिपादितः । केवलैतद्वाक्यविचारेऽपि न तदभीष्टं प्रकृतिरूपमव्यक्तं सिध्यतीत्याह । अत्र हि वाक्ये अव्यक्तं ज्ञेयत्वेन नोक्तं, तेषां तु प्रकृतिपुरुषान्तरं ज्ञातव्यम् । न हि सिद्धवन्मात्रनिर्देशे तेषां मते पुरुषार्थः सिद्ध्यति । अपुरुषार्थसाधनत्वे वा असंबद्धार्थवाक्यत्वमेव स्यात् । परत्व-

भाष्यप्रकाशः ।

इत्यादि स्वश्रद्धाजाड्याद् वदन्तो वेदान्तविरुद्धवादित्वात्तथेत्यर्थः । सिद्धमाहुः **तस्मा-दित्यादि** ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥ सूत्रमवतारयन्तः प्रयोजनमाहुः **पूर्वेत्यादि** । व्याकुर्वन्ति **अत्र हीत्यादि** । **ज्ञातव्यमिति** । 'गुणपुरुषान्तरज्ञानात् कैवल्यम्' इति प्रवचनसूत्रात् । विभूतिविशेषाप्तये प्रधानस्यापि ज्ञेयत्वस्मरणाच्च तथेत्यर्थः । **परत्वेत्यादि** । परापरभावो हि

रश्मिः ।

अक्षरस्य निर्गुणत्वात् मुख्यार्थस्य भाष्ये गीतोपन्यासेनोक्तवैष्णवमार्गस्यासंबद्धाभिलापत्वम् । **शैवा-चार्यमतेऽप्येवं** ज्ञात्वा वक्तव्यम् । सिद्धमाहुः **तथा चेति** । **शिव इति** । सौन्दर्यलहरीस्थं शिवपदं ब्रह्मपरं शक्तिर्माया । **वेदान्तेति** ॐमित्येकाक्षरं ब्रह्मेत्युक्तवेदान्तविरुद्धवादित्वात् तथा ते सन्मार्गा-द्बहिःकृतत्वेन प्रकारेण संपन्नाः । **तस्मादितीति** अत्र भाष्ये तस्मात् अव्यक्तपदस्याप्रधान-वाचकत्वात् । परस्य वाक्यं परवाक्यं 'इन्द्रियेभ्यः परा ह्यर्था' इति वाक्यं तस्मिन् । ननु कस्मात्पर-वाक्यमित्यत आहुः **इन्द्रियेभ्य इति** । ननु इन्द्रियेभ्यः परा इति वाक्ये इति वक्तव्ये इन्द्रियेभ्यः परवाक्य इति विलम्बोपस्थितिकप्रयोगः कुत इति चेन्न सर्वशब्दत्वात् । आचार्याणां प्रयोगेऽतार-तम्यात् ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥ **गुणेति** गुणश्च प्रकृतिरूपः तदन्यः पुरुषश्च तयोर्ज्ञानात् । पुस्तकान्तरस्थं सूत्रं शंकरभाष्ये उक्तमिहोपन्यस्तं सूत्रं तु तदा सर्वावरणमपलापे तस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पमिति तदा पूर्वसूत्रोक्तसमाधिः ततः क्लेशकर्मनिवृत्तिः इति सूत्रं ततस्तदेति सूत्रमतस्तदा नाम समाध्यनन्तरं क्लेशकर्मनिवृत्तिकाले । **विभूतीति** 'मन्त्रौषधितपःसमाधिजाः सिद्धयः' इति सांख्यप्रवचनसूत्रात् । विभूतिविशेषाः परिणामत्रयसंयमादतीतानागतज्ञानमिति स्मरणम् । **तथेति** ज्ञातव्यत्वेन । परिणामत्रयसंयमो हि प्रधानरूपप्रधानकार्यज्ञानाधीनमस्त्येव श्रीभागवते चैकादशस्य पञ्चदशेऽध्याये कचित्स्मर्यते ।

'उदासीने मयि परे प्रकृतेर्गुणवृत्तिषु ।
चिन्मये धारयेच्चेतो द्वन्द्वैर्नैवाभिभूयते' ॥ इति ।

अत्र विभूतिविशेषो द्वन्द्वाभिभवाभावः । यद्वा गुण इत्यस्यायमर्थः सत्त्वादिगुणरूपात्प्रधाना-त्पुरुषस्यान्तरं भेदस्तज्ज्ञानादित्यर्थः । न हि शक्यमिति च वदद्भिः प्रधानं ज्ञेयत्वेन स्मर्यते इति । न केवलं प्रधानस्य भेदप्रतियोगितया ज्ञेयत्वं तैरिष्टं किं तु तस्योपासनयाऽणिमादिप्राप्तयेपीत्याहुः **विभूतीति** । **भाष्ये** । ननु 'ह्यव्यक्तात्पुरुषः परः' इति शाब्दज्ञानविषयत्वमस्त्येव समाध्यनन्तरं

वचनं चासंगतम् । श्लिष्टत्वादुभयोरिति चकारार्थः । अयं हेतुः पूर्वमुक्तोऽप्यवसरे स्मारितः । तस्मादव्यक्तं न प्रकृतिः ॥ ४ ॥

भाष्यप्रकाशः ।

विश्लेषेऽवगन्तुं शक्यते, न तु संश्लेषे । इदानीमज्ञानदशायां तु श्लेष एवेत्युदासीनतयोक्तौ पुरुषस्य परत्ववचनमप्यसंगतं स्यादित्यर्थः । अयमिति । चकारसूचितः । पूर्वमिति अदृश्यत्वाद्यधिकरणे ॥ ४ ॥

रश्मिः ।

सिद्धयोपि भवन्ति इति ज्ञेयत्वेनोक्तमेव प्रधानं कथं ज्ञेयत्वेन नोक्तं इति भाष्यमित्याकाङ्क्षायामाहुः **नहीति । मत** इति तदुक्तं सांख्यप्रवचनसूत्रवृत्तौ 'प्रात्यहिकक्षुत्प्रतिकारवत् तत्प्रतिकारचेष्टनात् पुरुषार्थत्वम्' इति । 'निबन्धे

'वामा शाक्ताश्च योगे तु प्रकटाप्रकटे भिदा ।
प्रकृतिस्तत्र संराध्या साध्यो योगश्चतुष्टये' ॥

छलयोगो द्विविधसांख्यं शाक्तो मार्गश्च चतुर्थो वामः इति चतुष्टयम् । अत्र योगो पुरुषार्थः । 'अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः' इति सांख्यप्रवचनसूत्रवृत्तेः 'यद्वा तद्वा तदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषार्थः' इति सूत्रवृत्तेः तदाहुर**पुरुषार्थे**ति प्रधानस्य तथा वा पुरुषार्थेन हरेः पदे गमनेन संबद्धेष्वात्मानं रथिनमित्यादिवाक्येषु अस्य वाक्यस्यासंबद्धार्थोऽपुरुषार्थसाधनत्वं तस्य वाक्यत्वमेव स्यादेवकारेण मार्गान्तरत्वात् पुरुषार्थवाक्यत्वव्यवच्छेदः । **प्रकृते । श्लेष** इति 'असंगोयं पुरुषः' 'प्रधानाज्जगज्जायते' 'निःसंगेप्युपरागो विवेकात्' 'द्वयोरेकतरस्य वा औदासीन्यमपवर्गः' इति । **उदासीनतया** अपवर्गे उदासीनतया । **चकारे**ति वैयाकरणमतादरेण निपातानां द्योतकत्वमाहुः सूचितपदेन । **अदृश्ये**ति उभयोः संश्लिष्टत्वादयं हेतुः । पूर्वं प्रकृतिपुरुषयोः श्लिष्टत्वात् इति भाष्येणोक्तोपि 'अक्षरात् परतः परः' इति मुण्डके प्रकृतिपुरुषयोः श्लिष्टत्वात्परापरभावासंगतिरित्यंशे वक्तव्येपि प्रतिबन्धकीभूतजिज्ञासा कथमदृश्यत्वादिगुणकस्याक्षरस्य परमात्मत्वादिकमिति तन्निवृत्तये अदृश्यत्वादिगुणकाक्षरस्य परमात्मत्वं त्रिसूत्र्योक्तम् । ततः पूर्वाधिकरणोक्तं रूपं सांख्यसिद्धस्य कार्येश्वरस्य कुतो न अक्षरपरपुरुषयोः भेदाभेदौ च कथमित्याकाङ्क्षायां वैश्वानराधिकरणं नवसूत्र्योक्तम् । द्वितीयपादः समापितः । अन्तर्यामिप्रतिपादकवाक्यानां द्वितीयपादे विचारणात् । तृतीयपाद उपास्यरूपप्रतिपादकानि वाक्यान्यन्तर्याम्यानन्दत्वेन मोक्षदातृप्रतिपादकानि स्मृतानि विचारयितुं द्युभ्वाद्यायतनाधिकरणम् । तत्र तस्मिन् द्यौः पृथिवीति मुण्डकवाक्यं विषयत्वेनोपन्यस्य तत्र किं सांख्यसिद्धं प्रधानमुच्यते ब्रह्म वेति संदेहे प्रधानं निरस्य ब्रह्मैवेति साध्यते सप्तसूत्र्या तेन पूर्वपादोक्तमन्तर्यामिरूपमपि व्यापकत्वसर्वात्मकत्वगुणविशिष्टमेवोपासनीयमिति साधितम् । ततो नित्यनिरवध्यानन्दरूप एवान्तर्याम्युपास्यः पृथगपि भक्तिमार्गीयैरुपास्य इति बुद्धिस्थं प्रसङ्गाद्बोधयितुं द्वितीयं द्विसूत्रं भूमाधिकरणम् । ततो हि पूर्वपादेऽदृश्यत्वाद्यधिकरणेन विचारितस्याक्षरस्य विरुद्धधर्मत्वं बोधयितुं बुद्धिस्थोपोद्घातसंगत्या तृतीयं त्रिसूत्रमक्षराधिकरणम् । तत उपासना न फलं साक्षात्कार इति साधयितुं चतुर्थमेकसूत्रमीक्षतिकर्माधिकरणम् । ततः प्रसङ्गसंगत्या जीवब्रह्मवादं निर्णेतुं पञ्चममष्टसूत्रं दहराधिकरणम् । ततो दहरविरुद्धं 'न तत्सूर्यो भाति न चन्द्रतारकम्' इति

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

ननु ज्ञेयत्वावचनमसिद्धम् । पूर्वं निर्देशमात्रमुक्त्वाऽग्रे ज्ञेयत्ववचनात् ।
'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते' ॥
इत्युत्तरवाक्ये वदतीति चेन्न । प्रकरणस्य नियामकत्वेनैकवाक्यत्वे द्वयोः सर्वैकवाक्यत्वेन प्राज्ञः परमात्मैव निचाय्यः । न तु द्वयोरेवैकवाक्यत्वं वक्तुं शक्यम् । तस्मात् प्रकरणस्य नियामकत्वे अशब्दवाक्यमपि भगवत्परमेव ॥ ५ ॥

भाष्यप्रकाशः ।

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥ **प्रकरणस्येत्यादि** अव्यक्तश्रुतेः परत्वलिङ्गस्य तद्घटितवाक्यस्य च साधारणत्वात् प्रकरणस्य निर्णायकत्वं वक्तव्यम् । अतस्तस्य नियामकत्वेनैकवाक्यत्वे वाच्ये, 'महतः परमव्यक्तम्' इति, 'अशब्दमस्पर्शम्' इति द्वयोरेवैक-

रश्मिः ।

वाक्यमाशङ्क्य समाधातुं प्रसङ्गसंगत्या षष्ठं द्विसूत्रमनुकृत्यधिकरणम् । ततः प्रसङ्गसंगत्या जीवस्य मुक्तिदशायां ब्रह्माविर्भावेन विरुद्धधर्माश्रयत्वं फलितुं सप्तमं द्विसूत्रं 'शब्दादेव प्रमितः' इत्यधिकरणम् । ततः प्रसङ्गसंगत्या देवादीनां ब्रह्मविद्याधिकारं विचारयितुमष्टममष्टसूत्रं तदुपर्यपीत्यधिकरणम् । ततोतु प्रसङ्गसंगत्या शूद्राणां ब्रह्मविद्याधिकारं निराकर्तुं नवमं पञ्चसूत्रं शुगस्येत्यधिकरणम् । ततः प्रसङ्गसंगत्यावतारदशायामपि भगवतो दण्डपाणित्वं बोधयितुं दशममेकसूत्रं कम्पनाधिकरणम् । ततः प्रसङ्गसंगत्या उपसंपत्तव्यत्वोपसंपन्नस्वरूपाभिनिष्पादकत्वपूर्ववाक्यगतहृदयत्वोत्तरवाक्यगतसत्यपदोक्तमर्त्यामृतनियामकत्वरूपाणां चतुरो धर्मान् निष्क्रष्टुमेकादशमेकसूत्रं ज्योतिर्दर्शनाधिकरणम् । ततः प्रसङ्गसंगत्यान्यवाचकपदवाच्यस्य यत्रैवान्तर्धर्मातिरिक्तधर्मकथनं तत्रान्यवाचकपदस्य ब्रह्मपरत्वमिति न्यायं बोधयितुं द्वादशमेकसूत्रमर्थान्तरव्यपदेशाधिकरणम् । ततः प्रसङ्गोपोद्घातान्यतरसंगत्या मुक्तिदशायामपि जीवस्यानुकारित्विमेव तदात्मकत्वात् न त्वत्यन्ताभेदः सर्वथा तौल्यं वेति ब्राह्मणद्वये विचारयितुं त्रयोदशं द्विसूत्रं सुषुप्त्युत्क्रान्त्योरित्यधिकरणम् । एवं निरूपणेन परापरभावासंगतिनिरूपणे प्रतिबन्धकीभूतायाः कथमदृश्यत्वादिगुणकस्याक्षरस्य परमात्मत्वादिकमित्यस्यानिवृत्ताववश्यवक्तव्यत्वं चकारार्थहेताविव्यवसर इत्युक्तं भाष्ये । स्मारितो व्यासपादैश्चकारप्रयोगेण । **तस्मादिति** ज्ञेयत्वावचनाच्चकारसूचितहेतोश्च ॥ ४ ॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥ भाष्ये । पूर्वमिति महतः परमव्यक्तमित्यत्र । **वदतीति** महतः परमित्यव्यक्तमुक्त्वा तन्निचाय्य ज्ञात्वेति वदति । प्रकरणापेक्षया श्रुत्यादीनामुपन्यासः सूत्र उचित इत्याशङ्क्य तेषां साधारण्येनाप्रयोजकत्वमाहुः **अव्यक्तेति** । महतः परमव्यक्तमित्यव्यक्तश्रुतिः निरपेक्षस्वरूपा महतः परं ध्रुवमिति परपदश्रुतिरिति अक्षरप्रकृत्योः साधारण्यं श्रुतेः परत्वरूपपरशब्दसामर्थ्यस्य । **तद्घटितेति** लिङ्गघटितवाक्यस्य पदानां वाक्यानां वा एकवाक्यतारूपस्य वाक्यस्य साधारण्यं तत्र लिङ्गघटितत्वं वाक्यद्वये पूर्वमीमांसोक्तवाक्यलक्षणघटनायोग्यत्वाय । तदित्थं वाक्यद्वयं महतः परमव्यक्तमिति महतः परं ध्रुवं निचाय्य तमिति च । अत्र परत्वलिङ्गघटितत्वं तेनोभयोः पदानां वाक्यानां चैकवाक्यताघटनायोग्यत्वम् । वाक्यं नाम

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

ननु न वयं सर्वमेकं प्रकरणमिति वदामः । किंतु, 'इन्द्रियेभ्यः पराः' इत्यारभ्य, नाचिकेतमुपाख्यानमित्यन्तं भिन्नं प्रकरणम् । तत्र प्रथमं पदार्थनिर्देशः ।

भाष्यप्रकाशः ।

वाक्यत्वं नान्येषामित्यत्र नियामकाभावात् सर्वेषामेवैकवाक्यत्वं वक्तव्यम् । प्रकरणं च, 'ऋतं पिबन्तौ इत्यारभ्य 'नाचिकेतमुपाख्यनम्' इत्यन्तमेकम् । तत्र चात्मानावेव परामृश्य जीवात्मनो रथित्वं, तदुपकरणं तत्फलं चोक्त्वाग्रे, एष सर्वेषु भूतेष्वित्यारभ्य वल्लीसमाप्तिपर्यंतं परमात्मैव ज्ञेयत्वेन परामृष्टः । मृत्युमुखप्रमोकरूपफलदर्शनात् । प्रधानज्ञानेन सांख्यैस्तदनभ्युपगमात् चेतनात्मज्ञानादेव तदभ्युपगमाच्च । अतः प्रकरणस्य नियामकत्वे अशब्दवाक्यस्यापि भगवत्परत्वाज्ज्ञेयत्वावचनं नासिद्धमित्यर्थः ॥ ५ ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥ किं त्विन्द्रियेभ्य इत्यादि । तथाचात्रेवं पदार्थनिर्देशानन्तरं पुरुषविषयस्य प्रकृतिविषयस्य च ज्ञानस्य पार्थक्येन निर्देशात्

रश्मिः ।

पदानां वाक्यानां वा एकवाक्यता तत्र पदानां महदादीनामेकवाक्यता । अत्र यावतां पदानामेकोर्थः प्रयोजनं विष्णुपदगमनं मृत्युमुखात्प्रमोकरूपं च विभागे साकाङ्क्षता । पूर्वस्य ज्ञेयत्वावचन-साधकाकाङ्क्षा परस्य ज्ञेयत्वावचनसाध्याकाङ्क्षा तच्च लिङ्गश्रुतिकल्पनेनाङ्गत्वबोधकं परस्याव्यक्त-बोधनसामर्थ्यमालोच्य महतः परमव्यक्तमित्यत्र ज्ञेयत्वावचनं सिद्धं कुर्यादिति लिङ्गश्रुतिकल्पनम् । वाक्यैकवाक्यता नाम स्वार्थबोधे समाप्तानां वाक्यानां पुनराकाङ्क्षावशेनैकवाक्यता, तद्यथा स्वार्थ-बोधे समाप्तयोः वाक्ययोरङ्गाङ्गित्वाद्यपेक्षया पूर्ववाक्यीयज्ञेयत्वावचनस्य साध्यस्य साधकापरवाक्या-पेक्षा तया एकवाक्यतया पुनरुभयोर्ज्ञेयत्वावचनसाध्यसाधकभावाख्यपरवाक्यस्य परमात्मज्ञेयत्व-प्रतिपादनसामर्थ्यमस्तीति सामर्थ्यमालोच्य महतः परमव्यक्तमित्यत्र ज्ञेयत्वावचनं सिद्धं कुर्यादिति लिङ्गश्रुतिकल्पनम् । **प्राज्ञ** इति भाष्यं विवृण्वन्ति स्म **प्रकरणमिति । ज्ञेयत्वेनेति ।** निचाय्य इति भाष्यार्थः । तेन **भाष्ये** हिकारस्य सौत्रस्यावधारणमर्थस्तमाहुः **परमात्मैवेति । प्रकृते । फलेति** अग्रे नाचिकेतमुपाख्यानमित्यादिश्लोकद्वयं तूपाख्यानवचनश्रवणश्रावणफलबोधकं ज्ञेयम् । शंकरभाष्योक्तं किंचिदाहुः **प्रधानेति । प्रकरणस्येति** 'उभयाकाङ्क्षा प्रकरणम्' प्रकृते नास्तीति देशकालौ प्रकरणम् । **ज्ञेयत्वेति ।** ननु नञ्नकारौ कुतः ज्ञेयत्ववचनं सिद्धं सांख्यानामित्येव कुतो नोक्तमिति चेन्न अप्रयोजकत्वात् । न हि सांख्यानां ज्ञेयत्ववचनं साधयितुं व्यासचरणानां प्रवृत्तिरिति किं तु सांख्ये ज्ञेयत्ववचनं वेदान्ते ज्ञेयत्वावचनमिति वक्तुम् । ततश्च ज्ञेयत्वावचनम-सिद्धमिति भाष्यम् । ततो नशब्दं पूरयित्वा ज्ञेयत्वावचनं नासिद्धमिति प्रकाश इति न नञ्-नकारौ ह्ययुक्तौ । माध्वास्तु प्रकरणादिति सूत्रविभागेनाहुः । अर्थस्त्वयमेव तत्र जन्माद्यधिकरणरीत्या हेतुघटितं सूत्रं युक्तम् ॥ ५ ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥ भाष्ये । प्रकरणमिति सूत्रोक्तं प्रकर-णम् । **प्रकृते ।** एवमिति सांख्यभ्रमजनकं यथा भवति तथात्मानं रथिनमित्यादिप्रकारेण। **पुरुषेति ।** दृश्यते त्वग्रया बुद्ध्या' इति । महतः परं ध्रुवं तं निचाय्येति । **प्रकृतिविषयकस्य** तयोः प्रकृति-

तदनु, एष सर्वेषु भूतेष्विति पुरुषज्ञानम् । अशब्दमिति तु प्रकृतिज्ञानम् । तस्मादेतावत्प्रकरणे साङ्ख्यमतनिरूपणादशब्दत्वमसिद्धमित्याशङ्क्य परिहरति ॥ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ अस्मादुक्तव्याख्याने त्रिप्रकरणत्वमन्यथा

भाष्यप्रकाशः ।

तयोरन्तरमेव ज्ञातं भवतीति नेदमीश्वरबोधकत्वेन वक्तुं शक्यमिति प्रधानस्याशब्दत्वकथनमयुक्तमित्यर्थः । अस्मदुक्तेत्यादि । अयमर्थः । उभयाऽऽकाङ्क्षा हि प्रकरणम् । साऽत्र त्रयाणामग्निजीवब्रह्मणामेव प्रश्नोत्तराभ्यां प्रतीयते । यदि तृतीयस्यां वक्ष्याम्, 'इन्द्रियेभ्यः' इत्यारभ्य प्रकरणान्तरं स्यात् तदा पूर्ववदत्रापि प्रश्नोत्तरे स्याताम् । यदि च स्वत एव वरान्तरं दद्यात्, तदा, 'तमब्रवीत् प्रीयमाणः' इतिवत् तमप्युपक्षिपेत् । किंचैतस्य प्रकरणान्तरस्य किं प्रयोजनमित्यपि विचारणीयम् । यदि मुक्तिस्तदा तु, 'अन्यच्छ्रेयो अन्यदुतैव प्रेयः' इत्यारभ्य, 'सोऽध्वनः पारमाप्नोति, तद्विष्णोः परमं पदम्' इत्यन्तैरेव वाक्यैः सपरिकरायास्तस्या उक्तत्वात् किमनेन । यदि च स्वरूपावस्थानरूपा काचिदन्या परमपदप्राप्तितोऽप्युत्कृष्टाभिमन्यते, तदा तु, 'स तु तत्पदमाप्नोति यस्माद् भूयो न जायते । सोऽध्वनः पारमाप्नोति' इत्येतस्य पूर्वग्रन्थस्य विरोधः । त्रिविधदुःखात्यन्तनिवृत्तेः पदप्राप्त्यैवोक्तत्वात् । विज्ञानरूपस्य स्वरूपावस्थानसाधनस्यापि ततः प्रागेवोक्तत्वाच्च । किंचाशब्दमत्रे प्रकृतिज्ञाना-

रश्मिः ।

पुरुषयोरन्तरं भेदः । नेदमिति 'अशब्दमस्पर्शमरूपमव्ययम्' इति वाक्यम् । अनेन भाष्यार्थः स्पष्टः । उभयेति यथा प्रयाजादिषु समिधो यजतीत्यत्रेष्टविशेषाश्रवणात् समिधा यागेन भावयेत् किमित्यस्त्युपकार्याकाङ्क्षा । दर्शपूर्णमासवाक्येपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत् कथमित्यस्त्युपकारकाकाङ्क्षा तया दर्शपूर्णमासाङ्गत्वं प्रयाजादीनां सिद्ध्यतीति । अत्र विश्वजिन्न्यायसत्रिसत्रन्याययोर्नावकाश इत्युपपादितं पूर्वतन्त्रे । श्रूयमाणफलस्यैव साधनसाकाङ्क्षत्वादत्र चातथात्वात् केवलं किं भावयेदिति भाव्यमात्राकाङ्क्षा प्रयाजादीनामित्येवं बोध्यम् । सेति उभयोः प्रश्नोत्तरयोः प्रतिपाद्यप्रतिपादकयोः परस्पराकाङ्क्षा । अन्यथेति भाष्यं विवृण्वन्ति स्म यदीति । ननु तमब्रवीत् प्रीयमाण इति वरोस्तु सांख्यविद्येत्याकाङ्क्षायामाहुः यदि चेति । दद्यादग्निः । तं नचिकेतसं, तं वरं तवैव नाम्ना भवितायमग्निरिति श्रुत्या नचिकेतसो वाजःश्रवःपुत्रस्य नाम्नाग्निरपि नचिकेता इति वरः । मुक्तिरिति 'मुक्तिरन्तरायध्वस्तेर्न परः' इति सांख्यसूत्रम् । अभीति पञ्चशिखर्षिः अभिमन्यते सनन्दनाचार्यो वा । उक्तत्वादिति 'यस्माद्भूयो न जायते' इति श्रुत्योक्तत्वात् । नन्वन्यच्छ्रेय इत्यादिना मुक्तेरुक्तावपि विज्ञानं तत्साधनं नोक्तमिति चेत्तत्राहुः विज्ञानेति । तत इति मुक्तिबोधकादन्यच्छ्रेय इत्यादिसंदर्भात्प्राक्

'यस्मिन्निदं विचिकित्सन्ति मृत्यो
यत्सांपराये महति ब्रूहि नस्तत् ।
योयं वरो गूढमनुप्रविष्टो
नान्यं तस्मान्नचिकेता वृणीते' ॥

इति श्रुत्योक्तत्वात् । अस्या भाष्यम् । यस्मिन् प्रेते इदं विचिकित्सनं सांपराये परलोकविषये । महति महत्प्रयोजननिमित्ते, गूढं गहनं दुर्विवेचनं प्राप्तस्तस्माद्वरादन्यं वरं नचिकेता न

चतुष्प्रकरणत्वं स्यात् । तृतीया चैषा वल्ली । 'स त्वमग्निं स्वर्गमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम्' इति प्रश्नः प्रथमः । 'प्रतिब्रवीमि तदु मे निबोध स्वर्गमग्निं

भाष्यप्रकाशः ।

ङ्गीकारस्तु 'मृत्युमुखात् प्रमुच्यते' इति फलोक्त्यैव विरुद्ध्यते । तस्माच्चतुष्प्रकरणत्वमसंगतमिति । किंच, तृतीयैषा वल्ली । अतस्तृतीयप्रश्नोत्तरत्वमेवात्र युक्तम् । न त्वाकस्मिकं सांख्यमतनिरूपकत्वेन प्रकरणान्तरत्वम् । यतः, स त्वमग्निमित्यादिना, प्रतिब्रवीमीत्यादिना च त्रीण्येव

रश्मिः ।

वृणीते मनसापीति श्रुतेर्वचनमिति । अत्रेदं विचिकित्सनं करोति बहुवचनं छान्दसं बहुलमिति योगविभागसूत्रेण यथा चषालं ये अश्वयूपाय तक्षतीति ये तक्षतीति प्राप्तं तत्र

'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां सोपि च सिद्ध्यति बाहुलकेन' ॥

इति व्यत्ययो बहुल मिति सूत्रकारिकया तिङ्व्यत्ययः । सूत्रे योगविभागो महाभाष्येस्ति । अत्रार्थे विज्ञानं न स्पष्टं यतो यस्मिन् पूजके प्रेते यत्पूजादि कर्तृ इदं परमैश्वर्यवद्ब्रह्म तदन्यं गतं प्राप्तं तोयादि विचिकित्सन्ति कित निवासे भ्वा. प. से. केतितुमिच्छति सांपराये परलोके प्रापयितव्ये सति । अथवा परः पुरुषोत्तमः तस्यायो ज्ञानं तथा च सम्यग्भूतं पुरुषोत्तमज्ञानं येन स संपरायो भक्तिमार्ग इति यावत् । अथवा परे पुरुषोत्तमे अयो गमनं प्रवेश इति यावत् । तथा च सम्यक् परायो येन स तथा भक्तिमार्ग इत्यर्थः । तस्मिन् प्रापयितव्ये महति फलानां मध्ये तेनाल्पे ज्ञानमार्गीयाक्षरे प्रापयितव्ये तदप्युक्तं तृतीयाध्यायतृतीयचरणे 'संपराये तर्तव्याभावात् तथा ह्यन्ये' इति सूत्रभाष्ये ज्ञानमार्गेक्षरप्राप्त्येत्यादिना किं चान्येष्वल्पेषु पित्र्यगान्धर्वप्राजापत्यदैवमानुषान्यभूतसंबन्धिषु ब्राह्मं त्वत्र श्रुतं नाल्पं किं तु महत् तद्विस्तारकं नोस्मान् ब्रूहि हे मृत्यो गूढं ज्ञानसंवरणं यथा भवति तथा श्रद्धामनु पश्चात् नचिकेतसि प्रविष्ट इत्यादिश्रुतेर्वचनम् । अत्र विज्ञानं तेनाल्पे इत्यनेन प्राप्यते स्वरूपावस्थानमपि परमपदप्राप्त्यङ्गं प्राप्नोति । मुक्तोपसृप्यव्यपदेशादिति सूत्रात् । **तृतीये**त्यादि भाष्यं व्याचख्युः **किं चेति** । तृतीयेति तृतीयं च तत् प्रश्नश्चोत्तरं च तयोः समाहारः प्रश्नोत्तरं तृतीयं प्रश्नोत्तरं तस्य भावः । तद्भाष्ये स्पष्टम् । **स त्वमग्नि**मित्यादिभाष्यार्थमाहुः **यत इति** । श्रुत्यर्थस्तु हे मृत्यो स एवं गुणविशेषणविशिष्टः स्वर्गलोकस्य प्राप्तिसाधनमग्निं स्वर्गे साधुं 'तत्र साधुः' इति यत् । त्वमध्येषि स्मरसि तं मह्यं नचिकेतसे ब्रूहि श्रत् सत्यं दधानाय कर्तरि शानच् । अयं प्रश्नः, ब्रूहीति संप्रश्ने लोट् । **इत्यादिने**त्यादिपदेन भाष्योक्तोत्तरादि । उत्तरार्थः । **प्रति** ते भागं ब्रवीमि त्वां प्रतीत्यध्याहारात् । क्वचित् प्र ते ब्रवीमीति पाठः ते तुभ्यं प्रब्रवीमीत्यर्थः । तत उभे मत्तो विबोध प्रजानन्नहं मृत्युः तदुभे इत्यपपाठः । **भाष्ये** । आदिपदेन स्वर्गलोक । अमृतत्वं भजन्ते एतद्वितीयेन वृणे वरेणेति येनाग्निनोचितेन स्वर्गो लोको येषां ते स्वर्गलोका यजमाना अमृतत्वमानन्दं भजन्ते तदुपर्यप्यधिकारात् सेवन्ते तदेतदग्निविज्ञानं द्वितीयेन वरेण वृण इत्यर्थः । **प्रकृते** । येयं विचिकित्सा गन्तुर्भगवतो निवासेच्छा । **अय**मिति अज्विकारद्वयम् । विचिकित्सत्यर्थः । प्रश्नोयम् । अस्तीत्यत्र लेडाश्रयणात् । अस् भुवि 'लिङर्थे लेट्' इति सूत्रेण लेट्, अस्ति 'सिब्बहुलं लेटि' इति बहुलग्रहणान्न सिप् 'इतश्च लोपः परस्मैपदेषु' इति तिप इकारालोपः । वृत्तौ वाकारग्रहणाद्विकल्पात् 'लेटो डाटौ' इति सूत्रेण नाडाटावत्र, छन्दसि सर्वविधीनां विकल्पात् । अज्झीनं परमनुधावतीत्यस्ति इति प्रयोगसिद्धिः । अत्र संप्रश्ने लेडिति । देवैरत्रापि विचिकित्सितं पुरा नहि

भाष्यप्रकाशः ।

प्रश्नोत्तराणि प्रतीयन्ते । नच पितृसौमनस्येनाग्निजीवप्रश्नाभ्यां च वरत्रयपूर्तेस्तृतीयप्रश्नस्य

रश्मिः ।

सुविज्ञेयमणुरेष धर्म इत्युत्तरम् । शाब्दविज्ञानविषयत्वमात्रमिति तु । अन्यत्रेति धर्मादिभ्योऽन्यत्र ।

'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।
अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद' ॥

इति स्पष्टा । प्रश्नोयम् । वदेति प्रश्ने लोट् ।

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्' ॥
'एतद्ध्येवाक्षरं ब्रह्म ह्येतद्ध्येवाक्षरं परम् ।
एतद्ध्येवाक्षरं ब्रह्म यो यदिच्छति तस्य तत्' ॥ इत्युत्तरम् ।

आमनन्ति अभ्यस्यन्ति, तपांसि पुराणानि विचारकत्वात् तप आलोचनेऽसुन् । गुरुभजनवान् ईश्वरभजनकर्तृत्वादत्र । **भाष्ये** । ननु पाठक्रमात्पूर्वमुपन्यासात्प्रश्नप्रक्षेपोऽयुक्त इत्याशङ्क्याहुः **उपेति** । उपन्यासः कथनम् । **पश्चादिति** तथा च यथा वह्निमान् धूमादित्यत्र हेतोः पश्चाद्वचनम् । तथात्रोपन्यासः प्रश्नात् । यथा दशमस्कन्धे प्रश्नादुपन्यासः साध्यतावच्छेदकसंबन्धो वाच्यतया प्रबन्धः । हेतुतावच्छेदकसंबन्धो वाच्यता । **अत एवेति** अनुमानध्वननादेव । **तस्येति** प्रश्नस्य । **प्रकृते** । इन्द्रियेभ्यः परा इत्यारभ्य नाचिकेतमुपाख्यानमित्यन्ते भिन्ने प्रकरणेऽभावात् पूर्ववल्लोट्-लेटोरभावेन तस्य । ननु घटो घटश्चेत्युक्तिवदुपन्यासः प्रश्नश्चेत्युक्तिरस्त्वनुमानबोधकं किं पदमित्यत आहुः **उत्तरेति** । स्यादेवं घटः पट इत्यनुक्त्वा पोट घट इतिवदुपन्यासः प्रश्नश्चेति विपरीतं न त्वेवं किं तु भिक्षामट गां चानयेतिवदन्वाचये[2] चकारोस्तीति तेन गवानयनवत् भिक्षाटनकर्तृत्वादेव[3]-दत्तवदिति चोपन्यासवती प्रश्नवतीत्वादिति चकारान्वाचययोरर्थादुत्तरः[4] उपन्यासादुत्तरः प्रश्नस्तस्य भावः सत्ता तदर्थं चकार इति भाष्यार्थः । **प्रकृते** । त्रीण्येवेति । **भाष्ये** एवकारं समर्थयितुं जीवब्रह्मवादं च निराकर्तुं शंकरभाष्यस्थं किंचिदाहुः **न च पित्रिति** । अयमर्थः । पूर्वं उशन् इच्छन् अर्थात् पुत्रं वाजश्रवसो वाजमन्नं तस्माच्छ्रवः श्रवणं यस्य स वाजश्रवास्तस्यापत्ये वाजश्रवसो नाम स पुत्रेष्ट्येजे तत्फलं कामयमानः स तस्यामिष्टौ सर्ववेदसं सर्वस्वं ददौ । तस्य ह नचिकेताः पुत्र आस स सर्वस्वान्तर्गतः स्वस्यादाने पितुरनिष्टं फलं श्रद्धावेशादाज्ञाय तात 'कस्मै मां दास्यसि' इत्युक्तवान् । शंकरभाष्ये तु वाजमन्नं तद्दानादिनिमित्तं पुत्रेष्ट्येजे इत्यत्र विश्वजिता सर्वमेधेनेजे इति पठितम् । तदा पिता स्वस्य सर्वस्वदानसत्यतायै मृत्यवे दत्तवान् स च यमभवनं गत्वा तिस्रो रात्रीरुवास ततश्च यममाह भार्या भगिनी वा, पद्मपुराणे यमुनामाहात्म्ये यमुनावचनं यमं प्रति स्मर्यते

'ब्रूहि भ्रातः स्वकार्यं हि किं त्वं श्रावय तत्पदम् ।
तदाकर्ण्य करिष्यामि विचार्य स्वहृदि प्रियम्' ॥ इति, तद्वत् ।

उदकाहरणं ब्राह्मणाय कर्तव्यमित्येवमुक्तो यम आह—

'तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन् अतिथिर्नमस्यः ।
नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेस्तु तस्मात्प्रति त्रीन् वरान् वृणीष्वेति' ॥

---

१. ईश्वरं गुरुं च भजस्वेति । २. समुच्चये । ३. गुरुभजनवान् ईश्वरभजनकर्तृत्वादस्मदादिवत् इति । ४. चकारसमुच्चयादर्थादुत्तरः ।

रश्मिः।

तत्रैकैकां रात्रिं प्रति त्रीन् वरान् वृणीष्वेति शंकरभाष्यम्। शान्तसंकल्पः सुमना वीतमन्युरिति वरत्रयसंभवादिति त्रीन् वरान् वृणीष्वेति मृत्युनोक्तो नचिकेताः।

'शान्तसकल्पः सुमना यथा स्याद्वीतमन्युः गोतमो माभिमृत्यो।
त्वत्प्रसृष्टं माभिवदेत् प्रतीत एतत्रयाणां प्रथमं वरं वृणे'॥

इति पितृसौमनस्येनेत्यर्थः। किंचाग्निजीवप्रश्नाभ्यां स त्वमग्निमित्यस्योत्तरार्धं 'स्वर्गलोका अमृतत्वं भजन्ते' एतद्द्वितीयेन वृणे वरेणेति द्वितीये वरे प्रथमप्रश्नपरिसमाप्तेस्तथा 'येयं प्रेते विचिकित्सा' इत्यस्योत्तरार्धे 'एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः' इति तृतीये वरे द्वितीयप्रश्नपरिसमाप्तेरन्यत्र धर्मादित्युक्तस्तृतीयः प्रश्नः काल्पनिकः कल्पनेन व्यवहरति 'तेन दीव्यति खनति' इति ठक्, इत्याशङ्कमानस्तृतीयः प्रश्न इति भाष्यमाक्षिप्तम्। तेन जीवप्रश्न एव परमात्मप्रश्न इति पुनरनुकृष्यते जीवप्राज्ञयोरभेदात्। न च जीवस्य धर्मादिगोचरत्वात् स नान्यत्र धर्मादिति प्रश्नमर्हति प्राज्ञस्तु धर्माद्यतीतत्वात् अन्यत्र धर्मादिति प्रश्नमर्हति प्रश्नच्छाया च न समाना लक्ष्यते पूर्वस्यास्तित्वनास्तित्वविषयत्वादुत्तरस्य धर्माद्यतीतविषयत्वात्। तस्मात्प्रत्यभिज्ञानाभावात् प्रश्नभेदो न पूर्वस्यैवोत्तरत्रानुकर्षणमिति शक्यम्। भवत्प्रष्टव्यभेदात् प्रश्नभेदो यद्यन्यो जीवः प्राज्ञतः स्यान् न त्वन्यत्वमस्ति तत्त्वमसीत्यादिश्रुत्यन्तरेभ्यः इति शंकराचार्याः जीवब्रह्मवादमवतारयन्ति सोत्रावतारितस्तद्दूषयामासुः यत्तदिति। अयमभिप्रायः पश्यसीति पदात्।

'अथ वा शून्यवद्गाढं व्योमेव ब्रह्म तादृशम्।
प्रकाशते लोकदृष्ट्या नान्यथादृक् स्पृशेत् परम्'॥ इति।

निबन्धोक्तरूपस्मारणात्तस्य चात्यन्तजीवभिन्नत्वेन प्रश्नभेद इति। जीवस्य त्वप्रत्यक्षत्वं 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' इति श्रुतेः। न चावृत्तचक्षुस्त्वं पश्यसि तद्वदेत्यर्थ इति शक्यम्। 'त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि' इति वायुप्रतिपादकश्रुतेः 'ब्रह्म तर्हि अग्निः' इति श्रुतेश्च अग्निस्तु पृष्ट एव। जीवस्याणुत्वं जीवाणुत्ववाद उपपादि, अतो न जीवो वायुवत्प्रत्यक्ष इति। अन्यच्च वायुरपि त्वाचप्रत्यक्षविषयोतो क्षरं प्रत्यक्षं पृष्टं परं च अन्यच्च शंकरभाष्येऽस्य प्रश्नस्याङ्गीकारः केषां चिदस्य पृथक् सत्त्वं स्फोरयति सूत्रकृताङ्गीकृतं सत्त्वमिति चेत् कुतो निराक्रियते श्रुत्यर्थसंगतिबलादिति चेन्न पद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे गुणत्रयविवरणकथने 'मायावादमसच्छास्त्रमित्यस्यानिराकरणाच्छिवेन। ननु तर्हि श्रुत्यर्थसंगतिरन्या केति चेन्न ब्रह्मवादेन संगतिः सुस्थिरा भवति। तथाहि सौमनस्यपर्यन्तं समानकं सर्वमुक्तम्। अर्थस्तु हे मृत्यो मामभि मां प्रति मत्पिता शान्तसंकल्प इत्यादिरूपः सन् त्वत्प्रसृष्टं त्वदर्जितं माभिवदेत्प्रतीतो लब्धस्मृतिः स एवायं पुत्रो ममेत्यभिजानन् एतत्प्रयोजनं वरमाद्यं वृणे। तदा मृत्युरुवाच 'यथा पुरस्तात् भविता प्रतीतः' इति तव पिता भवितेत्यर्थः। नचिकेता उवाच।

'स्वर्गे लोके न भयं किंचनास्ति न तत्र च त्वं न जरया बिभेति' किं च
'उभे तीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोके' इति

यामिति वर्णागमः। एतदग्रे स त्वमग्निमिति। इतः संगतिर्भिन्ना त्रयाणामेवाग्निजीवपरमात्मनामेव वरप्रदानसामर्थ्यात् वक्तव्यतयोपन्यासो दृश्यते कठवल्लीषु तद्विषय एव च प्रश्नो नातोन्यस्य प्रश्न उपन्यासो वा दृश्यते इति सूत्रार्थः परेषाम्। अवधारण एवं पदं व्याकृतमत्र

नाचिकेतः प्रजानन्' इत्याद्युत्तरम् । 'येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके' इति द्वितीयः प्रश्नः । देवैरत्रापीत्यग्रे उत्तरम् । 'अन्यत्र धर्मादन्यत्राधर्मात्' इति तृतीयः प्रश्नः । 'सर्वे वेदा यत् पदमामनन्ति' इत्यादिना

भाष्यप्रकाशः ।

काल्पनिकत्वं शङ्क्यम् । 'यत् तत् पश्यसि तद् वद' इति श्रुत्यैव सिद्धत्वात् । नच निर्हेतुकत्वम् । 'तमब्रवीत् प्रीयमाणो महात्मा' इत्युक्तवरवदस्यापि वक्तृप्रीतिहेतुकत्वात् । नच तत्प्रीतेः काल्पनिकत्वम् । 'नैषा तर्केण' इति वाक्यस्थस्य प्रेष्ठपदस्यैव गमकत्वात् । नच 'यत् सांपराये महति ब्रूहि नस्तत्' इतिवदस्यापि पूर्वप्रश्नानुवादत्वं शङ्क्यम् । विषयनिर्देशविरोधात् । नच, 'येयं प्रेते'

रश्मिः ।

तु त्रयाणामेव प्रकरणानामेक एवशब्देन चतुर्थप्रकरणव्यवच्छेदः । अस्मदुक्तेति भाष्यात् । उत्तरत्वेन त्रयाणामेव न चतुर्थस्यैवमुपन्यासः । चकारोऽग्न्यादिसमुच्चये, अग्न्यादिकथनं च प्रश्नसमुच्चये, प्रश्नश्च द्वितीयचकार उत्तरप्रश्नभावार्थं स चोत्तरः प्रयोक्तव्यः उत्तरवतीवेदान्तप्रश्नात् यन्नैवं तन्नैवं वेदश्रुतिवदित्युत्तरोत्तरप्रश्नप्रयोगफलं वह्निमान् धूमादित्यत्र पर्वतो वह्निमानितिवदुत्तरप्रयोगफलमिति सूत्रार्थः । सिद्धत्वादिति वदेति लोटः संप्रश्नार्थकत्वेन तथा तस्मात् । नन्वन्येप्यर्थाः सन्ति संप्रश्नार्थग्रहणे किं कारणमिति चेन्न । तृतीयवरानन्तरमन्यं वरं नचिकेतो वृणीष्वेति मृत्यूक्तेः वरकारणसत्त्वात् । श्रुत्यैवेत्यत्रैवकारेण वरव्यवच्छेदः । वराभावं तत्र कारणाभावं च शङ्कते स्म न च निरिति । आपद्येत इति शङ्क्यमिति शेषः । वरवदिति तवैव नाम्ना भवितायमग्निरिति वरवत् षष्ठ्यन्ताद्वतिः । अस्येति तुरीयवरस्य इति । वाक्येति

'नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ ।
यां त्वमापः सत्यधृतिर्बतासि त्वादृङ् नो भूयान्नचिकेतः प्रष्टा' ॥

इति वाक्यस्थस्य । किंच वरप्रदानसामर्थ्यात् प्रश्नोत्तरे इत्यसंबद्धं वरोभीष्टमिति पक्षे वरः श्रेष्ठ इति पक्षे च प्रश्ने तयोः सामर्थ्यस्याहेतुत्वात् । अभीष्टश्रेष्ठसामर्थ्याभावेप्यनुरोधात् प्रश्नदर्शनात् । तदत्र नास्ति यौक्तिकत्वात् । तर्हि अनुवादत्वमस्य तृतीयप्रश्नस्यास्त्वित्याहुः न च यदिति । अयं च 'येयं प्रेते' इति प्रश्नानुवादः । 'यस्मिन्निदं विचिकित्सन्ति मृत्यो' इति पूर्वपादात् । अर्थस्तूक्तः । तदुभयोरर्थयोः प्रथमेर्थेनुवादत्वम् । अस्येति तृतीयप्रश्नस्य । पूर्वप्रश्नो जीवप्रश्नस्तस्यानुवादत्वं सिद्धस्य कथनमनुवादस्तस्य भावः । विषयेति । पूर्वस्य जीवः तृतीयप्रश्नस्याक्षरः । न च जीवोऽक्षर इति पूर्वानुवादत्वं 'एतद्ध्येवाक्षरं परम्' इतिश्रुतौ परपदेनादृश्यत्वाद्यधिकरणोक्तपरब्रह्मोक्तेः । न च 'एतद्ध्येवाक्षरं ब्रह्म ह्येतद्ध्येवाक्षरं परम्' इत्याद्यनन्तरं 'न जायते म्रियते वा विपश्चित्' इति जन्ममरणप्रतिषेधेन प्रतिपाद्यमानशारीरपरमेश्वरयोर्भेदं दर्शयति । सति हि प्रसङ्गे प्रतिषेधो भागी भवति प्रसङ्गश्च जन्ममरणयोः शारीरसंस्पर्शात् शारीरस्य भवति न परमेश्वरस्य । तथा ।

'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति' ॥

इति स्वप्नजागरितदृशो जीवस्यैव महत्त्वविभुत्वविशेषणस्य मननेन शोकविच्छेदं दर्शयन्न प्राज्ञादन्यो जीव इति दर्शयति प्राज्ञविज्ञानाद्धि शोकविच्छेद इति वेदान्तसिद्धान्तः । तथाग्रे 'यदेवेह तदमुत्र यदमुत्र तदन्विह मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति जीवप्राज्ञभेददृष्टिमपवदति

भाष्यप्रकाशः ।

इत्येतदुत्तरस्य ब्रह्मप्रश्नात् प्रागभावात् तत्पूर्वग्रन्थस्य तदनुत्तरत्वं शङ्क्यम् । 'न सांपरायः' इति वाक्ये परलोकासत्त्वमानिनः पुनः पुनः स्ववशगत्वोक्त्या तादृशस्याप्यस्तिबोधनस्यै वोत्तरत्वात् ।

रश्मिः ।

चातो जीवब्रह्मवादोस्त्विति वाच्यम् । अदृश्यत्वाद्यधिकरणोक्तं रूपमेतद्ध्येवाक्षरं ब्रह्मेत्युक्त्वा न जायत इति श्रुत्युक्तेरेतासां कृष्णावतारपरत्वात् । विपश्चित्पदात् 'सूर्यो विपश्चिन्मनसा पुनातु' इति विपश्चितः सूर्यत्वं कृष्णस्य सूर्यत्वं च 'कृष्णद्युमणिनिम्लोचे' इति वाक्यात् । अतः कृष्णविपश्चितोरेकार्थवाचकत्वम् । जन्ममरणयोराविर्भावतिरोभावात्मकत्वान्न दोषः । 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः' इति वाक्यात् । न च मुरस्य जलदोषात्मकस्यारित्वसमकालिकावाविर्भावतिरोभावाविति शङ्क्यम् । नारायणत्वेनात्मत आविर्भावतिरोभावाविति श्रुतेश्च मुरवैरित्वसमकालिकत्वस्याविर्भावतिरोभावयोः पौराणत्वात् । स्वप्नान्तं जागरितान्तं चेत्यादि कृष्णावतारे 'लोकवत्तु लीलाकैवल्यम्'इति सूत्रात् । इहेति इह लोके कृष्णावतारे । अमुत्र परब्रह्मणि । नानादर्शने स्वगतद्वैतापत्तिरतः साधने राजसतामसज्ञाने निहत्य सात्त्विकं ज्ञानं संपाद्य नानादृष्टिर्निवर्तनीया तदुक्तम्

'सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं सात्त्विकं स्मृतम्' ॥

इत्येकादशस्कन्धे । अतो न जीवब्रह्मवादः । एवं विषयनिर्देशविरोधादित्यर्थः । किं च अनूद्यजीवप्रश्न एकः अनुवादकं तु दृष्टान्तदार्ष्टान्तिकयोर्भिन्नं तत्र यदि दृष्टान्तेऽनुवादकं वाक्यं स्यात् तदा दार्ष्टान्तिकेपि वदेत् तदेव तु न दृष्टान्तीयानुवादकवाक्यस्य त्वर्थान्तरादिदं वाक्यं जीवप्रश्ने मृत्युना 'अन्यं वरं नचिकेतो वृणीष्व' इत्युक्तौ नचिकेताः

'यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्सांपराये महति ब्रूहि नस्तत् ।
योयं वरो गूढमनुप्रविष्टो नान्यं वरं तस्मान्नचिकेता वृणीते' ॥

इत्याह । अत्र तस्मादित्यस्य यस्मिन्नित्यादिनानूदितद्वितीयप्रश्नार्थादित्यर्थे अनुवादः स्यान्न त्वेवं न्यूनताख्यनिग्रहस्थानापत्तेः । न हि ब्रह्म जीवस्यात्ममात्रं 'अधिकं तु भेदनिर्देशात्' इति सूत्रात् किं तु तस्मादित्यस्य श्रौतपदस्योक्तोभयार्थद्वितीयपक्षः ब्रह्मण इत्यर्थः । अतोनानुवादत्वं शङ्क्यमित्यर्थः । न चात्र चतुर्थो वरस्तस्य समासत्वात् नचिकेता नामा अग्नि प्रसिद्धौ अतोन्यं वरं नचिकेतो वृणीष्व इत्यन्तं चरमवरकारणकस्तृतीयो ब्रह्मप्रश्न इति । एवं तृतीये प्रश्ने समर्थिते देवैरत्रापीत्यस्य प्रथमवल्लीसमाप्तिपर्यन्तस्योत्तरत्वम् । द्वितीयवल्लीस्थस्य ॐमन्यच्छ्रेय इत्यादेरनुत्तरत्वमाशङ्क्य समादधुः न च येयमिति । येयं प्रेत इत्यस्य प्रश्नस्य यदुत्तरं तस्य देवैरत्रापीत्यारभ्य 'नचिकेता वृणीते' इति प्रथमवल्लीसमाप्त्यन्तस्य ग्रन्थस्यात्र प्रागभावादित्यत्र प्राग्भावादिति पाठः । तत्पूर्वेति ब्रह्मप्रश्नात्पूर्वग्रन्थस्य प्रथमवल्लीसमाप्त्यनन्तरस्य ॐमन्यच्छ्रेय इत्यादिग्रन्थस्य द्वितीयवल्लीस्थस्य 'न सांपरायः' इति वाक्यात्पूर्वस्य । तदनुत्तरत्वं द्वितीयप्रश्नानुत्तरत्वं विचिकित्सनाभावाच्छङ्क्यम् । न इति ।

'न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ।
अयं वा लोको नास्ति पर इति मानी पुनःपुनर्वशमापद्यते मे' ॥

इति वाक्ये । स्ववशेति मृत्युवशगत्वोक्त्या । तादृशेति परलोकासत्त्वमानिनोपि । अस्ति 'अस्तीत्येके नायमस्तीति चैके' इत्यनयोरस्तिबोधनपक्षस्यात्रापि सत्त्वात् । यद्धर्मप्रकारकयद्विषयकप्रश्नस्तद्धर्मावच्छिन्नतदुद्देश्यकमुत्तरमिति नियमस्य को घटः कम्बुग्रीवादिमान् घट इत्यादिषु दर्शनादस्ति-

भाष्यप्रकाशः ।

नच तदग्रिमग्रन्थवैयर्थ्यं शङ्क्यम् । उत्तमाधिकारदर्शनेनाधिकप्रश्नोदयार्थमेव तदुक्त्या अवैयर्थ्यात् । तत एव श्रेयःप्रेयसोर्विद्याविद्ययोश्च कथनमपि युज्यते । अतः 'तं दुर्दर्शम्' इति वाक्यद्वयान्त-

रश्मिः ।

घटितजीवप्रश्नस्यास्तित्वबोधकस्यासंपराय इति वाक्यस्योत्तरत्वादिति । तदग्रिमेति न संपराये-तिवाक्याग्रिमस्य 'श्रवणायापि बहुभिर्यो न लभ्यः' इत्यादिजीवनिरूपकग्रन्थस्य वैयर्थ्यम् । उत्तमेति यस्मिन्निदमिति वाक्येन कामाप्रलोभादुत्तमाधिकारदर्शनेन त्वादृङ् नो भूयान्नचिकेतः प्रष्टा' इति प्रश्नप्रशंसया चोत्तमाधिकारदर्शनेन । अधिकेति ब्रह्मप्रश्नोदयार्थम् । तदुक्त्येति तदग्रिमग्रन्थोक्त्या हेतोः । तत इति अधिकप्रश्नोदयार्थत्वादेव

'अन्यच्छ्रेयो अन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीते ।
तयोः श्रेयआददानस्य साधु भवति हीयतेर्थाद्य उ प्रेयो वृणीते ॥
श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः ।
श्रेयो हि धीरो अभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ॥
सत्त्वं प्रियान् प्रियरूपांश्च कामान् अभिध्यायन्नचिकेतोऽत्यस्राक्षीः ।
नैतां सृतिं वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः' ॥

इति श्रेयःप्रेयसोः । सिनीत इति छान्दसत्वादेकवचनं बध्नीत इत्यर्थः । आ इत इति छेदः । एत इत्यत्र प्राप्नुतः । तौ संपरीत्य मनसालोच्य विविनक्ति पृथक्करोति गुरुलाघवम् । अभिप्रेयसे इति अभिप्रेयो विहाय । प्रेयः पशुपुत्रादिलक्षणम् । योगक्षेमात् योगक्षेमनिमित्तम् । सृतिमिति गतिम् । अतस्त्वं नचिकेतः श्रेय आददान इति भावः । विद्येति उक्तश्रुत्यग्र एव

'दूरमेते विपरीते विषुची अविद्या या च विद्येति ज्ञाता ।
विद्याभीप्सितं नाचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्तः ॥[१]
'अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः ।
दन्द्रम्यमाणाः परियन्ति मूढाः अन्धेनैव नीयमाना यथान्धाः' ॥

इत्यनेन विद्याविद्ययोः दूरं महतान्तरेण एते श्रेयःप्रेयसी । विषूची इति । ष्वच गतौ भ्वा. आ. से. ष्वचते इन् संप्रसारणं नानागतिभिन्नफले संसारमोक्षहेतुत्वेन एका विषूचिरविद्या या । सोर्याच् । अपरा विषूचिर्विद्या इति ज्ञाता भवेत् । विद्या अभीप्सिता यस्य । दन्द्रेति द्रम गतौ भ्वादिः आ. से. यङ् दन्द्रम्यन्ते दन्द्रम्यमाना, शानच्, आने मुक् । पुनःपुनः कामकामा गम्यन्ते आगम्यन्ते चेत्यर्थः । परियन्तीति परितो गच्छन्ति श्रेयःप्रयसोर्विद्याविद्ययोश्च कथनमेवं कृतमस्याधिकप्रश्नोदया-र्थत्वं तु अर्थस्य प्रयोजनरूपत्वादधिकप्रश्नोदयः प्रयोजनमस्य कथनस्य । अत्र कथनस्य कारणत्वम-त्रापि कथनरसाभिनिवेशः कारणमिति ज्ञेयम् । तच्च प्रथमस्कन्धसुबोधिन्यां 'त एकदा तु मुनयः' इत्यत्रोक्तम् । अत्र प्रश्नकथनरसाभिनिवेशयोः शौनकनिष्ठत्वम् । तत्र तु प्रश्नस्य नचिकेतोनिष्ठत्वं कथन-रसाभिनिवेशस्य मृत्युनिष्ठत्वमिति । व्यधिकरणं फलं केनचित्संबन्धेन समानाधिकरणम् । अत इति एतावतो ग्रन्थस्योक्तसंगतिकत्वादग्रे जीवप्रश्नासंगतत्वाच्च । वाक्येति । वाक्यद्वयमग्रे वक्तव्यम् ।

१ विद्यामीप्सितं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्ते ।

१०८ ब्र० सू० र०

भाष्यप्रकाशः ।

संदर्भ एव तृतीयवरप्राप्तस्य द्वितीयप्रश्नस्य पूर्तेः 'अन्यत्र धर्मात्' इत्यनेनोक्तस्य प्रश्नस्य तृतीयत्वं प्रसादहेतुकत्वं च मन्तव्यम् । नच प्रसङ्गाभावः शङ्क्यः । जीवप्रश्नप्रत्युत्तरोपसंहारस्थे दुर्दर्शवाक्योत्तरम् ।

'एतच्छ्रुत्वा संपरिगृह्य मर्त्यः प्रगृह्य धर्म्यमणुमेतमाप्य ।
स मोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसं मन्ये' ॥

इत्यस्मिन् वाक्ये, एतत्पूर्ववाक्योक्तं, देवं व्यवहर्तारं जीवमाचार्यमुखाच्छ्रुत्वा संपरिगृह्य सम्यगात्मत्वेनोपादाय मर्त्यः शरीरद्वयव्यतिरिक्तत्वज्ञानेन हर्षशोकशून्योऽपि, येऽन्येऽरविन्दाक्षेतिवाक्योक्तन्यायान्मरणधर्मैव सन् प्रगृह्य धर्म्यं, 'न हि सुविज्ञेयमणुरेष धर्मः' इत्युपक्रमवाक्ये धर्मत्वेनोक्तो यो जीवस्तस्मादनपेतं सखित्वान्निकटस्थं प्रकर्षेणालम्ब्य, अणुमेतमाप्य,

रश्मिः ।

वाक्यद्वयाग्रे तृतीयः प्रश्नः । **तृतीयत्व**मिति प्रश्नत्रये श्रुत्यभिप्राय उक्तः । तेन त्रयाणामेवेत्येवकारः सौत्रः समर्थितः । **प्रसादे**ति प्रसादो वरद्वारा हेतुर्यस्य । न च मृत्युनाऽन्यं वरं नचिकेतो वृणीष्वेति प्रोक्ते वाक्ये प्रसादो न वर इति शङ्क्यम् । श्रुत्याग्रे यस्मिन्निदमिति वाक्ये गूढवरस्य नचिकेतस उक्तत्वात् । एवं चात्रापि प्रसादो वरः प्रश्न उत्तरं च । **प्रसङ्गे**ति । तृतीयप्रश्ने संगत्यभावः । **दुर्दर्शे**ति

'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति' ॥

इति वाक्यम् । गह्वरमनेकार्थसंकटम् । तत्र तिष्ठतीति गह्वरेष्ठम् । **अधी**ति आत्मनीत्यध्यात्मं अव्ययीभावः, तत्संबन्धियोगः । **जीव**मिति जीवप्रश्नोत्तराभ्याम् । शरीरेत्यध्यात्मयोगाधिगमेनेत्यस्याभिप्रायः । **येन्य** इति ।

'येऽन्येरविन्दाक्षविमुक्तिमानिन-
स्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः
पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः' ॥

अयं न्यायः प्राप्तसांख्यस्यामर्त्यत्वेन मर्त्यपदोपपादनाय तस्मान्मरणधर्मेत्यत्र हेतुः । यद्यप्यात्मत्रयप्राप्तविवेकस्तथापि मृत्योः सूक्ष्मदेहीयोऽत्यन्तविस्मरणरूपो जीवस्यास्त्येव **पतन्त्यध** इति वचनात् । इत्युपेति जीवप्रश्नान्तरमुत्तरोपक्रमवाक्ये 'देवैरत्रापि विचिकित्सितं पुरा नहि सुविज्ञेयमणुरेष धर्मः' इतिवाक्यम् । **धर्मत्वेने**ति तथाच धर्म्यमित्यत्र धर्मं धर्मत्वमर्हतीति धर्म्यः । वैदिकप्रक्रियास्थेन 'छन्दसि च' इति सूत्रेण यत् । तथाच वृत्तिः 'प्रातिपदिकमात्रात्तदर्हतीति यत्' इति । धर्म्यमित्यत्र धर्मस्य भावप्रधाननिर्देशापत्त्या 'धर्मपथ्यर्थन्यायादनपेते' इति सूत्रेण यतमाहुः **तस्मा**दिति । धर्माज्जीवादनपेतं सुपर्णं 'द्वा सुपर्णा सयुजा सखाया समाने वृक्षे परिषस्वजाते' इति श्रुतिः धर्म्यं प्रगृह्येत्यस्यार्थः । इदमेव धर्मत्वमर्हतीति धर्म्यम् । इदमेव धर्मेण प्राप्यं धर्म्यं 'नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु' इति सूत्रेण यत् । इदमेव धर्मे साधु धर्म्यं तत्र साधुरिति यत् । धर्मं प्रवृद्ध्येति क्वचित् पाठः, पृथक्कृत्य शरीरादेरिति तद्भाष्यम् । भाष्यप्रकाशानुसारेण तु धर्मं जीवं प्रवृद्ध्य वर्द्धयित्वा मुक्तं कृत्वा । अणुत्वं तर्ह्यवास्तवमित्याशङ्क्याणुमित्यस्यार्थमाहुः **अणु**मिति । एतं जीवमणुमाप्य प्राप्य ज्ञात्वेति यावत् मुक्तत्वानन्तर-

उत्तरम् । एवमग्निजीवब्रह्मणां प्रश्नोत्तराणि । तत्र यदि साङ्ख्यमतं निरूपणीयम्, 'इन्द्रियेभ्यः' इत्यादि स्यात् तदा चतुर्थस्याप्युपन्यासः स्यात् । उपन्यासे हेतुः प्रश्नः । अत एव पश्चाद्वचनम् । तस्य प्रकृतेऽभावादस्मदुक्तरीत्या त्रीण्येव प्रकरणानीति सिद्धम् । उत्तरप्रश्नभावार्थं चकारः ॥ ६ ॥

भाष्यप्रकाशः ।

सः, जीवं ज्ञात्वा विद्वान्, मोदनीयं सर्वथालम्बनेन प्रसादनीयं ब्रह्म लब्ध्वा प्राप्य मोदते । एष ह्येवानन्दयातीति श्रुतेः । मोदते हि यतो हेतोरतो नचिकेतसं त्वामधिकारिणं प्रति सद्म सदनभूतं ब्रह्म विवृतमपावृतद्वारं मन्य इति कथनेन ब्रह्मणः स्मारणात् । नच पञ्चमवल्लीस्थस्य, यथा च मरणं प्राप्येति सार्द्धवाक्यस्योत्तरत्वं शङ्क्यम् । व्यवहितत्वात् । हन्त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनमिति प्रतिज्ञानन्तरपठितत्वेन तल्लीलाबोधनार्थत्वावगमाच्च । नचात्र लीलाङ्गीकारे मानाभावः शङ्क्यः । य एष सुप्तेषु जागर्तीत्यारभ्य वल्लीसमाप्तिलीलाकथनदर्शनेनापि तथावसायादिति ।

रश्मिः ।

मपि । स इति मर्त्यः देहद्वयविशिष्टः, जीवमणुमक्षरांशमिति न कर्मकर्तृविरोधः । **सदनेति** अक्षरम् । **अपेति** नापृष्टो ब्रूयादिति सुबोधिन्या ब्रह्मपृच्छकः सन्नुत्तरं धारयिष्यति चेति । **स्मरणेति** तथा च स्मृतस्य ब्रह्मप्रश्नस्योपेक्षानर्हत्वात् जीवप्रश्नोत्तरेण ब्रह्मप्रश्नस्य प्रसङ्गसंगतिरिति न प्रसङ्गाभावः शङ्क्यः । ननु देवैरत्रापीत्यस्य उत्तरत्वं भाष्य उक्तं तन्न संभवति देवैरपि संदिग्धमत्र यत उपसंहारेपि 'यस्मिन्निदं विचिकित्सन्ति' इति संदेहः श्रुत्योक्तः । अत एवान्यं वरं नचिकेतो वृणीष्वेति मृत्युनोक्तम् । संदिग्धस्यानुत्तरत्वात् । अत्र प्रथमवल्ली समाप्ता । ततो हि ॐ मन्यच्छ्रेय इत्यादीनामधिकप्रश्नोदयार्थत्वं श्रवणायापीत्यादिना पुनर्जीवनिरूपणं तत्राप्याश्चर्यो वक्ता कुशलोस्य लब्धेति अस्य जीवस्य वक्ताश्चर्यः न नरेणावरप्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमान इति च एष जीवः । अतः संदिग्धस्यानुत्तरत्वम् । उत्तरसमाप्तिकायां तं दुर्दर्शमित्यादिवाक्यद्वयं तद्व्याकृतं तत्राप्यध्यात्मयोगाधिगमेन देवं जीवं मत्वेत्यध्यात्मयोगाधिगमसाध्यावबोधकत्वेनाज्ञानकं ततो ब्रह्मप्रश्नः । अतः शंकरभाष्योक्तम्

'हन्त त इदं वक्ष्यामि गुह्यं ब्रह्म सनातनम् ।
यथा च मरणं प्राप्यात्मा भवति गौतम' ॥
'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनु संयन्ति यथाकर्म यथाश्रुतम्' ॥

इति व्यवहितमुत्तरमित्याशङ्क्य समादधुर्न चेति । **व्यवेति** येयं प्रेते इति जीवप्रश्नस्य प्रथमवल्लीस्थत्वात्तथा । यथा प्रहरे प्रहरेऽसहोच्चारितानि पदानि न प्रमाणानि संनिध्यभावात् । तथात्र प्रश्नोत्तरप्रमाजनकमुत्तरमिति भावः । ननु

'स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते' ॥ इति ।

पूर्वतन्त्रात्प्रश्नोत्तरभावो भविष्यतीति चेत्तत्राहुः **हन्तेति** । **गुह्यमिति** 'गूढं ब्रह्मणि वाङ्मये' इति श्रीभागवतात् कृष्णावताररूपम् । तथा च जीवविषयत्वाभावात् नाङ्गाङ्गित्वाद्यपेक्षेति भावः । **लीलाकथनेति** 'श्रोतव्यविषयत्वेन लीला दशविधा यतः' इति द्वितीयस्कन्धसुबोधिनीकारिकातो दशविधलीलासु प्रथमयु ।

रश्मिः।

'यथा हि मरणं प्राप्यात्मा भवति गोतम।
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्'।

मरणं प्राणत्यागं जीवीयं प्राप्य त्यक्ताः प्राणा भगवत्समीपं गच्छन्ति स आत्मा आध्यात्मिकादित्रितयविदाश्रयो भवति आत्मावतारादिरपि। लोकवत्तु लीलाकैवल्यमिति सूत्रानुसरणात्। धीरविषय उक्तः। अधीरविषयमाह योनिमिति 'योनेः शरीरम्' इति सूत्रात्। स्थाणुमन्ये। श्रुतं गुर्वादिमुखद्वारा। प्रसङ्गागतान्यगतिसहितेश्वरनिर्याणस्य मुक्तिलीलात्वेपि शोकदत्वात्तद्विहाय विसर्गलीलामारभ्याहुः य एष्विति।

य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः।
तदेवावक्रं तद्ब्रह्म तदेवामृतमुच्यते॥

अवक्रं ऋजुः 'विसर्गः पौरुषः स्मृतः' इति वाक्यम्। अत्र स्वप्नसृष्टिनिर्मातृत्वं तच्च कर्तृत्वमात्रं नाभिन्ननिमित्तोपादानत्वरूपमिति न संध्याधिकरणभाष्यविरोधः 'यस्मिन् लोकाः श्रिताः सर्वे तदुनात्येति कश्चन एतद्वैतत्' इति श्रुतिरत्र अत्येति अत्यन्तमेति तद्ब्रह्म 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति अत्र लोकधारकत्वादाश्रयलीला कृष्णाश्रयनामाश्रयः।

'अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च'॥

वायुर्यथैक इति वाक्यं पूर्ववत्। अत्र धर्मिणोऽसाधारणधर्मेण व्यापकत्वेन रूपनामनिर्वाहकत्वलीला तत्त्वादिरूपनामनिर्वाहकत्वेन सर्गलीला। महत्तत्त्वाहंकारादीनि नामानि 'प्रोचुः प्राञ्जलयः' इति वाक्यात् रूपाणि।

'सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः'॥

इत्यत्र लोकदुःखासंसृष्टत्वोक्त्या जगद्व्यापारवर्जं 'सर्वरसः' इति श्रुतेः सर्वरसलीला विसर्गलीला। भक्तानुरोधिनीं लीलां विसर्गरूपामाह।

'एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति।
तमात्मस्थं येऽनु पश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्'॥ इति।

अत्रैकरूपस्य बहुधाकरणं भक्तानुरोधात् यद्यद्धियेति वाक्यात्। आत्मस्थं श्रुतिस्थं 'तस्मान्नभिन्ना एतास्ता आभिर्भिन्नो न वै विभुः' इति कृष्णोपनिषच्छ्रुतेः मनःस्थं वा 'स मानसीन आत्मा जनानां सर्वात्मा' इति श्रुतेः। फलदातृत्वरूपां स्थानादिलीलामाह 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् तमात्मस्थम्' इति पूर्ववत्। सुखस्थाने शान्तिः फलमत उपपत्तेरिति सूत्रात्

'तदेतदिति मन्यन्ते निर्देश्यं परमं सुखम्।
कथं नु तद्विजानीयात् किमुतो भाति वा न वा'॥

तद्ब्रह्म एतत्प्रत्यक्षं समीपतरं मन्यन्ते जानन्ति अवबोधयन्ति वा निवृत्तेषणा ब्राह्मणादयः तत्सुखं कथं केन प्रकारेण जानीयामहं नचिकेताः। विजानीयात् यः कोपि। किमुतेति नात्मिये

रश्मिः ।

आङुक्तेः, न विकल्पे, वाकारोक्तेः । अतः प्रश्ने आसमन्ताद्भाति न वेति प्रश्नः । भासाद्वारा दीप्यते इत्युत्तरमाह 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' ॥ इति ।

'अनुकृतेस्तस्य च' इत्यत्र व्याकृता पञ्चमवल्लीस्था लीला । एवमा वल्लीसमाप्ति लीलाकथनदर्शनेनेत्यर्थः । अग्रेतनवल्ल्यर्थः कथ्यते प्रसङ्गात् । 'अत एव च नित्यत्वम्' इति सूत्रभाष्ये वेदस्यार्थतौल्यं शब्दब्रह्मवेदपुरुषशब्दवाच्यत्वमुक्तं तदाहुः ऊर्ध्वमूल इति इयं विसर्गरूपेण लीला 'तस्माद्विराडजायत विराजो अधिपूरुषः' इत्युक्त्वा किंचिदन्यदुक्त्वोच्यते 'तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे छन्दांꣳसि जज्ञिरे तस्माद् यजुस्तस्मादजायत' इति श्रुतेः । 'ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते' 'तस्मिंल्लोकाः श्रिताः सर्वे तदुनात्येति कश्चन एतद्वैतत्' इति श्रुतिः । अत्र पक्षिवृषभवृक्षेषु वृक्षत्वेन वेदोऽवर्णि । ननु वृक्षे लोकानां श्रितत्वं बाधितमिति चेन्न ऊर्ध्वमूलं तद्विष्णोः परमं पदमस्य स्वर्गनरकतिर्यगादिशाखाभिरवाक्शाखः अश्वत्थः अश्वत्थं जलमस्यास्ति 'अर्शआद्यच्' 'आपः प्रजाहितं शान्तं अश्वत्थं पवनं शिवम्' इति केशरमालाकोश इति व्याख्यासुधायां भानुदीक्षितः । यद्वा अश्वस्तिष्ठत्यस्मिन्नित्यश्वत्थः लोकास्त्वश्वे तिष्ठन्ति अस्मिंस्त्वश्वस्तिष्ठतीति अश्वो रूपं कृत्वा यदश्वत्थे तिष्ठते इति अश्वशब्दो योगरूढः 'विचारो योगरूढितः' इति पूर्वमीमांसाकारिकायाः । तथा च व्यापकोश्वनामा पदार्थः कल्की अवतारः । अवतारत्वाद्व्यापकः । रूपं प्रत्यक्षाश्वत्थरूपम् । तिष्ठत इति उपग्रहव्यत्ययः । परस्मैपदी आत्मनेपदी उपग्रहः । सनातनो नित्यः । तथा च वेदतरोः शब्दात्मकत्वमर्थतरोरवतारात्मकत्वमतोत्र शुक्रत्वादि विदधौ श्रुतिः तदेव शुक्रमिति । शुक गमने भ्वा. प. से. गतमित्यर्थः क्रियेति यावत् वेदार्थयोरभेदात् । तद्ब्रह्मेति अवतारावतारिणोरभेदात् । एतदमृतमिति तस्मिंल्लोकाः श्रिताः सर्वे । अत्यन्तं नेति प्राप्नोतीत्यर्थात् । अग्रे भगवतो मारणलीलार्थमारकं रूपं भगवत आह यदिदं किं चेति । कम्पनादित्यधिकरणे चिन्तिता । इयं लीला स्थानलीला । पुनः स्थानलीलामाह ।

'भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः' ॥

इति । स्पष्टम् । यथा वज्रोद्यतकरं स्वामिनं दृष्ट्वाऽभिमुखीकृत्य भृत्या नियमेन तच्छासने प्रवर्तन्ते तथेमाः प्रजा इति स्थानलीला । पूर्ववाक्ये फलमुक्तं य एतद्विदुरमृतास्ते भवन्तीति द्वितीयश्रुत्युक्तस्थानलीला ज्ञानफलमाह ।

'इह चेदशकद्बोद्धुं प्राक् शरीरस्य विस्रसः ।
ततः स्वर्गेषु लोकेषु शरीरत्वाय कल्पते' ॥

इति । स्थानलीलां बोद्धुमशकत् शक्नोति कालव्यत्ययः । शरीरस्य विस्रसः पतनात् प्राक् । कचिद्विस्रसः इत्यत्र विश्रम इति पाठः । श्रम धातुः खेदतपसोः दि. प. से. । बोद्धुमित्युक्ते स्थानलीलाबोधे वैजात्यात्फलवैजात्यमाह यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपौ ब्रह्मलोके इति । आदर्शे प्रतिबिम्बभूतकार्यैश्वर्यं पश्यति तथात्मनि बुद्धौ मनसि वा 'स मानसीन आत्मा जनानाम्' इति श्रुतेः । पश्यति यथा च दर्शे चन्द्रसूर्ययोः संगमे यथा

१. वैयात्यात् । २. वैयात्यात् ।

रश्मिः ।

धावलोकनात्मके दर्शे विषयत्वेन पश्यति तथा आत्मनि मनसीति पूर्ववत् 'दर्शस्तु संगमे चन्द्रसूर्ययोरवलोकने' इति विश्वः । चन्द्रसूर्ययोरवलोकने इत्यन्वये सूर्यत्वेन चन्द्रत्वेन पश्यतीत्यर्थः । यथा स्वप्ने जीवस्य मायिकभोगस्तथा पितृलोककामस्य पितृलोके उपस्थिते मायिकभोगः यथाप्सु परिददृशे परिदृश्यते एकोपि बहुत्वेन इव तद्वत् । तथा तेन प्रकारेणैको बहुत्वेन परिदृश्यते छायातपयोरिवात्यन्तविलक्षणौ ब्रह्मलोके । शोकाभावफलार्थमाह ।

'इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत् ।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति' ॥

इति । युक्तो हि इन्द्रियाणां पृथगुत्पन्नानां पृथग्भावं मत्वा ज्ञात्वा न शोचति । अयमपि भेदो निरध्यस्तदेहेन्द्रियकेषु । भक्तिज्ञानमार्गयोः निरध्यस्तदेहेन्द्रियकेषु भेदावाह निरध्यस्तेन्द्रियो भक्तश्चेदिन्द्रियाणामुदयः निरध्यस्तेन्द्रियैरेव कर्मकरणसंभवात् । ज्ञानी चेदिन्द्रियाणामस्तभावः । इन्द्रियत्वेनाज्ञानमात्मत्वेन ज्ञानम् । 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति फलाध्यायसूत्रात् मुक्तस्यामृतत्वं फलमाह इन्द्रियेभ्य इति ।

'इन्द्रियेभ्यः परं मनो मनसः सत्वमुत्तमम् ।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ।
अव्यक्तात्परः पुरुषो व्यापकोऽलिङ्ग एव च ।
यज्ज्ञात्वा मुच्यते जन्तुरमृतत्त्वं च गच्छति' ॥ इति ।

परत्वमिन्द्रियनायकत्वात् 'मनसैवानुद्रष्टव्यः' इति करणत्वाच्च । उत्तमत्वं ज्ञानजनकत्वाद्विष्णुत्वोपपादकत्वाच्च । अधि न दधातीत्यधि घोः किः आधेयो जीवः आत्मा अस्य सत्त्वाद्विष्णुत्वापादकादुत्तमत्वं कथमित्यत आह महानिति । अपरिच्छिन्नपरिमाणवान् मुक्त इति यावत् । तथा च निर्गुणत्वादुत्तमत्वमधिकत्वं वा कवर्णलोपात् । अव्यक्तमक्षरम् । अलिङ्ग इति लिङ्ग्यते गम्यते येन तत्तथोक्तं चिह्नं तदविद्यमानमस्येत्यलिङ्गः । चिह्नादीनां विद्यमानत्वाल्लिङ्गः लिगि गतौ भ्वा. प. से. ।

'नवाम्बुदानीकमनोहराय प्रफुल्लराजीवविलोचनाय ।
वेणुस्वनामोदितगोकुलाय नमोस्तु गोपीजनवल्लभाय' ॥ इति ।

गोपीजनवल्लभाष्टकोक्तानि चिह्नानि गम्यन्ते येन स आत्मा लिङ्गः तज्ज्ञात्वेत्युक्तं तत्र करणाकाङ्क्षायामाह ।

'न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाभिकॢप्तो य एतद्विदुरमृतास्ते भवन्ति' ॥ इति ।

संदृशे सम्यज्ज्ञानाय रूपं तिष्ठति । द्रव्यचाक्षुषं प्रत्युद्भूतरूपस्य कारणत्वेन कथं तत्पश्यति । उच्यते । हृदा मंनसा । मनीट्ट मनसः संकल्पादिरूपस्येष्टे नियन्तृत्वेनेति मनीट्ट बुद्धिस्तया मनसा अभितः कॢप्तम् । सुपां सुः मनसाभिकॢप्तः । एतद्विशेषणं रामतापिनीये 'उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना' इति । स मानसीन आत्मा जनानामिति मनसा । ननु मनोग्राह्यत्वापत्तिः आत्मा 'भक्त्याहमेकया ग्राह्यः' इति वाक्याद्भक्तिमात्रग्राह्य इति चेन्न । मनसाभिकॢप्तपदेन मनसाभिकल्पनविषय उच्यतेऽत्र मनसा कल्पनं 'भक्तिरहस्यभजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन् मनःकल्पन-

१. वैजात्यात् । २. वैजात्यम् ।

रश्मिः ।

मेतदेव च नैःकर्म्यम्' इति गोपालतापिनीयश्रुत्युक्तमनसः कल्पनरूपं गृह्यते इति मनसा कल्पनं मनःकल्पनमिति विगृह्य समासस्यापि संभवात् तथा च मनःकल्पनेन भक्तिरूपेण ग्राह्यः, हृदा मनीषा च सहकारिकारणानुगृहीतेनेति करणमुक्तम् । 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजयेत्' इति सुबोधिन्या योगमाह ।

'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्' ॥
'तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ' ॥

अत्रेति आत्मन्यवतिष्ठन्ते निरोधलक्षणोक्तरीत्या । बुद्धिश्च स्वव्यापारे न व्याप्रियते तां परमां गतिं फलरूपां सेवामाहुः । निरोधलीला इत्युक्तम् । अप्रमत्तस्तदा भवतीत्युक्त्या मन्यन्त इत्यत्र केचिदिति कर्तृबोधनात् विरलाः कर्तारः । अतः सकलसाधारणयोगमाह योग इति प्रभवत्यस्मादिति प्रभवः इति 'भुवः प्रभवः' इत्यत्र व्याकृतं मनोरमायां भट्टोजिदीक्षितेनात्रापि बोध्यम् । अपि अयः ब्रह्मणि गमनं संयोगो भवत्येव हि निश्चयेन यतः सर्वोऽपि वदति गच्छतीत्यत्र गमनं उत्तरदेशसंयोगं करोतीति न च फलानुकूलव्यापारो धात्वर्थ इति वाच्यम् मण्डनमिश्रवत्फलमात्रस्य धात्वर्थाङ्गीकारादस्यामप्ययोगदशायां निर्गुणेप्ययः न च साकारेनन्तमूर्तौ ब्रह्मणि कुतो नाप्ययः । भक्त्यैकलभ्यत्वात् ता नाविदन्निति वाक्यात् तथा चोभयोर्भक्तसाधारणयोर्ब्रह्मजीवयोश्च ग्रहणकारणाभावादनुपलभ्यमाने न स्त एव जीवब्रह्मणी इति प्राप्त आह ।

'नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्तीति ब्रुवतोन्यत्र कथं तदुपलभ्यते ॥
अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः ।
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति' ॥

इति नैव वागादिभिः प्राप्तुं शक्ये यद्यपि तथापि योगकाले आत्मद्वयमस्तीत्येवोपलब्धव्य आत्मा कस्मादस्तीति ब्रुवतो अस्तिवादिन आगमार्थानुसारिणः श्रद्दधानादन्यत्र नास्तिकवादिनि विपरीतदर्शिनि कथं तद् द्वयमुपलभ्यते न कथंचनेत्यर्थः । तस्मादपोह्यासद्वादिपक्षमासुरमस्तीत्येवोपलब्धव्यः आत्मा तत्त्वभावेन तस्य आत्मनो भावस्तत्त्वं तस्य भावः सत्ता तयोपलब्धव्या जीवात्मा तत्राप्युभयोर्जीवब्रह्मणोः । निर्धारणे षष्ठी । पूर्वमस्तीत्येवोपलब्धव्यः । आत्मा प्रसीदति तत्त्वभावो जीवसत्ता प्रसीदति योग ऐक्यान्न चकारप्रयोगः । अधुना जीवन्मुक्तिप्रकार उच्यते ।

'यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते' ॥

इति स्पष्टम् । जीवन्मुक्तिप्रकार एष सलिङ्गदेहस्य ।

'यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम्' ॥

इति । हृदयस्य ग्रन्थयो लिङ्गदेहास्तेषां भेदनेऽमृतो भवति । इहेति पदादयमपि जीवन्मुक्तप्रकारो द्वितीयः । मुक्तिप्रकारमाह शतमिति स्पष्टम् ।

रश्मिः ।

'शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विश्वङ्ङन्या उत्क्रमणे भवन्ति' ॥

इति श्रुतिः । सर्ववल्ल्यार्थोपसंहारार्थमाह ।

'अङ्गुष्ठमात्रः पुरुषोन्तरात्मा सदा जनानां हृदये संनिविष्टः ।
तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण ।
तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतम्' ॥ इति ।

मुञ्जादिति श्रीभागवते स्पष्टम् । शुक्रमिति शुच शोके भ्वा. प. से. शोचति ऋज्रेन्द्रेति रन् तमङ्गुष्ठमात्रं जीवसहितं शोचन्तं जीवं संचितकर्मसद्भावात् । अमृतमानन्दरूपमात्मानं विद्याज्जानीयात् पुनर्वचनं कर्ममार्गीयजीवाङ्गुष्ठमात्रयोः ग्रहणाय । भक्तिमार्गे तु 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधनम्' इति न शोकान्वयः मनुष्यानधिकृत्येदं मृत्यूपाख्यानं प्रवृत्तम् । अतो मनुष्याणां हृदयस्थाङ्गुष्ठमात्रत्वाद्रक्षार्थमङ्गुष्ठमात्र उपसंहार उक्त इति 'शब्दादेव प्रमितः' इत्याधिकरणे उक्तम् । 'हृद्यपेक्षया तु मनुष्याधिकारत्वात्' इतिसूत्रे मुक्तिप्रकारकथनानन्तरमङ्गुष्ठमात्ररूपोक्तिर्जीवस्य मुक्तिदशायां ब्रह्माविर्भावेन विरुद्धधर्माश्रयत्वे फलिष्यतीति वेदान्ताधिकरणमालायामभिप्राय उक्तः । सोपि साकारस्यानन्तमूर्तेरनेकास्वस्याग्रहणे बाधकाभाव इत्यभिप्रायेण । नचिकेत उपाख्यानावगतसाधनस्य फलमाह ।

मृत्युप्रोक्ता नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् ।
ब्रह्मप्राप्तो विरजोभूद्विमृत्युरन्योप्येवं यो विदध्यात्ममेव ॥

श्रुतेर्वचनान्मम श्रुतेरिव । अन्योर्थः । अन्योप्येवं यः सोध्यात्मविदेवेति । मनुष्याधिकारं ज्ञानकाण्डे निरूपयन्ती श्रुतिर्बिभयांचकार निःश्वसितत्वेन वायुत्वात् । वायुः शब्दतामापद्यत इति । ततश्च भयादिन्द्रश्च वायुश्चेति श्रुतेर्भयमस्याः सा श्रुतिराह स ह नाववतु इति स आत्मा ह प्रसिद्धः नौ वक्तृश्रोतारौ अवतु आमन्त्रणे लोट् अधीष्टे वा, न प्रार्थने 'प्रार्थिते वा ततः किंस्यात् स्वाम्यभिप्रायसंशयात्' इति वाक्यात् । ननु ज्ञानकाण्डीयस्याधिकारात्प्रच्यावनेन भगवान् मारयेदिति चेत्तत्राह सह नौ भुनक्तु इति पालयतु अभ्यवहरतु वा । 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' । सह वीर्यं करवावहै वीर्यं विद्याकृतं सामर्थ्यं तेन सह आवां करवावहै यथा न द्विष्यात् । तथा च तृतीयप्रश्नोत्तरे प्रधानीकृत्य वीर्यं करवावहै आवामिति भावः । तेजस्वि नावधीतमस्तु यथा तेजस्वि नौ आवयोः वक्तृश्रोत्रोरधीतमस्तु मा विद्विषावहै मा निषेधे आत्मानं सर्वप्रशास्तारं आवां मा विद्विषावहै इत्यर्थः । शान्तिः शान्तिः शान्तिरिति । ननु वीर्ये कृतेप्युपक्रमोपसंहारयोर्मनुष्याधिकाराद्विद्याया ज्ञानकाण्डे क्वोपयोग इत्यत आह शान्तिरिति । शम उपशमे दि. प. से. शम आलोचने चु. आ. से. लोचृदर्शने चु. प. से. उपालोचनं विद्याया ज्ञानकाण्डीयब्रह्मज्ञाने कर्तव्यम् । मार्गत्रये शान्तित्रयम् । अन्यव्याख्याने शान्तिपदे योगरूढ्यापत्तिः । अत्र वेदान्ते योगमात्रादरणादेवं व्याकृतमिति । प्रकृतमनुसर्यते तथावसायादिति लीलात्वेन य एषु सुप्तेष्वित्यादिषु पदार्थेष्वङ्गीकारावसायात् । अतो देवैरत्रापि इत्यत्र उत्तरम् । प्रश्नोत्तरयोः समानविषयत्वस्य को घटः कम्बुग्रीवादिमान् घट इत्यादिषु दर्शनादिति भाष्यार्थः । तथाच व्युत्पत्तिः । संगतिः ग्रन्थ उक्ता । यद्धर्मप्रकारकयद्विषयिणी जिज्ञासा तद्धर्मावच्छिन्नतदुद्देश्यकं लक्षणादिनिरूपणमिति नियमस्यास्योदाहरणं को घटः कम्बुग्रीवादिमान् घटः इति । किंच भाष्यं प्रति ब्रवीमि

भाष्यप्रकाशः ।

यत्तु वरदानानुरोधेन ब्रह्मप्रश्नस्य जीवप्रश्नान्तर्गतत्वं शंकराचार्यैरङ्गीकृतं तदसंगतम् । वक्तृप्रसादस्यैवात्र प्रश्नकारणतादर्शनात् । नच त्रीन् वरान् वृणीष्वेति वाक्यबाधापत्तिः । स्वस्ति मेऽस्त्विति वाक्योक्तस्य स्वाविनाशार्थकवरत्रयस्य सौमनस्याग्निजीवप्रश्नाभ्यां च पूर्त्या तदभावात् । नच तृतीयप्रश्नस्य काल्पनिकत्वम् । वदेति श्रुत्यैव तन्निरासात् । नचाधिक्यं दोषः । दोषत्वाभावस्योपपादितत्वात् । अतोऽस्य भिन्नप्रश्नत्वेऽपि कल्पनाया अभावेन, यथा वरव्यतिरेकेण प्रश्नकल्पनायामदोष एवं प्रश्नव्यतिरेकेण प्रधानोपन्यासकल्पनायामप्यदोष इति । साङ्ख्योक्तप्रतिबन्देरपि परिहाराद् व्यर्थ एव प्रष्टव्यभेदमनादृत्य,

रश्मिः ।

इत्यग्निप्रश्नोत्तरमुक्तं तदपि शंकराचार्यैः 'लोकादिमग्निं तमुवाच तस्मै' इति तदग्रिमवाक्यस्योत्तरत्वमुक्तं तन्निरसितुम् । न च 'प्रति ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्' इत्यस्य प्रतिज्ञावचनत्वात् तदेवोत्तरमिति शङ्क्यम् । 'अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम्' इत्युत्तरार्धेनास्यैवोत्तरत्वात् । यदपि 'न जायते म्रियते वा विपश्चित्' इति तृतीयप्रश्नोत्तरमुक्तं तस्यात्राभिप्रायाभावाददर्शनाच्च 'सर्वे वेदा' इत्येवोत्तरम् । वरदानेति न वयमिह वरदानव्यतिरेकेण प्रश्नं कंचित्कल्पयामो वाक्योपक्रमसामर्थ्यात् । वरदानोपक्रमा हि मृत्युनचिकेतःसंवादरूपा वाक्यप्रवृत्तिरासमाप्तेः कठवल्लीनां लक्ष्यते । मृत्युः किल नचिकेतसे पित्रा[1] प्रहिताय त्रीन् वरान् ददौ । नचिकेताः किल तेषां प्रथमेन वरेण पितुः सौमनस्यं वव्रे, द्वितीयेनाग्निविद्यां, तृतीयेनात्मविद्यां 'येयं प्रेते' इति 'वराणामेष वरस्तृतीयः' इति लिङ्गात् । तत्र यदि 'अन्यत्र धर्मात्' इत्यपूर्वोयमन्यः प्रश्न उत्थाप्यते ततो वरव्यतिरेकेणापि प्रश्नकल्पनाद्वाक्यं बाध्येतेति भाष्येण यत्त्वित्यादिः । प्रश्नेति वरप्रदानद्वारा प्रश्नकारणता । स्वस्तीति । मे नचिकेतसे । स्वेति नकिचेतोऽविनाशार्थकवरत्रयस्य । तदभावादिति तथा च वरप्रदानव्यतिरेकेण प्रश्नाङ्गीकारः श्रुतिं विरुणद्धीति श्रुत्यन्तरोक्तवरोऽङ्गीकृत इति भावः । भाष्योपपादने समाहितमपि काल्पनिकत्वं मतान्तरे प्रश्नद्वयस्यैक्यसाधनप्रयासस्य व्यर्थत्वसाधने पुनराहुः न चेति । एतच्च पूर्वमुपपादितम् । पूर्वं वरत्रयान्तर्गततृतीयवरस्य काल्पनिकत्वमुक्तमत्र तु वरत्रयपृथगित्येतस्य । ननु त्रीन् वरानित्युक्ते चतुर्थोयमाधिक्यं निग्रहस्थानदोषः । यथाह दिनकर्याम् । अधिकस्याधिकहेत्वाद्यभिधानरूपस्य गुणेन्तर्भाव इति वाच्यम् । उपेति न च निर्हेतुकत्वमित्यादिनोपपादितत्वात् । अत इति उक्तोपपादनात् । यथाश्रुतग्रन्थव्याकरणपक्षेऽत्र तृतीयप्रश्ने वरप्रवेशाभावादाहुः वरव्यतिरेकेणेति । अत्रोच्यते नैव वयमिह वरदानव्यतिरेकेण प्रश्नं कंचित् कल्पयाम इति शंकरभाष्यं पूर्वोक्तयुक्त्याक्षिप्तं तेन च तेषामस्य पूर्वपक्षग्रन्थः । यथैव वरप्रदानव्यतिरेकेण प्रश्नकल्पनायामदोष एवं प्रश्नव्यतिरेकेण प्रधानोपन्यासकल्पनायामदोषः स्यादिति तत्रापि वरप्रदानव्यतिरेकेण प्रश्नकल्पना युक्तियुक्ता, प्रश्नव्यतिरेकेण प्रधानोपन्यासकल्पना युक्तियुक्ता न भवतीति दृष्टान्तदार्ष्टान्तिकयोः वैषम्यं सूचितम् । पूर्वपक्षग्रन्थे न प्रतिबन्दिः । अपरीति । अत्रोच्यते । नैव वयमित्यादेः सिद्धान्तग्रन्थस्योक्तरीत्या शैथिल्येन पूर्वपक्षस्योक्तस्यापरिहारात् । प्रष्टव्येति द्वितीयतृतीयप्रश्नयोः जीवब्रह्मणोर्भेदं स च ननु च प्रष्टव्यभेदादपूर्वोयं प्रश्नो भवितुमर्हतीति । पूर्वो हि प्रश्नो जीवविषयः येयं प्रेते मनुष्येस्ति नास्तीति विचिकित्साभिधानात्, जीवस्य धर्मादिगोचरत्वात्, स

1. पित्र्याय हिताय ।
१०९ ब्र० सू० ८०

भाष्यप्रकाशः ।

'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति' ॥

इत्यादिश्रुत्युक्तं जीवब्रह्मणोर्धर्मभेदं चानादृत्य प्रश्नद्वयस्यैक्यसाधनप्रयास इति दिक् ।

रामानुजाचार्यास्तु, उपायोपेयोपेतॄणां त्रयाणां प्रश्नोपन्यासावत्राङ्गीकुर्वन्ति । तथाहि । नचिकेता हि मुमुक्षुर्मृत्युना दत्ते वरत्रये प्रथमवरेणात्मनः पुरुषार्थयोग्यतापादनायात्मनि पितुः सौमनस्यं प्रतिलभ्य द्वितीयेन वरेणाग्निविद्यां वव्रे । सा च मोक्षोपायभूता प्रश्नवाक्ये,

रश्मिः ।

नान्यत्र धर्मादिति प्रश्नमर्हति । प्राज्ञस्तु धर्माद्यतीतत्वात् 'अन्यत्र धर्मात्' इति प्रश्नमर्हति, प्रश्नछाया च न समाना लक्ष्यते । पूर्वस्यास्तित्वनास्तित्वविषयत्वात् । उत्तरस्य धर्माद्यतीतवस्तुविषयत्वात् । तस्मात्प्रत्यभिज्ञाभावात् प्रश्नभेदो न पूर्वस्यैवोत्तरत्रानुकर्षणमिति ग्रन्थोक्तः । अग्नेः इति चेन्न जीवप्राज्ञयोरेकत्वाभ्युपगमात् । भवति प्रष्टव्यभेदात् प्रश्नभेदो यद्यन्यो जीवः प्राज्ञतः स्यादित्यादिना तमनादृत्य

'स्वप्नान्तं जागरितान्तं च उभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति' ॥ इति ।

स्वप्नजागरितदृशोः जीवस्यैव महत्वविभुत्वविशेषणस्य मननेन शोकविच्छेदं दर्शयन्न प्राज्ञादन्यो जीव इति दर्शयति प्राज्ञविज्ञानाद्धि शोकविच्छेद इति वेदान्तसिद्धान्तः इति भाष्ये धर्मभेदानादररूपं दोषमुद्घाटयामासुः स्वप्नान्तमिति । स्वप्नान्तं बहुव्रीहिणा जागरितं, षष्ठीतत्पुरुषेण वा । जागरितान्तं स्वप्नः ताभ्यामेव । येन जीवभावेन पश्यति यत्तदोर्नित्यसंबन्धात् । तं महान्तं विभुमात्मानं मत्वेत्याद्यर्थः । अत्र कर्मकर्तृधर्मभेदानादरः । स च कर्मकर्तृव्यपदेशादिति सूत्रं विरुणद्धि । अतः प्रथमत्यागे मानाभावात्स धीरः महान्तमित्याद्यर्थः । नतु तमिति द्वितीयान्तमादाय धीरस्य पश्चादन्वयो भवति वाक्यभेदप्रसङ्गात् जीवब्रह्मवादापत्तेश्च । प्रश्नद्वयेति जीवब्रह्मप्रश्नद्वयस्य । यद्यत्रान्यत्र धर्मादित्यत्र न त्वयमपूर्वोयमन्यः प्रश्न उत्थाप्यते ततो वरप्रदानव्यतिरेकेणापि प्रश्नकल्पना त्रीन् वरानिति वाक्यं बाध्येतेति भाष्येणानुकर्षणं पूर्वप्रश्नस्यान्यत्र धर्मादित्यत्र न त्वयमपूर्वप्रश्न इत्यैक्यसाधनप्रयासः तदुक्तं तस्माद्येयं प्रेते इत्यस्यैव प्रश्नस्यैतदनुकर्षणमन्यत्र धर्मादिति । दिगिति । तेन 'यदेवेह तदमुत्र यदमुत्र तदेवेह' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति श्रुतिर्जीवप्राज्ञयोरभेदं वक्तीति यदुक्तं तदपि विस्फुलिङ्गो नाग्निरिति प्रत्ययाभावादंशांशिभावेनैव । किं च यदुक्तं अविद्याकल्पितजीवप्राज्ञभेदापेक्षया सूत्रं योजयितव्यमिति । तत्राविद्यासंबन्धे आत्मनो जीवत्वापत्तिस्तदसंबन्धे जीवत्वहानिरित्येवं बहूनि दूषणानि विद्वन्मण्डने उक्तान्यवधेयानि । पुरुषेति 'पितृदेवो भव' इति श्रुत्या पुरुषेत्यादिः । अग्निविद्येति अग्निज्ञानम् । प्रश्नेति,

'स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद् द्वितीयेन वृणे वरेण' ॥

इति वाक्ये स्वर्गशब्देनात्र परमपुरुषार्थलक्षणो मोक्षोभिधीयत इति । एते ज्ञानकर्मसमुच्चयवादिनः । वर्णाश्रमविहितं कर्माविद्या, ज्ञानं ध्रुवानुस्मृतिरूपम्, तयोः समुच्चयः । सत्यार्जवादिगुणयुक्तस्याश्रमाचारधर्मैरेव विद्यानिष्पत्तिरिति विद्या ज्ञानं ध्रुवा स्मृतिरिति यावत् । तदर्थं ज्ञानमुक्त्वा

भाष्यप्रकाशः ।

अमृतत्वं भजन्त इत्युत्तरवाक्ये, 'त्रिकर्मकृत् तरति जन्ममृत्यू' इति कथनात् । तृतीयेन वरेण मोक्षप्रश्नद्वारेण उपेयस्वरूपमुपेतृत्वस्वरूपमुपायभूतानुष्ठितकर्मानुगृहीतोपासनस्वरूपं च पृष्टं, 'येयं प्रेते' इत्यनेन । इत्येवं मोक्षे पृष्टे, तस्योपदेशयोग्यतां परीक्ष्य, 'तं दुर्दर्शं गूढम्' इत्यनेनोपदिदेश । तदा नचिकेताः प्रीतः सन्, देवं मत्वेत्युपास्यतया निर्दिष्टस्य प्राप्यस्य देवस्य, अध्यात्मयोगाधिगमेनेति वेदितव्यतया निर्दिष्टस्य प्राप्तुः प्रत्यगात्मनः, मत्वेत्यनेनोक्तस्य ब्रह्मोपासनस्य च स्वरूपावधानाय पुनः पप्रच्छ, अन्यत्र धर्मादन्यत्राधर्मादिति । एवं पृष्टे प्रथमं, सर्वे वेदा इत्यादिना प्रणवं प्रशस्य तद्वाच्यं प्राप्यस्वरूपं, तदन्तर्गतं प्रत्यक्स्वरूपं, वाचकस्वरूपं चोपायं पुनरपि सामान्येन ख्यापयन्

रश्मिः ।

आहुरुत्तरेति । 'त्रिणाचिकेतस्त्रिभिरेत्य सिद्धिं त्रिकर्मकृत्तरति जन्ममृत्यू' इति वाक्यम् । त्रिःकृत्वो नाचिकेतोऽग्निः चितो येन स त्रिणाचिकेतास्तत्संबोधनं, तद्विज्ञानस्तदध्ययनस्तदनुष्ठानवांश्च त्रिभिः पितृमात्राचार्यैस्त्रिकर्मकृत् इज्याध्ययनदानानि । इत्येतद्भाष्ये शंकराचार्याः । तृतीयेनेति,

'येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः' ॥

इत्यत्र वरस्य प्रश्नहेतुत्वात्तृतीया । वरेणेति विशेषेण केतितुं वसितुमिच्छा सन्नर्थाविवक्षायां निवासः शाश्वतविष्णुलोके निवासो मोक्षस्तस्य स्वरूपं तस्य प्रश्नः स द्वारं यस्य वरस्य तेन मोक्षपदं मोक्षस्य रूपे लाक्षणिकं मोक्षस्वरूपप्रश्नद्वारेणेति भाष्यात् । अत्रोपेयं मोक्षस्वरूपं विचिकित्सापदेन, उपेतृस्वरूपं प्रेतमनुष्यपदाभ्यां, उपायभूतानुष्ठितकर्मानुगृहीतोपासनस्वरूपमेतद्विद्यामिति । पृष्टमिति वरस्य प्रश्नहेतुत्वात् तेन वरेण त्रयाणां प्रश्नः कृत इत्यर्थः । तं दुरिति

'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति' ॥

इत्यनेन । नचिकेता इति पुनः पप्रच्छेत्येतेनान्वयः । उपास्येति ननूपास्यबोधकं पदं नास्तीति चेन्न आर्थिकार्थत्वात् । तथा च मत्वेत्युक्तं ज्ञानं स्मृत्यात्मकमुपासनम् । केन मत्वेत्युच्यते अधीति । अध्यात्ममात्मविषयकयोगेनाधिगमो ज्ञानं तेन मत्वा । निर्दिष्टस्येत्यत्र भाष्ये निर्दिश्येति पेठुः । निर्दिष्टस्येति देवस्येत्यस्य विशेषणम् । प्रणवमिति ॐमित्येतदिति श्रुत्योक्तं प्रणवं प्रशस्य । न च भाष्ये करणानुक्तेरस्य करणस्याग्रेन्वयोक्तेः प्रश्नवाक्येन प्रणवं प्रशस्येति कुतो नोक्तमिति शङ्क्यम् । अन्यत्र धर्मादिति प्रश्नवाक्ये प्रणवानुक्तेस्तस्य कर्मतानुपपत्तेः । वाचकस्वरूपख्यापनमाहुः पूर्वमिति । 'तस्य वाचकः प्रणवः' इति योगसूत्रात् । उपेति 'सर्वे वेदाः' इत्यादिना । ननु कथमेकस्य प्रशंसोपदेशयोः करणत्वमिति चेन्न एकं वाक्यं प्रशंसा या प्रकृष्टवचनरूपा तद्रूपं प्रकृष्टवाञ्छाविशिष्टं वा सदेव मन्त्ररूपोपदेशकर्मरूपमिति 'शंसा वचनवाञ्छयोः' इति विश्वः ।

'चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स कथ्यते' ॥

इति रामार्चनचन्द्रिकायां रुद्रयामलवचनम् । उत्तरवाक्यं प्रशंसाविशिष्टं ग्राह्यम् । तेन प्रश्नवाक्यस्य प्रशंसावैशिष्ट्येपि न क्षतिः । प्रशंसावैशिष्ट्यं यदि प्रश्नवाक्यस्य विभाव्यते तदोच्।

भाष्यप्रकाशः।

पूर्वं प्रणवमुपदिदेश प्रशशंस च। ततो, न जायत इत्यादिना प्राप्तुः स्वरूपमुक्त्वा अणोरणीयानित्यारभ्य, 'क इत्था वेद यत्र सः' इत्यन्तेन प्राप्यस्य विष्णोः स्वरूपं वदन् मध्ये, नायमात्मेत्यनेन उपायभूतस्योपासनस्य भक्तिरूपतामप्याहेत्यादि चाहुः।

तेन तन्मते प्रश्नद्वयस्य सामान्यविशेषभावेनैक्यादन्यत्र धर्मादिति प्रश्नोऽपि तृतीयं वरमनुरुन्धे। शैवमतेऽप्येवम्। अत्रोदासीना वयम्।

भास्कराचार्यास्तु जीवपरयोर्गोपुरुषवदत्यन्तभेदो नास्ति। पररूपादर्शनमेव चाविद्या। सा च विद्यया निवर्त्यते। ततश्च स्वरूपं प्रतिपद्यत इति पूर्वसूत्र उक्त्वाऽस्मिन् सूत्रे सौमनस्यापेक्षया जीवप्रश्नस्य तृतीयत्वमुक्त्वा ब्रह्मप्रश्नस्य ततोऽतिरिक्तत्वं सूचयामासुः। तेन तन्मते जीवप्रश्नस्याऽनतिप्रयोजनत्वम्।

माध्वास्तु, आनुमानिकसूत्रे, 'अव्यक्तात् पुरुषः परः' इत्यत्राऽव्यक्तशब्देन, 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः' इत्यत्र देहिशब्देन च सांख्यानुमानकल्पितं प्रधानं जीवश्चोच्यते, उत विष्णुरिति संदेहे विष्णुरेवोच्यते। कुतः। शरीररूपकविन्यस्तगृहीतेः। शरीरस्य रूपमिव शरीररूपकम्। कप्रत्ययः कुत्सने। तथाच यथा शरीरं पुरुषतन्त्रं, तथा परमात्मतन्त्रत्वेन शरीरसमे प्रधानादौ स्थितस्य गृहीतेः। नन्वत्र शरीरं रथमेव त्वित्यत्रोक्तं शरीरम्, आत्मानं रथिनं विद्धीत्यत्रोक्तो जीव एव च गृह्यताम्। परमात्मग्रहणे किं मानमिति शङ्क्यम्। सूत्रकृतः कुत्सार्थकप्रत्ययप्रयोगस्य रूपपदप्रयोगस्य च मानत्वात्। अन्यथा तद्वैयर्थ्यात्। नच सूत्रकृता कथनेऽपि श्रुतेस्तथैवाशय इत्यत्र किं गमकमिति शङ्क्यम्। तुच्छेनाभ्यपिहितं यदासीदिति श्रुतावल्पेन विभोरपिधानं दर्शयति। अव्यक्तमचलं शान्तमिति पिप्पलाद-

रश्मिः।

प्रशशंसेति एतद्ध्येवाक्षरं ब्रह्मेत्यादिवाक्यद्वयेन प्रशशंस। तदन्तर्गतचिदचिद्विशिष्टेश्वरान्तर्गतं प्रत्यक्स्वरूपमाहुः तत इति। भक्तिरूपतामिति। 'यमेवैष वृणुते तेन लभ्यः' इत्यत्र वरणं ध्रुवानुस्मृतिरिति भाति। इत्यादीति ऋतं पिबन्ताविति चोपास्यस्योपासकेन सहावस्थानात्सूपास्यतामुक्त्वा 'आत्मानं रथिनं विद्धि' इत्यादिना 'दुर्गापदं तत्कवयो वदन्ति' इत्यन्तेनोपासनस्वरूपप्रकारमुपासीनस्य च वैष्णवपरमपदप्राप्तिमभिधाय अशब्दमस्पर्शमित्यादिनोपसंहृतम्। इत्यादिपदार्थः। तमाहुरित्यर्थः। तृतीयप्रश्नस्य सिद्धान्ते वरानुरोधिसापेक्षतया वरानुरोधप्रतिपादकग्रन्थस्यादुष्टत्वात्। उदासीनाः प्रकाशाय आसीनाः। उत् प्रकाशे। आस्त आसीनः शानच् 'ईदासः' इति सूत्रेणासः परस्यानस्येत् 'आदेः परस्य' आसीनः। वयम्। तत्त्वमस्यादिश्रुतेः जीवप्रश्नस्यात्मप्रश्नत्वेन सामान्यविशेषभावस्य यथाकथंचित्सत्त्वात्। गोपुरुषेति गोपुरुषवद्योत्यन्तभेदः स नास्तीत्यर्थः। पूर्वेति 'वदतीति चेन्न प्राज्ञो हि प्रकरणात्' इति सूत्रे। तेनेति जीवपरयोर्भेदाभेदवादविषयत्वेन। अनतीति अभेदभाने प्रयोजनाभावादनतीति पाक्षिकप्रयोजनत्वम्। जीवश्चोच्यत इति जीवश्च यदुक्तं तदुच्यते इत्यर्थः। शरीरेति शरीररूपं प्रधानादि तत्कुत्सितमव्यक्तमित्याहुः केति। प्रधानादाविति। 'तुच्छेनाभ्यपिहितं यदासीत्' इति दर्शयति च। अर्थोऽस्ति। स्थितस्येति। सौत्रविन्यस्तपदार्थः विष्णोरित्यर्थः। गृह्यतामिति शरीरविन्यस्तपदाभ्यां गृह्यताम्। तद्वा इति तयोर्वैयर्थ्यात्। अव्यक्तमिति।

भाष्यप्रकाशः ।

शाखायामव्यक्तपदवाच्यतां च दर्शयति । अक्षरं ब्रह्म परममित्युक्ते अक्षरे, 'अव्यक्तोऽक्षर इत्युक्तः' इति गीतास्मृतेरित्याहुः । तथाऽग्रेऽपि ।

तत्रापि व्याख्यानस्य क्लिष्टत्वाच्छ्रुत्यर्थस्यान्यथापि संभवाद् गीतायां भगवद्वाक्यव्यक्त-पदप्रयोगाच्च वयं तत्रोदासीनाः ।

विज्ञानभिक्षुस्तु, आनुमानिकसूत्रे, अजामेकामिति श्वेताश्वतरश्रुतिमुदाहृत्य श्रुत्यन्तरे ब्रह्म-कारणताया अत्र च प्रकृतिकारणताया उक्तत्वात् कपालद्वयं घटस्येव जगतोऽपि द्वयं कारणं भवत्विति शङ्कायां ब्रह्मणो न कारणत्वं, विकारित्वापत्तेः । किंतु प्रकृतेरेवेति पूर्वपक्षदलार्थः । तमिमं पूर्वपक्षं शक्तिशक्तिमद्भावेनोभयोः कारणत्वेन समाधत्ते न शरीरेत्यादि । 'यस्तन्तुनाभ

रश्मिः ।

'अव्यक्तमचलं शान्तं निष्कलं निष्क्रियं परम् ।
यो वेद हरिमात्मानं स भयादनुमुच्यते' ॥

इति वाक्यम् । तथाग्र इति सूत्रद्वये । प्रथमे सूक्ष्ममव्यक्तं मुख्यगृहीतं तद्व्यक्ततामर्हतीति तदर्हत्वम् । द्वितीये सूत्रे । तदधीनत्वाच्चाव्यक्तत्वादीनां तस्यैवाव्यक्तत्वपरावरत्वादिकमर्थवत् । 'यदधीनो गुणो यस्य तद्गुणी सोभिधीयते' यथा जीवः परमात्मेति । यथा राजा जयीत्यपि स्कान्दे । तृतीये सूत्रे अन्यस्य वाच्यत्वं न युज्यते इति भाष्यं वदतीति सूत्रे विशेषार्थकाभावः । प्रकरणादिति सूत्रस्य सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति तस्य ह्येतत्प्रकरणमिति भाष्यम् । क्लिष्टत्वेति रूपपदस्य तत्सदृशे लक्षणा । तदधीनसूत्रे प्रधानादाव्यक्तपदगौणी । अप्रसिद्धाश्च श्रुतयः इति क्लिष्टत्वात् । ननु तथापि श्रुतय एता सर्वबाधिका इति चेत्तत्राहुः श्रुत्यर्थस्येति । तथा हि । 'एष ह्येव तुच्छः' इति महोपनिषच्छ्रुतेः । तुच्छेन ब्रह्मणाभ्यपिहितमभितो पिहितं बहिरपि गतं व्याप्तमिति यावत् । हि गतिवृद्ध्योः स्वा. प. अ. हितं वर्द्धितं वा । न च कथं तुच्छत्वमिति शङ्क्यम् । 'तोदनात्तुच्छमुच्यते' इति महाकौर्म्यात् तुदतीति तुच्छः प्रत्ययस्तु भावे घञ्, पाक इतिवत् । तोदनात्तुच्छमिति वाक्ये भावोक्तेः । वृद्ध्यभावच्छन्दसि सर्वविधिविकल्पात् दकारस्य थकारो विकारः हलिवकारः । तुदः वर्णविकार इति 'सर्वेषां तदधीनत्वात् तत्तच्छब्दाभिधेयता' इति तत्रत्यवाक्यात् । मुख्यतयाव्यक्तपदप्रयोगाच्चेत्येवमन्यथासंभवादव्यक्तात्पुरुषः पर इतीतरमुख्यवचनात्तद्धाम परमं ममेति वचनाच्चाव्यक्तादित्यस्याक्षरादित्यर्थात् देहिन इत्यस्यान्यविशेषणत्वाच्च । न देह्यव्यक्तशब्दौ परमात्मवचनावित्युदासीनाः प्रकाशायासीनाः इत्यर्थः । गीतायामिति ।

'अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम' ॥

इति गीतायाः महापुरुषयोगाध्याये । तथैवेति उदासीनपदेनान्वयः । सौमनस्येति सुमना यथा स्यादिति लिङ्लकारबोधितायाः । तथा च भाष्यम् । त्रयाणामेव पितृसौमनस्यस्वर्ग्याग्नि-परमात्मनां प्रश्न उपन्यासश्च 'अविज्ञातप्रार्थनं च प्रश्न इत्यभिधीयते' इति वचनान्न विरोध इति । 'येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके' इत्यत्रास्तीत्यत्र लेडनाश्रयणात् । जीवप्रश्नस्याविरोधः । श्रुत्यन्तर इति 'यतो वा इमानि' इति श्रुत्यन्तरे । प्रकृतीति बह्वीं प्रजां जनयन्तीमिति श्रुत्या ।

भाष्यप्रकाशः।

इव तन्तुभिः प्रधानजैः स्वभावतो देव एकः समावृणोति स नो दधातु ब्रह्माऽव्ययम्' इत्यादिषु वाक्यशेषेषु शरीरेण रूपकेण दृष्टान्तेन विन्यस्तमुपन्यस्तं यन्मायाख्यं प्रधानं तस्यैवाजावाक्ये ग्रहणं, न तु स्वातन्त्र्येण परेच्छाननुविधायित्वरूपेण। अतो न तस्याः स्वातन्त्र्येण कारणत्वमिति व्याख्याय, त्रयाणामेवेति सूत्रे त्रयाणामपीति पाठमङ्गीकृत्य प्राज्ञस्य प्रकरणित्वसमर्थनार्थं तदित्याशयेन तत्सूत्रमेवं व्याचख्यौ। भोक्ता भोग्यं प्रेरितारं च मत्वेति श्रुत्युक्तानां त्रयाणां पुरुषप्रकृतिदेवतावर्गाणामपि वाक्योपक्रमे उपन्यासः, प्रतिवचनं, तत्प्रश्नश्च प्रसज्येयाताम्। न ह्येवं दृश्यते। किं कारणं ब्रह्म कुतः स्म जाता इत्यादिना केवलब्रह्मण एव प्रश्नदर्शनात्। 'यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः' इत्यादिना केवलब्रह्मण एवोपन्यासदर्शनाच्चेति।

तदसंगतम्। अपिशब्दघटितपाठस्य क्वाप्यदर्शनात्। सांख्येऽपि देवतावर्गस्याधिदैवतत्वेन भोग्यकोटिपतिततया पृथग् ज्ञेयत्वाऽनङ्गीकारेण त्रयाणां प्रश्नाद्यापत्तेरपि दातुमशक्यत्वात्। किं कारणमिति श्रुतावपि विचारस्यैव दर्शनेन तत्र प्रश्नत्वायोगात्[1], 'ते ध्यानयोगानुगता अपश्यन्' इत्यग्रेऽपि दर्शनकथनेन प्रतिवचनादर्शनाच्च। एवं पूर्वोत्तरग्रन्थेऽप्यवगन्तव्यमिति दिक्॥ ६॥

रश्मिः।

प्रधानजैरिति सत्त्वरजस्तमोभिः। देवः कालः। एवं कालकर्मस्वभावा उक्ताः। कर्म प्रधानमज्ञानं मायेति यावत्। **समावृणोती**ति सम्यक् भजति विभागं करोति, वृङ् संभक्तौ क्र्या. आ. से. विकरणोपग्रहयोर्व्यत्ययः। वृञ् वरणे स्वा. उ. से. वा अर्थः। स एव वृञ् वरणे इत्यत्र वृङ् संभक्तावित्यस्य ल्युडन्तस्य रूपमिति। नोस्मान् धारयत्विति दधात्वित्यस्यार्थः। **वाक्ये**ति संदिग्धेषु वाक्यशेषात्। आदिपदार्थः स्पष्टः। **शरीरे**णेति तन्तुनाभशरीरेण। **तदि**ति सूत्रम्। इत्यादीत्यादिना। तमेकनेमिमित्यादिः तन्मतसमाप्ताविति पदम्। भोग्येति प्रकृतिकोटिपतिततया। **पृथक्ज्ञेयत्वे**ति। यथाहुः अपवादमात्रमबुद्धानामिति कापिलसांख्यप्रवचनसूत्रवृत्तौ। देवतावर्गः प्रधानकार्याध्याये निरूपितः इति प्रधानात्पृथक् ज्ञेयत्वानङ्गीकारः। **विचारस्ये**ति मननस्य। **प्रश्नस्ये**ति। ननु किं कुतः इति प्रश्नस्य वाचके पदे स्तः इति चेत्तत्राहुः **ते ध्याने**ति। 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति श्रुतिः। अत्रात्मशक्तिस्तत्त्वशक्तिः स्वस्वकार्यनिर्माणसामर्थ्यम्। तद्दर्शनकथनेन ब्रह्मत्वावधित्वकरणत्वाधिकरणत्वानामदर्शनेन यद्धर्मप्रकारकयद्विषयकप्रश्नः तद्धर्मावच्छिन्नतदुद्देश्यकं लक्षणादिनिरूपणमिति व्युत्पत्तेः। को घटः कम्बुग्रीवादिमान् घटः इत्यादिषु दृष्टायाः प्रकृतेः अभावादप्रश्नत्वादतः किमिति प्रश्नः। कुत इत्यवधिकरणाद्यन्तर्गत एकापेक्षया बहूनामनुग्रहो न्याय्य इति प्रश्नं न्यक्कृत्य 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' इति श्रुत्युक्तमननं विचाररूपमङ्गीकृतमिति बोध्यम्। किं च वेदान्तत्वेन किं कारणं ब्रह्मेत्यत्र किंपदस्य योग आवश्यकः। स च कै शब्दे भ्वा. प. अ. कायतेर्डिमिः शब्दरूपं शब्दकर्तृ वा ब्रह्म कारणमित्यर्थात्, कुतः पञ्चम्यर्थोज्जाताः, केन शब्दकर्त्रा, क्व शब्दकर्तरि, इत्यर्थाच्च न प्रश्नार्थत्वम्। अतः पुरुष इति चिन्त्यमित्युक्तचिन्तनं मननात्मकमुच्यते न प्रश्नः तदुक्तं विचारस्यैवेत्यनेन। **पूर्वोत्तरे**ति 'ज्ञेयत्वावचनाच्च' इति सूत्रस्य पूर्वोत्तरग्रन्थे यद्वा पूर्वस्यानुमानिकसूत्रस्योत्तरग्रन्थे 'सूक्ष्मं तु तदर्हत्वात्' इत्यादिग्रन्थे॥ ६॥

१. प्रश्नस्येति रश्मिपाठः।

महद्वच्च ॥ ७ ॥

ननु तथापि मतान्तरेऽन्यत्र संकेतिताः कथं ब्रह्मवादे ब्रह्मपरतया योज्यन्त इत्याशङ्क्य परिहरति महद्वत् । यथा महच्छब्दः । 'महान्तं विभुमात्मानम्' 'वेदाहमेतं पुरुषं महान्तम्' इत्यादौ महच्छब्दो ब्रह्मपरो योगेन । एवमव्यक्तशब्दोऽप्यक्षरवाचक इति । न हि सांख्यमत इव वेदान्तेऽपि महच्छब्दः प्रथमकार्ये वक्तुं शक्यते । तस्मादिन्द्रियादिवाक्ये सांख्यपरिकल्पितानां पदार्थानां नामापि नास्तीति सिद्धम् । चकारोऽधिकरणसंपूर्णत्वद्योतकः ॥ ७ ॥

इति श्रीप्रथमाध्याये चतुर्थपादे प्रथमं सप्तसूत्रात्मकमानुमानिकाधिकरणम् ॥१॥

भाष्यप्रकाशः ।

महद्वच्च ॥७॥ अत्र भाष्यं निगदव्याख्यातमित्युपरम्यते । मायादिवादानां निराकृतिरपि शरीररूपकविन्यस्तगृहीतेरेव बोध्या ॥ ७ ॥ **इति प्रथममानुमानिकाधिकरणम् ॥ १ ॥**

रश्मिः ।

महद्वच्च ॥ ७ ॥ **निगदेति** यथा महच्छब्दो महत्तत्त्वे प्रसिद्धोपि परममहत्त्वात्परमात्मन एव मुख्य एवमितरेपि इत्याहुः । **भाष्ये । यथा महदिति** । **अधीति** अत्राधिकरणसंपूर्णत्ववाचकं किमिति चेन्नाधिकरणस्य संपूर्णत्वे कर्तुः स्वमतनिराकरणपूर्वकस्वमतस्थापनरूपार्थपूर्तिः कारणम् । संपूर्णत्वं समाप्तिः । सा च चरमवर्णध्वंसरूपा । तद्ध्वंसश्च चरमवर्णस्य कारणमात्मा 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति श्रुतेः । तथा च चरमवर्णस्य महद्वदित्यत्र तकारस्य ध्वंसस्तत्कारणभूतात्मरूपः । न तु अभावरूपः ध्वंसप्रागभावौ कारणावस्थातो नातिरिच्येते इति प्रस्थानरत्नाकर उपपादितत्वात् । ततश्च चरमवर्णध्वंस आत्मा तद्वाचकमात्मपदमध्याहार्यं पदजन्यपदार्थोपस्थितेः शाब्दबोधे कारणत्वात् । अर्थाध्याहारेप्येवम् । तथा चात्मपदं वाचकं, अभावपदं वाचकमित्यन्ये ध्वंसस्याभावत्वात् चकारध्वंसो वा चरमवर्णध्वंसः उभयथात्मपदमधिकरणसंपूर्णत्ववाचकं चकारस्तु अधिकरणसंपूर्णत्वद्योतकः । न च वाचकोस्त्विति शङ्क्यम् । वृक्षाश्चेत्यत्र केवलवृक्षशब्दात् समुच्चयाबोधाच्चकारश्रवणे तद्बोधाच्चकार एव तद्वाचको न द्योतकस्तद्वत् प्रकृते अभावात् । एवं निगदव्याख्यातम् । नन्वव्यक्तशब्दस्य योगो मायादौ पूर्वसूत्रे उक्तस्तस्य का गतिरिति चेत्तत्राहुः **मायादीति** । मायाप्रकृत्यविद्याविष्णुशिवादिपदार्थः तथा च विश्वः ।

> 'अव्यक्तः शंकरे विष्णावव्यक्तो महदादिके ।
> आत्मन्यपि स्यादव्यक्तमस्फुटेप्यभिधेयवत्' ॥

इति । एते वादाः शंकराचार्यादीनां पूर्वमुक्तास्तेषां निराकृतिः शरीररूपकविन्यस्ता रथादयस्तेषां गृहीतेः । महदादिकेऽव्यक्तपदे प्रयोक्तव्ये कृपायामव्यक्तपदमात्मनि प्रयोक्तव्येऽक्षरे । 'अव्यक्तोक्षर इत्युक्तः' इति प्रमाणात् ।

> 'महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
> पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' ॥

इति विषयः । अत्र महदव्यक्तपुरुषशब्दानां सांख्यशास्त्रप्रसिद्धानां श्रवणात् सांख्यमपि श्रौतं भवति न वेति संशये, भवतीति पूर्वपक्षं सांख्यमतं श्रौतं न भवतीति सिद्धान्तः । संगतिः पूर्वमुक्ता ॥ ७ ॥

इति प्रथमाधिकरणम् ॥ १ ॥

चमसवदविशेषात् ॥ ८ ॥ (१।४।२)

पुनः श्रुत्यन्तरेण प्रत्यवस्थितं निराकर्तुमधिकरणान्तरमारभते। ननु प्रकरणवशात् पूर्वमस्मदुक्तोऽर्थोऽन्यथा वर्णितः। यत्र प्रकरणापेक्षैव नास्ति मन्त्रे तदस्माकं मूलम्।

'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' ॥

इति। यद्यपीदं श्वेताश्वतरोपनिषदि चतुर्थाध्याये विद्यमानत्वात् पूर्वापर-

---

भाष्यप्रकाशः।

चमसवदविशेषात् ॥ ८ ॥ अधिकरणप्रयोजनमाहुः **श्रुत्यन्तरेणे**त्यादि। अत्रापि साध्यमानुमानिके श्रौतत्वाभावरूपमेव । अजामन्त्रस्थोऽजाशब्दस्तु पूर्वपक्षोत्थाने द्वारमतः संशयं तद्बीजं चानुल्लिख्य पूर्वपक्षं विषयवाक्यं चाहुः **नन्वि**त्यादि । नन्वस्य मन्त्रस्य श्वेताश्वतरोपनिषच्चतुर्थाध्याये, 'य एको वर्णो बहुधा शक्तियोगाद् वर्णाननेकान्निहितार्थो दधाति' इत्यादिमन्त्रैर्ब्रह्म प्रकृत्यैव पठितत्वाद् उपनिषदारम्भेऽपि, किं कारणं ब्रह्मेति ब्रह्मण एव प्रकृतत्वात् कथमस्य कारणानपेक्षत्वमित्याकाङ्क्षायां तदनपेक्षतामुपपादयति **यद्यपी**त्यादि। तथाच यथा प्रणवादिमन्त्राणामर्थान्तरवाचकानां प्रकृतोपयोगः 'इमं मे वरुण' इत्यादीनां च

रश्मिः '

चमसवदविशेषात् ॥ ८ ॥ अत्रापीति अपिः समुच्चये। आनुमानिकं श्रौतत्वाभाववच्छ्रुतौ शरीररूपकविन्यस्तगृहीतेस्तदग्रहणात् घटवत् । यत्र यत्रान्यगृहीतेस्तदग्रहणं तत्र तत्र तदप्रतिपाद्यत्वमिति व्याप्तिः । प्रतियोगिता हेतुतावच्छेदकसंबन्धः, विशेषणविशेष्यता च साध्यतावच्छेदकसंबन्धः इति समुच्चयः। **अत्रे**ति सूत्रे। आनुमानिकं श्रौतत्वाभाववत् चमसवदविशेषात् इति। **अत** इति । उपस्थितत्वात् । पूर्वपक्षस्यान्याभिमतत्वेन सिद्धान्तस्पर्शित्वात् संशयोन्नायकत्वं तत एव तद्बीजोन्नायकत्वम्। अतो विषयवाक्यं पूर्वमनुक्त्वा पूर्वपक्षो विषयवाक्यात्पूर्वमुपात्तः। **भाष्ये। प्रत्यवस्थित**मिति सांख्यवादिनम्। **प्रकरणे**ति 'वदतीति चेन्न प्राज्ञो हि प्रकरणात्' । इति सूत्रे। **अजा**मिति न जायते इत्यजा तां मूलप्रकृतिरविकृतिरित्यभ्युपगमात्। ननु रूढिरत्र छागस्य स्त्रियां प्रजापदस्य रूढिर्योगमपहरतीति चेन्न विद्याप्रकरणात्। लोहितं रजो रञ्जनात्मकत्वात्, शुक्लं सत्त्वं प्रकाशात्मकत्वात्, कृष्णं तमः आवरणात्मकत्वात्, तेषां साम्यावस्थाऽवयवधर्मैर्व्यपदिश्यते। लोहितशुक्लकृष्णेति सरूपास्त्रैगुण्याः, अजोऽसङ्गः पुरुषः, जुषमाणः सेवमानः। अनुशेते तामेव। प्रकृतिमध्यासेनात्मत्वेनोपगम्य सुखी दुःखी मूढोहमित्यविवेकतया संसरति। अन्यः पुनरजः पुरुष उत्पन्नविवेकज्ञानो विरक्तो जहात्येनां प्रकृतिं भुक्तभोगां कृतभोगापवर्गां परित्यजति मुच्यत इत्यर्थः। **प्रकृते**। **एको वर्ण** इति प्रणवः। वर्णान् अकारेकारमाकारादीन् घटः पटः कुड्यं कुसुलं महाविष्णुः गोरोचनकमित्येवमनेकान् वर्णान्। बहुधा शक्तिलक्षणा लक्षितलक्षणा योगो रूढिर्योगरूढिरिति नामभिः बहुधा शक्तियोगान्निहिता अर्था शब्देषु येन । **ब्रह्मप्रे**ति एको वर्णः प्रणव इति ब्रह्म प्रकृत्य। **तदनपे**ति प्रकरणानपेक्षताम्। **यद्यपीत्यादी**ति। **भाष्ये। पूर्वापरसंबद्ध**मिति ब्रह्मज्ञानम् । ब्रह्मविद्येति यावत् । **प्रणवे**ति पूर्वकाण्डे हरिः ॐ इत्यस्य पूर्वापरसंबद्धस्यार्थस्याग्रे हरिः ओमित्युक्त्वोक्ते ग्रन्थे न नियमः तदीयोपक्रमाद्यधीनत्वात्। तथा च

रश्मिः ।

प्रणवः तदादिश्च प्रणवादी प्रणवाद्योर्मन्त्राणां नायं नियम इत्यर्थः । यद्वा हरिः ॐ इति प्रणवमन्त्रो विशेषणविशिष्टः आदिशब्देन 'चत्वारि शृङ्गा त्रयो अस्य पादा' इति मन्त्रः । अत्र महाभाष्ये व्याकरण-परता पूर्वापरसंबद्धोर्थः न च नायमर्थः । 'यावानर्थः' इति गीतायाः । सांख्यमतमसङ्गपुरुषः । अन्य-न्मतम् । सिद्धान्ते ब्रह्मविद्या तद्वाचकस्य अन्यन्मतं मतान्तरमिति प्रकृते सांख्य उपयोगः । प्रकृते तदेवाहुः **तथा चेति** । अर्थान्तरं ब्रह्मविद्या । प्रणवादिमन्त्राणामिति बहुवचनघटितत्वाद्भाष्यस्य मन्त्रानाहुः 'इमं म' इति संहिताद्वितीयाष्टके प्रथमेध्यायेऽन्तिमो मन्त्रः इत्यादीनामित्यादिपदेन विश्वचर्षणे 'मित्रस्य चर्षणी धृतः श्रवः' इति मन्त्रः संहितातृतीयाष्टकचतुर्थेध्यायेन्तेस्ति । तथा 'आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च, हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्' इति मन्त्रसंहितायां तत्रैव तृतीयाष्टकचतुर्थेध्यायेस्ति सूर्यादीत्यादिना वरुणः । तथा हि संध्यायां इमं मे वरुण इत्यादीनामित्यत्र संहितापाठक्रमः । सूर्यादीनामित्यत्रार्थक्रमः । सूर्योपस्थानमन्तरा सायंकालाभावेन वरुणानुपस्थितेः । अतः सूर्याद्युपस्थान इत्युक्तम् । अतः प्रथमं सूर्योपस्थानमन्त्रौ व्याख्यायेते । विश्वेषां सर्वेषां चर्षणे प्रजनने ऐष्ये च मित्रस्य पथश्चर्षण्यो हि परिभ्रमणशक्तयः तासां धृतः धारकस्य मित्रस्य इनस्य मेद्यति ध्यायति ञिमिदा स्नेहने दि. प. से. अमिचिमिदिशसिभ्यः इति क्रन् । श्रूयते इति श्रवो यशः तेन देवः दीव्यति हलश्चेति घः देवः यशसा देवस्य सानसिं भजनीयं सम्यक् । षण् संभक्तौ भ्वा. प. से. सानसिर्वर्ण-सीत्यादिना निपातितोऽसिजन्तः । सत्यमिति यथार्थम् । चित्रमाश्चर्यकरं श्रवः श्रवणं यस्य अतिशयेन तथाभूतं चित्रश्रवस्तमम् । मित्रो जनान्यातयतीति अन्तस्तद्धर्माधिकरणोक्तरूपस्य पूर्वोक्तस्य मित्रस्तं मेद्यति स्निह्यतीति मित्रः, क्रन्, सूर्यः । जनान् लोकान् यातयति जना यतन्ते'भवाय नाशाय च कर्म कर्तुम् इति पञ्चमस्कन्धात्प्रेरयतीति यातयति यती प्रयत्ने भ्वा. प. से. हेतुमण्ण्यन्ताल्लट्, कीदृशो मित्र इत्याह प्रजानन् तत्तज्जीवकृतधर्माधर्मज्ञानं प्रमिमाणः पुनः पुनर्भिन्नपदं स्नेहमुख्यतया भक्तिप्रतिपादनाय । मित्रो भगवान् 'ध्येयः सदा सवितृमण्डलमध्यवर्ती' अत्रापि मित्रपदस्य योगरूढिः सर्वपदवाच्यत्वात् मित्रः सूर्यो वा पृथिवीमुत 'उतः प्रश्ने वितर्के स्यात्' इति विश्वात् । दाधारेति प्रश्नो वितर्को वा 'सूर्य आत्मा जगतस्तस्थुषश्च' इति श्रुतेः जङ्गमस्य स्थावरस्य च मित्रः वृष्टिद्वारा अन्नं गाश्च जनयन् दाधार धारयति । प्रश्नपक्ष उत्तरमाह मित्रः कृष्टीरनिमिषाभिचष्टे अभितोवतीर्यापि चष्टे वक्ति श्रीभागवत-द्वारापि सत्याय हव्यं घृतवद्विधेम इति । सत्याय यथार्थाय हव्यं दानादनयोः अदनयोग्यं घृतयुक्तं विधेम । विध विधाने तु. प. से. तस्य विधानं कुर्याम इति दानमपीन्द्रियाणां संभवति । इन्द्रियाणि जुहोतीति श्रुतेः । यथाग्नये घृतदानं तद्वदिन्द्रियदानं निरोधलक्षणग्रन्थोक्तदिशा विधेम प्रयच्छेम । इत्यन्यः 'प्रसमित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन' इति हे मित्र कृष्णस्य मुख्या-धिकारिन् स्नेहकर्त आदित्य स मित्रो भगवान् 'ध्येयः सदा सवितृमण्डलमध्यवर्ती' मर्तो यलोपः । मर्त्यो मनुष्यः वसुदेवद्वारा प्रास्तु स्वयं भगवान् भवतु स क इत्याह । बहुषु साकाररूपेष्वित्याह यो व्रतेन स्वानंशान् प्रशिक्षति यस्ते तुभ्यं शिक्षति व्रतेनेति 'न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्ततो न दूरात्' । यत् त्वोतः त्वयाधिकारिणा सूर्येणोतः शिक्षितः उङ् शब्दे भ्वा. आ. अ. 'कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह' इति वाक्यात् । न हन्यते न जीयते नाभिभूयते केनापि न एनं त्वया शब्दितं अंहोतीतं समीपात् अश्नोति व्याप्नोति । अशूङ् व्याप्तौ उपग्रहव्यत्ययः स्वा. आ. वे. न दूरादपि यत् अहः निषिद्धदेवपूजादिकर्तृ इति योगः । निषिद्धदेवपूजाकर्ता पुरुषोपि

रश्मिः।

भवत्यतः समुदायशक्तिरंहसीति रूढिः योगरूढं पदं यच्चिद्विते विशो यथेतीमं मे वरुण इति मन्त्राग्रे व्याख्येयम्। अत्राप्यास्याम वरुणप्रियासः इत्युपसंहारादुपक्रमस्य तु विचारात्तस्य यज्ञ ऋध्यते यस्य हविरतिरिच्यते इत्यस्य यज्ञवृद्ध्यर्थत्वात्॥ प्रकरणं यज्ञवृद्धेर्वरुणप्रीतेश्च तदुभयनिरपेक्षेण सूर्योपस्थाने मित्रस्येति मन्त्रः। न च वरुणोपस्थानायास्त्विवति शङ्क्यम्। ततः सूर्योपस्थानं तत्र मन्त्राः मित्रस्येत्यादयः इति संध्याव्याख्यानात्। तत इत्यस्य गायत्रीजपानन्तरमित्यर्थः। आसत्येनेति मन्त्रो व्याख्यायते। सत्येन सह वर्तमानः सत्येन व्यावहारिकेणेत्यन्ये रजसान्तरिक्षलोकेन लोका रजांस्युच्यन्ते इति यास्कोक्तेः। सविता सूर्योक्षरो वा अमृतमानन्दं देवं वा मर्त्यं मनुष्यं कृष्णं वा आसमन्तात् नितरां वेशयन् मित्रत्वादधिकारित्वादक्षरस्य लोकत्वात् स्वस्थाने मनुष्यान् स्वक्रीडायां कृष्णं महाराजत्वाद्वेशयन् इति भक्तिमार्गमर्यादाऽन्यत्र तु कर्ता कारयिता हरिरिति हिरण्ययेन निरोधस्कन्धोक्तेन रथेन देवः क्रीडयिता कृष्णः हिरण्ययेनेत्यत्र ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसीति सूत्रेण मयटो मकारलोपः। यस्येति लोपे प्रत्ययस्वरः वर्णलोपः मयटो मकारस्य हलो लोपः। याति प्रापयति निरोधं दशरसः। आसमन्तात् भुवना जसोर्डा भुवनानि विशेषेण पश्यन्। अत्रापि प्रकरणं पूर्वोक्तम्। उद्वयमित्यादिमन्त्रव्याख्या उत् वयं यद्वा उ आश्चर्ये द्वयं कृष्णरामरूपं वेदार्थो रामकृष्णयोरिति कृष्णोपनिषदः। एकं द्वयमित्याश्चर्यम्। तमसः परि परितो वर्तमानं अजुष्टं द्वयं तमः सेवमानं तमसः पार इत्यन्ये। ज्योतिरुत्तरं पश्यन्तः वयं श्रुतयः। उत्तरं वितर्कतरं यथा भवति तथा वेदाः पश्यन्तो वा। उद्वयं तमसस्परि पश्यतो ज्योतिरुत्तरमिति व्याकृतम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्। देवत्रा देवेषु 'देवमनुष्यपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' इति सप्तम्यर्थे त्राप्रत्ययः। देवेषु देवं इह वृन्दावनादौ क्रीडन्तं सूर्ये अन्तर्वर्तमानं सूर्यं द्युमणिं कृष्णं सूर्यं वा उत्तमं ज्योतिस्तदेवागन्म 'छन्दसि लुङ्लङ्लिटः' इति प्रार्थनायां लिट्, बहुलं छन्दसीति शपो लुक् म्वोश्चेति मकारस्य धातोर्नकारः पादादित्वान्निघातोर्नेति सन्ध्याटीका। संहिताचतुर्थाष्टकप्रथमाध्यायस्थेयं श्रुतिः। अत्र छन्दसि लुङ्लङ्लिट इति सर्वकाले लङ् इति पाठः। तथाहि धात्वर्थानां संबन्धे सर्वकालेषु एते वा स्युरिति वृत्त्यन्तरं देवो देवेभिरागमदिति लुङः लोडर्थे। इदं तेभ्यो करं नमः आग्निमथ होतारमवृणीतायं यजमान इति इमे उदाहरणे लङः। अद्याममार इति लङर्थे लिटः। अद्य म्रियत इत्यर्थः। तथा चागन्मेत्यत्र लङुपलब्ध्या लिटोनुपलब्धेः तथा चागन्मेति श्रुत्याज्ञाविधौ लङुत्तमपुरुषबहुवचनं सर्वकालेषु न तु भूतानद्यतनकाल एव। प्रकरणमत्र युञ्जानं प्रथमं मन इत्युपक्रमेण शं नो भवतु वाजे वाजे इत्युपसंहारेणोन्नेयम्। 'उदुत्यं जातवेदसं देवं वहन्ति केतवः' दृशे विश्वाय सूर्यम्। 'चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षꣳसूर्य आत्मा जगतस्तस्थुषश्च' इति मन्त्रः। प्रथमाष्टकचतुर्थाध्यायस्थः। उदित्यमिति टीकायां पाठः। उत् उ, इ वा, त्यं प्रसिद्धं जातं वेदो धनं यस्मात् जातवेदाः अग्निस्तं देवं केतवोऽश्वा नहन्ति बध्नन्ति वहन्ति प्रापयन्ति वा। जातवेदा इत्यत्र 'गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वं च' इति उणादिसूत्रेणाऽसिः पूर्वपदप्रकृतिस्वरश्च। केतव इति 'केतुर्केतौ पताकायां ग्रहोत्पातारिलक्ष्मसु' इति विश्वः। अश्वाः केतव इति निरुक्तम्। योगरूढं पदं विश्वाय भुवनाय सामर्थ्योदये तस्य दृशे द्रष्टुं सूर्यम्, सूर्यजातवेदसोरभेदः। 'षष्ठ्यर्थे चतुर्थीति वाच्यम्' इति वार्तिकेन षष्ठ्यर्थे चतुर्थी या खर्वेण पिबति तस्मै खर्व इत्यत्र यथा। विश्वायेत्यत्र न ङे स्मै। विश्वस्येश्वरसामर्थ्य-

रश्मिः ।

नामत्वात् ॐमित्येकाक्षरं ब्रह्म सर्वं तस्योपव्याख्यानमिति उपपदवाच्यसामर्थ्यस्य व्याख्यानम् । उप 'सामर्थ्ये' इति विश्वात् । यद्वा सर्वमिति पदादिसर्वमित्यर्थात् । न उप इत्यस्य सामर्थ्यमात्रवाचकत्वद्योतकत्वेऽपि तु सामर्थ्यादेर्वाचकत्वद्योतकत्वे तथा च विश्वः ।

'उप सामर्थ्यदाक्षिण्यदोषाख्यानात्ययेषु च ।
आश्चर्यकरणे दाने व्याप्तावारम्भपूजयोः' ॥ इति ।
'नाभिः प्राण्यङ्गके क्षेत्रे चक्रान्ते चक्रवर्तिनि ।
नाभिः प्रधाने कस्तूरीमदेपि क्वचिदीरितः' ॥

इति च । दृशे इति 'दृशे विख्ये' इति तुमुनर्थे निपातितः । चित्रमिति देवानामिन्द्रादीनां कृष्णोपनिषदुक्तानां तं होचुः सुराः सर्वे इत्येषां देवानां वाऽनीकं सकलदेवसमूहात्मकं वा चित्रमाश्चर्यकरं उदगात् चक्षुर्मित्रस्य वरुणस्याग्नेः द्यावापृथिवी अन्तरिक्षं आप्राः तेजसा क्रीडया चापूरयत् । प्रा पूरणे लङ् पुरुषव्यत्ययः त्वमाप्रा इति श्रुतिवचनं वा । अदादिरयमनिट् परस्मैपदी च । जगतो जङ्गमस्य तस्थुषः स्थावरस्यात्मा व्यापकः । अत्राप्याददे ग्रावास्त्वध्वरकृदित्युपक्रमः त्वमग्ने विचर्षणे इत्युपसंहारः । प्रकरणमुन्नेयम् । 'तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतम् । जीवेम शरदः शतम् । नन्दाम शरदः शतम् । मोदाम शरदः शतम् । भवाम शरदः शतम् । शृणवाम शरदः शतम् । प्रब्रवाम शरदः शतमजीता स्याम शरदः शतम् । ज्योक् च सूर्यं दृशे' 'य उदगान्महतोर्णवात् विभ्राजमानः सरिरस्य मध्यात् स मा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु' इति आरणश्रुतिनिरूपणम् । चक्षुः प्रकाशकम् । देवेभ्यो हितं निर्मलं पुरस्ताच्छुक्रं शोककर्तारम् ।

'उत्प्रकाशे वियोगे च प्राबल्यस्वास्थ्यशक्तिषु ।
प्राधान्ये बन्धने भावे मोक्षे लाभोर्ध्वकर्मणि' ॥

इति विश्वः । प्रकाशाय चरत् गच्छत् अडभावश्छान्दसः अभक्षयद्वा । अतश्चक्षुरादिभक्षकभक्षकत्वात् पश्येम इत्यादि स्पष्टम् । ज्योक् चेति ज्योक् बहुकालं तत् ब्रह्म वर्णलोपः सूर्यं सूर्यान्तस्थं दृशे द्रष्टुम् । मा माम् । 'शन्नो वातः पवतं मातरिश्वा शन्नस्तपतु सूर्यः' इत्युपक्रमकः ब्रह्म प्रावादिष्म तन्नो मा हासीद्युपसंहाराद्ब्रह्मप्रकरणम् । सायं वरुणोपस्थानं 'इमं मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके 'तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंसमान आयुः प्रमोषीः' इति । इमं मे मम हे वरुण हवं आह्वानं श्रुधि शृणु, अद्य मां मृडय सुखय त्वामवः रक्षणं आत्मन इच्छतीत्यवस्युः आचके आह्वये, कै शब्दे छन्दसि लिडिति लिड्व्यत्ययेनात्मनेपदम् । तत्त्वेति । तत् सूर्यान्तस्थः त्वा त्वां वरुणं यामि याति कीदृश इत्याह ब्रह्मणा वेदेन वन्दमानः स्तूयमानः यकारलोपः, तत् त्वमाशास्ते आशास्से यजमानो देवपूजादिकर्ताशास्ते हविर्भिस्तत् । हे वरुण अहेडमानः अनादरमकुर्वन् इह मत्कर्तृकां स्तुतिं बोधि बुद्ध्यस्व अबोधि वा । स्तुतिर्मत्कर्तृका त्वया । कीदृग्वरुण इत्याह उरुर्महान् शंस स्तुतिर्यस्य तादृक् नोऽस्माकं उत्तमश्लोकवार्तायातमानामायुर्मा प्रमोषीः न्यूनं मा कार्षीः । उपसंहारमन्त्रोयम् । उपक्रममन्त्रस्तु वायव्यं श्वेतमालभेत भूतिकाम इति ब्रह्मप्रकरणम् । वायुमुपक्रम्य त्वमेव प्रत्यक्षं ब्रह्मासीति श्रुतेः । अग्ने यच्चिद्धिते विशो यथेति मन्त्रः तृतीयाष्टकचतुर्थाध्यायान्तेस्ति । विश्वचर्षणे मित्रस्य चर्षणी धृतश्रवो देवस्येत्यस्याग्रेतनो मन्त्रः । यच् चिद्धिते विशो यथा प्र देव वरुण व्रतं मिनीमसि यद्यविद्यवि

संबन्धमेव वक्तव्यम्। तत्र, ब्रह्मवादिनो वदन्तीत्युपक्रम्य ब्रह्मविद्यैव निरूपिता। तथापि पूर्वकाण्डे प्रणवादिमन्त्रणां नायं नियम इति प्रकृतेऽपि मतान्तरवाचकस्यैव प्रकृतोपयोग इति शङ्का। 'ते ध्यानयोगानुगता अपश्यन् देवा-

भाष्यप्रकाशः।

सूर्याद्युपस्थाने, तथास्यापि मन्त्रस्य कपिलमतसिद्धार्थवाचकस्यैव ब्रह्मविद्योपयोग इत्येष मन्त्रः स्वार्थनिरपेक्ष एवेति शङ्केत्यर्थः। किंचात्र यद्येक एव मन्त्र एतादृशोऽन्ये त्वन्यादृशा इति स्यात् तदा बहूनामनुग्रहो न्याय्य इत्यस्यैवार्थोऽन्यथा कल्प्येतापि। यथा कठवल्लीमन्त्रस्य। इह तु मन्त्रणां बहूनां तादृशत्वात् तदपि न वक्तुं शक्यमित्याह ते ध्यानेत्यादि।

रश्मिः।

यत् किं चेदं वरुण दैव्ये जनेभिद्रोहं मनुष्याश्चरामसि अचित्ती यत्तव धर्मायुयोपिम मा नः तस्मादेनसो देव रीरिषः कितवासो यद्रिहि पर्णदीवि यद्वा घासत्यमुतन्न विद्म। सर्वा ता विष्यशिथिरे यदेवाथाते स्याम वरुणप्रियास इति। हे देव वरुण ते व्रतं त्वदीयपरिचर्यारूपं द्यविद्यवि दिवसे दिवसे प्रमिनिमसि मिनीमः। मीञ् हिंसायां क्र्या. उ. अ. मीनातेर्निगमेति ह्रस्वः। यच्चिद्धि, चिद्धीति वा। यद्येवं तथापि विशो यथा, प्रजा इव, वयं तथा च सापराधाः अपि प्रजाः स्वासिना यथानुगृह्यन्ते तथा वयमप्यनुग्राह्या इति भावः। यत्किंचेति। किं च हे वरुण दैव्ये देवसमूहरूपे जने यत्। किं च अभिद्रोहमपकारजातं वयं चरामसि चरामो मनुष्याः किं चाचित्ती अचित्या अज्ञानेन तव त्वदीयं यद्धर्मधारकं कर्म आयुयोपिम युप विमोहे दि. प. से. विमोहितवन्त हे देव तस्मादेनसः पापान्नोस्मान् मा रीरिषः मा हिंसीः रिष् हिंसायां भ्वा. प. से.। कितवास इति कितवास्तीत्याचक्षाणाः कितवा दूतकृतः कितवेत्यनुकरणादाख्यातण्यन्तं पचाद्यच् पृषोदरादित्वात् किमो मलोपः दिवीति ते वरुणस्य दीविनीति ताच्छील्ये णिनौ प्राप्ते देवनमिव देवनं द्यौः तस्यां दिवि दिवेर्डिविः अन्येषामपीति दीर्घः। कितवासस्ते मित्रीभूतस्य दिवि नरि रिपुः रप व्यक्तवाचि भ्वा. प. से. यन् नाम देवपूजादिकर्तृ व्यक्तमूचुरिति यत् वाक् ह्य सत्यमिति छेदः यस्य देवपूजादिकर्तुः वाक् सत्यं ह्य जहाति उत वितर्के यत् यस्य न, न जहाति तन्न विद्म। यद्वा घा सत्यमिति छेदः ऋचि तु नुव मक्षु तङ् कुत्रो रूष्माणामिति संहितायां दीर्घः सर्वा सर्वाणि ता तानि विष्य विशेषेण ष्य नाशय षोन्तकर्मणि दि. प. अ. विपूर्वाल्लोटि मध्यमैकवचनम्। शिथिरेव शिथिलानीव। शिथिरेत्यत्र शेश्छन्दसि बहुलमिति शिलोपे 'न लोपः प्रातिपदिकान्तस्य' इति न लोपः। हे वरुण अथ अनन्तरं तव प्रियासः प्रियाः। आज्जसेरसुगिति[1] जसोऽसुगागमः। स्याम भवेम। अयमुपसंहारमन्त्रः। वि वा एतस्य यज्ञ ऋद्ध्यते यस्य हविरतिरिच्यते इत्युपक्रमः। प्रकरणमुन्नेयम्। न चात्र सूर्योपस्थानं न वरुणोपस्थानमिति शङ्क्यम्। इमं मे वरुणेत्युपक्रमात्। वरुणप्रियास इत्युपसंहाराच्च। न च सूर्योपस्थानपरग्रन्थविरोध इति वाच्यम्। व्याख्याने सूर्यप्राधान्येन तत्परत्वात्। हेतुद्वयेनार्थद्वयव्यवस्था। प्रकृतमधुनानुसर्यते। **एतादृश** इति सांख्यप्रतिपादकः 'त्यदादिषु दृशोनालोचने कञ्च' इति कन्। **अस्यैवेति** अजामेकामित्यस्यैव। **कठवल्लीमन्त्रस्येति** 'इन्द्रियेभ्यः परा ह्यर्थाः, इत्या दिकं सकलमतसाधारणम्। अतो महतः परमव्यक्तमिति मन्त्रस्य। **मन्त्राणामिति** वक्ष्यमाणानां मन्त्राणाम्। **तादृशेति** कर्मकर्तरि प्रत्ययः रूढ्यनुगुणत्वादिति मनोरमायां प्रत्ययस्तु,

१. आज्जसेरसुगिति वा पाठः।

त्मशक्तिं स्वगुणैर्निगूढाम्' इति च । तथा 'ज्ञाज्ञौ द्वावजावीशानीशौ' अजा ह्येका भोक्तृभोग्यार्थयुक्ता । अग्रे च यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः । 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्' इत्यादि च । वाक्यानि कपिलतन्मतवाचकानि वर्तन्त इति सांख्यमतमपि वैदिकमेवेत्येवं प्राप्ते, उच्यते—**चमसवदविशेषात्** ।

'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपम् ।
तस्यासते ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदाना' ॥

भाष्यप्रकाशः ।

तथाचात्र स्वगुणैर्निगूढत्वम् । अग्रिमे मुक्तामुक्तात्मसंघैर्भोक्तृभिर्भोग्यार्थैर्मन्त्रादिकार्यैर्युक्ता अनादिः प्रकृतिः । तदग्रिमे चाधिष्ठातृत्वम् । तदग्रिमे च कपिलस्य नाम तद्धर्माश्च प्रत्यभिज्ञायन्ते । एतावान् परं विशेषो यत् कापिलैः प्रकृतिः स्वतन्त्रोच्यते । अत्र तु परमेश्वरशक्तित्वेनेति । न तावता तस्या अजात्वहानिः । शक्तेर्नित्यत्वात् । अतः शक्तित्वमात्रेण विशेषेण कपिलमतप्रत्यभिज्ञापकनानापदानादरणमनुचितमिति सांख्यमतस्यानुमानिकत्वोक्तिः प्रधानस्याशब्दत्वोक्तिश्चानुपपन्नेति प्राप्ते इत्यर्थः । सूत्रं पठित्वा सिद्धान्तं व्याकुर्वन्ति उच्यते इत्यादि । एकपदमिदं सूत्रम् । चमसेन तुल्योऽविशेषश्चमसवदविशेषस्तस्मात् । स्यात् सांख्यमतमत्र, यदि तस्याः सृष्टिकरणे स्वातन्त्र्योपपादको रजःसत्त्वतमःसाम्यावस्थात्मकः स्वरूपस्य विशेषो

रश्मिः ।

त्यदादिषु दृशोनालोचने कञ्च' इति सूत्रेण । बहवो मन्त्राः सांख्यप्रतिपादकास्ते । दृश्यन्ते स्वयमेवेति तादृशाः सांख्यप्रतिपादकत्वेन दृश्यन्त इति फलितम् । तथा च तादृशत्वात् सांख्यप्रतिपादकत्वात् । तदपीत्येकमन्त्रान्यथार्थकल्पनम् । तन्मताभिज्ञापकपदानि स्फोटयन्ति **तथा चेति** । शक्तिपदं प्रकृतिव्यतिरिक्तेपि शक्तमित्यज्ञापकम् । **स्वगुणैर्निगूढत्वं** तु ज्ञापकमिति तदुक्तं **मुक्तामुक्तेति** । **ज्ञाऽज्ञावि**त्यनेनाविवक्षितैकत्वकेन । **अजेति** स्पष्टम् । मात्राः शब्दादयः आदिना महदादियुक्ताः । आत्मपदार्थमाहु**रनादिरि**ति । **अधीति** । योनिः समवायिकारणं प्रकृतिस्तदधिष्ठातृत्वम् । असङ्गस्य पुरुषस्याभिमानेन । मायावादेऽविद्यावादे च युक्तयस्तत्त्वानुसंधाने सन्ति । **तद्धर्मा** इति ज्ञानैर्धारणकर्मत्वं जायमानत्वं दर्शनविषयत्वं च । त एते सांख्यपदार्था इति प्रत्यभिज्ञाविषयीक्रियन्ते सांख्यमतमपि वैदिकमेवेति भाष्ये एवकारव्यावर्त्यं सांख्यमतस्यानुमानिकत्वप्रधानस्याशब्दत्वं चेत्याहुः **एतावानिति विशेष** इति सांख्यमताद्विशेषः । **स्वतन्त्रेति** 'प्रकृतिपुरुषयोरन्यत्सर्वमनित्यम्' इति सूत्रवृत्तौ वदद्भिरुच्यते 'असङ्गोयं पुरुषः इति' 'प्रधानाजगज्जायते इति' च इतिशब्दान्तं सूत्रद्वयम् । (स्वातन्त्र्यं कर्तृत्वं 'प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः' इति) **परमेति** हे देव । आत्मशक्तिमिति श्रुत्यर्थात्परमेश्वरस्य शक्तित्वेन । **आनुमानिकेति** । पूर्वाधिकरणपूर्वसूत्रे दूष्यत्वेनानुपपन्ना तथा चानुमानेन प्रकृत्या संबद्ध्यत इति आनुमानिकमित्युक्ता न व्युत्पत्तिः किं तु अनुमानेन व्याप्त्या परामर्शेन वा जयति पराभवतीति आनुमानिकं 'तेन दीव्यति खनति जयति जितम्' इत्यनेन ठक् । वैशेषिकादि इति भावः । **अशब्देति** । प्रधानस्याव्यक्तशब्दाप्रतिपाद्यत्वोक्तिः । अस्वपदविग्रहोऽविग्रहो वा नित्यसमासस्तदर्थमाहुः **तुल्य** इति । 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिः ।

इति मन्त्रे यथा न विशेषो विधातुं शक्यते। न हि कर्मविशेषं कल्पयित्वा तत्रार्वाग्बिलचमसं कल्पयित्वा तत्र यशोरूपं सोमं होतारो मन्त्रेण भक्षयेयुरिति कल्पयितुं शक्यते। तथा प्रकृते रोहितशुक्लकृष्णशब्देन रजःसत्त्वतमांसि कल्पयित्वा न तद्वशेन सर्वमेव मतं शक्यते कल्पयितुम्। कपिलऋषिवाक्यमप्यनित्यसंयोगभयान्नित्यऋषेरेवानुवादकम्। तस्मान्न मन्त्रमात्रेण प्रकरणश्रुत्यन्तरनिरपेक्षेण विशेषः कल्पयितुं शक्यः॥ ८॥

भाष्यप्रकाशः।

विधातुं शक्येत। स च न शक्यते। शक्तित्वेन शक्तिमदधीनोदयतया तत्सापेक्षतयैव सिद्धत्वात् नच स्वगुणैर्निगूढत्वं तद्गमकम्। तत्र स्वपदेन ब्रह्मण एव ग्रहीतुं शक्यतया तद्गुणानामेव ग्राह्यत्वात्। उत्तरार्धे, 'यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः' इत्यनेनापि तस्यैव परामृष्टत्वाच्च। नापि भोक्तृभोग्यार्थयोगस्तथा। जन्यायां शक्तावपि तथात्वस्य पुराणसिद्धत्वान्नापि, योनिं योनिमिति तद्गमकम्। वीप्साया बहुत्वस्य च बाधकत्वात्। नाप्यंशभेदात् समाधिः। तस्यापि शक्तिसाधारणत्वात्। अतश्चमसवाक्यवदत्राप्युक्तरीत्या कल्प्यमानस्य विशेषस्याभावान्न सांख्यमतसिद्धिः। कपिलवाक्यादसिद्धिस्तु भाष्य एवोपपादितेति पूर्वाधिकरणोक्तमक्षुण्णमित्यर्थः॥ ८॥

रश्मिः।

तेन चमसेन तुल्यश्चमसवद्वर्ततेऽविशेष इति क्रिया। **तत्सापेक्षेति** शक्तिमदात्मसापेक्षतया। घटवद्भूतलमित्यादेः प्रयोगस्य भूतलादिज्ञानवत् संबन्धित्वात्। यद्यपि घटज्ञानवत् संबन्धित्वमपि प्रयोगस्य तथापि प्रकृते नोपयोगः। **तद्गमकमिति** अनादिप्रकृतिगमकम्। प्रकरणादाहुः। **तत्रेति** प्रकरणं श्वेताश्वतरे ॐ ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म कुतः स्म जाता जीवामेत्युपक्रमात्स्वशब्दस्यात्मात्मीयज्ञातिधनवाचकत्वाच्च ब्रह्मणः। स्वशब्देन प्रकृतिसंग्रहाभावे प्रमाणान्तरमाहुः **उत्तरेति**। **निखिलानीति** प्रकृतिरपि संगृहीता। अधितिष्ठति स्वगुणैः। **तस्येति** ब्रह्मणः। **तथेति** तद्गमकत्वेन। **पुराणेति** तृतीयस्कन्धपञ्चमाध्याये।

'त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः।
त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः'॥

इति पुराणसिद्धत्वात्। किं च 'ततो वयं सत्प्रमुखा यदर्थे बभूविम' इति पुराणम्। वयं सात्त्विकाहंकारप्रमुखाः। यदर्थे भगवतः कार्यार्थे। **बहुत्वस्येति**। **योनीरित्यत्र**। **अंशेति** प्रकृत्यंशभेदाद् वीप्साबहुत्वयोः समाधिः। **शक्तीति** जन्यशक्तिसाधारणत्वात्। **अत इति** कपिलवाक्यातिरिक्तवाक्यानां प्रकृत्यगमकत्वात्। **विशेषस्येति**। रोहितशुक्लकृष्णशब्दानां रजःसत्त्वतमोवाचकत्वरूपस्य। **कपिलेति**। 'ऋषिं प्रसूतं कपिलम्' इति कपिलस्य वाक्यम्। प्रतिपाद्यप्रतिपादकभावसंबन्धे षष्ठी। अत्राप्यानुमानिको न वैदिकश्चमसवदविशेषात्। यन्नैवं तन्नैवं 'यतो वा इमानि' इत्युक्तजगज्जन्मादिकर्तृत्वादिवदित्यनुमानमपि। **भाष्ये। न विशेष** इति। ननु कं प्रत्याक्षेप इति चेच्छृणु—चम्यते भक्ष्यते सोमोस्मिन् पात्रविशेषे इति चमसः सोमपानपात्रं स्यात् अधिकरणे घञ्, वृद्धिर्न, छन्दसि विकल्पात् सोयं पूर्वतन्त्रे तृतीयस्य पञ्चमपादे ज्योतिष्टोमे मैत्रुहोतुश्चमसः प्रब्रह्मणः प्रोद्गातृणां प्रयजमानस्य प्रयन्तु सदस्यानामित्युक्तः। एवं च जिज्ञासाधिकरणोक्तं

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ ९ ॥

ननु चमसमन्त्रे अर्वाग्बिल इति मन्त्रव्याख्यानमस्ति । शिरश्चमसः प्राणा वै यशः प्राणा वा ऋषय इति । नात्र तथा व्याख्यानमस्तीतीमां शङ्कां

भाष्यप्रकाशः ।

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ ९ ॥ सूत्रमवतारयन्तो व्याकुर्वन्ति नन्वित्यादि । इतीमामिति इति हेतोश्चमसदृष्टान्तस्य वक्तुमशक्यत्वादजाशब्दे यौगिकार्थमादृत्याध्यात्मप्रकरणासंबद्धत्वाद्रूढार्थं च विहायात्र सांख्यसिद्धा प्रकृतिरेवाङ्गीकार्येतीमामित्यर्थः ।

रश्मिः ।

तस्माद्यत्रापि विध्यश्रवणं तत्रापि अर्वाग्बिलश्चमसः ऊर्ध्वबुध्नोभवदिति विधिं परिकल्प्य तत्रत्यानां तच्छेषत्वं परिकल्प्य कर्मविशेषं प्रब्रह्मण एत्वित्युक्तब्रह्मत्वार्थं कल्पयित्वा ब्रह्मिष्ठो ब्रह्मा तं दर्शपूर्णमासयोर्वृणीत इति वाक्यात् । तथा च स्यादेतत् अथातो ब्रह्मजिज्ञासेत्यादि जिज्ञासाधिकरणभाष्योक्तमानवं प्रत्याक्षेपः सिद्धः । एवं च विशेषो ब्रह्मत्वार्थं धर्मविशेषरूपः । एतदेवाहुर्नहीति । **तत्रार्वागिति** विशेषणार्थः स्पष्टः । सोमे यशोरूपव्यापकत्वं तु श्रुतिप्रामाण्यात्, विश्वरूपत्वं तु सर्वस्य सर्वात्मकत्वात् । वागष्टमीत्यस्यार्थमाहुः **मन्त्रेणे**ति । वागष्टमी ऋषिवत्तीरे निकटे कर्मविशेषस्येत्यष्टमीत्वं ब्रह्मणा वेदेन संविदाना संबध्नातीति मन्त्रार्थः । अत्र कर्मविशेषे चमसो ब्रह्मणः प्रैत्वित्यत्रोक्तचमसपदव्युत्पत्त्या सोमभक्षणं प्राप्तं तदाहुः **भक्षयेयु**रिति नान्यं क्रियापदमत्र । नित्यऋषेरिति आह्वुणस्तु न । छन्दोवदग्निभाष्यमिति विकल्पात् । **अन्विति** । सिद्धस्य कथनमनुवादइति कपिलपदार्थः सिद्धः । **विशेष** इति ब्रह्मत्वार्थं धर्मविशेषः ॥ ८ ॥

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ ९ ॥ नन्वित्यादीति अयं मन्त्रो बृहदारण्यके शिशुब्राह्मणेस्ति । **व्याख्यान**मिति श्रुतिस्तु अर्वाग्बिलश्चमसः ऊर्ध्वबुध्न इतीदं तच्छिर एष अर्वाग्बिलश्चमसः ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपमिति । प्राणा वै यशो विश्वरूपप्राणा नो तदाह तस्यासत ऋषयः सप्ततीर इति प्राणा वा ऋषयः प्राणा तदाह वागष्टमी ब्रह्मणा संविदानेति अत्र हि शिशूपासनं प्रक्रम्येयं श्रुता सप्रतीकव्याख्यात्री तत्रेदं तच्छिर इति अयं वा व शिशुर्योयं मध्यमः प्राण इति श्रुतेः प्राणात्मकस्य शिशोः प्रत्याधानभूतशिर एव तत्र श्रोत्रादिच्छिद्रेषु प्रत्येकं प्राण आधीयते शृण्वञ्छ्रोत्रं भवतीति । अर्वाग्बिलः अवाङ्मुखः अधः स्थितस्यैव मुखस्य बिलत्वात् । शिरसो बुध्नाकारस्योपरिदर्शनात् ऊर्ध्वबुध्नः चमसो यज्ञपात्रविशेषस्तद्वदिति । प्राणादीति प्राणादिरूपं यशःशब्दादिप्रकाशनं तत्कारणं नार्थोल्लासकत्वाद् विश्वरूपं तस्मिन् । शिरसि निहितं एतदिति यश इत्यर्थः प्राणा वा इति प्राणरूपा सप्तऋषयः शिरोलक्षणचमसस्य तीरे निकटे आसते भवन्तीति । एतदिति ऋषीनित्यर्थः । ब्रह्मणेति वेदेन संबध्नाति के ते प्राणा ऋषयः इत्याहाग्रे इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोयं कश्यपो वागेवात्रिः वाचा ह्यन्नमद्यते अत्तिर्ह वै नामैतद्यदत्रिरिति इमाविति कर्णौ अयं दक्षिणः कर्णः अयमुत्तरः कर्णः इमौ चक्षुषी इमाविति नासापुटौ इति व्याख्यानम् । भाष्यसिद्धार्थेन समं भाष्यार्थमाहुः **चमसे**ति । अविशेषे दृष्टान्तः **अध्यात्मे**ति आत्मनि । आत्मविषयप्रकरणासंबद्धत्वात् । **रूढे**ति [1]छागीरूपम् । **इमा**मिति प्रत्यक्षगे इदमः

१. छागा ।

परिहरति तुशब्दः। अजाशब्देन ज्योतिरेवोच्यते। यथा ह्यजा अल्पदोग्ध्री तथेयं नश्वरसुखदात्री अग्निसूर्यसोमविद्युद्रूपा ब्रह्मणो हंसोक्तचरणरूपा। भगवत्कार्यांशरूपत्वात् 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति श्रुतेश्च प्रथमोत्पन्ना

भाष्यप्रकाशः।

नन्वजाशब्दार्थानिर्द्धारे कथं तत्परिहार इत्यत आहुः अजेत्यादि। तर्ह्यजाशब्दप्रयोगः कुत इत्यत आहुः यथेत्यादि। तथाच 'पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः' इतिवन्निगीर्याध्यवसानेन तथात्वबोधनाय प्रयोग इत्यर्थः। ननु किं तज्ज्योतिर्यदेवमुच्यत इत्यत आहुः अग्नीत्यादि। अग्निसूर्यसोमविद्युद्रूपत्वाज्ज्योतिः। रूपादिति पाठे भावप्रधानो निर्देशः। रूपेति पाठः श्रीहस्ताक्षरेषु संदिग्धत्वाद् बोध्यः। छान्दोग्ये षष्ठे प्रपाठके सत्यकामाय हंसेन, अग्निः कला सूर्यः कला चन्द्रः कला विद्युत् कलैष वै सौम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नामेत्युक्तो यश्चरणस्तद्रूपा। तस्य चरणरूपत्वं तु, तत् तेजोऽसृजतेति श्रुत्युक्तभगवत्कार्यांशत्वात् तस्य त्रिरूपत्वं, कार्यत्वस्त्रीत्वे च। तासां त्रिवृतमिति श्रुतेः। चोऽवधारणे। अतः प्रथमोत्पन्ना या देवता तेजोरूपा सैवात्राजापदेनोच्यत इत्यर्थः। ननु तस्या अत्र

रश्मिः।

प्रयोगाद्भाष्यीयशाब्दज्ञानगां प्रकाशोक्तसिद्धार्थप्रत्यक्षमाचार्याणां तद्वां चेत्यर्थः। अजेति ज्योतिःशब्दं विहाय। अध्याहृतगौणीबोधनायेति भाष्यार्थमाहुः तथा चेति। इदं वाक्यं चन्द्रालोकस्थम्। पूर्वार्धं तु 'रूपकातिशयोक्तिः स्यात् निगीर्याध्यवसानतः' इति। तथा च यथात्र नीलोत्पलशरपदाभ्यां लोचनकटाक्षाणां निगरणं विषयवाचकपदोल्लेखमन्तराप्युपस्थापनं तत्पूर्वकं तद्रूपताध्यवसानं तथा जातकार्यपदाभ्यां ज्योतिस्तत्कार्ययोस्तद्वाचकपदोल्लेखमन्तराप्युपस्थापनं तत्पूर्वकतद्रूपताध्यवसानं तेन तथात्वम्। अध्याहृतगौणीत्वं तु 'अम्' तस्य बोधनाय। तथा च गौर्वाहीक इत्यत्र इव लक्ष्यमाणगुणा गवाद्यपेक्षयाल्पदोग्ध्रीत्वादयः अजात्वविशिष्ट अजारूपशक्यस्याधेयतासंबन्धाख्यलक्षणाया अल्पदोग्ध्रीत्यादिषु सत्त्वाद्गुणेषु लक्ष्यमाणत्वं 'लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता' इति काव्यप्रकाशे। ननूपचारमिश्रेयं गौणीति चेदोम्। उपचारो गुणयोगः सोस्त्येवेति। एवमल्पदोग्ध्रीत्वनश्वरफलदात्रीत्वयोः दुःखदातृत्वादिगुणयोगः अन्यत्पूर्ववत्। अल्पदोग्ध्रीत्वमजापदप्रवृत्तिनिमित्तं दुःखदातृत्वादि अल्पदोग्ध्रीत्वपदप्रवृत्तिनिमित्तम्। ज्योतिरिति तथेयमिति भाष्योक्ता ज्योतीरूपाजा। भावेति। यद्वा। अग्निसोमसूर्यविद्युतां रूपं प्राप्यात्मेयं ज्योतिरूपाजा नश्वरसुखदात्रीति भाष्यार्थः। ल्यब्लोपे पञ्चमी। ब्रह्मण इति भाष्यं विवृण्वन्ति स्म छान्दोग्य इति। भगवत्कार्येति भाष्यं विवृण्वन्ति स्म तस्येति ज्योतिषः। तासामिति भाष्यं विवृण्वन्ति स्म तस्येति। ननु तत्तेजोऽसृजतेति छान्दोग्यश्रुत्या कार्यत्वं तत्पदवाच्यसद्ब्रह्मणस्तेजसस्तर्हि तस्य त्रिरूपत्वं वक्तव्यम्। आनन्त्येपि हि कायार्णामित्युक्त्वा 'सर्वेषां त्रिगुणत्वाद्धि तयोर्भेदाः पृथङ् मताः' इति निबन्धात्। किं च भगवत्कार्येति भाष्योक्तकार्यत्वं अग्न्यादावसंभवि ब्रह्म तर्हि अग्निरिति श्रुतेः। सूर्यचन्द्रयोः प्रश्नोपनिषदि बहुधासृष्टिकर्तृत्वोक्तेर्ब्रह्मलक्षणाक्रान्तत्वात्। विद्युतो विद्युद्ब्रह्मेत्याहुरिति बृहदारण्यकात्। अतः कार्यत्वे कारणं वक्तव्यम्। तथा ज्योतिषि नपुंसकेऽजेति स्त्रीत्वे हेतुर्वक्तव्यः इति चेत्तत्राहुः त्रिरूपत्वमित्यादि। अत इति दोषाभावात्। कार्येऽजापदयोगः कथमित्याशङ्काग्रे सूत्रे निराकार्या।

देवता अजाशब्देनोच्यते । तत्र हेतुः । उपक्रमात् । अत्रैवोपक्रमे, 'तदेवाग्निस्तद्वायुस्तदादित्यस्तदु चन्द्रमाः' इति । द्वा सुपर्णेति चाग्रे । मध्ये चायं मन्त्रः पूर्वोक्तरसंबद्धमेव वदति । सा मुख्या सृष्टिः । अजद्वयं जीवब्रह्मरूपमिति । अत्र

भाष्यप्रकाशः ।

कथं प्रत्यभिज्ञानमित्यत आहुः तत्र हेतुरित्यादि । तथापि चेतनाधिष्ठितत्वस्य कथं प्रत्यभिज्ञानमित्यत आहुः द्वा इत्यादि । सैव कुत उच्यत इत्यत आहुः सा मुख्या सृष्टिरिति । सा त्रिवृत्कृतदेवतारूपा मुख्या सृष्टिः । सृष्ट्यन्तरकरणसमर्थमाद्यं कार्यमत उच्यत इत्यर्थः । एवमत्राजामन्त्रस्य पूर्वार्धं व्याख्यातम् । उत्तरार्धं व्याकरोतीत्याहुः अजद्वयमित्यादि ।

रश्मिः ।

अयमर्थः । ब्रह्मत्वेपि चतुर्व्यूहेऽन्तर्भावस्य साध्यत्वेन स्वरूपलक्षणानाक्रान्तत्वेन चैकत्वाभावात् 'एकमेवाद्वितीयं ब्रह्म' इति श्रुत्यस्पर्शादनेकेश्वरापत्तेः ।

'भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः' ॥ इति ।
'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' ॥ इति च ।

काठके श्रावणात् विद्युति वाच्यं ब्रह्मत्वं तदपि विद्युद्ब्रह्मेत्याहुरित्यत्र केचिदित्यध्याहारे केचिदित्यस्वरसं ग्रस्तं तदपि केचिदिति विरला इति सुबोधिन्याः । स्वरूपलक्षणाक्रान्तेति ह्यलमयोग्यकर्तृकविचारेणेति । किं च ब्रह्म तर्हि अग्निरिति श्रुतिरपि सुबोधिन्यामत उभयं सुबोधिनीप्रमाणकं तदुभयं विहाय कार्यत्वमत्रोक्ते ज्ञेयमिति चतुरस्रम् । त्रिरूपत्वं लोहितशुक्लकृष्णरूपत्वं तत्तेजोऽसृजत इत्युक्त्वोच्यते तदपोऽसृजत तदग्रे ता अन्नमसृजन्त इत्युक्त्वोच्यते तासां त्रिवृतं त्रिवृतमेकैकां करवाणि इत्युक्त्वा यदग्ने रोहित९रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यमिति त्रिवृत्करणे छान्दोग्यश्रुतेः त्रिवृतमिति श्रुत्यंशेन बोध्यते कार्यत्वस्त्रीत्वे तासामिति श्रुत्यंशेन बोध्यते । तासामित्यस्य तेजोबन्नरूपदेवतानां कार्यरूपाणामित्यर्थात् । इमास्तिस्रो देवता इति श्रुतेः । कथमिति केन हेतुनेति प्रश्नः । प्रत्यभीति सेयमजेति प्रत्यभिज्ञा । न च नित्यानित्यसंयोग इति शङ्क्यम् । दृष्टान्तार्थमात्रत्वात् । दृष्टान्तव्यतिरिक्तस्थले ऐक्यविषयत्वात् ऐक्यप्रतीतेर्भ्रमत्वात् तत्र हेतुरित्यादीति उपक्रमोपसंहाराभ्यामर्थनिर्णयादुपक्रमस्यासंजातविरोधित्वेन प्रबलत्वात् सृष्टिकर्तृत्वोक्त्याजा ज्योतिः प्रश्नोपनिषदुक्तौ सूर्यचन्द्रमसौ । वायुः बृहदारण्यकोक्तो यश्चक्षुषः स्वस्वरूपं प्रापितवान् सः । अग्निर्व्यापकः ब्रह्मरूपः एवमजा ज्योतिश्चतुष्टयरूपा । अत्र बृहदारण्योक्ता विद्युत् न छान्दोग्ये वायुर्न विद्युदस्ति । तस्या ब्रह्मरूपायाः संनिवेशार्थमुत्तरभाष्यं व्याचकुः तथापीति चेतनोग्निः । द्वा इत्यादीति । द्वौ जीवब्रह्मरूपौ ब्रह्माग्निः । विद्युत्पक्षे विद्युद् ब्रह्मेति । तदेवाग्निरित्यस्याः अग्निः कलेत्यस्याश्चैकवाक्यत्वे वायुः प्राणो विद्युदिति यावत् । सैवेति अव्याकृता देवता सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुत्युक्ताग्निविद्युदन्यतरात्र श्रुतौ कुतः कस्माद्धेतोरुच्यते तेजोनिरूपणे इत्यत इत्यर्थः । उच्यत इति । समवायित्वार्थम् । स्वतः प्रतीतत्वाद्वा भावप्रत्ययेन प्रकृतिजन्यबोधे प्रकारतामापन्नेनोच्यते इत्यर्थः । अत एव मुख्यपदम् । अजद्वयमित्यादीति प्रथममजपदं जीवपरम् । द्वितीयं ब्रह्मपरम् । तत्रेति

प्रकरणे न स्पष्ट इति निरूपयति । तथाहि श्रुत्यन्तरे स्पष्टमेव अधीयत एके 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य' इति । एवमग्रेऽपि कलात्रये । अनेन जीवेनात्मनेति जीवब्रह्मणोश्चानुप्रवेशः । बीजेऽपि त्रैविध्यमिति सरूपत्वम् । भगवतोऽभोगे हेतुः जीवेन भुक्तभोगामिति । तस्मात् प्रकृतेऽपि चमसवच्छ्रुतावेवार्थकथनान्न सांख्यमतप्रतिपादकत्वम् ॥ ९ ॥

भाष्यप्रकाशः ।

नन्वज्ञाया ज्योतिष्ट्वेन निरूपणमयुक्तम् । छान्दोग्ये तेजस उत्पत्तिकथने त्रिरूपताया अनुक्तत्वात् । भाष्ये च हंसोक्तचरणरूपत्वेन व्याख्यानमयुक्तम् । तस्यापि तत्रानुक्तत्वादित्याशयेन सूत्रशेषमवतारयन्ति **अत्रेत्यादि** । अत्र प्रथमकार्यप्रकरणे त्रिरूपत्वं, हंसोक्तश्चरणो न स्पष्ट इति हेतोस्तत्रत्यं श्रुत्यन्तरं दर्शयतीत्यर्थः । श्रुतिमाहुः **यदग्नेरित्यादि** । ननु यदि तेजोरूपा देवताभिप्रेता तदा सूत्रकृता तेजःपदमेव कुतो नोक्तमित्यत आहुः **एवमित्यादि** । **कलात्रय इति** सूर्यसोमविद्युद्रूपे । तथाचैतदग्रे, यदादित्यस्य रोहितं रूपं यचन्द्रमसो यद् विद्युत इत्यादिनिरूपणात् तत्र हंसोक्तपादरूपतादिधर्मनिरूपणार्थं ज्योतिःपदं प्रयुक्तं, न तेजःपदमित्यर्थः । अस्यां श्रुतौ जीवब्रह्मणी कुत्रोक्ते इत्याकाङ्क्षायामाहुः **अनेनेत्यादि** । जीवेनेति सहार्थतृतीययाऽऽत्मनेति करणतृतीयया च बोधिते इत्यर्थः । सरूपत्वकथनप्रयोजनमाहुः **बीजेऽपीत्यादि** । 'बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्' इति वाक्याद् बीजं भगवान् । तत्रापि सच्चिदानन्दरूपत्वात् त्रैविध्यमस्तीत्यतः प्रजासरूपत्वम् । तथाच कार्यकारणयोः सालक्षण्यस्यौत्सर्गिकत्वेनार्थात् प्राप्तावपि यत् सरूपत्वकथनं तत् प्रजानां तेजोऽबन्नात्मकत्वेऽपि बीजधर्मस्य सच्चिदानन्दरूपत्वस्य ज्ञापनार्थमित्यर्थः । **तस्मादिति** यस्मादेवं वाक्यतात्पर्यं तस्मात् ॥ ९ ॥

रश्मिः ।

छान्दोग्ये । **अनुक्तेति** उक्तत्वेप्यग्रिमग्रन्थावतरणायाहार्यज्ञानविषयत्वं कृत्वानुक्तत्वादित्युक्तम् । एवं पूर्वत्रापि ज्ञेयम् । **तत्रत्यमिति** छान्दोग्ये भवं जाताद्यर्थेऽव्ययात्त्यप् । श्वेताश्वतरश्रुतेरन्या श्रुतिः श्रुत्यन्तरम् । तत्र छान्दोग्ये जातादिः तत्रत्यं तद्दर्शयति **तत्रेति** छान्दोग्ये । **हंसोक्तेति** आदिना त्रिरूपता । **अस्यामिति** श्वेताश्वतरव्याख्यानरूपायाम् । छान्दोग्यश्रुतौ जीवब्रह्मणी उत्तरार्धेऽजद्वयवाच्ये कुत्रेति स्थलप्रश्नः । **सरूपेति** व्याख्येयश्रुतौ 'सरूपा' इतिपदेन तेषां खल्वेषां भूतानां त्रीण्येव बीजानीति छान्दोग्योपबृंहितां गीतामाहुः **बीजं मामिति** । **सच्चिदिति** सद्रोहितं परिशेषात्, चित् शुक्ला प्रकाशकत्वात्, आनन्दः कृष्णस्तमोजनकत्वात्, तमसश्च कृष्णत्वात् । **बीजधर्मेति** तेन समवायित्वं स्फोरितम् । निमित्तत्वं सतः । ज्योतिषि कार्ये सतोऽभिन्ननिमित्तोपादानत्वम् । **एवमिति** उक्तप्रकारेण छान्दोग्यश्रुतिषु व्याख्यानतात्पर्यं श्वेताश्वतरीयाजामेकामिति श्रुतिवाक्यतात्पर्यम् । **भाष्ये** । श्रुतावेवेत्यत्रैकवचनमविवक्षितम् । ताश्च श्रुतयः पूर्वमर्थानुरोधेन त्यक्तक्रमा अत्र प्रोच्यन्ते 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, तद्धैक आहुरसदेवेदमग्र आसीत् एकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत तदैक्षत बहु स्यां प्रजायेयेति, तदपोसृजत तस्माद्यत्र क च शोचति स्वेदति वा पुरुषः तेजस एव तदध्यापो जायन्ते, ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि इति, ताः अन्नमसृजन्त तस्माद्यत्र क च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्यः एव तदध्यन्नाद्यं जायते । तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवत्यण्डजं

रश्मिः ।

जीवजमुद्भिज्जमिति सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा नु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवतीति तन्मे विजानीहीति । यदग्नेः रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यम् । यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यम् । यच्चन्द्रमसो रोहितं रूपं तेजसस्तद्रूपं तच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्रमसश्चन्द्रमस्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यम् । यद्विद्युतो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यम् । एतद्ध स्म वै तद्विद्वाꣳस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यति इति ह्येभ्यो विदांचक्रुरिति श्वेताश्वतरश्रुतिव्याख्यानरूपश्छान्दोग्यश्वेतकेतूपाख्यानस्थाः एकमेवाद्वितीयमित्युक्तं 'वीर्यं मे दुश्चरं तपः' इति द्वितीयस्कन्धालोचनाद्वीर्यात्तेजः अन्नोत्पत्तिः । वर्षति वर्षणमपां विमोकः तथा चापां वर्षणकर्तुः सामर्थ्यादन्नत्वं अस्थ्यादिवत् । पृथिवी वा अन्नं आद्यं अद भक्षणे 'ऋहलोर्ण्यत्' अत्तुं योग्यं तयोः समाहारोन्नाद्यः अधिजायते अध्युपसर्गकृतविशेष उन्नेयः । अधुना तेजःपदवाच्याऽजायाः प्रथमकार्यत्वं वक्तुं कार्याणां सत्पदार्थभूतानि सदेव सोम्येदमग्र आसीदित्यत्र सत्पदेन उक्तानि बीजान्याह तेषामिति । तेषां प्रसिद्धानामेषां भूतानां मनुष्यपक्ष्यादिकानां कानीत्याह आण्डजमिति । स्वराट् 'एतन्नानावताराणां निधानं बीजमव्ययम्' इति वाक्यात् । जीवजं रेतः । जरायुजं वा जरायुजं मनुष्यादि । तत्र बीजपदप्रयोगश्चिन्त्यः । उद्भिनत्ति इत्युद्भित् कर्तरि क्विप् । स्थावरं ततो जातमुद्भिज्जं स्थावरपदमनुक्त्वोद्भिज्जपदमुक्तं तेनोद्भिनत्ति यो जगदाश्रयः स सर्वेषां बीजम् । अभिन्ननिमित्तोपादानम् । तत्तु समन्वयादिति व्याससूत्रात् । 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति गीता । अत्र श्वेताश्वतरोक्तो ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म कुतः स्म जाता जीवाम इत्युक्तब्रह्मप्रश्नोत्तरं सदेव सोम्येत्यादि तदेव बीजत्रयं चतुष्टयं वा तेषु । एतस्माज्जगदाश्रयरूपात्सतः भूतान्तर्गततेजःपदं तदर्थश्चाजा अग्निवाय्वादित्यचन्द्ररूपा प्रथमकार्यम् । सापि नश्वरसुखदा न रूपकार्यसहितेति । तस्याश्च प्रत्येकं चत्वारि रूपाण्याह । सेयमिति प्रकृताव्यवहितोक्ता व्याकृताख्या देवता पूर्ववदैक्षत आत्मनाऽनश्वता सता । अन्विति । एषां सृष्टिमनु 'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षीभूत्वा पुरः पुरुष आविशत्' इति मधुब्राह्मणस्थश्रुत्युक्तन्यायेन । विजानीहहि इति हेति अज्विकारः । हि हीति, विजानीहीति पाठः स्पष्टः । तेजःपदवाच्याऽजायाः अग्न्यादित्यचन्द्रमोविद्युद्रूपेष्वग्नित्रिवृत्करणमाह यदग्नेरिति अग्नौ सतस्तेजोनिविष्टस्य सत्त्वादाह रोहितमिति, अब्निविष्टस्य सत्त्वादाह यच्छुक्लमिति, पृथिवीनिविष्टस्य सत्त्वादाह यत्कृष्णमिति, तथा च यान्यग्नेस्त्रिवृत्कृतस्य रोहितादिरूपाणि तान्यत्रिवृत्कृतानां तेजोबन्नानां रूपाणि इत्युक्तम् । नन्वग्नित्वं गन्तृत्वं नाग्नौ दृश्यते । न च येनेन्द्रियेण यद्गृह्यते तेनैवेन्द्रियेण तद्गता जातिस्तदभावश्च गृह्येते इति नैयायिकोक्तेः दृश्येते इति वाच्यम् । अपागमनानन्तरमिन्द्रियेण तद्गृह्यते । अपागमनमेव कुतः इत्यतो विचारादित्याह अपेति । आप्तृ व्याप्तौ इत्यस्य रूपमपेति । अतो व्यापकेन सता रूपत्रयरूपाग्नित्वमागादिणो गा । अतोऽग्नौ

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

नतु द्विविधा शब्दप्रवृत्तिः । योगो, रूढिर्वा । तत्राजाशब्दश्छागायां

भाष्यप्रकाशः ।

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥ सूत्रमवतारयन्ति नन्वित्यादि ।

रश्मिः ।

रूपत्रयस्य उत्तरदेशसंयोगः । न च रूपत्रयसमवायो न संयोग इति शङ्क्यम् । संयोगस्य स्पर्शत्वं प्रस्थानरत्नाकर उपपादितम् । इत्याकाशातिरिक्तचतुर्भूतेषु स्पर्शसत्त्वेन रूपादावेकं रूपं रसात्पृथक् इतिवत्सत्त्वेनादोषात् । सर्वस्य सर्वमयत्वाद्वा । अग्नेर्व्यावहारिकं सत्यत्वं रूपत्रयस्य पारमार्थिकं सत्यत्वमित्याह वाचेति । वाचारम्भणं घटपटाग्न्यादिविकार इत्युक्ते 'शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्' इति सूत्रोक्ताधिदैविकसृष्टौ वैदिकायां विकारत्वापत्तिरतो नामधेयमिति नामैव नामधेयं स्वार्थे धेयप्रत्ययः । नामरूपविभेदेन क्रीडयितुं कृतं नामधेयं लौकिकमग्निरिति । त्रीणि रूपाणि जातिस्थलेङ्गीकृतानि नित्यानि अग्नित्वरूपाणि मृत्य्वतिक्रान्तत्वादग्न्यादीनाम् । मृत्व्यतिक्रमो बृहदारण्यक उक्तः । न च विकारानङ्गीकारे नित्यानित्यसंयोग इति वाच्यम् । विकारस्यापि वैदिकत्वाददोषः । एवमेवाग्रेपि श्रुत्यर्थः । अतोऽजा तेजोरूपा तस्याः त्रिरूपत्वं तत्कार्यस्यापि त्रिरूपत्वमिति पूर्वार्धं व्याकृतं श्रुतिभिः । अतः सर्वस्य सत्कार्यत्वात् सतो ज्ञानेन सर्वमिदं ज्ञातं स्यात् इत्युक्तेर्थे विद्वत्प्रसिद्धिं प्रमाणयति एतद्ध स्मेति । एतत्त्रिवृत्करणं तत् ब्रह्म तत्कार्यत्वात् विद्वांसो विदितवन्तः । पूर्वे नित्या महाशाला महागृहस्था महाश्रोत्रिया महान्तश्छन्दोध्येतारः । न नोद्येति न नः अस्माकं कुलेऽद्य इदानीं कश्चन कश्चिदपि नोदाहरिष्यति न वदिष्यतीति । ते पुनः कथमिव ज्ञातवन्तः सर्वमित्याह ह्येभ्य इति हि यस्मादेभ्यो रोहितादित्रिरूपेभ्यो हेतुभ्यः अन्यदप्यवशिष्टं ज्ञातवन्तः । विज्ञानप्रकारं दर्शयति यद्विति यत् उ कपोतादिषु रोहितमिवाभूत् । तदिति रोहितं स्पष्टमन्यत् । इति व्याख्यातश्रुत्यर्थः ॥ ९ ॥

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥ इदं सूत्रमजाशब्दस्य ज्योतिर्वाचकत्वे गौणीवृत्तिप्रतिपादकत्वेन शक्तिधियः सहकारिण्याः प्रतिपादकमित्यस्य । नात्राधिकरणनाम । तथा च सुबोधिनीतृतीयपञ्चमाध्याये 'कल्पनोपदेशाच्च मध्वादिवदविरोधः' इत्यधिकरणेनेति ।

'त्वं नः सुराणामसि सान्वयानां
कूटस्थ आद्यः पुरुषः पुराणः ।
त्वं देवशक्त्यां गुणकर्मयोनौ
रेतस्त्वजायां कविमादधेऽजः' ॥

इति श्लोके कविं महत्तत्त्वम् । पूर्वावस्था रेतः, उत्तरावस्था कविरिति । **भाष्ये ।** नैयायिकः शङ्कते । नन्विति वृत्तिः शक्तिलक्षणान्यतरः संबन्धः । अस्योपयोगः पदजन्यपदार्थोपस्थितिः तावेव पूर्वं शक्तिग्रहाभावे पदज्ञानेपि तत्संबन्धेन स्मरणानुपपत्तेः । पदज्ञानस्य संबन्धिज्ञानविधयार्थस्मारकत्वं शक्तिश्च पदेन सह पदार्थसंबन्धः । स चास्मात्पदादयमर्थो बोद्धव्य इति ईश्वरेच्छानुरूपः, उक्तेच्छाविषयः । आधुनिके नाम्नि शक्तिरस्त्येव 'एकादशेऽहनि पिता नाम कुर्यात्' इतीश्वरेच्छायाः सत्त्वात् । आधुनिकसंकेते तु न शक्तिरिति संप्रदायः । नव्यास्तु ईश्वरेच्छा न शक्तिः किं तु इच्छैव तेनाधुनिकसंकेतेपि शक्तिरस्तीत्याहुः । शक्तिविशिष्टं पदं तच्च क्वचिद्यौगिकं क्वचिद्रूढं क्वचिद्योगरूढम् ।

रूढः । न जायत इति योगः । अनुभयरूपत्वात् कथं सृष्टिवाचकत्वमित्याशङ्क्य परिहरति कल्पनोपदेशाच्च । कल्पनात्रोपदिश्यते ।

आद्या सृष्टिः कल्पनया अजाशब्देनोच्यते । यथा ह्यजा बर्करसहिता

भाष्यप्रकाशः ।

परिहारं व्याकुर्वन्ति कल्पनाऽत्रेत्यादि । एतस्यैव विवरणम् आद्येत्यादि । कल्पनाया विवरणं यथेत्यादि । तथाच तस्या भगवत्साहित्येन कार्यसाहित्येन चोपासनार्थं गौण्याऽजत्वोपदेश

रश्मिः ।

इति वदतां समुदायशक्ती रूढिः अवयवशक्तिर्योगः एतदुभयातिरिक्तयोर्यत्रावयवशक्तिमध्ये समुदायशक्तिरप्यस्ति तद्योगरूढं पङ्कजादिपदम् । यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढं यथा उद्भिदादिपदम् । अत्र ह्यूर्ध्वभेदकर्ता तरुगुल्मादिरपि बुध्यते योगविशेषोपि इति रूढियोगातिरिक्तशक्तिद्वयदर्शनान्न नैयायिकशङ्केयमिति चेन्न । पङ्कजादिपदं योगरूढं तत्र पङ्कजनिकर्तृरूपत्वमवयवशक्त्या पङ्कजपदं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति । न च केवलावयवशक्त्या कुमुदादौ प्रयोगः स्यादिति वाच्यम् । रूढिज्ञानस्य केवलयौगिकार्थबोधप्रतिबन्धकत्वादिति प्राञ्चः । वस्तुतस्तु समुदायशक्त्योपस्थितपद्मे अवयवार्थपङ्कजनिकर्तुरन्वयो भवति, सांनिध्याद्यत्र तु रूढ्यर्थस्य बाधः प्रतिसंधीयते कुमुदत्वेन रूपेण च बोधे तात्पर्यं तत्र लक्षणया कुमुदादेवेति । यत्र तु कुमुदत्वेन बोधेन तात्पर्यज्ञानं पद्मत्वस्य च बाधः तत्रावयवशक्तिमात्रेण निर्वाह इत्याहुः । यत्र तु स्थलपद्मादौ अवयवार्थबाधः तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः । यदि स्थलपङ्कजं विजातीयमेव तदा लक्षणयैवेति सिद्धान्तमुक्तावल्याः वस्तुतस्त्वित्युक्तपक्षेपि रूढिर्योगमपहरतीत्यस्य प्रसक्तेः । न च पद्मत्वावच्छिन्नविशेष्यत्वानिरूपितपङ्कजपदप्रयोगजन्यपङ्कजनिकर्तृत्वावच्छिन्नविषयताशालिबोधं प्रति रूढिज्ञानस्य प्रतिबन्धकत्वेन पद्मधर्मिकपङ्कजादिपदयोगार्थबुद्धेः प्रतिबध्यतावच्छेदकानाक्रान्तत्वादिति वाच्यम् । विरोध्यविषयकज्ञानस्य प्रतिबन्धकत्वं ·········ज्ञानविघटकत्वेनैवेति नियमभङ्गात् । अत उक्तं ननु द्विधा शब्दप्रवृत्तिरिति योगो रूढिर्वेति । छागायामिति । अत इति । सिद्धेऽजादिग्रहणं ज्ञापयति । जातिलक्षणं ङीषं बाधित्वाऽजवाचकाददन्ताट्टाबेवेति । तदुक्तं सिद्धान्तकौमुद्याम् । अजाद्युक्तिर्ङीषो ङीपश्च बाधनायैवेति । जातेरस्त्रीविषयादयोपधादिति सूत्रस्याजशब्दाट्टाब्विधान एव प्रवृत्तिर्न छागशब्दात् व्यक्तेरभेदस्य जातिबाधकसंग्रहस्य सत्त्वात् । यथा घटत्वं जातिर्न कलशत्वं व्यक्तेरभेदादिति । 'आकृतिग्रहणा जातिः' इति लक्षणपक्षे छागत्वं जातिः अनुगतसंस्थानव्यङ्ग्यत्वात् । तथापि नैयायिकपक्षैकवाक्यतयाऽजात्वं जातिरस्त्येवेति गौरवात् न छागत्वं जातिरिति बोध्यम् । अनुभयेति अजाशब्दस्योभौ रूढियौगिकावयवौ अस्य । संख्याया अवयवे तयप् । तयपोऽयच् 'उभादुदात्तो नित्यम्' इत्युभयरूपत्वाभावात् प्रथमसृष्टितेजोवाचकत्वं कथमिति प्रश्नः । प्रकृते । गौण्येति तेन योगरूढिव्यतिरेकेणापीति भाष्ये गौण्येति शेषः । भाष्ये तु शब्दब्रह्मण ब्रह्मतुल्यत्वस्य 'अत एव च नित्यत्वम्' इति सूत्रउक्तत्वात् तद्व्यतिरेकेणापि शब्दसामर्थ्यं द्योत्यते । गौणी तु पूर्वसूत्रे उपपादिता । भाष्ये । बर्करेति । कोशे कस्मिंश्चिदयं शब्दः । शंकरभाष्ये च बहुबर्करा सरूपबर्करा चेत्यजाविशेषणे । उपदेशेति कल्पनोक्तिरित्यनुक्त्वा ।

भाष्यप्रकाशः ।

इत्यर्थः । गूढाभिसंधिमुद्घाटयन्ति चकारादित्यादि । चोऽप्यर्थे । तत् तेषां न प्रियं यन्मनुष्या विद्युरिति श्रुतेर्मनुष्याणां ज्ञानं देवहिताय न भवतीति तद्धिताय, यथेन्धे इन्द्र इति परोक्षवादस्तथात्र चतुर्मुखाऽजन्यायेनास्मदादिसाधारणजन्माभावात् प्रथमकार्ये ज्योतीरूपेऽजेति परोक्षवादो, भगवत्प्रियत्वाय वा परोक्षवाद इत्यर्थः । दृष्टान्तं व्याकुर्वन्ति यथेत्यादि । अत्रायमर्थः । सांख्यसमाससूत्राणां पञ्चशिखवृत्तौ सूर्यस्य चक्षुरधिदैवतत्वेन सिद्धत्वान्मधुवि-

रश्मिः ।

'चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स कथ्यते' ॥

इति रामार्चनचन्द्रिकायां रुद्रयामलवचनान्मन्त्रस्य प्रकथनरूपस्य 'श्रीकृष्णः शरणं मम' इति मन्त्रोपदेशस्य ग्रहणात् । उप समीपे स्थित्वा यथा योग्यकरणे सर्गविसर्गक्रीडाभ्यां परोक्षीकृतशुद्धलीला..........नुपासने बोध्यते इत्यर्थः । तत एव मुक्तिलीलास्थमेकादशाध्यायोक्तस्यैकोनत्रिंशाध्यायोक्तस्योपासनस्य भक्तिरूपस्योपासनापदपरोक्षीकृत.......एतावता कल्पनोपदेशादिति सूत्रांशस्य भाष्यं प्रकाशितम् । चकारार्थमाहुः । **प्रकृते** । **गूढामिति** गुह संवरणे संवृताम् । वृढ् संभक्तौ सम्यक् भक्तियुक्ताम् । वाभिसंधिसमितां भग्नस्नेहसंधानकर्त्री मायासंबन्धी भग्नस्नेहोऽज्ञान....तः दृष्ट एव स्नेहः इत्युपपत्तेरिति भाष्यात् । **देवेति** देवहितायेत्यत्र वेदहितायेत्यपि, तत्र प्रथमपाठ आहुः । **यथेति** इन्द्रपदेन पुरंदरः प्रतीयते ञिइन्धि दीप्तौ इत्यस्य समभिव्याहाराद् दीप्तिमान् न त्वयमर्थः किं तु दक्षिणेऽक्ष्णि यः पुरुषः सः । तथा च बृहदारण्यकश्रुतिः 'स होवाच इन्धो वै नामैष योयं दक्षिणेक्षन् तं वा एतमिन्ध९सन्तमिन्द्र इत्याचक्षते परोक्षेणेव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः' इति षष्ठे । **चतुर्मुखेति** अयं न्यायो दशमे प्रक्षिप्तेष्वध्यायेषु ।

'जगत्रयान्तोदधिसंप्लवोदे
नारायणस्योदरनाभिनालात् ।
विनिर्गतोऽजस्त्विति वाङ् न वै मृषा
किं त्वीश्वर त्वं न विनिर्गतोसि' ॥ इत्युक्तः ।

परोक्षेति अक्ष्णः परमिति व्युत्पत्त्या अत्राजाक्ष्णो विषयः ज्योतिस्तु नेति ज्योतिषि परोक्षवादः । वेदस्य हितायेति पक्षे 'परोक्षवादो वेदोयम्' इत्येकादशस्कन्धादाहुः **भगवदिति** 'परोक्षं च मम प्रियम्' इति वाक्यात् । वेदस्य हिताय परोक्षवादः । हिताय भगवत्प्रियत्वाय । नन्वात्मा वेदो भगवत्प्रिय एवेति । आत्मत्वादेव विरुद्धधर्माश्रयत्वात् । परोक्षवादादिति चकारार्थ उक्तः । मध्वादिवदिति व्याकर्तुमाहुः **दृष्टान्तमिति** । **सिद्धत्वादिति** । 'द्रष्टृत्वादिरात्मनः करणत्वमिन्द्रियाणाम्' इति सूत्रे । मधुत्वं ज्योतिषज्ञानकर्तृत्वमपि तस्य वक्तुमित्यनेनाशक्यत्वेनान्वयाशक्यत्वमिति विशेषणं मध्विति । मनेर्धश्छन्दसीति उत्प्रत्ययः नस्य धः । ज्ञानकर्तृत्वं मधुत्वम्, तस्य वक्तुमशक्यत्वम् । ज्ञानेन भक्तेति शिवश्रुतेः ।

'स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः ।
प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ।
द्वादशैते विजानीमो धर्मं भागवतं भटाः' ॥

भाष्यप्रकाशः ।

द्योक्तस्य मधुत्वस्य तस्मिन् वक्तुमशक्यत्वेन सांख्यवादिनापि तत्र गौण्येव वृत्तिः कल्पनोपदेश-मादायैवादरणीया । अन्यथा श्रुतिविरोधापत्तेः । निर्गुणादिश्रुतिविरोधश्चेति सूत्रयतः कपिलाऽचार्यस्यापि तद्विरोधस्यासह्यत्वात् । अतो यथा मध्वादिविद्यायां कल्पनोपदेशस्त्वयाङ्गीक्रियते तथा श्रुतिविरोधपरिहारायात्राप्यङ्गीकार्यमिति प्रतिवादिबोधनार्थं तदनुसारेणोक्तम् । वस्तुतस्तु पुरुषविधब्राह्मणे रमणार्थं सृष्टिं प्रकृत्य अजेतराभवद् बस्त इतर इति श्रावणादत्रापि तादृगाकारमादाय चतुर्मुखाऽजन्यायबाधादजात्वमाद्यसृष्टेरुच्यते बन्धकत्वाय । नचात्र मानाभावः ।

रश्मिः ।

इति वाक्याच्च । **अपीति** । ननु ह्यनेन पदेन प्रतिवादिमते गौणी ध्वन्यते सा न संभवति एकविज्ञानेन सर्वविज्ञानस्य प्रतिज्ञातत्वात् । आदित्यादीनां ज्ञानकर्तृभगवदभेदबोधनाय मधुब्राह्मणस्य प्रवृत्तेरभेदसंभवादिति चेन्न 'आनन्दादयः प्रधानस्य' इति सूत्रे आदिपदेन मधुत्वस्यापि संग्रहात् । सूर्यधर्मत्वाभावेनाभेदान्वयासंभवात् । अतो गौण्यर्थं, योगरूढिव्यतिरेकेणापि शब्दप्रवृत्त्यर्थं वा मधुब्राह्मणम् । श्रुतीति श्रुतीनां व्याख्यातश्रुतीनां छान्दोग्यस्थानां विरोधः । तत्तेजोऽसृजत इत्यस्या वा । **त्वयेति** सांख्यप्रतिपादकेन प्रतिवादिना वा । **तदन्विति** तदनुसारः तदुक्ताभिन्नप्रकारेणानुसरणं तेनोक्तमविरुद्धम् । तेन मात्सर्याभावो ध्वन्यते । तेन भाष्यस्य परमार्थत्वं ज्ञातव्यम् । धर्मस्थाने उच्चैः स्थितोऽत एव बृहस्पतिर्मङ्गलयुतश्च तत्फलं जातकाभरणेस्ति,

'विलग्नतः शीतमयूखतः कर्मणि मघोनः सचिवो यदा स्यात् ।
नानाधनाभ्यागमनानि पुंसां विचित्रवृत्तं नृपगौरवं च' ॥

मङ्गलसाहित्यफलं—

'मन्त्रास्त्रशस्त्रादिकलाकलापैः विवेकशीलो मनुजः किल स्यात् ।
चमूपतिर्वा नृपतिः पुरेशो ग्रामेश्वरो वा सकुजे सुरेज्ये' ॥ इति

ज्ञानप्रदीपनामग्रन्थे—

'भवति भाग्यपतिर्नृपवल्लभः सुरगुरौ नवमे सुखवान् गुणी ।
त्रिदशयज्ञपरः परमार्थवित् प्रचुरकीर्तिकरः कुलवर्धनः' ॥ इति ।

यथाश्रुतार्थे मधुविद्यायाम् । अक्षरमात्रमपि वेदो नान्यथावक्तीति पक्षेप्यविरुद्धः प्रतीतार्थउक्तः । भेदान्वयस्फूर्तेर्गौणी न मधुब्राह्मणे संभवतीत्यरुच्या अजामेकामिति मन्त्रे परोक्षवादमाहुः **वस्तुत** इति । **पुरुषेति** बृहदारण्यके । **अजेति** अजा इतरा शतरूपा, इतरो मनुः । **इतीति** 'अजेतराभवत् बस्त इतरोऽविरितरा मेष इतरस्ता ँ समेवाभवत्ततोऽजावयोऽजायन्तैवमेव च यदिदं किं च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत' इति श्रावणात् । समेत्यस्य मिथुनाय गतवान् इत्यर्थः । समाय सुपां डा पुत्राय । 'इ'आश्चर्ये पुत्रीत्वात् स्वसेत्याश्चर्यम् । वा । वा गत्यादौ गतवान् । अभवत् सत्तां कृतवान् । **अत्रेति** अजामेकामिति मन्त्रे । सा दृश्यते स्वयमेवेति तादृक् । कर्मकर्तरि क्विप्रत्ययः । आकार आकृतिः तमादाय जातित्वात् । नित्यमेकमनेकानुगतं सामान्यमिति । विशिष्टे अजात्वविशिष्टे अजारूपेर्थे बाधितो योगो विशेषणमुपसंक्रामतीत्यजात्वं न जायते इति योगभाक् । अतः श्रौतेन पौराणस्य चतुर्मुखाजन्यायस्य बाधात् । पुराणानां वेदत्वपक्षे विकल्पः । तथा सति कया वृत्त्योच्यते इत्यत आहुः **बन्धेति** । बन्धकत्वमिन्द्रियविक्षेपकत्वं तस्मा अजात्वमुच्यते तेनाजापदप्रयोगः ज्योतिःस्थलेऽजापदप्रयोगेऽजात्वेन ज्योतिर्षोधो न ज्योतिष्ट्वेन, यथा कलशस्थले घटपदप्रयोगे घटत्वेन बोधो न कलशत्वेनेति

सवत्सा स्वामिहिता तथेयमिति उपदेशपदात् तथोपासनमभिप्रेतम्। चकारात् परोक्षवादोऽपि देवस्य हिताय। यथा आदित्यो वै देवमधु, वाचं धेनुमुपासीत। द्युलोकादीनां चाग्नित्वं पञ्चाग्निविद्यायां तथा प्रकृतेऽप्यविरोधः। योगरूढिव्यतिरेकेणाप्येषा वेदे शब्दप्रवृत्तिः। तस्मादजामात्रेण न सांख्यमतसिद्धिः॥ १०॥

इति प्रथमाध्याये चतुर्थपादे द्वितीयं त्रिसूत्रं चमसाधिकरणम्॥ २॥

भाष्यप्रकाशः।

'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः' इत्यग्रिमग्रन्थेन तथावसायात्। एवं मधुविद्यायामपि, दृष्ट्वैव तृप्यन्तीति तृप्तिलिङ्गादादित्यस्य मधुत्वम्। नच विरोधः। सैषा त्रय्येव विद्या तपतीति श्रुत्या शब्दात्मकत्ववद् रसात्मकत्वेऽप्यदोषात्। एवमेव वाचो धेनुत्वमपि धरणीवज्ज्ञातव्यम्। एवं द्युलोकादीनामग्नित्वमपि। 'सर्वं सर्वमयम्' इति तापनीयश्रुतेः सर्वत्र सर्वसत्त्वात् तत्तदुद्भवानुद्भवयोर्भगवदिच्छया नियामकत्वेन प्रत्यक्षविरोधस्याकिंचित्करत्वादिति। तदेतदुक्तं चकारात् परोक्षवादोऽपीति। अनेनैवाशयेन सुबोधिन्यां निगमकल्पतरोरित्यत्र, असौ वा आदित्यो देवमध्विति स्वर्गस्थानां सूर्यो मधु। यथास्माकं सारघमित्युक्तम्। एतावान् परं विशेषो यच्छ्रुतौ परोक्षवादोऽत्र नेति न कोऽपि शङ्कालेशः॥ १०॥

इति द्वितीयं चमसाधिकरणम्॥ २॥

रश्मिः।

तद्वत्। तथा चाजामन्त्रे रूढमजापदम्। अजेतरेत्यत्रेव। मैवं योगेप्यजात्वमविरुद्धमिति। पाठकस्थले भाषकपदप्रयोगे पाठकस्य भाषकत्वेन बोधो न पाठकत्वेनेति तद्वत्। नन्वजेतरेत्यत्र योगो बाधित इति चेन्न। नित्यानित्यसंयोगभियाधिदैविकाजाऽजापदवाच्या नित्येति योगाविरोधात्। अत्रेति बन्धकत्वे। वृक्षो देहः अनीशा माया इन्द्रियरूपा अनीशतयेति वार्थः। तकारलोपः। अग्रिमेत्यजामन्त्राग्रिमग्रन्थेन। तथेति बन्धकत्वावसायात्। दृष्टान्ते परोक्षवादमाहुः एवं मध्विति। दृष्ट्वैवेति इदं दर्शनं भक्त्यनन्तरं दर्शनानन्तरं भक्तिर्वा 'दृष्ट एव स्नेहः' इति भाष्यात्। आदित्यपदस्यात्मन्यधिकरणे वा पारोक्ष्यं आदित्यत्वे वा पारोक्ष्यम्। आदित्यत्वस्य, ध्येयः सदा सवितृमण्डलमध्यवर्तीत्यन्तस्तद्धर्माधिकरणोक्तरूपत्वात् 'येनेन्द्रियेण यद्गृह्यते तेनैवेन्द्रियेण तद्गता जातिस्तदभावश्च गृह्यते' इति स्वीकारस्य मतान्तरीयत्वात्। एतादृशादित्यस्य अभेदान्वयी मधु तस्य ज्ञानकर्तृत्वात्। तदाहुरादित्यस्य मधुत्वमिति। विरोधः प्रत्यक्षविरोधः परोक्षवादे मानाभावादित्यर्थः। मानमाहुः सैषेति। श्रुत्येति महानारायणीयोपनिषच्छ्रुत्या। रसेति सर्वं सर्वमयमिति श्रुतेः। तथा च त्रयीविद्याया भक्तिरसात्मकोप्ययम् 'रसो वै सः' इति श्रुतेश्च। धरणीवदिति। भूमिर्धेनुर्धरणी लोकधारिणीति तैत्तिरीये यथा भूमेर्धेनुत्वमाधिदैविकं रूपं श्रीभागवते तथा वाचोप्यान्यत्रिकमाधिदैविकं ज्ञातव्यम्। परोक्षवादे, प्रत्यक्षवादे गौणी स्पष्टा। युक्तिमाहुः तापीति नृसिंहतापिनीयश्रुतेः। नन्विदमपि प्रत्यक्षबाधितं तत्राहुः तत्तदिति। अकिमिति। श्रुत्यपेक्षया। अत्रापि परोक्षवादे। प्रत्यक्षवादे तु गौण्येवमत्र परोक्षवादो वेदान्तत्वेन योगादङ्गतीत्यग्निरिति द्युलोकादिरग्निर्गतेत्येव सर्वस्य सर्वमयत्वे। तदेतदिति वस्तुत इत्यादिनोक्तं भाष्यीयम्। चकारात् परोक्षवादोपीति दार्ष्टान्तिके दृष्टान्ते चास्माभिरुक्तं परोक्षवादार्थम्। अनेनेति परोक्षवादोक्तेन। सारघमिति सरघा मधुमक्षिका तासु जातं सारघं 'तत्र जातः' इति सूत्रेणाण्। अत्रेति सारघे। न कोपीति। अविरोधपदार्थस्य भाष्ये

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ (१।४।३)

मन्त्रान्तरेण पुनराशङ्क्य परिहरति। बृहदारण्यकषष्ठे श्रूयते।
'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः।
तमेव मन्य आत्मानं विद्वान् ब्रह्माऽमृतोऽमृतम्' ॥

भाष्यप्रकाशः।

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ सूत्रमवतारयन्ति **मन्त्रान्तरेणेत्यादि।** **आशङ्क्येति** सांख्यमतस्य श्रौतत्वमाशङ्क्य। तेन विषयरूपहेतुभेदादधिकरणान्तरत्वं वा, पूर्वशेषत्वान्न वेत्यपि बोधितम्। विषयमाहुः बृहदित्यादि अत्र षष्ठ इति काण्वपाठाभिप्रायेणोक्तम्। माध्यंदिनानां चतुर्थे दर्शनादिति। मन्त्रार्थस्तु, यस्मिन्नेते पञ्चादय आकाशान्ताः प्रतिष्ठितास्तमात्मानमेवं ब्रह्माऽमृतं विद्वानन्यो जीवः, अमृतो मुक्तो भवतीति शेषः। अन्यैस्तु तमेवात्मानं ब्रह्माऽमृतं विद्वानहममृत इति मन्य इति व्याक्रियते।

रश्मिः।

स्फुटत्वान्न कोपीत्यर्थः। सूत्रार्थः। कल्पनोपदेशाच्चकारात् पञ्चम्या लुक्। चकारात् परोक्षवादात्। मध्वादिष्विव मध्वादिवदित्यत्र सप्तम्यन्ताद्वतेर्व्याकृतत्वात् अजाशब्दस्याद्यसृष्टिरूपज्योतिर्वाचकत्वस्याविरोधः। विरोधः सहानवस्थानलक्षणः। अजात्वविशिष्टाजावाचकत्वेन सह ज्योतिर्वाचकत्वस्यानवस्थानं न। प्रत्यक्षवादे पूर्वस्य परोक्षवाद उत्तरस्य सत्त्वादिति। **भाष्ये। वेद** इति वेदस्य चेश्वरात्मत्वादिति भावः। **प्रकाशे** गौण्युक्तेव। अत्राजामेकां लोहितशुक्लकृष्णामिति विषयः। अत्राजाशब्देन सांख्यमतसिद्धा प्रकृतिरुच्यते वा अग्निसोमसूर्यविद्युदादिरूपं ज्योतिरुच्यते इति संशये प्रकृतिरिति पूर्वपक्षेऽजाशब्देन ज्योतिरेवोच्यत इति सिद्धान्तः। संगतिस्ततोक्ता निर्वाहकत्वरूपा ज्ञेया। पूर्वाधिकरणनिरूपणानन्तरं किं सांख्यनिराकरणनिर्वाहप्रयोजकमिति जिज्ञासया 'कल्पनोपदेशाच्च मध्वादिवदविरोधः' इत्यधिकरणनिरूपणमिति ॥ १० ॥

इति द्वितीयमधिकरणम् ॥ २ ॥

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ भाष्ये। बृहदारण्यकेति माध्यंदिनानां षष्ठेध्याये 'अथ जनको ह वैदेहः कूर्चात्' इत्यारम्भके तत्रापि शारीरब्राह्मणे श्रूयते। **प्रकृते।** सूत्रमिति त्रिसूत्रमिदमधिकरणम्। तत्रात्र सूत्रे मन्त्रान्तरेण पुनराशङ्क्य परिहार इतरयो-मंत्रार्थः संख्यापूरणं च। एवमन्यत्रापि। **यस्मिन्निति।** पूर्वार्धं भाष्ये व्याकरिष्यते। उत्तरार्धं व्याकुर्वन्ति यद्यपि तमेव मन्येहमात्मानं विद्वान् वेदोवबोधयामि ब्रह्मामृतं कृष्णं सदानन्दं अमृतोहं मन्ये ब्रह्म सदमृतमानन्द इत्यर्थो भवति। तथापि पूर्वमन्त्रे 'यदैतमनुपश्यत्यात्मानं देवमञ्जसा। ईशानं भूतभव्यस्य न तदा विचिकित्सति' इति मन्त्रे आत्मदर्शी विशेषेण निवासं कर्तुं नेच्छतीत्युक्तम्। तत्रात्मदर्शनस्य पूर्वं सिद्धत्वाद्बोधनं नोपयुज्यत इत्यर्थान्तरमाहुः **तमात्मानमिति। ब्रह्मामृतं** कृष्णम्।

'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' ॥ इति वाक्यात्।

अन्यैरिति बृहदारण्यकटीकाकृदादिभिः। शाब्दापरोक्षवादोत्र। तत्तच्छब्दार्थ एव जीवात्मानः तत्त्वमसीति वाक्येन ब्रह्मामृतं विद्वान् शाब्दज्ञानवान्। मन्ये अपरोक्षज्ञानवान्। अस्वरसस्तु शाब्दापरोक्षस्य दूषणाद्राकरे दूषितत्वं ज्ञेयम्। विषयवाक्यार्थ उक्तः। विषयस्त्वत्र पञ्चगुणिताः

इति । यद्यप्यत्र पञ्चजनाः पञ्चोच्यन्ते, न पञ्चानां पञ्चगुणत्वम् । समासानुपपत्तेः । तथा हि । आद्यः पञ्चशब्दः संख्यावाची, संख्येयवाची वा ? । आद्ये पञ्चसंख्याया एकत्वान्न षष्ठीसमासः । संख्यायां संख्याभावाच्च । संख्येयपरत्वे

भाष्यप्रकाशः ।

अनेन मन्त्रेण कथमाशङ्कोत्थानमित्याकाङ्क्षायामस्मिन् मन्त्रे पञ्चशब्दद्वयदर्शनात् पञ्चसंख्याविषयकपञ्चसंख्यान्तरश्रवणाभिमानरूपेण मूढग्राहेणेति वक्तुं तं व्युत्पादयन्ति यद्यपीत्यादि । तथाच तद्विवक्षितसंख्यानुपसंग्रहान्मूढग्राह इत्यर्थः । कथं समासानुपपत्तिरित्याकाङ्क्षायां तां व्युत्पादयन्ति तथा हीत्यादि । अयमर्थः । संख्योपसंग्रहार्थं पञ्चानां पञ्चेति समासे वाच्ये पञ्चसंख्याया एकत्वाद् ब्राह्मणसमाज इत्यत्र ब्राह्मणानामित्यस्येव पञ्चानामित्यस्य संख्यावाचिनो बहुवचनान्तस्य प्रवेशो न वक्तुं शक्य इति न षष्ठीसमासः । यदि च पञ्चशब्दस्य नित्यं बहुवचनान्तत्वेन दारा इत्यादिवद् बहुत्वस्याविवक्षितत्वेन प्रवेशो विभाव्यते, तदापि पञ्चपञ्चेत्यस्य पञ्चसंख्यासंबन्धिनी पञ्चसंख्येत्यर्थो वक्तव्यः । संबन्धश्च विषयतया वक्तव्यः । तथा सति तस्यां संख्यायां

रश्मिः ।

पञ्चेति व्याख्याय सांख्योक्तानि पञ्चविंशतितत्त्वानि ग्राह्याणि वाक्प्राणश्चक्षुःश्रोत्रमन्नं मन इति पञ्चकं पञ्चजनशब्देन ग्राह्याणीति अत्र पूर्वपक्षमनुवदन्ति स्माचार्याः इति सूत्रयामासुरनेनेति । पञ्चेति पञ्चसु पञ्चेत्यत्र तं मूढग्राहं मूढो मोहयुक्तस्तस्य ग्राहो ग्रहणम् । तद्धीति गुणो विंशतिस्तत्त्वं 'गुणोऽप्रधाने रूपादौ' इति विश्वात् रूपादिनैयायिकोक्तोतः संख्यालाभः । भाष्ये । पञ्चानां पञ्चगुणत्वे पञ्चविंशतिसंख्यालब्ध्या न पञ्चानामिति तेषां सांख्यपदार्थश्रौतत्वकल्पकानां विवक्षिता संख्या पञ्चविंशतिसंख्या । आद्य इत्यादि भाष्यार्थमाहुः अयमिति । संख्येति पञ्चविंशतिसंख्योपसंग्रहार्थं पञ्चानां संख्यानां पञ्चेति षष्ठीतत्पुरुषः । षष्ठ्या वैशिष्ट्यमर्थः । गुणगुणिनोः समवायात् 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः । संख्यार्थे द्विबहुत्वे स्तः' इत्यमरात् पञ्चसंख्या न पञ्चत्वम् । पञ्चेति पञ्चपञ्चकेषु एकं पञ्चकं पञ्चतत्त्वरूपं पञ्चसंख्याविशिष्टमिति प्रतीतेः सामानाधिकरण्यसंबन्धेन पञ्चसंख्यायामेकत्वं एकं रूपं रसात्पृथगित्यत्र रूपे गुणे एकत्वसंख्यावत् । न षष्ठीति भाष्यं विवृण्वन्ति स्म ब्राह्मणेति । ब्राह्मणानां समाजः । अनेन प्रकाशेन प्रकृतिविचारे प्रत्ययार्थबहुत्वसंख्यास्मरणात्तद्विचार्यते इत्यस्येति । अत्र प्रकृत्यर्थे प्रत्ययार्थबहुत्वस्याश्रयतयान्वयः बहुत्वावच्छिन्नब्राह्मणसंबन्धी, अस्य समाजपदार्थेऽभेदान्वयः संबन्धस्य पदार्थमर्यादयाऽभावात् । तादृशसंबन्ध्यभिन्न एकत्वविशिष्टः समाज इति बोधः । एकत्वस्य समाजेन्वयात् बहुत्वसंख्याया इव इत्यस्य । प्रवेश इति न च पञ्चपदं पञ्चसंख्यावाचकं भागत्यागलक्षणिकया सामानाधिकरण्येनैकं तत्रान्वयीत्युक्तम् । तत्र बहुत्वं पञ्चपदवाच्यसंख्येयान्वयि वाच्यं बहुत्वावच्छिन्नपञ्चसंख्येयनिष्ठपञ्चनिष्ठमेकं नैयायिकमते पञ्चसंख्यायामेक इत्यत्र प्रथमान्तविशेष्यकबोधाङ्गीकारादिति वाच्यम् । भागत्यागलक्षणिकया बहुत्वान्वयिपञ्चसंख्येयाप्रतीतेर्बहुत्वान्वयप्रवेशस्य वक्तुमशक्यत्वात् । नेति बहुत्वस्यैकार्थीभावेऽन्वयाऽप्रतीतेः सामर्थ्याभावान्न षष्ठीसमासः । ननु बहुत्वस्य विवक्षा नास्ति इत्यप्रतीतत्वेपि समासः सामर्थ्यादिति चेत्तत्राहुः यदि चेति । तस्यामिति पञ्चानां पञ्चेत्यत्र विषयतासंबन्धोङ्गीकृतः विषयतासंबन्धेन सत्त्वे सप्तम्या भाव्यमिति सप्तम्यप्युक्ता ।

भाष्यप्रकाशः ।

तत्संख्याऽभावात् समासानुपपत्तिः । अनेन सप्तमीसमासोऽपि नेत्युक्तप्रायम् । एवमन्येऽपि बोध्याः । यदि चाद्यस्य पञ्चशब्दस्य संख्येयपरत्वेन द्वितीयस्य संख्यापरत्वेन सप्तमीसमासो भाव्यते, तदा पञ्चसंख्यासंख्येयेषु पञ्चसंख्येत्यर्थलाभादभीष्टायाः संख्याया असिद्ध्या समासवैयर्थ्यम् । यदि च पूर्ववदाद्यस्य संख्यार्थत्वं, द्वितीयस्य संख्येयार्थत्वं, तदापि षष्ठीसमासे संख्येयबोधकपदादेव विशेषणीभूतसंख्यालाभेन पूर्वपदस्यानन्वयः । सप्तमीसमासे तु संख्यायां संख्येयाभावादुत्तरपदस्यानन्वयः । न चात्रासूर्यंपश्या राजदारा इतिवदसमर्थसमास एवास्त्विति वाच्यम् । अत्र 'असूर्यललाटयोर्दृशितपोः' इतिवत् तादृशसमासज्ञापकाभावादिति । एतेनान्येऽप्य-

रश्मिः ।

संख्यायामिति भाष्यं विवृण्वन्ति स्म **अनेनेति** । पञ्चानां पञ्चगुणत्वमित्यत्र पञ्चानां पञ्चेति विग्रहे षष्ठ्या विषयत्वसंबन्धाङ्गीकारेण संख्यायां संख्यानङ्गीकारेण च पञ्चसंख्यासु पञ्चसंख्येया इति विग्रहः । द्वितीयपञ्चपदं संख्यावाचि चेत् पञ्चानां पञ्चगुणत्वं, अत्र पञ्चानां पञ्च इत्यत्र घटानां घटा इतिवदतिमूढग्राह्यत्वं पञ्चानां सकलानां पञ्चविंशतिपञ्चेति । यदि च शते पञ्चाशदितिवदुच्यते तथापि द्रव्यादिगतायाः एव प्रत्ययाङ्गीकाराददोषः । **एवमन्य** इति द्वन्द्वाव्ययीभावयोरसंभवात्तत्पुरुषबहुव्रीहिद्विगुकर्मधारया इत्यर्थः । अत्र षष्ठीसप्तम्योस्तत्पुरुषस्योक्तत्वात् मूढग्राह्यत्वात् तृतीयादिसमासस्तु न सूत्राभावात् । **संख्येयपरत्व** इत्यादि भाष्यं विवृण्वन्ति स्म **यदि चेति**, तं समासमाहुः **तदेति**, पञ्चेति संख्यावाचकः । **अभीति** एतत्समासे पञ्चत्वमेवेति अभीष्टायाः पञ्चविंशतिसंख्यायाः । **पूर्ववच्चेदनन्वय** इति व्याचक्रुः **यदि चेति** चेद्यदि पूर्ववदिति संख्यार्थत्वमित्यनेनान्वयि । संख्यायां संख्याभावादित्युक्तभाष्यात् । अत्र भाष्य एव संख्यावाचकत्वं पञ्चपदस्य द्वितीयस्य तदा तु संख्येयार्थत्वमित्यन्तमन्वयः । **संख्येयेति** पञ्चानां पञ्चेत्यत्र संख्येयवाची पञ्चशब्दः । स च पञ्चविशिष्टवाचकः । तत्र पञ्चत्वे पञ्चानामित्युक्तपञ्चसंख्यानामभेदान्वयः स च नास्ति उद्देश्यतानवच्छेदकविधेययोरैक्यात् । घटो घट इत्यत्र यथा । **विशेषणीति** पञ्चसंख्यालाभात् । **पूर्वपदस्येति** पञ्चानामिति पदस्य । हेतुभाष्यमवतारयन्ति स्म **न चात्रेति** । अत्र पञ्चानां पञ्चेत्यत्र षष्ठीति सूत्रेण वा कृतसमासके । **असमर्थेति** दृशिना नञः संबन्धादसूर्यमित्यसमर्थसमासः सूर्यं न पश्यन्तीत्यसूर्यंपश्याः इत्यर्थात् । अत्रासूर्योपपदे दृशेः खश् प्रत्ययः कृतः । मनोरमात्र गुप्तिपरं चेदं वचनं यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्ति सत्यपि सूर्यदर्शने प्रयोगो भवत्येव यदा तु सूर्यदर्शनाभावमात्रं सूर्येतरस्य चन्द्रादेः दर्शनं वा विवक्षितं तदा खश् न भवत्यनभिधानात् इति । तथा च दार्ष्टान्तिकेऽसमर्थसमासः । पञ्चानां पञ्चत्वानां व्यपेक्षा जना इत्यनेन जना इत्यस्य पञ्चेत्यनेन पञ्चानामाश्रयतया संबन्धिनो जनास्ते च पञ्च पञ्चगुणिताः पञ्चेति पञ्चविंशतिसंख्या लब्धा । अयं समास एवास्त्विति वाच्यमित्यर्थः । पञ्चानां जनाः पञ्चेत्यर्थात् । असमर्थसमासत्वं तु समर्थपदमहिम्ना समासपदसंनिधेश्च 'समर्थः पदविधिः' इत्यत्र व्याख्यातं सामर्थ्यं तद्विशिष्टत्वम् । सामर्थ्यं च व्यपेक्षालक्षणं एकार्थीभावलक्षणं च, अजहत्स्वार्था वृत्तिः जहत्स्वार्था वृत्तिश्च उभयोः पर्यायरूपे । जहदजहत्स्वार्थवृत्तिरूपसामर्थ्यविशिष्टत्वं समर्थत्वं तद्विशिष्टः समर्थः । न समर्थोऽसमर्थः । तादृशसमसनत्वम् । तथा च राजपुरुष इत्यत्र वृत्तिद्वयमस्ति तद्वत्प्रकृते

१. संख्यानाम् ।

द्वितीयस्य संख्यात्वे पञ्चत्वमेव पूर्ववच्चेदनन्वयः । विधायकाभावाच्च । अतो वीप्सा । पञ्चजनसंज्ञाविशिष्टानां वा पञ्चत्वमिति यथासंभवमर्थः । तथापि मूढग्राहेण संख्योपसंग्रहेपि लक्षणार्थं केनचिद्धर्मेण पञ्चसंग्राहकेण भाव्यम् । स च तेषां मते न संभवति । तथा सति पञ्चैव तत्त्वानि स्युः । अतस्ते

भाष्यप्रकाशः ।

समर्थसमासा निवारिताः । एवं समासानुपपत्त्या तन्मतं दूषयित्वा सूत्रोक्तं पूर्वपक्षहेतुं साधयितुं पुनस्तन्मतोत्थापनायाहुः अत इत्यादि । यतः पूर्वोक्तरीत्या न पञ्चविंशतिसंख्योपसंग्रहोऽतस्त्वया असमस्तयोरेव पञ्चपञ्चेति पदयोर्वीप्सा द्विरुक्तिर्वा, अथ समासान्तरेण पञ्चजनसंज्ञाविशिष्टानां वा पञ्चत्वं यथासंभवं त्वदभीष्टं यथा स्यात् तथा, अर्थो वक्तव्यः । स चेत्थम् । वीप्सापक्षे पञ्चसंख्यायाः पञ्चगुणत्वबोधकस्याभावाद्दशानामेव बोधो न पञ्चविंशतीनाम् । अतो यस्मिञ्जनाः पञ्चशः पञ्चेत्येवं संख्योपसंग्राह्या । द्वितीयपक्षादरे तु पञ्चजनपदस्य, 'दैत्यः पञ्चजनो महान्' इत्युक्ते दैत्ये वा, 'स्युः पुमांसः पञ्चजनाः' इतिकोशोक्तेषु मनुष्येषु वा रूढिमाश्रित्य पञ्च पञ्चपूल्य इतिवत् पञ्चानां पञ्चजनानां समाहारः पञ्चजना इति समासो लिङ्गव्यत्ययादेश्छान्दसत्वं च वक्तव्यम् । अथवा 'दिक्संख्ये संज्ञायाम्' इत्यनेन सप्तर्षय इतिवत्

रश्मिः ।

नेति वैयाकरणभूषणसारे विस्तरः । असमर्थेति यथा देवदत्तो राज्ञः पुरुषो विष्णुमित्रस्य इत्यत्र राजपुरुष इति समासस्तद्वत् । पञ्चत्वानां संबन्धिनां जनाः पञ्च पञ्चगुणिताः पञ्च पञ्चजनाः । पञ्चसु जनाः पञ्चपञ्चगुणिता इत्यर्थे पञ्चविषया जनाः पञ्चगुणिता पञ्चपञ्चेति द्वितीयः समासः । पञ्चसु स्थलेषु जनाः पञ्चपञ्चगुणिताः पञ्चपञ्च । षष्ठीति सूत्रेण सप्तमीति योगविभागात् । सुपेति सूत्रेण वा समासास्तेषामनुपपत्तेर्निवारिताः ॥ भाष्ये । विधायकेति । 'न निर्धारणे' इति सूत्रेण 'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन' इति सूत्रेण गुणे परे समासनिषेधे विधायकाभावात् । 'असूर्यललाटयोर्दृशितपोः' इतिवत् । पूर्वेति संख्योपसंग्रहादिति हेतुम् । स चेति वीप्सयार्थः । समासान्तरेणार्थश्च । एवं सांख्यमतमुत्थाप्य पूर्वपक्षहेतुं साधयामासुः अत इति । पञ्चश इति 'संख्यैकवचनाच्च वीप्सायाम्' इति शस् । पञ्च पञ्च ददति द्वितीयपञ्चशब्दस्य पञ्चकवाचकत्वाद्वीप्सया पञ्चकलाभः । जनाः पञ्च पञ्चकान् ददतीत्यर्थः । अतो वीप्सेति भाष्यं व्याख्याय पञ्चजन-संज्ञेति भाष्यं व्याचख्युः द्वितीयपक्षेति । रूढिमिति । नृवर्गे पञ्चभिर्भूतैर्जन्यते इति पञ्चजनाः घञ् । जनिवध्योश्चेति न वृद्धिः । यद्वा पञ्चजना उत्पादका यस्येति विग्रहौ प्रकृतिप्रत्ययज्ञानार्थौ, नावयवशक्त्यर्थम् । समुदायशक्त्यापहारात् । पञ्चानां पञ्चपूलीनां समाहार इत्यत्र 'संख्यापूर्वो द्विगुः' इति समासो विहितः । ततो 'द्विगोः' इति सूत्रेण ङीब् विधानात् समाहारप्रतीतौ समाहाराः कति इत्याकाङ्क्षायां सत्यां पञ्चेति पदान्तरान्वयो युक्त इतिवत् । अत्र शंकरभाष्यादौ पूलशब्दः 'पुलं तु विपुलेन्यवत् । पुलः स्यात्पुलके चापि' इति विश्वात् । ह्रस्वादिः पुलशब्दः । मूलशब्दो वा 'मूलं मोघे शिफायां च भे निकुञ्जेन्तिकेपि च' इति विश्वः । शिफा जटा । लिङ्गेति स्त्रीलिङ्गव्यत्ययैकवचन-व्यत्ययौ । सप्तेति प्रागग्रं शकटाकारं तारासप्तकं सप्तर्षिसंज्ञकं मण्डलम् । एवं भाष्यं व्याख्याय तस्य विवक्षितसंख्यासाधनत्वाय पूर्वस्मिन् पक्षे पञ्चविंशतिसंख्या स्पष्टेति । वीप्सापक्षमपहाय समास-

भाष्यप्रकाशः ।

पञ्च च ते पञ्चजनाश्चेति संज्ञासमासो वा वक्तव्यः । तत्र पूर्वस्मिन् विकल्पे दैत्यस्यैकत्वेन समाहारासंभवान्न समासः । द्वितीयविकल्पे तु मनुष्याणां बहुत्वेन समूहघटकतया समास-संभवेऽपि विशेषणीभूतपञ्चत्वोपपत्त्यर्थं, 'वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यमः' इति मन्त्रोक्ता वा, जना यदग्निमयजन्त पञ्चेति यागसंबन्धलिङ्गेन निषादपञ्चमाश्चत्वारो वर्णा वा ग्राह्याः । तदापि न पञ्चविंशतिसंख्योपसंग्रहः । संख्याया एकस्मिन्नेव पञ्चशब्दे प्रविष्टत्वेन गुणकसंख्यान्तरस्या-भावात् । तथा संज्ञासमासपक्षेऽपि । वस्तुतस्तु वशिष्ठादिषु सप्तर्षय इतिवत् पञ्च पञ्चजना इति संज्ञायाः कुत्राप्यभावात् समासस्यैवानुपपत्तिः । अत एतत्सर्वं विहाय जनयन्तीति जना इति योगं चाश्रित्य तत्त्वानि ग्राह्याणि । ततः पञ्चानां जनानां समाहारः पञ्चजनाः, पञ्चानां पञ्चजनानां सः पञ्चपञ्चजना इति समाहारसमासद्वयस्य वा पञ्चगुणिताः पञ्च पञ्चपञ्च, ते च ते जनाश्चेत्युत्तरपदलोपिगर्भस्य कर्मधारयस्य वा आश्रयणेन पञ्चविंशतिसंख्यामुपसंगृह्य वेदान्ते

रश्मिः ।

पक्षे पञ्चविंशतिसंख्यासाधकत्वं स्पष्टमाहुस्तत्र **पूर्वे**ति । **निषादे**ति ब्राह्मणाच्छूद्रायां जातो निषादः । यागसंबन्धस्तु 'निषादस्थपतिं याजयेत्' इति श्रुतेः । **एकस्मिन्नि**ति विशेषणे द्वितीयस्य रूढपदा-न्तर्गतत्वात् । **गुणके**ति गुणः विंशतिसंख्या तत्र पञ्चसंख्या पञ्चशब्देनोक्ता विंशतिः संख्या गुण-पदार्थः । गुण एव गुणकः । 'गुणोऽप्रधाने रूपादौ' इति विश्वः । रूपादिः रूपरसगन्धस्पर्श इत्यादि-नैयायिकोक्तः । तत्र संख्या गुणः । **तथे**ति यथा समाहारद्विगुपक्षे तथा । एवमुपपादितेपि भाष्ये समासपक्ष एव पञ्चजनपदे व्याकरणसंचारात् प्रतिपिपादयिषितवाक्यशेषाच्छक्तिग्रहे पञ्चजनपदे उपपदमतिङिति सूत्रेणापि समासस्य वैयर्थ्यमापादयतीति पञ्चजनपदे उक्तव्याकरणनैर्बल्याय पक्षान्तरमाहुः **वस्तुत** इति । न चात्रापि व्याकरणं वक्ष्यमाणं भवतीति 'दिक्संख्ये संज्ञायाम्' इति व्याकरणं कुतो नेति शङ्क्यम् । पञ्चजनपदे अन्यस्य वक्ष्यमाणस्यापि व्याकरणस्य क्लिष्टकत्वेन युक्त्यन्तरतौल्यात् स्पष्टस्य दिक्संख्येति सूत्रस्याप्राप्तिमाहुः **वशिष्ठे**ति । ननु पूर्वपक्षभाष्यस्य पञ्चजनसंज्ञाविशिष्टानां वेत्यस्य विरोध इति चेन्न । पञ्चजनपदे संज्ञासमासं परित्यज्य वाक्यशेषेण प्राणादिवाचकत्वस्योत्तरसूत्रभाष्य एवादरात् । किं च प्राणादिवाचकत्वेपि समासस्तु दिक्संख्येत्य-नेनैव । न च सप्तर्षय इतिवत्पञ्चजना इति संज्ञायाः क्वाप्यदर्शनान्न 'दिक्' समासः किंतूपपदमतिङिति सूत्रेण समास इति वाच्यम् । कर्मणि चेति निषेधात् । न च कुम्भकार इत्यत्रेवोभयप्राप्त्यभावादस्तु समासो बुद्धेः पञ्चवृत्तिं जनयन्तीति प्राणादयः पञ्चजनाः इति भाष्यादिति वाच्यम् । कुम्भकार इत्यत्रास्तु उपपदमतिङिति सूत्रेण समास इह तु पञ्चसंख्याश्रावणात् दिक्संख्येतिसूत्रेण समासः । समानाधिकरण एवेति नियमाश्रयणे तु उपपदमतिङिति सूत्रेण समासः । वसिष्ठादयस्तु 'सप्तर्षीणां तु यौ पूर्वौ' इति श्लोकव्याख्याने द्वादशस्कन्धे सन्ति वसिष्ठो, मरीचिरङ्गिरसः, अत्रिः, पुलस्त्यः, पुलहः, क्रतुरिति अयं प्रकाशो दिक्संख्ये संज्ञायामिति सूत्रप्रवृत्तिर्या पञ्चजनपदे तस्या नैर्बल्यं प्रतिपादयति । दिक्संख्यासमासप्रसङ्गात् । उत्तरसूत्रे वक्तव्यमत्र पूर्वपक्षग्रन्थ उक्तम् । संख्योप-संग्रहादपि नेति सूत्रांशं व्याकरिष्यन्तो यथा संभवमिति भाष्येण वीप्सादिक्संख्येतिसमासयोर-नास्थासूचनादाहुः **अत** इति । यथासंभवमिति भाष्यतात्पर्यात् । जना इति पचाद्यच् । उपपदाभावान्नान्येष्वपि दृश्यत इति डः । **योग**मिति । तथा च योगरूढं पदमिति भावः । अवयवशक्तेः कुलालादौ सत्त्वात् । **उत्तरे**ति पञ्चगुणिता इत्यत्र पञ्चोत्तरपद इत्यर्थः । शाकपार्थि-

नानाभावा एव स्वीकर्तव्याः । यद्यपि भूततन्मात्राकृतिचित्त्यन्तःस्थितत्वधर्मा वक्तुं शक्यन्ते । तथापि न ते तथोक्तवन्तः ।

भाष्यप्रकाशः ।

मोक्षाधिकारान्मुमुक्षुभिः कपिलस्मृतिसिद्धानि पञ्चविंशतितत्त्वानि ग्राह्याणीति तन्मतस्यापि श्रौतत्वकल्पनं मूढग्राह इतीदं सर्वं संख्योपसंग्रहादपीत्यनेनोत्थाप्य, नेत्यनेन निषेधन्ति । तत्र हेतुर्नानाभावादिति । तद् व्याकुर्वन्ति **तथापी**त्यादि । एवं बाधेऽप्युक्तरीत्या मूढग्राहेण संख्योपसंग्रहेऽपि जनशब्दवाच्यानां तत्त्वानां प्रत्यभिज्ञानार्थं तत्पञ्चकनिष्ठपञ्चत्वसंग्राहकेण केनचिद्धर्मेण सांख्यमते भाव्यम् । तादृशश्च धर्मस्तन्मते अप्रसिद्ध इति न संभवति । तदसंभवे सति पञ्चैव तत्त्वानि स्युर्न तु पञ्चपञ्च । अतस्तेषां संख्यासंग्रहस्यावश्यकत्वात् पञ्चकनिष्ठपञ्चत्वसंग्राहका धर्मा **नानाभावाः**, प्रकृतित्वादिधर्मेभ्योऽतिरिक्तो भावो धर्मो येषां तादृशाः **स्वीकर्तव्याः** ।

रश्मिः ।

वादिराकृतिगण इति भावः । **पञ्चविंशती**ति पञ्चगुणिताः पञ्च पञ्चविंशतिः संख्या पञ्चानां जनानां समाहार इत्यत्र समाहारः पञ्चानां जनानामेवैकैकस्य पञ्चकरणं ततः पञ्चकृतस्य जनस्य पञ्चत्वाय पञ्चानां पञ्चजनानां समाहारः पञ्चकरणं पञ्च पञ्चजना इति पञ्चविंशतिसंख्या तामुपसंगृह्येत्यर्थः । सौत्रापिपदार्थं भाष्ये तमाहुः **मूढे**ति । अपि गर्हायाम् । मूढग्राह इति गर्हा सप्तम्यन्तपदं मूढेन मोहयुक्तेन ग्राहो ग्रहणं यस्य समासमात्रस्य स मूढग्राहकस्तस्मिन् । **निषेधन्ती**ति सूत्रकारो निषेधति । **तन्ने**ति निषेधे हेतुः सूत्रे नानाभावादिति । **एव**मिति पूर्वोक्तप्रकारेणातः एतत्सर्वमित्युक्तसमासयोरर्थबाधे । बाधस्तु पञ्चपदस्य पञ्चगुणितरूपत्वं कल्पितं अन्यस्यार्थस्य संभवात् । गौरवात् । समाहारे एकैकस्य पञ्चकरणमित्यपि न समाहृतिस्तु इति शब्दादिवर्गीयामरकोशात् ।

'विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः ।
निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः' ॥ इति ।

'संग्रहो बृहदुद्रङ्गे मुष्टिसंक्षययोरपि' इति हैमः । अपि गर्हायाम् । मूढग्राहो गर्हा । लक्षणेति भाष्यार्थमाहुः **जनशब्दे**ति । **तत्त्वाना**मिति पञ्चविंशतितत्त्वानाम् । पञ्च पञ्चजना इत्यत्र प्रत्यभिज्ञानार्थम् । जनपञ्चकनिष्ठपञ्चत्वसंग्राहकेण । पञ्चेति भाष्यस्य संख्यापरत्वस्फोरणार्थं भावप्रत्ययो न तु भाष्ये पञ्चपदं भावप्रधानमिति बोधनार्थम् । 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः' इत्यमरात् । **केनचि**दिति द्वितीयपञ्चपदं पञ्चगुणेषु लाक्षणिकम् । शक्यसंबन्धो लक्षणा संबन्धश्च स्वरूपः गुणपदवाच्यविंशतिसंख्यायाम् । तथा च स्वरूपसंबन्धः कश्चिद्धर्मस्तेन । **स चे**ति भाष्यं विवृण्वन्ति **तादृशश्चे**ति । स धर्मो दृश्यते स्वयमेव । त्यदादिष्विति कन् । **अप्रे**ति । यथा नैयायिकमते शब्दप्रत्यक्षानुमितयः तथा सांख्यमतेपि स्वरूपसंबन्धो नैयायिकमते नैतेषां मते इति भावः । **तथा**सतीति भाष्यं विवृण्वन्ति **तदस**मिति अयमपि क्वचित्प्रकारोतस्तथापदार्थः । पञ्चानां पञ्चगुणत्वमित्यत्र पञ्चगुणेषु लक्षणाभावाद्गुणाबोधे पञ्चानां पञ्चानां पञ्चेति स्थितौ पञ्चैव तत्त्वानि स्युरित्यर्थः । **पञ्चपञ्चे**ति पञ्च पञ्चगुणिताः । **अतस्त** इति भाष्यं विवृण्वन्ति **स अत** इति पञ्चतत्त्वापत्तेः । तेषां संख्यानां तत्त्वानां वा । प्रेति आदिपदेन महत्तत्त्वादित्वे । **अतिरिक्त** इति । नानापदार्थः । नाना भिन्नवाची नैयायिकभेदवादे य इह नानेव पश्यतीति श्रुतिविचारे । विनार्थेपि । 'नाना विनार्थेपि भवेत्' इति विश्वात् । अपिना 'नानानेकोभयार्थयोः' इति विश्वोक्तम् ।

भाष्यप्रकाशः ।

न च तादृशामभावः । भूतादिषु भूतत्वतन्मात्रात्वाकृतित्वचित्तित्वानां प्रकृतिपुरुषमहदहंकारमनस्स्वन्तःस्थत्वस्येत्येवं तादृशां वक्तुं शक्यत्वात् । यद्यप्येवं शक्यन्ते वक्तुं तथापि न ते तथोक्तवन्तः । मूलप्रकृतिरित्यादिना एकैकनिष्ठसप्तनिष्ठषोडशनिष्ठानां चतुर्णामेव धर्माणां स्वाभिमतसंख्यासंग्राहकत्वेनोपगमात् । तथा चायं सूत्रार्थः । पञ्चपञ्चजना इत्यत्र केनचित् समासेन संख्योपसंग्रहादपि न सांख्यमतस्य शब्दवत्त्वम् । कुतः ? नानाभावात् । संख्यासंग्राहकधर्माणां तन्मते पञ्चपञ्चकनिष्ठधर्मभिन्नत्वेन विद्यमानत्वात् । यदि हि तत्त्वेषु श्रौतत्वं तदभिप्रेतं स्यात् संग्राहकधर्माणां श्रौतशब्दविरुद्धसंख्याकत्वं न ब्रूयुरतस्तथेति । भाष्ये, आकृतित्वं कर्मेन्द्रियाणां धर्मः । चित्तित्वं ज्ञानेन्द्रियाणाम् । अन्तःस्थितत्वं प्रकृतिपुरुषमहदहंकारमनसाम् । सांख्यकारिकायां

रश्मिः ।

(शोधपत्रमत्र) नानापदस्यानेकार्थकत्वे तु कारिकोक्तचतुष्कं नाभिप्रेतम् । अत्रोच्यते । मूलप्रकृतिरविकृतिरित्यत्र मूलप्रकृतेः प्रकृतित्वेनोपस्थितौ अनेकार्थकत्वं अविकृतित्वेनोपस्थितौ अविकृतित्वप्रकृतिविकृतित्व-विकृतित्वप्रकृतिविकृतिविलक्षणत्वरूपचतुष्कमतो विकृतित्वेन रूपेणोपस्थितिं वदामः यथा क्षितिर्गन्धसमवायिकारणमित्यत्र गन्धसमवायिकारणत्वेन क्षितिबोधो न पृथिवीत्वेन तस्या गन्धसमवायिकारणतासिद्ध्यधीनत्वात् । तथाहि । क्षितौ गन्धसमवायिकारणता किंचिद्धर्मावच्छिन्ना कारणतात्वात् घटस्य समवायिकारणतावत् । तद्वदविकृतित्वं तत्त्वान्तरोपादानत्वं किंचिद्धर्मावच्छिन्नं कारणत्वाद् घटदृष्टान्तः पूर्ववत् । एवं 'महदाद्या प्रकृतिविकृतयः' इत्यत्र न महदाद्यत्वेन बोधः किं तु प्रकृतिविकृतित्वेन तत्र किंचित्तत्त्वोपादानत्वे सति किंचित्तत्त्वोपादेयत्वमत्रत्यं तत्त्वोपादानत्वमादाय किंचिद्धर्मावच्छिन्नकारणतात्वात् । दृष्टान्तः स एव । अग्रे 'षोडशकश्च विकारः' इत्यत्र विकारत्वं साक्षात्तत्त्वोपादेयत्वमत्र कारणताभावाभावात्तादृशज्ञानकारणतां विषयनिष्ठामादाय किंचिद्धर्मावच्छिन्नमित्यादि पूर्ववत् । एवं पुरुषलक्षणे उक्तत्रितयविलक्षणत्वेन ज्ञानं तत्कारणतां पुरुषनिष्ठामादाय किंचिद्धर्मावच्छिन्नमित्यादि पूर्ववत् । तदुक्तं द्वितीयपरिच्छेदे दिनकर्याः 'स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः' इत्यस्या मुक्तावल्या व्याख्याने ॥ अत्र शंकरभाष्ये तु नाना अनेकार्थकः नानाभावात् । नाना ह्येतानि पञ्चविंशतत्त्वानि तेषां पञ्चशः पञ्चशः साधारणो धर्मोऽस्ति येन पञ्चविंशत्यन्तरालेऽपरा पञ्चपञ्चसंख्या निविशेरन् । न ह्येकं निबन्धनमन्तरेण नानाभूतेषु द्वित्वादिसंख्याः निविशन्ते इति भाष्यात् । अत्र नानाभावादिति सांख्यमतानुवादो भगवता व्यासेन कृतः । इति सांख्यकारिकोपन्यासेन गम्यते । **यद्यपी**ति भाष्यं विवृण्वन्ति स्म **न चे**ति । **भूतादी**ति आदिपदेन तन्मात्राः पञ्च । आकृतयः कर्मेन्द्रियाणि पञ्च, चित्तयः पञ्च ज्ञानेन्द्रियाणि । अन्तःस्थिततत्त्वानि तानि धर्माः । इति द्वन्द्वगर्भितकर्मधारयः । द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं अभिसंबद्ध्यते । **मूले**ति भाष्यं विवृण्वन्ति स्म **मूले**ति । **चतुर्णा**मिति अविकृतित्व-प्रकृतिविकृतित्व-विकारत्व-प्रकृतिविकृतिविलक्षणत्वानाम् । **केने**ति पूर्वं लक्षणोक्ता केनचित्स्वरूपसंबन्धघटितेन समासेन षष्ठीतत्पुरुषेण 'उपपदमतिङ्' इति सूत्रकृतसमासेन वा । **अपी**ति मूढग्राहेणेत्यर्थः । नानाभिन्नत्ववाचकं लुप्ततृतीयान्तम् । भिन्नत्वं धर्मप्रतियोगिनावपक्षेते । भावो विद्यमानत्वमित्याशयेन विवृण्वन्ति स्म **संख्यास**मिति । **अतस्तथे**ति संख्योपसंग्रहादपि न सांख्यस्य श्रौतत्वम् । **कारिके**ति । आर्याछन्दः ।

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः' ॥

इत्यन्यथोपगमात् । पुरुषे वैलक्षण्याभावप्रसङ्गश्च । किंच नायं श्रुत्यर्थ इति श्रुतावेव प्रतीयते । अतिरेकादाकाशश्चेति । चकारादात्मा यस्मिन्नित्यधिकरणत्वेनोक्तः । तस्मान्नानेनापि मन्त्रेण तन्मतसिद्धिः ॥ ११ ॥

भाष्यप्रकाशः ।

तु प्रकृतित्वं तत्त्वान्तरोपादानत्वम् । प्रकृतिविकृतित्वं किंचित्तत्त्वोपादानत्वे सति किंचित्तत्त्वोपादेयत्वम् । विकारत्वं साक्षात् तत्त्वोपादेयत्वम् । पुरुषत्वं चोक्तत्रितयविलक्षणत्वं बोध्यम् । जनशब्दोऽपि तन्मते विरुध्यत इति दूषणान्तरमधिकमाहुः पुरुष इत्यादि । जनशब्दस्य जनकत्वोपाधिना तत्त्ववाचकत्वेन गृहीतत्वात् पुरुषेऽपि तदापत्त्या तथेत्यर्थः । न च छत्रिणो यान्तीतिवद् गौण्या तत्संग्रहान्न दोष इति शङ्क्यम् । तत्र प्रत्यक्षस्येवात्र गौणीनियामकस्याभावेन तस्या वक्तुमशक्यत्वाज्जनशब्दे युगपद् वृत्तिद्वयापातादगतिकगतित्वाच्चेति । हेत्वन्तरं व्याकुर्वन्ति

रश्मिः ।

'यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेपि ।
अष्टादश द्वितीये पञ्चदश चतुर्थके सार्या' ॥

तत्त्वेति अविकृतिपदार्थः । विकृतिर्विकारः कार्यं तत्त्वान्तररूपं तद्भिन्ना उपादानकारणरूपा । विकृतीराह महदाद्या इति द्वितीयपादे महदहंकारपञ्चतन्मात्राणि इति सप्तप्रकृतिविकृतयः । तत्त्वं च किंचित्तत्त्वस्याहंकारस्योपादानत्वं महति तत्त्वे सति किंचित्त्वं प्रकृतिस्तस्या उपादेयत्वं किंचित्तत्त्वस्येति षष्ठ्याऽभेदोर्थकः । षष्ठ्योर्निरूपितमर्थः । एवमन्यत्रापि । षोडशके विकारत्वं पञ्चस्थूलभूतान्येकादशेन्द्रियाणि च षोडशके विकारत्वं न प्रकृतित्वं तत्त्वान्तरभ्यो भिन्नत्वाभावात् । साक्षात्तत्त्वानि महदादीनि । न च मनसो महत्तत्त्वमतः षोडशकत्वं विकारस्येति कथमिति वाच्यम् । अहंकारवच्चित्तबुद्ध्योः पृथक्कृत्वात् दोषाभावात् । उक्तेति प्रकृति-प्रकृतिविकृति-विकृतिभ्यो विलक्षणत्वम् । तदुक्तं 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोहंकारात् पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गुणाः' इति प्रवचनसूत्रवृत्तौ । भाष्ये । अन्यथेति पञ्चपञ्चकत्वप्रकारादन्यः प्रकारः । चतुष्कत्वं तत्त्वान्तरोपादानत्वं किंचित्तत्त्वोपादानत्वे सति किंचित्तत्त्वोपादेयत्वं साक्षात्तत्त्वोपादेयत्वम् । उक्तत्रितयविलक्षणत्वमेतेषामुपगमात् पञ्चविंशतितत्त्वेषु । प्रकृते । दूषणेति पुरुषस्य जनत्वापत्तिरूपं दूषणान्तरम् । तदिति 'असङ्गोऽयं पुरुषः इति' इति सांख्यप्रवचनसूत्रात् । वैलक्षण्यवति पुरुषे जनकत्वापत्त्या तथावैलक्षण्याभावप्रसङ्गः । ननु 'प्रकारवचने थाल्' इति तथापदस्योक्तप्रसङ्गोर्थः कथं स्यादिति चेन्नास्य पुरुषधर्मत्वेन प्रकारत्वात् । असङ्गस्य पुरुषस्य वैलक्षण्यमजहत्स्वार्थलक्षणया जनपदवाच्यत्वं चाशङ्क्य निषेधन्ति स्म न चेति । एतत्समिति असङ्गपुरुषसंग्रहात् । तथाहि । यथा छत्रिण इत्यत्र एकसार्थवाहित्वे छत्रिपदलक्षणा इयमेवाजहत्स्वार्था लक्षणोच्यते । एकसार्थवाहित्वेन छत्रितदन्ययोर्बाधात् । तथा जनपदस्यैकप्रक्रमपठितत्वे लक्षणा । एकप्रक्रमपठितत्वेन जनतदन्ययोर्बोधात् । तत्रेति दृष्टान्ते । वृत्तिद्वयेति गौणीयोगरूढ्योरापातात् । ननु छत्रिपदस्य वृत्तिद्वयमस्त्येवेत्यत आहुः अगतीति । हेत्वन्तरमिति सौत्रमति-

प्राणादयो वाक्यशेषात् ॥ १२ ॥

नन्ववश्यं मन्त्रस्यार्थो वक्तव्यः । तदनुरोधेन लक्षणयापि ज्योतिःशास्त्रवत् पञ्चपञ्चशब्दः पञ्चविंशतिवाचकतया परिकल्प्यः । स्पष्टमाहात्म्यार्थमात्माकाशयोराधाराधेयभावः प्रदर्शितस्तत्रत्ययोरेव । अतो मन्त्रे तन्मतसिद्धिरित्याशङ्क्य

भाष्यप्रकाशः ।

किंचेत्यादि । आकाश आत्मा चेत्येतयोरतिरेकाज्जनशब्दोक्तेभ्य आधिक्यात् संख्याविरोधे सति न तन्मतसिद्धिरित्यर्थः ॥ ११ ॥

प्राणादयो वाक्यशेषात् ॥ १२ ॥ सूत्रमवतारयन्ति **नन्वित्यादि** । अयमर्थः । पञ्चविंशतिसंख्योपसंग्रहे मन्त्रवर्णविरोधो दोषत्वेनोक्तः । सोऽस्माभिः परिह्रियते । यतो मन्त्रस्यार्थो भवतामस्माकं चावश्यं वक्तव्यः । तत्र भवन्मते आत्मनि प्रतिष्ठिता द्विपञ्चसंख्याकाः पञ्चविंशतिसंख्याका वा एते जनाः, पञ्चसंख्याका वा एते पञ्चजना इति निश्चेतुमशक्यत्वाद्स्मन्मते तु पञ्चविंशतिसंख्याकानां तत्त्वानां निश्चितत्वादस्मन्मतमेव ज्यायः । एवं सति तदनुरोधेन यथा, 'पञ्च सप्त च वर्षाणि न ववर्ष शतक्रतुः' इत्यत्र द्वादशसंख्याघटकतया पञ्च सप्तेति पदद्वयेऽवयवद्वारेण समुदाये लक्षणा । तथात्र पञ्चविंशतिसंख्याघटके पञ्चेतिपदद्वये समुदाय-

रश्मिः ।

रेकादिति हेतुम् । **संख्येति** । सप्तविंशतिसंख्यापत्त्या पञ्चविंशतिसंख्याविरोध इति । न चाकाशः स्थूलभूतमात्मापुरुष इति कुतोतिरेक इति चेन्न यस्मिन् पञ्चपञ्चजना इति श्रुतौ यच्छब्दार्थ आत्माकाशश्च तयोरतिरेक आधिक्यं पुनरुक्त्यापत्तेः । **भाष्ये** श्रुतावयमिति यस्मिन् पञ्चपञ्चजना इति श्रुतौ अयं पञ्चविंशतिसंख्याप्रतिरूपोर्थः । **प्रतीयत** इति आत्माकाशयोः पञ्चविंशतिसंख्यातोतिरेकस्यातिरिक्तत्वस्य सत्त्वात् । तदाहुः सौत्रं हेतुम् । **अतिरेकादिति आकाश** इति अनेन भाष्येण सौत्रचकारार्थाकथनेन च ज्ञायते नायं श्रुत्यर्थ इति भाष्यमतिरेकाच्चेति सौत्रचकारार्थप्रतिपादकमिति । तथा चानुक्तसमुच्चयार्थकश्चकार इति भावः । आकाशश्चेति सौत्रचकारादात्मा । नन्वात्मग्रहणे किं बीजमत आहुः **यस्मिन्निति** । ननु कथमेकस्याधाराधेयभाव इति चेन्न 'अदृश्यत्वादिगुणको धर्मोक्तेः' इत्यधिकरणे एतादृश एव ब्रह्मवाद इति भाष्यात् ॥ ११ ॥

प्राणादयो वाक्यशेषात् ॥ १२ ॥ ननु सत्यमुक्तं मन्त्रवर्णे सप्तविंशतिसंख्या वर्तत इति । तथाप्यस्माकं शास्त्रत्वाच्छ्रुतार्थो वक्तव्य एवेति तमर्थान्तरेण प्रत्यवतिष्ठन्तं सांख्यं प्रत्याहुः भाष्ये इत्याशयेनाहुः **अयमिति** । मन्त्रवर्णो यस्मिन् पञ्चपञ्चजना इति । **द्वीति** । द्वौ च ते पञ्चेति विग्रहे 'तत्पुरुषः समानाधिकरणः कर्मधारयः' संख्यापूर्वो द्विगुरित्यत्र चरितार्थः । दशसंख्याका इत्यर्थः । पञ्चजनाः पुमांसः । **ज्योतिःशास्त्रवदिति** भाष्यं विवृण्वन्ति स्म **यथेति** । द्वादशवर्षाणि इन्द्रो न ववर्षेत्यर्थः । द्वादशसंख्या घटयतीति द्वादशसंख्याघटकपदद्वयम् । **अत्रेति** । अत्र पञ्चपदेन पञ्चानां संख्येयानां वर्षाणामुपस्थितिः सप्तपदेन सप्तानां संख्येयानां वर्षाणामुपस्थितिः समवायेन कीदृशेनावयवौ पञ्चसप्तरूपौ, द्वारे अभ्युपायौ निर्गमौ यस्य 'द्वारं निर्गमे अभ्युपाये' इति हैमः । समुदाये द्वादशसंख्येयरूपे लक्षणा । अवयवद्वयसमवायरूपा । **समुदाय** इति । पञ्चविंशतिसंख्येयरूपे लक्षणा पञ्चावयवसमवायसंबन्धरूपा तथा । परिकल्प्य इति भाष्यणोन्वयः । भाष्ये लक्षणयापीत्यपिपदं समुच्चये तदर्थ-

परिहरति । प्राणादयः पञ्चजनाः वाक्यशेषस्य मन्त्रार्थनियामकत्वात् । 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनः' इति ।

भाष्यप्रकाशः ।

लक्षणया, अथवा, त्रिणवेनौजस्कामं याजयेत्, 'युद्धं त्रिणवरात्रं तदभूत्तुमुलमुल्वणम्'इत्यत्र यथा त्रयो नव यत्रेति बहुव्रीहिस्तथात्र पञ्च पञ्च यत्रेति बहुव्रीहिणा सुब्लुका च गणलक्षणयापि ज्योतिःशास्त्रे इव पञ्चपञ्चशब्दः पञ्चविंशतिवाचकतया परिकल्प्यः । एवं वाचकत्वे कल्पितेऽत्र पञ्चविंशतितत्त्वसिद्धावेवं मन्त्रार्थः । यस्मिन् पञ्चविंशतिसंख्याकानि तत्त्वानि आकाशश्च प्रतिष्ठित उत्कर्षं प्राप्तस्तमात्मानमेव ब्रह्माऽमृतं विद्वान् अमृतो मुक्तो भवतीति मन्य इति । न च तत्त्वेष्वात्माकाशयोः प्रविष्टत्वात् पुनस्तत्कथनमतिरेकापादकतया बाधकमिति शङ्क्यम् । यतोऽत्र तत्रत्ययोर्गणस्थयोरेवात्माकाशयोराधाराधेयभावः । आत्मनः स्पष्टमाहात्म्यार्थं प्रदर्शितो योऽन्यत्र सर्वाधारत्वादिधर्मवत्तया प्रसिद्धः सोऽपि यस्मिन्निति । अत्रात्मन आधारता, मोक्षे इच्छाऽस्तीतिवद् विषयतया । तथा च यस्मिन्नात्मनि विषये तत्त्वान्याकाशश्च संघातरूपतया परार्थत्वेन ज्ञेयत्वरूपां प्रतिष्ठां प्राप्तवन्तस्तमात्मानं विद्वाँस्तथेति निर्गलितोऽर्थः । अतो मन्त्रे तन्मतसिद्धिरित्याशङ्क्य **परिहरतीति** । परिहारं व्यार्वकुन्ति **प्राणादय** इत्यादि । भवेदयं मन्त्रविरोधपरिहारो यद्यस्मन्मते पञ्चजनानामनिश्चयः स्यात् । स तु नास्ति । यतः प्राणादयो निश्चिताः पञ्चजनाः । कुतः ? **वाक्यशेषात्** । बहूनां प्राप्तौ वक्ष्यमाणस्य वाक्यशेषस्य मन्त्रार्थनियामकत्वात् ।

रश्मिः ।

माहुः **अथवेति** । **सुब्लुकेति** 'अव्ययादाप्सुपः' इति सूत्रेण लुक्कृता बहुत्वसंख्या प्रथमपञ्चपदालुक्कृता पञ्चदशसंख्या द्वितीयपञ्चपदाद्बहुत्वं पञ्चैवेति पञ्चविंशतिः । **गुणेति** गुणे विशेषणे लक्षणा पञ्चगुणितेषु अवयवेषु समवायः तयापि । **ज्योतिरिति** गुणपदं गुणितेषु तद्वत् । **उत्कर्षमिति** विकारत्वं माहात्म्यसूचकत्वं वा । यद्यपि मायाऽविद्याप्रकृतिवादाः किंचित्परस्परं विलक्षणा अपि मुक्त्यंशे भिन्ना इति मायावाद्यनुसार्यर्थः पूर्वोक्तो वक्तव्यस्तथापि जगन्नित्यत्वपरिणामभक्त्याङ्गीकारपूर्वकं 'मुक्तिरन्तरायध्वस्ते र्न परः' इति सूत्रणात् । तन्मतरीत्यार्थमाहुरुभयार्थमिश्रणेन । **तमात्मानमिति** । **मन्य** इति अहममृतो ध्वस्तान्तराय इति मन्य इत्यर्थः । **स्पष्टमिति** भाष्यं व्याकर्तुमाहुः **न चेति** । **अतीति** । भिन्नत्वापादकतया सप्तविंशतितत्त्वानुसंधानजनकतया सांख्यमतबाधकम् । **गणेति** पञ्चविंशतिगणस्थयोः । माहात्म्यमाहु**र्योन्यत्रेति** । अन्यत्र गीतादौ 'आकाशवत् सर्वगतश्च नित्यः' इति । **अत्रेति** श्रुतौ विषयेति वैषयिकाधारे सप्तमी । **विषय** इति विषये आधारे तत्त्वानि तत्त्वान्तर्गत इन्द्रियाणामिवान्येषामपि सविषयत्वेन । आकाशस्तु तत्त्वान्तर्गतोप्युक्तमाहात्म्यार्थी पृथगुपात्तः । ननु माहात्म्यस्य सांख्ये क्वोपयोगः इति चेन्न स्नेहकारणत्वादस्य भक्तौ तात्पर्यं भविष्यति ।

'एकं सांख्यं च योगं च वेदारण्यकमेव च ।
परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यते' ॥ इति भारतात् ।

पञ्चरात्रे 'स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा' इत्युक्तेः । **संघातेति** । 'संघातपरार्थत्वात्पुरुषस्य इति' इति सूत्रे यदेते संहता भावा तदैतदर्थं पुरुषः 'शरीरादिव्यतिरिक्तः पुमान्' 'संहतपरार्थत्वात्' इति सूत्राभ्यां परार्थः पुरुष इति प्रयोगे परार्थत्वेन पुरुषभाने पुरुषस्यासंगत्वादाधेयत्वेन ज्ञेयत्वरूपाम् । **तमात्मान**मिति तमात्मानमेवेति पूर्वमुक्ते सेश्वरसांख्यापत्तिरदूष्यत्वं चातस्तत्पुरुषमात्मानं जीवं विद्वानिति लाघवोक्तिः । अर्थस्योक्तत्वात् । **तथेति** इति पूर्वोक्तप्रकारेण ।

ननु कथमस्य वाक्यशेषत्वम्। उच्यते। प्राणादयः संज्ञाशब्दाः करणवाचकाः। ते ज्ञानरूपं वा, क्रियारूपं वा कार्यं जनयन्ति स्वव्यापारेण। तत्र तेषां करणान्तरापेक्षाभावात् प्राणादीनां पुनः प्राणादिमत्त्वं बाधितं स्यात्। भगवतो

भाष्यप्रकाशः।

एतस्य वाक्यशेषत्वे प्रत्यवतिष्ठते नन्वित्यादि। एकवाक्यलक्षणे परस्परसाकाङ्क्षत्वस्यैकवाक्यताबीजस्य सूचितत्वात् तस्याश्चात्राप्रतीयमानत्वे एकवाक्यत्वाभावेन शेषताया निश्चेतुमशक्यत्वात् कथमस्य वाक्यशेषत्वमित्यर्थः। एवं प्रत्यवस्थाने तां व्युत्पादयन्ति उच्यते प्राणादय इत्यादि। सत्यमापाततो नाकाङ्क्षा प्रतीयते। तथापि सूक्ष्मविचारे, प्राणादय इत्यादिनोक्तप्रकारेण पुनः प्राणादिमत्त्वं बाधितं स्यादित्यतः प्रतीयते। किंच। ते निचिक्युरित्युत्तरार्धाद् भगवतो माहात्म्यनिरूपणार्थमिदं वाक्यं प्रवृत्तम्। सांख्यमते चेश्वरानङ्गीकाराद् भगवतो माहात्म्य-

रश्मिः।

निर्गलितो निष्कृष्टः। बहूनामिति पक्षाणाम्। भाष्ये वक्ष्यमाणस्य। एतस्येति भाष्योक्तस्य प्राणस्य प्राणमित्यस्य। न तु वाक्यस्य यस्मिन् पञ्चपञ्चेत्यस्य शेषः तदर्थः। पारार्थ्यं शेषलक्षणमिति पञ्चपञ्चजना इति गूढार्थ इति तदग्रेतनवाक्ये प्राणादिपञ्चोक्तेः तच्छेष इति। नन्विति भाष्यस्य किं प्रयोजनमित्याकाङ्क्षायां वाक्यशेषत्वे कारणं वक्तुम्। मुक्तावल्यामपि वाक्यशेषे एकवाक्यतायाः कारणभूताया अनुक्तेस्तामाहुः एकेति। पूर्वतन्त्रे द्वितीयाध्याये 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति सूत्रे। सूचीति यदि विभागे साकाङ्क्षं स्यात् तदैकवाक्यं स्यात्, अर्थैकत्वादित्यत्र हेतुहेतुमद्भावे लिङ्गाबोधितत्वं यद्यपि तथापि अर्थैकत्वादेकं वाक्यं भवति चेद्विभागे साकाङ्क्षं स्यात् इत्यर्थे लिङ् भावाद् हेतुहेतुमद्भावस्य सूचितत्वम्। शेषताया इति एतस्य प्रयोजनं वै यस्य तो न तृप्यति निषादपञ्चमा वर्णा इत्येतयोरसंग्रहोऽग्रे। एवं सतीत्यनेनात्रैव स्फुटीभविष्यति। तामिति आकाङ्क्षाम्। प्राणादय इति एतेषां संज्ञाशब्दत्वकथनं पाचको याचक इतिवदुभयो संज्ञाशब्दत्वार्थम्। यद्वा प्राणा आदिर्येषां ते प्राणादय इत्यत्र 'न संज्ञायाम्' इति सूत्रेण 'शेषाद्विभाषा' इति सूत्रविकल्पितकबभावो नित्यः। तेन प्राणादय इति सौत्रप्रयोगः। न कदापि प्राणादिका इति सूचितम्। ज्ञानकरणानि ज्ञानरूपं कार्यं कर्मेन्द्रियाणि क्रियारूपं कार्यम्। करणत्वं व्यापारनियतमत आहुः स्वेति। करणेति। द्वितीयान्तप्राणादिपदवाचकानामपेक्षाभावात्। उत्तरत्र हेतुः। बाधितमिति बाधितत्वमाधाराधेयभावः। अनेन उक्तप्रकारेण। प्रतीयत इति अर्थान्तराकाङ्क्षा प्रतीयते प्राणादीनां भगवतः प्राणादिरूपस्याकाङ्क्षा वर्तते। ननूक्तं न कारणानां कारणान्तरापेक्षेति। अत्रोच्यते। 'यद्वाचानभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इति केनोपनिषच्छ्रुतेः भगवत आकाङ्क्षास्ति। भगवत इति भाष्यं विवृण्वन्ति स्म किं चेति। ननु द्वितीयप्राणादीनां भगवति शक्तौ किं मानमत आहुः ते निचिक्युरिति ते निचिक्युर्ब्रह्म पुराणमग्र्यम्' 'मनसैवानुद्रष्टव्यम्' 'नेह नानास्ति किंचन' इति 'ये प्राणस्य प्राणमिति विदुः ते ब्रह्मपुराणमग्र्यं निचिक्युः ज्ञातवन्तः। अत्र ब्रह्मज्ञानोक्तेः प्राणस्य प्राणमित्यादि भगवतो माहात्म्यं तत्त्वं तन्निरूपणार्थे। अतो द्वितीयप्राणादिशब्दार्थो भगवान्। किं च शारीरब्राह्मणेपि भगवत्प्रकरणमस्ति। सांख्येपि किंचिदाहुः सांख्येति चकारस्त्वर्थे। सांख्यमते त्वीश्वरानङ्गीकारान्नेदं प्रवृत्तम्।

माहात्म्यविरोधश्च । अतः स्वार्थनिर्वाहार्थमन्यार्थो वर्तते पञ्चजनवाक्यस्य च । अतो बुद्धेः पञ्चवृत्तीर्जनयन्तीति प्राणादयः पञ्चजनाः ।

भाष्यप्रकाशः ।

विरोधश्च स्यादतोऽपि सा प्रतीयते । अतस्त्वद्रीत्या वाक्यस्याबोधकत्वात् तस्य स्वार्थनिर्वाहार्थमन्योऽर्थो वर्तते । अन्यार्थे वर्तत इति सप्तम्यन्तपाठे तु, तद्वाक्यमन्यार्थे वर्तते इत्येवं व्याख्येयम् । पञ्चजनवाक्यस्य च सांख्यरीत्या पञ्चपञ्चकनिष्ठधर्मपञ्चकानुपलम्भात् पञ्चपञ्चजननिश्चायकोऽन्योऽर्थो वर्तते । स क इत्यपेक्षायां संशयादिरूपपञ्चबुद्धिवृत्तिजनकाः पञ्चजनास्ते पञ्चेति पञ्चानां ब्रह्मणि प्रतिष्ठितत्वमर्थः प्रतीयते । तदेतदुक्तमतो बुद्धेरित्यादि । एवं सति प्राणवाक्यं तेषां करणत्वं बोधयत् पञ्चजनवाक्यसूचितं कार्यमाकाङ्क्षते, पञ्चजनवाक्यं च तेषां तदित्यादिनोक्तरीत्या प्राणवाक्योक्तं भगवन्तमाकाङ्क्षत इति द्वयोर्विभागे साकाङ्क्षत्वे ब्रह्मबोधकतया च द्वयोरेकार्थत्वे ब्रह्मज्ञानार्थतया द्वयोरेकप्रयोजनकत्वे च सति यदत्रानुपपद्यमानत्वेनोक्तं तत् सर्वं संगतं स्यादतोऽस्य वाक्यशेषत्वम् । यदि चोभयोः परस्परसाकाङ्क्षत्वाद् गौणमुख्यभावाच्च एकस्य शेषित्वमपरस्य शेषत्वमिति नोपेयते, तदा तु साकाङ्क्षत्वेन खण्डत्वादेव शेषत्वमतो

रश्मिः ।

अत इति शेषः । अतो द्वितीयप्राणादिपदार्थोन्यश्चेद्भगवतो माहात्म्यविरोधः । सेति अर्थान्तराकाङ्क्षा । अत इति भाष्यं विवृण्वन्ति अत इति सांख्यरीत्या । भाष्यं प्रतीकं धृत्वा स्वयं विवृण्वन्ति पञ्चेति । पञ्चका इति पञ्चविंशतितत्त्वावयवाः पञ्चकाः पञ्च तन्निष्ठो यो धर्मपञ्चकस्तस्यानुपलम्भात् । किं तु प्रकृतिविकृतिरिति कारिकोक्तमविकृतित्वादिरूपं चतुष्कम् । अतो बुद्धेरिति भाष्यं विवृण्वन्ति स स क इति । पञ्चजना इति अत्र पञ्चबुद्धिवृत्तीर्जनयन्ति ते पञ्चजनाः कर्मणि घञ् । पञ्चानां जनाः पञ्चजनाः 'दिक्संख्ये संज्ञायाम्' इति समासः । सामानाधिकरण्यनियमस्य छन्दसि विकल्पात् । 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति परिभाषया । सामानाधिकरण्यपक्षे तु 'उपपदमतिङ्' इति सूत्रेण समासः । भाष्ये वाक्यं तु तृतीयस्कन्धस्य षड्विंशेध्याये । तेषां तदिति वाक्यं विवृण्वन्ति स एवमिति । पञ्चजनेति एकार्थीभावात्पञ्चजनेषु शक्तिः समासशक्तेः । बुद्धिवृत्तिरूपं कार्यं तु तात्पर्यवृत्त्या । विग्रहेण तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यं तदवगतेः । तेषां तदिति तेषां प्राणानां तत्तद्गन्धत्वादिप्रकारो यत्र गन्धादिज्ञानेषु तादृंशि स्वकार्याणि प्राणकार्याणि तेषां जननं न स्वतो न प्राणेभ्यो किं तु भगवतोऽजडत्वात् । केनोपनिषच्छ्रुतेः । इति द्वयोरिति भाष्यार्थमाहुः इति द्वयोरिति । सर्वमिति भाष्यार्थमाहुः यदत्रेति । यदत्र प्राणवाक्ये पञ्चजनवाक्ये च । अनुपपद्येति प्राणादीनां प्राणादिमत्त्वं पञ्चजनानां पञ्चत्वम् । ननु सर्वादीनि सर्वनामानीति अन्वर्थसंज्ञाबलात् किं किमन्यत्संगतमिति चेन्न प्राणस्य प्राणवत्त्वं चक्षुषः चक्षुष्मत्त्वं इत्येवं प्रातिस्विकरूपैः सर्वं बोध्यमिति । अतोस्येति विभागे साकाङ्क्षयोरर्थः प्रयोजनं ब्रह्मज्ञानं तस्यैकत्वात् । एकं वाक्यमस्मात् वैवस्वतो न तृप्यतीत्यस्य निषादपञ्चमानां वर्णानां च पञ्चजनप्रतिपादकत्वं पञ्चजनत्वं चेत्युक्तम् । मन्त्रस्य यममाहात्म्यपरत्वात् । निषादेत्युक्तानां लौकिकत्वात् । जना यदग्निमित्यत्र तु पञ्चजना ये ते एव 'वनस्पतयः सत्रमासते' इति श्रुतेः । खण्डत्वादिति भाष्यं विवृण्वन्ति यदि चेति । उभयोरिति यस्मिन् पञ्च पञ्चजना इत्यस्य प्राणस्य प्राणमित्यस्य च । साकाङ्क्षत्वेनेति

'संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च ।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्' ॥

इति । तेषां तत्तत्प्रकारकं स्वकार्यजननं न स्वतः किंतु भगवत इति द्वयोरेकार्थत्वे सर्वं संगतं स्यात् । खण्डत्वाच्च शेषत्वम् । सर्वप्रवर्तकत्वाद् भगवतो न माहात्म्यविरोधः । तत्र प्राणशब्देन त्वग्घ्राणप्राणा गृहीताः । रसना चान्ने

भाष्यप्रकाशः ।

न वाक्यशेषत्वानुपपत्तिरित्यर्थः । ननु प्राणादिप्रवर्तकत्वं जीवस्याप्यस्तीति भगवन्माहात्म्यमत्र वाक्यद्वयेऽपि न स्फुटतीति तद्विरोधात् कथमस्य ब्रह्मवाक्यत्वमित्यत आहुः सर्वेत्यादि । नन्वत्र पञ्चैव प्राणादयः प्रतीयन्ते, नान्ये इति कथमत्र सर्वप्रवर्तकत्वसिद्धिरित्यतः पञ्चसु सर्वनिवेशं व्युत्पादयन्ति तत्रेत्यादि । प्राणशब्दो मुख्यप्राणवाचकः । स च वायुरूप इति प्राणशब्देन वायुविकारभूता त्वक्, तत्सहभूतं घ्राणं मुख्यप्राणस्य रूपान्तरभूता अन्ये अपानादयः प्राणा गृहीताः । रसना चान्ने प्रतिष्ठिता 'तन्निरन्नस्य वर्धते' इति वाक्यादत्यन्ताभा-

रश्मिः ।

यस्मिन् पञ्चपञ्चेति वाक्यस्य ह्याकाङ्क्षत्वेन प्राणस्य प्राणमिति वाक्यं पञ्चसंख्यापूरकं यावत् तावतो खण्डत्वं पूर्ववाक्यशकलत्वं तस्माच्च शेषत्वमतो नैव वाक्यशेषत्वानुपपत्तिः । एवकारो नशब्देनान्वयी । भाष्ये चकारस्यान्यार्थत्वाभावात् । नैवशब्दार्थकत्वम् । जीवस्येति 'तमुत्क्रामन्तं प्राणोनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति श्रुतेः । तं जीवम् । स्फुटतीति तु. प. स्फुट विकसन इत्यस्य रूपम् । स्फोटतीति तु स्फुट विशरणे भ्वा. प. से. रूपम् । धातूनामनेकार्थत्वात् प्रयुक्तमन्यत्रास्माभिः स्फुट विकसन इत्यस्यैव रूपं नामधातुत्वाद्वा तत्प्रयुक्तम् । सर्वेत्यादीति सर्वान्तर्गतो जीवोपि । तेन जीवस्याणुत्वान्न व्यापकत्वं तत एव न प्राणादिप्रवर्तकत्वमित्यग्रे वक्ष्यते । प्राणादीनां सर्ववाचकत्वं व्युत्पादयन्ति प्राणशब्द इति । प्राणपदे वर्णविकारात् घ्राणवाचकं घ्राणपदमनुक्त्वा प्राणपदोक्त्या प्राणान् पञ्चेन्द्रियाणि चानुक्तानि सूचयति तत्र सूचितार्थ उक्तः प्राणशब्द इति वाचको व्यञ्जनया । त्वक् स्वरूपमाहुः वायुवित्यादि तथा च सूत्रे प्राणश्च प्राणश्च प्राणश्च प्राणश्च प्राणश्च प्राणाः सरूपैकशेषः । व्यञ्जनापक्षे श्रुतौ प्राणस्येत्येकवचनं प्राणापेक्षं जात्यभिप्रायेण व्यञ्जनापक्षे । तत्र द्वितीयप्राणशब्दस्त्वचो वाचकः प्राणपदे हल्विकारः घ्राणादय इति भाष्यात् । तस्याभिधावृत्तिर्घ्राणे तदाहुः तत्सहेति । ततोभिधावृत्त्या घ्राणं घ्राणपदवाच्यं प्रसिद्धं हेति । स भगवान् श्रुतिप्रसिद्धः प्राणमिति द्वितीयान्तमुक्तं तदर्थ उक्तः । पुनः सूचितार्थमाहुः मुख्येति । रसनेति भाष्यार्थमाहुः रसनेति रस आस्वादने रसाः षड् मधुराम्ललवणकटुकषायतिक्तभेदात् । रसयन्ते ये इति रसाः चु. प. से. कर्मणि घञ् । तदुक्तं प्रश्नोपनिषदि रसं च रसनीयं चेत्युक्त्वा एष पुरुषः परेऽक्षरेत्युक्तम् । तत्र रसो रसना रसनीयमन्नं पुरुषरूपं यद्यप्यक्षर उक्तं तथाप्यक्षरस्य साधारणाश्रयत्वात् संनिहितान्नत्यागे मानाभावाद्विशेषाश्रयत्वमन्नस्य न जिह्वायाः श्रुतावग्रहणात् । न चान्नं पृथिवी सा चान्नं जिह्वेति शङ्क्यम् । पुराणमतत्वात् । तृतीयस्य षष्ठेऽध्याये ।

'निर्भिन्नं तालु वरुणो लोकपालोविशद्धरेः ।
जिह्वयांशेन च रसं ययासौ प्रतिपद्यते' ॥ इति ।

प्रतिष्ठितेत्यन्नं गृहीतम् । वाग् वा तेजसि । अत्ता चान्नं चैकत्र भवतः । सहभावित्वात् क्वचिदेकग्रहणं, क्वचिदुभयग्रहणमिति तेनैते सर्वे पञ्चैव भवन्त्यतिरिच्यते परमाकाशः ।

भाष्यप्रकाशः ।

काङ्क्षिणीति तद्ग्रहणायात्रान्नं गृहीतम् । पाठान्तरेऽन्नस्थाने ज्योतिः पठितम् । तच्च तेजः । रश्मिः ।

जिह्वापीन्द्रियमिति सुबोधिनी । रसति अनयाऽस्यां वा रसना । णिचो वैकल्पिकत्वं अन्ने प्रतिष्ठितत्वमेवं 'रसना' इन्द्रियम् । रामानुजभाष्ये तु अन्नस्येति घ्राणरसनयोः तन्त्रेणोपादानमन्नशब्दोदितपृथ्वीसंबन्धित्वादित्युक्तम् । 'पृथ्वी वा अन्नमिति' अत्र प्रमाणमाहुः **तन्निरन्नेति** निष्क्रान्तोन्नान्निरन्नः पुरुषः 'अन्नात् पुरुषः' इति श्रुतेः, यतो पुरुषस्य वर्धते अतोन्ने प्रतिष्ठिता पुरुषस्यान्नान्निर्गतस्यान्नत्वात् यथा घटो मृदिति प्रतीतिः समवायित्वात्तथा पुरुषोन्नमिति प्रतीतिः । ननु निरोषधेर्वर्धते इति कुतो नोक्तं साक्षादन्ने प्रतिष्ठितत्वसंभवादिति चेन्न पुराणस्याज्ञासिद्धत्वात् न चैवं सति पुंसो वर्धत इत्युक्त्या अन्नात्पुरुष इत्युक्त्या पुरुषप्रतिष्ठिता सती जायते, अस्ति, विपरिणमते, इति शङ्क्यम् । 'अत्ता चान्नं चैकत्र भवतः' इति भाष्यात् । अत्तृत्वं तु जिह्वायां यतो जिह्वा गलाधःसंयोगानुकूलव्यापारवती तत्रान्नमत्र विवक्षितं अन्ने रसना इन्द्रियरूपा करणाधिकरणयोश्चेति निष्पन्ना न भावल्युडन्ता । शारीरब्राह्मणस्थत्वेन विचार्यवाक्यानां शरीरस्य तत्र त्याज्यत्वेन षड्रसानां स्थूलस्थत्वादत्र भावल्युडन्तताभावात् । ननु जिह्वायां प्रतिष्ठिता रसनं जिह्वाग्रवर्तीति नैयायिकग्रन्थादिति चेन्न रसना हि रसग्राहिकेति रसग्रहकारणं कारणताग्राहकस्तर्को न जिह्वाग्रवर्तित्वेऽपि तु अन्ने प्रतिष्ठितत्वे अन्नसत्त्वे रसग्राहकत्वं तदभावे तदभाव इति रसाभिव्यक्तिस्थानत्वं भवतु जिह्वाग्रस्येति अन्नं पृथिवीति पक्षे जिह्वा अन्नं तस्मिन् प्रतिष्ठिता न चान्नमत्र पृथिव्याधिदैविकी रूपत्रयोक्तेः । तदन्नं त्रिवृत्कृतम् । त्रिवृत्करणस्य पुरुषं प्राप्य भिन्नत्वात् । तदन्नमत्ता बृहदारण्यकोक्तः 'सर्वमत्तुमध्रियत' इति श्रुतेः । न च गलाधःसंयोगानुकूलव्यापाराभावः शङ्क्यः 'सर्वतोक्षिशिरोमुखम्' इति श्रुतेः । तथा चात्ता चान्नं चैकत्र भवतः इति भाष्यस्यायमर्थो रसनायास्तत्राकाङ्क्षया संभवान्न पूर्वोक्त इति वाच्यम् । सहभावित्वादिति भाष्यविरोधात् 'तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधिभ्योऽन्नमन्नात्पुरुषः' इति श्रुतौ आत्मन आकाशोत्पादकत्वेन सर्वपूर्वत्वं अन्नस्य तु औषधिभ्योऽर्वाकृत्वमिति सहभावित्वाभावात् । वृद्धिस्तु परिणामस्य ।

'पूर्वरूपपरित्यागो द्वितीयस्यादिमस्तथा ।
उभौ चैकीकृतौ लोके वृद्ध्यादिभिरुदितौ' ॥

इति द्वितीयस्य दशमाध्याये 'आभासश्च विरोधश्च, इति श्लोकेस्ति । यद्वा अन्ने प्रतिष्ठितेति भाष्ये नान्नपदेनान्नजः पुरुषः किं तु अन्नमेवेति पक्षे । अत्र प्रमाणमाहुरिति न संभवत्यतस्तन्निरन्नेत्युत्तरत्र हेतुः यतः पुंसो वर्धतेऽतोत्यन्तान्नाकाङ्क्षिणी आकाङ्क्षा पुरुषगता रसनायामारोप्यते पुरुषोत्पन्नाकाङ्क्षा क्षुधितोत्यन्नाकाङ्क्षी यद्यपि तथापि 'रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते' इत्यतिक्षुधितो रसनावानपि । उपलक्षणार्थं रसनान्नयोराकाङ्क्षयाकाङ्क्षकभावसंबन्धोप्युक्तः । तथा चान्नपदं रसनोपलक्षणार्थं गृहीतमिति भाष्यार्थः । **तद्ग्रहणायेति** उपलक्षणविधया रसनाग्रहणायान्नं गृहीतमित्यर्थः । तथा च प्रश्नोपनिषच्छ्रुतिः रसश्च रसनीयं चेति अत्र रसो सना प्रायपाठात् रसनीयमन्नं रस इत्यत्र वर्णलोपः । **वाग्वेति** भाष्यार्थमाहुः **पाठेति**

भाष्यप्रकाशः ।

वाक् च तेजोमयीति सा तेजसीति तेन वाक्संग्रहः । अत्ता चान्नं चैकत्र भवतः । अत्रार्थमेवान्नप्राकट्यात् । अतोऽन्नग्रहणेनैवात्तापि गृहीतः । तथा च तस्य तस्य तत्तत्सहभावित्वात् क्वचिदेकग्रहणं, क्वचिदुभयोर्ग्रहणम् । तेजस्येकस्या वाचो ग्रहणम् । प्राणान्नयोस्तूभयोस्त्वग्घ्राणयो रसनान्नयोश्च ग्रहणमिति सिद्ध्यति । तेन प्राणादिपदैरन्येषां संगृहीतत्वेन, चक्षुःश्रोत्रमनसां च कण्ठत उक्तत्वेनैते सर्वे प्राणवाक्ये पञ्चसु निविष्टत्वात् पञ्चैव भवन्ति । अतः पञ्चजनवाक्येऽपि पञ्चजनपदेनैत एव संगृह्यन्ते । अतिरिच्यते परमाकाशः । स च भूतत्वादिविधया पृथिव्यादीनां भूतानां तद्गुणानां च संग्राहक इति तेषां सर्वेषां ब्रह्मणि प्रतिष्ठितत्वकथनात् प्राणवाक्ये च तत्प्रवर्तकत्वकथनाज्जीवे तादृशत्वाभावेन वाक्यद्वयेऽपि भगवन्माहात्म्यमेव स्फुटतीति ब्रह्मवाक्यत्वमेतयोरविवादमित्यर्थः । एतेन बुद्धिवृत्तिजनकत्वं चक्षुःश्रोत्रमनसामेव, न तु

रश्मिः ।

माध्यंदिनपाठादन्यः पाठः काण्वपाठः पाठान्तरं तस्मिन् । **तेजोमयीति** त्रिवृत्करणप्रसङ्गे तेजोऽशितं त्रेधा विधीयत इत्युक्त्वा 'योणिष्ठः सा वाग्' इत्युक्तेस्तेजोविकारः, विकारे मयट्, 'अग्निर्वाग् भूत्वा मुखं प्राविशत्' इति तेजोभिन्ना वाङ् नोक्ता । अभेदस्योपलक्षणविरुद्धत्वादत आहुः **सा तेजसीति** । **तेनेति** । ज्योतिषोपलक्षणविधया वाक्संग्रहः विकारविकार्यभावसंबन्धात् । **अत्तेति** भाष्यं विवृण्वन्ति **अत्तेति** । **एकत्रेति** । परेऽक्षरे । तथा च श्रुतिः प्रश्नोपनिषदि गार्ग्येण पृष्टः कस्मिन्नु सर्वे संप्रतिष्ठिता भवन्ति इति पृष्टः पिप्पलादः पृथिवी च पृथिवीमात्रा चेत्याद्युक्त्वा प्राणश्च घ्रातव्यं च रसश्च रसनीयं चेदित्याद्युक्त्वा 'एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः स परेऽक्षरे आत्मनि संप्रतिष्ठित' इति । **सहेति** भाष्यं विवृण्वन्ति **अत्रार्थमिति** । अत्तुरर्थम् । **गृहीत** इति उपलक्षणेन गृहीतः । तथा च रसयितेत्युक्तश्रौतपदे रस आस्वादने चुरादिः पठितः । न तु रस शब्दे भ्वा. आ. से. ह्रस्वपाठात् । पुरुषविशेषणं रसनयास्वादकर्ता प्रतीयते सोयमत्ता तस्य रसनीयं चेति श्रुतौ रसनीयपदेन अन्नग्रहणात् । रसरसनीय एव इत्यनेनोक्त्वा रसयितेति एष इत्यनेनाभेदकथनात् । तथा चात्र रसनान्ने रसयितृपदेनोच्येते । आस्वादनानुकूलव्यापारो रसनानिष्ठः काष्ठानि पचन्तीतिवत् । अन्ननिष्ठो वा व्यापारः । व्यापाराणामनेकविधत्वात् । **क्वचिदिति** भाष्यं विवृण्वन्ति **तथा चेति** । उदाजह्रुः । तेजसीति तेजसा वाचा ग्रहणमिति प्राप्ते विवक्षातः कारकाणि भवन्तीति औपश्लेषिकाधारे सप्तमी । यथा 'इको यणचि' इत्यत्र । उप समीपे श्लेषः संबन्धस्तत्कृतमौपश्लेषिकम् । **प्राणान्नयोरिति** सप्तम्यन्तं पदद्वयम् । प्राणे कयोर्ग्रहणमित्याहुः **त्वग्घ्राणेति** षष्ठ्यन्तम् । रसना चात्ता च तयोः । **तेनैत** इति भाष्यार्थमाहुः **तेन प्राणेति** आदिपदेनान्नज्योतिषी । **अतीति** पञ्चजनवाक्य एव संगृहीतेभ्योतिरेको भेदः, तस्य कर्म, भिन्न इति यावत् । भूतत्वादित्यादिपदेन पञ्चतन्मात्रत्वम् । **तद्गुणानामिति** शब्दरूपरसगन्धस्पर्शानाम् । **तत्प्रवर्तेति** । ननु प्राणस्य प्राणमित्युक्ते कथं प्रवर्तकत्वमिति चेन्न 'यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इति श्रुत्युक्तवागभ्युदयकर्तृयच्छब्दार्थत्वप्रवर्तकत्ववत् प्राणस्य प्राणमित्यत्र द्वितीयान्तस्य प्राणस्य प्रवर्तकत्वात् । प्राणपदवाच्यत्वं ब्रह्मणो 'अत एव प्राणः' इत्यधिकरणे छान्दोग्ये कतमा सा देवता प्राण इति होवोचेत्यत्र श्रुतौ । **एतयोरिति** पञ्चपञ्चजनप्राणवाक्ययोः । **एतेनेति** । **बुद्धीति** बुद्धेर्वृत्तीनां संशयादीनां जनकत्वम् । ननु

तस्मात् प्राणादय एव पञ्चजना इति न तन्मतसिद्धिः ॥ १२ ॥

भाष्यप्रकाशः ।

प्राणान्नयोरतः कथं प्राणादीनां पञ्चजनत्वमित्याशङ्कापि निरस्ता । केवलानां चक्षुरादीनां न तथात्वमपि तु कर्तृगोलकादियुक्तानाम् । अतस्तद्विशिष्टानामेव पञ्चजनत्वमिति बोधनात् । किंचात्रैवं ब्रह्मणि सर्वप्रतिष्ठासिद्ध्या पञ्चसंख्यादीनामपि न निस्तात्पर्यकत्वम् । परोक्षवादत्वाच्चैवमुक्तिरिति सर्वं सुस्थम् । तदेतदभिसंधायाहुः तस्मादित्यादि । एवंचात्र पञ्चजनपदे योग आदृतः ।

रश्मिः ।

बुद्धिवृत्तिजनकत्वे संशयादीनां चाक्षुषत्वं बुद्धित्वं वेति चेदुच्यते । एतस्य पूर्ववाक्ये—

'तैजसात्तु विकुर्वाणाद् बुद्धितत्त्वमभूत् सति ।
द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः' ॥ इत्यत्र ।

तैजसाद्राजसाहंकारात् । बुद्धिलक्षणमाह इन्द्रियाणामिति । कार्यलक्षणमिदम् । बुद्ध्यनुगृहीतान्येवेन्द्रियाणि पश्यन्ति कुर्वन्ति चेति । अत एव बुद्धितारतम्येन इन्द्रियज्ञानक्रिययोस्तारतम्यं 'द्रव्यस्फुरणविज्ञानम्' इति स्वरूपलक्षणम् । द्रव्यस्य घटादेः स्फुरणे सति शब्देन संस्कारेणालोकेन वा यद्विशिष्टं ज्ञानं यस्मात्, केवलं चक्षुषा ज्ञाने तारतम्यं न स्यात् । स्वतः स्फुरणं योगजधर्मादिभिरपि भवति अतो द्रव्यफुरणविज्ञानं बुद्धेर्लक्षणमित्युक्त्वाधिभौतिकं विभागनिरूपणेनैव लक्षयति संशय इति । एवमाध्यात्मिकबुद्ध्यनुगृहीतानीन्द्रियाणि मनसि सूक्ष्मरूपेण स्थितमाधिभौतिकं संशयादिकं बुद्धिवृत्तिशब्देनोक्तं जायते इति बुद्धिवृत्तिजनकत्वं चक्षुरादीनामिति संशयादीनां चाक्षुषत्वं बुद्धियत्वं चेत्युभयम् । अत्र प्रस्थानरत्नाकरे दैवानुकूल्येनान्तर्यामिणा मनस्तत्कार्यार्थं प्रेर्यते तच्चेन्द्रियप्रेरणाय तत्तदिन्द्रियेण संसृज्यते तत्र तत्तदिन्द्रियदेवतानुकूल्ये विषयसंसृष्टैरिन्द्रियैः स्वावच्छिन्नमनसि पूर्वं निर्विकल्पकमुत्पाद्यते तदा इन्द्रियदेशे बुद्धेर्वृत्तिः । तदा बुद्ध्यापि वृत्तिद्वारा तदनुग्रहे सविकल्पकं भवतीति बुद्धितत्त्वनिवेश उक्तः । तथात्वमिति तथा बुद्धिवृत्तिजनकत्वम् । तु अम् । कर्त्रीति आदिना प्राणान्ने । तद्वीति तथा च साक्षात्परंपरया बुद्धिवृत्तिजनकत्वं विवक्षितमिति भावः । ननु पञ्च बुद्धिवृत्तीर्जनयन्ति इति पञ्चजना इत्यत्र पञ्चपदं साक्षाद् बुद्धिवृत्तिवाचकमिति कुतः परंपरापि विवक्षितेत्याशङ्क्याहुः किं चेति । निस्तात्पर्येति तथा च पञ्चपदस्य प्राणान्नयोस्तापर्यवृत्तिरिति भावः । 'प्रायशः सर्वशब्दानां व्यञ्जकत्वमपीष्यते' इति काव्यप्रकाशे । साक्षाद्बुद्धिवृत्तिवाचकत्वमपि पञ्चपदस्याहुः परोक्षेति । प्राणस्य प्राणमित्यत्र प्राणपदे परोक्षवादः, प्राणस्य घ्राणमित्यर्थः । तथान्नपदे परोक्षवादः रसनाया रसनेत्यर्थः । तथा च प्रश्नोपनिषत् । प्राणश्च घ्रातव्यं च रसश्च रसनीयं चेति प्राणः पवर्गादिः घ्रातव्यं कवर्गादिः । ननु रसपदे रसनेत्यस्य परोक्षवादो न त्वन्नपदे इति चेन्न रस्यते यः स रसः । कर्मणि घञ् । इत्यर्थस्यापि रसपदोक्त्या सूचनात् । अद्यते यत्तदन्नमित्युभयोरेकार्थतया रसपदे परोक्षवादेनान्नपदेपि परोक्षवादात् । ऐकार्थ्यात्प्राण इत्यत्रान्त्याक्षरैक्यात् परोक्षवादः औचित्याच्च प्रायपाठाच्च रस इत्यत्राद्याक्षरैक्यात् परोक्षवादो प्राणरसनयोः । एवमिति पञ्चजनान्तर्गतत्वेन प्रकारेण प्राणान्नयोरुक्तिः । सर्वं पूर्वोक्तं शोभनं तस्यास्थितिकर्ता यस्य तत् । तस्मादित्यादीति । भाष्ये । तन्मतेति सांख्यमतसिद्धिः । शंकराचार्यादिमतैः पञ्चजनपदार्थे योगं निश्चेतुमाहुः एवं चेति । ननु रूढिर्योगमपहरतीति न्यायाद् योगः कुत आदृतः इति

भाष्यप्रकाशः ।

शंकराचार्यास्तु, 'ते वा एते पञ्च ब्रह्मपुरुषाः' इत्यत्र पञ्चसु प्राणेषु प्रयुक्तत्वात् 'प्राणो हि पिता प्राणो माता' इत्यत्रापि पित्रादिरूपेण प्राणस्यैवोक्तत्वाच्च जनसंबन्धेन प्राणादीनां जनशब्दभाक्त्वे सिद्धे दिक्संख्येति संज्ञासमासबलात् पञ्चजनेति समुदायस्यापि प्राणादिषु रूढत्वमविरुद्धमित्याहुः तच्चिन्त्यम्। ते वा इति श्रुतौ जनवचनस्य पुरुषपदस्य प्राणापानादिषु प्रयुक्तत्वे-

रश्मिः ।

चेन्न पूर्वपादे 'शुगस्य तदनादरश्रवणात्' इति सूत्रे दत्तोत्तरत्वात् । ननु प्रकृते किं सूचकमिति चेन्न वाक्यशेषस्यैव योगसूचकत्वात् । ननु कथं योगसूचकत्वमिति चेद् भाष्यार्थः स्फुटं नोक्तोत्रोच्यते । शांकरमतमनुवदति स्म प्राणादय इति । ननु पञ्चजना इत्यत्र 'दिक्संख्ये संज्ञायाम्' इति सूत्रेण समासः स न संभवति पञ्चेत्यस्य संज्ञाशब्दत्वाभावात् । इत्याशङ्क्याहुः संज्ञाशब्दा इति । तथा च शंकरभाष्यं पञ्चजनशब्दः समासान्वाख्यानादवगते संज्ञाभावः संज्ञाकाङ्क्षी वाक्यशेषसमभिव्याहृतेषु प्राणादिषु वर्तिष्यते इति । जातिगुणक्रियायदृच्छाशब्देषु यदृच्छाशब्दाः गौः शुक्लः चलति डित्थः इति चतुष्टयशब्दाः न च जातिशब्दाः । संज्ञारूपो यदृच्छात्मक इति काव्यप्रकाशात् । तथा च पञ्चक इत्युक्तौ प्राणादयः पञ्चेत्युत्तरे संज्ञाशब्दत्वेनार्थस्य संज्ञाप्रत्यायकत्वात् पञ्चजना इति समास इति भावः । 'दिक्संख्ये संज्ञायाम्' इति विशेषस्मरणात् संज्ञायामेव पञ्चशब्दस्य जनशब्देन समास इति 'न संख्योपसंग्रहादपि' इति सूत्रस्य शंकरभाष्यं तेन 'संज्ञा पञ्चजनेत्येषा प्राणाद्याः संज्ञिनः श्रुताः' इति वैयासकिन्यायमालायां संज्ञा प्राणादयः इति पञ्चजनास्तु संज्ञिनः इति युक्तः पाठः । पञ्चजनानां विचार्यत्वेन संजि····दिति ज्ञेयम् । स्वेति यतो 'व्यापारवदसाधारणं कारणं करणं' 'साधकतमं करणं' क्रियासिद्धौ प्रकृष्टोपकारकं करणसञ्ज्ञं स्यात् यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टमिति शेखरे । माहात्म्यमिति तच्च निबन्धे टीकायाम् । रतिर्देवादिविषयेत्यत्र रतिः स्नेहः देवत्वं माहात्म्यमित्युक्त्या देवत्वं सर्वप्रेरकत्वं तस्य विरोधः । प्राणस्य प्राणमित्यादौ द्वितीयप्राणादिपदार्थानुक्तेः । वैयासकिन्यायमालायां प्राणादीनां पञ्चानां साक्षी चिदात्मा द्वितीयप्राणादिशब्दैरभिधीयत इत्युक्तं तन्न विवर्तप्रेरकमिति विरोधः । ब्रह्मामृतवर्षिणीकारोपि द्वितीयप्राणादिपदार्थान्न जगाद । वर्णागम इति पक्षे एकवर्णागमादन्योऽप्रसिद्धः स्पष्टमन्यत् । अत्र वाक्यशेषात् पञ्चानां बुद्धिवृत्तीनां जनाः पञ्च प्राणादयः इत्येकवाक्यतया सूचनात् । ननु रूढिः कैरुच्यत इति चेत्तत्राहुः शंकरेति श्रुतिमाहुः ते वा इति । ब्रह्म वायुः पुरुषा जनाः तथा च पञ्च ब्रह्मवायवः पुरुषा जना यद्वा ब्रह्मणो वायोः जना इति श्रुतिवचनव्यक्तेः, पञ्चसु प्राणेषु जनेषु पञ्चजनपदस्य प्रयुक्तत्वात् । जना पुरुषपदार्थाः स्पष्टा इति नोक्ताः । ब्राह्मणमाहुः प्राणो हीति । जनेति पुरुषपदोक्तजनसंबन्धेन संबन्धश्च ब्रह्मेति भिन्नं पदं यदा तदा भेदः । ब्रह्मणः पुरुषा इति षष्ठीसमासे तु अवयवावयविभावः संबन्धः । प्राणादीनां ब्रह्मपदार्थानां पुरुषपदार्थजनपदभाक्त्वे इत्यर्थः । संज्ञेति संज्ञाशब्दा रूढा इति भावः । प्राणादिष्विति प्राणश्चक्षुःश्रोत्रादिषु । अविरुद्धमिति प्रथमप्रयोगस्य श्रुत्युक्तेषु प्राणेषु सत्त्वात् प्राणादिषु वाक्यशेषोक्तेषु रूढत्वं पञ्चजनशब्दस्याविरुद्धम् । तथा च भाष्यम् । कथं पुनरसति प्रयोगे रूढिराश्रयितुं शक्येति । ननु रत्नप्रभायां प्राणेषु रूढस्य पञ्चजनपदस्य प्राणादिषु लक्षणेत्युक्तमिति रूढत्वं विरुद्धमिति चेन्न । पञ्चजनशब्दस्य रूढिरेव नावयवशक्त्यात्मको योग इत्युक्तत्वात् । प्राणापानादिष्विति । ते वा एते प्राणापानादयः पञ्चजनाः ब्रह्मवायव इत्यन्वयः । समासे लक्षणाप्रसङ्गात् ।

भाष्यप्रकाशः ।

नान्येषु रूढ्यभावात् समुदायस्यापि तत्रैव रूढिसिद्ध्या वाक्यशेषोक्तेषु चक्षुरादिषु पञ्चजनशब्दस्य रूढेर्दूरनिरस्तत्वात् । न च प्राणापानादय एव पञ्चजनाः सन्त्विति वाच्यम् । तथा सति प्राणा इति बहुवचनेनैव चारितार्थ्ये आदय इत्यस्य वैयर्थ्यप्रसङ्गात् । स्वस्यापि वाक्यशेषगता विवक्ष्यन्त इति कथनविरोधप्रसङ्गाच्चेति । समुदायशब्दार्थेऽवयवार्थस्याभावेन जनशब्दस्य तत्रानर्थकतया तेन तदुपपादनस्याशक्यत्वादित्यन्ये ।

रश्मिः ।

इत्येवं प्राणापानादीति । **चक्षुरादिषु** प्रयुक्तत्वेन । **अन्येष्विति** वाक्यशेषोक्तेषु प्राणेषु समुदायस्य पञ्चजनस्यापि **तत्रैव** प्राणापानादिष्वेव । घटादिपदवदनेकेषु रूढिदर्शनात् प्राणचक्षुरादिष्वपि प्राणेष्वस्तु रूढिरित्याशयेन प्राणानुक्तिः । ननु तर्हि प्राणेषु रूढिस्तत्सहचरितत्वसंबन्धश्चक्षुरादिष्विति चक्षुरादिषु लक्षणास्त्विति चेन्न योगेन निर्वाहेऽस्य गौरवग्रस्तत्वात् । वाक्यशेषान्तरस्य श्रौतत्वाद्विकल्पमाशङ्कते स्म **न** चेति । एवकारोप्यर्थे । ते वा एते इति श्रुतौ उक्तवाक्यशेषे संनिधिवत् पञ्चेति पुरुषा इति च पञ्चजना इत्यस्य संबन्धिनो दर्शनात् । **प्राणा इतीति** सूत्रीयप्राणादयः इत्यत्रेदं बोध्यम् । ननु प्राणा इत्युक्तेपि प्राणापानादिषु रूढिः, तथा वाक्यशेषोक्तप्राणेषु रूढिश्चक्षुरादिषु संबन्धरूपा लक्षणेति चेत्तत्राहुः **स्वस्येति** । शंकराचार्यस्यापि वाक्यशेषगताः पञ्चजनाः । प्राचां नैयायिकानां मतमाहुत्याहुः **समुदायेति** । अत्र योगः स्फुटति परं तु रूढिर्योगमपहरतीति रूढिरेवोक्ता सा तु पञ्चजनपदैकार्थीभावप्रतिबन्धिका पञ्चबुद्धिवृत्तीर्जनयतीति पञ्चजनाः प्राणादय इति भाष्याद् योगसत्त्वादेतदाहुः **समुदायेति** । इदं प्राचां नैयायिकानां मतम् । समुदायशक्तिः रूढिः, अवयवशक्तिर्योगः । तत्र पञ्चजनशब्देऽनर्थकतया । अयमर्थः । शब्देन्दुशेखरे तु एकार्थीभावस्य स्थलं दर्शितं 'समर्थः पदविधिः' इति सूत्रस्य । अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैवैकार्थीभाव इति । तदुक्तं वृद्धैः 'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी' जहत्स्वर्था एकार्थीभावः जहन्ति पदानि स्वार्थं यस्यां वृत्तौ सा जहत्स्वार्था । तथा च तेन जहत्स्वार्थेन पञ्चजनसमुदायगतेन जनशब्देन तदुपपादनं तस्या रूढेरुपपादनं तस्याशक्यत्वात् । न चाजहत्स्वार्था वृत्तिरस्तु व्यपेक्षालक्षणसामर्थ्यरूपेति शङ्क्यम् । महाभाष्ये ऋद्धस्य राजपुरुष इति वारणाय तस्या अनादृतत्वात् योगप्रतीत्यापत्तेश्च । **अन्य** इति एकदेशिनः । एकदेशिमतस्यारूपवत्सूत्रे वक्ष्यमाणत्वात् । तेन तदुपपादनस्याशक्यत्वं त्वेवम् । समुदायान्तर्गतजनशब्दस्यानर्थकतया । कथं पुनः प्राणादिषु जनशब्दप्रयोगः तत्त्वेषु वा कथं वा जनप्रयोग इति शंकराचार्यभाष्यासंगतिः । समास-शक्तेरतिरिक्तत्वात् । जनशब्दाशक्तेः । न च शब्देन्दुशेखरे क्लृप्तशक्तित्यागे मानाभावात् प्रत्येकशक्ति-सहकृतया समुदायशक्त्या तथोपस्थितिरयमेव चैकार्थीभावः । जहत्स्वार्था वृत्तिः । पदानामानर्थक्य-मिति तु न युक्तम् । महाबाहुः सुपन्था इत्यादावात्वाद्यनापत्तेः भूतपूर्वाश्रयणं तु सत्यां गतावयुक्तम् । तदुक्तं वृद्धैः 'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी' । अवयवार्थविरुद्धो यत्र समुदायार्थः तत्रैव सेति तदर्थ इति ग्रन्थेन जनशब्दशक्त्युक्तेः न शंकराचार्यभाष्यासंगतिरिति वाच्यम् ।

'पदं न वाचकं वाक्ये साद्दृश्यात्स्मारकं परम् ।
विशिष्टवाक्यमेवात्र वाक्यार्थस्य च वाचकम्' ॥ इति ।

सर्वनिर्णयात् । तदुक्तं वैयाकरणभूषणसारे 'जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था' पदवर्णा वा वृत्तौ पदानामानर्थक्यमिति कथं तर्हि महाबाहुः सुपन्था इति च 'आन्महतः

भाष्यप्रकाशः ।

यदपि, देवाः पितरो गन्धर्वा असुरा रक्षांसि वा निषादपञ्चमाश्चत्वारो वर्णा वा यत् पाञ्चजन्यया विशेति प्रजापरः पञ्चजनशब्द इति तत्परिग्रहेऽपि न दोषः । आचार्येण तु, न तत्त्वानामिह प्रतीतिरस्तीत्येतावन्मात्राभिप्रायेण वाक्यशेषोक्तमादृतमित्याहुः । तदपि स्वप्रज्ञाविलसितमात्रम् । पूर्वोक्तपक्षद्वयोपगमे सर्वाधारत्वरूपब्रह्ममाहात्म्यासिद्ध्या पञ्चसंख्याया निस्तात्पर्य-

रश्मिः ।

समानाधिकरणजातीययोः' इत्यस्य शब्दविषयत्वात् । पथिमथ्यृभुक्षामात्' इत्यस्य च शब्दविषयत्वात् पदानामानर्थक्येप्यदोषात् । न च समानाधिकरणस्य भिन्नप्रवृत्तिनिमित्तत्वे सति एकार्थबोधकत्वादानर्थक्येऽर्थबोधकत्वासंभवात् समानाधिकरणे आत्वानापत्तिरिति वाच्यम् । सादृश्यात् स्मारकत्वात् समानाधिकरणत्वस्य । अनर्थकपदैः सार्थकपदसमानाधिकरणस्मारणेनान्महत इति सूत्रे स्मृतसमानाधिकरणाश्रवणात् । पूर्वं महच्छब्दस्य बाहुशब्दस्य चार्थोनुभूतो महाबाहुरित्यत्र तत्सदृशशब्दाभ्यां सोर्थः स्मारितः । 'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इति भाषापरिच्छेदात् । तदुक्तं टीकायां तथा वाक्येपि पदं न वाचकं तर्हि संकेताग्रहेपि वाक्यार्थज्ञानं स्यात् गौरवं च स्यादित्याशङ्क्याह सादृश्यात्स्मारकं परमिति । वाक्यावयवभूतस्य स्वतन्त्रपदतुल्यत्वात् पदार्थस्मारकत्वम् । अन्यथा स्वार्थं प्रतिपाद्य कृतार्थत्वे वाक्यार्थो न तैर्जन्येतेति शंकराचार्यैकदेशिनोर्मतद्वयमाहुः **यदपीति** । **निषादे**ति निषादः पञ्चमो येषाम् । शंकराचार्यैः श्रुत्या पञ्चजनशब्दार्थ उक्तस्तमाहुः **यत्पाञ्चे**ति श्रुत्यर्थस्तु पाञ्चजन्यया प्रजया विशतीति विट् तया विशा पुरुषरूपस्येन्द्रियस्याह्वानार्थं घोषाः सृष्टा इति यत्तद्युक्तम् । घोषातिरेकेणेन्द्राह्वानायोगात् इति श्रुत्यनुसारेण प्रजामात्रग्रहेपि न दोष इत्यर्थः । प्राणादयः पञ्चजना इति सूत्रोक्तविरोधमाशङ्क्याह शंकरभाष्ये भाष्यकारस्तदाहुरा**चार्येणे**ति भगवता व्यासेन । **वाक्ये**ति प्राणादीनां पञ्चजनत्वम् । **सर्वाधारे**ति अत्रार्थे श्रुतिः प्रश्नोपनिषत्था कस्मिन् सर्वे संप्रतिष्ठिता भवन्तीत्यादिः पूर्वमुक्ता । ननु पृथिव्यादीनां पूर्वमुक्तत्वादेव पितृगन्धर्वासुररक्षोभिर्निषादपञ्चमचतुर्वर्णैश्च सर्वप्रतिष्ठा सिद्धिरस्तु इति चेत्तत्राहुः **पञ्चे**ति । पञ्चशब्दद्वये द्वितीयपञ्चशब्दस्य पञ्चबुद्धिवृत्तिवाचकत्वेन प्रथमपञ्चपदं पञ्चसंख्येयान् वक्ति त्वग्घ्राणादिपञ्च प्राणाः प्राणापानव्यानादयः पञ्च पुनः प्राणाः नागकूर्मकृकलदेवदत्तधनंजयाः इति पञ्च, रसनादयः पञ्च । काण्वपाठे वागादयः पञ्च, एतदेकवाक्यतया रसना कर्मेन्द्रियम् । न च पुराणे ज्ञानेन्द्रियेषु पाठविरोध इति शङ्क्यं पुराणमतत्वात् 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' इतिप्रकाशकत्वेन वागिन्द्रियस्य ज्ञानेन्द्रियत्वात् । न च वस्तुप्राप्यकारित्वप्रसङ्ग इति शङ्क्यम् । ज्ञानेन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वेपि निस्तात्पर्यकत्वप्रसङ्गवारणप्रसङ्गे चतुर्णां प्राप्यप्रकाशकारित्वं न वाचः । यथा दोरादिचतुष्कमन्यदेवेति व्यष्टिसमष्टिभेदेन श्रुत्युक्तमनोबुद्धिचित्ताहंकाराः । पञ्चेति तन्निष्ठपञ्चसंख्यायाः निस्तात्पर्यकत्वं निष्क्रान्ता तात्पर्यकादिति निस्तात्पर्यका तस्याः भावो निस्तात्पर्यकत्वम् । त्वे चेति सूत्रेण ह्रस्वो वा समासाश्रयविधिस्थं सूत्रं तस्य प्रसङ्गस्य । अयं भावः । यस्मिन् पञ्च पचजना इति मन्त्रे बुद्धिवृत्तिजनाः पञ्चेत्यनुक्त्वा पञ्च पञ्चजना इत्युक्तम् । पञ्चेत्यपि वाक्यशेषाद्गणनया लभ्यते एवं च पञ्च पञ्च पञ्च पञ्च पञ्च जना इत्युक्तम् । पञ्चजना वृन्दत्वविशिष्ट पञ्च पञ्च पञ्च । बहुत्वं च पञ्च पञ्च पञ्च पञ्च पञ्चनिष्ठमप्येतदितीच्छयोक्तम् । 'वक्तुरिच्छा तु तात्पर्यम्' तत्प्रतीतीच्छयोच्चरितत्वं वा । एवं च पञ्चपदस्य त्वग्घ्राणादिपञ्चसु तात्पर्यम् ।

भाष्यप्रकाशः।

कत्वप्रसङ्गस्य दुर्वारत्वात्। वाक्यशेषानादरे खले कपोतिकावत् सर्वपक्षापातेन वाक्यार्थनिर्णयाभावप्रसङ्गाच्च। वाक्यशेषस्यानिर्णायकत्वेन न्यायचर्चावैयर्थ्यापत्तेश्च।

अन्ये तु वाक्यशेषबलादेव पञ्चजनशब्दस्य प्राणादिषु रूढिमाहुः। तत् पूर्वोक्तपक्षापेक्षया सम्यगपि वाक्यशेषस्य वराहं गावोऽनुधावन्तीत्यादौ नियामकत्वेन शक्तिग्राहकत्वदर्शनान्नियमस्य

रश्मिः।

द्वितीयपञ्चपदस्य प्राणेषु पञ्चसु, तृतीयस्य नागादिप्राणेषु, चतुर्थस्य रसनादीन्द्रियेषु वागादीन्द्रियेषु वा, पञ्चमस्य मन आदिकरणेषु। श्रुत्या प्रजापरः पञ्चजनशब्द इति यदुक्तं तदपि पञ्चजना प्राणादयस्तेभ्यो हिताः पाञ्चजन्या इति न भवति 'पञ्चजनादुपसंख्यानं' इति वार्तिकाच्छप्रत्ययः पञ्चजनीनमिति स्यात् अतः स्वार्थे ष्यञ्। नापि छान्दसेन 'भवे छन्दसि' इति सूत्रेण यत्। अर्थासंभवात्। तया विशा प्रजयेत्यन्यत् पूर्ववदित्यर्थस्यापि वक्तुं शक्यत्वादविरुद्धम्। अतो वाक्यशेषानादरे दोषमाहुः **वाक्यशेषेति**। खले कपोतिकान्यायस्तु—

वृद्धा युवानः शिशवः कपोताः
खले यथामी युगपत्पतन्ति।
तथैव चामी युगपत्पदार्थाः
परस्परेणान्वयिनो भवन्ति॥ इति।

वाक्येति वाक्यं तु यस्मिन् पञ्च पञ्चजना इति। **न्यायेति** सिद्धान्तमुक्तावल्यां विश्वनाथः। वाक्यशेषादपि शक्तिग्रहः यथा 'यवमयश्चरुर्भवति' इत्यत्र यवपदस्य दीर्घशुकविशेषे आर्याणां प्रयोगः कङ्गौ च म्लेच्छानां यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति तत्र।

'वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवा कणशशालिनः'॥

इति वाक्यशेषाद्दीर्घशूकविशेषे शक्तिर्निर्णीयते कङ्गौ च शक्तिभ्रमात्प्रयोगः। नानाशक्तिकल्पनागौरवात्। हरिपदादौ विनिगमकाभावान् नानाशक्तिकल्पनमिति चकाराद्वेदव्याससूत्रप्रामाण्यात्च्छ्रुतेरुक्त एवार्थः। **आहुरिति** रामानुजाचार्या व्यञ्जनामाहुः तथा च वाक्यशेषोक्त्यनन्तरं भाषयन्ति ब्रह्माश्रयाः प्राणादयः एव पञ्च पञ्चजना इति विज्ञायत इति सम्यगपीति सर्वाधारत्वरूपब्रह्ममाहात्म्यसिद्ध्या सम्यक् तात्पर्यार्थानुक्त्या न तादृश ब्रह्ममाहात्म्यासिद्ध्यापीति पदम्। अपिर्गर्हायाम्। माहात्म्यसिद्धिर्गर्हिता तात्पर्याभावात् पञ्चपञ्चपदयोः। **वाक्यशेषस्येति** वाक्यशेषत्वेन रूपेण वाक्यशेषस्य। पूर्वतन्त्रे प्रथमस्य तृतीयपादे पञ्चमाधिकरणे वाराही उपानहावुपमुञ्चते इति श्रूयते अत्र वराहशब्दमार्याः शूकरे प्रयुञ्जते म्लेच्छाः कृष्णशकुनौ तथा सति लोकव्यवहारेण निश्चेतव्येषु शब्दार्थेषु आर्यम्लेच्छप्रसिद्ध्योः समबलत्वादुभयविधोप्यर्थः विकल्पेन स्वीकार्य इति प्राप्ते उक्तम्। शास्त्रीयधर्मावबोधे शास्त्रप्रसिद्धिर्बलीयसी प्रत्यासन्नत्वादविच्छिन्नपारंपर्यादृतत्वाच्च शास्त्रे च वराहं गावोनुधावन्ति इत्यादौ वाक्यशेष इत्यर्थः। आदिपदेन यवमयश्चरुर्भवति इत्यस्य वाक्यशेषः। यत्रान्या ओषधयो म्लायन्ते अथ ते मोदमाना इवोत्तिष्ठन्ति इति तस्य संग्रहः। गवामनुधावनं शूकरविषये संभवति न कृष्णशकुनिविषये इति वाक्यशेषत्वं वराह इत्यस्य। **शक्तीति** वराहे वराहपदस्य

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

काण्वपाठे, अन्नस्यान्नमिति नास्ति, तदा कथं पञ्च? तत्राह। ज्योतिषा संख्यापूर्तिस्तेषाम् । यस्मादर्वाक् संवत्सर इति पूर्वं पठितो मन्त्रः । तत्र तद्देवा ज्योतिषां ज्योतिरिति । अन्नस्थाने ज्योतिर्ग्राह्यम् । व्याख्यानं पूर्वमेव । तस्मात् सिद्धं न तन्मतस्य श्रुतिमूलत्वम् ॥ १३ ॥

इति प्रथमाध्यायचतुर्थपादे तृतीयं त्रिसूत्रं न संख्योपसंग्रहाधिकरणम् ॥ ३ ॥

भाष्यप्रकाशः ।

च प्रसिद्धप्रसृत्वरशक्तिसापेक्षत्वात् प्रकृते च प्रसिद्ध्यभावाच्चिन्त्यम् । तस्माद् योग एव साधीयानिति दिक् ॥ १२ ॥

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥ व्याख्यानं पूर्वमेवेति ज्योतिषा तेजोवाचौ ग्रहीतव्ये । मनसोऽन्नमयत्वेन मनसाऽन्नाच्चरसना ग्राह्याः। चक्षुषैकं चक्षुरेव ग्राह्यमित्येवं पूर्वोक्तरीतिकमेवेत्यर्थः । ननु काण्वमाध्यंदिनपाठविरोधादिह वाक्यशेषगतप्राणादिग्रहणं न युक्तम् । विकल्पापादकत्वादिति चेन्न । तुल्यबलतया षोडशिग्रहणाग्रहणवत् श्रुत्यभिप्रेतत्वेन विकल्पस्यादुष्टत्वात् । न च तत्रातिरात्रयागे व्यक्तिभेदेन ग्रहणाग्रहणयोरुपपत्तिवत् प्रकृते ब्रह्मण एकत्वेन

रश्मिः ।

शक्तिग्राहकत्वेत्यादिः । प्रसृत्वरेति प्रपूर्वकसर्त्तेः क्वरप् । सूत्रं तु 'इण्नशजिसर्तिभ्यः क्वरप्' इति । प्रसिद्धीति पञ्चजनशब्दस्य प्राणादिषु । योग एवेति तथा च भाष्यम् । महद्वच्चेति सूत्रस्य 'महान्तं विभुमात्मानं' 'वेदाहमेतं पुरुषं महान्त'मित्यादौ महच्छब्दो ब्रह्मपरो योगेन एवमव्यक्तशब्दोप्यक्षरवाचक इतीति । दिगिति व्याकरणस्याङ्गतया वेदान्ते योगाबाधे रूढिरयुक्तेति न रूढिर्योगमपहरतीति नैयायिकमतप्रसरः । नैयायिकमतस्य पातित्यसाधकत्वस्मरणाच्छ्रुतिविरुद्धांशत्याजकत्वस्मरणाच्च ॥ १२ ॥

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥ भाष्ये । यस्मादर्वागिति ।

'यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते ।
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्' ॥ इति मन्त्रः ।

प्रकृते । काठिन्याद् व्याकुर्वन्ति स्म ज्योतिषा तेजोवाचाविति व्याख्यातम् । विकल्प इति केषांचिदन्नं केषांचिज्ज्योतिरिति स च पूर्वतन्त्रे परिसंख्याविधिनिरूपणे विकल्पस्य दोषत्वकथनात् । तुल्येति अन्नज्योतिर्ग्रहणयोस्तुल्यबलत्वम् । अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति श्रुतिर्ज्योतिष्टोमस्य संस्थाविशेषेस्ति । अदुष्टत्वादिति यथाह जैमिनीयन्यायमालाविस्तरे सत्स्वप्यष्टदोषेषु गत्यन्तराभावाद् व्रीहियववत् विकल्पोस्त्विति तत्र व्रीहियवविकल्पो द्वादशतृतीयपादे चतुर्थाधिकरणे व्रीहिभिर्यजेत यवैर्यजेत इति श्रुत्युपन्यासेनोपपादितः । व्यक्तीति दशमस्याष्टमे पादे तृतीयाधिकरणेस्ति अतिरात्रेभेदादतिरात्रव्यक्तिभेदेन । इदमपि तत्रैव । पर्युदासार्थवादनिषेधेषु निषेधार्थमङ्गीकृत्य न चात्रापि व्याघातः शङ्कनीयः।.अनुष्ठानविकल्पाङ्गीकारेण भिन्नप्रयोगविषयत्वात् । सत्स्वप्यष्टदोषेषु गत्यन्तराभावात् व्रीहियववत् विकल्पोभ्युपेतव्यः । तस्मात्प्रतिषेध इति राद्धान्त इति इयमुपपत्तिरपि । तद्वद् दार्ष्टान्तिके योजयन्ति प्रकृत इति । ब्रह्मणोतिरात्रस्थानीयत्वम् । यस्मिन् पञ्च पञ्चजना इत्यत्र यच्छब्दार्थस्य ।

---

१. पाद्मे उमामहेश्वरसंवादेस्ति ।

भाष्यप्रकाशः ।

ग्राह्याणां प्राणादीनामन्यान्यत्वेन युगपद् ग्रहीतुमशक्तिरिति शङ्क्यम् । प्रकृतेऽपि तेषामेव सत्त्वेन ग्राहकशब्दमात्रभेदस्य तत्तत्पाठकरूपाधिकारिभेदाद् ग्रहीतुं शक्यतया सुखेनैवोपपत्तेरिति । भाष्यं तु निगदव्याख्यातमेवेति शुभम् ॥ १३ ॥

इति तृतीयं न संख्योपसंग्रहाधिकरणम् ॥ ३ ॥

रश्मिः ।

दृष्टान्ते षोडशिग्रहणाग्रहणे उक्ते दार्ष्टान्तिकेऽन्नस्यान्नमित्यस्य ग्रहणाग्रहणे ते प्राणाद्यन्तर्गते इति । प्राणादीनां ग्राहकत्वमाहुः ग्राह्याणामिति । अन्येति अन्येषां काण्वानामन्यत्वम् । कर्मव्यतिहाराभावात् समासः । समासवत् सुपः सोरभावश्च तद्धितसमाप्तिसमीपे सर्वनाम्नो द्वे विहिते कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम् । बहुलग्रहणात् अन्यपरयोर्न समासवत् । इतरशब्दस्य तु नित्यम् । असमासवद्भावे पूर्वपदस्य सूपः सुर्वक्तव्यः अन्योन्यं विप्रा नमन्तीतिवत् । अन्यमित्यस्य द्वित्वे पूर्वपदस्य सुपः सौ रूपसिद्धिः । ग्रहीतुमिति षोडशिग्रहणाग्रहणवत् । प्रकृत इति काण्वपाठे । तेषामिति सोयं गकार इतिवत् । तेषां माध्यंदिनपठितानां प्राणादीनामेव सत्त्वेन । ग्राहकौ शब्दौ अन्नज्योतीरूपौ तावेव ग्राहकशब्दमात्रौ तयोर्भेदस्य । तत्तत्पाठकेति काण्वमाध्यंदिनपाठकेत्यर्थः । ग्रहीतुमिति षोडशिग्रहणाग्रहणयोर्ग्रहणवत् । षोडशी ज्योतिष्टोमसंस्था । स्वयमेकोपि ज्योतिष्टोमः समाप्तिभेदात् भिद्यते यतो यज्ञायज्ञीयस्तोत्रेण समाप्तावग्निष्टोम इत्युच्यते । तस्मादपि स्तोत्रादूर्ध्वमुक्थ्यस्तोत्रेण समाप्तावुक्थ्य इत्युच्यते । अतिरात्रे षोडशिनमित्यादिमन्त्रेण समाप्तौ षोडशीत्याद्युच्यते । इत्येवं सप्तसंस्थावान् ज्योतिष्टोमः । श्रीभागवते तृतीयद्वादशेध्याये—

'षोडश्युक्थ्यौ पूर्ववक्त्रात् पुरीष्यग्निष्टुतावथ ।
आप्तोर्यामातिरात्रौ च वाजपेयं स गोसवम्' ॥ इति वाक्यम् ।

अग्निष्टुत् अग्निष्टोमः पुरीष्या अग्नयः चयनात्मकाः पुरीषं यस्यास्तीति पुरीषी च अग्निष्टुच्च पुरीष्याग्निष्टुतौ समासान्तः आप्तोर्यामः अतिरात्रस्यैव भूमा सविशेषोतिरात्र इत्यर्थः । वाजपेयोपि स्वतन्त्रो महाफलः । गोसवः गोसत्रं तयोरपि सहभावः । इति सुबोधिनी । शंकराचार्यभाष्ये तु कथं पुनरुभयेषां तुल्यवदिदं ज्योतिः पठ्यमानं समानमन्त्रगतया पञ्चसंख्यया केषांचिद्गृह्यते केषांचिन्नेति अपेक्षाभेदादित्याह माध्यंदिनानां समानमन्त्रपठितप्राणादिपञ्चतया लाभान्नास्मिन् मन्त्रान्तरपठिते ज्योतिष्यपेक्षा भवति तदलाभाच्च काण्वानां भवत्यपेक्षा अपेक्षाभेदाच्च समानेपि मन्त्रे ज्योतिषो ग्रहणाग्रहणे यथा समानेप्यतिरात्रे वचनभेदात् षोडशिनो ग्रहणाग्रहणे तद्वत् इत्युक्तम् । ननु व्याख्यानं पूर्वमेवेति भाष्यमात्रं व्याकृतमन्यत्कुतो न व्याकृतमित्याशङ्क्याहुः भाष्यं त्विति । अत्र यस्मिन् पञ्च पञ्चजना इति विषये संशयः अत्र पञ्च पञ्चजना इति प्रोक्ताः पदार्थाः किं सांख्यशास्त्रोक्ततत्त्वानि आहोस्विच्छ्रुतिप्रोक्ताः प्राणचक्षुःश्रोत्रमनोन्नसंज्ञकाः इति । पूर्वपक्षस्तु सांख्यशास्त्रप्रसिद्धायाः पञ्चविंशतिसंख्याया अत्रावभासनात् सांख्यतत्त्वानि पञ्च पञ्चजना इति । सिद्धान्तस्तु वाक्यशेषोक्ताः प्राणादयः पञ्च पञ्चजनाः इति । संगतिस्तु पूर्वाधिकरणोक्ता । किं च पञ्चपदं पचि व्यक्तीकरणे भ्वा. आ. सेट्, पचि विस्तारे चुरा प. सेट् ।

'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु' ॥

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥ (१।४।४)

श्रुतेर्विप्रतिषेधात् स्मृतिरेव ग्राह्येति मतं दूरीकर्तुं श्रुतिविप्रतिषेधो नास्तीत्यधिकरणमारभते । तत्र श्रुतौ सृष्टिभेदा बहवः क्वचिदाकाशादिका । 'आत्मन आकाशः संभूतः' इति । क्वचित् तेजःप्रभृतिका । तत् तेजोऽसृजतेति । क्वचिदन्य-

---

भाष्यप्रकाशः ।

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥ ननु पूर्वाधिकरणैः सांख्यमतस्य श्रौतत्वे निराकृते पुनरस्य किं प्रयोजनमित्याकाङ्क्षायामधिकरणप्रयोजनमाहुः श्रुतेरित्यादि । स्मृतिरिति सांख्यस्मृतिः । मतमिति सांख्याभिमतम् । नास्तीति इति बोधनाय । विप्रतिषेधबोधकं विषयमाहुः तत्रेत्यादि । असृजतेत्यन्तम् । अन्यथैवेति युगपत् साक्षात् । संशयस्तु एकस्यां सृष्टौ वक्तव्यायामेवं विप्रतिषिद्धनानाप्रकारकमनेन तदनिर्णायिकां श्रुतिं विहायैकप्रकारनिर्णायिका स्मृतिरेवादर्तव्या ? उत, विप्रतिषेधं परिहृत्य सर्वस्मृत्युपजीव्या

रश्मिः ।

इति पचेः कनिन् कर्तरि, तथा च व्यक्तीकृतबुद्धिवृत्तीनां जनाः पञ्च व्यक्तिकारका प्राणादय इत्यर्थो भवति न रूढ्या प्राणादयोर्थाः । रूढेर्वेदान्तानङ्गत्वात् । योगबोधकव्याकरणस्याङ्गत्वात् । न च भाष्ये यौगिकार्थः कुतो न कृतः इति शङ्क्यम् । भगवदिच्छया प्रसिद्धो योर्थस्तत्परत्वात् भाष्यस्य, उक्तार्थाविरुद्धत्वाद्वा भाष्यस्येति ॥ १३ ॥

इति तृतीयमधिकरणम् ।

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥ श्रुतेरित्यादीति । भाष्ये । विप्रतिषेधात् अनेकधा विरुद्धप्रतिनिधिप्रापणात् । श्रुतेर्हेतोर्ब्रह्मणो विप्रतिषेधात् । ग्राह्येति । अयमर्थः । ननु प्रथमस्य तृतीयपादे औदुम्बरीं स्पृष्ट्वोद्गायेदिति श्रुत्या औदुम्बरी सर्वा वेष्टयितव्येति स्मृतिरप्रमाणमित्युक्ते ग्राह्येति बुद्धिरेव नोदेतीति चेन्न । मूढग्राहेण स्मृतिसंग्रहात् । तथाहि औदम्बरी ज्योतिष्टोमे सदोनामकस्य मण्डपस्य मध्ये काचिदौदम्बरीशाखा निखन्यते तस्याश्च वेष्टनं वाससा स्मर्यते इति श्रुतिमूलरहिता स्मृतिरप्रमाणम् । सांख्यस्मृतिस्तु तच्छास्त्ररूपा अष्टकाः कर्तव्या इति वाक्यवत्प्रमाणं सांख्यानाम् ।

'एकं सांख्यं च योगं च वेदारण्यकमेव च ।
परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यते' ॥

इति परस्पराङ्गत्वात् । तथा चैतन्मतम् । तदुक्तं 'यावानर्थ उदपाने' इति गीतायाम् । 'सांख्योप्येकः सदाद्दतः' इति निबन्धे । तृतीयाधिकरणे सदाचारस्य मानत्वोक्तेश्च । दूरीकर्तुमिति तत्र श्रद्धात्याजनेन पाषण्डित्वापादकं दूरीकर्तुमधिकरणमारभत आचार्यः । ननु श्रुतिविप्रतिषेधोस्ति इति व्यर्थोधिकरणारम्भः इति चेत्तत्राहुः श्रुतीति । नास्तीति बोधनायेति योजनामाहुः प्रकाशे इतीति । तत्रेति भाष्यं व्याकर्तुमाहुः विप्रतीति । युगपदिति । अग्रेतनश्रुतिद्वये द्रष्टव्यम् ।

'एतस्माद् ब्रह्मणः प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी' इति ॥

मुण्डके युगपत् । इदं परिदृश्यमानं सर्वं ब्रह्म कर्तृ असृजत इति तैत्तिरीये साक्षात् । एवं पूर्वोक्तातैत्तिरीये । द्वितीया छान्दोग्ये श्वेतकेतूपाख्याने । सर्वस्मृतीति इदमुपपादितं पूर्वतन्त्रे प्रथमस्य तृतीयपादे

थैव। 'एतस्माज्जायते प्राण' इति। 'इद९ सर्वमसृजत' इति च। एवं क्रमव्युत्क्रमानेकविधसृष्टिप्रतिपादकत्वाद् वस्तुनो द्वैरूप्यासंभवाद्, 'ग्रहान्त्वा अनु प्रजा पशवः प्रजायन्ते' इतिवत् सृष्टिवाक्यानामर्थवादत्वेन ब्रह्मस्वरूपज्ञानार्थत्वादध्यारोपापवादन्यायेन न वेदाद्ब्रह्मणः कारणत्वं सिध्यति। अतः परिदृश्यमानजगतः कारणान्वेषणे क्रियमाणे बाह्याबाह्यमतभेदेषु सत्सु कपिलस्य भगवज्ज्ञानांऽशावतारत्वात् तन्मतप्रकारेणैव जगद्व्यवस्थोचितेत्येवं प्राप्ते, उच्यते। न सृष्टिभेदेषु

भाष्यप्रकाशः।

श्रुतिरेवादरणीयेति। अनिर्णायकत्वमुपजीव्यता च संदेहबीजम्। तत्र संशयस्य पूर्वपक्षयुक्तिभिरेवावगमात् तमनुक्त्वा पूर्वपक्षमेवाहुः एवमित्यादि। क्रमव्युत्क्रमेति नानाविधक्रमैर्नानाविधव्युत्क्रमैश्चेत्यर्थः। सृष्टिवाक्यानीतिपाठे त्वर्थवादत्वेनेत्यस्याग्रे, ग्राह्याणीति शेषो बोध्यः। शेषं स्फुटम्। एतत्समाधिं व्याकुर्वते न सृष्टीत्यादि। अयमर्थः। श्रुतयो हि ब्रह्मणस्तन्माहात्म्यस्य च बोधनार्थं प्रवृत्ताः। 'बन्दिनस्तत्पराक्रमैः' इति श्रीभागवते वेदस्तुतौ वाक्यात्। तत्रापि माहात्म्यमेव मुख्यम्। बोधनद्वारत्वात्। न चाध्यारोपापवादन्यायादरे ब्रह्मस्वरूपप्रतिपत्तिः। उन्मत्तादिप्रलाप इव तत्रापि वाक्ये अप्रामाण्यस्य, श्रुतौ च प्रतारकत्वस्य स्फूर्त्या

रश्मिः।

विमता स्मृतिर्वेदमूला वैदिकमन्वादिप्रणीतस्मृतित्वात् उपनयनाध्ययनादिस्मृतिवत् न च वैयर्थ्यम्। अस्मदादीनां प्रत्यक्षेषु परोक्षेषु नानावेदेषु प्रकीर्णस्यानुष्ठेयार्थस्यैकत्र संक्षिप्यमाणत्वात्। अनिर्णायेति नन्वेतेषां पदानां श्रुतौ कुतोऽनिर्णायकत्वमिति चेन्न पुराणोपबृंहितस्य वेदस्य निर्णायकत्वात्। तमिति संशयम्। नानेति नानापदार्थो भेदः अनेकपदे नञोर्थः। आश्रयतया एकभेदोऽन्यत्रैकस्यां संख्येयायां विधायां सा भेदविशिष्टा। नानापदार्थोपि भेदः आश्रयतया विधासु। अतो भाष्योक्तानेकविधापदस्य नानाविधापदस्यैकार्थत्वम्। 'नानानेकोभयार्थयोः' इतिविश्वाच्च। तथा च क्रमव्युत्क्रमाभ्यामनेकविधानां सृष्टीनां प्रतिपादकत्वादिति भाष्यार्थप्राञ्जल्येपि क्रमव्युत्क्रमयोरनेकविधानां सृष्टीनां प्रतिपादकत्वादित्यर्थे क्रमव्युत्क्रमसंबन्ध्यनेकविधासंबन्धिनी न सृष्टीनामित्यर्थेनेकविधानां क्रमव्युत्क्रमयोरपि भानादेवमर्थ उक्तः। शेषमिति। वस्तुनो ब्रह्मणः। द्वैरूप्यं विकृतत्वम्। अतः प्रकृतिर्मायाऽविद्या वा कर्त्री पुरुषोऽसंग इति भावः। गृहानिति श्रुतौ वै निश्चये गृहानिति द्वितीयाऽनोर्योगे ज्ञेया। श्रुतिस्तु षष्ठाष्टकपञ्चमाध्याये। अर्थवादत्वेनेति दृष्टान्तेऽर्थवादोऽनुवादात्मकः प्रत्यक्षसिद्धार्थानुवादात्। 'अग्निर्हिमस्य भेषजम्'इतिवत्। दार्ष्टान्तिकेप्यर्थवादत्वं आद्ये गुणानुवादत्वं वा 'आदित्यो यूपः' इतिवत्। गुणवादरूपार्थवादत्वम्। आकाशाद्वायुरित्यत्राथवा अद्भ्यः पृथिवीत्यत्राप्सु पृथिव्युपादानत्वरूपप्रत्यक्षविरुधार्थबोधकत्वविरोध इति। आदित्ये यूपे आदित्यत्वरूपप्रत्यक्षविरुद्धार्थबोधकत्वविरोधवत्। ननु सांख्यमते निराकर्तव्ये भाट्टमतस्य किं प्रयोजनमिति चेदुच्यते। मायाप्रकृत्यविद्यावादा अपि श्रौता इति भाष्यस्यानुमानिकसूत्रे दर्शनान्मायावादिनां व्यवहारे भाट्टमताङ्गीकारात् तत्तुल्ये सांख्यमतेपि भाट्टमतबोधनस्यैव प्रयोजनत्वात्। ब्रह्मेति 'असङ्गो ह्ययं पुरुषः' सांख्यसूत्रोक्तब्रह्मस्वरूपेत्यादिः। अध्यारोपेति जगज्जन्मादिकर्तृत्वं तटस्थलक्षणं काकवन्तो देवदत्तस्य गृहाः इतिवत्। इदं मायोपहितस्य ब्रह्मणः, अयमेवाध्यारोप इत्युच्यते। अस्यापवाद इदानीमुच्यते अपवादो नाम अधिष्ठाने भ्रान्त्या प्रतीतस्य तद्व्यतिरेकेणाभावनिश्चयः।

रश्मिः ।

यथा शुक्त्यादौ भ्रान्त्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किं तु शुक्तिरित्यभावनिश्चयः, अनेन न्यायेन । तत्त्वानुसंधानेस्य प्रपञ्चः । न वेदादिति 'अथात आदेशो नेति नेति' 'नेह नानास्ति किंचनेति' अपवादरूपाद्वेदात् । बाह्येति बाह्या नास्तिकाः । अबाह्याः प्रच्छन्नबौधाः माया-प्रकृत्यविद्यावादिनः । ज्ञानेति तृतीयस्कन्धे कपिलोपाख्याने । एवं शेषं स्फुटमित्यर्थः । अत्र वेदार्थस्य निर्गुणसगुणरूपस्य आरोपापवादसंगत्यधीनत्वं सतो ह्यारोपापवादयोः वेदस्यार्थवादत्वं स्वार्थे प्रमाणाभावोपपादने बाधकाभावादतो निर्वाहकसंगतिं सूचयितुं श्रुतिविप्रतिषेधं निषेधन्ति अतोत्रारोपापवादसंगतिनिषेधतात्पर्यमिति । अनेनाशयेन भाष्यं विवृण्वन्ति अयमर्थ इति । स्याद्यदि ह्यारोपापवादसंगत्या वेदार्थः स्याचेर्हि अधिष्ठाने भ्रान्त्या प्रतीतस्य जगत्कर्तृत्वादेः तद्व्यतिरे-केणाभावनिश्चयः न त्वेवं श्रीभागवते क्वचिच्छ्रूयमाणोप्यध्यारोपपावादो न सार्वत्रिकः । जगन्मिथ्यात्व एव जगज्जन्मादिकर्तृत्वापवादापत्त्या जगन्नित्यत्वबोधकश्रीभागवतविरोधात् । किं तु पुराणमतत्वेन पुराण एव । भगवदिच्छावशात् । अतो वेदस्तुतिवाक्यं श्रीभागवतीयं वक्ष्यन्ति तदाहुः श्रुतय इति । माहात्म्यं देवत्वं तच्च पदजन्यपदार्थो भवति । अत्र पदज्ञानं तु करणं 'यतो वा इमानि भूतानि जायन्ते' इत्याद्युक्तपदानां ज्ञानं करणं, माहात्म्यरूपपदार्थधीस्तद्बोधनरूपा द्वारं, शाब्दबोधः फलम् । स च यतो यच्छब्दार्थभूताभिन्ननिमित्तोपादानिका प्रत्यक्षभूतकर्तृका जनिरिति । नन्वध्या-रोपापवादानङ्गीकारे वस्तुनो वैरूप्यापत्तिस्तदङ्गीकारे ब्रह्मस्वरूपस्य शुद्धबुद्धमुक्तस्वभावासङ्ग-रूपस्य प्रतिपत्तिः प्रकृत्यादेर्वैरूप्यादित्याशङ्कते वादीत्याहुः न चेति । इति शङ्क्यमिति योजनीयम् । तत्रापीति वेदान्तेष्वपि यत्र विधिं परिकल्प्यार्थवादा योज्यन्ते तत्रेत्यर्थः । प्रतारेति प्रकृष्टतारको दैत्यः 'प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः' इत्युक्तस्तत्त्वस्फूर्त्या । अत इति । तादृशन्याया-नादरणसमानाधिकरणा कारणस्य सिद्धिः । कालोधिकरणम् । अयमर्थः यावत्कालमुक्तन्यायादर-स्तावत्कालं न कारणसिद्धिः वेदस्यार्थवादत्वेन स्वार्थे प्रामाण्याभावात् कारणत्वबोधकस्य । यदा तु मुक्तन्यायानादरस्तदा तु वेदस्यानधिगतार्थगन्तृत्वलक्षणप्रामाण्यम् । निर्वाहकसंगत्या स्फोरणात् । ननु क्वोक्तेयं संगतिरिति चेन्न श्रीभागवत एव—

'ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः ।
कथं चरन्ति श्रुतयः साक्षात्सदसतः परे' ॥

इति राज्ञा पृष्टः श्रीशुकः स्वरूपलक्षणं त्यक्त्वा 'बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः' इति तटस्थलक्षणमाहेति । न च गुणवृत्तय इति श्रुतिविशेषणात् आरोपापवादोपीति वाच्यम् । 'अथातो ब्रह्मजिज्ञासा' इति प्रतिज्ञाय 'जन्माद्यस्य यतः' इत्यवदद्यतो व्यासः अत्राप्येवमिति चेन्न पूर्वं स्वरूपलक्षणमित्यादसंदिग्धत्वेपीति सहृदयैर्विचारणीयम् । निर्गुणब्रह्म प्रतिज्ञाय सगुणनिरूपणे व्यासस्य प्रतिज्ञाहानिरूपनिग्रहस्थानापत्तिरुपक्रमविरोध इत्यलम् । विद्वन्मण्डने निर्गुणसगुणप्रति-पादकश्रुतिभागौ कल्पयित्वा बाध्यबाधकभावविचारे

'अभेदादनुपाधित्वाज्जगदप्रत्ययास्तितः ।
सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधनम्' ॥

इत्यस्याः कारिकायाः विवरणे । किं च ब्रह्मनिरूपकमहावाक्ये त्वन्मते सृष्टिनिरूपकाणि वाक्यान्यसंगतानि स्युः तदनिरूपकत्वात् । नन्वस्ति संगतिरध्यारोपापवादलक्षणा । तथाहि शुद्धब्रह्मणो

ब्रह्मणः कारणत्वे विप्रतिपत्तिः। सर्वप्रकारेषु तस्यैव कारणत्वोक्तेः। आकाशादिषु कारणत्वेन ब्रह्म यथा व्यपदिष्टमेवैकत्र, अन्यत्रापि तदेव कारणत्वेनोक्तम्। 'न तस्य कार्यं करणं च विद्यते' इत्यादिनिराकरणं तु लौकिककर्तृत्वनिषेधपरम्।

भाष्यप्रकाशः।

विश्वासनाशप्रसङ्गात्। अतस्तस्य न्यायस्यानादरे कारणस्य सिद्धौ न सृष्टिप्रभेदेषु ब्रह्मणः कारणत्वे विप्रतिपत्तिः। सर्वप्रकारेषु कारणत्वोक्तेः। तदेतदाह **कारणत्वेन चाकाशादिष्विति।** आकाशतेजःप्रभृतिषु क्रमिकेषु प्राणादिषु चाक्रमिकेषु कार्येषु कारणत्वेन यथाव्यपदिष्टोक्तेः। एकत्र यथैव सर्वज्ञत्वसर्वेश्वरत्वसर्वात्मत्वैकत्वाद्वितीयत्वसच्चिदानन्दरूपत्वादिधर्मवत्तया कारणत्वेन व्यपदिष्टमेवमन्यत्रापि तदेव कारणत्वेनोक्तं, तस्मादिति। नच, 'न तस्य कार्यम्' इति निषेध-

रश्मिः।

दुर्ज्ञेयत्वेन तज्ज्ञापनाय जगज्जननमुक्त्वा कर्तृत्वभोक्तृत्वे प्रतिपाद्य तद्द्वारा सोपाधिके ब्रह्मणि बुद्धौ सिद्धायां शाखारुन्धतीन्यायेन पूर्वोक्तमपोह्य कर्तृत्वाद्यपेतं ब्रह्म पश्चाद्बोध्यते इति चेन्नैवं वक्तुं युक्तं जगदप्रतीतिप्रसङ्गात्। तथाहि न हि जगत्प्रतीतिः श्रुतिसिद्धा येन पूर्वं बोधयति पश्चान्निषेधतीत्युच्येत किंतु लौकिकसिद्धा। तथा च तत्र कर्त्रपेक्षायां कर्तारमेवोपदिशतीति वक्तुं युक्तं न तु लोकसिद्धमेव जगदनुद्य तत्र कर्तृत्वं बोधयित्वा पश्चान्निषेधतीति। तथा सति कार्यस्य प्रतीतिसिद्धत्वेन कर्त्रन्तरस्याभावाच्च जगत एवासंभवेनानुवादो बाधितविषयः स्यादित्यादिना। जगत्प्रतीतिरत्र शाब्दी श्रुतिसिद्धेति चेन्न नित्यानित्यसंयोगभिया इमानि भूतानि इत्यत्र शाब्द्यास्तस्या अभावात्। आधिदैविकानीमानि भूतानीति प्रतीतिः श्रुतिसिद्धा, आधिभौतिकभूतविषयिणी त्वियम्। इदंपदप्रयोगात्। नन्विमानि भूतानीत्यत्राधिदैविकप्रतिपादकान्याधिभौतिकप्रतिपादकानीति चेन्न आधिदैविकप्रतिपादकानि सन्तीदृशस्थलेऽभियुक्तप्रसिद्ध्याधिभौतिकेष्वर्थेषु तात्पर्यवन्तीत्यभ्युपगमात्। सादृश्यात्स्मारकाणि आधिभौतिकानां वा। तथा च निर्वाहकसंगतिः स्फुटति। 'न कर्तृत्वनिषेधो ब्रह्मणि शक्यनिरूपणः' इति विद्वन्मण्डनात्। किमन्यद्ब्रह्मज्ञाननिर्वाहकमिति जिज्ञासया सृष्टिनिरूपकवाक्यानां निरूपणात्। प्रकृतमुच्यते। **कारणस्य सिद्धाविति** सामानाधिकरण्ये सति सप्तमी 'सिद्धिसमानाधिकरणं न सृष्टीत्यादिभाष्योक्तमित्यर्थः। तथाहि। निर्वाहकसंगत्यार्थवादत्वनिवृत्तौ सर्वकारणप्रतिपादकानां 'आत्मन आकाशः संभूतः' इत्यादीनां स्वार्थे प्रामाण्योपपत्तौ तदुक्तेषु सर्वप्रकारेषु तस्यैव न तु प्रकृतेः कारणत्वोक्तिस्तस्याः। न सृष्टिभेदेषु ब्रह्मणः कारणत्वे विप्रतिपत्तिरिति भाष्यार्थः प्रकाशेन सिद्धः। न च कारणस्य सिद्धावित्यन्तप्रकाशस्य न सृष्टीत्यादिभाष्येणान्वयोस्त्विति शङ्क्यम्। अस्य भाष्यस्य सिद्धत्वापत्त्या सर्वप्रकारेष्विति भाष्यस्य न सृष्टीत्याद्यर्थसाधकस्य वैयर्थ्यापत्तेः। **आहेति** सूत्रकार आह। **कारणत्वेनेति**। सूत्रव्याख्याने नैवाकाशादिष्विति भाष्यं विवृण्वन्त आहुः **आकाशतेज** इति। स्पष्टयांबभूवुः **एकत्रेति**। 'यतो वा इमानि भूतानि जायन्ते' इत्यत्र 'जन्माद्यस्य यतः' इत्यधिकरणे मुख्यतयोक्तेः। **सर्वज्ञेति** जगदुपादानापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं जगत्कर्तृत्वं तेन 'यः सर्वज्ञः' इति श्रुत्युक्तसर्वज्ञेति। मनसाप्याकलयितुमशक्यस्य विचित्रसन्निवेशस्य सर्वेश्वरातिरिक्तकारणासंभवात् सर्वेश्वरत्वेति। समवायित्वात्सर्वात्मत्वेति अनेकेश्वरेषु सत्सु विसंमतिरत एकत्वेति। एकरसत्वव्याहत्यापत्तिरतोऽद्वितीयत्वेति। सगुणत्वं स्यादतः सच्चिदानन्दरूपत्वेति। आदिपदेन वैषम्यनैर्घृण्यापत्तिवारणाय कृतप्रयत्नापेक्षत्वम्। **व्यपदिष्टमिति** यथा प्रथावद्व्यपदिष्टम्। तस्योक्तेरिति सूत्रेर्थो न तु व्यपदिष्टमनतिक्रम्येति यथाव्यपदिष्टमित्यव्ययीभावो व्याख्यानात्। **अन्यत्रेति** उक्तेषु 'आत्मन आकाशः संभूतः' इत्यादिषु। **न तस्येति** भाष्यं विवृण्वन्ति स्म **न च नेति**। श्वेताश्वतरे षष्ठाध्याये।

तस्यैव प्रतीतेः । सर्ववैलक्षण्यार्थं वैदिकानामबाधितार्थैकवाक्यत्वस्याभिप्रेतत्वादिति चकारार्थः । कार्यप्रकारे भेदस्तु माहात्म्यज्ञापको न तु बाधकः । बहुधा कृतिसामर्थ्यं लोकेऽपि माहात्म्यसूचकमिति । तस्मान्न श्रुतिविप्रतिषेधात् स्मृतिपरिग्रह इति सिद्धम् ॥ १४ ॥

इति प्रथमाध्याये चतुर्थपादे एकसूत्रं यथा व्यपदिष्टाधिकरणं चतुर्थम् ॥ ४ ॥

भाष्यप्रकाशः ।

श्रुतिव्याकोपः । तस्य लौकिककर्तृत्वनिषेधपरत्वात् । निषेधकवाक्योत्तरार्धे 'स्वाभाविकी ज्ञानबलक्रिया च' इति स्वाभाविकक्रियासद्भावप्रतिपादनात् । द्वितीयपादे समाऽभ्यधिकनिषेधाच्च । कार्यकारणसापेक्षलौकिककर्तृत्वनिषेधस्यैव प्रतीतेरिति । चकारसूचितं हेत्वन्तरमाहुः **सर्ववैलक्षण्येत्यादि** । **वैदिकानामिति** पदवाक्यानाम् । सिद्धमाहुः **तस्मादित्यादि** । उक्तरीतौ कस्या अपि श्रुतेर्व्याकोपाभावात् तथेत्यर्थः ॥ १४ ॥

इति प्रथमाध्याये चतुर्थपादे चतुर्थमेकसूत्रं यथाव्यपदिष्टाधिकरणम् ॥ ४ ॥

रश्मिः ।

'न तस्य कार्यं करणं च विद्यते न तत्समश्चाप्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' ॥ इति ।

लौकिकेति तत्त्वं तु कार्यस्य घटादेः कारणं समवायिनिमित्तं तज्ज्ञानरूपं तत् सापेक्षत्वं अलौकिकत्वं ब्रह्मनिष्ठमभिन्ननिमित्तोपादानत्वम् । इच्छाया धर्मत्वेन कार्यत्वादन्यानपेक्षत्वं च । एतदेवाहुः **कार्यकारणेति** तस्यैवेत्यादिभाष्यविवरणमिदम् । तथा च तस्यैवेत्यादिभाष्यस्यार्थस्तावत् तस्य कार्यकारणसापेक्षलौकिककर्तृत्वनिषेधस्यैव प्रतीतेः । कस्मै प्रयोजनायेत्याहुः **सर्वेति** । न च पदार्थकारणेभ्यो वैलक्षण्यार्थम् । न च कामधेन्वादेर्नवतत्त्वान्तर्गतत्वेन न नवपदार्थकारणेभ्यो वैलक्षण्यमिति शङ्क्यम् । कामधेन्वादेः कार्यत्वेनाकार्यत्वेनापि वैलक्षण्यस्य विवक्षणात् । अत्र नैयायिकयुक्तिसंचार इति सर्वेति भाष्यस्यार्थान्तरं चाहुः **चकारेति** । चकारार्थोऽग्रे वाच्यस्तेनायमर्थः सूच्यते । भाष्येस्योक्तार्थेन चकारार्थो वैदिकानामित्यादिर्ध्वनितः अनधिगतो यः सृष्टिभेदेषु ब्रह्मणः कारणत्वे विप्रतिपत्त्यभावोर्थः तस्य गन्तृत्वं तस्य प्रमाण्यस्य 'आत्मन आकाशः संभूतः' इत्यादिषु विषयत्वेनोदाहृतेषु सत्त्वात् । वैदिकानां लोकानधिगतो यो अबाधितार्थः पूर्वोक्तस्तस्याधिकरणात्मकेनार्थेऽस्यैकवाक्यत्वस्य तथा च सर्ववैलक्षण्यं चकारेण सूच्यत इत्यर्थः । अनधिगतार्थगन्तृत्वं प्रामाण्यमित्यत्र चकारो मानमित्युक्तम् । तथा च व्याकरणादिना श्रुत्यर्थे कृते 'यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः' इति तर्कादिसंपातेनाधिगतार्थगन्तृत्वं प्रामाण्यं दुष्टं भवेत् । एवं तु श्रुत्यनुकूलतर्कं प्रगृह्य नैषा तर्केण मतिरापनेयेति श्रुत्या यथार्थवस्तुज्ञानं भवतीति । **माहात्म्येति** । 'यथा त्रिविधभक्तेषु त्रिविधा भगवत्कृतिः' देवत्वबोधकम् । यथा वा दशविधलीला देवत्वबोधिका । **लोके** इति स्मृतौ व्यासादीनां माहात्म्यस्य वाचकं माहात्म्यपदं, सूचकं तु बहुधा कृतिसामर्थ्यं पदमर्थो वा काव्यप्रकाशे अर्थस्य व्यञ्जकत्वं यथा 'सर्वेषां प्रायशोर्थानां व्यञ्जकत्वमपीष्यते' इति । तत्त्वं वाच्यस्य यथा ।

'[1]माए घरोव अरणं अज्जहु णत्थि त्ति साहिअं तुमए ।
ता भण किं करणिज्जं एमेअ ण वासरो ठाइ' ॥

---

१. मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया । तद्भण किंकरणीयमेवमेव न वासरः स्थायी ॥

समाकर्षात् ॥ १५ ॥ (१।४।१५)

पुनरन्यथाशङ्क्य परिहरति । ननु क्वचित् 'असद्वा इदमग्र आसीत्' इति क्वचित्, 'सदेव सोम्येदमग्र आसीत्' । तद्धैक आहुरसदेवेदमग्र आसीत् । अव्याकृतमासीत् । 'नासदासीन्नो सदासीत्' 'तम आसीत्' इत्यादिवाक्येषु ब्रह्मणोऽपि विगानं श्रूयते । तद्धैक आहुरितिवत् पक्षान्तरं संभवति । न ह्यसत्तमःशब्दैर्ब्रह्म

भाष्यप्रकाशः ।

समाकर्षात् ॥ १५ ॥ सूत्रमवतारयन्ति पुनरित्यादि । प्रकारान्तरेण श्रुतिविप्रतिषेधमाशङ्क्य परिहरतीत्यर्थः । अत्रापि संशयस्तद्बीजं च पूर्ववदेव । एकस्य ब्रह्मणः कारणत्वे वक्तव्ये नानाशब्दानां कारणे प्रयोगादनिर्णायिकां श्रुतिं विहायेत्येतावान् विशेषः । पूर्वपक्षमाहुः **ननु क्वचिदित्यादि** । **विगानमिति** विरुद्धं गानम् । कै गै शब्दे । विरुद्धः शब्दः कारणान्तरबुद्धिमः ।

माए मातः अनेन सुखानुज्ञानार्थं प्रियोक्तिः सूच्यते । **घरोव अरणं** गृहोपकरणं तण्डुलादि, अनेनावश्यकरणीयत्वं सूच्यते । **अज्ज**ः अद्य, अनेन शीघ्रत्वं सूच्यते । **खलु ण त्थित्ति** नास्तीति **साहियं** कथितम्, **तुमए** त्वया । अनेन मया व्याजो नोत्पादितः इति सूच्यते, **ता** तस्मात् भण, **भण** अनेन प्रेरणार्थः शीघ्रत्वं सूच्यते, **किंकरणिज्जं** किं करणीयम् । एमेय एवमेव, **ण** न, **वासरो** वासरः, ठाइ तिष्ठति । अनेन सायंकाले मम पतिव्रताया गमनं नोचितमित्यात्मनः शुद्धत्वं द्योत्यते । त्वरया प्रेरय इति वा । अत्र व्यङ्ग्यं किमित्याकाङ्क्षायां काव्यप्रकाशे व्यङ्ग्यमुक्तम् । अत्र स्वैरविहारार्थिनीति व्यज्यते । अत्रान्येषां मतानि नान्यविधानि । **माध्वास्तु** आकाशादिष्ववान्तरकारणत्वेनापि स एव स्थितः । यथाव्यपदिष्टस्यैव परस्य यश्चाकाशे तिष्ठतीत्यादिनाऽकाशादिषूक्तेः ॥१४॥

इति चतुर्थाधिकरणम् ॥ ४ ॥

समाकर्षात् ॥१५॥ सर्वशब्दानां परमात्मवाचिनः शब्दाः अन्यत्र समाकृष्य व्यवह्रियन्ते ।

'परस्य वाचकाः शब्दाः समाकृष्येतरेष्वपि ।
व्यवह्रियन्ते सततं लोकवेदानुसारतः' ॥

इति पाद्मे चेत्याहुः तत्स्पष्टमिति नात्र सिद्धान्ते सूत्रं प्रवर्तितम् । समाकर्षादित्यधिकरणे भिन्नभिन्नशब्दप्रयोगप्रयोजनं न किमपि स्फुटतीति दूषणं वक्ष्यते संगतिस्तु निर्वाहकरूपैव । विषयस्तु उक्तश्रुतिरूपः । सांख्यस्मृतिरूपश्च । आकाशादिषु कारणत्वेन यथा व्यपदिष्टायाः प्रकृतेरित्येवं सूत्रार्थस्पर्शित्वात् । न च स्मृतेः सूत्रविषयत्वं नास्त्यपीति **युक्तम्**, पूर्वतन्त्रे षष्ठेध्याये सत्त्वात्, तथा हि षष्ठस्य द्वितीयपादे षष्ठाधिकरणे 'उपनयनादिर्नियमः' इति प्रागुपनयनात्कामचारवादभक्षा' इति स्मृतिविषय इति । ननु तर्हि कुतो दूषणमष्टकाः कर्तव्या इति स्मृतिवत् प्रमाणमस्त्विति चेन्न प्रकृतिवादत्वेन मूलश्रुत्यभावात् सर्ववेष्टनस्मृतिवत् प्रमाणत्वं न श्रुत्युक्तत्वेनेत्यलम् । सदाचारस्यापि मातुलकन्यापरिणयवदादरः । पूर्वतन्त्रे तृतीयपादे पञ्चमाधिकरणे मातुलकन्यापरिणये सदाचार उक्तः । सदाचारस्य स्मृतिमूलत्वम् ।

स्मृतिस्तु—'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत्' ॥ इति ।

तद्वत्प्रकृतेऽपि पाद्मे द्विचत्वारिंशाध्याये रुद्र उवाच ।

'शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् ।
येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि' ॥ इत्युक्त्वा ।

भाष्यप्रकाशः ।

ऽप्युल्लासकः । कर्मवदिति । यथा, मलवद्वाससोऽन्नं नाद्यादिति निषिद्ध्य अथो खल्वाहुरभ्यञ्जनं वा व स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्यं कामनयान्यदिति पक्षान्तरं कर्मविशेष उक्तं तद्वत् ।

रश्मिः ।

'प्रथमं हि मयोक्तं वै शैवम्' इत्युक्त्वा 'काणादेन तु संप्रोक्तं शास्त्र'मित्युक्त्वा 'सांख्यं तु कपिलेन वा' इति परंपरया पातित्यसाधकवाक्यम् । **समाकर्षात्** । सूत्रमित्यधिकरणात्मकं सूत्रम् । ननु पूर्वाधिकरणे इमाः श्रुतीरुक्त्वा ब्रह्मविगानपरिहारार्थं सूत्रमिदमिति कुतोधिकरणमिति चेन्न । पूर्वश्रुतिषु सृष्टिवैचित्र्याद्ब्रह्मणः सतो विकारित्वापत्त्या प्रकृतिः कर्त्री पुरुषोऽसङ्ग इति श्रुतिविप्रतिषेधात्स्मृतिपरिग्रहस्तर्कितः । अत्र तु ब्रह्मविगानेन श्रुतिविप्रतिषेधात् स्मृतिपरिग्रहस्तर्कितः इति भेदात् । **प्रकारे**ति प्रकारोत्र विप्रतिषेधे स च प्रकृतिः कर्त्री पुरुषोऽसङ्ग इति हेतुकः श्रुतिविप्रतिषेध इति तादृशहेतुकत्वम् तस्मादन्यः प्रकारः प्रकारान्तरं ब्रह्मविगानेन श्रुतिविप्रतिषेध इत्यत्र ब्रह्मविगानहेतुकः श्रुतिविप्रतिषेध इति ब्रह्मविगानहेतुकत्वं तेन अयं भाष्यीयान्यथाशब्दार्थः । तथा च पूर्वाधिकरणे सेश्वरसांख्यः अस्मिन्नधिकरणे निरीश्वरः सांख्य इत्यपि भेदः । **पूर्ववदि**ति अत्रापि श्रुतिरूपो निरीश्वरसांख्यस्मृतिरूपश्च विषयः । संदेहबीजं तु अनिर्णायकत्वमुपजीवत्वं च । पूर्वस्माद्विशेषमाहुः **एकस्ये**ति । **विशेष** इति अग्रे तु एकप्रकारनिर्णायका निरीश्वरसांख्यस्मृतिरेवादर्तव्या उत विप्रतिषेधं परिहृत्य सर्वस्मृत्युपजीव्या श्रुतिरेवादरणीयेति विशेषपूरणम् । **ननु क्वचिदित्यादी**ति तैत्तिरीये **क्वचिदि**ति छान्दोग्ये । **एवमव्याकृत**मिति पुरुषविधब्राह्मणेस्ति । **नासदासी**दिति ब्राह्मणे द्वितीयाष्टकेऽष्टमाध्याये पीवोन्नाश्वरजिवृद्धः सुमेधा इत्यारम्भकेस्ति वै आदिपदेन बृहदारण्यके आरणे । नेति नेतीति मूर्तामूर्तब्राह्मणे वाक्यपदोपादानं श्रुतिपदमपहाय ज्ञापयति 'यन्नेति नेतीत्यतदुत्सिसृक्षवः' इति श्रीभागवतवाक्यम् । **तद्धैक** इति । एके मुख्यान्यकेवलाः इति कोशात् एके मुख्या आहुरित्यर्थे कर्मणा ब्रह्मत्वे पक्षान्तरे तत्कर्म तदसतो ब्रह्मत्वे पक्षान्तरं संभवतीत्यर्थः । कर्मवदित्यस्यार्थमाहुः यथा मलवदिति कर्मवत् सप्तम्याद्वतिः । दर्शपूर्णमासाख्य कर्मणीव तद्धैक इति श्रुतावपि पक्षान्तरं संभवतीति भाष्यार्थः । कर्मणि किं पक्षान्तरमित्याकाङ्क्षायामाहुः **यथा मले**ति अयं न्यायः तृतीयस्य चतुर्थपादेस्ति प्रागवरोधान्मलवद्वासस इत्यधिकरणे मलवद्वाससा न संवदेत न सहासीत नास्यान्नमद्यात् ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्यास्ते इति निषिद्ध्य नास्या अन्नमद्यादिति श्रुत्यर्थः प्रकाशे उपन्यस्तः । तत्रायं प्रतिषेधः क्रत्वर्थ आहोस्वित् पुरुषार्थ इति संदेहे क्रत्वर्थः प्रकरणादिति प्राप्ते रजस्वला निःक्रतुव्यापारा तामवरुद्ध्य यजेत इति वाक्यात् क्रतावप्राप्तत्वात् पुरुषे च स्वतन्त्रे प्राप्तत्वान्निषेधोत्र पुरुषार्थ इति स्थितम् । अभ्यञ्जनं घृततैलेन वा युक्तं दीपधूमः । कामं यथेच्छम् । अन्यदिति पृथ्वी वा अन्नमिति श्रुतौ पृथ्वी ग्राह्येत्यर्थः । **कर्मविशेष** इति दर्शपूर्णमासयोः । वेत्तीति 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इत्यत्रासद्ब्रह्मवेत्तृनिन्दया । अयमो निषेधः । श्रुती तैत्तिरीये । अन्येति प्रथमनिर्दिष्टा अप्यसत्प्रतिपादिकाः श्रुतयः पक्षान्तरपरत्वेन पश्चात् संगृहीता अतः प्रथमाः परित्यज्याव्याकृतपदघटितश्रुत्यर्थपुरस्कारेणार्थमाहुः **अव्याकृते**ति ।

प्रतिपादयितुं शक्यते। असन्नेव स भवतीति बाधात्। आदित्यवर्णं तमसः परस्तादिति च। तस्मात् कारणत्वेनापि श्रुतिविप्रतिषेधाद् ब्रह्म कारणं नेत्येवं प्राप्ते उच्यते समाकर्षात्। आकृष्यते स्वस्थानाच्च्याव्यत इत्याकर्षः सर्वेष्वेतेषु वाक्येषु असदादिपदानां न निरात्मकत्वाद्यर्था उच्यन्ते। किंतु वैलक्षण्येन।

भाष्यप्रकाशः।

तमसः परस्तादिति असन्नेवेत्यत्र यथावेत्तृनिन्दया बाध एवमत्र तमःपरत्वकथनेन बाधादित्यर्थः। **तस्मादिति** अव्याकृतपदेनाव्यक्तस्य प्रधानस्य ग्रहीतुं शक्यत्वात्। श्रुतौ पक्षान्तरस्याप्यङ्गीकारादसदादिशब्दैर्ब्रह्मणः प्रतिपादयितुमशक्यत्वाच्च। शेषमतिरोहितार्थम्। अत्र समाधानं सूत्रकथनपूर्वकं व्याचक्षते **आकृष्यत** इत्यादि। **कारणत्वेनेति** पूर्वस्मादनुवर्तते। कारणत्वेन ब्रह्मैवादरणीयम्। अतो नात्र श्रुतिविप्रतिषेधः। कुतः? **समाकर्षात्**। आकर्षत इत्याकर्षः। समीचीनो निश्चायनार्थ आकर्षः समाकर्षस्तस्मात्। सामीचीन्यं व्युत्पादयन्ति **सर्वेष्वित्यादि**। **किंतु वैलक्षण्येनेति** एकश्रुत्युक्तरूपविलक्षणरूपान्तरमभिप्रेत्य श्रुत्यन्तरे तस्य तस्य शब्दस्य स्वार्थात्

रश्मिः।

श्रुताविति तद्धैक आहुरिति श्रुतौ। तर्हि असदादिपदैः कः प्रतिपाद्य इति चेच्छृणु असन्मृत्युरिति बृहदारण्यकादसच्छब्दप्रतिपाद्यो मृत्युः 'मेनेऽसन्तमिवात्मानम्' इति लोकोक्तासच्छब्दार्थो वा। आदिपदेन 'नासदासीन्नो सदासीत्तदानीम्' इत्युक्तः सदसद्विलक्षणः पदार्थः कश्चित्। भाष्यार्थस्तु तस्माद्ब्रह्मणोपि विगानात् कारणत्वेन रूपेण श्रुतिभिरसदादिनिरूपकैः विरुद्धस्य प्रधानस्य प्रति प्रतिनिधिरूपस्य षेधात्प्रापणात्। अपिशब्देन पूर्वाधिकरणोक्ताभिरात्मन आकाश इत्यादिश्रुतिभिः वैरूप्यप्रतिपादिकाभिः श्रुतिप्रतिपाद्याद्विरुद्धस्य प्रधानस्य प्रति प्रतिनिधिरूपस्य प्रापणाच्च ब्रह्मकारणं नेति। न च श्रुतेर्विप्रतिषेधादिति भाष्ये षष्ठीतत्पुरुषाङ्गीकारात् तद्विरोध इति शङ्क्यम्। कर्मादीनामपि संबन्धसामान्यविवक्षायां षष्ठ्येवेति षष्ठ्यङ्गीकारात् विप्रतिषेधपदेन बाधोक्तेश्च। इह तु बाधपदमतिहाय विप्रतिषेधपदमुक्तम् तदन्वर्थमित्येवं समर्थितम्। **सूत्रकथनेति**। व्याख्यातुमिति भावः। पूर्वं तु उद्देशमात्रम्। **ब्रह्मैवेति** जिज्ञासासूत्रादनुवृत्तम्। **नात्रेति** साध्यं तु भाष्यम्। एतदर्थं हेतुरूपाधिकरणावतरणात्। तथाहि ब्रह्मपक्षः न कारणमिति साध्यम्। श्रुतिविप्रतिषेधादिति हेतुः। अत्र ब्रह्मणि श्रुतिविप्रतिषेधरूपत्वप्रसिद्धिः। स्वरूपासिद्धिभेद इत्याहुः। **नात्रेति** अत्र ब्रह्मणि न श्रुतिविप्रतिषेधः समाकर्षादिति पूर्वसूत्रादनुवृत्तश्चकारस्तदर्थः। वैदिकानामबाधितार्थैकवाक्यत्वस्याभिप्रेतत्वाच्चेति। अधुना व्याचख्युः **आकृष्यत इतीति**। समीचीनं विवृण्वन्ति **निश्चयनार्थ** इति यथा असदितिपदं स्वस्थानान्मृत्युरूपादर्थात् प्रच्याव्यन्ते स आकर्षः स समीचीनः। लक्षणाद्यन्तरेण तृतीयाध्याये वक्ष्यमाणविरुद्धधर्माश्रयत्वनिश्चायनार्थः। सद्ब्रह्मासद्ब्रह्मेति सत्त्वासत्त्वे हि नकुलवद्विरुद्धौ धर्मौ तदाश्रयत्वनिश्चायनार्थः। 'न चासन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इति श्रुत्युक्तासत्त्वं वेत्तरि स्यादिति शङ्क्यम्। विरुद्धधर्माश्रयत्वेन वेत्तुरङ्गीकारात्। **सामीचीन्यमिति** विरुद्धधर्माश्रयत्वस्य लक्षणाद्यन्तरानिश्चायनार्थः। निश्चायनेत्यत्र नन्द्यादित्वाल्ल्युः। **सर्वेष्वित्यादीति**। **भाष्ये**। **न निरात्मकेति**। निर्गतः सत्पदार्थ आत्मा यस्मात्तन्निरात्मकम्। 'असन्नेव स' इति श्रुतौ निन्दाश्रवणात्। **किं त्विति** नञर्थभूतवैलक्षण्येन। **प्रकृते**। नञर्थषट्कं प्राचीनानां तेषु विरोधितारूपं वैलक्षण्यमादाय भाष्यार्थमाहुः **एकेति**। विरोधो नञर्थः अधर्म इत्यत्र

सर्वशब्दवाच्यत्वं च सिद्धं ब्रह्मणः। यथा 'को अद्धा वेद'। 'क इह प्रावोचत्'। 'सर्वे वेदा यत् पदमामनन्ति'। 'यतो वाचो निवर्तन्ते'। 'मनसैवानुद्रष्टव्यम्' इत्यादिसर्वे विरुद्धधर्मा भगवत्युच्यन्ते । एवमनेकविरुद्धशब्दवाच्यत्वं लोकप्रसिद्धताद्दशार्थात् समाकर्षादवगम्यते । तं यथा यथोपासते तथा भवतीति फलज्ञापनार्थमसन्नेव स भवतीति यथा कंसादीनां मारकः। तद्धैक आहुरित्यत्र

भाष्यप्रकाशः ।

प्रच्यावनं कृत्वा तत्तद्रूपविशिष्टं ब्रह्मैवोच्यते । नच लक्षणापत्तिः। यतः सर्वशब्दवाच्यत्वमपि सिद्धं ब्रह्मणः। तदप्युपपादितं तल्लिङ्गाद्यधिकरणेषु । नच सर्वत्र ब्रह्मण एव कारणत्वे वक्तव्ये विरुद्धशब्दप्रयोगस्य किं प्रयोजनमिति शङ्क्यम् । यथा को अद्धा वेदेत्यत्र सृष्टिकर्तृविषयकमज्ञानं, सर्वे वेदा इत्यत्र साधनैस्तज्ज्ञानं यतो वाच इत्यत्र वागाद्यप्राप्यत्वं, मनसेत्यत्र तत्प्राप्यत्वमित्येवं ब्रह्मणि विरुद्धा धर्मास्तत्र तत्र ते ते उच्यन्त एवमनेकविरुद्धशब्दवाच्यत्वमपि लोकप्रसिद्धो यस्ताद्दशधर्मविशिष्टोऽर्थस्ततः शब्दस्य समाकर्षादवगम्यते । तस्य प्रयोजनं तु तेन तेन प्रकारेण तद्भावने ताद्दशताद्दशफलाप्तिरिति । तत्रोदाहरणं तु कंसादीनां मारकत्वभावनाद् यथा मृत्युः। एवमसत्त्वेन भावनादसत्त्वमिति । अतस्तत्तत्फलार्थे समाकर्षे ब्रह्मणः कारणत्वमक्षुण्णमित्यर्थः। एवं सूत्रं व्याख्यायासदादिशब्दानां प्रवृत्तिनिमित्तं सिद्धान्तसिद्धं स्फुटीकुर्वन्ति तद्धैक इत्यादि ।

रश्मिः।

धर्मविरोधोर्थः। अभावो वा नञर्थः। आर्थिकार्थो विरोधः। यद्वा पर्युदासो नञर्थः। सद् ब्रह्म तद्भिन्नतत्सद्दशो मृत्युः असन्मृत्युरिति बृहदारण्यकात् । तथा चैकश्रुतिः सदेव सोम्येदमिति तदुक्तं रूपं सद्रूपं तद्विलक्षणमसदेवेदमित्यत्रासद्रूपान्तरमित्यर्थः। श्रुत्यन्तर इति असदेवेति श्रुतौ। तस्येति। असच्छब्दस्यार्थो मृत्युस्तस्मात्प्रच्यावनं कृत्वा तत्तदसद्रूपविशिष्टमभेदेन विरुद्धधर्माश्रयत्वाय ब्रह्मैवोच्यते इत्यर्थः। **सर्वशब्द** इति भाष्यमवतारयामासुः **न चेति**। मृत्युवाचकस्यासच्छब्दस्य ब्रह्मणि लक्षणा। संबन्धस्तु भेतव्यभीषकभावः 'मृत्युर्धावति पञ्चमः' इति श्रुतेः शून्यवाचकस्यासच्छब्दस्य लोकोक्तस्य वा ब्रह्मणि लक्षणा। 'मेनेऽसन्तमिवात्मानम्' इति लोके ज्ञानाश्रयस्य कर्तुरसद्विषयः तस्य शुद्धा सति ब्रह्मणि भागत्यागलक्षणा ज्ञानाश्रयब्रह्मणो ज्ञानविषयत्वस्य भागस्य त्यागात् । न च शुद्धा सति प्रयोग इति शङ्क्यम् । धर्मः प्रोज्झितकैतवोत्रेत्यस्य विरोधात् । तदुक्तं पद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे गुणत्रयकथने द्विचत्वारिंशेध्याये ।

'बौधशास्त्रमसत्प्रोक्तं नग्ननीलपटादिकम् ।
मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते' ॥ इति ।

शास्त्रं शब्दात्मकमिति तत्प्रतिपाद्यमप्यसतदिति । यथा क इति भाष्यमवतारयन्ति **न च सर्वेति**। **अद्धेति** साक्षात् । **अज्ञानमिति** क इह प्रपञ्चे प्रवोचन्न कोपीत्यर्थात् । **तज्ज्ञानमिति** सृष्टिकर्तृज्ञानम् । **आमनन्ति** अभ्यसन्ति । अतो वेदोक्तसाधनैः तज्ज्ञानमिति ज्ञायते इति । **तत्रेति** श्रुतिषु । ते सत्त्वमसत्त्वं च ज्ञानमज्ञानं च वागाद्यप्राप्यत्वं वागादिप्राप्यत्वं च धर्माः । ननु मनसैवेत्यत्र कथं वागादिग्रहणमिति चेन्न । मनः पूर्वरूपं वागुत्तररूपमिति श्रुतेः वाचामादि मनः तद्ग्रहणात् । यद्वा मनसैवेत्येवकारेणान्येन्द्रियव्यवच्छेदः भक्तिरूपव्यापारस्य तु मनसेति करणतृतीयया बोधनात् भक्तिश्च वागादिरूपा कीर्तनादिरूपा । एवमुच्यन्त इत्यन्तं भाष्यं व्याख्यायैवमिति भाष्यं व्याचक्रुः ।

रश्मिः।

एवमिति अनेके विरुद्धाः सदसदादयः शब्दास्तद्वाच्यत्वमपीत्यर्थः। लोकेति भाष्यं विवृण्वन्ति लोकप्रसिद्ध इति लोकः स्मृतिः मेनेऽसन्तमिवात्मानमिति तत्प्रसिद्धो यस्तादृशः असत्त्वरूपो धर्मः तद्विशिष्टोर्थोसद्रूपः स्पष्टमन्यत्। तं यथेति भाष्यमवतारयन्ति लोकप्रसिद्धस्येति लोकसिद्धार्थाप्रच्यावनस्य। तेनेति असत्त्वेन प्रकारेण। तद्भावने ब्रह्मभावने। तादृशेति 'मृत्युरत्यन्तविस्मृतिः' इत्यत्यन्तविस्मरणरूपफलाप्तिः। न च लोकोक्तासच्छब्दे प्रतिपाद्यासत्त्वेन प्रकारेण ब्रह्मभावने तादृशफलमस्त्विति वाच्यम्। तादृशफलाभावप्रसङ्गात्। पुराणस्य स्वतन्त्रत्वेन तदुक्तरीत्या भावनेनौपनिषदपुरुषरूपं फलं भवेत्। असन्निति भाष्यं विवरीतुमाहुः तत्रोदाहरणमिति। मारक इति आदिपदेनाम्बष्ठचाणूरशलानां मारकः। मृत्युपदार्थः मृत्युर्भोजपतेरिति वाक्यात्। मारकोपि भावनान्मृत्युरित्यभेदान्वयः। असन्मृत्युरिति बृहदारण्यकात्। निगमयांबभूवुः एवमसत्त्वेनेति एवं पूर्वोक्तप्रकारेण एवं चासन्निति श्रुतौ स परमात्मा असन्मृत्युर्भवति योसद्ब्रह्म मृत्युर्ब्रह्मेति वेद स्मरति स्म भावयति स्मेति यावत्। स वेत्तेति नार्थः। 'ॐ तत् सत्' इति त्रिविधब्रह्मनिर्देशात्। नित्यानित्यसंयोगापत्तेश्च। न च य इत्यत्र नित्यानित्यसंयोग इति वाच्यम्। वेदस्याधिदैविकप्रतिपादकत्वात्। तद्धैक इत्यादीति। भाष्ये। सर्वप्रपञ्चवैलक्षण्यमसच्छब्दप्रवृत्तिनिमित्तम्। सत् सर्वप्रपञ्चः नञो वैलक्षण्यमर्थः। सद्विलक्षणत्वम्। तत् सत् असत् सर्वप्रपञ्चवैलक्षण्यविशिष्टम्। इदमित्युक्तप्रपञ्चाभेदकथनात् प्रपञ्चरूपोपि स इत्यर्थः। प्रकृते। इत्युक्तः पक्ष इति सत्पदोक्तब्रह्मणो विरुद्धधर्माश्रयत्वेन एके इत्यस्य मुख्यार्थकत्वेन च प्रथम इत्यर्थः। भाष्ये। अरूपवत्सूत्रोक्तं द्वितीयपक्षमाहुः अव्याकृतमिति। इदं रूपमिदं नाम इदमित्यव्याकृतम्। प्रकृते। वैलक्षण्यबोधकमिति तथा च न तृतीयः पक्ष इति भावः। भाष्ये। नासदासीदिति न असत् सद्विलक्षणो मृत्युः नो निषेधे न सद्ब्रह्मासीत् इति द्वयोर्निषेधेन हेतुना मनोग्राह्यम्। नैवेह किंचनाग्र आसीत्। मृत्युनैवेदमावृतमासीत् इति कालस्याग्रपदेन मृत्योश्च मृत्युपदेनाभिधानात्। तदुक्तं बृहदारण्यके मनोमयब्राह्मणे मनोमयोयं पुरुषः भाः सत्यः तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा एवमयमन्तरात्मन् पुरुषः स एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं च य एवं वेदेति मनोमयो मनःप्रायः भाः सत्यस्वरूपं यस्य स भाः सत्यः अन्तरात्मन् इत्यत्र सप्तम्या लुक्। वेदेत्यस्य सस्मार इत्यप्यर्थः। मनःप्रायपदेन टीकास्थेन मनु अवबोधने असुन्। एवं भूतेन सत्यं ज्ञानमनन्तं ब्रह्म ज्ञानप्रधानम् न चान्नमयप्राणमयविज्ञानमयानन्दमयाः कुतो न गृहीता इति शङ्क्यम्। बृहदारण्यक एव अन्नं ब्रह्मेत्येक आहुः तन्न तथा पूयति वा अन्नमृते प्राणात् प्राणो ब्रह्मेत्येक आहुः तन्न तथा शुष्यति प्राणमृतेन्नादेते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छत इति एकेन्येन्ये दूषणात्। तत्तथा न ग्रहीतव्यम् यथा प्राणाद्भक्षकादृते विनान्नं वै पूयति क्लिद्यत इति प्रसिद्धं तथा प्राणो ब्रह्मेत्येकेऽन्य आहुः तदपि न तथा न ग्राह्यम्। अतोन्नाददनीयात् पृथ्वीरूपाद्वा ऋते प्राणः शुष्यति वै ह शोषमुपेतीति प्रसिद्धम्। ब्रह्म तु क्लेदशोषविवर्जितम्। एत एव तु देवते अन्नप्राणलक्षणे एकधाभूयं एकभावं भूत्वा गत्वा परमतां ब्रह्मतां गच्छतः प्राप्नुवत इत्यर्थः। विज्ञानमयो जीवो न सृष्टिकर्ता इत्यनुपयुक्तः। आनन्दमयस्तु नित्यलीलायां 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि' इति स्मृतेः। सृष्टिकर्तापि। विरुद्धधर्माश्रयत्वात्। इदमित्थतया ज्ञानत्वाच्च। अत उक्तं तदपि ब्रह्मेति। तथा च श्रुतिः मनो ब्रह्मेति व्यजानात् मनसो ह्येव खल्विमानि

सर्वप्रपञ्चवैलक्षण्यम् । प्रपञ्चरूपोऽपि स इति प्रथमः पक्षः । अव्याकृतमसत्पक्षेण तुल्यम् । नासदासीदिति मनस्तदपि ब्रह्म, तम आसीदित्यनभिव्यक्तम् । कर्मणोऽपि भगवत्वात् । पूर्वकाण्डेऽपि तस्मादेव सृष्टिः । न हि तमस्तः स्वेन गूढत्वं लोके संभवति । अतः क्वचिद् विलक्षणात् क्वचिदविलक्षणाद् ब्रह्मणो जगत् । भगवत्त्वादेव स्वयं कर्तृकता च । संभवति चैकवाक्यत्वे

भाष्यप्रकाशः ।

प्रथमः पक्ष इति सदेव सोम्येत्युक्तः पक्षः । असत्पक्षेण तुल्यमिति वैलक्षण्यबोधकम् । तमःशब्देन कर्माप्युच्यते । पूर्वमनभिव्यक्तत्वादित्यभिप्रेत्याहुः कर्मण इत्यादि । कर्मणस्तमःशब्दवाच्यत्वे युक्तिः न हीत्यादि । शेषं स्फुटम् । एतेनैव यत्रादिकारणे शिवरुद्रभगवती-

रश्मिः ।

भूतानि जायन्त इत्यादि । यद्वा मनसैवानुद्रष्टव्यः इति श्रुतेर्मनसो दर्शनसाधनत्वमुच्यते तन्मनश्चेन्न ब्रह्म तदा मनः संकल्पनभक्त्यादिव्यापारेण न ब्रह्मदर्शनसाधनं 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इत्यस्यात्र पाठस्यापि वक्तुं शक्यत्वात् । द्वितीये नवमाध्याये त्रयस्त्रिंशे श्लोके तु नासदासीन्नो सदासीत्तदानीमित्यादेस्तु स्थूलसूक्ष्मकार्यपरत्वमित्युक्तम् । तत्पक्षेऽत्र न ब्रह्मवार्ता । तम इति अनभिव्यक्तं ब्रह्म तमः इत्यर्थः । तत्रैव सुबोधिनी तम आसीदिति तमोपि ब्रह्मैव सर्वतः सुप्तत्वसाम्यात् न प्रकृतिः किमावरीवः कुह कस्य शर्मन्निति कार्याश्रयप्रयोजनाभावात् तस्याः कार्याश्रयप्रयोजनाभावादिति किं कार्यं कुह कुत्र कस्य शर्मन् कस्य सुखाय आवरीवः आवृणुयादिति श्रुत्यर्थः । इदमप्यवान्तरकल्पाभिप्रायेण । प्रकृते । कर्मापीति यथा तमु काङ्क्षायामित्यस्य रूपमन्धकारे, तथा तम ग्लानावित्यस्य रूपं कर्मणि वाच्ये । कर्मणो गहना गतिरिति कर्मग्लानिं करोतीति एतेन कर्मणो हि पूर्वभावे श्रुतिरुक्ता । ननु पूर्वं कर्म वा ब्रह्म वा, उभयोः पूर्वत्वे द्वैतमिति चेन्न 'अत एव च नित्यत्वम्' इति सूत्रे वेदस्य ब्रह्मपदवाच्यत्वेपि भाष्येङ्गाङ्गिभावोक्तेश्चोभयोः 'अथातो धर्मजिज्ञासा' 'अथातो ब्रह्मजिज्ञासा' इति धर्मधर्मिभावेन धर्मिपूर्वत्वस्य न्याय्यत्वात् । पूर्वमनभिव्यक्तत्वादिति सृष्टेः पूर्वम् । तथा च प्रस्थानरत्नाकरे सुबोधिनी द्वितीयस्कन्धस्य प्रदर्शिता ब्रह्म हि धर्मरूपेण भवन् ज्ञानानन्दकालेच्छाक्रियामायाप्रकृतिरूपेण पूर्वं भवतीति, अतः कर्मानभिव्यक्तम् । कर्मण इत्यादीति कर्मणो भगवत्त्वं 'धर्मो यस्यां मदात्मकः' इति भगवद्वाक्यात् । भावार्थपादस्थक्रियामात्रं न धर्मः किं तु अतीन्द्रियो यागादिः स्थिरो धर्मः । द्रव्यदेवतासंबन्धो यागः देवताया अतीन्द्रियत्वं तत्संबन्धोपि प्रीतिहेतुत्वेन स्वीकाररूपोतीन्द्रियः द्रव्यं चालौकिकमित्यनित्यतायां न कोपि हेतुरिति । भाष्ये । तस्मादिति तृतीयाष्टके प्रजापतिरकामयत प्रजा सृजेयमिति । प्रकृते । युक्तिरिति स्वस्य स्वेन गूढत्वाभाव इति न्यायः । न हीत्यादीति । लोक इति वेदे तु संभवति अनधिगतार्थगन्तृत्वात् । घटः पटेन गूढः इत्यत्र योगजधर्मेण पटस्य घटत्वे स्वस्य घटस्य स्वेन घटेन गूढत्वात् । स्फुटमिति विलक्षणादसतः । अविलक्षणात् सतः । ननु कर्मणः सृष्टिरित्युक्तं तत्र कर्मरूपसहकारिकारणनिष्ठव्यापारमपेक्ष्य कर्म करोतीति प्रयोगो न तु ब्रह्म करोतीतिवत् प्रसिद्धप्रयोग इति कर्तृकत्वं ब्रह्मापेक्षमित्याशङ्क्याहुः भगवत्त्वादेवेति । ननु शंकरभाष्ये असद्वा इदमग्र आसीदित्यत्र सदेव ब्रह्म सदिवासीदित्युपचर्यते प्रागुत्पत्तेः तद्ब्रह्माकरणाभावापेक्षयाऽतोऽसद्वादापवादेनास्तित्वलक्षणं ब्रह्मेत्युक्तमिति चेत्तत्राहुः संभवतीति सदसद्रूपत्वे संभवति विरुद्धधर्माश्रयब्रह्मार्थोज्ञानान्निराकरण-

११६ ब्र० सू० ८०

भाष्यप्रकाशः ।

यक्षादिशब्दाः प्रयुज्यन्ते अथर्वशिरःशिखासुन्दरीतापनीयगोपथब्राह्मणादिषु तत्राप्ययमेव न्यायो बोध्य इति बोधितम् ।

रश्मिः ।

माहुः तस्मादिति विरुद्धधर्माश्रयत्वाद् ब्रह्मणः । शब्दवैलक्षण्येनासच्छब्देन श्रुतिविप्रतिषेधः श्रुतिबाधः एवं स्फुटमित्यर्थः । द्वितीयस्कन्धनवमाध्याये सुबोधिनी, एवमन्यान्यपि वाक्यानि तत्तद्भावप्रकारेण बोधयन्ति पूर्वमेकरूपे भगवति न बाधकानि भवन्तीति तथाहुः एतेनेति । शिवेति । आदिपदेन आत्मा वाय्वादयः । अथर्वेति । अथर्वशिरः अथर्वशिखा च तत्राहमेकः प्रथममासीद्वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इतीति रुद्रवचनं देवान् प्रति । अथर्वशिखायां च शिव एको ध्येयः शिवंकरः इति सुन्दरीतापिनीयं यथा दुर्गामाहात्म्यं ब्रह्माण्डपुराणे तत्र

स्थिता नित्या अर्धमात्रा यानुच्चार्या विशेषतः ।
त्वमेव सत्त्वं सावित्रि त्वं देवि जननी परा ।
त्वयैव धार्यते सर्वं त्वयैतत्सृज्यते जगत् ।

इत्युक्त्वाग्रेन्यदुक्त्वोक्तं महामोहा च भगवतीति तथाग्रे 'सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी' इति अत्र भगवती अतिसुन्दरी च । गोपथब्राह्मणं यथा बृहदारण्यके महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति आदिपदार्थः पुरुषविधब्राह्मणे 'आत्मैवेदमग्र आसीत्पुरुषविधः' इति वायुविषये त्वमेव प्रत्यक्षं ब्रह्मासीति श्रुतिस्तैत्तिरीये । अत्र लोकप्रसिद्धो यस्तादृशधर्मविशिष्टोर्थः । तस्माच्छब्दस्य प्रच्यावनं शिवादित्वेन रूपेण ब्रह्मणो भावुकाः शिवादिभक्ताः शिवादिशब्दैर्ब्रह्मैवाहुरिति समाकर्षन्यायावतरणम् । एवं न्यायो बोध्य इति बोधितम् । अयं न्यायः कारणशब्दविषयः तेन तल्लिङ्गाद्यधिकरणेषु सर्वशब्दवाच्यत्वं मुख्यवृत्त्या प्रतिपादितम् । अत्र तु असच्छब्दस्य मृत्युवाचकस्य समाकर्ष इति विरोध इति कुचोद्यं निरस्तम् । वस्तुतस्तु पुरुषविधब्राह्मणे साकारब्रह्माभिधायके आत्मपुरुषपदे समाकर्षणन्यायो प्रसिद्धकारणशब्दा असदादयस्तद्विषयः इति । आत्मा परमात्मनि प्रसिद्धः 'आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु' इति विश्वात् । पुरुषशब्दश्चात्मनि 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति श्रुतेः । असदादयस्तु अप्रसिद्धा इति । न चायं न्यायः कारणशब्दविषय इति व्युत्पत्तावप्रसिद्धकारणविषय इति विशेषणनिवेशे सोऽबिभेदित्यसंगतमिति वाच्यम् । विरुद्धधर्माश्रयत्वात् 'व्रजे स बालको भूत्वा क्रीडते पुरुषोत्तमः' इति व्रजे बाललीलापरत्वात् ।

'कृतागसं तं प्ररुदन्तमक्षिणी कषन्तमञ्जन्मषिणी स्वपाणिना ।
उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयन्त्यवागुरत्' ॥

इति बाललीलावाक्यात् आश्रितत्वादिह तद्योगाच्च जीवधर्मभयस्य योगात् । सुबोधिन्यां मल्लानामशनिरित्यत्र दशधा रसरूपत्वोक्तेः तन्निर्वाहकत्वाद्वा तदात्मनोकुरुतेति बृहदारण्यकान्मनसः करणानन्तरं भयं वा 'कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति बृहदारण्यकात् ।

'न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् ।
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः' ॥ इति

अज्ञानान्निराकरणं चायुक्तम्। तस्माच्छब्दवैलक्षण्येन श्रुतिविप्रतिषेधो वक्तुं न शक्य इति सिद्धम्॥ १५॥

इति प्रथमाध्याये चतुर्थपादे पञ्चमं समाकर्षाधिकरणम्॥ ५॥

भाष्यप्रकाशः।

अन्येतु स माकर्षादित्यस्य पूर्वप्रकृतपरामर्षादित्यर्थमाहुः। तन्मते भिन्नशब्दप्रयोगप्रयोजनं न किमपि स्फुटति।

माध्वास्तु भगवद्वाचिनां शब्दानां जगति समाकर्षणमर्थमाहुस्तत्रापि तथा बोध्यम्॥ १५॥

इति पञ्चममधिकरणम्॥ ५॥

रश्मिः।

वाक्यात्। शंकररामानुजभास्कराचार्यमतमाहुः अन्ये त्विति। पूर्वप्रकृतेति असद्वा इदमग्र आसीदिति नात्रासन्निरात्मकं कारणत्वेन श्राव्यते यतो—

'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्।
अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः'॥

इतीत्यसद्वादापवादेनास्तित्वलक्षणं ब्रह्मान्नमयादिकोशे परंपरया ब्रह्मप्रत्यगात्मानं निर्धार्य सोऽकामयत इति तमेव प्रकृतं समाकृष्य सप्रपञ्चां सृष्टिं तस्माच्छ्रावयित्वा तत्सत्यमित्याचक्षत इत्यादिना चोपसंहृत्य तदप्येष श्लोको भवति इति तस्मिन्नेव प्रकृतेर्थे श्लोकमिममुदाहरति असद्वा इदमग्र आसीदिति यदि त्वसन्निरात्मकमस्मिञ्छ्लोकेऽभिप्रेयेत ततोन्यसमाकर्षणेऽन्यस्योदाहरणादसंबद्धवाक्यमापद्येत तस्मान्नामरूपव्याकृतवस्तुविषयः प्रायेणाऽसच्छब्दः प्रसिद्धः इति तद्व्याकरणाभावापेक्षया प्रागुत्पत्तेः सदेव ब्रह्मासीदित्युपचर्यते इति भाष्यादस्ति ब्रह्मेति पूर्वप्रकृतं ब्रह्म तस्य सोकामयत इत्यत्राकर्षः तस्य तस्मिन्नेव प्रकृतेर्थे यः श्लोकोऽसद्वा इति तत्राकर्षादित्यर्थमाहुः।

रामानुजाचार्याश्चानन्दमयविषयत्वमस्य मन्त्रस्याहुः असद्वा इदमग्र आसीदिति सत्यसंकल्पमानन्दमयं विपश्चिद्ब्रह्मैव समाकृष्यत इति तदानीं नामरूपविभागाभावेन तत्संबन्धितयास्तित्वाभावात् ब्रह्मैवासच्छब्देनोच्यते इति च। भास्कराचार्यास्तु जगत्तदासदिवासीत् असदस्पष्टमिवाभूत् इत्यर्थयामासुः दूषणमाहुः तन्मत इति अयमभिप्रायः इदंशब्दोक्तप्रत्यक्षकार्यस्य भगवदिच्छयेदंपदार्थस्य स्वकारणे लयो वाच्यः। इदंशब्दस्य परमैश्वर्यकर्तृरूपकार्यवाचकस्यार्थः परमैश्वर्यकर्ता तस्यापि स्वकारणे लयः तस्मिन् वाच्ये सत्यसति लये विशेषाभावादुपचारवैयर्थ्यं ततश्च सदसदिति भिन्नभिन्नकारणशब्दप्रयोजनं न किमपि स्फुटति 'मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक्' इति वाक्यं पुराणमते रामानुजाचार्यमतेप्येवम्। असच्छब्दप्रयोगप्रयोजनं न किमपि। भास्कराचार्यमतेप्येवम्। जगत्सदासीदसदासीदिति भिन्नभिन्नकारणशब्दप्रयोगप्रयोजनं न किमपि स्फुटति। ननु कदाचित्सज्जगत्कदाचिदसज्जगदिति प्रतीतिः प्रयोजनमस्त्विति वाच्यम्। सिद्धान्तेपि तौल्यात्। आचार्यैस्त्वेतन्निराकरणायासदित्यत्र पर्युदासमङ्गीकृत्यातः क्वचित् इत्याद्युक्तमिति ज्ञेयम्। शैवविज्ञानेन्द्रभिक्षुमतयोर्ज्ञेयमाहुः इति। तथा च मध्वाचार्यभाष्यीयपाद्मवाक्यम्—

जगद्वाचित्वात् ॥ १६ ॥ (१।४।१६)

एवं शब्दविप्रतिषेधं परिहृत्यार्थविप्रतिषेधं परिहरति कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे। बालाकिरजातशत्रवे ब्रह्मोपदेष्टुमागतः। आदित्यादिदक्षिणेक्षिपुरुषपर्यन्तं परिच्छिन्नब्रह्मोपासनान्युक्त्वा तथा निराकृते तमेव ज्ञानार्थमुपससाद। ततः सुप्तपुरुषसमीपमुभावागत्य ब्रह्मवाद्यं चक्रतुः।

भाष्यप्रकाशः।

जगद्वाचित्वात् ॥ १६ ॥ अधिकरणप्रयोजनमाहुः एवमित्यादि। शब्दविरोधकृतो यो ब्रह्मणि कारणत्वप्रतिषेधस्तं परिहृत्य अर्थविरोधकृतं तमनेनाधिकरणेन परिहरतीत्यर्थः। विषयमाहुः कौषीतकीत्यादि। गार्ग्यनामा बालाकिर्बलाकपुत्रोऽजातशत्रवे काशिराजाय

रश्मिः।

'परस्य वाचकाः शब्दाः समाकृष्यान्तरेष्वपि।
व्यवह्रियन्ते सततं लोकवेदानुसारतः' ॥ इति।

वेदो य आकाशे तिष्ठन्नित्याद्यन्तर्यामिब्राह्मणम्। तत्कारणत्वेनेति पूर्वसूत्रे तथाहि। आकाशादिष्ववान्तरकारणत्वेनापि स एव स्थितः। यथा व्यपदिष्टस्यैव परस्य य आकाशे तिष्ठन्नित्यादिना आकाशादिषूक्तेरिति जगति तु जगद्वाचित्वादिति सूत्रे तथाहि। तर्हि कथं तेषां शब्दानां जगति प्रसिद्धिः ॐ जगद्वाचित्वात् ॐ·······जगति हि व्यवहारो लोकस्य न तु परमात्मनि तथा। अतो जगति प्रसिद्धिः शब्दानामिति। तथेति प्रसिद्धः प्रकारो दूषणं बोध्यम्। अयमभिप्रायो द्रष्टव्यः। मण्डूकोपनिषदि ॐ इत्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव यच्चान्यत्किंचित्कालातीतं तदप्योङ्कार एव सर्वं ह्येतद्ब्रह्म अयमात्मा ब्रह्मेति श्रुतेः। उक्त प्रकारः प्रसिद्धो न विषयः सूत्राणामिति संदिग्धस्यैव विषयत्वात् ॥ १५ ॥

इति पञ्चमाधिकरणम् ॥ ५ ॥

जगद्वाचित्वात् ॥ १६ ॥ शब्देति असदादिशब्दविरोधकृतः। अर्थेति जीवरूपोर्थः। कर्तेत्येवमर्थविरोधकृतम्। तमिति ब्रह्मणि कारणत्वप्रतिषेधम्। कौषीतकीत्यादीति कौषीतकिन इति रामानुजाचार्यभाष्यात्कौषीतकाः केचन सामवेदभेदाः सन्ति। तथा च चरणव्यूहे सामवेदस्य सहस्रमासीत्तेष्वनध्यायेष्वधीयानास्ते शतक्रतुना वज्रेणाभिहताः। शेषान्व्याख्यास्यामः तत्र राणायनीयानां सप्तभेदा भवन्ति राणायनीयाः शाट्यः मुग्र्याः कौलोपाः महाकौलोपा लाङ्गलायनाः शार्दूलाः कौथुमाश्चेति अत्र कौषीतका न गणिताः अत शतक्रतुहतेषु भेदोयं द्रष्टव्यः। हननात्पूर्वं ब्राह्मणं कौषीतक्याख्यं तदधुना शंकराचार्यादिभाष्येषु प्रसिद्धम्। न दृप्तबालाकिब्राह्मणमिदमग्रे एक इत्यस्य व्याख्याने पृथक्तया तस्योपादानात्। ते च कौषीतकिनः केशधारिणः। 'कौषातकः कचे' इति विश्वात्। तालव्यस्य मूर्धन्यः आकारस्येकारश्छान्दसौ यथा लोके षाण्डिल्यपदं वेदे तु शाण्डिल्यपदं तद्वत्। लोके मूर्धन्यादिर्वेदे तालव्यादिरेवमत्र वेदे मूर्धन्यषकारमध्ये। लोके तु तालव्यशकारमध्ये इत्यपि द्रष्टव्यम्। गार्ग्योक्तनामेति गर्गस्यगोत्रापत्यं गार्ग्यः तन्नाम गर्ग इति तत् दृप्तबालाकिब्राह्मणे नैकवाक्यताप्यत्रोक्ता गार्ग्यपदेन दृप्तबालाकिर्हानूचानो गार्ग्य आस इति श्रुतेः। बलाकेति अत इञ्। बलाकाया अपत्यमिति विग्रहे स्त्रीभ्यो ढक् स्यात् क्वचिदपवादविषये उत्सर्गस्य

भाष्यप्रकाशः ।

ब्रह्मोपदेष्टुं स्वकीर्त्यर्थं स्वत एवागतः आदित्यचन्द्रविद्युत्स्तनयित्नुवाय्वाकाशाग्न्यब्दादर्शच्छायाप्रतिश्रुत्काशब्दस्वप्नशरीरदक्षिणाक्षिसव्याक्षिषु यः पुरुषस्तत्पर्यन्तं यान्युपासनान्युक्तवान् यथा आदित्यनिष्ठपुरुषस्य बृहत्पाण्डरवासा अतिष्ठाः सर्वेषां भूतानां मूर्धेत्येवं गुणकोपासने अतिष्ठाः सर्वेषां मूर्धा भवतीति परिच्छिन्नं फलम् । तथान्यत्रापि तत्तद्गुणकोपासने तत्तत्परिच्छिन्नफलमजातशत्रुणा तस्मा उक्तमिति तादृशानि परिच्छिन्नब्रह्मोपासनानि तान्युक्त्वा ततो राज्ञा उक्तप्रकारेण तदुक्ते प्रकारे निराकृते बालाकिस्तमेव पूर्णब्रह्मज्ञानार्थमुपससाद शिष्यत्वेन समित्पाणिर्निकटे गतः । ततो राजा स्नेहेन हस्ते तं गृहीत्वा सभात उत्थाय क्वचिदेकान्ते सुप्तपुरुषसमीपमुभावागत्य, बृहत्पाण्डरवासः सोमराजन्नित्यादिभिः संबोधनैस्तं राजा संबोधयाञ्चक्रे तदापि तं सुप्तं दृष्ट्वा

रश्मिः ।

प्रवृत्तिरित्यगतिकगतिः न च वंशब्राह्मणे । बलाकाकौशिकाद्बलाकाकौशिक इति बलाकाशब्दो न बलाकशब्द इति शङ्क्यम् । समाप्तौ काश्यपीबालाक्यमाडरीपुत्रात् काश्यपीबालाक्यमाडरीपुत्र इत्यत्र बलाकशब्दस्य स्वार्थे ष्यञन्तस्य सत्त्वात् । स्त्रीलिङ्गशब्दात् ष्यञः प्रसिद्धेः । स्वेति दृप्तबालाकिमेकवाक्यार्थे वक्ष्यन्ति 'अन्यार्थं तु जैमिनिः' इति सूत्रे तत्रत्यदृप्तत्वं ब्रह्मवित्त्वाद्गर्वितत्वं तदत्राप्येकवाक्यार्थत्वाय च वक्तव्यमित्याशयेन **स्वकीर्त्यर्थ**मिति । आदित्यचन्द्रेत्यादिभाष्यार्थमाहुः **आदित्ये**ति सहोवाच गार्ग्यः य एवादित्ये पुरुषः एतमेव ब्रह्मोपास इत्येवंविधेषु । अत्र पुरुषपर्यन्तमिति भाष्याद्य एवादित्ये पुरुष इत्युपासना तमेव ब्रह्मोपास इति तदनुवाद उपासनाया गानत्वादवग्रह इतिवत् ज्ञानमुपासना । **आदित्यपुरुष** इति श्रुतं श्रवणं प्रति लक्षीकृत्य यः शब्दः स प्रतिश्रुत् स इवेति प्रतिश्रुत्कः स च शब्दश्चेति स च दृप्तबालाकिब्राह्मणे य एवायं यन्तं पश्चाच्छब्दोनूदेत्येतमेवाहं ब्रह्मोपासे इत्यत्रोक्तः । यन्तं गच्छन्तं पुरुषं अनूदेति उत्पद्यते प्रतिश्रुत्काशब्देति पाठे प्रतिश्रुत्का टाप् । शब्दश्च । यानीति दृप्तबालाकिब्राह्मणे च स होवाच गार्ग्यः य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपासे इति । स्वसंघाते कर्ता भोक्तेत्येवमुपासे । स यश्चायं पुरुषे यश्चासावादित्ये स एक इति भृगूपनिषत्कात् । तान्यपोद्य मा मैतस्मिन् संवदिष्ठा इति । एतस्मिन् संघाते । यानि अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमेतमुपासे इत्युपासनान्यजातशत्रुरुक्तवानित्यर्थः । बृहत्पाण्डरवासा इति दृप्तबालाकिब्राह्मणे । अतिष्ठाः सर्वेषां भूतानामिति श्रुतौ बृहत्पाण्डरवासा नास्ति । अतिष्ठा इति स य एतमेवमुपास्ते इति श्रुतेः अस्याः श्रुतेः शेषश्रुतिमाहु अतिष्ठा इति । **परिच्छिन्न**मिति । सर्वभूतातीतत्वं सर्वपूज्यत्वं राजत्वं च । अतीत्य सर्वाणि भूतानि तिष्ठतीत्यतिष्ठाः स्थोतिक्रान्तो तिष्ठ इति वा । **अन्यत्रे**ति चन्द्रादिषु । **तत्तद्गुणके**ति । यथा दृप्तबालाकिब्राह्मणे बृहत्पाण्डरवासाः सोमो राजेत्येवंगुणकोपासने परिच्छन्नफलं तु अहरहर्हसुतः प्रसुतो भवतीति श्रुत्युक्ता अस्योपासकस्य प्रकृत्यात्मके यज्ञे अहरहः किल सोमः सुतः कृताभिषवो भवति विकृत्यात्मके च यज्ञे प्रस्तुतः प्रकृष्टं सुतरां स्तुतो भवति सुतो भवतीति वा । उभयविषयज्ञानुष्ठानसामर्थ्यं भवतीत्यर्थः । एवमन्यत्र विद्युदादिषु । **तस्मा** इति बालाकये । **परिच्छिन्ने**ति भाष्यं विवृण्वन्ति स्म **परिच्छिन्ने**ति । **तथा निराकृत** इति भाष्यार्थमाहुः **तत** इति । **उक्ते**ति यथा आदित्यनिष्ठपुरुषस्येत्याद्युक्तप्रकारेण । **तदुक्त** इति बालाक्युक्ते कर्तृभोक्तृत्वेन स्वसंघात उपासनप्रकारे निराकृते । **तमेवे**ति भाष्यार्थमाहुः **बालाकि**रिति । तमजातशत्रुम् । **उपे**ति यथा दृप्तबालाकिब्राह्मणे स होवाच गार्ग्य उप त्वायातीति त्वा त्वामजातशत्रुम् । **ततः सुप्ते**ति भाष्यं विवृण्वन्ति स्म । **ततो राजे**ति । **बृहत्पाण्डरवासः** शुक्लवासः । **इत्यादिभि**रिति कौषीतकि-

भाष्यप्रकाशः ।

यष्ट्या क्षिप्तवान् । स पुरुषस्तत एव समुत्तस्थौ । तदा राजबालाकी वक्ष्यमाणाभ्यां प्रश्नोत्तराभ्यां ब्रह्मवाद्यं चक्रतुः । तत्र, क्वैष एतद् बालाके इत्यादिके बालाकिं प्रति, पुरुषस्वप्नस्थानं, स्वप्नावस्था, तत आगमनं चेति त्रयविषयके राजप्रश्ने पुरुषपदेन जीवः प्रक्रान्तः । यदा च बालाकिस्तं न ज्ञातवाँस्तदा राजैव, यत्रैष एतद् बालाके पुरुषोऽशयिष्टेत्यादिनोत्तरं जगाद । तत्र हिताख्यासु हृदयनिकटस्थनाडीषु जीवस्य शयनं, तत्र स्वप्नसुषुप्त्याख्यमवस्थाद्वयं, ततः पुनरत्रागमनं वदता राज्ञा तत एवाग्निविस्फुलिङ्गन्यायेनोत्पत्तिरुक्ता । ततः, स एष प्राण एव प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तद्यथा क्षुरः क्षुरधानेऽवहितो विश्वम्भरो वा विश्वम्भरकुलाय इति दृष्टान्तद्वयेन ब्रह्मणः प्रज्ञात्मप्राणाख्यस्यानुप्रवेश उक्त इति सर्वोऽपि षष्ठोऽध्यायो

रश्मिः ।

ब्राह्मणाभिप्रायं दृप्तबालाकिब्राह्मणे नास्ति संबोधनत्रयातिरिक्तम् । यष्ट्येति दृप्तबालाकिब्राह्मणे तु स नोत्तस्थौ तं पाणिपेषं बोधयाञ्चकार सहोत्तस्थौ इति श्रुतिः । राजाबालाकी इति द्विवचनान्तम् । ब्रह्मवाद्यमिति वादयितुं योग्यं ब्रह्म चक्रतुः । यद्वा । वाद्यते ध्वन्यते वदेर्ण्यन्तादचो यत् । तत्रेति भाष्यं विवृण्वन्ति स्म तत्रेति । इत्यादिक इति क्वैष बालाके पुरुषोऽशयिष्ट क्व वै तदभूत् कुत एतदगात् इत्येवं रूपे । पुरुषेति स्थीयतेऽस्मिन्निति स्थानम् । तत्क्वेतिपदेन पृष्टम् । स्पष्टमन्यत् । तस्मादेवेति भाष्यं विवृण्वन्ति स्म यदा च बालाकिरिति । इत्यादिनेति कुत एतदगादित्यस्याः अग्रे यथा सुप्तः स्वप्नं न किंचन पश्यत्यथास्मिन् प्राण एवैकधा भवतीत्यादिना शयनभवनयोराधार उत्थानापादानं च प्राणपदवाच्यः परमात्मेत्युत्तरार्थः ब्रह्मामृतवर्षिण्याम् । रामानुजाचार्यभास्कराचार्यानुसारेणार्थमाहुः तत्र हिताख्येति । तत्रेत्युत्तरे तत्रेति हितानामनाडीषु अत्र स्वप्न उक्तो न सुषुप्तिः सा दृप्तबालाकिब्राह्मणे पुरितत्यामुक्ता । अथ यदा सुषुप्तो भवतीत्युपक्रम्य पुरितति शेते इति श्रुतेः । तत इत्यवस्थाद्वयात् । अत्रेति हृदये । तत एवेति जागरितावस्थावस्थिताज्जीवादेव । उक्तेति । तथा च श्रुतिः । कुत एतदागादित्यस्याः अग्रे पृष्टमर्थमजानते गार्ग्याय बालाकये स्वयमेवाजातशत्रुणोक्ता हितानाम नाड्यः तासु तथा भवति यथा सुप्तः स्वप्नं न कथंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गाः विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति । ब्रह्मणोप्यनुप्रवेशश्चेति भाष्यं विवृण्वन्ति स्म ततः स एष इति । पुरुषविधब्राह्मणे तु स एष इह प्रविष्ट इति पठ्यतेऽत इयमपि कौषीतकिब्राह्मणस्था । श्रुत्यर्थस्तु । प्राणस्य प्रकृष्टज्ञानात्मकत्वं ब्रह्म ते ब्रवाणीत्युपक्रमात् । आत्मानमिति अत एव विश्वः 'आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु' इति । आलोमभ्य इत्यादि आङभिविधौ मर्यादायामाङिति टीकायाम् । तत्र लोमनखाव्यापकत्वप्रसङ्गः लोमाग्रं नखाग्रमिति व्याख्याने लोमनखयोर्लक्षणापत्तिः । क्षुरः क्षुरधाने क्षुरो धीयतेऽस्मिन् नापितोपस्काराधाने एकदेशेऽवहितः प्रवेशितः स्थितः स्यात् यथा वा विश्वंभरो अग्निः जाठरत्वेन विश्वस्य भरणाद्विश्वंभरकुलाये असाधारभूतकाष्ठादिलक्षणे नीडे व्याप्य स्थितः । सर्वोपीति कौषीतकिब्राह्मणस्य षष्ठाध्याये । दृप्तबालाकिब्राह्मणं

तत्र, 'कैष एतद् बालाके पुरुषोऽशयिष्ट'इत्यादौ जीवः प्रक्रान्तः । तस्मादेव सर्वोत्पत्तिरुक्ता ब्रह्मणोऽप्यनुप्रवेशश्च । तत्र संदेहः । जीव एव ब्रह्मसहितः कर्ता ? ब्रह्मैव वेति ? । तत्र जीव एव कर्ता सर्वस्य जगतो ब्रह्मत्वादयस्तस्य धर्माः राजत्ववद् यजमानत्ववद्वा । अस्मिन् प्रकरणे ब्रह्मोपक्रमेण जीवपर्यवसानोक्तेः । सर्वत्रैव ब्रह्मत्वेनोक्तो जीव एव कर्ता । तथा सति लोकेऽपि जीवकर्तृत्वं सहजं भवेद् । बन्धमोक्षव्यवस्था च । एवं सत्यर्थात् प्रकृतेरेव फलिष्यतीत्येवं प्राप्ते

भाष्यप्रकाशः ।

विषयः । संदेहमाहुस्तत्रेत्यादि । पूर्वपक्षमाहुः तत्र जीव इत्यादि । सर्वस्य जगतो जीव एव कर्ता । यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्मेति कर्तारं वेदितव्यत्वेनोपक्षिप्य सुप्तपुरुषनिकटगमनाद्युत्तरं तस्मादेव प्राणानां देवानां लोकानां चोत्पत्तिकथनात् । नच ब्रह्मणोऽपि कर्तृत्वम् । तदनुप्रवेशमात्रस्यैव बोधनात् । अतः साहित्यमात्रं ब्रह्मणो भवतु । नच जीवस्य

रश्मिः ।

तु चतुर्थाध्याये बृहदारण्यके । तत्रेत्यादीति कैष एतद्बालाके पुरुषोऽशयिष्टेति पुरुषपदमुपक्रमो ब्रह्म ते ब्रवाणीति संदेहबीजं ब्रह्मणोनुप्रवेशस्यावार्यत्वाद्ब्रह्मसहित इति । एतेषामिति स वेदितव्य इति श्रुतिशेषः । श्रुत्यर्थः पूर्वपक्षे जीवपरः यत्तदोर्नित्यसंबन्धात् । यस्य वा एतत्कर्म त्रिविधमिति जीवः कर्ता न ब्रह्म धर्माधर्मलक्षणकर्मानाश्रयत्वात् स जीवो वेदितव्य इति । उपक्षिप्येति प्राप्तकाले कृत्यप्रत्ययेनोपक्षेपो ध्वनितः । सुप्तपुरुषेति आदिपदार्थः पूर्वमुक्तः । तस्मादेवेति जीवादेव । साहित्यमात्रमिति । ब्रह्मणा सहपुरुष इति न तु स यदा प्रतिबुध्यते इत्यनन्तरमेतस्मादात्मनः इत्यत्र ब्रह्मसहितादात्मनो जीवादित्यर्थेन ब्रह्मणो विप्रतिष्ठन्ते इति क्रियायामन्वयः । पुत्रेण सहागतः पिता इत्यत्रेव । ब्रह्मत्वादय इति भाष्यमवतारयन्ति न च जीवस्येति । तथात्रेति अत्र सांख्यमते 'प्रकृतिपुरुषयोः अन्यत्सर्वमनित्यम्' 'असङ्गो ह्ययं पुरुषः' इति च वदतां सांख्यानां न जीवः पुरुषातिरिक्तः तस्य व्यवस्था मायावादिवत् । प्रकृत्यभिमन्तृत्वमिति मलिनबुद्धौ प्रतिबिम्बितत्वं जीवत्वं प्रकृतौ प्रतिबिम्बितत्वमीश्वरत्वं प्रकृतिपुरुषयोरनादिरविवेकः । 'निःसंगेप्युपरागोऽविवेकात्' जपास्फटिकयोरिव नोपरागः किं त्वभिमानः । तथा च प्रकृतेर्जडायाः अप्यभिमन्तृत्वमहं कर्तेति तदेव ब्रह्मत्वं चिदुपरागस्याप्यविवेकानादित्वेनानादित्वात् । तदभिमन्तृत्वमुपाधिस्तदा भवति यदा ज्ञानान्मुक्तिः सा तु मलिनबुद्धिरूपप्रतिबिम्बाधारनिवृत्तिः 'मुक्तिरन्तरायध्वस्तेर्न परः' इति अतस्तेषां ब्रह्मत्वादीनामपि आगन्तुकत्वं मलिनबुद्धिरूपोपाधेः स्वाभाविकत्वात् । अभिमन्ता गीतात्रयोदशाध्याये ।

'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसङ्गोस्य सदसद्योनिजन्मसु ॥
उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेस्मिन् पुरुषः परः' ॥ इति ।

भाष्यप्रकाशः।

कर्तृत्वे उपक्रमोक्तस्य ब्रह्मत्वस्य बृहदादीनां धर्माणां न विरोधः शङ्क्यः। यथा तुल्येऽपि सर्वत्र जीवत्वे क्वचिदेव देहे अन्यनियोजकत्वोपाधिना राजत्वं, कर्मकरणे मुख्यत्वोपाधिना यजमानत्वं चोच्यते, तथात्र प्रकृत्यभिमन्तृत्वोपाधिना तेषामाप्यगन्तुकानां वक्तुं शक्यत्वात्। नचोपक्रमस्यासंजातविरोधत्वेन प्राबल्याद् ब्रह्मण एव कर्तृत्वं युक्तमिति शङ्क्यम्। उपसंहारस्यात्र विवरणरूपत्वेन पूर्वोक्तार्थनिर्णायकत्वादत्र ब्रह्मोपक्रमेण जीवपर्यवसानोक्तेर्ब्रह्मत्वेनोक्तो जीवः एव कर्ता। एवमुपक्रमोपसंहारभेदस्तु सर्वत्रैवैतन्न्यायज्ञापनार्थम्। एवमत्र देहविशिष्टस्याभिमानिनो दैह्यान् प्रति कर्तृत्वे बोधिते सति लोकेऽपि जीवस्य कर्तृत्वं देहसहभाव्येव भवेत्। तत्तत्कर्मणां बन्धमोक्षव्यवस्था च सुखेनोपपद्येत। एवमभिमानिनः कर्तृत्वे सिद्धे सति यो यादृगभिमानी तेन तादृक् कर्तव्यमिति नियमात् सर्वकर्तृत्वं प्रकृत्यभिमानिनः सेत्स्यति। सांख्यमते प्रकृतौ महत्तत्त्वे वा प्रतिबिम्बितस्यैवेश्वरत्वोपगमान्मलिनबुद्धौ प्रतिबिम्बितस्यैव जीवत्वात् प्रतिबिम्बस्य चाधारा-

रश्मिः।

मधुसूदन्यामत्र जीवो व्याकृतः प्रकृतिं पुरुषं चैव विद्धीत्यादिश्लोकेषु। **अस्मिन्नित्यादि** भाष्यमवतारयन्ति स्म **न चोपक्रमस्येति**। ब्रह्म ते ब्रवाणीत्यस्य। अग्रे षोडशपुरुषा आदित्यादय उक्ताः। **उपसंहारस्येति** स एष प्राण एव प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट इत्यस्य। दृप्तबालाकिब्राह्मणे तु सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमित्यस्य। उपसंहारार्थ उक्तः। द्वितीयस्य तु तस्योपनिषदिति पूर्वमुक्तं तत्र कासावुपनिषदित्यत आह सत्यस्येति किं वा सत्यं किं पुनः सत्यमित्यत आह प्राणा इति प्राणा वै सत्यं सच्च सत्यमिति व्युत्पत्तेः। तेषां प्राणानां मध्ये य एष उक्तः आत्मा सत्यमबाध्यं तत्त्वमित्यर्थः। तस्योपनिषदित्यस्य तु तस्याकाशशब्दोदितस्य आत्मनो ब्रह्मणः उपनिषत् इति नाम उपसमीपं निरन्तरं सादयति गमयतीति व्युत्पत्तेः निरन्तरं समीपगमिकेत्यर्थः। रामानुजाचार्यभाष्ये तु सर्वान्पाप्मनो अपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदेत्युपसंहारः एकत्र फलस्तुत्योपसंहारोन्यत्र तां विहाय। फलस्तुतेर्व्यतिरिक्तत्वादिति विवेकः। **विवरणेति** उपक्रमोक्तब्रह्मानुसंधायैष प्राणो ब्रह्म एव प्रज्ञायां बुद्धावात्मा स्वरूपं यस्य जीवस्येत्यन्यत् स्पष्टम्। **पूर्वोक्तेति** घटः कलश इतिवत्। शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्चेति वाक्यात्। प्रासङ्गिकमाहुः **एवमिति**। **एतन्न्यायेति**। उपक्रमस्यासंजातविरोधत्वेपि विवरणेन शक्तिग्रहो नोपक्रमेणेति न्यायज्ञापनार्थम्। **तथा सतीति** भाष्यं विवृण्वन्ति स्म **एवमत्रेति**। **दैह्यानित्यादि** प्रकृतिजान् 'पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्' इति गीतायाः। **कर्तृत्वं** भोगकर्तृत्वम्। देहसह सहभावि एव। **बन्धमोक्षेति** भाष्यार्थमाहुः **तत्तदिति**। अन्यथैकजीवस्य देहभेदेपि कर्तृत्वस्य प्रकृतिगुणनिष्ठत्वेन प्रकृतेर्बन्धमोक्षापत्तिः बन्धमोक्षव्यवस्था च सहजा भवेदिति भाष्यार्थात्। **यादृगिति** यादृक्कर्माभिमानी तादृक्कर्म कर्तव्यम्। **सर्वेति**। आदेहं सर्वकर्मकर्तृत्वम्। **आधारेति** प्रतिबिम्बाधारः। प्रकृतिमहत्तत्त्वाख्यं मनः मलिनबुद्धिश्च तदधीनत्वे चारुणजपाकुसुमाधीनस्फटिकारुणिमवत्कर्तृत्वं जीवस्याभिमानिन इति भावः। अयं जीवाणुत्ववादे तृतीयः पक्षः। तत्र मूलप्रकृतावेव चित्प्रतिबिम्ब ईश्वर इति आवरणशक्तिप्राधान्येनाविद्यादिशब्दितायां तस्यामेव चित्प्रतिबिम्बो जीव इति च कथनात्। **मूलप्रकृतिरविकृतिरिति** अविद्यादयो बहुणसंविज्ञानेन महत्तत्त्वमलिनबुद्ध्यादयः तैः शब्दितायां

उच्यते । जगद्वाचित्वात् । एतेषां पुरुषाणां कर्ता यस्य चैतत् कर्मेत्युपक्रमे एतच्छब्देन जगदुच्यते । पुरुषशब्देन च जीवः । तज्जडजीवात्मकं जगद् ब्रह्मकर्तृकमिति हि पूर्वसिद्धम् । तदनुरोधेनात्रापि ब्रह्मपरत्वमेवोचितं, न तु सर्वविप्लवोऽश्रुतकल्पना च । अतः सुषुप्तावपि ब्रह्मण्येव लयस्तस्मादेव सर्वमिति ज्ञातव्यम् । प्राणात्मशब्दवाच्यत्वं तु पूर्वमेव सिद्धम् । तस्मान्न जीवाधिष्ठिता प्रकृतिः कारणम् ॥ १६ ॥

भाष्यप्रकाशः ।

धीनत्वात् । नच ब्रह्मानुप्रवेशोक्तिवैयर्थ्यम् । तस्य साक्षित्वमात्रबोधनार्थत्वात् । तत्त्वं तु, स एष इत्यैक्यविधानान्न ब्रह्मेतो भिन्नम् । अतोऽभिमानिन एव कर्तृत्वात् प्रकृतेरेव कर्तृत्वमर्थादेव फलिष्यतीत्येवं प्राप्ते इत्यर्थः । समाधिं व्याकुर्वन्ति एतेषामित्यादि । अत्रापि कारणत्वेनेत्यनुवर्तते । कारणत्वेन ब्रह्मैवादरणीयम् । नात्र जीवः कर्तृत्वेन विवक्षितः । कुतः? जगद्वाचित्वात् । अत्र हि बालाकिनोक्तानादित्यादीन्निराकृत्य अजातशत्रुणा, 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत् कर्म स वै वेदितव्यः' इति सिद्धान्तकथनोपक्रमे, एतेषामित्येतच्छब्देनादित्यमण्डलाद्युल्लेखादुपलक्षणविधया जडं जगदुच्यते । पुरुषशब्देन च जीवरूपम् । तज्जडजीवात्मकं जगद् ब्रह्मकर्तृकमिति हि पूर्वसिद्धम् । आदित्यमण्डलाद्युत्पत्तेः प्रागेव, 'यतो वा इमानि भूतानि जायन्ते', 'तत्तजोऽसृजत', 'एतस्माज्जायते प्राणः' इत्यादिष्वादिसृष्टिबोधिकासु

रश्मिः ।

तस्यां मूलप्रकृतावेवेति सांख्यमतम् । न च कर्ता कारयिता हरिः इत्युक्तब्रह्मानुप्रवेशो हि कर्तृत्वादेवं तु तदुक्तिवैयर्थ्यमित्याशङ्क्य समाधत्ते न च ब्रह्मेति । 'असङ्गो ह्ययं पुरुषः' इति सूत्रात् । पञ्चविंशतितत्त्वेषु कुत्रास्य प्रतिबिम्बितत्वस्य निवेश इत्याशङ्क्याहुः तत्त्वं त्विति । स एष इत्युपसंहारश्रुतिः । एवं सतीति भाष्यं विवृण्वन्ति स्म अत इति । ननु भाष्ये एवं सतीत्यस्याभिमानिन एव कर्तृत्वे सतीत्यर्थः । अत्र तु पञ्चम्यन्तं कुत इति चेन्न विवक्षातः कारकाणि भवन्तीति । अर्थादिति असङ्गत्वरूपार्थात् प्रकृतेर्विकारशीलायाः । एतेषामित्यादीति भाष्ये एतेषामादित्यादीनाम् । एतत् इति गच्छतीत्येतत् 'एतेस्तुट् च' इति सूत्रेणादिप्रत्ययस्तस्य तस्य तुडागमश्च । कर्मेति क्रियत इति कर्म 'सर्वधातुभ्यो मनिन्' इति मनिन् । कृति कर्म जगदित्युक्तम्, तच्च जडम् ।

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया' ॥

इति गीतातः । पुरुषेति पुरुषाणामित्युक्तः पुरुषशब्देन जीवः । प्रकृते । अत्रेमां श्रुतिं सकलामाहुः पूर्वापरसंबन्धाय । अत्र हि बालाकिनेति । निराकृत्येति अत्र हि बालाकिरजातशत्रुणा ब्रह्म ते ब्रवाणीति संवदितुमुपचक्रमे स च कतिचिदादित्याद्यकारणान्पुरुषान् मुख्यब्रह्मदृष्टिभाज उक्त्वा तूष्णीं बभूव तमजातशत्रुर्मृषा वै खलु मा संवदिष्ठा ब्रह्म ते ब्रवाणीति । अमुख्यब्रह्मवादितया तं निराकृत्येत्यर्थः । तत्कर्तारमन्यं वेदितव्यतयोपचिक्षेप तमाहुः अजातशत्रुणेति । एतच्छब्देनेति भाष्यमवतारयन्ति एतेषामित्येतच्छब्देनेति । उक्तार्थस्य भगवदिच्छया प्रसिद्ध्यभावात् प्रसिद्धार्थमाहुः उपलक्षणेति । पुरुषेति भाष्यं विवृण्वन्ति पुरुषशब्देनेति । जीवेति पुरि शेते इति व्युत्पत्त्या जीवरूपं जगदुच्यते । तज्जडेति भाष्यं विवृण्वन्ति तज्जडेति । भूतानीति भूतं क्ष्मादि पिशाचादि च तेजोधाम छान्दोग्यश्रुतिः । इत्यादिष्विति ।

भाष्यप्रकाशः ।

श्रुतिषु सिद्धम् । अत्रापि पूर्वमिन्द्रप्रतर्दनसंवादे एवमेव सिद्धमतस्तदनुरोधेनात्रापि कर्तृत्वस्य ब्रह्मपरत्वमेवोचितम् । न तु पुरुषशब्देन देहमात्रमभिप्रेत्य तत्कर्तृत्वस्य प्रकृत्यभिमानिनि संभवदुक्तिकत्वेन तदङ्गीकृत्य सर्वश्रुत्युपप्लवो विधेयः । नच, न जायते न म्रियते वेति श्रुतेर्जीवोत्पत्तिः सिद्धान्तेऽप्यनिष्टेति जडजीवात्मकजगत्कर्तृत्वकथनमसंगतमिति शङ्क्यम् । 'सर्वं एवात्मानो व्युचरन्ति' इति श्रुत्यन्तरेण व्युचरणरूपाया उत्पत्तेस्तत्राप्यङ्गीकारात् । अतो जडवत् स्वरूपान्यथाभावाभावादेव, न जायत इत्युपपत्तेर्न सिद्धान्ते दोषः । नच सिद्धान्ते उपलक्षण-विधावत् पूर्वपक्षे संकोच इति दोषतौल्यात् साम्यं शङ्क्यम् । ब्रह्मण उपक्रमे श्रुतत्वेन तदादरस्य युक्ततया उपलक्षणविधाया अदुष्टत्वात् । प्रकृत्यभिमानिनस्त्वश्रुतत्वेन तत्कल्पने श्रुतत्यागोऽश्रुत-कल्पना च स्यादिति दोषाधिक्यात् । नच ब्रह्मपदमत्र सांख्याभिमतजडब्रह्मवाचकमिति शङ्क्यम् । स्वरूपलक्षणविरोधप्रसङ्गात् । अतः सर्वश्रुत्येकवाक्यत्वायात्रापि ब्रह्मैव कर्त्रीति मन्तव्यत्वात् सुषुप्तावपि ब्रह्मण्येव वागादीनामत्रोक्तानां लयः । तस्मादेव सर्वं यथायतनं विप्रतिष्ठत इति ज्ञातव्यम् । नच प्राण एव प्रज्ञात्मेत्यस्य विरोधः । ब्रह्मणि प्राणात्मशब्दवाच्यस्येन्द्रप्रतर्दनसंवादे पूर्वमेव सिद्धत्वादिति । तस्मादत्र प्रकृत्यभिमानी जीवो न तत्कर्तृत्वेन सिद्ध्यतीति न तदधिष्ठिता प्रकृतिः करणमित्यर्थः ॥ १६ ॥

रश्मिः ।

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी' ॥

इति । मुण्डके आदिपदेन 'द्यावापृथिवी जनयन् देव एकः' इति । **पूर्वसिद्ध**मित्यस्य भाष्यस्यार्थान्तरमाहुः **अत्रापि** । **पूर्व**मिति भाष्येपि पूर्वमनुगमाधिकरणे कौषीतकिब्राह्मणे वा पूर्वम् । **एवमेवे**ति जगद् ब्रह्मकर्तृकमेव सिद्धम् । **तदनुरोधेने**ति भाष्यं विवृण्वन्ति **अतस्तदनुरोधेने**ति । **अत्रापी**ति कौषीतकिब्राह्मणेपि । **संभवदि**ति प्राक्तनकर्मद्वारा । कर्मणां प्ररोहैकस्वभावत्वम् । **सर्वश्रुती**ति यतो वा इमानीति श्रुतिविप्लवः । न जायत इति 'न जायते म्रियते वा विपश्चित्' इति । न च विपश्चित् सूर्य इति शङ्क्यम् । सूर्य आत्मा जगतस्तस्थुषश्चेति आत्मत्वात् । **व्युचरणे**ति सर्व एव जीवाः सर्व एवात्मानः इति व्युचरणं समागमः । 'अनित्ये जननं नित्ये परिच्छिन्ने समागमः' इति सुबोधिनीकारिकायाः । जडे शब्दरूपरसगन्धस्पर्शपरावृत्तिवज्जीवेष्वित्याहुः **अत** इति । अन्यथा-भावः शब्दादिपरावृत्तिः । **अश्रुतकल्पना** चेति भाष्यमवतारयन्ति **न चे**ति । **उपलक्षणे**ति एतच्छब्देनोपलक्षणविधया । **संकोच** इति देहमात्रसंकोचः । शङ्कते **न च ब्रह्मे**ति । **सांख्ये**ति सांख्यैरभिमतं जडं प्रकृतिः ब्रह्म असङ्गपुरुषस्तदुभयवाचकमभिमानिवाचकमिति यावत् प्रतिबिम्बं वा जडं ब्रह्म तद्वाचकं वोपक्रमगतं ब्रह्मपदमित्यर्थः । **स्वरूपे**ति सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्युक्तम् । **अतः सुषुप्ता**वित्यादिभाष्यं विवृण्वन्ति स्म **अतः सर्वे**ति । **अत्रापी**ति कौषीतकिब्राह्मणेपि । **विप्रतिष्ठन्ते** इति जागरिते विप्रतिष्ठन्ते तच्च विषयोपपादनं पूर्वमुक्तम् । न जीवादिति भावः । **प्राणात्मे**ति भाष्यं विवृण्वन्ति **न च प्राण** इति । **पूर्व**मिति अनुगमाधिकरणे । कौषीतकिब्राह्मणे वा पूर्वम् । **तदधिष्ठे**ति प्रतिबिम्बाधिष्ठिता प्रतिबिम्बाधारभूता प्रकृतिः । न च गीताविरोध इति वाच्यम् । यद्यपि क्षेत्रक्षेत्रज्ञनिर्देशाध्याये क्षेत्रज्ञनिरूपणं न्यायं तथापि क्षेत्रेषु देहेषु द्वा सुपर्णेति श्रुत्या

जीवमुख्यप्राणलिङ्गादिति चेत्तद्व्याख्यातम् ॥ १७ ॥

किंचिदाशङ्क्य परिहरति । नन्वत्र जीव एव प्रक्रान्तः । क्वैष एतद् बालाके पुरुषोऽशयिष्टेति । ब्रह्म त्वद्यापि न सिद्धमेतादृशं, नैतादृशमिति । अतः शयनोत्थानलक्षणजीवधर्मदर्शनात् तस्यैव ब्रह्मत्वं जगत्कर्तृत्वं च । तत् स्वतोऽनुपपन्नं प्रकृतौ फलिष्यति । अथवा मुख्यप्राणलिङ्गमप्यत्रास्ति । प्राण एवैकधा भवतीति सुषुप्तौ तस्यैव वृत्तिरुपलभ्यते । विद्यमानादेव सर्वोत्पत्तिप्रलयौ । स च

भाष्यप्रकाशः ।

जीवमुख्यप्राणलिङ्गादिति चेत्तद्व्याख्यातम् ॥ १७ ॥ भाष्यमत्र निगदव्या-

रश्मिः ।

जीवमात्रस्याशक्यनिरूपणत्वात् उपद्रष्टेत्यादिना ब्रह्मनिरूपणात् । न चात्र मानाभाव इति शङ्क्यम् । भुङ्क्ते इति जीवे भोक्तृत्वसिद्ध्या भोक्तेति भोक्तृत्वस्य पृथगुक्तस्य मानत्वात् । न चानुवाद इति शङ्क्यम् । गौरवात् । न चानश्नन्नन्योभिचाकशीति श्रुतिविरोधः शङ्क्यः स्वेनाशननिषेधात् । जीवरूपेण भोक्तृत्वस्यावरणात् । अन्यथा माण्डूक्योपनिषदि स्थूलभुक्त्वोक्तेर्विरोधः स्यात् । न च चरणरूपेण स्थूलभुक्त्वमिति शङ्क्यम् । ॐ । न च प्रकृतेरनादित्वं न युज्यत इति शङ्क्यम् । मायया च निषेवितमिति वाक्यात् । माया प्रकृतिरिति । न च क्षेत्रक्षेत्रज्ञनिर्देशविरोध इति शङ्क्यम् । उपक्रमे,

'प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ।
एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव' ॥

इति ज्ञेयोक्तेः । न च क्षेत्रक्षेत्रज्ञयोरेवं सांख्यरीत्या सर्वनिवेशः क्षेत्रक्षेत्रज्ञनिर्देश इत्यध्यायनाम्नः इति शङ्क्यम् । प्रतिबिम्बस्य विद्वन्मण्डने दूषणात् निरीश्वरवादापत्तेश्चेति ॥ १६ ॥

जीवमुख्यप्राणलिङ्गादिति चेत्तद्व्याख्यातम् ॥ १७ ॥ निगदेति । तथाहि । किंचिदिति प्रतीतार्थत्यागेनायमात्मा ब्रह्मेति शारीरब्राह्मणे जीवस्य ब्रह्मत्वोक्तेरुपक्रमो जीवपरः क्वैष इत्यत्र जीवः स्पष्टः । सुप्तात् सुषुप्ताच्च जीवाच्छ्रौती सृष्टिः तत्कर्तृत्वं प्रतिबिम्बे बाधितम् । प्रकृतौ भविष्यति उपसंहारे स एष प्राण एव विज्ञानात्मेत्येकवचनेन सांख्यवाददर्शनात् फलनिरूपणेपि पापाहत्यादीनां संभव इत्याशङ्क्येति । ननु ब्रह्म ते ब्रवाणि इत्युपक्रम इति चेत्तत्राहुः ब्रह्म त्विति । अस्तूपक्रमवार्ता अत्रेन्द्रप्रतर्दनसंवादेपि ब्रह्म न सिद्धं प्राणपदं ब्रह्मवाचकमिति सिद्धं ततस्त्वष्टृवधोत्र तु शारीरब्राह्मणोक्तो जीव उपक्रमे उक्तः । अत इति शक्यार्थविचारात् । जीवमुख्यप्राणलिङ्गादित्येकवचनादेकं दुष्टमेकं लिङ्गमित्युक्त्या दुष्टं जीवलिङ्गं व्याख्याय मुख्यप्राणलिङ्गं व्याकुर्वन्ति स्म अथ वेति । ननु कोऽस्वरसो येन पक्षान्तरोक्तिरिति चेच्छृणु उपक्रम एवासंभवी यतोशयिष्टेति स्वप्नार्थकधातुमात्रं न किं तु सुषुप्तिसहितस्वप्नवाचकः यदा सुप्तः स्वप्नं न कंचन पश्यति इति श्रुतेः दृप्तबालाकिब्राह्मणे पुरीतति शेते इति सुषुप्तिनाडीपुरीतद्रूपाया उक्तेश्च सुषुप्तात्पुरुषात्सृष्टिः सुखमहमस्वाप्सं न किंचिदवेदिषमिति प्रत्ययविरुद्धेति प्रविष्टब्रह्मणः सृष्टिर्युक्तेत्यस्वरस इति । ननु अत्रापि स दोषस्तदवस्थ इति चेत्तत्राहुः सुषुप्ताविति यदा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन् प्राण एवैकधा भवतीति उपक्रम्य एतस्मादात्मनः प्राणा यथायतनं प्रतिष्ठन्ते प्राणेभ्यो

प्रकृत्यंशोऽतो जडादेव प्रधानात् सृष्टावपि सर्वोत्पत्तिः। अतोऽस्मात् प्रकरणाज्जीवद्वारा साक्षाद्वा प्रकृतेः कारणत्वमित्येवं प्राप्ते उच्यते तद्व्याख्यातम् । एतयोरुभयलिङ्गत्वमेव नास्तीति, आश्रयत्वादिह तद्योगादित्यत्र सर्वमेव कार्यं भगवत एव नान्यस्मादिति । अतोऽस्माद् ब्रह्मवाद एव सिद्ध्यति, न प्रकृतिवादः ॥ १७ ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥

स्वमतेन परिहारमुक्त्वा नियतधर्मवादेनापि परिहारमाह । स्वापप्रतिबोधौ जीवधर्मावेव । चक्षुरादिलयाधारत्वं प्राणस्येति । तस्मिन्नपि पक्षे अन्यार्थं तद्धर्मकीर्तनम् । भेदे हि तन्निराकरणमवश्यं कर्तव्यमिति तुशब्दः। ब्रह्मप्रति-

---

भाष्यप्रकाशः ।

ख्यातमित्युपरम्यते ॥ १७ ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥ अत्र सांख्यमतमाचार्यदेश्यानामन्येषामप्यनुमतं न भवतीति ज्ञापनाय सूत्रप्रयोजनमाहुः स्वमतेनेत्यादि । नियतधर्मवादस्वरूपमाहुः स्वापेत्यादि । परिहारमाहुः तस्मिन्नित्यादि । यस्मिन् पक्ष

रश्मिः ।

देवा देवेभ्यो लोका इति च । प्राणवृत्तयोऽपानादयः प्रतिष्ठन्ते जागरिते परीक्षकैरुपलभ्यन्ते । ननु प्राणोस्तु परं तु ब्रह्मणोनुप्रवेश उक्तः । तस्मादेवात्मनः सकाशात्प्राणप्रतिष्ठाद्युक्तम् । तथा च शंकराचार्यभाष्यं 'परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायते' इति वेदान्तमर्यादेति चेत्तत्राहुः **विद्यमानादिति** । प्राणादिति वृत्तौ मरीचिकाख्यायां लालुभट्टकृतायां वृत्तावप्येवम् । प्राणे विद्यमानाद् ब्रह्मणः सत्यत्वादिवत् कर्तृत्वरूपादित्यर्थः अत एव एतस्मादात्मन इति श्रुतावात्मपदं प्राणेष्वात्मपदाभावात् । भाष्यं चातः सुषुप्तावपि ब्रह्मण्येव लयस्तस्मादेव सर्वं ज्ञातव्यमिति स च प्राणः प्रकृत्यंशः । प्रकृतेर्मायारूपाया महत्तत्त्वं महत्तत्त्वादहंतत्त्वं तस्मात्तामसाहंकाराच्छब्दः ततः खं ततः स्पर्शस्ततो वायुरिति प्रकृत्यंशः समष्टिप्राणः व्यष्टीनां प्राणा अपि प्रकृत्यंशाः । सांख्य आह **अत** इति यतो भवतामेवमतोस्माकमपि जडादेवेत्यादिः । **अतोस्मादिति** । कौषीतकिप्रकरणात् । **जीवद्वारेति** प्रकृतौ प्रतिबिम्बो जीवस्तस्मात्सर्वम् । **साक्षादिति** 'प्रधानाज्जगज्जायते' इति । **एतयोरिति** लिङ्गयोः। प्रकरणित्वोपपादने उभयलिङ्गत्वमेव नास्तीति उभयलिङ्गत्वाभावो व्याख्यातः केत्याकाङ्क्षायामनुगमाधिकरण इत्याहुः **आश्रितत्वादिहेति** कथं व्याख्यातमित्याहुः **सर्वमिति** । नन्वेवं सति प्रतर्दनवाक्यनिर्णयेनैवेदमपि वाक्यं निर्णीयेत न निर्णीयते यस्य वै तत्कर्मेत्यस्य वाक्यस्य ब्रह्मविषयत्वेन तत्रानवधारितत्वात् तस्मादत्र जीवमुख्यप्राणाशङ्का पुनरुत्पद्यमाना निवर्त्यते । सिद्धमाहुः **अत इति** शक्यार्थादस्माद्ब्राह्मणात् । एवं निगदव्याख्यातमित्यर्थः ॥ १७ ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥ अत्र जैमिनिमतोक्तेः प्रयोजनं वक्तुमाहुः **अत्र सांख्येति** । **आचार्यदेश्यानामिति** ईषदूना आचार्या आचार्यदेश्याः 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति सूत्रेण देश्यप्रत्ययः । अन्येषामाचार्यदेश्यत्वं प्रत्यधिकरणं स्फुटमेव दूषणात् । **अन्येषामिति** जैमिनीनाम् । **नियतेति** स्वापप्रतिबोधौ जीवस्यैव चक्षुरादिलयाधारत्वं प्राणस्येति नियतधर्मवादः 'तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति सूत्रे

पत्त्यर्थमेव जीवलयोद्गमौ। मृतिवैलक्षण्येन प्राणकीर्तनमाश्रयब्रह्मबोधाय। कुत एतदवगम्यते तत्राह उपक्रमोपसंहाराभ्यामेवावगम्यते। 'यो वै बालाक एतेषां पुरुषाणाम्' इत्युपक्रमे मुख्यं ब्रह्मैव निर्दिष्टम्। तज्ज्ञानेनासुरजयः, सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं चेति फलम्। न ह्येतद्द्वयममुख्ये संभवति। अपि च प्रश्नव्याख्यानाभ्याम्। 'क्वैष एतद् बालाके पुरुषोऽशयिष्टेति प्रश्नः। तत्र जीवस्य ज्ञातत्वादधिकरणमेव न ज्ञातम्। यत्रैष एतद्बालाके पुरुषोऽशयिष्टेति

भाष्यप्रकाशः।

एतयोर्जीवमुख्यप्राणधर्मत्वात् तल्लिङ्गत्वमेव, न ब्रह्मधर्मत्वं, तस्मिन्नपि तद्धर्माणां कीर्तनमन्यार्थं ब्रह्मबोधार्थम्। तथा च ब्रह्मपरिचायनाय तच्छेषत्वेनैतत्कथनान्नैतेन सांख्यमतसिद्धिरित्यर्थः। ननु सूत्रे तुशब्दादस्य पक्षस्य पूर्वस्माज्ज्यायस्त्वमेव कुतो नाद्रियत इत्याकाङ्क्षायां तोः प्रयोजनमाहुः भेदे हीत्यादि। एतस्य मतस्य पूर्वस्माद् भेदे यतो हेतोर्जैमिनिनापि सांख्यमतनिकारणमवश्यं कर्तव्यमिति ज्ञापनाय तुशब्दो, न तु सिद्धान्तपक्षादस्योत्कर्षज्ञापनार्थः। गामाविश्य च भूतानीत्यादिभिर्भूतादिसर्वकार्यस्य भगवत्कार्यतयैव सिद्धत्वादिति। तर्ह्यस्मिन् पक्षे जीवप्राणयोः कथमन्यार्थत्वमित्यत उपपादयन्ति ब्रह्मप्रतीत्यादि। अपिचेत्यनेन सूचितं हेतुमाहुः

रश्मिः।

जैमिनिना व्यासग्रहणात् जीवस्वरूपं व्यासोक्तं यथाशास्त्रम्। 'जैमिनिः कर्मतत्त्वज्ञः' इति धर्मशास्त्रे नियतधर्मवादः। यथा मध्वादिष्वनधिकारं जैमिनिः। अधिकारं व्यास आह स्वापेत्यादीति श्रुतिं यदा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन् प्राण एवैकधा भवतीति। न ब्रह्मेति परंपरया न ब्रह्मधर्मत्वम्। नन्वत्रापि ब्रह्मणः एकविधत्वं तत्प्रमाणं बादरायणस्यानपेक्षत्वादित्यौत्पत्तिकसूत्रशेषादिति शङ्क्यम्। आत्माधिकः कलादिभिर्न भोगः इति जैमिनिसूत्रात् आदित्यादिग्रहेषु कलादिभिः सकलगुणैरधिक आढ्यः न भोगो ग्रहः आत्मेति ज्योतिषजैमिनिसूत्रसुबोधिन्याम्। आत्मलक्षणस्य ज्योतिर्विन्नीलकण्ठैः प्रतिपादनात्। तस्मिन्नपीति वेदवेदान्तादिषट्शास्त्रेषु वेदशास्त्रपक्षे। ब्रह्मपरीति दर्शपूर्णमासयोर्ब्रह्मत्वार्थं ब्रह्मपरिचायनाय। एतदिति जीवमुख्यप्राणलिङ्गकथनात्। ब्रह्मिष्ठो ब्रह्मा तं दर्शपूर्णमासयोः वृणीत इति वाक्यात्। ज्यायस्त्वमिति तोः पूर्वोक्तस्य व्यासपक्षस्य निराकरणस्य तोरर्थात् इति भावः। तु इति पूर्वपक्षिणमिति तुः, तुः पूर्वपक्षनिरास इति भाष्यात्। पूर्वस्मादिति वेदान्तमतात्। कर्तव्यमिति अन्यथा षट्शास्त्रव्यवस्था भज्येत। वेदशास्त्रमेव सांख्यशास्त्रम्। कर्मणः कर्तृत्वादि च न स्यात् प्रकृतेरुपादानत्वे। तथा च पूर्वपक्षिणं सांख्यं तुदतीति तुरिति भावः। भगवदिति। गीतायां न कर्मकार्यतया न सिद्धत्वमित्येवकारव्यावर्त्यम्। ब्रह्मप्रतिपत्तीत्यादीति प्रतिपत्तिर्ज्ञानं तद्ब्रह्मणो जगज्जन्मादिकर्तृत्वेन भवति तज्जगज्जन्मादिकर्तृत्वमेतेषां पुरुषाणां कर्तेत्यनेनोक्तं सुषुप्तावपि ब्रह्मण्यपलयः इति भाष्योक्तो लयः। तावेतौ जीवलयोद्गमौ ब्रह्मप्रतिपत्त्यर्थमेव तल्लक्षणत्वात्। मृतिः शारीरब्राह्मणे उक्ता 'सुषुप्त्युत्क्रान्त्योर्भेदेन' इत्यधिकरणे विवृता तत्र सर्वप्राणानां भगवन्निकटे गमनमुक्तमत्र तु वागादिलयाधारत्वं प्राणस्येति वैलक्षण्यं तेन। प्राणकीर्तनं प्राण एवैकधा भवति इति श्रुत्या। एतदिति आश्रयब्रह्मबोधनार्थत्वम्। जीव प्राणधारणे इति धातुपाठात् साक्षात्प्राणाश्रयजीवमपहायाश्रितत्वं परंपरयावगम्यते। अपि चेति स्वरादेराकृति-

व्याख्यानम्। न हि नाडीर्ज्ञापयितुं व्याख्याति, किं तु प्रतिज्ञातं ब्रह्म। कथमेतदवगम्यते, नाडीव्यतिरिक्त आत्मा ज्ञाप्यत इति तत्राह **एवमेके**। एके शाखिनो वाजसनेयिनः। तत्रापि दृप्तबालाकिब्राह्मणे, 'स होवाचाजातशत्रुर्यत्रैष एतत् सुप्तोऽभूद् य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय, य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इत्यत्र आकाशशब्दं ब्रह्म सता सोम्य तदा संपन्नो भवतीति च। स्वं ह्यपीतो भवतीति च। तस्मादाधारभूतब्रह्मज्ञापनार्थत्वाज्जीवमुख्यप्राणलिङ्गात् प्रकृतिवाद इत्यसंगतम्॥ १८॥

इति प्रथमाध्यायचतुर्थपादे षष्ठं त्रिसूत्रं जगद्वाचित्वाधिकरणम्॥ ६॥

भाष्यप्रकाशः।

उपक्रमेत्यादि। फलमिति उपसंहारे निर्दिष्टं फलम्। जीवस्य ज्ञातत्वादिति। एष इति पदेन बालाकिज्ञातपदार्थस्यैव निर्देशात् तथेत्यर्थः। शेषं स्फुटम्॥ १८॥

इति षष्ठमधिकरणम्॥ ६॥

रश्मिः।

गणत्वादन्यच्चेत्यर्थे प्रयुज्यते तत्र किं चेत्यनुक्त्वा एतत्प्रयोगः सूचयति सूत्रान्वयान्तरम्। प्रश्नव्याख्यानाभ्यामप्येवमेवैके शाखिनश्चेति तदाहुरपि चेत्यनेनेति हेतुमिति। उपक्रमोपसंहाररूपम्। समुच्चयार्थकेनापि नायं हेतुः समुच्चित इति भावः। **उपसंहार** इति सर्वान्पाप्मनोपहत्येत्यादिनोक्तस्तस्मिन्। भाष्ये। अमुख्ये साक्षात्प्राणाश्रये जीवेङ्गीकृते सति संभवत्यपि तु परंपरयाश्रये ब्रह्मण्यङ्गीकृते सति संभवति। सूचितार्थं व्याख्याय वाच्यार्थं वक्तुमाहुः अपि चेति। अन्यच्चेत्यर्थकमव्ययम्। मनोरमायां स्वरादेराकृतिगणत्वात्। क्वेत्यत्र किमः सप्तम्यन्तात् किमोदिति अत्प्रत्ययादधिकरणसप्तम्या अधिकरणविषयकः प्रश्नः इत्याहुः तत्रेति। प्रकृते। बालाकिज्ञातेति ज्ञातमत्र शास्त्रदृष्ट्या प्रत्यक्षं वा। अधिकरणं न ज्ञानमिति जीवाधिकरणं किमिति प्रश्नः। शेषमिति उत्तरस्य यद्धर्मप्रकारकयद्विषयी प्रश्नः तद्धर्मावच्छिन्नत्वतदुद्देश्यकं लक्षणादिनिरूपणमिति व्युत्पत्त्या को घटः कम्बुग्रीवादिमान् घट इत्यत्र दर्शनेन तादृशत्वाच्छ्रुत्यन्तरसिद्धमाकाशब्रह्मोत्तरयतीत्याहुः यत्रैष इति यत्रेत्यस्याकाशशब्दब्रह्मणि इत्यर्थः। ननु श्रुत्यन्तरे पुरीतति शेते इति यत्रेत्यस्य पुरीतति इत्यर्थः। कुतो नेति चेत्तत्राहुः नह्मीति। आकाशेति आकाशः शब्दो यस्य प्रतिपादकस्तदाकाशशब्दं ब्रह्म। यत्रैष जीवः सुप्तोभूत् एतज्जगत्सुप्तोभूत्। स्वयं विवृणोति य एष इति विज्ञानमयो जीवः प्राणानामिन्द्रियाणां विज्ञानं प्रकाशनसामर्थ्यम्। करणे ल्युटा स्वविज्ञानेन प्रत्यक्षप्रणाल्यामङ्गीकृतेनादाय गृहीत्वा हृदय इत्याकाशविशेषणम्। सप्तम्यन्तं न हृदयब्रह्मणोक्तब्रह्मक्षत्रहृदयमिति नपुंसकशब्दात्। अत उक्तमाकाशशब्दं ब्रह्मेति। अन्यच्च सतेति सता ब्रह्मणा तदा सुषुप्तौ। स्वमिति स्वमात्मानमपि इतः प्राप्तो भवति। सिद्धमाहुः तस्मादिति जीवमुख्येत्यत्र ल्यब्लोपे पञ्चमी आधारभूतब्रह्मज्ञापनार्थत्वात् जीवमुख्यप्राणलिङ्गमाज्ञाय पूर्वसूत्रोक्तरीत्या प्रकृतिवाद इत्यसंगतमित्यर्थः। संगतिस्तु निर्वाहकरूपा प्रत्यधिकरणम्॥ १८॥

इति षष्ठाधिकरणम्॥ ६॥

वाक्यान्वयात् ॥ १९ ॥ (१।४।७)

पुनर्जीवब्रह्मवादेन प्रकृतिकारणवादमाशङ्क्य निराकरोति । बृहदारण्यके चतुर्थे षष्ठे च याज्ञवल्क्यमैत्रेयीसंवादे, येनाहं नामृता स्यां किमहं तेन कुर्यामिति विरक्तिमुक्त्वा, यदेव भगवान् वेद तदेव मे ब्रूहीति पृष्टे तामभिमुखीकृत्य, न वा अरे पत्युः कामायेत्यादिना अमृतत्वाय ज्ञानमुपदिशति षष्ठे। पुनरुपसंहारेऽप्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति ।

भाष्यप्रकाशः ।

वाक्यान्वयात् ॥ १९ ॥ अधिकरणमवतारयन्ति पुनर्जीवेत्यादि विषयमाहुः बृहदित्यादि प्रवव्राजेत्यन्तम्। इदं वाक्यद्वयं प्रकृतिसंबन्धशून्यकेवलपुरुषतत्त्वज्ञापनपरम्। यथार्द्रेन्धाग्नेरित्यारभ्य वागेकायनमित्यन्तेन नामरूपात्मकप्रपञ्चोत्पत्तिलयाधारश्रावणात् । सांख्यमते केवलस्य पुरुषस्य तथात्वाभावात् । किंतु प्रकृतसंसृष्टतत्परम्। तेन तादृशस्य जीवस्य प्रकरणित्वम् ।

रश्मिः ।

वाक्यान्वयात् ॥१९॥ पुनर्जीवेत्यादीति जीव एव ब्रह्मेतिवादेन जीवस्य प्रतिबिम्बत्वात् प्रतिबिम्बस्याकारणत्वात् प्रकृतौ कारणत्वपर्यवसानात् प्रकृतिकारणवादेत्यादि । चतुर्थ इति चतुर्थे ब्राह्मणे षष्ठेध्याये च ब्राह्मणं तु पञ्चमं एतद्ब्राह्मणद्वयं विषयः। येन जन्मना हेतुना 'जातस्य हि ध्रुवो मृत्युः' इति वाक्यात् । अहं मैत्रेयी नामृता न शब्दो नञ् चामृतत्वाभिलाषसूचनायान्यथामृता स्यामित्येतावतैव चारितार्थ्यं लाघवं च । किं चामृतत्वाय ज्ञानोपदेशस्यासंगतिः स्यात् 'नाऽपृष्टो ब्रूयात्' इति सुबोधिन्याः एवं तु किं कुर्याममृतत्वार्थं किं कुर्यामिति प्रश्नव्यक्तेरमृतत्वाय पृष्टोऽमृतत्वाय ज्ञानमुपदिदेशेति अमृतत्वाय ज्ञानोपदेशस्यासंगतिर्नेति । स्यामिति हेतुहेतुमद्भावे लिङ् तेन जन्मना संपूर्णेन किं कुर्यामिति कृतिविषयकप्रश्नः नामृतत्वस्य कृतेश्च कार्यकारणभावः । न मृतत्वस्य कृतेश्च कार्यकारणभावः । कृतिपदेन सेवाकृतिकर्मकृत्योर्विवक्षणात् मृतत्वेप्यसत्कृतिसंभवात् । अतो हेतुहेतुमद्भावे लिङर्थमपि न नञौ। विरक्तिमिति। येनाहमिति वाक्यार्थस्य व्यञ्जकत्वात् व्यञ्जनयोक्त्वा वाक्यार्थेन विरक्तिव्यञ्जनात्। भगवान् याज्ञवल्क्यः । मे मम मैत्रेय्या मा इ इति च्छेदे मा मामित्यर्थः। एवं विषयः स्फुटः संशयस्फौट्यमाहुः संशयबीजमिति । पूर्वेति पूर्वं शारीरब्राह्मणं ततः पूर्वस्मिञ्ज्योतिर्ब्राह्मणे। आत्मज्योतिः सम्राडिति होवाचेति श्रुतेर्ब्रह्मणः प्रकृतत्वम् । तत्र आत्मन इत्यादीति । ननु जायापत्योरादित्वमपेक्षितमित्याशङ्क्याहुः स्वप्रतीत्येति । स्वप्रतीतिर्दम्पत्योर्नास्ति । ननु दम्पत्योर्मित्रस्वभार्यारूपयोः स्वप्रतीत्या प्रियत्वमस्त्येवेति चेन्न मुक्तस्य विषयरागाभावात् भार्याया अपि 'पुत्रे कृष्णप्रिये रतिः' इति वाक्याद्विषयप्रियत्वाभावात् । जायायाः पत्नीत्वे दम्पत्योः सहाधिकारस्य पूर्वतन्त्रसिद्धत्वात् तयोः प्रियत्वं स्वप्रतीतिगोचरो न भवति तथा च प्रतीतिप्राधान्यात् न पाठक्रम इति भावः । यद्वा पुत्राणामादी पुत्रादी पुत्रा आदयो येषां वित्तब्रह्मक्षत्रादीनां ते पुत्रादयः पुत्रादी च पुत्रादयश्च पुत्रादयस्तेषामपेक्षयेत्यर्थः । जीवमेवेति अयमात्मा ब्रह्मेति श्रुतौ जीवे आत्मपदप्रयोगात् । जीवस्येति । भाष्ये । तदित्यव्ययं लुप्तषष्ठीकं तस्येति निष्पन्नं तस्यार्थो जीवस्येति अव्ययार्थ आत्मत्वेन बोधानन्तरमिति । तत्रेत्यत्र विषयसप्तमी तदर्थस्तद्विषयकमेव जीवविषयकमेव दर्शनादिकं विधत्ते इति भाष्यान्वयः 'न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायाः कामाय जाया प्रिया भवति आत्मनस्तु

तत्र जीवस्य प्रकरणित्वं ब्रह्मणो वेति संशयः। तत्रात्मनः प्रियत्वं स्वप्रतीत्या पुत्राद्यपेक्षया बोधयञ्जीवमेवोपक्रमे आत्मत्वेन वदति। तदनु तत्र दर्शनादि विधत्ते। तेन सर्वं विदितमिति फलमाह। तत्र कथमात्मज्ञानेन सर्वज्ञानमित्याकाङ्क्षायां, ब्रह्म तं परादादित्यादिना, इदं सर्वं यदयमात्मेत्यन्तेन तस्यैव सर्वत्वमाह।

भाष्यप्रकाशः।

जीवलिङ्गस्य भूयस्त्वात्। अथवा ब्रह्मणः प्रकरणित्वम मृतस्वरूपस्य फलस्योक्तत्वादित्याशयेनाहुः तत्रेत्यादि। एवंचास्मिन्नपि सूत्रे आनुमानिकं नेत्यानुमानिकसूत्रादाकाशादिषु कारणत्वेन चेत्याकाशादिसूत्राच्चानुवर्तते। तथाच ब्रह्मण्येव वाक्यान्वयाद् ब्रह्मैव कारणत्वेन मन्तव्यं, न तु प्रकृतिविशिष्टो जीवः। सर्वश्रुतीनामेकवाक्यत्वात्। अतो नानुमानिकसूत्रे योजनं पर्यवस्यतीत्याशयेन पूर्वपक्षमाहुः तत्रात्मन इत्यादि। स्वप्रतीत्येति लौकिक्या स्वप्रतीत्या। जीवमिति प्रकृतिसंसृष्टं पुरुषम्। तदनु तत्रेति जीवस्यात्मत्वेन बोधनानन्तरं तद्विषयकमेव। 'ब्रह्म तं परादात्'-इत्यादिनेति ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादादित्यादिना। अर्थस्तु—ब्रह्मक्षत्रादिरूपा वर्णाभिमानिनी देवता तं वक्ष्यमाणलक्षणं पुरुषं परादाज्ज्ञानापराधात् पराकुर्यात्। अपराधमाह। योऽन्यत्रात्मनो ब्रह्म वेदेति। यः पुमान् अन्यत्रात्मन आत्मनः सकाशादन्यद् ब्रह्मक्षत्रादि वेदेति। त्रल् सार्वविभक्तिकः। तथाचायमात्माभिन्नत्वेन मां पश्यतीत्यपराधात् तमात्मज्ञानरहितं कुर्यादित्यर्थः। सर्वत्वमाहेति। इदं सर्वं यदित्यन्तमनूद्यभागः। अयमात्मेति विधेयभागः। तथाचात्मनः सर्वत्वादात्मज्ञाने सर्वज्ञानमुपपन्नमिति भावेनात्मनः सर्वरूपत्वमाहेत्यर्थः। तदन्विति एवं प्रतिज्ञोपपादनमुखेन तन्माहात्म्यश्रावणानन्तरं कथमस्मिन् संघाते आत्मज्ञानं भवतीत्याकाङ्क्षायां दुन्दुभ्यादिदृष्टान्तत्रयमाह। यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयात् तद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत इत्यादि। अर्थस्तु—यथा दुन्दुभेर्हन्यमानस्य सकाशाद् बाह्यान् अतिरिक्ताञ्छब्दान् महाकोलाहले ग्रहणाय ग्रहीतुं न शक्नुयान्न समर्थः पुरुषो भवेत्। किंतु हन्यमानस्य दुन्दुभेरेव शब्दो गृहीतो भवति। तत्र करणं दुन्दुभेर्दर्शनम्। दुन्दुभ्याघातस्य वा दर्शनम्। तदेतदुक्तं, दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वेति। तथा च महाकोलाहलाभिभावके कस्मिंश्चि-

रश्मिः।

कामाय जाया प्रिया भवति' इत्यारभ्य 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि वा अरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमित्यादिज्ञानोपदेशं जीवविषयकं विधत्ते। भाष्ये। तेनेति आत्मश्रवणादिना श्रुतिराह। प्रकृते। वक्ष्यमाणेति अपराधिनम्। सार्वेति तथा च त्रल् द्वितीयायाः अन्यदित्यन्यत्रेति। आत्मन इति भाष्यीयस्य तस्येत्यस्यार्थः। प्रतिज्ञेति प्रतिज्ञात्वावच्छिन्ना प्रतिज्ञा तद्विशिष्टं वाक्यमपि प्रतिज्ञावाक्यम्। तन्माहात्म्येति जीवमाहात्म्य श्रावणानन्तरम् परंपरयेत्यादि भाष्यार्थोग्रे स्पष्टोत्र। यथा महेति भाष्यं विवरीतुं श्रुतिमाहुः यथा दुन्दुभेरिति आदिपदेन स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयात् ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीत इति दृष्टान्तद्वयबोधकश्रुतिसंग्रहो बोध्यः। भाष्यं विवृण्वन्ति स्म यथा दुन्दुभेरिति आघाताख्यः संयोगः। अनुमानेति भाष्यं विवरीतुमाहुः

तदनु कथमस्मिन् संघाते आत्मज्ञानं भवतीत्याकाङ्क्षायां दुन्दुभ्यादिदृष्टान्तत्रयमाह । परंपरया बाह्याभ्यन्तरभेदेन । यथा महाकोलाहले दुन्दुभेर्हन्यमानस्य शब्दो गृहीतो भवति । तत्र करणं दुन्दुभिदर्शनं दुन्दुभ्याघातदर्शनं वा । अनुमानद्वारा चित्ते तत्र निविष्टे तत्साक्षात्कारो भवतीति तथा आत्मनो बोधककार्यानुसंधाने तत्साक्षात्कारो भवतीति । तत्र कथं सर्वत्वमित्याकाङ्क्षायां तत एवोत्पन्नं सर्वं नामरूपात्मकं तस्मिन्नेव लीयत इति । स यथेति द्वयेनाह । मध्ये

भाष्यप्रकाशः ।

च्छब्दे श्रुते, कस्यायमिति जिज्ञासायां योग्यतया सजातीयशब्दान्तरेण वा कारणमनुमिनोति । एवमनुमानद्वारा चित्ते तत्र निविष्टे ततः प्रयत्नेनान्यथा वा तस्य दुन्दुभेः साक्षात्कारो भवतीति दृष्टान्तः । तथात्रात्मबुभुत्सायाम्, आत्मनो बोधकानि यानि चेष्टादिरूपाणि तत्कार्याणि तेषां विचारेण चित्तेऽनुमानद्वारा आत्मानुसंधाने तस्यात्मनोऽप्यस्मिन् संघाते श्रवणादिभिः

रश्मिः ।

तथा चेति योग्यतयेति एकपदार्थेऽपरपदार्थसंबन्धो योग्यता । एकस्मिन् पदार्थे महाकोलाहलाभिभावके शब्देऽपरपदार्थस्य दुन्दुभेः संबन्धः । स्वान्वितान्वितत्वं संबन्धः स्वं शब्दः तस्माद्वा एतस्मादात्मनः इति श्रुतेः तेनान्वित आकाशस्तेनान्वितो वायुरित्येवं संबन्धः स्वरूपः । अनया कारणानुमानं दुन्दुभिशब्दः क्वचिदाश्रितः गुणत्वाद्रूपादिवदिति । ननु रूपादिकं न दृष्टान्तः साध्यतावच्छेदकस्वरूपसंबन्धेन हेतुतावच्छेदकसमवायसंबन्धेन हेतुमति घटादिरूपादौ साध्याभावात् । प्रत्युत साध्याभाववद्वृत्तित्वेन साधारणो हेतुरिति चेन्न घटादिभिन्नौषधिवृत्तिरूपादीनां दृष्टान्तत्वात् । तथा च श्रुतिः 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः' इति । स्वरूपं रूपं तेजसस्तन्मात्रा तत्राश्रयो दुन्दुभिरेव संबद्धत्वात् ततश्च शब्दः दुन्दुभ्याश्रित इत्यनुमितिः । अत्र नैयायिकैः साध्यतावच्छेदकसंबन्धशैथिल्यप्रयुक्तसमवायाङ्गीकारेण शब्द आकाशाश्रित इत्यनुमित्यापत्त्यार्थान्तरं निग्रहस्थानमित्यरुच्या पक्षान्तरमाहुः **सजातीयेति** ।

'सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ।
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता' ॥

इति भाषापरिच्छेदस्य मुक्तावल्याम् । दूरस्थशब्दस्याग्रहणादाह **श्रोत्रेति** ननु मृदङ्गाद्यवच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरित्यत आह **वीचीति** आद्यशब्दस्य बहिर्दशदिगवच्छिन्नोन्यशब्दस्तेनैव शब्देनोत्पाद्यते एवाद्यशब्दव्यापकः । एवं क्रमेण श्रोत्रोत्पन्नः शब्द उपलभ्यत इति । एवं च श्रोत्रोत्पन्नेन तत्कारणं शब्दाद्यनुमिनोति तेन शब्देन तत्कारणं तेन तत्कारणमित्येव सजातीयशब्दान्तरेण कारणं दुन्दुभिमनुमिनोति शब्दान्तरं कारणजन्यं कार्यत्वात् घटवदिति कारणं दुन्दुभ्यादिकमिति । **अनुमानेति** भाष्यं विवृण्वन्ति **एवमनुमानद्वारेति** । **तत्रेति** दुन्दुभ्यादौ जानाति इच्छति यतते इत्यत्रेच्छा न नियतेत्याशयेनाहुः **ततः प्रयत्न** इति । **अन्यथेति** । अप्रयत्नकर्तृत्वेन द्वितीयपक्षे दुन्दुभिसाक्षात्कारोनुमितिः सोक्ता । **तथेति** भाष्यं विवृण्वन्ति **तथात्रात्मेति** । बुभुत्सेति बोद्धुमिच्छायां सन् भष्भावः खरि चेति चर्त्वम् । **तत्कार्याणीति** शरीरकार्याणि शरीरसमवेतचेष्टयेति अग्रे ग्रन्थात् । **अनुमानेति** अनुमानं च संघातः आत्मवान् चेष्टावत्त्वात् देवदत्तसंघातवत् । कार्यादिति वा हेतुः । भाष्यप्रकाशे तत्र कार्यलिङ्गकानुमानमित्यग्रे वक्ष्य-

भाष्यप्रकाशः।

साक्षात्कारो भवतीति अत्र प्रथमो दुन्दुभिदृष्टान्तः परंपरया ज्ञानजनने। शरीरसमवेतचेष्टया निमित्तभूतस्यात्मनो ज्ञानात्। द्वितीयस्तु बाह्याद् भेदेन ज्ञानजनने। तत्र बाह्यशब्दा रागादिभेदज्ञापकास्ते शब्दप्रयोजकं नेतरभेदेन प्रत्याययन्तीति तांस्तद्ग्रहणाय न शक्नुयात्। वीणाया वीणावादस्य वा ग्रहणेन तु अयमीदृशः शब्दो न केवलमङ्गुलीसंसर्गप्रयुक्तः, किंतु मनोव्यापारविशेषप्रयुक्त इति ज्ञायते। अतः स शब्दस्तत्कारणस्य बाह्याद् भेदेन ज्ञापकतया गृहीतो भवति।

रश्मिः।

माणत्वात्। एतदनुमानद्वारा संघातात्मवान् इत्यनुमितिविषयास्यात्मनोतु अनुमितेरनु पश्चात् चित्तप्रवेशस्यानुपश्चाद्वा संधानेनुमितिविषयत्वेन ज्ञाने संघट्टने 'संधानं स्यादभिषवे तथा संघट्टनेपि च' इति विश्वात्। चित्तस्याधिकरणत्वोक्तेः। मनसि धीरिव चित्तेपीति। **भवतीति** यथा चैद्यदेहोत्थितं ज्योतिरित्यत्र भगवत्प्रमेयबलेन जीवदर्शनं तथा द्रष्टव्य इति श्रुतिबलेन भवति। **अत्रेति** मैत्रेयीब्राह्मणे। अनेन प्रकाशेन परंपरयेति भाष्यं विवृतम्। **ज्ञानेति** आत्मनो ज्ञानजनने। उपपादयन्ति **शरीरेति** चेष्टाक्रिययोर्भेदोऽस्मन्मतेऽतः शरीरसमवेता चेष्टा। **निमित्तेति** शरीरसमवेतचेष्टानिमित्तभूतस्य अनेन आत्मनो बोधकानि यानि चेष्टादिरूपाणि कार्याणि तैश्चित्ते चात्मानुसंधाने जीवसाक्षात्कारो भवतीति भाष्यार्थः। ननु चेष्टावत्त्वं हेतुरर्थान्तरसाधकम्। संघात इन्द्रियवान् चेष्टावत्त्वादिति चेत् तत्र द्वितीयदृष्टान्तमाहेत्याहुः **द्वितीयस्त्विति** बाह्यादात्मनः सकाशाद्वाह्यादिन्द्रियसमूहात् लिङ्गदेहात् वृत्तावप्येवमर्थो बाह्यशब्दस्य मनसः आत्मनो वा भेदेन ज्ञानजनने। **तत्रेति** तत्र श्रुतौ। वीणायां वा विचार्यमाणायाम्। वीणाशब्दाच्चतुर्थ्यौ षष्ठ्यर्थे। कोलाहलाभावात् परमैश्वर्यवद्योग्यशब्दा रागाद्यनुकूला बाह्या अतिरिक्ताः शब्दाः रागतानमूर्च्छनानां भेदा भैरवादयस्तेषां ज्ञापकाः शब्दसामान्यं विहाय रागादिपदं वीणापदसूचितम्। वीणैश्वर्यवद्गृहे वाद्यते इति श्रुतिप्रसिद्धार्थात्[१] ते शब्दाः शब्दप्रयोजकं मनोव्यापारं नेतरभेदेन इतरलिङ्गशरीरं ततो भेदेन न प्रत्याययन्ति मनोव्यापारो न लिङ्गभिन्नः रागादिभेदज्ञापकशब्दप्रयोजकत्वात् अस्मदाद्यभ्यस्तरागशब्दवत्। **इति तानिति** इति हेतोः तान् शब्दान् तद्ग्रहणाय लिङ्गभिन्नमनोव्यापारग्रहणायात्मपदार्थमनोग्रहणाय वा। न शक्नुयान्न शक्तान् हेतून् पुरुषः कुर्यात् इति श्रुत्याज्ञाविधौ लिङ्। तर्हि कं शब्दं शक्नुयात् इत्याह **वीणाया इति**। ग्रहणं ज्ञानम्। तद्यथा रागादिभेदज्ञापकशब्दानामभिभावके कस्मिंश्चिच्छब्दे श्रुते कस्यायं शब्द इति जिज्ञासायां योग्यतया सजातीयशब्दान्तरेण वा कारणमनुमिनोति। एवमनुमानद्वारा चित्ते तत्र प्रविष्टे प्रयतनेनान्यथा वा तस्या वीणायाः तद्वादस्य वा साक्षात्कारो भवतीति। एतादृशग्रहणे न तु अयमीदृशः वीणासंबन्धी शब्दः समानो व्यापारो रागादिभेदज्ञापकशब्दप्रयोजको न त्वङ्गुलीचालनविशेषजन्यशब्दप्रयोजकोऽतो मनोव्यापारविशेषप्रयुक्त इत्युक्तम्। **स शब्दो** वीणाशब्दः। **तत्कारणस्येति** मनोव्यापारविशेषस्य मनसो वा विलक्षणस्य बाह्यालिङ्गात्। तथा च मनोव्यापारविशेषं लिङ्गभिन्नं वीणाशब्दप्रयोजकत्वात् आत्मवत् यन्नैवं तन्नैवं गन्धवत्। ननु पक्षः पक्षतावच्छेदकावच्छिन्नभेदवान् कथमिति चेन्न मनोव्यापारविशेषं पक्षः। तस्य षोडशकलिङ्गभेदात् मनोव्यापारस्य लिङ्गनिवेशेपि तद्विशेषस्य लिङ्गनिवेशाभावात्। नन्वस्त्वेवं प्रकृते आत्मविषये किमायातमिति चेन्न मनस आत्मत्वात्। तद्व्यापारतद्विशेषयोरप्यात्म-

१. इतिपदं श्रुतिप्रसिद्धार्थेनेति।

रश्मिः ।

त्वात् । नन्वन्नमयादि व्यतिहायात्र मन आत्मग्रहणे किं कारणमिति चेन्न 'मनसैवानुद्रष्टव्यः' इति श्रुतेरुक्तात्मनो मनोग्राह्यत्वात् । ननु ग्राहकस्य किं प्रयोजनमात्मत्वेन निरूपणे इति चेन्न आत्मनः स्वग्राह्यत्वात् । 'स्वयमेवात्मनात्मानं वेत्थ' इति गीतायाः । ननु स यथा वीणायै इति श्रुतौ यथापदात्तथेत्यायाति तस्य संदर्भस्य कोर्थ इति चेच्छृणु । तथात्मनो बाह्याद्भेदबुभुत्सायां आत्मा बाह्यभिन्नः प्राणधारकत्वात् जीववत् । 'जीवो जीवमजीवयत्' इत्यत्रात्मवाचकत्वं जीवपदस्य आत्मा लिङ्गभिन्नः वीणाशब्दप्रयोजकत्वाद् वा । मनोऽव्यापारविशेषवदिति दृष्टान्तः तथा चेष्टया इन्द्रियाणि सिद्ध्यन्तु नाम परं तु चेष्टया तद्भिन्नात्मसिद्धौ बाधकाभाव इति भावः । सकलेन्द्रियरहितसंघाते चेष्टावत्त्वस्य साधारण्याच्च । ननु बाह्याद्भेदसाधनेपि न मनोभिन्न आत्मा मनसैवानुद्रष्टव्य इति श्रुतेः मनोग्राह्यत्वात् । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इति गीतावाक्यादिति चेत्तत्राहुः **तृतीयस्त्विवति** । मनसः सकाशात्प्राणस्य प्राणब्राह्मण उपसंहारब्राह्मणे वा त्रयं वा इदं नामरूपकर्मेत्यारम्भके निरूपितस्य नामरूपकर्मात्मकस्य तदेतत्त्रयꣳसदेकमयमात्मेति श्रुतेः आत्मरूपस्य भेदज्ञानजनने । **तत्रेति** ध्मा शब्दाग्निसंयोगयोः भ्वा. प. अ. धमतीति ध्मा कर्तरि क्विप् अज्विकारश्छान्दसः शङ्खस्य ध्मः शङ्खध्म इति । बाह्या अतिरिक्ताः शङ्खशब्दाः प्राणेन मनोभेदज्ञापकाः प्राण आत्मा मनोभिन्नः परंपरया शङ्खशब्दस्तस्य प्रयोजनकत्वादित्यत्र हेतोः स्वरूपासिद्धत्वात् । परंपरया शङ्खशब्दप्रयोजकत्वस्य हेतोरवान्तरशब्दादौ सत्त्वेन प्राणेऽभावात् । ग्रहणं ज्ञानं पूर्ववत् अनुमानं तु प्राण आत्मा मनोभिन्नरूपनामकर्मात्मत्वात् । यन्नैवं तन्नैवं मनोवत् । साक्षाच्छङ्खशब्दप्रयोजकत्वाद्वा । ननु साक्षाच्छङ्खशब्दप्रयोजकत्वं मनोमये वेदे ।

'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः' ॥ इति ।

एकादशस्कन्धवाक्यात् । तथा हृदि च वर्तते मनोभिन्नत्वं नास्तीति हेतोः साधारण्यमिति चेन्न मनोमयस्य कारणत्वेन प्रयोजकत्वाभावात् हृदस्त्वन्यथासिद्धत्वात् मनोनिविष्टमनसैव स्थविष्ठव्यक्तेः संभवाद्धृदन्यथासिद्धमिति भावः । जीवादीनां साक्षाच्छङ्खशब्दप्रयोजकत्वं वर्तते तेषां मनोभिन्नत्वमपि वर्तत इत्यदोषः । **मुख्यप्राणस्येति** आसन्यप्राणस्य आसन्यस्य सेवायामिन्द्रियाणां देवतात्वमिति शास्त्रार्थनिबन्धटीका । अस्योक्तत्रयस्यात्मत्वमुक्तश्रुतेः । आत्मनः अमृतत्वम् । एकः सन्नेतत्त्रयं तदेतदमृतमिति श्रुतेः एक इत्यात्मा पूर्वमुक्तः । अमृतस्य प्राणत्वं प्राणो वामृतमिति श्रुतेः । ननु दुन्दुभिदृष्टान्तेन संघात आत्मज्ञानमुक्तम् । द्वितीयेन दृष्टान्तेन मनस्तदात्मकं करणमप्युक्तम् । तृतीयेन प्राण उक्तः । स क इति चेच्छृणु प्राणपदेन प्राणादयः पञ्चोपस्थाप्यन्ते आत्मपदेनात्मत्वमप्युपस्थाप्यते एवं च प्राणा आत्मरूपाः प्राणपदार्थः । ते च संध्यायां ॐमित्येकाक्षरं ब्रह्मेति ब्रह्मपदेनात्मानमुपक्रम्य गायत्रीं छन्दसां मातेदं जुषस्व म इति गायत्र्यभेद उक्तः माता मातरं अमो डा संध्याव्याख्याने तु गायत्रीं गायत्रीमातेव मातेति व्याख्यानं भट्टोजीदीक्षितकृतम् । ननु स्त्रीत्वान्वयः कथमिति चेन्न भगवत्सेवानुकूल्यरूपपुंस्त्वस्योमित्यनेन प्राप्तेः । गायत्र्यां प्रसादरूपशक्तेरेव स्त्रीत्वात् भगवत्सेवाप्रातिकूल्यरूपस्त्रीत्वस्येह जुषस्वेति श्रुतिपदविरुद्धत्वात् । तदुक्तं गोपालतापिनीये प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिन इति महोपनिषच्चतुर्थे ॐ देवा ह वै प्रजापतिमब्रुवन् अनुष्टुभस्य मन्त्रराजस्य नारसिंहस्याङ्ग मन्त्रान्नो ब्रूहि स होवाच प्रजापतिरोङ्कारं सावित्रीं

भाष्यप्रकाशः।

तृतीयस्त्वभ्यन्तरान्मनसोऽपि भेदज्ञानजनने तत्र बाह्याः शब्दा मन्द्रतारादयस्ते प्राणस्य न मनोभेदज्ञापकाः। शंखस्य शंखध्मस्य वा ग्रहणेन तु शब्दस्तत्कारणस्यान्तःकरणाद् भेदेन ज्ञापकतया गृहीतो भवति। मुख्यप्राणस्यायं शब्द इति। एवं संघाताद् भिन्नतया संघातेऽन्तरात्मज्ञाने उपायो मननात्मक उक्तः। तत्र कार्यलिङ्गमनुमानमात्मनि चित्तं निवेशयतीति सिद्धम्। तत्रात्मकार्यविवक्षयैव इतः पूर्वमात्मज्ञाने सर्वज्ञानस्योक्तत्वादात्मा सर्वत्वेन वक्तव्यः। तत्र कथमात्मनः सर्वत्वमित्याकाङ्क्षायां तत एवोत्पन्नं सर्वं तत्रैव लीयत इति घटादेः पूर्वं पश्चाच्च मृदिव सर्वस्यात्मेति बोधनाय, स यथा आर्द्रैधाग्नेरिति स यथा सर्वासामपामिति कण्डिकाद्वयेनाह। तेन नैयायिकाद्यभिमतं निमित्तमात्रत्वं निराकृतम्। तथापि स्थितिदशायां

रश्मिः।

गायत्रीमित्यङ्गानि जानीयाद्यो जानीते सोमृतत्वं च गच्छति अग्रे ओंभूर्लक्ष्मीर्भुवर्लक्ष्मीः सुवः कालकर्णी तन्नो महालक्ष्मीति श्रुतिः अत्र ओं सुवः महालक्ष्मीत्यभेदेनोक्तिः। पद्मपुराणे चोत्तरखण्डे।

'वृषभानुरिति ख्यातो गोपो ज्ञातिमतां वरः।
तस्य पत्नी महाभागा नाम्ना सौभाग्यसुन्दरी॥
तावुभौ ब्रह्मसावित्र्यौ स्वांशेन जगतीं गतौ।
तयोर्गेहे महालक्ष्मीः प्रादुर्भूता सुरेश्वरी॥
अयोनिजा विशालाक्षी कृष्णस्यानन्दकारिणी।
मासे भाद्रपदेष्टम्यां भौमे मूलर्क्षमण्डिते'॥ इति।

तस्य वाचकः प्रणव इति योगसूत्रम्। तस्यासङ्गपुरुषस्य। तथा चात्मतद्ग्राहके मनसि उक्त्वा आत्मवाचकः प्रणवः उक्तः। स प्राणपदार्थः। नामरूपकर्मत्वात्। कर्म च 'क्रिया सा राधिका देवी' इति कुत्रचिद्वाक्यात् राधिका। ननु आकाशस्य शब्दो न प्राणस्य नामरूपकर्मरूपस्य श्रुतेस्तु शब्दमूलत्वात् आकाशशरीरं ब्रह्म कार्यत्वेनाकाशसमन्वयाच्च। ननु स यथेत्यत्रापि श्रुतौ दर्शनात् तथेत्यायाति तस्य संदर्भस्य कोर्थ इति चेच्छृणु तथात्रात्मबुभुत्सायां आत्मा प्राणभिन्नः प्राणकर्तृत्वात् कुलालवत्।

'आसीज्ज्ञानमथो ह्यर्थः केवलं निर्विकल्पितम्।
वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत्।
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका'॥ इति।

एकादशस्कन्धसार्धश्लोकात्। सिद्धमाहुः एवमिति। संघातादिति सूक्ष्मदेहात्ममनसश्च। ननु सूक्ष्मदेहग्रहणेनैव मनोग्रहणात्। पृथङ्मनोग्रहणमपार्थमिति चेन्न श्रुतिप्रामाण्यात् सूक्ष्मदेहे वक्तव्ये पञ्चदशग्रहणात्। तथा सकीचकैर्मारुतपूर्णरन्ध्रैरित्यत्र न कीचकपदस्य मारुतपूर्णरन्ध्रत्वविशिष्टे वेणौ शक्तिः किं तु वेणावेवैवमत्रापि बाह्यपदस्य पञ्चदशके शक्तिर्न तु षोडशत्वविशिष्टे इति। मननेति दुन्दुभ्यादिदृष्टान्तत्रयेणात्मज्ञानोक्त्या दृष्टान्तावधारणमात्रेणात्मनोपि दृष्टान्तोक्तरीत्यानुचिन्तनरूपं मननं तदात्मक इत्यर्थः। 'अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरम्' इति वाक्यादाहुस्तत्रेति। युक्तिषु कार्यलिङ्गकानुमानम्। तत्र संघात आत्मवान् चेष्टावत्त्वादिति चेष्टाया आत्मकार्यत्वात्। कार्यादिति हेतुर्वा। तत्र कथमिति भाष्यं विवरीतुमाहुः तत्रात्मकार्येति

स एव नातिरिक्तं विशतीति, स यथा सैन्धवघन इत्यनेनाह । आधेयत्वेन तावन्मात्रतानिराकरणायाह न प्रेत्य संज्ञास्तीति । कार्यातिरिक्तरूपं कथयितुं न शक्यत इति तत्र विशेषाकाङ्क्षायामतिरिक्ताकथने वञ्चकत्वमाशङ्क्य तत्परिहा-

भाष्यप्रकाशः ।

भेददर्शनात् पूर्वोक्तं सर्वमुपचारमात्रं मंस्यत इति तन्निवारणाय मध्ये स्थितिदशायामपि स आत्मैव केवलो, नातिरिक्तं किमप्याधेयत्वेन विशतीत्यन्तर्बहिस्तस्यवानन्तरत्वमबाह्यत्वमैकरूप्यं चाह । 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादेवं वा अरे इदं महद्भूतमनन्तमपारं कृत्स्नः प्रज्ञाघन एव' इति । तर्हि सर्वदा कुतो न प्रतीयते इत्यत आह । एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति । एतानि शरीरात्मकानि महान्ति च भूतानि कार्यत्वादस्य ज्ञापकानीति तेभ्यः समुत्थाय तद्द्वारा स्वं ज्ञापयित्वा तानि विनश्यन्ति सन्त्ययमात्माऽप्यनुविनश्यत्यदर्शनं प्राप्नोतीति तर्हि समुत्थानानुविनाशक्रियादर्शनात् कालपरिच्छिन्नो भविष्यतीत्याशङ्कायां तावन्मात्रतानिराकरणायाह न प्रेत्य संज्ञास्तीति । प्रेत्य भूतलयोत्तरं संज्ञा सम्यग् ज्ञापकं नास्ति । कार्यमेव तस्य ज्ञापकं रूपम् । अतस्तस्मिन् लीने कार्यातिरिक्तं तस्य रूपं वक्तुं न शक्यत इति न ज्ञायते । न तु स एव नास्तीत्यतो न ज्ञायत इति । तथाच तदानीमपि विद्यमानत्वान्न स कालपरिच्छिन्न इत्यर्थः । एवमुक्ते मैत्रेय्या मोहो जातः । सा होवाच मैत्रेयी, अत्रैव मा भगवान् मोहान्तमापीपदन्न वा अहमिदं विजानामि न प्रेत्य संज्ञास्तीति । मोहान्तं मोहमध्यमापीपदद् आपादितवानसि शेषोऽर्थः स्फुटः । एवं मैत्रेय्या उक्ते तत्र विशेषाकाङ्क्षायामतिरिक्ताकथने वञ्चकत्वमाशङ्क्य तत्परिहारायाह ।

रश्मिः ।

तन्तुकार्यपटवत् । इतः पूर्वं विषयश्रुतौ विवृण्वन्ति **तत्र कथमिति** । **निमित्तेति** 'संसारमहीरुहस्य बीजाय' इति नैयायिकाः । मायावादिनस्तु सगुणात् सृष्टिरिति, सांख्याः 'प्रधानाज्जगज्जायत' इति तेषामभिमतं निमित्तमात्रत्वमात्मनो निराकृतमभिन्ननिमित्तोपादानत्वं मृदिवेति दृष्टान्तेन समन्वयाधिकरणोक्तं स्मारितम् । **मध्येपीति** भाष्यं विवरीतुमाहुः **तथापीति** । पूर्वोक्तं मृदिव घटादेः पूर्वं पश्चाच्च सर्वस्यात्मेति बोधनाय कण्डिकाद्वयोक्तम् । **तावन्मात्रेति** भाष्यं विवरीतुमाहुः **तर्हीति** । **कालेति** कालपरिच्छेदः शरदः शतं सूर्यपरिस्पन्दस्तद्विषयस्तावदिति । कार्यमात्रतानिराकरणाय । **कार्यातिरिक्तेति** भाष्यं विवरीतुमाहुः **कार्यमेवेति** । कार्यमिति शरीरं जीवपक्षे जगत् सिद्धान्ते कार्यं तस्य जीवस्य ज्ञापकमपि व्यक्तिस्थानं सिद्धान्ते जगत्कर्तृत्वं लक्षणम् । **स एव जीव एव** । **तदानीमिति** संघातादिलयकाले । स इति जीवः । **मोहान्तमिति** 'अन्तः प्रान्तेन्तिके' इति विश्वात् । एकस्य मध्यवाचकत्वात् । कोशान्तराद्वा मध्यार्थकस्तदाहुः **मोहमध्यमिति** मोहमध्यं यथा भवति तथा । मोहमध्ये इति यावत् । आसमन्तात् प्रापितवानसि । **शेष इति** न वा इत्यादेरर्थः शेषः स स्फुट इत्यर्थः । **तत्र विशेषेति** भाष्यं विवृण्वन्ति **एवं मैत्रेय्येति** तृतीयान्तं संहिताविवक्षाभावान्नाद्गुणः विवक्षातः कारकाणि भवन्तीति षष्ठ्यन्तं वा । **तत्रेति** विज्ञानघन एवेति प्रतिज्ञाय पुनर्न प्रेत्य संज्ञास्तीति विरुद्धवदने । **कार्येति** कार्याद्वैलक्षण्यं नित्यत्वेनेश्वरस्य ।

रायाह स होवाचेति । अविनाशीत्यनेन कार्यवैलक्षण्यं सिद्धवत्कारेणोक्त्वा विषयसंबन्धेन संसारमाह मात्रासंसर्गस्त्वस्य भवतीति । विशेषतस्त्वकथने हेतुमाह यद्वैतमित्यादिना, यावत्समाप्ति । चक्षू रूपमेव पश्यति, नात्मानम् ।

भाष्यप्रकाशः ।

स होवाचेत्यादि । स होवाच याज्ञवल्क्यः । न वा अरे मोहमहं ब्रवीम्यविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति । अत्र, अविनाशीत्यनेन स्वरूपनित्यत्वस्य, न विद्यते उच्छित्तिर्येषां तेऽनुच्छित्तयस्तादृशा धर्मा यस्येत्यनुच्छित्तिधर्मेत्यनेन स्वरूपधर्माणां च नित्यत्वस्य बोधनात् कार्यवैलक्षण्यं सिद्धवत्कारेणोक्त्वा विषयसंबन्धेन संसारमाह । मात्रासंसर्गस्त्वस्य भवतीति । तथाच यद्यनित्यः स्याद् विषयसंबन्धेन पुनः संसारः कस्य स्यादतः सोऽविनाशीत्यर्थः । यद्येवं तर्हि तद्दर्शनार्थं विशेषोऽपि वक्तव्य इत्याकाङ्क्षायां विशेषतस्त्वकथने हेतुमाह यद्वै तमित्यादिना, यावत्समाप्ति यद्वै तन्न पश्यति पश्यन् वै तद् द्रष्टव्यं न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् । न तु द्वितीयमस्ति ततोऽन्यद् विभक्तं यत् पश्येदिति । तन्न पश्यतीत्यत्रानुस्वारस्य परसवर्णः । यतश्चक्षू रूपमेव पश्यति, नात्मानमतो यद्वै तन्न पश्यतीत्यनेनात्मदर्शनाभावमनूद्य कार्यस्य कारणात्मकत्वात् । ननु रूपमप्यात्मेति कथमदर्शनमुच्यत इति चेत् तत्राह । पश्यन् वै तद्द्रष्टव्यं न पश्यति । रूपात्मकमात्मानं पश्यन्नपि द्रष्टव्यत्वेन न पश्यतीति । तथाचेदं तस्य दर्शनाभावस्य स्वरूपं, न तु सर्वथा अविषयतया तद्दर्शनाभावरूपमित्यर्थः । ननु कथमेतदवगम्यते अस्येदमेव स्वरूपं, न सर्वथा तद्दर्शनाभावरूपमित्यतो युक्तिमाह । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादित्यादि । दृष्टेरिति पञ्चमी । घ्राणाद् रसादित्यादिपञ्चमीप्रायपाठस्यैवाग्रे दर्शनात् । तथाच द्रष्टुरात्मनो दृष्टेश्चक्षुरिन्द्रियाद् विपरिलोपो विरुद्धः परिलोपः सर्वथा अदर्शन-

रश्मिः ।

सिद्धवत्कारसूचकं वैपदं निश्चयवाचकम् । वै निश्चयेनाविनाश्यनुच्छित्तिधर्मेति । **विशेषत इति** भाष्यं विवरीतुमाहुः **यद्येवमिति** । विवृण्वन्ति विशेषतस्त्विति । **चक्षू रूपमिति** भाष्यं विवरीतुं व्याख्येयां श्रुतिमाहुः **यद्वै तन्नेति** । यद्वै तन्नित्यादीति भाष्ये परसवर्णकथनादाहुः **तत्र पश्यती-त्यत्रेति** 'अनुस्वारस्य ययि परसवर्णः' इति सूत्रेण । विवृण्वन्ति **यतश्चक्षुरिति** अत्र यदित्यव्ययं यत इत्यर्थे, वै निश्चयेन । द्रष्टुर्दृष्टेर्वक्ष्यमाणाया कर्तृत्वमभिप्रेत्योक्तं **चक्षुरिति** । **रूपमेवेति** आत्मकर्मकदर्शनाभावस्य किंचित्कर्मकदर्शनरूपप्रतियोगिनिरूपणाधीननिरूपणकत्वाद्रूपमेव पश्यतीति लब्धम् । ननु द्रव्यमपि पश्यन्तीति चेन्न । बाह्यास्तावद्रूपातिरिक्तं द्रव्यं नेच्छन्ति तद्वादानुरोधिरूपं भगवत उक्तमिति । **नात्मानमिति** तन्न पश्यतीत्यस्यार्थः । एतेन भाष्यमपि व्याकृतम् । ननु रूपमिति भाष्यं व्याचक्रुः **कार्यस्येति** । **तत्राहेति** एतेन **तत्रेति** भाष्यं क्रियाध्याहारेण व्याकृतम् । **पश्यन्न् वा** इति भाष्यं व्याचक्रुः **पश्यन्वेति** । व्यत्ययो बहुलमिति सूत्रविभागेन ।

'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां तदपि च सिद्ध्यति बाहुलकेन' ॥

इति लिङ्गव्यत्ययः पश्यन्तीत्यर्थः । द्रष्टुर्दृष्टिः । **द्रष्टव्यत्वेनेति** किं तु रूपत्वेन पश्यति । इदमिति द्रष्टव्यत्वेनादर्शनम् । **सर्वथेति** रूपत्वेनापि । **तद्दर्शनेनेति** आत्मदर्शनाभावरूपम् ।

ननु रूपमप्यात्मेतिचेत् । तत्रापश्यन् वै तद् द्रष्टव्यत्वेन न पश्यति । न हि द्रष्टृ-स्वरूपं दृश्यज्ञानेन ज्ञातं भवत्यतद्रूपत्वात् । एवं द्रष्टृदृश्यव्यवहारे अज्ञानावस्थायां विशेषतस्तज्ज्ञानमशक्यमुक्त्वा ज्ञानोत्तरं कर्मकर्तृभाव एव नास्तीत्याह यत्र

भाष्यप्रकाशः ।

रूपो न विद्यते । कुतः । अविनाशित्वात् । स्वरूपतः स्वरूपधर्मतश्च नित्यत्वात् । तर्हि पश्यत्त्वमेव, नापश्यत्त्वं तत्राह । न त्वित्यादि । यद् द्वितीयं पश्येद् यद् दर्शनकरणमिन्द्रियं तत्तु तत आत्मनो-ऽन्यद् विभक्तं नास्ति । भेदे विभागे च सति द्रष्टृदृश्यभावः । स तु कार्ययो रूपचक्षुषोरेवातो रूपदर्शनम् । न तु कार्यस्य रूपस्य चक्षुषश्च कारणादात्मनो भेदो विभागो वा । अतस्तदभावाच्चक्षुः स्वकारणमात्मानं न पश्यतीत्यपश्यत्त्वम् । न हि द्रष्टुः स्वरूपं दृश्यज्ञानेन ज्ञातं भवति । अतद्रूपत्वात् एवमग्रेऽपि बोध्यम् । एवं द्रष्टृदृश्यव्यवहारे अज्ञानावस्थायां विशेषतस्तज्ज्ञान-मशक्यमुक्त्वा ज्ञानदशायां विशेषतो वक्तुं शक्यो भविष्यतीत्याकाङ्क्षायां ज्ञानोत्तरं कर्मकर्तृभाव

रश्मिः ।

स्वरूपत इति आत्मत्वादिरूपतः । स्वरूपधर्मो अविनाशित्वं जगज्जन्मादिकर्तृत्वं समन्वयाधि-करणोक्तमभिन्ननिमित्तोपादानत्वमिदमित्थतया शब्दाप्रतिपाद्यत्वं चेक्षत्यधिकरणोक्तं तथा च रूपेप्यस्ति-भातिप्रियत्वेनान्वयात् रूपत्वेन विरुद्धः परिलोपोऽदर्शनरूपो न विद्यत इति भावः । **पश्यत्त्वमिति** चक्षुष आत्मनः पश्यतीति पश्यस्तत्त्वम् । अपश्यत्त्वं स्वाभिन्नात्मनश्चक्षुषोऽपश्यत्त्वं न रूपतौल्यात् । **भेदे विभागे चेति** । ननु च न तु तद्द्वितीयमस्तीत्यत्राभावप्रतियोगिद्वितीयं चक्षुरादीन्द्रियं तत्र द्वितीयत्वं अन्यदित्युक्तभेदप्रयोज्यमस्तु विभक्तमित्यधिकमिति चेन्न समवायाभ्युपगमाच्च साम्यादनवस्थितेरिति सूत्रे गुणादिष्वपि विचारे इत्यादिना विभागस्यापि स्वरूपानतिरेक उक्तः स न क्षोदक्षमः । पदार्थतत्त्वविवेचनग्रन्थे शिरोमणिना विभागतत्त्वाविवेचनात् । यथा दिक्कालौ नेश्वरादतिरिच्येते इति दिक्कालतत्त्वे विवेचिते तथा । एवमपि भिन्नो घटः पटाद्विभक्तः । इति प्रत्यये विभागो भेदस्वरूप एवमन्यत्रापि स्वरूपानतिरेको द्रष्टव्यः । ततोन्यद्विभक्तमिति श्रुतिरिति । विभागो गुणान्तरमिति नैयायिकाः । न चैवंसति न तु द्वितीयमस्तीत्युक्त्वा ततोन्यदिति विभक्तमिति चोभयोरेकपदमस्तु तावतैव चारितार्थ्यमिति दोषानुद्धार इति वाच्यम् । सजातीयविजातीयस्वगत-द्वैतवारणाय द्वितीयान्यविभक्तपदानामावश्यकत्वेनादोषात् । यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदिति वक्ष्यमाणत्वात् । द्वितीये सजातीयमन्यद्विजातीयं घटः पटादन्यो न तु घटो घटात् अन्य इति प्रत्ययात् । विभक्तत्वं स्वमते । यथाविभागमविभागः स्वगतः यत्र कपाले कर्म ततः कपालद्वयविभागः । ततो घटारम्भकसंयोगनाशस्ततस्तेनैवं कपालविभागेन सकर्मणः कपालस्याकाशा-दिविभागो जन्यते ततः पूर्वसंयोगनाशः तत उत्तरदेशसंयोगः ततः कर्मनाश इति मुक्तावल्याम् । 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीता ब्रह्मणि । एकमेवाद्वितीयं ब्रह्म इति च । **नहीति** भाष्यं विवृण्वन्ति **नहीति** स्पष्टम् । विरुद्धधर्माश्रयत्वादाहुः **अतद्रूपेति** । अरूपवत्सूत्रे जगद्विलक्षणं ब्रह्मेति प्रतिपादनात् । अत एव रूपब्रह्मज्ञाने तत्तुल्यचक्षुरादिसाधनं आत्मज्ञाने तु भक्त्यादीति युज्यते । ननु रूपमेव चक्षुःस्थले कुतो नोक्तं कार्यत्वसाम्यादिति शङ्क्यम् । भाष्ये दृश्यज्ञानेनेत्यत्र दृश्यपदेन रूपं गृहीतम् । तस्याः तद्रूपत्वप्रतिपिपादयिषायाः । युगपदेकत्रैवात्मा-भेदाभेदौ न प्रतिपत्तुं शक्येते इति अतो रूपं नोक्तम् । चक्षुरुपात्तं प्रकाशे । अतिदिशति **एवमग्रेपीति**

वा अन्यदिव स्यादित्यादिना। इदमेव हि ज्ञानममृतत्वमिति।

भाष्यप्रकाशः।

एव नास्तीत्याह। यत्र वा अन्यदिव स्यात् तत्रान्योऽन्यत पश्येदित्यादि। यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदित्यादि। तथाचावस्थाद्वयेऽप्यशक्यवचनत्वाद् विशेषतो न वक्तुं शक्य इत्यर्थः। तदेतन्निगमयति येनेदं सर्वं विजानाति तं केन विजानीयाद्, विज्ञातारमरे केन विजानीयादिति। एवमुपदिश्योक्तमुपसंहरति उक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति। इदमेव हि ज्ञानं सर्वनिमित्तोपादानभूतमविनाश्येकमेव तत्त्वमित्याकारकज्ञानोत्तरं यस्मिन्निर्विषयमात्मरूपं ज्ञानं तदेवाऽमृतत्वमित्यर्थः।

रश्मिः।

यद्वै तन्न जिघ्रतीत्यादौ यद्वै तन्न रसयतीत्यादौ यद्वै तन्न वदतीत्यादौ यद्वै तन्न शृणोतीत्यादौ यद्वै तन्न मनुते इत्यादौ यद्वै तन्न स्पृशतीत्यादौ यद्वै तन्न विजानातीत्यादौ। एवं द्रष्टीति भाष्यं विवृण्वन्ति स्म एवं द्रष्ट्रिति। यत्र वा अन्यदिव स्यात्तत्रान्योन्यत्पश्येदन्योन्यज्जिघ्रेदन्योन्यद्रसयेत् अन्योन्यदभिवदेत् अन्योन्यं शृणुयादन्योन्यन्मन्वीतान्योन्यत्स्पृशेदन्योन्यद्विजानीयादिति। अग्रिमां श्रुतिमाहुः यत्र त्वस्येति। इत्यादीति तत्केन कं जिघ्रेत् तत्केन क९रसयेत्तत्केन कमभिवदेत् तत्केन क९ शृणुयात् तत्केन कं मन्वीत तत्केन कं स्पृशेत् तत्केन कं विजानीयात् इति। अग्रिमामाहुः येनेदमिति येनेद९सर्वमिति क्वचित्पाठः। श्रुत्यर्थः स्पष्टः। इतीति श्रुतिस्थं पदम्। अग्रिमाया आभासमाहुः एवमुपेति इदमेव हीत्यादिभाष्यं विवृण्वन्ति इदमेवेति। सर्वस्य निमित्तोपादानभूतं अविद्वद्दशायां सखण्डब्रह्मज्ञाने विचारविषये 'आत्मा वा अरे द्रष्टव्यः' इत्यादिभिः ज्ञानं प्रवृत्तं तदत्रोक्तम्। यन्निर्विषयमात्मरूपं ज्ञापितं विद्वद्दशायामखण्डब्रह्मज्ञाने विचारविषये यत्र त्वस्य सर्वमात्मैवाभूदित्यादिभिर्ज्ञानं तदत्रोक्तम्। इदमखण्डसखण्डभेदेन द्वैराश्यं प्राप्तं ज्ञानं मैत्रेयीब्राह्मणे एकस्मिन्नमृतत्वप्रश्ने उक्तमित्येतदेवामृतत्वम्। निष्क्रान्तं विषयेभ्यः इति निर्विषयं ग्राहकस्य मन आदेरात्मरूपत्वात् तद्विषयादपि निष्क्रान्तम्। श्रुत्यन्तरेति शारीरब्राह्मणस्थेन। तस्येति जीवस्य ब्रह्मत्वमेतदात्मत्वम्। ननु सिद्धान्ते जीवस्यैतद्ब्रह्मत्वं दूषणाय कुतः पूर्वपक्षिज्ञानविषयमाचार्यमतस्याधुनिकत्वाच्चेति चेन्न पूर्वपक्षिपूर्वपक्षत्वात् जीवीयब्रह्मत्वस्याचार्यमतस्याधुनिकत्वेपि छान्दोग्ये ऐतदात्म्यमिदं सर्वमिति मतस्यानाधुनिकत्वाच्च। अतिरिक्तत्वादिति 'अधिकं तु भेदनिर्देशात्' इति सूत्रभाष्ये एतदुक्तम्। अत्र चेति ब्राह्मणे। स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमाविनिश्चरन्त्येवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासः पुराणविद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि दत्तं हुतमाशितं याचितमयं लोकः परलोकः सर्वाणि भूतानि अस्यैवैतानि सर्वाणि प्रतिष्वसितानीत्यत्र। ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योन्यत्रात्मनो इत्याद्युक्त्वा इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीद९ सर्वं परमात्मेत्यत्र चात्राभ्याहितस्येत्यस्य प्रज्वलितस्येत्यर्थः। अभित आसमन्ताद्धितस्य अन्यत्रेत्यत्र सार्वविभक्तिकस्त्रल्। अन्यत्। जगत्कर्तृत्वेति यथाक्रममुक्तश्रुत्यर्थो आदिपदेनेदं ब्रह्मेत्यत्र ब्रह्मसमन्वयेन ब्राह्मणजातिस्वरूपं ब्रह्मत्वं ब्रह्मलिङ्गम्। अभ्यर्हितेति अभ्यर्हितत्वं सेश्वरसांख्ये इवानीश्वरसांख्ये ईश्वरवज्जीवप्रतिपादकब्राह्मणप्रतिपाद्यत्वम्। तस्मिन्निति जीवे शारीरब्राह्मणोक्तं ब्रह्मत्वं जगत्कर्तृत्वं च। असङ्गपुरुषादुत्कृष्य जीव उत्कर्षः उत्कर्षणं तस्मै। सिद्धान्ते तु जीवे एतदात्मत्वम् ब्रह्मत्वं जगज्जन्मादिकर्तृत्वं ब्रह्मत्वमंशमात्रं तत्त्वमसीत्यत्र तस्य त्वं तत्

तत्रादिमध्यावसानेषु जीवप्रकरणमित्येव प्रतिभाति। तस्य ब्रह्मता जगत्कर्तृत्वमित्युत्कर्षः। न तु तस्मादन्यद् ब्रह्मत्वेन वक्तुं युक्तम्। अर्थविरोधाच्च। तस्माद् वेदे सृष्टिवाक्यानामेतन्न्यायेनान्यार्थत्वान्न ब्रह्म जगत्कारणमिति प्रकृति-

---

भाष्यप्रकाशः।

एवं विषयवाक्यं व्याख्याय पूर्वपक्षी स्वाभिप्रायमाह तत्रादीत्यादि। नन्वयमात्मा ब्रह्मेति श्रुत्यन्तरे एतस्य ब्रह्मत्वं विहितं, न तु ब्रह्मण एतदात्मत्वमतोऽस्मादात्मनो ब्रह्मणोऽतिरिक्तत्वादत्र च जगत्कर्तृत्वजगदात्मकत्वादिरूपब्रह्मलिङ्गादस्य ब्रह्मप्रकरणत्वमेवास्त्विति चेत् तत्राह तस्य ब्रह्मतेत्यादि। तथाचाभ्यर्हितत्वात् तस्मिन्नेतद्द्वयमुत्कर्षायोच्यते। ननु किमत्र मानमिति चेदन्यथाऽनुपपत्तिमेव जानीहि। एतावदरे खल्वमृतत्वमित्यनेनाऽमृतत्वस्यात्रैव नियमितत्वान्न तु तस्मादन्यद् ब्रह्मत्वेन वक्तुं युक्तमर्थविरोधाच्च। ब्रह्म ह्यविकारं कथं कार्यरूपेण विकुर्यादित्यर्थविरोधादित्यर्थः। सिद्धमाह तस्मादित्यादि। [अर्थविरोधेन ब्रह्मणः कारणताया बाधितत्वादात्मातिरिक्तब्रह्माभावाच्च वेदे सृष्टिवाक्यानामेतन्न्यायेन अत्रार्द्रैधाग्नेरिति दृष्टान्ताद्यथा तत्संसृष्टस्याग्नेर्नानाविधधूमजनकत्वं तथा प्रकृतिसंसृष्टस्यैव जीवस्य रूपनामात्मकप्रपञ्चजनकत्वमिति सिध्यतीत्येतन्न्यायेन] जीवस्तुत्यर्थत्वान्नातिरिक्तं ब्रह्म जगत्कारणमिति जीवाधिष्ठिता प्रकृतिरेव कारणम्। तेन प्रकृतिकारणवाद एव युक्त इति प्राप्ते इत्यर्थः। सूत्रं

रश्मिः।

त्वमसीति प्रकारद्वयदर्शनात्। **न त्वित्यादि** भाष्यमवतारयन्ति स्म **ननु किमिति**। **अन्यथेति** तथा हि अत्रोपसंहारस्यार्थस्यामृतत्वरूपस्य निर्णायकत्वेन तत्र च ब्रह्मता जगत्कर्तृत्वं चेत्येतद्द्वयविशिष्टजीवं एतावत्पदेन परामृश्यामृतत्वोक्तिः प्रमितार्थः। जीवस्यामृतत्वं तद्ब्रह्मतारूपार्थान्तरं विनानुपपद्यमानस्तस्योपपत्तयेर्थान्तरकल्पना जीवस्य ब्रह्मत्वकल्पनार्थापत्तिस्तन्मानमिति प्रस्थानरत्नाकरेर्थापत्तिस्तु प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्यार्थान्तरं विनानुपपद्यमानस्य उपपत्तये यथार्थान्तरकल्पना एवमर्थापत्तेर्मानतोक्ता। तथापि लाघवाज्जीवस्य ब्रह्मत्वजगज्जन्मादिकर्तृत्वयोः कल्पनाप्रकारान्यप्रकारेणोपक्रमोक्तस्य ब्राह्मणेऽमृतत्वानुपपत्तिरित्यन्यथानुपपत्तिर्मानं जानीहीत्युक्तम्। सांख्यमते प्रमाणानां त्रैविध्यात् 'त्रिविधं प्रमाणं तत्सिद्धौ सर्वसिद्धेर्नाधिक्यसिद्धिः' इति सूत्रात्। तदपि मानत्वमनुमानत्वेनान्यथानुपपत्तेर्नान्यथानुपपत्तित्वेन यथा नैयायिकानाम्। तदनुमानं तु जीवन्देवदत्तो गृहे नास्तीत्यत्र देवदत्तो बहिरस्ति जीवत्वे सति गृहेऽसत्त्वात् इति केवलव्यतिरेकि सांख्यमतत्वादुपात्तम्। यादृशार्थान्तरं विनानुपपद्यमानत्वं तादृशार्थान्तरं ब्रह्म जगत्कर्तृत्वविशिष्टजीवरूपं भाष्ये वक्ष्यते इत्याशयेन विवरीतुमाहुः **एतावदिति**। **अत्रैवेति**। त्रिविधप्रमाणेषु शब्दप्रमाणेन जीव एव। विवृण्वन्ति **न तु तस्मादिति**। **अर्थेति**भाष्यं निक्षिप्य व्याचक्रुः **अर्थेति**। **विकुर्यादिति** परिणामवादिनः सांख्याः। **आहेति** पूर्वपक्ष्याह। **ब्रह्मण** इत्यविकृतस्येत्यर्थः। **आत्मेति** आत्मा जीवः तदतिरिक्तस्य ब्रह्मणोऽभावात्। ननु वेदे 'प्रजापतिरकामयत प्रजाः सृजेय' इति तृतीयाष्टके सृष्टिरुक्ता तस्याः का गतिरित्यत आहुः **वेदे सृष्टीति**। **एतन्न्यायो** मैत्रेयीब्राह्मणन्यायस्तेन। **अतिरिक्तमिति** जीवातिरिक्तं तदुक्तं 'जन्मादिरवस्थातः पुरुषबहुत्वम्' इति 'उपाधिभेदेप्येकस्य नानायोग आकाशस्येव घटादिभिः' इति च सूत्राभ्याम्। कापिलसांख्यप्रवचनसूत्रवृत्तौ।

वाद एव युक्त इत्येवं प्राप्ते उच्यते वाक्यान्वयात् । इदं वाक्यं भगवत्येवान्वेति,

भाष्यप्रकाशः ।

पठित्वा सिद्धान्तं व्याकुर्वते इदमित्यादि । अत्रापि कारणत्वेनेत्यनुवर्तते [इति प्रागेवोक्तम्] । कारणत्वेन ब्रह्मैवात्रावगतव्यं, न जीवः । कुतः? वाक्यान्वयात् । वाक्यस्यान्वयो वाक्यान्वयस्तस्मात् । सर्वस्मिन् वेदरूपे महावाक्ये ब्रह्मण एव कारणत्वेनानुगमदर्शनादिदमपि

रश्मिः ।

तेनेति जीवेपि बाधात् प्रकृतिमात्रपर्यवसानेन । अनुवर्तत इति मण्डूकप्लुत्यानुवर्तते । 'कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः' इति सूत्रात् । वाक्य इति सप्तमीसमासः वाक्ये अन्वय इति । पाठः प्रमादात् । यद्वा श्रुतिः स्ववाक्यं कर्म भगवत्येवान्वेति अन्तर्भावितण्यर्थः । कर्मणि घञ् अन्विधातोः संहिताया नित्यत्वात् 'नित्या धातूपसर्गयोः' इति वाक्यात् । वाक्ये अन्वयः इति पाठे । ननु वाक्यं भगवत्येवान्वेतीति भाष्याय प्रतीतार्थमादाय कर्तर्युपपदे समासोस्त्विति चेत्सत्यं कर्तरि कृदित्यस्य तत्रोपपदं सप्तमीस्थमित्यत्राविचारितत्वात्, प्रत्ययस्याचो विधानेपि एरजित्यनेन चयो जयोऽय इति साधनान्न कर्तर्युपपदेऽज्विधानमिति । एतदाशयेनाहुः सर्वस्मिन्निति । वेदरूप इति वेदान्तरूपेपि । वेदपदस्य वेदान्तेपि शक्तेः । वेदेनुगमो वेदार्थो रामकृष्णयोरिति कृष्णोपनिषदः 'गूढं ब्रह्मणि वाङ्मये' इति श्रीभागवततृतीयस्कन्धे अनुगमपदेन वेदान्तेनुगमाधिकरणे शब्दसंदेह-वारकप्रथमपादे संदिग्धतत्पराणां वाक्येषु ब्रह्मण एव कारणत्वेनानुगमप्रतिपादनात् स स्मार्यते । एवं सूत्रं व्याख्याय कुम्भकारः कारः करः कृतिः कर्तेत्येवमादिषु धातोरेकस्मादप्युपपदेऽनुपपदे प्रत्ययनियमाभावात् कर्तर्युपपदेऽच् प्रत्यय इति संभवेन भाष्यं विवृण्वन्ति इदमपीति । तथा च महावाक्यस्यान्वयो वाक्यान्वयः इति भाष्ये विग्रहः सप्तमीसमासे योगविभागस्येष्टसिद्ध्यर्थत्वात् षष्ठीतत्पुरुषः कर्तृकर्मणोः कृतीति कर्तुर्वाक्यात्षष्ठी सुप्तिङ्चयो वाक्यं भगवति भगवद्विषयं वैषयिकाधारे सप्तमी । अन्वयं सुप्तिङ्संबन्धं प्रतिपाद्यप्रतिपादकभावं करोतीत्यर्थः । अत्र वाक्ये कर्तर्युपपदे एरजित्यच् । ननु यथा कर्मण्यणित्यादौ कर्मणीत्यादिः सौत्री प्रथमार्थे सप्तमी धातोरण् भवति कर्म चोपपदसंज्ञमिति तदर्थ इतीति चेन्न भाष्ये कर्तर्युपपदे ध्वनितेऽचि धातोरज् भवति कर्ता चोपपदसंज्ञः इति कर्तरि कृदित्यनुसंधायैरजिति सूत्रार्थ इत्यस्यापि वक्तुं शक्यत्वात् । ननु 'तत्रोपपदं सप्तमीस्थम्' इति सूत्रमत्र तत्रेतिपदेन सामान्यतः सप्तम्यन्ते पदे कर्तरीत्यादौ वाच्यत्वेन स्थितं वाक्यादि तद्वाचकं पदमुपपदसंज्ञं स्यादिति वृत्तौ संभावितायामपि वृत्तिकारः सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यादित्याहेति कर्त्रुपपदेऽज् दुर्लभ इति चेन्न 'श्यालः स्वस्रोरथाग्रहीत्' इत्यत्र पुमान् स्त्रियेति सूत्रविचारदर्शनात् अत्राप्यसति दोषे तत्रोपपदं सप्तमीस्थमित्यस्य विचारे बाधकाभावात् । तथा च सिद्धान्तकौमुद्या अयमर्थः । तत्रोपपदमिति सूत्रेण मुख्यस्य कर्तुस्तत्रेतिपदेन गौणमुख्यन्यायसनाथेन ग्रहणात् कर्मण्यणित्यादेरग्रहणापत्त्या कुम्भकार इत्यत्र कर्मणि घञ् प्रसक्तिरतः कर्तुर्मुख्यस्योपपदेन्वयः । संस्कारः सकर्मणीत्यादौ सप्तम्यन्त उपपदेपि यथा प्रयाजशेषेणाभिघारयति अत्र प्रधानक्रमानु-रोधेनादावाग्नेयहविषोरभिघारणं पश्चादैन्द्रस्येति मुख्यक्रमेण ज्ञाप्यते तथेत्याह वृत्तिकृत् गौणमुख्य-न्यायं बाधितुं सप्तम्यन्ते पदे कर्मणि इत्यादावित्यादि । तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यादिति

१. कुम्भादि । २. वाक्यादिः ।

नात्र जीवप्राधान्यगन्धोऽपि। सर्वत्र भगवदन्वयेनैव जीवस्यापि प्रियत्वम्।

भाष्यप्रकाशः।

वाक्यं भगवत्येवान्वेति। नात्र जीवप्राधान्यगन्धोऽपि, येन प्रकृतिवाद आशङ्क्येत। न [नु] चोपक्रमे। 'न वा अरे' इत्यादिना निरुपधिप्रियत्वेन जीवात्मन एव प्रकृतत्वात् कथं न तस्य प्राधान्यमिति [अत आहुः सर्वत्रेत्यादि। अत्रायमर्थः। अत्र मैत्रेय्यै मोक्षोपायमुपदेष्टुं निरुपधिप्रियमात्मानं प्रकृत्य मोक्षोपायभूतं तद्दर्शनं दर्शनोपायभूतं श्रवणादित्रयं चोपदिशति। तत्र प्रियत्वस्यापाततो विचारे देह एव तादृशः प्रतिभातीति तन्निवारयितुमात्मदर्शनादिना सर्वज्ञानं सर्वत्रात्मभेदद्रष्टुरपराधं च वदन् सर्वस्याप्यात्मत्वं बोधयति तादृशसर्वात्मकत्वं च देहस्य न संभवति, इति तद्भिन्नः कश्चिदात्मात्र द्रष्टव्यत्वादिनोपदिश्यते इति तस्याः ज्ञाने श्रवणेन जाते ततः स क इत्याकाङ्क्षायां दुन्दुभ्यादिदृष्टान्तत्रयं मननार्थं वक्ति तत्र देहचेष्टादिभिः परंपरया ज्ञापयितुमाद्योदृष्टान्तः। ततो बाह्याद्भेदं ज्ञापयितुं द्वितीयः। ततोऽभ्यन्तराद्भेदं ज्ञापयितुं तृतीयस्तेषु त्रिष्वपि दुन्दुभिदुन्दुभ्याघातः वीणावीणावादः शङ्खशङ्खध्मरूपेण द्वौ द्वौ वदन् द्वौ जीवपरमात्मानौ देहाद्भिन्नाविति साधयति ततो यदि द्वावपीदृशौ तदा द्रष्टव्ये आत्मन्येकवचनं किमित्युक्तं? यद्येक एव तादृशस्तदाजीवे तादृशस्याननुभवात् पूर्वदृष्टान्तत्रये द्वौ द्वौ किमित्युक्तावित्याकाङ्क्षायां जीवस्य तदंशत्वेन तदधीनत्वं वक्तुं 'स यथार्द्रैधाग्नेः' 'स यथा सर्वासामपाम्' इति कण्डिकाद्वयेन सर्वोत्पादकं प्रलये सर्वाधारं च साधयति तेन नियामकादात्मनो नियम्यस्यात्मनो भेदः आत्मत्वेनैकरूप्याच्चाभेद इति सिद्ध्यति। एवं सिद्धे भेदे सर्वोत्पत्तिलयाधारो य आत्मा स एव मोक्षार्थं निदिध्यासितव्य इति बोधयति तथा च] शङ्क्यम्।

रश्मिः।

कौमुदी। वक्ष्यमाणः कर्मणि घञ्। उपात्तकर्मानुरोधेनोक्तम्। तेन अन्येप्यजादयः प्रत्यया भवन्त्येव यथा वाक्यान्वय इत्यत्रैरच्। ननु तर्हि चयो जयो अय इति प्रयोगा न स्युः उपपदाभावादिति चेन्न भगवदिच्छया प्रवृत्तानामदुष्टत्वात्।

'लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम्।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत्'॥

इति पत्रावलम्बनात्। लौकिकत्वाच्च छन्दोवत्सूत्राणि भवन्तीति वाक्यान्वयादित्यलौकिकः प्रयोग इति। तेन वाक्यान्वयपदं द्वेधा व्याकृतम्। वाक्येऽन्वयो वाक्यान्वयः। वाक्यस्यान्वयो वाक्यान्वय इति। ननु वाक्यस्यान्वय इति भाष्योक्तमस्तु योगविभागस्येष्टसिद्ध्यर्थत्वाद्भाष्यप्रकाशोक्तमपि मा स्त्विति चेन्न। इष्टसिद्धिसत्त्वात्। अनुव्याख्यानस्यापि निःश्वसितत्वात्। एवं वाक्यं महावाक्यमित्यङ्गीकृत्योक्तम्। वाक्यमित्यत्र महत्त्वाभिनिवेशे तु एकत्वमविवक्षितमित्याशयेन वृत्तौ वाक्यानामन्वय इत्युक्तम्। अन्यथा भाष्ये महावाक्यमिति वदेयुः। अत एव माध्वभाष्येप्ये कवचनान्तेन समासः। वाक्यस्यान्वय इति। वाक्यं हीदमिति शंकरभाष्येप्येकवचनम्। नात्रेति भाष्यं विवृण्वन्ति नात्रेति। गन्धशब्दस्तु लेशे संबन्धिनि वा जीवप्राधान्यसंबन्धिवाक्यमपीत्यर्थः। 'गन्धो गन्धक आमोदे लेशे संबन्धिगर्वयोः' इति विश्वात्। येनेति जीवप्राधान्येन। जीवस्य प्रधानातिरेकादसंगित्वेन प्रकृतिकारणवादः। न चोपक्रम इति इत आरभ्य क्वचित्पुस्तके लघुबृहद्व्याख्यानं तयोः सूचीकटाहन्यायेन लघुव्याख्यानं व्याक्रियते। सर्वत्रेति

तस्यैव सुखरूपत्वात् । सर्वोपनिषदनुरोधेनैवास्याप्यर्थस्य वक्तुमुचितत्वात् ।

भाष्यप्रकाशः ।

आत्मनः प्रकृतत्वेऽपि प्रियत्वेनैव प्रकृततया स्वेन रूपेणाप्रकृतत्वात् प्रकृततावच्छेदकविचारे सर्वत्र भगवदन्वयेन जीवेऽपि तस्य सत्त्वात् तदन्वयेनैव जीवस्यापि प्रियत्वम् । प्रियत्वस्य सुखधर्मत्वात्, यो वै भूमा तत् सुखं नाल्पे सुखमस्तीति श्रुत्या ब्रह्मण एव सुखरूपत्वादत्र प्रतीयमानस्यापि [प्रियत्वादिरूप]प्राधान्यस्य ब्रह्मण्येव पर्यवसानेनोपक्र[मस्य जीवबोधकताया निश्चेतुमशक्यत्वादुपक्र]माद्यपेक्षया उपपत्तेर्बलिष्ठत्वात् । [अतः परमात्मैव मोक्षार्थं ज्ञेय इत्यर्थः । ननु आर्द्रैधाग्नेर्दृष्टान्तेन प्रकृतिसंसृष्टस्यैवात्मनः प्रकृतत्वात्तत्र च सत्त्वगुणसंसर्गेण प्रियत्वस्यापि प्रत्यवचनत्वान्नेयमुपपत्तिरिति चेत्तत्राहुः सर्वेत्यादि 'आत्मैवेदमग्र आसीत्' 'स ऐक्षत लोकान्नु सृजै' 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' 'सदेव सोम्येदमग्र आसीत्' 'तत्तेजोऽसृजत' 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिषु सर्वेषु सावधारणेषु वाक्येषु केवलस्यैवात्मनः प्रकृतत्वात् । बहूनामनुग्रहस्य च न्याय्यत्वात् सर्वोपनिषदनुरोधेनैवैतद्वाक्यार्थो वक्तुमुचितः । न च दृष्टान्तबाधः । ऐक्षत इत्यादिनेच्छाया उक्तत्वात् तत्संसर्गेणैव दृष्टान्तोपपत्तेः । किंच तन्मते प्रकृतेर्नित्यत्वेनानश्वरत्वादार्द्रैधसां च नश्वरत्वेन तेषां प्रकृतिस्थानीयत्वेन वक्तुमशक्यत्वाच्च । दृष्टान्ते विवक्षितार्थमात्रग्रहणे तु इच्छामात्रसंसर्गस्यैव वक्तुमुचितत्वम् । न त्विच्छाया द्वितीयत्वं धर्मत्वेनात्मान्तःपातित्वात् भिन्नाभिन्नत्वम् । किंच याज्ञवल्क्यो मोक्षार्थमुपदिशति । मोक्षस्तु ब्रह्मात्मज्ञानादेव संगतो भवतीत्याहुः

रश्मिः ।

भाष्यमवतारयन्ति न चोपक्रम इति । प्रियत्वेनेति ।

'अहमात्मात्मनां धातः प्रेष्ठः सन् प्रेयसामपि ।
अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः' ॥

इति श्रीभागवते प्रेयांस आत्मानो मैत्रेयीब्राह्मणद्वये जीवाः तेषां मध्ये हे धातः अहं प्रेष्ठः । देहादिर्यत्कृते प्रिय इत्यत्र निरुपधिप्रीतिविषयत्वस्य स्वस्मिन्नुक्तेरानन्दधर्मत्वाच्च प्रियत्वं ब्रह्मधर्मस्तेन । एवकारेणात्मत्वे व्यवच्छेदो येन जीवोपि संभाव्येत । एतदेवाहुः स्वेनेति । आत्मत्वेन जीवत्वेन वा । प्रकृततावच्छेदकं प्रियत्वं अन्यब्राह्मणेषु प्रकृतान्येषु सर्वेष्वत्र ब्राह्मणे तां प्रियत्वमवच्छिनत्ति इति तस्य विचारे इत्यर्थः । भाष्यं विवृण्वन्ति सर्वत्रेति जगति समन्वयाधिकरणोक्तेनास्तिभातिप्रियत्वेन भगवदन्वयेनेत्यर्थः । तस्येति ब्रह्मधर्मस्य प्रियत्वस्येत्यर्थः । तस्यैवेति हेतुभाष्यं विवृण्वन्ति प्रियत्वस्येति । सुखेति सुखरूपस्येति भाष्ये व्युत्पत्त्या तु सुखधर्मेति । यद्वा सुखधर्मत्वात् सुखरूपत्वं धर्मधर्मिणोरैक्यादित्यर्थः । शोभनानि खानि येन प्रियत्वेनेति सुखं प्रियत्वं भवति । ननु भूमाधिकरणे ब्रह्मणः सुखत्वमुक्तमत आहुः यो वै भूमेति । एवकारोप्यर्थे ब्रह्मणोपीत्यर्थः । ब्रह्मण्येवेति प्रियत्वावच्छिन्ने इत्यर्थः । उपक्रमेति ।

'अलौकिको हि वेदार्थः न युक्त्या प्रतिपद्यते ।
तपसा वेदयुक्त्या च प्रसादात् परमात्मनः' ॥

इति श्रुतेरुपक्रमादिन्यायरूपयुक्तिर्दुर्बला । का सा बलिष्ठोपपत्तिरित्याकाङ्क्षायां सर्वोपनिषदि

'तमेव विदित्वा अतिमृत्युमेति' 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते'

भाष्यप्रकाशः ।

तमेव विदित्वेत्यादि । तथा च सावधारणश्रुत्या न प्रकृतिसंसृष्टज्ञानान्मोक्ष इत्यर्थः । किंचाग्रे सर्वासामपां समुद्र एकायनमेवमित्यादिना अप्स्पर्शानां त्रयोदशानां समुद्रादयस्त्रयोदश यथा आधारभूतास्तथा आत्मा आधारभूत इत्युक्तं तत्र आपः समुद्रसजातीयाः स्पर्शादय पञ्च त्वमादीनां ग्राह्याः । संकल्पादयः सप्त मनआदीनां कार्याणि । अध्वशब्दश्च गतौ यौगिकः । अत्ति बलमित्यध्वेति व्युत्पत्तेः । अयनशब्दश्चाधिकरणव्युत्पन्नः यन्त्यस्मिन्निति व्युत्पत्तेः । तथा च यथा सजातीयानि सजातीये ग्राह्याणि ग्राहके कार्याणि कारणे लीयन्ते इति तेषां तल्लयस्थानमेवमात्मापि सजातीयानां ग्राह्याणां कार्याणां च लयस्थानमिति सिद्ध्यति । तच्च तदेकमव्यक्तमनन्तरूपमिति श्रुत्युक्तप्रकारके भगवत्युपपद्यते सांख्यमते भूतानां मात्रासु तासामिन्द्रियाणां चाहंकारे तस्य महति महतश्च प्रकृतौ लयः । आत्मनि तु न कस्यापि लयः इत्यतः प्रकृतिस्तत्संसृष्टो वा न वक्तुं शक्यते । अतो लयस्थानविचारेपि आत्मा ब्रह्मैव आयाति न तु प्रकृतिसंसृष्ट इत्याशयेनाहुः आनन्दाद्ध्येवेत्यादि । अत्रापि सावधारणश्रुत्योत्पत्तिस्थितिलयहेतुस्तत्स्थानं च ब्रह्मैवेत्युक्तं तेनापि तथा । अतो यत्पूर्वपक्षिणोक्तं ब्रह्मता जगत्कर्तृत्वं च तस्योत्कर्षार्थं तदसंगतमित्यर्थः । ननु सांख्यप्रवचने 'ईदृशेश्वरसिद्धिः सिद्धा', इतिसूत्राद्यादृशः पूर्वमुक्तस्तादृशः प्रकृतिसंसृष्ट एवास्त्विति चेत्राहुः सर्व एवात्मान इति । अस्यां सावधारणश्रुतौ हि बहूनामात्मनां ब्रह्मणः सकाशाद्व्युच्चरणमुक्तं तथा सति 'एष उ एव इत्यादिश्रुते स यं व्युच्चरितमात्मानं यथा करोति स तथा भवतीत्युपपद्यते । सांख्यमते तु नित्या बहवः आत्मानस्तेषु यः प्रकृतिसंसृष्टस्तस्य कार्येश्वरत्वं तच्चासंगतम् । बहुषु समानेष्वेकस्यैव प्रकृतिसंसृष्टस्येश्वरत्वं नान्येषामित्यत्र नियामकाभावात् । न च कर्मानादित्वात्तदुपपत्तिस्तेषां मते प्रकृतिपुरुषातिरिक्तस्यानादित्वाभावात् । नापि प्रकृतिस्वभावात्तदुपपत्तिस्तस्याः आत्मनां च स्वस्वभावस्यैकरूप्यादेकस्यैव संगो नान्येषामित्यत्र तन्मते नियामकस्य वक्तुमशक्यत्वादतस्तन्मतमप्यसंगतम् । किंच तन्मते चिद्रूपस्य जीवस्याहंताममतानाशे स्वरूपेणावस्थानं मोक्षस्तदसंगतमित्याहुः 'एष ह्येवानन्दयाति' तथा च श्रुतौ निरुपधिसुखस्यैव मोक्षरूपत्वात् ब्रह्मणः अतस्तन्मते मोक्षवाक्यमप्यसंगतं स्यात् । तदेतत्सर्वं हृदिकृत्याहुः संदिग्धादित्यादि ।] किंचेदमवान्तरवाक्यं महावाक्याद् दुर्बलम् । तच्छेषत्वात् । महावाक्यं तूपनिषत् । ततोऽपि महावाक्यं वेदः । स तु सर्वोऽपि भगवत्पर एव । सर्वे वेदा इति श्रुतेः । वेदैश्च सर्वैरित्यादिस्मृतेश्च । उपनिषद्विचारेऽपि, तं त्वौपनिषदमिति, आत्मैवेदमग्र आसीदित्यादिवाक्यदर्शनात् तस्या अपि तत्परत्वमेव ।

रश्मिः ।

त्यादिभाष्यमित्याशयेनाहुः किंचेदमित्यादि । किंचेति साकल्ये उपपत्तेः साकल्याद्वक्तुमुचितत्वादित्यर्थः । बलिष्ठोपपत्तिरारभ्यत इति वा । 'किंचारम्भे च साकल्ये' इति विश्वः । इदं ब्राह्मणद्वयम् । तं त्वौपनिषदमिति साकल्यब्राह्मणे आत्मैवेदमिति पुरुषविधब्राह्मणे । अन्यत्रापीति मैत्रेयी-

[ ] एतच्चिह्नान्तर्गतः प्रकाशः पश्चात् तत्कर्तृभिः प्रणीय योजितः इति ज्ञायते । मूलश्रीहस्ताक्षरलिखितपुस्तकेऽयं भागो नास्ति कर्तृभिर्नवीनो निर्मितः । पुस्तकान्तरे तैरेव स्वकरेणाधिकतया पत्रप्रान्तभागे निवेशितोऽस्ति सोऽप्यत्र मुद्रितोऽस्ति ।

भाष्यप्रकाशः ।

[अत उदाहृतजातीयैः श्रुतिसहस्रैस्तथाप्रतिपादनादत्रापि प्रियत्वबोधनेन नित्यनिरवधिसुखात्मकं तत्स्वरूपम् । आर्द्रैधाग्निरित्यादिकण्डिकाद्वयेन तत्कार्यं सर्वाणि भूतान्यस्यैव निःश्वसितानीति-कथनादंशाश्च प्रतिपादिता इतीदमपि वाक्यं ब्रह्मपरमेवोचितमित्यर्थः । एतावानर्थस्तद्बोधक-वाक्यसमूहश्च मैत्रेयीब्राह्मणद्वयेपि समानः । अग्रे तु तयोर्भेदः । तत्र यौ द्वावात्मानौ पूर्वं कार्यद्वारा परिचायितौ तयोः किं सर्वथा भेदः किं वा कार्यकारणयोरिव भेदाभेदावुत अंशांशिनोरिव तावुत सर्वथा अभेदः तयोः स्वरूपं च किमित्याकाङ्क्षायां मैत्रेय्या अधिकार-परीक्षार्थं प्रथमे ब्राह्मणे 'स यथा सैन्धवखिल्यः' इत्यादिना दृष्टान्तेनांशत्वं 'एवं वा अरे इदं महद्भूतम्' इत्यादिना दार्ष्टान्तिकस्य जीवस्य स्वरूपं च वदति । स यथा सैन्धवखिल्यः स जीवः सिन्धुरुदकं तत्र भवं सैन्धवं लवणं तस्य खिल्यः शकलः उदके जले प्रास्तः प्रक्षिप्तः सन् उदकमेवानुक्षेपाधारभूतमुदकमेव लक्ष्यीकृत्य विलीयेतोदकभावमापद्येत नाहास्य न कश्चिदस्य सैन्धवखिल्यस्योद्ग्रहणाय उद्धृत्य पूर्ववत् ग्रहणायेव स्यात् इवशब्दोनर्थकः शक्तः स्यात् । यतो हेतोर्यतः यस्मादुदकदेशादाददीत आस्वादनाय तद्गृह्णीयात् लवणमेव लवणरसमेवास्वादयेत् । अतो लवणभावेनांशत्वेपि उदकरूपेणैव तस्य सत्ता । न तु खिल्यभावेनेति लयदृष्टान्तं व्याख्याय 'एवं वा अरे इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्ति' इति लयं निरूप्य यथायं लवणदृष्टान्त एवमेवारे मैत्रेयि इदं जीवात्मतत्त्वं महदादिलक्षणकत्वाद्ब्रह्मैव महदनवच्छिन्नं भूतं सिद्धं अनन्तमविनाशिअपार-मनादिविज्ञानघने ज्ञप्तिमात्रस्वरूपे एव । प्रथमान्तपक्षे ज्ञप्तिस्वरूप एव इत्यर्थो वाच्यः । तादृशः सन्नेव एतेभ्यः स्थूलसूक्ष्मशरीराकारेण परिणतेभ्यो भूतेभ्यः समुत्थाय भूसूर्यरश्म्यादिभ्यो रसः सैन्धवभावमिव पराभिध्यानादहमाविशेषफलभोक्तृभावं प्राप्य तेन स्वस्वरूपं ज्ञापयित्वा तानि विनश्यन्ति सन्ति अनु पश्चात् विनश्यति भोक्तृभावं त्यजति न प्रेत्य संज्ञास्ति विमुक्त्यनन्तरं संज्ञा देवमनुष्यादिसंज्ञा नास्ति किंतु ज्ञप्तिमात्रस्वरूप एव भवति । इत्येवं लये संज्ञाभावं व्याख्याय तन्निरूपणार्थं मिष्टोदके तत्प्रक्षेपे अविभागदशायामपि भेदज्ञानान्न संज्ञाया अभावे इति मैत्रेय्या मोहो जातः प्रेत्य सम्यग्ज्ञानाभावः कथं किमात्मनः स्वरूपनाशादुत दर्शनाभावात् तत्र यदि स्वरूपनाशात्तदा विज्ञानघने आत्मनि अनन्तमपारमिति विशेषणाभ्यां अनादिनिधनत्वं यदुक्तं तत्कथं संगच्छते अहं च कथममृता भविष्यामि यदि दर्शनाभावात् तदा स्वरूपसद्भावे कथं दर्शनाभाव इति मैत्रेय्या मोहे जाते याज्ञवल्क्यः आत्मन स्वरूपसद्भावमभिप्रेत्य सर्वात्मना दर्श-नाभावस्य प्रकारमाह यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युपक्रम्य जिघ्रति अभिवदति शृणोति मनुते विजानातीत्यन्तमाह यत्र यस्यां विभागदशायां हि निश्चये तद् द्वैतमिव भवति वास्तवद्वैताभावेपि द्वैताविरुद्धमद्वैतं भवति तत्र इतरइतरं पश्यत्येवं सर्वेन्द्रियव्यापारजनकभेदक-धर्मस्य स्थूलसूक्ष्मदेहरूपस्य सत्तायां द्वैतदर्शनकथनपूर्वकं यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् जिघ्रेत् अभिवदेत् शृणुयात् मन्वीत विजानीयात् येनेदं सर्वं विजानाति तं केन विजा-नीयात् विज्ञातारमरे केन विजानीयादित्यन्तेन । यत्राविभागदशायामेतदीयभेदकधर्मस्य स्थूलसूक्ष्मदेहरूपस्य लये कटककुण्डलाकारलये तयोः सुवर्णभावे कटककुण्डलादिकार्यभूतहस्तकर्ण-

१. परलोकगमनानन्तरम् ।

भाष्यप्रकाशः ।

शोभाजननाद्यकरणवत् देहयोः विज्ञातृभावाद्ब्रह्मरूपतायां तयोरपि ज्ञानजननरूपस्वकार्यकरणाभावात् सम्यक्ज्ञानाभावः । समुद्रे लवणस्येव ब्रह्मणि लीनस्य जीवस्य स्वस्मिन् भगवतो भिन्नत्वेन प्रतीतिराहित्यं अन्यस्य ब्रह्मविदोपि तस्मिन् जीवे तथाप्रतीतिराहित्यं न्यरूपयदिति सिद्ध्यति । अत्र च भूतरूपदेहद्वयनाशो न विशेषदर्शनात् शुक्तिकारजतनाशवत् अभिप्रेतः किं तु कार्यस्य कारणे लये कार्यरूपादर्शनवदभिप्रेतः । 'यत्र त्वस्य सर्वमात्मैवाभूत्' इतिवाक्यसामञ्जस्यात् । एवं जीवस्यापि लये स्वकार्याक्षमत्वं तेन दर्शनादिकर्तृत्वाभावोपि बोध्यः । तेनेदं सिद्ध्यति यत्पूर्वं मोक्षार्थं ससाधनमात्मज्ञानमुपदिष्टं तत् जीवद्दशायामेव श्रवणादिभिः साधनीयम् । लयेऽविभागे सति तस्य कर्तुमशक्यत्वादिति । जीवस्वरूपं किमित्याकाङ्क्षा तु 'इदं वा अरे महद्भूतमनन्तमपारं विज्ञानघन एवेत्यनेन पूरिता । तेन मोक्षार्थिनो जीवस्य स्वरूपज्ञानार्थमत्र ब्रह्मोपदेशः । तथा च करणग्रामाभावात् तस्य ज्ञानाभावः । तेनांशरूपस्य विज्ञानात्मनः सत्त्वादिदानीं च करणग्रामस्यापि सत्त्वात् पूर्वोक्तैः दर्शनसाधनैस्तवामृतत्वाय परमात्मा द्रष्टव्य इति तव तस्य ज्ञानमित्युक्तं भवति। एवमधिकारपरीक्षायां ज्ञातायां तस्यै मोक्षार्थं ब्रह्मस्वरूपमुपदेष्टुं द्वितीयब्राह्मणे वागेकायनमित्यन्तं पूर्ववदुक्त्वा 'स यथा सैन्धवघनः अनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादेवं वा अरे इदं महद्भूतमनन्तमपारं कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्ति' इत्यादिपूर्ववदाह तेन जीवस्वरूपाद्विशेषो बोधितः । अयं तु यथा सैन्धवघनः अनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादिति दृष्टान्तं निरूप्य दार्ष्टान्तिकेऽनन्तरत्वमबाह्यत्वं च संगृह्णन् अग्रे कृत्स्नत्वं प्रज्ञानघनत्वं चाह इदं महद्भूतमनन्तमपारमिति पूर्ववदाह तेन ब्रह्मणो महदादिभिश्चतुर्भिर्विशेषणैरेव जीवसाम्यं प्रज्ञानघनत्वेन स्वरूपसाम्यं वस्तुतस्तु तत्र विज्ञानघनपदादत्र च प्रज्ञानघनपदात्ततः कश्चिद्विशेषोपि, अनन्तरत्वमबाह्यत्वं कृत्स्नत्वं च ततोऽधिकं तेन ब्रह्म जीवादधिकमिति बोधयन् जीवस्य सान्तरत्वं सबाह्यत्वमकृत्स्नत्वं च सूचयति तेन तस्य खिल्यतां द्रढयति भूतसमुत्थानानुविनाशप्रेत्यसंज्ञाभावात् पूर्ववदाह तत्र मैत्रेय्याः ब्रह्मनिष्ठयोर्भूतसमुत्थानविनाशयोर्न संदेहः । हृदि द्वयोर्जीवपरमात्मनोराध्यात्मिकाधिदैविकतया स्थितत्वेन जीवे तथात्वस्येव परमात्मनि तथात्वस्य सुखेन बोद्धुं शक्यत्वात् । प्रेत्यसंज्ञाभावस्तु लोकान्तरगत्यनन्तरं सम्यग्ज्ञानाभावरूपः स तु जीवेन्द्रियाणां लये सति जीवविषयो भवति ब्रह्म तु न विलीयते जीवोपि इदानीं वर्तत इति ब्रह्मविषयकः संज्ञाभावो जीवस्य लोकान्तरगमनोत्तरं कथमित्येवं मैत्रेय्या मोहे जाते तन्निवारणार्थं अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति इत्याह तत्र मात्रारूपाणां विषयाणां यः संसर्गः स ब्रह्मण्यनुपपन्नः इति तेन जीवलिङ्गेन जीवरूपमेव अत्र ब्रह्मास्तु न तु ततोधिकम् । अन्यथैतद्विरोधापत्तेरित्यत आहुः सर्वव्यवहारेत्यादि । तथा च पूर्वं जीवमुख्यप्राणलिङ्गसूत्रे जीवस्य ब्रह्माश्रितताया उक्तत्वात् जीवीयसर्वव्यवहारस्य तन्मूलकत्वात् हस्तपुस्तकसंयोगे पुरुषपुस्तकसंयोगवत् विषयस्पर्शोपि ब्रह्मण उपपद्यते अग्रिमवाक्योक्तं विज्ञातृत्वमपि ब्रह्मण एव धर्मः नान्योऽतोस्ति द्रष्टा इत्यादिश्रुतेर्द्रष्टृत्वस्य तत्रैव नियमनात् स च धर्मस्तदंशत्वात् जीवेपि भासते इति नात्र जीववाक्यशङ्केत्यर्थः । ननु तथापि मात्रासंसर्गे सत्यदर्शनं कथमुपपद्यत इत्याकाङ्क्षायामाहुः एवं सतीत्यादि । अयमर्थः । अत्र हि यद्वै तं न पश्यति इत्यादिना आत्मविषयक-

भाष्यप्रकाशः।

सर्वेन्द्रियजन्यज्ञानाभावस्य स्वरूपं प्रकारश्चोच्यते तथा हि यद्वै तन्नेत्यत्रानुस्वारस्य परसवर्णः। तं प्रज्ञानघनमात्मानं यन्न पश्यति तत्पश्यन् वै तद्द्रष्टव्यं न पश्यति द्रष्टव्यत्वेन पश्यति। ननु रूपमप्यात्मा इति द्रष्टव्येन दर्शनसत्त्वे कथमदर्शनमित्याकाङ्क्षायामदर्शनमुपपादयति नहीत्यादि। अदर्शनं लोपः विरुद्धः सर्वतो लोपः विपरिलोपः दृष्टेरिति पञ्चमी घ्राणादित्या प्रायपाठात् हि यतो हेतोः द्रष्टुर्दृष्टेर्विपरिलोपः द्रष्टुरात्मनो दृष्टेः दर्शनात् विपरिलोपः विरुद्धदर्शनसामर्थ्यकृतं अदर्शनं न विद्यते तत्र हेतुरविनाशित्वात्। ज्ञानात्मकस्य स्वरूपस्य धर्मस्य च नित्यत्वात्। तेन जीवस्य पश्यत्त्वम्। तर्हि कथमपश्यत्त्वं तत्राह न त्वित्यादि। यदन्यत्कार्यं रूपमिन्द्रियं करणं विभक्तमंशरूपं जीवतत्त्वं द्रष्टृ पश्येत् परमात्मविषयकं दर्शनं कुर्यात् तत्तु ततः परमात्मनः सकाशात् द्वितीयमन्यद्भिन्नं नास्ति तथा च दर्शनसाधनस्य द्रष्टुश्च परमात्मनः सकाशादन्यत्वाभावेन विभक्तत्वाभावेन च द्वितीयत्वाभावात् द्रष्टव्यत्वेनादर्शनं तथा च सामान्यतो द्रष्टव्यत्वेन रूपात्मकस्यात्मनो दर्शनात् पश्यत्त्वं तेन मात्रासंसर्गात् द्रष्टृदृश्यव्यवहारदशायां विशेषतः कारणत्वेनाविभक्तत्वेन द्वितीयत्वेन च अदर्शनादपश्यत्त्वमित्युभयमपि संगच्छते एवं सर्वत्रापि। ननु तर्हि ज्ञानस्वरूपत्वात् ज्ञानधर्मकत्वाच्च द्रष्टृत्वे सिद्धे स्वरूपेणैव परमात्मानं कुतो न पश्यति इत्यतः किंचित्पाठभेदेन पूर्ववदाह यद्वा अन्यदिव स्यादित्यादि तथा च स्वरूपे धर्मे च विद्यमानेपि ब्रह्मणि लीनत्वेन द्रष्टृदृश्यभावाभावात् न विजानीयादित्यर्थः। तथा च साधकस्य संसारदशातोऽग्रिमे लोकान्तरे मात्रारूपविषयसंसर्गे सत्यपि तस्य संसर्गस्यैतदात्म्येऽनुसंहिते द्वितीयत्वाभावात्सम्यग्दर्शनाभावः। मुक्तौ तु अविभागे सति द्रष्टृदृश्यत्वाभावात् सम्यग्ज्ञानाभावः। तेन ब्रह्माविभक्ततया ब्रह्मात्मकत्वेनावस्थाने ब्रह्मैव विज्ञातृ सर्वज्ञेयं तु ज्ञप्तिमात्रस्वरूपो ज्ञप्तिधर्मा च कार्यकारणशक्तिरहितस्तिष्ठति न तु सविषयज्ञानवान्। इदमेवामृतत्वमित्युपसंहरति। उक्तानुशासनासि मैत्रेयि एतावदेव खल्वमृतत्वमिति प्रव्रजति च। तत एतस्य ब्राह्मणस्य पूर्वब्राह्मणार्थनिश्चायकं इत्याशयेन सिद्धमाहुः अतो वाक्येत्यादि। एवं प्रकृतिकारणवादे निरस्ते यो याज्ञवल्क्येनोक्तः परमात्मा स मैत्रेय्या श्रुत इति पूर्वोक्तरीत्या मननं निदिध्यासनं च त्वया कर्तव्यं जीवद्दशायां ततः साधनपरिपाकेन दर्शने मुक्तौ जीवस्य विज्ञातृभावरूपो ब्रह्मभाव इति फलं सिद्ध्यति। एतदेव तत्त्वदीपे तत्प्रकाशे चाचार्यैः—

'व्यापकत्वश्रुतिस्त्वस्य भगवत्त्वेन युज्यते।
आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकोटयः।
प्रतीयेरन् परिच्छेदो व्यापकत्वं च तस्य तत्' ॥

इत्येनेनोक्तं व्याख्यातं च। किं चायमेव संवादो न प्रेत्यसंज्ञास्तीति प्रेत्यसंज्ञाभावं बोधयन् एतावदेव खल्वमृतत्वमिति मोक्षस्यैतावत्त्वं च बोधयन् निःसंबन्धो निरानन्दो मोक्ष इतिवादमुत्थापयति तथा आत्मनः प्रज्ञानघनं नित्यमेकरसं स्वरूपं बोधयन् अनुच्छित्तिधर्मपदस्याविनाशिपदव्याख्यानत्ववादिमते निर्धर्मकनिर्विषयकनित्यज्ञानात्मकस्वरूपेणावस्थानं मोक्ष इतिवादमुत्थापयति सिद्धान्ते तु आनन्दधर्मस्य प्रियत्वस्य परमात्मनिष्ठत्वात् परमात्मनश्च सर्वत्रैव जीवेप्यन्वयात् सोपि धर्मो मुक्तावभिव्यज्यते। अनुच्छित्तिधर्मपदं च धर्मनित्यत्ववाचकमिति पूर्वं व्याख्यातम्। तथा सति जीवीयज्ञानपरिमाणादीनां धर्माणां नित्यत्वात् निर्विषयकज्ञानस्वरूपः सविषयज्ञानधर्मा

'सर्वे एवात्मानो व्युच्चरन्ति' 'एष ह्येवानन्दयाति' इत्यादिश्रुतिसहस्रैर्निःसंदिग्धै-र्ब्रह्मणः स्वरूपं कार्यमंशाश्च प्रतिपादिता इतीदमपि वाक्यं तत्परमेवोचितम् ।

भाष्यप्रकाशः ।

लयः श्रावणाच्चाणुः ब्रह्माविभक्तत्वादनु च ब्रह्मधर्मो ब्रह्मभूतो मुक्ताववतिष्ठते । इत्येतद्बोधनाय निबन्धे तथोक्तमिति ज्ञेयम्] एवमन्यत्रापि । अतः सर्वोपनिषदनुरोधेनैवास्याप्यर्थस्य वक्तुमुचितत्वात् तासु च, तमेव विदित्वा अतिमृत्युमेतीत्यवधारणदर्शनादत्रापि श्रवणादिविधीनां ब्रह्मविषयत्वमेव मन्तव्यम् । तथा अत्रोक्तं यथार्द्रैधाग्नेरित्यादिदृष्टान्तसिद्धं कारणत्वं समुद्रादिदृष्टान्तसिद्धं प्रलयाधारत्वं च तदैव संगच्छेत यदा प्रियं ब्रह्मैवात्राद्रियेत । आनन्दद्ध्येवेति सावधारणश्रुत्या तत्रैव तन्नियमनात् । नच जीव एव ब्रह्मेति युक्तम् । सर्वे एवात्मानो व्युच्चरन्तीति श्रुतिविरोधात् । अमृतत्वरूपं फलमपि तत एव । एष ह्येवानन्दयातीति सावधारणश्रुतेः । अत

रश्मिः ।

ब्राह्मणद्वयेपि । **अस्यापीति** मैत्रेयीब्राह्मणद्वयस्यापि । **तमेव** विदित्वेति भाष्यं विवृण्वन्ति **स तासु चेति** । मैत्रेयीब्राह्मणेन सहैक्यतां वक्तुं तद्विभजन्ते **अत्रापीति** । ननु प्रियत्वेनोपक्रमात् 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इति कोशात् मैत्रेयीब्राह्मणद्वयस्य भक्तिप्रतिपादकत्वेपि एकवाक्यताया उपात्ताया महानारायणोपनिषदः कथं भक्तिप्रतिपादकत्वमिति चेन्न । तमैवेत्यत्रैवकारो नान्यथा व्याख्येयः तं विदित्वैवेति किं तु तमात्मानमेव विदित्वेति ततश्चात्मज्ञानं तु भक्त्या । भक्त्या जानाति चाव्ययमिति श्रुतेः । 'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः' इति गीतायाश्चेति भक्तिरर्थापत्तिलभ्येत्यदोषात् । न च भक्त्या ज्ञानं कुतो नेति शङ्क्यम् । 'नायमात्मा बलहीनेन लभ्यः' इति मुण्डके बलपदवाच्यभक्तिहीनालभ्यत्वोक्तेः । सिद्धान्तमुक्तावल्यां 'ज्ञानाधिको भक्तिमार्ग एवं तस्मान्निरूपितः' इति तट्टीकायां च प्रभवः उपपादयांचक्रुः मृत्युमतिक्रामतीति मृत्युमतिक्रान्तो मोक्षः । ब्रह्मविषयत्वमिति एवकारेण विभूतिव्युदासः । भक्तिहंसेऽयं विषयः स्पष्टः । आर्द्रैधाग्नेरिति व्याकृतम् । **समुद्रादीति** स यथा सर्वासामपा९ समुद्र एकायनमेव९ सर्वेषां स्पर्शानां त्वगेकायनमेव९ सर्वेषां गन्धानां नासिके एकायनमित्यादि । **आनन्देति** । ननु प्रियं प्रीतिविषयमानन्दः सुखमिति कथं पर्यायतेति चेन्न तत्तु समन्वयादित्यधिकरणे ब्रह्मणोस्तिभातिप्रियत्वेनान्वयोक्तेः । अस्ति सत्यधर्मः, भाति ज्ञानधर्मः, प्रियत्वमनन्तानन्दधर्म इति सिद्ध्या प्रियत्वेनोपक्रान्तधर्मप्रियत्वस्यानन्दे सत्त्वादानन्दस्य पर्यायत्वम् । **तत्रैवेति** प्रिये ब्रह्मण्यानन्दरूप एव भूतकर्तृत्वादिनियमनात् । **सर्वे** एवेति भाष्यं विवरीतुमाहुः **न चेति** । **आत्मान** इति । आत्मानोऽवतारा जीवास्तु पृथगुक्ता व्युच्चरन्त्येवेति माध्वाः । तद्यत्रात्मजीवयोः पृथग्व्युच्चरणं श्रुतं तत्रास्त्येव । भाष्यं तु केवलात्मव्युच्चरणबोधिका श्रुतिस्तद्विषयमात्मपदं यत्रात्मजीवोभयविषयं तच्छ्रुतिसंग्राहकं च । **अमृतत्वेति** उपसंहारोक्तामृतत्वरूपम् । तत इति ब्रह्मणः 'फलमत उपपत्तेः' इति व्याससूत्रात् । अमृत आनन्द इति भाष्यादाहुः **एष ह्येवेति** । एष आकाश आनन्दः । आनन्दममृतं करोतीत्यर्थः । **अत** इति । तमेवेति भक्तिरसविषयं ब्रह्मणो रूपं तत्पदेनोक्तं प्रसिद्धं सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्या । नन्वत्राम्भस्यपारे भुवनस्य मध्ये इति महानारायणोपनिषदो रामानुजाचार्यभाष्येण रसो वै स इति श्रुत्यनुवर्तितरसपदीयानारायणोऽनात्मा तत्पदार्थ इति चेन्न पुरुषसूक्तोक्तसाकारब्रह्म तत्पदार्थः सान्निध्यात् । तस्य च दशरसरूपत्वं सर्वरस इति श्रुतेः विरुद्धसर्वधर्माश्रयत्वेनानन्तरूपत्वेन

सर्वव्यवहारस्य तन्मूलकत्वेन पूर्वमुक्तत्वात् । विषयस्पर्शो विज्ञातृत्वमपि तस्यैव ।

भाष्यप्रकाशः ।

उदाहृतजातीयैः श्रुतिसहस्रैस्तथा प्रतिपादनादिदमपि वाक्यं ब्रह्मपरमेवोचितमित्यर्थः । ननु सत्यमेवं, तथापि मात्रासंसर्गस्त्वस्य भवतीति विषयसंसर्गरूपेण लिङ्गेनात्र जीव एव वक्तव्योऽन्यथा तद्विरोधस्य दुर्वारत्वादित्यत आहुः सर्वेत्यादि । पूर्वमिति । जीवमुख्यप्राणलिङ्गसूत्रे । तथाच जीवस्य ब्रह्माश्रितत्वाज्जीवधर्मा ब्रह्मण्युच्यन्त इति विषयस्पर्शोऽप्युपपद्यते । न त्वेतावतात्र जीववाक्यत्वम् । विज्ञातृत्वं तु ब्रह्मधर्म एव । नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेः ।

रश्मिः ।

च रसरूपत्वमेतस्य ज्ञानं तु भक्त्येत्युक्त्यान्यनिष्ठभक्तिरसविषयं च शास्त्रार्थनिरूपकद्वितीयस्कन्धनवमाध्यायोक्तमिति आनन्दाद्ध्येवेति कार्यं माहात्म्यज्ञानाय तेन सुबोधिन्युक्तस्य—

'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोधिकः ।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा' ॥

इति श्रुतिवाक्यद्वयेन सिद्धम् । आनन्दस्य प्रियशिरस्त्वादिकमानन्दमयाधिकरणे प्रपञ्चितम् । सर्वं एवात्मान इत्यंशाः आत्मपदवाच्या जीवाः अंशो नानाव्यपदेशादिति सूत्रात् । एष ह्येवानन्दयातीति फलमानन्दस्य फलत्वात् । एतच्चतुष्टयादित्यर्थः । सजातीयैरिति सजातीयत्वं च भक्तिरसविषयब्रह्म-भक्तिजनकमाहात्म्य-जीव-फलेतिचतुष्टयप्रतिपादकत्वेन । श्रुतीति यथा अन्तस्तद्धर्माधिकरणे छान्दोग्ये प्रथमप्रपाठके य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इति स एष सर्वेभ्यः पाप्मभ्य उदित इति भक्तिजनकमाहात्म्यं, उदेति ह वै सर्वेभ्यः पाप्मभ्य इति फलम् । य एवं वेदेति जीवः । तमेव विदित्वेति समानम् । यथा तल्लिङ्गाधिकरणे छान्दोग्ये प्रथमप्रपाठके सर्वाणि ह इमानि भूतानि आकाशादेव समुत्पद्यन्त इति भक्तिजनकमाहात्म्यं परोवरीयसो ह लोकान् जयति इति फलं य एतदेवं विद्वान् परोवरीयांसमुद्गीथमुपास्ते इति जीवः । तमेव विदित्वेति समानम् । यथातिदेशाधिकरणे तत्रैव कतमा सा देवता प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमुज्जिहते इति भक्तिजनकमाहात्म्यं तांश्चेदविद्वान् प्रस्तोष्यः इति जीवः, मूर्धा ते व्यपतिष्यदिति फलम् । लङ् । न त्वं प्रस्तोष्यसि न ते मूर्धा व्यपतिष्यतीत्यर्थः । तमेव विद्वानिति समानं इत्येवं श्रुतिसहस्रैरित्यर्थः । तैश्चासंदिग्धैः निःसंदिग्धत्वमिति भाष्यात् पूर्वं संदिग्धत्वेपि केषुचिच्छ्रुतिवाक्येषु न्याय(सूत्र)प्रापणानन्तरमसंदिग्धत्वमिति श्रुतिसहस्राणां निःसंदिग्धैरितिभाष्ये विशेषणं तथा भाष्ये ब्रह्मणः स्वरूपं तमेव विदित्वेति श्रुत्युक्तं भक्तिविषयं तं लोकवेदप्रसिद्धं पुरुषोत्तममिति पुरुषोत्तमरूपम् । ॐ स्वराट् जन्माद्यस्य यतोन्वयादितरतश्चेति वाक्यात् । इमानि भूतानीति कार्यं प्रसिद्धमंशा जीवा इति प्रसिद्धं चकारेण फलम् । तत्परं ब्रह्मपरम् । प्रकृते । तद्विरोधस्येति विषयवाचकमात्रापदवाच्यमात्रासंसर्गविरोधस्य । सर्वेत्यादीति सर्वो यो 'व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः' अहंममेति मतिः अहमित्यस्मत्प्रत्ययः ममेत्यस्मत्प्रयत्नगोचरसंबन्धिनो जीवजडधर्मास्ते तत्रैव 'जीवमुख्यप्राणलिङ्गादिति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्' इति सूत्रभाष्ये उद्दिष्टास्तद्विषयिणी मतिर्या सापि व्यवहारस्तस्य ब्रह्म मूलं परंपरा च यस्यार्थात्साक्षात्कारणं व्याख्यानात् स तन्मूलको व्यवहारःस्तत्वेनेत्यर्थः । अत्रेति मैत्रेयीब्राह्मणद्वये । विज्ञातृत्वमितिभाष्यं विवृण्वन्ति विज्ञातृत्वमिति । अत इति ब्रह्मणः । भाष्ये । तस्येति साकारब्रह्मणः । अत्र पक्षे तन्मूलकस्येनेति भाष्यस्य तानि ब्रह्मणः स्वरूपकार्यांशफलानि मूलानि कारणानि यस्य व्यवहारस्य स

भाष्यप्रकाशः ।

स च धर्मस्तदंशत्वाज्जीवेऽपि भासत इति न तेनापि जीववाक्यत्वशङ्का । ननु यथात्र लयाधिकरणदृष्टान्तनिरूपणोत्तरं, स यथा सैन्धवघन इत्यादि श्राव्यते, तथा पूर्वस्मिन् मैत्रेयीब्राह्मणे सर्वासामपामित्याद्युत्तरं, 'स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीत लवणमेव' इति श्राव्यते। खिल्यश्च शकल इति ब्रह्मांशस्तत्र प्रतीयत इतीहापि जीव एवास्त्विति चेत् तत्राहुः एवं सतीत्यादि । सर्वस्यापि व्यवहारस्य ब्रह्ममूलकत्वे सिद्धे सति यदत्रोक्तं यत्र वा अन्यदिव स्यादित्यादिना कर्मकर्तृभावराहित्यं, तदपि, यद्वै तन्न पश्यतीत्यादिना जीवस्य स्वरूपतो धर्मतश्च नित्यत्वं प्रतिपाद्य विभक्तत्वनिषेधेनाविभागानुसंधानदशायां द्वितीयस्य विभक्तत्वेन दर्शनं निषिद्ध्य सर्वस्यात्मभावं च

रश्मिः ।

तथोक्तः तत्त्वेन। अयमर्थः । चत्वारोर्थाः प्रतिपाद्यन्त इति नवाध्यां वेदटीकायां कारिकासूपपाद्यस्माभिः अतश्चतुर्भ्योर्थेभ्यः नातिरिक्तं किंचिदिति सर्वव्यवहारस्य तन्मूलकत्वम् । तेन पूर्वं सर्वत्र प्रसिद्धोपदेशादित्यधिकरणेऽनुगमाधिकरणेवेत्यर्थः । प्रलयेति स यथा सर्वासामपां समुद्र एकायनमित्यादिप्रलयाधिकरणदृष्टान्तः । इत्यादीति स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादेवं वा अरे इदं महद्भूतमनन्तमपारं कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यन्ताः श्रुत्यर्थाः स्पष्टाः । कर्मकर्त्रीति यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यत्र तत्कर्तृकं कर्माणमिति कर्मकर्तृभावस्तद्राहित्यम् । केनेति करणभावराहित्यमुपलक्षणविधया द्रष्टव्यम् । इतः पूर्वं प्रमेयमाहुः तदपि यद्वैतमिति यत् यतश्चक्षुस्तमात्मानं न पश्यतीत्यर्थः । स्वरूपतः इति स्वतः । धर्मत इत्यविनाशित्वतः । यद्वै तन्न पश्यति पश्यन् वा इत्यादिना । विभक्तेति न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यत्पश्येदिति विभक्तत्वनिषेधः । तत आत्मनोन्यद्विभक्तत्वं नास्तीत्यर्थात् अन्यन्नास्ति विभक्तं नास्तीत्यन्वयः । अविभागेति विभागाननुसंधानदशायामिति नोक्तम् । अविभक्तं च भूतेषु इत्यविभागस्य ग्राह्यत्वात् । द्वितीयस्येति द्वितीयत्वेन द्वितीयं चक्षुरादीन्द्रियं तद्द्वितीयत्वेन वर्तते एव । सात्त्विकज्ञानाभावात् । अन्यत्वेन वर्तते तत एव अतो विभक्तमिव च स्थितमिति गीता तादृशविभक्तत्वेन दर्शनं निषिद्ध्य । न चान्यत्वेन द्वितीयत्वेन कुतो न दर्शनं निषिद्धमिति शङ्क्यम् । ब्रह्मणो द्वितीयत्वमिन्द्रियेषु अविभागानुसंधानदशायामस्ति अन्यत्वं च । यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यत्रात्मभावानन्तरं न किमप्यस्तीत्यनुक्त्वा केनेति करणनिषेधः कमिति कर्मनिषेधश्च ज्ञापयति श्रुतिश्चात्मैवेदमग्र आसीत्पुरुषविध इति । विधापदादिन्द्रियेषु द्वितीयत्वमिन्द्रियेष्वन्यत्वं चास्ति सप्रतियोगित्वाल्लीलायाः 'अन्तरा भूतग्रामवत् स्वात्मनः' इति व्याससूत्राच्चात्र आत्मत्वेन साजात्ये 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति फलाध्यायसूत्रात् । अतः प्रतियोगिसजातीयं द्वितीयम् । एकमेवाद्वितीयं ब्रह्मेति तु स्वगतद्वितीयव्यूहेतरविषयं गोपालतापिनीये कथं चतुर्भिरेको देवो भवेदिति प्रश्ने एकमेवेति श्रुतिप्रवृत्तेः । व्यूहानां परस्परं द्वितीयत्वमस्त्येव अन्तरा भूतेति सूत्रोक्तो भेदोपि योगमाया । मायाभिन्नमायासदृशी, अतम इति श्रुतौ तमोभिन्नं तमःसदृशमिति पर्युदासार्थकनञोङ्गीकारात् । न चान्यत्वद्वितीयत्वे इन्द्रियेषूक्ते इति वासुदेवादिव्यूहेषु कुत उक्ते इति वाच्यम् । तरुणोगोपवेषोभ्राभोऽनादिभक्तमनोरथेन फलाध्यायोक्तलीलास्थेनैवादनादिना भक्तमनोरथपूरणायेच्छाविषयीकृतः सकललीलासामग्रीरूप-

एवं सति सर्वमेव संगतं भवेत् । अतो वाक्यान्वयान्न जीवपरत्वं येन प्रकृतिवादः स्यादिति ॥ १९ ॥

भाष्यप्रकाशः ।

बोधयित्वोक्तम् । अतस्तदपि सर्वस्य जीवजडरूपस्य वस्तुतो ब्रह्मत्वादेव संगतं भवेत् । यच्च तत्रोक्तं खिल्यत्वं जीवस्य संज्ञाभावादिकं च तदपि संगतं भवेत् । तत्रापि प्रियत्वरूपस्य प्रकृततावच्छेदकस्य महावाक्यशेषत्वादीनां च तुल्यत्वात् तस्यापि ब्रह्मण्येव तात्पर्यादविरुद्धं भवेत् । तत्र यद्, यद्वै तन्न पश्यतीत्यादिवाक्यराहित्यं पाठभेदादिकं च तदपि मैत्रेय्या अधिकारपरीक्षार्थम् । अत एव तत्र, उक्तानुशासनासीति नोक्तम् । पुनरुपदेशस्य चिकीर्षितत्वात् संन्यस्तमपि न इह तदुभयमुक्तमतोऽर्थभेदेऽपि तात्पर्यैक्यादैकार्थ्यम् । एतस्य तदर्थनिश्चायकत्वादस्यैव च प्राबल्यम् । तदेतद्धृदि कृत्वा सिद्धमाहुः अत इत्यादि ॥ १९ ॥

रश्मिः ।

संकर्षणव्यूहः तस्य तत्तल्लीलासामग्रीरूपेण भवने प्रद्युम्नव्यूहः अयं धर्मो यद्भक्तमनोरथपूरणं तदेव वासुदेवव्यूहरूपं वासुदेवस्य मोक्षत्वात् लोकवत्तु लीलाकैवल्यमिति व्याससूत्रात् । इति चतुर्व्यूहानुपक्रम्यैकमेवाद्वितीयमिति श्रुतिसंनिवेशात् तथा चाविभागदशायां भेदरूपान्यत्वार्थो विभागजन्योऽद्वितीयत्वं जनयति तत्रान्यत्वं योगमाया 'योगमायामुपाश्रितः' इति वाक्यात् । विभागश्च विभक्तमिवेति वाक्योक्तः द्वितीयत्वं च स्वरूपे प्रतीतं विभागानुसंधानदशायां तु माया भिदारूपा औपाधिकं द्वितीयत्वं चेति । इदमात्मा न पश्यति विभागजन्ययोगमायाजन्यत्वात् । भक्तिमार्गे द्वितीयस्कन्धनवमाध्यायोक्ते नित्यलीलावादोक्ते चात्मनि । न तु विभक्तत्वमिति विभक्तमिव च स्थितमिति गीतायाः । किं च इदं सर्वं यदयमात्मेति ब्रह्म तं परादात् योऽन्यत्रात्मनो ब्रह्म वेदेत्युक्त्वोक्तम् । तदपि यद्वै तन्न पश्यतीत्यादिभिरिन्द्रियाणां सर्वेषामात्मत्वं बोधितम् । अत्र सर्वपदं सर्वेषां नाम्नि शक्तम् । अतोपि द्वितीयत्वं भेदश्चातोपि द्वितीयत्वेनान्यत्वेन च दर्शनं न निषिद्धं तदेतदाहुः **सर्वस्येति** चक्षुरादेः । अग्रे सर्वत्र ततोन्यद्विभक्तं यज्जिघ्रेत्ततोन्यद्विभक्तं यद्रसयेदित्येवमात्मत्वं बोधयित्वेत्यर्थः । किमनेन सिद्धमित्याकाङ्क्षायामाहुः **अतस्तदपीति** । सर्वपदात्सर्वस्य चान्यत्वद्वितीयत्वाभ्यां विनाऽनिरूप्यत्वात् । **तदपि** कर्तृकर्मभावराहित्यमपीत्यर्थः । **एवेति** प्रकृतिव्युदासकं न प्रकृतित्वात् । **संगतमिति** इदं सर्वं यदयमात्मेति श्रुतौ सर्वस्यात्माभेदोक्तेः । न च प्रकृत्यभेदोस्त्विति शङ्क्यम् । गौणश्चेन्नात्मशब्दादिति व्याससूत्रात् । अत इदꣳसर्वमित्यत्रात्मपदं न प्रकृतिप्रतिबिम्बवाचकं गौणत्वापत्तेः, एवमसंगतं भवेत् । ब्रह्मपरिग्रहगुणमाहुः **यच्चेति** आदिपदेन मात्रासंसर्गस्त्वस्य भवतीत्युक्तं मात्रासंसर्गः तदपि आश्रितत्वादिह तद्योगात् संगतं भवेत् । प्रकृतिपरिग्रहे तु सत्त्वरजस्तमसां साम्यावस्थायां प्रकृतावस्वच्छायां प्रतिबिम्बासंभवेन तद्धर्मानाश्रितत्वात् । उपक्रमस्याप्रतिबिम्बसाधारण्यमाहुः **तत्रापीति** ब्रह्मण्यपि । तुल्यत्वं 'अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः' इति । महावाक्यशेषत्वादयो अत्रैव पूर्वमुक्ताः । तत्रात्रोक्तप्रियस्य ब्रह्मणो हि प्रतिपादकस्य ब्राह्मणद्वयस्य महावाक्यवेदरूपस्य शेषत्वं तादर्थ्यं भक्तार्थब्रह्मप्रतिपादकत्वेन पूर्णतार्थत्वमिति यावत् । अन्यथा ज्ञानत्वेन प्रसिद्धस्वयंप्रकाशत्वप्रतिपादकत्वेन न्यूनताख्यनिग्रहस्थानापत्तेः । **तत्रेति** द्वितीये ब्राह्मणे । **उपदेशस्येति** षष्ठ इत्यर्थः । षष्ठस्य तात्पर्यानुक्तौ तात्पर्यमाहुः **एतस्येति** तेन

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

नियतधर्मवादिनामपि मतेन प्रकृते सिद्धान्तं वक्तुं पक्षान्तराण्याह । तत्र ब्रह्मवादैकदेशिवादाः सन्ति । तत्र जीवो नाम स्वस्य भोगनिष्पत्त्यर्थं स्वांशो भगवता कृतो विस्फुलिङ्गवदित्याश्मरथ्यो मन्यते । अनादिसिद्ध एव जीवश्चैतन्यमात्रं शरीरादिसंघाते प्रविष्ट इति चिति तन्मात्रेण प्रवेशो च मोक्ष इति च औडुलोमिराचार्यः । काशकृत्स्नस्तु आसत्त्या विषयभोक्तृरूपं भगवत एव जीव इति । तेऽपि स्वमतानुसारेणात्र परिहरन्ति । तत्र पुत्रादिप्रियसहवचनाज्जीवप्रकरणमेवैतदित्याशङ्क्य जीवोपक्रमस्यान्यत् प्रयोजनमित्याह । प्रतिज्ञासिद्धेरिति षष्ठी । तस्या लिङ्गमंशत्वाज्जीवस्य तदभेदेनोपक्रमः प्रतिज्ञासिद्धेर्लिङ्गं भवति । एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञा ।

भाष्यप्रकाशः ।

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥ सूत्राण्यवतारयन्ति नियतेत्यादि । अत्रोक्तं प्रियत्वं जीवधर्म एवेतिवादिनां मतेन मैत्रेयीब्राह्मणे प्रकृतिवादनिरासरूपं सिद्धान्तं वक्तुं संमत्यर्थं पक्षान्तराण्याहेत्यर्थः । अत्र आश्मरथ्यमते श्रुतिर्भाष्य एव सूचिता । औडुलोमिमते तु,

'यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं यन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' ॥

इति मुण्डके श्रुतिर्मूलं बोध्यम् । नामरूपेति स्वीये नामरूपे । नदीदृष्टान्ताच्च भिन्नत्वं शरीरे प्रवेशश्च नामरूपव्याकरणश्रुत्या । चैतन्यात्मकत्वादिकं तु भाष्य एव स्फुटम् । काशकृत्स्नमतेपि व्याकरणश्रुतिः 'सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाऽभिवदन्यदास्ते' इति पुरुषसूक्तश्रुतिश्च मूले इति बोध्यम् । पुत्रादिप्रियसहवचनादित्यादि पुत्रादिरूपा ये लौकिकाः प्रियास्तैः सह वचनादत्रात्मनोऽपि लौकिकमेव प्रियत्वं प्रतीयत इति जीव एवात्रात्मपदेन परामृश्यते । अतो जीवप्रकरणमेवेदमित्याशङ्क्येत्यर्थः । तदभेदेनेति ब्रह्माभेदेन । एकविज्ञानेन सर्वविज्ञानमिति

रश्मिः ।

'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत्' ॥

इति व्यापकजीवो जीवन्मुक्तोपि आध्यात्मिकादित्रितयविदाश्रयः प्रकृतिरपि न समवायिनी किं तु प्रियत्वरूपब्रह्मधर्माविष्टो जीव इति भगवानेवाश्रयः इति सिद्धम् ॥ १९ ॥

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥ एवेति निराकारे आश्मरथ्योररीकृते द्वितीयपादे प्रियत्वं बाधितम् । नियतो जीवधर्म इत्येवकारः । भाष्ये । सन्तीति कृष्णद्वैपायनमतादेकदेशविदः परे । 'वदन्ति ते यथाप्राज्ञं न विरोधः कथंचन' इतिपाठात् । स्वस्येति निराकारस्य द्वितीयपादे आश्मरथ्यमतकथने उक्तत्वात् । व्यासमते स्वसिद्धान्ते तु स्वस्य 'अनश्नन्नन्योभिचाकशीति' इति श्रुतेर्जीवस्यैव भोगः । भगवतेति निराकारेणेत्येव साकारेणेति वार्थः । तदभेदेनेति क्व जीवस्यैवोपक्रम इति शङ्क्यम् । गौणमुख्यन्यायबाधात् प्रतिज्ञासिद्धेश्च । प्रकृते । जीवात्मकथन-

तस्यैवाग्रे व्युत्पाद्यमानत्वात् तस्या एतत् साधकम् । यथा जीवो भगवानेवं जड इति । एवमाश्मरथ्यो मन्यते । श्रोतव्यादिविषयस्तु भगवानेव । तस्मान्नियतधर्मजीववादेऽपि न जीवोपक्रमो दोषः ॥ २० ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥

लिङ्गमित्यनुवर्तते । यदत्र जीवोपक्रमेण भगवतः श्रवणादिकमुक्तं तत् संसारभावादुत्क्रमिष्यतो जीवस्य लिङ्गम् । मुक्तौ जीवो भगवानेव भविष्यतीति ज्ञापकम् । अन्यथा सैव कथममृता भवेत् । इतिशब्दो हेतौ । स्त्रिया विश्वासार्थं

भाष्यप्रकाशः ।

मैत्रेय्यात्मनि वा अरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति वाक्योक्तं तत् । प्रतिज्ञासिद्धेरिदं कथं लिङ्गमित्यत आहुः तस्यैवेत्यादि । तस्यैवेति सर्वत्वस्यैव । तस्या एतत्साधकमिति । उपक्रमे जीवात्मकथनं प्रतिज्ञायाः साधकम् । अन्यथा एतद्व्युत्पादनकोटौ जीवस्या[स्फुटतयाऽ] कथनाज्जीवज्ञानाभावे प्रतिज्ञा बाधिता स्यात् । कृते तूपक्रम उल्लेखे सोऽपि ब्रह्मक्षत्राद्यभिमानितया तत्र निविशेदत स्तथेत्यर्थः । [यथा जडे ब्रह्मकार्यत्वाद्ब्रह्मत्वोपचार एवं जीवेपि ब्रह्मांशत्वा ब्रह्मोब्रह्मत्वोपचार इत्यर्थः ।] तथा सत्यस्मिन् मते प्रतिज्ञैवास्य ब्रह्मणः प्रकरणत्वनियामिकेति ज्ञेयम् । एवमेवाग्रिमे मतद्वयेऽपि ॥ २० ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥ एवंभावादित्यस्य विवरणं संसारभावादिति । एवं कथनस्य मुक्तिप्राप्तिलिङ्गत्वे किं गमकमित्यत आहुः अन्यथेत्यादि । चिद्रूपे ब्रह्मणि जीवस्य प्रवेशो हि तन्मते मोक्षः । ब्रह्म तु चिद्रूपं व्यापकमितीदानीमपि जीवस्तत्र प्रविष्टोऽस्त्येव । परं संघातान्तरायेण । यथा कुसूलस्थं वस्तु गृहे । तद् यदा ततो बहिः

रश्मिः ।

मिति तदभेदेनेत्येव । अन्यथेति जीवात्मकथनत्वे प्रकारे । बाधितेति सर्वविज्ञानाभावप्रसक्तेरिति भावः । उल्लेख इति आपाततः । प्रियपदसमभिव्याहारेण जीवस्योल्लेखे सोपि आत्मापि पूर्वोक्तब्रह्मक्षत्राद्यभिमानतयेत्यादिः । तथेति ब्रह्माभेदेन जीवात्मकथनत्वम् । अत्र पाद्मेन विरोध इत्युक्तं तत्तट्टीकाविषयकम् । प्राज्ञपदान्न तुरीयविषयकं च । किं च आचार्यवान् पुरुषो वेदेति छान्दोग्यादेकदेशिमतानि तत्तद्भाष्यनियतानि । एवं च तत्तदर्थानां पदस्यान्यस्य संनिधेः कारणाद् बोधे श्रुतिसिद्धार्थबोधे बाधकाभावः । यथेह सहकारतरौ मधुरं पिको रौति अत्र पिकपदशक्तिग्रहः । तथात्र वाल्लभं भाष्यमिति । सिद्धमाहुः तथा सतीति । एवमेवेति यथात्वेपि प्रतिज्ञाया विषयवाक्योक्ताया अन्वयो नोक्त इति तत्स्मारणम् ॥ २० ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥ संसारभावादिति । एवमिति शब्देन संसारबोधः स चेत्थम् । संसारिणो विषयवाक्ये मात्रासंसर्गस्त्वस्य भवतीति पूर्वमुक्तत्वेन यत्र वा अन्यदिव स्यादित्यादिना यत्रेति संसार इत्यर्थात् । यत्र त्वस्य सर्वमात्मैवाभूत् इत्यत्र यत्रेति मोक्षे ज्ञाने इत्यर्थात् । तत्रैवंभावादुत्क्रमिष्यतो जीवस्य लिङ्गमित्येवंभावात् इत्यस्य संसारभावादित्यर्थः । एवमित्यस्य पूर्वोक्तादित्यर्थात् । एवंभावात्पूर्वोक्तभावादित्यर्थः । पूर्वोक्तः संसारः । भाष्ये । जीवस्येत्यस्याज्ञादिसिद्धस्येत्यर्थः । औडुलोमिमते तथेति । अनादिसिद्धत्वं तु आर्त्विज्यमिति सूत्रे

गौणप्रियवैराग्यार्थं च जीवोपक्रमः कर्तव्य एवेति औडुलोमिराचार्यो मन्यते। तस्माद् भिन्नजीवपक्षेऽपि नात्र दूषणम् ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

लिङ्गमित्येव। भगवत एवावस्था जीव इति। अतः संसारदशायामपि जीवो ब्रह्मेति नात्रोत्क्रमणमुपचारो वा। अन्यथा कथमात्मनस्तु कामाय सर्वं

भाष्यप्रकाशः ।

प्रक्षिप्यते तदा गृहस्थं भवति। तथा जीवोऽपि संघाताद् बहिर्भूय यदा साक्षाच्चित्संबद्धः स्यात् तदा मुच्येतेति संघाताद् भिन्नत्वबोधनार्थमेव जीवोपक्रमः। सा हि मोक्षेच्छुर्विद्यां पृच्छति। तद् यदि तस्यै मोक्षयोग्यं जीवस्वरूपं न ज्ञापयेत् सैव कथममृता भवेत्। अतो, येनाहं नामृता स्यामित्यादिकं तद्वाक्यमेवैवं कथनस्य मुक्तिलिङ्गत्वे गमकमित्यर्थः। तदेतदाहुः इतिशब्द इत्यादिना। दूषणमिति प्रकृतिवादापत्तिरूपं दूषणम् ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥ जीवस्य ब्रह्मावस्थाविशेषत्वबोधनार्थं जीवोपक्रम इत्यत्र किं गमकमित्यपेक्षायामाहुः अन्यथेत्यादि। यदि हि जीवस्य ब्रह्मावस्थाविशेषत्वमत्र

रश्मिः ।

ऋतौ यजतीति ऋत्विगिति व्युत्पत्त्यार्त्विज्यमनादीति। मुक्ताविति ज्ञाने। 'आर्त्विज्यमित्यौडुलोमिः तस्मै परिक्रीयते' इति तृतीयाध्यायस्य चतुर्थचरणे 'चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः' इति चतुर्थेऽध्याये चतुर्थपादे। **ज्ञापक**मिति एतेन प्रतिज्ञापि व्याख्याता। **प्रकृते**। **सैवेति** एवकारेण कात्यायन्या व्यवच्छेदः याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः। **अमृते**ति संघाताद्भिन्न आत्मा मैत्रेय्या अमृता मुक्तिर्हित्वान्यथारूपमिति वाक्यात्। **नामृते**ति अत्र ना पुमान् भगवत्सेवानुकूलत्ववत्यहमिति सिद्धान्ते वर्णागमोन्यत्र नकारो वर्णः। यद्वा न अमृता स्याम् किं तु शरीरे मृतेऽमृता स्यामित्यर्थः। टीकायां तु येनाहममृता न स्यां तेन कर्मणा किं कुर्याम् किं तु यदेवामृतत्वसाधनं मे मह्यं ब्रूह्युपदिशेत्यर्थः। **मुक्ती**ति। लिङ्गत्वं हेतुत्वम्। **भाष्ये**। **स्त्रिया इति** 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा' इति वाक्ये विश्वासात् त्रयी न श्रुतिगोचरेत्यर्थात्। **गौणे**ति स्वोत्कृष्टत्वज्ञानस्य स्वस्मिन् वैराग्यजनकत्वनियमेन गौणमुख्यन्यायमनादृत्य गौणेत्यादिः। **भिन्ने**ति संघाताद्भिन्नेत्यर्थः। अनादिसिद्धजीव इति ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥ अवस्थितिरवस्था संसारावस्था इति यावत्। **भाष्ये**। अवस्थितेरवस्थाया लिङ्गं हेतुः विषयवाक्ये उपसंहारेण प्रकारेणेति इतिशब्दार्थ इत्याहुः **लिङ्गमित्येवे**ति। कस्यावस्थेत्याकाङ्क्षायामाहुः **भगवत एवे**ति। प्रतिज्ञासूत्राद्ब्रह्मेत्यनुवृत्त्या भगवतः एवकारेण मायाव्युदासः। **अवस्थे**ति मात्रासंसर्गस्त्वस्य भवतीत्युक्त्वाऽऽसत्त्याविषयभोक्तृरूपावस्था जीवः। पूर्वसूत्रे दोषमाहुः **अत** इति उपक्रमोपसंहाराभ्यामित्यर्थः। **नात्रोत्क्रमण**मिति विषयवाक्ये यत्र त्वस्य सर्वमात्मैवेत्यादिना ज्ञानोक्तौ उत्क्रमणं नोक्तमत एव न ज्ञानोपचारः

प्रियं भवतीति। न ह्यन्यस्य सर्वं प्रियं भवति। मोक्षस्तु ज्ञानमेव। उत्तरत्र कर्तव्याभावात्। अवस्थया व्यवसायात् सिद्धान्ताद्विशेषः। इतिशब्देनैतावदरे खल्वमृतत्वमित्युपसंहारो हेतुरस्य पक्षस्येति काशकृत्स्नो मन्यते। तस्माज्जीवोपक्रमो, भगवत एवावस्थाविशेषो जीव इत्यस्य पक्षस्य लिङ्गम्। तस्मान्मैत्रेयीब्राह्मणेनापि जीवद्वारा प्रकृतिकारणवादासिद्धिरिति सिद्धम्॥ २२॥

इति प्रथमाध्याये चतुर्थपादे सप्तमं वाक्यान्वयाधिकरणम्॥ ७॥

भाष्यप्रकाशः।

बोधनीयं न स्यात् तदा, आत्मनस्तु कामाय सर्वं प्रियं भवतीति सर्वभोक्तृत्वमात्मनो न वदेत्। ब्रह्मातिरिक्तस्य सर्वभोक्तृत्वाभावेन सर्वस्मिन् प्रियत्वाभावात्। अतः सर्वभोक्तर्येकस्मिन्नात्मनि वक्तव्ये प्रतिनियततत्तद्विषयभोक्तारं तदवस्थाविशेषमुपक्रमे वदति। तथाच सर्वप्रियत्ववाक्यमेव तद्गमकमित्यर्थः। येनाहं नामृता स्यामिति मोक्षार्थं प्रश्नात् तत्रानुत्तरे तदपूर्तिरित्याशङ्कायां तन्मतेन समाधिमाहुः **मोक्ष इत्यादि**। **सिद्धान्ताद् विशेष** इति सिद्धान्ते[तूपपत्तिपक्षादरात्सर्वं नित्यं यथास्थितमेव ब्रह्मरूपं तेन कालकृतविशेषरूपयाऽवस्थया न तादृशरूपव्यवसायः। अत्र त्ववस्थया व्यवसाय इति सिद्धान्ताद्विशेष इत्यर्थः]त्वंशत्वे व्यवसाय इति तथा। **अस्य पक्षस्येति** ज्ञानमेव मोक्ष इति पक्षस्य। शेषमतिरोहितार्थम्॥ २२॥

इति सप्तमाधिकरणम्॥ ७॥

रश्मिः।

जीवे। **प्रकृते**। **न ह्यन्यस्येति** भाष्यं विवृण्वन्ति **ब्रह्मातीति**। **प्रियत्वेति** भोक्तृत्वनिबन्धनप्रियत्वाभावात्। **भाष्ये**। अस्य पक्षस्यापूर्वत्वाद्धेतुमाहुः **इतिशब्देनेति**। **हेतुरिति**। इति शब्दार्थे तृतीयार्थः। **प्रकृते**। **ज्ञानमेवेति** श्रुतावेतावत्पदेन पूर्वोक्तज्ञानमनूद्यामृतत्वविधानात्। 'आत्मा वा अरे द्रष्टव्यः' इति ब्रह्ममात्रविषयकं तत्। इति पक्षस्येति इत्येवं सर्वस्य काशकृत्स्नपक्षस्य आश्मरथ्यौडुलोमिमतयोः सूत्रान्तरसत्त्वात्। **अतिरोहितेति** भाष्ये। काशकृत्स्नमतसिद्धमाहुः **तस्मादिति** उपसंहारस्यार्थनिर्णायकत्वात्। अधिकरणसिद्धमर्थमाहुः **तस्मादिति**। **ब्रह्मैकदेशिवादात्**। **जीवद्वारेति** 'अपरेयमितस्त्वन्यां' 'जीवभूताम्' इति गीतायाः काशकृत्स्नमते त्वियं शक्तिः संसारदशापन्नापि इत्येवमतिरोहितार्थम्। शंकराचार्यमते पूर्वसूत्र एव पूर्वपक्षः सिद्धान्तस्त्वृषिमतभेदात्। माध्वास्त्वत्राध्यायसमाप्तिवाक्यशब्दाक्षराणां ब्रह्मणि समन्वयमाहुः। रामानुजाचार्यास्तु सांख्यात्मा वा परमात्मा वेति संशयमाहुः। भास्कराचार्यास्तु शंकराचार्यवत् पूर्वसूत्रं व्याख्याय वाक्यं नामैकार्थप्रतिपादनपरं विभज्यमानमाकाङ्क्षावत्पदं पदजातमुच्यत इति वाक्यलक्षणमुक्त्वा त्रिसूत्र्यां भेदाभेदावुक्त्वा प्रतिपादिता भेदे भेदोपीत्याहुः भेदोप्यस्ति यतः संसारी न कदाचिन्मुक्तपूर्वः। तस्य मुक्त्यर्थं विद्योपदेशोर्थवानिति त देतन्नातिविरुद्धम्। माध्वोक्तवाक्यान्वयः श्रुतिषु स्मृतिषु च स्पष्ट इति न सूत्रविषयवाक्यत्वमर्हतीति भाष्ये प्रकाशे नानूदितानि मतानीति ज्ञेयम्। रामानुजभाष्ये तु काशकृत्स्नमतेन व्याससिद्धान्तसमाप्तिस्तदेकदेशिमतवाक्यं विरुणद्धि। भास्करभाष्येपि 'आसीज्ज्ञानमथो ह्यर्थः' इत्यस्य विरोधः। जीवानामपि सत्त्वात्॥ २२॥

इति सप्तममधिकरणम्॥ ७॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥ (१।४।८)

एवं प्रकृतिकारणवादनिराकरणेन ब्रह्मण एव कारणत्वे सिद्धेऽप्यर्धजरतीयतयोभयस्थापनपक्षं परिहर्तुमधिकरणमारभते ।

भाष्यप्रकाशः ।

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥ अधिकरणप्रयोजनमाहुः **एवं प्रकृती**त्यादि । आनुमानिकाधिकरणमारभ्य वाक्यान्वयाधिकरणान्तग्रन्थे आद्यैस्त्रिभिः सांख्यमतस्याशब्दत्वसाधनात् प्रकृतिकारणवादनिराकरणेन, यथाव्यपदिष्टाद्यधिकरणत्रये श्रुतिविप्रतिषेधपरिहाराद्, वाक्यान्वयाधिकरणे जीवब्रह्मवादनिराकरणात् पुरुषच्छायायुक्तप्रकृतिकारणवादनिराकरणेन ब्रह्मण एव जगत्कारणत्वे सिद्धेऽपि ब्रह्मणो निर्विकारत्वात् कार्ये त्रिगुणात्मकत्वादिदर्शनाच्च ब्रह्मणो निमित्तत्वं, स्मृतिसिद्धस्य प्रधानस्य समवायित्वमित्यभ्युपेयम् । यदि च श्रौत एवाग्रहस्तदाऽपि श्वेताश्वतरादावजावाक्यस्थस्याजापदस्य छागीशरीराभिधायकत्वाच्छागीशरीरां यथा तदधिष्ठातृशारीरात्मशक्तिविधया नानाप्रजाजनकं, तथा सांख्योक्तं प्रधानमपीश्वरोपाधिभूतं सन्नानाविधप्रजाजनकमित्येतमर्थं रूपकातिशयोक्त्या बोधयितुं शक्नोति । यदि चेदं नोपेयते तदापि,

रश्मिः ।

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥ सांख्यराद्धान्तीयप्रकृतिनिराकरणात् स्मृताया गीतोक्तायाः 'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूताम्'इति जीवरूपायाः उपेक्षानर्हत्वात् प्रसङ्गसंगत्या निरूपणमित्याहुः **वाक्यान्वयाधिकरण** इति । **जीवब्रह्मे**ति ।

'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा' ॥

इति गीतायामष्टसु प्रकृतिपदम् । कापिलसांख्यप्रवचनसूत्रवृत्तौ विषयाध्याये 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोहंकारात् पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिगुणाः' इति सूत्रम् । तत्र पुरुषो जीवः । गीतायाम्

'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत्' ॥

इति नवमी प्रकृतिः । स जीवब्रह्मवादः अंशत्वाज्जीवस्य तदभेदेनोपक्रम्य मैत्रेयीब्राह्मणे तस्य निराकरणात् । **पुरुषच्छाये**ति पुरुषो जीवः सांख्योक्तः । छायाऽर्कयोषिद् युक्ता प्रकृतिर्जगत्कर्त्री व्यामोहिका च ताभ्यां युक्तो यः प्रकृतिकारणवादः तस्य निराकरणेन । यद्वा । पुरुषो महत्स्रष्टा तस्य छाया प्रतिबिम्बो जीवः तेन युक्तो यः प्रकृतिकारणवादस्तस्य निराकरणेन । **अर्धजरतीयत**येत्यादि भाष्यं विशदयन्ति **ब्रह्मणो निर्विकारत्वा**दिति । एवमपि चिन्तामण्यादिवदविकृतं ब्रह्म कारणमिति चेत्तत्राह **कार्ये त्रिगुणे**ति । **स्मृती**ति सांख्यस्मृतिसिद्धस्य 'प्रधानाज्जगज्जायत इति' इति सूत्रं स्मृतिः । **अभ्युपेय**मिति कार्ये त्रिगुणात्मकत्वायाभ्युपेयम् । **अजे**ति अजामेकां लोहितेत्यादिवाक्यस्थस्य । **छागे**ति कल्पनोपदेशसूत्रभाष्ये व्युत्पादितम् । छागीति पाठे जातित्वं विवक्ष्य यथाकथंचित्प्रयोगः । छागा शरीराधिष्ठाता जीवः तस्य शरीरात्मकशक्तिस्तत्कर्मार्जितत्वात् । अतस्तद्विधया । **रूपके**ति

भाष्यप्रकाशः ।

'यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतो देव एकः समावृणोति स नो दधातु ब्रह्माऽव्ययम्' इति तत्रत्यवाक्यान्तरे तन्तुनाभशरीरस्य दृष्टान्तिततत्वेन तन्तूनां प्रधानजत्वकथनेन च ईश्वरशरीरात्मकप्रधानांशैः शरीरैर्जीवानावृणोतीति सिद्ध्यति । अत एव, 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इत्यपि क्वचिदुच्यते तेन शुद्धसत्त्वात्मिका ईश्वरोपाधिः । रजस्तमोमिश्रमलिनसत्त्वात्मिका जीवोपाधिरित्युपाधिविभागोऽपि युज्यते । अत ईश्वराऽधिष्ठिता तच्छरीरभूता प्रकृतिरपि कारणम् । नच सा प्रथमकार्यरूपेति युक्तम् । चूलिकोपनिषदि,

'विकारजननीं मायामष्टरूपामजां ध्रुवाम् ।
ध्यायतेऽध्यासितां तेन तन्यते प्रेर्यते पुनः ॥
सूयते पुरुषार्थांश्च तेनैवाधिष्ठिता जगत् ।
गौरनाद्यन्तवती जनित्री भूतभाविनी' ॥ इति ।

श्रावणेन तद्विरोधात् । नच माया काचिदतिरिक्तैवेति वाच्यम् । विकारजननीमित्यनेन षोडशविकारजनकत्वस्य, अष्टरूपामित्यनेन प्रकृतिप्रकृतिविकृतिभेदेनाष्टरूपत्वस्य प्रकृतिधर्मस्य तस्यां श्रावणेन, श्वेताश्वतरे 'मायां तु प्रकृतिं विद्यात्' इति श्रावणेन, गीतायामपि, 'दैवी ह्येषा गुणमयी मम माया' इति, 'सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः' इति स्मरणेन च मायाशब्दस्य पर्यायतायामेव पर्यवसानात् । श्वेताश्वतरे, 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' इति सर्वान् वादानपास्य, 'ते ध्यानयोगनुगाता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति परमेश्वरशक्तेः स्वगुणनिगूढत्वश्रावणान्मैत्रायणीयोपनिषदि च, 'तमो वा इदमग्र आसीदेकं तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयात्येतद्रूपं वै रजस्तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपम्' इति श्रावणाद् गुणा अपि सत्त्वादय एव ग्राह्याः । अतः पूर्वोक्तन्यायैः सिद्धेऽपि ब्रह्मणः कारणत्वे शरीराख्यशक्तिरूपां तां विना कारणतानिर्वाहाभावादर्धजरतीयतया मायायाः समवायित्वं, ब्रह्मणो निमित्तत्वमित्युभयकारणत्वस्थापनपक्षपरिहारः प्रयोजनमित्यर्थः । एवं सति श्रुत्युक्तत्वाविशेषात् समवायिकारणं, प्रकृतिर्निमित्तकारणं ब्रह्म ? उत सर्वविधं कारणं

रश्मिः ।

'रूपकातिशयोक्तिः स्यान्निगीर्णाध्यवसानतः ।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः' ॥ इति ।

ननूक्तमजापदं सृष्टिलक्षकमिति चेत्तत्राहुः **यदि चेदमिति** । **क्वचिदिति** तत्त्वानुसंधानग्रन्थादावुच्यते । **अष्टरूपां** गीतोक्ताम् । **अध्यासिता**मिति ब्रह्मणाऽध्यासाख्यसंबन्धेन संबद्धाम् । अथ वा अन्यसंबन्धेन संबद्धाम् । **गौरि**ति गौरनादवती सा त्विति पाठस्त्वन्यतः । **प्रकृती**ति एका प्रकृतिः सप्तप्रकृतिविकृतयः । **इति श्रावणेने**ति अभेदश्रावणेन । न्यायाः सूत्राणि । **कारणते**ति कुलालादौ तथादर्शनादिति भावः । **अर्धजरतीये**ति समन्वये सति जीवपरमात्मा ब्रह्म तल्लक्षणं जगदभिन्ननिमित्तोपादानत्वमत्रार्धजरतीयम् । अर्धनारीश्वरवत् । निमित्तं ब्रह्म समवायी

ननु ब्रह्मकारणतां न निराकुर्मः श्रुतिसिद्धत्वात्। किंतु समवायिकारणं प्रकृतिरेव। कार्यकारणयोरवैलक्षण्यात्। समवायिकारणानुरोधि हि कार्यम्। अन्यत् सर्वं भगवानस्तु। अपेक्ष्यते च समवायिनिमित्तयोर्भेदः। कर्मण्यपि श्रुतिस्मृतिसमवायो धर्मे। एवं ब्रह्मवादेऽपि स्मृत्युक्ता प्रकृतिः समवायिकारणम्।

भाष्यप्रकाशः।

ब्रह्मेति संशयः। स च प्रयोजनकथनादर्थादेव लभ्यते इत्यतो नोक्तः। पूर्वपक्षमाहुः **नन्वि**त्यादि। कार्यकारणयोरवैलक्षण्यं व्युत्पादयति **समवायी**त्यादि। तथाच कार्येषु क्वचिद् रजसः, क्वचित् तमसः क्वचित् त्रयाणामपि गुणानां प्रकाशप्रवृत्तिनियमादिभिरनुवृत्तिदर्शनाद्धेयत्वतुच्छत्वादेर्दर्शनाच्च कार्यमात्रं प्रकृत्यनुरोधीत्यतः प्रकृतिरेव समवायिकारणमित्यर्थः। ननु सत्तायाः सर्वत्रानुवृत्तिदर्शनाद् ब्रह्मणोऽपि समवायित्वमस्तु, किं बाधकमित्यत आह **अपेक्ष्यते चे**त्यादि। यदि हि भगवतः समवायित्वं स्यात् तद्गुणा अपहतपाप्मत्वादयः स्वरूपधर्माः सच्चिदानन्दाश्चानुवर्तेरन्। नचात्र भगवत्सत्तानुवर्तते। प्रतीयमानायास्तस्या भावविकारत्वेन ब्रह्मधर्मत्वाभावात्। किंच। यदि भगवानेव समवायी निमित्तं च स्यात् सर्वं कार्यं सर्वदा स्यात्। अपेक्षितस्य सामग्रीमात्रस्य भगवद्रूपतया सत्त्वात्। नचेयं लौकिकी युक्तिर्न वैदिकैरादरणीयेति वाच्यम्। यतः कर्मकाण्डेऽपि श्रुतिस्मृतिसमवायो धर्मेऽङ्गीक्रियते। अस्मदादिकृतेश्च निमित्तत्वम्। एवं ब्रह्मवादेऽपि स्मृत्युक्ता प्रकृतिः समवायिकारणं, ब्रह्म निमित्तकारणमित्येवाङ्गीकार्यम्। न चैवं तस्याः श्रौतत्वहानिः। यथा हि ब्रह्मणोऽनुमानगम्यत्वेऽपि मुख्यतया उपनिषद एव गमयन्तीत्यौपनिषदत्वमेवं प्रकृतिं मुख्यतया स्मृतिरनुमानं च गमयतीति तस्या आनुमानिकत्वं स्मार्तत्वं चाभिलप्यत इति तावन्मात्रेण तद्धानेरभावादित्येवं प्राप्ते इत्यर्थः।

रश्मिः।

जीव इति। इत्युभयकारणव्यवस्थापनपक्षो मैत्रेयीब्राह्मणे तस्य परिहारः। **प्रयोजने**ति। तदुक्तं **पूर्वपक्ष**मिति। पूर्वोक्तसंशयप्रकारं स्फुटं सूचयन्तः पूर्वपक्षमाहुरित्यर्थः। **भाष्ये। न निराकुर्म** इति। मैत्रेयीब्राह्मणविचारेण न निराकुर्म इति। किंतु समन्वयसूत्रे तेन ब्राह्मणेनार्धजरतीयमुच्यते इत्यर्थः। **किंतु समवायी**ति। अत्र सूत्रे पादार्थमहिम्ना एकसंबन्धिज्ञानमपरसंबन्धि स्मारकमिति 'प्रधानाज्जगज्जायत इति' इति सूत्रस्मरणात्। प्रकृतिः समावायिनी चेति स्फूर्त्या समन्वयसूत्रे मैत्रेयीब्राह्मणेन किंतु समवायिकारणं प्रकृतिरेवेत्यर्थः। यद्यपि 'न समवायोस्ति प्रमाणाभावात्' इति सांख्यसूत्रं तथापि प्रसिद्धाभिप्रायेण तदुक्तिरतो न व्याससूत्रविरोधः। **प्रकृते। प्रकाशे**त्यादि। तथा च सूत्रं 'प्रकृतेराद्योपादानतामन्येषां कार्यत्वश्रुतेः' 'प्रकाशस्तत्सिद्धौ कर्मकर्तृत्वविरोधः'। तत्सिद्धौ जीवसिद्धौ। कर्म जीवः कर्त्री प्रकृतिः प्रवृत्ती रजसानियमश्चादिनाऽप्रकाशस्तमःकार्यम्। **अनुवर्तेरन्नि**ति ब्रह्मवादाननुसंधायकोक्तिरतो न समन्वयाधिकरणविरोधः। जायतेऽस्ति विपरिणमति[1] वर्धतेऽपक्षीयते नश्यतीति षड् भावविकाराः प्रकृतिधर्माः सांख्ये। **कर्मण्यपी**ति भाष्यं विवृण्वन्ति **न चेयमि**ति कर्मणीत्यस्यार्थमाह कर्मकाण्ड इति। **श्रुतिस्मृती** विधिपादे श्रुतयः स्मृतिपादे स्मृतयः इति। समवायो नित्यसंबन्धः। **धर्मे** नित्यधर्मव्यञ्जकक्रियारूपे धर्मे। **एवं ब्रह्मे**ति भाष्यं विवृण्वन्ति **एवं ब्रह्मे**ति। **श्रौतत्वे**ति प्रधानाज्जगज्जायते इति श्रौतत्वं चूलिकोपनिषदाद्युक्तं च

१. विपरिणमते।

ब्रह्म निमित्तकारणमित्येवं प्राप्ते उच्यते । प्रकृतिश्च निमित्तकारणं, समवायिकारणं च ब्रह्मैव । प्रकृतिपदप्रयोगात् स्मृतिसिद्धतृतीयसर्वधर्मापदेशः । चकाराद् यत्रेत्यादिसर्वसंग्रहः । कुत एतत् ? । प्रतिज्ञादृष्टान्ताऽनुपरोधात् ।

भाष्यप्रकाशः ।

अत्र सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति **प्रकृतिश्चे**त्यादि । ईक्षतिना ईक्षत्यादिभिर्वा कर्तृत्वेन ब्रह्म सिद्धमेवेति न तत्रेदानीं शङ्का । अतः परं लोकन्यायेन कर्तुरुपादानोपकरणसापेक्षत्वादिह तदाकाङ्क्षायां पूर्वपक्षिणा प्रकृतिरुपस्थाप्यते । सा निमित्तकारणभूता समवायिकारणभूता च प्रकृतिरत्र ब्रह्मैव । न तु ततोऽतिरिक्ता प्रकृतिशब्दश्च स्वरूपे रूढो मृत्प्रकृतिर्घटः कार्पासप्रकृतिः पट इत्यादिप्रयोगदर्शनात् समवायिकारणमभिधत्ते, प्रकृष्टा कृतिर्येनेति योगमहिम्ना च निमित्तम् । अतः प्रकृतिपदप्रयोगात् स्मृतिसिद्धा ये तृतीयकारणात्मका असमवायिनः सर्वे धर्माः संयोगादयस्तेषामपदेशः कथनम् । चकारात् पुराणोक्तानां,

'यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा ।
स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः' ॥

रश्मिः ।

पूर्वोक्तम् । **ब्रह्मैवेति** आकाशस्तल्लिङ्गादित्यधिकरणे उक्तत्वात् । हन्तैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ति इति माध्वभाष्योक्तवाक्यादेवकारः । प्रतिज्ञासूत्राद्ब्रह्मेत्यनुवर्तते । **न त्विति** 'स पतिः पत्नी चाभवताम्' इति पुरुषविधब्राह्मणे 'प्राप्तं तन्निजरूपाय गोविन्दाय नमो नमः' इति श्रीविट्ठलेशदीक्षिताः अर्धनारीश्वरोपि । सांख्यमतेनोक्त्वाऽधुना प्रकृतिपदं प्रयुक्तं न प्रधानपदं तदाशयमाहुरित्याशयेन **प्रकृतिपदे**त्यादिभाष्यं विवृण्वन्ति स्म **प्रकृतिशब्द** इति । अयमर्थः । सत्यं प्रधानपदं प्रयोक्तव्यं 'प्रधानाज्जगज्जायत इति' क्षीरवच्चेष्टितं प्रधानस्य' इति चातः पुरुषोऽसङ्गः प्रधानं यत्तदभिन्ननिमित्तोपादानं तद्वाचकं आकाशस्तल्लिङ्गादिति न्याये ब्रह्मवाचकमिति तथापि तस्य न प्रसिद्धमीश्वरवाचकत्वं प्रकृतिपदस्य तु 'प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिनः' इति गोपालतापिनीये 'प्रकृतिमगन् किल यस्य गोपवध्वः' इति च प्रसिद्धमतः प्रधानपदमतिहाय प्रकृतिपदमुपात्तमिति तदेतदुक्तं प्रकृतीत्यारभ्य रूढ इत्यन्तेन । यद्यपि वेदान्ते रूढिर्नास्ति तथापि ब्रह्मवादिनो वदन्तीति संहिताश्रुतेः ब्रह्मवाचकप्रकृतिपदरूढिः । यद्वा । योगमात्रं ब्रह्मज्ञानमित्यदोषः । यद्यपि यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । आविर्भावकशक्त्याधारत्वं वा कारणत्वं तद् ब्रह्मसामानाधिकरण्यादुपपन्नं तथापि पोषार्थं प्रयोगावाहुः **मृत्प्रकृतिरि**ति । **अभीति** । स्वरूपप्रकृतिपदार्थः 'प्रकृतिमगन् किल यस्य गोपवध्वः' इति स्मृतौ । अतः प्रयोगादिप्रसिद्ध्या प्रकृतिपदं ब्रह्मणि प्रयुक्तं न ज्ञानिनामिव घटपटादिपदवत् । **प्रकृष्टेति** व्यवहारोपयोगित्वं प्रकृष्टत्वं न तु बालक्रीडार्थं मृषादिवद्वा कृतिः । **संयोगादय** इति सिद्धान्ते विभागात्सृष्टिः सृष्टिभेदवाद एभिः भाष्यप्रकाशकृद्भिरुक्ता सा । **तेषां** निमित्तान्तर्भूतानाम् । अत्र यद्यपि तृतीयपदार्थः सुषुप्तिः कामश्च संयोगादीनां चकारार्थे संग्रहात् तथा च कामसुषुप्त्योः सर्वधर्मापदेश इति भाष्यार्थो भवेत् कामाकामरूपं ब्रह्मेत्यर्थोपि सोप्युपलक्षणविधयास्तु न च वैराग्याय भाष्यप्रकाशीयोर्थः । स च सुषुप्तिव्याख्यानेपि तुल्ये सुषुप्तिस्त्वकामरूपो भगवानिति भाष्यादिति वाच्यम् । विरुद्धधर्माश्रयत्वेन कामस्फूर्तेः । **चकारादि-**

प्रतिज्ञा, 'अपि वा तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवति' इति । दृष्टान्तो यथा 'एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' इत्यादि । प्रतिज्ञादृष्टान्तयोरनुपरोधोऽबाधनं, तस्मात् । समवायिकारणज्ञाने हि कार्यज्ञानम् । उभयोर्ग्रहणमुपचारव्यावृत्त्यर्थम् । उपक्रमोपसंहारवत् ।

भाष्यप्रकाशः ।

इत्याधारादीनां सर्वेषां संग्रहः । तथाच जगतः सर्वविधं कारणं भगवानेवेत्यर्थः । हेतुं व्याकुर्वन्ति प्रतिज्ञेत्यादि । अपि वेत्युतशब्दस्यार्थः पाठान्तरं वा । प्रतिज्ञा तु नियमः । 'संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवा' इति कोशात् । स चात्रैकविज्ञानेन सर्वविज्ञानं भवतीत्याकारको निश्चय इति तद्बोधकं वाक्यमिह वाच्यवाचकयोरभेदविवक्षया प्रतिज्ञापदेनोच्यते । एवं दृष्टान्तवाक्यमपि दृष्टान्तपदेन । दृष्टान्तस्तु श्रोतृबोधसौकर्यहेतुर्वक्तृश्रोत्रोः संप्रतिपत्तिविषयोऽर्थः । तयोर्बोधकं चेदं वाक्यद्वयं तयोरबाधनाद्धेतोस्तथा । तथा च यदि समवायित्वं ब्रह्मणो नाद्रियेत कारकान्तरत्वं च तदिदं वाक्यद्वयं पीड्येत । अतस्तदभावादेव तथाऽभ्युपेयमित्यर्थः । तदाहुः समवायीत्यादि । नन्वेकतरेणापि कार्यसिद्धेः किमित्युभयोरुल्लेख इत्याकाङ्क्षायामाहुः उभयोरित्यादि । यथोपक्रमोपसंहारयोरैकार्थ्येनैकस्यार्थस्य सिद्धौ न तत्रोपचार इति शङ्का, तथाच प्रति-

रश्मिः ।

त्यादिभाष्यं विवृण्वन्ति **चकारादिति । आधारेति** तेनाधिष्ठानकारणत्वमाचार्यान्तरैरुक्तं तत्स्माश्रितम् । निमित्तान्तर्गतम् । **पाठान्तरमिति** अर्थान्वयसहिता श्रुतिरुपन्यस्ता लाघवादित्यर्थः । अत एव भवतिद्वयमन्वयार्थमधिकमुक्तम् । ननु छान्दोग्यीयश्वेतकेतूपाख्यानस्य प्रतिज्ञादिग्रहणं मैत्रेयीब्राह्मणोक्तप्रतिज्ञात्यागस्तत्र को हेतुरितिचेन्न विवादाध्यासितक्लिष्टकल्पनासंभवादुपदेशवाक्यापेक्षया गौणत्वाच्च । **संविदागूरिति** अयं कोशो धीवर्गेऽमरः दशाङ्गीकारनामानि । उत्तरार्धं तु 'अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः' इति । पक्षभिन्नत्वे सति निश्चितसाध्यवत्त्वं दृष्टान्तत्वम् । अनुमानमात्रविषयमिति दृष्टान्तं लक्षयामासुः **श्रोत्रिति** । यथा श्रोता यथा महानस इति पञ्चावयवगतावयवं श्रुत्वा सौकर्येण व्याप्तिं गृह्णातीति श्रोतृबोधसौकर्यहेतुर्दृष्टान्तः । एवं वक्तृश्रोत्रोः संप्रतिपत्तिः सम्यक् दृष्टान्तसहितः प्रबोधः संप्रतिपत्तिस्तद्विषयोऽर्थो भवति । प्रकृतेपि भवति हि मृत्पिण्डं ज्ञानं श्रोतुरेकविज्ञानेन सर्वविज्ञानसंप्रतिपत्तेः सौकर्यहेतुर्भवति च वक्तृश्रोत्रोः संप्रबोधविषयः सामान्यवाक्यवाच्ये विवरणेतिव्याप्तिवारणाय सौकर्यपदम् । सौकर्यं च श्रोतृबोध्यार्थासंस्पर्शित्वे सति तत्सुकरत्वम् । विवरणादौ श्रोतृबोधार्थसंस्पर्शित्वात् नातिव्याप्तिः यथा ब्रह्मविदाप्नोति परमित्यादौ सत्यं ज्ञानमनन्तं ब्रह्मेति विवरणे श्रोतृबोधार्थब्रह्मसंस्पर्शित्वम् । सुगमे दृष्टान्तरहिते वाक्येतिव्याप्तिवारणाय विशेषणदलम् । प्रशस्तस्य विशेष्यगतसमुपसर्गार्थस्य सत्त्वात् । कालेतिव्याप्तिवारणाय विशेष्यम् । 'सम्यग्बाढप्रशंसयोः' इति विश्वः । ननु तथापि नवकृत्व उपदेशे अतिव्याप्तिरितिचेन्न पौनःपुन्योपदेशवाच्यभिन्नत्वेन विशेषणीयत्वात् । एवं च पौनःपुन्योपदेशवाच्यभिन्नत्वे सति श्रोतृबोधसौकर्यहेतुत्वे च सति वक्तृश्रोतृप्रबोधविषयार्थत्वं दृष्टान्तत्वमिति फलितम् । अत्र तथा महानस इत्यत्र साम्यं यथाशब्दोऽमरात् । तथा च समत्वं दृष्टान्तत्वं तथा तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम् । तदेव दृष्टान्तत्वं यद्यपि तथापि धर्मैः साम्यविशदनार्थं इवार्थभेदार्थमिदमेव लक्षणम् । **तयोरिति** प्रतिज्ञादृष्टान्तयोः । **वाक्यद्वयं** प्रतिज्ञावाक्यं दृष्टान्तवाक्यं च । **पीड्येत**

प्रतिज्ञामात्रत्वे अदृष्टद्वारापि भवेत् । दृष्टान्तमात्रत्वे त्वनुमानविधया स्यात् तथा सति सर्वसमानधर्मवद्ब्रह्म स्यान्न समवायिकारणम् । उभयोर्ग्रहणे तु प्रतिज्ञाया दृष्टमेव द्वारमिति समवायित्वसिद्धिः ।

भाष्यप्रकाशः ।

ज्ञादृष्टान्तयोरैकार्थ्येनेत्यत उभयोर्ग्रहणमित्यर्थः । तदेतदुपपादयन्ति **प्रतिज्ञामात्रत्व** इत्यादि । हेतोरिति शेषः । तथा च हेतुश्चेत् प्रतिज्ञामात्रमत्रोच्येत तदा अदृष्टा या योगजप्रत्यासत्तिस्तद्द्वाराऽप्येकविज्ञानेन सर्वज्ञानं भवेत् । यथा, 'विश्वं पश्यति दूरतः' इति ।

'अनागतमतीतं च वर्तमानमतीन्द्रियम् ।
विप्रकृष्टं व्यवहितं सम्यक् पश्यन्ति योगिनः' ॥

इत्यादिवाक्योक्तम् । तथा सति न तेन समवायित्वसिद्धिः । यदि च दृष्टान्तमात्रं हेतुः स्यात् तदा, सर्वं वाच्यं ज्ञेयत्वात् तदेकदेशवत्, घटो वाच्यो ज्ञेयत्वात् पटवदित्यादिवत्, सर्वं सज्ज्ञेयत्वादित्यप्यनुमानं संभवतीत्यनुमानविधया स्यात् । तथा सति सर्वसमानो यो धर्मो ज्ञेयत्वादिरूपस्तद्वद् ब्रह्म स्यान्न तु समवायिकारणम् । उभयोर्ग्रहणे त्वेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया दृष्टमेव कार्यैकदेशप्रत्यक्षमेव द्वारं समवायित्वगमकम् । यथा ह्येकस्मिन् मृत्पिण्डे मृद्विकारत्वनिश्चयोत्तरं सर्वस्मिंस्तत्सजातीये तथा ज्ञानान्मृत्तिकायां तत्समवायित्वज्ञानं तादृशैकदेशप्रत्यक्षादेव भवति, नानुमानात्, तथा प्रकृतेऽप्येकत्र सन्मयत्वे निश्चिते सर्वेषु तत्सजातीयेषु सद्विकारत्वज्ञानात् सति सर्वसमवायित्वज्ञानं तादृशप्रत्यक्षादेव भवतीति सति समवायित्वसिद्धिर्न तु स्मृतिसिद्धायाः प्रकृतेरित्यर्थः । ननु भवत्वेवमेकविज्ञानात् सर्वविज्ञानं, तथापि सा ब्रह्मोपाधिभूतत्वाद्

रश्मिः ।

इति क्लिष्टकल्पकं क्रियेत । **योगजे**ति योगिनो द्विधा युक्ता युञ्जानाश्चातो योगजधर्मस्यापि द्वैविध्यम् । युक्तस्य तावद् योगजधर्मसहायेन मनसाकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति द्वितीयस्य चिन्ताविशेषोपि सहकारीति । योगजधर्मप्रत्यासत्तिं प्रकृते वर्णयन्ति **यथा विश्व**मिति । **न तेने**ति विषयतासंबन्धेन संबन्धिनि विश्वस्मिन् समवायाभावात् । न च धर्मोदृष्टम् । योगजधर्मेपि धर्मत्वात् । **दृष्टान्ते**त्यादि भाष्यं विवृण्वन्ति **यदि चे**ति । **सर्वं स**दिति सर्वं ज्ञेयत्वेनानुभूतं पक्षः न चिन्नाप्यन्तर्यामी । अतो न साधारण्यं ज्ञेयत्वरूपहेतोः । इत्यपीति ननु किमनुमानान्तरमिति वाच्यम् । ब्रह्मज्ञानं सर्वज्ञानकारणं समवायिविषयकत्वात् मृत्पिण्डज्ञानवदित्यनुमानमस्तु । **न त्वि**ति तथाच सर्ववज्ज्ञाने विषयतासंबन्धो न तादात्म्यं समवायापरपर्यायम् । **उभयो**रिति भाष्यं विवृण्वन्ति **उभयो**रिति । **दृष्ट**मिति दर्शनविषयमित्यर्थः । इदमेव विषयविषयकं दर्शनं तदाहुः दृष्टमेव कार्यैकदेशप्रत्यक्षमिति । दृष्टान्तरूपं तद्द्वारं कथमित्याकाङ्क्षायामाहुः **यथा ही**ति । **तथा ज्ञाना**दिति सामान्यलक्षणालौकिकप्रत्यासत्त्यामृतत्वेन ज्ञानात् । **स्मृती**ति । अनेन विशेषणेन वेदवेदान्तसारे द्वितीयनवमाध्याये आनन्दस्य जगत्कर्त्री शक्तिस्तस्याः कर्तृत्वं न विरुद्धम् । आत्मनोर्धत्वात् तेन तत्राभिन्ननिमित्तोपादानत्वमविरुद्धम् । समन्वयाधिकरणभाष्यविरोधश्च न । अत्राग्रे भेदाभेदमतनिरासदर्शनाद्विवर्तविशिष्टाद्वैतमते निरस्यन्तः परिणामसूत्रस्य वक्ष्यमाणत्वाद्भावाद्वैतं समर्थयितुं चिदचिच्छरीरविशिष्टस्य सत्त्वाद्युपाधिकस्य चोपादानत्वं दूषयितुं समवायिनं विचारयन्ति **ननु भवत्त्वि**ति । **एव**मिति पूर्वोक्तप्रकारेण केवलस्यैव प्रकृतित्वमित्येकविज्ञानेनेत्यादिः । **ब्रह्मोपाधी**ति शुद्धसत्त्वप्रधाना यामा

भाष्यप्रकाशः ।

ब्रह्माविनाभूता वा, ब्रह्माविभक्ता वास्तीति शरीरद्वारकं ब्रह्मण एव समवायित्वं स्वतश्च कर्तृत्व-मित्येव युक्तं पूर्वोक्तश्रुतिभ्यः । न तु केवलस्यैव प्रकृतित्वम् । उक्तव्याकोपात् । न च 'सदेव सोम्येदमग्र आसीद् एकमेवाद्वितीयम्' इत्यादिश्रुतिविरोधः । तत्र हि, सदेवेत्येवकारे-णान्ययोगं व्यवच्छिद्याग्रे विवृणोत्येकमेवेति । एकशब्दश्च मुख्ये रूढः । 'एके मुख्यान्यकेवलाः' इति । तथा च मुख्यं ब्रह्मैवास्तीति सिद्ध्यति, न तु तेन तदविनाभूतस्याविभक्तस्य वा शरीर-स्यासिद्धिरिति तदविरोधात् । न चैकपदस्य मुख्यार्थत्वमेव, न केवलार्थत्वमित्यत्र किं गमकमिति शङ्क्यम् । सुबालोपनिषदि प्रलयप्रकरणे पृथिवीलयमारभ्याक्षरं तमसि लीयत इत्यन्तेन सर्वस्य तमसि लयमुक्त्वाऽग्रे, 'तमः परे देवे एकीभवति दिव्यो देव एको नारायणः इति तमसो नामरूपविभागानर्हतया ब्रह्माविनाभावेनाविभक्ततया वाऽवस्थितिबोधनस्यैव गमकत्वात् । न च, 'लीङ् श्लेषणे' इति धात्वर्थादक्षरान्तानां तमसा अविभागस्तमसस्तु ब्रह्मणा स्वरूपैक्यमिति शब्दान्तरादवगम्यते, न त्वविनाभावोऽविभागो वेति वाच्यम् । अन्तर्यामिब्राह्मणे, यस्य तेजः शरीरं यस्य तमः शरीरमिति शरीरत्वेन श्रावणात् सुबालोपनिषद्यपि, यो मृत्युमन्तरे संचरन् यस्य मृत्युः शरीरमिति मृत्युपदेन सर्वानर्थमूलतया तस्यैवोल्लेखाच्च तमसः शरीरतयैव सिद्ध-त्वेन स्वरूपैक्यस्य ग्रहीतुमशक्यत्वात् । तस्मात् सशरीरस्यैव प्रकृतित्वं सच्छब्दवाच्यत्वं च, न केवलस्येति चेन्नैवम् । अद्वितीयपदविरोधापत्तेः । एकमेवेति कथनोत्तरं मुख्यान्यार्थयोर्वा-

रश्मिः ।

सा ब्रह्मोपाधिस्तदवच्छिन्ना चित् सगुणं ब्रह्म तथा च शंकरभाष्यं प्रकृतिश्चोपादानकारणं ब्रह्माभ्युपग-न्तव्यं निमित्तकारणं चेति। **ब्रह्माविनाभूते**ति प्रतिबिम्बपक्षे ब्रह्मसगुणत्वापादिका। ब्रह्माविभक्तत्वेति रामानुजाचार्यमते तथाच भाष्यं प्रकृतिश्च ब्रह्मेति । तथा तत्राप्यविभक्तनामरूपं कारणावस्थं ब्रह्मैव प्रकृतिशब्देनोच्यत इति ब्रह्मविभक्ताप्युक्ता आत्मकृतेरिति सूत्रस्य भाष्ये अविभक्तनामरूप आत्मा कर्ता स एव विभक्तनामरूपः कार्यमिति । **शरीरे**ति प्रकृतिद्वारकं मायायां ब्रह्मप्रतिबिम्बात् प्रकृतेः शरीरं रामानुजाचार्यमते अन्तर्यामिब्राह्मणोक्तं चिदचिच्छरीरं ब्रह्मणः सगुणस्येत्यर्थः । कर्तृत्वं त्वस्या एव स ईक्षांचक्रे स प्राणमसृजत इति श्रुतेः ईक्षापूर्वकं च कर्तृत्वं निमित्तकारणेष्वेव दृष्टं उभयमते । **स्वतश्चे**ति आत्मनः स्वस्य च । अत्र मायाशरीरब्रह्मणः समवायित्वं प्रकृतिद्वारा स्वस्य कर्तृ-त्वमपि । **पूर्वोक्ते**ति प्रतिज्ञादृष्टान्तोक्त्यादिभ्यः उभयमते । **केवलस्ये**ति प्रकृतिपदसामानाधिकरण्यम् । श्रुतीति उभयोः पक्षयोरेवकारेणोपाधिशरीरयोः व्यवच्छेदात् । अग्रे सृष्टेः पूर्वकाल इत्यर्थात् ब्रह्मणः । शुद्धस्य ब्रह्मणः तच्चोपनिषदि सदसती माया पुरुषविधब्राह्मणे च 'स आत्मानं द्वेधापातयदिति ततः पतिः पत्नी चाभवताम्' इति प्रकृतिपदस्वरूपे शक्तिरुक्तैव चूलिकायां तेन ब्रह्मणा अध्यासितां स्वस्यात्मरूपायामध्यासविषयायामहं प्रकृतिरिति परस्मिन्परावभासस्याध्यासत्वादिति नो व्याकोप इति वाच्यम् । उभयोरेकतरपक्षे विशेषात् । **विवृणोती**ति भगवान् निश्वासद्वारा । **एक** इति कोशोयम् । **गमकत्वे**ति तथा च यदि केवलार्थः स्यात् तर्हि तमोवस्थितिकथनं न स्यात् । **शब्दान्तरा**दिति लीयत इत्यनुक्त्वा एकीभवतीति कथनादित्यर्थः । **यस्य तमः शरीर**मिति तेजः शरीरमिति समभिव्याहारात् विरुद्धधर्माश्रयत्वे पर्यवसानात् नावान्तरप्रलयकारणतमोग्रहणम् । **तस्यैवे**ति तमस एवकारेण शान्तस्य मङ्गलरूपस्य व्यवच्छेदः । **स्वरूपे**ति अवान्तरमूलकारणतमसो

भाष्यप्रकाशः ।

रणार्थमेव तत्प्रयोगात् । अन्यथा तद्वैयर्थ्यस्य वज्रलेपायितत्वात् । न चाद्वितीयपदेन मुख्यत्वमेव विव्रियत इति वाच्यम् । एकमेवेत्यनेनैव समाभ्यधिकराहित्ये सिद्धे व्याख्यानापेक्षाया एवाभावात् । तेनासिद्धावनेनाप्यसिद्ध्या सुतरां तदभावाच्च । एतेनैव, 'नान्यत् किंचन मिषत्' इत्यन्तरविषेधपरत्वमपि दत्तोत्तरम् । 'साक्षी चेता केवलो निर्गुणश्च,' 'यदा तमस्तन्न दिवा न रात्रीर्न सन्न चासन् शिव एव केवलः' इति सर्वभूतवति काले तद्रहिते तमोऽवशेषाङ्किते च काले ब्रह्मण एव केवलत्वश्रावणेन, यदा तमस्तत् स्वेनैकीभूतं तदा केवलो न शरीरीत्यर्थव्यक्तेर्द्विसंख्यापूरक एव निषेधपर्यवसानसिद्धेश्च । न च कालोक्तिविरोधः तस्याः सृष्ट्युत्तरव्यवहारे सर्वाधारतया प्रतीयमानकालोपरञ्जनेन पूर्ववृत्तान्तबोधनार्थत्वात् । अन्यथा शिष्यस्य सृष्टिकालस्थत्वेन कालसत्तामवधारयतः पूर्ववृत्तान्तबोधनाभावप्रसङ्गात् । न च कालसत्ताबोधकत्वे किं बाधकमिति शङ्क्यम् । एतस्य सर्वतः पूर्ववृत्तान्तबोधकत्वेन तत्र च सतोऽन्यस्य व्यवच्छेदे कालावच्छेदकप्रमाणस्यापि व्यवच्छिन्नत्वादत्र कालानुवादस्य वक्तुमशक्यत्वेन स्वतन्त्रतया कालसत्ताबोधने वाक्यभेदप्रसक्तेरेव बाधकत्वात् । न चात्र कालविशिष्टसत्सत्ताबोधकत्वमिति शङ्क्यम् । गौरवप्रसङ्गात् । समानजातीये बृहदारण्यकवाक्ये, सोऽनुवीक्ष्य नान्यदा-

रश्मिः ।

ग्रहणं तमोब्रह्मैक्ये भवति । **तत्प्रयोगा**दिति अद्वितीयपदप्रयोगात् । **विवृत**मिति तथा च अद्वितीयत्वरूपं मुख्यत्वमित्यर्थः । **व्याख्याने**ति विवरणेत्यर्थः । नन्वेकमेवेत्यनेन द्वित्वादिवैशिष्ट्यं निषिध्यते इति कथं समाभ्यधिकराहित्यं युगपद्वृत्तिद्वयविरोधात् । इति चेत्तत्राहुः **तेने**ति एकमेवेत्यनेन । **अनेने**ति तद्विवरणेनाद्वितीयमित्यनेन । **तदभावा**दिति व्याख्यानापेक्षाभावात् । **एतेने**ति एकपदव्याख्यानत्वेन । **मिष**दिति श्रुत्युत्तरादिति शेषः । **मिषदन्तरे**ति व्यापारयन्निषेधपरत्वमद्वितीयपदस्येत्यर्थः । **शिव** इति । तमःपदादवान्तरप्रलयविषयत्वे तमोधिष्ठाता शिवः कृष्णः । **सर्वभूते**ति साक्षित्वं सर्वभूतवति काले सति । **तद्रहित** इति । तन्नेत्यादिनिषेधात् । **तमोवशेषाङ्कित** इति कालस्याग्रे विचार्यत्वात् बोधनार्थाय काल इत्यर्थात् तमो न कालविशेषणमपि तु तमः स्वाभाविककृष्णविशिष्टं तत्तदा शिवः सन्नवान्तरप्रलये केवल इत्यर्थः । एवं च तमोवशेष आधारत्वेन संबद्धांशस्तेनाङ्कित इत्यर्थो भवति न तु कालाधिकरणकं तमः इति किंतु कृष्णाधिकरणकं तमः काले तु तमोवशेष इति । **ब्रह्मण** इति शिवस्य चेत्यपि द्रष्टव्यम् । यदा तम इति विवृण्वन्ति **यदा तम** इति । **कालोक्ती**ति केवलपदार्थेन सः । **प्रतीयमाने**ति । स्थितिकालस्योपरञ्जनं समीपरञ्जनं अभावात्मकप्रलये प्रतियोगिनां कारणत्वेन योग्यं तेन पूर्ववृत्तान्तः । प्रतियोगिवृत्तान्तस्तस्य बोधनं तदर्थत्वात् । अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात् । नन्वेवमपि सृष्टिवृत्तान्तकथनमस्तु कालोपरञ्जनस्य किं प्रयोजनमितिचेत्तत्राहुः **अन्यथे**ति । **बोधाभावे**ति । कालाभावे सति बोधाभावेत्यादिः । **व्यवे**ति सदेवेत्यवकारेण शिव एवेत्येवकारेण चेत्यर्थः । **वाक्यभेदे**ति यदा पराग्रपदाभ्यां बोधितः कालोप्यासीत्तत्र साक्ष्यप्यासीच्छिवोप्यासीत् सदप्यासीद्दिति वाक्यभेदप्रसङ्गादित्यर्थः । **अनुवीक्ष्ये**ति ।

'अनु-हीने सहार्थे च पश्चात् सादृश्ययोरनु ।
आयामे च समीपे च लक्षणादावनु क्रमे:' ॥

भाष्यप्रकाशः ।

त्मनोऽपश्यदित्यनुवीक्षाश्रावणस्य बाधापत्तेश्च । तस्माच्चिदचिच्छरीरविशिष्टस्य सत्त्वाद्युपाधिकस्य वोपादानत्वाङ्गीकारे केवलाद्वितीयश्रुत्योर्विरोधो दुर्वार एव । एवं च, तमः परे देवे एकीभवतीति, तमो वा इदमग्र आसीदेकं तत् परे स्यादित्यादावपि य एकीभावः स परस्वरूपत्वमेव, न तु नामरूपविभागानर्हत्वमात्रमित्येवं मन्तव्यम् । लयस्य श्लेषरूपत्वेन विभागाभावात्मकत्वे

रश्मिः ।

इति विश्वः । एतेषु सहार्थे अनु । तथा च अर्धाङ्गत्वेन सह वर्तमानां वीक्ष्यात्मनोन्यन्नापश्यत् किं तु आत्मैवेदमग्र आसीत् इति सृष्टिपूर्वकालेऽग्रे व्यवछिन्नात्मरूपेण स्वरूपात्मिकां प्रकृतिमगन्निति वाक्योक्तां प्रकृतिमपश्यत् । तृतीयसर्वधर्मापदेश इति भाष्यात् । 'प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिनः' इति गोपालतापिनीयाच्च । युक्तं च शब्दार्थयोरैक्यं औत्पत्तिकसूत्रात् । प्रणवस्वरूपं गायत्र्यर्थविवरणकारिकासु श्रीमद्गोस्वामिभिर्निरूपितम् । अनोरन्येर्थाः । हीने रामानुजाः शैवाचार्याश्च । हीनं चिदचिच्छरीरं वीक्ष्यात्मनोन्यन्नापश्यदपि तु चिदचिच्छरीरविशिष्टं आत्मानमद्वैतमपश्यत् विशिष्टाद्वैतमपश्यत् । माध्वनिम्बार्कयोः समीपेऽनुः अनु समीपे वर्तमानं भिन्नं जगद्वीक्ष्य आत्मनः आत्मकार्यात् अन्यन्नापश्यत् तथैव नैयायिकाः । यथा 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतायां तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपसादृश्यं तत्रापि योज्यम् । ना पुरुषो वाऽन्यदिति छेदः सादृश्ये शंकरपादाः अन्वर्थसादृश्यं ज्ञानकाशायां मायायां विवर्ताद्वैते पश्चादित्यर्थे वानुः तथाऽविभागाद्वैते पश्चादर्थेऽनुः अनुमानसृष्टेः पश्चादनुवीक्ष्यात्मनोन्यत् नापश्यत् किं तु नानावृक्षरसा यथा मधुकृत् मधुभावानन्तरमद्वैतमपश्यत् तथापश्यत् । अविभागाद्वैतमपश्यत् । सादृश्येनुक्रमे भास्कराचार्याः ज्ञानकाशायां सदृश्यां मायायामनुवीक्ष्य भेदवाचकानां पदानां विक्षेपं कार्यात्मना वीक्ष्य यथा कटकं सुवर्णं सुवर्णं कटकं नेत्यत्र आत्मनोऽन्यन्नापश्यत् । ना आत्मनोऽन्यदपश्यदिति तन्मार्गीयोऽन्योर्थोपि ज्ञेयः । लक्षणादौ अनुरिति वैयाकरणाः 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' इतिसूत्रे आयामेपि क्वचिद् द्रष्टव्यः । इति ब्रह्मणो निबन्धोक्तनानावादानुरोधिरूपं सोनुवीक्ष्येत्यत्र । सिद्धमाहुः **तस्मा**दिति । पूर्वग्रन्थात् । एवेति । कालस्य तु श्रुत्यन्यथानुपपत्त्या ब्रह्मत्वं 'कालोऽस्मि लोकक्षयकृत्' इति स्मृतेश्चेति । नोपरञ्जनेनाप्यन्यमतसिद्धिः कालवदित्येवकारः । माया च तमोरूपेति नृसिंहतापिनीयात् । प्रकृतिरूपतमोपि स्वरूपमित्यापत्त्या सुबोधिन्युक्तावान्तरप्रलयविषयत्वं भज्येतेति तदर्थं तत्स्वरूपमाहुः एवं च तम इति अक्षरं तमसि लीयते तमः परे देवे एकीभवतीति वाक्यम् । **परस्वरूपत्वमिति** समाकर्षादित्यधिकरणोक्तरीत्या तमः स्वार्थात्समाकृष्यते प्रच्याव्यत इत्यनभिव्यक्तस्य तमसः परस्वरूपत्वं तथा च सुबोधिन्यामिष्टापत्त्या न तत्र विरोधः । एकीभावलक्षणं रामानुजभाष्येस्ति तद्विशेष्यीकुर्वन्ति **न त्विति** तथा च परस्वरूपत्वे सति नामरूपविभागानर्हत्वमेकीभावः । तथा च भाष्यं न तु लय एकीभावः इति तमोभिधानातिसूक्ष्मचिद्वस्तुप्रकारस्य ब्रह्मणो विभक्तनामरूपतयावस्थानमभिधीयते इति रामानुजानाम् । **श्लेषेति** श्लिष आलिङ्गने । तदक्षरात्मकत्वाज्जगतो ब्रह्मणा सह भवति । श्लेषरूपत्वेन विभागाभावात्मकत्वं न संयुक्तत्वम् । गुणत्वापत्त्या 'नायं गुणः कर्म न सन्न चासन्' इति गुणत्वनिषेधात् । तथा च 'श्रुतिः यथा प्रियया स्त्रिया संपरिष्वक्तः'.इति । प्रस्थानरत्नाकरेपि स्पर्शनिरूपणे श्लेषस्तु विभागाभाव एव संयुक्ता अप्यङ्गुलयश्चतस्रो भवन्ति संश्लेषे तु न तथा

भाष्यप्रकाशः ।

एकीभावस्य पृथक्त्वाभावात्मकत्व एव पर्यवसानात् । न च शरीरत्वबोधकश्रुतिविरोधः तस्याः सृष्टिकालीनवृत्तान्तपरत्वात् । अन्तर्यामिब्राह्मणे तथात्वस्य स्फुटत्वात् । सुबालोपनिषद्यपि, 'अन्तःशरीरे निहितो गुहायामज एको नित्यः' इत्युपक्रम्य पृथिव्यादिमृत्य्वन्तानां शरीरत्वकथनेन तत्रापि सृष्टिपूर्वकालाऽलाभात् । प्रलयप्रकरणस्य प्रागेव समाप्तत्वाच्च । तस्मान्नोक्तशरीरविशिष्टस्य प्रकृतित्वम् । नापि प्रधानादेर्गर्तपतितमृतसर्पादिवत् स्थितिरिति निश्चयः ।

रश्मिः ।

यथा मिलिताङ्गुलेरिति । एवेति न चैकत्वरूपसंख्यायामन्तर्भावोऽस्त्विति शङ्क्यम् । 'न पश्यतीत्याहुरेकीभवति' इत्यादि बृहदारण्यके 'ततोन्यद्विभक्तं यत्पश्येत्' इत्यादौ विभक्तपदेन विभागोपस्थित्या एवमन्यत्र शारीरब्राह्मणेऽन्यं नवतरं कल्याणतर९ँरूपं तनुत इत्यत्र पृथक्कुरुते इत्यर्थ इति पार्थक्योपस्थित्या चैवकारः । शरीरत्वेति 'तम आसीत् तमसा गूढमग्रे प्रकेतम्' । तमसस्तन्महानजायतैकम्' इत्यादि श्रुतिविरोधः । रामानुजाचार्यमतेऽस्याः शरीरत्वबोधकत्वं तथा मनुस्मृतेश्च—

'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः' ॥

इति शरीरत्वबोधकत्वं सिद्धान्ते तस्यास्तस्याश्चावान्तरसृष्टिकालीनेत्यादिः । न तु स्थितिप्रलयकालीनवृत्तान्तबोधकत्वमिति वार्थः । न तु सृष्टिप्राक्कालीनवृत्तान्तबोधकत्वमिति वार्थः । स्फुटत्वादिति पृथिव्यादिशरीराणां सृष्टिकालीनत्वादित्यर्थः । ननु परस्वरूपसत्त्वे इति विशेषणेऽङ्गीकृते एकीभावलक्षणस्यासंभवः । तमसोऽव्यक्तत्वेन तस्य च महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते इति प्रलयश्रुतेरव्यक्तस्योत्पत्तिप्रलयौ प्रतीयेते तथा च महाभारते

'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम ।
अव्यक्तं पुरुषे ब्रह्मन् निष्कले संप्रलीयते' ॥

इति परस्वरूपत्वाभावाद्विशेषणाभावप्रयुक्तविशिष्टाभावादिति चेन्न । अत्र हेतुमाहुः प्रलयेति । प्रागेवेति । अक्षरं तमसि लीयते तमः परे देवे एकीभवतीत्यादेः प्रागेवेत्यर्थः । तथा चात्र प्रकरणाभावात् नोत्पत्तिप्रलयौ ततश्चानित्यत्वाभावात् न विशेषणाभावप्रयुक्तविशिष्टाभावः । तस्मादिति ततश्च परस्वरूपत्वात् । नोक्तेति व्याख्यातमेतत् । एवं चिदचिच्छरीरविशिष्टस्वप्रकृतित्वं निवार्य शंकराचार्यमतेपि वारयन्तो भास्कराचार्यमतेप्याहुः नापीति गर्तं विषयादिदार्ष्टान्तिके । मृतेत्यनेन जडत्वं दार्ष्टान्तिकेपि दृष्टान्तस्तु टीकायां द्रष्टव्यः । तथा च विषयपतितजडप्रधानादेरित्यर्थः । विवर्तात्मन एव परिणामसूत्रे विवर्तः परिणाम इति व्याख्यानात् । गीतायां विद्ध्यनादी उभावपीत्यत्र व्यवहारे वयं भाट्टा इति 'न कदाचिदनीदृशं जगत्' इति पूर्वमीमांसायाः प्रच्छन्नबौद्धत्वाच्च प्रतिबिम्बितसगुणस्यानादित्वम् । अतः सगुणस्यैव निमित्तत्वं उपादानत्वं चेत्यपि न केवलाद्वितीयश्रुत्योर्विरोधादिति । गीतायां कारणताशक्तिः प्रकृतिरिति विशिष्टाद्वैतमिति रामानुजाः । सुबोधिन्यां द्वितीयस्य नवमाध्याये सदानन्दस्य जगत्कर्त्री शक्तिः सा स्वरूपं सदत्रोपयुज्यते इति 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इत्यत्र तृतीयपुमर्थरूपं केवलं ब्रह्मैवोच्यतेत्रापि । अत्र परिणामस्तात्त्विकोन्यथाभावः इति विशेषः तन्तुनाभतन्तुवत् । आदिपदेन भास्कराचार्यभाष्ये शंकराचार्यमतेन आत्मकृतेरिति सूत्रे आत्मकृतेरित्यादि व्याख्याय परिणामो विवर्तत्वेन न स्वीकृतः ततश्चाभेदे त्रैलोक्य-

भाष्यप्रकाशः ।

एवं सति गौरनाद्यन्तवतीत्यादौ, 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इत्यादौ च यदनादित्वादिकथनं, तच्चतुर्मुखाऽजत्रिदशाऽमरन्यायेन जगत्साधारणोत्पत्तिनाशनिषेधपरमित्येव मन्तव्यम् ।

'तन्मायाफलरूपेण केवलं निर्विकल्पितम् ।
वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ॥
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते' ॥

इत्यादिपुराणवाक्येभ्यश्च । तेन, यस्तन्तुनाभ इति वाक्यमपि प्रधानोत्पत्त्यनन्तरकालवृत्तान्तबोधकमेवेत्येव निश्चयः । एषैव परमाण्वादिकारणवादानामपि गतिर्बोध्या । कालः स्वभाव इतिश्रुत्यैव तेषामनादरणीयत्वस्योक्तत्वादिति । तस्मात् केवलस्यैव ब्रह्मणः समवायित्वमिति निश्चयः । एवं सत्येकविज्ञानेन यत् सर्वं विज्ञातं तन्न योगजधर्मादिना, न वा अविनाभाव-

रश्मिः ।

सांकर्यप्रसङ्गः इति भेद आस्थित कार्यात्मना इत्येव । एवं च न त्रैलोक्यसांकर्यप्रसङ्गः इति मतम् । तत्र विक्षिप्तगुणः प्रकृतिः परिणामः । विक्षिप्तगुणा प्रकृतिरित्यादिपदार्थो विक्षिप्तगुणप्रधानं तस्य स्थितिः द्वितीयादिशब्दार्थभूतमुपाधिदृष्टान्तो जलचन्द्रेषु जलं तद्वत् । **एवं** चेति गौः प्रकृतिः । **अनादित्वादी**ति । आदिशब्देनान्तर्विकृतत्वं च 'विकारांश्च गुणांश्चापि विद्धि प्रकृतिसंभवान्' इत्युत्तरार्धात् । **चतुर्मुखे** चतुर्मुखश्चासावजश्च त्रिदशाश्च तेऽमराश्चेत्यनेन न्यायेन । अत्र अजशब्देनोत्पत्तिनिषेधो जगत्साधारणः परब्रह्मणस्तूत्पत्तिरस्त्येव नारायणाद् ब्रह्माऽजायत इति श्रुतेश्च । अमरशब्देन नाशनिषेधः सोपि जगत्साधारणः त्रिदशानां प्रलये नाशात् । यथा पश्चाच्छायी प्रथमप्रबोधी तं प्रति लोको वक्ति न स्वपितीति तद्वत् । **मन्तव्य**मिति शंकररामानुजभास्करादिमतानुयायिभिर्मन्तव्यं कुत इत्यतो हेतुमाहुः **तन्माये**ति । मायाफलं प्रतिबिम्बादि शंकरभास्करमतयोः । मायाचित् फलं चित् ताभ्यां रूप्यते व्यवह्रियत इति इति रामानुजाचार्यमतोर्थकः । शैवमतेपि चकारादुक्तवाक्यानि । **तेने**ति उपाधिचिदचित्तां विवक्षणेन । **एषैवे**ति सांख्यमतस्य कारणत्वांशेऽवैदिकत्वप्रतिपादनेन समीपतरवर्तिनि कारणत्वांशेऽवैदिकत्वादिरूपा सा सामान्यतोग्रेधिकरणे विशेषतो द्वितीयाध्याये स्पष्टा । परमाण्वादयः कारणानि तेषां वादानामित्यत्र परमाणवः आदयो येषां कालादीनामित्यतद्गुणसंविज्ञानोपीत्याशयेनाहुः **काल** इति । इयं श्वेताश्वतरेस्ति । तद्गुणसंविज्ञानपक्षे परमाण्वादिवादा उपक्षलक्षणविधया ज्ञेयाः

'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् ।
संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः' ॥

इति । सिद्धमाहुस्तस्मादिति प्रकृतेः स्वरूपत्वेनोपाध्याद्यभावात् । सिद्धान्ते तु प्रकृतिं पुरुषं चेति व्युत्पादितम् । श्लोकानन्तरम्

'कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते' ॥

इत्यादिकं द्वितीयस्कन्धनवमाध्यायोक्तरीत्योपपाद्य तन्मायाफलरूपेणेत्यादिसांख्यमतेन वेदान्ते इति च न तदर्थ उच्यते । न **योगजे**त्यादि नैयायिकादिमते भेदवादा योगजज्ञानलक्षणा

कार्यकारणयोर्भेदाभेदमतनिराकरणाय पिण्डमणिनखनिकृन्तनग्रहणम्। तथा सति यत्र क्वचिद् भगवान् ज्ञातः सर्वत्र ज्ञातो भवति। सर्वं च ज्ञातं भवति

भाष्यप्रकाशः।

महिम्ना, नाप्यविभागादिमहिम्ना श्रुत्यभिप्रेतं, किंतु दृष्टेनैव द्वारेणेति सिद्धम्। अतः परं दृष्टान्ते पिण्डादिपदग्रहणस्य प्रयोजनं विचारयन्ति कार्यकारणयोरित्यादि। कार्यकारणयोरभेदे त्रैलोक्यव्यवहारः संकीर्येत। अत्यन्तभेदे चैकविज्ञानेन सर्वविज्ञानं बाध्येत। अतस्तयोर्भेदाभेद एवास्थेयः। दृश्यते च तथा। तन्तव एव ह्यातता विततास्थ सन्तो लोके पटत्वेन व्यवह्रियन्ते, प्राव्रियन्ते, पटत्वजातिं च बिभ्रति। एवं च प्रतिज्ञादृष्टान्तयोरुभयोरप्युपपत्तिरिति मतनिराकरणाय पिण्डादित्रयग्रहणम्। यदि हि भेदाभेद आद्रियते, तदा येन रूपेण भेदस्तद्रूपं कारणज्ञानेन न ज्ञात भवेत्। ततो भिन्नत्वात्। अथ ज्ञायते तर्हि न तद्रूपं भिन्नमित्यभेद एवास्थेयः, कृतं भेदेन। न च सर्वथा अभेदे व्यवहारसांकर्यप्रसङ्गः। अवस्थाभेदादेव तन्निवृत्तेः। अतः कयाचिदवस्थयाऽवस्थितं कारणमेव कार्यं न तु ततो भिन्नाभिन्नमिति बोधनायावस्थारूपाणां पिण्डादीनां ग्रहणमित्यर्थः। एवमङ्गीकारे गुणमाहुः तथा सतीत्यादि। कार्यस्यैव-

रश्मिः।

सामान्यलक्षणा चालौकिक्यः प्रत्यासत्तयः उपाधिवादिनामविनाभावोपि पूर्वं व्याख्यातः। विशिष्टाद्वैतवादिनामविभागादिः। भिक्षुमतेपि। दृष्टेनैवेति शास्त्रदृष्टेन मनसा भक्तिसहकारिकारणकेन भक्तिरेव वा मनःकल्पनरूपा। तथा च बृहदारण्यके मनसैवानुद्रष्टव्यो नेह नानास्ति किंचन। गोपालतापिनीये भक्ती रहस्यभजनं तदिहामुत्रफलभोगनैराश्येनामुष्मिन् मनःकल्पनमेतदेव च नैःकर्म्यमिति। यद्वा दृष्टेन समवाय्येकदेशमृत्पिण्डादिप्रत्यक्षेण द्वारेण। भेदाभेद इति। न भेदाभेदावित्युक्तम्। अत्यन्तभेदस्य प्रतीयमानस्याविवक्षणात् ततः 'समर्थः पदविधिः' इत्यस्याप्राप्तिः। अतः भेदयुक्तोऽभेद इति समासः स त्वत्यन्तभेदे बाधितः। अत्यन्तभिन्नपरनिष्ठभेदेन युक्तो घटप्रतियोगिकभेदाभावो नास्तीति। अतस्त्रैलोक्यव्यवहारसांकर्यनिवृत्तिमात्रप्रयोजकः सुवर्णं कटकं नेत्यादिरूपभेदस्तेन युक्तोऽभेदः कटकं सुवर्णमित्यादिरूपस्तद्वाचकपदैः समासस्त्विष्टः। ननु द्वन्द्वनियामकोऽवास्तवो भेद इति मुक्तावल्यां विश्वनाथ इति चेन्न भास्कराचार्यमतेऽस्य वास्तवत्वात्। अन्यथैकविज्ञानेन सर्वविज्ञानबाधापत्तेः। जयरामकृतसमासवादे च समासत्वं विभक्तिशून्यपूर्वपदकनामसमुदायत्वम्। अत्र विभक्तिशून्यपूर्वपदकत्वं विभक्तिशून्यपदघटितशाब्दबोधप्रयोजकानुपूर्वीमत्त्वम्। शाब्दबोधे तु ह्यत्यन्तभेदस्याभावाद्भेदाभेदाविति द्वन्द्वे कृतेऽव्याप्तिरतो भेदयुक्तोऽभेद इति समासान्तरं युक्तम्। देवपूजको ब्राह्मणो देवब्राह्मण इतिवत्। भेदस्याभेदो भेदाभेद इति वा सहिष्णुत्वं षष्ठ्यर्थः। भेदसहिष्णुरभेदो भेदाभेद इत्यर्थः। प्रतिज्ञादृष्टान्तयोरिति आत्मा कर्ता प्रधानं समवायि तां शक्तिं विक्षिपति यथा सूर्यो रश्मीनां विक्षेपं करोति तद्वदेव संहरति अत एव प्रतिज्ञा 'उत तमादेशम्' इत्यादिः दृष्टान्तो मृत्पिण्डादिस्तयोरित्यर्थः। उपपत्तिरिति अभेदे प्रतिज्ञोपपत्तिः कार्यकारणयोः सूर्यरश्म्यादिरूपयोर्भेदे पिण्डादिदृष्टान्तोपपत्तिः। अवस्थेति धर्मरूपेणाविर्भवतीति द्वितीयनवमाध्याये इति साऽवस्था तेन भेदाभेदवादे भेदाभेदोप्यनया दिशा समर्थनीय इति सूचितम्। न त्वन्तर्यामिब्राह्मणोक्तपृथिव्यादिशरीरज्ञानेन किं तु तदेकदेशपिण्डादिज्ञानेन सर्वविज्ञानमिति। यद्वा भेदाभेद-

इति सामान्यलक्षणप्रत्यासत्तिनिराकरणाय च, वाचारम्भणं विकारो नामधेय-

भाष्यप्रकाशः।

मवस्थाविशेषविशिष्टकारणरूपत्वे ज्ञाते सति यत्र क्वचित्कार्ये केनचिदवस्थावैशिष्ट्येन भगवान् ज्ञातः सर्वत्र कार्ये तत्तदवस्थाविशिष्टत्वेन ज्ञातो भवति, सर्वं च कार्यं तदभिन्नत्वेन ज्ञातं भवतीति बोधसौकर्यरूपो गुण इत्यर्थः। नन्वत्र सामान्यप्रत्यासत्तिर्नादृतेत्यत्र किं गमकमित्यत आहुः **सामान्येत्यादि**। चोऽत्रधारणे। यदि हि सामान्यलक्षणात्र विवक्षिता स्यात् तदा, तत् सामान्यादिति वदेन्न तु वाचारम्भणमित्यादि। वदति त्वेवम्। तत्रायमर्थः। यो विकारः पृथुबुध्नोदरादिः स वाचारम्भणं वाचिकक्रियात्मको न तु कारणाद् व्यक्तिभेदापादकः। यथा सुप्त उत्थित उपविष्टे च पुरुषेऽवयवविन्यासभेदोऽतो नामधेयं नैमित्तिकक्रियायाः पदार्थस्वरूपभेदानापादकत्वान्नामैव। तथा चात्र कारणावस्थात्मनैवैकरूप्यस्य विवक्षित्वाद् व्यक्ति-

रश्मिः।

वादः। संभ्रमात्। भ्रान्तेर्जीवधर्मत्वात्। **क्वचित्कार्य** इति क्वचिदिति कार्यानियमः ब्रह्मविदां ज्ञानादिविषयो तेन कारणावस्थायामपि ब्रह्मविदां ज्ञानादिविषयायां बोध्यम्। **भगवानिति** तथा च सुबोधिन्यां एकैकस्मिन् पदार्थे दशविधलीलासहितो भगवांस्तिष्ठतीति। **वदेदिति** एकविज्ञानेन सर्वविज्ञानाय वदेत्। **वाचिकेति** वाचिकेत्यनेन मानस्याः कायिक्याश्च व्युदासः तादृशक्रियाजन्यः 'शब्द इति चेन्नातः प्रभवात्' इति सूत्रोक्तः स वाचिकक्रियात्मकः तथा च तदनन्यत्वसूत्रभाष्यम्। तत्र विकारो वाङ्मात्रेणैवारभ्यते न वस्तुत इत्यर्थः। **प्रतिभातीति**। एवं च **पृथुबुध्नोदरादिरिति** यथा श्रुतं चेत् 'मृदादि भगवत्कार्यं घटाद्याकारसंयुतम्' इति निबन्धो विरुध्येतेति पृथुबुध्नोदरादिपदं षड्भावविकारलक्षकं स षड्भावविकारः वाचैवारभ्यते यतः सुवर्णं वस्तु मृत्पिण्डादि च 'जायतेस्ति विपरिणमति वर्धतेऽपक्षीयते नश्यति' इत्यादिशब्दविषयकं भवति। **न त्विति** किं तु कायिकक्रियात्मक एव कारणाद्व्यक्तिभेदापादकः। अत्र दृष्टान्तमाहुः **यथेति**। **अवयवेति** षड्भावविकारस्थानापन्नः। **नैमित्तिकेति** जलाहरणादिनिमित्तैः संपाद्यते या क्रिया तस्याः जननादिषड्रूपायाः। **पदार्थेति** अन्यथा षड्भावविकारैः देवदत्तादिरूपपदार्थभेदः स्यात् तेन च प्रत्यभिज्ञाबाधप्रसङ्गः स्यात्। **नामैवेति** तथा च स्वार्थे धेयप्रत्ययः इति भावः। **व्यक्तिभेदानादर** इति। **अयमर्थः**। सुकृतं सुवर्णमिति सुवर्णस्य विशेषणविशिष्टस्य वाक्ये ग्रहणात्। सुकृतं समवायि विवक्षितम्। एवं च कटकादिरूपं सुवर्णं जगद्रूपं ब्रह्म घटशरावादिरूपं पिण्डमित्येवं व्यक्तिभेदानादरः स च सामान्यलक्षणप्रत्यासत्त्या न कटकत्वादिरूपया ब्रह्मत्वरूपया घटत्वादिरूपया ज्ञानेन संभवति व्यक्तिभेद एव तत्प्रसरात्। नन्वस्ति व्यक्तिभेदः स्वस्वकारणाभेदेपि अन्यस्मात् स्वस्वकारणभेदभिन्नाद्भेद इति। जगति त्वनुभवेनैव भेद इति चेन्न स्वस्वकारणेत्याद्युक्तानां जगत्यन्तर्भावात् तस्य च ब्रह्मत्वात् तस्य चैकत्वात् तत्र च स्वगतभेदाभावान्मनसा भक्त्या जगदन्तर्गतपदार्थानामेकत्वेन ज्ञानं तत्र भक्तिर्व्यापारो मनःकरणं तथा च भक्तिः प्रत्यासत्तिर्न सामान्यलक्षणेति। इदं बृहदारण्यकोक्तरीत्या मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवमिति गोपालतापिनीये 'भक्तिरस्य भजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन् मनःकल्पनमेतदेव च नैःकर्म्यमिति' गीतायां च—

भाष्यप्रकाशः ।

भेदानादर एव सामान्यलक्षणानादरगमकः । यथा बहुसुवर्णाकाङ्क्षायां कटककुण्डलकलशभृङ्गारादिव्यक्त्यनादरस्तथेत्यर्थः । एतदेवैकादशस्कन्धे भगवताप्युक्तम् ।

'यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥
न यत् पुरस्तादुत यन्न पश्चान्मध्येऽपि तन्न व्यपदेशमात्रम् ।
भूतं प्रसिद्धं च परेण यद्यत् तदेव तत्स्यादिति मे मनीषा' ॥

इति । यत् परेण भूतं यच्च परेण प्रसिद्धं तत्तदेव स्यादित्यर्थः । अंशे कार्यत्वाभावात् प्रसिद्धमिति पृथग्व्यपदेशः । एवमष्टमस्कन्धेऽपि ।

'यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ।
एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः' ॥ इति ।

एतेनाकारादिभेदकृत एव तत्तल्लौकिकवैदिकव्यवहारभेदो, न वस्तुभेदकृतः । यथा कलशरूपेण सुवर्णेन जलाहरणादिकं, कटककुण्डलादिरूपेण तेन हस्तकर्णादिशोभनमिति । एतेनैव फलभेदोऽपि व्याख्यातः । अन्यच्च तत्रैवाऽमृतमन्थने ब्रह्मस्तुतौ–

'त्वय्यग्र आसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे ।
त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्माद्' ॥

इति । कुत्सितत्वादिभानं तु दोषदृशामेव, न ब्रह्मविदाम् । यथा स्वाङ्गे पुरुषस्य । प्रसिद्धं तद् ऋषभदेवादिषु । तस्माद् भगवतः समवायित्वमप्रत्यूहम् । ननु यदि विकारस्य वाङ्मात्रत्वं तदैतेन

रश्मिः ।

'सर्वभूतेषु येनैकं भावमव्ययमीक्षते' ।
'अविभक्तं च भूतेषु तज्ज्ञानं विद्धि सात्त्विकम्' ॥

इति सत्त्वं वा प्रत्यासत्तिः 'सत्त्वात्संजायते ज्ञानम्' इति वाक्यात् । अधिकारभेदेन ननु भक्तिसत्त्वयोः प्रत्यासत्तित्वं न प्रसिद्धं इति चेन्न ज्ञानलक्षणप्रत्यासत्तेः प्रसिद्धत्वात् भक्तिर्ज्ञानं सत्त्वं ज्ञानं अतः सामान्यलक्षणानादर इत्यर्थः । यथेति बहु सुवर्णमित्यत्र सुकृतमित्येव तस्याकाङ्क्षायां तत्तद्व्यक्तित्वेनानादरः किं तु सुवर्णत्वेन कटकादिकं सुवर्णमिति प्रत्येति तद्वत् 'भृङ्गारः कनकालुका' इति कोशः । सुकृतमिति विशेषणं कार्यात्मनावस्थितमित्यर्थकं योग्यत्वाय । असुकृतस्य पुरस्तात्त्वाद्यभावात् । **अस्येति** जगतः । कारणताग्राहकान्वयमुक्त्वा व्यतिरेकबोधकं वाक्यमाहुः **न यदिति** । **प्रसिद्धमिति** । अंशत्वेन प्रसिद्धमकार्यम् । **अष्टमेति** । द्वादशस्कन्ध इत्यपि पाठः । **क्रियाभिरिति** जलाहरणादिरूपाभिः तत्तदाकारवचनानुकूलाभिर्वा । **वचोभिरिति** घटपटादिरूपाभिः । **अजः** शब्दान्मोंकारः । **एतेनेति** दृष्टान्ते फलभेदेनैव दार्ष्टान्तिक इत्यर्थः । **मृत्पिण्डेन** सर्वं मृण्मयमिति श्रुत्यनुकूलवाक्यान्तरमाहुः **अन्यच्चेति** । **विकारस्येति** षड्भावविकारस्य ।

मिति । अलीकत्वनिराकरणाय च मृत्तिकेत्येव सत्यमिति । ब्रह्मत्वेनैव जगतः सत्यत्वं, नान्यथेति ।

सामान्यलक्षणप्रत्यासत्तिनिराकरणं च स्पष्टमेवाग्रे त्रीणि रूपाणीत्यत्र करिष्यति । अतो ब्रह्मरूपेण सत्यस्य जगतो ब्रह्मैव समवायिकारणम् ।

भाष्यप्रकाशः ।

वाक्येन ब्रह्मणो विवर्तोपादानत्वमुपगम्य प्रपञ्चस्यालीकत्वमेवाद्रियतां तावताऽप्येकविज्ञानेन सर्वविज्ञानसिद्धेरित्यत आहुः **अलीकत्वे**त्यादि । **नान्यथे**ति न प्रतिनियतेन घटादिरूपेण, न वा जातिरूपेण नाप्यवान्तरोपादानरूपेण । तेषां रूपाणां व्यवहारमात्रार्थत्वादित्यर्थः । एतेन सिद्धान्ते प्रतिनियतरूपेण जगतः सत्यत्वाभावो न तु सत्यत्वेन रूपेण जगदभाव इति बोधितम् । ननु यदि ब्रह्मत्वेनैव जगतः सत्यत्वं तदा तेन रूपेण सामान्यलक्षणैवाद्रियतां, को दोष इत्यत आहुः **सामान्ये**त्यादि । **स्पष्टमि**ति अग्न्यादिविद्युदन्तेषु तेज इत्येव सत्यमित्यकथनात् त्रिवृत्करणस्य

रश्मिः ।

विवर्तेति उपादानविषमसत्ताकोऽन्यथाभावो विवर्तः । **सर्वे**ति सर्वस्यानिर्वचनीयान्यथाख्याति-रूपत्वेपि विशेषदर्शनात्पूर्वं सर्वमस्त्येवेति न निर्विषयकं ज्ञानम् । व्यवहारे वयं भाट्टा इति वदतां जातिरूपसर्वत्वे शक्तिः । तेन सामान्यलक्षणा प्रत्यासत्तिः । **अलीकत्वेत्यादी**ति । **भाष्ये** । मृत्तिकात्र । **यत्र क्वचिद्भगवान् ज्ञातः** इत्यादिभाष्यात् ब्रह्मविज्ञानविषयिणी ग्राह्या ब्रह्मापहाय एतस्याग्रहणं ब्रह्मरूपत्वख्यापनाय । **भाष्ये** । **ब्रह्मत्वेनैवे**ति शुक्तौ रजतं शुक्तित्वेन न भासते परिणामे तु रजतस्थानीयं जगद्ब्रह्मत्वेन भासते इति न प्रच्छन्नबौद्धत्वम् । एवकारव्यावर्त्यमाहुः **नान्यथे**ति । **प्रकृते** । **न प्रती**ति जगत्त्वेन षड्भावविकारेणेत्यर्थः । **सत्यत्वेने**ति जगतः पारमार्थिकेन रूपेण । तदुक्तं पद्यद्वयेन 'सत इदमुत्थितम्' इत्यनेन 'न यदिदमग्र आस' इत्यनेन च । तत्र कारिके

'सद्बुद्ध्या सर्वथा सद्भिर्न सेव्यमखिलं जगत् ।
भ्रान्त्या सद्बुद्धिरत्रेति सन्तं कृष्णं भजेद्बुधः' ॥ इति पूर्वपद्ये ।

द्वितीये तु । 'खपुष्पादिसमत्वाद्धि मिथ्याभूतं जगद्यतः ।
अधिष्ठानाच्च सद्भानं तं कृष्णं नियतं भजेत्' ॥

इति । **ब्रह्मत्वेने**ति नतु सत्यत्वेनाव्यवहितत्वेपि जगत्त्वसमानाधिकरणसत्यत्वस्योक्तकारि-काभ्यामभावात् । समन्वयाधिकरणोक्तसत्यत्वं तु वर्तत एव ब्रह्मलक्षणान्तर्गतम् । **अग्न्यादित्ये**ति चन्द्रमा नोक्तः सामान्यलक्षणप्रत्यासत्तिनिराकरणप्रस्तावात् चन्द्रमस्त्वं न सत्यत्वं किं तु ब्रह्मत्वेनैव जगतः सत्यत्वमित्यादिभाष्योक्तब्रह्मत्वाभिन्नमतो न सामान्यलक्षणप्रत्यासतिनिराकरणप्रस्तावेन तदुक्तिः । न च ब्रह्मत्वमेव सामान्यलक्षणप्रत्यासत्तिरस्त्विति शङ्क्यम् । अवान्तरजातिलक्षणप्रत्यासत्ति-निराकरणप्रस्तावात् तस्य सामान्यत्वे द्वैतप्रसङ्गाच्च । **तेज** इति यथा मृत्तिकेत्येव सत्यमित्यवान्तरो-पादाने सत्यत्वं तद्वदकथनात् । तथा च श्रुतिः 'सदेव सोम्येदमग्र आसीत्' इत्यादि । प्रतिज्ञातमेक-विज्ञानेन सर्वविज्ञानं देवतासु प्रवृत्तिनिमित्तत्वायोक्त्वा 'तत्तेजोऽसृजत' 'तत्तेज ऐक्षत' इति । **त्रिवृत्करणस्ये**ति यथा नु खलु सोम्येमास्तिस्रो देवताः त्रिवृत्त्रिवृदेकैका भवति इति तन्मे विजानीह्हीति' 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं

भाष्यप्रकाशः।

च बोधनात् त्रीणि रूपाणीत्येव सत्यमिति सावधारणं कथनाच्च स्पष्टम्। तेन, अपागादग्नेरग्नित्वमित्यादेरयमर्थः। यदग्न्यादौ रोहितादिगुणकं रूपमाकारत्रयं तदनागन्तुकस्वरूपविचारे अत्रिवृत्कृतानां तेजोऽबन्नानामेव, न तु त्रिवृत्कृतस्याग्न्यादेः कार्यस्य। त्रिवृत्करणात् प्रागपि सत्त्वात्। अतस्त्रिवृत्करणोत्तरमागन्तुकमग्नित्वादिकम्, अनागन्तुकरूपविचारे अनागन्तुकानारोपितरूपेणापागाद्, अग्न्यादेः सकाशादपगतम्। यतोऽग्नित्वादिकं वाचारम्भणमवस्थारूपत्वान्नाग्न्यादीनां तेभ्यो

रश्मिः।

वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वम्। वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। यच्चन्द्रमसो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। यद्विद्युतो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमित्येवमित्यर्थः। तेन रूपत्रयं प्रवृत्तिनिमित्तमित्युक्तम्। अत्र पूर्वाङ्गे निरुक्ते त्रिदेवतापक्षः चतुर्थश्चन्द्रमाः तासामपि ब्रह्मत्वेन भानं न वा। मुण्डकेपि क्षरात्सर्वे आत्मानो व्युच्चरन्तीत्यवताराणां जीवजडभिन्नत्वं न व्युच्चरणश्रावणाच्च तेषामपि जगत्त्वेन सत्यत्वं नान्यथेति प्राप्तं तत्र कृष्णाय देवकीपुत्रायेति छान्दोग्ये 'यज्ञेन यज्ञमयजन्त देवाः' इति यज्ञनारायणवाराहविषये महानारायणे तदादौ जगत्त्वेन सत्यत्वं बाधितं तदर्थं निरुक्ते अग्निः स्वाहाकृतिनामसु पठितस्तेन राधाग्निः। आत्मा पुरुषविधब्राह्मणोक्तस्तस्मै स्वाहाकृतिः पशुरूपायाः अग्निः पशुरासीत्तेनायजन्तेति पञ्चमाष्टकसमाप्तिकश्रुतेस्तेन प्रथमं तत्कथा। तदत्रादित्यः पशुरासीत्तेनायजन्त इत्यादित्यः कृष्णः 'कृष्णद्युमणिः' इति वाक्यात् तत्र कृष्णे वक्तव्ये प्रकृतिश्च राधारूपापि स्वाहाकृतिः। रामकृष्णयोः प्रकृतिपुरुषयोः सत्त्वेपि वायुः पशुरासीत्तेनायजन्तेत्यत्र विद्युदत्रोक्ता वायोरग्निरिति श्रुतेः। कार्यात्मत्वेन विद्युदुक्ता 'विद्युद्ब्रह्मेत्याहुः' इति बृहदारण्यकात्। तत्राप्यग्नित्वादीनामपायनं चन्द्रमस्त्वं कृष्णे वर्तते इति त्रयाणां रूपाणामसत्यत्वे शरदादौ रूपत्रयमुपमर्द्योपमर्दकभावेन प्रसिद्धम्। अत एव प्रकृतेः सत्त्वरजस्तमसां ते गुणाः। न च द्वैतापत्तिः 'प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिनः' इति श्रुतेः तस्या गुणाः न द्वैतापादकाः। 'प्रकृतिमगन्' इति वाक्यात्। प्रकृतिः स्वरूपमित्युक्तम्। तेन रूपत्रयं प्रकृत्यवशिष्टा।

'आसन् वर्णास्त्रयो ह्यस्य गृह्णतोनुयुगं तनुः।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः'॥

इति। त्रिवृत्करणोदाहरणश्रुत्यर्थमाहुः **तेनेति**। **रोहितादीति**। रोहितादयो गुणा यत्रेति बहुव्रीहिः। **आकारत्रय**मिति जगतो ब्रह्मत्वेन सत्यत्वे सति सामान्याभावे प्रवृत्तिनिमित्तमाकृतित्रयम्। **अत्रिवृ**दिति कारणभूतानां तत्तेजो सृजत' 'तत्तेज ऐक्षत' 'बहु स्याम् प्रजायेयेति' 'तदपोऽसृजत' 'ता आप ऐक्षन्त बह्वचः स्याम प्रजायेमहि'। इति 'ता अन्नमसृजन्त' इति श्रुत्युक्तानामित्यर्थः। **कार्यस्ये**ति सत्कार्यस्यात्रिवृत्कृतस्याग्न्यादेरित्यर्थः। **अनागन्तुके**ति अनागन्तुकानि अत्रिवृत्कृताग्न्यादिरूपाणि रोहितादीनि तेषां विचारे तत्त्रितयरूपेणानागन्तुकानारोपितरूपेण। विचारस्वरूपमाहुः **यत** इति वाचारम्भणं वाङ्मात्रेणारभ्यते। **अवस्थे**ति षड्भावविकाररूपत्वात्। तेभ्यः स्वकारणेभ्यो

भाष्यप्रकाशः।

भेदकमतस्त्रीणि रूपाणीत्येव सत्यमनागन्तुकानारोपितं रूपमिति बोध्यः। इदं च मूलकारणस्यात्यन्तपरोक्षत्वादन्त्यकार्यापेक्षया शिष्यविश्वासायोक्तम्। तच्च मूलकारणे ब्रह्मण्येव पर्यव-

रश्मिः।

भेदकं यथा कटकादीनामवस्था न कारणात्सुवर्णात् कार्यं कटकादेर्भेदकं कटकं सुवर्णमिति प्रतीतेः। तथा तेभ्यः पदार्थेभ्यो वा यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात्। तद्वन्न भेदकम्। वाचारम्भणत्वात्। अत इति व्यवहारदशायां भेदकस्य जातिरूपस्यासाधारणधर्मस्य ब्रह्मप्रकृतिगुणरूपस्य विवक्षणात्। अनागन्तुकेति। कारणताशक्तिः प्रकृतिरिति रामानुजभाष्येऽद्वैतांशे। विशिष्टांशे चिज्जडसमुदायः प्रपञ्चः प्रकृतिः। अत्र रोहितादिरूपाणां स्वरूपं मधुप्रपाठके पञ्चमे उक्तम्। अमृतानीत्यतो घटपटादिद्रव्यमपहाय गुणा जगत्यसाधारणधर्मा भेदका उक्ताः। घटः पटाद्भिद्यते घटत्वादित्येवं तत्र घटत्वादिस्थानापन्नं रोहितादिकं तु ऋग्वेदादिरूपशब्दानां रसाः आस्वादिका शक्तयः व्यामोहिकाः। तदुक्तम्। द्वितीयस्य नवमाध्याये चिद्रूपस्य व्यामोहिका शक्तिरिति। नाम चिद्विवक्तनेति ऋग्वेदान्नाम वेदश्चित् तस्य शक्ती रूपं, रूप विमोहन इति धातुपाठात्। सा प्रतिपाद्यप्रतिपादकभावसंबन्धेनार्थनिष्ठा शब्दप्रवृत्तिनिमित्तमिति मोहकत्वसाम्यात्। तत्रापि रोहितादिरूपं घटादिनिष्ठपटादिशक्तिः स्यादिति चेन्न। शक्तिश्च पदेन सह पदार्थसंबन्धोपि सोपि व्यामोहकत्वाद्रूपं व्यामोहकत्वं शब्दसंबन्धात् स चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छानुरूपः सः पदेन सह पदार्थसंबन्धः। अस्माकमिच्छावादः। आधुनिके नाम्नि शक्तिरस्त्येव एकादशेहनि पिता नाम कुर्यादिति ईश्वरेच्छायाः सत्त्वात्। आधुनिकसंकेते तु न शक्तिरिति संप्रदायः। नव्यास्तु ईश्वरेच्छा न शक्तिः किं तु इच्छैव तेनाधुनिकसंकेतेपि शक्तिरस्तीत्याहुः। शक्तिग्रहस्तु व्याकरणादिना

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः'॥

इति उदाहरणानि सिद्धान्तमुक्तावल्यां न्यायशास्त्रे। तथा च श्रुतिः 'नामानि कृत्वाभिवदन् यदास्ते' इति। अभिशब्दार्थः शक्त्यादिः तदप्युक्तम्

'लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम्।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत्'॥

इत्यलं पल्लवितेन। सन्तं कृष्णं भजेद् बुधः इत्युक्तम्। तच्चैकविज्ञानेन। किं च अप्रतीकालम्बनसूत्रे गुरौ प्रतिमायां च भगवान् सांनिध्यं करोतीत्युक्तम्। महानारायणे च 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इति 'मृदादि भगवद्रूपं घटाद्याकारसंयुतम्' इति निबन्धे। अन्तस्तद्धर्मोपदेशादित्यधिकरणे 'ध्येयः सदा सवितृमण्डलमध्यवर्ती' इति तथात्मोपनिषदन्तरात्मपरमात्मबाह्यात्मप्रतिपादिका इत्यादिकं पूर्वोक्तपक्षे विरुद्ध्यते अत एव 'न यदिदमग्र आस' इति श्लोके निधनादन्तरा त्वयि भाति मृषैकरसे इत्यन्तरालिकसृष्टिरुक्तातो ब्रह्मत्वेनैव जगतः सत्यत्वं नान्यथेति भाष्यतात्पर्यं वदन्ति इदं चेति। अन्त्यकार्येति। 'ऐन्द्रजालिकपक्षेपि तत्कर्तृत्वं नटे यथा' इति निबन्धोक्तकार्यापेक्षायाम्। यत्तु अन्त्यस्य मृत्पिण्डस्य कार्यापेक्षया लोहमणिरप्यन्त्यः चिन्तामणिवत्।

भाष्यप्रकाशः ।

स्यतीत्यभिप्रायेण । तदग्रे च यदुपदिष्टं तत् सर्वं मूलकारणस्य कार्यद्वारा परिचायनार्थम् । अतः सर्वस्य ब्रह्मैव समवायिकारणमिति सर्वं सुस्थम् । ननु जगतो ब्रह्मरूपेण सत्यत्वे तस्मिन्

रश्मिः ।

तत्र नखनिकृन्तनस्यात्यन्त्यत्वं चिन्त्यमतो यत्र कुत्रचिद्भगवान् ज्ञात इत्यादिभाष्योक्ताभिप्राय एवेति ज्ञेयम् । शिष्यस्य श्वेतकेतोर्विश्वासार्थमारुणिना पित्रोक्तम् । यतः श्वेतकेतुः पित्राज्ञया सर्वान्वेदानधीत्यानूचानमानी स्तब्ध इति तदधिकारेण विश्वासः । मूलकारणे इन्द्रजालकर्तरि । एवं च समवायिनिरूपणे प्रकृतेनाकाङ्क्षितनिमित्तनिरूपणं जातमित्यर्थान्तराख्यनिग्रहस्थानं परिहर्तुं वाचारम्भणत्वार्थमुपक्रान्त 'उत तमादेशः' स उपसंहारे एवं सोम्य स आदेशो भवतीत्यनूदितस्तस्य सर्वस्य तस्याप्यग्रेतनस्य 'सदेव सोम्येदमग्र आसीत्' इत्यादेः अभिप्रायमाहुः एतदग्रे चेति, उपदिष्टम् । 'एवं सोम्य स आदेशो भवतीति सर्वं च सदेव सोम्येदमग्र आसीत्' इत्यादि । आ समाप्ति । तत्र यत्किंचित्पूर्वं व्याख्यातमन्यट्टीकायामस्ति । **समवायी**ति अतो न निग्रहस्थानमितिभावः । प्रकृतानाकाङ्क्षिताभिधानस्यार्थान्तररूपनिग्रहस्थानत्वात् । उपदेशेषु विशेषोपि भाति टीकानुगुणमेव । 'सर्ववादानवसरं नानावादानुरोधि यत्' इतिनिबन्धाट्टीकोक्तसंदेहापनुत्तये उपदेशान्तरावतरणात् । पूर्वोपदेशे परदेवतोक्ता सा माध्वानाम् । तेषां भाष्ये श्रुतिस्मृत्युदाहरणेन विशेषानुपलम्भात् । द्वितीयोपदेशो विज्ञानेन्द्रभिक्ष्वभिमतकः 'यथा मधु मधुकृतो निस्तिष्ठन्ति' इति श्रुतिः तदीयग्रन्थेषु दृश्यते इति । तृतीयोवान्तरकारणादिविषयकः चतुर्थेऽवान्तरकारणादिविषयकः । नमामि यमुनामहमित्याचार्याः । सर्वं जहाति सर्वः शुष्यतीति श्रुतेः । 'आपमापामपः सर्वा' इत्यारणे । जैमिन्याचार्यविषयकः वृक्षस्यौषधिविद्योपयुक्तत्वात् तस्याश्च वेदस्यादौ सत्त्वात् । पञ्चमः जीवब्रह्मवादविषय इति शंकरभाष्यविषयः । 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्यष्टपदात्मकोपदेशात् । षष्ठो भेदाभेदविषयको भास्कराचार्यमतकः । यद्दोषा लवणमुदके अवाधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद यथा विलीनमेवेति श्रुतेः । लवणं न समुद्ररूपं जलं । जलं न लवणमिति भेदाभेदौ । सप्तमः समष्टिः साधारणः । पण्डितो मेधावीति स्वस्याधिकारबोधनात् 'आचार्यवान् पुरुषो वेद' इति श्रुतिकथनाच्च । 'यावन्न विमोक्ष्येऽथ संपत्स्ये' इति श्रुतिः । सर्वभाष्यप्रसिद्धत्वाच्च तस्या अत्र सत्त्वात् । अष्टमो रामानुजशैवाज्ञानवादविषयकः तस्या यावन्न वाङ्मनसि संपद्यते इत्यादिना संपत्त्युक्तेः संपत्तेश्चिदचिद्वैशिष्ट्ये संभवः । अथ न जानातीति श्रुत्या अद्वैतमज्ञानवादश्च । नवमः श्रीवल्लभाचार्याणामुपदेशः 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्येकादशपदात्मकः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दाह्यते अथ मुच्यते इति स्वरूपलक्षणोक्तेः सत्येनेत्युपलक्षणं ज्ञानानन्तयोः अतोष्टाक्षरमन्त्रे कृष्णोर्थः सदानन्दरूपः शब्दश्चिदिति सच्चिदानन्दः श्रीः प्रेङ्खश्रितलक्ष्म्याः 'श्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति श्रुतेः । 'शरणं विहितं मुमुक्षुर्वै शरणमनुव्रजेत्' इति । महाराजत्वात् तस्मिन् गृहे समागते शरणमार्गस्तद्गृहे च, स्वगृहे भक्तिमार्गः । ममेति विशेषः । अमुकशर्मण

देहात्मबुद्धिस्तु सत्यां विकारबुद्धौ दोषः। श्रुतिसामर्थ्यं प्रमाणमित्युक्तम्। तस्माद् ब्रह्मैव समवायिकारणं, न प्रकृतिः॥ २३॥

भाष्यप्रकाशः।

ब्रह्मधर्मविरुद्धधर्माध्यासो न स्याद्, देहादेरप्यात्मत्वेन सत्यता स्यात्। तथा सति देहात्मबुद्धेर्दोषत्वमप्यपेयात्। ततश्चाविद्यानिवर्तकशास्त्रवैयर्थ्यमापद्येतेत्यतो जगन्मिथ्यात्वमेव साधीय इत्यत आहुः **देहात्मे**त्यादि। वस्तुविचारेण जगतो ब्रह्मरूपत्वेऽपीदानीं बहुजन्माभ्यस्तविकारबुद्धेरनिवृत्तत्वात् तस्यां सत्यां या देहात्मबुद्धिः सा देहाभिन्नत्वेनात्मावगाहिनी, न त्वात्माभिन्नत्वेन देहावगाहिनी। आत्मस्वरूपस्याज्ञातत्वादतो दोषरूपैवेति न कोपि जगतो ब्रह्मरूपत्वे पूर्वोक्तो दोष इत्यर्थः। नन्वेवं व्यवस्थया देहात्मबुद्धेर्दोषत्वे किं मानमित्याकाङ्क्षायां पूर्वोक्तं स्मारयन्ति **श्रुती**त्यादि। **श्रुतिसामर्थ्य**मिति। दृष्टान्ते हि कार्यत्वन्यक्कारेण कारणात्मकत्वमुपदिष्टं, न तु तत्पुरस्कारेण। किंच। कारणात्मना कार्यज्ञानमभिसंहितं, न तु कार्यात्मना कारणज्ञानम्। अतस्तत्सामर्थ्यमेव तादृशव्यवस्थायां प्रमाणमित्यर्थः। सिद्धमाहुः **तस्मा**दित्यादि॥ २३॥

रश्मिः।

इति। **ब्रह्मधर्मे**ति। ब्रह्मधर्मा अपहतपाप्मत्वव्यापकत्वादयः तद्विरुद्धाः पापित्वाव्यापकत्वादयः तेषां त्वध्यास एवातस्मिन् तत्त्वारोपात्। **देहात्मबुद्धे**रिति अहं स्थूल इत्यादिरेव देहात्मबुद्धिः। **ततश्चे**ति सार्वविभक्तिकस्तसिः देहात्मबुद्धेर्दोषत्वापाये। अविद्या पञ्चपर्वा देहाध्यासः प्राणाध्यासोन्तःकारणाध्यास इन्द्रियाध्यास इति तन्निवर्तकं शास्त्रं पञ्चपर्वविद्याबोधकम्। 'वैराग्यं सांख्यायोगौ च तपो भक्तिश्च केशवे' इति पञ्चपर्वाणि तद्बोधकं शास्त्रं 'त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः उपगीयमानमाहात्म्यम्' इतिवाक्यात् षट् शास्त्राणि। **जगन्मिथ्यात्व**मिति। शुक्तिकारजतवत् न त्ववान्तरकारणमृत्पिण्डादिदृष्टान्तेन ब्रह्मत्वेन। **विकारे**ति षड्भावविकारबुद्धेः। **आत्मावगाहिनी**ति अतिरिक्तस्यात्मनो दर्शनादिति हेतुः। **अज्ञातत्वा**दिति तथाच विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वात् विशेषणस्यात्मरूपत्वात्। **पूर्वोक्त** इति आभासोक्तः। **तत्पुरस्कारे**णेति। **तत्सामर्थ्य**मिति श्रुतेः सामर्थ्यम् शब्दव्यापारः तदपि प्रमाणं श्रुतिसंबन्धात् श्रुतिकृतिः प्रमाणं तत्संबधात्कृतिस्तस्येति तृतीयस्कन्धपद्यस्य[1] यतो भवद्भिश्चमित्यस्य कारिकायाम्। **तादृशे**ति दोषो दृश्यते यत्र व्यवस्थायां प्रमाणं समर्था श्रुतिः प्रमाणं व्यापारानाविष्टायाप्रमाणात्वाभावात् करणत्वाभावेन प्रमाणलक्षणाप्रसक्तेः। **तस्मादित्यादी**ति। तस्मात्। अर्धजरतीयेनोभयस्थापनपक्षाभावात्॥ २३॥

---

१. सर्वथादरणीयो यः स प्रमाणमिहोच्यते। तत्संबन्धात्कृतिस्तस्य प्रमाणं वाक्यमेव च॥ भाग० ३।२३।२० श्लोकस्येयं कारिका।

अभिध्योपदेशाच्च ॥ २४ ॥

लिङ्गान्तरमाह। सोऽकामयत बहु स्यां प्रजायेयेतीत्यत्र कामनं तस्याभिध्यानम्। आप्तकामत्वान्न कामना। तदभिध्यानं सृष्टावुपदिश्यते। बहु स्यामिति स्वस्यैव बहुरूपत्वाभिध्यानेन सृष्टं स्वयमेव भवति। सुवर्णस्यानेकरूपत्वं सुवर्णप्रकृतिकत्व एव। अध्यासाभावाद् गौणत्वापत्तेश्च। न हि मुख्यं बहुभवनं

भाष्यप्रकाशः।

अभिध्योपदेशाच्च ॥ २४ ॥ सूत्रमवतारयन्ति। **लिङ्गान्तरमाहेति**। ननु दृष्टान्ते मृत्तिकेत्येव सत्यमिति कारणे सत्यपदमुक्तम्। अतस्तत्सामर्थ्येन कार्ये मिथ्यात्वमपि प्रमातुं शक्यत इति शङ्कायां प्रपञ्चे विवर्तत्वस्य ब्रह्मणि विवर्तोपादानत्वस्य च निरासाय लिङ्गान्तरमाहेत्यर्थः। **अभिध्यानमिति**। एवमेवमिदं करिष्यामीत्यालोचनम्। विचार इति यावत्। **सुवर्णप्रकृतिकत्व इति** अंशकार्ययोस्तथात्वे। नन्वभिध्योपदेशोऽपि न ब्रह्मणः समवायित्वसाधकः। योगिकायव्यूहवदपि बहुभवनाभिध्योपपत्तेरित्याशङ्कायामाहुः **अध्यासेत्यारभ्य नान्यथेत्य-**

रश्मिः।

अभिध्योपदेशाच्च ॥ २४ ॥ चेति अनुक्तसमुच्चये चकारः। पूर्वपक्षनिरासाय च इत्यस्यार्थस्य समुच्चायकः। **प्रमातुमिति** कार्यं मृत्पिण्डादि मिथ्या कृतकत्वात् घटवत् इति। **लिङ्गान्तरमिति** अर्धजरतीयाभावो लिङ्गम्। अभिध्योपदेशोन्यलिङ्गमिति अन्यलिङ्गं लिङ्गान्तरम्। **भाष्ये। कामनमित्यादि** कामयतेत्यस्य विवरणम्। बहु स्यामिति बहुनिष्ठसत्तानुकूलव्यापारोऽभीष्टस्तद्विषयिणी कामनात्र कामनं तस्याभिध्यानं 'प्रजायेय' इत्युक्तम्। अभित उच्चनीचभावेन ध्यानं चिन्तनमुपादानकारणसहितचिन्तनं प्रजायेयेति इत्युक्तप्रजननानुकूलव्यापारोभीष्ट इत्येवम्। ननु ह्यभिध्यानं पराभिध्यानसूत्रोक्तं परस्य भगवतो अभितो ध्यानं रमणेच्छेति विहाय कुतोभीष्टे इच्छाविषयो लक्षणया व्याख्यात इति चेन्न तदभिध्यानादेवेति सूत्रे तस्य तस्य कार्यस्योत्पादनार्थं तदभिध्यानं ततस्तदात्मकत्वं तेन तद्वाच्यत्वमिति भाष्यात्। ननु स्वरूपे प्रकृतिं निवेश्य मुख्यार्थत्यागे को हेतुरत आहुः। **आप्तेति** आप्तकाम इति श्रुत्यन्तरेणेत्यर्थः। **सृष्टाविति** सृष्ट्यर्थमेकोहं बहु स्यां प्रजायेयेत्युपदिश्यते। **भवतीति** न तु शुक्तौ रजतवन्मिथ्या। नापि पूर्वपक्षः। त्वया पूर्वपक्षिणा प्रकृतेर्जडत्वाङ्गीकारादिति भावः। 'क्षीरवच्चेष्टितं प्रधानस्य' इत्यग्रे प्रतिविधास्यते। **प्रकृते। अंशेत्यादि** ननु सुवर्णस्य कार्यरूपस्य सुवर्णपिण्डरूपस्य सुवर्णप्रकृतिकत्व इत्यर्थ इतिचेन्न दार्ष्टान्तिके सुवर्णस्थानापन्नयोरुक्तेः। अंशाः शकलानि सुवर्णस्य भेद्यस्वरूपायां प्रकृतौ भवन्ति जलस्य तु न भवन्ति शकलानि भेदरूपप्रकृत्यभावात् तद्वत्प्रकृतेरंशेषु स्वरूपभूतप्रकृतिसत्त्वात् तत्संबन्धे जीवत्वं इवार्थे भेदकवत्त्वं च कार्येषु सुवर्णरूपत्ववत् ब्रह्मत्वं इवार्थभेदकवत्त्वम्। इवशब्दस्त्वेवं स्मर्यते 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति ब्रह्मनिरूपणे गीतायाम्। **तथात्व इति** दार्ष्टान्तिके ब्रह्मप्रकृतिकत्वे ब्रह्मप्रकृतिर्ययोस्तेंशकार्ये तथा सुवर्णांशकार्यत्वेन प्रकारेण यथा तथा ब्रह्मांशकार्यत्वेन प्रकारेण तयोर्भावस्तथात्वं तस्मिन्। अध्यासेत्यारभ्येति इह ब्रह्मण इति शेषं पूरयित्वा तत्र हेतुद्वयं योजनीयम्। कायव्यूहे अध्यासोपयोगः। **मुख्यमिति** समवायिनः स्वस्य विषमानत्वे सिंहादिरूपत्वं ब्रह्मसमवायिवत् किंतु स्वस्यैव

योगिनां संभवति । सर्वभवनसामर्थ्यान्मुख्ये संभवति गौणकल्पनाया अन्याय्यत्वात् । चकाराद्, इदं सर्वं यदयमात्मेति कार्यस्य ब्रह्मत्वश्रुतिर्ब्रह्मप्रकृतित्वे संभवति, नान्यथा ।

अथवा 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति तस्य जगद्रूपत्वेनाभिध्यानमुपदिश्यते । तद् ब्रह्मसमवायित्वे घटत इति चकारात् 'एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्' इति ॥ २४ ॥

भाष्यप्रकाशः ।

न्तम् । ननु योगबलेनाध्यासाभावेऽपि भगवान् नानाभावं कर्तुं शक्नोति, गौणत्वं ब्रह्मणोऽविकृतत्वसाधकत्वाददुष्टम् । अतो नेयमभिध्या समवायित्वसाधने लिङ्गं भवितुं शक्नोतीत्याशङ्क्य व्याख्यानान्तरमाहुः अथवेत्यादि । तत्र हि सर्वस्य ब्रह्मत्वे, तज्जलानित्यनेनोत्पत्तिस्थितिलयाधारत्वं हेतुत्वेनोक्त्वा तथाभिध्यानमुपदिश्यते । यदि समवायित्वं नाभिप्रेयाद्धेतुं न वदेदतस्तथेत्यर्थः ॥२४॥

रश्मिः ।

सिंहत्वादिः । ननु क्षीरवच्चेष्टितं प्रधानस्येति सांख्यसूत्रात् अर्धजरतीयन्याय इति चेत्तत्राहुः सर्वभवनेति मुख्ये बहुभवने । गौणेति प्रकृतिगुणसंसर्गवत्त्वादर्धजरतीयकल्पनायाः । सूत्रीयचकारार्थमाहुः चकारादिति इदं सर्वं चिज्जडात्मकम् । ब्रह्मप्रकृतिकत्व इति जीवेषु ब्रह्मोपादानत्वे प्रकृतिरिवांशभेदके । जडेष्वप्येवम् । नान्यथेति प्रकृत्यंशपरित्यागे प्रकारे । प्रकृते । गौणत्वमिति प्रकृतिगुणसंसर्गवत्त्वम् अविकृतस्य चिन्तामण्यादिवदविकृतत्वं यत्तत्प्रकृतिस्वरूपकत्वे इत्यविकृतत्वसाधकत्ववत् । इयमिति अभित उच्चनीचभावेन चिन्तनं स्वस्य रमणेच्छाविषयम् । अभिध्यानमित्युपासनम् । पराभिध्यानात्तु तिरोहितमित्यत्र यद्व्याख्यातं तत्तु पूर्वव्याख्याने हेतुमिति तज्जलानितीतिपदं हेतुवाचकं हेतुर्वाच्यः । तथेत्यर्थ इति यो यदंशः स तं भजेदिति वाक्यात् समवायित्वम् । इदं ब्रह्मसमवायित्वे घटते इतीति भाष्यस्यार्थः । प्रकृते । किं प्रयोजनमित्याशङ्क्य भाष्ये प्रयोजनमाहुः चकारादिति इयं राजविद्याराजगुह्यनिरूपणेऽस्ति प्रकृतेः स्वरूपत्वे एकत्वं एकं ब्रह्मप्रकृतिरित्यत्रापाततोभातेनेवार्थपृथक्त्वेनाभेदेपि अत्र शंकराचार्याः प्रकृतिरुपाधिरिति बहु स्यामिति प्रत्यगात्मविषयत्वाज्जीवरूपेण बहुत्वमित्याहुः । किंच सोऽकामयत इति कर्तृत्वम् । तेन सगुणब्रह्मत्वं द्योतितम् । रामानुजभाष्ये विचित्रचिदचिद्रूपेणाहं बहु स्यामिति विशिष्टाद्वैतम् । माध्वभाष्ये तु

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते' ॥

इतिवचनात् तदभिध्यैव प्रकृतिशब्देनोच्यते 'सोभिध्या स ज्ञूतिः स प्रज्ञा स आनन्दः' इति श्रुतेरभिध्या च स्वरूपमेव ।

'ध्यायति ध्यानरूपोसौ सुखी सुखयतीव च ।
परमैश्वर्ययोगेन विरुद्धार्थतयेष्यते' ॥

इति ब्रह्माण्डे । एतद्वक्ष्यन्ति चाग्रे भास्करभाष्ये इतश्चापोदानं 'तदैक्षत बहु स्यां प्रजायेय' इति बहु भवामीति संकल्पपूर्विका प्रवृत्तिरभिध्यानमिति प्रकृतिस्तूपाधिरित्येवं भाति तन्मते जीवस्य व्यापकत्वात् ॥ २७ ॥

साक्षाच्चोभयाम्नात् ॥ २५ ॥

लिङ्गमुक्त्वा श्रुतिमेव प्रमाणमाह । साक्षाच्छ्रुत्यैव समवायित्वमुच्यते । चकारात् स्मृत्यापि । कथं श्रुत्योच्यते तत्राह उभयाम्नानात् । ब्रह्मणः सकाशाद् ब्रह्मण्येव च सृष्टिप्रलययोराम्नानात् । सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्तीति । 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा' इति च । न ह्येतस्मिन्निमित्तत्वे संभवति । सुवर्णादिषु तथोपलब्धेः । लोकवेद-न्यायेन साक्षात्त्वम् । तस्माद् भगवानेव समवायिकारणम् ॥ २५ ॥

भाष्यप्रकाशः ।

साक्षाच्चोभयाम्नानात् ॥ २५ ॥ सूत्रमवतारयन्ति लिङ्गमित्यादि । 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्' इति स्मृत्या कश्चित् प्रत्यवतिष्ठेदतस्तन्निरासाय श्रुतिमाहेत्यर्थः । एतस्मिन्निति प्रलयबोधक आकाशवाक्ये । लोकवेदन्यायेनेति लौकिकेन वैदिकेन च न्याये-नेत्यर्थः ॥ २५ ॥

रश्मिः ।

साक्षाच्चोभयाम्नानात् ॥ २५ ॥ लिङ्गमित्यादीति भाष्ये लिङ्गं शब्दस्य सामर्थ्यं सर्वं खल्विदं ब्रह्मेतिशब्दस्य । हेतुं वोक्त्वा । श्रुतिमेवेति आनुमानिकसूत्रोक्तानुमानं व्यवच्छिनत्त्ये-वकारः । प्रकृते । मयाध्यक्षेणेति इयं राजविद्याराजगुह्ययोगाध्यायेस्ति अतोन्यथाज्ञाने स्वमार्गीयोपि कश्चित् प्रत्यवतिष्ठेदित्यर्थः । अस्या उल्लेखो भाष्ये सृष्टिद्वयविवरणादत्रापि प्रकृतिं यान्ति मामिकामिति स्वरूपं प्रकृतिरुक्ता विकृतसमवायित्वार्थं नतु विपरिवर्तनार्थम् ।

'यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय' ॥

इति पूर्वमुक्तत्वात् पुनः प्रकृतिं स्वामवष्टभ्य विसृजामि इत्यविकृतसमवायित्वार्थम् । स्वामिति अग्रे आन्तरालिकसृष्ट्यर्थम्—

'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते' ॥

इति विवर्तरूपान्तरालिकसृष्टिरुक्तेति । भाष्ये । ब्रह्मणः सकाशादिति कर्तृत्वं कुलालाद् घट इतिवत् ब्रह्मणीति समवायिनि । इह कपालयोर्घटो भविष्यति कपालयोर्घटो ध्वस्त इतिवत् आकाशादिति आकाशस्तल्लिङ्गादिति सूत्रे आकाशो ब्रह्मेति निर्णीतम् । आकाशशरीरं ब्रह्मेति स्वमते । तत्स्वरूपमित्युक्ता प्रकृतिः सा च कर्तृत्वस्य शरीरव्यापकत्वात् अविकृतत्व-साधकत्वेपि स्वरूपं शरीरम् । कर्तृत्वात् कुलालस्य कर्तृत्वाच्छरीरित्वं दृष्टं अस्तं यन्ति लयं यन्ति समवायित्वबोधकम् । प्रभवत्यस्मादिति प्रभवः प्रलीयतेऽस्मिन्निति प्रलयः । प्रकृते । आकाशेति निमित्तत्वं संभवति निमित्तत्व इति पाठे निमित्तत्वे प्रतिपाद्ये सत्यभिन्ननिमित्तोपादानत्वरूपो मुख्यार्थः संभवतीत्यर्थः । क्वचित्पुस्तके न ह्येतन्निर्निमित्तत्वे संभवतीति पाठः । भाष्ये । सुवर्णादिष्विति सुवर्णं सुवर्णः सुवर्णकारश्च सुवर्णौ निमित्तोपादाने आदी येषां मृत्पिण्डकुलालादीनां ते सुवर्णादयस्तेषु एकैकत्वोपलब्धेः । यद्वा निमित्तत्वमीक्षतिना ईक्षत्यादिभिर्वा ब्रह्मणि सिद्धं तादृशे

आत्मकृतेः परिणामात् ॥ २६ ॥

ननु 'स एव सर्वं सृजति स एवावति हन्ति च' इति कर्तृत्वप्रतीतेरा-काशादिवाक्यमप्यौपचारिकं भविष्यतीति तन्निराकरणायाह आत्मकृतेः । 'तदात्मानं स्वयमकुरुत' इति स्वस्यैव कर्मकर्तृभावात् । सुकृतत्ववचनाच्चालौकिकत्वम् । तथापि ज्ञानार्थमुपपत्तिमाह परिणामात् । परिणमते कार्याकारेणेति ।

भाष्यप्रकाशः ।

आत्मकृतेः परिणामात् ॥ २६ ॥ परिणामात् प्राप्तस्य विकृतत्वस्य परिहारार्थं युक्ति-

रश्मिः ।

निमित्तत्वे न ह्येतत्संभवति यतः सुवर्णादिषु समवायिषु तथास्तापनादि तस्य भावः तस्योपलब्धेरतो ब्रह्मसमवायीत्यर्थः । परंपरयोपलब्धिः । **प्रकृते । लोकवेदेति** कथमस्याः साक्षात्त्वं तत्राहुरित्यवतरणं पूरणीयम् । स्मृतिर्हि लोकवेदात्मिकेति । गर्भस्तुतिसुबोधिन्याम् । सह अक्षेण प्रत्यक्षमूलवेदन चिद्रूपेण वा यो लोकः । साक्षाच्चेति सूत्ररूपस्मृत्यात्मकः स साक्षस्तमततीति साक्षात् सर्वाणि ह वा इमानीति श्रुतिः तस्य भावः साक्षात्त्वम् । लोकवेदन्यायोप्ययम् । अयं न्यायो लोके भवो वेदे भवो न तु मन्वादिस्मृतिषु भव इत्याहुः **लौकिकेनेत्यादि** । भवार्थे ठक् । तथा च लोकभवेन न्यायेन वेदभवेन न्यायेनेति भाष्यार्थः । 'मयाध्यक्षेण' इति गीता समाधनं तु व्याख्यानावसरे जातमिति न पुनरुच्यते आन्तरालिकसृष्टेः सिद्धान्तेप्यङ्गीकारात् । **भाष्ये । तस्मादिति** साक्षाच्छ्रुतिसत्त्वात् । अन्यत्र भाष्ये ब्रह्मणः समवायित्वं रामानुजभाष्ये साक्षादुभयाम्नानं किंस्विद्वनं क उ स वृक्ष आसीत् इत्यादि श्रुतावित्युक्तम् । माध्वभाष्ये पैङ्गिश्रुतिः प्रकृतिपुरुषौ ब्रह्मेति वक्तीत्युक्तम् । तदग्रे वक्ष्यन्ति । भास्कराचार्यभाष्ये सर्वाणि ह वा इमानीति श्रुतिः तत्र स्वस्वमतभेदो ज्ञातव्यः नानावादानुरोधित्वाद् ब्रह्मणः ॥ २५ ॥

आत्मकृतेः परिणामात् ॥ २६ ॥ भाष्ये । औपचारिकम् आकाशस्तल्लिङ्गादित्यधिकरणस्य विकृतसमवायिब्रह्मपरत्वमौपचारिकम् । प्रकृतिगुणसंसर्गवत्त्वेन ।

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते' ॥

इति गीतायास्तन्निराकरणाय **सुकृतत्वेति** । सोऽकामयतेति पूर्वसूत्रोक्तश्रुत्यनन्तरं स तपस्तप्त्वा इदं सर्वमसृजतेत्याद्युक्त्वा 'तदप्येष श्लोको भवति' 'असद्वा इदमग्र आसीत् ततो वै सदजायत' 'तदात्मान९स्वयमकुरुत तस्मात्तत्सुकृतमुच्यते' इतीति पठ्यते अत्र सच्छब्देन ब्रह्मैवोच्यते 'अहमेवासमेवाग्रे' इत्यस्य सुबोधिन्याम् । **सदसदिति** सच्छब्देन च ब्रह्मैवोच्यत इत्यर्थः तथा च अः सत् असत् तत्कर्म आत्मा नगः पर्वतः इति पाठान्तरम् । आत्मानमिति पाठः । सुकृतमात्मानं परिणमय्य कृतं तस्य वचनादित्यर्थः । अलौकिकत्वं परिणामित्वेप्यविकृतत्वम् । **ज्ञानार्थमिति** अविकृतत्वज्ञानार्थम् । कार्यकारणवस्त्वैक्येति वाक्यात् यद्यपि दुग्धं दधि भवतीति प्रत्ययेन दुग्धं न स्यात् चेत्प्रत्यक्षविरुद्धघटादि दधि स्यात् इत्युपपत्तिः । तथा प्रपञ्चो ब्रह्म न स्यान्मनसाप्याकलयितुमशक्यरचनो न स्यात् इति परिणामविषयिणी तथापि विकृतपरिणामविषयिणीति सर्वाणि तैजसानीति वक्ष्यन्ति यदि सुवर्णमविकृतपरिणामि न स्यात् कटकमपि कुण्डलं स्यात् सुवर्णवत् । न

अविकृतमेव परिणमते सुवर्णम् । सर्वाणि च तैजसानि । वृद्धेश्चालौकिकत्वाद् ब्रह्मकारणत्व एव घटते पूर्वावस्थान्यथाभावस्तु कार्यश्रुत्यनुरोधादङ्गीकर्तव्यः ।

भाष्यप्रकाशः ।

माहुः **अविकृतमित्यादि । सर्वाणि च तैजसानीति** यद्यविकृतपरिणामस्य बाहुल्यं नाभिप्रेयात् पूर्वं सर्वतैजससाधारणस्य लोहपदस्योक्तत्वेऽपि पुनः कृष्णायसं न दृष्टान्तीकुर्यात् । अतो बाहुल्याभिप्रायेणैव तदुक्तिरसमीचीनत्वेन प्रतीयमानस्यापि ब्रह्मसमवायिकत्वबोधनार्थं च । ननु, तदैक्षत बहुस्यां प्रजायेयेति बहुभवनादिवृद्धेस्तेजःप्रभृतिषूक्तत्वात् तेषामपि विकारित्वं चेत् सुवर्णादीनां का वार्तेत्यत आहुः **वृद्धेरित्यादि** । तेषां वृद्धिर्न लौकिकी । सर्वतः पूर्वभावित्वेन श्रुत्येकसमधिगम्यत्वात् । अतः सा तेजआदिकर्तृकस्यापीक्षणस्य ब्रह्मकारणत्व एव घटते । तासु जीवानुप्रवेशस्य पश्चादुक्तत्वेनेक्षणदशायामचेतनत्वात् । अतस्तासामपि ब्रह्मवदविकृतत्वान्न सुवर्णादिषु तद्दृष्टान्तेनानुपपत्तिरित्यर्थः । ननु पूर्वावस्थान्यथाभावरूपो विकारस्तु ब्रह्मणोऽप्यायातीति कथं ब्रह्मणोऽप्यविकृतत्वमित्यत आहुः **पूर्वेत्यादि** । तथा च दधिदुग्धन्यायेन स्वरूपस्य गन्धादिगुणानां चान्यथाभाव एवात्राग्राह्यविकारत्वेनाभिप्रेयते, न तु संख्याद्यन्यथाभावोऽपि तथात्वेनेति कार्यश्रुत्यनुरोधादङ्गीक्रियते । अत एव वेदस्तुतौ, 'न हि विकृतिं त्यजन्ति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितम्' इति ग्राह्यविकार-

रश्मिः ।

त्वेवमिति ब्रह्म न विकृतं परिणामि परिणमत इति, णम प्रह्वत्वे शब्दे च भ्वा. प. से. पर्युपसर्गाद्रात्मनेपदम् । लोहदृष्टान्तानन्तरं नखनिकृन्तनदृष्टान्तसूचितमर्थमाहुः **असमीचीनेति** । **बहुभवनादीति** बहुषु भवनं जायते इति भावविकारः आदिशब्देन अस्ति विपरिणमते वर्धते भवनादि वृद्धिः तस्याः । **न लौकिकीति** परिणामपरित्यागो द्वितीयस्य वृद्धिरूपस्यादिमः उभावेकीकृतो लोके वृद्धिः एवमपक्षीयते इत्यपक्षयः । नश्यतीति नाशः । तदेतद्द्वितीयसुबोधिन्यां दशमेस्ति । **तेजआदीति** । छान्दोग्ये श्वेतकेतूपाख्यान एव 'तत्तेजोऽसृजत' 'तत्तेज ऐक्षत' 'बहु स्यां प्रजायेय' इति 'तदपोऽसृजत' 'ता आप ऐक्षन्त बह्वयः स्याम प्रजामहि' इति 'ता अन्नमसृजन्त' । **ब्रह्मेति** तत्रैवेत्यस्याः पूर्वं 'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयं तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम्' 'तदैक्षत बहु स्यां प्रजायेय' इति 'तत्तेजोऽसृजत' 'तत्तेज ऐक्षत' इत्येवं ब्रह्मकारणत्वं तस्मिन् । **तास्विति** तेजोबन्नात्मिकासु देवतासु । **पश्चादिति** 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इत्यनेन जीवानुप्रवेशस्य तत्तेज ऐक्षतेत्यादिनोक्तक्षणात्पश्चात् उक्तत्वेनेत्यर्थः । सेयमित्यस्य सदेवेत्यनेनोक्ता देवतेत्यर्थः । अत्र भाष्ये पूरयन्ति **अत** इति जडत्वेपि तासामित्यन्वयः । **अविकृतेति** । ब्रह्मण ईक्षणात्पूर्वं ब्रह्मवत् । तेजआदीनां स्वस्वेक्षणात्पूर्वमविकृतत्वं तस्मात् तद्दृष्टान्तेन तद्देवतादृष्टान्तेन । अनुपपत्तिरविकृतत्वानुपपत्तिः । सुवर्णादिः विकृतं समवायित्वात् तेजआदिदेवतावत् । इत्यनेनानुमानेनेत्यर्थः । अन्यथाभावत्वेनान्यथाभावरूपविकाराभावात् न दोष इत्याहुः **तथाच दधीति** । **गन्धादीति** शब्दरूपरसगन्धस्पर्शपरा वृत्तिः कार्येष्वन्यथाभावः । **संख्यादीति** आदिशब्देन परिमाणम् । **तथात्वेन** ग्राह्यविकारत्वेन **अङ्गीति** अन्यथाकार्यश्रुतिविध इति भावः । **नहीति** कनकार्थिनः कनकस्य विकृतिं कुण्डलादिकं न त्यजन्ति कुतः **तदात्मतया** कनकात्मतया तद्वत् । स्वकृतमिदं जगत् जीवात्मनानुप्रविष्टं ब्रह्मविद्भि-

वक्ष्यति च, श्रुतेस्तु शब्दमूलत्वादिति । अन्यानि च युक्तिदूषणानि परिहरिष्यति । तस्माद् ब्रह्मपरिणामलक्षणं कार्यमिति जगत्समवायिकारणत्वं ब्रह्मण एवेति सिद्धम् ॥ २६ ॥

योनिश्च हि गीयते ॥ २७ ॥

चेतनेषु किंचिदाशङ्क्य परिहरति । नन्वस्तु जडानां ब्रह्मैककारणत्वम् । चेतनेषु तु योनिबीजयोः समवायित्वदर्शनात् पुरुषत्वाद् भगवतो योनिरूपा प्रकृतिः समवायिकारणं भवतु । शुक्रशोणितसमवेतत्वाच्छरीरस्येत्याशङ्क्य परिहरति

भाष्यप्रकाशः ।

स्यादुष्टत्वमुक्तमिति नायं दोष इत्यर्थः । नन्वयमेव सूत्रकाराशय इत्यत्र किं गमकमत आहुः वक्ष्यतीत्यादि । स्फुटमन्यत् ॥ २६ ॥

योनिश्च हि गीयते ॥ २७ ॥ अत्रापि सर्वं निगदव्याख्यातम् ।

रश्मिः ।

रात्मतयावसितमिति । अदुष्टत्वमिति ग्राह्यत्वांशे अन्यथा हानिजनकत्वान्न गृह्णीयुः । अयमिति अन्यथाभावरूपविकाररूपो दोषः । स्फुटमिति । अग्रे इति द्वितीयाध्याये । ब्रह्मपरिणामो लक्ष्यते ज्ञायते अनेन इति करणे ल्युट् । कार्यं मनसाप्याकलयितुमशक्यरचनम् । सिद्धमिति सूत्रान्तरान्तेऽनुक्त्वात्रोक्तम् । जडविचारसंपूर्णता द्योतयति । एवं स्फुटमित्यर्थः । शंकरभाष्ये तु विकृतत्वापत्तिभिया परिणामादिति पृथक् सूत्रमङ्गीकृतं तस्यैषोर्थः । इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्मण एव विकारात्मना परिणामः सामानाधिकरण्येनाम्नायते सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं चेत्यादिना तत्तु विकारस्य परिहृतत्वात् प्रकृतेः स्वरूपत्वस्योक्तत्वाच्चिन्त्यम् । रामानुजाचार्यास्तु सूत्रद्वयमङ्गीकृत्य पूर्ववद्व्याकुर्वन्ति द्वितीयसूत्रेऽन्तर्यामिब्राह्मणं सर्वं लापयन्ति । माध्वमतमग्रे वक्ष्यन्ति । भास्कराचार्यास्त्वेकसूत्रमङ्गीकृत्य सूत्रकारः श्रुत्यनुसारी परिणामपक्षं सूत्रयांबभूव अयमेव छान्दोग्ये वाक्यकारवृत्तिकाराभ्यां संप्रदीयतेऽतः समाश्रित इत्याहुः ॥ २६ ॥

योनिश्च हि गीयते ॥ २७ ॥ रश्मित्वं भाष्यभास्कराव्यवहितकिरणेषु न तु प्रकाशव्यवहितप्रकाशे अतो यथाबुद्धि व्याख्यायते समवायित्वमीश्वरे समर्थितं तत्तु जन्माद्यस्य यत इत्यत्र तत्तु समन्वयादित्यधिकरणैकवाक्यतया । सूत्रे अस्येति मनसाप्याकलयितुमशक्यरचनस्य प्रपञ्चस्य तस्य समवायित्वमर्धांशस्य जडस्य न चैतन्यस्येति चिज्जडसमुदायेऽर्धजरतीयापत्तिः । तथा च चेतनेषु प्रत्यक्षेण शब्दशतोक्तमपि समवायित्वं नाद्रियत इति प्रत्यक्षदृष्टबीजयोनिसमवायिकत्वमाशङ्क्य कार्ये अर्धजरतीयापत्तिं परिहरतीत्यर्थः । अस्त्विति । 'बीजं माम्' इति वाक्यात् बीजाद्यन्तरापि जडपिप्पलादिवृक्षतृणोत्पत्तिदर्शनात् लाघवादस्तु । योनिरूपेति अक्षररूपा प्रकृतिः न त्वविकृतत्वापादिका स्वरूपरूपा युक्तं चैतत् । संयुक्तकपालद्वयसमवेतघटवत् संयुक्तशुक्रशोणितसमवेतत्वाच्छरीरस्येत्यर्थः । तथा च श्रुतिः 'शुक्रशोणितसंयोगादावर्तते गर्भ इति' गर्भोपनिषदि योनिपदशक्तिर्ब्रह्मणि न प्रकृतौ तदाहुः योनिश्च ब्रह्मैवेति । प्रस्थानरत्नाकरे अमुख्यवृत्त्या ब्रह्मप्रतिपादकानां शक्तिसंकोचलक्षणरूढ्यान्यत्र प्रवृत्तिस्वीकारात् । छन्दोवत्सूत्राणि भवन्तीति न समुदायशक्तिरूपा रूढिः । वेदान्तत्वेन योनिपदे योगमात्रप्रवृत्तेः । नन्वव्यवधानेनोत्पत्तिद्वारत्वं च प्रकृतित्वं तद्विशिष्टा योनिः

योनिश्च ब्रह्मैव। शाक्तवादनिराकरणाय चकारः। तत्र युक्तिश्रुती प्रमाणयति हि गीयत इति। युक्तिस्तावत् 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति पूर्वमेकमेव प्रतिज्ञातम्। आकाशादेव, आनन्दाद्ध्येवेत्याद्यवेकारैश्चानन्यकारणत्वं जगतोऽवगम्यते। इतरापेक्षायां द्वैतापत्तेः। गीयते च 'कर्तारमीशं पुरुषं

रश्मिः।

कर्तारमीशं पुरुषं ब्रह्मयोनिम्' इति श्रावणात् ब्रह्म भवतु परं तु पृथिवीयोनिरोषधिवनानामिति च दर्शनात्। पृथिवी कथं स्वरूपं किं च अथ देव्या अथर्वणशीर्षं व्याख्यास्यामः ॐ सर्वे वै देवा देवीमुपतस्थुः। कासि त्वं महादेवी साब्रवीदहं ब्रह्मस्वरूपिणी ततः प्रकृतिपुरुषात्मकं जगत्। शून्यं चाशून्यं च अहमानन्दानानन्दौ अहं विज्ञानाविज्ञाने अहं ब्रह्माब्रह्मणी द्वे ब्रह्मणी वेदितव्ये इति आथर्वणीश्रुतिः। एवं च शक्तिः समवायिनी इति शाक्तानां वादः तदुक्तं—

'सर्वे शाक्ता द्विजा ज्ञात्या न शैवा न च वैष्णवाः।
यस्मादुपासते नित्यं गायत्रीं वेदमातरम्' ॥

इति तस्य वादस्य निराकरणाय चकारः कथं योनिः शक्तिश्च युक्तिश्रुतिभ्यां ब्रह्मेति हि गीयत इति सूत्रार्थात्। योनित्वप्रतिपादनस्यानतिगूढत्वात् युक्तेश्च गूढत्वेनाभ्यर्हितत्वाद् ब्रह्मविदां तां पुरस्कृत्याहुः **तत्र युक्तीति** हिर्युक्तिवाचकमव्ययमित्याहुः **युक्तिस्तावदिति**। **सदेवेति** अयमर्थः। पृथिवीयं चानन्तपदाभ्यामुच्यते कोशे पृथिवी अनन्तां विजयां शुद्धामिति यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्तेति च इति देव्याः अथर्वणशीर्षे तथा च यदि शक्तिवादो न निरस्यात् तदा एवकारेण ज्ञानानन्तेन व्यवच्छिन्द्यात्। उपलक्षकं सत्पदं न वदेदद्वितीयपदं चेत्यन्यथाज्ञानं युक्तिः। ननूपलक्षणविधयास्तु शक्तिवाद इति चेत्तत्राहुः **पूर्वमेकमिति** तथा च वादान्तरमित्यत आपाततः एकमेव विज्ञानं प्रतिज्ञातं बाध्येतेत्यर्थः। ननु देव्या अथर्वणशीर्षे सैषा सत्त्वरजस्तमांसि सैषा ब्रह्मविष्णुशिवरूपिणी सैषा प्रजापतीन्द्रमनव इति श्रावणात् सदपि सास्त्विति चेत्तत्राहुः **आकाशादेवेति** अस्तु परं त्वाकाशपदवाच्यायास्तद्रूपाया न त्वङ्गग्रन्थस्तुतायाः भगवच्चरिताविष्टाया ब्रह्मवादवद्वादेनेति द्योतनाय आकाशादेवेति पूर्वमुक्तम् 'यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता' इति श्रुतेः। **अवगम्यत इति**। ननु भगवच्चरित्राविष्टायाः 'कृष्णोहं पश्यत गतिम्' इति फलप्रकरणे यथा तस्या एवकारव्यावर्त्याया नावगम्यते अत एव देव्या अथर्वणशीर्षे—

'कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम्।
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम्।
महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि।
तन्नो देवी प्रचोदयात्' ॥ इति।

अत्र अदितिः दुहिता। अदितिर्ह्यजनिष्ट दक्षया दुहितेति श्रुतेः। महालक्ष्मी राधापि। अस्या अर्चास्थापने उपनिषज्ज्ञानमावश्यकमिदमथर्वशीर्षमज्ञात्वा योर्चां स्थापयति शतलक्षं जप्त्वा नार्चा शुद्धिं च विन्दति। नन्वव्यभिचारिभक्तिश्रद्धालुत्वेपि प्रवृत्तवेदान्तशास्त्रसिद्धान्तविरोधस्तु स्यात् तथा च पाक्षिकत्वापत्ती राद्धान्ते स्यादत आहुः **इतरापेति** ननु सत्यं पाक्षिकत्वापत्तिरिति परं तु द्वैतापत्तिस्तु वारणीया।

ब्रह्मयोनिम्’। ‘यद्भूतयोनिं परिपश्यन्ति धीराः’ इति च ‘मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्’ इति। ‘तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता’ इति च। अक्षरपुरुषोत्तमभावेन तथात्वम्। तस्माद् योनिरपि भगवान् पुरुषोऽपि सर्वं वीर्यं जीवश्च सर्वं भगवानिति। ‘इदं सर्वं, यदयमात्मा’ इति सिद्धम्। तस्मात् केनाप्यंशेन प्रकृतिप्रवेशो नास्तीत्यशब्दत्वं सांख्यमतस्य सिद्धम् ॥ २७ ॥

इति प्रथमाध्यायस्य चतुर्थपादेऽष्टमं प्रश्नसूत्रं प्रकृत्यधिकरणम् ॥ ८ ॥

रश्मिः ।

‘रुद्रोऽरुद्रश्च दन्ती च नन्दिः षण्मुख एव च ।
गरुडो ब्रह्म विष्णुश्च नारसिंहस्तथैव च ।
आदित्योग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसि’ ॥

इति तैत्तिरीये द्वादशाङ्गः पुरुषः स च महानारायण ‘अम्भस्यपारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्’ इत्यत्र रामानुजभाष्ये रसरूपः “रसो वै सः रस९ह्येवायं लब्ध्वानन्दी भवति’ इति तैत्तिरीयादाहृत्य व्याक्रियतेऽतो न द्वैतमिति बोध्यम्। साकारब्रह्मस्थापिका महानारायणे श्रुतिः ‘यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्’ इति अनन्तरूपेषु द्वादशाङ्गः पुरुषोप्यतः ‘प्राप्तनिजरूपाय गोविन्दाय नमोनमः’ ‘गायत्रीं वेदमातरम्’ इति यदुक्तं तत्तु ‘पूजां तैः कल्पयेत् सम्यक्संकल्पः कर्मपावनीम्’ इति वाक्यात् पूजोपयोगि तदुपासनम् । एवं युक्तिमुक्त्वा श्रुतिं वक्तुमाहुः **गीयते** चेति अक्षरब्रह्मपुरुषोत्तमभावार्थं ब्रह्मणोऽक्षरस्य योनिः पञ्चमहाभूतयोनिम्। ननु भूतयोनिरित्युक्तं न सर्वयोनिरिति चेत्तत्रोपबृंहितश्रुतिः सूत्रे गीयत इत्याशयेनाहुः **मम योनिरिति**। ननु तथापि चेतने तौल्यमिति सिद्धमित्यसिद्धमिति चेत्तत्राहुः **तासामिति**। एवं जडेषु बीजप्रदत्वं चेतनेषु पितृत्वमिति विशेषः। **अक्षरपुरुषोत्तमिति**। ब्रह्मयोनिमित्यत्र व्याख्यातम् । तथात्वं योनित्वम्। बीजप्रदत्वं च। सिद्धमाहुस्तस्मादिति उक्तोपपादनात् । योनिपुरुषौ चरमवाक्ये। सर्वमिति तृतीये वीर्यं गर्भमिति तृतीये जीवोपि महद्ब्रह्मेति तृतीये उक्तेर्थे श्रुतिं प्रमाणयन्ति **इदं सर्वमिति**। **सांख्यमतस्येति** अन्यथा षड्शास्त्रेषु निवेशो न स्यात्। पञ्च चत्वारि वा शास्त्राणि स्युः तथा च।

‘त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः ।
उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजम्’ ॥

इति वाक्यं विरुद्ध्येत । तथा च द्वितीयस्कन्धनवमाध्यायोक्तोर्णनाभिवत्समवायित्वमिति सिद्धम्। तथा सति जडवल्लाघवस्तु प्रवर्तते चिन्मनुप्रजापतीन्द्रा य एष स्तन इवालुम्पते सेन्द्रयोनिरिति तैत्तिरीयात् ब्रह्मविष्णुशिवाः नारदः ‘उत्सङ्गान्नारदो जज्ञे’ इति स्वल्पा अयोनिजाः शंकरभाष्ये तु क्वचित्स्थानवचनोपि योनिशब्दो दृष्टः ‘योनिष्ठ इन्द्रनिषदे अकारीति’ सर्वे योनिजा इति बहूनामनुग्रहो न्याय्यः इत्यनेन बाधात् इति बोध्यम् । अन्यत्र स्त्रीयोनेरप्यस्त्येवावयवद्वारेण गर्भं प्रत्युपादानत्वमित्युक्तम्। तच्छुक्रशोणितसमवेतत्वात् शरीरस्येति भाष्यविरुद्धम्। रामानुजभाष्येपि योनिशब्दश्च ब्रह्मवचनः इत्यूर्णनाभिदृष्टान्तः। मध्वभाष्ये तु ब्रह्माण्डवाक्ये अप्युक्ते

‘व्यवधानेन सूतिस्तु पुंस्त्वं विद्वद्भिरुच्यते ।
सूतिरव्यवधानेन प्रकृतित्वमिति स्थितिः’ ॥

भाष्यप्रकाशः ।

माध्वास्तु—प्रकृतिश्चेति सूत्रे, हन्त तमेव पुरुषं सर्वाणि नामान्यभिवदन्ति, 'यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रमभिसंविशन्त्येवमेवैतानि नामानि पुरुषमभिसंविशन्ति' इति श्रुतिम्, अभिध्यासूत्रे च, मायां तु प्रकृतिं विद्यादिति,

'महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त ! कथ्यते' ॥

इति वचनम्, 'सोऽभिध्या स जूतिः स प्रज्ञा स आनन्दः' इति श्रुतिम्,

'ध्यायति ध्यानरूपोऽसौ सुखी सुखमतीव च ।
परस्यैश्वर्ययोगेन विरुद्धार्थतयेष्यते' ॥

इति ब्रह्माण्डवाक्यम्, साक्षात्सूत्रे चैष ह्येष पुरुष एष प्रकृतिरेष आत्मैष ब्रह्मैष लोक एष आलोको योऽसौ हरिरादिरनादिरनन्तोऽन्तः परमः पराद् विश्वरूप इति पैङ्ग्यश्रुतिं चोपन्यस्य भगवतः सर्वविधशब्दवाच्यत्वं च स्थापयित्वा, आत्मकृतिसूत्रे प्रकर्षेण करोतीति प्रकृतिरिति प्रयोगात् प्रकृतावनुप्रविश्य ता परिणाम्य तत्परिणामनियामकत्वेन तत्र स्थित्वाऽऽत्मनो बहुधाकरणात् प्रकृतिशब्दवाच्यतां स्थापयित्वा, अथ हैष आत्मा प्रकृतिमनुप्रविश्यात्मानं बहुधा चकार तस्मात् प्रकृतिरित्याचक्षत इति भाल्लवेयश्रुतिम्—

'अविकारोऽपि परमः प्रकृतिं तु विकारिणीम् ।
अनुप्रविश्य गोविन्दः प्रकृतिश्चाभिधीयते' ॥

रश्मिः ।

'उभयात्मकसूतित्वाद्वासुदेवः परः पुमान् ।
प्रकृतिः पुरुषश्चेति शब्दैरेकोभिधीयते' ॥

इति अग्रेपि वक्ष्यते ग्रन्थकृद्भिः । भास्करभाष्येप्येवं तत्तन्मतभेदेन विशेषः हिर्हेतौ यतो हेतोः अत्र श्रुतिसंग्रहेपि न युक्तिसंग्रहः मुख्ये कार्यसंप्रत्ययात् जडदेहयोरियान् विशेषो येन बाह्यात्मा जडात्पृथक्कृत्य निरूपणम् । देहे पाञ्चभौतिक इदं निरूप्यते आत्मोपनिषदि त्रिविधात्मनिरूपणे पञ्चमहाभूतात्मको निरूपित इति पृथिवी अस्थीनि यत्कठिनं तत्पृथिवीति श्रुतौ । तेषामात्मत्वे एवास्थि शस्त्रं दधीचेरस्थीनि तेन वृत्रवधः । 'अपां फेनेन नमुचेः शिर आहरत्' इत्यपामात्मत्वं विलक्षणसामर्थ्यात् । तेजः क्रममुक्तौ प्रतिबन्धनिवृत्तिद्वारात्मा । वायुरात्मा प्रसिद्धः । त्वमेव प्रत्यक्षं ब्रह्मासीति श्रुतौ । आकाश आत्मा बृहदारण्यकोक्त आकाशोपासकान् प्रति मांसस्याकाशत्वं संहितायां तस्यात्मत्वं वेनजङ्घागतस्यान्यथा मनूत्पत्तिर्न स्यात् इति जडौषधिषु तु योगेन पृथग्वेत्युपवेदवैद्यकगतमिति समवायित्वं माध्वा नाङ्गीकुर्वते तन्निराकर्तुं, तदाहुः अत्रापि सर्वमिति गतं भाष्यव्याख्यानमधुना प्रकृते भावाद्वैतं परिणामवादे न सिद्ध्यति परिणामश्चेल्लाक्षणिकः तदा कथंभावाद्वैतमिति परिणामं समर्थयितुं विषयादिकं चाधिकरणत्वार्थं सूचयितुं माध्वमतमुपचिक्षिपुः माध्वास्त्विवति । प्रकृतिपरिणामो न जगदिति शंकरभाष्ये तत्सूत्रं भङ्क्त्वा सप्रयोजकमित्यन्येषां तु संमतः परिणाम इति माध्वास्त्विवति माध्वमतमुपक्षिप्तं हन्त तमिति इयं प्रतिज्ञाबोधिका । यथा नद्य इति दृष्टान्तबोधिकेयम् । अभिध्यापदार्थमाहुः प्रकृतिमिति । साक्षात्पदार्थमाहुः एष स्त्रीति परिणामं विशदयन्ति प्रकृतावन्वितिति तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतौ समवायित्वाद्यनङ्गीकारे सूत्राणां निर्विषयत्वमित्याशयेनाहुः अभिधीयत इति अभिधानं क्रियते प्रकृतिरित्यत्र कृञो क्तिच् ।

भाष्यप्रकाशः ।

इति नारदीयवाक्यं च तदुपष्टम्भायोदाहरन्ति । तच्चिन्त्यम् । श्रुतेरप्रसिद्धत्वात् । तादृश्या अपि कथंचित् प्रामाण्योपगमेऽप्यस्या आत्मनो बहुधाकरणबोधकतयाऽऽत्मकृतिबोधकत्वाभावेन विषयतयोपन्यासायोगाच्च । हन्त तमित्यारभ्य विश्वरूप इत्यन्तासु स्वोपन्यस्तासु श्रुतिषु सर्वशब्दवाच्यत्वस्य सर्वरूपत्वस्य च स्वत एव बोधनेन तासां पूर्वकालीनव्यवस्थाबोधकतायाः, भाल्लवेयश्रुतौ चाथशब्देन पाश्चात्यबोधकतायाः स्फुटं भानेन कालभेदकृतविषयभेदस्य स्फुटत्वे एतदनुरोधेन तदर्थनिर्णयस्याप्ययुक्तत्वाच्च । ध्यायतीति ब्रह्माण्डवाक्ये ऐश्वर्ययोगेन विरुद्धार्थतया सर्वरूपत्वादेरिष्टताया उक्ततया सर्वानुपपत्तिपरिहारसंभवे प्रकृतिशब्दयोगादरणेन रूढ्युपष्टम्भस्य व्यर्थत्वाच्च ।

यत्तु जयतीर्थः—ब्रह्मणो जगदुपादानत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया मृत्पिण्डादिदृष्टान्तोक्तेश्च न प्रमाणत्वम् । तस्या अन्यार्थत्वस्य सूत्रव्याख्याने सम्यग्व्याख्यातत्वादित्याह ।

रश्मिः ।

क्तिर्वा कर्तरि । श्रुतेरिति भाल्लवेयश्रुतेः समाकर्षादित्यधिकरणे विचारितत्वाच्च । आत्मनो बहुधेति आत्मानं बहुधा चकारेति श्रुतौ विषयभूतायाम् । अत्र कर्ताप्यात्माऽत आत्मनः स्वस्याः प्रकृतेः कृतिः आत्मकृतिसूत्रोक्ता तस्या विषयवाक्ये बोधकत्वाभावेन । विषयतयेति अनेनास्मिन्नधिकरणे 'सोऽकामयत बहु स्यां प्रजायेय इति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवत् यदिदं किंच तत्सत्यमित्याचक्षते तदप्येष श्लोको भवति असद्वा इदमग्र आसीत् ततो वै सदजायत तदात्मानँस्वयमकुरुत तस्मात्सुकृतमुच्यते' इति विषयवाक्यम् । संशयस्तु परिणामः भवति न वेति श्रुतिः अद्वैतस्थापकत्वविशिष्टा चेयमेवेति संशयबीजं नेति पूर्वपक्षः प्रकृतिप्रवेशे सगुणत्वापत्तिः न यत्र मायेति निषेधाच्चेति प्राप्ते सिद्धान्तः । प्रकृतिश्चेति प्रकृतिः स्वरूपमिति न सगुणात्वापत्तिः 'योगमायामुपाश्रितः' इति न मायाविरोधः मायेन्द्रियाणि वा सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितमिति ब्रह्मप्रकरणे गीता । यतः इति स्वमतेऽधिकरणरचना द्योतिता । उपन्यासायोगादिति । ननु सत्यमात्मकृतिबोधकत्वाभावः परं त्वपरो हेतुर्भवति तस्मात्प्रकृतिरित्यचक्षते इत्यत्रात्मा प्रकृतिरित्यभिधानात् । तथाच प्रकृतिश्चेति सूत्रभाष्यं माध्वानां प्रकृतिशब्दवाच्योपि स एवेति तथाच कुतो ह्युपन्यासायोग इति चेन्न तथाप्युपन्यासायोगात् । प्रकृतिशब्दवाच्यत्वस्याप्युक्ताधिकरणेनैव लाभात् स्वार्थात्प्रच्यावनस्यात्रापि सत्त्वात् । विषयवाक्य एव नामरूपविश्वात्मकत्वश्रावणे समवायित्वं भाष्य एव श्रावितं भवति इत्याशयेनाहुः सततमित्यारभ्येति । स्वोपन्यस्तास्विति साक्षात्सूत्रमभिव्याप्योपन्यस्तासु । पूर्वकालीनेति प्रकृतिप्रवेशपूर्वकालीनेत्यर्थः । पाश्चात्येति आनन्तर्यवाचकत्वमथेत्यस्येति भावः । कालभेदेति प्रकृतिप्रवेशात्पूर्वकाल उत्तरकालश्च । एतदन्विति भाल्लवेयश्रुत्यनुरोधेन । तदर्थेति प्रकृतिप्रवेशोत्तरकालीनप्रकृतिशब्दवाच्यत्वरूपो यः प्रकृतिश्चेत्यादित्रिसूत्रीविषयवाक्यार्थस्तस्य निर्णयस्य । अयुक्तत्वेति तथा चास्मदीयोर्थः स्फुट इति स युक्त इति भावः । अतः समवायित्वनिरूपणम् । एवं प्रथमकर्त्रविषय उक्त्वा अभिध्यासूत्र आहुः ध्यायतीति । विरुद्धेति ध्यानाश्रयत्वेपि ध्याने रूपत्वरूपविरुद्धार्थतया सर्वानुपपत्तिः सर्वशब्दवाच्यत्वानुपपत्तिः । रूढ्युपेति इच्छायां रूढिः

भाष्यप्रकाशः ।

तदपि श्रद्धाजाड्यमात्रम् । सूत्रव्याख्यानस्यैवासंगततायाः प्रदर्शितत्वादिति । यदपि ब्रह्मणः परिणामोक्तिरसंगतैव । एतदध्यायस्याशेषशास्त्रस्य ब्रह्मणि समन्वयप्रतिपादनाय प्रवृत्तत्वादित्याह । तदप्यसंगतम् । अशेषशास्त्रमध्ये, 'स आत्मान९ स्वयमकुरुत,' 'खल्विदं', ब्रह्म, तज्जलान् इति', 'स आत्मानमेव द्वेधापातयत्, ततः पतिश्च पत्नी चाभवताम्,' 'हन्ताहं मदेव मन्मात्रं सर्वं यस्मिन्नाकाश ओतश्च' इत्यादिश्रुतीनां, 'विश्वं वै ब्रह्मतन्मात्रम्—

'नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे, ।
ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः' ॥

'त्वय्यग्र आसीत्' इत्यादिस्मृतीनां च प्रविष्टत्वात् तासां समन्वयस्यावश्यं प्रतिपाद्यत्वात् परिणामं विना च तदसंभवादिति । यदप्यानुमानिकपादे, प्रकृतेः शब्दप्रतिपाद्यत्वनिराकरणं चेत् प्रकृतिस्वरूपस्यानिराकृतत्वात् तस्या उपादानतया वर्तमानत्वात् प्रकृतित्वेन ब्रह्मण उपादानत्वस्थापनमसंगतमेव । प्रकृतिस्वरूपनिराकरणं चेत् सूत्रेषु तददर्शनात् तदप्यसंगतमिति न ब्रह्मण उपादानत्वे कापि संगतिरित्युक्तं । तदप्यबुद्ध्वैव । प्रकृतेर्मूलकारणतायाः शब्दप्रतिपाद्यत्वस्य निराकरणं सूत्रेषु सिद्धमिति तस्या अवान्तरोपादानतया विद्यमानत्वेऽपि ब्रह्मणि मूलोपादानत्वाबाधात् । एकादशस्कन्धे, 'आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम् ।

'यदा विवेकनिपुणा आदौ कृतयुगे युगे ।
तन्मायाफलरूपेण केवलं निर्विकल्पितम् ॥
वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ।
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका' ॥

इत्यादिना भगवतैव तथा निर्णीतत्वात् । अतो ब्रह्मण उपादानत्वानङ्गीकरणमबोधाग्रहयोरन्यतरमूलकमेवेति दिक् ॥ २७ ॥

इत्यष्टमाधिकरणम् ॥ ८ ॥

रश्मिः ।

समुदायशक्तिः तस्या उपष्टम्भस्य । स आत्मानमिति एतच्च समाकर्षादित्यधिकरणे उपपादितम् । परिणाममिति परिणामस्तात्त्विकोन्यथाभावः । शब्देति वैदिकशब्देत्यर्थः । सूत्रेषु रचनानुपपत्तेश्च नानुमानमित्यादिषु । अवान्तरेति । आन्तरालिकसृष्ट्युपादानतया । रजतोपादानतया केषांचित् शुक्तिरुपादानं स्वमते एवमपि प्रकृतिपुरुषपरिणामैरद्वैतेऽधीतिनां विचिकित्सासंभवे भ्रमवारकमेव सांख्यमाहुः एकादशेति । तथेति केवलं निर्विकल्पितम् एकं तन्मायाफलरूपं प्रकृतिमायाफलरूपं प्रतिबिम्बमिति निर्गुणसगुणफलरूपेणेति मायावादो भासते न स प्रकृते सांख्येन समाधानात् । दिगिति अन्यानि दूषणानि प्रसिद्धशक्तित्रिचारस्य विषयत्वादिरूपाणि सूचयति दिक्शब्दः । तथापि 'पूर्णा भगवदीयास्ते शेषव्यासाग्निमारुताः' इति 'आचार्यवान् पुरुषो वेद' इत्यादिविरोधात् दिक्शब्दार्थ एवम् । यथानेकमार्गेण क्रीडा तेपि पुष्टा युक्ताश्चापेक्षिताः इति 'युक्तं च सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा' इत्याद्युक्ता यथा विविक्तं यदुक्तं गृह्णीमो युक्तिसंभवादिति भगवता ग्रहणादिगुक्तेत्यर्थः नाधिकम् ॥ २७ ॥

इत्यष्टमाधिकरणम् ॥ ८ ॥

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥ (१।४।९)

ब्रह्मवादव्यतिरिक्ताः सर्वे वादा अवैदिका वेदविरुद्धाश्चेत्याह । एतेन ब्रह्मवादस्थापनपूर्वकसांख्यमतनिराकरणेन सर्वे पातञ्जलादिवादा व्याख्याताः । अवैदिका अनुपयुक्ताश्च । वैदिकानां हि वेदः प्रमाणम् । तस्मिन्नव्याकुले भ्रान्तिप्रतिपन्ना एव सर्वे वादा इति । एतत् सौकर्यार्थं विस्तरेणाग्रे वक्ष्यते । आवृत्तिरध्यायसमाप्तिबोधिका ॥ २८ ॥

इति प्रथमाध्यायचतुर्थपादे नवममेकसूत्रं व्याख्यानाधिकरणम् ॥ ९ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये प्रथमाध्यायस्य चतुर्थः पादः ॥ १ ॥ ४ ॥

॥ प्रथमोऽध्यायः समाप्तः ॥

भाष्यप्रकाशः ।

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥ सूत्रमवतारयन्ति ब्रह्मवादेत्यादि । एतेन सांख्यमतस्याश्रौतत्वसाधनेन पूर्वपादत्रयोक्तं सर्वं समर्थितं ज्ञेयम् । नन्वेवं मतान्तरनिराससिद्धावग्रिमाध्यायस्य किं प्रयोजनमित्यत आहुः । एतदित्यादि । एतदिति वादान्तरनिराकरणमग्रिमाध्याये बोधसौकर्यार्थं विस्तरेण वक्ष्यत इत्यर्थः । एतेन सामान्यविशेषभावरूपा संगतिरपि दर्शिता ॥ २८ ॥

इति नवमाधिकरणम् ॥ ९ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रकिरणनिवारितहृदयान्धकारेण पीताम्बरात्मजपुरुषोत्तमेन कृते ब्रह्मसूत्राणुभाष्यप्रकाशे प्रथमाध्यायस्य चतुर्थः पादः समाप्तः ॥ १ ॥ ४ ॥

॥ समाप्तश्चायं प्रथमोध्यायः ॥

रश्मिः ।

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥ सूत्रमेवेति सांख्यमते उक्तमश्रौतत्वं पातञ्जलादिष्वतिदेष्टुं सूत्रात्मकमधिकरणमवतारयन्तीत्यर्थः । न च सूत्रत्वे किं बाधकमिति शङ्क्यम् । अधिकरणप्रायपाठपठितत्वमेव बाधकमिति । भाष्ये । पतञ्जलादीति तेन पातञ्जलादिवादा विषयाः ते व्याख्याता न वेति संदेहः । 'वेदान्तविज्ञानसुनिश्चितार्थाः' इति 'नानुध्यायाद्बहून् शब्दान्' इति नानुध्यायादित्यस्याः अनूपसर्गेण अन्यथाप्यर्थसंभवात् तथाच शब्दान प्रतिज्ञातान् च संदेहबीजं नेति पूर्वपक्षः व्याख्यानादर्शनात् । सिद्धान्तस्तु व्याख्यानदर्शनम् । व्याख्याताः वेदान्तविज्ञानेति श्रुतेः । आदिपदेन सामान्यवादः परमाणुवादः ज्योतिषवादः गणपतिवादः सूर्यवादः शून्यवादः स्वभाववादः भूतवादः योनिवादः पुरुषवादः नियतिवादः यदृच्छावादः कालवादः तमोवादः अन्धवादः एते अवैदिकत्वेनानुपयुक्तत्वेन व्याख्याताः । कुत इत्याकाङ्क्षायां हेतुमाहुः वैदिकानां हीति । अव्याकुल इति व्याकुल इति वक्तव्ये ईषदर्थकनञ्प्रयोगः 'नानावादानुरोधि तत्' इतिनिबन्धात् । ईषद्व्याकुलतामन्तरा नानावादायोगात् । यस्मिन्

रश्मिः ।

प्रतिश्लोकमबद्धवत्यपीति न्यायेन वा नानावादानुरोधिरूपे प्रतिपादनीये तु अव्याकुलेऽभ्रान्तिप्रतिपन्ना इति ईषदुपयुक्तत्वेनेषद्वैदिकत्वेन च प्रकृतिवादवद्व्याख्याताः । भ्रान्तिप्रतिपन्ना ईषद्व्याकुलवैदिकत्वात् । शून्यवादवत् । शून्यवादो हि 'मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक्' इतिवाक्यानन्नुसंधानमूलकः । एवं सिद्धे भ्रान्तिप्रतिपन्नत्वे विमतभावा अनुपयुक्ताः भ्रान्तिप्रतिपन्नत्वात् शुक्तिरजतवत् । अवैदिकाः अनुपयुक्तत्वात् । अवादवत् । यन्नैवं तन्नैवं ब्रह्मवादवत् । नहि ब्रह्मवादव्यतिरेकेण ब्रह्मज्ञानं भवतीति । **बोधिकेति** ननु कः शब्द इति चेन्न आवृत्तिबोधको शब्दो आवृत्तिरर्थोपि व्यञ्जकोध्यायसमाप्तेः । शक्यार्थावृत्तिस्तु भक्तिकर्मभेदेन शक्यद्वैविध्यात् । ज्ञानमार्गे प्रकृत्यादिनिरूपणस्यानतिप्रयोजनत्वात् । ननु तर्हि भक्तिकर्ममार्गयोः व्याख्याता इत्येव सूत्रांशोऽस्त्विति शङ्क्यम् । अवधारणार्थं सर्वस्याप्युक्तस्याध्यायमूलतः । 'द्विरुक्तिं कुर्वते प्राज्ञा अध्यायान्ते विनिर्णये' इति वाराहसंहितावाक्यात् । माध्वैरङ्गीकृतमिदम् । अध्यायान्तो यस्य विनिर्णयस्य । **प्रकृते** । **सामान्येति** एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति प्रसङ्गसंगतावन्तर्भावः सामान्यः सर्वे वादा विशेषः सामान्यवादादिः । यथा प्रकृतिः सांख्ये समवायिकारणं पुरुषोऽसङ्गः । सिद्धान्ते प्रकृतिः अविकृतत्वसाधकं स्वरूपं 'प्रकृतिमगन् किल यस्य गोपवध्वः' इतिवाक्यात् तेन नार्धजरतीयम् । तथा सामान्यं वाक्यपदीये आत्मा तदेव समवायि स्यात् प्रकृतौ प्रतिफलितमिति मायावादः शून्यवादसदृक्षः । सिद्धान्ते सामान्यं द्वितीयस्कन्धनवमाध्यायोक्तरीत्या धर्मरूपमतो धर्मिणोऽसामान्यं जन्यं धर्मविशिष्टे शक्तावुपयुज्यते इति शक्तिधीविषयत्वसाधकं स्वरूपं समाधिकरणात् तेन नार्धजरतीयम् । तथा नित्या परमाणवः समवायिकारणं ज्ञानाधिकरणमात्मा निमित्तकारणं सिद्धान्ते परमाणवः ईश्वरस्य शरीरैक्यज्ञानजन्याः अन्येषां शरीरैक्यभ्रमजनकाः ।

'चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः' ॥

इति तेन नार्धजरतीयम् । तथा ज्योतिषे वासुदेवः सर्वोत्पादक ईश्वरः । सप्तग्रहेषु बलाधिको यः सः शनिर्वा आत्माधिकः कलादिभिर्न भोगः इति जैमिनिसूत्रम् । एवं शनिविषये……………
सिद्धान्ते वासुदेवोवतार उच्यते 'वदन्ति वासुदेवेति वसुदेवसुतं हि माम्' इत्युत्तरार्धवाक्यात् तेन नार्धजरतीयम् । तथा गणपत्युपनिषदि गणपतेर्जगज्जन्मादिकमुक्तमतः स एव समवायीति । सिद्धान्ते गणपत्यथर्वशीर्षे ब्रह्ममय इति शिवसुत इति च कथनात् ब्रह्मचरित्रमिति द्वादशाङ्के निविष्टो दन्तिः समवायी 'त्वमानन्दमयस्त्वं ब्रह्ममयः' इति गणपत्यथर्वशीर्षवाक्यात् । प्रमथपतये नमस्ते अस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने । शिवसुताय वरदमूर्तये इति वाक्याच्च तेन नार्धजरतीयम् । तथा सूर्योपनिषदि गायत्री प्रसिद्धा सूर्य आत्मा जगतस्तस्थुषश्च सूर्यात् खल्विमानि भूतानि जायन्ते इति सूर्य एव समवायी इति स्मार्ताः—

'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् ।
एतैः सर्वैरादित्यमण्डलमेव विधास्यते' ॥

इत्यारणात् । सिद्धान्ते निरुक्ते सूर्यः देवपत्नी सपत्नीनामसु पठित इति प्रकृतिवन्निर्णयः । असावादित्यो ब्रह्मेति सूर्योपनिषद्वाक्यात् । आदित्योग्निरग्निरादित्य इति ब्राह्मणम् । तथाच वेदत्रयी

रश्मिः ।

सूर्यश्चिदिति सदानन्दप्रतिपादक इति स्वरूपलक्षणलक्षित सत्यज्ञानानन्तानन्देन्तर्भावात् तत्स्वरू... तेन नार्धजरतीयम् । समवायिकारणं सूर्यः ब्रह्म निमित्तकारणं सिद्धान्ते कालो ब्रह्म बहुबुभूष-गृहीतप्राणगुणकरकारकं रूपं कर्तृ विषयत्वान्न समवायिविषयमिति वा । कालः सूर्यश्चेष्टारूप इति प्रकृतिवदेव । तथा कालोस्मीति भगवद्वाक्यात् तेन नार्धजरतीयम् । तथा स्वभावः समवायी ईश्वरो निमित्तं सिद्धान्ते कृष्णः प्रवर्तकः इति प्रवृत्तिरूपे धर्मे स्वभावपदम् । 'प्रवर्तकत्वं कृष्णस्य' इतिवाक्यात् तेन नार्धजरतीयं प्रकाशाश्रयन्यायात् । तथा नियतिरन्तर्यामिब्राह्मणोक्तं दैवं नियम्यनियामकभावः संबन्धो वा समवायिकारणं ईश्वरः कर्ता सिद्धान्ते दैवं कर्तृसंबन्ध आत्माऽऽत्मस्वरूपे निविष्टत्वात् । ब्रह्मब्रह्मत्वसंबन्धावगाहिज्ञानस्यात्मत्वात् आत्मनः कर्तृ न समवायिविषयः ।

'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्' ॥
'तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः' ॥

इति । 'दैवादपेतमथ दैववशादुपेतम्' इत्यादिवाक्यनिचयात् । पृथिवीमन्तरो यमयतीति श्रुतेः नियम्यनियामकभावः संबन्धस्तेन नार्धजरतीयम् । तथा यदृच्छा भगवदिच्छा समवायिनी सिद्धान्ते इच्छाशक्त्यधीना अन्या शक्तयः इति शक्तौ निवेशः वाराहपुराणवाक्यात् तेन नार्धजरतीयम् । तथा भूतवादे पञ्चमहाभूतानां ब्रह्माहं प्रपद्ये इति तान्येव समवायीनि सिद्धान्ते वृत्तश्चतुःषोडश पञ्चशक्तिभिरिति द्वितीयस्कन्धनवमाध्यायवाक्याद्धरणशक्तयः उक्तवाक्यात् तेन नार्धजरतीयकम् । तथा योनिः स्थानं अश्वः बृहदारण्यकोक्तः समवायी सिद्धान्ते कर्तृत्वं तत्पुरस्कारेण समवायित्वं उक्तवाक्यात् तेन नार्धजरतीयकम् । पुरुषो ब्रह्माण्डविग्रहः समवायी तज्जनकं महतः स्रष्टृ निमित्त-कारणं सिद्धान्ते महतः स्रष्टृ समवायि निमित्तं च तस्माद्विराडजायत इति श्रुतिवाक्यात् । न च 'एतन्नानावताराणां निधानं बीजमव्ययम्' इति वाक्यात् नैवमिति वाच्यम् । श्वेताश्वतरे कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यमित्युक्त्वा युक्त्या संयोग एषां न त्वात्मभावादिति संयोगः एषां संबन्धः न त्वात्मभावादात्मत्वादित्युक्त्वात्माप्यनीशः सुखदुःखहेतोरिति कृतप्रयत्नापेक्षत्वात् वैषम्यनैर्घृण्ये वारिते तमोवादे आसीदिदं तमोभूतमिति तदेव समवायि सिद्धान्ते अवान्तरप्रलयविषयत्वं तमो ब्रह्मैव वा अहमेवासमेवाग्रे इति वाक्यात् । तमआसीदिति अनभिव्यक्त········माधिकरणभाष्यं तेन नार्धजरतीयकम् । आपो वा इदमग्रे सलिलमासीत् इत्यादेऽवान्तरप्रलयविषयः समवायिविषयः सिद्धान्तेप्येवम् । आपमापामपः सर्वा इत्यारणात् । तेन नार्धजरतीयम् । शून्यवादो नास्तिकानां शून्यं विजनं शुने हितं 'शुनः संप्रसारणं वा च दीर्घः' इति यत् शून्यम् विजनं शमून्यमिति पाठे सर्वस्य ज्ञानात्म-कत्वात् असुराणां च असत्यमिति वाक्यात् कायः समवायी सिद्धान्ते शमूनकर्त्रपि ब्रह्म शम् ऊनम् । नास्तिकानामसुराणां च ऊनाय हितं यत् शमून्यं 'शमूनं कुरुते विष्णुरदृश्यः सन् परः स्वयम् । तस्माच्छून्यमिति प्रोक्तः' इति महाकौर्मात् तेन नार्धजरतीयम् । अन्ये तु छान्दोग्यस्थासुद्दालक-श्वेतकेतूपाख्यानस्थां न्यग्रोधफलमाहरेति इदं भगव इति भिन्धीति भिन्न भगव इति किमत्र पश्यसीति

रश्मिः ।

अण्व्य इवेमाधाना भगव इति आसामङ्गैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन भगव इति तं होवाच यं वै सोम्यैतमणिमानं न निभालयसे एतस्यै वै सौम्यैषोणिम्न एष महान्यग्रोधस्तिष्ठतीति जगतः पूर्वावस्थायां दृष्टान्तः । अथ किंचनाणुपदश्रावणात् शून्यस्वभावाणुकारणवादा भ्रान्त्या प्रतीयन्ते तत्रैतासां तात्पर्यमस्ति न वेति संदेहोस्तीति पूर्वपक्षस्तत्रेदं सूत्रं प्रवर्तते । एतेनेति प्रधाननिराकरणे हेतूनां शब्दत्वादचेतनत्वैकविज्ञानं प्रतिज्ञानुपपत्तीनामण्वादिपक्षसामान्येन सर्वे अण्वादिकारणवादा निराकृतत्वेन व्याख्याता इत्याहुः एतेनेत्यस्य स्वस्वमतानुगुणार्थानाहुः ॥ २८ ॥

इति नवमाधिकरणम् ॥ ९ ॥

इति श्रीविद्वन्मण्डनश्रीविठ्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगिरिधार्यात्मजश्रीदामोदरभ्रात्रीयेण श्रीगोविन्दरायपौत्रेण पूर्णवेत्रा श्रीविठ्ठलरायभ्रात्रीयश्रीगोकुलोत्सवात्मजगोपेश्वरेण कृते भाष्यप्रकाशरश्मौ प्रथमस्याध्यायस्य तुरीयः पादः संपूर्णतामगमत् ॥ १ ॥ ४ ॥

॥ प्रथमाध्यायः समाप्तः ॥

राग—प्रकटे पूरणपुरुषोत्तम व्रजनाथ ।
दिनदयाल भक्तजनवत्सल सबगुन जिनके हाथ ॥ १ ॥
श्रीवल्लभके पक्षपाततें इनबिन जनम अकाज ।
सुरस्याम तिहारे हित यातें कीने सकलअपात ॥ २ ॥ [असत्कृतिः]

(ग्रन्थकारः समाप्तौ हस्ताक्षरेण लिखति)

एतावतो ग्रन्थस्य श्लोकानां संख्या (१०९००) दशसहस्रनवशतमुच्यते, अस्य ग्रन्थस्य (अस्मिन् प्रकरणे) षट्दशसहस्रश्लोकसंख्याह । द्विशतपञ्चदश पत्राणि ॥ शुभं भवतु ॥

॥ श्रीविठ्ठलेशो जयति ॥

३८८ पत्राणि १२ शोधपत्राणि=पत्राणि ४००। पत्र ४ सों पत्र २२ तांई नहि हे आगें संपूर्ण हे.



श्रीमद्वल्लभाचार्यकारिकाः।

श्रीमद्विट्ठलेश्वरकारिकाः ।

॥ आचार्याणां कारिकाः समाप्ताः ॥

अधिकरणानां सूचीपत्रम् ।

श्रीमद्वाल्लभभाष्यपाठानुसारतः श्रीमद्बादरायणप्रणीत-ब्रह्मसूत्राणां वर्णानुक्रमः।

श्रीमदणुभाष्योद्धृतानां प्रमाणवाक्यानां सूचीपत्रम् ।

[सर्वत्र अध्यायपादपृष्ठाङ्काः निर्दिष्टाः]

उपरिनिर्दिष्टस्थूलाक्षरग्रन्थस्थान्तरसंकेतसूचका आङ्ग्लाङ्काः

जाबालोपनिषद् ।

जैमिनीयसूत्रम् ।

तैत्तिरीयारण्यकम् ।

तैत्तिरीयोपनिषद् ।

तैत्तिरीयब्राह्मणम् ।

बृहदारण्यकोपनिषद् ।

ब्रह्मबिन्दूपनिषद् ।

ब्रह्मसूत्रम् ।

भगवद्गीता ।

भागवतम् ।

मनुस्मृतिः ।

महानारायणोपनिषत् ।

महाभारतम् ।

मत्स्यपुराणम् ।

मार्कण्डेयपुराणं देवीमाहात्म्यम् ।

मुण्डकोपनिषद् ।

मैत्र्युपनिषद् ।

याज्ञवल्क्यस्मृतिः ।

योगसूत्रम् ।

रामोत्तरतापनीयोपनिषत् ।

वराहपुराणम् ।

वसिष्ठस्मृतिः ।

शतपथब्राह्मणम् ।

शुक्लयजुर्वेदसंहिता ।

श्वेताश्वतरोपनिषद् ।

सर्वसारोपनिषत् ।

कठोपनिषत् ।

सांख्यकारिका ।

कूर्मपुराणम् ।

अनिर्दिष्टस्थलानि वाक्यानि ।